THE BOOK WAS DRENCHED

UNIVERSAL
LIBRARY

OU_184178

UNIVERSAL
LIBRARY

तिलक-महाराष्ट्र-विद्यापीठ-शाखाभूत-

वैदिक-संशोधन-मण्डलेन

प्रकाशिता

॥ ऋग्वेदसंहिता ॥

श्रीमत्सायणाचार्यविरचितभाष्यसमेता

६-८ मण्डलात्मकः

तृतीयो भागः

शके १८६३

मूल्यं १६ रूप्यकाणि

Printed by :—**S. R. Sardesai,** B.A., LL.B., Manager,
Navin Samartha Vidyālaya's Samartha Bhārat Press,
POONA 2.

All Rights Reserved

Published by :—**N. S. Sontakke,** Secretary,
Vaidika Saṁshodhana Maṇḍala, Tilak Memorial,
POONA 2.

Tilak Mahārāshtra University

VAIDIKA SAṀSHODHANA MAṆḌALA

(*Vedic Research Institute*)

POONA

RGVEDA-SAṀHITĀ

WITH THE

COMMENTARY OF SĀYAṆĀCHĀRYA

VOL. III

6—8 Maṇḍalas

1941

Price Rs. 16

THE EXECUTIVE COMMITTEE

OF THE

VAIDIKA SAMSHODHANA MANDALA

POONA

President

Prin. V. K. Rajawade, M.A.

Vice-President

Sardar M. V. Kibe, M.A.

Members

Mr. N. C. Kelkar, B.A., LL.B.

Prof. D. R. Gharpure, M.A., B.Sc.

Mr. J. S. Karandikar, B.A., LL.B.

Mr. Y. R. Date, B.A., LL.B.

Āyurvedāchārya P. G. Nanal Shāstri:

Vidyānidhi Siddheshwarshāstri Chitrav

Āchārya V. P. Limaye, B.A. (T.U.)

Mr. V. V. Atitkar, B.A.

Secretary

Mr. N. S. Sontakke, B.A. (T.U.)

Assistant Secretary

Mr. C. G. Kashikar, M.A. (T.U.)

EDITORIAL BOARD

N. S. Sontakke, B.A., (T. U.)
(*Managing Editor*)


C. G. Kashikar, M.A., (T. U.)

T. S. Varadaraj Sharma,
Vedānta Vidyā Pravīṇ?

Advisory Editors

Prin. V. K. Rajawade, M.A.

MM. Vasudevashastri Abhyankar



जन्मकालः—आषाढ शुद्ध ३
शके १७५९

अवसानकालः—भाद्रपद शुद्ध ५
शके १८४७

॥ सादरं समर्पणम् ॥

तीर्णो येन महात्मनाऽतिगहनः शाब्दादिशास्त्रार्णवः
साहित्यं कलयांचकार सकलं यो लीलयाऽनल्पधीः ।
यो भाण्डाग्करास्यवंशतिलको गोपालसूनुः कृती
सोऽयं राजति भूबृहस्पतिरिव श्रीरामकृष्णाभिधः ॥ १ ॥

कामं सन्तु सहस्रशः कृतधियो विद्वद्वरा भूतले
नैकत्रोभयविद्ययोर्निवसनं पौरस्त्यपाश्चात्ययोः ।
एतस्मिन्समगच्छतैतदुभयं पूर्णप्रबोधान्वितं
येनासौ धवलीचकार भुवनं ज्ञानप्रदीपत्विषा ॥ २ ॥

ग्रन्था यस्य विभान्ति भूरिविषया विद्वन्मनोग्राहिणो
यौरोपीयविपश्चितोऽपि मुदिता यानस्तुवन्सादरम् ।
वाग्देव्याः समुपासनं बहुविधं तस्याश्च संवर्धनं
यावज्जन्म समाचरत्सुबहुलैर्यत्नैः सदा तन्मनाः ॥ ३ ॥

स्वर्यातोऽपि जगद्विमृत्वरयशःकायेन यो भ्राजते
यस्योपास्तिरपैति चित्तकुहरान्नाद्यापि सारस्वती ।
तत्पुण्यस्मृतये कृतज्ञमनसा ऋक्संहिताया असौ
श्रीमत्सायणसूरिभाष्यकलितो भागस्तृतीयोऽर्प्यते ॥ ४ ॥

INTRODUCTION

The third volume of the Ṛgveda with the commentary of Sāyaṇāchārya, comprising Maṇḍalas 6, 7 & 8, is now being presented to scholars and admirers of Ancient Indian Culture. The following gives a full description of the Mss. of Sāyaṇa's commentary used in preparing this volume :

ख[1]

(1) (ख१) The Bhandarkar Oriental Research Institute, Poona. No. 5 of 1916–18; No. 4 of 1916–18. Aṣṭakas II to IV; V to VIII. Written in Śaka 1739–40. This Ms. was used for Vols. I & II by the designation ख.

(2) The Ānandāśrama, Poona. Aṣṭakas I to IV. Date not given. This Ms. was used for Vols. I & II by the designation ण.

(3) The Bhandarkar O. R. Institute, Poona. No. 3 of 1916–18. Aṣṭaka V. Date not mentioned.

(4) (ज) The Bombay Branch of the Royal Asiatic Society. No. 446 (B. D. 240). Aṣṭakas III, IV & V and some portion of the sixth Adhyāya of Aṣṭaka VI. This was used in Vols. I & II as ज.

(5) (थ) The Prājña Pāṭhaśāla, Wāi (Dist. Satara). Aṣṭakas I, II, V–VIII. Date not mentioned. This Ms. is included in the ख group in Aṣṭaka V. [Aṣṭaka VI is included in घ]. Aṣṭaka II of this Ms. was used for Vol. II by the same name.

These Mss. form the ख group. The text of Mss. Nos. 2 & 3 (serially) is identical with that of No. 1 in their respective portions. Therefore these two have not been separately designated. Ms. No. 4 is also identical with No. 1. It, however, gives a few different readings in Adhyāya 6th of Aṣṭaka VI. In such cases it is given the designation ज, by which it was used in the second volume. Excepting such readings, the Ms. is indentical with the ख group. Ms. No. 5 is identical with Ms. No. 1. as far as Aṣṭaka V is concerned. It is therefore included in this group. In case of difference, readings of these Mss. are noted by their respective designations.

ग

(6) (ग१) Procured by Dr. T. R. Chintamani, M.A., Ph.D., University of Madras. Nos. 465, 485 & 518. Written on palm-leaves in Grantha script. This Ms. contains the following portions :—Aṣṭakas VI & VII complete. Aṣṭaka VIII ends with the 36th Varga of the 8th Adhyāya; some portion here and there is wanting in this Aṣṭaka.

(7) (ग२) Travancore University Library, Trivandrum. R. No. 3652. A palm-leaf Ms. written in Grantha script. About 150 years old according to the library authorities. This Ms. contains the same portion of the commentary which ग१ contains, with the exception that ग२ contains the commentary on Aṣṭaka VII upto the 12th Varga of the third Adhyāya only, while ग१ gives complete commentary on that Aṣṭaka.

These two Mss. form one group, viz. ग. Their text is exactly the same. Only in a few cases they differ slightly from each other, a result

1. All Mss. except those in ग group are written in Devanāgarī script.

simply due to the difference of scribes. In such cases they are mentioned as ग१ and ग२ respectively.

घ

(8) (घ१) The Bhandarkar O. R. Institute, Poona. No. 4 of Vis. I. Aṣṭakas III to VII. Written in Samwat 1785. This Ms. was used for the second volume as घ.

(9) (च) The Bombay Branch of the Royal Asiatic Society. Nos. 445, 447 (ZZa 21). Aṣṭakas III–IV ; V VI. Date not given. No. 445 was used for the second volume as च.

(10) The Bhandarkar O. R. Institute, Poona. No. 15 Vis. I. Aṣṭakas I–IV. Date not given. This was used for Vols. I & II as ग.

These three Mss., as well as Aṣṭaka VI of थ (see above) form the group घ. The text of (1) घ१ in Aṣṭakas IV to VI, (2) ग in Aṣṭaka IV, (3) च in Aṣṭakas IV to VI, and (4) थ in Aṣṭaka VI is identical. In a very few cases घ१ and च differ slightly from each other. In such cases, their readings are recorded by their respective designations. This group is the same as Max Müller's B group. The peculiarity of this group is that grammatical portion and alternative explanations are omitted in them ; Anukramaṇī quotation and Śrauta Viniyogas are omitted in the introduction to a hymn, and only the names of the author, metre and deity are given. [Aṣṭaka VII of घ१ does not omit these portions ; it, however, does not form part of the present volume.] One more characteristic of this group is that not a word from the Saṃhitā text is omitted in the commentary; even उ, नु, हि, च etc. are noted as *Pūraṇas*.

ञ

(11) The Theosophical Society's Library, Adyar, Madras. Eastern section shelf No. 34 J. 45. Aṣṭakas I, II, IV, V & VIII. Written in Samwat 1835. This Ms. was used for both the preceding volumes as ञ.

(12) The Oriental Institute, Baroda. No. 12209. Aṣṭaka V. Written in Samwat 1877.

The Baroda Ms. completely coincides with the Adyar Ms. in Aṣṭaka V. Therefore both the Mss. are presumed to be one in that Aṣṭaka. In Aṣṭaka IV portion the Adyar Ms. alone carries the name ञ.

त

(13) (त१) The T. M. S. Saraswati Mahal Library, Tanjore. No. 597. (Cat. No. 1, 1928; Burnell's Cat. No. 2360 A.) A complete Ms. written in Samwat 1844. This was used as त for Vols. I & II.

(14) (त२) Procured from Mr. Lakshman Ganesh Athalye, Gwalior. A complete Ms. excepting the 2nd Adhyāya in Aṣṭaka I and the 3rd in Aṣṭaka VII. Date not given.

(15) (त३) The Oriental Institute, Baroda. No. 235. Aṣṭakas V to VIII. Date not mentioned.

The following four Mss. form the sub-section त४ :

(16) The Bhārata Itihāsa Saṃshodhaka Maṇḍala, Poona 2. Kalamkar Collection No. 1. Aṣṭakas IV to VIII. Written in Samwat 1643.

(17) The Archæological Department, Jodhpur. A complete Ms. written in Samwat 1877.

(18) The Gwalior Durbar Sanskrit Library. The Ms. contains the following portions :—Aṣṭaka IV : Adhyāyas 4 to 8. Aṣṭaka V : last 4 Vargas of the 8th Adhyāya only. Aṣṭaka VI & VII complete. Aṣṭaka VIII : first three Adhyāyas and some portion of Adhyāyas 4 & 5. Date not given. Pandit Raghunath Shastri Vedabhashya, Gwalior, was kind enough to collate this Ms. at Gwalior at our request. The Editorial Board thanks him for his help.

(19) Procured from Kāvyālaṅkārabhūṣaṇa B. M. Khuperkar Shastri, Satara. This Ms. is in two different sizes. The small size part contains the following portions of Aṣṭaka V : Adhyāya 2nd (Folio 32–50); from the beginning of the 4th Adhyāya to the 25th Varga of Adhyāya 6th (F. 71–141) and Vargas 1 to 34 of Adhyāya 8th (F. 173–195). The writing shows four different hands. The large size part comprises the following portions : Adhyāyas 1 to 6 of Aṣṭaka VI, Adhyāyas 3 to 8 of Aṣṭaka VII and Aṣṭaka VIII complete. The writing shows one hand only. No date is given on either parts of the Ms. The small size Ms. is however very old, being written in Pṛṣṭhamātrā style. The large size Ms. is of a comparatively late date. The text of the small size part is completely identical with that of the other members of त४, and that of large size part with त२. Hence no separate designation is assigned to this Ms.

(20) (ञ) The Government Sanskrit College Library, Benares. Rewa Collection No. 44–45. A complete Ms. written in Samwat 1903. This is included in त group in Aṣṭakas V & VI. The Ms. was used for both the preceding volumes as ञ.

All these Mss. are included in a general group, viz. त.[1] Though the readings of the Mss. in this class are not completely identical, their similarity is such that it was found convenient to group them together. A different designation within the त group is assigned to many of these Mss. and in cases of different readings these different designations have been used. When त is mentioned, it is presumed that all the Mss. in this group give the same reading, excepting the Aṣṭaka IV portion where the case is rather different : ञ is used independently in Aṣṭaka IV. त३ does not contain Aṣṭaka IV and so is not included in it. त४ is formed of four Mss. (serial Nos. 16–19). Their text is so exactly identical that they are classed as one.[2] Though three of these Mss. no doubt contain commentary on Aṣṭaka IV, they were received after some portion of that Aṣṭaka had been printed. Therefore त४ is not included in त group in Aṣṭaka IV. However the Aṣṭaka IV portion of these Mss. was collated afterwards and it was found that most of their variants are identical with those of त२ and श. The variants in these Mss. which were not found in त२ or श have

1. Aṣṭaka V of Ms. य, as will be seen further on, is also included in this group.

2. The Gwalior and Jodhpur Mss. differ slightly from the Poona Ms. in a very few cases. See notes on Ṛv. VII. 33. 8 ; 35. ini.; VIII. 24. 27.

been recorded by the designation त४ in the "Notes". (See p. 62. l. 12; 91. 5; 96. 28; 116. 11; 132. 7; 208. 13; 25.) Thus it is clear that in Aṣṭaka IV portion त group consists only of त१ and त२; ज्ञ is independently mentioned; त३ does not contain Aṣṭaka IV and त४ is practically included in त२ and ज्ञ.

The four subsections of त, viz. त१, त२, त३ and त४ can be divided into two groups according to their text. The affinity between त१ and त२ on the one hand, and त३ and त४ on the other, is striking. Of these two, the latter is a more important group. The former gives more variants.[1] Again of त३ and त४, त३ is more important and more closely conforming to Sāyaṇa's text.[2] So also there is a slight difference between त१ and त२. One of its causes is that corrections are occasionally made in the margin of the former. ज्ञ gives a considerable number of variants in Aṣṭaka IV. Its variants are, therefore, mentioned independently in that portion. In Aṣṭakas V & VI it very closely conforms to the text of त group and hence is included in it in that portion. The corrections made in the margin of त१ are found sometimes incorporated in the body of ज्ञ.[3] Moreover, many superfluous variants are met in this Ms.; they are recorded in the foot-notes.

त

(21) Procured from Shrimant Sardar M. V. Kibe, Indore. A complete Ms. dated Samwat 1903. This was used by the same name for the preceding volumes.

भ

(22) (भ१) Procured from Krishnacharya Malgi, Bagalkot, (Dist. Bijapur.) Aṣṭakas II to VIII. Aṣṭaka II begins with the 29th verse of Ṛv. I. 164. Dated Samwat 1743. This was used as भ for Vols. I & II.

(23) (भ२) The Oriental Institute, Baroda. No. 12205. Aṣṭaka VI. Dated Samwat 1877.

(24) (भ३) The Bhandarkar O. R. Institute, Poona. No. 226. Vis. II; No. 15 of 1886–92. Date not given.

(25) (य) The State Sanskrit Library, Bikaner. No. 71 (Cat. R. L. Mitra 1880). A complete Ms. Date not given. In Aṣṭaka IV its readings are recorded as य. Aṣṭaka V of this Ms. is included in त and Aṣṭaka VI in भ.[4] This was used for the 2nd volume as य.

The group भ is formed by these Mss. In Aṣṭakas IV & V भ means only भ१, as भ२ and भ३ do not contain these Aṣṭakas. य compares very well with भ१ in Aṣṭaka IV, but it is used independently in it. Thus these four Mss. constitute the group भ in Aṣṭaka VI. Their text is almost identical except in a few cases where their different readings are recorded by their respective names.

1. See foot-notes to 554. 17; 556. 24; 562. 31; 573. 16; 678. 1; 729. 2; 733. 6 etc.
2. For example see foot-notes to 563. 2; 3; 564. 25; 584. 11; 594. 19.
3. See notes on or foot-notes to Ṛv. VII. 66. 15; 101. ini.; 103·7; 104·5; 25. ini.; VIII. 7. 1. etc.
4. The foot-notes to the following pages will be sufficient to expose the relation of य to त and भ 473·5; 560·16; 566·13; 592·3; 596·16; 599·7; 600·2; 601·24; 602·2; 4.

र

(26) The Oriental Institute, Baroda. No. 12211. Aṣṭaka IV. Dated Samwat 1452. This is the oldest Ms. of Sāyaṇa's commentary. This was also used for the second volume of this edition.

श

(27) Procured from Pandit Mahabaleshwar Dixit, Gokarn (Dist. N. Canara). All the Aṣṭakas except III. Written in Śaka 1799. This was used as श for the 2nd volume.

(28) Procured from Pandit Chidambar Dixit, Badli, (Dist. Belgaum). Aṣṭakas II, V & VII. Written in Śaka 1596. Aṣṭaka II was used for the previous volumes as म.

(29) (श२) The Oriental Institute, Baroda. No. 12631. Aṣṭaka V. Date not mentioned; but the Ms. seems very old.

These three Mss. constitute the श group. The text of the Gokarn and Badli Mss. is identical, while the Baroda Ms. slightly differs in a few cases. In such cases, the readings in the Gokarn and Badli Mss. are recorded by the designation श१ and that of Baroda Ms. by श२. In very rare cases, the Badli Ms. differs from the Gokarn Ms., where the readings of the Badli Ms. are noted by the name म.

(30) The Government Sanskrit College Library, Calcutta. No. 18. Aṣṭaka IV. Date not given. The Ms. could not be lent out according to the rules of the Library. The Editorial Board was, however, fortunate in obtaining the help of Dr. Manilal Patel, Ph.D. (Marburg), then of the Śāntiniketan, Bengal, for comparing the important readings in the portion covered by the Ms. The variants of the Ms. were found to be identical with those of र, the oldest Ms. of the same Aṣṭaka and also त१. The Ms. exhibited no new readings. It was therefore not found necessary to collate the Ms. thoroughly. Besides, according to Dr. Patel, the Ms. is very old and corrupt. We thank Dr. Patel for kindly doing the work at our request.

Classification of Mss. :—As regards the classification of the Mss. used in preparing this volume, much has already been said while describing the Mss. one by one. The assigning of a Ms. to one or the other class has clarified its character in relation to other members of the class. It has also been made clear why certain Mss. have been grouped into one class for the purpose of recording variants. It now remains only to discuss the nature of the classes of the Mss. in relation to each other. Let us divide the classes of the Mss. according to Aṣṭakas IV, V & VI.

Aṣṭaka IV has the following groups of Mss. (with the number of Mss. represented by each class within bracket before each) :—

ख (3), घ (3), ज्ञ (1), झ (1), त (2), न (1), भ (1), य (1), र (1), श (1).

It was found convenient for some reasons to use these Mss. more or less independently. First of all, these Mss. — or the groups of Mss. — have the same designations in the second volume of this edition. Secondly, the nature of readings in many Mss. pertaining to this Aṣṭaka is such that it was found convenient to assign them separate names as in the preceding volume.

ख is a group of three Mss. घ also covers a number of Mss. This group has been utilised independently throughout this volume. Its peculiarity which makes it an independent class has already been shown. The nature of झ, its affinity with त group, and the reason for recording its variants independently have already been dealt with. झ is an important Ms. and its affinity with त is considerable. Still the independence of its text is so striking that it was found convenient to assign it a separate designation. त is no doubt a group of which only two Mss. could be available for this Aṣṭaka until the time of the printing of that portion. The nature of other Mss. in this group which were available afterwards has already been described. न closely conforms to the त group. Since, however, it gives a considerable number of readings, it has been kept separate throughout this volume. Some more Viniyogas of Ṛgvedic mantras than those given by Sāyaṇa are occasionally found in this Ms. भ is an important and independent Ms. in this Aṣṭaka. य is in close affinity with भ in this Aṣṭaka. The reading of र shows much affinity with that of त. The chief reason, however, for assigning it an independent designation as in the preceding volume, is that it is the oldest Ms. uptill now available of Sāyaṇa's commentary not only on this Veda, but also on all other Saṃhitās, Brāhmaṇas and Āraṇyakas commented upon by Sāyaṇa; it was written in Samwat 1452. Unfortunately it covers only the IVth Aṣṭaka. श has some affinity with भ.

Thus in this Aṣṭaka (1) ज, झ, त, न, र are more or less related to each other, (2) घ is an independent group on account of its peculiar nature, and (3) ख, भ, य, श form a general group.

Aṣṭaka V has the following groups of Mss. :

ख (4), घ (2), झ (2), त (8), न (1), भ (1), श (3).

It will be found here that the classification has assumed a rather closer form.[1] All these classes are present in Aṣṭaka IV, though the number of Mss. represented by them in this Aṣṭaka is different. The groups of Mss. dealing with this Aṣṭaka can be classified in the following way :—(1) झ, त are, as in the preceding Aṣṭaka, closely related to each other. श agrees with भ in Aṣṭaka IV, but in Aṣṭaka V & VI it is related to त in general.[2] (2) ख, न, भ form a general group. न is related to त in Aṣṭaka IV, but in Aṣṭaka V and also in VI it agrees with भ[2]. (3) घ, as in Aṣṭaka IV, is an independent group.

Aṣṭaka VI has the following groups of Mss. :

ख (1), ग (2), घ (3), त (8), न (1), भ (4), श (1).

The difference between the groups of Mss. in Aṣṭakas V and VI is that झ has disappeared and ग has been added. ग is, as already stated, a group of two Mss. identical with each other, written in Grantha script. These

1. ज and य have been included in त and र is exhausted.

2. The comparison of notes on or foot-notes to the following will show that in Aṣṭaka IV न agrees with त and श agrees with भ; but in Aṣṭakas V & VI न agrees with भ and श agrees with त in general: 191·16; 192·28; 193·15; 194·26; 195·21; 222·11; 223·12; 224·3; 14; 601·1; 605·11; 17; 606·1; 615·8.

Mss. contain Aṣṭakas VI to VIII. It may be remembered that Mss. of Sāyaṇa's commentary written in South Indian scripts were available for Aṣṭakas I & II only. Max Müller had also procured Grantha and Tulu Mss. only on these two Aṣṭakas. As stated in the introduction to the second volume of this edition (p. 4), Mss. written in South Indian scripts form a class of their own. Date is generally not given on them. Yet they do not appear to be older than two hundred years.[1] Their text presents many difficulties.[2] They exhibit a considerable number of variants of various characters. The following remarks are particularly applicable to the Aṣṭaka VI portion only, there being no occasion for the present to compare their readings in Aṣṭakas VII & VIII.

It is to be noted here that the Grantha Mss. form an altogether different group from the Devanāgari Mss. and their readings generally do not agree with those of Devanāgari Mss. In some cases, however, they agree with those of भ which is an old and very important Ms. So when they agree with भ, they naturally have the value of the latter. The notes on or foot-notes to the following will suffice to prove the partial affinity of Grantha Mss. with भ : 599. 8 ; 600·17 ; 601·17 ; 24 ; 602·26 ; 603·17 ; 18 ; 604·26 ; 605·11 ; 17 ; 606·1 ; 609·9 ; 10 ; 613·29 ; 615·8 ; 906·21 ; 931·30 ; 948·22 ; 962·1 ; 963·21.

This is, however, only one side of the character of Grantha Mss. The other peculiarities of these are such that one cannot count them as simply belonging to the भ class. In a good number of cases, these Mss. give their own text differing from that of the Devanāgari Mss. Sometimes we find in them alterations which cause no difference in the meaning. Specimens of this nature will be found frequently in foot-notes, particularly in notes on or foot-notes to pp. 642, 675, 676 & 882. Some Portions of the *Bhāṣya* (Rv. VIII. 25·1 to 27·14 and 76·5 to 77·5) are also of the same nature. Besides these, there are many incorrect and insignificant readings in them ; these are generally not recorded in foot-notes.[3]

The principle followed in treating the readings in these Mss. has already been laid down in the introduction (p. 6) to the first volume of this edition, namely, that the readings in these Mss. have been adopted only when they have been supported by the Devanāgari Mss. In a few cases, however, their readings have been adopted only because the readings given

1. Cf. Max Müller's Preface to the second edition. Vol. I. p. lvii.

2. Max Müller has laid down (ibid. p. lxi) the orthographical peculiarities of Southern Mss., and mistakes likely to be arising in their reading.

3. Their nature will, however, be visible in the "Notes" where readings in ग are frequently recorded.

by all other Mss. seemed incorrect.[1] Prof. Max Müller has also adopted the same principle in dealing with the South Indian Mss. procured by him.[2]

ख which has affinity with भ in Aṣṭakas IV & V, is related to त in Aṣṭaka VI.[3] ख is more particularly related to त१-२ than to त३-४. Frequently we find ख-ज्ञ-त१-२ giving identical text. Characters of घ, त, न, भ and श are the same as in Aṣṭaka V, namely that घ is an independent group, श mostly agrees with त and न is related to भ. Thus the groups of Mss. in this Aṣṭaka can be classified in the following way : (1) ग, (2) घ, (3) ख, त, श, (4) न, भ.

Additional Remarks:—The principle adopted in fixing the text of Sāyaṇa's commentary on the basis of Mss. material has already been laid down in short in the introductions to both the preceding volumes ; that same procedure has been followed in this volume too. We have, however, to add here a few remarks which, though more or less common to the preceding volumes, are not stated in them.

The Bombay edition has, of course, been utilised in preparing this volume too. Its readings have been referred to and quoted when (1) we have adopted readings different from those in Max Müller, and also when (2) we have retained those conjectured by Max Müller from his Mss. material. In addition, we have preferred to adopt the readings of the Bombay edition in some cases[4] when Max Müller's readings were found incorrect or insufficient. Sometimes, we too have had to conjecture our

---

1. The following is a full list of readings adopted from the Grantha Mss. For particulars, reference may be made to the "Notes".

प्रततवस् 614.12 ; हिंसित्र्यः सत्यः 614.24; एवमहमपि 616.1; सः 636.12; आगच्छतं 657.11; गच्छन्तीभिः 659.17; आयुधानां 693.25; अभिषुतः तं 825.11; अनाचरितं 830.16; परितो व्याप्तं 857.13; वृश्च्यन्त 865.19; °दांसये 867.11; अन्यस्याः 869.4; पुरमसि 880.20; आतोऽम् इत्यात्वाभावः 909.25; आडागमः 921.21; तं तथोक्तं 924.10; माद्यतेः 928.9; ऋजीषः 932.20; प्रणेतुं 963.20.

2. Preface to the 2nd edition Vol. I, p. lxi.

3. Refer to the foot-notes to 588.6; 589.31; 595.3; 31; 596.16; 598.23 and to 599.8 ; 22; 600.17; 601.17; 24; 602.14; 603.17; 604.29.

4. The following is a full list of readings adopted solely from the Bombay edition :

दुर्ज्ञानान् 350.25; प्रीयमाणाः 356.21; द्रढयति 487.27; प्रियमेधाख्य 536.24; गच्छन्तौ। वा 552.2; तैः प्रतिगृहीतानि 554.7; वज्रहतेन 572.20; प्र इर्यति प्रेरयति 607.13; तृम्पतं तृप्यतं 724.28; ज्वलद्दीप्ते 749.3; अन्धः सन् अन्धो 877.16; श्रुतेरत्रापि 922.10; हननोत्पादकत्वात् 929.13; त्वे 938.3; प्र मंहिष्ठाय इति 962.18; सूत्रितं च.....याहि इत्येषा 962.19-20.

It is needless to add that in very many cases our readings adopted on the basis of Mss. in opposition to Max Muller's agree with those in the Bombay edition.

own readings[1] as against those in Max Müller and the Bombay edition. It may be noted that Max Müller too has occasionally resorted to the same procedure. Even this procedure has at times failed. In such cases, the incorrect readings in Sāyaṇa's text have been noted as far as possible in the "Notes" and corrections have also been suggested wherever possible. As Max Müller has said, it is not the duty of a critical editor of a text to emend the text of his own accord ; his duty is only to find out by means of Mss. material what the original author might have written, right or wrong. We have tried our best to follow this principle.

As in the preceding volumes, the "Notes" following the Sanskrit introduction have the following features :

(i) Readings adopted differently from Max Müller with or without the support of Mss. material.[2] (ii) Readings either formed out of the Mss. material or conjectured by Max Müller. The variants in our Mss. are fully recorded. (iii) Incorrect readings in Sāyaṇa. Correct readings have been suggested as far as possible. (iv) Words in the Vedic text differently reproduced by Sāyaṇa. Actual words in the Padapāṭha have been given. (v) References differently quoted by Sāyaṇa. Original readings have been given. (vi) References that could not be traced to their original sources.

As regards the references quoted by Sāyaṇa from Vedic and other branches of Sanskrit literature, attempts have been made to trace them to their original sources as far as possible. Max Muller has already done a good deal in this respect. There are, however, some quotations which have not been traced by him. We have tried our best to trace them and succeeded to some extent. Still there are some quotations which could not be traced. These have, as stated above, been recorded in the "Notes". Certain

1. The following is a full list of readings conjectured by us :—

पक्ववान् 83.14; माषाणामश्नीयात् 287.2; उत्सहमानं 306.3; मध्यंदिनः 316.9; चतुर्थपादार्थे मन्त्रस्य (also suggested in T.S. Āss.) 410.28; इराघ्नं तदभावं दारिद्र्यमित्यर्थः 439.23; स्वकीयेन विहितेन 477.29; देवानत्र 483.25; एकविंशत्यृचं 546.31; शतसंख्याकपर्वाणि 565.25; अञ्प्रत्ययः 598.27; परस्मैपदं द्विर्वचनप्रकरणे 603.2; सुविन्दं सुविन्दनामकं 705.2; जगदुपकारिकायाः 812.12; जीवेम पुत्रान् रक्षितुं 835.1; आसन्द्यामासादयन्ति 857.20; स्तुवते 864.25; आहूत 866.26; बट् सत्यं नाकरं 879.12; मरुत्वतीया ऊर्ध्वं 891.24; आत्मनः 895.5; शोभनदानयोग्यं बलादियुक्तं 897.5; कुर्वाणात् मनुष्यात् 963.13.

2. Besides these, some other changes have been made in the text of Sāyaṇa. They are, however, not so significant as to be recorded in the "Notes". It is needless to add that these changes have been made on the basis of Mss. material. Their nature will be evident from the following few examples :

RV. VII. 3.2 संततेषु for सततेषु; VII. 9.1 सुषुपुः for सुसुपुः; VII. 60.3 सर्व यूथं for सर्वयूथं; VIII. 88. ini. माध्यंदिनसवने for माध्यंदिने सवने; VIII. 96.9 °संख्याकानां for °संख्यानां; VIII. 97.8 पानाय for पानार्थं; VIII. 97.13 पुनःपुनः for पुनः; VIII. 98.13 प्रयत्नं for यत्नं; VIII. 101. ini. सूर्यदेवताके for सूर्यदेवत्ये.

Printing mistakes in Max Muller's edition have also not been noted.

references from Paṇini, Nighaṇṭu, Smṛtis etc. occur in Sāyaṇa often and often. Original places of such quotations have generally not been given again.

There are many places in Sāyaṇa's *Bhāṣya* where many Mss. leave some space showing that some portion of the commentary is omitted. There are many such lacunæ in this volume. We have generally kept them as they are. We have strictly followed the method adopted by Max Müller on such occasions. It has not been our aim to fill in the blanks of our own accord. It is only at a few places that we have adopted readings where Max Mülle r has shown lacunæ. Thus at p. 831. l. 7 we read ईदृशान् on the authority of a Ms. while Max Müller and several other Mss. read अतो - - - शान्. At 878·14-16 we have inserted on the authority of an old Ms. the full commentary of Ṛv. VIII. 79 ·3 where Max Müller has left a partial lacuna. At 879·12 we read बट् सत्यं नाकरं where Max Müller retains बट् - तन्नाकरं. For details of these cases the reader may refer to our "Notes". It will be found that there is sufficient Mss. material to support these improvements. It may be noted that at least at one place (Ṛv. VIII. 83. 3) Max Müller has filled in a lacuna without the support of Mss. material, though his improvement is quite justifiable. In all other cases of lacunæ there is no occasion of difference with Max Müller.

It is well known that there is no commentary of Sāyana on the eleven Vālakhilya hymns (49-59) in the eighth Maṇḍala of the Ṛgveda. We hav e found a commentary on these hymns in a Ms. (ज्ञ) of Sāyaṇa's commentary lent us by the Government Sanskrit College, Benares. The character of this Ms. has already been described. It is evident that the commentary is not of Sāyana himself. This conclusion is further warranted by the method of interpretation followed therein. We do not know who its author was, and when he wrote it. All the same we have quoted it in the foot-notes for the convenience of the reader, and made it sufficiently intelligible. There are certain incorrect readings in it. Correct readings in their places have been suggested and are either put into brackets before them or are given as foot-notes to the commentary.

As in the preceding volumes, the words in the verse reproduced in the commentary have been marked ^{v} for distinction. It often happens that Sāyaṇa reproduces the *pratīka* differently. In such cases, too, we have mostly inserted the sign in order that the reader may note the fact. Sometimes Sāyana does not quote the *pratīka* as it is, but presents its regular grammatical form. In such cases, of course, the mark of *pratīka* is not inserted.

Acknowledgments :—As regards the Saṃhitā and Pada text, we have already stated in the introduction to the second volume that we have followed the traditional recitation, and in this connection have sought the assistance of two learned Vaidikas — Vedamūrti Govind Bhaṭṭaji Chitak and Vedamūrti Krishnashastri Prabhune of Poona. We acknow-

ledge with thanks the valuable services of these Ghanapāṭhī Vaidikas. We are sorry to note that Vedamūrti K. Prabhune died a premature death when some portion of this volume had gone through the press.

We have tried our best to make this volume as faultless as possible. But in spite of our close scrutiny a few misprints have occurred; some of them were due to our own oversight and some were due to the accidents of printing. A complete list of these misprints will be found at the end.

In conclusion, we feel it a duty to thank the Institutions and Individuals who have either lent or procured or presented manuscripts of Sāyaṇa's Commentary for the preparation of this volume. We are very highly obliged to the ruling Princes in Gujarat, Kathiawar, Rajputana, Central India, U. P. and the Deccan and the public for the support they have rendered to our cause. But in view of the stupendous work that we have to achieve, this help must increase manifold. Seth Fardumji D. Pudumji of the Deccan Paper Mills Co. Ltd., Poona, must also be thanked for his very kind help in supplying us with suitable printing paper especially manufactured for our edition, at concession rate. We acknowledge the services of Mr. S. R. Sardesai, B.A., LL.B., Manager of the Samartha Bharat Press, Poona, who helped us much in making this work as accurate as possible. The Vaidika Samshodhana Maṇḍala acknowledges its indebtedness to the University of Bombay for the financial help it has granted towards the cost of the publication of this volume.

The volume could not be presented to the public earlier owing to financial difficulties. We hope, this volume will meet with the approval of scholars.

21st October, 1941.
VAIDIKA SAMSHODHANA MAṆḌALA,
POONA 2.

EDITORS

॥ श्रीगणेशाय नमः ॥

प्रास्ताविकम्

श्रीसायणाचार्यविरचितभाष्यसमेताया ऋग्वेदसंहितायाः पञ्चसप्तमाष्टममण्डलात्मकोऽयं तृतीयो भागोऽधुना सुधियां करकमलेषु सादरं समर्प्यते। अत्र भाष्यसंशोधनार्थमुपयुक्तानि लिखितपुस्तकान्यधो निर्दिश्यन्ते। तत्र येषु पुस्तकेषु बाहुल्येनैकरूपा एव पाठा उपलभ्यन्ते तेषामेकैकं वर्गं कृत्वा प्रतिवर्गमेकैव संज्ञा लाघवाय कृता। वर्गसंज्ञा यत्र निर्दिष्टा तत्र ते ते पाठास्तत्तद्वर्गान्तर्गतेषु सर्वेषूपलभ्यन्ते, यत्र वर्गान्तर्गतानामेव प्रातिस्विकी संज्ञा दत्ता तत्र ते पाठास्तत्तत्पुस्तकेष्वेवेत्यवगन्तव्यम्।

ख-वर्गः—

(१) (ख१) पुण्यपत्तनस्थ-भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरस्थं द्वितीयाद्यष्टमान्ताष्टकसप्तकभाष्यम् (क्रमाङ्कः—५; ४; १९१६-१८)। प्रथमद्वितीययोर्भागयोः ख-संज्ञया निर्दिष्टमिदमेव।

(२) पुण्यपत्तनस्थानन्दाश्रमसंबन्धि प्रथमादिचतुर्थान्ताष्टकचतुष्कभाष्यं प्रथमद्वितीययोर्भागयोः ण-संज्ञया निर्दिष्टम्।

(३) भाण्डारकरसंशोधनमन्दिरस्थं पञ्चमाष्टकभाष्यम् (क्र. ३; १९१६-१८)।

(४) (ज) मुम्बापुरीस्थ-रॉयल-एशिआटिक-सोसायटी-संबन्धि (क्र. ४४६)। तृतीयचतुर्थपञ्चमाष्टकानां भाष्यं षष्ठाष्टके षष्ठाध्यायस्य कियानंशश्च।

(५) (थ) वैराजक्षेत्र (वांई)स्थ-प्राज्ञपाठशालासंबन्धि। १, २, ५-८ अष्टकानां भाष्यम्। पञ्चमाष्टकभाष्यं ख-वर्गे समावेशितं, षष्ठाष्टकभाष्यं घ-वर्गे च। द्वितीयाष्टकभाष्यं द्वितीयभागसंशोधनार्थमुपयुक्त तस्मिन् भागे च थ-नाम्नैव संकेतितम्।

एतानि ख-वर्गान्तर्गतानि पुस्तकानि। अत्र द्वितीयतृतीये समाने भाष्यभागे प्रथमेनातीव साम्यं भजत इति तयोः पृथक्सज्ञा न कृता। चतुर्थस्य प्रथमेन सत्यपि साम्ये षष्ठाष्टकांशे केचन विभिन्ना अपि पाठा उपलभ्यन्त इति यदा तन्मात्रस्थितपाठानामुल्लेखः कृतस्तदा ज-संज्ञया निर्दिष्टमिदम्। इतरत्र ख-वर्गान्तर्गतमेवेदमिति मन्तव्यम्। द्वितीयभागेऽनयैव संज्ञयास्य व्यवहारः कृतः। पञ्चमं प्रथमेन पञ्चमाष्टके साम्यमावहतीत्यस्मिन् वर्गे तस्य पञ्चमाष्टकोऽपि समावेशितः। एतन्मात्रोपलब्धपाठोल्लेखार्थमस्य थ-सज्ञा कृता।

ग-वर्गः—

(६) (ग१) डॉ. टी. आर्. चिन्तामणि-महाशयैः संप्राप्य दत्तं (क्र. ४६५, ४८५, ५१८) ग्रन्थलिप्या तालपत्रेषु लिखितम्। षष्ठसप्तमाष्टकयोर्भाष्यं संपूर्णमष्टमाष्टकेऽष्टमाध्यायस्य षट्त्रिंशद्वर्गान्तं भाष्यं च।

(७) (ग२) त्रिवेन्द्रम्—विश्वविद्यालयसंबन्धि (क्र. ३६५२) तालपत्रात्मकं ग्रन्थलिप्या लिखितम्। पुस्तकाल्याधिकृतानां मतेन सार्धशतवत्सरेभ्यः पूर्वं लिखितम्। षष्ठाष्टकभाष्यं पूर्णं सप्तमे तृतीयाध्यायद्वादशवर्गपर्यन्तभागस्य अष्टमे अष्टमाध्यायषट्त्रिंशद्वर्गान्तभागस्य च भाष्यम्।

इमे द्वे ग-वर्गान्तर्गते। अनयोः पाठ एकरूप एव। ये विरला भेदा दृश्यन्ते ते लेखकभेदनिबन्धनाः। एतादृशभेदस्थले एतयोरनुक्रमेण ग१, ग२ इति संज्ञे कृते।

घ-वर्गः—

(८) (घ१) भाण्डारकरसंशोधनमन्दिरस्थं (क्र. ४ [वि. १]) तृतीयादिसप्तमान्ताष्टकपञ्चकभाष्यं १७८५ संवत्सरे लिखितम्।

(९) (च) मुम्बापुरीस्थ-रॉ. ए. सो.-संबन्धि प्रथमादिषष्ठान्ताष्टकषट्कभाष्यम् (क्र. ४४१, ४४३, ४४५, ४४७)। द्वितीयभागेऽप्यनयैव संज्ञया निर्दिष्टमिदम्।

(१०) भाण्डारकरसंशोधनमन्दिरस्थं (क्र. १५ [वि. १]) द्वितीयतृतीयचतुर्थाष्टकभाष्यम्। प्रथमद्वितीययोर्भागयोः ग-संज्ञयास्य व्यवहारः कृतः।

एतानि त्रीणि थ-पुस्तकगतषष्ठाष्टकभाष्यभागश्च घ-वर्गान्तर्गतानि। एतेषु चतुर्ष्वपि पाठः प्रायः एकरूप एव। क्वचित् घ१-च-पुस्तकयोः पाठवैरूप्यं दृश्यते। परंतु तादृशप्रदेशा अतीव विरलाः। अयं वर्गः मॅक्समुल्लरमहाशयस्य B–वर्गश्च एक एव। एतद्वर्गान्तर्गतेषु पुस्तकेषु व्याकरणप्रक्रिया विकल्पितार्थाः ('यद्वा' इति प्रक्रम्योक्ताः) सूक्तारम्भे अनुक्रमणिका श्रौतविनियोगश्च इत्येते न सन्ति। केवलं ऋषिच्छन्दोदेवता निर्दिष्टाः। (घ१-पुस्तकस्य सप्तमाष्टकभाष्ये तु न किमपि त्यक्तम्। परं त्वत्र भागे तन्नास्ति।) अपरं चैतेषु संहितास्थानि सर्वाण्यपि पदानि व्याख्यातानि। तु, नु, हि, च इत्यादयोऽपि न त्यक्ताः ('नु पूरणः' इत्यादि लिखितमस्ति)।

झ-वर्गः—

(११) मद्रपुर(मद्रास)निकटवर्तिअड्यारग्रामस्थित–'थिऑसॉफिकल सोसायटी'–संबन्धिग्रन्थालयस्थं (क्र. ३४ [४५]) १८३५ संवत्सरे लिखितं १, २, ४, ५, ८ अष्टकानां भाष्यं प्रथमद्वितीयभागयोरुपयुक्तं झ-संज्ञया संकेतितं च।

(१२) वटोदर(वडोदा)नगरस्थित-'ओरिएण्टल् इन्स्टिट्यूट्'-संबन्धिग्रन्थालयस्थं (क्र. १२२०९) १८७७ संवत्सरे लिखितं पञ्चमाष्टकभाष्यम्। अस्मिन् पाठः पूर्वेण समान इत्यस्य पृथक्संज्ञा न कृता।

त-वर्गः—

(१३) (त१) तञ्जौरनगरस्थ–सरस्वतीमहाल-ग्रन्थालयस्थं (क्र. ५९७) १८४४ संवत्सरे लिखितं समग्रं भाष्यम्। प्रथमद्वितीयभागयोः त-संज्ञया निर्दिष्टम्।

(१४) (त२) ग्वालियरनगरस्थ–श्री. लक्ष्मण गणेश आठल्ये–महाशयैर्दत्तं प्रथमाष्टकद्वितीयाध्यायं सप्तमाष्टकतृतीयाध्यायं च विना समग्रस्य भाष्यम्।

(१५) (त३) वटोदरनगरस्थ-ओरि. इ.-संबन्धि (क्र. २३५) पञ्चमषष्ठसप्तमाष्टमाष्टकभाष्यम्।

अधोवर्ण्यमानेषु चतुर्षु एकरूप एव पाठ इति कृत्वा चतुर्णामपि 'त४' इत्येकैव संज्ञा दत्ता—

(१६) पुण्यपत्तनस्थ-भारतेतिहाससंशोधकमण्डलस्थं (कळमकर-संग्रहे क्र. १) १६४३ संवत्सरे लिखितं चतुर्थाद्यष्टमान्ताष्टकपञ्चकभाष्यम्।

(१७) जोधपूरराज्यगत–'आर्कियॉलॉजिकल डिपार्टमेंट'–ग्रन्थालयस्थं १८७७ संवत्सरे लिखितं समग्रं भाष्यम्।

(१८) ग्वालियरराजकीयसंस्कृतपुस्तकालयस्थम्। अस्मिन् पुस्तके चतुर्थाष्टके चतुर्थाध्यायमारभ्य अष्टकसमाप्तिपर्यन्तस्य भागस्य, पञ्चमस्याष्टमे अन्तिमवर्गचतुष्टयस्य, षष्ठसप्तमाष्टकयोः, अष्टमे आदिमस्याध्यायत्रयस्य चतुर्थपञ्चमाध्याययोः कियतश्चिद्भागस्य च भाष्यं विद्यते। ग्वालियरनगरवास्तव्यैः पण्डितरघुनाथशास्त्रिवेदभाष्यमहाशयैरस्मत्प्रार्थनामनुरुध्यैतत्पुस्तकस्थाः पाठभेदा लिखित्वा प्रेषिता इति तेषामधमर्णः संपादकवर्गः।

(१९) सप्ततारा(सातारा)नगरवास्तव्यैः काव्यालङ्कारभूषणैः बा. मा. खुपेरकरशास्त्रिभिर्दत्तं विभिन्नाकृति पुस्तकद्वयम्। प्रथमे (तनुपुस्तके) पञ्चमाष्टके द्वितीयचतुर्थपञ्चमाध्यायानां षष्ठाध्याये पञ्चविंशवर्गान्तभागस्य अष्टमाध्याये चतुस्त्रिंशवर्गान्तभागस्य च भाष्यं विद्यते। द्वितीये (बृहति पुस्तके) षष्ठाष्टके प्रथमादिषष्ठान्ताध्यायषट्कस्य, सप्तमाष्टके तृतीयाद्यष्टमान्ताध्यायषट्कस्य, अष्टमाष्टकस्य समग्रस्य च भाष्यं विद्यते। तनुपुस्तकं पुरातनं दृश्यते। अत्र पृष्ठमात्रावन्त्यक्षराणि। तनुपुस्तकं त४-समुदायेऽन्तर्भावितम्। बृहत्पुस्तकपाठः त२-पुस्तकपाठेन सर्वथा साम्यमावहतीति त२ इति अनयोर्मिलितयोः संज्ञा कृतेत्यवगन्तव्यम्।

(२०) (ज्ञ) वाराणसीस्थराजकीयसंस्कृतपाठशालासंबन्धिग्रन्थालयस्थं (रिवा सं. क्र. ४४-४५) संपूर्णम्। अस्य पञ्चमषष्ठाष्टकभाष्यभागः तवर्गेऽन्तर्भावितः। प्रथमद्वितीययोर्भागयोः ज्ञ-संज्ञया व्यपदिष्टमिदम्।

एतानि पुस्तकानि त-वर्गान्तर्गतानि। एतेषु सर्वत्र पाठो यद्यपि नैकरूपस्तथापि बहुत्र तथेति एतेषामेको वर्गः सौकर्याय कृतः। एतद्वर्गान्तर्गतानां बहूनां प्रातिस्विकी संज्ञापि कृतास्ति तत्तन्मात्रस्थितपाठज्ञापनाय। 'त' इति सामान्यनिर्देशः पञ्चमाष्टकादारभ्य यत्र कृतः तत्र स पाठः एतद्वर्गान्तर्गतेषु सर्वेष्वपि विद्यत इत्यवगन्तव्यम्। चतुर्थाष्टके ज्ञ-पुस्तकं नात्र वर्गे समावेशितम्। त३-पुस्तके चतुर्थाष्टकभाष्यं नास्ति। त४-गतानां चतुर्णां पुस्तकानां मध्ये त्रिषु पुस्तकेषु यद्यपि चतुर्थाष्टकभाष्यं विद्यते तथाप्येतानि चतुर्थाष्टकमुद्रणानन्तरमुपलब्धानीति चतुर्थाष्टकभागे त-वर्गे समावेशितुं न पारितानि। तथाप्येतेषु स्थितानां चतुर्थाष्टकपाठभेदानामनन्तरं संग्रहः कृतः। ते च प्रायः त२-श-पुस्तकपाठैः समाना उपलब्धाः। एतेषु क्वचित् त२-श-पुस्तकपाठेभ्यो विभिन्ना अपि पाठा उपलभ्यन्ते। चतुर्थाष्टकपाठभेदविचारे यत्र त४ इति संकेतो दृश्यते तत्र स पाठः एतेषु चतुर्ष्वपि विद्यत इत्यवगन्तव्यम्। एवं च चतुर्थाष्टकभाष्यांशे त-वर्गे त१, त२ एतावेव समावेशितौ।

न—

(२१) इन्दूरनगरवास्तव्य-सरदार मा. वि. किबे-महाशयानाम्। समग्रं १९०३ संवत्सरे लिखितम्। प्रथमद्वितीययोर्भागयोरियमेव संज्ञास्य कृता।

भ—

(२२) (भ१) विजापूरप्रान्तीय-बागलकोटग्रामवास्तव्य-कृष्णाचार्य मळगी-महोदयानाम्। १७४३ सवत्सरे लिखितम्। द्वितीयाष्टके अस्यवामीयसूक्तमध्यादारभ्य अष्टकसमाप्तिपर्यन्तभागस्य तृतीयाद्यष्टमान्ताष्टकषट्कस्य च भाष्यम्।

(२३) (भ२) वटोदरनगरस्थ-ओरि. इ.-संबन्धिग्रन्थालयस्थं (क्र. १२२०५) षष्ठाष्टकभाष्यं १८७७ संवत्सरे लिखितम्।

(२४) (भ३) भाण्डारकरसंशोधनमन्दिरस्थं (क्र. २२६ [वि. २]; १५, १८८६-९२) षष्ठाष्टकभाष्यम्। मध्ये कानिचित् पत्राणि विनष्टानि।

(२५) (य) बीकानेरराजकीयसंस्कृतपुस्तकालयस्थं (क्र. ७१) समग्रं भाष्यम्। अस्य चतुर्थाष्टकभागो य-संज्ञया निर्दिष्टः। पञ्चमाष्टकभागः त-वर्गे षष्ठाष्टकभागः भ-वर्गे च समावेशितः। द्वितीयभागसंशोधनार्थमस्योपयोगः कृतः।

एतानि भ-वर्गान्तर्गतानि। चतुर्थपञ्चमाष्टकयोः भ-वर्गे भ१-पुस्तकमेकमेवान्तर्गतम्। षष्ठाष्टके एतानि चत्वारि भ-वर्गप्रविष्टानि। तत्र सर्वेष्वपि पाठो भूयसा समान एव। यत्र भेद उपलब्धस्तत्रैतानि प्रातिस्विकसंज्ञया निर्दिष्टानि।

र—

(२६) बटोदरनगरस्थित–ओरि. इ.–संबन्धिग्रन्थालयस्थं (क्र. १२२११) चतुर्थाष्टक-भाष्यं १४५२ संवत्सरे लिखितम्। सर्वेषु भाष्यपुस्तकेष्वेतत् प्राचीनतमम्। द्वितीयभागसंशोधनार्थ-मुपयुक्तमिदम्।

श—

(२७) गोकर्णक्षेत्रवास्तव्य–वेदशास्त्रसंपन्नमहाबलेश्वरदीक्षितानां तृतीयाष्टकवर्जं समग्रं भाष्यं १७७९ शके लिखितम्। द्वितीयभागसंशोधनार्थमिदमुपयुक्तम्।

(२८) वेणुग्राम(वेळगांव)प्रान्तीयबडलीग्रामवास्तव्य-चिदम्बरदीक्षितमहाशयानां द्वितीय-पञ्चमसप्तमाष्टकभाष्यं १५९६ शके लिखितम्। द्वितीयाष्टकः द्वितीयभागसंशोधनार्थमुपयुक्तः म-संज्ञया संकेतितश्च।

(२९) (श२) बटोदरनगरस्थित-ओरि. इ.-संबन्धि (क्र. १२६३१) पञ्चमाष्टक-भाष्यम्।

एतानि त्रीणि श-वर्गान्तर्गतानि। अत्रैकस्मिन्नेव चतुर्थपञ्चमषष्ठाष्टकानां भाष्यं विद्यते इतर-योर्द्वयोः पञ्चमाष्टकभाष्यमेव। तत्र प्रथमद्वितीययोः पाठः पञ्चमाष्टके भूयसा समान इति कृत्वा तत्र द्वयोरपि श१ इति एकैव संज्ञा कृता। (यत्र क्वचिदेतयोः परस्परभेद उपलब्धस्तत्र द्वितीयस्य म-संज्ञया व्यवहारः कृतः)। तृतीयस्य श२ इति संज्ञा कृता।

(३०) कलिकातानगरस्थितराजकीयसंस्कृतविद्यालयग्रन्थसंग्रहालयस्थं (क्र. १८) चतुर्थाष्टक-भाष्यम्। एतत्पुस्तकस्था मुख्यपाठभेदा अस्मत्कृते डॉ. मणिलाल पटेल-महोदयैः (तदानीं ' शान्ति-निकेतने ' वसद्भिः) संगृहीताः। एते त१-र-पुस्तकपाठभेदैः समाना इति कृत्वास्य पृथक्संज्ञा न कृता। डॉ. पटेल-महाशयानामधमर्णा वयम्।

एवमुपवर्णितेषु पुस्तकेषु चतुर्थाष्टकभाष्यसंशोधनार्थमुपयुक्तान्येतावन्ति पुस्तकानि—ख(३), घ(३) ञ(१), ञ(१), त(२), न(१), भ(१), य(१), र(१), श(१)। एतेषु बहूनां प्रथमद्वितीयभागयोः कृताः संज्ञा एवात्रापि स्वीकृताः। एतेषु वर्गान्तःप्रविष्टानां विशेषतः परस्परसाम्यमस्तीत्युक्तमेव। अस्मिन् चतुर्थाष्टकभाष्यभागे ञ-ञ-त-न-र-पुस्तकपाठः प्रायः समानः। घ-वर्गपाठो विभिन्न एव। ख-भ-य-श-पुस्तकपाठेऽपि परस्परसाम्यमधिकमुपलभ्यते।

पञ्चमाष्टकभाष्यपुस्तकानि–ख(४), घ(२), ञ(२), त(८), न(१), भ(१), श(३)। अस्मिन्नष्टके ञ-य-पुस्तकयोः त-वर्गेऽन्तर्भावः कृतः। र-पुस्तके पञ्चमाष्टकभागो नास्त्येव। अस्मिन्नष्टके ञ-त-श-पुस्तकेषु एवं ख-न-भ-पुस्तकेषु पाठसाम्यमुपलभ्यते। चतुर्थाष्टके न-पुस्तकस्य त-वर्गेण श-पुस्तकस्य भ-वर्गेण च साम्यं विद्यते; अत्र तु न-पुस्तकस्य भ-वर्गेण श-वर्गस्य त-वर्गेण च[1]। घ-वर्गपाठः पूर्वाष्टकवद्विभिन्न एव।

एतावन्ति षष्ठाष्टकभाष्यपुस्तकानि–ख(१), ग(२), घ(३), त(८), न(१), भ(४), श(१)। अस्मिन्नष्टके ञ-पुस्तकं नास्ति ग-वर्गोऽधिको विद्यते। अस्मिन् वर्गे पुस्तकद्वयं तालपत्रात्मकं ग्रन्थलिपिलिखितमस्तीति पूर्वमुक्तमेव। अनयोः षष्ठसप्तमाष्टमाष्टकानां भाष्यं विद्यते। दाक्षिणात्यलिपिलिखितं समग्रं भाष्यमद्यावधि नोपलब्धमस्माभिः। मॅक्समुल्लरमहाशयैः प्रथम-

१. प्रस्तावनायाः ६ पृष्ठे अधष्टिप्पणी द्रष्टव्या।

द्वितीयाष्टकयोरेव दाक्षिणात्यलिपिलिखितानि भाष्यपुस्तकान्युपलब्धानि । दाक्षिणात्यलिपिलिखितपुस्तकपाठस्य नागरीलिपिलिखितपुस्तकपाठस्य च परस्परं भेदोऽधिको विद्यत इति द्वितीयभागप्रस्तावनायामुक्तम् । एतेषु दाक्षिणात्यपुस्तकेषु प्रायो लेखनकालो न लिखितः । तथाप्येतेषामायुर्न वत्सरद्विशतीमतिक्रामतीति शक्यते वक्तुम् । एतेषु पाठभेदा बहवो बहुप्रकाराश्च । प्रकृतषष्ठाष्टके तावत् देवनागरीलिपिलिखितपुस्तकपाठेभ्य एतत्पुस्तकपाठा बहुत्र विभिद्यन्ते । तथापि भ-वर्गपाठैः क्वचित्साम्यमपि दृश्यते[1] । बहुत्र अर्थभेदाभावेऽपि देवनागरीपुस्तकापेक्षया विभिन्नाः पाठा अनयोरुपलभ्यन्ते । अशुद्धपाठा अपि बहुश उपलभ्यन्ते । ते प्रायशोऽस्माभिरुपेक्षिताः । एतदुपलभ्यमानपाठानां मूले स्वीकरणविषये प्रथमभागप्रस्तावनायां यो नियम उक्तः सोऽत्रापि द्रष्टव्यः । केषुचित्प्रदेशेषु इतरसर्वपुस्तकेषु अशुद्धः पाठ इति केवलमेतदुपलब्ध एव पाठो मूले स्वीकृतः[2] ।

भाष्यपाठनिर्णयविषये प्रथमद्वितीयभागयोः या सरणिः स्वीकृता सैव प्रायोऽत्राप्यन्वसारि । मुम्बापुरीमुद्रितपुस्तकस्य पूर्ववदेतद्भागसंशोधनार्थमपि कृत उपयोगः । यत्र मॅक्समुल्लरपाठाद्विभिन्नपाठोऽस्माभिः स्वीकृतः तथा यत्र मॅ-पुस्तके लिखितपुस्तकेष्वदर्शनात् कल्पितः पाठः तत्र मु-पुस्तकपाठोऽपि पाठभेदादिविषयकटिप्पण्यां तुल्नार्थं दत्तः । यत्र मॅ-पुस्तके लिखितपुस्तकेषु सर्वेषु च अशुद्धोऽसमीचीनो वा पाठ उपलब्धस्तादृशेषु केषुचित् प्रदेशेषु केवलं मु-पुस्तकपाठः समीचीनो दृष्ट इति स्वीकृतोऽस्माभिः[3] । यत्र मॅ-पाठाद्विभिन्नपाठो लिखितपुस्तकानुसारेण स्वीकृतस्तत्र प्रायो मु-पुस्तकपाठोऽप्यस्मत्पाठानुसार्येव दृष्टः । केषुचित्प्रदेशेषु मॅ-मु-पुस्तकयोः सर्वेषु लिखितपुस्तकेषु च अशुद्धोऽसमीचीनश्च पाठ उपलभ्यते । अत्र परमस्माभिरपि पाठः केवलमभ्यूहमात्रेण स्वीकृतः[4] ।

पाठभेदादिविषयकविचारे पूर्वयोर्भागयोरिवात्राप्येते विशेषाः सन्ति—यत्र यत्र मॅ-पुस्तकपाठाद्विभिन्नपाठोऽस्माभिः स्वीकृतः तत्र तत्र तत्प्रमाणभूतलिखितपुस्तकनिर्देशपूर्वकं यत्रावश्यकं तत्र विभिन्नपाठस्वीकारे कारणमपि निर्दिष्टम् । क्वचिदर्थवैशेष्याभावेऽपि बहुलिखितपुस्तकोपलम्भात् केचन मॅ-पुस्तकाद्विभिन्नाः पाठाः स्वीकृतास्तेषां परं प्रयोजनाभावादुल्लेखो न कृतः[5] । यत्र भाष्ये वाक्याशुद्ध्यादिकमुपलक्षितं तदुल्लेखपूर्वकं तत्रास्मदभ्यूहितशुद्धपाठस्यापि निर्देशः कृतः । यत्र मॅक्समुल्लरमहाशयैः लिखितपुस्तकस्थाशुद्धपाठसाहाय्येन कल्पितः पाठः तथा केवलमभ्यूहितश्च तत्रास्मदुपलब्धलिखितपुस्तकस्थिताः सर्वेऽपि पाठा निर्दिष्टाः । क्वचित् भाष्ये व्याख्येयत्वेन गृहीतानां पदानां संहितापदपाठयोश्च भेद उपलक्षितः सोऽपि संगृहीतः । यत्र भाष्ये ग्रन्थान्तरीयवाक्यानि ईषद्भेदपूर्वकं निर्दिष्टानि तेषामप्युल्लेखः कृतः । अवतरणवाक्यानि कुत्रत्यानीति मूलग्रन्थान्वेषणाऽपि कृता । परंतु बहुवारं निर्दिश्यमानानां पाणिनिसूत्रादीनां पुनःपुनः स्थलनिर्देशो न कृतः ।

क्वचित्क्वचित् प्रायः सर्वेष्वपि लिखितपुस्तकेषु किंचित्पदं पदसमुदायो वा गलित इति ज्ञापनार्थं रेखाचिह्नं - - - लिखितमुपलभ्यते । एतादृशस्थलेषु मॅक्समुल्लरमहाशयस्वीकृतरीतिरेवास्माभिरप्यनुसृता । केवलं स्वमत्यनुसारेण पूरणार्थं यत्नो न कृतः । तथापि द्वित्रेषु प्रदेशेषु यत्र मॅ-पुस्तके गलितचिह्नं दत्तं तत्रास्माभिः लिखितपुस्तक उपलम्भात् पूरणं कृतमस्ति । ८३१. पृ. ७ प. मॅ-पुस्तके केषु-

---

१. प्रस्तावनायाः ७ पृष्ठे द्रष्टव्यम् । २. प्रस्तावनायाः ८ पृष्ठे अधष्टिप्पणी द्रष्टव्या । ३. प्रस्तावनायाः ८ पृष्ठे अधष्टिप्पणी द्रष्टव्या । ४. प्रस्तावनायाः ९ पृष्ठे अधष्टिप्पणी द्रष्टव्या । ५. प्रस्तावनायाः ९ पृष्ठे अधष्टिप्पणी द्रष्टव्या ।

चिह्नितपुस्तकेषु च 'अतो - - - शान्' इति विद्यते तत्र 'ईदृशान्' इति पाठ एकस्मिन् लिखितपुस्तक उपलब्धः स समीचीन इति स्वीकृतः । एवमेकस्मिन् प्राचीनलिखितपुस्तक उपलम्भात् ऋ. सं. ८. ७९. ७. मन्त्रस्यापि भाष्यमस्माभिः पूरितम् । अत्र मॅ-पुस्तके गलितचिह्नं समस्ति । एवं ८७९. पृ. १२. प. 'वट् सत्यं नाकरं' इत्यस्माभिः स्वीकृतः पाठः । मॅ-पुस्तके 'वट् - तन्नाकरं' इति विद्यते । एतादृशो भेदः लिखितपुस्तकप्रामाण्यादेवास्माभिः कृत इति अस्मत्कृतटिप्पण्यवलोकनेन ज्ञातुं शक्यत एव । मॅक्समुल्लरमहाशयैरप्येकस्मिन्प्रदेशे (ऋ. सं. ८. ८३. ३.) लिखितपुस्तकानपेक्षं स्वयं पूरणं कृतं विद्यत एव ।

अष्टममण्डलस्थानामेकादशानां वालखिल्यसूक्तानां सायणकृतं भाष्यं नास्तीति सर्वविदितमेव । परं त्वस्माभिः वाराणसीस्थराजकीयसंस्कृतविद्यालयसंबन्धिनि (ज्ञ)पुस्तक एतेषामपि सूक्तानामेका व्याख्योपलब्धा । केनेयं कदा वा विरचितेति न ज्ञायते । विदुषामुपयोगाय भवेदिति कृत्वा एषा व्याख्यापि वालखिल्यसूक्ताधः टिप्पणीरूपेण विनिवेशिता । यत्रादर्शपुस्तके पाठोऽशुद्ध उपलक्षितस्तत्र अर्धवलयचिह्नान्तरे तत्तत्पृष्ठाधो वा शुद्धपाठोऽपि संसूचितः ।

पूर्वभागयोरिवात्रापि भाष्ये व्याख्येयपदानामुपात्तानामाशुबोधाय तत्तत्पदाग्रे ∨ एतच्चिह्नं दत्तमस्ति । क्वचित्संहितापदपाठाभ्यामीषद्भेदेन सर्वथा भेदेन वा पदानि भाष्यकारैर्व्याख्यातुमुपात्तानि (उदा. २०९ पृ. २४ प. 'कृतः' इति भाष्यकारैः स्वीकृतं 'कृत' इति पदस्य स्थाने) । एतादृशस्थलेऽपि एतच्चिह्नं प्रायः दत्तमस्त्येव । यत्र व्याख्येयपदानां लौकिकं व्याकरणानुगतं रूपं गृहीतं तत्र परम् एतच्चिह्नं न विनिवेशितम् (उदा. ४३९ पृ. २० प. 'अश्विना' इति पदपाठः 'हे अश्विनौ' इति भाष्यकारैः गृहीतम्) ।

संहितापदपाठविषये सांप्रदायिकपाठ एव प्रमाणीकृत इति द्वितीयभागप्रस्तावनायामुपवर्णितमेव । संहितापदपाठयोः संशोधने पुण्यपत्तनवासिनां प्रथितयशसां श्रोत्रियवर्याणां वे. गोविन्दभट्टजीफाटकमहाशयानां तथा वे. कृष्णशास्त्रिप्रभुणेमहाशयानां च साहाय्यं संपादितमस्माभिः । एतैर्वैदिकवर्यैः बहूपकृतमितीमे धन्यवादार्हाः । अत्रेदमपि सशोकं निवेदनीयं संवृत्तं यत् वे. कृष्णशास्त्रिप्रभुणेमहाशयाः अनवसित एवैतद्भागमुद्रणे स्वर्लोकमगमन्निति ।

पूर्ववदस्यापि भागस्य यथाशक्ति निर्दोषतासंपादने यत्नोऽकार्यस्माभिः । मुद्रणकीलकानां स्थानच्युतेः क्वचिदस्मद्दृष्टिदोषाच्च काश्चन अक्षराशुद्धय उपलक्षिताः । एतासां सर्वासामपि संग्रहोऽन्ते कृतोऽस्ति ।

अधुनेदमेव निवेदनीयमवशिष्यते यदेतन्मुद्रणकार्ये भाष्यसंशोधनार्थं प्राचीनलिखितपुस्तकदानेन तथा अनल्पेन द्रविणदानेन च यैर्महत्साहाय्यं कृतं तेषामुपकारभरस्यानवरतं स्मराम इति । पुण्यपत्तनस्थ-'डेक्कन पेपर मिल्स्'-संचालकैः श्री. फ. दो. पदमजीमहाशयैर्न्यूनमूल्येन मुद्रणपत्रकाणि दत्तानीति तेषां नामात्रोल्लेखार्हं मन्यामहे । पुण्यपत्तनस्थ-समर्थभारतमुद्रणालयाधिकृतानां श्री. स. रा. सरदेसाईमहाशयानामपि साहायकमविस्मरणीयमिति निवेदयामः । मुम्बापुरीविद्यापीठसमितिरपि एतद्भागमुद्रणार्थं द्रविणदानेनास्मानुपकृतवतीति कृतज्ञतापूर्वकमावेदयामः ।

अन्ते चायमपि भागो विदुषां परितोषाय स्यादित्याशास्महे ।

१८६३ शकवत्सरे कार्तिकशुद्धप्रतिपदि
वैदिक-संशोधन-मण्डलम्
पुण्यपत्तनम्

संपादकाः

॥ श्रीगणेशाय नमः ॥

पाठभेदादिविषयकविचारः

मॅ = मॅक्समुल्लरमुद्रितपुस्तके । एतस्मात्पूर्वं यत्र *एतच्चिह्नं दत्तं तत्र तादृशः पाठः मॅक्समुल्लरमहाशयेन लिखितपुस्तकेषु तथानुपलम्भात् स्वयमभ्यूहित इति मन्तव्यम् ॥

मु = मुम्बापुरीमुद्रितपुस्तके ।

§ = सर्वेषु लिखितपुस्तकेषूपलभ्यते ।

× = सर्वेषु लिखितपुस्तकेषु नास्ति ।

॥ षष्ठं मण्डलम् ॥

(चतुर्थाष्टकभाष्यसंशोधनार्थमुपयुक्तानि लिखितपुस्तकानि–ख, घ, ज्ञ, झ, त, न, भ, य, र, श)

[६. १] १. १० **पूर्वमन्त्रे**—ज्ञ-झ-त-न-भ-र-श-मु । पूर्वे मन्त्रे–मॅ ॥ ३. ८ **उभयासः**—मॅ-मु । त्वामुभयासः–§ ॥ ४. ४ **अगमय इति वा** —मॅ-मु । गम इति–ख; अगमय इति–ज्ञ; गमय इति–झ-त-न-भ-य-र; गमय इति वा– श ॥ ५. २ **समिधा वा**—घ-श-*मॅ-मु । वा समिधा–ज्ञ-झ-त-न-भ-र ॥ ६. ६–७ **अत्र भरतस्वामी...संबुद्धयन्तं चकार** । सामवेदस्य भरतस्वामिकृतं भाष्यमुपलभ्यते । किंतु सामवेदे प्रकृतो मन्त्रो नास्ति । अयं मन्त्रः तैत्तिरीयब्राह्मणेऽपि (३. ६. १०. ५) दृश्यते । तत्र भट्टभास्करमिश्रैः ' वसुताते ' इत्येकपदं संबुद्धयन्तं कृत्वा व्याख्यातम् । सायणाचार्यैरपि तत्र तथैव व्याख्यातम् ॥

[६. २] ९. ६ **तादृशः पुत्र इव**—ख-झ-न-भ-श । तादृशः पुत्र इति–ज्ञ-त-र-मॅ-मु ॥ ९. १८. °**श्रितमिति वा इति**—न-भ-य । °श्रितमिति–त२-मॅ । धामन्ते विश्वमिति–मु ॥ ९. २४. **अत्सीति**—ज्ञ-न-भ-श-*मॅ-मु । अमीति–ख; अपीति–घ; अशीति–त ॥ ९. २७. **भक्षयन्ति**—ख-घ-ज्ञ-झ-त-न-भ-य-श । तक्षंति–र-मॅ-मु ॥ १०. १९. **दुर्गमनानि च**—ख-झ-न-भ-य-र । दुर्गमनानि–घ-त-श-मॅ-मु ॥

[६. ३] ११. १३. **शान्तश्च**—*मॅ-मु । श्रांतश्च–ख-त-न-भ; शांतो–घ; श्रांतो–श ॥ १२. १. **गमनसाधनभूतो**—ख-झ-न-भ-य । गमनभूतो–घ-ज्ञ-त-र-श-मॅ-मु ॥ **स्प्रष्टुमशक्यत्वात्**—ख-ज्ञ-*मॅ-मु । प्रष्टुमशक्यत्वात्–झ-त-न-भ-य-र-श ॥ १२. ६. **मूर्तभूतं सर्वम्**—ख-घ-ज्ञ-झ-त-न-भ-श-मु । मूर्तभूतं–र-मॅ ॥ १२. ११. **बाणादेः**—ख-घ-झ-न-भ-श-मु । बाणादेः–ज्ञ-त-र-मॅ ॥ १२. २३. **य ईं योऽयम्**––ख-झ-न-भ-य-र-श । य ईड्यो यं– त । य ईमयं–घ-मॅ-मु ॥

[६. ४] १४. १२. **प्रबुद्धो**—*मॅ-मु । प्रवृद्धो–§ ॥ १५. १२. **यष्टृभिर्दीयमानम्**—न-भ-*मॅ-मु । यष्टभिर्दीयमानं–ख; यज्वभिर्दीयमानं–घ-ज्ञ-त; यज्ञे व्रीयमाणं–श ॥ १५. १७. **अरातीः अरातिरदाता**—ज्ञ-न-भ-*मॅ-मु । अरातीररातिः–घ; अरातीररातिवदातां–त; अरातीररातिवदतो–श ॥ १५. १८. °**माचक्षाणानाम**°—ज्ञ-न-भ-*मॅ-मु । °माचक्षाणाम°–त-श ॥ १५. २०. **ह्वरते**°––मॅ । द्विषते°–ख; ह्वरयते°–ज्ञ-त-न-मु; हूयते°–झ-भ; ह्वयते°–र-श ॥ १६. ३. **दिग्भागा**°–न-भ-*मॅ-मु । दिगंभा°–ज्ञ; दिग्नामा°–त; दीप्तोग्निः– श ॥

[६. ५] १७. १५. **वैश्वानरात्मना**—ख-ज्ञ-न-भ । विश्वान्तरात्मना–मॅ-मु । वैश्वात्मना–र ॥ १८. १२. **तप्ततमाग्ने**—ख-ज्ञ-भ-र । तपस्विन्नग्ने–घ; तपस्वितमाग्ने–ज्ञ-त-न-श । तृप्ततमाग्ने–मॅ-मु ॥ १९. १५. **ते त्वदीयम्**—ख-घ-मु । त्वदीयं–त-मॅ ॥

[६. ६] १९. २३. **उपगन्तव्यम्**—ख-ज्ञ-न-भ-श-*मॅ । उपमंतव्यं–घ-त-मु ॥ २०.१७. **बहूनि काष्ठानि**—घ-ज्ञ-ज्ञ-न-भ-य । तुविकाष्ठानि–घ-त-श । बहुकाष्ठानि–र-मॅ-मु ॥ २१. १०. **असुरैरपहृतासु**—ख-ज्ञ-न-भ । असुरैरप्रहृतासु–र । असुरप्रहृतासु–ज्ञ-त-मॅ-मु ॥ २१.११. **यथान्यै-र्दुःसह°**—ख-ज्ञ-न-भ-*मॅ-मु । यथान्ये दुःसह°– त ॥

[६. ७] २३. १. **अभि अभितः**—ज्ञ-त-*मॅ-मु । अभितः–ख-न-भ; अभि–घ-श ॥

[६. ८] २५. १२. **कामानां वर्षितुः**—ख-घ-भ । वर्षितुः–ज्ञ-ज्ञ-त-न-र-श-मॅ-मु ॥

[६. ९] २८. २. **रात्रिवचनः**—ख-ज्ञ-ज्ञ-त-न-भ-य-मु । रात्रिवाचनः–र । रात्रिवाचकः–श-मॅ ॥ २८. ३. **°द्रक्षयन्तौ**—ख-न-भ-*मॅ-मु । °द्रक्षयंतौ–घ-त-श ॥ २८. २३. **तन्तुस्था-नानि**—मॅ-मु-§ । उत्तरवाक्ये ' ओतुस्थानीयानि ' इतिवदत्रापि ' तन्तुस्थानीयानि ' इति युक्तम् ॥ २९. ५. **वदति**—ख-ज्ञ-न-भ-श-*मॅ-मु । वेदति–त ॥ २९. ७. **कर्माणि**—*मॅ-मु । कर्माणि स एव–§ ॥ २९. ८. **वदाति वदेत्**—ख-घ-ज्ञ-त-न-श । वदाति वदति वदेत्–मॅ-मु ॥

[६. १०] ३१. ११. **द्विपदान्तम् इति**—ज्ञ-न-भ-य । द्विपदांतं–ख-त-श-मॅ-मु ॥ ३२. ३. **पादपूरणम्**—मॅ-मु । यास्कनिरुक्ते भाष्यलिखितपुस्तकेष्वपि प्रायशः सर्वत्र ' पादपूरणम् ' इत्यस्य स्थाने ' पदपूरणम् ' इति पाठः उपलभ्यते ॥ ३२. २२. **तिरः तिरस्कुर्वन्**—ख-ज्ञ-न-भ-य । तिरस्कुर्वन्–घ-त-र-श-मॅ-मु ॥

[६. ११] ३४. १९. **चिद्धि इत्येतत्**—ख-ज्ञ-ज्ञ-त-न-भ-र-मु । चिदित्येतत्–श-मॅ ॥ ३४. २२. **मधुवत्**—§-मु । मधुमत्–मॅ ॥ ३५.८. **यं पञ्च**—घ-*मॅ-मु । पंच–ख-ज्ञ-ज्ञ-त-न-भ-र ॥ ३५. ९. **शोभनहविर्लक्षणान्नमग्निम्**—§ । शोभनहविर्लक्षणं यमग्नि–मु । शोभनहविर्लक्षणमग्निं–मॅ ॥ ३५. १५. **आह्वियत**—ख-ज्ञ-न-भ*-मॅ-मु । आसाद्यत–घ; आहियत–त; आस्रियत–श ॥

[६. १२] ३६. २०. **त्वे त्वयि**—§-मॅ-मु । अत्र ' त्वे ' इति पदस्य पुनर्ग्रहणमनावश्यकम् ॥ ३७.७. **अद्यौत् द्योतते**—ख-ज्ञ-ज्ञ-न-भ-य-र-मु । अद्यौत् ते– त; अद्यौत्–घ-श-मॅ ॥ ३८. ३. **स्पन्द्रः स्पन्दनवान्** । मॅक्समुल्लरमहाशयैः सर्वत्र (१. १८०. ९; ५. ५२. ३; ८; ८७. ३; ६. १२. ५) स्पन्द्रशब्दे पकारस्थाने यकारः पठितः । परंतु वैदिकैः सर्वत्र पकार एव पठ्यते । नागरीलिपिलिखितपुस्तकेषु प्रायेण यकारपकारयोः साम्यं दृश्यते । किंतु ग्रन्थलिप्यां तयोर्लेखने साम्यं नास्ति । यद्यपि प्रकृते ग्रन्थलिपिलिखितं भाष्यपुस्तकं नोपलब्धमस्माभिः तथापि ऋ. सं. १. १८०. ९; १०. ४२. ५ अनयोर्मन्त्रयोः भाष्ये ग्रन्थलिपिलिखितपुस्तकेषु पकारः स्पष्टं दृश्यते । प्रथममण्डले (१. १८०. ९) संहितापदपाठयोः भाष्ये च ' स्पन्द्रा ' इत्यस्य स्थाने ' स्यन्द्रा ' इति मुद्रितम् । तत्र पकारः पठनीयः । मु-पुस्तकेऽपि सर्वत्र पकारविशिष्ट एव पाठः ॥ ३८. १३. **पाहीति**—ख-ज्ञ-न-भ-*मॅ-मु । आयाहीति–घ; यहींति–श ॥ ३८. १४. **गमय प्रापय**—ख-ज्ञ-त-न-भ-य-र । गमय–घ-श-मॅ-मु ॥

[६. १३] ३९. २०. **एतन्नाम्नोऽसुरस्य वा**—ख-ज्ञ-न-भ-य । एतन्नाम्नोऽसुरस्य–घ-ज्ञ-त-श-मँ-मु ॥ ४०. २. **यज्ञैः यजनसाधनै°**—ज्ञ-मु । यज्ञैः यजमानसाधनै°–घ-मँ । यज्ञसाधनै°–ख-ज्ञ-न-भ-य; यजमानसाधनै°–त; यज्ञमानसाधनै°–र; यजमानः साधनै°–श ॥ **वेद्याम्**—ख-घ-ज्ञ-ज्ञ-त-न-भ-र । वेद्यायां–श-मँ-मु ॥ ४०. २०. **संपूर्तिम्**—ख-घ-ज्ञ-न-भ-य-श । पूर्तिं–ज्ञ-त-र-मँ-मु ॥

[६. १५] ४३. ८. **आद्यं नवर्चम्**—ज्ञ-ज्ञ-न-भ-श । आद्यं नवर्चं–त-र । नवर्चं–मँ-मु ॥ ४८. २७. **तस्मात्**—ख-ज्ञ-ज्ञ-त-न-भ-र । तस्मात्त्वं–श-मँ-मु ॥ ४८. २९. **हव्या**—मँ-मु-× ॥ ४९. १९. **गुग्गुल्वादि°**—ज्ञ-न-मु । गुल्गुल्वादि°–त-भ-मँ ॥ **°संभारेणोपेतम्**—ख-ज्ञ-ज्ञ-त-न-भ-य-र । °संभरणोपेतं–घ-श-मँ-मु ॥ ४९. २०. **गुग्गुलूर्णा°**—ज्ञ-मु । गुल्गुलूर्णा°–त-न-भ-मँ ॥

[६. १६] ५२. १२. **अमरणधर्मः** (?)—मँ-मु । 'धर्मादनिच् केवलात्' (५. ४. १२४) इति पाणिनिसूत्रेण 'अमरणधर्मा' इति भाव्यम् ॥ ५२. २०. **प्रयजे**—*मँ । प्रयक्षे–ख-ज्ञ-त-भ-श-मु ॥ ५६. १. **स हि स खलु**—ख-घ-भ-श-मु । स हि खलु–ज्ञ-त-न-र-मँ ॥ ५६. ३. **महित्वना**—ख-घ-न-श-*मँ-मु । महित्वभा–त; महित्वेन–भ ॥ ५६. १४. **प्रयच्छत**—घ-ज्ञ । प्रयच्छ–त-न-भ-मँ-मु ॥ ६०. ८. **°मुपगच्छन्ति**—ख-घ-ज्ञ-न-भ-श-मु । °मुपागच्छंति–त-र-मँ ॥ ६२. १६. **देवानां होतारम्**—ख-घ-ज्ञ-न-भ-य-श । होतारं–ज्ञ-त-र-मँ-मु ॥

[६. १७] ६३. १८. **पञ्चदशचँ द्वितीयम्**—ख-घ-ज्ञ-न-भ-य-श-मु । द्वितीयं–त-र-मँ ॥ ६४.२. **पणिभिरपहृतम्**—ख-ज्ञ-न-भ-य । पणिभिराहृतं–घ-त-र-श-मँ-मु ॥ ६४. ४. **अमित्रम्**—ख-ज्ञ-ज्ञ-त-न-भ-य-र । अमित्रं यं–श । अमित्रियं–घ-मँ-मु ॥ ६५. ७. **न्यूनतारहितम्**—मँ-मु । न्यूनरहितं–ख-ज्ञ-भ; नूनरहितं–ज्ञ-त-र; नूनं रहितं–न; न्यूनतारहितः–श ॥ ६७. १२. **येन**—ख-घ-ज्ञ-ज्ञ-त-न-भ-य-र-श-मु । त्वं येन–त४-मँ ॥ ६७. २२. **अगच्छन्**—*मँ । गच्छन्–§ । गच्छन् भवति पूषा विष्णुश्च–मु ॥ ६९. २. **शतहिमाः शतसंवत्सरान्**—घ-ज्ञ-श-मु । 'शत... संवत्सरान्' नास्ति–ख-ज्ञ-त-य-र । शतहिमाः शतं संवत्सरान्–मँ ॥

[६. १८] ६९. १४. **वातेर्वातम्**—*मँ-मु । वातेर्वाः–ख-ज्ञ-भ; वातेर्वा–ज्ञ-न-भ; वातेर्वासं–त-र ॥ ७२. २. **हिंसितवान्**—घ-ज्ञ । हिंसितवानसि–त-न-भ-श-मँ-मु ॥ ७२. ३. **हिंसितवान्**—घ-ज्ञ । हिंसितवानसि–त-न-भ-श-मँ-मु ॥ ७२. २०. **करोति च तथा**—ज्ञ-न-भ । करोति तथा च–घ-ज्ञ-त-श-मँ-मु ॥ ७३. २३. **इन्द्र त्वं धृषता**—ख-ज्ञ-न-भ । इंद्र धृषता–घ-ज्ञ-त-र-श-मँ-मु ॥

[६. १९] ७५. १. **भृत्यादीनाम्**—ख-ज्ञ-न-भ-र । भृत्यादीनां–ज्ञ-त-मँ-मु ॥ ७७. १९. **दक्षिणभागात्**—ख-ज्ञ-न-भ-य । दक्षिणात्–घ-ज्ञ-त-र-श-मँ-मु ॥ ७८. २३. **बहुभिः**—§-मु । पुरुभिः–मँ ॥

[६. २०] ७९. १८. **दिवो न दिवे सूर्यायेव**—ख-न-भ-य । दिवो न सूर्यस्येव–घ-ज्ञ; दिवे सूर्यायेव–त-र; दिवो न सूर्य इव–श । दिवो न सूर्यायेव–मँ-मु ॥ ७९. २२. **हन् अहन्**—ख-ज्ञ-ज्ञ-न-भ-य-र-मु । हन्–घ-त-श-मँ ॥ ८०. १०. **अपाद्रवन्**—घ-श-*मँ-मु । ८०. २२. **तथा चोक्तं–कुत्साय...** । अयं सार्धः श्लोकः कुत्रत्य इति न ज्ञायते ॥ ८०. २३. **अहंस्ततः**—

§-मु। अहंस्ततश्च–मॅ॥ ८१. २१. **बहुवञ्चनम्**—ज्ञ-भ-*मॅ-मु॥ ८३. १४. **पक्कवान्**। पचनवान्–§। पक्तवान्(?)–*मॅ-मु। 'पचो वः' (८. २. ५२) इति पाणिनिसूत्रेण 'पक्कवान्' इति भाव्यम्॥

[६. २१] ८४. ८. **बहुवञ्चनस्य**—त-भ-*मॅ। बहुवचनस्य–ख-ज्ञ-झ-न-र-श-मु॥ ८४. २४. **उक्तानि प्रसिद्धानि**—श। उक्तानि–घ-ज्ञ; उक्तप्रसिद्धानि–ख-त-मॅ-मु॥ ८५. २६. **नियोज्येन**—ख-ज्ञ-झ-त-न-भ-र। घ-श-पुस्तकयोरेतन्नास्ति। योज्येन–मॅ-मु॥ ८६. १७. **पुरुधियम्**—ज्ञ-त-न-*मॅ-मु॥ ८७. ६. **मदीया वाचः स्तुतिरूपाणि वचांसि**—मॅ-मु; घ-वर्जेषु लिखितपुस्तकेषु च। 'वाचम्' इति पदपाठः। मदीयां वाचं स्तुतिरूपां–घ॥ ८७. ९. **उपक्षपणाय**—ख-ज्ञ-न-भ। उपक्षेपणाय–त-मॅ-मु॥

[६. २२] ८८. २२. **जराहानिरहितः**—झ-न-र-*मॅ-मु॥ ८९. २२. **त्यं तम्**—ख-घ-झ-न-भ-र-श-मु। त्यं–त-मॅ॥ ९०. १७. **अन्तरिक्षं च**—ख-झ-न-भ-य। अन्तरिक्षं–घ-ज्ञ-त-र-श-मॅ-मु॥ ९१. ५. **संयतीम्**—*मॅ-मु। एतन्नास्ति ख-घ-पुस्तकयोः; सर्यात–ज्ञ; संयति–झ-त-न-र; सचिवेन–श; संचनी–त४; संयनी–ग्वालियरलिखितपुस्तके॥ ९१. १७. **अद्यागमस्य**—*मॅ-मु। मद्यागमनस्य–ख-ज्ञ-झ-त-न-भ-र; मद्यद्रिगिति–श॥

[६. २३] ९२. १२. **येऽरयः**—ख-ज्ञ-झ-त-न-भ-र। चारयः–श। अपारयः–*मॅ-मु॥ ९३. १९. **त्वामुद्दिश्य सुते सोमेऽभिपुते सति**—ज्ञ-मु। त्वं–घ-त-न-भ-श-मॅ॥ ९४. ७. **प्र अक्षुवन्तु**–*मॅ-मु-×॥ **पुरुहूत बहुभिराहूत इन्द्र**—मॅ-मु। 'पुरुऽहूतम्' इति पदकाराः पठन्ति॥

[६. २४] ९६. ११. **यथा**—*मॅ-मु-×॥ ९६. १२. **यत्र नियतैः**—ज्ञ-*मॅ। यस्य नियते–ख-झ-न-भ-र; यत्र नियतेः–घ; यत्र नियंते–श। तत्र नियतैः–मु॥ ९६. २८. **स्वप्राधान्येन**—ज्ञ-त-न-भ-श-मु। स्वप्रधान्येन–त४-मॅ॥ ९६. ३०. **स्मृते**—ज्ञ-*मॅ-मु। स्मृतौ–त-न-भ-य-श॥ ९८. १. **सुगमनाः**—मॅ। अमुगमनाः–ख-ज्ञ-झ-त-न-र-मु; अमुरागमनाः–घ-श; अमुतागमनाः–भ॥ ९८. १७. **समुच्चयार्थः**—ज्ञ-मु। समुच्चयः–ख-झ-त-न-भ-मॅ॥

[६. २५] १००. ११. **स त्वया**—ख-झ-न-भ। अतस्त्वया—ज्ञ-त-श-मॅ-मु॥

[६. २६] १०२. २१. **प्रतिपालयते**—*मॅ। प्रतिपालयन्त–ख-झ-भ-र; मां प्रतिपालयेति ज्ञ; प्रतिपालयत–त; प्रतिपालयति–न; प्रविभालयते–श। प्रतिभालयते–मु॥

[६. २७] १०५. १३. **शुभं कर्म चकार**—ख-न-भ-य। शुभं चकार–ज्ञ-त-श-मॅ-मु॥

[६. २८] १०७. २७-२८. **संततिसहिताः.....भवेयुः**–घ-श-मॅ। संततिसहिताः स्युर्भवेयुः इन्द्रायेन्द्रार्थं पूर्वार्धेह्नीः उपसो दिवसान् सर्वेषु दिवसेष्वित्यर्थः दुहानाः क्षीरदाः क्षीरं दोह्यमाना भवेयुः–ख-ज्ञ-झ-त-न-भ-य-र-मु॥ १०७. २८. **दोग्ध्यः**–घ। दोहमानाः–मॅ-मु इतरेषु च॥ १०८. २०. **नाक्रामतु**–ज्ञ-त। नाक्रमतु–घ-न-भ-मॅ-मु॥ १०९. १. **रेणुकस्य रेणोः**—ख-ज्ञ-झ-त-न-भ-य-र। रेणोः–घ-श-मॅ-मु। पदकाराः 'रेणुऽकंकाटः' इत्यत्र रेणुशब्दोत्तरमवग्रहं कुर्वते। परंतु 'कटिर्भेदनकर्मा' इति भाष्यपर्यालोचनया 'रेणुक-काट' इति पदद्वयसमासेन निष्पन्नमिदं समस्तं पदमिति भाष्यकाराणां मतमिति विज्ञायते। एतत्पर्यालोचनया बहुषु पुस्तकेषूपलभ्यमानत्वाच्च 'रेणुकस्य रेणोः' इति पाठोऽ-

स्माभिः स्वीकृतः। मॅक्समुल्लरमहाशयैरप्युपलब्धोऽयं पाटः॥ १०९. ११. **संस्क्रियमाणत्वात्**—घ-श। संश्रयणत्वात्–ख-ज्ञ-त-न-भ-र-मॅ-मु॥१०९. १९. **मेदयथ स्नेहयथ**—ख-घ-ज्ञ-न-भ-य। मेदयथ–त-र-मॅ मु॥ १०९. २०. **अश्लीलमपि**— ख-ज्ञ-न-भ-य-र। अमंगलांगमपि–घ-श। अमंगलमपि–मॅ-मु॥ ११०. ३. **भवत**—ज्ञ-त-न-भ-*मॅ-मु। भवेयुः–घ; भवेत्–श॥

[६. २९] १११. १३. **हन्तर्यस्मिन्**—त-न-भ-*मॅ। हंतरि यस्मिन्–ज्ञ-मु। व्यत्ययेन हंतेर्यस्मिन्–श॥ १११. १४. **वर्तमाना नृहिता**—ख-ज्ञ-न-भ-य। वर्तमानान् हिता–त-र। वर्तमाना–ज्ञ-श-*मॅ-मु॥ १११. १६. **अभिवर्षति**—ज्ञ-त-न-भ-*मॅ-मु। अभिवर्षयति–श॥

[६. ३०] ११४. ५. **संबन्धि**—ख-घ-ज्ञ। संबंधिकं–श-मॅ-मु॥

[६. ३१] ११५. ६. **पृष्ठयस्य**—ख-न-भ-*मॅ-मु। पृष्ठ्य– ज्ञ-त-श॥ ११५. १८. **पौत्रे**—ख-घ-भ। पौत्रेषु–ज्ञ-त-न-र-मॅ-मु। पुत्रेषु–श॥ ११६. ६. **साहाय्यार्थम्**—*मॅ-मु। सहार्थ–ख; सहायार्थ–घ-ज्ञ-न-भ-श॥ ११६. ८. **दंश दशने**—भ-मु। दन्श दशने–*मॅ। दश दशने–ख-न-श; ददंशने–ज्ञ-त॥ ११६. ११. **तत्साहाय्यार्थम्**—*मॅ-मु। सहायार्थ–ख-त-न-भ-श; साहायार्थ–ज्ञ; तत्सहार्थ–त४॥

[६. ३२] ११७. ६. **अपूर्व्या इत्यनुक्रान्तम्**—न। अपूर्वेत्यनुक्रांतं–ख-न-भ; अपूर्व्येत्यनुक्रमणिका–ज्ञ; 'अपूर्व्या...क्रान्तं' नास्ति–ज्ञ-त-य-र-श-मॅ-मु॥ ११७. १५. **विविधम्**—न। विविध°–ख-ज्ञ-त-भ-य-श-मॅ-मु॥ **शत्रूणामीरयित्रे**—ख-न-भ-य। शत्रूणां मारयित्रे–ज्ञ-त-श-मॅ-मु। ऋ. सं. ६. ४५. १३; ४९. १२. द्रष्टव्यम्॥ ११७. २२. **प्राकाशयत्**—ज्ञ-न-*मॅ-मु। प्रकाशयत्–ख-घ-ज्ञ-भ-र-श॥ ११८. १६. **वडवाभिः**—ख-न-भ-*मॅ-मु। प्रजाभिः—घ-ज्ञ; वहवाभिः–न॥

[६. ३३] ११९. ७. **वर्षितः**—घ-श। वर्षयितः–ख-ज्ञ-त-मॅ-मु॥ ११९. २५. **उभयान् वक्ष्यमाणान् उभयविधान्**। 'वक्ष्यमाणान् उभयान् उभयविधान्' इति पटनीयम्। एवमेव घ-त-य-र-पुस्तकेषु। वक्ष्यमाणान् उभयान् उभयविधान् द्विप्रकारान्–ख-ज्ञ-ज्ञ-न-भ-श। उभयान् उभयविधान्–मॅ-मु॥ १२०. २१. **गवां संभक्तृतमाः सन्तः**—ज्ञ-मु। गवां सत्कृततमाः–ख-घ-भ-श। 'गवां...सन्तः' नास्ति–ज्ञ-त-न-र-मॅ। 'गवां संभक्तृतमाः' इति मॅक्समुल्लरमहाशयः संभावयति स्म॥

[६. ३४] १२०. २४. **त्रैष्टुभमैन्द्रम्**—ख-भ। ऐंद्रं त्रैष्टुभं–ज्ञ-मु। एतन्नास्ति-त-य-श-मॅ॥

[६. ३५] १२३. ३. **दाः दद्याः**—ख-ज्ञ-भ-मु। दाः—त-य-श-मॅ॥ १२३. १५. **त्रिधातूः**—ज्ञ-त-र। त्रिधातूनां–घ-भ-श-मॅ-मु; त्रिधातून्–ज्ञ॥

[६. ३७] १२६. २०. **सुष्ठु अरणीयम्**—घ-न-श-*मॅ। सुष्ठु वरणीयं–ख-ज्ञ-ज्ञ-त-भ-र-मु॥ १२७. १३. **ततः पुरैव**—ज्ञ-न-*मॅ-मु। तत्रैव–ख-ज्ञ-भ-य; ततः पुत्रैव–त-र॥

[६. ३८] १२९. ९. **उक्थानि शस्त्राणि**—ख-घ-ज्ञ-न-भ-य। उक्थशस्त्राणि–त-र-श-मॅ-मु॥

[६. ३९] १२९. २६. **मन्मानः**—ख-ज्ञ-ज्ञ-न-भ। मन्मनः–त-र-मॅ। मन्मः–मु॥ १३०. ११. **युक्तश्च**—*मॅ-मु। च युक्तश्च–ख-ज्ञ-त-न-भ; च युजानः युक्तश्च–घ-श॥ **सानुं समुच्छ्रितम्**—ख-घ-ज्ञ-न-भ-श। सानुमुच्छ्रितं–ज्ञ-त-र-मॅ-मु। सानु समुच्छ्रितं–य॥

[६. ४०] १३२. ७. **श्रपणसाधनाः**—त४-मॅ-मु । श्रयणसाधनाः–ख-ज्ञ-त-न-भ-र ॥

[६. ४१] १३३. २७. **तया**—मॅ-मु । पूर्वं तया–§ ॥ १३४. १८. **यज्ञम्**—ख-घ-ज्ञ-न-भ-य-मु । त-श-मॅ पुस्तकेषु एतन्नास्ति ॥

[६. ४२] १३६. १४. **प्रभर संप्रहर प्रयच्छेति यावत्**—मॅ-मु । ' प्रयच्छेति यावत् ' इत्युक्तत्वात् ' संप्रहर ' इत्यनुपपन्नमिव प्रतिभाति ॥

[६. ४३] १३६. १८. **निष्केवल्ये**—ज्ञ-न-र-श-मु । निष्केवल्येऽपि–मॅ ॥

[६. ४४] १३९. १७. **बृहत्त्वम्**—ख-ज्ञ-न-भ । बहुत्वं–ज्ञ-त-र-श-मॅ-मु ॥ १३९. २१. **यस्मिंश्चेन्द्रे**—ज्ञ-त-न-र-*मॅ-मु । यस्मिन्निंद्रे–ख-घ-ज्ञ-भ-श ॥ १४०. १०. **देवासो देवाः**—ख-ज्ञ-न-भ-य । देवाः–घ-ज्ञ-त-र-श-मॅ-मु ॥ १४५. २२. **सूर्येऽन्तर्ज्योतिः**—न-भ-*मॅ । सूर्यो ज्योतिः–श । सूर्ये तर्ज्ज्योतिः–मु । **त्रितेषु त्रिस्थानगतेषु**—ख-ज्ञ-ज्ञ-त-न-भ-य । त्रिषु त्रिस्थानगतेषु–श । त्रिस्थानगतेषु–मॅ-मु ॥ १४६. ११. **दशैतानध्वर्युः...गृह्णाति**—मॅ-मु-§ । शाङ्खायनब्राह्मणे (१४.२) ' दश प्रातःसवने अध्वर्युर्ग्रहान् गृह्णाति ' इति पाठः ॥

[६. ४५] १४७. २०. **अस्मभ्यम्**—*मॅ-मु । अस्मान्–§ ॥ १४८. २८. **तन्तस**—न-श-*मॅ-मु । ततसाय्य–ख-ज्ञ-ज्ञ-त-भ-र ॥ १५०. २५. **सीमिमाः**—ख-ज्ञ-न-भ-य । सी सर्वतः–ज्ञ-मु । सीमयं–मॅ ॥ १५१. ११. **बहुविधप्रज्ञ वा इन्द्र**—ज्ञ-न-भ-*मॅ-मु । बहुविधप्रज्ञवन्निंद्र–ख; बहुविधप्रज्ञः वेंद्र–त; बहुविधप्रज्ञानेंद्र–श ॥ १५३. ५. **तत् तम्**—घ-ज्ञ-*मॅ-मु । तत्–ख-त-न-भ ॥

[६. ४६] १५३. २०. **आह्वयामः**—मॅ-मु । आह्वयामहे–ख-ज्ञ-न-भ; आह्वयोमे–घ; आह्वयाम–ज्ञ-त-र-श ॥ १५३. २२. **यत्राश्वः क्रान्त्वा**—*मॅ-मु । यास्वश्वः क्रांतत्वात्–ज्ञ; यथाश्वः क्रांतत्वात्–त; यथाश्वः क्रांत्वा–ख-ज्ञ-न-भ-र; अश्वः क्रांत्वा–श ॥ १५४. १३. **यां कां च...कौषीतकिभिराम्नातम्**—इयं श्रुतिः नोपलभ्यते ॥ १५५. २४. **स्वभूतम्**—ज्ञ । स्वरूपं–घ-त-न-भ-श-मॅ-मु ॥ १५६. १८. **शत्रुप्रेरितम्**—त२-*मॅ-मु । सर्वर्षिप्रेरितं–ख-ज्ञ-भ; सरोप्रेरितं–त-न-र; सर्वेषां प्रेरितुं–य ॥ १५७. ६. **कदेत्याह**—ख-ज्ञ-न-भ-य । कदेत्यत आह–ज्ञ-त-र-श-मॅ-मु ॥ **पर्णिनः**—*मॅ-मु । यद्यदा पर्णिनः–ख-घ-ज्ञ-त-न-भ-र-श ॥

[६. ४७] १५८. २१. **त्रिष्टुम्महि द्विपदा**—न-भ-य । त्रिष्टुप् द्विपदा–त१-२ । ' त्रिष्टु...पदा ' नास्ति–ज्ञ-श-मॅ-मु ॥ १५९. १६. **षण्मोर्वीरंहस...चौषधयश्च** । शतपथब्राह्मणे ' षण्मोर्वीरंहसस्पान्तु अग्निश्च पृथिवी चापश्च वाजश्चाहश्च रात्रिश्च ' (१. ५. १. २२) इत्येवं पाठः । ऋ. सं. १०. १४. १६. द्रष्टव्यम् ॥ १६२. ३. **जुषस्व सेवस्व**—ख-ज्ञ-न-भ-य । जुषस्व–घ-ज्ञ-त-श-मॅ-मु ॥ १६३. ९. **अभिगच्छन्ति**—ख-ज्ञ-न-भ-य । अवगच्छंति–घ-ज्ञ-त-र-श-मॅ-मु ॥ १६३. १३. **श्रपणार्थम्**—*मॅ । श्रयणार्थ–§-मु ॥ १६३. १४. **श्रपणद्रव्यैः**—*मॅ-मु । श्रयणद्रव्यैः–§ ॥ १६४. ७. **पूर्वमपरम्**—*मॅ-मु । पूर्वत इत्येवं–ख-ज्ञ-ज्ञ-त-न-भ-र-श । अन्यमन्यं पूर्वमपरं परव्यतिहारेण–घ । १६५. २६. २८. **अत्रोक्तम्– अरण्ये...च्युतोऽनया, अगव्यूती...स्तुतः**—एतच्छ्लोकद्वयं कुत्रेत्यमिति न ज्ञायते ॥ १६५. ३०. **अस्मानतः सापि रक्षतु**—*मॅ-मु । नास्मानतः सापि रक्षतु–ज्ञ-त; नोस्मानतः सापि रक्षतु–न-भ; अस्मानतः कारणात्–श ॥ १६८. ४. **बलरूपम्**—मॅ-मु । बलं रूपं–ख-ज्ञ-त-न-भ-र; बलं तं

रूपं–ज्ञ; बलं–घ ॥ १६८. ६. **इन्द्रो वृत्राय...स्तृतीयम्**—ज्ञ-न-भ-य-श । इंद्रो वृत्राय वज्र-मुदयच्छत् स त्रेधा व्यभवत् वज्रस्तृतीयं रथस्तृतीयं यूपस्तृतीयं–घ-मॅ-मु । तैत्तिरीयसंहितायां (५. २. ६. २; ६. १. ३. ४) 'इन्द्रो वृत्राय वज्रं प्राहरत् स त्रेधा व्यभवत् स्फ्यस्तृतीयं रथस्तृतीयं यूपस्तृतीयम्' एवं पाठो दृश्यते । एतदनुसारेण लिखितपुस्तकानुसारेण च पाठोऽस्माभिः स्वीकृतः । तै. सं. ६.५.१.१. अत्र केवलम् 'इंद्रो वृत्राय वज्रमुदयच्छत्' इतीयानंशोः विद्यते ॥ १६८. ७. **स्फ्यस्तृतीयम्**—भ-य । स्फ्यतृतीयं–ज्ञ-ज्ञ-र-श; स्तृतीयं–त२ । वज्रस्तृतीयं–घ-मॅ-मु ॥ १६८. १४. **शीघ्रगामी**—ज्ञ-*मॅ-मु । शीघ्रगामिनं–ख-घ-ज्ञ-त२-न-भ-र-श ॥ १६८. १६. **अवस्थितः**—ख-न-भ-य-श । एव स्थितः–ज्ञ-त-र-मॅ-मु ॥

[६. ४८] १७०. १०. **तृतीयाचतुर्थ्यौ**— न । तृतीयाचतुर्थौ–ज्ञ । तृतीयाचतुर्थौ–ख-त-र-मॅ-मु ॥ १७०. ११. **द्वादशाक्षरौ**—ज्ञ-त-न-भ-मु । द्वादशाक्षरा–मॅ ॥ १७०. ११, १३. **अष्टाक्षरा...बृहती; अष्टिन...बृहती**—ऽ-मॅ-मु । महासतोबृहत्या लक्षणं द्विरुक्तम् ॥ १७०. २०. **सा चापि**—ख-ज्ञ-न-भ-मु । सा च – श । स चापि–ज्ञ-त-र-मॅ ॥ १७३. १२. **पालनैः**—ख-ज्ञ-न-भ-य । पालकैः–घ-ज्ञ-त-श-मॅ-मु ॥ १७३. १३. कर्तरि–मॅ-मु । कर्तारं–ख-घ-ज्ञ-त-न-भ-र; कर्तारः–ज्ञ ॥ १७३.२०. **अस्य सर्वत्र लोके**— ज्ञ-*मॅ । लोके–ख; अस्य सर्वस्य लोकस्य–घ; सर्वत्र लोके–ज्ञ-त-न-भ-र-मु; सर्वस्य लोकस्य–श ॥ १७५. २७. **उपदोद्राव इति**—न-भ-*मॅ । उपदोद्राघेति–ख; उपदोद्रवयति–ज्ञ; उपदोद्रावयति–त-मु ॥ १७६. ६. **काकम्बीरम्**—ख-ज्ञ-भ । मा काकंबीरं–त-र-श-मॅ-मु ॥ १७७. १६. **वृत्रहम्**—श-*-मॅ-मु । वृत्रहन्–ख-घ-त-न-भ; वृत्रंहं–ज्ञ ॥

[६. ४९] १७९. २६. **त्मने आत्मने**—ज्ञ-त-भ-श-मु । त्मने आत्मने आत्मनि–घ; त्मने–न-य-मॅ ॥

[६. ५०] १८५. २५. **पोषको**—ज्ञ-न-*मॅ-मु । पूषको–त-र; प्रेषको–श ॥

[६. ५१] १९१. २३. **भुंक्ष्महि** (?)-मॅ-मु । भुंज्महि–ज्ञ-त२ । 'भुञ्जीमहि' इति भाव्यम् ॥ १९२. ९. **यतस्तेन**—ज्ञ-त-न-र-श-मु । अतस्तेन–ख-भ-मॅ ॥ १९२. २८. **वक्मराजाः**—त-न-र । वक्मराजानः–ख-ज्ञ-श-मॅ-मु ॥ १९३. २०. **इत्येष**—ज्ञ-न-मु । इत्येषा–त-भ-मॅ ॥

[६. ५२] १९५. ८. **यियक्षुरास**—*मॅ-मु । इयक्षुराह–ख-त-न-श; इयक्षाह–ज्ञ-र; इयक्षुरास–घ-ज्ञ-भ ॥ १९५. २१. **स्वस्याधिक्यम्**—ज्ञ-*मॅ-मु । स्वाधिक्यं–ख-भ-श; स्वस्वाधिक्यं–ज्ञ-त-न-र ॥ १९६. ३. **शत्रुभ्यः**—ख-ज्ञ-न-भ-य । एतन्नास्ति–ज्ञ-त-र-श-मॅ-मु ॥ १९७. २४. **'तप्ते पयसि...भिक्षा**–इयं श्रुतिः कुत्रत्येति न ज्ञायते । तै. ब्रा. १. ६. २. ५ अत्र 'वैश्वदेव्या-भिक्षा भवति' इति वचनमुपलभ्यते ॥ १९८.२५. **चित्ते**—ख-ज्ञ-न-भ-*मॅ-मु । चते–त१; चत्ते–त२ ॥

[६. ५३] २००. १२. **युञ्ज्महि** (?)–ऽमॅ-मु- । 'युञ्जीमहि' इति भाव्यम् ॥

[६. ५७] २०७. २६. **यद्यदा**—*मॅ । यद्यदा इंद्रः–ऽ-मु ॥ २०८. ४. **इन्द्रस्य**—ज्ञ-*मॅ-मु । इतरलिखितपुस्तकेषु 'इन्द्रस्य' नास्ति ॥ २०८. ११. **यथा**—*मॅ-× । मु–पुस्तकेऽप्ये तन्नास्ति ॥

[६. ५८] २०८. १३. **पौष्णस्य**—त४-श । वैश्वदेवस्य–ज्ञ-त२-मॅ-मु ॥ २०८. १६. **प्रवर्ग्याभिष्टवे**—न । अमाभिष्टवे–ज्ञ-त-मॅ-मु; सोमाभिष्टवे–श ॥ २०८. २४. **प्रकाशेन**—ज्ञ-*मॅ-

मु। प्रकाशे–इतरेषु ॥ २०८. २५. **एकम्**—त४-*मॅ-मु। इतरेषु नास्ति ॥ २०९. २२. **संजातौत्सुक्या**—*मॅ। संजातोत्सुका–ख-ज्ञ-त-न-भ-श-मु; संजातौत्सुका–घ ॥ २०९. २३. **प्राहैशीत्**—*मॅ-मु। प्राहौषीत्–ख-घ-ज्ञ-ज्ञ-न-भ-र; प्राहुशीत्–ज्ञ-त२-श ॥ २०९. २४. **कृतः**—'कुत' इति पदपाठः। 'कृतः' इति भाष्यकारैः स्वीकृतम् ॥

[६. ५९] २११. १६. **अप्रीतिकरम्**—मॅ-मु। अप्रीतिकरं जोषं–§ ॥ २११. १९. **अथ योऽयम्**—ज्ञ-त-भ-निरु. ५. २२। योऽय–न-*मॅ-मु ॥ २११. २८. **व्यापकान्**। अत्र किमपि विशेष्यमावश्यकम्। 'दिवसान्' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति। व्यापकान् रश्मीन् – मु ॥

[६. ६१] २१७. १०. **इयमित्ये.....बुद्धिमान्**—§-मॅ-मु। इयमित्येतदाद्यन्तं सूक्तं सारस्वतं द्विजः। नित्यं जपेच्छुचिर्भूत्वा वाग्मी भवति बुद्धिमान्' ॥ इति निर्णयसागरमुद्रितपुस्तकस्थः पाठः। । २१८. ४. **परावाँची तीरे**—त-मु। पारावाँची तीरे–श-मॅ। पारावाञ्ची तीरे–न-भ। 'पारावारे परावाँची तीरे' इत्यमरः (१. १०. ८) ॥ २१८. १५. **लब्धवत्यसि**—ज्ञ। लब्धवानसि–त-न-भ-श-मॅ-मु ॥ २१९. १४. **ऋतावरीः**—मॅ-मु-§। 'ऋतऽवॅरी' इति पदपाठः। 'ऋतावरीः' इति भाष्यकाराः पठन्ति ॥

॥ पञ्चमाष्टकः ॥

(पञ्चमाष्टकभाष्यसशोधनार्थमुपयुक्तानि लिखितपुस्तकानि–ख, घ, ज्ञ, त, न, भ, श.)

[६. ६२] २२१. **वागीशाद्याः.....गजाननम्**—मॅ-× । मु-पुस्तकेऽपि नास्ति ॥ २२१. १६. **प्रसन्तौ प्रभवन्तौ**—*मॅ-मु। प्रसवंतौ–ख-ज्ञ-न-भ; प्रसनवंतौ–घ; प्रसनवंतौ प्रभुवंतौ–त; प्रसन्नवंतौ प्रभुवतौ–श ॥ २२१. १७. **अश्वैरन्वितौ**—ज्ञ-श-*मॅ-मु। ख-घ-ज्ञ-त२-४-न-भ-पुस्तकेषु एतन्नास्ति। अश्वैरश्विनौ–त१-३ ॥ **अप्रगीतमन्त्र**°–ख-ज्ञ-न-भ। अर्चनीयैरप्रगीतमंत्र°–श; अर्चनीयमंत्र°–त-मॅ-मु ॥ २२१. २१. **परि युयूषतः**—ज्ञ-त१-*मॅ-मु। पर्युयूषतः–ख-ज्ञ-त२-३-४-न-भ-श ॥ २२३. ३. **वलनशीलौ**—त१-२-३-*मॅ-मु। वलानशीलौ–ख-ज्ञ-त४; वल्गनशीलौ–भ-श; वलाशीलौ–न ॥ २२४. १३. **मध्यमपुरुषेण**—ज्ञ-मॅ-मु। उत्तमपुरुषेण–इतरेषु ॥ २२५. २. **दृब्हस्य चिद्दृढापिधानस्यापि**—घ-ज्ञ। दृब्हस्य दृढापिधानस्यापि–ख-ज्ञ-त४-न-भ; दृब्हस्य चित् दृब्हापिधानस्यापि–त१-२-३-य-श-मॅ-मु ॥

[६. ६३] २२५. ७. **छन्दस्युक्तो**—ख-ज्ञ-त-४-न-भ। छंदसि–ज्ञ-त१-२-३-य-श-मॅ-मु ॥ २२५. २३–२५. **अन्तरः संनिकृष्टोऽपि ..... कुरुथ इति**—त४-*मॅ-मु। 'अन्तरः न हिस्यात्' नास्ति–ख१; 'रिपो...यथास्मदीयं गृहं' नास्ति–ज्ञ-त१-२-श; 'यद्वा..... तुतुर्यात्' नास्ति–ज-ज्ञ-त३-न-भ ॥ २२६. ३. **बहुरक्षाकम्**—घ-ज-ज्ञ-त४-न-भ। बहुरक्षकं–ख१-ज्ञ-त१-२-३-श-मॅ-मु ॥ २२८.११. **सहस्राणि च**—ख-ज्ञ-न-भ। सहस्राणि–त-श-मॅ-मु ॥

[६. ६५] २३०. २६. **जिगर्तिर्गिरतिकर्मा**—ज्ञ-त१-भ। जागर्ति°–ज्ञ-त२-न-भ। जीगर्ति°–ख-त३-४-मॅ-मु ॥ २३१. २७. **नि वहथ**—ज्ञ-त२-*मॅ-मु। निर्वहथ–घ-ज्ञ-त१-३-न-भ-श; हविर्वहथ–ख ॥ २३२. १५. **प्राणो वै भरद्वाजवत्**—इयं श्रुतिः कुत्रत्येति न ज्ञायते ॥

[६. ६६] २३२. २२. **नवानुयाजाः**—§। नवानुयाज्याः–मॅ-मु ॥ २३३. २. **मर्तेषु**–ज्ञ-त२। मर्त्येषु–मॅ-मु-इतरेषु च ॥ २३३. १९. सर्वज्ञाता–*मॅ-मु। सर्वज्ञानां–ज्ञ; सर्वज्ञाते–इतरेषु ॥

२३५. २२. **य इति**—ज्ञ-*मँ-मु। इय इति–इतरेषु॥ २३५. २३. **राजपुरुषः**—ज्ञ-*-मँ-मु। राज्ञः पुरुषः–इतरेषु॥ २३५.२८. **अध्वरस्येव यज्ञस्येव**—'अध्वरस्येव' इति षष्ठ्यन्तपदस्यान्वयः केति न ज्ञायते॥

[६.६७] २३७. ११. **स्तूयमानौ वा**—ख-ज्ञ-त-न-भ-श। स्तूयमानौ–घ-मँ-मु॥ यौ–घ-*मँ-मु। या यौ–इतरेषु॥ २३७. २७. **धत्तवन्तः** (?)–ख१-घ-ज्ञ-त१-२-३-४-भ-श-मँ-मु। धृतवंतः–ज-ज्ञ; यत्नवंतः–न। हितवन्तः इति भाव्यम्॥

[६. ६८] २४०. १३. **वाम्**—*मँ-मु। वाग्–ख-ज्ञ-त३-४-न-भ-श; 'वां' नास्ति–घ; वा–ज्ञ-त१-२॥ २४०. २४. **सत्येन**—ज्ञ-मँ-मु। सत्यमेव–इतरेषु॥ २४१. १०. **देवाः स्तोतारः**—घ-त१-२-श। देवाः स्तारः—ज्ञ-त३-४-न; देवाः–ख-ज्ञ-भ-य-मँ-मु। ऋ. सं. ७.९७.३; ९८. ३ द्रष्टव्यम्॥ २४१. २०. **ऋतावा**–§-मु। ऋतावान्—मँ (मुद्रणदोषः?)॥ २४१. २१. **प्राप्येत**—घ-त-श। प्राप्यते—ख-ज्ञ-न-भ। प्राप्येत्–मँ-मु॥ २४२. २४. **युक्तः**—ख-घ-ज्ञ-त३-४-न-भ-श। युक्तः शोचिषा तेजसा युक्तः–ज्ञ-त२-मँ-मु॥ २४२. २५. **शोचिषा दीप्त्या विभाति**–ख-घ-त१-२-३-४-न-भ-श। विभाति–ज्ञ-मँ-मु॥ २४३. १३. **सोमपानेनेति**—ख-घ-ज्ञ-त१-२-३-भ-श-मु। सोमपानेति–ज्ञ-त४-न। सोमपान इति–मँ॥

[६. ६९] २४३. १५. **उक्थ्ये**—ज्ञ-ज्ञ-न-भ-श२। उक्थे–ख-त२-४-श१-मँ-मु॥ २४३. २९. **सेवेथाम्**—ज्ञ-ज्ञ-न-भ-श-*मँ-मु। सेवतां–ख१; सेवयेथां–त२॥ २४४. ७. **निपातनात् णिलोपः**—ज्ञ-मँ-मु। निपाताल्लोपः–ख-ज्ञ-न-भ; निपातनात् सिल्लोपः–श॥ २४५. १८. **सोमनिधानः**—ज्ञ२-*मँ-मु। सोमाभिधानाः–ख; सोमाभिधानः–ज्ञ१-न-श; सोमाभिधान°–त१-२॥

[६. ७०] २४७. १. **द्यावापृथिव्यौ**—ख-ज्ञ-न-भ-श। हे द्यावापृथिव्यौ–घ-ज्ञ-त२-मँ-मु॥ २४७. ३. **अनुसंधेयम्**—ख-ज्ञ-त१-न-भ-श। अनुसाधयं–त२-४; अनुसंधेयं–ज्ञ-मँ-मु॥ २४७. ५. **स्तुतिः प्रसङ्गात्**—ज्ञ। स्तुतिप्रसंगात्–मँ-मु-इतरेषु च॥ २४७. १६. **समृद्धिहेतुम्**—ख-ज्ञ-ज्ञ-त१-२-४-न-भ-श। समृद्धिहेतुकं–त३; समृद्धिधृतहेतु–य। समृद्धिहेतु–मँ-मु॥

[६. ७१] २४९. १०. **बृहस्पतिसवेऽपि.....इत्यनूत्तिष्ठेत् इति**। एतद्विनियोगविधायके आश्वलायनश्रौतसूत्रे 'इत्यनूत्तिष्ठेत्' इत्ययमंशो नास्ति। किंतु 'उदु᳡य देवः सविता हिरण्यया घृतवती भुवनानामभिश्रिया' इति दृश्यते। अग्निष्टोमप्रवर्ग्ये 'महावीरमादायोत्तिष्ठत्सूदु᳡य देवः सविता हिरण्ययेत्यनूत्तिष्ठेत्' इति विनियोगान्तरविधायकं सूत्रं (४. ७) दृश्यते। तेन अत्र भाष्ये मध्ये कियांश्चिदंशो गत इति प्रतिभाति। मँक्समुल्लरमहाशयेन स्वकीयटिप्पण्यां 'इत्यनूत्तिष्ठेत्' इति भागः आश्वलायनश्रौतसूत्रे नास्ति इत्येतावदेवोक्तम्॥ २४९. २०. **सुवनाय**—*मँ-मु। एतन्नास्ति–ख-घ-न-भ; प्रसवनाय–ज्ञ-त१-२; प्रसवाय–श। 'सवनाय सुवनाय प्रेरणाय दानाय वा' इति स्यादिति मँक्समुल्लरमहाशयः संभावयति॥ २४९. २८. **दाने च**—मँ-मु। दाने वयं–§॥ २४९. २९. **यः त्वम्**—मँ। यश्च त्वं–§। यस्तं–मु॥ २५०. ५. **सुखकरैः**—§। सुखकारिभिः–मँ-मु॥

[६. ७२] २५१. १६. **प्रथमानि...वा**—मँ-मु। 'वा' इत्ययुक्तं प्रतिभाति॥ २५१. १८. **अलम्भयतं च**—*मँ-मु। अलभयत वा–ख; अलभयतं–घ; अलभयंतं वा–ज्ञ-भ; अलंभयतं

वा–त१-२-४-य; अलभंत अलभयंत वा–श; अलभेथां अलभयतं वा–श ॥ २५१. २५. **व्युच्छन्तीम्**—*मॅ-मु । व्युच्छतं–ख-भ; व्युच्छनं–ज्ञ-न-श; व्युच्छंतीं व्युच्छलं–त ॥ २५२. २६. **रयिं धनम्** । 'रयिम्' इति मन्त्रे नास्ति ॥

[६. ७३] २५३. ४. °**द्वसूनीति**—मॅ । °द्वसूनि–ख-ज्ञ-त-न-भ-श-मु ॥ २५३. २८. **अपः** । एतत् मन्त्रगतं पदं भाष्ये न व्याख्यातम् ॥ २५४. ३. **संभक्तुकामः**—मॅ । **संभक्तुमिच्छन्**—ऽ-मु । एवमेव पठनीयम् ॥

[६. ७४] २५५. ४. **शिथिलबन्धम्**–ज्ञ-त२-*मॅ-मु । शिथिलबद्धं–इतरेषु ॥

[६.७५] २५५. २३. °**द्यावापृथिवीपूषणो**—ऽ।°द्यावापृथिवीपूषाणो–मॅ-मु ॥ २५५. ३२. **मण्डलान्तहोमे**—ख-ज्ञ-त४-न-भ । मण्डलान्ताहोमे–श । मण्डलान्त्यहोमे–ज्ञ-त१-२-मॅ-मु ॥ २५७. १०. **चुर्यगिभ्याम्**—त२-४-श-मॅ-मु । ऋर्यगिभ्यां–ज्ञ ॥ २५८. ७. **पश्चात्सन्तो**—ख-त२-भ । पश्चात्सतो–ज्ञ-ज्ञ-त४-न-श-मॅ-मु ॥ २५८. २१. **सार्वविभक्तिकत्वात्**—ऽ-मु । सर्वविभक्तिकत्वात्–मॅ ॥ २५८. २७. **संसीदन्तः**—मॅ-मु । संसदंतः–ऽ ॥ २५९. १. **शक्तीवन्तः शक्तिहस्ताः**—ज्ञ-त२-श-मु । शक्तिवंतः शक्तिहस्ताः––ज्ञ-न-भ; शक्तीवंतः शक्तीहस्ताः–त४-मॅ ॥ २५९. ३. **प्राप्तवीर्याः**—मॅ-मु । प्राप्तवीर्यः–ज्ञ । प्राप्तवीराः–इतरेषु ॥ २५९. १०. **सत्यस्य यज्ञस्य वा**—ऽ । ऋतस्य यज्ञस्य वा–मु । ऋतस्य यज्ञस्य सत्यस्य वा–मॅ ॥ २५९. १४. **भवताम्**—मॅ-मु । भवेतां–ज्ञ; भवतं–इतरेषु ॥ २५९. १५. **मा ईशिष्ट**—ख-ज्ञ-ज्ञ-त१-२-भ । माष्ठ–घ; मा इशिष्ट–त४; मा ईशिष्टे–न; मा ईष्टि–श; मा ईष्ट–मु । मैशिष्ट–मॅ ॥ २५९. ३०. **शर्म शरणं प्रयच्छन्तु**—मॅ-मु । शर्म यच्छंति–ख१-ज्ञ; शर्म यच्छंतु–ज-ज्ञ-त२-४-न-भ; शर्म प्रयच्छंतु–त१; शर्म शरणं यच्छंतु–श ॥ २६०. १४. **उपजिघ्रन्ति**—ख-ज्ञ-त-भ-श-मु । उपजिघ्रति–घ-न-मॅ ॥ २६२. १. **उरुतरम्**—*मॅ-मु । उरुतुभ्यं–ख-ज्ञ-त-न-भ-श । उरु–घ ॥

॥ सप्तमं मण्डलम् ॥

[७. १] २६३. २९. **आगम्यमतनवन्तम्**—*मॅ-मु । आगम्यतनवतं–ख-ज्ञ-त१-४-भ; गम्यं–घ; अगम्यमतनवंतं–ज्ञ-त२; आगम्यतनवंतं–न; अगम्यतनवंतं–श ॥ २६४. २६. **सुवीरं... पौत्रोपेतम्**—घ । सुवीरं शोभनपुत्रपौत्रोपेतं–ख-ज्ञ-न-भ; सुवीरं शोभनपुत्रपौत्रोपेतं स्वपत्यं शोभनपौत्रोपेतं–त-मॅ-मु; सुवीरं शोभनपुत्रपौत्रोपेतं स्वपत्यं शोभनपुत्रपौत्रोपेतं–श ॥ २६९. ११. **नोपक्षीयेत**—*मॅ । मोपक्षीयत—मु । मोपक्षीयते–ख१-भ; मापक्षीयतां–घ; नोपक्षीयते–ज; मापक्षीयता–ज्ञ; मोपक्षीयंते–ज्ञ; मापक्षीयंत–त१-२; नोपक्षीयत–त३-न; मोपक्षीयंत–त४; मोपक्षीयतां–य; मीपक्षीयत–श१; मौपक्षीयत–श२ ॥ २६९. २८. **ददाति**—मॅ । दधाति धारयति—त-मु । अयमेव युक्तः पाठः । 'दधाति ददाति' इति स्यादिति मॅक्समुल्लरमहाशयेन संभावितम् ॥

[७. २] २७०. २४. **पशाविष्टौ**—*मॅ-मु । सोविष्टौ–ख-त१-२-४-न; सोविष्टौ–घ; सौविष्टौ–ज-ज्ञ-त३-भ; वसिष्ठानां–श । 'वासिष्ठमिदम्' इति स्यादिति पीटर्सनमहाशयः[1] संभावयति

---

1. Handbook to the Ṛgveda Maṇḍala VII. pp. 2–3

स्म । अयं पाठः मॅक्समुल्लरमहाशयस्य[1] संमतः । 'पशौ वासिष्ठानाम्' इति युक्तं प्रतिभाति ॥ २७२. १. **पादौ भरन्तः**—ख-ज्ञ-त-न-भ । अग्रौ भरंतः—म; अग्निभरंतः—श१ । पादैर्भरंतः—घ-मॅ-मु । 'पादौ भरंतः' इति पाठो युक्त इति मॅक्समुल्लरमहाशयः[2] अभिप्रैति ॥ २७४. २. **अस्माकम्**—*मॅ-मु । अस्मात्—ऽ॥

[७. ३] २७४. २३. **संततेषु**—ज्ञ-त१ । आस्ते—ख; असतेषु—भ; ऽसतते—श; सततेषु—घ-ज्ञ-त२-३-४-न-मॅ-मु ॥ २७५. १७. **आहवनीयायतने**—*मॅ । आवहनीयायतने (१)—मु । आहवनीयातने—ख; आयतने—घ; आहवनीय°—ज्ञ; आहवनीयायते—ज्ञ-त३-न-श१; आहवनीयायेति-त१-२-४; आहवनीयायने—भ; आवहनीयायते—श२ ॥ २७५. १०. **खादति**—*मॅ-मु । सीदति—ख-घ; सादति—ज्ञ-त-न-भ; सादयति—श ॥ २७६. ८. **नगरीभिरिव**—ख-ज्ञ-त३-न-भ-श । नगरीभिः—घ-ज्ञ; नगरीव—त१-२-४ । नगरीभिरेव—मॅ-मु ॥ २७६. १५. **अप्रधृषिताः**—ज्ञ-त२-३-न-श-मॅ-मु । 'अप्रधर्षिताः'—इति घ-पुस्तकानुसारेण पठनीयम् ॥ २७६. १६. **रक्षेः**—*मॅ-मु । रक्ष— ख-घ-त१-२-३-४-भ-श । रक्ष्याः—ज्ञ; रक्षि—ज्ञ-न ॥

[७. ४] २७७. २३. **भवति**—ऽ-मॅ-मु । 'अस्तु भवति' इति स्यादिति मॅक्समुल्लर-महाशयः संभावयति ॥ २७८. ९. **अयम्**—घ-*मॅ-मु । यः—इतरेषु ॥ २७८. १९. **अतारीत् दुर्गेभ्यस्तारयति तमिममग्निम्**—त । अतारीत्—मॅ-मु इतरेषु च ॥ २७८. २०. **सन्तं बिभ्रति**—ऽ । संतं तं बिभ्रति—मॅ-मु ॥ २७८. २१. **वनिभिश्च**—ख-ज्ञ *-मॅ-मु । वनिनश्च—इतरेषु ॥ २७९. १. **अप्स इति रूपनाम**—मॅ-मु; ज्ञ-वर्जलिखितपुस्तकेषु च । 'रूपरहिताः' इति यतो व्याख्यातं तस्मात् 'न विद्यते प्सुः येषाम्' इति विग्रहोऽभिमतः प्रतिभाति । एवं सति 'अप्स इति रूपनाम' इति निरुक्तोपन्यासोऽप्रासङ्गिकः । 'प्सुः' इति शब्दोऽपि निघण्टौ रूपनामसु दृश्यते ॥ २७९. २८. **सहसावन्...नि पाहि**—ज्ञ-त१-२-य-मु । एतन्नास्ति इतरेषु । त्वमु त्वमेवावद्यात् पापात् नोऽस्मान्नि पाहि—मॅ ॥

[७. ५] २८०. २३. **तेजसा वा**—ज्ञ-*मॅ-मु । तेजसा—इतरेषु ॥ २८१. १. **असितवर्णाः**—ज्ञ-*मॅ-मु । असिक्तवर्णाः—इतरेषु ॥ २८१. १३. **शोचिषा नित्येन**—घ-ज्ञ-त१-२ । शोचिषा—त३-४-न-भ-श-मॅ । नित्येन शोचिषा—मु ॥ २८१. २०. **उषसाम् अह्नाम्**—ज्ञ-मॅ । एतदनन्तरं 'महांतं' इति पदं बहुषु लिखितपुस्तकेषु मु-पुस्तके च दृश्यते । 'महाम्' इति पदं स्यादिति भ्रान्त्या केनचित् तद्व्याख्यानत्वेन 'महांतं' इति लिखितं स्यात् । तथा चानन्तरमेव 'हरितः' इत्यस्य पुरस्तात् 'हरणात्' इति लिखितपुस्तकेषु दृश्यते ॥ २८१. २८. **असेवन्त हि**—*मॅ-मु । सेवंते हि—ख-ज्ञ-त४; सेवंत हि—घ-त१-२-३-श; सेवंतर्हि—ज्ञ-न ॥ २८२. ११. **प्रयच्छन्**—*मॅ । च यच्छन्—मु । वांच्छन्—ख-भ; यच्छन्—घ; वा यच्छन्—ज्ञ-त-न-श ॥

[७. ६] २८४. २३. **प्रार्थयमानाः**—ख-च-भ । प्रार्थ्यमानाः—य; प्रार्थमानाः—घ१-ज्ञ-त-न-श-मॅ-मु ॥ २८५. १. **आन्तरिक्षाणि**—*मॅ । अंतरिक्षाणि—ऽ मु ॥ २८५. ४. **सगरः समुद्रः**—ज्ञ-त१-२-श-मु-नि. १. ३. १४ । सगरं समुद्रः—ख-ज्ञ-त३-४-भ-मॅ । सागरं समुद्रः—न ॥

[७. ७] २८५. २४. **शब्दायमानः**—ऽ-मॅ-मु । 'शब्दाययमानः' इति भाव्यम् ॥ २८७.१. **प्र तिरन्त**—घ-*मॅ । च तिरंत—त१-मु । वातिरंत—ख-ज्ञ-त३-न-भ; चातिरंत—ज्ञ-त२-४ ॥

---

१. Preface to the 2nd Edition Vol. IV p. 184.

२. Preface to the 2nd Edition Vol. IV. p. 184.

२८७. २. **माषाणामभीयात्**। ऋ. सं. १. २०. ६. अत्र द्रष्टव्यम्। मानुषाणामभीयात्—§-मॅ-मु। यद्यपि लिखितपुस्तकेषु 'मानुषाणामभीयात्' इत्युपलभ्यते, तथापि 'माषाणामभीयात्' इत्येव भाष्यकाराणामभिप्रेतमासीदिति मॅक्समुल्लरमहाशयेन स्वकीयटिप्पण्यां लिखितम्॥

[७. ८] २८८. १५. **बृहद्भाः**। 'बृहत्। भाः' इति पदपाठः॥

[७. ९] २९०. १८. **संगन्ता**—मॅ। संगंतः (?) मु। संगता—ख-त३-न-भ; गंता—घ-ज्ञ-ज्ञ-त१-२-४-श॥

[७. १०] २९२. २२. **रयीणाम्**—घ-ज्ञ। रयीणां सूर्यस्य—मॅ-मु इतरेषु च॥ २९२. २३. **दूतः अभवत्**—घ-ज्ञ-त१-२-य। अभवत्—मॅ-मु इतरेषु च॥ **यस्मादूदूतोऽभवत्**—*मॅ-मु। यस्मादूतोभवः—ख; यस्मादूदूतोभवः—ज्ञ-त२-३-भ-श; तस्मादूतोभवः—ज्ञ-त४; यस्मादूदूतोभव—न। इयं श्रुतिः कुत्रत्येति न विज्ञायते॥ २९२. २४. **विशः**—*मॅ-मु। विश्वः—§॥

[७. ११] २९४. ५. **किमर्थमित्यत आह**—*मॅ-मु। किं-घ१; किंच—च; किमित्यत आह—इतरेषु॥

[७. १२] २९४. २४. **साह्वान्**—ख-च-ज्ञ-ज्ञ-त२-य-श। सह्वान्—घ१-त३-४-न-भ-मॅ-मु॥

[७. १४] २९६. २. **ब्राह्मणाः**—ज्ञ-श। ब्रह्मणा—त१-२-३-४-भ-मॅ-मु॥

[७. १५] २९७. ४. **भगिनो याज्या**—*मॅ-मु। भागयाज्या—ज्ञ-त१; भगीयाज्या—ज्ञ; भगियाज्या—त२-४-श॥ २९९. १७. **°प्राकारादिर्वा**—भ-*मॅ-मु। °प्रकारादिर्वा—ख-ज्ञ-त-न; °प्रकारादि वा—श॥

[७. १६] ३००. १३. **युज्यते**—ख-भ। अयुज्यत—मॅ-मु इतरेषु च॥ ३०१. ११. **कामयस्व**—*मॅ-मु। कामय च—ख; कामय त्वं—इतरेषु॥ ३०१. १९. **यः**—*मॅ-मु-×॥ ३०१. २७. **प्रियासः**—मॅ-मु। प्रियाश्च—ख-घ-ज्ञ-त१-२-३-४-न-भ-श१; प्रियाः—ज्ञ; प्रियासश्च—श२॥

[७. १८] ३०४. १६. **पञ्चविंशत्यृचम्**—श१-मॅ-मु। पंचविंशर्चे—इतरेषु। एतादृशोऽशुद्धः पाठः लिखितपुस्तकेषु बहुवारमुपलभ्यते॥ ३०४. १८. **त्वे ह यत्**—§-मॅ। त्वे ह—मु-अनु.॥ **चतस्रोऽन्त्या**—§—मॅ-मु। अंत्याश्चतस्रो—अनु.॥ ३०६. ३. **उत्सहमानम्**। उत्साहमानं—§-मॅ-मु। ऋ. सं. ७. १८. १६, १८. अत्र द्रष्टव्यम्॥ **बाधमानम्**—ज्ञ। बोधमानं—मॅ-मु इतरेषु च। 'बाधमानम्' इति स्यादिति मॅक्समुल्लरमहाशयेन संभावितम्॥ ३०६. ११. **जालनिहिता**—§। जले निहिता—मॅ-मु॥ ३०७. १२. **यथापूर्वम् अर्थम्**—ज्ञ-*मॅ-मु। यथापूर्वं मदर्थं—ख-श; यथापूर्वमर्थमित्—घ; यथापूर्व्यं मदर्थं—ज्ञ-त-न-भ॥ ३०७. १७. **सुतोकान्**—मॅ-मु। सतोकमानान्—ख; सुतोकमानान्—ज्ञ-त-न-भ श२; सुतुकमानान्—श१; सुष्वुत्यसहितान्—च॥ ३०८. ५-६. **सपत्नान्...युद्धे**—ज्ञ-त१-*मॅ-मु। एतन्नास्ति इतरलिखितपुस्तकेषु॥ ३०९. १. **दुवोयुवे**—§-मॅ-मु (? दुवोयवे)॥ ३०९. १०. **विश्वानि**—घ-ज्ञ-*मॅ। विश्वा विश्वानि—मु इतरेषु च॥ ३०९. २७. **अश्रीन्**—*मॅ-मु। अस्रीन्—घ; अस्रान्—इतरेषु॥ **वेश्यादेः कृत्यं सूच्यैवाकरोत्**—*मॅ-मु। वेश्यादेः कृत्यं सूच्यैव करोत्—ख; वेश्यादेः कृत्यसूत्यैवाकरोत्—ज्ञ-त३-श; वेश्यादेः कृत्यसूच्येवाकरोत्—त१-२-४-भ; वेश्यादेः कृत्यसूच्यैवाकरोत्—न। **वाश्यादेः कृत्यं सूच्यैवाकरोत्**—ज्ञ। अयमेव पाठः समीचीनः प्रतिभाति। 'वाशी ति तक्षणसाधनमायुधम्' (ऋ. भा. ५.५७.२)। 'पर्श्वादेः कृत्यं' इति

स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ३१०. ९. **वशीकरम्**—§-मॅ-मु (१ वशीकरणम्) ॥ **विन्द लभस्व यो भेदः**—*मॅ। विंद लभ यो भेदः–मु। विंद उभयोरभेदः–ख-त२-भ; विंद लब्धवानसि उभयोरभेदः–श; वद उभयोरभेदः–श्न-त१-३-४-न-श ॥ ३११. ९. **द्वितीयार्थे**—मॅ-मु-× ॥ ३११. ११. **पालकस्य**—ख-घ-भ-य-मु। पालस्य–मॅ-इतरेषु च ॥ **मृषन्त**—घ-श्न-त१-२-मु। मृषंति–मॅ इतरेषु च ॥ ३११. १४. **उपगच्छन्ति**—*मॅ-मु। अवगच्छंति–ख-न-भ; अपगच्छंति–श्न-त-श ॥ ३११. २०. **इन्द्रम्**—घ१-*-मॅ। इंद्रः–ख-च-श्न-त-न-भ-श२; 'इंद्रं' नास्ति–श; इंद्र–श१ ॥ ३११. २२. **अतदेवताकत्वात्**—श-भ-*मॅ। अतदेवताकरत्वात्–ख। अतस्तदेवताकत्वात्–मु इतरेषु च ॥

[७. १९] ३१३. २. **तृन्नन्तत्वात्**—§-मु। तृनंतत्वात्–मॅ। एवं ३१६ पृष्ठे २३, २६ पङ्क्तयोरपि ॥ ३१३. ९. **मर्यैः**—श-मॅ-मु। एतन्नास्ति–ख-त२-भ; **समर्यैः**–श्न-त४-न-श; समार्यै–त३ ॥

[७. २०] ३१६. अध्यायप्रारम्भे 'वागीशाद्याः' इति श्लोकः मॅक्समुल्लरमुद्रितपुस्तके दृश्यते। परंतु अस्माभिः लिखितपुस्तकेष्वनुपालम्भादुपेक्षितः। मु-पुस्तकेऽप्ययं नास्ति केवलमष्टक-प्रारम्भेऽयं श्लोको दृश्यते ॥ ३१६. ९. **मध्यंदिनः**। आश्वलायनश्रौतसूत्रेऽपि 'मध्यंदिनः' इत्येव पाठः। लिखितपुस्तकेषु बहुत्र 'माध्यंदिनः' इत्युपलभ्यते ॥ ३१८. ६. **प्रीणाति**—§-मॅ-मु। पृणाति–नि. ३. २० ॥ ३१८. १४. **यः**—*मॅ-मु- ॥ ३१८. २७. **वस्वी षु**। भाष्यकारैः 'वस्वीषु' इत्येकं सप्तम्यन्तं पदं कृत्वा व्याख्यातमनन्तरं पदपाठानुसारेण 'वस्वी सु' इति भिन्ने पदे कृत्वा व्याख्यानान्तरं कृतम् ॥

[७. २१] ३१९. २५. **गृहमध्यमग्नावा**—मॅ-मु। 'गृहमध्यमग्नौ वा' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ३२०. २०. **उत्सहेत**–*मॅ-मु। उत्सहेच्च–ख; उत्सहे च–घ-श्न-त१-२-३-४-न-भ-श; उत्सहते–श ॥ **दीव्यन्ति**—श-*मॅ-मु। दीव्यंत इति–ख-घ-त-श; दिव्यंत–श्न; दीप्यंते–न-भ ॥ ३२०. २१. **क्रीडन्त इति**—§-मॅ-मु। 'क्रीडन्तीति' इति भाव्यम्। अयं धातुः परस्मैपदी ॥

[७. २२] ३२२. २६. **अनुगुणः**—*मॅ। गुणः–§-मु ॥ ३२३. २९. **ह्वयति स्तौति**—*मॅ। स्तौति ह्वयति–ख-त३-न-भ-श; आह्वयति–घ; स्तौति आह्वयति–श-त१-२-मु; स्तौति–श्न; स्तौव ह्वयति–त४ ॥

[७. २३] ३२५. ९. **रुन्धन्तीति**—ख-श-श्न-त१-२-४-भ-श। संरुंधंतीति–त३-न-मॅ-मु ॥ ३२५. ११. **नहि चिकिते न ज्ञायते**—घ-श-*मॅ। नहि चिकिते ज्ञायते–ख-भ-मु। चिकिते ज्ञायते–श्न-त१-२-३-४-न-श ॥ ३२५. १८. **उप अस्थुः**—च-श-*मॅ-मु। उपस्थुः–ख-घ१-त१-२-४-भ; उपतस्थुः–श्न-त३-श ॥ ३२६. १२. **वज्रकल्पबाहुम्**—श-*मॅ-मु। वज्रकल्पनाहं–श्न-त१-३-४-न-भ; वज्रकल्पनार्हं–त२-श ॥

[७. २४] ३२६. २५. **मादयस्व**—*मॅ-मु। मादय–§ ॥ ३२७. ११. **इदं बर्हिरिमम्**—श-*मॅ-मु। **इदं बर्हिरिदं**–ख-घ-श्न-त३-न-भ-श; इंद्रं बर्हिरिदं–त१-२-४ ॥

[७. २६] ३२९. २९. **नवमम्**—मॅ-मु । दशमं–§ । एतादृशी गणनाशुद्धिः लिखितपुस्तकेषु क्वचिदुपलभ्यते ॥ ३३०. १७. **हवन्ते**—श-*मॅ-मु । वहंते–ख-घ-झ-त३-४-न-भ-श; हवते वहंते–त१-२ ॥ ३३०. २३. **अपि अन्या अन्यानि**—*मॅ । अन्या अन्यान्यपि–मु । अन्या अन्यानि–ख-घ-झ-भ; अन्याप्यन्यानि–श-त१-२-४; अन्याप्यन्या अन्यानि-त३-न-श ॥

[७. २७] ३३३. २. **मंहनीयाय**—§-मु । 'धनाय' इति विशेष्यमध्याहर्तव्यम् । मंहनीयायै–*मॅ । 'मंहनीयाय दानाय' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥

[७. २८] ३३३. ५. **पञ्चमत्वेन**—मॅ-मु; श-त१-वर्जितेषु लिखितपुस्तकेषु च । पंचमेहनि–श-त१ (प्रान्ते[1]) । 'चतुर्थत्वेन' इति भाव्यम् । उत्तरसूक्ते च 'महाव्रते निष्केवल्ये पञ्चमत्वेनास्य सूक्तस्य विनियोगः' इत्यप्यधिकं वक्तव्यम् । 'आ ते महः' इति सूक्तस्य (७. २५) प्रस्तावना द्रष्टव्या ॥ ३३३. २५. **न** । न व्याख्यातम् । नृन्न स्तोतृनिव–मु ॥ ३३४. १८. **प्रायच्छत्**—*मॅ-मु । प्रयच्छत्–ख-श-न-भ; प्रयच्छतु–घ१-झ; प्रयच्छेत्–च-त१-२-३-४-श ॥

[७. ३०] ३३६. २२. **सुहन्तुना**—श । सुहंतुनाम–इतरेषु । सुहंतुनाम्ना–मॅ-मु । ऋ. सं. ७. १९. ४. अत्र द्रष्टव्यम् । मॅक्समुल्लरमहाशयेन स्वकीयटिप्पण्यां 'सुहन्तुना' इत्येव संभावितम् ॥ ३३६. २८. **तदा**—थ-*मॅ-मु । तथा– इतरलिखितपुस्तकेषु ॥

[७. ३१] ३३७. १४. **गायत्रम्**—*मॅ । त्रैष्टुभं–§-मु ॥ ३३७. २०. **आहवनीयः**—§ मॅ-मु । 'आवपनीयः' इति भाव्यम् ॥ **तदर्थाः**—*मॅ-मु । तदर्थ–ख-भ; तदर्था–झ-त-न-श ॥ ३३९. ४. **व्याप्नुवती**—घ-न-श२; व्याप्नुवंती–ख-झ-त-भ-श१-मॅ-मु ॥ ३४०. २. **स्तोतॄणाम्**—श-श१ । स्तोत्राणां–ख-झ-त३; स्तोत्रीणां–त१-२-४-न-श२ । स्तोत्राणि–*मॅ-मु ॥ **शत्रून्**—श । शत्रूणां–मॅ-मु-इतरेषु च ॥

[७. ३२] ३४०. १६. **प्रगाथादनन्तरम्**—श-*मॅ-मु । प्रगाथानंतरं–इतरेषु ॥ ३४०. १७. **मरुत्वतीया ऊर्ध्वम्**—श-त२-भ-*मॅ । मरुत्वतीयादूर्ध्वं–ख-त४-मु । मरुत्वतीयमूर्ध्वं–त१; मरुत्वतीयादूर्ध्वा–झ-त३-श ॥ ३४०. २१. **कस्तमिन्द्रेति**—मॅ-मु । अच्छावाकस्तमिंद्रेति–§ ॥ ३४०. २८. **तरणिरित्सिषासति**—मॅ । तरणिरित्सिषासतीति प्रगाथौ स्तोत्रियानुरूपौ–§-मु ॥ ३४०. ३०. **प्रगाथौ**—*मॅ-आश्व. श्रौ.; रथंतरस्य–ख । 'प्रगाथौ' नास्ति–झ-त३-न-भ-श-मु ॥ ३४१. ७. **त्वाम्**—श; त्वया–मॅ-मु इतरेषु च । 'त्वाम्' इति समीचीनमिति मॅक्समुल्लरमहाशयेनोक्तम् ॥ ३४१. २७. **सुता बभूवुः**—श-*मॅ-मु । सुषुवः–ख; अभिषुतवंतः–घ; सबभूः–झ; सुबभूः–त२-३-४-न-श२; सुषुवतुः–भ; अभिषुता भवन्–य; सुबभूवुः–श१ ॥ ३४३. १. **अभिषुणुत**—मॅ-मु । अभिषुत–§ ॥

[७. ३३] ३४८. २१. **चूडाकर्मणि दक्षिणतो वसिष्ठानाम्** । इदं कृत्यमिति न ज्ञायते ॥ ३५०. २५. **दुर्ज्ञानान्**–मु । दुर्ज्ञानात्–घ-झ-त-न-श-मॅ ॥ ३५१. ५–८. **हे वसिष्ठाः...न शक्यः**—त१-२-मॅ जोधपूर-लिखितपुस्तके च । मु-पुस्तके 'गंभीरः' इति नास्ति 'अन्येन अन्वेतवे' इत्येतयोश्च मध्ये 'तव महिमा' इत्यधिकमस्ति । हे वसिष्ठाः एषां वो युष्माकं स्तोमोऽपि वातस्येव

---

१. Margin

प्रजवः यथा वातस्य (वातस्येव–श) प्रवेगो नान्वेतुमशक्यः (अन्येनान्वेतुं न शक्यः–श) तद्वदन्येनान्वेतवे अन्वेतुं न शक्यः—ख-त४-श; हे वसिष्ठाः एषां वो युष्माकं स्तोमोपि वातस्येव प्रजवः। यथा वातस्य प्रवेगः अन्येनान्वेतुं न शक्यते तद्वदन्येनान्वेतवे अन्वेतुं न शक्यः। किंच युष्माकं वक्षथः तेजः सूर्यस्येव सूर्यज्योतिरिव तथा युष्माकं महिमा समुद्रस्येव गभीरः गंभीर इव–घ॥ ३५१. २८-२९. **उतापि च...आजहार**—ऽ-मॅ-मु। अनन्वितार्थकमिदं वाक्यम्॥ ३५२. ५. **मित्रावरुणयोः**—घ-श-ञ-भ-मु। अयोः—ख; मैत्रावरुणयोः—त४-श; मित्रवरुणयोः—त३-न-मॅ॥ ३५२. ८. **अहंभुवा युक्तम्**—श-त२-श१-मॅ-मु। 'स्वयंभुवा युक्तम्' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति॥ ३५२. १०. **तत्कुम्भे**—न-श-*मॅ-मु। तं कुंभे–ख-भ; तत्कुंभ–ञ; तत्कुंभे–ञ-त१-२-३; नकुंभे–त४-न॥ ३५२. ११. **पतितं रेतः कलशे च**—ऽ-मॅ-मु। पतिते शुक्रे कलशेऽथ–बृहद्दे.॥ ३५२. १३. **महातपाः**—ऽ-मॅ-मु। महायशाः–बृहद्दे.॥ ३५२. १४. **इत्यभिधानं च**—मॅ-मु। इत्यभिधानं तु– बृहद्दे.॥ ३५२. १५. **सर्वतः पुष्करे तं हि**–ऽ-मॅ-मु। सर्वत्र पुष्करं तत्र–बृहद्दे.॥

[७. ३४] ३५३. १९-२०. **षोडशिनि...द्विपदा इति**—ऽ-मॅ-मु। मध्ये किंचिद्वृतमिति प्रतिभाति। अत्र एवं भाव्यं—'षोडशिनि आ धूर्ष्वस्मा इति द्विपदा। सूत्रितं च–आ धूर्ष्वस्मा इति द्विपदा इति'॥ ३५४. १. **पूर्वस्यामिन्द्रस्य**—*मॅ-मु। पूर्वस्यामि—ख१ञ-त१-३-४-न-भ; पूर्वस्यापि—ज-त२-श; पूर्वस्यामचि (१ °मृचि)–ञ। 'पूर्वस्यामिदमः' इति पीटर्सनमहाशयस्वीकृतः[1] पाठो युक्ततर इति मॅक्समुल्लरमहाशयेनोक्तम्[2]। परंतु 'पूर्वस्यामिन्द्रस्य' इत्येव समीचीनः पाठ इत्यस्माकं प्रतिभाति। पूर्वप्रकृतार्थपरामर्शित्वे हि 'अस्मै' इत्यस्यानुदात्तत्वं भवति। न हि सर्वानुदात्तत्वे इदमः (इदंशब्दस्य) प्रकृतत्वं हेतुः स्यात्॥ ३५५. १९. **अस्मान्**—*मॅ-मु। नोस्मान्–ऽ॥ ३५६. ३. **स्तोतारः**—ञ। स्तोतः–मॅ-मु इतरेषु च॥ ३५६. २१. **प्रीयमाणाः**—मु। प्रियमाणाः–ऽ-मॅ। ऋ. सं. ७. ६६. १९. भाष्ये द्रष्टव्यम्॥ ३५७. २१. **अव्ययम्**—ञ-त२। अव्ययः–मॅ-मु इतरलिखितपुस्तकेषु च॥ ३५८. ५. **अनु जिहीताम्**—*मॅ। अनु जीहीतां–ञ; अनु जिहातां–मु इतरेषु च॥ ३५८. १३. **अस्मदीयम्**—ञ। ऋ. सं. ७. ५६. २५. अत्र द्रष्टव्यम्। अस्मभ्यं– मॅ-मु इतरेषु च॥

[७. ३५] ३५८. १९. **एव -- सु**—ञ-त३-४-न-य-मॅ। एवतमस्तु–ख१-भ; एवमुक्तस्तु–ज; एवमेतासु–ञ-त१-२-मु जोधपूर-लिखितपुस्तके च; एवमु–श॥

[७. ३६] ३६३. १६. **नान्यस्य कस्यचित्**—ञ-थ। नान्यस्य चित्–ञ-त२-३-४-न-श-मॅ-मु। नान्यचित्–त१। 'नान्यस्य कस्यचित्' इति स्यादिति मॅक्समुल्लरमहाशयेन संभावितम्॥ ३६४. १४. **युञ्ज्यात्**—*मॅ-मु। युंजान्–ख-ञ-त३-न-भ-श; युंजन्–घ; युनक्ति–ञ; युजान्–त१-२-४॥ ३६४. २३. **पूजयन्ति**—श१। पूजयंतु–मॅ-मु इतरलिखितपुस्तकेषु च॥

[७. ३७] ३६७. १५. **विवेषः**—घ-*मॅ। विवेष–मु इतरेषु च॥ ३६७. २८. **निवहेत्**—*मॅ-मु। न्यवहेत्–ख-घ-ञ-त१-२-३-४-भ-श; न्विवहेत्–ञ; न्युवहेत्–न॥ ३६८. ३. **ईशितव्या स्वभूता**—ऽ-मु। ईशितव्यास्वभूता–मॅ (–अस्वभूता?)॥

---

1. Handbook to Ṛgveda Maṇḍala VII pp. 11-12
2. Preface to the 2nd Edition Vol. IV p. 185.

[७. ३९] ३७२. १. **पृथिव्यां भवाः**—*मॅ । पृथिव्याः म–ख१; पृथिव्याः–घ-श१; म–ज; पृथिव्यासा–घ-त३-४-न-श२; पृथिव्याः सा–त१-२; पृथिव्याम–भ । पृथिव्यां–मु ॥ ३७२. १२. **आक्रामन्ति**—मॅ-मु । आक्रमंति-§ ॥ ३७२. १९. **गरणीयान्**—*मॅ । गरीयां–ख-ज्ञ-त२-३-न-भ-श । गरीयान्–घ-मु । गिरा–ज्ञ; गिरीया–त१-४ ॥ ३७३. ९–१०. **सर्वे देवाः...अस्मिन् सूक्ते**—ज्ञ-श । नः अस्मभ्यमर्कमर्चनीयमुपमं सर्वोत्कृष्टमन्नं यच्छंतु चंद्रा आह्लादकाः–घ; आह्लादयितारो देवा नोस्मभ्यं उपमं प्राप्तलक्ष्मीकं अर्कमर्चनीयं धनं यच्छन्तु ददतु सूक्ते–ज्ञ; 'चंद्राः.....ददतु' नास्ति–त१-२-४-य; 'सर्वे देवाः.....देवास्ते' नास्ति–ख-त३-न-भ । देवा नोऽस्मभ्यमर्कमर्चनीयमन्नमुपमं सर्वोत्कृष्टं यच्छंतु ददतु सूक्ते–*मॅ-मु । (अयमंशः मॅक्समुल्लरमहाशयेन ऋ. सं. ७. ४०. ७. एतन्मन्त्रभाष्यानुसारेण निबद्धः) ॥

[७. ४०] ३७३. २०. **युष्मान्**—*मॅ-मु । युष्मदीयान्–§ ॥

[७. ४१] ३७६. १ **प्रातःऽजितम्** । भाष्यकारैः 'प्रातः जितम्' इति विभज्य व्याख्यातम् ॥ ३७६. ६. **यम्**—घ-*मॅ-मु । इतरेषु नास्ति ॥ ३७६. १५. **फलयुक्ताम्**—ज्ञ । सफलयुक्तां–मॅ-मु इतरेषु च ॥ ३७७. १. **वा**—*मॅ-मु–× । 'धनेन' इति मु-पुस्तके नास्ति । 'भगेन देवेन वयं भगवन्तः स्याम' इति पाठो युक्त इति मॅक्समुल्लरमहाशयः[1] अभिप्रैति ॥

[७. ४२] ३७८. ५. **सुते**—। 'सु ते' इति भिन्ने पदे भाष्यकारैः कृते ॥ ३७८. ६. **जनिमानि सुत्तः** । भाष्यकारैः 'जनिमा निसत्तः' इति पदच्छेदः कृतः ॥

[७. ४३] ३८०. ५. **साधकम्**—*मॅ । साधुकं–§-मु ॥ ३८०. १२. **जननीम्**—*मॅ-मु । जननीं यं–श; जननीयं–इतरेषु । मातरम् इति षष्ठ्यर्थे द्वितीया स्यात् । मातुर्भर्तव्याः पुत्रा इव अस्माकं भरणीया इत्याद्यर्थो ज्ञेयः ॥ **अस्माकम्**—*मॅ-मु । अस्मात्–ख१-त१; अस्मान्–इतरेषु ॥ ३८०. १५. **जुहूः**—त२-श१; जहुः–त४-न । जुहुः–मॅ-मु इतरेषु च ॥ ३८०. २६. **यूयं---आगन्तन**—§-मॅ । यूयं यतिष्ठ आ गंतन–मु ॥

[७. ४४] ३८१. १४. **अश्विनौ देवौ**—ज्ञ-ज्ञ-त१-२-४-य-श-मु । अश्विनौ–घ । अश्विदेवौ–ख-त३-न-मॅ ॥

[७. ४५] ३८२. २६. **आ देवो यातु-----इत्येषा**—§-मॅ । आ देवो यात्वित्येषा–मु । 'आ देवो यातु प्र द्यावेति (आश्व. श्रौ. ८. ८) इति । सावित्रे पशौ आ देवो यातु इत्येषा' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ 'आ देवो यातु प्र द्यावेति वासिष्ठम्' इति सूत्रम् (८. ८) । ऋ. सं. ७. ५३ प्रस्तावनायां द्रष्टव्यम् ॥

[७. ४६] ३८४. २२. **भवः** । अस्मादनन्तरं 'क्षम्यः' इति शब्दो गलितः स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥

[७. ४७] ३८५. २२. **अभिषवणपवनादिभिः**—ज्ञ । °वचनादिभिः–ज्ञ-त४-मॅ-मु । °सेचनादिभिः–श१; °एचनादिभिः–श२ ॥ **समस्कुर्वत अद्य**—*मॅ-मु । समस्कुर्वत अथ–ज्ञ-श; सम्यक्कुर्वत अथ–ज्ञ-त१-२-४ ॥

---

[1] Preface to the 2nd Edition Vol. iv. p. 185.

[७. ४८] ३८७. २. **अस्मदभिमुखाः सन्तः**—श-झ-त२-४-य-श-मु। अस्मदभिमुखाः—मॅ इतरेषु च ॥ **मनुष्यहितं रथम्**—*मॅ-मु। नराईं रथं—घ; मनुष्यरथं—इतरेषु ॥ ३८७. ८. **उरु भवन्तीत्यृभवः**—*मॅ-मु। निरुभवन् ऋभवः—घ१; उरु भवन् ऋभव—च; उरु भवंन्यभवः—न; उरु भवंत्यृभवः—इतरेषु। 'उरु भवंतीत्यृभवः व्यत्ययेनैकवचनं ऋभवः संतः' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ३८७. २२. **मेथतेः**—*मॅ। मिथतेः—मु; मिम्नातेः—ख-त१-२-३-४-न-भ-श२; मिम्नतेः—झ; मिश्रातेः—श१; मिप्रातेः—श; मित्थातेः—थ। 'मिथतेः' इति सम्यगिति मॅक्समुल्लरमहाशयेनोक्तम्[1]। मिथधातुः तुदादावपि पठितः स्यादिति मॅक्समुल्लरमहाशयः संभावयति। परंतु पाणिनीयधातुपाठे तुदादावयं धातुर्न दृश्यते। ऋ. सं. ७. ९३. ५. अत्र 'मेथतिः' इति दृश्यते ॥

[७. ४९] ३८८. १७. **निर्वृत्ताः**—ख-मु। निचृताः—घ। निवृत्ताः—मॅ इतरेषु च ॥

[७. ५०] ३८९. ७. **वैश्वदेवी**—श-*मॅ-मु। वैश्वानरी—इतरेषु ॥ ३९०. १९. **शिमिर्वधकर्मा अहिंसाप्रदाः**—ख१-भ-श१-*मॅ-मु। शमिर्वधनकर्मा असाप्रा—झ-त१-४; शमिवर्धनकामा असाप्रदा—झ; शिमिर्वधनकर्मा अहिंसाप्रदा—त३-न-श२; शिमिर्वधकर्मा अहिंसाप्रदा—थ ॥

[७. ५१] ३९०. २४. **आदित्यग्रहस्यैषानुवाक्या**—ख-भ-मु। °स्यैवानुवाक्या—मॅ इतरेषु च ॥ ३९०. २५. **यक्षदादित्यान्**—*मॅ-मु। यक्षदादित्यानां—§ ॥

[७. ५५] ३९४. २७. **पञ्चम्याद्याश्चतस्रो...उपरिष्टाद्बृहत्यः**—*मॅ-मु। द्वितीयाद्यास्तिस्र उपरिष्टाद्बृहत्यः पंचम्याद्यास्तिस्रोनुष्टुभः (°श्चतस्रो°—न-श)-ख-न-भ-श; द्वितीयाद्याश्चतस्रोनुष्टुभः पंचम्याद्यास्तिस्र उपरिष्टाद्बृहत्यः—झ-त ॥ ३९४. २८. **तल्लक्षणयोगात्**—*मॅ-मु। स्वलक्षण°—ख; स्वश्वलक्षण°—झ; चलक्षण°—श-त१-२; श्वलक्षण°—न-भ ॥ ३९५.१. **सान्त्वयित्वा ह्यसूषुपत्**—*मॅ। सांत्वयित्वा ह्यसुष्वपत्—मु। सांतयित्वा प्रसुषयत् (प्रसूषपत्-भ)—ख-भ; सांतयित्वा ह्यसूषयत्—झ-झ-त१-२; सांतयित्वा ह्यसूषपत्—त३-न-श२; सांतयित्वा ह्यसूषुपत्—श१ ॥ ३९५. २. **प्रस्वापयामास**—झ-भ-श१। प्रकृतिस्थापयामास—ख१। प्रस्थापयामास—मॅ-मु इतरेषु च ॥ ३९५. ४. **गृहमेत्य तु**—ख-घ-झ-त२-३-४-न-भ-अनु. भा. ७. ५५। गृहमेत्या नु—च; गृहमध्य तु—श। गृहमेत्य नु—श-मॅ-मु ॥ बृहद्देवतागतः पाठ एवं विद्यते—वरुणस्य गृहान् रात्रौ वसिष्ठः स्वप्न आचरत् ॥ प्राविवेशाथ तं तत्र श्वा नदन्नभ्यधावत। क्रंदंतं सारमेयं स धावंतं दृष्टमुद्यतम् ॥ यदर्जुनेति च द्वाभ्यां सांत्वयित्वा व्यसुष्वपत्। स तं प्रस्वापयामास जनमन्यं च वारुणम् ॥ **यदर्जुनेति**—§-मॅ-मु। यदर्जुनादि—अनु. भा. ॥ ३९५. ९. **कामयते तत्तद्देवता विशति**—भ। कामयते तद्देवता भवति—ख; कामयते तत्तद्देवा विशंति—झ-त१-श१; कामयते तत्तदेवा विशति—झ-श२; कामयते तत्तद्देवा विशति—त२-३-४-न। कामयते तत्तद्देवता भवति—निरु.। कामयते तत्तद्देवा विशंति—मॅ-मु ॥

[७. ५६] ३९८. १९. **कम्पयितु(?तृ)वेगः**। कंपयितुवेगः—मॅ। 'कम्पयितुः' अथवा 'कम्पयिता' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति। कंपयितुर्वेगः—मु। ऋ. सं. १. ७९. १; १७४. ९; १०. ८९. ५ अत्र 'धुनिः' इत्यस्य 'कम्पयिता' इति व्याख्यानं कृतमस्ति ॥ ख१-झ१-त३-४-न-भ-य-श एतेषु लिखितपुस्तकेषु नवमदशममन्त्रयोर्भाष्यं नास्ति। श-झ२-त१-२-

1. Preface to the 2nd Edition Vol. IV. p. 177.

मु-पुस्तकेषु नवममन्त्रस्य भाष्यमेवं विद्यते–' हे मरुतः सनेमि सनातनं दिवुं दीप्यमानं ऋष्टयाख्यं युष्मदीयमायुधं अस्मत्तः (अस्मदस्मत्तः–मु) सकाशात् युयोत पृथक्कुरुत । तथा युष्मदीया दुर्मतिः निग्रहबुद्धिः नोस्मान् इहास्मिन् लोके मा प्रणक् मा प्राप्नोत् ' । एतेष्वेव दशममन्त्रभाष्यमेवमस्ति–' हे मरुतः तुराणां यजमानार्थं त्वरया आगच्छतां वो युष्माकं नाम आहुवे आह्वयामि यत् येनाह्वानेन प्रियाः स्नेहयुक्ताः वावशानाः अस्माकमाह्वानं कृतमिति शब्दायमानाश्च संतः तृपत् संतुष्टाः भविष्यथ तदाह्वानमिति ' ॥ घ-ज-पुस्तकयोर्नवममन्त्रस्य भाष्यमेवम्–' सनेमि पुराणं परंपरागतं दिवुं दीप्यमानं वर्धमानमित्यर्थः वः युष्मत्सख्यं अस्मदस्मत्तः मा युयोत मा पृथक्कुरुत । किंच इह युष्मत्सख्ये नोस्मान् दुर्मतिः मा प्रणक् न प्राप्नोतु ' । मॅक्समुल्लरमुद्रितपुस्तकगतमेतन्मन्त्रद्वयभाष्यमेवास्माभिः समावेशितम् । एकस्य (C. Colebr·) लिखितपुस्तकस्य प्रान्ते मॅक्समुल्लरमहाशयेन तदुपलब्धम् ॥ ३९९. १७. **वक्षःऽसु रुक्माः** । भाष्यकारैः ' वक्षः सुरुक्माः ' इति पदच्छेदः कृतः ॥ ४००. १. **प्र**—मॅ-मु-× ॥ ४००. ९. **हविष्मति**—मॅ-मु । हविर्मति–ख-त । हविर्मनि–ज्ञ-न-भ-श ॥ ४०१. ११. **त्वदीयम्** । 'युष्मदीयम्' इति भाव्यम् ॥ ४०१. १९. **क्षिप्रवन्तम्**—ऽ-मॅ-मु । भावप्रधानो निर्देशः । शैघ्र्यवन्तमित्यर्थः ॥ ४०२. ६. **परित्यक्त्वा** । ' परित्यज्य ' इति भाव्यम् ॥ ४०२. ९. **शोभनजनम्**—ऽ-मॅ-मु । ' शोभनजननम् ' इति स्यात् ॥

[७. ५७] ४०४. ८. **आभरणैरायुधैः**—*मॅ । आयुधैराभरणैः–ऽ-मु ॥ ४०४. १९. **हि प्रमादः**–*मॅ-मु । क्षिप्रमार्गः–ख; क्षिप्रयागः–ज; क्षिप्रमदः–इतरेषु ॥

[७. ५८] ४०७. २. **नमन्ताम्**—*मॅ-मु । नवतां–ख; नवंतां–इतरेषु ॥

[७. ५९] ४०८. १७. **न सहते**—ऽ-मॅ । ' सहते ' इति मु-पुस्तकस्थः पाठः समीचीनतर इति मॅक्समुल्लरमहाशयेन[1] लिखितम् ॥ ४०९. १३. **निषीदतु**—*मॅ-मु । निषेदतु–ऽ ॥ ४१०. १३. **यूयम्**—ऽ-मॅ । ' वः युष्मभ्यम् ' इति भाव्यम् । वः यूयं(!)–मु ॥ ४१०. १७-२९. **अत्र शौनकः...वावैतदाह इति**—ज्ञ-त१-२-मॅ-मु । ' त्रयाणां...वावैतदाह ' इति ख-ज्ञ-त३-४-न-भ-श-पुस्तकेषु नास्ति । घ-पुस्तके–' त्र्यंबकं त्रिलोकस्य मातृभूतं पालकमित्यर्थः सुगंधिं सुष्ठु व्यापकं पुष्टिवर्धनं यजमानस्य बलं वर्धयितारं एतादृशं रुद्रं यजामहे वयं यजमानऋत्विजः हविर्भिः पूजयामहे । किमर्थं । मृत्योः सकाशात् मुक्षीय मुंचेय । मामृतात् अमृतात् मोक्षात् नैव मुक्षीय इत्येतदर्थं । दृष्टांतः । बंधनाद्वृंतादुर्वारुकमिव उर्वारुकफलमिव तद्यथा ईषत्प्रयत्नेन मुंचत इति तद्वत् ' । त१-प्रान्तगतः पाठः–' वयं त्र्यंबकं त्रिलोचनं यजामहे । किंलक्षणं । सुगंधिं शोभनगंधोपेतं पुष्टिवर्धनं पुष्टेः पोषकं । प्रत्यक्षस्तुतिः । हे रुद्र मा मां मृतान्मरणान्मुक्षीय मां मोचय । कस्मात् कमिव । बंधनाद्वृंतादुर्वारुकमिव ' ॥ ४१०. २८. **चतुर्थपादार्थे मन्त्रस्य** । चतुर्थपादार्थमंत्रस्य–ज्ञ-त१-२-मॅ-मु ॥

[७. ६०] ४११. १५. **अदीन देव**—*मॅ-मु । अदीन देव वयं–ऽ ॥ ४११. २७. **वृजिना वृजिनानि**—घ१-ज्ञ-ञ-त१-श-मु । वृजिनानि–ख-च-त२-३-४-न-भ-मॅ ॥ ४१२. २. **एतत्संख्याकान्**—ख-ञ-श१ । ते तत्संख्याकान्–त३-भ-श२ । तत्संख्याकान्–त२-४-मॅ-मु ॥ ४१२. ६. **तदवान्तरगोव्यक्तिम्**—श१-*मॅ । तदवांतरगोयुक्तिं–मु । तदेवांतरेणाव्यक्तिं–ख-त३-भ; तदवांतरगोव्यक्तं–ज्ञ-त१-२-४; तदवीतरगोव्यक्तिं–ञ; तदवांतरेणाव्यक्ति–न; तदवांतर-

1. Preface to the 2nd Edition Vol. IV. p. 177.

गोव्यक्ति–श२ ॥ ४१२. ३०. **ऋतुं कर्तारम्**—ऋ-श२-*मॅ-मु । कृतं कर्तारं–त४; कर्तारं–इतरेषु ॥ ४१३. १० **व्यापितस्य** (?)–श–वर्जेषु लिखितपुस्तकेषु मॅ-पुस्तके च । व्यापितस्य–श-मु । 'वितस्य' इति स्यादिति प्रतिभाति । ऋ. सं. ८. ८३. ३; निरु. ६. २० अत्र द्रष्टव्यम् ॥ ४१४. १८. **उरुक्षयाय** । पदकाराः 'उरु क्षयाय' इति भिन्ने पदे पठन्ति ॥ ४१४. २५. **दुःखेन**—*मॅ-मु । दुःखानि–§ ॥

[७. ६१] ४१५. ८. **कृत्वा न** । भाष्ये न व्याख्यातम् ॥ ४१५. १३ **यत् कर्म**—मॅ घ-वर्जेषु लिखितपुस्तकेषु च । शोभनकर्माणौ कृत्वा समर्थेन कर्मणा–घ । यत् कृत्वा न कर्म–मु । 'यत्कर्मणा' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ४१५. २४. **ऋधग्यतः...विवेकात्**—*मॅ । ऋधक् सत्येन यतो विवेकात्–मु । ऋधक्सत्यो न यतः विवेकान्–ख१; ऋधग्यतः ऋधक्सत्यो न यतः विवेकान्–थ; ऋधग्यत सत्यानयतो–घ; ऋधक् सत्यान् यतः विवेकात्–ऋ-न-श; ऋधक् यत् ऋधक् सत्यानयतः–त३-भ ॥ ४१६. ७. **वां युवाभ्याम्**—मॅ-मु । वां युवां–घ; युवां–इतरेषु ॥ ४१६. १०. **वां युवाभ्याम्**—*मॅ-मु बहुषु लिखितपुस्तकेषु च । युवाभ्यां–ख-भ; वां युवां–त१ । सर्वेषु लिखितपुस्तकेषु 'युवां' इति विद्यते इति मॅक्समुल्लरमहाशयेनोक्तम् । वस्तुतः ७ पङ्क्तौ विद्यमानस्य 'युवाभ्याम्' इत्यस्य स्थाने 'युवां' इति सर्वेषु लिखितपुस्तकेषूपलभ्यते ॥ ४१६. ११-१२. **नाभूवन्न भवन्ति**—*मॅ-मु । अभूवन् भवति– घ-ऋ; भूवन् भवंति–इतरेषु ॥

[७. ६२] ४१७. ९ **ऋत्वा...कृतः**—च-ऋ-*मॅ-मु । कर्ता(कृत्वा–ख१; कर्त्वा–ऋ-त४; ऋत्वी-थ) सर्वस्य कर्ता कृतः–ख१-ऋ-त४-थ-न-भ-श; कर्ता स देवस्य कर्ता ततः–त१-२ ॥ ४१७. १८. **उद्गाः**—घ-*मॅ-मु । उदगात्–ख; उद्गाः उदगाः–ऋ-य-श; उदगाः–त-न-भ ॥ ४१७.२६. **शुचेर्दुःखस्य**—§-मॅ-मु । 'शुचो दुःखस्य' इति भाव्यम् । ऋ. सं. ६. ३. ३; ४९. ८ इत्यादिषु द्रष्टव्यम् ॥ ४१८. १६. **युवाभ्याम्** ?—§-मॅ-मु । 'युवयोः' इति भाव्यम् ॥ ४१८. २०. **विश्रुतम्**—§-मॅ-मु । 'विश्रुतान्' इति भाव्यम् ॥

[७. ६४] ४२१. ६. **यज्ञस्य वा**—ख-भ । यज्ञस्य–मॅ-मु इतरेषु च ॥ ४२१. १०. **पुष्टिम्**—§-मॅ-मु । 'वृष्टिम्' इति पदपाठः ॥ **तत्साधिकाम्**—मॅ । तत्साधकां–§-मु ॥ ४२१. २५. **स्तोमेन**—मॅ-मु । स्तोमेति–ख-ऋ-त-न-भ-श । स्तौमिति–घ ॥ ४२१. २७. **जनम्**—§-मॅ-मु । एतस्मात्पूर्वं 'तम्' इति पदमावश्यकमिति मॅक्समुल्लरमहाशयः ॥

[७. ६५] ४२२. २४. **पुत्रादिरूपाः**—*मॅ-मु । पुत्रादिरूपा–§ ॥

[७. ६६] ४२३. २७. **आद्यन्तौ**—*मॅ । अद्यतौ–न । आद्यंतौ–मु इतरेषु च ॥ ४२४. ५ **अहोरात्रे**—ख-भ-तै.सं. । अहोरात्रं–मॅ-मु इतरलिखितपुस्तकेषु च ॥ ४२४. १५. **स्तयो गृहाः**—*मॅ । सूर्यो ग्रहाः–ख-भ; स्तिया ग्रहाः–घ; स्तयो ग्रहाः–त-न-श२-मु; स्तियो ग्रहाः–श१ । ऋ. सं. ७. १९. ११; १०. ६९. ४. अत्र द्रष्टव्यम् ॥ ४२४. १७. **फलवन्ति**—ख-भ । सफलवंति–मॅ-मु इतरेषु च ॥ ४२५. १८. **विप्राः** । 'विप्रा' इति विसर्गरहितः पदपाठः ॥ **इयमेव**—त१-भ-श-मु । इयं मम–ख; इयं मे–घ; इयमव–ऋ; इयं मेव–त२-४; इयं मे च–ऋ-त३-न-मॅ ॥ ४२६. ४. **अदनसाधनः**—§-मॅ-मु । 'अदनसाधनम्' इति सम्यक् ॥ ४२६. ५. **क्षित्यादीनि**—§-मॅ-मु । एतत्पदमनावश्यकम् ॥ ४२७. १८-१९. **सूर्यं वहन्ती°**—*मॅ-मु ।

अयं वहंती°–ख-ज्ञ-त२-३-४-न-भ-श; अश्वं वहंती°–ज्ञ-त१(प्रान्ते); अश्वो वहंती°–घ ॥ ४२८. १६. **प्रीयमाणौ**—ज्ञ-त२-४-न-म-मु । प्रियमाणौ–मॅ इतरेषु च ॥

[७. ६७] ४२९. २३. **युवाभ्याम्**—(?)–ऽ-मॅ-मु । 'युवयोः' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ४२९. २५. **अतो वाम्**—*मॅ-मु । अति वा–ख-ज्ञ-त्१-२-भ; अती वा–ज्ञ-त३-४-न-श ॥ ४३०. २३. **सख्ये**—च-भ-*मॅ-मु । सख्येन–इतरेषु ॥ ४३१. ३. **तद्रथानुकूलाः**—च-*मॅ । तद्रथाश्वाः–ख-मु । तद्रथाकुलाः–घ१; तद्रथान् कुलाः–त-न-भ; तद्रथात्–ज्ञ-श ॥

[७. ६८] ४३२. १६. **तच्छ्रुतम्**—*मॅ-मु । तश्रुतं–ख१-ज्ञ; तं श्रुतं–इतरेषु ॥ ४३२. २१. **सूर्यायाः**—ऽ-मॅ-मु । 'सूर्यया' इति युक्तम् ॥ ४३३. ९. **ऋबीसम्**—ज्ञ-भ-श२-*मॅ-मु । ऋग्वावासं–ख; ऋषिसं–घ१; ऋषिआवासं–च; ऋबीस–ज्ञ-त१-२-३-न; ऋस–त४; ऋचीषं–श१ ॥ ४३३. १०. **युवाभ्याम्**?—ऽ-मॅ-मु । 'युवयोः' इति भाव्यम् ॥ ४३३. १६. **प्रत्याप्त्यै**—घ१-*मॅ-मु । प्रत्यायं–ख; प्रत्यय–च; प्रत्याप्त्य–ज्ञ-त-न-श; प्रत्यादयं–भ ॥ ४३३. १९. **च्यवानस्य**—मॅ-मु । च्यवनस्य–ऽ ॥ ४३४. ५. **धनादात्रे**—भ-श२-*मॅ-मु । धनदात्रे–इतरेषु ॥ ४३४. ९. **नदीं तां**—ज्ञ-श-*मॅ-मु । नदी तां– त१-४; नदीनां–इतरेषु ॥ ४३४. १९. **वर्धयतु**—मॅ-मु । वर्धयत्–ऽ ॥

[७. ६९] ४३५. २२. **पर्यवृणीत**—घ-*मॅ-मु । परिवृणीत–इतरेषु ॥ ४३६. १२. **हवन्ते**—घ-ज-*मॅ-मु । जरंते–इतरेषु ॥ ४३६. १३. **नियच्छन्तु**—*मॅ । नयंतु–ख-भ; नियतु–घ; नियंतु–मु-इतरेषु च ॥ ४३६.१८. **विक्षिप्तम्**—ऽ-मॅ-मु । 'निक्षिप्तम्' इति स्यादिति मॅक्समुल्लरमहाशयः ॥

[७. ७०] ४३६. २९. **प्रातरनुवाक आश्विनशस्त्रे**—मॅ । प्रातरनुवाकाश्विनशस्त्रे–ऽ-मु ॥ ४३७.५. **यद्यं यागम्**—*मॅ । यद्यदा–ख-घ-न-भ; यद्यागं–ज्ञ-त-श-मु ॥ ४३७.९. **अश्वः**—भ-*मॅ । अत्यथः–ख; 'अश्वः' नास्ति–घ-मु; अत्यः–ज्ञ-त-श२; अद्य–श१ ॥ ४३७. १५. **वा वाम्**–*मॅ-मु । व्यवां–ख; वा–ज्ञ-त४-श; वां–घ-ज्ञ-त१-२; युवा–त३-न-भ ॥ ४३७. १६. **प्रवर्ग्यश्च**—ज भ-मु । प्रकार्यश्च–ख१ । प्रवर्गश्च–मॅ-इतरेषु च । ऋ. सं. १. १६४. २६; ७. १०३. ८; ८. ९. ४ अत्र द्रष्टव्यम् । अयमेव समीचीनः पाठ इति मॅक्समुल्लरमहाशयेनोक्तम्[1] ॥ ४३७. २७. **निसदन्ता**—घ-मु । सदंता–ख-ज्ञ-त-भ-श-मॅ ॥ ४३८. ५. **देवा देवौ**। 'देवौ' इत्येव पदपाठः ॥ ४३८. ६. **चनिष्ठम्**। 'एतत्पदं सायणेन क्रियापदत्वेन इष्ठन्प्रत्ययान्तत्वेन वा व्याख्यातम्' इति मॅक्समुल्लरमहाशयेन स्वकीयटिप्पण्यामुक्तम् ॥ ४३९. १. **अथ सप्तम्या स्तुतिमुपसंहरति**—ऽ । एतन्नास्ति मॅ-मु-पुस्तकयोः ॥

[७. ७१] ४३९. ५. **एकोनविंशति°**—*मॅ । एकविंशति–ऽ-मु ॥ ४३९. २३. **इरान्नम् तदभावं दारिद्र्यमित्यर्थः**। ऋ. सं. ८. ६०. २०; १०. ३७. ४. अत्र द्रष्टव्यम् । इरान्नं तदन्नदारिद्र्यमित्यर्थः—ज्ञ-त३-न-भ-मॅ । इरान्नं तद्रहितं दारिद्र्यमित्यर्थः–मु । इरान्नं तदभाव दद्यदित्यर्थः–ख; अन्नरहितं दारिद्र्यमित्यर्थः–घ; इरान्नं तेदत्रदारिद्र्यमित्यर्थः–ज्ञ-त१-२-४; इरान्नं तदलाभं न दारिद्र्यमित्यर्थः–श१; इरान्नं तदन्नं दारिद्र्यमित्यर्थः–श२ ॥ ४३९. २९.

1. Prefece to the 2nd Edition Vol. IV. p. 177

सुखेन योजयन्तः ? ॥ ४४०. ५. **यः**—*मॅ–मु–X॥ ४४०. ९. **अन्य आह**– श । अथवाह–ख-मॅ । अथवा–मु । अथाह–ख-श-त३-न-भ; अथ आह–झ-त१-२-४ । ऋ. सं. ६. ४२. २. अत्र द्रष्टव्यम् । 'अन्य आह' इति स्यादिति मॅक्समुल्लरमहाशयेनोक्तम् ॥ **वामू**–*मॅ-मु । वा–§ ॥ ४४०. १८. **न्यपारयतम्**—*मॅ-मु । निवारयतं–श१; निपारयतं–इतरेषु ॥

[७. ७२] ४४१. ४. **गोप्रदेन**—श-*मॅ-मु । गोप्रदेशेन–इतरेषु । 'गोप्रदेशनेन' इति स्यादिति मॅक्समुल्लरमहाशयः **संभावयति** ॥ ४४१. १२. **बन्धुत्वातिशयम्**—ख-भ-*मॅ-मु । बंध्वातिशयं—ज्ञ-त१-२; बंध्वीतिशयं–झ-त३-४-न-श२; बंध्वतिशयं–श१ ॥ ४४१. २४. **तच्छुक्रं गर्भकाम्यया**—*मॅ । तं शुक्रं गर्भकाम्यया–मु । तच्छुक्रं गतकाम्यया–य; तं शुक्रं गतकाम्यया–इतरेषु ॥ बृहद्देवतायां त्वेवं पाठो दृश्यते–अभवन्मिथुनं त्वष्टुः सरण्यूस्त्रिशिराः सह । स वै सरण्यूं प्रायच्छत् स्वयमेव विवस्वते ॥ ततः सरण्व्यां जज्ञाते यमयम्यौ विवस्वतः । तौ चाप्युभौ यमावेव ज्यायांस्ताभ्यां तु वै यमः ॥ सृष्ट्वा भर्तुः परोक्षं तु सरण्यूः सदृशीं स्त्रियम् । निक्षिप्य मिथुनं तस्यामश्वा भूत्वापचक्रमे ॥ अविज्ञानाद्विवस्वांस्तु तस्यामजनयन्मनुम् । राजर्षिरभवत्सोऽपि विवस्वानिव तेजसा ॥ स विज्ञाय त्वपक्रान्तां सरण्यूमश्वरूपिणीम् । त्वाष्ट्रीं प्रति जगामाशु वाजी भूत्वा सलक्षणः ॥ सरण्यूश्च विवस्वन्तं विदित्वा हयरूपिणम् । मैथुनायोपचक्राम तां च तत्रारुरोह सः ॥ ततस्तयोस्तु वेगेन शुक्रं तदपतद्भुवि । उपाजिघ्रच्च सा त्वश्वा तच्छुक्रं गर्भकाम्यया ॥ आघ्रातमात्राच्छुक्रात्तु कुमारौ संबभूवतुः । नासत्यश्चैव दस्रश्च यौ स्तुतावश्विनाविति ॥ ४४२. १. **अश्विना** । 'अश्विनोः' इति पदपाठः ॥ ४४२. २. **परिवृढानि**—*मॅ-मु । कर्मपरिवृढानि–§ ॥

[७. ७३] ४४३. २०. **बोधयति**—§-मॅ-मु ? ॥ ४४३. २९. **सोमान्**—ख-घ-ज्ञ-त१-२-भ । सोमा–ज्ञ-त३-४-श; समा–न; सोमाः–*मॅ-मु ॥ ४४३. ३०. **समगच्छतम्**—ख-भ । गच्छतं–घ-त४; संगच्छतं च–ज्ञ-त१-२; संगच्छंत–झ । समगच्छंत–*मॅ-मु । 'सोमान् समगच्छतम्' इत्ययं पाठः समीचीनतरः इति मॅक्समुल्लरमहाशयः[1] ॥

[७. ७४] ४४४. ७. **प्रागाथम्**—ख-त२-४-भ-श-मु । प्रगाथं–मॅ इतरेषु च ॥ ४४४. २५. **नियमयतम्**—श । नियमतं (?) मॅ-मु इतरेषु च ॥ ४४५. ४. **ईदृशप्रार्थनाकरणमेव हिंसा** । प्रार्थनाया अकरणमिति विग्रहः ॥

[७. ७५] ४४६. ३. **गा अश्वान्**—मॅ । गावोश्वान्–§-मु ॥ **धान्यम्**—मॅ-मु । धान्यान्–ख-त४; धन्यान्–इतरेषु । 'प्राप्नुयात्स हिरण्यादि नानारूपं धनं बहु । अश्वांश्च पुरुषान् धान्यं स्त्रियो वासांस्यजाविकान्' ॥ इति निर्णयसागरमुद्रितऋग्विधानस्थः पाठः ॥ ४४६. १०. **इत्यत्र**—श । इत्यनु–ख; इत्यत्–झ-त-न-भ । इत्याद्–मॅ-मु ॥ ४४६. ११. **इति लोपः**—§-मॅ-मु । 'इति तिलोपः' इति पाठः समीचीनः स्यादिति मॅक्समुल्लरमहाशयेनोक्तम् ॥ ४४७. ६. **निषादपञ्चमाश्चत्वारो वर्णास्तान्**—घ-ज्ञ-त१-२ । निषादपंचमाश्चतुरो वर्णाः–इतरलिखितपुस्तकेषु । निषादपंचमाश्चत्वारो वर्णाः–मु । निषादपंचमांश्चतुरो वर्णान्–*मॅ । 'निषादपंचमाश्चत्वारो वर्णास्तान्' इत्ययमेव पाठः समीचीनतर इति मॅक्समुल्लरमहाशयनोक्तम्[2] ॥ **परि जिगाति परिगच्छति**—घ-ज्ञ-त१-२-मु । परि जिगाति–मॅ इतरेषु च ॥ ४४७. १३. **उषोनामकस्य** । 'उषोनाम्नः' इति तात्पर्यम् ॥ ४४७.

---

१. Preface to the 2nd Edition Vol. IV. p. 185. २. ibid. p. 183.

१४. **अत्रैको योगरूढः**— ज्ञ-श-*मॅ-मु। अत्र योगरूढः–ख-भ; अत्रैको यागरूढः–श-त१-२-४; अत्रैयो योगरूढः–त३-न ॥ ४४७. १५. **विचित्ररश्म्याख्यधना**—*मॅ-मु। °रश्माख्य°–§ ॥

[७. ७६] ४४९. १२. **जार इव पत्याविव**। ' जारःऽईव ' इति पदपाठः ॥ ४४९. १४. **अत्यञ्जैव**—ख-ज्ञ-भ-श-*मॅ-मु। अत्यजैव–त३-न ॥ ४४९. १५. **यती...व्यभिचारिणीव**—*मॅ-मु। यती पति परित्यजे (परित्यजेत–त३-भ) ततः संचरंती व्यभिचारिणीव (°चरिणीव–ख)–ख-त३-भ; यती पतिं परित्यजेत् (परित्यजेत–श) ततः संचरंतीत्यभिचारिणीव–ज्ञ-श-त१-२-४-श। यथा व्यभिचारिणी जारं न त्यजति तद्वत् सूर्यमपरित्यजंती त्वं–घ ॥

[७. ७७] ४५०. २८. **बाधमानम्**—मॅ-मु। बाधमानं वा–§ ॥ ४५१. ४ **उदिता च**—मॅ-मु। उदित्वा–ख; उदित्वा च–इतरेषु ॥ ४५१. ५. **हितरमणीयवर्णोपेता**—मॅ-मु। हितरमणीयोपेता–§ ॥ ४५१. १५. **कीदृग्युषाः**—§-मॅ-मु। ' ईदृग्युषाः ' इति युक्ततरम् ॥ ४५२. १. **इषमन्नम्**—घ-ज। इषं–मॅ-मु इतरेषु च ॥

[७. ७८] ४५३. १९. **अस्माकाः**—§-मॅ-मु। ' आस्माकाः ' इति भाव्यम् ॥

[७. ७९] ४५४. १८. **रात्र्यवसानस्य**—*मॅ-मु। रात्रिवसनास्य–ख; रात्रिवसानस्य–ज्ञ-त-न-श; रात्रिवसनस्य–भ ॥

[७. ८०] ४५५. २८. **पुत्रप्रदाः**—त३-वर्जलिखितपुस्तकेषु मु-पुस्तके च। पुत्रदाः–त३-मॅ ॥

[७. ८१] ४५७. १. **रत्नं न**—घ-ज्ञ-मु। रत्नं–मॅ इतरेषु च ॥

[७. ८२] ४५८. १९. **युवाम्**—§-मॅ-मु। ' युवाभ्याम् ' इति भाव्यमिति मॅक्समुल्लरमहाशयो मन्यते ॥ ४५८. २०. **ओजो नामाष्टमी दशा**। ऋ. सं. ८. ७६. ५. द्रष्टव्यम्। ओजो नाष्टमी दशा–ज्ञ-त-श। त-वर्गगत एकस्मिन् पुस्तके (खुपेरकरशास्त्रिणां) ' मा ' इत्यक्षरं ' ना ' इत्यस्यानन्तरं निवेशनार्थं प्रान्ते लिखितमस्ति। ओजः साष्टमी दशा–ख-न-भ-मॅ-मु। इदं वचनं कुत्रत्यमिति न ज्ञायते ॥ ४५८. ३१. **अस्य मदे...पिन्वदपितः**। ' अस्य मदे जरितरिन्द्रोऽपिन्वदपितोऽजिन्वदजुवः ' इति शा. श्रौ. सूत्रम् (८. २५. १) ॥ ४५९. १५. **जनिमन्ति**—ख-ज्ञ-न-भ-श। संति–ज्ञ-त१-२-४; जतिमंति–त३। जातिमंति–*मॅ-मु। ऋ. सं. १०. १५३. ५. अत्र द्रष्टव्यम् ॥ ४६०. ५. **मर्त्यस्य**। ' मर्तस्य ' इति पदपाठः ॥ ४६०. ७. **व्याप्नोति**—त३-वर्जेषु लिखितपुस्तकेषु मु-पुस्तके च। प्राप्नोति–त३-मॅ ॥ ४६०. २२. **वां युवाम्**—ख-घ-ज्ञ-त१-२-४-भ। युवां–श-मु। वां–त३-न-मॅ ॥ ४६१. १. **नोऽस्माकम्**। ' नः ' इति पदमृचि नास्ति ॥

[७. ८३] ४६१. ४. **ऐन्द्रावरुणम्**—*मॅ-मु। मैत्रावरुणं–§ ॥ ४६१. १५. **उपक्षपयितृणि**—श१-मु। उपक्षयित्रीणि–ख-न; उपक्षयितृणि–घ; उपक्षपयित्रीणि–मॅ इतरलिखितपुस्तकेषु च ॥ ४६२. ११. **अरक्षतम्**—*मॅ-मु। रक्षितं–घ; रक्षतं–इतरेषु ॥ ४६२. ३१. **अरक्षतम्**—*मॅ-मु। रक्षितं–घ; रक्षतं–इतरेषु ॥ ४६३. १७. **श्वितिम्**—ज्ञ-त३-न-श। श्वितं–मॅ-मु इतरेषु च। ऋ. सं. २. ३३. ८; १०. ४६. ७. अत्र द्रष्टव्यम् ॥ ४६३. १८. **स्तुत्या च**—त३-वर्जेषु लिखितपुस्तकेषु मु-पुस्तके च। स्तुत्या–त३-मॅ ॥

[७. ८४] ४६५. १३. **मीळ्**—घ१-ज-श-ज्ञ-त२-४-न-भ-मु। मिञ-ख१; मीन्-श१; मीङ्-त३-मॅ ॥

[७. ८६] ४६९. ११. **ह्वेव**—ऽ-मॅ-मु। उ एव एनं-कौ. उ. ॥

[७. ८७] ४७१. १८. **उपदेशगम्यानि**—ख-घ-ज्ञ-त१-२-श१-मु। उपदेशे गम्यानि-मॅ इतरेषु च ॥

[७. ८८] ४७२. २०. **वारुणम्**—मॅ-मु। इंद्रावरुणौ-घ; मैत्रावरुणं-त३; ऐंद्रावरुणं-इतरेषु[1] ॥ **प्र शुन्ध्युवम्**—ऽ-मॅ-मु। 'प्र शुंध्युवमंत्या पाशविमोचनी' इत्यनुक्रमणिका ॥ ४७३. २३. **अवोभिः रक्षणैः स्वपां स्वपसम्**। ऋक्पाठस्तु 'स्वपा॒ महो॑भिः' इति ॥ ४७४. १८-१९. **ध्रुवा सु .....न गच्छति**। 'ध्रुवासु त्वासु क्षितिषु जपन् बद्धः प्रमुच्यते। तिष्ठन् रात्रौ जपेदेनां विपाशः सन् प्रमुच्यते ॥' इति निर्णयसागरमुद्रितऋग्विधानपुस्तकस्थः पाठः ॥

[७. ८९] ४७५. ३. **सु शोभनम्**। सुशोभनं-मॅ-मु। ऋ. सं. ८. १. १४. अत्र मॅ-पुस्तकेऽपि 'सु शोभनम्' इति भिन्ने पदे ॥

[७. ९०] ४७६. २७. **वाज्यस्य**—ऽ-मॅ। 'वा॒जी अ॒स्य॒' इति पदपाठः। वाजी अस्य प्राप्तस्य-मु ॥ ४७७. २०. **हिताचरणपरा**-श२। हिताहिताचरणया पापरहिता-श१। हिताहिताचरणपरा-मॅ इतरेषु च। हिताः हिताचरणपरा-मु ॥ ४७७. २९. **स्वकीयेन विहितेन**। स्वकीयत्वे विहितेन-त३-मॅ-मु। स्वकीयेनैव-ख; स्वकीयस्वविदितेन-ज्ञ-त१-२-४; स्वकीयेन विदितेन-घ; स्वकीयत्वेतिहितेन-ज्ञ; स्वकीयेत्वे विहिवे-न; स्वकीयेनैव हिते-भ; स्वकीयत्वेन विहितेन-ज्ञ ॥ ४७८. ८. **शूरभटैः**-ख-ज्ञ-ज्ञ-त१-२-न-भ-श। भटैः-घ-मु। सूरभटैः-त३-४-मॅ ॥ ४७८. १५. **स्ववसे शोभनरक्षणाय**। 'सु अर्वसे' इति भिन्नः पदपाठः ॥

[७. ९२] ४८१. २९. **वायव्यतृचस्य**—ख-भ-मु। वायवतृचस्य-मॅ। इतरेषु च ॥

[७.९३] ४८३. १७. **युवं युवाम्**—ऽ-मॅ। 'युवम्' इत्यृचि नास्ति। युवां-मु ॥ ४८३. २५. **देवानत्र**। देवानात्र-ख; देवास्तत्र-ज्ञ-त१-२; देवातत्र-इतरलिखितपुस्तकेषु । देवांस्तत्र-मॅ-मु ॥ ४८४. १७. **कुर्वन्त्यौ**—ऽ-मॅ-मु। 'कुर्वत्यौ' इति भाव्यम्। **तनूरुचा - - - हतं हिंस्तम्**—मॅ। तनूरुचा आत्मीयेन तेजसा सं (संपन्ने-मु) यत् ये शूरसाता शूरसातौ रणे यतैते जेतुं यत्नं कुर्वत्यौ वैरिसेने देवयुभिः देवान् कामयमानैः सह विदथे यज्ञे अदेवयुं सत्रा हतं सततं (संततं-ज्ञ-मु) हिंस्तं-ज्ञ-त१-२-मु। शूरसाता शूरसातौ रणे यतैते यत्नं कुर्वत्यौ वैरिसेनेन तनूरुचा आत्मीयेन तेजसा सं यत् ये सत्रा हतं सततं हिंस्तं-घ ॥ ४८४. २५. **उप आ यातम्**—घ-*मॅ-मु। उप यातं-इतरेषु ॥ ४८५. १४. **मा**—*मॅ-मु-× ॥

[७.९४] ४८६.२०. **सनिं धनम्**—ख-ज्ञ-त३-भ-श। सनि धनं-घ-त२-४-न-मॅ-मु। ऋ.सं. १. ५६. २; ६. ६१. ६. इत्यादिषु द्रष्टव्यम्॥ ४८७. १९. **गिरा चित्**—ख-घ-भ। गिरा च-मॅ-मु इतरेषु च ॥ ४८७. २७. **द्रढयति**—मु। दृढयति-ऽ-मॅ। ऋ. सं. ८. २. १३. अत्र द्रष्टव्यम् ॥

[७. ९५] ४८८. १. **प्रथमे छन्दोमे...प्रउगम् इति**-ऽ-मॅ-मु। (?) 'प्रथमे छन्दोमे प्रउग-शस्त्रे प्र क्षोदसा इति सारस्वतस्तृचः। सूत्रितं च—'प्र क्षोदसा धायसा सस्र एषेति प्रउगमिति' इति

---

1. See Max Müller's Preface to the 2nd Edition Vol. IV. p. 183.

स्यात् ॥ ४८९. ६. **तत्स्तवनमिति**–भ-मु । तस्तवनमिति–श१; तत्सवनमिति–मॅ इतरेषु च ॥ ४९०. ३. **यन्तुः**—ज्ञ-*मॅ-मु । एतन्नास्ति–ख-घ-भ-श१; यंतु–त१-२-३-४-न; तु–श२ ॥

[७. ९६] ४९०. ६-७. **द्वितीया...प्रस्तारपङ्क्तिः**—*मॅ-मु । द्वितीया प्रस्तारपंक्तिः तृतीया स्तोबृहती–घ; द्वितीया प्रस्तारपंक्तिः—श१; तृतीया प्रस्तारपंक्तिः– इतरेषु ॥ **सरस्वदेवताकः**—*मॅ-मु । सरस्वान्देवताकः–ऽ ॥ ४९०. ९. **सारस्वतस्तृचः**—ख-ज्ञ-त१-२-भ-मु । सरस्वतस्तृचः–मॅ इतरेषु च ॥ ४९०. १६. **असुराशब्दात्**—*मॅ । असुरशब्दात्–ऽ-मु ॥ ४९१. ७. **पशुपुरोडाशहविषाम्**—मु । पुरोडाशहविषाम्–ज्ञ-ज्ञ-त३-श-मॅ ॥

[७. ९७] ४९३. १४. **स्तुयेम (?)**—ज्ञ-त२-४-न-भ-मॅ-मु । ' स्तुयाम ' इति स्यात् ॥ ४९४. २१. **एषैव**—त-भ-श-मु । एषेव–ख-मॅ ॥ ४९४. २७. **युवं युवाम्**—घ-श-मु । युवां–मॅ इतरेषु च ॥

[७. ९८] ४९५. २७. **आदित्येन्द्रमहत्त्वस्योक्तत्वात्**—*मॅ । अदित्या इन्द्रमहत्त्वस्योक्तत्वात्–मु । आदित्य (अदि–न) इंद्रमादित्यस्योक्तवान्–ख-न; आदित्य (अदित्य-त३)इंद्रमादित्यस्योक्तत्वात्–ज्ञ-त-भ-श२; अदित्ये इंद्रमातादित्यस्योक्तत्वात्–श१ ॥ ४९५. २८. **पप्राथ**—ख-घ-भ-श१-*मॅ-मु । पप्रथ–ज्ञ-त१-२-३-श२; पप्रथ–ज्ञ-त४; प्रपथ–न ॥ ४९६. ६. **अभियुध्येश्च**–*मॅ । अभियुध्यस्व–ऽ-मु ॥ ४९६.१२-१३. **मघवा धनवान्**—ज्ञ-त१-२-४-श-मु । मघवान्–ख-ज्ञ-न; मघवा अन्नवान्–घ; मघवा मघवान्–त३-मॅ ॥ ४९६. १३. **यदेत् यदैव**—घ-*मॅ-मु । यदेतत् तदेव–ख; यदेत् यदेव–ज्ञ-श; यदेतत् यदेव–ज्ञ-त३-न; यदेतत् सदेव–त१-२-४ ॥ ४९६. २१ **तवेत्**–ऽ-मॅ । ' तर्व ' इति पदपाठः । तव तवैव–मु ॥ ४९६. २३. **गोः पतिः**–च-श; गोपतिः–मॅ-मु इतरेषु च ॥

[७. ९९] ४९८. २६. **संघशः**—ज्ञ-त१-२-मु । संघस–ज्ञ-त४-श; संपद्यस–त३; संघशः–न; सद्यः–ख-मॅ ॥

[७. १००] ५००. ७. **एवयावा**—ज्ञ-त४-न-श२ । एवयाव–ज्ञ-त२-३-भ-श१ । एवयावः–ख-मॅ-मु । ऋ. सं. १. ९०.५. अत्र द्रष्टव्यम् ॥ ५००. ८. **अप्रयुतां दोषैर्वियुक्ताम्**—घ-ज्ञ-त१-२-४-मु । दोषैर्वियुक्तां–मॅ-इतरेषु च ॥ ५००. ११. **वैष्णवस्य**—ख । वैष्णव्यस्य–मॅ-मु इतरेषु च । ऋ. सं. १.२२.१७. अत्र द्रष्टव्यम् ॥ ५००.१२. **वैष्णवे** । वैष्णव्ये-ऽ-मॅ-मु ॥ ५०१.२९. **यस्मात्**—ख-भ-*मॅ । यस्मात्तु–मु इतरेषु च ॥ **अन्यरूपो**—*मॅ । अन्यत्–ऽ-मु ॥ ५०१. ३३. **गूढरूपोऽपि**—ज्ञ-*मॅ-मु । गूढरूपोसि–ख-भ; गूढरूपाणि–ज्ञ-त३; गूढरूपायि–त१-४-न; गूढरूपोयि–त२ ॥

[७. १०१] ५०२. २१-२३. **आस्यदग्नं...वृष्टिमाप्नुयात्** । ' आस्यदग्नं विगाह्याम्भः प्राङ्मुखः प्रयतः शुचिः । सूक्ताभ्यां तिस्र एताभ्यामुपतिष्ठेद्दिवाकरम् ॥ अनश्नता तु जप्तव्यं वृष्टिकामेन यत्नतः । पंचरात्रे व्यतीते तु महद्वर्षमवाप्नुयात् ' इति निर्णयसागरमुद्रितऋग्विधानस्थः पाठः ॥

[७. १०२] ५०५. १२. **अर्वतीनां वडवानाम्**—ज्ञ-त१-२-श१-मु । अर्वतीनां–मॅ इतरेषु च ॥ ५०५. १३. **प्रसूतिहेतुम्**—थ-वर्जेषु लिखितपुस्तकेषु मु-पुस्तके च । प्रसूतिहेतु–थ-मॅ ॥

[७. १०३] ५०६. १४. **अरुख्खलीकृत्यां**—मॅ। वैदिकपाठोऽप्येवम्। केषुचिन्मुद्रितपुस्तकेषु 'अक्खलीकृत्यां' इति पाठो दृश्यते[1] ॥ ५०७. ६. **वदथन वदत शब्दं कुरुत**—ऽ-मॅ-मु। 'वदथन वदथ शब्दं कुरुथ' इति सम्यक्। यद्यपि लोण्मध्यमपुरुषबहुवचनस्य 'त' स्य स्थाने थनादेशो विहितस्तथापि 'विश्वे देवासो मनुषो यति ष्ठन' (ऋ. सं. १०. ६३. ६.) इत्यत्र 'स्थन भवथ' इति वर्तमानार्थो व्याख्यातः ॥ ५०७. २४. **सर्वतः वदन्तः**—घ-श-*मॅ। सर्वतो यावदंतः—ख-ञ-त२-४-य; सर्वतो यथा वदंतः—ञ-त१ (प्रान्ते); सर्वतः यावदंतः—त३-न; सर्वदंतः यावदंतः—भ। सर्वतः तथा वदंतः—मु ॥ **तदिनम्**—घ-ञ-श-*मॅ-मु। यद्वृत्तं—ख; यद्दिनं—ञ१; पदिनं—त१-२; पद्दनं—त३-४-भ; पंदन—न ॥ ५०७. २५. **सर्वतो**—*मॅ-मु। एतन्नास्ति—ख-घ; तो—ञ-ञ-त-न-भ; परतो—श ॥ ५०८. ३. **प्रवर्ग्येण**—ञ-मु। प्रवर्गेण—मॅ इतरेषु च ॥

[७. १०४] ५०९. २. **'रक्षोघ्नम्'** इत्यस्य स्थाने 'राक्षोघ्नं,' **'क्रुद्धः'** इत्यस्य च स्थाने 'तस्मिन्' इति बृहद्देवतायाम् ॥ ५०९. ३. **जप्यम्**—श। जाप्यं—मॅ-मु इतरेषु च ॥ ५०९. २३. **आङ्पूर्वार्थो**—त२-भ-वर्जेषु लिखितपुस्तकेषु मु-पुस्तके च। आङ्पूर्वार्थो—त२; आडोपूर्वार्थो—भ। आङ्पूर्वार्थे—मॅ ॥ ५१०. २१. **अश्मसारभूतस्य**—ख-ञ-ञ-त१ (प्रान्ते)—भ-मॅ-मु। अश्मसाभूतस्य—त२-३-४श; अश्महारभूतस्य—न। 'अश्मसाद्भूतस्य' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ५१०. २२. **निःस्वरम्**—ऽ-मॅ-मु। 'निऽस्वरम्' इति विसर्गरहितः पदपाठः ॥ ५११. २. **स्तोत्राणि - - - यथा धनैः**—*मॅ। स्तोत्राणि धनैः—'घ'

---

1. In the whole of the known Prātiśākhya and Śikṣā literature the doubling of aspirates is represented by mute or voiced stop plus its corresponding aspirate. Whitney in his Grammar, section 109/a, p. 401, actually quotes the form as *akkhalīkṛtya* in opposition to Wackernagel, Altindische Grammatik I, p. 110 *akhkhalī-kṛtyā*, and II-i, p. 7 ibid. Thus according to the grammatical tradition *kkh* represents the doubling of *kh*. According to Wackernagel, Ai. Gr. I, p. 110 the writing of double aspirates in the place of tenuis or media with their corresponding aspirates is found very generally in Mss., without any basis in etymology, particularly in Vedic Mss. [Cf. Weber, Indische Studien 4, 336 (with reference to Vs. Pr. 4, 106), Whitney Av. Pr. I. 94, and Pischel Gött. Nach. 1873, 206 ff, 212.—In classical Sk. Bollensen Mālavikāgnimitra p. XIV., in inscriptions Hultzsch, Epigraphia Indica 3, 185.] Of a special type is *akhkhalī-kṛtyā*, according to Wackernagel, on account of its interjectional nature. Comparable to this are Vedic *ciccika'ḥ* and *ja'jhjhatīriva*, both onomatopoetic. We have thus to see here not the doubling of an aspirate (which would give us the unaspirate plus aspirate), but the juxtaposition of two aspirates in imitative or interjectional speech. (Cf. also Dr. Siddheshwar Varma's Critical Studies in the Phonetic Observations of Indian Grammarians, p. 101.)

[The above information has, by our request, been kindly supplied by Prof. Dr. S. M. Katre, M. A., Ph. D., of Poona. The Editorial Board is thankful to him for the same.]

वर्जेषु लिखितपुस्तकेषु । ('नृपतीव' इत्येतन्न व्याख्यातमेतेषु)। दृष्टांतः नृपतीव राजानौ इव तौ यथा पूरयतस्तद्वत्–घ । स्तोत्राणि नृपतीव यथा नृपतयो–मु । 'स्तोत्राणि नृपतीव राजानाविव तौ यथा धनैः पूरयतः तथा' इति स्यादिति मॅक्समुल्लरमहाशयः ॥

५१२. २४. **वासिष्ठम्**—*मॅ । वसिष्ठं–ऽ-मु ॥ ५१२. २५. **वसिष्ठेनेति नः श्रुतम्**—*मॅ-मु । वसिष्ठो नेति न श्रुतं–ख-ज्ञ-त३-भ-श२; वसिष्ठो नेति (नेति हि–ज्ञ) श्रुतं (श्रुमं–न)-ज्ञ-त१-२-४-न; वसिष्ठेनेति न श्रुतं–श१ । एतच्छ्लोकद्वयं कुत्रत्यमिति न विज्ञायते ॥ ५१२. २६. **सच्च सत्यं च असच्च असत्यं च**—घ-ज्ञ-ज्ञ-त१-४-श-मु । सच्च सत्यं च असत्यं च–ख-त३-भ; सच्च सत्यं च–त२-न । सच्चासच्च सत्यं च असत्यं च–मॅ ॥ ५१२. २८. **सत्यभाषणं**—*मॅ । असत्यभाषिणं–घवर्जेषु । सत्यभाषिणं–घ-मु । ५१३. २३. **म्रियेय**—मॅ । म्रिये यदि वा–ख-च-भ; म्रियेय म्रिये यदि वा–घ१; म्रिये–ज्ञ-त-मु; म्रियते–न-श ॥ ५१३.२४. **म्रियेयेत्यन्वयः**—मॅ । म्रिये इत्यन्वयः–ख-घ१-भ-मु; म्रियेत्यन्वयः–इतरेषु ॥ ५१४. १. **संबोध्य**—मॅ-× । मु-पुस्तकेऽपि नास्ति ॥ ५१४. १८. **गृहीत**—मॅ-× । मु-पुस्तकेऽपि नास्ति ॥ ५१५. ५. **परिकरभूतैः**—मॅ । परिगभूतैः–ख१; परिगतभूतैः–ज-ज्ञ-त३-भ-श-मु; परिगताभूतैः–ज्ञ-त२-४; परिगतः भूतैः–न ॥ ५१५. १८. **इदू पूरणौ**—ज्ञ-त१-२-४-मु । इंदूपूरणौ–ज्ञ; इह पूरणौ–ख-श; इह पूरणे–त३-न-भ । इदु पूरणे–मॅ ॥ ५१५. २५. **उलूकयातुं...मे जहि** । अस्य पूर्वार्धो बृहद्देवतायामुपलभ्यते । नोत्तरार्धः[1] ॥ ५१५. २७. **शुशुलूकः**—श१-*मॅ-मु । शिशुलूकः–श२ । 'शुशुलूकः' नास्तीतरेषु ॥ ५१६. ७. **स्त्रीपुंसरूपाणि**—ख-च-ज्ञ-त३-न-भ-श-मु । स्त्रीपुंसोरूपाणि–घ१-ज्ञ-त१-२-४ । स्त्रीपुंरूपाणि–*मॅ । 'स्त्रीपुंसरूपाणि' इत्येव समीचीनः पाठ इति मॅक्समुल्लरमहाशयः[2] ॥ **विवासयतु**—घ-ज्ञ-ज्ञ-त१-२-४-य-श । विनाशयतु–ख-त३-न-भ-मॅ । उच्छी विवासे अपविवासयतु–मु ॥ ५१६. २०. **अरणः**—ज्ञ-त१ (प्रान्ते)–*मॅ । अग्निं नरः–मु इतरेषु च ॥

॥ अष्टमं मण्डलम् ॥

[८. १] ५१७. ४. **द्रूचम्**—मॅ-मु-अनु. । ऋचं–ख-भ; तृचं–ज्ञ-त-न-श ॥ ५१७. १६. **एकोनत्रिंशत्**—*मॅ । एकोनत्रिंशो–ऽ-मु ॥ ५१७. २९. **प्रशास्त्रादयः**—ख-भ । होत्रादयः–घ; प्रशास्तादयः–श । प्रशस्त्रादयः–त-न-मॅ-मु ॥ ५१८. ५. **निग्रहानुग्रहयोः**—च-श-मु । विग्रहानुग्रहयोः–मॅ इतरेषु च ॥ ५१९. १. **त्वाम्**—घ-*मॅ । त्वा त्वां–मु इतरेषु च ॥ ५२१. २६. **मदन्तु** । 'मन्दन्तु' इति संहितापदपाठयोः ॥ ५२२. १२. **अदाभ्यग्रहे हिमादासुत**—*मॅ । अदाभ्यग्रहे हिमांदासुत–ख-ज्ञ-भ-श-मु; अदाभ्यग्रे हिमांदासुत–त१-२-४-न; अदाभ्यहे हिमांदासुत–त३; कात्या. श्रौ. १२. ५. १३; ऋ. सं. ८. २. २; ९. ७२. ८; १०७. ५. अत्र द्रष्टव्यम् ॥ ५२४. १६. **तद्विभूतयोऽन्येपि**—त१-२-भ-श-*मॅ-मु । तद्विभूतयोनोपि–ख; तद्विभूतयोंनेपि–ज्ञ; तद्विभूतयोनेपि–त३-४-न ॥ ५२४. २८. **हिरण्मये**—ख-घ-त३-न-श । हिरण्मये–ज्ञ-त-२-४-भ-मॅ-

---

1. See Macdonell, Bṛhad-devatā part II, p. 219 ll. 3-4.
2. Preface to the 2nd Edition, Vol. IV. p. 185.

मु ॥ ५२५. ९-१०. **स इव**—घ-*मॅ। स हि–मु इतरेषु च ॥ ५२५. २२. **न वियुक्तो**—*मॅ-मु। **वियुक्तो**–ख-त३-न-भ-श; **विनियुक्तो**–ज्ञ-त१-२-४-य ॥ ५२६. १३. **प्राप्ते**—*-मॅ-मु। **एतन्नास्ति**–ख-घ; **प्रयते**–ज्ञ-श; **प्रपिते**–त-न-भ ॥ ५२६. २०. **मेध्यातिथये**—घ-*मॅ-मु। **मेधातिथये**–इतरलिखितपुस्तकेषु ॥ ५२६. २५. **लक्ष्यते**—*मॅ-मु। **चक्षते**–त१-२-४; **वक्ष्यते**–इतरेषु ॥

[८. २] ५२८. ७. **च**—*मॅ-मु-✕ ॥ ५२८. ८. **विभिन्दो**—मॅ। **विभिंद**–ऽ-मु ॥ ५२८. २६-२७. **दशापवित्रस्य.....नाभिं कुरुते**—श। ('शकटे' इत्यस्य स्थाने 'सकाले' इति श-पुस्तके विद्यते)। सामवेदभाष्यं (२. १. २. ८. २) द्रष्टव्यम्। दशापवित्रस्य नाभिं कुरुते–*मॅ-मु इतरेषु च ॥ ५२८. २८. **अमोतं भवतीति**—*मॅ-मु। आमानं भवतीषु–ख-न-भ; अमोतं भवतीषु–ज्ञ-त-श ॥ ५२९. २३. **नत्वा च**—थ-भ-*मॅ-मु। नत्वा व–इतरेषु ॥ ५३०. ४. **इन्द्रम्**—श-*मॅ। यमिंद्रं–मु इतरेषु च ॥ ५३०. १६. **सोमैः**—च-*मॅ-मु। सोमाः–**इतरेषु** ॥ ५३१. १९. **द्रढयति**—ज्ञ-त१-२-३-४-मु। दृढयति–मॅ इतरेषु च। 'दृढयति' इति पाठो मॅक्समुल्लरमहाशयस्योपलब्धः ॥ ५३१. २२. **निहीयते**—श-*मॅ-मु। निहीते-ख-ज्ञ-न-भ; **नहीते**–त ॥ ५३२. २६. **अनलसाः**—घ-न-भ-मु। अनालसाः–मॅ इतरेषु च। ऋ. सं. १. ७२. ७; ८. ६०. १५. अत्र द्रष्टव्यम् ॥ ५३४. २०-२३. **ब्रह्मयुजा.....संभजनीयं वा**—*मॅ। एतन्मन्त्रभाष्यं मॅक्समुल्लरमहाशयेन सामवेदस्य (२. ८. २. १. २.) सायणकृतभाष्यादुद्धृतम्। अस्यार्धः त्रुटितः–ख१-भ; ज्ञ-त३-४-न-य-श-पुस्तकेष्वस्य मन्त्रस्य भाष्यं नास्ति। घ-ज-ज्ञ-त१-२-मु-पुस्तकेष्वस्य मन्त्रस्य भाष्यमेवं विद्यते–हे ब्रह्मयुजा अन्नवंतौ शग्मा सुखप्रदौ हरी एतादृशौ अश्वौ युवामिहास्मद्यज्ञे इंद्रमावक्षतः आवहतं। कीदृशमिंद्रं। अस्मत्सख्यायं गीर्भिरस्मत्कृतैः स्तोत्रैः श्रुतं प्रख्यातं गिर्वणसं गिरां संभक्तारं ॥ ५३५. २९-३०. **अभिभवनानि**—मॅ-मु। अभिभवानि–ऽ ॥ ५३६. २३. **प्रियोऽनुकूलो मेधो यज्ञः**—*मॅ-मु। प्रियाः अनुकूलाः मेधाः यज्ञाः–ख-भ; प्रियः अनुकूलवेद्यः मेधो यज्ञः–ज्ञ-त-न-श ॥ ५३६. २४. **प्रियमेधाख्य**—मु। प्रियमेधा अस्य–मॅ-ऽ। प्रियमेधाख्य इति पाठः समीचीनतर इति मॅक्समुल्लरमहाशयेनोक्तम्[1] ॥ ५३७. १७. **वज्रवन्**—ख-घ-भ२-श-मु। वज्रिवन्–ज्ञ-त-न-मॅ ॥ ५३७. २०. **आजहार**—मॅ-घ्र. ब्रा.। उदजहार–ऽ-मु। ऋ. सं. १. ५१. १. अत्र द्रष्टव्यम् ॥

[८. ३] ५३८. २३. **सहितैः**—ऽ-मु। संहितैः–*मॅ ॥ ५४२. ४. **विकल्पनात्**—*-मॅ-मु। विकलनात्–ख१; विकर्तनात्–इतरेषु ॥ ५४२. १९. **कद्वत्प्रगाथः**—ख-ज्ञ-त३-४-न-भ-श-मु। तद्वत्प्रगाथः–ज्ञ-त१-२। कद्वान् प्रगाथः–मॅ ॥ ५४२. ३३. **नुद्**—श-*मॅ-मु। नूद्–भ; नद्–इतरेषु ॥ ५४५. १०. **बलेनापहृताः**—ख-ज्ञ-त३-४-न-भ-श। बलेनापहृताः–घ-ज्ञ-त१-२-मॅ-मु ॥ ५४५. २६. **मे मह्यम्**—ऽ-मु। मह्यं–मॅ ॥ ५४६. ८. **तस्याः**—*मॅ। तां–मु। प्रां–त१-२; इतरलिखितपुस्तकेषु नास्ति ॥ ५४६. २७. **दाता तम्**—श-मु। दातारं–मॅ इतरेषु च। 'दाता तम्' इति पाठः समीचीनतरः इति मॅक्समुल्लरमहाशयेनोक्तम्[2] ॥

[८. ४] ५४६. ३१. **एकविंशत्यृचम्**। एकविंशर्चं–ऽ-मु। एकविंशत्यर्चं–मॅ ॥ ५४७. १२. **न्यधी चेति**—ज-त३-भ-मु। न्यधी नेति–ख१; न्यधी वेति–ज्ञ-ज्ञ-त१-२-४ श। न्यधी इति–मॅ ॥

1. Preface to the 2nd Edition Vol. IV p. 177. 2. ibid.

५४७. १४. **सिम इति...वाजसनेयकम्**—ऋ. सं. १. १०२. ६. अत्रेदं वाक्यं शाट्यायनकब्राह्मण-वचनमित्युक्तम् ॥ ५४७. १५. **अनुर्नाम**—च-ज-त३-श । आनुर्नाम–इतरेषु मॅ-मु पुस्तकयोश्च ॥ ५४८. ४ **संपूर्णम्**—*मॅ । संपूर्ण च–ख१-घ; संपूर्णत्वं–ज-त-न-भ-मु; संपूर्णं त्वं–झ-श ॥ ५४८. ७. **एकयत्नेनैव**—झ-त३-भ-श-*मॅ-मु । एकयत्ननैव–ख; एकत्रैव–घ; एकयन्नैव–श-त२-४; एकयत्तेनैव–त१; एक यन्नेनैव–न ॥ ५४९.४. **परस्मैपदम्**—श-त१-२-मॅ-मु । श्रम् परस्मैपदं च–श । 'परस्मैपदं' नास्ति इतरेषु ॥ - - - **सचते**—ख-त-न भ-मॅ । सचते–मु । स पुरुषः यवीयुधा यौति मिश्रीभवतीति यबिर्यज्ञः यौतेरौणादिक इन् तेन संप्रहरता त्वया सहायभूतेन सचते–श ॥ ५४९. २७. **कर्मप्रवनीयत्वम्**—*मॅ-मु । °प्रवचनीयं–ऽ ॥ **ववसे**—मु; च–वर्जलिखितपुस्तकेषु च । वावसे–च-मॅ ॥ ५५०. ३-४. **अथवा धेट्...स्तोमा इत्यर्थः**—ज-झ-त-श-मु । ख१-नं-भ-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ५५१. २०-२१. **बहुलमिति सप्तम्या अलुक्**—*मॅ-मु । बहुलमिति अलुक्–ख; बहुलुक्–झ-त-न; बहुलु–भ; बहुलमिति लुक्–श ॥ ५५२. २-३. **गच्छन्तौ वा**—मु । ऋ. सं. ४. ४. ८. अत्र द्रष्टव्यम् । गंतो वा– ख१; गतो वा–ज; गांतोर्वा–झ; गंतोर्वा–त-न-भ-श । गतौ वा–*मॅ । 'गच्छन्तौ वा' इति समीचीनमिति मॅक्समुल्लरमहाशयेनोक्तम्[1] ॥ ५५२. ५. **पीवोपवसनानाम्** । 'पीवोपवसनादीनाम्' इति वार्तिकपाठः ॥ ५५४. ५. **शुद्धानाम्**—*मॅ-मु । शुद्धो–ख; शुद्धां–घ-भ-श; शुद्धां वीभो–झ; शुद्धां वांभो–त१-२-४; शुद्धांभो–त ३-न ॥ ५५४. ७. **तैः प्रतिगृहीतानि**–मु । तैः प्रतिगृहीतं-त१–वर्जेषु लिखितपुस्तकेषु । तत्प्रति-गृहीतं–त१-मॅ । 'तैः प्रतिगृहीतानि' इति स्यादिति मॅक्समुल्लरमहाशयः अभिप्रैति ॥

[८. ५] ५५४. ३१–३२. **प्रातरनुवाकाश्विनशस्त्रयोः**—झ-त२-श१-मु । प्रातरनुवाक आश्विनशस्त्रयोः–झ-त३-४-न-भ-मॅ ॥ ५५५. ३१. **शबभावो**—मॅ-मु । शब्दभावो–झ-त-न-भ; शब्दाभावो–श ॥ ५५६. २३. **विगमनमपायः**—*मॅ-मु । विगतमपायां–ख-न-भ; विगमनम-पायां–झ-त-श ॥ ५५६. २५. **गोर्यूतौ**—भ-श-मु । गोयूतौ–ख-त-न-मॅ ॥ ५५६. ३०. **उपा-गच्छतम्**—ऽ-मु । उपगच्छतं–मॅ ॥ ५५६. ३१. **कीदृशैः**—घ-*मॅ-मु । ईदृशैः–इतरलिखित-पुस्तकेषु ॥ **शंसनीयगतिभिः**—च-थ-भ-मु । शंसनीयागतिभिः–ख; शंसनीयागामिभिः–झ-त; शंसनीयाभिः–न-श । शंसनीयगामिभिः–घ१-मॅ । ऋ. सं. ८. २०. १०. अत्र द्रष्टव्यम् ॥ ५५७. २२ **वीराः**—मॅ-मु । दीर्घाः–ख-भ; वीर्याः–इतरेषु ॥ ५५७. २३. **वा**—*मॅ-×। मु-पुस्तकेऽपि नास्ति ॥ ५५८. १८. **उपगमतम्(?)**—ख-त-न-भ-मॅ । उपगमयतं–श ॥ उपगच्छतम्–मु ॥ ५५८. २१. **चाप्रेषितो**—झ-त२-४-मु । च प्रेषितो–श । वा प्रेषितो–ख-झ-त३-न भ-मॅ ॥ ५६०. १४. **साधू**—झ-त२-*मॅ । साधु–ख-झ-त३-४-न-भ । साधुषु–श-मु ॥ ५६३. १. **न च नामन्त्रितविद्यमानवत्व° ?**—ऽ-मॅ । न च नामन्त्रित इति विद्यमानवत्व°–मु । अयमेव युक्तः प्रतिभाति ॥ ५६३. ४. **प्रथमान्तमेव**—ज-भ-श-*मॅ-मु । प्रथमांतरमेव–ख१-झ-त; प्रथमांतरेमेव–न ॥ **नामन्त्रितम्**—श-*मॅ-मु । मामंत्रितः–ज; मामंत्रितं–ख१-झ-न-भ; सामंत्रितं–त ॥ ५६३. १०. **मदजनने व्यग्रम्**—ऽ । मदजननेऽव्यग्रं–मॅ-मु ॥ ५६४. ८. **बहुदातृतमो**—ख१-मु । बहु-दातृजनो–मॅ इतरेषु च ॥

---

1. Preface to the 2nd Edition Vol. IV. p. 169.

[८. ६.] ५६४. १३. **पारशव्यस्य** । 'पार्शव्यस्य' इत्यनुक्रमण्याम् ॥ ५६४. १८. **अतिरिक्तोक्थे**—ऽ-मु । मॅक्समुल्लरमहाशयैः 'अतिरिक्तोक्थ्ये' इति कल्पितः । तदुपलब्धलिखितपुस्तकेष्वपि 'ॅक्तोक्थे' इत्येव पाठः । तत्कृतटिप्पण्यां 'आश्वलायनश्रौतसूत्रम् (९. ११, १३) अवलोकनीयम्' इति निर्दिष्टमस्ति । परंतु तत्र 'ऊर्ध्वमाश्विनादतिरिक्तोक्थानि' इति प्रक्रम्य 'महाँ इन्द्रो य ओजसा' इति पठितम् । एवमितरत्रापि (ऋ. सं. ४. ५७. प्रस्ता.; ५. ७६. प्रस्ता.) । 'अतिरिक्तोक्थे' इत्येव साधु ॥ ५६४. १९. **नूनमश्विना**—ज्ञ-*मॅ-आश्व. श्रौ. । नूनमश्विनोः—ऽ-मु ॥ ५६४. २५. **प्राजेयिता**—ज-त३-न-श-मु-निरु. १०. १०; ऋ. सं. ५. ८३. १ । पर्जयिता प्राजेयिता—ज्ञ । पार्जयिता—घ-त२-४-भ-मॅ ॥ ५६५. २५. **शतसंख्याकपर्वाणि** । शतसंख्याकापर्वाणि—न; शतसंख्यापर्वाणि इतरेषु मॅ—पुस्तके च । शतसंख्यानि पर्वाणि—मु । ऋ. सं. १. ८०. ६; ८. ८९. ३. अत्र द्रष्टव्यम् ॥ ५६८. ७. **पृश्नयः प्राष्टवर्णाः**—ऽ-मॅ-मु । प्रकर्षेण अष्टः व्याप्तः वर्णः यासां ताः इति विग्रहः । निरु. १०. ३९. द्रष्टव्यम् ॥ ५६९. ७. **कर्तुमाद्रियस्व**—ख१-ज्ञ-त-न-भ-श-मॅ । एतेष्वन्त्यः पादो न व्याख्यातः । कर्तुमाद्रियस्व उतापि च प्रजां सुपुत्रवीरं च (सुपुत्रवीर्यं वीरं—ज; सुवर्णं [? सुवीर्यं] सुपुत्रवीरं च—च) आद्रियस्व—घ१-च-ज । उतापि च सुवीर्यं शोभनवीर्योपेतां प्रजां संततिं दातुं कामयस्व—मु । मु-पुस्तकस्थोऽयं पाठः शंकास्पदमिति मॅक्समुल्लरमहाशयस्याभिप्रायः[1] ॥ ५७१. ७. **वज्री हस्तः**—*मॅ । वज्रहस्ते—न; वज्रहस्तः—मु इतरेषु च ॥ **तद्वान्**—*मॅ । तद्वन्—त३-मु । तद्धानी—ख; तद्वनी—न-भ; तद्वत्—ज्ञ-ज्ञ-त१-२-श ॥ ५७१. ८. **मेधाविनो वयम्**—ख१-घ-ज्ञ-ज्ञ-त२-४-न-भ-श-मु । मेधाविनः—ज-त३-मॅ ॥ ५७१. ३०. **ह्वयन्ते**—ऽ-मॅ- । हवन्ते—मु । 'हवन्ते' इति संहितापदपाठयोश्च । मु-पुस्तकपाठ एव युक्त इति अस्य शब्दस्य व्याकरणप्रक्रियया सुस्पष्टमेव । ऋ. सं. १. १४२. १३. अत्रापि द्रष्टव्यम् ॥ ५७२. २०. **वज्रहतेन**—मु । वज्रहस्तेन—ऽ-मॅ । 'वज्रहतेन' इति भाव्यमिति मॅक्समुल्लरमहाशयेन संसूचितम् ॥ ५७३. ९. **अत्यग्निष्टोमादिषु**—श-*मॅ । इत्यग्निष्टोमादिषु—भ । अत्यष्टोमादिषु—मु इतरेषु च ॥ ५७३. ३०. **बहु धनम्**—ऽ-मु । बहु दानं—मॅ ॥ ५७३. ३१. **दशगुणितानि**—*मॅ । शतगुणितानि—ऽ-मु ॥

[८. ७] ५७५. ९. **यद्यदा**—*मॅ-मु-× ॥ ५७५. ११. **एव स्थाने**—ख१-श-ज्ञ-त२-४-न-भ-श-मु । एव—घ । एकस्थाने—ज-त३-मॅ ॥ ५७७. ३. **जौहोत्यादिकात्**—ख१-ज्ञ-ज्ञ-त२-३-श-मु । जाहोत्यादिकात्—त४; जोहोत्यादिकात्—न-भ । जुहोत्यादिकात्—ज-मॅ ॥ ५७८. २१. **प्रवृत्तयज्ञकाः**—*मॅ । प्रवृत्तयशकाः—घ-ज्ञ-त-मु । प्रवृत्तयशकामाः—ख१-न-भ-श; प्रवृत्तयज्ञकामाः—ज ॥ ५७९. ७-८. **वायुर्वै...भवन्ति** । बृहदारण्यकोपनिषदि 'गोतम' इत्यस्य स्थाने 'गौतम', 'अयं च लोकः' इत्यस्यानन्तरं च 'परश्च लोकः' इत्यधिकं विद्यते ॥ **सर्वाणि च**—*मॅ बृ. उ. । सर्वाणि—ऽ-मु ॥ **संदृब्धानि**—न-श-*मॅ-मु-बृ. उ. । संदध्वानि—ख; संदब्धानि—त-भ ॥ ५७९. २०. **आप्त्यस्य**—भ-श-*मॅ-मु । आप्तस्य—ख१-ज्ञ-त-न; आप्यस्य—ज ॥ ५७९. ३०. **उशनाः**—त-न-श-मॅ-मु । 'उशना' इति पदपाठः । उशना—ख-भ ॥ ५८०. १७. **समान...दादेशाः**—*मॅ-मु । समानवाक्येषु युष्मदस्मदादेशाः—ज्ञ-ज्ञ-त१-२-श; समानवाक्येषु युष्मदादेशाः—ज-त३-४-न ॥

---

1. Preface to the 2nd Edition Vol. IV. p. 172.

५८०. २१. **तत्संबन्धिनी**—*मॅ । तत्संबंधि–ऽ-मु ॥ ५८०. २३. **रथकक्ष्यया**—श-त-न-श-*मॅ-मु । (केषुचिल्लिखितपुस्तकेषु 'टय' इत्यक्षरं 'द्य' इत्येवं लिखितमस्ति ।) रथकद्रया–घ१-श; रथकक्षया–ख१-च-ज-भ ॥

[८. ८] ५८२. १५. **आनुष्टुभं त्विति**—*मॅ-अनु.। आनुष्टुभमिति–ऽ-मु ॥ ५८३. १९. **ऋषेः**—घ-न-*मॅ-मु । ऋषिः–ख-श-त-भ-श ॥ ५८४. १. **पक्षे**—*मॅ-मु । यज्ञे–ऽ ॥ ५८४. २. **धीतिभिरित्य...श्छान्दसः**—ऽ-मॅ-मु ॥ 'धीतिभिरिति पराङ्' इति भाव्यम् ॥ ५८५. १२. **म्रियमाणा**—ख१-भ-*मॅ । म्रियमाणा–मु । क्षीयमाणा–इतरेषु ॥ ५८५. २९. **रैशब्दात्**—ऽ-मॅ-मु । 'रयिशब्दात्' इति भाव्यम् ॥ ५८६. २. **अभिप्राप्तावश्रौष्टाम्**—*मॅ-मु । अभिप्राप्तोश्रेष्टां–ख-भ; अभिप्राप्ताश्रौष्टां–श-त-न-श ॥ ५८७. ८. **भक्षयितारौ**—श-त२-४-मु । भक्षितारौ–मॅ इतरेषु च । ऋ. सं. १. ७७. ४; ६. ५१. ४ द्रष्टव्यम् ॥

[८. ९] ५८९. ८. **गायत्र्यावुपाद्ये** । 'गायत्र्या उपाद्ये' इत्यनुक्रमण्याम् ॥ ५८९.१० **अतिरिक्तोक्थे**—त-मु । अतिरिक्तोक्थ्ये–मॅ । ५६४. १८. टिप्पणी द्रष्टव्या ॥ ५९०. १५. **इत्यादिना**—श-श-*मॅ-मु । इति–श; इत्यादि–ख-त-न-भ ॥ ५९४. ५. **वा**—*मॅ-मु-× ॥ ५९४. २७. **द्युम्नादीनि**—मॅ-मु । द्युम्नादीन्–ऽ ॥

[८. १०] ५९६. १४. **यज्ञस्य शिरो**—*मॅ । स्य यज्ञशिरसो–थ; यज्ञस्य शिरसो–श; यज्ञशिरसो–ख१-श-त-न-भ-मु । 'तावेतद्यज्ञशिरः' इत्यस्य स्थाने 'ततो वै तौ यज्ञस्य शिरः' इति तैत्तिरीयसंहितायाम् ॥ ५९६. १६. **असूरे स्तोतृरहितेऽपि**—घ-ज्ञ-श त१-२-४-य-मु । असूरे स्तोत्ररहिते–ख-भ; असूरे स्तोतृरहिते–न; असुरेभ्यो रहितेपि–श । असूरे स्तोत्ररहितेपि–त३ ॥

[८. ११] ५९७. ६-७. **षट्कसप्तकाष्टकैः**—ख१-ज्ञ-त१-२-न-श-मु-पि. सू. । षट्कसप्तकाष्टकै–ज-ज्ञ-त३-४-भ । षट्कसप्तकाष्टकैव–मॅ ॥ ५९७. १४. **देवेषु**—मॅ । आ देवेषु–ऽ-मु ॥ ५९८. ३. **गीर्भिः स्तुतिभिः**—ख-ज्ञ-श्र-त३-न-भ-श-मु । गीर्भिः–घ-त२-४-मॅ ॥ ५९८. २७. **अङ्प्रत्ययः** । अजप्रत्ययः–श्र१ । अङ्प्रत्ययः–मॅ-मु इतरेषु च । अत्र 'अञ्प्रत्ययः' इत्येव साधुः । ऋ. सं. १. ३६. १७; ३८. ३; ४८. ९; ९२. १५ इत्यादिमन्त्रभाष्ये द्रष्टव्यम् ॥

॥ षष्ठाष्टकः ॥

(षष्ठाष्टकभाष्यसंशोधनार्थमुपयुक्तानि लिखितपुस्तकानि—ख, ग, घ, त, न, भ, श)

[८. १२] ६००. २. **तं त्वदीयम्**—ग१-भ१-य । त्वदीयं–मॅ-मु इतरेषु च ॥ ६०१. १. **यः**—ग-न-भ१ । यो नः–मॅ-मु इतरेषु च ॥ ६०१. १७. **लुङि सिपि मन्त्रे**—ग-भ१-२-*मॅ-मु । लुङि मंत्रे–ख-ज्ञ-त२-३-श; लुङि सि मंत्रे–थ; लुङि सिमंघेत्रे–न ॥ ६०१. २४. **अत्र**—ग-भ । अ–ख-त-न-श । अयं–मॅ-मु ॥ ६०२. १०. **ग्रहीता**—ऽ । गृहीता–मॅ-मु ॥ ६०२. १४. **नामानुपूर्व्यस्य** । 'नामानुपूर्वस्य' इति निरुक्तपाठः ॥ ६०२. २४. **प्राञ्चन्ती**—*मॅ । प्रांचती–ख-घ-त-न-भ-श-मु । प्रांचं–ग ॥ **स्तुत्यगुणगणम्**—भ-मु । स्तुत्यगुणं–घ, स्तुत्यं गुणंगण–त-न । स्तुत्यं गुणगणं–श-मॅ ॥ ६०२. २६. **स्तुत्यगुण°**—ग-भ-*मॅ-मु । **स्तुत्यं गुणं**–ज्ञ-त४; **स्तुत्या गुण°**—

इतरेषु ॥ ६०३.२. **परस्मैपदं । द्विर्वचनप्रकरणे** । परद्विर्वचनप्रकरणे–ग; परस्परं द्विर्वचनं (द्विवचनं–न) परेण–न-श । परस्परं द्विर्वचनपरेण–मॅ-मु इतरलिखितपुस्तकेषु च ॥ ६०३. ४. ' शुद्धम् ' इत्यस्यानन्तरं ' हविः ' इति पदं गलितमिति मॅक्समुल्लरमहाशयेनोक्तं तदनावश्यकं प्रतिभाति । ' हविः ' इति विशेष्यमग्रे विद्यत एव ॥ ६०३. १८. **नू**–ग-न-भ-श । नु–ख-त-मॅ-मु ॥ ६०४. २६. **यजनसाधनैः**—ग-भ । यजमानसाधनैः–मॅ-मु इतरेषु च ॥ ६०४. २७. **वा**—*मॅ-मु-✕ ॥ ६०५. २९. **तित्विषे**—ग । स तित्विषे–मॅ-मु इतरेषु च ॥ ६०६. १. **षोडशिशस्रे**—ग-न-भ-मु । षोडशस्रे–ख । षोडशशस्रे–त-श-मॅ-मु ॥ ६०७. १३. **प्र इयर्ति प्रेरयति**–मु । इयर्ति प्रेरयति–ग; यिप्रर्ति । प्रेरयति–य । प्रेरयति–मॅ इतरेषु च । ' प्रेयर्ति प्रेरयति ' इति स्यादिति मॅक्समुल्लरमहाशयेन संभावितम् ॥ ६०७. २०. **अयालिन्द्रस्य**—ग१-श-*मॅ-मु । अयालिंद्रस्य–ख-न-भ१; अथालिंद्रस्य–त; अयालिंद्रस्य–ग२-तै. ब्रा. । वा. सं. २१. ४७. अत्र द्रष्टव्यम् ॥ ६०७. २२. **दोहनाधिकरणे**—ख-ग-ज्ञ-भ३-श-मु । दोहनाधिकारणे–मॅ इतरेषु च ॥

[८. १३.] ६०८. १७. **वर्धयिता**—ग-घ-मु । वर्धयिताय–भ१; वर्धयितार–श । वर्धयिता च–मॅ इतरेषु च ॥ ६०८. २७. **लुडि**—भ-श-मु । (छांदसो) लङ्–ग१; लिडि–ग२; लडि–मॅ इतरेषु च ॥ ६०९. ४. **यज्ञस्य**—भ-*मॅ-मु । यज्ञे–ग-श; यज्ञ–ख-त२-३-४; वेद्यास्तीर्णे बर्हिषि–घ; यज्ञवेद्यास्तीर्णे बर्हिषि वा–ज्ञ ॥ ६०९. १०. **ईमहे याचामहे**—ग-घ-न-भ । ईमहे–त-मॅ-मु ॥ **वेदितारम्**—ग-भ-*मॅ-मु । विदितारं– इतरलिखितपुस्तकेषु ॥ ६०९. १७. **बह्वयः**—भ । वृद्धाः–श; वद्धाः–ख-त । बद्धाः–ग-घ-न-मॅ-मु ॥ ६१०. ८. **पूर्वोक्तै**—मॅ-मु । पूर्वोक्तैः–ऽ ॥ ६११. १९. **अवितेदसि**—ग-घ-मु । अवितासि–मॅ इतरेषु च ॥ **रक्षितैव**—ग-घ-न-भ-मु । रक्षिते–ख-त२-३; रक्षितो–ज्ञ-त४; रक्षिता–श-मॅ। एतत्सूक्तस्य २६ मन्त्रभाष्यं द्रष्टव्यम् ॥ ६१२. २४. **ज्ञायते वर्तते**—*मॅ-मु । जान् वर्तते–ख-त; ना अनुवर्तते–ग; जानन् वर्तते–घ-भ; तानन्–थ; जा वर्तते–न; ज्ञात्व वर्तते–श ॥ ६१३. २७. **ऋषिभिरुत्पादिताभिः**—*मॅ-मु । ऋषिरुच्यति ताभिः–ख-त-भ२; प्रकृतो नारदऋषिरुच्यते ताभिः–ग; ऋषिरुच्चरिताभिः–भ१-३; ऋषिरुच्यते ताभिः–श ॥ ६१४.१२. **प्रततवसू**—ग२ । प्रत्तवसू–ग१; प्रतवसू–ख-त-भ । प्राप्तवसू–मॅ-मु-निरु. ६. २१. ॥ ६१४. १९. **अन्या अपि दैवीः प्रजाः**—घ । अन्यापि दैवी प्रजा–ख-त-न-श-मॅ । अन्यापि दैवीः प्रजाः–मु । अन्यापि देवाः प्रजा–भ । अन्या अपि देवप्रजाः–ग ॥ ६१४. २४. **हिंसित्र्यः सत्यः**—ग । हिंसित्र्यः स्यः–ख-त-न-भ-श; हिंसित्र्यः–घ-मॅ-मु । ' हिंसित्र्यः सत्यः ' इति स्यादिति मॅक्समुल्लरमहाशयेन संभावितम् ॥ ६१५. ८. **बहुप्रज्ञ वेन्द्र**—ग-न-भ१-३ । बहुप्रज्ञेंद्र–ख-त-भ२-मॅ-मु । बहुप्रज्ञे इंद्र–श ॥ ६१५. १६. **अभीष्टस्य फलस्य**—ख-घ-त-न-भ-श-मु । अभीष्टस्य–ग । अभीष्टफलस्य–मॅ ॥

[८.१४] ६१५.२५. **काण्वायनौ**—ऽ-मॅ-मु । काण्व्यायनौ–अनु. भा. ॥ ६१६. १. **एवमहमपि**—ग । एवमपि–ख-त-न-भ२-श-मॅ । एवमपि यद्यदि अहं–मु । मह एव ईश्वरो भवसिमपि–भ१; एव महश्वरो भवसिमपि–भ३; ईश्वरो भवसि–य ॥ ६१७. १८. **दृढीकृतानि**—ग-भ१-३-*मॅ-मु । दृढीकृतारो–न; दृढां कृता–श; दृढीकृता–इतरेषु ॥ ६१७. १९. **दृह दृहि बृहि**

वृद्धौ—न। **बृह दृहि वृहि वृद्धौ**—ख-ज्ञ-त२-३-भ२-मॅ-मु। **दृह दृहि वृद्धौ**—ग-भ१-३-श; **बृह दृहि वृद्धौ**—त४ ॥ ६१७. २१. **कृत्यार्थे**—ग-भ१-३-श-मु। कृतार्थे—मॅ इतरेषु च ॥ ६१८. ११. **जगृहे**—ख-त-न-भ-श-मु। जग्रहे—ग-मॅ ॥ ६१८.१६. **इन्द्रो वृत्रं हत्वासुरान्**---—ख-ज्ञ-त३-४-न-भ१-३-मॅ। तदा अच्छैत्सीरित्यर्थः—ग; 'इंद्रो...असुरान्' नास्ति—त१-२-मु। इंद्रो वृत्रं हत्वासुरान् जयन्—श। इंद्रो वृत्रं हत्वासुरान् च—भ२ ॥ ६१८. १९. ---हे **इन्द्र...प्रेरितवानसि**—ख-ज्ञ-त३-४-न-भ१-३-मॅ। हे इंद्र (इन्द्र त्वं द्यां द्युलोकं—श) मायाभिः उत्सिसृप्सतः (उत्सिसृप्सतः उत्सृष्टुमिच्छतः—श) सर्वत्र प्रसरतः द्यामारुरुक्षतः द्युलोकमारोहतः दस्यून् (दस्यून् शत्रुन् उपक्षेप्तॄन्—ख) हे इंद्र (इंद्र त्वं—ख) अवाधूनुथाः—ख-घ-श। मायाभिरुत्सर्पणमिच्छतः द्यामारुरुक्षतः दस्यून् उपक्षपयितॄन् हे इंद्र त्वं वृत्रस्यासुरान् अवाधूनुथाः अवाङ्मुखं प्रेरितवानसि—ग। हे इंद्र मायाभिरुत्सिसृप्सतः सर्वत्र प्रसरतः द्यामारुरुक्षतः द्युलोकमारोहतः दस्यून् शत्रूनुपक्षेप्तॄन् इंद्रो वृत्रं हत्वा असुरान् हे इंद्र त्वं अवाधूनुथाः अवाङ्मुखं प्रेरितवानसि (प्रेरितवानसि उत्कृष्टतरो भवत्—त१)—त१-२-भ२ ॥

[८. १५] ६१९. १५. **शत्रुजातानि**—भ१-३-*मॅ-मु। शत्रून्—घ; शत्रुहननादिजातानि—इतरेषु ॥

[८. १६] ६२२. २४. **प्राप्तव्येषु**—ग-भ। प्राप्तेषु—न-*मॅ-मु। 'प्राप्तेषु' नास्ति—घ; प्रत्येषु—ज्ञ-त२-३; त्येषु—त४ ॥ ६२३. १०. **वा**—भ। ऋ. सं. ८. २. ३६. अत्र द्रष्टव्यम्। मॅ-मु-पुस्तकयोः इतरलिखितपुस्तकेषु च 'वा' नास्ति ॥ **एवमतः**—ग-घ-न-भ। एवातः—मॅ-मु इतरेषु च ॥ ६२३. २१. **युधा युद्धेन**—ऽ-मु। युधायुधेन—मॅ।

[८. १७] ६२४. १०. **आद्यस्तृचो**—ग-भ१-*मॅ-मु। आद्या च—ख-त; आद्य—न; आद्यस्तुचो—भ२ ॥ ६२४. १९. **केशिना केशिनौ केशवन्तौ**—त-भ-मु। केशिनौ केशवंतौ—ग-न; केशिना केशवंतौ—घ-मॅ। ६२४. २५. **सुतवन्तः**—ख-त३-न-भ-मु। सुतेवंतः—घ; सुतवतः—त२-४। सुतावंतः—श-मॅ ॥ ६२४. २९. **सुतवतः**—ऽ-मु। सुतावतः—मॅ ॥ ६२४. ३०. **सुशिप्रिन्**। 'सु। शिप्रिन्।' इति पदपाठः ॥ ६२५. ४. **ओभा कुक्षी... माघोनं च**। इयं श्रुतिः कुत्रत्येति न ज्ञायते ॥ 'वार्त्रघ्नं' इत्यस्य स्थाने 'वार्त्रघ्ने' इति मॅ-पुस्तके ॥ ६२५. ५. **सव्यदक्षिणभेदेन**—ग-भ१-*मॅ-मु। °दक्षिणे पदेन—ख-ज्ञ-त२-४-न; °दक्षिणपदेन—त३; °दक्षिणेन पदेन—श ॥ ६२५. ६. **शरीरावयवानि**—ऽ-मॅ-मु। 'शरीरावयवान्' इति भाव्यम्। ६२५. १३. **सुखजनकम्**—ऽ-मॅ-मु। 'सुखजनकः' इति भाव्यम् ॥ ६२६. २०. **शाचिपूजन**—ग-भ-*मॅ-मु। शाचिषा—ख-त-श; शाचिषापूजन—न ॥ ६२६. २१. **यतः**—*मॅ-मु। अतः—ऽ ॥ ६२६. २६. **स्वयमेव**—ग-भ-*मॅ। स्वयं—मु; स्वयं ते तव—ख-त-श; स्वयतेव—न ॥ ६२६. ३१. **ण्यत्प्रत्ययो**—मॅ। यत्प्रत्ययो—ऽ-मु ॥

[८. १८] ६२७. २५. **द्वाविंशत्यृचम्**—भ-*मॅ। द्वाविंशर्चं—मु इतरेषु च ॥ ६२७. ३१. **देवानाम्**—ग१ (पश्चाच्छोधितः)-*मॅ। देवादीनां—मु इतरेषु च ॥ ६२९. ७. **करणेऽर्थे**—ऽ-मु। करणार्थे—मॅ ॥ ६२९. २७. **शिष्यते**—भ-*मॅ-मु। शिष्टाते—ख-त-न; शिष्टः ते—श ॥ ६२९. २८. **पूर्वस्यामन्त्रितस्य**—ऽ-मु। पूर्वस्य—मॅ। ६३०. २४. **अयमर्थः**—*मॅ-मु। **अयमर्त्य**—ख-त; योमर्त्यः—ग१; यथा मर्त्यः—ग२; अयर्त्यः—न; अथमर्त्यः—भ; अयं मर्त्यः—श ॥

६३१. २१. **कृणोतन कुरुत**—ख-घ-त१-२-भ-मु। कृणोतन–ग-त३-४-न-श-मॅ॥ ६३२. १०. **नः अस्मभ्यम्**—ख-घ-श-त१-मु। एतन्नास्ति ग-त२-३-४-न-भ-श-मॅ-पुस्तकेषु॥

[८. १९] ६३२. १८. **सोभरेः**—त४-भ-श-*मॅ-मु। सोभरिः ऋषिः–घ; सौभरेः–इतरेषु॥ ६३२. २३. **सोभरि°**—ज्ञ-भ-श-*मॅ-मु। सौभरिः–ग; सौभरं–ख-त१-२-३-न॥ **पितुर्न**—ख-ज्ञ-त२-न-भ-श-*मॅ-मु-अनु.। वितुर–ग; पितु–त३॥ ६३३. ३. **वहेर्लिटि**—ख-ग-ज्ञ-त१-२-न-भ-श-मु। वहेः–त३-मॅ॥ ६३३. ९. **ईमिमम्**—त२-न-भ-श-*मॅ-मु। ईं इमं–ज्ञ॥ **व्याप्तधनं प्रभूतदानं वा**—ख-त-न-भ-श-मु। विभूतदानं वा–ग; व्याप्तधनं–घ। विभूतदानं–मॅ॥ ६३३. १७. **यष्टृतमम्**—ख-ग-घ१-त२-न-भ-श-मु। इष्टृतमं–च; यष्टतमं–ज्ञ। इष्टतमं–त३-मॅ॥ ६३३. २५. **प्रकृतिभावः**—ऽ-मु। प्रकृतिता च–मॅ। ६३४. १. **ब्राह्मणान्तरप्रदर्शनेन**—ख-ग-ज्ञ-त१-२-न-भ२-य-श। ब्राह्मणांतरप्रदर्शनेन व्याख्याता यः समिधा य आहुती यो वेदेनेत्यादिना–भ१। 'ब्राह्मणान्तरप्रदर्शनेन' नास्ति–त३-मॅ-मु॥ ६३४. २. **मर्तः**—ख-ग१-ज्ञ-त१-२-न-भ१-मु। मर्त्यः–ग२-त३-भ२-श-मॅ॥ ६३४. ३. **ब्रह्मयज्ञेन**—ग-त-भ१-श-मु। ब्रह्मयज्ञ–न-भ२-य। मॅ-पुस्तक एतन्नास्ति॥ ६३४. १२. **देवैः कृतम्**—त३-४-वर्जेषु लिखितपुस्तकेषु मु-पुस्तके च। त३-४-मॅ-पुस्तकेष्वेतन्नास्ति। ६३४. २४. **अतिथिर्न**—मु-त३-वर्जेषु लिखितपुस्तकेषु च। एतन्नास्ति त३-मॅ॥ ६३४. २६. **अभीष्टफल°**—ऽ-मु। अभिषवफल°–मॅ॥ **प्रत्यक्षकृतः**—ग-ज्ञ-त१-२-न-भ-श-मु। प्रत्यक्षत्वकृतः–ख-त३। प्रत्यक्षत्वकर्ता–मॅ॥ ६३४. २७. **क्षेमासो धारणान्यपि**—*मॅ-मु। त्वेक्षेमा रक्षकणान्यपि–ख; क्षेमासो रम्यान्यपि–घ-न-भ;त्वेसमा धीरणान्यपि–त३; क्षेमासो रक्षणा धारणान्यपि–श॥ ६३४. २८. **त्वमेव**—ग-घ-न-भ। एव–ख-त-श-मॅ-मु॥ ६३५. १. **दाश्वध्वरः**—ऽ-मु। दाश्वध्वरश्च–मॅ॥ ६३५. ३. **सनिता अस्तु**—ख-ग-घ-त३-न-भ-श। सनिता–ज्ञ-त२-मॅ। अस्तु भवतु–मु॥ ६३५. २५. **ज्ञातवतो**—न-भ२-श। ज्ञानवतो–ग-भ३; ज्ञातव–त; ज्ञातवो–भ१; ज्ञातव्यस्य–ख-मॅ-मु॥ ६३६. ११. **निशान°**—*मॅ-मु। निश्वान°–ख; निश्यान°–ग-न-भ-श; निश्व्यान°–न॥ ६३६. १२. **सः**–ग। एतन्नास्ति मॅ-इतरलिखितपुस्तकेषु च। सोऽग्निर्धीभिः–मु॥ ६३७. १३. **सौत्ये**—भ१-३-मु। सौम्ये–ग; स्तौत्ये–भ२; स्वोत्ये–श। स्तोत्ये–मॅ इतरेषु च॥ ६३९. १३-१४. **ये यथा……भवन्ति**। 'यं यथायथोपासते तथैव भवति' इति मुद्गलोप. ३. ३॥ ६३९. १४.**भवेयमिति**—*मॅ-मु। भवति–ख-त-श; भवानि–ग-न-भ॥ ६३९. १९. **वा**–ग-भ१। व–ख-त-न-श। च–मॅ-मु॥ ६४१. ९. **मुष्काणि**—मॅ। मुष्कानि–ऽ-मु॥ ६४१. ११. **स्तोतव्यत्वेन**—ग-त-भ१-३-*मॅ-मु। स्तोतव्येन–ख-न-भ२-श॥ ६४१.१९. **लभेय**—*मॅ। लभेयं–ऽ-मु॥ ६४१. ३०. **शत्रुं सर्वमपि**—ख-ज्ञ-त१-२-३-भ-श-मु। सर्व–ग। एतन्नास्ति घ-त४-मॅ॥ ६४२. १४. त२-३-४-न-श-मॅ-पुस्तकेषु प्रकृतमन्त्रभाष्यं न विद्यते। ख-ज्ञ-त१-भ-मु-पुस्तकेषु–'अप्येतद्यदुक्तमपि यदेतत् वक्ष्यमाणमिति। उतशब्दः एवमुभयं तं ('तं' नास्ति भ-निरुक्तटीकायां च) संभावयति। मे मह्यं (मम–निरु. टी.) प्रयियो प्रयायते प्रगम्यते (शाम्यते–य) येन तत् प्रयियु (प्रयियुः–मु) धनमश्वादि। तस्य प्रयियोः धनस्य बह्वदात् (धनं दात्–ख)। ताभिः कन्याभिः सह वयियोः। ऊयते येन तद्वयियु वस्त्रादि तस्य च बह्वदात्। तिसृणां (तिसृणां–ख-भ१-निरु. टी.) सप्ततीनां गवां श्यावः श्यामवर्णो वृषः श्यामवर्णानां प्रणेता प्रकर्षेण नेता अग्रतो गामी भुवद्वसुः

भावयिता वसूनां प्रशस्तः पूजितलक्षणः दियानां (दिव्यानां–त१; दीयानां–ख-ज्ञ-भ१; देयानां–य) दानार्हाणां गवां (गवां देया यास्तासां–निरु. टी.) पतिः। ताश्च गाः एतत्संख्यायुक्ताः एतद्गुण-युक्ताश्च मह्यमदात्। क्व पुनरसावदात्। सुवास्त्वाः सुष्ठुनिवासाया नद्याः अधि तुग्वनि तीर्थेषि एतददात् मह्यम्। सुवास्तुर्नाम (सुवास्तुः–ज्ञ-भ१-निरु.) नदी तुग्व तीर्थं भवतीति निरुक्तम्। अस्या ऋचो व्याख्यानं निरुक्तटीकाया उद्धृतम्[1] ॥ ग-पुस्तकपाठः–' कूलं या प्रयौति सा प्रयियुः। वृक्षादिकं यावयौति सा वयियुः। एवंभूता या सुवास्त्वा नद्या अधि तुग्वनि तीर्थे तिसृणां सप्ततीनां श्यावः श्यामवर्णः ऋषभः दियानां देयानां गवां पतिः वसुर्वासकः प्रणेता नायको भवदभवत् इति दानस्तुतिः ' ॥ घ-पुस्तके – ' उताप्येतद्यदुक्तं मे मह्यं प्रयियोः अश्वादिषः श्यामवर्णानां प्रणेता प्रकर्षेण नेता मह्यमदात्। क्व पुनरसावदात्। सुवास्त्वाः सुष्ठुनिवासाया नद्याः अधि तुग्वनि तीर्थे अधि एतददात् मह्यम्। सुवास्तुनाम नदी तुग्व तीर्थं भवतीति निरुक्तम्। अग्रतो गामी भुवद्वसुः भावयता वसूनां (बहूनां–च) पूजितलक्षणः दियानां दानार्हाणां गवां पतिः ताश्च गाः एतत्संख्यायुक्ताः' ॥

[८. २०] ६४२. १६. **गन्त**। ' गन्ता ' इत्यनुक्रमण्याम् ॥ ६४२. २२. **हे प्रस्थावानः .....अस्मानागच्छत**—ख-ग-ज्ञ-त१-२-भ-मु। हे प्रस्थावानः गमनशीलाः अयं आगंतव्यं गच्छत–घ। हे प्रस्थावानो गमनशीला मरुतः यूयमा गंत आगच्छत–मॅ[2] ॥ ६४३. १. **महान्तः**—ख-ज्ञ-भ-*मॅ-मु। तद्वंतः–ग-श; तद्वातः–त२-३-४; तद्वांतः–न ॥ ६४३. ४. **कामयमानाः**—ख-ज्ञ-त१-२-भ-*मॅ-मु। ग-घ-त३-४-न-श-पुस्तकेष्वेतन्नास्ति ॥ ६४३. १८-१९. **परोऽर्धर्चः परोक्षकृतः**। ' प्रत्यक्षकृतः ' इति भाव्यम् ॥ ६४३. २१. **निष्पद्यते**—ख-ग-त-न-भ१-२-य। विद्यते–श। निष्पाद्यते–भ३-मॅ-मु ॥ ६४४. ६. **आन्तरिक्षम्**—*मॅ-मु। अंतरिक्ष°–श; अंतरिक्षं–इतरेषु ॥ ६४४. ७. **पलायते**—ग-घ-भ१-३-मु। पालयते–ख-त-न-भ२-श-मॅ ॥ ६४४. ३०.

---

१. Cf. Max Müller: Preface to the 2nd Edition, Vol. IV, p. 172:
" *R* (i. e. Bombay Edition) borrows the commentary from the commentary on the Nirukta IV. 15, adding at the end of the verse (*not in a note*): अस्या ऋचो व्याख्यानं निरुक्तटीकाया उद्धृतं, which might give the impression, as if Sāyaṇa, not the Editors, had copied from the Nirukta-ṭīkā. At all events, this throws some light on the manner in which lacunas have been filled in *R*." As Max Müller could not find in his Mss. material this part of commentary, it is but natural that he should charge the Editors of the Bombay Edition with adding this portion of their own accord. Since, however, this portion is found in a good number of Mss. (some of them really old), it is quite clear that the Editors of Bombay Edition reproduced it from some Ms., and did not add of their own accord. It is evident that the scribe of the original copy of the Mss. ख-ज्ञ-त१-भ, not having found commentary on this verse, reproduced it from the Nirukta-ṭīkā.

२. Cf. Max Müller: Preface to the 2nd Edition, Vol. IV. p. 169:
" R (Bombay Edition) reads हे प्रस्थावानः प्रस्थातारः प्रगंतारः मरुतः आगंत अस्मानागच्छत quite different from our Ms. B., the only Ms. which has the passage. Is this a conjectural reading ? " It is rather striking that Max Müller could not find this reading found in so many Mss. by us and also most probably by the Editors of the Bombay Edition, in his *apparatus criticus*.

ार्धं विशेष्यते—त३-न-*मॅ-मु। शर्धो विशेष्यंत–ख-त२; शर्धो विशेष्यते–ग-श-त४-भ; कीदृशे ार्धाय–घ ॥ ६४५. १४. **शक्त्यादीन्यायुधानि**—*मॅ-मु। शक्त्यान्यायुधानि–ख-त-न-श; शक्त्या-्यान्यायुधानि–ग-भ ॥ ६४६. ६. **स्मः**—घ-न-भ। रः–ग। स्म–त-मॅ-मु ॥ ६४६. ७. **हीनः**—ा-*मॅ-मु। हिनः–ख-त२-३-न-भ१; नहिनः–श-त४-भ२-३; हीन–श ॥ ६४६. २४. **सुम्ना ुम्नानि सुखानि**—ग-न-भ-मु। सुम्ना सुखानि–घ-श। सुखानि–त-मॅ ॥ ६४७. १५. **वर्षितॄन्**—ा-भ। वर्षितान्–घ; वर्षिन्–न; वर्षिष्ठान्–ख-त-श-मॅ-मु। ऋ. सं. ८. ७. ३३; २०. २०. ष्टव्यम् ॥ ६४७. १७. **शक्तान्**—*मॅ-मु। सत्कृतान्–ख-त; सेक्तॄन्–घ-भ; सेक्षन्–न; सनूतने–ा ॥ ६४८. ११-१२. **धारयितव्ये स्तोत्रे यज्ञे**—भ-*मॅ-मु। धारयितव्यस्तोतृयज्ञे–ख-त-न; ारयितरि यष्टरि स्तोतरि यज्ञे–ग; धारयितव्यस्तोमे यज्ञे–श ॥ ६४८. २३. **असक्तशत्रवः**—ः। अशक्तशत्रवः–ऽ-मु ॥ ६४८. २४. **कल्याणीभिस्ताभिः**—ग-भ१-३। कल्याणीभिः ोत्रीभिः–ख-ज्ञ-त१-२-४-श; कल्याणीभिः स्तोत्राभिः–त३-मु; कल्याणीभिः स्तोतृभिः–न-भ२; ल्याणीभिस्ततभिः–य। कल्याणीभिः–मॅ ॥

[८. २१] ६५०. २. **वाजयन्ति**—ग-त१। वाजंति–मॅ-मु इतरेषु च ॥६५०. ३. **वा**–ा-न-भ। त्वा–त२-३-श। ख-ज्ञ-त४-मॅ-मु-पुस्तकेषु 'वा' नास्ति ॥ ६५१. ३. **गोविकारे दधि-ायसी**—*मॅ-मु। गोविकारो दधिपयस्य–ख-त-न; गोविकारो दधि पयश्च–ग-भ; गोर्विकारो दधि-ायसोः–श ॥ **उच्यते**—*मॅ-मु। उच्यते–ऽ ॥ ६६१. ४. **श्रीते**—भ१-३। श्रीतेन–ख-त-न-ा२-श-मॅ-मु ॥ ६५१. २१. **अभूम भवामः**—न-भ-श-मु। अभूमः–घ। भवामः–ख-ग-त-मॅ ॥ ६५१. २२. **सुष्ठ्यत्ययः**—श-*मॅ-मु। सुव्यत्ययः–ख-त-भ२; सुप्व्यत्ययः–ग;सुव्यत्ययः–न; सुष्प-ययः–भ१; सुतयः–भ३ ॥ ६५१. २३. **तु ते त्वां**—*मॅ। ते त्वां–मु। उत त्वं–ख-ज्ञ-त१-२; ु त्वां–ग१; तु त त्वा–ग२; नुत त्वं–त३-न; तु त्वं–त४; तु ते त्वं–भ१-३; ननु ते त्वं–श ॥ **रक्ष्या इति**—ग-*मॅ-मु। रक्षंत इति–त१-२-४-भ२; रक्षत इति–ज्ञ; इति–भ१; मिति–भ३ ॥ ६५१. २९. **अभ्यवहार्यम्**—ग-घ-भ। अभ्यवहार्थ–न। अभ्यवहारार्थ–ख-त-श-मॅ-मु ॥ ६५३. २८. **तान्नाश्रयसीत्यर्थः**—त३-४-न-श-मॅ। तान्नाश्रयसीत्यर्थः यदा त्वं नदनुं नद अभ्यक्ते शब्दे यं ोतारं कृणोषि मदीयोयमिति यदा भावयसि तदानीं समूहसि धनादिकं तस्मै वहसि। आदित् अनंत-मेव तेन लब्धधनेन स्तोत्रा पितेव पालयिता जनक इव हूयसे स्तुतिभिराहूयसे स्तूयस इत्यर्थः–ख-ज्ञ-१-२-भ-मु। तान्नाश्रयसीत्यर्थः यदा मानवस्य नदनुं दानादिराहित्यं समूहसि निराकरोषि यष्टृत्वं कृणोषि करोषि आदित् अनंतरमेव पितेव सन् तेन हूयसे–घ ॥ ६५४. १६. **मा**—घ। तस्मादन्नं न–ा२-ज्ञ-त१-४-भ१-२; तस्माद्धनं–भ३; तस्मादन्यन्न–ख-ग१-त२-३-न-श-मॅ-मु ॥ **ग्रहेः**—ह-त२-३-४-न-भ२-श-मु। गृहेः–ग-ज्ञ-भ१-३-मॅ ॥ ६५४. १८. **धनादिभिः**—ख-ग-त२-न-न-*मॅ-मु। नादिभिः–त३; भरणादिभिः–श ॥ ६५४. १९. **कैश्चित्**—ग-*मॅ-मु। कश्चित्–ृतरेषु ॥ ६५५. ५. **वर्तन्ते तान्**—भ३-*मॅ-मु। त्रतंत तान्–ख-त-न; ततान्–घ; तत्रंते तान्–भ१; त्रतंते तान्–भ२; तान् ततान्–श ॥ ६५५. ६. **धनैस्तनोति**—ग२-भ३-*मॅ-मु। धनौ नोति–ख-ज्ञ-त२-३-४-न; सनोति–घ; धनै सनोति–त१· धनैः सनोति–भ२· धनं सनोति–श· **नैस्तनोमि**–भ१ ॥

[८. २२] ६५५. ११. **आश्विनम्**—ग-श-त२-भ१-३-*मॅ-मु-अनु. । अश्विनं–ख-त३-४-न-भ२ ॥ ६५५. १८. **उपक्षपयितारम्**—भ१-३-*मॅ-मु । उपजनायतारं–ख-त-न; उपयितारं–ग; उपजनयितारं–श ॥ ६५५. १९. **सुहवा सुहवौ**—ख-ग-श-त१-२-भ-श-मु । **सुहहवौ**–त३-४-न । **सुहवा**–घ-मॅ ॥ ६५५. २१ **सूर्यां स्वयंवरे**—ग-भ-श-मु । सूर्यास्वयंवरे–ख-घ-त-मॅ ॥ ६५५. २७. **यज्ञेषु**—ख-ग-श-त१-२-न-भ-श । यक्तेषु–त३-४ । युद्धेषु–*मॅ-मु ॥ ६५५. २९. **कैश्चिदप्यनुपद्रवम्**—ऽ-मॅ-मु । ! ॥ ६५६. ३. **द्योतनशीलौ**—ख-ग-श-त३-४-भ-श-*मॅ-मु । द्यौतन°–त२ ॥ ६५६. ११. **परि ईयते**—घ-भ१-३ । मॅ इतरेषु चैतन्नास्ति । ईयते गच्छति–मु ॥ ६५६. १३. **मन्त्रान्तरम्**—*मॅ-मु । मंत्रांतरं सति–ख-त-य; मंत्रांतरं संति–न-भ१-२; मंत्रांतरे सति–भ३-श ॥ ६५६. २३. **द्यावापृथिवी द्यावापृथिव्यौ**—ग-घ-भ-मु । द्यावापृथिव्यौ–ख-त-श-मॅ ॥ ६५६. ३१. **वृकेण**—*मॅ-मु । वृकेण लांगलेन–ऽ ॥ ६५७. १. **धान्यम्**—*मॅ-मु । धान्यं वा–ग; धनं वा–इतरेषु ॥ ६५७. ९. **अस्मानुपयातमागच्छतम्**—घ१-*मॅ-मु । अस्माकं नुपमानं गच्छंतौ (गच्छतौ–त२-४)–ख-त१-२-३-४-न-भ२; अस्मानुपयातं गच्छतं–ग; अस्माकमुपयातमागच्छतं–च-य; अस्माकमुपयातं गच्छतं–भ३; अस्माकं उपमानं गच्छंतौ (गच्छतौ–श)-श-भ१-श ॥ ६५७. ११. **एवम्**—ऽ-मु । एव–मॅ ॥ **आगच्छतम्**—ग । आगं–भ२ । आगतं–मॅ-मु इतरेषु च ॥ ६५८. १. **यत्**—ग-घ-भ । यद्यच्छत्–ख-त-न-श; यद्यत्–*मॅ-मु ॥ ६५८. ६. **अधृतगमनाः**—ग-भ१-३-*मॅ-मु । अधृतनाः–त४; अधृतघनाः–इतरेषु ॥ ६५८. १९. **वन्दनो**–भ-*मॅ । वंदन–मु इतरेषु च ॥ ६५८. २०. **मायाभिः**—*मॅ । मालाभिः–ऽ-मु ॥ ६५९. १. **स्तूयमानमार्गौ**—ख-श-त२-न-भ१-३-*मॅ-मु । यामन् मार्गे–ग; स्तूयमार्गौ–त३-४; स्तूयमानमार्गैः–भ२ ॥ ६१९. ४. **नः अस्मान्**—घ । नोस्मत्–मॅ-मु इतरेषु च ॥ ६५९. ८. **सेवनीयशीलौ**—*मॅ । सेचनीयशीलौ–ख-घ-त-न-भ-श-मु । सचनशीलौ–ग । 'सचनीयौ' अथवा 'सेवनीयौ' इति साधु इति मॅक्समुल्लरमहाशयेनाभिप्रेतम् । ऋ. सं. २. ३१. ४; ८. ७०. ८. अत्र द्रष्टव्यम् ॥ ६५९. १७. **गच्छन्तीभिः**—ग । गच्छद्भिः–मॅ-मु इतरेषु च ॥ ६५९. १८. **आरात्ताच्चित्**—ग-घ-मु । आरात्तात्–मॅ इतरेषु च ॥ ६६०. १. **प्रयच्छति**—ख-त-न-भ-श-*मॅ-मु । प्रयच्छंति–ग ॥ ६६०. ६. **लिडि**—मॅ-मु । लिटि–ऽ ॥

[८. २३] ६६१. १३. **अनुषक्तम्**—ख-ग-त-न-भ-श-मु । अनुषगनुषक्तं–घ । आनुषक्तं–मॅ । निरु. ६. १४ द्रष्टव्यम् ॥ ६६१. २०. **यष्टृत्वेन**—*मॅ-मु । यष्टृयष्टव्येन–ख-त-न-भ-श; याज्ययष्टृत्वेन–ग; यष्टव्येन–घ ॥ ६६१. २७. **यज्ञवति**—ग-भ३-*मॅ-मु । यज्ञं प्रति–ख-घ-श-त१-२-भ२-य-श; धत्रयज्ञं प्रति–त३-४-न; ज्ञं प्रति–भ१ ॥ ६६३. १४-१५. **मायया पि तस्य**—ग-घ-*मॅ-मु । मायावि(व्योवि–श)तस्य–ख-श-त३-४-भ२-श; वमायावि तस्य–त२; मायावि तस्य–न; मायान्वि तस्य–भ१-३ ॥ ६६३. २१. **त्वा त्वाम्**—ग-घ-न-भ-मु । त्वां–ख-त-श-मॅ ॥ ६६३. २६. **गृहे**—*मॅ-मु । यज्ञे–ग; सह–इतरेषु ॥ ६६४. ३. **अस्माकम्**—मॅ-मु । नोस्माकं–ऽ ॥ ६६४. ४. **त्वा**—घ१-वर्जेषु लिखितपुस्तकेषु । घ१-मॅ-मु-पुस्तकेषु नास्ति ॥ ६६५. ५. **ज्वलत्तेजसे**—ख-ग-घ-त१-३-भ । ज्वलत्तेजसो–त२-४; ज्वालंत्तेजसे–न । ज्वालातेजसे–मॅ-मु ॥ **कथमिव**—ख-ग-श-त१-२-४-भ-श । वयमिव–त३-न । वयमिह–मॅ-मु ॥ ६६५. १०. **बाध-**

परिहारेण—ग-भ१-२-श-*मॅ-मु। बाधपरिपूरेण–ख-ञ-त२-३-४-न; बाधापरिहारेण–भ३ ॥ ६६५. १७. **अरणीभिः**—ग-घ-*मॅ-मु। वारणीभिः–मु इतरेषु च ॥ ६६६. १९. **यशस्वी असि**—घ-भ-मु। साति यशस्वी–ग; यशासि–ञ; यशस्त्वं–श; यशस्वासि–ख-त२-३-४-न-मॅ ॥

[८. २४] ६६६. २४ **विश्वमना ऋषिः**—*मॅ। वैयश्वनाम ऋषिः–ऽ-मु ॥ ६६७. ४. **इत्वषत्वे**—ग-भ१-३-मु। इत्त्वषत्वे–मॅ। ईत्त्वषत्वे–भ२; इतिषत्वे–ख-त-न-श ॥ ६६७. १०. **हि प्रसिद्धौ**—मॅ-मु। हि प्रसिद्धो भूः–ग; हि प्रसिद्धो भूत्–इतरेषु ॥ ६६७. १७ **नानाविधान्नोपेतम्**—भ१-३-श-*मॅ-मु। नानाविधौपेतं–ग२; नानाविधानोपेतं–ख-घ-त-न-भ२ ॥ ६६७. २३ **निरेकम्**—*मॅ-×। मु–पुस्तकेऽप्येतन्नास्ति ॥ ६६७. २५. **स्तवमानः**—ञ-*मॅ। स्तवानः–ख-ग-त१-३-४-न-भ२-३-मु; स्तवनः–घ; स्तवान–श। ६६८. १२. **तथा मनः**—*मॅ-×। तथा मदीयं मनो–मु ॥ ६६८. १७. **नामन्त्रिते**—ग-भ। आमंत्रिते–ख-त-न-श-मॅ-मु ॥ ६६९. ३. **नर्तयितः**—ग-*मॅ-मु। वर्तयितः–ख-घ-त-न-भ; वर्तमानं–श ॥ ६७०. २. **अभिषुणुत**—ग-भ२-य। अभिषुत–मॅ-मु इतरेषु च ॥ **मदकरम्**–भ२। मधुरं–ग। मधुकरं–मॅ-मु इतरेषु च ॥ ६७०. ९. **दक्षम्**—ग-भ१-श-*मॅ-मु। रक्षं–इतरेषु ॥ ६७०. २७. **ऋत्विक् मध्वः**—ख-ग-त-न-भ-श-मु। **ऋत्विक्** सदावृधः सर्वदा वृद्धिमतो मध्वः–घ-मॅ ॥ ६७०. २८-२९. **अभिषुणु.....वर्धकः**—ग-भ। एतन्नास्ति ख-त-न-श-मॅ-मु। ऋ. सं. ४. ३१. १; ५. ३६. ३; ८. ६८. ५ एतेषु 'सदावृधः' इत्यस्य, ऋ. सं. ८. २४. १३. अत्र 'सिंच' इत्यस्य च व्याख्यानं द्रष्टव्यम् ॥ **अयमेवेन्द्रः**—ग-भ-मॅ-मु। कोपे(कोये–त१-२)नेवेन्द्रः–ख-त; इत् वा उ अयमेवेंद्रः–घ; कोयमेवेंद्रः–न-श[1]। 'स्तूयते खलु' इत्यस्यानन्तरं मु-पुस्तके 'कीदृशः वीरः विक्रांतः सदावृधः सर्वदा वर्धमानः' इत्यधिकं विद्यते ॥ ६७१. ५. **उपलक्षणमेतत्**—भ। उपलक्षणं–*मॅ-मु इतरेषु च। 'उपलक्षणमेतत्' इति भाष्ये साधारणः पाठ इति मॅक्समुल्लरमहाशयेनोक्तम् ॥ ६७१. ६. **छान्दसो मुम्**—*मॅ। छांदसो वोम–ख-त-न; छांदसो द्वितीयो नुट्–भ; छांदसो लोपः–श। छांदस आगमः–मु ॥ ६७१. ७. **सर्वैः**—ग-ञ-भ३-*मॅ-मु। सर्वैरिति–त२-४-भ२ ॥ ६७१. ३१. **ऋत्विग्भिः**—ग-ञ-न-भ-श-*मॅ। ऋत्विस्तः–ख त२-३। ऋत्विग्भ्यः–मु ॥ **मदीयम्**—ग-त-न-भ। यदिदं–श-मॅ-मु ॥ ६७२.१. **घृताच्च मधुनश्च**—ख-ग-त२-भ-श-मु-आश्व. गृ.। घृतान्मानुश्च–त३; घृतास मधुनश्च–भ२। घृतान्मधुनश्च–घ-न-मॅ ॥ ६७२. ९. **धनदानम्**—ग-घ-मु। धनं दानं–मॅ इतरेषु च ॥ ६७२. २५-२६. **नव वै.....दशधा चरन्तम्**। 'नव वै पुरुषे प्राणाः' एतावन्मात्रोंऽशः तैत्तिरीयब्राह्मणे (१. ३. ७. ४) उपलभ्यते। 'दशधा' इत्यस्य स्थाने 'दशमो' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ६७३. ६. **संबोध्याह**—ग-भ१-३-*मॅ-मु। संबोध्य–इतरेषु ॥ ६७३. ८. **भवन्तीति**—*मॅ-मु। भवन्ति–ऽ ॥ **शोधनहेतुत्वात्**—ग-भ२-३ । शोधने हेतुत्वात्–भ१; शोभनहेतुत्वात्–इतरेषु। शोभाहेतुत्वात्–मॅ-मु ॥ ६७३. ९. **यजमानानामिव**—*मॅ-मु । पद्यमानानां यजमानानां–ख; पतमानानां–ग२-त४-भ; पद्यमानानां पतमानानां–ञ-त२; पद्यमानानां यजमानानां राया (राया

---

1. The fact that many Mss. have को before यमेवेंद्रः suggests that some portion is here wanting whose last letter may be को. This want is fulfilled by the passage reconstructed on the basis of Mss., which has वर्धको as the last word.

इव–य) त१-य ॥ **परिपदां समानाधिकरणः**—*मॅ-मु । परिपदी समानक–ख-श-त२-३-४-न-भ१; परिपदां समानक–त१; पद्यमानानां–भ१-३ ॥ ६७३. १९. **विशेषेण**—भ । विशेषणं–ग । निःशेषेण–त-मॅ-मु ॥ ६७३. २५. **संन्यसे**—त२-भ२-*मॅ-मु। सन्यसे–ख-ग-घ-श-भ१-३; संन्यासे–त३; सन्यासे–त४ । ' सर्न्यसे ' इति पदपाठः ॥ ६७४. १. **ऋन्**—*मॅ-मु । ऋन–जोधपूरलिखित-पुस्तके । ऋन्–इतरेषु ॥ **क्षणोतेः**—*मॅ-मु । अर्तेः–ग; ऋणोतेः–इतरेषु ॥ ६७४. ३. **किं पुनस्तं हन्ति**—*मॅ-मु । किं पुना हंति–ख-त; किं पुनः हंति–ग-घ-श; किंतु नाहंति–न-भ१-२-य; किमु न हंति–भ३ ॥ ६७४. ७. **हननसाधनम्**—ग-घ-न-भ-मु । हननसा(युधं)–ख-त-श । हनन-साधकं–मॅ ॥ ६७४. १६. **वाजनम्**—मॅ-मु । वर्जनं–ख-ग-त-न-श; वर्धनं–भ ॥ ६७४. १९. **प्रापितवती**—*मॅ-मु । प्रापितवान्–§ ॥ ६७४. २०. **करोषि**—*मॅ-मु । करोति–§ । ' कारय ' इति भाव्यम् ॥ ६७४. २४. **आदत्तवान्**—*मॅ-मु । दत्तवान्–§ ॥ ६७५. २. **यदा**—भ३-*मॅ-मु । यद्वा यथा–ख-त१-२-३-न-भ१-२; यद्वा यदा–ग ॥

[८. २५] ६७५. ७. **विश्वमना**—ख-श-त२-भ-*मॅ । वैयश्वनामा–मु ॥ ६७५. २२. **कर्त्रपेक्षत्वात्**—ग-भ३ । कर्तृपेक्षत्वात्–न-भ१-२ । कर्तृपक्षत्वात्–ख-श-त२-३-श-मॅ-मु ॥ ६७६. ४. **ऋतावाना**—§-मॅ । ' ऋतऽवानौ ' इति पदपाठः । ऋतावानौ–मु ॥ ६७६. १०. **बलाद्वेगः**—भ-*मॅ-मु । बलाहेग–ख-त; बलोवेग–श; **द्वेग**—न ॥ ६७६. १२. **क्षयतेः**—त२-न-श-मॅ-मु । क्षीयतेः–भ । ' क्षियतेः ' इति भाव्यम् ॥ ६७६. २०. **वृष्टथवेला तदा**—*मॅ । वृष्टथवेजानाद–ख-त-न-भ२; **वृष्टथभावो** जातः तदा–भ१-३-श । मु-पुस्तक एतद्वाक्यं नास्ति ॥ ६७७. १३. **तद्वददुःसहेन**—भ१-श-*मॅ-मु । तद्वदः दुःसहेन–ख-त-न; तद्वदुःसहेन–भ२-३ । तद्वत् दुःसहेन–मु ॥ **अहोरात्रयोः**—*मॅ-मु । अहोतात्रयोः–ख-त-न-श; लोकत्रयेन–भ१; लोकत्रय–भ२-य; लोकत्रये–भ३ ॥ ६७७.१९. **वृद्धश्रवसः** । ' वृद्धऽश्रवसः ' इति पदपाठः ॥ ६७८. १. **पालनवत्त्वात्**—*मॅ-मु । पालनैवत्त्वान–ख-श-त३-४; पालनैवत्त्वात्–त१-२; पालनैतत्त्वान–न; पलितेतत्त्वात्–भ१; पलिनेवत्त्वात्–भ२; मरुत्पालितत्वात्–भ३ ॥ ६७८. ४. **कर्म**—भ-श-*मॅ-मु । कर्मक–ख-त-न ॥ ६७८. १०. **उरुतरम्**—*मॅ-मु । गुरुतरं–§ ॥ ६७८. १९. **पालयताम्**—भ१-२-*मॅ-मु । पालयंतां–इतरेषु ॥ ६७९. ११. **वरुणस्य**—श-*मॅ । वरुर्षण–भ१; वर्षणस्य–इतरेषु ॥ **च**—*मॅ । धां–ख; व–त१; वा–मु इतरेषु च ॥ ६७९. १६. **पर्यन्तान्**—*मॅ-मु । रपानति–ख-श-त२-३-४-न-भ१-२; स्थानति–त१; अंतरान्–घ; अंतानपि–भ३; पारं परितो मिनोमि–श ॥ ६७९. २३. **रूपम्**—*मॅ-मु-× ॥ ६८०. ५. **लुक्**—*मॅ-मु । षष्ठी–§ ॥ ६८०. ११. **उक्षण्शब्दात्**—न-भ-*मॅ । उक्षणशब्दात्–ख-त-श-मु ॥ ६८०. १२. **वृद्धिभावोऽपि**—*मॅ । वृद्धयभावोपि–ख-त-न-भ१-३-मु; वृद्धभावोपि–भ२; वृद्धयभावेपि–श ॥ ६८०. १३. **बहुवत्पितृशब्देन (?)**—§-मॅ-मु ॥ ६८०. २१. **स्वकुशलं**—ख-त-न-भ२-श । स्वकुलं–भ१; स्वकुशले–भ३ । कुशलं–मु । नु कुशलं–मॅ । एतद्बोधं दृश्यते ॥ **आयुधनेतृणाम्**—श-*मॅ-मु । अयुतनेतृणां–ख; अधुयनेनृणां–त-न; अधूयने-तृणां–भ१-२; अध्वरनेतृणां–भ३ ॥ ६८०. २२. **भवेताम्**—भ३-*मॅ । भवेत–§ । भवेतं–मु ॥ ६८०. २७-२८. **मेधाविनामुचितौ**—*मॅ-मु । मेधाविनामस्थितौ–ख-त-न; मेधाविनौ–घ-श; मेधाविनावस्थितौ–भ ॥ ६८१. २. **प्रत्यग्रहीषम्**—*मॅ-मु । प्रत्यगृहीतं–§ ॥

[८. २६.] ६८१. ४. **तत्पूर्वाः**—त२-*मॅ-मु-अनु. । तत्पूर्व्यः–इतरेषु ॥ ६८१. ७. **पञ्चदशर्चः**—भ३-मु । पंचर्चः–त-न-भ१-२-श-मॅ ॥ ६८१.१४. **युवयो रथम्**—घ-मु । युवयोरर्थ–मॅ इतरेषु च ॥ ६८१. २२. **तनोतीति**—भ३-श-*मॅ-मु । तनोति–इतरेषु ॥ ६८२. १२. **रोदनशीलौ रुवन्तौ**—*मॅ-मु । रोदनशीलो देवत्यौ–न; रोदनशीले देवत्यौ–ख-त-भ-श ॥ ६८२. १४. **संक्लेशयतम्**—*मॅ-मु । संक्लेदयतं–ख-श-त१-२-३-भ२-३; संकेदयतं–त४-न; संक्लंदयतं–भ१; संकेतयनं–श ॥ °**संक्लेशनयोः**—*मॅ-मु । °संक्लेदनयोः–ख-त-भ२-३; (हिं)सकेदनयोः–न; °सनकेदनयोः–भ१; °संकेतनयोः–श ॥ ६८२. २०. **युवयोः**—*मॅ-मु । युवां–§ ॥ **ते तत्रैव**—*मॅ-मु । ते तु तत्रैव–न-भ-श; वे तु तत्रैवं–ख-त ॥ ६८२. ३०. **तैरपच्यावनीयौ**—*मॅ-मु । तैरुष्यचावनीयौ–ख-भ१; तैरुष्य्यावनीयौ–त-न-भ२; कैरप्यच्यावनीयौ–भ३; तैरुप्च्यावनीयौ–श ॥ ६८३. १२ **स्तुत्वा**—मॅ-मु । स्तुत्या–§ ॥ ६८३. २१. **अपनेतॄन्**—*मॅ-मु । आनेतॄन्–§ ॥ ६८३. २२. **आडागमः**—भ२ । अडागमः–त२-न-भ१-श-मॅ-मु ॥ ६८३. २७. **आत्मीयतया**—§ । आत्मायत्तया–*मॅ-मु ॥ ६८३. २८. **संगतौ सन्तौ**—ख-घ-त-न-भ१-२-श-मु । संगतौ–भ३-मॅ ॥ ६८४. २८. **क्रतौ**—श-*मॅ-मु । इतरेषु नास्ति ॥ **हवानाम् इति**—भ३-श-*मॅ-मु । हवानां–त-न-भ२ ॥ ६८५. ६. **सप्तम्याः सः**—§-मॅ । सप्तम्याः सुः–मु । अयमेव साधुः ॥ ६८५. ८. **अमनुष्यौ**—*मॅ-मु । मनुष्यौ–§ ॥ ६८५. १२. **श्वेतयावरीनाम्न्या**—भ । श्वेतयावरीनान्यो–त-न-श । श्वेतयावरीनाम्न्यो–मॅ-मु ॥ ६८५. २१. **हिरण्मयकूलवत्त्वात्**—ख-त-न-भ-श । हिरण्मयकूलवत्या–मॅ-मु ॥ ६८५.२८. **करतलास्फालनैः**—त१-२-३-न-भ-श-मु । करलास्फालनैः–ख; करललास्फालनैः–श-त४। करलतास्फालनैः–*मॅ । 'करतलास्फालनैः' इति पाठः समीचीनतर इति मॅक्समुल्लरमहाशयः[1]॥ **आश्वास्य पोषणीयौ**—भ३-*मॅ-मु । आश्वाश्व(अश्वाश्व–भ१-२)पेषणीया–त१-२-३-न-भ१-२; आश्वास्य पोषणीया–श ॥ ६८६.२२. **अश्वावावह्**—*मॅ-मु । अश्वावाह्–ज्ञ-त२-भ;अश्व्यावाह्–त३-४-न-श ॥

[८. २७] ६८७. ११. **प्रागाथम्**—भ-श-*मॅ-अनु. । प्रगार्थं–ख-त-न-मु ॥ ६८७.३२. **ओषध्यः**—§-मु । ओषधयः–मॅ ॥ ६८८. २०. **वा**—*मॅ-मु-× ॥ ६८८. २८. **स्तोतृषु**—§ । स्तोत्रेषु–मॅ-मु ॥ ६८८. २९. **शुश्रूषुतया प्रातव्यया**—*मॅ-मु । शिश्रूषतया प्रातव्यत्यया–ज्ञ-त२-३-४-भ२; शुश्रूषुतया प्रातव्यत्यया–त१; शिश्रूषतया मातव्यया–न-भ१; शुश्रूषिततया जानव्यया–भ३; शुश्रूषतया प्रातव्यतया–श ॥ **तया**—भ३-*मॅ-मु । गिरा–श; गतया–इतरेषु ॥ ६८९. २८. °**कर्मणि**—§-मु । °कर्माणि–मॅ (मुद्रणदोषः ?) ॥ ६९०. १५. **विभाषितणिच्त्वात् यदा णिच्**—*मॅ-मु । विभाषिताणिस्त्वात् यदा णिङ्–ज्ञ-त२-३-४; विभाषितणित्वात् यदा णिङ्–न-भ; विभाषिताणित्वात्यदाण्णिङ्–श ॥ ६९१. १३. **कुर्वते**—§ । कुर्वति–मॅ-मु ॥ ६९१. ३१. **अपरम्**—*मॅ-मु-× ॥ ६९२. ८. **क्रियमाणत्वात्**—*मॅ-मु । क्रियमाणा°–ख-त-न-भ२; क्रियमाणानां–ग-भ१-३ ॥ ६९२. ११. **हविर्भाक्त्वम्**—ग-भ२-य । हविर्भाक्तं–त४-न; हविर्भक्षं–ज्ञ-त२ । हविर्भक्षणं–श-मॅ-मु ॥ ६९३. ८. **ऋजुगमने प्रस्थे**—*मॅ-मु । ऋजुगमनप्रेरन्–ख-त-भ१; ऋजुगमनप्रेरयन्–न-भ२-३-श ॥ ६९३. १८. **मुचिः**—*मॅ । निर्मुचिः–§-मु ॥ ६९३. २०. **धनं मनवे**—*मॅ-मु । धनं मध्ये–ग-भ३; धने मध्ये–त-भ१-२ ॥ ६९३. २५. **आयुधानाम्**—

---

१. Preface to the 2nd Edition Vol. IV. p. 178.

ग। आत्मानां–मॅ-मु इतरेषु च ॥ ६९४. ९. **निश्रोचने**—मॅ। आनिश्रोचने–ख-घ-त-न-भ-श-मु; आनिचेने–ग ॥ ६९४. १७. **तद्धनम्**—ऽ-मॅ। तद्धनमावृणीमहे संभजामः तथा हविर्जुह्वतः यागं कुर्वतो वयं हे आदित्याः तद्धनं–मु ॥ ६९४. १८. **अनशामहै**—ख-ग-त-न-भ-श-मॅ-मु। अनशामहै अश्नुयाम हे आदित्याः अदितेः पुत्रा देवा बहिः (१ हविः) जुह्वतः अस्माभिर्दत्तं हविः स्वीकुरुत ततः धनंत्त तद्धनमावृणीमहे वयं संभजामहे–घ। एतन्मन्त्रभाष्ये कानिचिन्मन्त्रगतानि पदानि न व्याख्यातानि। मु-पुस्तके तेषां व्याख्यानं दृश्यते। 'तत् धनम्' इत्यस्यानन्तरं मु-पुस्तके 'आ वृणीमहे संभजामः। तथा हविः जुह्वतः यागं कुर्वतो वयं हे आदित्याः तद्धनं' इत्यधिकं विद्यते ॥

[८. २८] ६९४. २१. **विश्वे देवाः**—ऽ-मु। विश्वे देवे–मॅ ॥ ६९५. १३. **निर्दिशति**—भ१-३-श-मु। निदिशति–इतरेषु मॅ-पुस्तके च ॥ ६९५. २८. **अदितेः (?)**—ऽ-मॅ। दितेः–मु। एतदेव युक्तम् ॥ ६९५.३१. **सप्रपञ्चेन (?)**—ऽ-मॅ-मु। 'सप्रपञ्चम्' अथवा 'प्रपञ्चेन' इति भाव्यम् ॥

[८. २९] ६९६. ५. **वैश्वदेवशस्त्रे**—ऽ-मु। मॅ-पुस्तक एतन्नास्ति ॥ ६९६. ९. **किंचित्पदलिङ्गात् पृथक्देवताः**—ग-ज्ञ-मु। किंचित्पदंलिंगात् (°पदलिंगात्–भ२-३-य) पृथक् पृथक् (पृथक्–ख-त३-४) देवताः–ख-त१-२-३-४-न-भ; किंचित्पदविभागात् लिंगात् पृथक्देवताः–श। किंचित्पदं लिंगात्पृथक्देवतं (१)–मॅ ॥ ६९६. १०. **सौम्यम्**—ग-न-भ-*मॅ। सोम्यं–त-श-मु ॥ ६९६. ११. **शबलतादिषु(१)**—*मॅ। सवलतादिषु–त४; सचलतादिषु–श; सर्वलतादिषु–इतरेषु मु-पुस्तके च ॥ ६९६. १२. **तावदुद्गते**—*मॅ-मु। तावुदिते–ख-त३; तानुभानुपुष्टे उदक्षे–ग, तावुउदिते–ज्ञ-त१-२; तावुदते–त४-भ१-२; तायुदात–न; लताः पुष्यंते–भ३; तापोपनुदत्–श ॥ **दुःस्वोपशमनानि पुष्टानि खलु**—*मॅ-मु। सर्वे स्वदुःस्वोपशमनेन (स्वदुःस्वशमनेन–य) पुष्यंति खलु–ख-ज्ञ-त१-२-भ; सर्वदुःस्वोपशमनेन (सर्वस्वदुःस्वापशमनेन–त३-४-न) पुष्टानि खलु–ग-त३-४-न-श ॥ ६९६. १३. **रात्रयश्चन्द्रनेतृकाः**—ग-*मॅ-मु। शस्त्रयश्चंद्रनेतृकाः–त-न-भ२-श; रस्त्रय-श्चंद्रनेत्रकाः–भ१-३ ॥ ६९६. ३१. **आवरकाणि**—मॅ। अपामावरकाणि–ऽ-मु ॥ ६९७. १४. **यथा**—*मॅ-×। मु-पुस्तकेऽप्येतन्नास्ति ॥ ६९७.१६. **तदाहृत्य**—ऽ-मॅ-मु। 'तानि आहृत्य' इति भाव्यम् ॥ **स्वसहायेभ्यः**—*मॅ। तस्य सहायेभ्यः–ऽ-मु ॥

[८. ३०] ६९८. २१. **लेटि**—*मॅ-मु। लोटि–ऽ ॥ ६९८. २२. **लुगभावः**—न-भ-*मॅ-मु। नुगभावः–त-श; स्वभावः–ग ॥ **असतिः**—न-भ। असयेति–त-श-मॅ-मु। ६९९. १. **धनादिमन्तश्च**—भ३-*मॅ-मु। धनादिमन्तश्च–इतरेषु ॥ ६९९. १-२. **मानवात्.....तस्मात्**—*मॅ। मानवात् (मनुः–न; मानवाः–श) सर्वेषां मनुः पिता तत (तेन–श) आगतात् परावतः पिता मुहुरं (दूरं–श) मार्गं चक्रे तस्मात्–ज्ञ-त३-४-न-श; मानवात् पित्र्यात् सर्वेषां मनुः पिता ततः आगतात् परावतः दूरात् पथः–घ। त२-भ-पुस्तकयोः 'सर्वेषाम्' इत्यस्मादनन्तरं 'मनुः' इति पदमधिकमस्ति। मु-पुस्तके–'मानवात् पित्र्यात् मनुः सर्वेषां पिता तत आगतात् परावतः पिता मनुर्दूरं मार्गं चक्रे तस्मात्' ॥ ६९९.४. **अस्मान्**—*मॅ-मु। मास्मान्–ऽ ॥ ६९९.११. **विश्वानरः**—*मॅ। वैश्वानरः–ऽ-मु ॥ ६९९. १३. **शृणाति**–*मॅ। शृणोति–ऽ-मु ॥

[८. ३१] ६९९. २८. **लेट्यडागमाः**—*मॅ। लेट्यडागमौ–ऽ। **लेट्यडागमः**–मु। 'लेट्याडागमाः' इति भाव्यम् ॥ **ब्रह्म**—मॅ। ब्रह्मेत्–घ; इतरलिखितपुस्तकेषु एतन्नास्ति। '**ब्रह्मा**' इति

पदपाठः । एवमेव मु–पुस्तके ॥ ७००. ८-९ दीप्तिमान्...असत्—*मॅ । दीप्तिमान् (दीप्तिमान् सन्–ग) रथः स्यंदनः देवानां हविष्प्रदानरूपेण यज्ञेन (यज्ञे–ग; पूजनेन–भ३) असत्–भ-भ३-मु; दीप्तिमान् रथः असत्–घ; दीप्तिमान् शीलो स्यंदनः देवानां हविष्प्रदानरूपेण पूजायज्ञेन (यूयज्ञेन–त ३-न-भ१; पू॑यज्ञेन–ज्ञ-त२-४) असत्–ज्ञ-त२-३-४-न-भ१-२-श ॥ ७००.११. येन मे रथः—*मॅ-मु । यो हेमंरथैः–ख-त-न; यागे रथै–ग; यो हेमरथः-भ; यो हैमरथे–श ॥ ७००. १२. येन—*मॅ-मु । तेन–§ ॥ ७००.१७. अहरहः—ख-त१-२-न-भ-श-मु । ग-घ-त३-४-*मॅ-पुस्तकेष्वेतन्नास्ति ॥ देवैः—ख-घ-ज्ञ-त१-२-न भ-श-मु । ग-*मॅ-पुस्तकयोरेतन्नास्ति ॥ ७०१. ३. प्राश्नितव्यान्—*मॅ । प्राश्नव्यान्–§-मु ॥ ७०१. ५. तिष्ठेताम्—ग-घ । तिष्ठतां–भ१ । तिष्ठातां–मॅ-मु इतरेषु च ॥ ७०१. ८. न अपि—*मॅ-मु । अपि–§ ॥ ७०१.९. अपलपन्ति—मॅ-मु । अपलपति–§ । 'अपलपतः' इति भाव्यम् ॥ ७०२. ५. भवतो—ग-*मॅ-मु । भवथ–इतरेषु ॥ ७०२. ६. वर्तामह इत्यर्थः—ग-भ३-*मॅ । वर्तमिदमित्यर्थः–ख; वर्तमित्यर्थः–ज्ञ; वर्तमिदंत्यर्थः–त२; वर्ताम इत्यर्थः–मु इतरेषु च ॥ ७०२. १०. प्रत्यागच्छतु—ग-घ । प्रतिगच्छतु–मॅ-मु इतरेषु च ॥ ७०२. २०. गोपायितारो—ख-ग-घ-ज्ञ-त१-२-भ२-३-मु । गोपयितारो–त३-४-न-श-मॅ ॥ ७०२. ३०. क्षेत्रो—§-मॅ-मु । 'क्षेत्रम्' इति भाव्यम् । ऋ. सं. ३. ८. ७. द्रष्टव्यम् ॥ ७०३. १६. मनः—ग-घ-*मॅ । न–त-न-मु ॥ ७०४. ६. आशुगमनाश्व°—भ३-*मॅ-मु । शीघ्रगमनाश्व°–ग; गमनाश्व°–ज्ञ-त२-३-भ१-२ ॥

[८. ३२] ७०४. २४. अच्छावाकवादे—*मॅ-मु । अच्छावाको–ग; आच्छादको–त-न-भ ॥ पत्नीयजमानस्थाने—§-मॅ-मु । 'प्रत्यस्मा इत्यस्य तृचस्य स्थाने' इति भाव्यम् । 'अच्छा वो अग्निमवसे प्रत्यस्मा इति तृचयोः स्थानेऽच्छा नः शीरशोचिषं प्रति श्रुताय वो धृषदिति तृचावच्छावाकः' इति हि आश्व. श्रौ. सूत्रम् । मॅक्समुल्लरमहाशयेनाप्येवमेव संभावितम् ॥ ७०५. २. सृविन्दं सृविन्दनामकम् । सुविंदं सुविंदनामकं–न-भ; सुविंदं एतन्नामकं–घ । सुविंदनामकं–ख-ग-त-श-मॅ-मु ॥ ७०५. १८. नगरीमिव—§ । नगरमिव–मॅ-मु ॥ ७०६. २८. शोभनपारणश्च—ग-*मॅ-मु । शोभनपारश्च–भ३; शोभनवरणश्च–इतरेषु ॥ ७०७. १३. यज्वा ब्रह्मचारिवासी—भ३-*मॅ-तै. सं. । यद्वा ब्रह्मसूचारिवासी–ख-त; यद्वा ब्रह्मचारिवासी–न-भ१-२-श । यज्वा ब्रह्मचारीति–मु ॥ ७०८.७. बुसं तुम्प्यमिति—*मॅ । बुसं तुम्येति–भ२-३-मु । नुसः स्वधा तुम्येति–ज्ञ-त१-२; तुसं संतुग्धं–न; नुसः संनुग्धेति–त३-४; तुसं बुसं तुम्येति–भ१ ॥ ७०८. २६. निम्नं देशम्—§-मु । निम्नदेशं–मॅ ॥ ७०८. २९. अध्वर्यो—घ-मु । अध्वर्यवः–मॅ इतरेषु च ॥

[८. ३३] ७१०.२२-२३. इन्द्रः...आगमत्—§-मॅ । 'आ गमः इन्द्र' इति पदपाठः । इन्द्रः...आगमः आगमत्–मु ॥ ७११. २१ अपरिवृतः—*मॅ-मु । परिवृतः–ग; आवृतः–ज्ञ-त३; अवृतः–त१-२-४; अवृतः–न; रपवृतः–भ ॥ ७११. २२. श्रवः श्रयन्त्यस्मिन्निति—भ२-*मॅ-मु । युध शृण्वन्त्यस्मिन्निति–ग; श्रितः सन् श्रवं श्रयंत्यस्मिन्निति–ज्ञ-त१-२; धश्रवं श्रयंत्यस्मिन्निति–त३-४; श्रवा श्रयंत्यस्मिन्निति–भ१-२; श्रवयंत्यस्मिन्निति–न ॥ ७१२. २४. वृषभिश्चाकृष्टः—*मॅ-मु । वृषाश्चाकृष्टौ–ख-त३; वृषाश्चकृष्टो–ग; वृषाश्चाकृष्टो–न-श; वृषभिः सेक्तृभिः सोमरसस्य सोतृभिः (सेक्तृभिः–भ३) चाकृष्टो–भ; वृषैश्चाकृष्टो–घ ॥ ७१२. २५. वृषा—§-मॅ । 'वृषो इति' इति पदपाठः । वृषो वृषैव–मु ॥ ७१३.२४. रथस्थम्—घ-भ-श-मु । रथस्थां–ख-ग-त-

मॅ ॥ ७१४. ३. **महत्**—ग-*मॅ। महान्–मु इतरेषु च ॥ ७१४.५. **सुस्वतमानि**—ख-ञ-त१-२-न-भ-मु। ग-घ-त४-श-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ७१४. ९. **तव**—*मॅ-मु। ते तव–ऽ ॥ ७१४. १५. **प्रायोगिः**—*मॅ-मु। प्रायोगिः–ऽ ॥ ७१४. २३. **रथस्य**—घ। रथः–मॅ-मु इतरेषु च ॥

[८. ३४] ७१५. ९. **एन्द्र**—ञ-त३-न-भ-मु-अनु.। ऐंद्र–ग-त४-मॅ. ॥ **गायत्रः**—न-भ-मु-अनु.। गायत्र्यः–ग-त-मॅ ॥ ७१६. १. **सोमलताम्**—भ-श। सोमलता–मॅ-मु इतरेषु च ॥ ७१७. १५. **अर्य**। ' अर्यः ' इति पदपाठः ॥ ७१७. १६. **स्वाहा**—ख-ग-घ-त-न-भ२-श-मु। भ१-३-मॅ एतेष्वेतन्नास्ति ॥ ७१७.२१. **उपश्रुति उपश्रुतौ**—*मॅ-मु। उपश्रुति–ग-घ; उपश्रुतेः–त-न-भ२; उपश्रुतिश्रुतेः–भ१-३-य ॥ ७१८. १२. **वा**। एतस्मादनन्तरं ' धनानि ' इत्यावश्यकमिति मॅक्समुल्लरमहाशयः मन्यते ॥ ७१९.१. **तेषु**—मॅ। तेषु तेषु –ग; तेष्वेषु–इतरलिखितपुस्तकेषु। तेष्वश्वेषु–मु ॥ ७१९. २. **तिष्ठम् इति**—*मॅ-मु। तिष्ठति–ख-त-न-भ१-२-श; तिष्ठदिति–ग; तिष्ठं–घ; तिष्ठंति–भ३ ॥

[८.३५] ७१९. ५. **औपरिष्टाज्ज्योतिषम्**—त२-४-मॅ। उपरिष्टा°–ञ-श-मु; ओपरिष्टा°–न-भ। औपरिष्टाज्ज्यौतिषम्–अनु. ॥ ७१९. ८. **अश्नोर्यामे**—भ३। ऋ. सं. ५. ७६. सूक्तप्रस्तावनायां द्रष्टव्यम्। अश्विनोर्यामे–त-न-भ१-श-मॅ-मु। अश्विनोर्ध्वे–ग; अश्विनोर्यागे–भ२; 'अश्नोर्यामे ' इति स्यादिति मॅक्समुल्लरमहाशयेन संभावितम् ॥ **होतुरतिरिक्तोक्थे**—न। °रिक्तोक्थ्ये–मॅ-मु इतरेषु च। ऋ. सं. ५. ७६. सूक्तप्रस्तावनायां ' °रिक्तोक्थ्ये ' इत्यस्य स्थाने ' °रिक्तोक्थे ' इति पठनीयम् ॥ ७१९. १५. **सजोषसा**। ' सऽजोषसौ ' इति पदपाठः ॥ ७२०.५-६. **विश्वा सवना सर्वाणि**—घ-न-भ३-मु। विश्वा विश्वानि–भ२। विश्वा सर्वाणि–मॅ ॥ ७२०. २५. **वाः वनम्**—ख-त-न-भ-श। वा वनं (१)–मॅ-मु ॥ ७२१. ११. **गगनम्**—घ-मु। वेगेन–ग; वागमन–ख-त-श। गगणं–*मॅ। ७२२.९. **मित्रावरुणवन्ता**—ऽ-मॅ। 'मित्रावरुणऽवन्तौ' इति पदपाठः। मित्रावरुणवन्तौ–मु ॥ **धर्मवन्ता**—घ-श-मु। धर्मवंतौ–मॅ इतरेषु च ॥ ७२३. १९. **सोमाभिषवम्**—ऽ-मु। अभिषवं–मॅ ॥ ७२४. २०. शतपथब्राह्मणे ' **सह** ' नास्ति। ७२४. २१. **एव यत्**—श. ब्रा. मॅ-×। मु-पुस्तकेऽप्येतन्नास्ति ॥ ७२४. २८. **तृम्पतं तृप्यतम्**—मु। तृप्यतां–ख-ञ-त३-४-न-भ१-३; तृप्यतः–ग; तृंपतं तृप्यतां–घ; तृप्यतं–त१-२-भ२-य-श ॥

[८. ३६] ७२५.१३. **अन्यासु**—*मॅ-तै. सं.। अन्यान्यासु–ग; अन्या–त-भ। अन्य–मु ॥ ७२५. २२. **रक्ष**—ग-*मॅ-मु। रक्षसि–घ-त-न-भ२ ॥ ७२६. २७. **प्राविथ**—भ३-*मॅ-मु। प्रत्रस्यमाविथ–ख-त२-३-४-न-भ१-२; माविथ–ग; पुरुकुत्सपुत्रं प्राविथ रक्षिथ–घ-ञ-त१; पुत्रं त्वमाविथ–श ॥

[८. ३७] ७२७.१. **महाव्रते निष्केवल्य एतत्सूक्तम्**। ' प्रेदं ब्रह्मेन्द्रो मदाय सत्रा मदास इति निष्केवल्यम् ' इति आश्व. श्रौ. सूत्रानुसारेण ' पृष्ठ्यस्य पञ्चमेऽहनि निष्केवल्य एतत्सूक्तम् ' इति भाव्यमिति प्रतिभाति। मॅक्समुल्लरमहाशयेनाप्येवमेव संभावितम् ॥ ७२७. ८. **प्ररक्ष**—न-भ-मॅ-मु। प्ररक्षः–घ; रक्ष–त२-श। ' प्रारक्षः ' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ७२७. २१. **अस्य भुवनस्य**—ग-घ-भ१-३-मु। स्य भुवनस्य–इतरेषु। भुवनस्य–मॅ ॥

[८. ३८] ७२८. २३. **°स्तोत्रियसंज्ञकस्तृचः**—*मॅ-मु। °स्तोत्रियसंज्ञक–त-भ ॥ ७२८. २५. **प्रातःसवनीयस्य**—*मॅ-मु। प्रातःसवनीय–ग-त४-भ२; प्रातःसवन–ञ-त२-भ३;

प्रातःसवनि–भ१ ॥ ७२९.१. **स्थः** । अस्मादनन्तरं 'क्रतौ कालेकाले यष्टव्यौ' इति श–भ२–य–पुस्तकेष्वधिकं विद्यते ॥ **भवथो हि**—§–मु । भवथः–मॅ ॥ ७२९. २. **युद्धेषु कर्मसु**—श–त१–२–भ२–य । कर्मसु युद्धेषु–ग–त४–मॅ–मु ॥ **चोपतिष्ठन्तौ**—ख–ग–श–त३–४–न । यज्ञादिषु चोपतिष्ठंतौ–त१–२–भ२ । चोपतिष्ठंतौ–मॅ–मु ॥

[८. ३९] ८३०. ३०. **अभिगच्छन्तः**—मॅ । अभिगच्छन्त (?)–मु । गच्छतः–ग; अभिच्छतः–घ; अभिगच्छतः–त–न–भ१; अभिगच्छत–भ२; अभिगच्छता–भ३ ॥ ७३१.२५-२६. **अभीवृतः परिवृतः**—घ–मु । आवृतः–त१; आवृतः परिवृतः–इतरेषु । अभीवृतः–मॅ ॥ ७३३. ६. **इरज्यसि ईशिषे**—मॅ–मु । राजासि–घ; राजासाशिषे–त३–४–न; राजासशिषे–ग; राजामाशिषे–श–त२; राजासीशिषे–भ ॥

[८. ४०] ७३३. ११. **ऊरुभाग**—*मॅ–मु । उरुभाग–ग; ऊरूभाग–श–त२; उरुभीग–त३–४–भ२; उरुभिग–भ१; ऊरुणि–भ३ ॥ **एतत्**—ग–न–भ–श । एव–मॅ–मु इतरेषु च ॥ ७३३. १३. **आरम्भणीयाभ्यः**—भ३–*मॅ–मु । आरंभणीयारभ्य–इतरेषु ॥ ७३३. २६. **सहिषीमहि**—ख–त–न–भ–मु । साहिषीमहि–श । सहीषिमहि–घ–मॅ ॥ ७३४. २०. **नाभाक नभाकवत्**—*मॅ । नाभाक नभाकवत् नभाकवंतौ–मु । नाभाक नभावंतौ–ख; नाभाकवंतौ–ग–श; नभाकवत् नभाकवंतौ–घ; नाभाक नभाकवंतौ–त–न–भ ॥ ७३४. २८. **प्र इरज्यत**—मॅ–मु । इरज्यत–§ ॥ ७३५. ५. **वल्ल्याः**—*मॅ । वल्याः–घ; तमाया–ख–त–न–भ१–२–श; लताया–ग–भ३ ॥ **गुष्पितम्**—घ–त–न–भ२–*मॅ–मु । गुप्तिपं–ग; पुष्पितां–भ१–३ ॥ ७३५. ६. **ओजः**—मॅ–मु–× ॥ ७३५. १५. **अस्माकीनैः**—§–मॅ–मु । 'आस्माकीनैः' इति भाव्यम् ॥ ७३६. १. **हरिवः वज्रिन्**? ॥ ७३६. ३. **पूर्वीः.....अन्यत्**—*मॅ । पूर्वी वयः प्रज्ञां साधंतां साधयन् सिद्धमन्यत्–ख–त–न–भ१–२–श; पूर्वी धियः प्रज्ञां सधंति साधन् सिद्धमन्यत्–ग; पूर्वीः बह्वयः प्रज्ञाः नः याः धियः अस्मद्बुद्धयः नु क्षिप्रं साधंत साधयंतु–घ; पूर्वीः बह्वयः धियः प्रज्ञाः साधंतासाधयन् सिद्धमन्यत्–भ३ । पूर्वीः याः नोऽस्माकं धियः प्रज्ञां नु क्षिप्रं साधंतासाधयन् सिद्धमन्यत्–मु ॥ ७३६. २०. **आण्डा**—मॅ–× । मु–पुस्तकेऽप्येतन्नास्ति ॥

[८. ४१] ७३७. ११. **मरुद्भ्यश्च**—ग–श–भ३–*मॅ–मु । मरुद्भिश्च–त३–४–भ२ ॥ ७३७. १९. **समानया**—मॅ–मु । समान्या–§ ॥ ७३७. २१. **समीपे यः**—*मॅ । समीपे–§–मु ॥ ७३७. २३. **समानया**—मॅ–मु । समान्या–§ ॥ ७३८. १३. **रक्षिता**—भ२–३–*मॅ–मु । रक्षति–ग–घ–श–त१–२; ररक्षति–त३–४; रराक्षिता–भ१ ॥ ७३९. ८ - - - **त्परिमृशतः.....पुरस्तात्**—त३–४–भ१–३–श–मॅ । यः वरुणः आसु दिक्षु अन्तः व्याप्तः सन् आशये जाग्रतो वर्तते यः वरुणः एषां शत्रूणां विश्वा सर्वाणि परिजातानि परितो भूतानि धामानि पुराणि मर्मृशत् विनाशयत् अस्य वरुणस्य पुरोगये रथस्य पुरस्तात्–ख–घ–श–त१–२–भ२ । यः वरुणः आसु दिक्षु अन्तः व्याप्तः सन् आशये जाग्रतो वर्तते यः वरुणः एषां शत्रूणां विश्वा सर्वाणि परिजातानि परितो भूतानि धामानि पुराणि मर्मृशत् परिमृशतो वरुणस्य पुरोगये रथस्य पुरस्तात् भवति तस्य वरुणस्य पुरस्तात्–मु । परिमर्मृशत् परिमृशतो–न ॥ ७३९. २५. **अन्तरिक्षेऽधिवसतः**—*मॅ–मु । अंतरिक्षेधिवभ्रुतः–§ ॥ ७३९. २६. **भूमीः.....पप्रतुः**—*मॅ–मु । भूमी(°मि–त१–भ३)रधिस्थिता पप्रतुः–त–भ३;

भूमी(°मि–म१)रधस्थिता पप्रतुः–भ१-२; भूमीः द्यौरंतरिक्षभूमीः–घ ॥ ७४०. १. **अधिऽनिर्निजः**। भाष्यकारः 'अधि', 'निर्णिजः' इति भिन्ने पदे कृत्वा व्याख्यातवान् ॥ ७४०. ७. **व्यधारयत्**—ख-घ-त-न-भ-मु । अधारयत्–श-मॅ ॥

[८. ४२] ७४२. १२. **ऐकादशिनाः**–श-भ२-*मॅ-आश्व. श्रौ. । एकादशिनः–त२-३-मु । एकादशिनाः–ग ॥ ७४०. १६. **देवेति**–ग-श-*मॅ-मु-आश्व. श्रौ. । इतरलिखितपुस्तकेषु नास्ति ॥ ७४०. ३०. **गोपायितारम्**–घ-श-त१-२-३-भ१-२-मु । गोपयितारं–ग-त४-भ३-मॅ ॥ ७४१. ८. **बलम्**—ख-श-त१-२-न-भ-मु । ग-घ-त३-श-मॅ-पुस्तकेषु नास्ति ॥

[८. ४३] ७४२.४. **कारीर्यवभृथेष्टयोः**—मॅ । कारीर्यावभृथेष्टयोः–ख-ग-त१-न-भ१-२-श; कारीर्यावभृथेष्टयाः–त३-मु ॥ ७४२. ५. **आज्यभागौ**—ऽ-मॅ-मु । आश्व. श्रौ. सूत्र एतन्नास्ति ॥ ७४२. २६. **बप्सति भक्षयन्ति**—*मॅ-मु । बप्सति भक्षयति–घ; बप्संति भक्षयंति–त-भ ॥ ७४२. ३०. **पृथगित्येव**—श-भ२-३-*मॅ-मु । पृथगिति–ग; पृथिगितोव–त२; पृथगितोर्व–त४; पृथगित्येव–भ१ । वाजसनेयिसंहितायां वेबरमहाशयमुद्रितपुस्तके निर्णयसागरमुद्रितपुस्तके च 'पृथक्' इत्येव पाठो दृश्यते ॥ ७४३. २. **अग्निहोत्रिभिः**—ऽ-मु । अग्निहोतृभिः–मॅ ॥ ७४३. १०. **क्षुत् धासि**—त-न-भ-मॅ । क्षु धासिः–श-मु-नि. ॥ ७४४.२. **सोमघृतपृष्ठाय**—घ-*मॅ-मु । सोमघृते पृष्ठाय–त-न-भ; सोमसिक्तघृते पृष्ठाय यद्वा सोमयुक्तानि पृष्ठस्तोत्राणि यस्यासौ सोमपृष्ठ अनेकस्तोतृभ्रितसोमान्न इत्यर्थः–ग ॥ ७४३. ११ **अङ्गिरस्वत्**—ऽ-मु । मॅ-पुस्तक एतन्नास्ति ॥ ७४५. १५. **प्रभु प्रभुः**—ग-भ२-३-मॅ-मु । अनुप्रभुः प्रभुप्रभुः–घ; प्रभुः–न । 'प्रभुः' इति सविसर्गः संहितापाठः । 'सुलोपश्छान्दसः' इति भाष्यकारेणोक्तं तच्चिन्त्यम् ॥ ७४५. १६. **अनु**—*मॅ-मु-× ॥ ७४६. २. **यमिमम्**—ख-घ-त-न-भ-श । यं–ग । इमं–मॅ-मु ॥ **सर्वदा**—मॅ-मु । सर्वहा–ऽ ॥ ७४६. १९. **सहस्कृतः**—ऽ-मॅ । 'सहःऽकृत' इति पदपाठः । सहस्कृत–मु ॥ ७४६. २७. **अहा**—मॅ-मु-× ॥ ७४६. २८. **गाहयितव्यानि**—*मॅ-मु । गाहितव्यानि–भ३; ग्राहयितव्यानि–इतरेषु ॥ ७४७. ८. **दीप्तिधनः**—ख-न-भ२-श । दीप्तधनः–ग; दीप्तिचनः–त । दीप्तिरोचनः–घ-मॅ-मु ॥

[८. ४४] ७४९.३. **ज्वलद्दीप्ते**—मु । उज्ज्वलदीप्ते–ग; ज्वालदीप्ते–न; ज्वलद्दीप्ते–मॅ इतरेषु च । ऋ. सं. ८. २३. २३. द्रष्टव्यम् । 'ज्वलद्दीप्ते' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ७४९. ८. **पताका°**—ग-घ । पताक°–त-न-भ-मॅ-मु । ऋ. सं. १०. १. ५. द्रष्टव्यम् ॥ ७४९. १६. **ववृधे** ऽ-मु । वावृधे–मॅ ॥ ७५०. ७. **ते तव**—ऽ-मॅ । 'तर्व' इत्येव पदपाठः । तव–मु ॥ ७५०. १७ **वर्धयन्तु**—*मॅ-मु । वर्धयंति–ऽ ॥ ७५०. २०. **अग्ने**–ऽ-मॅ-मु । 'अग्नेः' इति पदपाठः ॥ ७५०. २९. **वर्धयन्तु**—*मॅ-मु । वर्धयंति–ऽ ॥ ७५१. १० **अनुग्रहबुद्धौ**—मॅ । अनुग्रहबुद्धौ सुष्ठुतौ कं सुखं यथा तथा–घ; अनुग्रहबुद्धौ सुष्ठुतौ–इतरेषु मु-पुस्तके च ॥ ७५१. २७. **तं सुखय वा**—*मॅ-मु । सुखय वा–ग; तं सुखय–श; तसुय व–त१-२-३; तसुय वा–त४-न-भ ॥ ७५२. २. **द्यवि**—मॅ-मु । सदिवि–घ; दिवि–त-न-भ ॥

[८. ४५] ७५२. १५. **इति स्तोत्रम्**—ऽ-*मॅ-मु । आश्व. श्रौ. सूत्र एतन्नास्ति ॥ ७५२. १६. **°तिरिक्तोक्थे**। °तिरिक्तोक्थ्ये–ऽ-मॅ-मु ॥ ७५४. १६. **भक्तारम्**—*मॅ-मु । भोक्तारं–ख-घ-त-न-भ; भेत्तारं–ग-श ॥ ७५६. १५. **प्रेरितवान्**—भ-*मॅ-मु । प्रेरयितवान्–इतरेषु ॥ ७५७. ५.

बुर्बुरमिति—*मॅ-मु। बुबुरेति–ग-त४-न-भ१-२; बुर्बुरेति–भ३; बृधुरिति–ज्ञ-त१-२-३ ॥ ७५७.१८. **प्रयच्छस्येव**—मॅ-मु। प्रगच्छस्येव–ऽ ॥ **नाकार्षीः**—*मॅ-मु। माकार्षीः–ऽ ॥ ७५८. ३. **भूरिषु**—घ-न-भ। मूरिष्वपि–मॅ-मु इतरेषु च ॥ **असंख्यातेष्वपि**—ख-ग-त-न-भ-श-मु। °ष्वति–घ। असंख्यातेषु–मॅ ॥ ७५९. ७. **हिंधि अतः**—*मॅ। हिंस च–मु। हिंसि अतः–ख-ज्ञ-त१-२-३-श; हतान् कुरु–ग; हिंस्य–घ; विस्यतः–त४; हिंस्याः–न-भ१-३ ॥ ७५९. १३. **विमर्शनक्षमे**—न-*मॅ-मु। विमर्शके राक्षसे–ग; विमर्शकेनक्षमे–घ-त-भ ॥

[८. ४६.] ७६०. ४. **अष्टाक्षरा**—*मॅ। अष्टाक्षरवती–ख-ग-त-न-भ-मु; द्वादशाक्षरवती–घ ॥ **द्वितीयचतुर्थयोः**—ख-ज्ञ-भ-*मॅ-मु। द्वितीयतृतीययोः–ग-घ-त-न ॥ ७६०. १०. **नवका... पदा**। 'युजावष्टकावयुजौ नवैकादशिनौ बृहती विषमपदा' इत्यनुक्रमणीपरिभाषा। 'नवकाष्टकैकादशाष्टिनो विषमपदा' इति वा. सं. सर्वानुक्रमण्याम् ॥ ७६१.८. **कमित्याह**—ऽ-मॅ-मु। 'क इत्याह' इति भाव्यम् ॥ ७६१. २५. **सर्वा रक्षणाः**—ऽ-मॅ-मु। १ ॥ ७६१. २६. **सुतम्**—ऽ-मु। सुतमभिसुतं–मॅ ॥ ७६२. ११. **यः तव**। पूर्वमन्त्रोक्तो मदशब्दो विशेष्यत्वेनाध्याहर्तव्यः ॥ ७६२. १२. **स त्वम्**। तादृशमदयुक्तस्त्वमित्यर्थः ॥ ७६२. १८. **यथास्माकम्**—मॅ-मु। यथास्माकं यागं–ऽ ॥ ७६३. २२. **मह्यम्**—ऽ-मॅ-मु। ममेत्यर्थः ॥ ७६३. २३. **अद्य**—मॅ। 'अर्थ' इति पदपाठः। अथाति चित्–मु ॥ ७६३. २५. **लिङ्भावात्**—ऽ-मॅ-मु। 'लिङ्वद्भावात्' इति भाव्यमिति मॅक्समुल्लरमहाशयः अभिप्रैति ॥ ७६४.२. **स्तुवत इति**—ऽ। स्तुवंत इति–मॅ-मु ॥ ७६४.३. **अद्यापीदानीमपि**। 'अतिं अर्थ' इति पदपाठः। अथाति चित्–मु ॥ ७६४.११. **वा**—ग२-*मॅ-मु। इतरलिखितपुस्तकेषु 'वा' नास्ति ॥ ७६५.७. **चेतयितः**—मॅ-मु। चेतितः–ऽ ॥ ७६५.८. **वा**—ग-भ-*मॅ-मु। त्वा–ख-त-न-श ॥ ७६५.१५. **वशायाश्चाय**—*मॅ-मु। वशायास्याय–ग; वशायाख्याय–इतरेषु ॥ **कानीतस्तु**—न-भ१-३-*मॅ-मु-बृहद्दे.। कानीतस्स–ग; कानीतस्य–इतरेषु ॥ बृहद्देवतायां 'स्तूयते' इत्यस्य स्थाने 'संस्तुतं', 'एत्वेव' इत्यस्य स्थाने 'इत्येव' इति च पाठो दृश्यते ॥ ७६५. २०. **कनीतपुत्रे**—भ-*मॅ। कानीतपुत्रे–घ-न-मु। कानीते पुत्रे–ख-त; पुत्रे–श; कानीतेषु पुत्र–ग ॥ ७६६.२२. **तदुच्यते**–ख-त-श। चेदुच्यते–ग-न-भ-मॅ-मु ॥ ७६७.१३. **अन्वशात्**—ख-भ-*मॅ-मु। अप्सान्–ग; अन्वशान्–ज्ञ-त२; अन्वप्सान्–त३-४-न; अन्वस्यान्–श ॥ ७६८. २५. **योज्यम्**—भ२-३-श-*मॅ। योजनया–ग; योज्य–ख-त-न-भ१-मु ॥

[८. ४७.] ७६८. २९. **लैङ्गिकः**—*मॅ-मु-× ॥ ७६९. १९. **अधि**। एतन्मन्त्रे नास्ति ॥ ७७०. १२. **अधा**—ख-ज्ञ-त१-२-भ-श-मु। ग-घ-त३-४-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ७७०. १३. **अवटधिष्ण्यादिकान्**—*मॅ-मु। अवइधि°-ख-त३-४-न-भ२; अवदधि°-ज्ञ-भ१-३; अवनधि°–ग; धिष्ण्यादिकान्–श ॥ ७७०. २०. **आशवः**—ऽ-मॅ-मु। 'आशु वः' इति भिन्नः पदपाठः ॥ **यम्**—ग-*मॅ-मु। इतरेषु नास्ति ॥ ७७०. २८. **प्रवृद्धम्**—*मॅ-मु। अप्रवृद्धं–ख-त-न-भ२-श; अतिप्रवृद्धः–ग; अभिप्रवृद्धं–घ ॥ **अपरिहारार्हम्**—*मॅ-मु। अपरिहारार्थं–ख-घ-त-भ१-श; अपरिहार्यं–ग-न-य ॥ **कस्य**—*मॅ-मु। यस्य–ऽ ॥ ७७२. २८. **°शेषेण**—*मॅ-मु। शेषे–ऽ ॥ **उपतिष्ठेत**—ऽ-मु। उपतिष्ठेत्–मॅ ॥ ७७२. २९. **उपतिष्ठेत**—ज्ञ-न-भ१-श-मु-आश्व. ग.। उपतिष्ठेत्–ख-त२-३-४-भ३-मॅ ॥ ७७३. १८. **दुःस्वप्नम्**—ख-त-न-भ-श। दुःष्वप्न्यं–ग; दुःष्वप्नं–घ;

स्वप्नं–मु। दु स्वप्न्यं–मॅ ॥ ७७३. २६. **यदेव**—*मॅ-मु। तं देव–न; तदेव–इतरेषु ॥ ७७३. २७. **भोक्त्रे**—*मॅ-मु। भोक्तुः–ऽ ॥ **तदपसे यदेवापः**—*मॅ-मु। तदपसे देवापः–ख-ग-त-भ१-२-श; दपसे तदेवापः–घ; तदपसे वदेवापः–न; तदपसे तदेवपः–भ३ ॥ ७७४. २. **अनुभूतवत्**—ख-ग-त-भ-श। अनुभूतं च–न। अनुरूपवत्–मॅ-मु ॥ ७७४. ८. **संज्ञपितम्**—ख-ग-त-न-भ। संज्ञापितं–श-मॅ-मु ॥ **संदाय**—श-*मॅ-मु। समादाय–ग; दानाय–भ३; सदाय–इतरेषु ॥ ७७४. १८. **स्मः**—न-भ२। स्म–मॅ-मु इतरेषु च ॥

[८. ४८] ७७५. २२. **ततः**—*मॅ-मु। त्वातामृभा–ख-त२-३-४; पीत्वा–ग; त्वत्तः–घ१; इतः–च; त्वामाभृन्ना–न; त्वावामृभा–भ१; त्वमाः–भ३; त्वां पीत्वा–श ॥ ७७६. ३. **सखा स स्वसख्ये**—त-न-भ१-२। सखाय स्वसख्य–ख; सखा स्वसख्ये–ग-श; सख सख्ये–भ३। सखायं स्वसख्ये–मॅ-मु ॥ ७७६. ११. **वध्र्यः**—*मॅ। वध्वः–ख-त-श-मु; वध्यः–ग; वध्वः–घ; वध्वाः–न-भ ॥ ७७७. ८. **स्मः**—न-भ। स्म–मॅ-मु इतरेषु च। ऋ. सं. ८. ४६. १. द्रष्टव्यम् ॥ ७७८. ४. **अत्रसन् प्राप्नुवन्**—मॅ-मु। अत्रसन् प्राप्तवान्–ख-ग-श-त२; अत्रसन्–घ; अरमं प्राप्तवान्–त३-४; अरन्–भ१-३; अरमन् प्राप्तवान्–भ२; अरमन् प्रापूर्वन्–श ॥ ७७८. ५. **यस्मात्**—ग-*मॅ-मु। तस्मात्–इतरलिखितपुस्तकेषु ॥ ७७८. १७. **सौम्यस्य**—ऽ-मु। सोमस्य–मॅ ॥ ७७८. ३१. **निद्राः**—घ-मॅ। निद्रा–ख-ग-भ-श-मु। निंद्रा–त-न। ' निऽद्रा ' इति पदपाठः ॥

[८. ५८] ८०२. १३. **यमृत्विज...स्तुतिर्वा**—मॅकडोनलमुद्रितपुस्तक एतन्न दृश्यते। वैदिकास्त्वेतत्पठन्ति ॥

[८. ६०] ८०६. १९. **प्रदीप्तकेश°**—ग-श-भ-मु। प्रदीप्तकलश°–मॅ इतरेषु च ॥ ८०७. २७ **तेजो वा**। अत्र किमपि गलितं प्रतिभाति। ऋ. सं. २. १. ५. भाष्ये ' मित्रमहः ' इत्यस्य ' हितकारितेजः ' इति व्याख्यानं कृतमस्ति ॥ ८०८. १२. **ऋचा गिरा**—ऽ-मॅ-मु। ' गिरा ऋचा ' इति साधु इति मॅक्समुल्लरमहाशयः ॥ ८०८. २८. **माति नो**—ग-*मॅ-मु। मानितिनि–ख; मातिर्नो–घ; मातितिर्ना–त-भ२-श; मातीतिर्ना–भ१-३॥ ८०९. ८. **तद्धनम्**—ग-श-*मॅ-मु। त धन–भ१; तं धनं–इतरेषु ॥ **कर्मधन**—ऽ-मु। कर्म धनं–मॅ ॥ ८१०. १९. **हे यजमानाः**—ग-च-*मॅ-मु। गेहे यजमानाः–ख-घ१-त-भ३-श; गेह यजमानाः–भ१; ग्रहे यजमानाः–भ२ ॥ ८११. १९. **यातना**—ग-*मॅ-मु। याना–ख-त-न-श; याता–भ ॥ ८११. २१. **बाह्यानि**—घ-त-न-भ१-मु। बाह्यानि–ख-ग-भ२-मॅ ॥ **च न**—*मॅ-मु। च–ख-ग-त-न-भ१-२-श; न–घ; मा–भ३ ॥

[८. ६१] ८११. २३ **प्रागाथस्य**—मॅ–मु। प्रगाथः–घ; प्रगाथस्य–इतरेषु ॥ ८११. २८-३०. **चातुर्विंशिकेऽहनि.....पुरूवसो इति**—ग-त-न-भ२-श-मु। ' चातुर्विंशिकेऽहनि... शृणवच्च न इति ' इत्यंशः ख-पुस्तके नास्ति। चातुर्विंशिकेऽहनि निष्केवल्य उभयमिति बृहत्साम-प्रगाथः। तथा च सूत्रितं। उभयं शृणवच्च न आ वृषस्व पुरूवसो। आ.७.४। इति–मॅ ॥ ८१२. १२. **जगदुपकारिकायाः**। जगदुपकारकस्य–ख-त-न-भ-श-मु; जगदुपकारक–ग। जगदुपकारकायाः (१)–*मॅ ॥ ८०३. १. **भवति**—ऽ-मॅ-मु। ' भवतु ' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ८१३. १६. **पौरः**—ग-भ-*मॅ-मु। पुरुकृत्–ख-घ-श-त१-२; पुर–त३; पूरयि–त४; पूरः–न; पुरयि –श ॥ ८१३. २२. **बृहतः**—*मॅ-ऐ.आ. । **बृहत्**–ख-ग-त-भ२-मु; **बृहत**–श-न-भ१-३-श ॥

८१४. २६. **जल्हवः**। एवं संहितायां पदपाठे सर्वेषु भाष्यलिखितपुस्तकेषु च। मॅक्समुल्लरमहाशयः सर्वत्र 'जळ्हवः' इति पठति॥ ८१५.२. **अरायाः**—ऽ-मॅ-मु (१)। 'अरायः' इति भाव्यम्॥ ८१५. १४. **वेद्**—*मॅ। देवः वेद–ख-ग-घ-श-मु; देवः–त१-३-४-न-भ२-श; वेदः–भ१; वेदा–भ३॥ ८१६. ४. **आह्वयामः**—ख-घ-श-त३-भ। आह्वयाम–ग-त२-४-न-श-मॅ-मु॥ ८१६. १७. **पश्चात् पश्चाद्भागात्**—*मॅ-मु। पश्चाद्भागो–ख-घ-श-त२-३-४-न-भ१-२; पश्चाद्भागे–ग-भ-३-य; पश्चाद्भागात्–त१॥ **पूर्वभागात्**—*मॅ-मु। पूर्वभागः–ख-ग-भ१-२; पूर्वो भागो–घ-त-न-श; पूर्वभागे–भ३-य॥ **अधोभागात्**—*मॅ-मु। अधोभागः–ख-घ-भ१; अधोभाग–ग-त-न-भ२; अधोभागे–भ३-य॥ ८१६. २०. **आसुराणि**—*मॅ-मु। आसुरीः–ऽ॥ ८१६. २७. **रक्षसि** (रक्ष वा)—*मॅ-मु। क्षत्रास्वसि–ख-त-न-भ१-२-श; त्रासयसि–ग; त्रास्व–भ३॥

[८. ६२] ८१७. ८. **सप्तम्याद्याश्च**—ख-त-न-भ१-३-मॅ। सप्तम्याद्याः–ग-भ२-श-मु-अनु॥ ८१८. १. **चिदर्वता**—*मॅ-मु। चार्वता–ग-घ-त-श; बार्वता–न-भ१-२; नार्वता–भ३॥ ८१८. २३. **दृष्ट्वा**—*मॅ-मु। गत्य–ख-ग-घ-न-श; अवगत्य–भ॥ ८१८. २६. **अवेक्षितम्**—*मॅ-मु। अवक्षितं–न; अवेक्षितुं–इतरेषु॥

[८. ६३] ८२०.२६. **आनजिः**—मॅ-मु। नजिः–ऽ। (१) ऋ. सं. १.१०२.१; १६१. ४. भाष्ये 'आनजे' इत्यस्य प्रक्रिया द्रष्टव्या॥ ८२१. ५. **उपायज्ञः**—भ२-३-*मॅ-मु। उपायचास्मैशः–ख-न; उषायचास्मैशः–त२-३-४-श; अनुष्ठेयवरतैश–ग; उपायाद्र–भ१॥ ८२१. ६. **अपवारितवान्**—ग२-*मॅ-मु। ऊवारितवान्–ख-त३; अपावारितवान्–ग१; उत्सारितवान्–श-त२-४; उपवारितवान्–भ१-२; अपवारितान्–भ३; उच्चारितवान्–श॥ ८२१. १३. **गन्तु**—ख-घ-श-त१-२-न-भ-मु। ग-त३-४-श-मॅ-पुस्तकेष्वेतन्नास्ति॥ ८२१.१८. **स्वाहावरस्य**। 'स्वाहा। वरस्य' इति पदपाठः। भाष्यकार एकपदं चकारेति स्पष्टम्। स्वाहा वरस्य–मॅ। ८२२. १४. **लब्धे लब्धठये**—*मॅ। लब्धेन्ये–ख-त-भ३-श; लब्धेन्य–ग; लब्धे–घ; लब्धन्ये–भ१-२-मु॥ **अस्मानिति पूरणः**—ऽ-मॅ-मु। ?॥

[८.६४] ८२३. १९. **तव**—ग-*मॅ-मु। स तव–ख-त-न-भ; सदृशः–श॥ ८२४.१३. **त्वा त्वाम्**—ख-ग-त२-३-न-भ२-३-मॅ। 'तम्' इति पदपाठः। तमिद्रं–मु॥ ८२५.८. **अधिश्रितः**। 'अधि श्रितः' इति पदपाठः॥ ८२५. ११. **अभिषुतः तम्**—ग। अभिषुतं–मॅ-मु इतरेषु च॥

[८. ६५] ८२५. २७. **°निष्यन्दनस्थाने**—मॅ। °निस्यंदने स्थाने–ख-त; °निष्यंदिनि स्थाने–ग; °निष्यंदने स्थाने–घ-न-भ; °निष्पंदस्थाने–श। °निस्पंदने स्थाने–मु॥ ८२७. १९. **इन्द्रे प्रीत इत्यर्थः**—*मॅ। इंद्रः प्रीत इत्यर्थः–ऽ-मु॥

[८. ६६] ८२७. २५. **अयं प्रगाथः**—*मॅ। प्रगाथौ–त१-२; प्रगाथः–मु इतरेषु च॥ ८२८. १६. **यः**—*मॅ-मु-×॥ ८२८. २३. **प्रक्षालितोऽश्वः**—मॅ-मु। प्रक्षाळिताश्वः–ऽ॥ ८२८. २४. **व******–त-न-भ३-मॅ। ग-भ२-श-पुस्तकेष्वेतन्नास्ति। जातमिति च–मु। 'वचनात्' अथवा 'च व्युत्पत्तिः' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति॥ ८२८. २६. **अपवरणीयम्**—ऽ-मॅ-मु। अस्मादनन्तरं 'व्रजम्' इत्येतादृशं पदमावश्यकमिति मॅक्समुल्लरमहाशयस्याभिप्रायः॥ ८२९. १. **पुरुऽसंभृतम्**। भाष्यकारः 'पुरु' 'संभृतम्' इति भिन्ने पदे कृत्वा व्याख्यातवान्॥

८२९.६. **प्रकामयते**—§। कामयते–मॅ-मु ॥ ८२९. १२. **अचीकमथाः**—मॅ। अचीकमाः—ग; अचीकमथ–मु इतरेषु च ॥ ८२९.२९. **हरत**—*मॅ-मु। हर–घ-भ२; हरवाम–त१; हरवा–इतरेषु ॥ ८३०. ७. **अस्येति**—§-मु। स्येति–मॅ (मुद्रणदोषः १) ॥ **वृकोऽपि**—*मॅ-मु। क्रूरोपि च–ख-ज्ञ-त१-२-भ; कोपि–ग; क्रूपि–त४-न ॥ ८३०. १६. **किं नु**—ग-न-भ१-२। **किंतु**–मॅ-मु इतरेषु च ॥ **अनाचरितम्**—ग। अनामचरितं–ज्ञ-त२-४; आनाचरितं–भ। अनाचारितं–मॅ-मु ॥ ८३०. २०-२१. **वृत्रहेत्येतत्पुंस्त्व°**—ग-न-भ। **वृत्रहत्येतत्पुंस्त्व°**–ख-त-श। **वृत्रहत्यं तत्पुंस्त्व°**–मॅ-मु ॥ **°प्रदर्शनद्योतनाय**—ग-भ-श। °प्रदर्शनाद्योतनाय–त-न-मॅ-मु ॥ ८३०. २६. **महीः–महान्ति**—ख-घ-ज्ञ-त२-मु। महीः–त१; मही महांति–न। ग-त३-४-भ-श-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ८३०. २८. ------ **व्यहं अभवदि°**—ज्ञ-त३-न-भ२। ------ व्यहंत्र्यभवदि°–ख-ग-त१-२-४-भ१; न कदाचिदित्यर्थः–श-मु। ------ न्ययंहं अभवदि°–मॅ। मॅक्समुल्लरमहाशयस्य अयं पाठः C 2, C 4 लिखितपुस्तकयोरुपलब्धः। 'न कदाचिदित्यभिप्रायः। सर्वं हंतव्यं हतमभवदित्यर्थः' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ८३१. २-३. **दातव्य---नयेन**—ख-त-न-भ१-२-श-मॅ। दातव्यौ नयेन–ग-मु; दातव्यमिति येन–भ३। 'दातव्यावित्येवमभिनयेन' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ८३१. ५. **पश्यन्ति**—ग२-भ-*मॅ-मु। पश्यति–ख-ग१-घ-त-न-श ॥ ८३१. ६. **अहानि पश्यन्ति**—ग-न-भ-श-*मॅ-मु। अहानि पश्यति–ख-त ॥ ८३१. ७. **ईदृशान्**—घ। अतो ईदृशान्–ख-ज्ञ-त२-श-मु; अतोतान्–ग; अतोतीदृशान्–त१; अतो --- श्यान–न; अतो --- शान्–त३-४-भ-मॅ ॥ ८३१. ९. **कारुकुशील-वान्**—*मॅ। कारुकशीलकान्–ख; वै कारुशिल्पकान्–ग; कारुकुशिलकान्–ज्ञ-भ१; कारुशीलकान्–त२-३-४-भ२-श; कारुकशिल्पिकान्–भ३। च कारुशीलकान्–मु। गोरक्षकान् वाणिजिकांस्तथा कारुकुशीलवान् इ.–मनु. ॥ ८३१. १७. **ताम्**—§-मु। तं–मॅ ॥ ८३१. १८. **°तात्पर्याद्भृति°**—ग१-ज्ञ-न-भ-श-*मॅ-मु। °तात्पर्याद्भवति°–ख; °तात्पर्यात्स्तुतिति°–ग२; °तात्पर्याद्धति°–त२; °तात्पर्यादुति°–त३। ८३२. ३. **वर्तामहे**—भ१-३-य। वर्तते–मॅ-मु इतरेषु च ॥ ८३२. ११. **शविष्ठ**। 'शत्रिष्ठ' इति पदपाठः ॥ ८३२. २०. **उ इति पूरणः**। 'इत्' इति पदपाठः ॥

[८. ६७] ८३२. २२. **संमदाख्यस्य**—ग-त२-न-भ१-*मॅ। समदाख्यस्य–ख-घ-त३-श-मु ॥ ८३२. २४. **आदित्यान्**—त२-*मॅ। आदित्यं–मु इतरेषु च ॥ ८३२. २५. **आदित्याः**—ख-ग-त२-३-*मॅ-मु। आदित्यो–इतरेषु ॥ ८३३. ९. **अलंकर्त्रे**—§-मु। अरंकर्त्रे–मॅ ॥ ८३३. १६. **जीवान् इदानीम्**—§-मु। इदानीं जीवान्–मॅ ॥ ८३३. १७. **पुरा**—§। मॅ-मु-पुस्तकयोरेतन्नास्ति ॥ **क**—न-भ। के–इतरेषु मॅ-पुस्तके च। कद्ध क नु–मु ॥ ८३४. ९. **मर्चयता**—ख-ग-ज्ञ-न-भ३-श-*मॅ-मु। मर्चयंना–त३-४; मर्चता–भ१; मर्चयेते–भ२ ॥ ८३४. ११. **प्राप्ता बाधा नोऽस्माकम्**—*मॅ-मु। प्राप्तबाधा नोस्माकं–ग; प्राप्तां बाधा मा नोस्माकं–ख-त-न-श; प्राप्तां बाधां नोस्माकं–भ ॥ ८३४. १७. **मत्स्यपक्षे**—ग-घ-त-न-भ-श-मु। ख-मॅ-पुस्तकयोरेतन्नास्ति ॥ ८३४. २१. **गभीरम्**—न-भ-श-नि.। गंभीरं–ख-ग-त-मॅ-मु ॥ ८३४. २८. **भूमिरूपा**—*मॅ। भूरिरूपा–§-मु ॥ ८३४. २९. **उरुचि उरुत्वम्**—§-मॅ-मु। 'उरुचि' इत्यस्मादनन्तरं किंचित्पदं गलितं स्यात्, अथवा 'उरुत्वम्' इत्यस्य स्थाने 'उर्वि त्वम्' इति स्यादिति मॅक्समुल्लरमहाशयः

मन्यते। किंतु तदनावश्यकम्। 'उरूचि' इत्यस्य 'पृथिवी' इत्यर्थः। ऋ. सं. ७. ३५.३. द्रष्टव्यम्। 'उरुत्वम्' इति कर्मपदं च वाक्ये आवश्यकम्॥ ८३५. १. **तस्य**—ऽ-मु। **एतन्नास्ति मॅ॥ जीवेम पुत्रान् रक्षितुम्।** जीवेनापूत्यान्नक्षितुं–ख-त३-मॅ। जालेन रक्षिताः **जीवेम** पुत्रान् रक्षितुं–ग; जीवेनापत्यान्नक्षितुं–त२; जीवेनापत्यान्भक्षयितुं–भ१-२; जीवेन मत्स्यान् भक्षयितुं–भ३; जीवेनामृतान्नक्षितुं–न; जीवेन्यस्मात्पाद्रक्षितुं–श। जीवनेनापत्यान् रक्षितुं–मु॥ ८३५. ५. **उच्छ्रिताः**—ख-ग-ज्ञ-त२-३-न-भ-श-मु। उच्छ्रियंता–त४; उच्छ्रितीनां–त१। उच्छ्रियंतः–मॅ॥ ८३५. १०. **आदातृणाम्**—ख-ग-ज्ञ-त१-३-४-न-भ१-२-श। अदातृणां–ख-त२-मॅ-मु॥ ८३५.११ **मुमोचत**—ऽ-मु। मुमोचत विमोचत–मॅ॥ ८३५.२१. **भुञ्जमहे**—भ१-*मॅ। बुबुज्महे–ख-न; भुजंजमहे–ग; भुज्महे–त-भ-श। बुभुज्महे–मु॥ ८३५. २४. **प्रकृष्टमतयः**—त२-भ। प्रकृष्टमयो–ख-त-न-श; प्रकृष्टधियो–ग; प्रकृष्टमायाः–घ-मॅ-मु॥ ८३६. ११. **अतिस्कन्दनाय**—ज्ञ-त२-३-भ३-श-मु। अतिष्कंदनाय–मॅ इतरेषु च॥ ८३६. १५. **पुत्रे पितृशब्दः**—ग-भ-*मॅ-मु। पुत्रे पित्वशब्दः–ख-त॥ ८३६. २३. **रिप्रमिति**—त२-*मॅ-मु-निरु.। रिप इति–भ१-३; रिप्र इति–**इतरेषु**॥

[८. ६८.] ८३७. ९. **अन्ततः**—*मॅ-मु। अथ ततः–ख-ग-त-न; अथ तत्–भ; अथ–श॥ ८३७. १७. **रथं यथा**—मॅ-×। मु-पुस्तकेऽप्येतन्नास्ति॥ ८३७. २३. **मते**—मॅ-मु-×॥ ८३८. ८-९. **सैनिकानां.....चर्षणीनाम्**—ख-त-न-भ-श-मु। सैनिकानां एवैः गमनैः–घ। मॅ-पुस्तक एतन्नास्ति॥ ८३८. २२. °**योगादिच्छा**°—ग। °योगत्वादिच्छा°–*मॅ-मु। °योगस्वदिच्छा°–ख-ज्ञ-त१-२-३; °योगास्वदिच्छा°–त४-न-भ-श॥ ८३९. १०. **कर्तुम्**—भ२-*मॅ-मु। कुर्वन्–इतर-लिखितपुस्तकेषु॥ ८३९. ११. **वज्रवन्**—ख-घ-त-न-भ-श-मु। वज्रिन्–ग-मॅ॥ ८३९. १२-१३. **प्रतिपत्...सुतमन्ध इति**—*मॅ-मु-×॥ ८३९. २०. **ररक्षिथ**—*मॅ-मु। रक्षिथ–ख-ज्ञ-त२-३; रक्षथ–ग-घ-त४-न-भ-श॥ ८३९.२६. **तननीयः**—ग-*मॅ-मु। तंतनीयः–ख-घ-त-न-श; संतननीयः–भ॥ ८४०. २. **तथा तने**—*मॅ-मु-×॥ ८४०. ६. **याचामहे**—ख-घ-ज्ञ-त१-२-मु। ग-त३-४-न-भ-मॅ-पुस्तकेष्वेतन्नास्ति॥ ८४०.११. **दानप्रशंसकाः**—ऽ-मॅ-मु। दानस्तुतिः पराः–बृहद्दे.॥ ८४०. १२. **अविरोधः**—ग-श-मु। अनिरोधः–ख-त-भ-मॅ॥ **अनेनैवाशयेन**—ग। अनयैवाशया–मॅ-मु इतरेषु च॥ ८४०. १५. **पितृपुत्ररूपेण**—*मॅ-मु। पितृपितृरूपेण–ख-त-भ१-श; पितृपुत्रपितृ-रूपेण–ग; पितृरूपेण–घ-भ२॥ ८४०. २०. **अतिथिग्वाय**—ख-ग-त-न-श। इत्यतिथिग्वाय–भ-मॅ-मु॥ ८४०. २१. **इन्द्रोते**—ग-*मॅ। इंद्र–इतरलिखितपुस्तकेषु। इंद्रोतः–मु॥ ८४०. २५. **प्रस्तुतम्**—ग-न-भ२-श। प्रस्तुत–ख-त; प्रस्तुतं–भ१। प्रस्तुत्य–मॅ-मु॥ ८४०. २६. **एवमृक्षाश्व-मेधयोः**—*मॅ-मु। एवं त्यपृक्षाश्वमेधयोः–ख-त१-भ१-२; एवं सति ऋक्षाश्वमेधयोः–ग; एतं त्यपृ-पृक्षाश्वमेधयोः–त२। पितृपुत्रयोरभेदात्तयोः पक्षकर्तृत्वाच्च ऋक्षाश्वमेधयोर्दानस्तुतित्वं न व्याहन्यते इत्यन्वयः। मॅ-पुस्तके तु 'न व्याहन्यते' इत्यत्र वाक्यपरिसमाप्तिं कृत्वा 'पितृपुत्रयो°' इत्यारभ्य 'विस्पष्टयिष्यते' इत्यन्तमेकं वाक्यं कृतम् (१)॥ ८४०. २७. **इन्द्रोतदानस्य**—ग-*मॅ-मु। इंद्र तद्दानस्य–ख; इंद्र तद्दानस्य–त-भ-श॥ ८४१. १०. **आज्ञायते**—मॅ-मु। आज्ञायत–ख-घ-त-न-भ-श; अज्ञायत–ग-ज्ञ॥

[८. ६९.] ८४१. १९. **आद्यास्रयोऽर्धर्चाः**—ग-न-भ१-२-मु । आद्यासु योर्धर्चाः-ख-ञ-त३-४-श । आद्यासु येऽर्धर्चाः-मॅ ॥ ८४१. २९. **उनत्ति**—*मॅ-मु । उंदिति-ख-त-श इंदति-ग; उदति-न; उदिति-भ१; उंदति-भ२ ॥ ८४२. ७. **सुगम्य इति**—*मॅ । युगप इति-ख-त; युग्म्य इति-ग-त४-भ२-मु; युवत्य इति-न; युत्प इति-भ१; युग्म इति-श ॥ ८४२. २२ **दिवीत्यर्थः**—*मॅ । दिवीत्येषः-ख-ञ-त१-२-भ१-२; दिवीत्यषः-त३ । दिवीति शेषः-मु ॥ ८४२ २३. **आरोचमाने**—श-*मॅ-मु । आरोचने-ख-त१-२-३-४; अरोचमाने-ञ ॥ ८४२. २५-२६ **सूत्रितं च.....इति**—ग-*मॅ-मु । इतरलिखितपुस्तकेष्वेतन्नास्ति ॥ ८४२. ३०. **तथार्चेति**—ख-ञ-त१-२-३-न-श-मु । तथा चेति-ग-त४-भ१-२ । तथा वेति-मॅ ॥ ८४३. १. **तत्रानुरक्तत्वात्**—*मॅ-मु । तत्रानुक्तत्वात्-ख-त-भ-श; तत्रानुत्पन्नत्वात्-ग ॥ ८४४. १०. **युद्ध संनद्धः**—ऽ-मॅ-मु । ! ॥ ८४४. १५. **अप्रवृद्धाः**—घ-त-न-भ२-श । अमवृद्धाः-ख; अवृद्धाः-ग; प्रवृद्धाः-भ१ । अपवृद्धाः-मॅ-मु ॥ ८४४. १९. **आ पतन्ति वृष्टिरल्पा यदा**—*मॅ-मु सापतितं वृष्टिरल्पाय यदा-ख-त-श; आपतंति वृष्टिरहिता यद्यता-ग ॥ ८४४.२६. **तम्**—मॅ-मु-× ८४५. ११. **वृष्टिनिवारकैः**—ञ-न-भ-मु । धृनिवारकैः-ख-त१-२-३-४-श । वृष्टिवारकैः-मॅ ॥ ८४५. २५. **कुमारकः**—ऽ-मु । कुमारः-मॅ ॥ ८४६. ३. **गृहो (?)**—ऽ-मॅ-मु । 'गृहा पुंसि च भूम्न्येव' इति कोशात् (अमर. २. २. ५ (पुंलिङ्गैकवचनान्तगृहशब्दप्रयोगश्चिन्त्यः । ८४६. ४. **आरोहामि**—ऽ-मु । रथमारोहामि-मॅ ॥ ८४६. १५. **स्तुतिवन्तः**—ऽ-मॅ स्तुतिमन्तः-मु । एतदेव समीचीनम् ॥

[८. ७०.] ८४६. ३१. **चतुर्दश्यनुष्टुप्**—ग-*मॅ । मु-इतरेषु च नास्ति ॥ **पञ्चदशी पुरउष्णिक्**—ग-*मॅ । मु-इतरेषु च नास्त्येतत् ॥ ८४७. २. **यो राजा...इति**—ख-त१-श *मॅ-मु । इतरेषु नास्ति ॥ ८४७. १५. **आत्मानम्**—ग-त३ । अस्मास्वमात्मानं-घ । आत्म स्वात्मानं-त२-न-भ-श-मॅ । आत्मना स्वात्मानं-मु ॥ ८४७. २६. **अनुकूलम्**—ऽ-मॅ-मु । अस्मा दनन्तरं 'करोति' इत्येतादृशं पदमावश्यकमिति मॅक्समुल्लरमहाशयः ॥ ८४८. १५. **मूर्ति°**—भ३ श-*मॅ-मु । गूर्त°-ख-त; गूर्ति°-न-भ१-२ ॥ ८४८. १६. **त्वा**—घ-मु । ते-मॅ इतरेषु च । ८४८. १७. **किंचन**—*मॅ । किंच मनु-ख-त-भ-श; किंच अनु-ग-मु ॥ ८४९.४. **यो मर्त्योऽस्य**—*मॅ-मु । स मर्त्यो यस्य-ख-ग-त-न-भ-श; स मर्त्यो अस्य-घ । क्लिष्टा वाक्यरचना ॥ ८४९. ६. त न—मु । त न-घ । तन्न-मॅ इतरेषु च ॥ ८४९. २०. **उत्थापय**—*मॅ-मु । उत्पादयत-ख; उत्थापयत-घ-त-भ-श; उत्थापयितः-ग ॥ ८४९. २९. **नि शिश्नथः**—घ-*मॅ-मु । वि शिश्नथो-इतर लिखितपुस्तकेषु ॥ ८५०. १५. **भृष्टयवाः**—ख-ग-घ-त१-२-३-४-न-भ-मु । भ्रष्टयवाः—ञ-श-मॅ ॥ ८५१. २. **य इन्द्रः** । त्वम् इत्यध्याहार्यम् ॥ ८५१. ३. **एकमेकमेव वत्समित्येवम्**—न एकमेव वत्समित्येवं-भ; एकमेकमेवं-ख-त-श । एकमेकमेव-मॅ-मु ॥ ८५१. ९. **हितं शौरदेव युद्धम्**—*मॅ । हितः शौरदेवयुद्धं-ख-ग-घ१-त-न-भ-श; हिताः शौरदेवा युद्धं-च; हितः शौरदेव युद्धं-मु ॥ ८५१. १०. **न** । 'नः' इति पदपाठः ॥ ८५१. १२. **कर्णे**—ऽ-मु । मॅ-पुस्तक एतन्नास्ति ।

[८. ७१.] ८५१. १६. **चादितो**—न-भ३-य । वादितो-ख-त१-२-भ१-२; दोदितो-त३; **त्वं नो अग्ने** इत्यादितो-श; एतदादितो-ग; आदितो-ञ-त४-मॅ-मु ॥ ८५१. २०. **रक्ष**—

*मॅ। रक्ष कस्य महोभिः–ऽ-मु ॥ ८५१. २८. **अस्मदादिभिः**—*मॅ-मु। अस्मादिभिः–ख-त-भ; अस्माभिः–ग; अस्मादादिभिः–श ॥ ८५२. २. **वस्वो...प्रयच्छसि**। अत्र 'स नो विश्वेभिर्देवेभिरूर्जो नपात्' इति ऋक्पाठः। 'स नो वस्व उप मास्यूर्जो नपात्' (८. ७१. ९) इति व्याख्यात्रा पठितम्। विश्वेभिर्देवेभिः धनं प्रयच्छसि–घ-मु ॥ ८५२. ३. **स्तुत्यप्रकाश तदेवादरार्थम्**—न-भ। स्तुत्यप्रकाशन तदेवा°–श; स्तुत्यप्रकाश देवा°–घ-त१; स्तुत्यप्रकाशन देवा°–ख-ग-ञ-त२-३-४-मॅ। स्तुत्यप्रकाशन देव आदरार्थ–मु। ऋ. सं. ७. ७०. ७. द्रष्टव्यम् ॥ ८५२. ४. **तच्च**। 'तं च' इति भाव्यम् ॥ ८५२. ९. **यम्**—ग-*मॅ-मु। यदा–ख-त-न-भ-श; यदा यं–घ ॥ ८५२. १३. **गोषु**–घ-भ३। यागोषु–ग; यागोषु–ख-त२-न-भ१-२-श-मॅ-मु ॥ ८५३. २. **नपात्त्वम्**—ग-भ३-*मॅ-मु। नपादित्वं–इतरलिखितपुस्तकेषु ॥ ८५३. ३. **एव**—*मॅ। वा–ऽ-मु ॥ ८५३. २५. **होता**—ख-घ-ञ-त२-न-भ-मु। ग-त३-४-श-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ८५४. १२. **वा**—*मॅ। अति वा–ख-त-भ; सति वा–ग; अथवा–मु ॥ ८५४. २३ **धनाय**—ऽ। मॅ-पुस्तक एतन्नास्ति। धनायाग्निं–मु ॥ ८५५. १. **नः अस्माकम्**—ख-ञ-त१-न-भ-मु। ग-त४-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ८५५. २. **भयानाममिश्रणम्**—*मॅ-मु। भयानं मम श्रवणं च–ख-ञ-त२-४-भ१; भयानाममिश्रवणं–ग; भयानाममश्रणं–त१; भयानामश्रवणं–भ२ ॥

[८. ७२.] ८५५. २४. **ससं स्वपन्तम्**—*मॅ-मु। ससं स्थापनं–ख-ग-ञ-त२-भ२-श; ससं स्थपनं–घ-त३-४-भ१; संस्थापनं–त१; संसं स्थपनं–न ॥ ८५६. ८. **स्तोतुम् अम्ब्यम्**—मॅ। स्तोतामन्यं–ख-त-न-भ-श; स्तोतामंब्यं–ग; स्तोतुमन्य–घ१; स्तोतुमंब्यमन्यं–च-मु ॥ ८५६. ९. **अयं रुशंश्चरंश्च**—*मॅ-मु। अयं चरंश्च–ख-ग-त-भ; यच्चरन्रश्च–श ॥ ८५६. १४. **स्थूलम्**—*मॅ-मु। स्थलं–ख-त-श; स्थल–घ; स्थलो–भ१-२ ॥ ८५६. १५. **नियोजयतीत्यर्थः**—*मॅ-मु। यारुजनियोजयेति क्षेत्यर्थः–ख-त१-२-३-न-भ; यारुजनियोजयेति श्रुत्यर्थः–श ॥ ८५६. २२. **ब्रह्माणम्**—ग-घ-श-मु। ब्राह्मणं–ख-त-भ-मॅ ॥ ८५६. २५. **ओ**—घ-ञ-भ-मु। तो–ख-ग-त; बो–श। ओं–मॅ ॥ ८५६. २६. च **आ**—ग-न-भ। वा–ख-त-श-मॅ-मु ॥ ८५७. १३. **परितो व्याप्तम्**—ग। परिणेव्याभं–ख-त-भ-श। परिणत्याभं–घ-मॅ-मु। 'परिगंतारम्' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ८५७. १४. **नीचीनद्वारम्**—न-भ-*मॅ-मु। ग्भूतद्वारं–घ। इतरलिखितपुस्तकेषु नास्त्येतत् ॥ ८५७. २०. **आसन्द्यामासादयन्ति**। आसद्यामा°–घ१; आसादयंति–च; असंध्यमा°–ख; आलंध्यामा°–श। आसंध्यमासादयंति–मॅ-मु इतरेषु च ॥ ८५७. २६. **गवाजयोः**—ग-*मॅ-मु। गवाश्वयोः–ख-ञ-त१-२-भ; गवायोः–त३-४-श ॥ ८५८. १३-१४. **संगच्छन्ति...संगच्छन्ते**—ऽ-मॅ-मु। 'समो गम्यृच्छिभ्याम्' (पा. सू. १. ३. २९) इति सूत्रेण प्रथमं 'संगच्छन्ते' इति अनन्तरं 'संगच्छन्ति' इति च भाव्यम् ॥ ८५८. १८. **धारकम्**—घ। धारकमग्निं–ख-त-न-भ-श; धारकमग्नं–ग; धारकमाजं–मॅ-मु ॥ ८५८. २८. **मधुधुक्त्वम्**—*मॅ-मु। मधुक्षं–ख; मधुकत्वं–ग; मधूदकं–ञ; मधुकं–त१-२-४; मधुदकं–त३; मधुष्णं–भ१-२; मधुवृणं–भ३; मधुत्वं–श ॥ ८५९. २. **हेतुमाह**—*मॅ-मु। हेतुं–ऽ ॥ ८५९. ६. **पवमाने**—*मॅ-मु। एवमाने–ख-त-भ; एवमात्ते–ग; एवंमाने–घ; एवंभूते–श। 'पवमाने सोमे' इत्यनन्वितम् ॥

[८. ७३.] ८६०. २२. **आवारयतम्**—मॅ-मु। आवरयंतं–घ; आवरयतं–इतरेषु ॥ ८६०. २७-२८. '**प्रवेशः...निर्गमश्च...स्पष्टमुक्तम्**—ऽ-मॅ। ।। स्पष्टमुक्तः–मु ॥ ८६१. ८.

युवयोरर्थमागमनाय—*मॅ। युवयोरर्थागमनाय–ख-घ-त-न-भ-श; युवयोरात्रार्थागमानाय–ग। युवयोरर्थं गमनाय–मु ॥ ८६१. १४. **सजात्यम्**—च-भ२-श-*मॅ-मु। साजात्यं–ख-ग-त; संजात्यं–घ१; साजत्यं–भ१ ॥ ८६१. १५. **बन्धकः स्तुवः**—*मॅ-मु। बंधकस्तुवः–ख-त-भ२; बंधकस्तुवः–भ१-श; बंधकं स्तुवः–ग; बंधुकः स्तुतः–घ१; बधुकः स्ततः–च ॥ ८६१.१६. **अथवर्षिरहम्**—*मॅ-मु। अद्य वायुरहं–ख-त-न; अथवा युवयोरहं–ग; आद्या वायुरहं–भ१-२; अथवा रहं–श ॥ ८६२. ३. **अश्विनौ**—मॅ। अश्विनौ नोस्मान्–ख-ग-त-न-भ-श-मु; अश्विनौ नः–घ ॥ **अश्व्यैः अश्वसमूहैः**—*मॅ। अश्व्यैश्च–ख-ग-घ-त-न-श-मु। अश्व्यैः अश्व–भ२ ॥ ८६२. १४. **निशारयति**—*मॅ-मु। निशरयति–ख-त; निःसारयति–ग; निवारयति–घ-न-भ; निशातयति–श ॥ **एवम्**—ग-न-भ। एव–ख-त-श-मॅ-मु ॥ ८६२. १९. **आकर्षया**—मॅ। लिखितपुस्तकेषु 'कृष्णयाकर्षया' इति निरन्तरं लिखितत्वात् 'आकर्षया' 'कर्षया' इत्युभयथापि पदच्छेदः शक्यते कर्तुम्। कर्षया–मु। 'आकर्षकया' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥

[८. ७४.] ८६२. २३. **पञ्चमम्**—भ२-*मॅ। चतुर्थ–मु इतरेषु च ॥ ८६२. २७. **व्योमविश्वदेवस्तुत्**—*मॅ-मु। त्वाव्योमविश्वेदेवस्तुत्–ख-न-भ; व्योमविश्वोदेवस्तुत्–ज्ञ-त१-२; त्वाव्योमविश्वेदेवस्त्वयं–त३-४-श। केवलं पञ्चशारदीय एवेदं सूक्तमाज्यशस्त्रं, न व्योमविश्वदेवस्तुतोरिति आश्व. श्रौ. सूत्रादवगम्यते ॥ ८६३. ५. **स्तुषे**—ख-घ-ज्ञ-त१-२-मु। नु स्तुषे–मॅ इतरेषु च ॥ ८६३. २७. **°तेज आद्युपलक्षण°**—*मॅ-मु। °तेजोद्युपलक्षण°–ख-ग-त-न-भ ॥ ८६३. २८. **नाशयन्तम्**—ग-घ-ज्ञ-भ२-श। नार्शयंतं–ख-त२-३-४-न-भ१। दर्शयंतं–मॅ-मु ॥ ८६४. २०. **संबन्धीति**—*मॅ। संबंधिनमिति–ख-ज्ञ-त१-३-न-भ-श-मु; संबंधिनि इति–ग; संबंधि सर्वं—त२ ॥ ८६४. २५. **स्तुवते**। स्तुवंति–ग। स्तुवंते–मॅ-मु इतरलिखितपुस्तकेषु च ॥ ८६५. १२. **वृत्रतूर्ये**—ग-न-भ-श। वृत्रस्य तूर्ये–ख-त-मॅ-मु। ८६५. १९. **वृक्षा**। 'मृक्षा' इति पदपाठः। **वृक्ष्यन्त**—ग-*मॅ-मु। व्रश्चत–ख-ज्ञ-त२-३; व्रश्च्यंते–त१; वश्च्यंते–भ ॥ ८६५. २७. **शत्रूणाम्**—मॅ। शत्रूणां संबंधिनां–ख-त-न-भ-श। शत्रूणां संबंधिनं–घ-मु ॥

[८. ७५.] ८६६. २६. **आहूत वा**। आहूतो वा–भ१; आहुतोद्य–ख; आहुतो वा–ग-त-भ२-श-मु। आहुत वा–*मॅ। ऋ. सं. ८. २५. १९. द्रष्टव्यम् ॥ ८६७. ११. **°दीप्तये**—ग। °तृप्तये–मॅ-मु इतरेषु च ॥ ८६८. ६. **ते**—घ-न-भ-मु। ख-ग-त-श-मॅ-पुस्तकेष्वेतन्नास्ति। ८६८. २३. **अस्मदन्यमस्तोतारम्**—*मॅ-मु। अस्मदन्यस्तोतारं–ख-त-न-भ; अस्मदन्यं स्तोरं–ग; अस्मदन्यं स्तोतारं–घ-श ॥ ८६८. २९. **विधावति**–त-न। विधाति–भ। वधावति–घ। वृधावति–श-मॅ-मु। 'वृधावति' इत्यस्य स्थाने 'विधावति' इति भाष्यकारः पठितवानिति तद्व्याख्यानतोऽपि स्पष्टम् ॥ ८६८. ३०. **भवाम**—ख-ग-ज्ञ-त१-२-३-भ-श-मु। भवेम–घ-त४-न-मॅ ॥ **इति भावः** §-मु। इति–मॅ। ८६९. ४. **अन्यस्याः**—ग२। अन्यायाः–मॅ-मु इतरेषु च ॥

[८. ७६.] ८६९. २८. **अपः सृजन्**—च-भ३। अपः असृजत्–ख; अपः असृजन्–ज्ञ-त१-२-३; अपसृजन्–ग-त४-भ१-२; अपः अपसृजन्–घ१-श-मॅ। अपः सृजन् असृजन्–मु। मु-पुस्तकगतः पाठः शुद्ध इति मॅक्समुल्लरमहाशयेनोक्तम्[1] (!) ॥ ८७०. २२. **बहुकर्मन्निन्द्र**—

1. Preface to the 2nd Edition Vol. IV. p. 178.

ग-घ । बहुकर्मेंद्र–ख-त-भ-श-मॅ-मु ॥ ७७१.३. **अह्नाम्**—ग१-*मॅ-मु । अहां–इतरलिखितपुस्तकेषु ॥ ८७१. ६. **इति ब्राह्मणाच्छंसिनः**—ख-त-न-भ-श-मु । इदं नास्ति मॅ-पुस्तके ॥ ८७१. २०. **साष्टापदी**—ख-*मॅ । साष्टापदीं–त१-२-३-४-न-भ२-३-मु; प्राप्ता–घ; प्राप्तापदीं–ज्ञ-भ१(प्रान्ते) ॥ ८७१. २२. **तनुम्**—ख-घ-त न-भ२-श-मु । तनून्–भ१-३ । तनूं–मॅ ॥ **स्वरूपं...अशक्यत्वात्** । 'स्वरूपस्य...अशक्यत्वात्' इति भाव्यम् ॥

[८. ७७] ८७१. २४. **कुरुसुतेः**—श-*मॅ । पुरुसुतेः–ख-त-भ-मु; पुरुसुतिः–घ ॥ ८७२. ६. **एनम्**—ख-त-न-भ-श । **ईमेनं**–घ-मु । एतं–मॅ ॥ ८७२. ७. **तौ**—मॅ-मु । ते–§ ॥ ८७२. १३. **रज्ज्वा इव तया**—*मॅ-मु । नद्धेव लया–ख-त; रज्ज्वा–ग; वलया–घ; रज्वेव लया–न-भ-श ॥ ८७३. १७. **नतानि**—*मॅ-मु । निता–ख-त-भ-श; नीतानि–घ ॥ **भूमेः कीलवद्धारणाय**—*मॅ । भूमे किलवद्धारणया–ख; भूमेः किलवद्धधारणाय–घ; भूमे किलवद्धारणाय–ज्ञ; भूमे किल बद्धा धारणाय–त१-२; भूमे किल बद्धा धारणया–त३-४-भ; भूमे किलवद्धा धारणप्रा–श । भूमेः कीलवद्धारणानि–मु ॥ ८७३. २४. **नैरुक्तैतिहासिक°**—ख-ज्ञ-त१-२-४-न-भ-मु । निरुक्तैतिहासिक°–ग-त३-श-मॅ ॥ ८७३.२६. **स्वविरोधेन नेत्याह**—न-भ-श । स्वविरोधन नेत्याह–ग; स्वविरोधेनेत्याह–ख-त-मॅ-मु ॥ ८७३. २८. **°वचनः**—§-मु । °बचने–मॅ ॥ ८७४. १४. **तानि**—भ । एतन्नास्ति ख-ग-त-न-श-मॅ-मु-पुस्तकेषु ॥ ८७४. १६. **उक्तोऽर्थश्च चरमपादेन**–*मॅ-मु । उक्तार्थाच्च वारमपादिना–ख-ज्ञ-त१-२-३; इत्यत्रोर्थाश्च चारमपादेन–ग; उक्तोर्थोच्च चारमपादिना–त४-न-भ-श ॥ ८७४.२३. **यास्केन व्याख्याता**—*मॅ-मु । व्याख्यातत्वात्–§ ॥ **लिख्यते**–*मॅ-मु । लिख्यते यास्कः–§ ॥ ८७४. २५. **गमनपातिनौ**—§-मॅ-मु । गमनपातिनौ वा–निरु. ॥

[८. ७८] ८७६. ४. **यदा तं निन्दितुमिच्छति**—*मॅ-मु । यदा त्वं निंदितुमिच्छसि–ख-ग-त-न-भ-श ॥ ८७६. १४. **इन्द्रः...अभिहितः**—*मॅ-मु । चेंद्रः पीतं सोमोभिहितः–ख-त-न-भ-श; चेंद्रपीताः सोमोभिहितः–ग ॥ ८७६. १८. **एषते**—ग-घ-भ । ईषते–ख-त-मॅ-मु ॥ ८७६. १९. **आप्तेच्छम्**—*मॅ-मु । आप्तछुं–ख-त२-३-श; दातुमिच्छां अदच्छशु–ग; त्वामिछुं–घ१; त्वामिछां–च; आप्तेछुं–त१; प्राप्तेछुं–भ ॥ ८७६. २७. **निष्कृतस्य**—*मॅ-मु । निष्कस्य–ख-त-भ-श; संभृतस्य–ग ॥

[८. ७९] ८७७. १६. **°साधनश्च अन्धः सन्नन्धोऽपि**—मु । °साधनस्य अंध संनद्धोपि–भ१-३; °साधनस्य अंध संनद्धोपि–न; °साधनश्च अंध(अध–त३-४) संनद्धोपि–त३-४-भ२; °साधनश्च अयमंधोपि–ग । °साधनश्च अंधः संनद्धोऽपि–मॅ ॥ ८७७. २१. **कृत्याभ्य इत्यर्थः**—ग-त४-भ-श । कृत्यभ्येत्यर्थः–ख-ज्ञ-त२-३-न । कृत्येभ्य इत्यर्थः–मॅ-मु ॥ ८७७. २२. **अन्यकृतानि हि रक्षांसि** । इदं ब्राह्मणवचनं कुत्रत्यमिति न ज्ञायते ॥ ८७७. २७. **दिवश्च**—§-मु । एतन्नास्ति मॅ-पुस्तके ॥ ८७८. १४-१६. **हे सोम ..... हृदे हृदये ..... नः पूरणः** । हे सोम..... कृत् हृदये ... ... नः पुराणः–भ । हे सोम पीतः त्वं नः अस्माकं हृदे हृदये वर्तमानः सुशेवः सुसुखः मृळयाकुः सुखकर्ता अदभ्रक्रतुः असमाप्तकर्मा पुनःपुनः यागप्रवर्तकः अवातः निश्चलश्च भवेत्यन्वयः–ख-घ । हे सोम पीतः त्वं नः अस्माकं हृदे हृदये वर्तमानः सुशेवः सुसुखः सुखहेतुः अगर्वितकर्मा अहिंसितः । एतादृश हे सोम नः अस्मभ्यं शं भव मनसे अतिनेतेवं साधयतीत्यर्थः–ग । हे

सोम पीतः त्वं नः अस्माकं हृदे हृदये पीताय शं सुखं भव किंच नः अस्माकं सुशेवः सुसुखः मूळयाकुः सुखकर्मा अदृप्तक्रतुः असमाप्तकर्मा पुनःपुनः यागप्रवर्तकः अवातः निश्चलश्च भवेत्यन्वयः–श-त१-२। हे सोम नः अस्माकं कृत् हृदये पीताय हृदयसंभव। अपरो नः पुराणः–त४-न-श। हे सोम पीतस्त्वं नः अस्माकं हृदे हृदये वर्तमानः शं सुखं भव। किंच नः अस्माकं सुशेवः सुसुखः मूळयाकुः सुखकर्ता अदृप्तक्रतुः असमाप्तकर्मा पुनःपुनः यागप्रवर्तकः अवातः निश्चलश्च भवेत्यन्वयः–मु। हे सोम पीतस्त्वं नोऽस्माकं हृदे हृदये वर्तमानः सुशेवः - -। अपरो नः पूरणः–मॅ॥ ८७९. २. **वा**—भ-*मॅ-मु। च–ध। इतरलिखितपुस्तकेषु नास्ति॥ ८७९. ३. **हिन्धीत्यर्थः**—ग-त४-भ१-श। हिंसीत्यर्थः–ख-भ२-३; भिषीत्यर्थः–घ; हंतीत्यर्थः–ञ; हिंथीत्यर्थः–त२-३। भिंधीत्यर्थः–मॅ-मु॥

[८. ८०.] ८७९. ४. **एकादशम्**—*मॅ। द्वादशं–ञ। दशमं–मु॥ ८७९. ५. **°र्नाम**—घ१-मु। °र्नामा–इतरलिखितपुस्तकेषु मॅ-पुस्तके च॥ ८७९. १२. **बट् सत्यं नाकरम्**। बहुकृत्यं(°त्य–घ) नाकरं–ख-घ-ञ-त१; बट् सत्यं ऩाकरं–ग-भ३; बहुकृत्यऩाकरं–त२; बट् - त्यऩाकरं–त३-४-न; बट् - - ऩाकरं–भ१; वरं - - ऩाकरं–भ२; बल इत्यऩाकरं–श। बट् तऩ्याकरं–मु। बट् - तऩाकरं–मॅ॥ ८७९. १७. **अन्नलाभाय**—घ-भ३। एतन्नास्ति मॅ-पुस्तके॥ ८८०. ९-१०. **वाजयु ... इच्छत्**—मॅ-मु। 'वाजयुः ... इच्छन्' इति (घ-पुस्तकगतः) पाठः साधीयानिति मॅक्समुल्लरमहाशयस्याभिप्रायः॥ ८८०. २०. **पुरमसि**—ग२। पूरयसि–मॅ-मु इतरेषु च॥ ८८०. २७. **अवद्यः**—ख-ग-त-न-भ-श। अवद्ये–मॅ-मु पदपाठश्च। अवद्ये अवद्यः–घ। 'अवद्ये' इति पाठः मॅक्समुल्लरमहाशयेन लिखितपुस्तकेषूपलब्धो न वा इति न ज्ञायते। अस्मत्प्राप्तेषु बहुषु लिखितपुस्तकेषु 'अवद्यः' इत्येव पाठः। अतः भाष्यकारैः 'अवद्ये' इत्यस्य स्थाने 'अवद्यः' इति पठितमिति शक्यमनुमातुम्॥ ८८०. २८. **बह्वन्तरालमाज्यन्तः**। बह्वंतरळं (°लं–त२-३; °ळ–भ१) आज्यंते–ख-त-न-भ१; बह्वंतराळ–ग; बह्वंतराल आज्यंते–भ३; बह्वंतरलं आज्यंतो–श। बह्वंतराल आज्यन्तः–मॅ-मु॥ ८८०. २९. **स्थिता**—ञ-मॅ। स्थितो–मु-निरु.॥

[८. ८१.] ८८१. २०. **स्तोत्रियः**—ञ-मु। मॅ-पुस्तक इदं नास्ति॥ ८८१. २३. **नः अस्मभ्यम्**—ञ। अस्मभ्यं–*मॅ-मु॥ **दातुम्**—घ। दातुं नोऽस्मदर्थं–ख-त-न-भ-श-मॅ-मु॥ ८८२. १६. **उपगानम्**—ग१-भ३-*मॅ-मु। उपमानं–इतरलिखितपुस्तकेषु॥ ८८२. १८. **स्वीकुर्वीति**—ख-ग-त-भ-श-मु। स्वीर्नीति–न। घ-मॅ-पुस्तकयोरेतन्नास्ति। ऋ. सं. १. १४०. १३. द्रष्टव्यम्॥ ८८३. ८. **तव वाजाः**—*मॅ-मु। तव आ–त-भ१-२; तव–ग; अश्वाः–घ-भ३॥

[८. ८२.] ८८४. ७. **लिटि**—ख-ग-ञ-त२-३। टेटिले–भ१; लटि–श; लेटि–त४-भ२-३-मॅ-मु॥ ८८४. २९. **सोऽस्माभिः**—*मॅ-मु। अस्माभिः–ग; सह अस्माभिः–इतरलिखितपुस्तकेषु॥ ८८५. २८. **त्वम्**—ग-भ३-श-*मॅ-मु। ता–ख-त-भ१-२; तां–ञ॥

[८. ८३.] ८८६. ७. **महनीयम्**—ञ। मंहनीयं–मॅ-मु॥ ८८६. १३. **सर्वेषु कालेषु**—ख-ञ-त१-२-भ। सर्वेषु–ग-घ-त३-४-न-श। सर्वेष्वहःसु–*मॅ-मु॥ ८८६. १९. **संबन्धि - - - त्वात्**—मॅ बहुषु लिखितपुस्तकेषु च। संबंधेः–न। मु-पुस्तक एतन्नास्ति। 'संबन्धिशब्दत्वात्' इति स्यात्॥ ८८६. २०. **विष्पितानि**—*मॅ-मु-×। बहुषु लिखितपुस्तकेषु 'विष्पिता' इत्यस्यानन्तरं लेखनार्थं काश्चिदवकाशो (Lacuna) दृश्यते। 'विष्पितानि' इति पदमत्राभिप्रेतं स्यादिति कृत्वा

मॅक्समुल्लरमहाशयेन विनिवेशितम्॥ ८८६. २१. **वा**—ख-ञ-त१-२-भ२-य। ग-त३-श-मॅ-मु-पुस्तकेषु नास्ति ॥ ८८७. ४. **याचामहे**—ख-घ-ञ-त२-४-मु। याचामः–ग-न-भ-श-मॅ॥ ८८७. ६. **न प्राप्नोतु**—घ-न-भ। प्राप्नोतु–ख-त-श-मॅ-मु॥ ८८७. १०. **वः इत्**—ग-घ-मु। इत्–ख-त-भ-श। इद्वो–मॅ॥ ८८७. १६. **तेषामेषाम्**—ऽ-मु। तेषां–मॅ॥ ८८७. २१. **सामान्येन**—ख-घ। समाने–ग। समान्येन–त-न-भ-श-मॅ-मु॥ ८८७. २४. **तस्मै पूषा चार्यमा चाजायेताम्**। इयं श्रुतिः तैत्तिरीयसंहितायां (६. ५. ६.) नोपलभ्यते॥ ८८७. २९. **सर्वे देवाः**—ख-घ-त-न-भ-श-मु। सर्वदेवाः–ग-मॅ॥ ८८७. ३०. **ब्रुवे**—*मॅ-मु-×। उतापि च ब्रुवे–घ॥

[८. ८४.] ८८८. ३. **उक्थ्येषु**—ग-त-न-भ१-२-श-मु। उक्थेषु–ख-भ३-मॅ॥ ८८८. १२. **काण्वः**—*मॅ-मु। अहं–ग; कः–इतरेषु॥ ८८८. २१. **अग्ने**—*मॅ-मु। इंद्र–ऽ॥ ८८८. २३. **नृन्पे**–*मॅ-मु। नृन् पति–ग; तत्प्रति–इतरेषु॥ ८८८. २६. **त्मनेति**—ख-त-न-य-श-मु। आत्मनेति–भ१-३-मॅ॥ **रक्ष त्वदन्यम्**—भ२-*मॅ-मु। रजनदन्य–ख-भ१; नवतदन्यं–ग; रजनदन्यं–त-भ२; त्वदन्यं–श॥ ८९०. ६. **साधयद्भिः**—*मॅ-मु। साधायोभिः–ख-त-भ३; साधीयोभिः–ग; साधोयोभिः–भ१-२॥

[८. ८५.] ८९१. २. **संप्रति**—ग-भ१-३-श-मु। सप्रति–ख-त-न-भ२। घ-मॅ-पुस्तकयोर्नास्ति॥ ८९१. २९. **सोमस्य**—ग-*मॅ-मु। इतरेषु नास्त्येतत्॥

[८. ८६.] ८९२. ९. **नराः**—ऽ-मु। नरः–मॅ॥ ८९२. १०. **भीतिमपनयतः**—*मॅ। भीतिं समनयन–ख-त; भीतिं समनयत–भ-श-मु॥ ८९२.१२. **अस्ताविषाथाम्**—*मॅ-मु। अस्ताविद्याख्या–ख-श-त२-४-भ२; स्ताविद्याढग–ग; अस्ताविद्याथाः–घ; अस्ताविद्याया–त१-३; अस्ताबीयाद्या–भ१-३॥ ८९२. १४. **विष्णाप्वो निमित्तम्**—*मॅ-मु। विष्णोः प्रसनिमित्त–ख-त; विष्णोः प्रसवनिमित्तं–ग-भ२-३; विष्णोः निमित्तं–घ; विष्णोः प्रसविमितं–भ१॥ ८९२. २३. **कथं वाम्**—ऽ-मु। मॅ-पुस्तक इदं नास्ति॥ ८९२. २४. **प्रशस्तं धनं तस्याभिलषितस्य**—*मॅ-मु। प्रशस्तधनं तस्याभिलषितस्य–ग; प्रशस्तधनवतमभिलषितस्य–ख-त-भ-श; प्रशस्तधनमभिलषितस्य–घ॥ ८९२. २५. **अददाथाम्**। अदार्थां–ख-त-न-भ-श; अदातं–ग; अद्यार्थां–घ। अदधार्थां–मॅ-मु॥ ८९३. ५. **आपुनाति**—ऽ-मु। पुनाति–मॅ॥ ८९३. ७. **अदत्तम्**—मॅ-मु। दत्तं–ऽ॥ ८९३. १४. **ऋजीषोऽपार्जितोऽभिषुतः सोमः**—ग-त३-मु। निरु.५.१२.; ९३२. पृ.२० प. टिप्पणी च द्रष्टव्ये। ऋजीषोपार्जितोभिषुतसोमः–ञ-त४-भ-श। उपार्जितः अभिषुतसोमः–घ। ऋजीष उपार्जितोऽभिषुतः सोमः–मॅ। ऋजीषशब्दः यद्यपि निरुक्तादिषु नपुंसकलिङ्गः दृश्यते तथापि सायणाचार्यैः प्रायेण पुंलिङ्ग एव प्रयुक्तो दृश्यते (ऋ. सं. ५.४०.४; ६.४२.२; ८.७६.५.)॥ ८९३. १५. **रक्षति**—ग-न-भ। रक्षत–ख-ञ-त२-३। रक्षते–घ-त४-श-मॅ-मु॥ ८९३. १८. **मा नो इति**—ख-त१-२-मु। मा न इति–ग-ञ-भ३; म मे इति–त३-४-न-श; इमे इति–भ१; मे इति–भ२। मेति–मॅ॥

[८. ८७.] ८९४. ३. **यत्स्थ इति**—मॅ-मु-आश्व. श्रौ.। यत्स्थो–ख-ग-त; यत्स्थो इति–भ-श॥ ८९४. ८. **अनुपक्षीणस्तोत्रः**—ग-*मॅ। अनुक्षीणस्तोत्रः–ख-त-भ-मु; मनुष्यः क्षीणस्तोत्रः–श॥ **स्तोमः स्तोता भवति**—*मॅ-मु। स्तोमस्ता भवसि–ख-ञ-त२-३-भ; स्तोम भवसि–त१-४॥ ८९४. १२. **प्रयच्छतः**—ऽ-मु।.प्रयच्छथः–मॅ॥ **प्रति आ गतम्**—ख-ग-घ-त-न-भ२-

श-मु। प्रत्यागं–भ१। प्रत्यागच्छतं–भ३-मॅ॥ ८९४.१४. **शीघ्रमागत्य पिबतम्**—त-भ-मु। शीघ्रमागत्य पिबतः–ख। एतन्नास्ति घ-मॅ-पुस्तकयोः॥ ८९४.२७. **आ**—भ१-२। आ नि पातं–ख-ञ-त१-२-मु। भ३-मॅ-पुस्तकयोरेतन्नास्ति। इतरलिखितपुस्तकेषु २-४ मंत्राणां भाष्यं नास्ति॥ ८९५. ४. **अवतिः**—भ२-३-मु। अवतीः–भ१; अविति–त२। अवति–ख-मॅ॥ **याच्ञाकर्मा**—ख-त२-भ-मु। याच्ञाकर्म–मॅ॥ ८९५. ५. **आत्मनः**। आत्मनां–ख-ञ-त२-भ३; आत्मानं–त१; आत्मानां–भ१-२। आत्मना–मॅ-मु॥ **पालनहेतुकत्वेन**—ख-त२-भ-मॅ-मु।?॥ ८९५.६. **ता तौ**—ख-घ-त१-२-मु। ततो–भ-मॅ॥ ८९५. ७. **सर्वैर्देवैः**—ख-घ-ञ-त१-२-मु। सर्वदेवैः–भ१-२। सर्वदेवेषु–मॅ॥ ८९५. १५. **ववृधानौ**—ख-घ-ञ-त१-२-भ१-२-मु। वावृधानौ–भ३-मॅ॥ ८९५. १६. **शोभनाम्**—ऽ-मु। मॅ-पुस्तक एतन्न विद्यते॥ ८९६. २. **अन्नलाभाय**—ऽ-मु। अन्नकामाय–मॅ॥

[८. ८८.] ८९६. २०. **वसोः पात्रे निवसतः**—*मॅ-मु। वसे पात्रः प्रतिवसतः–ख-त-भ१; वसोः पात्रं प्रतिवसतः–ग-भ३-श; वसो पात्रः प्रतिवसतः–भ२॥ ८९६. २५. **अत्रेति**—ऽ-मु। यत्रेति–मॅ॥ ८९६. ३०. **अतिशयितदीप्तिम्**—ऽ। °दीप्तं–मु। अतिशयेन दीप्तं–मॅ॥ ८९७. ५. **शोभनदानयोग्यं बलादियुक्तम्**। शोभनदानयोग्यबलादियुक्तं–ग। शोभनयोग्यं बलादियुक्तं–ख-त-भ-मॅ-मु॥ ८९७. ६. **याचामह इति**—ग-*मॅ। याचामहेति–श; याचाम इति–ख-त-न-भ-मु॥ ८९७. ७. **ब्राह्मणाच्छंसिनः**। 'अच्छावाकस्य' इति भाव्यमिति प्रतिभाति॥ ८९७. १४. **न निवारयन्ति**—ग२-घ१-भ-मु। च निवारयंति–श; निवारयंति–ख-ग१-च-ञ-त३-४-न-मॅ॥ ८९७. १५. **त्वम्**—मॅ। त्वं तत्–ऽ-मु॥ ८९७. २३-२४. **मज मुजि...शब्दार्थः**—ऽ-मॅ-मु। इदं पुनरुक्तमिवाभाति। धातुपाठे 'मुज मुजि शब्दार्थाः' इति दृश्यते। 'मजमुजी च' इति नास्ति। 'मुज मुजि' इत्येतयोः स्थाने 'मृज मृजि इति स्वामिचन्द्रौ' इति माधवीयधातुवृत्तावुक्तम्। 'मृज मृजि शब्दार्थाः मजमुजी च' इति पाठः संभाव्यते। अन्यत्र (ऋ. सं. १. ५१. १०; ५५. ५) 'टुमस्जो शुद्धौ' इति धातोः मज्मश्शब्दो व्युत्पादितः॥ **शत्रूणामाक्रोशनसमर्थेन**—मॅ-मु। येन शत्रूणामाकोसनसमर्थेन–ख-ञ-त२-३-४-भ१-२; येन शत्रूणां रोदनसमर्थेन–ग; येन शत्रूणाकोशन(°सन–न)समर्थेन–त१-न; येन शत्रूणामाकोशनसमर्थेन–श॥ ८९७. २९. **प्रादुरबीभवन्**—मॅ-मु। प्रादुरभीरयन्–ख-घ१-त-न-भ-श; प्रादुरचीकरन्–ग; प्रादुरभिरयन्–च॥ ८९८. ६. **लटि**—ख-त-भ-श। लेटि–ग-मॅ-मु॥

[८. ८९.] ८९८.२१. **इन्द्रो देवता**—ख-ग-त-न-भ-श-मु। मॅ-पुस्तके नास्तीदम्॥ ८९८.२४. **मरुत्वतीया ऊर्ध्वं नित्यात्**। मरुत्वदीया ऊर्ध्वं नित्यात्–ग; मरुत्वतीय ऊर्ध्वं नित्या–ख-त-भ-श। मरुत्वतीय ऊर्ध्व नित्यात्–मॅ॥ ९००. ३. गच्छन्तु–*मॅ-मु। गच्छति–ख-त; गच्छंति–घ-न-भ॥ ९००. १०. **त्वत्तो**—ऽ-मु। स्वतो–मॅ॥ ९००. १८. **त्वदर्थम्**—ऽ। त्वदर्थो–मॅ-मु॥ ९००. २९-३१. **ततोऽङ्गिरस...मारोहितवान्**। अशुद्धेयं वाक्यरचना॥

[८. ९०.] ९०१. १५. **अनुभवतु**—भ३-श। उत्कृष्टमनुभवतु–ग; उदकमनुभावतु–त; उदकमनुभवेतु–न-भ१-२। उदकमनुभावयतु–घ-मॅ-मु॥ ९०१. १६. **वा**—श-*मॅ-मु। एतन्नास्ति ख-ग-त-न-भ-पुस्तकेषु॥ ९०१. १८. **जिनाति**—भ२-३-मु। जिनातीति–ख-त-भ१-श; जीनातीति–ग। जीनाति–न-मॅ। ऋ. सं. ८. १. ३०. द्रष्टव्यम्॥ ९०१. २७. **तत्पुत्रस्य**—

ग-*मॅ-मु। नपुत्रस्य–ख-त-भ१-२-श; पुत्रस्य–भ३ ॥ ९०२. ३. **त्वद्गुणान् सर्वान्**—न-भ-श। (अनति)द्गुणान् सर्वान्–ख-त। सर्वान्–ग-घ-मॅ-मु॥ ९०२. ४. **ब्रह्म**—घ-न-भ-मु। ख-ग-त-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ९०२. १३. **प्रह्वीभावयसि**—*मॅ-मु। प्रह्वीभवसि–ख-त-भ-श; प्रह्वीभवंती–ग ॥ ९०२. २४. **ऋजीषी ऋजीषोऽपार्जितोऽभिषुतः सोमः**। ऋजीषोपार्जितोभिषुतसोमः–ख-त-भ२-३-श; ऋजीषोपार्जितोभिषुतः सोमः–ग; ऋजीषी उपार्जितोभिषुतः सोमः–घ-मु; ऋजीषी* ऋजीषोपार्जितोभिषुतसोमः–भ१। ऋजीषी ऋजीष उपार्जितोऽभिषुतः सोमः–मॅ। ८९३. पृ. १४ प. टिप्पणी द्रष्टव्या॥ ९०३. ११. **अश्नुवताम्**—ग-त४-श-मु। अश्नुवता–ख-ज्ञ-त२-३; अश्नुवंतु–घ; अश्नुतां–भ। अश्नुवंतां–मॅ ॥

[८. ९१] ९०३. १६. **चिरकालम्**—ऽ-मॅ-मु। चिरं कालं–आउपरेख्ट्महाशयप्रकाशित एतत्सूक्तभाष्ये (Indische studien Vol. IV) ॥ ९०३.१९. **दंतघर्षण°**—मॅ-मु। दंतघर्ष°–आउफ्रेख्ट् ॥ ९०३. २०. **अत्र कन्या**—ऽ-मॅ। अत्रिकन्या–मु-आउफरेख्ट् ॥ ९०३. २७. **अपालायामुक्तायाम्**—ऽ-मॅ-मु-आउफरेख्ट्। 'अपालायामुक्तवत्याम्' इति भाव्यम्॥ ९०३. २९. **एतानि रोमफलादियुक्तं कुरु**—ऽ-मॅ-मु-आउफरेख्ट्। 'रोमफलादियुक्तानि' इति भाव्यम् ॥ **उक्तायाम्**—ऽ-मॅ-मु। 'उक्तवत्याम्' इति भाव्यम्। उक्तवत्यां–आउफरेख्ट् ॥ **°शिरःस्थितं खलतिमपहाय**—भ-मॅ। °शिरःस्थितां खलतिमपहाय–ग-त-मु। °शिरःस्थितं खलतित्वमपहाय–आउफरेख्ट्। खलतिशब्दः पुनरपि (५ मंत्रे) आगतः। मॅक्समुल्लरमहाशयस्यैतद्विषयकटिप्पणी द्रष्टव्या ॥ ९०३. ३१. **पूर्वापहता या**—*मॅ। पूर्वाभिहतायाः–ख-ग-त२-३-४-भ-मु; पूर्वाभिहितायाः–ज्ञ-त१; पूर्वाभिहता या–श-आउफरेख्ट्। बृहद्देवतायां (६.१०६)–'तस्यास्त्वगपहता या पूर्वा सा शल्यकोऽभवत्' ॥ ९०४. ६. **लतारूपम्**—भ३। अविरूपं–ख-त-भ२; अची रूपं–भ१; अटि रूपं–श-आउफरेख्ट्। लङि रूपं–ग-*मॅ-मु। 'लङि रूपम्' इति यत् मॅक्समुल्लरमहाशयैः स्वीकृतं तदयुक्तं प्रतिभाति। यतः लङि 'अविन्दत्' इति रूपं स्यात्। लुङि तु 'अविदत्' इति भवति। मॅक्समुल्लरमहाशयस्य टिप्पणी द्रष्टव्या ॥ ९०४. ९. **दन्तध्वनिम्**—घ-मॅ। दंते दंतध्वनिं–मु। दंतराजिध्वनिं–आउफरेख्ट् ॥ ९०४. १०. **सोमांशुमविन्दत्**—ग-*मॅ-मु-आउफरेख्ट्। सोमं सुमविंदत्–ख-ज्ञ-त२-३-४-भ; सोमं समविंदत्–श। शाटयायनब्राह्मणवचनविषये मॅक्समुल्लरमहाशयस्य टिप्पणी द्रष्टव्या। एतद्ग्रन्थस्याद्याप्यनुपलब्धेः न किमप्यधिकं वक्तुं शक्यतेऽस्मिन् विषये ॥ ९०४. ११. **सा तमभिव्याजहार**—*मॅ-मु। साभिव्याहार–ख-त-भ-श; साभिव्याहरत्–ग। साभिव्याजहार–आउफरेख्ट् ॥ **त इदम्**—*मॅ-मु-आउफरेख्ट्। ता इदं–ख-त-भ-श; वा इदं–ग। 'त इह' इत्यपि स्यादिति मॅक्समुल्लरमहाशयः ॥ ९०४. २०. **भृष्टयवाः**—भ३-मु। पृष्टयवाः–भ१। भ्रष्टयवाः–ख-त-श-मॅ-आउफरेख्ट् ॥ ९०४. २८.–९०५. १. **इच्छाम एव..... तमिन्द्रमुक्त्वा**—*मॅ। इच्छाम एव मम गृहमागच्छंत त्वामिंद्र इति जानीम (न जानीम–ख) एव इह मार्गं एवागतं त्वा त्वां नाधीमसि नाधिगम (न जानीम–ख; निधिगम–भ१) अत्रापि चनेत्यवधारणे इह त्वामिंद्र इति न जानीम इत्यपालय तमिंद्रमुक्त्वा–ख-ज्ञ-त१-४-भ; इच्छाम एव मम गृहमागच्छतं (°मागच्छंतं–श) त्वामिंद्र इति जानीम एव इत्यपालय(°ल्या–श)तमिंद्रमुक्त्वा–त३-श। इच्छाम एव मम गृहमागच्छ तं त्वामिंद्र इति जानीम एव इह मार्गं एवागतं

त्वा त्वां नाधीमसि नाधिगच्छामः । अत्रापि चनेत्यवधारणे । इह त्वामिंद्र इति न जानीमः । इत्यपाला तमिंद्रमुक्त्वा(क्त्वा)–मु । इच्छामः एवं मम गृहमागच्छंतं त्वामिंद्र इति जानीम एव । इह मार्गे एवागतं त्वा त्वां नाधीमसि नाधिगच्छामः । अत्रापि चनेत्यवधारणे । इह त्वामिंद्रेति न जानीम इत्यपाला तमिंद्रमुक्त्वा–आउफरेख्ट् ॥ ९०५. २. **कुत्सितम्**—*मॅ-मु । कुत्सितः–ऽ-आउफरेख्ट् ॥ ९०५. ५. **एवाधासीत्**—*मॅ-मु । एवौवधासीत्–ख-त-भ-श; एवोच्चैरधासीत्–ग । एवाधासीत (मुद्रणदोषः ?)–आउफरेख्ट् ॥ ९०५. १५. **बहु**—ऽ-मॅ-मु । आउफरेख्ट्महाशयप्रकाशितभाष्य एतन्नास्ति ॥ ९०५. १७. **बहु**—ऽ-मॅ-मु-आउफरेख्ट् । मॅक्समुल्लरमहाशयः इमं शब्दमनावश्यकं मन्यते 'बहुवारम्' इति पदस्याग्रे सद्भावात् ॥ ९०५. १८. **एव**—भ३-*मॅ-मु-आउफरेख्ट् । इतरलिखितपुस्तकेषु नास्ति ॥ ९०५. ३१. **तम्**—मॅ-मु-आउफरेख्ट् । तां–ऽ ॥ **सो ह जज्ञे**—आउफरेख्ट् । सोहं जज्ञे–ख-ज्ञ-त१-भ; सो जज्ञे–ग-त४-श-मॅ-मु; जज्ञे–त२-३ ॥ ९०५. ३२. **नासुस्तान्यु ह**—*मॅ-मु-आउफरेख्ट् । वस्युस्थान्यु ह–ऽ ॥ ९०६. ५. **या असौ**—मॅ-मु । या सा–आउफरेख्ट् ॥ ९०६. ६. **अथापि**—ख-ग-त-भ-श-मॅ-मु । अपि–घ-आउफरेख्ट् ॥ ९०६. १५. **निष्कर्षणेन पूत्वी**—*मॅ-आउफरेख्ट् । निष्कर्षणे वा–त-भ१-२; निष्कर्षेणैव–ग; निष्कर्षणेन–भ३; निष्कर्षणेन वा–श । निष्कर्षेण पूत्वी–मु ॥ ९०६. १७-१८. **रथस्य...अभवत्**—*मॅ । रथस्याव्य (ष्य–ज्ञ-त२-३) बृहत्सा मोर्धाभवत्तां खेनसेनसो(खेनसो–भ२-३) त्यबृहत् (त्यहरत्–श) सा संश्लिष्टकाभवत्–ख-त-भ-श; रथस्यात्यबृहत्सा मोद्धवा भवतो खेनसेनसो बृहत्सामंशिष्टकाभवत्–ग । रथस्याध्यबृहत्सा गोधाभवत्तां खेऽनसोऽत्यबृहत्सा संश्लिष्टकाभवत्–मु । रथस्यासाद्य बृहत्सामोर्ध्वाभवत्तं खेऽनस आसाद्य बृहत्सामसंश्लिष्टकाभवत्–आउफरेख्ट् ॥ ९०६.२०. **तस्य...त्वग्दोषम्**—ऽ-मॅ-मु । तद्दोषं–आउफरेख्ट् ॥ ९०६. २१. **सूक्तम्**—ग-न-भ-*मॅ-मु । युक्तं–ख-त-श-आउफरेख्ट् ॥ अपालायाः कथाविषये ऋग्वि. २. ५२.; बृहद्दे. ६. ९९–१०७; अनु. भा. ८. ९१. द्रष्टव्यम् । मॅक्समुल्लरमहाशयस्य एतत्सूक्तटिप्पणी च द्रष्टव्या ॥

[८. ९२.] ९०७. ९. **गानयोग्यम्**—त१-३-मु । गातयोग्यं–ख-ज्ञ-त२-४-भ-श; गातव्यं योग्यं–ग । गाथायोग्यं–*मॅ । 'गानयोग्यम्' इति पाठः समीचीनतर इति मॅक्समुल्लरमहाशयेनोक्तम्[1] । ९०७. ३०. **लोटि**—*मॅ-मु । लिटि–ख-त-भ-श; लिडि–ग ॥ **ध्वमस्तनबादेशः**—ग-भ३-*मॅ-मु । ध्वस्तनबादेशः–इतरेषु ॥ **व्यत्ययेन...गुणः** । अत्र व्यत्ययाश्रयणमनावश्यकम् । ब्रूत्र उभयपदित्वात् 'तस्य तनबादेशः' इति वक्तुं शक्यम् । ऋ. सं. १. ८४. ५. द्रष्टव्यम् ॥ ९०७. १९. **यत्वा**—*मॅ । दत्वा–ऽ । गृहीत्वा–मु ॥ ९०७. २५. **श्रीङ् पाके**—ख-ग-भ-मॅ-मु । प्रीङ् पाके–त२-३-श; शीङ् पाके–ज्ञ-भ१ । 'श्रीञ् पाके' इति भाव्यम् ॥ ९०७. २६. **इन्दोः**—ग-*मॅ-मु । इंद्रः–ख-त-न-भ२-श; इंद्रः इंदोः–घ ॥ **क्षरत्**—*मॅ । क्षरतः–ग; क्षरंत–त-भ-श; क्षरंत–घ-मु ॥ ९०८. ७. **ग्रहेषु**—ग-त-न-भ२-श । गृहेषु–भ१-३-मॅ-मु ॥ ९०८. ११. **भूताभिभवनादीनि**—ख-त-न-भ-श-मु । भूतानि अभिभूतानि–ग । भूतानि भुवनादीनि–मॅ ॥ ९०८. १४. **°तिरिक्तोक्त्ये**—त-भ-श । °तिरिक्तोक्त्ये–ग-मॅ-मु ॥ ९०८. १५. **स्तोत्रियानुरूपौ**। स्तोत्रियानुरूपाः–आश्व. श्रौ. ॥ ९०८. २३. **प्लुङ्**—ख-ग-त-न-भ-*मॅ-मु । प्लुङ्–श ॥ ९०९. १८. **अदा-**

1. Preface to the 2nd Edition Vol. IV, p. 178.

तृन्—ग-*मॅ-मु । दातृन्–ख-त-भ-श; शत्रून्–घ ॥ ९०९. २५. **औतोमित्यात्वाभावः**—ग । ओत्वाभावः–ख-त-न-भ२-मु; ओर्ऋत्वाभावः–श । औत्वाभावः–भ३-*मॅ ॥ ९१०. २. **अनुकामा**—मॅ-मु । कामा–§ ॥ ९१०. ४. **अवगच्छाम**—ख-ग-त-न-भ-श । अवगच्छामः–घ-मॅ-मु ॥ **लेटि** । 'लकि' इति युक्तम् । ऋ. सं. १. ५०. १०; ११३. १६. द्रष्टव्यम् ॥ ९१०. १८. **पोषयित्र्या**—ख-त-न-भ-श-मु । ग-घ-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ९१०. १९. **°वचनात्**—ख-ग-त१-२-३-भ१-३-मु । °वदनात्–त४-भ२-श-मॅ ॥ ९१०. २६. **प्रदीयमानेन सोमेन**—भ३-*मॅ । प्रदीयमानसोमेन–ख-ग-त-भ१-२-मु; प्रदीयमानः सोमो न– श ॥ ९११. २८. **इन्द्रादयः**—§-मु । मॅ-पुस्तके नास्ति ॥ ९१२. १६. **कुक्षये**—§-*मॅ-मु । सर्वेषु लिखितपुस्तकेषु 'कुक्षये' इत्यस्य स्थाने 'तुनहु' इति पाठो विद्यते इति मॅक्समुल्लरमहाशयः । वस्तुतस्तु १८ पङ्क्तौ विद्यमानस्य 'कुक्षये' इत्यस्य स्थाने 'तुनहु' इति पाठो लिखितपुस्तकेषूपलभ्यते ॥ ९१२. १७. **तेजसाम्**—§ । तेजसा–मॅ-मु (मुद्रणदोषः ?) ॥ ९१२. २४. **स्तौति**—*मॅ-मु ग्वालियर-जोधपूरलिखितपुस्तकयोश्च । नौत–ख-त१-२-३-४-भ-श; स्तौत–ग्र ॥ ९१३. ४. **समीपात्त्वाम्**—भ३-*मॅ-मु । मृगपाव्नां–ख-त; मृगपात्वां–भ१-२; मृगपाजां–श; मृपातारं–ग ॥ **अभ्रुवतामिति**—ख-ग-त-भ-श-मु । अभ्रुवंतामिति–मॅ ॥ ९१३. २६. **तन्द्रयुक्तः**—*मॅ-मु । तं प्रयुक्तं–ख-त; मंद्रयुक्तं–ग; तंद्रयुक्तं–न-भ-श ॥ ९१३. २७. **°कर्मान्वितो**—*मॅ-मु । °कर्मवतो–ख-घ-त-भ१-२; °कर्मयुतो–ग; °कर्मवान्–भ३; °कर्मवते–श ॥ ९१४. ४. **वन**—मु । क्त–ख-त-न-भ१-२-श; श्न–भ३; वनु–ग२-मॅ ॥ ९१४.११. **त्वमिदं...त्वमस्माकमसि** । इदमारण्यकवचनं कुत्रत्यमिति न ज्ञायते ॥ ९१४. १८. **आडागमः**—ग । अडागमः–मॅ-मु इतरेषु च ॥

[८. ९३.] ९१४. २४. **°तिरिक्तोक्थे**—ग्र-भ-श-मु । °तिरिक्तोत्वे–ख-त१-२-३-४ । °तिरिक्तोक्थ्ये–ग-मॅ ॥ ९१४. ३०. **एतादृशानुभावम्**–*मॅ-मु । एतादृशं अनुभवि–ख-त-भ१-२; एतादृशं मनुष्यमभि–ग; एतादृशमभि–भ३; एव तादृशं अनुभवि–श ॥ ९१५. ६. **केनापि**—मॅ । न केनापि–§-मु ॥ ९१५. १२. **प्रतिषेधात्**—ख-ग-ग्र-त१-२-३-भ । षप्रतिषेधात्–त४-श । वप्रतिषेधात्–मॅ-मु ॥ ९१५. १३. **दोहनकाले**—ख-ग्र-त१-२-न-भ-मु । ग-घ-त४-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ९१५. १५. **°तिरिक्तोक्थे**—ख-त-न-भ१-२-श-मु । °तिरिक्तोक्ते–भ३ । °तिरिक्तोक्थ्ये–ग-मॅ ॥ ९१५. २२. **तदा**—§-मॅ-मु । अयं शब्दोऽनावश्यकः प्रतिभाति ॥ ९१६. ६. **ये सोमाः**—घ-*मॅ । ते सोमाः सुनोतेः कर्मणि लिटि व्यत्ययेन श्नुः (श्लुः छः–त३-४-भ३-श; श्नुः छ–न; श्नुः उच्छ–भ१)–ख-ग-त-न-भ-श । सुनोतेः कर्मणि लिटि व्यत्ययेन श्लुः ये सोमाः–मु । केनचिदध्येत्रा प्रान्ते लिखितं केनचिल्लेखकेन प्रमादान्मूले समावेशितं स्यात् । मॅक्समुल्लरमहाशयोऽप्येवमभिप्रैति ॥ ९१६. ८. **सूचितम्**—§ । सूचितं च–मॅ-मु ॥ ९१६. ९. **°तिरिक्तोक्थे**—भ१-श । °तिरिक्तोक्थ्ये–ख-ग-त-भ२-मॅ-मु ॥ ९१६. १५. **वा**—त-न-भ-श-मु । ख-ग-मॅ-पुस्तकेषु नास्ति ॥ ९१६. १७. **स्तुतः सन्**—मॅ । स्तुतः सन् वृत्रहंतवे वाजयामसि वाजवंतं करोतीत्यर्थे तत्करोतीति णिच् णाविष्ठवदिति णेरिष्ठवद्भावात् टेरिति टिलोपः विन्मतोर्लुक् इति वचनान्मतुपो लुक्–ख-ग-त-न-भ-श-मु (लिखितपुस्तकेषु क्वचिदशुद्धिर्विद्यते) । इयमपि प्रक्रिया लेखकप्रमादाद्भाष्ये प्रविष्टा ॥ ९१६. २८. **वज्र आयुधम्**—*मॅ । वज्रायुधं–§-मु ॥ ९१७. ११. **सर्वत्रामयेति**—मु ।

सर्वत्रमनुयंति—ख; सर्वमनेति नेति—ग; सर्वत्रमनयंति—त-श; सर्वत्रमानयेति—भ। सर्वत्रानयतीति—*मॅ ॥ ९१७. २०. °शिरस्त्राणेन्द्र—ऽ-मॅ-मु। ' °शिरस्त्राण वेन्द्र ' इति भाव्यम्। ' °शिरस्त्राण वेंद्रः ' इति भाव्यमिति मॅक्समुल्लरमहाशयेनोक्तं तदयुक्तम् (मुद्रणदोषः ?) ॥ ९१७. २२. ते त्वदीयम्—ख-त१-२-भ-मु। घ-त३-न-श-मॅ-पुस्तकेष्विदं नास्ति ॥ ९१७. २८. त्वद्बलम्—ख-ग-घ-त-न-भ२-य-श-मु। तद्बलं—भ१-मॅ ॥ ९१८. ४. परिगमिताः—*मॅ-मु। वनिगमितां—ख-त२-३-श; च निर्गमिता—ग; वनिगमिता—ज्ञ-त४-भ२; चर्मिनामिता—भ१ ॥ ९१८. २०. आशुषे। ' आशुष्ये ' इति भिन्नः पदपाठः। ' आश्नुषे ' इति भाष्यकारेण स्वीकृतं स्यादित्यपि संभावयितुं शक्यमिति मॅक्समुल्लरमहाशयः ॥ ९१८. २६. वशं नयन्तीति—ऽ-मॅ। वशं नयंत्यनेनेति—मु। अयं समीचीनतरः पाठः लिखितपुस्तकेष्वभावादस्माभिर्न स्वीकृतः ॥ ९१९. १३. °यूतीत्यादिना—ख-ग-ज्ञ-त१-२-भ३-मु। °यूत्यादिना—त४-न-भ१-२-श-मॅ ॥ ९१९. २४. आगच्छतु—*मॅ-मु। आगच्छति—ख-त-भ; आगच्छेति—ग ॥ ९१९. ३०. भवानि—ज्ञ-भ३-*मॅ-मु। भवामि—इतरेषु ॥ ९२०. ३. वसतीवर्यः—मॅ-मु। वसतीवरा—ख-त-न-भ१-२; वसतीवरीः—घ-भ३-श; वसतीवरिः—ग ॥ ९२०. ४. ग्रहस्थाः—ग-घ। गृहस्थाः—ख-त-न-भ-श-मॅ-मु ॥ ९२०. ५. निचान्तपृणः—मॅ-मु। निचांतपुणः—ऽ ॥ ९२०.१४. एव ---- र - वि - जः—त४-न-भ१-२-मॅ। एव—ख-ज्ञ-त२-३-मु। एव ऋत्विजः विसर्ग—ग; एव ओजसा ओजः—त१; एव ऋजः—भ३; एव ऋजीषं—श ॥ °त्युक्तम्—ग-ज्ञ-त२-३-श-*मॅ-मु। °त्युक्त—ख-त१-४-भ१-२; °त्युक्त(त्वात्प्रसंगात्)—भ३ ॥ ९२०. १६. अच्छ—ऽ-मु। अच्छा—मॅ ॥ ९२०. १७. विसृजन्ति—ग-*मॅ-मु। विसृजत—ख-ज्ञ-त१-२; विसृजन्—त३-४ भ-श ॥ ९२०. २१. हविर्भिः—*मॅ-मु। हविः—ऽ ॥ ९२०. २२. हितं - - वादिषु—त-भ१-२-मॅ। हितं - - - - वेदिषु—ग; हितं - - - वाषु—श; हितं गवादिषु—भ३। हितं हितकरं प्रयः—मु ॥ ९२०. २७-२८. ता निवसन्त्यत्रेति। ते निवसंतेत्यत्रेति—ख-त-भ१-२-श; ते निवसंतत्रेति—ग; ते निवसंत्यत्रेति—न-भ३। निवसंत्यत्रेति—मु। निवसत्यत्रेति—मॅ ॥ ९२१. २१. आडागमः—ग। अडागमः—मॅ-मु इतरेषु च ॥ ९२२. १०. श्रुतेरत्रापि—मु। श्रुते तत्रापि—ख-ग-त-न-श; श्रुतेन तत्रापि—भ। श्रुतेऽत्रापि—*मॅ ॥ ९२२. ११. इत्यादरार्थः—ख-ग-घ-त-मु। इत्यादरार्था—न-भ-श। इत्यादरार्थ—मॅ ॥ ९२२. २४. धत्तनेति...रत्नानि—*मॅ-मु-× ॥

[८. ९४] ९२३. ३. बिन्दु°—ख-ग-ज्ञ-भ२-*मॅ-मु। विंदु°—त१-२-३-४-भ१-श; विंदुः—घ ॥ ९२३. २८. पूर्वाभिहिते—ज। पूर्ववेनिहित—ख; पूर्व अभिहिते—ग; पूर्वनिहित—ज्ञ; पूर्ववेभिहिते—त२-न; पूर्वभवेभिहिः—त४; पूर्वचोभिहित—भ; पूर्ववेभिहित—त३-श। पूर्वमेवाभिहिते—मु। पूर्वत्राभिहिते—मॅ ॥ ९२४. ८. ततमूर्णास्तुकेनेति—*मॅ-मु। ततपूर्णास्तुकोनेति—ख-ज्ञ-त१-२-३; तन्यते ऊर्णास्तुकेनेति—ग; ततपूर्णास्तुकेनेति—त४-भ; ततपूर्णास्तुकोनति—श ॥ आलादेशः—ग-ज-न-भ-श। अडादेशः—ख; अलादेशः—त-मॅ-मु ॥ ९२४. १०. तं तथोक्तम्—ग। तत्तथोक्तं—मॅ-मु इतरेषु च ॥ ९२४. १६. सेवाम्—ग-*मॅ-मु। सतां—ख; सवां—त-भ-श ॥ ९२४. १७. सोमसेवां कामयते—ज-न-भ। सोममेवां कामयते—ख-त-श; स्तोता कामयते—ग। सोममेव कामयते—मु। सोममेवाकामयते—मॅ ॥ ९२५.२०. विश्रुतम्—ज। विसृतं—भ१; विष्टतं—श; बिस्तृतं—ख-ग-घ-त-न-भ२-मॅ-मु ॥

[८. ९५.] ९२६. १५. **निहितम्**—ऽ-मु। मॅ-पुस्तके नास्ति॥ ९२६. २२. **मरुद्गणानाम्**—*मॅ-मु। मरुत्सोमानां-ख-त-न-भ-श; मरुत्संबन्धिनं-ग; मरुत्समानानां-घ। 'मरुत्संघानाम्' इति स्यादिति मॅक्समुल्लरमहाशयः॥ ९२७. ३. **सुपुत्रवतः**—ख-ग-ज-श-त१-२-न-भ-मु। सुपुत्रतः-त३-४; सुपुत्रमतः-श। सुपुत्रस्य-मॅ॥ ९२७. १५. **त्वदीयम्**—ऽ-मु। मॅ-पुस्तके नास्ति॥ ९२७. २२. **सिषासन्तः**—च-ज-मु। सिसासंतः-मॅ इतरेषु च॥ ९२७. २४. **सन्तः**—ख-घ-ज-त-न-भ-श-मु। ग-मॅ-पुस्तकयोर्नास्ति॥ ९२८. १. **इन्द्राय यागादिकर्माणि**—ग-ज-भ१-श-मु। इंद्रयागादिकर्मणि-न-भ२। इंद्रयागादिकर्माणि-ख-त-मॅ॥ ९२८. ६. आगच्छतैव-ऽ-मु। गच्छतैव-मॅ॥ ९२८. ९. **माद्यतेः**—ग। मादतेः-ख-त-भ-श। मदायतेः-मु। मादयतेः-मॅ॥ ९२८. १७. **त्वम्**—ऽ-मु। त्वं च-मॅ॥

[८. ९६.] ९२८. ३२. **अध द्रप्सः**—*मॅ। अव द्रप्स-ऽ-मु॥ ९२९. ७. **अर्तेरू च**। 'अर्तेरुच्च' इत्युणादिसूत्रम्॥ ९२९. १२. **सप्त**—न-भ। इतरेषु मॅ-मु-पुस्तकयोश्च नास्ति॥ ९२९. १३. **हननेनोत्पादकत्वात्**—मु। हननेनोत्पादत्वात्-ख-त-न-भ२; हननोत्पादकत्वात्-ग; हननोत्पादत्वात्-ज-भ१। हननोत्पादित्वात्-मॅ॥ ९२९. २१. **अतिविद्धा**—ग-घ-ज-श-त१-३-४-न-भ-श-मु। ख-त२-मॅ-पुस्तकेषु नास्ति॥ ९२९. २३. °**पिञ्जूलमुद्धृत्य**। '°पुञ्जीलमुद्धृत्य' इति तै. सं.॥ ९३०. ७. **निस्पूर्वात्**—ऽ-मु। निष्पूर्वात्-मॅ॥ ९३१. १६. **धारयेम**—ख-श-त१-२-भ-मु। एतन्नास्ति ग-घ-त३-४-श-मॅ॥ ९३१. १८. **भवाम**—ऽ-मु। भवेम-मॅ॥ ९३१. ३०. **वृत्रं घ्नन्तम्**—ग-भ१। वृत्रं जघ्नंतं-ज। वृत्रघ्नं तं-ख-त-भ२-श-मॅ-मु॥ ९३२. ४. **षष्टिश्युत्तरसंख्याकाः**। 'श्युत्तरषष्टिसंख्याकाः' इति भाव्यम्॥ ९३२. ५. **नवसु गणेषु**—*मॅ-मु। वसुगणेषु-ख-त-श; नवसु गणोषु-ग; सुरगणेषु-ज-भ॥ **प्रतिपादिताः**—ख-ज-श-त१-२-भ। तिपादिताः-ग-त३-४-श। निपादिताः-*मॅ-मु॥ **आदितः**—ग-*मॅ। अदितेः-इतरेषु। आदिपंचगणाः-मु॥ ९३२. ७. **गणः**—*मॅ-मु। गर्भाः-ख-त-भ; वर्गाः-ज; गणाः-ग॥ ९३२.११. **विदध्म**—ख-घ-त-श-मु। विदध्यम-ग; विदधाम-ज-भ। विदध्मः-मॅ॥ ९३२. १७. **च**—ऽ-मु। ते-मॅ॥ ९३२. २०. **अभिषुतः**—ग-भ। अभिषुत्यः-ख-घ-त-श-मॅ-मु। अत्र 'अपार्जितः' इत्येव पाठः **सर्वेषु** लिखितपुस्तकेषु दृश्यते। ऋ. सं. ८. ८६. ४; ९०. ५. द्रष्टव्यम्॥ **ऋजीषः**—ग। ऋजीषी-ख-घ-त-भ-श-मु। ऋजीषं-*मॅ। ८९३. पृ. १४. प. टिप्पणी द्रष्टव्या॥ ९३३. ८. **ईषाम्**—ख-ग-ज-त-भ२-मु। ईशां-भ१-श-मॅ॥ ९३३.२१. **शोभना**—ऽ-मु। शोभमाना-मॅ॥ ९३४.८. **नाम**। नाम्ना-बृहद्दे.॥ **सोऽभ्ययात्**। अभ्ययात्-बृहद्दे.॥ **योत्स्यमानः सुसंहृष्टैः**—बृहद्दे.। योत्स्यमानंस्तु संहृष्टैः (हृष्टैः-त३)-ख-श-त२-३-४; योत्स्यमानस्तु संहृष्टैः—ग-त१-भ; यात्स्यामातं स्तुतं हृष्टैः-श। योत्स्यमानं सुसंहृष्टैः-*मॅ-मु॥ ९३४. ९. **तानायतः**—*मॅ-मु-बृहद्दे.। तानायुतान्-ख-त-भ; तानायतासन्-ग; तानायुधान्-श॥ **प्रेहि**। एहि-बृहद्दे.॥ ९३४. ११. **पुनर्विभो**। अस्मादनन्तरं "श्रुत्वा देवगुरोर्वाक्यम् अनर्थं वृत्रशङ्कया" इति बृहद्देवतायामधिकं विद्यते॥ **स्वर्ग एव**—बृहद्दे.। खङ्ग एव-ख-त-भ; खग एव-ग। ओजसैव-*मॅ-मु॥ **देवानादाय**—त१-*मॅ-मु-बृहद्दे.। देवायायाय—ख; देवाधनाय-ग; देवयतनं-ज; देवानायाय-श-त२-३-४-भ१; देवानाय-भ१; देवानायांतं-श॥

पपुर्विधिवत्सुराः—*मॅ-मु-बृहद्दे. । पुनर्विधिवत्पुरा–ख-ग-ज-त-भ२; पुनर्विधिवत्पुराः—भ१ ॥ ९३४. १२. **तृचे**–ग-ज-बृहद्दे. । दृचे–ख-त-भ; ऋचि–श । द्रुचे–मॅ । **ऋचे**–मु । **तदव द्रप्स इत्यस्मिन्** । तदेतदप्यवेत्यस्मिन्–बृहद्दे. ॥ अयं बृहद्देवतागतः कथाभागः केनचित् पश्चाद्विनिवेशितो भाष्ये इति मॅक्समुल्लरमहाशयस्याभिप्रायः ॥ ९३४. १३. **अनार्षत्वेनानादरणीयम्**–ज । अनात्वान् नादरणीयं–ग; अनार्षादनारणीयं–श । अनार्षत्वे नादरणीयं–मॅ-मु इतरेषु च ॥ ९३४. १६. **उदकस्य**—ग-ज्ञ-श-मु । उदस्य–ख-त२-४-भ-मॅ । अनन्तरऋग्भाष्यं द्रष्टव्यम् ॥ ९३५. १. **केचिदिष्यामि...पठन्ति** । 'इष्यामि वो वृषणो' इति संहितापाठः । 'शाखान्तरे' इति मुपुस्तके टिप्पणी दत्ता ॥ ९३५. १८. **°ज्रेवाशत्रुभ्यः**—*मॅ-मु । °ज्रेव शत्रुभ्यः—ऽ । १६ पङ्क्तौ विद्यमानस्य '°ज्रेवाशत्रुभ्यः' इत्यस्य स्थाने '°ज्रेव शत्रुभ्यः' इति पाठो लिखितपुस्तकेषूपलभ्यत इति मॅक्समुल्लरमहाशयेनोक्तं तत्प्रामादिकम् ॥ १३५. २०. **प्रकाश्य**–ग-भ-*मॅ-मु । प्रकाश्यः–ख-घ-त-श ॥ ९३६. ११. **छन्दोविषयत्वान्निपातनम्**—ग-*मॅ-मु । छन्दोविषयत्वानिपातनं–ख-त१-२-३-भ२; छंदोविषयत्वांनिपातनं–ज्ञ; छंदोविषयत्वानिपात्यते–त४; छंदोविषयत्वान्निपातत्वं–श ॥ ९३६. १३. **सप्त गङ्गाद्याः**—ऽ-मु । गंगाद्याः सप्त–मॅ ॥ ९३६.२३. **अहानि**–ऽ-मु । अहा अहानि–मॅ ॥ ९३७. ३. **वृत्रहा**–ऽ-मु । स वृत्रहा–मॅ ॥ **चर्षणीधृत्**—ख-ग-घ-त३-भ१-मु । चर्षणिधृत्–ज्ञ-त२-४-भ२-श-मॅ ॥ ९३७. १४. **महान्**—ज । स महन्–ख; सहमन्–ज्ञ-त२; सहमा–त४-श; सहम–त३; सहन्–भ । स महान्–ग-मॅ-मु ॥

[८. ९७.] ९३७. २७. **च**—ख-ग-ज-ज्ञ-त१-२-३-न-भ-श-मु-आश्व. श्रौ. । वा–त४-मॅ ॥ ९३८.३. **त्वे**—मु । ते–ग-घ-ज-न-भ; न–ख-त । मॅ-पुस्तके नास्ति ॥ ९४०. १६. **एतत्**—ग-त-न-भ-श-मु । एत्–ख । एव तत्–मॅ ॥ ९४०.२९ **संग्रामनाम**—ज । संग्रामः–ख-ग-ज्ञ-त२-३; संग्राम–त४-न-भ-श । संग्रामाः–मॅ-मु ॥ ९४०. ३०. **स्तुते**—ग-ज-भ-मु । सुते–ख-त-न-श-मॅ ॥ ९४१. ११. **रेभाः**—ऽ-मु । रेभासः—मॅ ॥ ९४१. २७. **इत्याद्या**—ऽ । इत्याद्याः–मॅ-मु ॥ ९४२. १०. **सर्वदिक्स्थम्**—न-*मॅ-मु । सर्वदिक्वं–ख-त; सर्वदिग्भवं–ग; सर्वदिग्गतं–ज; सर्वदिग्–भ१; सर्वदिद्यु–भ२; सर्वहिकं–श ॥

[८. ९८.] ९४३. १३. **नृमेधाख्यस्य**—ग-भ१-२ । नृमेधाक्षस्य–ख-त-न-श । नृमेधस्य–भ३-मॅ-मु ॥ ९४३. १५. **पुरउष्णिक्**—*मॅ-मु । ककुप्–ऽ ॥ ९४४. १०. **प्राप्नोः**—*मॅ । अप्राप्नोः–ऽ-मु ॥ ९४४. २८. **त्वम्**—ऽ-मु । मॅ-पुस्तके नास्ति ॥ ९४५. ६. **ससृज्महे**—ज्ञ-त१-भ२-*मॅ-मु । ससृज्महे–ख; सृज्महे–ग-घ१-त३-४-भ१-श; सृज्यमहे–च; सुसृज्महे–त२ ॥ ९४५. १४. **वर्धन्ति**—ग-घ-भ । वर्धयंति–ख-त-मॅ-मु ॥ ९४५. १८. **उरुयुगे**—ख-ग-च-ज्ञ-त१-२-न-भ१-श-मॅ । उरुयुगे–घ१-त३-४-भ२-३-मॅ ॥

[८. ९९.] ९४६. १२. **ऐन्द्रम्**—न-भ । इंद्रो देवता–घ । ख-ग-त-श-मॅ-मु-पुस्तकेष्वेतन्नास्ति ॥ ९४६. २५. **वज्रिन्निन्द्र**—ख-ग-घ-त-न-श-मु । वज्रवन्निंद्र–भ । वज्रिन् वज्रवन्निंद्र–मॅ ॥ ९४६. २७. **स्वसरं गृहम्**—ऽ-मु । स्वसरं च गृहं–मॅ ॥ ९४७. १३. **करोति**—*मॅ । करोत्यतो–ऽ-मु ॥ ९४७. १४. **रश्मयः**—*मॅ-मु । श्रयः–ख-त-भ-श । ऋषयः–ग ॥ ९४७.२५. **स्तोतः**—न । स्तोतारः–मॅ-मु **इतरेषु च** ॥ ९४८. १६. **श्रथयन्त ग्रथिताः**—त२-४-*मॅ । श्रथयंत

श्रथिताः–ख; श्रयंत श्रथिता–ग; श्रथयंत श्रथिताः–ज्ञ-त३-श-मु; श्रथयंत श्रथयिताः–भ; श्रथयंत श्रथिताः–न । 'श्रथयंत' इति संहितापदपाठौ ॥ ९४८. २२. **गन्तारम्**—ग-ज्ञ-भ२-श-*मॅ-मु । गगा–ख; गंगारं–त ॥

[८. १००.] ९४९. ८. **ते**—ख-त-न-भ-मु । ग-श-मॅ-पुस्तकेषु नास्ति ॥ **अयमिति... वाग्देवत्ये**—*मॅ-मु । अयमिति द्रूचेनेंद्र आत्मानमस्तौदिति वाग्देवत्ये–ख-त२-भ; अयमिति द्रूचेन त्ये–न; वाग्देवत्ये–श ॥ ९४९. १२. **प्रयाण...वाचः**–भ३-*मॅ-मु । प्रणवो याज्यासनये वयं सामये वयंसा मनोज्ञा वचः–ख-ग-त२-३-४; वयसाममनोज्ञा वाचः–ज्ञ; प्राणा - - समये वयं सामये वयंसामननोज्ञा वचः–न; प्रयाणसमये वयंसा मनोज्ञा वाचः–भ१; प्रणवो याज्या-समये वयंसा मनोज्ञा वाचः–भ२-म; प्रयाणे वयसाममनोज्ञा वाचः–श ॥ ९५२. २२. **विश्वरूपाः** । सर्वरूपाः–निरु. ॥ ९५३. ३. **अभिवृत्यैतान्**—ऽ-मॅ-मु । अभितप्येमान्–बृहद्दे. ॥ ९५३. ४. **उद्यतस्य तु**—ऽ-मॅ-मु । उद्यतस्यैव–बृहद्दे. ॥ ९५३. ५. **विष्णो इति**—ऽ-मॅ-मु । विष्णविति–बृहद्दे. ॥ **त्वृचा**—मॅ । तृचा–ख; त्यृचा–ग; द्रूचा–ज्ञ-त२-न-श; द्रचा-त३-४; वृचा–भ१; *चृचा–भ२ । त्रृचा–मु । त्वृचि–बृहद्दे. ॥

[८. १०१.] ९५३. १०. **तृतीया**—ग-*मॅ-मु । तृतीयादि–ख-ज्ञ-त१-२-न-भ-श; तृतीया हि–त३-४ ॥ ९५३. २३. **अहनि माध्यंदिने**—ख-त१-भ-श-मु । माध्यंदिने–ग; गामु-पकर्मणि–ज्ञ-त२; माध्यंदिनो–त३-४-न-मॅ ॥ ९५४. ५. **वर्षिष्ठक्षत्रौ**—ज्ञ-त१-२-भ-मु । वर्षिष्ठ-क्षेत्रौ–ख-घ । वर्षिष्ठक्षत्रा–ग-त३-४-न-श-मॅ ॥ ९५४. १८. **पुनःपुनर्हवीतवे**—ज्ञ-त१-३-*मॅ-मु । पुनःपुनर्हवीतये–ख-त२; पुनर्हवीतवे–ग-घ-ज्ञ-त४-भ; पुनपुनर्हवीतवे–श ॥ ९५५. १३. **उभा उभौ**—घ-न-भ-मु । उभौ उभौ–ख-ज्ञ-त१-२ । उभौ–ग-त३-४-श-मॅ ॥ ९५६. २७. **ते**—श-मु । तव–ग-न-भ२; त–त२-३-४; भुवि–भ१; विभु–भ३; तत्–ख-घ-ज्ञ-मॅ ॥ ९५७. ५. **आगच्छन्ती**—भ१-२ । आगच्छती–ख-ग-घ-त१-२-न-श-मॅ-मु ॥ ९५७. १४. **चैतरेय**—*मॅ । चैतस्य–ख-ग-ज्ञ-त१-२-३-भ२-३-मु; चेतस्ये–त४; चैतस्ये–न; चैतास्य–भ; चैतास्येव–श ॥ ९५७. १८. **स प्रजा असृजत**—*मॅ-मु । ससृजे–ख-ग१-त-न-भ-श; सं ससृजे–ग२ ॥ ९५७. २०. **पराभूताः**—ग-न-भ-*मॅ-मु । पारभूताः–ख-त१-२-३; परभूताः–ज्ञ; पाराभूताः–त४ । भाष्योद्धृतः शतपथब्राह्मणगतः पाठः तद्ब्राह्मणस्य काण्वमाध्यंदिनशाखयोः पाठाभ्यां भिन्नः ॥

[८.१०२.] ९५८.१०. **पावकविशेषणविशिष्टो**—ग-भ३-श । पावकविशेषणेन विशिष्टो–भ१; पावकविशेषणे विशिष्टो–भ२; पावकविशेषेण विशिष्टो–ख-त-न-मॅ-मु ॥ ९५८. १२-१३. **°यविष्ठयोर्वा**—ग-श-*मॅ-मु । यविष्ठयोर्वा–ख-त; यविष्टयोर्वा–न-भ ॥ ९५८. १४. **इत्यष्टा°**—ग-त२-भ१-*मॅ-मु । अष्टा°–ख-त३-श; इष्टा°–न ॥ ९५८. ३०. **सः त्वम्**—ऽ-मु । मॅ-पुस्तके नास्ति ॥ ९५९. २५. **भवामेति**—ख-ग-घ-त-न-श । भवोमेति–भ१; भवति–भ३ । भवेमेति–भ२-मॅ-मु ॥ ९६०. १२. **वाशिनमिति वा**—ख-ग१-ज्ञ-त१-२-४-न-भ२-*मॅ-मु । वाशिनामिति वा–त३-श; च–भ१-३ ॥ ९६०. २७. **अन्तरिक्ष्या माध्यमिके**—ख-ज्ञ-त२-३-न-भ१-२-श । अंतरिक्षा माध्यमिकं–ग; अंतरिक्षं माध्यमिके–घ; अत्चित्रक्ष्या माध्यमेके–त१; अंतरिक्ष्या माध्यमिको–

त४ । आंतरिक्ष्या माध्यामिके–भ३-मॅ-मु ॥ ९६१. ८. **धीतिभिः निधानैः**—ग-मॅ-मु । ' धीतिभिरिधानः ' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ९६१.२२. **वनन्वति काष्ठानि हन्ति**—ग-भ२-*मॅ-मु । वनन्वती काष्ठानि संति–ख-त१-२; वनन्वति काष्ठानि संति–श-भ१-३; वनन्वती काष्ठानि हंति–त४-श; वनन्वती काष्ठानि न–घ१; वनन्वती काष्ठानि त्वंति–च ॥ ९६१. २३. **काष्ठानि**—ख-ग-त-न-भ-श-मु । घ-मॅ-पुस्तकयोः नास्ति ॥ ९६२. १. **यानि कानि चेति**—ग-श-भ-श-*मॅ-मु-तै. सं. । यानि कानि चेवि–ख-त१-२; यानि चेवि–त३-४ ॥ ९६२. २. **सर्वमस्मै स्वदते**—ग१-त१-२-३-भ-श-*मॅ-मु-तै. सं. । सर्वदस्मै स्वदक्ष–ख; अस्मै स्वदते–ग२; सर्वस्मै स्वदते–श-त४ ॥ ९६२.१२. **प्रज्वलयति**—ग-घ-भ२-३ । प्रज्वलंति–श । प्रज्वलति–ख-त-न-भ१-मॅ-मु ॥

[८. १०३] ९६२. १८–२१. **आभिप्लविके...राजन्नग्ने इति**—मु । प्र मंहिष्ठायेति आभिप्लविकेषूक्थ्येषु मैत्रावरुणस्य वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितं च । प्र मंहिष्ठाय गायत प्र सो अग्ने इति । उपाकर्मणि मंडलाद्याग्ने याहीत्येषा । सूत्रितं मा चिदाग्ने याहि मरुत्सखा यत्ते राजन्नग्न इति–ग । आभिप्लविकेषूक्थ्येषु मैत्रावरुणस्य वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितं च । मा चिदाग्ने याहि मरुत्सखा यत्ते राजन्नग्न इति–ख-त-न-भ-श-मॅ । मॅक्समुल्लरमहाशयः एवमत्र पाठः स्यादिति संभावयति–' आभिप्लविकेषूक्थ्येषु मैत्रावरुणस्य प्र मंहिष्ठायेति वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितं च । अभि प्रयांसि वाहसा प्र मंहिष्ठाय गायत । आ. ७. ८. । इति । उपाकरणोत्सर्जनयोर्मण्डलाद्यंतहोम आग्ने याहीत्येषा । सूत्रितं च । आग्ने याहि मरुत्सखा यत्ते राजञ्छृतं हविः । आ. गृ. ३. ५.७.। इति ' ॥ अस्माभिस्तु ग-पुस्तकानुसारेण मु-पुस्तकानुसारेण च स्वीकृतः पाठः ॥ ९६३. १३. **कुर्वाणात् मनुष्यात्** । कुर्वाणान् मनुष्यान्–ऽ-मॅ-मु । **रेजन्ते कम्पन्ते**—ऽ-मॅ । ' रेजन्त ' इति पदपाठः । रेजन्त कम्पन्ते–मु ॥ ९६३. २०. **प्रणेतुम्**—ग । प्रनेतुं–मॅ-मु इतरेषु च ॥ ९६३. २१. **मर्तो**—ख-ज्ञ-त१-२-३-भ३-मु । मतेः–घ१; मर्ता–त४-न-श । मर्त्यो–ग-भ१-२-मॅ ॥ ९६३. २८. **तथा**—ग-त४-न-भ१-३ । यथा–ख-घ-ज्ञ-त२-भ२-मॅ-मु ॥ ९६४. २. **धारयाम**—ख-ग-घ-त-न । धारयामः–भ-श-मॅ-मु ॥ ९६४. १६. **सः**—मॅ-×। मु-पुस्तकेऽपि नास्ति ॥ ९६४. २०. **हे**—मॅ । हे ये–त१ । ये–मु इतरेषु च ॥ ९६४. २१. **प्र गायत**—ख-घ-ज्ञ-त१-२-भ-श-मु । ग-त३-४-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ९६४. २७. **अस्य अग्नेः**—ख-घ-त१-श-*मॅ-मु । तस्याग्नेः–ग-न; तस्यासाग्नेः–त३-श; तस्यास्याग्नेः–भ ॥ ९६५. २६. **अभिगमनैरपि** । अस्मादनन्तरं ' स्तुवन्ति ' इत्येतादृशं क्रियापदमावश्यकमिति मॅक्समुल्लरमहाशयः ॥

॥ ऋग्वेदसंहिता ॥

श्रीमत्सायणाचार्यविरचितभाष्यसमेता

६—८ मण्डलानि

ॐ

ऋग्वेदसंहिता

श्रीमत्सायणाचार्यविरचितभाष्यसमेता

॥ अथ षष्ठं मण्डलम् ॥

भारद्वाजे षष्ठे मण्डले षडनुवाकाः। तत्र प्रथमेऽनुवाके पञ्चदश सूक्तानि। तत्र 'त्वं ह्यग्ने' इति त्रयोदशर्चं प्रथमं सूक्तम्। 'त्वं ह्यग्ने सहसोनेति बार्हस्पत्यो भरद्वाजः षष्ठं मण्डलमपश्यत्' इत्यनुक्रान्तत्वात् मण्डलद्रष्टा स एव भरद्वाज ऋषिः। अनादेशपरिभाषया त्रिष्टुप्। मण्डलादिपरिभाषया अग्निर्देवता। पशोः[1] हविषि अवदीयमाने मैत्रावरुणेनानुवचनीयमिदं मनोतासूक्तम्। सूत्रितं च—'त्वं ह्यग्ने प्रथम इत्यन्वाह' (आश्व. श्रौ. ३. ६) इति। प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छन्दसि एतदादिसूक्तषट्कं द्वितीयवर्जम्। सूत्रितं च—'त्वं ह्यग्ने प्रथम इति षण्णां द्वितीयमुद्धरेत्' (आश्व. श्रौ. ४. १३) इति। आद्या उपाकरणे विनियुक्ता। सूत्रं तु पूर्वमन्त्र उक्तम्॥

त्वं ह्यग्ने प्रथमो मनोतास्या धियो अभवो दस्म होता।
त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै ॥ १ ॥

त्वम्। हि। अग्ने। प्रथमः। मनोता। अस्याः। धियः। अभवः। दस्म। होता।
त्वम्। सीम्। वृषन्। अकृणोः। दुस्तरीतु। सहः। विश्वस्मै। सहसे। सहध्यै ॥ १ ॥

हे [v]अग्ने [v]प्रथमः देवानां मध्ये प्रथमः प्रतमः प्रकृष्टतमः पूर्वभावी वा [v]त्वं [v]मनोता [v]हि देवानां मनो यत्रोतं संबद्धं भवति तादृशो भवसि। हिशब्दः 'अग्निः सर्वा मनोताग्नौ मनोताः संगच्छन्ते' (ऐ. ब्रा. २. १०) इत्यादिब्राह्मणप्रसिद्धिद्योतनार्थः। हे [v]दस्म दर्शनीय [v]अस्याः [v]धियः अस्य कर्मणः [v]होता देवानामाह्वाता [v]अभवः भवसि। हे [v]वृषन् कामानां वर्षितः [v]त्वं [v]सीं सर्वतः [v]दुष्टरीतु दुर्हिंस्यमहिंस्यं [v]सहः बलम् [v]अकृणोः अकरोः। किमर्थम्। [v]विश्वस्मै [v]सहसे सर्वस्यापि बलवतः शत्रोः [v]सहध्यै अभिभवनाय॥

---

१. ज्ञ-त-न-भ-र-पशौ।

अधा होता न्यसीदो यजीयानिळस्पद इषयन्नीड्यः सन् ।
तं त्वा नरः प्रथमं देवयन्तो महो राये चितयन्तो अनु ग्मन् ॥ २ ॥

अध । होता । नि । असीदः । यजीयान् । इळः । पदे । इषयन् । ईड्यः । सन् ।
तम् । त्वा । नरः । प्रथमम् । देवऽयन्तः । महः । राये । चितयन्तः । अनु । ग्मन् ॥२॥

[v]अध अधुना हे अग्ने [v]यजीयान् अतिशयेन यष्टा त्वं [v]होता होमनिष्पादकः सन् [v]इळः भूम्याः वेदिलक्षणायाः [v]पदे स्थाने [v]न्यसीदः निषण्णवानसि । किं कुर्वन् । [v]इषयन् पशुपुरोडाशादिलक्षणमन्नमिच्छन् [v]ईड्यः स्तुत्यः [v]सन् । [v]तं तादृशं [v]त्वा त्वां [v]प्रथमम् इतरदेवताभ्यः पूर्वं [v]देवयन्तः देवं त्वामात्मन इच्छन्तः [v]नरः नेतारो मनुष्या ऋत्विग्यजमानाः [v]महः महते [v]राये धनाय [v]चितयन्तः जानन्तः स्तुत्या ज्ञापयन्तो वा [v]अनु [v]ग्मन् अन्वगच्छन् पूर्वम् ॥

वृतेव यन्तं बहुभिर्वसव्यैस्त्वे रयिं जागृवांसो अनु ग्मन् ।
रुशन्तमग्निं दर्शतं बृहन्तं वपावन्तं विश्वहा दीदिवांसम् ॥ ३ ॥

वृताऽइव । यन्तम् । बहुऽभिः । वसुऽयैः । त्वे इति । रयिम् । जागृऽवांसः । अनु । ग्मन् ।
रुशन्तम् । अग्निम् । दर्शतम् । बृहन्तम् । वपाऽवन्तम् । विश्वहा । दीदिऽवांसम् ॥ ३ ॥

[v]वृतेव मार्गेण । इवेति संप्रत्यर्थे । लोकद्वयमध्यगतेन मार्गेण [v]बहुभिः अनेकैः [v]वसव्यैः वसुभिः ॥ स्वार्थिकस्तद्धितप्रत्ययः ॥ यजमानानां निवासयोग्यैर्वा सार्धं [v]यन्तं गच्छन्तं त्वाम् [v]अनु [v]ग्मन् अनुगच्छन्ति । संभजन्ते यजमानाः । कीदृशास्ते । [v]त्वे त्वयि देवे [v]रयिं धनं [v]जागृवांसः प्रयच्छन्त इत्यर्थः । कीदृशं त्वामित्युच्यते । [v]रुशन्तं दीप्तवर्णम् [v]अग्निम् अङ्गनादिगुणविशिष्टं [v]दर्शतं दर्शनीयं [v]बृहन्तं महान्तं [v]वपावन्तं [v]विश्वहा सर्वेषु कालेषु [v]दीदिवांसं दीप्यमानम् ॥

पदं देवस्य नमसा व्यन्तः श्रवस्यवः श्रव आपन्नमृक्तम् ।
नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ ॥ ४ ॥

पदम् । देवस्य । नमसा । व्यन्तः । श्रवस्यवः । श्रवः । आपन् । अमृक्तम् ।
नामानि । चित् । दधिरे । यज्ञियानि । भद्रायाम् । ते । रणयन्त । सम्ऽदृष्टौ ॥ ४ ॥

[v]देवस्य द्योतमानस्याग्नेः [v]पदम् आहवनीयस्थानं[1] [v]नमसा हविषा स्तोत्रेण वा [v]व्यन्तः गच्छन्तः [v]श्रवस्यवः अन्नमिच्छन्तः पूर्वे यजमानाः [v]श्रवः सर्वत्र श्रूयमाणमन्नम् [v]अमृक्तम् अन्यैरपरिबाध्यम् [v]आपन् आप्नुवन्ति । हे अग्ने [v]ते तव [v]भद्रायां स्तुत्यायां [v]संदृष्टौ निमित्तायां [v]रणयन्त[2] रमयन्ति[2] ।

---

१. ख-आहवनीयं स्थानम्; ग-श-आहवनीयादिस्थानम् । २. ख-घ-ञ-त-न-भ-य-र-' रणयन्त रमयन्ति ' नास्ति ।

vयज्ञियानि यज्ञयोग्यानि vनामानि नमनीयानि वैश्वानरो जातवेदा इत्यादीनि vदधिरे धारयन्ति । अथवा नमनसाधनानि स्तोत्राणि दधिरे ॥

त्वां वर्धन्ति क्षितयः पृथिव्यां त्वां राय उभयासो जनानाम् ।
त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणाम् ॥ ५ ॥

त्वाम् । वर्धन्ति । क्षितयः । पृथिव्याम् । त्वाम् । रायः । उभयासः । जनानाम् ।
त्वम् । त्राता । तरणे । चेत्यः । भूः । पिता । माता । सदम् । इत् । मानुषाणाम् ॥ ५ ॥

हे अग्ने vत्वां vक्षितयः मनुष्या ऋत्विजः vपृथिव्यां वेदिलक्षणायां vवर्धन्ति वर्धयन्ति । vउभयासः उभयविधानि पश्वश्वरूपाणि vजनानां यजमानानां संबन्धीनि vरायः धनानि ऋत्विजः अध्वर्वादयः त्वां त्वामुद्दिश्य वर्धन्ति । अथवा उभयविधानि धनानि गवादीनि जनानां पुत्रादीनाम् अर्थाय प्राप्तुं त्वां वर्धन्ति । हे vतरणे दुःखात्तारकाग्ने vत्वं vचेत्यः ज्ञातव्यः स्तुत्यः सन् vत्राता रक्षिता vभूः भवसि । किंच vमानुषाणां मनुष्याणां स्तोतॄणामस्माकं vसदमित् सर्वदा vपिता vमाता च मातापितृस्थानीयो भूः भवसि ॥ ॥ ३५ ॥

सपर्येण्यः स प्रियो विक्ष्व१ग्निर्होता मन्द्रो नि षसाद यजीयान् ।
तं त्वा वयं दम आ दीदिवांसमुप द्बुबाधो नमसा सदेम ॥ ६ ॥

सपर्येण्यः । सः । प्रियः । विक्षु । अग्निः । होता । मन्द्रः । नि । ससाद । यजीयान् ।
तम् । त्वा । वयम् । दमे । आ । दीदिऽवांसम् । उप । द्बुऽबाधः । नमसा । सदेम ॥ ६ ॥

vसः vअग्निः vसपर्येण्यः पूज्यः vप्रियः कामानां पूरकः vविक्षु प्रजासु[1] vहोता होमनिष्पादकः vमन्द्रः मदनीयः vयजीयान् अतिशयेन इतरदेवानां यष्टा यजनीयो वा । एवं महानुभावोऽग्निः vनि vषसाद निषण्णोऽभूत् । अथ प्रत्यक्षकृतः। vतं vत्वा तादृशं त्वां vवयं यजमानाः vदमे गृहे vदीदिवांसं दीप्यमानं vद्बुबाधः जानुनी बाधयन्तः अवननजानवः प्रणताः सन्तः vनमसा स्तोत्रेण vउप vआ vसदेम आसादयेम । अथवा उपासीदेमेत्येवमाशास्ते ॥

तं त्वा वयं सुध्यो३ नव्यमग्ने सुम्नायव ईमहे देवयन्तः ।
त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन ॥ ७ ॥

तम् । त्वा । वयम् । सुऽध्यः । नव्यम् । अग्ने । सुम्नऽयवः । ईमहे । देवऽयन्तः ।
त्वम् । विशः । अनयः । दीद्यानः । दिवः । अग्ने । बृहता । रोचनेन ॥ ७ ॥

---

१. ख-झ-त-न-भ-य-र-प्रजासु प्रियः ।

हे [v]अग्ने [v]तं तादृशं महानुभावं [v]नव्यं स्तुत्यं [v]त्वा त्वां [v]सुध्यः शोभनबुद्धयः [v]सुम्नायवः सुखमिच्छन्तः [v]देवयन्तः देवं त्वामिच्छन्तः [v]वयम् [v]ईमहे याचामहे । स्तुम इत्यर्थः । हे [v]अग्ने [v]त्वं [v]दीद्यानः दीप्यमानः सन् । केन । [v]बृहता महता [v]रोचनेन रोचमानेन तेजसा दीद्यानः [v]विशः प्रजाः स्तोतॄनस्मान् [v]दिवः स्वर्गम् [v]अनयः अगमयः । रोचनेनादित्येन दिवमगमय इति वा संबन्धः । आदित्यमार्गेणेत्यर्थः ॥

विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनाम् ।
प्रेतीषणिमिषयन्तं पावकं राजन्तमग्निं यजतं रयीणाम् ॥ ८ ॥

विशाम् । कविम् । विश्पतिम् । शश्वतीनाम् । निऽतोशनम् । वृषभम् । चर्षणीनाम् ।
प्रेतिऽइषणिम् । इषयन्तम् । पावकम् । राजन्तम् । अग्निम् । यजतम् । रयीणाम् ॥ ८ ॥

[v]शश्वतीनां नित्यानां [v]विशाम् ऋत्विग्यजमानलक्षणानां [v]विश्पतिं स्वामिनं [v]कविं क्रान्तदर्शिनं [v]नितोशनं शत्रूणां हिंसकं [v]वृषभं कामानां वर्षकं [v]चर्षणीनां स्तोतॄणां मनुष्याणां [v]प्रेतीषणिं प्राप्तगमनम् [v]इषयन्तम् अन्नं कुर्वन्तं [v]पावकं शोधकं [v]राजन्तं दीप्यमानं दीपयन्तं वा [v]रयीणां लाभाय [v]यजतं यष्टव्यम् [v]अग्निं स्तुम इति शेषः ॥

सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा हव्यदातिम् ।
य आहुतिं परि वेदा नमोभिर्विश्वेत्स वामा दधते त्वोतः ॥ ९ ॥

सः । अग्ने । ईजे । शशमे । च । मर्तः । यः । ते । आनट् । सम्ऽइधा । हव्यऽदातिम् ।
यः । आऽहुतिम् । परि । वेद । नमःऽभिः । विश्वा । इत् । सः । वामा । दधते । त्वाऽऊतः ॥ ९ ॥

हे [v]अग्ने त्वां [v]सः [v]मर्तः स यजमानः [v]ईजे यजते । [v]शशमे [v]च स्तौति । 'शशमानः' (नि. ३. १४. २२) इति स्तुतिकर्मसु पाठादिदमपि स्तुतिकर्म । [v]यः यजमानः [v]ते तव [v]समिधा सह [v]हव्यदातिं हविषां दानम् [v]आनट् करोति । किंच [v]यः यजमानः [v]नमोभिः स्तुतिभिः [v]आहुतिम् आज्यादिलक्षणां [v]परि [v]वेद परितो वेत्ति । ददातीत्यर्थः । [v]सः यजमानः [v]त्वोतः त्वया रक्षितः सन् [v]विश्वेत् सर्वाणि [v]वामा वननीयानि धनानि [v]दधते धारयति ॥

अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः ।
वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्रायां सुमतौ यतेम ॥ १० ॥

अस्मै । ऊँ इति । ते । महि । महे । विधेम । नमःऽभिः । अग्ने । सम्ऽइधा । उत । हव्यैः ।
वेदी । सूनो इति । सहसः । गीःऽभिः । उक्थैः । आ । ते । भद्रायाम् । सुऽमतौ । यतेम ॥ १० ॥

हे ᵛअग्ने ᵛमहे महते ᵛअस्मै ᵛते तुभ्यं ᵛमहि महत् अत्यधिकं ᵛविधेम परिचरेम। कैरित्युच्यते। ᵛनमोभिः नमस्कारैः ᵛसमिधा वा ᵛउत अपि च ᵛहव्यैः हविर्भिः। हे ᵛसहसः ᵛसूनो[1] ᵛवेदी वेद्यां ᵛगीर्भिः स्तोत्रैः ᵛउक्थैः शस्त्रैश्च विधेमेति संबन्धः। किंच ᵛते तव ᵛभद्रायां स्तुत्यायां ᵛसुमतौ शोभनानुग्रहबुद्धौ ᵛआ ᵛयतेम आगच्छेम। भवेमेत्यर्थः॥

आ यस्ततन्थ रोदसी वि भासा श्रवोभिश्च श्रवस्यस्तरुत्रः।
बृहद्भिर्वाजैः स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भाहि॥ ११॥

आ। यः। ततन्थ। रोदसी इति। वि। भासा। श्रवःऽभिः। च। श्रवस्यः। तरुत्रः।
बृहत्ऽभिः। वाजैः। स्थविरेभिः। अस्मे इति। रेवत्ऽभिः। अग्ने। विऽतरम्। वि। भाहि॥११॥

हे अग्ने ᵛयः त्वं ᵛरोदसी द्यावापृथिव्यौ ᵛभासा दीप्त्या ᵛवि ᵛआ ᵛततन्थ व्यतनोः। किंच ᵛतरुत्रः तारकस्त्वं ᵛश्रवोभिः स्तुतिभिः ᵛश्रवस्यः ᵛच भवसि हे तादृश ᵛअग्ने ᵛबृहद्भिः महद्भिः ᵛवाजैः अन्नैः ᵛस्थविरेभिः स्थविरैः स्थूलैः ᵛरेवद्भिः रयिमद्भिः ᵛअस्मे अस्मदर्थं ᵛवितरं विशिष्टतरं ᵛवि ᵛभाहि विशेषेण दीप्यस्व॥

नृवद्वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः।
पूर्वीरिषो बृहतीरारेअघा अस्मे भद्रा सौश्रवसानि सन्तु॥ १२॥

नृऽवत्। वसो इति। सदम्। इत्। धेहि। अस्मे इति। भूरि। तोकाय। तनयाय। पश्वः।
पूर्वीः। इषः। बृहतीः। आरेऽअघाः। अस्मे इति। भद्रा। सौश्रवसानि। सन्तु॥ १२॥

हे ᵛवसो वासक धनवन् वाग्ने ᵛनृवत् मनुष्यैरुपेतं धनं ᵛसदमित् सर्वदा ᵛअस्मे अस्मासु ᵛधेहि स्थापय। किंच ᵛभूरि प्रभूतान् ᵛपश्वः पशूंश्च[2] धेहि[2]। किमर्थम्। ᵛतोकाय अस्मत्पुत्राय ᵛतनयाय तत्पुत्राय। किंच ᵛपूर्वीः पूरयित्र्यः[3] कामानां बह्व्यो वा ᵛबृहतीः[4] महत्यः[4] ᵛआरेअघाः। आरे दूरेऽघानि यासु ताः। तादृश्यः ᵛइषः उक्तलक्षणान्यन्नानि ᵛभद्रा भद्राणि ᵛसौश्रवसानि सुश्रवस्त्वानि ᵛअस्मे अस्मासु ᵛसन्तु भवन्तु।

'पुरूण्यग्ने' इति त्रयोदशी उखासंभरणीयेष्टौ अग्नेः क्षत्रवतोऽनुवाक्या। सूत्रितं च—'पुरूण्यग्ने पुरुधा त्वाया स चित्र चित्रं चितयन्तमस्मे' (आश्व. श्रौ. ४. १) इति॥

---

१. त–सूनो देव। २. ख-ञ-न-भ-र-पशूंश्चाधेहि; श–पशून् विधेहि। ३. ख-ञ-भ–प्रेरयित्र्यः। ४. ख-ञ-न-भ-र–बृहतीर्महतीर्महत्यः; त-य–महतीर्महत्यः।

पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन्वसुता ते अश्याम् ।
पुरूणि हि त्वे पुरुवार सन्त्यग्ने वसु विधते राजनि त्वे ॥ १३ ॥

पुरूणि । अग्ने । पुरुधा । त्वाऽया । वसूनि । राजन् । वसुता । ते । अश्याम् ।
पुरूणि । हि । त्वे इति । पुरुऽवार । सन्ति । अग्ने । वसु । विधते । राजनि । त्वे इति ॥ १३ ॥

हे ᵛअग्ने ᵛराजन् ᵛते तव ᵛपुरूणि बहूनि ᵛपुरुधा गवाश्वादिरूपेण बहुप्रकाराणि ᵛवसूनि धनानि ᵛवसुता वसुतायै वसुमत्त्वाय ᵛअश्यां व्याप्नुयां भुञ्जीय वा । अत्र भरतस्वामी वसुतात इत्येकपदं सप्तम्यन्तं चकार भट्टभास्करमिश्रोऽप्येकपदं संबुद्ध्यन्तं चकार । हे ᵛपुरुवार बहुभिर्वरणीय ᵛअग्ने ᵛराजनि राजमाने ᵛत्वे त्वयि ᵛपुरूणि बहूनि ᵛवसु वसूनि ᵛत्वे त्वां ᵛविधते परिचरते मह्यं दातव्यानि ᵛसन्ति ॥ ॥ ३६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये
चतुर्थाष्टके चतुर्थोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ पञ्चमाध्याय आरभ्यते । षष्ठमण्डलस्य षडनुवाकात्मकस्य प्रथमेऽनुवाके पञ्चदश सूक्तानि । तत्र 'त्वं हि' इत्येकादशर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षमाग्नेयम् । अन्त्या षट्पञ्चाशदक्षरा शाक्करी आदितो दशानुष्टुभः । अनुक्रम्यते हि—'त्वं ह्येकादशानुष्टुभं शाक्कर्यन्तम्' इति । प्रातरनुवाक आग्नेये क्रतौ आनुष्टुभे छन्दसीदं सूक्तमुत्तमावर्जं विनियुक्तम् । सूत्र्यते हि—'त्वं हि क्षैतवदग्ना यो होताजनिष्ट' (आश्व. श्रौ. ४. १३) इति । आश्विनशस्त्रे चैतत् शंसनीयं प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात् । अङ्गिरसां द्वित्रात्रे द्वितीयेऽहनीदमेव सूक्तमाज्यशस्त्रम् । सूत्रितं च—'त्वं हि क्षैतवदिति चाज्यम्' (आश्व. श्रौ. १०. २) इति ॥

त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे ।
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥ १ ॥

त्वम् । हि । क्षैतऽवत् । यशः । अग्ने । मित्रः । न । पत्यसे ।
त्वम् । विऽचर्षणे । श्रवः । वसो इति । पुष्टिम् । न । पुष्यसि ॥ १ ॥

हे ᵛअग्ने ᵛत्वं ᵛहि त्वं खलु ᵛक्षैतवत् । क्षितिः क्षयोऽपचयः । तत्संबन्धि क्षैतं शुष्कं काष्ठम् । तद्युक्तं ᵛयशः अन्नं हविर्लक्षणं ᵛपत्यसे अभिपतसि[1] गच्छसि । तत्र दृष्टान्तः । ᵛमित्रो ᵛन । अहरभिमानी

१. ख–अभितपसि; ङ-न-भ–अतिपतसि।

देवो मित्रः । स इव । यद्वा यश इति गृहनाम । क्षैतवत् । क्षैतं निवासकं हविर्लक्षणमन्नम् । तद्युक्तं यजमानगृहं मित्रभूतः पुरुष इवाभिपतसि । यद्वा पत्यतिरैश्वर्यकर्मा । ईदृशमन्नं पत्यसे ईशिषे । अतः कारणात् हे vविचर्षणे विशेषेण सर्वस्य द्रष्टः vवसो वासकाग्ने vत्वं vश्रवः श्रवणीयमन्नं यजमानगृहस्थं vन । अयं नशब्दश्चार्थे । अन्नकार्यभूतां पुष्टिं च vपुष्यसि वर्धयसि ॥

त्वां हि ष्मा चर्षणयो यज्ञेभिर्गीर्भिरीळते ।
त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः ॥ २ ॥

त्वाम् । हि । स्म । चर्षणयः । यज्ञेभिः । गीःऽभिः । ईळते ।
त्वाम् । वाजी । याति । अवृकः । रजःऽतूः । विश्वऽचर्षणिः ॥ २ ॥

हे अग्ने vत्वां vहि vस्म त्वामेव खलु vचर्षणयः मनुष्याः vयज्ञेभिः यज्ञसाधनैर्हविर्भिः vगीर्भिः स्तुतिभिः vईळते स्तुवन्ति । अपि च vवाजी । वाजो गमनम् । तद्वान् सूर्यः vत्वां vयाति गच्छति । प्रविशतीत्यर्थः । तथा च श्रूयते—'अग्निं वावादित्यः सायं प्रविशति तस्मादग्निर्दूरान्नक्तं दृश्यते' (तै. ब्रा. २. १. २९) इति । वाजिशब्दश्च सूर्यवाचकत्वेन क्वचित् श्रूयते—'अग्निर्वायुः सूर्यस्ते वै वाजिनः' (तै. ब्रा. १. ६. ३. ९) इति 'वायुः सप्तिरादित्यो वाजी' (तै. ब्रा. १. ७. ८) इति च । कीदृशो वाजी । vअवृकः हिंसकरहितः vरजस्तूः । उदकमन्न रज उच्यते । तस्य वृष्टिलक्षणस्य प्रेरयिता । यद्वा । रजसां लोकानां तरिता गन्ता vविश्वचर्षणिः सर्वस्य द्रष्टा ॥

सजोषस्त्वा दिवो नरो यज्ञस्य केतुमिन्धते ।
यद्ध स्य मानुषो जनः सुम्नायुर्जुह्वे अध्वरे ॥ ३ ॥

सऽजोषाः । त्वा । दिवः । नरः । यज्ञस्य । केतुम् । इन्धते ।
यत् । ह । स्यः । मानुषः । जनः । सुम्नऽयुः । जुह्वे । अध्वरे ॥ ३ ॥

हे अग्ने vसजोषः सजोषसः सह प्रीयमाणाः vदिवः स्तुतेः vनरः नेतार ऋत्विजः vयज्ञस्य vकेतुं प्रज्ञापकं vत्वा त्वाम् vइन्धते समिद्धं कुर्वन्ति । कदेति चेदुच्यते । vयद्ध यदा खलु vस्यः सः vमानुषः मनोरपत्यभूतः vजनः जातो यजमानो होता वा vसुम्नायुः[1] सुम्नं सुखमात्मन इच्छन् vअध्वरे हिंसाप्रत्यवायरहिते यज्ञे vजुह्वे त्वामाह्वयति तदेत्यर्थः ॥

ऋधद्यस्ते सुदानवे धिया मर्तः शशमते ।
ऊती स बृहतो दिवो द्विषो अंहो न तरति ॥ ४ ॥

ऋधत् । यः । ते । सुऽदानवे । धिया । मर्तः । शशमते ।
ऊती । सः । बृहतः । दिवः । द्विषः । अंहः । न । तरति ॥ ४ ॥

---

१. त–सुम्नयुः ।

vऋधत्। स यजमान ऋध्नुयात् हे अग्ने vसुदानवे शोभनदानाय तुभ्यम्॥ षष्ठ्यर्थे चतुर्थी॥ तव संबन्धिना[1] vधिया कर्मणा vयः[2] vमर्तः[2] मरणधर्मा यजमानः vशशमते शाम्यति। यद्वा। शमतिः[3] स्तुतिकर्मा। त्वदर्थं कर्मणा युक्तः सन् स्तौति। vसः यजमानः vबृहतः महतः vदिवः दीप्तस्य[4] तव संबन्धिन्या vऊती ऊत्या रक्षया vद्विषः द्वेष्टॄन् vअंहो vन आहननशीलं पापमिव[5] vतरति[5] अतिक्रामति॥

समिधा यस्त आहुतिं निशितिं मर्त्यो नशत्।
वयावन्तं स पुष्यति क्षयमग्ने शतायुषम्॥ ५॥

समऽइधा। यः। ते। आऽहुतिम्। निऽशितिम्। मर्त्यः। नशत्।
वयाऽवन्तम्। सः। पुष्यति। क्षयम्। अग्ने। शतऽआयुषम्॥ ५॥

हे vअग्ने vसमिधा समिन्धनहेतुभूतेनेध्मेन सह vते त्वदीयां vनिशितिं निशितां तनूकृतां[6] मन्त्रसंस्कृताम्[6] vआहुतिं vयः vमर्त्यः मनुष्यः vनशत् व्याप्नुयात्। नशतिर्व्याप्तिकर्मा। vसः मनुष्यो यजमानः vवयावन्तम्। वयाः शाखाः पुत्रपौत्रादिलक्षणाः। तद्युक्तं vशतायुषं बहुविधान्नं चिरकालजीवनं वा vक्षयं गृहं vपुष्यति पोषयति वर्धयति। तत्र चिरकालमवतिष्ठत इत्यर्थः॥ ॥ १॥

त्वेषस्ते धूम ऋण्वति दिवि षञ्छुक्र आततः।
सूरो न हि द्युता त्वं कृपा पावक रोचसे॥ ६॥

त्वेषः। ते। धूमः। ऋण्वति। दिवि। सन्। शुक्रः। आऽततः।
सूरः। न। हि। द्युता। त्वम्। कृपा। पावक। रोचसे॥ ६॥

हे अग्ने vत्वेषः दीप्तस्य vते तव vशुक्रः निर्मलः शुभ्रवर्णो वा vधूमः vदिवि अन्तरिक्षे vआततः विस्तीर्णः vसन् vऋण्वति मेघात्मना परिणतो गच्छति। अपि च हे vपावक शोधकाग्ने vसूरो vन सूर्य इव vकृपा अभिमुखीकरणसमर्थया स्तुत्या स्तूयमानः vत्वं vद्युता दीप्त्या vरोचसे vहि दीप्यसे खलु॥

अधा हि विक्ष्वीड्योऽसि प्रियो नो अतिथिः।
रण्वः पुरीव जूर्यः सूनुर्न त्रययाय्यः॥ ७॥

अध। हि। विक्षु। ईड्यः। असि। प्रियः। नः। अतिथिः
रण्वः। पुरिऽइव। जूर्यः। सूनुः। न। त्रययाय्यः॥ ७॥

vअध अपि च vविक्षु प्रजासु हे अग्ने त्वम् vईड्यः स्तुत्यः vअसि भवसि। vहि यस्मादर्थे। यस्मादेवं तस्मात् vनः अस्माकम् vअतिथिः। लुप्तोपममेतत्। अतिथिरिव vप्रियः असि। यद्वा।

---

१. घ-त-संबन्धिन्या। २. त-मर्त्यः। ३. न-शाम्यतिः। ४. ग-त-व्याप्तस्य। ५. ख-पापं चरति; भ-य-पापं च तरति। ६. त-तनूकृत्वा संस्कृताम्।

हविर्वहनाय सततगामी भूत्वास्माकं प्रियोऽसि । तथा [v]पुरीव नगर्यां [v]जूर्यः जीर्णो वृद्धो हितोपदेष्टा राजेव [v]रण्वः रमणीयो गन्तव्यो वा भवसि । तथा [v]सूनुर्न पुत्र इव [v]त्रययाय्यः यजमानैः त्रातव्यः[1] पालयितव्यो भवसि । त्रायतेरेतद्रूपम् । यद्वैतत्सूनोर्विशेषणम् । विद्यातपःकर्मलक्षणं त्रयं यातीति त्रययाय्यः । यातेरौणादिक आय्यप्रत्ययः । स्पृहयाय्य इति यथा । अथवा त्रययाय्यो जन्मत्रयं प्राप्तः । जन्मत्रयं स्मर्यते—'मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धनात् । तृतीयं यज्ञदीक्षाया इति जन्मत्रयं स्मृतम्' (मनु. २. १६९) इति । तादृशः पुत्र इव रण्वो रमणीयोऽसि ॥

क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः ।
परिज्मेव स्वधा गयोऽत्यो न ह्वार्यः शिशुः ॥ ८ ॥

क्रत्वा । हि । द्रोणे । अज्यसे । अग्ने । वाजी । न । कृत्व्यः ।
परिज्माऽइव । स्वधा । गयः । अत्यः । न । ह्वार्यः । शिशुः ॥ ८ ॥

हे [v]अग्ने [v]क्रत्वा कर्मणा मन्थनरूपेण [v]द्रोणे द्रुमे काष्ठेऽरण्यां विद्यमानस्त्वम् [v]अज्यसे [v]हि व्यज्यसे[2] खलु । तथा [v]वाजी [v]न वेजनवानश्च इव [v]कृत्व्यः । कृत्वीति कर्मनाम । हविर्वहनादीनां कर्मणां कर्ता । स यथा पुरुषं वहति तद्वद्धविर्वहनमग्नेरश्वसादृश्यम् । तथा [v]परिज्मेव परितः सर्वत्र गन्ता वायुरिव दावानलादिरूपेण सर्वत्र गन्ता त्वं [v]स्वधा । अन्ननामैतत् । अन्नं [v]गयः गृहं च भवसि । उभयोर्दातेत्यर्थः । अपि च [v]शिशुः जातमात्रो बालोऽपि त्वम् [v]अत्यो [v]न सततगामी जात्यश्च इव [v]ह्वार्यः कुटिलमितस्ततो गन्तासि । 'ह्वृ कौटिल्ये' इत्यस्यैतद्रूपम् ॥

कारीर्यामग्नेर्धामच्छदो वैकल्पिक्यनुवाक्या 'त्वं त्या' इति । सूत्रितं च—'त्वं त्या चिदच्युता धामन्ते विश्वं भुवनमधिश्रितमिति वा' (आश्व. श्रौ. २. १३) इति ॥

त्वं त्या चिदच्युताग्ने पशुर्न यवसे ।
धामा ह यत्ते अजर वना वृश्चन्ति शिक्वसः ॥ ९ ॥

त्वम् । त्या । चित् । अच्युता । अग्ने । पशुः । न । यवसे ।
धामा । ह । यत् । ते । अजर । वना । वृश्चन्ति । शिक्वसः ॥ ९ ॥

हे [v]अग्ने [v]त्वं [v]त्या तानि काष्ठानि । चिच्छब्दोऽपिशब्दसमानार्थो भिन्नक्रमः । [v]अच्युता अच्युतानि च्यावयितुमशक्यान्यपि । अस्सीति शेषः । तत्र दृष्टान्तः । [v]यवसे घासे विसृष्टः [v]पशुर्न पशुरिव । स यथा सर्वं भक्षयति तथा त्वं प्रौढकाष्ठादीनि क्षणमात्रेण दहसीत्यर्थः । हे [v]अजर जरारहिताग्ने [v]यत् यस्य ॥ 'सुपां सुलुक्०' इति षष्ठ्या लुक् ॥ [v]शिक्वसः दीप्तस्य [v]ते तव [v]धामा[3] धामानि तेजांसि [v]वना वननीयानि संभजनीयान्यरण्यानि [v]वृश्चन्ति छिन्दन्ति भक्षयन्ति स त्वमिति पूर्वेणान्वयः । [v]ह इत्येतत्पादपूरणम् ॥

---

१. ख-न-भ-र-स्तोतव्यः । २. त-यजसे । ३. त-धामा ।

वेषि॒ ह्यध्व॑रीयतामग्ने॒ होता॒ दमे॑ वि॒शाम् ।
स॒मृधो॑ विश्पते कृणु जु॒षस्व॑ ह॒व्यमङ्गिरः ॥ १० ॥

वेषि॑ । हि । अध्व॑रिऽयताम् । अग्ने॑ । होता॑ । दमे॑ । वि॒शाम् ।
स॒मृऽऋ॑धः । वि॒श्प॒ते॒ । कृ॒णु॒ । जु॒षस्व॑ । ह॒व्यम् । अङ्गि॑रः ॥ १० ॥

हे ᵛअग्ने ᵛअध्वरीयताम् अध्वरं यज्ञमात्मन इच्छतां ᵛविशां यजमानानां ᵛदमे गृहे त्वं ᵛहोता देवानामाह्वाता सन् ᵛवेषि ᵛहि स्तुतिं हवींषि वा यतः कामयसे अतः कारणात् ᵛविश्पते विशां पालकाग्ने ᵛसमृधः समृद्धानस्मान् यजमानान् ᵛकृणु कुरु। कृत्वा च हे ᵛअङ्गिरः अङ्गनादिगुणयुक्त अङ्गाररूप वाग्ने ᵛहव्यम् अस्मदीयं हविः ᵛजुषस्व सेवस्व ॥

अच्छा॑ नो मित्रमहो देव दे॒वानग्ने॒ वोचः॑ सुम॒तिं रोद॑स्योः ।
वी॒हि स्व॒स्ति सु॒क्षि॒तिं दि॒वो नॄन्द्वि॒षो अंहां॑सि दुरि॒ता त॑रेम
ता त॑रेम॒ तवा॑वसा तरेम ॥ ११ ॥

अच्छ॑ । नः॒ । मि॒त्र॒ऽम॒हः॒ । दे॒व॒ । दे॒वान् । अग्ने॑ । वोचः॑ । सु॒ऽम॒तिम् । रोद॑स्योः ।
वी॒हि । स्व॒स्ति॒म् । सु॒ऽक्षि॒तिम् । दि॒वः । नॄन् । द्वि॒षः । अंहां॑सि । दुः॒ऽइ॒ता । त॒रेम॒ ।
ता । त॒रेम॒ । तव॑ । अव॑सा । त॒रेम॒ ॥ ११ ॥

हे ᵛमित्रमहः अनुकूलदीप्ते ᵛदेव दानादिगुणयुक्त ᵛअग्ने ᵛरोदस्योः द्यावापृथिव्योर्वर्तमानस्त्वं ᵛदेवान् यष्टव्यानिन्द्रादीन् ᵛअच्छ आभिमुख्येन ᵛनः अस्माकं ᵛसुमतिं स्तुतिं ᵛवोचः ब्रूहि । ᵛद्विषः स्तुतेः ᵛनॄन् नेतॄनस्मान् ᵛसुक्षितिं शोभननिवासयुक्तं ᵛस्वस्तिम् अविनाशं ᵛवीहि गमय ॥ वेतिरत्र अन्तर्भावितण्यर्थो द्रष्टव्यः ॥ वयं च ᵛद्विषः द्वेष्टॄन् शत्रून् ᵛअंहांसि पापानि ᵛदुरिता तत्फलरूपाणि दुर्गमनानि च ᵛतरेम अतिक्रामेम । तथा ᵛता तानि व्यवहितानि जन्मान्तरकृतानि च पापादीनि ᵛतरेम । उक्त एवार्थो दार्ढ्याय पुनरुच्यते । हे अग्ने ᵛतव ᵛअवसा रक्षणेन द्वेष्टृप्रभृतीनत्यन्तं ᵛतरेम ॥ ॥ २ ॥

' अग्ने स क्षेषत् ' इत्यष्टर्चं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम् । अनुक्रान्तं च—'अग्नेऽष्टौ' इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

अग्ने॒ स क्षे॑षदृत॒पा ऋ॒तेजा॒ उरु॒ ज्योति॑र्नशते देव॒युष्टे॑ ।
यं त्वं मि॒त्रेण॒ वरु॑णः स॒जोषा॒ देव॒ पासि॒ त्यज॑सा॒ मर्त॑मंहः ॥ १ ॥

अग्ने॑ । सः । क्षे॒ष॒त् । ऋ॒त॒ऽप॒पाः । ऋ॒ते॒ऽजाः । उ॒रु । ज्योतिः॑ । न॒श॒ते॒ । दे॒व॒ऽयुः । ते॒ ।
यम् । त्वम् । मि॒त्रेण॑ । वरु॑णः । स॒ऽजोषाः॑ । देव॑ । पासि॑ । त्यज॑सा । मर्त॑म् । अं॒हः॒ ॥ १ ॥

हे ᵛअग्ने ᵛसः यजमानः ᵛक्षेपत् क्षियति[१] निवसति । चिरकालं जीवेदित्यर्थः । कीदृशो यजमानः । ᵛऋतपाः ऋतस्य यज्ञस्य पालकः ᵛऋतेजाः यज्ञनिमित्तं जातः । उक्थिवा च ᵛते त्वदीयं ᵛदेवयुः देवानात्मन इच्छन् स यजमानः ᵛउरु विस्तीर्णं ᵛज्योतिः सूर्याख्यं ᵛनशते प्राप्नोति । हे ᵛदेव द्योतमानाग्ने ᵛयं ᵛमर्तं मनुष्यं यजमानं ᵛमित्रेण ᵛवरुणः । तृतीयार्थे प्रथमा । वरुणेन च ᵛसजोषाः सह प्रीयमाणः ᵛत्वं ᵛस्वयजसा स्वाजनसाधनेनायुधेन ᵛअंहः अंहसः पापात् ᵛपासि रक्षसि स यजमानः इति पूर्वत्र संबन्धः ॥

ईजे यज्ञेभिः शशमे शमीभिर्ऋधद्वाराय प्रयसे ददाश ।
एवा चन तं यशसामजुष्टिर्नाहो मर्तं नशते न प्रदृप्तिः ॥ २ ॥

ईजे । यज्ञेभिः । शशमे । शमीभिः । ऋधत्ऽवाराय । अग्नये । ददाश ।
एव । चन । तम् । यशसाम् । अजुष्टिः । न । अंहः । मर्तम् । नशते । न । प्रऽदृप्तिः ॥ २ ॥

यः यजमानः ᵛऋधद्वाराय ऋधत्समृद्धं वारं वरणीयं धनं यस्य तादृशाय ᵛअग्नये ᵛददाश हवींषि ददाति स यजमानः ᵛयज्ञेभिः सर्वैर्यज्ञैः ᵛईजे इष्टवान् भवति । तथा ᵛशमीभिः कर्मभिः कृच्छ्रचान्द्रायणादिभिः ᵛशशमे शान्तश्च भवति । आग्नेयेन यागेन सर्वं फलं लभत इत्यर्थः । अपि च ᵛतं यजमानं ᵛयशसां यशस्विनां पुत्राणाम् ᵛअजुष्टिः अप्राप्तिः न ᵛएव ᵛनशते नैव प्राप्नोति । पुत्रवान् भवत्येवेत्यर्थः । तथा ᵛमर्तं मनुष्यं तम् ᵛअंहः पापं ᵛन नशते । तथा ᵛप्रदृप्तिः अनर्थहेतुः प्रदर्पश्च[२] तं ᵛन प्राप्नोति ॥

सूरो न यस्य दृशतिररेपा भीमा यदेति शुचतस्त आ धीः ।
हेषस्वतः शुरुधो नायमक्तोः कुत्रा चिद्रण्वो वसतिर्वनेजाः ॥ ३ ॥

सूरः । न । यस्य । दृशतिः । अरेपाः । भीमा । यत् । एति । शुचतः । ते । आ । धीः ।
हेषस्वतः । शुरुधः । न । अयम् । अक्तोः । कुत्र । चित् । रण्वः । वसतिः । वनेऽजाः ॥ ३ ॥

ᵛसूरो ᵛन सूर्यस्येव[३] ᵛयस्य अग्नेः ᵛदृशतिः दर्शनम् ᵛअरेपाः पापरहितम् । हे अग्ने ᵛयत् यस्य ᵛते तव ᵛशुचतः ज्वलतः ᵛधीः धारयित्री ज्वाला ᵛभीमा भयंकरा सती ᵛआ समन्तात् ᵛएति गच्छति । यः ᵛअयम् अग्निः ᵛहेषस्वतः शब्दयुक्ताः ᵛशुरुधो ᵛन[४] शुचः शोकस्य रोधयित्रीर्गाश्च ᵛअक्तोः । अक्तुरिति रात्रिनाम । तेन च तत्र संचारी राक्षसादिर्लक्ष्यते । राक्षसादेः स्वभूता ददातीति शेषः । सोऽयं ᵛवसतिः सर्वेषामावासभूतः ᵛवनेजाः अरण्ये जायमानः ᵛकुत्रा ᵛचित् क्वचिदेव स्थाने पर्वताग्रादौ ᵛरण्वः रमणीयो भवति ॥

तिग्मं चिदेम महि वर्पो अस्य भसदश्वो न यमसान आसा ।
विजेहमानः परशुर्न जिह्वां द्रविर्न द्रावयति दारु धक्षत् ॥ ४ ॥

तिग्मम् । चित् । एम । महि । वर्पः । अस्य । भसत् । अश्वः । न । यमसानः । आसा ।
विऽजेहमानः । परशुः । न । जिह्वाम् । द्रविः । न । द्रवयति । दारु । धक्षत् ॥ ४ ॥

---

१. ख-ङ्ग-न-भ-र-क्षयति । २. त-दर्पश्च । ३. य-सूर्य इव । ४. ख-घ-भ-न । न चार्थे ।

२८७. २. **माषाणामश्नीयात्**। ऋ. सं. १. २०. ६. अत्र द्रष्टव्यम्। मानुषाणामश्नीयात्–ऽ-मॅ-मु। यद्यपि लिखितपुस्तकेषु 'मानुषाणामश्नीयात्' इत्युपलभ्यते, तथापि 'माषाणामश्नीयात्' इत्येव भाष्यकाराणामभिप्रेतमासीदिति मॅक्समुल्लरमहाशयेन स्वकीयटिप्पण्यां लिखितम्॥

[७. ८] २८८. १५. **बृहद्भाः**। 'बृहत्। भाः' इति पदपाठः॥

[७. ९] २९०. १८. **संगन्ता**—मॅ। संगंतः (?) मु। संगता–ख-त३-न-भ; गंता–घ-ज्ञ-श्र-त१-२-४-श॥

[७. १०] २९२. २२. **रयीणाम्**—घ-ज्ञ। रयीणां सूर्यस्य–मॅ-मु इतरेषु च॥ २९२. २३. **दूतः अभवत्**—घ-ज्ञ-त१-२-य। अभवत्–मॅ-मु इतरेषु च॥ **यस्मादूदूतोऽभवत्**—*मॅ-मु। यस्मादूतोभवः–ख; यस्मादूदूतोभवः–ज्ञ-त२-३-भ-श; तस्मादूतोभवः–ज्ञ-त४; यस्मादूदूतोभव–न। इयं श्रुतिः कुत्रत्येति न विज्ञायते॥ २९२. २४. **विशः**—*मॅ-मु। विश्वः–ऽ॥

[७. ११] २९४. ५. **किमर्थमित्यत आह**—*मॅ-मु। किं-घ१; किंच–च; किमित्यत आह–इतरेषु॥

[७. १२] २९४. २४. **साह्वान्**—ख-च-ज्ञ-श्र-त२-य-श। सह्वान्–घ१-त३-४-न-भ-मॅ-मु॥

[७. १४] २९६. २. **ब्राह्मणाः**—ज्ञ-श। ब्रह्मणा–त१-२-३-४-भ-मॅ-मु॥

[७. १५] २९७. ४. **भगिनो याज्या**—*मॅ-मु। भागयाज्या–ज्ञ-त१; भगीयाज्या–श्र; भगियाज्या–त२-४-श॥ २९९. १७. **°प्राकारादिर्वा**—भ-*मॅ-मु। °प्रकारादिर्वा–ख-श्र-त-न; °प्रकारादि वा–श॥

[७. १६] ३००. १३. **युज्यते**—ख-भ। अयुज्यत–मॅ-मु इतरेषु च॥ ३०१. ११. **कामयस्व**—*मॅ-मु। कामय च–ख; कामय त्वं–इतरेषु॥ ३०१. १९. **यः**—*मॅ-मु-×॥ ३०१. २७. **प्रियासः**—मॅ-मु। प्रियाश्च–ख-घ-श्र-त१-२-३-४-न-भ-श१; प्रियाः–ज्ञ; प्रियासश्च–श२॥

[७. १८] ३०४. १६. **पञ्चविंशत्यृचम्**—श१-मॅ-मु। पंचविंशर्चे–इतरेषु। एतादृशोऽशुद्धः पाठः लिखितपुस्तकेषु बहुवारमुपलभ्यते॥ ३०४. १८. **त्वे ह यत्**—ऽ-मॅ। त्वे ह–मु-अनु.॥ **चतस्रोऽन्त्या**—ऽ–मॅ-मु। अंत्याश्चतस्रो–अनु.॥ ३०६. ३. **उत्सहमानम्**। उत्साहमानं–ऽ-मॅ-मु। ऋ. सं. ७. १८. १६, १८. अत्र द्रष्टव्यम्॥ **बाधमानम्**—ज्ञ। बोधमानं–मॅ-मु इतरेषु च। 'बाधमानम्' इति स्यादिति मॅक्समुल्लरमहाशयेन संभावितम्॥ ३०६. ११. **जालनिहिता**—ऽ। जले निहिता–मॅ-मु॥ ३०७. १२. **यथापूर्वम् अर्थम्**—ज्ञ-*मॅ-मु। यथापूर्वं मदर्थं–ख-श; यथापूर्वमर्थमित्–घ; यथापूर्व्यं मदर्थं–ज्ञ-त-न-भ॥ ३०७. १७. **सुतोकान्**—मॅ-मु। सतोकमानान्–ख; सुतोकमानान्–ज्ञ-त-न-भ श२; सुतुकमानान्–श१; सुष्वुपत्यसहितान्–च॥ ३०८. ५-६. **सपत्नान्...युद्धे**—ज्ञ-त१-*मॅ-मु। एतन्नास्ति इतरलिखितपुस्तकेषु॥ ३०९. १. **दुवोयुवे**—ऽ-मॅ-मु (? दुवोयवे)॥ ३०९. १०. **विश्वानि**—घ-ज्ञ-*मॅ। विश्वा विश्वानि–मु इतरेषु च॥ ३०९. २७. **अश्रीन्**—*मॅ-मु। अस्रीन्–घ; अस्रान्–इतरेषु॥ **वेश्यादेः कृत्यं सूच्यैवाकरोत्**—*मॅ-मु। वेश्यादेः कृत्यं सूच्यैव करोत्–ख; वेश्यादेः कृत्यसूत्यैवाकरोत्–ज्ञ-त३-श; वेश्यादेः कृत्यसूच्येवाकरोत्–त१-२-४-भ; वेश्यादेः कृत्यसूच्यैवाकरोत्–न। **वाश्यादेः कृत्यं सूच्यैवाकरोत्**—ज्ञ। अयमेव पाठः समीचीनः प्रतिभाति। 'वाशी ति तक्षणसाधनमायुधम्' (ऋ. भा. ५.५७.२)। 'पर्श्वादेः कृत्यं' इति

स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ३१०. ९. **वशीकरम्**—§-मॅ-मु (१ वशीकरणम्) **विन्द लभस्व यो भेदः**—*मॅ। विंद लभ यो भेदः–मु। विंद उभयोरभेदः–ख-त२-भ; विं लब्धवानसि उभयोरभेदः–श; वद उभयोरभेदः–श-त१-३-४-न-श ॥ ३११. ९. **द्वितीयार्थे**—मॅ-मु-× ॥ ३११. ११. **पालकस्य**—ख-घ-भ-य-मु। पालस्य–मॅ-इतरेषु च ॥ **मृषन्त**—घ-श त१-२-मु। मृषंति–मॅ इतरेषु च ॥ ३११. १४. **उपगच्छन्ति**—*मॅ-मु। अवगच्छंति–ख-न-भ अपगच्छंति–श-त-श ॥ ३११. २०. **इन्द्रम्**—घ१-*-मॅ। इंद्रः–ख-च-श-त-न-भ-श२; 'इंद्रं नास्ति–श; इंद्र–श१ ॥ ३११. २२. **अतदेवताकत्वात्**—श-भ-*मॅ। अतदेवताकरत्वात्–ख अतस्तदेवताकत्वात्–मु इतरेषु च ॥

[७. १९] ३१३. २. **तृन्नन्तत्वात्**—§-मु। तृनंतत्वात्–मॅ। एवं ३१६ पृष्ठे २३ २६ पङ्क्तयोरपि ॥ ३१३. ९. **मर्यैः**—श-मॅ-मु। एतन्नास्ति–ख-त२-भ; समर्यैः–श-त४-न-श; समार्ये–त३ ॥

[७. २०] ३१६. अध्यायप्रारम्भे 'वागीशाद्याः' इति श्लोकः मॅक्समुल्लरमुद्रितपुस्तके दृश्यते। परंतु अस्माभिः लिखितपुस्तकेष्वनुपालम्भादुपेक्षितः। मु-पुस्तकेऽप्ययं नास्ति केवलमष्टक-प्रारम्भेऽयं श्लोको दृश्यते॥ ३१६. ९. **मध्यंदिनः**। आश्वलायनश्रौतसूत्रेऽपि 'मध्यंदिनः' इत्येव पाठः। लिखितपुस्तकेषु बहुत्र 'माध्यंदिनः' इत्युपलभ्यते ॥ ३१८. ६. **प्रीणाति**—§-मॅ-मु। पृणाति–नि. ३. २० ॥ ३१८. १४. **यः**—*मॅ-मु- ॥ ३१८. २७. **वस्वी षु**। भाष्यकारैः 'वस्वीषु' इत्येकं सप्तम्यन्तं पदं कृत्वा व्याख्यातमनन्तरं पदपाठानुसारेण 'वस्वी सु' इति भिन्ने पदे कृत्वा व्याख्यानान्तरं कृतम् ॥

[७. २१] ३१९. २५. **गृहमध्यमग्नावा**—मॅ-मु। 'गृहमध्यमग्नौ वा' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ३२०. २०. **उत्सहेत**–*मॅ-मु। उत्सहेच्च–ख; उत्सहे च–घ-श-त१-२-३-४-न-भ-श; उत्सहते–श ॥ **दीव्यन्ति**—श-*मॅ-मु। दीव्यंत इति–ख-घ-त-श; दिव्यंत–श; दीप्यंते–न-भ ॥ ३२०. २१. **क्रीडन्त इति**—§-मॅ-मु। 'क्रीडन्तीति' इति भाव्यम्। अयं धातुः परस्मैपदी ॥

[७. २२] ३२२. २६. **अनुगुणः**—*मॅ। गुणः–§-मु ॥ ३२३. २९. **ह्वयति स्तौति**—*मॅ। स्तौति ह्वयति–ख-त३-न-भ-श; आह्वयति–घ; स्तौति आह्वयति–श-त१-२-मु; स्तौति–श; स्तौव ह्वयति–त४ ॥

[७. २३] ३२५. ९. **रुन्धन्तीति**—ख-श-श-त१-२-४-भ-श। संरुंधंतीति–त३-न-मॅ-मु ॥ ३२५. ११. **नहि चिकिते न ज्ञायते**—घ-श-*मॅ। नहि चिकिते ज्ञायते–ख-भ-मु। चिकिते ज्ञायते–श-त१-२-३-४-न-श ॥ ३२५. १८. **उप अस्थुः**—च-श-*मॅ-मु। उपस्थुः–ख-घ१-त१-२-४-भ; उपतस्थुः–श-त३-श ॥ ३२६. १२. **वज्रकल्पबाहुम्**—श-*मॅ-मु। वज्रकल्पनाहं–श-त१-३-४-न-भ; वज्रकल्पनार्हं–त२-श ॥

[७. २४] ३२६. २५. **मादयस्व**—*मॅ-मु। मादय–§ ॥ ३२७. ११. **इदं बर्हिरिमम्**—श-*मॅ-मु। **इदं बर्हिरिदं**–ख-घ-श-त३-न-भ-श; इंद्रं बर्हिरिदं–त१-२-४ ॥

२८७. २. **माषाणामश्नीयात्**। ऋ. सं. १. २०. ६. अत्र द्रष्टव्यम्। मानुषाणामश्नीयात्–ऽ-मॅ-मु। यद्यपि लिखितपुस्तकेषु 'मानुषाणामश्नीयात्' इत्युपलभ्यते, तथापि 'माषाणामश्नीयात्' इत्येव भाष्यकाराणामभिप्रेतमासीदिति मॅक्समुल्लरमहाशयेन स्वकीयटिप्पण्यां लिखितम्॥

[७. ८] २८८. १५. **बृहद्भाः**। 'बृहत्। भाः' इति पदपाठः॥

[७. ९] २९०. १८. **संगन्ता**—मॅ। संगंतः (?) मु। संगता–ख-त३-न-भ; गंता–घ-ज्ञ-ञ-त१-२-४-श॥

[७. १०] २९२. २२. **रयीणाम्**—घ-ज्ञ। रयीणां सूर्यस्य–मॅ-मु इतरेषु च॥ २९२. २३. **दूतः अभवत्**—घ-ज्ञ-त१-२-य। अभवत्–मॅ-मु इतरेषु च॥ **यस्मादूदूतोऽभवत्**—*मॅ-मु। यस्मादूतोभवः–ख; यस्मादूदूतोभवः–ज्ञ-त२-३-भ-श; तस्मादूतोभवः–ञ-त४; यस्मादूदूतोभव–न। इयं श्रुतिः कुत्रत्येति न विज्ञायते॥ २९२. २४. **विशः**—*मॅ-मु। विश्वः–ऽ॥

[७. ११] २९४. ५. **किमर्थमित्यत आह**—*मॅ-मु। किं-घ१; किंच–च; किमित्यत आह–इतरेषु॥

[७. १२] २९४. २४. **साह्वान्**—ख-च-ज्ञ-ञ-त२-य-श। सह्वान्–घ१-त३-४-न-भ-मॅ-मु॥

[७. १४] २९६. २. **ब्राह्मणाः**—ज्ञ-श। ब्रह्मणा–त१-२-३-४-भ-मॅ-मु॥

[७. १५] २९७. ४. **भगिनो याज्या**—*मॅ-मु। भागयाज्या–ज्ञ-त१; भगीयाज्या–ञ; भगियाज्या–त२-४-श॥ २९९. १७. **°प्राकारादिर्वा**—भ-*मॅ-मु। °प्रकारादिर्वा–ख-ञ-त-न; °प्रकारादि वा–श॥

[७. १६] ३००. १३. **युज्यते**—ख-भ। अयुज्यत–मॅ-मु इतरेषु च॥ ३०१. ११. **कामयस्व**—*मॅ-मु। कामय च–ख; कामय त्वं–इतरेषु॥ ३०१. १९. **यः**—*मॅ-मु-×॥ ३०१. २७. **प्रियासः**—मॅ-मु। प्रियाश्च–ख-घ-ञ-त१-२-३-४-न-भ-श१; प्रियाः–ज्ञ; प्रियासश्च–श२॥

[७. १८] ३०४. १६. **पञ्चविंशत्यृचम्**—श१-मॅ-मु। पंचविंशर्चे–इतरेषु। एतादृशोऽशुद्धः पाठः लिखितपुस्तकेषु बहुवारमुपलभ्यते॥ ३०४. १८. **त्वे ह यत्**—ऽ-मॅ। त्वे ह–मु-अनु.॥ **चतस्रोऽन्त्या**—ऽ–मॅ-मु। अंत्याश्चतस्रो–अनु.॥ ३०६. ३. **उत्सहमानम्**। उत्साहमानं–ऽ-मॅ-मु। ऋ. सं. ७. १८. १६, १८. अत्र द्रष्टव्यम्॥ **बाधमानम्**—ज्ञ। बोधमानं–मॅ-मु इतरेषु च। 'बाधमानम्' इति स्यादिति मॅक्समुल्लरमहाशयेन संभावितम्॥ ३०६. ११. **जालनिहिता**—ऽ। जले निहिता–मॅ-मु॥ ३०७. १२. **यथापूर्वम् अर्थम्**—ज्ञ-*मॅ-मु। यथापूर्व मदर्थं–ख-श; यथापूर्वमर्थमित्–घ; यथापूर्व्य मदर्थं–ञ-त-न-भ॥ ३०७. १७. **सुतोकान्**—मॅ-मु। सतोकमानान्–ख; सुतोकमानान्–ञ-त-न-भ श२; सुतुकमानान्–श१; सुष्ठुपत्यसहितान्–च॥ ३०८. ५-६. **सपत्नान्...युद्धे**—ज्ञ-त१-*मॅ-मु। एतन्नास्ति इतरलिखितपुस्तकेषु॥ ३०९. १. **दुवोयुवे**—ऽ-मॅ-मु (? दुबोयवे)॥ ३०९. १०. **विश्वानि**—घ-ज्ञ-*मॅ। विश्वा विश्वानि–मु इतरेषु च॥ ३०९. २७. **अश्रीन्**—*मॅ-मु। अस्रीन्–घ; अस्रान्–इतरेषु॥ **वेश्यादेः कृत्यं सूच्यैवाकरोत्**—*मॅ-मु। वेश्यादेः कृत्यं सूच्यैव करोत्–ख; वेश्यादेः कृत्यसूत्यैवाकरोत्–ञ-त३-श; वेश्यादेः कृत्यसूच्येवाकरोत्–त१-२-४-भ; वेश्यादेः कृत्यसूच्यैवाकरोत्–न। **वाश्यादेः कृत्यं सूच्यैवाकरोत्**—ज्ञ। अयमेव पाठः समीचीनः प्रतिभाति। 'वाशी ति तक्षणसाधनमायुधम्' (ऋ. भा. ५.५७.२)। 'पर्श्वादेः कृत्यं' इति

स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ३१०. ९. **वशीकरम्**—§-मॅ-मु (१ वशीकरणम्) ॥ **विन्द लभस्व यो भेदः**—*मॅ। विंद लभ यो भेदः—मु। विंद उभयोरभेदः—ख-त२-भ; विंद लब्धवानसि उभयोरभेदः—श; वद उभयोरभेदः—श-त१-३-४-न-श ॥ ३११. ९. **द्वितीयार्थे**—मॅ-मु-× ॥ ३११. ११. **पालकस्य**—ख-घ-भ-य-मु। पालस्य—मॅ-इतरेषु च ॥ **मृषन्त**—घ-श-त१-२-मु। मृषंति—मॅ इतरेषु च ॥ ३११. १४. **उपगच्छन्ति**—*मॅ-मु। अवगच्छंति—ख-न-भ; अपगच्छंति—श-त-श ॥ ३११. २०. **इन्द्रम्**—घ१-*-मॅ। इंद्रः—ख-च-श-त-न-भ-श२; 'इंद्रं' नास्ति—श; इंद्र—श१ ॥ ३११. २२. **अतदेवताकत्वात्**—श-भ-*मॅ। अतदेवताकरत्वात्—ख। अतस्तदेवताकत्वात्—मु इतरेषु च ॥

[७. १९] ३१३. २. **तृन्नन्तत्वात्**—§-मु। तृनंतत्वात्—मॅ। एवं ३१६ पृष्ठे २३, २६ पङ्क्तयोरपि ॥ ३१३. ९. **मर्यैः**—श-मॅ-मु। एतन्नास्ति—ख-त२-भ; **समर्यैः**—श-त४-न-श; समार्यै—त३ ॥

[७. २०] ३१६. अध्यायप्रारम्भे 'वागीशाद्याः' इति श्लोकः मॅक्समुल्लरमुद्रितपुस्तके दृश्यते। परंतु अस्माभिः लिखितपुस्तकेष्वनुपालम्भादुपेक्षितः। मु-पुस्तकेऽप्ययं नास्ति केवलमष्टक-प्रारम्भेऽयं श्लोको दृश्यते ॥ ३१६. ९. **मध्यंदिनः**। आश्वलायनश्रौतसूत्रेऽपि 'मध्यंदिनः' इत्येव पाठः। लिखितपुस्तकेषु बहुत्र 'माध्यंदिनः' इत्युपलभ्यते ॥ ३१८. ६. **प्रीणाति**—§-मॅ-मु। पृणाति—नि. ३. २० ॥ ३१८. १४. **यः**—*मॅ-मु- ॥ ३१८. २७. **वस्वी षु**। भाष्यकारैः 'वस्वीषु' इत्येकं सप्तम्यन्तं पदं कृत्वा व्याख्यातमनन्तरं पदपाठानुसारेण 'वस्वी सु' इति भिन्ने पदे कृत्वा व्याख्यानान्तरं कृतम् ॥

[७. २१] ३१९. २५. **गृहमध्यमग्रावा**—मॅ-मु। 'गृहमध्यमश्मा वा' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ३२०. २०. **उत्सहेत**—*मॅ-मु। उत्सहेच्च—ख; उत्सहे च—घ-श-त१-२-३-४-न-भ-श; उत्सहते—श ॥ **दीव्यन्ति**—श-*मॅ-मु। दीव्यंत इति—ख-घ-त-श; दिव्यंत—श; दीप्यंते—न-भ ॥ ३२०. २१. **क्रीडन्त इति**—§-मॅ-मु। 'क्रीडन्तीति' इति भाव्यम्। अयं धातुः परस्मैपदी ॥

[७. २२] ३२२. २६. **अनुगुणः**—*मॅ। गुणः—§-मु ॥ ३२३. २९. **ह्वयति स्तौति**—*मॅ। स्तौति ह्वयति—ख-त३-न-भ-श; आह्वयति—घ; स्तौति आह्वयति—श-त१-२-मु; स्तौति—श; स्तौव ह्वयति—त४ ॥

[७. २३] ३२५. ९. **रुन्धन्तीति**—ख-श-श-त१-२-४-भ-श। संरुंधंतीति—त३-न-मॅ-मु ॥ ३२५. ११. **नहि चिकिते न ज्ञायते**—घ-श-*मॅ। नहि चिकिते ज्ञायते—ख-भ-मु। चिकिते ज्ञायते—श-त१-२-३-४-न-श ॥ ३२५. १८. **उप अस्थुः**—च-श-*मॅ-मु। उपस्थुः—ख-घ१-त१-२-४-भ; उपतस्थुः—श-त३-श ॥ ३२६. १२. **वज्रकल्पबाहुम्**—श-*मॅ-मु। वज्रकल्पनाहं—श-त१-३-४-न-भ; वज्रकल्पनार्हं—त२-श ॥

[७. २४] ३२६. २५. **मादयस्व**—*मॅ-मु। मादय—§ ॥ ३२७. ११. **इदं बर्हिरिमम्**—श-*मॅ-मु। इदं बर्हिरिदं—ख-घ-श-त३-न-भ-श; इंद्रं बर्हिरिदं—त१-२-४ ॥

[७. २६] ३२९. २९. **नवमम्**—मॅ-मु । दशमं–§ । एतादृशी गणनाशुद्धिः लिखितपुस्तकेषु क्वचिदुपलभ्यते ॥ ३३०. १७. **हवन्ते**—श-*मॅ-मु । वहंते–ख-घ-झ-त३-४-न-भ-श; हवते वहंते–त१-२ ॥ ३३०. २३. **अपि अन्या अन्यानि**—*मॅ । अन्या अन्यान्यपि–मु । अन्या अन्यानि–ख-घ-झ-भ; अन्याप्यन्यानि–झ-त१-२-४; अन्याप्यन्या अन्यानि-त३-न-श ॥

[७. २७] ३३३. २. **मंहनीयाय**—§-मु । 'धनाय' इति विशेष्यमध्याहर्तव्यम् । मंहनीयायै–*मॅ । 'मंहनीयाय दानाय' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥

[७. २८] ३३३. ५. **पञ्चमत्वेन**—मॅ-मु; झ-त१-वर्जितेषु लिखितपुस्तकेषु च । पंचमेहनि–झ-त१ (प्रान्ते[1]) । 'चतुर्थत्वेन' इति भाव्यम् । उत्तरसूक्ते च 'महाव्रते निष्केवल्ये पञ्चमत्वेनास्य सूक्तस्य विनियोगः' इत्यप्यधिकं वक्तव्यम् । 'आ ते महः' इति सूक्तस्य (७. २५) प्रस्तावना द्रष्टव्या ॥ ३३३. २५. **न**। न व्याख्यातम् । नृन्न स्तोतृनिव–मु ॥ ३३४. १८. **प्रायच्छत्**—*मॅ-मु । प्रयच्छत्–ख-श-न-भ; प्रयच्छतु–घ१-झ; प्रयच्छेत्–च-त१-२-३-४-श ॥

[७. ३०] ३३६. २२. **सुहन्तुना**—श । सुहंतुनाम–इतरेषु । सुहंतुनाम्ना–मॅ-मु । ऋ. सं. ७. १९. ४. अत्र द्रष्टव्यम् । मॅक्समुल्लरमहाशयेन स्वकीयटिप्पण्यां 'सुहन्तुना' इत्येव संभावितम् ॥ ३३६. २८. **तदा**—थ-*मॅ-मु । तथा– इतरलिखितपुस्तकेषु ॥

[७. ३१] ३३७. १४. **गायत्रम्**—*मॅ । त्रैष्टुभं–§-मु ॥ ३३७. २०. **आहवनीयः**—§ मॅ-मु । 'आवपनीयः' इति भाव्यम् ॥ **तदर्थाः**—*मॅ-मु । तदर्थ–ख-भ; तदर्था–झ-त-न-श ॥ ३३९. ४. **व्याप्नुवती**—घ-न-श२; व्याप्नुवंती–ख-झ-त-भ-श१-मॅ-मु ॥ ३४०. २. **स्तोतृणाम्**—श-श१ । स्तोत्राणां–ख-झ-त३; स्तोत्रीणां–त१-२-४-न-श२ । स्तोत्राणि–*मॅ-मु ॥ **शत्रून्**—श । शत्रूणां–मॅ-मु-इतरेषु च ॥

[७. ३२] ३४०. १६. **प्रगाथादनन्तरम्**—श-*मॅ-मु । प्रगाथानंतरं–इतरेषु ॥ ३४०. १७. **मरुत्वतीया ऊर्ध्वम्**—श-त२-भ-*मॅ । मरुत्वतीयादूर्ध्वं–ख-त४-मु । मरुत्वतीयमूर्ध्वं–त१; मरुत्वतीयादूर्ध्वा–झ-त३-श ॥ ३४०. २१. **कस्तमिन्द्रेति**—मॅ-मु । अच्छावाकस्तमिंद्रेति–§ ॥ ३४०. २८. **तरणिरित्सिषासति**—मॅ । तरणिरित्सिषासतीति प्रगाथौ स्तोत्रियानुरूपौ–§-मु ॥ ३४०. ३०. **प्रगाथौ**—*मॅ-आश्व. श्रौ.; रथंतरस्य–ख । 'प्रगाथौ' नास्ति–झ-त३-न-भ-श-मु ॥ ३४१. ७. **त्वाम्**—श; त्वया–मॅ-मु इतरेषु च । 'त्वाम्' इति समीचीनमिति मॅक्समुल्लरमहाशयेनोक्तम् ॥ ३४१. २७. **सुता बभूवुः**—झ-*मॅ-मु । सुषुवः–ख; अभिषुतवंतः–घ; सबभूः–झ; सुबभूः–त२-३-४-न-श२; सुषुवतुः–भ; अभिषुता भवन्–य; सुबभूवुः–श१ ॥ ३४३. १. **अभिषुणुत**—मॅ-मु । अभिषुत–§ ॥

[७. ३३] ३४८. २१. **चूडाकर्मणि दक्षिणतो वसिष्ठानाम्** । इदं कृत्यमिति न ज्ञायते ॥ ३५०. २५. **दुर्ज्ञानान्**–मु । दुर्ज्ञानात्–घ-झ-त-न-श-मॅ ॥ ३५१. ५–८. **हे वसिष्ठाः...न शक्यः**—त१-२-मॅ जोधपूर-लिखितपुस्तके च । मु-पुस्तके 'गंभीरः' इति नास्ति 'अन्येन अन्वेतवे' इत्येतयोश्च मध्ये 'तव महिमा' इत्यधिकमस्ति । हे वसिष्ठाः एषां वो युष्माकं स्तोमोऽपि वातस्येव

---

१. Margin

प्रजवः यथा वातस्य (वातस्येव–श) प्रवेगो नान्वेतुमशक्यः (अन्येनान्वेतुं न शक्यः–श) तद्वदन्येनान्वेतवे अन्वेतुं न शक्यः—ख-त४-श; हे वसिष्ठाः एषां वो युष्माकं स्तोमोपि वातस्येव प्रजवः। यथा वातस्य प्रवेगः अन्येनान्वेतुं न शक्यते तद्वदन्येनान्वेतवे अन्वेतुं न शक्यः। किंच युष्माकं वक्षथः तेजः सूर्यस्येव सूर्यज्योतिरिव तथा युष्माकं महिमा समुद्रस्येव गभीरः गंभीर इव–घ॥ ३५१. २८-२९. **उतापि च...आजहार**—ऽ-मॅ-मु। अनन्वितार्थकमिदं वाक्यम्॥ ३५२. ५. **मित्रावरुणयोः**—घ-श-झ-भ-मु। अयोः—ख; मैत्रावरुणयोः—त४-श; मित्रवरुणयोः—त३-न-मॅ॥ ३५२. ८. **अहंभुवा युक्तम्**—श-त२-श१-मॅ-मु। 'स्वयंभुवा युक्तम्' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति॥ ३५२. १०. **तत्कुम्भे**—न-श-*मॅ-मु। तं कुंभे–ख-भ; तत्कुंभ–झ; तकुंभे–श-त१-२-३; नकुंभे–त४-न॥ ३५२. ११. **पतितं रेतः कलशे च**—ऽ-मॅ-मु। पतिते शुक्रे कलशेऽथ–बृहद्दे.॥ ३५२. १३. **महातपाः**—ऽ-मॅ-मु। महायशाः–बृहद्दे.॥ ३५२. १४. **इत्यभिधानं च**—मॅ-मु। इत्यभिधानं तु– बृहद्दे.॥ ३५२. १५. **सर्वतः पुष्करे तं हि**–ऽ-मॅ-मु। सर्वत्र पुष्करं तत्र–बृहद्दे.॥

[७. ३४] ३५३. १९-२०. **षोडशिनि...द्विपदा इति**—ऽ-मॅ-मु। मध्ये किंचिद्गतमिति प्रतिभाति। अत्र एवं भाव्यं—'षोडशिनि आ धूर्ष्वस्मा इति द्विपदा। सूत्रितं च–आ धूर्ष्वस्मा इति द्विपदा इति'॥ ३५४. १. **पूर्वस्यामिन्द्रस्य**—*मॅ-मु। पूर्वस्यामि—ख१झ-त१-३-४-न-भ; पूर्वस्यापि—ज-त२-श; पूर्वस्यामचि (? °मृचि)–श। 'पूर्वस्यामिदमः' इति पीटर्सन-महाशयस्वीकृतः[1] पाठो युक्ततर इति मॅक्समुल्लरमहाशयेनोक्तम्[2]। परंतु 'पूर्वस्यामिन्द्रस्य' इत्येव समीचीनः पाठ इत्यस्माकं प्रतिभाति। पूर्वप्रकृतार्थपरामर्शित्वे हि 'अस्मै' इत्यस्यानुदात्तत्वं भवति। न हि सर्वानुदात्तत्वे इदमः (इदंशब्दस्य) प्रकृतत्वं हेतुः स्यात्॥ ३५५. १९. **अस्मान्**—*मॅ-मु। नोस्मान्–ऽ॥ ३५६. ३. **स्तोतारः**—श। स्तोतः–मॅ-मु इतरेषु च॥ ३५६. २१. **प्रीयमाणाः**—मु। प्रियमाणाः–ऽ-मॅ। ऋ. सं. ७. ६६. १९. भाष्ये द्रष्टव्यम्॥ ३५७. २१. **अव्ययम्**—श-त२। अव्ययः–मॅ-मु इतरलिखितपुस्तकेषु च॥ ३५८. ५. **अनु जिहीताम्**—*मॅ। अनु जीहीतां–श; अनु जिहातां–मु इतरेषु च॥ ३५८. १३. **अस्मदीयम्**—श। ऋ. सं. ७. ५६. २५. अत्र द्रष्टव्यम्। अस्मभ्यं– मॅ-मु इतरेषु च॥

[७. ३५] ३५८. १९. **एव -- सु**—झ-त३-४-न-य-मॅ। एवतमस्तु–ख१-भ; एव-मुक्तस्तु–ज; एवमेतासु–श-त१-२-मु जोधपूर-लिखितपुस्तके च; एवमु–श॥

[७. ३६] ३६३. १६. **नान्यस्य कस्यचित्**—श-य। नान्यस्य चित्–झ-त२-३-४-न-श-मॅ-मु। नान्यचित्–त१। 'नान्यस्य कस्यचित्' इति स्यादिति मॅक्समुल्लरमहाशयेन संभावितम्॥ ३६४. १४. **युञ्ज्यात्**—*मॅ-मु। युंजान्–ख-झ-त३-न-भ-श; युंजन्–घ; युनक्ति–ज्ञ; युजान्–त१-२-४॥ ३६४. २३. **पूजयन्ति**—श१। पूजयंतु–मॅ-मु इतरलिखितपुस्तकेषु च॥

[७. ३७] ३६७. १५. **विवेषः**—घ-*मॅ। विवेष–मु इतरेषु च॥ ३६७. २८. **निवहेत्**—*मॅ-मु। न्यवहेत्–ख-घ-झ-त१-२-३-४-भ-श; न्विवहेत्–ज्ञ; न्युवहेत्–न॥ ३६८. ३. **ईशितव्या स्वभूता**—ऽ-मु। ईशितव्यास्वभूता–मॅ (–अस्वभूता १)॥

---

1. Handbook to Ṛgveda Maṇḍala VII pp. 11-12
2. Preface to the 2nd Edition Vol. IV p. 185.

[७. ३९] ३७२. १. **पृथिव्यां भवाः**—*मॅ । पृथिव्याः म–ख१; पृथिव्याः–घ-श१; म–ज; पृथिव्यासा–घ-त३-४-न-श२; पृथिव्याः सा–त१-२; पृथिव्याम–भ । पृथिव्यां–मु ॥ ३७२. १२. **आक्रामन्ति**—मॅ-मु । आक्रमंति-ऽ ॥ ३७२. १९. **गरणीयान्**—*मॅ । गरीयां–ख-ज्ञ-त२-३-न-भ-श । गरीयान्–घ-मु । गिरा–ज्ञ; गिरीया–त१-४ ॥ ३७३. ९–१०. **सर्वे देवाः...अस्मिन् सूक्ते**—ज्ञ-श । नः अस्मभ्यमर्कमर्चनीयमुपमं सर्वोत्कृष्टमन्नं यच्छंतु चंद्रा आह्लादकाः–घ; आह्लादयितारो देवा नोस्मभ्यं उपमं प्राप्तलक्ष्मीकं अर्कमर्चनीयं धनं यच्छन्तु ददतु सूक्ते–ज्ञ; 'चंद्राः.....ददतु' नास्ति–त१-२-४-य; 'सर्वे देवाः.....देवास्ते' नास्ति–ख-त३-न-भ । देवा नोऽस्मभ्यमर्कमर्चनीयमन्नमुपमं सर्वोत्कृष्टं यच्छंतु ददतु सूक्ते–*मॅ-मु । '(अयमंशः मॅक्समुल्लरमहाशयेन ऋ. सं. ७. ४०. ७. एतन्मन्त्रभाष्यानुसारेण निबद्धः) ॥

[७. ४०] ३७३. २०. **युष्मान्**—*मॅ-मु । युष्मदीयान्–ऽ ॥

[७. ४१] ३७६. १ **प्रातःऽजितम्** । भाष्यकारैः 'प्रातः जितम्' इति विभज्य व्याख्यातम् ॥ ३७६. ६. **यम्**—घ-*मॅ-मु । इतरेषु नास्ति ॥ ३७६. १५. **फलयुक्ताम्**—ज्ञ । सफलयुक्तां–मॅ-मु इतरेषु च ॥ ३७७. १. **वा**—*मॅ-मु–× । 'धनेन' इति मु-पुस्तके नास्ति । 'भगेन देवेन वयं भगवन्तः स्याम' इति पाठो युक्त इति मॅक्समुल्लरमहाशयः[1] अभिप्रैति ॥

[७. ४२] ३७८. ५. **सुते**—। 'सु ते' इति भिन्ने पदे भाष्यकारैः कृते ॥ ३७८. ६. **जनिमानि सुत्तः** । भाष्यकारैः 'जनिमा निसत्तः' इति पदच्छेदः कृतः ॥

[७. ४३] ३८०. ५. **साधकम्**—*मॅ । साधुकं–ऽ-मु ॥ ३८०. १२. **जननीम्**—*मॅ-मु । जननीं यं–श; जननीयं–इतरेषु । मातरम् इति षष्ठ्यर्थे द्वितीया स्यात् । मातुर्भर्तव्याः पुत्रा इव अस्माकं भरणीया इत्याद्यर्थो ज्ञेयः ॥ **अस्माकम्**—*मॅ-मु । अस्मात्–ख१-त१; अस्मान्–इतरेषु ॥ ३८०. १५. **जुहूः**—त२-श१; जहुः–त४-न । जुहुः–मॅ-मु इतरेषु च ॥ ३८०. २६. **यूयं आगन्तन**—ऽ-मॅ । यूयं यतिष्ठ आ गंतन–मु ॥

[७. ४४] ३८१. १४. **अश्विनौ देवौ**—ज्ञ-ज्ञ-त१-२-४-य-श-मु । अश्विनौ–घ । अश्विदेवौ–ख-त३-न-मॅ ॥

[७. ४५] ३८२. २६. **आ देवो यातु इत्येषा**—ऽ-मॅ । आ देवो यात्वित्येषा–मु । 'आ देवो यातु प्र द्यावेति (आश्व. श्रौ. ८. ८) इति । सावित्रे पशौ आ देवो यातु इत्येषा' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ 'आ देवो यातु प्र द्यावेति वासिष्ठम्' इति सूत्रम् (८. ८) । ऋ. सं. ७. ५३ प्रस्तावनायां द्रष्टव्यम् ॥

[७. ४६] ३८४. २२. **भवः** । अस्मादनन्तरं 'क्ष्म्यः' इति शब्दो गलितः स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥

[७. ४७] ३८५. २२. **अभिषवणपवनादिभिः**—ज्ञ । °वचनादिभिः–ज्ञ-त४-मॅ-मु । °सेचनादिभिः–श१; °एचनादिभिः–श२ ॥ **समस्कुर्वत अद्य**—*मॅ-मु । समस्कुर्वत अथ–ज्ञ-श; सम्यक्कुर्वत अथ–ज्ञ-त१-२-४ ॥

---

1 Preface to the 2nd Edition Vol. iv. p. 185.

[७. ४८] ३८७. २. **अस्मदभिमुखाः सन्तः**—श-झ-त२-४-य-श-मु। अस्मदभिमुखाः—मॅ इतरेषु च ॥ **मनुष्यहितं रथम्**—*मॅ-मु। नराईं रथं—घ; मनुष्यरथं—इतरेषु ॥ ३८७. ८. **उरु भवन्तीत्यृभवः**—*मॅ-मु। निरुभवन् ऋभवः—घ१; उरु भवन् ऋभव—च; उरु भवंन्यभवः—न; उरु भवंत्यृभवः—इतरेषु। 'उरु भवंतीत्यृभवः व्यत्ययेनैकवचनं ऋभवः संतः' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ३८७. २२. **मेथतेः**—*मॅ। मिथतेः—मु; मिम्नातेः—ख-त१-२-३-४-न-भ-श२; मिम्नतेः—झ; मिम्रातेः—श१; मिम्रातेः—ज्ञ; मित्थातेः—थ। 'मिथतेः' इति सम्यगिति मॅक्समुल्लरमहाशयेनोक्तम्[1]। मिथधातुः तुदादावपि पठितः स्यादिति मॅक्समुल्लरमहाशयः संभावयति। परंतु पाणिनीयधातुपाठे तुदादावयं धातुर्न दृश्यते। ऋ. सं. ७. ९३. ५. अत्र 'मेथतिः' इति दृश्यते ॥

[७. ४९] ३८८. १७. **निर्वृत्ताः**—ख-मु। निचृताः—घ। निवृत्ताः—मॅ इतरेषु च ॥

[७. ५०] ३८९. ७. **वैश्वदेवी**—श-*मॅ-मु। वैश्वानरी—इतरेषु ॥ ३९०. १९. **शिमिर्वधकर्मा अहिंसाप्रदाः**—ख१-भ-श१-*मॅ-मु। शमिर्वर्धनकर्मा असाप्रा—ज्ञ-त१-४; शमिवर्धनकामा असाप्रदा—झ; शिमिर्वधनकर्मा अहिंसाप्रदा—त३-न-श२; शिमिर्वधकर्मा अहिंसाप्रदा—थ ॥

[७. ५१] ३९०. २४. **आदित्यप्रहस्यैषानुवाक्या**—ख-भ-मु। °स्यैवानुवाक्या—मॅ इतरेषु च ॥ ३९०. २५. **यक्षदादित्यान्**—*मॅ-मु। यक्षदादित्यानां—§ ॥

[७. ५५] ३९४. २७. **पञ्चम्याद्याश्चतस्रो...उपरिष्टाद्बृहत्यः**—*मॅ-मु। द्वितीयाद्यास्तिस्र उपरिष्टाद्बृहत्यः पंचम्याद्यास्तिस्रोनुष्टुभः (°श्चतस्रो°—न-श)-ख-न-भ-श; द्वितीयाद्याश्चतस्रोनुष्टुभः पंचम्याद्यास्तिस्र उपरिष्टाद्बृहत्यः—झ-त ॥ ३९४. २८. **तल्लक्षणयोगात्**—*मॅ-मु। स्वलक्षण°—ख; स्वश्चलक्षण°—झ; चलक्षण°—ज्ञ-त१-२; श्वलक्षण°—न-भ ॥ ३९५.१. **सान्त्वयित्वा ह्यसूषुपत्**—*मॅ। सांत्वयित्वा ह्यसुष्वपत्—मु। सांतयित्वा प्रसुषयत् (प्रसूषपत्-भ)—ख-भ; सांतयित्वा ह्यसूषयत्—ज्ञ-झ-त१-२; सांतयित्वा ह्यसूषपत्—त३-न-श२; सांतयित्वा ह्यसूषुपत्—श१ ॥ ३९५. २. **प्रस्वापयामास**—झ-भ-श१। प्रकृतिस्थापयामास—ख१। प्रस्थापयामास—मॅ-मु इतरेषु च ॥ ३९५. ४. **गृहमेत्य तु**—ख-घ-झ-त२-३-४-न-भ-अनु. भा. ७. ५५। गृहमेत्या नु—च; गृहमध्य तु—श। गृहमेत्य नु—ज्ञ-मॅ-मु ॥ बृहद्देवतागतः पाठ एवं विद्यते—वरुणस्य गृहान् रात्रौ वसिष्ठः स्वप्न आचरत् ॥ प्राविवेशाथ तं तत्र श्वा नदन्नभ्यधावत। क्रंदंतं सारमेयं स धावंतं दृष्टमुद्यतम् ॥ यदर्जुनेति च द्वाभ्यां सांत्वयित्वा व्यसुष्वपत्। स तं प्रस्वापयामास जनमन्यं च वारुणम् ॥ **यदर्जुनेति**—§-मॅ-मु। यदर्जुनादि—अनु. भा. ॥ ३९५. ९. **कामयते तत्तद्देवता विशति**—भ। कामयते तद्देवता भवति—ख; कामयते तत्तद्देवा विशंति—झ-त१-श१; कामयते तत्तदेवा विशति—ज्ञ-श२; कामयते तत्तद्देवा विशति—त२-३-४-न। कामयते तत्तद्देवता भवति—निरु.। कामयंते तत्तद्देवा विशंति—मॅ-मु ॥

[७. ५६] ३९८. १९. **कम्पयितु(?तृ)वेगः**। कंपयितुवेगः—मॅ। 'कम्पयितुः' अथवा 'कम्पयिता' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति। कंपयितुर्वेगः—मु। ऋ. सं. १. ७९. १; १७४. ९; १०. ८९. ५ अत्र 'धुनिः' इत्यस्य 'कम्पयिता' इति व्याख्यानं कृतमस्ति ॥ ख१-झ१-त३-४-न-भ-य-श एतेषु लिखितपुस्तकेषु नवमदशममन्त्रयोर्भाष्यं नास्ति। ज्ञ-झ२-त१-२-

1. Preface to the 2nd Edition Vol. IV. p. 177.

मु-पुस्तकेषु नवममन्त्रस्य भाष्यमेवं विद्यते–' हे मरुतः सनेमि सनातनं दिवुं दीप्यमानं ऋष्टयाख्यं युष्मदीयमायुधं अस्मत्तः (अस्मदस्मत्तः–मु) सकाशात् युयोत पृथक्कुरुत । तथा युष्मदीया दुर्मतिः निग्रहबुद्धिः नोस्मान् इहास्मिन् लोके मा प्रणक् मा प्राप्नोत् ' । एतेष्वेव दशममन्त्रभाष्यमेवमस्ति–' हे मरुतः तुराणां यजमानार्थं त्वरया आगच्छतां वो युष्माकं नाम आहुवे आह्वयामि यत् येनाह्वानेन प्रियाः स्नेहयुक्ताः वावशानाः अस्माकमाह्वानं कृतमिति शब्दायमानाश्च संतः तृपत् संतुष्टाः भविष्यथ तदाह्वानमिति ' ॥ घ-ज-पुस्तकयोर्नवममन्त्रस्य भाष्यमेवम्–' सनेमि पुराणं परंपरागतं दिवुं दीप्यमानं वर्धमानमित्यर्थः वः युष्मत्सख्यं अस्मदस्मत्तः मा युयोत मा पृथक्कुरुत । किंच इह युष्मत्सख्ये नोस्मान् दुर्मतिः मा प्रणक् न प्राप्नोतु ' । मॅक्समुल्लरमुद्रितपुस्तकगतमेतन्मन्त्रद्वयभाष्यमेवास्माभिः समावेशितम् । एकस्य (C. Colebr·) लिखितपुस्तकस्य प्रान्ते मॅक्समुल्लरमहाशयेन तदुपलब्धम् ॥ ३९९. १७. **वक्षःऽसु रुक्माः** । भाष्यकारैः ' वक्षः सुरुक्माः ' इति पदच्छेदः कृतः ॥ ४००. १. **प्र**—मॅ-मु-× ॥ ४००. ९. **हविष्मति**—मॅ-मु । हविर्मति–ख-त । हविर्मनि–ज्ञ-न-भ-श ॥ ४०१. ११. **त्वदीयम्** । 'युष्मदीयम्' इति भाव्यम्॥ ४०१. १९. **क्षिप्रवन्तम्**—ऽ-मॅ-मु । भावप्रधानो निर्देशः । शैघ्र्यवन्तमित्यर्थः ॥ ४०२. ६. **परित्यक्त्वा** । ' परित्यज्य ' इति भाव्यम् ॥ ४०२. ९. **शोभनजनम्**—ऽ-मॅ-मु । ' शोभनजननम् ' इति स्यात् ॥

[७. ५७] ४०४. ८. **आभरणैरायुधैः**—*मॅ । आयुधैराभरणैः–ऽ-मु ॥ ४०४. १९. **हि प्रमादः**–*मॅ-मु । क्षिप्रमार्गः–ख; क्षिप्रयागः–ज; क्षिप्रमदः–इतरेषु ॥

[७. ५८] ४०७. २. **नमन्ताम्**—*मॅ-मु । नवतां–ख; नवंतां–इतरेषु ॥

[७. ५९] ४०८. १७. **न सहते**—ऽ-मॅ । ' सहते ' इति मु-पुस्तकस्थः पाठः समीचीनतर इति मॅक्समुल्लरमहाशयेन[1] लिखितम् ॥ ४०९. १३. **निषीदतु**—*मॅ-मु । निषेदतु–ऽ ॥ ४१०. १३. **यूयम्**—ऽ-मॅ । ' वः युष्मभ्यम् ' इति भाव्यम् । वः यूयं(!)–मु ॥ ४१०. १७-२९. **अत्र शौनकः...वावैतदाह इति**—ज्ञ-त१-२-मॅ-मु । ' त्रयाणां...वावैतदाह ' इति ख-ज्ञ-त३-४-न-भ-श-पुस्तकेषु नास्ति । घ-पुस्तके–' त्र्यंबकं त्रिलोकस्य मातृभूतं पालकमित्यर्थः सुगंधिं सुष्ठु व्यापकं पुष्टिवर्धनं यजमानस्य बलं वर्धयितारं एतादृशं रुद्रं यजामहे वयं यजमानऋत्विजः हविर्भिः पूजयामहे । किमर्थं । मृत्योः सकाशात् मुक्षीय मुंचेय । मामृतात् अमृतात् मोक्षात् नैव मुक्षीय इत्येतदर्थं । दृष्टांतः । बंधनाद्वृंताद्वुर्वारुकमिव उर्वारुकफलमिव तद्यथा ईषत्प्रयत्नेन मुंचत इति तद्वत् ' । त१-प्रान्तगतः पाठः–' वयं त्र्यंबकं त्रिलोचनं यजामहे । किंलक्षणं । सुगंधिं शोभनगंधोपेतं पुष्टिवर्धनं पुष्टेः पोषकं । प्रत्यक्षस्तुतिः । हे रुद्र मा मां मृतान्मरणान्मुक्षीय मां मोचय । कस्मात् कमिव । बंधनाद्वृंतादुर्वारुकमिव ' ॥ ४१०. २८. **चतुर्थपादार्थे मन्त्रस्य** । चतुर्थपादार्थमंत्रस्य–ज्ञ-त१-२-मॅ-मु ॥

[७. ६०] ४११. १५. **अदीन देव**—*मॅ-मु । अदीन देव वयं–ऽ ॥ ४११. २७. **वृजिना वृजिनानि**—घ१-ज्ञ-ज्ञ-त१-श-मु । **वृजिनानि**–ख-च-त२-३-४-न-भ-मॅ ॥ ४१२. २. **एतत्संख्याकान्**—ख-ज्ञ-श१ । ते तत्संख्याकान्–त३-भ-श२ । तत्संख्याकान्–त२-४-मॅ-मु ॥ ४१२. ६. **तदवान्तरगोव्यक्तिम्**—श१-*मॅ । तदवांतरगोयुक्तिं–मु । तदेवांतरेणाव्यक्तिं–ख-त३-भ; तदवांतरगोव्यक्तं–ज्ञ-त१-२-४; तदवीतरगोव्यक्तिं–ज्ञ; तदवांतरेणाव्यक्ति–न; तदवांतर-

1. Preface to the 2nd Edition Vol. IV. p. 177.

गोव्यक्ति–श२ ॥ ४१२. ३०. **कृतुं कर्तारम्**—ऋ-श२-*मॅ-मु । कृतं कर्तारं–त४; कर्तारं–इतरेषु ॥ ४१३. १० **व्यापितस्य** (?)–श-वर्जेषु लिखितपुस्तकेषु मॅ-पुस्तके च । व्यापितस्य–श-मु । 'वितस्य' इति स्यादिति प्रतिभाति । ऋ. सं. ८. ८३. ३; निरु. ६. २० अत्र द्रष्टव्यम् ॥ ४१४. १८. **उरुक्षयाय** । पदकाराः 'उरु क्षयाय' इति भिन्ने पदे पठन्ति ॥ ४१४. २५. **दुःखेन**—*मॅ-मु । दुःखानि–§ ॥

[७. ६१] ४१५. ८. **कृत्वा न** । भाष्ये न व्याख्यातम् ॥ ४१५. १३ **यत् कर्म**—मॅ घ-वर्जेषु लिखितपुस्तकेषु च । शोभनकर्माणौ कृत्वा समर्थेन कर्मणा–घ । यत् कृत्वा न कर्म–मु । 'यत्कर्मणा' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ४१५. २४. **ऋधग्यतः...विवेकात्**—*मॅ । ऋधक् सत्येन यतो विवेकात्–मु । ऋधक्सत्यो न यतः विवेकान्–ख१; ऋधग्यतः ऋधक्सत्यो न यतः विवेकान्–थ; ऋधग्यत सत्यानयतो–घ; ऋधक् सत्यान् यतः विवेकात्–ऋ-न-श; ऋधक् यत् ऋधक् सत्यानयतः–त३-भ ॥ ४१६. ७. **वां युवाभ्याम्**—मॅ-मु । वां युवां–घ; युवां–इतरेषु ॥ ४१६. १०. **वां युवाभ्याम्**—*मॅ-मु बहुषु लिखितपुस्तकेषु च । युवाभ्यां–ख-भ; वां युवां–त१ । सर्वेषु लिखितपुस्तकेषु 'युवां' इति विद्यते इति मॅक्समुल्लरमहाशयेनोक्तम् । वस्तुतः ७ पङ्क्तौ विद्यमानस्य 'युवाभ्याम्' इत्यस्य स्थाने 'युवां' इति सर्वेषु लिखितपुस्तकेषूपलभ्यते ॥ ४१६. ११-१२. **नाभूवन्न भवन्ति**—*मॅ-मु । अभूवन् भवति– घ-ऋ; भूवन् भवंति–इतरेषु ॥

[७. ६२] ४१७. ९ **कृत्वा...कृतः**—च-ऋ-*मॅ-मु । कर्ता(कृत्वा–ख१; कर्त्वा–ऋ-त४; कृत्वी-थ) सर्वस्य कर्ता कृतः–ख१-ऋ-त४-थ-न-भ-श; कर्ता स देवस्य कर्ता ततः–त१-२ ॥ ४१७. १८. **उद्गाः**—घ-*मॅ-मु । उदगात्–ख; उद्गाः उदगाः–ऋ-य-श; उदगाः–त-न-भ ॥ ४१७.२६. **शुचेर्दुःखस्य**—§-मॅ-मु । 'शुचो दुःखस्य' इति भाव्यम् । ऋ. सं. ६. ३. ३; ४९. ८ इत्यादिषु द्रष्टव्यम् ॥ ४१८. १६. **युवाभ्याम्?**—§-मॅ-मु । 'युवयोः' इति भाव्यम् ॥ ४१८. २०. **विश्रुतम्**—§-मॅ-मु । 'विश्रुतान्' इति भाव्यम् ॥

[७. ६४] ४२१. ६. **यज्ञस्य वा**—ख-भ । यज्ञस्य–मॅ-मु इतरेषु च ॥ ४२१. १०. **पुष्टिम्**—§-मॅ-मु । 'वृष्टिम्' इति पदपाठः ॥ **तत्साधिकाम्**—मॅ । तत्साधकां–§-मु ॥ ४२१. २५. **स्तोमेन**—मॅ-मु । स्तोमेति–ख-ऋ-त-न-भ-श । स्तौमिति–घ ॥ ४२१. २७. **जनम्**—§-मॅ-मु । एतस्मात्पूर्वं 'तम्' इति पदमावश्यकमिति मॅक्समुल्लरमहाशयः ॥

[७. ६५] ४२२. २४. **पुत्रादिरूपाः**—*मॅ-मु । पुत्रादिरूपा–§ ॥

[७. ६६] ४२३. २७. **आद्यन्तौ**—*मॅ । अद्यतौ–न । आद्यंतौ–मु इतरेषु च ॥ ४२४. ५ **अहोरात्रे**—ख-भ-तै.सं. । अहोरात्रं–मॅ-मु इतरलिखितपुस्तकेषु च ॥ ४२४. १५. **स्तयो गृहाः**—*मॅ । सूर्यो ग्रहाः–ख-भ; स्तिया ग्रहाः–घ; स्तयो ग्रहाः–त-न-श२-मु; स्तियो ग्रहाः–श१ । ऋ. सं. ७. १९. ११; १०. ६९. ४. अत्र द्रष्टव्यम् ॥ ४२४. १७. **फलवन्ति**—ख-भ । सफलवंति–मॅ-मु इतरेषु च ॥ ४२५. १८. **विप्राः** । 'विप्रा' इति विसर्गरहितः पदपाठः ॥ **इयमेव**—त१-भ-श-मु । इयं मम–ख; इयं मे–घ; इयमव–ऋ; इयं मेव–त२-४; इयं मे च–ऋ-त३-न-मॅ ॥ ४२६. ४. **अदनसाधनः**—§-मॅ-मु । 'अदनसाधनम्' इति सम्यक् ॥ ४२६. ५. **क्षित्यादीनि**—§-मॅ-मु । एतत्पदमनावश्यकम् ॥ ४२७. १८-१९. **सूर्यं वहन्ती°**—*मॅ-मु ।

अयं वहंती°–ख-ज्ञ-त२-३-४-न-भ-श; अश्वं वहंती°–ज्ञ-त१(प्रान्ते); अश्वो वहंती°–घ ॥ ४२८. १६. **प्रीयमाणौ**—ज्ञ-त२-४-न-म-मु । प्रियमाणौ–मॅ इतरेषु च ॥

[७. ६७] ४२९. २३. **युवाभ्याम्**—(?)–ऽ-मॅ-मु । 'युवयोः' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ४२९. २५. **अतो वाम्**—*मॅ-मु । अति वा–ख-ज्ञ-त्१-२-भ; अती वा–ज्ञ-त३-४-न-श ॥ ४३०. २३. **सख्ये**—च-भ-*मॅ-मु । सख्येन–इतरेषु ॥ ४३१. ३. **तद्रथानुकूलाः**—च-*मॅ । तद्रथाश्वाः–ख-मु । तद्रथाकुलाः–घ१; तद्रथान्कुलाः–त-न-भ; तद्रथात्–ज्ञ-श ॥

[७. ६८] ४३२. १६. **तच्छ्रुतम्**—*मॅ-मु । तश्रुतं–ख१-ज्ञ; तं श्रुतं–इतरेषु ॥ ४३२. २१. **सूर्यायाः**—ऽ-मॅ-मु । 'सूर्यया' इति युक्तम् ॥ ४३३. ९. **ऋबीसम्**—ज्ञ-भ-श२-*मॅ-मु । ऋष्वावासं–ख; ऋषिसं–घ१; ऋषिआवासं–च; ऋबीस–ज्ञ-त१-२-३-न; ऋस–त४; ऋचीषं–श१ ॥ ४३३. १०. **युवाभ्याम्**?—ऽ-मॅ-मु । 'युवयोः' इति भाव्यम् ॥ ४३३. १६. **प्रत्याप्त्यै**—घ१-*मॅ-मु । प्रत्यायं–ख; प्रत्यय–च; प्रत्याप्त्य–ज्ञ-त-न-श; प्रत्यादयं–भ ॥ ४३३. १९. **च्यवानस्य**—मॅ-मु । च्यवनस्य–ऽ ॥ ४३४. ५. **धनादात्रे**—भ-श२-*मॅ-मु । धनदात्रे–इतरेषु ॥ ४३४. ९. **नदीं तां**—ज्ञ-श-*मॅ-मु । नदी तां– त१-४; नदीनां–इतरेषु ॥ ४३४. १९. **वर्धयतु**—मॅ-मु । वर्धयत्–ऽ ॥

[७. ६९] ४३५. २२. **पर्यवृणीत**—घ-*मॅ-मु । परिवृणीत–इतरेषु ॥ ४३६. १२. **ह्वन्ते**—घ-ज-*मॅ-मु । जरंते–इतरेषु ॥ ४३६. १३. **नियच्छन्तु**—*मॅ । नयंतु–ख-भ; नियतु–घ; नियंतु–मु-इतरेषु च ॥ ४३६.१८. **विक्षिप्तम्**—ऽ-मॅ-मु । 'निक्षिप्तम्' इति स्यादिति मॅक्समुल्लरमहाशयः ॥

[७. ७०] ४३६. २९. **प्रातरनुवाक आश्विनशस्त्रे**—मॅ । प्रातरनुवाकाश्विनशस्त्रे–ऽ-मु ॥ ४३७.५. **यद्यं यागम्**—*मॅ । यद्यदा–ख-घ-न-भ; यद्यागं–ज्ञ-त-श-मु ॥ ४३७.९. **अश्वः**—भ-*मॅ । अत्यथः–ख; 'अश्वः' नास्ति–घ-मु; अत्यः–ज्ञ-त-श२; अद्य–श१ ॥ ४३७. १५. **वा वाम्**–*मॅ-मु । व्यवां–ख; वा–ज्ञ-त४-श; वां–घ-ज्ञ-त१-२; युवा–त३-न-भ ॥ ४३७. १६. **प्रवर्ग्यश्च**—ज भ-मु । प्रकार्यश्च–ख१ । प्रवर्गश्च–मॅ-इतरेषु च । ऋ. सं. १. १६४. २६; ७. १०३. ८; ८. ९. ४ अत्र द्रष्टव्यम् । अयमेव समीचीनः पाठ इति मॅक्समुल्लरमहाशयेनोक्तम्[1] ॥ ४३७. २७. **निसदन्ता**—घ-मु । सदंता–ख-ज्ञ-त-भ-श-मॅ ॥ ४३८. ५. **देवा देवौ**। 'देवौ' इत्येव पदपाठः ॥ ४३८. ६. **चनिष्ठम्**। 'एतत्पदं सायणेन क्रियापदत्वेन इष्ठन्प्रत्ययान्तत्वेन वा व्याख्यातम्' इति मॅक्समुल्लरमहाशयेन स्वकीयटिप्पण्यामुक्तम् ॥ ४३९. १. **अथ सप्तम्या स्तुतिमुपसंहरति**—ऽ । एतन्नास्ति मॅ-मु-पुस्तकयोः ॥

[७. ७१] ४३९. ५. **एकोनविंशति°**—*मॅ । एकविंशति–ऽ-मु ॥ ४३९. २३. **इरान्नम् तदभावं दारिद्र्यमित्यर्थः** । ऋ. सं. ८. ६०. २०; १०. ३७. ४. अत्र द्रष्टव्यम् । इरान्नं तदन्नदारिद्र्यमित्यर्थः—ज्ञ-त३-न-भ-मॅ । इरान्नं तद्रहितं दारिद्र्यमित्यर्थः–मु । इरान्नं तदभाव दद्यदित्यर्थः–ख; अन्नरहितं दारिद्र्यमित्यर्थः–घ; इरान्नं तेदत्रदारिद्र्यमित्यर्थः–ज्ञ-त१-२-४; इरान्नं तदलाभं न दारिद्र्यमित्यर्थः–श१; इरान्नं तदन्नं दारिद्र्यमित्यर्थः–श२ ॥ ४३९. २९.

1. Prefece to the 2nd Edition Vol. IV. p. 177

सुखेन योजयन्तः ? ॥ ४४०. ५. **यः**—*मॅ–मु–X॥ ४४०. ९. **अन्य आह**– श । अथवाह-ख-मॅ । अथवा–मु । अथाह–ख-श-त३-न-भ; अथ आह–झ-त१-२-४ । ऋ. सं. ६. ४२. २ अत्र द्रष्टव्यम् । 'अन्य आह' इति स्यादिति मॅक्समुल्लरमहाशयेनोक्तम् ॥ **वाम्**––*मॅ-मु । वा–§ । ४४०. १८. **न्यपारयतम्**—*मॅ-मु । निवारयतं–श१; निपारयतं–इतरेषु ॥

[७. ७२] ४४१. ४. **गोप्रदेन**—श-*मॅ-मु । गोप्रदेशेन–इतरेषु । 'गोप्रदेशनेन' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ४४१. १२. **बन्धुत्वातिशयम्**—ख-भ-*मॅ-मु बंध्वातिशयं—ज्ञ-त१-२; बंध्वीतिशयं–झ-त३-४-न-श२; बंध्वतिशयं–श१ ॥ ४४१. २४ **तच्छुक्रं गर्भकाम्यया**—*मॅ । तं शुक्रं गर्भकाम्यया–मु । तच्छुक्रं गतकाम्यया–य; तं शुक्र गतकाम्यया–इतरेषु ॥ बृहद्देवतायां त्वेवं पाठो दृश्यते–अभवन्मिथुनं त्वष्टुः सरण्यूस्त्रिशिराः सह स वै सरण्यूं प्रायच्छत् स्वयमेव विवस्वते ॥ ततः सरण्यां जज्ञाते यमयम्यौ विवस्वतः । तौ चाप्युभौ यमावेव ज्यायांस्ताभ्यां तु वै यमः ॥ सृष्ट्वा भर्तुः परोक्षं तु सरण्यूः सदृशीं स्त्रियम् । निक्षिप्य मिथुनं तस्यामश्वा भूत्वापचक्रमे ॥ अविज्ञानाद्विवस्वांस्तु तस्यामजनयन्मनुम् । राजर्षिरभवत्सोऽपि विवस्वानिव तेजसा ॥ स विज्ञाय त्वपक्रान्तां सरण्यूमश्वरूपिणीम् । त्वाष्ट्रीं प्रति जगामाशु वाजी भूत्वा सलक्षणः ॥ सरण्यूश्च विवस्वन्तं विदित्वा हयरूपिणम् । मैथुनायोपचक्राम तां च तत्रारुरोह सः ॥ ततस्तयोस्तु वेगेन शुक्रं तदपतद्भुवि । उपाजिघ्रच्च सा त्वश्वा तच्छुक्रं गर्भकाम्यया ॥ आघ्रात मात्राच्छुक्रात्तु कुमारौ संबभूवतुः । नासत्यश्चैव दस्रश्च यौ स्तुतावश्विनाविति ॥ ४४२. १. **अश्विना** 'अश्विनौ:' इति पदपाठः ॥ ४४२. २. **परिवृढानि**—*मॅ-मु । कर्मपरिवृढानि–§ ॥

[७. ७३] ४४३. २०. **बोधयति**—§-मॅ-मु ? ॥ ४४३. २९. **सोमान्**—ख-घ-ज्ञ-त१ २-भ । सोमा–झ-त३-४-श; समा–न; सोमाः–*मॅ-मु ॥ ४४३. ३०. **समगच्छतम्**—ख-भ गच्छतं–घ-त४; संगच्छतं च–ज्ञ-त१-२; संगच्छंत–झ । समगच्छंत–*मॅ-मु । 'सोमान् समगच्छतम्' इत्ययं पाठः समीचीनतरः इति मॅक्समुल्लरमहाशयः[1] ॥

[७. ७४] ४४४. ७. **प्रागाथम्**—ख-त२-४-भ-श-मु । प्रगाथं–मॅ इतरेषु च ॥ ४४४ २५. **नियमयतम्**—श । नियमतं (?) मॅ-मु इतरेषु च ॥ ४४५. ४. **ईदृशप्रार्थनाकरणमेव हिंसा** । प्रार्थनाया अकरणमिति विग्रहः ॥

[७. ७५] ४४६. ३. **गा अश्वान्**—मॅ । गावोश्वान्–§-मु ॥ **धान्यम्**—मॅ-मु । धान्यान्-ख-त४; धन्यान्–इतरेषु । 'प्राप्नुयात्स हिरण्यादि नानारूपं धनं बहु । अश्वांश्च पुरुषान् धान्यं स्त्रियं वासांस्यजाविकान्' ॥ इति निर्णयसागरमुद्रितऋग्विधानस्थः पाठः ॥ ४४६. १०. **इत्यत्र**—श इत्यनु–ख; इत्यत्–झ-त-न-भ । इत्याद्–मॅ-मु ॥ ४४६. ११. **इति लोपः**—§-मॅ-मु । 'इति तिलोपः' इति पाठः समीचीनः स्यादिति मॅक्समुल्लरमहाशयेनोक्तम् ॥ ४४७. ६. **निषादपञ्चमा श्चत्वारो वर्णास्तान्**—घ-ज्ञ-त१-२ । निषादपंचमाश्चतुरो वर्णाः–इतरलिखितपुस्तकेषु । निषादपंचमा श्चत्वारो वर्णाः–मु । निषादपंचमांश्चतुरो वर्णान्–*मॅ । 'निषादपंचमाश्चत्वारो वर्णास्तान्' इत्ययमेव पाठः समीचीनतर इति मॅक्समुल्लरमहाशयनोक्तम्[2] ॥ **परि जिगाति परिगच्छति**—घ-ज्ञ-त१-२-मु परि जिगाति–मॅ इतरेषु च ॥ ४४७. १३. **उषोनामकस्य** । 'उषोनाम्नः' इति तात्पर्यम् ॥ ४४७

१४. **अत्रैको योगरूढः**— ज्ञ-श-*मॅ-मु। अत्र योगरूढः–ख-भ; अत्रैको यागरूढः–ज्ञ-त१-२-४; अत्रैयो योगरूढः–त३-न ॥ ४४७. १५. **विचित्ररश्म्याख्यधना**—*मॅ-मु। °रश्माख्य°–§ ॥

[७. ७६] ४४९. १२. **जार इव पत्याविव**। ' जारःऽइव ' इति पदपाठः ॥ ४४९. १४. **अत्यञ्चैव**—ख-ज्ञ-भ-श-*मॅ-मु। अत्यञ्जैव–त३-न ॥ ४४९. १५. **यती...व्यभिचारिणीव**—*मॅ-मु। यती पति परित्यजे (परित्यजेत–त३-भ) ततः संचरंती व्यभिचारिणीव (°चरिणीव–ख)–ख-त३-भ; यती पतिं परित्यजेत् (परित्यजेत–श) ततः संचरंतीत्यभिचारिणीव–ज्ञ-ज्ञ-त१-२-४-श। यथा व्यभिचारिणी जारं न त्यजति तद्वत् सूर्यमपरित्यजंती त्वं–घ ॥

[७. ७७] ४५०. २८. **बाधमानम्**—मॅ-मु। बाधमानं वा–§ ॥ ४५१. ४ **उदिता च**—मॅ-मु। उदित्वा–ख; उदित्वा च–इतरेषु ॥ ४५१. ५. **हितरमणीयवर्णोपेता**—मॅ-मु। हितरमणीयोपेता–§ ॥ ४५१. १५. **कीदृश्युषाः**—§-मॅ-मु। ' ईदृश्युषाः ' इति युक्ततरम् ॥ ४५२. १. **इषमन्नम्**—घ-ज। इषं–मॅ-मु इतरेषु च ॥

[७. ७८] ४५३. १९. **अस्माकाः**—§-मॅ-मु। ' आस्माकाः ' इति भाव्यम् ॥

[७. ७९] ४५४. १८. **रात्र्यवसानस्य**—*मॅ-मु। रात्रिवसनास्य–ख; रात्रिवसानस्य–ज्ञ-त-न-श; रात्रिवसनस्य–भ ॥

[७. ८०] ४५५. २८. **पुत्रप्रदाः**—त३-वर्जलिखितपुस्तकेषु मु-पुस्तके च। पुत्रदाः–त३-मॅ ॥

[७. ८१] ४५७. १. **रत्नं न**—घ-ज्ञ-मु। रत्नं–मॅ इतरेषु च ॥

[७. ८२] ४५८. १९. **युवाम्**—§-मॅ-मु। ' युवाभ्याम् ' इति भाव्यमिति मॅवसमुल्लरमहाशयो मन्यते ॥ ४५८. २०. **ओजो नामाष्टमी दशा**। ऋ. सं. ८. ७६. ५. द्रष्टव्यम्। ओजो नाष्टमी दशा–ज्ञ-त-श। त-वर्गगत एकस्मिन् पुस्तके (खुपेरकरशास्त्रिणां) ' मा ' इत्यक्षरं ' ना ' इत्यस्यानन्तरं निवेशनार्थं प्रान्ते लिखितमस्ति। ओजः साष्टमी दशा–ख-न-भ-मॅ-मु। इदं वचनं कुत्रत्यमिति न ज्ञायते ॥ ४५८. ३१. **अस्य मदे...पिन्वदपितः**। ' अस्य मदे जरितारिन्द्रोऽपिन्वदपितोऽजिन्वदजुवः ' इति शा. श्रौ. सूत्रम् (८. २५. १) ॥ ४५९. १५. **जनिमन्ति**—ख-ज्ञ-न-भ-श। संति–ज्ञ-त१-२-४; जतिमंति–त३। जातिमंति–*मॅ-मु। ऋ. सं. १०. १५३. ५. अत्र द्रष्टव्यम् ॥ ४६०. ५. **मर्त्यस्य**। ' मर्तस्य ' इति पदपाठः ॥ ४६०. ७. **व्याप्नोति**—त३-वर्जेषु लिखितपुस्तकेषु मु-पुस्तके च। प्राप्नोति–त३-मॅ ॥ ४६०. २२. **वां युवाम्**—ख-घ-ज्ञ-त१-२-४-भ। युवां–श-मु। वां–त३-न-मॅ ॥ ४६१. १. **नोऽस्माकम्**। ' नः ' इति पदमृचि नास्ति ॥

[७. ८३] ४६१. ४. **ऐन्द्रावरुणम्**—*मॅ-मु। मैत्रावरुणं–§ ॥ ४६१. १५. **उपक्षपयितृणि**—श१-मु। उपक्षयित्रीणि–ख-न; उपक्षयितृणि–घ; उपक्षपयित्रीणि–मॅ इतरलिखितपुस्तकेषु च ॥ ४६२. ११. **अरक्षतम्**—*मॅ-मु। रक्षितं–घ; रक्षतं–इतरेषु ॥ ४६२. ३१. **अरक्षतम्**—*मॅ-मु। रक्षितं–घ; रक्षतं–इतरेषु ॥ ४६३. १७. **श्वितिम्**—ज्ञ-त३-न-श। श्वितं–मॅ-मु इतरेषु च। ऋ. सं. २. ३३. ८; १०. ४६. ७. अत्र द्रष्टव्यम् ॥ ४६३. १८. **स्तुत्या च**—त३-वर्जेषु लिखितपुस्तकेषु मु-पुस्तके च। स्तुत्या–त३-मॅ ॥

[७. ८४] ४६५. १३. **मीळ्**—घ१-ज-ञ-ञ-त२-४-न-भ-मु। मिञ-ख१; मीन्-श१; मीड्-त३-मॅ॥

[७. ८६] ४६९. ११. **ह्येव**—ऽ-मॅ-मु। उ एव एनं-कौ. उ.॥

[७. ८७] ४७१. १८. **उपदेशगन्यानि**—ख-घ-ञ-त१-२-श१-मु। उपदेशे गभ्यानि-मॅ इतरेषु च॥

[७. ८८] ४७२. २०. **वारुणम्**—मॅ-मु। इंद्रावरुणौ-घ; मैत्रावरुणं-त३; ऐंद्रावरुणं-इतरेषु[1]॥ **प्र शुन्ध्युवम्**—ऽ-मॅ-मु। 'प्र शुंध्युवमंत्या पाशविमोचनी' इत्यनुक्रमणिका॥ ४७३. २३. **अवोभिः रक्षणैः स्वपां स्वपसम्**। ऋक्पाठस्तु 'स्वपा महोभिः' इति॥ ४७४. १८-१९. **ध्रुवा सु .....न गच्छति**। 'ध्रुवासु त्वासु क्षितिषु जपन् बद्धः प्रमुच्यते। तिष्ठन् रात्रौ जपेदेनां विपाशः सन् प्रमुच्यते॥' इति निर्णयसागरमुद्रितऋग्विधानपुस्तकस्थः पाठः॥

[७. ८९] ४७५. ३. **सु शोभनम्**। सुशोभनं-मॅ-मु। ऋ. सं. ८. १. १४. अत्र मॅ-पुस्तकेऽपि 'सु शोभनम्' इति भिन्ने पदे॥

[७. ९०] ४७६. २७. **वाज्यस्य**—ऽ-मॅ। 'वाजी अस्य' इति पदपाठः। वाजी अस्य प्राप्तस्य-मु॥ ४७७. २०. **हिताचरणपरा**-श२। हिताहिताचरणया पापरहिता-श१। हिताहिताचरणपरा-मॅ इतरेषु च। हिताः हिताचरणपरा-मु॥ ४७७. २९. **स्वकीयेन विहितेन**। स्वकीयत्वे विहितेन-त३-मॅ-मु। स्वकीयेनैव-ख; स्वकीयस्वविदितेन-ञ-त१-२-४; स्वकीयेन विदितेन-घ; स्वकीयत्वेतिहितेन-ञ; स्वकीयेत्वे विहिवे-न; स्वकीयेनैव हिते-भ; स्वकीयत्वेन विहितेन-ञ॥ ४७८. ८. **शूरभटैः**-ख-ञ-ञ-त१-२-न-भ-श। भटैः-घ-मु। सूरभटैः-त३-४-मॅ॥ ४७८. १५. **स्ववसे शोभनरक्षणाय**। 'सु अर्वसे' इति भिन्नः पदपाठः॥

[७. ९२] ४८१. २९. **वायव्यतृचस्य**—ख-भ-मु। वायवतृचस्य-मॅ। इतरेषु च॥

[७.९३] ४८३. १७. **युवं युवाम्**—ऽ-मॅ। 'युवम्' इत्यृचि नास्ति। युवां-मु॥ ४८३. २५. **देवानत्र**। देवानात्र-ख; देवास्तत्र-ञ-त१-२; देवातत्र-इतरलिखितपुस्तकेषु। देवांस्तत्र-मॅ-मु॥ ४८४. १७. **कुर्वन्त्यौ**—ऽ-मॅ-मु। 'कुर्वत्यौ' इति भाव्यम्। **तनूरुचा - - - हतं हिंस्तम्**—मॅ। तनूरुचा आत्मीयेन तेजसा सं (संपन्ने-मु) यत् ये शूरसाता शूरसातौ रणे यतैते जेतुं यत्नं कुर्वत्यौ वैरिसेने देवयुभिः देवान् कामयमानैः सह विदथे यज्ञे अदेवयुं सत्रा हतं सततं (संततं-ञ-मु) हिंस्तं-ञ-त१-२-मु। शूरसाता शूरसातौ रणे यतैते यत्नं कुर्वत्यौ वैरिसेनेन तनूरुचा आत्मीयेन तेजसा सं यत् ये सत्रा हतं सततं हिंस्तं-घ॥ ४८४. २५. **उप आ यातम्**—घ-*मॅ-मु। उप यातं-इतरेषु॥ ४८५. १४. **मा**—*मॅ-मु-×॥

[७.९४] ४८६.२०. **सनिं धनम्**—ख-ञ-त३-भ-श। सनि धनं-घ-त२-४-न-मॅ-मु। ऋ.सं. १. ५६. २; ६. ६१. ६. इत्यादिषु द्रष्टव्यम्॥ ४८७. १९. **गिरा चित्**—ख-घ-भ। गिरा च-मॅ-मु इतरेषु च॥ ४८७. २७. **द्रढयति**—मु। दृढयति-ऽ-मॅ। ऋ. सं. ८. २. १३. अत्र द्रष्टव्यम्॥

[७. ९५] ४८८. १. **प्रथमे छन्दोमे...प्रउगम् इति**-ऽ-मॅ-मु। (?) 'प्रथमे छन्दोमे प्रउग-शस्त्रे प्र क्षोदसा इति सारस्वतस्तृचः। सूत्रितं च—'प्र क्षोदसा धायसा सस्र एषेति प्रउगमिति' इति

---

1. See Max Müller's Preface to the 2nd Edition Vol. IV. p. 183.

स्यात् ॥ ४८९. ६. **तत्स्तवनमिति**–भ-मु । तस्तवनमिति–श१; तत्सवनमिति–मॅ **इतरेषु च** ॥ ४९०. ३. **यन्तुः**—ज्ञ-*मॅ-मु । एतन्नास्ति–ख-घ-भ-श१; यंतु–त१-२-३-४-न; **तु**–श२ ॥

[७. ९६] ४९०. ६-७. **द्वितीया...प्रस्तारपङ्क्तिः**—*मॅ-मु । द्वितीया प्रस्तारपंक्तिः तृतीया सतोबृहती–घ; द्वितीया प्रस्तारपंक्तिः—श१; तृतीया प्रस्तारपंक्तिः– इतरेषु ॥ **सरस्वदेवताकः**—*मॅ-मु । सरस्वान्देवताकः–ऽ ॥ ४९०. ९. **सारस्वतस्तृचः**—ख-ज्ञ-त१-२-भ-मु । सरस्वतस्तृचः–मॅ इतरेषु च ॥ ४९०. १६. **असुराशब्दात्**—*मॅ । असुरशब्दात्–ऽ-मु ॥ ४९१. ७. **पशुपुरोडाशहविषाम्**—मु । पुरोडाशहविषाम्–ज्ञ-ज्ञ-त३-श-मॅ ॥

[७. ९७] ४९३. १४. **स्तुयेम (?)**—ज्ञ-त२-४-न-भ-मॅ-मु । ' स्तुयाम ' इति स्यात् ॥ ४९४. २१. **एषैव**—त-भ-श-मु । एषेव–ख-मॅ ॥ ४९४. २७. **युवं युवाम्**—घ-श-मु । **युवां**–मॅ इतरेषु च ॥

[७. ९८] ४९५. २७. **आदित्येन्द्रमहत्त्वस्योक्तत्वात्**—*मॅ । अदित्या इन्द्रमहत्त्वस्योक्तत्वात्–मु । आदित्य (अदि–न) इंद्रमादित्यस्योक्तवान्–ख-न; आदित्य (अदित्य-त३)इंद्रमादित्यस्योक्तत्वात्–ज्ञ-त-भ-श२; अदित्ये इंद्रमातादित्यस्योक्तत्वात्–श१ ॥ ४९५. २८. **पप्राथ**—ख-घ-भ-श१-*मॅ-मु । पप्रथ–ज्ञ-त१-२-३-श२; पप्रथ–ज्ञ-त४; प्रपथ–न ॥ ४९६. ६. **अभियुध्येश्च**–*मॅ । अभियुध्यस्व–ऽ-मु ॥ ४९६. १२-१३. **मघवा धनवान्**—ज्ञ-त१-२-४-श-मु । मघवान्–ख-ज्ञ-न; मघवा अन्नवान्–घ; मघवा मघवान्–त३-मॅ ॥ ४९६. १३. **यदेत् यदैव**—घ-*मॅ-मु । यदेतत् तदेव–ख; यदेत् यदेव–ज्ञ-श; यदेतत् यदेव–ज्ञ-त३-न; यदेतत् सदेव–त१-२-४ ॥ ४९६. २१ **तवेत्**–ऽ-मॅ । ' तर्व ' इति पदपाठः । तव तवैव–मु ॥ ४९६. २३. **गोः पतिः**–च-श; गोपतिः–मॅ-मु इतरेषु च ॥

[७. ९९] ४९८. २६. **संघशः**—ज्ञ-त१-२-मु । संघस–ज्ञ-त४-श; संपद्यस–त३; स्वंघशः–न; सद्यः–ख-मॅ ॥

[७. १००] ५००. ७. **एवयावा**—ज्ञ-त४-न-श२ । एवयाव–ज्ञ-त२-३-भ-श१ । एवयावः–ख-मॅ-मु । ऋ. सं. १. ९०.५. अत्र द्रष्टव्यम् ॥ ५००. ८. **अप्रयुतां दोषैर्वियुक्ताम्**—घ-ज्ञ-त१-२-४-मु । दोषैर्वियुक्तां–मॅ-इतरेषु च ॥ ५००. ११. **वैष्णवस्य**—ख । वैष्णव्यस्य–मॅ-मु इतरेषु च । ऋ. सं. १.२२.१७. अत्र द्रष्टव्यम् ॥ ५००.१२. **वैष्णवे** । वैष्णव्ये-ऽ-मॅ-मु ॥ ५०१.२९. **यस्मात्**—ख-भ-*मॅ । यस्मात्तु–मु इतरेषु च ॥ **अन्यरूपो**—*मॅ । अन्यत्–ऽ-मु ॥ ५०१. ३३. **गूढरूपोऽपि**—ज्ञ-*मॅ-मु । गूढरूपोसि–ख-भ; गूढरूपाणि–ज्ञ-त३; गूढरूपायि–त१-४-न; गूढरूपोयि–त२ ॥

[७. १०१] ५०२. २१-२३. **आस्यदग्नं...वृष्टिमाप्नुयात्** । ' आस्यदग्नं विगाह्याम्भः प्राङ्मुखः प्रयतः शुचिः । सूक्ताभ्यां तिस्र एताभ्यामुपतिष्ठेदिवाकरम् ॥ अनश्नता तु जप्तव्यं वृष्टिकामेन यत्नतः । पंचरात्रे व्यतीते तु महद्वर्षमवाप्नुयात् ' इति निर्णयसागरमुद्रितऋग्विधानस्थः पाठः ॥

[७. १०२] ५०५. १२. **अर्वतीनां वडवानाम्**—ज्ञ-त१-२-श१-मु । अर्वतीनां–मॅ **इतरेषु च** ॥ ५०५. १३. **प्रसूतिहेतुम्**—थ-वर्जेषु लिखितपुस्तकेषु मु-पुस्तके च । **प्रसूतिहेतु**–थ-मॅ ॥

[७. १०३] ५०६. १४. **अक्खलीकृत्या**—मॅ। वैदिकपाठोऽप्येवम्। केषुचिन्मुद्रित-पुस्तकेषु 'अक्खलीकृत्या' इति पाठो दृश्यते[1] ॥ ५०७. ६. **वदथन वदत शब्दं कुरुत**—ऽ-मॅ-मु। 'वदथन वदथ शब्दं कुरुथ' इति सम्यक्। यद्यपि लोण्मध्यमपुरुषबहुवचनस्य 'त' स्य स्थाने थनादेशो विहितस्तथापि 'विश्वे देवासो मनुषो यति ष्ठन' (ऋ. सं. १०. ६३. ६.) इत्यत्र 'स्थन भवथ' इति वर्तमानार्थो व्याख्यातः ॥ ५०७. २४. **सर्वतः वदन्तः**—घ-श-*मॅ। सर्वतो यावदंतः—ख-ञ-त२-४-य; सर्वतो यथा वदंतः—ञ-त१ (प्रान्ते); सर्वतः यावदंतः—त३-न; सर्वदंतः यावदंतः—भ। सर्वतः तथा वदंतः—मु ॥ **तद्दिनम्**—घ-ञ-श-*मॅ-मु। यद्दत्तं—ख; यद्दिनं—ञ१; पदिनं—त१-२; पद्दनं—त३-४-भ; पंदन—न ॥ ५०७. २५. **सर्वतो**—*मॅ-मु। एतन्नास्ति—ख-घ; तो—ञ-ञ-त-न-भ; परतो—श ॥ ५०८. ३. **प्रवर्ग्येण**—ञ-मु। प्रवर्गेण—मॅ इतरेषु च ॥

[७. १०४] ५०९. २. 'रक्षोघ्नम्' इत्यस्य स्थाने 'राक्षोघ्नं,' 'क्रुद्धः' इत्यस्य च स्थाने 'तस्मिन्' इति बृहद्देवतायाम् ॥ ५०९. ३. **जप्यम्**—श। जाप्यं—मॅ-मु इतरेषु च ॥ ५०९. २३. **आङ्पूर्वार्थो**—त२-भ-वर्जेषु लिखितपुस्तकेषु मु-पुस्तके च। आङ्पूर्वोर्थो—त२; आडोपूर्वार्थो—भ। आङ्पूर्वार्थे—मॅ ॥ ५१०. २१. **अश्मसारभूतस्य**—ख-ञ-ञ-त१ (प्रान्ते)—भ-मॅ-मु। अश्मसाभूतस्य—त२-३-४श; अश्महारभूतस्य—न। 'अश्मसाद्भूतस्य' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ५१०. २२. **निःस्वरम्**—ऽ-मॅ-मु। 'निऽस्वरम्' इति विसर्गरहितः पदपाठः ॥ ५११. २. **स्तोत्राणि - - - यथा धनैः**—*मॅ। स्तोत्राणि धनैः—'घ'

---

1. In the whole of the known Prātiśākhya and Śikṣā literature the doubling of aspirates is represented by mute or voiced stop plus its corresponding aspirate. Whitney in his Grammar, section 109/a, p. 401, actually quotes the form as *akkhalīkṛtya* in opposition to Wackernagel, Altindische Grammatik I, p. 110 *akhkhalī-kṛtyā*, and II-i, p. 7 ibid. Thus according to the grammatical tradition *kkh* represents the doubling of *kh*. According to Wackernagel, Ai. Gr. I, p. 110 the writing of double aspirates in the place of tenuis or media with their corresponding aspirates is found very generally in Mss., without any basis in etymology, particularly in Vedic Mss. [Cf. Weber, Indische Studien 4, 336 (with reference to Vs. Pr. 4, 106), Whitney Av. Pr. I. 94, and Pischel Gött. Nach. 1873, 206 ff, 212.—In classical Sk. Bollensen Mālavikāgnimitra p. XIV., in inscriptions Hultzsch, Epigraphia Indica 3, 185.] Of a special type is *akhkhalī-kṛtyā*, according to Wackernagel, on account of its interjectional nature. Comparable to this are Vedic *ciccika'ḥ* and *ja'jhjhatīriva*, both onomatopoetic. We have thus to see here not the doubling of an aspirate (which would give us the unaspirate plus aspirate), but the juxtaposition of two aspirates in imitative or interjectional speech. (Cf. also Dr. Siddheshwar Varma's Critical Studies in the Phonetic Observations of Indian Grammarians, p. 101.)

[The above information has, by our request, been kindly supplied by Prof. Dr. S. M. Katre, M. A., Ph. D., of Poona. The Editorial Board is thankful to him for the same.]

बर्जेषु लिखितपुस्तकेषु । (' नृपतीव ' इत्येतन्न व्याख्यातमेतेषु)। दृष्टांतः नृपतीव राजानौ इव तौ यथा पूरयतस्तद्वत्–घ । स्तोत्राणि नृपतीव यथा नृपतयो–मु । ' स्तोत्राणि नृपतीव राजानाविव तौ यथा धनैः पूरयतः तथा ' इति स्यादिति मॅक्समुल्लरमहाशयः ॥

५१२. २४. **वासिष्ठम्**—*मॅ । वसिष्ठं–ऽ-मु ॥ ५१२. २५. **वसिष्ठेनेति नः श्रुतम्**—*मॅ-मु । वसिष्ठो नेति न श्रुतं–ख-ञ-त३-भ-श२; वसिष्ठो नेति (नेति हि–श) श्रुतं (श्रुमं–न)-ञ-त१-२-४-न; वसिष्ठेनेति न श्रुतं–श१ । एतच्छ्लोकद्वयं कुत्रत्यमिति न विज्ञायते ॥ ५१२. २६. **सच्च सत्यं च असच्च असत्यं च**—घ-श-ञ-त१-४-श-मु । सच्च सत्यं च असत्यं च–ख-त३-भ; सच्च सत्यं च–त२-न । सच्चासच्च सत्यं च असत्यं च–मॅ ॥ ५१२. २८. **सत्यभाषणं**—*मॅ । असत्यभाषिणं–घवर्जेषु । सत्यभाषिणं–घ-मु । ५१३. २३. **म्रियेय**—मॅ । म्रिये यदि वा–ख-च-भ; म्रियेय म्रिये यदि वा–घ१; म्रिये–ञ-त-मु; म्रियते–न-श ॥ ५१३.२४. **म्रियेयेत्यन्वयः**—मॅ । म्रिये इत्यन्वयः–ख-घ१-भ-मु; म्रियेत्यन्वयः–इतरेषु ॥ ५१४. १. **संबोध्य**—मॅ-× । मु-पुस्तकेऽपि नास्ति ॥ ५१४. १८. **गृहीत**—मॅ-× । मु-पुस्तकेऽपि नास्ति ॥ ५१५. ५. **परिकरभूतैः**—मॅ । परिगभूतैः–ख१; परिगतभूतैः–ज-ञ-त३-भ-श-मु; परिगताभूतैः–ञ-त२-४; परिगतः भूतैः–न ॥ ५१५. १८. **इदू पूरणौ**—ञ-त१-२-४-मु । इंदूपूरणौ–ञ; इह पूरणौ–ख-श; इह पूरणे–त३-न-भ । इदु पूरणे–मॅ ॥ ५१५. २५. **उलूकयातुं...मे जहि** । अस्य पूर्वार्धो बृहद्देवतायामुपलभ्यते । नोत्तरार्धः[1] ॥ ५१५. २७. **शुशुलूकः**—श१-*मॅ-मु । शिशुलूकः–श२ । ' शुशुलूकः' नास्तीतरेषु ॥ ५१६. ७. **स्त्रीपुंसरूपाणि**—ख-च-ञ-त३-न-भ-श-मु । स्त्रीपुंसोरूपाणि–घ१-ञ-त१-२-४ । स्त्रीपुंरूपाणि–*मॅ । ' स्त्रीपुंसरूपाणि ' इत्येव समीचीनः पाठ इति मॅक्समुल्लरमहाशयः[2] ॥ **विवासयतु**—घ-ञ-ञ-त१-२-४-य-श । विनाशयतु–ख-त३-न-भ-मॅ । उच्छी विवासे अपविवासयतु–मु ॥ ५१६. २०. **अरणः**—ञ-त१ (प्रान्ते)–*मॅ । अग्निं नरः–मु इतरेषु च ॥

॥ अष्टमं मण्डलम् ॥

[८. १] ५१७. ४. **द्वृचम्**—मॅ-मु-अनु. । ऋचं–ख-भ; तृचं–ञ-त-न-श ॥ ५१७. १६. **एकोनत्रिंशत्**—*मॅ । एकोनत्रिंशो–ऽ-मु ॥ ५१७. २९. **प्रशास्त्रादयः**—ख-भ । होत्रादयः–घ; प्रशास्तादयः–श । प्रशस्त्रादयः–त-न-मॅ-मु ॥ ५१८. ५. **निग्रहानुग्रहयोः**—च-श-मु । विग्रहानुग्रहयोः–मॅ इतरेषु च ॥ ५१९. १. **त्वाम्**—घ-*मॅ । त्वा त्वां–मु इतरेषु च ॥ ५२१. २६. **मदन्तु** । ' मन्दन्तु ' इति संहितापदपाठयोः ॥ ५२२. १२. **अदाभ्यग्रहे हिमादासुत**—*मॅ । अदाभ्यग्रहे हिमांदासुत–ख-ञ-भ-श-मु; अदाभ्यग्रे हिमांदासुत–त१-२-४-न; अदाभ्यहे हिमांदासुत–त३; कात्या. श्रौ. १२. ५. १३; ऋ. सं. ८. २. २; ९. ७२. ८; १०७. ५. अत्र द्रष्टव्यम् ॥ ५२४. १६. **तद्विभूतयोऽन्येपि**—त१-२-भ-श-*मॅ-मु । तद्विभूतयोनोपि–ख; तद्विभूतयोंनेपि–ञ; तद्विभूतयोनेपि–त३-४-न ॥ ५२४. २८. **हिरण्मये**—ख-घ-त३-न-श । हिरण्यमये–ञ-त-२-४-भ-मॅ-

---

1. See Macdonell, Bṛhad-devatā part II, p. 219 ll. 3-4.
2. Preface to the 2nd Edition, Vol. IV. p. 185.

मु ॥ ५२५. ९-१०. **स इव**—घ-*मॅ । स हि–मु इतरेषु च ॥ ५२५. २२. **न वियुक्तो**—*मॅ-मु । वियुक्तो–ख-त३-न-भ-श; विनियुक्तो–झ-त१-२-४-य ॥ ५२६. १३. **प्राप्ते**—*-मॅ-मु । एतन्नास्ति–ख-घ; प्रयते–झ-श; प्रपिते–त-न-भ ॥ ५२६. २०. **मेध्यातिथये**—घ-*मॅ-मु । मेधातिथये–इतरलिखितपुस्तकेषु ॥ ५२६. २५. **लक्ष्यते**—*मॅ-मु । चक्षते–त१-२-४; वक्ष्यते–इतरेषु ॥

[८. २] ५२८. ७. **च**—*मॅ-मु-× ॥ ५२८. ८. **विभिन्दो**—मॅ । विभिंद–§-मु ॥ ५२८. २६-२७. **दशापवित्रस्य.....नाभिं कुरुते**—श । (' शकटे ' इत्यस्य स्थाने ' सकाले ' इति श-पुस्तके विद्यते)। सामवेदभाष्यं (२. १. २. ८. २) द्रष्टव्यम् । दशापवित्रस्य नाभिं कुरुते–*मॅ-मु इतरेषु च ॥ ५२८. २८. **अमोतं भवतीति**—*मॅ-मु । आमानं भवतीषु–ख-न-भ; अमोतं भवतीषु–झ-त-श ॥ ५२९. २३. **नत्वा च**—थ-भ-*मॅ-मु । नत्वा व–इतरेषु ॥ ५३०. ४. **इन्द्रम्**—श-*मॅ । यमिंद्रं–मु इतरेषु च ॥ ५३०. १६. **सोमैः**—च-*मॅ-मु । सोमाः–इतरेषु ॥ ५३१. १९. **द्रढयति**—झ-त१-२-३-४-मु । दृढयति–मॅ इतरेषु च । ' दृढयति ' इति पाठो मॅक्समुल्लरमहाशयस्योपलब्धः ॥ ५३१. २२. **निहीयते**—श-*मॅ-मु । निहीते-ख-झ-न-भ; नहीते–त ॥ ५३२. २६. **अनलसाः**—घ-न-भ-मु । अनालसाः–मॅ इतरेषु च । ऋ. सं. १. ७२. ७; ८. ६०. १५. अत्र द्रष्टव्यम् ॥ ५३४. २०-२३. **ब्रह्मयुजा.....संभजनीयं वा**—*मॅ । एतन्मन्त्रभाष्यं मॅक्समुल्लरमहाशयेन सामवेदस्य (२. ८. २. १. २.) सायणकृतभाष्यादुद्धृतम् । अस्यार्थः त्रुटितः–ख१-भ; झ-त३-४-न-य-श-पुस्तकेष्वस्य मन्त्रस्य भाष्यं नास्ति । घ-ज-श-त१-२-मु-पुस्तकेष्वस्य मन्त्रस्य भाष्यमेवं विद्यते–हे ब्रह्मयुजा अन्नवंतौ शग्मा सुखप्रदौ हरी एतादृशौ अश्वौ युवामिहास्मद्यज्ञे इंद्रमावक्षतः आवहतं । कीदृशमिंद्रं । अस्मत्सख्यायं गीर्भिरस्मत्कृतैः स्तोत्रैः श्रुतं प्रख्यातं गिर्वणसं गिरां संभक्तारं ॥ ५३५. २९-३०. **अभिभवनानि**—मॅ-मु । अभिभवानि–§ ॥ ५३६. २३. **प्रियोऽनुकूलो मेधो यज्ञः**—*मॅ-मु । प्रियाः अनुकूलाः मेधाः यज्ञाः–ख-भ; प्रियः अनुकूलवेद्यः मेधो यज्ञः–झ-त-न-श ॥ ५३६. २४. **प्रियमेधाख्य**—मु । प्रियमेधा अस्य–मॅ-§ । प्रियमेधाख्य इति पाठः समीचीनतर इति मॅक्समुल्लरमहाशयेनोक्तम्[1] ॥ ५३७. १७. **वज्रवन्**—ख-घ-भ२-श-मु । वज्रिवन्–झ-त-न-मॅ ॥ ५३७. २०. **आजहार**—मॅ-षड्. ब्रा. । उदजहार–§-मु । ऋ. सं. १. ५१. १. अत्र द्रष्टव्यम् ॥

[८. ३] ५३८. २३. **सहितैः**—§-मु । संहितैः–*मॅ ॥ ५४२. ४. **विकल्पनात्**—*-मॅ-मु । विकलनात्–ख१; विकर्तनात्–इतरेषु ॥ ५४२. १९. **कद्वत्प्रगाथः**—ख-झ-त३-४-न-भ-श-मु । तद्वत्प्रगाथः–श-त१-२ । कद्वान् प्रगाथः–मॅ ॥ ५४२. ३३. **नुद्**—श-*मॅ-मु । नूद्–भ; नद्–इतरेषु ॥ ५४५. १०. **बलेनापहृताः**—ख-झ-त३-४-न-भ-श । बलेनापहृताः–घ-श-त१-२-मॅ-मु ॥ ५४५. २६. **मे मह्यम्**—§-मु । मह्यं–मॅ ॥ ५४६. ८. **तस्याः**—*मॅ । तां–मु । प्रां–त१-२; इतरलिखितपुस्तकेषु नास्ति ॥ ५४६. २७. **दाता तम्**—श-मु । दातारं–मॅ इतरेषु च । ' दाता तम् ' इति पाठः समीचीनतरः इति मॅक्समुल्लरमहाशयेनोक्तम्[2] ॥

[८. ४] ५४६. ३१. **एकविंशत्यृचम्** । एकविंशर्चं–§-मु । एकविंशत्यर्चं–मॅ ॥ ५४७. १२. **न्यधी चेति**—ज-त३-भ-मु । न्यधी नेति–ख१; न्यधी वेति–झ-त१-२-४ श । न्यधी इति–मॅ ॥

---

१. Preface to the 2nd Edition Vol. IV p. 177. २. ibid.

५४७. १४. **सिम इति...वाजसनेयकम्**—ऋ. सं. १. १०२. ६. अत्रेदं वाक्यं शाट्यायनकब्राह्मण-वचनमित्युक्तम् ॥ ५४७. १५. **अनुर्नाम**—च-ज-त३-श । आनुर्नाम–इतरेषु मॅ-मु पुस्तकयोश्च ॥ ५४८. ४ **संपूर्णम्**—*मॅ । संपूर्ण च–ख१-घ; संपूर्णत्वं–ज-त-न-भ-मु; संपूर्णं त्वं–ञ-श ॥ ५४८. ७. **एकयत्नेनैव**—ञ-त३-भ-श-*मॅ-मु । एकयत्ननैव–ख; एकत्रैव–घ; एकयन्नैव–ञ-त२-४; एकयत्तेनैव–त१; एक यन्नेनैव–न ॥ ५४९.४. **परस्मैपदम्**—ञ-त१-२-मॅ-मु । श्रम् परस्मैपदं च–श । 'परस्मैपदं' नास्ति इतरेषु ॥ - - - **सचते**—ख-त-न भ-मॅ । सचते–मु । स पुरुषः यवीयुधा यौति मिश्रीभवतीति यवियुज्ञः यौतेरौणादिक इन् तेन संप्रहरता त्वया सहायभूतेन सचते–श ॥ ५४९. २७. **कर्मप्रवनीयत्वम्**—*मॅ-मु । °प्रवचनीयं–ऽ ॥ **ववसे**—मु; च–वर्जलिखितपुस्तकेषु च । वावसे–च-मॅ ॥ ५५०. ३-४. **अथवा धेट्...स्तोमा इत्यर्थः**—ज-ञ-त-श-मु । ख१-नं-भ-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ५५१. २०-२१. **बहुलमिति सम्प्रम्या अलुक्**—*मॅ-मु । बहुलमिति अलुक्–ख; बहुलुक्–ञ-त-न; बहुलु–भ; बहुलमिति लुक्–श ॥ ५५२. २-३. **गच्छन्तौ वा**—मु । ऋ. सं. ४. ४. ८. अत्र द्रष्टव्यम् । गंतो वा– ख१; गतो वा–ज; गांतोर्वा–ञ; गंतोर्वा–त-न-भ-श । गतौ वा–*मॅ । 'गच्छन्तौ वा' इति समीचीनमिति मॅक्समुल्लरमहाशयेनोक्तम्[1] ॥ ५५२. ५. **पीवोपवसनानाम्** । 'पीवोपवसनादीनाम्' इति वार्तिकपाठः ॥ ५५४. ५. **शुद्धा-नाम्**—*मॅ-मु । शुद्धो–ख; शुद्धां–घ-भ-श; शुद्धां वीभो–ञ; शुद्धां वांभो–त१-२-४; शुद्धांभो–त ३-न ॥ ५५४. ७. **तैः प्रतिगृहीतानि**–मु । तैः प्रतिगृहीतं-त१–वर्जेषु लिखितपुस्तकेषु । तत्प्रति-गृहीतं–त१-मॅ । 'तैः प्रतिगृहीतानि' इति स्यादिति मॅक्समुल्लरमहाशयः अभिप्रैति ॥

[८. ५] ५५४. ३१–३२. **प्रातरनुवाकाश्विनशस्त्रयोः**—ञ-त२-श१-मु । प्रातरनुवाक आश्विनशस्त्रयोः–ञ-त३-४-न-भ-मॅ ॥ ५५५. ३१. **शबभावो**—मॅ-मु । शब्दभावो–ञ-त-न-भ; शब्दाभावो–श ॥ ५५६. २३. **विगमनमपायः**—*मॅ-मु । विगतमपायां–ख-न-भ; विगमनम-पायां–ञ-त-श ॥ ५५६. २५. **गोर्यूतौ**—भ-श-मु । गोयूतौ–ख-त-न-मॅ ॥ ५५६. ३०. **उपा-गच्छतम्**—ऽ-मु । उपगच्छतं–मॅ ॥ ५५६. ३१. **कीदृशैः**—घ-*मॅ-मु । ईदृशैः–इतरलिखित-पुस्तकेषु ॥ **शंसनीयगतिभिः**—च-थ-भ-मु । शंसनीयागतिभिः–ख; शंसनीयागामिभिः–ञ-त; शंसनीयाभिः–न-श । शंसनीयगामिभिः–घ१-मॅ । ऋ. सं. ८. २०. १०. अत्र द्रष्टव्यम् ॥ ५५७. २२ **वीराः**—मॅ-मु । दीर्घाः–ख-भ; वीर्याः–इतरेषु ॥ ५५७. २३. **वा**—*मॅ-×। मु-पुस्तकेऽपि नास्ति ॥ ५५८. १८. **उपगमतम्**(?)—ख-त-न-भ-मॅ । उपगमयतं–श ॥ उपगच्छतम्–मु ॥ ५५८. २१. **चाप्रेषितो**—ञ-त२-४-मु । च प्रेषितो–श । वा प्रेषितो–ख-ञ-त३-न भ-मॅ ॥ ५६०. १४. **साधू**—ञ-त२-*मॅ । साधु–ख-ञ-त३-४-न-भ । साधुषु–श-मु ॥ ५६३. १. **न च नामन्त्रितविद्यमानवत्व° ?**—ऽ-मॅ । न च नामन्त्रित इति विद्यमानवत्व°–मु । अयमेव युक्तः प्रतिभाति ॥ ५६३. ४. **प्रथमान्तमेव**—ज-भ-श-*मॅ-मु । प्रथमांतरमेव–ख१-ञ-त; प्रथमांतरेमेव–न ॥ **नामन्त्रितम्**—श-*मॅ-मु । मामंत्रितः–ज; मामंत्रितं–ख१-ञ-न-भ; सामंत्रितं–त ॥ ५६३. १०. **मदजनने व्यग्रम्**—ऽ । मदजननेऽव्यग्रं–मॅ-मु ॥ ५६४. ८. **बहुदातृतमो**—ख१-मु । बहु-दातृजनो–मॅ इतरेषु च ॥

---

1. Preface to the 2nd Edition Vol. IV. p. 169.

[८. ६.] ५६४. १३. **पारशव्यस्य** । 'पार्शव्यस्य' इत्यनुक्रमण्याम् ॥ ५६४. १८. **अतिरिक्तोक्थे**—ऽ-मु । मॅक्समुल्लरमहाशयैः 'अतिरिक्तोक्थ्ये' इति कल्पितः । तदुपलब्धलिखितपुस्तकेष्वपि 'ॅक्तोक्थे' इत्येव पाठः । तत्कृतटिप्पण्यां 'आश्वलायनश्रौतसूत्रम् (९. ११, १३) अवलोकनीयम्' इति निर्दिष्टमस्ति । परंतु तत्र 'ऊर्ध्वमाश्विनादतिरिक्तोक्थानि' इति प्रक्रम्य 'महाँ इन्द्रो य ओजसा' इति पठितम् । एवमितरत्रापि (ऋ. सं. ४. ५७. प्रस्ता.; ५. ७६. प्रस्ता.) । 'अतिरिक्तोक्थे' इत्येव साधु ॥ ५६४. १९. **नूनमश्विना**—श-*मॅ-आश्व. श्रौ. । नूनमश्विनोः–ऽ-मु ॥ ५६४. २५. **प्राजेयिता**—ज-त३-न-श-मु-निरु. १०. १०; ऋ. सं. ५. ८३. १ । पर्जयिता प्राजेयिता–झ । पार्जयिता–घ-त२-४-भ-मॅ ॥ ५६५.२५. **शतसंख्याकपर्वाणि** । शतसंख्याकापर्वाणि–न; शतसंख्यापर्वाणि इतरेषु मॅ–पुस्तके च । शतसंख्यानि पर्वाणि–मु । ऋ. सं. १. ८०. ६; ८. ८९. ३. अत्र द्रष्टव्यम् ॥ ५६८. ७. **पृश्नयः प्राष्टवर्णाः**—ऽ-मॅ-मु । प्रकर्षेण अष्टः व्याप्तः वर्णः यासां ताः इति विग्रहः । निरु. १०. ३९. द्रष्टव्यम् ॥ ५६९. ७. **कर्तुमाद्रियस्व**—ख१-झ-त-न-भ-श-मॅ । एतेष्वन्त्यः पादो न व्याख्यातः । कर्तुमाद्रियस्व उतापि च प्रजां सुपुत्रवीरं च (सुपुत्रवीर्यं वीरं–ज; सुवर्णं [? सुवीर्यं] सुपुत्रवीरं च–च) आद्रियस्व–घ१-च-ज । उतापि च सुवीर्यं शोभनवीर्योपेतां प्रजां संततिं दातुं कामयस्व–मु । मु-पुस्तकस्थोऽयं पाठः शंकास्पदमिति मॅक्समुल्लरमहाशयस्याभिप्रायः[1] ॥ ५७१. ७. **वज्री हस्तः**—*मॅ । वज्रहस्ते–न; वज्रहस्तः–मु इतरेषु च ॥ **तद्वान्**—*मॅ । तद्वन्–त३-मु । तद्धानी–ख; तद्वनी–न-भ; तद्वत्–झ-झ-त१-२-श ॥ ५७१. ८. **मेधाविनो वयम्**—ख१-घ-झ-झ-त२-४-न-भ-श-मु । मेधाविनः–ज-त३-मॅ ॥ ५७१. ३०. **ह्वयन्ते**—ऽ-मॅ- । हवन्ते—मु । 'हवन्ते' इति संहितापदपाठयोश्च । मु-पुस्तकपाठ एव युक्त इति अस्य शब्दस्य व्याकरणप्रक्रियया सुस्पष्टमेव । ऋ. सं. १. १४२. १३. अत्रापि द्रष्टव्यम् ॥ ५७२. २०. **वज्रहतेन**—मु । वज्रहस्तेन–ऽ-मॅ । 'वज्रहतेन' इति भाव्यमिति मॅक्समुल्लरमहाशयेन संसूचितम् ॥ ५७३. ९. **अत्यग्निष्टोमादिषु**—श-*मॅ । इत्यग्निष्टोमादिषु–भ । अत्यष्टोमादिषु–मु इतरेषु च ॥ ५७३. ३०. **बहु धनम्**—ऽ-मु । बहु दानं–मॅ ॥ ५७३. ३१. **दशगुणितानि**—*मॅ । शतगुणितानि–ऽ-मु ॥

[८. ७] ५७५. ९. **यद्यदा**—*मॅ-मु-× ॥ ५७५. ११. **एव स्थाने**—ख१-झ-झ-त२-४-न-भ-श-मु । एव–घ । एकस्थाने–ज-त३-मॅ ॥ ५७७. ३. **जौहोत्यादिकात्**—ख१-झ-झ-त२-३-श-मु । जाहोत्यादिकात्–त४; जोहोत्यादिकात्–न-भ । जुहोत्यादिकात्–ज-मॅ ॥ ५७८. २१. **प्रवृक्तयज्ञकाः**—*मॅ । प्रवृत्तयशकाः–घ-झ-त-मु । प्रवृत्तयज्ञकामाः–ख१-न-भ-श; प्रवृक्तयज्ञकामाः–ज ॥ ५७९. ७-८. **वायुर्वै...भवन्ति** । बृहदारण्यकोपनिषदि 'गोतम' इत्यस्य स्थाने 'गौतम', 'अयं च लोकः' इत्यस्यानन्तरं च 'परश्च लोकः' इत्यधिकं विद्यते ॥ **सर्वाणि च**—*मॅ.बृ.उ. । सर्वाणि–ऽ-मु ॥ **संदब्धानि**–न-श-*मॅ-मु-बृ. उ. । संबध्वानि–ख; संदब्धानि–त-भ ॥ ५७९. २०. **आप्त्यस्य**–भ-श-*मॅ-मु । आप्तस्य–ख१-झ-त-न; आप्यस्य–ज ॥ ५७९. ३०. **उशनाः**—त-न-श-मॅ-मु । 'उशना' इति पदपाठः । उशना–ख-भ ॥ ५८०. १७. **समान...दादेशाः**—*मॅ-मु । समानवाक्येषु युष्मदस्मदादेशाः–झ-झ-त१-२-श; समानवाक्येषु युष्मदादेशाः–ज-त३-४-न ॥

---

१. Preface to the 2nd Edition Vol. IV. p. 172.

५८०. २१. **तत्संबन्धिनी**—*मॅ । तत्संबंधि–ऽ-मु ॥ ५८०. २३. **रथकक्ष्यया**—ज्ञ-त-न-श-*मॅ-मु । (केषुचिल्लिखितपुस्तकेषु 'टय' इत्यक्षरं 'द्य' इत्येवं लिखितमस्ति ।) रथकद्वया–ध१-श; रथकक्षया–ख१-च-ज-भ ॥

[८. ८] ५८२. १५. **आनुष्टुभं त्विति**—*मॅ-अनु.। आनुष्टुभमिति–ऽ-मु ॥ ५८३. १९. **ऋषेः**—ध-न-*मॅ-मु । ऋषिः–ख-ज्ञ-त-भ-श ॥ ५८४. १. **पक्षे**—*मॅ-मु । यज्ञे–ऽ ॥ ५८४. २. **धीतिभिरित्य...श्छान्दसः**—ऽ-मॅ-मु ॥ ' धीतिभिरिति पराङ्ग° ' इति भाव्यम् ॥ ५८५. १२. **म्रियमाणा**—ख१-भ-*मॅ । प्रियमाणा–मु । क्षीयमाणा–इतरेषु ॥ ५८५. २९. **रैशब्दात्**—ऽ-मॅ-मु । ' रयिशब्दात् ' इति भाव्यम् ॥ ५८६. २. **अभिप्रायावश्रौष्टाम्**—*मॅ-मु । अभिप्रायोश्रेष्ठां–ख-भ; अभिप्रायाश्रौष्टां–ज्ञ-त-न-श ॥ ५८७. ८. **भक्षयितारौ**—ज्ञ-त२-४-मु । भक्षितारौ–मॅ इतरेषु च । ऋ. सं. १. ७७. ४; ६. ५१. ४ द्रष्टव्यम् ॥

[८. ९] ५८९. ८. **गायत्र्यावुपाद्ये** । ' गायत्र्या उपाद्ये ' इत्यनुक्रमण्याम् ॥ ५८९.१० **अतिरिक्तोक्थे**—त-मु । अतिरिक्तोक्थ्ये–मॅ । ५६४. १८. टिप्पणी द्रष्टव्या ॥ ५९०. १५. **इत्यादिना**—ज्ञ-ज्ञ-*मॅ-मु । इति–श; इत्यादि–ख-त-न-भ ॥ ५९४. ५. **वा**—*मॅ-मु-× ॥ ५९४. २७. **द्युम्नादीनि**—मॅ-मु । द्युम्नादीन्–ऽ ॥

[८. १०] ५९६. १४. **यज्ञस्य शिरो**—*मॅ । स्य यज्ञशिरसो–थ; यज्ञस्य शिरसो–श; यज्ञशिरसो–ख१-ज्ञ-त-न-भ-मु । ' तावेतद्यज्ञशिरः ' इत्यस्य स्थाने ' ततो वै तौ यज्ञस्य शिरः ' इति तैत्तिरीयसंहितायाम् ॥ ५९६. १६. **असूरे स्तोतृरहितेऽपि**—ध-ज्ञ-ज्ञ त१-२-४-य-मु । असूरे स्तोत्ररहिते–ख-भ; असूरे स्तोतृरहिते–न; असुरेभ्यो रहितेपि–श । असूरे स्तोत्ररहितेपि–त३ ॥

[८. ११] ५९७. ६-७. **षट्कसप्तकाष्टकैः**—ख१-ज्ञ-त१-२-न-श-मु-पि. सू. । षट्कसप्तकाष्टकै–ज-ज्ञ-त३-४-भ । षट्कसप्तकाष्टकैव–मॅ ॥ ५९७. १४. **देवेषु**—मॅ । आ देवेषु–ऽ-मु ॥ ५९८. ३. **गीर्भिः स्तुतिभिः**—ख-ज्ञ-ज्ञ-त३-न-भ-श-मु । गीर्भिः–ध-त२-४-मॅ ॥ ५९८. २७. **अञ्प्रत्ययः** । अजप्रत्ययः–ज्ञ१ । अङ्प्रत्ययः–मॅ-मु इतरेषु च । अत्र ' अञ्प्रत्ययः ' इत्येव साधुः । ऋ. सं. १. ३६. १७; ३८. ३; ४८. ९; ९२. १५ इत्यादिमन्त्रभाष्ये द्रष्टव्यम् ॥

॥ षष्ठाष्टकः ॥

(षष्ठाष्टकभाष्यसंशोधनार्थमुपयुक्तानि लिखितपुस्तकानि—ख, ग, घ, त, न, भ, श)

[८. १२] ६००. २. **तं त्वदीयम्**—ग१-भ१-य । त्वदीयं–मॅ-मु इतरेषु च ॥ ६०१. १. **यः**—ग-न-भ१ । यो नः–मॅ-मु इतरेषु च ॥ ६०१. १७. **लुङि सिपि मन्त्रे**—ग-भ१-२-*मॅ-मु । लुङि मंत्रे–ख-ज्ञ-त२-३-श; लुङि सि मंत्रे–थ; लुङि सिमंघेत्रे–न ॥ ६०१. २४. **अत्र**—ग-भ । अ–ख-त-न-श । अयं–मॅ-मु ॥ ६०२. १०. **ग्रहीता**—ऽ । गृहीता–मॅ-मु ॥ ६०२. १४. **नामानुपूर्व्यस्य** । ' नामानुपूर्वस्य ' इति निरुक्तपाठः ॥ ६०२. २४. **प्राञ्चन्ती**—*मॅ । प्रांचती–ख-घ-त-न-भ-श-मु । प्रांचं–ग ॥ **स्तुत्यगुणगणम्**—भ-मु । स्तुत्यगुणं–घ, स्तुत्यं गुणंगण–त-न । स्तुत्यं गुणगणं–श-मॅ ॥ ६०२. २६. **स्तुत्यगुण°**—ग-भ-*मॅ-मु । स्तुत्यं गुणं–ज्ञ-त४; स्तुत्या गुण°—

इतरेषु ॥ ६०३.२. **परस्मैपदं । द्विर्वचनप्रकरणे** । परद्विर्वचनप्रकरणे–ग; परस्परं द्विर्वचनं (द्विवचनं–न) परेण–न-श । परस्परं **द्विर्वचनपरेण**–मॅ-मु इतरलिखितपुस्तकेषु च ॥ ६०३. ४. ' शुद्धम् ' इत्यस्यानन्तरं ' हविः ' इति पदं गलितमिति मॅक्समुल्लरमहाशयेनोक्तं तदनावश्यकं प्रतिभाति । ' हविः ' इति विशेष्यमग्रे विद्यत एव ॥ ६०३. १८. **नू**–ग-न-भ-श । नु–ख-त-मॅ-मु ॥ ६०४. २६. **यजनसाधनैः**—ग-भ । यजमानसाधनैः–मॅ-मु इतरेषु च ॥ ६०४. २७. **वा**—*मॅ-मु-× ॥ ६०५. २९. **तित्विषे**—ग । स तित्विषे–मॅ-मु इतरेषु च ॥ ६०६. १. **षोडशिशस्त्रे**—ग-न-भ-मु । षोडशस्त्रे–ख । षोडशशस्त्रे–त-श-मॅ-मु ॥ ६०७. १३. **प्र इयर्ति प्रेरयति**–मु । इयर्ति प्रेरयति–ग; यिप्रर्ति । प्रेरयति–य । प्रेरयति–मॅ इतरेषु च । ' प्रेयर्ति प्रेरयति ' इति स्यादिति मॅक्समुल्लरमहाशयेन संभावितम् ॥ ६०७. २०. **अयालिन्द्रस्य**—ग१-श-*मॅ-मु । अयालिंद्रस्य–ख-न-भ१; अयालिंद्रस्य–त; अयाडिंद्रस्य–ग२-तै. ब्रा. । वा. सं. २१. ४७. अत्र द्रष्टव्यम् ॥ ६०७. २२. **दोहनाधिकरणे**—ख-ग-ज्ञ-भ३-श-मु । दोहनाधिकारणे–मॅ इतरेषु च ॥

[८. १३.] ६०८. १७. **वर्धयिता**—ग-घ-मु । वर्धयिताय–भ१; वर्धयितार–श । वर्धयिता च–मॅ इतरेषु च ॥ ६०८. २७. **लुङि**—भ-श-मु । (छांदसो) लङ्–ग१; लिङि–ग२; लङि–मॅ इतरेषु च ॥ ६०९. ४. **यज्ञस्य**—भ-*मॅ-मु । यज्ञे–ग-श; यज्ञ–ख-त२-३-४; वेद्यास्तीर्णे बर्हिषि–घ; यज्ञवेद्यास्तीर्णे बर्हिषि वा–ज्ञ ॥ ६०९. १०. **ईमहे याचामहे**—ग-घ-न-भ । ईमहे–त-मॅ-मु ॥ **वेदितारम्**—ग-भ-*मॅ-मु । विदितारं– इतरलिखितपुस्तकेषु ॥ ६०९. १७. **बह्वयः**—भ । वृद्धाः–श; वद्धाः–ख-त । बद्धाः–ग-घ-न-मॅ-मु ॥ ६१०. ८. **पूर्वोक्ते**—मॅ-मु । पूर्वोक्तैः–§ ॥ ६११. १९. **अवितेदसि**—ग-घ-मु । अवितासि–मॅ इतरेषु च ॥ **रक्षितैव**—ग-घ-न-भ-मु । रक्षिते–ख-त२-३; रक्षितो–ज्ञ-त४; रक्षिता–श-मॅ । एतत्सूक्तस्य २६ मन्त्रभाष्यं द्रष्टव्यम् ॥ ६१२. २४. **ज्ञायते वर्तते**—*मॅ-मु । जान् वर्तते–ख-त; ना अनुवर्तते–ग; जानन् वर्तते–घ-भ; तानन्–थ; जा वर्तते–न; ज्ञात्व वर्तते–श ॥ ६१३. २७. **ऋषिभिरुत्पादिताभिः**—*मॅ-मु । ऋषिरुच्यति ताभिः–ख-त-भ२; प्रकृतो नारदऋषिरुच्यते ताभिः–ग; ऋषिरुच्चरिताभिः–भ१-३; ऋषिरुच्यते ताभिः–श ॥ ६१४.१२. **प्रततवसू**—ग२ । प्रत्तवसू–ग१; प्रतवसू–ख-त-भ । प्रात्तवसू–मॅ-मु-निरु. ६. २१. ॥ ६१४. १९. **अन्या अपि दैवीः प्रजाः**—घ । अन्यापि दैवी प्रजा–ख-त-न-श-मॅ । अन्यापि दैवीः प्रजाः–मु । अन्यापि देवाः प्रजा–भ । अन्या अपि देवप्रजाः–ग ॥ ६१४. २४. **हिंसित्र्यः सत्यः**—ग । हिंसित्र्यः स्यः–ख-त-न-भ-श; हिंसित्र्यः–घ-मॅ-मु । ' हिंसित्र्यः सत्यः ' इति स्यादिति मॅक्समुल्लरमहाशयेन संभावितम् ॥ ६१५. ८. **बहुप्रज्ञ वेन्द्र**—ग-न-भ१-३ । बहुप्रज्ञेंद्र–ख-त-भ२-मॅ-मु । बहुप्रज्ञै इंद्र–श ॥ ६१५. १६. **अभीष्टस्य फलस्य**—ख-घ-त-न-भ-श-मु । अभीष्टस्य–ग । अभीष्टफलस्य–मॅ ॥

[८.१४] ६१५.२५. **काण्वायनौ**—§-मॅ-मु । काण्यायनौ–अनु. भा. ॥ ६१६. १. **एवमहमपि**—ग । एवमपि–ख-त-न-भ२-श-मॅ । एवमपि यद्यदि अहं–मु । मह एव ईश्वरो भवसिमपि–भ१; एव महश्वरो भवसिमपि–भ३; ईश्वरो भवसि–य ॥ ६१७. १८. **दृढीकृतानि**—ग-भ१-३-*मॅ-मु । दृढीकृतारो–न; दृढां कृता–श; दृढीकृता–**इतरेषु** ॥ ६१७. १९. **दृह दृहि बृहि**

वृद्धौ—न। **बृह दृहि वृहि वृद्धौ**—ख-ज्ञ-त२-३-भ२-मॅ-मु। **दह दहि वृद्धौ**—ग-भ१-३-श; **बृह दहि वृद्धौ**—त४ ॥ ६१७. २१. **कृत्यार्थे**—ग-भ१-३-श-मु। कृतार्थे—मॅ इतरेषु च ॥ ६१८. ११. **जगृहे**—ख-त-न-भ-श-मु। जग्रहे—ग-मॅ ॥ ६१८.१६. **इन्द्रो वृत्रं हत्वासुरान्**---—ख-ज्ञ-त३-४-न-भ१-३-मॅ। तदा अच्छैत्सीरित्यर्थः—ग; 'इंद्रो...असुरान्' नास्ति—त१-२-मु। इंद्रो वृत्रं हत्वासुरान् जयन्—श। इंद्रो वृत्रं हत्वासुरान् च—भ२ ॥ ६१८. १९. ---हे **इन्द्र...प्रेरितवानसि**—ख-ज्ञ-त३-४-न-भ१-३-मॅ। हे इंद्र (इन्द्र त्वं द्यां द्युलोकं—श) मायाभिः उत्सिसृप्सतः (उत्सिसृप्सतः उत्सृष्टुमिच्छतः—श) सर्वत्र प्रसरतः द्यामारुरुक्षतः द्युलोकमारोहतः दस्यून् (दस्यून् शत्रुन् उपक्षेप्तॄन्—ख) हे इंद्र (इंद्र त्वं—ख) अवाधूनुथाः—ख-घ-श। मायाभिरुत्सर्पणमिच्छतः द्यामारुरुक्षतः दस्यून् उपक्षपयितॄन् हे इंद्र त्वं वृत्रस्यासुरान् अवाधूनुथाः अवाङ्मुखं प्रेरितवानसि—ग। हे इंद्र मायाभिरुत्सिसृप्सतः सर्वत्र प्रसरतः द्यामारुरुक्षतः द्युलोकमारोहतः दस्यून् शत्रूनुपक्षेप्तॄन् इंद्रो वृत्रं हत्वा असुरान् हे इंद्र त्वं अवाधूनुथाः अवाङ्मुखं प्रेरितवानसि (प्रेरितवानसि उत्कृष्टतरो भवत्—त१)—त१-२-भ२ ॥

[८. १५] ६१९. १५. **शत्रुजातानि**—भ१-३-*मॅ-मु। शत्रून्—घ; शत्रुहननादिजातानि—इतरेषु ॥

[८. १६] ६२२. २४. **प्राप्तव्येषु**—ग-भ। प्राप्तेषु—न-*मॅ-मु। 'प्राप्तेषु' नास्ति—घ; प्रत्येषु—ज्ञ-त२-३; त्येषु—त४ ॥ ६२३. १०. **वा**—भ। ऋ. सं. ८. २. ३६. अत्र द्रष्टव्यम्। मॅ-मु-पुस्तकयोः इतरलिखितपुस्तकेषु च 'वा' नास्ति ॥ **एवमतः**—ग-घ-न-भ। एवातः—मॅ-मु इतरेषु च ॥ ६२३. २१. **युधा युद्धेन**—ऽ-मु। युधायुधेन—मॅ।

[८. १७] ६२४. १०. **आद्यस्तृचो**—ग-भ१-*मॅ-मु। आद्या च—ख-त; आद्य—न; आद्यस्तुचो—भ२ ॥ ६२४. १९. **केशिना केशिनौ केशवन्तौ**—त-भ-मु। केशिनौ केशवंतौ—ग-न; केशिना केशवंतौ—घ-मॅ। ६२४. २५. **सुतवन्तः**—ख-त३-न-भ-मु। सुतेवंतः—घ; सुतवतः—त२-४। सुतावंतः—श-मॅ ॥ ६२४. २९. **सुतवतः**—ऽ-मु। सुतावतः—मॅ ॥ ६२४. ३०. **सुशिप्रिन्**। 'सु। शिप्रिन्।' इति पदपाठः ॥ ६२५. ४. **ओभा कुक्षी... माघोनं च**। इयं श्रुतिः कुत्रत्येति न ज्ञायते ॥ 'वार्त्रघ्नं' इत्यस्य स्थाने 'वार्त्रघ्ने' इति मॅ-पुस्तके ॥ ६२५. ५. **सव्यदक्षिणभेदेन**—ग-भ१-*मॅ-मु। °दक्षिणे पदेन—ख-ज्ञ-त२-४-न; °दक्षिणपदेन—त३; °दक्षिणेन पदेन—श ॥ ६२५. ६. **शरीरावयवानि**—ऽ-मॅ-मु। 'शरीरावयवान्' इति भाव्यम्। ६२५. १३. **सुखजनकम्**—ऽ-मॅ-मु। 'सुखजनकः' इति भाव्यम् ॥ ६२६. २०. **शाचिपूजन**—ग-भ-*मॅ-मु। शाचिषा-ख-त-श; शाचिषापूजन—न ॥ ६२६. २१. **यतः**—*मॅ-मु। अतः—ऽ ॥ ६२६. २६. **स्वयमेव**—ग-भ-*मॅ। स्वयं—मु; स्वयं ते तव—ख-त-श; स्वयतेव—न ॥ ६२६. ३१. **ण्यत्प्रत्ययो**—मॅ। यत्प्रत्ययो—ऽ-मु ॥

[८. १८] ६२७. २५. **द्वाविंशत्यृचम्**—भ-*मॅ। द्वाविंशर्चे—मु इतरेषु च ॥ ६२७. ३१. **देवानाम्**—ग१ (पश्चाच्छोधितः)-*मॅ। देवादीनां—मु इतरेषु च ॥ ६२९. ७. **करणेऽर्थे**—ऽ-मु। करणार्थे—मॅ ॥ ६२९. २७. **शिष्यते**—भ-*मॅ-मु। शिष्टाते—ख-त-न; शिष्टः ते—श ॥ ६२९. २८. **पूर्वस्यामन्त्रितस्य**—ऽ-मु। पूर्वस्य—मॅ। ६३०. २४. **अयमर्थः**—*मॅ-मु। **अयमर्त्य**—ख-त; योमर्त्यः—ग१; यथा मर्त्यः—ग२; अयर्त्यः—न; अथमर्त्यः—भ; अयं मर्त्यः—श ॥

६३१. २१. **कृणोतन कुरुत**—ख-घ-त१-२-भ-मु। कृणोतन—ग-त३-४-न-श-मॅ॥ ६३२. १०. **नः अस्मभ्यम्**—ख-घ-श-त१-मु। एतन्नास्ति ग-त२-३-४-न-भ-श-मॅ-पुस्तकेषु॥

[८. १९] ६३२. १८. **सोभरेः**—त४-भ-श-*मॅ-मु। सोभरिः ऋषिः—घ; सौभरेः—इतरेषु॥ ६३२. २३. **सोभरि°**—ज्ञ-भ-श-*मॅ-मु। सौभरिः—ग; सौभरं—ख-त१-२-३-न॥ **पितुर्न**—ख-ज्ञ-त२-न-भ-श-*मॅ-मु-अनु.। वितुर—ग; पितु—त३॥ ६३३. ३. **वहेर्लिटि**—ख-ग-ज्ञ-त१-२-न-भ-श-मु। वहेः—त३-मॅ॥ ६३३. ९. **ईमिमम्**—त२-न-भ-श-*मॅ-मु। ईं इमं—श॥ **व्याप्तधनं प्रभूतदानं वा**—ख-त-न-भ-श-मु। विभूतदानं वा—ग; व्याप्तधनं—घ। विभूतदानं—मॅ॥ ६३३. १७. **यष्टृतमम्**—ख-ग-घ१-त२-न-भ-श-मु। इष्टृतमं—च; यष्टतमं—ज्ञ। इष्टतमं—त३-मॅ॥ ६३३. २५. **प्रकृतिभावः**—ऽ-मु। प्रकृतिता च—मॅ। ६३४. १. **ब्राह्मणान्तरप्रदर्शनेन**—ख-ग-ज्ञ-त१-२-न-भ२-य-श। ब्राह्मणांतरप्रदर्शनेन व्याख्याता यः समिधा य आहुती यो वेदेनेत्यादिना—भ१। 'ब्राह्मणान्तरप्रदर्शनेन' नास्ति—त३-मॅ-मु॥ ६३४. २. **मर्तः**—ख-ग१-ज्ञ-त१-२-न-भ१-मु। मर्त्यः—ग२-त३-भ२-श-मॅ॥ ६३४. ३. **ब्रह्मयज्ञेन**—ग-त-भ१-श-मु। ब्रह्मयज्ञ—न-भ२-य। मॅ-पुस्तक एतन्नास्ति॥ ६३४. १२. **देवैः कृतम्**—त३-४-वर्जेषु लिखितपुस्तकेषु मु-पुस्तके च। त३-४-मॅ-पुस्तकेष्वेतन्नास्ति। ६३४. २४. **अतिथिर्न**—मु-त३-वर्जेषु लिखितपुस्तकेषु च। एतन्नास्ति त३-मॅ॥ ६३४. २६. **अभीष्टफल°**—ऽ-मु। अभिषवफल°—मॅ॥ **प्रत्यक्षकृतः**—ग-ज्ञ-त१-२-न-भ-श-मु। प्रत्यक्षत्वकृतः—ख-त३। प्रत्यक्षत्वकर्ता—मॅ॥ ६३४. २७. **क्षेमासो धारणान्यपि**—*मॅ-मु। त्वेक्षेमा रक्षकणान्यपि—ख; क्षेमासो रम्यान्यपि—घ-न-भ;त्वेसमा धीरणान्यपि—त३; क्षेमासो रक्षणा धारणान्यपि—श॥ ६३४. २८. **त्वमेव**—ग-घ-न-भ। एव—ख-त-श-मॅ-मु॥ ६३५. १. **दाश्वध्वरः**—ऽ-मु। दाश्वध्वरश्च—मॅ॥ ६३५. ३. **सनिता अस्तु**—ख-ग-घ-त३-न-भ-श। सनिता—ज्ञ-त२-मॅ। अस्तु भवतु—मु॥ ६३५. २५. **ज्ञातवतो**—न-भ२-श। ज्ञानवतो—ग-भ३; ज्ञातव—त; ज्ञातवो—भ१; ज्ञातव्यस्य—ख-मॅ-मु॥ ६३६. ११. **निशान°**—*मॅ-मु। निश्वान°—ख; निश्यान°—ग-न-भ-श; निश्श्यान°—न॥ ६३६. १२. **सः**—ग। एतन्नास्ति मॅ-इतरलिखितपुस्तकेषु च। सोऽग्निर्धीभिः—मु॥ ६३७. १३. **सौत्ये**—भ१-३-मु। सौम्ये—ग; स्तौत्ये—भ२; स्वोत्ये—श। स्तोत्ये—मॅ इतरेषु च॥ ६३९. १३-१४. **ये यथा……भवन्ति**। 'यं यथायथोपासते तथैव भवति' इति मुद्गलोप. ३. ३॥ ६३९. १४.**भवेयमिति**—*मॅ-मु। भवति—ख-त-श; भवानि—ग-न-भ॥ ६३९. १९. **वा**—ग-भ१। व—ख-त-न-श। च—मॅ-मु॥ ६४१. ९. **मुष्काणि**—मॅ। मुष्कानि—ऽ-मु॥ ६४१. ११. **स्तोतव्यत्वेन**—ग-त-भ१-३-*मॅ-मु। स्तोतव्येन—ख-न-भ२-श॥ ६४१.१९. **लभेय**—*मॅ। लभेयं—ऽ-मु॥ ६४१. ३०. **शत्रुं सर्वमपि**—ख-ज्ञ-त१-२-३-भ-श-मु। सर्व—ग। एतन्नास्ति घ-त४-मॅ॥ ६४२. १४. त२-३-४-न-श-मॅ-पुस्तकेषु प्रकृतमन्त्रभाष्यं न विद्यते। ख-ज्ञ-त१-भ-मु-पुस्तकेषु—'अप्येतद्यदुक्तमपि यदेतत् वक्ष्यमाणमिति। उतशब्दः एवमुभयं तं ('तं' नास्ति भ-निरुक्तटीकायां च) संभावयति। मे मह्यं (मम—निरु. टी.) प्रयियो प्रयायते प्रगम्यते (शाम्यते—य) येन तत् प्रयियु (प्रयियुः—मु) धनमश्वादि। तस्य प्रयियोः धनस्य बहुदात् (धनं दात्—ख)। ताभिः कन्याभिः सह वयियोः। ऊयते येन तद्वयियु वस्त्रादि तस्य च बहुदात्। तिसृणां (तिसृणां—ख-भ१-निरु. टी.) सप्ततीनां गवां श्यावः श्यामवर्णो वृषः श्यामवर्णानां प्रणेता प्रकर्षेण नेता अग्रतो गामी भुवद्वसुः

भावयिता वसूनां प्रशस्तः पूजितलक्षणः दियानां (दिव्यानां–त१; दीयानां–ख-ज्ञ-भ१; देयानां–य) दानार्हाणां गवां (गवां देया यास्तासां–निरु. टी.) पतिः। ताश्च गाः एतत्संख्यायुक्ताः एतद्गुण-युक्ताश्च मह्यमदात्। क्व पुनरसावदात्। सुवास्त्वाः सुष्ठुनिवासाया नद्याः अधि तुग्वनि तीर्थेधि एतददात् मह्यम्। सुवास्तुर्नाम (सुवास्तुः–ज्ञ-भ१-निरु.) नदी तुग्व तीर्थं भवतीति निरुक्तम्। अस्या ऋचो व्याख्यानं निरुक्तटीकाया उद्धृतम्[1] ॥ ग-पुस्तकपाठः–'कूलं या प्रयौति सा प्रयियुः। वृक्षादिकं यावयौति सा वयियुः। एवंभूता या सुवास्त्वा नद्या अधि तुग्वनि तीर्थे तिसृणां सप्ततीनां श्यावः श्यामवर्णः ऋषभः दियानां देयानां गवां पतिः वसुर्वासकः प्रणेता नायको भवदभवत् इति दानस्तुतिः' ॥ घ-पुस्तके – 'उताप्येतद्यदुक्तं मे मह्यं प्रयियोः अश्वादिषः श्यामवर्णानां प्रणेता प्रकर्षेण नेता मह्यमदात्। क्व पुनरसावदात्। सुवास्त्वाः सुष्ठुनिवासाया नद्याः अधि तुग्वनि तीर्थे अधि एतददात् मह्यम्। सुवास्तुनाम नदी तुग्व तीर्थं भवतीति निरुक्तम्। अग्रतो गामी भुवद्वसुः भावयता वसूनां (बहूनां–च) पूजितलक्षणः दियानां दानार्हाणां गवां पतिः ताश्च गाः एतत्संख्यायुक्ताः' ॥

[८. २०] ६४२. १६. **गन्त**। 'गन्ता' इत्यनुक्रमण्याम्॥ ६४२. २२. **हे प्रस्थावानः .....अस्मानागच्छत**—ख-ग-ज्ञ-त१-२-भ-मु। हे प्रस्थावानः गमनशीलाः अयं आगंतव्यं गच्छत–घ। हे प्रस्थावानो गमनशीला मरुतः यूयमा गंत आगच्छत–मॅ[2] ॥ ६४३. १. **महान्तः**—ख-ज्ञ-भ-*मॅ-मु। तद्वंतः–ग-श; तद्वातः–त२-३-४; तद्वांतः–न ॥ ६४३. ४. **कामयमानाः**—ख-ज्ञ-त१-२-भ-*मॅ-मु। ग-घ-त३-४-न-श-पुस्तकेष्वेतन्नास्ति ॥ ६४३. १८-१९. **परोऽर्धचैः परोक्षकृतः**। 'प्रत्यक्षकृतः' इति भाव्यम्॥ ६४३. २१. **निष्पद्यते**—ख-ग-त-न-भ१-२-य। विद्यते–श। निष्पाद्यते–भ३-मॅ-मु ॥ ६४४. ६. **आन्तरिक्षम्**—*मॅ-मु। अंतरिक्ष°–श; अंतरिक्षं–इतरेषु ॥ ६४४. ७. **पलायते**—ग-घ-भ१-३-मु। पालयते–ख-त-न-भ२-श-मॅ ॥ ६४४. ३०.

---

१. Cf. Max Müller: Preface to the 2nd Edition, Vol. IV, p. 172:
"*R* (i. e. Bombay Edition) borrows the commentary from the commentary on the Nirukta IV. 15, adding at the end of the verse (*not in a note*): अस्या ऋचो व्याख्यानं निरुक्तटीकाया उद्धृतं, which might give the impression, as if Sāyaṇa, not the Editors, had copied from the Nirukta-ṭīkā. At all events, this throws some light on the manner in which lacunas have been filled in *R*." As Max Müller could not find in his Mss. material this part of commentary, it is but natural that he should charge the Editors of the Bombay Edition with adding this portion of their own accord. Since, however, this portion is found in a good number of Mss. (some of them really old), it is quite clear that the Editors of Bombay Edition reproduced it from some Ms., and did not add of their own accord. It is evident that the scribe of the original copy of the Mss. ख-ज्ञ-त१-भ, not having found commentary on this verse, reproduced it from the Nirukta-ṭīkā.

२. Cf. Max Müller: Preface to the 2nd Edition, Vol. IV. p. 169:
"R (Bombay Edition) reads हे प्रस्थावानः प्रस्थातारः प्रगंतारः मरुतः आगंत अस्मानागच्छत quite different from our Ms. B., the only Ms. which has the passage. Is this a conjectural reading?" It is rather striking that Max Müller could not find this reading found in so many Mss. by us and also most probably by the Editors of the Bombay Edition, in his *apparatus criticus*.

शर्धं विशेष्यते—त३-न-*मॅ-मु। शर्धो विशेष्यंत–ख-त२; शर्धो विशेष्यते–ग-श-त४-भ; कीदृशे शर्धाय–घ ॥ ६४५. १४. **शक्त्यादीन्यायुधानि**—*मॅ-मु। शक्त्यान्यायुधानि–ख-त-न-श; शक्त्याख्यान्यायुधानि–ग-भ ॥ ६४६. ६. **स्मः**—घ-न-भ। रः–ग। स्म–त-मॅ-मु ॥ ६४६. ७. **हीनः**—ग-*मॅ-मु। हिनः–ख-त२-३-न-भ१; नहिनः–ज्ञ-त४-भ२-३; हीन–श ॥ ६४६. २४. **सुम्ना सुम्नानि सुखानि**—ग-न-भ-मु। सुम्ना सुखानि–घ-श। सुखानि–त-मॅ ॥ ६४७. १५. **वर्षितृन्**—ग-भ। वर्षितान्–घ; वर्षिन्–न; वर्षिष्ठान्–ख-त-श-मॅ-मु। ऋ. सं. ८. ७. ३३; २०. २०. द्रष्टव्यम् ॥ ६४७. १७. **शक्तान्**—*मॅ-मु। सत्कृतान्–ख-त; सेक्तॄन्–घ-भ; सेक्षन्–न; सनूतने–श ॥ ६४८. ११-१२. **धारयितव्ये स्तोत्रे यज्ञे**—भ-*मॅ-मु। धारयितव्यस्तोतृयज्ञे–ख-त-न; धारयितरि यष्टरि स्तोतरि यज्ञे–ग; धारयितव्यस्तोमे यज्ञे–श ॥ ६४८. २३. **असक्तशत्रवः**—मॅ। अशक्तशत्रवः–ऽ-मु ॥ ६४८. २४. **कल्याणीभिस्ताभिः**—ग-भ१-३। कल्याणीभिः स्तोत्रीभिः–ख-श-त१-२-४-श; कल्याणीभिः स्तोत्राभिः–त३-मु; कल्याणीभिः स्तोतृभिः–न-भ२; कल्याणीभिस्ततभिः–य। कल्याणीभिः–मॅ ॥

[८. २१] ६५०. २. **वाजयन्ति**—ग-त१। वाजंति–मॅ-मु इतरेषु च ॥६५०. ३. **वा**–ग-न-भ। त्वा–त२-३-श। ख-ज्ञ-त४-मॅ-मु-पुस्तकेषु 'वा' नास्ति ॥ ६५१. ३. **गोविकारे दधिपयसी**—*मॅ-मु। गोविकारो दधिपयस्य–ख-त-न; गोविकारो दधि पयश्च–ग-भ; गोर्विकारो दधिपयसोः–श ॥ **उच्येते**—*मॅ-मु। उच्यते–ऽ ॥ ६६१. ४. **श्रीते**—भ१-३। श्रीतेन–ख-त-नभ२-श-मॅ-मु ॥ ६५१. २१. **अभूम भवामः**—न-भ-श-मु। अभूमः–घ। भवामः–ख-ग-त-मॅ ॥ ६५१. २२. **सुञ्ज्यत्ययः**—श-*मॅ-मु। सुञ्यत्ययः–ख-त-भ२; सुप्ज्यत्ययः–ग;सुञ्यत्ययः–न; सुष्पत्ययः–भ१; सुप्तयः–भ३ ॥ ६५१. २३. **तु ते त्वां**—*मॅ। ते त्वां–मु। उत त्वं–ख-ज्ञ-त१-२; तु त्वां–ग१; तु त त्वा–ग२; नुत त्वं–त३-न; तु त्वं–त४; तु ते त्वं–भ१-३; ननु ते त्वं–श ॥ **रक्ष्या इति**—ग-*मॅ-मु। रक्षंत इति–त१-२-४-भ२; रक्षत इति–ज्ञ; इति–भ१; मिति–भ३ ॥ ६५१. २९. **अभ्यवहार्यम्**—ग-घ-भ। अभ्यवहार्थं–न। अभ्यवहारार्थं–ख-त-श-मॅ-मु ॥ ६५३. २८. **तान्नाश्रयसीत्यर्थः**—त३-४-न-श-मॅ। तान्नाश्रयसीत्यर्थः यदा त्वं नदनुं नद अभ्यक्ते शब्दे यं स्तोतारं कृणोषि मदीयोयमिति यदा भावयसि तदानीं समूहसि धनादिकं तस्मै वहसि। आदित् अनंतरमेव तेन लब्धधनेन स्तोत्रा पितेव पालयिता जनक इव हूयसे स्तुतिभिराहूयसे स्तूयस इत्यर्थः–ख-ज्ञ-त१-२-भ-मु। तान्नाश्रयसीत्यर्थः यदा मानबस्य नदनुं दानादिराहित्यं समूहसि निराकरोषि यष्टृत्वं कृणोषि करोषि आदित् अनंतरमेव पितेव सन् तेन हूयसे–घ ॥ ६५४. १६. **मा**—घ। तस्मादन्नं न–ग२-ज्ञ-त१-४-भ१-२; तस्माद्धनं–भ३; तस्मादन्यन्न–ख-ग१-त२-३-न-श-मॅ-मु ॥ **ग्रहेः**—ख-त२-३-४-न-भ२-श-मु। गृहेः–ग-ज्ञ-भ१-३-मॅ ॥ ६५४. १८. **धनादिभिः**—ख-ग-त२-न-भ-*मॅ-मु। नादिभिः–त३; भरणादिभिः–श ॥ ६५४. १९. **कैश्चित्**—ग-*मॅ-मु। कश्चित्–इतरेषु ॥ ६५५. ५. **वर्तन्ते तान्**—भ३-*मॅ-मु। त्रतंत तान्–ख-त-न; ततान्–घ; तत्रंते तान्–भ१; त्रतंते तान्–भ२; तान् ततान्–श ॥ ६५५. ६. **धनैस्तनोति**—ग२-भ३-*मॅ-मु। धनौ सनोति–ख-ज्ञ-त२-३-४-न; सनोति–घ; धनै सनोति–त१; धनैः सनोति–भ२; धनं सनोति–श; धनैस्तनोमि–भ१ ॥

[८. २२] ६५५. ११. **आश्विनम्**—ग-श-त२-भ१-३-*मॅ-मु-अनु. । **अश्विनं**—ख-त३-४-न-भ२ ॥ ६५५. १८. **उपक्षपयितारम्**—भ१-३-*मॅ-मु । उपजनायतारं—ख-त-न; उपयितारं—ग; उपजनयितारं—श ॥ ६५५. १९. **सुहवा सुहवौ**—ख-ग-श-त१-२-भ-श-मु । **सुहवौ**—त३-४-न । सुहवा—घ-मॅ ॥ ६५५. २१ **सूर्या स्वयंवरे**—ग-भ-श-मु । सूर्यास्वयंवरे—ख-घ-त-मॅ ॥ ६५५. २७. **यज्ञेषु**—ख-ग-श-त१-२-न-भ-श । यक्तेषु—त३-४ । युद्धेषु—*मॅ-मु ॥ ६५५. २९. **कैश्चिदप्यनुपद्रवम्**—ऽ-मॅ-मु । ! ॥ ६५६. ३. **द्योतनशीलौ**—ख-ग-श-त३-४-भ-श-*मॅ-मु । द्यौतन°—त२ ॥ ६५६. ११. **परि ईयते**—घ-भ१-३ । मॅ इतरेषु चैतन्नास्ति । ईयते गच्छति—मु ॥ ६५६. १३. **मन्त्रान्तरम्**—*मॅ-मु । मंत्रांतरं सति—ख-त-य; मंत्रांतरं संति—न-भ१-२; मंत्रांतरे सति—भ३-श ॥ ६५६. २३. **द्यावापृथिवी द्यावापृथिव्यौ**—ग-घ-भ-मु । द्यावापृथिव्यौ—ख-त-श-मॅ ॥ ६५६. ३१. **वृकेण**—*मॅ-मु । वृकेण लांगलेन—ऽ ॥ ६५७. १. **धान्यम्**—*मॅ-मु । धान्यं वा—ग; धनं वा—इतरेषु ॥ ६५७. ९. **अस्मानुपयातमागच्छतम्**—घ१-*मॅ-मु । अस्माकं नुपमानं गच्छंतौ (गच्छतौ—त२-४)-ख-त१-२-३-४-न-भ२; अस्मानुपयातं गच्छतं—ग; अस्माकमुपयातमागच्छतं—च-य; अस्माकमुपयातं गच्छतं—भ३; अस्माकं उपमानं गच्छंतौ (गच्छतौ—श)-श-भ१-श ॥ ६५७. ११. **एवम्**—ऽ-मु । एव—मॅ ॥ **आगच्छतम्**—ग । आगं—भ२ । आगतं—मॅ-मु इतरेषु च ॥ ६५८. १. **यत्**—ग-घ-भ । यद्यच्छत्—ख-त-न-श; यद्यत्—*मॅ-मु ॥ ६५८. ६. **अधृतगमनाः**—ग-भ१-३-*मॅ-मु । अधृतनाः—त४; अधृतधनाः—इतरेषु ॥ ६५८. १९. **वन्दनो**—भ-*मॅ । वंदन—मु इतरेषु च ॥ ६५८. २०. **मायाभिः**—*मॅ । मालाभिः—ऽ-मु ॥ ६५९. १. **स्तूयमानमार्गौ**—ख-श-त२-न-भ१-३-*मॅ-मु । यामन् मार्गे—ग; स्तूयमार्गौ—त३-४; स्तूयमानमार्गैः—भ२ ॥ ६१९. ४. **नः अस्मान्**—घ । नोस्मत्—मॅ-मु इतरेषु च ॥ ६५९. ८. **सेवनीयशीलौ**—*मॅ । सेचनीयशीलौ—ख-घ-त-न-भ-श-मु । सचनशीलौ—ग । 'सचनीयौ' अथवा 'सेवनीयौ' इति साधु इति मॅक्समुल्लरमहाशयेनाभिप्रेतम् । ऋ. सं. २. ३१. ४; ८. ७०. ८. अत्र द्रष्टव्यम् ॥ ६५९. १७. **गच्छन्तीभिः**—ग । गच्छद्भिः—मॅ-मु इतरेषु च ॥ ६५९. १८. **आरात्ताच्चित्**—ग-घ-मु । आरात्तात्—मॅ इतरेषु च ॥ ६६०. १. **प्रयच्छति**—ख-त-न-भ-श-*मॅ-मु । प्रयच्छंति—ग ॥ ६६०. ६. **लिडि**—मॅ-मु । लिटि—ऽ ॥

[८. २३] ६६१. १३. **अनुषक्तम्**—ख-ग-त-न-भ-श-मु । अनुषगनुषक्तं—घ । आनुषक्तं—मॅ । निरु. ६. १४ द्रष्टव्यम् ॥ ६६१. २०. **यष्टृत्वेन**—*मॅ-मु । यष्टृयष्टव्येन—ख-त-न-भ-श; याज्ययष्टृत्वेन—ग; यष्टव्येन—घ ॥ ६६१. २७. **यज्ञवति**—ग-भ३-*मॅ-मु । यज्ञं प्रति—ख-घ-श-त१-२-भ२-य-श; घत्रयज्ञं प्रति—त३-४-न; ज्ञं प्रति—भ१ ॥ ६६३. १४-१५. **मायायापि तस्य**—ग-घ-*मॅ-मु । मायावि(व्योवि—श)तस्य—ख-ज्ञ-त३-४-भ२-श; वमायावि तस्य—त२; मायावि तस्य—न; मायान्वि तस्य—भ१-३ ॥ ६६३. २१. **त्वा त्वाम्**—ग-घ-न-भ-मु । त्वां—ख-त-श-मॅ ॥ ६६३. २६. **गृहे**—*मॅ-मु । यज्ञे—ग; सह—इतरेषु ॥ ६६४. ३. **अस्माकम्**—मॅ-मु । नोस्माकं—ऽ ॥ ६६४. ४. **त्वा**—घ१-वर्जेषु लिखितपुस्तकेषु । घ१-मॅ-मु-पुस्तकेषु नास्ति ॥ ६६५. ५. **ज्वलत्तेजसे**—ख-ग-घ-त१-३-भ । ज्वलत्तेजसो—त२-४; ज्वालंत्तेजसे—न । ज्वालातेजसे—मॅ-मु ॥ **कथमिव**—ख-ग-श-त१-२-४-भ-श । वयमिव—त३-न । वयमिह—मॅ-मु ॥ ६६५. १०. **बाध-**

परिहारेण—ग-भ१-२-श-*मॅ-मु। बाधपरिपूरेण–ख-श-त२-३-४-न; बाधापरिहारेण–भ३ ॥ ६६५. १७. **अरणीभिः**—ग-घ-*मॅ-मु। वारणीभिः–मु इतरेषु च ॥ ६६६. १९. **यशस्वी असि**—घ-भ-मु। साति यशस्वी–ग; यशासि–श; यशस्त्वं–श; यशस्वासि–ख-त२-३-४-न-मॅ ॥

[८. २४] ६६६. २४ **विश्वमना ऋषिः**—*मॅ। वैयश्वनाम ऋषिः–ऽ-मु ॥ ६६७. ४. **इत्वषत्वे**—ग-भ१-३-मु। इत्त्वषत्वे–मॅ। ईत्त्वषत्वे–भ२; इतिषत्वे–ख-त-न-श ॥ ६६७. १०. **हि प्रसिद्धौ**—मॅ-मु। हि प्रसिद्धो भूः–ग; हि प्रसिद्धो भूत्–इतरेषु ॥ ६६७. १७ **नानाविधान्नोपेतम्**—भ१-३-श-*मॅ-मु। नानाविधौपेतं–ग२; नानाविधानोपेतं–ख-घ-त-न-भ२ ॥ ६६७. २३ **निरेकम्**—*मॅ-×। मु–पुस्तकेऽप्येतन्नास्ति ॥ ६६७. २५. **स्तवमानः**—श-*मॅ। स्तवानः–ख-ग-त१-३-४-न-भ२-३-मु; स्तवनः–घ; स्तवान–श। ६६८. १२. **तथा मनः**—*मॅ-×। तथा मदीयं मनो–मु ॥ ६६८. १७. **नामन्त्रिते**—ग-भ। आमंत्रिते–ख-त-न-श-मॅ-मु ॥ ६६९. ३. **नर्तयितः**—ग-*मॅ-मु। वर्तयितः–ख-घ-त-न-भ; वर्तमानं–श ॥ ६७०. २. **अभिषुणुत**—ग-भ२-य। अभिषुत–मॅ-मु इतरेषु च ॥ **मदकरम्**–भ२। मधुरं–ग। मधुकरं–मॅ-मु इतरेषु च ॥ ६७०. ९. **दक्षम्**—ग-भ१-श-*मॅ-मु। रक्षं–इतरेषु ॥ ६७०. २७. **ऋत्विक् मध्वः**—ख-ग-त-न-भ-श-मु। ऋत्विक् सदावृधः सर्वदा वृद्धिमतो मध्वः–घ-मॅ ॥ ६७०. २८-२९. **अभिषुणु.....वर्धकः**—ग-भ। एतन्नास्ति ख-त-न-श-मॅ-मु। ऋ. सं. ४. ३१. १; ५. ३६. ३; ८. ६८. ५ एतेषु 'सदावृधः' इत्यस्य, ऋ. सं. ८. २४. १३. अत्र 'सिंच' इत्यस्य च व्याख्यानं द्रष्टव्यम् ॥ **अयमेवेन्द्रः**—ग-भ-मॅ-मु। कोपे(कोये–त१-२)नेवेन्द्रः–ख-त; इत् वा उ अयमेवेंद्रः–घ; कोयमेवेंद्रः–न-श[1]। 'स्तूयते खलु' इत्यस्यानन्तरं मु-पुस्तके 'कीदृशः वीरः विक्रांतः सदावृधः सर्वदा वर्धमानः' इत्यधिकं विद्यते ॥ ६७१. ५. **उपलक्षणमेतत्**—भ। उपलक्षणं–*मॅ-मु इतरेषु च। 'उपलक्षणमेतत्' इति भाष्ये साधारणः पाठ इति मॅक्समुल्लरमहाशयेनोक्तम् ॥ ६७१. ६. **छान्दसो मुम्**—*मॅ। छांदसो वोम–ख-त-न; छांदसो द्वितीयो नुट्–भ; छांदसो लोपः–श। छांदस आगमः–मु ॥ ६७१. ७. **सर्वैः**—ग-श-भ३-*मॅ-मु। सर्वैरिति–त२-४-भ२ ॥ ६७१. ३१. **ऋत्विग्भिः**—ग-श-न-भ-श-*मॅ। ऋत्विस्तः–ख त२-३। ऋत्विग्भ्यः–मु ॥ **मदीयम्**—ग-त-न-भ। यदिदं–श-मॅ-मु ॥ ६७२.१. **घृताच्च मधुनश्च**—ख-ग-त२-भ-श-मु-आश्व. गृ.। घृतान्मावुश्च–त३; घृतास मधुनश्च–भ२। घृतान्मधुनश्च–घ-न-मॅ ॥ ६७२. ९. **धनदानम्**—ग-घ-मु। धनं दानं–मॅ इतरेषु च ॥ ६७२. २५-२६. **नव वै.....दशधा चरन्तम्**। 'नव वै पुरुषे प्राणाः' एतावन्मात्रोंऽशः तैत्तिरीयब्राह्मणे (१. ३. ७. ४) उपलभ्यते। 'दशधा' इत्यस्य स्थाने 'दशमो' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ६७३. ६. **संबोध्याह**—ग-भ१-३-*मॅ-मु। संबोध्य–इतरेषु ॥ ६७३. ८. **भवन्तीति**—*मॅ-मु। भवन्ति–ऽ ॥ **शोधनहेतुत्वात्**—ग-भ२-३ । शोधने हेतुत्वात्–भ१; शोभनहेतुत्वात्–इतरेषु। शोभाहेतुत्वात्–मॅ-मु ॥ ६७३. ९. **यजमानानामिव**—*मॅ-मु । पद्यमानानां यजमानानां–ख; पतमानानां–ग२-त४-भ; पद्यमानानां पतमानानां–श-त२; पद्यमानानां यजमानानां राया (राया

---

1. The fact that many Mss. have को before यमेवेंद्रः suggests that some portion is here wanting whose last letter may be को. This want is fulfilled by the passage reconstructed on the basis of Mss., which has वर्धको as the last word.

इव–य) त१-य ॥ **परिपदां समानाधिकरणः**—*मॅ-मु । परिपदी समानक–ख-श-त२-३-४-न-भ१; परिपदां समानक–त१; पद्यमानानां–भ१-३ ॥ ६७३. १९. **विशेषेण**—भ । विशेषणं–ग । निःशेषेण–त-मॅ-मु ॥ ६७३. २५. **संन्यसे**—त२-भ२-*मॅ-मु। सन्यसे–ख-ग-घ-श-भ१-३; संन्यासे–त३; सन्यासे–त४ । ' सन्र्यसे ' इति पदपाठः ॥ ६७४. १. **ऋन्**—*मॅ-मु । ऋन–जोधपूरलिखित-पुस्तके । ऋन्–इतरेषु ॥ **क्षणोतेः**—*मॅ-मु । अर्तेः–ग; ऋणोतेः–इतरेषु ॥ ६७४. ३. **किं पुनस्तं हन्ति**—*मॅ-मु । किं पुना हंति–ख-त; किं पुनः हंति–ग-घ-श; किंतु नाहंति–न-भ१-२-य; किमु न हंति–भ३ ॥ ६७४. ७. **हननसाधनम्**—ग-घ-न-भ-मु । हननसा(युधं)–ख-त-श । हनन-साधकं–मॅ ॥ ६७४. १६. **वाजनम्**—मॅ-मु । वर्जनं–ख-ग-त-न-श; वर्धनं–भ ॥ ६७४. १९. **प्रापितवती**—*मॅ-मु । प्रापितवान्–§ ॥ ६७४. २०. **करोषि**—*मॅ-मु । करोति–§ । ' कारय ' इति भाव्यम् ॥ ६७४. २४. **आदत्तवान्**—*मॅ-मु । दत्तवान्–§ ॥ ६७५. २. **यदा**—भ३-*मॅ-मु । यद्वा यथा–ख-त१-२-३-न-भ१-२; यद्वा यदा–ग ॥

[८. २५] ६७५. ७. **विश्वमना**—ख-श-त२-भ-*मॅ । वैयश्वनामा–मु ॥ ६७५. २२. **कर्त्रपेक्षत्वात्**—ग-भ३ । कर्तृपेक्षत्वात्–न-भ१-२ । कर्तृपक्षत्वात्–ख-श-त२-३-श-मॅ-मु ॥ ६७६. ४. **ऋतावाना**—§-मॅ । ' ऋतऽवानौ ' इति पदपाठः । ऋतावानौ–मु ॥ ६७६. १०. **बलाद्वेगः**—भ-*मॅ-मु । बलाद्देग–ख-त; बलोवेग–श; **द्वेग**—न ॥ ६७६. १२. **क्षयतेः**—त२-न-श-मॅ-मु । क्षीयतेः–भ । ' क्षियतेः ' इति भाव्यम् ॥ ६७६. २०. **वृष्टथवेला तदा**—*मॅ । वृष्टथवेजानाद–ख-त-न-भ२; वृष्टथभावो जातः तदा–भ१-३-श । मु-पुस्तक एतद्वाक्यं नास्ति ॥ ६७७. १३. **तद्वददुःसहेन**—भ१-श-*मॅ-मु । तद्वदः दुःसहेन–ख-त-न; तद्वदुःसहेन–भ२-३ । तद्वत् दुःसहेन–मु ॥ **अहोरात्रयोः**—*मॅ-मु । अहोतात्रयोः–ख-त-न-श; लोकत्रयेन–भ१; लोकत्रय–भ२-य; लोकत्रये–भ३ ॥ ६७७.१९. **वृद्धश्रवसः** । ' वृद्धऽश्रवसः ' इति पदपाठः ॥ ६७८. १. **पालनवत्त्वात्**—*मॅ-मु । पालनैवत्त्वान–ख-ज्ञ-त३-४; पालनैवत्त्वात्–त१-२; पालनैतत्त्वान–न; पलितेतत्त्वात्–भ१; पलिनेवत्त्वात्–भ२; मरुत्पालितत्वात्–भ३ ॥ ६७८. ४. **कर्म**—भ-श-*मॅ-मु । कर्मक–ख-त-न ॥ ६७८. १०. **उरुतरम्**—*मॅ-मु । गुरुतरं–§ ॥ ६७८. १९. **पालयताम्**—भ१-२-*मॅ-मु । पालयंतां–इतरेषु ॥ ६७९. ११. **वरुणस्य**—श-*मॅ । वरुर्षण–भ१; वर्षणस्य–इतरेषु ॥ **च**—*मॅ । धां–ख; व–त१; वा–मु इतरेषु च ॥ ६७९. १६. **पर्यन्तान्**—*मॅ-मु । रपानति–ख-ज्ञ-त२-३-४-न-भ१-२; स्थानति–त१; अंतरान्–घ; अंतानपि–भ३; पारं परितो मिनोमि–श ॥ ६७९. २३. **रूपम्**—*मॅ-मु-× ॥ ६८०. ५. **लुक्**—*मॅ-मु । षष्ठी–§ ॥ ६८०. ११. **उक्षण्शब्दात्**—न-भ-*मॅ । उक्षणशब्दात्–ख-त-श-मु ॥ ६८०. १२. **वृद्धिभावोऽपि**—*मॅ । वृद्धयभावोपि–ख-त-न-भ१-३-मु; वृद्धभावोपि–भ२; वृद्धयभावेपि–श ॥ ६८०. १३. **बहुवत्पितृशब्देन (?)**—§-मॅ-मु ॥ ६८०. २१. **स्वकुशलं**—ख-त-न-भ२-श । स्वकुलं–भ१; स्वकुशले–भ३ । कुशलं–मु । नु कुशलं–मॅ । एतद्बुधं दृश्यते ॥ **आयुधनेतृणाम्**—श-*मॅ-मु । अयुतनेतृणां–ख; अधुयनेनृणां–त-न; अधूयने-तृणां–भ१-२; अध्वरनेतृणां–भ३ ॥ ६८०. २२. **भवेताम्**—भ३-*मॅ । भवेत–§ । भवेतं–मु ॥ ६८०. २७-२८. **मेधाविनामुचितौ**—*मॅ-मु । मेधाविनामस्थितौ–ख-त-न; मेधाविनौ–घ-श; मेधाविनावस्थितौ–भ ॥ ६८१. २. **प्रत्यग्रहीषम्**—*मॅ-मु । प्रत्यगृहीतं–§ ॥

[८. २६.] ६८१. ४. **तत्पूर्वाः**—त२-*मॅ-मु-अनु. । तत्पूर्व्यः–इतरेषु ॥ ६८१. ७. **पञ्चदशर्चः**—भ३-मु । पंचर्चः–त-न-भ१-२-श-मॅ ॥ ६८१.१४. **युवयो रथम्**—घ-मु । युवयोरर्थ–मॅ इतरेषु च ॥ ६८१. २२. **तनोतीति**—भ३-श-*मॅ-मु । तनोति–इतरेषु ॥ ६८२. १२. **रोदनशीलौ रुवन्तौ**—*मॅ-मु । रोदनशीलो देवत्यौ–न; रोदनशीले देवत्यौ–ख-त-भ-श ॥ ६८२. १४. **संक्रेशयतम्**—*मॅ-मु । संक्रेदयतं–ख-श-त१-२-३-भ२-३; संकेदयतं–त४-न; संक्रंदयतं–भ१; संकेतयनं–श ॥ °**संक्रेशनयोः**—*मॅ-मु । °संक्रेदनयोः–ख-त-भ२-३; (हिं)सकेदनयोः–न; °सनकेदनयोः–भ१; °संकेतनयोः–श ॥ ६८२. २०. **युवयोः**—*मॅ-मु । युवां–§ ॥ **ते तत्रैव**—*मॅ-मु । ते तु तत्रैव–न-भ-श; वे तु तत्रैवं–ख-त ॥ ६८२. ३०. **तैरपच्यावनीयौ**—*मॅ-मु । तैरुप्यचावनीयौ–ख-भ१; तैरुप्यप्यावनीयौ–त-न-भ२; कैरप्यप्यावनीयौ–भ३; तैरुपप्यावनीयौ–श ॥ ६८३. १२ **स्तुत्वा**—मॅ-मु । स्तुत्या–§ ॥ ६८३. २१. **अपनेतॄन्**—*मॅ-मु । आनेतॄन्–§ ॥ ६८३. २२. **आडागमः**—भ२ । अडागमः–त२-न-भ१-श-मॅ-मु ॥ ६८३. २७. **आत्मीयतया**—§ । आत्मायत्तया–*मॅ-मु ॥ ६८३. २८. **संगतौ सन्तौ**—ख-घ-त-न-भ१-२-श-मु । संगतौ–भ३-मॅ ॥ ६८४. २८. **क्रतौ**—श-*मॅ-मु । इतरेषु नास्ति ॥ **हवानाम् इति**—भ३-श-*मॅ-मु । हवानां–त-न-भ२ ॥ ६८५. ६. **सप्तम्याः सः**—§-मॅ । सप्तम्याः मुः–मु । अयमेव साधुः ॥ ६८५. ८. **अमनुष्यौ**—*मॅ-मु । मनुष्यौ–§ ॥ ६८५. १२. **श्वेतयावरीनाम्न्या**—भ । श्वेतयावरीनान्यो–त-न-श । श्वेतयावरीनाम्न्यो–मॅ-मु ॥ ६८५. २१. **हिरण्मयकूलवत्त्वात्**—ख-त-न-भ-श । हिरण्मयकूलवत्या–मॅ-मु ॥ ६८५.२८. **करतलास्फालनैः**—त१-२-३-न-भ-श-मु । करलास्फालनैः–ख; करललास्फालनैः–ज्ञ-त४। करलतास्फालनैः–*मॅ । 'करतलास्फालनैः' इति पाठः समीचीनतर इति मॅक्समुल्लरमहाशयः[1]॥ **आश्वास्य पोषणीयौ**—भ३-*मॅ-मु । आश्वाश्व(अश्वाश्व–भ१-२)पेषणीया–त१-२-३-न-भ१-२; आश्वास्य पोषणीया–श ॥ ६८६.२२. **अश्वावावह्**—*मॅ-मु । अश्वावाह्–ज्ञ-त२-भ;अश्व्यावाह्–त३-४-न-श ॥

[८. २७] ६८७. ११. **प्रागाथम्**—भ-श-*मॅ-अनु. । प्रगाथं–ख-त-न-मु ॥ ६८७.३२. **ओषध्यः**—§-मु । ओषधयः–मॅ ॥ ६८८. २०. **वा**—*मॅ-मु-× ॥ ६८८. २८. **स्तोतृषु**—§ । स्तोत्रेषु–मॅ-मु ॥ ६८८. २९. **शुश्रूषुतया प्रातव्यया**—*मॅ-मु । शिश्रूषतया प्रातव्यत्यया–ज्ञ-त२-३-४-भ२; शुश्रूषुतया प्रातव्यत्यया–त१; शिश्रूषतया मातव्यया–न-भ१; शुश्रूषिततया जानव्यया–भ३; शुश्रूषतया प्रातव्यतया–श ॥ **तया**—भ३-*मॅ-मु । गिरा–श; गतया–इतरेषु ॥ ६८९. २८. °**कर्मणि**—§-मु । °कर्माणि–मॅ (मुद्रणदोषः १)॥ ६९०. १५. **विभाषितणिच्त्वात् यदा णिच्**—*मॅ-मु । विभाषिताणिस्त्वात् यदा णिङ्–ज्ञ-त२-३-४; विभाषितणित्वात् यदा णिङ्–न-भ; विभाषिताणित्वात्यदाण्णिङ्–श ॥ ६९१. १३. **कुर्वते**—§ । कुर्वति–मॅ-मु ॥ ६९१. ३१. **अपरम्**—*मॅ-मु-× ॥ ६९२. ८. **क्रियमाणत्वात्**—*मॅ-मु । क्रियमाणा°–ख-त-न-भ२; क्रियमाणानां–ग-भ१-३ ॥ ६९२. ११. **हविर्भाक्त्वम्**—ग-भ२-य । हविर्भाक्तं–त४-न; हविर्भक्षं–ज्ञ-त२ । हविर्भक्षणं–श-मॅ-मु ॥ ६९३. ८. **ऋजुगमने प्रस्थे**—*मॅ-मु । ऋजुगमनप्रेरन्–ख-त-भ१; ऋजुगमनप्रेरयन्–न-भ२-३-श ॥ ६९३. १८. **मुचिः**—*मॅ । निमुचिः–§-मु ॥ ६९३. २०. **धनं मनवे**—*मॅ-मु । धनं मध्ये–ग-भ३; धने मध्ये–त-भ१-२ ॥ ६९३. २५. **आयुधानाम्**—

---

1. Preface to the 2nd Edition Vol. IV. p. 178.

ग। आप्तानां–मॅ-मु इतरेषु च ॥ ६९४. ९. **निम्रोचने**—मॅ। आनिम्रोचने–ख-घ-त-न-भ-श-मु; आनिचेने–ग ॥ ६९४. १७. **तद्धनम्**—ऽ-मॅ। तद्धनमावृणीमहे संभजामः तथा हविर्जुह्वतः यागं कुर्वतो वयं हे आदित्याः तद्धनं–मु ॥ ६९४. १८. **अनशामहै**—ख-ग-त-न-भ-श-मॅ-मु। अनशामहै अश्नुयाम हे आदित्याः अदितेः पुत्रा देवा बहिः (? हविः) जुह्वतः अस्माभिर्दत्तं हविः स्वीकुरुत ततः धनंत्त तद्धनमावृणीमहे वयं संभजामहे–घ। एतन्मन्त्रभाष्ये कानिचिन्मन्त्रगतानि पदानि न व्याख्यातानि। मु-पुस्तके तेषां व्याख्यानं दृश्यते। 'तत् धनम्' इत्यस्यानन्तरं मु-पुस्तके 'आ वृणीमहे संभजामः। तथा हविः जुह्वतः यागं कुर्वतो वयं हे आदित्याः तद्धनं' इत्यधिकं विद्यते ॥

[८. २८] ६९४. २१. **विश्वे देवाः**—ऽ-मु। विश्वे देवे–मॅ ॥ ६९५. १३. **निर्दिशति**—भ१-३-श-मु। निदिशति–इतरेषु मॅ-पुस्तके च ॥ ६९५. २८. **अदितेः (?)**—ऽ-मॅ। **दितेः**–मु। एतदेव युक्तम् ॥ ६९५.३१. **सप्रपञ्चेन (?)**—ऽ-मॅ-मु। 'सप्रपञ्चम्' अथवा 'प्रपञ्चेन' इति भाव्यम् ॥

[८. २९] ६९६. ५. **वैश्वदेवशस्त्रे**—ऽ-मु। मॅ-पुस्तक एतन्नास्ति ॥ ६९६. ९. **किंचित्पदलिङ्गात् पृथक्देवताः**—ग-ज्ञ-मु। किंचित्पदंलिंगात् (°पदलिंगात्–भ२-३-य) पृथक् पृथक् (पृथक्–ख-त३-४) देवताः–ख-त१-२-३-४-न-भ; किंचित्पदविभागात् लिंगात् पृथक्देवताः–श। किंचित्पदं लिंगात्पृथक्देवतं (?)–मॅ ॥ ६९६. १०. **सौम्यम्**—ग-न-भ-*मॅ। सोम्यं–त-श-मु ॥ ६९६. ११. **शबलतादिषु(?)**—*मॅ। सवलतादिषु–त४; सचलतादिषु–श; सर्वलतादिषु–इतरेषु मु-पुस्तके च ॥ ६९६. १२. **तावदुद्गते**—*मॅ-मु। तावुदिते–ख-त३; तानुभानुपुष्टे उदक्षे–ग, तावुउदिते–ज्ञ-त१-२; तावुदते–त४-भ१-२; तायुदात–न; ल्लताः पुष्यंते–भ३; तापोपनुदत्–श ॥ **दुःस्वोपशमनानि पुष्टानि खलु**—*मॅ-मु। सर्वे स्वदुःस्वोपशमनेन (स्वदुःस्वशमनेन–य) पुष्यंति खलु–ख-ज्ञ-त१-२-भ; सर्वदुःस्वोपशमनेन (सर्वस्वदुःस्वापशमनेन–त३-४-न) पुष्टानि खलु–ग-त३-४-न-श ॥ ६९६. १३. **रात्रयश्चन्द्रनेतृकाः**—ग-*मॅ-मु। शस्त्रयश्चंद्रनेतृकाः–त-न-भ२-श; रस्त्रय-श्चंद्रनेत्रकाः–भ१-३ ॥ ६९६. ३१. **आवरकाणि**—मॅ। अपामावरकाणि–ऽ-मु ॥ ६९७. १४. **यथा**—*मॅ-×। मु-पुस्तकेऽप्येतन्नास्ति ॥ ६९७.१६. **तदाहृत्य**—ऽ-मॅ-मु। 'तानि आहृत्य' इति भाव्यम् ॥ **स्वसहायेभ्यः**—*मॅ। तस्य सहायेभ्यः–ऽ-मु ॥

[८. ३०] ६९८. २१. **लेटि**—*मॅ-मु। लोटि–ऽ ॥ ६९८. २२. **लुगभावः**—न-भ-*मॅ-मु। नुगभावः–त-श; स्वभावः–ग ॥ **असतिः**—न-भ। असथेति–त-श-मॅ-मु। ६९९. १. **धनादिमन्तश्च**—भ३-*मॅ-मु। धनादिमन्तश्च–इतरेषु ॥ ६९९. १-२. **मानवात्.....तस्मात्**—*मॅ। मानवात् (मनुः–न; मानवाः–श) सर्वेषां मनुः पिता तत (तेन–श) आगतात् परावतः पिता मुहुरं (दूरं–श) मार्गं चक्रे तस्मात्–ज्ञ-त३-४-न-श; मानवात् पित्र्यात् सर्वेषां मनुः पिता ततः आगतात् परावतः दूरात् पथः–घ। त२-भ-पुस्तकयोः 'सर्वेषाम्' इत्यस्मादनन्तरं 'मनुः' इति पदमधिकमस्ति। मु-पुस्तके–'मानवात् पित्र्यात् मनुः सर्वेषां पिता तत आगतात् परावतः पिता मनुर्दूरं मार्गं चक्रे तस्मात्' ॥ ६९९.४. **अस्मान्**—*मॅ-मु। मास्मान्–ऽ ॥ ६९९.११. **विश्वानरः**—*मॅ। वैश्वानरः–ऽ-मु ॥ ६९९. १३. शृणाति–*मॅ। शृणोति–ऽ-मु ॥

[८. ३१] ६९९. २८. **लेट्यडागमाः**—*मॅ। लेट्यडागमौ–ऽ। **लेट्यडागमः**–मु। 'लेट्याडागमाः' इति भाव्यम् ॥ **ब्रह्म**—मॅ। ब्रह्मेत्–घ; इतरलिखितपुस्तकेषु एतन्नास्ति। '**ब्रह्मा**' इति

पदपाठः । एवमेव मु–पुस्तके ॥ ७००. ८-९ **दीप्तिमान्...असत्**—*मॅ । दीप्तिमान् (दीप्तिमान् सन्–ग) रथः स्यंदनः देवानां हविष्प्रदानरूपेण यज्ञेन (यज्ञे–ग; पूजनेन–भ३) असत्–म-भ३-मु; दीप्तिमान् रथः असत्–घ; दीप्तिमान् शीलो स्यंदनः देवानां हविष्प्रदानरूपेण पूजायज्ञेन (यूयज्ञेन–त ३-न-भ१; पू॰ यज्ञेन–ज्ञ-त२-४) असत्–ज्ञ-त२-३-४-न-भ१-२-श ॥ ७००.११. **येन मे रथः**—*मॅ-मु । यो हेमंरथैः–ख-त-न; यागे रथै–ग; यो हेमरथः–भ; यो हैमरथे–श ॥ ७००. १२. **येन**—*मॅ-मु । तेन–§ ॥ ७००.१७. **अहरहः**—ख-त१-२-न-भ-श-मु । ग-घ-त३-४-*मॅ-पुस्तकेष्वेतन्नास्ति ॥ **देवैः**—ख-घ-ज्ञ-त१-२-न भ-श-मु । ग-*मॅ-पुस्तकयोरेतन्नास्ति ॥ ७०१. ३. **प्राशितव्यान्**—*मॅ । प्राशन्यान्–§-मु ॥ ७०१. ५. **तिष्ठेताम्**—ग-घ । तिष्ठतां–भ१ । तिष्ठातां–मॅ-मु इतरेषु च ॥ ७०१. ८. **न अपि**—*मॅ-मु । अपि–§ ॥ ७०१.९. **अपलपन्ति**—मॅ-मु । अपलपति–§ । 'अपलपतः' इति भाव्यम् ॥ ७०२. ५. **भवतो**—ग-*मॅ-मु । भवथ–इतरेषु ॥ ७०२. ६. **वर्तामह इत्यर्थः**—ग-भ३-*मॅ । वर्तामिदमित्यर्थः–ख; वर्तामित्यर्थः–ज्ञ; वर्तामिदंत्यर्थः–त२; वर्ताम इत्यर्थः–मु इतरेषु च ॥ ७०२. १०. **प्रत्यागच्छतु**—ग-घ । प्रतिगच्छतु–मॅ-मु इतरेषु च ॥ ७०२. २०. **गोपायितारो**—ख-ग-घ-ज्ञ-त१-२-भ२-३-मु । गोपयितारो–त३-४-न-श-मॅ ॥ ७०२. ३०. **क्षेत्रो**—§-मॅ-मु । 'क्षेत्रम्' इति भाव्यम् । ऋ. सं. ३. ८. ७. द्रष्टव्यम् ॥ ७०३. १६. **मनः**—ग-घ-*मॅ । न–त-न-मु ॥ ७०४. ६. **आशुगमनाश्व°**—भ३-*मॅ-मु । शीघ्रगमनाश्व°–ग; गमनाश्व°–ज्ञ-त२-३-भ१-२ ॥

[८. ३२] ७०४. २४. **अच्छावाकवादे**—*मॅ-मु । अच्छावाको–ग; आच्छादको–त-न-भ ॥ **पत्नीयजमानस्थाने**—§-मॅ-मु । 'प्रत्यस्मा इत्यस्य तृचस्य स्थाने' इति भाव्यम् । 'अच्छा वो अग्निमवसे प्रत्यस्मा इति तृचयोः स्थानेऽच्छा नः शीरशोचिषं प्रति श्रुताय वो धृषदिति तृचावच्छावाकः' इति हि आश्व. श्रौ. सूत्रम् । मॅक्समुल्लरमहाशयेनाप्येवमेव संभावितम् ॥ ७०५. २. **सुविन्दं सुविन्दनामकम्** । सुविंदं सुविंदनामकं–न-भ; सुविंदं एतन्नामकं–घ । **सुविंदनामकं**–ख-ग-त-श-मॅ-मु ॥ ७०५. १८. **नगरीमिव**—§ । नगरमिव–मॅ-मु ॥ ७०६. २८. **शोभनपारणश्च**—ग-*मॅ-मु । शोभनपारश्च–भ३; शोभनवरणश्च–इतरेषु ॥ ७०७. १३. **यज्वा ब्रह्मचारिवासी**—भ३-*मॅ-तै. सं. । यद्वा ब्रह्मसूचारिवासी–ख-त; यद्वा ब्रह्मचारिवासी–न-भ१-२-श । यज्वा ब्रह्मचारीति–मु ॥ ७०८.७. **बुसं तुम्प्यमिति**—*मॅ । बुसं तुम्प्येति–भ२-३-मु । नुसः स्वधा तुम्प्येति–ज्ञ-त१-२; तुसं संतुग्धं–न; नुसः संनुग्धेति–त३-४; तुसं बुसं तुम्प्येति–भ१ ॥ ७०८. २६. **निम्नं देशम्**—§-मु । निम्नदेशं–मॅ ॥ ७०८. २९. **अध्वर्यो**—घ-मु । अध्वर्यवः–मॅ इतरेषु च ॥

[८. ३३] ७१०.२२-२३. **इन्द्रः...आगमत्**—§-मॅ । 'आ गमः इन्द्रं' इति पदपाठः । इन्द्रः...आगमः आगमत्–मु ॥ ७११. २१ **अपरिवृतः**—*मॅ-मु । परिवृतः–ग; आवृतः–ज्ञ-त३; अवृतः–त१-२-४; अवृतः–न; रपवृतः–भ ॥ ७११. २२. **श्रवः श्रयन्त्यस्मिन्निति**—भ२-*मॅ-मु । युध शृण्वन्त्यस्मिन्निति–ग; श्रितः सन् श्रवं श्रयंत्यस्मिन्निति–ज्ञ-त१-२; धश्रवं श्रयंत्यस्मिन्निति–त३-४; श्रवा श्रयंत्यस्मिन्निति–भ१-२; श्रवयंत्यस्मिन्निति–न ॥ ७१२. २४. **वृषभिश्चाकृष्टः**—*मॅ-मु । वृषाश्चाकृष्टौ–ख-त३; वृषाश्चाकृष्टो–ग; वृषाश्चाकृष्टो–न-श; वृषभिः सेक्तृभिः सोमरसस्य सोतृभिः (सेक्तृभिः–भ३) चाकृष्टो–भ; वृषैश्चाकृष्टो–घ ॥ ७१२. २५. **वृषा**—§-मॅ । **'वृषो इति'** इति पदपाठः । वृषो वृषैव–मु ॥ ७१३.२४. **रथस्थम्**—घ-भ-श-मु । रथस्थां–ख-ग-त-

मॅ ॥ ७१४. ३. **महत्**—ग-*मॅ। महान्–मु इतरेषु च ॥ ७१४.५. **सुस्रतमानि**—ख-श-त१-२-न-भ-मु। ग-घ-त४-श-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ७१४. ९. **तव**—*मॅ-मु। ते तव–ऽ ॥ ७१४. १५. **प्रायोगिः**—*मॅ-मु। प्रायोगिः–ऽ ॥ ७१४. २३. **रथस्य**—घ। रथः–मॅ-मु इतरेषु च ॥

[८. ३४] ७१५. ९. **एन्द्र**—श-त३-न-भ-मु-अनु.। ऐंद्र–ग-त४-मॅ. ॥ **गायत्रः**—न-भ-मु-अनु.। गायत्र्यः–ग-त-मॅ ॥ ७१६. १. **सोमलताम्**—भ-श। सोमलता–मॅ-मु इतरेषु च ॥ ७१७. १५. **अर्य**। ' अर्यः ' इति पदपाठः ॥ ७१७. १६. **स्वाहा**—ख-ग-घ-त-न-भ२-श-मु। भ१-३-मॅ एतेष्वेतन्नास्ति ॥ ७१७.२१. **उपश्रुति उपश्रुतौ**—*मॅ-मु। उपश्रुति–ग-घ; उपश्रुतेः–त-न-भ२; उपश्रुतिश्रुतेः–भ१-३-य ॥ ७१८. १२. **वा**। एतस्मादनन्तरं ' धनानि ' इत्यावश्यकमिति मॅक्समुल्लरमहाशयः मन्यते ॥ ७१९.१. **तेषु**—मॅ। तेषु तेषु –ग; तेष्वेषु–इतरलिखितपुस्तकेषु। तेष्वेषु–मु ॥ ७१९. २. **तिष्ठम् इति**—*मॅ-मु। तिष्ठति–ख-त-न-भ१-२-श; तिष्ठदिति–ग; तिष्ठं–घ; तिष्ठंति–भ३ ॥

[८.३५] ७१९. ५. **औपरिष्टाज्ज्योतिषम्**—त२-४-मॅ। उपरिष्टा°–श-श-मु; ओपरिष्टा°–न-भ। औपरिष्टाज्ज्यौतिषम्–अनु. ॥ ७१९. ८. **अश्नोर्याम**े—भ३। ऋ. सं. ५. ७६. सूक्तप्रस्तावनायां द्रष्टव्यम्। अश्विनोर्यामे–त-न-भ१-श-मॅ-मु। अश्विनोर्ध्वे–ग; अश्विनोर्यागे–भ२; 'अश्नोर्यामे ' इति स्यादिति मॅक्समुल्लरमहाशयेन संभावितम् ॥ **होतुरतिरिक्तोक्थे**—न। °रिक्तोक्थ्ये–मॅ-मु इतरेषु च। ऋ. सं. ५. ७६. सूक्तप्रस्तावनायां ' °रिक्तोक्थ्ये ' इत्यस्य स्थाने ' °रिक्तोक्थे ' इति पठनीयम् ॥ ७१९. १५. **सजोषसा**। ' सऽजोषसौ ' इति पदपाठः ॥ ७२०.५-६. **विश्वा सवना सर्वाणि**—घ-न-भ३-मु। विश्वा विश्वानि–भ२। विश्वा सर्वाणि–मॅ ॥ ७२०. २५. **वाः वनम्**—ख-त-न-भ-श। वा वनं (१)–मॅ-मु ॥ ७२१. ११. **गगनम्**—घ-मु। वेगेन–ग; वागमन–ख-त-श। गगणं–*मॅ। ७२२.९. **मित्रावरुणवन्ता**—ऽ-मॅ। 'मित्रावरुणऽवन्तौ' इति पदपाठः। मित्रावरुणवन्तौ–मु ॥ **धर्मवन्ता**—घ-श-मु। धर्मवंतौ–मॅ इतरेषु च ॥ ७२३. १९. **सोमाभिषवम्**—ऽ-मु। अभिषवं–मॅ ॥ ७२४. २०. शतपथब्राह्मणे ' **सह** ' नास्ति। ७२४. २१. **एव यत्**—श. ब्रा. मॅ-×। मु-पुस्तकेऽप्येतन्नास्ति ॥ ७२४. २८. **तृम्पतं तृप्यतम्**—मु। तृप्यतां–ख-श-त३-४-न-भ१-३; तृप्यतः–ग; तृंपतं तृप्यतां–घ; तृप्यतं–त१-२-भ२-य-श ॥

[८. ३६] ७२५.१३. **अन्यासु**—*मॅ-तै. सं.। अन्यान्यासु–ग; अन्या–त-भ। अन्य–मु ॥ ७२५. २२. **रक्ष**—ग-*मॅ-मु। रक्षसि–घ-त-न-भ२ ॥ ७२६. २७. **प्राविथ**—भ३-*मॅ-मु। प्रत्रस्यमाविथ–ख-त२-३-४-न-भ१-२; माविथ–ग; पुरुकुत्सपुत्रं प्राविथ रक्षिथ–घ-श-त१; पुत्रं त्वमाविथ–श ॥

[८. ३७] ७२७.१. **महात्रते निष्केवल्य एतत्सूक्तम्**। ' प्रेदं ब्रह्मेन्द्रो मदाय सत्रा मदास इति निष्केवल्यम् ' इति आश्व. श्रौ. सूत्रानुसारेण ' पृष्ठ्यस्य पञ्चमेऽहनि निष्केवल्य एतत्सूक्तम् ' इति भाव्यमिति प्रतिभाति। मॅक्समुल्लरमहाशयेनाप्येवमेव संभावितम् ॥ ७२७. ८. **प्ररक्ष**–न-भ-मॅ-मु। प्ररक्षः–घ; रक्ष–त२-श। ' प्रारक्षः ' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ७२७. २१. **अस्य भुवनस्य**—ग-घ-भ१-३-मु। स्य भुवनस्य–इतरेषु। भुवनस्य–मॅ ॥

[८. ३८] ७२८. २३. **°स्तोत्रियसंज्ञकस्तृचः**—*मॅ-मु। °स्तोत्रियसंज्ञक–त-भ ॥ ७२८. २५. **प्रातःसवनीयस्य**—*मॅ-मु। प्रातःसवनीय–ग-त४-भ२; प्रातःसवन–श-त२-भ३;

प्रातःसवनि–भ१ ॥ ७२९.१. **स्थः** । अस्मादनन्तरं 'क्रतौ कालेकाले यष्टव्यौ' इति श्न-भ२-य-पुस्तकेष्वधिकं विद्यते ॥ **भवथो हि**—§-मु । भवथः–मॅ ॥ ७२९. २. **युद्धेषु कर्मसु**—श्न-त१-२-भ२-य । कर्मसु युद्धेषु–ग-त४-मॅ-मु ॥ **चोपतिष्ठन्तौ**—ख-ग-श्न-त३-४-न । यज्ञादिषु चोपतिष्ठंतौ–त१-२-भ२ । चोपतिष्ठंतौ–मॅ-मु ॥

[८. ३९] ८३०. ३०. **अभिगच्छन्तः**—मॅ । अभिगच्छन्त (?)–मु । गच्छतः–ग; अभिच्छतः–घ; अभिगच्छतः–त-न-भ१; अभिगच्छत–भ२; अभिगच्छता–भ३ ॥ ७३१.२५-२६. **अभीवृतः परिवृतः**—घ-मु । आवृतः–त१; आवृतः परिवृतः–इतरेषु । अभीवृतः–मॅ ॥ ७३३. ६. **इरज्यसि ईशिषे**—मॅ-मु । राजासि–घ; राजासाशिषे–त३-४-न; राजासशिषे–ग; राजामाशिषे–श्न-त२; राजासीशिषे–भ ॥

[८. ४०] ७३३. ११. **ऊरुभाग**—*मॅ-मु । उरुभाग–ग; ऊरूभाग–श्न-त२; उरुभीग–त३-४-भ२; उरुभिग–भ१; ऊरुणि–भ३ ॥ **एतत्**—ग-न-भ-श । एव–मॅ-मु इतरेषु च ॥ ७३३. १३. **आरम्भणीयाभ्यः**—भ३-*मॅ-मु । आरंभणीयारभ्य–इतरेषु ॥ ७३३. २६. **सहिषीमहि**—ख-त-न-भ-मु । साहिषीमहि–श । सहीषिमहि–घ-मॅ ॥ ७३४. २०. **नाभाक नभाकवत्**—*मॅ । नाभाक नभाकवत् नभाकवंतौ–मु । नाभाक नभावंतौ–ख; नाभाकवंतौ–ग-श; नभाकवत् नभाकवंतौ–घ; नाभाक नभाकवंतौ–त-न-भ ॥ ७३४. २८. **प्र इरज्यत**—मॅ-मु । इरज्यत–§ ॥ ७३५. ५. **वल्ग्याः**—*मॅ । वल्याः–घ; तमाया–ख-त-न-भ१-२-श; लताया–ग-भ३ ॥ **गुप्तिपतम्**—घ-त-न-भ२-*मॅ-मु । गुप्तिपतं–ग; पुप्तिपतां–भ१-३ ॥ ७३५. ६. **ओजः**—मॅ-मु-× ॥ ७३५. १५. **अस्माकीनैः**—§-मॅ-मु । 'आस्माकीनैः' इति भाव्यम् ॥ ७३६. १. **हरिवः वज्रिन्?** ॥ ७३६. ३. **पूर्वीः.....अन्यत्**—*मॅ । पूर्वी वयः प्रज्ञां साधंतां साधयन् सिद्धमन्यत्–ख-त-न-भ१-२-श; पूर्वी धियः प्रज्ञां सधंति साधन् सिद्धमन्यत्–ग; पूर्वीः बह्वयः प्रज्ञाः नः याः धियः अस्मद्बुद्धयः नु क्षिप्रं साधंत साधयंतु–घ; पूर्वीः बह्वयः धियः प्रज्ञाः साधंतासाधयन् सिद्धमन्यत्–भ३ । पूर्वीः याः नोऽस्माकं धियः प्रज्ञां नु क्षिप्रं साधंतासाधयन् सिद्धमन्यत्–मु ॥ ७३६. २०. **आण्डा**—मॅ-×। मु-पुस्तकेऽप्येतन्नास्ति ॥

[८. ४१] ७३७. ११. **मरुद्भिश्च**—ग-श्न-भ३-*मॅ-मु । मरुद्भिश्च–त३-४-भ२ ॥ ७३७. १९. **समानया**—मॅ-मु । समान्या–§ ॥ ७३७. २१. **समीपे यः**—*मॅ । समीपे–§-मु ॥ ७३७. २३. **समानया**—मॅ-मु । समान्या–§ ॥ ७३८. १३. **रक्षिता**—भ२-३-*मॅ-मु । रक्षति–ग-घ-श्न-त१-२; ररक्षति–त३-४; रराक्षिता–भ१ ॥ ७३९. ८ - - - **त्परिमृशतः.....पुरस्तात्**—त३-४-भ१-३-श-मॅ । यः वरुणः आसु दिक्षु अत्कः व्याप्तः सन् आशये जागृतो वर्तते यः वरुणः एषां शत्रूणां विश्वा सर्वाणि परिजातानि परितो भूतानि धामानि पुराणि मर्मृशत् विनाशयत् अस्य वरुणस्य पुरोगये रथस्य पुरस्तात्–ख-घ-श्न-त१-२-भ२ । यः वरुणः आसु दिक्षु अत्कः व्याप्तः सन् आशये जागृतो वर्तते यः वरुणः एषां शत्रूणां विश्वा सर्वाणि परिजातानि परितो भूतानि धामानि पुराणि मर्मृशत् परिमृशतो वरुणस्य पुरोगये रथस्य पुरस्तात् भवति तस्य वरुणस्य पुरस्तात्–मु । परिमर्मृशत् परिमृशतो–न ॥ ७३९. २५. **अन्तरिक्षेऽधिवसतः**—*मॅ-मु । अंतरिक्षेधिवभ्रुतः–§ ॥ ७३९. २६. **भूमीः.....पप्रतुः**—*मॅ-मु । भूमी(°मि–त१-भ३)रधिस्थिता पप्रतुः–त-भ३;

भूमी(°मि–भ१)रधस्थिता पप्रतुः–भ१-२; भूमीः द्यौरंतरिक्षभूमीः–घ ॥ ७४०. १. **अधिऽनिर्निजः**। भाष्यकारः 'अधि', 'निर्णिजः' इति भिन्ने पदे कृत्वा व्याख्यातवान् ॥ ७४०. ७. **व्यधारयत्**—ख-घ-त-न-भ-मु । अधारयत्–श-मॅ ॥

[८. ४२] ७४२. १२. **ऐकादशिनाः**–ज्ञ-भ२-*मॅ-आश्व. श्रौ. । एकादशिनः–त२-३-मु । एकादशिनाः–ग ॥ ७४०. १६. **देवेति**–ग-ज्ञ-*मॅ-मु-आश्व. श्रौ. । इतरलिखितपुस्तकेषु नास्ति ॥ ७४०. ३०. **गोपायितारम्**–घ-श-त१-२-३-भ१-२-मु । गोपयितारं–ग-त४-भ३-मॅ ॥ ७४१. ८. **बलम्**—ख-ज्ञ-त१-२-न-भ-मु । ग-घ-त३-श-मॅ-पुस्तकेषु नास्ति ॥

[८. ४३] ७४२.४. **कारीर्यवभृथेष्टयोः**—मॅ । कारीर्यावभृथेष्टयोः–ख-ग-त१-न-भ१-२-श; कारीर्यावभृथेष्टयाः–त३-मु ॥ ७४२. ५. **आज्यभागौ**—ऽ-मॅ-मु । आश्व. श्रौ. सूत्र एतन्नास्ति ॥ ७४२. २६. **बप्सति भक्षयन्ति**—*मॅ-मु । बप्सति भक्षयति–घ; बप्संति भक्षयंति–त-भ ॥ ७४२. ३०. **पृथगित्येव**—ज्ञ-भ२-३-*मॅ-मु । पृथगिति–ग; पृथिगितोव–त२; पृथगितोर्व–त४; पृथगित्येव–भ१ । वाजसनेयिसंहितायां वेबरमहाशयमुद्रितपुस्तके निर्णयसागरमुद्रितपुस्तके च 'पृथक्' इत्येव पाठो दृश्यते ॥ ७४३. २. **अग्निहोत्रिभिः**—ऽ-मु । अग्निहोतृभिः–मॅ ॥ ७४३. १०. **क्षुत् धासि**—त-न-भ-मॅ । क्षु धासिः–श-मु-नि. ॥ ७४४.२. **सोमघृतपृष्ठाय**—घ-*मॅ-मु । सोमघृते पृष्ठाय–त-न-भ; सोमसिक्तघृते पृष्ठाय यद्वा सोमयुक्तानि पृष्ठस्तोत्राणि यस्यासौ सोमपृष्ठ अनेकस्तोतृभ्रितसोमान्न इत्यर्थः–ग ॥ ७४३. ११ **अङ्गिरस्वत्**—ऽ-मु । मॅ-पुस्तक एतन्नास्ति ॥ ७४५. १५. **प्रभु प्रभुः**—ग-भ२-३-मॅ-मु । अनुप्रभुः प्रभुप्रभुः–घ; प्रभुः–न । 'प्रभुः' इति सविसर्गः संहितापाठः । 'सुलोपश्छान्दसः' इति भाष्यकारेणोक्तं तच्चिन्त्यम् ॥ ७४५. १६. **अनु**—*मॅ-मु-× ॥ ७४६. २. **यमिमम्**—ख-घ-त-न-भ-श । यं–ग । इमं–मॅ-मु ॥ **सर्वदा**—मॅ-मु । सर्वहा–ऽ ॥ ७४६. १९. **सहस्कृतः**—ऽ-मॅ । 'सहः ऽकृत' इति पदपाठः । सहस्कृत–मु ॥ ७४६. २७. **अहा**—मॅ-मु-× ॥ ७४६. २८. **गाहयितव्यानि**—*मॅ-मु । गाहितव्यानि–भ३; ग्राहयितव्यानि–इतरेषु ॥ ७४७. ८. **दीप्तिधनः**—ख-न-भ२-श । दीप्तधनः–ग; दीप्तिचनः–त । दीप्तिरोचनः–घ-मॅ-मु ॥

[८. ४४] ७४९.३. **ज्वलद्दीप्ते**—मु । उज्ज्वलदीप्ते–ग; ज्वालदीप्ते–न; ज्वलदीप्ते–मॅ इतरेषु च । ऋ. सं. ८. २३. २३. द्रष्टव्यम् । 'ज्वलद्दीप्ते' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ७४९. ८. **पताका°**—ग-घ । पताक°–त-न-भ-मॅ-मु । ऋ. सं. १०. १. ५. द्रष्टव्यम् ॥ ७४९. १६. **ववृधे** ऽ-मु । वावृधे–मॅ ॥ ७५०. ७. **ते तव**—ऽ-मॅ । 'तवं' इत्येव पदपाठः । तव–मु ॥ ७५०. १७ **वर्धयन्तु**—*मॅ-मु । वर्धयंति–ऽ ॥ ७५०. २०. **अग्ने**–ऽ-मॅ-मु । 'अग्नेः' इति पदपाठः ॥ ७५०. २९. **वर्धयन्तु**—*मॅ-मु । वर्धयंति–ऽ ॥ ७५१. १० **अनुग्रहबुद्धौ**—मॅ । अनुग्रहबुद्धौ सुष्टुतौ कं सुखं यथा तथा–घ; अनुग्रहबुद्धौ सुष्टुतौ–इतरेषु मु-पुस्तके च ॥ ७५१. २७. **तं सुखय वा**—*मॅ-मु । सुखय वा–ग; तं सुखय–ज्ञ; तसुय व–त१-२-३; तसुय वा–त४-न-भ ॥ ७५२. २. **द्यवि**—मॅ-मु । सदिवि–घ; दिवि–त-न-भ ॥

[८. ४५] ७५२. १५. **इति स्तोत्रम्**—ऽ-*मॅ-मु । आश्व. श्रौ. सूत्र एतन्नास्ति ॥ ७५२. १६. **°तिरिक्तोक्थे**। °तिरिक्तोक्थ्ये–ऽ-मॅ-मु ॥ ७५४. १६. **भक्तारम्**—*मॅ-मु । भोक्तारं–ख-घ-त-न-भ; भेत्तारं–ग-श ॥ ७५६. १५. **प्रेरितवान्**—भ-*मॅ-मु । प्रेरयितवान्–इतरेषु ॥ ७५७. ५.

बुबुरमिति—*मॅ-मु। बुबुरेति–ग-त४-न-भ१-२; बुबुरेति–भ३; बुधुरिति–ज्ञ-त१-२-३ ॥ ७५७.१८. **प्रयच्छस्येव**—मॅ-मु। प्रगच्छस्येव–§ ॥ **नाकार्षीः**—*मॅ-मु। माकार्षीः–§ ॥ ७५८. ३. **भूरिषु**—घ-न-भ। मूरिष्वपि–मॅ-मु इतरेषु च ॥ **असंख्यातेष्वपि**—ख-ग-त-न-भ-ज्ञ-मु। °ष्वति–घ। असंख्यातेषु–मॅ ॥ ७५९. ७. **हिंधि अतः**—*मॅ। हिंस च–मु। हिंसि अतः–ख-ज्ञ-त१-२-३-श; हतान् कुरु–ग; हिंस्य–घ; विस्यतः–त४; हिंस्याः–न-भ१-३ ॥ ७५९. १३. **विमर्शनक्षमे**—न-*मॅ-मु। विमर्शके राक्षसे–ग; विमर्शकेनक्षमे–घ-त-भ ॥

[८. ४६.] ७६०. ४. **अष्टाक्षरा**—*मॅ। अष्टाक्षरवती–ख-ग-त-न-भ-मु; द्वादशाक्षरवती-घ ॥ **द्वितीयचतुर्थयोः**—ख-ज्ञ-भ-*मॅ-मु। द्वितीयतृतीययोः–ग-घ-त-न ॥ ७६०. १०. **नवका... पदा**। 'युजावष्टकावयुजौ नवैकादशिनौ बृहती विषमपदा' इत्यनुक्रमणीपरिभाषा। 'नवकाष्टकैकादशाष्टिनो विषमपदा' इति वा. सं. सर्वानुक्रमण्याम् ॥ ७६१.८. **कमित्याह**—§-मॅ-मु। 'क इत्याह' इति भाव्यम् ॥ ७६१. २५. **सर्वा रक्षणाः**—§-मॅ-मु। ! ॥ ७६१. २६. **सुतम्**—§-मु। सुतमभिसुतं–मॅ ॥ ७६२. ११. **यः तव**। पूर्वमन्त्रोक्तो मदशब्दो विशेष्यत्वेनाध्याहर्तव्यः ॥ ७६२. १२. **स त्वम्**। तादृशमदयुक्तस्त्वमित्यर्थः ॥ ७६२. १८. **यथास्माकम्**—मॅ-मु। यथास्माकं यागं–§ ॥ ७६३. २२. **मह्यम्**—§-मॅ-मु। ममेत्यर्थः ॥ ७६३. २३. **अद्य**—मॅ। 'अर्थ' इति पदपाठः। अथाति चित्–मु ॥ ७६३. २५. **लिङ्भावात्**—§-मॅ-मु। 'लिङ्वद्भावात्' इति भाव्यमिति मॅक्समुल्लरमहाशयः अभिप्रैति ॥ ७६४.२. **स्तुवत इति**—§। स्तुवंत इति–मॅ-मु ॥ ७६४.३. **अद्यापीदानीमपि**। 'अतिं अर्थ' इति पदपाठः। अथाति चित्–मु ॥ ७६४.११. **वा**—ग२-*मॅ-मु। इतरलिखितपुस्तकेषु 'वा' नास्ति ॥ ७६५.७. **चेतयितः**—मॅ-मु। चेतितः–§ ॥ ७६५.८. **वा**—ग-भ-*मॅ-मु। त्वा–ख-त-न-श ॥ ७६५.१५. **वशायाश्याय**—*मॅ-मु। वशायास्याय–ग; वशायाख्याय–इतरेषु ॥ **कानीतस्तु**—न-भ१-३-*मॅ-मु-बृहद्दे.। कानीतस्स–ग; कानीतस्य–इतरेषु ॥ बृहद्देवतायां 'स्तूयते' इत्यस्य स्थाने 'संस्तुतं', 'एत्येव' इत्यस्य स्थाने 'इत्येव' इति च पाठो दृश्यते ॥ ७६५. २०. **कनीतपुत्रे**—भ-*मॅ। कानीतपुत्रे–घ-न-मु। कानीते पुत्रे–ख-त; पुत्रे–श; कानीतेषु पुत्र–ग ॥ ७६६.२२. **तदुच्यते**–ख-त-श। चेदुच्यते–ग-न-भ-मॅ-मु ॥ ७६७.१३. **अन्वशात्**—ख-भ-*मॅ-मु। अप्सान्–ग; अन्वशान्–ज्ञ-त२; अन्वप्सान्–त३-४-न; अन्वस्यान्–श ॥ ७६८. २५. **योज्यम्**—भ२-३-श-*मॅ। योजनया–ग; योज्य–ख-त-न-भ१-मु ॥

[८. ४७.] ७६८. २९. **लैङ्गिकः**—*मॅ-मु-× ॥ ७६९. १९. **अधि**। एतन्मन्त्रे नास्ति ॥ ७७०. १२. **अघा**—ख-ज्ञ-त१-२-भ-श-मु। ग-घ-त३-४-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ७७०. १३. **अवटधिष्ण्यादिकान्**—*मॅ-मु। अवद्यधि°–ख-त३-४-न-भ२; अवदधि°–ज्ञ-भ१-३; अवनधि°–ग; धिष्ण्यादिकान्–श ॥ ७७०. २०. **आशवः**—§-मॅ-मु। 'आ॒श॒ वः' इति भिन्नः पदपाठः ॥ **यम्**—ग-*मॅ-मु। इतरेषु नास्ति ॥ ७७०. २८. **प्रवृद्धम्**—*मॅ-मु। अप्रवृद्धं–ख-त-न-भ२-श; अतिप्रवृद्धः–ग; अभिप्रवृद्धं–घ ॥ **अपरिहारार्हम्**—*मॅ-मु। अपरिहारार्थ–ख-घ-त-भ१-श; अपरिहार्य–ग-न-य ॥ **कस्य**—*मॅ-मु। यस्य–§ ॥ ७७२. २८. °**शेषेण**—*मॅ-मु। शेषे–§ ॥ **उपतिष्ठेत**—§-मु। उपतिष्ठेत्–मॅ ॥ ७७२. २९. **उपतिष्ठेत**—ज्ञ-न-भ१-श-मु-आश्व. ग.। उपतिष्ठेत्–ख-त२-३-४-भ३-मॅ ॥ ७७३. १८. **दुःस्वप्नम्**—ख-त-न-भ-श। दुःष्वप्न्यं–ग; दुःष्वप्नं–घ;

स्वप्नं–मु । दु॰स्वप्न्यं–मॅ ॥ ७७३. २६. **यदेव**—*मॅ-मु । तं देव–न; **तदेव**–इतरेषु ॥ ७७३. २७. **भोक्त्रे**—*मॅ-मु । भोक्तुः–ऽ ॥ **तदपसे यदेवापः**—*मॅ-मु । तदपसे देवापः–ख-ग-त-भ१-२-श; दपसे तदेवापः–घ; तदपसे वदेवापः–न; तदपसे तदेवपः–भ३ ॥ ७७४. २. **अनुभूतवत्**—ख-ग-त-भ-श । अनुभूतं च–न । अनुरूपवत्–मॅ-मु ॥ ७७४. ८. **संज्ञपितम्**—ख-ग-त-न-भ । संज्ञापितं–श-मॅ-मु ॥ **संदाय**—श-*मॅ-मु । समादाय–ग; दानाय–भ३; सदाय–इतरेषु ॥ ७७४. १८. **स्मः**—न-भ२ । स्म–मॅ-मु इतरेषु च ॥

[८. ४८] ७७५. २२. **ततः**—*मॅ-मु । त्वातामृभा–ख-त२-३-४; पीत्वा–ग; त्वत्तः–घ१; हतः–च; त्वामाभृन्ना–न; त्वावामृभा–भ१; त्वमाः–भ३; त्वां पीत्वा–श ॥ ७७६. ३. **सखा स स्वसख्ये**—त-न-भ१-२ । सखाय स्वसख्य–ख; सखा स्वसख्ये–ग-श; सख सख्ये–भ३ । सखायं स्वसख्ये–मॅ-मु ॥ ७७६. ११. **वध्रयः**—*मॅ । वध्वः–ख-त-श-मु; वध्यः–ग; वध्वः–घ; वध्वाः–न-भ ॥ ७७७. ८. **स्मः**—न-भ । स्म–मॅ-मु इतरेषु च । ऋ. सं. ८. ४६. १. द्रष्टव्यम् ॥ ७७८. ४. **अत्रसन् प्राप्नुवन्**—मॅ-मु । अत्रसन् प्राप्तवान्–ख-ग-श-त२; अत्रसन्–घ; अरमं प्राप्तवान्–त३-४; अरन्–भ१-३; अरमन् प्राप्तवान्–भ२; अरमन् प्रापूर्वन्–श ॥ ७७८. ५. **यस्मात्**—ग-*मॅ-मु । तस्मात्–इतरलिखितपुस्तकेषु ॥ ७७८. १७. **सौम्यस्य**—ऽ-मु । सोमस्य–मॅ ॥ ७७८. ३१. **निद्राः**—घ-मॅ । निद्रा–ख-ग-भ-श-मु । निंद्रा–त-न । ' निऽद्रा ' इति पदपाठः ॥

[८. ५८] ८०२. १३. **यमृत्विज...स्तुतिर्वा**—मॅकडोनल्मुद्रितपुस्तक एतन्न दृश्यते । वैदिकास्त्वेतत्पठन्ति ॥

[८. ६०] ८०६. १९. **प्रदीप्तकेश°**—ग-श-भ-मु । प्रदीप्तकलश°–मॅ इतरेषु च ॥ ८०७. २७ **तेजो वा** । अत्र किमपि गलितं प्रतिभाति । ऋ. सं. २. १. ५. भाष्ये ' मित्रमहः ' इत्यस्य ' हितकारितेजः ' इति व्याख्यानं कृतमस्ति ॥ ८०८. १२. **ऋचा गिरा**—ऽ-मॅ-मु । ' गिरा ऋचा ' इति साधु इति मॅक्समुल्लरमहाशयः ॥ ८०८. २८. **माति नो**—ग-*मॅ-मु । मानितिनि–ख; मातिर्नो–घ; मातितिर्ना–त-भ२-श; मातीतिर्ना–भ१-३॥ ८०९. ८. **तद्धनम्**—ग-श-*मॅ-मु । त धन–भ१; तं धनं–इतरेषु ॥ **कर्मधन**—ऽ-मु । कर्म धनं–मॅ ॥ ८१०. १९. **हे यजमानाः**—ग-च-*मॅ-मु । गेहे यजमानाः–ख-घ१-त-भ३-श; गेह यजमानाः–भ१; ग्रहे यजमानाः–भ२ ॥ ८११. १९. **यातना**—ग-*मॅ-मु । याना–ख-त-न-श; याता–भ ॥ ८११. २१. **बाह्यानि**—घ-त-न-भ१-मु । बाह्यानि–ख-ग-भ२-मॅ ॥ **च न**—*मॅ-मु । च–ख-ग-त-न-भ१-२-श; न–घ; मा–भ३ ॥

[८. ६१] ८११. २३ **प्रागाथस्य**—मॅ–मु । प्रगाथः–घ; प्रगाथस्य–इतरेषु ॥ ८११. २८-३०. **चातुर्विंशिकेऽहनि.....पुरूवसो इति**—ग-त-न-भ२-श-मु । ' चातुर्विंशिकेहनि... शृणवच्च न इति ' इत्यंशः ख-पुस्तके नास्ति । चातुर्विंशिकेऽहनि निष्केवल्य उभयमिति बृहत्साम-प्रगाथः । तथा च सूत्रितं । उभयं शृणवच्च न आ वृषस्व पुरूवसो । आ.७.४ । इति–मॅ ॥ ८१२. १२. **जगदुपकारिकायाः** । जगदुपकारकस्य–ख-त-न-भ-श-मु; जगदुपकारक–ग । जगदुपकारकायाः (!)–*मॅ ॥ ८०३. १. **भवति**—ऽ-मॅ-मु । ' भवतु ' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ८१३. १६. **पौरः**—ग-भ-*मॅ-मु । पुरुकृत्–ख-घ-श-त१-२; पुर–त३; पूरयि–त४; पूरः–न; पुरयि –श ॥ ८१३. २२. **बृहतः**—*मॅ-ऐ.आ. । **बृहत्**–ख-ग-त-भ२-मु; **बृहत**–श-न-भ१-३-श ॥

८१४. २६. **जल्हवः**। एवं संहितायां पदपाठे सर्वेषु भाष्यलिखितपुस्तकेषु च। मॅक्समुल्लरमहाशयः सर्वत्र 'जळ्हवः' इति पठति॥ ८१५.२. **अरायाः**—ऽ-मॅ-मु (!)। 'अरायः' इति भाव्यम्॥ ८१५. १४. **वेद्**—*मॅ। देवः वेद–ख-ग-घ-ञ-मु; देवः–त१-३-४-न-भ२-श; वेदः–भ१; वेदा–भ३॥ ८१६. ४. **आह्वयामः**—ख-घ-ञ-त३-भ। आह्वयाम–ग-त२-४-न-श-मॅ-मु॥ ८१६. १७. **पश्चात् पश्चाद्भागात्**—*मॅ-मु। पश्चाद्भागो–ख-घ-ञ-त२-३-४-न-भ१-२; पश्चाद्भागे–ग-भ-३-य; पश्चाद्भागात्–त१॥ **पूर्वभागात्**—*मॅ-मु। पूर्वभागः–ख-ग-भ१-२; पूर्वो भागो–घ-त-न-श; पूर्वभागे–भ३-य॥ **अधोभागात्**—*मॅ-मु। अधोभागः–ख-घ-भ१; अधोभाग–ग-त-न-भ२; अधोभागे–भ३-य॥ ८१६. २०. **आसुराणि**—*मॅ-मु। आसुरीः–ऽ॥ ८१६. २७. **रक्षसि** (रक्ष वा)—*मॅ-मु। क्षत्रास्वसि–ख-त-न-भ१-२-श; त्रासयसि–ग; त्रास्व–भ३॥

[८. ६२] ८१७. ८. **सप्तम्याद्याश्च**—ख-त-न-भ१-३-मॅ। सप्तम्याद्याः–ग-भ२-श-मु-अनु॥ ८१८. १. **चिदर्वता**—*मॅ-मु। चार्वता–ग-घ-त-श; बार्वता–न-भ१-२; नार्वता–भ३॥ ८१८. २३. **दृष्ट्वा**—*मॅ-मु। गत्य–ख-ग-घ-न-श; अवगत्य–भ॥ ८१८. २६. **अवेक्षितम्**—*मॅ-मु। अवक्षितं–न; अवेक्षितुं–इतरेषु॥

[८. ६३] ८२०.२६. **आनजिः**—मॅ-मु। नजिः–ऽ। (!) ऋ. सं. १.१०२.१; १६१. ४. भाष्ये 'आनजे' इत्यस्य प्रक्रिया द्रष्टव्या॥ ८२१. ५. **उपायज्ञः**—भ२-३-*मॅ-मु। उपायचास्मैज्ञः–ख-न; उपायचास्मैज्ञः–त२-३-४-श; अनुष्ठेयवस्तैज्ञ–ग; उपायाद्र–भ१॥ ८२१. ६. **अपवारितवान्**—ग२-*मॅ-मु। ऊवारितवान्–ख-त३; अपावारितवान्–ग१; उत्सारितवान्–ञ-त२-४; उपवारितवान्–भ१-२; अपवारितान्–भ३; उच्चारितवान्–श॥ ८२१. १३. **गन्तु**—ख-घ-ञ-त१-२-न-भ-मु। ग-त३-४-श-मॅ-पुस्तकेष्वेतन्नास्ति॥ ८२१.१८. **स्वाहावरस्य**। 'स्वाहा। वरस्य' इति पदपाठः। भाष्यकार एकपदं चकारेति स्पष्टम्। स्वाहा वरस्य–मॅ। ८२२. १४. **लब्धे लब्धठये**—*मॅ। लब्धेन्ये–ख-त-भ३-श; लब्धेन्य–ग; लब्धे–घ; लब्धव्ये–भ१-२-मु॥ **अस्मानिति पूरणः**—ऽ-मॅ-मु। ?॥

[८.६४] ८२३. १९. **तव**—ग-*मॅ-मु। स तव–ख-त-न-भ; सदृशः–श॥ ८२४.१३. **त्वा त्वाम्**—ख-ग-त२-३-न-भ२-३-मॅ। 'तम्' इति पदपाठः। तमिंद्रं–मु॥ ८२५.८. **अधिश्रितः**। 'अधि श्रियः' इति पदपाठः॥ ८२५. ११. **अभिषुतः तम्**—ग। अभिषुतं–मॅ-मु इतरेषु च॥

[८. ६५] ८२५. २७. **°निष्यन्दनस्थाने**—मॅ। °निस्यंदने स्थाने–ख-त; °निष्यंदिनि स्थाने–ग; °निष्यंदने स्थाने–घ-न-भ; °निष्पंदस्थाने–श। °निस्पंदने स्थाने–मु॥ ८२७. १९. **इन्द्रे प्रीत इत्यर्थः**—*मॅ। इंद्रः प्रीत इत्यर्थः–ऽ-मु॥

[८. ६६] ८२७. २५. **अयं प्रगाथः**—*मॅ। प्रगाथौ–त१-२; प्रगाथः–मु इतरेषु च॥ ८२८. १६. **यः**—*मॅ-मु-×॥ ८२८. २३. **प्रक्षालितोऽश्वः**—मॅ-मु। प्रक्षाळिताश्वः–ऽ॥ ८२८. २४. **व----**–त-न-भ३-मॅ। ग-भ२-श-पुस्तकेष्वेतन्नास्ति। जातमिति च–मु। 'वचनात्' अथवा 'च व्युत्पत्तिः' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति॥ ८२८. २६. **अपवरणीयम्**—ऽ-मॅ-मु। अस्मादनन्तरं 'व्रजम्' इत्येतादृशं पदमावश्यकमिति मॅक्समुल्लरमहाशयस्याभिप्रायः॥ ८२९. १. **पुरुऽसंभृतम्**। भाष्यकारः 'पुरु' 'संभृतम्' इति भिन्ने पदे कृत्वा व्याख्यातवान्॥

८२९.६. **प्रकामयते**—§। कामयते–मॅ-मु ॥ ८२९. १२. **अचीकमथाः**—मॅ। अचीकमाः—ग; अचीकमथ–मु इतरेषु च ॥ ८२९.२९. **हरत**—*मॅ-मु। हर–घ-भ२; हरवाम–त१; हरवा–इतरेषु ॥ ८३०. ७. **अस्येति**—§-मु। स्येति–मॅ (मुद्रणदोषः १)॥ **वृकोऽपि**—*मॅ-मु। क्रूरोपि च–ख-श-त१-२-भ; कोपि–ग; क्रूपि–त४-न ॥ ८३०. १६. **किं नु**—ग-न-भ१-२। **किंतु**–मॅ-मु इतरेषु च ॥ **अनाचरितम्**—ग। अनामचरितं–श-त२-४; आनाचरितं–भ। अनाचारितं–मॅ-मु ॥ ८३०. २०-२१. **वृत्रहेत्येतत्पुंस्त्व°**—ग-न-भ। वृत्रहत्येतत्पुंस्त्व°–ख-त-श। वृत्रहत्यं तत्पुंस्त्व°–मॅ-मु ॥ **°प्रदर्शनद्योतनाय**—ग-भ-श। °प्रदर्शनाद्योतनाय–त-न-मॅ-मु ॥ ८३०. २६. **महीः–महान्ति**—ख-घ-श-त२-मु। महीः–त१; मही महांति–न। ग-त३-४-भ-श-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ८३०. २८. ------ **व्यहं अभवदि°**—श-त३-न-भ२। ------ व्यहंव्यभवदि°–ख-ग-त१-२-४-भ१; न कदाचिदित्यर्थः–श-मु। ------ व्ययंहं अभवदि°–मॅ। मॅक्समुल्लरमहाशयस्य अयं पाठः C 2, C 4 लिखितपुस्तकयोरुपलब्धः। 'न कदाचिदित्यभिप्रायः। सर्वं हंतव्यं हतमभवदित्यर्थः' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ८३१. २-३. **दातव्य---नयेन**—ख-त-न-भ१-२-श-मॅ। दातव्यौ नयेन–ग-मु; दातव्यमिति येन–भ३। 'दातव्याविच्येवमभिनयेन' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥ ८३१. ५. **पश्यन्ति**—ग२-भ-*मॅ-मु। पश्यति–ख-ग१-घ-त-न-श ॥ ८३१. ६. **अहानि पश्यन्ति**—ग-न-भ-श-*मॅ-मु। अहानि पश्यति–ख-त ॥ ८३१. ७. **ईदृशान्**—घ। अतो ईदृशान्–ख-श-त२-श-मु; अतोतान्–ग; अतोतीदृशान्–त१; अतो --- श्यान–न; अतो --- शान्–त३-४-भ-मॅ ॥ ८३१. ९. **कारुकुशीलवान्**—*मॅ। कारुकशीलकान्–ख; वै कारुशिल्पकान्–ग; कारुकुशिलकान्–श-भ१; कारुशीलकान्–त२-३-४-भ२-श; कारुकशिल्पिकान्–भ३। च कारुशीलकान्–मु। गोरक्षकान् वाणिजिकांस्तथा कारुकुशीलवान् इ.–मनु. ॥ ८३१. १७. **ताम्**—§-मु। तं–मॅ ॥ ८३१. १८. **°तात्पर्याद्भृति°**—ग१-श-न-भ-श-*मॅ-मु। °तात्पर्याद्भवति°–ख; °तात्पर्यात्सुतिति°–ग२; °तात्पर्याद्भति°–त२; °तात्पर्यादुति°–त३। ८३२. ३. **वर्तामहे**—भ१-३-य। वर्तते–मॅ-मु इतरेषु च ॥ ८३२. ११. **शविष्ठ**। 'शचिष्ठ' इति पदपाठः ॥ ८३२. २०. **उ इति पूरणः**। 'इत्' इति पदपाठः ॥

[८. ६७] ८३२. २२. **संमदाख्यस्य**—ग-त२-न-भ१-*मॅ। समदाख्यस्य–ख-घ-त३-श-मु ॥ ८३२. २४. **आदित्यान्**—त२-*मॅ। आदित्यं–मु इतरेषु च ॥ ८३२. २५. **आदित्याः**—ख-ग-त२-३-*मॅ-मु। आदित्यो–इतरेषु ॥ ८३३. ९. **अलंकर्त्रे**—§-मु। अरंकर्त्रे–मॅ ॥ ८३३. १६. **जीवान् इदानीम्**—§-मु। इदानीं जीवान्–मॅ ॥ ८३३. १७. **पुरा**—§। मॅ-मु-पुस्तकयोरेतन्नास्ति ॥ **क**—न-भ। के–इतरेषु मॅ-पुस्तके च। कद्ध क नु–मु ॥ ८३४. ९. **मर्चयता**—ख-ग-श-न-भ३-श-*मॅ-मु। मर्चयंना–त३-४; मर्चता–भ१; मर्चयंते–भ२ ॥ ८३४. ११. **प्राप्ता बाधा नोऽस्माकम्**—*मॅ-मु। प्राप्तबाधा नोस्माकं–ग; प्राप्तां बाधा मा नोस्माकं–ख-त-न-श; प्राप्तां बाधां नोस्माकं–भ ॥ ८३४. १७. **मत्स्यपक्षे**—ग-घ-त-न-भ-श-मु। ख-मॅ-पुस्तकयोरेतन्नास्ति ॥ ८३४. २१. **गभीरम्**—न-भ-श-नि.। गंभीरं–ख-ग-त-मॅ-मु ॥ ८३४. २८. **भूमिरूपा**—*मॅ। भूरिरूपा–§-मु ॥ ८३४. २९. **उरुचि उरुत्वम्**—§-मॅ-मु। 'उरूचि' इत्यस्मादनन्तरं किंचित्पदं गलितं स्यात्, अथवा 'उरुत्वम्' इत्यस्य स्थाने 'उर्वि त्वम्' इति स्यादिति मॅक्समुल्लरमहाशयः

न्यते । किंतु तदनावश्यकम् । ' उरूचि ' इत्यस्य ' पृथिवी ' इत्यर्थः । ऋ. सं. ७. ३५.३. द्रष्टव्यम् । उरुत्वम् ' इति कर्मपदं च वाक्ये आवश्यकम् ॥ ८३५. १. **तस्य**—ऽ-मु । एतन्नास्ति मॅ ॥ **वीवेम पुत्रान् रक्षितुम्** । जीवेनापृत्यान्नक्षितुं—ख-त३-मॅ । जालेन रक्षिताः जीवेम पुत्रान् क्षितुं—ग; जीवेनापत्यान्नक्षितुं—त२; जीवेनापत्यान्भक्षयितुं—भ१-२; जीवेन मत्स्यान् भक्षयितुं—३; जीवेनामृत्रात्रक्षितुं—न; जीवेन्यस्मात्यादक्षितुं—श । जीवनेनापत्यान् रक्षितुं—मु ॥ ८३५. .. **उच्छ्रिताः**—ख-ग-ज्ञ-त२-३-न-भ-श-मु । उच्छ्रियंता—त४; उच्छ्रितीनां—त१ । उच्छ्रियंतः—ं ॥ ८३५. १०. **आदातृणाम्**—ख-ग-ज्ञ-त१-३-४-न-भ१-२-श । अदातृणां—ख-त२-मॅ-मु ॥ ३५.११ **मुमोचत**—ऽ-मु । मुमोचत विमोचत—मॅ ॥ ८३५.२१. **भुञ्जमहे**—भ१-*मॅ । बुबुज्महे—न; भुजंजमहे—ग; भुज्महे—त-भ-श । बुभुज्महे—मु ॥ ८३५. २४. **प्रकृष्टमतयः**—त२-भ । कृष्टमयो—ख-त-न-श; प्रकृष्टधियो—ग; प्रकृष्टमायाः—घ-मॅ-मु ॥ ८३६. ११. **अतिस्कन्दनाय**—-त२-३-भ३-श-मु । अतिष्कंदनाय—मॅ इतरेषु च ॥ ८३६. १५. **पुत्रे पितृशब्दः**—ग-भ-*मॅ-मु । त्रे पित्वशब्दः—ख-त ॥ ८३६. २३. **रिप्रमिति**—त२-*मॅ-मु-निरु. । रिप इति—भ१-३; रिप्र ति—इतरेषु ॥

[८. ६८.] ८३७. ९. **अन्ततः**—*मॅ-मु । अथ ततः—ख-ग-त-न; अथ तत्—भ; अथ— ॥ ८३७. १७. **रथं यथा**—मॅ-× । मु-पुस्तकेऽप्येतन्नास्ति ॥ ८३७. २३. **मते**—मॅ-मु-× ॥ ३८. ८-९. **सैनिकानां.....चर्षणीनाम्**—ख-त-न-भ-श-मु । सैनिकानां एवैः गमनैः—घ । मॅ-स्तक एतन्नास्ति ॥ ८३८. २२. **°योगादिच्छा°**—ग । °योगत्वादिच्छा°—*मॅ-मु । °योगस्वदिच्छा°—ा-ज्ञ-त१-२-३; °योगास्वदिच्छा°—त४-न-भ-श ॥ ८३९. १०. **कर्तुम्**—भ२-*मॅ-मु । कुर्वन्—इतर-ऋखितपुस्तकेषु ॥ ८३९. ११. **वज्रवन्**—ख-घ-त-न-भ-श-मु । वज्रिन्—ग-मॅ ॥ ८३९. १२-१३. **तिपत्...सुतमन्ध इति**—*मॅ-मु-× ॥ ८३९. २०. **ररक्षिथ**—*मॅ-मु । रक्षिथ—ख-ज्ञ-त२-३; क्षथ—ग-घ-त४-न-भ-श ॥ ८३९.२६. **तननीयः**—ग-*मॅ-मु । तंतनीयः—ख-घ-त-न-श; संतननीयः— ॥ ८४०. २. **तथा तने**—*मॅ-मु-× ॥ ८४०. ६. **याचामहे**—ख-घ-ज्ञ-त१-२-मु । ग-त३-४- -भ-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ८४०.११. **दानप्रशंसकाः**—ऽ-मॅ-मु । दानस्तुतिः पराः—बृहद्दे. ॥ ८४०. २. **अविरोधः**—ग-श-मु । अनिरोधः—ख-त-भ-मॅ ॥ **अननैवाशयेन**—ग । अनयैवाशया—मॅ-मु तरेषु च ॥ ८४०. १५. **पितृपुत्ररूपेण**—*मॅ-मु । पितृपितृरूपेण—ख-त-भ१-श; पितृपुत्रपितृ-पेण—ग; पितृरूपेण—घ-भ२ ॥ ८४०. २०. **अतिथिग्वाय**—ख-ग-त-न-श । इत्यतिथिग्वाय— ा-मॅ-मु ॥ ८४०. २१. **इन्द्रोते**—ग-*मॅ । इंद्र—इतरलिखितपुस्तकेषु । इंद्रोतः—मु ॥ ८४०. २५. स्तुतम्—ग-न-भ२-श । प्रस्तुत—ख-त; प्रस्तुतं—भ१ । प्रस्तुत्य—मॅ-मु ॥ ८४०. २६. **एवमृक्षाश्व-धयोः**—*मॅ-मु । एवं त्यृक्षाश्वमेधयोः—ख-त१-भ१-२; एवं सति ऋक्षाश्वमेधयोः—ग; एतं त्यृक्षाश्वमेधयोः—त२ । पितृपुत्रयोरभेदात्तयोः पक्षकर्तृत्वाच्च ऋक्षाश्वमेधयोर्दानस्तुतित्वं न व्याहन्यते त्यन्वयः । मॅ-पुस्तके तु ' न व्याहन्यते ' इत्यत्र वाक्यपरिसमाप्तिं कृत्वा ' पितृपुत्रयो° ' इत्यारभ्य विस्पष्टयिष्यते ' इत्यन्तमेकं वाक्यं कृतम् (!) ॥ ८४०. २७. **इन्द्रोतदानस्य**—ग-*मॅ-मु । इंद्र दानस्य—ख; इंद्र तद्दानस्य—त-भ-श ॥ ८४१. १०. **आज्ञायते**—मॅ-मु । आज्ञायत—ख-घ-त-न- ा-श; अज्ञायत—ग-श ॥

[८. ६९.] ८४१. १९. **आद्यास्वयोऽर्धर्चाः**—ग-न-भ१-२-मु । आद्यासु योर्धर्चाः—ख-श-त३-४-श । आद्यासु येऽर्धर्चाः—मॅ ॥ ८४१. २९. **उनत्ति**—*मॅ-मु । उंदिति—ख-त-श; इंदति—ग; उदति—न; उदिति—भ१; उंदति—भ२ ॥ ८४२. ७. **सुगम्य इति**—*मॅ । युगप इति—ख-त; युग्म्य इति—ग-त४-भ२-मु; युवत्य इति—न; युत्प इति—भ१; युग्म इति—श ॥ ८४२. २२. **दिवीत्यर्थः**—*मॅ । दिवीत्येषः—ख-श-त१-२-भ१-२; दिवीत्यषः—त३ । दिवीति शेषः—मु ॥ ८४२. २३. **आरोचमाने**—श-*मॅ-मु । आरोचने—ख-त१-२-३-४; अरोचमाने—श ॥ ८४२. २५-२६. **सूत्रितं च.....इति**—ग-*मॅ-मु । इतरलिखितपुस्तकेष्वेतन्नास्ति ॥ ८४२. ३०. **तथार्चेति**—ख-श-त१-२-३-न-श-मु । तथा चेति—ग-त४-भ१-२ । तथा वेति—मॅ ॥ ८४३. १. **तत्रानुरक्तत्वात्**—*मॅ-मु । तत्रानुक्तत्वात्—ख-त-भ-श; तत्रानुत्पन्नत्वात्—ग ॥ ८४४. १०. **युद्धः संनद्धः**—ऽ-मॅ-मु । ? ॥ ८४४. १५. **अप्रवृद्धाः**—घ-त-न-भ२-श । अमवृद्धाः—ख; अवृद्धाः—ग; प्रवृद्धाः—भ१ । अपवृद्धाः—मॅ-मु ॥ ८४४. १९. **आ पतन्ति वृष्टिरल्पा यदा**—*मॅ-मु । सापतितं वृष्टिरल्पाय यदा—ख-त-श; आपतंति वृष्टिरहिता यद्यता—ग ॥ ८४४.२६. **तम्**—मॅ-मु-× ॥ ८४५. ११. **वृष्टिनिवारकैः**—श-न-भ-मु । धृनिवारकैः—ख-त१-२-३-४-श । वृष्टिवारकैः—मॅ ॥ ८४५. २५. **कुमारकः**—ऽ-मु । कुमारः—मॅ ॥ ८४६. ३. **गृहो (?)**—ऽ-मॅ-मु । 'गृहाः पुंसि च भूम्न्येव' इति कोशात् (अमर. २. २. ५ (पुंलिङ्गैकवचनान्तगृहशब्दप्रयोगश्चिन्त्यः ॥ ८४६. ४. **आरोहामि**—ऽ-मु । रथमारोहामि—मॅ ॥ ८४६. १५. **स्तुतिवन्तः**—ऽ-मॅ । स्तुतिमन्तः—मु । एतदेव समीचीनम् ॥

[८. ७०.] ८४६. ३१. **चतुर्दश्यनुष्टुप्**—ग-*मॅ । मु-इतरेषु च नास्ति ॥ **पञ्चदशी पुरउष्णिक्**—ग-*मॅ । मु-इतरेषु च नास्त्येतत् ॥ ८४७. २. **यो राजा...इति**—ख-त१-श-*मॅ-मु । इतरेषु नास्ति ॥ ८४७. १५. **आत्मानम्**—ग-त३ । अस्मास्वमात्मानं-घ । आत्मा स्वात्मानं—त२-न-भ-श-मॅ । आत्मना स्वात्मानं—मु ॥ ८४७. २६. **अनुकूलम्**—ऽ-मॅ-मु । अस्मादनन्तरं 'करोति' इत्येतादृशं पदमावश्यकमिति मॅक्समुल्लरमहाशयः ॥ ८४८. १५. **मूर्ति°**—भ३-श-*मॅ-मु । गूर्त°—ख-त; गूर्ति°—न-भ१-२ ॥ ८४८. १६. **त्वा**—घ-मु । ते—मॅ इतरेषु च ॥ ८४८. १७. **किंचन**—*मॅ । किंच मनु—ख-त-भ-श; किंच अनु—ग-मु ॥ ८४९.४. **यो मर्त्योऽस्य**—*मॅ-मु । स मर्त्यो यस्य—ख-ग-त-न-भ-श; स मर्त्यो अस्य—घ । क्लिष्टा वाक्यरचना ॥ ८४९. ६. **तं न**—मु । त न—घ । तन्न—मॅ इतरेषु च ॥ ८४९. २०. **उत्थापय**—*मॅ-मु । उत्पादयत—ख; उत्थापयत—घ-त-भ-श; उत्थापयितः—ग ॥ ८४९. २९. **नि शिश्रथः**—घ-*मॅ-मु । वि शिश्रथो—इतरलिखितपुस्तकेषु ॥ ८५०. १५. **भृष्टयवाः**—ख-ग-घ-त१-२-३-४-न-भ-मु । भ्रष्टयवाः—श-श-मॅ ॥ ८५१. २. **य इन्द्रः** । त्वम् इत्यध्याहार्यम् ॥ ८५१. ३. **एकमेकमेव वत्समित्येवम्**—न । एकमेव वत्समित्येवं—भ; एकमेकमेवं—ख-त-श । एकमेकमेव—मॅ-मु ॥ ८५१. ९. **हितं शौरदेवं युद्धम्**—*मॅ । हितः शौरदेवयुद्धं—ख-ग-घ१-त-न-भ-श; हिताः शौरदेवा युद्धं—च; हितः शौरदेवं युद्धं—मु ॥ ८५१. १०. न । 'नः' इति पदपाठः ॥ ८५१. १२. **कर्णे**—ऽ-मु । मॅ-पुस्तक एतन्नास्ति ॥

[८. ७१.] ८५१. १६. **चादितो**—न-भ३-य । वादितो—ख-त१-२-भ१-२; दोदितो—त३; त्वं नो अग्ने इत्यादितो—श; एतदादितो—ग; आदितो—श-त४-मॅ-मु ॥ ८५१. २०. **ग्रह**—

*मॅ। रक्ष कस्य महोभिः–ऽ-मु ॥ ८५१. २८. **अस्मदादिभिः**—*मॅ-मु। अस्मादिभिः–ख-त-भ; अस्माभिः–ग; अस्मादादिभिः–श ॥ ८५२. २. **वस्वो...प्रयच्छसि**। अत्र 'स नो विश्वेभिर्देवेभिरूर्जो नपात्' इति ऋक्पाठः। 'स नो वस्व उप मास्यूर्जो नपात्' (८. ७१. ९) इति व्याख्यात्रा पठितम्। विश्वेभिर्देवेभिः धनं प्रयच्छसि–घ-मु ॥ ८५२. ३. **स्तुत्यप्रकाश तदेवादरार्थम्**—न-भ। स्तुत्यप्रकाशन तदेवा°–श; स्तुत्यप्रकाश देवा°–घ-त१; स्तुत्यप्रकाशन देवा°–ख-ग-ञ-त२-३-४-मॅ। स्तुत्यप्रकाशन देव आदरार्थ–मु। ऋ. सं. ७. ७०. ७. द्रष्टव्यम् ॥ ८५२. ४. **तच्च**। 'तं च' इति भाव्यम् ॥ ८५२. ९. **यम्**—ग-*मॅ-मु। यदा–ख-त-न-भ-श; यदा यं–घ ॥ ८५२. १३. **गोषु**–घ-भ३। यागोषु–ग; यागेषु–ख-त२-न-भ१-२-श-मॅ-मु ॥ ८५३. २. **नपात्त्वम्**—ग-भ३-*मॅ-मु। नपादित्वं–इतरलिखितपुस्तकेषु ॥ ८५३. ३. **एव**—*मॅ। वा–ऽ-मु ॥ ८५३. २५. **होता**—ख-घ-ञ-त२-न-भ-मु। ग-त३-४-श-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ८५४. १२. **वा**—*मॅ। अति वा–ख-त-भ; सति वा–ग; अथवा–मु ॥ ८५४. २३ **धनाय**—ऽ। मॅ-पुस्तक एतन्नास्ति। धनायाग्निं–मु ॥ ८५५. १. **नः अस्माकम्**—ख-ञ-त१-न-भ-मु। ग-त४-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ८५५. २. **भयानाममिश्रणम्**—*मॅ-मु। भयानं मम श्रवणं च–ख-ञ-त२-४-भ१; भयानाममिश्रवणं–ग; भयानाममश्रणं–त१; भयानामश्रवणं–भ२ ॥

[८. ७२.] ८५५. २४. **ससं स्वपन्तम्**—*मॅ-मु। ससं स्थापनं–ख-ग-ञ-त२-भ२-श; ससं स्थपनं–घ-त३-४-भ१; संस्थापनं–त१; संसं स्थपनं–न ॥ ८५६. ८. **स्तोतुम् अन्व्यम्**—मॅ। स्तोतामन्यं–ख-त-न-भ-श; स्तोतामंव्यं–ग; स्तोतुमन्य–घ१; स्तोतुमंव्यमन्यं–च-मु ॥ ८५६. ९. **अयं रुशंश्चरंश्च**—*मॅ-मु। अयं चरंश्च–ख-ग-त-भ; यच्चरन्रश्च–श ॥ ८५६. १४. **स्थूलम्**—*मॅ-मु। स्थलं–ख-त-श; स्थल–घ; स्थलो–भ१-२ ॥ ८५६. १५. **नियोजयतीत्यर्थः**—*मॅ-मु। यारुजनिंयोजयेति सेत्यर्थः–ख-त१-२-३-न-भ; यारुजनिंयोजयेति श्रुत्यर्थः–श ॥ ८५६. २२. **ब्राह्मणम्**—ग-घ-श-मु। ब्राह्मणं–ख-त-भ-मॅ ॥ ८५६. २५. **ओ**—घ-ञ-भ-मु। तो–ख-ग-त; वो–श। ओं–मॅ ॥ ८५६. २६. च **आ**—ग-न-भ। वा–ख-त-श-मॅ-मु ॥ ८५७. १३. **परितो व्याप्तम्**—ग। परिणेव्याभं–ख-त-भ-श। परिणत्याभं–घ-मॅ-मु। 'परिगंतारम्' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ८५७. १४. **नीचीनद्वारम्**—न-भ-*मॅ-मु। ग्भूतद्वारं–घ। इतरलिखितपुस्तकेषु नास्त्येतत् ॥ ८५७. २०. **आसन्द्यामासादयन्ति**। आसद्यामा°–घ१; आसादयंति–च; असंध्यमा°–ख; आलंध्यामा°–श। आसंध्यमासादयंति–मॅ-मु इतरेषु च ॥ ८५७. २६. **गवाजयोः**—ग-*मॅ-मु। गवाश्वयोः–ख-ञ-त१-२-भ; गवायोः–त३-४-श ॥ ८५८. १३-१४. **संगच्छन्ति...संगच्छन्ते**—ऽ-मॅ-मु। 'समो गम्यृच्छिभ्याम्' (पा. सू. १. ३. २९) इति सूत्रेण प्रथमं 'संगच्छन्ते' इति अनन्तरं 'संगच्छन्ति' इति च भाव्यम् ॥ ८५८. १८. **धारकम्**—घ। धारकमग्निं–ख-त-न-भ-श; धारकमग्नं–ग; धारकमाजं–मॅ-मु ॥ ८५८. २८. **मधुधुक्त्वम्**—*मॅ-मु। मधुक्षं–ख; मधुकत्वं–ग; मधूदकं–ञ; मधुकं–त१-२-४; मधुदकं–त३; मधुष्णं–भ१-२; मधुवृणं–भ३; मधुत्वं–श ॥ ८५९. २. **हेतुमाह**—*मॅ-मु। हेतुं–ऽ ॥ ८५९. ६. **पवमाने**—*मॅ-मु। एवमाने–ख-त-भ; एवमात्ते–ग; एवंमाने–घ; एवंभूते–श। 'पवमाने सोमे' इत्यनन्वितम् ॥

[८. ७३.] ८६०. २२. **आवारयतम्**—मॅ-मु। आवरयंतं–घ; आवरयतं–इतरेषु ॥ ८६०. २७-२८. **'प्रवेशः...निर्गमश्च...स्पष्टमुक्तम्**—ऽ-मॅ। ।। स्पष्टमुक्तः–मु ॥ ८६१. ८.

युवयोरर्थमागमनाय—*मॅ। युवयोरर्थागमनाय–ख-घ-त-न-भ-श; युवयोरात्रार्थागमानाय–ग। **युवयोरर्थं** गमनाय–मु ॥ ८६१. १४. **सजात्यम्**—च-भ२-श-*मॅ-मु। साजात्यं–ख-ग-त; संजात्यं–घ१; साजत्यं–भ१ ॥ ८६१. १५. **बन्धकः स्तुवः**—*मॅ-मु। बंधकस्तुवः–ख-त-भ२; बंधकस्तुवः–भ१-श; बंधकं स्तुवः–ग; बंधुकः स्तुतः–घ१; बधुकः स्ततः–च ॥ ८६१.१६. **अथवर्षिरहम्**—*मॅ-मु। अद्य वायुरहं–ख-त-न; अथवा युवयोरहं–ग; आद्या वायुरहं–भ१-२; अथवा रहं–श ॥ ८६२. ३. **अश्विनौ**—मॅ। अश्विनौ नोस्मान्–ख-ग-त-न-भ-श-मु; अश्विनौ नः–घ ॥ **अश्व्यैः अश्वसमूहैः**—*मॅ। अश्व्यैश्च–ख-ग-घ-त-न-श-मु। अश्व्यैः अश्व–भ२ ॥ ८६२. १४. **निशारयति**—*मॅ-मु। निशरयति–ख-त; निःसारयति–ग; निवारयति–घ-न-भ; निशातयति–श ॥ **एवम्**—ग-न-भ। एव–ख-त-श-मॅ-मु ॥ ८६२. १९. **आकर्षया**—मॅ। लिखितपुस्तकेषु 'कृष्णयाकर्षया' इति निरन्तरं लिखितत्वात् 'आकर्षया' 'कर्षया' इत्युभयथापि पदच्छेदः शक्यते कर्तुम्। कर्षया–मु। 'आकर्षकया' इति स्यादिति मॅक्समुल्लरमहाशयः संभावयति ॥

[८. ७४.] ८६२. २३. **पञ्चमम्**—भ२-*मॅ। चतुर्थ–मु इतरेषु च ॥ ८६२. २७. **व्योमविश्वदेवस्तुत्**—*मॅ-मु। त्वाव्योमविश्वेदेवस्तुत्–ख-न-भ; व्योमविश्वोदेवस्तुत्–ज्ञ-त१-२; त्वाव्योमविश्वेदेवस्त्वयं–त३-४-श। केवलं पञ्चशारदीय एवेदं सूक्तमाज्यशस्त्रं, न व्योमविश्वदेवस्तुतोरिति आश्व. श्रौ. सूत्रादवगम्यते ॥ ८६३. ५. **स्तुषे**—ख-घ-ज्ञ-त१-२-मु। नु स्तुषे–मॅ इतरेषु च ॥ ८६३. २७. **°तेज आद्युपलक्षण°**—*मॅ-मु। °तेजोद्युपलक्षण°–ख-ग-त-न-भ ॥ ८६३. २८. **नाशयन्तम्**—ग-घ-ज्ञ-भ२-श। नार्शयंतं–ख-त२-३-४-न-भ१। दर्शयंतं–मॅ-मु ॥ ८६४. २०. **संबन्धीति**—*मॅ। संबंधिनमिति–ख-ज्ञ-त१-३-न-भ-श-मु; संबंधिनि इति–ग; संबंधि सर्व—त२ ॥ ८६४. २५. **स्तुवते**। स्तुवंति–ग। स्तुवंते–मॅ-मु इतरलिखितपुस्तकेषु च ॥ ८६५. १२. **वृत्रतूर्ये**—ग-न-भ-श। वृत्रस्य तूर्ये–ख-त-मॅ-मु। ८६५. १९. **वृक्षा**। 'मृक्षा' इति पदपाठः। **वृक्ष्यन्त**—ग-*मॅ-मु। व्रश्चत–ख-ज्ञ-त२-३; व्रश्च्यंते–त१; व्रश्च्यंते–भ ॥ ८६५. २७. **शत्रूणाम्**—मॅ। शत्रूणां संबंधिनां–ख-त-न-भ-श। शत्रूणां संबंधिनं–घ-मु ॥

[८. ७५.] ८६६. २६. **आहूत वा**। आहूतो वा–भ१; आहुतोद्य–ख; आहुतो वा–ग-त-भ२-श-मु। आहुत वा–*मॅ। ऋ. सं. ८. २५. १९. द्रष्टव्यम् ॥ ८६७. ११. **°दीप्तये**—ग। °तृप्तये–मॅ-मु इतरेषु च ॥ ८६८. ६. **ते**—घ-न-भ-मु। ख-ग-त-श-मॅ-पुस्तकेष्वेतन्नास्ति। ८६८. २३. **अस्मदन्यमस्तोतारम्**—*मॅ-मु। अस्मदन्यस्तोतारं–ख-त-न-भ; अस्मदन्यं स्तोरं–ग; अस्मदन्यं स्तोतारं–घ-श ॥ ८६८. २९. **विधावति**–त-न। विधाति–भ। वधावति–घ। वृधावति–श-मॅ-मु। 'वृधावति' इत्यस्य स्थाने 'विधावति' इति भाष्यकारः पठितवानिति तद्व्याख्यानतोऽपि स्पष्टम् ॥ ८६८. ३०. **भवाम**—ख-ग-ज्ञ-त१-२-३-भ-श-मु। भवेम–घ-त४-न-मॅ ॥ **इति भावः** ऽ-मु। इति–मॅ। ८६९. ४. **अन्यस्याः**—ग२। अन्यायाः–मॅ-मु इतरेषु च ॥

[८. ७६.] ८६९. २८. **अपः सृजन्**—च-भ३। अपः असृजत्–ख; अपः असृजन्–ज्ञ-त१-२-३; अपसृजन्–ग-त४-भ१-२; अपः अपसृजन्–घ१-श-मॅ। अपः सृजन् असृजन्–मु। मु-पुस्तकगतः पाठः शुद्ध इति मॅक्समुल्लरमहाशयेनोक्तम्[1] (!) ॥ ८७०. २२. **बहुकर्मन्निन्द्र**—

1. Preface to the 2nd Edition Vol. IV. p. 178.

ग-घ । बहुकर्मेंद्र–ख-त-भ-श-मॅ-मु ॥ ७७१.३. **अह्नाम्**—ग१-*मॅ-मु । अहां–इतरलिखितपुस्तकेषु ॥ ८७१. ६. **इति ब्राह्मणाच्छंसिनः**—ख-त-न-भ-श-मु । इदं नास्ति मॅ-पुस्तके ॥ ८७१. २०. **साष्टापदी**—ख-*मॅ । साष्टापदीं–त१-२-३-४-न-भ२-३-मु; प्राप्ता–घ; प्राप्तापदीं–श-भ१(प्राप्ते) ॥ ८७१. २२. **तनुम्**—ख-घ-त न-भ२-श-मु । तनून्–भ१-३ । तनूं–मॅ ॥ **स्वरूपं...अशक्यत्वात्** । 'स्वरूपस्य...अशक्यत्वात्' इति भाव्यम् ॥

[८. ७७] ८७१. २४. **कुरुसुतेः**—श-*मॅ । पुरुसुतेः–ख-त-भ-मु; पुरुसुतिः–घ ॥ ८७२. ६. **एनम्**—ख-त-न-भ-श । ईमेनं–घ-मु । एतं–मॅ ॥ ८७२. ७. **तौ**—मॅ-मु । ते–§ ॥ ८७२. १३. **रज्ज्वा इव तया**—*मॅ-मु । नद्धेव लया–ख-त; रज्ज्वा–ग; वलया–घ; रज्वेव लया–न-भ-श ॥ ८७३. १७. **नतानि**—*मॅ-मु । निता–ख-त-भ-श; नीतानि–घ ॥ **भूमेः कीलवद्धारणाय**—*मॅ । भूमे किलवद्धारणया–ख; भूमेः किलबद्धधारणाय–घ; भूमे किलवद्धारणाय–ज्ञ; भूमे किल बद्धा धारणाय–त१-२; भूमे किल बद्धा धारणया–त३-४-भ; भूमे किलबद्धा धारणप्रा–श । भूमेः कीलवद्धारणानि–मु ॥ ८७३. २४. **नैरुक्तैतिहासिक°**—ख-ज्ञ-त१-२-४-न-भ-मु । निरुक्तैतिहासिक°–ग-त३-श-मॅ ॥ ८७३.२६. **स्वविरोधेन नेत्याह**—न-भ-श । स्वविरोधन नेत्याह–ग; स्वविरोधेनेत्याह–ख-त-मॅ-मु ॥ ८७३. २८. **°वचनः**—§-मु । °वचने–मॅ ॥ ८७४. १४. **तानि**—भ । एतन्नास्ति ख-ग-त-न-श-मॅ-मु-पुस्तकेषु ॥ ८७४. १६. **उक्तोऽर्थश्च चरमपादेन**–*मॅ-मु । उक्तार्थाच्च वारमपादिना–ख-ज्ञ-त१-२-३; इत्यत्रोर्थाश्च चारमपादेन–ग; उक्तोर्थोच्च चारमपादिना–त४-न-भ-श ॥ ८७४.२३. **यास्केन व्याख्याता**—*मॅ-मु । व्याख्यातत्वात्–§ ॥ **लिख्यते**–*मॅ-मु । लिख्यते यास्कः–§ ॥ ८७४. २५. **गमनपातिनौ**—§-मॅ-मु । गमनपातिनौ वा–निरु. ॥

[८. ७८] ८७६. ४. **यदा तं निन्दितुमिच्छति**—*मॅ-मु । यदा त्वं निंदितुमिच्छसि–ख-ग-त-न-भ-श ॥ ८७६. १४. **इन्द्रः...अभिहितः**—*मॅ-मु । चेंद्रः पीतं सोमोभिहितः–ख-त-न-भ-श; चेंद्रपीताः सोमोभिहितः–ग ॥ ८७६. १८. **एषते**—ग-घ-भ । ईषते–ख-त-मॅ-मु ॥ ८७६. १९. **आप्तेच्छम्**—*मॅ-मु । आप्तछुं–ख-त२-३-श; दातुमिच्छां अदच्छशु–ग; त्वामिछुं–घ१; त्वामिछां–च; आप्तेछुं–त१; प्राप्तेछुं–भ ॥ ८७६. २७. **निष्कृतस्य**—*मॅ-मु । निष्कस्य–ख-त-भ-श; संभृतस्य–ग ॥

[८. ७९] ८७७. १६. **°साधनश्च अन्धः सन्नन्धोऽपि**—मु । °साधनस्य अंध संनद्धोपि–भ१-३; °साधनस्य अंध संनद्धोपि–न; °साधनश्च अंध(अध–त३-४) संनद्धोपि–त३-४-भ२; °साधनश्च अयमंधोपि–ग । °साधनश्च अंधः संनद्धोऽपि–मॅ ॥ ८७७. २१. **कृत्याभ्य इत्यर्थः**—ग-त४-भ-श । कृत्यभ्येत्यर्थः–ख-ज्ञ-त२-३-न । कृत्येभ्य इत्यर्थः–मॅ-मु ॥ ८७७. २२. **अन्यकृतानि हि रक्षांसि** । इदं ब्राह्मणवचनं कुत्रत्यमिति न ज्ञायते ॥ ८७७. २७. **दिवश्च**—§-मु । एतन्नास्ति मॅ-पुस्तके ॥ ८७८. १४-१६. **हे सोम ..... हृदे हृदये ..... नः पूरणः** । हे सोम..... कृत् हृदये ... ... नः पुराणः–भ । हे सोम पीतः त्वं नः अस्माकं हृदे हृदये वर्तमानः सुशेवः सुसुखः मृळयाकुः सुखकर्ता अदभ्रकतुः असमाप्तकर्मा पुनःपुनः यागप्रवर्तकः अवातः निश्चलश्च भवेत्यन्वयः–ख-घ । हे सोम पीतः त्वं नः अस्माकं हृदे हृदये वर्तमानः सुशेवः सुसुखः सुखहेतुः अगर्वितकर्मा अहिंसितः । एतादृश हे सोम नः अस्मभ्यं शं भव मनसे अतिनेतेवं साधयतीत्यर्थः–ग । हे

सोम पीतः त्वं नः अस्माकं हृदे हृदये पीताय शं सुखं भव किंच नः अस्माकं सुशेवः सुसुखः मूळयाकुः सुखकर्मा अदृप्तक्रतुः असमाप्तकर्मा पुनःपुनः यागप्रवर्तकः अवातः निश्चलश्च भवेत्यन्वयः–ऋ-त१-२। हे सोम नः अस्माकं कृत् हृदये पीताय हृदयसंभव। अपरो नः पुराणः–त४-न-श। हे सोम पीतस्त्वं नः अस्माकं हृदे हृदये वर्तमानः शं सुखं भव। किंच नः अस्माकं सुशेवः सुसुखः मूळयाकुः सुखकर्ता अदृप्तक्रतुः असमाप्तकर्मा पुनःपुनः यागप्रवर्तकः अवातः निश्चलश्च भवेत्यन्वयः–मु। हे सोम पीतस्त्वं नोऽस्माकं हृदे हृदये वर्तमानः सुशेवः - -। अपरो नः पूरणः–मॅ॥ ८७९. २. **वा**—भ-*मॅ-मु। च–घ। इतरलिखितपुस्तकेषु नास्ति॥ ८७९. ३. **हिन्धीत्यर्थः**—ग-त४-भ१-श। हिंसीत्यर्थः–ख-भ२-३; भिषीत्यर्थः–घ; हंतीत्यर्थः–ञ; हिंथीत्यर्थः–त२-३। भिंधीत्यर्थः–मॅ-मु॥

[८. ८०.] ८७९. ४. **एकादशम्**—*मॅ। द्वादशं–ञ्। दशमं–मु॥ ८७९. ५. **°र्नाम**—घ१-मु। °र्नामा–इतरलिखितपुस्तकेषु मॅ-पुस्तके च॥ ८७९. १२. **बद् सत्यं नाकरम्**। बहुकृत्यं(°त्य–घ) नाकरं–ख-घ-श-त१; बद् सत्यं ऩाकरं–ग-भ३; बहुकृत्यऩाकरं–त२; बद् - त्यऩाकरं–त३-४-न; बद् - - ऩाकरं–भ१; वरं - - ऩाकरं–भ२; बल इत्यऩाकरं–श। बद् तऩ्यकरं–मु। बद् - तऩाकरं–मॅ॥ ८७९. १७. **अन्नलाभाय**—घ-भ३। एतन्नास्ति मॅ-पुस्तके॥ ८८०. ९-१०. **वाजयु ... इच्छत्**—मॅ-मु। 'वाजयुः ... इच्छन्' इति (घ-पुस्तकगतः) पाठः साधीयानिति मॅक्समुल्लरमहाशयस्याभिप्रायः॥ ८८०. २०. **पुरमसि**—ग२। पूरयसि–मॅ-मु इतरेषु च॥ ८८०. २७. **अवद्यः**—ख-ग-त-न-भ-श। अवद्ये–मॅ-मु पदपाठश्च। अवद्ये अवद्यः–घ। 'अवद्ये' इति पाठः मॅक्समुल्लरमहाशयेन लिखितपुस्तकेषूपलब्धो न वा इति न ज्ञायते। अस्मत्प्राप्तेषु बहुषु लिखितपुस्तकेषु 'अवद्यः' इत्येव पाठः। अतः भाष्यकारैः 'अवद्ये' इत्यस्य स्थाने 'अवद्यः' इति पठितमिति शक्यमनुमातुम्॥ ८८०. २८. **बह्वन्तरालमाज्यन्तः**। बह्वंतरळं (°लं–त२-३; °ळ–भ१) आज्यंते–ख-त-न-भ१; बह्वंतराळ–ग; बह्वंतराल आज्यंते–भ३; बह्वंतरलं आज्यंतो–श। बह्वंतराल आज्यन्तः–मॅ-मु॥ ८८०. २९. **स्थिता**—ञ्-मॅ। स्थितो–मु-निरु॥

[८. ८१.] ८८१. २०. **स्तोत्रियः**—ञ्-मु। मॅ-पुस्तक इदं नास्ति॥ ८८१. २३. **नः अस्मभ्यम्**—ञ्। अस्मभ्यं–*मॅ-मु॥ **दातुम्**—घ। दातुं नोऽस्मदर्थं–ख-त-न-भ-श-मॅ-मु॥ ८८२. १६. **उपगानम्**—ग१-भ३-*मॅ-मु। उपमानं–इतरलिखितपुस्तकेषु॥ ८८२. १८. **स्वीकुर्वीति**—ख-ग-त-भ-श-मु। स्वीर्निति–न। घ-मॅ-पुस्तकयोरेतन्नास्ति। ऋ. सं. १. १४०. १३. द्रष्टव्यम्॥ ८८३. ८. **तव वाजाः**—*मॅ-मु। तव आ–त-भ१-२; तव–ग; अश्वाः–घ-भ३॥

[८. ८२.] ८८४. ७. **लिटि**—ख-ग-ञ-त२-३। टेटिले–भ१; लटि–श; लेटि–त४-भ२-३-मॅ-मु॥ ८८४. २९. **सोऽस्माभिः**—*मॅ-मु। अस्माभिः–ग; सह अस्माभिः–इतरलिखितपुस्तकेषु॥ ८८५. २८. **त्वम्**—ग-भ३-श-*मॅ-मु। ता–ख-त-भ१-२; तां–ञ॥

[८. ८३.] ८८६. ७. **महनीयम्**—ञ्। मंहनीयं–मॅ-मु॥ ८८६. १३. **सर्वेषु कालेषु**—ख-ञ-त१-२-भ। **सर्वेषु**–ग-घ-त३-४-न-श। **सर्वेष्वहःसु**–*मॅ-मु॥ ८८६. १९. **संबन्धि - - - त्वात्**—मॅ बहुषु लिखितपुस्तकेषु च। संबंधेः–न। मु-पुस्तक एतन्नास्ति। 'संबन्धिशब्दत्वात्' इति स्यात्॥ ८८६. २०. **विष्पितानि**—*मॅ-मु-×। बहुषु लिखितपुस्तकेषु 'विष्पिता' इत्यस्यानन्तरं लेखनार्थं काश्चिदवकाशो (Lacuna) दृश्यते। 'विष्पितानि' इति पदमत्राभिप्रेतं स्यादिति कृत्वा

मॅक्समुल्लरमहाशयेन विनिवेशितम् ॥ ८८६. २१. **वा**—ख-ञ-त१-२-भ२-य । ग-त३-श-मॅ-मु-पुस्तकेषु नास्ति ॥ ८८७. ४. **याचामहे**—ख-घ-ञ-त२-४-मु । याचामः–ग-न-भ-श-मॅ ॥ ८८७. ६. **न प्राप्नोतु**—घ-न-भ । प्राप्नोतु–ख-त-श-मॅ-मु ॥ ८८७. १०. **वः इत्**—ग-घ-मु । इत्–ख-त-भ-श । इद्वो–मॅ ॥ ८८७. १६. **तेषामेषाम्**—ऽ-मु । तेषां–मॅ ॥ ८८७. २१. **सामान्येन**—ख-घ । समाने–ग । समान्येन–त-न-भ-श-मॅ-मु ॥ ८८७. २४. **तस्मै पूषा चार्यमा चाजायेताम्** । इयं श्रुतिः तैत्तिरीयसंहितायां (६. ५. ६.) नोपलभ्यते ॥ ८८७. २९. **सर्वे देवाः**—ख-घ-त-न-भ-श-मु । सर्वदेवाः–ग-मॅ ॥ ८८७. ३०. **ब्रुवे**—*मॅ-मु-×। उतापि च ब्रुवे–घ ॥

[८. ८४.] ८८८. ३. **उक्थ्येषु**—ग-त-न-भ१-२-श-मु । उक्थेषु–ख-भ३-मॅ ॥ ८८८. १२. **काठ्यः**—*मॅ-मु । अहं–ग; कः–इतरेषु ॥ ८८८. २१. **अग्ने**—*मॅ-मु । इंद्र–ऽ ॥ ८८८. २३. **नृन्पे**–*मॅ-मु । नृन् पति–ग; तत्प्रति–इतरेषु ॥ ८८८. २६. **त्मनेति**—ख-त-न-य-श-मु । आत्मनेति–भ१-३-मॅ ॥ **रक्ष त्वदन्यम्**—भ२-*मॅ-मु । रजनदन्य–ख-भ१; नवतदन्यं–ग; रजनदन्यं–त-भ२; त्वदन्यं–श ॥ ८९०. ६. **साधयद्भिः**—*मॅ-मु । साधायोभिः–ख-त-भ३; साधीयोभिः–ग; साधोयोभिः–भ१-२ ॥

[८. ८५.] ८९१. २. **संप्रति**—ग-भ१-३-श-मु । सप्रति–ख-त-न-भ२ । घ-मॅ-पुस्तकयोर्नास्ति ॥ ८९१. २९. **सोमस्य**—ग-*मॅ-मु । इतरेषु नास्त्येतत् ॥

[८. ८६.] ८९२. ९. **नराः**—ऽ-मु । नरः–मॅ ॥ ८९२. १०. **भीतिमपनयतः**—*मॅ । भीतिं समनयन–ख-त; भीतिं समनयत–भ-श-मु ॥ ८९२.१२. **अस्ताविषाथाम्**—*मॅ-मु । अस्ताविद्याढ्या–ख-ञ-त२-४-भ२; स्ताविद्याढग–ग; अस्ताविद्याथाः–घ; अस्ताविद्याया–त१-३; अस्ताबीयाद्या–भ१-३ ॥ ८९२. १४. **विष्णाप्यो निमित्तम्**—*मॅ-मु । विष्णोः प्रसनिमित्त–ख-त; विष्णोः प्रसवनिमित्तं–ग-भ२-३; विष्णोः निमित्तं–घ; विष्णोः प्रसबिमितं–भ१ ॥ ८९२. २३. **कथं वाम्**—ऽ-मु । मॅ-पुस्तक इदं नास्ति ॥ ८९२. २४. **प्रशस्तं धनं तस्याभिलषितस्य**—*मॅ-मु । प्रशस्तधनं तस्याभिलषितस्य–ग; प्रशस्तधनवतमभिलषितस्य–ख-त-भ-श; प्रशस्तधनमभिलषितस्य–घ ॥ ८९२. २५. **अददाथाम्** । अदाथां–ख-त-न-भ-श; अदातं–ग; अद्याथां–घ । अदधाथां–मॅ-मु ॥ ८९३. ५. **आपुनाति**—ऽ-मु । पुनाति–मॅ ॥ ८९३. ७. **अदत्तम्**—मॅ-मु । दत्तं–ऽ ॥ ८९३. १४. **ऋजीषोऽपार्जितोऽभिषुतः सोमः**—ग-त३-मु । निरु.५.१२.; ९३२. पृ.२० प. टिप्पणी च द्रष्टव्ये । ऋजीषोपार्जितोभिषुतसोमः–ञ-त४-भ-श । उपार्जितः अभिषुतसोमः–घ । ऋजीष उपार्जितोऽभिषुतः सोमः–मॅ । ऋजीषशब्दः यद्यपि निरुक्तादिषु नपुंसकलिङ्गः दृश्यते तथापि सायणाचार्यैः प्रायेण पुंलिङ्ग एव प्रयुक्तो दृश्यते (ऋ. सं. ५.४०.४; ६.४२.२; ८.७६.५.) ॥ ८९३. १५. **रक्षति**—ग-न-भ । रक्षत–ख-ञ-त२-३ । रक्षते–घ-त४-श-मॅ-मु ॥ ८९३. १८. **मा नो इति**—ख-त१-२-मु । मा न इति–ग-ञ-भ३; म मे इति–त३-४-न-श; इमे इति–भ१; मे इति–भ२ । मेति–मॅ ॥

[८. ८७.] ८९४. ३. **यत्स्थ इति**—मॅ-मु-आश्व. श्रौ. । यत्स्थो–ख-ग-त; यत्स्थो इति–भ-श ॥ ८९४. ८. **अनुपक्षीणस्तोत्रः**—ग-*मॅ । अनुक्षीणस्तोत्रः–ख-त-भ-मु; मनुष्यः क्षीणस्तोत्रः–श ॥ **स्तोमः स्तोता भवति**—*मॅ-मु । स्तोमस्ता भवसि–ख-ञ-त२-३-भ; स्तोम भवसि–त१-४ ॥ ८९४. १२. **प्रयच्छतः**—ऽ-मु । प्रयच्छथः–मॅ ॥ **प्रति आ गतम्**—ख-ग-घ-त-न-भ२-

श-मु। प्रत्यागं–भ१। प्रत्यागच्छतं–भ३-मॅ॥ ८९४.१४. **शीघ्रमागत्य पिबतम्**—त-भ-मु। शीघ्रमागत्य पिबतः–ख। एतन्नास्ति घ-मॅ-पुस्तकयोः॥ ८९४.२७. **आ**—भ१-२। आ नि पातं–ख-ज्ञ-त१-२-मु। भ३-मॅ-पुस्तकयोरेतन्नास्ति। इतरलिखितपुस्तकेषु २-४ मंत्राणां भाष्यं नास्ति॥ ८९५. ४. **अवतिः**—भ२-३-मु। अवतीः–भ१; अविति–त२। अवति–ख-मॅ॥ **याच्ञाकर्मा**—ख-त२-भ-मु। याच्ञाकर्म–मॅ॥ ८९५. ५. **आत्मनः**। आत्मनां–ख-ज्ञ-त२-भ३; आत्मानं–त१; आत्मानां–भ१-२। आत्मना–मॅ-मु॥ **पालनहेतुकत्वेन**—ख-त२-भ-मॅ-मु।?॥ ८९५.६. **ता तौ**—ख-घ-त१-२-मु। ततो–भ-मॅ॥ ८९५. ७. **सर्वैर्देवैः**—ख-घ-ज्ञ-त१-२-मु। सर्वदेवैः–भ१-२। सर्वदेवेषु–मॅ॥ ८९५. १५. **ववृधानौ**—ख-घ-ज्ञ-त१-२-भ१-२-मु। वावृधानौ–भ३-मॅ॥ ८९५. १६. **शोभनाम्**—ऽ-मु। मॅ-पुस्तक एतन्न विद्यते॥ ८९६. २. **अन्नलाभाय**—ऽ-मु। अन्नकामाय–मॅ॥

[८. ८८.] ८९६. २०. **वसोः पात्रे निवसतः**—*मॅ-मु। वसे पात्रः प्रतिवसतः–ख-त-भ१; वसोः पात्रं प्रतिवसतः–ग-भ३-श; वसो पात्रः प्रतिवसतः–भ२॥ ८९६. २५. **अत्रेति**—ऽ-मु। यत्रेति–मॅ॥ ८९६. ३०. **अतिशयितदीप्तिम्**—ऽ। °दीप्तं–मु। अतिशयेन दीप्तं–मॅ॥ ८९७. ५. **शोभनदानयोग्यं बलादियुक्तम्**। शोभनदानयोग्यबलादियुक्तं–ग। शोभनयोग्यं बलादियुक्तं–ख-त-भ-मॅ-मु॥ ८९७. ६. **याचामह इति**—ग-*मॅ। याचामहेति–श; याचाम इति–ख-त-न-भ-मु॥ ८९७. ७. **ब्राह्मणाच्छंसिनः**। 'अच्छावाकस्य' इति भाव्यमिति प्रतिभाति॥ ८९७. १४. **न निवारयन्ति**—ग२-घ१-भ-मु। च निवारयंति–श; निवारयंति–ख-ग१-च-ज्ञ-त३-४-न-मॅ॥ ८९७. १५. **त्वम्**—मॅ। त्वं तत्–ऽ-मु॥ ८९७. २३-२४. **मज मुजि...शब्दार्थः**—ऽ-मॅ-मु। इदं पुनरुक्तमिवाभाति। धातुपाठे 'मुज मुजि शब्दार्थाः' इति दृश्यते। 'मजमुजी च' इति नास्ति। 'मुज मुजि' इत्येतयोः स्थाने 'मृज मृजि इति स्वामिचन्द्रौ' इति माधवीयधातुवृत्तावुक्तम्। 'मृज मृजि शब्दार्थाः मजमुजी च' इति पाठः संभाव्यते। अन्यत्र (ऋ. सं. १. ५१. १०; ५५. ५·) 'टुमस्जो शुद्धौ' इति धातोः मज्मञ्शब्दो व्युत्पादितः॥ **शत्रूणामाक्रोशनसमर्थेन**—मॅ-मु। येन शत्रूणामाकोसनसमर्थेन–ख-ज्ञ-त२-३-४-भ१-२; येन शत्रूणां रोदनसमर्थेन–ग; येन शत्रूणाकोशन(°सन–न)समर्थेन–त१-न; येन शत्रूणामाकोशनसमर्थेन–श॥ ८९७. २९. **प्रादुरबीभवन्**—मॅ-मु। प्रादुरभीरयन्–ख-घ१-त-न-भ-श; प्रादुरचीकरन्–ग; प्रादुरभिरयन्–च॥ ८९८. ६. **लटि**—ख-त-भ-श। लेटि–ग-मॅ-मु॥

[८. ८९.] ८९८.२१. **इन्द्रो देवता**—ख-ग-त-न-भ-श-मु। मॅ-पुस्तके नास्तीदम्॥ ८९८.२४. **मरुत्वतीया ऊर्ध्वं नित्यात्**। मरुत्वदीया ऊर्ध्वं नित्यात्–ग; मरुत्वतीय ऊर्ध्वं नित्या–ख-त-भ-श। मरुत्वतीय ऊर्ध्वं नित्यात्–मॅ॥ ९००. ३. गच्छन्तु–*मॅ-मु। गच्छति–ख-त; गच्छंति–घ-न-भ॥ ९००. १०. **त्वत्तो**—ऽ-मु। स्वतो–मॅ॥ ९००. १८. **त्वदर्थम्**—ऽ। त्वदर्थो–मॅ-मु॥ ९००. २९-३१. **ततोऽङ्गिरस...मारोहितवान्**। अशुद्धेयं वाक्यरचना॥

[८. ९०.] ९०१. १५. **अनुभवतु**—भ३-श। उत्कृष्टमनुभवतु–ग; उदकमनुभावतु–त; उदकमनुभवेतु–न-भ१-२। उदकमनुभावयतु–घ-मॅ-मु॥ ९०१. १६. **वा**—श-*मॅ-मु। एतन्नास्ति ख-ग-त-न-भ-पुस्तकेषु॥ ९०१. १८. **जिनाति**—भ२-३-मु। जिनातीति–ख-त-भ१-श; जीनातीति–ग। जीनाति–न-मॅ। ऋ. सं. ८. १. ३०. द्रष्टव्यम्॥ ९०१. २७. **तत्पुत्रस्य**—

ग-*मॅ-मु। नपुत्रस्य–ख-त-भ१-२-श; पुत्रस्य–भ३॥ ९०२. ३. **त्वदूगुणान् सर्वान्**—न-भ-श। (अनति)दूगुणान् सर्वान्–ख-त। **सर्वान्**–ग-घ-मॅ-मु॥ ९०२. ४. **ब्रह्म**—घ-न-भ-मु। ख-ग-त-मॅ-पुस्तकेष्वेतन्नास्ति॥ ९०२. १३. **प्रह्वीभावयसि**—*मॅ-मु। प्रह्वीभवसि–ख-त-भ-श; **प्रह्वीभवंती**–ग॥ ९०२. २४. **ऋजीषी ऋजीषोऽपार्जितोऽभिषुतः सोमः**। ऋजीषोपार्जितोभिषुतसोमः–ख-त-भ२-३-श; ऋजीषोपार्जितोभिषुतः सोमः–ग; ऋजीषी उपार्जितोभिषुतः सोमः–घ-मु; ऋजीषी- ऋजीषोपार्जितोभिषुतसोमः–भ१। ऋजीषी ऋजीष उपार्जितोऽभिषुतः सोमः–मॅ। ८९३. पृ. १४ प. टिप्पणी द्रष्टव्या॥ ९०३. ११. **अश्नुवताम्**—ग-त४-श-मु। अश्नुवता–ख-त२-३; अश्नुवंतु–घ; अश्नुतां–भ। अश्नुवंतां–मॅ॥

[८. ९१] ९०३. १६. **चिरकालम्**—ऽ-मॅ-मु। चिरं कालं–आउपरेख्ट्महाशयप्रकाशित एतत्सूक्तभाष्ये (Indische studien Vol. IV)॥ ९०३.१९. **दंतघर्षण°**—मॅ-मु। दंतघर्ष°–आउफ्रेख्ट्॥ ९०३. २०. **अत्र कन्या**—ऽ-मॅ। अत्रिकन्या–मु-आउफरेख्ट्॥ ९०३. २७. **अपालायामुक्तायाम्**—ऽ-मॅ-मु-आउफरेख्ट्। 'अपालायामुक्तवत्याम्' इति भाव्यम्॥ ९०३. २९. **एतानि रोमफलादियुक्तं कुरु**—ऽ-मॅ-मु-आउफरेख्ट्। 'रोमफलादियुक्तानि' इति भाव्यम्॥ **उक्तायाम्**—ऽ-मॅ-मु। 'उक्तवत्याम्' इति भाव्यम्। उक्तवत्यां–आउफरेख्ट्॥ **°शिरःस्थितं खलतिमपहाय**—भ-मॅ। °शिरःस्थितां खलतिमपहाय–ग-त-मु। °शिरःस्थितं खलतित्वमपहाय–आउफरेख्ट्। खलतिशब्दः पुनरपि (५ मंत्रे) आगतः। मॅक्समुल्लरमहाशयस्यैतद्विषयकटिप्पणी द्रष्टव्या॥ ९०३. ३१. **पूर्वापहता या**—*मॅ। पूर्वाभिहतायाः–ख-ग-त२-३-४-भ-मु; पूर्वाभिहितायाः–ज्ञ-त१; पूर्वाभिहता या–श-आउफरेख्ट्। बृहद्देवतायां (६.१०६)–'तस्यास्त्वगपहता या पूर्वा सा शल्यकोऽभवत्'॥ ९०४. ६. **लतारूपम्**—भ३। अविरूपं–ख-त-भ२; अची रूपं–भ१; अटि रूपं–श-आउफरेख्ट्। लङि रूपं–ग-*मॅ-मु। 'लङि रूपम्' इति यत् मॅक्समुल्लरमहाशयैः स्वीकृतं तदयुक्तं प्रतिभाति। यतः लङि 'अविन्दत्' इति रूपं स्यात्। लुङि तु 'अविदत्' इति भवति। मॅक्समुल्लरमहाशयस्य टिप्पणी द्रष्टव्या॥ ९०४. ९. **दन्तध्वनिम्**—घ-मॅ। दंते दंतध्वनिं–मु। दंतराजिध्वनिं–आउफरेख्ट्॥ ९०४. १०. **सोमांशुमविन्दत्**—ग-*मॅ-मु-आउफरेख्ट्। सोमं सुमविंदत्–ख-ज्ञ-त२-३-४-भ; सोमं समविंदत्–श। शाटयायनब्राह्मणवचनविषये मॅक्समुल्लरमहाशयस्य टिप्पणी द्रष्टव्या। एतद्ग्रन्थस्याद्याप्यनुपलब्धेः न किमप्यधिकं वक्तुं शक्यतेऽस्मिन् विषये॥ ९०४. ११. **सा तमभिव्याजहार**—*मॅ-मु। साभिव्याहार–ख-त-भ-श; साभिव्याहरत्–ग। साभिव्याजहार–आउफरेख्ट्॥ **त इदम्**—*मॅ-मु-आउफरेख्ट्। ता इदं–ख-त-भ-श; वा इदं–ग। 'त इह' इत्यपि स्यादिति मॅक्समुल्लरमहाशयः॥ ९०४. २०. **भृष्टयवाः**—भ३-मु। पृष्टयवाः–भ१। भ्रष्टयवाः–ख-त-श-मॅ-आउफरेख्ट्॥ ९०४. २८.–९०५. १. **इच्छाम एव..... तमिन्द्रमुक्त्वा**—*मॅ। इच्छाम एव मम गृहमागच्छंत त्वामिंद्र इति जानीम (न जानीम–ख) एव इह मार्ग एवागतं त्वा त्वां नाधीमसि नाधिगम (न जानीम–ख; निधिगम–भ१) अत्रापि चनेत्यवधारणे इह त्वामिंद्र इति न जानीम इत्यपालय तमिंद्रमुक्त्वा–ख-ज्ञ-त१-४-भ; इच्छाम एव मम गृहमागच्छतं (°भागच्छंतं–श) त्वामिंद्र इति जानीम एव इत्यपालय(°ल्या–श)तमिंद्रमुक्त्वा–त३-श। इच्छाम एव मम गृहमागच्छ तं त्वामिंद्र इति जानीम एव इह मार्ग एवागतं

त्वा त्वां नाधीमसि नाधिगच्छामः । अत्रापि चनेत्यवधारणे । इह त्वामिंद्र इति न जानीमः । इत्यपाला तमिंद्रमुक्त्वा(ऽक्त्वा)–मु । इच्छामः एवं मम गृहमागच्छंतं त्वामिंद्र इति जानीम एव । इह मार्गे एवागतं त्वा त्वां नाधीमसि नाधिगच्छामः । अत्रापि चनेत्यवधारणे । इह त्वामिंद्रेति न जानीम इत्यपाला तमिंद्रमुक्त्वा–आउफरेख्ट् ॥ ९०५. २. **कुत्सितम्**—*मॅ-मु । कुत्सितः–ऽ-आउफरेख्ट् ॥ ९०५. ५. **एवाधासीत्**—*मॅ-मु । एवौवधासीत्–ख-त-भ-श; एवोच्चैरधासीत्–ग । एवाधासीत् (मुद्रणदोषः ?)–आउफरेख्ट् ॥ ९०५. १५. **बहु**—ऽ-मॅ-मु । आउफरेख्ट्महाशयप्रकाशितभाष्य एतन्नास्ति ॥ ९०५. १७. **बहु**—ऽ-मॅ-मु-आउफरेख्ट् । मॅक्समुल्लरमहाशयः इमं शब्दमनावश्यकं मन्यते 'बहुवारम्' इति पदस्याग्रे सद्भावात् ॥ ९०५. १८. **एव**—भ३-*मॅ-मु-आउफरेख्ट् । इतरलिखितपुस्तकेषु नास्ति ॥ ९०५. ३१. **तम्**—मॅ-मु-आउफरेख्ट् । तां–ऽ ॥ **सो ह जज्ञे**—आउफरेख्ट् । सोहं जज्ञे–ख-ज्ञ-त१-भ; सो जज्ञे–ग-त४-श-मॅ-मु; जज्ञे–त२-३ ॥ ९०५. ३२. **नासुस्तान्यु ह**—*मॅ-मु-आउफरेख्ट् । वस्युस्थान्यु ह–ऽ ॥ ९०६. ५. **या असौ**—मॅ-मु । या सा–आउफरेख्ट् ॥ ९०६. ६. **अथापि**—ख-ग-त-भ-श-मॅ-मु । अपि–घ-आउफरेख्ट् ॥ ९०६. १५. **निष्कर्षणेन पूत्वी**—*मॅ-आउफरेख्ट् । निष्कर्षणे वा–त-भ१-२; निष्कर्षणैव–ग; निष्कर्षणेन–भ३; निष्कर्षणेन वा–श । निष्कर्षेण पूत्वी–मु ॥ ९०६. १७-१८. **रथस्य...अभवत्**—*मॅ । रथस्याव्य (°ध्य–ज्ञ-त२-३) बृहत्सा मोर्धाभवत्तां खेनसेनसो(खेनसो–भ२-३) त्यबृहत् (त्यहरत्–श) सा संश्लिष्टकाभवत्–ख-त-भ-श; रथस्यात्यबृहत्सा मोद्धवा भवतो खेनसेनसो बृहत्सामंशिष्टकाभवत्–ग । रथस्याध्यबृहत्सा गोधाभवत्तां खेऽनसोऽत्यबृहत्सा संश्लिष्टकाभवत्–मु । रथस्यासाद्य बृहत्सामोर्ध्वाभवत्तं खेऽनस आसाद्य बृहत्सामसंश्लिष्टकाभवत्–आउफरेख्ट् ॥ ९०६.२०. **तस्य...त्वग्दोषम्**—ऽ-मॅ-मु । तद्दोषं–आउफरेख्ट् ॥ ९०६. २१. **सूक्तम्**—ग-न-भ-*मॅ-मु । युक्तं–ख-त-श-आउफरेख्ट् ॥ अपालायाः कथाविषये ऋग्वि. २. ५२.; बृहद्दे. ६. ९९–१०७; अनु. भा. ८. ९१. द्रष्टव्यम् । मॅक्समुल्लरमहाशयस्य एतत्सूक्तटिप्पणी च द्रष्टव्या ॥

[८. ९२.] ९०७. १. **गानयोग्यम्**—त१-३-मु । गातयोग्यं–ख-ज्ञ-त२-४-भ-श; गातव्यं योग्यं–ग । गाथायोग्यं–*मॅ । 'गानयोग्यम्' इति पाठः समीचीनतर इति मॅक्समुल्लरमहाशयेनोक्तम्[1] ॥ ९०७. ३०. **लोटि**—*मॅ-मु । लिटि–ख-त-भ-श; लिङि–ग ॥ **ध्वमस्तनवादेशः**—ग-भ३-*मॅ-मु । ध्वस्तनवादेशः–इतरेषु ॥ **व्यत्ययेन...गुणः** । अत्र व्यत्ययाश्रयणमनावश्यकम् । ब्रूत्र उभयपदित्वात् 'तस्य तनबादेशः' इति वक्तुं शक्यम् । ऋ. सं. १. ८४. ५. द्रष्टव्यम् ॥ ९०७. १९. **यत्वा**—*मॅ । दत्वा–ऽ । गृहीत्वा–मु ॥ ९०७. २५. **श्रीङ् पाके**—ख-ग-भ-मॅ-मु । प्रीङ् पाके–त२-३-श; शीङ् पाके–ज्ञ-भ१ । 'श्रीञ् पाके' इति भाव्यम् ॥ ९०७. २६. **इन्दोः**—ग-*मॅ-मु । इंद्रः–ख-त-न-भ२-श; इंद्रः इंदोः–घ ॥ **क्षरत्**—*मॅ । क्षरतः–ग; क्षरंतं–त-भ-श; क्षरंत–घ-मु ॥ ९०८. ७. **ग्रहेषु**—ग-त-न-भ२-श । **गृहेषु**–भ१-३-मॅ-मु ॥ ९०८. ११. **भूताभिभवनादीनि**—ख-त-न-भ-श-मु । भूतानि अभिभूतानि–ग । भूतानि भुवनादीनि–मॅ ॥ ९०८. १४. **°तिरिक्तोक्थे**—त-भ-श । °तिरिक्तोक्थ्ये–ग-मॅ-मु ॥ ९०८. १५. **स्तोत्रियानुरूपौ**। स्तोत्रियानुरूपाः–आश्व. श्रौ. ॥ ९०८. २३. **प्लुङ्**—ख-ग-त-न-भ-*मॅ-मु । प्लुङ्–श ॥ ९०९. १८. **अदा-**

1. Preface to the 2nd Edition Vol. IV, p. 178.

तृन्—ग-*मॅ-मु । दातृन्–ख-त-भ-श; शत्रून्–घ ॥ ९०९. २५. **औतोमित्यात्वाभावः**—ग । ओत्वाभावः–ख-त-न-भ२-मु; ओर्ऋत्वाभावः–श । औत्वाभावः–भ३-*मॅ ॥ ९१०. २. **अनुकामा**—मॅ-मु । कामा–ऽ ॥ ९१०. ४. **अवगच्छाम**—ख-ग-त-न-भ-श । अवगच्छामः–घ-मॅ-मु ॥ **लेटि** । 'लटि' इति युक्तम् । ऋ. सं. १. ५०. १०; ११३. १६. द्रष्टव्यम् ॥ ९१०. १८. **पोषयित्र्या**—ख-त-न-भ-श-मु । ग-घ-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ९१०. १९. **°वचनात्**—ख-ग-त१-२-३-भ१-३-मु । °वदनात्–त४-भ२-श-मॅ ॥ ९१०. २६. **प्रदीयमानेन सोमेन**—भ३-*मॅ । प्रदीयमानसोमेन–ख-ग-त-भ१-२-मु; प्रदीयमानः सोमो न– श ॥ ९११. २८. **इन्द्रादयः**—ऽ-मु । मॅ-पुस्तके नास्ति ॥ ९१२. १६. **कुक्षये**—ऽ-*मॅ-मु । सर्वेषु लिखितपुस्तकेषु 'कुक्षये' इत्यस्य स्थाने 'तुनहु' इति पाठो विद्यते इति मॅक्समुल्लरमहाशयः । वस्तुतस्तु १८ पङ्क्तौ विद्यमानस्य 'कुक्षये' इत्यस्य स्थाने 'तुनहु' इति पाठो लिखितपुस्तकेषूपलभ्यते ॥ ९१२. १७. **तेजसाम्**—ऽ । तेजसा–मॅ-मु (मुद्रणदोषः ?) ॥ ९१२. २४. **स्तौति**—*मॅ-मु ग्वालियर-जोधपूरलिखितपुस्तकयोश्च । नौत–ख-त१-२-३-४-भ-श; स्तौत–श ॥ ९१३. ४. **समीपास्त्वाम्**—भ३-*मॅ-मु । मृगपाव्नां–ख-त; मृगपात्वां–भ१-२; मृगपाजां–श; मृपातारं–ग ॥ **अभ्रुवतामिति**—ख-ग-त-भ-श-मु । अभ्रुवंतामिति–मॅ ॥ ९१३. २६. **तन्द्रयुक्तः**—*मॅ-मु । तं प्रयुक्तं–ख-त; मंद्रयुक्तं–ग; तंद्रयुक्तं–न-भ-श ॥ ९१३. २७. **°कर्मान्वितो**—*मॅ-मु । °कर्मवतो–ख-घ-त-भ१-२; °कर्मयुतो–ग; °कर्मवान्–भ३; °कर्मवते–श ॥ ९१४. ४. **वन**—मु । क्त–ख-त-न-भ१-२-श; श्न–भ३; वनु–ग२-मॅ ॥ ९१४.११. **त्वमिदं...त्वमस्माकमसि** । इदमारण्यकवचनं कुत्रत्यमिति न ज्ञायते ॥ ९१४. १८. **आडागमः**—ग । अडागमः–मॅ-मु इतरेषु च ॥

[८. ९३.] ९१४. २४. **°तिरिक्तोक्थे**—ज्ञ-भ-श-मु । °तिरिक्तोत्वे–ख-त१-२-३-४ । °तिरिक्तोक्थ्ये–ग-मॅ ॥ ९१४. ३०. **एतादृशानुभावम्**–*मॅ-मु । एतादृशं अनुभवि–ख-त-भ१-२; एतादृशं मनुष्यमभि–ग; एतादृशमभि–भ३; एव तादृशं अनुभवि–श ॥ ९१५. ६. **केनापि**—मॅ । न केनापि–ऽ-मु ॥ ९१५. १२. **प्रतिषेधात्**—ख-ग-ज्ञ-त१-२-३-भ । षप्रतिषेधात्–त४-श । वप्रतिषेधात्–मॅ-मु ॥ ९१५. १३. **दोहनकाले**—ख-ज्ञ-त१-२-न-भ-मु । ग-घ-त४-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ९१५. १५. **°तिरिक्तोक्थे**—ख-त-न-भ१-२-श-मु । °तिरिक्तोक्ते–भ३ । °तिरिक्तोक्थ्ये–ग-मॅ ॥ ९१५. २२. **तदा**—ऽ-मॅ-मु । अयं शब्दोऽनावश्यकः प्रतिभाति ॥ ९१६. ६. **ये सोमाः**—घ-*मॅ । ते सोमाः सुनोतेः कर्मणि लिटि व्यत्ययेन श्नुः (श्लुः छः–त३-४-भ३-श; श्नुः छ–न; श्नुः उच्छ–भ१)–ख-ग-त-न-भ-श । सुनोतेः कर्मणि लिटि व्यत्ययेन श्लुः ये सोमाः–मु । केनचिदध्येत्रा प्रान्ते लिखितं केनचिल्लेखकेन प्रमादान्मूले समावेशितं स्यात् । मॅक्समुल्लरमहाशयोऽप्येवमभिप्रैति ॥ ९१६. ८. **सूचितम्**—ऽ । सूचितं च–मॅ-मु ॥ ९१६. ९. **°तिरिक्तोक्थे**—भ१-श । °तिरिक्तोक्थ्ये–ख-ग-त-भ२-मॅ-मु ॥ ९१६. १५. **वा**—त-न-भ-श-मु । ख-ग-मॅ-पुस्तकेषु नास्ति ॥ ९१६. १७. **स्तुतः सन्**—मॅ । स्तुतः सन् वृत्रहंतवे वाजयामसि वाजवंतं करोतीत्यर्थे तत्करोतीति णिच् णाविष्ठवदिति णेरिष्ठवद्भावात् टेरिति टिलोपः विन्मतोर्लुक् इति वचनान्मतुपो लुक्–ख-ग-त-न-भ-श-मु (लिखितपुस्तकेषु क्वचिदशुद्धिर्विद्यते) । इयमपि प्रक्रिया लेखकप्रमादाद्भाष्ये प्रविष्टा ॥ ९१६. २८. **वज्र आयुधम्**—*मॅ । वज्रायुधं–ऽ-मु ॥ ९१७. ११. **सर्वत्रानयेति**—मु ।

सर्वत्रमनुयंति—ख; सर्वमनेति नेति—ग; सर्वत्रमनयंति—त-श; सर्वत्रमानयेति—भ। सर्वत्रानयतीति—*मॅ॥ ९१७. २०. **°शिरस्त्राणेन्द्र**—ऽ-मॅ-मु। ' °शिरस्त्राण वेन्द्र ' इति भाव्यम्। ' °शिरस्त्राण वेंद्रः ' इति भाव्यमिति मॅक्समुल्लरमहाशयेनोक्तं तदयुक्तम् (मुद्रणदोषः ?)॥ ९१७. २२. **ते त्वदीयम्**—ख-त१-२-भ-मु। घ-त३-न-श-मॅ-पुस्तकेष्विदं नास्ति॥ ९१७. २८. **त्वद्बलम्**—ख-ग-घ-त-न-भ२-य-श-मु। तद्बलं—भ१-मॅ॥ ९१८. ४. **परिगमिताः**—*मॅ-मु। वनिगमितां—ख-त२-३-श; च निर्गमिता—ग; वनिगमिता—ज्ञ-त४-भ२; चर्मिनामिता—भ१॥ ९१८. २०. **आशुषे**। ' आ शुषे ' इति भिन्नः पदपाठः। ' आश्नुषे ' इति भाष्यकारेण स्वीकृतं स्यादित्यपि संभावयितुं शक्यमिति मॅक्समुल्लरमहाशयः॥ ९१८. २६. **वशं नयन्तीति**—ऽ-मॅ। **वशं नयंत्यनेनेति**—मु। अयं समीचीनतरः पाठः लिखितपुस्तकेष्वभावादस्माभिर्न स्वीकृतः॥ ९१९. १३. **°यूतीत्यादिना**—ख-ग-ज्ञ-त१-२-भ३-मु। °यूत्यादिना—त४-न-भ१-२-श-मॅ॥ ९१९. २४. **आगच्छतु**—*मॅ-मु। आगच्छति—ख-त-भ; आगच्छेति—ग॥ ९१९. ३०. **भवानि**—ज्ञ-भ३-*मॅ-मु। भवामि—इतरेषु॥ ९२०. ३. **वसतीवर्यः**—मॅ-मु। वसतीवरा—ख-त-न-भ१-२; वसतीवरीः—घ-भ३-श; वसतीवरिः—ग॥ ९२०. ४. **ग्रहस्थाः**—ग-घ। गृहस्थाः—ख-त-न-भ-श-मॅ-मु॥ ९२०. ५. **निचान्तपृणः**—मॅ-मु। निचांतपुणः—ऽ॥ ९२०. १४. **एव ---- र - वि - जः**—त४-न-भ१-२-मॅ। एव—ख-ज्ञ-त२-३-मु। एव ऋत्विजः विसर्गे—ग; एव ओजसा ओजः—त१; एव ऋजः—भ३; एव ऋजीषं—श॥ **°त्युक्तम्**—ग-ज्ञ-त२-३-श-*मॅ-मु। °त्युक्त—ख-त१-४-भ१-२; °त्युक्त(त्वात्प्रसंगात्)—भ३॥ ९२०. १६. **अच्छ**—ऽ-मु। अच्छा—मॅ॥ ९२०. १७. **विसृजन्ति**—ग-*मॅ-मु। विसृजत—ख-ज्ञ-त१-२; विसृजन्—त३-४ भ-श॥ ९२०. २१. **हविर्भिः**—*मॅ-मु। हविः—ऽ॥ ९२०. २२. **हितं -- वादिषु**—त-भ१-२-मॅ। हितं ---- वेदिषु—ग; हितं --- वाषु—श; हितं गवादिषु—भ३। हितं हितकरं प्रयः—मु॥ ९२०. २७-२८. **ता निवसन्त्यत्रेति**। ते निवसंतेत्यत्रेति—ख-त-भ१-२-श; ते निवसंतत्रेति—ग; ते निवसंत्यत्रेति—न-भ३। निवसंत्यत्रेति—मु। निवसत्यत्रेति—मॅ॥ ९२१. २१. **आडागमः**—ग। अडागमः—मॅ-मु इतरेषु च॥ ९२२. १०. **श्रुतेरत्रापि**—मु। श्रुते तत्रापि—ख-ग-त-न-श; श्रुतेन तत्रापि—भ। श्रुतेऽत्रापि—*मॅ॥ ९२२. ११. **इत्यादरार्थः**—ख-ग-घ-त-मु। इत्यादरार्था—न-भ-श। इत्यादरार्थे—मॅ॥ ९२२. २४. **धत्तनेति...रत्नानि**—*मॅ-मु-×॥

[८. ९४] ९२३. ३. **बिन्दु°**—ख-ग-ज्ञ-भ२-*मॅ-मु। विंदु°—त१-२-३-४-भ१-श; विंदुः—घ॥ ९२३. २८. **पूर्वाभिहिते**—ज। पूर्ववेनिहित—ख; पूर्व अभिहिते—ग; पूर्वनिहित—ज्ञ; पूर्वेवेभिहिते—त२-न; पूर्वभवेभिहिः—त४; पूर्वचोभिहित—भ; पूर्ववेभिहित—त३-श। पूर्वमेवाभिहिते—मु। पूर्वत्राभिहिते—मॅ॥ ९२४. ८. **ततमूर्णास्तुकेनेति**—*मॅ-मु। ततपूर्णास्तुकोनेति—ख-ज्ञ-त१-२-३; तन्यते ऊर्णास्तुकेनेति—ग; ततपूर्णास्तुकेनेति—त४-भ; ततपूर्णास्तुकोनति—श॥ **आलादेशः**—ग-ज-न-भ-श। अडादेशः—ख; अलादेशः—त-मॅ-मु॥ ९२४. १०. **तं तथोक्तम्**—ग। तत्तथोक्तं—मॅ-मु इतरेषु च॥ ९२४. १६. **सेवाम्**—ग-*मॅ-मु। सतां—ख; सवां—त-भ-श॥ ९२४. १७. **सोमसेवां कामयते**—ज-न-भ। सोममेवां कामयते—ख-त-श; स्तोता कामयते—ग। सोममेव कामयते—मु। सोममेवाकामयते—मॅ॥ ९२५. २०. **विश्रुतम्**—ज। विसृतं—भ१; विष्टतं—श; बिस्तृतं—ख-ग-घ-त-न-भ२-मॅ-मु॥

[८. ९५.] ९२६. १५. **निहितम्**—ऽ-मु। मॅ-पुस्तके नास्ति॥ ९२६. २२. **मरुद्गणानाम्**—*मॅ-मु। मरुत्सोमानां-ख-त-न-भ-श; मरुत्संबन्धिनं-ग; मरुत्समानानां-घ। 'मरुत्संघानाम्' इति स्यादिति मॅक्समुल्लरमहाशयः॥ ९२७. ३. **सुपुत्रवतः**—ख-ग-ज-श-त१-२-न-भ-मु। सुपुत्रतः-त३-४; सुपुत्रमतः-श। सुपुत्रस्य-मॅ॥ ९२७. १५. **त्वदीयम्**—ऽ-मु। मॅ-पुस्तके नास्ति॥ ९२७. २२. **सिषासन्तः**—च-ज-मु। सिसासंतः-मॅ इतरेषु च॥ ९२७. २४. **सन्तः**—ख-घ-ज-त-न-भ-श-मु। ग-मॅ-पुस्तकयोर्नास्ति॥ ९२८. १. **इन्द्राय यागादिकर्माणि**—ग-ज-भ१-श-मु। इंद्रयागादिकर्मणि-न-भ२। इंद्रयागादिकर्माणि-ख-त-मॅ॥ ९२८. ६. आगच्छतैव-ऽ-मु। गच्छतैव-मॅ॥ ९२८. ९. **माद्यतेः**—ग। मादतेः-ख-त-भ-श। मदायतेः-मु। मादयतेः-मॅ॥ ९२८. १७. **त्वम्**—ऽ-मु। त्वं च-मॅ॥

[८. ९६.] ९२८. ३२. **अध द्रप्सः**—*मॅ। अव द्रप्स-ऽ-मु॥ ९२९. ७. **अर्तेरू च**। 'अर्तेरुच्च' इत्युणादिसूत्रम्॥ ९२९. १२. **सप्त**—न-भ। इतरेषु मॅ-मु-पुस्तकयोश्च नास्ति॥ ९२९. १३. **हननेनोत्पादकत्वात्**—मु। हननेनोत्पादत्वात्-ख-त-न-भ२; हननोत्पादकत्वात्-ग; हननोत्पादत्वात्-ज-भ१। हननोत्पादित्वात्-मॅ॥ ९२९. २१. **अतिविद्धा**—ग-घ-ज-श-त१-३-४-न-भ-श-मु। ख-त२-मॅ-पुस्तकेषु नास्ति॥ ९२९. २३. **°पिञ्जूलमुद्वृत्य**। '°पुञ्जीलमुद्वृह्य' इति तै. सं.॥ ९३०. ७. **निरूपूर्वात्**—ऽ-मु। निष्पूर्वात्-मॅ॥ ९३१. १६. **धारयेम**—ख-श-त१-२-भ-मु। एतन्नास्ति ग-घ-त३-४-श-मॅ॥ ९३१. १८. **भवाम**—ऽ-मु। भवेम-मॅ॥ ९३१. ३०. **वृत्रं घ्नन्तम्**—ग-भ१। वृत्रं जघ्नंतं-ज। वृत्रघ्नं तं-ख-त-भ२-श-मॅ-मु॥ ९३२. ४. **षष्टिश्युत्तरसंख्याकाः**। 'श्युत्तरषष्टिसंख्याकाः' इति भाव्यम्॥ ९३२. ५. **नवसु गणेषु**—*मॅ-मु। वसुगणेषु-ख-त-श; नवसु गणोषु-ग; सुरगणेषु-ज-भ॥ **प्रतिपादिताः**—ख-ज-श-त१-२-भ। तिपादिताः-ग-त३-४-श। निपादिताः-*मॅ-मु॥ **आदितः**—ग-*मॅ। अदितेः-इतरेषु। आदिपंचगणाः-मु॥ ९३२. ७. **गणः**—*मॅ-मु। गर्भाः-ख-त-भ; वर्गाः-ज; गणाः-ग॥ ९३२.११. **विदध्म**—ख-घ-त-श-मु। विदध्यम-ग; विदधाम-ज-भ। विदध्मः-मॅ॥ ९३२. १७. **च**—ऽ-मु। ते-मॅ॥ ९३२. २०. **अभिषुतः**—ग-भ। अभिषुत्यः-ख-घ-त-श-मॅ-मु। अत्र 'अपार्जितः' इत्येव पाठः **सर्वेषु** लिखितपुस्तकेषु दृश्यते। ऋ. सं. ८. ८६. ४; ९०. ५. द्रष्टव्यम्॥ **ऋजीषः**—ग। ऋजीषी-ख-घ-त-भ-श-मु। ऋजीषं-*मॅ। ८९३. पृ. १४. प. टिप्पणी द्रष्टव्या॥ ९३३. ८. **ईधाम्**—ख-ग-ज-त-भ२-मु। ईशां-भ१-श-मॅ॥ ९३३.२१. **शोभना**—ऽ-मु। शोभमाना-मॅ॥ ९३४.८. **नाम**। नाम्ना-बृहद्दे.॥ **सोऽभ्ययात्**। अभ्ययात्-बृहद्दे.॥ **योत्स्यमानः सुसंहृष्टैः**—बृहद्दे.। योत्स्यमानंस्तु संहृष्टैः (हृष्टैः-त३)-ख-श-त२-३-४; योत्स्यमानस्तु संहृष्टैः—ग-त१-भ; यात्स्यामातं स्तुतं हृष्टैः-श। योत्स्यमानं सुसंहृष्टैः-*मॅ-मु॥ ९३४. ९. **तानायतः**—*मॅ-मु-बृहद्दे.। तानायुतान्-ख-त-भ; तानायतासन्-ग; तानायुधान्-श॥ **प्रेहि**। एहि-बृहद्दे.॥ ९३४. ११. **पुनर्विभो**। अस्मादनन्तरं "श्रुत्वा देवगुरोर्वाक्यम् अनर्थं वृत्रशङ्कया" इति बृहद्देवतायामधिकं विद्यते॥ **स्वर्ग एव**—बृहद्दे.। खङ्ग एव-ख-त-भ; खग एव-ग। ओजसैव-*मॅ-मु॥ **देवानादाय**—त१-*मॅ-मु-बृहद्दे.। देवायायाय—ख; देवाघनाय-ग; देवयतनं-ज; देवानायाय-श-त२-३-४-भ१; देवानाय-भ१; देवानायांतं-श॥

पपुर्विधिवत्सुराः—*मॅ-मु-**बृहद्रे.** । पुनर्विधिवत्पुरा–ख-ग-ज-त-भ२; पुनर्विधिवत्पुराः—भ१ ॥ ९३४. १२. **तृचे**–ग-ज-**बृहद्रे.** । दृचे–ख-त-भ; ऋचि–श । द्रुचे–मॅ । **ऋचे**–मु । **तदव द्रप्स इत्यस्मिन्** । तदेतदप्यवेत्यस्मिन्–**बृहद्रे.** ॥ अयं बृहद्देवतागतः कथाभागः केनचित् पश्चाद्विनिवेशितो भाष्ये इति मॅक्समुल्लरमहाशयस्याभिप्रायः ॥ ९३४. १३. **अनार्षत्वेनानादरणीयम्**–ज । अनात्वान् नादरणीयं–ग; अनार्षादनारणीयं–श । अनार्षत्वे नादरणीयं–मॅ-मु इतरेषु च ॥ ९३४. १६. **उदकस्य**—ग-ज्ञ-श-मु । उदस्य–ख-त२-४-भ-मॅ । अनन्तरऋग्भाष्यं द्रष्टव्यम् ॥ ९३५. १. **केचिदिष्यामि...पठन्ति** । 'इष्यामि वो वृषणो' इति संहितापाठः । 'शाखान्तरे' इति मुपुस्तके टिप्पणी दत्ता ॥ ९३५. १८. **°ज्रेवाशत्रुभ्यः**—*मॅ-मु । °ज्रेव शत्रुभ्यः—ऽ । १६ पङ्क्तौ विद्यमानस्य '°ज्रेवाशत्रुभ्यः' इत्यस्य स्थाने '°ज्रेव शत्रुभ्यः' इति पाठो लिखितपुस्तकेषूपलभ्यत इति मॅक्समुल्लरमहाशयेनोक्तं तत्रामादिकम् ॥ १३५. २०. **प्रकाश्य**–ग-भ-*मॅ-मु । प्रकाश्यः–ख-घ-त-श ॥ ९३६. ११. **छन्दोविषयत्वान्निपातनम्**—ग-*मॅ-मु । छन्दोविषयत्वानिपातनं–ख-त१-२-३-भ२; छंदोविषयत्वांनिपातनं–ज्ञ; छंदोविषयत्वानिपात्यते–त४; छंदोविषयत्वान्निपातत्वं–श ॥ ९३६. १३. **सप्त गङ्गाद्याः**—ऽ-मु । गंगाद्याः सप्त–मॅ ॥ ९३६.२३. **अहानि**–ऽ-मु । अहा अहानि–मॅ ॥ ९३७. ३. **वृत्रहा**–ऽ-मु । स वृत्रहा–मॅ ॥ **चर्षणीधृत्**—ख-ग-घ-त३-भ१-मु । चर्षणिधृत्–ज्ञ-त२-४-भ२-श-मॅ ॥ ९३७. १४. **महान्**—ज । स महन्–ख; सहमन्–ज्ञ-त२; सहमा–त४-श; सहम–त३; सहन्–भ । स महान्–ग-मॅ-मु ॥

[८. ९७.] ९३७. २७. **च**—ख-ग-ज-ज्ञ-त१-२-३-न-भ-श-मु-आश्व. श्रौ. । वा–त४-मॅ ॥ ९३८.३. **त्वे**—मु । ते–ग-घ-ज-न-भ; न–ख-त । मॅ-पुस्तके नास्ति ॥ ९४०. १६. **एतत्**—ग-त-न-भ-श-मु । एत्–ख । एव तत्–मॅ ॥ ९४०.२९ **संग्रामनाम**—ज । संग्रामः–ख-ग-ज्ञ-त२-३; संग्राम–त४-न-भ-श । संग्रामाः–मॅ-मु ॥ ९४०. ३०. **स्तुते**—ग-ज-भ-मु । सुते–ख-त-न-श-मॅ ॥ ९४१. ११. **रेभाः**—ऽ-मु । रेभासः—मॅ ॥ ९४१. २७. **इत्याद्या**—ऽ । इत्याद्याः–मॅ-मु ॥ ९४२. १०. **सर्वदिक्स्थम्**—न-*मॅ-मु । सर्वदिक्वं–ख-त; सर्वदिग्भवं–ग; सर्वदिग्गतं–ज; सर्वदिग्–भ१; सर्वदिद्यु–भ२; सर्वहिकं–श ॥

[८. ९८.] ९४३. १३. **नृमेधाख्यस्य**—ग-भ१-२ । नृमेधाक्षस्य–ख-त-न-श । नृमेधस्य–भ३-मॅ-मु ॥ ९४३. १५. **पुरउष्णिक्**—*मॅ-मु । ककुप्–ऽ ॥ ९४४. १०. **प्राप्नोः**—*मॅ । अप्राप्नोः–ऽ-मु ॥ ९४४. २८. **त्वम्**—ऽ-मु । मॅ-पुस्तके नास्ति ॥ ९४५. ६. **ससृज्महे**—ज्ञ-त१-भ२-*मॅ-मु । ससृज्महे–ख; सृज्महे–ग-घ१-त३-४-भ१-श; सृज्यमहे–च; सुसृज्महे–त२ ॥ ९४५. १४. **वर्धन्ति**—ग-घ-भ । वर्धयंति–ख-त-मॅ-मु ॥ ९४५. १८. **उरुयुगे**—ख-ग-च-ज्ञ-त१-२-न-भ१-श-मॅ । उरूयुगे–घ१-त३-४-भ२-३-मॅ ॥

[८. ९९.] ९४६. १२. **ऐन्द्रम्**—न-भ । इंद्रो देवता–घ । ख-ग-त-श-मॅ-मु-पुस्तकेष्वेतन्नास्ति ॥ ९४६. २५. **वज्रिन्निन्द्र**—ख-ग-घ-त-न-श-मु । वज्रवन्निंद्र–भ । वज्रिन् वज्रवन्निंद्र–मॅ ॥ ९४६. २७. **स्वसरं गृहम्**—ऽ-मु । स्वसरं च गृहं–मॅ ॥ ९४७. १३. **करोति**—*मॅ । करोत्यतो–ऽ-मु ॥ ९४७. १४. **रश्मयः**—*मॅ-मु । श्रयः–ख-त-भ-श । ऋषयः–ग ॥ ९४७.२५. **स्तोतः**—न । स्तोतारः–मॅ-मु इतरेषु च ॥ ९४८. १६. **श्रथयन्त श्रथिताः**—त२-४-*मॅ । श्रथयंत

श्रयिताः–ख; श्रयंत श्रयिता–ग; श्रथयंत श्रथिताः–ज्ञ-त३-श-मु; श्रथयंत श्रथयिताः–भ; श्रथयंत श्रथिताः–न । 'श्रथयंत' इति संहितापदपाठौ ॥ ९४८. २२. **गन्तारम्**—ग-ज्ञ-भ२-श-*मॅ-मु । गगा–ख; गंगारं–त ॥

[८. १००.] ९४९. ८. **ते**—ख-त-न-भ-मु । ग-श-मॅ-पुस्तकेषु नास्ति ॥ **अयमिति... वाग्देवत्ये**—*मॅ-मु । अयमिति ब्रूचेनेंद्र आत्मानमस्तौदिति वाग्देवत्ये–ख-त२-भ; अयमिति ब्रूचेन त्ये–न; वाग्देवत्ये–श ॥ ९४९. १२. **प्रयाण...वाचः**–भ३-*मॅ-मु । प्रणवो याज्यासनये वयं सामये वयंसा मनोज्ञा वचः–ख-ग-त२-३-४; वयसाममनोज्ञा वाचः–ज्ञ; प्राणा - - समये वयं सामये वयंसामननोज्ञा वचः–न; प्रयाणसमये वयंसा मनोज्ञा वाचः–भ१; प्रणवो याज्या-समये वयंसा मनोज्ञा वाचः–भ२-म; प्रयाणे वयसाममनोज्ञा वाचः–श ॥ ९५२. २२. **विश्वरूपाः** । सर्वरूपाः–निरु. ॥ ९५३. ३. **अभिवृत्यैतान्**—ऽ-मॅ-मु । अभितप्येमान्–**बृहद्दे.** ॥ ९५३. ४. **उद्यतस्य तु**—ऽ-मॅ-मु । उद्यतस्यैव–**बृहद्दे.** ॥ ९५३. ५. **विष्णो इति**—ऽ-मॅ-मु । विष्णविति–**बृहद्दे.** ॥ **त्वृचा**—मॅ । तृचा–ख; त्यृचा–ग; द्रूचा–ज्ञ-त२-न-श; द्रचा-त३-४; **वृचा**–भ१; च्चृचा–भ२ । **त्यृचा**–मु । **त्वृचि**–**बृहद्दे.** ॥

[८. १०१.] ९५३. १०. **तृतीया**—ग-*मॅ-मु । तृतीयादि–ख-ज्ञ-त१-२-न-भ-श; तृतीया हि–त३-४ ॥ ९५३. २३. **अहनि माध्यंदिने**—ख-त१-भ-श-मु । माध्यंदिने–ग; गामु-पकर्मणि–ज्ञ-त२; माध्यंदिनो–त३-४-न-मॅ ॥ ९५४. ५. **वर्षिष्ठक्षत्रौ**—ज्ञ-त१-२-भ-मु । वर्षिष्ठ-क्षेत्रौ–ख-घ । वर्षिष्ठक्षत्रा–ग-त३-४-न-श-मॅ ॥ ९५४. १८. **पुनःपुनर्हवीतवे**—ज्ञ-त१-३-*मॅ-मु । पुनःपुनर्हवीतये–ख-त२; पुनर्हवीतवे–ग-घ-ज्ञ-त४-भ; पुनपुनर्हवीतवे–श ॥ ९५५. १३. **उभा उभौ**—घ-न-भ-मु । उभौ उभौ–ख-ज्ञ-त१-२ । उभौ–ग-त३-४-श-मॅ ॥ ९५६. २७. **ते**—श-मु । तव–ग-न-भ२; त–त२-३-४; भुवि–भ१; विभु–भ३; तत्–ख-घ-ज्ञ-मॅ ॥ ९५७. ५. **आग-च्छन्ती**—भ१-२ । आगच्छती–ख-ग-घ-त१-२-न-श-मॅ-मु ॥ ९५७. १४. **चैतरेय**—*मॅ । चैतस्य–ख-ग-ज्ञ-त१-२-३-भ२-३-मु; चेतस्ये–त४; चैतस्ये–न; चैतास्य–भ; चैतास्येव–श ॥ ९५७. १८. **स प्रजा असृजत**—*मॅ-मु । ससृजे–ख-ग१-त-न-भ-श; सं ससृजे–ग२ ॥ ९५७. २०. **पराभूताः**—ग-न-भ-*मॅ-मु । पारभूताः–ख-त१-२-३; परभूताः–ज्ञ; पाराभूताः–त४ । भाष्योद्धृतः शतपथब्राह्मणगतः पाठः तद्ब्राह्मणस्य काण्वमाध्यंदिनशाखयोः पाठाभ्यां भिन्नः ॥

[८.१०२.] ९५८.१०. **पावकविशेषणविशिष्टो**—ग-भ३-श । पावकविशेषणेन विशिष्टो–भ१; पावकविशेषणे विशिष्टो–भ२; पावकविशेषण विशिष्टो–ख-त-न-मॅ-मु ॥ ९५८. १२-१३. **°यविष्ठयोर्वा**—ग-श-*मॅ-मु । यविष्ययोर्वा–ख-त; यविष्टयोर्वा–न-भ ॥ ९५८. १४. **इत्यष्टा°**—ग-त२-भ१-*मॅ-मु । अष्टा°–ख-त३-श; इष्टा°–न ॥ ९५८. ३०. **सः त्वम्**—ऽ-मु । मॅ-पुस्तके नास्ति ॥ ९५९. २५. **भवामेति**—ख-ग-घ-त-न-श । भवोमेति–भ१; भवति–भ३ । भवेमेति–भ२-मॅ-मु ॥ ९६०. १२. **वाशिनमिति वा**—ख-ग१-ज्ञ-त१-२-४-न-भ२-*मॅ-मु । वाशिनामिति वा–त३-श; च–भ१-३ ॥ ९६०. २७. **अन्तरिक्ष्या माध्यमिके**—ख-ज्ञ-त२-३-न-भ१-२-श । अंत-रिक्षा माध्यमिकं–ग; अंतरिक्षं माध्यमिके–घ; अत्चित्रक्ष्या माध्यमेके–त१; अंतरिक्ष्या माध्यमिको–

त४ । आंतरिक्ष्या माध्यमिके–भ३-मॅ-मु ॥ ९६१. ८. **धीतिभिः निधानैः**—ग-मॅ-मु । 'धीतिभिरिधानः' इति स्यादिति मॅक्समुल्लरमहाशयः ॥ ९६१.२२. **वनन्वति काष्ठानि हन्ति**—ग-भ२-*मॅ-मु । वनन्वती काष्ठानि संति–ख-त१-२; वनन्वति काष्ठानि संति–ज्ञ-भ१-३; वनन्वती काष्ठानि हंति–त४-श; वनन्वती काष्ठानि न–घ१; वनन्वती काष्ठानि त्वंति–च ॥ ९६१. २३. **काष्ठानि**—ख-ग-त-न-भ-श-मु । घ-मॅ-पुस्तकयोः नास्ति ॥ ९६२. १. **यानि कानि चेति**—ग-ज्ञ-भ-श-*मॅ-मु-तै. सं. । यानि कानि चेवि–ख-त१-२; यानि चेवि–त३-४ ॥ ९६२. २. **सर्वमस्मै स्वदते**—ग१-त१-२-३-भ-श-*मॅ-मु-तै. सं. । सर्वदस्मै स्वदक्ष–ख; अस्मै स्वदते–ग२; सर्वस्मै स्वदते–ज्ञ-त४ ॥ ९६२.१२. **प्रज्वलयति**—ग-घ-भ२-३ । प्रज्वलंति–श । प्रज्वलति–ख-त-न-भ१-मॅ-मु ॥

[८. १०३] ९६२. १८–२१. **आभिप्लविके...राजन्नग्ने इति**—मु । प्र मंहिष्ठायेति आभिप्लविकेषूक्थ्येषु मैत्रावरुणस्य वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितं च । प्र मंहिष्ठाय गायत प्र सो अग्ने इति । उपाकर्मणि मंडलाद्याग्ने याहीत्येषा । सूत्रितं मा चिदाग्ने याहि मरुत्सखा यत्ते राजन्नग्न इति–ग । आभिप्लविकेषूक्थ्येषु मैत्रावरुणस्य वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितं च । मा चिदाग्ने याहि मरुत्सखा यत्ते राजन्नग्न इति–ख-त-न-भ-श-मॅ । मॅक्समुल्लरमहाशयः एवमत्र पाठः स्यादिति संभावयति–'आभिप्लविकेषूक्थ्येषु मैत्रावरुणस्य प्र मंहिष्ठायेति वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितं च । अभि प्रयांसि वाहसा प्र मंहिष्ठाय गायत । आ. ७. ८.। इति । उपाकरणोत्सर्जनयोर्मण्डलाद्यंतहोम आग्ने याहीत्येषा । सूत्रितं च । आग्ने याहि मरुत्सखा यत्ते राजञ्छृतं हविः । आ. ग्र. ३. ५.७.। इति' ॥ अस्माभिस्तु ग-पुस्तकानुसारेण मु-पुस्तकानुसारेण च स्वीकृतः पाठः ॥ ९६३. १३. **कुर्वाणात् मनुष्यात्** । कुर्वाणान् मनुष्यान्–ऽ-मॅ-मु । **रेजन्ते कम्पन्ते**—ऽ-मॅ । 'रेर्जन्त' इति पदपाठः । रेजन्त कम्पन्ते–मु ॥ ९६३. २०. **प्रणेतुम्**—ग । प्रनेतुं–मॅ-मु इतरेषु च ॥ ९६३. २१. **मर्तो**—ख-ज्ञ-त१-२-३-भ३-मु । मतेः–घ१; मर्ता–त४-न-श । मर्त्यो–ग-भ१-२-मॅ ॥ ९६३. २८. **तथा**—ग-त४-न-भ१-३ । यथा–ख-घ-ज्ञ-त२-भ२-मॅ-मु ॥ ९६४. २. **धारयाम**—ख-ग-घ-त-न । धारयामः–भ-श-मॅ-मु ॥ ९६४. १६. **सः**—मॅ-×। मु-पुस्तकेऽपि नास्ति ॥ ९६४. २०. **हे**—मॅ । हे ये–त१ । ये–मु इतरेषु च ॥ ९६४. २१. **प्र गायत**—ख-घ-ज्ञ-त१-२-भ-श-मु । ग-त३-४-मॅ-पुस्तकेष्वेतन्नास्ति ॥ ९६४. २७. **अस्य अग्नेः**—ख-घ-त१-श-*मॅ-मु । तस्याग्नेः–ग-न; तस्यासाग्नेः–त३-श; तस्यास्याग्नेः–भ ॥ ९६५. २६. **अभिगमनैरपि** । अस्मादनन्तरं 'स्तुवन्ति' इत्येतादृशं क्रियापदमावश्यकमिति मॅक्समुल्लरमहाशयः ॥

॥ ऋग्वेदसंहिता ॥

श्रीमत्सायणाचार्यविरचितभाष्यसमेता

६—८ मण्डलानि

ॐ

ऋग्वेदसंहिता

श्रीमत्सायणाचार्यविरचितभाष्यसमेता

॥ अथ षष्ठं मण्डलम् ॥

भारद्वाजे षष्ठे मण्डले षडनुवाकाः। तत्र प्रथमेऽनुवाके पञ्चदश सूक्तानि। तत्र 'त्वं ह्यग्ने' इति त्रयोदशर्चं प्रथमं सूक्तम्। 'त्वं ह्यग्ने सहोनेति बार्हस्पत्यो भरद्वाजः षष्ठं मण्डलमपश्यत्' इत्यनुक्रान्तत्वात् मण्डलद्रष्टा स एव भरद्वाज ऋषिः। अनादेशपरिभाषया त्रिष्टुप्। मण्डलादिपरिभाषया अग्निर्देवता। पशोः[1] हविषि अवदीयमाने मैत्रावरुणेनानुवचनीयमिदं मनोतासूक्तम्। सूत्रितं च—'त्वं ह्यग्ने प्रथम इत्यन्वाह' (आश्व. श्रौ. ३. ६) इति। प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छन्दसि एतदादिसूक्तपट्कं द्वितीयवर्जम्। सूत्रितं च—'त्वं ह्यग्ने प्रथम इति षण्णां द्वितीयमुद्धरेत्' (आश्व. श्रौ. ४. १३) इति। आद्या उपाकरणे विनियुक्ता। सूत्रं तु पूर्वमन्त्र उक्तम्॥

त्वं ह्यग्ने प्रथमो मनोतास्या धियो अभवो दस्म होता।
त्वं सीं वृषन्नकृणोर्दुष्टरीतु सहो विश्वस्मै सहसे सहध्यै ॥ १ ॥

त्वम्। हि। अग्ने। प्रथमः। मनोता। अस्याः। धियः। अभवः। दस्म। होता।
त्वम्। सीम्। वृषन्। अकृणोः। दुस्तरीतु। सहः। विश्वस्मै। सहसे। सहध्यै ॥ १ ॥

हे ᵛअग्ने ᵛप्रथमः देवानां मध्ये प्रथमः प्रतमः प्रकृष्टतमः पूर्वभावी वा ᵛत्वं ᵛमनोता ᵛहि देवानां मनो यज्ञोतं संबद्धं भवति तादृशो भवसि। हिशब्दः 'अग्निः सर्वा मनोताग्नौ मनोताः संगच्छन्ते' (ऐ. ब्रा. २. १०) इत्यादिब्राह्मणप्रसिद्धिद्योतनार्थः। हे ᵛदस्म दर्शनीय ᵛअस्याः ᵛधियः अस्य कर्मणः ᵛहोता देवानामाह्वाता ᵛअभवः भवसि। हे ᵛवृषन् कामानां वर्षितः ᵛत्वं ᵛसीं सर्वतः ᵛदुष्टरीतु दुर्हिंस्यमहिंस्यं ᵛसहः बलम् ᵛअकृणोः अकरोः। किमर्थम्। ᵛविश्वस्मै ᵛसहसे सर्वस्यापि बलवतः शत्रोः ᵛसहध्यै अभिभवनाय॥

---

१. झ-त-न-भ-र-पशौ।

अधा होता न्यसीदो यजीयानिळस्पद इषयन्नीड्यः सन् ।
तं त्वा नरः प्रथमं देवयन्तो महो राये चितयन्तो अनु ग्मन् ॥ २ ॥

अध । होता । नि । असीदः । यजीयान् । इळः । पदे । इषयन् । ईड्यः । सन् ।
तम् । त्वा । नरः । प्रथमम् । देवऽयन्तः । महः । राये । चितयन्तः । अनु । ग्मन् ॥२॥

vअध अधुना हे अग्ने vयजीयान् अतिशयेन यष्टा त्वं vहोता होमनिष्पादकः सन् vइळः भूम्याः वेदिलक्षणायाः vपदे स्थाने vन्यसीदः निषण्णवानसि । किं कुर्वन् । vइषयन् पशुपुरोडाशादिलक्षणमन्नमिच्छन् vईड्यः स्तुत्यः vसन् । vतं तादृशं vत्वा त्वां vप्रथमम् इतरदेवताभ्यः पूर्वं vदेवयन्तः देवं त्वामात्मन इच्छन्तः vनरः नेतारो मनुष्या ऋत्विग्यजमानाः vमहः महते vराये धनाय vचितयन्तः जानन्तः स्तुत्या ज्ञापयन्तो वा vअनु vग्मन् अन्वगच्छन् पूर्वम् ॥

वृतेव यन्तं बहुभिर्वसव्यैस्त्वे रयिं जागृवांसो अनु ग्मन् ।
रुशन्तमग्निं दर्शतं बृहन्तं वपावन्तं विश्वहा दीदिवांसम् ॥ ३ ॥

वृताऽइव । यन्तम् । बहुऽभिः । वसुऽव्यैः । त्वे इति । रयिम् । जागृऽवांसः । अनु । ग्मन् ।
रुशन्तम् । अग्निम् । दर्शतम् । बृहन्तम् । वपाऽवन्तम् । विश्वहा । दीदिऽवांसम् ॥ ३ ॥

vवृतेव मार्गेण । इवेति संप्रत्यर्थे । लोकद्वयमध्यगतेन मार्गेण vबहुभिः अनेकैः vवसव्यैः वसुभिः ॥ स्वार्थिकस्तद्धितप्रत्ययः ॥ यजमानानां निवासयोग्यैर्वा सार्धं vयन्तं गच्छन्तं त्वाम् vअनु vग्मन् अनुगच्छन्ति । संभजन्ते यजमानाः । कीदृशास्ते । vत्वे त्वयि देवे vरयिं धनं vजागृवांसः प्रयच्छन्त इत्यर्थः । कीदृशं त्वामित्युच्यते । vरुशन्तं दीप्तवर्णम् vअग्निम् अङ्गनादिगुणविशिष्टं vदर्शतं दर्शनीयं vबृहन्तं महान्तं vवपावन्तं vविश्वहा सर्वेषु कालेषु vदीदिवांसं दीप्यमानम् ॥

पदं देवस्य नमसा व्यन्तः श्रवस्यवः श्रव आपन्नमृक्तम् ।
नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ ॥ ४ ॥

पदम् । देवस्य । नमसा । व्यन्तः । श्रवस्यवः । श्रवः । आपन् । अमृक्तम् ।
नामानि । चित् । दधिरे । यज्ञियानि । भद्रायाम् । ते । रणयन्त । सम्ऽदृष्टौ ॥ ४ ॥

vदेवस्य द्योतमानस्याग्नेः vपदम् आहवनीयस्थानं[1] vनमसा हविषा स्तोत्रेण वा vव्यन्तः गच्छन्तः vश्रवस्यवः अन्नमिच्छन्तः पूर्वे यजमानाः vश्रवः सर्वत्र श्रूयमाणमन्नम् vअमृक्तम् अन्यैरपरिबाध्यम् vआपन् आप्नुवन्ति । हे अग्ने vते तव vभद्रायां स्तुत्यायां vसंदृष्टौ निमित्तायां vरणयन्त[2] रमयन्ति[2] ।

---

१. ख-आहवनीयं स्थानम्; ग-श-आहवनीयादिस्थानम् । २. ख-घ-ङ्ग-त-न-भ-य-र-' रणयन्त रमयन्ति ' नास्ति ।

[v]यज्ञियानि यज्ञयोग्यानि [v]नामानि नमनीयानि वैश्वानरो जातवेदा इत्यादीनि [v]दधिरे धारयन्ति। अथवा नमनसाधनानि स्तोत्राणि दधिरे ॥

त्वां वर्धन्ति क्षितयः पृथिव्यां त्वां रायं उभयासो जनानाम् ।
त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणाम् ॥ ५ ॥

त्वाम् । वर्धन्ति । क्षितयः । पृथिव्याम् । त्वाम् । रायः । उभयासः । जनानाम् ।
त्वम् । त्राता । तरणे । चेत्यः । भूः । पिता । माता । सदम् । इत् । मानुषाणाम् ॥ ५ ॥

हे अग्ने [v]त्वां [v]क्षितयः मनुष्या ऋत्विजः [v]पृथिव्यां वेदिलक्षणायां [v]वर्धन्ति वर्धयन्ति। [v]उभयासः उभयविधानि पश्वश्वरूपाणि [v]जनानां यजमानानां संबन्धीनि [v]रायः धनानि ऋत्विजः अध्वर्यवादयः [v]त्वां त्वामुद्दिश्य वर्धन्ति । अथवा उभयविधानि धनानि गवादीनि जनानां पुत्रादीनाम् अर्थाय प्राप्तुं त्वां वर्धन्ति । हे [v]तरणे दुःखात्तारकाग्ने [v]त्वं [v]चेत्यः ज्ञातव्यः स्तुत्यः सन् [v]त्राता रक्षिता [v]भूः भवसि । किंच [v]मानुषाणां मनुष्याणां स्तोतॄणामस्माकं [v]सदमित् सर्वदा [v]पिता [v]माता च मातापितृस्थानीयो भूः भवसि ॥ ॥ ३५ ॥

सपर्येण्यः स प्रियो विक्ष्व[1]ग्निर्होता मन्द्रो नि षसाद यजीयान् ।
तं त्वा वयं दम आ दीदिवांसमुप द्युबाधो नमसा सदेम ॥ ६ ॥

सपर्येण्यः । सः । प्रियः । विक्षु । अग्निः । होता । मन्द्रः । नि । ससाद । यजीयान् ।
तम् । त्वा । वयम् । दमे । आ । दीदिऽवांसम् । उप । द्युऽबाधः । नमसा । सदेम ॥ ६ ॥

[v]सः [v]अग्निः [v]सपर्येण्यः पूज्यः [v]प्रियः कामानां पूरकः [v]विक्षु प्रजासु[1] [v]होता होमनिष्पादकः [v]मन्द्रः मदनीयः [v]यजीयान् अतिशयेन इतरदेवानां यष्टा यजनीयो वा । एवं महानुभावोऽग्निः [v]नि [v]षसाद निषण्णोऽभूत् । अथ प्रत्यक्षकृतः। [v]तं [v]त्वा तादृशं त्वां [v]वयं यजमानाः [v]दमे गृहे [v]दीदिवांसं दीप्यमानं [v]द्युबाधः जानुनी बाधयन्तः अवननजानवः प्रणताः सन्तः [v]नमसा स्तोत्रेण [v]उप [v]आ [v]सदेम आसादयेम । अथवा उपासीदेमेत्येवमाशास्ते ॥

तं त्वा वयं सुध्यो३ नव्यमग्ने सुम्नायव ईमहे देवयन्तः ।
त्वं विशो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन ॥ ७ ॥

तम् । त्वा । वयम् । सुऽध्यः । नव्यम् । अग्ने । सुम्नऽयवः । ईमहे । देवऽयन्तः ।
त्वम् । विशः । अनयः । दीद्यानः । दिवः । अग्ने । बृहता । रोचनेन ॥ ७ ॥

---

१. ख-ञ-त-न-भ-य-र–प्रजासु प्रियः ।

हे ᵛअग्ने ᵛतं तादृशं महानुभावं ᵛनव्यं स्तुत्यं ᵛत्वा त्वां ᵛसुध्यः शोभनबुद्धयः ᵛसुम्नायवः सुखमिच्छन्तः ᵛदेवयन्तः देवं त्वामिच्छन्तः ᵛवयम् ᵛईमहे याचामहे । स्तुम इत्यर्थः । हे ᵛअग्ने ᵛत्वं ᵛदीद्यानः दीप्यमानः सन् । केन । ᵛबृहता महता ᵛरोचनेन रोचमानेन तेजसा दीद्यानः ᵛविशः प्रजाः स्तोतॄनस्मान् ᵛदिवः स्वर्गम् ᵛअनयः अगमयः । रोचनेनादित्येन दिवमगमय इति वा संबन्धः । आदित्यमार्गेणेत्यर्थः ॥

विशां कविं विश्पतिं शश्वतीनां नितोशनं वृषभं चर्षणीनाम् ।
प्रेतीषणिमिषयन्तं पावकं राजन्तमग्निं यजतं रयीणाम् ॥ ८ ॥

विशाम् । कविम् । विश्पतिम् । शश्वतीनाम् । नितोशनम् । वृषभम् । चर्षणीनाम् ।
प्रेतिऽइषणिम् । इषयन्तम् । पावकम् । राजन्तम् । अग्निम् । यजतम् । रयीणाम् ॥ ८ ॥

ᵛशश्वतीनां नित्यानां ᵛविशाम् ऋत्विग्यजमानलक्षणानां ᵛविश्पतिं स्वामिनं ᵛकविं क्रान्तदर्शिनं ᵛनितोशनं शत्रूणां हिंसकं ᵛवृषभं कामानां वर्षकं ᵛचर्षणीनां स्तोतॄणां मनुष्याणां ᵛप्रेतीषणिं प्राप्तगमनम् ᵛइषयन्तम् अन्नं कुर्वन्तं ᵛपावकं शोधकं ᵛराजन्तं दीप्यमानं दीपयन्तं वा ᵛरयीणां लाभाय ᵛयजतं यष्टव्यम् ᵛअग्निं स्तुम इति शेषः ॥

सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा हव्यदातिम् ।
य आहुतिं परि वेदा नमोभिर्विश्वेत्स वामा दधते त्वोतः ॥ ९ ॥

सः । अग्ने । ईजे । शशमे । च । मर्तः । यः । ते । आनट् । सम्ऽइधा । हव्यऽदातिम् ।
यः । आऽहुतिम् । परि । वेद । नमःऽभिः । विश्वा । इत् । सः । वामा । दधते । त्वाऽऊतः ॥ ९ ॥

हे ᵛअग्ने त्वां ᵛसः ᵛमर्तः स यजमानः ᵛईजे यजते । ᵛशशमे ᵛच स्तौति । 'शशमानः' (नि. ३. १४. २२) इति स्तुतिकर्मसु पाठादिदमपि स्तुतिकर्म । ᵛयः यजमानः ᵛते तव ᵛसमिधा सह ᵛहव्यदातिं हविषां दानम् ᵛआनट् करोति । किंच ᵛयः यजमानः ᵛनमोभिः स्तुतिभिः ᵛआहुतिम् आज्यादिलक्षणां ᵛपरि ᵛवेद परितो वेत्ति । ददातीत्यर्थः । ᵛसः यजमानः ᵛत्वोतः त्वया रक्षितः सन् ᵛविश्वेत् सर्वाणि ᵛवामा वननीयानि धनानि ᵛदधते धारयति ॥

अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः ।
वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्रायां सुमतौ यतेम ॥ १० ॥

अस्मै । ऊँ इति । ते । महि । महे । विधेम । नमःऽभिः । अग्ने । सम्ऽइधा । उत । हव्यैः ।
वेदी । सूनो इति । सहसः । गीःऽभिः । उक्थैः । आ । ते । भद्रायाम् । सुऽमतौ । यतेम ॥ १० ॥

हे ᵛअग्ने ᵛमहे महते ᵛअस्मै ᵛते तुभ्यं ᵛमहि महत् अत्यधिकं ᵛविधेम परिचरेम। कैरित्युच्यते। ᵛनमोभिः नमस्कारैः ᵛसमिधा वा ᵛउत अपि च ᵛहव्यैः हविर्भिः। हे ᵛसहसः ᵛसूनो[1] ᵛवेदी वेद्यां ᵛगीर्भिः स्तोत्रैः ᵛउक्थैः शस्त्रैश्च विधेमेति संबन्धः। किंच ᵛते तव ᵛभद्रायां स्तुत्यायां ᵛसुमतौ शोभनानुग्रहबुद्धौ ᵛआ ᵛयतेम आगच्छेम। भवेमेत्यर्थः॥

आ यस्ततन्थ रोदसी वि भासा श्रवोभिश्च श्रवस्यस्तरुत्रः।
बृहद्भिर्वाजैः स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भाहि॥ ११॥

आ। यः। ततन्थ। रोदसी इति। वि। भासा। श्रवःऽभिः। च। श्रवस्यः। तरुत्रः।
बृहत्ऽभिः। वाजैः। स्थविरेभिः। अस्मे इति। रेवत्ऽभिः। अग्ने। विऽतरम्। वि। भाहि॥११॥

हे अग्ने ᵛयः त्वं ᵛरोदसी द्यावापृथिव्यौ ᵛभासा दीप्त्या ᵛवि ᵛआ ᵛततन्थ व्यतनोः। किंच ᵛतरुत्रः तारकस्त्वं ᵛश्रवोभिः स्तुतिभिः ᵛश्रवस्यः ᵛच भवसि हे तादृश ᵛअग्ने ᵛबृहद्भिः महद्भिः ᵛवाजैः अन्नैः ᵛस्थविरेभिः स्थविरैः स्थूलैः ᵛरेवद्भिः रयिमद्भिः ᵛअस्मे अस्मदर्थं ᵛवितरं विशिष्टतरं ᵛवि ᵛभाहि विशेषेण दीप्यस्व॥

नृवद्वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः।
पूर्वीरिषो बृहतीरारेअघा अस्मे भद्रा सौश्रवसानि सन्तु॥ १२॥

नृऽवत्। वसो इति। सदम्। इत्। धेहि। अस्मे इति। भूरि। तोकाय। तनयाय। पश्वः।
पूर्वीः। इषः। बृहतीः। आरेऽअघाः। अस्मे इति। भद्रा। सौश्रवसानि। सन्तु॥ १२॥

हे ᵛवसो वासक धनवन् वाग्ने ᵛनृवत् मनुष्यैरुपेतं धनं ᵛसदमित् सर्वदा ᵛअस्मे अस्मासु ᵛधेहि स्थापय। किंच ᵛभूरि प्रभूतान् ᵛपश्वः पशूंश्च[2] धेहि[2]। किमर्थम्। ᵛतोकाय अस्मत्पुत्राय ᵛतनयाय तत्पुत्राय। किंच ᵛपूर्वीः पूरयित्र्यः[3] कामानां बह्व्यो वा ᵛबृहतीः[4] महत्यः[4] ᵛआरेअघाः। आरे दूरेऽघानि यासु ताः। तादृश्यः ᵛइषः उक्तलक्षणान्यन्नानि ᵛभद्रा भद्राणि ᵛसौश्रवसानि सुश्रवस्त्वानि ᵛअस्मे अस्मासु ᵛसन्तु भवन्तु।

'पुरूण्यग्ने' इति त्रयोदशी उखासंभरणीयेष्टौ अग्नेः क्षत्रवतोऽनुवाक्या। सूत्रितं च—'पुरूण्यग्ने पुरुधा त्वाया स चित्र चित्रं चितयन्तमस्मे' (आश्व. श्रौ. ४. १) इति॥

---

१. त–सूनो देव। २. ख-ञ-न-भ-र–पशूंश्चाधेहि; श–पशून् विधेहि। ३. ख-ञ-भ–प्रेरयित्र्यः। ४. ख-ञ-न-भ-र–बृहतीर्महतीर्महत्यः; त-य–महतीर्महत्यः।

पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन्वसुता ते अश्याम् ।
पुरूणि हि त्वे पुरुवार सन्त्यग्ने वसु विधते राजनि त्वे ॥ १३ ॥

पुरूणि । अग्ने । पुरुधा । त्वाऽया । वसूनि । राजन् । वसुता । ते । अश्याम् ।
पुरूणि । हि । त्वे इति । पुरुऽवार । सन्ति । अग्ने । वसु । विधते । राजनि । त्वे इति ॥ १३ ॥

हे vअग्ने vराजन् vते तव vपुरूणि बहूनि vपुरुधा गवाश्वादिरूपेण बहुप्रकाराणि vवसूनि धनानि vवसुता वसुतायै वसुमत्त्वाय vअश्यां व्याप्नुयां भुञ्जीय वा । अत्र भरतस्वामी वसुतात इत्येकपदं सप्तम्यन्तं चकार भट्टभास्करमिश्रोऽप्येकपदं संबुद्ध्यन्तं चकार । हे vपुरुवार बहुभिर्वरणीय vअग्ने vराजनि राजमाने vत्वे त्वयि vपुरूणि बहूनि vवसु वसूनि vत्वे त्वां vविधते परिचरते मह्यं दातव्यानि vसन्ति ॥ ॥ ३६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थाँश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये
चतुर्थाष्टके चतुर्थोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ पञ्चमाध्याय आरभ्यते । षष्ठमण्डलस्य षडनुवाकात्मकस्य प्रथमेऽनुवाके पञ्चदश सूक्तानि । तत्र 'त्वं हि' इत्येकादशर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षमाग्नेयम् । अन्त्या षट्पञ्चाशदक्षरा शाक्करी आदितो दशानुष्टुभः । अनुक्रम्यते हि—'त्वं ह्येकादशानुष्टुभं शाक्वर्यन्तम्' इति । प्रातरनुवाक आग्नेये क्रतौ आनुष्टुभे छन्दसीदं सूक्तमुत्तमावर्जं विनियुक्तम् । सूत्र्यते हि—'त्वं हि क्षैतवदग्ना यो होताजनिष्ट' (आश्व. श्रौ. ४. १३) इति । आश्विनशस्त्रे चैतत् शंसनीयं प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात् । अङ्गिरसां द्विरात्रे द्वितीयेऽहनीदमेव सूक्तमाज्यशस्त्रम् । सूत्रितं च—'त्वं हि क्षैतवदिति चाज्यम्' (आश्व. श्रौ. १०. २) इति ॥

त्वं हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे ।
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥ १ ॥

त्वम् । हि । क्षैतऽवत् । यशः । अग्ने । मित्रः । न । पत्यसे ।
त्वम् । विऽचर्षणे । श्रवः । वसो इति । पुष्टिम् । न । पुष्यसि ॥ १ ॥

हे vअग्ने vत्वं vहि त्वं खलु vक्षैतवत् । क्षितिः क्षयोऽपचयः । तत्संबन्धि क्षैतं शुष्कं काष्ठम् । तद्युक्तं vयशः अन्नं हविर्लक्षणं vपत्यसे अभिपतसि[1] गच्छसि । तत्र दृष्टान्तः । vमित्रो vन । अहरभिमानी

१. ख—अभितपसि: ग-न-भ-अतिपतसि ।

देवो मित्रः । स इव । यद्वा यश इति गृहनाम । क्षैतवत् । क्षैतं निवासकं हविर्लक्षणमन्नम् । तद्युक्तं यजमानगृहं मित्रभूतः पुरुष इवाभिपतसि । यद्वा पत्यतिरैश्वर्यकर्मा । ईदृशमन्नं पत्यसे ईशिषे । अतः कारणात् हे vविचर्षणे विशेषेण सर्वस्य द्रष्टः vवसो वासकाग्ने vत्वं vश्रवः श्रवणीयमन्नं यजमानगृहस्थं vन । अयं नशब्दश्चार्थे । अन्नकार्यभूतां पुष्टिं च vपुष्यसि वर्धयसि ॥

त्वां हि ष्मा चर्षणयो यज्ञेभिर्गीर्भिरीळते ।
त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः ॥ २ ॥

त्वाम् । हि । स्म । चर्षणयः । यज्ञेभिः । गीःऽभिः । ईळते ।
त्वाम् । वाजी । याति । अवृकः । रजःऽतूः । विश्वऽचर्षणिः ॥ २ ॥

हे अग्ने vत्वां vहि vस्म त्वामेव खलु vचर्षणयः मनुष्याः vयज्ञेभिः यज्ञसाधनैर्हविर्भिः vगीर्भिः स्तुतिभिः vईळते स्तुवन्ति । अपि च vवाजी । वाजो गमनम् । तद्वान् सूर्यः vत्वां vयाति गच्छति । प्रविशतीत्यर्थः । तथा च श्रूयते—'अग्निं वावादित्यः सायं प्रविशति तस्मादग्निर्दूरान्नक्तं दृश्यते' (तै. ब्रा. २. १. २९) इति । वाजिशब्दश्च सूर्यवाचकत्वेन क्वचित् श्रूयते—'अग्निर्वायुः सूर्यस्ते वै वाजिनः' (तै. ब्रा. १. ६. ३. ९) इति 'वायुः सप्तिरादित्यो वाजी' (तै. ब्रा. १. ७. ८) इति च । कीदृशो वाजी । vअवृकः हिंसकरहितः vरजस्तूः । उदकमन्न रज उच्यते । तस्य वृष्टिलक्षणस्य प्रेरयिता । यद्वा । रजसां लोकानां तरिता गन्ता vविश्वचर्षणिः सर्वस्य द्रष्टा ॥

सजोषस्त्वा दिवो नरो यज्ञस्य केतुमिन्धते ।
यद्ध स्य मानुषो जनः सुम्नायुर्जुह्वे अध्वरे ॥ ३ ॥

सऽजोषाः । त्वा । दिवः । नरः । यज्ञस्य । केतुम् । इन्धते ।
यत् । ह । स्यः । मानुषः । जनः । सुम्नऽयुः । जुह्वे । अध्वरे ॥ ३ ॥

हे अग्ने vसजोषः सजोषसः सह प्रीयमाणाः vदिवः स्तुतेः vनरः नेतार ऋत्विजः vयज्ञस्य vकेतुं प्रज्ञापकं vत्वा त्वाम् vइन्धते समिद्धं कुर्वन्ति । कदेति चेदुच्यते । vयद्ध यदा खलु vस्यः सः vमानुषः मनोरपत्यभूतः vजनः जातो यजमानो होता वा vसुम्नायुः[1] सुम्नं सुखमात्मन इच्छन् vअध्वरे हिंसाप्रत्यवायरहिते यज्ञे vजुह्वे त्वामाह्वयति तदेत्यर्थः ॥

ऋधद्यस्ते सुदानवे धिया मर्तः शशमते ।
ऊती स बृहतो दिवो द्विषो अंहो न तरति ॥ ४ ॥

ऋधत् । यः । ते । सुऽदानवे । धिया । मर्तः । शशमते ।
ऊती । सः । बृहतः । दिवः । द्विषः । अंहः । न । तरति ॥ ४ ॥

---

१. त–सुम्नयुः ।

vऋधत्। स यजमान ऋध्नुयात् हे अग्ने vसुदानवे शोभनदानाय तुभ्यम्॥ षष्ठ्यर्थ चतुर्थी॥ तव संबन्धिना[1] vधिया कर्मणा vयः[2] vमर्तः[3] मरणधर्मा यजमानः vशशमते शाम्यति। यद्वा। शमतिः[3] स्तुतिकर्मा। त्वदर्थं कर्मणा युक्तः सन् स्तौति। vसः यजमानः vबृहतः महतः vदिवः दीप्तस्य[4] तव संबन्धिन्या vऊती ऊत्या रक्षया vद्विषः द्वेष्टॄन् vअंहो vन आहननशीलं पापमिव[5] vतरति[5] अतिक्रामति॥

समिधा यस्त आहुतिं निशितिं मर्त्यो नशत्।
वयावन्तं स पुष्यति क्षयमग्ने शतायुषम्॥ ५॥

समिऽइधा। यः। ते। आऽहुतिम्। निऽशितिम्। मर्त्यः। नशत्।
वयाऽवन्तम्। सः। पुष्यति। क्षयम्। अग्ने। शतऽआयुषम्॥ ५॥

हे vअग्ने vसमिधा समिन्धनहेतुभूतेनेध्मेन सह vते त्वदीयां vनिशितिं निशितां तनूकृतां[6] मन्त्रसंस्कृताम्[6] vआहुतिं vयः vमर्त्यः मनुष्यः vनशत् व्याप्नुयात्। नशतिर्व्याप्तिकर्मा। vसः मनुष्यो यजमानः vवयावन्तम्। वयाः शाखाः पुत्रपौत्रादिलक्षणाः। तद्युक्तं vशतायुषं बहुविधान्नं चिरकालजीवनं वा vक्षयं गृहं vपुष्यति पोषयति वर्धयति। तत्र चिरकालमवतिष्ठत इत्यर्थः॥ ॥ १॥

त्वेषस्ते धूम ऋण्वति दिवि षञ्छुक्र आततः।
सूरो न हि द्युता त्वं कृपा पावक रोचसे॥ ६॥

त्वेषः। ते। धूमः। ऋण्वति। दिवि। सन्। शुक्रः। आऽततः।
सूरः। न। हि। द्युता। त्वम्। कृपा। पावक। रोचसे॥ ६॥

हे अग्ने vत्वेषः दीप्तस्य vते तव vशुक्रः निर्मलः शुभ्रवर्णो वा vधूमः vदिवि अन्तरिक्षे vआततः वेस्तीर्णः vसन् vऋण्वति मेघात्मना परिणतो गच्छति। अपि च हे vपावक शोधकाग्ने vसूरो vन सूर्य इव vकृपा अभिमुखीकरणसमर्थया स्तुत्या स्तूयमानः vत्वं vद्युता दीप्त्या vरोचसे vहि दीप्यसे खलु॥

अधा हि विक्ष्वीड्योऽसि प्रियो नो अतिथिः।
रण्वः पुरीव जूर्यः सूनुर्न त्रययाय्यः॥ ७॥

अध। हि। विक्षु। ईड्यः। असि। प्रियः। नः। अतिथिः
रण्वः। पुरिऽइव। जूर्यः। सूनुः। न। त्रययाय्यः॥ ७॥

vअध अपि च vविक्षु प्रजासु हे अग्ने त्वम् vईड्यः स्तुत्यः vअसि भवसि। vहि यस्मादर्थे। यस्मादेवं तस्मात् vनः अस्माकम् vअतिथिः। लुप्तोपममेतत्। अतिथिरिव vप्रियः असि। यद्वा।

---

१. घ-त-संबन्धिन्या। २. त-मर्त्यः। ३. न-शाम्यतिः। ४. ग-त-व्याप्तस्य। ५. ख-पापं तरति; भ-य-पापं च तरति। ६. त-तनूकृत्वा संस्कृताम्।

हविर्वहनाय सततगामी भूत्वास्माकं प्रियोऽसि । तथा [v]पुरीव नगर्यां [v]जूर्यः जीर्णो वृद्धो हितोपदेष्टा राजेव [v]रण्वः रमणीयो गन्तव्यो वा भवसि । तथा [v]सूनुर्न पुत्र इव [v]त्रययाय्यः यजमानैः त्रातव्यः[१] पालयितव्यो भवसि । त्रायतेरेतद्रूपम् । यद्वैतत्सूनोर्विशेषणम् । विद्यातपःकर्मलक्षणं त्रयं यातीति त्रययाय्यः । यातेरौणादिक आय्यप्रत्ययः । स्पृहयाय्य इति यथा । अथवा त्रययाय्यो जन्मत्रयं प्राप्तः । जन्मत्रयं स्मर्यते—'मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धनात् । तृतीयं यज्ञदीक्षाया इति जन्मत्रयं स्मृतम्' (मनु. २. १६९) इति । तादृशः पुत्र इव रण्वो रमणीयोऽसि ॥

क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः ।
परिज्मेव स्वधा गयोऽत्यो न ह्वार्यः शिशुः ॥ ८ ॥

क्रत्वा । हि । द्रोणे । अज्यसे । अग्ने । वाजी । न । कृत्व्यः ।
परिज्माऽइव । स्वधा । गयः । अत्यः । न । ह्वार्यः । शिशुः ॥ ८ ॥

हे [v]अग्ने [v]क्रत्वा कर्मणा मन्थनरूपेण [v]द्रोणे द्रुमे काष्ठेऽरण्यां विद्यमानस्त्वम् [v]अज्यसे [v]हि व्यज्यसे[२] खलु । तथा [v]वाजी [v]न वेजनवानश्च इव [v]कृत्व्यः । कृत्वीति कर्मनाम । हविर्वहनादीनां कर्मणां कर्ता । स यथा पुरुषं वहति तद्वद्धविर्वहनमग्नेरश्वसादृश्यम् । तथा [v]परिज्मेव परितः सर्वत्र गन्ता वायुरिव दावानलादिरूपेण सर्वत्र गन्ता त्वं [v]स्वधा । अन्ननामैतत् । अन्नं [v]गयः गृहं च भवसि । उभयोर्दातेत्यर्थः । अपि च [v]शिशुः जातमात्रो बालोऽपि त्वम् [v]अत्यो [v]न सततगामी जात्यश्च इव [v]ह्वार्यः कुटिलमितस्ततो गन्तासि । 'ह्वृ कौटिल्ये' इत्यस्यैतद्रूपम् ॥

कारीर्यामग्नेर्धामच्छदो वैकल्पिक्यनुवाक्या 'त्वं त्या' इति । सूत्रितं च—'त्वं त्या चिदच्युता धामन्ते विश्वं भुवनमधिश्रितमिति वा' (आश्व. श्रौ. २. १३) इति ॥

त्वं त्या चिदच्युताग्ने पशुर्न यवसे ।
धामा ह यत्ते अजर वना वृश्चन्ति शिक्वसः ॥ ९ ॥

त्वम् । त्या । चित् । अच्युता । अग्ने । पशुः । न । यवसे ।
धाम । ह । यत् । ते । अजर । वना । वृश्चन्ति । शिक्वसः ॥ ९ ॥

हे [v]अग्ने [v]त्वं [v]त्या तानि काष्ठानि । चिच्छब्दोऽपिशब्दसमानार्थो भिन्नक्रमः । [v]अच्युता अच्युतानि च्यावयितुमशक्यान्यपि । अस्तीति शेषः । तत्र दृष्टान्तः । [v]यवसे घासे विसृष्टः [v]पशुर्न पशुरिव । स यथा सर्वं भक्षयति तथा त्वं प्रौढकाष्ठादीनि क्षणमात्रेण दहसीत्यर्थः । हे [v]अजर जरारहिताग्ने [v]यत् यस्य ॥ 'सुपां सुलुक्०' इति षष्ठ्या लुक् ॥ [v]शिक्वसः दीप्तस्य [v]ते तव [v]धाम[३] धामानि तेजांसि [v]वना वननीयानि संभजनीयान्यरण्यानि [v]वृश्चन्ति छिन्दन्ति भक्षयन्ति स त्वमिति पूर्वत्रान्वयः । [v]ह इत्येतत्पादपूरणम् ॥

---

१. ख-न-भ-र-स्तोतव्यः । २. त-यजसे । ३. त-धामा ।

वेषि॒ ह्यध्व॑रीय॒तामग्ने॒ होता॒ दमे॑ वि॒शाम् ।
स॒मृधो॑ विश्पते कृणु जु॒षस्व॑ ह॒व्यमङ्गिरः ॥ १० ॥

वेषि॑ । हि । अ॒ध्व॒रि॒ऽय॒ताम् । अग्ने॑ । होता॑ । दमे॑ । वि॒शाम् ।
स॒म्ऽऋ॑धः । वि॒श्प॒ते॒ । कृ॒णु॒ । जु॒षस्व॑ । ह॒व्यम् । अङ्गि॑रः ॥ १० ॥

हे [v]अग्ने [v]अध्वरीयताम् अध्वरं यज्ञमात्मन इच्छतां [v]विशां यजमानानां [v]दमे गृहे त्वं [v]होता देवानामाह्वाता सन् [v]वेषि [v]हि स्तुतिं हवींषि वा यतः कामयसे अतः कारणात् [v]विश्पते विशां पालकाग्ने [v]समृधः समृद्धानस्मान् यजमानान् [v]कृणु कुरु। कृत्वा च हे [v]अङ्गिरः अङ्गनादिगुणयुक्त अङ्गारारूप वाग्ने [v]हव्यम् अस्मदीयं हविः [v]जुषस्व सेवस्व ॥

अच्छा॑ नो मित्रमहो देव दे॒वानग्ने॒ वोचः॑ सुम॒तिं रोद॑स्योः ।
वी॒हि स्व॒स्ति सु॒क्षि॒तिं दि॒वो नॄन्द्वि॒षो अंहां॑सि दुरि॒ता त॑रेम
ता त॑रेम॒ तवा॑वसा तरेम ॥ ११ ॥

अच्छ॑ । नः॒ । मि॒त्र॒ऽम॒हः॒ । दे॒व॒ । दे॒वान् । अग्ने॑ । वोचः॑ । सु॒ऽम॒तिम् । रोद॑स्योः ।
वी॒हि । स्व॒स्ति॒म् । सु॒ऽक्षि॒तिम् । दि॒वः । नॄन् । द्वि॒षः । अंहां॑सि । दुः॒ऽइ॒ता । त॒रेम॒ ।
ता । त॒रेम॒ । तव॑ । अव॑सा । त॒रेम॒ ॥ ११ ॥

हे [v]मित्रमहः अनुकूलदीप्ते [v]देव दानादिगुणयुक्त [v]अग्ने [v]रोदस्योः द्यावापृथिव्योर्वर्तमानस्त्वं [v]देवान् यष्टव्यानिन्द्रादीन् [v]अच्छ आभिमुख्येन [v]नः अस्माकं [v]सुमतिं स्तुतिं [v]वोचः ब्रूहि । [v]दिवः स्तुतेः [v]नॄन् नेतॄनस्मान् [v]सुक्षितिं शोभननिवासयुक्तं [v]स्वस्तिम् अविनाशं [v]वीहि गमय ॥ वेतिरत्र अन्तर्भावितण्यर्थो द्रष्टव्यः ॥ वयं च [v]द्विषः द्वेष्टॄन् शत्रून् [v]अंहांसि पापानि [v]दुरिता तत्फलरूपाणि दुर्गमनानि च [v]तरेम अतिक्रामेम । तथा [v]ता तानि व्यवहितानि जन्मान्तरकृतानि च पापादीनि [v]तरेम । उक्त एवार्थो दार्ढ्याय पुनरुच्यते । हे अग्ने [v]तव [v]अवसा रक्षणेन द्वेष्टृप्रभृतीनत्यन्तं [v]तरेम ॥ ॥ २ ॥

' अग्ने स क्षेषत् ' इत्यष्टर्चं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम् । अनुक्रान्तं च—'अग्नेऽष्टौ' इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्थो विनियोगः ॥

अग्ने॒ स क्षे॑षदृत॒पा ऋ॒तेजा॒ उरु॒ ज्योति॑र्नशते देव॒युष्टे॑ ।
यं त्वं मि॒त्रेण॒ वरु॑णः स॒जोषा॑ देव॒ पासि॒ त्यज॑सा॒ मर्त॒मंहः॑ ॥ १ ॥

अग्ने॑ । सः । क्षे॒ष॒त् । ऋ॒त॒ऽपाः । ऋ॒ते॒ऽजाः । उ॒रु । ज्योतिः॑ । न॒श॒ते॒ । दे॒व॒ऽयुः । ते॒ ।
यम् । त्वम् । मि॒त्रेण॑ । वरु॑णः । स॒ऽजोषाः॑ । देव॑ । पासि॑ । त्यज॑सा । मर्त॑म् । अंहः॑ ॥ १ ॥

हे vअग्ने vसः यजमानः vक्षेषत् क्षियति[1] निवसति । चिरकालं जीवेदित्यर्थः । कीदृशो यजमानः । vऋतपाः ऋतस्य यज्ञस्य पालकः vऋतेजाः यज्ञनिमित्तं जातः । उक्थ्वा च vते त्वदीयं vदेवयुः देवानात्मन इच्छन् स यजमानः vउरु विस्तीर्णं vज्योतिः सूर्याख्यं vनशते प्राप्नोति । हे vदेव द्योतमानाग्ने vयं vमर्तं मनुष्यं यजमानं vमित्रेण vवरुणः । तृतीयार्थे प्रथमा । वरुणेन च vसजोषाः सह प्रीयमाणः vत्वं vत्यजसा त्याजनसाधनेनायुधेन vअंहः अंहसः पापात् vपासि रक्षसि स यजमानः इति पूर्वत्र संबन्धः ॥

ईजे यज्ञेभिः शशमे शमीभिर्ऋधद्वाराय प्यग्नये ददाश ।
एवा चन तं यशसामजुष्टिर्नाहो मर्तं नशते न प्रदृप्तिः ॥ २ ॥

ईजे । यज्ञेभिः । शशमे । शमीभिः । ऋधत्ऽवाराय । अग्नये । ददाश ।
एव । चन । तम् । यशसाम् । अजुष्टिः । न । अंहः । मर्तम् । नशते । न । प्रऽदृप्तिः ॥ २ ॥

यः यजमानः vऋधद्वाराय ऋधत्समृद्धं वारं वरणीयं धनं यस्य तादृशाय vअग्नये vददाश हवींषि ददाति स यजमानः vयज्ञेभिः सर्वैर्यज्ञैः vईजे इष्टवान् भवति । तथा vशमीभिः कर्मभिः कृच्छ्रचान्द्रायणादिभिः vशशमे शान्तश्च भवति । आग्नेयेन यागेन सर्वं फलं लभत इत्यर्थः । अपि च vतं यजमानं vयशसां यशस्विनां पुत्राणाम् vअजुष्टिः अप्राप्तिः न vएव vनशते नैव प्राप्नोति । पुत्रवान् भवत्येवेत्यर्थः । तथा vमर्तं मनुष्यं तम् vअंहः पापं vन नशते । तथा vप्रदृप्तिः अनर्थहेतुः प्रदर्पश्च[2] तं vन प्राप्नोति ॥

सूरो न यस्य दृशतिररेपा भीमा यदेति शुचतस्त आ धीः ।
हेषस्वतः शुरुधो नायमक्तोः कुत्रा चिद्रण्वो वसतिर्वनेजाः ॥ ३ ॥

सूरः । न । यस्य । दृशतिः । अरेपाः । भीमा । यत् । एति । शुचतः । ते । आ । धीः ।
हेषस्वतः । शुरुधः । न । अयम् । अक्तोः । कुत्र । चित् । रण्वः । वसतिः । वनेऽजाः ॥ ३ ॥

vसूरो vन सूर्यस्येव[3] vयस्य अग्नेः vदृशतिः दर्शनम् vअरेपाः पापरहितम् । हे अग्ने vयत् यस्य vते तव vशुचतः ज्वलतः vधीः धारयित्री ज्वाला vभीमा भयंकरा सती vआ समन्तात् vएति गच्छति । यः vअयम् अग्निः vहेषस्वतः शब्दयुक्ताः vशुरुधो vन[4] शुचः शोकस्य रोधयित्रीर्गाश्च vअक्तोः । अक्तुरिति रात्रिनाम । तेन च तत्र संचारी राक्षसादिर्लक्ष्यते । राक्षसादेः स्वभूता ददातीति शेषः । सोऽयं vवसतिः सर्वेषामावासभूतः vवनेजाः अरण्ये जायमानः vकुत्रा vचित् क्वचिदेव स्थाने पर्वताग्रादौ vरण्वः रमणीयो भवति ॥

तिग्मं चिदेम महि वर्पो अस्य भसदश्वो न यमसान आसा ।
विजेहमानः परशुर्न जिह्वां द्रविर्न द्रावयति दारु धक्षत् ॥ ४ ॥

तिग्मम् । चित् । एम । महि । वर्पः । अस्य । भसत् । अश्वः । न । यमसानः । आसा ।
विऽजेहमानः । परशुः । न । जिह्वाम् । द्रविः । न । द्रवयति । दारु । धक्षत् ॥ ४ ॥

---

१. ख-ञ-न-भ-र-क्षयति । २. त-दर्पश्च । ३. य-सूर्य इव । ४. ख-घ-भ-न । न चार्थे ।

vअस्य[1] अग्नेः vएम गमनसाधनभूतो मार्गः vतिग्मं तीक्ष्णं स्प्रष्टुमशक्यत्वात्। अस्य च vवर्पः रूपं vमहि महत् प्रभूतं vभसत् दीप्यते ॥ ' भस भर्त्सनदीप्त्योः ' इति धातुः ॥ कीदृशोऽग्निः। vअश्वो vन अश्व इव vआसा आस्येन vयमसानः तृणादिकं नियच्छन्। तथा vपरशुर्न। यथा परशुः स्वकीयां धारां काष्ठे प्रक्षिपति तथा स्वकीयां vजिह्वां ज्वालां vविजेहमानः तरुगुल्मादौ प्रक्षिपन्। तथा vदारु काष्ठं vधक्षत् दहन् vद्रविर्न। द्रविर्द्रावयिता स्वर्णकारः। स यथा स्वर्णादिकं द्रावयति तथा सर्वं वनं vद्रावयति। मूर्तभूतं सर्वं भस्मसात्करोतीत्यर्थः ॥

स इदस्तेव प्रति धादसिष्यन्छिशीत तेजोऽयसो न धाराम्।
चित्रभ्रजतिररतिर्यो अक्तोर्वेर्न द्रुषद्वा रघुपत्मजंहाः ॥ ५ ॥

सः। इत्। अस्ताऽइव। प्रति। धात्। असिष्यन्। शिशीत। तेजः। अयसः। न। धाराम्।
चित्रऽभ्रजतिः। अरतिः। यः। अक्तोः। वेः। न। द्रुऽसद्वा। रघुपत्मऽजंहाः ॥ ५ ॥

vस vइत् स खल्वग्निः vअस्तेव बाणादेः क्षेपेव vप्रति vधात् स्वकीयज्वालां प्रतिधत्ते। यथा धन्वी लक्ष्याभिमुख्येन बाणं संधत्ते तथा ज्वालां संधत्त इत्यर्थः। प्रतिधाय च vअसिष्यन् ज्वालां प्रक्षेप्स्यन्[2] vतेजः स्वकीयं vशिशीत निश्यति तीक्ष्णीकरोति। तत्र दृष्टान्तः। vअयसो vन vधाराम्। यथा अयोमयस्य परश्वादेर्धारां प्रक्षेप्तुकामस्तीक्ष्णीकरोति तद्वत्। तीक्ष्णीकृत्य च vचित्रभ्रजतिः विचित्रगतिः vअक्तोः रात्रेः vअरतिः अभिगन्ता vवेर्न पक्षीव vद्रुषद्वा वृक्षेषु सीदन् vरघुपत्मजंहाः लघुपतनसमर्थपादः। एवंभूतः सन् vयः अग्निर्वर्तते स इति पूर्वत्रान्वयः ॥ ॥ ३ ॥

स ईं रेभो न प्रति वस्त उस्राः शोचिषा ररपीति मित्रमहाः।
नक्तं य ईमरुषो यो दिवा नृनमर्त्यो अरुषो यो दिवा नृन् ॥ ६ ॥

सः। ईम्। रेभः। न। प्रति। वस्ते। उस्राः। शोचिषा। ररपीति। मित्रऽमहाः।
नक्तम्। यः। ईम्। अरुषः। यः। दिवा। नृन्। अमर्त्यः। अरुषः। यः। दिवा। नृन् ॥६॥

vस vईं सोऽयमग्निः vरेभो vन स्तुत्यः सूर्य इव vउस्राः दीप्ता ज्वालाः[3] vप्रति vवस्ते आच्छादयति। तथा vमित्रमहाः सर्वेषामनुकूलप्रकाशः सन् vशोचिषा तेजसा vररपीति भृशं शब्दं करोति। vयः vईं योऽयमग्निः vनक्तं रात्रौ vअरुषः आरोचमानः सन् vदिवा अहनीव vनॄन् मनुष्यान् स्वस्वकार्ये प्रेरयति। पुनर्यच्छब्दः पूरकः। तथा vअमर्त्यः अमरणधर्मा vअरुषः आरोचमानो रोषरहितो वा vयः अग्निः vदिवा द्योतमानेन तेजसा vनॄन् नेतॄनात्मीयान् रश्मीन् प्रेरयति स इति पूर्वत्र संबन्धः। यद्वा। नक्तं रात्रौ योऽयमग्निररुष आरोचमानो यश्च मरणरहितोऽग्निर्दिवा अह्नि नॄन् नेतॄन् देवान् हविर्भिः संयोजयति। यः दिवा नृनिति पुनरुक्तिरादरार्था ॥

---

१. ग-त–यस्य। २. त–प्रक्षिपन्। ३. ख-ङ्ग-त-न-भ-र-श–' ज्वालाः ' नास्ति।

दिवो न यस्य विधतो नवीनोद्वृषा रुक्ष ओषधीषु नूनोत् ।
घृणा न यो ध्रजसा पत्मना यन्ना रोदसी वसुना दं सुपत्नी ॥ ७ ॥

दिवः । न । यस्य । विधतः । नवीनोत् । वृषा । रुक्षः । ओषधीषु । नूनोत् ।
घृणा । न । यः । ध्रजसा । पत्मना । यन् ।
आ । रोदसी इति । वसुना । दम् । सुपत्नी इति सुऽपत्नी ॥ ७ ॥

vदिवो vन दीप्तस्य सूर्यस्येव vविधतः विधातू रश्मीकुर्वतः vयस्य अग्नेः vनवीनोत् भृशं शब्दोऽभूत् । एतदेव व्याचष्टे । vवृषा कामानां वर्षिता vरुक्षः दीप्तः सोऽग्निः vओषधीषु दह्यमानासु vनूनोत् भृशं शब्दमकरोत् । vयः च vघृणा vन संचलनशीलेन दीप्तेनेव vध्रजसा गमनशीलेन तेजसा vपत्मना इतस्तत उत्पतता vयन् गच्छन् वर्तते सोऽग्निः vदम् अस्मच्छत्रून् दमयन् vसुपत्नी शोभनपतिके vरोदसी द्यावापृथिव्यौ vवसुना धनेन vआ पूरयति ॥

धायोभिर्वा यो युज्येभिरर्कैर्विद्युन्न दविद्योत्स्वेभिः शुष्मैः ।
शर्धो वा यो मरुतां ततक्ष ऋभुर्न त्वेषो रभसानो अद्यौत् ॥ ८ ॥

धायःऽभिः । वा । यः । युज्येभिः । अर्कैः । विऽद्युत् । न । दविद्योत् । स्वेभिः । शुष्मैः ।
शर्धः । वा । यः । मरुताम् । ततक्ष । ऋभुः । न । त्वेषः । रभसानः । अद्यौत् ॥ ८ ॥

vयः अग्निः vधायोभिर्वा धारकैरश्वैरिव vयुज्येभिः युज्यैः स्वयमेव युज्यमानैः vअर्कैः अर्चनीयैः दीप्तिभिर्गच्छति सोऽग्निः vविद्युन्न विद्युदिव vस्वेभिः स्वकीयैः vशुष्मैः शोषकैस्तेजोभिः vदविद्योत् विद्योतते । vयः च vमरुताम् एतत्संज्ञकानां देवानां vशर्धो vवा बलमिव vततक्ष तनूकरोति सर्वं तीक्ष्णीकरोति । शोषयतीति यावत् । सोऽयम् vऋभुर्न उरु भासमानः सूर्य इव vत्वेषः दीप्तः vरभसानः वेगं कुर्वन् vअद्यौत् विद्योतते प्रकाशते ॥ ॥ ४ ॥

' यथा होतः ' इत्यष्टर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम् । ' यथा होतः ' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

यथा होतर्मनुषो देवताता यज्ञेभिः सूनो सहसो यजासि ।
एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान् ॥ १ ॥

यथा । होतः । मनुषः । देवऽताता । यज्ञेभिः । सूनो इति । सहसः । यजासि ।
एव । नः । अद्य । समना । समानान् । उशन् । अग्ने । उशतः । यक्षि । देवान् ॥ १ ॥

हे vहोतः देवानामाह्वातः vसहसः vसूनो बलस्य पुत्राग्ने vयथा येन प्रकारेण vमनुषः मनोः प्रजापतेर्यजमानस्य vदेवताता । यज्ञनामैतत् । देवतातौ यज्ञे vयज्ञेभिः यजमानसाधनैर्हविर्भिः vयजासि

देवान् यजसि [v]एव[1] एवं[1] हे [v]अग्ने [v]नः अस्माकम् [v]अद्य अस्मिन् यज्ञे [v]समानान् त्वत्सदृशानिन्द्रादीन् [v]उशतः कामयमानस्त्वम् [v]उशतः कामयमानान् यष्टव्यान् [v]देवान् [v]समना क्षिप्रं [v]यक्षि यज । यद्वा । समानं मन्यन्ते[2] अस्मिन् देवानिति समनो यज्ञः । तस्मिन्निति योज्यम् ॥

स नो विभावा चक्षणिर्न वस्तोरग्निर्वन्दारु वेद्यश्चनो धात् ।
विश्वायुर्यो अमृतो मर्त्येषूषर्भूर्जूदतिथिर्जातवेदाः ॥ २ ॥

सः । नः । विभाऽवा । चक्षणिः । न । वस्तोः । अग्निः । वन्दारु । वेद्यः । चनः । धात् ।
विश्वऽआयुः । यः । अमृतः । मर्त्येषु । उषःऽभुत् । भूत् । अतिथिः । जातऽवेदाः ॥ २ ॥

[v]वस्तोः अहनि [v]चक्षणिर्न प्रकाशकः सूर्य इव [v]विभावा विशेषेण दीप्यमानः [v]वेद्यः सर्वैर्ज्ञातव्यो लम्भनीयो वा [v]सः [v]अग्निः [v]नः अस्मभ्यं [v]वन्दारु वन्दनीयं स्तुत्यं [v]चनः अन्नं [v]धात् दधातु प्रयच्छत्वित्यर्थः । [v]विश्वायुः सर्वान्नः सर्वेषां जीवनहेतुर्वा [v]अमृतः मरणरहितः [v]अतिथिः हविर्वहनाय सततगामी [v]जातवेदाः जातानां वेदिता जातधनो वा एवंभूतः [v]यः अग्निः [v]मर्त्येषु मनुष्येषु यजमानेषु [v]उषर्भुत्[3] उषःकालेऽग्निहोत्रहोमार्थं प्रबुद्धो भवति स इति पूर्वत्रान्वयः ॥

द्यावो न यस्य पनयन्त्यभ्वं भासांसि वस्ते सूर्यो न शुक्रः ।
वि य इनोत्यजरः पावकोऽश्नस्य चिच्छिश्नथत्पूर्व्याणि ॥ ३ ॥

द्यावः । न । यस्य । पनयन्ति । अभ्वम् । भासांसि । वस्ते । सूर्यः । न । शुक्रः ।
वि । यः । इनोति । अजरः । पावकः । अश्नस्य । चित् । शिश्नथत् । पूर्व्याणि ॥ ३ ॥

[v]न इति संप्रत्यर्थे । उक्तं च—'अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोगः' (निरु. ७. ३१) इति । [v]द्यावः स्तोतारः संप्रतीदानीं [v]यस्य अग्नेः [v]अभ्वं महत्कर्म [v]पनयन्ति स्तुवन्ति सोऽग्निः [v]सूर्यो [v]न सूर्य इव [v]शुक्रः शुक्लवर्णः[4] सन् [v]भासांसि तेजांसि [v]वस्ते आच्छादयति । [v]यः च [v]अजरः जरारहितः [v]पावकः सर्वस्य शोधकोऽग्निः [v]वि [v]इनोति[5] भासा सर्वं व्याप्नोति सोऽयम्[6] [v]अश्नस्य [v]चित् व्यापनशीलस्यापि राक्षसादेः [v]पूर्व्याणि चिरंतनानि पुराणि [v]शिश्नथत् हिनस्ति । 'श्नथ क्रथ हिंसायाम्' इति धातुः ॥

वधा हि सूनो अस्यध्रसद्वा चक्रे अग्निर्जनुषाज्मान्नम् ।
स त्वं न ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यन्तः ॥ ४ ॥

वधा । हि । सूनो इति । असि । अध्रऽसद्वा । चक्रे । अग्निः । जनुषा । अज्मन् । अन्नम् ।
सः । त्वम् । नः । ऊर्जऽसने । ऊर्जम् । धाः । राजाऽइव । जेः । अवृके । क्षेषि । अन्तरिति ॥ ४ ॥

---

१. त–एवमेव । २. त–मन्यते । ३. श–उषर्भुद्भूदभूत् । ४. घ-श–शुक्रवर्णः । ५. त-य– य इनोति । ६. श– सोऽयमग्निः ।

हे ᵛसूनो सहसः पुत्र । यद्वा 'षू प्रेरणे' । सर्वस्य प्रेरकाग्ने ᵛवन्या वन्दनीयः स्तुत्यः ᵛअसि ᵛहि । परः पादः परोक्षकृतः । ᵛअग्नसद्वा अग्नसु अदनीयेषु हविःषु सीदन् हविःस्वीकरणायोपविशन् ᵛअग्निः ᵛजनुषा जन्मना स्वभावतः[1] एव ᵛअज्म । गृहनामैतत् । गृहम् ᵛअन्नं च यजमानानां ᵛचक्रे करोति । ᵛऊर्जसने[2] ऊर्जस्यान्नस्य दातरग्ने ᵛनः अस्मभ्यं ᵛसः तादृशः ᵛत्वम् ᵛऊर्जम् अन्नं ᵛधाः देहि । तथा ᵛराजेव ᵛजेः अस्मच्छत्रून् जय । एतत्सर्वार्थम् ᵛअवृके राक्षसादिभिर्बाधकैर्वियुक्तेऽस्मदीयेऽग्न्यागारे ᵛअन्तः मध्ये ᵛक्षेषि निवस[3] ॥

निर्तिक्ति यो वारणमन्नमत्ति वायुर्न राष्ट्र्यत्येत्यक्तून् ।
तुर्याम यस्ते आदिशामरातीरत्यो न हुतः पतंतः परिहुत् ॥ ५ ॥

निऽर्तिक्ति । यः । वारणम् । अन्नम् । अत्ति । वायुः । न । राष्ट्री । अति । एति । अक्तून् ।
तुर्याम । यः । ते । आऽदिशाम् । अरातीः । अत्यः । न । हुतः । पतंतः । परिऽहुत् ॥ ५ ॥

ᵛयः अग्निः ᵛवारणं तमसां निवारकं स्वकीयं तेजः ᵛनितिक्ति निश्यति तीक्ष्णीकरोति । 'तिज निशाने' इति धातुः । यश्च ᵛअन्नं यष्टृभिर्दीयमानं हविर्लक्षणम् ᵛअत्ति भक्षयति । तथा च श्रूयते–' अन्नादो वा एषोऽग्नपतिर्यदग्निः ' (ऐ. ब्रा. १. ८) इति। सोऽग्निः ᵛवायुर्न वायुरिव ᵛराष्ट्री । ईश्वरनामैतत् । राष्ट्रं राज्यम् । तद्वान् । वायुर्यथा स्वमाहात्म्येन सर्वमीष्टे[4] तद्वत् । सर्वस्येश्वर इत्यर्थः । तादृशः सन् ᵛअक्तून् रात्रीः ᵛअत्येति अतिक्रामति । तद्गतमन्धकारं तिरस्करोतीत्यर्थः । वयं च त्वत्प्रसादात् ᵛतुर्याम तं हिंस्याम ᵛयः जनः ᵛते तुभ्यम् ᵛआदिशाम् आदिश्यमानानां दीयमानानां हविषाम् ᵛअरातीः अरातिरदाता । छान्दसो दीर्घः । यद्वा । अरातीर्धनस्य अदातॄन्[5] ते त्वां प्रत्यादिशामादेष्टॄणामाचक्षाणानामस्माकं यो जनो विरोधी तं हिंस्याम । त्वं च ᵛअत्यो ᵛन शीघ्रगामी जात्यश्व इव ᵛहुतः हिंसकान्[6] ᵛपततः[6] आभिमुख्येन गच्छतः शत्रून् ᵛपरिहुत् परिगत्य हन्ता भव ॥ ह्वरतेर्हिंसार्थस्यैतद्रूपम् ॥ ॥ ५ ॥

आ सूर्यो न भानुमद्भिरर्कैरग्ने ततन्थ रोदसी वि भासा ।
चित्रो नयत्परि तमांस्यक्तः शोचिषा पत्मन्नौशिजो न दीयन् ॥ ६ ॥

आ । सूर्यः । न । भानुमत्ऽभिः । अर्कैः । अग्ने । ततन्थ । रोदसी इति । वि । भासा ।
चित्रः । नयत् । परि । तमांसि । अक्तः । शोचिषा । पत्मन् । औशिजः । न । दीयन् ॥६॥

हे ᵛअग्ने ᵛरोदसी द्यावापृथिव्यौ ᵛभासा दीप्त्या ᵛवि ᵛआ ᵛततन्थ विशेषेणाच्छादयसि । तत्र दृष्टान्तः । ᵛभानुमद्भिः प्रभावद्भिः ᵛअर्कैः अर्चनीयैः किरणैः ᵛसूर्यो ᵛन । यथा सूर्य आतनोति तद्वत् । परोऽर्धर्चः परोक्षकृतः । ᵛपत्मन् । पतत्यस्मिन्निति पत्म मार्गः । तस्मिन् ᵛऔशिजोᵛ न । उशिजः

---

१. त–स्वभावेन । २. त–हे ऊर्जसने । ३. घ१-ग-श–निवससि; च–निवसति; त–निवासेः । ४. ख-झ-भ-र–सर्वमेष्टे; घ-त-श–सर्वमीष्टे । ५. ख१-झ-न-भ-य-र–दातॄन् । ६. त–हिंसकादन्यतः; य–हिंसकान्पततः अभिपततः ।

स्तोतारः । स्तुत्यतया तत्संबन्ध्यौशिजः सूर्यः । स इव ᵛदीयन् गच्छन् ᵛशोचिषा तेजसा ᵛअक्तः[1] संश्लिष्टः अत एव ᵛचित्रः चायनीयोऽग्निः ᵛतमांसि नैशान्यन्धकाराणि ᵛपरि ᵛणयत् परिणयति परितो गमयति । सर्वस्मादपि दिग्भागान्निवर्तयतीत्यर्थः ॥

त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।
इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः ॥ ७ ॥

त्वाम् । हि । मन्द्रऽतमम् । अर्कऽशोकैः । ववृमहे । महि । नः । श्रोषि । अग्ने ।
इन्द्रम् । न । त्वा । शवसा । देवता । वायुम् । पृणन्ति । राधसा । नृऽतमाः ॥ ७ ॥

हे ᵛअग्ने ᵛमन्द्रतमं स्तुत्यतमं ᵛत्वाम् ᵛअर्कशोकैः अर्चनीयैः पूजनीयैः शोकैर्दीप्तिभिर्युक्तं ᵛहि यस्मात् ᵛववृमहे वृणीमहे संभजामहे । यद्वा । अर्कशोकैरर्चनीयैः प्रशस्यैर्दीप्तिकरणैः स्तोत्रैः साधनभूतैस्त्वां संभजामहे तस्मात् ᵛमहि महत् ᵛनः अस्मदीयं स्तोत्रं ᵛश्रोषि शृणु । हे अग्ने ᵛनृतमाः स्तुतीनां नेतृतमा ऋत्विजः ᵛशवसा बलेन ᵛवायुं गन्तारम् । यद्वा[2] । वायुमिव शवसा युक्तम्[3] ᵛइन्द्रं ᵛन इन्द्रमिव ᵛदेवता देवतात्मानं त्वां ᵛराधसा हविर्लक्षणेन धनेन ᵛपृणन्ति प्रीणयन्ति । देवताशब्दात् द्वितीयायाः ' सुपां सुलुक्° ' इति लुक् ॥

नू नो अग्नेऽवृकेभिः स्वस्ति वेषि रायः पथिभिः पर्ष्यंहः ।
ता सूरिभ्यो गृणते रासि सुम्नं मदेम शतहिमाः सुवीराः ॥ ८ ॥

नु । नः । अग्ने । अवृकेभिः । स्वस्ति । वेषि । रायः । पथिऽभिः । पर्षि । अंहः ।
ता । सूरिऽभ्यः । गृणते । रासि । सुम्नम् । मदेम । शतऽहिमाः । सुऽवीराः ॥ ८ ॥

हे ᵛअग्ने ᵛनः अस्मान् ᵛअवृकेभिः । वृकाः स्तेनाः । तद्रहितैः ᵛपथिभिः मार्गैः ᵛरायः धनानि ᵛनु क्षिप्रं ᵛस्वस्ति क्षेमेण ᵛवेषि गमय प्रापय । ᵛअंहः अंहसः पापात् ᵛपर्षि । उक्तलक्षणैर्मार्गैः पारय चास्मान् । यानि त्वया ᵛसूरिभ्यः स्तोतृभ्यो देयानि सुम्नानि[4] ᵛता तानि[4] ᵛसुम्नं सुम्नानि सुखानि ᵛगृणते स्तुवते मह्यं ᵛरासि देहि । वयं च ᵛशतहिमाः शतं हेमन्तान् संवत्सरान् ᵛसुवीराः । वीर्या-ज्जायन्त इति वीराः पुत्रादयः । शोभनपुत्रपौत्रादिसहिताः[5] सन्तः ᵛमदेम[6] हृष्याम[7] ॥ ॥ ६ ॥

' हुवे वः ' इति सप्तर्चं पञ्चमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम् । तथा चानुक्रम्यते—' हुवे वः सप्त ' इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्थो विनियोगः ॥

---

१. ख-भ-य-अक्तः सिक्तः । २. त-अथवा । ३. त-बलयुक्तम् । ४. त-' सुम्नानि ता तानि ' नास्ति । ५. त-शोभनपुत्रादिसहिताः । ६. ख-ञ-त-न-भ-य-र-मदेम मोदेम । ७. घ-हृष्येम; त-हृष्यामः ।

हुवे वः सूनुं सहसो युवानमद्रोघवाचं मतिभिर्यविष्ठम् ।
य इन्वति द्रविणानि प्रचेता विश्ववाराणि पुरुवारो अध्रुक् ॥ १ ॥

हुवे । वः । सूनुम् । सहसः । युवानम् । अद्रोघऽवाचम् । मतिऽभिः । यविष्ठम् ।
यः । इन्वति । द्रविणानि । प्रऽचेताः । विश्वऽवाराणि । पुरुऽवारः । अध्रुक् ॥ १ ॥

हे अग्ने [v]वः । व्यत्ययेन बहुवचनम् । त्वां [v]मतिभिः मननीयैः स्तोत्रैः [v]हुवे आह्वयामि । कीदृशम् । [v]सहसः बलस्य [v]सूनुं पुत्रम् । अग्निर्हि बलेन मथ्यमानो जायते । [v]युवानं नित्यतरुणं फलस्य मिश्रयितारं वा [v]अद्रोघवाचम् । अद्रोघध्व्या[1] प्रशस्ता स्तुतिरूपा वाक् यस्मिन् प्रयुज्यते तादृशम् । [v]यविष्ठम् अतिशयेन युवानम् । [v]प्रचेताः प्रकृष्टज्ञानः [v]पुरुवारः पुरुभिर्बहुभिर्वरणीयः संभजनीयः [v]अध्रुक् अद्रोग्धा यजमानानाम् एवंभूतः [v]यः अग्निः [v]विश्ववाराणि सर्वैर्वरणीयानि संभजनीयानि प्रशस्यानि [v]द्रविणानि धनानि [v]इन्वति प्रेरयति । स्तोतृभ्यो ददातीति यावत् । तं त्वां हुव इति पूर्वत्र संबन्धः ॥

त्वे वसूनि पुर्वणीक होतर्दोषा वस्तोरेरिरे यज्ञियासः ।
क्षामेव विश्वा भुवनानि यस्मिन्त्सं सौभगानि दधिरे पावके ॥ २ ॥

त्वे इति । वसूनि । पुरुऽअनीक । होतः । दोषा । वस्तोः । आ । ईरिरे । यज्ञियासः ।
क्षामऽइव । विश्वा । भुवनानि । यस्मिन् । सम् । सौभगानि । दधिरे । पावके ॥ २ ॥

हे [v]पुर्वणीक बहुज्वाल [v]होतः देवानामाह्वातरग्ने [v]त्वे त्वयि [v]दोषा रात्रौ [v]वस्तोः अहनि च [v]यज्ञियासः यज्ञार्हा यजमानाः [v]वसूनि हविर्लक्षणानि धनानि [v]एरिरे आभिमुख्येन[2] प्रेरयन्ति प्रापयन्ति । जुह्वतीत्यर्थः । [v]विश्वा विश्वानि सर्वाणि [v]भुवनानि भूतजातानि [v]क्षामेव क्षमायां भूम्यामिव [v]यस्मिन् [v]पावके शोधकेऽग्नौ [v]सौभगानि धनानि [v]सं [v]दधिरे देवाः सम्यक् निहितवन्तः । 'अग्नौ वामं वसु सं न्यदधत' (तै. सं. १. ५. १. १) इति ब्राह्मणम्[3] । तस्मिंस्त्वयीति पूर्वत्र योज्यम् ॥

त्वं विक्षु प्रदिवः सीद आसु क्रत्वा रथीरभवो वार्याणाम् ।
अतं इनोषि विधते चिकित्वो व्यानुषग्जातवेदो वसूनि ॥ ३ ॥

त्वम् । विक्षु । प्रऽदिवः । सीदः । आसु । क्रत्वा । रथीः । अभवः । वार्याणाम् ।
अतः । इनोषि । विधते । चिकित्वः । वि । आनुषक् । जातऽवेदः । वसूनि ॥ ३ ॥

हे अग्ने [v]त्वं [v]प्रदिवः । पुराणनामैतत् । पुरातनकालीनासु [v]विक्षु प्रजासु [v]आसु परिदृश्यमानासु च [v]सीदः सीदसि । वैश्वानरात्मना वर्तसे । तथा [v]क्रत्वा आत्मीयेन कर्मणा [v]वार्याणां वरणीयानां

---

१. श–अद्रोगध्री । २. त–आ आभिमुख्येन । ३. ख-भ– तैत्तिरीयं ब्राह्मणम् ।

धनानां ᵛरथीरभवः । रंहयिता[1] यजमानेभ्यः प्रापयिताभूः । ᵛअतः कारणात् हे ᵛचिकित्वः विद्वन् ᵛजातवेदः जातानां प्राणिनां वेदितरग्ने ᵛविधते परिचरते यजमानाय ᵛवसूनि धनानि ᵛआनुषक् अनुषक्तं सततं यथा भवति तथा ᵛवि ᵛइनोषि विविधं प्रेरयसि ॥

प्रवर्म्येऽभिष्टवे ' यो नः सनुत्यः ' इति द्वयृचः । सूत्रितं च–' यो नः सनुत्यो अभिदासदग्ने भवा नो अग्ने सुमना उपेताविति द्वयृचाः ' (आश्व. श्रौ. ४. ६) इति ॥

यो नः सनुत्यो अभिदासदग्ने यो अन्तरो मित्रमहो वनुष्यात् ।
तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तपस्वान् ॥ ४ ॥

यः । नः । सनुत्यः । अभिऽदासत् । अग्ने । यः । अन्तरः । मित्रऽमहः । वनुष्यात् ।
तम् । अजरेभिः । वृषऽभिः । तव । स्वैः । तप । तपिष्ठ । तपसा । तपस्वान् ॥ ४ ॥

हे ᵛअग्ने ᵛयः शत्रुः ᵛसनुत्यः । सनुतरित्यन्तर्हितनाम । अन्तर्हिते देशे वर्तमानः सन् ᵛनः अस्मान् ᵛअभिदासत् उपक्षयति बाधते । ᵛयः च ᵛअन्तरः अभ्यन्तरवर्ती सन् हे ᵛमित्रमहः अनुकूलदीप्ते मित्राणां महयितर्वाग्ने ᵛवनुष्यात् हिंस्यात् ᵛतम् उभयविधं हे ᵛतपिष्ठ तप्ततमाग्ने ᵛतपसा तेजसा ᵛतपस्वान् तेजस्वी त्वम् ᵛअजरेभिः जरारहितैः ᵛवृषभिः वर्षितृभिः वृष्टिहेतुभूतैः[2] ᵛतव ᵛस्वैः स्वभूतैः असाधारणैस्तेजोभिः ᵛतप दह ॥

यस्ते यज्ञेन समिधा य उक्थैरर्केभिः सूनो सहसो ददाशत् ।
स मर्त्येष्वमृत प्रचेता राया द्युम्नेन श्रवसा वि भाति ॥ ५ ॥

यः । ते । यज्ञेन । सम्ऽइधा । यः । उक्थैः । अर्केभिः । सूनो इति । सहसः । ददाशत् ।
सः । मर्त्येषु । अमृत । प्रऽचेताः । राया । द्युम्नेन । श्रवसा । वि । भाति ॥ ५ ॥

हे ᵛसहसः ᵛसूनो बलस्य पुत्राग्ने ᵛते त्वां ᵛयः यजमानः ᵛयज्ञेन यागेन ᵛददाशत् परिचरति । ᵛयः च ᵛसमिधा समिन्धनसाधनेनेध्मेन । यश्च ᵛउक्थैः शस्त्रैः ᵛअर्केभिः अर्चनीयैः स्तोत्रैश्च परिचरति हे ᵛअमृत मरणधर्मरहितानि ᵛसः यजमानः ᵛमर्त्येषु मनुष्येषु ᵛप्रचेताः प्रकृष्टज्ञानः सन् ᵛराया धनेन ᵛद्युम्नेन द्योतमानेन ᵛश्रवसा श्रवणीयेनान्नेन यशसा वा ᵛवि ᵛभाति विशेषेण प्रकाशते ॥

स तत्कृधीषितस्तूयमग्ने स्पृधो बाधस्व सहसा सहस्वान् ।
यच्छस्यसे द्युभिरक्तो वचोभिस्तज्जुषस्व जरितुर्घोषि मन्म ॥ ६ ॥

सः । तत् । कृधि । इषितः । तूयम् । अग्ने । स्पृधः । बाधस्व । सहसा । सहस्वान् ।
यत् । शस्यसे । द्युऽभिः । अक्तः । वचःऽभिः । तत् । जुषस्व । जरितुः । घोषि । मन्म ॥ ६ ॥

---

१. ज्ञ-त–रंहिता । २. ज्ञ-त–वृष्टेर्हेतुभूतैः ।

हे vअग्ने vसः त्वम् vइषितः प्रेषितः सन् vतूयं क्षिप्रं vतत् vकृधि कुरु । किं तदित्यत आह । vसहस्वान् बलवांस्त्वं vस्पृधः स्पर्धमानान् vसहसा बलेन परेषामभिभवनसमर्थेन[1] तेजसा वा vबाधस्व विनाशय । vद्युभिः द्योतमानैस्तेजोभिः vअक्तः संसिक्तस्त्वं vवचोभिः स्तुतिरूपैर्वाक्यैः vयच्छस्यसे यस्तूयसे[2] । त्वामुद्दिश्य यत् स्तोत्रं स्तोतृभिः क्रियत इत्यर्थः । vतत् vमम्म मननीयं vघोषि घोषणीयं vजरितुः स्तोत्रं vजुषस्व सेवस्व ॥

अग्नये कामाय पुरोडाशमष्टाकपालमित्यस्य ' अश्याम ' इत्येषा याज्या । सूत्रितं च—' अश्याम तं काममग्ने तवोतीति कामाय ' (आश्व. श्रौ. २. १०) इति ॥

अश्याम॒ तं काम॑मग्ने तवो॒ती अश्या॑म॒ र॒यिं र॑यिवः सु॒वीर॑म् ।
अश्याम॒ वाज॑म॒भि वा॒जय॑न्तो॒ऽश्याम॑ द्यु॒म्नम॑जरा॒जरं॑ ते ॥ ७ ॥

अश्याम॑ । तम् । काम॑म् । अग्ने॑ । तव॑ । ऊ॒ती । अश्या॑म । र॒यिम् । र॒यि॒ऽवः॒ । सु॒वीर॑म् ।
अश्याम॑ । वाज॑म् । अ॒भि । वा॒जय॑न्तः । अश्या॑म । द्यु॒म्नम् । अ॒जर॒ । अ॒जर॑म् । ते॒ ॥ ७ ॥

हे vअग्ने vतव संबन्धिन्या vऊती ऊत्या रक्षया vतं vकामम् vअश्याम प्राप्नुयाम । तमेव कामं विवृणोति । हे vरयिवः धनवन्नग्ने vसुवीरं शोभनपुत्रादियुक्तं vरयिं धनम् vअश्याम प्राप्नुयाम । तथा vवाजयन्तः वाजमन्नमात्मन इच्छन्तो वयं vवाजं त्वया दत्तमन्नम् vअभि आभिमुख्येन vअश्याम प्राप्नुयाम । हे vअजर जरारहिताग्ने vते त्वदीयम् vअजरं जरारहितं vद्युम्नं द्योतमानं यशश्च vअश्याम प्राप्नुयाम ॥ ॥ ७ ॥

' प्र नव्यसा ' इति सप्तर्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम् । ' प्र नव्यसा ' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

प्र नव्य॑सा सह॑सः सू॒नुम॑च्छा य॒ज्ञेन॑ गा॒तुम॑व इ॒च्छमा॑नः ।
वृ॒श्चद्व॑नं कृ॒ष्णया॑मं रु॒शन्तं॑ वी॒ती होता॑रं दि॒व्यं जि॑गाति ॥ १ ॥

प्र । नव्य॑सा । सह॑सः । सू॒नुम् । अच्छ॑ । य॒ज्ञेन॑ । गा॒तुम् । अवः॑ । इ॒च्छमा॑नः ।
वृ॒श्चत्ऽव॑नम् । कृ॒ष्णया॑मम् । रु॒शन्त॑म् । वी॒ती । होता॑रम् । दि॒व्यम् । जि॒गा॒ति॒ ॥ १ ॥

vगातुम् उपगन्तव्यं स्तोतव्यं वा vसहसः vसूनुं बलस्य पुत्रमग्निम् vअवः अन्नं रक्षणं वा vइच्छमानः इच्छन् स्तोता vनव्यसा[3] नवतरेण vयज्ञेन युक्तः सन् vअच्छ आभिमुख्येन vप्र vजिगाति प्रकर्षेण गच्छति । कीदृशमग्निम् । vवृश्चद्वनं वृक्णं[4] छिन्नं दग्धं[4] वनं येन तादृशं vकृष्णयामं कृष्णवर्त्मानं vरुशन्तं श्वेतवर्णं vवीती वीत्या कान्तेन यज्ञेन vहोतारं यष्टारं vदिव्यं दिवि भवम् ॥

---

१. ज्ञ-त–परेषामभिभव० । २. ज्ञ-त–स्तूयसे । ३. ज्ञ-त–नव्यसा नवीयसा (त-नवीयस्य) । ४. घ–निर्दग्धम्; श–वृक्तं निर्दग्धम् ।

स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः ।
यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन् ॥ २ ॥

सः । श्वितानः । तन्यतुः । रोचनऽस्थाः । अजरेभिः । नानदत्ऽभिः । यविष्ठः ।
यः । पावकः । पुरुऽतमः । पुरूणि । पृथूनि । अग्निः । अनुऽयाति । भर्वन् ॥ २ ॥

[v]सः अग्निः [v]श्वितानः श्वेतमानः श्वेतवर्णो वर्तते । [v]तन्यतुः शब्दकारी [v]रोचनस्थाः । रोचन्ते अस्मिन् ग्रहनक्षत्रादीनीति रोचनमन्तरिक्षम् । तत्र स्थितः [v]अजरेभिः जरारहितैः [v]नानदद्भिः अत्यर्थं शब्दं कुर्वद्भिर्मरुद्भिर्युक्तो रश्मिभिर्वा [v]यविष्ठः युवतमः । [v]यः [v]पावकः शोधकः [v]अग्निः [v]पुरुतमः अतिशयेन प्रभूतः सन् [v]पुरूणि बहूनि [v]पृथूनि स्थूलानि काष्ठानि [v]भर्वन्[1] भक्षयन् [v]अनुयाति अनुगच्छति स इत्थमित्थं वर्तत इति पूर्वत्र संबन्धः ॥

गार्हपत्यादीनां मिथः संसर्गेऽग्नये विविचय इष्टिः कर्तव्या । तत्र 'वि ते' इत्येषानुवाक्या[2] (आश्व. श्रौ. ३. १३) ॥

वि ते विष्वग्वातजूतासो अग्ने भामासः शुचे शुचयश्चरन्ति ।
तुविम्रक्षासो दिव्या नवग्वा वना वनन्ति धृषता रुजन्तः ॥ ३ ॥

वि । ते । विष्वक् । वातऽजूतासः । अग्ने । भामासः । शुचे । शुचयः । चरन्ति ।
तुविऽम्रक्षासः । दिव्याः । नवऽग्वाः । वना । वनन्ति । धृषता । रुजन्तः ॥ ३ ॥

हे [v]शुचे शुद्ध दीप्त वा [v]अग्ने [v]ते त्वदीयाः [v]वातजूतासः वातेन प्रेरिताः [v]शुचयः निर्मलाः [v]भामासः दीप्तयः [v]विष्वक् सर्वतः [v]वि [v]चरन्ति विविधं गच्छन्ति । [v]तुविम्रक्षासः बहूनि काष्ठानि स्पृशन्तः [v]दिव्याः दिवि द्योतमानेऽग्नौ भवाः [v]नवग्वाः नूतनगमनास्ते रश्मयः [v]वना वनानि [v]वनन्ति संभजन्ते । दहन्तीत्यर्थः । किं कुर्वन्तः । [v]धृषता धर्षकेण तेजसा [v]रुजन्तः वनानि[3] भञ्जयन्तः ॥

ये ते शुक्रासः शुचयः शुचिष्मः क्षां वपन्ति विषितासो अश्वाः ।
अध भ्रमस्त उर्विया वि भाति यातयमानो अधि सानु पृश्नेः ॥ ४ ॥

ये । ते । शुक्रासः । शुचयः । शुचिष्मः । क्षाम् । वपन्ति । विऽसितासः । अश्वाः ।
अध । भ्रमः । ते । उर्विया । वि । भाति । यातयमानः । अधि । सानु । पृश्नेः ॥ ४ ॥

हे [v]शुचिष्मः दीप्तिमन्नग्ने [v]ते तव [v]शुक्रासः शुभ्राः [v]ये [v]शुचयः दीप्तयः [v]क्षां पृथिवीं भूमिं [v]वपन्ति मुण्डयन्ति । केशस्थानीयानोषधिवनस्पतीन् दहन्तीत्यर्थः । 'अग्निर्ह दाति रोमा पृथिव्याः'

---

१. त१–भर्वन् भजन् । २. न–अनुवाक्या । सूत्रितं च–वि ते विष्वग्वातजूतासो अग्ने त्वामग्ने मानुषीरीळते विश इति । ३. ख-ङ्ग-भ-य–वना वनानि ।

(ऋ. सं. १. ६५. ४) इति निगमान्तरम् । ते रश्मयः ᵛविषितासः विमुक्ताः ᵛअश्वाः इव इतस्ततो गच्छन्तीति शेषः । ᵛअध अस्मिन् काले ᵛते स्वदीयः ᵛभ्रमः भ्रमणशीलो ज्वालासमूहः ᵛपृथ्वेः नानारूपाया भूमेः ᵛअधि उपरि ᵛसानु समुच्छ्रितं देशं पर्वताग्रादिकं प्रति ᵛयातयमानः स्वकीयमग्रं व्यापारयन् ᵛउर्विया उरु बहुलं ᵛवि ᵛभाति विशेषेण प्रकाशते ॥

अधा जिह्वा पापतीति प्र वृष्णो गोषुयुधो नाशनिः सृजाना ।
शूरस्येव प्रसितिः क्षातिरग्नेर्दुर्वर्तुर्भीमो दयते वनानि ॥ ५ ॥

अध । जिह्वा । पापतीति । प्र । वृष्णः । गोषुऽयुधः । न । अशनिः । सृजाना ।
शूरस्यऽइव । प्रऽसितिः । क्षातिः । अग्नेः । दुःऽवर्तुः । भीमः । दयते । वनानि ॥ ५ ॥

ᵛअध अपि च ᵛवृष्णः वर्षितुरग्नेः ᵛजिह्वा ज्वाला ᵛप्र ᵛपापतीति प्रकर्षेण पुनःपुनः पतति गच्छति । तत्र दृष्टान्तः । ᵛगोषुयुधो ᵛनाशनिः ᵛसृजाना । असुरैरपहृतासु गोषु युध्यन्निन्द्रो गोषुयुत् । तस्मात् सृज्यमानाशनिर्वज्र इव । तथा ᵛशूरस्येव शौर्योपेतस्य नरस्य ᵛप्रसितिः प्रबन्धनं यथान्यैः दुःसहमेवम् ᵛअग्नेः ᵛक्षातिः ज्वाला सोढुमशक्येत्यर्थः । क्षीयन्ते दह्यन्तेऽस्यामोषधिवनस्पतय इति क्षायतेरधिकरणे क्तिन् ॥ अपि च ᵛदुर्वर्तुः दुर्वारोऽन्यैर्वारयितुमशक्यः ᵛभीमः भयंकरोऽग्निः ᵛवनानि ᵛदयते दहति । दयतिरत्र दहतिकर्मा ॥

आ भानुना पार्थिवानि व्रयाँसि महस्तोदस्य धृषता ततन्थ ।
स बाधस्वाप भया सहोभिः स्पृधो वनुष्यन्वनुषो नि जूर्व ॥ ६ ॥

आ । भानुना । पार्थिवानि । व्रयाँसि । महः । तोदस्य । धृषता । ततन्थ ।
सः । बाधस्व । अप । भया । सहःऽभिः । स्पृधः । वनुष्यन् । वनुषः । नि । जूर्व ॥ ६ ॥

हे अग्ने ᵛभानुना दीप्त्या ᵛपार्थिवानि पृथिव्यां भवानि ᵛव्रयांसि ॥ व्रयतिर्गतिकर्मा ॥ गन्तव्यानि स्थानानि ᵛमहः महतः ᵛतोदस्य प्रेरकस्य ᵛधृषता धर्षकेण रश्मिना सह ᵛआ ᵛततन्थ आस्तृणासि आच्छादयसि । ᵛसः त्वं ᵛभया भयकरणानि ᵛअप ᵛबाधस्व । तथा ᵛसहोभिः अभिभवनसमर्थैर्बलैस्तेजोभिर्वा ᵛस्पृधः स्पर्धमानान् ᵛवनुष्यन् हिंसन् ᵛवनुषः हिंसकान् । शत्रूनिति । ᵛनि ᵛजूर्व निजहि ॥ जूर्वतिर्हन्तिकर्मा ॥

उखासंभरणीयेष्टावग्नेः क्षत्रवतः ' स चित्र ' इत्येषा याज्या । सूत्रितं च—' स चित्र चित्रं चितयन्तमस्मे अग्निरीशे बृहतः क्षत्रियस्य ' (आश्व. श्रौ. ४. १) इति ॥

स चित्र चित्रं चितयन्तमस्मे चित्रक्षत्र चित्रतमं वयोधाम् ।
चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्रं चन्द्राभिर्गृणते युवस्व ॥ ७ ॥

सः । चित्र । चित्रम् । चितयन्तम् । अस्मे इति । चित्रक्षत्र । चित्रऽतमम् । वयःऽधाम् ।
चन्द्रम् । रयिम् । पुरुऽवीरम् । बृहन्तम् । चन्द्र । चन्द्राभिः । गृणते । युवस्व ॥ ७ ॥

हे [v]चित्र चायनीय हे [v]चित्रक्षत्र विचित्रबल चायनीयधन वा हे [v]चन्द्र आह्लादकाग्ने [v]सः तादृशस्त्वं [v]चन्द्राभिः आह्लादयित्रीभिः स्तुतिभिः [v]गृणते स्तुवते। वचनव्यत्ययः। स्तुवन्नयः [v]अस्मे अस्मभ्यं दातुं [v]रयिं धनं [v]युवस्व पृथक् कुरु। कीदृशं रयिम्। [v]चित्रं चायनीयं [v]चितयन्तं ज्ञापयन्तम्। धनेन हि पुरुषः प्रख्यायते। [v]चित्रतमम् अतिशयेनाश्चर्यभूतं [v]वयोधां वयसोऽन्नस्य धातारं प्रदातारं [v]चन्द्रम् आह्लादकं [v]पुरुवीरं पुरुभिर्बहुभिर्वीरैः पुत्रपौत्रादिभिर्युक्तं [v]बृहन्तं महान्तम्। ईदृशं धनमस्मभ्यं प्रयच्छेत्यर्थः॥ ॥ ८ ॥

' मूर्धानम् ' इति सप्तर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं वैश्वानराग्निदेवताकम्। षष्ठीसप्तम्यौ जगत्यौ शिष्टाः पञ्च त्रिष्टुभः। तथा चानुक्रान्तं—' मूर्धानं वैश्वानरीयं हि द्विजगत्यन्तम् ' इति। गतः सूक्तविनियोगः। विषुवत्याग्निमारुत आद्यस्तृचो वैकल्पिकः स्तोत्रियः। तथैव सूत्रितं—' मूर्धानं दिवो अरतिं पृथिव्या मूर्धा दिवो नाभिरग्निः पृथिव्या इति वा ' (आश्व. श्रौ. ८. ६) इति॥

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम्।
कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः॥ १॥

मूर्धानम्। दिवः। अरतिम्। पृथिव्याः। वैश्वानरम्। ऋते। आ। जातम्। अग्निम्। कविम्। सम्ऽराजम्। अतिथिम्। जनानाम्। आसन्। आ। पात्रम्। जनयन्त। देवाः॥१॥

[v]मूर्धानं शिरोभूतम्। कस्य। [v]दिवः द्युलोकस्य [v]पृथिव्याः प्रथिताया भूमेः [v]अरतिं गन्तारम्। यद्वा। गन्तव्यं स्वामिनं [v]वैश्वानरं विश्वेषां नराणां संबन्धिनम् [v]ऋते। ऋतमिति सत्यस्य यज्ञस्य वा नाम। निमित्तसप्तम्येषा। ऋतनिमित्तम् [v]आ आभिमुख्येन [v]जातं सृष्ट्यादावुत्पन्नं [v]कविं क्रान्तदर्शिनं [v]सम्राजं सम्यग्राजमानं [v]जनानां यजमानानाम् [v]अतिथिं हविर्वहनाय सततं गन्तारम्। यद्वा[1]। अतिथिवत्पूज्यम्[1]। [v]आसन् आसनि आस्ये। द्वितीयार्थे सप्तमी। आस्यभूतम्। अग्निलक्षणेनास्येन हि देवा हवींषि भुञ्जते। [v]पात्रं पातारं रक्षकम्। यद्वा। आस्येन धारकम्। एवंगुणविशिष्टं वैश्वानराग्निं [v]देवाः स्तोतार ऋत्विजो देवा एव वा [v]आ [v]जनयन्त। यज्ञाभिमुख्येन अजीजनन्[2]। अरण्योः सकाशादुदपादयन्॥

नाभिं यज्ञानां सदनं रयीणां महामाहावमभि सं नवन्त।
वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः॥ २॥

नाभिम्। यज्ञानाम्। सदनम्। रयीणाम्। महाम्। आऽहावम्। अभि। सम्। नवन्त। वैश्वानरम्। रथ्यम्। अध्वराणाम्। यज्ञस्य। केतुम्। जनयन्त। देवाः॥ २॥

[v]यज्ञानां ज्योतिष्टोमादियागानां [v]नाभिं नहनं बन्धकं तथा [v]रयीणां धनानां [v]सदनं स्थानमेकनिलयं [v]महां महान्तम् [v]आहावम्। आहूयन्तेऽस्मिन्नाहुतय इत्याहावः। तादृशम्। यद्वा।

---

१. ख-घ-ञ-भ-य-र-' यद्वा...पूज्यं ' नास्ति। २. य-अजनयन्।

वृष्टयुदकधारणमाहावं निपानस्थानीयम्। एवंभूतमग्निम् vअभि अभितः vसं vनवन्त स्तोतारः सम्यक् स्तुवन्ति। तथा vवैश्वानरं विश्वेषां नराणां संबन्धिनम् vअध्वराणां यज्ञानां[1] vरथ्यं रथिनम्। यथा रथी स्वरथं नयति तद्वत्प्रेतारं प्राहयितारं[2] गमयितारं vयज्ञस्य vकेतुं प्रज्ञापकम्। एवंविधमग्निं vदेवाः स्तोतार ऋत्विजो देवा एव वा vजनयन्त जनयन्ति मथनेनोत्पादयन्ति॥

त्वद्विप्रो॑ जायते वा॒ज्यग्ने॒ त्वद्वी॒रासो॑ अभिमाति॒षाहः॑।
वैश्वा॑नर॒ त्वम॒स्मासु॑ धेहि॒ वसू॑नि राजन्त्स्पृह॒याय्या॑णि॥ ३॥

त्वत्। विप्रः। जायते। वाजी। अग्ने। त्वत्। वीरासः। अभिमातिऽसहः।
वैश्वानर। त्वम्। अस्मासु। धेहि। वसूनि। राजन्। स्पृहयाय्याणि॥ ३॥

हे vअग्ने vवाजी हविर्लक्षणान्नवान् पुरुषः vत्वत् त्वत्तः सकाशात् vविप्रः मेधावी vजायते। तुभ्यं हविर्दानेन मेधावी भवति। तथा vवीरासः वीराः vत्वत् त्वत्तः vअभिमातिषाहः अभिमातीनां शत्रूणामभिभवितारो जायन्ते। यस्मादेवं तस्मात् हे vवैश्वानर vराजन् राजमानाग्ने vत्वमस्मासु त्वद्भक्तेषु vस्पृहयाय्याणि स्पृहणीयानि vवसूनि धनानि vधेहि निधेहि॥

त्वां विश्वे॑ अमृत॒ जाय॑मानं॒ शिशुं॒ न दे॒वा अ॒भि सं न॑वन्ते।
तव॒ क्रतु॑भिरमृत॒त्वमा॑य॒न्वैश्वा॑नर॒ यत्पि॒त्रोरदी॑दे॒ः॥ ४॥

त्वाम्। विश्वे। अमृत। जायमानम्। शिशुम्। न। देवाः। अभि। सम्। नवन्ते।
तव। क्रतुऽभिः। अमृतऽत्वम्। आयन्। वैश्वानर। यत्। पित्रोः। अदीदेः॥ ४॥

हे vअमृत मरणधर्मरहिताग्ने[3] vविश्वे सर्वे vदेवाः स्तोतारः vजायमानम् अरण्योः सकाशात् उत्पद्यमानं vत्वां vशिशुं vन पुत्रमिव vअभि vसं vनवन्ते अभिसंस्तुवन्ति[4]। यद्वा। दीव्यन्तीति देवा रश्मयः। ते सर्वे जायमानं त्वामभि सं नवन्ते अभिसंगच्छन्ते यथा पितरः पुत्रमभिगच्छन्ति। अपि च हे vवैश्वानर अग्ने vयत् यदा vपित्रोः पालयित्र्योर्द्यावापृथिव्योर्मध्ये vअदीदेः दीप्यसे तदानीं vतव त्वदीयैः vक्रतुभिः कर्मभिर्ज्योतिष्टोमादिभिर्यागैः vअमृतत्वं देवत्वम् vआयन् यजमानाः प्राप्नुवन्ति॥

वैश्वा॑नर॒ तव॒ तानि॑ व्र॒तानि॑ म॒हान्य॑ग्ने॒ नकि॒रा द॑धर्ष।
यज्जाय॑मानः पि॒त्रोरु॒पस्थेऽवि॑न्दः के॒तुं व॒युने॒ष्वह्ना॑म्॥ ५॥

वैश्वानर। तव। तानि। व्रतानि। महानि। अग्ने। नकिः। आ। दधर्ष।
यत्। जायमानः। पित्रोः। उपऽस्थे। अविन्दः। केतुम्। वयुनेषु। अह्नाम्॥ ५॥

---

१. घ-ज्ञ-त-न-श–यज्ञानां संबन्धिनम्। २. ज्ञ-त–प्रहीतारम्। ३. य–मरणरहिताग्ने। ४. न–अभिसंगच्छन्ते; श–अभिसंगच्छन्ते अभिसंस्तुवन्ति।

हे [v]वैश्वानर विश्वेषां नराणां संबन्धिन् [v]अग्ने [v]तव त्वदीयानि [v]तानि प्रसिद्धानि [v]व्रतानि कर्माणि [v]महानि महान्ति [v]नकिरा [v]दधर्ष न कश्चनान्यो धर्षयति बाधते[1]। [v]यत् यदा त्वं [v]पित्रोः द्यावापृथिव्योः [v]उपस्थे उपस्थानेऽन्तरिक्षे [v]वयुनेषु गन्तव्येषु मार्गेषु [v]जायमानः सन् [v]अह्नां [v]केतुं प्रज्ञापकं सूर्यं स्वर्भानुनावृतम् .[v]अविन्दः अलम्भयः। तमोरूपमसुरं स्वतेजसा निवारयन्नस्थापय इत्यर्थः। तदा तानि व्रतानीति पूर्वत्रान्वयः ॥

वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना।
तस्येदु विश्वा भुवनाधि मूर्धनि वयाइव रुरुहुः सप्त विस्रुहः ॥ ६ ॥

वैश्वानरस्य। विऽमितानि। चक्षसा। सानूनि। दिवः। अमृतस्य। केतुना।
तस्य। इत्। ऊँ इति। विश्वा। भुवना। अधि। मूर्धनि। वयाःऽइव। रुरुहुः। सप्त। विऽस्रुहः ॥६॥

[v]वैश्वानरस्य विश्वनरहितस्याग्नेः [v]चक्षसा तेजसा [v]अमृतस्य उदकस्य [v]केतुना प्रज्ञापकेन [v]दिवः द्युलोकस्य [v]सानूनि समुच्छ्रितस्थलानि नक्षत्ररूपाणि [v]विमितानि निर्मितानि। यद्वा। दिवोऽन्तरिक्षस्य सानूनि समुच्छ्रितप्रदेशा मेघात्मका विमितानि निर्मिताः। धूमविकारत्वात्तेषाम्। [v]तस्येदु तस्यैव वैश्वानरस्य [v]मूर्धनि मूर्धस्थानीय उपरि वर्तमाने धूमे मेघात्मना परिणते [v]विश्वा विश्वानि व्याप्तानि [v]भुवना भुवनान्युदकानि [v]अधि वसन्ति। यद्वा। वैश्वानरात्मकस्य परब्रह्मणो मूर्धन्युपरिप्रदेशे सर्वाणि भूतजातान्यधिवसन्ति। तथा [v]वयाः शाखाः [v]इव [v]सप्त सर्पणशीलाः सप्तसंख्याः[2] वा [v]विस्रुहः नद्यश्च गङ्गाद्याः [v]रुरुहुः रोहन्ति। अस्मादेव वैश्वानरात् प्रादुर्भवन्ति। आहुतिद्वारा सकलं जगदग्नेः सकाशादुत्पद्यत इत्यर्थः।

वि यो रजांस्यमिमीत सुक्रतुर्वैश्वानरो वि दिवो रोचना कविः।
परि यो विश्वा भुवनानि पप्रथेऽदब्धो गोपा अमृतस्य रक्षिता ॥ ७ ॥

वि। यः। रजांसि। अमिमीत। सुऽक्रतुः। वैश्वानरः। वि। दिवः। रोचना। कविः।
परि। यः। विश्वा। भुवनानि। पप्रथे। अदब्धः। गोपाः। अमृतस्य। रक्षिता ॥ ७ ॥

[v]सुक्रतुः सुकर्मा [v]वैश्वानरः विश्वेषां नराणां हितः [v]यः अग्निः [v]रजांसि उदकानि लोकान् वा [v]वि [v]अमिमीत निर्मितवान्। तथा [v]दिवः द्युलोकस्य संबन्धीनि [v]रोचना रोचमानानि दीप्यमानानि नक्षत्रादीनि [v]कविः क्रान्तदर्शी सन् योऽग्निः [v]वि अमिमीत। [v]यः च [v]विश्वा सर्वाणि [v]भुवनानि भूतजातानि व्याप्तान्युदकानि वा [v]परि [v]पप्रथे परितोऽप्रथयत् सोऽयम् [v]अदब्धः केनाप्यहिंसितः [v]गोपाः सर्वस्य गोपायिता रक्षिता [v]अमृतस्य अमरणहेतोरुदकस्य [v]रक्षिता पालयिता सन् वर्तत इति शेषः ॥ ॥ ९ ॥

---

१. श–न बाधते। २. य–सप्तसंख्याकाः।

'पृक्षस्य' इति सप्तर्चमष्टमं सूक्तं भरद्वाजस्यार्षं वैश्वानराग्निदेवताकम्। आदितः[1] षट् जगत्यः सप्तमी त्रिष्टुप्। तथा चानुक्रान्तं—'पृक्षस्यान्त्या त्रिष्टुप्' इति। चातुर्विंशिकेऽहन्याग्निमारुते इदं सूक्तं वैश्वानरीयनिविद्धानम्। सूत्रितं च—'पृक्षस्य वृष्णो वृष्णे शर्धाय' (आश्व. श्रौ. ७. ४) इति। आभिप्लविके पृष्ठ्याभिप्लवषडहयोः पञ्चमेऽहनीदमेव सूक्तं वैश्वानरनिविद्धानम्। सूत्रितं च—'पृक्षस्य वृष्णो वृष्णे शर्धाय नू चित्सहोजा इत्याग्निमारुतम्' (आश्व. श्रौ. ७. ७) इति। विषुवत्याग्निमारुत आद्यौ तृचौ स्तोत्रियानुरूपौ। सूत्रितं च—'पृक्षस्य वृष्णो अरुषस्य नू सह इति स्तोत्रियानुरूपौ' (आश्व. श्रौ. ८. ६) इति॥

पृक्षस्य वृष्णो अरुषस्य नू सहः प्र नु वोचं विदथा जातवेदसः।
वैश्वानराय मतिर्नव्यसी शुचिः सोमइव पवते चारुरग्नये॥ १॥

पृक्षस्य। वृष्णः। अरुषस्य। नु। सहः। प्र। नु। वोचम्। विदथा। जातऽवेदसः।
वैश्वानराय। मतिः। नव्यसी। शुचिः। सोमःऽइव। पवते। चारुः। अग्नये॥ १॥

vपृक्षस्य संपृक्तस्य व्याप्तस्य। यद्वा। पृक्षं हविर्लक्षणमन्नम्। तद्वतः। vवृष्णः कामानां वर्षितुः vअरुषस्य आरोचमानस्य vजातवेदसः जातानां वेदितुर्वैश्वानराग्नेः vसहः बलमभिभवनसमर्थं vविदथा विदथे यज्ञेv नु क्षिप्रं vप्र vवोचं प्रब्रवीमि। प्रकर्षेण स्तौमीत्यर्थः। एको नुशब्दः पूरकः। vनव्यसी नवतरा vशुचिः निर्मला यद्वा स्तोतॄणां शोधयित्री vचारुः शोभना vमतिः मननीया स्तुतिश्चास्मै vवैश्वानराय vअग्नये vपवते। मत्सकाशात् स्रवति। स्वयमेव निर्गच्छतीत्यर्थः। vसोमइव। यथा सोमो दशापवित्रात् स्रवति तद्वत्॥

स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत।
व्यन्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत्॥ २॥

सः। जायमानः। परमे। विऽओमनि। व्रतानि। अग्निः। व्रतऽपाः। अरक्षत।
वि। अन्तरिक्षम्। अमिमीत। सुऽक्रतुः। वैश्वानरः। महिना। नाकम्। अस्पृशत्॥ २॥

vसः वैश्वानरः vअग्निः vव्रतपाः व्रतस्य पालकः vपरमे उत्कृष्टे vव्योमनि व्योम्न्याकाशे vजायमानः सूर्यात्मना प्रादुर्भवन् vव्रतानि कर्माणि लौकिकानि वैदिकानि च vअरक्षत रक्षति। vअन्तरिक्षं च vवि vअमिमीत। एतदुपलक्षितांस्त्रीन् लोकान्निर्मितवान्। तथा vसुक्रतुः शोभनकर्मा vवैश्वानरः अग्निः vमहिना स्वमहिम्ना तेजसा vनाकं द्युलोकम् vअस्पृशत् स्पृशति स्म॥

---

१. त—आद्याः।

व्यस्तभ्नाद्रोदसी मित्रो अद्भुतोऽन्तर्वावदक्रणोज्ज्योतिषा तमः ।
वि चर्मणीव धिषणे अवर्तयद्वैश्वानरो विश्वमधत्त वृष्ण्यम् ॥ ३ ॥

वि । अस्तभ्नात् । रोदसी इति । मित्रः । अद्भुतः । अन्तः ऽवावत् । अक्रणोत् । ज्योतिषा । तमः ।
वि । चर्मणी इवेति चर्मणी ऽइव । धिषणे इति । अवर्तयत् ।
वैश्वानरः । विश्वम् । अधत्त । वृष्ण्यम् ॥ ३ ॥

vमित्रः मित्रभूतः सर्वेषाम् vअद्भुतः महान् आश्चर्यभूतो वा वैश्वानरोऽग्निः vरोदसी द्यावापृथिव्यौ vव्यस्तभ्नात् विशेषेण स्तम्भितवान्। यथाधो न पततस्तथा स्वकीयदेशे स्थापितवानित्यर्थः। तथा vज्योतिषा तेजसा vतमः अन्धकारं च vअन्तर्वावत् अन्तर्हितं तिरोहितम् vअक्रणोत् अकरोत् ॥ वावदिति वातेर्गतिकर्मणो यङ्लुगन्तस्य रूपम् ॥ अपि च vधिषणे धारयित्र्यौ द्यावापृथिव्यौ vचर्मणीव यथा पशोर्विशसिता द्वे चर्मणी शोषणार्थं प्रसारयति तथा vवि vअवर्तयत् विवृते विस्तृते अकरोत्। किं बहुना vवैश्वानरः अयमग्निः vविश्वं सर्वं vवृष्ण्यं वीर्यम् vअधत्त धत्ते धारयति ॥

अपामुपस्थे महिषा अगृभ्णत विशो राजानमुप तस्थुरृग्मियम् ।
आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मातरिश्वा परावतः ॥ ४ ॥

अपाम् । उपऽस्थे । महिषाः । अगृभ्णत । विशः । राजानम् । उप । तस्थुः । ऋग्मियम् ।
आ । दूतः । अग्निम् । अभरत् । विवस्वतः । वैश्वानरम् । मातरिश्वा । पराऽवतः ॥ ४ ॥

आप इत्यन्तरिक्षनाम । vअपाम् अन्तरिक्षस्य vउपस्थे उपस्थाने मध्ये vमहिषाः । महन्नामैतत्। महान्तो मरुतः vअगृभ्णत अगृह्णन् । इमं वैश्वानरं वैद्युतात्मना वर्तमानमजानन्निस्यर्थः । गृहीत्वा च vविशः प्रजाः vराजानं स्वामिनम् vऋग्मियम् अर्चनीयम्[1] vउप vतस्थुः अस्तुवन् । अपि चेमं vवैश्वानरम् vअग्निं पुरा सूर्यसमीपे विद्यमानं vदूतः वेगवान् देवानां दूतो वा vमातरिश्वा वायुः vपरावतः दूरदेशात् vविवस्वतः आदित्यात् vआ vअभरत् इमं लोकं प्रत्याजहार ॥

युगेयुगे विदथ्यं गृणद्भ्योऽग्ने रयिं यशसं धेहि नव्यसीम् ।
पव्येव राजन्नघशंसमजर नीचा नि वृश्च वनिनं न तेजसा ॥ ५ ॥

युगेऽयुगे । विदथ्यम् । गृणत्ऽभ्यः । अग्ने । रयिम् । यशसम् । धेहि । नव्यसीम् ।
पव्याऽइव । राजन् । अघऽशंसम् । अजर । नीचा । नि । वृश्च । वनिनम् । न । तेजसा ॥५॥

हे vअग्ने vयुगेयुगे काले काले vविदथ्यम् । विदथो यज्ञः । तदर्हं त्वामुद्दिश्य vनव्यसीं नवतरां स्तुतिं vगृणद्भ्यः उच्चारयितृभ्योऽस्मभ्यं vरयिं धनं vयशसं यशस्विनं पुत्रं च vधेहि विधेहि कुरु ।

---

१. ख-ग्न-त-न-भ-र–अर्चनीयं तम् ।

किंच हे vराजन् राजमान vअजर जरारहिताग्ने vपष्येव वज्रेणेवास्मीयेन vतेजसा vवनिनं vन वृक्षमिव vअघशंसम् अघस्यानर्थस्य शंसितारं शत्रुं vनीचा नीचीनो न्यग्भूतो यथा भवति तथा vनि vवृश्च निजहि[1] ॥

अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरꣳ सुवीर्यम् ।
वयं जयेम शतिनꣳ सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः ॥ ६ ॥

अस्माकम् । अग्ने । मघवत्ऽसु । धारय । अनामि । क्षत्रम् । अजरम् । सुऽवीर्यम् ।
वयम् । जयेम । शतिनम् । सहस्रिणम् । वैश्वानर । वाजम् । अग्ने । तव । ऊतिऽभिः ॥ ६ ॥

हे vअग्ने vअस्माकम् । सप्तम्यर्थे षष्ठी । अस्मासु vमघवत्सु हविर्लक्षणेन धनेन युक्तेषु vक्षत्रं धनं vधारय स्थापय । कीदृशम् । vअनामि अनमनीयमनपहार्यम् vअजरं जरारहितमनश्वरं vसुवीर्यं शोभनवीर्योपेतम् । किंच हे vवैश्वानर vअग्ने vतवोतिभिः त्वत्संबन्धिभी रक्षणैः vवयं vशतिनं शत-संख्यायुक्तं शतपुरुषयुक्तं वा तथा vसहस्रिणं vवाजम् अन्नं vजयेम लभेमहि ॥

अदब्धेभिस्तव गोपाभिरिष्टेऽस्माकं पाहि त्रिषधस्थ सूरीन् ।
रक्षा च नो दुदुषां शर्धो अग्ने वैश्वानर प्र च तारीः स्तवानः ॥ ७ ॥

अदब्धेभिः । तव । गोपाभिः । इष्टे । अस्माकम् । पाहि । त्रिऽसधस्थ । सूरीन् ।
रक्ष । च । नः । दुदुषाम् । शर्धः । अग्ने । वैश्वानर । प्र । च । तारीः । स्तवानः ॥ ७ ॥

हे vइष्टे यष्टव्य एषणीय वा vत्रिषधस्थ त्रिषु लोकेषु सहावस्थायिन् यद्वा आहवनीयादिषु त्रिष्वा-यतनेषु यष्टव्यैर्देवैः सहावतिष्ठमानाग्ने vअदब्धेभिः केनाप्यहिंसितैः vतव त्वदीयैः vगोपाभिः गोपकैः रक्षकैस्तेजोभिः vअस्माकं vसूरीन् अस्मदीयान् स्तोतॄन् vपाहि रक्ष । हे vवैश्वानर vअग्ने vददुषां हवींषि दत्तवतां vनः अस्माकं vशर्धः बलं vरक्ष vच । vस्तवानः स्तूयमानस्त्वं vप्र vच vतारीः प्रवर्धय च ॥ ॥ १० ॥

'अहश्च' इति सप्तर्चं नवमं सूक्तं भरद्वाजस्यार्षं वैश्वानराग्निदेवताकम् । अनुक्रान्तं च—'अहश्च' इति । व्यूळ्हे दशरात्रे षष्ठेऽहन्याग्निमारुतशस्त्रे वैश्वानरनिविद्धानमिदम् । सूत्र्यते हि—'अहश्च कृष्णं मध्वो वो नाम' (आश्व. श्रौ. ८. ८) इति ॥

अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि ॥ १ ॥

अहरिति । च । कृष्णम् । अहः । अर्जुनम् । च । वि । वर्तेते इति । रजसी इति । वेद्याभिः ।
वैश्वानरः । जायमानः । न । राजा । अव । अतिरत् । ज्योतिषा । अग्निः । तमांसि ॥१॥

---

१. श–नितरां छिन्द्धि ।

आहरति पुरुषोऽस्मिन् कर्माणीति ᵛअहः । ᵛकृष्णं कृष्णवर्णम् । एतत्सामानाधिकरण्यादहःशब्दो रात्रिवचनः । तमसा कृष्णवर्णा रात्रिः ᵛच ᵛअर्जुनं ᵛच सौरेण तेजसा शुक्लवर्णम् ᵛअहः दिवसश्च ᵛरजसी स्वस्वभासा सर्वं जगद्व्याप्नुवन्तौ ᵛवेद्याभिः वेदितव्याभिरनुकूलतया ज्ञातव्याभिः स्वप्रवृत्तिभिः[1] ᵛवि ᵛवर्तेते विविधं पर्यावर्तेते । यद्वा । रजसी द्यावापृथिव्यौ । उपलक्षणमेतत् । लोकत्रयं प्रत्यावर्तेते । एतच्च[2] वैश्वानराग्नेराज्ञया[3] इति शेषः । स हि देवतात्वेनात्र प्रतिपाद्यः । स च ᵛवैश्वानरः ᵛअग्निः ᵛजायमानो ᵛन ᵛराजा प्रादुर्भवन् प्रवर्धमानः राजेव ᵛज्योतिषा तेजसा ᵛतमांसि ᵛअवातिरत् अवतिरतिर्वधकर्मा । अवतिरति विनाशयति ॥

नाहं तन्तुं न वि जानाम्योतुं न यं वयन्ति समरेऽतमानाः ।
कस्य स्वित्पुत्र इह वक्त्वानि परो वदात्यवरेण पित्रा ॥ २ ॥

न । अहम् । तन्तुम् । न । वि । जानामि । ओतुम् । न । यम् । वयन्ति । सम्ऽअरे । अतमानाः ।
कस्य । स्वित् । पुत्रः । इह । वक्त्वानि । परः । वदाति । अवरेण । पित्रा ॥ २ ॥

वैश्वानरस्य महत्त्वमाख्यास्यन्नृषिस्तदर्थं यज्ञं वस्त्रात्मकतया रूपयन् तस्य दुर्ज्ञानत्वमनया प्रतिपादयतीति यज्ञवादिनो मन्यन्ते । ᵛतन्तुम् । तन्तवः पटस्य प्रागायतानि सूत्राणि । तानि च यज्ञात्मकस्य वस्त्रस्य गायत्र्यादीनि छन्दांसि स्तुतशस्त्राणि च । तानि ᵛअहं ᵛन ᵛवि ᵛजानामि । तथा ᵛओतुम् । ओतवस्तिरश्चीनानि सूत्राणि । तानि चात्र यजूंष्याध्वर्यवाणि कर्माणि च । तान्यहं ᵛन वि जानामि । अपि चैतदुभयसाध्यं तं पटं यज्ञलक्षणं ᵛन वि जानामि ᵛयं पटं यज्ञलक्षणं ᵛसमरे संगमने देवयजने ᵛअतमानाः सततं चेष्टमाना ऋत्विजः ᵛवयन्ति तन्तूनोतूंश्च संतन्वन्ति । वस्त्ररूपेण निष्पादयन्ति इत्यर्थः । ᵛइह अस्मिन् लोके ᵛकस्य ᵛस्वित् । स्विदिति वितर्के । कस्य खलु ᵛपुत्रः मनुष्यः ᵛवक्त्वानि वक्तव्यानि तानीमानि ᵛपरः परस्तादमुष्मिन् लोके वर्तमानो यः सूर्यस्तस्य ᵛपित्रा ᵛअवरेण अवस्तात् अस्मिन् लोके वर्तमानेन वैश्वानराग्निनानुशिष्टः सन् ᵛवदाति वदेत् । न कश्चिदपि प्रवदितुं शक्नोतीत्यर्थः । एतच्च संप्रदायविद्भिरुक्तं–'वैश्वानरस्य पुत्रोऽसौ परस्ताद्दिवि यः स्थितः । छन्दांस्यध्वरवस्त्रस्य स्तुतशस्त्राणि तन्तवः ॥ यजूंषि चेष्टाश्चौतुः स्याद्वस्त्रं वातव्यमध्वरः । परः परः स्थितः सूर्यः पिताग्निः पार्थिवो मतः' इति ॥ रूपकतया जगत्सृष्टेर्दुर्ज्ञानत्वमनया प्रतिपादयतीत्यात्मविदो मन्यन्ते । तन्तुं तन्तून् तन्तुस्थानानि सूक्ष्माणि वियदादीन्यपञ्चीकृतानि भूतानि न विजानामि । ओतुमोतून् पञ्चीकृतानि स्थूलान्योतुस्थानीयान्यपि वियदादीनि न विजानामि । न च तत्कार्यं पटस्थानीयं प्रपञ्चं विजानामि यं प्रपञ्चं समरे तन्तूनामोतूनां च संगमनेऽतमानाः सततं चेष्टमानाः संसारिणो वयन्ति उत्पादयन्ति । तेषां भोगार्थमीश्वरः सृजतीति कर्तृत्वमुपचर्यते । इहास्मिन्विषये परः परस्ताद्बुद्धेरविषये वर्तमानानि वक्त्वानि वक्तव्यानीमान्यवरेणार्वाचीनेन सृष्टयुत्तरकालमुत्पन्नेन पित्रा स्वजनकेनानुशिष्टः सन् कस्य खलु पुत्रो वदाति । वदेत् । स्वोत्पत्तेः प्राचीनं वृत्तान्तमजानानः कश्चिदपि न वदेदित्यर्थः ॥

---

१. ख-ञ-त-न-भ-र–'स्वप्रवृत्तिभिः' नास्ति; श–स्ववृत्तिभिः । २. घ–एतस्य । ३. ख-ञ-न-भ–वैश्वानरस्याग्नेराज्ञया; र–वैश्वानराज्ञया; श–वैश्वानरो राज्ञः ।

स इत्तन्तुं स वि जानात्योतुं स वक्त्वान्यूतुथा वदाति ।
य ईं चिकेतदमृतस्य गोपा अवश्चरन्परो अन्येन पश्यन् ॥ ३ ॥

सः । इत् । तन्तुम् । सः । वि । जानाति । ओतुम् । सः । वक्त्वानि । ऋतुऽथा । वदाति ।
यः । ईम् । चिकेतत् । अमृतस्य । गोपाः । अवः । चरन् । परः । अन्येन । पश्यन् ॥ ३ ॥

यद्यपि उक्तेन[1] प्रकारेण[1] दुर्ज्ञानानि तथाप्येतानि वैश्वानरोऽग्निः जानाति वदति चेत्यनया प्रतिपादयति। vस vइत् स एव वैश्वानरोऽग्निः vतन्तुं तन्तुस्थानीयानि गायत्र्यादीनि छन्दांसि स्तुतशस्त्राणि vवि vजानाति तथा vसः एव vओतुम् ओतुस्थानीयानि यजूंष्याध्वर्यवाणि च कर्माणि वि जानाति। vऋतुथा काले काले तत्तदनुष्ठानसमये vवक्त्वानि वक्तव्यानि च तानि vवदाति वदेत्। vयः अयं वैश्वानरः vअमृतस्य vगोपाः उदकस्य गोपायिता रक्षिता vअवः अवस्तात् भूलोके vचरन् पार्थिवाग्निरूपेण संचरन् vपरः परस्ताद्दिवि vअन्येन सूर्यात्मना vपश्यन् सर्वं जगत् प्रकाशयन् vईम् इमानि परिदृश्यमानानि सर्वाणि भूतानि vचिकेतत् जानाति स एवेति पूर्वत्र संबन्धः। यद्वा। स इत् स एव तन्तुं तन्तुस्थानीयानि सूक्ष्मभूतानि वि जानाति नान्यः कश्चित्। तथौतुमोतुस्थानीयानि स्थूलभूतानि च स एव वि जानाति। स एव वक्त्वानि वक्तव्यान्युपदेष्टव्यानीमान्यृतुथा काले काले यदा यदा विद्यासंप्रदायोच्छेदस्तदा तदा वदाति वदेत्। कोऽसौ यो विजानीयाद्वदेच्चेत्यत आह। यो वैश्वानरो विश्वनरात्मकः परमात्मामृतस्यामृतत्वस्य विमोक्षणस्य गोपा रक्षितावोऽवस्तात् संसारदशायां चरन् अन्तःकरणोपेतः[2] जीवात्मभावेन संचरन् परः परस्तादविद्याया ऊर्ध्वं वर्तमानेनान्येनोक्तविलक्षणेन निरुपाधिकेन सच्चिदादिलक्षणेन रूपेण पश्यन् सर्वं जगत् प्रकाशयन् ईमिमानि चिकेतत् जानाति। तथा च परमात्मानं प्रकृत्य श्रूयते—'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' (श्वे. उ. ६.१४) इति ॥

अयं होता प्रथमः पश्यतेममिदं ज्योतिरमृतं मर्त्येषु ।
अयं स जज्ञे ध्रुव आ निषत्तोऽमर्त्यस्तन्वा३ वर्धमानः ॥ ४ ॥

अयम् । होता । प्रथमः । पश्यत । इमम् । इदम् । ज्योतिः । अमृतम् । मर्त्येषु ।
अयम् । सः । जज्ञे । ध्रुवः । आ । निऽसत्तः । अमर्त्यः । तन्वा । वर्धमानः ॥ ४ ॥

vअयं वैश्वानरोऽग्निः vप्रथमः आद्यः vहोता । मानुषो हि होता द्वितीयः । हे मनुष्यास्तम् vइमं vपश्यत भजतेत्यर्थः। vमर्त्येषु मरणस्वभावेषु[3] शरीरेषु[3] vअमृतं मरणरहितम् vइदं वैश्वानराख्यं vज्योतिः जाठररूपेण वर्तत इत्यर्थः। अपि च vसः vअयम् अग्निः vध्रुवः निश्चलः vआ समन्तात् vनिषत्तः निषण्णः सर्वव्यापी अत एव vअमर्त्यः मरणरहितोऽपि vतन्वा शरीरेण संबन्धात् vजज्ञे जायते। vवर्धमानः च भवतीति उपचर्यते[4] ॥

---

१. श–उक्तप्रकारेण । २. श–अन्तःकरणोपेतेन । ३. श–मरणस्वभावशरीरेषु । ४. ख–उच्यते

ध्रुवं ज्योतिर्निहितं दृशये कं मनो जविष्ठं पतयत्स्वन्तः ।
विश्वे देवाः समनसः सकेता एकं क्रतुमभि वि यन्ति साधु ॥ ५ ॥

ध्रुवम् । ज्योतिः । निऽहितम् । दृशये । कम् । मनः । जविष्ठम् । पतयत्ऽसु । अन्तरिति ।
विश्वे । देवाः । सऽमनसः । सऽकेताः । एकम् । क्रतुम् । अभि । वि । यन्ति । साधु ॥ ५ ॥

vध्रुवं निश्चलं vमनः मनसः तस्मादपि vजविष्ठम् अतिशयेन वेगवत् ईदृशं वैश्वानराख्यं vज्योतिः vपतयत्सु गच्छत्सु[1] जङ्गमेषु प्राणिषु vअन्तः मध्ये vनिहितं प्रजापतिना स्थापितम् । किमर्थम् । vदृशये vकम् । दर्शनार्थम् । किंच vविश्वे सर्वे vदेवाः च vसमनसः समानमनस्काः vसकेताः समानप्रज्ञाश्च सन्तः vएकं मुख्यं गन्तारं वा vक्रतुं कर्मणां कर्तारं vसाधु सम्यक् vअभि vवि vयन्ति आभिमुख्येन विविधं प्रामुवन्ति सेवन्त इत्यर्थः । यद्वा । पतयत्सु गच्छत्सु प्राणिष्वन्तर्मध्ये हृदये मनो जविष्ठं मनसोऽप्यतिशयेन वेगयुक्तं ध्रुवं निश्चलं निर्विकल्पम् । तथा च वाजसनेयकम्—'अनेजदेकं मनसो जवीयः' (वा. सं. ४०. ४) इति । ज्योतिर्ब्रह्म चैतन्यं निहितम् । न केनचित् स्थापितम् । 'यो वेद निहितं गुहायां परमे व्योमन्' (तै. आ. ८. १) इति हि श्रूयते । किमर्थम् । दृशये दर्शनार्थम् । ज्ञानेन हि सर्वं जानन्ति[2] । अपि च । दीव्यन्तीति देवा इन्द्रियाणि । विश्वे सर्वे देवाः सर्वाणीन्द्रियाणि चक्षुराद्याः समनसो मनसा सह वर्तमानाः सकेताः सतेजस्काः सन्त एकमद्वितीयं क्रतुं सृष्ट्यादीनां कर्मणां कर्तारं विश्वनरात्मकं[3] परमात्मानमभिलक्ष्य साधु सम्यक् वि यन्ति विविधं गच्छन्ति । देवा एव वेममभि वि यन्ति । आभिमुख्येन विविधमुपयन्ति । उपासत इत्यर्थः । तथा च श्रूयते—'तदेवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्' (बृ. उ. ४. ४. १६) इति ॥

वि मे कर्णा पतयतो वि चक्षुर्वीदं ज्योतिर्हृदय आहितं यत् ।
वि मे मनश्चरति दूरआधीः किं स्विद्वक्ष्यामि किमु नू मनिष्ये ॥ ६ ॥

वि । मे । कर्णा । पतयतः । वि । चक्षुः । वि । इदम् । ज्योतिः । हृदये । आऽहितम् । यत् ।
वि । मे । मनः । चरति । दूरेऽआधीः । किम् । स्वित् । वक्ष्यामि । किम् ।
ऊँ इति । नु । मनिष्ये ॥ ६ ॥

वैश्वानरं श्रोतुकामस्य vमे मम vकर्णा कर्णौ vवि vपतयतः विविधं गच्छतः । श्रोतव्यानां तदीयगुणानां बहुत्वात् । तथा वैश्वानरं दिदृक्षमाणस्य मम vचक्षुः इन्द्रियं vवि पतयति विविधं गच्छति । द्रष्टव्यानां तदीयरूपाणां बहुत्वात् । तथा vज्योतिः प्रकाशकं vहृदये हृदयपुण्डरीके vआहितं निहितं vयत् बुद्ध्याख्यं तत्त्वम् vइदमपि vवि पतयति विविधं गच्छति वैश्वानरात्मानं ज्ञातुम् । अपि च vदूरआधीः । दूरे विप्रकृष्टे विषय आधीराध्यानं यस्य तादृशम् । छान्दसो लिङ्व्यत्ययः । vमे मदीयं vमनः च vवि vचरति विविधं प्रवर्तते । एवमहमहमिकया सर्वेष्विन्द्रियेषु प्रवृत्तेषु vकिं vस्वित् अहं

---

१. ख-ञ-न-भ-र—'गच्छत्सु' नास्ति । २. ख-श—जानाति । ३. ख-श—विश्वानरात्मकम् ।

वैश्वानरस्य रूपमिति ᵛवक्ष्यामि । ᵛकिमु ᵛनु किमु खलु संप्रति ᵛमनिष्ये मनसा प्रपस्ये । वैश्वानरस्य गुणानामनन्तत्वात् मन्दप्रज्ञेन मया ज्ञातुं न शक्यत इत्यर्थः ॥

विश्वे देवा अनमस्यन्भियानास्त्वामग्ने तमसि तस्थिवांसम् ।
वैश्वानरोऽवतूतये नोऽमर्त्योऽवतूतये नः ॥ ७ ॥

विश्वे । देवाः । अनमस्यन् । भियानाः । त्वाम् । अग्ने । तमसि । तस्थिऽवांसम् ।
वैश्वानरः । अवतु । ऊतये । नः । अमर्त्यः । अवतु । ऊतये । नः ॥ ७ ॥

हे वैश्वानर[1] ᵛतमसि अन्धकारे ᵛतस्थिवांसं स्थितवन्तं ᵛत्वां ᵛविश्वे सर्वे ᵛदेवाः ᵛअनमस्यन् नमस्कुर्वन्ति । कुतो हेतोः । ᵛभियानाः अन्धकाराद्भीताः । तादृशः ᵛअमर्त्यः मरणरहितः ᵛवैश्वानरः अग्निः ᵛनः अस्मान् ᵛऊतये ऊत्या रक्षणेन ᵛअवतु रक्षतु । पुनरुक्तिरादरार्था ॥ ॥ ११ ॥

'पुरो वः' इति सप्तर्चं दशमं सूक्तं भरद्वाजस्यार्षमाग्नेयम् । सप्तमी त्रिंशिका द्विपदा विराट् शिष्टास्त्रिष्टुभः । तथा चानुक्रान्तं—'पुरो वो द्विपदान्तम्' इति । प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छन्दसीदमादीनि चत्वारि सूक्तानि । सूत्रितं च—'पुरो वो मन्द्रमिति चत्वारि तं सुप्रतीकमिति षट्' (आश्व. श्रौ. ४. १३) इति ॥

पुरो वो मन्द्रं दिव्यं सुवृक्तिं प्रयति यज्ञे अग्निमध्वरे दधिध्वम् ।
पुर उक्थेभिः स हि नो विभावा स्वध्वरा करति जातवेदाः ॥ १ ॥

पुरः । वः । मन्द्रम् । दिव्यम् । सुऽवृक्तिम् । प्रऽयति । यज्ञे । अग्निम् । अध्वरे । दधिध्वम् ।
पुरः । उक्थेभिः । सः । हि । नः । विभाऽवा । सुऽअध्वरा । करति । जातऽवेदाः ॥ १ ॥

हे ऋत्विग्यजमानाः ᵛवः यूयं ᵛमन्द्रं मोदनं स्तुत्यं वा ᵛदिव्यं दिवि भवं ᵛसुवृक्तिं सुष्ठु दोषैर्वर्जितं सुखेनावर्जनीयं वा एवंगुणम् ᵛअग्निं ᵛप्रयति प्रगच्छति प्रवर्तमाने ᵛअध्वरे रक्षःप्रभृतिभिरहिंस्ये हिंसाप्रत्यवायरहिते वास्मिन् ᵛयज्ञे ᵛपुरः ᵛदधिध्वं पुरस्ताद्दाहवनीयरूपेण धारयत । यद्वा । पुरोधसं कुरुत । ᵛउक्थेभिः स्तुतशस्त्रैश्च ᵛपुरः दधिध्वम् । ᵛविभावा विशेषेण दीप्यमानः ᵛजातवेदाः जातानां वेदिता ᵛसः[2] अग्निः ᵛहि यस्मात् ᵛनः अस्मान् ᵛस्वध्वरा शोभनयागान् ᵛकरति करोति तस्मात् पुरो दधिध्वमित्यन्वयः ॥

तमु ष्टुमः पुरुवर्णीक होतरग्ने अग्निभिर्मनुष इधानः ।
स्तोमं यमस्मै ममतेव शूषं घृतं न शुचि मतयः पवन्ते ॥ २ ॥

तम् । ऊँ इति । ष्टुमः । पुरुऽअनीक । होतः । अग्ने । अग्निऽभिः । मनुषः । इधानः ।
स्तोमम् । यम् । अस्मै । ममताऽइव । शूषम् । घृतम् । न । शुचि । मतयः । पवन्ते ॥ २ ॥

---

१. ख-घ-भ–वैश्वानर अग्ने । २. ज्ञ-त-र–यः ।

हे vद्युमः दीप्तिमन् vपुवणीक बहुज्वाल vहोतः देवानामाह्वातः vअग्ने vअग्निभिः तवावयवैः भूतैरन्यैरग्निभिः सार्धम् vइधानः समिध्यमानः दीप्तः सन् vमनुषः मनुष्यस्य स्तोतुः vतमु तं स्तोमं शृण्विति शेषः । उ इति पादपूरणम् । vयं vस्तोमं स्तोत्रं vशूषं सुखकरं vघृतं vन पवित्राभ्याम् उत्पूतं घृतमिव vशुचि शुद्धम् vअस्मै अग्नये vमतयः मन्तारः स्तोतारः vममतेव । ममता नाम ब्रह्मवादिनी दीर्घतमसो माता । सेव vपवन्ते पुनन्ति संस्कुर्वन्ति दोषवर्जितमुच्चारयन्तीत्यर्थः । तं स्तोममित्यन्वयः ॥

पीपाय स श्रवसा मर्त्येषु यो अग्नये ददाश विप्र उक्थैः ।
चित्राभिस्तमूतिभिश्चित्रशोचिर्व्रजस्य साता गोमतो दधाति ॥ ३ ॥

पीपाय । सः । श्रवसा । मर्त्येषु । यः । अग्नये । ददाश । विप्रः । उक्थैः ।
चित्राभिः । तम् । ऊतिऽभिः । चित्रऽशोचिः । व्रजस्य । साता । गोऽमतः । दधाति ॥३॥

vसः[1] यजमानः vमर्त्येषु मनुष्येषु[2] मध्ये[2] vश्रवसा अन्नेन vपीपाय वर्धते vविप्रः मेधावी vयः यजमानः vउक्थैः स्तुतिभिः सार्धं हवींषि vददाश प्रयच्छति । vतं यजमानं vचित्रशोचिः विचित्रदीप्तिरग्निः vचित्राभिः आश्चर्यभूताभिः vऊतिभिः[3] रक्षाभिः[3] vगोमतः गोभिर्युक्तस्य vव्रजस्य गोष्ठस्य vसाता सातौ संभजने vदधाति धारयति ॥

आ यः पप्रौ जायमान उर्वी दूरेदृशा भासा कृष्णाध्वा ।
अध बहु चित्तम ऊर्म्यायास्तिरः शोचिषा ददृशे पावकः ॥ ४ ॥

आ । यः । पप्रौ । जायमानः । उर्वी इति । दूरेऽदृशा । भासा । कृष्णऽअध्वा ।
अध । बहु । चित् । तमः । ऊर्म्यायाः । तिरः । शोचिषा । ददृशे । पावकः ॥ ४ ॥

vकृष्णाध्वा कृष्णवर्त्मा vयः अग्निः vजायमानः प्रादुर्भवन् vउर्वी विस्तीर्णे द्यावापृथिव्यौ vदूरेदृशा दूरे दृश्यमानया vभासा दीप्त्या vआ vपप्रौ आपूरयति सः vपावकः अग्निः vअध अनन्तरम् vऊर्म्यायाः । रात्रिनामैतत् । रात्रेः संबन्धि vबहु vचित् बह्वपि vतमः अन्धकारं vशोचिषा दीप्त्या vतिरः तिरस्कुर्वन् vददृशे दृश्यते ॥

नू नश्चित्रं पुरुवाजाभिरूती अग्ने रयिं मघवद्भ्यश्च धेहि ।
ये राधसा श्रवसा चात्यन्यान्त्सुवीर्येभिश्चाभि सन्ति जनान् ॥ ५ ॥

नु । नः । चित्रम् । पुरुऽवाजाभिः । ऊती । अग्ने । रयिम् । मघवत्ऽभ्यः । च । धेहि ।
ये । राधसा । श्रवसा । च । अति । अन्यान् । सुऽवीर्येभिः । च । अभि । सन्ति । जनान् ॥५॥

---

१. श-सोऽयम् । २. ज्ञ-न-मध्ये; ज्ञ-त२-र-मनुष्येषु । ३. ख-ज्ञ-ज्ञ-त-न-भ-य-र-श-'ऊतिभी रक्षाभिः' नास्ति ।

हे ᵛअग्ने ᵛमघवद्भ्यः हविर्लक्षणधनयुक्तेभ्यः ᵛनः अस्मभ्यं ᵛपुरुवाजाभिः बहुभिः ᵛऊती ऊतिभिः रक्षणैः सह ᵛचित्रं चायनीयं ᵛरयिं धनं ᵛनु क्षिप्रं ᵛधेहि देहि प्रयच्छ। चशब्दो वक्ष्यमाणेन समुच्चयार्थः। ᵛये ᵛराधसा धनेन ᵛश्रवसा अन्नेन ᵛच ᵛसुवीर्येभिः शोभनैर्वीर्यैश्च ᵛअन्यान् ᵛजनान् मनुष्यान् ᵛअति अतिशयेन ᵛअभि ᵛसन्ति अभिभवन्ति तादृशान् पुत्रांश्चास्मभ्यं देहीत्यर्थः ॥

इमं यज्ञं चनो धा अग्न उशन्यं ते आसानो जुहुते हविष्मान्।
भरद्वाजेषु दधिषे सुवृक्तिमवीर्वाजस्य गध्यस्य सातौ ॥ ६ ॥

इमम्। यज्ञम्। चनः। धाः। अग्ने। उशन्। यम्। ते। आसानः। जुहुते। हविष्मान्।
भरत्ऽवाजेषु। दधिषे। सुऽवृक्तिम्। अवीः। वाजस्य। गध्यस्य। सातौ ॥ ६ ॥

हे ᵛअग्ने ᵛउशन् कामयमानस्त्वम् ᵛइमं पुरोवर्तिं ᵛयज्ञं यागसाधनं ᵛचनः हविर्लक्षणमन्नं ᵛधाः धेहि। स्वात्मनि धारय। ᵛयं च पुरोडाशादिकम् ᵛआसानः आसीन[1] उपविशन्[1] ᵛहविष्मान् हविर्युक्तो यजमानः ᵛते तुभ्यं त्वदर्थं ᵛजुहुते जुहोति तमिममित्यन्वयः। अपि च ᵛभरद्वाजेषु ऋषिषु ᵛसुवृक्तिं सुष्ठु दोषैर्वर्जितां स्तुतिं ᵛदधिषे धारय। ᵛगध्यस्य। गध्यतिर्मिश्रीभावकर्मा। मिश्रणीयस्य प्राप्यस्य ᵛवाजस्य अन्नस्य ᵛसातौ संभजने निमित्तभूते ᵛअवीः तानृषीन्[2] रक्ष च[2] ॥

वि द्वेषांसीनुहि वर्धयेळां मदेम शतहिमाः सुवीराः ॥ ७ ॥

वि। द्वेषांसि। इनुहि। वर्धय। इळाम्। मदेम। शतऽहिमाः। सुऽवीराः ॥ ७ ॥

हे अग्ने ᵛद्वेषांसि द्वेष्टॄन् शत्रून् ᵛवि ᵛइनुहि विविधं गमय। ᵛइळाम् अन्नं चास्मदीयं ᵛवर्धय। वयं च ᵛसुवीराः शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेताः सन्तः ᵛशतहिमाः शतं हेमन्तान् संवत्सरान् ᵛमदेम मोदेम तृप्ता भूयास्म ॥ ॥ १२ ॥

'यजस्व होतः' इति षड्ऋचमेकादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम्। अनुक्रम्यते च— 'यजस्व षट्' इति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

यजस्व होतरिषितो यजीयानग्ने बाधो मरुतां न प्रयुक्ति।
आ नो मित्रावरुणा नासत्या द्यावा होत्राय पृथिवी ववृत्याः ॥ १ ॥

यजस्व। होतः। इषितः। यजीयान्। अग्ने। बाधः। मरुताम्। न। प्रऽयुक्ति।
आ। नः। मित्रावरुणा। नासत्या। द्यावा। होत्राय। पृथिवी इति। ववृत्याः॥ १ ॥

हे ᵛहोतः देवानामाह्वातः ᵛअग्ने ᵛयजीयान् यष्टृतमस्त्वम् ᵛइषितः प्रेषितोऽस्माभिः प्रार्थितः सन्। ᵛन इति संप्रत्यर्थे। संप्रति ᵛप्रयुक्ति प्रयुक्तौ प्रयुज्यमाने यज्ञे ᵛमरुतां देवानां ᵛबाधः शत्रूणां बाधकं

१. त—आविशन्। २. श—अस्मानृषीनवात्सीः।

गणं ᵛयजस्व । यद्वैतद्वाक्यद्वयम् । हे होतरग्ने यजस्व देवानित्येकं वाक्यम् । प्रयुज्यत इति प्रयुक्तिर्बलम् । मरुतां न प्रयुक्तिं मरुतां बलमिवास्मच्छत्रून् बाधः बाधस्वेति द्वितीयं वाक्यम् । अपि च ᵛमित्रावरुणा । अहरभिमानी देवो मित्रो वरुणो रात्र्यभिमानी । तौ च ᵛनासत्या सत्यस्य नेतारौ सत्यस्वभावावेव वा नासिकाप्रभवौ वाश्विनौ ᵛद्यावापृथिवी दिवं च पृथिवीं च एतांश्च देवान् ᵛहोत्राय अस्मद्यज्ञाय तदर्थम् ᵛआ ᵛवृत्याः आवर्तय आवहेत्यर्थः ॥

त्वं होता मन्द्रतमो नो अध्रुगन्तर्देवो विदथा मर्त्येषु ।
पावकया जुह्वा३ वह्निरासाग्ने यजस्व तन्वं१ तव स्वाम् ॥ २ ॥

त्वम् । होता । मन्द्रऽतमः । नः । अध्रुक् । अन्तः । देवः । विदथा । मर्त्येषु ।
पावकया । जुह्वा । वह्निः । आसा । अग्ने । यजस्व । तन्वम् । तव । स्वाम् ॥ २ ॥

हे अग्ने ᵛत्वं ᵛमर्त्येषु मनुष्येषु ᵛअन्तः मध्ये वर्तमानः[1] ᵛविदथा विदथे यज्ञे ᵛहोता देवानामाह्वाता भवसि । कीदृशस्त्वम् । ᵛमन्द्रतमः स्तुत्यतमः ᵛनः अस्माकम् ᵛअध्रुक् अद्रोग्धास्मदर्थं द्रोहरहितो वा । सर्वदा मित्रभूत इत्यर्थः[2] । ᵛदेवः दानादिगुणयुक्तः । अपि च हे ᵛअग्ने ᵛजुह्वा । हूयन्तेऽस्यामाहुतय इति जुहूर्ज्वाला । तया ᵛपावकया शोधयित्र्या ᵛआसा आस्येन देवानामास्यभूतया ᵛवह्निः हविषां वोढा त्वं ᵛतव ᵛस्वां स्वभूतां स्विष्टकृदाख्यां ᵛतन्वं तनूं ᵛयजस्व ॥

धन्या चिद्धि त्वे धिषणा वष्टि प्र देवाञ्जन्म गृणते यजध्यै ।
वेषिष्ठो अङ्गिरसां यद्ध विप्रो मधुच्छन्दो भनति रेभ इष्टौ ॥ ३ ॥

धन्या । चित् । हि । त्वे इति । धिषणा । वष्टि । प्र । देवान् । जन्म । गृणते । यजध्यै ।
वेषिष्ठः । अङ्गिरसाम् । यत् । ह । विप्रः । मधु । छन्दः । भनति । रेभः । इष्टौ ॥ ३ ॥

ᵛधन्या धनमिच्छन्ती धनहेतुभूता[3] ᵛधिषणा स्तुतिर्हे अग्ने ᵛत्वे त्वां ᵛवष्टि कामयते । ᵛचिद्धि इत्येतत् पादपूरणम् । किमर्थम् । ᵛदेवान् यष्टव्यानिन्द्रादीन् ᵛप्र ᵛयजध्यै प्रकर्षेण यष्टुं त्वदीयं ᵛजन्म प्रादुर्भावं ᵛगृणते स्तुवते यजमानायेदृग्भूतयजमानार्थम् । ᵛयद्ध यदा खलु ᵛअङ्गिरसाम् ऋषीणां मध्ये ᵛवेषिष्ठः अतिशयेन स्तुतेः प्रेरयिता ᵛविप्रः मेधावी ᵛरेभः स्तोता भरद्वाजः ᵛइष्टौ यज्ञे ᵛमधु मधुवत् मदकरं ᵛछन्दः स्तोत्रं ᵛभनति उच्चारयति तदा धिषणा वष्टीत्यन्वयः ।

---

१. ख-ङ्ग-त-न-भ-र-वर्तमाने । २. ख-ङ्ग-न-भ-य-'इत्यर्थः' नास्ति । ३. श-धनहेतुभूता धनं लभमाना वा । धनगणं लब्धेति यत् ।

अदिद्युतत्स्वपाको विभावाग्ने यजस्व रोदसी उरूची ।
आयुं न यं नमसा रातहव्या अञ्जन्ति सुप्रयसं पञ्च जनाः ॥ ४ ॥

अदिद्युतत् । सु । अपाकः । विऽभावा । अग्ने । यजस्व । रोदसी इति । उरूची इति ।
आयुम् । न । यम् । नमसा । रातऽहव्याः । अञ्जन्ति । सुऽप्रयसम् । पञ्च । जनाः ॥ ४ ॥

अयमग्निः vसु vअदिद्युतत् । सुष्ठु द्योतते दीप्यते । कथंभूतः । vअपाकः । पाकः पक्वस्यप्रज्ञो मूर्खः । तद्विलक्षणोऽपाकः । vविभावा दीप्तिमान् । शेषः प्रत्यक्षकृतः । हे vअग्ने स त्वम् vउरूची उरु विस्तीर्णमञ्चन्त्यौ विस्तृते vरोदसी द्यावापृथिव्यौ vयजस्व हविषा पूजय । vआयुं vन मनुष्यमतिथिमिव vयं vपञ्च vजनाः मनुष्या ऋत्विग्यजमानलक्षणाः vरातहव्याः दत्तहविष्काः सन्तः vसुप्रयसं शोभनहविर्लक्षणान्नमग्निं vनमसा अन्नेन हविर्लक्षणेन vअञ्जन्ति सिञ्चन्ति तर्पयन्ति स त्वं यजस्वेत्यन्वयः॥

वृञ्जे ह यन्नमसा बर्हिरग्नावयामि स्रुग्घृतवती सुवृक्तिः ।
अम्यक्षि सद्म सदने पृथिव्या अश्रायि यज्ञः सूर्ये न चक्षुः ॥ ५ ॥

वृञ्जे । ह । यत् । नमसा । बर्हिः । अग्नौ । अयामि । स्रुक् । घृतऽवती । सुऽवृक्तिः ।
अम्यक्षि । सद्म । सदने । पृथिव्याः । अश्रायि । यज्ञः । सूर्ये । न । चक्षुः ॥ ५ ॥

vयत् vह यदा खलु vनमसा हविषा सह[1] vअग्नौ अग्निसमीपे vबर्हिः[1] vवृञ्जे । वृजिश्छेदनार्थः । छिद्यते । आह्रियत इत्यर्थः । vसुवृक्तिः सुष्ठु दोषैर्वर्जिता vघृतवती घृतपूर्णा vस्रुक् vअयामि नियम्यते बर्हिष्यासाद्यते । तथा vपृथिव्याः भूमेः vसदने स्थाने vसद्म हविरासादनार्था वेदिः vअम्यक्षि । म्यक्षतिर्गतिकर्मा । गम्यते परिगृह्यते । तदानीं vयज्ञः vअश्रायि यजमाने आश्रितो भवति । तत्र दृष्टान्तः । vसूर्ये vन vचक्षुः । यथा सूर्ये सर्वस्य प्रेरक आदित्ये प्रकाशकं तेजः समवैति तद्वत् ॥

दशस्या नः पुरुणीक होतर्देवेभिरग्ने अग्निभिरिधानः ।
रायः सूनो सहसो वावसाना अतिं स्रसेम वृजनं नांहः ॥ ६ ॥

दशस्य । नः । पुरुऽअनीक । होतः । देवेभिः । अग्ने । अग्निऽभिः । इधानः ।
रायः । सूनो इति । सहसः । ववसानाः । अति । स्रसेम । वृजनम् । न । अंहः ॥ ६ ॥

हे vपुरुणीक बहुज्वाल vहोतः देवानामाह्वातः vअग्ने vदेवेभिः देवैर्द्योतमानैरन्यैः vअग्निभिः त्वद्विभूतिभूतैः सार्धम् vइधानः इध्यमानो दीप्यमानः सन् vनः अस्मभ्यं vरायः धनानि vदशस्य

---

१. ख-ञ-न-भ-य– सह बर्हिः अग्नौ अग्निसमीपे ।

प्रयच्छ । हे vसहसः vसूनो बलस्य पुत्राग्ने vवावसानाः हविषा स्वामाच्छादयन्तो वयं vबृजनं vन शत्रुमिव vअंहः पापम् vअति vस्रसेम अतिगच्छेम । अतिक्रामेमेत्यर्थः[1] ॥ ॥ १३ ॥

'मध्ये होता' इति षड्वृचं द्वादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम् । 'मध्ये' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

मध्ये होता दुरोणे बर्हिषो राळग्निस्तोदस्य रोदसी यजध्यै ।
अयं स सूनुः सहस ऋतावा दूरात्सूर्यो न शोचिषा ततान ॥ १ ॥

मध्ये । होता । दुरोणे । बर्हिषः । राट् । अग्निः । तोदस्य । रोदसी इति । यजध्यै ।
अयम् । सः । सूनुः । सहसः । ऋतऽवा । दूरात् । सूर्यः । न । शोचिषा । ततान ॥१॥

vहोता देवानामाह्वाता vबर्हिषः यज्ञस्य vराट् राजा vअग्निः vतोदस्य । तुद्यते तपसा पीड्यत इति तोदो यजमानः । तस्य vदुरोणे गृहे vमध्ये निषीदतीति शेषः । किमर्थम् । vरोदसी द्यावापृथिव्यौ vयजध्यै यष्टुम् । vसः तादृशः vअयं vसहसः vसूनुः सहसस्पुत्रः vऋतावा सत्यवान् यज्ञवान् वाग्निः vसूर्यो vन सूर्य इव vदूरात् दूरत एव vशोचिषा तेजसा vततान आतनोति विस्तारयति । दूरदेशे वर्तमानोऽपि सूर्य इव सर्वं जगद्भासयतीत्यर्थः ॥

आ यस्मिन्त्वे स्वपाके यजत्र यक्षद्राजन्त्सर्वतातेव नु द्यौः ।
त्रिषधस्थस्ततरुषो न जंहो हव्या मघानि मानुषा यजध्यै ॥ २ ॥

आ । यस्मिन् । त्वे इति । सु । अपाके । यजत्र । यक्षत् । राजन् । सर्वतातौऽइव । नु । द्यौः ।
त्रिऽसधस्थः । ततरुषः । न । जंहः । हव्या । मघानि । मानुषा । यजध्यै ॥ २ ॥

vद्यौः स्तोता vसर्वतातेव । इवशब्दः पूरकः । यज्ञनामैतत् । सर्वतातौ सर्वैस्तायमाने यज्ञे । यद्वा । सर्वशब्दात् स्वार्थिकस्तातिल्प्रत्ययः । सर्वः स्तोता हे vयजत्र यष्टव्य vराजन् राजमानाग्ने vअपाके प्राज्ञे vत्वे vयस्मिन् त्वे त्वयि vसु[2] अत्यन्तं vनु क्षिप्रम् vआ vयक्षत् आयजति हवींषि जुहोति vत्रिषधस्थः त्रिषु लोकेषु सह स्थितः । यद्वा । गार्हपत्यादिरूपेण त्रिधावस्थितः । तादृशस्त्वं vततरुषो vन तरिता सूर्य इव vजंहः शीघ्रं गन्ता भव । जंह इति हन्तेर्गतिकर्मणो रूपम् । यद्वा । 'तॄ प्लवनतरणयोः' इत्यस्मात् क्सौ रूपं ततर्वांनिति । तस्य षष्ठ्यां[3] रूपमेतत् ततरुष इति ॥ तरितुः सूर्यस्येव जंहो वेगः तव[4] भवत्वित्यर्थः । किमर्थम् । vमघानि मंहनीयानि प्रशस्यानि vमानुषा मनुष्याणां[5] संबन्धीनि vहव्या हव्यानि हवींषि vयजध्यै यष्टुं देवेभ्यो दातुम् ॥

---

१. ख-न-भ–अतिक्रमेमेत्यर्थः; झ–अतिक्रमेत्यर्थः; त२–अतिक्रामेत्यर्थः । २. ख-झ-त-न-भ-र–'सु' नास्ति । ३. य–षष्ठ्याः । ४. ख-झ-भ-य-र–तद्वत् । ५. ख-झ-न-भ-य–मानुषाणाम् ।

तेजिष्ठा यस्यारतिर्वनेराट् तोदो अध्वन्न वृधसानो अद्यौत् ।
अद्रोघो न द्रविता चेतति त्मन्नमर्त्योऽवर्त्र ओषधीषु ॥ ३ ॥

तेजिष्ठा । यस्य । अरतिः । वनेऽराट् । तोदः । अध्वन् । न । वृधसानः । अद्यौत् ।
अद्रोघः । न । द्रविता । चेतति । त्मन् । अमर्त्यः । अवर्त्रः । ओषधीषु ॥ ३ ॥

[v]यस्य अग्नेः [v]अरतिः गन्त्री ज्वाला [v]तेजिष्ठा अतिशयेन तेजस्विनी सती [v]वनेराट् दावरूपेण[1] अरण्ये राजमाना वर्तते [v]वृधसानः वर्धमानः सोऽग्निः [v]तोदो [v]अध्वन्न । तोदः सर्वस्य प्रेरकः सूर्यः । स इवाध्वनि स्वमार्गेऽन्तरिक्षे [v]अद्यौत् द्योतते प्रकाशते । अपि च [v]अद्रोघो [v]न अद्रोग्धव्यः । यद्वा । प्राणरूपेण सर्वेषामद्रोग्धा वायुरिव तादृशः [v]अमर्त्यः मरणरहितः सोऽग्निः [v]ओषधीषु । ओषः पाक एषु धीयत इत्योषधयो वनानि । तेषु [v]द्रविता शीघ्रगामी सन् [v]अवर्त्रः केनाप्यवारणीयश्च भवन् [v]त्मन् आत्मना स्वप्रकाशेनैव [v]चेतति चेतयति[2] सर्वं जगत् ज्ञापयति ॥

सास्माकेभिरेतरी न शूषैरग्निः ष्टवे दम आ जातवेदाः ।
द्रुहोऽवन्वन् क्रत्वा नार्वोस्रः पितेव जारयायियज्ञैः ॥ ४ ॥

सः । अस्माकेभिः । एतरि । न । शूषैः । अग्निः । स्तवे । दमे । आ । जातऽवेदाः ।
द्रुऽअन्नः । वन्वन् । क्रत्वा । न । अर्वा । उस्रः । पिताऽइव । जारयायि । यज्ञैः ॥ ४ ॥

[v]जातवेदाः जातधनो जातप्रज्ञो वा [v]सः [v]अग्निः [v]अस्माकेभिः अस्मदीयैः स्तोतृभिः [v]एतरी[3] [v]न । एतरि गन्तरि[3] याचमाने पुरुषे विद्यमानानि स्तोत्राणि यथात्यन्तं सुखकराणि तथा [v]शूषैः सुखकरैः स्तोत्रैः [v]दमे अस्मदीये यज्ञगृहे [v]आ आभिमुख्येन [v]स्तवे स्तूयते । अपि च [v]द्रुन्नः । द्रुर्द्रुमः । स एवान्नं यस्य स तथोक्तः । अत एव [v]वन्वन् वनानि संभजन् [v]क्रत्वा [v]न क्रतुना आत्मीयेन[4] कर्मणा च [v]अर्वा गन्ता च[5] भवति । तत्र दृष्टान्तः । [v]उस्रः [v]पितेव । पिता पालयिता वत्सानां जनको वोस्रो वृषभ इव । स यथा मैथुनार्थं शीघ्रं गच्छति तद्वत् । [v]यज्ञैः यज्ञवद्भिर्यजमानैश्च [v]जारयायि स्तूयते । जरतेः स्तुतिकर्मणः एतद्रूपम्[6] ।

अधं स्मास्य पनयन्ति भासो वृथा यत्तक्षदनुयाति पृथ्वीम् ।
सद्यो यः स्पन्द्रो विषितो धवीयानृणो न तायुरति धन्वा राट् ॥ ५ ॥

अधं । स्म । अस्य । पनयन्ति । भासः । वृथा । यत् । तक्षत् । अनुऽयाति । पृथ्वीम् ।
सद्यः । यः । स्पन्द्रः । विऽसितः । धवीयान् । ऋणः । न । तायुः । अति । धन्व । राट् ॥५॥

---

१. झ-न-भ-दावरूपे । २. ख-' चेतयति ' नास्ति; त२-र-चितयति; न- चिन्तयति । ३. ख-एतरि तदुपरि; झ-एतरी न उपगन्तरि; झ-त१-भ-एतरि तदुपगन्तरि; त२-र-एतरी नदुपगन्तर्; न-एतरि तद्वउपगन्तरि । ४. ख-झ-झ-त-न-भ-र-' आत्मीयेन ' नास्ति । ५. घ-वर्जितेषु ' च ' नास्ति । ६. ख-झ-न-भ-य-इदं रूपम् ।

vअध अस्मिँल्लोके । vस्म इति पूरकः । vअस्य अग्नेः vभासः रश्मीन् vपनयन्ति स्तोतारः स्तुवन्ति । vयत् यदा vवृथा अनायासेन vतक्षत् तक्षन् तनकुर्वन् वनानि सम्यग्दहन् vपृथ्वीं विस्तीर्णामरण्यभुवम् vअनुयाति अनुगच्छति तदानीं पनयन्ति इत्यन्वयः । vयः अग्निः vस्पन्द्रः स्पन्दनवान् vविषितः विमुक्तः प्रतिबन्धरहितः अत एव vसद्यः शीघ्रं vधवीयान् गन्तृतमो भवति । क इव । vऋणो vन vतायुः । ऋणोतिर्गतिकर्मा । तायुरिति स्तेननाम । यथा स्तेनः शीघ्रं गन्ता भवति तद्वत् सोऽयमग्निः vधन्व मरुभूमिमतिक्रम्य vराट् राजते । यद्वा । धन्वन्त्यस्मादाप इति धन्वान्तरिक्षम् । अतिशयेनान्तरिक्षम् आक्रम्य[1] राजते ॥

स त्वं नो अर्वन्निदाया विश्वेभिरग्ने अग्निभिरिधानः ।
वेषि रायो वि यासि दुच्छुना मदेम शतहिमाः सुवीराः ॥ ६ ॥

सः । त्वम् । नः । अर्वन् । निदायाः । विश्वेभिः । अग्ने । अग्निऽभिः । इधानः ।
वेषि । रायः । वि । यासि । दुच्छुनाः । मदेम । शतऽहिमाः । सुऽवीराः ॥ ६ ॥

हे vअर्वन् गन्तः vअग्ने vसः तादृशः vत्वं vनिदायाः निन्दितायाः प्रजाया निन्दाया एव वा पाहीति शेषः । कथंभूतः सन् । vविश्वेभिः सर्वैः vअग्निभिः स्वच्छाखाभूतैः vइधानः[2] इध्यमानः[2] सन् । vरायः धनानि चास्मान् vवेषि गमय प्रापय । यद्वा । हविर्लक्षणानि धनानि वेषि कामयसे । vदुच्छुनाः दुःखकारिणीः शत्रुसेनाः vवि vयासि च विविधं गमयसि च । वयं च vसुवीराः शोभनपुत्रपौत्राः सन्तः vशतहिमाः शतं[3] संवत्सरान्[3] vमदेम मोदेम ॥ ॥ १४ ॥

'त्वद्विश्वा' इति षड्ऋचं त्रयोदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयम् । 'त्वद्विश्वा' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

त्वद्विश्वा सुभग सौभगान्यग्ने वि यन्ति वनिनो न वयाः ।
श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टिरीड्यो रीतिरपाम् ॥ १ ॥

त्वत् । विश्वा । सुऽभग । सौभगानि । अग्ने । वि । यन्ति । वनिनः । न । वयाः ।
श्रुष्टी । रयिः । वाजः । वृत्रऽतूर्ये । दिवः । वृष्टिः । ईड्यः । रीतिः । अपाम् ॥ १ ॥

हे vसुभग शोभनधन vअग्ने vविश्वा विश्वानि सर्वाणि vसौभगानि धनानि[4] vत्वत् त्वत्तः vवि vयन्ति विविधं निर्गच्छन्ति । हिरण्यमूलत्वात् सर्वेषां धनानां हिरण्यं चाग्नेः सकाशादुत्पन्नम् । 'तस्य रेतः परापतत्तद्धिरण्यमभवत्' (तै. ब्रा. १. १. ३. ८) इति श्रुतेः । निर्गमने दृष्टान्तः । vवनिनो vन vवयाः । यथा वृक्षाच्छाखा विविधं निर्गच्छन्ति तद्वत् । तथा vरयिः पशुसंघश्च त्वत्सकाशादेव vश्रुष्टी क्षिप्रं ज्येति निर्गच्छति । 'पशवो वै रयिः पशूनेवावरुन्धे' (तै. सं. १. ५. ७. २) इति तैत्तिरीयकम् ।

---

१. श–अतिक्रम्य । २. ख१-भ–स इधानः इध्यमानः; ज-ञ-ण-त-न-र–स इधानः । ३ ख-ज्ञ-ञ-त-न-भ-र-श–शतसंवत्सरान् । ४. न–शोभनधनानि ।

vवृत्रतूर्ये वृत्राणां शत्रूणां हिंसके संग्रामे शत्रून् जेतुं vवाजः बलं च त्वत्तो भ्येति । vदिवः अन्तरिक्षात् या vवृष्टिः सापि त्वत्त एव भ्येति । ' अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ' (मनु. ३. ७६) इति स्मरणात् । अतस्त्वम् vईड्यः सर्वैः स्तुत्यः सन् vअपाम् उदकानां vरीतिः गमयिता भवसि ॥

त्वं भगो॑ नृ आ हि रत्न॑मिषे परिज्मेव क्षयसि दस्मवर्चाः ।
अग्ने॑ मित्रो न बृ॒हत ऋ॒तस्यासि क्षत्ता वा॒मस्य॑ देव भू॒रेः ॥ २ ॥

त्वम् । भगः । नः । आ । हि । रत्न॑म् । इषे । परिज्मेऽइव । क्षयसि । दस्मऽवर्चाः ।
अग्ने॑ । मित्रः । न । बृ॒हतः । ऋ॒तस्य॑ । असि । क्षत्ता । वा॒मस्य॑ । देव । भू॒रेः ॥ २ ॥

हे अग्ने vभगः[1] भजनीयः vत्वं[1] vनः अस्मभ्यं vरत्नं रमणीयं धनम् vआ vइषे आगमय प्रयच्छ ॥ ' इष् गतौ ' इत्यस्यैतद्रूपम् । vहि इति पूरकः । vदस्मवर्चाः दर्शनीयदीप्तिस्त्वं vपरिज्मेव परितो गन्ता वायुरिव vक्षयसि सर्वत्र निवससि । यद्वा । क्षयतिरैश्वर्यकर्मा । सर्वस्येशिषे । हे vअग्ने vमित्रो vन प्रमीतेस्त्रायको देव इव vबृहतः महतः vऋतस्य उदकस्य[2] यज्ञस्य वा vक्षत्ता vअसि । क्षदतिरत्र दानकर्मा । दाता भवसि । तथा हे vदेव द्योतमानाग्ने vभूरेः बहुलस्य vवामस्य वननीयस्य धनस्य च दाता भवसीत्यनुषङ्गः ॥

स सत्पति॑ः शवसा हन्ति वृ॒त्रमग्ने॒ विप्रो॒ वि प॒णेर्भर्ति॑ वा॒जम् ।
यं त्वं प्रचेत ऋतजात रा॒या स॒जोषा॑ नप्त्रापां हि॒नोषि॑ ॥ ३ ॥

सः । सत्ऽपतिः । शवसा । ह॒न्ति॒ । वृ॒त्रम् । अग्ने॑ । विप्रः॑ । वि । प॒णेः । भर्ति॑ । वा॒जम् ।
यम् । त्वम् । प्रऽचेतः । ऋ॒तऽजात । रा॒या । स॒ऽजोषाः॑ । नप्त्रा॑ । अपाम् । हि॒नोषि॑ ॥ ३ ॥

हे vअग्ने vसत्पतिः सतां पालयिता vसः पुरुषः vवृत्रम् आवरकं शत्रुं vशवसा बलेन vहन्ति । स च vविप्रः मेधावी सन् vपणेः वणिजः एतन्नाम्नोऽसुरस्य वा vवाजम् अन्नं बलं वा vवि vभर्ति वियुज्य हरति ॥ ' ह्मन्हो र्भः० ' इति भत्वम् ॥ हे vप्रचेतः प्रकृष्टज्ञान vऋतजात । ऋतमिति यज्ञनाम । तदर्थं जातानि vअपां vनप्त्रा न पातयित्रा[3] पुत्रेण मध्यमस्थानेन वैद्युताग्निना vसजोषाः संगतः vत्वं vयं पुरुषं vराया ॥ चतुर्थ्यर्थे तृतीया ॥ धनार्थं vहिनोषि प्रेरयसि स हन्तीत्यन्वयः ॥

यस्ते॑ सूनो सहसो गी॒र्भिरु॒क्थैर्यज्ञै॒र्मर्तो॑ निशि॑तिं वे॒द्यान॑ट् ।
विश्वं॑ स दे॒व प्रति॒ वार॑मग्ने धत्ते धा॒न्यं॑[1] पत्यते वसव्यैः ॥ ४ ॥

यः । ते॒ । सू॒नो॒ इति॑ । सह॑सः । गी॒ःऽभिः । उ॒क्थैः । य॒ज्ञैः । मर्तः॑ । निऽशि॑तिम् । वे॒द्या । आन॑ट् ।
विश्व॑म् । सः । दे॒व॒ । प्रति॑ । वा॒ । अर॑म् । अग्ने॑ । ध॒त्ते॒ । धा॒न्य॑म् । प॒त्य॒ते॒ । व॒स॒व्यैः॑ ॥ ४ ॥

---

१. य–त्वं भगो भजनीयः । २. ख-भ–उदकस्य सत्यस्य; श–सत्यस्य । ३. ख-ञ-त-भ-य–प्रापयित्रा; न-र–पापयित्रा ।

हे ᵛसहसः ᵛसूनो बलस्य पुत्राग्ने ᵛते तव ᵛनिशितिं तैक्ष्ण्यं ᵛयः ᵛमर्तः मनुष्यो यजमानः ᵛगीर्भिः स्तुतिभिः ᵛउक्थैः शस्त्रैः ᵛयज्ञैः यजनसाधनैर्हविर्भिश्च ᵛवेधा वेद्यां यज्ञभूमौ ᵛआनट् प्रापयति ᵛसः मर्तो हे ᵛदेव द्योतमान ᵛअग्ने ᵛविश्वं सर्वम् ᵛअरं पर्याप्तम्। वाशब्दश्चार्थे। ᵛधान्यं च ᵛप्रति ᵛधत्ते प्रतिधारयति। ᵛवसव्यैः वसुभिश्च ᵛपत्यते संगच्छते ॥

ता नृभ्य आ सौश्रवसा सुवीराग्ने सूनो सहसः पुष्यसे धाः ।
कृणोषि यच्छवसा भूरि पश्वो वयो वृकायारये जसुरये ॥ ५ ॥

ता । नृऽभ्यः । आ । सौश्रवसा । सुऽवीरा । अग्ने । सूनो इति । सहसः । पुष्यसे । धाः ।
कृणोषि । यत् । शवसा । भूरि । पश्वः । वयः । वृकाय । अरये । जसुरये ॥ ५ ॥

हे ᵛसहसः ᵛसूनो सहसस्पुत्र ᵛअग्ने ᵛसुवीरा शोभनैः पुत्रैरुपेतानि ᵛसौश्रवसा सुश्रवांसि शोभनान्यन्नानि ᵛता तानि ᵛनृभ्यः शत्रुजनेभ्यः ᵛआ आहृत्य ᵛधाः अस्मासु धेहि । किमर्थम् । ᵛपुष्यसे पोषार्थम्[1] । यद्वा । नृभ्यः स्तुतीनां नेतृभ्योऽस्मभ्यम् आ धेहि आभिमुख्येन प्रयच्छ । ᵛशवसा बलेन युक्तस्त्वं ᵛभूरि बहुलं ᵛपश्वः पशोः संबन्धि दध्यादिलक्षणं ᵛयत् ᵛवयः अन्नं ᵛवृकाय अदात्रे ᵛजसुरये उपक्षपयित्रे ᵛअरये शत्रवे ᵛकृणोषि करोषि तदन्नमाहृत्य प्रयच्छेत्यर्थः[2] ॥

वह्या सूनो सहसो नो विहाया अग्ने तोकं तनयं वाजि नो दाः ।
विश्वाभिर्गीर्भिरभि पूर्तिमश्यां मदेम शतहिमाः सुवीराः ॥ ६ ॥

वह्या । सूनो इति । सहसः । नः । विऽहायाः । अग्ने । तोकम् । तनयम् । वाजि । नः । दाः ।
विश्वाभिः । गीःऽभिः । अभि । पूर्तिम् । अश्याम् । मदेम । शतऽहिमाः । सुऽवीराः ॥ ६ ॥

हे ᵛसहसः ᵛसूनो ᵛअग्ने ᵛविहायाः । महन्नामैतत् । महांस्त्वं ᵛनः अस्माकं ᵛवह्या वदिता हितोपदेष्टा भव । अपि च ᵛतोकं पुत्रं ᵛतनयं तत्पुत्रं च ᵛवाजि अन्नयुक्त ᵛनः अस्मभ्यं ᵛदाः देहि । अहं स्तोता ᵛविश्वाभिः सर्वाभिः ᵛगीर्भिः स्वद्विषयाभिः[3] ᵛपूर्तिं कामानां संपूर्तिम् ᵛअभि ᵛअश्याम् अभिप्राप्नुयाम् । अन्यद्वृतम् ॥ ॥ १५ ॥

' अग्ना यः ' इति षड्वृचं चतुर्दशं सूक्तं भरद्वाजस्यार्षमाग्नेयम् । षष्ठी शक्करी शिष्टाः पञ्चानुष्टुभः । तथा चानुक्रान्तम्—' अग्ना य आनुष्टुभं शक्कर्यन्तम् ' इति । प्रातरनुवाक आग्नेये क्रतावाश्विनशस्त्रे वेदं सूक्तम् । सूत्रितं च—' अग्ना यो होताजनिष्ट ' (आश्व. श्रौ. ४. १३) इति । अग्नेश्चतुर्वीरात्ये चतूरात्रेऽहीने तृतीयेऽहनीदं सूक्तमाज्यशस्त्रम् । सूत्रितं च—' अग्ना यो मर्त्यो दुव इति तृतीये ' (आश्व. श्रौ. १०. २) इति ॥

---

१. श-पोषणार्थम् । २. श-अस्मभ्यं प्रयच्छेत्यर्थः । ३. ज्ञ-त्वद्विषयाभिः स्तुतिभिः ।

अग्ना यो मर्त्यो दुवो धियं जुजोष धीतिभिः ।
भसन्नु ष प्र पूर्व्य इषं वुरीतावसे ॥ १ ॥

अग्ना । यः । मर्त्यः । दुवः । धियम् । जुजोष । धीतिऽभिः ।
भसत् । नु । सः । प्र । पूर्व्यः । इषम् । वुरीत । अवसे ॥ १ ॥

[v]यो [v]मर्त्यः मनुष्यः [v]अग्ना अग्नावग्निविषयं [v]दुवः परिचरणं [v]धियं कर्म च यज्ञादिलक्षणं [v]धीतिभिः स्तुतिभिः सार्धं [v]जुजोष सेवते आचरति [v]सः मर्त्यः [v]पूर्व्यः पूर्वेषां मुख्यः सन् [v]नु क्षिप्रं [v]प्र [v]भसत् प्रभासेत । प्रकृष्टप्रकाशवान् भवेत् । [v]अवसे पुत्रादीनां रक्षणार्थम् [v]इषम् अन्नं च [v]वुरीत वृणीत संभजेत । शत्रुसकाशाल्लभेतेत्यर्थः ॥

अग्निरिद्धि प्रचेता अग्निर्वेधस्तमः ऋषिः ।
अग्निं होतारमीळते यज्ञेषु मनुषो विशः ॥ २ ॥

अग्निः । इत् । हि । प्रऽचेताः । अग्निः । वेधःऽतमः । ऋषिः ।
अग्निम् । होतारम् । ईळते । यज्ञेषु । मनुषः । विशः ॥ २ ॥

[v]अग्निरित् अग्निरेव [v]प्रचेताः प्रकृष्टज्ञानवान् नान्यः[1] कश्चित् । [v]हि यस्मादेवं तस्मात् [v]वेधस्तमः विधातृतमोऽतिशयेन हविर्वहनादीनां कर्मणां कर्ता [v]ऋषिः सर्वस्य द्रष्टा च भवति । [v]मनुषः मनुष्यस्य यजमानस्य [v]विशः प्रजाः ऋत्विग्लक्षणाः [v]होतारं देवानामाह्वातारं तादृशम् [v]अग्निं [v]यज्ञेषु यागेषु [v]ईळते स्तुवन्ति ॥

नाना ह्यग्नेऽवसे स्पर्धन्ते रायो अर्यः ।
तूर्वन्तो दस्युमायवो व्रतैः सीक्षन्तो अव्रतम् ॥ ३ ॥

नाना । हि । अग्ने । अवसे । स्पर्धन्ते । रायः । अर्यः ।
तूर्वन्तः । दस्युम् । आयवः । व्रतैः । सीक्षन्तः । अव्रतम् ॥ ३ ॥

हे [v]अग्ने [v]अर्यः अरेः शत्रोः [v]रायः धनानि [v]अवसे त्वत्स्तोतॄणां रक्षणार्थं [v]नाना शत्रुसकाशात् पृथग्भूताः [v]स्पर्धन्ते । अहमेव पालयान्यहमेव पालयानीति स्पर्धां कुर्वन्ति । [v]आयवः मनुष्यास्ते च स्तोतारः [v]दस्युम् उपक्षपयितारं शत्रुं [v]तूर्वन्तः हिंसन्तः [v]व्रतैः त्वदेवत्स्यैर्यागैः [v]अव्रतं व्रतविरोधिनं[2] च पुरुषं [v]सीक्षन्तः सोढुमभिभवितुमिच्छन्तो भवन्ति ॥

---

१. ख-ङ्ग-त-न-भ-य-र-'नान्यः' नास्ति । २. ख-ग-घ१-ङ्ग-ङ्ग-त-न-भ-य-र-श–व्रतविरोधिनं यागविरोधिनम् ।

अग्निरप्सामृतीषहं वीरं ददाति सत्पतिम् ।
यस्य त्रसन्ति शवसः संचक्षि शत्रवो भिया ॥ ४ ॥

अग्निः । अप्साम् । ऋतिऽसहम् । वीरम् । ददाति । सत्ऽपतिम् ।
यस्य । त्रसन्ति । शवसः । सम्ऽचक्षि । शत्रवः । भिया ॥ ४ ॥

अयम् vअग्निः vवीरं पुत्रं vददाति स्तोतृभ्यः प्रयच्छति । कीदृशं पुत्रम् । vअप्साम् अपामास्त्यानां कर्मणां सनितारं संभक्तारम् vऋतीषहम् ऋतीनामरातीनां सोढारमभिभवितारं vसत्पतिं सतां कर्मणां पालयितारम् । vयस्य वीरस्य vसंचक्षि संदर्शने सति vशवसः बलात् vभिया भीत्या vशत्रवः vत्रसन्ति उद्विजन्ते तं वीरमित्यन्वयः ॥

अग्निर्हि विश्वना निदो देवो मर्तमुरुष्यति ।
सहावा यस्यावृतो रयिर्वाजेष्ववृतः ॥ ५ ॥

अग्निः । हि । विश्वना । निदः । देवः । मर्तम् । उरुष्यति ।
सहऽवा । यस्य । अवृतः । रयिः । वाजेषु । अवृतः ॥ ५ ॥

vसहावा । सहो बलम् । तद्वान् vदेवः दानादिगुणयुक्तः vअग्निः vविश्वना ज्ञानेन युक्तः सन् तं vमर्तं मनुष्यं यजमानं vनिदः निन्दकात् vउरुष्यति रक्षति । vहि इति पूरकः । vयस्य मर्तस्य vरयिः हविर्लक्षणं धनम् vअवृतः रक्षःप्रभृतिभिरनाच्छादितं vवाजेषु यज्ञेषु vअवृतः अन्यैर्यजमानैः असंभक्तं[1] तं[1] हविष्मन्तं यजमानमुरुष्यतीत्यन्वयः ॥

अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः ।
वीहि स्वस्तिं सुक्षितिं दिवो नृन्द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम ॥६॥

अच्छ । नः । मित्रऽमहः । देव । देवान् । अग्ने । वोचः । सुऽमतिम् । रोदस्योः ।
वीहि । स्वस्तिम् । सुऽक्षितिम् । दिवः । नॄन् । द्विषः । अंहांसि । दुःऽइता । तरेम ।
ता । तरेम । तव । अवसा । तरेम ॥ ६ ॥

व्याख्यातेयम्* । अक्षरार्थस्तु । अनुकूलदीप्ते दानादिगुणयुक्ताग्ने द्यावापृथिव्योरभिगतस्त्वमस्मदीयां सुष्टुतिं यष्टव्यान् देवान् प्रति वोचः प्रब्रूहि । स्तुतेर्नेतृनस्मांश्च सुनिवासमविनाशं गमय । वयं च

---

१. ख१-घ-ज-भ-श–असंभक्तं तस्यैव असाधारणम् ; ण–असंभक्तं तस्यैव साधारणम् ; त–असंभक्तं न । * ख-घ–पुस्तकयोरस्य मन्त्रस्य संपूर्णं भाष्यं विद्यते (ऋ. सं. ६. २. ११) ।

त्वत्प्रसादात् द्वेष्टॄन् पापानि तत्फलानि दुर्गमनानि चातिक्रामेम । व्यवहितानि जन्मान्तरकृतानि च तान्यतिक्रामेम । त्वदीयेन रक्षणेनात्यन्तमतिक्रामेमेति ॥ ॥ १६ ॥

'इममू षु वः' इत्येकोनविंशस्यृचं पञ्चदशं सूक्तमाङ्गिरसस्य वीतहव्यस्य भरद्वाजस्य वार्षमाग्नेयम् । आदौ नव जगत्यस्तृतीयापष्ठयौ तु शक्वर्यतिशक्वर्यौ पञ्चदशी शक्करी सप्तदश्यनुष्टुबष्टादशी बृहती दशम्याद्याः पञ्च षोडश्येकोनविंशी चेति सप्त त्रिष्टुभः । तथा चानुक्रान्तम्—'इममू ष्वेकोना वीतहव्य ऋषिर्वा जागतं प्राग्दशम्यास्तृतीयापञ्चदश्यौ शक्वर्यौ षष्ठ्यतिशक्वर्यनुष्टुब्बृहत्या उपान्त्ये' इति । प्रातरनुवाक आग्नेये क्रतावाश्विनशस्त्रे चादितो नवर्चः । सूत्रितं च—' इममू षु वो अतिथिमुषर्बुधमिति नव ' (आश्व. श्रौ. ४. १३) इति । दशरात्रे पञ्चमेऽहनि आद्यं नवर्चमाज्यशस्त्रम् । सूत्रितं च—' इममू षु वो अतिथिमुषर्बुधमिति नवाज्यम् ' (आश्व. श्रौ. ७. १२) इति ॥

इममू षु वो अतिथिमुषर्बुधं विश्वासां विशां पतिमृञ्जसे गिरा ।
वेतीदिवो जनुषा कच्चिदा शुचिर्ज्योक्चिदत्ति गर्भो यदच्युतम् ॥ १ ॥

इमम् । ऊँ इति । सु । वः । अतिथिम् । उषःऽबुधम् । विश्वासाम् । विशाम् । पतिम् । ऋञ्जसे । गिरा ।
वेति । इत् । दिवः । जनुषा । कत् । चित् । आ । शुचिः ।
ज्योक् । चित् । अत्ति । गर्भः । यत् । अच्युतम् ॥ १ ॥

हे वीतहव्य ऋषे भरद्वाज वा ᵛवः त्वम् । विभक्तिवचनयोर्व्यत्ययः ॥ ᵛइममु इममेवाग्निं ᵛगिरा स्तुत्या ᵛसु ᵛऋञ्जसे सुष्ठु प्रसाधय । 'ऋञ्जतिः प्रसाधनकर्मा' इति यास्कः । कीदृशम् । ᵛअतिथिं सततं गन्तारम् । यद्वा । अतिथिवत्पूज्यम् । ᵛउषर्बुधम् उषसि प्रबुद्धं ᵛविश्वासां सर्वासां ᵛविशां प्रजानां ᵛपतिं पालयितारम् । ᵛजनुषा[1] जन्मना स्वत एव ᵛशुचिः शुद्धो निर्मलो वाग्निः ᵛकच्चित् कदाचित् कस्मिंश्चिद्यागकाले ᵛदिवः द्युलोकात् ᵛआ ᵛवेति आगच्छति । तदानीं प्रसाधयेत्यन्वयः । एवं प्रसाधितोऽग्निः ᵛगर्भः अरण्योर्मध्ये गर्भवद्वर्तमानः । यद्वा । द्यावापृथिव्योर्गर्भभूतः सन् ᵛयत् हविः ᵛअच्युतं च्युतिरहितं नित्यमग्निहोत्रादिसाधनभूतं पयःप्रभृतिकं तत् ᵛज्योक्चित् चिरकालम् ᵛअत्ति भक्षयति ॥

मित्रं न यं सुधितं भृगवो दधुर्वनस्पतावीड्यमूर्ध्वशोचिषम् ।
स त्वं सुप्रीतो वीतहव्ये अद्भुत प्रशस्तिभिर्महयसे दिवेदिवे ॥ २ ॥

मित्रम् । न । यम् । सुऽधितम् । भृगवः । दधुः । वनस्पतौ । ईड्यम् । ऊर्ध्वऽशोचिषम् ।
सः । त्वम् । सुऽप्रीतः । वीतऽहव्ये । अद्भुत । प्रशस्तिऽभिः । महयसे । दिवेऽदिवे ॥ २ ॥

ᵛवनस्पतौ अरण्यां ᵛसुधितं सुष्ठु निहितम् ᵛईड्यं स्तुत्यम् ᵛऊर्ध्वशोचिषम् उच्छ्रिततेजस्कं ᵛयम् अग्निं त्वां ᵛमित्रं ᵛन मित्रमिव सखिभूतमिव ᵛभृगवः महर्षयः ᵛदधुः आदधुः गृहे स्थापितवन्तः हे

---

१. ख-घ-भ – जनुषा इत् ।

vअद्भुत महञ्जन्ने vसः तादृशः vत्वं vवीतहव्ये एतत्संज्ञ ऋषौ vसुप्रीतः सुष्ठु प्रीयमाणो भव । यतः vदिवेदिवे प्रतिदिनं vप्रशस्तिभिः प्रकृष्टैः स्तोत्रैः vमहयसे पूज्यसे । भरद्वाज ऋषिश्चेत् वीतहव्ये दत्तहविष्के भरद्वाज इति योजनीयम् ॥

स त्वं दक्षस्यावृको वृधो भूरर्यः परस्यान्तरस्य तरुषः ।
रायः सूनो सहसो मर्त्येष्वा छर्दिर्यच्छ वीतहव्याय सप्रथो भरद्वाजाय सप्रथः ॥३॥

सः । त्वम् । दक्षस्य । अवृकः । वृधः । भूः । अर्यः । परस्य । अन्तरस्य । तरुषः ।
रायः । सूनो इति । सहसः । मर्त्येषु । आ ।
छर्दिः । यच्छ । वीतऽहव्याय । सऽप्रथः । भरत्ऽवाजाय । सऽप्रथः ॥ ३ ॥

हे अग्ने vसः तादृशः vअवृकः बाधकरहितः vत्वं vदक्षस्य अनुष्ठानसमर्थस्य vवृधः वर्धयिता vभूः भवसि । तथा vपरस्य विप्रकृष्टस्य vअर्यः अरेः शत्रोः vअन्तरस्य अन्तिकतरस्य संनिकृष्टस्य शत्रोः vतरुषः तरिता भवसि । अतः कारणात् हे vसहसः vसूनो vसप्रथः सर्वतः पृथुस्त्वं vमर्त्येषु मनुष्येषु मध्ये vभरद्वाजाय संभृतहविर्लक्षणान्नाय vवीतहव्याय । वीतं गमितं हव्यं हविर्येन तादृशाय भरद्वाजायेति वा योज्यम् । vरायः[1] धनानि vछर्दिः गृहं vआ vयच्छ प्रयच्छ । सप्रथ इति पुनरुक्तिरादरार्था[1] ॥

द्युतानं वो अतिथिं स्वर्णरमग्निं होतारं मनुषः स्वध्वरम् ।
विप्रं न द्युक्षवचसं सुवृक्तिभिर्हव्यवाहमरतिं देवमृञ्जसे ॥ ४ ॥

द्युतानम् । वः । अतिथिम् । स्वःऽनरम् । अग्निम् । होतारम् । मनुषः । सुऽअध्वरम् ।
विप्रम् । न । द्युक्षऽवचसम् । सुवृक्तिऽभिः । हव्यऽवाहम् । अरतिम् । देवम् । ऋञ्जसे ॥४॥

हे वीतहव्य त्वं vसुवृक्तिभिः शोभनाभिः स्तुतिभिः vहव्यवाहं हविषां वोढारं vदेवम् vअग्निम् vऋञ्जसे प्रसाधय । कीदृशम् । vद्युतानं दीप्यमानं vवः युष्माकम् vअतिथिम् अतिथिवत्पूज्यं vस्वर्णरं स्वर्गस्य नेतारं vमनुषः मनोः प्रजापतेर्यज्ञे vहोतारं देवानामाह्वातारं vस्वध्वरं शोभनयज्ञं vविप्रं vन मेधाविनं विपश्चितमिव vद्युक्षवचसम् । दीप्तेर्निवासभूतं द्युक्षम् । तादृशवाक्योपेतम् vअरतिम् अर्यं स्वामिनम् ॥

---

१. ख-ञ-न-भ-य-र-सप्रथ इति पुनरुक्तिरादरार्था (ख-ञ-र-२'एवंविधस्त्वं' नास्ति) रायो धनानि छर्दिर्गृहं वायच्छ प्रयच्छ; त-सप्रथ इति पुनरुक्तिरादरार्था ।

पावकया यश्चितयन्त्या कृपा क्षामन्रुरुच उषसो न भानुना ।
तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे न ततृषाणो अजरः ॥ ५ ॥

पावकया । यः । चितयन्त्या । कृपा । क्षामन् । रुरुचे । उषसः । न । भानुना ।
तूर्वन् । न । यामन् । एतशस्य । नु । रणे । आ । यः । घृणे । न । ततृषाणः । अजरः ॥५॥

vयः अग्निः vपावकया शोधयित्र्या vचितयन्त्या चेतयन्त्या प्रज्ञापयन्त्या vकृपा दीप्त्या vक्षामन् भूम्यां vरुरुचे दीप्यते । vउषसो vन vभानुना । यथोषसः प्रकाशेन भासन्ते तद्वत् । अपि च vयामन् यामनि संग्रामे vतूर्वन्न शत्रून् हिंसन् पुरुष इव vएतशस्य एतत्संज्ञकस्य ऋषेः vरणे सूर्येण सह संग्रामे सहायार्थं vयः अग्निः vनु क्षिप्रम् vआ vघृणे आदीप्यते । 'प्रैतशं सूर्ये पस्पृधानम्' (ऋ. सं. १. ६१. १५) इति निगमान्तरम् । नूनं सर्वे देवास्तस्य साहाय्यमकार्षुः । यश्च vततृषाणः तृषितः प्रभावेन सर्वभक्षणशीलः vअजरः जरारहितश्च भवति तं देवमृअस इति पूर्वस्यामृचि संबन्धः ॥ ॥ १७ ॥

अग्निमग्निं वः समिधा दुवस्यत प्रियंप्रियं वो अतिथिं गृणीषणिं ।
उप वो गीर्भिरमृतं विवासत देवो देवेषु वनते हि वार्यं देवो देवेषु वनते हि नो दुवः॥६॥

अग्निम्ऽअग्निम् । वः । सम्ऽइधा । दुवस्यत । प्रियम्ऽप्रियम् । वः । अतिथिम् । गृणीषणिं ।
उप । वः । गीःऽभिः । अमृतम् । विवासत । देवः । देवेषु । वनते । हि । वार्यम् ।
देवः । देवेषु । वनते । हि । नः । दुवः ॥ ६ ॥

हे अस्मदीयाः स्तोतारः vवः यूयं vप्रियंप्रियम् अत्यन्तं प्रियं vवः युष्माकम् vअतिथिम् अतिथिवत्पूज्यं vगृणीषणि शब्दनीयं स्तुत्यम् vअग्निमग्निम् अग्निमेव । नान्यं देवमित्यर्थः । vसमिधा समिन्धनेन समिद्भिर्वा vदुवस्यत परिचरत । यद्वा । गृणीषणीति सप्तम्यन्तम् । गृणीषणि स्तोत्रे विषयतया वर्तमानम् । अपि च vवः यूयम् vअमृतम् अमरणमग्निं vगीर्भिः स्तुतिभिरुपेत्य vविवासत परिचरत । vहि यस्मात् vदेवेषु मध्ये vदेवः दानादिगुणयुक्तोऽग्निः vवार्यं वरणीयं समिदादिकं vवनते संभजते । vहि यस्माच्च vदेवेषु मध्ये vदेवः अग्निः vनः अस्माकं vदुवः परिचरणं vवनते संभजते तस्मात् दुवस्यतेत्यन्वयः ॥

दशमेऽहन्याग्निमारुते 'समिद्धम्' इति तृचो जातवेदस्यनिविद्धानार्थः । सूत्रितं च— 'समिद्धमग्निं समिधा गिरा गृण इति तृचश्च' (आश्व. श्रौ. ८. १२) इति[1] ॥

---

१. न–इति । बृहस्पतिसवे आग्निमारुते शस्त्रे समिद्धमग्निमिति तृचः । सूत्रितं च–समिद्धमग्निं समिधा गिरा गृण इत्याग्निमारुतम् (आश्व. श्रौ. ९.५.) इति ।

समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम् ।
विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम् ॥ ७ ॥

सम्ऽईद्धम् । अग्निम् । सम्ऽइधा । गिरा । गृणे । शुचिम् । पावकम् । पुरः । अध्वरे । ध्रुवम् । विप्रम् । होतारम् । पुरुऽवारम् । अद्रुहम् । कविम् । सुम्नैः । ईमहे । जातऽवेदसम् ॥ ७ ॥

[v]समिद्धं सम्यग्दीप्तम् [v]अग्निं [v]समिधा समिन्धनहेतुभूतया [v]गिरा स्तुत्या [v]गृणे स्तौमि । यद्वा । समिधा समिद्भिर्दारुभिः समिद्धं सम्यगिद्धम् । अपि च [v]शुचिं स्वयं शुद्धं [v]पावकं सर्वेषां शोधकं [v]ध्रुवं निश्चलं तमग्निम् [v]अध्वरे यज्ञे पुरस्करोमीति शेषः । तथा [v]विप्रं मेधाविनं [v]होतारं देवानामाह्वातारं [v]पुरुवारं बहुभिर्वरणीयम् [v]अद्रुहम् अद्रोग्धारं सर्वेषामनुकूलं [v]कविं क्रान्तदर्शिनं [v]जातवेदसं जातानां वेदितारमग्निं [v]सुम्नैः सुखकरैः स्तोत्रैः [v]ईमहे संभजामहे । यद्वा द्वितीयार्थे तृतीया । सुम्नानि धनानीमहे याचामहे ॥

त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम् ।
देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ॥ ८ ॥

त्वाम् । दूतम् । अग्ने । अमृतम् । युगेऽयुगे । हव्यऽवाहम् । दधिरे । पायुम् । ईड्यम् । देवासः । च । मर्तासः । च । जागृविम् । विऽभुम् । विश्पतिम् । नमसा । नि । सेदिरे ॥८॥

हे [v]अग्ने [v]त्वां [v]देवासः देवाः [v]च [v]मर्तासः मनुष्याः [v]च [v]दूतं [v]दधिरे विदधिरे कृतवन्तः । कीदृशं त्वाम् । [v]अमृतम् अमरणं [v]युगेयुगे काले काले तत्तद्यागानुष्ठानसमये [v]हव्यवाहं हव्यानां हविषां वोढारं [v]पायुं पालयितारम् [v]ईड्यं स्तुत्यम् । अपि च त उभयविधा [v]जागृविं जागरणशीलं [v]विभुं व्याप्तं [v]विश्पतिं विशां प्रजानां पालयितारं तमग्निं [v]नमसा नमस्कारेण हविर्लक्षणान्नेन वा [v]नि [v]षेदिरे उपसेदिरे ॥

विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे ।
यत्ते धीतिं सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव ॥ ९ ॥

विऽभूषन् । अग्ने । उभयान् । अनु । व्रता । दूतः । देवानाम् । रजसी इति । सम् । ईयसे । यत् । ते । धीतिम् । सुऽमतिम् । आऽवृणीमहे । अध । स्म । नः । त्रिऽवरूथः । शिवः । भव ॥९॥

हे [v]अग्ने [v]उभयान् उभयविधान् देवान् मनुष्यांश्च [v]विभूषन् विशेषेण भूषयन् अलंकुर्वंस्त्वम् [v]अनु [v]व्रता व्रतान्यनु व्रतेषु कर्मसु यागेषु [v]देवानां [v]दूतः सन् [v]रजसी द्यावापृथिव्यौ [v]समीयसे संचरसि । देवानानेतुं द्युलोकं गच्छसि हवींषि च नेतुमिमं लोकम् । किंच [v]यत् यस्मात् [v]ते तुभ्यं त्वदर्थं

vधीतिं कर्म vसुमतिं शोभनां स्तुतिं च vआवृणीमहे वयं संभजामहे vअथ अतः कारणात् vत्रिवरूथः त्रिस्थानस्थं vनः अस्माकं vशिवः सुखकरः vभव। vस्म इत्येतत् पादपूरणम्॥

प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे छन्दसि 'तं सुप्रतीकम्' इत्याद्याः षडृचः। सूत्रितं च—'तं सुप्रतीकमिति षट्' (आश्व. श्रौ. ४. १३) इति॥

तं सुप्रतीकं सुदृशं स्वञ्चमविद्वांसो विदुष्टरं सपेम।
स यक्षद्विश्वा वयुनानि विद्वान्प्र हव्यमग्निरमृतेषु वोचत्॥ १०॥

तम्। सुऽप्रतीकम्। सुऽदृशम्। सुऽअञ्चम्। अविद्वांसः। विदुःऽतरम्। सपेम।
सः। यक्षत्। विश्वा। वयुनानि। विद्वान्। प्र। हव्यम्। अग्निः। अमृतेषु। वोचत्॥१०॥

vअविद्वांसः वैदुष्यरहिता अल्पमतयो वयं vविदुष्टरं विद्वत्तरं सर्वज्ञं vतम् अग्निं vसपेम परिचरेम। कीदृशम्। vसुप्रतीकं शोभनाङ्गं vसुदृशं शोभनद्रष्टारं[1] vस्वञ्चं सुष्ठ्वञ्चन्तं गच्छन्तम्। किंच vसः तादृशः अग्निः vयक्षत् देवान् यजतु। vविश्वा सर्वाणि vवयुनानि। ज्ञाननामैतत्। इह तु ज्ञातव्ये वर्तते। ज्ञातव्यान्यर्थजातानि vविद्वान् जानन् vअग्निः vअमृतेषु मरणरहितेषु देवेषु vहव्यम् अस्मदीयं हविः vप्र vवोचत् प्रब्रवीतु। युष्मदर्थं हविः कल्पितं तदर्थं यूयमागच्छतेत्येवं कथयतु॥ ॥ १८॥

तमग्ने पास्युत तं पिपर्षि यस्त आनट्कवये शूर धीतिम्।
यज्ञस्य वा निशितिं वोदितिं वा तमित्पृणक्षि शवसोत राया॥ ११॥

तम्। अग्ने। पासि। उत। तम्। पिपर्षि। यः। ते। आनट्। कवये। शूर। धीतिम्।
यज्ञस्य। वा। निऽशितिम्। वा। उत्ऽइतिम्। वा। तम्। इत्। पृणक्षि। शवसा। उत। राया॥११॥

हे vअग्ने vतं पुरुषं vपासि रक्षसि। vउत अपि च vतं vपिपर्षि कामैः पूरयसि। vयः पुरुषो हे vशूर शौर्यवन्नग्ने vकवये क्रान्तदर्शनाय vते तुभ्यं त्वदर्थं vधीतिं कर्म स्तुतिं वा vआनट् प्राप्नोति। यद्वा। 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थी। कविं त्वां धीतिमानट् प्रापयति। तं पासीत्यन्वयः। अपि[2] च vयज्ञस्य यागस्य vवा तत्साधनभूतस्य हविषो वा vनिशितिं vवा। निशितिः संस्कारः। तं वा vउदितिम् उद्गमनं vवा आनट् प्रापयति vतमित् तमेव vशवसा बलेन vपृणक्षि पूरयसि। vउत अपि च vराया धनेन पूरयसि[3]॥

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्।
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥ १२॥

त्वम्। अग्ने। वनुष्यतः। नि। पाहि। त्वम्। ऊँ इति। नः। सहसाऽवन्। अवद्यात्।
सम्। त्वा। ध्वस्मन्ऽवत्। अभि। एतु। पाथः। सम्। रयिः। स्पृहयाय्यः। सहस्री॥ १२॥

---

१. श-त-य-शोभनं द्रष्टारम्। २. घ-श-उतापि। ३. ख-ज्ञ-ज्ञ-त१-न-भ-य-र- च पूरयसि; घ-त२-आपूरयसि

हे vअग्ने vत्वं vबलवतः हिंसकाच्छत्रोः vनि नितरामस्मान्रक्ष । हे vसहसावन् बलवन्नग्ने vत्वमु त्वमेव vनः अस्मान् vअवद्यात् पापात् निपाहि । vत्वा त्वां vध्वस्मन्वत् ध्वंसनवत् ध्वस्तदोषं vपाथः हविर्लक्षणमस्माभिर्दत्तमन्नं vसम् vअभ्येतु सम्यगभिगच्छतु । vस्पृहयाय्यः स्पृहणीयः vसहस्री सहस्रसंख्यायुक्तः vरयिः त्वया दत्तं धनं सम्यगभिगच्छतु ॥

व्यूढे दशरात्रे पञ्चमेऽहन्यग्निमारुते 'अग्निर्होता' इति तृचो जातवेदसनिविद्धानीयः । सूत्रितं च—'अग्निर्होता गृहपतिः स राजेति तिस्रः' (आश्व. श्रौ. ८. ८) इति । पत्नीसंयाजेषु गृहपतेराद्यानुवाक्या । सूत्रितं च—'अग्निर्होता गृहपतिः स राजा हव्यवाळग्निरजरः पिता न इति पत्नीसंयाजाः' (आश्व श्रौ. १. १०) इति । आग्निनशस्त्रस्यैषैव प्रतिपत् । सूत्रितं च—'अग्निर्होता गृहपतिः स राजेति प्रतिपदेकपातिनी पच्छः' (आश्व. श्रौ. ६. ५) इति ॥

अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः ।
देवानामुत यो मर्त्यानां यजिष्ठः स प्र यजतामृतावा ॥ १३ ॥

अग्निः । होता । गृहऽपतिः । सः । राजा । विश्वा । वेद । जनिम । जातऽवेदाः ।
देवानाम् । उत । यः । मर्त्यानाम् । यजिष्ठः । सः । प्र । यजताम् । ऋतऽवा ॥ १३ ॥

vहोता देवानामाह्वाता vराजा राजमानः vसः vअग्निः vगृहपतिः गृहाणां पतिरधिपतिर्भवति । तथा vविश्वा विश्वानि सर्वाणि vजनिम जन्मानि जन्मवन्ति भूतजातानि vजातवेदाः जातप्रज्ञः सन् vवेद वेत्ति जानाति । vयः अग्निः vदेवानाम् इन्द्रादीनाम् vउत अपि च vमर्त्यानां मनुष्याणां च मध्ये vयजिष्ठः अतिशयेन यष्टा भवति vऋतावा । ऋतं सत्यं यज्ञो वा । तद्वान् vसः अग्निः vप्र vयजतां प्रकर्षेण देवान् यजतु ॥

'अग्ने यदद्य' इति दर्शपूर्णमासयोः स्विष्टकृतो याज्या । सूत्रितं च—'अग्ने यदद्य विशो अध्वरस्य होतरित्यनवानं यजति' (आश्व. श्रौ. १. ६) इति ॥

अग्ने यदद्य विशो अध्वरस्य होतः पावकशोचे वेष्टं हि यज्वा ।
ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य ॥ १४ ॥

अग्ने । यत् । अद्य । विशः । अध्वरस्य । होतरिति । पावकऽशोचे । वेः । त्वम् । हि । यज्वा ।
ऋता । यजासि । महिना । वि । यत् । भूः । हव्या । वह । यविष्ठ । या । ते । अद्य ॥ १४ ॥

हे vअध्वरस्य vहोतः यज्ञस्य निष्पादक vपावकशोचे शोधकदीप्ते एवंभूत हे vअग्ने vअद्य अस्मिन् काले vविशः मनुष्यस्य यजमानस्य vयत् कर्तव्यं तत् vवेः कामयस्व । vहि यस्मात् vत्वं vयज्वा देवानां यष्टा भवसि तस्मात् vऋता ऋते यज्ञे vयजासि देवान् यज । अपि च vमहिना महिम्ना स्वमाहात्म्येन vयत् यस्मात् vवि vभूः विभवसि व्याप्तो भवसि अतः कारणात् हे vयविष्ठ युवतमाग्ने vते तुभ्यं स्वदर्थम् vअद्य इदानीं vया यानि हव्यानि जुहुमस्तानि vहव्या हव्यानि हवींषि vवह । स्वकीयां स्विष्टकृदाख्यां तनुं प्रापय ॥

अभि प्रयाँसि सुधितानि हि ख्यो नि त्वा दधीत रोदसी यजध्यै ।
अर्वा नो मघवन्वाजसातावग्ने विश्वानि दुरिता तरेम ता तरेम तवावसा तरेम ॥१५॥

अभि । प्रयाँसि । सुऽधितानि । हि । ख्यः । नि । त्वा । दधीत । रोदसी इति । यजध्यै ।
अर्वा । नः । मघऽवन् । वाजऽसातौ । अग्ने । विश्वानि । दुःऽइता । तरेम ।
ता । तरेम । तवा । अवसा । तरेम ॥ १५ ॥

हे अग्ने [v]सुधितानि सुनिहितानि[1] वेद्यामासादितानि [v]प्रयांसि अन्नानि हविर्लक्षणानि[2] [v]अभि [v]ख्यः अभिपश्यसि । [v]हि पूरकः । तादृशं[3] त्वां[3] [v]रोदसी द्यावापृथिव्यावेतदुपलक्षितान् सर्वान् देवान् [v]यजध्यै यष्टुं [v]नि [v]दधीत । अयं यजमानो निहितवान् । हे [v]मघवन् [v]अग्ने [v]नः अस्मान् [v]वाजसातौ संग्रामे अन्नस्य संभजने वा निमित्तभूते [v]अव रक्ष । वयं च [v]विश्वानि सर्वाणि [v]दुरिता दुरितानि दुःखानि [v]तरेम अतिक्रामेम । अन्यद्गतम् ॥ ॥ १५ ॥

अग्निप्रणयने ' अग्ने विश्वेभिः ' इत्येषानुवक्तव्या[4] । सूत्रितं च—' अग्ने विश्वेभिः स्वनीक देवैरित्यर्धर्चं आरमेत् ' (आश्व. औ. २. १७) इति ॥

अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिम् ।
कुलायिनं घृतवन्तं सवित्रे यज्ञं नय यजमानाय साधु ॥ १६ ॥

अग्ने । विश्वेभिः । सुऽअनीक । देवैः । ऊर्णाऽवन्तम् । प्रथमः । सीद । योनिम् ।
कुलायिनम् । घृतऽवन्तम् । सवित्रे । यज्ञम् । नय । यजमानाय । साधु ॥ १६ ॥

हे [v]स्वनीक सुज्वाल [v]अग्ने [v]विश्वेभिः विश्वैः सर्वैः [v]देवैः सह [v]ऊर्णावन्तम् ऊर्णास्तुकावन्तं [v]योनिम् उत्तरवेदिलक्षणं स्थानं [v]प्रथमः सर्वेषु देवेषु मुख्यस्त्वं [v]सीद उपविश । कीदृशं योनिम् । [v]कुलायिनम् । कुलायो नीडम् । तत्सदृशं गुग्गुल्वादिसंभारेणोपेतम् । तथा च श्रूयते—' कुलायमिव ह्येतद्यज्ञे क्रियते यत्पैतुदारवाः परिधयो गुग्गुलूर्णास्तुकाः सुगन्धितेजनानि ' (ऐ. ब्रा. १. २८) इति । [v]घृतवन्तं घृताघारणाज्ययुक्तम् । एवमुत्तरवेद्यां निषण्णस्त्वं [v]सवित्रे हविषां प्रेरयित्रे [v]यजमानाय । षष्ठ्यर्थे चतुर्थ्येषा । ईदृशस्य यजमानस्य [v]यज्ञं [v]साधु आर्जवेन [v]नय देवान् प्रापय ॥

इममु त्यमथर्ववदग्निं मन्थन्ति वेधसः ।
यमङ्कूयन्तमानयन्नमूरं श्याव्याभ्यः ॥ १७ ॥

इमम् । ऊँ इति । त्यम् । अथर्वऽवत् । अग्निम् । मन्थन्ति । वेधसः ।
यम् । अङ्कूयन्तम् । आ । अनयन् । अमूरम् । श्याव्याभ्यः ॥ १७ ॥

---

१. ख-ञ-न-भ-य-श—सुहितानि । २. त-य—हविर्लक्षणान्यन्नानि । ३. ख-भ—त्वा त्वां तादृशम्; ञ—त्वा तादृशम्; न-र—त्वा त इदृशं त्वाम्; श—त्वादृशं त्वाम् । ४. ख-ञ-न-भ-श—इत्येषानुवाक्या ।

[v]वेधसः कर्मणां विधातार ऋत्विजः [v]इमं दृश्यमानं [v]त्यं तं पूर्वोक्तगुणम् [v]अग्निम् [v]अथर्ववत् यथाथर्वाख्य ऋषिः पुरामघात् तथा [v]मन्थन्ति मथ्नन्ति । अरण्योः सकाशाज्जनयन्ति । [v]अङ्कूयन्तम् । कुत्सितमञ्चनं गमनम् अङ्कूः[1] । तदात्मन इच्छन्तं देवेभ्यो निर्गत्येतस्ततः पलायमानम् [v]अमूरम् अमूढं [v]यम् अग्निं [v]श्याव्याभ्यः । श्यावीति रात्रिनाम । तत्र भवास्तमसः संहतयः श्याव्याः । ताभ्यः सकाशात् [v]आनयन् आगमयन् तं मन्थन्तीत्यन्वयः[2] ॥

जनिष्वा देववीतये सर्वताता स्वस्तये ।
आ देवान्वक्ष्यमृताँ ऋतावृधो यज्ञं देवेषु पिस्पृशः ॥ १८ ॥

जनिष्व । देवऽवीतये । सर्वऽताता । स्वस्तये ।
आ । देवान् । वक्षि । अमृतान् । ऋतऽवृधः । यज्ञम् । देवेषु । पिस्पृशः ॥ १८ ॥

हे अग्ने [v]सर्वताता सर्वैस्तायमाने यज्ञे मथ्यमानस्त्वं [v]जनिष्व प्रादुर्भव । किमर्थम् । [v]देववीतये देवकामाय यजमानाय । षष्ठ्यर्थे चतुर्थ्येषा । ईदृशस्य यजमानस्य [v]स्वस्तये अविनाशार्थम् । जनित्वा च [v]अमृतान् मरणरहितान् [v]ऋतावृधः यज्ञस्य वर्धयितॄन् [v]देवान् [v]आ [v]वक्षि आवह । तदनन्तरं तेषु [v]देवेषु अस्मदीयं [v]यज्ञं [v]पिस्पृशः स्पर्शय । प्रापयेत्यर्थः ॥

वयमु त्वा गृहपते जनानामग्ने अकर्म समिधा बृहन्तम् ।
अस्थूरि नो गार्हपत्यानि सन्तु तिग्मेन नस्तेजसा सं शिशाधि ॥ १९ ॥

वयम् । ऊँ इति । त्वा । गृहऽपते । जनानाम् । अग्ने । अकर्म । सम्ऽइधा । बृहन्तम् ।
अस्थूरि । नः । गार्हऽपत्यानि । सन्तु । तिग्मेन । नः । तेजसा । सम् । शिशाधि ॥१९॥

हे [v]गृहपते यज्ञानां पालक [v]अग्ने [v]जनानां प्राणिनां मध्ये [v]वयमु वयमेव [v]त्वा त्वां [v]समिधा समिन्धनेन [v]बृहन्तं महान्तम् [v]अकर्म कृतवन्तः स्मः । अतः कारणात् [v]नः अस्माकं [v]गार्हपत्यानि गृहपतित्वानि [v]अस्थूरि अस्थूरीणि । एकाश्वयुक्तः शकटः स्थूरिरित्युच्यते तद्विपरीतो बहुभिरश्वैरुपेतः शकटोऽस्थूरिः । तेन च संपूर्णता लक्ष्यते । अस्थूरीणि पुत्रपशुधनादिभिः संपूर्णानि भवन्तु । अपि च [v]नः अस्मान् [v]तिग्मेन तीक्ष्णेन [v]तेजसा [v]सं [v]शिशाधि सम्यङ्निश्य सम्यक् तीक्ष्णीकुरु । संयोजयेत्यर्थः ॥ ॥ २० ॥ ॥ १ ॥

द्वितीयेऽनुवाकेऽष्ट सूक्तानि । तत्र ' त्वमग्ने यज्ञानाम् ' इत्यष्टाचत्वारिंशदृचं प्रथमं सूक्तं भरद्वाजस्यार्षमाग्नेयम् । आद्या षष्ठी च वर्धमाना गायत्री ' षट्कसप्तकाष्टकाः सा वर्धमाना ' इत्युक्तलक्षणोपेतत्वात् । सप्तर्विंशयनुष्टुप् । ' आ ते अग्ने, अग्निं देवासः ' इत्येते ऋचावनुष्टुभौ । तयोः पूर्वा ' वीती यो देवम् ' इति त्रिष्टुप् । शिष्टा द्वाचत्वारिंशदृचो गायत्र्यः । तथा[3] चानुक्रम्यते[3]—' त्वमग्नेऽष्टाचत्वारिंशद्भारद्वाजमग्नं वर्ध-

---

१. ख-ज्ञ-ञ-त-न-भ-र—अङ्कुः । २. मथ्नन्तीत्यन्वयः । ३. ख-न-भ—तथानुक्रम्यते; श—तथा चानुक्रान्तम् ।

मानाद्या षष्ठी च सप्तविंश्यनुष्टुप् त्रिष्टुप्पूर्वे चान्त्ये ' इति । प्रातरनुवाकाश्विनशस्त्रयोराग्नेयं क्रतौ गायत्रे छन्दसीदं सूक्तमुच्यते । तत्रान्त्यास्तिस्र ऋच उद्धर्तव्याः । सूत्र्यते हि—' त्वमग्ने यज्ञानामिति तिस्र उत्तमा उद्धरेत् ' (आश्व. श्रौ. ४. १३) इति । विश्वजित्याग्निमारुते बृहत्साम यद्यग्निष्टोमसाम स्यात्तदानीमाद्याः षडृचः स्तोत्रियानुरूपार्थाः । सूत्रितं हि—' त्वमग्ने यज्ञानामिति स्तोत्रियानुरूपौ ' (आश्व. श्रौ. ८. ७) इति ॥

त्वमग्ने यज्ञानां होता विश्वेषां हितः । देवेभिर्मानुषे जने ॥ १ ॥

त्वम् । अग्ने । यज्ञानाम् । होता । विश्वेषाम् । हितः । देवेभिः । मानुषे । जने ॥ १ ॥

हे ᵛअग्ने ᵛत्वं ᵛविश्वेषां सर्वेषां सप्तसंस्थारूपेण भिन्नानां ᵛयज्ञानां ᵛहोता होमनिष्पादकोऽसि । यद्वा । यज्ञानां[1] संबन्धी देवानामाह्वाता भवसि । कुत इत्यत आह । यस्मात् त्वं ᵛमानुषे मनोः संबन्धिनि मनुष्ये ᵛजने यजमाने ᵛदेवेभिः देवैः ᵛहितो होतृत्वेन निहितोऽसि तस्मादित्यर्थः ॥

स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः । आ देवान्वक्षि यक्षि च ॥ २ ॥

सः । नः । मन्द्राभिः । अध्वरे । जिह्वाभिः । यज । महः । आ । देवान् । वक्षि । यक्षि । च ॥२॥

हे अग्ने ᵛसः त्वं ᵛनः अस्माकम् ᵛअध्वरे यज्ञे ᵛमन्द्राभिः मदकरीभिः[2] स्तुत्याभिर्वा ᵛजिह्वाभिः ज्वालाभिः ᵛमहः महतः ᵛदेवान् ᵛयज हविर्भिस्तर्पय । कथं तदित्युच्यते । देवान् यष्टव्यानिन्द्रादीन् ᵛआ ᵛवक्षि आवह । ततः ᵛयक्षि ᵛच यज च । हवींषि तेभ्यो देहीत्यर्थः ॥

पाथिकृत्यामग्नेः पथिकृतोऽनुवाक्या ' वेत्था ' इत्येषा । सूत्रितं च—' वेत्था हि वेधो अध्वन आ देवानामपि पन्थामगन्म ' (आश्व. श्रौ. ३. १०) इति ॥

वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा । अग्ने यज्ञेषु सुक्रतो ॥ ३ ॥

वेत्थ । हि । वेधः । अध्वनः । पथः । च । देव । अञ्जसा ।

अग्ने । यज्ञेषु । सुऽक्रतो इति सुऽक्रतो ॥ ३ ॥

हे ᵛवेधः विधातः ᵛसुक्रतो शोभनकर्मन् ᵛदेव दानादिगुणयुक्त ᵛअग्ने त्वं ᵛयज्ञेषु दर्शपूर्णमासादियागेषु ᵛअध्वनः महामार्गान् ᵛपथश्च क्षुद्रमार्गांश्च ᵛअञ्जसा आर्जवेन ᵛवेत्थ जानासि । ᵛहि यस्मादेवं तस्मात् कारणाद्यज्ञमार्गात् भ्रष्टं यजमानं पुनस्तं मार्गं प्रापयेत्यर्थः ॥

त्वामीळे अध द्विता भरतो वाजिभिः शुनम् । ईजे यज्ञेषु यज्ञियम् ॥ ४ ॥

त्वाम् । ईळे । अध । द्विता । भरतः । वाजिऽभिः । शुनम् । ईजे । यज्ञेषु । यज्ञियम् ॥ ४ ॥

---

१. ख-भ-होता यज्ञानां; ज्ञ-य-देवः यज्ञानां; ज्ञ-त-न-र-देवयज्ञानाम् । २. घ-श-मदकारिभिः ।

हे अग्ने ᵛत्वां ᵛभरतः दौष्यन्तिरेतत्संज्ञो राजा ᵛवाजिभिः। वाजो हविर्लक्षणमन्नम्। तद्वद्भिः ऋत्विग्भिः सह ᵛद्विता द्विविधमिष्टप्राप्त्यनिष्टपरिहाररूपेण द्विधा भिन्नं ᵛशुनं सुखमुद्दिश्य ᵛईळे स्तुतवान्। स्तुत्वा च[1] ᵛयज्ञियं यज्ञार्हं त्वां ᵛयज्ञेषु। तृतीयार्थे सप्तमी। यज्ञैः ᵛईळे इष्टवान्। तस्मै त्वम् उभयविधं[2] सुखं[2] प्रादा इत्यर्थः ॥

त्वमि॒मा वार्या॑ पु॒रु दिवो॑दासाय सुन्व॒ते । भर॒द्वाजा॑य दा॒शुषे॑ ॥ ५ ॥

त्वम्। इ॒मा। वार्या॑। पु॒रु। दिवः॑ऽदासाय। सु॒न्व॒ते। भर॑त्ऽवाजाय। दा॒शुषे॑ ॥ ५ ॥

हे अग्ने ᵛत्वम् ᵛइमा इमानि दृश्यमानानि ᵛपुरु पुरूणि बहूनि ᵛवार्या वार्याणि वरणीयानि संभजनीयानि धनानि ᵛदिवोदासाय ᵛसुन्वते। लुप्तोपममेतत्। यथा सोमाभिषवं कुर्वते दिवोदासाख्याय[3] राज्ञे प्रादास्तथा ᵛदाशुषे हवींषि वृत्तवते ᵛभरद्वाजाय ऋषये देहीति शेषः ॥ ॥ २१ ॥

त्वं दू॒तो अम॑र्त्य आ वे॒हा दैव्यं॒ जन॑म् । शृ॒ण्वन्वि॒प्रस्य॑ सुष्टु॒तिम् ॥ ६ ॥

त्वम्। दू॒तः। अम॑र्त्यः। आ। व॒ह॒। दैव्य॑म्। जन॑म्। शृ॒ण्वन्। वि॒प्रस्य॑। सु॒ऽस्तु॒तिम् ॥ ६ ॥

ᵛअमर्त्यः अमरणधर्मः[4] ᵛत्वं ᵛदूतः भूत्वा ᵛदैव्यं देवसंबन्धिनं ᵛजनम् ᵛआ ᵛवह अस्मद्यज्ञं आनय। किं कुर्वन्। ᵛविप्रस्य मेधाविनो भरद्वाजस्य ᵛसुष्टुतिं शोभनां स्तुतिं ᵛशृण्वन् ॥

त्वामग्ने स्वा॒ध्यो॑३ मर्ता॑सो दे॒ववी॑तये । य॒ज्ञेषु॑ दे॒वमी॑ळते ॥ ७ ॥

त्वाम्। अग्ने। सु॒ऽआ॒ध्यः॑। मर्ता॑सः। दे॒वऽवी॑तये। य॒ज्ञेषु॑। दे॒वम्। ई॒ळ॒ते ॥ ७ ॥

हे ᵛअग्ने ᵛदेवं द्योतमानं ᵛत्वां ᵛस्वाध्यः शोभनाध्यानाः[5] ᵛमर्तासः मनुष्याः ᵛदेववीतये देवानां तर्पणार्थं यज्ञेषु ᵛईळते स्तुवन्ति याचन्ते वा ॥

तव॒ प्र य॑क्षि सं॒दृश॑मुत क्रतुं॒ सुदा॑नवः । विश्वे॑ जुषन्त का॒मिनः॑ ॥ ८ ॥

तव॑। प्र। य॒क्षि॒। स॒म्ऽदृश॑म्। उ॒त। क्र॒तु॒म्। सु॒ऽदा॒न॒वः॒। विश्वे॑। जु॒ष॒न्त॒। का॒मिनः॑ ॥ ८ ॥

हे अग्ने ᵛतव ᵛसंदृशं सम्यग्दर्शनीयं यद्वा सम्यग्द्रष्टारं सर्वस्य भासकं तेजः ᵛप्र ᵛयक्षि प्रयजे। प्रकर्षेण पूजयामि। ᵛउत अपि च ᵛसुदानवः सुदानोः शोभनदानस्य तव ᵛक्रतुं कर्म प्रज्ञानं वा पूजयामि। न केवलमहमेव किन्त्वन्ये ᵛविश्वे सर्वेऽपि यजमानाः ᵛकामिनः त्वदनुग्रहात्तैस्तैः कामैः उपेताः सन्तः ᵛजुषन्त। त्वदीयं संदृशं क्रतुं च सेवन्ते ॥

---

१. ख-घ-भ- च अध अथ। २. ग-घ१-उभयविधसुखम्; ज्ञ-ञ-त-न-र-उभयसुखम्। ३. ख-घ-दिवोदासाय; श-दिवोदासाय दिवोदासाख्याय। ४. ज्ञ-मरणधर्मरहितः। ५. ख-घ-श-शोभनध्यानाः; ज्ञ-र-शोभनाध्येनाः; ज्ञ-त-न-य-शोभनाध्ययनाः।

त्वं होता मनुर्हितो वह्निरासा विदुष्टरः । अग्ने यक्षि दिवो विशः ॥ ९ ॥

त्वम् । होता । मनुःऽहितः । वह्निः । आसा । विदुःऽतरः । अग्ने । यक्षि । दिवः । विशः ॥९॥

हे Vअग्ने Vत्वं Vहोता होतृत्वेन Vमनुर्हितः मनुनाहितोऽसि । Vआसा आस्येनास्यभूतया ज्वालया Vवह्निः हविषां वोढा Vविदुष्टरः अतिशयेन विद्वान् । अतः कारणात् त्वं Vदिवः द्युलोकसंबन्धिनीः Vविशः दैवीः प्रजाः Vयक्षि यज ॥

दर्शपूर्णमासयोः सामिधेनीषु ' अग्न आ याहि ' इत्याद्यास्तिस्रः । सूत्रितं च–' अग्न आ याहि वीतये गृणान इंळेऽन्यो नमस्यस्तिरः ' (आश्व. श्रौ. १.२) इति । गार्हपत्याहवनीययोर्मिथः संसर्गेऽग्नये वीतयेऽष्टाकपालः पुरोडाशः । तस्य ' अग्न आ याहि ' इत्येषानुवाक्या । सूत्रितं च– ' अग्न आ याहि वीतये यो अग्निं देववीतये ' (आश्व. श्रौ. ३. १३) इति ॥

अग्न आ याहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥ १० ॥

अग्ने । आ । याहि । वीतये । गृणानः । हव्यऽदातये । नि । होता । सत्सि । बर्हिषि ॥१०॥

हे Vअग्ने त्वम् Vआ Vयाहि आगच्छ । किमर्थम् । Vवीतये हविषां भक्षणार्थम् । किंच Vहव्यदातये हव्यानि हवींषि देवेभ्यो दातुम् । Vगृणानः स्तूयमानस्त्वं Vबर्हिषि आस्तीर्णे दर्भे Vहोता सन् Vनि Vसत्सि निषीद उपविश ॥ ॥ २२ ॥

तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि । बृहच्छोचा यविष्ठ्य ॥ ११ ॥

तम् । त्वा । समित्ऽभिः । अङ्गिरः । घृतेन । वर्धयामसि । बृहत् । शोच । यविष्ठ्य ॥११॥

हे Vअङ्गिरः अङ्गनादिगुणयुक्त अङ्गाररूप वाङ्गिरसः पुत्र वाग्ने Vतं पूर्वोक्तगुणं Vत्वा त्वां Vसमिद्भिः समिन्धनहेतुभिर्दारुभिः Vघृतेन आज्येन च Vवर्धयामसि वर्धयामः । अतो[1] हे Vयविष्ठ्य युवतमाग्ने Vबृहत् महदत्यन्तं Vशोच दीप्यस्व ॥

स नः पृथु श्रवाय्यमच्छा देव विवाससि । बृहदग्ने सुवीर्यम् ॥ १२ ॥

सः । नः । पृथु । श्रवाय्यम् । अच्छ । देव । विवाससि । बृहत् । अग्ने । सुऽवीर्यम् ॥ १२ ॥

हे Vदेव द्योतमानाग्ने Vसः पूर्वोक्तगुणस्त्वं Vपृथु विस्तीर्णं Vश्रवाय्यं श्रवणीयं प्रशस्यं Vबृहत् महत् Vसुवीर्यं शोभनवीर्योपेतं धनं Vनः अस्मान् Vअच्छ Vविवाससि अभिगमय । अत्र वाजसनेयकम्– ' अच्छा देव विवाससीति तन्नो गमयेत्येवैतदाह ' (श. ब्रा. १. ४. १. २७) इति ॥

---

१. श–अतो हेतोः ।

अग्निमन्थने ' त्वामग्ने पुष्करादधि ' इत्याद्यास्तिस्र ऋचोऽनूच्याः । सूत्रितं च–' त्वामग्ने पुष्करादधीति तिसृणामर्धर्चं शिष्ट्वारमेत् ' (आश्व. श्रौ. २.१६) इति ॥

त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥ १३ ॥

त्वाम् । अग्ने । पुष्करात् । अधि । अथर्वा । निः । अमन्थत । मूर्ध्नः । विश्वस्य । वाघतः ॥१३।

हे vअग्ने vअथर्वा एतत्संज्ञक ऋषिः vत्वां vपुष्करादधि पुष्करपर्णे[1] vनिरमन्थत । अरण्योः सकाशात् अजनयत् । कीदृशात् पुष्करात् । vमूर्ध्नः मूर्धवद्वारकात् vविश्वस्य सर्वस्य जगतः vवाघतः वाहकात् । पुष्करपर्णे हि प्रजापतिर्भूमिमप्रथयत् ' तत्पुष्करपर्णेऽप्रथयत् ' (तै. ब्रा. १.१.३.६) इति श्रुतेः । भूमिश्च सर्वजगत आधारभूतेति पुष्करपर्णस्य सर्वजगद्धारकत्वम् । अत्र पुष्करशब्देन पुष्करपर्णमभिधीयत इति । एतच्च तैत्तिरीयके विस्पष्टमाम्नातं–' त्वामग्ने पुष्करादधीत्याह पुष्करपर्णे ह्येनमुपश्रितमविन्दत् ' (तै. सं. ५.१.४.४) इति ॥

तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरंदरम् ॥ १४ ॥

तम् । ऊँ इति । त्वा । दध्यङ् । ऋषिः । पुत्रः । ईधे । अथर्वणः । वृत्रऽहनम् । पुरम्ऽदरम् ॥१४।

हे अग्ने य उक्तगुणः vतमु तमेव त्वाम् vअथर्वणः vपुत्रः vदध्यङ् एतत्संज्ञः vऋषिः vईधे दीपितवान् । कीदृशम् । vवृत्रहणम् आवरकाणां शत्रूणां हन्तारं vपुरंदरम् असुरपुराणां दारयितारम् ॥

तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनंजयं रणेरणे ॥ १५ ॥

तम् । ऊँ इति । त्वा । पाथ्यः । वृषा । सम् । ईधे । दस्युहन्ऽतमम् । धनम्ऽजयम् । रणेऽरणे ॥१५।

vपाथ्यो[2] vवृषा नाम कश्चिदृषिः[2] vतमु[3] तमेव vत्वा त्वां हे अग्ने vसमीधे[3] समैन्ध[4] समदीपयत् । कीदृशम् । vदस्युहन्तमम् अतिशयेन दस्यूनामुपक्षपयितृणां शत्रूणां हन्तारं vरणेरणे युद्धे युद्धे vधनंजयं धनानां जेतारम् ॥ ॥ २३ ॥

उक्थ्ये क्रतौ तृतीयसवने मैत्रावरुणस्य ' एह्यू षु ' इत्यादिकौ तृचौ स्तोत्रियानुरूपौ (आश्व. श्रौ. ६. १) । आभिप्लविकेषूक्थ्येषु त्वेतौ वैकल्पिकौ स्तौत्रियानुरूपौ । आभिप्लविकेषूक्थ्येषु सूत्रितं च–' एह्यू षु ब्रवाणि त आग्निरगामि भारतः ' (आश्व. श्रौ. ७.८) इति । पौनराधेयिक्यामिष्टावुक्तराज्यभागस्य ' एह्यू षु ' इत्यनुवाक्या । सूत्रितं च– ' एह्यू षु ब्रवाणि त इत्याग्नेयावाज्यभागौ ' (आश्व. श्रौ. २.८) इति ॥

---

१. ख-ञ-भ-य-र–पुष्करे पुष्करपर्णे । २. ख–भ–पाथ्य इति पाथ्यो वृषा (वृषो-ख) नाम कश्चिदृषिः; घ-श–पाथ्यो वृषा (वृषो-घ) कश्चिदृषिः स्तौति । ३. ख-ञ-त-न-भ-य-र–एवंगुण (गुणः-त-र) त्वामथर्वणः सोऽपि हे अग्ने तमु तमेव त्वां समीधे; घ-श–हे अग्ने तमु तमेव त्वा त्वां हे अग्ने समीधे; ञ–सोऽपि हे अग्ने तमु तमेव त्वा त्वां समीधे । ४. ख-ञ-भ-र–समैन्धत; घ-श–साधु ; न-समैधत ।

एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः । एभिर्वर्धास इन्दुभिः ॥ १६ ॥

आ । इहि । ऊँ इति । सु । ब्रवाणि । ते । अग्ने । इत्था । इतराः । गिरः ।
एभिः । वर्धासे । इन्दुऽभिः ॥ १६ ॥

हे [v]अग्ने [v]एहि आगच्छ । [v]ते तुभ्यं स्वदर्थं [v]गिरः स्तुतीः [v]इत्था इत्थमनेन प्रकारेण [v]सु सुष्ठु [v]ब्रवाणि[1] इत्याशास्यते । ताः स्तुतीः शृण्वित्यर्थः । [v]उ इत्येतत्पूरकम् । [v]इतराः असुरैः कृताः स्तुतीः शृण्विति शेषः । तथा च ब्राह्मणम्– 'अग्न इत्थेतरा गिर इत्यसुर्या ह वा इतरा गिरः' (ऐ. ब्रा. ३.४९) इति । अपि चागतस्त्वम् [v]एभिः एतैः [v]इन्दुभिः सोमैः [v]वर्धासे वर्धस्व ॥

यत्र क्व च ते मनो दक्षं दधस उत्तरम् । तत्रा सदः कृणवसे ॥ १७ ॥

यत्र । क्व । च । ते । मनः । दक्षम् । दधसे । उत्ऽतरम् । तत्र । सदः । कृणवसे ॥ १७ ॥

हे अग्ने [v]ते तव [v]मनः अनुग्रहात्मकमन्तःकरणं [v]यत्र यस्मिन् देशे [v]क्व [v]च कस्मिंश्चियजमाने वर्तते [v]तत्र तस्मिन् यजमाने [v]उत्तरम् उद्ततरं श्रेष्ठं [v]दक्षं बलकरमन्नं वा [v]दधसे धारयसि । तथा [v]सदः स्थानं च [v]कृणवसे । तस्मिन् यजमाने करोषि ॥

नहि ते पूर्तमक्षिपद्भुवन्नेमानां वसो । अथा दुवो वनवसे ॥ १८ ॥

नहि । ते । पूर्तम् । अक्षिऽपत् । भुवत् । नेमानाम् । वसो इति । अथ । दुवः । वनवसे ॥ १८ ॥

हे अग्ने [v]ते स्वदीयं [v]पूर्तं पूरकं तेजः [v]अक्षिपत् अक्ष्णोः पातकं विनाशकं [v]नहि [v]भुवत् न भवतु । सर्वदास्माकं दर्शनसामर्थ्यं करोतु । हे [v]नेमानां [v]वसो । नेमशब्दोऽल्पवाची । मनुष्याणां मध्ये कतिपयानां यजमानानां वासक । [v]अथ अतः कारणात् [v]दुवः अस्माभिर्यजमानैः कृतं परिचरणं [v]वनवसे संभजस्व ॥

आग्निरगामि भारतो वृत्रहा पुरुचेतनः । दिवोदासस्य सत्पतिः ॥ १९ ॥

आ । अग्निः । अगामि । भारतः । वृत्रऽहा । पुरुऽचेतनः । दिवःऽदासस्य । सत्ऽपतिः ॥ १९ ॥

अयम् [v]अग्निः [v]आ [v]अगामि । अस्माभिः[2] स्तुतिभिरभ्यगम्यत[2] । कीदृशः । [v]भारतः हविषां भर्ता [v]दिवोदासस्य एतत्संज्ञस्य राज्ञः [v]वृत्रहा वृत्राणां शत्रूणां हन्ता [v]पुरुचेतनः पुरूणां बहूनां चेतयिता ज्ञाता । सर्वज्ञ इत्यर्थः । [v]सत्पतिः सतां यजमानानां पालयिता ॥

स हि विश्वाति पार्थिवा रयिं दाशन्महित्वना । वन्वन्नवातो अस्तृतः ॥ २० ॥

सः । हि । विश्वा । अति । पार्थिवा । रयिम् । दाशत् । महिऽत्वना ।
वन्वन् । अवातः । अस्तृतः ॥ २० ॥

---

१. श–ब्रवाणि प्रब्रवाणि । २. घ–स्तुतिभि°; श–अस्मत्स्तुतिभि° ।

ᵛस ᵛहि स खल्वग्निः ᵛविश्वा विश्वानि सर्वाणि ᵛपार्थिवा पृथिव्यां भवानि भूतजातानि ᵛमहित्वना महत्त्वेन स्वमहिम्नातिक्रामन् ᵛरयिं धनं ᵛदाशत् अस्मभ्यं ददातु । यद्वा । विश्वं सर्वं पार्थिवं पृथिव्यां विद्यमानं रयिं[1] धनम् ᵛअति[1] अतिशयेन दाशत् ददातु । कीदृशोऽग्निः । महित्वना महत्त्वेन तेजसा ᵛवन्वन् काष्ठानि शत्रून् वा हिंसन् ᵛअवातः अन्यैः शत्रुभिरप्रतिगतः ᵛअस्तृतः केनाप्यहिंसितः ॥ ॥ २४ ॥

स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता । बृहत्ततन्थ भानुना ॥ २१ ॥

सः । प्रत्नऽवत् । नवीयसा । अग्ने । द्युम्नेन । सम्ऽयता । बृहत् । ततन्थ । भानुना ॥ २१ ॥

हे ᵛअग्ने यः पूर्वोक्तगुणविशिष्टः ᵛसः तादृशस्त्वं ᵛप्रत्नवत् प्रत्नेन पुराणेन ᵛनवीयसा नवतरेण ᵛद्युम्नेन द्योतमानेन ᵛसंयता संगच्छता सम्यग्व्याप्नुवता ᵛभानुना तेजसा ᵛबृहत् महदन्तरिक्षं ᵛततन्थ विस्तारयसि ॥

प्र वः सखायो अग्नये स्तोमं यज्ञं च धृष्णुया । अर्चं गायं च वेधसे ॥ २२ ॥

प्र । वः । सखायः । अग्नये । स्तोमम् । यज्ञम् । च । धृष्णुऽया । अर्चं । गायं । च । वेधसे ॥ २२ ॥

हे ᵛसखायः समानख्याना ऋत्विजः ᵛवः यूयं ᵛधृष्णुया शत्रूणां धर्षकाय ᵛवेधसे विधात्रे ᵛअग्नये ᵛस्तोमं स्तोत्रं ᵛगाय गायत । तथा ᵛयज्ञं यजनसाधनं[2] हविः ᵛच ᵛप्र ᵛअर्च प्रयच्छत ॥

स हि यो मानुषा युगा सीदद्धोता कविक्रतुः । दूतश्च हव्यवाहनः ॥ २३ ॥

सः । हि । यः । मानुषा । युगा । सीदत् । होता । कविऽक्रतुः । दूतः । च । हव्यऽवाहनः ॥ २३ ॥

ᵛस ᵛहि स खल्वग्निः ᵛसीदत् सीदतु । अस्मदीये यज्ञे बर्हिष्युपविशतु । ᵛयः अग्निः ᵛहोता देवानामाह्वाता ᵛकविक्रतुः क्रान्तप्रज्ञः ᵛमानुषा ᵛयुगा मानुषाणि युगानि मनुष्यसंबन्धिनो यज्ञार्हान् कालविशेषान् येषु यागाः[3] अनुष्ठीयन्ते ॥ अत्यन्तसंयोगे द्वितीया ॥ एतावन्तं कालं देवानां ᵛदूतः । सः[4] ᵛहव्यवाहनः हविषां वोढा ᵛच भवति[5] ॥

ता राजाना शुचिव्रतादित्यान्मारुतं गणम् । वसो यक्षीह रोदसी ॥ २४ ॥

ता । राजाना । शुचिऽव्रता । आदित्यान् । मारुतम् । गणम् ।
वसो इति । यक्षि । इह । रोदसी इति ॥ २४ ॥

ᵛता तौ प्रसिद्धौ ᵛराजाना राजमानौ ᵛशुचिव्रता शुचिकर्माणौ मित्रावरुणौ ᵛआदित्यान् अदितेः पुत्रान् धात्रादीन् ᵛमारुतं ᵛगणं मरुतां संघं च ᵛरोदसी द्यावापृथिव्यौ च एतान् देवान् हे ᵛवसो वासकाग्ने ᵛइह अस्मिन् यज्ञे ᵛयक्षि यज ॥

---

१. ख-ज्ञ-ज्ञ-त-न-भ-र-धनम् । २. ज्ञ-त-भ-य-र-यजमानसाधनम् । ३. श-यागादयः । ४. ख-भ- स त्वम्; घ-श-त्वम्; ज्ञ-सन् । ५. घ-भवसि ।

वस्वी ते अग्ने संदृष्टिरिषयते मर्त्याय । ऊर्जो नपादमृतस्य ॥ २५ ॥

वस्वी । ते । अग्ने । सम्ऽदृष्टिः । इषऽयते । मर्त्याय । ऊर्जः । नपात् । अमृतस्य ॥ २५ ॥

हे ᵛऊर्जो ᵛनपात् बलस्य पुत्र ᵛअग्ने ᵛअमृतस्य मरणरहितस्य ᵛते तव ᵛसंदृष्टिः दीप्तिः ᵛवस्वी वासयित्री । प्रशस्येत्यर्थः । सा ᵛमर्त्याय मनुष्याय यजमानाय ᵛइषयते । इषमन्नमिच्छति[1] । ददातीत्यर्थः[2] ॥ ॥ २५ ॥

क्रत्वा दा अस्तु श्रेष्ठोऽद्य त्वा वन्वन्त्सुरेक्णाः ।
मर्त आनाश सुवृक्तिम् ॥ २६ ॥

क्रत्वा । दाः । अस्तु । श्रेष्ठः । अद्य । त्वा । वन्वन् । सुऽरेक्णाः । मर्तः । आनाश । सुऽवृक्तिम् ॥ २६ ॥

हे अग्ने ᵛअद्य इदानीं ᵛक्रत्वा कर्मणा परिचरणात्मना त्वां ᵛवन्वन् संभजन् ᵛदाः हवींषि दाता यजमानः ᵛश्रेष्ठः अतिशयेन प्रशस्यः ᵛअस्तु । ᵛसुरेक्णाः शोभनधनश्चास्तु । तथा सः ᵛमर्तः मनुष्यः ᵛसुवृक्तिं त्वद्विषयां सुष्टुतिं च ᵛआनाश व्याप्नोतु । तव[3] सर्वदा स्तोता[3] भवत्वित्यर्थः ॥

ते ते अग्ने त्वोता इषयन्तो विश्वमायुः ।
तरन्तो अर्यो अरातीर्वन्वन्तो अर्यो अरातीः ॥ २७ ॥

ते । ते । अग्ने । त्वाऽऊताः । इषयन्तः । विश्वम् । आयुः ।
तरन्तः । अर्यः । अरातीः । वन्वन्तः । अर्यः । अरातीः ॥ २७ ॥

हे ᵛअग्ने ᵛते त्वदीया ये त्वां स्तुवन्ति ᵛते[4] स्तोतारः ᵛत्वोताः त्वयोता रक्षिता अत एव ᵛइषयन्तः इषमात्मन इच्छन्तः[5] सन्तः ᵛविश्वं सर्वम् ᵛआयुः अन्नं लभन्त इति शेषः । आयुरेव वा शतवर्षलक्षणमिषयन्त इच्छन्तः प्राप्नुवन्तीति शेषः । तथा ᵛअर्यः अरीनभिगन्त्रीः ᵛअरातीः काश्चित् शत्रुसेनाः ᵛतरन्तः अतिक्रामन्तः ᵛअर्यः अभिगन्त्रीः ᵛअरातीः काश्चन शत्रुसेनाः ᵛवन्वन्तः हिंसन्तश्च भवन्तीति शेषः ॥

अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणम् ।
अग्निर्नो वनते रयिम् ॥ २८ ॥

अग्निः । तिग्मेन । शोचिषा । यासत् । विश्वम् । नि । अत्रिणम् । अग्निः । नः । वनते । रयिम् ॥ २८ ॥

---

१. घ-श-°मिच्छते । २. घ-श-ददासीत्यर्थः । ३. घ-सर्वदा त्वत्स्तोता; श-तत्सर्वदा स्तोता । ४. ख-ज्ञ-त-न-भ-र-'ते' नास्ति । ५. ख-इष्यन्ति; ज्ञ-ज्ञ-त-भ-र-इष्यन्तः; न-इत्थन्तः ।

अयम् vअग्निः vतिग्मेन तीक्ष्णेन vशोचिषा तेजसा vविश्वं सर्वम् vअग्रिणम् अग्रगं राक्षसादिकं vनि vयासत् निहन्तु। अपि च vनः अस्मभ्यम् vअग्निः vरयिं धनं vवनते ददातु ॥

सुवीरं रयिमा भर जातवेदो विचर्षणे । जहि रक्षांसि सुक्रतो ॥ २९ ॥

सुऽवीरम्। रयिम्। आ। भर। जातऽवेदः। विऽचर्षणे। जहि। रक्षांसि। सुऽक्रतो इति सुऽक्रतो॥२९॥

हे vजातवेदः जातप्रज्ञान[1] जातधन वा vविचर्षणे विशेषेण द्रष्टरग्ने vसुवीरं शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेतं vरयिं धनम् vआ vभर आहर। तथा हे vसुक्रतो सुकर्मन्नग्ने vरक्षांसि च vजहि विनाशय ॥

त्वं नः पाह्यंहसो जातवेदो अघायतः । रक्षा णो ब्रह्मणस्कवे ॥ ३० ॥

त्वम्। नः। पाहि। अंहसः। जातऽवेदः। अघऽयतः। रक्ष। नः। ब्रह्मणः। कवे ॥ ३० ॥

हे vजातवेदः vत्वं vनः अस्मान् vअंहसः पापात् vपाहि रक्ष। तथा हे vब्रह्मणस्कवे स्तुतिरूपस्य मन्त्रस्य कवे कावयितः शब्दयितरग्ने। अग्निर्हि शब्दमुत्पादयति। तथा च स्मर्यते–'मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्' (पा. शि. ६-७) इति। तादृशाग्ने vअघायतः अघमनर्थमस्माकमिच्छतः शत्रोश्च vनः अस्मान् vरक्ष ॥ ॥ २६ ॥

यो नो अग्ने दुरेव आ मर्तो वधाय दाशति । तस्मान्नः पाह्यंहसः ॥ ३१ ॥

यः। नः। अग्ने। दुःऽएवः। आ। मर्तः। वधाय। दाशति। तस्मात्। नः। पाहि। अंहसः॥३१॥

हे vअग्ने vदुरेवः दुष्टाभिप्रायः vयः[2] vमर्तः मनुष्यः vवधाय स्वस्यायुधाय vनः अस्मान् vआ vदाशति अभिप्रयच्छति। आयुधेनास्मान् हन्तीत्यर्थः। vतस्मात् मनुष्यात् vअंहसः पापाच्च vनः अस्मान् vपाहि रक्ष ॥

त्वं तं देव जिह्वया परि बाधस्व दुष्कृतम् । मर्तो यो नो जिघांसति ॥ ३२ ॥

त्वम्। तम्। देव। जिह्वया। परि। बाधस्व। दुःऽकृतम्। मर्तः। यः। नः। जिघांसति॥३२॥

हे vदेव द्योतमानाग्ने vत्वं vतं वक्ष्यमाणं vदुष्कृतं दुष्कर्मकारिणं मनुष्यं vजिह्वया ज्वालया vपरि vबाधस्व सर्वतो जहि। vयः vमर्तः मनुष्यः vनः अस्मान् vजिघांसति हन्तुमिच्छति ॥

भरद्वाजाय सप्रथः शर्म यच्छ सहन्त्य । अग्ने वरेण्यं वसु ॥ ३३ ॥

भरत्ऽवाजाय। सऽप्रथः। शर्म। यच्छ। सहन्त्य। अग्ने। वरेण्यम्। वसु ॥ ३३ ॥

---

१. ख-घ-श–जातप्रज्ञ। २. ख-न-भ–'यः' नास्ति।

हे [v]सहस्य शत्रूणामभिभवितः [v]अग्ने [v]भरद्वाजाय मह्यमृषये [v]सप्रथः सर्वतः पृथु विस्तीर्णं [v]शर्म सुखं गृहं वा [v]यच्छ देहि। तथा [v]वरेण्यं वरणीयं [v]वसु धनं च[1] देहि ॥

पौर्णमास्यामाग्नेयाज्यभागस्यानुवाक्या 'अग्निर्वृत्राणि' इत्येषा। सूत्रितं च—'अग्निर्वृत्राणि जङ्घनदिति पूर्वस्याज्यभागस्यानुवाक्या' (आश्व. श्रौ. १. ५) इति। इष्टिपशुसोमेषु च यत्र वृधन्वन्तौ पुष्टिमन्ताविति विशेषविधिर्न दृश्यते तत्र सर्वत्रैषैव प्रथमाज्यभागानुवाक्या। उपसद्याग्नेयस्यैषानुवाक्या सायंकालीनस्य स्वेषैव याज्या। सूत्रितं च—'अग्निर्वृत्राणि जङ्घनद्य उग्रहव शर्यहेति विपर्यासो याज्यानुवाक्यानाम्' (आश्व. श्रौ. ४. ८) इति ॥

अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया। समिद्धः शुक्र आहुतः ॥ ३४ ॥

अग्निः। वृत्राणि। जङ्घनत्। द्रविणस्युः। विपन्यया। सम्ऽइद्धः। शुक्रः। आऽहुतः ॥३४॥

[v]विपन्यया स्तुत्या स्तूयमानः [v]द्रविणस्युः द्रविणं धनं स्तोस्तृणामिच्छन् यद्वा हविर्लक्षणं धनमात्मन इच्छन् [v]अग्निः [v]वृत्राणि आवरकाणि रक्षःप्रभृतीनि तमांसि वा [v]जङ्घनत् भृशं हन्तु। कीदृशोऽग्निः। [v]समिद्धः सम्यग्दीप्तः अत एव [v]शुक्रः शुक्लवर्णः [v]आहुतः हविर्भिरभिहुतः ॥

गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे। सीदन्नृतस्य योनिमा ॥ ३५ ॥

गर्भे। मातुः। पितुः। पिता। विऽदिद्युतानः। अक्षरे। सीदन्। ऋतस्य। योनिम्। आ ॥३५॥

अत्र मातृपितृशब्दाभ्यां भूद्यौश्चाभिधीयेते। 'द्यौर्[2] पिता पृथिवी माता' (ऋ. सं. १. १९१. ६) इति श्रुतेः। [v]मातुः भूम्याः [v]गर्भे गर्भस्थाने मध्ये [v]अक्षरे क्षरणरहिते वेद्याख्ये स्थाने [v]विदिद्युतानः विशेषेण दीप्यमानः [v]पितुः [v]पिता द्युलोकस्य पालयिता हविषां प्रदानेन। एवंभूतोऽग्निः [v]ऋतस्य यज्ञस्य [v]योनिम् उत्तरवेद्याख्यं धिष्ण्यम्॥ सप्तम्यर्थे द्वितीया॥ [v]आ [v]सीदन् उत्तरवेद्यामुपविशन् अग्निर्वृत्राणि जङ्घनदित्यन्वयः॥ ॥ २७ ॥

ब्रह्म प्रजावदा भर जातवेदो विचर्षणे। अग्ने यद्दीदयद्दिवि ॥ ३६ ॥

ब्रह्म। प्रजाऽवत्। आ। भर। जातऽवेदः। विऽचर्षणे। अग्ने। यत्। दीदयत्। दिवि ॥३६॥

हे [v]जातवेदः जातानां वेदितः [v]विचर्षणे विशेषेण द्रष्टः [v]अग्ने [v]प्रजावत् पुत्रपौत्रसहितं [v]ब्रह्म अन्नम् [v]आ [v]भर आहर। [v]यत् ब्रह्म [v]दिवि द्युलोके [v]दीदयत् दीप्यते देवेषु मध्ये यत्प्रशस्तमन्नं राजते तदाहरेत्यर्थः ॥

उप त्वा रण्वसंदृशं प्रयस्वन्तः सहस्कृत। अग्ने ससृज्महे गिरः ॥ ३७ ॥

उप। त्वा। रण्वऽसंदृशम्। प्रयस्वन्तः। सहःऽकृत। अग्ने। ससृज्महे। गिरः ॥ ३७ ॥

---

१. ख-ङ्ग-न-भ-'च' नास्ति। २. ख-ङ्ग-त-न-भ-र-द्यौः।

हे vसहस्कृत सहसा बलेनोत्पन्न vअग्ने vप्रयस्वन्तः हविर्लक्षणान्नवन्तो वयं vरण्वसंदृशं[1] रमणीयसंदर्शनं स्तोतव्यसंदर्शनं वा vत्वा त्वाम् vउप प्रति vगिरः स्तुतीः vसपर्यामहे विसृजामः उच्चारयाम इत्यर्थः ॥

उपच्छायामिव घृणेरगन्म शर्म ते वयम् । अग्ने हिरण्यसंदृशः ॥ ३८ ॥

उप । छायाम्ऽइव । घृणेः । अगन्म । शर्म । ते । वयम् । अग्ने । हिरण्यऽसंदृशः ॥ ३८ ॥

हे vअग्ने vहिरण्यसंदृशः हितरमणीयतेजसो हिरण्यवद्द्योतमानतेजसो वा vघृणेः दीप्तस्य vते तव vशर्म शरणमाश्रयणम्[2] vउप vअगन्म उपगच्छाम। तत्र दृष्टान्तः। vछायामिव। यथा घर्मार्ताः संतप्ताश्छायामुपगच्छन्ति तद्वत् ॥

उपसदि प्रातःकालीनस्याग्नेयस्य ' य उग्रइव ' इति याज्या सायंकालीनस्य त्वेषैवानुवाक्या। सूत्रितं च—' अग्निर्वृत्राणि जङ्घनद्य उग्रइव शर्यहा ' (आश्व. श्रौ. ४. ८) इति ॥

य उग्रइव शर्यहा तिग्मशृङ्गो न वंसगः । अग्ने पुरो रुरोजिथ ॥ ३९ ॥

यः । उग्रःऽइव । शर्यऽहा । तिग्मऽशृङ्गः । न । वंसगः । अग्ने । पुरः । रुरोजिथ ॥ ३९ ॥

vयः अग्निः vउग्रइव उत्पूर्णबलो धन्वीव vशर्यहा शर्यैर्बाणैः[3] शत्रूणां हन्ता vतिग्मशृङ्गो vन vवंसगः तीक्ष्णशृङ्गो वननीयगतिर्वृषभ इव हे vअग्ने स त्वं vपुरः आसुरीस्तिस्रः पुरीः vरुरोजिथ भग्नवानसि। ' रुद्रो वा एष यदग्निः ' (तै. ब्रा. २. १. ३. १) इति श्रुतेः रुद्रकृतमपि त्रिपुरदहनमग्निकृतमेवेत्यग्निः स्तूयते। यद्वा। त्रिपुरदहनसाधनभूते बाणेऽग्नेरनीकत्वेनावस्थानादग्निः पुराणि भग्नवानित्युच्यते । ' देवासुरा वा एषु लोकेषु समयतन्त ' (ऐ. ब्रा. १. २३) इत्यादिकं ब्राह्मणमनुसंधेयम् ॥

अग्निमन्थने जायमानेऽग्नौ ' आ यं हस्ते ' इत्येषानुवाक्या। सूत्रितं च—' आ यं हस्ते न खादिनमित्यर्धर्चं आरमेत् ' (आश्व. श्रौ. २. १६) इति ॥

आ यं हस्ते न खादिनं शिशुं जातं न बिभ्रति । विशामग्निं स्वध्वरम् ॥ ४० ॥

आ । यम् । हस्ते । न । खादिनम् । शिशुम् । जातम् । न । बिभ्रति ।

विशाम् । अग्निम् । सुऽअध्वरम् ॥ ४० ॥

मन्थनोत्पन्नं vयम् अग्निं vशिशुम् vजातं vन जातं पुत्रमिव vहस्ते vआ vबिभ्रति हस्तेष्वभिमुखं धारयन्त्यध्वर्यवः। पूर्वो नञ्शब्दः पुरस्तादुपचारोऽप्युपमार्थीयः। vखादिनं vन भक्षकं व्याघ्रादिमिव[4]। यथा तं बिभ्रतः पुरुषा अवहितास्तथाभूता इत्यर्थः। यद्वा संप्रत्यर्थे संप्रतीदानीं खादिनं

---

१. ख-ञ-न-भ-र–रण्वसंदृशं रण्वम्। २. त-श–°माश्रयणं सुखं वा। ३. ख-ञ-त-न-भ-र–शर्यैर्बलैः। ४. ख-भ–व्याघ्रादिकमिव; घ–व्याघ्रमिव ।

हविषां भक्षकं यम् अग्निं हस्ते धारयन्ति vविशां जनानां vस्वध्वरं शोभनयागस्य निष्पादकं तम् vअग्निं हे ऋत्विजः परिचरतेति शेषः ॥ ॥ २८ ॥

अग्निमन्थने जातस्याग्नेराहवनीये प्रहरणसमये 'प्र देवं देववीतये' इति द्वृचोऽनुवक्तव्यः। सूत्रितं च—'प्र देवं देववीतय इति द्वे अग्निनाग्निः समिध्यते' (आश्व. श्रौ. २. १६) इति ॥

प्र देवं देववीतये भरता वसुवित्तमम् । आ स्वे योनौ नि षीदतु ॥ ४१ ॥

प्र । देवम् । देवऽवीतये । भरत । वसुवित्ऽतमम् । आ । स्वे । योनौ । नि । सीदतु ॥ ४१ ॥

हे अध्वर्यवः[1] vदेवं द्योतमानं vवसुवित्तमं वसूनां धनानां वेदयितारं लम्भयितारमग्निं vप्र vभरत प्रहरत। आहवनीयेऽग्नौ प्रक्षिपत। किमर्थम्। vदेववीतये देवानां भक्षणार्थम्। तथा च ब्राह्मणं—'प्र देवं देववीतये भरता वसुवित्तममिति प्रहियमाणायाभिरूपा यज्ञस्याभिरूपं तत्समृद्धम्[2]' (ऐ.ब्रा.१. १६) इति। स चाग्निः vस्वे vयोनौ कारणे स्थाने आहवनीये vआ vनि vषीदतु अभिनिषण्णो भवतु। ब्राह्मणं च भवति—'एष[3] ह वा अस्य स्वो योनिर्यदग्निरग्नेः' (ऐ. ब्रा. १. १६) इति ॥

आ जातं जातवेदसि प्रियं शिशीतातिथिम् । स्योन आ गृहपतिम् ॥ ४२ ॥

आ । जातम् । जातऽवेदसि । प्रियम् । शिशीत । अतिथिम् । स्योने । आ । गृहऽपतिम् ॥ ४२ ॥

हे अध्वर्यवः vजातं प्रादुर्भूतम् vअतिथिम्। लुप्तोपममेतत्। अतिथिमिव vप्रियं अत एव vगृहपतिं गृहाणां स्वामिनमग्निं vजातवेदसि जातप्रज्ञे vस्योने सुखकरे आहवनीयेऽग्नौ vआ vशिशीत ॥ अन्तर्णीतण्यर्थस्य शीङ एतद्रूपम् ॥ शाययत स्थापयत ॥ यद्वा। 'ईयैङ् गतौ' इत्यस्य छान्दसं रूपम् ॥ गमयत। प्रापयतेत्यर्थः ॥ 'शो तनूकरणे' इत्यस्य वा रूपम्। इयत[4] तीक्ष्णीकुरुत[4]। संस्कुरुत। प्रहरतेति यावत्। द्वितीय आकारः पूरकः। 'जात इतरो जातवेदा इतरः' (ऐ. ब्रा. १. १६) इत्यादिकं ब्राह्मणमन्त्रानुसंधेयम् ॥

अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्ति मन्यवे ॥ ४३ ॥

अग्ने । युक्ष्व । हि । ये । तव । अश्वासः । देव । साधवः । अरम् । वहन्ति । मन्यवे ॥ ४३ ॥

हे vदेव द्योतमान vअग्ने तानश्वान् vयुक्ष्व आत्मीये रथे योजय। vये vतव त्वदीयाः vसाधवः साधकाः सुशीला वा vअश्वासः अश्वाः vअरम् अलं पर्याप्तं vवहन्ति। किमर्थम्। vमन्यवे। मन्यते यष्टव्यत्वेन देवानत्रेति मन्युर्यागः। तदर्थं तानश्वान् रथे युक्ष्वेत्यर्थः। vहि खलु ॥

अच्छा नो याह्या वहाभि प्रयांसि वीतये । आ देवान्त्सोमपीतये ॥ ४४ ॥

अच्छ । नः । याहि । आ । वह । अभि । प्रयांसि । वीतये । आ । देवान् । सोमऽपीतये ॥ ४४ ॥

---

१. ख-घ-भ-अध्वर्यवादयः । २. ख-ङ्ग-त-न-भ-र-तत्समृद्धमा स्वे योनौ निषीदत्वित्येष ह वा अस्य स्वो योनिः यदग्निरग्नेः । ३. ङ्ग-आ स्वे योनौ निषीदत्वित्येष । ४. ख-शातनं कुरुत; ङ्ग-भ-इयत तनूकुरुत ।

हे अग्ने vनः अस्मान् vअच्छ आभिमुख्येन vयाहि आगच्छ। तथा vप्रयांसि हविर्लक्षणान्यन्नानि अभिलक्ष्य vदेवान् vआ vवह। किमर्थम्। vवीतये तेषां हविषां स्वादनार्थम्[1]। तथा vसोमपीतये सोमपानार्थं च तान् देवान् vआ वह॥

उदग्ने भारत द्युमदजस्रेण दविद्युतत्। शोचा वि भाह्यजर॥ ४५॥

उत्। अग्ने। भारत। द्युऽमत्। अजस्रेण। दविद्युतत्। शोच। वि। भाहि। अजर॥४५॥

हे vभारत हविषां भर्तः vअग्ने vउत् vशोच उद्गततरं दीप्यस्व। तदेव विवृणोति। हे vअजर जरारहिताग्ने vदविद्युतत् भृशं द्योतमानस्त्वं vद्युमत् द्युमता दीप्तिमता॥ 'सुपां सुलुक्०' इति तृतीयाया लुक्॥ vअजस्रेण अविच्छेदेन तेजसा vवि vभाहि विशेषेण प्रकाशस्व॥ यद्वा। भातिरत्रान्तर्णीतण्यर्थः॥ त्वं प्रथममुद्दीप्यस्व पश्चादात्मीयेन तेजसा सर्वं जगत् प्रकाशयेति योजनीयम्॥ ॥२९॥

वीती यो देवं मर्तो दुवस्येदग्निमीळीताध्वरे हविष्मान्।
होतारं सत्ययजं रोदस्योरुत्तानहस्तो नमसा विवासेत्॥ ४६॥

वीती। यः। देवम्। मर्तः। दुवस्येत्। अग्निम्। ईळीत। अध्वरे। हविष्मान्।
होतारम्। सत्यऽयजम्। रोदस्योः। उत्तानऽहस्तः। नमसा। आ। विवासेत्॥ ४६॥

vयः vमर्तः मनुष्यः vहविष्मान् हविर्भिर्युक्तो यजमानः vवीती वीत्या कान्तेन हविर्लक्षणेनान्नेन यं कंचन vदेवं vदुवस्येत् परिचरेत् तस्मिन् vअध्वरे यज्ञे vअग्निम् vईळीत स्तुवीत। सर्वेषु यागेष्वग्निः पूज्यत इत्यर्थः। कीदृशमग्निम्। vरोदस्योः द्यावापृथिव्योर्लोकद्वये वर्तमानानां देवानां vहोतारम् आह्वातारं vसत्ययजं सत्येनावितथेन हविषा यष्टारम्। किंचायं यजमान ईदृशमग्निम् vउत्तानहस्तः कृताञ्जलिपुटः सन् vनमसा नमस्कारेण हविषा वा vआ vविवासेत् परिचरेत्॥

आ ते अग्न ऋचा हविर्हृदा तष्टं भरामसि।
ते ते भवन्तूक्षणो ऋषभासो वशा उत॥ ४७॥

आ। ते। अग्ने। ऋचा। हविः। हृदा। तष्टम्। भरामसि।
ते। ते। भवन्तु। उक्षणः। ऋषभासः। वशाः। उत॥ ४७॥

अनयाध्ययनं प्रशस्यत इत्याश्वलायनो मन्यते[2] (आश्व. गृ. १. १. ५)। हे vअग्ने vते तुभ्यं vहृदा हृदयेन vतष्टं संस्कृतम् vऋचा ऋग्रूपेण वर्तमानं हविः ऋचमेव हविः कृत्वा vआ vभरामसि आहरामः। त इति तच्छब्देन प्रकृतमृग्रूपं हविः परामृश्यते। प्रतिनिर्दिश्यमानापेक्षया पुंस्त्वबहुत्वे। ऋग्रूपं तद्धविः vते तुभ्यम् vउक्षणः उक्षाणः सेचनसमर्थाः vऋषभासः ऋषभाः vउत अपि च vवशाः च vभवन्तु। ऋषभवशारूपेण परिणतं सत् त्वद्भक्षणाय भवत्विति शेषः॥

---

१ ख-ञ-न-भ-य-खादनार्थम्; त-र-सादनार्थम्। २. न-मन्यते। उक्तानि वैतानिकानीति खण्डे विद्यायैवाप्यस्ति प्रीतिरित्युपक्रम्य सूत्रितम्-आ ते अग्न ऋचा हविः हृदा तष्टं भरामसि ते ते भवन्तूक्षण ऋषभासो वशा उतेत्येत एव म उक्षाणश्च ऋषभाश्च वशाश्च भवन्ति य इमं स्वाध्यायमधीयत इतीति।

अग्निं देवासो अग्रियमिन्धते वृत्रहन्तमम् ।
येना वसून्याभृता तुळहा रक्षाँसि वाजिना ॥ ४८ ॥

अग्निम् । देवासः । अग्रियम् । इन्धते । वृत्रहन्ऽतमम् ।
येन । वसूनि । आऽभृता । तुळहा । रक्षांसि । वाजिना ॥ ४८ ॥

vअग्रियं मुख्यं vवृत्रहन्तमम् अतिशयेन वृत्रस्य हन्तारमिमम् vअग्निं vदेवासः देवाः vइन्धते दीपयन्ति[1]। vयेन अग्निना vवसूनि असुरैरपहृतानि धनानि हविर्लक्षणान्यन्नानि वा vआभृता असुरसकाशाद्यजमानाद्वाहृतानि। येन च vवाजिना बलवताग्निना vरक्षांसि यज्ञविरोधीनि vतुळहा तृढानि हिंसितानि तमग्निमिन्धत इत्यन्वयः ॥ ॥ ३० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण[2] विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके पञ्चमोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

चतुर्थाष्टके षष्ठोऽध्याय आरभ्यते । षष्ठे मण्डले द्वितीयेऽनुवाके प्रथमं सूक्तं व्याख्यातम् । तत्र ' पिबा सोमम् ' इति पञ्चदशर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभम्। अन्त्या द्विपदा त्रिष्टुप् । तथा चानुक्रान्तं—' पिब पञ्चोनैन्द्रं त्रैष्टुभं द्विपदान्तम् ' इति । अभिजिति मरुत्वतीयशस्त्रे एतन्निविद्धानम् । सूत्रितं च—' पिबा सोमं तमु ष्टुहीति मध्यंदिनः ' (आश्व. श्रौ. ८. ५) इति । समूळ्हे दशरात्रऽष्टमेऽहनि मरुत्वतीयशस्त्रे एतत्सूक्तम् । सूत्रितं च—' पिबा सोममभि तमस्य द्यावापृथिवी ' (आश्व. श्रौ. ८. ७) इति । सूर्यस्तुत्ताम्न्येकाहे मरुत्वतीये[3] एतत्सूक्तं निविद्धानम् । सूच्यते हि—' सूर्यस्तुता यशस्कामः पिबा सोममभि ' (आश्व. श्रौ. ९. ८) इति । महाव्रतेऽपि मरुत्वतीये एतत्सूक्तम् । तथैव पञ्चमारण्यके सूत्रितं—' पिबा सोममभि यमुग्र तर्दः कया शुभा सवयसः सनीळाः ' (ऐ. आ. ५. १. १) इति । माध्यंदिने[4] सवने आद्यास्तिस्रो होतृमैत्रावरुणब्राह्मणाच्छंसिनां प्रस्थितयाज्याः । सूत्रितं च—' पिबा सोममभि यमुग्र तर्द इति तिस्रोऽर्वाङेहि सोमकामं त्वाहुः ' (आश्व. श्रौ. ५. ५) इति ॥

पिबा सोममभि यमुग्र तर्द ऊर्वं गव्यं महि गृणान इन्द्र ।
वि यो धृष्णो वधिषो वज्रहस्त विश्वा वृत्रमभित्रिया शवोभिः ॥ १ ॥

पिब । सोमम् । अभि । यम् । उग्र । तर्दः । ऊर्वम् । गव्यम् । महि । गृणानः । इन्द्र ।
वि । यः । धृष्णो इति । वधिषः । वज्रऽहस्त । विश्वा । वृत्रम् । अमित्रिया । शवःऽभिः ॥ १ ॥

१. ख-ज्ञ-न-भ–दीपयन्ते । २. ख-ज्ञ-भ–सायणामात्येन; र–सायणार्येण । ३. त१–मरुत्वति । ४. ज्ञ-त-भ-य–माध्यंदिनसवने ।

हे [v]उग्र उद्गूर्णबल [v]इन्द्र [v]गृणानः अङ्गिरोभिः स्तूयमानस्त्वं [v]यं सोमम् [v]अभि उद्दिश्य । पातुमित्यर्थः । [v]महि महत् [v]गव्यं गोसंबन्धि [v]ऊर्वं पणिभिरपहृतं समूहं [v]तर्दः प्रकाशितवानसि[1] । तृदिहिंसाकर्मात्र प्रकाशनार्थः । तं [v]सोमं [v]पिब पानं कुरु । हे [v]वृष्णो शत्रूणां धर्षक [v]वज्रहस्त वज्रपाणे हे इन्द्र [v]यः त्वं [v]शवोभिः बलैः सहितः सन् [v]विश्वा विश्वं [v]वृत्रम् आवरकम् [v]अमित्रिया अमित्रं शत्रुम् ॥ अमित्रशब्दात् द्वितीयैकवचनस्येयादेशः ॥ [v]वि [v]वधिषः व्यवधीः स त्वं सोमं पिबेति संबन्धः ॥

स ईं पाहि य ऋजीषी तरुत्रो यः शिप्रवान्वृषभो यो मतीनाम् ।
यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः स इन्द्र चित्राँ अभि तृन्धि वाजान् ॥ २ ॥

सः । ईम् । पाहि । यः । ऋजीषी । तरुत्रः । यः । शिप्रवान् । वृषभः । यः । मतीनाम् ।
यः । गोत्रभित् । वज्रभृत् । यः । हरिष्ठाः ।
सः । इन्द्र । चित्रान् । अभि । तृन्धि । वाजान् ॥ २ ॥

हे इन्द्र [v]ऋजीषी । ऋजीषशब्देन गतरसः सोमोऽभिधीयते । तद्वान्[2] [v]यः त्वं [v]तरुत्रः शत्रूणां तारकोऽसि [v]यः त्वं [v]शिप्रवान् शोभनहनुरसि [v]यः त्वं [v]मतीनां स्तोतॄणाम् ॥ मन्यतेः स्तुतिकर्मणः कर्तरि क्त्रिच् ॥ [v]वृषभः कामानां वर्षितासि [v]सः त्वम् [v]ईम् एनं सोमं [v]पाहि पिब । हे इन्द्र यस्त्वं[3] [v]वज्रभृत् वज्रधरः [v]यः त्वं [v]गोत्रभित् गोत्राणां पर्वतानां मेघानां वा भेत्तासि [v]यः त्वं [v]हरिष्ठाः हर्योः स्थातासि हे [v]इन्द्र [v]सः त्वं [v]चित्रान् विचित्रान् [v]वाजान् अन्नानि [v]अभि [v]तृन्धि अस्मभ्यं प्रकाशय ॥

एवा पाहि प्रत्नथा मन्दतु त्वा श्रुधि ब्रह्म वावृधस्वोत गीर्भिः ।
आविः सूर्यं कृणुहि पीपिहीषो जहि शत्रूँरभि गा इन्द्र तृन्धि ॥ ३ ॥

एव । पाहि । प्रत्नऽथा । मन्दतु । त्वा । श्रुधि । ब्रह्म । ववृधस्व । उत । गीःऽभिः ।
आविः । सूर्यम् । कृणुहि । पीपिहि । इषः । जहि । शत्रून् । अभि । गाः । इन्द्र । तृन्धि ॥३॥

हे इन्द्र त्वं [v]प्रत्नथा प्रत्नान् पुराणान् सोमान् यथापिबः तथा [v]एव एवम् इममस्मदीयं सोमं [v]पाहि पिब । स च सोमस्त्वया पीतः सन् [v]त्वा त्वां [v]मन्दतु मदयतु[4] । [v]ब्रह्म अस्माभिः कृतं स्तोत्रं [v]श्रुधि शृणु । [v]उत अपि च [v]गीर्भिः स्तुतिरूपाभिर्वाग्भिः [v]ववृधस्व त्वं वर्धस्व । अपि च [v]सूर्यं सर्वस्य प्रेरकं देवम् [v]आविः [v]कृणुहि आविष्कुरु । वयं सूर्यं यथा पश्येम तथा कुर्वित्यर्थः । [v]इषः अन्नानि च [v]पीपिहि अस्मभ्यं प्यायय[5] । [v]शत्रून् अस्मत्सपत्नान् [v]जहि नाशय । हे [v]इन्द्र त्वं पणिभिरपहृताः [v]गाः [v]अभि [v]तृन्धि प्रकाशय ॥

---

१. ज्ञ–प्राकाशयः प्रकाशितवानसि; त-भ-य–प्रकाशय । २. घ-श–तद्वान् गतसारमपि सोममपरित्यजन् । ३. ख-ज्ञ-त-न-भ-र–' यस्त्वं ' नास्ति । ४. ज्ञ–मादयतु किंच; घ-श–मदयुक्तं करोतु । ५. ख-भ–पायय; श–आप्यायय ।

ते त्वा मदा बृहदिन्द्र स्वधाव इमे पीता उक्षयन्त द्युमन्तम् ।
महामनूनं तवसं विभूतिं मत्सरासो जर्हषन्त प्रसाहम् ॥ ४ ॥

ते । त्वा । मदाः । बृहत् । इन्द्र । स्वधाऽवः । इमे । पीताः । उक्षयन्त । द्युऽमन्तम् ।
महाम् । अनूनम् । तवसम् । विऽभूतिम् । मत्सरासः । जर्हषन्त । प्रऽसहम् ॥ ४ ॥

हे [v]स्वधावः अन्नवन् [v]इन्द्र [v]मदाः मदकराः [v]ते [v]इमे [v]पीताः सोमाः [v]द्युमन्तं दीप्तिमन्तं [v]त्वा त्वां [v]बृहत् अत्यन्तम् [v]उक्षयन्त सेचयन्तु[1] । अपि च हे इन्द्र त्वां [v]मत्सरासः मदकराः सोमाः [v]जर्हषन्त भृशं हर्षयन्तु । कीदृशम् । [v]महां महान्तं प्रभूतम् [v]अनूनं सर्वगुणैर्न्यूनतारहितम् । संपूर्णगुणमित्यर्थः[2] । [v]तवसं प्रवृद्धं [v]विभूतिं विभवन्तं [v]प्रसाहं शत्रूणामभिभवितारम् ॥

येभिः सूर्यमुषसं मन्दसानोऽवासयोऽप दुळ्हानि दर्द्रैत् ।
महामद्रिं परि गा इन्द्र सन्तं नुत्था अच्युतं सदसः परि स्वात् ॥ ५ ॥

येभिः । सूर्यम् । उषसम् । मन्दसानः । अवासयः । अप । दुळ्हानि । दर्द्रैत् ।
महाम् । अद्रिम् । परि । गाः । इन्द्र । सन्तम् । नुत्थाः । अच्युतम् । सदसः । परि । स्वात् ॥५॥

हे इन्द्र [v]येभिः यैः सोमैः [v]मन्दसानः मोदमानस्त्वं [v]सूर्यं सर्वस्य प्रेरकं देवम् [v]उषसम् उषोदेवतां च [v]अवासयः स्वस्थाने न्यवासयः । अथवा सूर्योषसौ यथा तमांसि विवासयतस्तथाकार्षीः । किं कुर्वन् । [v]दुळ्हानि दृढानि तमांसि [v]अप [v]दर्द्रैत् अपदारयन् । किंच हे [v]इन्द्र त्वं पणिभिः अपहृताः [v]गाः [v]परि [v]सन्तं परितो विद्यमानं [v]महां महान्तम् [v]अद्रिं पर्वतं [v]नुत्थाः अनुदः। कीदृशम् । [v]स्वात् स्वकीयात् [v]सदसः स्थानात् [v]परि परितः [v]अच्युतम् अविचालितं[3] विनाशरहितम् । स्थिरमित्यर्थः[4] ॥ ॥ १ ॥

तव क्रत्वा तव तदंसनाभिरामासु पक्वं शच्या नि दीधः ।
और्णोर्दुरः उस्रियाभ्यो वि दुळ्होदुर्वाद्रा अंसृजो अङ्गिरस्वान् ॥ ६ ॥

तव । क्रत्वा । तव । तत् । दंसनाभिः । आमासु । पक्वम् । शच्या । नि । दीधरिति दीधः ।
और्णोः । दुरः । उस्रियाभ्यः । वि । दुळ्हा ।
उत् । उर्वात । गाः । असृजः । अङ्गिरस्वान् ॥ ६ ॥

हे इन्द्र [v]तव [v]क्रत्वा स्वदीयया प्रज्ञया[5] [v]तव [v]दंसनाभिः स्वदीयैः कर्मभिः [v]शच्या सामर्थ्येन [v]आमासु अपक्कासु गोषु [v]पक्वं परिणतं [v]तत् प्रसिद्धं पयः [v]नि [v]दीधः नितरां धारयसि । अपि च हे इन्द्र त्वम् [v]उस्रियाभ्यः गोभ्यः[6] । गा निर्गमयितुमित्यर्थः[7] । [v]दुळ्हा दृढानि । वलेन पाषाणादिभिर्दृढी-

---

१. ख-ज्ञ-त-न-भ-य-र-सिञ्चयन्तु; ज्ञ-सिचयन्तु; श-सेचयन्त । २. ख-ज्ञ-ज्ञ-त-न-भ-य-र-' संपूर्णमित्यर्थः । ३. ख-ज्ञ-ज्ञ-त-न-भ-य-र-' अविचालितं ' नास्ति । ४. ज्ञ-त-स्थितमित्यर्थः । ५. घ-श-प्रकृत्या । ६. श-गोभ्यः । तादर्थ्ये चतुर्थी । अङ्गिरसाम् । ७. श-नियमितुमित्यर्थः ।

कृतानीत्यर्थः । vदुरः द्वाराणि vवि vऔर्णोः उद्घाटितवानसि । vअङ्गिरस्वान् अङ्गिरोभिर्युक्तस्त्वम् vऊर्वात् समूहात् । गोष्ठादित्यर्थः । vगाः vउत् vअसृजः उदगमयः ॥

पप्राथ क्षां महि दंसो व्युर्वीमुप द्यामृष्वो बृहदिन्द्र स्तभायः ।
अधारयो रोदसी देवपुत्रे प्रत्ने मातरा यह्वी ऋतस्य ॥ ७ ॥

पप्राथ । क्षाम् । महि । दंसः । वि । उर्वीम् । उप । द्याम् । ऋष्वः । बृहत् । इन्द्र । स्तभायः ।
अधारयः । रोदसी इति । देवपुत्रे इति देवऽपुत्रे ।
प्रत्ने इति । मातरा । यह्वी इति । ऋतस्य ॥ ७ ॥

हे इन्द्र त्वं vमहि महता vदंसः दंससा कर्मणा vउर्वीं विस्तीर्णां vक्षां भूमिं vवि vपप्राथ विशेषेण पूरितवानसि । 'प्रा पूरणे' इति धातुः । हे vइन्द्र vऋष्वः महांस्त्वं vबृहत् बृहतीं vद्यां दिवम् vउप vस्तभायः उपस्तभ्नासि । निरालम्बं वितिष्ठन्ती द्यौर्यथा न पततीन्द्रस्तथा करोतीत्यर्थः । अपि च त्वं vरोदसी द्यावापृथिव्यौ vअधारयः पोषणैर्धारयसि । कीदृश्यौ । vदेवपुत्रे । देवाः पुत्रा ययोस्ते । vप्रत्ने पुराणे vमातरा मातरौ निर्माञ्यौ vऋतस्य उदकस्य यज्ञस्य वा vयह्वी यह्व्यौ महत्यौ । यद्वा । विश्वस्य मातरौ ऋतस्य ब्रह्मणो यह्वी पुत्र्यौ । यहुरित्यपत्यनामैतत् ॥

अध त्वा विश्वे पुर इन्द्र देवा एकं तवसं दधिरे भराय ।
अदेवो यदभ्यौहिष्ट देवान्त्स्वर्षाता वृणत इन्द्रमत्र ॥ ८ ॥

अध । त्वा । विश्वे । पुरः । इन्द्र । देवाः । एकम् । तवसम् । दधिरे । भराय ।
अदेवः । यत् । अभि । औहिष्ट । देवान् । स्वःऽसाता । वृणते । इन्द्रम् । अत्र ॥ ८ ॥

vअध अधुना अस्मिन् काले vविश्वे vदेवाः[1] सर्वे[1] वह्न्यादयो हे vइन्द्र vएकं मुख्यं vतवसं प्रवृद्धं बलवन्तं vत्वा त्वां vभराय संग्रामाय vपुरः vदधिरे पुरस्तात् चक्रिरे । vयत् यदा vअदेवः वृत्रोऽसुरः vदेवान् vअभ्यौहिष्ट संग्रामार्थमभिगतवान् । ओहतिर्गतिकर्मा । किंचास्मिन् काले vस्वर्षाता स्वर्षातौ संग्रामे vइन्द्रं[2] vवृणते संभजन्ते स्म । मरुत इति शेषः[2] । मरुतो हीन्द्रं देवेषु पलायितेषु समभजन्नित्यर्थः । अधुना पुरो दधिरे इति संबन्धः ॥

अध द्यौश्चित्ते अप सा नु वज्राद्वितानमद्भियसा स्वस्य मन्योः ।
अहिं यदिन्द्रो अभ्योहसानं नि चिद्विश्वायुः शयथे जघान ॥ ९ ॥

अध । द्यौः । चित् । ते । अप । सा । नु । वज्रात् । द्विता । अनमत् । भियसा । स्वस्य । मन्योः ।
अहिम् । यत् । इन्द्रः । अभि । ओहसानम् । नि । चित । विश्वऽआयुः । शयथे । जघान ॥ ९ ॥

---

१. ज्ञ–सर्वे देवाः; त–सर्वे देवाः सर्वे । २. ख-ज्ञ-ञ-त-न-भ-य-र–देवा मरुत इति शेषः । इन्द्रं वृणते संभजन्ते स्म ।

vसा प्रसिद्धा देवानामाश्रयत्वेन vद्यौश्चित् द्युलोकोऽपि हे इन्द्र vअध अधुनास्मिन् काले vद्विता[1] द्विधा द्विप्रकारात्[2] vते त्वदीयात् vवज्रात् vस्वस्य आत्मीयात् vमन्योः क्रोधाच्च vभियसा भयेन[3] vअप vअनमत् अपननाम। vनु[4] इति[5] पूरणः। vविश्वायुः बहुप्रः vइन्द्रः vयत् यदा vअभ्योहसानम् अभिगच्छन्तम् vअहिं वृत्रं vशयथे शयननिमित्ते। मरणायेत्यर्थः। vनि vजघान न्यवधीत्। vचित् इति पूरणः। यदा वृत्रं जघानास्मिन्[6] काले द्यौर्नमेति संबन्धः॥

अध॒ त्वष्टा॑ ते म॒ह उ॑ग्र॒ वज्रं॑ स॒हस्र॑भृष्टिं ववृतच्छ॒तास्रि॑म्।
निऽकाम॑म॒रम॑णसं॒ येन॒ नव॑न्त॒महिं॑ सं पि॑णगृजीषिन्॥ १०॥

अध॑। त्वष्टा॑। ते॒। म॒हः॒। उ॒ग्र॒। वज्र॑म्। स॒हस्र॑ऽभृष्टिम्। व॒वृ॒त॒त्। श॒तऽअ॑स्रिम्।
निऽका॑मम्। अर॑ऽमनसम्। येन॑। नव॑न्तम्। अहि॑म्। सम्। पि॒ण॒क्। ऋ॒जी॒षि॒न्॥ १०॥

vअध अधुना हे vउग्र उद्गूर्णबलेन्द्र vमहः महतः vते तव vत्वष्टा देवशिल्पी vवज्रं vववृतत् न्यवर्तयत् निष्पन्नं कृतवान्। कीदृशम्। vसहस्रभृष्टिं सहस्रधारं vशताश्रिं शतपर्वाणम्। हे vऋजीषिन् गतरससोमवन्निन्द्र vयेन वज्रेण vनिकामम्। नियतः कामो यस्य तम्। vअरमणसम्[7]। शत्रूणामरमभिगन्तृ मनो यस्य तम्। vनवन्तं शब्दायमानम् vअहिं वृत्रमसुरं vसं vपिणक् संपिष्टवानसि तं वज्रं कृतवानित्यर्थः॥ ॥ २॥

वर्धा॒न्यं विश्वे॑ म॒रुतः॑ स॒जोषाः॑ पच॑च्छ॒तं म॑हि॒षाँ इ॑न्द्र तु॒भ्य॑म्।
पू॒षा विष्णु॒स्त्रीणि॒ सरां॑सि धावन्वृ॒त्रह॑णं मदि॒रमं॑शु॒मस्मै॑॥ ११॥

वर्धा॑न्। यम्। विश्वे॑। म॒रुतः॑। स॒ऽजोषाः॑। पच॑त्। श॒तम्। म॒हि॒षान्। इ॒न्द्र॒। तु॒भ्य॑म्।
पू॒षा। विष्णुः॑। त्रीणि॑। सरां॑सि। धा॒व॒न्। वृ॒त्र॒ऽहन॑म्। म॒दि॒रम्। अं॒शुम्। अ॒स्मै॒॥ ११॥

vसजोषाः सह प्रीयमाणाः vविश्वे vमरुतः सर्वे देवा हे vइन्द्र vयं त्वां vवर्धान् स्तोत्रैर्वर्धयन्ति हे इन्द्र तस्मै vतुभ्यं vपूषा एतन्नामको देवः vविष्णुः एतन्नामकश्च vशतं शतसंख्याकान् vमहिषान् पुंपशून् vपचत् पचेत्। अपि च vअस्मै तुभ्यं vसरांसि द्रोणकलशपूतभृदाधवनीयाख्यानि vत्रीणि पात्राणि vअंशुं सोमं vधावन् अगच्छन्। सोमैः पात्राणि पूर्यन्त इत्यर्थः। कीदृशं सोमम्। vमदिरं मदकरं vवृत्रहणं वृत्राणां शत्रूणां हन्तारम्। अत्र वृत्रहच्छब्देन सोमोऽभिधीयते। पीते[8] हि सति सोमे वृत्राणि हन्तुमिन्द्रः समर्थो भवतीति यावत्॥

आ क्षो॒दो॑ महि॑ वृ॒तं न॒दीनां॑ परि॑ष्ठितमसृज ऊ॒र्मिम॒पाम्।
तासा॒मनु॒ प्रव॑त इन्द्र॒ पन्थां॑ प्रा॒र्दयो॒ नीची॑रप॒सः स॑मु॒द्रम्॥ १२॥

आ। क्षो॒दः॑। महि॑। वृ॒तम्। न॒दीना॑म्। परि॑ऽस्थितम्। अ॒सृ॒जः॒। ऊ॒र्मिम्। अ॒पाम्।
तासा॑म्। अनु॑। प्र॒ऽवतः॑। इ॒न्द्र॒। पन्था॑म्। प्र। आ॒र्द॒यः॒। नीची॑ः। अ॒प॒सः॒। स॒मु॒द्रम्॥ १२॥

---

१. ख-घ-भ-श-'द्विता...द्विप्रकारात्' नास्ति। २. ख-घ-भ-श-भयेन द्विता द्विप्रकारेण काष्ठेन (भ-कालेन) मनसा च। ३. नू चिदिति। ४. श-जघान तस्मिन्। ५. ज्ञ-त-न-भ-अरमनसम्। ६. ख-भ-आपीते।

हे इन्द्र त्वं vमहि महत् vवृतं वृत्रेण परिवृतमाच्छादितं vपरिष्ठितं परितः स्थितं vनदीनां सिन्धूनां संबन्धि vस्रोदः उदकम् vआ vअसृजः आ समन्तात् सृष्टवानसि । येन नद्यः पूर्णाः प्रवहेयुस्तदित्यर्थः । vअपाम् उदकानाम् vऊर्मिं समूहं सृष्टवानसि । पुनर्वचनमादरार्थम् । हे vइन्द्र vतासां नदीनां संबन्धिनः vपन्थां पथो मार्गान् vप्रवतः प्रवणान् vअनु अकार्षीरिति शेषः । अन्वित्युपसर्गयोग्यक्रियाध्याहारः । किंच vनीचीः प्रवणाभिमुखीः । वेगयुक्ता इत्यर्थः । vअपसः अपः उदकानि । अपस इत्यप एवार्थे वर्तते । vसमुद्रम् उदधिं vप्रार्दयः प्रागमयः । अत्रार्दयतिर्नयनकर्मा ॥

एवा ता विश्वा चकृवांसमिन्द्रं महामुग्रमजुर्यं सहोदाम् ।
सुवीरं त्वा स्वायुधं सुवज्रमा ब्रह्म नव्यमवसे ववृत्यात् ॥ १३ ॥

एव । ता । विश्वा । चकृऽवांसम् । इन्द्रम् । महाम् । उग्रम् । अजुर्यम् । सहःऽदाम् ।
सुऽवीरम् । त्वा । सुऽआयुधम् । सुऽवज्रम् । आ । ब्रह्म । नव्यम् । अवसे । ववृत्यात् ॥ १३ ॥

हे इन्द्र vत्वा त्वां vनव्यं नूतनमन्यैरकृतपूर्वं[1] vब्रह्म अस्माभिः कृतं स्तोत्रम् vअवसे अस्माकं रक्षणाय vआ vववृत्यात् आवर्तयतु । कीदृशं त्वाम् । vएव एवमुक्तप्रकारेण[2] vता तानि प्रसिद्धानि vविश्वा विश्वानि सर्वाणि कर्माणि vचकृवांसं कृतवन्तम् vइन्द्रम् ईश्वरं vमहां महान्तम् vउग्रम् ओजस्विनम् vअजुर्यम् अजरं vसहोदां सहसो बलस्य दातारं vसुवीरं शोभना वीरा मरतो यस्य तं vस्वायुधं शोभनायुधं vसुवज्रं शोभनवज्रोपेतम् ॥

स नो वाजाय श्रवस इषे च राये धेहि द्युमत इन्द्र विप्रान् ।
भरद्वाजे नृवत इन्द्र सूरीन्दिवि च स्मैधि पार्ये न इन्द्र ॥ १४ ॥

सः । नः । वाजाय । श्रवसे । इषे । च । राये । धेहि । द्युऽमतः । इन्द्र । विप्रान् ।
भरत्ऽवाजे । नृऽवतः । इन्द्र । सूरीन् । दिवि । च । स्म । एधि । पार्ये । नः । इन्द्र ॥ १४ ॥

हे vइन्द्र vसः त्वं vद्युमतः दीप्तिमतः vविप्रान् मेधाविनः vनः अस्मान् vवाजाय बलाय vश्रवसे यशसे vइषे vच अन्नाय च vराये धनाय vधेहि धारय । अपि च हे vइन्द्र vभरद्वाजे मयि vनृवतः मनुष्यवतः । परिचारकयुक्तानित्यर्थः । vसूरीन् तव स्तोतॄन् पुत्रपौत्रान्[3] कुर्वित्ति शेषः । हे vइन्द्र त्वं vपार्ये पारणीये आगामिनि vच vदिवि दिवसे vएधि vस्म vनः । अस्माकं रक्षिता[4] खलु[5] भवेत्यर्थः ॥

षष्ठेऽहनि[1] तृतीयसवने ब्राह्मणाच्छंसिशस्त्रेऽनुरूपतृचस्य 'अया वाजम्' इति तृतीया । सूत्रितं च—'अया वाजं देवहितं सनेमेति स्तोत्रियानुरूपौ' (आश्व. श्रौ. ८. ३) इति ॥

अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥ १५ ॥

अया । वाजम् । देवऽहितम् । सनेम । मदेम । शतऽहिमाः । सुऽवीराः ॥ १५ ॥

---

१. घ-ङ्ग-र-°कृतं पूर्वम्; त२-°कृते पूर्वम् । २. घ-°मुक्तेन प्रकारेण । ३. ख-भ-पुत्रपौत्रादीन् । ४. भ-य-खलु रक्षिता । ५. ख१-ज-ञ-ङ्ग-त-भ-र-पृष्ठ्येऽहनि; ण-पक्ष्येऽहनि; न-पृष्ठ्यस्य षष्ठेऽहनि, य-पृष्ठेऽहनि ।

vअया अनया स्तुत्या vदेवहितं देवेन द्योतमानेनेन्द्रेण दत्तं vवाजम् अन्नं vसनेम वयं संभजेम। अपि च vसुवीराः शोभनपुत्रोपेताः[1] वयं vशतहिमाः शतसंवत्सरान् vमदेम हृष्याम[2] ॥ ॥ ३ ॥

'तमु ष्टुहि' इति पञ्चदशर्चं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम्। तथा चानुक्रम्यते—'तमु ष्टुहि' इति। अभिजिति निष्केवल्य एतन्निविद्धानम्। सूत्रितं च—'तमु ष्टुहीति मध्यंदिनः' (आश्व. श्रौ. ८. ५) इति। इन्द्राग्न्योः कुलायनाम्न्येकाहेऽपि निष्केवल्य एतन्निविद्धानम्। सूत्रितं च—'तिष्ठा हरी तमु ष्टुहीति मध्यंदिनः' (आश्व. श्रौ. ९. ७) इति। महाव्रतेऽपि निष्केवल्ये। तथैव पञ्चमारण्यके सूत्रितं—'तमु ष्टुहि यो अभिभूत्योजाः सुत इत्थं निमिश्ल इन्द्र सोम इति त्रीणि' (ऐ. आ. ५. २. २) इति ॥

तमु ष्टुहि यो अभिभूत्योजा वन्वन्नवातः पुरुहूत इन्द्रः।
अषाळ्हमुग्रं सहमानमाभिर्गीर्भिर्वर्धं वृषभं चर्षणीनाम् ॥ १ ॥

तम्। ऊँ इति। स्तुहि। यः। अभिभूतिऽओजाः। वन्वन्। अवातः। पुरुऽहूतः। इन्द्रः। अषाळ्हम्। उग्रम्। सहमानम्। आभिः। गीःऽभिः। वर्ध। वृषभम्। चर्षणीनाम् ॥ १ ॥

vअभिभूत्योजाः अभिभावुकतेजाः vवन्वन् शत्रून् हिंसन् vअवातः शत्रुभिरहिंसितः ॥ वनोतेर्निष्ठान्तस्य नञ्पूर्वस्य रूपम्। यद्वा वातेर्वातम् ॥ अनभिगतः vपुरुहूतः बहुभिराहूतः vयः vइन्द्रः अस्तीति शेषः। हे भरद्वाज vतमु vष्टुहि तमेवेन्द्रं स्तुहि। अपि च vआभिः वक्ष्यमाणाभिः vगीर्भिः स्तुतिरूपाभिर्वाग्भिः तमिन्द्रं vवर्ध वर्धय। कीदृशम्। vअषाळ्हम् अनभिभूतम् vउग्रम् उद्गूर्णम् ओजस्विनं वा vसहमानं शत्रूनभिभवन्तं vचर्षणीनां प्रजानां संबन्धिनं[3] vवृषभं वर्षितारम् ॥

स युध्मः सत्वा खजकृत्समद्वा तुविम्रक्षो नदनुमाँ ऋजीषी।
बृहद्रेणुश्च्यवनो मानुषीणामेकः कृष्टीनामभवत्सहावा ॥ २ ॥

सः। युध्मः। सत्वा। खजऽकृत्। समत्ऽवा। तुविऽम्रक्षः। नदनुऽमान्। ऋजीषी। बृहत्ऽरेणुः। च्यवनः। मानुषीणाम्। एकः। कृष्टीनाम्। अभवत्। सहऽवा ॥ २ ॥

vबृहद्रेणुः[4] बृहतो महतो रेणोः पांसोरुत्थापकः। संग्रामेष्विति यावत्। vएकः मुख्यः vसहावा बलवान् vसः इन्द्रः vमानुषीणां मनोः संबन्धिनीनां vकृष्टीनां प्रजानां यजमानानां vच्यवनः अभिगन्ता vअभवत् आसीत्। कीदृशः। vयुध्मः योद्धा vसत्वा दाता। सनोतेरिदं रूपम्। vखजकृत् खजानां संग्रामाणां कर्ता। खज इति संग्रामनामैतत्। vसमद्वा। यजमानैः सह मदः समत् तद्वान्। vतुविम्रक्षः। मृक्षतिः संश्लेहनकर्मा। तुवीनां बहूनां वर्षणेन संश्लेहनकर्ता vनदनुमान् शब्दवान् vऋजीषी। ऋजीषशब्देन सवनद्वयाभिषुतः पुनस्तृतीयसवनेऽप्यभिषुतः सोम उच्यते। तद्वान् ॥

---

१. भ-य-°पुत्रपौत्रोपेताः। २. ख-हृष्टाः स्म; घ-ज्ञ-हृष्येम; ज्ञ-त-र-हृष्यास्म; न-भ-हृष्याः स्म। ३. ख-ज्ञ-न-भ-य-संबन्धिनां कामानाम्; ज्ञ-त-संबन्धिनाम्। ४. ख-भ-स इन्द्रः बृहद्रेणुः।

त्वं ह नु त्यदददमायो दस्यूँरेकः कृष्टीरवनोरार्याय ।
अस्ति स्विन्नु वीर्यं१ तत्त इन्द्र न स्विदस्ति तदृतुथा वि वोचः ॥ ३ ॥

त्वम् । ह । नु । त्यत् । अदमयः । दस्यून् । एकः । कृष्टीः । अवनोः । आर्याय । अस्ति । स्वित् । नु । वीर्यम् । तत् । ते । इन्द्र । न । स्वित् । अस्ति । तत् । ऋतुऽथा । वि । वोचः ॥३॥

हे इन्द्र ᵛत्यत् स्यः स ᵛत्वम् । त्यदिति तच्छब्दपर्यायः । अत्र लिङ्गव्यत्ययः । ᵛदस्यून् कर्महीनान् जनान् ᵛनु क्षिप्रम् ᵛअदमयः दान्तानकरोः । हशब्दः पूरणार्थः । अपि च ᵛएकः मुख्यस्त्वं ᵛकृष्टीः पुत्रदासादीन्[1] ᵛआर्याय कर्मकृते जनाय ᵛअवनोः अददाः । एवं स्तुवन्नृषिरिन्द्रं यदा नाद्राक्षीत् तदा तस्य वीर्यसद्भावे विचिकित्समानः परार्ध्यमाह । हे ᵛइन्द्र ᵛते तव यत् पूर्वमुक्तं ᵛतत्[2] ᵛवीर्यं[2] सामर्थ्यं ᵛस्विन्नु ᵛअस्ति । किं स्विद्भवति । स्विन्नु इति विचिकित्सायाम् । यद्वा ᵛनास्ति ᵛस्वित् । ᵛतत् बलम् ᵛऋतुथा काले काले ᵛवि ᵛवोचः विशेषेण ब्रूहि ॥

सदिद्धि ते तुविजातस्य मन्ये सहः सहिष्ठ तुरतस्तुरस्य ।
उग्रमुग्रस्य तवसस्तवीयोऽरध्रस्य रध्रतुरो बभूव ॥ ४ ॥

सत् । इत् । हि । ते । तुविऽजातस्य । मन्ये । सहः । सहिष्ठ । तुरतः । तुरस्य । उग्रम् । उग्रस्य । तवसः । तवीयः । अरध्रस्य । रध्रऽतुरः । बभूव ॥ ४ ॥

पूर्वमन्त्रे इन्द्रस्य बलसदसद्भावं संदिह्य अनया बलमस्त्येवेत्यवधारयन्नाह । हि यस्मादर्थे । ᵛहि यस्मात् कारणात् हे ᵛसहिष्ठ बलवत्तमेन्द्र ᵛतुविजातस्य बहुयज्ञेषु प्रादुर्भूतस्य ᵛतुरतः अस्मान् हिंसतः ᵛतुरस्य शत्रूणां हिंसितुर्बलवतो वा ᵛते तव ᵛसहः बलं ᵛसदित् विद्यमानमेवाहं ᵛमन्ये । ᵛउग्रस्य ओजस्विनः ᵛतवसः प्रवृद्धस्य ᵛअरध्रस्य शत्रुभिर्वशीकर्तुमशक्यस्य । रधेर्वशीकरणार्थस्य रूपम् । ᵛरध्रतुरः वशीकरणीयानां[3] सपत्नानां हिंसकस्य तव बलं ᵛबभूव भवत्येव । कीदृशम् । ᵛउग्रम् उद्गूर्णं ᵛतवीयः प्रवृद्धतरम् । यतस्त्वं वृत्रादीन् शत्रून् हंसि[4] अतस्ते बलं विद्यत एवेत्यर्थः ॥

तन्नः प्रत्नं सख्यमस्तु युष्मे इत्था वदद्भिर्वलमङ्गिरोभिः ।
हन्नच्युतच्युद्दस्मेषयन्तमृणोः पुरो वि दुरो अस्य विश्वाः ॥ ५ ॥

तत् । नः । प्रत्नम् । सख्यम् । अस्तु । युष्मे इति । इत्था । वदत्ऽभिः । वलम् । अङ्गिरःऽभिः । हन् । अच्युतऽच्युत् । दस्म । इषयन्तम् । ऋणोः । पुरः । वि । दुरः । अस्य । विश्वाः ॥५॥

ᵛप्रत्नं पुराणम् । चिरकालानुवर्तीत्यर्थः[5] । ᵛतत् प्रसिद्धं ᵛनः अस्मदीयं ᵛसख्यं स्तुत्यस्तोतृलक्षणं[6] सख्यित्वं हे इन्द्र ᵛयुष्मे युष्मासु ᵛअस्तु । पूजार्थं बहुवचनम् । हे ᵛअच्युतच्युत् अच्युतानामविचलितानां च्यावक हे ᵛदस्म दर्शनीयेन्द्र त्वम् ᵛइषयन्तम् आयुधानि प्रेरयन्तं ᵛवलम् एतन्नामानमसुरम् ᵛइत्था

---

१. श–पुत्रदारादीन् । २. झ-त-न-भ-र–त्वद्वीर्यम् । ३. ख-झ-त-न-भ-र–वशीकरणानाम् । ४. ख-भ–अहंसि; झ-य–अहिंसः; न–अहिंसी; श–हिंसि । ५. ख–चिरकालं वर्तत इत्यर्थः । ६. ख–स्तोत्रं स्तोत्रलक्षणम् ; झ-झ-त-न-भ-य-र–स्तोत्रलक्षणम् ।

सत्यमेव [v]वदद्भिः त्वां स्तुवद्भिः [v]अङ्गिरोभिः सह [v]हन् हतवानसि । अपि च [v]अस्य वलस्य [v]पुरः नगराणि [v]वि [v]ऋणोः व्यगमयः । वियुक्तान्यकार्षीरित्यर्थः । [v]विश्वाः सर्वाः [v]दुरः पुरीणां द्वारश्च व्यृणोः ॥ ॥ ४ ॥

स हि धीभिर्हव्यो अस्त्युग्र ईशानकृन्महति वृत्रतूर्ये ।
स तोकसाता तनये स वज्री वितन्तसाय्यो अभवत्समत्सु ॥ ६ ॥

सः । हि । धीभिः । हव्यः । अस्ति । उग्रः । ईशानऽकृत् । महति । वृत्रऽतूर्ये ।
सः । तोकऽसाता । तनये । सः । वज्री । वितन्तसाय्यः । अभवत् । समत्ऽसु ॥ ६ ॥

[v]उग्रः ओजस्वी [v]ईशानकृत् । स्तोतॄन् ईशानान् समर्थान् करोतीति ईशानकृत् । [v]सः इन्द्रः [v]महति प्रभूते [v]वृत्रतूर्ये संग्रामे । वृत्रतूर्य इति संग्रामनामैतत् । [v]धीभिः स्तोतृभिः स्तुतिभिर्वा [v]हव्यः जयार्थिभिराह्वातव्यः [v]अस्ति भवति । हिशब्दः पादपूरणः । [v]तोकसाता तोकस्य पुत्रस्य सातौ लाभे निमित्ते [v]तनये तत्पुत्रे निमित्ते सति [v]सः इन्द्रः आह्वातव्योऽस्ति । [v]वज्री वज्रवान् [v]सः इन्द्रः [v]समत्सु संग्रामेषु [v]वितन्तसाय्यः विशेषेण विस्तार्यः स्तोत्रैर्वन्दनीयः [v]अभवत् भवति । यद्वा वितन्तसाय्यः शत्रूणां हिंसकः । तन्तस इति धातुर्हिंसाकर्मा । तस्य कर्तरि रूपम् ॥

स मज्मना जनिम मानुषाणाममर्त्येन नाम्नाति प्र सर्स्रे ।
स द्युम्नेन स शवसोत राया स वीर्येण नृतमः समोकाः ॥ ७ ॥

सः । मज्मना । जनिम । मानुषाणाम् । अमर्त्येन । नाम्ना । अति । प्र । सर्स्रे ।
सः । द्युम्नेन । सः । शवसा । उत । राया । सः । वीर्येण । नृऽतमः । सम्ऽओकाः ॥ ७ ॥

[v]सः इन्द्रः [v]अमर्त्येन विनाशरहितेन [v]नाम्ना शत्रूणां नमयित्रा [v]मज्मना बलेन । मज्मनेति बलनामैतत् । [v]मानुषाणां मनुष्याणां [v]जनिम जन्म । संघमित्यर्थः । [v]अति [v]प्र [v]सर्स्रे अतिप्रयेदे । [v]सः इन्द्रः [v]द्युम्नेन यशसा [v]समोकाः समानस्थानो भवति । किंच [v]सः इन्द्रः [v]शवसा बलेन समोका भवति । [v]उत अपि च [v]नृतमः नेतृतमः [v]सः इन्द्रः [v]राया धनेन [v]वीर्येण सामर्थ्येन च समोका भवति ॥

स यो न मुहे न मिथू जनो भूत्सुमन्तुनामा चुमुरिं धुनिं च ।
वृणक्पिप्रुं शम्बरं शुष्णमिन्द्रः पुरां च्यौत्नाय शयथाय नू चित् ॥ ८ ॥

सः । यः । न । मुहे । न । मिथु । जनः । भूत् । सुमन्तुऽनामा । चुमुरिम् । धुनिम् । च ।
वृणक् । पिप्रुम् । शम्बरम् । शुष्णम् । इन्द्रः । पुराम् । च्यौत्नाय । शयथाय । नु । चित् ॥ ८ ॥

[v]यः इन्द्रः [v]न [v]मुहे संग्रामे कदापि न मुह्यति । यश्च [v]मिथु मिथ्या वृथा [v]जनः जनयिता [v]न [v]भूत् न भवति किंतु [v]सुमन्तुनामा प्रज्ञाननामा[1] । प्रख्यातनामेत्यर्थः । [v]सः [v]इन्द्रः [v]पुरां शत्रु-

---

१. ख-न-भ–प्रज्ञातनामा; झ–प्रजातनामा ।

संबन्धिनीनां पुरीणां vक्ष्यौत्नाय क्ष्यवनाय नाशनाय vशयथाय शत्रूणां मरणाय च vनृ vचित् शीघ्रमेव कर्म कुरुत इति शेषः । तथा vचुमुरिं vधुनिं vच एतन्नामकावसुरौ vवृणक् अवृणक् हिंसितवान् । वृणक्तिर्हिंसाकर्मा । अपि च vपिप्रुं vशम्बरं vशुष्णम् एतन्नामकान् त्रीनसुरान् हिंसितवान् ॥

उदावता त्वक्षसा पन्यसा च वृत्रहत्याय रथमिन्द्र तिष्ठ ।
धिष्व वज्रं हस्त आ दक्षिणत्राभि प्र मन्द पुरुदत्र मायाः ॥ ९ ॥

उत्ऽअवता । त्वक्षसा । पन्यसा । च । वृत्रऽहत्याय । रथम् । इन्द्र । तिष्ठ ।
धिष्व । वज्रम् । हस्ते । आ । दक्षिणऽत्रा । अभि । प्र । मन्द । पुरुऽदत्र । मायाः ॥ ९ ॥

हे vइन्द्र vउदवता उद्गच्छता । अवतिरत्र गतिकर्मा । vत्वक्षसा शत्रूणां तनूकर्त्रा vपन्यसा स्तुत्यतरेण[1] बलेन युक्तस्त्वं vवृत्रहत्याय शत्रुहननाय स्वकीयं vरथं vच vतिष्ठ आरोह । तथा vदक्षिणत्रा दक्षिणे[2] vहस्ते[2] पाणौ vवज्रं स्वकीयमायुधम् vआ vधिष्व आधत्स्व । तदनन्तरं हे vपुरुदत्र बहुधनेन्द्र त्वमासुरीः vमायाः vअभि अभिगम्य vप्र vमन्द प्रकर्षेण जहि[3] । अत्र मन्दतिर्वधकर्मा[3] ॥

अग्निर्न शुष्कं वनमिन्द्र हेती रक्षो नि धक्ष्यशनिर्न भीमा ।
गम्भीरया ऋष्वया यो रुरोजाध्वनयदुरिता दम्भयच्च ॥ १० ॥

अग्निः । न । शुष्कम् । वनम् । इन्द्र । हेतिः । रक्षः । नि । धक्षि । अशनिः । न । भीमा ।
गम्भीरया । ऋष्वया । यः । रुरोज । अध्वनयत् । दुःऽइता । दम्भयत् । च ॥ १० ॥

vअग्निर्न अग्निरिव । नशब्द उपमार्थीयः । यथाग्निः vशुष्कं नीरसं vवनं वृक्षसमूहं दहति हे vइन्द्र vहेतिः त्वदीयं वज्रं तद्वच्छत्रून् नाशयति । तदेवाह । vअशनिर्न vभीमा । यथाशनिर्भीमा भवति तद्वत्त्वमंकरस्त्वं vरक्षः राक्षसं vनि vधक्षि वज्रेण नितरां दह । vयः इन्द्रः vगम्भीरया शत्रुभिरधर्षणीयया vऋष्वया महत्या । ऋष्व इति महन्नामैतत् । हत्या vरुरोज शत्रून् बभञ्ज । vअध्वनयत् युद्धे गर्जनलक्षणं शब्दं करोति च । तथा vदुरिता दुरितानि vदम्भयच्च भिनत्ति च । स त्वं रक्षो नि धक्षीति पूर्वेणान्वयः ॥ ॥ ५ ॥

आ सहस्रं पथिभिरिन्द्र राया तुविद्युम्न तुविवाजेभिरर्वाक् ।
याहि सूनो सहसो यस्य नू चिददेव ईशे पुरुहूत योतोः ॥ ११ ॥

आ । सहस्रम् । पथिऽभिः । इन्द्र । राया । तुविऽद्युम्न । तुविऽवाजेभिः । अर्वाक् ।
याहि । सूनो इति । सहसः । यस्य । नु । चित् । अदेवः । ईशे । पुरुऽहूत । योतोः ॥ ११ ॥

हे vतुविद्युम्न बहुधन हे vसहसः vसूनो बलस्य पुत्र vइन्द्र । 'ओजसो जातमुत मन्य एनम्' (ऋ. सं. १०. ७३. १०) इति निगमान्तरे बलपुत्रत्वं सिद्धम्[4] । vराया धनेन युक्तस्त्वं vसहस्रं

---

१. ख-ञ्च-न-भ-र-स्तुत्यन्तरेण । २. ख-ञ्च-ञ्च-त-न-भ-र-दक्षिणहस्ते; श-दक्षिणहस्तेन । ३. ख-ञ्च-त-न-भ-य-र-गमय (त-'गमय' नास्ति) । अत्र मन्दति(भ-मन्दयति)र्गतिकर्मा । ४. भ-य-प्रसिद्धम् ।

सहस्रेण । बहुभिरित्यर्थः । vतुविवाजेभिः बहुबलैः vपथिभिः । पतन्ति गच्छन्त्यमीभिरिति पन्थानो वाहाः । तैः vअर्वाक् मदभिमुखः सन् vआ vयाहि आगच्छ । हे vपुरुहूत बहुभिराहूतेन्द्र vयस्य तव vयोतोः बलादिभिः पृथक्कर्तुं vअदेवः कश्चिदसुरः vनू vचित् vईशे नेष्टे । अत्र नू चिदिति निषेधार्थे वर्तते ॥

प्र तुविद्युम्नस्य स्थविरस्य घृष्वेर्दिवो ररप्शे महिमा पृथिव्याः ।
नास्य शत्रुर्न प्रतिमानमस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः ॥ १२ ॥

प्र । तुविऽद्युम्नस्य । स्थविरस्य । घृष्वेः । दिवः । ररप्शे । महिमा । पृथिव्याः ।
न । अस्य । शत्रुः । न । प्रतिऽमानम् । अस्ति । न । प्रतिऽस्थिः । पुरुऽमायस्य । सह्योः ॥ १२ ॥

vतुविद्युम्नस्य बहुयशसो बहुधनस्य[1] वा vस्थविरस्य प्रवृद्धस्य vघृष्वेः शत्रूणां घर्षकस्येन्द्रस्य vमहिमा महत्त्वं vदिवः द्युलोकात् vपृथिव्याः भूमेश्च vप्र vररप्शे प्ररिरिचे । विरप्शीति महन्नामसु पाठात् नाम्नां च प्रायेण धातुजन्यत्वात्[2] रप्शतिरत्रातिशयवाची । vपुरुमायस्य बहुप्रज्ञस्य vसह्योः शत्रूणामभिभवितुः vअस्य इन्द्रस्य vशत्रुः शातयिता vन अस्ति । vप्रतिमानं प्रतिनिधिः vन vअस्ति । अस्य vप्रतिष्ठिः प्रतिष्ठाश्रयः vन अस्ति । स एव सर्वस्य प्रतिष्ठेत्यर्थः ॥

प्र तत्ते अद्या करणं कृतं भूत्कुत्सं यदायुमतिथिग्वमस्मै ।
पुरू सहस्रा नि शिशा अभि क्षामुत्तूर्वयाणं धृषता निनेथ ॥ १३ ॥

प्र । तत् । ते । अद्य । करणम् । कृतम् । भूत् । कुत्सम् । यत् । आयुम् । अतिथिऽग्वम् । अस्मै ।
पुरु । सहस्रा । नि । शिशाः । अभि । क्षाम् । उत् । तूर्वयाणम् । धृषता । निनेथ ॥ १३ ॥

vअद्य इदानीमपि हे इन्द्र vते त्वया vकृतं vकरणं तत्कर्म vप्र vभूत् प्रभवति प्रकाशते । किं तदित्युच्यते । vकुत्सं शुष्णात् राक्षसादेतन्नामानमृषिं च vआयुं शत्रुभ्यः सकाशात् एतत्संज्ञकं पौरूरवसम् vअतिथिग्वम् अतिथीनामभिगन्तारं दिवोदासं च शम्बरात् ररक्षिथेति vयत् करणं vतत् प्रभवतीति पूर्वेण संबन्धः । ररक्षिथेति द्वितीयाश्रुतेरुचितक्रियाध्याहारः । अपि च vअस्मै अनन्तरोक्ताय अतिथिग्वाय vपुरु पुरूणि बहूनि vसहस्रा सहस्राणि शम्बरस्य धनानि vनि vशिशाः अददाः । इन्द्रः शम्बरं हत्वा तस्य धनानि दिवोदासाय ददावित्यर्थः । तथा हे इन्द्र त्वं vधृषता धर्षणेन त्वदीयेन वज्रेण शम्बरं हत्वा vक्षां पृथिवीम् vअभि अभिलक्ष्य पृथिव्यां वर्तमानं vतूर्वयाणं त्वरितगमनं दिवोदासम् vउत् vनिनेथ आपद्य उदगमयः ॥

अनुक्रीनाम्न्येकाहे मरुत्वतीयशस्त्रे 'अनु त्वाहिम्ने' इति सूक्तमुखीया । सूत्रितं च—'अनु त्वाहिम्ने अध देव देवा अनु ते दायि मह इन्द्रियाय' (आश्व. श्रौ. ९. ५) इति ॥

---

१. न-बहुबलस्य । २. ज्ञ-त-धातुजत्वात् ।

अनु त्वाहिंन्ने अधं देव देवा मदन्विश्वे कवितमं कवीनाम् ।
करो यत्र वरिवो बाधितायं दिवे जनाय तन्वे गृणानः ॥ १४ ॥

अनु । त्वा । अहिंऽइन्ने । अधं । देव । देवाः । मदन् । विश्वे । कविऽतमम् । कवीनाम् ।
करः । यत्र । वरिवः । बाधितायं । दिवे । जनाय । तन्वे । गृणानः ॥ १४ ॥

हे [v]देव द्योतमानेन्द्र [v]त्वा त्वाम् [v]अध अस्मिन् काले [v]विश्वे सर्वे [v]देवाः स्तोतारः [v]अहिन्ने मेघहननाय । वृष्टिप्रदानायेत्यर्थः । [v]अनु [v]मदन् अनुमदन्ति अनुस्तुवन्ति । कीदृशं त्वाम् । [v]कवीनां मेधाविनां मध्ये [v]कवितमम् अत्यन्तं कविम् । [v]यत्र यस्मिन् काले [v]गृणानः स्तोतृभिः स्तूयमानस्त्वं [v]बाधिताय दारिद्र्यादिभिः पीडिताय [v]दिवे स्तोत्रे [v]जनाय [v]तन्वे स्तोतृणां तनयाय च [v]वरिवः धनं [v]करः अकरोः अददाः । अथवा हे देवेन्द्र अधास्मिन् काले विश्वे सर्वे देवाः सुराः । अहिर्वृत्र एवोच्यते । तस्य[1] हननाय कवीनां कवितमं त्वामनुमदन्ति । यत्र यस्मिन् स्तोत्रे सति बाधिताय असुरैः पीडिताय दिवे द्युलोकनिवासाय जनाय तन्वे शोभायै वृत्रहननेन तव शोभार्थं वरिवश्चकर्थ ॥

अनु द्यावापृथिवी तत्त ओजोऽमर्त्या जिहत इन्द्र देवाः ।
कृष्वा कृत्नो अकृतं यत्ते अस्त्युक्थं नवीयो जनयस्व यज्ञैः ॥ १५ ॥

अनु । द्यावापृथिवी इति । तत् । ते । ओजः । अमर्त्याः । जिहते । इन्द्र । देवाः ।
कृष्व । कृत्नो इति । अकृतम् । यत् । ते । अस्ति । उक्थम् । नवीयः । जनयस्व । यज्ञैः ॥ १५ ॥

हे [v]इन्द्र [v]ते त्वदीयं [v]तत् प्रसिद्धम् [v]ओजः बलं [v]द्यावापृथिवी [v]अनु[2] जिहाते[2] । [v]अमर्त्याः अमरणधर्माणः [v]देवाः त्वदीयं बलमनु [v]जिहते अनुगच्छन्ति । हे [v]कृत्नो बहूनां कर्मणां कर्तः [v]ते त्वदीयम् [v]अकृतं [v]यत् कर्म [v]अस्ति तत् [v]कृष्व कुरुष्व । तदनन्तरं [v]यज्ञैः यज्ञेषु [v]नवीयः नवतरम् [v]उक्थं स्तोत्रं [v]जनयस्व ॥ ॥ ६ ॥

'महाँ इन्द्रः' इति त्रयोदशर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । अनुक्रान्तं च—'महान्त्समोना' इति । माध्यंदिने सवने सोमातिरेके[3] शस्त्रं[3] भवति । तत्रेदं सूक्तम् । सूत्रितं च—महाँ इन्द्रो नृवद्विष्णोर्नु कम्' (आश्व. श्रौ. ६. ७) इति । समूढहे द्वितीये छन्दोमे मरुत्वतीयशस्त्रे एतत्सूक्तम् । सूत्रितं च—'महाँ इन्द्रो नृवदिति मरुत्वतीयम्' (आश्व. श्रौ. ८. ७) इति ॥

महाँ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।
अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत् ॥ १ ॥

महान् । इन्द्रः । नृऽवत् । आ । चर्षणिऽप्राः । उत । द्विऽबर्हाः । अमिनः । सहःऽभिः ।
अस्मद्र्यक् । ववृधे । वीर्याय । उरुः । पृथुः । सुऽकृतः । कर्तृऽभिः । भूत् ॥ १ ॥

---

१. ख-ङ्ग-न-भ-य—अहिन्ने तस्य वृत्रस्य । २. ख-घ-ङ्ग-भ—अनुजिहते अनुगच्छतः; ङ्ग-त-न—अनुजिहते ।
३. ख-ङ्ग-भ-सोमातिरेकं शस्त्रम्; ङ्ग-त-न-र—सोमातिरेके एकं (ङ्ग—एक°) शस्त्रम्; श-सोमातिरेकशस्त्रम् ।

vनृवत् यथा नेता राजा भृत्यादीनां कामानां पूरयिता तद्वत् vचर्षणिप्राः चर्षणीनां स्तोतृजनानां कामानां पूरकः vमहान् प्रभूतः vइन्द्रः vआ गच्छतु । आ इत्युपसर्गदर्शनात् गच्छत्वित्याख्यातस्याध्याहारः । vउत अपि च vद्विबर्हाः द्वयोर्लोकयोः परिवृढः vसहोभिः शत्रुबलैः vअमिनः अहिंसनीयः[1] इन्द्रः vअस्मद्र्यक् अस्मदभिमुखं यथा भवति तथा vवीर्याय वीरकर्मकरणाय vववृधे वर्धते । vउरुः शरीरेण विस्तीर्णः vपृथुः गुणैः प्रथितः vकर्तृभिः यजमानैः vसुकृतः vभूत् सुष्ठु परिचरितो भवति ॥

इन्द्रमेव धिषणा सातये धाद्बृहन्तमृष्वमजरं युवानम् ।
अषाळ्हेन शवसा शूशुवांसं सद्यश्चिद्यो वावृधे असामि ॥ २ ॥

इन्द्रम् । एव । धिषणा । सातये । धात् । बृहन्तम् । ऋष्वम् । अजरम् । युवानम् ।
अषाळ्हेन । शवसा । शूशुवांसम् । सद्यः । चित् । यः । ववृधे । असामि ॥ २ ॥

vधिषणा अस्मदीया स्तुतिः vसातये दानाय vइन्द्रमेव vधात् धारयति । कीदृशम् । vबृहन्तं महान्तम् vऋष्वं गन्तारम् vअजरं जरारहितं vयुवानं नित्यतरुणम् vअषाळ्हेन शत्रुभिरनभिभूतेन vशवसा बलेन vशूशुवांसं प्रवृद्धम् । श्वयतेरिदं रूपम् । vयः इन्द्रः vसद्यश्चित् सद्य एव जातमात्रः सन् vअसामि अनल्पमधिकं यथा भवति तथा vववृधे वर्धते[2] ॥

पृथू करस्ना बहुला गभस्ती अस्मद्र्यक्सं मिमीहि श्रवांसि ।
यूथेव पश्वः पशुपा दमूना अस्माँ इन्द्राभ्या ववृत्स्वाजौ ॥ ३ ॥

पृथू इति । करस्ना । बहुला । गभस्ती इति । अस्मद्र्यक् । सम् । मिमीहि । श्रवांसि ।
यूथाऽइव । पश्वः । पशुऽपाः । दमूनाः ।
अस्मान् । इन्द्र । अभि । आ । ववृत्स्व । आजौ ॥ ३ ॥

हे इन्द्र त्वं vपृथू विस्तीर्णौ vकरस्ना[3] कर्मणां कर्तारौ vबहुला बहुप्रदौ vगभस्ती त्वदीयौ बाहू vश्रवांसि अन्नानि । दातुमिति शेषः। vअस्मद्र्यक् अस्मदभिमुखं vसं vमिमीहि कुरु। किंच हे vइन्द्र vदमूनाः दान्तमनास्त्वम् vआजौ संग्रामे vअस्मान् vअभि vआ vववृत्स्व अभ्यावर्तस्व । तत्र दृष्टान्तः । vपशुपाः पशूनां पालकः vपश्वः पशूनां vयूथेव यूथानि यथा आवर्तयति[4] तद्वत् ॥

तं व इन्द्रं चतिनमस्य शाकैरिह नूनं वाजयन्तो हुवेम ।
यथा चित्पूर्वे जरितार आसुरनेद्या अनवद्या अरिष्टाः ॥ ४ ॥

तम् । वः । इन्द्रम् । चतिनम् । अस्य । शाकैः । इह । नूनम् । वाजऽयन्तः । हुवेम ।
यथा । चित् । पूर्वे । जरितारः । आसुः । अनेद्याः । अनवद्याः । अरिष्टाः ॥ ४ ॥

---

१. घ-श-अहिंसितः यः । २. ख-भ-अवर्धयत्; ज्ञ-अवर्धत; ज्ञ-त-न-य-र-अवर्धयत; श-वर्धयते । ३. ख-घ-भ-करस्ना करस्नौ; श-करस्नौ । ४. ज्ञ-त-य-र-आववृत्स्व; न-आववृत्स्वति ।

vनूनम् अद्य vइह अस्मिन् यज्ञे vवाजयन्तः अन्नमिच्छन्तो वयं स्तोतारः vशाकैः शक्तैः समर्थैः vअस्य तव सहायैर्मरुद्भिः सहितं vचतिनं शत्रूणां चातकम्। नाशकमित्यर्थः। vइन्द्रं[1] परमेश्वरं[1] vतं vवः प्रसिद्धं त्वां vहुवेम स्तुमः। vयथा vचित् यथैव vपूर्वे पुरातनाः vजरितारः स्तोतारः vअनेद्याः अनिन्द्याः vअनवद्याः पापरहिताः vअरिष्टाः अहिंसिताश्च vआसुः बभूवुः हे इन्द्र त्वत्प्रसादात् वयमपि तथैव भवेमेत्यर्थः ॥

धृतव्रतो धनदाः सोमवृद्धः स हि वामस्य वसुनः पुरुक्षुः ।
सं जग्मिरे पथ्या३ रायो अस्मिन्त्समुद्रे न सिन्धवो यादमानाः ॥ ५ ॥

धृतऽव्रतः । धनऽदाः । सोमऽवृद्धः । सः । हि । वामस्य । वसुनः । पुरुऽक्षुः ।
सम् । जग्मिरे । पथ्याः । रायः । अस्मिन् । समुद्रे । न । सिन्धवः । यादमानाः ॥ ५ ॥

vस vहि स खलु इन्द्रः vधृतव्रतः धृतकर्मा। vधनदाः स एव धनप्रदः। कीदृशस्य धनस्येत्याकाङ्क्षायामुपसर्जनीभूतस्यापि धनस्य विशेषणे[2] वामस्य वसुन इति। vवामस्य वननीयस्य vवसुनः श्रेष्ठस्य। यद्वा वसुनो धनस्य स्वामीति शेषः। vसोमवृद्धः स एव सोमेन प्रवृद्धः। vपुरुक्षुः बह्वन्नः स एव। vअस्मिन् इन्द्रे एव vपथ्याः स्तोतॄणां हितानि vरायः धनानि vसं vजग्मिरे संगच्छन्ते। तत्र दृष्टान्तः। vसिन्धवः नद्यः vसमुद्रे vन यथा समुद्रे vयादमानाः[3] अभिगच्छन्त्यस्तद्वत् ॥ ॥ ७ ॥

शविष्ठं न आ भर शूर शव ओजिष्ठमोजो अभिभूत उग्रम् ।
विश्वा द्युम्ना वृण्या मानुषाणामस्मभ्यं दा हरिवो मादयध्यै ॥ ६ ॥

शविष्ठम् । नः । आ । भर । शूर । शवः । ओजिष्ठम् । ओजः । अभिऽभूते । उग्रम् ।
विश्वा । द्युम्ना । वृण्या । मानुषाणाम् । अस्मभ्यम् । दाः । हरिऽवः । मादयध्यै ॥ ६ ॥

हे vशूर विक्रान्तेन्द्र vशविष्ठं बलवत्तमं vशवः बलं vनः अस्मभ्यम् vआ vभर आहर। हे vअभिभूते शत्रूणामभिभावुकेन्द्र vउग्रम् अप्रसह्यम् vओजिष्ठम् ओजस्वितमम्[4] vओजः दीप्तिमस्मभ्यमा भर। vविश्वा विश्वानि सर्वाणि vवृण्या वृण्यानि सेचनसमर्थानि vद्युम्ना द्युम्नानि द्योतमानानि यानि धनानि vमानुषाणां मनुष्याणां भोग्यतया कल्पितानि हे vहरिवः हरिवन्निन्द्र तानि धनानि vमादयध्यै अस्मान् मादयितुम् vअस्मभ्यं vदाः प्रयच्छ ॥

यस्ते मदः पृतनाषाळमृध्र इन्द्र तं न आ भर शूशुवांसम् ।
येन तोकस्य तनयस्य सातौ मंसीमहि जिगीवांसस्त्वोताः ॥ ७ ॥

यः । ते । मदः । पृतनाषाट् । अमृध्रः । इन्द्र । तम् । नः । आ । भर । शूशुऽवांसम् ।
येन । तोकस्य । तनयस्य । सातौ । मंसीमहि । जिगीवांसः । त्वाऽऊताः ॥ ७ ॥

---

१. ख१-ज्ञ–हे इन्द्र परमेश्वर; घ–तमिन्द्रं परमेश्वरम्; ज-ञ-ण-त-न-भ-र–हे इन्द्र परमेश्वरम्। २. ख-भ-श–विशेषणम्। ३. ख-ञ्ञ-न-भ-य–यादमानाः यातयमानाः; त-र–यातयमानाः। ४. ख-ञ्ञ-त-न-भ-र–ओजस्तमम्; श–ओजस्विनम्।

vपृतनाषाट् शत्रुसेनानामभिभविता vअमृध्रः अहिंसितः vयः vमदः हर्षः हे vइन्द्र vते त्वया देयः vशूशुवांसं प्रवृद्धं vतं मदं vनः अस्मभ्यम् vआ vभर आहर । vस्वोताः त्वया रक्षिताः vजिगीवांसः जितवन्तो वयं vतोकस्य पुत्रस्य vतनयस्य तत्पुत्रस्य च vसातौ लाभे निमित्तभूते सति vयेन हर्षेण vमंसीमहि त्वां स्तुवीमहि तमा भरेति पूर्वेणान्वयः ॥

आ नो भर वृषणं शुष्ममिन्द्र धनस्पृतं शूशुवांसं सुदक्षम् ।
येन वंसाम पृतनासु शत्रून्त्वोतिभिरुत जामीरजामीन् ॥ ८ ॥

आ । नः । भर । वृषणम् । शुष्मम् । इन्द्र । धनऽस्पृतम् । शूशुऽवांसम् । सुऽदक्षम् ।
येन । वंसाम । पृतनासु । शत्रून् । त्वा । ऊतिऽभिः । उत । जामीन् । अजामीन् ॥ ८ ॥

हे vइन्द्र त्वं vवृषणं वर्षितारं vशुष्मं सेनालक्षणं बलं vनः अस्मभ्यम् vआ vभर आहर । कीदृशम् । vधनस्पृतं धनस्य पालकं vशूशुवांसं प्रवृद्धं vसुदक्षं शोभनबलम् । हे इन्द्र vतवोतिभिः त्वदीयाभी रक्षाभिः vपृतनासु संग्रामेषु । पृतना इति संग्रामनाम । vयेन बलेन vशत्रून् vवंसाम हनाम[1] । उतेत्यत्र भिन्नक्रमः । vजामीन् बन्धून् vउत अपि च vअजामीन् शत्रूंश्च येन शुष्मेण वंसाम तं शुष्ममा भरेति पूर्वेण संबन्धः ॥

आ ते शुष्मो वृषभ एतु पश्चादोत्तरादधरादा पुरस्तात् ।
आ विश्वतो अभि समेत्वर्वाङिन्द्र द्युम्नं स्ववद्धेह्यस्मे ॥ ९ ॥

आ । ते । शुष्मः । वृषभः । एतु । पश्चात् । आ । उत्तरात् । अधरात् । आ । पुरस्तात् ।
आ । विश्वतः । अभि । सम् । एतु । अर्वाङ् । इन्द्र । द्युम्नम् । स्वःऽवत् । धेहि । अस्मे इति ॥९॥

हे इन्द्र vवृषभः वर्षिता vते त्वदीयं vशुष्मः बलम् vअर्वाङ् अस्मदभिमुखः सन् vपश्चात पश्चिमभागात् vआ vएतु आगच्छतु । vउत्तरात् उत्तरभागात् vआ गच्छतु । vअधरात् दक्षिणभागाच्चैतु । vपुरस्तात् पूर्वभागाच्च vआ गच्छतु । vविश्वतः सर्वस्मादिग्भागात् vअभि अस्मानभिलक्ष्य vआ vसमेतु सम्यगागच्छतु । हे vइन्द्र त्वं vस्ववत् सुखयुक्तं vद्युम्नं धनम् vअस्मे अस्मभ्यं vधेहि प्रयच्छ ॥

नृवत्ते इन्द्र नृतमाभिरूती वंसीमहि वामं श्रोमतेभिः ।
ईक्षे हि वस्वः उभयस्य राजन्धा रत्नं महि स्थूरं बृहन्तम् ॥ १० ॥

नृऽवत् । ते । इन्द्र । नृऽतमाभिः । ऊती । वंसीमहि । वामम् । श्रोमतेभिः ।
ईक्षे । हि । वस्वः । उभयस्य । राजन् । धाः । रत्नम् । महि । स्थूरम् । बृहन्तम् ॥ १०

vनृवत् मनुष्यैः परिचारकजनैर्युक्तं vश्रोमतेभिः श्रोतव्यैर्यशोभिः सहितं vवामं वननीयं धनं हे vइन्द्र vते त्वत्तः vनृतमाभिः नेतृतमाभिः vऊती ऊतिभी रक्षाभिः vवंसीमहि वयं संभजेमहि । vहि यस्मात् कारणात् हे vराजन् राजमानेन्द्र त्वम् vउभयस्य पार्थिवस्य दिव्यस्य च vवस्वः धनस्य

---

१. ख-ङ्ग-त-न-भ-र-'हनाम' नास्ति ।

[v]ईष्टे ईशिषे तस्मात् कारणात् [v]महि महान्तं [v]स्थूरं विपुलं [v]बृहन्तं गुणैः परिवृढं [v]रत्नं रमणीयं धनम् । अत्र रत्नशब्दः पुलिङ्गः । [v]धाः धेहि ॥

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यं शासमिन्द्रम् ।
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम ॥ ११ ॥

मरुत्वन्तम् । वृषभम् । ववृधानम् । अकवऽअरिम् । दिव्यम् । शासम् । इन्द्रम् ।
विश्वऽसहम् । अवसे । नूतनाय । उग्रम् । सहःऽदाम् । इह । तम् । हुवेम ॥ ११ ॥

[v]इह अस्मिन् यज्ञे [v]नूतनाय अभिनवाय [v]अवसे रक्षणाय [v]तं प्रसिद्धम् [v]इन्द्रं [v]हुवेम स्तुमः । आह्वयामो वा । कीदृशम् । [v]मरुत्वन्तं मरुद्भिर्युक्तं [v]वृषभं कामानां वर्षितारं [v]ववृधानं प्रवृद्धम् [v]अकवारिम् अकुत्सितशत्रुं [v]दिव्यं द्योतमानं [v]शासं शासितारं [v]विश्वसहं[1] विश्वस्य लोकस्य अभिभवितारम् [v]उग्रम् ओजस्विनं [v]सहोदां बलप्रदम् ॥

जनं वज्रिन्महि चिन्मन्यमानमेभ्यो नृभ्यो रन्धया येष्वस्मि ।
अधा हि त्वा पृथिव्यां शूरसातौ हवामहे तनये गोष्वप्सु ॥ १२ ॥

जनम् । वज्रिन् । महि । चित् । मन्यमानम् । एभ्यः । नृऽभ्यः । रन्धय । येषु । अस्मि ।
अध । हि । त्वा । पृथिव्याम् । शूरऽसातौ । हवामहे । तनये । गोषु । अप्ऽसु ॥ १२ ॥

[v]येषु येषां नृणां मध्येऽहम् [v]अस्मि एको भवामि हे [v]वज्रिन् वज्रवन् इन्द्र त्वम् [v]एभ्यो [v]नृभ्यः मनुष्येभ्यः [v]महि महदत्यन्तमात्मानं [v]मन्यमानं [v]जनम् । बहुमन्यमानमित्यर्थः । [v]रन्धय वशीकुरु । [v]चित् इति पादपूरणः । [v]अध अधुना [v]पृथिव्यां भूम्यां [v]शूरसातौ युद्धे प्रवृत्ते सति [v]तनये पुत्रे निमित्ते च [v]गोषु पशुषु [v]अप्सु उदकेषु च निमित्तेषु हे इन्द्र [v]त्वा द्युलोके स्थितं त्वां [v]हवामहे वयमाह्वयामः ॥

वयं ते एभिः पुरुहूत सख्यैः शत्रोःशत्रोरुत्तर इत्स्याम ।
घ्नन्तो वृत्राण्युभयानि शूर राया मदेम बृहता त्वोताः ॥ १३ ॥

वयम् । ते । एभिः । पुरुऽहूत । सख्यैः । शत्रोःऽशत्रोः । उत्ऽतरे । इत् । स्याम ।
घ्नन्तः । वृत्राणि । उभयानि । शूर । राया । मदेम । बृहता । त्वाऽऊताः ॥ १३ ॥

हे [v]पुरुहूत बहुभिराहूतेन्द्र [v]एभिः प्रसिद्धैः [v]सख्यैः स्तोत्रलक्षणैः सखिकर्मभिः [v]ते त्वया सह [v]वयम् [v]उभयानि जामिरूपाण्यजामिरूपाणि [v]वृत्राणि अमित्राणि [v]घ्नन्तः हिंसन्तः [v]शत्रोःशत्रोः सर्वस्माच्छत्रोः [v]उत्तरे [v]इत् [v]स्याम अधिका एव भवेम । हे [v]शूर विक्रान्तेन्द्र [v]त्वोताः वयं त्वया रक्षिताः सन्तः [v]बृहता महता [v]राया धनेन [v]मदेम हृष्याम[2] ॥ ॥ ८ ॥

'द्यौर्न य इन्द्र' इति त्रयोदशर्चं पञ्चमं सूक्तं भरद्वाजस्यार्षमैन्द्रं त्रैष्टुभम् । 'वि पिप्रोः' इत्येषा सप्तमी दशाक्षरचतुष्टययुक्ता[3] विराट् । अनुक्रम्यते च—'द्यौर्न वि पिप्रोर्विराट्' इति । पृष्ठय-

---

१. श–विश्वासाहम् । २. झ-र–हृष्यास्म । ३. ख-भ–दशकचतुष्टय°; झ-ञ-त-न-र–दशचतुष्टय° ।

षडहस्य षष्ठेऽहनि तृतीयसवने उक्थ्यस्तोत्राणि यदि द्विपदासु स्तुवीरन् यदि वाग्निष्टोमसंस्थः स्यात् तदानीं माध्यंदिने सवनेऽच्छावाकः स्वशस्त्र आरम्भणीयाभ्य ऊर्ध्वमेतत्सूक्तं शंसेत् । सूत्रितं च—' द्यौर्न य इन्द्रेत्यच्छावाकः ' (आश्व. श्रौ. ८. ४) इति । इदमेव सूक्तम् इन्द्राविष्ण्वोरुक्रान्तिनाम्न्येकाहे निष्केवल्यनिविद्धानम् । ' द्यौर्न य इन्द्रेति मध्यंदिनः ' (आश्व. श्रौ. ९. ७) इति ॥

द्यौर्न य इन्द्राभि भूम्यार्यस्तस्थौ रयिः शवसा पृत्सु जनान् ।
तं नः सहस्त्रभरमुर्वरासां दृढि सूनो सहसो वृत्रतुरम् ॥ १ ॥

द्यौः । न । यः । इन्द्र । अभि । भूमि । अर्यः । तस्थौ । रयिः । शवसा । पृत्ऽसु । जनान् ।
तम् । नः । सहस्त्ऽभरम् । उर्वराऽसाम् । दृढि । सूनो इति । सहसः । वृत्रऽतुरम् ॥ १ ॥

यः रयिः पुत्ररूपं धनं शवसा बलेन पृत्सु संग्रामेषु अर्यः अरीन् शत्रून् जनान् अभि तस्थौ आक्रामेत्[1] । तत्र दृष्टान्तः। द्यौर्न । द्योतमानः सूर्यो यथा भूम भूतानि आक्रामति[2] तद्वत् । हे सहसः सूनो बलस्य पुत्र इन्द्र त्वं तं पुत्रं नः अस्मभ्यं दृढि देहि । कीदृशम् । सहस्त्रभरं सहस्त्रस्य धनस्य भर्तारम् उर्वरासाम् उर्वराणां सस्याढ्यानां भूमीनां सनितारं संभक्तारं वृत्रतुरं वृत्राणां शत्रूणां तरितारं तुर्वितारं वा ॥

दिवो न तुभ्यमन्विन्द्र सत्रासुर्यं देवेभिर्धायि विश्वम् ।
अहिं यदृत्रमपो वव्रिवांसं हन्नृजीषिन्विष्णुना सचानः ॥ २ ॥

दिवः । न । तुभ्यम् । अनु । इन्द्र । सत्रा । असुर्यम् । देवेभिः । धायि । विश्वम् ।
अहिम् । यत् । वृत्रम् । अपः । वव्रिऽवांसम् । हन् । ऋजीषिन् । विष्णुना । सचानः ॥२॥

दिवो न दिवे सूर्यायेव हे इन्द्र तुभ्यं सत्रा सत्यमेव विश्वं व्याप्तम् असुर्यम् असुरत्वं बलं देवेभिः देवैः स्तोतृभिः अनु धायि व्यधायि । अकारि । स्तोत्रैः स्तूयमाना देवता बलवती भवतीत्यर्थः । हे ऋजीषिन् विगतरससोमेन्द्र विष्णुना सचानः संगच्छमानस्त्वम् । ' षच समवाये ' इति धातो रूपम् । यत् येनासुर्येण अपः उदकानि वव्रिवांसं परिवृण्वन्तम् अहिम् आगत्य हन्तारं वृत्रम् असुरं हन् अहन् अवधीः तद्बलं व्यधार्याति पूर्वेण संबन्धः ॥

तूर्वन्नोजीयान्तवसस्तवीयान्कृतब्रह्मेन्द्रो वृद्धमहाः ।
राजाभवन्मधुनः सोम्यस्य विश्वासां यत्पुरां दर्तुमावत् ॥ ३ ॥

तूर्वन् । ओजीयान् । तवसः । तवीयान् । कृतऽब्रह्मा । इन्द्रः । वृद्धऽमहाः ।
राजा । अभवत् । मधुनः । सोम्यस्य । विश्वासाम् । यत् । पुराम् । दर्तुम् । आवत् ॥ ३ ॥

यत् यदा इन्द्रः विश्वासां सर्वासां पुरां पुरीणां[3] दर्तुं दारकं वज्रम् आवत् प्रापत् तदा सोम्यस्य सोममयस्य मधुनः मधुररसस्य[4] राजा अभवत् स्वामी आसीत् । कीदृशः । तूर्वन्

---

१. ख-न-भ-आक्रमेत् ; झ-आक्रम्यते । २. ख-ज्ञ-त-न-र-आक्रमति; घ-अतिक्रामति । ३. ज्ञ-त-असुरपुरीणाम् । ४. ख-ज्ञ-न-भ-मधुरस्य; ज्ञ-त-र-मधुरसस्य ।

हिंसकान् हिंसन् [v]ओजीयान् अतिशयेनौजस्वी [v]तवसः बलवतः [v]तवीयान् बलवत्तरः [v]कृतब्रह्मा । कृतं ब्रह्म स्तोत्रं यस्मै स्तोतृभिः सः । अथवा कृतं दत्तं ब्रह्म अन्नं येन स्तोतृभ्यः सः । [v]बृद्धमहाः बृद्धतेजाः[1] । एवंभूत इन्द्रो राजाभवदिति ॥

शतैरपद्रन्पणय इन्द्रात्र दशोणये कवयेऽर्कसातौ ।
वधैः शुष्णस्याशुषस्य मायाः पित्वो नारिरेचीत्किं चन प्र ॥ ४ ॥

शतैः । अपद्रन् । पणयः । इन्द्र । अत्र । दशऽओणये । कवये । अर्कऽसातौ ।
वधैः । शुष्णस्य । अशुषस्य । मायाः । पित्वः । न । अरिरेचीत् । किम् । चन । प्र ॥ ४ ॥

[v]अत्र अस्मिन् [v]अर्कसातौ । अर्कोऽन्नं प्राप्यतेऽस्मिन्नित्यर्कसातिर्युद्धम् । तस्मिन् [v]दशोणये[2] बहुहविष्कात्[3] [v]कवये मेधाविनः । पञ्चम्यर्थे चतुर्थी । हे [v]इन्द्र त्वत्सहायात् कुत्सात् बिभ्यतः [v]पणयः एतन्नामकासुराः [v]शतैः शतसंख्याकैः बलैः सार्धम् [v]अपद्रन् अपाद्रवन्[4] । अपलायन्त । अपि चेन्द्रः [v]अशुषस्य अशुष्कस्य । संपूर्णबलस्येत्यर्थः । [v]शुष्णस्य एतन्नामकासुरस्य कुत्सस्य[5] शत्रोः [v]मायाः कपटान् [v]वधैः हनमसाधनैरायुधैः [v]न [v]प्र [v]अरिरेचीत् प्ररिक्तानतिरिक्तान्नाकरोत् । [v]पित्वः अन्नस्य । पितुरित्यन्ननामैतत् । [v]किं [v]चन किंचिदपि न प्रारिरेचीत् । तदीयमन्नं सर्वमप्यपाहारयत् ॥

महो द्रुहो अप विश्वायु धायि वज्रस्य यत्पतने पादि शुष्णः ।
उरु ष सरथं सारथये करिन्द्रः कुत्साय सूर्यस्य सातौ ॥ ५ ॥

महः । द्रुहः । अप । विश्वऽआयु । धायि । वज्रस्य । यत् । पतने । पादि । शुष्णः ।
उरु । सः । सऽरथम् । सारथये । कः । इन्द्रः । कुत्साय । सूर्यस्य । सातौ ॥ ५ ॥

[v]यत् यदा सः[6] [v]शुष्णः असुरः [v]वज्रस्य [v]पतने पाते [v]पादि अगच्छत् । अन्नियतेत्यर्थः । तदा [v]महः महतः [v]द्रुहः द्रोग्धुः शुष्णस्य संबन्धि [v]विश्वायु सर्वगतम् । बलमिति शेषः । [v]अप [v]धायि अपहितमकारि[7] । निरस्कृतमित्यर्थः । [v]सः [v]इन्द्रः [v]सारथये सारथिभूताय [v]कुत्साय [v]सरथं समानरथं [v]सूर्यस्य [v]सातौ भजने निमित्तभूते [v]उरु विस्तीर्णं यथा भवति तथा [v]कः अकरोत् । तथा चोक्तं—'कुत्सायेन्द्रोऽसुरं शुष्णं जिघांसुः कुत्समात्मनः । सारथिं कल्पयित्वास्य शत्रुं शुष्णमहंस्ततः । कुत्सस्य रक्षां बहुलां चकारेत्यनर्थोच्यते' इति ॥ ॥ ९ ॥

प्र श्येनो न मदिरमंशुमस्मै शिरो दासस्य नमुचेर्मथायन् ।
प्रावन्नमीं साप्यं ससन्तं पृणग्राया समिषा सं स्वस्ति ॥ ६ ॥

प्र । श्येनः । न । मदिरम् । अंशुम् । अस्मै । शिरः । दासस्य । नमुचेः । मथायन् ।
प्र । आवत् । नमीम् । साप्यम् । ससन्तम् । पृणक् । राया । सम् । इषा । सम् । स्वस्ति ॥ ६ ॥

---

१. ख-झ-न-भ-य-प्रवृद्धतेजाः । २. श-दशोणये । अवतेस्तर्पणार्थात् छान्दसो णिः । ३. ख-झ-भ-°हविष्मतः; न-°हविष्येतत् । ४. ख-झ-न-भ-र-अपद्रवन्; ज्ञ-त-'अपाद्रवन्' नास्ति । ५. ख-ज्ञ-झ-त-न-भ-य-र-'कुत्सस्य' नास्ति । ६. ज्ञ-त-'सः' नास्ति । ७. ख-ञ-न-भ-र-°मपकारि ।

[v]श्येनः सुपर्णश्च । [v]न[1] इत्ययं शब्दः[1] समुच्चये वर्तते । [v]अस्मै इन्द्राय [v]महिरं मदकरम् [v]अंशुं सोमम् । [v]प्र इति आ इत्यस्यार्थे वर्तते । आहरत् । उपसर्गदर्शनाच्चाख्यातमध्याहियते । किंचायमिन्द्रोऽपि [v]दासस्य प्राणिनामुपक्षपयितुः [v]नमुचेः एतन्नाम्नोऽसुरस्य [v]शिरः शीर्षं [v]मथाचन् मन्थनं कुर्वन् [v]साप्यं सपस्य पुत्रं [v]ससन्तं स्वपन्तं [v]नमीम् एतत्संज्ञकमृषिं [v]प्रावत् प्रारक्षत् । [v]स्वस्ति अविनाशेन [v]राया पश्वादिधनेन [v]इषा अन्नेन च तमृषिं [v]सं [v]पृणक् समयोजयत् ॥

वि पिप्रोरहिमायस्य दृळ्हाः पुरो वज्रिञ्छवसा न दर्दः ।
सुदामन्तद्रेक्णो अप्रमृष्यमृजिश्वने दात्रं दाशुषे दाः ॥ ७ ॥

वि । पिप्रोः । अहिऽमायस्य । दृळ्हाः । पुरः । वज्रिन् । शवसा । न । ददरिति ददः । सुऽदामन् । तत् । रेक्णः । अप्रऽमृष्यम् । ऋजिश्वने । दात्रम् । दाशुषे । दाः ॥ ७ ॥

हे [v]वज्रिन् वज्रवन्निन्द्र त्वम् [v]अहिमायस्य आहन्त्र्यो माया यस्य[2] [v]पिप्रोः एतन्नाम्नोऽसुरस्य संबन्धिनीः [v]दृळ्हाः दृढानि [v]पुरः प्राकारादीनि दुर्गाणि [v]शवसा बलेन [v]वि [v]ददः विदारितवानसि । [v]न इति पादपूरणः । 'त्वं पिप्रोर्नृमणः प्रारुजः पुरः' (ऋ. सं. १. ५१. ५); 'शतं पूर्भिरायसीभिर्नि पाहि' (ऋ. सं. ७. ३. ७) इति दर्शनात् । अपि च हे [v]सुदामन् शोभनदानेन्द्र त्वं [v]दात्रं हविर्लक्षणं धनं [v]दाशुषे दत्तवते [v]ऋजिश्वने एतन्नामकाय राजर्षये [v]अप्रमृष्यं केनाप्यबाध्यं [v]तत् तस्य स्वभूतं [v]रेक्णः धनं [v]दाः अदाः दत्तवानसि ॥

स वेतसुं दशमायं दशोणिं तूतुजिमिन्द्रः स्वभिष्टिसुम्नः ।
आ तुग्रं शश्वदिभं द्योतनाय मातुर्न सीमुप सृजा इयध्यै ॥ ८ ॥

सः । वेतसुम् । दशऽमायम् । दशऽओणिम् । तूतुजिम् । इन्द्रः । स्वभिष्टिऽसुम्नः । आ । तुग्रम् । शश्वत् । इभम् । द्योतनाय । मातुः । न । सीम् । उप । सृज । इयध्यै ॥८॥

[v]स्वभिष्टिसुम्नः सुष्ठु अभ्येषणीयान्यभिगम्यानि सुम्नानि सुखानि येन देयानि [v]सः [v]इन्द्रः [v]दशमायं बहुवञ्चनं[3] [v]वेतसुं वेतसुनामानमसुरं [v]दशोणिम् एतन्नामकं च [v]तूतुजिं तूतुजिनामकं च [v]आ अपि च [v]तुग्रं तुग्रनामकमसुरं तथा [v]इभम् एतन्नामकमसुरं च [v]इयध्यै एतुं [v]द्योतनाय एतत्संज्ञाय राज्ञे [v]शश्वत [v]उप [v]सृज उपासृजत् । वशीचकार । तत्र दृष्टान्तः । [v]मातुर्न मातुर्जनन्या इव पुत्रम् । यथा मात्रे पुत्रो[4] वशीभवति[4] तद्वत् वशं चकारेत्यर्थः । [v]सीम् इति पादपूरणः ॥

स ईं स्पृधो वनते अप्रतीतो बिभ्रद्वज्रं वृत्रहणं गभस्तौ ।
तिष्ठद्धरी अध्यस्तेव गर्ते वचोयुजा वहत इन्द्रमृष्वम् ॥ ९ ॥

सः । ईम् । स्पृधः । वनते । अप्रतिऽइतः । बिभ्रत् । वज्रम् । वृत्रऽहनम् । गभस्तौ । तिष्ठत् । हरी इति । अधि । अस्ताऽइव । गर्ते । वचःऽयुजा । वहतः । इन्द्रम् । ऋष्वम् ॥९॥

---

१. भ–नशब्दः; श–अत्र नञ्शब्दः । २. ज्ञ–यस्य तस्य । ३. ख-घ-त-न-श–°वचनम् । ४. त–पुत्रा वशीभवन्ति ।

vगभस्तौ हस्ते vवृत्रहणं वृत्राणां शत्रूणां हन्तारं vवज्रं स्वकीयमायुधं vबिभ्रत् धारयन् vअप्रतीतः शत्रुभिरप्रतिगतः vसः इन्द्रः vस्पृधः स्पर्धमानान् vहंम् हमान् वृत्रप्रभृतीन् शत्रून् vवनते हन्ति। vहरी स्वकीयावश्वौ vअधि vतिष्ठत् आरोहति। तत्र दृष्टान्तः। vअस्तेव vगतें। यथा क्षेत्रा शूरो रथेऽधितिष्ठति तद्वत्। तथा vवचोयुजा वचोमात्रेण[1] युज्यमानौ। यद्वा। स्तोतृणां स्तुतिभिर्युज्यमानौ तौ हरी च vऋध्वं महान्तम् vइन्द्रं vवहतः ॥

सनेम॒ तेऽवसा॒ नव्य॑ इन्द्र॒ प्र पूर्व॑ः स्तवन्त॒ एना॒ यज्ञैः॑ ।
सप्त॒ यत्पुरः॒ शर्म॑ शार॒दीर्दर्द्धन्दासीः॑ पुरुकुत्सा॑य शिक्षन् ॥ १० ॥

सनेम॑। ते॒। अव॑सा। नव्यः॑। इ॒न्द्र॒। प्र। पूर्व॑ः। स्त॒व॒न्ते॒। एना॑। यज्ञैः॑।
सप्त॑। यत्। पुरः॑। शर्म॑। शा॒र॒दीः॑। दर्त्। हन्। दासीः॑। पुरु॑ऽकुत्साय। शि॒क्ष॒न् ॥ १० ॥

हे vइन्द्र vते त्वदीयेन vअवसा रक्षणेन vनव्यः नवीयः नवतरं त्वया दीयमानं धनं vसनेम वयं स्तोतारो भजेमहि। vपूर्वः मनुष्याः स्तोतारः vएना अनेन[2] स्तोत्रेण युक्तैः vयज्ञैः vप्र vस्तवन्ते त्वां स्तुवन्ति। vयत् यस्मात् कारणात् vदासीः कर्मणामुपक्षपयित्रीः शत्रुप्रजाः vहन् हन् हिंसन् vपुरुकुत्साय एतन्नामकाय राज्ञे vशिक्षन् धनानि प्रयच्छन् हे इन्द्र त्वं vशारदीः शरत्काले ऽसुरस्य संबन्धिनीः vसप्त सप्तसंख्याकाः vपुरः पुरीः vशर्म शर्मणा वज्रेण vदर्त् विदारितवानसि तस्मात् कारणात् त्वां स्तोतारः स्तुवन्तीत्यर्थः ॥

त्वं वृ॒ध इ॑न्द्र पू॒र्व्यो भूर्वरि॑वस्यन्नु॒शने॑ काव्या॒य ।
परा॒ नव॑वास्त्वमनु॒देयं॑ म॒हे पि॒त्रे द॑दाथ॒ स्वं नपा॑तम् ॥ ११ ॥

त्वम्। वृ॒धः। इ॒न्द्र॒। पू॒र्व्यः। भूः। वरि॑वस्यन्। उ॒शने॑। काव्या॑य।
परा॑। नव॑ऽवास्त्वम्। अ॒नु॒ऽदेय॑म्। म॒हे। पि॒त्रे। द॒दा॒थ॒। स्वम्। नपा॑तम् ॥ ११ ॥

हे vइन्द्र vपूर्व्यः पुरातनः vत्वं vकाव्याय कविपुत्राय vउशने उशनसे भार्गवाय vवरिवस्यन् धनमिच्छन् vवृधः vभूः स्तोतृणां वर्धको भवसि। vअनुदेयम् अनुदातव्यं धनं vनववास्त्वम् एतन्नामकमसुरं पराहत्य vस्वं स्वकीयमौशनसं vनपातं युद्धे शत्रुभिर्गृहीतं[3] पुत्रं vमहे महते vपित्रे पालयितव्याय उशनसे vपरा vददाथ। तस्य शत्रुं हत्वा प्रकर्षेण दत्तवानसि ॥

त्वं धुनि॑रिन्द्र धुनि॑मतीर्ऋ॒णोरपः॑ सी॒रा न स्रव॑न्तीः ।
प्र यत्स॑मु॒द्रमति॑ शूर॒ पर्षि॑ पा॒रया॑ तु॒र्वशं॑ यदुं॑ स्व॒स्ति ॥ १२ ॥

त्वम्। धुनिः॑। इ॒न्द्र॒। धुनि॑ऽमतीः। ऋ॒णोः॑। अपः॑। सी॒राः॑। न। स्रव॑न्तीः।
प्र। यत्। स॒मु॒द्रम्। अति॑। शू॒र॒। पर्षि॑। पा॒रय॑। तु॒र्वशं॑म्। यदु॑म्। स्व॒स्ति ॥ १२ ॥

---

१. ख-ङ्ग-भ-वचनमात्रे; न-य-वचनमात्रेण; श-वाचामात्रेण। २. ख-ङ्ग-भ-य-एनेन। ३. ख-ङ्ग-ङ्ग-त-न-भ-य-र-शत्रूणां गृहीतम्।

हे vइन्द्र vधुनिः शत्रूणां कम्पयिता vत्वं vधुनिमतीः धुनिर्नामासुरो यासु निरोधकतया विद्यते ताः vअपः उदकानि vसीरा vन नदीरिव vस्रवन्तीः प्रवहन्तीः vऋणोः अगमयः। धुनिं हत्वा तेन निरोधिताम्युदकानि[1] प्रवाहयतीत्यर्थः। हे vशूर वीरेन्द्र vयत् यदा vसमुद्रम् vअति अतिक्रम्य vप्र vपर्षि प्रतीर्णो भवसि तदा समुद्रपारे तिष्ठन्तौ vतुर्वशं vयदुं च vस्वस्ति क्षेमेण vपारय अपारयः। समुद्रमतारयः॥

तर्व ह त्यदिन्द्र विश्वमाजौ सस्तो धुनीचुमुरी या ह सिष्वप्।
दीदयदित्तुभ्यं सोमेभिः सुन्वन्दभीतिरिध्मभृतिः पक्थ्यर्कैः॥ १३॥

तर्व। ह। त्यत्। इन्द्र। विश्वम्। आजौ। सस्तः। धुनीचुमुरी इति। या। ह। सिस्वप्। दीदयत्। इत्। तुभ्यम्। सोमेभिः। सुन्वन्। दभीतिः। इध्मऽभृतिः। पक्थी। अर्कैः॥१३॥

हे vइन्द्र vआजौ संग्रामे vतव vह तवैव vविश्वं व्याप्तं vत्यत् तादृशं कर्म भवति। कीदृशमिति तदुच्यते। vया यौ vधुनीचुमुरी। धुनिश्च चुमुरिश्चेत्येतन्नामकावसुरौ। vसिष्वप् त्वमस्वापयः तावसुरौ vसस्तः संग्रामे सुप्तवन्तौ। मृतावित्यर्थः॥ भूतार्थे व्यत्ययेन लट्। द्वितीयो हशब्दः पादपूरणः॥ तदनन्तरं हे इन्द्र vतुभ्यं त्वदर्थं vसुन्वन् सोमानभिषुण्वन् vपक्थी पक्थवान् हवींषि पक्ववान् vइध्मभृतिः इध्मानां भर्ता आहर्ता वा vदभीतिः नाम राजर्षिः vसोमेभिः सोमैः vअर्कैः हविर्लक्षणैरन्नैः vदीदयदित् दीप्यत एव। धुनिं चुमुरिं तस्मै जघन्थेत्यर्थः। 'त्वं नि दस्युं चुमुरिं धुनिं च' (ऋ. सं. ७. १९. ४) इति हि दर्शनात्॥ ॥ १० ॥

'इमा उ त्वा' इति द्वादशर्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम्। नवम्येकादशी च वैश्वदेव्यौ[2]। तथा चानुक्रम्यते—'इमा उ[3] द्वादश नवम्येकादश्यौ वैश्वदेव्यौ' इति। उपहव्यनाम्न्येकाहे इदं सूक्तं मरुत्वतीयनिविद्धानम्। सूत्रितं च—'इमा उ त्वा य एक इदिति मध्यंदिनः' (आश्व. श्रौ. ९. ७) इति। इन्द्राविष्णवोरुक्रान्तिनाम्न्येकाहेऽपीदं मरुत्वतीयनिविद्धानम्। सूत्रितं च—'इमा उ त्वा शौर्न य इन्द्रेति मध्यंदिनः' (आश्व. श्रौ. ९. ७) इति। तृतीये छन्दोमेऽपि मरुत्वतीय इदं सूक्तम्। सूत्रितं च—'प्र मन्दिन इमा उ त्वेति मरुत्वतीयम्' (आश्व. श्रौ. ८. ७) इति॥

इमा उं त्वा पुरुतमस्य कारोर्हव्यं वीर हव्या हवन्ते।
धियो रथेष्ठामजरं नवीयो रयिर्विभूतिरीयते वचस्या॥ १॥

इमाः। ऊँ इति। त्वा। पुरुऽतमस्य। कारोः। हव्यम्। वीर। हव्याः। हवन्ते।
धियः। रथेऽस्थाम्। अजरम्। नवीयः। रयिः। विऽभूतिः। ईयते। वचस्या॥ १॥

vपुरुतमस्य बहुलं कामं काङ्क्षतः। 'तमु अभिकाङ्क्षायाम्' इति धातुः। vकारोः स्तोतुर्भरद्वाजस्य संबन्धिन्यः vहव्याः स्तुत्याः प्रशस्याः vइमाः vधियः स्तुतयो हे vवीर शूरेन्द्र vहव्यं[4] vत्वा त्वां vहवन्ते ह्वयन्ति। कीदृशम्। vरथेस्थां रथे स्थितम् vअजरं जरारहितं vनवीयः नवीयांसं[5] नवतरम्।

---

१. ख-ज्ञ-ञ्र-त-भ-र-निरोधयितान्युदकानि। २. ख-विश्वेदेवा देवता; ज्ञ-ञ्र-त२-न-भ-य-र-विश्वेदेवा(ज्ञ-व)देवताके; त१-विश्वेदेवताके। ३. ख-ज्ञ-ञ्र-त-न-भ-र-उ त्वा। ४. ख१-हव्यं हातव्यम्; ज-ण-हव्यं होतव्यम्; भ-य-हव्यं ह्रातव्यम्। ५. ख-ञ्र-भ-र-नवीयाम्।

vउ इति पूरणः। अपि च vवचस्या स्तुत्या श्रेष्ठा vविभूतिः जगतो विभवहेतुः vरयिः हविर्लक्षणं धनम् vईयते त्वामभिगच्छति ॥

तमु॑ स्तुष इन्द्रं॒ यो विदा॑नो॒ गिर्वा॑हसं गी॒र्भिर्य॒ज्ञवृ॑द्धम् ।
यस्य॒ दिव॒मति॑ म॒ह्ना पृ॑थि॒व्याः पु॑रुमा॒यस्य॑ रिरि॒चे म॑हि॒त्वम् ॥ २ ॥

तम्। ऊँ इति। स्तुषे। इन्द्रम्। यः। विदानः। गिर्वाहसम्। गीःऽभिः। यज्ञऽवृद्धम्।
यस्य। दिवम्। अति। मह्ना। पृथिव्याः। पुरुऽमायस्य। रिरिचे। महिऽत्वम् ॥ २ ॥

vयः इन्द्रः vविदानः सर्वं विद्वान् सर्वैर्ज्ञायमानो वा vगिर्वाहसं गीर्भिर्वहनीयं[1] vयज्ञवृद्धं यज्ञैः प्रवृद्धं vतमु तमेव vइन्द्रं vस्तुषे स्तुवे। vपुरुमायस्य बहुप्रज्ञस्य बहुवञ्चनस्य वा vयस्य इन्द्रस्य vमहित्वं माहात्म्यं vदिवं दिवो द्युलोकात्। पञ्चम्यर्थे द्वितीया। vपृथिव्याः भूलोकात् vमह्ना महिम्ना vअति vरिरिचे अतिरिच्यते तं स्तुवे इति संबन्धः ॥

स इत्तमो॑ऽवयु॒नं त॑तन्वत्सू॒र्येण॒ वयु॑नवच्चकार ।
क॒दा ते॒ मर्ता॑ अ॒मृत॑स्य॒ धामे॑यक्ष॒न्तो॒ न मि॑नन्ति स्वधावः ॥ ३ ॥

सः। इत्। तमः। अवयुनम्। ततन्वत्। सूर्येण। वयुनऽवत्। चकार।
कदा। ते। मर्ताः। अमृतस्य। धाम। इयक्षन्तः। न। मिनन्ति। स्वधाऽवः ॥ ३ ॥

vस vइत् स एवेन्द्रः vअवयुनम् अप्रज्ञानम्। प्रज्ञाननाशनमित्यर्थः। vततन्वत् वृत्रेण विस्तीर्यमाणं vतमः अन्धकारं दिवि vसूर्येण दिव्यारोपितेन देवेन vवयुनवत् प्रकाशवत् vचकार कृतवान्। परोऽर्धर्चः प्रत्यक्षकृतः। हे vस्वधावः बलवन्निन्द्र vमर्ताः मनुष्याः vअमृतस्य नित्यस्य vते त्वदीयं vधाम स्वर्गाख्यं स्थानम्। तत्रस्थान् देवानित्यर्थः। vइयक्षन्तः यष्टुमिच्छन्तः vकदा कदाचित्। सर्वदेत्यर्थः। vन vमिनन्ति किमपि प्राणिजातं न हिंसन्ति ॥

यस्ता॑ चकार॒ स कु॒ह स्वि॑दिन्द्रः॒ कमा जनं॑ चरति॒ कासु॑ वि॒क्षु ।
कस्ते॑ य॒ज्ञो मन॑से॒ शं व॑राय॒ को अ॒र्क ई॑न्द्र क॒तमः स होता॑ ॥ ४ ॥

यः। ता। चकार। सः। कुह। स्वित्। इन्द्रः। कम्। आ। जनम्। चरति। कासु। विक्षु।
कः। ते। यज्ञः। मनसे। शम्। वराय। कः। अर्कः। इन्द्र। कतमः। सः। होता ॥ ४ ॥

vयः इन्द्रः vता तान्युक्तानि प्रसिद्धानि वृत्रवधादीनि कर्माणि vचकार अकरोत् vसः vइन्द्रः अद्य vकुह vस्वित् क्व स्विद्वर्तते। vकं vजनं कमपि देशम् vआ vचरति vकासु vविक्षु प्रजासु वर्तत इतीन्द्रस्य विभूतिमहत्त्वात्[2] न निश्चेतुं शक्यम्। अथ प्रत्यक्षस्तुतिः। हे vइन्द्र vकः कीदृशः vयज्ञः vते तव vमनसे चेतसे vशं सुखकरो भवति। vवराय तव वरणाय vकः कीदृशः vअर्कः मन्त्रः समर्थो भवति। vहोता[3] आह्वाता तव[4] वरणाय यः[5] समर्थो भवति vसः होता vकतमः च भवति ॥

---

१. ख-घ-श–गीर्भिर्हवनीयम्। २. घ–विभूतिं मत्वा; श–विभूतिमत्त्वात्। ३. घ-श–य होता। ४. घ-ङ्ग-भ-श–भवति वरणाय; य–अभवति वरणाय।

इदा हि ते वेविषतः पुराजाः प्रत्नासं आसुः पुरुकृत्सखायः ।
ये मध्यमासं उत नूतनास उतावमस्य पुरुहूत बोधि ॥ ५ ॥

इदा । हि । ते । वेविषतः । पुराऽजाः । प्रत्नासः । आसुः । पुरुऽकृत् । सखायः ।
ये । मध्यमासः । उत । नूतनासः । उत । अवमस्य । पुरुऽहूत । बोधि ॥ ५ ॥

vपुराजाः पूर्वस्मिन् काले जाताः vप्रत्नासः पुराणाः अङ्गिरःप्रभृतयः vइदा vहि इदानीमिव । हिशब्द उपमार्थे वर्तते । vवेविषतः कर्माणि प्राप्नुवन्तो हे vपुरुकृत् बहूनां कर्मणां कर्तरिन्द्र vते तव vसखायः स्तोतारः vआसुः बभूवुः । vये vमध्यमासः मध्यमकालजाः vउत अपि च ये vनूतनासः अद्यतना यतस्तेऽपि सर्वे ते स्तोतारो बभूवुः अतः कारणात् vउत अपि च vअवमस्य अर्वाचीनस्य ममापि स्तोत्रं हे vपुरुहूत बहुभिराहूतेन्द्र त्वं vबोधि बुध्यस्व ॥ ॥ ११ ॥

तं पृच्छन्तोऽवरासः परांणि प्रत्ना ते इन्द्र श्रुत्यानु येमुः ।
अर्चामसि वीर ब्रह्मवाहो यादेव विद्म तात्त्वा महान्तम् ॥ ६ ॥

तम् । पृच्छन्तः । अवरासः । परांणि । प्रत्ना । ते । इन्द्र । श्रुत्या । अनु । येमुः ।
अर्चामसि । वीर । ब्रह्मऽवाहः । यात् । एव । विद्म । तात् । त्वा । महान्तम् ॥ ६ ॥

हे vवीर शूर vब्रह्मवाहः ब्रह्मभिर्मन्त्रैर्वहनीय vइन्द्र vअवरासः अर्वाचीनाः मनुष्याः vतम् उक्तगुणोपेतं त्वां vपृच्छन्तः अर्चन्तः । पृच्छतिरर्चतिकर्मा । vपराणि प्रकृष्टानि vप्रत्ना प्रत्नानि पुराणानि vश्रुत्या श्रुत्यानि श्रोतव्यानि vते त्वदीयानि कर्माणि vअनु vयेमुः । अनुयमनं निबन्धनम् । स्तुतिरूपाभिर्वाग्भिर्निबबन्धुः । तथा वयमपि vमहान्तं प्रभूतं vत्वा त्वाम् vअर्चामसि अर्चामः स्तुमः । vयादेव यान्येव कर्माणि vविद्म जानीमः vतात् तैः कर्मभिः स्तुम इति संबन्धः ॥

अभि त्वा पाजो रक्षसो वि तस्थे महि जज्ञानमभि तत्सु तिष्ठ ।
तव प्रत्नेन युज्येन सख्या वज्रेण घृष्णो अप ता नुदस्व ॥ ७ ॥

अभि । त्वा । पाजः । रक्षसः । वि । तस्थे । महि । जज्ञानम् । अभि । तत् । सु । तिष्ठ ।
तव । प्रत्नेन । युज्येन । सख्या । वज्रेण । घृष्णो इति । अप । ता । नुदस्व ॥ ७ ॥

vरक्षसः रक्षसां संबन्धि vपाजः सेनालक्षणं बलं हे इन्द्र vत्वा vअभि त्वामभिमुखं vवि vतस्थे प्रतिष्ठते । तथा त्वमपि vमहि महत् vजज्ञानं प्रादुर्भवत् vतत् बलम् vअभि अभिमुखः सन् vसु सुष्ठु vतिष्ठ स्थिरो भव । स्थित्वा च हे vघृष्णो शत्रूणां धर्षकेन्द्र vतव त्वदीयेन vवज्रेण vता तद्बलम् vअप vनुदस्व अपगतं प्रेरय । छिन्धीत्यर्थः । कीदृशेन । vप्रत्नेन पुराणेन vयुज्येन नियोज्येन vसख्या निरवसहायेन ॥

स तु श्रुधीन्द्र नूतनस्य ब्रह्मण्यतो वीर कारुधायः ।
त्वं ह्यापिः प्रदिवि पितॄणां शश्वद्बभूथ सुहव एष्टौ ॥ ८ ॥

सः । तु । श्रुधि । इन्द्र । नूतनस्य । ब्रह्मण्यतः । वीर । कारुऽधायः ।
त्वम् । हि । आपिः । प्रऽदिवि । पितॄणाम् । शश्वत् । बभूथ । सुऽहवः । आऽइष्टौ ॥ ८ ॥

हे vकारुधायः कारूणां स्तोतॄणां धारक हे vवीर vइन्द्र vसः प्रसिद्धस्त्वं vनूतनस्य इदानींतनस्य vब्रह्मण्यतः ब्रह्म स्तोत्रं कर्तुमिच्छतो मम स्तोत्रं vतु क्षिप्रं vश्रुधि शृणुहि । यस्मात् कारणात् हे इन्द्र vत्वम् vएष्टौ आयजने अभिकामने वा सति vसुहवः शोभनाह्वानः सन् vप्रदिवि पूर्वस्मिन् काले vपितॄणाम् अङ्गिरसाम् vआपिः बन्धुः vशश्वत् चिरकालं vबभूथ अभूः तस्मात् कारणात् मदीयं स्तोत्रं श्रुधीति संबन्धः ॥

प्रोतये वरुणं मित्रमिन्द्रं मरुतः कृष्वावसे नो अद्य ।
प्र पूषणं विष्णुमग्निं पुरंधिं सवितारमोषधीः पर्वतांश्च ॥ ९ ॥

प्र । ऊतये । वरुणम् । मित्रम् । इन्द्रम् । मरुतः । कृष्व । अवसे । नः । अद्य ।
प्र । पूषणम् । विष्णुम् । अग्निम् । पुरम्ऽधिम् । सवितारम् । ओषधीः । पर्वतान् । च ॥ ९ ॥

अस्यामृचि विश्वे देवाः स्तूयन्ते । हे भरद्वाज vअद्य इदानीं vवरुणं राज्यभिमानिनं च vमित्रम् अहरभिमानिनं च vइन्द्रं च प्रसिद्धं vमरुतः मरुद्गणांश्च vनः अस्माकम् vऊतये तर्पणाय vअवसे रक्षणाय च vप्र vकृष्व अभिमुखीकुरुष्व । किंच vपूषणम् एतत्संज्ञकं च vविष्णुं सर्वव्यापिनं देवं च vपुरंधिं पुरुधियं[1] पुरुकर्माणम् vअग्निं च vसवितारं सर्वस्य प्रेरकं देवम् vओषधीः ओषध्यभिमानिनो देवान् vपर्वतांश्च अद्रीनित्येतान् देवान्[2] अस्माकं तर्पणाय[3] रक्षणाय च प्रकृष्व स्तुत्या अभिमुखीकुरु ॥

इम उ त्वा पुरुशाक प्रयज्यो जरितारो अभ्यर्चन्त्यर्कैः ।
श्रुधी हवमा हुवतो हुवानो न त्वावाँ अन्यो अमृत त्वदस्ति ॥ १० ॥

इमे । ऊँ इति । त्वा । पुरुऽशाक । प्रयज्यो इति प्रऽयज्यो । जरितारः । अभि । अर्चन्ति । अर्कैः ।
श्रुधि । हवम् । आ । हुवतः । हुवानः । न । त्वाऽवान् । अन्यः । अमृत । त्वत् । अस्ति ॥ १० ॥

हे vपुरुशाक बहुशक्ते हे vप्रयज्यो प्रकृष्टेन यजनीयेन्द्र vत्वा त्वाम् vइमे vजरितारः स्तोतारः vअर्कैः अर्चनीयैः स्तोत्रैः vअभ्यर्चन्ति अभिष्टुवन्ति । तथा हे vअमृत अमरणशीलेन्द्र vहुवानः स्तूयमानस्त्वम् vआ vहुवतः अभिष्टुवतो मम vहवं स्तोत्रं vश्रुधि शृणु । किंच vत्वावान् त्वत्सदृशो देवः vत्वत् vअन्यः vन vअस्ति ॥

---

१. ख-ञ-त२-न-भ-र-पुरंधियम्; घ-श-'पुरुधियं' नास्ति । २. ख-ञ-ञ-त-न-न-भ-विश्वान् देवान् । ३. ख-ञ-भ-य-ऊतये तर्पणाय ।

नू म आ वाचमुप याहि विद्वान्विश्वेभिः सूनो सहसो यजत्रैः ।
ये अग्निजिह्वा ऋतसाप आसुर्ये मनुं चक्रुरुपरं दसाय ॥ ११ ॥

नु । मे । आ । वाचम् । उप । याहि । विद्वान् । विश्वेभिः । सूनो इति । सहसः । यजत्रैः ।
ये । अग्निऽजिह्वाः । ऋतऽसापः । आसुः । ये । मनुम् । चक्रुः । उपरम् । दसाय ॥ ११ ॥

इयं च वैश्वदेवीत्युक्तम् । हे [v]सहसः [v]सूनो बलस्य पुत्रेन्द्र [v]विद्वान् सर्वज्ञस्त्वं [v]यजत्रैः यजनीयैः [v]विश्वेभिः सर्वैर्देवैः सह [v]नु क्षिप्रं [v]मे मदीया वाचः स्तुतिरूपाणि वचांसि [v]उप अभि [v]आ [v]याहि आगच्छ । एवंभूतमिन्द्रं[1] प्रार्थयत ऐन्द्रत्वात् सूक्तस्य । [v]ये देवाः [v]अग्निजिह्वाः । अग्निर्जिह्वा-स्थानीयो येषां ते । [v]ऋतसापः[2] ऋतं यज्ञं स्पृशन्तः [v]आसुः भवन्ति [v]ये च देवाः [v]दसाय शत्रूणामुपक्षपणाय [v]मनुं राजर्षिम् [v]उपरं दस्यूनामुपरिभवं [v]चक्रुः कृतवन्तः तैः सहागच्छेति पूर्वेण संबन्धः ॥

स नो बोधि पुरएता सुगेषूत दुर्गेषु पथिकृद्विदानः ।
ये अश्वमास उरवो वहिष्ठास्तेभिर्न इन्द्राभि वक्षि वाजम् ॥ १२ ॥

सः । नः । बोधि । पुरःऽएता । सुऽगेषु । उत । दुःऽगेषु । पथिऽकृत् । विदानः ।
ये । अश्वमासः । उरवः । वहिष्ठाः । तेभिः । नः । इन्द्र । अभि । वक्षि । वाजम् ॥ १२ ॥

हे [v]इन्द्र [v]पथिकृत् वर्त्मनां कर्ता [v]विदानः सर्वं विद्वान् [v]सः त्वं [v]सुगेषु सुखेन गन्तव्येषु [v]उत अपि च [v]दुर्गेषु दुःखेन गन्तव्येषु च मार्गेषु [v]नः अस्माकं [v]पुरएता पुरो गन्ता [v]बोधि भव । बोधीति भवतेर्लोण्मध्यमपुरुषैकवचनस्य छान्दसं रूपम् । [v]अश्वमासः श्वमरहिताः [v]उरवः महान्तः [v]वहिष्ठाः वोढृतमाः तव [v]ये अश्वाः सन्ति हे इन्द्र [v]तेभिः तैरश्वैः [v]नः अस्मभ्यं [v]वाजम् अन्नम् [v]अभि [v]वक्षि अभिवह ॥ ॥ १२ ॥

'य एक इत्' इत्येकादशर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तं—'य एक एकादश[3]' इति । आभिप्लविके प्रथमेऽहनि दशरात्रस्य प्रथमेऽहनि च माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रेऽहीनसूक्तस्य स्थाने त्रीणि संपातसूक्तानि । तेष्विदं द्वितीयं सूक्तम् । सूत्रितं च—'य एक इद्यस्तिग्मशृङ्गः' (आश्व. श्रौ. ७. ५) इति । उपहव्यनाम्न्येकाहेऽपीदं निष्केवल्यनिविद्धानम् । सूत्रितं च—'य एक इदिति मध्यंदिनः' (आश्व. श्रौ. ९. ७) इति ॥

य एक इद्धव्यश्चर्षणीनामिन्द्रं तं गीर्भिरभ्यर्च आभिः ।
यः पत्यते वृषभो वृष्ण्यावान्त्सत्यः सत्वा पुरुमायः सहस्वान् ॥ १ ॥

यः । एकः । इत् । हव्यः । चर्षणीनाम् । इन्द्रम् । तम् । गीःऽभिः । अभि । अर्चे । आभिः ।
यः । पत्यते । वृषभः । वृष्ण्यऽवान् । सत्यः । सत्वा । पुरुऽमायः । सहस्वान् ॥ १ ॥

---

१. ख-ञ-त-न-भ-र—एवंभूतमितीन्द्रम् । २. ख-ज्ञ-ञ-त-भ-र—ते ऋतसापः । ३. ख-ज्ञ-ञ-त-न-भ-य-र—इदेकादश ।

[v]यः इन्द्रः [v]चर्षणीनां प्रजानामापःसु [v]एक [v]इत् एक एव [v]हव्यः ह्वातव्यः [v]आभिः [v]गीर्भिः स्तुतिरूपाभिर्वाग्भिः [v]तम् [v]इन्द्रम् [v]अभ्यर्चे अभिष्टौमि । [v]यः इन्द्रः [v]पत्यते स्तोतृनभिगच्छति[1] । यद्वा । पत्यते लोकानामीष्टे । कीदृशः । [v]वृषभः कामानां वर्षिता [v]वृष्ण्यावान् बलवान् [v]सत्यः अविसंवादी [v]सत्वा शत्रूणां सादयिता कामानां दाता वा । सदेर्वा सनोतेर्वेदं रूपम् । [v]पुरुमायः बहुप्रज्ञः [v]महस्वान् अभिभवनवान् तमिन्द्रमभिष्टौमीति संबन्धः ॥

तमु नः पूर्वे पितरो नवग्वाः सप्त विप्रासो अभि वाजयन्तः ।
नक्षद्दाभं तदुरिं पर्वतेष्ठामद्रोघवाचं मतिभिः शविष्ठम् ॥ २ ॥

तम् । ऊँ इति । नः । पूर्वे । पितरः । नवऽग्वाः । सप्त । विप्रासः । अभि । वाजयन्तः । नक्षत्ऽदाभम् । तदुरिम् । पर्वतेऽस्थाम् । अद्रोघऽवाचम् । मतिऽभिः । शविष्ठम् ॥ २ ॥

[v]पूर्वे प्रज्ञाः [v]नवग्वाः नवभिर्मासैः सत्रमनुष्ठितवन्तः [v]सप्त सप्तसंख्याकाः [v]विप्रासः विप्रा मेधाविनः [v]वाजयन्तः वाजमन्नं हविर्लक्षणमिन्द्रस्य कुर्वन्तः । इन्द्रं वा वाजिनं बलिनं कुर्वन्तः । तत्करोतीति णिच् । एवंभूताः [v]नः अस्माकं [v]पितरः अङ्गिरसः [v]तमु तमेवेन्द्रं [v]मतिभिः स्तुतिभिः [v]अभि । तुदुदुरिति शेषः । कीदृशम् । [v]नक्षद्दाभम् । नक्षतिर्गतिकर्मा । अभिगच्छतां शत्रूणां दम्भितारं[2] हिंसितारं [v]ततुरिं तरितारं [v]पर्वतेष्ठां पर्वतेष्ववस्थितम् [v]अद्रोघवाचम् । अद्रोग्धव्या अनतिक्रमणीया वागाज्ञारूपा[3] यस्य तम् । [v]शविष्ठं बलवत्तमम् ॥

तमीमह इन्द्रमस्य रायः पुरुवीरस्य नृवतः पुरुक्षोः ।
यो अस्कृधोयुरजरः स्ववान्तमा भर हरिवो मादयध्यै ॥ ३ ॥

तम् । ईमहे । इन्द्रम् । अस्य । रायः । पुरुऽवीरस्य । नृऽवतः । पुरुऽक्षोः ।
यः । अस्कृधोयुः । अजरः । स्वःऽवान् । तम् । आ । भर । हरिऽवः । मादयध्यै ॥ ३ ॥

[v]पुरुवीरस्य बहुपुत्रपौत्रयुक्तस्य [v]नृवतः परिचारकजनसहितस्य [v]पुरुक्षोः बह्वन्नस्य बहुयशसो वा [v]अस्य [v]रायः इदं धनम् । द्वितीयार्थे षष्ठी । [v]तम् [v]इन्द्रम् [v]ईमहे याचामहे । [v]यः रयिः [v]अस्कृधोयुः अविच्छिन्नः [v]अजरः जराहानिरहितः[4] [v]स्ववान् सुखयुक्तो हे [v]हरिवः हरिवन् स्वकीयाश्वोपेतेन्द्र त्वं [v]तं रयिं [v]मादयध्यै अस्मान् मादयितुम् [v]आ [v]भर आहर ॥

तन्नो वि वोचो यदि ते पुरा चिज्जरितार आनशुः सुम्नमिन्द्र ।
कस्ते भागः किं वयो दुध्र खिद्वः पुरुहूत पुरुवसोऽसुरघ्नः ॥ ४ ॥

तत् । नः । वि । वोचः । यदि । ते । पुरा । चित् । जरितारः । आनशुः । सुम्नम् । इन्द्र ।
कः । ते । भागः । किम् । वयः । दुध्र । खिद्वः । पुरुऽहूत । पुरुवसो इति पुरुऽवसो । असुरऽघ्नः ॥ ४ ॥

---

१. ख-ङ्ग-भ-य-शत्रूनभि° । २. त १-दभितारम् । ३. घ-ङ्ग-भ-श-वाग्यज्ञरूपा । ४. ख-घ-भ-श-जरारहितः; ङ्ग-त-जराहानिसहितः ।

हे ᵛइन्द्र ᵛयदि ᵛते तव ᵛपुरा ᵛचित् पूर्वस्मिन् काले ᵛजरितारः स्तोतारः ᵛसुम्नं सुखम् ᵛआनशुः ᵛतत् तत्सुखं ᵛनः अस्माकं ᵛवि ᵛवोचः विब्रूहि । ᵛदुध्र दुर्धर हे ᵛखिद्रः शत्रूणां खेदयितर्हे ᵛपुरुहूत[1] हे ᵛपुरुवसो[2] इन्द्र ᵛअसुरघ्नः असुराणां हन्तुः ᵛते तव यज्ञेषु ᵛकः ᵛभागः कुत्सः । ᵛवयः हविर्लक्षणमन्नं ᵛकिं कृतम् । यदि केचित् चिरंतनाः पूर्वकालेऽपि त्वत्तः सकाशात् सुखं लेभिरे तर्ह्यहमपि तत् सुखं लप्स्ये इति विचार्य सुखप्राप्तिविलम्बो ममासोढव्यो भवेदित्यर्थः ॥

तं पृच्छन्ती वज्रहस्तं रथेष्ठामिन्द्रं वेपी वकरी यस्य नू गीः ।
तुविग्राभं तुविकूर्मिं रभोदां गातुमिषे नक्षते तुम्रमच्छ ॥ ५ ॥

तम् । पृच्छन्ती । वज्रेऽहस्तम् । रथेऽस्थाम् । इन्द्रम् । वेपी । वकरी । यस्य । नु । गीः ।
तुविऽग्राभम् । तुविऽकूर्मिम् । रभःऽदाम् । गातुम् । इषे । नक्षते । तुम्रम् । अच्छ ॥ ५ ॥

पूर्वयोपालब्धः[3] इन्द्र ऋषये कामान् प्रायच्छत् ततः स कामपूर्ण ऋषिराह । ᵛवज्रहस्तं वज्रपाणिं ᵛरथेष्ठां रथे स्थितं ᵛतम् ᵛइन्द्रं ᵛपृच्छन्ती अर्चयन्ती । पृच्छतिरर्चतिकर्मा । ᵛवेपी । वेपो यागादिलक्षणं कर्म । तद्वती ᵛवकरी गुणानां वक्त्री ᵛगीः ईदृशी स्तुतिः ᵛयस्य यजमानस्य भवति । कीदृशमिन्द्रं पृच्छन्ती । ᵛतुविग्राभं तुवीनां बहूनां ग्रहीतारं ᵛतुविकूर्मिं बहुकर्माणं ᵛरभोदां रभसो बलस्य दातारम् । ᵛनु इति पूरणः । स यजमानः ᵛगातुं सुखम् ᵛइषे गच्छति । किंच ᵛतुम्रं म्लापयितारं[4] शत्रुम् ᵛअच्छ अभिमुखं ᵛनक्षते गच्छति ॥ ॥ १३ ॥

अया ह त्यं मायया वावृधानं मनोजुवा स्वतवः पर्वतेन ।
अच्युता चिद्वीळिता स्वोजो रुजो वि दृळ्हा धृषता विरप्शिन् ॥ ६ ॥

अया । ह । त्यम् । मायया । ववृधानम् । मनःऽजुवा । स्वऽतवः । पर्वतेन ।
अच्युता । चित् । वीळिता । सुऽओजः । रुजः । वि । दृळ्हा । धृषता । विऽरप्शिन् ॥ ६ ॥

हे ᵛस्वतवः स्वभूतबलेन्द्र त्वं ᵛमनोजुवा मनोवद्गच्छता अनेन[5] ᵛपर्वतेन बहुपर्वणा स्वकीयेनायुधेन वज्रेण । 'वज्रेण शतपर्वणा' (ऋ. सं. १. ८०. ६) इति दर्शनात् । ᵛअया[6] अनया[6] ᵛमायया ᵛववृधानं वर्धमानं ᵛत्यं तं प्रसिद्धं वृत्रं ᵛवि ᵛरुजः विशेषेणाभङ्क्षीः । तथा हे ᵛस्वोजः शोभनतेजः हे ᵛविरप्शिन् हे महन्निन्द्र त्वम् ᵛअच्युता अच्युतानि ᵛचित्[7] विनाशरहितान्यपि ᵛवीळिता वीळितानि अशिथिलीकृतानि ᵛदृळ्हा दृढानि पुराणि ᵛधृषता धर्षकेण वज्रेण व्यरुजः भग्नवानसि ॥

---

१. ख-घ-भ-पुरुहूत बहुभिराहूत । २. घ-पुरुवसो बहुधन । ३. ख-ज्ञ-भ-य-पूर्वयोपालब्धव्यः; त-र-पूर्वयोपालब्ध वा । ४. ख-घ-ज्ञ-भ-ग्लापयितारम्; ज्ञ-त२-न-य-र-ग्रापयितारम्; त१-ग्रवायितारम् । ५. ख-ज्ञ-ज्ञ-त-न-य-र-अयानेन । ६. ज्ञ-ज्ञ-त-न-य-र-'अया अनया' नास्ति । ७. ख-भ-चिद्ध ।

तं वो धिया नव्यस्या शविष्ठं प्रत्नं प्रत्नवत्परितंसयध्यै ।
स नो वक्षदनिमानः सुवह्वेन्द्रो विश्वान्यति दुर्गहाणि ॥ ७ ॥

तम् । वः । धिया । नव्यस्या । शविष्ठम् । प्रत्नम् । प्रत्नऽवत् । परिऽतंसयध्यै ।
सः । नः । वक्षत् । अनिऽमानः । सुऽवह्वा । इन्द्रः । विश्वानि । अति । दुःऽगहानि ॥७॥

vनव्यस्या नवतरया vधिया स्तुत्या vशविष्ठं बलवत्तमं vप्रत्नं पुराणं हे इन्द्र vतं vवः त्वां vप्रत्नवत् चिरंतना ऋषयः इव vपरितंसयध्यै परितो विस्तारयितुम् । अहं प्रवृत्तोऽस्मीति शेषः । vअनिमानः अपरिमाणः vसुवह्वा शोभनवहनः vसः vइन्द्रः vविश्वानि समस्तानि vदुर्गहाणि दुर्गाणि vनः अस्मभ्यम् vअति vवक्षत् अतिवहतु ॥

आ जनाय द्रुह्वणे पार्थिवानि दिव्यानि दीपयोऽन्तरिक्षा ।
तपा वृषन्विश्वतः शोचिषा तान्ब्रह्मद्विषे शोचय क्षामपश्च ॥ ८ ॥

आ । जनाय । द्रुह्वणे । पार्थिवानि । दिव्यानि । दीपयः । अन्तरिक्षा ।
तप । वृषन् । विश्वतः । शोचिषा । तान् । ब्रह्मऽद्विषे । शोचय । क्षाम् । अपः । च ॥ ८ ॥

हे इन्द्र त्वं vद्रुह्वणे साधुजनानां द्रोग्धुः vजनाय जनस्य राक्षसादेः । षष्ठ्यर्थे चतुर्थी ॥ vपार्थिवानि पृथिव्यां भवानि vदिव्यानि दिवि भवानि vअन्तरिक्षा अन्तरिक्षे भवानि च स्थानानि vआ vदीपयः आ समन्तात् तापय[1] । हे vवृषन् कामानां वर्षितरिन्द्र त्वं vविश्वतः सर्वतो विद्यमानान् vतान् राक्षसादीन् vशोचिषा त्वदीयया दीप्त्या vतप दह । किंच vब्रह्मद्विषे ब्राह्मणद्वेष्टे राक्षसादये । ब्रह्मद्विषं दग्धुमित्यर्थः[2] । vक्षां पृथिवीम् vअपश्च अन्तरिक्षं च vशोचय दीपय । आप इत्यन्तरिक्षनामैतत् ॥

भुवो जनस्य दिव्यस्य राजा पार्थिवस्य जगतस्त्वेषसंदृक् ।
धिष्व वज्रं दक्षिण इन्द्र हस्ते विश्वा अजुर्य दयसे वि मायाः ॥ ९ ॥

भुवः । जनस्य । दिव्यस्य । राजा । पार्थिवस्य । जगतः । त्वेषऽसंदृक् ।
धिष्व । वज्रम् । दक्षिणे । इन्द्र । हस्ते । विश्वाः । अजुर्य । दयसे । वि । मायाः ॥ ९ ॥

हे vत्वेषसंदृक् दीप्तदर्शनेन्द्र vदिव्यस्य दिवि भवस्य vजनस्य vराजा ईश्वरः vभुवः भवसि । vजगतः जङ्गमस्य vपार्थिवस्य च राजा भवसि । vदक्षिणे vहस्ते vवज्रं vधिष्व[3] निधेहि । तेन 'च'[4] निहितेन वज्रेण vविश्वाः सर्वा आसुरीः vमायाः[5] vवि vदयसे विबाधसे । 'दय[6] दानहिंसागतिरक्षणेषु' इति धातुः[6] । हे vइन्द्र vअजुर्य जरयितुमशक्येन्द्र त्वमिति[7] ॥

---

१. ख-घ-ङ्ग-भ-तापयः; श-दीपय । २. ख-घ-भ-द्रोग्धुमि°; श-द्राग्धुमि° । ३. घ-धिष्व धारय । ४. ख-भ-'तेन च' नास्ति । ५. श-पुरीः । ६. ख-भ-'दय...धातुः' नास्ति । ७. श-त्वमिति शेषः ।

आ संयतमिन्द्र णः स्वस्ति शत्रुतूर्याय बृहतीममृध्राम् ।
यया दासान्यार्याणि वृत्रा करो वज्रिन्त्सुतुका नाहुषाणि ॥ १० ॥

आ । सम्ऽयतम् । इन्द्र । नः । स्वस्तिम् । शत्रुऽतूर्याय । बृहतीम् । अमृध्राम् ।
यया । दासानि । आर्याणि । वृत्रा । करः । वज्रिन् । सुऽतुका । नाहुषाणि ॥ १० ॥

हे [v]इन्द्र [v]शत्रुतूर्याय शत्रूणां तारणाय [v]बृहतीं महतीम् [v]अमृध्राम् अहिंसितां [v]संयतं संयतीं संगच्छमानां [v]स्वस्तिं क्षेमलक्षणां संपदं हे इन्द्र[1] [v]नः अस्मभ्यम् [v]आ भर। [v]वज्रिन् वज्रवन्निन्द्र [v]यया स्वस्त्या [v]दासानि कर्महीनानि मनुष्यजातानि [v]आर्याणि कर्मयुक्तानि [v]करः अकरोः। [v]नाहुषाणि मनुष्यसंबन्धीनि। नहुषा इति मनुष्यनामैतत्। [v]वृत्रा वृत्राणि शत्रून् [v]सुतुका सुतुकानि शोभनहिंसोपेतान्यकरोः ॥

स नो नियुद्भिः पुरुहूत वेधो विश्ववाराभिरा गहि प्रयज्यो ।
न या अदेवो वरते न देव आभिर्याहि तूयमा मद्यद्रिक् ॥ ११ ॥

सः । नः । नियुत्ऽभिः । पुरुऽहूत । वेधः । विश्वऽवाराभिः । आ । गहि । प्रयज्यो इति प्रऽयज्यो ।
न । याः । अदेवः । वरते । न । देवः । आ । आभिः । याहि । तूयम् । आ । मद्यद्रिक् ॥ ११ ॥

हे [v]पुरुहूत हे [v]वेधः विधातर्हे [v]प्रयज्यो प्रकृष्टेन[2] यजनीयेन्द्र [v]सः त्वं [v]विश्ववाराभिः विश्वैर्वरणीयाभिः संभजनीयाभिः [v]नियुद्भिः अश्वैः [v]नः अस्मान् [v]आ [v]गहि आगच्छ । [v]अदेवः असुरः [v]याः नियुतो यानश्वान् [v]न [v]वरते न वारयति [v]देवः च [v]न वरते [v]आभिः नियुद्भिः [v]तूयम् [v]आ क्षिप्रमेव [v]मद्यद्रिक् मदभिमुखः सन् [v]आ [v]याहि आगच्छ। अद्यागमस्य द्विर्वचनं छान्दसम् ॥ ॥ १४ ॥

'सुत इत्' इति दशर्चमष्टमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । 'सुत इद्दश' इत्यनुक्रान्तम् । विषुवति निष्केवल्ये इदं सूक्तम् । सूत्रितं च—सुत इत्त्वमेष प्र पूर्वीः' (आश्व. श्रौ. ८. ६) इति । महाव्रतेऽपि निष्केवल्ये इदमादीनि त्रीणि सूक्तानि । तथैव पञ्चमारण्यके सूत्रितं—'सुत इत्त्वं निमिश्ल इन्द्र सोम इति त्रीणि' (ऐ. आ. ५. २. २) इति ॥

सुत इत्त्वं निमिश्ल इन्द्र सोमे स्तोमे ब्रह्मणि शस्यमान उक्थे ।
यद्वा युक्ताभ्यां मघवन्हरिभ्यां बिभ्रद्वज्रं बाह्वोरिन्द्र यासि ॥ १ ॥

सुते । इत् । त्वम् । निऽमिश्लः । इन्द्र । सोमे । स्तोमे । ब्रह्मणि । शस्यमाने । उक्थे ।
यत् । वा । युक्ताभ्याम् । मघऽवन् । हरिऽभ्याम् । बिभ्रत् । वज्रम् । बाह्वोः । इन्द्र । यासि ॥ १ ॥

[v]सोमे [v]सुते [v]इत् अभिषुत एव सति [v]ब्रह्मणि बृहति महति[3] [v]स्तोमे स्तोत्रे उच्चार्यमाणे सति [v]उक्थे शस्त्रे [v]शस्यमाने सति हे [v]इन्द्र त्वं [v]निमिश्लः निमिश्लः सन् हरी संयोजयन् हे [v]मघवन्

---

१. ख-ञ्च-न-भ-य—इन्द्र त्वम् । २. घ-श—प्रकर्षेण । ३. ख-ञ्च-ञ्च-त-न-भ-र—'महति' नास्ति; श—मरुत ।

धनवन् ᵛइन्द्र त्वं ᵛबाह्वोः हस्तयोः ᵛवज्रं स्वकीयमायुधं ᵛबिभ्रत् धारयन् ᵛयुक्ताभ्यां रथे नियुक्ताभ्यां ᵛहरिभ्याम् अश्वाभ्यां ᵛयासि ᵛयद्वा आगच्छसीति यच्च तत्सोमेऽभिषुते इति संबन्धः ॥

यद्वा दिवि पार्ये सुष्विमिन्द्र वृत्रहत्येऽवसि शूरसातौ ।
यद्वा दक्षस्य बिभ्युषो अबिभ्यदरन्धयः शर्धत इन्द्र दस्यून् ॥ २ ॥

यत् । वा । दिवि । पार्ये । सुष्विम् । इन्द्र । वृत्रऽहत्ये । अवसि । शूरऽसातौ ।
यत् । वा । दक्षस्य । बिभ्युषः । अबिभ्यत् । अरन्धयः । शर्धतः । इन्द्र । दस्यून् ॥ २ ॥

हे ᵛइन्द्र त्वं ᵛदिवि द्युलोके ᵛशूरसातौ शूरैः भटैः संभजनीये ᵛवृत्रहत्ये युद्धे च ᵛपार्ये प्राप्तव्ये सति ᵛसुष्विम् अभिषोतारं यजमानम् ᵛअवसि ᵛयद्वा रक्षसीति यच्च । वेति समुच्चये । ᵛदक्षस्य यज्ञादिषु समर्थस्य ᵛबिभ्युषः शत्रुभ्यो बिभ्यतो जनस्य ᵛशर्धतः संग्रामे उत्सहमानान् ᵛदस्यून् उपक्षपयितॄन् शत्रून् हे ᵛइन्द्र त्वम् ᵛअबिभ्यत् भीतिरहितः सन् ᵛअरन्धयः[1] ᵛयद्वा वशीकरोषीति यच्च तत्सर्वं सोमेऽभिषुते इति पूर्वेण संबन्धः ॥ तथा चोक्तं—'यद्वाह्वोर्धारयन्वज्रं हरिभ्यां यासि वृत्रहन् । यच्च रक्षसि संग्रामे नॄन् सोममभिषुण्वतः ॥ यच्च कर्मसु दक्षस्य यजमानस्य येऽरयः । वशीकरोषि तांस्तस्मै बिभ्यते भीतिवर्जितः ॥ तत्सोमेऽभिषुते स्तोत्रशस्त्रयोश्च प्रवृत्तयोः । इति द्वयोऽयमेकार्थः सुत इत्वमिति द्वयम्' इति ॥

पाता सुतमिन्द्रो अस्तु सोमं प्रणेनीरुग्रो जरितारमूती ।
कर्ता वीराय सुष्वय उ लोकं दाता वसु स्तुवते कीरये चित् ॥ ३ ॥

पाता । सुतम् । इन्द्रः । अस्तु । सोमम् । प्रऽनेनीः । उग्रः । जरितारम् । ऊती ।
कर्ता । वीराय । सुस्वये । ऊँ इति । लोकम् । दाता । वसु । स्तुवते । कीरये । चित् ॥३॥

ᵛइन्द्रः ᵛसुतम् अभिषुतं ᵛसोमं ᵛपाता ᵛअस्तु पानशीलो भवतु ॥ तृनन्तत्वात् 'न लोकाव्ययनिष्ठा०' इति षष्ठीप्रतिषेधः ॥ कीदृशः । ᵛऊती ऊत्या मार्गेण ᵛजरितारं स्तोतारं ᵛप्रणेनीः प्रकर्षेण नेता ᵛउग्रः उद्गूर्णः ᵛवीराय यज्ञादिकर्मसु दक्षाय ᵛसुष्वये सोमाभिषवं कुर्वते यजमानाय ᵛलोकं स्थानं ᵛकर्ता । दातेत्यर्थः । ᵛउ इति पादपूरणः । ᵛस्तुवते स्तोत्रं कुर्वते ᵛकीरये ᵛचित् । खिदिति चार्थे । स्तोत्रे च । कीरिरिति स्तोतृनामैतत् । ᵛवसु धनं ᵛदाता अस्तु ॥

गन्तेयान्ति सवना हरिभ्यां बभ्रिर्वज्रं पपिः सोमं ददिर्गाः ।
कर्ता वीरं नर्यं सर्ववीरं श्रोता हवं गृणतः स्तोमवाहाः ॥ ४ ॥

गन्ता । इयर्न्ति । सवना । हरिऽभ्याम् । बभ्रिः । वज्रम् । पपिः । सोमम् । ददिः । गाः ।
कर्ता । वीरम् । नर्यम् । सर्वऽवीरम् । श्रोता । हवम् । गृणतः । स्तोमऽवाहाः ॥ ४ ॥

इन्द्रः ᵛहरिभ्यां स्वकीयाभ्याम् ᵛइयन्ति हृदयस्थानि त्रीणि ᵛसवना सवनानि ᵛगन्ता गमनशीलो भवतु । कीदृशः । ᵛवज्रं स्वकीयमायुधं ᵛबभ्रिः भर्ता धारकः ᵛसोमम् अभिषुतं ᵛपपिः पाता ᵛगाः

---

१. ख-ज्ञ-ञ-त-न-भ-र—अरन्धय इति ।

vददिः दाता vनर्यं मनुष्यहितं vसर्ववीरं बहुपुत्रोपेतं vवीरं पुत्रं vकर्ता यजमानाय दाता vगृणतः स्तुवतः स्तोतुः संबन्धि vहवं स्तोत्रं vश्रोता श्रावकः vस्तोमवाहाः स्तोमैः स्तोत्रैर्वहनीयः ॥

अस्मै वयं यद्ववान तद्विविष्म इन्द्राय यो नः प्रदिवो अपस्कः ।
सुते सोमे स्तुमसि शंसदुक्थेन्द्राय ब्रह्म वर्धनं यथासत् ॥ ५ ॥

अस्मै । वयम् । यत् । ववान । तत् । विविष्मः । इन्द्राय । यः । नः । प्रऽदिवः । अपः । करिति कः । सुते । सोमे । स्तुमसि । शंसत् । उक्था । इन्द्राय । ब्रह्म । वर्धनम् । यथा । असत् ॥ ५ ॥

vप्रदिवः पुराणः vयः इन्द्रः vनः अस्मदर्थम् vअपः पोषणादिकं कर्म vकः करोति अयमिन्द्रः vयत् स्तोत्रादिकं vववान कामयते vअस्मै vइन्द्राय vवयं vतद्विविष्मः व्याप्नुमः । कुर्म इत्यर्थः । vसोमे vसुते अभिषुते सति vस्तुमसि स्तुमः । इन्द्राय स्तोत्राणि कुर्मः । vउक्था उक्थानि शस्त्राणि vशंसत् शंसन्तः । प्रथमाबहुवचनस्य लुक् । vब्रह्म हविर्लक्षणमन्नम् vइन्द्राय इन्द्रार्थं vवर्धनं vयथा वृद्धिकरम् vअसत् स्यात् तथा कुर्म इत्यर्थः ॥ ॥ १५ ॥

ब्रह्माणि हि चकृषे वर्धनानि तावत्त इन्द्र मतिभिर्विविष्मः ।
सुते सोमे सुतपाः शंतमानि रान्द्रया क्रियास्म वक्षणानि यज्ञैः ॥ ६ ॥

ब्रह्माणि । हि । चकृषे । वर्धनानि । तावत् । ते । इन्द्र । मतिऽभिः । विविष्मः । सुते । सोमे । सुतऽपाः । शम्ऽतमानि । रान्द्रया । क्रियास्म । वक्षणानि । यज्ञैः ॥ ६ ॥

हे vइन्द्र त्वं vहि यस्मात् कारणात् vब्रह्माणि स्तोत्राणि vवर्धनानि स्वयमेव वृद्धिकराणि vचकृषे कृतवानसि तस्मात् कारणात् vतावत् तावन्ति तादृशानि स्तोत्राणि vते तुभ्यं vमतिभिः बुद्धिभिर्वयं vविविष्मः व्याप्नुमः । वर्धनानि स्तोत्राणि मम यथा भवेयुस्त्वं तादृशानि कल्पितवानसीत्यर्थः । अपि च[1] हे vसुतपाः अभिषुतस्य सोमस्य पातस्त्वामुद्दिश्य vसुते vसोमे अभिषुते सति vशंतमानि सुखकृत्तमानि vरान्द्रया रान्द्र्याणि रमणीयानि vयज्ञैः हविर्भिर्युक्तानि vवक्षणानि वाहकानि स्तोत्राणि vक्रियास्म करवाम ॥

स नो बोधि पुरोळाशं ररिणः पिबा तु सोमं गोऋजीकमिन्द्र ।
एदं बर्हिर्यजमानस्य सीदोरुं कृधि त्वायत उ लोकम् ॥ ७ ॥

सः । नः । बोधि । पुरोळाशम् । ररिणः । पिब । तु । सोमम् । गोऽऋजीकम् । इन्द्र ।
आ । इदम् । बर्हिः । यजमानस्य । सीद । उरुम् । कृधि । त्वाऽयतः । ऊँ इति । लोकम् ॥७॥

हे vइन्द्र vररिणः रममाणः vसः त्वं vनः अस्मदीयं vपुरोडाशम् एतल्लक्षणं हविः vबोधि बुध्यस्व । किंच vगोऋजीकं गोविकारदध्यादिभिः[2] संस्कृतमभिषुतं vसोमं vतु क्षिप्रं vपिब पिबेः । तदर्थं च vयजमानस्य संबन्धि vइदं vबर्हिः vआ vसीद अभिविश । तदनन्तरं vत्वायतः त्वामिच्छतो यजमानस्य vलोकं स्थानम् vउरुं[3] विस्तीर्णं[3] vकृधि कुरु । vउ इति पूरणः ॥

---

१. घ – च सुते सोमे । २. घ – गोविकारैर्दध्यादिभिः; श – गोविकारं दध्यादिभिः ।
३. ख-श-ञ-त-न-भ-र–‘ उरुं विस्तीर्णं ’ नास्ति ।

स मन्दस्वा ह्यनु जोषमुग्र प्र त्वा यज्ञास इमे अश्नुवन्तु ।
प्रेमे हवासः पुरुहूतमस्मे आ त्वेयं धीरवस इन्द्र यम्याः ॥ ८ ॥

सः । मन्दस्व । हि । अनु । जोषम् । उग्र । प्र । त्वा । यज्ञासः । इमे । अश्नुवन्तु ।
प्र । इमे । हवासः । पुरुऽहूतम् । अस्मे इति । आ । त्वा । इयम् । धीः । अवसे । इन्द्र । यम्याः ॥ ८ ॥

हे ᵛउग्र उत्कर्षवन्नेन्द्र ᵛसः स्वम् ᵛअनु ᵛजोषं कामानुगुणं यथा भवति तथा ᵛमन्दस्व मोदस्व ॥ हिशब्दः पादपूरणः । हियोगे मन्दस्वेत्याख्यातस्य व्यत्ययात् सर्वानुदात्तत्वम् ॥ ᵛइमे ᵛयज्ञासः यज्ञाः सोमाः ᵛत्वा त्वां ᵛप्र ᵛअश्नुवन्तु प्राप्नुवन्तु । हे[1] पुरुहूत बहुभिराहूत ᵛइन्द्र[1] त्वाम् ᵛअस्मे अस्मदीयानि ᵛइमे ᵛहवासः हवाः स्तोत्राणि प्राप्नुवन्तु[2] । ᵛइयं ᵛधीः स्तुतिः ᵛत्वा त्वाम् ᵛअवसे अस्माकं रक्षणाय ᵛआ ᵛयम्याः आयच्छतु[3] नियच्छतु[3] ॥

तं वः सखायः सं यथा सुतेषु सोमेभिरीं पृणता भोजमिन्द्रम् ।
कुवित्तस्मा असति नो भराय न सुष्विमिन्द्रोऽवसे मृधाति ॥ ९ ॥

तम् । वः । सखायः । सम् । यथा । सुतेषु । सोमेभिः । ईम् । पृणत । भोजम् । इन्द्रम् ।
कुवित् । तस्मै । असति । नः । भराय । न । सुष्विम् । इन्द्रः । अवसे । मृधाति ॥ ९ ॥

हे ᵛसखायः स्तोतारः ᵛवः यूयं सोमेषु ᵛसुतेषु अभिषुतेषु सत्सु ᵛभोजं दातारं ᵛतम् ᵛईम् एतम्[4] ᵛइन्द्रं ᵛसोमेभिः सोमैर्यथाकामं ᵛसं ᵛपृणत संपूरयत । ᵛतस्मै इन्द्राय ᵛकुवित् बहूपकरणम् । कुविदिति बहुनामैतत् । ᵛअसति अस्तु । किमर्थम् । ᵛनः अस्माकं ᵛभराय भरणाय पोषणाय । ᵛइन्द्रः ᵛसुष्विम् अभिषवणशीलं यजमानम् ᵛअवसे तर्पणाय ᵛन ᵛमृधाति न बाधते ॥

एवेदिन्द्रः सुते अस्तावि सोमे भरद्वाजेषु क्षयदिन्मघोनः ।
असद्यथा जरित्र उत सूरिरिन्द्रो रायो विश्ववारस्य दाता ॥ १० ॥

एव । इत् । इन्द्रः । सुते । अस्तावि । सोमे । भरत्ऽवाजेषु । क्षयत् । इत् । मघोनः ।
असत् । यथा । जरित्रे । उत । सूरिः । इन्द्रः । रायः । विश्वऽवारस्य । दाता ॥ १० ॥

ᵛमघोनः धनवतो हविष्मतो यजमानस्य ᵛक्षयत् ईश्वरः ᵛइन्द्रः ᵛसोमे ᵛसुते अभिषुते सति ᵛभरद्वाजेषु भरद्वाजे मयि ᵛएव एवम् ᵛअस्तावि स्तुतोऽभूत् । ᵛइन्द्रः ᵛजरित्रे स्तोत्रे ᵛसूरिः सन्मार्गे प्रेरकः ᵛयथा ᵛअसत् भवेत् । ᵛउत अपि च ᵛविश्ववारस्य विश्ववरणीयस्य ᵛरायः धनस्य ᵛदाता यथा भवेत् तथा अस्तावीति संबन्धः । इदिति द्वयं पूरणम् ॥ ॥ १६ ॥ ॥ २ ॥

---

१. घ-पुरुहूतं बहुभिराहूतमिन्द्रम् । २. ख-ञ-न-भ-आयम्याः आगच्छन्तु (ख-ञ-०च्छतु) नियच्छन्तु; ञ-त२-आयम्याः आगच्छन्तु; त१-र-आयम्याः आगच्छतु । ३. ख-ञ-ञ-न-भ-र-आगच्छतु; त२-आच्छतु; य-आगच्छतु नियच्छतु । ४. ख-ञ-ञ-त१-न-भ-य-र-एनम् ।

तृतीयेऽनुवाके विंशतिसूक्तानि । तत्र 'वृषा मदः' इति दशर्चं प्रथमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । 'वृषा' इत्यनुक्रान्तम् । विषुवति निष्केवल्य एतत्सूक्तम् । सूत्रितं च—'वृषा मदः प्र मंहिष्ठाय' (आश्व. श्रौ. ८. ६) इति ॥

वृषा॒ मद॒ इन्द्रे॒ श्लोक॑ उ॒क्था सचा॒ सोमे॑षु सु॒तपा॒ ऋ॑जीषी ।
अ॒र्च॒न्त्यो॑ म॒घवा॒ नृभ्य॑ उ॒क्थैर्द्यु॒क्षो राजा॑ गि॒रामक्षि॑तोतिः ॥ १ ॥

वृषा । मदः । इन्द्रे । श्लोकः । उक्था । सचा । सोमेषु । सुतऽपाः । ऋजीषी ।
अर्चन्त्यः । मघऽवा । नृऽभ्यः । उक्थैः । द्युक्षः । राजा । गिराम् । अक्षितऽऊतिः ॥ १ ॥

[v]सोमेषु सोमवत्सु यागेषु [v]इन्द्रे सोमपानजनितः [v]मदः [v]वृषा यजमानस्य कामानां वर्षको भवति । यद्वा । सर्वजनाह्लादकस्य वर्षणस्य कर्ता भवति । [v]उक्था उक्थेन शब्देन [v]सचा सह [v]श्लोकः स्तोत्ररूपः शब्दः वृषा भवति । [v]सुतपाः अभिषुतस्य सोमस्य पाता [v]ऋजीषी ऋजीषं गतरसमपि सोमं न परित्यजन् [v]मघवा धनवान् स चेन्द्रः [v]नृभ्यः स्तुतीनां नेतृभ्यः[1] [v]उक्थैः स्तोत्रैः [v]अर्चन्त्यः अर्चनीयो भवति । [v]द्युक्षः द्युलोकनिवासः [v]गिरां स्तुतीनां [v]राजा ईश्वर इन्द्रः [v]अक्षितोतिः अक्षीणरक्षश्च[2] भवति ॥

तर्तु॑रि॒र्वीरो नर्यो॑ विचे॒ताः श्रोता॒ हवं॑ गृणत उ॒र्व्यू॑तिः ।
वसुः शंसो॑ न॒रां का॒रुधा॑या वा॒जी स्तु॒तो वि॒दथे॑ दाति॒ वाज॑म् ॥ २ ॥

तर्तुरिः । वीरः । नर्यः । विऽचेताः । श्रोता । हवम् । गृणतः । उर्विऽऊतिः ।
वसुः । शंसः । नराम् । कारुऽधायाः । वाजी । स्तुतः । विदथे । दाति । वाजम् ॥ २ ॥

[v]वाजी अन्नवान् इन्द्रः [v]विदथे यज्ञेऽस्माभिः [v]स्तुतः [v]सन् [v]वाजम् अन्नं [v]दाति अस्मभ्यं ददाति । कीदृश इन्द्रः । [v]ततुरिः शत्रूणां हिंसकः [v]वीरः विक्रान्तः [v]नर्यः नरहितः [v]विचेताः विविक्तज्ञानः [v]हवम् अस्मदीयं स्तोत्रं [v]श्रोता [v]गृणतः स्तुवतः स्तोतृजनस्य [v]उर्व्यूतिः विस्तृतरक्षः [v]वसुः वासयिता [v]नरां नृणां स्तोतृजनानां [v]शंसः शंसनीयः [v]कारुधायाः कारूणां स्तोतॄणां धारयिता । एवंभूत इन्द्रो वाजं ददातीति संबन्धः ॥

अक्षो॒ न च॒क्र्योः॑ शूर बृ॒हन्प्र ते॑ म॒ह्ना रि॑रिचे॒ रोद॑स्योः ।
वृ॒क्षस्य॒ नु ते॑ पुरुहूत व॒या व्यू॒तयो॑ रुरुहु॒रिन्द्र॒ पूर्वीः॑ ॥ ३ ॥

अक्षः । न । चक्र्योः । शूर । बृहन् । प्र । ते । मह्ना । रिरिचे । रोदस्योः ।
वृक्षस्य । नु । ते । पुरुऽहूत । वयाः । वि । ऊतयः । रुरुहुः । इन्द्र । पूर्वीः ॥ ३ ॥

---

१. ख-भ-नेतृभ्यो मनुष्येभ्यः । २. ख१-न-भ-अक्षीणरक्षिणश्च; ज-ण-अक्षीणः रक्षिणश्च; ञ-अक्षीण-रक्षणश्च; त-अक्षीणरक्षकश्च ।

हे [v]शूर विक्रान्तेन्द्र [v]बृहन् महान्[1] [v]ते त्वदीयः [v]महा महिमा [v]रोदस्योः द्यावापृथिव्योः [v]प्र [v]रिरिचे अतिरिच्यते[2]। द्यावापृथिवीभ्यामित्यर्थः। अत्र[3] दृष्टान्तः। [v]चक्र्योः चक्रयोः [v]अक्षो [v]न। रथसंबन्ध्यक्षो यथा चक्राभ्यां बहिर्गतस्तद्वत। हे [v]पुरुहूत बहुभिराहूत [v]इन्द्र त्वदीयाः [v]धुर्वीः वह्नयः [v]ऊतयः रक्षाः [v]वि [v]रुरुहुः विशेषेण रोहन्ति। तत्र दृष्टान्तः। [v]वृक्षस्य [v]नु। यथा वृक्षस्य [v]वयाः शाखाः विरोहन्ति तद्वत् ॥

शचीवतस्ते पुरुशाक शाका गवामिव स्रुतयः संचरणीः।
वत्सानां न तन्तर्यस्त इन्द्र दामन्वन्तो अदामानः सुदामन् ॥ ४ ॥

शचीऽवतः। ते। पुरुऽशाक। शाकाः। गवाम्ऽइव। स्रुतयः। सम्ऽचरणीः।
वत्सानाम्। न। तन्तर्यः। ते। इन्द्र। दामन्ऽवन्तः। अदामानः। सुऽदामन् ॥ ४ ॥

हे [v]पुरुशाक बहुकर्मन्निन्द्र[4] [v]शचीवतः प्रज्ञावतः [v]ते त्वदीयाः [v]शाकाः शक्तयः कर्माणि वा सर्वतः संचरन्तीति शेषः। तत्र दृष्टान्तः। [v]गवामिव धेनूनां [v]स्रुतयः मार्गा यथा [v]संचरणीः सर्वत्र संचारिणो भवन्ति तद्वत्। अपि च [v]वत्सानां [v]न [v]तन्तयः। तन्निर्नाम दीर्घप्रसारिता रज्जुः यत्र नियतैर्विंशाखदामभिः बहवो वत्सा बध्यन्ते। यथा तन्तयो बहूनां वत्सानां बन्धका हे [v]सुदामन् शोभनदान [v]इन्द्र तथा [v]ते त्वदीयाः शाकाः [v]दामन्वन्तः बन्धनवन्तः बहूनां शत्रूणां बन्धकाः [v]अदामानः स्वयमन्यैरबद्धाः ॥

अन्यद्य कर्वरमन्यदु श्वोऽसच्च सन्मुहुराचक्रिरिन्द्रः।
मित्रो नो अत्र वरुणश्च पूषार्यो वर्शस्य पर्येतास्ति ॥ ५ ॥

अन्यत्। अद्य। कर्वरम्। अन्यत्। ऊँ इति। श्वः। असत्। च। सत्। मुहुः। आऽचक्रिः। इन्द्रः।
मित्रः। नः। अत्र। वरुणः। च। पूषा। अर्यः। वर्शस्य। परिऽएता। अस्ति ॥ ५ ॥

अयमिन्द्रः [v]अद्य अस्मिन् दिवसे [v]अन्यत् [v]कर्वरम्। कर्मनामैतत्। कर्म करोति। [v]अन्यदु अन्यदेव उक्तविलक्षणमेव कर्म [v]श्वः परस्मिन् दिने करोति। एतदेव विव्रियते। [v]असच्च अशुभम् अशनिपातनादिकं [v]सत् वर्षणादिकं शोभनं कर्म च। यद्वा। त्रिशिरसो विश्वरूपस्य वधादिकम् असत्कर्म लोकोपद्रवकारिणो वृत्रादेरसुरस्य वधादिरूपं सत्कर्म च [v]मुहुः पुनःपुनरसौ [v]इन्द्रः [v]आचक्रिः कर्ता भवति। एवं परस्परविलक्षणं कर्म स्वमहिम्ना पुनःपुनरावर्तयन् प्रतिदिवसमन्यदेव परेषामसाधारणं कर्म करोतीत्यर्थः। एवंविध इन्द्रः [v]अत्र अस्मिन् यज्ञे [v]नः अस्माकं [v]वर्शस्य कामयितव्यस्य फलस्य स्वर्गादेः [v]पर्येतास्ति परिगमयिता भवतु। अस्तेर्लेटि रूपम्। [v]मित्रः अहरभिमानी देवः [v]वरुणः रात्र्यभिमानी [v]पूषा पोषको देवः [v]अर्यः प्रेरकः सविता एते [v]च इन्द्रेण नियम्यमाना अस्मदीयस्य कामस्य परिगमयितारः सन्तु। यद्वा। मित्रादयोऽप्यत्र स्वप्राधान्येन अभिधीयन्ते। मित्रादय इन्द्रः प्रत्येकमस्मदीयस्य कामस्य पर्येतास्तु। तथा च बृहद्देवतायामुक्तं—'प्रोतयेऽन्यदिति त्वेते वैश्वदेव्यावृचौ स्मृते' इति ॥ ॥ १७ ॥

---

१. ख-भ–महन्। २. ख-भ–प्ररिरिच्यते अतिरिच्यते; ज्ञ-त-न–प्ररिच्यते; र–प्ररिरिच्यते। ३. ख-न-भ-य-श–तत्र। ४. ख-घ भ-श–बहुशक्तिमन्निन्द्र।

वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरिन्द्रानयन्त यज्ञैः ।
तं त्वाभिः सुष्टुतिभिर्वाजयन्त आजिं न जग्मुर्गिर्वाहो अश्वाः ॥ ६ ॥

वि । त्वत् । आपः । न । पर्वतस्य । पृष्ठात् । उक्थेभिः । इन्द्र । अनयन्त । यज्ञैः ।
तम् । त्वा । आभिः । सुस्तुतिऽभिः । वाजयन्तः । आजिम् । न । जग्मुः । गिर्वाहः । अश्वाः ॥ ६ ॥

हे [v]इन्द्र [v]त्वत् त्वत्सकाशात् [v]उक्थेभिः उक्थैः शस्त्रैः [v]यज्ञैः हविर्भिश्च स्तोतारः कामानात्मनः [v]वि [v]अनयन्त विविधं प्रापयन्ति । तत्र दृष्टान्तः । [v]पर्वतस्य अद्रेः [v]पृष्ठात् उपरिभागात् [v]आपो [v]न अप उदकानि यथा तद्वत् । अपि च हे [v]गिर्वाहः गीर्भिः स्तुतिरूपाभिर्वाग्भिः वहनीयेन्द्र [v]तं प्रसिद्धं [v]त्वा त्वां [v]वाजयन्तः बलिनं कुर्वन्तः । यद्वा । वाजमन्नमिच्छन्तो भरद्वाजाः स्तोतारः [v]आभिः पूर्वोक्ताभिः [v]सुष्टुतिभिः शोभनाभिः[1] स्तुतिभिः[1] [v]जग्मुः[2] प्रापुः । क्षिप्रगमने दृष्टान्तः । [v]अश्वाः वाहाः [v]आजिं [v]न संग्रामं यथा शीघ्रं प्रापुस्तद्वत्[3] ॥

न यं जरन्ति शरदो न मासा न द्याव इन्द्रमवकर्शयन्ति ।
वृद्धस्य चिद्वर्धतामस्य तनूः स्तोमेभिरुक्थैश्च शस्यमाना ॥ ७ ॥

न । यम् । जरन्ति । शरदः । न । मासाः । न । द्यावः । इन्द्रम् । अवऽकर्शयन्ति ।
वृद्धस्य । चित् । वर्धताम् । अस्य । तनूः । स्तोमेभिः । उक्थैः । च । शस्यमाना ॥ ७ ॥

[v]शरदः संवत्सराः [v]यम् इन्द्रं [v]न [v]जरन्ति न जरयन्ति नापक्षीणयन्ति । तथा [v]मासाः च नापक्षीणयन्ति । तथा [v]द्यावः दिवसाश्च यम् [v]इन्द्रं [v]न [v]अवकर्शयन्ति नाल्पीभावयन्ति [v]वृद्धस्य [v]चित् प्रवृद्धस्यापि [v]अस्य इन्द्रस्य [v]तनूः शरीरं [v]स्तोमेभिः अस्मदीयैः स्तोत्रैः [v]उक्थैश्च शस्त्रैश्च [v]शस्यमाना स्तूयमाना सती [v]वर्धतां प्रवृद्धा भवतु ॥

न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान् ।
अज्रा इन्द्रस्य गिरयश्चिदृष्वा गम्भीरे चिद्भवति गाधमस्मै ॥ ८ ॥

न । वीळवे । नमते । न । स्थिराय । न । शर्धते । दस्युऽजूताय । स्तवान् ।
अज्राः । इन्द्रस्य । गिरयः । चित् । ऋष्वाः । गम्भीरे । चित् । भवति । गाधम् । अस्मै ॥ ८ ॥

[v]स्तवान् अस्माभिः स्तूयमान इन्द्रः [v]वीळवे दृढगात्राय यजमानाय [v]न [v]नमते न वशीभवति । [v]स्थिराय[4] युद्धेऽविचलिताय च [v]न नमते । [v]शर्धते उत्सहमानाय[5] [v]दस्युजूताय कर्मवर्जितैः प्रेरिताय यजमानाय [v]न वशीभवति । यद्यपि स्तोतारो बहुगुणाः सन्ति तथापीन्द्रस्तेभ्यो दस्युसहितेभ्यो न वशीभवतीत्यर्थः । अपि च [v]ऋष्वाः महान्तः [v]गिरयश्चित् पर्वता अपि [v]इन्द्रस्य

---

१. ज्ञ-त–शोभनस्तुतिभिः । २. ख-न-भ-य–क्षिप्रं जग्मुः । ३. ख-न-भ-य–प्राप्नुवन्ति तद्वत् । ४. ख-घ-भ-श– न स्थिराय । ५. ख–उत्सायनाय; ज्ञ-न-भ–उत्साहनाय ।

vअज्राः सुगमनाः क्षेपणीया भवन्ति । vगम्भीरे vचित् अगाधेऽपि स्थाने vअस्मै इन्द्राय vगाधम्[1] एव स्थानं विषयो[1] vभवति ॥

गम्भीरेण न उरुणामत्रिन्प्रेषो यन्धि सुतपावन्वाजान् ।
स्था ऊ षु ऊर्ध्व ऊती अरिषण्यन्नक्तोर्व्युष्टौ परितक्म्यायाम् ॥ ९ ॥

गम्भीरेण । नः । उरुणा । अमत्रिन् । प्र । इषः । यन्धि । सुतऽपावन् । वाजान् ।
स्थाः । ऊँ इति । सु । ऊर्ध्वः । ऊती । अरिषण्यन् । अक्तोः । विऽउष्टौ । परिऽतक्म्यायाम् ॥९॥

हे vअमत्रिन् । अमत्रं बलम् । तद्वन् हे vसुतपावन् सुतस्य सोमस्य पातरिन्द्र vगम्भीरेण केनापि दुरवगाहेन vउरुणा विस्तीर्णेन मनसा vनः अस्मभ्यम् vइषः अन्नानि vवाजान् बलानि च vप्र vयन्धि प्रयच्छ । किंच vअक्तोः रात्रेः vव्युष्टौ विवासे अह्नि vपरितक्म्यायां रात्रौ हे इन्द्र त्वम् vऊती अस्माकं रक्षायै हे इन्द्र vअरिषण्यन् अहिंसंस्वम् vऊर्ध्वः उद्युक्तः vस्था vऊ vषु सुष्ठु तिष्ठैव ॥

सचस्व नायमवसे अभीके इतो वा तमिन्द्र पाहि रिषः ।
अमा चैनमरण्ये पाहि रिषो मदेम शतहिमाः सुवीराः ॥ १० ॥

सचस्व । नायम् । अवसे । अभीके । इतः । वा । तम् । इन्द्र । पाहि । रिषः ।
अमा । च । एनम् । अरण्ये । पाहि । रिषः । मदेम । शतऽहिमाः । सुऽवीराः ॥ १० ॥

हे vइन्द्र त्वं vनायं कर्मणां स्तुतीनां च नेतारम् vअभीके संग्रामे vअवसे रक्षणाय vसचस्व सेवस्व । vइतो vवा अस्मात् संनिकृष्टाच्च vरिषः शत्रोः अमुतो विप्रकृष्टाच्छत्रोश्च । वाशब्दोऽनुक्तेन विवक्षितेन समुच्चयार्थः । हे इन्द्र vतं स्तोतारं vपाहि रक्ष । तथा vअमा vच गृहे च । अमेति गृहनाम । vअरण्ये कानने च vरिषः शत्रोः vपाहि तं[2] रक्ष । तदनन्तरं vसुवीराः शोभनपुत्रा वयं vशतहिमाः शतसंवत्सरान् vमदेम हृष्याम ॥ ॥ १८ ॥

' या त ऊतिः ' इति नवर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तं— ' या ते नव ' इति । पृष्ठयाभिप्लवषडहयोर्द्वितीयेऽहनीदं सूक्तं निष्केवल्यनिविद्धानम् । सूत्रितं च— ' या त ऊतिरवमेति मध्यंदिनः ' (आश्व. श्रौ. ७. ६) इति ॥

या त ऊतिरवमा या परमा या मध्यमेन्द्र शुष्मिन्नस्ति ।
ताभिरू षु वृत्रहत्येऽवीर्न एभिश्च वाजैर्महान्न उग्र ॥ १ ॥

या । ते । ऊतिः । अवमा । या । परमा । या । मध्यमा । इन्द्र । शुष्मिन् । अस्ति ।
ताभिः । ऊँ इति । सु । वृत्रऽहत्ये । अवीः । नः । एभिः । च । वाजैः । महान् । नः । उग्र ॥१॥

---

१. ख–गाधमवस्था अवस्थानविषयो; ज्ञ-ञ-त-न-भ-र–गाधमवस्थानविषयो । २. श–एनम् ।

हे [v]शुष्मिन् बलवन् [v]इन्द्र [v]ते त्वदीया [v]या [v]ऊतिः या रक्षा [v]अवमा अधमा [v]अस्ति । [v]या [v]परमा उत्कृष्टास्ति । [v]या [v]मध्यमा अस्ति । [v]ताभिः ऊतिभिः [v]वृत्रहत्ये युद्धे [v]नः अस्मान् [v]सु अत्यन्तम् [v]अवीः पालय । किंच हे [v]उग्र उद्गूर्णेन्द्र [v]महान् त्वम् [v]एभिः भोज्यसाधनैः [v]वाजैः अन्नैः [v]च [v]नः अस्मान् संयोजयेति शेषः ॥

आभिः स्पृधो मिथतीररिषण्यन्नमित्रस्य व्यथया मन्युमिन्द्र ।
आभिर्विश्वा अभियुजो विषूचीरार्याय विशोऽवं तारीर्दासीः ॥ २ ॥

आभिः । स्पृधः । मिथतीः । अरिषण्यन् । अमित्रस्य । व्यथय । मन्युम् । इन्द्र ।
आभिः । विश्वाः । अभिऽयुजः । विषूचीः । आर्याय । विशः । अव । तारीः । दासीः ॥२॥

हे [v]इन्द्र [v]आभिः अस्मदीयाभिः स्तुतिभिः [v]मिथतीः शत्रुसैन्यानि हिंसतीः [v]स्पृधः अस्मदीयाः सेनाः [v]अरिषण्यन् अहिंसन् । पालयन्नित्यर्थः । [v]अमित्रस्य शत्रोः [v]मन्युं संग्रामादिषु विद्यमानं कोपं [v]व्यथय नाशय । अपि च [v]आभिः स्तुतिभिरेव [v]अभियुजः अभियोक्त्रीः [v]विषूचीः सर्वतो विद्यमानाः [v]दासीः कर्मणामुपक्षपयित्रीः [v]विश्वाः सर्वाः [v]विशः प्रजाः [v]आर्याय यज्ञादिकर्मकृते यजमानाय [v]अव [v]तारीः विनाशय ॥

इन्द्र जामय उत येऽजामयोऽर्वाचीनासो वनुषो युयुज्रे ।
त्वमेषां विथुरा शवांसि जहि वृष्ण्यानि कृणुही पराचः ॥ ३ ॥

इन्द्र । जामयः । उत । ये । अजामयः । अर्वाचीनासः । वनुषः । युयुज्रे ।
त्वम् । एषाम् । विथुरा । शवांसि । जहि । वृष्ण्यानि । कृणुहि । पराचः ॥ ३ ॥

हे [v]इन्द्र [v]जामयः ज्ञातिरूपाः संनिकृष्टा ये शत्रवः । [v]उत अपि च [v]अजामयः दूरदेशे स्थिता [v]ये शत्रवः [v]अर्वाचीनासः अस्मदभिमुखाः [v]वनुषः हिंसन्तः [v]युयुज्रे उद्युक्ता भवन्ति [v]एषाम् उभयविधानां शत्रूणां संबन्धीनि [v]शवांसि बलानि [v]विथुरा[1] विथुराणि[1] हीनानि [v]त्वं कुर्विति शेषः । तथा [v]वृष्ण्यानि एषां वीर्याणि [v]जहि नाशय । किंच [v]पराचः उभयविधान् शत्रून् पराचः पराङ्मुखान् [v]कृणुहि कुरु ॥

शूरो वा शूरं वनते शरीरैस्तनूरुचा तरुषि यत्कृणवैते ।
तोके वा गोषु तनये यदप्सु वि क्रन्दसी उर्वरासु ब्रवैते ॥ ४ ॥

शूरः । वा । शूरम् । वनते । शरीरैः । तनूऽरुचा । तरुषि । यत् । कृण्वैते इति ।
तोके । वा । गोषु । तनये । यत् । अप्ऽसु । वि । क्रन्दसी इति । उर्वरासु । ब्रवैते इति ॥ ४ ॥

हे इन्द्र [v]शूरः त्वदनुगृहीतो वीरः [v]शरीरैः अङ्गैः [v]शूरं [v]वा वीरमपि [v]वनते हन्ति । वेत्ययमपीत्यस्यार्थे वर्तते । यद्वा । वेत्यनेन विकल्पाभिधायकेन अशूरो[2] वा त्वदनुगृहीतः सन् शूरं वनते ।

---

१. ख-ज्ञ-न-भ-र-विधुरा विधुराणि; ज्ञ-त-विथुरा विथुराणि; श-विथुराणि । २. ख-ज्ञ-न-भ-य-अशूरोऽभिधीयते (य-असुरोऽभि°) शूरो वाशूरो; र-अशूरोऽभिधीयते । शूरो ।

कदा चनत इत्येतदाह । vतनूरुचा शरीरेण शोभमानौ परस्परविरोधिनौ vतर्हि युद्धे vयत् यदा vकृण्वते संग्रामं कुर्वाते । vयत् यदा च vतोके vवा पुत्रनिमित्ते वा vगोषु निमित्तभूतासु वा vतनये पौत्रे निमित्तभूते वा vअप्सु उदकेषु निमित्तेषु वा vउर्वरासु सर्वसस्याढ्यासु भूमिषु निमित्तासु vक्रन्दसी क्रन्दमानावाक्रोशन्तौ vवि vह्वयेते विवदेते । हे इन्द्र पुत्रादिलाभजयः[1] त्वदनुगृहीतस्य भवतीत्यर्थः ॥

नहि त्वा शूरो न तुरो न धृष्णुर्न त्वा योधो मन्यमानो युयोध ।
इन्द्र नकिष्टा प्रत्यस्त्येषां विश्वा जातान्यभ्यसि तानि ॥ ५ ॥

नहि । त्वा । शूरः । न । तुरः । न । धृष्णुः । न । त्वा । योधः । मन्यमानः । युयोध ।
इन्द्र । नकिः । त्वा । प्रति । अस्ति । एषाम् । विश्वा । जातानि । अभि । असि । तानि ॥५॥

हे इन्द्र vत्वा त्वया सह vशूरः विक्रान्तजनः vनहि vयुयोध न युध्यते[2] । तथा vतुरः अन्येषां शत्रूणां हिंसकः स त्वया vन युयोध । vधृष्णुः धर्षकः vन युयोध । vमन्यमानः युद्धे क्रुध्यन् vयोधः भटः vत्वा त्वया vन युयोध । हे vइन्द्र vएषां शूरादीनां मध्ये कश्चन vत्वा तव vनकिः vप्रत्यस्ति प्रतिनिधिर्नास्ति । vविश्वा विश्वानि vजातानि प्रादुर्भूतानि vतानि[3] शूरादीनि त्वम् vअभ्यसि अभिभवसि ॥ ॥ १९ ॥

स पत्यत उभयोर्नृम्णमयोर्यदीं वेधसः समिथे हवन्ते ।
वृत्रे वा महो नृवति क्षये वा व्यचस्वन्ता यदि वितन्तसैते ॥ ६ ॥

सः । पत्यते । उभयोः । नृम्णम् । अयोः । यदि । वेधसः । समऽइथे । हवन्ते ।
वृत्रे । वा । महः । नृऽवति । क्षये । वा । व्यचस्वन्ता । यदि । वितन्तसैते इति ॥ ६ ॥

vअयोः अनयोः vउभयोः मध्ये vसः जनः vनृम्णं धनं vपत्यते ईष्टे । कयोर्मध्ये क ईष्ट इत्येतदुभयमाह । vयदि यस्य जनस्य । यदीति निपातो यस्यार्थे वर्तते । vसमिथे यज्ञे vवेधसः कर्मणां विधातार ऋत्विजः vहवन्ते इन्द्रं स्तुवन्ति स ईष्ट इति संबन्धः । vमहः महति प्रभूते vवृत्रे vवा निरोधे निमित्ते वा vनृवति परिचारकमनुष्ययुक्ते vक्षये vवा गृहनिमित्ते[4] वा व्यचस्वन्तौ[5] vयदि यौ[6] जनौ । यदीति यावित्यर्थे वर्तते[7] । vवितन्तसैते वियुध्येते तयोर्मध्ये इति[8] संबन्धः ॥ तसेः उपक्षयकर्मणः विपूर्वात् वितन्तसैते इति भवति । यद्वा । तन्तस इति धातुः कण्ड्वादिषु पठ्यते तस्मादिदं रूपमिति ॥

---

१. ख-पुत्रादि; भ-पुत्रादिलाभः; श-पुत्रादिलाभाय । २. ख-ज्ञ-ञ-त-न-भ-य-र-युध्येत् । ३. ख-ज्ञ-त२-न-भ-श-'तानि' नास्ति । ४. ख१-ज्ञ-गृहे निमित्ते । ५. ख-भ-य-र-व्यचस्वन्तौ व्याप्तिमन्तौ; घ-व्यचस्वन्ता व्यचस्वन्तौ उद्योगवन्तौ; ज्ञ-त१-व्यचस्वतौ; ञ-न-व्यचस्वन्ता व्यचस्वन्तौ व्याप्तिमन्तौ; श-व्यचस्वन्ता व्यचस्वन्तौ । ६. ख-घ-भ-श-तौ । ७. ख-ञ-त-भ-र- न वर्तते । ८. ख-घ-भ-त्वदनुगृहीतः जयतीति (ख-घ-जयति) ।

अध॑ स्मा ते चर्षणयो॒ यदेजा॒न्निन्द्र॑ त्रा॒तोत भ॑वा वरू॒ता ।
अ॒स्माका॑सो॒ ये नृ॒तमासो अ॒र्य इन्द्रं॑ सू॒रयो॑ दधि॒रे पु॒रो नः ॥ ७ ॥

अध॑ । स्म॒ । ते॒ । च॒र्षणयः । यत् । एजा॑न् । इन्द्र॑ । त्रा॒ता । उ॒त । भ॒व॒ । व॒रू॒ता ।
अ॒स्माका॑सः । ये । नृ॒ऽतमासः । अ॒र्यः । इन्द्र॑ । सू॒रयः॑ । द॒धि॒रे । पु॒रः । नः ॥ ७ ॥

[v]अध [v]स्म अपि च हे [v]इन्द्र [v]ते[1] त्वदीयाः [v]चर्षणयः पुरुषाः [v]यत् यदा [v]एजान् एजेयुः भीत्या कम्पेयुः त्वं तेषां [v]त्राता पालकः [v]भव । [v]उत अपि च [v]वरूता संभक्ता भव । [v]अस्माकासः अस्मदीयाः [v]नृतमासः नेतृतमाः [v]ये मनुष्या हे इन्द्र त्वाम् [v]अर्यः अरयः । प्रापयितार इत्यर्थः । तेषां त्राता भव । हे [v]इन्द्र [v]सूरयः ये स्तोतारः [v]नः अस्मान् [v]पुरः [v]दधिरे पुरश्चक्रिरे । तेषां च त्राता भवेति ॥

साकमेधेषु माहेन्द्र्यामिष्टौ इन्द्रस्य वृत्रघ्नो[2] याज्या । सूत्रितं च—' अनु ते दायि मह इन्द्रियाय विश्वकर्मन्हविषा वावृधानः ' (आश्व. श्रौ. २. १८) इति । अनुक्रीनाम्येकाहे निष्केवल्य एषैव सूक्तमुखीया । सूत्रितं च—' अनु ते दायि मह इन्द्रियाय कथो नु ते परि चराणि विद्वानिति द्वे ' (आश्व. श्रौ. ९. ५) इति ॥

अनु॑ ते दायि म॒ह इ॑न्द्रि॒याय॑ स॒त्रा ते॒ विश्व॒मनु॑ वृत्र॒हत्ये॑ ।
अनु॒ क्षत्र॒मनु॑ सहो॒ यज॑त्रेन्द्र॒ देवे॑भि॒रनु॑ ते नृ॒षह्ये॑ ॥ ८ ॥

अनु॑ । ते॒ । दा॒यि॒ । म॒हे । इ॒न्द्रि॒याय॑ । स॒त्रा । ते॒ । विश्व॑म् । अनु॑ । वृ॒त्र॒ऽहत्ये॑ ।
अनु॑ । क्षत्र॑म् । अनु॑ । सहः॑ । यज॑त्र । इन्द्र॑ । देवे॑भिः । अनु॑ । ते॒ । नृ॒ऽसह्ये॑ ॥ ८ ॥

हे इन्द्र [v]महे महते [v]ते तुभ्यम् [v]इन्द्रियाय ऐश्वर्यार्थम् [v]अनु [v]दायि अन्वदायि । अनुदीयते स्म । [v]वृत्रहत्ये वृत्रवधे निमित्ते [v]ते तुभ्यं [v]विश्वं समस्तं [v]सत्रा सत्यम् [v]अनु दायि । कैः किमनु दायीति तदुभयमाह । येन विश्वं बिभर्ति तत् [v]क्षत्रं बलम् [v]अनु दायि । येन शत्रूनभिभवति तदूर्जविशिष्टं[3] [v]सहः बलम् [v]अनु दायि । हे [v]यजत्र यजनीय [v]इन्द्र [v]ते तुभ्यं [v]नृषह्ये[4] युद्धे [v]देवेभिः सर्वैर्देवैरेतत्सर्वम् [v]अनु दायि ॥

एवा॑ नः स्पृ॒धः सम॑जा स॒मत्सि॑न्द्र रार॒न्धि मि॑थ॒तीर॑दे॒वीः ।
वि॒द्याम॒ वस्तो॒रव॑सा गृ॒णन्तो॑ भर॒द्वाजा उ॒त ते॑ इन्द्र नू॒नम् ॥ ९ ॥

एव॑ । नः॒ । स्पृ॒धः॒ । सम् । अ॒ज॒ । स॒मत्ऽसु॑ । इ॒न्द्र॒ । र॒र॒न्धि॒ । मि॒थ॒तीः॒ । अ॒दे॒वीः॒ ।
वि॒द्याम॑ । वस्तोः॑ । अव॑सा । गृ॒णन्तः॑ । भ॒र॒त्ऽवा॑जाः । उ॒त । ते॒ । इ॒न्द्र॒ । नू॒नम् ॥ ९ ॥

हे [v]इन्द्र[5] [v]एव एवं स्तुतस्त्वं [v]नः अस्मदीयाः [v]स्पृधः शत्रुसेनाः[6] [v]समत्सु संग्रामेषु [v]समज शत्रुवधार्थं प्रेरय । किंच [v]मिथतीः हिंसतीः [v]अदेवीः आसुरीः सेनाः [v]ररन्धि अस्मदर्थं वशीकुरु ।

---

१. ख-ज्ञ-ञ्च-त-न-भ-र-श–' ते ' नास्ति । २. ख-ज्ञ-ञ्च-भ–वृत्रहणः; त-र–वृत्रहणे; श–वृत्रहणेति । ३. ख-ञ्च-त२-न-भ-र–°विशिष्टकम् । ४. ज्ञ-त–नृसह्ये । ५. ख-भ-श–इन्द्र त्वम् । ६. ज्ञ–स्पर्धमानाः सेनाः ।

vउत अपि च हे vइन्द्र vते[1] vगृणन्तः त्वां स्तुवन्तः vभरद्वाजाः वयम् vअवसा अन्नेन सह vवस्तोः वासस्य । निवासमित्यर्थः । vनूनम् अवश्यं vविद्याम लभेमहि ॥ ॥ २० ॥

' श्रुधी न इन्द्र ' इत्यष्टर्चं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रम्यते—' श्रुधी नोऽष्टौ ' इति । विनियोगो लैङ्गिकः ॥

श्रुधी नं इन्द्र ह्वयामसि त्वा महो वाजस्य सातौ वावृषाणाः ।
सं यद्विशोऽयन्त शूरसाता उग्रं नोऽवः पार्ये अहन्दाः ॥ १ ॥

श्रुधि । नः । इन्द्र । ह्वयामसि । त्वा । महः । वाजस्य । सातौ । ववृषाणाः ।
सम् । यत् । विशः । अयन्त । शूरऽसातौ । उग्रम् । नः । अवः । पार्ये । अहन् । दाः ॥१॥

हे vइन्द्र vववृषाणाः सोमैस्त्वां सिञ्चन्तो वयं स्तोतारः vमहः महतः vवाजस्य अन्नस्य vसातौ लाभार्थं vत्वा त्वां vह्वयामसि आह्वयामः । हे इन्द्र त्वं vनः अस्माकं तदाह्वानं vश्रुधि शृणु । vयत् यदा vविशः जनाः vशूरसातौ[2] युद्धे vसम् vअयन्त संगच्छन्ते तदा vपार्ये अन्तिमे vअहन् अहनि दिवसे vनः अस्मभ्यम् vउग्रम् उद्गूर्णम् vअवः रक्षणं vदाः अदाः प्रयच्छ ॥

त्वां वाजी हवते वाजिनेयो महो वाजस्य गध्यस्य सातौ ।
त्वां वृत्रेष्विन्द्र सत्पतिं तरुत्रं त्वां चष्टे मुष्टिहा गोषु युध्यन् ॥ २ ॥

त्वाम् । वाजी । हवते । वाजिनेयः । महः । वाजस्य । गध्यस्य । सातौ ।
त्वाम् । वृत्रेषु । इन्द्र । सत्ऽपतिम् । तरुत्रम् । त्वाम् । चष्टे । मुष्टिऽहा । गोषु । युध्यन् ॥२॥

vवाजी हविर्लक्षणान्नवान् vवाजिनेयः वाजिन्याः पुत्रो भरद्वाजो हे इन्द्र vत्वां vगध्यस्य सर्वैः प्राप्यस्य vमहः महतः vवाजस्य अन्नस्य vसातौ लाभे निमित्ते vहवते स्तौति । अपि च हे vइन्द्र vसत्पतिं सज्जनानां पालकं vतरुत्रं दुर्जनानां तारकं vत्वां vवृत्रेषु उपद्रवेषु निमित्तेषु भरद्वाजो हवते । vमुष्टिहा मुष्टिबलेन शत्रूणां हन्ता vगोषु निमित्तभूतासु vयुध्यन् शत्रुभिः सह युद्धं कुर्वन् भरद्वाजः vत्वां vचष्टे पश्यति । प्रतिपालयते ॥

त्वं कविं चोदयोऽर्कसातौ त्वं कुत्साय शुष्णं दाशुषे वर्क् ।
त्वं शिरो अमर्मणः पराहन्नतिथिग्वाय शंस्यं करिष्यन् ॥ ३ ॥

त्वम् । कविम् । चोदयः । अर्कऽसातौ । त्वम् । कुत्साय । शुष्णम् । दाशुषे । वर्क् ।
त्वम् । शिरः । अमर्मणः । परा । अहन् । अतिथिऽग्वाय । शंस्यम् । करिष्यन् ॥ ३ ॥

हे इन्द्र vत्वम् vअर्कसातौ अन्नलाभार्थं vकविं भार्गवमृषिं vचोदयः अचोदयः । प्रैरयः । किंच हे इन्द्र vत्वं vदाशुषे हविर्दत्तवते vकुत्साय vशुष्णम् असुरं vवर्क् छेदितवानसि ॥ वर्क् इति

---

१. ख-ज्ञ-ञ-त-न-भ-य-र—ते त्वत्तः । २. ख-ज्ञ-ञ-त-न-भ-र—शूरसाता शूरसातौ ।

वृणक्तेश्छेदनार्थस्य[1] लुङि रूपम् ॥ तथा ᵛत्वम् ᵛअतिथिग्वाय अतिथीनामभिगन्त्रे दिवोदासाय ᵛशंस्यं स्तुत्यं सुखं ᵛकरिष्यन् ᵛअमर्मणः मर्महीनमात्मानं मन्यमानस्य शम्बरस्य ᵛशिरः शीर्षं ᵛपराहन् अवधीः ॥

त्वं रथं प्र भरो योधमृष्वमावो युध्यन्तं वृषभं दशद्युम् ।
त्वं तुग्रं वेतसवे सचाहन्त्वं तुजिं गृणन्तमिन्द्र तूतोः ॥ ४ ॥

त्वम् । रथम् । प्र । भरः । योधम् । ऋष्वम् । आवः । युध्यन्तम् । वृषभम् । दशऽद्युम् ।
त्वम् । तुग्रम् । वेतसवे । सचा । अहन् । त्वम् । तुजिम् । गृणन्तम् । इन्द्र । तूतोरिति तूतोः ॥ ४ ॥

हे इन्द्र ᵛत्वं वृषभसंज्ञकाय राज्ञे ᵛयोधं युद्धसाधनम् ᵛऋष्वं महान्तं ᵛरथं ᵛप्र ᵛभरः प्रापयः । अपि च ᵛयुध्यन्तं शत्रुभिः सह युद्धं कुर्वन्तं ᵛदशद्युं दश दिवसा युध्यतो[2] यस्य गताः तं ᵛवृषभम् एतदाख्यं राजानम् ᵛआवः युद्धादपीपलः । किंच ᵛत्वं ᵛवेतसवे एतन्नाम्ने राज्ञे ᵛसचा सहायभूतः सन् ᵛतुग्रम् असुरम् ᵛअहन् हतवानसि । वेतसुर्नाम कश्चिदसुरः । अत्र तस्मादन्योऽसावुच्यते । यद्वा । वेतसव इति तृतीयार्थे चतुर्थी । वेतसुनासुरेण सहितं तुग्रं हतवानसि । तथा च मन्त्रान्तरे श्रूयते—'अहं पितेव वेतसूँरभिष्टये तुग्रं कुत्साय स्मदिभं च रन्धयम्' (ऋ. सं. १०. ४९. ४) इति । हे ᵛइन्द्र ᵛत्वं ᵛगृणन्तं त्वां स्तुवन्तं ᵛतुजिम् एतदाख्यं राजानं ᵛतूतोः अवर्धयः ॥

त्वं तदुक्थमिन्द्र बर्हणा कः प्र यच्छता सहस्रा शूर दर्षि ।
अव गिरेर्दासं शम्बरं हन्प्रावो दिवोदासं चित्राभिरूती ॥ ५ ॥

त्वम् । तत् । उक्थम् । इन्द्र । बर्हणा । करिति कः । प्र । यत् । शता । सहस्रा । शूर । दर्षि ।
अव । गिरेः । दासम् । शम्बरम् । हन् । प्र । आवः । दिवःऽदासम् । चित्राभिः । ऊती ॥ ५ ॥

हे ᵛइन्द्र ᵛबर्हणा बर्हणः शत्रूणां हिंसकः ᵛत्वम् ᵛउक्थं प्रशस्यं ᵛतत् कर्म ᵛकः अकरोः । किं तत्कर्मेत्युच्यते । हे ᵛशूर वीरेन्द्र त्वं ᵛशता शतानि ᵛसहस्रा सहस्राणि च शम्बरस्य अनुचरान् भटान् ᵛप्र ᵛदर्षि विदारितवानसि । तथा च निगमान्तरे—'अध्वर्यवो यः शतं शम्बरस्य' (ऋ. सं. २. १४. ६) इति । तथा त्वं ᵛदासं यज्ञादिकर्मणामुपक्षपयितारं ᵛगिरेः पर्वताङ्गिर्गते ᵛशम्बरम् असुरम् ᵛअव ᵛहन् अवावधीः । तथापि[3] श्रूयते—'यः शम्बरं पर्वतेषु क्षियन्तम्' (ऋ. सं. २. १२. ११) इति । किंच ᵛचित्राभिः विचित्राभिः[4] ᵛऊती ऊतिभिः रक्षाभिः ᵛदिवोदासं राजानं ᵛप्रावः प्रकर्षेण पालयसि स्म ॥ ॥ २१ ॥

त्वं श्रद्धाभिर्मन्दसानः सोमैर्दभीतये चुमुरिमिन्द्र सिष्वप् ।
त्वं रजिं पिठीनसे दशस्यन्षष्टिं सहस्रा शच्या सचाहन् ॥ ६ ॥

त्वम् । श्रद्धाभिः । मन्दसानः । सोमैः । दभीतये । चुमुरिम् । इन्द्र । सिस्वप् ।
त्वम् । रजिम् । पिठीनसे । दशस्यन् । षष्टिम् । सहस्रा । शच्या । सचा । अहन् ॥ ६ ॥

---

१. ख-ङ्ग-त-न-भ-र-छेदनार्थस्य । २. ख-ङ्ग-न-भ-र-श-युध्यन्तो; त-युद्धन्तो । ३. ख-न-भ-तथा च । ४. घ-श-विचित्राभिर्हे इन्द्र त्वमाभिः ।

हे ᵛइन्द्र ᵛश्रद्धाभिः श्रद्धापुरःसरमादरातिशयेनानुष्ठितैः कर्मभिः ᵛमन्दसानः मोदमानः। यच्छ्रद्धया युक्तं कर्म तत्सारवत् भवति। तथा च श्रूयते—'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छा. उ. १. १. १०) इति। ᵛसोमैः च मन्दसानः ᵛत्वं ᵛदभीतये एतन्नामकाय राजर्षये ᵛचुमुरिम् एतदाख्यमसुरं ᵛसिष्वप् अस्वापयः। अवधीरित्यर्थः। किंच हे इन्द्र ᵛत्वं ᵛपिठीनसे एतन्नामकाय ᵛरजिम् एतदाख्यां कन्यां वा राज्यं वा ᵛदशस्यन् प्रयच्छन् ᵛशच्या प्रज्ञया ᵛषष्टिं षष्टिसंख्याकानि ᵛसहस्रा भटानां सहस्राणि ᵛसचा सह युगपदेव ᵛअहन् अवधीः॥

अहं चन तत्सूरिभिरानश्यां तव ज्यायं इन्द्र सुम्नमोजः।
त्वया यत्स्तर्वन्ते सधवीर वीरास्त्रिवरूथेन नहुषा शविष्ठ॥ ७॥

अहम्। चन। तत्। सूरिऽभिः। आनश्याम्। तव। ज्यायः। इन्द्र। सुम्नम्। ओजः। त्वया। यत्। स्तर्वन्ते। सधऽवीर। वीराः। त्रिऽवरूथेन। नहुषा। शविष्ठ॥ ७॥

हे ᵛसधवीर वीरैः सहित ᵛशविष्ठ बलवत्तमेन्द्र ᵛवीराः स्तोतारः ᵛत्रिवरूथेन। त्रीणि वरूथान्यावरकाणि भुवनानि यस्य तेन। ᵛनहुषा शत्रूणां बन्धकेन[1] ᵛत्वया दत्तं ᵛयत् ᵛसुम्नं सुखम् ᵛओजः बलं च ᵛस्तवन्ते स्तुवन्ति हे ᵛइन्द्र ᵛतव त्वया दत्तं ᵛज्यायः अतिशयेन प्रशस्यं ᵛतत् सुम्नमोजः ᵛअहं ᵛचन अहमपि भरद्वाजः ᵛसूरिभिः मदीयैः स्तोतृभिः सह ᵛआनश्यां प्राप्नुयाम्॥

वयं ते अस्यामिन्द्र द्युम्नहूतौ सखायः स्याम महिन प्रेष्ठाः।
प्रातर्दनिः क्षत्रश्रीरस्तु श्रेष्ठो घने वृत्राणां सनये धनानाम्॥ ८॥

वयम्। ते। अस्याम्। इन्द्र। द्युम्नऽहूतौ। सखायः। स्याम। महिन। प्रेष्ठाः।
प्रातर्दनिः। क्षत्रऽश्रीः। अस्तु। श्रेष्ठः। घने। वृत्राणाम्। सनये। धनानाम्॥ ८॥

हे ᵛमहिन पूजनीय ᵛइन्द्र ᵛते त्वदर्थं ᵛसखायः स्तोतारः ᵛवयम् ᵛअस्यां ᵛद्युम्नहूतौ अस्मिन्[2] धननिमित्ते स्तोत्रे ᵛप्रेष्ठाः अतिशयेन प्रियाः ᵛस्याम भवेम। ᵛप्रातर्दनिः प्रतर्दनो नाम राजा। तस्य पुत्रः ᵛक्षत्रश्रीः एतन्नामको मम याज्यो राजा ᵛश्रेष्ठः ᵛअस्तु सर्वेषामुत्कृष्टो भवतु। किमर्थम्। ᵛवृत्राणां शत्रूणां ᵛघने वधाय च ᵛधनानां वसूनां ᵛसनये संभजनाय च श्रेष्ठोऽस्विति संबन्धः॥ ॥२२॥

'किमस्य मदे' इत्यष्टर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षम्। अनुक्रान्तं च—'किमस्यान्त्या चायमानस्याभ्यावर्तिनो दानस्तुतिः' इति। भरद्वाज ऋषिः। त्रिष्टुप् छन्दः। अन्त्यायास्तु दानस्तुतिरूपत्वात्[3] 'या तेनोच्यते' इति न्यायेन दानमेव देवता। विनियोगो लैङ्गिकः॥

किमस्य मदे किम्वस्य पीताविन्द्रः किमस्य सख्ये चकार।
रणा वा ये निषदि किं ते अस्य पुरा विविद्रे किमु नूतनासः॥ १॥

किम्। अस्य। मदे। किम्। ऊँ इति। अस्य। पीतौ। इन्द्रः। किम्। अस्य। सख्ये। चकार।
रणाः। वा। ये। निऽसदि। किम्। ते। अस्य। पुरा। विविद्रे। किम्। ऊँ इति। नूतनासः॥१॥

---

१. ख-ञ-न-भ-य-बाधकेन। २. ख१-ञ-न-भ-'अस्मिन्' नास्ति ३. ख-ञ-भ-र-°रूपत्वम्।

भरद्वाज ऋषिः फलविलम्बनासहिष्णुः सन् अनयेन्द्रमाक्षिपति । vअस्य सोमस्य vमदे सति vइन्द्रः vकिं vचकार कृतवान् । vकिमु किंच vअस्य सोमस्य vपीतौ पाने सति किं चकार । vअस्य सोमस्य vसख्ये सखित्वे vकिं चकार । पानात् पूर्वम् इन्द्रः सोमेन सह वसतीत्यर्थः । vअस्य सोमस्य vनिषदि गृहे vरणा vवा vये स्तोतारश्च सन्ति ते स्तोतारः vपुरा पूर्वं हे इन्द्र vते त्वत्तः vकिं vविविद्रे किं लेभिरे । vनूतनासः नूतना इदानींतनाः स्तोतारश्च vकिमु लेभिरे ॥

सदस्य मदे सदस्य पीताविन्द्रः सदस्य सख्ये चकार ।
रणा वा ये निषदि सत्ते अस्य पुरा विविद्रे सदु नूतनासः ॥ २ ॥

सत् । अस्य । मदे । सत् । ऊँ इति । अस्य । पीतौ । इन्द्रः । सत् । अस्य । सख्ये । चकार ।
रणाः । वा । ये । निऽसदि । सत् । ते । अस्य । पुरा । विविद्रे । सत् । ऊँ इति । नूतनासः ॥२॥

एवमाक्षिप्त इन्द्रस्तस्मा ऋषय ईप्सितं धनं प्रददौ । तदनन्तरमृषिरिन्द्रसकाशात् संपूर्णकामः सन् पुरा यान्युपालम्भप्रतिपादकानि वाक्यान्युवाच इदानीं तानि निराकरोति । vइन्द्रः vअस्य सोमस्य vमदे vसत् शुभं कर्म vचकार । vअस्य सोमस्य vपीतौ पाने vसत् शुभं कर्म चकार । vअस्य vसख्ये vसत् शुभं कर्म चकार । vये vरणा vवा स्तोतारश्च ते vनिषदि गृहे । यज्ञगृह इत्यर्थः । vपुरा पूर्वं हे इन्द्र vते त्वत्तः vसत् शुभं कर्म vविविद्रे लेभिरे । vनूतनासः इदानींतनाः स्तोतारः vसदु शुभमेव कर्म लेभिरे ॥

नहि नु ते महिमनः समस्य न मघवन्मघवत्त्वस्य विद्म ।
न राधसोराधसो नूतनस्येन्द्र नकिर्ददृश इन्द्रियं ते ॥ ३ ॥

नहि । नु । ते । महिमनः । समस्य । न । मघऽवन् । मघवत्ऽत्वस्य । विद्म ।
न । राधसःऽराधसः । नूतनस्य । इन्द्र । नकिः । ददृशे । इन्द्रियम् । ते ॥ ३ ॥

हे vमघवन् धनवन्निन्द्र vते त्वदीयस्य vसमस्य समस्तस्य vमहिमनः महिम्नो महिमानं vनहि vविद्म वयं न जानीमः । नुशब्दः पूरणः । तथा vमघवत्त्वस्य त्वदीयस्य धनिकत्वस्य च वयं न जानीमः । vनूतनस्य स्तुत्यस्य vराधसोराधसः त्वदीयं सर्वं धनं च न जानीमः । सर्वत्र द्वितीयार्थे षष्ठी । हे vइन्द्र vते त्वदीयम् vइन्द्रियं सामर्थ्यं vनकिर्ददृशे केनापि न दृश्यते ॥

एतत्यत्ते इन्द्रियमचेति येनावधीर्वरशिखस्य शेषः ।
वज्रस्य यत्ते निहतस्य शुष्मात्स्वनाच्चिदिन्द्र परमो ददार ॥ ४ ॥

एतत् । त्यत् । ते । इन्द्रियम् । अचेति । येन । अवधीः । वरऽशिखस्य । शेषः ।
वज्रस्य । यत् । ते । निऽहतस्य । शुष्मात् । स्वनात् । चित् । इन्द्र । परमः । ददार ॥ ४ ॥

हे इन्द्र vयेन वीर्येण vवरशिखस्य । वरशिखो नाम कश्चिदसुरः । तस्य vशेषः शेषांसि पुत्रान् । शेष इत्यपत्यनामैतत् । vअवधीः अहिंसीः vते त्वदीयम् vएतत्यत् तदिदम् vइन्द्रियं वीर्यम्

vअचेति अस्माभिरज्ञायि । हे vइन्द्र vयत् यस्मात् vशुष्मात् बलात् vनिहतस्य प्रेरितस्य त्वदीय-vवज्रस्य vस्वनाच्चित् ध्वनेरेव vपरमः वरशिखस्य पुत्राणां मध्ये बलाद्याधिक्येनोत्कृष्टः[1] कश्चित् पुत्रः vददार अदीर्यत ॥

वधीदिन्द्रो वरशिखस्य शेषोऽभ्यावर्तिने चायमानाय शिक्षन् ।
वृचीवतो यद्धरियूपीयायां हन्पूर्वे अर्धे भियसापरो दर्त् ॥ ५ ॥

वधीत् । इन्द्रः । वरऽशिखस्य । शेषः । अभिऽआवर्तिने । चायमानाय । शिक्षन् ।
वृचीवतः । यत् । हरिऽयूपीयायाम् । हन् । पूर्वे । अर्धे । भियसा । अपरः । दर्त् ॥ ५ ॥

पूर्वोक्तमेवार्थमनया विवृणोति । अयम् vइन्द्रः vचायमानाय चयमानस्य राज्ञः पुत्राय vअभ्या-वर्तिने एतन्नामकाय राज्ञे vशिक्षन् ईप्सितानि वसूनि प्रयच्छन् vवरशिखस्य असुरस्य vशेषः पुत्रान् vवधीत् अवधीत् । अहिंसीत् । वरशिखस्य पुत्रान् कथमवधीदित्युच्यते । vयत् यदा अयमिन्द्रः vहरियूपीयायाम् । हरियूपीया नाम काचिन्नदी काचिन्नगरी वा । तस्यां vपूर्वे vअर्धे प्राग्भागे स्थितान् vवृचीवतः । वृचीवान् नाम वरशिखस्य कुलोत्पन्नः पूर्वः । तद्गोत्रजान् वरशिखस्य पुत्रान् vहन् अवधीत् तदा vअपरः अपरभागे स्थितः वरशिखस्य श्रेष्ठः[2] पुत्रः vभियसा भीत्या vदर्त् दीर्णोऽभूत ॥ ॥ २३ ॥

त्रिंशच्छतं वर्मिणं इन्द्र साकं यव्यावत्यां पुरुहूत श्रवस्या ।
वृचीवन्तः शरवे पत्यमानाः पात्रा भिन्दाना न्यर्थान्यायन् ॥ ६ ॥

त्रिंशत्ऽशतम् । । वर्मिणः । इन्द्र । साकम् । यव्याऽवत्याम् । पुरुऽहूत । श्रवस्या ।
वृचीवन्तः । शरवे । पत्यमानाः । पात्रा । भिन्दानाः । निऽअर्थानि । आयन् ॥ ६ ॥

इदानीमुक्तमेवार्थं विवृणोति । हे vपुरुहूत बहुभिराहूत vइन्द्र vश्रवस्या श्रवस्यया । श्रवोऽन्नं यशो वा । तद्वाञ्छया[3] । युद्धे त्वां जित्वा अन्नं प्राप्नुयाम यशो वा प्राप्नुयामेति कामयमानाः vशरवे हिंसायै । त्वां हिंसितुमित्यर्थः । vपत्यमानाः अभिपतन्तोऽभिगच्छन्तः vपात्रा पात्राणि यज्ञसाधनानि vभिन्दानाः भिन्दन्तः vवर्मिणः कवचभृतः vत्रिंशच्छतं त्रिंशदधिकशतसंख्याकाः vवृचीवन्तः वरशिखस्य पुत्राः vसाकं युगपदेव vयव्यावत्यां पूर्वोक्तायां हरियूपीयायां vन्यर्थानि अर्थशून्यानि vआयन् अगच्छन्[4] । विनाशं प्रापुरित्यर्थः ॥

यस्य गावावरुषा सूयवस्यू अन्तरू षु चरतो रेरिहाणा ।
स सृञ्जयाय तुर्वशं परादाद्वृचीवतो दैववाताय शिक्षन् ॥ ७ ॥

यस्य । गावौ । अरुषा । सुयवस्यू इति सुऽयवस्यू । अन्तः । ऊँ इति । सु । चरतः । रेरिहाणा ।
सः । सृञ्जयाय । तुर्वशम् । परा । अदात् । वृचीवतः । दैवऽवाताय । शिक्षन् ॥ ७ ॥

---

१. ज्ञ-त-बलाधिक्येनो० । २. ज्ञ-त-र-शेषः । ३. ख-ञ्च-न-भ-य-तदिच्छया । ४. ख-घ-ञ-न-भ-य-आगच्छन् ; श-गच्छन् ।

vअरुषा अरुषौ रोचमानौ vसुयवस्यू[1] शोभनतृणानीच्छन्तौ vरेरिहाणा लेलिहानौ पुनःपुनः घासमास्वादयन्तौ । यद्वा । गतिविशेषं कुर्वन्तौ । vयस्य इन्द्रस्य संबन्धिनौ vगावौ अश्वौ vअन्तः द्यावापृथिव्योर्मध्ये अन्तरिक्षे[2] vचरतः गच्छतः । vउ vसु इतीमौ पूरणौ । vसः इन्द्रः vसृञ्जयाय एतन्नामकाय राज्ञे vतुर्वशं राजानं vपरादात् प्रददौ । किं कुर्वन् । vवृचीवतः वारशिखान् vदैववाताय देववातवंशोत्पन्नायाभ्यावर्तिने राज्ञे vशिक्षन् वशीकुर्वन् । तेषां धनानि प्रयच्छन्निति वा ॥

द्व्याँ अग्ने रथिनो विंशतिं गा वधूमतो मघवा मह्यं सम्राट् ।
अभ्यावर्ती चायमानो ददाति दूणाशेयं दक्षिणा पार्थवानाम् ॥ ८ ॥

द्व्यान् । अग्ने । रथिनः । विंशतिम् । गाः । वधूऽमतः । मघऽवा । मह्यम् । सम्ऽराट् ।
अभिऽआवर्ती । चायमानः । ददाति । दुःऽनशा । इयम् । दक्षिणा । पार्थवानाम् ॥ ८ ॥

अधुना भरद्वाजः स्वस्मा अभ्यावर्तिना दत्तं धनजातमग्नये प्रकथयति । हे vअग्ने vमघवा धनवान् प्रभूतदानो वा vसम्राट् राजसूययाजी vचायमानः चयमानस्य पुत्रः vअभ्यावर्ती एतदाह्वयो राजा vरथिनः रथसहितान् vवधूमतः स्त्रीयुक्तान् vद्व्यान् मिथुनभूतान् vविंशतिं विंशतिसंख्याकान् vगाः पशून् vमह्यं vददाति प्रायच्छत् । vपार्थवानां पृथोर्वंशजस्याभ्यावर्तिनो राज्ञः संबन्धिनी । पूजार्थं बहुवचनम् । vइयं vदक्षिणा vदुर्नशा केनापि नाशयितुमशक्या भवति ॥ ॥ २४ ॥

'आ गावः' इत्यष्टर्चं पञ्चमं सूक्तम् । अत्रेयमनुक्रमणिका—'आ गावो गव्यं द्वितीयैन्द्री वान्त्यश्च पादोऽन्त्यानुष्टुप् जागतस्तृचो द्वितीयादिः' इति । भरद्वाज ऋषिः । 'इन्द्रो यज्वने' इत्याद्यस्तृचो जागतः । 'उपेदम्' इति अन्त्यानुष्टुप् शिष्टाश्चत्वारस्त्रिष्टुभः । कृत्स्नस्य गौर्देवता द्वितीयायाः सूक्तान्त्यपादस्य च विकल्पेनेन्द्रो देवता । गवामुपस्थान एतत् सूक्तम् । सूत्रितं च—'आगावीयमेके' (आश्व. गृ. २. १०. ७) इति ॥

आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्वस्मे ।
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः ॥ १ ॥

आ । गावः । अग्मन् । उत । भद्रम् । अक्रन् । सीदन्तु । गोऽस्थे । रणयन्तु । अस्मे इति ।
प्रजाऽवतीः । पुरुऽरूपाः । इह । स्युः । इन्द्राय । पूर्वीः । उषसः । दुहानाः ॥ १ ॥

vगावः vआ vअग्मन् । अस्मदीयं गृहमागच्छन्तु । vउत अपि च vभद्रं भजनीयं शुभम् vअक्रन् कुर्वन्तु । तथा vगोष्ठे अस्मदीये गवां स्थाने vसीदन्तु उपविशन्तु । तदनन्तरम् vअस्मे अस्मासु vरणयन्तु रमन्ताम् । अपि च vइह अस्मिन् गोष्ठे vपुरुरूपाः नानावर्णा गावः vप्रजावतीः प्रजावत्यः संततिसहिताः vपूर्वीः बह्व्यः vइन्द्राय इन्द्रार्थम् vउषसः उषःकालान् प्रति vदुहानाः दोग्ध्र्यः vस्युः भवेयुः ॥

---

१. घ-ज-ण-श-सूयवस्यू । २. ख-झ-न-भ-'अन्तरिक्षे' नास्ति ।

इन्द्रो यज्वने पृणते च शिक्षत्युपेदेदाति न स्वं मुषायति ।
भूयोभूयो रयिमिदस्य वर्धयन्नभिन्ने खिल्ये नि दधाति देवयुम् ॥ २ ॥

इन्द्रः । यज्वने । पृणते । च । शिक्षति । उप । इत् । ददाति । न । स्वम् । मुषायति ।
भूयःऽभूयः । रयिम् । इत् । अस्य । वर्धयन् । अभिन्ने । खिल्ये । नि । दधाति । देवऽयुम् ॥ २ ॥

vइन्द्रो vयज्वने यजनशीलाय vपृणते vच स्तुतिभिः प्रीणयित्रे च स्तोत्रे vशिक्षति अपेक्षितं धनं ददाति । न केवलं सकृदेव दानम् अपि तु सर्वदैवेत्याह vउपेदेदाति उपेत्य सर्वदा ददात्येव । यज्वनः स्तोतुश्च vस्वं स्वभूतं धनं vन vमुषायति कदाचिदपि नापहरति । अपि च vअस्य उभयविधस्य vरयिं धनमात्मना दत्तं vभूयोभूयः पुनःपुनः vवर्धयन् vइत् वृद्धिं प्रापयन्नेव vदेवयुं देवमिन्द्रमात्मन इच्छन्तं तं जनम् vअभिन्ने शत्रुभिरभेद्ये vखिल्ये । खिलमप्रतिहतं स्थानम् । तदेव खिल्यम् । स्वार्थिको यत् । अन्यैर्गन्तुमशक्ये स्थले vनि vदधाति निक्षिपति । निवासयतीत्यर्थः ॥

दैवीनां हविःषु ' न ता नशन्ति ' ' न ता अर्वा ' इति गोदेवताया याज्यापुरोनुवाक्ये (आश्व. श्रौ. ६. १४) । गोस्तोमेऽपि मरुत्वतीयनिष्केवल्ययोरेते मूक्तमुखीये । सूत्रितं च—' न ता अर्वा रेणुककाटो अश्नुते न ता नशन्ति न दभाति तस्करः ' (आश्व. श्रौ. ९. ५) इति ॥

न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिरा दधर्षति ।
देवाँश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह ॥ ३ ॥

न । ताः । नशन्ति । न । दभाति । तस्करः । न । आसाम् । आमित्रः । व्यथिः । आ । दधर्षति ।
देवान् । च । याभिः । यजते । ददाति । च । ज्योक् । इत् । ताभिः । सचते । गोऽपतिः । सह ॥ ३ ॥

vताः गावः vन vनशन्ति । अस्मत्सकाशान्न नश्यन्तु । किंच vतस्करः चोरोऽपि vन vदभाति । अस्मदीया गा न हिंस्यात् । तथा vआमित्रः अमित्रस्य शत्रोः संबन्धि vव्यथिः शस्त्रम् vआसाम् इमा गाः vन vआ vदधर्षति नाक्रामतु । vगोपतिः एवंभूतानां गवां स्वामी यजमानः vयाभिः गोभिः vदेवांश्च इन्द्रादीनुद्दिश्य vयजते यजनं करोति । या गा इन्द्रार्थं vददाति vच प्रयच्छति च vताभिः तादृशीभिर्गोभिः vसह vज्योगित् चिरकालमेव vसचते संगच्छताम् ॥

न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रमुप यन्ति ता अभि ।
उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः ॥ ४ ॥

न । ताः । अर्वा । रेणुऽककाटः । अश्नुते । न । संस्कृतऽत्रम् । उप । यन्ति । ताः । अभि ।
उरुऽगायम् । अभयम् । तस्य । ताः । अनु । गावः । मर्तस्य । वि । चरन्ति । यज्वनः ॥ ४ ॥

vरेणुककाटः रेणुकस्य रेणोः पार्थिवस्य रजस उन्नेदकः । काटिर्भेदनकर्मा । vअर्वा युद्धार्थमागतोऽश्वः vताः गाः vन vअश्नुते न प्राप्नुयात्[1] । तथा vताः गावः vसंस्कृतन्न विशासनादिसंस्कारं vन vअभि vउप vयन्ति नाभिगच्छन्तु । अपि च vताः vगावः vयज्वनः यागशीलस्य vतस्य vमर्तस्य मनुष्यस्य vउरुगायं विस्तीर्णगमनम् vअभयं भयवर्जितं प्रदेशम्[2] vअनु उद्दिश्य vवि vचरन्ति विशेषेण गच्छन्तु ॥

गावो॒ भगो॒ गाव॒ इन्द्रो॑ मे अच्छा॑न् गाव॒ः सोम॑स्य प्रथ॒मस्य॑ भ॒क्षः ।
इ॒मा या गाव॒ः स ज॑नास॒ इन्द्रं॑ इ॒च्छामी॑द्धृ॒दा मन॑सा चि॒दिन्द्र॑म् ॥ ५ ॥

गावः । भगः । गावः । इन्द्रः । मे । अच्छान् । गावः । सोमस्य । प्रथमस्य । भक्षः ।
इमाः । याः । गावः । सः । जनासः । इन्द्रः । इच्छामि । इत् । हृदा । मनसा । चित् । इन्द्रम् ॥५॥

vगावः एव मह्यं vभगः धनं भवन्तु । vइन्द्रः च vमे मह्यं vगावः गाः vअच्छान् यच्छतु । vगावः[3] vप्रथमस्य हविषां श्रेष्ठस्य vसोमस्य vभक्षः भक्षणं भवन्तु । अभिषुतस्य हि सोमस्य गव्येनाज्यादिना संस्क्रियमाणत्वात् । हे vजनासः जनाः vइमाः एवंभूताः vया vगावः सन्ति vसः । ता इत्यर्थः । ता एव गावः vइन्द्रः भवन्ति । दधिघृतादिरूपेण इन्द्रस्याप्यायनत्वात् । एवंभूतम् vइन्द्रं vहृदा श्रद्धायुक्तेन vमनसा vचित् । चिदित्यप्यर्थे । vइच्छामीत् कामय एव । साधनभूताभिर्गोभिः एवंभूतमिन्द्रं यष्टुमिच्छामीत्यर्थः ॥

यू॒यं गावो॒ मेद॑यथा कृ॒शं चि॑दश्री॒रं चि॒त्कृणु॑था सु॒प्रती॑कम् ।
भ॒द्रं गृ॒हं कृ॑णुथ भद्रवाचो बृ॒हद्वो॑ वय उच्यते स॒भासु॑ ॥ ६ ॥

यूयम् । गावः । मेदयथ । कृशम् । चित् । अश्रीरम् । चित् । कृणुथ । सुऽप्रतीकम् ।
भद्रम् । गृहम् । कृणुथ । भद्रऽवाचः । बृहत् । वः । वयः । उच्यते । सभासु ॥ ६ ॥

हे vगावः vयूयं vमेदयथ स्नेहयथ । आप्यायनं कुरुथेत्यर्थः । तथा vकृशं vचित् क्षीणमपि vअश्रीरं vचित् अश्लीलमपि vसुप्रतीकं शोभनाङ्गं vकृणुथ कुरुथ । हे vभद्रवाचः कल्याणध्वन्युपेता गावः अस्मदीयं vगृहं vभद्रं कल्याणं vकृणुथ । गोभिरुपेतं कुरुथ । vसभासु यागपरिषत्सु हे गावः युष्माकं vबृहत् महत् vवयः अन्नम्[4] vउच्यते[4] । सर्वैर्दीयत इत्यर्थः ॥

प्र॒जाव॑तीः सू॒यव॑सं रि॒शन्ती॑ः शु॒द्धा अ॒पः सु॒प्रपा॑णे पिबन्तीः ।
मा व॑ः स्ते॒न ई॑शत॒ माघ॑शंस॒ः परि॑ वो हे॒ती रु॒द्रस्य॑ वृज्याः ॥ ७ ॥

प्रजाऽवतीः । सुऽयवसम् । रिशन्तीः । शुद्धाः । अपः । सुऽप्रपाने । पिबन्तीः ।
मा । वः । स्तेनः । ईशत । मा । अघऽशंसः । परि । वः । हेतिः । रुद्रस्य । वृज्याः ॥७॥

---

१. ख–प्राप्नोतु; न-भ–प्राप्नोत् । २. ख-ज्ञ-त२-भ-र-श–प्रवेशम् । ३. ख-ज्ञ-ज्ञ-त-न-भ-र–'गावः' नास्ति । ४. ख-ज्ञ-न-भ-य–अन्नं भक्षणमुच्यते; ज्ञ–अन्नमुच्यते समवेतं क्रियते; त-र–अन्नम् ।

हे गावो यूयं vप्रजावतीः प्रजावत्यो वत्साभिर्युक्ता भवतेति शेषः । vसुयवसं शोभनतृणं vरिशन्तीः रिशन्त्यो भक्षणार्थं हिंसन्त्यो भवत । vसुप्रपाणे सुखेन पातव्ये तटाकादौ vशुद्धाः निर्मलाः vअपः उदकानि vपिबन्तीः पिबन्त्यश्च भवत । vवः युष्मान् vस्तेनः तस्करः[1] vमा vईशत मेशिष्ट । ईश्वरो मा भूत् । तथापि vअघशंसः व्याघ्रादिः शत्रुः vमा ईशत । अपि च vवः युष्मान् vरुद्रस्य कालात्मकस्य परमेश्वरस्य vहेतिः आयुधं च[2] vपरि vवृज्याः परिवृणक्तु । परिहरतु[3] ॥

उपेदमुपपर्चनमासु गोषूप पृच्यताम् । उप ऋषभस्य रेतस्युपेन्द्र तव वीर्ये ॥ ८ ॥

उप । इदम् । उपऽपर्चनम् । आसु । गोषु । उप । पृच्यताम् ।
उप । ऋषभस्य । रेतसि । उप । इन्द्र । तव । वीर्ये ॥ ८ ॥

vआसु vगोषु vइदमुपपर्चनम् आप्यायनम् vउप vपृच्यतां संपृच्यताम् । हे vइन्द्र vतव vवीर्ये स्वदीयवीर्ये निमित्ते vऋषभस्य गवां गर्भमादधानस्य वृषभस्य vरेतसि इदमुपपर्चनमाप्यायनम्[4] । गोषु हि आप्यायितासु सतीषु तत्संबन्धिक्षीरादिहविर्द्वारेणेन्द्र आप्यायितो भवतीत्यर्थः । vउप इति पुनर्वचनं पादभेदानां[5] पूरणार्थमिति ॥ ॥ २५ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके षष्ठोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ सप्तमोऽध्याय आरभ्यते । षष्ठस्य मण्डलस्य तृतीयेऽनुवाके पञ्च सूक्तानि व्याकृतानि । 'इन्द्रं वः' इति षड्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । अनुक्रम्यते च—'इन्द्रं षट्' इति । गतो विनियोगः ॥

इन्द्रं वो नरः सख्याय सेपुर्महो यन्तः सुमतये चकानाः ।
महो हि दाता वज्रहस्तो अस्ति महामु रण्वमवसे यजध्वम् ॥ १ ॥

इन्द्रम् । वः । नरः । सख्याय । सेपुः । महः । यन्तः । सुऽमतये । चकानाः ।
महः । हि । दाता । वज्रऽहस्तः । अस्ति । महाम् । ऊँ इति । रण्वम् । अवसे । यजध्वम् ॥ १ ॥

हे यजमानाः vवः युष्माकं संबन्धिनः vनरः नेतार ऋत्विजः vसख्याय सख्यिभावार्थम्[6] vइन्द्रं vसेपुः परिचरन्ति स्पृशन्ति वा । कथंभूताः । vमहः महान्ति स्तोत्राणि vयन्तः उपयन्तः प्राप्नुवन्तः ।

---

१. ख-ञ-न-भ-र-चौरः; य-चोरः । २. ख-ञ-त-न-भ-य-र-च मा । ३. ख-ञ-त-न-भ-य-र-न परिहरतु । ४. ख-ञ-ञ-त-न-भ-य-र-°माप्यायताम् । ५. ख-ञ-न-भ-पादभेदेन; ञ-पादभेदात्; त-र-पादभेदान् । ६. ञ-त-सख्यिभावार्थे ।

कुर्वन्त इत्यर्थः । तथा vसुमतये । सुमतिः शोभनानुग्रहात्मिका तदीया बुद्धिः । तां vचकानाः कामयमानाः ॥ 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानसंज्ञा । चकाना इति कामयतेश्छान्दसं रूपम् ॥ यद्वा । महो महत्कर्म यन्तः[1] अनुतिष्ठन्तः सुमतये सुमतिं शोभनां स्तुतिं चकानाः शब्दयन्तः ॥ 'कै गै शब्दे' इत्यस्माल्लिटः कानचि रूपम् ॥ vहि यस्मात् vवज्रहस्तः वज्रपाणिरिन्द्रः vमहः महतो धनस्य vदाता vअस्ति भवति तस्मात् vरण्वं रमणीयं vमहामु महान्तमेव vअवसे रक्षणाय vयजध्वं हविर्भिः पूजयत ॥

आ यस्मिन्हस्ते नर्या मिमिक्षुरा रथे हिरण्ययें रथेष्ठाः ।
आ रुक्मयो गभस्त्योः स्थूरयोराध्वन्नश्वासो वृषणो युजानाः ॥ २ ॥

आ । यस्मिन् । हस्ते । नर्याः । मिमिक्षुः । आ । रथे । हिरण्यये । रथेऽस्थाः ।
आ । रुक्मयः । गभस्त्योः । स्थूरयोः । आ । अध्वन् । अश्वासः । वृषणः । युजानाः ॥ २ ॥

vयस्मिन् इन्द्रे vनर्याः नृभ्यो हिता रायः vआ vमिमिक्षुः आसिच्यन्ते आपूर्यन्ते । व्यत्ययेन कर्मणि कर्तृप्रत्ययः । इन्द्रे कुत्रेति चेत् । vहस्ते तदीये बाहौ । यद्वा । एतत्समानाधिकरणमिन्द्रस्य विशेषणम् । हस्ते हन्तर्यस्मिन्निन्द्र इत्यर्थः । उक्तं[2] यास्केन–'हस्तो हन्तेः प्राग्धृहनने' (निरु. १.७) इति । यद्वा । ईदृशे यस्मिन्निन्द्रे वर्तमाना नृहिता राय आमिमिक्षुः आसिञ्चन्ति आपूरयन्ति स्तोतॄन् । यश्चेन्द्रः vरथेष्ठाः रथे स्थाता तत्स्वभावः सन् vहिरण्यये सुवर्णमये vरथे vआ तिष्ठति । यद्वा । रथेष्ठा रथेऽवस्थिता रायो धनानि हिरण्मये रथे तिष्ठन् य इन्द्र आ सिञ्चति अभिवर्षति । यस्य च vस्थूरयोः स्थूलयोर्विस्तृतयोः vगभस्त्योः । बाहुनामैतत् । बाह्वोः vरुक्मयः अभीशवः vआ[3] सिच्यन्ते आयम्यन्ते[4] । यस्य च vअश्वासः अश्वाः vवृषणः सेक्तारः युवानः vयुजानाः रथे युज्यमानाः vअध्वन् अध्वनि मार्गे vआ मिमिक्षुः आसिञ्चन्ति आपूरयन्ति । आगच्छन्तीत्यर्थः । तमिन्द्रं स्तुम इति शेषः ॥

श्रिये ते पादा दुव आ मिमिक्षुर्धृष्णुर्वज्री शवसा दक्षिणावान् ।
वसानो अत्कं सुरभिं दृशे कं स्वर्ण नृतविषिरो बभूथ ॥ ३ ॥

श्रिये । ते । पादा । दुवः । आ । मिमिक्षुः । धृष्णुः । वज्री । शवसा । दक्षिणऽवान् ।
वसानः । अत्कम् । सुरभिम् । दृशे । कम् । स्वः । न । नृतो इति । इषिरः । बभूथ ॥ ३ ॥

हे इन्द्र vश्रिये ऐश्वर्यार्थं vते त्वदीययोः vपादा पादयोः vदुवः परिचरणम् vआ vमिमिक्षुः आसिञ्चन्ति समर्पयन्ति । भरद्वाजः समर्पयति । व्यत्ययेन बहुवचनम् । यद्वा । ते तव पादौ श्रिये श्रयितुं सेवितुं दुवः परिचरणम् आ सिञ्चन्ति अनुतिष्ठन्ति । यस्त्वं vशवसा बलेन vधृष्णुः शत्रूणां धर्षकः vवज्री वज्रवान् vदक्षिणावान् । दक्षिणा स्तोतृभ्यो दातव्यं धनम् । तद्वान् हे vनृतो नेतरिन्द्र स त्वं vसुरभिं प्रशस्तम् vअत्कं सततगमनशीलमात्मीयं[5] रूपं vदृशे सर्वेषां दर्शनार्थं vवसानः आच्छादयन् vस्वर्ण सूर्य इव vइषिरः गन्तैषणीयो वा vबभूथ भवसि । कमिति पूरकः ॥

---

१. ख-ज्ञ-ञ-त-न-भ-य–यन्तो गच्छन्तः । २. श–उक्तं च । ३. ख-भ–आमिमिक्षुः आसिच्यन्ते आयन्ते; घ–आमिमिक्षुः; ज्ञ–आसिच्यन्ते आश्रीयन्ते; श–आमिमिक्षुः आसिच्यन्ते आश्रीयन्ते । ४. ख-ज्ञ-ञ-त-न-भ-र–संतत० ।

स सोम आमिश्लतमः सुतो भूद्यस्मिन्पक्तिः पच्यते सन्ति धानाः ।
इन्द्रं नरः स्तुवन्तो ब्रह्मकारा उक्था शंसन्तो देववाततमाः ॥ ४ ॥

सः । सोमः । आमिश्लऽतमः । सुतः । भूत् । यस्मिन् । पक्तिः । पच्यते । सन्ति । धानाः ।
इन्द्रम् । नरः । स्तुवन्तः । ब्रह्मऽकाराः । उक्था । शंसन्तः । देववातऽतमाः ॥ ४ ॥

यः सोमो वक्ष्यते ᵛसः ᵛसोमः ᵛसुतः अभिषुतः सन् ᵛआमिश्लतमः आभिमुख्येन मिश्रतमः[1] ᵛभूत् । इन्द्रेणात्यर्थं संगच्छते । ᵛयस्मिन् सोमेऽभिषुते सति ᵛपक्तिः पक्तव्यः पुरोडाशादिः ᵛपच्यते । भृष्टयवाः ᵛधानाः । ताश्च ᵛसन्ति हविरर्थं संस्कृता भवन्ति । यस्मिंश्च सोमेऽभिषुते ᵛनरः नेतारः ᵛब्रह्मकाराः ब्रह्मणः अन्नस्य हविर्लक्षणस्य कर्तारः[2] ऋत्विजः ᵛइन्द्रं स्तोत्रैः ᵛस्तुवन्तः ᵛउक्था उक्थानि शस्त्राणि च ᵛशंसन्तः उच्चारयन्तः ᵛदेववाततमाः देवानतिशयेनोपगता[3] भवन्ति स सोम इन्द्रेण संमिश्रितोऽभूदित्यन्वयः ॥

न ते अन्तः शवसो धाय्यस्य वि तु बाबधे रोदसी महित्वा ।
आ ता सूरिः पृणति तूतुजानो यूथेवाप्सु समीजमान ऊती ॥ ५ ॥

न । ते । अन्तः । शवसः । धायि । अस्य । वि । तु । बाबधे । रोदसी इति । महिऽत्वा ।
आ । ता । सूरिः । पृणति । तूतुजानः । यूथाऽइव । अप्ऽसु । समऽईजमानः । ऊती ॥ ५ ॥

हे इन्द्र ᵛते तव ᵛअस्य उक्तगुणस्य ᵛशवसः बलस्य ᵛअन्तः अवसानं ᵛन ᵛधायि । अत्र केवलोऽपि दधातिरवपूर्वार्थो द्रष्टव्यः । नावाधायि । अस्माभिर्नाज्ञायीत्यर्थः । यद्बलं ᵛरोदसी द्यावापृथिव्यौ ᵛमहित्वा महत्त्वेन ᵛतु क्षिप्रं ᵛवि ᵛबाबधे यस्माद्बलात् द्यावापृथिव्यौ बिभीत इत्यर्थः । ᵛता तद्बलं ᵛसूरिः स्तोता ᵛतूतुजानः त्वरितः सन् ᵛऊती ऊत्या तर्पकेण हविषा ᵛसमीजमानः सम्यग्यजन् ᵛआ ᵛपृणति आपूरयति । तत्र दृष्टान्तः । ᵛयूथेव ᵛअप्सु उदकेषु गवां यूथानीव यथा गोपालः अपः पाययन्निस्तर्पयति तद्वत् ॥

एवेदिन्द्रः सुहव ऋष्वो अस्तूती अनूती हिरिशिप्रः सत्वा ।
एवा हि जातो असमात्योजाः पुरू च वृत्रा हनति नि दस्यून् ॥ ६ ॥

एव । इत् । इन्द्रः । सुऽहवः । ऋष्वः । अस्तु । ऊती । अनूती । हिरिऽशिप्रः । सत्वा ।
एव । हि । जातः । असमातिऽओजाः । पुरु । च । वृत्रा । हनति । नि । दस्यून् ॥ ६ ॥

ᵛएव एवमुक्तेन प्रकारेण ᵛऋष्वः महान् ᵛइन्द्रः ᵛसुहवः ᵛअस्तु सुखेनाह्वातव्यो[4] भवतु । ᵛइत् इति पूरणः । ᵛहिरिशिप्रः । शिप्रे हनू नासिके वा । हरितवर्णे शिप्रे यस्य तादृश इन्द्रः ᵛऊती ऊत्यागमनेन ᵛअनूती अनूत्यानागमनेन वा ᵛसत्वा गमयिता भवति धनानाम् । स्वयमागतोऽनागतोऽपि

---

१. ख-झ-भ-य–मिश्रिततमो; घ-श–मिश्रिवततमो । २. श–काराः कर्तारः । ३. ख-घ-भ–°नोपगन्तारो । ४. य–सुखेन ह्वातव्यो ।

स्तोतृभ्यो धनं प्रयच्छतीत्यर्थः । ᵛएवा ᵛहि एवं हि ᵛजातः प्रादुर्भूतोऽयमिन्द्रः ᵛअसमात्योजाः असमाति असमानम् अनुपमम् उत्कृष्टतरमोजो बलं यस्य तादृशः सन् ᵛपुरु पुरूणि बहूनि ᵛच ᵛवृत्रा वृत्राण्यावरकाणि रक्षःप्रभृतीनि ᵛहनति हिनस्तु । तथा ᵛदस्यून् उपक्षपयितॄन् शत्रूंश्च ᵛनि हन्तु ॥ ॥ १ ॥

'भूय इत्' इति पञ्चर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । 'भूयः पञ्च' इत्यनुक्रान्तम् । अग्निष्टोमे माध्यंदिनसवनेऽच्छावाकशस्त्र एतत्सूक्तं शंसनीयम् । सूत्रितं च—'उदिन्वस्य रिच्यते भूय इत्' (आश्व. श्रौ. ५·१६) इति । महाव्रतेऽपि निष्केवल्य एतत्सूक्तम् । तथैव पञ्चमारण्यके सूत्रितं—'भूय इद्वावृधे वीर्याय नृणामु त्वा' (ऐ. आ. ५· १·६) इति ॥

भूय इद्वावृधे वीर्यायँ एको अजुर्यो दयते वसूनि ।
प्र रिरिचे दिव इन्द्रः पृथिव्या अर्धमिदस्य प्रति रोदसी उभे ॥ १ ॥

भूयः । इत् । ववृधे । वीर्याय । एकः । अजुर्यः । दयते । वसूनि ।
प्र । रिरिचे । दिवः । इन्द्रः । पृथिव्याः । अर्धम् । इत् । अस्य । प्रति । रोदसी इति । उभे इति ॥ १ ॥

अयमिन्द्रः ᵛभूयः ᵛइत् बहुतरमेव ᵛवावृधे प्रवृद्धोऽभूत् । किमर्थम् । ᵛवीर्याय वीरकर्माणि वृत्रवधादीनि कर्तुम् । ᵛएकः मुख्यः ᵛअजुर्यः जरयितुमशक्यः स च ᵛइन्द्रः ᵛवसूनि धनानि ᵛदयते स्तोतृभ्यो ददाति । तथा ᵛदिवः द्युलोकात् ᵛपृथिव्याः भूमेश्चायमिन्द्रः ᵛप्र ᵛरिरिचे अतिरिच्यते । किंच ᵛअस्य इन्द्रस्य ᵛउभे ᵛरोदसी द्यावापृथिव्यौ ᵛअर्धमित् अर्धमेव ᵛप्रति । अस्येन्द्रस्यार्धो भागो द्यावापृथिव्योः प्रतिनिधिर्भवतीत्यर्थः ॥

अधा मन्ये बृहदसुर्यमस्य यानि दाधार नकिरा मिनाति ।
दिवेदिवे सूर्यो दर्शतो भूद्वि सद्मान्युर्विया सुक्रतुर्धात् ॥ २ ॥

अध । मन्ये । बृहत् । असुर्यम् । अस्य । यानि । दाधार । नकिः । आ । मिनाति ।
दिवेऽदिवे । सूर्यः । दर्शतः । भूत् । वि । सद्मानि । उर्विया । सुऽक्रतुः । धात् ॥ २ ॥

ᵛअध अधुना ᵛअस्य इन्द्रस्य ᵛबृहत् महत् ᵛअसुर्यम् असुरहननकुशलं बलं ᵛमन्ये स्तौमि । मन्यतिः स्तुतिकर्मा । स चेन्द्रः ᵛयानि[1] कर्माणि ᵛदाधार धारयति तानि ᵛनकिः ᵛआ ᵛमिनाति न कश्चिदपि हिनस्ति । कानि पुनस्तानि । उच्यते । ᵛदिवेदिवे प्रतिदिनं वृत्रेणावृतः ᵛसूर्यो ᵛदर्शतः दर्शनीयः ᵛभूत् भवति । आवरकस्यासुरस्य वधेन सूर्यं प्रकाशितवानित्येकं कर्म । ᵛसुक्रतुः शोभनकर्मा स इन्द्रः ᵛसद्मानि भुवनानि ᵛउर्विया उरूणि विस्तीर्णानि ᵛवि ᵛधात् व्यधात् अकार्षीत् । इदमपरं कर्म । एतदादीनि बहूनि कर्माणि कृतवानित्यर्थः ॥

---

१. ख-ज्ञ-ञ्ञ-त-न-भ-य-र—यानि च ।

अद्या चिन्नू चित्तदपो नदीनां यदाभ्यो अरदो गातुमिन्द्र ।
नि पर्वता अद्मसदो न सेदुस्त्वया दृळ्हानि सुक्रतो रजांसि ॥ ३ ॥

अद्य । चित् । नु । चित् । तत् । अपः । नदीनाम् । यत् । आभ्यः । अरदः । गातुम् । इन्द्र ।
नि । पर्वताः । अद्मऽसदः । न । सेदुः । त्वया । दृळ्हानि । सुक्रतो इति सुऽक्रतो । रजांसि ॥३॥

हे [v]इन्द्र [v]अद्या [v]चित् अद्यापि [v]नू [v]चित् पुरापि तव [v]नदीनां संबन्धि [v]तदपः कर्म वर्तते । [v]आभ्यः नदीभ्यः [v]गातुं मार्गम् [v]अरदः प्रवहनार्थं व्यलिख इति [v]यत् कर्म तत्सर्वदानुपक्षीणं सद्वर्तत इत्यर्थः । अपि च त्वदाज्ञया [v]पर्वताः गिरयः [v]नि [v]सेदुः निषण्णाः । उत्पतनं परित्यज्य क्वचिदेव स्थाने नैश्चल्येनोपविष्टा बभूवुः । [v]अद्मसदो [v]न । अद्म अदनीयमन्नम्[1] । तदर्थं सीदन्तः पुरुषा इव । यथा ते भोजनार्थं नैश्चल्येनासते तथेत्यर्थः[2] । अतः कारणात् हे [v]सुक्रतो शोभनकर्मन्निन्द्र [v]त्वया [v]रजांसि सर्वे लोकाः [v]दृळ्हानि दृंहितानि[3] स्थिरीकृताः[3] आसन् ॥

सत्यमित्तन्न त्वावाँ अन्यो अस्तीन्द्र देवो न मर्त्यो ज्यायान् ।
अहन्नहिं परिशयानमर्णोऽवासृजो अपो अच्छा समुद्रम् ॥ ४ ॥

सत्यम् । इत् । तत् । न । त्वाऽवान् । अन्यः । अस्ति । इन्द्र । देवः । न । मर्त्यः । ज्यायान् ।
अहन् । अहिम् । परिऽशयानम् । अर्णः । अव । असृजः । अपः । अच्छ । समुद्रम् ॥ ४ ॥

हे [v]इन्द्र वक्ष्यमाणं [v]तत् [v]सत्यमित् सत्यमेव नानृतम् । [v]त्वावान् त्वत्सदृशः [v]अन्यः [v]देवः [v]न [v]अस्ति । त्वत्सदृशोऽन्यः [v]मर्त्यः मनुष्योऽपि [v]न एव विद्यते । [v]ज्यायान् अधिकोऽपि देवो मनुष्यो वा न खल्वस्ति । इति यदृचीयते तत्सत्यमेवेत्यर्थः । अपि च त्वम् [v]अर्णः उदकं [v]परिशयानं परिवृत्य शयानम् [v]अहिम् मेघम् [v]अहन् अवधीः । हत्वा च [v]समुद्रम् अन्तरिक्षं जलधिं वा [v]अच्छ आभिमुख्येन [v]अपः उदकानि [v]अवासृजः अवाङ्मुखतया विसृष्टवानसीत्यर्थः ॥

त्वमपो वि दुरो विषूचीरिन्द्र दृळ्हमरुजः पर्वतस्य ।
राजाभवो जगतश्चर्षणीनां साकं सूर्यं जनयन्द्यामुषासम् ॥ ५ ॥

त्वम् । अपः । वि । दुरः । विषूचीः । इन्द्र । दृळ्हम् । अरुजः । पर्वतस्य ।
राजा । अभवः । जगतः । चर्षणीनाम् । साकम् । सूर्यम् । जनयन् । द्याम् । उषसम् ॥ ५ ॥

हे [v]इन्द्र [v]त्वं [v]दुरः वृत्रेणावृताः[3] [v]अपः [v]विषूचीः विविधमञ्चन्त्यो यथा सर्वतः प्रसृता भवन्ति तथा [v]वि असृजः । यतस्त्वं [v]पर्वतस्य पर्वतवतो मेघस्य [v]दृळ्हं दृढमपां बन्धकप्रदेशम् [v]अरुजः अभाङ्क्षीः । अपि च त्वं [v]जगतः संबन्धिनीनां [v]चर्षणीनां प्रजानां [v]राजाभवः अधिपतिर्भवसि ।

---

१. ख-ङ्ग-त२-भ-सदनीयम० । २. ख-ङ्ग-त२-न-भ-र-इत्यर्थः । ३. ख-भ-दृढानि । ३. ङ्ग-वृत्रेणावृतद्वाराः ।

किं कुर्वन् । ᵛसूर्यं ᵛद्यां द्युलोकम् ᵛउषसं च तमसा प्रावृतम् एतत्त्रितयं[1] ᵛसाकं युगपदेव ᵛजनयन् प्रादुर्भावयन् । प्रकाशयन्नित्यर्थः ॥ ॥ २ ॥

'अभूरेकः' इति पञ्चमष्टमं सूक्तं भरद्वाजस्य सुहोत्रस्यार्षम् । उपान्त्या शक्करी शिष्टाश्चतस्रस्त्रिष्टुभः । इन्द्रो देवता । अनुक्रम्यते च—'अभूरेकः सुहोत्रस्तु चतुर्थी शक्करी' इति । महाव्रतस्य निष्केवल्ये इदमादीन्यष्ट सूक्तानि शंसनीयानि । तथा पञ्चमारण्यकम्—'अभूरेको रयिपते रयीणामित्यष्टौ सूक्तानि' (ऐ. आ. ५. २. २) इति । पृष्ठ्यस्य षष्ठेऽहनि निष्केवल्य इदं सूक्तं निविद्धानम् । सूत्रितं च—'एन्द्र याह्युप नः प्र घा न्वस्याभूरेक इति निष्केवल्यम्' (आश्व. श्रौ. ८. १) इति । विश्वजिति माध्यंदिनेऽच्छावाकशस्त्रे सामसूक्तास्यमेतच्छंसनीयम् । सूत्रितं च—'अभूरेको रयिपते रयीणामिति सामसूक्तानि' (आश्व. श्रौ. ८. ७) ॥

अभूरेको रयिपते रयीणामा हस्तयोरधिथा इन्द्र कृष्टीः ।
वि तोके अप्सु तनये च सूरेऽवोचन्त चर्षणयो विवाचः ॥ १ ॥

अभूः । एकः । रयिऽपते । रयीणाम् । आ । हस्तयोः । अधिथाः । इन्द्र । कृष्टीः ।
वि । तोके । अप्ऽसु । तनये । च । सूरे । अवोचन्त । चर्षणयः । विऽवाचः ॥ १ ॥

हे ᵛरयिपते धनस्य[2] पालक[2] ᵛइन्द्र ᵛएकः प्रधानभूतस्त्वं ᵛरयीणां धनानां स्वामी ᵛअभूः भवसि । यद्वा । रयीणां रयिपत इति संबन्धः । एको रयिशब्दोऽनुवादो यथा 'गवामसि गोपतिरेक इन्द्र' (ऋ. सं. ७. ९८. ६) इति । तदानीमेको मुख्यस्त्वं भवसीति योजनीयम् । अपि च हे इन्द्र त्वं ᵛहस्तयोः आत्मीययोर्बाह्वोः ᵛकृष्टीः प्रजाः ᵛआ ᵛअधिथाः आधत्से । सर्वं जगत्तवाज्ञायां वर्तत इत्यर्थः । किंच ᵛचर्षणयः मनुष्याः ᵛतोके पुत्रे ᵛअप्सु उदकेषु ᵛसूरे शत्रूणां प्रेरके ᵛतनये पौत्रे चैतेषु निमित्तभूतेषु सत्सु ᵛविवाचः विशिष्टाः स्तुतीः ᵛवि ᵛअवोचन्त विविधं ब्रुवन्ति ॥

त्वद्भियेन्द्र पार्थिवानि विश्वाच्युता चिच्च्यावयन्ते रजांसि ।
द्यावाक्षामा पर्वतासो वनानि विश्वं दृळ्हं भयते अज्मन्ना ते ॥ २ ॥

त्वत् । भिया । इन्द्र । पार्थिवानि । विश्वा । अच्युता । चित् । च्यवयन्ते । रजांसि ।
द्यावाक्षामा । पर्वतासः । वनानि । विश्वम् । दृळ्हम् । भयते । अज्मन् । आ । ते ॥ २ ॥

हे ᵛइन्द्र ᵛत्वत् त्वत्तः ᵛभिया भयेन ᵛविश्वा विश्वानि व्यापकानि ᵛपार्थिवानि । पृथिव्यन्तरिक्षनामैतत्[3] । तत्र भवानि ᵛरजांसि उदकानि ᵛअच्युता ᵛचित् च्यावयितुमशक्यान्यपि[4] ᵛच्यावयन्ते मेघाः प्रच्यावयन्ति । वर्षन्तीत्यर्थः । अपि च हे इन्द्र ᵛते तव ᵛआ[5] ᵛअज्मन् आगमने सति ᵛद्यावाक्षामा द्यावापृथिव्यौ ᵛपर्वतासः गिरयः ᵛवनानि वृक्षाश्च भयं प्राप्नुवन्ति । किं बहुना ᵛविश्वं सर्वं ᵛदृळ्हं स्थिरं प्राणिजातं ᵛभयते बिभेति ॥

---

१. ख-झ-न-भ-य–इत्येतत्त्रितयम् । २. घ-श–धनपालक । ३. श–°नामैतत् । ४. ख-झ-त-भ-य-र–च्यवयितुम° । ५. त-न–'आ' नास्ति ।

त्वं कुत्सेनाभि शुष्णमिन्द्राशुषं युध्य कुयवं गविष्टौ ।
दशं प्रपित्वे अध सूर्यस्य मुषायश्चक्रमविवे रपांसि ॥ ३ ॥

त्वम् । कुत्सेन । अभि । शुष्णम् । इन्द्र । अशुषम् । युध्य । कुयवम् । गोऽईष्टौ ।
दशं । प्रऽपित्वे । अध । सूर्यस्य । मुषायः । चक्रम् । अविवेः । रपांसि ॥ ३ ॥

हे [v]इन्द्र [v]त्वं [v]कुत्सेन सह[1] [v]अशुषं शोषयितुमशक्यं प्रबलं [v]शुष्णं सर्वस्य शोषकमेतत्संज्ञमसुरम् [v]अभि [v]युध्य अभ्ययुध्यः । कुत्सस्य साहाय्यार्थं तेनासुरेण सह युद्धं कृतवानसीत्यर्थः । तथा [v]गविष्टौ । गावो बाणा इष्यन्ति गच्छन्तीति गविष्टिः संग्रामः । तस्मिन् [v]कुयवम् एतत्संज्ञमसुरं च [v]दश अदशः । हिंसितवानसि ॥ 'दंश दशने' इत्येतस्माच्छान्दसे लोटि रूपम् ॥ [v]अध अपि च [v]प्रपित्वे प्रपतने युद्धे [v]सूर्यस्य [v]चक्रं रथावयवभूतं [v]मुषायः अमुष्णाः । तदाप्रभृति सूर्यस्य रथ एकचक्रोऽभूत् । तथा चाम्नातं—'सप्त युञ्जन्ति रथमेकचक्रम्' (ऋ. सं. १. १६४. २) इति । एतच्छाख्यस्य ऋषेः सूर्येण सह युद्धे तत्साहाय्यार्थमागत इन्द्रः सूर्यस्य चक्रमपहृतवान् इत्याख्यातम्[2] । 'सूरश्चक्रं प्र वृहज्जात ओजसा' (ऋ. सं. १. १३०. ९) इति च निगमान्तरम् । अपि च [v]रपांसि पापकारीणि रक्षःप्रभृतीनि [v]अविवेः अस्माल्लोकादगमयः । अवधीरित्यर्थः[3] ॥

त्वं शतान्यव शम्बरस्य पुरो जघन्थाप्रतीनि दस्योः ।
अशिक्षो यत्र शच्या शचीवो दिवोदासाय सुन्वते सुतक्रे
भरद्वाजाय गृणते वसूनि ॥ ४ ॥

त्वम् । शतानि । अव । शम्बरस्य । पुरः । जघन्थ । अप्रतीनि । दस्योः ।
अशिक्षः । यत्र । शच्या । शचीऽवः । दिवःऽदासाय । सुन्वते । सुतऽक्रे ।
भरत्ऽवाजाय । गृणते । वसूनि ॥ ४ ॥

हे इन्द्र [v]त्वं [v]शतानि शतसंख्यानि[4] [v]दस्योः उपक्षपयितुरसुरस्य [v]शम्बरस्य एतत्संज्ञस्य [v]पुरः पुरीः [v]अप्रतीनि । लिङ्गव्यत्ययः । केनाप्यप्रतिगताः [v]अव [v]जघन्थ अवाहन् । हे [v]शचीवः प्रज्ञावन् हे [v]सुतक्रे अभिषुतेन सोमेन क्रीतेन्द्र [v]यत्र यस्मिन् काले [v]सुन्वते सोमाभिषवं कुर्वते [v]दिवोदासाय [v]शच्या प्रज्ञया [v]अशिक्षः धनानि प्रादाः [v]गृणते स्तवते [v]भरद्वाजाय च [v]वसूनि प्रादाः तस्मिन् काले शाम्बरीः पुरोऽव जघन्थेत्यन्वयः ॥

स सत्यसत्वन्महते रणाय रथमा तिष्ठ तुविनृम्ण भीमम् ।
याहि प्रपथिन्नवसोप मद्रिक्प्र च श्रुत श्रावय चर्षणिभ्यः ॥ ५ ॥

सः । सत्यऽसत्वन् । महते । रणाय । रथम् । आ । तिष्ठ । तुविऽनृम्ण । भीमम् ।
याहि । प्रऽपथिन् । अवसा । उप । मद्रिक् । प्र । च । श्रुत । श्रवय । चर्षणिऽभ्यः ॥ ५ ॥

---

१. ख-घ-भ-श–सह युध्यमानम् । २. ख-ज्ञ-झ-त-र–इत्याख्यानम् ; न–इत्याम्नोतम् । ३. ख-घ-झ-त२-भ-र–अवधीदित्यर्थः । ४. ज्ञ–°संख्याकाः ।

हे ᵛसत्यसत्वन् । सत्याः[१] सत्वानो भटा[२] यस्य स तथोक्तः । हे ᵛतुविनृम्ण । तुवि बहुलं नृम्णं धनं यस्य स तथोक्तः । हे तादृशेन्द्र ᵛसः त्वं ᵛमहते ᵛरणाय संग्रामाय तदर्थं ᵛभीमं भयंकरमात्मीयं ᵛरथमा ᵛतिष्ठ । हे ᵛप्रपथिन् प्रकृष्टमार्गेन्द्र ᵛअवसा रक्षणेन सह तेन च रथेन ᵛउप ᵛयाहि आगच्छ ᵛमद्रिक् मदभिमुखः । तथा हे ᵛश्रुत विश्रुतेन्द्र ᵛचर्षणिभ्यः प्रजाभ्यः ᵛप्र ᵛश्रावय ᵛच अस्मान् प्रख्यापय च । सर्वासु प्रजासु मध्ये अस्मान् प्रख्यातान् कुर्वित्यर्थः ॥ ॥ ३ ॥

'अपूर्व्या' इति पञ्चर्चं नवमं सूक्तं त्रैष्टुभमैन्द्रम् । 'अपूर्व्या' इत्यनुक्रान्तम् । द्वितीये छान्दोमिकेऽहनि निष्केवल्य एतत्सूक्तम् । सूत्रितं च—'अपूर्व्या पुरुतमानि तां सु ते कीर्तिम्' (आश्व. श्रौ. ८.७) इति । महाव्रतेऽपि निष्केवल्येऽस्य[३] सूक्तस्य विनियोग उक्तः ॥

अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
विरप्शिने वज्रिणे शंतमानि वचांस्यासा स्थविराय तक्षम् ॥ १ ॥

अपूर्व्या । पुरुऽतमानि । अस्मै । महे । वीराय । तवसे । तुराय ।
विऽरप्शिने । वज्रिणे । शम्ऽतमानि । वचांसि । आसा । स्थविराय । तक्षम् ॥ १ ॥

ᵛअपूर्व्या अपूर्व्याणि पूर्वैरकृतानि नूतनानि ᵛपुरुतमानि बहुतमानि ᵛशंतमानि सुखकृत्तमानि ᵛवचांसि स्तुतिरूपाणि वाक्यानि ᵛआसा आस्येन ᵛअस्मै इन्द्राय ᵛतक्षम् अतक्षम् । करोमि । कीदृशाय । ᵛमहे महते ᵛवीराय विविधं शत्रूणामीरयित्रे ᵛतवसे तवस्विने बलवते ᵛतुराय त्वरमाणाय ᵛविरप्शिने विशेषेण स्तुत्याय ᵛवज्रिणे वज्रवते ᵛस्थविराय प्रवृद्धाय ॥

स मातरा सूर्येणा कवीनामवासयद्रुजदद्रिं गृणानः ।
स्वाधीभिर्ऋक्वभिर्वावशान उदुस्रियाणामसृजन्निदानम् ॥ २ ॥

सः । मातरा । सूर्येण । कवीनाम् । अवासयत् । रुजत् । अद्रिम् । गृणानः ।
सुऽआधीभिः । ऋक्वऽभिः । वावशानः । उत् । उस्रियाणाम् । असृजत् । निऽदानम् ॥२॥

ᵛसः इन्द्रः ᵛमातरा मातरौ दिवं च पृथिवीं च ᵛकवीनां क्रान्तदर्शिनामङ्गिरसामर्थाय ᵛसूर्येण ᵛअवासयत् प्राकाशयत् । किं कुर्वन् । ᵛअद्रिं गवामदर्शनाय वलेन स्थापितं पर्वतं ᵛरुजत् भञ्जन् । यद्वा । कवीनाम्[४] अङ्गिरसामिति तृतीयार्थे षष्ठी । अङ्गिरोभिः ᵛगृणानः स्तूयमान इति संबन्धः । अपि च ᵛस्वाधीभिः शोभनध्यानैः ऋक्वभिः स्तोतृभिरङ्गिरोभिः ᵛवावशानः पुनः पुनः काम्यमानः सन् ᵛउस्रियाणां वलस्य भृत्यैः पणिभिरपहृतानां गवां ᵛनिदानं बन्धनम् ᵛउत् ᵛअसृजत् अमोचयत् ॥

---

१. ज्ञ–सत्या अबाध्याः । २. ख१–भरा; ज्ञ-य-र–भावा नो; त-न–भावा । ३. ख-ज्ञ-त-न-भ-र–निष्केवल्येऽप्यस्य । ४. ख-ज्ञ-ज्ञ त-न-भ-र–'कवीनाम्' नास्ति ।

स वह्निभिर्ऋक्वभिर्गोषु शश्वन्मितज्ञुभिः पुरुकृत्वा जिगाय ।
पुरः पुरोहा सखिभिः सखीयन्दृळ्हा रुरोज कविभिः कविः सन् ॥ ३ ॥

सः । वह्निऽभिः । ऋक्वऽभिः । गोषु । शश्वत् । मितज्ञुऽभिः । पुरुऽकृत्वा । जिगाय ।
पुरः । पुरःऽहा । सखिऽभिः । सखिऽयन् । दृळ्हाः । रुरोज । कविऽभिः । कविः । सन् ॥३॥

[v]पुरुकृत्वा बहुकर्मकृत् [v]सः इन्द्रः [v]वह्निभिः हविषां वोढृभिः [v]ऋक्वभिः स्तोतृभिः [v]शश्वत् सर्वदा [v]मितज्ञुभिः संकुचितजानुभिरङ्गिरोभिः सह [v]गोषु निमित्तभूतेषु [v]जिगाय असुरान् जितवान् । जित्वा च [v]पुरोहा पुराणां हन्ता सः इन्द्रः [v]सखिभिः समानख्यानैः [v]कविभिः क्रान्तप्रज्ञैरङ्गिरोभिः सह [v]सखीयन् सखित्वमात्मन इच्छन् [v]कविः [v]सन् स्वयमपि क्रान्तप्रज्ञो भवन् [v]दृळ्हाः स्थिराः [v]पुरः आसुरीः पुरीः [v]रुरोज[1] ॥

स नीव्याभिर्जरितारमच्छा महो वाजेभिर्महद्भिश्च शुष्मैः ।
पुरुवीराभिर्वृषभ क्षितीनामा गिर्वणः सुविताय प्र याहि ॥ ४ ॥

सः । नीव्याभिः । जरितारम् । अच्छ । महः । वाजेभिः । महत्ऽभिः । च । शुष्मैः ।
पुरुऽवीराभिः । वृषभ । क्षितीनाम् । आ । गिर्वणः । सुविताय । प्र । याहि ॥ ४ ॥

हे [v]वृषभ कामानां वर्षक हे [v]गिर्वणः गिरा स्तुत्या संभजनीयेन्द्र [v]सः[2] त्वं [v]महः महद्भिः [v]वाजेभिः वाजैरन्नैः [v]महद्भिः [v]शुष्मैः बलैः [v]च सह [v]क्षितीनां प्रजानां मध्ये [v]जरितारं स्तोतारम् [v]अच्छ आभिमुख्येन [v]नीव्याभिः नव्याभिर्नवतराभिः [v]पुरुवीराभिः पुरूणां बहूनां वीरयित्रीभिः बडवाभिः [v]आ [v]प्र [v]याहि आगच्छ । किमर्थम् । [v]सुविताय शोभनाय । सुखप्राप्त्यर्थमित्यर्थः ॥

स सर्गेण शवसा तक्तो अत्यैरप इन्द्रो दक्षिणतस्तुराषाट् ।
इत्था सृजाना अनपावृदर्थं दिवेदिवे विविषुरप्रमृष्यम् ॥ ५ ॥

सः । सर्गेण । शवसा । तक्तः । अत्यैः । अपः । इन्द्रः । दक्षिणतः । तुराषाट् ।
इत्था । सृजानाः । अनपऽवृत् । अर्थम् । दिवेऽदिवे । विविषुः । अप्रऽमृष्यम् ॥ ५ ॥

[v]तुराषाट् तुराणां हिंसकानां सोढाभिभविता [v]सः [v]इन्द्रः [v]सर्गेण सर्वदोद्युक्तेन [v]शवसा बलेन [v]अत्यैः अश्वैः सततगामिभिस्तेजोभिर्वा [v]तक्तः संगतः सन् [v]दक्षिणतः दक्षिणायने [v]अपः उदकानि विसृजतीति[3] शेषः । [v]इत्था इत्थमनेन प्रकारेण [v]सृजानाः सृज्यमानास्ता आपः [v]अर्थं गन्तव्यम् [v]अप्रमृष्यम् अन्यैरक्षोभ्यं समुद्रं [v]दिवेदिवे प्रतिदिनम् [v]अनपावृत् अपावर्तनं पुनरागमनं[4] यथा न[5] भवति तथा [v]विविषुः व्याप्नुवन्ति ॥ अर्तेस्यन्प्रत्ययान्तस्य रूपमर्थमिति ॥ ॥ ४ ॥

---

१. ज्ञ–रुरोज बभञ्ज । २. ज्ञ-त-य–'सः' नास्ति । ३. ख-ज्ञ-ङ्ग-त-भ-र-श–सृजतीति । ४. ख१-ङ्ग-भ-न-य–पुनरागमनं न अपावर्तनम् अनपावर्तनम् अपुनरागमनम्; ज-ण–पुनरागमनम् अपावर्तनम अनपावर्तनम् पुनरागमनम् ५. ख१-त-न-भ-य–'न' नास्ति ।

'य ओजिष्ठः' इति पञ्चर्चं दशमं सूक्तं शुनहोत्रस्यार्षं त्रैष्टुभमैन्द्रम्। अनुक्रम्यते च—'य ओजिष्ठः शुनहोत्रस्तु' इति। महाव्रतेऽपि निष्केवल्य उक्तो विनियोगः॥

य ओजिष्ठ इन्द्र तं सु नो दा मदो वृषन्त्स्वभिष्टिर्दास्वान्।
सौवश्व्यं यो वनवत्स्वश्वो वृत्रा समत्सु सासहदमित्रान्॥ १॥

यः। ओजिष्ठः। इन्द्र। तम्। सु। नः। दाः। मदः। वृषन्। सुऽअभिष्टिः। दास्वान्।
सौवश्व्यम्। यः। वनवत्। सुऽअश्वः। वृत्रा। समत्ऽसु। ससहत्। अमित्रान्॥ १॥

हे [v]वृषन् कामानां वर्षितः [v]इन्द्र त्वं [v]यः पुत्रः [v]ओजिष्ठः ओजस्वितमो बलवत्तमः [v]मदः तव मादयिता स्तुतिभिः स्तोतेत्यर्थः। [v]स्वभिष्टिः शोभनाभ्येषणः [v]दास्वान्। हविषां दानं[1] दाः[1]। तद्वान्। एवंगुणविशिष्टं [v]तं पुत्रं [v]नः अस्मभ्यं [v]सु सुष्ठु [v]दाः देहि। [v]यः पुत्रः [v]स्वश्वः सन् [v]समत्सु संग्रामेषु [v]सौवश्व्यं शोभनाश्वानां समूहं [v]वनवत् हिंस्यात्। तथा [v]वृत्रा वृत्रान् वारयितॄन् [v]अमित्रान् शत्रूंश्च[2] [v]ससहत् अत्यर्थमभिभवेत् तं दा इत्यन्वयः॥

त्वां हीन्द्रावसे विवाचो हवन्ते चर्षणयः शूरसातौ।
त्वं विप्रेभिर्वि पणीँरशायस्त्वोत इत्सनिता वाजमर्वा॥ २॥

त्वाम्। हि। इन्द्र। अवसे। विऽवाचः। हवन्ते। चर्षणयः। शूरऽसातौ।
त्वम्। विप्रेभिः। वि। पणीन्। अशायः। त्वाऽऊतः। इत्। सनिता। वाजम्। अर्वा॥२॥

हे [v]इन्द्र [v]त्वां [v]हि त्वामेव [v]विवाचः विविधाः स्तुतिरूपा वाचो येषां तादृशाः [v]चर्षणयः मनुष्याः [v]शूरसातौ शूरैः संभजनीये संग्रामे [v]अवसे रक्षणार्थं [v]हवन्ते आह्वयन्ति। किंच [v]त्वं [v]विप्रेभिः विप्रैर्मेधाविभिरङ्गिरोभिः सार्धं [v]पणीन्। वलस्यानुचरा असुराः पणयः। तान् [v]वि [v]अशायः विशेषेणाशाययः। हतवानित्यर्थः। अतः [v]त्वोत [v]इत् त्वयोतो रक्षित एव [v]सनिता संभक्ता पुरुषः [v]वाजम् अन्नम् [v]अर्वा अभिगन्ता भवति॥

त्वं ताँ इन्द्रोभयाँ अमित्रान्दासा वृत्राण्यार्या च शूर।
वधीर्वनेव सुधितेभिरत्कैरा पृत्सु दर्षि नृणां नृतम॥ ३॥

त्वम्। तान्। इन्द्र। उभयान्। अमित्रान्। दासा। वृत्राणि। आर्या। च। शूर।
वधीः। वनाऽइव। सुऽधितेभिः। अत्कैः। पृत्ऽसु। दर्षि। नृणाम्। नृऽतम॥ ३॥

हे [v]इन्द्र [v]त्वं [v]तान् [v]उभयान् वक्ष्यमाणान् उभयविधान् [v]अमित्रान् शत्रून् [v]वधीः अहिंसीः। के त उभयविधाः। [v]दासा उपक्षपयितॄन् कर्मविरोधिनो वलप्रभृतीनसुरान्[3]॥ 'सुपां सुलुक्०' इति शस

---

१. ख१-दातारः; ज-ञ-ण-न-भ-दाता दाः; त-र-दातारं दाः। २. ख-भ-शत्रूंश्च समत्सु संग्रामेषु। ३. ख-ञ भ-वृत्रप्र०; ज्ञ-त२-र-श-वलप्र०; न-वलवृत्रप्र०।

आकारः ॥ [v]आर्या आर्याणि कर्मानुष्ठातृत्वेन श्रेष्ठानि [v]वृत्राणि आवरकाणि विश्वरूपादीनि [v]च तान्[1] उभयविधान् हे [v]शूर त्वं हतवानित्यर्थः । [v]नृणां नेतॄणां मध्ये [v]नृतम अतिशयेन नेतर्हे इन्द्र [v]पृत्सु संग्रामेषु [v]सुधितेभिः सुष्ठु निहितैः [v]अर्कैः आत्मीयैरायुधैः [v]आ [v]दर्षि अन्यानपि शत्रूनाद्दणासि विदारयसि । तत्र दृष्टान्तः । [v]वनेव वनानीव । यथा[2] वृक्षजातानि कुठारादिभिश्छिनत्ति तद्वत् ॥

स त्वं न इन्द्रार्कवाभिरूती सखा विश्वायुरविता वृधे भूः ।
स्वर्षाता यद्धवामसि त्वा युध्यन्तो नेमधिता पृत्सु शूर ॥ ४ ॥

सः । त्वम् । नः । इन्द्र । अर्कवाभिः । ऊती । सखा । विश्वऽआयुः । अविता । वृधे । भूः ।
स्वःऽसाता । यत् । हवामसि । त्वा । युध्यन्तः । नेमऽधिता । पृत्ऽसु । शूर ॥ ४ ॥

हे [v]इन्द्र [v]सः तादृशः [v]त्वम् [v]अर्कवाभिः अकुत्सिताभिः [v]ऊती ऊतिभी रक्षाभिः [v]नः अस्माकं [v]वृधे वर्धनाय [v]अविता रक्षिता [v]भूः भव । तथा [v]विश्वायुः सर्वतो गन्ता त्वमस्माकं [v]सखा च भव । [v]नेमधिता नेमशब्दोऽर्धवाची । उक्तं च—'स्वो नेम इत्यर्धस्य' (निरु ३. २०) इति । अर्धाः कतिपयाः पुरुषा धीयन्त एष्विति नेमधितयः संग्रामाः । तादृशेषु [v]पृत्सु पृतनासु संग्रामेषु [v]युध्यन्तः युद्धं कुर्वन्तो वयं [v]स्वर्षाता स्वः सुष्ठु अरणीयं[3] धनं तस्य संभजनार्थं हे [v]शूर त्वां [v]यत् यदा [v]ह्वयामसि आह्वयामः तदानीं त्वमविता सखा च भवेत्यर्थः ॥

नूनं न इन्द्रापरायं च स्या भवा मृळीक उत नो अभिष्टौ ।
इत्था गृणन्तो महिनस्य शर्मन्दिवि ष्याम पार्ये गोषतमाः ॥ ५ ॥

नूनम् । नः । इन्द्र । अपरायं । च । स्याः । भव । मृळीकः । उत । नः । अभिष्टौ ।
इत्था । गृणन्तः । महिनस्य । शर्मन् । दिवि । स्याम । पार्ये । गोऽसतमाः ॥ ५ ॥

हे [v]इन्द्र त्वं [v]नूनम् अद्य [v]नः अस्माकं [v]स्याः अस्मदीयो भव । [v]अपराय [v]च अपरस्मिन्नन्यस्मिन्नपि काले ऽस्मदीयो भव । [v]उत अपि च त्वं [v]नः अस्माकम् [v]अभिष्टौ अभिगमने सति [v]मृळीकः सुखयिता [v]भव । [v]इत्था इत्थमनेन प्रकारेण [v]गृणन्तः स्तुवन्तो वयं [v]गोषतमाः गवां संभक्तृतमाः सन्तः [v]महिनस्य महतस्तव संबन्धिनि [v]दिवि द्योतमाने [v]पार्ये दुःखस्य पारके [v]शर्मन् शर्मणि सुखे [v]स्याम वर्तमाना भवेम ॥ ॥ ५ ॥

'सं च त्वे जग्मुः' इति पञ्चर्चमेकादशं सूक्तं शुनहोत्रस्यार्षं त्रैष्टुभमैन्द्रम् । 'सं च त्वे' इत्यनुक्रान्तम् । तृतीये छान्दोमिकेऽहनीदमादिके द्वे सूक्ते । सूत्रितं च—'सं च त्वे जग्मुरिति सूक्ते' (आश्व. श्रौ. ८. ७) इति । महाव्रतेऽपि निष्केवल्य उक्तो विनियोगः ॥

---

१. ख-ङ-न-भ-एतान् । २. ङ-यथा कश्चित् । ३. ख-भ-श-रक्षणीयम्; ङ-य-क्षरणीयम् ।

सं च त्वे जग्मुर्गिरं इन्द्र पूर्वीर्वि च त्वद्यन्ति विभ्वो मनीषाः ।
पुरा नूनं च स्तुतय ऋषीणां पस्पृध्र इन्द्रे अध्युक्थार्का ॥ १ ॥

सम् । च । त्वे इति । जग्मुः । गिरः । इन्द्र । पूर्वीः । वि । च । त्वत् । यन्ति । विऽभ्वः । मनीषाः ।
पुरा । नूनम् । च । स्तुतयः । ऋषीणाम् । पस्पृध्रे । इन्द्रे । अधि । उक्थऽअर्का ॥ १ ॥

हे [v]इन्द्र [v]त्वे त्वयि [v]पूर्वीः बह्व्यः [v]गिरः स्तुतयश्च [v]सं [v]जग्मुः संगच्छन्ते । [v]त्वत् त्वत्तः [v]विभ्वः विभवो विस्तृताः [v]मनीषाः स्तोतृणां मतयश्च [v]वि [v]यन्ति विविधं निर्गच्छन्ति । शेषः परोक्षकृतः । [v]पुरा पूर्वस्मिन्काले [v]नूनम् अद्य [v]च [v]ऋषीणाम् अतीन्द्रियार्थदर्शिनां भरद्वाजादीनां [v]स्तुतयः स्तोत्राणि [v]इन्द्रे [v]अधि अधिकं [v]पस्पृध्रे अस्पर्धन्त । अहमहमिकयेन्द्रस्य स्तवने त्वरिता बभूवुरित्यर्थः । तथा [v]उक्थार्का । उक्थं शस्त्रम् । तद्रूपाण्यर्काणि अर्चनसाधनानि स्तोत्राणि च पस्पृध्रे अस्पर्धन्त ॥

पुरुहूतो यः पुरुगूर्त ऋभ्वाँ एकः पुरुप्रशस्तो अस्ति यज्ञैः ।
रथो न महे शवसे युजानोऽस्माभिरिन्द्रो अनुमाद्यो भूत् ॥ २ ॥

पुरुऽहूतः । यः । पुरुऽगूर्तः । ऋभ्वा । एकः । पुरुऽप्रशस्तः । अस्ति । यज्ञैः ।
रथः । न । महे । शवसे । युजानः । अस्माभिः । इन्द्रः । अनुऽमाद्यः । भूत् ॥ २ ॥

[v]पुरुहूतः बहुभिरुहूतः [v]पुरुगूर्तः बहुभिरुद्यमितः [v]ऋभ्वा महान् [v]एकः प्रधानभूत एवंगुणविशिष्टः [v]यः इन्द्रः [v]यज्ञैः यष्टृभिः पुरुषैः यजनसाधनैः[1] स्तोत्रैर्वा [v]पुरुप्रशस्तः [v]अस्ति बहुधा प्रशस्तः स्तुतो भवति सः [v]इन्द्रः [v]रथो [v]न रथ इव [v]महे महते [v]शवसे बलाय तदर्थं [v]युजानः अस्मत्स्तुतिभिर्युज्यमानः सन् [v]अस्माभिः स्तोतृभिः [v]अनुमाद्यो [v]भूत् सर्वदा स्तुत्यो भवतु ॥

न यं हिंसन्ति धीतयो न वाणीरिन्द्रं नक्षन्तीदभि वर्धयन्तीः ।
यदिं स्तोतारः शतं यत्सहस्रं गृणन्ति गिर्वणसं शं तदस्मै ॥ ३ ॥

न । यम् । हिंसन्ति । धीतयः । न । वाणीः । इन्द्रम् । नक्षन्ति । इत् । अभि । वर्धयन्तीः ।
यदिं । स्तोतारः । शतम् । यत् । सहस्रम् । गृणन्ति । गिर्वणसम् । शम् । तत् । अस्मै ॥ ३ ॥

[v]यम् [v]इन्द्रं [v]धीतयः कर्माणि परिचरणानि [v]न [v]हिंसन्ति न बाधन्ते । [v]वाणीः वाण्यः स्तुतयश्च यं [v]न बाधन्ते । दातुमसमर्थः पुरुषोऽन्यकृतैः परिचरणैः स्तुतिभिश्च भृशं खिद्यते[2] अस्य चेन्द्रस्य बहुधनत्वाद्दातृत्वाच्च तस्मिन् प्रयुज्यमानानि परिचरणानि स्तोत्राणि च बाधहेतवो नाभूवन्नित्यर्थः । किं तर्हीत्यत आह । तमिन्द्रं [v]वर्धयन्तीः वर्धयन्त्यः [v]अभि [v]नक्षन्ति अभिगच्छन्ति[3] । अपि च [v]गिर्वणसं गिरां संभक्तारमिन्द्रं [v]शतं शतसंख्याकाः [v]स्तोतारः [v]यदि [v]गृणन्ति स्तुवन्ति । [v]यत् यदि च [v]सहस्रं सहस्रसंख्याकाः स्तोतारः स्तुवन्ति [v]तत् सर्वं स्तोत्रम् [v]अस्मै इन्द्राय [v]शं सुखकरं भवति ॥

---

१. ख१-झ-त-यजमानसाधनैः । २. ज-झ-ण-न-भ-य-व्यथते । ३. ख भ-इत् अभिगच्छन्ति एव ।

अस्मा एतद्दिव्य१र्चेव मासा मिमिक्ष इन्द्रे न्ययामि सोमः ।
जनं न धन्वन्नभि सं यदापः सत्रा वावृधुर्हवनानि यज्ञैः ॥ ४ ॥

अस्मै । एतत् । दिवि । अर्चाऽइव । मासा । मिमिक्षः । इन्द्रे । नि । अयामि । सोमः ।
जनम् । न । धन्वन् । अभि । सम् । यत् । आपः । सत्राः । ववृधुः । हवनानि । यज्ञैः ॥४॥

ᵛएतत् एतस्मिन् ᵛदिवि दिवसे सौम्येऽहनि ᵛअर्चेव अर्चनसाधनेन स्तोत्रेणेव ᵛमासा मानेन 'इन्द्राय त्वा वृत्रघ्ने' इत्यादिमन्त्रसाध्येन युक्तः ᵛमिमिक्षः वसतीवर्येकधनाख्याभिरद्भिरासिक्तः ᵛसोमः ᵛअस्मै । विभक्तिव्यत्ययः । अस्मिन् ᵛइन्द्रे ᵛन्ययामि नियतोऽभूत् । यद्वा । अस्मै इन्द्रायैतत्स्तोत्रं ब्रवाणीति शेषः । दिवि द्युलोके अर्चेव अर्कः सूर्य इव मासा । लुप्तोपममेतत् । माति परिच्छिनत्तीति मासश्चन्द्रमाः । स इव मिमिक्षो वृष्ट्युदकानां सेक्ता य इन्द्रो वर्तते ऽस्मिन्निन्द्रेऽभिषुतः सोमो नियम्यते स्म । किंच तमिन्द्रं ᵛयज्ञैः यजनसाधनैः पुरोडाशादिभिर्हविर्भिः सार्धं ᵛहवनानि स्तोत्राणि ᵛसत्रा सह ᵛवावृधुः अवर्धयन् । तत्र दृष्टान्तः । ᵛधन्वन् धन्वनि मरुदेशे ᵛअभि अभिमुखं ᵛसं ᵛयत् सम्यग्यन्त्यो[1] गच्छन्त्यः ᵛआपः ᵛजनं प्राणिनमिव । यथा मरुदेश उपलभ्यमाना आपः प्राणिनं वर्धयन्ति तद्वत् ॥

अस्मा एतन्महो अजुर्यमस्मा इन्द्राय स्तोत्रं मतिभिरवाचि ।
असद्यथा महति वृत्रतूर्य इन्द्रो विश्वायुरविता वृधश्च ॥ ५ ॥

अस्मै । एतत् । महि । आजुर्यम् । अस्मै । इन्द्राय । स्तोत्रम् । मतिऽभिः । अवाचि ।
असत् । यथा । महति । वृत्रऽतूर्ये । इन्द्रः । विश्वऽआयुः । अविता । वृधः । च ॥ ५ ॥

ᵛअस्मै इन्द्राय ᵛमहि महत् ᵛएतत् ᵛआजुर्यं स्तोत्रं ᵛमतिभिः स्तोतृभिः ᵛअवाचि उक्तमभूत् । ᵛअस्मा ᵛइन्द्राय ᵛस्तोत्रम् इति पुनरुक्तिरादरार्था । ᵛविश्वायुः सर्वत्र गन्ता सः ᵛइन्द्रः ᵛमहति प्रभूते ᵛवृत्रतूर्ये संग्रामे ᵛयथा येन प्रकारेणास्माकम् ᵛअविता रक्षकः ᵛवृधः वर्धयिता ᵛच ᵛअसत् भवेत् तथावाचीत्यन्वयः ॥ ॥ ६ ॥

'कदा भुवन्' इति पञ्चर्चं द्वादशं सूक्तं नरस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तं—'कदा नरस्तु' इति । तृतीये छन्दोमे महाव्रते च निष्केवल्य उक्तो विनियोगः ॥

कदा भुवन्रथक्षयाणि ब्रह्म कदा स्तोत्रे सहस्रपोष्यं दाः ।
कदा स्तोमं वासयोऽस्य राया कदा धियः करसि वाजरत्नाः ॥ १ ॥

कदा । भुवन् । रथऽक्षयाणि । ब्रह्म । कदा । स्तोत्रे । सहस्रऽपोष्यम् । दाः ।
कदा । स्तोमम् । वासयः । अस्य । राया । कदा । धियः । करसि । वाजऽरत्नाः ॥ १ ॥

---

१. ख-ज्ञ-भ- तं सम्यग्यन्त्यो; ज्ञ-य-सम्यग्यन्त्यो ।

हे इन्द्र vब्रह्म ब्रह्माणि स्तोत्राण्यस्मदीयानि vरथक्षयाणि रथनिवासानि vकदा कस्मिन्काले vभुवन् भवेयुः । रथेऽवस्थितं त्वां कदा प्राप्नुवन्तीत्यर्थः । vकदा कस्मिन् काले vस्तोत्रे स्तुवते मह्यं vसहस्रपोष्यं सहस्रसंख्याकपुरुषपोषकं गोसमूहं पुत्रं वा vदाः दद्याः । vकदा च vअस्य मम स्तोतुः vस्तोमं स्तोत्रं vराया धनेन vवासयः व्यापयेः । vधियः कर्माणि चाग्निहोत्रादीनि vवाजरत्नाः वाजैरन्नैः रमणीयाः vकदा कस्मिन् काले vकरसि कुर्याः । एवं स्तोता फलस्य विलम्बमसहमानः[1] इन्द्रमनया पृष्टवान् ॥

कहिं स्वित्तदिन्द्र यन्नृभिर्नॄन्वीरैर्वीरान्नीळयासे जयाजीन् ।
त्रिधातु गा अधि जयासि गोष्विन्द्र द्युम्नं स्वर्वद्धेह्यस्मे ॥ २ ॥

कहिं । स्वित् । तत् । इन्द्र । यत् । नृऽभिः । नॄन् । वीरैः । वीरान् । नीळयासे । जय । आजीन् । त्रिऽधातु । गाः । अधि । जयासि । गोषु । इन्द्र । द्युम्नम् । स्वःऽवत् । धेहि । अस्मे इति ॥ २ ॥

फलस्य विलम्बमसहमान ऋषिरनयापीन्द्रं पृच्छति । हे vइन्द्र vकहिं vस्वित् कदा खलु vतत् भवेत् । vनृभिः अस्मदीयैः पुरुषैः vनॄन् शत्रुपुरुषान् तथा vवीरैः अस्मदीयैः पुत्रैः vवीरान् शत्रुपुत्रांश्च vयत् vनीळयासे त्वं संश्लेषयेः[2] संयोजयेः[2] ॥ नीळयतिः संश्लेषणकर्मा[3] ॥ ईदृशं युद्धे यत्संश्लेषणं तत्कदा भवेदिति वितर्कः । अपि चास्मदर्थं त्वम् vआजीन् संग्रामान् कदा vजय जयेः । कदा च vगोषु अभिगन्तृषु शत्रुषु विद्यमानाः vत्रिधातु त्रिधातूः क्षीरदधिघृतानां त्रयाणां धारयित्रीः vगाः vअधि vजयासि अधिकं जयेः । हे vइन्द्र त्वं vस्वर्वत् व्याप्तिमत् vद्युम्नं धनम् vअस्मे अस्मासु कदा vधेहि धारयेः ॥

कहिं स्वित्तदिन्द्र यज्जरित्रे विश्वप्सु ब्रह्म कृणवः शविष्ठ ।
कदा धियो न नियुतो युवासे कदा गोमघा हवनानि गच्छाः ॥ ३ ॥

कहिं । स्वित् । तत् । इन्द्र । यत् । जरित्रे । विश्वऽप्सु । ब्रह्म । कृणवः । शविष्ठ । कदा । धियः । न । निऽयुतः । युवासे । कदा । गोऽमघा । हवनानि । गच्छाः ॥ ३ ॥

अनयापि कतिचित् प्रश्नाः क्रियन्ते । हे vइन्द्र vकहिं vस्वित् कदा खलु vतत् भवेत् । हे vशविष्ठ बलवत्तमेन्द्र त्वं vजरित्रे स्तोत्रे vविश्वप्सु बहुविधरूपं vब्रह्म अन्नं vकृणवः करोषीति vयत् तत्कदा भवेदिति वितर्कः। vकदा च vधियः कर्माणि। vन इति समुच्चये । vनियुतः स्तुतीश्च vयुवासे आत्मनि[4] योजयेः[4] । vकदा च त्वं vगोमघा गोमघानि गवां दातृणि ॥ मंहतेर्दानार्थस्य रूपमुत्तरपदम् ॥ vहवनानि स्तोत्राणि vगच्छाः अभिगच्छेः[5] ॥

स गोमघा जरित्रे अश्वश्चन्द्रा वाजश्रवसो अधि धेहि पृक्षः ।
पीपिहीषः सुदुघामिन्द्र धेनुं भरद्वाजेषु सुरुचो रुरुच्याः ॥ ४ ॥

सः । गोऽमघाः । जरित्रे । अश्वऽचन्द्राः । वाजऽश्रवसः । अधि । धेहि । पृक्षः । पीपिहि । इषः । सुऽदुघाम् । इन्द्र । धेनुम् । भरत्ऽवाजेषु । सुऽरुचः । रुरुच्याः ॥ ४ ॥

---

१. घ–°मसहमानः स; श–°मसहमानः सन् । २. घ–संहरेः । ३. ख-न-म–संश्लेषकर्मा । ४. ज्ञ-त-य–आत्मना नियोजयेः । ५. ख१-ज-ज्ञ-न-भ–आगच्छेः ।

हे इन्द्र [v]सः त्वं [v]जरित्रे स्तोत्रे [v]गोमघाः गवां दात्रीः [v]अश्वश्चन्द्राः अश्वैराह्लादयन्तीः [v]वाजश्रवसः वाजैर्बलैः प्रसिद्धा एवंभूताः [v]पृक्षः अन्नानि [v]भरद्वाजेषु भरद्वाजपुत्रेष्वस्मासु [v]अधि [v]धेहि धारय । तथा [v]इषः तान्यन्नानि [v]सुदुघां शोभनदोग्ध्रीं [v]धेनुं गां च हे [v]इन्द्र [v]पीपिहि प्याय । अपि च ता इषो गौश्च [v]सुरुचः शोभनदीप्तयो यथा भवन्ति तथा त्वं [v]रुरुच्याः दीपयेः । शोभनदीप्तियुक्ताश्च ताः सन्त्वित्यर्थः ॥

तमा नूनं वृजनमन्यथा चिच्छूरो यच्छक्र वि दुरो गृणीषे ।
मा निररं शुक्रदुघस्य धेनोरांङ्गिरसान्ब्रह्मणा विप्र जिन्व ॥ ५ ॥

तम् । आ । नूनम् । वृजनम् । अन्यथा । चित् । शूरः । यत् । शक्र । वि । दुरः । गृणीषे ।
मा । निः । अरम् । शुक्रऽदुघस्य । धेनोः । आङ्गिरसान् । ब्रह्मणा । विप्र । जिन्व ॥ ५ ॥

हे इन्द्र त्वं [v]नूनम्[1] अद्यतनं [v]वृजनं बाधकमस्मदीयं शत्रुम् [v]अन्यथा [v]चित् अन्येनैव प्रकारेण योजय । येन प्रकारेण सर्वे जीवन्ति तद्विलक्षणं प्रकारं मरणाख्यं प्रापयेत्यर्थः । आकारः पूरकः । हे [v]शक्र सर्वकार्येषु शक्तेन्द्र [v]शूरः शौर्योपेतः [v]वि [v]दुरः विशेषेण दारयिता शत्रूणाम् । यद्वा । दुरो द्वाराणि शत्रुसंबन्धीनि विघटयस्त्वं [v]यत् यस्मात् [v]गृणीषे अस्माभिः स्तूयसे तस्मात् कारणात् [v]शुक्रदुघस्य शुक्राणां निर्मलानां दोग्ध्रीन्द्रस्य [v]धेनोः वाचः स्तोत्रात् [v]मा [v]निररं मा निर्गच्छेयम् । यद्वा । शुक्रस्य पयसो दोग्ध्र्या धेनोस्त्वया दत्ताया गोः सकाशात् मा निर्गच्छेयम् ॥ अरमित्याख्यातम् 'ऋ गतौ' इत्यस्य रूपम् ॥ सा सर्वदास्मासु निवसत्वित्यर्थः । हे [v]विप्र प्राज्ञेन्द्र [v]आङ्गिरसान् अङ्गिरोगोत्रजानस्मान् [v]ब्रह्मणा अन्नेन [v]जिन्व प्रीणय ॥ ॥ ७ ॥

'सत्रा मदासः' इति पञ्चर्चं त्रयोदशं सूक्तं नरस्यार्षं त्रैष्टुभमैन्द्रम् । 'सत्रा' इत्यनुक्रान्तम् । पृष्ठ्यस्य पञ्चमेऽहनि निष्केवल्य एतत्सूक्तं शस्यम्[2] । सूत्रितं च–'प्रेदं ब्रह्मेन्द्रो मदाय सत्रा मदास इति निष्केवल्यम्' (आश्व. श्रौ. ७. १२) इति । विश्वजिति माध्यंदिनसवने प्रशास्तुः शस्त्र इदं सामसूक्तात्यं शंसनीयम् । सूत्रितं च—'सत्रा मदासो यो जात एवाभूरेक इति सामसूक्तानि' (आश्व. श्रौ. ८. ७) इति । महाव्रतेऽपि[3] निष्केवल्य उक्तो विनियोगः ॥

सत्रा मदासस्तव विश्वजन्याः सत्रा रायोऽध ये पार्थिवासः ।
सत्रा वाजानामभवो विभक्ता यद्देवेषु धारयथा असुर्यम् ॥ १ ॥

सत्रा । मदासः । तव । विश्वऽजन्याः । सत्रा । रायः । अध । ये । पार्थिवासः ।
सत्रा । वाजानाम् । अभवः । विऽभक्ता । यत् । देवेषु । धारयथाः । असुर्यम् ॥ १ ॥

हे इन्द्र [v]तव त्वदीयाः [v]मदासः सोमपानजनिता मदाः [v]सत्रा । सत्यनामैतत् । सत्यं [v]विश्वजन्याः सर्वजनहिता भवन्ति । यद्वा । सत्रेति महन्नाम । महान्तस्तव मदा इति योज्यम् । [v]अध अपि च [v]पार्थिवासः पृथिव्युपलक्षिते लोकत्रये भवास्त्वदीयाः [v]ये [v]रायः धनसमूहाः सन्ति तेऽपि

---

१. ख-ङ्ग-त२-न-भ-र–अनूनम् । २. ख-घ-ङ्ग-त१-न-भ-र-श–'शस्थं' नास्ति; ङ्ग–शंस्यम् । ३. त–महाव्रते ।

[v]सत्रा सत्यं विश्वजनहिता भवन्तीत्यन्वयः । किंच त्वं [v]वाजानाम् अन्नानां [v]सत्रा सत्यं [v]विभक्ता दाता [v]अभवः भवसि । यद्वा । सत्रा महतां वाजानामिति योज्यम् । [v]यत् यस्मात्त्वं [v]देवेषु मध्ये [v]असुर्यं बलं [v]धारयथाः अतः कारणात्त्वमेवं करोषीत्यर्थः ॥

अनु प्र येजे जनऽओजो अस्य सत्रा दधिरे अनु वीर्याय ।
स्यूमगृभे दुधयेऽर्वते च क्रतुं वृञ्जन्त्यपि वृत्रहत्ये ॥ २ ॥

अनु । प्र । येजे । जनः । ओजः । अस्य । सत्रा । दधिरे । अनु । वीर्याय ।
स्यूमऽगृभे । दुधये । अर्वते । च । क्रतुम् । वृञ्जन्ति । अपि । वृत्रऽहत्ये ॥ २ ॥

[v]अस्य इन्द्रस्य [v]ओजः बलं [v]जनः यजमानः [v]अनु [v]प्र [v]येजे संततं प्रकर्षेण यजते पूजयति । अपि च तमिन्द्रं [v]वीर्याय वीरकर्म कर्तुं [v]सत्रा सत्यम् [v]अनु [v]दधिरे पुरो[1] दधिरे[2] यजमानाः । यद्वा । सत्रा महान्तमिन्द्रमिति योज्यम् । अपि च [v]स्यूमगृभे स्यूम्नः स्यूतान् अविच्छेदेन वर्तमानान् शत्रून् गृह्णते [v]दुधये । दुधिर्हिंसाकर्मा । तेषां हिंसकाय [v]अर्वते शत्रूणामभिगन्त्रे [v]च तस्मा इन्द्राय [v]क्रतुं कर्म परिचरणात्मकं [v]वृञ्जन्ति निष्पादयन्ति । किमर्थम् । [v]वृत्रहत्ये वृत्रस्य वारकस्य[3] शत्रोर्हननं निमित्तम् ॥

तं सध्रीचीरूतयो वृष्ण्यानि पौंस्यानि निऽयुतः सश्चुरिन्द्रम् ।
समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसं गिर आ विशन्ति ॥ ३ ॥

तम् । सध्रीचीः । ऊतयः । वृष्ण्यानि । पौंस्यानि । निऽयुतः । सश्चुः । इन्द्रम् ।
समुद्रम् । न । सिन्धवः । उक्थऽशुष्माः । उरुऽव्यचसम् । गिरः । आ । विशन्ति ॥ ३ ॥

[v]तम् इन्द्रम् [v]ऊतयः मरुतः [v]सध्रीचीः सहाञ्चन्त्यः संगता भूत्वा [v]सश्चुः सचन्ते सेवन्ते । यद्वा । ऊतयस्तर्पकाण्यन्नानि सह वर्तमानानि भूत्वा सेवन्ते । तथा [v]वृष्ण्यानि वीर्याणि [v]पौंस्यानि बलानि च [v]नियुतः रथे युज्यमानाः[3] वडवाश्च तम्[4] [v]इन्द्रं सेवन्ते । अपि च [v]उक्थशुष्माः । उक्थं शस्त्रम् । तदेव बलं[5] यासां तादृशाः [v]गिरः स्तुतयश्च [v]उरुव्यचसं विस्तीर्णव्याप्तिकं तमिन्द्रम् [v]आ [v]विशन्ति प्रविशन्ति । तत्र दृष्टान्तः । [v]समुद्रं [v]न [v]सिन्धवः । यथा स्यन्दनशीला नद्यः समुद्रमाविशन्त्याविश्य च विभक्ततया न दृश्यन्ते एवं सर्वा अपि स्तुतय इन्द्रेणैकीभवन्तीत्यर्थः ॥

स रायस्खामुप सृजा गृणानः पुरुश्चन्द्रस्य त्वमिन्द्र वस्वः ।
पतिर्बभूथासमो जनानामेको विश्वस्य भुवनस्य राजा ॥ ४ ॥

सः । रायः । खाम् । उप । सृज । गृणानः । पुरुऽचन्द्रस्य । त्वम् । इन्द्र । वस्वः ।
पतिः । बभूथ । असमः । जनानाम् । एकः । विश्वस्य । भुवनस्य । राजा ॥ ४ ॥

हे [v]इन्द्र [v]गृणानः स्तूयमानः [v]सः [v]त्वं [v]रायः धनस्य [v]खाम् । नदीनामैतत् । अत्र तत्संबद्धा धारा लक्ष्यते । धाराम् [v]उप [v]सृज विमुञ्च । अस्माभिः संयोजयेत्यर्थः । कीदृशस्य धनस्य । [v]पुरु-

---

१. ख-ज्ञ-न-भ-र-'पुरो दधिरे' नास्ति । २. ख-ज्ञ-भ-आवरकस्य । ३. श-नियुज्यमानाः । ४. ख-ज्ञ-ज्ञ-त-न-भ-य-र-तमेव । ५. ज्ञ-शुष्मं बलम् ।

श्रन्द्रस्य बहूनामाह्लादकस्य ᵛवस्वः निवासकस्य । अपि च ᵛअसमः अनुपमः सर्वोत्कृष्टस्त्वं ᵛजनानां सर्वेषां प्राणिनां ᵛपतिः अधिपतिः ᵛबभूथ[1] । तथा ᵛविश्वस्य सर्वस्य ᵛभुवनस्य भूतजातस्य ᵛएकः असाधारणो ᵛराजा ईश्वरश्च बभूविथ[2] ॥

स तु श्रुधि श्रुत्या यो दुवोयुर्द्यौर्न भूमाभि रायो अर्यः ।
असो यथा नः शवसा चकानो युगेयुगे वयसा चेकितानः ॥ ५ ॥

सः । तु । श्रुधि । श्रुत्या । यः । दुवःऽयुः । द्यौः । न । भूम । अभि । रायः । अर्यः ।
असः । यथा । नः । शवसा । चकानः । युगेऽयुगे । वयसा । चेकितानः ॥ ५ ॥

हे इन्द्र ᵛश्रुत्या श्रुत्यानि स्तोत्राणि ᵛतु क्षिप्रं ᵛश्रुधि शृणु । ᵛयः त्वं ᵛदुवोयुः अस्मदीयं परिचरणमात्मन इच्छन् ᵛअर्यः अरेः संबन्धीनि ᵛरायः धनानि ᵛभूम बहुतराणि ᵛद्यौर्न सूर्य इव ᵛअभि भवसि ᵛसः त्वं श्रुधीत्यन्वयः । अपि च ᵛशवसा आत्मीयेन बलेन स्तोतव्येन युक्तः ᵛचकानः स्तूयमानः ᵛयुगेयुगे काले काले ᵛवयसा हविर्लक्षणेनान्नेन ᵛचेकितानः प्रज्ञायमानस्त्वं ᵛयथा येन प्रकारेण ᵛनः अस्माकमसाधारणोऽसि तथा ᵛअसः स्याः ॥ ॥ ८ ॥

' अर्वाग्रथम् ' इति पञ्चर्चं चतुर्दशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । ' अर्वाग्रथम् ' इत्यनुक्रान्तम् । महाव्रते निष्केवल्ये उक्तो विनियोगः ॥

अर्वाग्रथं विश्ववारं त उग्रेन्द्र युक्तासो हरयो वहन्तु ।
कीरिश्चिद्धि त्वा हवते स्वर्वानृधीमहि सधमादस्ते अद्य ॥ १ ॥

अर्वाक् । रथम् । विश्वऽवारम् । ते । उग्र । इन्द्र । युक्तासः । हरयः । वहन्तु ।
कीरिः । चित् । हि । त्वा । हवते । स्वःऽवान् । ऋधीमहि । सधऽमादः । ते । अद्य ॥ १ ॥

हे ᵛउग्र उद्भूर्णबल ᵛइन्द्र ᵛयुक्तासः रथेन युक्ताः ᵛहरयः अश्वाः ᵛते त्वदीयं ᵛविश्ववारं विश्वैर्वरणीयं ᵛरथम् ᵛअर्वाक् अस्मदभिमुखं ᵛवहन्तु आनयन्तु । ᵛहि यस्मात् ᵛस्वर्वान् । स्वः सुष्ठु अरणीयं गुणजातम् । तद्वान् ᵛकीरिश्चित् स्तोता भरद्वाज ऋषिः ᵛत्वा त्वां ᵛहवते आह्वयति तस्मात् कारणात् त्वदीयं रथमभिमुखं वहन्त्वित्यर्थः । वयं च ᵛअद्य इदानीं ᵛते त्वया ᵛसधमादः सह माद्यन्तः ᵛऋधीमहि समृद्धा भवेम ॥

तृतीये पर्यायेऽच्छावाकस्य ' प्रो द्रोणे ' इत्येषा शस्त्रयाज्या । सूत्रितं च—' प्रो द्रोणे हरयः कर्माग्मन्निति याज्या ' (आश्व. श्रौ. ६· ४) इति ॥

प्रो द्रोणे हरयः कर्मांग्मन्पुनानास ऋज्यन्तो अभूवन् ।
इन्द्रो नो अस्य पूर्व्यः पपीयाद्व्युक्षो मदस्य सोम्यस्य राजा ॥ २ ॥

प्रो इति । द्रोणे । हरयः । कर्मन् । अग्मन् । पुनानासः । ऋज्यन्तः । अभूवन् ।
इन्द्रः । नः । अस्य । पूर्व्यः । पपीयात् । व्युक्षः । मदस्य । सोम्यस्य । राजा ॥ २ ॥

---

१. ज्ञ–बभूथ बभूविथ । • २. ज्ञ–बभूथ ।

vहरयः हरितवर्णाः सोमाः vनः vकर्म अस्मदीयं यज्ञं vप्रो vअग्मन् प्रकर्षेण गच्छन्ति प्राप्नुवन्ति । प्राप्य च vपुनानासः पूयमानाः vद्रोणे द्रोणकलशे vऋज्यन्तः ऋजु गच्छन्तः vअभूवन् भवन्ति। vपूर्व्यः पुरातनः vशुश्रुः दीप्तिर्निवासभूतो शुस्थानो वा vमदस्य मदकरस्य vसोम्यस्य सोमस्य vराजा ईश्वर एवंभूतः vइन्द्रः च vअस्य इमं सोमं vपपीयात् पिबतु ॥

आसस्राणासः शवसानमच्छेन्द्रं सुचक्रे रथ्यासो अश्वाः ।
अभि श्रव ऋज्यन्तो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत् ॥ ३ ॥

आऽसस्राणासः । शवसानम् । अच्छ । इन्द्रम् । सुऽचक्रे । रथ्यासः । अश्वाः ।
अभि । श्रवः । ऋज्यन्तः । वहेयुः । नु । चित् । नु । वायोः । अमृतम् । वि । दस्येत् ॥ ३ ॥

vआसस्राणासः परितो गच्छन्तः vरथ्यासः रथे युक्ताः vअश्वाः vऋज्यन्तः ऋजुगमनाः सन्तः vसुचक्रे शोभनचक्रे रथेऽवस्थितं vशवसानं बलमिवाचरन्तम् vइन्द्रं vश्रवः श्रवणीयमस्मदीयं हविः vअच्छ आभिमुख्येन vअभि vवहेयुः आवहेयुः । नू चित् इति निपातौ निषेधेऽत्र वर्तते । vअमृतम् अमरणहेतुभूतं सोमलक्षणं हविः vवायोः हेतोः vनु इदानीं vनू vचित् नैव vवि vदस्येत् क्षयं न प्राप्नुयात् । पात्रे गृहीतः सोमो वायुना शुष्यति ततः पुरैव तदनार्थमश्वा इन्द्रमभिवहेयुरित्यर्थः ॥

वरिष्ठो अस्य दक्षिणामियर्तीन्द्रो मघोनां तुविकूर्मितमः ।
यया वज्रिवः परियास्यंहो मघा च धृष्णो दयसे वि सूरीन् ॥ ४ ॥

वरिष्ठः । अस्य । दक्षिणाम् । इयर्ति । इन्द्रः । मघोनाम् । तुविऽकूर्मिऽतमः ।
यया । वज्रिऽवः । परिऽयासि । अंहः । मघा । च । धृष्णो इति । दयसे । वि । सूरीन् ॥ ४ ॥

vवरिष्ठः उरुतमः vतुविकूर्मितमः अतिशयेन बहुविधकर्मा vइन्द्रो vमघोनां मघवतां हविर्लक्षणधनोपेतानां मध्ये vअस्य यजमानस्य vदक्षिणां यज्ञे दातव्याम् vइयर्ति प्रेरयति । यद्वा । मघोनामिति अस्येदमनेन समानाधिकरणम् ॥ वचनव्यत्ययः ॥ मघोनो हविष्मतोऽस्य यजमानस्येत्यर्थः । शेषः प्रत्यक्षकृतः । हे vवज्रिवः वज्रवन्निन्द्र vयया दक्षिणया दत्तया vअंहः पापं यज्ञसंबन्धि vपरियासि विनाशयसि हे vधृष्णो धर्षक vमघा मघानि धनानि vसूरीन् स्तोतॄन् पुत्रांश्च यया च दक्षिणया vवि vदयसे प्रयच्छसि तादृशीं दक्षिणां प्रेरयसीत्यर्थः ॥

इन्द्रो वाजस्य स्थविरस्य दातेन्द्रो गीर्भिर्वर्धतां वृद्धमहाः ।
इन्द्रो वृत्रं हनिष्ठो अस्तु सत्वा ता सूरिः पृणति तूतुजानः ॥ ५ ॥

इन्द्रः । वाजस्य । स्थविरस्य । दाता । इन्द्रः । गीःऽभिः । वर्धताम् । वृद्धऽमहाः ।
इन्द्रः । वृत्रम् । हनिष्ठः । अस्तु । सत्वा । आ । ता । सूरिः । पृणति । तूतुजानः ॥ ५ ॥

अयम् vइन्द्रः vस्थविरस्य[1] vवाजस्य अन्नस्य बलस्य वा vदाता भवतु । स च vइन्द्रः vवृद्धमहाः प्रवृद्धतेजस्कः सन् vगीर्भिः अस्मदीयाभिः स्तुतिभिः vवर्धताम् । vसत्वा शत्रूणां शातयिता

१. ज्ञ–स्थविरस्य श्रेष्ठस्य ।

सः [V]इन्द्रः [V]वृत्रम् आवरकं शत्रुं [V]हनिष्ठः हन्तृतमः [V]अस्तु भवतु । अपि च [V]सूरिः प्रेरकः स इन्द्रः [V]तूतुजानः त्वरमाणः [V]ता तानि धनानि [V]आ [V]पृणति अस्मभ्यं प्रयच्छतु ॥ ॥ ९ ॥

'अपादितः' इति पञ्चर्चं पञ्चदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । 'अपात्' इत्यनुक्रान्तम् । महाव्रते निष्केवल्य उक्तो विनियोगः ॥

अपादित उदु नश्चित्रतमो महीं भर्षद्द्युमतीमिन्द्रहूतिम् ।
पन्यसीं धीतिं दैव्यस्य यामञ्जनस्य रातिं वनते सुदानुः ॥ १ ॥

अपात् । इतः । उत् । ऊँ इति । नः । चित्रऽतमः । महीम् । भर्षत् । द्युऽमतीम् । इन्द्रऽहूतिम् । पन्यसीम् । धीतिम् । दैव्यस्य । यामन् । जनस्य । रातिम् । वनते । सुऽदानुः ॥ १ ॥

[V]चित्रतमः चायनीयतम आश्चर्यतमो वा स इन्द्रः [V]नः अस्मदीयात् [V]इतः अस्मात् ग्रहचमसादेः [V]अपात् सोमं पिबतु । यद्वा। इतोऽस्मात् शत्रोर्नोऽस्मान् अपात् पातु रक्षतु । [V]उदु इत्येतौ पूरणौ । तथा [V]महीं महतीं [V]द्युमतीं दीप्तिमतीम् [V]इन्द्रहूतिम् इन्द्रस्य स्तुतिं [V]भर्षत् स इन्द्रो बिभर्तु धारयतु । [V]दैव्यस्य देवसंबन्धिनो [V]जनस्य [V]यामन् यामनि यज्ञे क्रियमाणां [V]पन्यसीं स्तुत्यतमां [V]धीतिं परिचरणरूपां क्रियां [V]रातिं दातव्यं हविश्च [V]सुदानुः शोभनदान इन्द्रः [V]वनते संभजतु ॥

दूराच्चिदा वसतो अस्य कर्णा घोषादिन्द्रस्य तन्यति ब्रुवाणः ।
एयमेनं देवहूतिर्वव्रृत्यान्मद्र्यङिन्द्रमियमृच्यमाना ॥ २ ॥

दूरात् । चित् । आ । वसतः । अस्य । कर्णा । घोषात् । इन्द्रस्य । तन्यति । ब्रुवाणः । आ । इयम् । एनम् । देवऽहूतिः । ववृत्यात् । मद्र्यक् । इन्द्रम् । इयम् । ऋच्यमाना ॥ २ ॥

[V]अस्य इन्द्रस्य [V]कर्णा कर्णौ [V]दूराच्चित् दूरदेशादपि [V]आ [V]वसतः स्तोत्रश्रवणार्थमागच्छतः । [V]इन्द्रस्य [V]घोषात् घोषणीयात् स्तोत्राद्धेतोः [V]ब्रुवाणः स्तुवन् स्तोता [V]तन्यति शब्दं करोति । यद्वा । सर्वत्र विस्तारयति । [V]देवहूतिः देवस्येन्द्रस्याह्वानरूपा [V]इयं स्तुतिश्च [V]ऋच्यमाना स्वयं प्रेर्यमाणा सती [V]एनम् [V]इन्द्रम् [V]मद्र्यक् मदभिमुखम् [V]आ [V]ववृत्यात् आवर्तयतु । पुनः [V]इयम् इति पूरणः ॥

तं वो धिया परमया पुराजामजरमिन्द्रमभ्यनूष्यर्कैः ।
ब्रह्मा च गिरो दधिरे समस्मिन्महांश्च स्तोमो अधि वर्धदिन्द्रे ॥ ३ ॥

तम् । वः । धिया । परमया । पुराऽजाम् । अजरम् । इन्द्रम् । अभि । अनूषि । अर्कैः । ब्रह्मा । च । गिरः । दधिरे । सम् । अस्मिन् । महान् । च । स्तोमः । अधि । वर्धत् । इन्द्रे ॥ ३ ॥

हे इन्द्र [V]तं तादृशम् [V]इन्द्रं [V]वः त्वाम् ॥ व्यत्ययेन बहुवचनम् ॥ [V]परमया उत्कृष्टतमया [V]धिया स्तुत्या [V]अर्कैः अर्चनसाधनैर्हविर्भिः सार्धम् [V]अभ्यनूषि अभिष्टौमि । कीदृशम् । [V]पुराजां पूर्वस्मिन् काले जातं चिरंतनम् [V]अजरं जरारहितं नित्यम्[1] । अतः कारणात् [V]अस्मिन् [V]इन्द्रे [V]ब्रह्म

१. ख-भ–नित्यमिन्द्रमैश्वर्यवन्तम् ।

ब्रह्माणि हविर्लक्षणान्यन्नानि Vगिरः स्तुतयश्च Vसं Vदधिरे संधीयन्ते संश्लिष्यन्ते । Vमहान् प्रवृद्धः Vस्तोमः Vच Vअधि Vवर्धत् अधिकं वर्धते ॥

वर्धा॒द्यं य॒ज्ञ उ॒त सोम॒ इन्द्रं॑ वर्धा॒द्ब्रह्म॑ गिर॑ उ॒क्था च॒ मन्म॑ ।
वर्धा॒हैन॒मुष॑सो याम॒न्नक्तो॑र्वर्धा॒न्मासाः॑ श॒रदो॒ द्याव॒ इन्द्र॑म् ॥ ४ ॥

वर्धा॑त् । यम् । य॒ज्ञः । उ॒त । सोमः॑ । इन्द्र॑म् । वर्धा॑त् । ब्रह्म॑ । गिरः॑ । उ॒क्था । च॒ । मन्म॑ ।
वर्ध॑ । अह॑ । एन॑म् । उ॒षसः॑ । याम॑न् । अ॒क्तोः॑ । वर्धा॑न् । मासाः॑ । श॒रदः॑ । द्यावः॑ । इन्द्र॑म् ॥४॥

Vयम् Vइन्द्रं Vयज्ञः यागः Vवर्धात् वर्धयति । Vउत अपि च तत्साधनभूतः Vसोमः च यमिन्द्रं वर्धयति । तथा Vब्रह्म हविर्लक्षणमन्नं च पुरोडाशादिकं यमिन्द्रं Vवर्धात् वर्धयति । Vगिरः स्तोत्राणि Vमन्म मननीयानि Vउक्था उक्थानि शस्त्राणि Vच यं वर्धयन्ति Vएनम् इन्द्रम् Vउषसः च Vअक्तोः रात्रेः Vयामन् यामनि गमने सति Vवर्ध[1] वर्धयन्ति[1]। Vमासाः Vशरदः संवत्सराश्च Vद्यावः दिवसाश्चैनम् Vइन्द्रं Vवर्धान् वर्धयन्ति[2] ॥

एवा॑ ज॒ज्ञा॒नं सह॑से॒ असा॑मि वावृधा॒नं राध॑से च श्रु॒ताय॑ ।
म॒हाम॒ुग्रम॑वसे विप्र नू॒नमा वि॑वासेम वृत्र॒तूर्ये॑षु ॥ ५ ॥

एव । ज॒ज्ञा॒नम् । सह॑से । असा॑मि । व॒वृ॒धा॒नम् । राध॑से । च॒ । श्रु॒ताय॑ ।
म॒हाम् । उ॒ग्रम् । अव॑से । वि॒प्र॒ । नू॒नम् । आ । वि॒वा॒से॒म॒ । वृ॒त्र॒ऽतूर्ये॑षु ॥ ५ ॥

हे Vविप्र मेधाविन्निन्द्र Vएव एवं Vजज्ञानं प्रादुर्भवन्तं Vसहसे शत्रूणामभिभवार्थम् Vअसामि[3] बहुलं Vवावृधानं[4] वर्धमानं Vमहां महान्तम् Vउग्रम् उद्गूर्णबलं त्वां Vनूनम् अद्य Vवृत्रतूर्येषु[5] Vश्रुताय[6] विश्रुताय Vराधसे धनाय Vच Vअवसे रक्षणाय च Vआ Vविवासेम परिचरेम ॥ ॥ १० ॥

'मन्द्रस्य कवेः' इति पञ्चर्चं षोडशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम्। 'मन्द्रस्य' इत्यनुक्रान्तम्। गतो विनियोगः ॥

म॒न्द्रस्य॑ क॒वेर्दि॒व्यस्य॒ वह्ने॑र्विप्रम॒न्मनो॑ वच॒नस्य॒ मध्वः॑ ।
अपा॑ न॒स्तस्य॑ सच॒नस्य॑ देवे॒षो॑ युवस्व गृण॒ते गो॑अग्राः ॥ १ ॥

म॒न्द्रस्य॑ । क॒वेः॑ । दि॒व्यस्य॑ । वह्नेः॑ । विप्र॑ऽमन्मनः । व॒च॒नस्य॑ । मध्वः॑ ।
अपा॑ः । नः॒ । तस्य॑ । स॒च॒नस्य॑ । देव॒ । इ॒षः॑ । युव॒स्व॒ । गृ॒ण॒ते । गोऽअ॑ग्राः ॥ १ ॥

Vमन्द्रस्य मोदनस्य मदकरस्य वा Vकवेः विक्रान्तस्य Vदिव्यस्य दिवि भवस्य Vवह्नेः वोढुः Vविप्रमन्मनः । विप्रा मेधाविनो मन्मानः स्तोतारो यस्य स तथोक्तः । तस्य Vवचनस्य वचनीयस्य स्तुत्यस्य

---

१. ख१-भ-वर्धय आवर्धयन्ति; ज्ञ-ञ-न-वर्धा वर्धयन्ति; त२-वर्धा वर्धयंसि । २. ख१-घ-ज-ण-भ-वर्धन्ति अह (ख१-भ-अहः) पूरणः । ३. ख-घ-भ-असामि संपूर्णम् । ४. घ-ववृधानम् । ५. घ-वृत्रतूर्येषु रणेषु; ज्ञ-श-वृत्रतूर्येषु संग्रामेषु । ६. ख-ञ-त-न-भ-र-'श्रुताय' नास्ति ।

vतस्य सर्वत्र प्रसिद्धस्य vसचनस्य सेव्यस्य[1] एवंभूतस्य vमध्वः मधुनः सोमस्य ॥ 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥ एवंभूतं vनः अस्मदीयं सोमं हे इन्द्र त्वम् vअपाः पिब । अपि च हे vदेव द्योतमानेन्द्र vगृणते स्तुवते । तृतीयार्थे चतुर्थी । स्तुवता मया vगोअग्राः । गावोऽग्रे प्रमुखे यासां तादृशाः vइषः अन्नानि vयुवस्व संयोजय ॥

अयमुशानः पर्यद्रिमुस्रा ऋतधीतिभिर्ऋतयुर्युजानः ।
रुजदरुग्णं वि वलस्य सानुं पणींर्वचोभिराभि योधदिन्द्रः ॥ २ ॥

अयम् । उशानः । परि । अद्रिम् । उस्राः । ऋतधीतिऽभिः । ऋतऽयुक् । युजानः ।
रुजत् । अरुग्णम् । वि । वलस्य । सानुम् । पणीन् । वचःऽभिः । अभि । योधत् । इन्द्रः ॥२॥

vअयम् इन्द्रः vअद्रिं वलेन गोपिधानाय निर्मितं शिलोच्चयं vपरि परितः पर्वतसमीपे विद्यमानाः vउस्राः गाः vउशानः कामयमानः vऋतधीतिभिः सत्यकर्मभिरङ्गिरोभिः vयुजानः संगच्छमानः vऋतयुक् ऋतेन[2] तत्कृतेन[2] स्तोत्रेण युक्तश्च भूत्वा vवलस्य असुरस्य स्वभूतं vसानुं समुच्छ्रितं पर्वतम् vअरुग्णम् अन्यैरभग्नं vवि vरुजत् व्यभाङ्क्षीत् । किंच vपणीन् वलानुचरानेतत्संज्ञानसुरांश्च vवचोभिः स्तुत्यरायुधैः संतर्जनरूपैर्वाक्यैरेव[3] वा अयम्[3] vइन्द्रः vअभि vयोधत् अभ्ययुध्यत् ॥

अयं द्योतयदुषो व्यक्तून्दोषा वस्तोः शरदु इन्दुरिन्द्र ।
इमं केतुमदधुर्नू चिदह्नां शुचिजन्मन उषसश्चकार ॥ ३ ॥

अयम् । द्योतयत् । अषुतः । वि । अक्तून् । दोषा । वस्तोः । शरदः । इन्दुः । इन्द्र ।
इमम् । केतुम् । अदधुः । नु । चित् । अह्नाम् । शुचिऽजन्मनः । उषसः । चकार ॥ ३ ॥

हे vइन्द्र त्वया नियम्यमानः पीयमानो वा vअयम् vइन्दुः सोमः vअद्युतः अद्योतमानान् vअक्तून् । अक्तूरिति रात्रिनाम । अत्र च तत्संबन्धात् पक्षमासादयो लक्ष्यन्ते । पक्षमासादीन् तथा vदोषा रात्रिं vवस्तोः दिवसं vशरदः संवत्सरांश्च vवि vद्योतयत् व्यदीपयत् । कुत इत्यत आह । vनू vचित् पुरा देवाः vइमं सोमं चन्द्रात्मना नभसि वर्तमानम् vअह्नां दिवसानां vकेतुं प्रज्ञापकं यस्मात् vअदधुः व्यदधुः अकुर्वन् तस्मादनेन पक्षमासादयः सर्वे प्रकाश्यन्ते । चन्द्रगत्यधीनत्वात्तिथिविभागानाम् । अपि चायं सोमः vउषसः उषःकालान् vशुचिजन्मनः आत्मीयेन तेजसा शुद्धोदयान् vचकार करोति ॥

अयं रोचयदुरुचो रुचानोऽयं वासयदुषसो विभातीः ।
अयमीयत ऋतयुग्भिरश्वैः स्वर्विदा नाभिना चर्षणिप्राः ॥ ४ ॥

अयम् । रोचयत् । अरुचः । रुचानः । अयम् । वासयत् । वि । ऋतेन । पूर्वीः ।
अयम् । ईयते । ऋतयुक्ऽभिः । अश्वैः । स्वःऽविदा । नाभिना । चर्षणिऽप्राः ॥ ४ ॥

---

१. ख–सेवनस्य ; झ-न-भ-य–सेवनीयस्य ; 'त–सेव्यस्य' नास्ति । २. घ–ऋतेन तत्कृतेन स्तोत्रेण च युजानः ; श–तेन कृतेन स्तोत्रेण च युज्यमानः । ३. झ–°र्वाक्यैर्वायम ; त–°र्वाक्यैरेनायम ।

vअयम् इन्द्रः vरुचानः रोचमानः सूर्यात्मना दीप्यमानः vअरुचः प्रकाशरहितान् तमसा मलीमसान् सर्वाँल्लोकान् vरोचयत् प्रकाशयति । तथा vपूर्वीः बह्वीरुषसश्च vअयम् इन्द्रः vऋतेन सत्यभूतेन सर्वत्र गमनशीलेन वा तेजसा vवि vवासयत् व्यापयति । तत्रत्यानि तमांसि निवर्तयतीत्यर्थः । तथा vऋतयुग्भिः ऋतेन स्तोत्रेण युज्यमानैः vअश्वैः vनाभिना संनद्धेन vस्वर्विदा सुष्ठुरणीयस्य[1] धनस्य लम्भकेन रथेन vचर्षणिप्राः चर्षणीनां मनुष्याणां कामैः पूरयिता सन् vअयम् एवेन्द्रः vईयते गच्छति ॥

नू गृणानो गृणते प्रत्न राजन्निषः पिन्व वसुदेयाय पूर्वीः ।
अप ओषधीरविषा वनानि गा अर्वतो नॄनृचसे रिरीहि ॥ ५ ॥

नु । गृणानः । गृणते । प्रत्न । राजन् । इषः । पिन्व । वसुऽदेयाय । पूर्वीः ।
अपः । ओषधीः । अविषा । वनानि । गाः । अर्वतः । नॄन् । ऋचसे । रिरीहि ॥ ५ ॥

हे vप्रत्न पुरातन vराजन् राजमानेन्द्र vगृणानः स्तूयमानस्त्वं vवसुदेयाय वसूनि धनानि त्वया देयानि यस्मै तादृशाय vगृणते स्तुवते vपूर्वीः बह्वीः vइषः अन्नानि vनु क्षिप्रं vपिन्व सिञ्च प्रयच्छेत्यर्थः । किंच vऋचसे अर्चयित्रे स्तोत्रे vअपः वृष्टिलक्षणान्युदकानि vओषधीः व्रीह्यादीन् vअविषा विषरहितानि रक्षकाणि वा vवनानि वृक्षजातानि चूतपनसादीनि vगा vअर्वतः अश्वान् vनॄन् मनुष्यांश्च कर्मकरान् vरिरीहि देहि ॥ ॥ ११ ॥

'इन्द्र पिब' इति पञ्चर्चं सप्तदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम् । 'इन्द्र पिब' इत्यनुक्रान्तम् । गतः सूक्तविनियोगः । प्रथमे रात्रिपर्यायेऽच्छावाकस्याद्या[2] शस्त्रयाज्या[3] । सूत्रितं च—'इन्द्र पिब तुभ्यं सुतो मदायेति याज्या (आश्व. श्रौ. ६. ४) इति ॥

इन्द्र पिब तुभ्यं सुतो मदायावं स्यु हरी वि मुचा सखाया ।
उत प्र गाय गण आ निषद्यार्था युज्ञाय गृणते वयो धाः ॥ १ ॥

इन्द्र । पिब । तुभ्यम् । सुतः । मदाय । अव । स्यु । हरी इति । वि । मुच । सखाया ।
उत । प्र । गाय । गणे । आ । निऽसद्य । अथ । युज्ञाय । गृणते । वयः । धाः ॥ १ ॥

हे vइन्द्र तं सोमं vपिब यः सोमः vतुभ्यं vमदाय मदार्थं vसुतः अभिषुतः । यतस्त्वया सोमः पातव्योऽतः कारणात् vसखाया समानख्यानौ मित्रभूतौ वा vहरी अश्वौ vअव vस्य अवस्थापय । तदनन्तरं vवि vमुच रथाद्विमुञ्च । vउत अपि च vगणे अस्मत्स्तोतृसंघे vआ आभिमुख्येन vनिषद्य उपविश्य vप्र vगाय अस्माभिः कृतं स्तोत्रमुपश्लोकय । vअथ अनन्तरं vयज्ञाय यजमानाय vगृणते स्तुवते vवयः अन्नं vधाः देहि ॥

द्वितीये रात्रिपर्याये[3] अच्छावाकस्य 'अस्य पिब' इति शस्त्रयाज्या । सूत्रितं च—'अस्य[4] पिबेति याज्या[4]' (आश्व. श्रौ. ६. ४) इति ॥

---

१. घ-श-सुष्ठु वरणीयस्य । २. झ-भ-°स्याज्यशस्त्रयाज्या; र-°स्याज्या शस्त्रयाज्या; श-°स्याज्यशस्त्रस्य याज्या । ३. झ-ञ-त२-न-भ-य-र-पर्याये । ४. न-अस्य पिब यस्य जज्ञान इन्द्रेति याज्या ।

अस्य पिब यस्य जज्ञान इन्द्र मदाय क्रत्वे अपिबो विरप्शिन् ।
तमु ते गावो नर आपो अद्रिरिन्दुं समह्यन्पीतये समस्मै ॥ २ ॥

अस्य । पिब । यस्य । जज्ञानः । इन्द्र । मदाय । क्रत्वे । अपिबः । विऽरप्शिन् ।
तम् । ऊँ इति । ते । गावः । नरः । आपः । अद्रिः । इन्दुम् । सम् । अह्यन् । पीतये । सम् । अस्मै ॥२॥

हे [v]इन्द्र [v]अस्य इमं सोमं [v]पिब । हे [v]विरप्शिन् महन् [v]जज्ञानः जायमान एव त्वं [v]यस्य यं सोमम् [v]अपिबः पूर्वं पीतवानसि । किमर्थम् । [v]मदाय हर्षाय [v]क्रत्वे कर्मणे वृत्रवधादिलक्षणं वीर्यकर्म[1] कर्तुं च । [v]तमु तादृशमेव [v]इन्दुं सोमं [v]गावः गवि भवाः श्रपणसाधनाः क्षीरादयः [v]नरः नेतारोऽध्वर्यवः [v]आपः वसतीवर्याख्याः [v]अद्रिः अभिषवार्थो ग्रावा एते सर्वे [v]अस्मै अस्येन्द्रस्य [v]ते तव [v]पीतये पानार्थं [v]समह्यन् समगमयन् । 'हि गतौ' इत्यस्यैतद्रूपम् । पुनः [v]सम् इति पूरकः ॥

समिद्धे अग्नौ सुत इन्द्र सोम आ त्वा वहन्तु हरयो वहिष्ठाः ।
त्वायता मनसा जोहवीमीन्द्रा याहि सुवितायं महे नः ॥ ३ ॥

सम्ऽइद्धे । अग्नौ । सुते । इन्द्र । सोमे । आ । त्वा । वहन्तु । हरयः । वहिष्ठाः ।
त्वाऽयता । मनसा । जोहवीमि । इन्द्र । आ । याहि । सुवितायं । महे । नः ॥ ३ ॥

[v]अग्नौ [v]समिद्धे[2] दीप्ते[2] [v]सोमे [v]सुते अभिषुते सति हे [v]इन्द्र [v]त्वा त्वां [v]वहिष्ठाः वोढृतमाः [v]हरयः अश्वाः [v]आ [v]वहन्तु । इमं यज्ञं प्रत्यानयन्तु । अहं च [v]त्वायता त्वां कामयमानेन [v]मनसा [v]जोहवीमि पुनःपुनराह्वयामि । हे [v]इन्द्र त्वं [v]नः अस्माकं [v]महे महते [v]सुविताय कल्याणाय [v]आ [v]याहि आगच्छ ॥

आ याहि शश्वदुशता ययाथेन्द्र महा मनसा सोमपेयम् ।
उप ब्रह्माणि शृणव इमा नोऽथा ते यज्ञस्तन्वे[3] वयो धात् ॥ ४ ॥

आ । याहि । शश्वत् । उशता । ययाथ । इन्द्र । महा । मनसा । सोमऽपेयम् ।
उप । ब्रह्माणि । शृणवः । इमा । नः । अथ । ते । यज्ञः । तन्वे । वयः । धात् ॥ ४ ॥

हे [v]इन्द्र पुरा [v]शश्वत् बहुकृत्वः [v]ययाथ सोमपानार्थं यज्ञं गतवानसि । अतः कारणात् [v]उशता अस्मान् कामयमानेन [v]महा महता [v]मनसा सह [v]सोमपेयं सोमः पीयते यस्मिन्[3] तादृशमस्मदीयं यज्ञम् [v]आ [v]याहि अभिगच्छ । आगत्य च [v]ब्रह्माणि स्तोत्राणि [v]इमा इदानीं प्रयुज्यमानानि [v]नः अस्मदीयानि [v]उप [v]शृणवः उपशृणु । [v]अथ अनन्तरं [v]यज्ञः यजमानः [v]ते तव [v]तन्वे शरीराय त्वच्छरीरपोषार्थं [v]वयः अन्नं सोमात्मकं [v]धात् ददातु ॥

---

१. घ-ञ-न-भ-श–वीर्यं कर्म । २. ज्ञ-त-न-श–समिद्धे सम्यगिन्धनैः दीप्ते । ३. घ-ज्ञ-त-न-भ-र-श–अस्मिन् ।

यदिन्द्र दिवि पार्ये यद्वध्र्यग्यद्वा स्वे सदने यत्र वासि ।
अतो नो यज्ञमवसे नियुत्वान्त्सजोषाः पाहि गिर्वणो मरुद्भिः ॥ ५ ॥

यत् । इन्द्र । दिवि । पार्ये । यत् । ऋधक् । यत् । वा । स्वे । सदने । यत्र । वा । असि ।
अतः । नः । यज्ञम् । अवसे । नियुत्वान् । सऽजोषाः । पाहि । गिर्वणः । मरुत्ऽभिः ॥५॥

हे [v]इन्द्र [v]पार्ये पारगे दूरदेशे [v]दिवि द्युलोकाख्ये [v]यत् यदि त्वं वर्तसे । यदि वा ऋधक् । एतत्पृथक्शब्देन समानार्थम् । पृथगन्यस्मिन् देशे वर्तसे । [v]यद्वा [v]स्वे स्वकीये [v]सदने गृहे । अथवा किमनेन विशेषणेन [v]यत्र यस्मिन् देशे [v]असि भवसि [v]अतः अस्मात् स्थानादागत्य हे [v]गिर्वणः गिरां संभक्तरिन्द्र [v]नियुत्वान् नियुतोऽश्वाः । तद्वान् [v]मरुद्भिः [v]सजोषाः सह प्रीयमाणस्त्वं [v]नः अस्माकम् [v]अवसे रक्षणाय [v]यज्ञम् अस्मदीयं यागं [v]पाहि रक्ष । यद्वा । यज्ञं यजनसाधनमस्मदीयं[1] सोममवसे तर्पणाय पाहि पिब ॥ ॥ १२ ॥

'अहेळमानः' इति पञ्चषमष्टादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रम्' । अनुक्रान्तं च– 'अहेळमानः' इति । गतो विनियोगः ॥

अहेळमान उप याहि यज्ञं तुभ्यं पवन्त इन्दवः सुतासः ।
गावो न वज्रिन्त्स्वमोको अच्छेन्द्रा गहि प्रथमो यज्ञियानाम् ॥ १ ॥

अहेळमानः । उप । याहि । यज्ञम् । तुभ्यम् । पवन्ते । इन्दवः । सुतासः ।
गावः । न । वज्रिन् । स्वम् । ओकः । अच्छ । इन्द्र । आ । गहि । प्रथमः । यज्ञियानाम् ॥१॥

हे इन्द्र [v]अहेळमानः अक्रुध्यंस्त्वं [v]यज्ञम् अस्मदीयम् [v]उप [v]याहि उपगच्छ[2] । यतः कारणात् [v]तुभ्यं त्वदर्थं [v]सुतासः अभिषुताः [v]इन्दवः सोमाः [v]पवन्ते पूयन्ते दशापवित्रेण शोध्यन्ते । हे [v]वज्रिन् वज्रवन् इन्द्र [v]गावो [v]न गावः स्वकीयं गोष्ठमिव [v]स्वं स्वकीयम् [v]ओकः स्थानं द्रोणकलशादिलक्षणम् [v]अच्छ आभिमुख्येन प्रामुवन्तीति शेषः । अतः कारणात् हे [v]इन्द्र [v]यज्ञियानां यज्ञार्हाणां देवानां मध्ये [v]प्रथमः मुख्यस्त्वं [v]आ [v]गहि आगच्छ ॥

या ते काकुत्सुकृता या वरिष्ठा यया शश्वत्पिबसि मध्व ऊर्मिम् ।
तया पाहि प्र ते अध्वर्युरस्थात्सं ते वज्रो वर्ततामिन्द्र गव्युः ॥ २ ॥

या । ते । काकुत् । सुऽकृता । या । वरिष्ठा । यया । शश्वत् । पिबसि । मध्वः । ऊर्मिम् ।
तया । पाहि । प्र । ते । अध्वर्युः । अस्थात् । सम् । ते । वज्रः । वर्तताम् । इन्द्र । गव्युः ॥२॥

हे इन्द्र [v]या [v]ते तव [v]काकुत् जिह्वा [v]सुकृता सुष्ठु धात्रा निर्मिता । [v]या च [v]वरिष्ठा उरुतमा विस्तीर्णतमा । [v]यया च [v]मध्वः मधुनः सोमस्य [v]ऊर्मिं रसं [v]शश्वत् बहुकृत्वः [v]पिबसि [v]तया जिह्वयास्मदीयं सोमं [v]पाहि पिब । तदर्थम् [v]अध्वर्युः अध्वरस्य नेता ऋत्विग्गृहीतसोमः सन् [v]प्र

---

१. ख-ञ-त-य-र–यजमान° । २. श–उपागच्छ ।

vअस्थात् हविर्धानादुत्तरवेदिदेशं प्रत्यगमत्। अपि च हे vइन्द्र vगव्युः शत्रुसंबन्धिनीर्गा आत्मन इच्छन् vते त्वदीयः vवज्रः vसं vवर्ततां शत्रुभिः संगतो भवतु। तान् हन्त्विरत्यर्थः ॥

एष द्रप्सो वृषभो विश्वरूप इन्द्राय वृष्णे समकारि सोमः।
एतं पिब हरिवः स्थातरुग्र यस्येशिषे प्रदिवि यस्ते अन्नम् ॥ ३ ॥

एषः। द्रप्सः। वृषभः। विश्वऽरूपः। इन्द्राय। वृष्णे। सम्। अकारि। सोमः।
एतम्। पिब। हरिऽवः। स्थातः। उग्र। यस्य। ईशिषे। प्रऽदिवि। यः। ते। अन्नम् ॥३॥

vद्रप्सः द्रवणशीलः vवृषभः कामानां वर्षिता vविश्वरूपः बहुविधरूपोपेत ईदृग्विधः vएषः vसोमः vवृष्णे कामानां वर्षित्रे vइन्द्राय इन्द्रस्य पानार्थं vसमकारि अभिषवादिभिः संस्कृतोऽभूत्। हे vहरिवः। हरी अश्वौ। तद्वन् हे vस्थातः सर्वेषामधिष्ठातः vउग्र उत्कृर्णबलेन्द्र vएतम् ईदृशं सोमं vपिब। vयस्य सोमस्य vप्रदिवि। जातावेकवचनम्। प्रभूतेषु दिवसेषु प्रगतेष्वहःसु वा vईशिषे त्वमेवेश्वरो भवसि। vयः च सोमः vते तव vअन्नम् अन्नत्वेन परिकल्पित एतं पिबेत्यन्वयः ॥

सुतः सोमो असुतादिन्द्र वस्यानयं श्रेयाञ्चिकितुषे रणाय।
एतं तितिर्व उप याहि यज्ञं तेन विश्वास्तविषीरा पृणस्व ॥ ४ ॥

सुतः। सोमः। असुतात्। इन्द्र। वस्यान्। अयम्। श्रेयान्। चिकितुषे। रणाय।
एतम्। तितिर्वः। उप। याहि। यज्ञम्। तेन। विश्वाः। तविषीः। आ। पृणस्व ॥ ४ ॥

हे vइन्द्र vसुतः अभिषुतः vअयं vसोमः vअसुतात् अकृताभिषवात् सोमादन्यदीयात् vवस्यान् वसीयान् वसुमत्तरः प्रशस्यतरः। तथा vचिकितुषे विदुषेऽभिज्ञाय तुभ्यं vरणाय रमणीयाय तदर्थं vश्रेयान् श्रेष्ठश्च भवति। त्वामतिशयेन रमयितेत्यर्थः। हे vतितिर्वः शत्रूणां तरितरिन्द्र[1] vयज्ञं यजनसाधनम् vएतं सोमम् vउप vयाहि उपागच्छ[2]। vतेन[3] च सोमेन vविश्वास्तविषीः सर्वाणि[4] बलानि vआ vपृणस्व आपूरय ॥

ह्वयामसि त्वेन्द्र याह्यर्वाङ्रं ते सोमस्तन्वे भवाति।
शतक्रतो मादयस्वा सुतेषु प्रास्माँ अव पृतनासु प्र विक्षु ॥ ५ ॥

ह्वयामसि। त्वा। आ। इन्द्र। याहि। अर्वाङ्। अरम्। ते। सोमः। तन्वे। भवाति।
शतक्रतो इति शतऽक्रतो। मादयस्व। सुतेषु। प्र। अस्मान्। अव। पृतनासु। प्र। विक्षु ॥ ५ ॥

हे vइन्द्र vत्वा त्वां vह्वयामसि आह्वयामः। अतः कारणात् त्वम् vअर्वाङ् अस्मदभिमुखः सन् vआ vयाहि आगच्छ। अस्मदीयः vसोमः च vते vतन्वे तव शरीराय vअरं पर्याप्तं vभवाति भवतु। त्वदीयं शरीरं यथाभिलाषं[1] तर्पयत्वित्यर्थः। हे vशतक्रतो बहुविधकर्मन्निन्द्र त्वं च vसुतेषु अभिषुतेषु

---

१. ख-ञ-भ-जेतरिन्द्र ; घ-नेतरिन्द्र। २. ञ-उपगच्छ। ३. ञ-त-न-र-उपगतेन। ४. ख-ञ-न-भ-सर्वाणि च। ५. श-यथाभिलषितम्।

अस्मदीयेषु सोमेषु ᵛमादयस्व तृप्यस्व । 'मद तृप्तियोगे' । तदनन्तरं ᵛपृतनासु संग्रामेषु ᵛअस्मान् ᵛप्र ᵛअव प्रकर्षेण रक्ष । न केवलं पृतनासु किंतु ᵛविश्षु सर्वासु प्रजास्वस्मान् ᵛप्र अव प्ररक्ष ॥ ॥१३॥

'प्रत्यस्मै' इति चतुर्ऋचमेकोनविंशं सूक्तं भरद्वाजस्यार्षमैन्द्रम् । चतुर्थी बृहती शिष्टा अनुष्टुभः । तथा चानुक्रान्तं—'प्रत्यस्मै चतुष्कमानुष्टुभं बृहत्यन्तम्' इति । प्रातःसवनेऽच्छावाकस्येदमुक्षीयमान-सूक्तम् । सूत्रितं च—'प्रत्यस्मा इत्युक्षीयमानायानूच्य' (आश्व. श्रौ. ५. ७) इति ॥

प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।
अरंगमाय जग्मयेऽपश्चाद्घ्वने नरे ॥ १ ॥

प्रति । अस्मै । पिपीषते । विश्वानि । विदुषे । भर ।
अरम्ऽगमाय । जग्मये । अपश्चात्ऽदघ्वने । नरे ॥ १ ॥

हे अध्वर्यो ᵛअस्मै इन्द्राय ᵛप्रति ᵛभर अभिहर । सोमं प्रयच्छेत्यर्थः । कीदृशायेन्द्राय । ᵛपिपीषते पातुमिच्छते ᵛविश्वानि सर्वाणि वेद्यानि ᵛविदुषे जानते ᵛअरंगमाय पर्याप्तगमनाय ᵛजग्मये यज्ञेषु गमनशीलाय ᵛअपश्चाद्घ्वने । दधिर्गतिकर्मा । अपश्चाद्गमनाय सर्वेषामग्रगामिने ᵛनरे नेत्रे यज्ञानाम् ॥

तृतीये स्वरसाम्नि निष्केवल्ये 'एमेनम्' इति स्तोत्रियस्तृचः । सूत्रितं च—'एमेनं प्रत्येतनेत्याद्यो वा सर्वेषाम्' (आश्व. श्रौ. ८. ५) इति ॥

एमेनं प्रत्येतन सोमेभिः सोमपातमम् ।
अमत्रेभिर्ऋजीषिणमिन्द्रं सुतेभिरिन्दुभिः ॥ २ ॥

आ । ईम् । एनम् । प्रतिऽएतन । सोमेभिः । सोमऽपातमम् ।
अमत्रेभिः । ऋजीषिणम् । इन्द्रम् । सुतेभिः । इन्दुऽभिः ॥ २ ॥

हे अध्वर्यवः ᵛसोमेभिः सोमैः करणभूतैः ᵛसोमपातमम् अतिशयेन सोमस्य पातारम् ᵛएनम् ᵛइन्द्रम् ᵛआ अभिमुखं ᵛप्रत्येतन प्रतिगच्छत । ᵛईम् इति निपातोऽनर्थकः । कीदृशमिन्द्रम् । ᵛअमत्रेभिः अमत्रैः सोमपात्रैर्ग्रहचमसादिभिः ᵛऋजीषिणम् । ऋजीषं शत्रूणामुपार्जकं बलम् । तद्वन्तम् । यद्वा । ऋजीषिणमित्युत्तरत्र संबन्धनीयम् । ᵛसुतेभिः अभिषुतैः ᵛइन्दुभिः सोमैर्ऋजीषिणम् । गतसारः सोम ऋजीषः । तद्वन्तम् । अथवा अमत्रेभिरमत्रैरमात्रैः[1] अपरिमितैरभिषुतैः सोमैर्ऋजीषिणम् ॥ ऋजेर्गत्यर्थान्नावसाधन ऋजीषशब्दः । ततो मत्वर्थीय इनिः ॥ संगतमित्यर्थः । एवंविधमिन्द्रं प्रतिगच्छतेत्यन्वयः । अन्य[2] आह । अमत्रेभिर्ग्रहचमसादिगतैरभिषुतैः सोमैर्ऋजीषिणं बलवन्तमेनमिन्द्रं प्रतिगच्छतेति ॥

---

१. त१–अमत्रैः; त२–अमत्रैरमात्रैः । २. श–अन्यस्तु ।

यदीं सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ ।
वेदा विश्वस्य मेधिरो धृषत्तंतमिदेषते ॥ ३ ॥

यदि । सुतेभिः । इन्दुऽभिः । सोमेभिः । प्रतिऽभूषथ ।
वेद । विश्वस्य । मेधिरः । धृषत् । तम्ऽतंम् । इत् । आ । ईषते ॥ ३ ॥

हे अध्वर्यवः [v]सुतेभिः अभिषुतैः [v]इन्दुभिः उन्दनशीलैर्दीप्तैर्वा[1] [v]सोमेभिः सोमैः [v]यदि [v]प्रतिभूषथ इन्द्रं प्रति यूयं प्रतिगच्छथ ॥ 'भू प्राप्तौ' इत्यस्यैतद्रूपम् ॥ तदानीं [v]मेधिरः मेधावी । मेधो यज्ञस्तद्वान्वा । स इन्द्रः [v]विश्वस्य विश्वं सर्वं भवदीयं कामं [v]वेद वेत्ति जानाति । ज्ञात्वा च [v]धृषत् शत्रूणां धर्षकः सन् [v]तंतमित् तं तं काममेव [v]एषते प्रापयति ॥

अस्माअस्मा इदन्धसोऽध्वर्यो प्र भरा सुतम् ।
कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्परत् ॥ ४ ॥

अस्मैऽअस्मै । इत् । अन्धसः । अध्वर्यो इति । प्र । भर । सुतम् ।
कुवित् । समस्य । जेन्यस्य । शर्धतः । अभिऽशस्तेः । अवऽस्परत् ॥ ४ ॥

[v]अस्माअस्मा [v]इत् अस्मा एवेन्द्राय नान्यस्मै हे [v]अध्वर्यो त्वम् [v]अन्धसः सोमलक्षणस्यान्नस्य [v]सुतम् अभिषुतं रसं [v]प्र [v]भर संप्रहर[2] । प्रयच्छेति यावत् । स चेन्द्रः [v]समस्य सर्वस्य [v]जेन्यस्य जेतव्यस्य [v]शर्धतः उत्सहमानस्य शत्रोः [v]अभिशस्तेः अभिशंसनात् तत्कृताद्धिंसनात् [v]कुवित् बहुशः [v]अवस्परत् अस्मान् पालयतु ॥ ॥ १४ ॥

'यस्य त्यत्' इति चतुर्ऋचं विंशं सूक्तं भरद्वाजस्यार्षमौष्णिहमैन्द्रम् । अनुक्रम्यते च— 'यस्यौष्णिहम्' इति । महाव्रतेऽपि निष्केवल्ये औष्णिहतृचाशीतावेतत्सूक्तम् । तथैव पञ्चमारण्यके सूत्रितं—'यस्य त्यच्छम्बरं मद इति त्रयस्तृचा गायत्र्यः' (ऐ. आ. ५. २. ५) इति ॥

यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयः ।
अयं स सोम इन्द्र ते सुतः पिब ॥ १ ॥

यस्य । त्यत् । शम्बरम् । मदे । दिवःऽदासाय । रन्धयः ।
अयम् । सः । सोमः । इन्द्र । ते । सुतः । पिब ॥ १ ॥

हे इन्द्र[3] [v]यस्य सोमस्य [v]मदे पानेन जनिते हर्षे सति [v]शम्बरम् असुरं [v]दिवोदासाय राज्ञे [v]रन्धयः अहिंसीः । यद्वा । वशीकृतवानसि । 'रध्यतिर्वशगमने' (निरु. ६. ३२) इति यास्कः । त्यत् इति क्रियाविशेषणम् । [v]त्यत् तत् प्रसिद्धं यथा भवति तथा अरन्धय[4] इत्यर्थः[4] । हे [v]इन्द्र [v]सः [v]अयं [v]सोमः [v]ते त्वदर्थं [v]सुतः अभिषुतः अतस्तं [v]पिब ॥

---

१. भ–अमृतेन जगत् क्लेदयितृभिर्दीप्तैर्वा । २. ख-घ-ङ्ग-त-भ-श–प्रहर । ३. त–इन्द्र त्वम् । ४. ख–अरन्धयः अहिंसीत्यर्थः ; त२–अरंधयदित्यर्थः ; भ–अरन्धयः अहिंसीदित्यर्थः ।

यस्य तीव्रसुतं मदं मध्यमन्तं च रक्षसे ।
अयं स सोम इन्द्र ते सुतः पिब ॥ २ ॥

यस्य । तीव्रऽसुतम् । मदम् । मध्यम् । अन्तम् । च । रक्षसे ।
अयम् । सः । सोमः । इन्द्र । ते । सुतः । पिब ॥ २ ॥

हे [v]इन्द्र त्वं [v]यस्य सोमस्यावयवभूतं [v]तीव्रसुतम् । तीक्ष्णं सुतमभिषवो यस्य स तीव्रसुतः प्रातःसवनिकः । तं [v]मदं मदकरं सोमरसं [v]मध्यं मध्यंदिनसवनगतम् [v]अन्तं तृतीयसवनगतं [v]च सोमरसं [v]रक्षसे रक्षसि [v]सः [v]अयं [v]सोमः त्वदर्थमभिषुतस्तं [v]पिब इति ॥

यस्य गा अन्तरश्मनो मदे दृळ्हा अवासृजः ।
अयं स सोम इन्द्र ते सुतः पिब ॥ ३ ॥

यस्य । गाः । अन्तः । अश्मनः । मदे । दृळ्हाः । अवऽअसृजः ।
अयम् । सः । सोमः । इन्द्र । ते । सुतः । पिब ॥ ३ ॥

[v]यस्य सोमस्य [v]मदे मदकरे रसे पीते सति [v]अश्मनः वलासुरेण निहितस्य पर्वतस्य [v]अन्तः मध्ये विद्यमानाः [v]दृळ्हाः दृढपिधानाश्च [v]गाः पणिभिरपहृताः [v]अवासृजः वलस्य बन्धनाद्यसृजः स सोम इत्यादि गतम् ॥

यस्य मन्दानो अन्धसो माघोनं दधिषे शवः ।
अयं स सोम इन्द्र ते सुतः पिब ॥ ४ ॥

यस्य । मन्दानः । अन्धसः । माघोनम् । दधिषे । शवः ।
अयम् । सः । सोमः । इन्द्र । ते । सुतः । पिब ॥ ४ ॥

हे [v]इन्द्र त्वं [v]यस्य [v]अन्धसः सोमलक्षणस्यान्नस्य पानेन[1] [v]मन्दानः मन्दमानो हृष्टः सन् [v]माघोनम् ऐन्द्रं [v]शवः असाधारणं बलं [v]दधिषे धारयसि । येन सोमेन तवेन्द्रत्वं जातमित्यर्थः [v]सः [v]अयं [v]सोमः [v]सुतः अभिषुतस्तं [v]पिब ॥ ॥ १५ ॥ ॥ ३ ॥

चतुर्थेऽनुवाके षट् सूक्तानि । तत्र 'यो रयिवः' इति चतुर्विंशत्यृचं प्रथमं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षमैन्द्रम् । आदितः षडनुष्टुभः सप्तम्यष्टमीनवम्यो विराजोऽष्टम्येकैव वा विराट् शिष्टाश्चिष्टुभः तथा चानुक्रान्तं—'यो रयिवश्चतुर्विंशतिः शंयुर्बार्हस्पत्यो ह्यादौ षळनुष्टुभस्तिस्रश्च विराजो मध्यमैः वासाम्' इति । गतः सूक्तविनियोगः ।

---

१. ख-झ-भ—अन्नेन ।

यो रयिवो रयितमो यो द्युम्नैर्द्युम्नवत्तमः ।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥ १ ॥

यः । रयिऽवः । रयिम्ऽतमः । यः । द्युम्नैः । द्युम्नवत्ऽतमः ।
सोमः । सुतः । सः । इन्द्र । ते । अस्ति । स्वधाऽपते । मदः ॥ १ ॥

हे ᵛरयिवः धनवन् इन्द्र ᵛयः सोमः ᵛरयितमः अतिशयेन रयिमान् धनवान् । ᵛयः च ᵛद्युम्नैः द्योतमानैर्यशोभिः ᵛद्युम्नवत्तमः अतिशयेन यशस्वी हे ᵛस्वधापते स्वधाया अन्नस्य सोमलक्षणस्य पालक ᵛइन्द्र ᵛसः ᵛसोमः अभिषुतः सन् ᵛते तव ᵛमदः मदकरः ᵛअस्ति भवति ॥

यः शुग्मस्तुविशुग्म ते रायो दामा मतीनाम् ।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥ २ ॥

यः । शुग्मः । तुविऽशुग्म । ते । रायः । दामा । मतीनाम् ।
सोमः । सुतः । सः । इन्द्र । ते । अस्ति । स्वधाऽपते । मदः ॥ २ ॥

हे ᵛतुविशुग्म बहुसुखेन्द्र ᵛयः ᵛशुग्मः सुखकरः ᵛते त्वदीयः यः सोमः ᵛमतीनां स्तोतॄणां ᵛरायः धनस्य ᵛदामा दाता भवति हे ᵛस्वधापते ᵛइन्द्र ᵛसः ᵛसोमः अभिषुतस्तव मदकरो भवति ॥

येन वृद्धो न शवसा तुरो न स्वाभिरूतिभिः ।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥ ३ ॥

येन । वृद्धः । न । शवसा । तुरः । न । स्वाभिः । ऊतिऽभिः ।
सोमः । सुतः । सः । इन्द्र । ते । अस्ति । स्वधाऽपते । मदः ॥ ३ ॥

इमौ नशब्दौ समुच्चयार्थौ । ᵛयेन पीतेन सोमेन ᵛवृद्धो ᵛन प्रवृद्धश्च सन् ᵛस्वाभिरूतिभिः आत्मीयैर्मरुद्भिः सार्धं ᵛशवसा बलेन ᵛतुरः[1] शत्रूणां हिंसकश्च भवसि स सोम इत्यादि पूर्ववत् ॥

पृष्ठ्यषडहस्य चतुर्थेऽहनि प्रउगशस्त्रे 'त्यमु वः' इत्यैन्द्रस्तृचः । सूत्रितं च—'त्यमु वो अप्रहणमप त्यं वृजिनं रिपुम्' (आश्व. श्रौ. ७. ११) इति ॥

त्यमु वो अप्रहणं गृणीषे शवसस्पतिम् ।
इन्द्रं विश्वासाहं नरं मंहिष्ठं विश्वचर्षणिम् ॥ ४ ॥

त्यम् । ऊँ इति । वः । अप्रऽहनम् । गृणीषे । शवसः । पतिम् ।
इन्द्रम् । विश्वऽसहम् । नरम् । मंहिष्ठम् । विश्वऽचर्षणिम् ॥ ४ ॥

---

१. ख-भ–तुरो न ।

हे ऋत्विग्यजमानाः ᵛवः युष्मदर्थं ᵛत्यमु तमेव ᵛइन्द्रं ᵛगृणीषे स्तौमि । यद्वा । वो यूयं गृणीषे गृणीत स्तुत । वचनव्यत्ययः । कीदृशमिन्द्रम् । ᵛअप्रहणम् अप्रहन्तारं भक्तानामनुग्राहकं ᵛशवसः बलस्य ᵛपतिं पालकं ᵛविश्वासाहं विश्वस्य शत्रोरभिभवितारं ᵛनरं नेतारं ᵛमंहिष्ठं दातृतमं ᵛविश्वचर्षणिं सर्वस्य द्रष्टारम् ॥

यं वर्धयन्तीद्गिरः पतिं तुरस्य राधसः ।
तमिन्वस्य रोदसी देवी शुष्मं सपर्यतः ॥ ५ ॥

यम् । वर्धयन्ति । इत् । गिरः । पतिम् । तुरस्य । राधसः ।
तम् । इत् । नु । अस्य । रोदसी इति । देवी इति । शुष्मम् । सपर्यतः ॥ ५ ॥

ᵛगिरः स्तुतय इन्द्रसंबन्धिनं ᵛयम् ᵛइत् यमेव शुष्मं बलं ᵛवर्धयन्ति । कीदृशम् । ᵛपतिम् ईश्वरम् । कस्य । ᵛतुरस्य हिंसकस्य शत्रोः ᵛराधसः धनस्य । शत्रुधनानामपहर्तारमित्यर्थः । ᵛअस्य इन्द्रस्य ᵛतमित् तमेव ᵛशुष्मं शोषकं बलं ᵛदेवी देवनशीले ᵛरोदसी द्यावापृथिव्यौ ᵛनु क्षिप्रं ᵛसपर्यतः परिचरतः ॥ ॥ १६ ॥

तद्व उक्थस्य बर्हणेन्द्रायोपस्तृणीषणि ।
विपो न यस्योतयो वि यद्रोहन्ति सक्षितः ॥ ६ ॥

तत् । वः । उक्थस्य । बर्हणा । इन्द्राय । उपऽस्तृणीषणि ।
विपः । न । यस्य । ऊतयः । वि । यत् । रोहन्ति । सऽक्षितः ॥ ६ ॥

हे स्तोतारः ᵛवः युष्मदीयस्य ᵛउक्थस्य स्तोत्रस्य ᵛतत् ᵛबर्हणा बृहत्वं माहात्म्यम् ᵛइन्द्राय इन्द्रार्थम् ᵛउपस्तृणीषणि उपस्तरणीयम् । उपेत्य विस्तरणीयम् । इन्द्रो यथा स्तोत्रस्य माहात्म्यं जानीयात् तथा विस्तार्यत इत्यर्थः । ᵛयस्य इन्द्रस्य ᵛऊतयः रक्षाः ᵛविपो ᵛन मेधाविन इव भवन्ति । सर्वकार्यकुशला इत्यर्थः । यद्वा नेति पूरकः । विपो विप्रस्य मेधाविनो यस्येन्द्रस्येति योज्यम् । ᵛयत् यस्मिंश्चेन्द्रे ᵛसक्षितः समाननिवासाः संहता ऊतयः ᵛवि ᵛरोहन्ति प्रादुर्भवन्ति तस्मा इन्द्रायेत्यर्थः ॥

अविदद्दक्षं मित्रो नवीयान्पपानो देवेभ्यो वस्यो अचैत् ।
ससवान्त्स्तौलाभिर्धौतरीभिरुरुष्या पायुरभवत्सखिभ्यः ॥ ७ ॥

अविदत् । दक्षम् । मित्रः । नवीयान् । पपानः । देवेभ्यः । वस्यः । अचैत् ।
ससऽवान् । स्तौलाभिः । धौतरीभिः । उरुष्या । पायुः । अभवत् । सखिऽभ्यः ॥ ७ ॥

स इन्द्रः ᵛदक्षं कर्मसु समर्थं प्रवृद्धं वा यष्टारम् ᵛअविदत् जानाति । कीदृशः । ᵛमित्रः मित्रभूतः ᵛनवीयान् नवतरः कल्याणतरः स्तुत्यतरो वा । स च ᵛपपानः सोमं पिबन् ᵛदेवेभ्यः स्तोतृभ्यः ᵛवस्यः वसीयः श्रेष्ठं धनम् ᵛअचैत् चिनोति उपचितं करोति ददातीति यावत् । अपि च ᵛससवान् । ससमित्यन्ननाम । हविर्लक्षणान्नोपेतः स इन्द्रः ᵛस्तौलाभिः स्थूलाभिः प्रवृद्धाभिः ᵛधौतरीभिः

कम्पनकारिणीभिर्वडवाभिरीदृशैर्मरुद्भिर्वा युक्तः सन् ᵛसखिभ्यः स्तोतृभ्यः ᵛउरुव्या रक्षणेच्छया आगत्य ᵛपायुरभवत् रक्षको भवति । यद्वा । ससवानिति सनतेः क्वसौ रूपम् । स्तौलाभिर्धौतरीभिः ससवान् संभजमान इति संबन्धः ॥

ऋतस्य पथि वेधा अपायि श्रिये मनांसि देवासो अक्रन् ।
दधानो नाम महो वचोभिर्वपुर्दृशये वेन्यो व्यावः ॥ ८ ॥

ऋतस्य । पथि । वेधाः । अपायि । श्रिये । मनांसि । देवासः । अक्रन् ।
दधानः । नाम । महः । वचःऽभिः । वपुः । दृशये । वेन्यः । वि । आवरित्यावः ॥ ८ ॥

ᵛऋतस्य यज्ञस्य ᵛपथि मार्गे ᵛवेधाः विधाता सर्वस्य द्रष्टा सोमः ᵛअपायि । इन्द्रेण पीतोऽभूत् । यद्वा । वेधा विधातेन्द्रोऽपायि । सोमं पिबतु॥ व्यत्ययेन कर्तरि चिण् ॥ तस्मिन् सोमे इन्द्रस्य ᵛमनांसि ᵛश्रिये श्रयितुं ᵛदेवासः देवाः स्तोतारः ऋत्विजः ᵛअक्रन् कर्माणि कुर्वन्ति । स चेन्द्रः ᵛनाम शत्रूणां नामकं ᵛमहः महदात्मीयं[1] ᵛवपुः शरीरं ᵛदधानः धारयन् ᵛवचोभिः स्तुतिभिः ᵛवेन्यः वननीयः संभजनीयश्च सन् ᵛदृशये दर्शनार्थं ᵛव्यावः विवृणोतु प्रकाशयतु । अनुकूलं तेज इति शेषः । यद्वा । वेन्य इति वेनतेः कान्तिकर्मणो रूपं वपुरिति च रूपनाम । वेन्यः कमनीयो वपुर्भास्वरं रूपं दृशये दर्शनार्थं व्यावः विवृणोतु वचोभिः स्तूयमानः सन् ॥

द्युमत्तमं दक्षं धेह्यस्मे सेधा जनानां पूर्वीररातीः ।
वर्षीयो वयः कृणुहि शचीभिर्धनस्य सातावस्माँ अविड्ढि ॥ ९ ॥

द्युमत्ऽतमम् । दक्षम् । धेहि । अस्मे इति । सेध । जनानाम् । पूर्वीः । अरातीः ।
वर्षीयः । वयः । कृणुहि । शचीभिः । धनस्य । सातौ । अस्मान् । अविड्ढि ॥ ९ ॥

हे इन्द्र ᵛद्युमत्तमं दीप्तिमत्तमं ᵛदक्षं बलम् ᵛअस्मे अस्मासु ᵛधेहि धारय । ᵛजनानां[2] स्तोतॄणामस्माकं ᵛपूर्वीः बह्वीः ᵛअरातीः शत्रुसेनाः ᵛसेध निषेध निवारय । अपि चास्माकं ᵛवर्षीयः वृद्धतरं ᵛवयः अन्नं ᵛशचीभिः आत्मीयाभिः प्रज्ञाभिः ᵛकृणुहि कुरु । तथा ᵛधनस्य ᵛसातौ संभजने ᵛअस्मानविड्ढि गमय । यद्वा । धनस्य संभजनार्थमस्मान् रक्ष ॥

इन्द्र तुभ्यमिन्मघवन्नभूम वयं दात्रे हरिवो मा वि वेनः ।
नकिरापिर्ददृशे मर्त्यत्रा किमङ्ग रध्रचोदनं त्वाहुः ॥ १० ॥

इन्द्र । तुभ्यम् । इत् । मघऽवन् । अभूम । वयम् । दात्रे । हरिऽवः । मा । वि । वेनः ।
नकिः । आपिः । ददृशे । मर्त्यऽत्रा । किम् । अङ्ग । रध्रऽचोदनम् । त्वा । आहुः ॥ १० ॥

हे ᵛमघवन् धनवन् ᵛइन्द्र ᵛदात्रे कामानां दात्रे ᵛतुभ्यमित् तुभ्यमेव ᵛवयं शेषभूताः ᵛअभूम । यद्वा । त्वदर्थमेव दात्रे हविषां दाने वर्तमाना अभूम । हे ᵛहरिवः हरिवन्निन्द्र अतः कारणात्

---

१. ख-ज्ञ-ञ-त-न-य-र-श-°दात्मीयं च । २. श-जनानां यजमानानाम् ।

vमा vवि vवेनः मा विगतकामो भूः । अस्मान् सर्वदा कामयस्व । वेनतिः कान्तिकर्मा । vमर्त्यत्रा मर्त्येषु मनुष्येषु मध्ये vआपिः बन्धुस्त्वत्तोऽन्यः कश्चिदपि vनकिः vदृशे नैव दृश्यते । किमनेन विशेषकथनेन । vअङ्ग हे इन्द्र vत्वा त्वां vरध्रचोदनं रध्रस्य राधकस्य समृद्धस्य धनस्य चोदनं चोदयितारम् vआहुः कथयन्ति पुराजाः ॥ ॥ १७ ॥

मा जस्वने वृषभ नो ररीथा मा ते रेवतः सख्ये रिषाम ।
पूर्वीष्ट इन्द्र निष्षिधो जनेषु जह्यसुष्वीन्प्र वृहा पृणतः ॥ ११ ॥

मा । जस्वने । वृषभ । नः । ररीथाः । मा । ते । रेवतः । सख्ये । रिषाम ।
पूर्वीः । ते । इन्द्र । निःऽसिधः । जनेषु । जहि । असुस्वीन् । प्र । वृह । अपृणतः ॥ ११ ॥

हे vवृषभ कामानां वर्षितरिन्द्र vजस्वने । जसिरुपक्षयकर्मा । उपक्षपयित्रे राक्षसादये vनः अस्मान् vमा vररीथाः मा दाः । vरेवतः धनवतः vते तव vसख्ये सखित्वे वर्तमाना वयं vमा vरिषाम हिंसिता मा भूम । हे vइन्द्र vते त्वदीयाः vपूर्वीः बह्वीः vनिष्षिधः निःशेषा निवारणानि vजनेषु शत्रुषु निहिताः सन्ति । यद्वा । निष्षिधो निषेधार्था रजवः । ताः शत्रुजनेषु तव बह्व्यो विद्यन्ते । अतः कारणात् vअसुष्वीन् अनभिषोतॄनयजमानान्[1] vजहि मारय । vअपृणतः हवींष्यप्रयच्छतश्च vप्र vवृह उन्मूलय । ' पृण दाने ' इति धातुः ॥

उद्भ्राणीव स्तनयन्भियर्तीन्द्रो राधांस्यश्व्यानि गव्या ।
त्वमसि प्रदिवः कारुधाया मा त्वादामान आ दभन्मघोनः ॥ १२ ॥

उत् । अभ्राणिऽइव । स्तनयन् । इयर्ति । इन्द्रः । राधांसि । अश्व्यानि । गव्या ।
त्वम् । असि । प्रऽदिवः । कारुऽधायाः । मा । त्वा । अदामानः । आ । दभन् । मघोनः ॥ १२ ॥

vअभ्राणीव vस्तनयन् गर्जयन् पर्जन्यो यथा मेघानुद्गमयत्येवम् vइन्द्रः vअश्व्यानि अश्वसंबन्धीनि vगव्या गव्यानि गोसंबन्धीनि एतत्समूहद्वयरूपाणि vराधांसि धनानि vउत् vइयर्ति उदीरयति । उद्गमयति स्तोतृभ्यो दातुम् । उत्तरार्धः प्रत्यक्षकृतः । हे इन्द्र vप्रदिवः पुराणः vत्वं vकारुधायाः कारूणां स्तोतॄणां धारयिता vअसि भवसि । तादृशं vत्वा त्वां vमघोनः धनवन्तः कृपणाः vअदामानः हविषामदातारः vमा vआ vदभन् मा हिंसिषुः । यद्वा । वचनव्यत्ययः । मघवानं धनवन्तं त्वामिति संबन्धः ॥

अध्वर्यो वीर प्र महे सुतानामिन्द्राय भर स ह्यस्य राजा ।
यः पूर्व्याभिरुत नूतनाभिर्गीर्भिर्ववृधे गृणतामृषीणाम् ॥ १३ ॥

अध्वर्यो इति । वीर । प्र । महे । सुतानाम् । इन्द्राय । भर । सः । हि । अस्य । राजा ।
यः । पूर्व्याभिः । उत । नूतनाभिः । गीःऽभिः । ववृधे । गृणताम् । ऋषीणाम् ॥ १३ ॥

हे vवीर हविषां विशेषेण प्रेरयितः vअध्वर्यो vमहे महते अस्मै vइन्द्राय vसुतानाम् । कर्मणि षष्ठी । सुतानभिषुतान् सोमान् vप्र vभर प्रहर प्रगमय । vस vहि खलु इन्द्रः vअस्य सोमस्य

---

[1] ख-घ-भ-°नयजमानान् शत्रून् ।

vराजा स्वामी भवति । vयः इन्द्रः vपूर्व्याभिः पूर्वकाले कृताभिः vउत अपि च vनूतनाभिः इदानीं क्रियमाणाभिः vगृणतां स्तुवताम् vऋषीणां संबन्धिनीभिः vगीर्भिः उभयविधाभिः स्तुतिभिः vवावृधे वर्धते । स इन्द्रो यस्मात् सोमस्य राजा तस्मादस्मै सोमः प्रदेय इत्यर्थः ॥

प्रथमे रात्रिपर्याये मैत्रावरुणस्य ' अस्य मदे ' इति शस्त्रयाज्या । सूत्रितं च—' अस्य मदे पुरु वर्पांसि विद्वानिति याज्या ' (आश्व. श्रौ. ६. ४) इति ॥

अस्य मदे पुरु वर्पांसि विद्वानिन्द्रो वृत्राण्यप्रती जघान ।
तमु प्र होषि मधुमन्तमस्मै सोमं वीराय शिप्रिणे पिबध्यै ॥ १४ ॥

अस्य । मदे । पुरु । वर्पांसि । विद्वान् । इन्द्रः । वृत्राणि । अप्रति । जघान ।
तम् । ऊँ इति । प्र । होषि । मधुऽमन्तम् । अस्मै । सोमम् । वीराय । शिप्रिणे । पिबध्यै ॥ १४ ॥

vअस्य सोमस्य पानेन vमदे हर्षे सति vविद्वान् अभिज्ञः vइन्द्रः vपुरु पुरूणि बहूनि vवर्पांसि आवरकाणि vवृत्राणि शत्रून् vअप्रति स्वयमन्यैरप्रतिगतः सन् vजघान हतवान् । यद्वा । वर्प इति रूपनाम । बहूनि वर्पांस्यसुरमायया निर्मितानि रूपाणि विद्वान् जानन्निन्द्रो वृत्राणि आवरकाणि रक्षःप्रभृतीनि इतः पूर्वमन्यैरप्रतिगतानि जघान हतवान् । vमधुमन्तं माधुर्यवन्तं vतमु तमेव vसोमं vशिप्रिणे शोभनहनुकाय vअस्मै vवीराय शत्रूणां वीरयित्र इन्द्राय vपिबध्यै पातुं vप्र vहोषि हे अध्वर्यो प्रजुहुधि ॥

द्वितीये रात्रिपर्याये मैत्रावरुणस्यैव ' पाता सुतम् ' इति शस्त्रयाज्या । सूत्रितं च—' पाता सुतमिन्द्रो अस्तु सोमं हन्ता वृत्रमिति याज्या ' (आश्व. श्रौ. ६. ४) इति ॥

पाता सुतमिन्द्रो अस्तु सोमं हन्ता वृत्रं वज्रेण मन्दसानः ।
गन्ता यज्ञं परावतश्चिदच्छा वसुर्धीनामविता कारुधायाः ॥ १५ ॥

पाता । सुतम् । इन्द्रः । अस्तु । सोमम् । हन्ता । वृत्रम् । वज्रेण । मन्दसानः ।
गन्ता । यज्ञम् । पराऽवतः । चित् । अच्छ । वसुः । धीनाम् । अविता । कारुऽधायाः ॥ १५ ॥

अयम् vइन्द्रः vसुतम् अभिपुतं vसोमं vपाता vअस्तु साधु पाता भवतु ॥ साधुकारिणि तृन् । अत एव ' न लोकाव्यय° ' इति षष्ठीप्रतिषेधात् द्वितीया । एवं हन्तेत्यादावपि द्रष्टव्यम् ॥ तेन च सोमेन vमन्दसानः माद्यन् vवज्रेण आयुधेन vवृत्रम् आवरकं शत्रुं vहन्ता अस्तु भवतु । एतदुभयार्थं vपरावतश्चित् दूरदेशादपि vयज्ञम् vअच्छ अस्मदीयं यज्ञमभि vगन्ता भवतु । दूरदेशस्थोऽपि शीघ्रमस्मद्यज्ञे सोमपानाय आगच्छत्वित्यर्थः । कीदृश इन्द्रः । vवसुः सर्वेषां निवासयिता vधीनां ध्यातॄणां स्तोतॄणां कर्मणां वा vअविता रक्षिता vकारुधायाः कारूणां[1] कर्तॄणां यजमानानां धारयिता ॥ ॥ १८ ॥

तृतीये रात्रिपर्याये प्रशास्तुः ' इदं त्यत् ' इति शस्त्रयाज्या । सूत्रितं च—' इदं त्यत्पात्रमिन्द्रपानमिति याज्या ' (आश्व. श्रौ. ६. ४) इति ॥

---

१. ख-ङ्ग-न-भ य-कारूणा स्तोतॄणाम् ।

इदं त्यत्पात्रमिन्द्रपानमिन्द्रस्य प्रियममृतमपायि ।
मत्सद्यथा सौमनसाय देवं व्य१स्मद्द्वेषो युयवद्अंहः ॥ १६ ॥

इदम् । त्यत् । पात्रम् । इन्द्रऽपानम् । इन्द्रस्य । प्रियम् । अमृतम् । अपायि ।
मत्सत् । यथा । सौमनसाय । देवम् । वि । अस्मत् । द्वेषः । युयवत् । वि । अंहः ॥ १६ ॥

ᵛपात्रं पातव्यम् ᵛइन्द्रपानम् इन्द्रस्य पानार्हम् ᵛइन्द्रस्य ᵛप्रियम् अनुकूलं ᵛत्यत् तत् ᵛइदं सोमात्मकम् ᵛअमृतमपायि । इन्द्रः पिबतु ॥ व्यत्ययेन कर्तरि क्तिण् ॥ यद्वा । एतदमृतमपायि । इन्द्रेण पीयताम् । ᵛयथा येन प्रकारेण पीतः सोमः ᵛसौमनसाय सुमनस्त्वाय ᵛदेवम् इन्द्रं ᵛमत्सत् मादयेत्तथा पीयतामित्यर्थः । स पीतसोम इन्द्रः ᵛद्वेषः द्वेष्टॄन् ᵛअस्मत् अस्मत्तः ᵛवि ᵛयुयवत् वियोजयतु । ᵛअंहः पापं चास्मत्तो वियोजयतु ॥

एना मन्दानो जहि शूर शत्रूञ्जामिमजामिं मघवन्नमित्रान् ।
अभिषेणाँ अभ्या१देदिशानान्परांच इन्द्र प्र मृणा जही च ॥ १७ ॥

एना । मन्दानः । जहि । शूर । शत्रून् । जामिम् । अजामिम् । मघऽवन् । अमित्रान् ।
अभिऽसेनान् । अभि । आऽदेदिशानान् । पराचः । इन्द्र । प्र । मृण । जहि । च ॥ १७ ॥

हे ᵛमघवन् धनवन् ᵛशूर शौर्यवन्निन्द्र ᵛएना एनेन प्रकृतेनानेन सोमेन ᵛमन्दानः मन्दमानो माद्यन् ᵛजामिं ज्ञातिम् ᵛअजामिं तद्विलक्षणमेवमुभयविधान् ᵛअमित्रान् अस्मत्प्रतिकूलाचरणपरान् ᵛशत्रून् ᵛजहि हिंसितान् कुरु । किंच ᵛअभिषेणान् अस्मान्प्रत्यभिगताः सेना येषां तादृशानस्मदभिमुखम् ᵛआदेदिशानान् आयुधानि पुनःपुनरादिशतो विसृजतः शत्रूंश्च हे ᵛइन्द्र ᵛपराचः ᵛप्र ᵛमृण । ते यथा पराङ्मुखा भवन्ति तथा बाधस्व । तदनन्तरं तान् ᵛजहि ᵛच ॥

आसु ष्मा णो मघवन्निन्द्र पृत्स्व१स्मभ्यं महि वरिवः सुगं कः ।
अपां तोकस्य तनयस्य जेष इन्द्र सूरीन्कृणुहि स्मा नो अर्धम् ॥ १८ ॥

आसु । स्म । नः । मघऽवन् । इन्द्र । पृत्ऽसु । अस्मभ्यम् । महि । वरिवः । सुऽगम् । कृरिति कः ।
अपाम् । तोकस्य । तनयस्य । जेषे । इन्द्र । सूरीन् । कृणुहि । स्म । नः । अर्धम् ॥ १८ ॥

हे ᵛमघवन् धनवन् ᵛइन्द्र ᵛनः अस्मदीयासु ᵛआसु ᵛपृत्सु पृतनासु संग्रामेषु ᵛअस्मभ्यं ᵛमहि महत् ᵛसुगं सुखेन प्राप्यं ᵛवरिवः धनं ᵛकः कुरु । ᵛस्म इति पूरणः ॥ अपि च हे ᵛइन्द्र ᵛअपाम् आसन्यानां धनानां वा उदकानां वा ᵛतोकस्य पुत्रस्य ᵛतनयस्य पौत्रस्य च ᵛजेषे जयार्थं ᵛसूरीन् स्तोतॄन् ᵛनः अस्मान् ᵛअर्धम् अर्धान् समृद्धान् ᵛकृणुहि कुरु । यद्वा । अर्धकारिणः शत्रूणां खण्डयितॄन् कुरु । ᵛस्म इति पूरकः ।

आ त्वा हरयो वृषणो युजाना वृषरथासो वृषरश्मयोऽत्याः ।
अस्मत्राञ्चो वृषणो वज्रवाहो वृष्णे मदाय सुयुजो वहन्तु ॥ १९ ॥

आ । त्वा । हरयः । वृषणः । युजानाः । वृषऽरथासः । वृषऽरश्मयः । अत्याः ।
अस्मत्राञ्चः । वृषणः । वज्रऽवाहः । वृष्णे । मदाय । सुऽयुजः । वहन्तु ॥ १९ ॥

हे इन्द्र [v]त्वा त्वां [v]हरयः अश्वाः [v]वृष्णे वर्षित्रे [v]मदाय मदकराय सोमायेदृशं सोमं पाययितुम् [v]आ [v]वहन्तु[1] । कीदृशा अश्वाः । [v]वृषणः कामानां वर्षितारः [v]युजानाः स्वयमेव रथे युज्यमानाः [v]वृषरथासः । वृषा कामाभिवर्षको रथो येषां ते तथोक्ताः । [v]वृषरश्मयः । वर्षितारो रश्मयः प्रग्रहा येषां तादृशाः । [v]अत्याः सततगामिनः [v]अस्मत्राञ्चः अस्मान् प्रत्यञ्चन्तो गच्छन्तः [v]वृषणः नित्यतरुणाः [v]वज्रवाहः वज्रादीन्यायुधानि वहन्तः [v]सुयुजः शोभनयोजनाः ॥

आ ते वृषन्वृषणो द्रोणमस्थुर्घृतप्रुषो नोर्मयो मदन्तः ।
इन्द्र प्र तुभ्यं वृषभिः सुतानां वृष्णे भरन्ति वृषभाय सोमम् ॥ २० ॥

आ । ते । वृषन् । वृषणः । द्रोणम् । अस्थुः । घृतऽप्रुषः । न । ऊर्मयः । मदन्तः ।
इन्द्र । प्र । तुभ्यम् । वृषऽभिः । सुतानाम् । वृष्णे । भरन्ति । वृषभाय । सोमम् ॥ २० ॥

हे [v]वृषन् कामानां वर्षितरिन्द्र [v]वृषणः सेक्तारो युवानस्त्वदीया अश्वाः [v]घृतप्रुषः [v]नोर्मयः घृतमुदकं सिञ्चन्तः[2] सामुद्रास्तरङ्गा इव [v]मदन्तः हृष्यन्तो मत्ताः सन्तः [v]ते त्वदीयं [v]द्रोणं द्रुममयं रथम् [v]आ [v]अस्थुः[3] आतिष्ठन्त[4] । अतस्त्वमागच्छेति भावः । कुत इत्यत आह । हे [v]इन्द्र [v]वृष्णे यूने नित्यतरुणाय [v]वृषभाय कामानां वर्षयित्रे [v]तुभ्यं [v]वृषभिः कामाभिवर्षकैर्ग्रावभिः[5] [v]सुतानाम् अभिषुतानां सोमानां मध्ये त्वद्भागरूपं [v]सोमं यस्मादध्वर्यवः [v]प्र [v]भरन्ति प्रहरन्ति होमार्थं प्रणयन्ति तस्मादागच्छेत्यर्थः ॥ ॥ १९ ॥

वृषासि दिवो वृषभः पृथिव्या वृषा सिन्धूनां वृषभः स्तियानाम् ।
वृष्णे त इन्दुर्वृषभ पीपाय स्वादू रसो मधुपेयो वराय ॥ २१ ॥

वृषा । असि । दिवः । वृषभः । पृथिव्याः । वृषा । सिन्धूनाम् । वृषभः । स्तियानाम् ।
वृष्णे । ते । इन्दुः । वृषभ । पीपाय । स्वादुः । रसः । मधुऽपेयः । वराय ॥ २१ ॥

हे इन्द्र त्वं [v]दिवः द्युलोकस्य [v]वृषासि । हविर्भिः सेक्ता भवसि । [v]पृथिव्याः भूमेश्च [v]वृषभः कामानां वर्षिता । [v]सिन्धूनां स्यन्दनशीलानां च नदीनां [v]वृषा वर्षेण पूरयितासि । तथा [v]स्तियानां संघीभूतानां स्थावरजङ्गमात्मनां प्राणिनां [v]वृषभः कामानां वर्षिता भवसि । यद्वा । स्तियाः संघीभूता आपः । तासां वर्षितासि । [v]वृषभ कामानां[6] वर्षकेन्द्र[6] [v]वराय श्रेष्ठाय [v]वृष्णे सेक्त्रे [v]ते तुभ्यं त्वदर्थं

---

१. ख-ञ्च-न-भ-य–आवहन्तु आनयन्तु । २. ख–पृषन्तः सिञ्चन्तः ; न–पृषोतः सिञ्चन्तः ; भ–पृषतः सिञ्चन्तः । ३. ख-ञ्च-ञ्च-त-न-भ-र–तस्थुः। ४. ख-ञ्च-त२-न-भ–आतिष्ठन्तः; घ-ञ्च-श–आस्थितवन्तः । ५. ख-न–वर्षकैर्ग्रावभिः । ६. घ–कामानां वर्षितरिन्द्र ; र–कामाभिवर्षकेन्द्र ।

vस्वादुः मधुरः vरसः रसनीयः प्रशस्यो रसवान् वा रसात्मको वा vमधुपेयः मधुवत् पातव्यः vइन्दुः सोमः vपीपाय प्यायते वर्धते । अतस्त्वमागत्य तं सोमं पिबेति भावः ॥

अयं देवः सहसा जायमान इन्द्रेण युजा पणिमस्तभायत् ।
अयं स्वस्य पितुरायुधानीन्दुरमुष्णादशिवस्य मायाः ॥ २२ ॥

अयम् । देवः । सहसा । जायमानः । इन्द्रेण । युजा । पणिम् । अस्तभायत् ।
अयम् । स्वस्य । पितुः । आयुधानि । इन्दुः । अमुष्णात् । अशिवस्य । मायाः ॥ २२ ॥

vदेवः द्योतमानः vअयम् vइन्दुः सोमः vइन्द्रेण vयुजा सख्या सह vजायमानः प्रादुर्भवन् vपणिं वणिजं गवामादातारं वलाख्यमसुरम् । यद्वा । पणीनां स्वामित्वात् पणिरित्युच्यते । तमसुरं vसहसा बलेन vअस्तभायत् अस्तभ्नात् न्यरुधत् । अपि च[1] vस्वस्य धनस्य गोरूपस्य vपितुः पालयितुः vअशिवस्य असुखकरस्य वलस्य vआयुधानि वज्रादीनि vअमुष्णात् अपाहरत् । तदीयाः vमायाः च अमुष्णात् । हे इन्द्र त्वत्सख्यबलादेतत्सर्वं सोमः कृतवान् अतस्तव महिमा केन वर्णयितुं शक्यत इतीन्द्रस्तुतिः ॥

अयमकृणोदुषसः सुपत्नीरयं सूर्ये अदधाज्ज्योतिरन्तः ।
अयं त्रिधातु दिवि रोचनेषु त्रितेषु विन्ददमृतं निगूळहम् ॥ २३ ॥

अयम् । अकृणोत् । उषसः । सुऽपत्नीः । अयम् । सूर्ये । अदधात् । ज्योतिः । अन्तरिति ।
अयम् । त्रिऽधातु । दिवि । रोचनेषु । त्रितेषु । विन्दत् । अमृतम् । निऽगूळहम् ॥ २३ ॥

vअयं सोमः vउषसः उषःकालान् vसुपत्नीः शोभनः पतिः पालकः सूर्ये यासामुषसां तादृशीः vअकृणोत् अकरोत् । vअयम् एव vसूर्ये सूर्यमण्डले vअन्तः मध्ये vज्योतिः तेजः vअदधात् निहितवान् । vत्रिधातु सवनत्रयरूपेण त्रिप्रकारम् vअयं लतारूपः सोमः vदिवि द्युलोके vरोचनेषु रोचमानेषु vत्रितेषु तृतीये स्थाने ततेषु विस्तृतेषु देवेषु vनिगूळहं नितरां गूढमदृश्यतया वर्तमानम् vअमृतम् अमृतत्वकारणं पीयूषं vविन्दत् अविन्दत् अलभत । हे इन्द्र त्वत्साहाय्यादेवमेवं सोमः कृतवानिति इन्द्रस्य[2] स्तुतिरधिगन्तव्या[2] । यद्वा । इदंशब्देनेन्द्र एव परामृश्यते । अयमिन्द्र उषसः शोभनपतिका अकरोत् । अयमेव सूर्येऽन्तर्ज्योतिरदधात् । दिवि द्युलोके रोचमानेषु त्रितेषु त्रिस्थानगतेषु देवेषु मध्येऽयमेवेन्द्रस्त्रिधातु सवनत्रयात्मना त्रिप्रकारं निगूढं पात्रैः संवृतममृतममरणहेतुभूतं सोममविन्दत् अलभत ॥

अयं द्यावापृथिवी वि ष्कभायदयं रथमयुनक्सप्तरश्मिम् ।
अयं गोषु शच्या पक्वमन्तः सोमो दाधार दशयन्त्रमुत्सम् ॥ २४ ॥

अयम् । द्यावापृथिवी इति । वि । स्कभायत् । अयम् । रथम् । अयुनक् । सप्तऽरश्मिम् ।
अयम् । गोषु । शच्या । पक्वम् । अन्तरिति । सोमः । दाधार । दशऽयन्त्रम् । उत्सम् ॥ २४ ॥

---

१. ञ–च अयं सोमः । २. ख-घ-ञ-न-भ-य–इन्द्रस्तुति° ।

vअयं सोमः vद्यावापृथिवी दिवं च पृथिवीं च vवि vष्कभायत् विविधमस्थापयत्। अपि च vअयं सोमः सूर्यस्य च v२रथं vससरश्मिं ससरश्मिभिः किरणैरुपेतं ससाश्वं ससचक्रं वा vअयुनक् अयोजयत्। तथा vअयं vसोमः vगोषु vअन्तः मध्ये vपक्वं निष्पन्नं vशच्या प्रज्ञया संकल्परूपया vउत्सम् उत्सरणशीलं पयः vदाधार धारयति। vदशयन्त्रम्। उत्सस्य हेतुगर्भविशेषणमेतत्[1]। उत्सरणहेतुभूतैर्दशाभिश्छुद्रैः श्रोत्रादिभिर्यन्त्रैरुपायैर्युक्तम्। इदं च पदं खैलिकेन मन्त्रान्तरेण व्याख्यायते—'चक्षुश्च श्रोत्रं च मनश्च वाक्च प्राणापानौ देह इदं शरीरम्। द्वौ प्रत्यञ्चावनुलोमौ विसर्गावेतं तं मन्ये दशयन्त्रमुत्सम्' इति। यद्वा। अयमिन्द्रो द्यावापृथिवी वि ष्कभायत्। स्वे स्वे स्थाने स्थिते अकरोत्। अयमेव ससरश्मिं सूर्यस्य रथमयुनक्। अयमेवेन्द्रो गोष्वन्तः शच्यात्मीयेन कर्मणा पक्वं पयो धारयति। एवंभूतेन्द्रार्थं[2] सोमो दशयन्त्रं दशसंख्याकैरिन्द्रवायवादिभिर्ग्रहैर्यन्त्रितैर्गृहीतैरुपेतमुत्समुत्सरणशीलं रसं दाधार धारयति। प्रातःसवन ऐन्द्रवायवादयो दश ग्रहा गृह्यन्ते। तथा च ब्राह्मणं-'नव प्रातर्ग्रहा गृह्यन्ते नवभिर्वहिष्पवमाने स्तुवते स्तुते स्तोमे[3] दशमं गृह्णाति' (ऐ. ब्रा. ३. १) इति। अन्यत्राम्नातं—'दशैतानध्वर्युः प्रातःसवने ग्रहान् गृह्णाति' (शा. ब्रा. १४. २) इति। तदभिप्रायेणेदं दशयन्त्रमिति विशेषणम्॥ ॥ २० ॥

'य आनयत्' इति त्रयस्त्रिंशदृचं द्वितीयं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षम्। 'पुरुतमम्' इत्येषातिनिचृत्' त्रयः सप्तकाः पादनिचृत् मध्यमः ष्टुञ्श्रेदतिनिचृत्' इत्युक्तलक्षणात्[4]। त्रयस्त्रिंशदनुष्टुप् शिष्टा गायत्र्यः। 'अधि बृबुः पणीनाम्' इत्यस्मिन्नन्ये तृचे बृबुर्नाम तक्षा स्तूयते। अतः स तृचस्तद्देवताकः। शिष्टास्त्रिंशदैन्द्र्यः। तथा चानुक्रान्तं—'य आनयत्त्रयस्त्रिंशदायत्रं पुरुतममतिनिचृदन्त्यानुष्टुप् तृचेऽन्त्ये बृबुस्तक्षा दैवतम्' इति। महाव्रतेऽपि निष्केवल्येऽन्त्यतृचवर्जमेतत्सूक्तम्। तथैव पञ्चमारण्यकं—'य आनयत्परावत इति तिस्र उत्तमा उद्धरति' (ऐ. आ. ५. २. ५) इति॥

य आनयत्परावतः सुनीती तुर्वशं यदुम्। इन्द्रः स नो युवा सखा॥ १॥

यः। आ। अनयत्। पराऽवतः। सुऽनीती। तुर्वशम्। यदुम्। इन्द्रः। सः। नः। युवा। सखा॥ १॥

vयः इन्द्रः vतुर्वशं vयदुं चैतत्संज्ञौ राजानौ शत्रुभिर्दूरदेशे प्रक्षिप्तौ vसुनीती सुनीत्या शोभनेन नयनेन vपरावतः तस्माद्दूरदेशात् vआनयत् आनीतवान् vयुवा तरुणः vसः vइन्द्रः vनः अस्माकं vसखा भवतु॥

अविप्रे चिद्वयो दधदनाशुना चिदर्वता। इन्द्रो जेता हितं धनम्॥ २॥

अविप्रे। चित्। वयः। दधत्। अनाशुना। चित्। अर्वता। इन्द्रः। जेता। हितम्। धनम्॥ २॥

vअविप्रे vचित्। विप्रः स्तोता[5]। तद्विलक्षणेऽपि पुरुषे vवयः अन्नं vदधत् इन्द्रो धारयति। किमु वक्तव्यं स्तोतरि धारयतीति। सः vइन्द्रः vअनाशुना vचित् अक्षिप्रगमनेनापि vअर्वता अश्वेन vहितं शत्रुषु निहितं स्थापितं vधनं vजेता जयशीलो भवति॥ जयतेस्ताच्छीलिकस्तृन्। अतो 'न लोकाव्यय°' इति षष्ठीप्रतिषेधः॥

महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः। नास्य क्षीयन्त ऊतयः॥ ३॥

महीः। अस्य। प्रऽनीतयः। पूर्वीः। उत। प्रऽशस्तयः। न। अस्य। क्षीयन्ते। ऊतयः॥ ३॥

---

१. झ-त१-र-हेतुगर्भं विशे°। २. घ-ज्ञ-ञ-त२-न-भ-र-°तेन्द्रार्थं। ३. ख-ञ-त-न-भ-र-सोम; घ-श-'स्तोमे' नास्ति। ४. ख-ञ-न-भ-°लक्षणत्वात्। ५. श-मेधावी।

vअस्य इन्द्रस्य vप्रणीतयः प्रकृष्टा नीतयः प्रापणानि vमहीः महत्यो महत्यो भवन्ति । vउत अपि च vप्रशस्तयः प्रकृष्टाः स्तुतयः स्तोतृभिः क्रियमाणाः vपूर्वीः बह्व्यो भवन्ति । तथा vअस्य इन्द्रस्य vऊतयः रक्षाः vन vक्षीयन्ते नापचीयन्ते । किन्तु सर्वदा वर्धन्त एव ॥

सखायो ब्रह्मवाहसेऽर्चत प्र च गायत । स हि नः प्रमतिर्महो ॥ ४ ॥

सखायः । ब्रह्मऽवाहसे । अर्चत । प्र । च । गायत । सः । हि । नः । प्रऽमतिः । महो ॥ ४ ॥

हे vसखायः समानख्यानाः स्तोतारः vब्रह्मवाहसे ब्रह्मभिर्मन्त्रैर्वहनीयाय प्राप्तव्यायेन्द्राय vअर्चत शस्त्राणि शंसत । vप्र vगायत vच स्तोत्राणि । vस vहि स खलिन्द्रः vनः अस्माकं vमहो महती vप्रमतिः प्रकृष्टा बुद्धिः । ईदृश्या बुद्धेः प्रदातेत्यर्थः ॥

त्वमेकस्य वृत्रहन्नविता द्वयोरसि । उतेदृशे यथा वयम् ॥ ५ ॥

त्वम् । एकस्य । वृत्रऽहन् । अविता । द्वयोः । असि । उत । ईदृशे । यथा । वयम् ॥ ५ ॥

हे vवृत्रहन् वृत्राणां शत्रूणां हन्तरिन्द्र vत्वमेकस्य स्तोतुः vद्वयोः च स्तोत्रोः vअविता रक्षिता vअसि । सर्वेषां स्तोतॄणां रक्षको भवसीत्यर्थः । vउत अपि च vईदृशे जनेऽप्यविता भवसि vयथा यादृशाः vवयं त्वया रक्षिता बहुविधपुत्रपौत्रा[1] अभूम । ईदृशस्यापि जनस्य त्वमेव रक्षको नान्य इत्यर्थः ॥ ॥ २१ ॥

नयसीदु त्रिषधस्थ कृणोष्युक्थशंसिनः । नृभिः सुवीर उच्यसे ॥ ६ ॥

नयसि । इत् । ऊँ इति । अति । द्विषः । कृणोषि । उक्थऽशंसिनः । नृऽभिः । सुऽवीरः । उच्यसे ॥ ६ ॥

हे इन्द्र vइत् त्वमेव vद्विषः द्वेष्टॄन् vअति vनयसि अस्मान्नयसि[2] तारयसि[2] । vउ इति पूरकः । तथा vउक्थशंसिनः उक्थानि शस्त्राणि शंसतः स्तोतॄनस्मान् vकृणोषि समृद्धान् करोषि । यस्मात् त्वं vनृभिः स्तुतीनां नेतृभिः पुरुषैः vसुवीरः शोभनैर्वीरैः पुत्रपौत्रादिभिः स्तोतृभ्यो दातव्यैरेत इति vउच्यसे स्तूयसे अतस्तानप्यस्मभ्यं प्रयच्छेति शेषः ॥

ब्रह्माणं ब्रह्मवाहसं गीर्भिः सखायमृग्मियम् । गां न दोहसे हुवे ॥ ७ ॥

ब्रह्माणम् । ब्रह्मऽवाहसम् । गीःऽभिः । सखायम् । ऋग्मियम् । गाम् । न । दोहसे । हुवे ॥ ७ ॥

vब्रह्माणं परिवृढं vब्रह्मवाहसं ब्रह्मभिः स्तुतिरूपैर्मन्त्रैर्वहनीयं vसखायम् अस्माकं सखिभूतम् vऋग्मियम् । ऋग्मा ऋचः । तदर्हम् । स्तुत्यर्हमित्यर्थः । एवंभूतमिन्द्रं vदोहसे दोग्धुं vगां vन गामिव vगीर्भिः स्तुतिभिः[3] vहुवे आह्वयाम्यस्मदीयान् कामान् दोग्धुम् ॥

यस्य विश्वानि हस्तयोरूचुर्वसूनि नि द्विता । वीरस्य पृतनाषहः ॥ ८ ॥

यस्य । विश्वानि । हस्तयोः । ऊचुः । वसूनि । नि । द्विता । वीरस्य । पृतनाऽसहः ॥ ८ ॥

---

१. ख-ञ-न-भ-विविध° । २. ख-ञ-भ-अस्मानतितारयसि; ञ-न-य-अस्मानतिनयसि तारयसि; घ-वारयसि । ३. घ-श-स्तुतिरूपाभिः ।

Vवीरस्य वीर्यवतः Vपृतनासहः । पृतनाः शत्रुसेनाः । तासामभिभवितुः Vयस्य इन्द्रस्य Vहस्तयोः बाह्वोः Vविश्वानि सर्वाणि Vहिता दिव्यपार्थिवरूपेण द्वैधं वर्तमानानि Vवसूनि विधन्ते इति Vनि Vऊचुः ऋषयो नितरां वदन्ति तमिन्द्रं हुव इति पूर्वत्र संबन्धः ॥

वि दृळ्हानि चिदद्रिवो जनानां शचीपते । वृह माया अनानत ॥ ९ ॥

वि । दृळ्हानि । चित् । अद्रिऽवः । जनानाम् । शचीऽपते । वृह । मायाः । अनानत ॥ ९ ॥

हे Vअद्रिवः । आदृणात्यनेनेत्यद्रिर्वज्रः । तद्वन् Vशचीपते इन्द्र Vजनानां शत्रूणां Vदृळ्हानि Vचित् दृढानि स्थिराण्यपि पुराणि बलानि वा Vवि Vवृह विभिन्धि । विविधमुन्मूलयेत्यर्थः । हे Vअनानत अप्रह्वीभूत सर्वोच्छ्रितेन्द्र Vमायाः च शत्रुभिर्निर्मिता वि वृह विनाशय ॥

तमु त्वा सत्य सोमपा इन्द्र वाजानां पते । अहूमहि श्रवस्यवः ॥ १० ॥

तम् । ऊँ इति । त्वा । सत्य । सोमऽपाः । इन्द्र । वाजानाम् । पते । अहूमहि । श्रवस्यवः ॥ १० ॥

हे Vसत्य अवितथस्वभाव Vसोमपाः सोमस्य[1] पातर्हे[1] Vवाजानां Vपते अन्नानां पालयितरेवंभूत हे Vइन्द्र Vश्रवस्यवः श्रवोऽन्नमात्मन इच्छन्तो वयं Vतमु Vत्वा तादृशं त्वामेव Vअहूमहि आह्वयामः स्तुम इत्यर्थः ॥ ॥ २२ ॥

तमु त्वा यः पुरासिथ यो वा नूनं हिते धने । हव्यः स श्रुधी हवम् ॥ ११ ॥

तम् । ऊँ इति । त्वा । यः । पुरा । आसिथ । यः । वा । नूनम् । हिते । धने ।
हव्यः । सः । श्रुधि । हवम् ॥ ११ ॥

हे इन्द्र Vतमु Vत्वा तमेव त्वां स्तुम इति शेषः । Vयः त्वं Vपुरा पूर्वस्मिन् काले Vहव्यः ह्वातव्यः Vआसिथ बभूविथ धनलाभार्थम् । Vयो Vवा यश्च त्वं Vहिते शत्रुषु निहिते Vधने निमित्तभूते[2] सति Vनूनम् अद्यापि हव्यः ह्वातव्यो बभूविथ Vसः त्वमस्मदीयं Vहवं स्तोत्रं Vश्रुधि शृणु ॥

धीभिरर्वद्भिरर्वतो वाजाँ इन्द्र श्रवाय्यान् । त्वया जेष्म हितं धनम् ॥ १२ ॥

धीभिः । अर्वत्ऽभिः । अर्वतः । वाजान् । इन्द्र । श्रवाय्यान् । त्वया । जेष्म । हितम् । धनम् ॥ १२ ॥

हे Vइन्द्र Vधीभिः स्तुतिभिस्त्वद्विषयाभिः प्रीतेन Vत्वया अनुगृहीता वयम् Vअर्वद्भिः अस्मदीयैः अश्वैः Vअर्वतः शत्रुसंबन्धिनोऽश्वान् Vश्रवाय्यान् श्रवणीयान् प्रशस्यान् Vवाजान् अन्नानि च Vहितं शत्रुषु निहितं Vधनं च Vजेष्म त्वदनुग्रहाज्जयेम ॥

अभूरु वीर गिर्वणो महाँ इन्द्र धने हिते । भरे वितन्तसाय्यः ॥ १३ ॥

अभूः । ऊँ इति । वीर । गिर्वणः । महान् । इन्द्र । धने । हिते । भरे । वितन्तसाय्यः ॥ १३ ॥

हे Vवीर विविधमीरयितः शत्रूणां हे Vगिर्वणः गीर्भिर्वननीय Vइन्द्र Vहिते शत्रुषु निहिते Vधने निमित्तभूते सति Vमहान् प्रवृद्धस्त्वं Vभरे संग्रामे Vवितन्तसाय्यः शत्रूणां जेता Vअभूः ॥ तन्तस इति धातुर्जयार्थः कण्ड्वादौ पठ्यते । तस्मात् व्युपसृष्टादेर्णादिकः कर्तर्याय्यप्रत्ययः ॥

---

१. ख–सोमपातर्हे । २. ख–निमित्ते ।

या त ऊतिरमित्रहन्मक्षूजवस्तुमासति । तया नो हिनुही रथम् ॥ १४ ॥

या । ते । ऊतिः । अमित्रऽहन् । मक्षुऽजवः ऽतमा । असति । तया । नः । हिनुहि । रथम् ॥ १४ ॥

हे [v]अमित्रहन् अमित्राणां शत्रूणां हन्तरिन्द्र [v]ते त्वदीया [v]मक्षुजवस्तमा अतिशयेन शीघ्रजवा [v]या [v]ऊतिः गतिः [v]असति अस्ति [v]तया गत्या [v]नः अस्माकं [v]रथं [v]हिनुहि प्रेरय शत्रुजयार्थं शीघ्रं गमय ॥

स रथेन रथीतमोऽस्माकेनाभियुग्वना । जेषि जिष्णो हितं धनम् ॥ १५ ॥

सः । रथेन । रथिऽतमः । अस्माकेन । अभिऽयुग्वना । जेषि । जिष्णो इति । हितम् । धनम् ॥ १५ ॥

हे [v]जिष्णो जयशीलेन्द्र [v]रथीतमः अतिशयेन रथी महारथः [v]सः त्वम् [v]अस्माकेन अस्मदीयेन [v]अभियुग्वना अभियोक्त्रा शत्रूणामभिभवित्रा [v]रथेन [v]हितं शत्रुषु निहितं [v]धनं [v]जेषि अस्मदर्थं जय ॥ ॥ २३ ॥

य एक इत्तमु ष्टुहि कृष्टीनां विचर्षणिः । पतिर्जज्ञे वृषक्रतुः ॥ १६ ॥

यः । एकः । इत् । तम् । ऊँ इति । स्तुहि । कृष्टीनाम् । विऽचर्षणिः । पतिः । जज्ञे । वृषऽक्रतुः ॥ १६ ॥

[v]विचर्षणिः विशेषेण सर्वस्य द्रष्टा [v]वृषक्रतुः वर्षकर्मा [v]यः इन्द्रः [v]एक[1] [v]इत् एक एव [v]कृष्टीनां प्रजानां [v]पतिः अधिपतिः [v]जज्ञे अजायत नान्यः कश्चित् [v]तमु तमेवेन्द्रं हे स्तोतः [v]स्तुहि ॥

यो गृणतामिदासिथापिरूती शिवः सखा । स त्वं न इन्द्र मृळय ॥ १७ ॥

यः । गृणताम् । इत् । आसिथ । आपिः । ऊती । शिवः । सखा । सः । त्वम् । नः । इन्द्र । मृळय ॥ १७ ॥

हे [v]इन्द्र [v]यः त्वम् [v]ऊती ऊत्या रक्षया [v]शिवः सुखकरोऽत एव [v]सखा मित्रभूतश्च सन् [v]गृणतामित् स्तुवतामस्माकमेव [v]आपिः बन्धुः [v]आसिथ पुरा बभूविथ [v]सः तादृशः [v]त्वं [v]नः अस्मान् इदानीं [v]मृळय सुखय ॥

धिष्व वज्रं गभस्त्योरक्षोहत्याय वज्रिवः । ससहीष्ठा अभि स्पृधः ॥ १८ ॥

धिष्व । वज्रम् । गभस्त्योः । रक्षःऽहत्याय । वज्रिऽवः । ससहीष्ठाः । अभि । स्पृधः ॥ १८ ॥

हे [v]वज्रिवः वज्रवन्निन्द्र [v]गभस्त्योः आत्मीययोर्हस्तयोः [v]वज्रं कुलिशं [v]धिष्व धारय । किमर्थम् । [v]रक्षोहत्याय रक्षसां हननार्थम् । धृत्वा च [v]स्पृधः स्पर्धमानाः [v]अभि[2] अभिगन्त्रीरासुरीः सेनाः [v]ससहीष्ठाः अत्यर्थमभिभव ॥

प्रत्नं रयीणां युजं सखायं कीरिचोदनम् । ब्रह्मवाहस्तमं हुवे ॥ १९ ॥

प्रत्नम् । रयीणाम् । युजम् । सखायम् । कीरिऽचोदनम् । ब्रह्मऽवाहःऽतमम् । हुवे ॥ १९ ॥

---

१. ख-ञ-त-न-भ-र-य एकः । २. ख-ञ-न-भ-र-श–'अभि' नास्ति; त– न ।

vप्रत्नं चिरंतनं सर्वेषामाद्यं vरयीणां धनानां vयुजं योजयितारं दातारं vसख्यं मित्रभूतं vकीरिचोदनं कीरीणां स्तोतृणां चोदयितारं vब्रह्मवाहस्तमम् अतिशयेन ब्रह्मभिर्मन्त्रैर्वर्हनं प्रवर्धकमेवंविधमिन्द्रं vहुवे आह्वयामि ॥

स हि विश्वानि पार्थिवाँ एको वसूनि पत्यते । गिर्वणस्तमो अध्रिगुः ॥ २० ॥

सः । हि । विश्वानि । पार्थिवा । एकः । वसूनि । पत्यते । गिर्वणःऽतमः । अध्रिऽगुः ॥ २० ॥

vस vहि स खलिवन्द्रः vविश्वानि सर्वाणि vपार्थिवा पृथिव्यां भवानि vवसूनि धनानि vएकः एव vपत्यते ईष्टे नान्यः कश्चित् । पत्यतिरैश्वर्यकर्मा । कीदृश इन्द्रः । vगिर्वणस्तमः अतिशयेन गीर्भिः स्तुतिभिः संभजनीयः vअध्रिगुः अकृतगमनः । अप्रतिहतगतिरित्यर्थः ॥ ॥ २४ ॥

स नो नियुद्भिरा पृण कामं वाजेभिरश्विभिः । गोमद्भिर्गोपते धृषत् ॥ २१ ॥

सः । नः । नियुत्ऽभिः । आ । पृण । कामम् । वाजेभिः । अश्विऽभिः ।
गोमत्ऽभिः । गोऽपते । धृषत् ॥ २१ ॥

हे vगोपते गवां पालयितः vसः त्वं vनः अस्माकं vकामं vनियुद्भिः वडवाभिः vधृषत् धृष्टं दारिद्र्यनाशनसमर्थं यथा भवति तथा vआ vपृण आपूरय[1] । यद्वा धृषदितीन्द्रविशेषणम् । शत्रूणां धर्षकस्त्वमित्यर्थः । तथा vगोमद्भिः बहुभिर्गोभिर्युक्तैः vअश्विभिः बहुभिरश्वैरुपेतैर्वाजैरन्नैश्चास्मदीयं काममापूरय ॥

तद्वो गाय सुते सचा पुरुहूताय सत्वने । शं यदवे न शाकिने ॥ २२ ॥

तत् । वः । गाय । सुते । सचा । पुरुऽहूताय । सत्वने । शम् । यत् । गवे । न । शाकिने ॥ २२ ॥

हे स्तोतारः vवः यूयं vसुते अभिषुते सोमे सति vपुरुहूताय बहुभिर्यजमानैराहूताय vसत्वने शत्रूणां सादयित्रे धनानां[2] वा[2] सनित्रे दात्रे इन्द्राय vतत् स्तोत्रं vसचा सह संहता भूत्वा vगाय गायत । vयत् स्तोत्रं vशाकिने शक्तिमते इन्द्राय vशं सुखकरं भवति vगवे vन । यथा गवे यवसं सुखकरं तद्वदित्यर्थः ॥

न घा वसुर्नि यमते दानं वाजस्य गोमतः । यत्सीमुप श्रवद्गिरः ॥ २३ ॥

न । घ । वसुः । नि । यमते । दानम् । वाजस्य । गोऽमतः ।
यत् । सीम् । उप । श्रवत् । गिरः ॥ २३ ॥

vवसुः वासयिता स इन्द्रः vगोमतः बहुभिर्गोभिर्युक्तस्य vवाजस्य अन्नस्य बलस्य वा vदानं प्रदानं vन vघ न खलु vनि vयमते नियच्छति उपरतं करोति । vयत् यदि vसीम् इमाः vगिरः अस्मदीयाः स्तुतीः vउप vश्रवत् उपशृणुयात् । स्तोत्रश्रवणे सति सर्वदा ददातीत्यर्थः ॥

---

१. ख-ञ-ञ-त-न-भ-र-पूरय । २. ख-न-भ-यद्वा शत्रुधनानाम् । ञ-यद्वा धनानाम् ।

कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत्। शचीभिरप नो वरत् ॥ २४ ॥

कुवित्ऽसस्य। प्र। हि। व्रजम्। गोऽमन्तम्। दस्युऽहा। गमत्।
शचीभिः। अप। नः। वरत्॥ २४ ॥

vकुवित्सस्य। कुविद्बहुशः स्यति हिनस्तीति कुवित्सो नाम कश्चित्। तस्य स्वभूतं vगोमन्तं बहुभिर्गोभिर्युक्तं vव्रजं गोष्ठं vदस्युहा दस्यूनामुपक्षपयितॄणां हन्तेन्द्रः vप्र vगमत् प्रकर्षेण गच्छति। vहि यस्मादेवं तस्मात् vशचीभिः आत्मीयैः कर्मभिः प्रज्ञाभिर्वा vनः अस्माकं ता गा vअप vवरत् निगूढास्ता अपावृणोत्॥

इमा उ त्वा शतक्रतोऽभि प्र णोनुवुर्गिरः। इन्द्रं वत्सं न मातरः ॥ २५ ॥

इमाः। ऊँ इति। त्वा। शतक्रतो इति शतऽक्रतो। अभि। प्र। नोनुवुः। गिरः।
इन्द्रं। वत्सम्। न। मातरः॥ २५ ॥

हे vशतक्रतो बहुविधकर्मन् बहुविधप्रज्ञ वा vइन्द्र vत्वा त्वाम् vअभि vइमाः अस्मदीयाः vगिरः स्तुतयः vप्र vणोनुवुः प्रकर्षेण पुनःपुनर्गच्छन्ति। नौतिरत्र गतिकर्मा। तत्र दृष्टान्तः। vवत्सं vन vमातरः। यथा मातरो गावो गृहे वर्तमानं वत्सं शीघ्रमभिगच्छन्ति तद्वत्। यद्वा। अस्मदीया वाचस्त्वाम् अभि नोनुवुः अभितः शब्दयन्ति स्तुवन्ति। यथा गावो वत्समभिलक्ष्य हम्भारवं कुर्वन्ति तद्वत्॥ ॥ २५ ॥

दूणाशं सख्यं तव गौरसि वीर गव्यते। अश्वो अश्वायते भव ॥ २६ ॥

दुःऽनर्शम्। सख्यम्। तव। गौः। असि। वीर। गव्यते।
अश्वः। अश्वऽयते। भव॥ २६ ॥

हे इन्द्र vतव त्वदीयं vसख्यं सख्यित्वं vदूणाशं दुर्णाशं[1] नाशयितुमशक्यम्। अतिदृढमित्यर्थः। अतो हे vवीर वीरयितरिन्द्र vगव्यते गामात्मन इच्छते त्वं vगौरसि गवां प्रदाता भवसि। उपचारात् कारणे कार्यशब्दः। तथा vअश्वायते अश्वानात्मन इच्छते vअश्वः vभव अश्वप्रदो भवसि॥

स मन्दस्वा ह्यन्धसो राधसे तन्वा महे। न स्तोतारं निदे करः ॥ २७ ॥

सः। मन्दस्व। हि। अन्धसः। राधसे। तन्वा। महे।
न। स्तोतारम्। निदे। करः॥ २७ ॥

हे इन्द्र vसः तादृशस्त्वम् vअन्धसः सोमस्य पानेन हृष्टया vतन्वा आत्मीयेन शरीरेण vमन्दस्व मोदस्व। किमर्थम्। vमहे महते vराधसे धनार्थम्। vहि पूरणः। अपि च त्वदीयं vस्तोतारं vनिदे निन्दकाय तस्य वशं vन vकरः न कुर्याः॥

इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः। वत्सं गावो न धेनवः ॥ २८ ॥

इमाः। ऊँ इति। त्वा। सुतेऽसुते। नक्षन्ते। गिर्वणः। गिरः। वत्सम्। गावः। न। धेनवः॥ २८॥

---

१. ज्ञ–दुर्नशम्।

हे [v]गिर्वणः गीर्भिर्वननीयेन्द्र [v]सुतेसुते सोमेऽभिषुते अभिषुते[1] सति [v]इमाः अस्मदीयाः [v]गिरः स्तुतयः [v]त्वा त्वां [v]नक्षन्ते व्याप्नुवन्ति। [v]धेनवः दोग्ध्र्यः [v]गावो [v]न गाव इव [v]वत्सम्। यथा शीघ्रं वत्सं व्याप्नुवन्ति तद्वत् ॥

पुरूतमं पुरूणां स्तोतॄणां विवाचि। वाजेभिर्वाजयताम् ॥ २९ ॥

पुरुऽतमम्। पुरूणाम्। स्तोतॄणाम्। विऽवाचि। वाजेभिः। वाजऽयताम् ॥ २९ ॥

हे इन्द्र [v]पुरुतमं[2] पुरूणां बहूनां शत्रूणां तमयितारं ग्लपयितारं[3] त्वां [v]पुरूणां बहूनां [v]स्तोतॄणाम् अस्माकं स्तुतिः प्राप्नोत्विति शेषः। कीदृशानाम्। [v]विवाचि विविधाः स्तुतिशस्त्रात्मिका वाचो यस्मिन् यज्ञे तस्मिन् [v]वाजेभिः वाजैर्हविर्लक्षणैरन्नैः [v]वाजयतां वाजवन्तं बलवन्तं[4] वा[5] त्वां[6] कुर्वताम् ॥

अस्माकमिन्द्र भूतु ते स्तोमो वाहिष्ठो अन्तमः। अस्माभ्ये महे हिनु ॥ ३० ॥

अस्माकम्। इन्द्र। भूतु। ते। स्तोमः। वाहिष्ठः। अन्तमः।

अस्मान्। राये। महे। हिनु ॥ ३० ॥

हे [v]इन्द्र [v]वाहिष्ठः वोढृतमः [v]अस्माकं [v]स्तोमः स्तोत्रं [v]ते तव [v]अन्तमः अन्तिकतमः [v]भूतु भवतु। त्वं च [v]अस्मान् [v]महे महते [v]राये धनाय [v]हिनु प्रेरय ॥

अधि बृबुः पणीनां वर्षिष्ठे मूर्धन्नस्थात्। उरुः कक्षो न गाङ्ग्यः ॥ ३१ ॥

अधि। बृबुः। पणीनाम्। वर्षिष्ठे। मूर्धन्। अस्थात्। उरुः। कक्षः। न। गाङ्ग्यः ॥ ३१ ॥

बृबुर्नाम पणीनां तक्षा। तस्मकाशाल्लब्धधनो भरद्वाजस्तदीयं दानमनेन तृचेनास्तौत्। एतच्च मनुना स्मर्यते—'भरद्वाजः क्षुधार्तस्तु सपुत्रो विजने[7] वने। बह्वीर्गाः प्रतिजग्राह बृबोस्तक्ष्णो महायशाः' (मनु. १०. १०७) इति ॥ पणनात् पणयो वणिज एतत्संज्ञा असुरा वा। तेषां तक्षा बृबुः [v]वर्षिष्ठे[8] [v]मूर्धन् मूर्धनि मूर्धवदुच्छ्रिते स्थले [v]अधि [v]अस्थात् अधिष्ठितोऽभूत् [v]गाङ्ग्यः गङ्गायाः कूले उद्भवते भवः [v]कक्षो [v]न कक्ष इव [v]उरुः विस्तीर्णः सन्। जातितो हीनोऽपि दातृत्वात् सर्वत्र श्रेष्ठो भवतीत्यर्थः ॥

यस्य वायोरिव द्रवद्भद्रा रातिः सहस्रिणी। सद्यो दानाय मंहते ॥ ३२ ॥

यस्य। वायोःऽइव। द्रवत्। भद्रा। रातिः। सहस्रिणी। सद्यः। दानाय। मंहते ॥ ३२ ॥

[v]वायोरिव [v]द्रवत् क्षिप्रगामिनः [v]यस्य बृबोः [v]भद्रा कल्याणी [v]सहस्रिणी सहस्रसंख्यायुक्ता [v]रातिः दानं [v]सद्यः स्तुतिसमय एव [v]दानाय दानकामाय याचमानाय मह्यं [v]मंहते अपेक्षितं धनं ददाति तं बृबुमित्युत्तरस्यामृचि संबन्धः ॥

---

१. ज्ञ-त-'अभिषुते' नास्ति। २. ज्ञ-त-पुरुतमम्। ३. य-श्लथयितारम्। ४. ज्ञ-वेगवन्तं बलवन्तम्। ५. ख-घ-ङ्ग-न-भ-'वा' नाति। ६. घ-ज्ञ-र-श-'त्वां' नास्ति। ७. ख-ज्ञ-ङ्ग-त१-न-भ-य-र-निर्जने। ८. न-वर्षिष्ठे वर्षके।

तत्सु नो विश्वे अर्य आ सदा गृणन्ति कारवः ।
बृबुं सहस्रदातमं सूरिं सहस्रसातमम् ॥ ३३ ॥

तत् । सु । नः । विश्वे । अर्यः । आ । सदा । गृणन्ति । कारवः ।
बृबुम् । सहस्रऽदातमम् । सूरिम् । सहस्रऽसातमम् ॥ ३३ ॥

vतत् तं vबृबुं vनः अस्मदीयाः vविश्वे सर्वे vअर्यः स्तुतीनामीरयितारः vकारवः स्तोत vसदा vसु सुष्ठु vआ vगृणन्ति अभिगृणन्ति अभिष्टुवन्ति । कीदृशम् । vसहस्रदातमम् अतिशं सहस्रसंख्यस्य धनस्य दातारं vसूरिं प्राज्ञं यद्वा प्रेरयितारं vसहस्रसातमम् अतिशयेन सहस्रसंख्य स्तोत्रस्य धनस्य वा संभक्तारम् ॥ ॥ २६ ॥

'त्वामिद्धि' इति चतुर्दशर्चं तृतीयं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षमैन्द्रम् । प्रथमातृतीया अयुजो बृहत्यो द्वितीयाचतुर्थ्यौ या युजः सतोबृहत्यः । तथा चानुक्रान्तं—'त्वामिद्धि षळूना प्रा थम्' इति । सूक्तविनियोगो लैङ्गिकः । यदि ज्योतिष्टोमो बृहत्पृष्ठः स्यात्तदानीं निष्केवल्यस्या प्रगाथः स्तोत्रियः । सूत्रितं च—'यद्यु वै बृहत्वामिद्धि हवामहे' (आश्व. श्रौ. ५. १५) इति महाव्रतेऽपि निष्केवल्येऽयं प्रगाथः शंसनीयः । तथैव पञ्चमारण्यके सूत्रितं—'त्वामिद्धि हवामहे ह्येहि चेरव इति बृहतः स्तोत्रियानुरूपौ' (ऐ. आ. ५. २. २) इति ॥

त्वामिद्धि हवामहे साता वाजस्य कारवः ।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥ १ ॥

त्वाम् । इत् । हि । हवामहे । साता । वाजस्य । कारवः ।
त्वाम् । वृत्रेषु । इन्द्र । सत्ऽपतिम् । नरः । त्वाम् । काष्ठासु । अर्वतः ॥ १ ॥

vकारवः स्तोतारो वयं vवाजस्य अन्नस्य vसाता सातौ संभजने निमित्तभूते सति हे vत्वामिद्धि त्वामेव vहवामहे स्तुतिभिराह्वयामः । हे vइन्द्र vसत्पतिं सतां पालयितारं श्रेष्ठं v vनरः अन्येऽपि मनुष्याः vवृत्रेषु आवरकेषु शत्रुषु सत्सु हवन्ते आह्वयन्ति[1] तज्जयार्थम् । अपि vअर्वतः अश्वस्य संबन्धिनीषु vकाष्ठासु यत्राश्वः क्रान्त्वा तिष्ठति तासु काष्ठासु संग्रामेषु युद्धका vत्वाम् एवाह्वयन्ति । अतो वयं त्वामेवाह्वयाम इत्यर्थः ॥

स त्वं नश्चित्र वज्रहस्त धृष्णुया महः स्तवानो अद्रिवः ।
गामश्वं रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥ २ ॥

सः । त्वम् । नः । चित्र । वज्रऽहस्त । धृष्णुऽया । महः । स्तवानः । अद्रिऽवः ।
गाम् । अश्वम् । रथ्यम् । इन्द्र । सम् । किर । सत्रा । वाजम् । न । जिग्युषे ॥ २ ॥

हे vचित्र चायनीय vवज्रहस्त वज्रबाहो vअद्रिवः वज्रवन् । यद्वा । आदणात्यनेनेत्यद्रिरहा तद्वन् । एवंभूत vइन्द्र vधृष्णुया धृष्णुः शत्रूणां धर्षयिता vमहः महान् vसः तादृशः vत्वं vस्तव

---

१. ख-भ—आह्वयन्ते ।

अस्माभिः स्तूयमानः सन् [v]गां [v]रथ्यं रथवाहनम् [v]अश्वं च [v]सं [v]किर सम्यक् प्रयच्छ। [v]जिग्युषे जितवते पुरुषाय भोगार्थं [v]सत्रा महत् प्रभूतं [v]वाजं [v]न अन्नमिव। यथा शत्रून् जितवते भोगार्थं बह्वन्नं प्रयच्छसि तद्वत्॥

महाव्रते निष्केवल्ये 'यः सत्राहा' इत्यादिसूक्तशेषः शंसनीयः। सूच्यते हि—'यः सत्राहा विचर्षणिरिति शेषोऽयं ते अस्तु हर्यत इति सूक्ते' (ऐ. आ ५. २. ४) इति। चातुर्विंशिकेऽहनि माध्यंदिनसवने[1] 'यः सत्राहा' इति प्रगाथो वैकल्पिकोऽनुरूपः। सूत्रितं च—'यः सत्राहा विचर्षणिः स्वादोरित्था विषूवतः' (आश्व. श्रौ. ७. ४) इति॥

यः सत्राहा विचर्षणिरिन्द्रं तं हूमहे वयम्।
सहस्रमुष्क तुविनृम्ण सत्पते भवा समत्सु नो वृधे॥ ३॥

यः। सत्राऽहा। विऽचर्षणिः। इन्द्रम्। तम्। हुमहे। वयम्।
सहस्रऽमुष्क। तुविऽनृम्ण। सत्ऽपते। भव। समत्ऽसु। नः। वृधे॥ ३॥

[v]यः इन्द्रः [v]सत्राहा महतां शत्रूणां हन्ता [v]विचर्षणिः विशेषेण सर्वस्य द्रष्टा [v]तम् [v]इन्द्रं [v]वयं [v]हूमहे स्तुतिपदैराह्वयामः। उत्तरार्धः प्रत्यक्षकृतः। हे [v]सहस्रमुष्क सहस्रशेफ। यां कां[2] च[2] स्त्रियं संभवन्निन्द्रो भोगलोलुपतया स्वशरीरे पर्वणि पर्वणि शेफान् ससर्जेति कौषीतकिभिराख्यातम्। तदभिप्रायेणेदं संबोधनम्। हे [v]तुविनृम्ण बहुधन[3] [v]सत्पते सतां पालयितरिन्द्र [v]समत्सु संग्रामेषु [v]नः अस्माकं [v]वृधे वर्धनाय [v]भव॥

बाधसे जनान्वृषभेव मन्युना घृषौ मीळ्ह ऋचीषम।
अस्माकं बोध्यविता महाधने तनूष्वप्सु सूर्ये॥ ४॥

बाधसे। जनान्। वृषभाऽइव। मन्युना। घृषौ। मीळ्हे। ऋचीषम।
अस्माकम्। बोधि। अविता। महाऽधने। तनूषु। अप्ऽसु। सूर्ये॥ ४॥

हे [v]ऋचीषम ऋचा सम ऋग्यादृशं रूपं प्रतिपादयति तादृग्रूपेन्द्र [v]घृषौ शत्रूणां घर्षके बाधके [v]मीळ्हे संग्रामे [v]जनान् अस्मदीयान् शत्रून् [v]वृषभेव वृषभेणेव बलवता [v]मन्युना क्रोधेन [v]बाधसे बाधस्व। तथा [v]महाधने महतो धनस्य निमित्तभूते संग्रामे च [v]अस्माकम् [v]अविता रक्षिता [v]बोधि बुध्यस्व। रक्षितृत्वेनात्मानं जानीहि। रक्षको भवेति यावत्। किमर्थम्। [v]तनूषु तनयेषु [v]अप्सु उदकेषु [v]सूर्ये च लब्धव्येषु सत्स्वेतेषां लाभार्थम्। सूर्यस्य[4] लाभः संदर्शनम्। तदर्थमित्यर्थः[4]॥

चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिनः 'इन्द्र ज्येष्ठं न आ भर' इति प्रगाथो वैकल्पिकोऽनुरूपः। सूत्रितं च—'इन्द्र ज्येष्ठं न आ भरा त्वा सहस्रमा शतम्' (आश्व. श्रौ. ७. ४) इति॥

---

१. न-°सवनेऽच्छावाकशस्त्रे। २. र-कांचन। ३. घ-बहुविधधन; श-बहुविधधनवन्। ४. ख-भ-र-सूर्यलाभः संदर्शनं तदर्थमि°; ज्ञ-न-सूर्यलाभसंदर्शनं तदर्थमि°; श-सूर्यस्य लाभः संदर्शनार्थमि°।

इन्द्र ज्येष्ठं न आ भर ओजिष्ठं पपुरि श्रवः ।
येनेमे चित्र वज्रहस्त रोदसी ओभे सुशिप्र प्राः ॥ ५ ॥

इन्द्र । ज्येष्ठम् । नः । आ । भर । ओजिष्ठम् । पपुरि । श्रवः ।
येन । इमे इति । चित्र । वज्रऽहस्त । रोदसी इति । आ । उभे इति । सुऽशिप्र । प्राः ॥५॥

हे [v]इन्द्र [v]ज्येष्ठं प्रशस्यतमम् [v]ओजिष्ठम् ओजस्वितमम् अतिशयेन बलकरं [v]पपुरि पूरकं [v]श्रवः अन्नं [v]नः अस्मभ्यम् [v]आ [v]भर आहर प्रयच्छ। हे [v]चित्र चायनीय [v]वज्रहस्त वज्रबाहो हे [v]सुशिप्र शोभनहनुक एवंभूत हे इन्द्र [v]येन अन्नेन [v]इमे परिदृश्यमाने [v]उभे [v]रोदसी द्यावापृथिव्यौ [v]आ [v]प्राः आपूरयसि तदन्नमा भरेत्यन्वयः ॥ ॥ २७ ॥

त्वामुग्रमवसे चर्षणीसहं राजन्देवेषु हूमहे ।
विश्वा सु नो विथुरा पिप्रदा वसोऽमित्रान्त्सुषहान्कृधि ॥ ६ ॥

त्वाम् । उग्रम् । अवसे । चर्षणिऽसहम् । राजन् । देवेषु । हुमहे ।
विश्वा । सु । नः । विथुरा । पिप्रदा । वसो इति । अमित्रान् । सुऽसहान् । कृधि ॥ ६ ॥

हे [v]राजन् राजमानेन्द्र [v]देवेषु देवानां मध्ये [v]उग्रम् उद्गूर्णबलं [v]चर्षणीसहं चर्षणीनां शत्रुभूतानां प्रजानामभिभवितारं [v]त्वाम् [v]अवसे रक्षणाय [v]हूमहे आह्वयामः[1]। त्वं [v]विश्वा सर्वाणि [v]पिप्रदा पिप्रदनानि रक्षांसि। पिहितमस्यक्तं शब्दयन्त इति पिप्रदनानि । पृषोदरादिः । तानि [v]सु शुष्ठु [v]विथुरा व्यथितानि बाधितानि कुरु। हे [v]वसो वासकेन्द्र [v]नः अस्मदीयान् [v]अमित्रान् शत्रूंश्च [v]सुषहान् सुखेनाभिभवितुं शक्यान् [v]कृधि कुरु ॥

यदिन्द्र नाहुषीष्वाँ ओजो नृम्णं च कृष्टिषु ।
यद्वा पञ्च क्षितीनां द्युम्नमा भर सत्रा विश्वानि पौंस्या ॥ ७ ॥

यत् । इन्द्र । नाहुषीषु । आ । ओजः । नृम्णम् । च । कृष्टिषु ।
यत् । वा । पञ्च । क्षितीनाम् । द्युम्नम् । आ । भर । सत्रा । विश्वानि । पौंस्या ॥ ७ ॥

हे [v]इन्द्र [v]नाहुषीषु । नहुष इति मनुष्यनाम । तत्संबन्धिनीषु [v]कृष्टिषु प्रजासु । आकारः समुच्चये। [v]यत् च [v]ओजः बलं [v]नृम्णं धनं [v]च विद्यते। [v]यद्वा यच्च [v]पञ्च पञ्चानां [v]क्षितीनाम्। निषाद-पञ्चमाश्चत्वारो वर्णाः पञ्च क्षितयः । तेषां स्वभूतं [v]द्युम्नं द्योतमानमन्नं तत् सर्वमस्मभ्यम् [v]आ [v]भर आहर प्रयच्छ। तथा [v]सत्रा महान्ति [v]विश्वानि सर्वाणि पौंस्यानि[2] बलानि चास्मभ्यमाहर[3] ॥

---

१. ख-ञ-न-भ-र-आह्वयामहे । २. श–पौंस्या पौंस्यानि । ३. ख-ञ-न-भ–°माभर ।

यद्वा तृक्षौ मघवन्द्रुह्यावा जने यत्पूरौ कच्च वृष्ण्यम् ।
अस्मभ्यं तद्रिरीहि सं नृषाह्येऽमित्रान्पृत्सु तुर्वणे ॥ ८ ॥

यत् । वा । तृक्षौ । मघऽवन् । द्रुह्यौ । आ । जने । यत् । पूरौ । कत् । च । वृष्ण्यम् ।
अस्मभ्यम् । तत् । रिरीहि । सम् । नृऽसह्ये । अमित्रान् । पृत्ऽसु । तुर्वणे ॥ ८ ॥

हे [v]मघवन् धनवन्निन्द्र [v]तृक्षौ एतत्संज्ञे राजनि [v]यद्वा यच्च बलं विद्यते [v]द्रुह्यौ [v]आ द्रुह्यौ चैतत्संज्ञे च [v]जने यत् बलमस्ति । [v]पूरौ एतत्संज्ञे नृपे च [v]यत् [v]कच्च यत्किंचन [v]वृष्ण्यं वीर्यं विद्यते [v]तत् सर्वम् [v]अस्मभ्यं स्तोतृभ्यः [v]सं सम्यक् [v]रिरीहि प्रयच्छ। कदा । [v]नृसह्ये[1] नृभिर्योद्भृभिः सोढव्ये युद्धे प्रवृत्ते । किमर्थम् । [v]पृत्सु पृतनासु संग्रामेषु [v]अमित्रान् शत्रून् [v]तुर्वणे तुर्वितुं हिंसितुम् ॥

चातुर्विंशिकेऽहनि निष्केवल्ये 'इन्द्र त्रिधातु' इति वैरूपस्य सामप्रगाथः शंसनीयः । सूत्रितं च—'इन्द्र त्रिधातु शरणं त्वमिन्द्र प्रतूर्तिषु' (आश्व. श्रौ. ७. ३) इति ॥

इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत् ।
छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ॥ ९ ॥

इन्द्र । त्रिऽधातु । शरणम् । त्रिऽवरूथम् । स्वस्तिऽमत् ।
छर्दिः । यच्छ । मघवत्ऽभ्यः । च । मह्यम् । च । यवय । दिद्युम् । एभ्यः ॥ ९ ॥

हे [v]इन्द्र [v]त्रिधातु त्रिप्रकारं त्रिभूमिकं [v]त्रिवरूथं त्रयाणां शीतातपवर्षाणां वारकं [v]स्वस्तिमत् अविनाशयुक्तं [v]छर्दिः छर्दिष्मत्[2] आच्छादनयुक्तमेवंगुणविशिष्टं [v]शरणं गृहं [v]मघवद्भ्यश्च । मघं हविर्लक्षणं धनम् । तद्वद्भ्यश्चास्मदीयेभ्यः [v]मह्यं भरद्वाजाय [v]च [v]यच्छ देहि । अपि च [v]एभ्यः सकाशात् [v]दिद्युं शत्रुप्रेरितं द्योतमानमायुधं [v]यवय[3] पृथक्कुरु ॥

ये गव्यता मनसा शत्रुमादभुरभिप्रघ्नन्ति धृष्णुया ।
अधा स्मा नो मघवन्निन्द्र गिर्वणस्तनूपा अन्तमो भव ॥ १० ॥

ये । गव्यता । मनसा । शत्रुम् । आऽदभुः । अभिऽप्रघ्नन्ति । धृष्णुऽया ।
अध । स्म । नः । मघऽवन् । इन्द्र । गिर्वणः । तनूऽपाः । अन्तमः । भव ॥ १० ॥

[v]ये जनाः [v]गव्यता शत्रूणां गा इच्छता [v]मनसा युक्ताः सन्तः [v]शत्रुं शातयितारं वैरिणम् [v]आदभुः अहिंसिषुः । ये च [v]धृष्णुया धृष्णवो धृष्टाः सन्तः अस्मानभिलक्ष्य [v]प्रघ्नन्ति प्रकर्षेण हिंसन्ति हे [v]मघवन् धनवन् [v]गिर्वणः गिरां संभक्तः [v]इन्द्र [v]अध [v]स्म अस्मिन् काले तेभ्यः सकाशात् [v]नः अस्माकं [v]तनूपाः तनूनां शरीराणां रक्षिता सन् [v]अन्तमः अन्तिकतमः [v]भव ॥ ॥ २८ ॥

---

१. ज्ञ-त-नृषह्ये । २. ख-ङ्ग-न-भ-छर्दिष्मत् । ३. र-यावय ।

अध स्मा नो वृधे भवेन्द्र नायमवा युधि ।
यदन्तरिक्षे पतयन्ति पर्णिनो दिव्यस्तिग्ममूर्धानः ॥ ११ ॥

अध । स्म । नः । वृधे । भव । इन्द्र । नायम् । अव । युधि ।
यत् । अन्तरिक्षे । पतयन्ति । पर्णिनः । दिव्यवः । तिग्मऽमूर्धानः ॥ ११ ॥

हे ᵛइन्द्र ᵛअध ᵛस्म तदानीं ᵛनः अस्माकं ᵛवृधे वर्धनाय ᵛभव । अपि च ᵛनायं योऽस्माकं नयो नेता ᵛयुधि युद्धे तमपि ᵛअव रक्ष । तदेत्युक्तं कदेत्याह । ᵛपर्णिनः पक्षवन्तः ᵛतिग्ममूर्धानः तीक्ष्णास्याः ᵛदिव्यवः दीषा बाणाः ᵛयत्[1] यदा[1] ᵛअन्तरिक्षे व्योम्नि ᵛपतयन्ति शत्रुभिर्विसृष्टाः पतन्ति तदानीं वृधे भवेत्यन्वयः ॥

यत्र शूरासस्तन्वो वितन्वते प्रिया शर्म पितृणाम् ।
अध स्मा यच्छ तन्वे३ तने च छर्दिरचित्तं यावय द्वेषः ॥ १२ ॥

यत्र । शूरासः । तन्वः । विऽतन्वते । प्रिया । शर्म । पितृणाम् ।
अध । स्म । यच्छ । तन्वे । तने । च । छर्दिः । अचित्तम् । यवय । द्वेषः ॥ १२ ॥

ᵛयत्र यस्मिन् काले ᵛशूरासः शूराः शौर्यवन्तो योद्धारः ᵛतन्वः स्वकीयानि शरीराणि ᵛवितन्वते विस्तारयन्ति स्वामिनो जयाय शत्रूणां पुरतो दर्शयन्ति[2] । तथास्मिन् काले ᵛप्रिया प्रियाणि ᵛशर्म शर्माणि स्थानानि ᵛपितृणां जनकानां संबन्धीनि । तैरर्जितानीति यावत् । एतानि च वितन्वते शत्रूणां पुरस्तात् विस्तारयन्ति । परित्यजन्तीति यावत् । ᵛअध ᵛस्म अस्मिन् काले ᵛतन्वे शरीराय ᵛतने तनयाय ᵛच ᵛछर्दिः छादनम् आयुधानां निवारकं कवचम् ᵛअचित्तं शत्रुभिरज्ञातं यथा भवति तथा ᵛयच्छ प्रयच्छ । शत्रुज्ञानात् पूर्वमेव देहीत्यर्थः । अपि च ᵛद्वेषः द्वेष्टॄन् शत्रून् ᵛयावय तेभ्यो वियोजय ॥

यदिन्द्र सर्गे अर्वतश्चोदयासे महाधने ।
असमने अध्वनि वृजिने पथि श्येनाँइव श्रवस्यतः ॥ १३ ॥

यत् । इन्द्र । सर्गे । अर्वतः । चोदयासे । महाऽधने ।
असमने । अध्वनि । वृजिने । पथि । श्येनान्ऽइव । श्रवस्यतः ॥ १३ ॥

हे ᵛइन्द्र ᵛमहाधने जेतव्यस्य महतो[3] धनस्य[3] निमित्ते महति संग्रामे ᵛसर्गे उद्योगे सति ᵛअसमने विषमे ᵛअध्वनि मार्गे ᵛअर्वतः अस्मदीयानश्वान् ᵛयत् यदा ᵛचोदयासे प्रेरयसि[4] । ᵛवृजिने कुटिले ᵛपथि मार्गेऽन्तरिक्षलक्षणे ᵛश्रवस्यतः श्रवोऽन्नमामिषरूपमात्मन इच्छतः ᵛश्येनानिव यथामिषार्थिनः श्येना अन्तरिक्षे शीघ्रं गच्छन्ति तथास्मदीयानश्वान् यदा त्वं शीघ्रं गमयसि तदानीमस्माकं तन्वे तनयाय च छर्दिर्यच्छेति पूर्वस्यामृचि संबन्धः ॥

---

१. ज्ञ–'यद्यदा' नास्ति । २. त-न-य-र–जयन्ति । ३. ख-ज्ञ-त-न-र–'महतो धनस्य' नास्ति; ज्ञ–धनस्य । ४. ज्ञ-र–प्रेरयेः; त२–प्रेरये; न–भ–प्रेरय ।

सिन्धूँरिव प्रवण आशुया यतो यदि क्रोशमनु स्वर्णि ।
आ ये वयो न वर्वृतत्यार्मिषि गृभीता बाह्वोर्गवि ॥ १४ ॥

सिन्धून्ऽइव । प्रवणे । आशुऽया । यतः । यदि । क्रोशम् । अनु । स्वर्नि ।
आ । ये । वयः । न । वर्वृतति । आर्मिषि । गृभीताः । बाह्वोः । गवि ॥ १४ ॥

उक्तस्यैवार्थस्यातिशयप्रतिपादनार्थेयम् । [v]प्रवणे निम्नदेशे [v]सिन्धूनिव स्यन्दमाना नदीरिव [v]आशुया आशु शीघ्रं [v]यतः गच्छतोऽश्वान् हे इन्द्र [v]यदि चोदयासे प्रेरयसि[1] । कदा । [v]क्रोशमनु । क्रोश इति भयनाम । भयमनुलक्ष्य [v]स्वनि स्वने आक्रोशे सति । कीदृशास्ते अश्वाः । [v]बाह्वोः बाहुमूलयोः [v]गृभीताः कक्ष्यया बद्धाः [v]ये अश्वाः [v]गवि गोरूपे धने जेतव्ये सति [v]आ [v]वर्वृतति पुनःपुनरावर्तन्ते । [v]आमिषि आमिषे मांसे ग्रहीतव्ये सति [v]वयो [v]न यथा श्येनादयः पक्षिणः पुनःपुनरावर्तन्ते तद्वत् । एवंभूतानश्वान् भयेन क्रोशे सति यदा त्वं प्रेरयसि तदानीमस्मदीयेभ्यश्छर्दिः प्रयच्छेति संबन्धः । यद्यपि ऋषेर्युद्धे[2] प्रसक्तिर्नास्ति[2] तथापि राजपुरोहितत्वेन राजकीयानां पुरुषाणां जयः प्रार्थ्यत इति न कश्चिद्विरोधः ॥ ॥ २९ ॥

'स्वादुः' इत्येकत्रिंशदृचं चतुर्थं सूक्तं भरद्वाजपुत्रस्य गर्गस्यार्षम् । 'प्रस्तोक इत्तु' इत्येषा त्रिष्टुप्, 'दशाश्वान्' इत्यनुष्टुप्, 'दश रथान्' इति गायत्री, 'महि राधः' इति द्विपदा द्व्येकादशका, 'युजानो हरिता' इत्येषा बृहती, 'दिवस्पृथिव्याः' इति जगती शिष्टास्त्रिष्टुभः । आदितः पञ्चानामृचां सोमो देवता । 'अगव्यूति क्षेत्रम्' इत्यर्धर्चप्रथमपादे देवा उत्तरस्य भूमिस्तृतीयस्य बृहस्पतिश्चतुर्थस्येन्द्रः । 'प्रस्तोकः' इत्याद्याश्चतस्रः सृञ्जयपुत्रस्य राज्ञो दानस्तुतिरूपत्वात् तद्देवताकाः । 'वनस्पते वीड्वङ्गः' इत्ययं तृचो रथदेवत्यः । 'उप श्वासय' इति तृचो दुन्दुभिदेवत्यः । 'समश्वपर्णाः' इत्यर्धर्चं ऐन्द्रः । शिष्टा इन्द्रदेवताकाः । तथा चानुक्रान्तं—'स्वादुरेकत्रिंशदृर्गः पञ्चादौ सौम्योऽगव्यूत्यर्धर्चो लिङ्गोक्तदेवतः प्रस्तोक इति त्रिष्टबनुष्टुबृगायत्री द्विपदा साऽर्जयस्य प्रस्तोकस्य दानस्तुतिः परौ तृचौ रथदुन्दुभिदेवत्यावैन्द्रोऽन्त्योऽर्धर्चो युजानो बृहती त्रिष्टुम्महि द्विपदा दिवस्पृथिव्या जगती' इति । आग्निमारुत आदितश्चतस्रः शंसनीयाः । सूत्रितं च—'स्वादुष्किलायमिति चतस्रो मध्ये चाङ्गानम्' (आश्व. श्रौ. ५. २०) इति ॥

स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायम् ।
उतो न्व१स्य पपिवांसमिन्द्रं न कश्चन सहत आहवेषु ॥ १ ॥

स्वादुः । किल । अयम् । मधुऽमान् । उत । अयम् । तीव्रः । किल । अयम् । रसऽवान् । उत । अयम् ।
उतो इति । नु । अस्य । पपिऽवांसम् । इन्द्रम् । न । कः । चन । सहते । आऽहवेषु ॥ १ ॥

[v]अयम् अभिषुतः सोमः [v]स्वादुः आस्वादनीयः [v]किल भवति । [v]उत अपि च [v]मधुमान् माधुर्यवांश्च [v]अयं सोमो भवति । तथा [v]अयं सोमः [v]तीव्रः [v]किल मदोत्पादने तीक्ष्णः खलु भवति । [v]उत अपि च [v]अयं सोमः [v]रसवान् सारवांश्च भवति । अनेन वाक्यचतुष्टयेन सोमस्य माधुर्यातिशयत्वं च प्रतिपादितम्[3] । [v]उतो अपि च [v]अस्य सोमस्य । द्वितीयार्थे षष्ठी । इमं सोमं [v]पपिवांसं पीतवन्तम् [v]इन्द्रम् [v]आहवेषु संग्रामेषु [v]न [v]कश्चन न कोऽपि [v]सहते अभिभवति । [v]नु इति पूरकः ॥

---

१. ख-ज्ञ-ञ्च-त-न-भ-र-प्रेरयेः; श-प्रेरयसे । २. ख-°र्युद्धप्रसक्ति° । ३. त-प्रतिपाद्यते ।

अयं स्वादुरिह मदिष्ठ आस यस्येन्द्रो वृत्रहत्ये ममादं ।
पुरूणि यश्च्यौत्ना शम्बरस्य वि नवतिं नव च देह्योऽहन् ॥ २ ॥

अयम् । स्वादुः । इह । मदिष्ठः । आस । यस्य । इन्द्रः । वृत्रऽहत्ये । ममादं ।
पुरूणि । यः । च्यौत्ना । शम्बरस्य । वि । नवतिम् । नव । च । देह्योः । हन् ॥ २ ॥

vइह अस्मिन् यज्ञे vअयं सोमः vस्वादुः आस्वादितः पीतः सन् vमदिष्ठः अतिशयेन मदयिता vआस बभूव । vयस्य सोमस्य पानेन vइन्द्रो vवृत्रहत्ये वृत्रहननकाले vममाद मत्तो बभूव । vयः सोमः vशम्बरस्य असुरस्य vपुरूणि बहूनि vच्यौत्ना च्यौत्नानि बलानि जघान । तथा vदेह्योः दिग्धा उपचिता आसुरीः पुरीः तदीयान् देहान् वा vनवतिं vनव vच नवोत्तरनवतिसंख्याका यः सोमः vवि vहन् व्यहन् अयं सोम इति प्रथमपादेन संबन्धः ॥

अयं मे पीत उदियर्ति वाचमयं मनीषामुशतीमजीगः ।
अयं षळुर्वीरभिमीत धीरो न याभ्यो भुवनं कच्चनारे ॥ ३ ॥

अयम् । मे । पीतः । उत् । इयर्ति । वाचम् । अयम् । मनीषाम् । उशतीम् । अजीगरिति ।
अयम् । षट् । उर्वीः । अभिमीत । धीरः । न । याभ्यः । भुवनम् । कत् । चन । आरे ॥३॥

vअयं सोमः vपीतः सन् vमे मम vवाचम् vउदियर्ति उद्गमयति । vअयम् एव सोमः vउशतीं कान्तां vमनीषां बुद्धिम् उत् vअजीगः उद्गारयति । प्रकाशयति ॥ 'गृ निगरणे' इत्यस्माण्ण्यन्ताल्लुङि चङि रूपम् ॥ अपि च vअयं vधीरः धीमान् सोमः vषळुर्वीः 'षण्मोर्वीरहसस्पान्तु द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधयश्च' इति प्रतिपादिता[1] द्युपृथिव्याद्याः षट् vअभिमीत निर्मितवान् । vयाभ्यः उर्वीभ्यः vआरे दूरे विप्रकृष्टे देशे vकच्चन किंचन vभुवनं भूतजातं vन भवति अपि तु आस्वेव सर्वं भूतजातं वर्तते तादृशीरुर्वीर्निर्मितवान् ॥

अयं स यो वरिमाणं पृथिव्या वर्ष्माणं दिवो अकृणोदयं सः ।
अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्वन्तरिक्षम् ॥ ४ ॥

अयम् । सः । यः । वरिमाणम् । पृथिव्याः । वर्ष्माणम् । दिवः । अकृणोत् । अयम् । सः ।
अयम् । पीयूषम् । तिसृषु । प्रवत्ऽसु । सोमः । दाधार । उरु । अन्तरिक्षम् ॥ ४ ॥

vसः खलु vअयं vसोमः vयः vपृथिव्याः vवरिमाणम् उरुत्वं विस्तृतत्वम् vअकृणोत् अकरोत् । तथायं सोमः vदिवः द्युलोकस्य vवर्ष्माणं संहतत्वं[2] दृढत्वमकृणोदकरोत् । vअयं सोमः vसः हि भवति । अपि च vअयं सोमः vतिसृषु ओषधीष्वप्सु गोषु च vप्रवत्सु प्रकृष्टास्वेतासु vपीयूषं रसं vदाधार धारयति । तथा vउरु विस्तीर्णम् vअन्तरिक्षं च धारयति । तथा च मन्त्रान्तरं—'त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः । त्वमा ततन्थोर्वन्तरिक्षम्' (ऋ. सं. १. ९१. २२) इति ॥

---

१. घ-श–प्रतिपादनात् । २. ख-ङ्ग-भ-र–सहत्वम्; न–महत्त्वम् ।

अयं विदच्चित्रदृशीकमर्णः शुक्रसंग्रनामुषसामनीके ।
अयं महान्महता स्कम्भनेनोद्द्यामस्तभ्नाद्वृषभो मरुत्वान् ॥ ५ ॥

अयम् । विदत् । चित्रऽदृशीकम् । अर्णः । शुक्रऽसंग्रनाम् । उषसाम् । अनीके ।
अयम् । महान् । महता । स्कम्भनेन । उत् । द्याम् । अस्तभ्नात् । वृषभः । मरुत्वान् ॥ ५ ॥

vअयं सोमः vचित्रदृशीकं विचित्रदर्शनं यद्वा आश्चर्यत्वेन दर्शनीयम् vअर्णः सर्वस्य प्रेरकं सौरं ज्योतिः vविदत् लम्भयति । कस्मिन् काले । vशुक्रसग्रनां शुक्रं निर्मलमन्तरिक्षं सग्रं सदनं यासां तासाम् vउषसाम् vअनीके प्रमुखे । उषःकाल इत्यर्थः । अपि च vमहान् प्रवृद्धः vअयं सोमः vमहता स्थविष्ठेन vस्कम्भनेन स्तम्भनसाधनेन मध्यवर्तिनान्तरिक्षेण vद्यां द्युलोकम् vउत् vअस्तभ्नात् ऊर्ध्वमस्थापयत् । यथाधो न पतति तथान्तरिक्षं तस्याधारत्वेन कृतवानित्यर्थः । कीदृशः सोमः । vवृषभः वृष्टेर्जनयिता । सोमाहुत्या हि वृष्टिर्जन्यते । vमरुत्वान् मरुद्भिर्युक्तः ॥ ॥ ३० ॥

धृषत्पिब कलशे सोममिन्द्र वृत्रहा शूर समरे वसूनाम् ।
माध्यंदिने सवने आ वृषस्व रयिस्थानो रयिमस्मासु धेहि ॥ ६ ॥

धृषत् । पिब । कलशे । सोमम् । इन्द्र । वृत्रऽहा । शूर । समऽअरे । वसूनाम् ।
माध्यंदिने । सवने । आ । वृषस्व । रयिऽस्थानः । रयिम् । अस्मासु । धेहि ॥ ६ ॥

हे vशूर शौर्यवन् vइन्द्र vवृत्रहा वृत्राणामावरकाणां शत्रूणां हन्ता त्वं vवसूनां धनानां vसमरे संग्रामे निमित्तभूते[1] सति vकलशे द्रोणकलशेऽवस्थितं vसोमं vधृषत् धृष्टं यथा भवति तथा vपिब । अपि च vमाध्यंदिने vसवने vआ vवृषस्व आसिञ्चस्व । जठरं सोमेन पूरय । सर्वेन्द्रं हि माध्यंदिनं सवनम् । किंच vरयिस्थानः रयीणां धनानां स्थानभूतस्त्वं vरयिं धनम् vअस्मासु vधेहि धारय ॥

इन्द्र प्र णः पुरएतेव पश्य प्र नो नय प्रतरं वस्यो अच्छ ।
भवा सुपारो अतिपारयो नो भवा सुनीतिरुत वामनीतिः ॥ ७ ॥

इन्द्र । प्र । नः । पुरएताऽइव । पश्य । प्र । नः । नय । प्रऽतरम् । वस्यः । अच्छ ।
भव । सुऽपारः । अतिऽपारयः । नः । भव । सुऽनीतिः । उत । वामऽनीतिः ॥ ७ ॥

हे vइन्द्र त्वं vपुरएतेव पुरतो गन्तेव vनः अस्मान् vप्र vपश्य प्रकर्षेणेक्षस्व । यथा मार्गरक्षकः स्वयं पुरतो गच्छन्ननुगच्छतो रक्षणीयान् पथिकान् पश्यति तथा पश्येत्यर्थः । तथा vवस्यः वसीयः श्रेष्ठं धनम् vअच्छ आभिमुख्येन vप्रतरं प्रकृष्टतरमतिशयेन vप्र vणय अस्मान् प्रापय । तथा vसुपारः सुष्ठु पारयिता दुःखेभ्यस्तारयिता vभव । तथा vनः अस्मान् स्तोतॄन् vअतिपारयः शत्रूनतिक्रामय । vसुनीतिः शोभननयनश्चास्माकं vभव । vउत अपि च vवामनीतिः वामानां वननीयानां धनानां नेता भव । यद्वा । अस्मदर्थं श्रेष्ठमापणो भव ॥

---

१. घ-श – निमित्ते ।

ऐन्द्रे पशौ 'उरुं नः' इत्येषा वपाया याज्या। सूत्रितं च—'उरुं नो लोकमनु नेषि विद्वान् प्र सुसाहिषे पुरुहूत शत्रून्' (आश्व. श्रौ. ३. ७) इति। होत्रकैः सदःप्रसर्पणसमयेऽप्येषा जप्या। सूत्रितं च—'उरुं नो लोकमनु नेषि विद्वानिति जपन्तः' (आश्व. श्रौ. ५. ३) इति। चातुर्विंशिकेऽन्यहर्गणेषु च द्वितीयादिष्वहःसु माध्यंदिनसवनेऽच्छावाकस्यैषा चारम्भणीया[1]। सूत्रितं च—'उरुं नो लोकमनु नेषि विद्वानिति कद्रुद्रय आरम्भणीयाः' (आश्व. श्रौ. ७. ४) इति॥

उरुं नो लोकमनु नेषि विद्वान्त्स्वर्वज्ज्योतिरभयं स्वस्ति।
ऋष्वा ते इन्द्र स्थविरस्य बाहू उप स्थेयाम शरणा बृहन्ता॥ ८॥

उरुम्। नः। लोकम्। अनु। नेषि। विद्वान्। स्वःऽवत्। ज्योतिः। अभयम्। स्वस्ति।
ऋष्वा। ते। इन्द्र। स्थविरस्य। बाहू इति। उप। स्थेयाम। शरणा। बृहन्ता॥ ८॥

हे इन्द्र [v]विद्वान् जानंस्त्वम् [v]उरुं विस्तीर्णं [v]लोकं स्थानं स्वर्गाख्यं [v]नः अस्मान् [v]अनु [v]नेषि अनुगमय। तथा [v]स्वर्वत् सुखवत् [v]अभयं भयरहितं [v]ज्योतिः च [v]स्वस्ति क्षेमेणानु नेषि अस्मानुगमय। हे [v]इन्द्र [v]स्थविरस्य स्थूलस्य वृद्धस्य [v]ते तव संबन्धिनौ[2] [v]ऋष्वा दर्शनीयौ [v]बृहन्ता महान्तौ [v]बाहू त्वदीयौ हस्तौ [v]शरणा शरणौ रक्षकौ रक्षकतया [v]उप [v]स्थेयाम उपतिष्ठेम। सेवेमहि॥

वरिष्ठे न इन्द्र वन्धुरे धा वहिष्ठयोः शतावन्नश्वयोरा।
इषमा वक्षीषां वर्षिष्ठां मा नस्तारीन्मघवन्रायो अर्यः॥ ९॥

वरिष्ठे। नः। इन्द्र। वन्धुरे। धाः। वहिष्ठयोः। शतऽवन्। अश्वयोः। आ।
इषम्। आ। वक्षि। इषाम्। वर्षिष्ठाम्। मा। नः। तारीत्। मघऽवन्। रायः। अर्यः॥ ९॥

हे [v]इन्द्र [v]वरिष्ठे उरुतमे विस्तीर्णतमे [v]वन्धुरे आत्मीये रथे [v]नः अस्मान् [v]धाः धेहि। धारय। अपि च हे [v]शतावन्[3] शतसंख्यधनेन्द्र [v]वहिष्ठयोः वोढृतमयोः। आकारः समुच्चये। [v]अश्वयोरावदीययोरश्वयोश्चास्मान् धारय। तथा [v]इषाम् अन्नानां मध्ये [v]वर्षिष्ठां वृद्धतमाम् [v]इषम् अन्नम् आ [v]वक्षि अस्मदर्थमावह। आनय। हे [v]मघवन् धनवन्निन्द्र [v]अर्यः धनस्य स्वामी अन्यः कश्चित् [v]नः अस्माकं [v]रायः धनानि [v]मा [v]तारीत् मा हिंसीत्॥

इन्द्र मृळ मह्यं जीवातुमिच्छ चोदय धियमयसो न धाराम्।
यत्किं चाहं त्वायुरिदं वदामि तज्जुषस्व कृधि मा देववन्तम्॥ १०॥

इन्द्र। मृळ। मह्यम्। जीवातुम्। इच्छ। चोदय। धियम्। अयसः। न। धाराम्।
यत्। किम्। च। अहम्। त्वाऽयुः। इदम्। वदामि।
तत्। जुषस्व। कृधि। मा। देवऽवन्तम्॥ १०॥

हे [v]इन्द्र [v]मृळ मृळय। अस्मान् सुखय। [v]जीवातुं जीवनौषधं च [v]मह्यं दातुम् [v]इच्छ। तथा [v]धियं बुद्धिं [v]चोदय। स्तुतिविषयां कर्मविषयां वा प्रेरय। तीक्ष्णीकुरु। [v]अयसो [v]न

---

१. ज्ञ-ज्ञ-त२-र-वारम्भणीया। २. ज्ञ-संबन्धिनो वयम्। ३. घ-ज्ञ-त-र-श-शतवन्।

vधाराम् अयोमयस्य खड्गादेर्धारामिव । सा यथा सूक्ष्मा तद्वत् सूक्ष्मविषयां धियं चोदयेत्यर्थः । किंच vत्वायुः त्वामात्मन इच्छन् vइदम् इदानीं यत्किंचन vअहं vवदामि समीचीनमसमीचीनं वा vतज्जुषस्व सेवस्व । vमा मां च vदेवयन्तं रक्षकैर्देवैरुपेतं vकृधि कुरु ॥ ॥ ३१ ॥

आयुष्कामेष्ट्यामिन्द्रस्य त्रातुः ' त्रातारम् ' इत्यनुवाक्या । सूत्रितं च—' त्रातारमिन्द्रमवितारमिन्द्रं मा ते अस्यां सहसावन्परिष्टौ ' (आश्व. श्रौ. २. १०) इति[1] ॥

त्रातारमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः ॥ ११ ॥

त्रातारम् । इन्द्रम् । अवितारम् । इन्द्रम् । हवेऽहवे । सुऽहवम् । शूरम् । इन्द्रम् ।
ह्वयामि । शक्रम् । पुरुऽहूतम् । इन्द्रम् । स्वस्ति । नः । मघऽवा । धातु । इन्द्रः ॥ ११ ॥

vत्रातारं शत्रुभ्यः पालयितारम् vइन्द्रम् आह्वयामि । तथा vअवितारं कामैस्तर्पयितारम् vइन्द्रम् आह्वयामि । vहवेहवे सर्वेष्वाहवनेषु vसुहवं सुखेनाह्वातुं[2] शक्यं vशूरं शौर्यवन्तं vशक्रं सर्वकार्येषु शक्तं vपुरुहूतं पुरुभिर्बहुभिः पालनार्थमाहूतमेवंविधम् vइन्द्रं vह्वयामि आह्वयामि । एवमाहूतः vमघवा धनवान् सः vइन्द्रः vस्वस्ति अविनाशं vनः अस्मभ्यं vधातु ददातु । यद्वा[3] । अस्माकं विदधातु[3] ॥

इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥ १२ ॥

इन्द्रः । सुऽत्रामा । स्वऽवान् । अवःऽभिः । सुऽमृळीकः । भवतु । विश्वऽवेदाः ।
बाधताम् । द्वेषः । अभयम् । कृणोतु । सुऽवीर्यस्य । पतयः । स्याम ॥ १२ ॥

vसुत्रामा सुष्ठु त्राता vस्ववान् धनवान् सः vइन्द्रः vअवोभिः रक्षणैः vसुमृळीकः सुष्ठु सुखयिता vभवतु । तथा च vविश्ववेदाः सर्वधनः सर्वविद्वान् वा स इन्द्रः vद्वेषः द्वेष्टॄन् शत्रून् vबाधतां हिनस्तु । vअभयं भयरहितं चास्माकं vकृणोतु करोतु । वयं च तत्प्रसादात् vसुवीर्यस्य शोभनवीर्यस्य vपतयः vस्याम भवेम ॥

तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥ १३ ॥

तस्य । वयम् । सुऽमतौ । यज्ञियस्य । अपि । भद्रे । सौमनसे । स्याम ।
सः । सुऽत्रामा । स्वऽवान् । इन्द्रः । अस्मे इति । आरात् । चित् । द्वेषः । सनुतः । युयोतु ॥ १३ ॥

vयज्ञियस्य यज्ञार्हस्य vसुमतौ शोभनायामनुग्रहात्मिकायां बुद्धौ vवयं vस्याम । तद्विषयभूताः[4] भवेम । तथा vभद्रे कल्याणे vसौमनसे सुमनसो भावे vअपि तदीये स्याम भवेम । स

---

१. न–इति । दीक्षितानामुपतापे एषा ऋग्विनियुक्ता । सूत्रितं च दीक्षितानामुपतापे इति खण्डे–त्रातारमिन्द्रमवितारमिति तार्क्ष्यादिः (आश्व. श्रौ. ६. ९) इति । २. ख-ज्ञ-ञ-त-न-भ-र–सुखेन ह्वातुम् । ३. ख-भ–' यद्वा ... विदधातु ' नास्ति । ४. ख-ज्ञ-ञ-त-न-भ-र–विषयभूताः ।

इन्द्रोऽस्मास्वनुग्रहात्मिकां बुद्धिं सौमनस्यं च करोत्वित्यर्थः । [v]सुत्रामा सुष्ठु त्राता [v]स्ववान् धनवान् [v]सः [v]इन्द्रः च [v]अस्मे अस्मत्तः [v]आराच्चित् दूरदेश एव [v]द्वेषः द्वेष्टॄन् [v]सनुतः । अन्तर्हितनामैतत् । अन्तर्हितान् [v]युयोतु पृथक्करोतु ॥

अव॒ त्वे इ॑न्द्र प्र॒वतो॒ नोर्मिर्गिरो॒ ब्रह्मा॑णि नि॒युतो॑ धवन्ते ।
उ॒रू न रा॒धः सव॑ना पु॒रूण्यपो गा व॑ज्रिन्युव॒से सम्इन्दू॑न् ॥ १४ ॥

अव॑ । त्वे इति॑ । इ॒न्द्र॒ । प्र॒ऽवतः॑ । न । ऊ॒र्मिः॑ । गिरः॑ । ब्रह्मा॑णि । नि॒ऽयुतः॑ । ध॒व॒न्ते॒ ।
उ॒रु । न । रा॒धः॑ । सव॑ना । पु॒रूणि॑ । अ॒पः॒ । गाः॒ । व॒ज्रि॒न् । यु॒व॒से॒ । सम् । इ॒न्दू॑न् ॥१४॥

हे [v]इन्द्र [v]त्वे त्वां [v]नियुतः स्तोतुः [v]गिरः उक्थात्मिका वाचः [v]ब्रह्माणि सामरूपाणि स्तोत्राणि च [v]अव [v]धवन्ते अभिगच्छन्ति । तत्र दृष्टान्तः । [v]ऊर्मिः जलसंघः [v]प्रवतो [v]न प्रवणदेशानिव । यथोच्छ्रितात् स्थलात् निम्नदेशं शीघ्रं गच्छति तद्वत् । नशब्दः समुच्चये । [v]उरु उरूणि बहु [v]राधः राधांसि च हविर्लक्षणानि धनानि [v]पुरूणि बहूनि [v]सवना सवनानि बहवोऽभिषुताः सोमाश्च त्वामेवाभिगच्छन्ति[1] । हे [v]वज्रिन् वज्रवन्निन्द्र [v]अपः वसतीवर्याख्याः [v]गाः गोविकारान् श्रृतदध्यादीन् श्रपणार्थान् [v]इन्दून् सोमांश्च [v]सं [v]युवसे सम्यक् मिश्रयसि । त्वां यष्टुं वसतीवरीभिरभिषुण्य[2] तं[2] सोममाशिरादिभिः श्रपणद्रव्यैः संस्कुर्वन्तीत्यर्थः ॥

क ई॑ स्तव॒त्कः पृ॑णा॒त्को य॑जाते॒ यदु॒ग्रमि॑न्म॒घवा॑ वि॒श्वहावे॑त् ।
पादा॑विव प्र॒हर॑न्न॒न्यम॑न्यं कृ॒णोति॒ पूर्व॒मप॑रं श॒चीभिः॑ ॥ १५ ॥

कः । ई॒म् । स्त॒व॒त् । कः । पृ॒णा॒त् । कः । य॒जा॒ते॒ । यत् । उ॒ग्रम् । इ॒त् । म॒घऽवा॑ । वि॒श्वहा॑ । अवे॑त् ।
पादौ॑ऽइव । प्र॒ऽहर॑न् । अ॒न्यम्ऽअ॑न्यम् । कृ॒णोति॑ । पूर्व॑म् । अप॑रम् । श॒चीभिः॑ ॥ १५ ॥

[v]कः स्तोता [v]ईम् एनमिन्द्रं [v]स्तवत् स्तुयात् । स्तोतुं शक्नुयात् । [v]कः वा [v]पृणात् एनं प्रीणयेत् । [v]कः च [v]यजाते एनं हविर्भिर्यजेत[3] । [v]यत् यस्मात् अयं [v]मघवा धनवानिन्द्रः [v]उग्रमित् उद्गूर्णमेव [v]विश्वहा सर्वदा [v]अवेत् आत्मानं वेत्ति जानाति सर्वदा उग्र एव भवति तस्मात् कारणात् न कोऽप्येनं स्तोतुं प्रीणयितुं यष्टुं वा शक्नोतीति भावः । इतोऽपि स्तुत्यादेरविषय इत्याह । यस्मादयमिन्द्रः [v]शचीभिः आत्मीयाभिः प्रज्ञाभिः [v]पूर्वं प्रथमभाविनं सन्तं स्तोतारम् [v]अपरं पश्चाद्भाविनं च [v]अन्यमन्यं परस्परव्यतिहारेण [v]कृणोति करोति । यः प्रथमभावी मुख्यः स्तोता तं जघन्यं करोति यश्च जघन्यः स्तोता तं मुख्यं करोति । तत्र दृष्टान्तः । [v]प्रहरन् [v]पादाविव । यथा पादौ प्रहरन् मार्गे प्रक्षिपन् पुरुषः पूर्वं पादमपरं करोत्यपरं च पूर्वं तद्वत् । अतोऽपि कारणात् इन्द्रः स्तुत्यादेरविषय इति भावः । एतदादिकेन पञ्चर्चेन इन्द्रस्यातिस्वातन्त्र्यं प्रतिपाद्यते ॥ ॥ ३२ ॥

---

१. श–°वावगच्छन्ति । २. ख-ज्ञ-ञ-न-भ–°रभिषुतम्; त२–°रभिषुत्यं तम् । ३. ख-ज्ञ-ञ-त-न-भ– °र्यजते ।

शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः ।
एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान् ॥ १६ ॥

शृण्वे । वीरः । उग्रम्ऽउग्रम् । दमऽयन् । अन्यम्ऽअन्यम् । अतिऽनेनीयमानः ।
एधमानऽद्विट् । उभयस्य । राजा । चोष्कूयते । विशः । इन्द्रः । मनुष्यान् ॥ १६ ॥

अयमिन्द्रः [v]वीरः वीर्यवानिति [v]शृण्वे श्रूयते । किं कुर्वन् । [v]उग्रमुग्रम् उद्गूर्णमुद्गूर्णं बलिनं शत्रुं प्रति [v]दमायन् । दमः दमनम् । बाधनमिच्छन् । [v]अन्यमन्यं प्रथमं नेतव्यमन्यं पश्चान्नेतव्यं चान्यं पूर्वमपरं परस्परव्यतिहारेण स्तोतॄन् [v]अतिनेनीयमानः अत्यन्तं पुनःपुनर्नयन् । अपि[1] च[1] [v]एधमानद्विट् एधमानानां वर्धमानानामसुन्वतां द्वेष्टा [v]उभयस्य दिव्यस्य पार्थिवस्य च धनस्य [v]राजा ईश्वरोऽयम् [v]इन्द्रः [v]विशः निवेशयितॄन् स्वस्य परिचारकान् [v]मनुष्यान् [v]चोष्कूयते रक्षणार्थं पुनःपुनराह्वयति ॥

परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेति ।
अनानुभूतीरवधून्वानः पूर्वीरिन्द्रः शरदस्तर्तरीति ॥ १७ ॥

परा । पूर्वेषाम् । सख्या । वृणक्ति । विऽतर्तुराणः । अपरेभिः । एति ।
अनानुऽभूतीः । अवऽधून्वानः । पूर्वीः । इन्द्रः । शरदः । तर्तरीति ॥ १७ ॥

अयमिन्द्रः [v]पूर्वेषां पूर्वभाविनां प्रशस्तानां कर्मणां कुर्वतां पुरुषाणां [v]सख्या सख्यानि [v]परा [v]वृणक्ति वर्जयति । अपि च [v]वितर्तुराणः तान् हिंसन् [v]अपरेभिः अपरैः अमुख्यैरप्रशस्तैरपि कर्मानुष्ठातृभिः[2] [v]एति सख्यं प्राप्नोति । तथा [v]अनानुभूतीः अपरिचरणाः प्रजाः [v]अवधून्वानः परित्यजन् [v]पूर्वीः बह्वीः [v]शरदः संवत्सरान् अयम् [v]इन्द्रः [v]तर्तरीति भृशमतिक्रामति । स्तोतृभिः सह सख्यं कुर्वन् चिरकालं वसतीत्यर्थः ॥

रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥ १८ ॥

रूपम्ऽरूपम् । प्रतिऽरूपः । बभूव । तत् । अस्य । रूपम् । प्रतिऽचक्षणाय ।
इन्द्रः । मायाभिः । पुरुऽरूपः । ईयते । युक्ताः । हि । अस्य । हरयः । शता । दश ॥ १८ ॥

अयमिन्द्रः [v]प्रतिरूपः रूपाणां प्रतिनिधिः सन् [v]रूपंरूपं तत्तदन्यादिदेवतास्वरूपं [v]बभूव । प्राप्नोति । 'भू प्राप्तौ' इति धातुः । इन्द्रः स्वमाहात्म्येन तत्तद्देवतारूपो भवतीत्यर्थः । [v]अस्य चेन्द्रस्य [v]तत् प्राप्तमन्यादिदेवतास्वरूपं [v]प्रतिचक्षणाय प्रतिनियतदर्शनाय अयमग्निरयं विष्णुरयं रुद्र इत्येवमसंकीर्णदर्शनाय भवति । अपि चायम् [v]इन्द्रो [v]मायाभिः । ज्ञाननामैतत् । ज्ञानैः आत्मीयैः संकल्पैः [v]पुरुरूपः बहुविधशरीरः सन् [v]ईयते बहून् यजमानान् गच्छति । ननु द्वावेवास्याश्वावेकश्च रथः कथमनेन युगपद्बहून् गच्छतीत्यत[3] आह । [v]अस्य इन्द्रस्य [v]हरयः अश्वाः [v]युक्ताः रथे योजिताः

---

१. ख-ङ्ग-भ-'अपि च' नास्ति । २. भ-°ष्ठातृभिः स्तोतृभिः । ३. श-गच्छतीत्येतत् ।

[v]शता [v]दश सहस्रसंख्याका अपरिमिताः सन्ति । [v]हि यस्मादेवं तस्माद्बहुशरीराणि स्वीकृत्य युगपत् हविष्मतो यजमानान् गच्छतीत्यर्थः ॥ अन्ये मन्यन्ते । 'इदि परमैश्वर्ये' इत्यस्य धातोरर्थानुगमात् इन्द्रः परमात्मा । स चाकाशवत् सर्वगतः सदानन्दरूपः । स एव उपाधिभिरन्तःकरणैः प्रतिशरीरमवच्छिन्नः[1] सन् जीवात्मेति व्यपदिश्यते । स एव अनादिमायाशक्तिभिः वियदादिजगदात्मना विवर्तते शब्दादिविषयहरणशीला इन्द्रियवृत्तयश्च तेनैव संबद्धाः । एतत्सर्वं तस्य परमात्मनो यद्वास्तवं रूपं तस्य दर्शनायेति । अयमर्थोऽनया प्रतिपाद्यते । रूपंरूपम् । रूप्यत इति रूपं शरीरादि । प्रतिशरीरं चिद्रूपः सर्वगतः परमात्मा प्रतिरूपः प्रतिबिम्बरूपः सन् सर्वाणि शरीराणि बभूव । प्राप्नोत् । तच्च प्राप्तं प्रतिबिम्बरूपमस्य परमात्मनः प्रतिचक्षणाय प्रतिनियताकारस्य दर्शनाय भवति । स चेन्द्रः परमेश्वरो मायाभिर्मायाशक्तिभिः पुरुरूपो वियदादिभिर्बहुविधरूपैरुपेतः सन् ईयते चेष्टते । एतदप्यस्य परमात्मनः प्रतिचक्षणाय भवति । अस्य च दश शता सहस्रसंख्याका हरय इन्द्रियवृत्तयः युक्ता विषयग्रहणायोद्युक्ताः सन्ति । तदप्यस्य वास्तवरूपस्य दर्शनाय भवतीति । एवं स्थूलसूक्ष्मशरीरयोर्वियदादिमहाप्रपञ्चस्य[2] च तत्त्वज्ञानहेतुत्वमनया प्रत्यपादीति ॥

युजानो हरिता रथे भूरि त्वष्टेह राजति ।
को विश्वाहा द्विषतः पक्ष आसत उतासीनेषु सूरिषु ॥ १९ ॥

युजानः । हरिता । रथे । भूरि । त्वष्टा । इह । राजति ।
कः । विश्वाहा । द्विषतः । पक्षः । आसते । उत । आसीनेषु । सूरिषु ॥ १९ ॥

[v]हरिता हरितावश्वौ [v]रथे [v]युजानः युञ्जन् [v]त्वष्टा दीप्त इन्द्रः [v]इह त्रैलोक्ये [v]भूरि भूरिषु बहुषु प्रदेशेषु [v]राजति दीप्यते । [v]उत अपि च [v]सूरिषु स्तोतृष्वस्मादृशेषु [v]आसीनेषु सत्सु [v]विश्वाहा सर्वदा इन्द्रादन्यः [v]कः नाम [v]द्विषतः शत्रोः [v]पक्षः पाचको बाधकः सन् [v]आसते आस्ते । इन्द्र एव सर्वदा शत्रून् बाधत इत्यर्थः । यद्वा । पक्ष इति सकारान्तं समीपवचनम् । इन्द्रादन्यः को नाम द्विषतः शत्रोः समीप आसते आस्ते । इन्द्र एव निर्भयः सन् शत्रुसमीपे स्थातुं शक्नोतीति भावः ॥

अगव्यूति क्षेत्रमागन्म देवा उर्वी सती भूमिरंहूरणाभूत् ।
बृहस्पते प्र चिकित्सा गविष्टावित्था सते जरित्र इन्द्र पन्थाम् ॥ २० ॥

अगव्यूति । क्षेत्रम् । आ । अगन्म । देवाः । उर्वी । सती । भूमिः । अंहूरणा । अभूत् ।
बृहस्पते । प्र । चिकित्स । गोऽईष्टौ । इत्था । सते । जरित्रे । इन्द्र । पन्थाम् ॥ २० ॥

अत्रोक्तम्—'अरण्ये निर्जने गवां देवान् भूमिं बृहस्पतिम् । इन्द्रं चास्तौत् स्वरक्षार्थमृचा मार्गच्युतोऽनया' इति, 'अगव्यूतीत्यत्र देवान् पादे भूमिमथोत्तरे । बृहस्पतिं तृतीये तु इन्द्र[3] एवोत्तमे स्तुतः[3]' इति च ॥ हे [v]देवाः [v]अगव्यूति अगोचरं गोसंचाररहितं निर्जनं [v]क्षेत्रं देशम् [v]आगन्म आगताः स्मः । अतो मां[4] रक्षतेति शेषः । [v]उर्वी विस्तीर्णा [v]सती [v]भूमिः च [v]अंहूरणा । अंहव आहन्तारो दस्यवः तेषां रमणा रमयित्री [v]अभूत् भवति । अस्मानतः सापि रक्षतु । हे [v]बृहस्पते

---

१. श–°मवस्थितः । २. श–°मायाप्रपञ्चस्य । ३. ज्ञ–इन्द्रमस्तौदथोत्तमे । ४. ख–भ–अस्मान् ।

त्वं [v]गविष्टौ गवामन्वेषण उपाये [v]प्र [v]चिकित्स प्रवेदय[1]। [v]इत्था इत्थमनेन प्रकारेण [v]सते भवते दुःखमनुभवते [v]जरित्रे स्तोत्रे मह्यं हे [v]इन्द्र [v]पन्थां पन्थानं मार्गं प्र चिकित्स प्रज्ञापय ॥ ॥ ३३ ॥

दिवेदिवे सदृशीरन्यमर्धं कृष्णा असेधदप सद्मनो जाः।
अहन्दासा वृषभो वस्नयन्तोदव्रजे वर्चिनं शम्बरं च ॥ २१ ॥

दिवेऽदिवे। सऽदृशीः। अन्यम्। अर्धम्। कृष्णाः। असेधत्। अप। सद्मनः। जाः।
अहन्। दासा। वृषभः। वस्नऽयन्ता। उदऽव्रजे। वर्चिनम्। शम्बरम्। च ॥ २१ ॥

अयमिन्द्रः [v]सद्मनः सदनात् स्वकीयादन्तरिक्षैकदेशात् स्थानात् [v]जाः जायमानः सूर्यात्मना प्रादुर्भवन् [v]सदृशीः तुल्यरूपाः [v]कृष्णाः कृष्णवर्णा रात्रीः [v]दिवेदिवे प्रतिदिवसम् [v]अप [v]असेधत् निवर्तयति। किमर्थम्। [v]अन्यम् [v]अर्धम् अहरर्धम्[2] अपरं भागं प्रकाशयितुम्। अहोरात्रात्मकस्य दिवसस्य हि रात्रिरेको भागः। अपि च [v]वृषभः वर्षयिता स इन्द्रः [v]दासा दासौ उपक्षपयितारौ यज्ञकर्मणां [v]वस्नयन्ता। वस्नं निवासहेतुभूतं धनम्। तदिच्छन्तौ [v]वर्चिनं [v]शम्बरं [v]च एतत्संज्ञावसुरौ [v]उदव्रजे। उदकानि व्रजन्त्यस्मिन्नित्युदव्रजो देशविशेषः। तस्मिन् [v]अहन् हतवान्॥

प्रस्तोक इन्नु राधसस्त इन्द्र दश कोशयीर्दश वाजिनोऽदात्।
दिवोदासादतिथिग्वस्य राधः शाम्बरं वसु प्रत्यग्रभीष्म ॥ २२ ॥

प्रऽस्तोकः। इत्। नु। राधसः। ते। इन्द्र। दश। कोशयीः। दश। वाजिनः। अदात्।
दिवःऽदासात्। अतिथिऽग्वस्य। राधः। शाम्बरम्। वसु। प्रति। अग्रभीष्म ॥ २२ ॥

एतदाद्यासु चतसृषु सृञ्जयपुत्रस्य प्रस्तोकस्य राज्ञो दानस्तुतिः। स एव दिवोदासोऽथोऽतिथिग्व इति चाख्यायते। हे [v]इन्द्र [v]ते तव [v]राधसः आराधयितुः स्तोतुः। चतुर्थ्यर्थे षष्ठी। त्वां स्तुवते मह्यं गर्गाय [v]प्रस्तोकः राजा [v]दश [v]कोशयीः सुवर्णपूर्णान् दशसंख्याकान् कोशान् [v]दश [v]वाजिनः अश्वांश्च [v]नु क्षिप्रम् [v]अदात् प्रायच्छत्। [v]इत् इति पूरणः। वयं च तस्मात् [v]दिवोदासात् एतत्संज्ञात् प्रस्तोकात् [v]वसु धनं [v]प्रत्यग्रभीष्म प्रतिगृहीतवन्तः। कीदृशम्। [v]अतिथिग्वस्य तस्यैव प्रस्तोकस्य स्वभूतं [v]राधः राधकं [v]शाम्बरं शम्बरादसुरादागतम्। शम्बरं हत्वा त्वया दत्तं तदीयमित्यर्थः॥

दशाश्वान्दश कोशान्दश वस्त्राधिभोजना।
दशो हिरण्यपिण्डान्दिवोदासादसानिषम् ॥ २३ ॥

दश। अश्वान्। दश। कोशान्। दश। वस्त्रा। अधिऽभोजना।
दशो इति। हिरण्यऽपिण्डान्। दिवःऽदासात्। असानिषम् ॥ २३ ॥

[v]दश दशसंख्याकान् [v]अश्वान् दशसंख्याकान् हिरण्यपूर्णान् [v]कोशान् [v]अधिभोजना। भोजनमिति धननाम। अधिकं धनं येषां मूल्यम्। तादृशानि दशसंख्याकानि वस्त्राणि[3] च। [v]दशो दश च

---

१. ख-न-भ-प्रचोदय; त-प्रदेवय। २. ज्ञ-त-न-अपरार्धम्; श-अहरात्मकम्। ३. घ-वस्त्रा वस्त्राणि।

दशसंख्याकांश्च ᵛहिरण्यपिण्डान् सुवर्णपिण्डानेतान् सर्वान् ᵛदिवोदासात् प्रस्तोकादहम् ᵛअसानिषं समभजम्। लब्धवानस्मि ॥

दश॒ रथा॒न्प्रष्टि॑मतः श॒तं गा अथ॑र्वभ्यः। अ॒श्व॒थः पा॒यवे॑ऽदात् ॥ २४ ॥

दश॑। रथा॑न्। प्रष्टि॑ऽमतः। श॒तम्। गाः। अथ॑र्वऽभ्यः।
अ॒श्व॒थः। पा॒यवे॑। अ॒दा॒त् ॥ २४ ॥

ᵛदश दशसंख्याकान् ᵛप्रष्टिमतः। प्रष्टिस्त्रिपद आधारः। तद्वद्वहन्तीति प्रष्टयोऽश्वाः। तथुक्तान् ᵛरथान् ᵛशतं शतसंख्याकाः ᵛगाः च ᵛअथर्वभ्यः अथर्वगोत्रेभ्य ऋषिभ्यः ᵛपायवे भरद्वाजपुत्राय एतत्संज्ञायास्मद्भ्रात्रे च ᵛअश्वथः अश्ववानेतत्संज्ञः प्रस्तोकः ᵛअदात् दत्तवान् ॥

महि॒ राधो॑ विश्वजन्यं॒ दधा॑नान्भरद्वा॒जान्त्सार्ञ्जयो॒ अभ्य॑यष्ट ॥ २५ ॥

महि॑। राधः॑। वि॒श्व॒ऽज॒न्य॒म्। दधा॑नान्। भ॒र॒त्ऽवा॒जान्। सार्ञ्जयः॑। अ॒भि। अ॒य॒ष्ट॒ ॥२५॥

ᵛविश्वजन्यं सर्वजनहितं ᵛमहि महत् ᵛराधः धनं ᵛदधानान् धारयतः ᵛभरद्वाजान् भरद्वाजपुत्रानस्मान् ᵛसार्ञ्जयः सृञ्जयपुत्रः प्रस्तोकः ᵛअभ्ययष्ट अपूजयत्[1] ॥ ॥ ३४ ॥

' वनस्पते ' इत्येषा रथारोहणे विनियुक्ता। सूत्रितं च—' वनस्पते वीड्वङ्गो हि भूया इत्येतयान्यान्यपि वानस्पत्यानि ' (आश्व. गृ. २. ६. ५) इति ॥

वन॑स्पते वी॒ड्वङ्गो॒ हि भूया अ॒स्मत्स॑खा प्र॒तर॑णः सु॒वीरः॑।
गोभिः॑ संन॒द्धो अ॑सि वी॒ळय॑स्वास्था॒ता ते॑ जयतु जेत्वा॒नि ॥ २६ ॥

वन॑स्पते। वी॒ळुऽअ॑ङ्गः। हि। भूयाः। अ॒स्मत्ऽस॑खा। प्र॒ऽतर॑णः। सु॒ऽवीरः॑।
गोभिः॑। सम्ऽन॑द्धः। अ॒सि॒। वी॒ळय॑स्व। आ॒ऽस्था॒ता। ते॒। ज॒य॒तु॒। जे॒त्वा॒नि ॥ २६ ॥

हे ᵛवनस्पते वनस्पतिविकार रथ त्वं ᵛवीड्वङ्गः दृढावयवः ᵛभूयाः भव। ᵛअस्मत्सखा वयं सखायो यस्य स तादृशश्च भव। ᵛप्रतरणः प्रवर्धयिता ᵛसुवीरः शोभनैर्वीरैः शूरभटैः पुत्रादिभिर्वा युक्तश्च भव। अपि च त्वं ᵛगोभिः गोविकारैश्चर्मभिः ᵛसंनद्धो ᵛअसि सम्यक् बद्धो भवसि। तादृशस्त्वं ᵛवीळयस्व अस्मान् दृढीकुरु। ᵛते[2] तव ᵛआस्थाता[2] त्वयि अवस्थितो रथी च ᵛजेत्वानि जेतव्यानि शत्रुसैन्यानि ᵛजयतु ॥

दि॒वस्पृ॑थि॒व्याः पर्योज॒ उद्भृ॑तं वन॒स्पति॑भ्य॒ः पर्याभृ॑तं॒ सहः॑।
अ॒पामो॒ज्मान॑ं॒ परि॒ गोभि॒रावृ॑त॒मिन्द्र॑स्य॒ वज्रं॑ ह॒विषा॒ रथं॑ यज ॥ २७ ॥

दि॒वः। पृ॒थि॒व्याः। परि॑। ओजः॑। उत्ऽभृ॑तम्। व॒न॒स्पति॑ऽभ्यः। परि॑। आऽभृ॑तम्। सहः॑।
अ॒पाम्। ओ॒ज्मान॑म्। परि॑। गोभिः॑। आऽवृ॑तम्। इन्द्र॑स्य। वज्र॑म्। ह॒विषा॑। रथ॑म्। यज ॥२७॥

---

१. ख–अभ्यपूजयतु; झ-ञ-भ-य–अभ्यपूजयत्; त२–पूजयत्; श–पूजयत। २. य–आस्थाता ते।

vदिवः द्युलोकात् vपृथिव्याः भूमेश्च vउद्भृतम् उद्धृतं सारत्वेनोपात्तं यत् vओजः बलमस्ति तद्रूपम्। वनस्पतिविकारत्वाद्रथस्य। वनस्पतयो हि पृथिव्याः सारभूताः ते च द्युसंबन्धिभिरुदकैः प्रवृद्धाः। अतो रथस्य लोकद्वयसारत्वमुपपन्नम्। vपरि[1] पञ्चम्यर्थानुवादी। अपि च vवनस्पतिभ्यः वृक्षेभ्यः। vपरि पूर्ववत्। vआभृतम् आहृतं vसहः बलरूपम् vअपाम् उदकानाम् vओजमानं प्रेरकम्। यद्वा। ओजमा वेगः। अपां वेग इव वेगवन्तं vगोभिः गोविकारैश्चर्मभिः vपरि परितः vआवृतम् आवेष्टितम् vइन्द्रस्य vवज्रं वज्रैकदेशम्। श्रूयते हि—'इन्द्रो वृत्राय वज्रमुदयच्छत् स त्रेधा व्यभवत् स्फ्यस्तृतीयं रथस्तृतीयं यूपस्तृतीयम्' इति। एवंगुणविशिष्टं vरथं vहविषा पुरोडाशादिना हे अध्वर्यो vयज॥ नूनमेषोत्तरा च रथदेवत्यस्य हविषो याज्यानुवाक्ये लिङ्गादवगन्तव्ये॥

इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः।
सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय॥ २८॥

इन्द्रस्य। वज्रः। मरुताम्। अनीकम्। मित्रस्य। गर्भः। वरुणस्य। नाभिः।
सः। इमाम्। नः। हव्यऽदातिम्। जुषाणः। देव। रथ। प्रति। हव्या। गृभाय॥ २८॥

यो रथः vइन्द्रस्य vवज्रः उक्तप्रकारेण वज्रैकदेशः vमरुताम् एतत्संज्ञानां देवगणानाम् vअनीकम् अग्रभूतं तद्वच्छीघ्रगामी vमित्रस्य अहरभिमानिनो देवस्य vगर्भः गर्भवदन्तर्वर्तमानः। अहनि हि रथः संचरति। vवरुणस्य रात्र्यभिमानिदेवस्य vनाभिः नाभिस्थानीयः। नाभिर्यथा देहमध्ये नैश्चल्येनावतिष्ठते तद्वत् रात्रौ क्वचिदवस्थितः। हे vदेव द्योतमान vरथ य उक्तगुणः vसः तादृशस्त्वम् vइमां vनः अस्मदीयां vहव्यदातिं हविर्दानवतीं यागक्रियां vजुषाणः सेवमानः सन् vहव्या हव्यान्यस्मदीयानि हवींषि vप्रति vगृभाय प्रतिगृहाण॥

परेण तृचेन संग्रामे दुन्दुभिरभिमर्शनीयः। सूत्रितं च—'उप श्वासय पृथिवीमुत द्यामिति तृचेन दुन्दुभिमभिमृशेत्' (आश्व. गृ. ३. १२. १७) इति॥

उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत्।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अप सेध शत्रून्॥ २९॥

उप। श्वासय। पृथिवीम्। उत। द्याम्। पुरुऽत्रा। ते। मनुताम्। विऽस्थितम्। जगत्।
सः। दुन्दुभे। सऽजूः। इन्द्रेण। देवैः। दूरात्। दवीयः। अप। सेध। शत्रून्॥ २९॥

हे दुन्दुभे vपृथिवीमुत अपि च vद्यां दिवम् vउप vश्वासय आत्मीयेन जयघोषेणाश्वासय। यथा लोकद्वयं त्वदीयेन शब्देनापूरितं भवति तादृशं शब्दं कुर्वित्यर्थः। अपि च vविस्थितं[2] विशेषेण स्थितं vजगत् स्थावरं जङ्गमं चोभयविधं प्राणिजातं vते त्वदीयं शब्दं vपुरुत्रा बहुधा vमनुतां मन्यताम्। जानातु। हे vदुन्दुभे vसः त्वम् vइन्द्रेण अन्यैः vदेवैः च vसजूः सह vदूराद्दवीयः दूरादपि दूरतरं[3] vशत्रून् अस्मदीयान् vअप vसेध अपगमय। अत्र निरुक्तं—'दुन्दुभिरिति शब्दानुकरणं द्रुमो भिन्न इति वा दुन्दुभ्यतेर्वा स्याद्वधकर्मणः[4]' (निरु. ९. १२) इत्यादि॥

---

१. ख-ङ्ग-त-न-भ-परिः। २. ख-ङ्ग-न-भ-विष्ठितम्; त-स्थितम्। ३. ख-ङ्ग-न-भ-य-दूरतरमतिशयेन दूरतरम्। ४. ङ्ग-स्याच्छब्दकर्मणः।

आ क्रन्दय बलमोजो न आ धा निः ष्टनिहि दुरिता बाधमानः ।
अप प्रोथ दुन्दुभे दुच्छुना इत इन्द्रस्य मुष्टिरसि वीळयस्व ॥ ३० ॥

आ । क्रन्दय । बलम् । ओजः । नः । आ । धाः । निः । स्तनिहि । दुःऽइता । बाधमानः ।
अप । प्रोथ । दुन्दुभे । दुच्छुनाः । इतः । इन्द्रस्य । मुष्टिः । असि । वीळयस्व ॥ ३० ॥

हे दुन्दुभे Vआ Vक्रन्दय अस्मच्छत्रून् रोदय । Vबलं सेनारूपम् Vओजः शरीरबलं च Vनः अस्मभ्यम् Vआ Vधाः आधेहि । प्रयच्छ । तथा Vदुरिता दुरितानि दुर्गमनानि Vबाधमानः हिंसंस्त्वं Vनिः Vस्तनिहि नितरां शब्दं कुरु । ' स्तन शब्दे ' इति धातुः । हे Vदुन्दुभे Vदुच्छुनाः अस्मदुःखहेतुभूतं शुनं सुखं यासां तादृशीः शत्रुसेनाः Vइतः अस्मत्स्थानात्[1] Vअप Vप्रोथ बाधस्व । त्वं च Vइन्द्रस्य Vमुष्टिरसि । मुष्टिरिव शत्रूणां हन्ता भवसि । अतोऽस्मान् Vवीळयस्व दृढीकुरु ॥

आमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ॥ ३१ ॥

आ । अमूः । अज । प्रतिऽआवर्तय । इमाः । केतुऽमत् । दुन्दुभिः । वावदीति ।
सम् । अश्वऽपर्णाः । चरन्ति । नः । नरः । अस्माकम् । इन्द्र । रथिनः । जयन्तु ॥ ३१ ॥

अस्याः पूर्वार्धो दुन्दुभिदेवत्य उत्तरार्धश्चैन्द्रः । यद्वा । उभावप्यर्धर्चावैन्द्रौ । हे इन्द्र Vअमूः शत्रुषु स्थितास्ता गाः Vआ Vअज अस्मान् प्रत्यागमय । Vइमाः अस्मदीया गाः शत्रुभिर्जिघृक्षिताः Vप्रत्यावर्तय प्रतिनिवर्तय । अयं च Vदुन्दुभिः Vकेतुमत् प्रज्ञानवत् यथा सर्वैर्ज्ञायते तथा Vवावदीति भृशं शब्दं करोति । Vअश्वपर्णाः अश्वपतना अश्ववाहाश्च Vनः अस्मदीयाश्च Vनरः पुरुषाः Vसं Vचरन्ति शत्रुभिर्युध्यमाना वर्तन्ते । तथा सति हे Vइन्द्र Vअस्माकं Vरथिनः रथारूढाः पुरुषाः शत्रून् Vजयन्तु ॥ ॥ ३५ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण[2] विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके सप्तमोऽध्यायः समाप्तः ॥

---

१. ख-ङ्ग-न-भ-श-अस्मात्स्थानात् । २. ख-ङ्ग-न-भ-सायणामात्येन; र-सायणार्येण ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथाष्टमोऽध्याय आरभ्यते । षष्ठमण्डलस्य चतुर्थेऽनुवाके चत्वारि सूक्तानि व्याख्यातानि[1] । ' यज्ञायज्ञा ' इति द्वाविंशस्यृचं पञ्चमं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षम् । अत्रानुक्रम्यते—'यज्ञायज्ञा द्व्यधिका शंयुस्तृणपाणिकं पृश्निसूक्तं प्रगाथौ बृहती महासतोबृहती महाबार्हतबार्हतौ प्रगाथाविन्द्राग्नेय्यः काकुभः प्रगाथः पुरउष्णिग्बृहत्यतिजगतीति मारुत्योऽन्त्यास्तिस्रो वासां लिङ्गोक्तदेवताः काकुभः प्रगाथः पुरउष्णिग्बृहतीति पौष्ण्यो बृहती महाबृहती यवमध्यान्त्यानुष्टुप्[2] द्यावाभूम्योर्वा पृश्नेर्वा ' इति । ' यज्ञायज्ञा वः ' इत्येषा बृहती । ' तृतीयो द्वादशकः[3] ' इति[3] तल्लक्षणसद्भावात् । द्वितीया सतोबृहती । ' अयुजौ जागतौ सतोबृहती ' इत्युक्तलक्षणोपेतत्वात् । तृतीयाचतुर्थ्यौ बृहतीसतोबृहत्यौ पञ्चमी बृहती षष्ठी महासतोबृहती । अष्टाक्षराख्यः पादा द्वादशाक्षरौ द्वौ पादौ सा महासतोबृहती । सप्तमी महाबृहती । अष्टाक्षराश्चत्वारः पादा एको द्वादशाक्षरः सा महाबृहती । अष्टमी महासतोबृहती । अष्टिनाम्न्यो द्वौ जागतौ सा महासतोबृहती । नवमी बृहती दशमी सतोबृहती । एता दश अग्निदेवत्याः । एकादशी ककुप् । मध्यमो यदि द्वादशाक्षर उभयतोऽष्टकौ द्वौ पादौ सा ककुप् । द्वादशी सतोबृहती त्रयोदशी पुरउष्णिक् । आद्यो जागतो द्वितीयतृतीयौ गायत्रौ सा पुरउष्णिक् । चतुर्दशी बृहती पञ्चदशी अतिजगती द्वापञ्चाशदक्षरा । एकादश्याद्याः पञ्च मरुद्देवताकाः । त्रयोदश्यादीनां तिसृणां लिङ्गोक्ता इन्द्रादयो वा देवताः । षोडशी ककुप् सप्तदशी सतोबृहती अष्टादशी पुरउष्णिक् एकोनविंशी बृहती । षोडश्यादीनां चतसृणां पूषा देवता । विंशी बृहती एकविंशी यवमध्या महाबृहती । आद्यौ द्वावष्टकौ तृतीयो द्वादशकश्चतुर्थपञ्चमावष्टकौ सा यवमध्या महाबृहती । विंश्येकविंश्योः ' पृश्निसूक्तम् ' इत्युक्तत्वात् मरुतां माता पृश्निर्देवता । द्वाविंशी अनुष्टुप् । सा चापि पृश्निदेवत्या द्यावाभूमिदेवत्या वा । सूक्तविनियोगो लैङ्गिकः । आग्निमारुते ' यज्ञायज्ञा वः ' इत्ययं स्तोत्रियप्रगाथः । सूत्रितं च—' यज्ञायज्ञा वो अग्नये देवो वो द्रविणोदा इति प्रगाथौ स्तोत्रियानुरूपौ ' (आश्व. श्रौ. ५. २०) इति ॥

यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम् ॥ १ ॥

यज्ञाऽयज्ञा । वः । अग्नये । गिराऽगिरा । च । दक्षसे ।
प्रऽप्र । वयम् । अमृतम् । जातऽवेदसम् । प्रियम् । मित्रम् । न । शंसिषम् ॥ १ ॥

हे स्तोतारः [v]वः यूयं [v]यज्ञायज्ञा यज्ञेयज्ञे सर्वेषु यागेषु [v]दक्षसे प्रवृद्धाय [v]अग्नये [v]गिरागिरा स्तुतिरूपया वाचावाचा स्तोत्रं कुरुतेति शेषः । चशब्दो भिन्नक्रमो व इत्यस्मात् परो द्रष्टव्यः । यूयं च स्तोत्रं कुरुत । [v]वयम् अपि तमग्निं [v]प्र [v]शंसिषम्[4] ॥ ' प्रसमुपोदः पादपूरणे ' इति प्रशब्दस्य द्विरुक्तिः पादपूरणार्था । व्यत्ययेनैकवचनम् । छान्दसो लुङ् ॥ प्रशंसाम । कीदृशम् । [v]अमृतं मरणरहितं [v]जातवेदसं जातानां वेदितारं जातप्रज्ञं जातधनं वा [v]मित्रं [v]न सखिभूतमिव [v]प्रियम्

---

१. ख-ज्ञ-न-भ-य–व्याकृतानि तत्र; ज्ञ-त–व्याकृतानि । २. ज्ञ-त-न-र-श–°नुष्टुम्मारुत्यऽन्त्या । ३. ख-ज्ञ-त१-न-भ–द्वादशको अष्टकेति; ज्ञ-त२-र–द्वादशका त्र्य(अ-र)ष्टकेति । ४. ख-ज्ञ-ज्ञ-त-न-भ-र–प्रशंसिषम् ।

अनुकूलम् ॥ यद्वा । व्यत्ययेन त्वमित्यस्य वसादेशः । अग्नये इति च कर्मणि चतुर्थी । क्रियाग्रहणमपि कर्तव्यमिति कर्मणः संप्रदानत्वात् । चशब्दः ' चण् ' इति निपातश्चेदर्थे वर्तते । दक्षसे इति च दक्षेर्वृद्धिकर्मणोऽन्तर्भावितण्यर्थात् लटि रूपम् । चणा योगात् ' निपातैर्यद्यदिहन्त° ' इति निघातप्रतिषेधः ॥ तत्रायमर्थः । हे स्तोतस्त्वं यज्ञेयज्ञे इममग्निं गिरागिरा स्तुत्या दक्षसे च वर्धयसि चेत् वयमपि अमृतत्वादिगुणकं तं प्रशंसाम ॥

ऊर्जो नपातं स हिनायमस्मयुर्दाशेम हव्यदातये ।
भुवद्वाजेष्वविता भुवद्बुध उत त्राता तनूनाम् ॥ २ ॥

ऊर्जः । नपातम् । सः । हिन । अयम् । अस्मऽयुः । दाशेम । हव्यऽदातये ।
भुवत् । वाजेषु । अविता । भुवत् । बुधः । उत । त्राता । तनूनाम् ॥ २ ॥

vऊर्जः अन्नस्य बलस्य वा vनपातं पुत्रं प्र शंसिषमित्यनुषङ्गात् प्रशंसामेत्यर्थः । vहिन इति निपातद्वयसमुदायो हीत्यस्यार्थे । vसः खलु vअयम् अग्निः vअस्मयुः अस्मान् कामयमानो भवति । वयं च vहव्यदातये हव्यानां हविषां देवेभ्यो दात्रे तस्मा अग्नये vदाशेम हवींषि दद्याम । स चाग्निः vवाजेषु संग्रामेषु vअविता रक्षिता vबुधः वर्धकश्चास्माकं vभुवत् भवतु । vउत अपि च vतनूनां तनयानामस्मत्पुत्राणां च vत्राता रक्षिता भवतु ॥

वृषा ह्यग्ने अजरो महान्विभास्यर्चिषा ।
अजस्रेण शोचिषा शोशुचच्छुचे सुदीतिभिः सु दीदिहि ॥ ३ ॥

वृषा । हि । अग्ने । अजरः । महान् । विऽभासि । अर्चिषा ।
अजस्रेण । शोचिषा । शोशुचत् । शुचे । सुदीतिऽभिः । सु । दीदिहि ॥ ३ ॥

हे vअग्ने vवृषा वर्षिता कामानां वृष्टेः कर्ता वा vअजरः जरारहितः vमहान् गुणैरधिकः एवंभूतस्त्वम् vअर्चिषा दीप्त्या vविभासि vहि विशेषेण प्रकाशसे खलु । हे vशुचे दीप्ताग्ने vअजस्रेण अविच्छिन्नेन vशोचिषा तेजसा vशोशुचत् भृशं दीप्यमानस्त्वं vसुदीतिभिः सुदीप्तिभिः vसु vदीदिहि सुष्ठु अस्मान् दीपय । प्रकाशय ॥

महो देवान्यजसि यक्ष्यानुषक्त्व क्रत्वोत दंसना ।
अर्वाचः सीं कृणुह्यग्नेऽवसे रास्व वाजोत वँस्व ॥ ४ ॥

महः । देवान् । यजसि । यक्षि । आनुषक् । तव । क्रत्वा । उत । दंसना ।
अर्वाचः । सीम् । कृणुहि । अग्ने । अवसे । रास्व । वाजा । उत । वंस्व ॥ ४ ॥

हे vअग्ने त्वं vमहः महतः vदेवान् vयजसि । यजमानानां यज्ञे हविर्भिः पूजयसि । अतोऽस्माकमपि यज्ञे vआनुषक् अनुषक्तं संततं यथा भवति तथा vयक्षि तान् देवान् यज । तदर्थं vतव vक्रत्वा प्रज्ञया vउत अपि च vदंसना कर्मणा च । vसीम् इति परिग्रहार्थीयः । तान् सर्वान् देवान् vअर्वाचः अस्मदभिमुखान् vकृणुहि कुरु vअवसे अस्मद्रक्षणार्थम् । तथा vवाजा वाजान् हविर्लक्ष-

णाम्यन्नानि ᵛरास्व । तेभ्यो देवेभ्यो देहि । ᵛउत अपि च त्वमपि ᵛवंस्व । तुभ्यं प्रत्तानि हवींषि संभजस्व ॥

यमापो अद्र्योे वना गर्भमृतस्य पिप्रति ।
सहसा यो मथितो जायते नृभिः पृथिव्या अधि सानवि ॥ ५ ॥

यम् । आपः । अद्र्यः । वना । गर्भम् । ऋतस्य । पिप्रति ।
सहसा । यः । मथितः । जायते । नृऽभिः । पृथिव्याः । अधि । सानवि ॥ ५ ॥

ᵛआपः वसतीवर्याख्याः ᵛअद्रयः ग्रावाणः ᵛवना वनानि काष्ठानि च ᵛऋतस्य यज्ञस्योदकस्य वा ᵛगर्भं गर्भवदन्तर्वर्तमानं ᵛयम् अग्निं ᵛपिप्रति पूरयन्ति । यद्वा । आपः समुद्रिया अद्रयो मेघा वनान्यरण्यानि च ऋतस्य गर्भं वाडवंवैद्युतदावरूपेण वर्तमानं यमग्निं पिप्रति पूरयन्ति । ᵛयः चाग्निः ᵛनृभिः नेतृभिर्ऋत्विग्भिः ᵛसहसा बलेन ᵛमथितः सन् ᵛपृथिव्या ᵛअधि भूमेरुपरि ᵛसानवि समुच्छ्रिते उत्कृष्टे देवयजनदेशे ᵛजायते प्रादुर्भवति स त्वं वंस्वेत्यन्वयः । यद्वा । 'यः पप्रौ' इत्यनया संबन्धः ॥ ॥ १ ॥

आ यः पप्रौ भानुना रोदसी उभे धूमेन धावते दिवि ।
तिरस्तमो ददृश ऊर्म्यास्वा श्यावास्वरुषो वृषा श्यावा अरुषो वृषा ॥ ६ ॥

आ । यः । पप्रौ । भानुना । रोदसी इति । उभे इति । धूमेन । धावते । दिवि ।
तिरः । तमः । ददृशे । ऊर्म्यासु । आ । श्यावासु । अरुषः । वृषा ।
आ । श्यावाः । अरुषः । वृषा ॥ ६ ॥

ᵛयः अग्निः ᵛभानुना दीप्त्या ᵛउभे ᵛरोदसी द्यावापृथिव्यौ ᵛआ ᵛपप्रौ आपूरयति सः ᵛधूमेन ᵛदिवि अन्तरिक्षे ᵛधावते गच्छति । धूमो हि मेघात्मना परिणतः सन् अन्तरिक्षे गच्छति । कार्यकारणयोरभेदविवक्षया[1] तद्गमनमप्यनुपचर्यते[1] । अपि चायम् ᵛअरुषः आरोचमानः ᵛवृषा वर्षिता कामानामेवंगुणकोऽग्निः ᵛश्यावासु श्यामवर्णासु कृष्णासु ᵛऊर्म्यासु । रात्रिनामैतत् । निशासु ᵛतमः अन्धकारं तिरस्कृत्य ᵛआ समन्तात् ᵛददृशे दृश्यते । ᵛश्यावाः श्यामवर्णा रात्रीश्च ᵛआ तिष्ठति । ᵛअरुषो ᵛवृषा इति पुनरुक्तिरादरार्था पादपूरणार्था वा ॥

बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा ।
भरद्वाजे समिधानो यविष्ठ्य रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि ॥७॥

बृहत्ऽभिः । अग्ने । अर्चिऽभिः । शुक्रेण । देव । शोचिषा ।
भरतऽवाजे । सम्ऽइधानः । यविष्ठ्य । रेवत् । नः । शुक्र । दीदिहि ।
द्युऽमत् । पावक । दीदिहि ॥ ७ ॥

---

१. ख-ग्न-भ-°विवक्षायां बहुमतमप्या°; य-°विवक्षायां तद्गमनमप्या° ।

हे [v]देव दानादिगुणयुक्त [v]यविष्ठय युवतम [v]शुक्र दीप्त [v]अग्ने [v]शुक्रेण निर्मलेन [v]शोचिषा तेजसा [v]भरद्वाजे अस्मद्धातरि [v]समिधानः समिध्यमानस्त्वं [v]बृहद्भिः महद्भिः [v]अर्चिभिः तेजोभिः [v]नः अस्मदर्थं [v]रेवत् धनयुक्तं यथा भवति तथा [v]दीदिहि दीप्यस्व । तथा [v]पावक हे शोधकाग्ने [v]द्युमत् द्योतमानेन[1] च युक्तं यथा भवति तथा [v]दीदिहि दीप्यस्व ॥

विश्वासां गृहपतिर्विशामसि त्वमग्ने मानुषीणाम् ।
शतं पूर्भिर्यविष्ठ पाह्यंहसः समेद्धारं शतं हिमाः स्तोतृभ्यो ये च ददति ॥८॥

विश्वासाम् । गृहऽपतिः । विशाम् । असि । त्वम् । अग्ने । मानुषीणाम् ।
शतम् । पुःऽभिः । यविष्ठ । पाहि । अंहसः । सम्ऽएद्धारम् । शतम् । हिमाः ।
स्तोतृऽभ्यः । ये । च । ददति ॥ ८ ॥

हे [v]अग्ने [v]त्वं [v]मानुषीणां मनोरपत्यभूतानां [v]विश्वासां सर्वासां [v]विशां प्रजानां [v]गृहपतिः [v]असि गृहस्वामी भवसि । हे [v]यविष्ठ युवतमाग्ने अतस्त्वं [v]शतं [v]हिमाः शतं हेमन्तान् संवत्सरान् [v]समेद्धारं त्वां सम्यगिद्धं कृतवन्तं मां [v]शतं शतेन शतसंख्याकैः [v]पूर्भिः पालनैः [v]अंहसः पापात् आहन्तुः शत्रोर्वा [v]पाहि रक्ष । [v]ये [v]च [v]स्तोतृभ्यः [v]ददति धनं तव समिन्धनस्य कर्तरि प्रयच्छन्ति तांश्च पाहि ॥

त्वं नश्चित्र ऊत्या वसो राधांसि चोदय ।
अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥ ९ ॥

त्वम् । नः । चित्रः । ऊत्या । वसो इति । राधांसि । चोदय ।
अस्य । रायः । त्वम् । अग्ने । रथीः । असि । विदाः । गाधम् । तुचे । तु । नः ॥ ९ ॥

* हे [v]वसो वासक [v]अग्ने [v]चित्रः दर्शनीयः [v]त्वम् [v]ऊत्या रक्षया सह [v]राधांसि धनानि [v]नः अस्मभ्यं [v]चोदय प्रेरय । [v]अस्य सर्वत्र लोके परिदृश्यमानस्य[2] [v]रायः धनस्य [v]त्वं [v]रथीरसि रंहिता नेता भवसि । अतः कारणात् अस्मभ्यं धनानि प्रेरयेत्यर्थः । अपि च [v]नः अस्माकं [v]तुचे । अपत्यनामैतत् । अपत्यायापतनहेतुभूताय पुत्रादये [v]गाधं प्रतिष्ठां [v]तु क्षिप्रं [v]विदाः लम्भय ॥

पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः ।
अग्ने हेळांसि दैव्या युयोधि नोऽदेवानि हरांसि च ॥ १० ॥

पर्षि । तोकम् । तनयम् । पर्तृऽभिः । त्वम् । अदब्धैः । अप्रयुत्वऽभिः ।
अग्ने । हेळांसि । दैव्या । युयोधि । नः । अदेवानि । हरांसि । च ॥ १० ॥

---

१. ज्ञ–द्योतनेन । *न–'वाजपेये आग्निमारुते त्वं नश्चित्र इति प्रगाथः स्तौत्रियः। चित्रवतीषु चेत्स्तुवीरंस्त्वं नश्चित्र ऊत्याग्ने विवस्वदुषस इत्यग्निष्टोमसान्नः स्तौत्रियानुरूपौ (आश्व. श्रौ. ९.९) इति हि सूत्रितम् ' इत्यधिकम् । २. ख-भ-र–दृश्यमानस्य ।

हे [v]अग्ने [v]त्वम् [v]अदब्धैः केनाप्यहिंसितैः [v]अप्रयुत्वभिः । यौतिरत्र पृथग्भावार्थः । अपृथग्भूतैः संहतैः [v]पत्नीभिः पालनसाधनैः [v]तोकं पुत्रं [v]तनयं पौत्रं च [v]पर्षि पालय । [v]दैव्या देवसंबन्धीनि च [v]हेळांसि क्रोधान् [v]नः अस्मत्तः [v]युयोधि पृथक्कुरु । [v]अदेवानि मनुष्यसंबन्धीनि [v]च [v]क्रूरांसि हिंसनानि चास्मत्तः पृथक्कुरु ॥ ॥ २ ॥

आ सखायः सबर्दुघां धेनुमजध्वमुप नव्यसा वचः । सृजध्वमनपस्फुराम् ॥११॥

आ । सखायः । सबर्दुघाम् । धेनुम् । अजध्वम् । उप । नव्यसा । वचः । सृजध्वम् । अनपऽस्फुराम् ॥ ११ ॥

हे [v]सखायः समानख्याना अध्वर्यवः [v]सबर्दुघाम् । सबरिति पयसो नाम । अमरणहेतुभूतस्य पयसो दोग्ध्रीं [v]धेनुं गाम् [v]आ [v]अजध्वम् अभिगच्छत । प्राप्नुत । केन साधनेन । [v]नव्यसा नवीयसा नवतरेण [v]वचः वचसाह्वानरूपेण शब्देन । तदनन्तरम् [v]अनपस्फुराम् । स्फुरतिर्वधकर्मा । अनपबाध्यां तां धेनुम् [v]उप [v]सृजध्वम् । वत्सेनोपसृष्टां कुरुत । मरुद्देवत्यत्वात् मरुतां यागाय पयो दोग्धुमिति शेषः । अथवा मरुतां माता पृश्न्याख्या माध्यमिका वाक् धेनुः । हे सखायः स्तोतारः सबर्दुघां मरुज्जनहेतुभूतस्य[1] पयसो दोग्ध्रीं धेनुं पृश्निं नव्यसा नवतरेण वचसा स्तोत्रेणोपाजध्वम् उपागच्छत । अनपस्फुरामनपबाधनीयां तां सृजध्वम् । बन्धनात् विसृजत । मुञ्चत । ईदृशी महती धेनुर्मरुतां माता किमु वक्तव्यं तेषां माहात्म्यमिति मरुत्स्तुतिः ॥

या शर्धाय मारुताय स्वभानवे श्रवोऽमृत्यु धुक्षत ।
या मृळीके मरुतां तुराणां या सुम्नैरेवयावरी ॥ १२ ॥

या । शर्धाय । मारुताय । स्वऽभानवे । श्रवः । अमृत्यु । धुक्षत ।
या । मृळीके । मरुताम् । तुराणाम् । या । सुम्नैः । एवऽयावरी ॥ १२ ॥

[v]या धेनुः [v]अमृत्यु अमरणहेतु [v]श्रवः अन्नं पयोलक्षणं [v]मारुताय मरुत्संघाय [v]धुक्षत अधुक्षत[2] । कीदृशाय । [v]शर्धाय प्रसहनशीलाय [v]स्वभानवे स्वायत्तदीप्तये । [v]या च [v]तुराणां क्षिप्रकारिणां [v]मरुतां [v]मृळीके सुखे तत्परा वर्तते । [v]या च [v]सुम्नैः सुखैर्हेतुभूतैः [v]एवयावरी एवैर्गन्तृभिरध्वैर्मध्यमस्थानैरुदकैर्वा[3] सह यान्ती[4] अन्येषामपि सुखार्थं वृष्टिजलैः सहागच्छन्ती[5] तां धेनुमुपाजध्वमिति पूर्वत्रान्वयः । अत्रापि पूर्ववत् मरुत्स्तुतिरधिगन्तव्या ॥

भरद्वाजायाव धुक्षत द्विता । धेनुं च विश्वदोहसमिषं च विश्वभोजसम् ॥ १३ ॥

भरत्ऽवाजाय । अव । धुक्षत । द्विता ।
धेनुम् । च । विश्वऽदोहसम् । इषम् । च । विश्वऽभोजसम् ॥ १३ ॥

हे मरुतः [v]भरद्वाजाय अस्मद्भ्रात्रे [v]द्विता द्वितयम् [v]अव [v]धुक्षत[6] । किं तत् द्वितयम् । [v]धेनुं [v]च गां च [v]इषं [v]च अन्नं च । कीदृशीं धेनुम् । [v]विश्वदोहसं विश्वस्य व्याप्तस्य बहुलस्य दोग्ध्रीम् । कीदृशमन्नम् । [v]विश्वभोजसं सर्वेषां भोगपर्याप्तम् ॥

---

१. ख–मरुज्जन°। २. ज्ञ-त–अधुक्षत। ३. ख-भ–°र्मध्यस्थानै°। ४. ख-भ–याति; ज्ञ-श–यान्ति। ५. ख-भ–सहागच्छति; ज्ञ-श–सहागच्छन्ति। ६. ज्ञ–धुक्षत दत्त।

तं व इन्द्रं न सुक्रतुं वरुणमिव मायिनम् ।
अर्यमणं न मन्द्रं सुप्रभोजसं विष्णुं न स्तुष आदिशे ॥ १४ ॥

तम् । वः । इन्द्रम् । न । सुऽक्रतुम् । वरुणम्ऽइव । मायिनम् ।
अर्यमणम् । न । मन्द्रम् । सुप्रऽभोजसम् । विष्णुम् । न । स्तुषे । आऽदिशे ॥ १४ ॥

हे मरुद्गण [v]तं तादृशं [v]वः त्वां [v]स्तुषे स्तौमि । किमर्थम् । [v]आदिशे आदेशनाय धनानामतिसर्जनाय प्रदानाय । कीदृशं त्वाम् । [v]इन्द्रं [v]न इन्द्रमिव [v]सुक्रतुं सुकर्माणं [v]वरुणमिव [v]मायिनं मायावन्तं प्रज्ञावन्तम् [v]अर्यमणं [v]न अर्यमणमिव [v]मन्द्रं स्तुत्यं [v]विष्णुं [v]न विष्णुमिव [v]सुप्रभोजसं प्रसृतधनम्[१] । यदा त्वस्या लिङ्गोक्तदेवतास्तदानीं नेवशब्दौ चशब्दार्थे द्रष्टव्यौ ॥

त्वेषं शर्धो न मारुतं तुविष्वण्यनर्वाणं पूषणं सं यथा शता ।
सं सहस्रा कारिषच्चर्षणिभ्य आँ आविर्गूळ्हा वसु करत्सुवेदा नो वसु करत् ॥१५॥

त्वेषम् । शर्धः । न । मारुतम् । तुविऽस्वनिं । अनर्वाणम् । पूषणम् । सम् । यथा । शता ।
सम् । सहस्रा । कारिषत् । चर्षणिऽभ्यः । आ । आविः । गूळ्हा । वसु । करत् ।
सुऽवेदा । नः । वसु । करत् ॥ १५ ॥

नेति संप्रत्यर्थे । [v]न संप्रति इदानीं [v]त्वेषं दीप्तं [v]तुविष्वणि बहुस्वनम् [v]अनर्वाणम् अप्रत्यृतं शत्रुभिरनभिगतं [v]पूषणं पोषकं [v]मारुतं मरुत्संघरूपमीदृशं [v]शर्धः बलं स्तौमीति शेषः । स च मरुद्गणः [v]यथा येन प्रकारेण [v]शता शतसंख्याकानि धनानि [v]सं सहैव [v]चर्षणिभ्यः मनुष्येभ्योऽस्मभ्यं [v]कारिषत् कुर्यात् । आकारः समुच्चये । यथा वा [v]सहस्रा सहस्रसंख्याकानि धनानि च [v]सं सहैव कारिषत् कुर्यात् तथा स्तौमीति पूर्वत्रान्वयः । अपि च स मरुद्गणः [v]गूळ्हा गूढानि संवृतानि [v]वसु वसूनि धनानि [v]आविः [v]करत् अस्मभ्यमाविष्करोतु । तथा [v]वसु वसूनि धनानि [v]सुवेदा सुलभानि च [v]नः अस्माकं [v]करत् करोतु । यदा तु लिङ्गादियं पौष्णी तदा मारुतं शर्ध इव त्वेषं पूषणं पोषकमेतत्संज्ञं देवं स्तौमीति योजनीयम् ॥

आ मा पूषन्नुप द्रव शंसिषं नु ते अपिकर्ण आघृणे । अघा अर्यो अरातयः ॥१६॥

आ । मा । पूषन् । उप । द्रव । शंसिषम् । नु । ते । अपिऽकर्णे । आघृणे ।
अघाः । अर्यः । अरातयः ॥ १६ ॥

हे [v]पूषन् [v]मा माम् [v]आ [v]द्रव रक्षणार्थमभिगच्छ । हे [v]आघृणे आगतदीप्ते [v]अघाः आहन्त्रीः [v]अर्यः अरीरभिगन्त्रीः [v]अरातयः शत्रुभूताः प्रजाः [v]उप द्रव बाधस्व ॥ उपपूर्वो द्रवतिः बाधायां वर्तते । यथा 'प्रजां पशून्यजमानस्योप दोद्राव' (तै. सं. १. ५. १. ४) इति ॥ अहं च [v]ते तव [v]अपिकर्णे कर्णावपिगते समीपदेशे स्थितः सन् [v]नु क्षिप्रं [v]शंसिषं प्रशंसामि ॥ ॥ ३ ॥

---

१. ख-ङ्ग-श-सृप्रधनम् ; ज्ञ-त-प्रसृप्रधनम् ; न-सृप्रं धनम् ; भ-सृसधनम् ।

मा काकम्बीरमुद्बृहो वनस्पतिमशस्तीर्वि हि नीनशः ।
मोत सूरो अह एवा चन ग्रीवा आदधते वेः ॥ १७ ॥

मा । काकम्बीरम् । उत् । बृहः । वनस्पतिम् । अशस्तीः । वि । हि । नीनशः ।
मा । उत । सूरः । अहरिति । एव । चन । ग्रीवाः । आऽदधते । वेरिति वेः ॥ १७ ॥

ऋषिः पुत्रपौत्रसहितमात्मानं बहुपक्ष्याश्रयवनस्पतित्वेन रूपयन्[1] तस्यानुद्धारमाशास्ते । हे पूषन् vकाकम्बीरं काकानां भर्तारं vवनस्पतिं वृक्षं vमा vउद्बृहः उद्धर । मा बाधस्व । पुत्रपौत्रादिभिः सक्षीभूतैरुपेतमन्यैश्च बहुभिराश्रितं मां मा हिंसीरित्यर्थः । हिशब्दश्चार्थे । vअशस्तीः अशंसनीया अशंसनीयस्य दुःखस्य कीर्तयित्रीर्वा शत्रुभूताः प्रजाः vवि vनीनशः vहि विनाशय च । vउत[2] अपि च[2] vसूरः प्रेरकः शत्रुः vएव एवं vमा vअहः अस्मान् मा हार्षीत् ॥ एवमित्यभिसंबन्धात् आख्यातस्योदात्तवत्त्वाच्च अश्रुतोऽपि यथेत्येतद्वाक्ये[3] अध्याहियते ॥ vग्रीवाः । गिरन्त्यन्तरवस्थापयन्ति बध्नन्तीति ग्रीवा दामानि । यथा व्याधाः vवेः पक्षिणो हरणार्थं ग्रीवा दामानि जालरूपाणि vआदधते भूम्यां निदधते तैश्च निहितैः पक्षिणो हरन्ति एवमस्मान् बन्धनोपायैः[4] शत्रुर्मा हार्षीदित्यर्थः ॥

दृतेरिव तेऽवृकमस्तु सख्यम् । अच्छिद्रस्य दधन्वतः सुपूर्णस्य दधन्वतः ॥१८॥

दृतेःऽइव । ते । अवृकम् । अस्तु । सख्यम् ।
अच्छिद्रस्य । दधन्ऽवतः । सुऽपूर्णस्य । दधन्ऽवतः ॥ १८ ॥

हे पूषन् vते तव vसख्यं सखित्वम् vअवृकं बाधकरहितं[5] सर्वदा ऐकरूप्येण वर्तमानमस्माकम् vअस्तु सर्वदा भवतु । vदृतेरिव । यथा दृतेस्त्वदीयं सख्यमविच्छिन्नं तद्वत् । कीदृशो दृतिः । vअच्छिद्रस्य छिद्ररहितस्य संश्लिष्टस्य vदधन्वतः दधिमतः vसुपूर्णस्य दृढ्ना सुष्ठु पूरितस्य । पुनर्दधन्वत इति दृढ्नोऽधिकत्वद्योतनार्थः । ईदृशो दृतिः सर्वदा पूर्णो रथे वर्तते । स इव वयमपि तव सखायो भवेमेत्यृषिराशास्ते ॥

परो हि मर्त्यैरसि समो देवैरुत श्रिया ।
अभि ख्यः पूषन्पृतनासु नस्त्वमर्वा नूनं यथा पुरा ॥ १९ ॥

परः । हि । मर्त्यैः । असि । समः । देवैः । उत । श्रिया ।
अभि । ख्यः । पूषन् । पृतनासु । नः । त्वम् । अर्वा । नूनम् । यथा । पुरा ॥ १९ ॥

हे vपूषन् vमर्त्यैः मर्त्येभ्यो मनुष्येभ्यः vपरः परस्तात् स्थितः vअसि । vश्रिया संपदा vदेवैरुत सर्वैर्देवैश्च vसमः समानोऽसि । अतः vत्वं vपृतनासु संग्रामेषु vनः अस्मान् vअभि vख्यः अभिपश्य अनुग्रहदृष्ट्या[6] विलोकय[7] । vयथा vपुरा येन प्रकारेण पूर्वकालीनान् पुरुषान्[8] ररक्षिथ एवं vनूनम् अद्येदानीम् vअव अस्मान् रक्ष ॥

---

१. ख-ङ्ग-न-भ-श-निरूपयन् । २. ज्ञ-ङ्ग-त-न-य-र-श-मोत मा च । ३. ज्ञ-यथेत्युत्तरवाक्ये; त-यथेत्येतरवाक्ये । ४. घ-बाधनोपायैः । ५. घ-श-बाधरहितम् । ६. ख-भ-अनुग्रहबुद्धया । ७. ख-ङ्ग-भ-र-'विलोकय' नास्ति । ८. श-मनुष्यान् ।

वामी वामस्य धूतयः प्रणीतिरस्तु सूनृता ।
देवस्य वा मरुतो मर्त्यस्य वेजानस्य प्रयज्यवः ॥ २० ॥

वामी । वामस्य । धूतयः । प्रऽनीतिः । अस्तु । सूनृता ।
देवस्य । वा । मरुतः । मर्त्यस्य । वा । ईजानस्य । प्रऽयज्यवः ॥ २० ॥

हे [v]धूतयः कम्पयितारः [v]प्रयज्यवः प्रकर्षेण यष्टव्याः [v]मरुतः सा [v]सूनृता प्रियसत्यात्मिका माध्यमिका युष्मदीया वाक् [v]प्रणीतिरस्तु । अस्मदर्थं धनानां प्रणेत्री भवतु । [v]देवस्य [v]वा [v]मर्त्यस्य मनुष्यस्य [v]वा [v]ईजानस्य इष्टवतः उभयविधस्य पुरुषस्य [v]वामी प्रशस्ता या वाक् [v]वामस्य वननीयस्य धनस्य प्रणीतिः प्रणेत्री सा सूनृतेत्यन्वयः । प्रणीतिरस्त्वस्मदर्थम् ॥

सद्यश्चिद्यस्य चर्कृतिः परि द्यां देवो नैति सूर्यः ।
त्वेषं शवो दधिरे नाम यज्ञियं मरुतो वृत्रहं शवो ज्येष्ठं वृत्रहं शवः ॥२१॥

सद्यः । चित् । यस्य । चर्कृतिः । परि । द्याम् । देवः । न । एति । सूर्यः ।
त्वेषम् । शवः । दधिरे । नाम । यज्ञियम् । मरुतः । वृत्रऽहम् । शवः ।
ज्येष्ठम् । वृत्रऽहम् । शवः ॥ २१ ॥

[v]यस्य च मरुद्गणस्य [v]चर्कृतिः कर्म [v]सद्यश्चित् सद्य एव [v]द्यां [v]परि [v]एति परिगच्छति दिव्यन्तरिक्षे परितो वर्तते [v]देवो [v]न देवो द्योतमानः [v]सूर्यः इव तादृशगणात्मकाः[1] [v]मरुतः [v]त्वेषं दीप्तं [v]नाम शत्रूणां नमयितृ [v]यज्ञियं यज्ञार्हं [v]शवः बलं [v]दधिरे अधारयन् । तच्च [v]शवः बलं [v]वृत्रहं वृत्रादेरसुरस्य हन्तृ भवति । तच्च[2] [v]वृत्रहं [v]शवः [v]ज्येष्ठं सर्वेभ्यः प्रशस्ततमं भवति ॥

सकृद्द्यौरजायत सकृद्भूमिरजायत ।
पृश्न्या दुग्धं सकृत्पयस्तदन्यो नानु जायते ॥ २२ ॥

सकृत् । ह । द्यौः । अजायत । सकृत् । भूमिः । अजायत ।
पृश्न्याः । दुग्धम् । सकृत् । पयः । तत् । अन्यः । न । अनु । जायते ॥ २२ ॥

[v]सकृद्ध सकृदेव [v]द्यौरजायत उदपद्यत । सकृदुत्पन्नैव स्थिता भवति । न पुनस्तस्यां[3] नष्टायामन्या तत्सदृशी द्यौर्जायते[4] । [v]भूमिः च [v]सकृत् एव [v]अजायत । [v]पृश्न्याः मरुतां मातुर्गोः [v]पयः च [v]सकृत् एकवारमेव [v]दुग्धं यस्मात् पयसो मरुतो जज्ञिरे । 'पृश्निर्यै वै पयसो मरुतो जाताः' (तै. सं. २. २. ११. ४) इति तैत्तिरीयकम् । यथा द्यावापृथिव्यौ सकृदेवोत्पद्येते एवं पृश्निरपि सकृदुग्धेनैव पयसा मरुतोऽजीजनत् । तत् ततः परम् [v]अन्यः पदार्थः [v]नानु [v]जायते तत्सदृशो नोत्पद्यते ॥ ॥ ४ ॥

---

१. ख–तादृशा एवंगुणात्मकाः; श–तादृशो मरुद्गणात्मकः । २. ख–एतच्च । ३. य–पुनरस्याम् । ४. ख-भ-य-र–द्यौर्न जायते ।

'स्तुषे जनम्' इति पञ्चदशर्चं षष्ठं सूक्तं भारद्वाजस्य ऋजिश्वन आर्षं वैश्वदेवम्। अन्त्या षट्पञ्चाशदक्षरा शक्करी शिष्टास्त्रिष्टुभः। तथा चानुक्रान्तं—'स्तुषे पञ्चोन ऋजिश्वा ह वैश्वदेवं ह शक्र्यन्तम्' इति। व्यूळ्हे दशरात्रे पञ्चमेऽहनीदं वैश्वदेवनिविद्धानम्[1]। सूत्रितं च—'ऋभुर्विभ्वा स्तुषे जनमिति वैश्वदेवम्' (आश्व. श्रौ. ८. ८) इति। आद्या महानाम्नीव्रते जप्या॥

स्तुषे जनं सुव्रतं नव्यसीभिर्गीर्भिर्मित्रावरुणा सुम्नयन्ता।
त आ गमन्तु त इह श्रुवन्तु सुक्षत्रासो वरुणो मित्रो अग्निः॥ १॥

स्तुषे। जनम्। सुऽव्रतम्। नव्यसीभिः। गीःऽभिः। मित्रावरुणा। सुम्नऽयन्ता।
ते। आ। गमन्तु। ते। इह। श्रुवन्तु। सुऽक्षत्रासः। वरुणः। मित्रः। अग्निः॥ १॥

[v]सुव्रतं सुकर्माणं [v]जनं दैव्यं जनं देवसंघं [v]नव्यसीभिः नवतराभिः [v]गीर्भिः स्तुतिभिः [v]स्तुषे अहं स्तुवे। तथा [v]मित्रावरुणा। मित्रः प्रमीतेस्त्रायको वरुणः पापान्निवारयिता[2]। एतावपि देवौ स्तौमि। कीदृशौ। [v]सुम्नयन्ता सुम्नं सुखं स्तोतृणामिच्छन्तौ। [v]सुक्षत्रासः शोभनबलाः [v]ते वरुणादयः सर्वे देवाः [v]इह अस्मिन् यज्ञे [v]आ [v]गमन्तु आगच्छन्तु। [v]ते तादृशाः [v]श्रुवन्तु। अस्मदीयाः स्तुतीः शृण्वन्तु च। अत्र मित्रादीनां परिगणनमुपलक्षणं सूक्तस्य सर्वदेवताप्रतिपादकत्वात्[3]। अत एव पूर्वं जनमिति सामान्यनिर्देशः॥

विशोविशः ईड्यमध्वरेष्वदृप्तक्रतुमरतिं युवत्योः।
दिवः शिशुं सहसः सूनुमग्निं यज्ञस्य केतुमरुषं यजध्यै॥ २॥

विशःऽविशः। ईड्यम्। अध्वरेषु। अदृप्तऽक्रतुम्। अरतिम्। युवत्योः।
दिवः। शिशुम्। सहसः। सूनुम्। अग्निम्। यज्ञस्य। केतुम्। अरुषम्। यजध्यै॥ २॥

[v]विशोविशः सर्वस्याः प्रजायाः [v]अध्वरेषु यज्ञेषु [v]ईड्यम् ऋत्विग्भिः स्तुत्यम् [v]अदृप्तक्रतुं दर्परहितकर्माणम् अमूढप्रज्ञं वा [v]युवत्योः द्यावापृथिव्योः [v]अरतिम् अभिगन्तारम् अयं स्वामिनं [v]दिवः द्युलोकस्य [v]शिशुं पुत्रम्। 'दिवस्परि प्रथमं जज्ञे अग्निः' (ऋ. सं. १०.४५.१) इति निगमः। यद्वा। दिवः स्तोतुः पुत्रभूतम्। तथापि निगमो भवति—'त्वं पुत्रो भवसि यस्तेऽविधत्' (ऋ. सं. २. १. ९) इति। [v]सहसः बलस्य [v]सूनुं पुत्रं [v]यज्ञस्य यागस्य [v]केतुं प्रज्ञापकम् [v]अरुषम् आरोचमानम् एवंगुणकम् [v]अग्निं [v]यजध्यै यष्टुम्। स्तुषे स्तुवे इत्यनुषज्यते। स्तुषे स्तुवे॥

अरुषस्य दुहितरा विरूपे स्तृभिरन्या पिपिशे सूरो अन्या।
मिथस्तुरा विचरन्ती पावके मन्म श्रुतं नक्षत ऋच्यमाने॥ ३॥

अरुषस्य। दुहितरा। विरूपे इति विऽरूपे। स्तृऽभिः। अन्या। पिपिशे। सूरः। अन्या।
मिथःऽतुरा। विचरन्ती इति विऽचरन्ती। पावके इति।
मन्म। श्रुतम्। नक्षतः। ऋच्यमाने इति॥ ३॥

---

१. ज्ञ—वैश्वदेवं निविद्धानम्; श—वैश्वदेवं हविर्धानम्। २. ज्ञ-त—पापानां निवारयिता। ३. ज्ञ—सर्वं देवता°; ज्ञ-त-न-र—सर्वस्य देवता°।

इयमहोरात्रयोः स्तुतिः । vअरुषस्य आरोचमानस्य सूर्यस्य vदुहितरा दुहितरौ । सूर्येण हि अहोरात्रयोर्विभागः क्रियते । अतस्तदधीनात्मलाभत्वात् तस्य दुहितरावित्युच्येते । vविरूपे शुक्लकृष्णतया नानारूपे । तयोः vअन्या एका रात्रिः vस्तृभिः नक्षत्रैः vपिपिशे पिश्यते संश्लिष्यते । ' पिश अवयवे ' इति धातुः । vअन्या अहरात्मिका दुहिता vसूरः सूर्येण पिपिशे संश्लिष्यते । ते च नक्षत्रैः सूर्येण चालंकृते भवत इत्यर्थः । vमिथस्तुरा परस्परं बाधयन्त्यौ । अह्ना रात्रिर्निवर्त्यते रात्र्या चाहरिति परस्परं बाधः । अत एव vविचरन्ती विविधं पृथक् चरन्त्यौ vपावके सर्वस्य शोधयित्र्यौ । एवंभूते अहश्च रात्रिश्च vऋच्यमाने अस्माभिः स्तूयमाने सत्यौ vश्रुतं श्रोतव्यं vमन्म मननीयं स्तोत्रमस्माकृतं vनक्षतः व्याप्नुताम् ॥

प्र वायुमच्छा बृहती मनीषा बृहद्रयिं विश्ववारं रथप्राम् ।
द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥ ४ ॥

प्र । वायुम् । अच्छ । बृहती । मनीषा । बृहत्ऽरयिम् । विश्वऽवारम् । रथऽप्राम् ।
द्युतत्ऽयामा । निऽयुतः । पत्यमानः । कविः । कविम् । इयक्षसि । प्रयज्यो इति प्रऽयज्यो ॥४॥

*vबृहती महती vमनीषा अस्मदीया स्तुतिः vवायुम् vअच्छ आभिमुख्येन vप्र गच्छतु ॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ कीदृशं वायुम् । vबृहद्रयिं महाधनं vविश्ववारं विश्वैर्वरणीयं संभजनीयं vरथप्रां रथस्यात्मीयस्य प्रातारं पूरयितारम् । यद्वा । स्तोतॄणां रथं धनैः पूरयितारम् । अथ प्रत्यक्षस्तुतिः । हे vप्रयज्यो प्रकर्षेण यष्टव्य वायो vद्युतद्यामा प्रदीप्तयानः vनियुतः आत्मीयरथयोज्याः वडवाः ताः vपत्यमानः अभिपतन्नभिगच्छन् । यद्वा । पत्यतिरैश्वर्यकर्मा । तासां वडवानामीश्वरः vकविः क्रान्तदर्शी । एवंभूतः त्वं vकविं मेधाविनं स्तोतारम् vइयक्षसि धनेन पूजय ॥

स मे वपुश्छदयदश्विनोर्यो रथो विरुक्मान्मनसा युजानः ।
येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ॥ ५ ॥

सः । मे । वपुः । छदयत् । अश्विनोः । यः । रथः । विरुक्मान् । मनसा । युजानः ।
येन । नरा । नासत्या । इषयध्यै । वर्तिः । याथः । तनयाय । त्मने । च ॥ ५ ॥

vअश्विनोः स्वभूतः vसः रथः vमे मदीयं vवपुः शरीरं vछदयत् छादयतु । तेजसाच्छादयतु । vयो vरथो vविरुक्मान् विरोचनवान् विशेषेण दीप्यमानः vमनसा मनोव्यापारमात्रेण vयुजानः अश्वैः संप्रयुज्यमानो[1] भवति । हे vनरा नेतारौ हे vनासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वाश्विनौ vयेन रथेन vवर्तिः स्तोतृगृहं vतनयाय पुत्राय vत्मने आत्मने तत्पित्रे स्तोत्रे vच vइषयध्यै कामान् प्रापयितुं vयाथः गच्छथः स रथः इति पूर्वत्रान्वयः ॥ ॥ ५ ॥

---

* न–' नियुत्वद्वायुदेवताके पशौ हविषो याज्या प्र वायुमिति । सूत्रितं च–रायो नु यं जज्ञतू रोदसी मे प्र वायुमच्छा बृहती मनीषा (आश्व. श्रौ. ३. ८) इति ' इत्यधिकम् । १. झ-त-न-र–संयुज्यमानो ।

पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतमप्यानि ।
सत्यश्रुतः कवयो यस्य गीर्भिर्जगतः स्थातर्जगदा कृणुध्वम् ॥ ६ ॥

पर्जन्यवाता । वृषभा । पृथिव्याः । पुरीषाणि । जिन्वतम् । अप्यानि ।
सत्यऽश्रुतः । कवयः । यस्य । गीःऽभिः । जगतः । स्थातः । जगत् । आ । कृणुध्वम् ॥६॥

हे [v]पर्जन्यवाता पर्जन्यवायू [v]वृषभा वृष्टेः कर्तारौ [v]पृथिव्याः । अन्तरिक्षनामैतत् । अन्तरिक्षात् [v]अप्यानि आप्तव्यानि [v]पुरीषाणि पूरकाण्युदकानि [v]जिन्वतं प्रेरयतम् । उत्तरोऽर्धर्चो मारुतः । हे [v]सत्यश्रुतः सत्यस्य स्तोत्रस्य श्रोतारः [v]कवयः मेधाविनो मरुतः [v]यस्य स्तोतुः [v]गीर्भिः स्तुतिभिः यूयं स्तुता भवथ तस्य स्तोतुः [v]जगत् स्थावरजङ्गमात्मकं सर्वं प्राणिजातम् [v]आ [v]कृणुध्वम् आभिमुख्येन कुरुत । हे [v]जगतः [v]स्थातः । गणाभिप्रायमेकवचनम्[1] । स्थावरजङ्गमात्मकस्य जगतोऽवस्थापक[2] हे मरुद्गण इति योज्यम् ॥

अन्वारम्भणीयायां सारस्वतस्य हविषो याज्या 'पावीरवी' इत्येषा । सूत्रितं च—' पावीरवी कन्या चित्रायुः पीपिवांसं सरस्वतः ' (आश्व. श्रौ. २. ८) इति । एकादशिने सारस्वते पशावेषैव पुरोडाशस्य याज्या । सूत्रितं च—' पावीरवी कन्या चित्रायुर्यस्ते स्तनः शशयो यो मयोभूः ' (आश्व. श्रौ. ३.७) इति । आग्निमारुते शस्त्रेऽप्येषा । सूत्रितं च—' राकामहमिति द्वे पावीरवी कन्या चित्रायुः' (आश्व. श्रौ. ५. २०) इति ॥

पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात् ।
ग्राभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते शर्म यंसत् ॥ ७ ॥

पावीरवी । कन्या । चित्रऽआयुः । सरस्वती । वीरऽपत्नी । धियम् । धात् ।
ग्राभिः । अच्छिद्रम् । शरणम् । सऽजोषाः । दुःऽआधर्षम् । गृणते । शर्म । यंसत् ॥ ७ ॥

[v]पावीरवी शोधयित्री [v]कन्या कमनीया [v]चित्रायुः चित्रगमना चित्रान्ना वा [v]वीरपत्नी । वीरः प्रजापतिः पतिर्यस्यास्तादृशी । यद्वा । वीराणां पालयित्री । एवंभूता [v]सरस्वती [v]धियम् अस्मदीयं कर्म यज्ञाख्यं [v]धात् दधातु । धारयतु । ददातु वा । शब्देन प्रतिपादितो ह्यर्थोऽनुष्ठीयते । अपि च [v]ग्राभिः देवपत्नीभिः [v]सजोषाः सह प्रीयमाणा । यद्वा । ग्राः गायत्र्यादीनि छन्दांसि । ' छन्दांसि वै ग्राः' (तै. सं. ५. १. ७. २) इति श्रुतेः । तैः सह प्रीयमाणा [v]गृणते स्तुवते मह्यम् [v]अच्छिद्रं छिद्ररहितं [v]दुराधर्षं शत्रुभिः शीतवातादिभिश्च धर्षयितुमशक्यं [v]शरणं गृहं [v]शर्म सुखं च [v]यंसत् प्रयच्छतु ॥

एकादशिने पौष्णे पशौ ' पथस्पथः ' इति हविषो याज्या । सूत्रितं च—' पथस्पथः परिपतिं वचस्या बृहस्पते या परमा परावदिति द्वे ' (आश्व. श्रौ. ३. ७) इति ॥

---

१. ख-ङ्ग-न-भ-य-गणाभिप्रायेणैक° । २. घ-श–जगतः स्थापक ।

पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कम् ।
स नो रासच्छुरुधश्चन्द्राग्रा धियंधियं सीषधाति प्र पूषा ॥ ८ ॥

पथःऽपथः । परिऽपतिम् । वचस्या । कामेन । कृतः । अभि । आनट् । अर्कम् ।
सः । नः । रासत् । शुरुधः । चन्द्रऽअग्राः । धियम्ऽधियम् । सीसधाति । प्र । पूषा ॥८॥

vपथस्पथः सर्वस्य मार्गस्य vपरिपतिम् अधिपतिम् vअर्कम् अर्चनीयं पूषणं vकामेन काम्यमानेन फलेन vकृतः वशीकृतः स्तोता vवचस्या[1] स्तुत्या vअभ्यानट् अभ्यश्नुताम् । प्राप्नोतु । vसः च vपूषा vनः अस्मभ्यं vशुरुधः शुचो रोधयित्रीः गाः vचन्द्राग्राः । चन्द्रमिति हिरण्यनाम । हिरण्यप्रमुखा यद्वा स्वर्णशृङ्गाः vरासत् ददातु ॥ ' रा दाने ' । अस्माल्लेटि रूपम् ॥ तथा vधियंधियं सर्वमस्मदीयं कर्म स पूषा vप्र vसीषधाति प्रसाधयतु ॥

त्वाष्टे पशौ ' प्रथमभाजम् ' इति हविषो याज्या । सूत्रितं च—' प्रथमभाजं यशसं वयोधां सोमापूषणा जनना रयीणामिति सूक्तम् ' (आश्व. श्रौ. ३.८) इति ॥

प्रथमभाजं यशसं वयोधां सुपाणिं देवं सुगभस्तिमृभ्वम् ।
होता यक्षद्यजतं पस्त्यानामग्निस्त्वष्टारं सुहवं विभावा ॥ ९ ॥

प्रथमऽभाजम् । यशसम् । वयःऽधाम् । सुऽपाणिम् । देवम् । सुऽगभस्तिम् । ऋभ्वम् ।
होता । यक्षत् । यजतम् । पस्त्यानाम् । अग्निः । त्वष्टारम् । सुऽहवम् । विभाऽवा ॥ ९ ॥

vप्रथमभाजं प्रथम उत्पत्तिकाले[2] एव विभक्तारं जन्तूनाम् । ' यावच्छो वै रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोति तावच्छो वै तत्प्र जायते' (तै. सं. १. ५. ९. १) इति श्रुतेः । vयशसं यशस्विनं vवयोधां वयसोऽन्नस्य हविर्लक्षणस्य धातारं धारयितारं यद्वा स्तोतृभ्योऽन्नप्रदं vसुपाणिम् । हस्तस्य मणिबन्धादूर्ध्वप्रदेशः पाणिः । शोभनपाणिकं vदेवं दानादिगुणयुक्तं vसुगभस्तिम् । गभस्तिरिति बाहुनाम । शोभनदोर्दण्डम्[3] vऋभ्वम् उरु भासमानं महान्तं वा vपस्त्यानाम् । पस्त्यमिति गृहनाम । तत्स्थानां vयजतं यष्टव्यम् । गृहस्थैर्यजनीयमित्यर्थः । vसुहवं सुखेन ह्वातुं[4] शक्यम् । एवंभूतं vत्वष्टारं vहोता देवानामाह्वाता vविभावा दीप्यमानः vअग्निः vयक्षत् यजत् । अनेन हविषा यजतु ॥

भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ ।
बृहन्तमृष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः ॥ १० ॥

भुवनस्य । पितरम् । गीःऽभिः । आभिः । रुद्रम् । दिवा । वर्धय । रुद्रम् । अक्तौ ।
बृहन्तम् । ऋष्वम् । अजरम् । सुऽसुम्नम् । ऋधक् । हुवेम । कविना । इषितासः ॥ १० ॥

---

१. ज्ञ-त-वचस्या वचसा । २. घ-श-उषःकाले । ३. ज्ञ-त-र-श-सुगभस्ति शोभनदोर्दण्डम् ।
४ थ-ज्ञ-त-भ-श-आह्वातुम् ।

vभुवनस्य भूतजातस्य vपितरं पालयितारं vरुद्रम् । रुत् दुःखम् । तत्[1] द्रावयितारमीश्वरम् vआभिः vगीर्भिः स्तुतिभिः vदिवा अहनि हे स्तोतः vवर्धय । vअक्तौ रात्र्यां च तमेव vरुद्रं स्तुतिभिर्वर्धय । वयं च vकविना प्राज्ञेन रुद्रेण vहृषितासः प्रेरिताः[2] सन्तः vबृहन्तं महान्तम् vऋष्वं दर्शनीयम् vअजरं जरारहितं vसुषुम्नं शोभनसुखमेवंगुणविशिष्टं रुद्रम्[3] vऋधक् ऋद्धं समृद्धं यथा भवति तथा vहुवेम स्तवाम ॥ ॥ ६ ॥

आ युवानः कवयो यज्ञियासो मरुतो गन्त गृणतो वरस्याम् ।
अचित्रं चिद्धि जिन्वथा वृधन्त इत्था नक्षन्तो नरो अङ्गिरस्वत् ॥ ११ ॥

आ । युवानः । कवयः । यज्ञियासः । मरुतः । गन्त । गृणतः । वरस्याम् ।
अचित्रम् । चित् । हि । जिन्वथ । वृधन्तः । इत्था । नक्षन्तः । नरः । अङ्गिरस्वत् ॥ ११ ॥

हे vयुवानः नित्यतरुणाः vकवयः प्राज्ञाः vयज्ञियासः यज्ञार्हा एवंभूता हे vमरुतः vगृणतः स्तुवतः vवरस्यां वरणीयां स्तुतिं प्रति vआ vगन्त आगच्छत । अपि च हे vनरः नेतारो मरुतः vइत्था इत्थमनेन प्रकारेण vवृधन्तः वर्धमानाः । यद्वा इत्था अमुत्रान्तरिक्षे vनक्षन्तः व्याप्नुवन्तः vअङ्गिरस्वत् । अङ्गिरसो गमनशीला रश्मयः । ते यथा शीघ्रं नभस्तलं[4] व्याप्नुवन्ति तद्वत् । यद्वा । ऋषय एवाङ्गिरसः । तद्वच्छीघ्रगामिनः । एवंभूता यूयम् vअचित्रं vचित् । ओषधिवनस्पतिभिर्निर्बिडो देशश्चित्रम्[5] । तद्विलक्षणम् ओषध्यादिभिर्विर्युक्तमपि देशं vजिन्वथ वृष्टया तर्पयथ । vहि इति पूरणः ॥

प्र वीराय प्र तवसे तुरायाजा यूथेव पशुरक्षिरस्तम् ।
स पिस्पृशति तन्वि श्रुतस्य स्तृभिर्न नाकं वचनस्य विप्रः ॥ १२ ॥

प्र । वीराय । प्र । तवसे । तुराय । अज । यूथाऽइव । पशुऽराक्षिः । अस्तम् ।
सः । पिस्पृशति । तन्वि । श्रुतस्य । स्तृऽभिः । न । नाकम् । वचनस्य । विप्रः ॥ १२ ॥

vवीराय विक्रान्ताय विविधं शत्रूणामीरकाय वा मरुद्गणाय vप्र vअज हे स्तोतः स्तुतिं प्रगमय । तथा vतवसे बलिने[6] vतुराय क्षिप्रगमनाय[7] च तस्मै गणाय vप्र अज । तत्र दृष्टान्तः । vपशुरक्षिः पशुपालकः vयूथेव । स यथा गोयूथानि सायंकाले vअस्तं गृहं शीघ्रं गमयति तद्वत् शीघ्रं स्तुतिं प्रेरयेत्यर्थः । vसः च मरुद्गणः vवचनस्य वक्तुः vविपः विप्रस्य मेधाविनः स्तोतुः vश्रुतस्य ॥ क्रियाग्रहणमपि कर्तव्यमिति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी ॥ श्रुतं श्रोतव्यं स्तोत्रं vतन्वि आत्मीये शरीरे vपिस्पृशति स्पर्शयतु । संश्लेषयतु । तत् स्तोत्रं हृद्यं भवत्वित्यर्थः । स्पर्शने दृष्टान्तः । vस्तृभिर्न vनाकम् । यथा नक्षत्रैर्नाकमन्तरिक्षं स्पर्शयति संश्लेषयति तद्वत् ॥

---

१. ज्ञ-ज्ञ-त-न-भ-य-र-तस्य । २. ख-ज्ञ-त-न-भ-र-प्रेषिताः प्रेरिताः । ३. ख-ज्ञ-न-भ-तं रुद्रम् । ४. ख-घ-ज्ञ-ज्ञ-त-न-भ-र-नभस्थलम् । ५. ख-घ-ज्ञ-ज्ञ-त-न-भ-य-श-देशश्चित्रः । ६. ख-घ-भ-बलाय; श-बले । ७. ख-घ-भ-श-क्षिप्रगामिने ।

यो रजाँसि विममे पार्थिवानि त्रिश्चिद्विष्णुर्मनवे बाधितायै ।
तस्य ते शर्मन्नुपदद्यमाने राया मदेम तन्वा तना च ॥ १३ ॥

यः । रजाँसि । विऽममे । पार्थिवानि । त्रिः । चित् । विष्णुः । मनवे । बाधितायै ।
तस्य । ते । शर्मन् । उपऽदद्यमाने । राया । मदेम । तन्वा । तना । च ॥१३॥

[v]यः [v]विष्णुः [v]बाधिताय असुरैर्हिंसिताय [v]मनवे प्रजापतये तदर्थं [v]पार्थिवानि पृथिव्या[1] संबद्धानि[1] [v]रजांसि लोकान् । त्रीँल्लोकानिति यावत् । [v]त्रिः [v]विममे । [v]चित् इत्यवधारणे । त्रिभिरेव विक्रमणैः[2] परिमितवान् । हे विष्णो [v]तस्य तादृशस्य [v]ते तव । तृतीयार्थे षष्ठी । ईदृशेन त्वया [v]उपदद्यमाने अस्मभ्यं दीयमाने [v]शर्मन् शर्मणि गृहे सुखे वा वर्तमानाः सन्तो वयं [v]राया धनेन [v]तन्वा रोगादिरहितेन शरीरेण च [v]तना तनयेन पुत्रेण [v]च [v]मदेम मोदेम । हृष्टा भवेम[3] ॥

तन्नोऽहिर्बुध्न्यो अद्भिरर्कैस्तत्पर्वतस्तत्सविता चनो धात् ।
तदोषधीभिरभि रातिषाचो भगः पुरंधिर्जिन्वतु प्र राये ॥ १४ ॥

तत् । नः । अहिः । बुध्न्यः । अत्ऽभिः । अर्कैः । तत् । पर्वतः । तत् । सविता । चनः । धात् ।
तत् । ओषधीभिः । अभि । रातिऽसाचः । भगः । पुरंम्ऽधिः । जिन्वतु । प्र । राये ॥१४॥

[v]बुध्न्यः । बुध्नमन्तरिक्षम् । तत्र भवः [v]अहिः । एत्यन्तरिक्ष इत्यहिः । उक्तं च—'अहिरयनादेत्यन्तरिक्षे' (निरु. २. १७) इति । एतत्पदद्वयाभिधेयो देवः [v]अर्कैः अर्चनसाधनैर्मन्त्रैः स्तूयमानः सन् [v]नः अस्मभ्यं [v]तत् लोके प्रसिद्धं [v]चनः अन्नम् [v]अद्भिः उदकैः सार्धं [v]धात् दधातु विदधातु । प्रयच्छतु । [v]पर्वतः पूरयिता । 'पर्व पूरणे' इति धातुः । यद्वा । पर्ववद्वज्रं पर्वतः । तद्वान् । पर्वतस्य गिरेः शत्रुरिति वा पर्वतः । स च [v]तत् चनो दधातु । तथा [v]सविता प्रेरको देवश्च [v]तत् चनो दधातु । अपि च [v]रातिषाचः । रातिं दानं सचन्ते सेवन्ते इति रातिषाचो विश्वे देवाः । ते च [v]ओषधीभिः । ओषः पाकः आसु धीयते इत्योषधयस्तिलमाषाद्याः । ताभिः सार्धं [v]तत् अन्नम् [v]अभि प्रयच्छन्तु । तथा [v]पुरंधिः बहुधीर्बहुप्रज्ञो वा बहुकर्मा वा [v]भगः भजनीय एतत्संज्ञो देवश्च [v]राये धनार्थं [v]प्र [v]जिन्वतु अस्मान् प्रेरयतु ॥

नू नो रयिं रथ्यं चर्षणिप्रां पुरुवीरं मह ऋतस्य गोपाम् ।
क्षयं दाताजरं येन जनान्त्स्पृधो अदेवीरभि च क्रमाम
विश आदेवीरभ्य[1]श्नवाम ॥ १५ ॥

नु । नः । रयिम् । रथ्यम् । चर्षणिऽप्राम् । पुरुऽवीरम् । महः । ऋतस्य । गोपाम् ।
क्षयम् । दात । अजरम् । येन । जनान् । स्पृधः । अदेवीः । अभि । च । क्रमाम ।
विशः । आऽदेवीः । अभि । अश्नवाम ॥ १५ ॥

---

१. ख-ञ-पृथिव्यां संबन्धान्; घ-पृथिव्यां संबद्धाः; ञ-त-र-पृथिव्यां संबद्धानि; न-य-पृथिव्या संबद्धान्; भ-पृथिव्यां संबद्धान्; श-पृथिवीसंबन्धीनि । २. ख-ञ-न-भ-य-क्रमणैः । ३. ख-ञ-त-भ-य-र-स्म भवेम; न-संभवेम ।

हे सर्वे देवाः ᵛनः अस्मभ्यं ᵛरयिं धनं ᵛक्षयं गृहं च ᵛदात प्रयच्छत। कीदृशं रयिम्। ᵛरथ्यं रथसंबन्धिनम्। रथयुक्तमित्यर्थः। ᵛचर्षणिप्राम्। चर्षणयो मनुष्याः। तेषां पूरयितारं ᵛपुरुवीरम्। वीर्याजायन्त इति वीराः पुत्रादयः। बहुभिर्वीरैरुपेतम्। ᵛमहः महतः ᵛऋतस्य यज्ञस्य ᵛगोपां रक्षकम्। दक्षिणारूपेण धनेन हि यज्ञो रक्ष्यते। 'मृतो यज्ञस्वदक्षिणः' इति वचनात्। कीदृशं क्षयम्। ᵛअजरं जरारहितम्। ᵛयेन रयिणा क्षयेण च ᵛजनान् शत्रून् ᵛस्पृधः स्पर्धमानाः ᵛअदेवीः[1] अदेवसंबन्धिनीः आसुरीः सेनाः ᵛच ᵛअभि ᵛक्रमाम अभिभवेम। तथा ᵛआदेवीः। आगता देवा यासु हविःस्वीकारार्थं ता आदेव्यः। तादृशीश्च ᵛविशः प्रजा यज्ञानुष्ठायिनीर्येन धनेन गृहेण च ᵛअभ्यभवाम अभिप्राप्नवाम तादृशं धनं गृहं च दातेत्यन्वयः॥ ॥ ७ ॥ ॥ ४ ॥

पञ्चमेऽनुवाके द्वादश सूक्तानि। तत्र 'हुवे वः' इति पञ्चदशर्चं प्रथमं सूक्तमृजिश्वन आर्षं बहुदेवताकं त्रैष्टुभम्। 'हुवे वः' इत्यनुक्रान्तम्। गतः सूक्तविनियोगः॥

हुवे वो देवीमदितिं नमोभिर्मृळीकाय वरुणं मित्रमग्निम्।
अभिक्षदामर्यमणं सुशेवं त्रातॄन्देवान्त्सवितारं भगं च ॥ १ ॥

हुवे। वः। देवीम्। अदितिम्। नमःऽभिः। मृळीकाय। वरुणम्। मित्रम्। अग्निम्।
अभिऽअक्षदाम्। अर्यमणम्। सुऽशेवम्। त्रातॄन्। देवान्। सवितारम्। भगम्। च ॥१॥

हे देवाः ᵛवः युष्माकं मातरं ᵛदेवीं द्योतमानाम् ᵛअदितिम् अखण्डनीयामदीनां वा एतत्संज्ञां देवतां ᵛमृळीकाय सुखार्थं ᵛनमोभिः नमस्कारैः स्तोत्रैर्वा ᵛहुवे ह्वयामि। स्तौमि। तथा ᵛवरुणं वारकं ᵛमित्रं प्रमीतेस्त्रायकं देवम् ᵛअग्निं चैतांश्च देवान् नमोभिर्हुवे। तथा ᵛअभिक्षदाम्। क्षदिर्हिंसाकर्मा। अभिक्षत्तारं शत्रूणां हिंसितारं ᵛसुशेवं सुसुखम् ᵛअर्यमणं च नमोभिर्हुवे। ᵛसवितारं ᵛभगं ᵛच नमोभिर्हुवे। किं बहुना ᵛत्रातॄन् पालयितॄन् सर्वान् ᵛदेवान् नमोभिः स्तोत्रैर्हुवे स्तौमि॥

सुज्योतिषः सूर्य दक्षपितृनना गास्त्वे सुमहो वीहि देवान्।
द्विजन्मानो य ऋतसापः सत्याः स्वर्वन्तो यजता अग्निजिह्वाः ॥ २ ॥

सुऽज्योतिषः। सूर्य। दक्षऽपितॄन्। अनागाःऽत्वे। सुऽमहः। वीहि। देवान्।
द्विऽजन्मानः। ये। ऋतऽसापः। सत्याः। स्वःऽवन्तः। यजताः। अग्निऽजिह्वाः ॥२॥

हे ᵛसुमहः शोभनदीप्ते ᵛसूर्य सर्वस्य प्रेरक ᵛदक्षपितॄन्। दक्षः पितामहो[2] येषां ते दक्षपितरः। पितृशब्दो हि सामान्येन पूर्वपुरुषत्वमात्रं ब्रूते। यथा—'अहं पितॄन्त्सुविदत्राँ अविन्सि' (ऋ. सं. १०. १५. ३) इति। एषां दक्षपितृत्वं च 'अदितिर्ह्यजनिष्ट' (ऋ. सं. १०. ७२. ५) इति मन्त्रादवगम्यते। ईदृशान् ᵛसुज्योतिषः शोभनज्योतिष्कान् ᵛदेवान् ᵛअनागास्त्वे अनपराधत्वे ᵛवीहि कामयस्व। यथास्माकमपराधं ते न कुर्वन्ति तथा कुर्या इत्यर्थः। ᵛये देवाः ᵛद्विजन्मानः द्वयोर्लोकयोर्जायमानाः प्रादुर्भवन्तः ᵛऋतसापः ऋतं यज्ञं स्पृशन्तः ᵛसत्याः अवितथाः सत्यवादिनो वा

---

१. ख-घ-ञ-न-भ-र-आदेवीः। २. ज्ञ-ञ-त-न-र-पिता मातामहो।

vस्वर्वन्तः धनवन्तः vयजताः यष्टव्याः vअग्निजिह्वाः । अग्निर्जिह्वास्थानीयो येषां ते। एवंभूता ये देवाः सन्ति तान् देवान् वीहीत्यन्वयः ॥

उत द्यावापृथिवी क्षत्रमुरु बृहद्रोदसी शरणं सुषुम्ने ।
महस्करथो वरिवो यथा नोऽस्मे क्षयाय धिषणे अनेहः ॥ ३ ॥

उत । द्यावापृथिवी इति । क्षत्रम् । उरु । बृहत् । रोदसी इति । शरणम् । सुषुम्ने इति सुऽसुम्ने । महः । करथः । वरिवः । यथा । नः । अस्मे इति । क्षयाय । धिषणे इति । अनेहः ॥ ३ ॥

vउत अपि च हे vद्यावापृथिवी द्यावापृथिव्यौ vउरु विस्तीर्णं vक्षत्रं बलं vकरथः कुरुतम् । तथा हे vरोदसी द्यावापृथिव्यौ vसुसुम्ने सुसुखे युवां vबृहत् महत् vशरणं गृहं च करथः कुरुतम् । vमहः महत् vवरिवः धनं vनः अस्माकं vयथा स्यात्तथा कुरुतमित्यर्थः । अपि च हे vधिषणे धारयित्र्यौ द्यावापृथिव्यौ vअनेहः पापराहित्यं च vअस्मे अस्माकं vक्षयाय निवासार्थं कुरुतम् ॥

आ नो रुद्रस्य सूनवो नमन्तामद्या हूतासो वसवोऽधृष्टाः ।
यदीमर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान् ॥ ४ ॥

आ । नः । रुद्रस्य । सूनवः । नमन्ताम् । अद्य । हूतासः । वसवः । अधृष्टाः ।
यत् । ईम् । अर्भे । महति । वा । हितासः । बाधे । मरुतः । अह्वाम । देवान् ॥४॥

vरुद्रस्य vसूनवः पुत्रा मरुतः vअद्य अस्मिन् काले vहूतासः आहूताः सन्तः vनः अस्मान् प्रति vआ vनमन्ताम् आनता भवन्तु । आगच्छन्तु । कीदृशाः । vवसवः वासयितारः vअधृष्टाः अन्यैरहिंसिताः[1] । vयत् यदा vईम् एनान् vमरुतः vदेवान् vअर्भे अल्पे vमहति प्रभूते vवा vबाधे संग्रामे vहितासः निहिताः स्थिताः सन्तो वयम् vअह्वाम आह्वयाम तदानीमद्येत्यन्वयः ॥

मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूषा अभ्यर्धयज्वा ।
श्रुत्वा हवं मरुतो यद्ध याथ भूमा रेजन्ते अध्वनि प्रविक्ते ॥ ५ ॥

मिम्यक्ष । येषु । रोदसी । नु । देवी । सिसक्ति । पूषा । अभ्यर्धऽयज्वा ।
श्रुत्वा । हवम् । मरुतः । यत् । ह । याथ । भूमा । रेजन्ते । अध्वनि । प्रऽविक्ते ॥५॥

vयेषु मरुत्सु vरोदसी रुद्रस्य पत्नी vदेवी द्योतमाना माध्यमिका वाक् vमिम्यक्ष vनु क्षिप्रं संगच्छते । तथा vअभ्यर्धयज्वा स्तोतॄनभ्यर्धयन् समृद्धान् कुर्वन् यो यजति धनेन पूजयति तादृशः vपूषा पोषको देवश्च vसिषक्ति यान् मरुतः सेवते । 'अभ्यर्धयज्वाभ्यर्धयन्यजति' (निरु. ६.६) इति यास्कः । हे vमरुतः ते यूयं vहवम् अस्मदीयमाह्वानं vश्रुत्वा vयद्ध यदा खलु vयाथ[2] आगच्छथ[2] तदानीम् vअध्वनि मार्गे vप्रविक्ते गमनार्थं पृथक्कृते सति तत्र विद्यमानानि vभूम भूतजातानि

---

१. श–अन्यैरहताः । २. घ-त-भ-श–याथ गच्छथ; ख-ञ-न-र–यथागच्छथ ।

[v]रेजन्ते कम्पन्ते । तथा च मन्त्रान्तरं—'प्र वेपयन्ति पर्वतान्वि विञ्चन्ति वनस्पतीन्' (ऋ. सं. १. ३९. ५) इति ॥ ॥ ८ ॥

अभि त्यं वीरं गिर्वणसमर्चेन्द्रं ब्रह्मणा जरितर्नवेन ।
श्रवदिद्धवमुप च स्तवानो रासद्वाजाँ उप महो गृणानः ॥ ६ ॥

अभि । त्यम् । वीरम् । गिर्वणसम् । अर्च । इन्द्रम् । ब्रह्मणा । जरितः । नवेन ।
श्रवत् । इत् । हवम् । उप । च । स्तवानः । रासत् । वाजान् । उप । महः । गृणानः ॥६॥

हे [v]जरितः स्तोतः [v]त्यं तं प्रसिद्धं [v]वीरं वीर्यवन्तं विशेषेण शत्रूणामीरकं वा [v]गिर्वणसं गिरां संभक्तारमेवंविधम् [v]इन्द्रं [v]नवेन अभिनवेन शोभनेन [v]ब्रह्मणा स्तोत्रेण [v]अभि [v]अर्च अभिष्टुहि । स च [v]स्तवानः स्तूयमानः सन् [v]हवम् अस्मदीयं स्तोत्रम् [v]उप [v]श्रवदित् उपशृणुयादेव । अपि च [v]गृणानः स्तूयमान इन्द्रः [v]महः महतः प्रभूतान् [v]वाजान् अन्नानि [v]च [v]उप [v]रासत् प्रदेयात्[1] । यत एवमतः स्तुहीत्यर्थः ॥

ओमानमापो मानुषीरमृक्तं धात तोकाय तनयाय शं योः ।
यूयं हि ष्ठा भिषजो मातृतमा विश्वस्य स्थातुर्जगतो जनित्रीः ॥ ७ ॥

ओमानम् । आपः । मानुषीः । अमृक्तम् । धात । तोकाय । तनयाय । शम् । योः ।
यूयम् । हि । स्थ । भिषजः । मातृऽतमाः । विश्वस्य । स्थातुः । जगतः । जनित्रीः ॥७॥

हे [v]आपः [v]मानुषीः मनुष्यहिता यूयम् [v]अमृक्तम् अहिंसितम्[2] [v]ओमानम् । अवति रक्षतीत्योमा रक्षकमन्नम् । [v]तोकाय पुत्राय [v]तनयाय तत्पुत्राय[3] च [v]धात धत्त । प्रयच्छत । तथा [v]शं शमनमुपद्रवाणां [v]योः यावनं पृथक्करणं च पृथक्कर्तव्यानां[4] धत्त प्रयच्छत । कुत इत्यत आह । [v]हि यस्मात् [v]यूयं [v]मातृतमाः मातृभ्योऽप्यधिकाः [v]भिषजः[5] [v]स्थ भवथ तस्मात् धातेत्यन्वयः । कथं मातृभ्योऽप्यधिकं भैषज्यमस्तीत्यत[6] आह । [v]विश्वस्य सर्वस्य [v]स्थातुः स्थावरस्य [v]जगतः जङ्गमस्य [v]जनित्रीः जनयित्र्यो भवथ । अतो यूयं भिषजः स्थ ॥

आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जगम्यात् ।
यो दत्रवाँ उषसो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि ॥ ८ ॥

आ । नः । देवः । सविता । त्रायमाणः । हिरण्यऽपाणिः । यजतः । जगम्यात् ।
यः । दत्रऽवान् । उषसः । न । प्रतीकम् । विऽऊर्णुते । दाशुषे । वार्याणि ॥ ८ ॥

[v]त्रायमाणः रक्षन् [v]हिरण्यपाणिः सुवर्णहस्तो हितरमणीयपाणिर्वा [v]यजतः यष्टव्यः एवंभूतः [v]सविता प्रेरकः [v]देवः [v]नः अस्मान् [v]आ [v]जगम्यात् आगच्छतु । [v]यः देवः [v]दत्रवान् धनवान्

---

१. ख-घ-भ–प्रदद्यात् । २. ख–हिंसन्तम्; घ-भ-श–अहिंसन्तम् । ३. ख-ङ्ग-न-भ–तत्सुताय । ४. ख-ङ्ग-न-भ–पृथक्कर्तव्यानां भयानाम् । ५. ख-घ-भ–भिषजः आरोग्यकर्तारः । ६. त–भैषज्यमाख्यित्यत ।

vउषसो vन vप्रतीकम् उषसः प्रमुखमिव vदाशुषे हवींषि दत्तवते यजमानाय vवार्याणि वरणीयानि धनानि[1] vव्यूर्णुते विवृणोति प्रकाशयति स सवितेत्यन्वयः ॥

उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्नध्वरे ववृत्याः ।
स्याम॒हं ते सद॒मिद्रा॒तौ तव॑ स्याम॒ग्नेऽव॑सा सु॒वीरः॑ ॥ ९ ॥

उत । त्वम् । सूनो इति । सहसः । नः । अद्य । आ । देवान् । अस्मिन् । अध्वरे । ववृत्याः । स्याम् । अहम् । ते । सदम् । इत् । रातौ । तव । स्याम् । अग्ने । अवसा । सुऽवीरः ॥९॥

vउत अपि च हे vसहसः vसूनो बलस्य पुत्राग्ने vत्वम् vअद्य अस्मिन् काले vनः अस्मदीये vअस्मिन्नध्वरे यागे vदेवान् यष्टव्यानिन्द्रादीन् vआ vववृत्याः आवर्तय । आगमय । अपि च vअहं vते तव vरातौ धनस्य दाने vसदमित् सर्वदैव वर्तमानः vस्यां भवेयम् । तथा हे vअग्ने vतव vअवसा त्वदीयेन रक्षणेन vसुवीरः शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेतश्च vस्यां भवेयम् ॥

उत त्या मे हव॒मा जग्म्यातं॒ नास॑त्या धी॒भिर्यु॒वमङ्ग विप्रा ।
अत्रिं॒ न म॒हस्तम॑सोऽमुमु॒क्तं तू॒र्वीतं॑ नरा दुरि॒ताद॒भीके॑ ॥ १० ॥

उत । त्या । मे । हवम् । आ । जग्म्यातम् । नासत्या । धीभिः । युवम् । अङ्ग । विप्रा । अत्रिम् । न । महः । तमसः । अमुमुक्तम् । तूर्वीतम् । नरा । दुःऽइतात् । अभीके ॥१०॥

vउत अपि च हे vविप्रा प्राज्ञौ vनासत्या सत्यस्वभावौ सत्यस्य नेतारौ वा हे अश्विनौ vत्या तौ प्रसिद्धौ vयुवं युवां vधीभिः परिचरणकैः[2] कर्मभिरुपेतं vमे मदीयं vहवं स्तोत्रम् vअङ्ग क्षिप्रम् vआ vजग्म्यातम् आगच्छतम् । आगत्य च vमहः महतः vतमसः असुरकृतादन्धकारात् vअत्रिं vन यथात्रिमृषिम् vअमुमुक्तं मोचितवन्तौ स्थः हे vनरा नेतारावश्विनौ तथास्मानपि vअभीके अभ्यक्षे प्राप्ते संग्रामे vदुरितात् दुःखात् शत्रुकृतात् vतूर्वतम् अस्मांस्तारयतम् ॥ ॥ ९ ॥

ते नो॑ रा॒यो द्यु॒मतो॒ वाज॑वतो दा॒तारो॑ भूत नृ॒वतः॑ पुरु॒क्षोः ।
द॒श॒स्यन्तो॑ दि॒व्याः पार्थि॑वासो॒ गोजा॑ता॒ अप्या॑ मृ॒ळता॑ च देवाः ॥ ११ ॥

ते । नः । रायः । द्युऽमतः । वाजऽवतः । दातारः । भूत । नृऽवतः । पुरुऽक्षोः ।
दशस्यन्तः । दिव्याः । पार्थिवासः । गोऽजाताः । अप्याः । मृळत । च । देवाः ॥११॥

हे vदेवाः vते यूयं vद्युमतः दीप्तिमतः vवाजवतः बलयुक्तस्य vनृवतः नृभिः पुत्रादिभिरुपेतस्य vपुरुक्षोः बहुभिः कीर्तनीयस्य vरायः धनस्य vनः अस्मभ्यं vदातारो vभूत भवत । अपि च vदशस्यन्तः कामान् प्रयच्छन्तः vदिव्याः दिवि भवा आदित्याः vपार्थिवासः पृथिव्यां भवा वसवः vगोजाताः । गौः पृश्निर्माध्यमिका वाक् । तत उत्पन्ना मरुतः vअप्याः अप्सु अन्तरिक्षे भवा रुद्राः[3] vच ते सर्वे यूयम् अस्मान् vमृळत सुखयत ॥

---

१. ख-ङ्ग-न-भ-संभजनीयानि धनानि । २. ख-घ-भ-श-परिचारकैः । ३. ख-घ-भ-श-सेन्द्राः ।

ते नो रुद्रः सरस्वती सजोषा मीळ्हुष्मन्तो विष्णुर्मृळन्तु वायुः ।
ऋभुक्षा वाजो दैव्यो विधाता पर्जन्यावाता पिप्यतामिषं नः ॥ १२ ॥

ते । नः । रुद्रः । सरस्वती । सऽजोषाः । मीळ्हुष्मन्तः । विष्णुः । मृळन्तु । वायुः ।
ऋभुक्षाः । वाजः । दैव्यः । विऽधाता । पर्जन्यावाता । पिप्यताम् । इषम् । नः ॥ १२ ॥

vमीळ्हुष्मन्तः वर्षणवन्तः vते देवाः vनः अस्मान् vमृळन्तु मृळयन्तु सुखयन्तु । के त इति चेदुच्यते । vरुद्रः vसरस्वती च vसजोषाः सह प्रीयमाणाः vविष्णुः vवायुः च vऋभुक्षाः । ऋभुर्विभ्वा वाज इति त्रयः सौधन्वनाः । तेषामाद्यो ऋभुश्च vवाजः अन्तिमश्च । उपलक्षणमेतत् । विभ्वा च । vदैव्यः देवेभ्यो हितः vविधाता प्रजापतिश्च । अपि च vपर्जन्यावाता पर्जन्यश्च वायुश्चोभौ vनः अस्मभ्यम् vइषम् अन्नं vपिप्यतां वर्धयताम् ॥

उत स्य देवः सविता भगो नोऽपां नपादवतु दानु पप्रिः ।
त्वष्टा देवेभिर्जनिभिः सजोषा द्यौर्देवेभिः पृथिवी समुद्रैः ॥ १३ ॥

उत । स्यः । देवः । सविता । भगः । नः । अपाम् । नपात् । अवतु । दानुं । पप्रिः ।
त्वष्टा । देवेभिः । जनिऽभिः । सऽजोषाः । द्यौः । देवेभिः । पृथिवी । समुद्रैः ॥१३॥

vउत अपि च vस्यः स यः प्रेरकतया सर्वत्र प्रख्यातः सः vसविता vदेवः vभगः च[1] vअपां vनपात् च अपां मेघस्थानां पुत्रो माध्यमिकोऽग्निः स च vनः अस्मान् vअवतु रक्षतु । कीदृशोऽपां नपात् । vदानु दातव्यं धनं vपप्रिः प्राता पूरयिता ॥ ' प्रा पूरणे ' इत्यस्मात् ' आदृगमहन० ' इति किनो लिड्वद्भावात् ' न लोकाव्यय० ' इति षष्ठीप्रतिषेधः ॥ तथा vदेवेभिः देवैः vजनिभिः तत्पत्नीभिश्च vसजोषाः सहप्रीतिः[2] vत्वष्टा च vदेवेभिः देवैः सह प्रीयमाणा vद्यौः च vसमुद्रैः सह प्रीयमाणा vपृथिवी चैताश्च सर्वा देवता अस्मानवन्तु ॥

आग्निमारुते ' उत नोऽहिः ' इत्येषा । सूत्रितं च—' उत नोऽहिर्बुध्न्यः शृणोतु देवानां पत्नीरुशतीरवन्तु नः ' (आश्व. श्रौ. ५. २०) इति ॥

उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु ॥ १४ ॥

उत । नः । अहिः । बुध्न्यः । शृणोतु । अजः । एकऽपात् । पृथिवी । समुद्रः ।
विश्वे । देवाः । ऋतऽवृधः । हुवानाः । स्तुताः । मन्त्राः । कविऽशस्ताः । अवन्तु ॥१४॥

vउत अपि च vअहिर्बुध्न्यः vनः अस्माकं स्तोत्रं vशृणोतु । vअजः जन्मरहितः । एकः असहाय एव पद्यते गच्छतीति vएकपात् । एतत्पदद्वयाभिधेयो देवश्च vपृथिवी vसमुद्रः च अस्मदीयं

---

१. ख-घ-भ-च नोऽस्मान् रक्षताम् । २. श-सहप्रीतियुक्ताः ।

स्तोत्रं शृणोतु । अपि च ᵛऋतावृधः ऋतस्य यज्ञस्य सत्यस्य वा वर्धयितारः ᵛहुवानाः अस्माभिराह्वयमानाः पूर्वैर्ऋषिभिश्च स्तोत्रैः ᵛस्तुता ᵛमन्त्राः मन्त्रणीया गुप्तं भाषितव्या मन्त्रप्रतिपाद्या वा ᵛकविशस्ताः कविभिर्मेधाविभिः ऋषिभिः[1] शक्वैः शंसिता ईदृशाः ᵛविश्वे ᵛदेवाः ᵛअवन्तु अस्मान् रक्षन्तु ॥

एवा नपातो मम तस्य धीभिर्भरद्वाजा अभ्यर्चन्त्यर्कैः ।
ग्ना हुतासो वसवोऽधृष्टा विश्वे स्तुतासो भूता यजत्राः ॥ १५ ॥

एव । नपातः । मम । तस्य । धीभिः । भरत्ऽवाजाः । अभि । अर्चन्ति । अर्कैः ।
ग्नाः । हुतासः । वसवः । अधृष्टाः । विश्वे । स्तुतासः । भूत । यजत्राः ॥ १५ ॥

ᵛएव एवं योऽहं देवान् स्तुतवान् ᵛतस्य ᵛमम ऋजिश्वनः ᵛनपातः पुत्राः ᵛभरद्वाजाः भरद्वाजगोत्रजाः[2] सुहोत्रादयः ᵛधीभिः स्तोत्रैः ᵛअर्कैः अर्चनसाधनैः ᵛअभ्यर्चन्ति अभिष्टुवन्ति । हे ᵛयजत्राः यष्टव्या देवाः ᵛहुतासः पुरोडाशादिभिर्हविर्भिः हुतास्तर्पिताः ᵛवसवः[3] निवासयितारः ᵛअधृष्टाः कैरप्यहिंसिताः[3] एवंभूताः ᵛविश्वे ते सर्वे यूयं ᵛग्नाः देवपत्न्यश्च ᵛस्तुतासो ᵛभूत । तैः सुहोत्रादिभिः स्तुता भवत ॥ ॥ १० ॥

'उदु त्यत्' इति षोडशर्चं द्वितीयं सूक्तमृजिश्वन आर्षं वैश्वदेवम् । त्रयोदश्याद्यास्तिस्र उष्णिहः षोडश्यनुष्टुप् शिष्टास्त्रिष्टुभः । तथा चानुक्रान्तम्—' उदु त्यत्षोळश ष्युष्णिगनुष्टुबन्तम् ' इति । गतः सूक्तविनियोगः ॥

उदु त्यच्चक्षुर्महि मित्रयोराँ एतिं प्रियं वरुणयोरदब्धम् ।
ऋतस्य शुचिं दर्शतमनीकं रुक्मो न दिव उदिता व्यद्यौत् ॥ १ ॥

उत् । ऊँ इति । त्यत् । चक्षुः । महि । मित्रयोः । आ । एतिं । प्रियम् । वरुणयोः । अदब्धम् ।
ऋतस्य । शुचिं । दर्शतम् । अनीकम् । रुक्मः । न । दिवः । उत्ऽईता । वि । अद्यौत् ॥ १ ॥

ᵛत्यत् तत् प्रसिद्धं ᵛचक्षुः प्रकाशकं ᵛमहि महत् विस्तृतं ᵛमित्रयोः[4] ᵛवरुणयोः[4] ᵛप्रियं । मित्रशब्दो वरुणशब्दश्च इतरेतरयोगात् मित्रावरुणावुभावप्याचष्टे । मित्रावरुणयोः प्रियम्[5] ᵛअदब्धं रक्षोभिरहिंसितं ᵛशुचि शुद्धं निर्मलं ᵛदर्शतं दर्शनीयम् । एवंभूतम् ᵛऋतस्य आदित्यस्य ᵛअनीकं तेजः ᵛआ सर्वेषामभिमुखम् ᵛउत् ᵛएति उद्गच्छति । ᵛउदिता उदितौ सूर्यस्योदये सति उदितं तत्तेजः ᵛदिवः अन्तरिक्षस्य ᵛरुक्मो ᵛन भूषणमिव ᵛव्यद्यौत् विद्योतते । प्रकाशतेः[6] ॥

---

१. ख-ञ्च-न-भ–' ऋषिभिः ' नास्ति । २. घ-श–°गोत्रकाः । ३. ज्ञ-ञ्च-त-न-भ-य-र–अधृष्टाः शत्रुभिरहिंसिता वसवो निवासयितारः । ४. ख-भ–मित्रयोः मित्रावरुणयोः; श–मित्रयोः वरुणमित्रयोः प्रियमित्रयोः । ५. ज्ञ-ञ्च-त-न-भ-र-श–अतिप्रियम्; य–इति प्रियम् । ६. ख-भ–प्रकाशते उ पूरणः ।

वेद॒ यस्त्रीणि॒ वि॒दथा॑न्येषां दे॒वाना॑ं॒ जन्म॑ सनु॒तरा॒ च॒ विप्रः॑ ।
ऋ॒जु मर्ते॑षु वृ॒जि॒ना च॒ पश्य॑न्न॒भि चष्टे॒ सूरो॒ अ॒र्य एवा॑न् ॥ २ ॥

वेद॑ । यः । त्रीणि॑ । वि॒दथा॑नि । ए॒षा॒म् । दे॒वाना॑म् । जन्म॑ । स॒नु॒तः । आ । च॒ । विप्रः॑ ।
ऋ॒जु । मर्ते॑षु । वृ॒जि॒ना । च॒ । पश्य॑न् । अ॒भि । चष्टे॑ । सूरः॑ । अ॒र्यः॑ । एवा॑न् ॥ २ ॥

[v]यः सूर्यः [v]त्रीणि त्रिसंख्यानि [v]विदथानि वेदितव्यानि स्थानानि त्रीँल्लोकान् [v]वेद वे॑ जानाति । [v]एषाम् एतल्लोकत्रयवर्तिनां [v]देवानां वसुरुद्रादित्यात्मनां [v]सनुतः । अन्तर्हितनामैतत् अन्तर्हितमप्रज्ञायमानं [v]जन्म जननं [v]च यः [v]विप्रः मेधावी सूर्यो वेत्ति । आकारः पूरकः । स [v]सूरः सूर्यः [v]मर्तेषु मनुष्येषु विद्यमानानि [v]ऋजु ऋजूनि शोभनानि कर्माणि [v]वृजिना वृजिनान्न शोभनानि कर्माणि [v]च [v]पश्यन् साक्षितया जानन् [v]अभि [v]चष्टे अभितः सर्वं जगत् प्रकाशयति तथा [v]अर्यः स्वामी भूत्वा [v]एवान् प्राप्तव्यान् कामांश्च मनुष्येषु प्रकाशयति ॥

स्तु॒ष उ॑ वो म॒ह ऋ॒तस्य॑ गो॒पाना॑दि॑तिं मि॒त्रं वरु॑णं सु॒जा॒ता॑न् ।
अ॒र्य॒मणं॑ भग॒मद॑ब्धधी॒तीन॑च्छा॑ वोचे सध॒न्यः॑ पावकान् ॥ ३ ॥

स्तु॒षे । ऊँ॒ इति॑ । वः॒ । म॒हः॒ । ऋ॒तस्य॑ । गो॒पान् । अदि॑तिम् । मि॒त्रम् । वरु॑णम् । सु॒ऽजा॒ता॒न॒
अ॒र्य॒मण॑म् । भग॑म् । अद॑ब्धऽधीतीन् । अच्छ॑ । वो॒चे॒ । स॒ऽध॒न्यः॑ । पा॒व॒कान् ॥३॥

हे देवाः [v]महः महतः [v]ऋतस्य यज्ञस्य [v]गोपान् रक्षकान् [v]वः युष्मान् [v]स्तुषे स्तुवे । [v]इति पूरणः । तानेव देवानाह । [v]अदितिम् अदीनां देवमातरं [v]मित्रं [v]वरुणं चैतान् [v]सुजाता॑ शोभनजननान् [v]अर्यमणं [v]भगं च [v]अदब्धधीतीन् अहिंसितकर्मणः [v]सधन्यः धनसहितान् [v]पावका॑ विश्वस्य शोधकान् । ईदृशान् सर्वान् देवान् [v]अच्छ [v]वोचे अभिप्रब्रवीमीत्यर्थः ॥

रि॒शाद॑सः सत्प॒ती॒रद॑ब्धान्म॒हो राज्ञः॑ सुव॒स॒नस्य॑ दा॒तॄ॑न् ।
यू॒नः सु॒क्ष॒त्रान्क्षय॑तो दि॒वो नॄनादि॒त्यान्या॒म्यदि॑तिं दुवोयु ॥ ४ ॥

रि॒शाद॑सः । स॒त्ऽप॒तीन् । अद॑ब्धान् । म॒हः । राज्ञः॑ । सु॒ऽव॒स॒नस्य॑ । दा॒तॄ॑न् ।
यू॒नः । सु॒ऽक्ष॒त्रान् । क्षय॑तः । दि॒वः । नॄन् । आ॒दि॒त्यान् । या॒मि॒ । अदि॑तिम् । दु॒वः॒ऽयु ॥

[v]रिशादसः रिशतां हिंसकानामसितॄन् क्षेप्तॄन् यद्वा रिशानां हिंसकानामत्तॄन् भक्षयितॄन् [v]सत्पती॑ सतां पालयितॄन् [v]अदब्धान् अहिंसितान् [v]महः महतः [v]राज्ञः राजमानानीश्वरान् वा [v]सुवसना॑ शोभननिवासस्य [v]दातॄन् [v]यूनः नित्यतरुणान् [v]सुक्षत्रान् शोभनधनान् शोभनबलान् वा [v]क्षयः सर्वत्र निवसतः[1] । यद्वा । क्षयतिरैश्वर्यकर्मा । ईशानान् [v]दिवः द्युलोकस्य [v]नॄन् नेतॄन् [v]आदित्या॑ अदितेः पुत्रान् । ईदृशान् सर्वान् देवान् [v]दुवोयु । लुप्तविभक्तिकमेतत् । दुवोयुं दुवोऽस्मर्द परिचरणं कामयमानाम् [v]अदितिं देवमातरं च [v]यामि प्राप्नोमि । यद्वा । यामि याचामि ॥

---

१. झ-त-न-भ-र – निवासतः ।

द्यौष्पितः पृथिवि मातरध्रुगग्ने भ्रातर्वसवो मृळता नः ।
विश्व आदित्या अदिते सजोषा अस्मभ्यं शर्म बहुलं वि यन्त ॥ ५ ॥

द्यौः । पितरिति । पृथिवि । मातः । अध्रुक् । अग्ने । भ्रातः । वसवः । मृळत । नः ।
विश्वे । आदित्याः । अदिते । सऽजोषाः । अस्मभ्यम् । शर्म । बहुलम् । वि । यन्त ॥ ५ ॥

हे [v]पितः पितृस्थानीय [v]द्यौः द्युलोक हे [v]मातः मातृस्थानीये [v]अध्रुक् अद्रोग्धि [v]पृथिवि हे [v]भ्रातः भ्रातृस्थानीय [v]अग्ने हे [v]वसवः वासयितारो[1] देवाः ते सर्वे यूयं [v]नः अस्मान् [v]मृळत सुखयत । हे [v]विश्वे [v]आदित्याः सर्वेऽदितिपुत्रा देवा हे [v]अदिते यूयं [v]सजोषाः संगता भूत्वा [v]अस्मभ्यं [v]बहुलम् अधिकं [v]शर्म सुखं विस्तृतं वा गृहं [v]वि [v]यन्त प्रयच्छत ॥ ॥ ११ ॥

मा नो वृकाय वृक्ये समस्मा अघायते रीरधता यजत्राः ।
यूयं हि ष्ठा रथ्यो नस्तनूनां यूयं दक्षस्य वचसो बभूव ॥ ६ ॥

मा । नः । वृकाय । वृक्ये । समस्मै । अघऽयते । रीरधत । यजत्राः ।
यूयम् । हि । स्थ । रथ्यः । नः । तनूनाम् । यूयम् । दक्षस्य । वचसः । बभूव ॥ ६ ॥

हे [v]यजत्राः यष्टव्या देवाः [v]नः अस्मान् [v]वृकाय हिंसकाय स्तेनाय [v]वृक्ये तस्य स्त्रियै च [v]मा [v]रीरधत मा वशं नैष्ट । मा वशीकुरुत । यद्वा । वृकोऽरण्यश्वा तस्य स्त्री वृकी । अपि च [v]समस्मै सर्वस्मै [v]अघायते अघमनर्थमस्माकमिच्छते शत्रुजनायास्मान् मा वशं नयत । [v]यूयं [v]हि यूयं खलु [v]नः अस्माकं [v]तनूनां शरीराणां [v]रथ्यः नेतारः [v]स्थ भवथ । [v]यूयम् एव [v]दक्षस्य अस्मदीयस्य बलस्य [v]वचसः वाक्यस्य च नेतारः [v]बभूव[2] । अतः कारणात् अस्मान् मा रीरधतेत्यन्वयः ॥

मा व एनो अन्यकृतं भुजेम मा तत्कर्म वसवो यच्चयध्वे ।
विश्वस्य हि क्षयथ विश्वदेवाः स्वयं रिपुस्तन्वं रीरिषीष्ट ॥ ७ ॥

मा । वः । एनः । अन्यऽकृतम् । भुजेम । मा । तत् । कर्म । वसवः । यत् । चयध्वे ।
विश्वस्य । हि । क्षयथ । विश्वऽदेवाः । स्वयम् । रिपुः । तन्वम् । रिरिषीष्ट ॥ ७ ॥

हे देवाः [v]वः युष्माकं स्वभूता वयम् [v]अन्यकृतम् अन्यैः शत्रुभिः कृतमुत्पादितम् [v]एनः पापं [v]मा [v]भुजेम मा भुंक्ष्महि । हे [v]वसवः वासयितारो देवाः [v]यत् येन कृतेन पापेन [v]चयध्वे अस्मान् बाधध्वे । चयतिर्हिंसाकर्मा । [v]तत् च पापं [v]मा [v]कर्म मा कार्ष्म ॥ करोतेर्माङि लुङि 'मन्त्रे घस०' इति च्लेर्लुक् ॥ हे [v]विश्वदेवाः सर्वे देवाः [v]विश्वस्य सर्वस्य जगतो यूयं [v]हि [v]क्षयथ ईश्वरा भवथ । अतः कारणात् अस्मदीयः [v]रिपुः शत्रुः [v]तन्वं स्वशरीरं [v]स्वयम् एव [v]रिरिषीष्ट[3] हिंस्यात् । यथैवं भवति तथा कुरुतेति भावः ॥

---

१. ख-घ-ङ्ग-त-न-भ-श – निवासयितारो । २. ङ्ग-न – बभूव बभूवथ; र – बभूवथ । ३. ख-घ-भ-श – मा रीरिषीष्ट ।

नम इदुग्रं नम आ विवासे नमो दाधार पृथिवीमुत द्याम् ।
नमो देवेभ्यो नम ईश एषां कृतं चिदेनो नमसा विवासे ॥ ८ ॥

नमः । इत् । उग्रम् । नमः । आ । विवासे । नमः । दाधार । पृथिवीम् । उत । द्याम् ।
नमः । देवेभ्यः । नमः । ईशे । एषाम् । कृतम् । चित् । एनः । नमसा । आ । विवासे ॥ ८ ॥

आस्तां तावद्देवानां माहात्म्यं तदीयो नमस्कारोऽपीत्थंमहाभाग इति ब्रुवाणः कैमुतिकन्यायेन देवान् स्तौति । ᵛनम ᵛइत् नमस्कार एव ᵛउग्रम् उत्कृष्टबलं सर्वोत्कृष्टम् । तेन हि सर्वं लभ्यते । अतः ᵛनमः नमस्कारम् ᵛआ ᵛविवासे परिचरामि । ᵛनमः नमस्कार एव ᵛपृथिवीमुत ᵛद्यां द्युलोकं च ᵛदाधार धारयति । द्यावापृथिव्यौ प्राणिभिर्नमस्क्रियमाणे सत्यौ तदुपभोगाय चिरकालमवतिष्ठेते । अतः ᵛदेवेभ्यः ईदृशं ᵛनमः करोमि[1] । ᵛएषां देवानां ᵛनमः नमस्कारः ᵛईशे ईष्टे । यतस्तेन ते वशीकृताः । ᵛकृतं ᵛचित् कृतमप्याचरितमपि ᵛएनः पापं ᵛनमसा नमस्कारेण ᵛआ ᵛविवासे । विवासो वर्जनम् । वर्जयामि । विनाशयामि ॥

ऋतस्य वो रथ्यः पूतदक्षानृतस्य पस्त्यसदो अदब्धान् ।
ताँ आ नमोभिरुरुचक्षसो नृन्विश्वान्व आ नमे महो यजत्राः ॥ ९ ॥

ऋतस्य । वः । रथ्यः । पूतऽदक्षान् । ऋतस्य । पस्त्यऽसदः । अदब्धान् ।
तान् । आ । नमःऽभिः । उरुऽचक्षसः । नॄन् । विश्वान् । वः । आ । नमे । महः । यजत्राः ॥ ९ ॥

हे ᵛयजत्राः यष्टव्या देवाः ᵛवः युष्मदीयस्य ᵛऋतस्य यज्ञस्य ᵛरथ्यः रंहितॄन् नेतॄन् ᵛपूतदक्षान् शुद्धबलान् ᵛऋतस्य यज्ञस्य ᵛपस्त्यसदः यज्ञसंबन्धिनि पस्त्ये देवयजनलक्षणे गृहे सीदतो निषण्णान् ᵛअदब्धान् रक्षःप्रभृतिभिरहिंसितान् ᵛउरुचक्षसः बहुद्रष्टॄन् ᵛनॄन् नेतॄन् ᵛमहः महतः ᵛतान् ᵛविश्वान् सर्वान् ᵛवः युष्मान् ᵛआ आभिमुख्येन क्रियमाणैः ᵛनमोभिः नमस्कारैः ᵛआ ᵛनमे आनतोऽस्मि ॥

ते हि श्रेष्ठवर्चसस्त उ नस्तिरो विश्वानि दुरिता नयन्ति ।
सुक्षत्रासो वरुणो मित्रो अग्निर्ऋतधीतयो वक्मराजसत्याः ॥ १० ॥

ते । हि । श्रेष्ठऽवर्चसः । ते । ऊँ इति । नः । तिरः । विश्वानि । दुःऽइता । नयन्ति ।
सुऽक्षत्रासः । वरुणः । मित्रः । अग्निः । ऋतऽधीतयः । वक्मराजऽसत्याः ॥ १० ॥

ये देवा वक्ष्यमाणगुणाः ᵛते ᵛहि ते खलु ᵛश्रेष्ठवर्चसः प्रशस्यतमदीप्तयो भवन्ति । अतः ᵛत ᵛउ त एव ᵛनः अस्माकं ᵛविश्वानि सर्वाणि ᵛदुरिता[2] पापानि ᵛतिरः तिरोहितानि यथा भवन्ति तथा ᵛनयन्ति नयन्तु । विनाशयन्तित्यर्थः । ये वरुणादयो देवाः ᵛसुक्षत्रासः शोभनबलाः शोभनधना वा ᵛऋतधीतयः सत्यकर्माणः ᵛवक्मराजसत्याः । वक्म वचनं स्तोत्रम् । तस्य राजान ईशाना वक्मराजाः स्तोतारः । तेषु सत्या अवितथाः । एवंभूतास्ते हीत्यन्वयः ॥ ॥ १२ ॥

---

१. ख-भ-नमस्करोमि । २. श-दुरिता दुरितानि ।

ते नु इन्द्रः पृथिवी क्षामं वर्धन्पूषा भगो अदितिः पञ्च जनाः ।
सुशर्माणः स्ववसः सुनीथा भवन्तु नः सुत्रात्रासः सुगोपाः ॥ ११ ॥

ते । नुः । इन्द्रः । पृथिवी । क्षामं । वर्धन् । पूषा । भगः । अदितिः । पञ्च । जनाः ।
सुऽशर्माणः । सुऽअवसः । सुऽनीथाः । भवन्तु । नुः । सुऽत्रात्रासः । सुऽगोपाः ॥ ११ ॥

[v]ते[1] देवाः [v]नः अस्माकं [v]क्षाम निवासभूमिं[2] [v]वर्धन् वर्धयन्तु । के ते । [v]इन्द्रः [v]पृथिवी च [v]पूषा च [v]भगः च [v]अदितिः अदीना देवमाता च [v]पञ्च [v]जनाः 'देवमनुष्याणां गन्धर्वाप्सरसाम्' (ऐ. ब्रा. ३. ३१) इत्यादिब्राह्मणोक्ता देवमनुष्यादयश्च[3] ते च [v]नः अस्मदर्थं [v]सुशर्माणः सुसुखाः [v]स्ववसः शोभनान्नाः [v]सुनीथाः सुप्रापणाश्च [v]भवन्तु । अस्मभ्यं शोभनसुखादिकं प्रयच्छन्तीति भावः । तथा [v]सुत्रात्रासः सुष्ठु त्रातारः [v]सुगोपाः शोभनगोपायितारश्च भवन्तु । उपस्थितेभ्यः शत्रुभ्यो रक्षणं त्राणम् । तेषामुत्पत्तिनिरोधेन रक्षणं गोपनम् ॥

नू सद्मानं दिव्यं नंशि देवा भारद्वाजः सुमतिं याति होता ।
आसानेभिर्यजमानो मियेधैर्देवानां जन्म वसुयुर्ववन्द ॥ १२ ॥

नु । सद्मानम् । दिव्यम् । नंशि । देवाः । भारत्ऽवाजः । सुऽमतिम् । याति । होता ।
आसानेभिः । यजमानः । मियेधैः । देवानाम् । जन्म । वसुऽयुः । ववन्द ॥ १२ ॥

अनया ऋषिरात्मानं परोक्षवदाह[4] । हे [v]देवाः [v]भारद्वाजः भरद्वाजगोत्रजः [v]होता स्तोता अयमृषिः [v]दिव्यं दिवि भवं [v]सद्मानं सदनं स्थानं [v]नु क्षिप्रं [v]नंशि व्याप्नोतु । तथा [v]सुमतिं शोभनां मतिं युष्मदीयामनुग्रहबुद्धिं च [v]याति याचते । यातिर्याच्ञाकर्मा । तदर्थम् [v]आसानेभिः आसीनैः सत्रासनं कुर्वद्भिः [v]मियेधैः मेध्यैर्मेधार्हैः अन्ययजमानैः[5] सार्धं [v]यजमानः यागं कुर्वन्नयमृषिः [v]वसूयुः वसूनि धनान्यात्मन इच्छन् [v]देवानां [v]जन्म जनं[6] संघं[6] [v]ववन्द वन्दते । स्तौति ॥

दशरात्रस्य चतुर्थेऽहनि प्रउगशस्त्रे 'अप त्यं वृजिनम्' इत्येष वैश्वदेवस्तृचः । सूत्रितं च— 'अप त्यं वृजिनं रिपुमम्बितमे नदीतम इत्यानुष्टुभं प्रउगम्' (आश्व. श्रौ. ७.११) इति ॥

अप त्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यम् । दविष्ठमस्य सत्पते कृधी सुगम् ॥ १३ ॥

अप । त्यम् । वृजिनम् । रिपुम् । स्तेनम् । अग्ने । दुःऽआध्यम् ।
दविष्ठम् । अस्य । सत्ऽपते । कृधि । सुऽगम् ॥ १३ ॥

हे [v]अग्ने त्वं [v]त्यं तं प्रसिद्धं [v]वृजिनं कुटिलं [v]रिपुं पापकारिणं [v]दुराध्यं दुःखस्याध्यातारं दुष्टाभिप्रायमेवंभूतं [v]स्तेनं हिंसकं [v]दविष्ठं दूरतमम् [v]अप [v]अस्य अपक्षिप । 'असु क्षेपणे' इति

---

१. ख-भ-ते तादृशाः । २. ञ-न-र-भूमिम् । ३. ख-भ-देवमनुष्यादयः पितृसर्पाश्च । ४. ख-घ-भ-श-परोक्षतयाह । ५. घ-ञ-त-भ-र-अन्ययाजमानैः । ६. ख-घ-भ-जनसंघम्; श-जननं सर्वम् ।

धातुः । हे ᵛसत्पते सतां पालयितरग्ने अस्माकं ᵛसुगं शोभनेन[1] गन्तव्यं[1] सुखं ᵛकृधि कुरु । अत्र सर्वदेवात्मकस्याग्नेः स्तवनाद्वैश्वदेवत्वम् ॥

ग्रावाणः सोम नो हि कं सखित्वनाय वावशुः ।
जहि न्य१त्रिणं पणिं वृको हि षः ॥ १४ ॥

ग्रावाणः । सोम । नः । हि । कम् । सखिऽत्वनाय । वावशुः ।
जहि । नि । अत्रिणम् । पणिम् । वृकः । हि । सः ॥ १४ ॥

हे ᵛसोम ᵛनः अस्मदीया इमे ᵛग्रावाणः अभिषवार्थाः पाषाणाः तव ᵛसख्यित्वनाय सख्यार्थं ᵛवावशुः कामयन्ते । ᵛकम् इति पूरकः । ᵛहि यस्मादर्थे । यस्मादेवं तस्मात्त्वं ᵛपणिं वणिजमदातारम् ᵛअत्रिणम् अदनशीलं राक्षसादिकं ᵛनि ᵛजहि विनाशय । ᵛसः पणिः ᵛवृको ᵛहि आदानपरः[2] खलु । सर्वदास्मत्तोऽपहरणशीलः । अतस्त्वं जहीत्यर्थः ॥ ' कुक वृक आदाने ' इति धातुः ॥

यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः ।
कर्ता नो अध्वन्ना सुगं गोपा अमा ॥ १५ ॥

यूयम् । हि । स्थ । सुऽदानवः । इन्द्रऽज्येष्ठाः । अभिऽद्यवः ।
कर्त । नः । अध्वन् । आ । सुऽगम् । गोपाः । अमा ॥ १५ ॥

हे ᵛसुदानवः शोभनदाना देवाः ᵛयूयं ᵛहि ᵛष्ठ यूयं खलु प्रभवथ । समृद्धाः स्थ । ᵛइन्द्रज्येष्ठाः । इन्द्रो ज्येष्ठो मुख्यो येषां ते । ᵛअभिद्यवः अभिगतदीप्तयस्ते यूयम् ᵛअध्वन् अध्वनि मार्गे ᵛनः अस्माकम् ᵛअमा सहव ᵛगोपाः गोपायितारो रक्षितारः सन्तः ᵛसुगं सुखम् । आकारः समुच्चये । सुखं च ᵛकर्त कुरुत ॥

प्रवासादागमने ' अपि पन्थाम् ' इत्येषा यजमानेन जप्या । सूत्रितं च—' अपि पन्थामगन्महीति प्रत्येत्य समित्पाणिः ' (आश्व. श्रौ. २.५) इति ॥

अपि पन्थामगन्महि स्वस्तिगामनेहसम् ।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥ १६ ॥

अपि । पन्थाम् । अगन्महि । स्वस्तिऽगाम् । अनेहसम् ।
येन । विश्वाः । परि । द्विषः । वृणक्ति । विन्दते । वसु ॥ १६ ॥

ᵛपन्थां पन्थानं मार्गम् ᵛअपि ᵛअगन्महि । अपिगताः प्राप्ताः स्मः । कीदृशम् । ᵛस्वस्तिगां सुखेन गन्तव्यम् ᵛअनेहसं पापरहितम्[3] । ᵛयेन पथा गच्छन् ᵛविश्वाः सर्वाः ᵛद्विषः द्वेष्ट्रीः प्रजाः ᵛपरि ᵛवृणक्ति परिवर्जयति बाधते ᵛवसु धनं च ᵛविन्दते लभते । तादृशं पन्थानमित्यर्थः ॥ ॥१३॥

---

१. ख-ङ्ग-न-भ-य–शोभनगन्तव्यम् । २. ख-ङ्ग-भ–अदानपरः । ३. ङ्ग-त-न-र–पापरहित्यम् ।

'न तद्दिवा' इति सप्तदशर्चं तृतीयं सूक्तम् ऋजिश्वन आर्षं वैश्वदेवम्। आदितः षट् त्रिष्टुभः सप्तम्याद्याः षट् गायत्र्यस्त्रयोदशी त्रिष्टुप् चतुर्दशी जगती शिष्टास्तिस्त्रस्त्रिष्टुभः। तथा चानुक्रान्तं– 'न तत्र्यूना सप्तम्याद्याः षड्गायत्र्यश्चतुर्दशी जगती' इति। गतो विनियोगः॥

न तद्दिवा न पृथिव्यानु मन्ये न यज्ञेन नोत शमीभिराभिः।
उब्जन्तु तं सुभ्वः पर्वतासो नि हीयतामतियाजस्य यष्टा॥ १॥

न। तत्। दिवा। न। पृथिव्या। अनु। मन्ये। न। यज्ञेन। न। उत। शमीभिः। आभिः। उब्जन्तु। तम्। सुऽभ्वः। पर्वतासः। नि। हीयताम्। अतिऽयाजस्य। यष्टा॥ १॥

अतियाजो नाम कश्चिदृषिरस्मादृजिश्वन उत्कृष्टः स्यामहमिति बुद्ध्या देवान् यियक्षुरास। ऋषिस्तदीयं यजनं निराचष्टाद्यया। ᵛन ᵛतत् अतियाजस्य ऋषेः तत् यजनं ᵛदिवा द्युलोकेन तत्रस्थेन देवगणेन युक्तमित्यहं न ᵛअनु ᵛमन्ये। अनुमतिं न करोमि। ᵛन च ᵛपृथिव्या पार्थिवेनापि देवगणेन युक्तमिति नानु मन्ये। ᵛन च ᵛयज्ञेन मयानुष्ठितेन सदृशं तदित्यहं[1] नानु मन्ये[1]। ᵛउत अपि च ᵛआभिः ᵛशमीभिः अन्यैरपि मया कृतैरेभिः कर्मभिः सदृशमित्यपि ᵛन अनु मन्ये। मया वशीकृता देवाः तदीयं यजनं नाङ्गीकुर्वन्ति स चानभिज्ञत्वात् सम्यक् यष्टुमपि न शक्नोतीति भावः। अपि च ᵛतम् ऋषिं ᵛसुभ्वः सुष्ठु भवन्तः ᵛपर्वतासः पर्वता इन्द्रेण प्रहिताः सन्तः ᵛउब्जन्तु हिंसन्तु। उब्जिर्हिंसाकर्मा। तथा तस्य ᵛअतियाजस्य ऋजिश्वनोऽप्यतिशयेनाहं देवान् यजामीति बुद्ध्या युक्तस्य ऋषेर्यो ᵛयष्टा याजकः सः ᵛनि ᵛहीयतां नितरां हीनो भवतु॥

अतिं वा यो मरुतो मन्यते नो ब्रह्म वा यः क्रियमाणं निनित्सात्।
तपूंषि तस्मै वृजिनानि सन्तु ब्रह्मद्विषमभि तं शोचतु द्यौः॥ २॥

अतिं। वा। यः। मरुतः। मन्यते। नः। ब्रह्म। वा। यः। क्रियमाणम्। निनित्सात्। तपूंषि। तस्मै। वृजिनानि। सन्तु। ब्रह्मऽद्विषम्। अभि। तम्। शोचतु। द्यौः॥ २॥

हे ᵛमरुतः ᵛयः पुरुषः ᵛनः अस्मान् ᵛअति ᵛमन्यते अतीत्य स्वस्याधिक्यं मन्यते अस्मत्तोऽपि स्वयमधिक इति बुध्यते। अस्माभिः ᵛक्रियमाणं ᵛब्रह्म स्तोत्रं ᵛवा ᵛयः ᵛनिनित्सात् निन्दितुमिच्छेत् ᵛतस्मै पुरुषाय ᵛतपूंषि तेजांसि ᵛवृजिनानि बाधकानि ᵛसन्तु भवन्तु। ᵛब्रह्मद्विषं ᵛतं शत्रुं ᵛद्यौः आदित्यश्च ᵛअभि ᵛशोचतु अभितपतु। अभिदहतु॥

किमङ्ग त्वा ब्रह्मणः सोम गोपां किमङ्ग त्वाहुरभिशस्तिपां नः।
किमङ्ग नः पश्यसि निद्यमानान्ब्रह्मद्विषे तपुषिं हेतिमस्य॥ ३॥

किम्। अङ्ग। त्वा। ब्रह्मणः। सोम। गोपाम्। किम्। अङ्ग। त्वा। आहुः। अभिशस्तिऽपाम्। नः। किम्। अङ्ग। नः। पश्यसि। निद्यमानान्। ब्रह्मऽद्विषे। तपुषिम्। हेतिम्। अस्य॥३॥

---

१. ख–तदित्यपि नानुमन्ये; ञ-त-न-र–तदित्यप्यनुमन्ये।

vकिमङ्ग इति प्रसिद्धिद्योतकौ निपातौ। हे vसोम vत्वा त्वां खलु vब्रह्मणः मन्त्रस्य कर्मणो वा ब्रह्मजातेर्वा[1] vगोपां गोपायितारम् vआहुः कथयन्ति पुराविदः। तथा vनः अस्माकम् vअभिशस्तिपाम् अभिशंसकेभ्यः शत्रुभ्यः पालयितारं त्वामेव खल्वाहुः। यद्वा। अङ्गेत्यभिमुखीकरणे। अङ्ग हे सोम किंकारणं त्वां ब्रह्मणो गोपामाहुः। किंकारणं वा त्वामस्माकमभिशस्तिपामाहुः। vनिद्यमानान् परैर्दूष्यमाणान् vनः अस्मान् vअङ्ग हे सोम किंकारणं vपश्यसि। त्वामेव सर्वे ब्रह्मणो[2] रक्षकं[2] शत्रुभ्यः पालकं च कथयन्ति अतोऽस्मासु परैर्निन्द्यमानेष्वौदासीन्यं तवानुचितम्। अतः vब्रह्मद्विषे ब्राह्मणद्वेष्ट्रे तस्मै vतपुर्षि तापकं vहेतिम् आयुधम् vअस्य क्षिप। प्रेरय॥

अर्वन्तु मामुषसो जायमाना अर्वन्तु मा सिन्धवः पिन्वमानाः।
अर्वन्तु मा पर्वतासो ध्रुवासोऽर्वन्तु मा पितरो देवहूतौ॥ ४॥

अर्वन्तु। माम्। उषसः। जायमानाः। अर्वन्तु। मा। सिन्धवः। पिन्वमानाः।
अर्वन्तु। मा। पर्वतासः। ध्रुवासः। अर्वन्तु। मा। पितरः। देवऽहूतौ॥ ४॥

vजायमानाः प्रादुर्भवन्त्यः vउषसः vमाम् vअवन्तु रक्षन्तु। तथा vपिन्वमानाः वर्धमानाः vसिन्धवः स्यन्दनशीला नद्यश्च vमा माम् vअवन्तु। तथा vध्रुवासः निश्चलाः vपर्वतासः पर्वताश्च vमा माम् vअवन्तु। तथा vदेवहूतौ। देवानां हूतिराह्वानमस्मिन्निति देवहूतिर्यागः। तत्र विद्यमानाः vपितरः पितृदेवताश्च माम् vअवन्तु॥

विश्वदानीं सुमनसः स्याम पश्येम नु सूर्यमुच्चरन्तम्।
तथा करद्वसुपतिर्वसूनां देवाँ ओहानोऽवसागमिष्ठः॥ ५॥

विश्वऽदानीम्। सुऽमनसः। स्याम। पश्येम। नु। सूर्यम्। उत्ऽचरन्तम्।
तथा। करत्। वसुऽपतिः। वसूनाम्। देवान्। ओहानः। अवसा। आऽगमिष्ठः॥ ५॥

हे देवाः vविश्वदानीं सर्वदा वयं vसुमनसः vस्याम शोभनमनस्का भवेम। नुशब्दः समुच्चये। vउच्चरन्तम् उद्यन्तं vसूर्यं सर्वदा vपश्येम च। vवसूनां vवसुपतिः उत्कृष्टधनाधिपतिरग्निः[3] vदेवान् vअवसा अस्मदीयेन हविषा vओहानः वहन् प्रापयन् vआगमिष्ठः आगन्तृतम एवंगुणविशिष्टः सन् vतथा vकरत्। अस्मान् तथाविधानुत्कृष्टप्रकारान् करोतु॥ ॥ १४॥

इन्द्रो नेदिष्ठमवसागमिष्ठः सरस्वती सिन्धुभिः पिन्वमाना।
पर्जन्यो नु ओषधीभिर्मयोभुरग्निः सुशंसः सुहवः पितेव॥ ६॥

इन्द्रः। नेदिष्ठम्। अवसा। आऽगमिष्ठः। सरस्वती। सिन्धुऽभिः। पिन्वमाना।
पर्जन्यः। नः। ओषधीभिः। मयःऽभुः। अग्निः। सुऽशंसः। सुऽहवः। पिताऽइव॥ ६॥

---

१. ख-न-भ-य–ब्राह्मणजातेर्वा; ज्ञ-त२–ब्राह्मजातेर्वा। २. ख-भ–ब्राह्मणरक्षकम्; ज्ञ-न–ब्राह्मणा रक्षकम्। ३. ज्ञ-त–°धनानामधिपति°।

अयम् vइन्द्रो vनेदिष्ठम् अन्तिकतमं यथा भवति तथा vअवसा रक्षणेन सार्धम् vआगमिष्ठः आगन्तृतमोऽस्तु । vसिन्धुभिः स्यन्दनैरुदकैः vपिन्वमाना वर्धमाना नदीरूपा vसरस्वती चागन्तृतमा भवतु । vओषधीभिः सार्धं vपर्जन्यः च vनः अस्माकं vमयोभुः सुखस्य भावयिता भवतु । vअग्निः च vपितेव पुत्रस्य जनक इव vसुशंसः सुखेन शंसनीयः vसुहवः सुखेनाह्वातव्यश्च[1] भवतु ॥

आप्रयणे वैश्वदेवस्य चरोः ' विश्वे देवास आ गत ' इत्यनुवाक्या । सूत्रितं च—' विश्वे देवास आ गत ये के च ममा महिनो अहिमायाः ' (आश्व. श्रौ. २. ९) इति ॥

विश्वे देवास आ गत शृणुता म इमं हवम् । एदं बर्हिर्नि षीदत ॥ ७ ॥

विश्वे । देवासः । आ । गत । शृणुत । मे । इमम् । हवम् । आ । इदम् । बर्हिः । नि । सीदत ॥७॥

हे vविश्वे vदेवासः सर्वे देवाः vआ vगत आगच्छत । आगत्य च vमे मदीयम् vइमं vहवम् इदमाह्वानं vशृणुत । श्रुत्वा च vइदम् आस्तीर्णं vबर्हिः vआ vनि vषीदत आस्तीर्णे बर्हिषि निषण्णा[2] भवत ॥

यो वो देवा घृतस्नुना हव्येन प्रतिभूषति । तं विश्व उप गच्छथ ॥ ८ ॥

यः । वः । देवाः । घृतऽस्नुना । हव्येन । प्रतिऽभूषति । तम् । विश्वे । उप । गच्छथ ॥८॥

हे vदेवाः vवः युष्मान् vयः जनः vघृतस्नुना घृतप्रक्षरणेन vहव्येन हविषा vप्रतिभूषति परिचरति vतं जनं vविश्वे सर्वे यूयम् vउप vगच्छथ उपगता भवथ ॥

उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये । सुमृळीका भवन्तु नः ॥ ९ ॥

उप । नः । सूनवः । गिरः । शृण्वन्तु । अमृतस्य । ये । सुऽमृळीकाः । भवन्तु । नः ॥ ९॥

vअमृतस्य मरणरहितस्य प्रजापतेः vये vसूनवः पुत्राः ते देवाः vनः अस्माकं vगिरः स्तुतीः vउप vशृण्वन्तु । vनः अस्माकं vसुमृळीकाः सुष्ठु मृडयितारः सुखयितारश्च vभवन्तु ॥

विश्वे देवा ऋतावृधं ऋतुभिर्हवनश्रुतः । जुषन्तां युज्यं पयः ॥ १० ॥

विश्वे । देवाः । ऋतऽवृधः । ऋतुऽभिः । हवनऽश्रुतः । जुषन्ताम् । युज्यम् । पयः ॥१०॥

vऋतावृधः ऋतस्य यज्ञस्य वर्धकाः vऋतुभिः कालविशेषैः vहवनश्रुतः हवनस्य स्तोत्रस्य श्रोतारः तस्मिंस्तस्मिन् यागकाले स्तूयमाना ईदृशाः vविश्वे सर्वे vदेवाः vयुज्यं योग्यं vपयः आमिक्षारूपं vजुषन्तां सेवन्ताम् । श्रूयते हि—' तसे पयसि दध्यानयति सा वैश्वदेव्यामिक्षा ' इति ॥ ॥ १५ ॥

स्तोत्रमिन्द्रो मरुद्गणस्त्वष्टृमान्मित्रो अर्यमा । इमा हव्या जुषन्त नः ॥ ११ ॥

स्तोत्रम् । इन्द्रः । मरुत्ऽगणः । त्वष्टृऽमान् । मित्रः । अर्यमा । इमा । हव्या । जुषन्त । नः ॥११॥

---

१. ख-ज्ञ-ञ्ञ-त-न-भ—सुखेन ह्वातव्यश्च । २. ख—उपानिषण्णा; भ—उपविशत निषण्णा ।

vमरुद्गणः मरुतो गणभूताः परिजनभूता[1] यस्य तादृशः vइन्द्रः vत्वष्टृमान् त्वष्टृसहितः vमित्रो vअर्यमा च vनः अस्माकं vस्तोत्रम् vइमा vहव्या इमानि हवींषि च vजुषन्त सेवन्ताम् ॥

इमं नो अग्ने अध्वरं होतर्वयुनशो यज । चिकित्वान्दैव्यं जनम् ॥ १२ ॥

इमम् । नः । अग्ने । अध्वरम् । होतः । वयुनऽशः । यज । चिकित्वान् । दैव्यम् । जनम् ॥ १२ ॥

हे vहोतः देवानामाह्वातः vअग्ने vदैव्यं देवसंबन्धिनं vजनं[2] संघं यजनीयं vचिकित्वान् जानंस्त्वं vनः अस्मदीयम् vइमम् vअध्वरं हिंसारहितं यज्ञं vवयुनशः ज्ञानक्रमेण यथानुपूर्व्या देवा बुद्धिस्थाः तथा vयज यागं कुरु ॥

वैश्वदेवशस्त्रस्य 'विश्वे देवाः' इति याज्या । सूत्रितं च—'आशुस्यै त्वेति शस्त्वा जपेद्विश्वे देवाः शृणुतेमं हवं म इति याज्या' (आश्व. श्रौ. ५. १८) इति । वैश्वदेवे पशावेषैव याज्या । सूत्रितं च—'विश्वे देवाः शृणुतेमं हवं मे ये के च ज्मा महिनो अहिमायाः' (आश्व. श्रौ. ३. ७) इति ॥

विश्वे देवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ ।
ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वम् ॥ १३ ॥

विश्वे । देवाः । शृणुत । इमम् । हवम् । मे । ये । अन्तरिक्षे । ये । उप । द्यवि । स्थ ।
ये । अग्निऽजिह्वाः । उत । वा । यजत्राः । आऽसद्य । अस्मिन् । बर्हिषि । मादयध्वम् ॥ १३ ॥

हे vविश्वे vदेवाः vमे मदीयम् vइमं vहवम् आह्वानं vशृणुत । vये यूयम् vअन्तरिक्षे vस्थ अन्तरिक्षलोके वर्तमाना भवथ । vये च vउप तत्समीपस्थे भूलोके भवथ । ये च vद्यवि द्युलोके स्थ । vये च vअग्निजिह्वाः । अग्निर्जिह्वास्थानीयो येषाम् । यद्वा । अग्नेर्जिह्वा[3] । तया[3] पोष्यमाणत्वात् अग्निजिह्वा[4] इत्युच्यन्ते[4] । vउत vवा अपि वा ये vयजत्राः यजनीयाः ते सर्वे यूयम् आस्तीर्णे vअस्मिन् vबर्हिषि vआसद्य उपविश्य vमादयध्वं सोमेनात्मानं तर्पयथ ॥

विश्वे देवा मम शृण्वन्तु यज्ञिया उभे रोदसी अपां नपाच्च मन्म ।
मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अन्तमा मदेम ॥ १४ ॥

विश्वे । देवाः । मम । शृण्वन्तु । यज्ञियाः । उभे इति । रोदसी इति । अपाम् । नपात् । च । मन्म ।
मा । वः । वचांसि । परिऽचक्ष्याणि । वोचम् । सुम्नेषु । इत् । वः । अन्तमाः । मदेम ॥ १४ ॥

vयज्ञियाः[5] यज्ञार्हाः vविश्वे vदेवाः vमम मदीयं vमन्म मननीयं स्तोत्रं vशृण्वन्तु । चित्तेऽवधारयन्तु । तथा vउभे vरोदसी द्यावापृथिव्यौ vअपां vनपात् मध्यमस्थानोऽग्निः[6] vच अस्मदीयं

---

१. ख-ङ्ग-त-न-भ-र-परितो जनभूताः । २. ख-भ-श-जनसंघम् ; त-संघम् । ३. न-अग्नेर्जिह्वया । ४. ख-ङ्ग-न-भ-जिह्वा इत्युच्यन्ते; त-श-जिह्वा इत्युच्यते । ५. ख-घ-भ-हे यज्ञियाः; श-ये [illegible]

स्तोत्रं शृण्वन्तु । अथ प्रत्यक्षकृतः । हे देवाः ᵛवः युष्मभ्यं ᵛपरिचक्ष्याणि वर्जनीयानि ᵛवचांसि स्तोत्राणि ᵛमा ᵛवोचं मा ब्रवीमि । अपि तु समीचीनानि । अतः ᵛवः युष्माकम् ᵛअन्तमाः अन्तिकतमाः सन्तो वयं ᵛसुक्षेष्वित् युष्माभिर्दत्तेषु सुखेष्वेव वर्तमानाः ᵛमदेम मोदेम ॥

आग्रयणे वैश्वदेवस्य ' ये के च ज्मा ' इति याज्या । सूत्रितं च—' विश्वे देवास आ गत ये के च ज्मा महिनो अहिमायाः ' (आश्व. श्रौ. २.९) इति । वैश्वदेवपुरोडाशस्यैव याज्या । सूत्रमुदाहृतम् ॥

ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे ।
ते अस्मभ्यमिषये विश्वमायुः क्षपं उस्रा वरिवस्यन्तु देवाः ॥ १५ ॥

ये । के । च । ज्मा । महिनः । अहिऽमायाः । दिवः । जज्ञिरे । अपाम् । सधऽस्थे ।
ते । अस्मभ्यम् । इषये । विश्वम् । आयुः । क्षपः । उस्राः । वरिवस्यन्तु । देवाः ॥ १५ ॥

ᵛमहिनः महान्तः ᵛअहिमायाः । माया प्रज्ञानाम[1] । आहन्तृप्रज्ञाः । एवंभूताः ᵛये ᵛके चन देवाः ᵛज्मा । पृथिवीनामैतत् । ज्मायां[2] पृथिव्यां ᵛजज्ञिरे प्रादुर्बभूवुः । ये[3] के चन[3] ᵛदिवः द्युलोकाज्जज्ञिरे । ये के चन[4] ᵛअपां ᵛसधस्थे सहान्तरिक्षे जज्ञिरे ᵛते सर्वे ᵛदेवाः ᵛअस्मभ्यमिषये । इष्यत इतीषिः पुत्रादिः । तस्मै च ᵛविश्वं सर्वम् ᵛआयुः अन्नं जीवनं वा ᵛक्षपः सर्वा रात्रीः ᵛउस्राः सर्वाण्यहानि च सर्वदा नैरन्तर्येण ᵛवरिवस्यन्तु प्रयच्छन्तु ॥

अग्नीपर्जन्याववतं धियं मेऽस्मिन्हवे सुहवा सुष्टुतिं नः ।
इळामन्यो जनयद्गर्भमन्यः प्रजावतीरिष आ धत्तमस्मे ॥ १६ ॥

अग्नीपर्जन्यौ । अवतम् । धियम् । मे । अस्मिन् । हवे । सुऽहवा । सुऽस्तुतिम् । नः ।
इळाम् । अन्यः । जनयत् । गर्भम् । अन्यः । प्रजाऽवतीः । इषः । आ । धत्तम् । अस्मे इति ॥ १६ ॥

हे ᵛअग्नीपर्जन्यौ ᵛमे मदीयं ᵛधियं कर्म यज्ञलक्षणम् ᵛअवतं गच्छतं रक्षतं वा । हे ᵛसुहवा सुखेन ह्वातुं शक्यौ ᵛअस्मिन् ᵛहवे यज्ञे ᵛनः अस्मदीयां[5] ᵛसुष्टुतिं शोभनां स्तुतिं च रक्षतम् । यद्वा । अनुवृत्तोऽवतिः श्रवणार्थः । अवतं शृणुतम् । युवयोर्मध्ये ᵛअन्यः पर्जन्यः ᵛइळाम् अन्नं ᵛजनयत् जनयति । वृष्ट्या हि ओषधिवनस्पतयो जायन्ते तेभ्यश्चान्नं जायते । ᵛअन्यः अग्निः ᵛगर्भं जनयति । पुरुषेण भुक्तमन्नं जाठरेणाग्निना पक्वं सत् रेतोरूपेण परिणमते तदेव योषित्सु गर्भो भवति । अतो युवां ᵛप्रजावतीः प्रजाभिर्युक्ताः ᵛइषः अन्नानि ᵛअस्मे अस्मासु ᵛआ ᵛधत्तम् अवस्थापयतम् ॥

स्तीर्णे बर्हिषि समिधाने अग्नौ सुक्तेन महा नमसा विवासे ।
अस्मिन्नो अद्य विदथे यजत्रा विश्वे देवा हविषि मादयध्वम् ॥ १७ ॥

स्तीर्णे । बर्हिषि । सम्ऽइधाने । अग्नौ । सुऽउक्तेन । महा । नमसा । आ । विवासे ।
अस्मिन् । नः । अद्य । विदथे । यजत्राः । विश्वे । देवाः । हविषि । मादयध्वम् ॥ १७ ॥

---

१. ख–प्रज्ञाननाम । २. ख-ज्ञ-ज्ञ-त-न-भ-र–' ज्मायां ' नास्ति । ३. ख१-न-भ– ये के च; ज-ण–एके च । ४. ज-ण–न । ५. ख-घ-भ-अस्माकम् ।

हे विश्वे देवाः ᵛबर्हिषि दर्भपुञ्जे वेद्यां ᵛस्तीर्णे सति ᵛअग्नौ च ᵛसमिधाने समिद्धे[1] सति अनेन ᵛसूक्तेन स्तोत्रेण च ᵛमहा महता ᵛनमसा नमस्कारेण च ᵛआ ᵛविवासे पर्यचरम्। हे ᵛयजत्राः यजनीयाः ᵛविश्वे ᵛदेवाः ᵛअद्य अस्मिन् दिने ᵛनः अस्मदीये ᵛअस्मिन् ᵛविदथे यज्ञे ᵛहविषि। तृतीयार्थे सप्तमी। हविषा अस्माभिर्दत्तेन ᵛमादयध्वं[2] तृप्यध्वम्॥ ॥ १६ ॥

'वयमु त्वा' इति दशर्चं चतुर्थं सूक्तं भरद्वाजस्याष पौष्णम्। 'यां पूषन्' इत्यनुष्टुप् शिष्टा गायत्र्यः। तथा चानुक्रान्तं—'वयं दश पौष्णं तद्वायत्रं वै यां पूषन्ननुष्टुप्' इति। अर्थार्थिभिः प्रवसद्भिरेतज्जप्यम्। सूत्रितं च—'वयमु त्वा पथस्पते इत्यर्थचर्यां चरिष्यन्' (आश्व. गृ. ३. ७. ८) इति। जपेदिति शेषः[3]॥

वयमु त्वा पथस्पते रथं न वाजसातये। धिये पूषन्नयुज्महि॥ १॥

वयम्। ऊँ इति। त्वा। पथः। पते। रथम्। न। वाजऽसातये। धिये। पूषन्। अयुज्महि॥१॥

हे ᵛपथस्पते मार्गस्य पालयितः ᵛपूषन् ᵛधिये कर्मार्थं ᵛवाजसातये अन्नस्य लाभाय च ᵛवयं ᵛरथं ᵛन युद्धे रथमिव ᵛत्वा त्वाम् ᵛअयुज्महि युञ्ज्महि। अस्मदभिमुखं कुर्मः। ᵛउ इति पूरकः॥

अभि नो नर्यं वसु वीरं प्रयतदक्षिणम्। वामं गृहपतिं नय॥ २॥

अभि। नः। नर्यम्। वसु। वीरम्। प्रयतऽदक्षिणम्। वामम्। गृहऽपतिम्। नय॥ २॥

हे पूषन् ᵛनर्यं नृभ्यो हितं ᵛवसु धनम् ᵛअभि प्राप्तुं ᵛवीरं दारिद्र्यस्य विशेषेण ईरयितारं गमयितारं ᵛप्रयतदक्षिणं पूर्वमन्येभ्योऽपि दत्तधनम्। यद्वा। प्रयतं शुद्धं दक्षिणं धनं यस्य तादृशम्। ᵛवामं वननीयमेवंविधं ᵛगृहपतिं गृहस्थं ᵛनः अस्मान् ᵛनय प्रापय॥

अदित्सन्तं चिदाघृणे पूषन्दानाय चोदय। पणेश्चिद्वि म्रदा मनः॥ ३॥

अदित्सन्तम्। चित्। आघृणे। पूषन्। दानाय। चोदय। पणेः। चित्। वि। म्रद। मनः॥३॥

हे ᵛआघृणे आगतदीप्ते ᵛपूषन् ᵛअदित्सन्तं ᵛचित् दातुमनिच्छन्तमपि पुरुषं ᵛदानाय अस्मद्दानार्थं ᵛचोदय प्रेरय। ᵛपणेश्चित् वणिजोऽपि वार्धुषिकस्य लुब्धस्यापि ᵛमनः हृदयं ᵛवि ᵛम्रद दानार्थं मृदूकुरु॥

वि पथो वाजसातये चिनुहि वि मृधो जहि। साधन्तामुग्र नो धियः॥ ४॥

वि। पथः। वाजऽसातये। चिनुहि। वि। मृधः। जहि। साधन्ताम्। उग्र। नः। धियः॥४॥

हे ᵛउग्र उत्कृष्टबल पूषन् ᵛपथः मार्गान् ᵛवाजसातये अन्नलाभाय ᵛवि ᵛचिनुहि। शोधितान् कुरु। यैः पथिभिर्गता धनं लभेमहि तादृशान् पथः पृथक्कुर्वित्यर्थः। ᵛमृधः बाधकान् तस्करादींश्च ᵛवि ᵛजहि बाधस्व। तथा ᵛनः अस्माकं ᵛधियः कर्माणि अन्नलाभार्थं क्रियमाणानि ᵛसाधन्तां सेध्यन्तु। सफलानि भवन्तु॥

---

१. घ—समिध्यमाने। २. श—अन्नेन मादयध्वम्। ३. ज्ञ—शेषः। तथाह शौनकः—वयमु त्वेति [illegible]

परि तृन्धि पणीनामारया हृदया कवे । अथेमस्मभ्यं रन्धय ॥ ५ ॥

परि । तृन्धि । पणीनाम् । आरया । हृदया । कवे । अथ । ईम् । अस्मभ्यम् । रन्धय ॥५॥

हे ᵛकवे प्राज्ञ पूषन् ᵛपणीनां वणिजां लुब्धानां ᵛहृदया हृदयानि कठिनानि ᵛआरया । सूक्ष्मलोहाग्रो दण्डः प्रतोद[1] इति आरा इति चाख्यायते । तया ᵛपरि ᵛतृन्धि परिविध्य । हृदयं काठिन्यमपनयेत्यर्थः । ᵛअथ अनन्तरम् ᵛईम् एनान् पणीन् ᵛअस्मभ्यं ᵛरन्धय वशीकुरु ॥ ॥ १७ ॥

वि पूषन्नारया तुद पणेरिच्छ हृदि प्रियम् । अथेमस्मभ्यं रन्धय ॥ ६ ॥

वि । पूषन् । आरया । तुद । पणेः । इच्छ । हृदि । प्रियम् । अथ । ईम् । अस्मभ्यम् । रन्धय ॥६॥

हे ᵛपूषन् ᵛआरया प्रतोदेन ᵛपणेः वणिजः हृदयं ᵛवि ᵛतुद विविध्य । तस्य पणेः ᵛहृदि हृदये ᵛप्रियम् अस्मभ्यमनुकूलं धनम् ᵛइच्छ दातव्यमितीच्छां जनय । ᵛअथ अनन्तरम् ᵛअस्मभ्यम् ᵛईम् एनान् ᵛरन्धय वशीकुरु ॥

आ रिख किकिरा कृणु पणीनां हृदया कवे । अथेमस्मभ्यं रन्धय ॥ ७ ॥

आ । रिख । किकिरा । कृणु । पणीनाम् । हृदया । कवे । अथ । ईम् । अस्मभ्यम् । रन्धय ॥७॥

हे ᵛकवे प्राज्ञ पूषन् ᵛपणीनां वणिजां ᵛहृदया हृदयानि ᵛआ ᵛरिख आलिख । आलिख्य च ᵛकिकिरा कीर्णानि प्रशिथिलानि ᵛकृणु कुरु । मृदूनि कुर्वित्यर्थः । अन्यद्व्रतम् ॥

यां पूषन्ब्रह्मचोदनीमारां बिभर्ष्याघृणे ।
तया समस्य हृदयमा रिख किकिरा कृणु ॥ ८ ॥

याम् । पूषन् । ब्रह्मऽचोदनीम् । आराम् । बिभर्षि । आघृणे ।
तया । समस्य । हृदयम् । आ । रिख । किकिरा । कृणु ॥ ८ ॥

हे ᵛआघृणे आगतदीप्ते ᵛपूषन् ᵛब्रह्मचोदनीं ब्रह्मणोऽन्नस्य प्रेरयित्रीं[2] ᵛयाम् ᵛआरां ᵛबिभर्षि हस्ते धारयसि ᵛतया ᵛसमस्य सर्वस्य लुब्धजनस्य ᵛहृदयम् ᵛआ ᵛरिख आलिख । ᵛकिकिरा किकिराणि कीर्णानि प्रशिथिलानि च ᵛकृणु कुरु ॥

या ते अष्टा गोऔपशाघृणे पशुसाधनी । तस्यास्ते सुम्नमीमहे ॥ ९ ॥

या । ते । अष्ट्रा । गोऽऔपशा । आघृणे । पशुऽसाधनी ।
तस्याः । ते । सुम्नम् । ईमहे ॥ ९ ॥

हे ᵛआघृणे आगतदीप्ते पूषन् ᵛते त्वदीया ᵛया ᵛअष्ट्रा आरा ᵛगोऔपशा । उपशेरते इत्योपशाः । गाव ओपशा यस्यास्तादृशी । अतएव ᵛपशुसाधनी पशूनां साधयित्री भवति ᵛते त्वदीयायाः ᵛतस्याः संबन्धि ᵛसुम्नं सुखम् ᵛईमहे याचामहे ॥

---

१. ख-भ-प्रतोदन । २. ज्ञ-त-श-दात्रीं प्रेरयित्रीम् ।

उत नो गोषणिं धियमश्वसां वाजसामुत । नृवत्कृणुहि वीतये ॥ १० ॥

उत । नः । गोऽसनिम् । धियम् । अश्वऽसाम् । वाजऽसाम् । उत ।
नृऽवत् । कृणुहि । वीतये ॥ १० ॥

vउत अपि च हे पूषन् vगोषणिं गवां सनित्रीम् vअश्वसाम् अश्वानां सनित्रीं vवाजसां वाजानामन्नानां सनित्रीम् vउत अपि च vनृवत् नृवतीं यद्वा नृणां वनित्रीं दात्रीमेवंभूतां vधियं बुद्धिं कर्म वा vनः अस्माकं vवीतये खादनायोपभोगार्थं[1] vकृणुहि कुरु ॥ ॥ १८ ॥

'सं पूषन्' इति दशर्चं पञ्चमं सूक्तं भरद्वाजस्यार्षं पौष्णं गायत्रम्। 'सं पूषन्' इत्यनुक्रान्तम्। नष्टधनमन्विच्छता पुरुषेणैतज्जप्यम्। सूत्रितं च—'सं पूषन्विदुषेति नष्टमधिजिगमिषन्मूळहो वा' (आश्व. गृ. ३. ७. ९) इति[2] ॥

सं पूषन्विदुषा नय यो अञ्जसानुशासति । य एवेदमिति ब्रवत् ॥ १ ॥

सम् । पूषन् । विदुषा । नय । यः । अञ्जसा । अनुऽशासति ।
यः । एव । इदम् । इति । ब्रवत् ॥ १ ॥

हे vपूषन् पोषक देव vविदुषा जानता तेन जनेन vसं vनय अस्मान् संगमय vयः विद्वान् vअञ्जसा ऋजुमार्गेण vअनुशासति अनुशास्ति नष्टद्रव्यप्राप्त्युपायमुपदिशति। vयः च vएव एवम् vइदं नष्टं भवदीयं धनम् vइति vब्रवत् ब्रवीति। नष्टं धनं दर्शयतीत्यर्थः। तेन विदुषेत्यन्वयः ॥

सग्मं पूष्णा गमेमहि यो गृहाँ अभिशासति । इम एवेति च ब्रवत् ॥ २ ॥

सम् । ऊँ इति । पूष्णा । गमेमहि । यः । गृहान् । अभिऽशासति ।
इमे । एव । इति । च । ब्रवत् ॥ २ ॥

vपूष्णा अनुगृहीता वयं vसं vगमेमहि तेन जनेन संगच्छेमहि vयः जनः vगृहान् येषु गृहेषु अस्मदीया नष्टाः पशवस्तिष्ठन्ति तान् गृहान् vअभिशासति अभिशास्ति आभिमुख्येन बोधयति। यश्च vइमे स्वदीया नष्टाः पशवः vएव एवं तिष्ठन्ति vइति vच vब्रवत् ब्रूयात् ॥

पूष्णश्चक्रं न रिष्यति न कोशोऽव पद्यते । नो अस्य व्यथते पविः ॥ ३ ॥

पूष्णः । चक्रम् । न । रिष्यति । न । कोशः । अव । पद्यते ।
नो इति । अस्य । व्यथते । पविः ॥ ३ ॥

vपूष्णः पोषकस्य देवस्य vचक्रम् आयुधं vन vरिष्यति न विनश्यति। अस्य चक्रस्य vकोशः च vन vअव vपद्यते न ह्रीयते। vअस्य vपविः धारा च vनो नैव vव्यथते कुण्ठीभवति[3]। तेन चक्रेण चोरान् हत्वा अस्मदीयं धनं प्रकाशयेति भावः ॥

---

१. घ-श-स्वादनायोप°। २. ज्ञ-इति। तथाह शौनकः-यस्य नष्टं भवेत् किंचिद्द्रव्यं गौर्द्विपदं धनम्। नश्येद्वाध्वनि यो मोहात् सं पूषन् स जपेन्निशि। ३. भ-न कुण्ठीभवति।

यो अस्मै हविषाविधन्न तं पूषापि मृष्यते । प्रथमो विन्दते वसु ॥ ४ ॥

यः । अस्मै । हविषा । अविधत् । न । तम् । पूषा । अपि । मृष्यते ।

प्रथमः । विन्दते । वसु ॥ ४ ॥

[v]यः यजमानः [v]अस्मै पूष्णे [v]हविषा चरुपुरोडाशादिना [v]अविधत् परिचरति [v]तं यजमानं [v]पूषा [v]न [v]अपि [v]मृष्यते । अपिशब्द ईषदर्थे । ईषदपि न हिनस्ति । स च [v]प्रथमः मुख्यः सन् [v]वसु धनं [v]विन्दते लभते ॥

पूषा गा अन्वेतु नः पूषा रक्षत्ववर्वतः । पूषा वाजं सनोतु नः ॥ ५ ॥

पूषा । गाः । अनु । एतु । नः । पूषा । रक्षतु । अर्वतः । पूषा । वाजम् । सनोतु । नः ॥५॥

[v]पूषा पोषको देवः [v]नः अस्मदीयाः [v]गाः [v]अन्वेतु रक्षणार्थमनुगच्छतु[1] । स च [v]पूषा [v]अर्वतः अश्वान् [v]रक्षतु चोरेभ्यः । तथा [v]वाजम् अन्नं च [v]नः अस्मभ्यं [v]पूषा [v]सनोतु प्रयच्छतु ॥ ॥१९॥

पूषन्ननु प्र गा इहि यजमानस्य सुन्वतः । अस्माकं स्तुवतामुत ॥ ६ ॥

पूषन् । अनु । प्र । गाः । इहि । यजमानस्य । सुन्वतः । अस्माकम् । स्तुवताम् । उत ॥६॥

हे [v]पूषन् [v]सुन्वतः सोमाभिषवं कुर्वतः [v]यजमानस्य [v]गाः पशून् [v]अनु [v]प्र [v]इहि रक्षणार्थमनुगच्छ । [v]उत अपि च [v]स्तुवतां त्वद्विषयं स्तोत्रं कुर्वताम् [v]अस्माकं गाश्चानुगच्छ ॥

माकिर्नेशन्माकीं रिषन्माकीं सं शारि केवटे । अथारिष्टाभिरा गहि ॥ ७ ॥

माकिः । नेशत् । माकीम् । रिषत् । माकीम् । सम् । शारि । केवटे ।

अथ । अरिष्टाभिः । आ । गहि ॥ ७ ॥

हे पूषन् अस्मदीयं[2] गोधनं [v]माकिर्नेशत् मा नश्यतु । माकिर्माकीम् इत्येतौ प्रतिषेधमात्रे वर्तेते । [v]माकीं [v]रिषत् । मा व्याघ्रादिभिर्हिंस्यताम् । [v]माकीं मा च [v]केवटे कूपे [v]सं [v]शारि संकीर्णं भूत् । कूपपातेनापि हिंसितं मा भवतु । [v]अथ एवं सति [v]अरिष्टाभिः अहिंसिताभिर्गोभिः सह [v]आ [v]गहि सायंकाले आगच्छ ॥

शृण्वन्तं पूषणं वयमिर्यमनष्टवेदसम् । ईशानं राय ईमहे ॥ ८ ॥

शृण्वन्तम् । पूषणम् । वयम् । इर्यम् । अनष्टवेदसम् । ईशानम् । रायः । ईमहे ॥ ८ ॥

अस्मत्स्तोत्राणि [v]शृण्वन्तम् [v]इर्यं दारिद्र्यस्य प्रेरकम् [v]अनष्टवेदसम् अविनष्टधनम् [v]ईशानं सर्वस्येश्वरमेवंविधं [v]पूषणं देवं [v]वयं [v]रायः धनानि [v]ईमहे याचामहे ॥

चातुर्मास्येषु वैश्वदेवे पर्वणि पौष्णस्य हविषः 'पूषन्तव व्रते' इत्येषानुवाक्या । सूत्रितं च— 'वाममद्य सवितर्वाममु श्वः पूषन्तव व्रते वयम्' (आश्व. श्रौ. २. १६) इति ॥

---

१ ख-ङ्ग-त-न-भ-र– अनुरक्षणार्थ° । २. ख-ङ्ग-न-भ-य–नोऽस्मदीयम् ।

पूषन्तवं व्रते वयं न रिष्येम कदा चन । स्तोतारस्त इह स्मसि ॥ ९ ॥

पूषन् । तवं । व्रते । वयम् । न । रिष्येम । कदा । चन ।
स्तोतारः । ते । इह । स्मसि ॥ ९ ॥

हे ᵛपूषन् पोषक ᵛतव स्वदीये ᵛव्रते कर्मणि वर्तमानाः ᵛवयं ᵛकदा ᵛचन कदाचिदपि ᵛन ᵛरिष्येम हिंसिता न भवेम । तादृशाश्च वयम् ᵛइह अस्मिन् कर्मणि ᵛते तव ᵛस्तोतारः ᵛस्मसि स्मः । भवामः ॥

परि पूषा परस्ताद्धस्तं दधातु दक्षिणम् । पुनर्नो नष्टमाजतु ॥ १० ॥

परि । पूषा । परस्तात् । हस्तम् । दधातु । दक्षिणम् ।
पुनः । नः । नष्टम् । आ । अजतु ॥ १० ॥

ᵛपूषा पोषको देवः ᵛपरस्तात् परस्मिन् देशे सुसंचारादन्यस्मिन् चोरव्याघ्रादिभिरुषिते देशे गच्छतो गोधनस्य निवारणाय स्वकीयं ᵛदक्षिणं ᵛहस्तं ᵛपरि ᵛदधातु । परिधानं निवारकं करोतु । ᵛनः अस्मदीयं ᵛनष्टं च गोधनं ᵛपुनः ᵛआजतु आगच्छतु । आगमयतु ॥ ॥ २० ॥

'एहि वाम्' इति षड्चं षष्ठं सूक्तं भरद्वाजस्यार्षं गायत्रं पौष्णम् । अनुक्रम्यते च—'एहि वां षट्' इति । गतो विनियोगः ॥

एहि वां विमुचो नपादाघृणे सं सचावहै । रथीर्ऋतस्य नो भव ॥ १ ॥

आ । इहि । वाम् । विऽमुचः । नपात् । आघृणे । सम् । सचावहै ।
रथीः । ऋतस्य । नः । भव ॥ १ ॥

हे ᵛविमुचो ᵛनपात् । विमुञ्चति सृष्टिकाले स्वसकाशात् सर्वाः प्रजा विसृजतीति विमुक् प्रजापतिः । तस्य पुत्र ᵛआघृणे आगतदीप्ते पूषन् ᵛवाम् । वाति गच्छति स्तुतिं प्राप्नोतीति वाः स्तोता ॥ 'वा गतिगन्धनयोः' इत्यस्मात् 'आतो मनिन्०' इति विच् ॥ वां गन्तारं स्तोतारं माम् ᵛएहि आगच्छ । आवां च[1] ᵛसं ᵛसचावहै समयाव । संगच्छावहै[2] । तादृशस्त्वं ᵛनः अस्माकम् ᵛऋतस्य यज्ञस्य ᵛरथीः रंहिता नेता ᵛभव । तथा सति तत्रत्यं हविस्त्वयापि लभ्यत इत्यर्थः ॥

रथीतमं कपर्दिनमीशानं राधसो महः । रायः सखायमीमहे ॥ २ ॥

रथिऽतमम् । कपर्दिनम् । ईशानम् । राधसः । महः । रायः । सखायम् । ईमहे ॥ २ ॥

ᵛरथीतमम् अतिशयेन रथिनम् । यद्वा । अतिशयेन रंहितारं नेतारं ᵛकपर्दिनम् । कपर्दश्चूडा । तद्वन्तम् । राध्नोत्यनेनेति राधो धनम् । ᵛमहः महतः ᵛराधसः धनस्य ᵛईशानं स्वामिनं ᵛसखायम् अस्माकं मित्रमेवंविधं पूषणं ᵛरायः धनानि ᵛईमहे याचामहे ॥

---

१. ख-न-भ-'च' नास्ति । २. ज्ञ-त-संगच्छावहै । यद्वा आवामित्यस्याद्याक्षरलोपे वामिति भवति । आवां सचावहै इति संबन्धः । याव संगच्छावहै ।

रायो धारास्यावृणे वसो राशिरजाश्व । धीवतोधीवतः सखा ॥ ३ ॥

रायः । धारा । असि । आवृणे । वसोः । राशिः । अजः अश्व । धीवतः धीवतः । सखा ॥ ३ ॥

हे [v]आवृणे आगतदीप्ते पूषन् [v]रायः धनस्य [v]धारा [v]असि प्रवाहो भवसि । स्तोतृभ्यो बहुधनं नैरन्तर्येण प्रयच्छसीत्यर्थः । [v]अजाश्व । अजाश्छागा एवाश्वा अश्वकार्यापन्ना यस्य तादृश पूषन् [v]वसोः वसुनः धनस्य [v]राशिः संघश्च भवसि । धनसंघश्च त्वय्येव निवसतीत्यर्थः । [v]धीवतोधीवतः सर्वस्य स्तोत्रवतः पुरुषस्य [v]सखा मित्रभूतश्च[1] भवसि ॥

पूषणं न्व१जाश्वमुप स्तोषाम वाजिनम् । स्वसुर्यो जार उच्यते ॥ ४ ॥

पूषणम् । नु । अजः अश्वम् । उप । स्तोषाम । वाजिनम् । स्वसुः । यः । जारः । उच्यते ॥ ४ ॥

[v]अजाश्वं छागवाहनं [v]वाजिनम् अन्नवन्तं बलवन्तं वा [v]पूषणं पोषकं देवं [v]नु अद्य [v]उप [v]स्तोषाम उपस्तवाम । [v]यः पूषा [v]स्वसुः उषसः [v]जारः उपपतिरिति [v]उच्यते तं पूष्णमित्यन्वयः ॥

मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः । भ्रातेन्द्रस्य सखा मम ॥ ५ ॥

मातुः । दिधिषुम् । अब्रवम् । स्वसुः । जारः । शृणोतु । नः ।
भ्राता । इन्द्रस्य । सखा । मम ॥ ५ ॥

[v]मातुः निर्मात्र्या रात्रेः [v]दिधिषुं पतिं[2] पूषणम् [v]अब्रवं स्तौमि । [v]स्वसुः उषसः [v]जारः च पूषा [v]नः अस्माकं स्तोत्राणि [v]शृणोतु । [v]इन्द्रस्य [v]भ्राता सहजातः पूषा [v]मम स्तोतुः [v]सखा मित्रभूतोऽस्तु ॥

आजासः पूषणं रथे निशुम्भास्ते जनश्रियम् । देवं वहन्तु बिभ्रतः ॥ ६ ॥

आ । अजासः । पूषणम् । रथे । निऽशुम्भाः । ते । जनऽश्रियम् ।
देवम् । वहन्तु । बिभ्रतः ॥ ६ ॥

[v]अजासः अजाश्छागाः [v]निशुम्भाः निश्चर्य संबध्य हर्तारः [v]ते पूष्णो वाहनतया प्रसिद्धा-श्छागाः [v]जनश्रियम् । जनं स्तोतृसंघं श्रयति गच्छतीति जनश्रीः । तं [v]पूषणं [v]देवं [v]रथे [v]बिभ्रतः धारयन्तः [v]आ [v]वहन्तु आनयन्तु ॥ ॥ २१ ॥

'य एनम्' इति षड्वृचं सप्तमं सूक्तं भरद्वाजस्यार्षं पौष्णम् । अन्त्यानुष्टुप् आदौ पञ्च गायत्र्यः । तथा चानुक्रान्तं—'य एनमन्त्यानुष्टुप्' इति । गतो विनियोगः ॥

य एनमादिदेशति करम्भादिति पूषणम् । न तेन देव आदिशे ॥ १ ॥

यः । एनम् । आऽदिदेशति । करम्भऽअत् । इति । पूषणम् ।
न । तेन । देवः । आऽदिशे ॥ १ ॥

---

१. ज्ञ–मित्रं च । २. श–उपपतिम् ।

vयः स्तोता vएनं vपूषणं पौष्कं vकरम्भात् करम्भाणां घृतमिश्राणां यवसक्तूनाम् अत्ता[1] vहुति[1] vआदिदेशति[2] अभिष्टौति vतेन पुरुषेण अन्यः[3] vदेवः vन vआदिशे आदेष्टव्यः स्तोतव्यो न[4] भवति। पूष्ण एव सर्वस्याभिमतस्य धनस्य लाभात् देवतान्तरं न स्तौतीत्यर्थः ॥

उत घा स रथीतमः सख्या सत्पतिर्युजा। इन्द्रो वृत्राणि जिघ्नते ॥ २ ॥

उत। घ। सः। रथिऽतमः। सख्या। सत्ऽपतिः। युजा। इन्द्रः। वृत्राणि। जिघ्नते ॥२॥

vउत vघ अपि च vसः यः शत्रूणां हन्तृत्वेन प्रसिद्धस्तादृशः vरथीतमः अतिशयेन रथी महारथः vसत्पतिः सतां पालयिता एवंगुणः vइन्द्रः vसख्या मित्रभूतेन पूष्णा vयुजा सहायभूतेन युक्तः सन् vवृत्राणि शत्रून् vजिघ्नते हन्ति। इन्द्रस्यापि अयमेव साहाय्यकारीत्यर्थः[5] ॥

उतादः पंरुषे गवि सूरश्चक्रं हिरण्ययम्। न्यैरयद्रथीतमः ॥ ३ ॥

उत। अदः। पुरुषे। गवि। सूरः। चक्रम्। हिरण्ययम्। नि। ऐरयत्। रथिऽतमः ॥३॥

vउत अपि च vसूरः प्रेरकः vरथीतमः अतिशयेन रथी नेतृतमो वा पूषा vपरुषे परुष्मति पर्ववति भास्वति वा vगवि। गच्छतीति गौरादित्यः। तस्मिन् vहिरण्ययं हिरण्मयं सुवर्णनिर्मितम् vअदः तत् रथस्य vचक्रं vन्यैरयत् नितरां प्रेरयति स्म ॥

यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मन्तुमः। तत्सु नो मन्म साधय ॥ ४ ॥

यत्। अद्य। त्वा। पुरुऽस्तुत। ब्रवाम। दस्र। मन्तुऽमः।
तत्। सु। नः। मन्म। साधय ॥ ४ ॥

हे vपुरुष्टुत बहुभिर्यजमानैः स्तुत[6] vदस्र दर्शनीय vमन्तुमः ज्ञानवन् पूषन् vअद्य इदानीं vयत्[7] उद्दिश्य[7] vत्वा त्वां vब्रवाम स्तवाम vनः अस्माकं vमन्म मननीयं vतत् धनं vसु vसाधय उत्पादय ॥

इमं च नो गवेषणं सातये सीषधो गणम्। आरात्पूषन्नसि श्रुतः ॥ ५ ॥

इमम्। च। नः। गोऽएषणम्। सातये। सीसधः। गणम्।
आरात्। पूषन्। असि। श्रुतः ॥ ५ ॥

हे पूषन् vनः अस्माकं vसातये लाभाय vइमं vच vगणं मनुष्यसंघं vगवेषणं गवामेषयितारं vसीषधः साधय। हे vपूषन् vआरात् दूरदेशेऽपि त्वं vश्रुतः विश्रुतः प्रख्यातः vअसि भवसि ॥

आ ते स्वस्तिमीमहे आरेअघामुपावसुम्। अद्या च सर्वतातये श्रवश्च सर्वतातये ॥६॥

आ। ते। स्वस्तिम्। ईमहे। आरेऽअघाम्। उपऽवसुम्।
अद्य। च। सर्वऽतातये। श्रवः। च। सर्वऽतातये ॥ ६ ॥

---

१. ख-भ-श-अत् अत्ति। २. ख-घ-ञ्च-भ-श-आदिदेशति आदिशति; न-आदिदेशति पुनः-पुनरादिशति। ३. घ-भ-श-अन्योऽपि। ४. ञ-त्त-य-'न' नास्ति। ५. ख-न-भ-सहकारीत्यर्थः। ६. ख-ञ्च-त-न-भ-र-स्तुतेन्द्र। ७. भ-यद्यमुद्दिश्य; घ-यत्त्वामुद्दिश्य; ञ-त-न-र-यमुद्दिश्य।

हे पूषन् [v]ते त्वदीयां त्वया देयां [v]स्वस्तिं कल्याणीं रक्षाम् [v]आरेअघाम्। आरे दूरे अघं पापं यस्यास्तादृशीम्। [v]उपावसुम् उपगतधनाम्। ईदृशीं स्वस्तिम् [v]अद्य [v]च अस्मिन्न काले [v]सर्वतातये। सर्वैर्ऋत्विग्भिस्तायते इति सर्वतातिर्यज्ञः। तदर्थम्। यद्वा। सर्वेषां भोगानां[1] विस्ताराय। [v]श्वश्च परस्मिन्नपि दिने [v]सर्वतातये सर्वदा सर्वतात्यर्थम्[2] [v]आ [v]ईमहे अभियाचामहे ॥ ॥ २२ ॥

'इन्द्रा नु पूषणा' इति षड्चमष्टमं सूक्तं भरद्वाजस्यार्षं गायत्रमैन्द्रापौष्णम्। अनुक्रान्तं च— 'इन्द्रा न्वैन्द्रं च' इति। गतो विनियोगः ॥

इन्द्रा नु पूषणा वयं सख्याय स्वस्तये। हुवेम वाजसातये ॥ १ ॥

इन्द्रा। नु। पूषणा। वयम्। सख्याय। स्वस्तये। हुवेम। वाजऽसातये ॥ १ ॥

इतरेतरयोगात् इन्द्रपूषन्शब्दयोः उभयत्र द्विवचनम्। इन्द्रापूषणौ[3] देवौ [v]नु अद्य च [v]वयं [v]स्वस्तये [v]सख्याय शोभनाय सख्ित्वाय [v]वाजसातये वाजस्यान्नस्य बलस्य वा सातये संभजनाय च [v]हुवेम आह्वयाम। स्तवाम[4] ॥

सोममन्य उपासदत्पातवे चम्वोः सुतम्। करम्भमन्य इच्छति ॥ २ ॥

सोमम्। अन्यः। उप। असदत्। पातवे। चम्वोः। सुतम्। करम्भम्। अन्यः। इच्छति ॥२॥

[v]चम्वोः अधिषवणफलकयोः [v]सुतम् अभिषुतं [v]सोमम् [v]अन्यः अनयोरेकतर इन्द्रः [v]पातवे पातुम् [v]उपासदत् उपसीदति। उपगच्छति। [v]अन्यः एकतरः पूषा [v]करम्भं घृतसिक्तं सक्त्वात्मकं हविः भक्षयितुम् [v]इच्छति ॥

अजा अन्यस्य वह्नयो हरी अन्यस्य संभृता। ताभ्यां वृत्राणि जिघ्नते ॥ ३ ॥

अजाः। अन्यस्य। वह्नयः। हरी इति। अन्यस्य। सम्ऽभृता।
ताभ्याम्। वृत्राणि। जिघ्नते ॥ ३ ॥

अनयोरिन्द्रापूष्णोः [v]अन्यस्य एकस्य पूष्णः [v]अजाः छागाः [v]वह्नयः वाहका अश्वाः। [v]अन्यस्य अपरस्येन्द्रस्य [v]संभृता संभृतौ सम्यक् पुष्टौ [v]हरी एतत्संज्ञावश्वौ वाहकौ। स चेन्द्रः [v]ताभ्यां [v]वृत्राणि शत्रून् [v]जिघ्नते हन्ति ॥

यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः। तत्र पूषाभवत्सचा ॥ ४ ॥

यत्। इन्द्रः। अनयत्। रितः। महीः। अपः। वृषन्ऽतमः।
तत्र। पूषा। अभवत्। सचा ॥ ४ ॥

[v]यत् यदा [v]वृषन्तमः अतिशयेन वर्षिता [v]इन्द्रः [v]रितः[5] गन्त्रीः [v]महीः महतीः [v]अपः वृष्टयुदकानि [v]अनयत् इमं लोकं प्रापयति [v]तत्र तदानीं [v]पूषा पोषको देवः [v]सचा [v]अभवत् अस्येन्द्रस्य सहायो भवति ॥

---

१. ख-ज्ञ-न-भ– सोमानाम्। २. श– यज्ञार्थम्। ३. ख-घ-भ– इन्द्रापूषणा इन्द्रापूषणौ। ४. ज्ञ-ज्ञ-त-न-र– स्तवाम वा। ५. ख-घ-ज्ञ-भ– रितः परितः; त-श– परितः।

तां पूष्णः सुमतिं वयं वृक्षस्य प्र वयामिव । इन्द्रस्य चा रभामहे ॥ ५ ॥

ताम् । पूष्णः । सुऽमतिम् । वयम् । वृक्षस्य । प्र । वयाम्ऽइव ।
इन्द्रस्य । च । आ । रभामहे ॥ ५ ॥

ᵛपूष्णः[1] पोषकस्य देवस्य ᵛइन्द्रस्य ᵛच ᵛतां प्रसिद्धां ᵛसुमतिं कल्याणीं मतिमनुग्रहबुद्धिं ᵛवृक्षस्य महीरुहस्य ᵛप्र ᵛवयां प्रकृष्टां दृढां शाखाम् ᵛइव ᵛवयम् ᵛआ ᵛरभामहे अवलम्बामहे । आश्रयामह इत्यर्थः ॥

उत्पूषणं युवामहेऽभीशूँरिव सारथिः । मह्या इन्द्रं स्वस्तये ॥ ६ ॥

उत् । पूषणम् । युवामहे । अभीशून्ऽइव । सारथिः । मह्यै । इन्द्रम् । स्वस्तये ॥ ६ ॥

ᵛपूषणं पोषकं देवम् ᵛइन्द्रं च ᵛमह्यै महत्यै ᵛस्वस्तये रक्षार्थम् ᵛउत् ᵛयुवामहे उद्योजयामः । उद्योजनमाकर्षणम् । तत्र दृष्टान्तः । ᵛसारथिः सूतः ᵛअभीशूनिव । अभीशून् रश्मीन् अश्वबन्धनार्थान् यथाकर्षति तद्वत् ॥ ॥ २३ ॥

'शुक्रं ते' इति चतुर्ऋचं नवमं सूक्तं भरद्वाजस्यार्षं पौष्णम् । द्वितीया जगती शिष्टास्त्रिष्टुभः । तथा चानुक्रान्तं—'शुक्रं चतुष्कं द्वितीया जगती' इति । वैश्वदेवे पर्वणि पौष्णस्य हविषः 'शुक्रं ते' इति याज्या । सूत्रितं च—'शुक्रं ते अन्यद्यजतं ते अन्यदिहेह वः स्वतवसः' (आश्व. श्रौ. २·१६) इति । एकादशिनस्य पौष्णस्य पशोर्वपाया एषैव याज्या । सूत्रितं च—'शुक्रं ते अन्यद्यजतं ते अन्यत्प्रपथे पथामजनिष्ट पूषा' (आश्व. श्रौ. ३·७) इति । प्रवर्ग्याभिष्टवेऽप्येषा । सूत्रितं च—'शुक्रं ते अन्यद्यजतं ते अन्यदपश्यं गोपामनिपद्यमानम्' (आश्व. श्रौ. ४. ६) इति ॥

शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु ॥ १ ॥

शुक्रम् । ते । अन्यत् । यजतम् । ते । अन्यत् ।
विषुरूपे इति विषुऽरूपे । अहनी इति । द्यौःऽइव । असि ।
विश्वाः । हि । मायाः । अवसि । स्वधाऽवः । भद्रा । ते । पूषन् । इह । रातिः । अस्तु ॥ १ ॥

हे पूषन् ᵛते तव ᵛशुक्रं शुक्लवर्णम् ᵛअन्यत् एकम् अहर्भवति वासरात्मकम् । तथा ᵛते तव संबन्धि ᵛयजतम् । यजिरत्र संगतिकरणे वर्तते । यजनीयं प्रकाशेन संगमनीयं स्वतः कृष्णवर्णम् ᵛअन्यत् एकम् अहर्भवति रात्र्यात्म्यम् । इत्थं ᵛविषुरूपे शुक्लकृष्णतया नानारूपे ᵛअहनी तव महिम्ना निष्पद्येते । यद्वा । हे पूषन् त्वदीयमन्यदेकं रूपं शुक्रं निर्मलं दिवसस्योत्पादकम् । त्वदीयमन्यदेकं रूपं यजतं केवलं यजनीयं न प्रकाशकं रात्रेरुत्पादकम् । अत एव विषुरूपे विषमरूपे अहनी अहश्च रात्रिश्च भवतः । अहोरात्रयोर्निर्माणे सूर्य एव कर्ता कथमस्य प्रसक्तिरिति तत्राह । ᵛद्यौरिवासि । यथा द्यौरादित्यः प्रकाशयिता तथा त्वं प्रकाशकोऽसि । कुत इत्यत आह । हे ᵛस्वधावः अन्नवन् ᵛपूषन् ᵛविश्वाः

---

१. ख-घ-भ – इन्द्रस्य पूष्णः ।

सर्वाः vमायाः प्रज्ञाः vहि यस्मात् कारणात् vअवसि रक्षसि अतः कारणात् त्वं सूर्य इव भवसीत्यर्थः। तादृशस्य vते तव vभद्रा कल्याणी vरातिः दानम् vइह अस्मासु vअस्तु भवतु। यास्कस्त्वाह— 'शुक्रं ते अन्यद्यजतं ते अन्यद्यज्ञियं[1] ते अन्यदयज्ञियं ते अन्यत्' इति[2] वा[2] विषमरूपे अहनी[3] कर्मणा द्यौरिव चासि। सर्वाणि च प्रज्ञानान्यवस्यन्नवन्' (निरु. १२. १७) इति ॥

अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः।
अष्ट्रां पूषा शिथिरामुद्वरीवृजत्संचक्षाणो भुवना देव ईयते ॥ २ ॥

अजऽअश्वः। पशुऽपाः। वाजऽपस्त्यः। धियम्ऽजिन्वः। भुवने। विश्वे। अर्पितः। अष्ट्राम्। पूषा। शिथिराम्। उत्ऽवरीवृजत्। सम्ऽचक्षाणः। भुवना। देवः। ईयते ॥ २ ॥

vअजाश्वः छागवाहनः vपशुपाः पशूनां पालयिता vवाजपस्त्यः। वाजा अन्नानि पस्त्ये गृहे यस्य तादृशः। vधियंजिन्वः। धियः स्तोतारः कर्माणि वा। तेषां प्रीणयिता vविश्वे विश्वस्मिन् सर्वस्मिन् vभुवने लोके vअर्पितः प्रजापतिना पोषकत्वेन स्थापितः। अत एवंभूतः vपूषा पोषको vदेवः vअष्ट्राम् आरां स्वहस्तगतां vशिथिरां शिथिलां सतीम् vउद्वरीवृजत् उद्यच्छन् vभुवना भुवनानि सर्वान् लोकान् भूतजातानि वा vसंचक्षाणः संपश्यन् सूर्यात्मना प्रकाशयन् vईयते नभसि गच्छति ॥

पौष्णस्य पशोर्वपापुरोडाशयोः 'यास्ते पूषन्' इत्यादिके द्वे ऋचौ अनुवाक्ये। सूत्रितं च— 'यास्ते पूषन्नावो अन्तः समुद्र इति द्वे पूषेमा आशा अनु वेद सर्वाः' (आश्व. श्रौ. ३. ७) इति ॥

यास्ते पूषन्नावो अन्तः समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति।
ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमानः ॥ ३ ॥

याः। ते। पूषन्। नावः। अन्तरिति। समुद्रे। हिरण्ययीः। अन्तरिक्षे। चरन्ति। ताभिः। यासि। दूत्याम्। सूर्यस्य। कामेन। कृत। श्रवः। इच्छमानः ॥ ३ ॥

हे vपूषन् vते त्वदीयाः vयाः vहिरण्ययीः हिरण्मय्यो हितरमणीयाः vनावः vसमुद्रे उदधौ vअन्तः मध्ये vअन्तरिक्षे नभसि vचरन्ति संचरन्ति vताभिः नौभिः vसूर्यस्य vदूत्यां vयासि गच्छसि। कदाचित् देवैः सार्धं सूर्येऽसुरवधार्थं प्रस्थिते सति तस्य भार्या स्वभर्तरि संजातौत्सुक्या बभूव तां प्रति सूर्यः पूषणं प्राहैषीत् तेन चात्र पूषा स्तूयते। अपि च त्वं vश्रवः हविर्लक्षणमन्नम् vइच्छमानः इच्छन् vकामेन पश्वादिविषयेण स्तोतृभिः vकृतः वशीकृतोऽसि ॥

पूषा सुबन्धुर्दिव आ पृथिव्या इळस्पतिर्मघवा दस्मवर्चाः।
यं देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वञ्चम् ॥ ४ ॥

पूषा। सुऽबन्धुः। दिवः। आ। पृथिव्याः। इळः। पतिः। मघऽवा। दस्मऽवर्चाः। यम्। देवासः। अददुः। सूर्यायै। कामेन। कृतम्। तवसम्। सुऽअञ्चम् ॥ ४ ॥

---

१. ख-ज्ञ-त-न-भ-र—अन्यद्यजतं ते अन्यद्यज्ञियं ते अन्यत्; श—अन्यद्यज्ञियं ते अन्यत्। २. ज्ञ-भ—'इति वा' नास्ति। ३. ज्ञ—ते अहनी।

vपूषा पोषको देवः vदिव vआ द्युलोकस्य च vपृथिव्याः च vसुबन्धुः शोभनो[1] बन्धुर्भवति[1]। तथा vइळस्पतिः इळाया अन्नस्य पतिः vमघवा। मघमिति धननाम। तद्वान्। यद्वा। मंहतेर्दानकर्मणो भावसाधनो मघशब्दः। दानवान् vदस्मवर्चाः। वर्च इति रूपनाम। दस्मं दर्शनीयं वर्चो यस्य तादृशः। vयं पूषणं vदेवासः सर्वे देवाः vसूर्यायै सूर्यस्य पत्न्यै यद्वा सावित्र्यै सूर्यारूयायै अश्विनोर्वरणाय vअददुः दत्तवन्तः। 'पुत्रः पितरावृणीत पूषा' (ऋ. सं. १०. ८५. १४) इति हि श्रूयते। कीदृशं पूषणम्। vकामेन पश्चादिविषयेण vकृतं स्तोतृभिर्वशीकृतं vतवसं बलवन्तं प्रवृद्धं वा vस्वञ्चं स्वञ्चनं सुष्ठु गच्छन्तम्। एवंविधं यं पूषणमददुः स पूषा सुबन्धुरित्यन्वयः॥ ॥ २४ ॥

'प्र नु वोचा' इति दशर्चं दशमं सूक्तं भरद्वाजस्यार्षमिन्द्राग्निदेवताकम्। सप्तम्याद्याश्चतस्रोऽनुष्टुभः शिष्टाः षट् बृहत्यः। तथा चानुक्रान्तं—'प्र नु दशैन्द्राग्नं तु बार्हतं चतुरनुष्टुबन्तम्' इति। गतो विनियोगः॥

प्र नु वोचा सुतेषु वां वीर्या३ यानि चक्रथुः।
हतासो वां पितरो देवशत्रव इन्द्राग्नी जीवथो युवम्॥ १॥

प्र। नु। वोच। सुतेषु। वाम्। वीर्या। यानि। चक्रथुः।
हतासः। वाम्। पितरः। देवऽशत्रवः। इन्द्राग्नी इति। जीवथः। युवम्॥ १॥

हे इन्द्राग्नी vयानि vवीर्या वीर्याणि वीरकर्माणि vचक्रथुः कृतवन्तौ युवां vसुतेषु अभिषुतेषु सोमेषु अस्मद्यज्ञे vवां युवयोः तानि वीर्याणि vनु क्षिप्रं vप्र vवोच प्रवोचं प्रब्रवीमि। तदेव वीर्यं दर्शयति। हे vइन्द्राग्नी vदेवशत्रवः। देवाः शत्रवः[2] शातयितारो येषां तादृशाः। असुराः vपितरः हिंसकाः। पीयतिर्हिंसाकर्मा। तस्यैतद्रूपम्। ईदृशा असुराः vवां युवाभ्यां vहतासः हताः आसन्। vयुवं युवां तु vजीवथः जीवनवन्तौ[3] भवथः। असुरैर्न बाधिताविति यावत्॥

बळित्था महिमा वामिन्द्राग्नी पनिष्ठ आ।
समानो वां जनिता भ्रातरा युवं यमाविहेहमातरा॥ २॥

बट्। इत्था। महिमा। वाम्। इन्द्राग्नी इति। पनिष्ठः। आ।
समानः। वाम्। जनिता। भ्रातरा। युवम्। यमौ। इहेहऽमातरा॥ २॥

हे vइन्द्राग्नी vवां युवयोः vमहिमा महत्त्वम् vइत्था इत्थमनेन प्रकारेण vबट् सत्यम्। युष्मद्विषयं यज्ञममहत्त्वं प्रतिपाद्यते तत्सर्वं यथार्थमित्यर्थः। vपनिष्ठ vआ पनिष्ठः स्तुत्यतमश्च प्रजापतिः vसमानः एक एव vवां युवयोः vजनिता जनयिता। अतः vयुवं युवां vभ्रातरा भ्रातरौ स्थः। अपि च vयमौ यमलौ सहोत्पन्नौ vइहेहमातरा। इह चेह च सर्वत्र माता ययोस्तादृशौ स्थः। अदितिर्हि अनयोर्माता सैव विस्तीर्णा भूमिरिति इहेहमातराविति श्रूयते[4]॥

---

१. श—शोभनबन्धु°। २. ख-ज्ञ-न-भ—'शत्रवः' नास्ति। ३. ख-भ-जीववन्तौ। ४. ख-ज्ञ-ज्ञ-त-न-भ-र—स्तूयते।

ओकिवांसा सुते सचाँ अश्वा सप्तीइवादने ।
इन्द्रा नवाग्नी अवसेह वज्रिणा वयं देवा हवामहे ॥ ३ ॥

ओकिऽवांसा । सुते । सचा । अश्वा । सप्तीइवेति सप्तीऽइव । आदने ।
इन्द्रा । नु । अग्नी इति । अवसा । इह । वज्रिणा । वयम् । देवा । हवामहे ॥ ३ ॥

हे इन्द्राग्नी [v]सुते अभिषुते सोमे युवां [v]सचा सह [v]ओकिवांसा ओकिवांसौ समवेतौ संगतौ भवतम् । 'उच समवाये' इत्यस्यैतद्रूपम् । तत्र दृष्टान्तः । [v]आदने भक्षणीये घासे [v]सप्तीइव [v]अश्वा सर्पणशीलावश्वाविव । [v]नु अद्य [v]वयं तादृशौ इन्द्राग्नी [v]इह अस्मिन् यज्ञे [v]अवसा रक्षणेन हेतुना [v]हवामहे आह्वयामहे ॥ इतरेतरयोगात् इन्द्रशब्दे अग्निशब्दे च द्विवचनम् ॥ कीदृशाविन्द्राग्नी । [v]वज्रिणा वज्रिणावायुधोपेतौ [v]देवा[1] दानादिगुणयुक्तौ ॥

य इन्द्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा ।
जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन ॥ ४ ॥

यः । इन्द्राग्नी इति । सुतेषु । वाम् । स्तवत् । तेषु । ऋतऽवृधा ।
जोषऽवाकम् । वदतः । पज्रऽहोषिणा । न । देवा । भसथः । चन ॥ ४ ॥

हे [v]ऋतावृधा ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितारौ [v]इन्द्राग्नी [v]सुतेषु अभिषुतेषु सोमेषु [v]यः स्तोता [v]वां युवां [v]स्तवत् कुत्सितं स्तूयात् [v]तेषु सोमेषु मध्ये [v]जोषवाकं [v]वदतः जोषं जोषयितव्यं प्रीतिहेतुत्वेन कर्तव्यं स्वयमप्रीतिकरं तादृशं वाकं[2] वाक्यं वदतस्तस्य स्तोतुः सोमं हे [v]पज्रहोषिणा पज्रैः प्राजितः प्रसिद्धो होषो घोषः स्तोत्रं ययोस्तादृशौ हे [v]देवा देवौ युवां [v]न [v]भसथः न भक्षयथः । [v]चन इति पादपूरणः । अत्र निरुक्तं—'जोषवाकमित्यविज्ञातनामधेयं जोषयितव्यं भवति । य इन्द्राग्नी सुतेषु वां सोमेषु स्तौति तेष्वृतस्य वर्धयितारौ न तस्याभीथः । अथ योऽयं जोषवाकं वदति विजऋपः प्राजितहोषिणौ देवौ[3] न[3] तस्याभीथः' (निरु. ५. २२) इति ॥

इन्द्राग्नी को अस्य वां देवौ मर्तश्चिकेतति ।
विषूचो अश्वान्युयुजान ईयत एकः समान आ रथे ॥ ५ ॥

इन्द्राग्नी इति । कः । अस्य । वाम् । देवौ । मर्तः । चिकेतति ।
विषूचः । अश्वान् । युयुजानः । ईयते । एकः । समाने । आ । रथे ॥ ५ ॥

हे [v]देवौ द्योतमानौ [v]इन्द्राग्नी [v]वां युवयोः [v]अस्य इदं कर्म [v]कः [v]मर्तः मनुष्यः [v]चिकेतति जानीयात् । न कोऽपीत्यर्थः । किं तत्कर्म । [v]विषूचः[4] नानाञ्चतो गच्छतः [v]अश्वान् [v]समाने उभयार्थ एकस्मिन् [v]रथे युवयोः [v]एकः इन्द्रः सूर्यात्मना वर्तमानः [v]युयुजानः तादृशानश्वान् योजयन् [v]आ [v]ईयते सर्वं जगदभिगच्छति । यद्वा । विषूचो नानारूपानश्वान् व्यापकान् समान एकरूपे रथे संवत्सरात्मके युयुजानो योजयन् युवयोरेकः सूर्यात्मेन्द्र एयते आगच्छति । एतद्युवयोः कर्म को यथावज्जानीयादित्यर्थः ॥ ॥ २५ ॥

---

१. ख-भ-देवा देवौ । २. ख-ज्ञ-भ-'वाकं' नास्ति । ३. ज्ञ-न देवौ । ४. श-विषूचः विष्वक् ।

इन्द्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः ।
हित्वी शिरो जिह्वया वावदच्चरत्त्रिंशत्पदा न्यक्रमीत् ॥ ६ ॥

इन्द्राग्नी इति । अपात् । इयम् । पूर्वी । आ । अगात् । पत्ऽवतीभ्यः ।
हित्वी । शिरः । जिह्वया । वावदत् । चरत् । त्रिंशत् । पदा । नि । अक्रमीत् ॥ ६ ॥

हे ᵛइन्द्राग्नी ᵛअपात् पादरहिता ᵛइयम् उषाः ᵛपद्वतीभ्यः पादयुक्ताभ्यः सुताभ्यः प्रजाभ्यः ᵛपूर्वा प्रथमभाविनी सती ᵛआगात् आगच्छति । तथा प्राणिनां ᵛशिरः ᵛहित्वी प्रेरयित्री । यद्वा । शिरो हित्वा त्यक्त्वा स्वयमशिरस्का सती । ᵛजिह्वया प्राणिस्थया तदीयेन वागिन्द्रियेण ᵛवावदत् भृशं शब्दं कुर्वती ᵛचरत् । एवं चरन्ती उषाः ᵛत्रिंशत् पदानि अवयवभूतान् त्रिंशन्मुहूर्तान् ᵛन्यक्रमीत् एकेन दिवसेनातिक्रामति । एतच्च युवयोः कर्म । तत् को जानीयादिति पूर्वत्रान्वयः ॥

इन्द्राग्नी आ हि तन्वते नरो धन्वानि बाह्वोः ।
मा नो अस्मिन्महाधने परा वर्क्तं गविष्टिषु ॥ ७ ॥

इन्द्राग्नी इति । आ । हि । तन्वते । नरः । धन्वानि । बाह्वोः ।
मा । नः । अस्मिन् । महाऽधने । परा । वर्क्तम् । गोऽइष्टिषु ॥ ७ ॥

हे ᵛइन्द्राग्नी ᵛनरः योद्धारो मनुष्याः ᵛबाह्वोः हस्तयोः ᵛधन्वानि धनूंषि ᵛआ ᵛतन्वते ᵛहि आततज्यानि कुर्वते ᵛहि । युवां च ᵛअस्मिन् ᵛमहाधने जेतव्येन महाधनेनोपेते संग्रामे ᵛगविष्टिषु गवामन्वेषणेषु ᵛनः अस्मान् ᵛमा ᵛपरा ᵛवर्क्तम् । मा परित्यजतम् ॥

इन्द्राग्नी तपन्ति मा घा अर्यो अरातयः । अप द्वेषांस्या कृतं युयुतं सूर्यादधि ॥८॥

इन्द्राग्नी इति । तपन्ति । मा । अघाः । अर्यः । अरातयः ।
अप । द्वेषांसि । आ । कृतम् । युयुतम् । सूर्यात् । अधि ॥ ८ ॥

हे ᵛइन्द्राग्नी ᵛअघाः आहन्तव्यः ᵛअर्यः अभिगन्तव्यः ᵛअरातयः शत्रुसेनाः ᵛमा ᵛतपन्ति मां बाधन्ते । ताः ᵛअप ᵛआ ᵛकृतम् अपाकुरुतम् । तथा ᵛद्वेषांसि द्वेष्टॄन् शत्रून् ᵛसूर्यादधि । अधिः पञ्चम्यर्थानुवादकः । सूर्यदर्शनात् ᵛयुयुतं पृथक्कुरुतं च । यथा ते सूर्यं न पश्यन्ति तथा कुरुतम् । मारयतमित्यर्थः ॥

इन्द्राग्नी युवोरपि वसु दिव्यानि पार्थिवा ।
आ न इह प्र यच्छतं रयिं विश्वायुपोषसम् ॥ ९ ॥

इन्द्राग्नी इति । युवोः । अपि । वसु । दिव्यानि । पार्थिवा ।
आ । नः । इह । प्र । यच्छतम् । रयिम् । विश्वायुऽपोषसम् ॥ ९ ॥

हे ᵛइन्द्राग्नी ᵛयुवोः युवयोः ᵛदिव्यानि दिवि भवानि ᵛपार्थिवा पृथिव्यां भवानि लोकद्वयसंबन्धीनि ᵛवसु वसूनि ᵛअपि हितानि युवयोरेव वर्तन्ते । अतः कारणात् ᵛइह अस्मिन् यज्ञे ᵛनः

अस्मभ्यं ᵛरयिं धनम् ᵛआ अभि ᵛप्र ᵛयच्छतम्। कीदृशं रयिम्। ᵛविश्वायुपोषसम्। आयव इति मनुष्यनाम। सर्वेषां मनुष्याणां पोषणाय पर्याप्तम्। यद्वा। सर्वस्यायुषः पोषणे शक्तम्। छान्दसो वर्णलोपः ॥

इन्द्राग्नी उक्थवाहसा स्तोमेभिर्हवनश्रुता ।
विश्वाभिर्गीर्भिरा गतमस्य सोमस्य पीतये ॥ १० ॥

इन्द्राग्नी इति । उक्थऽवाहसा । स्तोमेभिः । हवनऽश्रुता ।
विश्वाभिः । गीःऽभिः । आ । गतम् । अस्य । सोमस्य । पीतये ॥ १० ॥

हे ᵛउक्थवाहसा उक्थैः स्तुतिभिः वहनीयौ हे ᵛहवनश्रुता हवनस्याह्वानस्य श्रोतारौ एवंभूतौ हे ᵛइन्द्राग्नी ᵛस्तोमेभिः स्तोत्रैः ᵛविश्वाभिः सर्वाभिः ᵛगीर्भिः शस्त्ररूपाभिर्वाग्भिश्च[1] हेतुभूताभिः ᵛआ ᵛगतम् आगच्छतम्। किमर्थम्। ᵛअस्य अस्मदीयस्य ᵛसोमस्य ᵛपीतये पानार्थम् ॥ ॥ २६ ॥

'अथद्वृत्रम्' इति पञ्चदशर्चमेकादशं सूक्तं भरद्वाजस्यार्षमैन्द्राग्नम्। आदौ तिस्रस्त्रिष्टुभः चतुर्थ्याद्या नव गायत्र्यः त्रयोदशी त्रिष्टुप् चतुर्दशी बृहती पञ्चदश्यनुष्टुप्। तथा चानुक्रान्तं— 'अथत्पञ्चोना गायत्रं तु त्रिष्टुबादि त्रिष्टुब्बृहत्यनुष्टुबन्तम्' इति। गतः सूक्तविनियोगः। वरुणप्रघासेषु ऐन्द्राग्नस्य हविषः 'अथत्' इत्येषा याज्या। सूत्रितं च—'इन्द्राग्नी अवसा गतं अथद्वृत्रमुत सनोति वाजम्' (आश्व. श्रौ. २. १७) इति ॥

अथद्वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी सहुरी सपर्यात् ।
इरज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाजयन्ता ॥ १ ॥

अथत्। वृत्रम्। उत। सनोति। वाजम्। इन्द्रा। यः। अग्नी इति। सहुरी इति। सपर्यात्।
इरज्यन्ता। वसव्यस्य। भूरेः। सहःऽतमा। सहसा। वाजऽयन्ता ॥ १ ॥

स पुरुषः ᵛवृत्रम् आवरकं शत्रुं ᵛअथत् हिनस्ति। ᵛउत अपि च ᵛवाजम् अन्नं बलं वा ᵛसनोति लभते। ᵛयः पुरुषः ᵛसहुरी शत्रूणामभिभवितारौ इन्द्राग्नी ᵛसपर्यात् परिचरेत्। इतरेतरयोगात् उभयत्र पूर्ववत् द्विवचनम्। कीदृशाविन्द्राग्नी। ᵛभूरेः प्रभूतस्य ᵛवसव्यस्य वसुसमूहस्य[2]। यद्वा। स्वार्थिको यत्। धनस्य ᵛइरज्यन्ता ईशानौ स्वामिनौ। इरज्यतिरैश्वर्यकर्मा। ᵛसहसा बलेन ᵛसहस्तमा अतिशयेनाभिभवितारौ शत्रूणां ᵛवाजयन्ता वाजं हविर्लक्षणमन्नमात्मन इच्छन्तौ। यद्वा। वाजं स्तोतृभ्यो दातव्यमन्नं कामयमानौ ॥

ता योधिष्टमभि गा इन्द्र नूनमपः स्वरुषसो अग्न ऊळ्हाः ।
दिशः स्वरुषस इन्द्र चित्रा अपो गा अग्ने युवसे नियुत्वान् ॥ २ ॥

ता। योधिष्टम्। अभि। गाः। इन्द्र। नूनम्। अपः। स्वः। उषसः। अग्ने। ऊळ्हाः।
दिशः। स्वः। उषसः। इन्द्र। चित्राः। अपः। गाः। अग्ने। युवसे। नियुत्वान् ॥ २ ॥

---

१. श–स्तुतिरूपाभि°। २. ख-ङ्ग-भ-र–वासयितव्यस्य।

हे ᵛइन्द्र हे ᵛअग्ने ᵛता तौ युवां ᵛगाः ᵛअपः उदकानि ᵛस्वः सूर्यम् ᵛउषसः उषःकालान् ᵛऊळ्हाः पणिभिरपहृता एतान् गवादीनभिलक्ष्य ᵛयोधिष्टम्। तैरसुरैर्युद्धं कृतवन्तौ। ᵛनूनम् इति पादपूरणार्थः। हे ᵛइन्द्र त्वं ᵛदिशः प्राच्याद्याः ᵛस्वः सूर्यम् ᵛउषसः च ᵛचित्राः चायनीयाः ᵛअपः उदकानि च ᵛगाः च पणिभिरपहृतानेतान् ᵛयुवसे अनेन लोकेनायोजयः। यद्वा। असुरैरावृतान् दिगादीन् असुरवधेनावरणमपनीय पृथक्कृतवानसीत्यर्थः। हे ᵛअग्ने ᵛनियुत्वान् नियुद्भिरश्वैर्युक्तः सन् त्वमप्येवमकार्षीरित्यर्थः॥

ऐन्द्राग्नस्य पशोर्वपायाः 'आ वृत्रहणा' इत्यनुवाक्या। सूत्रितं च—'आ वृत्रहणा वृत्रहभिः शुष्मैरा भरतं शिक्षतं वज्रबाहू' (आश्व. श्रौ. ३. ७) इति॥

आ वृत्रहणा वृत्रहभिः शुष्मैरिन्द्राग्नी यातं नमोभिरग्ने अर्वाक्।
युवं राधोभिरकवेभिरिन्द्राग्ने अस्मे भवतमुत्तमेभिः॥ ३॥

आ। वृत्रऽहना। वृत्रहऽभिः। शुष्मैः। इन्द्राग्नी इति। यातम्। नमःऽभिः। अग्ने। अर्वाक्।
युवम्। राधःऽभिः। अकवेभिः। इन्द्र। अग्ने। अस्मे इति। भवतम्। उत्ऽतमेभिः॥३॥

हे ᵛवृत्रहणा वृत्रस्यासुरस्य हन्तारौ हे ᵛइन्द्र हे ᵛअग्ने ᵛवृत्रहभिः वृत्रस्य हन्तृभिः वृत्रहनननिमित्तैः ᵛशुष्मैः बलैः ᵛनमोभिः अस्मभ्यं दातव्यैरन्नैश्च सार्धम् ᵛअर्वाक् अस्मदभिमुखम् ᵛआ ᵛयातम् आगच्छतम्। हे ᵛइन्द्र हे ᵛअग्ने ᵛयुवं युवाम् ᵛअकवेभिः अकुत्सितैः महद्भिः ᵛउत्तमेभिः उत्कृष्टतमैः ᵛराधोभिः धनैः सह ᵛअस्मे अस्मासु ᵛभवतम् आविर्भवतम्॥

चातुर्विंशिकेऽहनि प्रातःसवनेऽच्छावाकशस्त्रे 'ता हुवे' इति षडृस्तोत्रियस्तृचः। सूत्रितं च—'ता हुवे ययोरिदमियं वामस्य मन्मनः' (आश्व. श्रौ. ७. २) इति। पृष्ठ्याभिप्लवषडहयोः स्तोमवृद्धौ 'ता हुवे' इत्याद्या नवर्चं आवापार्थाः। सूत्रितं च—'ता हुवे ययोरिदमिति नवेयं वामस्य मन्मन इत्येकादश' (आश्व. श्रौ. ७. ५) इति॥

ता हुवे ययोरिदं पप्रे विश्वं पुरा कृतम्। इन्द्राग्नी न मर्धतः॥ ४॥

ता। हुवे। ययोः। इदम्। पप्रे। विश्वम्। पुरा। कृतम्। इन्द्राग्नी इति। न। मर्धतः॥४॥

ᵛता तौ तादृशाविन्द्राग्नी ᵛहुवे आह्वये। ᵛययोः इन्द्राग्न्योः ᵛपुरा पूर्वस्मिन् काले ᵛकृतं ᵛविश्वं सर्वम् ᵛइदं पूर्वासु ऋक्षु कीर्तितं वीर्यं ᵛपप्रे पन्यते ऋषिभिः स्तूयते। ताविन्द्राग्नी हुवे इत्यन्वयः। तौ च ᵛइन्द्राग्नी ᵛन ᵛमर्धतः स्तोतॄन् हिंस्तः। अतोऽस्मान्प्याहूतौ रक्षतामिति भावः। मर्धतिर्हिंसाकर्मा॥

उग्रा विघनिना मृध इन्द्राग्नी हवामहे। ता नो मृळात ईदृशे॥ ५॥

उग्रा। विऽघनिना। मृधः। इन्द्राग्नी इति। हवामहे। ता। नः। मृळातः। ईदृशे॥५॥

ᵛउग्रा उग्रौ उदूर्णबलावत एव ᵛमृधः शत्रून् ᵛविघनिना विघनिनौ विशेषेण हतवन्तौ ᵛइन्द्राग्नी ᵛहवामहे आह्वयामहे। तौ[1] चेन्द्राग्नी ᵛईदृशे अस्मिन् संग्रामे ᵛनः अस्मान् ᵛमृळातः सुखयताम्। यद्वा। मृळतिरुपदयाकर्मा। नोऽस्माकं मृळातः उपदयां कुरुताम्॥ ॥ २७॥

---

१. ख-भ—ता तौ।

हतो वृत्राण्यार्या हतो दासानि सत्पती । हतो विश्वा अप द्विषः ॥ ६ ॥

हतः । वृत्राणि । आर्या । हतः । दासानि । सत्पती इति सत्ऽपती ।

हतः । विश्वाः । अप । द्विषः ॥ ६ ॥

ताविन्द्राग्नी ᵛआर्या आर्यैः कर्मानुष्ठातृभिः कृतानि ᵛवृत्राणि उपद्रवजातानि ᵛहतः हिंस्तः । तथा ᵛसत्पती सतां पालयितारौ इन्द्राग्नी ᵛदासानि । दासाः कर्महीनाः शत्रवः । तैः कृतानि चोपद्रवजातानि ᵛहतः । अपि च ᵛविश्वाः सर्वाः ᵛद्विषः द्वेष्ट्रीः शत्रुभूताः प्रजाः ᵛअप ᵛहतः विनाशयतः । अतोऽस्माकमप्येवमेव कुरुतामिति भावः ॥

चातुर्वैशिकेऽहनि प्रातःसवनेऽच्छावाकशस्त्रे 'इन्द्राग्नी युवाम्' इति षडहस्तोत्रियस्तृचः । सूत्रितं च—'इन्द्राग्नी युवामिमे यज्ञस्य हि स्थ ऋत्विजेत्यच्छावाकस्य' (आश्व. श्रौ. ७.२) इति ॥

इन्द्राग्नी युवामिमे३भि स्तोमा अनूषत । पिबतं शंभुवा सुतम् ॥ ७ ॥

इन्द्राग्नी इति । युवाम् । इमे । अभि । स्तोमाः । अनूषत । पिबतम् । शम्ऽभुवा । सुतम् ॥७॥

हे ᵛइन्द्राग्नी ᵛयुवामिमे ᵛस्तोमाः स्तोतारः ᵛअभि ᵛअनूषत अभिष्टुवन्ति । हे ᵛशंभुवा सुखस्य भावयितारावित्यन्द्राग्नी ᵛसुतम् अभिषुतमस्मदीयं सोमं ᵛपिबतम् ॥

या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा । इन्द्राग्नी ताभिरा गतम् ॥ ८ ॥

याः । वाम् । सन्ति । पुरुऽस्पृहः । निऽयुतः । दाशुषे । नरा ।

इन्द्राग्नी इति । ताभिः । आ । गतम् ॥ ८ ॥

हे ᵛनरा नेतारावित्यन्द्राग्नी ᵛवां युवयोः स्वभूताः ᵛपुरुस्पृहः पुरुभिर्बहुभिः स्पृहणीयाः ᵛदाशुषे हवींषि दत्तवते यजमानार्थमुत्पन्नाः ᵛयाः ᵛनियुतः अश्वाः ᵛसन्ति हे ᵛइन्द्राग्नी ᵛताभिः नियुद्भिः ᵛआ ᵛगतम् आगच्छतम् ॥

ताभिरा गच्छतं नरोपेदं सवनं सुतम् । इन्द्राग्नी सोमपीतये ॥ ९ ॥

ताभिः । आ । गच्छतम् । नरा । उप । इदम् । सवनम् । सुतम् । इन्द्राग्नी इति । सोमऽपीतये ॥९॥

हे ᵛनरा नेतारौ ᵛइन्द्राग्नी । सूयतेऽभिषूयत इति सवनः सोमः । ᵛइदं ᵛसवनम् इमं सोमं ᵛसुतम् अभिषुतम् ᵛउप प्रति । यद्वा । इदं प्रातःसवनमुप अस्मिन् सवने सुतमभिषुतं सोमं प्रति ᵛताभिः नियुद्भिः ᵛआ ᵛगच्छतम् । किमर्थम् । ᵛसोमपीतये तस्य सोमस्य पानार्थम् ॥

तमीळिष्व यो अर्चिषा वना विश्वा परिष्वजत् । कृष्णा कृणोति जिह्वया ॥१०॥

तम् । ईळिष्व । यः । अर्चिषा । वना । विश्वा । परिऽस्वजत् । कृष्णा । कृणोति । जिह्वया ॥१०॥

हे स्तोतः ᵛतम् अग्निम् ᵛईळिष्व स्तुहि । ᵛयः अग्निः ᵛअर्चिषा ज्वालारूपेण तेजसा ᵛविश्वा सर्वाणि ᵛवना[1] अरण्यानि[1] ᵛपरिष्वजत् परिष्वजति परितो वेष्टयति । यश्च तानि वनानि ᵛजिह्वया ज्वालया दग्ध्वा ᵛकृष्णा कृष्णवर्णानि ᵛकृणोति करोति[2] ॥ ॥ २८ ॥

---

१. ख-ञ-न-भ-र-श—वनान्यरण्यानि; ञ-त-वनान्यारण्यानि; य-वन्यान्यरण्यानि । २. घ-ञ-त-न-श—करोति तमीळिष्वेति संबन्धः ।

य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः । द्युम्नाय सुतरा अपः ॥ ११ ॥

यः । इद्धे । आऽविवासति । सुम्नम् । इन्द्रस्य । मर्त्यः । द्युम्नाय । सुऽतराः । अपः ॥११॥

[v]यः [v]मर्त्यः मनुष्यः [v]इद्धे दीप्तेऽग्नौ [v]सुम्नं सुखकरं हविः [v]इन्द्रस्य इन्द्राय [v]आविवासति परिचरति प्रयच्छति । चतुर्थ्यर्थे षष्ठी । तस्य मर्त्यस्य [v]द्युम्नाय द्योतमानायान्नाय तदर्थं [v]सुतराः सुखेन तरणीयाः [v]अपः उदकानि वृष्ट्यात्मकानि[1] इन्द्रः करोतीति शेषः ॥

ता नो वाजवतीरिषं आशून्पिपृतमर्वतः । इन्द्रमग्निं च वोळ्हवे ॥ १२ ॥

ता । नः । वाजऽवतीः । इषः । आशून् । पिपृतम् । अर्वतः । इन्द्रम् । अग्निम् । च । वोळ्हवे ॥१२॥

हे इन्द्राग्नी [v]ता तौ युवां [v]वाजवतीः अन्नवतीः [v]इषः इष्यमाणा वृष्टीः । यद्वा । वाजो बलम् । तद्वतीरिषोऽन्नानि [v]आशून् शीघ्रगान् [v]अर्वतः अश्वांश्च [v]नः अस्मभ्यं [v]पिपृतं पूरयतम् । प्रयच्छतम् । किमर्थम् । [v]इन्द्रमग्निं [v]च युवां [v]वोळ्हवे वोढुं हविर्भिः प्रापयितुम् ॥

ऐन्द्राग्नस्य पञ्चोर्हविषोऽनुवाक्या ' उभा वाम् ' इत्येषा । सूत्रितं च—' उभा वामिन्द्राग्नी आहुवध्यै शुचिं नु स्तोमं नवजातमद्य ' (आश्व. श्रौ. ३. ७) इति ॥

उभा वामिन्द्राग्नी आहुवध्या उभा राधसः सह मादयध्यै ।
उभा दाताराविषां रयीणामुभा वाजस्य सातये हुवे वाम् ॥ १३ ॥

उभा । वाम् । इन्द्राग्नी इति । आऽहुवध्यै । उभा । राधसः । सह । मादयध्यै ।
उभा । दातारौ । इषाम् । रयीणाम् । उभा । वाजस्य । सातये । हुवे । वाम् ॥ १३ ॥

हे [v]इन्द्राग्नी [v]उभा उभौ संहत्य वर्तमानौ [v]वां युवां [v]हुवे आह्वयामि । किमर्थम् । [v]आहुवध्यै आभिमुख्येन होतुम् । तथा [v]उभा उभौ युवामाह्वये [v]राधसः राधसा राधकेन हविषा [v]सह युगपदेव [v]मादयध्यै मादयितुं तर्पयितुम् । सर्वेषु देवेषु सत्सु आवयोराह्वाने किं कारणमिति चेदुच्यते । [v]उभा उभौ तौ युवाम् [v]इषाम् अन्नानां [v]रयीणां धनानां च [v]दातारौ स्थः । अतः कारणात् [v]उभा उभौ [v]वां युवां [v]वाजस्य अन्नस्य [v]सातये संभजनाय हुवे आह्वये ॥

आ नो गव्यैभिरश्व्यैर्वसव्यै३रुप गच्छतम् ।
सखायौ देवौ सख्याय शंभुवेन्द्राग्नी ता हवामहे ॥ १४ ॥

आ । नः । गव्यैभिः । अश्व्यैः । वसव्यैः । उप । गच्छतम् ।
सखायौ । देवौ । सख्याय । शम्ऽभुवा । इन्द्राग्नी इति । ता । हवामहे ॥ १४ ॥

हे इन्द्राग्नी [v]गव्येभिः गोसमूहैः [v]अश्व्यैः अश्वसमूहैः [v]वसव्यैः वसुसमूहैश्च सार्धं [v]नः अस्मानाभिमुख्येन [v]उप [v]आ [v]गच्छतम् । शेषः परोक्षकृतः । [v]सखायौ समानख्यानौ [v]देवौ दानादिगुणयुक्तौ [v]शंभुवा शंभुवौ सुखस्य भावयितारौ [v]ता[2] तादृशौ [v]इन्द्राग्नी [v]सख्याय सखित्वार्थं वयं [v]हवामहे आह्वयामहे ॥

---

१. ख-घ-वृष्टयुदकानि; श–वृष्टया त्यक्तानि । २. ख-ङ्ग-भ–वा ।

इन्द्राग्नी शृणुतं हवं यजमानस्य सुन्वतः ।
वीतं हव्यान्या गतं पिबतं सोम्यं मधु ॥ १५ ॥

इन्द्राग्नी इति । शृणुतम् । हवम् । यजमानस्य । सुन्वतः ।
वीतम् । हव्यानि । आ । गतम् । पिबतम् । सोम्यम् । मधु ॥ १५ ॥

हे vइन्द्राग्नी vसुन्वतः सोमाभिषवं कुर्वतः vयजमानस्य vहवम् आह्वानं स्तोत्रं vशृणुतम् । श्रुत्वा च तदीयानि vहव्यानि हवींषि vवीतं कामयेथाम् । कामयित्वा च vआ vगतम् आगच्छतम् । आगत्य च vसोम्यं सोमात्मकं vमधु vपिबतम् ॥ ॥ २९ ॥

'इयमददात्' इति चतुर्दशर्चं द्वादशं सूक्तं भरद्वाजस्यार्षं सरस्वतीदेवताकम् । आदितस्तिस्रो जगत्यः त्रयोदश्यपि जगती चतुर्दशी त्रिष्टुप् शिष्टा गायत्र्यः । तथा चानुक्रान्तम्—'इयं षड्ना सारस्वतं त्रिजगत्यादि जगतीत्रिष्टुबन्तम्' इति । अत्र शौनकः—'इयमित्येतदाद्यं तु सूक्तं सारस्वतं जपेत् । द्विजः प्रातः शुचिर्भूत्वा वाग्मी भवति बुद्धिमान्' (ऋग्वि. २. २९५) इति । पार्ष्टिके षष्ठेऽहनि प्रउगे 'इयमददात्' इति सारस्वतस्तृचः । सूत्रितं च—'इयमददाद्रभसमृणच्युतमिति प्रउगम्' (आश्व. श्रौ. ८. १) इति ॥

इयमददाद्रभसमृणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे ।
या शश्वन्तमाचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति ॥ १ ॥

इयम् । अददात् । रभसम् । ऋणऽच्युतम् । दिवःऽदासम् । वध्रिऽअश्वाय । दाशुषे ।
या । शश्वन्तम् । आऽचखाद । अवसम् । पणिम् । ता । ते । दात्राणि । तविषा । सरस्वति ॥ १ ॥

vइयं सरस्वती vरभसं वेगवन्तम् vऋणच्युतं वैदिकस्य देवर्षिपितृसंबन्धिनो लौकिकस्य च ऋणस्य च्यावयितारं vदिवोदासम् एतत्संज्ञं पुत्रं vदाशुषे हवींषि दत्तवते vवध्र्यश्वाय एतत्संज्ञाय ऋषये vअददात् दत्तवती । vया सरस्वती vशश्वन्तं बहुलं vपणिं पणनशीलं वणिजमदातृजनम् vअवसं केवलं स्वात्मन एव तर्पकम् vआचखाद आजघान सेयमददादित्यन्वयः । अथ प्रत्यक्षीकृत्य स्तौति । हे vसरस्वति देवि vता तानि पुत्रदानादीनि vते त्वदीयानि vदात्राणि दानानि vतविषा तविषाणि महान्ति भवन्ति ॥

इयं शुष्मेभिर्बिसखाइवारुजत्सानुं गिरीणां तविषेभिरूर्मिभिः ।
पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीतिभिः ॥ २ ॥

इयम् । शुष्मेभिः । बिसखाःऽइव । अरुजत् । सानुं । गिरीणाम् । तविषेभिः । ऊर्मिऽभिः ।
पारावतऽघ्नीम् । अवसे । सुवृक्तिऽभिः । सरस्वतीम् । आ । विवासेम । धीतिऽभिः ॥ २ ॥

सरस्वती देवतारूपेण नदीरूपेण च वर्तते । देवतारूपा स्तुता । अधुनानया नदीरूपां सरस्वतीं स्तौति । vइयं नदीरूपा सरस्वती शुष्मैः[1] शोषकैरात्मीयैर्बलैः vतविषेभिः महद्भिः vऊर्मिभिः तरङ्गैः

१. घ-श-शुष्मेभिः शुष्मैः ।

vगिरीणां पर्वतानां तीरसंबद्धानां vसानु सानूनि vअरुजत् भनक्ति[1] । vबिसखाइव । बिसं खनतीति बिसखाः । स यथा बिसार्थं पङ्कं रुजति तद्वत् । तां vसरस्वतीं vपारावतघ्नीं परावति दूरदेशे विद्यमानस्यापि वृक्षादेर्हन्त्रीं vसुवृक्तिभिः स्तुतिभिः vधीतिभिः कर्मभिश्च vअवसे रक्षणार्थम् vआ vविवासेम परिचरेम । यद्वा । पारावतघ्नीं पारावारे परार्वाची तीरे । तयोर्घातिनीम् । उक्तं च— 'पारावतघ्नीं पारावारघातिनीम्' (निरु. २. २४) इति ॥

सरस्वति देवनिदो नि बर्हय प्रजां विश्वस्य बृसयस्य मायिनः ।
उत क्षितिभ्योऽवनीरविन्दो विषमेभ्यो अस्रवो वाजिनीवति ॥ ३ ॥

सरस्वति । देवऽनिदः । नि । बर्हय । प्रऽजाम् । विश्वस्य । बृसयस्य । मायिनः ।
उत । क्षितिऽभ्यः । अवनीः । अविन्दः । विषम् । एभ्यः । अस्रवः । वाजिनीऽवति ॥३॥

हे vसरस्वति vदेवनिदः देवानां निन्दकानसुरान् vनि vबर्हय न्यबर्हयः । अवधीः । तथा vविश्वस्य व्याप्तस्य vमायिनः मायाविनः vबृसयस्य । बृसय इति त्वष्टुर्नामधेयम् । त्वष्टुः vप्रजां पुत्रं वृत्रासुरं च न्यवधीः । त्वत्सहाय्यादेवेन्द्रो[2] हतवानित्यर्थः । vउत अपि च हे vवाजिनीवति अन्नवति सरस्वति त्वं vक्षितिभ्यः मनुष्येभ्यः vअवनीः असुरैरपहृता भूमीः vअविन्दः अलम्भयः । vएभ्यः मनुष्येभ्यः vविषम् उदकं च vअस्रवः अक्षारयः । यद्वा । क्षितयोऽसुरजनाः । तेभ्यः सकाशात् अवनीर्भूमीरविन्दः लब्धवत्यसि । तान् हत्वैभ्यश्चासुरेभ्यो विषं मृतिहेतुभूतं गरलमस्रवः ॥

प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती । धीनामवित्र्यवतु ॥ ४ ॥

प्र । नः । देवी । सरस्वती । वाजेभिः । वाजिनीऽवती । धीनाम् । अवित्री । अवतु ॥ ४ ॥

vदेवी दानादिगुणयुक्ता vवाजिनीवती । वाजोऽन्नं यस्यां[3] क्रियायां[4] सा वाजिनी । तद्युक्ता । vधीनां ध्यातॄणां स्तोतॄणाम् vअवित्री रक्षित्री । एवंभूता vसरस्वती vवाजेभिः अन्नैः vनः अस्मान् vप्र vअवतु प्रकर्षेण तर्पयतु ॥

यस्त्वा देवि सरस्वत्युपब्रूते धने हिते । इन्द्रं न वृत्रतूर्ये ॥ ५ ॥

यः । त्वा । देवि । सरस्वति । उपऽब्रूते । धने । हिते । इन्द्रम् । न । वृत्रऽतूर्ये ॥ ५ ॥

हे vदेवि vसरस्वति vयः स्तोता vवृत्रतूर्ये संग्रामे vधने vहिते निहिते निमित्तभूते सति vइन्द्रं vन इन्द्रमिव त्वाम् vउपब्रूते स्तौति तं[5] रक्षेति[6] शेषः ॥ ॥ ३० ॥

त्वं देवि सरस्वत्यवा वाजेषु वाजिनि । रदा पूषेव नः सनिम् ॥ ६ ॥

त्वम् । देवि । सरस्वति । अव । वाजेषु । वाजिनि । रद । पूषाऽइव । नः । सनिम् ॥ ६ ॥

हे vदेवि दानादिगुणयुक्ते हे vवाजिनि । वाजो बलमन्नं वा । तद्युक्ते हे vसरस्वति vत्वं vवाजेषु संग्रामेषु vअव अस्मान् रक्ष । अपि च vनः अस्मभ्यं vपूषेव पोषको देव इव vसनिं संभजनीयं धनं vरद विलिख । प्रयच्छेति यावत् ॥

---

१. ख-भ-भिनत्ति दृष्टान्तः; त-भुनक्ति । २. ख-भ-त्वत्सहायो देव इन्द्रो । ३. श-यस्याः । ४. ज्ञ-त-र-श-'क्रियायां' नास्ति । ५. ख-घ-भ-श-तं त्वम् । ६. घ-रक्षसीति ।

उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः । वृत्रघ्नी वष्टि सुष्टुतिम् ॥ ७ ॥

उत । स्या । नः । सरस्वती । घोरा । हिरण्यऽवर्तनिः । वृत्रऽघ्नी । वष्टि । सुऽस्तुतिम् ॥७॥

vउत अपि च vस्या सा प्रसिद्धा vसरस्वती vघोरा शत्रूणां भयकारिणी vहिरण्यवर्तनिः । वर्ततेऽनेनेति वर्तनी रथः । हिरण्ममयो वर्तनिर्यस्याः सा तथोक्ता । vवृत्रघ्नी वृत्राणां शत्रूणां हन्त्री । एवंभूता सा सरस्वती vनः अस्मदीयां vसुष्टुतिं शोभनां स्तुतिं vवष्टि कामयताम् ॥

यस्या अनन्तो अहुतस्त्वेषश्चरिष्णुरर्णवः । अमश्चरति रोरुवत् ॥ ८ ॥

यस्याः । अनन्तः । अहुतः । त्वेषः । चरिष्णुः । अर्णवः । अमः । चरति । रोरुवत् ॥ ८ ॥

vयस्याः सरस्वत्याः vअमः बलम् vअनन्तः अपर्यन्तोऽपरिमितः vअहुतः अहिंसितोऽकुटिलो वा vत्वेषः दीप्तः vचरिष्णुः चरणशीलः । सर्वत्राप्रतिहतगतिरित्यर्थः । vअर्णवः उदकवान् । उदकप्रद इत्यर्थः । एवंभूतः सन् vरोरुवत् भृशं शब्दं कुर्वन् vचरति वर्तते सा नो विश्वा इत्युत्तरत्र संबन्धः ॥

सा नो विश्वा अति द्विषः स्वसृरन्या ऋतावरी । अतन्नहेव सूर्यः ॥ ९ ॥

सा । नः । विश्वाः । अति । द्विषः । स्वसृः । अन्याः । ऋतऽवरी । अतन् । अहाऽइव । सूर्यः ॥९॥

vसा[1] सरस्वती vनः अस्मान् vविश्वाः सर्वाः vद्विषः द्वेष्ट्रीः प्रजाः vअति नयतु अतितारयतु । तथा vस्वसृः स्वयं सारिणीः सहोत्पन्ना वा vऋतावरीः । ऋतमित्युदकनाम । तद्युक्ताः vअन्याः च नदीरस्मानतिनयतु । यद्वा । जस्येव 'वा छन्दसि[2]' इति[2] पूर्वसवर्णदीर्घः । उदकवत्यः स्वसारो भगिन्योऽन्या गङ्गाद्या नद्यश्चास्मान्[3] शत्रून् अतिनयन्तु । तत्र दृष्टान्तः । vसूर्यः सर्वस्य प्रेरक आदित्यः vअतन् सततं गच्छन् vअहेव अहानीव । यथाहानि शीघ्रमतिनयति तद्वत् ॥

दशरात्रे तृतीयेऽहनि प्रउगे 'उत नः प्रिया' इति सारस्वतस्तृचः । सूत्रितं च—'उत नः प्रिया प्रियास्विन्द्राग्नी अहं प्रउगम्' (आश्व. श्रौ. ७. १०) इति । पवित्रेष्टयाम् 'उत नः प्रिया' इति सारस्वतस्य हविषोऽनुवाक्या । सूत्रितं च—'उत नः प्रिया प्रियास्विमा जुह्वाना युष्मदा नमोभिः' (आश्व. श्रौ. २. १२) इति ॥

उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा । सरस्वती स्तोम्या भूत् ॥ १० ॥

उत । नः । प्रिया । प्रियासु । सप्तऽस्वसा । सुऽजुष्टा । सरस्वती । स्तोम्या । भूत् ॥ १० ॥

vउत अपि च vनः अस्माकं vप्रियासु प्रियाणां मध्ये vप्रिया प्रियतमा vसप्तस्वसा । गायत्र्यादीनि सप्त छन्दांसि स्वसारो यस्यास्तादृशी । नदीरूपायास्तु गङ्गाद्याः सप्त नद्यः स्वसारः । vसुजुष्टा सुष्ठु पुरातनैर्ऋषिभिः सेविता । एवंभूता vसरस्वती देवी vस्तोम्या vभूत् स्तोतव्या भवतु ॥ ॥ ३१ ॥

आपप्रुषी पार्थिवान्युरु रजो अन्तरिक्षम् । सरस्वती निदस्पातु ॥ ११ ॥

आऽपप्रुषी । पार्थिवानि । उरु । रजः । अन्तरिक्षम् । सरस्वती । निदः । पातु ॥ ११ ॥

vपार्थिवानि पृथिव्याः संबन्धीनि vउरु उरूणि विस्तीर्णानि vरजः रजांसि लोकान् vअन्तरिक्षम् अन्तरा क्षान्तं नभश्च vआपप्रुषी स्वतेजसा पूरितवती vसरस्वती देवी vनिदः निन्दकाच्छत्रोः vपातु अस्मान् रक्षतु ॥

---

१. ज्ञ-त-ऋतावरी उदकवती (ऋतवत्युदकवती-ज्ञ) सा । २. ख-ज्ञ-ज्ञ-त-न-भ-र-छान्दसः । ३. ख-ज्ञ-न-भ-य-नद्यश्चान्यान् ।

त्रिषधस्था सप्तधातुः पञ्च जाता वर्धयन्ती । वाजेवाजे हव्या भूत् ॥ १२ ॥

त्रिऽसधस्था । सप्तऽधातुः । पञ्च । जाता । वर्धयन्ती । वाजेऽवाजे । हव्या । भूत् ॥ १२ ॥

[v]त्रिषधस्था त्रिषु लोकेषु सहावतिष्ठमाना त्रिलोकव्यापिनी [v]सप्तधातुः । सप्त धातवोऽवयवा गायत्र्याद्या गङ्गाद्या वा यस्याः सा तथोक्ता । [v]पञ्च [v]जाता जातानि निषादपञ्चमांश्चतुरो वर्णान् गन्धर्वादीन् वा [v]वर्धयन्ती अभिवृद्धान् कुर्वती । ईदृशी सरस्वती [v]वाजेवाजे युद्धे युद्धे सर्वेषु युद्धेषु [v]हव्या [v]भूत् ह्वातव्या भवति ॥

प्र या महिम्ना महिनासु चेकिते द्युम्नेभिरन्या अपसामपस्तमा ।
रथइव बृहती विभ्वने कृतोपस्तुत्या चिकितुषा सरस्वती ॥ १३ ॥

प्र । या । महिम्ना । महिना । आसु । चेकिते । द्युम्नेभिः । अन्याः । अपसाम् । अपःऽतमा ।
रथःऽइव । बृहती । विऽभ्वने । कृता । उपऽस्तुत्या । चिकितुषा । सरस्वती ॥ १३ ॥

[v]महिम्ना माहात्म्येन [v]महिना महती [v]द्युम्नेभिः द्युम्नैर्द्योतमानैर्यशोभिरन्नैर्वा युक्ता सती [v]आसु आसां नदीनां देवतानां वा मध्ये [v]या सरस्वती [v]प्र [v]चेकिते प्रकर्षेण ज्ञायते । या च [v]अन्याः अन्यासाम् ॥ 'सुपां सुलुक्०' इति षष्ठीबहुवचनस्य जस् ॥ [v]अपसां वेगवतीनां नदीनां मध्ये [v]अपस्तमा वेगवत्तमा । या च [v]रथइव [v]विभ्वने विभुत्वाय [v]बृहती परिवृढा गुणैरधिका [v]कृता प्रजापतिना निर्मिता सा [v]सरस्वती [v]चिकितुषा जानता स्तोत्रा [v]उपस्तुत्या उपस्तोतव्या भवति ॥

सरस्वत्यभि नो नेषि वस्यो मापस्फरीः पयसा मा न आ धक् ।
जुषस्व नः सख्या वेश्या च मा त्वत्क्षेत्राण्यरणानि गन्म ॥ १४ ॥

सरस्वति । अभि । नः । नेषि । वस्यः । मा । अप । स्फरीः । पयसा । मा । नः । आ । धक् ।
जुषस्व । नः । सख्या । वेश्या । च । मा । त्वत् । क्षेत्राणि । अरणानि । गन्म ॥ १४ ॥

हे [v]सरस्वति [v]नः अस्मान् [v]वस्यः वसीयः प्रशस्तं वसु धनम् [v]अभि [v]नेषि अभिप्रापय । [v]माप [v]स्फरीः अप्रवृद्धान् मा कार्षीः । स्फारो वृद्धिः । उपसर्गवशात् तद्विपरीते वर्तते । तथा [v]पयसा उदकेनाधिकेन [v]नः अस्मान् [v]मा [v]आ [v]धक् नाभिदहः[1] । न बाधस्व । अपि च [v]नः अस्माकं [v]सख्या सख्यानि सखिकर्माणि [v]वेश्या प्रवेशनानि [v]च [v]जुषस्व सेवस्व । वयं च त्वत्सकाशात् [v]अरणानि अरमणानि[2] निकृष्टानि [v]क्षेत्राणि [v]मा [v]गन्म मा प्राप्नवाम । अपि तु रमणीयान्येव[3] ॥ ॥ ३२ ॥ ॥ ५ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण[4] विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टकेऽष्टमोऽध्यायः समाप्तः ।

---

१. न–माभि० । २. ख-भ–अरमणीयानि; न-अरणमाणानि । ३. घ-श–रमणीयान्येव प्राप्नवाम । ४. ख-भ–सायणामात्येन; र-सायणार्येण ।

ॐ

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ पञ्चमाष्टके प्रथमोऽध्याय आरभ्यते । षष्ठमण्डलस्य षष्ठेऽनुवाके चतुर्दश सूक्तानि । तत्र 'स्तुषे नरा' इत्येकादशर्चं प्रथमं सूक्तम् । अत्रेयमनुक्रमणिका—'स्तुष एकादशाश्विनं तु' इति । मण्डलद्रष्टा बार्हस्पत्यो भरद्वाज[1] ऋषिः । अनुक्तत्वात् त्रिष्टुप् । अश्विनौ देवता[2] । प्रातरनुवाक[3] आश्विने क्रतौ[3] इदमादिके द्वे सूक्ते । आश्विनशस्त्रे चैते एव । सूत्रितं च—'स्तुषे नरेति सूक्ते' (आश्व. श्रौ. ४. १५) इति ॥

स्तुषे नरा दिवो अस्य प्रसन्ताश्विना हुवे जरमाणो अर्कैः ।
या सद्य उस्रा व्युषि ज्मो अन्तान्युर्युषतः पर्युरू वरांसि ॥ १ ॥

स्तुषे । नरा । दिवः । अस्य । प्रऽसन्ता । अश्विना । हुवे । जरमाणः । अर्कैः ।
या । सद्यः । उस्रा । विऽउषि । ज्मः । अन्तान् । युर्युषतः । परि । उरु । वरांसि ॥ १ ॥

[v]दिवः द्युलोकस्य [v]नरा नेतारौ [v]अस्य भुवनस्य [v]प्रसन्ता प्रसन्तौ प्रभवन्तावीश्वरौ [v]अश्विना अश्विनौ अश्वैरन्वितौ [v]स्तुषे प्रगीतमन्त्रसाध्यैः स्तोत्रैः स्तोतुम् [v]अर्कैः अप्रगीतमन्त्रसाध्यैः शस्त्रैः [v]जरमाणः स्तुतिं कुर्वन् [v]हुवे आह्वयामि । कीदृशावित्यपेक्षायाम् । [v]या यौ [v]सद्यः एव [v]उस्रा शत्रूणां निवारकौ [v]व्युषि व्युष्टौ निशायाः समाप्तौ [v]ज्मः पृथिव्याः [v]अन्तान् पर्यन्तान् [v]उरु उरूणि [v]वरांसि रूपस्यावरकाणि तमांसि च [v]परि परितः [v]युयूषतः पृथक्कुरुतः । अथवा वरांसि तेजांसि तमोनिवारणात् परि युयूषतः विस्तारयतः ॥

ता यज्ञमा शुचिभिश्चक्रमाणा रथस्य भानुं रुरुचू रजोभिः ।
पुरू वरांस्यमिता मिमानापो धन्वान्यति याथो अज्रान् ॥ २ ॥

ता । यज्ञम् । आ । शुचिऽभिः । चक्रमाणा । रथस्य । भानुम् । रुरुचुः । रजःऽभिः ।
पुरु । वरांसि । अमिता । मिमाना । अपः । धन्वानि । अति । याथः । अज्रान् ॥ २ ॥

किंच [v]ता तौ प्रसिद्धावश्विनौ [v]यज्ञम् अस्मदीयं यागम् [v]आ [v]चक्रमाणा अभिचक्रमाणौ[4] [v]शुचिभिः निर्मलैः [v]रजोभिः स्वीयैस्तेजोभिः । 'रजो रजतेर्ज्योती रज उच्यते' (निरु ४. १९) इति

---

१. घ-त–भारद्वाज । २. घ-ज्ञ-न-भ–देवते; ख–देवतो । ३. ख-ज्ञ-न-भ–प्रातरनुवाकाश्विनेय-क्रतौ; ज्ञ-श–प्रातरनुवाकाश्विने क्रतौ; त-य-प्रातरनुवाकाश्विनक्रतौ । ४. ज्ञ–अभिचंक्रममाणौ ।

यास्केनोक्तत्वात् । vरथस्य स्वकीयस्य रथस्य vभानुं दीप्तिं vरुरुचुः रोचयेते । अपि च vपुरु बहूनि vवरांसि तमोनिवारकाणि तेजांसि vअमिता अपरिमितानि vमिमाना निर्मिमाणौ vअपः उद्दिश्य vधन्वानि मरुप्रदेशान् vअन्नान् स्वकीयानश्वान् vअति vयाथः अतिक्रामयथः[1] ॥

ता ह त्यद्वर्तिर्यदरध्रमुग्रेत्था धियं ऊहथुः शश्वदश्वैः ।
मनोजवेभिरिषिरैः शयध्यै परि व्यथिर्दाशुषो मर्त्यस्य ॥ ३ ॥

ता । ह । त्यत् । वर्तिः । यत् । अरध्रम् । उग्रा । इत्था । धियः । ऊहथुः । शश्वत् । अश्वैः । मनःऽजवेभिः । इषिरैः । शयध्यै । परि । व्यथिः । दाशुषः । मर्त्यस्य ॥ ३ ॥

vता vह तौ खलु vउग्रा उग्रावश्विना युवां vयत् vअरध्रम् असमृद्धं vत्यत् vवर्तिः यजमानस्य तत् गृहं समर्धयितुं गच्छथः । किंच vइत्था इत्थं vधियः स्तोतॄन् vइषिरैः एषणीयैः काम्यैः vमनोजवेभिः मनोवेगैः vअश्वैः स्वीयैरश्वैः vशश्वत् सर्वदा vऊहथुः स्वर्गं प्रापयथः । vमर्त्यस्य मनुष्यस्य vदाशुषः यजमानस्य vव्यथिः हिंसकः vपरि vशयध्यै परिशयनाय[2] दीर्घनिद्रायै युवाभ्यां क्रियताम्[3] ॥

ता नव्यसो जरमाणस्य मन्मोप भूषतो युयुजानसप्ती ।
शुभं पृक्षमिषमूर्जं वहन्ता होता यक्षत्प्रत्नो अध्रुग्युवाना ॥ ४ ॥

ता । नव्यसः । जरमाणस्य । मन्म । उप । भूषतः । युयुजानसप्ती इति युयुजानऽसप्ती ।
शुभम् । पृक्षम् । इषम् । ऊर्जम् । वहन्ता । होता । यक्षत् । प्रत्नः । अध्रुक् । युवाना ॥४॥

vता तावश्विनौ vयुयुजानसप्ती रथे युज्यमानाश्वौ vशुभं शोभनं vपृक्षम् अन्नम् । 'पयः[4] पृक्षः' इत्यन्ननामसु पाठात् । vइषं पुष्टिम् vऊर्जं रसं च vवहन्ता वहन्तौ vनव्यसः नवतरस्य vजरमाणस्य स्तुतिं कुर्वतः vमन्म मननीयं स्तोत्रम् vउप vभूषतः उपगच्छतः । यद्वा । स्तोत्रसमीपे भवतः । किंच vयुवाना नित्यतरुणौ तौ[5] vहोता[5] देवानामाह्वाता vअध्रुक् अद्रोग्धा प्रियः[6] vप्रत्नः पुराणोऽग्निः vयक्षत् यजतु ॥

ता वल्गू दस्रा पुरुशाकतमा प्रत्ना नव्यसा वचसा विवासे ।
या शंसते स्तुवते शंभविष्ठा बभूवतुर्गृणते चित्ररातीं ॥ ५ ॥

ता । वल्गू इति । दस्रा । पुरुशाकऽतमा । प्रत्ना । नव्यसा । वचसा । आ । विवासे ।
या । शंसते । स्तुवते । शम्ऽभविष्ठा । बभूवतुः । गृणते । चित्ररातीं इति चित्रऽरातीं ॥५॥

---

१. ख–अतिक्रामथः । २. ख-घ-ञ-न-भ–परिशयनार्थम्; त–परिशयनाय । ३. ख-घ-ञ-न-भ–क्रियते । ४. त२–श्रवः । ५. ख-तो वा होता; त–होता; भ–तौ वां होता । ६. य–सर्वप्रियः ।

Vया यौ Vशंसते शस्यैः स्तुतिं कुर्वते Vस्तुवते स्तोत्रैः स्तुतिं कुर्वते जनाय[1] Vशंभविष्ठा अतिशयेन सुखस्य भावयितारौ अतिशयेन सुखस्वरूपौ वा Vगृणते स्तोत्रशस्त्र्यतिरिक्तलौकिकस्तुतिभिः स्तुवते च Vचित्ररातौ विचित्रदानौ Vबभूवतुः Vता तौ Vवल्गू वलनशीलौ रुचिरौ वा Vपुरुशाकतमा अतिशयेन बहुकर्माणौ बहुसहायौ वा Vप्रत्ना प्रत्नौ पुराणौ। 'प्रत्नं प्रदिवः' इति पुराणनामसु पाठात्। Vदस्रा दर्शनीयौ[2] अश्विनौ Vनव्यसा नवतरेण Vवचसा स्तुत्या Vआ Vविवासे परिचरामि ॥ ॥ १ ॥

ता भुज्युं विभिरद्भ्यः समुद्रात्तुग्र्यस्य सूनुमूहथू रजोभिः ।
अरेणुभिर्योजनेभिर्भुजन्ता पतत्रिभिरर्णसो निरुपस्थात् ॥ ६ ॥

ता । भुज्युम् । विऽभिः । अत्ऽभ्यः । समुद्रात् । तुग्र्यस्य । सूनुम् । ऊहथुः । रजःऽभिः ।
अरेणुऽभिः । योजनेभिः । भुजन्ता । पतत्रिऽभिः । अर्णसः । निः । उपऽस्थात् ॥ ६ ॥

Vता तावश्विनौ युवां Vतुग्रस्य Vसूनुं Vभुज्युं भुज्युनामकं समुद्रमध्ये भग्ननावं Vभुजन्ता रक्षन्तौ Vअरेणुभिः रेणुरहितैः आन्तरिक्षैः Vरजोभिः मार्गैः Vयोजनेभिः रथयुक्तैः[3] Vपतत्रिभिः पतनवद्भिः Vविभिः अश्वैः Vअर्णसः जलस्य Vउपस्थात् योनेः Vसमुद्रात् Vअद्भ्यः Vनिः Vऊहथुः निरगमयतम्। समुद्रादद्भ्य इति प्रयोगो मातुर्गृहाद्गच्छतीतिवत्[4] ॥

वि जुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा वध्रिमत्याः ।
दशस्यन्ता शयवे पिप्यथुर्गामिति च्यवाना सुमतिं भुरण्यू ॥ ७ ॥

वि । जुषा । रथ्या । यातम् । अद्रिम् । श्रुतम् । हवम् । वृषणा । वध्रिऽमत्याः ।
दशस्यन्ता । शयवे । पिप्यथुः । गाम् । इति । च्यवाना । सुऽमतिम् । भुरण्यू इति ॥ ७ ॥

Vरथ्या हे रथारूढावश्विनौ[5] Vजुषा जयशीलेन रथेन Vअद्रिं मार्गे[6] स्थितं पर्वतं Vवि Vयातं व्यबाधेथाम्। यातिरत्र वधकर्मा। तथा च निगमान्तरं—'विभिन्दुना नासत्या रथेन वि पर्वतां अजरयू अयातम्' (ऋ. सं. १. ११६. २०) इति। Vवृषणा कामानां वर्षितारौ Vवध्रिमत्याः पुत्रार्थिन्याः Vहवम् आह्वानं Vश्रुतं श्रुणुतम्। Vदशस्यन्ता स्तोतृभ्यः कामान् प्रयच्छन्तौ Vशयवे युवां स्तुवते Vगां निवृत्तप्रसवां Vपिप्यथुः क्षीरेणाप्याययतम्। तथा च निगमान्तरं—'शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम्' (ऋ. सं. १.११६.२२) इति। Vइति इत्थं Vसुमतिं सुष्टुतिं Vच्यवाना गच्छन्तौ Vभुरण्यू सर्वत्र गन्तारौ यज्ञस्य भर्तारौ वा भवतम् ॥

यद्द्यावः पृदिवो अस्ति भूमा हेळो देवानामुत मर्त्यत्रा ।
तदादित्या वसवो रुद्रियासो रक्षोयुजे तपुरघं दधात ॥ ८ ॥

यत् । द्यावः । पृदिवः । इति । प्रऽदिवः । अस्ति । भूमा । हेळः । देवानाम् । उत । मर्त्यऽत्रा ।
तत् । आदित्याः । वसवः । रुद्रियासः । रक्षःऽयुजे । तपुः । अघम् । दधात ॥ ८ ॥

---

१. ख–यजमानाय; झ–यजनाय। २. ख-झ-न-भ–दस्रौ। ३. ख-घ-झ-न-भ–रथे युक्तैः। ४. श–°गृहाद्रक्षती°। ५. ख-घ-झ-न-भ-श–रथिनाव°। ६. झ-त१-२–मध्ये; त३–मूर्ध्नि।

vरोदसी हे द्यावापृथिव्यौ हे vआदित्याः हे vवसवः vरुद्रियासः हे रुद्रपुत्रा मरुतः vमर्त्यत्रा मर्त्येषु अश्विनोः परिचारकेषु vदेवानां vयत् vहेळः क्रोधः vभूम[1] महान् vअस्ति vतत् हेळः vतपुः तापकं vरक्षोयुजे रक्षोभिर्युक्ताय रक्षसां स्वामिने प्रेरकाय वा vअघम् आहन्तृ[2] vदधात कुरुत । अथवा रक्षोयुजे रक्षोभिर्युक्ताय यज्वने अघमाहन्तृ[3] कुरुत ॥

य ईं राजानावृतुथा विदधद्रजसो मित्रो वरुणश्चिकेतत् ।
गम्भीराय रक्षसे हेतिमस्य द्रोघाय चिद्वचस आनवाय ॥ ९ ॥

यः । ईम् । राजानौ । ऋतुऽथा । विऽदधत् । रजसः । मित्रः । वरुणः । चिकेतत् ।
गम्भीराय । रक्षसे । हेतिम् । अस्य । द्रोघाय । चित् । वचसे । आनवाय ॥ ९ ॥

vयः नरः vरजसः समस्तस्य लोकस्य । 'लोका रजांस्युच्यन्ते' इति यास्केनोक्तत्वात् । vराजानौ vईम् एतौ अश्विनौ vऋतुथा काले काले vविदधत् परिचरति[4] तं vमित्रो vवरुणः च vचिकेतत् जानीयात् । मित्रवरुणप्रभृतयो[5] देवा एनं विदुरित्यर्थः । किंचायं परिचारकः vगम्भीराय महाबलाय vरक्षसे राक्षसाय vहेतिं घातकमायुधम् vअस्य अस्यति । क्षिपति । प्रथमपुरुषस्य मध्यमपुरुषेण व्यत्ययः । vद्रोघाय अभिद्रोहात्मकाय vआनवाय मनुष्यसंबन्धिने vवचसे vचित् वचनायैव हेतिमस्यति । मनुष्याणामभिद्रोहाय[6] एनम्[7] आस्कन्दतीति[8] ॥

अन्तरैश्चक्रैस्तनयाय वर्तिर्द्युमता यातं नृवता रथेन ।
सनुत्येन त्यजसा मर्त्यस्य वनुष्यतामपि शीर्षा ववृक्तम् ॥ १० ॥

अन्तरैः । चक्रैः । तनयाय । वर्तिः । द्युऽमता । आ । यातम् । नृऽवता । रथेन ।
सनुत्येन । त्यजसा । मर्त्यस्य । वनुष्यताम् । अपि । शीर्षा । ववृक्तम् ॥ १० ॥

हे अश्विनौ vअन्तरैः अनिकृष्टैः vचक्रैः युक्तेन vद्युमता दीप्तिमता vनृवता नेत्रा सारथिना युक्तेन । यद्वा । अश्वयुक्तेन । 'पतङ्गाः नरः' (नि. १. १४. २२) इत्यश्वनामसु पाठात् । vरथेन vवर्तिः अस्माकं गृहं vतनयाय तनयं दातुम् vआ vयातम् । अपि च vसनुत्येन तिरोहितेन vत्यजसा क्रोधेन । 'हणिः त्यजः' इति क्रोधनामसु पाठात् । vमर्त्यस्य मनुष्यस्य vवनुष्यतां बाधमानानाम् । 'वनुष्यतिर्हन्तिकर्मा' इति यास्केनोक्तत्वात् । vशीर्षा शिरांसि vअपि vववृक्तं प्रवृक्तम्[9] ॥

आ परमाभिरुत मध्यमाभिर्नियुद्भिर्यातमवमाभिरर्वाक् ।
दृळ्हस्य चिद्गोमतो वि व्रजस्य दुरो वर्तं गृणते चित्ररातीं ॥ ११ ॥

आ । परमाभिः । उत । मध्यमाभिः । नियुत्ऽभिः । यातम् । अवमाभिः । अर्वाक् ।
दृळ्हस्य । चित् । गोऽमतः । वि । व्रजस्य । दुरः । वर्तम् । गृणते । चित्ररातीं इति चित्रऽरातीं ॥ ११ ॥

---

१. घ-ञ-त-न-श-भूमा । २. ख-ञ-न-भ-अहन्तृ । ३. ख-अघमहन्तृ; ञ-त-न-श-अघमहन्तृ । ४. ख-ञ-न-भ-परिचरत्; घ-परिचरन् । ५. थ-मित्रावरुण° । ६. ख-भ-श२-न तु मनुष्याणामभि°; ञ-त-न-ननु मनुष्याणामभि° । ७. त-एवम् । ८. ख-ञ-न-भ-श२-आस्कन्दन्तीति । ९. ख-ञ-भ-य-श-प्रववृक्तम्; घ-छिनतम् ।

हे अश्विनौ ᵛपरमाभिः उत्कृष्टाभिः ᵛउत अपि च ᵛमध्यमाभिः अनुत्कृष्टाभिः ᵛअवमाभिः निकृष्टाभिश्च ᵛनियुद्भिः वाहैः ᵛअर्वाक् अस्मदभिमुखम् ᵛआ ᵛयातम् । ᵛहळहस्य ᵛचित् दृढापिधानस्यापि ᵛगोमतः गोयुक्तस्य ᵛव्रजस्य गोष्ठस्य ᵛदुरः द्वाराणि ᵛवि ᵛवर्तं विवृणुतम् । किंच ᵛगृणते स्तुवते मह्यं ᵛचित्ररातौ विचित्रदानौ[1] भवतम् ॥ ॥ २ ॥

'क्व त्या' इत्येकादशर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षम् । अत्रेयमनुक्रमणिका–'क्व त्येकपदान्तं त्रैष्टुभम्' इति । 'आ वां सुम्ने' इत्येकादशी एकपदा त्रिष्टुप् शिष्टास्त्रिष्टुभः । 'आश्विनं तु' इत्युक्तत्वादस्यापि सूक्तस्याश्विनौ देवता । प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छन्दस्युक्तो विनियोगः ॥

क्व॑ त्या व॒ल्गू पु॑रुहू॒ताद्य दू॒तो न स्तोमो॑ऽविद॒न्नम॑स्वान् ।
आ यो अ॒र्वाङ्नास॑त्या व॒वर्त॒ प्रेष्ठा॒ ह्यस॑थो अस्य॒ मन्म॑न् ॥ १ ॥

क्व॑ । त्या । व॒ल्गू इति॑ । पु॒रु॒ऽहू॒ता । अ॒द्य । दू॒तः । न । स्तोमः॑ । अ॒वि॒द॒त् । नम॑स्वान् ।
आ । यः । अ॒र्वाक् । नास॑त्या । व॒वर्त॑ । प्रेष्ठा॑ । हि । अस॑थः । अ॒स्य॒ । मन्म॑न् ॥ १ ॥

ᵛक्व कुत्र स्थितौ[2] ᵛवल्गू रुचिरौ ᵛपुरुहूता बहुभिराहूतौ ᵛत्या तावश्विनौ ᵛनमस्वान् हविषा युक्तः । 'नमः आयुः' इत्यन्ननामसु पाठात् । ᵛस्तोमः पञ्चदशादिस्तोमः ᵛअद्य ᵛदूतो ᵛन प्रेरितो[3] दूत इव ᵛअविदत् विन्देत् । ᵛयः स्तोमः ᵛअर्वाक् अस्मदभिमुखं ᵛनासत्या अश्विनौ ᵛआ ᵛववर्त आवर्तयत् । हे अश्विनौ युवाम् ᵛअस्य स्तोतुः ᵛमन्मन् स्तोत्रे ᵛप्रेष्ठा ᵛहि प्रियतमौ हि ᵛअसथः भवथः॥

अरं॑ मे गन्तं॒ हव॑नायास्मै गृ॒णा॒ना यथा॒ पिबा॑थो॒ अन्धः॑ ।
परि॑ ह॒ त्यद्व॒र्तिर्या॑थो रि॒षो न यत्परो॒ नान्त॑रस्तुतु॒र्यात् ॥ २ ॥

अर॑म् । मे॒ । ग॒न्त॒म् । हव॑नाय । अ॒स्मै॒ । गृ॒णा॒ना । यथा॑ । पिबा॑थः । अन्धः॑ ।
परि॑ । ह॒ । त्यत् । व॒र्तिः॑ । या॒थः॒ । रि॒षः । न । यत् । परः॑ । न । अन्त॑रः । तु॒तु॒र्यात् ॥ २ ॥

हे अश्विनौ युवां ᵛमे मदीयाय ᵛअस्मै ᵛहवनाय आह्वानाय ᵛअरं पर्याप्तं ᵛगन्तं गच्छतम् । ᵛगृणाना स्तूयमानौ ᵛअन्धः सोमं ᵛयथा ᵛपिबाथः पिबतम् । ᵛरिषः हिंसकस्य शत्रोः ᵛत्यद्वर्तिः तद्गृहं ᵛपरि ᵛयाथः परितो याथः ᵛयत् वर्तिः ᵛपरः विप्रकृष्टः ᵛन ᵛतुतुर्यात् न हिंस्यात् । ᵛअन्तरः संनिकृष्टोऽपि ᵛन तुतुर्यात् । यद्वा । त्यद्वर्तिस्तदस्मदीयं गृहं रिषो हिंसकात् परि याथः । त्यद्वर्तिः परो विप्रकृष्टोऽन्तरः संनिकृष्टोऽपि न तुतुर्यात् । अयं भावः । यथास्मदीयं गृहं दूरस्थः संनिकृष्टोऽपि न हिंस्यात्तथा रक्षां कुरुथ इति ॥

अक॑ारि वा॒मन्ध॑सो॒ वरी॑म॒न्नस्ता॑रि ब॒र्हिः सु॒प्राय॑णत॒मम् ।
उ॒त्ता॒नह॑स्तो युव॒युर्व॑न्द॒ा वां॒ नक्ष॑न्तो अ॒द्र्य आ॑ज॒न् ॥ ३ ॥

अक॑ारि । वा॒म् । अन्ध॑सः । वरी॑मन् । अस्ता॑रि । ब॒र्हिः । सु॒प्रऽअ॑यनत॒मम् ।
उ॒त्ता॒नऽह॑स्तः । यु॒व॒ऽयुः । व॒व॒न्द॒ । आ । वा॒म् । नक्ष॑न्तः । अ॒द्र्यः॒ । आ॒ज॒न् ॥ ३ ॥

---

१. ख-घ-ङ्ग-न-भ–चित्रदानौ । २. श–अवस्थितौ । ३. ख-घ-ङ्ग-न-भ–प्राहितः ।

vवां युवयोरर्थे vअन्धसः सोमस्य vवरीमन् विस्तृतेऽभिषवादौ यत् कृत्यमस्ति तत् vअकारि कृतम्। vसुप्रायणतमं मृदुतमं vबर्हिः vअस्तारि स्तीर्णम्। vउत्तानहस्तः कृताञ्जलिः vयुवयुः युवां कामयमानो होता vववन्द स्तौति। vवां युवां vनक्षन्तः व्याप्नुवन्तः ॥ 'तृक्ष पृक्ष नक्ष गतौ' इति धातुः ॥ vअद्रयः ग्रावाणः vआ vआञ्जन् सोमरसम् आ[1] समन्तात् व्यक्तीकृतवन्तः[2] ॥

ऊर्ध्वो वामग्निरध्वरेष्वस्थात्प्र रातिरेति जूर्णिनी घृताची ।
प्र होता गूर्तमना उराणोऽयुक्त यो नासत्या हवीमन् ॥ ४ ॥

ऊर्ध्वः । वाम् । अग्निः । अध्वरेषु । अस्थात् । प्र । रातिः । एति । जूर्णिनी । घृताची ।
प्र । होता । गूर्तऽमनाः । उराणः । अयुक्त । यः । नासत्या । हवीमन् ॥ ४ ॥

vअग्निः vवां युवयोर्यज्ञार्थम् vऊर्ध्वः vअस्थात् उदतिष्ठत्। vअध्वरेषु यज्ञेषु vप्र vएति समिद्ध[3] आहवनीयं गच्छति च। vरातिः[4] धनं[4] हविः vजूर्णिनी प्रगामिनी। 'जूर्णिर्जवतेर्वा' (निरु. ६. ४) इति यास्केनोक्तत्वात्। vघृताची घृतेनाक्ता। उपस्तीर्णाभिधारितेत्यर्थः। किंच vहोता vउराणः उरु कुर्वाणः vप्र vगूर्तमनाः प्रकर्षेणोद्युक्तमनाः भवति vयः होता vनासत्या अश्विनौ vहवीमन् आह्वाने स्तोत्रे वा vअयुक्त योजयति ॥

अधि श्रिये दुहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतोतिम् ।
प्र मायाभिर्मायिना भूतमत्र नरा नृतू जनिमन्यज्ञियानाम् ॥ ५ ॥

अधि । श्रिये । दुहिता । सूर्यस्य । रथम् । तस्थौ । पुरुऽभुजा । शतऽऊतिम् ।
प्र । मायाभिः । मायिना । भूतम् । अत्र । नरा । नृतू इति । जनिमन् । यज्ञियानाम् ॥ ५ ॥

vपुरुभुजा हे पूर्णभुजौ बहूनां रक्षकौ वाश्विनौ युवयोः vशतोतिं बहुरक्षाकं बहुगमनं वा vरथं vसूर्यस्य vदुहिता सूर्या vश्रिये श्रयितुम्[5] vअधि vतस्थौ अध्यतिष्ठत्। अपि च vयज्ञियानां देवानाम् vअत्र vजनिमन् अस्मिन् जन्मनि प्रादुर्भावे vमायाभिः प्रज्ञानैः। 'शची माया' इति प्रज्ञानामसु पाठात्। मायिनौ प्रज्ञावन्तौ vनरा नेतारौ vनृतू नृत्यन्तौ vभूतं भवतम्। यद्वा। हे मायिनौ प्राज्ञौ नरौ नेतारौ नृतू नृत्यन्तावश्विनौ यज्ञियानां देवानामत्र जनिमन् जन्मनि प्रादुर्भावे प्रभूतं प्राज्ञतममग्न्यादिकं देवं मायाभिः प्रज्ञानैः कौशलैर्वा जितवन्तौ स्थ इत्यर्थः। अयमर्थः 'प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत्सूर्यां सावित्रीम्' (ऐ. ब्रा. ४.७) इत्यादिना स्पष्टीकृतः ॥ ॥ ३ ॥

युवं श्रीभिर्दर्शताभिरभिः शुभे पुष्टिमूहथुः सूर्यायाः ।
प्र वां वयो वपुषेऽनु पप्तन्नक्षद्वाणी सुष्टुता धिष्ण्या वाम् ॥ ६ ॥

युवम् । श्रीभिः । दर्शताभिः । आभिः । शुभे । पुष्टिम् । ऊहथुः । सूर्यायाः ।
प्र । वाम् । वयः । वपुषे । अनु । पप्तन् । नक्षत् । वाणी । सुऽस्तुता । धिष्ण्या । वाम् ॥ ६ ॥

---

१. ख-घ-ङ्ग-न-भ-'आ' नास्ति। २. ख-ङ्ग-भ-व्यनक्तिकृतवन्तः; त-व्यक्तीकुर्वतः; न-व्यनक्ती-त्यनवन्तः; श-व्यक्तीकुर्वतः। ३. ख-सिद्ध आहवनीयम्; त-श-समिद्धमाहवनीयम्। ४. ख-ङ्ग-भ-रातिवर्धनम्; न-रातिवर्द्धनम्। ५. ख-ङ्ग-न-भ-श्रयर्थम्; घ-श्रेयार्थम्।

हे अश्विनौ vयुवं युवां vदर्शताभिः दर्शनीयाभिः vआभिः श्रीमतां परिदृश्यमानाभिः vश्रीभिः लक्ष्मीभिः कान्तिभिर्वा vसूर्यायाः युवयोः पत्न्याः vशुभे शोभनार्थं vपुष्टिं पूर्तिम् vऊहथुः प्रापयथः। किंच vवां युवां vवयः अश्वाः vवपुषे शोभायै vप्र vअनु vपप्तन् प्रकर्षेणान्वपतन्। अपि च हे vधिष्ण्या स्तुत्यर्हावश्विनौ vवां युवां vसुष्टुता vवाणी ऋषीणां स्तुतिः vनक्षत् व्याप्नोति ॥

आ वां वयोऽश्वासो वहिष्ठा अभि प्रयो नासत्या वहन्तु।
प्र वां रथो मनोजवा असर्जीषः पृक्ष इषिधो अनु पूर्वीः ॥ ७ ॥

आ। वाम्। वयः। अश्वासः। वहिष्ठाः। अभि। प्रयः। नासत्या। वहन्तु।
प्र। वाम्। रथः। मनःऽजवाः। असर्जि। इषः। पृक्षः। इषिधः। अनु। पूर्वीः ॥ ७ ॥

हे नासत्यौ vवां युवां vवयः गन्तारः vवहिष्ठाः वोढृतमाः vअश्वासः अश्वाः vप्रयः सोमरूपमन्नम् vअभि vआ vवहन्तु प्रापयन्तु। vवां युवयोः vमनोजवाः मनोवेगः vरथः vपृक्षः संपर्चनीयाः vइषिधः एषणीयाः vपूर्वीः बह्वीः vइषः अन्नानि सोमान् vअनु vप्र vअसर्जि विसृष्टः ॥

पुरु हि वां पुरुभुजा देष्णं धेनुं न इषं पिन्वतमसक्राम्।
स्तुतश्च वां माध्वी सुष्टुतिश्च रसाश्च ये वामनु रातिमग्मन् ॥ ८ ॥

पुरु। हि। वाम्। पुरुऽभुजा। देष्णम्। धेनुम्। नः। इषम्। पिन्वतम्। असक्राम्।
स्तुतः। च। वाम्। माध्वी इति। सुऽस्तुतिः। च।
रसाः। च। ये। वाम्। अनु। रातिम्। अग्मन् ॥ ८ ॥

vपुरुभुजा हे पूर्णभुजौ बहुपालकौ वा vवां युवयोः vदेष्णं दातव्यं धनं vपुरु बहु vहि भवति। अतः कारणात् vनः अस्मभ्यं vधेनुं प्रीणयित्रीम् vअसक्रां मत्तोऽन्यत्रासंक्रमणीम्। 'असक्रामसंक्रमणीम्' (निरु. ६. २९) इति यास्केनोक्तत्वात्। vइषम् अन्नं vपिन्वतं प्रयच्छतम्। यद्वा। इषमेषणीयां धेनुमित्यन्वयः। किंच vवां vस्तुतः। स्तुवन्तीति स्तुतः स्तोतारः। सन्ति। vमाध्वी मदयितारावश्विनौ vसुष्टुतिः शोभना स्तुतिः vच स्तोतृषु भवति। vरसाः सोमरसाः vच सन्ति। vये रसाः vवां युवयोः vरातिं दानम् vअनु उद्दिश्य vअग्मन् देवयजनं प्राप्ताः। अयं भावः। सुष्टुतिं श्रुत्वा देवयजनं प्राप्तान् सोमरसान् पीत्वा स्तोतृभ्यः कामान् प्रयच्छतमिति शेषः ॥

उत मे ऋज्रे पुरयस्य रघ्वी सुमीळ्हे शतं पेरुके च पक्वा।
शाण्डो दाद्धिरण्यनः स्मदिष्टीन्दर्शं वशासो अभिषाचं ऋष्वान् ॥ ९ ॥

उत। मे। ऋज्रे इति। पुरयस्य। रघ्वी इति। सुऽमीळ्हे। शतम्। पेरुके। च। पक्वा।
शाण्डः। दात्। हिरण्यनः। स्मत्ऽदिष्टीन्। दर्शं। वशासः। अभिऽसाचं। ऋष्वान् ॥ ९ ॥

vउत[1] अपि च vपुरयस्य पुरयनामकस्य स्वभूते vऋज्रे ऋजुगमने vरथ्वी क्षिप्रगामिन्यौ वडवे vमे आश्विनोः स्तुतिं कुर्वतो मम अभूताम् । vसुमीळ्हे राज्ञि विद्यमानाः सन्तः[2] vशतं गावो ममाभूवन् । vपेरुके राज्ञि विद्यमानानि vपक्वा पक्वान्यन्नानि ममासन् । vशाण्डः च राजा vहिरणिनः हिरण्यवतः vस्मद्दिष्टीन् प्रशस्तदर्शनान् रथान्[3] अश्वान् वा vदश दशसंख्याकान् vवशासः अनुगुणान्[4] vअभिषाचः शत्रूणामभिभावुकान् vऋष्वान् दर्शनीयान् पुरुषान् अश्विनोः स्तोतृभ्यः vदात् ददातु ॥

सं वां शता नासत्या सहस्राश्वानां पुरुपन्था गिरे दात् ।
भरद्वाजाय वीर नू गिरे दाद्धता रक्षांसि पुरुदंससा स्युः ॥ १० ॥

सम् । वाम् । शता । नासत्या । सहस्रा । अश्वानाम् । पुरुऽपन्थाः । गिरे । दात् ।
भरत्ऽवाजाय । वीर । नु । गिरे । दात् । हता । रक्षांसि । पुरुऽदंससा । स्युरिति स्युः ॥१०॥

vनासत्या हे अश्विनौ vवां युवयोः vगिरे । गृणातीति गीः स्तोता । तस्मै vअश्वानां vशता शतानि vसहस्रा सहस्राणि च vपुरुपन्थाः पुरुपन्था नाम राजा vसं vदात् संददाति । vवीर हे वीरावश्विनौ ॥ द्विवचनस्य लुक् ॥ vगिरे युवयोः स्तोत्रे vभरद्वाजाय मह्यमपि[5] vनु क्षिप्रं vदात् ददातु । किंच हे vपुरुदंससा बहुकर्माणावश्विनौ युवयोरनुग्रहात् vरक्षांसि vहता हतानि vस्युः ॥

आ वां सुम्ने वरिमन्त्सूरिभिः ष्याम् ॥ ११ ॥

आ । वाम् । सुम्ने । वरिमन् । सूरिऽभिः । स्याम् ॥ ११ ॥

हे अश्विनौ vवरिमन् विस्तृते vसुम्ने vवां युवाभ्यां दत्ते सुखावहे धने । 'जलाषं सुम्नम्' इति सुखनामसु पाठात् । vसूरिभिः विद्वद्भिः पुत्रादिभिः सह vआ समन्तात् vस्यां भवेयम् ॥ ॥४॥

'उदु श्रिये' इति षड्ऋचं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमुषोदेवताकम् । अनुक्रम्यते च— 'उदु श्रिये षळुषस्यं तु' इति । प्रातरनुवाक उषस्ये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे चैतदादिके द्वे सूक्ते । सूच्यते हि—'उदु श्रिय इति सूक्ते' (आश्व. श्रौ. ४.१४) इति ॥

उदु श्रिय उषसो रोचमाना अस्थुरपां नोर्मयो रुशन्तः ।
कृणोति विश्वा सुपथा सुगान्यभूदु वस्वी दक्षिणा मघोनी ॥ १ ॥

उत् । ऊँ इति । श्रिये । उषसः । रोचमानाः । अस्थुः । अपाम् । न । ऊर्मयः । रुशन्तः ।
कृणोति । विश्वा । सुऽपथा । सुऽगानि । अभूत् । ऊँ इति । वस्वी । दक्षिणा । मघोनी ॥ १ ॥

vरोचमानाः दीप्यमानाः vरुशन्तः शुक्लवर्णाः । 'रुशदिति वर्णनाम' (निरु. २.२०) इति यास्कः । vउषसः vश्रिये जगतः शोभायै जगद्व्याप्तुं वा vअपाम् vऊर्मयः vन उदकसंबन्धिनस्तरङ्गा इव vउत् vअस्थुः उत्तिष्ठन्ति । अनन्तरमेकवह्निगमः । उषाः vविश्वा विश्वानि स्थानानि vसुपथा

---

१. ख-झ-न-भ–'उत' नास्ति । २. ख-घ-झ-न-भ–'सन्तः' नास्ति । ३. ख-झ-त-न-भ–पुरुषान् रथान्; श–पुरुषान् । ४. ख-झ-त-न-भ–अनुगुणाः; श–आनुगुणाः । ५. ख-झ-न-भ–मह्यमधि ।

सुमार्गाणि ᵛसुगानि सुखेन गम्यानि ᵛकृणोति करोति। अपि च ᵛमघोनी धनवत्युषाः ᵛवस्वी प्रशस्ता ᵛदक्षिणा समर्धयित्री च ᵛअभूत् ॥

भद्रा ददृक्ष उर्विया वि भास्युत्ते शोचिर्भानवो द्यामपप्तन्।
आविर्वक्षः कृणुषे शुम्भमानोषो देवि रोचमाना महोभिः ॥ २ ॥

भद्रा। ददृक्षे। उर्विया। वि। भासि। उत्। ते। शोचिः। भानवः। द्याम्। अपप्तन्। आविः। वक्षः। कृणुषे। शुम्भमाना। उषः। देवि। रोचमाना। महःऽभिः ॥ २ ॥

हे उषो देवि ᵛभद्रा कल्याणी ᵛदृदृक्षे दृश्यसे[1]। ᵛउर्विया विस्तीर्णा च ᵛवि ᵛभासि। ᵛते तव ᵛशोचिः शोचिषः ॥ जसो लुक् ॥ दीप्यमानाः ᵛभानवः रश्मयः ᵛद्याम् अन्तरिक्षम् ᵛउत् ᵛअपप्तन् उत्पतन्ति। किंच हे ᵛउषो ᵛदेवि ᵛमहोभिः तेजोभिः ᵛशुम्भमाना शोभमाना ᵛरोचमाना दीप्यमाना ᵛवक्षः त्वदीयं रूपम् ᵛआविः ᵛकृणुषे प्रकटीकरोषि ॥

वहन्ति सीमरुणासो रुशन्तो गावः सुभगामुर्विया प्रथानाम्।
अपेजते शूरो अस्तेव शत्रून्बाधते तमो अजिरो न वोळ्हा ॥ ३ ॥

वहन्ति। सीम्। अरुणासः। रुशन्तः। गावः। सुऽभगाम्। उर्विया। प्रथानाम्। अप। ईजते। शूरः। अस्ताऽइव। शत्रून्। बाधते। तमः। अजिरः। न। वोळ्हा ॥ ३ ॥

ᵛअरुणासः लोहितवर्णाः ᵛरुशन्तः दीप्यमानाः ᵛगावः रश्मयः। 'किरणा गावः' इति रश्मिनामसु पाठात्। ᵛसुभगाम् ᵛउर्विया उर्वीं विस्तीर्णां ᵛप्रथानां प्रथमानां ᵛसीम् एनामुषोदेवतां ᵛवहन्ति। सेयमुषोदेवता ᵛशूरो ᵛअस्तेव वीरः क्षेपेव ᵛशत्रून्[2] ᵛतमः ᵛअपेजते अपगमयति। ᵛवोळ्हा सेनायाः ᵛअजिरो ᵛन क्षिप्रगामी शत्रून् यथा[3] बाधते तथा[3] तमांसि ᵛबाधते च ॥

सुगोत ते सुपथा पर्वतेष्ववाते अपस्तरसि स्वभानो।
सा न आ वह पृथुयामन्नृष्वे रयिं दिवो दुहितरिषयध्यै ॥ ४ ॥

सुऽगा। उत। ते। सुऽपथा। पर्वतेषु। अवाते। अपः। तरसि। स्वभानो इति स्वऽभानो। सा। नः। आ। वह। पृथुऽयामन्। ऋष्वे। रयिम्। दिवः। दुहितः। इषयध्यै ॥ ४ ॥

हे उषो देवि ᵛपर्वतेषु ᵛउत दुर्गेष्वपि ᵛअवाते गमनसाधनरहिते देशे ᵛसुपथा सुपथानि मार्गाणि ᵛसुगा सुगानि सुखेन गम्यानि ᵛते तव भवन्ति। ᵛस्वभानो हे स्वप्रकाशे ᵛअपः अन्तरिक्षमाकाशम्। 'आपः' इत्यन्तरिक्षनामसु पाठात्। सामुद्रिकीरपो वा ᵛतरसि। ᵛपृथुयामन् पृथुरथे ᵛऋष्वे दर्शनीये ᵛदिवो ᵛदुहितः अन्तरिक्षसुते हे उषो देवि ᵛसा त्वम् ᵛइषयध्यै एषणीयं ᵛरयिं धनं ᵛनः अस्मभ्यम् ᵛआ ᵛवह ॥

---

१. ख-ङ्ग-त-श–दृश्यते। २. ख-घ-ङ्ग-त-न-भ-श–'शत्रून्' नास्ति। ३. ख-घ-ङ्ग-त-न-भ-श–इव।

सा वंह्र योक्षभिरवातोषो वरं वहसि जोषमनु ।
त्वं दिवो दुहितर्या ह देवी पूर्वहूतौ मंहना दर्शता भूः ॥ ५ ॥

सा । आ । वह । या । उक्षऽभिः । अवाता । उषः । वरम् । वहसि । जोषम् । अनु ।
त्वम् । दिवः । दुहितः । या । ह । देवी । पूर्वऽहूतौ । मंहना । दर्शता । भूः ॥ ५ ॥

हे ᵛउषः ᵛसा त्वं ᵛवरं धनं मह्यम् ᵛआ ᵛवह । ᵛया त्वम् ᵛअवाता अप्रतिगता ᵛजोषं प्रीतिम्[1] ᵛअनु ᵛउक्षभिः अनडुद्भिरश्वैर्वा स्तोतृभ्यो वरं ᵛवहसि । किंच हे ᵛदिवो ᵛदुहितः अन्तरिक्षसुते ᵛया ᵛत्वं ᵛदेवी द्योतमाना ᵛपूर्वहूतौ प्रथमाह्वाने प्रातरनुवाके ᵛमंहना पूजनीया भवसि[2] सा त्वं ᵛदर्शता दर्शनीया ᵛभूः इति योजना । या दर्शता भूरित्यन्वये यद्वृत्तेन सामानाधिकरण्यात् भूरित्यस्य निघातो न स्यात् ॥

उत्ते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥ ६ ॥

उत् । ते । वयः । चित् । वसतेः । अपप्तन् । नरः । च । ये । पितुऽभाजः । विऽउष्टौ ।
अमा । सते । वहसि । भूरि । वामम् । उषः । देवि । दाशुषे । मर्त्याय ॥ ६ ॥

हे उषो देवि ᵛते तव ᵛव्युष्टौ सत्यां ᵛवयश्चित् पक्षिणोऽपि ᵛवसतेः निवासस्थानात् ᵛउत् ᵛअपप्तन् उत्पतन्ति । ᵛये ᵛपितुभाजः हविषां संभक्तारः अन्नस्योपार्जका वा । 'पितुः' इत्यन्ननामसु पाठात् । ᵛनरः तेऽपि ᵛच उत्पतन्ति । किं च हे ᵛउषो ᵛदेवि त्वम् ᵛअमा समीपे ᵛसते वर्तमानाय ᵛदाशुषे हविषां प्रदात्रे ᵛमर्त्याय ᵛभूरि प्रभूतं ᵛवामं धनं ᵛवहसि ॥ ॥ ५ ॥

'एषा स्या' इति षड्चं चतुर्थं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभम् । अनुक्रम्यते च—'एषा स्या' इति । 'उषस्यं तु' इति पूर्वसूक्ते उक्तत्वात् इदमपि उषोदेवताकम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

एषा स्या नो दुहिता दिवोजाः क्षितीरुच्छन्ती मानुषीरजीगः ।
या भानुना रुशता राम्यास्वज्ञायि तिरस्तमसश्चिदक्तून् ॥ १ ॥

एषा । स्या । नः । दुहिता । दिवःऽजाः । क्षितीः । उच्छन्ती । मानुषीः । अजीगरिति ।
या । भानुना । रुशता । राम्यासु । अज्ञायि । तिरः । तमसः । चित् । अक्तून् ॥ १ ॥

ᵛएषा ᵛस्या सा ᵛदिवोजाः दिवो जाता अत एव ᵛदुहिता दिवः पुत्री उषाः ᵛनः अस्मदर्थम् ᵛउच्छन्ती तमांसि वर्जयन्ती ᵛक्षितीः प्रजाः ᵛमानुषीः ᵛअजीगः उद्गिरति । 'जिगर्तिर्गिरतिकर्मा वा' (निरु. ६. ८) इति यास्कः । प्रकाशयतीति यावत् । ᵛया ᵛरुशता दीप्यमानेन

---

१. ख-झ-त-न-भ-श–प्रति । २. ख-घ-झ-त-न-भ-श–वहसि ।

vभानुना युक्ता vरास्नासु यास्वासु रात्रिषु। रेफयकारयोर्व्यत्ययः। vअक्तून् नक्षत्रादितेजांसि vतमसश्रित् तमांसि च vतिरः तिरस्कुर्वती vअज्ञायि दृश्यते[1] ॥

वि तद्ययुररुणयुग्भिरश्वैश्चित्रं भान्त्युषसश्चन्द्ररथाः।
अग्रं यज्ञस्य बृहतो नयन्तीर्वि ता बाधन्ते तम ऊर्म्यायाः ॥ २ ॥

वि। तत्। ययुः। अरुणयुक्ऽभिः। अश्वैः। चित्रम्। भान्ति। उषसः। चन्द्रऽरथाः।
अग्रम्। यज्ञस्य। बृहतः। नयन्तीः। वि। ताः। बाधन्ते। तमः। ऊर्म्यायाः ॥ २ ॥

vचन्द्ररथाः कान्तिरथाः। 'चन्द्रश्चन्दतेः कान्तिकर्मणः' (निरु. ११.५) इति यास्कः। ताः vउषसः vतत् तदानीं प्रातःकाले vबृहतः बृंहणशीलस्य[2] vयज्ञस्य[3] vअग्रं मुखं vनयन्तीः संपादयन्त्यः vअरुणयुग्भिः अरुणवर्णयुक्तैः vअश्वैः vवि vययुः विस्तीर्णं यान्ति। vचित्रं यथा भवति तथा vभान्ति च। vऊर्म्यायाः रात्रेः। 'अक्तुः ऊर्म्या' इति रात्रिनामसु पाठात्। vतमः vवि vबाधन्ते सम्यगपनयन्ति च ॥

श्रवो वाजमिषमूर्जं वहन्तीर्नि दाशुषे उषसो मर्त्याय।
मघोनीर्वीरवत्पत्यमाना अवो धात विधते रत्नमद्य ॥ ३ ॥

श्रवः। वाजम्। इषम्। ऊर्जम्। वहन्तीः। नि। दाशुषे। उषसः। मर्त्याय।
मघोनीः। वीरऽवत्। पत्यमानाः। अवः। धात। विधते। रत्नम्। अद्य ॥ ३ ॥

हे vउषसः vदाशुषे हविषां[4] दात्रे[4] vमर्त्याय vश्रवः कीर्तिं vवाजं बलम् vइषम् अन्नम् vऊर्जं रसं च vवहन्तीः वहन्त्यो यूयं vमघोनीः धनवत्यः vपत्यमानाः गच्छन्त्यः vअद्य vविधते परिचरते मह्यं vवीरवत् पुत्रपौत्रादिसहितम् vअवः अन्नम्। 'सिनम् अवः' इत्यन्ननामसु पाठात्। vरत्नं धनं च। 'श्रात्रं रत्नम्' इति धननामसु पाठात्। vनि vधात नितरां धत्त ॥

इदा हि वो विधते रत्नमस्तीदा वीराय दाशुषे उषासः।
इदा विप्राय जरते यदुक्था नि ष्म मावते वहथा पुरा चित् ॥ ४ ॥

इदा। हि। वः। विधते। रत्नम्। अस्ति। इदा। वीराय। दाशुषे। उषसः।
इदा। विप्राय। जरते। यत्। उक्था। नि। स्म। माऽवते। वहथ। पुरा। चित् ॥४॥

हे vउषसः vइदा vहि इदानीमेव vवः युष्माकं vविधते परिचरते दातुं vरत्नं धनम् vअस्ति। vइदा हि इदानीमेव vवीराय प्रेरयित्रे हविषां vदाशुषे यजमानाय दातुं वो रत्नमस्ति। vइदा हि इदानीमेव vविप्राय प्राज्ञाय vजरते स्तुवते[5] दातुं वो रत्नमस्ति। vयत् यस्मिन् विप्रे vउक्था उक्थनामकानि स्तोत्राणि विद्यन्ते vमावते मत्सदृशाय यजमानाय[6] तद्रत्नं vनि vवहथ। vपुरा vचित् पुरापि रत्नं मह्यं दत्तम् ॥

---

१. ख-घ-ङ्ग-त-न-भ-श–अदृश्यत। २. ख-ङ्ग-न-भ-श–बृंहणस्य। ३. ख-ङ्ग-न-भ–'यज्ञस्य' नास्ति। ४. ख-घ-ङ्ग-त-न-भ-श–हवींषि प्रदात्रे। ५. ख-घ-ङ्ग-न-भ–'स्तुवते' नास्ति। ६. श–जनाय।

इदा हि ते उषो अद्रिसानो गोत्रा गवामङ्गिरसो गृणन्ति ।
व्यर्केण बिभिदुर्ब्रह्मणा च सत्या नृणामभवद्देवहूतिः ॥ ५ ॥

इदा । हि । ते । उषः । अद्रिसानो इत्यद्रिऽसानो । गोत्रा । गवाम् । अङ्गिरसः । गृणन्ति ।
वि । अर्केण । बिभिदुः । ब्रह्मणा । च । सत्या । नृणाम् । अभवत् । देवऽहूतिः ॥ ५ ॥

हे [v]उषो[1] [v]अद्रिसानो आदृतसानो [v]ते तव प्रसादात् [v]इदा [v]हि सत्य एव [v]गवां [v]गोत्रा संघान् [v]अङ्गिरसो [v]गृणन्ति उत्सृजन्ति । तथा च निगमान्तरं— ' गवां गोत्रमुदसृजो यदङ्गिरः ' (ऋ. सं. २. २३. १८) इति । [v]अर्केण अर्चनीयेन [v]ब्रह्मणा स्तोत्रेण [v]वि [v]बिभिदुः तमांसि विदारयन्ति च । [v]नृणां नेतॄणां तेषामङ्गिरसां [v]देवहूतिः देवविषया स्तुतिः [v]सत्या सत्यफला[2] [v]अभवत् ॥

उच्छा दिवो दुहितः प्रत्नवन्नो भरद्वाजवद्विधते मघोनि ।
सुवीरं रयिं गृणते रिरीह्युरुगायमधि धेहि श्रवो नः ॥ ६ ॥

उच्छ । दिवः । दुहितरिति । प्रत्नऽवत् । नः । भरद्वाजऽवत् । विधते । मघोनि ।
सुऽवीरम् । रयिम् । गृणते । रिरीहि । उरुऽगायम् । अधि । धेहि । श्रवः । नः ॥ ६ ॥

हे [v]दिवो [v]दुहितः उषः [v]प्रत्नवत् पुरातनेऽह्य इव [v]नः अस्मदर्थम् [v]उच्छ तमांसि वर्जय । हे [v]मघोनि [v]भरद्वाजवत् [v]विधते परिचरते । भरद्वाजवदिति वचनात् अन्योऽप्यस्ति भरद्वाजः । तथा च ब्राह्मणं— ' प्राणो वै भरद्वाजवत् ' इति । [v]गृणते स्तुतिं कुर्वते मह्यं [v]सुवीरं कल्याणपुत्रपौत्रादियुक्तं [v]रयिं धनं [v]रिरीहि देहि । किंच [v]नः अस्मभ्यम् [v]उरुगायं बहुभिर्गातव्यं [v]श्रवः अन्नम् [v]अधि [v]धेहि अधिकं प्रयच्छ ॥ ॥ ६ ॥

' वपुर्नु तत् ' इत्येकादशर्चं पञ्चमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं मारुतम् । तथा चानुक्रम्यते— ' वपुन्वैकादश मारुतम् ' इति । व्यूढेऽहे दशरात्रे षष्ठेऽहनि आग्निमारुत इदं सूक्तं मारुतनिविद्धानम् । सूत्रितं च—' हविष्यान्तं वपुर्नु तत् ' (आश्व. श्रौ. ८. ८) इति । वैश्वदेवे पर्वणि मारुतसप्तकपालस्य ' प्र चित्रमर्कम् ' इति याज्या । सूत्रितं च—' प्र चित्रमर्कं गृणते तुरायेति नवानुयाजाः ' (आश्व. श्रौ. २. १६) इति । एकादशिने मारुते पशौ ' प्र चित्रमर्कम् ' इत्येषैव याज्या । सूत्रितं च- ' प्र चित्रमर्कं गृणते तुरायारा इवेदचरमा अहेव ' (आश्व. श्रौ. ३.७) इति ॥

वपुर्नु तच्चिकितुषे चिदस्तु समानं नाम धेनु पत्यमानम् ।
मर्तेष्वन्यद्दोहसे पीपाय सकृच्छुक्रं दुदुहे पृश्निरूधः ॥ १ ॥

वपुः । नु । तत् । चिकितुषे । चित् । अस्तु । समानम् । नाम । धेनु । पत्यमानम् ।
मर्तेषु । अन्यत् । दोहसे । पीपाय । सकृत् । शुक्रम् । दुदुहे । पृश्निः । ऊधः ॥ १ ॥

[v]तत् प्रसिद्धं [v]समानम् एकरूपम् । मरुतः सर्वदा समानरूपाः । तथा च निगमान्तरम्— ' अज्येष्ठासो अकनिष्ठास एते ' (ऋ. सं. ५.६०.५) इति । [v]नाम स्थिराणामपि नामकं [v]धेनु

---

१. ख-ञ-त-न-भ-श—उषसः । २. ख-ञ-न-भ—सफला ।

प्रीणयितृ ᵛपत्यमानं सर्वदा गच्छत् ᵛवपुः मरुतां रूपं[1] ᵛचिकितुषे विदुषे[2] स्तोत्रे ᵛनु क्षिप्रम् ᵛअस्तु प्रादुर्भवतु। ᵛचित् इति पूरकम्। किंच तद्रूपं ᵛमर्तेषु मर्त्यलोके[3] ᵛअन्यत् ओषधिवनस्पत्यादिकं ᵛदोहसे कामान् दोग्धुं ᵛपीपाय आप्याययति। किंच मरुतामेव निर्देशात् ᵛपृश्निः अन्तरिक्षं ᵛसकृत् संवत्सरस्य वर्षासु ᵛशुक्रं शुक्लवर्णम् ᵛऊधः उदकं ᵛदुदुहे क्षरति ॥

ये अग्नयो न शोशुचन्निधाना द्विर्यत्त्रिर्मरुतो वावृधन्त।
अरेणवो हिरण्ययास एषां साकं नृम्णैः पौंस्येभिश्च भूवन् ॥ २ ॥

ये। अग्नयः। न। शोशुचन्। इधानाः। द्विः। यत्। त्रिः। मरुतः। ववृधन्त।
अरेणवः। हिरण्ययासः। एषाम्। साकम्। नृम्णैः। पौंस्येभिः। च। भुवन् ॥ २ ॥

ᵛये ᵛमरुतः ᵛइधानाः ᵛअग्नयो ᵛन समिध्यमाना अग्नय इव ᵛशोशुचन् दीप्यन्ते। ᵛयत् ये मरुतः ᵛद्विः द्विगुणं ᵛत्रिः त्रिगुणं च ᵛववृधन्त इच्छानुरूपं वर्धन्ते ॥ संहितायां दीर्घश्छान्दसः ॥ ᵛएषां मरुतां रथाः ᵛअरेणवः रेणुरहिताः ᵛहिरण्ययासः हिरण्मयालंकाराश्च भवन्ति। तेᵛ मरुतः ᵛनृम्णैः धनैः ᵛपौंस्येभिः बलैः ᵛच ᵛसाकं सार्धं ᵛभूवन् प्रादुर्भवन्ति। तथा च निगमान्तरं—'ये पृषतीभिर्ऋष्टिभिः' (ऋ. सं. १. ३७. २) इति ॥

रुद्रस्य ये मीळ्हुषः सन्ति पुत्रा यांश्चो नु दाधृविर्भरध्यै।
विदे हि माता महो मही षा सेत्पृश्निः सुभ्वे गर्भमाधात् ॥ ३ ॥

रुद्रस्य। ये। मीळ्हुषः। सन्ति। पुत्राः। यान्। चो इति। नु। दाधृविः। भरध्यै।
विदे। हि। माता। महः। मही। सा। सा। इत्। पृश्निः। सुऽभ्वे। गर्भम्। आ। अधात् ॥३॥

ᵛमीळ्हुषः सेक्तुः ᵛरुद्रस्य ᵛपुत्राः ᵛये मरुतः ᵛसन्ति ᵛदाधृविः धरित्री पृश्निः अन्तरिक्षं ᵛयांश्चो ᵛनु यांश्च मरुतो नु ᵛभरध्यै भर्तुं क्षमा भवति। ᵛविदे ᵛहि सर्वज्ञाता हि ᵛमहः महतामेषां ᵛमाता ᵛसा पृश्निः ᵛमही महती। किंच ᵛसा ᵛपृश्निः ᵛसुभ्वे नृणां सम्यक् भवनाय ᵛगर्भम् उदकम् ᵛआधात् आदधाति ॥

न य ईषन्ते जनुषोऽया न्वर्न्तः सन्तोऽवद्यानि पुनानाः।
निर्यद्दुहे शुचयोऽनु जोषमनु श्रिया तन्वमुक्षमाणाः ॥ ४ ॥

न। ये। ईषन्ते। जनुषः। अया। नु। अन्तरिति। सन्तः। अवद्यानि। पुनानाः।
निः। यत्। दुहे। शुचयः। अनु। जोषम्। अनु। श्रिया। तन्वम्। उक्षमाणाः ॥ ४ ॥

ᵛये प्रसिद्धा मरुतः ᵛजनुषः जनान् स्तोतॄन् प्रति ᵛअया अयेन गमनसाधनेन ᵛन ᵛईषन्ते न गच्छन्ति। किं तेषां रक्षणीयत्वाभावात् गमनाभावो नेत्याह। ᵛअन्तः ᵛसन्तः सर्वेषां हृदि वर्तमाना एव ᵛअवद्यानि पापानि ᵛपुनानाः शोधयन्तः। तथा च निगमान्तरं—'प्राणा वै मरुतः स्वापयः'

---

१. ख-घ-ङ्ग-न-भ-श–'रूपं' नास्ति। २. ख-घ-ङ्ग-त-न-भ-श–'विदुषे' नास्ति।
३. घ–मनुष्यलोके; त-य-श–मर्त्यलोकेषु। ४. ख-घ-ङ्ग-त-न-भ-श–तेऽमी।

(ऐ. ब्रा. ३.१६) इति। अतः सर्वप्राणिनां हृदि वर्तमानत्वात् तेषां गमनं नास्तीति अध्यात्मं प्राणरूपेणावस्थानं[1] दर्शितं भवति। शीघ्रगामित्वं तु तेषामधिदैवतरूपेणेति[2] द्रष्टव्यम्। vयत् यदा vशुचयः दीप्यमाना मरुतः vजोषमनु स्तोतॄणां काममनु vनिः vदुहे नितरां दुहन्त्युदकम्। तथा vश्रिया दीप्त्या vअनु अनुगताः vतन्वम् आत्मीयं शरीरं प्रकाशयन्तः vउक्षमाणाः भूमिं सिञ्चन्तो भवन्ति। यद्वा। तन्वं विस्तीर्णं यथा भवति तथा उक्षमाणा भूमिं सिञ्चन्तो भवन्तीत्यर्थः।

मक्षू न येषु दोहसे चिदया आ नाम धृष्णु मारुतं दधानाः।
न ये स्तौना अयासो मह्ना नू चित्सुदानुरव यासदुग्रान् ॥ ५ ॥

मक्षु। न। येषु। दोहसे। चित्। अयाः। आ। नाम। धृष्णु। मारुतम्। दधानाः।
न। ये। स्तौनाः। अयासः। मह्ना। नु। चित्। सुऽदानुः। अव। यासत्। उग्रान् ॥५॥

vयेषु प्रसिद्धेषु मरुत्सु vधृष्णु धर्षकं vमारुतं vनाम मरुत्संज्ञकं शस्त्रम् vआ[3] vदधानाः उच्चारयन्तः vअयाः उपगच्छन्तः स्तोतारः vमक्षु क्षिप्रं vदोहसे कामान् दोग्धुं क्षमा भवन्ति। vन इति संप्रत्यर्थे। vये vस्तौनाः स्तेनास्तिरोहिता वा स्तोतृधनानामपहर्तारः vअयासः गन्तारो भवन्ति। vमह्ना महत्त्वेन युक्ताश्च भवन्ति vउग्रान् तान्। क्रुद्धान् vसुदानुः शोभनहविर्दानो यजमानः vअव vयासत् अवयजते। अपगतक्रोधान् करोति। vन इति संप्रत्यर्थे ॥ ॥ ७ ॥

त इदुग्राः शवसा धृष्णुषेणा उभे युजन्त रोदसी सुमेके।
अध स्मैषु रोदसी स्वशोचिरामवत्सु तस्थौ न रोकः ॥ ६ ॥

ते। इत्। उग्राः। शवसा। धृष्णुऽसेनाः। उभे इति। युजन्त। रोदसी इति। सुमेके इति सुऽमेके।
अध। स्म। एषु। रोदसी। स्वऽशोचिः। आ। अमवत्ऽसु। तस्थौ। न। रोकः ॥ ६ ॥

vते मरुतः vउग्राः vशवसा बलेन वेगेन[4] युक्ताः vधृष्णुषेणाः धर्षकसेनाः vसुमेके सुरूपे vउभे vरोदसी द्यावापृथिव्यौ vयुजन्त योजयन्ति। वृष्ट्या पृथिवीं तर्पयन्तीत्यभिप्रायः। vअध vस्म अपि च vएषु[5] येषु मरुत्सु vरोदसी रुद्रस्य पत्नी माध्यमिकी वाक् vस्वशोचिः स्वदीप्तिर्वर्तते vअमवत्सु बलवत्सु तेषु vरोकः दीप्तिः बाधको वा vन vआ vतस्थौ न तिष्ठति। न निःसरत्येवेत्यर्थः॥

अनेनो वो मरुतो यामो अस्त्वनश्वश्चिद्यमजत्यरथीः।
अनवसो अनभीशू रजस्तूर्वि रोदसी पथ्या याति साधन् ॥ ७ ॥

अनेनः। वः। मरुतः। यामः। अस्तु। अनश्वः। चित्। यम्। अजति। अरथीः।
अनवसः। अनभीशुः। रजःऽतूः। वि। रोदसी इति। पथ्याः। याति। साधन् ॥ ७ ॥

हे vमरुतः vवः युष्माकं संबन्धी vयामः रथः vअनेनः पापरहितं यथा भवति तथा vअस्तु प्रादुर्भवतु। किंच vयं याममम् vअरथीः। रथिः सारथिः। न रथिररथीः[6]। असारथिरपि स्तोता

---

१. ख-ङ्ग-न-भ–प्राणिरूपेणा°। २. ख-ङ्ग-भ–नामाधि°; त-न-श–तामधि°। ३. ख-ङ्ग-त-न-भ-श–'आ' नास्ति। ४. ङ्ग–वेगेन वा। ५. ख-ङ्ग-त-न-भ-श–येषु; घ-ङ्ग–एषु; य–तेषु। ६. ख-ङ्ग-त-न-भ–रथिररथिः।

vअजति प्रेरयति स रथः[1] vअनश्वश्चित् अश्वरहितोऽपि vअनवसः पथ्यदनरहितः vअनभीशुः पाशरहितोऽपि vरजस्तूः उदकस्य प्रेरकः vसाधन् स्तोतॄणां कामान् साधयन् vरोदसी द्यावापृथिव्यौ vपथ्याः पथोऽन्तरिक्षमार्गान् vवि vयाति विविधं गच्छति ॥

नास्य वर्ता न तरुता न्वस्ति मरुतो यमवथ वाजसातौ ।
तोके वा गोषु तनये यमप्सु स व्रजं दर्ता पार्ये अध द्योः ॥ ८ ॥

न । अस्य । वर्ता । न । तरुता । नु । अस्ति । मरुतः । यम् । अवथ । वाजसातौ ।
तोके । वा । गोषु । तनये । यम् । अप्सु । सः । व्रजम् । दर्ता । पार्ये । अध । द्योः ॥ ८ ॥

हे vमरुतः vवाजसातौ संग्रामे vयम् vअवथ रक्षथ vअस्य जनस्य vवर्ता प्रेरकः vन vअस्ति । अस्य vतरुता vनु हिंसिता च vन अस्ति । vअध अपि च vतोके पुत्रे vतनये पौत्रे धने वा vगोषु vवा vअप्सु वा निमित्तभूतेषु vयम् अवथ vसः[2] vपार्ये संग्रामे vद्योः दीप्तस्यापि[3] विजिगीषोर्वा शत्रोः vव्रजं गवां संघं vदर्ता दारयिता भवति ॥

प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम् ।
ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः ॥ ९ ॥

प्र । चित्रम् । अर्कम् । गृणते । तुराय । मारुताय । स्वऽतवसे । भरध्वम् ।
ये । सहांसि । सहसा । सहन्ते । रेजते । अग्ने । पृथिवी । मखेभ्यः ॥ ९ ॥

हे vअग्ने vगृणते शब्दं कुर्वते स्तूयमानाय वा vतुराय त्वरिताय vस्वतवसे स्वभूतबलाय vमारुताय मरुतां गणाय vचित्रं दर्शनीयम् vअर्कम् अन्नं हविः । 'स्वधा अर्कः' इत्यन्ननामसु पाठात् । vप्र vभरध्वम् । त्वत्सहायभूताः[4] ऋत्विजस्त्वं च सर्वे यूयं प्रभरत । यथा लोके बहुष्वेककार्यकरेषु मुख्यमेकं संबोध्य यूयमेवं कुरुतेति प्रार्थना तद्वदत्रापि मुख्यमग्निमेकमेव संबोध्य प्रभरध्वमिति बहुवचनप्रयोगः । vये मरुतः vसहांसि शत्रूणां बलानि vसहसा बलेन vसहन्ते अभिभवन्ति vमखेभ्यः मंहनीयेभ्यो मरुद्भ्यो भयात् vपृथिवी vरेजते कम्पते ॥ मारुतायेति तद्धितवृत्तावन्तर्भूतानामपि मरुतां बुद्ध्या प्रविभागात् य इति प्रत्यवमर्शः । यथा महाभाष्ये–'अथ शब्दानुशासनम् । केषां शब्दानाम्' (पा. म. १. १. १) इति । यथा वा लोके राजपुरुष इत्युक्ते कस्य राज्ञ इति ॥

त्विषीमन्तो अध्वरस्येव दिद्युत्तृषुच्यवसो जुह्वो३ नाग्नेः ।
अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः ॥ १० ॥

त्विषिऽमन्तः । अध्वरस्यऽइव । दिद्युत् । तृषुऽच्यवसः । जुह्वः । न । अग्नेः ।
अर्चत्रयः । धुनयः । न । वीराः । भ्राजत्ऽजन्मानः । मरुतः । अधृष्टाः ॥ १० ॥

vमरुतः vअध्वरस्येव यज्ञस्येव vदिद्युत् द्योतमानाः vतृषुच्यवसः क्षिप्रगमनाः vअग्नेः vजुह्वो vन रश्मय इव vत्विषीमन्तः दीप्तिमन्तः vअर्चत्रयः अर्चनीयाः vधुनयो vन सपत्नान् कम्पयन्त इव vवीराः शूराः vभ्राजज्जन्मानः दीप्तशरीराः vअधृष्टाः परैरनभिभूताश्च भवन्ति ॥

---

१. त३-श-यामः । २. ख-ङ्ग-त-न-भ-श–'सः' नास्ति । ३. ख–दीप्तस्य; ङ्ग-त-न-भ-श–दीप्तस्यास्य । ४. ख-ङ्ग-न-भ–त्वत्सहायप्रभूताः ।

तं वृधन्तं मारुतं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे ।
दिवः शर्धाय शुचयो मनीषा गिरयो नार्प उग्रा अस्पृध्रन् ॥ ११ ॥

तम् । वृधन्तम् । मारुतम् । भ्राजत्ऽऋष्टिम् । रुद्रस्य । सूनुम् । हवसा । आ । विवासे ।
दिवः । शर्धाय । शुचयः । मनीषाः । गिरयः । न । आपः । उग्राः । अस्पृध्रन् ॥ ११ ॥

[v]तं प्रसिद्धं [v]वृधन्तं वर्धमानं [v]भ्राजदृष्टिं भ्राजमानऋष्टिं [v]रुद्रस्य [v]सूनुं पुत्रं [v]मारुतं मरुद्गणं [v]हवसा स्तोत्रेण [v]आ [v]विवासे परिचरामि । किंच [v]दिवः स्तोतुः [v]शुचयः निर्मलाः [v]मनीषाः स्तुतयः [v]उग्राः उदूर्णाः [v]शर्धाय मारुताय बलाय । ' तृक्षः शर्धः ' इति बलनामसु पाठात् । [v]आपः आप्नुवन्तः [v]गिरयो [v]न मेघा इव । ' गिरिः व्रजः ' इति मेघनामसु पाठात् । [v]अस्पृध्रन् अस्पर्धन्त[1] ॥ ॥ ८ ॥

' विश्वेषां वः ' इत्येकादशर्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं मैत्रावरुणम् । तथा चानुक्रम्यते— ' विश्वेषां मैत्रावरुणम् ' इति । सूक्तविनियोगो लैङ्किकः । मैत्रावरुणे पशौ ' आ यातं मित्रावरुणा ' इति पशुपुरोडाशस्यानुवाक्या । सूत्रितं च— ' आ यातं मित्रावरुणा सुशस्ता नो मित्रावरुणा हव्यजुष्टिम् ' (आश्व. श्रौ. ३ . ८) इति । ध्रुवेऽह्नि दशरात्रे सप्तमेऽहनि प्रउगशस्त्रे ' प्र यद्वाम् ' इति मैत्रावरुणस्तृतीयस्तृचः । तथा च सूत्रितं—' प्र यद्वां मित्रावरुणा स्पूर्धन्ना गोमता नासत्या रथेन ' (आश्व. श्रौ. ८ . ९) इति ॥

विश्वेषां वः सतां ज्येष्ठतमा गीर्भिर्मित्रावरुणा वावृधध्यै ।
सं या रश्मेव यमतुर्यमिष्ठा द्वा जनाँ असमा बाहुभिः स्वैः ॥ १ ॥

विश्वेषाम् । वः । सताम् । ज्येष्ठऽतमा । गीःऽभिः । मित्रावरुणा । ववृधध्यै ।
सम् । या । रश्माऽइव । यमतुः । यमिष्ठा । द्वा । जनान् । असमा । बाहुऽभिः । स्वैः ॥ १ ॥

[v]विश्वेषां[2] [v]सतां मध्ये [v]ज्येष्ठतमा ज्येष्ठतमौ मित्रावरुणौ [v]वः वां [v]गीर्भिः स्तुतिभिः [v]ववृधध्यै वर्धयितुं प्रवृत्तोऽस्मि । [v]या यौ [v]द्वा द्वौ सहितौ [v]असमा विषमौ । ' त्रिरश्रिं हन्ति चतुरश्रिरुग्रः ' (ऋ. सं. १ . १५२ . २) इति निगमान्तरेणासाम्यं दर्शितम् । [v]यमिष्ठा यन्तृतमौ [v]स्वैः आत्मीयै [v]बाहुभिः [v]रश्मेव रश्मिनेवाश्वान् [v]जनान् [v]सं [v]यमतुः संयच्छतः[3] । बाहुभिरिति बहुवचनं पूजार्थम् ॥

इयं मद्वां प्र स्तृणीते मनीषोप प्रिया नमसा बर्हिरच्छ ।
यन्तं नो मित्रावरुणावधृष्टं छर्दिर्यद्वां वरूथ्यं सुदानू ॥ २ ॥

इयम् । मत् । वाम् । प्र । स्तृणीते । मनीषा । उप । प्रिया । नमसा । बर्हिः । अच्छ ।
यन्तम् । नः । मित्रावरुणौ । अधृष्टम् । छर्दिः । यत् । वाम् । वरूथ्यम् । सुदानू इति सुऽदानू ॥ २ ॥

---

१. घ-ङ्ग-त-न-श – अस्पर्धन्ते; ङ्ग-य – स्पर्धन्ते । २. ख – विश्वेषां देवानाम् । ३. ख-घ-ङ्ग-त-न-भ-श – संगच्छतः ।

हे मित्रावरुणौ ᵛवां युवां ᵛमत् मम ᵛइयं ᵛमनीषा स्तुतिः ᵛप्र ᵛस्तृणीते प्रच्छादयति । ᵛप्रिया हे प्रियौ युवां ᵛनमसा अन्नेन हविषा सह ᵛउप गच्छति च । युवयोः ᵛबर्हिः यज्ञम् ᵛअच्छ अभिगच्छति च । हे ᵛमित्रावरुणौ ᵛनः अस्मभ्यम् ᵛअदृष्टम् अनभिभूतं ᵛछर्दिः गृहं ᵛयन्तं प्रयच्छतम् । हे ᵛसुदानू शोभनदानौ ᵛवां युवयोः संबन्धि युवाभ्यां देयं ᵛयत् गृहं ᵛवरूथ्यं शीतवाततापानां वारयितृ भवति ॥

आ यातं मित्रावरुणा सुशस्त्युप प्रिया नमसा हूयमाना ।
सं यावप्रः स्थो अपसेव जनाञ्छुधीयतश्चिद्यतथो महित्वा ॥ ३ ॥

आ । यातम् । मित्रावरुणा । सुऽशस्ति । उप । प्रिया । नमसा । हूयमाना ।
सम् । यौ । अप्रः ऽस्थः । अपसाऽइव । जनान् । श्रुधिऽयतः । चित् । यतथः । महिऽत्वा ॥३॥

हे मित्रावरुणौ ᵛसुशस्ति शोभनशंसनं ᵛनमसा अन्नेन हविषा स्तोत्रेण वा ᵛहूयमाना[1] स्तूयमानौ वा ᵛप्रिया विश्वस्य प्रियौ ᵛउप ᵛआ ᵛयातम् उपागच्छतम् । ᵛयौ ᵛमहित्वा महत्त्वेन युक्तौ युवां ᵛश्रुधीयतः श्रुधिमन्नं यशो वात्मन इच्छतो ᵛजनान् ᵛअप्रः स्थः कर्मण्यधिकृतः पुरुषः । ' अपः अप्रः ' इति कर्मनामसु पाठात् । ᵛअपसेव कर्मणेव ᵛसं ᵛयतथः संयच्छथः ॥

अश्वा न या वाजिना पूतबन्धू ऋता यद्गर्भमदितिर्भरध्यै ।
प्र या महि महान्ता जायमाना घोरा मर्तीय रिपवे नि दीधः ॥ ४ ॥

अश्वा । न । या । वाजिना । पूतबन्धु इति पूतऽबन्धू । ऋता । यत् । गर्भम् । अदितिः । भरध्यै ।
प्र । या । महि । महान्ता । जायमाना । घोरा । मर्तीय । रिपवे । नि । दीधरिति दीधः ॥४॥

ᵛया यौ ᵛअश्वा ᵛन अश्वाविव ᵛवाजिना वाजिनौ बलिनौ ᵛपूतबन्धू पूतस्तोत्रौ ᵛऋता सत्यौ च । ᵛयत् यौ ᵛगर्भं गर्भभूतौ ᵛअदितिः देवी ᵛभरध्यै बभार । किंच ᵛया यौ ᵛजायमाना जायमानावेव ᵛमहि महतः ᵛमहान्ता महत्तरौ प्रभूतौ मित्रावरुणौ ᵛमर्तीय मर्त्याय ᵛरिपवे हिंसकाय ᵛघोरा घोरौ घातकौ ᵛनि ᵛदीधः निदधारादितिः स्वोदरे ॥

विश्वे यद्वां महना मन्दमानाः क्षत्रं देवासो अदधुः सजोषाः ।
परि यद्भूथो रोदसी चिदुर्वी सन्ति स्पशो अदब्धासो अमूराः ॥ ५ ॥

विश्वे । यत् । वाम् । महना । मन्दमानाः । क्षत्रम् । देवासः । अदधुः । सऽजोषाः ।
परि । यत् । भुवः । रोदसी इति । चित् । उर्वी इति । सन्ति । स्पशः । अदब्धासः । अमूराः ॥५॥

ᵛविश्वे सर्वे ᵛदेवासः देवाः ᵛसजोषाः परस्परं प्रीतियुक्ताः ᵛयत् यौ ᵛवां युवां ᵛमहना महत्त्वेन ᵛमन्दमानाः स्तुवन्तः ᵛक्षत्रं बलम् ᵛअदधुः धत्तवन्तः । किंच ᵛयत् यौ युवाम् ᵛउर्वी विस्तीर्णे ᵛरोदसी द्यावापृथिव्यौ ᵛपरि ᵛभूथः परिभवथः तयोर्युवयोः ᵛअदब्धासः अहिंसिताः ᵛअमूराः अमूढाः ᵛस्पशः रश्मयश्चरा वा ᵛसन्ति ॥ ॥ ९ ॥

---

१. ज्ञ–हूयमाना आहूयमानौ ।

ता हि क्षत्रं धारयेथे अनु द्यून्दृंहेथे सानुमुपमादिव द्योः ।
दृळ्हो नक्षत्र उत विश्वदेवो भूमिमातान्द्यां धासिनायोः ॥ ६ ॥

ता । हि । क्षत्रम् । धारयेथे इति । अनु । द्यून् । दृंहेथे इति । सानुम् । उपमात्ऽइव । द्योः ।
दृळ्हः । नक्षत्रः । उत । विश्वऽदेवः । भूमिम् । आ । अतान् । द्याम् । धासिना । आयोः ॥६॥

ता तौ मित्रावरुणौ युवाम् अनु द्यून् दिवसे दिवसे क्षत्रं बलं धारयेथे हि । द्योः अन्तरिक्षस्य सानुं समुच्छ्रितप्रदेशं मेघं सूर्यं वा दृंहेथे दृढीकुरुतम् । उपमादिव । उपमीयते प्रक्षिप्यते इति उपमात् स्थूणा । सा यथा वत्सं धारयति तद्वदित्यर्थः । दृळ्हः युवाभ्यां दृढीकृतश्च मेघः नक्षत्रः अन्तरिक्षं व्याप्नुवानः उत अपि च विश्वदेवः सूर्यः भूमिं द्यां दिवं च आयोः मनुष्यस्य । ' द्रुह्यवः आयवः ' इति मनुष्यनामसु पाठात् । धासिना अन्नेन हविषा । ' क्षुत् धासिः ' इत्यन्ननामसु पाठात् । आप्यायितः सन् आतान् आतनोति युवाभ्यां दृढीकृत एव ॥

ता विप्रं धैथे जठरं पृणध्या आ यत्सद्म सभृतयः पृणन्ति ।
न मृष्यन्ते युवतयोऽवाता वि यत्पयो विश्वजिन्वा भरन्ते ॥ ७ ॥

ता । विप्रम् । धैथे इति । जठरम् । पृणध्यै । आ । यत् । सद्म । सऽभृतयः । पृणन्ति ।
न । मृष्यन्ते । युवतयः । अवाताः । वि । यत् । पयः । विश्वऽजिन्वा । भरन्ते ॥ ७ ॥

ता तौ मित्रावरुणौ युवां विप्रं प्राज्ञं[1] यजमानम् । ' विप्रः विप्रः ' इति मेधाविनामसु पाठात् । धैथे धारयथः जठरम् उदरं पृणध्यै सोमेन पूरयितुम् । यत् यदा सभृतयः सह भ्रियमाणा ऋत्विजः सद्म यज्ञसदनम् आ पृणन्ति आपूरयन्ति । विश्वजिन्वा हे विश्वजिन्वानौ यत् यदा पयः जलं भवद्भ्यां प्रहितं तदा युवतयः नद्यः दिशो वा न मृष्यन्ते रजसा नाभिभूयन्ते । अवाताः अशुष्काश्च वि भरन्ते विभूतिं धारयन्ति ॥

ता जिह्वया सदमेदं सुमेधा आ यद्वां सत्यो अरतिर्ऋते भूत् ।
तद्वां महित्वं घृतान्नावस्तु युवं दाशुषे वि चयिष्टमंहः ॥ ८ ॥

ता । जिह्वया । सदम् । आ । इदम् । सुऽमेधाः । आ । यत् । वाम् । सत्यः । अरतिः । ऋते । भूत् ।
तत् । वाम् । महिऽत्वम् । घृतऽअन्नौ । अस्तु । युवम् । दाशुषे । वि । चयिष्टम् । अंहः ॥८॥

ता तौ मित्रावरुणौ युवां सुमेधाः प्राज्ञः जिह्वया वाचा सदं सर्वदा इदं जलम् आ याचते । आ इत्युपसर्गदर्शनात् योग्यक्रियाध्याहारात् याचत इत्यध्याहियते । पूर्वस्याम्रृचि जलस्य प्रकृतत्वात् बुद्धौ विपरिवर्तमानं जलमिदंशब्देन परामृश्यते । यत् यदा वां युवयोः अरतिः अभिगन्ता ऋते यज्ञे सत्यः मायारहितः आ भूत् आभवति हे घृतान्नौ तत् महित्वम् अपेक्षितप्रदातृत्वलक्षणं वां युवयोः अस्तु । किंच युवं युवां दाशुषे दाशुषो यजमानस्य ॥ षष्ठ्यर्थे चतुर्थी ॥ अंहः पापं वि चयिष्टं विनाशयतमित्यर्थः ॥

---

१. ख-भ-मेधाविनम् ।

प्र यद्वां मित्रावरुणा स्पूर्धन्प्रिया धाम युवधिता मिनन्ति ।
न ये देवास ओहसा न मर्ता अयज्ञसाचो अप्यो न पुत्राः ॥ ९ ॥

प्र । यत् । वाम् । मित्रावरुणा । स्पूर्धन् । प्रिया । धाम । युवऽधिता । मिनन्ति ।
न । ये । देवासः । ओहसा । न । मर्ताः । अयज्ञऽसाचः । अप्यः । न । पुत्राः ॥ ९ ॥

हे मित्रावरुणौ ᵛवां युवयोः ᵛप्रिया प्रियाणि ᵛधाम धामानि कर्माणि ᵛयुवधिता युवाभ्यां विहितानि ᵛयत् ये[1] अयजन्तो जनाः[1] ᵛस्पूर्धन् स्पर्धमानाः ᵛप्र ᵛमिनन्ति हिंसन्ति। ᵛये च ᵛदेवासः देवाः ᵛओहसा वहनसाधनेन स्तोत्रेण ᵛन युज्यन्ते । ᵛमर्ताः मनुष्याश्च ओहसा ᵛन युज्यन्ते । ये च ᵛअप्यः । अपः कर्म । तद्वन्तः ᵛअयज्ञसाचः न[2] यज्ञयुक्ताः[2] वृथाकर्माणि कुर्वन्त[3] इत्यर्थः[3] । ये च ᵛन ᵛपुत्राः । पृणन्तीति पुत्राः । न पुत्रा अपृणन्त इत्यर्थः । तान् सर्वान् वि चयिष्टमित्यनुषज्यते ॥

वि यद्वाचं कीस्तासो भरन्ते शंसन्ति के चिन्निविदो मनानाः ।
आद्वां ब्रवाम सत्यान्युक्था नकिर्देवेभिर्यतथो महित्वा ॥ १० ॥

वि । यत् । वाचम् । कीस्तासः । भरन्ते । शंसन्ति । के । चित् । निऽविदः । मनानाः ।
आत् । वाम् । ब्रवाम । सत्यानि । उक्था । नकिः । देवेभिः । यतथः । महिऽत्वा ॥ १० ॥

ᵛयत् यदा ᵛकीस्तासः मेधाविन उद्गातारः । ' उशिजः कीस्तासः ' इति मेधाविनामसु पाठात् । ᵛवाचं स्तुतिं ᵛवि ᵛभरन्ते पृथक् उच्चारयन्ति तदा ᵛके ᵛचित् बह्वृचाः ᵛमनानाः अग्न्यादीन् स्तुवन्तः ᵛनिविदः ᵛशंसन्ति । ᵛआत् तथा सति ᵛवां युवाभ्यां ᵛसत्यानि उक्थानि स्तोत्राणि वयं ᵛब्रवाम । ᵛमहित्वा महत्त्वेन ᵛदेवेभिः अन्यैर्देवैः सह ᵛनकिः ᵛयतथः न गच्छथः ॥

अवोरित्था वां छर्दिषो अभिष्टौ युवोर्मित्रावरुणावस्कृधोयु ।
अनु यद्वावः स्फुरान्ऋजिप्यं धृष्णुं यद्रणे वृषणं युनजन् ॥ ११ ॥

अवोः । इत्था । वाम् । छर्दिषः । अभिष्टौ । युवोः । मित्रावरुणौ । अस्कृधोयु ।
अनु । यत् । गावः । स्फुरान् । ऋजिप्यम् । धृष्णुम् । यत् । रणे । वृषणम् । युनजन् ॥ ११ ॥

हे ᵛमित्रावरुणौ ᵛअवोः अवतोः ᵛवां युवयोः ᵛअभिष्टौ अभिगमने ᵛछर्दिषः गृहाय सुखाय वा । चतुर्थ्यर्थे षष्ठी । युवामभिगतेषु स्तोतृषु ᵛयुवोः युवयोः संबन्धि[4] युवाभ्यां देयं तद्गृहादिकम् ᵛअस्कृधोयु अविच्छिन्नं भवति । तथा च यास्कः—' अस्कृधोयुरकृध्वायुः । कृध्विति ह्रस्वनाम निकृत्तं भवति ' (निरु. ६. ३) इति । ᵛइत्था सत्यमेव । कदा मित्रावरुणयोरभिगमनमित्यत आह । ᵛयत् यदा ᵛगावः स्तुतयः ᵛअनु ᵛस्फुरान् अनुस्फुरेयुः । यदा[5] च ᵛऋजिप्यम् ऋजुगामिनं ᵛधृष्णुं शत्रूणां धर्षकं ᵛवृषणं कामानां वर्षितारं सोमं ᵛरणे रमणे यज्ञे ᵛयुनजन् यजमाना युञ्ज्युः ॥ ॥ १० ॥

---

१. ख-झ-त-भ-ये यजः; न-ये यज्ञाः; श-ये यजमानाः । २. ख-झ-त-न-भ-श-यज्ञयुक्ता न । ३. ख-त-न-श-कुर्वन्तीत्यर्थः; झ-भ-कुर्वतीत्यर्थः । ४. ख-झ-न-भ-' संबन्धि ' नास्ति । ५. ख-झ-न-भ-तदा ।

' श्रुष्टी वाम् ' इत्येकादशर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रावरुणम् । तथा चानुक्रम्यते– ' श्रुष्टी वामैन्द्रावरुणमुपान्त्ये जगत्यौ ' इति । ' प्र सम्राजे, इन्द्रावरुणा सुतपौ ' इत्येते जगत्यौ शिष्टाः त्रिष्टुभः । इन्द्रावरुणौ देवता । आभिप्लविकेषूक्थ्येषु तृतीयसवने होत्रकशस्त्रेषु स्तोमवृद्धौ मैत्रावरुणस्येदमावापार्थं सूक्तम् । सूत्रितं च– ' श्रुष्टी वां यज्ञो युवां नरा ' (आश्व. श्रौ. ७. ९) इति । तृतीयसवने ' इन्द्रावरुणा सुतपाविमं सुतम् ' इति प्रशास्तुः प्रस्थितयाज्या । सूत्रितं च–' इन्द्रावरुणा सुतपाविमं सुतमिन्द्रश्च सोमं पिबतं बृहस्पते ' (आश्व. श्रौ. ५. ५) इति । उक्थ्ये तृतीयसवने ' इन्द्रावरुणा मधुमत्तमस्य ' इति मैत्रावरुणस्य शस्त्रयाज्या । सूत्रितं च—' इन्द्रावरुणा मधुमत्तमस्येति याज्या ' (आश्व. श्रौ. ६. १) इति ॥

श्रुष्टी वां यज्ञ उद्यतः सजोषा मनुष्वद्बर्हिषो यजध्यै ।
आ य इन्द्रावरुणाविषे अद्य महे सुम्नाय महे आववर्तत् ॥ १ ॥

श्रुष्टी । वाम् । यज्ञः । उत्ऽयतः । सऽजोषाः । मनुष्वत् । बृक्तऽबर्हिषः । यजध्यै ।
आ । यः । इन्द्रावरुणौ । इषे । अद्य । महे । सुम्नाय । महे । आऽववर्तत् ॥ १ ॥

[v]महे महनीयौ हे [v]इन्द्रावरुणौ [v]वां युवयोरर्थे [v]श्रुष्टी क्षिप्रः । तथा च यास्कः—' श्रुष्टीति क्षिप्रनामाशु अष्टीति ' (निरु. ६. १२) । [v]यज्ञः सोमः [v]सजोषाः ऋत्विग्भिः सहितः [v]अद्य [v]आ समन्तात् [v]उद्यतः प्रवृत्तः । [v]यः सोमः [v]मनुष्वत् मनोरिव [v]वृक्तबर्हिषः स्तीर्णबर्हिषः यजमानस्य [v]इषे अन्नार्थं [v]महे महते [v]सुम्नाय सुखाय च [v]यजध्यै यष्टुं वाम् [v]आववर्तत् आवर्तयति ॥

ता हि श्रेष्ठा देवताता तुजा शूराणां शविष्ठा ता हि भूतम् ।
मघोनां मंहिष्ठा तुविशुष्मा ऋतेन वृत्रतुरा सर्वसेना ॥ २ ॥

ता । हि । श्रेष्ठा । देवऽताता । तुजा । शूराणाम् । शविष्ठा । ता । हि । भूतम् ।
मघोनाम् । मंहिष्ठा । तुविऽशुष्मा । ऋतेन । वृत्रऽतुरा । सर्वऽसेना ॥ २ ॥

हे इन्द्रावरुणौ [v]ता तौ प्रसिद्धौ युवां [v]श्रेष्ठा श्रेष्ठौ [v]देवताता देवतातौ यज्ञे । ' इष्टिः देवताता ' इति यज्ञनामसु पाठात् । [v]तुजा धनानां प्रेरकौ [v]हि [v]भूतं भवतम् । किंच [v]ता तौ [v]हि युवां [v]शूराणां मध्ये [v]शविष्ठा अतिशयेन बलवन्तौ भूतम् । किंच [v]मघोनां[२] दानवतां [v]मंहिष्ठा दातृतमौ [v]तुविशुष्मा बहुबलौ [v]ऋतेन सत्येन [v]वृत्रतुरा शत्रूणां हिंसकौ [v]सर्वसेना कृत्स्नसेनौ च भूतमिति ॥

ता गृणीहि नमस्येभिः शूषैः सुम्नेभिरिन्द्रावरुणा चकाना ।
वज्रेणान्यः शवसा हन्ति वृत्रं सिषक्त्यन्यो वृजनेषु विप्रः ॥ ३ ॥

ता । गृणीहि । नमस्येभिः । शूषैः । सुम्नेभिः । इन्द्रावरुणा । चकाना ।
वज्रेण । अन्यः । शवसा । हन्ति । वृत्रम् । सिषक्ति । अन्यः । वृजनेषु । विप्रः ॥ ३ ॥

२. ख-ञ-न-भ–मघोनां देवानाम् ।

हे भरद्वाज [v]नमस्येभिः स्तुत्यैः [v]शूषैः बलैः । 'शूषम्' इति बलनामसु पाठात् । [v]सुम्नेभिः सुखैश्च सर्वैः [v]चकाना स्तुतौ ॥ कायतिः शब्दकर्मा । तस्य लिटः कानचि रूपमिदम् ॥ [v]ता तावित्द्रावरुणौ [v]गृणीहि स्तुहि । [v]अन्यः तयोरन्य इन्द्रः [v]वृत्रं वृत्रनामकमसुरं [v]वज्रेण [v]हन्ति । [v]अन्यः वरुणः [v]विप्रः प्राज्ञः [v]वृजनेषु स्तोतृणामुपद्रवेषु रक्षितुं [v]शवसा बलेन [v]सिषक्ति संगच्छते ॥

ग्राश्च यन्नरश्च व्यवृधन्त विश्वे देवासो नरां स्वगूर्ताः ।
प्रैभ्य इन्द्रावरुणा महित्वा द्यौश्च पृथिवि भूतमुर्वी ॥ ४ ॥

ग्राः । च । यत् । नरः । च । वयृधन्त । विश्वे । देवासः । नराम् । स्वऽगूर्ताः ।
प्र । एभ्यः । इन्द्रावरुणा । महिऽत्वा । द्यौः । च । पृथिवि । भूतम् । उर्वी इति ॥ ४ ॥

[v]नरां नृणां मनुष्याणां मध्ये [v]ग्राश्च स्त्रियश्च । 'मेना ग्रा इति स्त्रीणाम्' (निरु. ३. २१) इति यास्कवचनात् । [v]नरश्च पुरुषाश्च [v]विश्वे सर्वे [v]देवासः देवाः स्तोतारः ॥ देवासः इत्यत्र 'पुमान् स्त्रिया' इत्येकशेषात् देव्यश्च देवाश्च देवास इति निर्देशः पुंवन्निर्देशः ॥ [v]स्वगूर्ताः स्वयमुद्यताः [v]यत् यदा [v]वयवृधन्त स्तुतिभिर्वर्धयन्ते[1] तदा हे इन्द्रावरुणौ [v]महित्वा महत्त्वयुक्तौ [v]एभ्यः स्तोतृभ्यः [v]प्र [v]भूतं प्रभवतम् । हे [v]द्यौः [v]पृथिवि [v]च उभे [v]उर्वी विस्तीर्णे युवामेभ्यः प्र भूतमित्यनुषङ्गः ॥

स इत्सुदानुः स्ववाँ ऋतावेन्द्रा यो वां वरुण दाशति त्मन् ।
इषा स द्विषस्तरेद्दास्वान्वंसद्रयिं रयिवतश्च जनान् ॥ ५ ॥

सः । इत् । सुऽदानुः । स्वऽवान् । ऋतऽवा । इन्द्रा । यः । वाम् । वरुणा । दाशति । त्मन् ।
इषा । सः । द्विषः । तरेत् । दास्वान् । वंसत् । रयिम् । रयिऽवतः । च । जनान् ॥ ५ ॥

हे [v]इन्द्रा इन्द्रौ [v]वरुणा हे वरुणौ ॥ इतरेतरयोगादुभयत्र द्विवचनप्रयोगः । वरुणेत्यत्र संहितायां ह्रस्वश्छान्दसः ॥ [v]वां युवाभ्यां [v]यः यजमानः [v]त्मन् आत्मनैव [v]दाशति हवींषि ददाति [v]स [v]इत् स एव [v]सुदानुः शोभनदानो भवति । [v]स्ववान् धनवांश्च [v]ऋतावा यज्ञवांश्च भवति । किंच [v]सः [v]दास्वान् दानवान् [v]द्विषः द्वेष्टुः [v]इषा अन्नेन जयलब्धेन सह [v]तरेत् प्राप्नुयात् । अपि च [v]रयिं धनं [v]रयिवतः धनवतः [v]जनान् पुत्रान् [v]च [v]वंसत् संभजेत्[2] ॥ ॥ ११ ॥

यं युवं दाश्वध्वराय देवा रयिं धत्थो वसुमन्तं पुरुक्षुम् ।
अस्मे स इन्द्रावरुणावपि ष्यात्प्र यो भनक्ति वनुषामशस्तीः ॥ ६ ॥

यम् । युवम् । दाशुऽअध्वराय । देवा । रयिम् । धत्थः । वसुऽमन्तम् । पुरुऽक्षुम् ।
अस्मे इति । सः । इन्द्रावरुणौ । अपि । स्यात् । प्र । यः । भनक्ति । वनुषाम् । अशस्तीः ॥ ६ ॥

[v]देवा देवौ स्तूयमानौ हे [v]इन्द्रावरुणौ [v]युवं युवां [v]दाश्वध्वराय दत्तहविष्काय [v]वसुमन्तं धनानुबन्धिनं [v]पुरुक्षुं बह्वन्नं पूर्णयशस्कं वा [v]यं यादृशं [v]रयिं धनं [v]धत्थः प्रयच्छथः । [v]यः [v]अपि च [v]वनुषां हिंसकानाम् [v]अशस्तीः अकीर्तीः । शत्रुकृतान्ययशांसीत्यर्थः । [v]प्र [v]भनक्ति प्ररुजति [v]सः तादृशो रयिः [v]अस्मे अस्मासु [v]स्यात् भूयात् ॥

---

१. य–स्तुत्या वर्धन्ते वर्धयन्ति । २. ख-ङ्ग-भ–संभजते; न-श–संभजेत ।

उत नः सुत्रात्रो देवगोपाः सूरिभ्य इन्द्रावरुणा रयिः ष्यात् ।
येषां शुष्मः पृतनासु साह्वान्प्र सद्यो द्युम्ना तिरते ततुरिः ॥ ७ ॥

उत । नः । सुऽत्रात्रः । देवऽगोपाः । सूरिऽभ्यः । इन्द्रावरुणा । रयिः । स्यात् ।
येषाम् । शुष्मः । पृतनासु । सह्वान् । प्र । सद्यः । द्युम्ना । तिरते । ततुरिः ॥ ७ ॥

vउत अपि च vइन्द्रावरुणा हे इन्द्रावरुणौ vसूरिभ्यः स्तोतृभ्यः vनः अस्मभ्यं vसुत्रात्रः सुरक्षः vदेवगोपाः । देवा गोपा गोप्तारो यस्य स तथाविधः । vरयिः धनं vस्यात् भूयात् । किंच vयेषाम् अस्माकं vशुष्मः बलं vपृतनासु युद्धेषु vसाह्वान् शत्रूणामभिभविता vततुरिः हिंसकश्च सन् vद्युम्ना यशांसि vसद्यः एव vप्र vतिरते सम्यक् तिरस्कुर्यात् ॥

नू नं इन्द्रावरुणा गृणाना पृङ्क्तं रयिं सौश्रवसाय देवा ।
इत्था गृणन्तो महिनस्य शर्धोऽपो न नावा दुरिता तरेम ॥ ८ ॥

नु । नः । इन्द्रावरुणा । गृणाना । पृङ्क्तम् । रयिम् । सौश्रवसाय । देवा ।
इत्था । गृणन्तः । महिनस्य । शर्धः । अपः । न । नावा । दुःऽइता । तरेम ॥ ८ ॥

हे vइन्द्रावरुणा इन्द्रावरुणौ vगृणाना स्तूयमानौ युवां vनः अस्मभ्यं vसौश्रवसाय । सुश्रवसो भावः सौश्रवसम् । तस्मै सुश्रवस्त्वाय[1] vरयिं धनं vनु क्षिप्रं vपृङ्क्तं प्रयच्छतम् । किंच vदेवा हे देवौ vमहिनस्य महतोर्युवयोः vशर्धः बलम् vइत्था इत्थं vगृणन्तः स्तुवन्तो वयं vदुरिता दुरितानि vनावा vअपो vन उदकानीव vतरेम ॥

प्र सम्राजे बृहते मन्म नु प्रियमर्चे देवाय वरुणाय सप्रथः ।
अयं य उर्वी महिना महिव्रतः क्रत्वा विभात्यजरो न शोचिषा ॥ ९ ॥

प्र । सम्ऽराजे । बृहते । मन्म । नु । प्रियम् । अर्चे । देवाय । वरुणाय । सुऽप्रथः ।
अयम् । यः । उर्वी इति । महिना । महिऽव्रतः । क्रत्वा । विऽभाति । अजरः । न । शोचिषा ॥९॥

हे स्तोतः vसम्राजे आज्ञया राज्ञां शासकाय vबृहते परिवृढाय vदेवाय द्योतमानाय vवरुणाय vप्रियं मनोहरं vसप्रथः सर्वतः पृथु । तथा च यास्कः—'सप्रथाः सर्वतः पृथुः' (निरु. ६. ७) इति । vमन्म स्तोत्रं vनु अद्य vप्र vअर्चे प्रोच्चारय । vअयं vयः योऽयं वरुणः vमहिना महिम्ना युक्तः vमहिव्रतः[2] महाकर्मा vक्रत्वा प्रज्ञया च युक्तः vअजरो vन जरारहितश्च vउर्वी विस्तीर्णे द्यावापृथिव्यौ vशोचिषा दीप्त्या vविभाति विभासयति ॥

इन्द्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रता ।
युवो रथो अध्वरं देववीतये प्रति स्वसरमुप याति पीतये ॥ १० ॥

इन्द्रावरुणा । सुतऽपौ । इमम् । सुतम् । सोमम् । पिबतम् । मद्यम् । धृतऽव्रता ।
युवोः । रथः । अध्वरम् । देवऽवीतये । प्रति । स्वसरम् । उप । याति । पीतये ॥ १० ॥

---

१. ख-भ-सौश्रवसाय; झ-न-सुयअवस्वाय; श-सुयशस्त्वाय । २. ख-झ-न-भ-महिव्रतो महाव्रतः ।

vइन्द्रावरुणा हे इन्द्रावरुणौ vसुतपौ सुतस्य सोमस्य पातारौ युवां vमद्यं मदकरं vसुतम् अभिषुतम् vइमं vसोमं vपिबतम् । किंच vघृतव्रता हे घृतकर्माणौ vयुवोः युवयोः vरथः vअध्वरम् उद्दिश्य vदेववीतये देवानां पानार्थं vपीतये युवयोरपि सोमपानार्थं vस्वसरं मार्गं vप्रति vउप vयाति ॥

इन्द्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथाम् ।
इदं वामन्धः परिषिक्तमस्मे आसद्यास्मिन्बर्हिषि मादयेथाम् ॥ ११ ॥

इन्द्रावरुणा । मधुमत्ऽतमस्य । वृष्णः । सोमस्य । वृषणा । आ । वृषेथाम् ।
इदम् । वाम् । अन्धः । परिऽसिक्तम् । अस्मे इति ।
आऽसद्य । अस्मिन् । बर्हिषि । मादयेथाम् ॥ ११ ॥

vइन्द्रावरुणा हे इन्द्रावरुणौ vवृषणा कामानां वर्षितारौ युवां vमधुमत्तमस्य अतिशयेन मधुमन्तं[1] रसवन्तं vवृष्णः वर्षितारं vसोमस्य सोमम् vआ vवृषेथाम् अक्षीतम् । तथा च शतपथ-ब्राह्मणं—' यथाभागमावृषायध्वमिति यथाभागमक्षीतेत्येवैतदाह ' (श. ब्रा. २. ४. २. २०) इति । vवां युवयोरर्थे vइदम् vअन्धः सोमरूपमन्नम् vअस्मे अस्माभिः vपरिषिक्तं पात्रेषु । अतः vआसद्य उपविश्य vअस्मिन् vबर्हिषि यज्ञे vमादयेथां सोमपानेनेति शेषः ॥ ॥ १२ ॥

' सं वां कर्मणा ' इत्यष्टर्चमष्टमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैन्द्रावैष्णवम् । अनुक्रम्यते च—' सं वामष्टावैन्द्रावैष्णवम् ' इति । उक्थ्ये तृतीयसवनेऽच्छावाकशस्त्र एतत् सूक्तम् । सूत्र्यते हि—' सं वां कर्मणेन्द्राविष्णू मदपती मदानामिति याज्या ' (आश्व. श्रौ. ६. १) इति । सोमातिरेके प्रातःसवने नैमित्तिके शस्त्रे परिहिते सति गाणगारिमते ' सं वाम् ' इति तस्य शस्त्रयाज्या । सूत्रितं च—' ऐन्द्रावैष्णव्येति गाणगारिर्दैवतप्रधानत्वात् सं वां कर्मणा समिषा हिनोमि ' (आश्व. श्रौ. ६. ७) इति । सोमातिरेके माध्यंदिनसवने ' या विश्वासाम् ' इत्येषा शस्त्रयाज्या । सूत्रितं च—' या विश्वासां जनितारा मतीनामिति याज्या ' (आश्व. श्रौ. ६. ७) इति । उक्थ्ये तृतीयसवनेऽच्छावाकस्य ' इन्द्राविष्णू मदपती ' इति शस्त्रयाज्या । सूत्रं तूदाहृतम् । तृतीयसवनेऽच्छावाकस्य ' इन्द्राविष्णू पिबतम् ' इति प्रस्थितयाज्या । सूत्रितं च — ' इन्द्राविष्णू पिबतं मध्वो अस्येमं स्तोममर्हते जातवेदसे ' (आश्व. श्रौ. ५. ५) इति ॥

सं वां कर्मणा समिषा हिनोमीन्द्राविष्णू अपसस्पारे अस्य ।
जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्ता ॥ १ ॥

सम् । वाम् । कर्मणा । सम् । इषा । हिनोमि । इन्द्राविष्णू इति । अपसः । पारे । अस्य ।
जुषेथाम् । यज्ञम् । द्रविणम् । च । धत्तम् । अरिष्टैः । नः । पथिऽभिः । पारयन्ता ॥ १ ॥

हे vइन्द्राविष्णू vवां युवां vकर्मणा स्तोत्रेण vइषा हविषा च vसं vहिनोमि सम्यक् प्रेरयामि । vअपसः कर्मणः vअस्य उक्थस्य vपारे समाप्तौ vयज्ञं vजुषेथां सेवेथाम् । किंच vअरिष्टैः अनुपद्रवैः vपथिभिः मार्गैः vनः अस्मान् vपारयन्ता पारं नयन्तौ युवां vद्रविणं धनं vधत्तम् अस्मभ्यं दत्तम् ॥

---

१. ख-घ-ङ्ग-त-न-भ-श—' मधुमन्तं ' नास्ति ।

या विश्वासां जनितारा मतीनामिन्द्राविष्णू कलशा सोमधाना ।
प्र वां गिरः शस्यमाना अवन्तु प्र स्तोमासो गीयमानासो अर्कैः ॥ २ ॥

या । विश्वासाम् । जनितारा । मतीनाम् । इन्द्राविष्णु इति । कलशा । सोमऽधाना ।
प्र । वाम् । गिरः । शस्यमानाः । अवन्तु । प्र । स्तोमासः । गीयमानासः । अर्कैः ॥ २ ॥

[v]या यौ प्रसिद्धौ [v]इन्द्राविष्णू [v]विश्वासां सर्वासां [v]मतीनां स्तुतीनां [v]जनितारा जनितारौ ॥ 'जन जनने' इत्यस्मात् धातोः तृचि इदं रूपम् । यद्वा । 'जनी प्रादुर्भावे' इत्यस्मात् धातोरेव तृचि 'जनिता मन्त्रे' इति निपातनात् णिलोपः ॥ [v]कलशा कलशौ [v]सोमधाना सोमस्य निधानभूतौ च स्याताम् । अथ प्रत्यक्षस्तुतिः । हे इन्द्राविष्णू [v]वां युवां [v]शस्यमानाः उच्चार्यमाणाः शस्त्ररूपाः [v]गिरः वाचः [v]प्र [v]अवन्तु प्राप्नुवन्तु । [v]अर्कैः स्तोतृभिः [v]गीयमानासः गीयमानाः [v]स्तोमासः स्तोमाः स्तोत्राणि च [v]प्र अवन्तु प्राप्नुवन्तु ॥

इन्द्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना ।
सं वामञ्जन्त्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः ॥ ३ ॥

इन्द्राविष्णु इति । मदपती इति मदऽपती । मदानाम् । आ । सोमम् । यातम् । द्रविणो इति । दधाना ।
सम् । वाम् । अञ्जन्तु । अक्तुऽभिः । मतीनाम् । सम् । स्तोमासः । शस्यमानासः । उक्थैः ॥३॥

हे [v]इन्द्राविष्णू [v]मदानां सोमानां [v]मदपती स्वामिनौ । मदपती इत्यत्र मदशब्दः[1] अनुवादः । [v]द्रविणो द्रविणानि धनान्यपि ॥ द्रविणा उ इति पदद्वयमेकीभूय द्रविणो इति निष्पन्नं पदम् ॥ [v]दधाना ददानौ युवां [v]सोमम् अभि[2] [v]आ [v]यातम् । [v]मतीनां स्तोतॄणां [v]स्तोमासः स्तोत्राणि [v]उक्थैः शस्त्रैः सार्धं [v]शस्यमानासः उच्चार्यमाणाः [v]वां युवाम् [v]अक्तुभिः तेजोभिः [v]सम् [v]अञ्जन्तु[3] समर्धयन्तु । सं समिति द्विरुक्तिरादरार्था ॥

आ वामश्वासो अभिमातिषाह इन्द्राविष्णू सधमादो वहन्तु ।
जुषेथां विश्वा हवना मतीनामुप ब्रह्माणि शृणुतं गिरो मे ॥ ४ ॥

आ । वाम् । अश्वासः । अभिमातिऽसहः । इन्द्राविष्णू इति । सधऽमादः । वहन्तु ।
जुषेथाम् । विश्वा । हवना । मतीनाम् । उप । ब्रह्माणि । शृणुतम् । गिरः । मे ॥ ४ ॥

हे [v]इन्द्राविष्णू [v]वां युवाम् [v]अभिमातिषाहः अभिमातीनां हिंसकानामभिभवितारः [v]सधमादः सह माद्यन्तः [v]अश्वासः अश्वाः [v]आ [v]वहन्तु । [v]मतीनां स्तोतॄणां [v]विश्वा विश्वानि सर्वाणि [v]हवना हवनानि स्तोत्राणि [v]जुषेथां सेवेथाम् । तदर्थं [v]मे मदीयानि [v]ब्रह्माणि स्तोत्राणि [v]गिरः शस्त्ररूपा वाचश्च [v]उप [v]शृणुतम् ॥

---

१. झ-न-श-द्वेमदशब्दः । २. ख-भ-प्रति । ३. झ-त-न-य-श-समञ्जन्तु ।

इन्द्राविष्णू तत्पनयाय्यं वां सोमस्य मदे उरु चक्रमाथे ।
अकृणुतमन्तरिक्षं वरीयोऽप्रथतं जीवसे नो रजांसि ॥ ५ ॥

इन्द्राविष्णू इति । तत् । पनयाय्यम् । वाम् । सोमस्य । मदे । उरु । चक्रमाथे इति ।
अकृणुतम् । अन्तरिक्षम् । वरीयः । अप्रथतम् । जीवसे । नः । रजांसि ॥ ५ ॥

हे vइन्द्राविष्णू vवां युवयोः vतत् कर्म vपनयाय्यं स्तुत्यम् । किं तत् कर्मेत्यत आह । vसोमस्य vमदे सति यत् vउरु विस्तीर्णं vचक्रमाथे विचक्रमाथे[1] । यद्यपि विष्णोरेव विक्रमः तथापि एकार्थत्वादुभयोरित्युच्यते । यच्च vअन्तरिक्षं vवरीयः उरुतरम् vअकृणुतम् अकुरुतम् । यदपि च vरजांसि लोकान् सर्वान् । 'लोका रजांस्युच्यन्ते' इति यास्कः । vनः अस्माकं vजीवसे जीवनाय vअप्रथतम् अप्रथयतम् ॥

इन्द्राविष्णू हविषा वावृधानाग्राद्धाना नमसा रातहव्या ।
घृतासुती द्रविणं धत्तमस्मे समुद्रः स्थः कलशः सोमधानः ॥ ६ ॥

इन्द्राविष्णू इति । हविषा । ववृधाना । अग्रेऽअद्धाना । नमसा । रातऽहव्या ।
घृतासुती इति घृतेऽआसुती । द्रविणम् । धत्तम् । अस्मे इति ।
समुद्रः । स्थः । कलशः । सोमऽधानः ॥ ६ ॥

vघृतासुती घृताक्तौ vइन्द्राविष्णू युवां vहविषा सोमेन vवावृधाना वर्धमानौ vअग्राद्धाना सोमाग्रस्य[2] शुक्रस्य अत्तारौ vनमसा नमस्कारेण vरातहव्या दत्तहविष्कौ यजमानैः vअस्मे अस्मभ्यं vद्रविणं धनं vधत्तं प्रयच्छतम् । किंच युवां vसमुद्रः उदधिरिव vस्थः भवथः । यतः vसोमधानः सोमनिधानः vकलशः भवथः ॥

इन्द्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथाम् ।
आ वामन्धांसि मदिराण्यग्मन्नुप ब्रह्माणि शृणुतं हवं मे ॥ ७ ॥

इन्द्राविष्णू इति । पिबतम् । मध्वः । अस्य । सोमस्य । दस्रा । जठरम् । पृणेथाम् ।
आ । वाम् । अन्धांसि । मदिराणि । अग्मन् । उप । ब्रह्माणि । शृणुतम् । हवम् । मे ॥ ७ ॥

vदस्रा हे दर्शनीयौ vइन्द्राविष्णू युवां vमध्वो[3] vअस्य मदकरमिमं vसोमस्य सोमं vपिबतम् । किंच vजठरम् उदरं vपृणेथां सोमेन पूरयेथाम् । हे इन्द्राविष्णू vवां युवां[3] vमदिराणि मदकराणि vअन्धांसि सोमात्मकान्यन्नानि vआ vअग्मन् अभिगच्छन्तु । vमे मदीयानि vब्रह्माणि स्तोत्राणि vहवं मदीयमाह्वानं च vउप vशृणुतम् ॥

---

१. ख-घ-ङ्ग-न-भ-श–'विचक्रमाथे' नास्ति। २. ख-घ-ङ्ग-न-भ–सोमस्य। ३. ख-ङ्ग-न-भ-श–'मध्वो...युवां' नास्ति; घ–मध्वः मधुरस्य मधुरमस्य सोमस्य इमं सोमं पिबतं जठरं पृणेथां पूरयेथाम्। वां युवाम्; त–अस्य सोमस्य इमं सोमं मध्वः मधुरं पिबतम्। तेन च जठरमुदरं सोमेन पृणेथां पूरयेथाम्। हे इन्द्राविष्णू वां युवाम्।

उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः ।
इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम् ॥ ८ ॥

उभा । जिग्यथुः । न । परा । जयेथे इति । न । परा । जिग्ये । कतरः । चन । एनोः ।
इन्द्रः । च । विष्णो इति । यत् । अपस्पृधेथाम् ।
त्रेधा । सहस्रम् । वि । तत् । ऐरयेथाम् ॥ ८ ॥

हे इन्द्राविष्णू ᵛउभा उभौ युवां ᵛजिग्यथुः शत्रूनजैष्टम् । ᵛन ᵛपरा ᵛजयेथे न पुनः कदाचन पराजयेथे । ᵛएनोः एनयोर्युवयोर्मध्ये ᵛकतरश्चन एकतरोऽपि ᵛन ᵛपरा ᵛजिग्ये न पराजैष्ट । हे ᵛविष्णो ᵛइन्द्रश्च[1] त्वं च युवां ᵛयत् यद्वस्तु प्रति ᵛअपस्पृधेथाम् असुरैः सहास्पृधेथां ᵛत्रेधा लोकवेदवागात्मना त्रिधा स्थितं ᵛसहस्रम् अमितं च ᵛवि ᵛतत् ᵛऐरयेथां व्यक्रमेथामित्यर्थः । तथा च ब्राह्मणम्—' उभा जिग्यथुरित्यच्छावाकस्योभौ हि तौ जिग्यतुर्न परा जयेथे न परा जिग्य इति न हि तयोः कतरश्चन पराजिग्य इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथामितीन्द्रश्च ह वै विष्णुश्चासुरैर्युयुधाते तान् ह स्म जित्वोचतुः कल्पामहा इति ते ह तथेत्यसुरा ऊचुः सोऽब्रवीदिन्द्रो यावदेवायं विष्णुस्त्रिर्विक्रमते तावदस्माकमथ युष्माकमितरदिति स इमाँल्लोकान्विचक्रमेऽथो वेदानथो वाचं तदाहुः किं तत्सहस्रमितीमे लोका इमे वेदा अथो वागिति ब्रूयादैरयेथामैरयेथाम् ' (ऐ. ब्रा. ६·१५) इति । यद्वा । तत् सहस्रं गवां सहस्रं त्रेधा त्र्यैरयेथामित्यर्थः ॥ ॥ १३ ॥

' घृतवती भुवनानाम् ' इति षड्चं नवमं सूक्तं भरद्वाजस्यार्षं जागतं द्यावापृथिवीदेवताकम् । तथा चानुक्रम्यते—' घृतवती षट् द्यावापृथिवीयं[2] जागतम् ' इति । आभिप्लविके पञ्चमेऽहनि वैश्वदेवशस्त्र आद्यस्तृचो द्यावापृथिव्यनिविद्धानार्थः । सूत्रितं च—' घृतवती भुवनानामभिश्रियेन्द्र ऋभुभिर्वाजवद्भिरिति तृचौ ' (आश्व. श्रौ. ७ . ७) इति । बृहस्पतिसवेऽपि वैश्वदेवशस्त्रे एष तृचः । सूत्रितं च (आश्व. श्रौ. ९ . ५) । आभिप्लविके तृतीयेऽहनि वैश्वदेवशस्त्रे ' घृतेन द्यावापृथिवी ' इति तिस्रो द्यावापृथिव्यनिविद्धानार्थाः । सूत्रितं च– ' घृतेन द्यावापृथिवी इति तिस्रोऽनश्वो जातः ' (आश्व. श्रौ. ७ . ७) इति ॥

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ १ ॥

घृतवती इति घृतऽवती । भुवनानाम् । अभिऽश्रिया ।
उर्वी इति । पृथ्वी इति । मधुदुघे इति मधुऽदुघे । सुऽपेशसा ।
द्यावापृथिवी इति । वरुणस्य । धर्मणा ।
विस्कभिते इति विऽस्कभिते । अजरे इति । भूरिऽरेतसा ॥ १ ॥

---

१. ख-ङ्ग-त-श–इन्द्र; घ–इन्द्रः । २. ख-ङ्ग-न-भ–द्यावापृथिव्यम् ।

[v]द्यावापृथिवी द्यावापृथिव्यौ [v]घृतवती दीप्तिमत्यौ उदकवत्यौ वा। 'वनं घृतम्' इत्युदकनामसु पाठात्। भवत इति शेषः। [v]भुवनानां भूतानाम् [v]अभिश्रिया अभिश्रयणीये[1] भवत इति सर्वत्रानुसंधेयम्। [v]उर्वी विस्तीर्णे [v]पृथ्वी बहुकार्यरूपेण प्रथिते च [v]मधुदुघे मधुन उदकस्य [v]दोग्ध्र्यौ [v]सुपेशसा सुरूपे [v]वरुणस्य सर्वस्य नियामकस्य [v]धर्मणा धारणेन[2] [v]विष्कभिते पृथग्धारिते [v]अजरे नित्ये [v]भूरिरेतसा बहुरेतस्के बहुकार्ये[3] वा भवतः[3]। अत्र साक्षात् द्यावापृथिव्योः स्तुतिः प्रसङ्गात् वरुणस्येति द्रष्टव्यम्॥

असश्चन्ती भूरिधारे पयस्वती घृतं दुहाते सुकृते शुचिव्रते।
राजन्ती अस्य भुवनस्य रोदसी अस्मे रेतः सिञ्चतं यन्मनुर्हितम्॥ २॥

असश्चन्ती इति। भूरिधारे इति भूरिऽधारे। पयस्वती इति। घृतम्। दुहाते इति। सुऽकृते। शुचिव्रते इति शुचिऽव्रते। राजन्ती इति। अस्य। भुवनस्य। रोदसी इति। अस्मे इति। रेतः। सिञ्चतम्। यत्। मनुःऽहितम्॥ २॥

[v]असश्चन्ती असज्यमाने व्युदस्यन्त्यौ वा [v]भूरिधारे बहुधारे। दिवो वृष्टिधाराः पृथिव्याश्चाहुस्युत्तरसधाराः। एवमुभयोरपि बहुधारत्वम्[4]। [v]पयस्वती उदकवत्यौ। तथा च यास्कः–'असज्यमाने इति वा व्युदस्यन्त्याविति वा बहुधारे उदकवत्यौ' (निरु. ५.२) इति। [v]शुचिव्रते शुचिक्रिये द्यावापृथिव्यौ [v]सुकृते शोभनकारिणे यजमानाय [v]घृतं सस्यादिसमृद्धिहेतुमुदकं [v]दुहाते। अथ प्रत्यक्षस्तुतिः। [v]रोदसी हे द्यावापृथिव्यौ [v]अस्य [v]भुवनस्य भूतजातस्य [v]राजन्ती ईशाने युवाम् [v]अस्मे अस्मासु [v]रेतः प्रजननसमर्थं वीर्यं [v]सिञ्चतम्। [v]यत् रेतः [v]मनुर्हितं मनुष्येभ्यो हितम्॥

यो वामृजवे क्रमणाय रोदसी मर्तो ददाश धिषणे स साधति।
प्र प्रजाभिर्जायते धर्मणस्परि युवोः सिक्ता विषुरूपाणि सव्रता॥ ३॥

यः। वाम्। ऋजवे। क्रमणाय। रोदसी इति। मर्तः। ददाश। धिषणे इति। सः। साधति। प्र। प्रऽजाभिः। जायते। धर्मणः। परि। युवोः। सिक्ता। विषुऽरूपाणि। सऽव्रता॥३॥

[v]धिषणे धृष्टे सर्वस्य भुवनस्य निवासभूते वा हे [v]रोदसी [v]वां युवाभ्यां [v]यः [v]मर्तः मर्त्यः [v]ऋजवे [v]क्रमणाय युवयोः सुखगमनाय [v]ददाश हवींषि ददाति [v]सः मर्त्यः [v]साधति[5] कामान् साधयति। किंच [v]प्रजाभिः पुत्रपौत्रादिभिः [v]प्र [v]जायते प्रवृद्धो भवति। [v]धर्मणः कर्मणः [v]परि उपरि [v]युवोः युवयोः [v]सिक्ता सिक्तानि रेतांसि [v]विषुरूपाणि नानावर्णानि [v]सव्रता समानकर्माणि भूतानि जायन्ते॥

---

१. ख-घ-ङ्ग-न-भ-श–अभिश्रयणीयेन। २. य–धारकेन। ३. य–बहुकार्येति भावः। ४. ख-ङ्ग-न भ–बहुधारम्; श–बहुधारं त्वम्। ५. ख-ङ्ग-न-भ– स साधति।

घृतेन द्यावापृथिवी अभीवृते घृतश्रिया घृतपृचा घृतावृधा ।
उर्वी पृथ्वी होतृवूर्ये पुरोहिते ते इद्विप्रा ईळते सुम्नमिष्टये ॥ ४ ॥

घृतेन । द्यावापृथिवी इति । अभिवृते इत्यभिऽवृते । घृतऽश्रिया । घृतऽपृचा । घृतऽवृधा ।
उर्वी इति । पृथ्वी इति । होतृऽवूर्ये । पुरोहिते इति पुरःऽहिते ।
ते इति । इत् । विप्राः । ईळते । सुम्नम् । इष्टये ॥ ४ ॥

vद्यावापृथिवी द्यावापृथिव्यौ vघृतेन उदकेन vअभिवृते आवृते[1] भवतः । vघृतश्रिया उदकं श्रयन्त्यौ च vघृतपृचा घृतसंपृक्ते च vघृतावृधा[2] घृतं वर्धयन्त्यौ च vउर्वी विस्तीर्णे vपृथ्वी प्रथिते च भवतः । vहोतृवूर्ये[3] यज्ञे vपुरोहिते यजमानैः पुरस्कृते च भवतः । vविप्राः प्राज्ञाः[4] स्तोतारः vते vइत् द्यावापृथिव्यावेव vइष्टये यज्ञाय । 'होत्रा इष्टिः' इति यज्ञनामसु पाठात् । vसुम्नं सुखम् vईळते याचन्ते । सुखे सति हि यागाः प्रवर्तन्ते ॥

मधु नो द्यावापृथिवी मिमिक्षतां मधुश्रुता मधुदुघे मधुव्रते ।
दधाने यज्ञं द्रविणं च देवता महि श्रवो वाजमस्मे सुवीर्यम् ॥ ५ ॥

मधु । नः । द्यावापृथिवी इति । मिमिक्षताम् ।
मधुऽश्रुता । मधुदुघे इति मधुऽदुघे । मधुव्रते इति मधुऽव्रते ।
दधाने इति । यज्ञम् । द्रविणम् । च । देवता ।
महि । श्रवः । वाजम् । अस्मे इति । सुऽवीर्यम् ॥ ५ ॥

vमधुश्रुता उदकस्य क्षारयित्र्यौ vमधुदुघे उदकदोग्ध्र्यौ vमधुव्रते उदकार्थकर्माणौ vदेवता देवताभूते vअस्मे अस्मासु vयज्ञं vद्रविणं धनं vच vमहि महत् vश्रवः यशः vवाजम् अन्नं vसुवीर्यं सुवीरत्वं च vदधाने ददत्यौ vद्यावापृथिवी द्यावापृथिव्यौ vनः अस्मान् vमधु मधुना ॥ तृतीयैकवचनस्य लुक् ॥ vमिमिक्षतां सिञ्चताम् ॥

ऊर्जं नो द्यौश्च पृथिवी च पिन्वतां पिता माता विश्वविदा सुदंससा ।
संरराणे रोदसी विश्वशंभुवा सनिं वाजं रयिमस्मे समिन्वताम् ॥ ६ ॥

ऊर्जम् । नः । द्यौः । च । पृथिवी । च । पिन्वताम् । पिता । माता । विश्वऽविदा । सुऽदंससा ।
संरराणे इति सम्ऽररणे । रोदसी इति । विश्वऽशंभुवा ।
सनिम् । वाजम् । रयिम् । अस्मे इति । सम् । इन्वताम् ॥ ६ ॥

---

१. ख-घ-ञ-न-भ-श–अपवृते । २. ख-ञ-त-न-भ-श–घृतवृधा । ३. ञ–होतृवूर्ये होतृभिर्वरणीये । ४. ख-ञ-न-भ–प्रजाः ।

vपिता वर्षस्य[1] सेकृत्वेन पितृभूता vद्यौश्च vमाता धारकत्वेन मातृभूता vपृथिवी vच उभे vनः अस्मभ्यम् vऊर्जम् अन्नं vपिन्वतां यच्छताम् । किंच vविश्ववित्रा विश्वं जानन्त्यौ विश्वस्य वेदयित्र्यौ वा vसुदंससा सुकर्माणौ vसंरराणे परस्परोपकार्योपकारकभावेन सह रममाणे vविश्वशंभुवा[2] सर्वस्य भावयित्र्यौ[2] vरोदसी द्यावापृथिव्यौ vअस्मे अस्मासु vसनिं संभजनीयं पुत्रादिकं vवाजं बलं vरयिं धनं च vसमिन्वतां संप्रेरयताम् ॥ ॥ १४ ॥

' उदु ष्य देवः ' इति षड्चं दशमं सूक्तं भरद्वाजस्यार्षं सवितृदेवताकम् । आद्यास्तिस्रो जगत्यश्चतुर्थ्यास्तिस्रस्त्रिष्टुभः । तथा चानुक्रान्तम्—' उदु ष्य सावित्रं त्रित्रिष्टुबन्तम्[3] ' इति । सूक्तविनियोगो लैङ्गिकः । चातुर्विंशिकेऽहनि वैश्वदेवशस्त्रे आद्यस्तृचः सावित्रसूक्तस्थान आवपनीयः । सूत्रितं च—'उदु ष्य देवः सविता हिरण्ययेति तिस्रस्ते हि द्यावापृथिवी ' (आश्व. श्रौ. ७ . ४) इति । बृहस्पतिसवेऽपि वैश्वदेवशस्त्रे सावित्रसूक्तस्थान एष तृचः । सूत्रितं च—' उदु ष्य देवः सविता हिरण्ययेत्यनूत्तिष्ठेत् ' (आश्व. श्रौ.९ . ५) इति । द्यूनहे पञ्चमेऽहनि वैश्वदेवशस्त्रे 'उदु ष्य देवः सविता दमूनाः ' इति तृचः सावित्रनिविद्धानार्थः । सूत्रितं च—'उदु ष्य देवः सविता दमूना इति तिस्रः ' (आश्व. श्रौ. ८ . ८) इति । वैश्वदेवपर्वणि सावित्रद्वादशकपालस्य ' वाममद्य ' इति याज्या । सूत्रितं च—' वाममद्य सवितर्वाममु श्वः पूषन्तव व्रते वयम् ' (आश्व. श्रौ. २ . १६) इति ॥

उदु ष्य देवः सविता हिरण्यया बाहू अयंस्त सवनाय सुक्रतुः ।
घृतेन पाणी अभि प्रुष्णुते मखो युवा सुदक्षो रजसो विधर्मणि ॥ १ ॥

उत् । ऊँ इति । स्यः । देवः । सविता । हिरण्यया । बाहू इति । अयंस्त । सवनाय । सुऽक्रतुः ।
घृतेन । पाणी इति । अभि । प्रुष्णुते । मखः । युवा । सुऽदक्षः । रजसः । विऽधर्मणि ॥१॥

vदेवः द्योतमानः vसुक्रतुः सुकर्मा vस्यः स प्रसिद्धः vसविता vहिरण्यया हिरण्मयौ आत्मीयौ vबाहू vसवनाय सुवनाय दानाय वा vउत् vअयंस्त उद्यच्छति । किंच vमखः महनीयः vयुवा नित्यतरुणः vसुदक्षः सुप्रज्ञः vरजसः लोकस्योदकस्य वा vविधर्मणि विधारणे स्थितः vघृतेन उदकेन पूर्णौ स्वौ vपाणी vअभि vप्रुष्णुते अभिप्रेरयति ॥

देवस्य वयं सवितुः सवीमनि श्रेष्ठे स्याम वसुनश्च दावने ।
यो विश्वस्य द्विपदो यश्चतुष्पदो निवेशने प्रसवे चासि भूमनः ॥ २ ॥

देवस्य । वयम् । सवितुः । सवीमनि । श्रेष्ठे । स्याम । वसुनः । च । दावने ।
यः । विश्वस्य । द्विऽपदः । यः । चतुःऽपदः । निऽवेशने । प्रऽसवे । च । असि । भूमनः॥२॥

तस्य vदेवस्य vसवितुः प्रेरकस्य vसवीमनि प्रसवेऽनुज्ञाने । तथा च यास्कः—' सवीमनि प्रसवे ' (निरु. ६ . ७) इति । vश्रेष्ठे अतिशयेन प्रशस्ते vवसुनः धनस्य vदावने दाने vच vस्याम समर्था भूयास्म । vयः त्वं vविश्वस्य सर्वस्य vद्विपदः vनिवेशने स्थितौ vप्रसवे vच स्वतन्त्रः vअसि । vयः त्वं vभूमनः भूरेः vचतुष्पदः निवेशने प्रसवे च स्वतन्त्रोऽसि ॥

---

१. ख-झ-न-भ-श–वर्षकस्य । २. ख-झ-त-न-भ-श–' विश्वशंभुवा...भावयित्र्यौ ' नास्ति । ३. ख-झ-न-भ-श–त्रिष्टुबन्तमिति ।

अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परि पाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशंस ईशत ॥ ३ ॥

अदब्धेभिः । सवितरिति । पायुऽभिः । त्वम् । शिवेभिः । अद्य । परि । पाहि । नः । गयम् ।
हिरण्यऽजिह्वः । सुविताय । नव्यसे । रक्ष । माकिः । नः । अघऽशंसः । ईशत ॥ ३ ॥

हे [v]सवितः [v]अदब्धेभिः अहिंसितैः [v]पायुभिः तेजोभिः रक्षणसाधनैर्वा [v]शिवेभिः सुखकरैः [v]नः अस्माकं [v]गयं गृहं धनं वा । ' गयः कृदरः ' इति गृहनामसु ' मीळ्हं गयः ' इति धननामसु पाठात् । [v]अद्य [v]परि [v]पाहि रक्ष । [v]हिरण्यजिह्वः हितरमणीयवाक् [v]त्वम् । तथा च यास्कः—' हिरण्यं कस्मात् ' इत्युपक्रम्य ' हितरमणं भवतीति वा ' (निरु. २ · १०) इति । [v]सुविताय सुखाय [v]नव्यसे नवतराय भव । [v]रक्ष[1] अस्मान्[1] पालय च । [v]नः अस्माकम् [v]अघशंसः अनर्थमाशंसमानः[2] शत्रुः[3] [v]माकिः [v]ईशत मेशत ॥

उदु ष्य देवः सविता दमूना हिरण्यपाणिः प्रतिदोषमस्थात् ।
अयोहनुर्यजतो मन्द्रजिह्व आ दाशुषे सुवति भूरि वामम् ॥ ४ ॥

उत् । ऊँ इति । स्यः । देवः । सविता । दमूनाः । हिरण्यऽपाणिः । प्रतिऽदोषम् । अस्थात् ।
अयःऽहनुः । यजतः । मन्द्रऽजिह्वः । आ । दाशुषे । सुवति । भूरि । वामम् ॥ ४ ॥

[v]देवः द्योतमानः [v]दमूनाः दममनाः दानमना वा । तथा च यास्कः—' दमूना दममना वा दानमना[4] वा[4] दान्तमना वा ' (निरु. ४. ४) इति । [v]हिरण्यपाणिः हिरण्मयपाणिः [v]अयोहनुः हिरण्मयहनुः । ' रुक्मम् अयः ' इति हिरण्यनामसु पाठात् । [v]यजतः यष्टव्यः [v]मन्द्रजिह्वः मोदमानवाक् [v]स्यः सः [v]सविता [v]प्रतिदोषं प्रतिरात्रं रात्रेः अवसानेऽवसाने [v]उत् [v]अस्थात् उत्तिष्ठतु । यः [v]दाशुषे यजमानाय मह्यं [v]भूरि प्रभूतं [v]वामं वननीयं संभजनीयमन्नम् । ' वामं वननीयम् ' (निरु. ६ · ३१) इति यास्कः । [v]आ [v]सुवति प्रेरयति ॥

उदू अयाँ उपवक्तेव बाहू हिरण्यया सविता सुप्रतीका ।
दिवो रोहाँस्यरुहत्पृथिव्या अरीरमत्पतयत्कच्चिदभ्वम् ॥ ५ ॥

उत् । ऊँ इति । अयान् । उपवक्ताऽइव । बाहू इति । हिरण्यया । सविता । सुऽप्रतीका ।
दिवः । रोहाँसि । अरुहत् । पृथिव्याः । अरीरमत् । पतयत् । कत् । चित् । अभ्वम् ॥५॥

[v]सविता [v]उपवक्तेव अस्माकमधिवक्तेव [v]हिरण्यया हिरण्मयौ [v]सुप्रतीका शोभनावयवौ [v]बाहू [v]उत् [v]अयान् उद्यच्छतु । योऽयं [v]पृथिव्याः पृथिवीपर्यन्तात् [v]दिवः अन्तरिक्षस्य [v]रोहांसि उच्छ्रितप्रदेशान् [v]अरुहत् रोहति । [v]पतयत् गच्छत् [v]कच्चित् यत्किंचित् [v]अभ्वं महत् सर्वं वस्तुजातं तिरोहितम् [v]अरीरमत् रमयति च ॥

---

१. ख-ञ-रक्षणेस्मान्; घ-अस्मान् रक्ष; न-भ-रक्षणेन; श-रक्षणास्मान्। २. ख-भ-अघमा°; ञ-न-अर्थमा°। ३. ख-ञ-त-न-भ-श-शत्रुः नोऽस्माकम्। ४. ख-ञ-न-भ-' दानमना वा ' नास्ति।

वामम॒द्य स॑वितर्वाम॒मु श्वो दि॒वेदि॑वे वाम॒मस्मभ्यं॑ सावीः ।
वामस्य॒ हि क्षय॑स्य देव॒ भूरे॑रया धि॒या वा॑म॒भाजः॑ स्याम ॥ ६ ॥

वाम॑म् । अ॒द्य । स॒वि॒तः॒ । वाम॑म् । ऊँ इति॑ । श्वः । दि॒वेऽदि॑वे । वाम॑म् । अ॒स्मभ्य॑म् । सा॒वीः॒ ।
वाम॑स्य । हि । क्षय॑स्य । दे॒व॒ । भूरेः॑ । अ॒या । धि॒या । वा॒म॒ऽभाजः॑ । स्या॒म॒ ॥ ६ ॥

हे [v]सवितः [v]अस्मभ्यं [v]वामं धनम् [v]अद्य [v]सावीः सुव । [v]श्वः च [v]वामं धनं प्रसुव । किं[1] बहूक्त्या[1] । [v]दिवेदिवे प्रतिदिनं [v]वामं धनं[2] प्रसुव । हे [v]देव [v]हि यस्मात् [v]क्षयस्य निवासभूतस्य [v]भूरेः प्रभूतस्य [v]वामस्य दातासि अतो वयम् [v]अया अनया [v]धिया स्तुत्या [v]वामभाजः धनवन्तः [v]स्याम भूयास्म ॥ ॥ १५ ॥

' इन्द्रासोमा महि ' इति पञ्चर्चमेकादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमिन्द्रासोमदेवताकम् । अनुक्रम्यते च–' इन्द्रासोमा पञ्चेन्द्रासोमम् ' इति । सूक्तविनियोगो लैङ्गिकः ॥

इन्द्रा॑सोमा॒ महि॒ तद्वां॑ महि॒त्वं यु॒वं म॒हानि॑ प्रथ॒मानि॑ चक्रथुः ।
यु॒वं सूर्यं॑ विविदथु॒र्युवं स्व॑१॒॑र्विश्वा॒ तमां॑स्यहतं नि॒दश्च॑ ॥ १ ॥

इन्द्रा॑सोमा । महि॑ । तत् । वा॒म् । म॒हि॒ऽत्वम् । यु॒वम् । म॒हानि॑ । प्र॒थमा॑नि । च॒क्र॒थुः॒ ।
यु॒वम् । सूर्य॑म् । वि॒वि॒द॒थुः॒ । यु॒वम् । स्वः॑ । विश्वा॑ । तमां॑सि । अ॒ह॒त॒म् । नि॒दः॒ । च॒ ॥ १ ॥

[v]इन्द्रासोमा हे इन्द्रासोमौ [v]वां युवयोः [v]तत् [v]महित्वं महत्त्वं [v]महि महत् । किं तदित्यत आह । [v]युवं युवां [v]महानि महान्ति [v]प्रथमानि प्रतमानि[3] मुख्यानि वा भूतानि । ' प्रथम इति मुख्यनाम प्रतमो[4] भवति ' (निरु. २·२२) इति यास्कः । [v]चक्रथुः अकार्ष्टम् । किंच [v]युवं युवां [v]सूर्यं [v]विविदथुः अलम्भयतं च जनान् । [v]युवं युवां [v]स्वः उदकं च विविदथुः । ' हेम स्वः ' इत्युदकनामसु पाठात् । अपि च [v]विश्वा विश्वानि [v]तमांसि [v]निदश्च निन्दितॄनसुरांश्च [v]अहतम् अहिंस्तम् ॥

इन्द्रा॑सोमा॒ वास॑यथ उ॒षास॒मुत्सूर्यं॑ नयथो॒ ज्योति॑षा स॒ह ।
उप॒ द्यां स्क॒म्भथुः॒ स्कम्भ॑नेनाप्र॒थतं॑ पृथि॒वीं मा॒तर॑ं॒ वि ॥ २ ॥

इन्द्रा॑सोमा । वास॑यथः । उ॒षस॑म् । उत् । सूर्य॑म् । न॒य॒थः॒ । ज्योति॑षा । स॒ह ।
उप॑ । द्याम् । स्क॒म्भथुः॒ । स्कम्भ॑नेन । अ॒प्र॒थत॑म् । पृ॒थि॒वीम् । मा॒तर॑म् । वि ॥ २ ॥

[v]इन्द्रासोमा हे इन्द्रासोमौ [v]उषसं [v]वासयथः विवासयथः । उषसं व्युच्छन्तीं कारयथ इत्यर्थः । किंच [v]सूर्यं [v]ज्योतिषा तेजसा [v]सह [v]उत् [v]नयथः । अपि च [v]द्यां

---

१. ख-झ-त-न-भ-य-श–किंच बहूक्त्या; घ–किंच । २. ख-घ-झ-न-भ-श–'धनं' नास्ति । ३. ख-झ-त-न-भ-श–प्रततानि । ४. झ-न-श–प्रथमो ।

दिवं vस्कम्भनेन स्तम्भनहेतुनान्तरिक्षेण[1] मध्ये स्थापितेन vउप vस्कम्भथुः अस्तम्भयतम्[2] । vमातरं विश्वस्य मातृभूतां vपृथिवीं vवि vअप्रथतं व्यप्रथयतम् ॥

इन्द्रासोमावहिमपः परिष्ठां हथो वृत्रमनु वां द्यौरमन्यत ।
प्राणांस्यैरयतं नदीनामा समुद्राणि पप्रथुः पुरूणि ॥ ३ ॥

इन्द्रासोमौ । अहिम् । अपः । परिऽस्थाम् । हथः । वृत्रम् । अनु । वाम् । द्यौः । अमन्यत ।
प्र । अर्णांसि । ऐरयतम् । नदीनाम् । आ । समुद्राणि । पप्रथुः । पुरूणि ॥ ३ ॥

हे vइन्द्रासोमौ vअहिं जगत आहन्तारम् vअपः मेघस्थान्युदकानि vपरिष्ठां परिवृत्य स्थितं vवृत्रम् असुरं vहथः हतम् । तदानीं vद्यौः vवां युवाम् vअनु vअमन्यत । किंच vनदीनाम् vअर्णांसि उदकानि vप्र vऐरयतम् । vपुरूणि बहूनि । 'तुवि पुरु' इति बहुनामसु पाठात् । vसमुद्राणि उदकस्थानानि vआ vपप्रथुः उदकैरापूरयतं च । अथवा समुन्दन्तीत्युदकान्येव समुद्राणि । तानि रसेनापूरयतमित्यर्थः । तथा च यास्कः–'समुद्रः कस्मात्समुद्द्रवन्त्यस्मादापः समभिद्रवन्त्येनमापः संमोदन्तेऽस्मिन्भूतानि समुदको भवति समुनत्तीति[3] वा' (निरु. २.१०) इति ॥

इन्द्रासोमा पक्वमामास्वन्तर्नि गवामिद्दधथुर्वक्षणासु ।
जगृभथुरनपिनद्धमासु रुशच्चित्रासु जगतीष्वन्तः ॥ ४ ॥

इन्द्रासोमा । पक्वम् । आमासु । अन्तः । नि । गवाम् । इत् । दधथुः । वक्षणासु ।
जगृभथुः । अनपिऽनद्धम् । आसु । रुशत् । चित्रासु । जगतीषु । अन्तरिति ॥ ४ ॥

vइन्द्रासोमा हे इन्द्रासोमौ vआमासु अपक्वासु vगवां vवक्षणासु ऊधःसु vअन्तः मध्ये vपक्वं पयः vनि vदधथुः । किंच vचित्रासु नानावर्णासु vआसु vजगतीषु गोषु । 'इळा जगती' इति गोनामसु पाठात् । vअन्तः मध्ये vअनपिनद्धं केनाप्यबद्धं vरुशत् शुक्लवर्णं पयः vजगृभथुः । यथा पृथिव्यां स्वयं न क्षरति तथा धारितवतावित्यर्थः । vइत् इति पूरणः ॥

इन्द्रासोमा युवमङ्ग तरुत्रमपत्यसाचं श्रुत्यं ररथे ।
युवं शुष्मं नर्यं चर्षणिभ्यः सं विव्यथुः पृतनाषाहमुग्रा ॥ ५ ॥

इन्द्रासोमा । युवम् । अङ्ग । तरुत्रम् । अपत्यऽसाचम् । श्रुत्यम् । ररथे इति ।
युवम् । शुष्मम् । नर्यम् । चर्षणिऽभ्यः । सम् । विव्यथुः । पृतनाऽसहम् । उग्रा ॥ ५ ॥

vइन्द्रासोमा हे इन्द्रासोमौ vयुवं युवां vतरुत्रं तारकम् vअपत्यसाचं संतानयुक्तं vश्रुत्यं श्रवणीयं[4] रयिं धनम् vअङ्ग क्षिप्रं vररथे अस्मभ्यं धत्थः । किंच vउग्रा हे उद्गूर्णाविन्द्रासोमौ vयुवं युवां vनर्यं नृभ्यो हितं vपृतनासहं शत्रुसैन्याभिभावुकं[5] vशुष्मं बलं vचर्षणिभ्यः मनुष्येभ्यः । 'कृष्टयः चर्षणयः' इति मनुष्यनामसु पाठात् । vसं vविव्यथुः समतनुतम् । परिवेष्टयथो वा ॥ ॥१६॥

---

१. ख-घ-ङ्ग-त-न-भ–स्तम्भनेन हेतुना°; य–स्कम्भनहेतुना° । २. य–अस्कम्भयतम् । ३. ख-ङ्ग-न-भ-श–समुन्नतीति । ४. ख-ङ्ग-न-भ-श-श्रयणीयम् । ५. ख-ङ्ग-त-न-भ-श–'शत्रुसैन्याभिभावुकं' नास्ति ।

'यो अद्रिभित्' इति तृचं द्वादशं सूक्तं बार्हस्पत्यं भरद्वाजस्यार्षं त्रैष्टुभम्। तथा चानुक्रम्यते—'यो अद्रिभित्तृचं बार्हस्पत्यम्' इति। आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे स्तोमातिशंसनार्थमिदं सूक्तम्। सूच्यते हि—'यो अद्रिभिद्यज्ञे दिव इति सूक्ते' (आश्व. श्रौ. ७·९) इति। वाजपेये बार्हस्पत्ये चरौ 'बृहस्पतिः समजयद्वसूनीति - - - त्वामीळते अजिरं दूत्याय' (आश्व. श्रौ. ९. ९) इति॥

यो अद्रिभित्प्रथमजा ऋतावा बृहस्पतिराङ्गिरसो हविष्मान्।
द्विबर्हज्मा प्राघर्मसत्पिता न आ रोदसी वृषभो रोरवीति॥ १॥

यः। अद्रिऽभित्। प्रथमऽजाः। ऋतऽवा। बृहस्पतिः। आङ्गिरसः। हविष्मान्।
द्विबर्हऽज्मा। प्राघर्मऽसत्। पिता। नः। आ। रोदसी इति। वृषभः। रोरवीति॥ १॥

यः बृहस्पतिः अद्रिभित् पणिभिर्विरचितानां शिलोच्चयानां भेत्ता मेघानां विदारको वा। 'अद्रिः ग्रावः' इति मेघनामसु पाठात्। प्रथमजाः प्रजापतेर्वीर्यात् प्रथमं जातः ऋतावा सत्यवान् उदकवान् वा आङ्गिरसः पश्चाज्जातः। तथा च निगमः—'येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्यदङ्गाराः पुनरवशान्ता उददीप्यन्त तत् बृहस्पतिरभवत्' (ऐ. ब्रा. ३. ३४) इति। हविष्मान् यज्ञभागवान् द्विबर्हज्मा द्वयोर्लोकयोर्बृंहितगमनः प्राघर्मसत् प्रकर्षेण दीप्तस्थाने वर्तमानः नः अस्माकं पिता पालयिता भवति स बृहस्पतिः वृषभः वर्षकः सन् रोदसी द्यावापृथिव्यौ आ रोरवीति अभिगर्जति॥

जनाय चिद्य ईवत उ लोकं बृहस्पतिर्देवहूतौ चकार।
घ्नन्वृत्राणि वि पुरो दर्दरीति जयञ्छत्रूँरमित्रान्पृत्सु साहन्॥ २॥

जनाय। चित्। यः। ईवते। ऊँ इति। लोकम्। बृहस्पतिः। देवऽहूतौ। चकार।
घ्नन्। वृत्राणि। वि। पुरः। दर्दरीति। जयन्। शत्रून्। अमित्रान्। पृत्ऽसु। सहन्॥२॥

अपि च यः बृहस्पतिः देवहूतौ यज्ञे वर्तमानाय ईवते उपगच्छते स्तोत्रे जनाय लोकं स्थानं चकार करोति। चित् इति पूरणः। सः वृत्राणि आवरकाणि तमांसि घ्नन् निवारयन् पृत्सु युद्धेषु शत्रून् जयन् अमित्रान् सहन् अभिभवन् पुरः आसुरीः पुरीः वि दर्दरीति भृशं विदारयति॥

बृहस्पतिः समजयद्वसूनि महो व्रजान्गोमतो देव एषः।
अपः सिषासन्त्स्वरप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः॥ ३॥

बृहस्पतिः। सम्। अजयत्। वसूनि। महः। व्रजान्। गोऽमतः। देवः। एषः।
अपः। सिसासन्। स्वः। अप्रतिऽइतः। बृहस्पतिः। हन्ति। अमित्रम्। अर्कैः॥ ३॥

देवः द्योतमानः एषः प्रसिद्धः बृहस्पतिः वसूनि पणीनामसुराणां वसुस्य वा धनानि महः महतः गोमतः गोसहितान् व्रजान् च समजयत्। तथा च निगमौ—'बृहस्पतिर्गोवपुषो

वलस्य निर्मज्जानं न पर्वणो जभार ' (ऋ. सं. १०. ६८. ९) इति, ' दूरमित पणयो वरीय उद्नावो यन्तु मिनतीर्ऋतेन । बृहस्पतिर्या अविन्दन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः ' (ऋ. सं. १०. १०८. ११) इति । किंच ᵛबृहस्पतिः ᵛअप्रतीतः केनाप्यप्रतिगतः ᵛसिषासन् संभक्तुकामः ᵛस्वः स्वर्गस्य ᵛअमित्रम् असुरम् ᵛअर्कैः अर्चनसाधनैर्मन्त्रैः ᵛहन्ति । ' अर्को मन्त्रो भवति यदेनेनार्चन्ति ' (निरु. ५. ४) इति यास्कः ॥ ॥ १७ ॥

' सोमारुद्रा ' इति चतुर्ऋचं त्रयोदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं सोमारुद्रदेवताकम् । अनुक्रम्यते च—' सोमारुद्रा चतुष्कं सोमारौद्रम् ' इति । विनियोगो लैङ्गिकः ॥

सोमारुद्रा धारयेथामसुर्यं१ प्र वामिष्टयोऽरमश्नुवन्तु ।
दमेदमे सप्त रत्ना दधाना शं नो भूतं द्विपदे शं चतुष्पदे ॥ १ ॥

सोमारुद्रा । धारयेथाम् । असुर्यम् । प्र । वाम् । इष्टयः । अरम् । अश्नुवन्तु ।
दमेऽदमे । सप्त । रत्ना । दधाना । शम् । नः । भूतम् । द्विऽपदे । शम् । चतुःऽपदे ॥१॥

ᵛसोमारुद्रा हे सोमारुद्रौ ᵛअसुर्यम् असुरसंबन्धि बलमस्मासु ᵛधारयेथाम् । किंच ᵛदमेदमे सर्वेष्वस्मद्गृहेषु ᵛइष्टयः यज्ञाः ᵛवां युवाम् ᵛअरम् अलं पर्याप्तं ᵛप्र ᵛअश्नुवन्तु प्रकर्षेण व्याप्नुवन्तु । अपि च युवां ᵛसप्त ᵛरत्ना[1] रत्नानि ᵛदधाना धारयन्तौ ᵛनः अस्मभ्यं ᵛशं सुखकरौ सुखरूपौ वा ᵛभूतं भवतम् । ᵛद्विपदे अस्मदीयाय पुत्रादये ᵛचतुष्पदे पश्वादये च ᵛशं भूतं भवतम् ॥

सोमारुद्रा वि वृहतं विषूचीममीवा या नो गयमाविवेश ।
आरे बाधेथां निर्ऋतिं पराचैरस्मे भद्रा सौश्रवसानि सन्तु ॥ २ ॥

सोमारुद्रा । वि । वृहतम् । विषूचीम् । अमीवा । या । नः । गयम् । आऽविवेश ।
आरे । बाधेथाम् । निःऽऋतिम् । पराचैः । अस्मे इति । भद्रा । सौश्रवसानि । सन्तु ॥२॥

ᵛसोमारुद्रा हे सोमारुद्रौ ᵛनः अस्माकं ᵛगयं गृहं गृहगतं प्राणिजातं वा ᵛया ᵛअमीवा यो रोगः ᵛआविवेश तां ᵛविषूचीं विष्वक् सर्वतो गच्छन्तीममीवां ᵛवि ᵛवृहतं वियोजयतम् । अपि च ᵛनिर्ऋतिम् अलक्ष्मीं ᵛपराचैः पराग्यथा भवति तथा ᵛआरे दूरे ᵛबाधेथां निवारयतम् । ᵛअस्मे अस्माकं ᵛभद्रा भद्राणि ᵛसौश्रवसानि अन्नानि यशांसि च ᵛसन्तु भवन्तु । सुश्रवसो भावः सौश्रवसम् । श्रवोऽन्नं यशश्च ॥

सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तम् ।
अव स्यतं मुञ्चतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥ ३ ॥

सोमारुद्रा । युवम् । एतानि । अस्मे इति । विश्वा । तनूषु । भेषजानि । धत्तम् ।
अव । स्यतम् । मुञ्चतम् । यत् । नः । अस्ति । तनूषु । बद्धम् । कृतम् । एनः । अस्मत् ॥३॥

---

१. ख-ङ्ग-ञ-भ-श-' रत्ना ' नास्ति ।

हे [v]सोमारुद्रा सोमारुद्रौ [v]युवं युवाम् [v]अस्मे अस्माकं [v]तनूषु अङ्गेषु [v]एतानि प्रसिद्धानि [v]विश्वा सर्वाणि [v]भेषजानि [v]धत्तं धारयतम्। किंच [v]नः अस्माकं [v]तनूषु अङ्गेषु अस्माभिः [v]कृतं [v]बद्धं च [v]यत् [v]एनः पापम् [v]अस्ति विद्यते तत् पापम् [v]अव [v]स्यतं क्षपयतं[1] श्लथयतम्। शिथिलबन्धं कुरुतमित्यर्थः। [v]अस्मत् अस्मत्तः [v]मुञ्चतं च ॥

तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः।
प्र नो मुञ्चतं वरुणस्य पाशाद्गोपायतं नः सुमनस्यमाना ॥ ४ ॥

तिग्मऽआयुधौ। तिग्महेती इति तिग्मऽहेती। सुऽशेवौ। सोमारुद्रौ। इह। सु। मृळतम्। नः। प्र। नः। मुञ्चतम्। वरुणस्य। पाशात्। गोपायतम्। नः। सुऽमनस्यमाना ॥ ४ ॥

हे [v]सोमारुद्रौ [v]तिग्मायुधौ दीप्तधनुष्कौ [v]तिग्महेती तीक्ष्णशरौ [v]सुशेवौ शोभनसुखप्रदौ [v]सुमनस्यमाना शोभनं मनः स्तोत्रमिच्छन्तौ सुमनस्यमानौ स्तूयमानौ सुमनसौ वा सन्तौ युवाम् [v]इह लोके [v]नः अस्मान् [v]सु अत्यन्तं [v]मृळतं[2] सुखयतम्। [v]नः अस्मान् [v]वरुणस्य [v]पाशात् [v]प्र [v]मुञ्चतम्। [v]नः अस्मान् [v]गोपायतम् आपद्भ्यो रक्षतं च ॥ ॥ १८ ॥

'जीमूतस्य' इत्येकोनविंशत्यृचं चतुर्दशं सूक्तं भारद्वाजस्य पायोरार्षम्। अनुक्रम्यते च– 'जीमूतस्येवैकोना पायुर्भारद्वाजः संग्रामाङ्गान्यृक्शोऽभितुष्टाव वर्म धनुर्ज्यामार्त्नी इषुधिं जगत्यर्धे सारथिमर्धे रश्मीनश्वान् रथं रथगोपान् जगत्यां[3] लिङ्गोक्तदेवता[3] द्वाभ्यामिषूः प्रतोदं हस्तघ्नं द्वाभ्यामिषूः पराः षड्क्त्यादयो लिङ्गोक्तदेवताः संग्रामाशिषोऽन्त्यानुष्टुब्जीत आलाक्तेति च द्वे द्वे' इति। 'रथे तिष्ठन्' 'ब्राह्मणासः' इति षष्ठीदशम्यौ जगत्यौ अन्त्या 'यो नः स्वः[4]' इत्येषानुष्टुप् 'ऋजीते' 'आ जङ्घन्ति' 'आलाक्ता' 'अवसृष्टा' 'यो नः स्वः' इति पञ्चानुष्टुभः 'यत्र बाणाः' इति पङ्क्तिः शिष्टास्त्रिष्टुभः। आद्यया वर्म स्तूयते, द्वितीयया धनुः, तृतीयया ज्या, चतुर्थ्या आर्त्नी, पञ्चम्या इषुधिः। अतः पञ्चानां वर्माद्या देवताः। षष्ठ्याः पूर्वार्धेन सारथिः स्तूयते। अतः सोऽर्धस्तद्देवताकः[5]। उत्तरार्धेन रश्मयः स्तूयन्ते। सप्तम्या अश्वाः, अष्टम्या रथः, नवम्या रथगोपाः। अतस्तास्तद्देवताकाः। 'ब्राह्मणासः' इत्यस्यां ब्राह्मणपितृसोम्यत्वावृथिवीपूषणो लिङ्गोक्तदेवताः। एकादशीद्वादश्यौ इषुस्तुतिरूपत्वात् इषुदेवताके। त्रयोदश्या प्रतोदः। चतुर्दश्या हस्तघ्नः। पञ्चदशीषोडश्यौ इषुदेवताके। सप्तदश्याः युद्धभूमिब्रह्मणस्पत्यदितिरूपा लिङ्गोक्तदेवताः। अष्टादश्याः कवचसोमवरुणा देवताः। अन्त्याया देवा ब्रह्म च देवताः[6]। युद्धे अनेन सूक्तेन राजानं संनाहयेत्। तथा चाश्वलायनः–'संग्रामे समुपोळ्हे राजानं संनाहयेदा त्वाहार्षमन्तरेधीति पश्चाद्वृत्तस्यावस्थाय जीमूतस्येव भवति प्रतीकमिति कवचं प्रयच्छेत् उत्तरया धनुरुत्तरां वाचयेत्स्वयं चतुर्थीं जपेत्पञ्चम्येषुधिं प्रयच्छेदभिप्रवर्तमाने षष्ठीं सप्तम्याश्वानष्टमीमिषूनवेक्षमाणं वाचयत्यहिरिव भोगैः पर्येति बाहुमिति तलं नह्यमानम्' (आश्व. गृ. ३ · १२) इति। तथा च 'अवसृष्टा परा पतेतीषून्विसर्जयेद्यत्र बाणाः संपतन्तीति युध्यमानेषु जपेत् संशिष्याद्वा' (आश्व. गृ. ३·१२) इति। अध्यायोपाकरणोत्सर्जनयोर्मण्डलान्तहोमे 'यो नः स्वः' इत्येषा (आश्व. गृ. ३. ५. ७) ॥

---

१ ख-घ-ङ्ग-त-न-भ-श–'क्षपयतं' नास्ति। २. य–मृळयतं; श–मृळतं मृळयतम्। ३. ख–जगत्याद्या लिङ्गोक्त°; श–जगत्याद्या लिङ्गोक्ता देवताः। ४. ख-ङ्ग-त-न-भ-श–स्वो अरणो। ५. ख-ङ्ग-त-न-भ–सोऽर्धर्चस्त°। ६. ख-ङ्ग-त-न-भ-श–देवता।

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु ॥ १ ॥

जीमूतस्यऽइव । भवति । प्रतीकम् । यत् । वर्मी । याति । सऽमदाम् । उपऽस्थे ।
अनाविद्धया । तन्वा । जय । त्वम् । सः । त्वा । वर्मणः । महिमा । पिपर्तु ॥ १ ॥

vसमदां संग्रामाणाम् vउपस्थे उपस्थाने सति vयत् यदा अयं राजा vवर्मी कवची vयाति तदा लोहमयेन वर्मणा संनद्धस्य राज्ञः vप्रतीकं रूपं vजीमूतस्येव मेघस्येव vभवति । मेघस्य[1] यादृशं रूपं तादृशमस्य भवतीत्यर्थः । हे राजन् vत्वम् vअनाविद्धया शत्रुभिरबाधितया vतन्वा शरीरेण शत्रून् vजय । vवर्मणः vसः तादृशः vमहिमा vत्वा त्वां vपिपर्तु पालयतु ॥

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥ २ ॥

धन्वना । गाः । धन्वना । आजिम् । जयेम । धन्वना । तीव्राः । सऽमदः । जयेम ।
धनुः । शत्रोः । अपऽकामम् । कृणोति । धन्वना । सर्वाः । प्रऽदिशः । जयेम ॥ २ ॥

vधन्वना चापेन vगाः शत्रूणां vजयेम वयं वशीकरवाम । vधन्वना vआजिं संग्रामं च जयेम । vधन्वना vतीव्राः उद्भताः vसमदः अत्यन्तं[2] मदवतीः[2] शत्रुसेनाश्च vजयेम । तथा च यास्कः–'समदः समदो वात्तेः संमदो वा मदतेः' (निरु. ९·१७) इति । vधनुः vशत्रोः vअपकामं कामस्यापायं vकृणोति करोतु । किंच vधन्वना वयं vसर्वाः vप्रदिशः सर्वासु दिक्षु वर्तमानान् शत्रून् vजयेम । प्रदिक्शब्दो लक्षणया तत्स्थेषु पुरुषेषु वर्तते मञ्चाः क्रोशन्तीतिवत् । धन्वन्शब्दस्य जयतेश्चावृत्तिरादरार्था ॥

वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियं सखायं परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वञ्ज्या इयं समने पारयन्ती ॥ ३ ॥

वक्ष्यन्तीऽइव । इत् । आ । गनीगन्ति । कर्णम् । प्रियम् । सखायम् । परिऽसस्वजाना ।
योषाऽइव । शिङ्क्ते । विऽततना । अधि । धन्वन् । ज्या । इयम् । समने । पारयन्ती ॥३॥

पूर्वत्र ऋग्द्वयेन कवचधनुषी स्तुते । अत्र ज्यास्तुतिः । vइयं vज्या vसमने संग्रामे vधन्वन् धन्वनि । vअधि इति सप्तम्यर्थानुवादः । vविततता विस्तृता vपारयन्ती पारं नयन्ती vप्रियं प्रियकरं वाक्यं vवक्ष्यन्तीव vकर्णं धन्विनो राज्ञः कर्णप्रदेशम् vआ vगनीगन्ति आगच्छति । vइत् इति पूरणः । vयोषा नारी vसखायं पतिम् vइव vपरिषस्वजाना इषुं परिष्वजमाना vशिङ्क्ते शब्दायते च । तथा च यास्कः–'वक्ष्यन्तीवागच्छति कर्णं प्रियमिव सखायमिषुं परिष्वजमाना योषेव शिङ्क्ते शब्दं करोति विततधि धनुषि ज्येयं समने संग्रामे पारयन्ती पारं नयन्ती' (निरु. ९ . १८) इति ॥

---

१. ख-ङ्ग-न-भ-श–मेघस्येव । २. ख–घ-ङ्ग-त-न-भ–अत्यन्त° ।

ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे ।
अप शत्रून्विध्यतां संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् ॥ ४ ॥

ते इति । आचरन्ती इत्याऽचरन्ती । समनाऽइव । योषा ।
माताऽइव । पुत्रम् । बिभृताम् । उपऽस्थे ।
अप । शत्रून् । विध्यताम् । संविदाने इति सम्ऽविदाने ।
आर्त्नी इति । इमे इति । विस्फुरन्ती इति विऽस्फुरन्ती । अमित्रान् ॥ ४ ॥

अत्र धनुष्कोट्योः स्तुतिः । [v]ते[1] धनुष्कोट्यौ [v]समनेव समनस्केव [v]योषा पतिसमीपं न त्यजति तद्वत् [v]आचरन्ती अभितश्चरन्त्यौ [v]उपस्थे उपस्थाने [v]मातेव [v]पुत्रं यथा माता पुत्रं धारयति तद्वत् [v]बिभृतां राजानं धारयेताम् । किंच [v]इमे धनुष्कोट्यौ [v]संविदाने संजानाने विसंवादरहिते [v]आर्त्नी गच्छन्त्यौ ॥ ' ऋ गतौ ' इति धातोः ' चुर्यगिभ्यां निः ' इति बाहुलकात् निप्रत्ययो धातोरार्तभावश्च । ततः ' कृदिकारादक्तिनः ' (पा. सू. ४. १. ४५ ग.) इति ङीष् । द्विवचनस्य पूर्वसवर्णः ॥ अस्य राज्ञः [v]अमित्रान् [v]विष्फुरन्ती विहिंसन्त्यौ [v]शत्रून् च [v]अप [v]विध्यताम् । तथा च यास्कः—' ते आचरन्त्यौ समनसाविव योषे मातेव पुत्रं बिभृतामुपस्थ उपस्थानेऽपविध्यतां शत्रून् संविदाने आर्त्न्यावि मे विप्रत्यावमित्रान् ' (निरु. ९. ४०) इति ॥

बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिः संकाः पृतनाश्च सर्वीः पृष्ठे निनद्धो जयति प्रसूतः ॥ ५ ॥

बह्वीनाम् । पिता । बहुः । अस्य । पुत्रः । चिश्चा । कृणोति । समना । अवऽगत्य ।
इषुऽधिः । संकाः । पृतनाः । च । सर्वीः । पृष्ठे । निऽनद्धः । जयति । प्रऽसूतः ॥ ५ ॥

इषुधिरत्र स्तूयते । [v]इषुधिः [v]बह्वीनाम् इषूणां [v]पिता भवति । रक्षणहेतुत्वात् पितेत्युच्यते । इषुशब्दस्योभयलिङ्गत्वात् बह्वीनामिति प्रयोगः । [v]अस्य इषुधेः [v]पुत्रः इषुः [v]बहुः भवति । बहव इषवो ह्येषुधौ निधीयन्ते । इषूणां निधानत्वादिषुधिः । तथा च यास्कः—' इषुधिरिषूणां निधानम् ' (निरु. ९. १३) इति । [v]चिश्चा [v]कृणोति । चिश्चेति शब्दानुकृतिः । इषुषु उद्धियमाणेषु[2] इषुधिश्चिश्चाशब्दं करोति । किंच इषुधिः [v]पृष्ठे [v]निनद्धः धन्विनो राज्ञः पृष्ठभागे बद्धः [v]समना युद्धानि [v]अवगत्य प्राप्य [v]प्रसूतः प्रसुवन् । कर्तरि निष्ठा । इषून् प्रेरयन् [v]संकाः[3] । सह कायन्ति शब्दायन्त इति संकाः [v]पृतनाः [v]सर्वाः सेनाः [v]जयति ॥ ॥ १९ ॥

रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छन्ति रश्मयः ॥ ६ ॥

रथे । तिष्ठन् । नयति । वाजिनः । पुरः । यत्रऽयत्र । कामयते । सुऽसारथिः ।
अभीशूनाम् । महिमानम् । पनायत । मनः । पश्चात् । अनु । यच्छन्ति । रश्मयः ॥ ६ ॥

---

१. ख-ग्न-न-भ-' ते ' नास्ति । २. ग्न-त-न-भ-ध्रियमाणेषु; श-धियमाणेषु । ३. ख-ग्न-न-भ-श-' संकाः ' नास्ति ।

अत्र पूर्वार्धे सारथिस्तुतिरुत्तरार्धेऽभीशूनां स्तुतिः। vसुषारथिः शोभनसारथिः vरथे vतिष्ठन् vपुरः पुरस्तात् वर्तमानान् vवाजिनः[1] अश्वान्[1] vयत्रयत्र नेतुं vकामयते तत्र तत्र vनयति। ये रथे vरश्मयः अश्वग्रीवाभ्यां व्याप्य वर्तमानाः पाशाः vपश्चात् रथस्य पृष्ठभागे विद्यमानाः[2] अश्वान् vमनः सारथेर्मनोऽनुकूलम् vअनु vयच्छन्ति नियच्छन्ति। तेषाम् vअभीशूनां रश्मीनां vमहिमानं महत्त्वं vपनायत हे जनाः स्तुत। तथा च यास्कः—'रथे तिष्ठन्नयति वाजिनः पुरस्तात्सतो यत्र यत्र कामयते सुषारथिः कल्याणसारथिरभीशूनां महिमानं पूजयत मनः पश्चात्सन्तोऽनुयच्छन्ति रश्मयः' (निरु. ९.१६) इति ॥

तीव्रान्घोषान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान् क्षिणन्ति शत्रूँरनपव्ययन्तः ॥ ७ ॥

तीव्रान्। घोषान्। कृण्वते। वृषऽपाणयः। अश्वाः। रथेभिः। सह। वाजयन्तः।
अवऽक्रामन्तः। प्रऽपदैः। अमित्रान्। क्षिणन्ति। शत्रून्। अनपऽव्ययन्तः ॥ ७ ॥

अत्र अश्वस्तुतिः। vअश्वाः vवृषपाणयः पांसूनां वर्षकखुराः[3] vरथेभिः रथैः vसह vवाजयन्तः वेगमाचरन्तः vतीव्रान् उच्चतरान् vघोषान् शब्दान् vकृण्वते कुर्वते। किंच vअनपव्ययन्तः अपलायमानाः vअमित्रान् हिंसकान् vशत्रून् vप्रपदैः पादाग्रैः vअवक्रामन्तः vक्षिणन्ति हिंसन्ति ॥

रथवाहनं हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।
तत्रा रथमुप शग्मं सदेम विश्वाहा वयं सुमनस्यमानाः ॥ ८ ॥

रथऽवाहनम्। हविः। अस्य। नाम। यत्र। आयुधम्। निऽहितम्। अस्य। वर्म।
तत्र। रथम्। उप। शग्मम्। सदेम। विश्वाहा। वयम्। सुऽमनस्यमानाः ॥ ८ ॥

vअस्य राज्ञः vरथवाहनं शत्रून् जित्वा रथेनोह्यमानं धनं vहविः भवति[4]। अग्नेर्हविरिव वर्धकं भवतीत्यर्थः। vनाम इति संमतिः। vयत्र रथे vअस्य राज्ञः vआयुधं धनुःशरादिकं vवर्म कवचं च vनिहितं भवति vतत्र तम् ॥ तत्रेत्यव्ययस्य सार्वविभक्तिकत्वात् ॥ vशग्मं सुखकरं vविश्वाहा सर्वदा vसुमनस्यमानाः सुखमनसो भवन्तः vवयं पायवो भरद्वाजाः vउप vसदेम उपगच्छेम ॥

स्वादुष्संसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृधाः सतोवीरा उरवो व्रातसाहाः ॥ ९ ॥

स्वादुऽसंसदः। पितरः। वयःऽधाः। कृच्छ्रेऽश्रितः। शक्तिऽवन्तः। गभीराः।
चित्रऽसेनाः। इषुऽबलाः। अमृधाः। सतःऽवीराः। उरवः। व्रातऽसहाः ॥ ९ ॥

अत्र रथगोपस्तुतिः[5]। vपितरः रथस्य पालयितारः vस्वादुष्संसदः शत्रूणां स्वादुनि अन्ने संसीदन्तः शत्रूणामन्नमवसादयन्तो वा vवयोधाः अन्नस्य दातारः[6] vकृच्छ्रेश्रितः आपदि श्रयन्तः vशक्तीवन्तः ।

---

१. ख-ञ्च-न-म-श–'वाजिनोऽश्वान्' नास्ति। २. ख-ञ्च-त-श–विद्यमानान्। ३. ख-ञ्च-त-न-म–वर्षुकखुराः। ४. ख-ञ्च-त-न-म-श–भवति अग्नेर्हविर्भवति। ५. ख-ञ्च-त२-न-भ-श१–रथगोपास्तुतिः; त१–गोपास्तुतिः; श२–गोपस्तुतिः। ६. ख-भ–प्रदातारः; ञ्च-न–सदातारः।

शक्तिरायुधविशेषः तद्वन्तः शक्तीवन्तः। शक्तिहस्ता इति यावत्। यद्वा। शक्तिर्बलम्। तद्वन्तः। vगभीराः अगाधाश्च्याः vचित्रसेनाः दर्शनीयसेनाः vइषुबलाः बाणबलाः vअमृधाः हिंसितुमशक्याः vसतोवीराः प्राप्तवीर्याः। तथा च यास्कः—'तिरः सत इति प्राप्तस्य तिरस्तीर्णं भवति सतः संसृतं भवति' (निरु. ३. २०) इति। vउरवः महान्तः vव्रातसाहाः[1] समूहानामभिभवितारो भवन्तीति॥

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस ईशत॥ १०॥

ब्राह्मणासः। पितरः। सोम्यासः। शिवे इति। नः। द्यावापृथिवी इति। अनेहसा।
पूषा। नः। पातु। दुःऽइतात्। ऋतऽवृधः। रक्ष। माकिः। नः। अघऽशंसः। ईशत॥१०॥

vब्राह्मणासः हे ब्राह्मणाः vपितरः vऋतावृधः सत्यस्य यज्ञस्य वा वर्धयितारः vसोम्यासः सोमार्हाः सोमसंपादिनो वा। तथा च यास्कः—'सोम्याः सोमसंपादिनः' (निरु. ११. १८) इति। नः अस्मान् रक्षत। रक्ष इत्युपरितनमेकवचनान्तं सत्यपि व्यवधाने बहुवचनान्ततया विपरिणतं सदत्र संबध्यतेऽध्याहारस्यातिजघन्यत्वात्। किंच vअनेहसा अपापे vद्यावापृथिवी द्यावापृथिव्यौ vनः अस्माकं vशिवे सुखकृतौ भवताम्। vपूषा पोषको देवोऽपि vनः अस्मान् vदुरितात् दुष्कृतात् vपातु रक्षतु। vनः अस्माकम् vअघशंसः पापशंसः शत्रुरपि vमाकिः vईशत मा ईशिष्ट॥ ॥२०॥

सुपर्णं वस्ते मृगो अस्या दन्तो गोभिः संनद्धा पतति प्रसूता।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन्॥ ११॥

सुऽपर्णम्। वस्ते। मृगः। अस्याः। दन्तः। गोभिः। सम्ऽनद्धा। पतति। प्रऽसूता।
यत्र। नरः। सम्। च। वि। च। द्रवन्ति। तत्र। अस्मभ्यम्। इषवः। शर्म। यंसन्॥११॥

अस्यामृषि इषवः स्तूयन्ते। vसुपर्णं शोभनं वाजं vवस्ते। इयमिषुर्धारयति। vअस्याः इषोः vमृगः मृगावयवः शृङ्गं vदन्तः भवति। इषवः काश्चित् दन्तमुखा भवन्ति हि। अथवा अस्या दन्तो मृगः शत्रून् मृगयमाणो भवति। किंच vगोभिः गोविकारैः स्नायुभिः vसंनद्धा सम्यक् बद्धा। अथवा गौरिति ज्यानाम। तया संबद्धा[2]। अत्र वचनव्यत्ययः। तथा च निगमः—'वृक्षेवृक्षे नियता मीमयद्गौः' (ऋ. सं. १०. २७. २२) इति। अस्यायमर्थः। वृक्षेवृक्षे धनुषि धनुषि गौर्ज्या नियता[3] मीमयत् शब्दं करोतीति। तथा च यास्कः—'वृक्षेवृक्षे धनुषि धनुषि। वृक्षो व्रश्चनात् वृत्वा क्षां तिष्ठतीति वा। क्षा क्षियतेर्निवासकर्मणः। नियता मीमयद्गौः शब्दं करोति। मीमयतिः शब्दकर्मा' (निरु. २.६) इति। vप्रसूता प्रेरिता सती vपतति। vयत्र युद्धे vनरः vसं vच सह च vवि vच पृथक् च vद्रवन्ति चरन्ति vतत्र vअस्मभ्यम् vइषवः शराः vशर्म सुखं vयंसन् प्रयच्छन्तु। तथा च यास्कः—'सुपर्णं वस्त इति वाजानभिप्रेत्य मृगमयोऽस्या दन्तो मृगयतेर्वा गोभिः संनद्धा पतति प्रसूतेति व्याख्यातम्। यत्र नराः संद्रवन्ति च विद्रवन्ति च तत्रास्मभ्यमिषवः शर्म शरणं प्रयच्छन्तु' (निरु. ९. १९) इति॥

---

१. त—व्रातसहाः। २. त१—सनद्धा। ३. ख—घ—त१-२—नियता नियता; ङ—नियता संबद्धा; श—नियता नियमिता।

ऋजीति परि वृङ्धि नोऽश्मा भवतु नस्तनूः ।
सोमो अधि ब्रवीतु नोऽदितिः शर्म यच्छतु ॥ १२ ॥

ऋजीते । परि । वृङ्धि । नः । अश्मा । भवतु । नः । तनूः ।
सोमः । अधि । ब्रवीतु । नः । अदितिः । शर्म । यच्छतु ॥ १२ ॥

ऋजीते । ऋजु गच्छतीति ऋजीतिः इषुः । हे इषो नः अस्मान् परि वृङ्धि परितो वर्धय[1] । नः अस्माकं तनूः शरीरम् अश्मा भवतु । अश्मवदभेद्या दृढा भवतु । किंच नः अस्मभ्यं सोमो अधि ब्रवीतु पक्षपातेन ब्रवीतु । अदितिः अपि शर्म सुखं यच्छतु ॥

आ जङ्घन्ति सान्वेषां जघनाँ उप जिघ्नते ।
अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥ १३ ॥

आ । जङ्घन्ति । सानु । एषाम् । जघनान् । उप । जिघ्नते ।
अश्वऽअजनि । प्रऽचेतसः । अश्वान् । समत्ऽसु । चोदय ॥ १३ ॥

अश्वाजनि अश्वानां क्षेप्त्रि कक्षे यया त्वया प्रचेतसः प्रकृष्टज्ञानाः सादिनः सारथयो वा एषाम् अश्वानां सानु सानूनि सक्थीनि आ जङ्घन्ति आघ्नन्ति जघनान् जघनानि च उप जिघ्नते उपजिघ्नन्ति सा त्वं समत्सु संग्रामेषु अश्वान् चोदय प्रेरय । तथा च यास्कः—'आघ्नन्ति सानून्येषां सरणानि सक्थीनि । सक्थि सचतेरासक्तोऽस्मिन् कायः । जघनानि घोपघ्नन्ति । जघनं जङ्घन्यतेः । अश्वाजनि प्रचेतसः प्रवृद्धचेतसोऽश्वान् समत्सु समरणेषु संग्रामेषु चोदय' (निरु. ९. २०) इति ॥

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः ॥ १४ ॥

अहिःऽइव । भोगैः । परि । एति । बाहुम् । ज्यायाः । हेतिम् । परिऽबाधमानः ।
हस्तऽघ्नः । विश्वा । वयुनानि । विद्वान् । पुमान् । पुमांसम् । परि । पातु । विश्वतः ॥ १४ ॥

अत्र धन्विनः प्रकोष्ठे बन्धनीयस्य हस्तघ्नस्य स्तुतिः । हस्तघ्नः । हस्ते हस्तसमीपे वर्तिनि[2] प्रकोष्ठे स्थितः सन् ज्यया हन्यते इति हस्तघ्नः ॥ 'घञर्थे कविधानम्' इति कः ॥ ज्यायाः हेतिं ज्याहेतुकां हिंसां परिबाधमानः निवारयन् भोगैः शरीरेण । वचनव्यत्ययः । अहिरिव सर्प इव बाहुं प्रकोष्ठम् । लक्षणया बाहुशब्दः प्रकोष्ठे वर्तते । पर्येति परिवेष्टयति । किंच विश्वा विश्वानि वयुनानि ज्ञानानि ज्ञातव्यानि । 'माया वयुनम्' इति तन्नामसु पाठात् । विद्वान्[3] जानन् पुमान् पौरुषोपेतः स्वयं पुमांसं धन्विनं विश्वतः सर्वतः परि पातु रक्षति । तथा च यास्कः—'अहिरिव भोगैः परिवेष्टयति बाहुं ज्याया वधात्परित्रायमाणो हस्तघ्नः सर्वाणि प्रज्ञानानि प्रजानन् पुमान्पुरुमना भवति पुंसतेर्वा' (निरु. ९. १५) इति[3] ॥

---

१. ख-नो वर्जय; घ्न-न-भ-नो वृद्धय । २. ख-घ-घ्न-त-न-भ-श-वर्तमानः । ३. ख-घ्न-न-श-विद्वान् जानन् पुमान् पुरुमना भवति पुंसतेर्वा इति यास्कः । बहुमनस्कः पुमांसं धन्विनं वेश्वतः सर्वतः परिपातु रक्षतु ।

आलाक्ता या रुरुशीर्ष्ण्यथो यस्या अयो मुखम् ।
इदं पर्जन्यरेतस इष्वै देव्यै बृहन्नमः ॥ १५ ॥

आलंऽअक्ता । या । रुरुंऽशीर्ष्णी । अथो इति । यस्याः । अयः । मुखम् ।
इदम् । पर्जन्यंऽरेतसे । इष्वै । देव्यै । बृहत् । नमः ॥ १५ ॥

vया इषुः vआलाक्ता आलेन विषेण अक्ता vरुरुशीर्ष्णी हन्तृशिरस्का ॥ अर्तेः[1] हिंसाकर्मणो रुरुशब्दोत्पत्तिः ॥ शृङ्गशीर्ष्णी वा । vअथो किंच vयस्याः इषोः vमुखम् vअयः अयोमयं भवति । vपर्जन्यरेतसे । पर्जन्यो रेतो यस्याः सा पर्जन्यरेताः । तस्यै[2] पर्जन्यकार्यभूतायै । शरकाण्डस्य पर्जन्यजन्यत्वात्[3] । vबृहत् बृहत्यै तस्यै vइष्वै vदेव्यै vइदं vनमः क्रियते इति ॥ ॥ २१ ॥

अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते ।
गच्छामित्रान्प्र पद्यस्व मामीषां कं चनोच्छिषः ॥ १६ ॥

अवंऽसृष्टा । परा । पत । शरव्ये । ब्रह्मंऽसंशिते ।
गच्छ । अमित्रान् । प्र । पद्यस्व । मा । अमीषाम् । कम् । चन । उत् । शिषः ॥ १६ ॥

vब्रह्मसंशिते मन्त्रेण तीक्ष्णीकृते vशरव्ये हिंसाकुशले इषो त्वम् vअवसृष्टा क्षिप्ता vपरा vपत परागच्छ । इतो देशात् vगच्छ च । vअमित्रान् हिंसकान् vप्र vपद्यस्व प्रामुहि च । vअमीषाम् अमित्राणां मध्ये vकं vचन कंचिदपि vमा vउच्छिषः अवशिष्टं मा कुरु ॥

यत्र बाणाः संपतन्ति कुमारा विशिखाइव ।
तत्रा नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥ १७ ॥

यत्र । बाणाः । सम्ंऽपतन्ति । कुमाराः । विशिखाःऽइव ।
तत्र । नः । ब्रह्मणः । पतिः । अदितिः । शर्म । यच्छतु । विश्वाहा । शर्म । यच्छतु ॥१७॥

vयत्र युद्धे vकुमारा vविशिखाइव मुण्डिता इव vबाणाः vसंपतन्ति vतत्र vनः अस्मभ्यं vब्रह्मणस्पतिः vशर्म सुखं vविश्वाहा सर्वदा vयच्छतु । vअदितिः च vशर्म vयच्छतु । द्विरुक्तिरादरार्था ॥

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥ १८ ॥

मर्माणि । ते । वर्मणा । छादयामि । सोमः । त्वा । राजा । अमृतेन । अनु । वस्ताम् ।
उरोः । वरीयः । वरुणः । ते । कृणोतु । जयन्तम् । त्वा । अनु । देवाः । मदन्तु ॥ १८ ॥

हे राजन् vते त्वदीयानि vमर्माणि । येषु स्थानेषु विद्धः सद्यो म्रियते तानि मर्माणि । vवर्मणा कवचेन vछादयामि । vसोमः vराजा vत्वा त्वाम् vअनु मर्मच्छादनानन्तरम् vअमृतेन vवस्ताम्

---

१. ख-ग्न-न-भ-श-'अर्तेः' नास्ति । २. ख-ग्न-न-भ-तस्यैव । ३. ख-घ-ग्न-न-भ-पर्जन्यत्वात् ।

आच्छादयतु। किंच ᵛवरुणः अपि ᵛते तुभ्यम् ᵛउरोर्वरीयः उरुतरं सुखं ᵛकृणोतु करोतु। ᵛजयन्तं ᵛत्वा त्वां ᵛदेवाः सर्वेऽपि ᵛअनु ᵛमदन्तु अनुहृष्यन्तु ॥

यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति ।
देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ॥ १९ ॥

यः । नः । स्वः । अरणः । यः । च । निष्ट्यः । जिघांसति ।
देवाः । तम् । सर्वे । धूर्वन्तु । ब्रह्म । वर्म । मम । अन्तरम् ॥ १९ ॥

ᵛयः[1] ᵛस्वः ज्ञातिः ᵛअरणः अरममाणः ᵛयश्च ᵛनिष्ट्यः तिरोभूतो दूरे स्थितः ᵛनः अस्मान् ᵛजिघांसति हन्तुमिच्छति ᵛतं ᵛदेवाः ᵛसर्वे देवाः ᵛधूर्वन्तु हिंसन्तु। ᵛब्रह्म मन्त्रः ᵛमम ᵛअन्तरं शराणां निवारकं ᵛवर्म विद्यते ॥ ॥ २२ ॥

॥ इति सायणाचार्यविरचिते[2] दाशतय्याः षष्ठे मण्डले षष्ठोऽनुवाकः समाप्तं मण्डलं च ॥

---

१. ख-घ-म-न-भ-स्वः। २. श-°विरचिते वेदार्थप्रकाशे।

॥ श्रीः ॥

॥ अथ सप्तमं मण्डलम् ॥

अथ सप्तमं मण्डलमारभ्यते । तस्मिन् मण्डले षडनुवाकाः । प्रथमेऽनुवाके सप्तदश सूक्तानि । तत्र 'अग्निः नरः' इति पञ्चविंशत्यृचं प्रथमं सूक्तम् । अत्रेयमनुक्रमणिका—'अग्निं पञ्चाधिका विराजोऽष्टादशाद्याः' इति । 'सप्तमं मण्डलं वसिष्ठोऽपश्यत्' इत्युक्तत्वात् मण्डलद्रष्टा वसिष्ठ ऋषिः । आदितोऽष्टादश विराजस्त्र्येकादशकाः शिष्टा अनादेश्यपरिभाषया त्रिष्टुभः । मण्डलादिपरिभाषया अग्निर्देवता । विश्वजितीदं सूक्तमाज्यशस्त्रम् । सूत्रितं च—'विश्वजितोऽग्निं नर इत्याज्यम्' (आश्व. श्रौ. ८. ७) इति । अत्रेश्चतुर्वीराख्ये[1] चतूरात्रे[1] चतुर्थेऽहनीदमेव सूक्तमाज्यशस्त्रम् । सूय्यते हि—'अग्निं नर इति चतुर्थे' (आश्व. श्रौ. १०. २) इति । ब्यूळहे दशरात्रे चतुर्थेऽहनीदं सूक्तं जातवेदस्यनिविद्धानम् । सूत्रितं च—'अग्निं नर इत्याग्निमारुतम्' (आश्व. श्रौ. ८. ८) इति । महाव्रतेऽपीदमाज्यशस्त्रम् । तथैव पञ्चमारण्यके सूय्यते—'आज्यप्रउगे विश्वजितः' (ऐ. आ. ५. १. १) इति । अविवाक्येऽहनि प्रातरनुवाके 'त्वमग्ने वसून्' इत्यादीनामनुष्टुभां स्थाने आद्यस्तृचः प्रक्षेपणीयः । सूय्यते हि—'दशमेऽहन्यनुष्टुभां स्थानेऽग्निं नरो दीधितिभिररण्योरिति तृचमाग्नेये क्रतौ' (आश्व. श्रौ. ८. १२) इति । आद्याः षड्चः तस्मिन्नेवाहनि आग्निमारुते शस्त्रे स्तोत्रियानुरूपार्थाः । सूत्रितं च—'अग्निं नरो दीधितिभिररण्योरिति स्तोत्रियानुरूपौ' (आश्व. श्रौ. ८. १२) इति । मण्डलादिहोमेऽप्येषा[2] । आधाने तृतीयायामिष्टौ 'प्रेद्धः' इति स्विष्टकृतोऽनुवाक्या । सूत्रितं च—'प्रेद्धो अग्न इमो अग्न इति संयाज्ये' (आश्व. श्रौ. २. १) इति । एवमन्यत्रापि दीक्षणीयादिषु स्विष्टकृतोऽनुवाक्या । प्रायणीयेष्टौ 'सेदग्निरग्नीन्' इत्यादिके द्वे स्विष्टकृतो याज्यानुवाक्ये । सूत्रितं च—'सेदग्निरग्नीरित्यस्वन्यानिति द्वे संयाज्ये' (आश्व. श्रौ. ४. ३) इति । आधाने तृतीयायामिष्टौ 'इमो अग्ने' इति स्विष्टकृतो याज्या । सूत्रितं च—'इमो अग्न इति संयाज्ये' (आश्व. श्रौ. २. १) इति । एवमन्यत्रापि दीक्षणीयादिष्वेषा सौविष्टकृती याज्या । प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे च 'त्वमग्ने सुहवः' इत्याद्याः पञ्चर्चः । सूत्रितं च—'त्वमग्ने सुहवो रण्वसंदृक्' (आश्व. श्रौ. ४. १३) इति ॥

अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तम् ।
दूरेदृशं गृहपतिमथर्युम् ॥ १ ॥

अग्निम् । नरः । दीधितिऽभिः । अरण्योः । हस्तेऽच्युती । जनयन्त । प्रऽशस्तम् ।
दूरेऽदृशम् । गृहऽपतिम् । अथर्युम् ॥ १ ॥

[v]नरः नेतार ऋत्विजः [v]प्रशस्तं प्रकर्षेण स्तुतं [v]दूरेदृशं दूरे दृश्यमानं दूरे पश्यन्तं वा [v]गृहपतिं गृहाणां पालकम् [v]अथर्युम्[3] आगम्यमतनवन्तं वा[4] [v]अग्निम्[4] [v]अरण्योः विद्यमानं [v]हस्तच्युती हस्तप्रच्युत्या हस्तगत्या [v]दीधितिभिः अङ्गुलिभिः [v]जनयन्त[5]। 'दीधितयोऽङ्गुलयो भवन्ति धीयन्ते कर्मसु । अरणी प्रत्यृत एने अग्निः समरणाज्जायत इति वा । हस्तच्युती हस्तप्रच्युत्या जनयन्त प्रशस्तं दूरेदर्शनं गृहपतिमतनवन्तम्' (निरु. ५. १०) इति ॥

---

१. ख-ज्ञ-त-भ-°श्वतुराख्ये चतुरात्रे; न-°श्वतुर्वाराख्ये चतूरात्रे; श-°श्वतुर्वारात्रे चतूरात्रे। २. ख-ज्ञ-न-भ-श-मण्डलादिहोता। ३. ज्ञ-अथर्युमध्वर्युं। ४. ख-ज्ञ-न-भ-वाग्निं वा; श-अग्निं वा। ५. ज्ञ-जनयंत अत्र यास्कः; त२-जनयंत तथा च यास्कः; श-जनयंत अजनयंत।

तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित् ।
दक्षाय्यो यो दम आस नित्यः ॥ २ ॥

तम् । अग्निम् । अस्ते । वसवः । नि । ऋण्वन् । सुऽप्रतिचक्षम् । अवसे । कुतः । चित् ।
दक्षाय्यः । यः । दमे । आस । नित्यः ॥ २ ॥

यः अग्निः दमे गृहे दक्षाय्यः पूजनीयो हविर्भिः समर्धनीयो वा नित्यः अजस्रः आस बभूव तं सुप्रतिचक्षं सुप्रतिदर्शनम् अग्निं कुतश्चित् सर्वस्मादपि भयहेतोः अवसे रक्षणाय वसवः वासका ये वसिष्ठाः अस्ते गृहे न्यृण्वन् न्यदधुः ॥

प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ ।
त्वां शश्वन्त उप यन्ति वाजाः ॥ ३ ॥

प्रऽईद्धः । अग्ने । दीदिहि । पुरः । नः । अजस्रया । सूर्म्या । यविष्ठ ।
त्वाम् । शश्वन्तः । उप । यन्ति । वाजाः ॥ ३ ॥

यविष्ठ युवतम हे अग्ने प्रेद्धः प्रकर्षेण समिद्धस्त्वम् अजस्रया अशरणशीलया[1] सूर्म्या ज्वालया नः अस्मदर्थं पुरः[2] पुरस्तात् आहवनीयायतने दीदिहि दीप्यस्व । त्वां शश्वन्तः बहवः वाजाः अन्नानि हवींषि उप यन्ति उपगच्छन्ति ॥

प्र ते अग्नयोऽग्निभ्यो वरं निः सुवीरासः शोशुचन्त द्युमन्तः ।
यत्रा नरः समासते सुजाताः ॥ ४ ॥

प्र । ते । अग्नयः । अग्निऽभ्यः । वरम् । निः । सऽवीरासः । शोशुचन्त । द्युऽमन्तः ।
यत्र । नरः । सम्ऽआसते । सुऽजाताः ॥ ४ ॥

अग्निभ्यः लौकिकेभ्योऽग्निभ्यः वरम् अत्यन्तं द्युमन्तः दीप्तिमन्तः सुवीरासः कल्याणपुत्रपौत्रप्रदाः ते अग्नयः प्र निः शोशुचन्त प्रकर्षेण नितरां दीप्यन्ते । यत्र येष्वग्निषु सुजाताः[3] सुजन्मानः नरः कर्मणां नेतारो यजमाना ऋत्विजो वा समासते सहासते ॥

दा नो अग्ने धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तम् ।
न यं यावा तरति यातुमावान् ॥ ५ ॥

दाः । नः । अग्ने । धिया । रयिम् । सुऽवीरम् । सुऽअपत्यम् । सहस्य । प्रऽशस्तम् ।
न । यम् । यावा । तरति । यातुऽमावान् ॥ ५ ॥

सहस्य अभिभवकुशल हे अग्ने सुवीरं शोभनपुत्रोपेतं स्वपत्यं शोभनपौत्रोपेतं प्रशस्तं श्रेष्ठं रयिं धनं धिया स्तोत्रेण नः अस्मभ्यं दाः देहि । यं रयिं यावा अभिगन्ता शत्रुः यातुमावान् हिंसाया निर्गतः । नलोपाभावश्छान्दसः । यद्वा । हिंसायुक्तः । परो वतिर्मत्वर्थीयः पूरकः । न तरति न बाधते ॥ ॥ २३ ॥

---

१. घ–सरणशीलया; ङ–संसरण° । २. ख-ङ-न-भ–'पुरः' नास्ति । ३. ख-घ-ङ-न-भ–जाताः ।

उप॒ यमेति॑ युव॒तिः सु॒दक्षं॑ दो॒षा वस्तो॑र्हवि॒ष्मती॑ घृ॒ताची॑ ।
उप॒ त्वैन॑म॒रम॑तिर्वसू॒युः ॥ ६ ॥

उप॑ । यम् । एति॑ । यु॒व॒तिः । सु॒ऽदक्ष॑म् । दो॒षा । वस्तोः॑ । ह॒विष्म॑ती । घृ॒ताची॑ ।
उप॑ । त्वा॒ । ए॒न॒म् । अ॒रम॑तिः । व॒सु॒ऽयुः ॥ ६ ॥

[v]सुदक्षं सुबलं [v]यम् अग्निं [v]हविष्मती हविषा युक्ता [v]घृताची । घृतमञ्चतीति घृताची जुहूः । [v]युवतिः अग्निना नित्ययुक्ता [v]दोषा [v]वस्तोः रात्रावहनि च [v]उप [v]एति उपगच्छति तम् [v]एनं [v]त्वा स्वकीया [v]अरमतिः दीप्तिः [v]वसूयुः स्तोतॄणां धनमिच्छन्ती [v]उप एति ॥

विश्वा॑ अग्नेऽप॒ द॒हारा॑तीर्ये॒भिस्तपो॑भिरदहो॒ जरू॑थम् ।
प्र नि॑स्व॒रं चा॑तय॒स्वामी॑वाम् ॥ ७ ॥

विश्वाः॑ । अग्ने॒ । अप॑ । द॒ह॒ । अरा॑तीः । ये॒भिः॑ । तपः॑ऽभिः । अ॒द॒हः॒ । जरू॑थम् ।
प्र । नि॒ऽस्व॒रम् । चा॒त॒य॒स्व॒ । अमी॑वाम् ॥ ७ ॥

हे [v]अग्ने [v]विश्वाः विश्वान् [v]अरातीः शत्रून् [v]तपोभिः तेजोभिः [v]अप [v]दह । [v]येभिः यैः तपोभिः [v]जरूथं परुषशब्दकारिणं राक्षसम् ॥ गृणातेरूथन्प्रत्यये सति जरूथशब्दनिष्पत्तिः ॥ [v]अदहः दहसि । किंच [v]अमीवां रोगं [v]निस्वरं न्यक्कृतोपतापं यथा भवति तथा ॥ ' स्वृ शब्दोपतापयोः ' इति धातुः ॥ [v]प्र [v]चातयस्व प्रकर्षेण नाशय । ' चततिर्गत्यर्थो वा ' इति भट्टभास्करमिश्रः ॥

आ यस्ते॑ अग्न इ॒धते॑ अनी॒कं व॑सिष्ठ शुक्र॒ दीदि॑वः पावक ।
उ॒तो न॑ एभिः स्त॒वथै॒रिह स्याः ॥ ८ ॥

आ । यः । ते॒ । अ॒ग्ने॒ । इ॒धते॑ । अ॒नी॒कम् । व॒सि॒ष्ठ॒ । शु॒क्र॒ । दीदि॑ऽवः । पा॒व॒क॒ ।
उ॒तो इति॑ । नः॒ । ए॒भिः॒ । स्त॒वथैः॑ । इ॒ह । स्याः॒ ॥ ८ ॥

[v]वसिष्ठ श्रेष्ठ [v]शुक्र शुभ्र [v]दीदिवः दीप्त[1] [v]पावक शोधक हे [v]अग्ने [v]ते तव [v]अनीकं तेजः [v]यः [v]आ [v]इधते समेधयति तस्येव [v]नः अस्माकम् [v]उतो अपि च [v]एभिः [v]स्तवथैः स्तोत्रैः [v]इह अस्मिन् यज्ञे [v]स्याः भव ॥

वि ये ते॑ अग्ने मे॒जि॒रे अनी॒कं मर्ता॑ नर॒ः पित्र्या॑सः पुरु॒त्रा ।
उ॒तो न॑ एभिः सु॒मना॑ इ॒ह स्याः ॥ ९ ॥

वि । ये । ते॒ । अ॒ग्ने॒ । मे॒जि॒रे । अनी॑कम् । मर्ता॑ः । नरः॑ । पित्र्या॑सः । पु॒रु॒ऽत्रा ।
उ॒तो इति॑ । नः॒ । ए॒भिः॒ । सु॒ऽमनाः॑ । इ॒ह । स्याः॒ ॥ ९ ॥

---

१. ख-भ-दीप्तिमन् ।

हे vअग्ने vते तव vअनीकं तेजः vपित्र्यासः पितृहिताः आर्षेया वा vमर्ताः मनुष्याः vनरः कर्मणां नेतारः vये यजमानाः vपुरुत्रा बहुषु देशेषु vवि vभेजिरे विभजन्ते । आदधुरिति यावत् । तेषामिव vनः अस्माकम् vउतो अपि vएभिः स्तुतैः सह स्तोत्रैर्वा vसुमनाः अनुग्राहकमनाः सन् vइह यज्ञे vस्याः भव ॥

इमे नरो वृत्रहत्येषु शूरा विश्वा अदेवीरभि सन्तु मायाः ।
ये मे धियं पुनर्यन्त प्रशस्ताम् ॥ १० ॥

इमे । नरः । वृत्रऽहत्येषु । शूराः । विश्वाः । अदेवीः । अभि । सन्तु । मायाः ।
ये । मे । धियम् । पुनर्यन्त । प्रऽशस्ताम् ॥ १० ॥

vये मनुष्याः vमे मदीयां vप्रशस्तां प्रकृष्टां vधियं कर्म स्तुतिं वा vपनथन्त स्तुवन्ति ब्रुवन्ति वा ते vइमे मयि स्निग्धाः vनरः मनुष्याः vवृत्रहत्येषु संग्रामेषु vशूराः vअदेवीः आसुरीः vविश्वाः सर्वाः vमायाः vअभि vसन्तु अभिभवन्तु ॥ ॥ २४ ॥

मा शूने अग्ने नि षदाम नृणां माशेषसोऽवीरता परि त्वा ।
प्रजावतीषु दुर्यासु दुर्य ॥ ११ ॥

मा । शूने । अग्ने । नि । सदाम । नृणाम् । मा । अशेषसः । अवीरता । परि । त्वा ।
प्रजाऽवतीषु । दुर्यासु । दुर्य ॥ ११ ॥

हे vअग्ने vशूने शून्ये पुत्रादिरहिते गृहे vमा vनि vषदाम न निवसाम । vनृणाम् अन्येषां च गृहे vमा नि षदाम । vदुर्य गृहेभ्यो हित हे अग्ने vअशेषसः अपुत्राः । 'तोक्म शेषः' इति पुत्रनामसु पाठात् । vअवीरता अवीरतया युक्ताश्च सन्तः vत्वा त्वां vपरि चरन्तः vप्रजावतीषु एव vदुर्यासु गृहेषु निवसाम ॥

यमश्वी नित्यमुपयाति यज्ञं प्रजावन्तं स्वपत्यं क्षयं नः ।
स्वजन्मना शेषसा वावृधानम् ॥ १२ ॥

यम् । अश्वी । नित्यम् । उपऽयाति । यज्ञम् । प्रजाऽवन्तम् । सुऽअपत्यम् । क्षयम् । नः ।
स्वऽजन्मना । शेषसा । ववृधानम् ॥ १२ ॥

vयं vयज्ञं यज्ञाश्रयम् vअश्वी अश्ववानग्निः vनित्यमुपयाति तं vप्रजावन्तं भृत्यादिसहितं vस्वपत्यं शोभनसंतानोपेतं vस्वजन्मना औरसेन vशेषसा पुत्रेण vववृधानं वर्धमानं vक्षयं गृहं vनः अस्मभ्यं हे अग्ने देहीति शेषः ॥

पाहि नो अग्ने रक्षसो अजुष्टात्पाहि धूर्तेरररुषो अघायोः ।
त्वा युजा पृतनायूँरभि ष्याम् ॥ १३ ॥

पाहि । नः । अग्ने । रक्षसः । अजुष्टात् । पाहि । धूर्तेः । अरुषः । अघऽयोः ।
त्वा । युजा । पृतनाऽयून् । अभि । स्याम् ॥ १३ ॥

हे vअग्ने vनः अस्मान् vअजुष्टात् अप्रीतिविषयात् vरक्षसः राक्षसात् vपाहि रक्ष । किंच vअररुषः अदातुः vअघायोः पापमिच्छतः vधूर्तेः हिंसकात् vपाहि । अपि च vत्वा त्वया vयुजा सहायभूतेन vपृतनायून् पृतनाकामान् vअभि vत्याम् अहमभिभवेयम् ॥

सेदग्निरग्नीरत्यस्त्वन्यान्यत्र वाजी तनयो वीळुपाणिः ।
सहस्रपाथा अक्षरा समेति ॥ १४ ॥

सः । इत् । अग्निः । अग्नीन् । अति । अस्तु । अन्यान् । यत्र । वाजी । तनयः । वीळुऽपाणिः । सहस्रऽपाथाः । अक्षरा । सम्ऽएति ॥ १४ ॥

vस vइत् स एव vअग्निः आहवनीयादिरस्मदीयः vअन्यान् इतरान् अन्यदीयान् vअग्नीन् vअत्यस्तु अतिभवतु । vयत्र यस्मिन्नग्नौ vवाजी अशनवान्[1] बलवान् वा vवीळुपाणिः दृढहस्तः । 'वीळु च्यौत्नम्' इति बलनामसु पाठात् । vसहस्रपाथाः बह्वन्नो बहुस्थानो वा बहूदको वा vतनयः अस्मत्पुत्रः vअक्षरा अक्षरेण क्षयरहितेन स्तोत्रेण vसमेति सम्यक् परिचरतेति । समर्थपुत्रवत एवाग्निः अन्यदीयानग्नीनभिभवतीति भावः ॥

सेदग्निर्यो वनुष्यतो निपाति समेद्धारमंहस उरुष्यात् ।
सुजातासः परि चरन्ति वीराः ॥ १५ ॥

सः । इत् । अग्निः । यः । वनुष्यतः । निऽपाति । सम्ऽएद्धारम् । अंहसः । उरुष्यात् ।
सुऽजातासः । परि । चरन्ति । वीराः ॥ १५ ॥

vयः vसमेद्धारं प्रबोधकं[2] vवनुष्यतः हिंसकात् । 'वनुष्यतिर्हन्तिकर्मा' (निरु. ५. २) इति यास्कः । vउरुष्यात् अधिकात् vअंहसः पापात् च vनिपाति अत्यन्तं रक्षति । यं[3] च vसुजातासः सुजन्मान एव vवीराः स्तोतारः सुता वा vपरि vचरन्ति vस vइत् स एव vअग्निः ॥ ॥२५॥

अयं सो अग्निराहुतः पुरुत्रा यमीशानः समिदिन्धे हविष्मान् ।
परि यमेत्यध्वरेषु होता ॥ १६ ॥

अयम् । सः । अग्निः । आऽहुतः । पुरुऽत्रा । यम् । ईशानः । सम् । इत् । इन्धे । हविष्मान् ।
परि । यम् । एति । अध्वरेषु । होता ॥ १६ ॥

vयम् अग्निम् vईशानः समृद्ध ऐश्वर्यमिच्छन् वा vहविष्मान् यजमानः vसम्[4] vइन्धे[4] सम्यक् दीपयति । vयं च vअध्वरेषु हिंसारहितेषु यज्ञेषु vहोता देवानामाह्वाता vपरि vएति परिगच्छति vसः vअयम् vअग्निः vपुरुत्रा बहुषु देशेषु बहुषु यज्ञेषु वा vआहुतः आहुतिभिरभिहुतः ॥

त्वे अग्न आहवनानि भूरीशानास आ जुहुयाम नित्या ।
उभा कृण्वन्तौ वहतू मियेधे ॥ १७ ॥

---

१. ख-घ-अन्नवान्; य-वेजनवान् । २. ख-ग्न-त-न-म-श-प्रबोधकं सेदग्नियों । ३. ख-यत्; घ-ग्न-त-न-म-श-ये । ४. घ-त-न-श-समिदिंधे; ग्न-समिधे ।

त्वे इति । अग्ने । आऽहवनानि । भूरि । ईशानासः । आ । जुहुयाम । नित्या ।
उभा । कृण्वन्तः । वहतू इति । मियेधे ॥ १७ ॥

हे vअग्ने vत्वे त्वयि vईशानासः धनानामीश्वराः सन्तः vनित्या नित्यान्यग्निहोत्रादीनि vउभा उभौ vवहतू वहनहेतू स्तोत्रं शस्त्रं च vकृण्वन्तः कुर्वन्तः vमियेधे यज्ञे vभूरि बहूनि vआहवनानि हवींषि vआ vजुहुयाम आजुहवाम[1] ॥

इमो अग्ने वीततमानि हव्याजस्रो वक्षि देवतातिमच्छ ।
प्रति न ईं सुरभीणि व्यन्तु ॥ १८ ॥

इमो इति । अग्ने । वीतऽतमानि । हव्या । अजस्रः । वक्षि । देवऽतातिम् । अच्छ ।
प्रति । नः । ईम् । सुरभीणि । व्यन्तु ॥ १८ ॥

हे vअग्ने त्वम् vअजस्रः अनवरतः सन् vइमो इमानि vवीततमानि अतिशयेन कान्तानि vहव्या हव्यानि vदेवतातिं देवानां समूहम् अभि vवक्षि वह । vअच्छ गच्छ च । vनः अस्मदीयानि vसुरभीणि शोभनानि vईम् एतानि हव्यानि देवाः vप्रति vव्यन्तु प्रत्येकं कामयन्ताम् ॥

मा नो अग्नेऽवीरते परा दा दुर्वाससेऽमतये मा नो अस्यै ।
मा नः क्षुधे मा रक्षसे ऋतावो मा नो दमे मा वन आ जुहूर्थाः ॥ १९ ॥

मा । नः । अग्ने । अवीरते । परा । दाः । दुःऽवाससे । अमतये । मा । नः । अस्यै ।
मा । नः । क्षुधे । मा । रक्षसे । ऋतऽवः । मा । नः । दमे । मा । वने । आ । जुहूर्थाः ॥ १९ ॥

हे vअग्ने vनः अस्मान् vअवीरते अपुत्रताय vमा vपरा vदाः मा देहि । vदुर्वाससे दुष्टवस्त्राय च नो मा परा दाः । vअस्यै vअमतये अभिहान्यै vनः अस्मान् vमा परा दाः । vक्षुधे अशनायायै vनः अस्मान् vमा च परा दाः । vरक्षसे बलिने चास्मान् vमा परा दाः । हे vऋतावः[2] सत्यवन् अग्ने vनः अस्मान् vदमे गृहे vमा vजुहूर्थाः मा हिंसीः ॥ 'हुर्छा कौटिल्ये' इति धातुः ॥ vवने चास्मान् vमा जुहूर्थाः ॥

नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः ।
रातौ स्यामोभयासस आ ते यूयं पात स्वस्तिभिः सदा नः ॥ २० ॥

नु । मे । ब्रह्माणि । अग्ने । उत् । शशाधि । त्वम् । देव । मघवत्ऽभ्यः । सुसूदः ।
रातौ । स्याम । उभयासः । आ । ते । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ २० ॥

हे vअग्ने vमे मम मदर्थं vब्रह्माणि अन्नानि vनु क्षिप्रम् vउच्छशाधि उत्कर्षेण शोधितानि कुरु । किंच हे vदेव द्योतमानाग्ने vमघवद्भ्यः हविष्मद्भ्योऽस्मभ्यं vसुषूदः अन्नानि प्रेरय । vते वदीयायां vरातौ दाने vउभयासः[3] स्तोत्रिणः शस्त्रिणश्च अथवा[4] स्तुवन्तो यजमानाश्च वयम् vआ

---

१. ख-घ-ञ-त-भ-आहुवाम; न-आजुहावाम; श-जुहुवाम । २. ञ-श-ऋतवः । ३. त-य-उभयासः उभये । ४. ञ-यथ वा; त-न-भ-य-श-यथा वा ।

vस्याम अत्यर्थं भवेम । vनः अस्मान् vयूयं त्वत्परिवाराश्च सर्वे vस्वस्तिभिः अविनाशिभिर्मङ्गलैः । तथा च यास्कः—' स्वस्तीत्यविनाशनामास्तिरभिपूजितः स्वस्ति ' (निरु. ३. २१) इति । vसदा vपात रक्षत ॥ ॥ २६ ॥

त्वमग्ने सुहवो रण्वसंदृक्सुदीती सूनो सहसो दिदीहि ।
मा त्वे सचा तनये नित्य आ धङ्मा वीरो अस्मन्नर्यो वि दासीत् ॥२१॥

त्वम् । अग्ने । सुऽहवः । रण्वऽसंदृक् । सुऽदीती । सुनो इति । सहसः । दिदीहि ।
मा । त्वे इति । सचा । तनये । नित्ये । आ । धक् । मा । वीरः । अस्मत् । नर्यः । वि । दासीत् ॥२१॥

vसहसः vसूनो सहसः सुत हे vअग्ने vसुहवः स्वाह्वानः vरण्वसंदृक् रमणीयसंदर्शनः vत्वं vसुदीती शोभनया दीप्त्या vदिदीहि दीप्यस्व । किंच vतनये vनित्ये औरसे पुत्रे vत्वे त्वं vसचा सहायभूतः vमा vआ vधक् माभिधाक्षीः । अपि च vअस्मत् पृथग्भूतः अस्माकं वा । षष्ठ्यर्थे पञ्चमी । vवीरः पुत्रः vनर्यः नरहितः vमा vवि vदासीत् नोपक्षीयेत ॥

मा नो अग्ने दुर्भृतये सचेषु देवेद्धेष्वग्निषु प्र वोचः ।
मा ते अस्मान्दुर्मतयो भृमार्चिद्देवस्य सूनो सहसो नशन्त ॥ २२ ॥

मा । नः । अग्ने । दुःऽभृतये । सचा । एषु । देवऽइद्धेषु । अग्निषु । प्र । वोचः ।
मा । ते । अस्मान् । दुःऽमतयः । भृमात् । चित् । देवस्य । सूनो इति । सहसः । नशन्त ॥२२॥

हे vअग्ने vसचा सहायभूतस्त्वं vदेवेद्धेषु ऋत्विग्भिः समिद्धेषु vएषु vअग्निषु vदुर्भृतये कृच्छ्रभरणाय vनः अस्मान् vमा vप्र vवोचः न ब्रूहि । त्वत्सहायभूता अग्नयो यथा मामकृच्छ्रेण बिभृयुः तथा ब्रूहीत्यर्थः । किंच vसहसः vसूनो हे बलस्य पुत्र अग्ने vदेवस्य द्योतमानस्य vते तव vदुर्मतयः निग्रहबुद्धयः vभृमाच्चित् भ्रमादपि । अत्र संप्रसारणं छान्दसम् । प्रमादादपीत्यर्थः । vअस्मान् vमा vनशन्त मा व्याप्नुवन्तु । नशदिति व्याप्तिकर्मसु पाठात् ॥

स मर्तो अग्ने स्वनीक रेवानमर्त्ये य आजुहोति हव्यम् ।
स देवता वसुवनिं दधाति यं सूरिरर्थी पृच्छमानु एति ॥ २३ ॥

सः । मर्तः । अग्ने । सुऽअनीक । रेवान् । अमर्त्ये । यः । आऽजुहोति । हव्यम् ।
सः । देवता । वसुऽवनिम् । दधाति । यम् । सूरिः । अर्थी । पृच्छमानः । एति ॥ २३ ॥

vस्वनीक सुतेजस्क हे vअग्ने vअमर्त्ये अमनुष्ये देवतात्मनि त्वयि vहव्यं हविः vयः vआजुहोति vस vमर्तः मनुष्यः vरेवान् धनवान् भवति । vयं मर्त्यं vसूरिः प्राज्ञः vअर्थी धनादिकामः vपृच्छमानः असौ उदारः क्वास्ते[1] इति पृच्छन् vएति अभिगच्छति vसः एव मनुष्यः vदेवता देवताभ्यः vवसुवनिं धनपोषं ददाति[2] । यद्वा । स देवतामिर्वसुवनिं यजमानं दधाति धारयति यमग्निं सूरिः स्तोता अर्थी प्रयोजनवान् पृच्छमानः कोऽसावग्निरिति पृच्छमान एति ॥

---

१. त–कोस्ति । २. ख–ग्न–न–भ–ददाति धारयति; त–दधाति धारयति ।

महो नो अग्ने सुवितस्य विद्वान्रयिं सूरिभ्य आ वहा बृहन्तम् ।
येन वयं सहसावन्मदेमाविक्षितास आयुषा सुवीराः ॥ २४ ॥

महः । नः । अग्ने । सुवितस्य । विद्वान् । रयिम् । सूरिऽभ्यः । आ । वह । बृहन्तम् ।
येन । वयम् । सहसाऽवन् । मदेम । अविऽक्षितासः । आयुषा । सुऽवीराः ॥ २४ ॥

हे vअग्ने vनः अस्मदीयस्य vमहः महतः vसुवितस्य कल्याणस्य कर्मणः vविद्वान्[1]। अस्मदीयं कल्याणं कर्म[2] जानन्नित्यर्थः । त्वं vसूरिभ्यः स्तोतृभ्योऽस्मभ्यं vबृहन्तं महान्तं vरयिं धनम् vआ vवह । रयिमेव विशिनष्टि । हे vसहसावन् बलवन् अग्ने vयेन धनेन vवयं स्तोतारः vअविक्षितासः अविक्षीणाः vआयुषा पूर्णायुषः vसुवीराः कल्याणपुत्रपौत्राश्च सन्तः vमदेम हृष्येम ॥

नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः ।
रातौ स्याम मोभयासस आ ते यूयं पात स्वस्तिभिः सदा नः ॥ २५ ॥

नु । मे । ब्रह्माणि । अग्ने । उत् । शशाधि । त्वम् । देव । मघवत्ऽभ्यः । सुसूदः ।
रातौ । स्याम । उभयासः । आ । ते । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ २५ ॥

इयमृक् प्रागेव व्याख्याता ॥ ॥ २७ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्क-
भूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते
माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये
पञ्चमाष्टके प्रथमोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

' जुषस्व नः ' इत्येकादशर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभम् । आप्रशब्दोक्तत्वादिदं तनूनपाद्रहितम् । समिद्वाद्या अग्निविशेषाः प्रत्यृचं देवता उक्ताः । तथा चानुक्रम्यते—' जुषस्वैकादशाग्रम् ' इति । पशाविष्टाविदमाप्रीसूक्तम् । सूत्रितं च—' जुषस्व नः समिधमिति वसिष्ठानाम् ' (आश्व. श्रौ. ३. २) इति । पत्नीसंयाजे त्वाष्ट्रयागस्य याज्या त्वाष्ट्रे पशावपि पुरोडाशस्यानुवाक्येयमिति पूर्वमुक्तम् ॥

जुषस्व नः समिधमग्ने अद्य शोचा बृहद्यजतं धूममृण्वन् ।
उप स्पृश दिव्यं सानु स्तूपैः सं रश्मिभिस्ततनः सूर्यस्य ॥ १ ॥

जुषस्व । नः । सम्ऽइधम् । अग्ने । अद्य । शोच । बृहत् । यजतम् । धूमम् । ऋण्वन् ।
उप । स्पृश । दिव्यम् । सानु । स्तूपैः । सम् । रश्मिऽभिः । ततनः । सूर्यस्य ॥ १ ॥

---

१. ख-ङ्ग-त-न-भ-य-श—विद्वान् जानन् । २. श—कर्मजातं ।

हे vअग्ने vनः अस्माकं vसमिधम् vअद्य vजुषस्व सेवस्व । vयजतं यजनीयं प्रशस्तं vधूमम् vऋण्वन् प्रेरयन् vबृहत् अत्यन्तं vशोच दीप्यस्व च । किंच vदिव्यम् अन्तरिक्षभवं vसानु समुच्छ्रितं vस्तृभिः तप्तैः[1] रश्मिभिः vउप vस्पृश । अपि च vसूर्यस्य vरश्मिभिः तेजोभिः vसं vततनः संगच्छस्व ॥

नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।
ये सुक्रतवः शुचयो धियंधाः स्वदन्ति देवा उभयानि हव्या ॥ २ ॥

नराशंसस्य । महिमानम् । एषाम् । उप । स्तोषाम । यजतस्य । यज्ञैः ।
ये । सुऽक्रतवः । शुचयः । धियम्ऽधाः । स्वदन्ति । देवाः । उभयानि । हव्या ॥ २ ॥

vये vदेवाः vसुकृतवः सुप्रज्ञाः सुकर्माणो वा vशुचयः दीप्तिमन्तः vधियंधाः कर्मणां धारयितारः vउभयानि सौमिकानि[2] च हविःसंस्थादीनि च[2] vहव्या हव्यानि vस्वदन्ति स्वदयन्ति भक्षयन्ति तेषाम् vएषां मध्ये vयज्ञैः हविर्भिः स्तोत्रैर्वा vयजतस्य यजनीयस्य vनराशंसस्य नरैः प्रशंसनीयस्य अग्निविशेषस्य vमहिमानं महत्त्वम् vउप vस्तोषाम वयमुपस्तुमः । तथा च यास्कः—'नरा अस्मिन्नासीनाः शंसन्ति । अग्निरिति शाकपूणिनैरैः प्रशस्यो भवति । तस्यैषा भवति । नराशंसस्य महिमानमेषामुप स्तोषाम[3] यजतस्य[3] यज्ञैर्ये सुकर्माणः[4] शुचयो धियं धारयितारः स्वदयन्तु देवा उभयानि हवींषि सोमं चेतराणि च' (निरु. ८. ६) इति ॥

ईळेन्यं वो असुरं सुदक्षमन्तर्दूतं रोदसी सत्यवाचम् ।
मनुष्वदग्निं मनुना समिद्धं समध्वराय सदमिन्महेम ॥ ३ ॥

ईळेन्यम् । वः । असुरम् । सुऽदक्षम् । अन्तः । दूतम् । रोदसी इति । सत्यऽवाचम् ।
मनुष्वत् । अग्निम् । मनुना । सम्ऽइद्धम् । सम् । अध्वराय । सदम् । इत् । महेम ॥ ३ ॥

हे अध्वर्यवः vवः यूयम् vईळेन्यं स्तुत्यम् vअसुरं बलवन्तं vसुदक्षं सुप्रज्ञं vरोदसी रोदस्योः vअन्तः मध्ये vदूतं देवानां हविर्वहनार्थं चरन्तं vसत्यवाचं vमनुष्वत् मनुष्यवत्[5] vमनुना vसमिद्धं यथेदानीं मनुष्याः समिन्धते तथा पूर्वं मनुना प्रजापतिना समिद्धम् vअग्निम् vअध्वराय यज्ञाय vसदमित् सदैव vसं vमहेम संपूजयत ॥ मध्यमपुरुषस्य व्यत्ययेनोत्तमपुरुषत्वम् ॥

सपर्यवो भरमाणा अभिज्ञु प्र वृञ्जते नमसा बर्हिरग्नौ ।
आजुह्वाना घृतपृष्ठं पृषद्वदध्वर्यवो हविषा मर्जयध्वम् ॥ ४ ॥

सपर्यवः । भरमाणाः । अभिऽज्ञु । प्र । वृञ्जते । नमसा । बर्हिः । अग्नौ ।
आऽजुह्वानाः । घृतऽपृष्ठम् । पृषत्ऽवत् । अध्वर्यवः । हविषा । मर्जयध्वम् ॥ ४ ॥

---

१. झ-श-तन्वैः; त-त्वदीयैः; न-' तप्तैः ' नास्ति । २. ख-सौमिकानि इतराणि च; घ-इतराणि सौमिकानि च; झ-त-न-भ-श-सौमिकानि च । ३. त-स्तुमो यज्ञियस्य । ४. य-श-सुकर्माणः सुकृतवः । ५. ख-झ-त-न-भ-श-' मनुष्यवत् ' नास्ति ।

vसपर्यवः परिचरणमिच्छन्तः vअभिशु अभिगतजानुकं vभरमाणाः पादौ भरन्तः vबर्हिः vनमसा हविषा सह vअग्नौ vप्र vवृञ्जते प्रभरन्ति । तदेव विशदयति । हे vअध्वर्यवः vघृतपृष्ठं घृतसंसिक्तपृष्ठं vपृषद्वत् स्थूलबिन्दुभिर्युक्तं बर्हिः vहविषा सह vआजुह्वानाः vमर्जयध्वम् अग्निं परिचरत ॥

स्वाध्यो३ वि दुरो देवयन्तोऽशिश्रयू रथयुर्देवताता ।
पूर्वी शिशुं न मातरा रिहाणे समग्रुवो न समनेष्वञ्जन् ॥ ५ ॥

सुऽआध्यः । वि । दुरः । देवऽयन्तः । अशिश्रयुः । रथऽयुः । देवऽताता ।
पूर्वी इति । शिशुम् । न । मातरा । रिहाणे इति । सम् । अग्रुवः । न । समनेषु । अञ्जन् ॥५॥

vस्वाध्यः सुकर्माणः vदेवयन्तः देवकामा यजमानाः vरथयुः रथकामाश्च[1] ॥ जसि पूर्वसवर्णो ह्रस्वश्च ॥ vदेवताता देवतातौ यज्ञे vदुरः यज्ञगृहद्वाराणि vवि vअशिश्रयुः आश्रितवन्तः । किंच vसमनेषु यज्ञेषु vपूर्वी प्राचीने प्रागग्रे जुहूपभृतौ vशिशुं vन वत्समिव मातरौ गावौ vरिहाणे अग्निं लिहाने vअग्रुवो vन यथा नद्यः क्षेत्राण्युदकेन तद्वत् vसम् vअञ्जन् अध्वर्यवः आज्येन समञ्जन्ति ॥ ॥ १ ॥

उत योषणे दिव्ये मही न उषासानक्ता सुदुघेव धेनुः ।
बर्हिषदा पुरुहूते मघोनी आ यज्ञिये सुवितायं श्रयेताम् ॥ ६ ॥

उत । योषणे इति । दिव्ये इति । मही इति । नः । उषासानक्ता । सुदुघाऽइव । धेनुः ।
बर्हिऽसदा । पुरुहूते इति पुरुऽहूते । मघोनी इति । आ । यज्ञिये इति । सुवितायं । श्रयेताम् ॥६॥

vउत अपि च vयोषणे युवत्यौ स्त्रीरूपे[2] वा vदिव्ये[3] दिवि भवे vमही महत्यौ[4] vबर्हिषदा बर्हिषि सीदन्त्यौ vपुरुहूते बहुभिः स्तुते vमघोनी धनवत्यौ vयज्ञिये यज्ञार्हे vउषासानक्ता अहोरात्रे vसुदुघेव vधेनुः कामदुग्धेनुरिव vनः अस्मान् vसुविताय कल्याणाय vआ vश्रयेताम् ॥

विप्रा यज्ञेषु मानुषेषु कारू मन्ये वां जातवेदसा यजध्यै ।
ऊर्ध्वं नो अध्वरं कृतं हवेषु ता देवेषु वनथो वार्याणि ॥ ७ ॥

विप्रा । यज्ञेषु । मानुषेषु । कारू इति । मन्ये । वाम् । जातऽवेदसा । यजध्यै ।
ऊर्ध्वम् । नः । अध्वरम् । कृतम् । हवेषु । ता । देवेषु । वनथः । वार्याणि ॥ ७ ॥

हे दैव्या होतारौ vविप्रा मेधाविनौ vजातवेदसा जातधनौ vमानुषेषु मनुष्यैः क्रियमाणेषु vयज्ञेषु vकारू कर्मणां कर्तारौ vवां युवां vयजध्यै यष्टुं vमन्ये स्तौमि । किंच vहवेषु हवनेषु स्तोत्रेषु सत्सु vनः अस्माकम् vअध्वरम् अकुटिलं यज्ञम् vऊर्ध्वं देवाभिमुखं vकृतं कुरुतं च । अपि च vता तौ युवां vदेवेषु विद्यमानानि vवार्याणि धनानि vवनथः संभजथः । तान्यस्मभ्यं संप्रयच्छथ इत्यर्थः ॥

---

१. ख-त-भ-रथकामश्च; श-रथमात्मन इच्छंतश्च । २. ख-भ-मिश्ररूपे । ३. ख-ञ-त-न-भ-श-'दिव्ये...महत्यौ' नास्ति ।

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदन्तु ॥ ८ ॥

आ । भारती । भारतीभिः । सऽजोषाः । इळा । देवैः । मनुष्येभिः । अग्निः ।
सरस्वती । सारस्वतेभिः । अर्वाक् । तिस्रः । देवीः । बर्हिः । आ । इदम् । सदन्तु ॥ ८ ॥

एतदाद्यृक्चतुष्टयं द्वितीयाष्टकस्याष्टमाध्याये (ऋ. सं. ३. ४. ८-११) यद्यपि व्याख्यातं तथापि व्यवधानात् संक्षेपतोऽत्रापि व्याख्यायते। vभारती भरतस्यादित्यस्य पत्नी vभारतीभिः vसजोषाः सहिता vइळा vमनुष्येभिः मनुष्यलोकभवैः vदेवैः सार्धम् vअग्निः vआ गच्छतु। vसरस्वती vसारस्वतेभिः सारस्वतैः मध्यमस्थानैर्देवैः सार्धम् vअर्वाक् अस्मदभिमुखमागच्छतु। आगत्य vतिस्रो vदेवीः देव्यः ॥ प्रथमार्थे द्वितीया ॥ vबर्हिः vइदम् vआ vसदन्तु[1] ॥

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥ ९ ॥

तत् । नः । तुरीपम् । अध । पोषयित्नु । देव । त्वष्टः । वि । रराणः । स्यस्वेति स्यस्व ।
यतः । वीरः । कर्मण्यः । सुऽदक्षः । युक्तऽग्रावा । जायते । देवऽकामः ॥ ९ ॥

vदेव द्योतमान हे vत्वष्टः vरराणः रममाणस्त्वं vनः अस्माकं vतुरीपं त्वरितमाप्नुवत् vपोषयित्नु पोषकरं vतत् रेतः vवि vस्यस्व विशेषेणावसानं प्रापय। विमोचयेत्यर्थः। vयतः रेतसः vकर्मण्यः कर्मसु साधुः vसुदक्षः सुबलः vयुक्तग्रावा सोमसुत् vदेवकामः vवीरः पुत्रः vजायते ॥

वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति ।
सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥ १० ॥

वनस्पते । अव । सृज । उप । देवान् । अग्निः । हविः । शमिता । सूदयाति ।
सः । इत् । ऊँ इति । होता । सत्यऽतरः । यजाति । यथा । देवानाम् । जनिमानि । वेद ॥ १० ॥

हे vवनस्पते vदेवान्[2] vउप vअव[2] vसृज। अथ परोक्षस्तुतिः। vअग्निः वनस्पतिः vशमिता शामित्ररूपः सन् vहविः vसूदयाति प्रेरयतु। vसेत् स एव वनस्पतिः vहोता देवानामाह्वाता vसत्यतरः अपि सन् vयजाति यजतु। vदेवानां vजनिमानि जननानि[3] vयथा स्वयं vवेद तथा ॥

आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः ।
बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥ ११ ॥

आ । याहि । अग्ने । सम्ऽइधानः । अर्वाङ् । इन्द्रेण । देवैः । सऽरथम् । तुरेभिः ।
बर्हिः । नः । आस्ताम् । अदितिः । सुऽपुत्रा । स्वाहा । देवाः । अमृताः । मादयन्ताम् ॥ ११ ॥

---

१. ख-न-भ-श-सीदन्तु; घ-सदन्तु आसीदन्तु । २. ख-ज्ञ-झ-त३-भ-श-देवानुप; त१-२-देवानुरूप । ३. ख-त३-न-भ-जानन्; ज्ञ-जन्मानि; झ-श-जनान्; त१-२-जनानाम् ।

हे vअग्ने vसमिधानः[1] vअर्वाक् अस्मदभिमुखस्त्वम् vइन्द्रेण vतुरेभिः त्वरितैः vदेवैः च vसरथं समानरथं यथा भवति तथा vआ vयाहि आगच्छ। vनः अस्माकं vबर्हिः अधि vआस्ताम् vअदितिः च vसुपुत्रा कल्याणपुत्रा। vस्वाहा vदेवाः च सर्वे vअमृताः सन्तः vमादयन्ताम् इति ॥ ॥ २ ॥

'अग्निं वो देवम्' इति दशर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम्। अत्रेयमनुक्रमणिका—'अग्निं वो दश' इति। 'अग्निं वो देवम्' इत्येतदादीनि दश सूक्तानि तृतीयचतुर्थवर्जितानि प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे च विनियुक्तानि। सूत्रितं च—'अग्निं वो देवमिति दशानां तृतीयचतुर्थे उद्धरेत्' (आश्व. श्रौ. ४·१३) इति। व्यूळहे दशरात्रेऽष्टमेऽहनीदं सूक्तमाज्यशस्त्रम्। सूत्र्यते हि—'द्वितीयस्याग्निं वो देवमित्याज्यम्' (आश्व. श्रौ. ८·१०) इति॥

अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम्।
यो मर्त्येषु निधुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥ १ ॥

अग्निम्। वः। देवम्। अग्निऽभिः। सऽजोषाः। यजिष्ठम्। दूतम्। अध्वरे। कृणुध्वम्।
यः। मर्त्येषु। निऽध्रुविः। ऋतऽवा। तपुःऽमूर्धा। घृतऽअन्नः। पावकः ॥ १ ॥

हे देवाः vवः यूयं vदेवं द्योतमानम् vअग्निभिः अन्यैरग्निभिः vसजोषाः सजोषसं सहितम्। द्वितीयार्थे प्रथमा। vयजिष्ठं यष्टृतमम् vअग्निम् vअध्वरे कौटिल्यरहिते यज्ञे vदूतं vकृणुध्वं कुरुत। vयः अग्निर्देवोऽपि सन् vमर्त्येषु vनिध्रुविः नितरां ध्रुवस्तिष्ठति vऋतावा यज्ञवान् सत्यवान् वा vतपुर्मूर्धा तापकतेजाः vघृतान्नः vपावकः शोधकश्च भवति ॥

प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात्।
आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥ २ ॥

प्रोथत्। अश्वः। न। यवसे। अविष्यन्। यदा। महः। सम्ऽवरणात्। वि। अस्थात्।
आत्। अस्य। वातः। अनु। वाति। शोचिः। अध। स्म। ते। व्रजनम्। कृष्णम्। अस्ति॥२॥

vयवसे घासे vअविष्यन् भक्षयन् vप्रोथत् शब्दं कुर्वन् संचरन् वा vअश्वो vन अश्व इव vमहः महतः vसंवरणात् निरोधात् दावरूपोऽग्निः vयदा vव्यस्थात् संततेषु वृक्षेषु वितिष्ठते vआत् तदा vअस्य अग्नेः vशोचिः अर्चिः vअनु vवातः vवाति। अथ प्रत्यक्षस्तुतिः। vअध अनन्तरं हे अग्ने vते तव vव्रजनं वर्त्म vकृष्णमस्ति भवति। vस्म इति पूरणः ॥

उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः।
अच्छा द्यामरुषो धूम एति सं दूतो अग्न ईयसे हि देवान् ॥ ३ ॥

उत्। यस्य। ते। नवऽजातस्य। वृष्णः। अग्ने। चरन्ति। अजराः। इधानाः।
अच्छ। द्याम्। अरुषः। धूमः। एति। सम्। दूतः। अग्ने। ईयसे। हि। देवान्॥ ३ ॥

---

१. त—समिधानः समिध्यमानः।

हे ᵛअग्ने ᵛनवजातस्य नवप्रादुर्भावस्य ᵛवृष्णः वर्षितुः ᵛयस्य ᵛते तव ᵛअजराः जरारहिता ज्वालाः ᵛइधानाः[1] ᵛउत् ᵛचरन्ति उद्गच्छन्ति अस्य ᵛअरुषः आरोचमानः ᵛधूमः ᵛद्याम् ᵛअच्छ दिवमभि ᵛएति गच्छति[2]। हे ᵛअग्ने त्वं ᵛदूतः सन् ᵛदेवान् ᵛसम् ᵛईयसे ᵛहि संप्राप्नोषि च ॥

वि यस्य॑ ते पृथि॒व्यां पाजो॒ अश्रे॑त्तृषु॒ यद॒न्ना स॒मवृ॑क्त॒ जम्भैः॑।
सेने॑व सृ॒ष्टा प्रसि॑तिष्ट एति॒ यवं॑ न द॑स्म जु॒ह्वा॑ विवेक्षि ॥ ४ ॥

वि। यस्य॑। ते॒। पृ॒थि॒व्याम्। पाजः॑। अश्रे॑त्। तृ॒षु। यत्। अन्ना॑। स॒म्ऽअवृ॑क्त। जम्भैः॑।
सेना॑ऽइव। सृ॒ष्टा। प्रऽसि॑तिः। ते॒। ए॒ति॒। यव॑म्। न। द॒स्म॒। जु॒ह्वा॑। विवे॑क्षि ॥ ४ ॥

हे अग्ने ᵛयस्य दावरूपस्य ᵛते तव ᵛपाजः तेजः ᵛपृथिव्यां भूम्यां ᵛतृषु क्षिप्रं ᵛवि ᵛअश्रेत् विश्रयति ᵛयत् यदा अन्नानि[3] काष्ठादीनि ᵛजम्भैः दन्तैः। ज्वालाभिरित्यर्थः। ᵛसमवृक्त वृङ्क्ते खादति। तथा ᵛसेनेव ᵛसृष्टा उद्युक्ता ᵛते तव ᵛप्रसितिः ज्वाला ᵛएति गच्छति। ᵛदस्म हे दर्शनीयाग्ने त्वं ᵛयवं ᵛन यवमिव ᵛजुह्वा ज्वालया ᵛविवेक्षि काष्ठादीनि भक्षयसि व्याप्नोषि वा ॥

तमिद्दोषा तमु॒षसि॒ यवि॑ष्ठ॒मग्निमत्यं॒ न मर्जयन्त॒ नर॑ः।
नि॒शिशा॑ना॒ अति॑थिमस्य॒ योनौ॑ दी॒दाय॑ शो॒चिरा॑हु॒तस्य॒ वृष्ण॑ः ॥ ५ ॥

तम्। इत्। दो॒षा। तम्। उ॒षसि॑। यवि॑ष्ठम्। अ॒ग्निम्। अत्य॑म्। न। मर्ज॑यन्त। नर॑ः।
नि॒ऽशिशा॑नाः। अति॑थिम्। अ॒स्य॒। योनौ॑। दी॒दाय॑। शो॒चिः। आऽहु॑तस्य। वृष्ण॑ः ॥५॥

ᵛयविष्ठं युवतमम् ᵛअतिथिम् अतिथिवत् पूज्यं ᵛतमित् तमेव ᵛअग्निं ᵛदोषा दोषायां रात्रौ ᵛउषसि वासरेऽपि ᵛतम् एव ᵛअस्य अग्नेः ᵛयोनौ स्थाने आहवनीयायतने ध्रिष्ण्ये वा ᵛनिशिशानाः दीपयन्तः ᵛनरः मनुष्याः ᵛअत्यं ᵛन सततगमनयुक्तं वोढारमश्वमिव ᵛमर्जयन्त परिचरन्ति। ᵛआहुतस्य च ᵛवृष्णः कामानां वर्षितुरग्नेस्तस्य ᵛशोचिः ज्वाला ᵛदीदाय दीप्यते ॥ ॥ ३ ॥

सु॒सं॒दृक्ते॑ स्वनीक॒ प्रती॑कं॒ वि यद्रु॒क्मो न रो॑च॒स उपा॒के।
दि॒वो न ते॑ तन्य॒तुरे॑ति॒ शुष्म॑श्चि॒त्रो न सू॒रः प्रति॑ चक्षि भा॒नुम् ॥ ६ ॥

सु॒ऽसं॒दृक्। ते॒। सु॒ऽअ॒नी॒क॒। प्रती॑कम्। वि। यत्। रु॒क्मः। न। रो॒च॒से। उ॒पा॒के।
दि॒वः। न। ते॒। त॒न्य॒तुः। ए॒ति॒। शुष्मः॑। चि॒त्रः। न। सू॒रः॑। प्रति॑। च॒क्षि॒। भा॒नुम्॥६॥

ᵛस्वनीक हे सुतेजस्काग्ने त्वं ᵛयत् यदा ᵛरुक्मो ᵛन सूर्य इव। सुवर्णमिव वा। ᵛउपाके अन्तिके ᵛवि ᵛरोचसे विशेषेण दीप्यसे तदा ᵛते तव ᵛप्रतीकं रूपमङ्गं वा ᵛसुसंदृक् सुसंदर्शनं भवति। किंच ᵛते तव ᵛशुष्मः ᵛदिवः अन्तरिक्षात् ᵛतन्यतुः ᵛन अशनिरिव ᵛएति निर्गच्छति। ᵛचित्रः दर्शनीयः ᵛसूरः ᵛन सूर्य इव ᵛभानुं स्वां दीप्तिं ᵛप्रति ᵛचक्षि प्रदर्शयसि ॥

---

१. त–इधानाः समिध्यमानाः। २. त–अभिगच्छति। ३. ज्ञ-त२–अन्ना अन्नानि।

यथा॑ वः॒ स्वाहाग्नये॒ दाशे॑म॒ परी॑ळाभिर्घृ॒तव॑द्भिश्च॒ हव्यैः॑ ।
तेभि॑र्नो अग्ने अमि॒तैर्म॒होभिः॒ श॒तं पूर्भि॑रायसी॒भिर्नि पा॑हि ॥ ७ ॥

यथा॑ । वः॒ । स्वाहा॑ । अ॒ग्नये॑ । दाशे॑म । परि॑ । इ॒ळा॑भिः । घृ॒तव॑त्ऽभिः । च॒ । हव्यैः॑ ।
तेभिः॑ । नः॒ । अ॒ग्ने॒ । अ॒मि॒तैः॑ । म॒हः॒ऽभिः॒ । श॒तम् । पूः॒ऽभिः॒ । आ॒य॒सी॒भिः॒ । नि । पा॒हि॒ ॥ ७ ॥

हे ᵛअग्ने ᵛअग्नये अग्रस्य नेत्रे ᵛवः तुभ्यं ᵛस्वाहा स्वाहुतं हविः । किंच ᵛयथा वयम् ᵛइळाभिः गोभिर्गोविकारैः क्षीरादिभिः ᵛघृतवद्भिः घृतसहितैः ᵛहव्यैः पुरोडाशादिभिः ᵛच ᵛदाशेम परिचरेम तथा त्वमपि ᵛतेभिः प्रसिद्धैः ᵛअमितैः अपरिमितैः ᵛमहोभिः तेजोभिः ᵛशतम् अपरिमिताभिः ᵛआयसीभिः हिरण्मयीभिः । 'रुक्मम् अयः' इति हिरण्यनामसु पाठात् । ᵛपूर्भिः नगरीभिरिव ᵛनः अस्मान् ᵛनि ᵛपाहि नितरां रक्ष ॥

या वां॑ ते सन्ति दा॒शुषे॑ अधृ॒ष्टा गिरो॑ वा॒ याभि॑र्नृ॒वती॑रु॒रुष्याः॑ ।
ताभि॑र्नः सूनो सहसो॒ नि पा॑हि॒ स त्सू॒रीञ्जरि॑तॄञ्जातवेदः ॥ ८ ॥

याः । वा॒ । ते॒ । सन्ति॑ । दा॒शुषे॑ । अ॒धृ॒ष्टाः । गिरः॑ । वा॒ । याभिः॑ । नृ॒ऽवती॑ः । उ॒रु॒ष्याः॑ ।
ताभिः॑ । नः॒ । सू॒नो॒ इति॑ । स॒ह॒सः॒ । नि । पा॒हि॒ । स्मत् । सू॒रीन् । जरि॑तॄन् । जा॒त॒ऽवे॒दः॒ ॥ ८ ॥

ᵛसहसः ᵛसूनो हे बलस्य पुत्र ᵛजातवेदः अग्ने ᵛदाशुषे दाशुषः ᵛते तव ᵛयाः ᵛवा याश्च ज्वालाः ᵛसन्ति । ᵛअधृष्टाः रक्षोभिः अप्रधृषिताः[1] ᵛगिरो ᵛवा गिरश्च सन्ति । ᵛयाभिः गीर्भिः ᵛनृवतीः पुत्रवतीः प्रजाः ᵛउरुष्याः रक्षेः । ᵛताभिः उभयीभिः ᵛनः अस्मान् । ᵛस्मत् इति प्रशस्तवचनः । प्रशस्तान् ᵛसूरीन् हविषां प्रेरकान् ᵛजरितॄन् स्तोतॄंश्च ᵛनि ᵛपाहि नितरां रक्ष ॥

निर्य॑त्पु॒तेव॒ स्वधि॑तिः शु॒चिर्गात्स्वया॑ कृ॒पा त॒न्वा॑३ रोच॑मानः ।
आ यो मात्रो॑रु॒शन्यो॒ जनि॑ष्ट देव॒यज्या॑य सु॒क्रतुः॑ पावक॒कः ॥ ९ ॥

निः॑ । यत् । पु॒ताऽइ॑व । स्वऽधि॑तिः । शु॒चिः॑ । गात् । स्वया॑ । कृ॒पा । त॒न्वा॑ । रोच॑मानः ।
आ । यः । मात्रोः॑ । उ॒शन्यः॑ । जनि॑ष्ट । दे॒व॒ऽयज्या॑य । सु॒ऽक्रतुः॑ । पा॒व॒कः ॥ ९ ॥

ᵛयत् यदा ᵛशुचिः अग्निः ᵛस्वया स्वकीयया ᵛतन्वा ततया ᵛकृपा कृपया दीप्त्या ᵛरोचमानः ᵛपूतेव ᵛस्वधितिः तीक्ष्णीकृता स्वधितिरिव ᵛनिः ᵛगात् काष्ठान्निर्गच्छति तदानीं ᵛदेवयज्याय भवति । तदेव विशदयति । ᵛयः अग्निः ᵛउशन्यः कमनीयः ᵛसुक्रतुः सुकर्मा ᵛपावकः शोधकश्च ᵛमात्रोः अरण्योः ᵛआ ᵛजनिष्ट आजायत स देवयज्याय भवतीति ॥

एता नो॑ अग्ने सौभ॒गा दि॑दी॒ह्यपि॑ क्रतुं सु॒चेत॑सं वतेम ।
विश्वा॑ स्तो॒तृभ्यो॑ गृण॒ते च॑ सन्तु यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ १० ॥

एता । नः॒ । अ॒ग्ने॒ । सौ॒भ॒गा । दि॒दी॒हि॒ । अपि॑ । क्र॒तु॒म् । सु॒ऽचेत॑सम् । व॒ते॒म॒ ।
विश्वा॑ । स्तो॒तृऽभ्यः॑ । गृ॒ण॒ते । च॒ । स॒न्तु॒ । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥ १० ॥

---

१. ख-भ-अभिधृषिताः; घ-अप्रधर्षिताः ।

हे ᵛअग्ने ᵛएता एतानि परिदृश्यमानानि ᵛसौभगा सौभगानि शोभनानि धनानि ᵛनः अस्मभ्यं ᵛदिदीहि दीपय देहि वा । ᵛअपि अपि च ᵛक्रतुं कर्म यज्ञानां कर्तारं वा ᵛसुचेतसं शोभनप्रज्ञानयुक्तं सुप्रज्ञानं पुत्रं वा ᵛवतेम संभजेमहि ॥ वनतेः संभजनार्थस्य वर्णान्तरागमे सति रूपम् ॥ ᵛविश्वा विश्वानि धनानि ᵛस्तोतृभ्यः उद्गातृभ्यः ᵛगृणते शंसते ᵛच ᵛसन्तु । ᵛयूयं त्वत्परिवाराश्च सर्वे यूयं ᵛनः अस्मान् ᵛस्वस्तिभिः क्षेमैः ᵛसदा सर्वदा ᵛपात रक्षत ॥ ॥ ४ ॥

'प्र वः शुक्राय' इति दशर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम् । 'प्र वः' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्तमध्ये द्वितीयत्वेनोक्तः सूक्तविनियोगः । एकादशिन आग्नेये पशौ 'प्र वः शुक्राय' इत्येषा वपाया याज्या । सूत्रितं च—'प्र वः शुक्राय भानवे भरध्वं यथा विप्रस्य मनुषो हविर्भिः' (आश्व. श्रौ. ३.७) इति ॥

प्र वः शुक्राय भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतम् ।
यो दैव्यानि मानुषा जनूंष्यन्तर्विश्वानि विद्मना जिगाति ॥ १ ॥

प्र । वः । शुक्राय । भानवे । भरध्वम् । हव्यम् । मतिम् । च । अग्नये । सुऽपूतम् ।
यः । दैव्यानि । मानुषा । जनूंषि । अन्तः । विश्वानि । विद्मना । जिगाति ॥ १ ॥

हे हविषां वोढारः ᵛवः यूयं ᵛशुक्राय शुभ्राय ᵛभानवे दीप्ताय ᵛअग्नये ᵛसुपूतं सुशुद्धं[1] ᵛहव्यं ᵛमतिं स्तुतिं ᵛच ᵛप्र ᵛभरध्वम् । ᵛयः अग्निः ᵛदैव्यानि ᵛमानुषा मानुषाणि च ᵛविश्वानि[2] ᵛजनूंषि जातानि ᵛअन्तः अन्तरा ᵛविद्मना प्रज्ञानेन मार्गेण वा ᵛजिगाति गच्छति । देवान् मनुष्यांश्च अन्तरा हवींषि नेतुं वर्तत इत्यर्थः ॥

स गृत्सो अग्निस्तरुणश्चिदस्तु यतो यविष्ठो अजनिष्ट मातुः ।
सं यो वना युवते शुचिदन्भूरि चिदन्ना समिदत्ति सद्यः ॥ २ ॥

सः । गृत्सः । अग्निः । तरुणः । चित् । अस्तु । यतः । यविष्ठः । अजनिष्ट । मातुः ।
सम् । यः । वना । युवते । शुचिऽदन् । भूरि । चित् । अन्ना । सम् । इत् । अत्ति । सद्यः ॥२॥

ᵛसः ᵛचित् स एव ᵛगृत्सः मेधावी । तथा च यास्कः—'गृत्स इति मेधाविनाम' (निरु. ९.५) । ᵛअग्निः ᵛतरुणः तारको भवति[3] । तदा ᵛयतः यदा ᵛमातुः अरण्याः ᵛयविष्ठः युवतमः सन् ᵛअजनिष्ट । ᵛयः अग्निः ᵛशुचिदन् दीप्तदन्तः ᵛवना वनानि ᵛसं ᵛयुवते आत्मना संयोजयति । किंच ᵛभूरि ᵛचित् भूरीण्यपि ᵛअन्ना स्वीयान्यन्नानि ᵛसद्यः ᵛइत् सद्य एव ᵛसम्[4] ᵛअत्ति[4] सम्यक् भक्षयति ॥

अस्य देवस्य सुसदघनीके यं मर्तासः श्येतं जगृभ्रे ।
नि यो गृभं पौरुषेयीमुवोच दुरोकमग्निरायवे शुशोच ॥ ३ ॥

अस्य । देवस्य । सम्ऽसदि । अनीके । यम् । मर्तासः । श्येतम् । जगृभ्रे ।
नि । यः । गृभम् । पौरुषेयीम् । उवोच । दुःऽओकम् । अग्निः । आयवे । शुशोच ॥ ३ ॥

---

१. ख-ङ्ग-भ-शुद्धम् । २. ख-ङ्ग-त-न-भ-य-श-विश्वा विश्वानि । ३. ख-बिभ्रति भूमिश्च भवति; घ-अस्तु भवति । ४. ख-भ-समिदत्ति; न-श-समदत्ति ।

vअस्य vदेवस्य अग्नेः vअनीके मुख्ये vसंसदि स्थाने vइयेतं श्वेतं शुभ्रं vयम्[1] अग्निं[1] vमर्तासः मनुष्याः vजगृभ्रे परिगृह्णन्ति[2] । vयः च अग्निः vपौरुषेयीं पुरुषैः क्रियमाणां vगृभं गृभीतं[3] vनि vउवोच ॥ अत्र वधिः सेवार्थे वर्तते ॥ निषेवत इत्यर्थः । सः vअग्निः vआयवे मनुष्यार्थम् । ' द्रुह्यवः आयवः ' इति मनुष्यनामसु पाठात् । vदुरोकं सपत्नैर्दुःसेवं यथा भवति तथा vशुशोच दीप्यते ॥

अयं कविरकविषु प्रचेता मर्तेष्वग्निरमृतो नि धायि ।
स मा नो अत्र जुहुरः सहस्वः सदा त्वे सुमनसः स्याम ॥ ४ ॥

अयम् । कविः । अकविषु । प्रऽचेताः । मर्तेषु । अग्निः । अमृतः । नि । धायि ।
सः । मा । नः । अत्र । जुहुरः । सहस्वः । सदा । त्वे इति । सुऽमनसः । स्याम ॥ ४ ॥

vकविः क्रान्तदृक् vप्रचेताः प्रकाशकः vअमृतः मरणधर्मरहितः vअयम् vअग्निः vअकविषु अक्रान्तदृक्षु vमर्तेषु मरणधर्मकेषु vनि vधायि निहितः । अथ प्रत्यक्षस्तुतिः । vसहस्वः बलवन्नग्ने vत्वे यस्मिन् त्वयि vसदा वयं vसुमनसः सुमतयः vस्याम vसः त्वम् vअत्र अस्मिन् लोके vनः अस्मान् vमा vजुहुरः मा हिंसीः ॥

आ यो योनिं देवकृतं ससाद क्रत्वा ह्यग्निरमृताँ अतारीत् ।
तमोषधीश्च वनिनश्च गर्भं भूमिश्च विश्वधायसं बिभर्ति ॥ ५ ॥

आ । यः । योनिम् । देवऽकृतम् । ससादं । क्रत्वा । हि । अग्निः । अमृतान् । अतारीत् ।
तम् । ओषधीः । च । वनिनः । च । गर्भम् । भूमिः । च । विश्वऽधायसम् । बिभर्ति ॥५॥

vयः अग्निः vदेवकृतं देवैः कल्पितं vयोनिं स्थानम् vआ vससाद अध्यास्ते । किमर्थं देवा स्थानं कल्पयन्त्यग्नेः इत्यत आह । vहि यस्मात् कारणात् vअग्निः vक्रत्वा प्रज्ञया vअमृतान् देवान् vअतारीत् दुर्गेभ्यस्तारयति । vतम् इममग्निं vविश्वधायसं विश्वस्य[4] धारकम्[5] vओषधीः ओषधयः vवनिनश्च वृक्षाश्च vगर्भं गर्भं सन्तं बिभ्रति । vभूमिश्च vबिभर्ति । श्रुतमेव बिभर्तीति परं बहुवचनान्ततया विपरिणतं सत् ओषधीभिर्वनिभिश्च संबध्यते ॥ ॥ ५ ॥

ईशे ह्यग्निरमृतस्य भूरेरीशे रायः सुवीर्यस्य दातोः ।
मा त्वा वयं सहसावन्नवीरा माप्सवः परि षदाम मादुवः ॥ ६ ॥

ईशे । हि । अग्निः । अमृतस्य । भूरेः । ईशे । रायः । सुऽवीर्यस्य । दातोः ।
मा । त्वा । वयम् । सहसाऽवन् । अवीराः । मा । अप्सवः । परि । सदाम । मा । अदुवः ॥६॥

vअमृतस्य अन्नमुदकं[1] वा[1] । द्वितीयार्थे षष्ठी । vभूरेः अधिकं vदातोः दातुम् vअग्निः vईशे ईष्टे vहि । vसुवीर्यस्य शोभनवीर्ययुक्तं vरायः धनं दातुम् vईशे ईष्टे । अथ प्रत्यक्षस्तुतिः vसहसावन् हे बलवन्नग्ने vवयं वसिष्ठाः vअवीराः पुत्रादिरहिताः सन्तः vमा vपरि vषदाम म

---

१. ख-ञ-न-भ-श–अग्निम्; त–अग्निं यम् । २. न-भ–परिगृह्णाति । ३. त-न-भ-श–गृभीतिम् ४. ख-घ-ञ-न-भ–विश्वधारकम् । ५. घ-त–अमृतमन्नमुदकं च ।

पर्युपविशाम। vअप्सवः रूपरहिताश्च सन्तः vमा परि षदाम। तथा च यास्कः—'अप्स[1] इति रूपनाम' (निरु. ५.१३) इति। vअदुवः परिचरणहीनाश्च vमा परि षदाम॥

परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम।
न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः॥ ७॥

परिऽसद्यम्। हि। अरणस्य। रेक्णः। नित्यस्य। रायः। पतयः। स्याम।
न। शेषः। अग्ने। अन्यऽजातम्। अस्ति। अचेतानस्य। मा। पथः। वि। दुक्षः॥ ७॥

vअरणस्य अनृणस्य vरेक्णः धनं vपरिषद्यं पर्याप्तं भवति vहि। अतः vनित्यस्य अपुनर्देयस्य vरायः धनस्य vपतयः vस्याम। यद्वा। अरणस्य[2] रेक्णो धनं परिषद्यं परिहर्तव्यं भवति। अतो नित्यस्य औरसस्य रायः पुत्राख्यस्य धनस्य पतयः स्याम। हे vअग्ने vअन्यजातम् अनौरसं vशेषः अपत्यं vन vअस्ति न भवति। vअचेतानस्य अविदुषः vपथः मार्गान् पुत्रोत्पादनप्रमुखान् मार्गान् vमा vवि vदुक्षः मा विदुदुषः॥ 'दुष वैकृत्ये' इति धातुः॥ तथा च यास्कः—'परिहर्तव्यं हि नोपसर्तव्यमरणस्य रेक्णोऽरणोऽपार्णो भवति रेक्ण इति धननाम रिच्यते प्रयतः। नित्यस्य रायः पतयः स्याम[3]। न शेषो अग्ने अन्यजातमस्ति। शेष इत्यपत्यनाम शिष्यते प्रयतोऽचेतयमानस्य तत्प्रमत्तस्य भवति मा नः पथो विदूदुषः' (निरु. ३.२) इति॥

नहि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ।
अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु नव्यः॥ ८॥

नहि। ग्रभाय। अरणः। सुऽशेवः। अन्यऽउदर्यः। मनसा। मन्तवै। ऊँ इति।
अध। चित्। ओकः। पुनः। इत्। सः। एति। आ। नः। वाजी। अभीषाट्। एतु। नव्यः॥ ८॥

पूर्वस्यामृचि उक्त एवार्थोऽत्र प्रपञ्च्यते। vअरणः अरममाणः vअन्योदर्यः vसुशेवः सुखतमः[4] सन् vग्रभाय पुत्रत्वेन ग्रहणाय vमनसा vमन्तवा vउ मनसापि मन्तव्यः vन भवति vहि। vअध vचित् अपि च vसः अन्योदर्यः vओकः vइत् संस्थानमेव vपुनः vएति प्राप्नोति। अतः vवाजी अन्नवान् vअभीषाट् शत्रूणामभिभविता vनव्यः नवजातः पुत्रः vनः अस्मान् vआ vएतु आगच्छतु॥

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्।
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥ ९॥

त्वम्। अग्ने। वनुष्यतः। नि। पाहि। त्वम्। ऊँ इति। नः। सहसाऽवन्। अवद्यात्।
सम्। त्वा। ध्वस्मन्ऽवत्। अभि। एतु। पाथः। सम्। रयिः। स्पृहयाय्यः। सहस्री॥ ९॥

हे vअग्ने vत्वं vवनुष्यतः हिंसकात् vनः अस्मान् vनि vपाहि। vसहसावन् हे बलवन्नग्ने vत्वम् vअवद्यात् पापाच्चास्मान् नि पाहि। vत्वा त्वां vध्वस्मन्वत् ध्वस्तदोषं vपाथः अन्नं हविः vसम्

---

१. ज्ञ–प्सु। २. ज्ञ–श–अरणस्य अरममाणस्य। ३. त–स्याम पित्र्यस्येव धनस्य। ४. ख–भ–सुसुखतमोऽपि।

vअभ्येतु सम्यक् प्राप्नोतु । अपि च अस्मान् vस्पृहयाय्यः स्पृहणीयः vसहस्री सहस्रसंख्याकः vरयिः अभ्येतु ॥

एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम ।
विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ १० ॥

एता । नः । अग्ने । सौभगा । दिदीहि । अपि । क्रतुम् । सुऽचेतसम् । वतेम ।
विश्वा । स्तोतृऽभ्यः । गृणते । च । सन्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १० ॥

एषा ऋग्व्याख्याता ॥ ॥ ६ ॥

'प्राग्नये तवसे' इति नवर्चं पञ्चमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वानराग्निदेवताकम् । तथा चानुक्रान्तं—'प्राग्नये नव वैश्वानरीयं तु' इति । विनियोगो लैङ्गिकः ॥

प्राग्नये तवसे भरध्वं गिरं दिवो अरतये पृथिव्याः ।
यो विश्वेषाममृतानामुपस्थे वैश्वानरो वावृधे जागृवद्भिः ॥ १ ॥

प्र । अग्नये । तवसे । भरध्वम् । गिरम् । दिवः । अरतये । पृथिव्याः ।
यः । विश्वेषाम् । अमृतानाम् । उपऽस्थे । वैश्वानरः । ववृधे । जागृवत्ऽभिः ॥ १ ॥

हे स्तोतारः vतवसे प्रवृद्धाय vदिवः अन्तरिक्षस्य vपृथिव्याः च vअरतये गन्त्रे vअग्नये वैश्वानरसंज्ञकायाग्नये vगिरं स्तुतिं vप्र vभरध्वम् । vयः vवैश्वानरः विश्वनरहितोऽग्निः vविश्वेषां सर्वेषाम् vअमृतानां देवानाम् vउपस्थे उपस्थाने यज्ञे vजागृवद्भिः प्रबुद्धैर्देवैः सहितः सन् vववृधे स्तुतिभिर्हविर्भिश्च वर्धते ॥

पृष्टो दिवि धाय्यग्निः पृथिव्यां नेता सिन्धूनां वृषभः स्तियानाम् ।
स मानुषीरभि विशो वि भाति वैश्वानरो वावृधानो वरेण ॥ २ ॥

पृष्टः । दिवि । धायि । अग्निः । पृथिव्याम् । नेता । सिन्धूनाम् । वृषभः । स्तियानाम् ।
सः । मानुषीः । अभि । विशः । वि । भाति । वैश्वानरः । ववृधानः । वरेण ॥ २ ॥

vसिन्धूनां नदीनां vनेता vस्तियानाम् अपाम् । 'स्तिया आपो भवन्ति स्त्यायनात्[1]' (निरु. ६. १७) इति यास्कवचनात् । vवृषभः वर्षिता vपृष्टः अर्चितः तेजसा संपृक्तो वा यः vअग्निः vदिवि अन्तरिक्षे vपृथिव्यां च vधायि न्यधायि vसः vवैश्वानरः विश्वनरहितोऽग्निः vवरेण श्रेष्ठेन हविषा तेजसा वा vवावृधानः वर्धमानः सन् vमानुषीः vविशः vअभि मानुषीः प्रजाः प्रति vवि vभाति ॥

त्वद्भिया विश आयन्नसिक्नीरसमना जहतीर्भोजनानि ।
वैश्वानर पुरवे शोशुचानः पुरो यदग्ने दरयन्नदीदेः ॥ ३ ॥

त्वत् । भिया । विशः । आयन् । असिक्नीः । असमनाः । जहतीः । भोजनानि ।
वैश्वानर । पुरवे । शोशुचानः । पुरः । यत् । अग्ने । दरयन् । अदीदेः ॥ ३ ॥

---

१. ख-य-श–स्तियानात्; न–स्तियाना ।

हे ᵛवैश्वानर विश्वनरहित ᵛअग्ने ᵛत्वत् त्वत्तः ᵛभिया भीत्या ᵛअसिक्नीः असितवर्णा राजस्यः ॥ प्रथमार्थे द्वितीया ॥ ᵛविशः प्रजाः ᵛअसमनाः परस्परमसमेताः[1] ᵛभोजनानि धनानि ᵛजहतीः त्यजन्त्यः ᵛआयन् आगच्छन् । कदेत्यत आह । ᵛयत् यदा ᵛपूरवे राज्ञे ᵛशोशुचानः दीप्यमानः ᵛपुरः तस्य शत्रूणां पुरः ᵛदरयन् दारयन् ᵛअदीदेः अज्वलः । तथा च निगमः—'अंहो राजन्वरिवः पूरवे कः' (ऋ. सं. १. ६३. ७) इति ॥

तवं त्रिधातु पृथिवी उत द्यौर्वैश्वानर व्रतमग्ने सचन्त ।
त्वं भासा रोदसी आ ततन्थाजस्रेण शोचिषा शोशुचानः ॥ ४ ॥

तवं । त्रिऽधातु । पृथिवी । उत । द्यौः । वैश्वानर । व्रतम् । अग्ने । सचन्त ।
त्वम् । भासा । रोदसी इति । आ । ततन्थ । अजस्रेण । शोचिषा । शोशुचानः ॥ ४ ॥

हे ᵛवैश्वानर विश्वेषां नराणां नेतः ᵛअग्ने । तथा च यास्कः—'वैश्वानरः कस्मात् विश्वान्नरान्नयति विश्व एनं नरा नयन्तीति वा' (निरु. ७. २१) इति । ᵛतव ᵛव्रतं त्वत्प्रीतिकरं कर्म ᵛत्रिधातु अन्तरिक्षं ᵛपृथिवी च ᵛउत अपि च ᵛद्यौः इति त्रयो लोकाः ᵛसचन्त सेवन्ते । त्रैलोक्यवर्तिन्यः प्रजास्त्वदर्थं कर्म कुर्वन्तीत्यर्थः । अपि च ᵛत्वम् ᵛअजस्रेण ᵛशोचिषा नित्येन प्रकाशेन ᵛशोशुचानः दीप्यमानः ᵛभासा दीप्त्या ᵛरोदसी द्यावापृथिव्यौ च ᵛआ ᵛततन्थ विस्तारयसि ॥

त्वामग्ने हरितो वावशाना गिरः सचन्ते धुनयो घृताचीः ।
पतिं कृष्टीनां रथ्यं रयीणां वैश्वानरमुषसां केतुमह्नाम् ॥ ५ ॥

त्वाम् । अग्ने । हरितः । वावशानाः । गिरः । सचन्ते । धुनयः । घृताचीः ।
पतिम् । कृष्टीनाम् । रथ्यम् । रयीणाम् । वैश्वानरम् । उषसाम् । केतुम् । अह्नाम् ॥ ५ ॥

हे ᵛअग्ने ᵛकृष्टीनां प्रजानाम् । 'क्षितयः कृष्टयः' इति मनुष्यनामसु पाठात् । ᵛपतिं स्वामिनं ᵛरयीणां धनानां ᵛरथ्यं नेतारम् ᵛउषसाम् ᵛअह्नां ᵛकेतुं[2] प्रज्ञापकं ᵛवैश्वानरं विश्वनरहितं ᵛत्वां ᵛहरितः[3] अश्वाः ᵛवावशानाः कामयमानाः ᵛसचन्ते सेवन्ते । तथा ᵛगिरः नृणां[4] स्तुतिरूपा वाचः ᵛधुनयः पापं धुन्वानाः ᵛघृताचीः घृतमञ्चन्त्यः । हविषा सहिता इत्यर्थः । सचन्ते ॥ ॥ ७ ॥

त्वे असुर्यं१ वसवो न्यृण्वन्क्रतुं हि ते मित्रमहो जुषन्त ।
त्वं दस्यूँरोकसो अग्न आज उरु ज्योतिर्जनयन्नार्याय ॥ ६ ॥

त्वे इति । असुर्यम् । वसवः । नि । ऋण्वन् । क्रतुम् । हि । ते । मित्रऽमहः । जुषन्त ।
त्वम् । दस्यून् । ओकसः । अग्ने । आजः । उरु । ज्योतिः । जनयन् । आर्याय ॥ ६ ॥

हे ᵛमित्रमहः मित्राणां पूजयितः ᵛअग्ने ᵛत्वे त्वयि ᵛवसवः वासका देवाः ᵛअसुर्यं बलं ᵛन्यृण्वन् न्यगमयन् । ᵛते ᵛक्रतुं त्वत्प्रीतिकरं कर्म ᵛजुषन्त असेवन्त ᵛहि । किंच ᵛत्वम् ᵛआर्याय

---

१. ख-श–°मसमवेताः । २. ख-घ-ङ्ग-त-न-भ-श–महान्तं केतुम् । ३. ख-ङ्ग-ङ्ग-त३-भ-य-श–हरितो हरणात्; त१-२–हरितो हरिणात्; न–हरणात् । ४. श–स्तोतॄणाम् ।

कर्मवते[1] जनाय ᵛउरु ᵛज्योतिः अधिकं तेजः ᵛजनयन् ᵛदस्यून् कर्महीनान् ᵛओकसः स्थानात् ᵛआजः निरगमयः ॥

स जायमानः परमे व्योमन्वायुर्न पाथः परि पासि सद्यः ।
त्वं भुवना जनयन्नभि क्रन्नपत्याय जातवेदो दशस्यन् ॥ ७ ॥

सः । जायमानः । परमे । विऽओमन् । वायुः । न । पाथः । परि । पासि । सद्यः ।
त्वम् । भुवना । जनयन् । अभि । क्रन् । अपत्याय । जातऽवेदः । दशस्यन् ॥ ७ ॥

हे वैश्वानर ᵛसः प्रसिद्धस्त्वं ᵛपरमे दूरस्थे ᵛव्योमन् अन्तरिक्षे ᵛजायमानः सूर्यरूपेण प्रादुर्भवन् ᵛवायुर्न यथा वायुः द्विदेवत्यग्रहेषु[2] प्रथमं सोमं पिबति तथा ᵛपाथः सोमं ᵛसद्यः ᵛपरि ᵛपासि परिपिबसि । यद्वा । वायुरिव पाथो जलं परि पासि परिपिबसि । शोषयसीत्यर्थः । किंच हे ᵛजातवेदः जातधनाग्ने ᵛत्वं ᵛभुवना भुवनान्युदकानि । 'भूतं भुवनम्' इत्युदकनामसु पाठात् । ᵛजनयन् ᵛअपत्याय अपत्यवत्पालनीयाय यजमानाय[3] ᵛदशस्यन् कामान् प्रयच्छन् ᵛअभि ᵛक्रन् वैद्युतात्मना अभिक्रन्दसि अभिगर्जसि वा ॥

तामग्ने अस्मे इषमेरयस्व वैश्वानर द्युमतीं जातवेदः ।
यया राधः पिन्वसि विश्ववार पृथु श्रवो दाशुषे मर्त्याय ॥ ८ ॥

ताम् । अग्ने । अस्मे इति । इषम् । आ । ईरयस्व । वैश्वानर । द्युऽमतीम् । जातऽवेदः ।
यया । राधः । पिन्वसि । विश्वऽवार । पृथु । श्रवः । दाशुषे । मर्त्याय ॥ ८ ॥

हे ᵛजातवेदः जातप्रज्ञ ᵛवैश्वानर विश्वनरहित ᵛअग्ने ᵛताम् ᵛइषम् एषणीयां वृष्टिं ᵛद्युमतीं दीप्तिमतीम् ᵛअस्मे अस्मभ्यम् ᵛएरयस्व प्रेरयस्व । वृष्ट्या त्रैलोक्यं द्योतते हि । यद्वा । द्युमतीं तामिषमन्नमेरयस्व । तथा च श्रूयते—'तस्माद्यस्यैवेह भूयिष्ठमन्नं भवति स एव भूयिष्ठं लोके विराजति' (ऐ. ब्रा. १.५) इति । अथवा इषमेषणीयां तां द्युमतीं भास्वतीं दीप्तिमेरयस्व । ᵛयया इषा ᵛराधः धनं ᵛपिन्वसि पालयसि । अपि च हे ᵛविश्ववार विश्ववरणीयाग्ने ᵛपृथु विस्तीर्णं ᵛश्रवः यशः ᵛदाशुषे ᵛमर्त्याय यजमानाय पिन्वसि[4] ॥

तं नो अग्ने मघवद्भ्यः पुरुक्षुं रयिं नि वाजं श्रुत्यं युवस्व ।
वैश्वानर महि नः शर्म यच्छ रुद्रेभिरग्ने वसुभिः सजोषाः ॥ ९ ॥

तम् । नः । अग्ने । मघवत्ऽभ्यः । पुरुऽक्षुम् । रयिम् । नि । वाजम् । श्रुत्यम् । युवस्व ।
वैश्वानर । महि । नः । शर्म । यच्छ । रुद्रेभिः । अग्ने । वसुऽभिः । सऽजोषाः ॥ ९ ॥

हे ᵛअग्ने ᵛमघवद्भ्यः धनवद्भ्यः । हविष्मद्भ्य इत्यर्थः । ᵛनः अस्मभ्यं ᵛपुरुक्षुं बह्वन्नं बहुयशस्कं वा ᵛतं प्रसिद्धं ᵛरयिं ᵛश्रुत्यं श्रवणीयं ᵛवाजं बलं च ᵛनि ᵛयुवस्व नितरां मिश्रयस्व ।

---

१. श–कर्मकृते । २. ख–द्विदैवत्यग्रहेषु; त–द्विदेवत्यगृहेषु; न–द्विदेवत्यः ग्रहेषु । ३. ख-ङ्ग-न-भ-य-श–जनाय । ४. ख-भ–पिन्वसि पालयसि ।

किंच हे vवैश्वानर विश्वनरहित vअग्ने त्वं vरुद्रेभिः रुद्रैः vवसुभिः च देवैः vसजोषाः सहितश्च सन् vनः अस्मभ्यं vमहि महत् vशर्म सुखं vयच्छ प्रयच्छ ॥ ॥ ८ ॥

'प्र सम्राजः' इति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षम्[1]। अनुक्रम्यते च—'प्र सम्राजः सप्त[2]'। 'वैश्वानरीयं तु' इत्युक्तत्वादस्यापि वैश्वानरोऽग्निर्देवता। विनियोगो लैङ्किकः ॥

प्र सम्राजो असुरस्य प्रशस्तिं पुंसः कृष्टीनामनुमाद्यस्य।
इन्द्रस्येव प्र तवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि ॥ १ ॥

प्र। सम्ऽराजः। असुरस्य। प्रऽशस्तिम्। पुंसः। कृष्टीनाम्। अनुऽमाद्यस्य।
इन्द्रस्यऽइव। प्र। तवसः। कृतानि। वन्दे। दारुम्। वन्दमानः। विवक्मि ॥ १ ॥

vदारुं पुरां भेत्तारं vवन्दे। vवन्दमानः सन् vसम्राजः सर्वस्य भुवनस्येश्वरस्य vअसुरस्य बलवतः vपुंसः वीरस्य। पौंस्यमिति[3] वीर्यमुच्यते। तथा च यास्कः—'पुमान् पुरुमना भवति पुंसतेर्वा' (निरु. ९.१५) इति। vकृष्टीनां जनानाम् vअनुमाद्यस्य स्तुत्यस्य vतवसः बलवतः vइन्द्रस्येव तस्य वैश्वानरस्य vप्रशस्तिं स्तुतिं vकृतानि कर्माणि च vप्र vविवक्मि प्रब्रवीमि ॥

कविं केतुं धासिं भानुमद्रेर्हिन्वन्ति शं राज्यं रोदस्योः।
पुरंदरस्य गीर्भिरा विवासेऽग्नेर्व्रतानि पूर्व्या महानि ॥ २ ॥

कविम्। केतुम्। धासिम्। भानुम्। अद्रेः। हिन्वन्ति। शम्। राज्यम्। रोदस्योः।
पुरम्ऽदरस्य। गीःऽभिः। आ। विवासे। अग्नेः। व्रतानि। पूर्व्या। महानि ॥ २ ॥

vकविं प्राज्ञं vकेतुं विश्वस्य प्रज्ञापकं vधासिम् vअद्रेः धर्तारमादर्तुः स्तोतुर्वा vभानुं भासकं vशं सुखकरं vरोदस्योः द्यावापृथिव्योः vराज्यं राजानं वैश्वानरमग्निं vहिन्वन्ति। मदीयाः प्रीणयन्ति प्रेरयन्ति वा देवाः। अहं च vपुरंदरस्य पुरां दारयितुः vअग्नेः vपूर्व्या पूर्व्याणि पुरातनानि vमहानि महान्ति vव्रतानि कर्माणि vगीर्भिः vआ vविवासे परिचरामि ॥

न्यक्रतून्ग्रथिनो मृध्रवाचः पणीँरश्रद्धाँ अवृधाँ अयज्ञान्।
प्रप्र तान्दस्यूँरग्निर्विवाय पूर्वश्चकारापराँ अयज्यून् ॥ ३ ॥

नि। अक्रतून्। ग्रथिनः। मृध्रऽवाचः। पणीन्। अश्रद्धान्। अवृधान्। अयज्ञान्।
प्रऽप्र। तान्। दस्यून्। अग्निः। विवाय। पूर्वः। चकार। अपरान्। अयज्यून्॥ ३ ॥

vअक्रतून् अयज्ञान् vग्रथिनः जल्पकान् vमृध्रवाचः हिंसितवचस्कान् vपणीन् पणिनामकान् वार्धुषिकान् vअश्रद्धान् यज्ञादिषु श्रद्धारहितान् vअवृधान् स्तुतिभिरग्निमवर्धयतः vअयज्ञान् यज्ञहीनान् vतान् vदस्यून् वृथा कालस्य नेतॄन् vअग्निः vप्रप्र अत्यन्तं vनि vविवाय नितरां गमयेत्। तदेवाह। अग्निः[4] vपूर्वः मुख्यः सन् vअयज्यून् अयजमानान् vअपरान् जघन्यान् vचकार[4] ॥

---

१. ज्ञ-य-°स्यार्षं त्रैष्टुभम्। २. य-सप्त इति। ३. ख-भ-पुंस्त्वमिति; ज्ञ-त-न-पौंस्यमिति; श-पौष्णमिति। ४. ख-ज्ञ-न-भ-श-'अग्निः...चकार' नास्ति; घ-पूर्वः पुरातनोऽग्निः अपरान् पुरुषान् अयज्यून् यागानर्हान् चकार; त-नृतमः नेतृतमोऽग्निः..... चकार करोतीत्यर्थः।

यो अपाचीने तमसि मदन्तीः प्राचीश्चकार नृतमः शचीभिः ।
तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयन्तं पृतन्यून् ॥ ४ ॥

यः । अपाचीने । तमसि । मदन्तीः । प्राचीः । चकार । नृऽतमः । शचीभिः ।
तम् । ईशानम् । वस्वः । अग्निम् । गृणीषे । अनानतम् । दमयन्तम् । पृतन्यून् ॥ ४ ॥

[v]नृतमः नेतृतमः [v]यः अग्निः [v]अपाचीने अप्रकाशमाने [v]तमसि निमग्नाः प्रजाः [v]मदन्तीः स्तुवन्तीः [v]शचीभिः ताभ्यो दत्ताभिः प्रज्ञाभिः [v]प्राचीः ऋजुगामिनीः [v]चकार । यद्वा । नेतृतमो योऽग्निः अपाचीने तमसि[1] निशायां मदन्तीर्मांधन्तीरुषसः शचीभिः प्रज्ञाभिः प्राचीश्चकारेत्यर्थः । [v]तं [v]वस्वः धनस्य [v]ईशानम् [v]अनानतम् अप्रह्वं [v]पृतन्यून् युद्धकामांश्च [v]दमयन्तम् [v]अग्निं [v]गृणीषे स्तौमि[2] ॥

यो देह्योः अनमयद्वधस्नैर्यो अर्यपत्नीरुषसश्चकार ।
स निरुध्या नहुषो यह्वो अग्निर्विशश्चक्रे बलिहृतः सहोभिः ॥ ५ ॥

यः । देह्योः । अनमयत् । वधऽस्नैः । यः । अर्यऽपत्नीः । उषसः । चकार ।
सः । निऽरुध्य । नहुषः । यह्वः । अग्निः । विशः । चक्रे । बलिऽहृतः । सहःऽभिः ॥५॥

[v]यः अग्निः [v]देह्योः देहीरूपचिताः[3] आसुरीर्विद्याः [v]वधस्नैः वधैरायुधैर्वा [v]अनमयत् हीना अकरोत् । [v]यः च [v]अर्यपत्नीः । अर्यः सूर्यः पतिर्यासां ता अर्यपत्न्यः । ताः [v]उषसश्चकार अकरोत् [v]सः [v]यह्वः महान् [v]अग्निः [v]विशः प्रजाः [v]सहोभिः बलैः [v]निरुध्य [v]नहुषः राज्ञः [v]बलिहृतः करप्रदाः [v]चक्रे ॥

यस्य शर्मन्नुप विश्वे जनास एवैस्तस्थुः सुमतिं भिक्षमाणाः ।
वैश्वानरो वरमा रोदस्योराग्निः ससाद पित्रोरुपस्थम् ॥ ६ ॥

यस्य । शर्मन् । उप । विश्वे । जनासः । एवैः । तस्थुः । सुऽमतिम् । भिक्षमाणाः ।
वैश्वानरः । वरम् । आ । रोदस्योः । आ । अग्निः । ससाद । पित्रोः । उपऽस्थम् ॥ ६ ॥

[v]विश्वे सर्वे [v]जनासः जनाः [v]शर्मन् शर्मणि सुखनिमित्तं [v]यस्य वैश्वानरस्य [v]सुमतिं [v]भिक्षमाणाः प्रार्थयमानाः [v]एवैः कर्मभिः हविर्भिर्वा [v]उप [v]तस्थुः यमेवोपतिष्ठन्ते सः [v]वैश्वानरः विश्वनरहितः [v]अग्निः सूर्यः सन् [v]पित्रोः मातापित्रोः [v]रोदस्योः द्यावापृथिव्योः [v]वरम् उत्कृष्टम् [v]उपस्थं मध्यमन्तरिक्षम् [v]आ [v]ससाद आगच्छत् ॥

आ देवो ददे बुध्न्यो वसूनि वैश्वानर उदिता सूर्यस्य ।
आ समुद्रादवरादा परस्मादाग्निर्ददे दिव आ पृथिव्याः ॥ ७ ॥

आ । देवः । ददे । बुध्न्यः । वसूनि । वैश्वानरः । उत्ऽइता । सूर्यस्य ।
आ । समुद्रात् । अवरात् । आ । परस्मात् । आ । अग्निः । ददे । दिवः । आ । पृथिव्याः ॥७॥

---

१. ख–तमसि अप्रकाशमाने तमसि । २. ख-न-भ–स्तौति । ३. ख–देहैरुपचिताः ।

[v]वैश्वानरः विश्वनरहितोऽग्निः [v]देवः द्योतमानः [v]बुध्न्या बुध्न्यानि आन्तरिक्षाणि । बुध्नमन्तरिक्षम् । तथा च यास्कः—'बुध्नमन्तरिक्षं बद्धा अस्मिन् धृता आप इति वा' (निरु. १०. ४४) इति । [v]वसूनि आच्छादकानि तमांसि ॥ 'वस आच्छादने' इति धातुः ॥ [v]सूर्यस्य [v]उदिता उदितावुदये[1] सति[1] [v]आ [v]ददे । [v]समुद्रात् अन्तरिक्षात् । 'सगरः समुद्रः' इत्यन्तरिक्षनामसु पाठात् । [v]अवरात् पृथिव्याः तमांसि [v]आ ददे । समुद्रात् [v]परस्मात् दिवोऽपि तमांसि [v]आ ददे । तदेव दर्शयति । [v]अग्निः [v]दिवः तमांसि [v]आ [v]ददे [v]पृथिव्याः च तमांसि [v]आ ददे ॥ ॥ ९ ॥

'प्र वो देवम्' इति सप्तर्चं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम् । 'प्र वो देवम्' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्ते[2] उक्तो विनियोगः ॥

प्र वो देवं चित्सहसानमग्निमश्वं न वाजिनं हिषे नमोभिः ।
भवा नो दूतो अध्वरस्य विद्वान्त्मना देवेषु विविदे मितद्रुः ॥ १ ॥

प्र । वः । देवम् । चित् । सहसानम् । अग्निम् । अश्वम् । न । वाजिनम् । हिषे । नमःऽभिः ।
भव । नः । दूतः । अध्वरस्य । विद्वान् । त्मना । देवेषु । विविदे । मितऽद्रुः ॥ १ ॥

हे अग्ने [v]वः[3] त्वां[3] [v]देवं द्योतमानादिगुणयुक्तं [v]सहसानं राक्षसानभिभवन्तं बलमाचरन्तं वा [v]अग्निम् अग्रस्य नेतारम् [v]अश्वं [v]न अश्वमिव [v]वाजिनं वेगवन्तं बलवन्तं वा [v]नमोभिः स्तुतिभिर्हविर्भिर्वा [v]प्र [v]हिषे हे अग्ने त्वां[4] [v]चित् प्रहिणोम्येव[5] । किंच हे अग्ने त्वं [v]विद्वान् जानन्[6] [v]नः अस्माकम् [v]अध्वरस्य यज्ञस्य [v]दूतः [v]भव । अथ परोक्षस्तुतिः । [v]त्मना आत्मना स्वयमेव [v]देवेषु [v]मितद्रुः दग्धद्रुमोऽग्निरिव [v]विविदे प्रज्ञायते ॥

आ याह्यग्ने पथ्या अनु स्वा मन्द्रो देवानां सख्यं जुषाणः ।
आ सानु शुष्मैर्नदयन्पृथिव्या जम्भेभिर्विश्वमुशधग्वनानि ॥ २ ॥

आ । याहि । अग्ने । पथ्याः । अनु । स्वाः । मन्द्रः । देवानाम् । सख्यम् । जुषाणः ।
आ । सानु । शुष्मैः । नदयन् । पृथिव्याः । जम्भेभिः । विश्वम् । उशधक् । वनानि ॥ २ ॥

हे [v]अग्ने त्वं [v]मन्द्रः मदयिता स्तुत्यो वा [v]देवानां [v]सख्यम् । देवैः सह सख्यमित्यर्थः । [v]जुषाणः सेवमानः[7] [v]पृथिव्याः [v]सानु समुच्छ्रितं तृणगुल्मादिकं [v]शुष्मैः शोषकैर्दाहकैस्तेजोभिः [v]नदयन् शब्दायमानः । दह्यमानं हि शब्दायते । [v]जम्भेभिः दंष्ट्राभिः । ज्वालाभिरित्यर्थः । [v]विश्वं विश्वानि [v]वनानि [v]उशधक् कामयमानः दहन् [v]स्वाः [v]पथ्याः [v]अनु । स्वैर्मार्गैरित्यर्थः । [v]आ [v]आ [v]याहि । आकारस्य पुनर्वचनमादरार्थम् ॥

प्राचीनो यज्ञः सुधितं हि बर्हिः प्रीणीते अग्निरीळितो न होता ।
आ मातरा विश्ववारे हुवानो यतो यविष्ठ जज्ञिषे सुशेवः ॥ ३ ॥

प्राचीनः । यज्ञः । सुऽधितम् । हि । बर्हिः । प्रीणीते । अग्निः । ईळितः । न । होता ।
आ । मातरा । विश्ववारे इति विश्वऽवारे । हुवानः । यतः । यविष्ठ । जज्ञिषे । सुऽशेवः ॥ ३ ॥

---

१. ख-भ-उदितौ सूर्ये । २. त-°र्दशसूक्तेषु । ३. ख-ञ-त-श-त्वाम्; न-भ-त्वम् । ४. ख-ञ-श-त्वम् । ५. ख-भ-प्रहिणोष्येव । ६. ञ-त२-य-देवान् जानन् । ७. त-सेवमानः सन् ।

अयं ᵛयज्ञः ᵛप्राचीनः । सम्यगनुष्ठीयत इत्यर्थः । यद्वा । यज्ञो यष्टा होता प्राचीनः । यद्वा । यज्ञो हविः प्राचीनः प्राचीनं प्राङ्मुखमासन्नम्[1] । ᵛबर्हिः[1] ᵛहि बर्हिश्च ᵛसुधितं सुनिहितम् । ᵛईळितः स्तुतः ᵛअग्निः ᵛप्रीणीते तृप्तश्च भवति । ᵛहोता ᵛन होता च । नेति चार्थे । ᵛविश्ववारे विश्वैर्वरणीये ᵛमातरा द्यावापृथिव्यौ इडायाम् ᵛआ ᵛहुवानः भवति । कदेत्यत आह । ᵛयतः यदा ᵛयविष्ठ हे युवतमाग्ने त्वं ᵛसुशेवः सुसुखः ᵛजज्ञिषे जायसे ॥

सद्यो अध्वरे रथिरं जनन्त मानुषासो विचेतसो य एषाम् ।
विशामधायि विश्पतिर्दुरोणे[2]ऽग्निर्मन्द्रो मधुवचा ऋतावा ॥ ४ ॥

सद्यः । अध्वरे । रथिरम् । जनन्त । मानुषासः । विऽचेतसः । यः । एषाम् ।
विशाम् । अधायि । विश्पतिः । दुरोणे । अग्निः । मन्द्रः । मधुऽवचाः । ऋतऽवा ॥ ४ ॥

ᵛविचेतसः विविक्तप्रज्ञाः ᵛमानुषासः मनुष्याः ᵛअध्वरे यज्ञे ᵛरथिरं रथिनं[3] नेतारमग्निं ᵛसद्यः ᵛजनन्त जनयन्ति । ᵛयः ᵛएषां हविर्वहति सोऽयम् ᵛअग्निः ᵛविश्पतिः विशां पतिर्विश्वस्य पतिर्वा ᵛमन्द्रः मदयिता ᵛमधुवचाः मादयितृवचस्कः[3] ᵛऋतावा[4] यज्ञवान् ᵛविशां मनुष्याणां ᵛदुरोणे गृहे ᵛअधायि आहितः ॥

असादि वृतो बर्हिराजगन्वानग्निर्ब्रह्मा नृषदने विधर्ता ।
द्यौश्च यं पृथिवी वावृधाते आ यं होता यजति विश्ववारम् ॥ ५ ॥

असादि । वृतः । बर्हिः । आऽजगन्वान् । अग्निः । ब्रह्मा । नृऽसदने । विऽधर्ता ।
द्यौः । च । यम् । पृथिवी । ववृधाते इति । आ । यम् । होता । यजति । विश्वऽवारम् ॥५॥

ᵛवृतः होतृत्वेन ᵛवह्निः हविषां वोढा ᵛब्रह्मा परिवृढः ᵛविधर्ता विश्वस्य धारकः ᵛअग्निः ᵛआजगन्वान् द्युलोकादागत आगमनशीलो वा ᵛनृषदने होतुः स्थाने ᵛअसादि उपविष्टः । ᵛयम् अग्निं ᵛद्यौश्च ᵛपृथिवी चोभे ᵛववृधाते वर्धयतः । ᵛयं च ᵛविश्ववारं विश्वैर्वरणीयं ᵛहोता मानुषः ᵛआ ᵛयजति ॥

एते द्युम्नेभिर्विश्वमातिरन्त मन्त्रं ये वारं नर्या अतक्षन् ।
प्र ये विशस्तिरन्त श्रोषमाणा आ ये मे अस्य दीधयन्नृतस्य ॥ ६ ॥

एते । द्युम्नेभिः । विश्वम् । आ । अतिरन्त । मन्त्रम् । ये । वा । अरम् । नर्याः । अतक्षन् ।
प्र । ये । विशः । तिरन्त । श्रोषमाणाः । आ । ये । मे । अस्य । दीधयन् । ऋतस्य ॥६॥

ᵛएते मदीयाः पुरुषाः ᵛद्युम्नेभिः अन्नैः ᵛविश्वं पोष्यवर्गम् ᵛआतिरन्त वर्धयन्ति । अथवा द्युम्नेभिर्यशोभिर्विश्वं जगदातिरन्त[5] । अभ्यगच्छन्नित्यर्थः । क इत्यत आह । ᵛये ᵛनर्याः मनुष्याः ᵛमन्त्रं स्तोत्रं स्तुत्यं ᵛवा ᵛअरं[6] पर्याप्तम् ᵛअतक्षन् समस्कुर्वन् । वेति समुच्चये । ᵛये च ᵛविशः जनाः ᵛश्रोषमाणाः ॥ शृणोतेः 'सन्यङोः' इति द्वित्वम् 'इको झल्' इति सनः कित्त्वं च 'सर्वे विधय-

१. ख–°मासन्नम्; झ-त-न-भ-श–°मासनम् । २. ख-भ–' रथिनं ' नास्ति । ३. ख. मदयितृ° । ४. त–ऋतवा । ५. झ–°दातिरन्त आभरन्त । ६. य–अरमलम् ।

श्छन्दसि विकल्प्यन्ते[1] ' इति न भवतः। ' ज्ञाश्रुस्मृदृशां सनः ' इत्यात्मनेपदम् ॥ ᵛप्र ᵛतिरन्त वर्धयन्ति। ᵛमे मदीयाः ᵛये वा ᵛऋतस्य ᵛअस्य सत्यमिममग्निम्। कर्मणि षष्ठी। माषाणामश्नीयादितिवत्। ᵛआ ᵛदीधयन् आदीपयन् ॥

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम्।
इषं स्तोतृभ्यो मघवन्नृजु आनडयुं पात स्वस्तिभिः सदा नः ॥ ७ ॥

नु। त्वाम्। अग्ने। ईमहे। वसिष्ठाः। ईशानम्। सूनो इति। सहसः। वसूनाम्। इषम्। स्तोतृऽभ्यः। मघवत्ऽभ्यः। आनट्। युयम्। पात। स्वस्तिऽभिः। सदा। नः॥७॥

ᵛसहसः ᵛसूनो बलस्य पुत्र ᵛअग्ने ᵛवसिष्ठाः वयं ᵛवसूनाम् ᵛईशानं ᵛत्वाम् अस्मदीयेभ्यः ᵛस्तोतृभ्यः ᵛमघवद्भ्यश्च हविष्मद्भ्यश्च ᵛइषम् अन्नं ᵛनु क्षिप्रम् अद्य वा ᵛआनट् प्रापयेः ॥ नशेर्व्याप्तिकर्मणोऽन्तर्णीतण्यर्थात् लुङि[2] ' छन्दस्यपि दृश्यते ' इत्याडागमः। ᵛयूयं त्वत्परिवाराश्च[3] सर्वे यूयं ᵛनः अस्मान् ᵛसदा ᵛस्वस्तिभिः ᵛपात इत्येवम् ᵛईमहे याचामहे ॥ ॥ १० ॥

' इन्धे राजा ' इति सप्तर्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम्। ' इन्धे राजा ' इत्यनुक्रान्तम्। प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः[4]। आतिथ्यायां ' प्रप्रायमग्निः ' इति स्विष्टकृतो याज्या। सूत्रितं च—'प्रप्रायमग्निर्भरतस्य शृण्व इति संयाज्ये ' (आश्व. श्रौ. ४·५) इति ॥

इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन।
नरो ह्व्येभिरीळते सबाध आग्निरग्र उषसामशोचि ॥ १ ॥

इन्धे। राजा। सम्। अर्यः। नमःऽभिः। यस्य। प्रतीकम्। आऽहुतम्। घृतेन। नरः। ह्व्येभिः। ईळते। सऽबाधः। आ। अग्निः। अग्रे। उषसाम्। अशोचि ॥ १ ॥

ᵛराजा दीप्तः ᵛअर्यः स्वामी हविषां[5] प्रेरको वाग्निः ᵛनमोभिः स्तुतिभिः सह ᵛसम् ᵛइन्धे समिध्यते। ᵛयस्य अग्नेः ᵛप्रतीकं रूपं ᵛघृतेन ᵛआहुतं भवति। यं[6] च ᵛनरः अस्मदीयाः ᵛसबाधः संश्लिष्टाः संजातबाधा वा ᵛह्व्येभिः हव्यैः सार्धम् ᵛईळते स्तुवन्ति सः ᵛअग्निः ᵛउषसाम् ᵛअग्रे ᵛआ ᵛअशोचि आदीप्यते ॥

अयमु ष्य सुमहाँ अवेदि होता मन्द्रो मनुषो यह्वो अग्निः।
वि भा अकः ससृजानः पृथिव्यां कृष्णपविरोषधीभिर्ववक्षे ॥ २ ॥

अयम्। ऊँ इति। स्यः। सुऽमहान्। अवेदि। होता। मन्द्रः। मनुषः। यह्वः। अग्निः। वि। भाः। अकरित्यकः। ससृजानः। पृथिव्याम्। कृष्णऽपविः। ओषधीभिः। ववक्षे ॥२॥

ᵛस्यः सः ᵛअयं ᵛहोता देवानामाह्वाता ᵛमन्द्रः मदयिता ᵛयह्वः महान् ᵛअग्निः ᵛमनुषः मनुष्यस्य ᵛसुमहान् ᵛअवेदि सुमहत्त्वेन प्रज्ञायते। अपि च सोऽयं ᵛभाः दीप्तीः ᵛवि ᵛअकः विकरोत्यन्तरिक्षे। किंच सोऽयं ᵛकृष्णपविः कृष्णमार्गोऽग्निः ᵛपृथिव्यां[9] ᵛससृजानः सृज्यमानः सन् ᵛओषधीभिर्ववक्षे वर्धते ॥

---

१. ख-त-भ-विकल्पन्ते; झ-न-श-विलुप्यन्ते। २. य-लिङर्थे लुङि। ३. ख-न-भ-त्वत्परिचराश्च। ४. त-°शस्त्रयोरुक्तो विनियोगः। ५. ख-भ-अरीणाम्। ६. ख-झ-त-न-भ-श-ये। ७. झ-न-भ-श-पृथिव्याः।

कया नो अग्ने वि वसः सुवृक्तिं कामु स्वधामृणवः शस्यमानः ।
कदा भवेम पतयः सुदत्र रायो वन्तारो दुष्टरस्य साधोः ॥ ३ ॥

कया । नः । अग्ने । वि । वसः । सुऽवृक्तिम् । काम् । ऊँ इति । स्वधाम् । ऋणवः । शस्यमानः । कदा । भवेम । पतयः । सुऽदत्र । रायः । वन्तारः । दुस्तरस्य । साधोः ॥ ३ ॥

हे अग्ने त्वं कया स्वधया हविषा नः अस्माकं सुवृक्तिं स्तुतिं वि वसः व्यामुषे आच्छादयसि वा । कामु कां च स्वधां शस्यमानः स्तूयमानस्त्वम् ऋणवः प्रामुयाः । हे सुदत्र शोभनदानाग्ने । तथा च यास्कः—'सुदत्रः कल्याणदानः' (निरु. ६.१४) इति । वयं कदा दुष्टरस्य शत्रुभिर्दुर्हिंसकस्य[1] साधोः समीचीनस्य रायः धनस्य पतयः स्वामिनः भवेम । वन्तारः संभक्तारश्च कदा भवेम ॥

प्रप्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ द्युतानो दैव्यो अतिथिः शुशोच ॥ ४ ॥

प्रऽप्र । अयम् । अग्निः । भरतस्य । शृण्वे । वि । यत् । सूर्यः । न । रोचते । बृहत् । भाः । अभि । यः । पुरुम् । पृतनासु । तस्थौ । द्युतानः । दैव्यः । अतिथिः । शुशोच ॥ ४ ॥

अयं प्रसिद्धः[2] अग्निः भरतस्य यजमानस्य मम प्रप्र अत्यन्तं शृण्वे प्रथितो भवति । कदेत्यत्राह । यत् यदा सूर्यो न सूर्य इव बृहद्भाः बृहद्भासमानो वि रोचते प्रकाशते[3] । किंच यः अग्निः पृतनासु संग्रामेषु पूरुं पूरुनामकमसुरम् अभि तस्थौ अभिबभूव सोऽयं द्युतानः दीप्यमानः दैव्यः अतिथिः देवानामतिथिवत् पूज्यः सन् शुशोच जज्वाल ॥

असन्नित्ते आहवनानि भूरि भुवो विश्वेभिः सुमना अनीकैः ।
स्तुतश्चिदग्ने शृण्विषे गृणानः स्वयं वर्धस्व तन्वं सुजात ॥ ५ ॥

असन् । इत् । ते । इति । आऽहवनानि । भूरि । भुवः । विश्वेभिः । सुऽमनाः । अनीकैः । स्तुतः । चित् । अग्ने । शृण्विषे । गृणानः । स्वयम् । वर्धस्व । तन्वम् । सुऽजात ॥ ५ ॥

हे अग्ने त्वे त्वयि आहवनानि हवींष्याहुतयो वा भूरि बहूनि असन्नित् भवन्त्येव । त्वं च विश्वेभिः विश्वैः अनीकैः तेजोभिस्त्वद्विभूतिभिरग्निभिर्वा सह सुमनाः भुवः भव । हे अग्ने स्तुतः[4] स्तोतुः । स्तौतीति स्तुत् । स्तोत्रं शृण्विषे शृणु । हे सुजात कल्याणप्रादुर्भावाग्ने गृणानः स्तूयमानस्त्वं स्वयं स्वयमेव तन्वं स्वां तनुं मम तनुं वा वर्धस्व वर्धयस्व ॥

इदं वचः शतसाः संसहस्रमुदग्नये जनिषीष्ट द्विबर्हाः ।
शं यत्स्तोतृभ्य आपये भवाति द्युमदमीवचातनं रक्षोहा ॥ ६ ॥

इदम् । वचः । शतऽसाः । सम्ऽसहस्रम् । उत् । अग्नये । जनिषीष्ट । द्विऽबर्हाः । शम् । यत् । स्तोतृऽभ्यः । आपये । भवाति । द्युऽमत् । अमीवऽचातनम् । रक्षःऽहा ॥ ६ ॥

---

१. ज्ञ—°र्दुर्हिंस्यस्य । २. ख—समिद्धः । ३. ख-न-भ—विकाशते । ४. त—स्तुतश्चित् ।

vशतसाः गवां शतस्य संभक्ता vसंसहस्रं गवां सहस्रेण च संयुतः vद्विबर्हाः द्वाभ्यां विद्याकर्मभ्यां बृहन् वसिष्ठो द्वयोः स्थानयोर्लोकयोर्महान् वा । तथा च यास्कः—' द्विबर्हा द्वयोः स्थानयोः परिबृढः ' (निरु. ६. १७) इति । vइदं vवचः इदं स्तोत्रम् vअग्नये[1] vउत् vजनिषीष्ट उदजीजनत् । किं तदित्थत आह । vयत् वचः vद्युमत् दीप्तिमत्[2] । यशस्करमित्यर्थः । vअमीवचातनं रोगाणां निवारकं vरक्षोहा रक्षसां हन्तृ च vस्तोतृभ्यः vआपये तद्बन्धवे पुत्रादिकायापि vशं सुखदं vभवाति भवेत् ॥

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम् ।
इषं स्तोतृभ्यो मघवन्द्भय आनडयूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

नु । त्वाम् । अग्ने । ईमहे । वसिष्ठाः । ईशानम् । सूनो इति । सहसः । वसूनाम् ।
इषम् । स्तोतृऽभ्यः । मघवत्ऽभ्यः । आनट् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः॥७॥

इयमृक् प्रागेव व्याख्याता ॥ ॥ ११ ॥

' अबोधि जारः ' इति षड्ऋचं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम् । ' अबोधि पट् ' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्तमध्ये उक्तो[3] विनियोगः ॥

अबोधि जार उषसामुपस्थाद्धोता मन्द्रः कवितमः पावकः ।
दधाति केतुमुभयस्य जन्तोर्हव्या देवेषु द्रविणं सुकृत्सु ॥ १ ॥

अबोधि । जारः । उषसाम् । उपऽस्थात् । होता । मन्द्रः । कविऽतमः । पावकः ।
दधाति । केतुम् । उभयस्य । जन्तोः । हव्या । देवेषु । द्रविणम् । सुकृत्ऽसु ॥ १ ॥

vजारः सर्वेषां प्राणिनां जरयिता vहोता देवानामाह्वाता vमन्द्रः मदयिता स्तुत्यो वा vकवितमः प्राज्ञतमः vपावकः शोधकोऽग्निः vउषसाम् vउपस्थात् मध्ये vअबोधि अबुध्यत । किंच vउभयस्य द्विपदश्च[4] चतुष्पदश्च दैव्यस्य मानुषस्य वा vजन्तोः प्राणिनः vकेतुं प्रज्ञानं vदधाति विदधाति । vदेवेषु च vहव्या हव्यानि दधाति । vसुकृत्सु यजमानेषु च vद्रविणं धनं दधाति ॥

स सुक्रतुर्यो वि दुरः पणीनां पुनानो अर्कं पुरुभोजसं नः ।
होता मन्द्रो विशां दमूनास्तिरस्तमो ददृशे राम्याणाम् ॥ २ ॥

सः । सुऽक्रतुः । यः । वि । दुरः । पणीनाम् । पुनानः । अर्कम् । पुरुऽभोजसम् । नः ।
होता । मन्द्रः । विशाम् । दमूनाः । तिरः । तमः । ददृशे । राम्याणाम् ॥ २ ॥

vसः अग्निः vसुक्रतुः सुकर्मा सुप्रज्ञो वा भवति । vयः अग्निः vपणीनाम् असुराणां vदुरः द्वाराणि गवां पिधानानि विवृतवान् । vपुरुभोजसं बहुक्षीरम् vअर्कम् अर्चनीयं गवां संघं vनः अस्मदर्थं vपुनानः शोधयन् । हरन्नित्यर्थः । vहोता देवानामाह्वाता vमन्द्रः मदयिता स्तुत्यो वा

---

१. ख-ङ्ग-त-न-भ-श–' अग्नये ' नास्ति । २. ख-न-भ–'दीप्तिमत्' नास्ति । ३. श–इदं सूक्तम् । ४. घ-ङ्ग-त-श–द्विपदः ।

vदमूनाः दान्तमना[1] दममना दानमना वा[1] vरात्र्याणां रात्रीणां रमयित्रीणां[2] वा vविशां जनानां यजमानानां वा vतमः अन्धकारं तिरस्कुर्वन् vदद्दशे दृश्यते च। यद्वा। तमस्तिरो दद्दशे नाशयतीत्यर्थः॥

अमूरः कविरदितिर्विवस्वान्त्सुसंसन्मित्रो अतिथिः शिवो नः।
चित्रभानुरुषसां भात्यग्रेऽपां गर्भः प्रस्वः आ विवेश॥ ३॥

अमूरः। कविः। अदितिः। विवस्वान्। सुऽसंसत्। मित्रः। अतिथिः। शिवः। नः।
चित्रऽभानुः। उषसाम्। भाति। अग्रे। अपाम्। गर्भः। प्रऽस्वः। आ। विवेश॥ ३॥

योऽग्निः vअमूरः अमूढः vकविः प्राज्ञः vअदितिः अदीनः vविवस्वान् दीप्तिमान् vसुसंसत् शोभनसदनः शोभनसंवेदनो वा vमित्रः प्रमीतेस्त्राता सर्वेषाम् vअतिथिः अतिथिवत् पूज्यः vशिवः शिवकरो जगतः vचित्रभानुः चित्रदीप्तिः vउषसाम् vअग्रे मुखे vभाति सोऽयम् vअपां vगर्भः सन् vप्रस्वः जायमाना ओषधीः vआ vविवेश॥

ईळेन्यो वो मनुषो युगेषु समनगा अशुचज्जातवेदाः।
सुसंदृशा भानुना यो विभाति प्रति गावः समिधानं बुधन्त॥ ४॥

ईळेन्यः। वः। मनुषः। युगेषु। समनऽगाः। अशुचत्। जातऽवेदाः।
सुऽसंदृशा। भानुना। यः। विऽभाति। प्रति। गावः। सम्ऽइधानम्। बुधन्त॥ ४॥

हे अग्ने vवः त्वम्। अत्र विभक्तिवचनव्यत्ययः[3]। vमनुषः मनुष्यस्य vयुगेषु यागकालेषु सर्वेष्वपि दिवसेषु वा vईळेन्यः स्तुत्यः। अतः परं परोक्षस्तुतिः। vयः अग्निः vजातवेदाः जातधनः vसमनगाः युद्धेषु संगन्ता सन् vअशुचत् दीप्यते। vसुसंदृशा सुसंदर्शनेन vभानुना तेजसा vविभाति च। तमग्निं vसमिधानं समिध्यमानं vगावः स्तुतयः vप्रति vबुधन्त प्रतिबोधयन्ति॥

वैश्वदेवे पशौ 'अग्ने याहि' इति हविषो याज्या। सूत्रितं च—'अग्ने याहि दूत्यं मा रिषण्य इन्द्रं नरो नेमधिता हवन्त इति तिस्रः' (आश्व. श्रौ. ३ · ७) इति॥

अग्ने याहि दूत्यं मा रिषण्यो देवाँ अच्छा ब्रह्मकृता गणेन।
सरस्वतीं मरुतो अश्विनापो यक्षि देवान् रत्नधेयाय विश्वान्॥ ५॥

अग्ने। याहि। दूत्यम्। मा। रिषण्यः। देवान्। अच्छ। ब्रह्मऽकृता। गणेन।
सरस्वतीम्। मरुतः। अश्विना। अपः। यक्षि। देवान्। रत्नऽधेयाय। विश्वान्॥ ५॥

हे vअग्ने vदूत्यं दूतस्य कर्म हविर्वहनादि vयाहि vदेवान् vअच्छ अभिगच्छ। vगणेन संघेन सह vब्रह्मकृता ब्रह्मकृतोऽस्मानस्मदीयांश्च तव स्तोतॄन् vमा vरिषण्यः मा हिंसीः। vसरस्वतीं vमरुतः vअश्विना अश्विनौ vअपः चैतान् vदेवान् vरत्नधेयाय अस्मभ्यं रत्नदानाय vयक्षि च[4]॥

---

१. त–दममना वा दानमना वा दान्तमना वा। २. ख-न-भ–'रमयित्रीणां' नास्ति। ३. झ-त-न-भ-श–विभक्तेर्वचन°। ४. ज्ञ–यज।

त्वामग्ने समिधानो वसिष्ठो जरूथं हन्यक्षि राये पुरंधिम् ।
पुरुणीथा जातवेदो जरस्व यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

त्वाम् । अग्ने । सम्ऽइधानः । वसिष्ठः । जरूथम् । हन् । यक्षि । राये । पुरम्ऽधिम् ।
पुरुऽनीथा । जातऽवेदः । जरस्व । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

हे vअग्ने vत्वां vवसिष्ठः ऋषिः[1] vसमिधानः भवति । त्वं च vजरूथं परुषभाषिणं जरणीयं वा रक्षोगणं vहन् जहि । vराये धनवते यजमानाय vपुरंधिं बहुधियं देवगणम् । तथा च यास्कः— 'पुरंधिर्बहुधीः' इति । vयक्षि यज । किंच हे vजातवेदः अग्ने vपुरुणीथा पुरुनीथेन बहुना स्तोत्रेण vजरस्व देवान् स्तुहि । यद्वा । पुरुणीथानेकमार्गाणि रक्षांसि जरयेत्यर्थः ॥ ॥ १२ ॥

'उषो न जारः' इति पञ्चर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम् । तथा चानुक्रान्तम्— 'उषो न पञ्च' इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

उषो न जारः पृथु पाजो अश्रेद्दविद्युतद्दीद्यच्छोशुचानः ।
वृषा हरिः शुचिरा भाति भासा धियो हिन्वान उशतीरजीगः ॥ १ ॥

उषः । न । जारः । पृथु । पाजः । अश्रेत् । दविद्युतत् । दीद्यत् । शोशुचानः ।
वृषा । हरिः । शुचिः । आ । भाति । भासा । धियः । हिन्वानः । उशतीः । अजीगरिति ॥ १ ॥

अग्निः vउषो vन vजारः उषसो जारः सूर्यस्तद्वत् vपृथु विस्तीर्णं vपाजः तेजः vअश्रेत् श्रयति[2] । किंच vदविद्युतत् vदीद्यत् vशोशुचानः इति त्रयोऽपि शब्दा यद्यपि दीसिकर्माणः तथापि दीसेः भूयस्त्वज्ञापनाय प्रयुक्ता इति न पुनरुक्तिः । अत्यन्तं दीप्यमान इत्यर्थः । vवृषा कामानां वर्षिता vहरिः हरिषां प्रेरकः vशुचिः शुद्धिकृदग्निः vधियः कर्माणि vहिन्वानः प्रेरयन् vभासा दीप्त्या vआ vभाति प्रकाशते । अपि च vउशतीः कामयमानाः vअजीगः जागरयति । तमसा तिरोहिताः प्रजा उद्गिरति वा ॥

स्वर्ण वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न मन्म ।
अग्निर्जन्मानि देव आ वि विद्वान्द्रवद्दूतो देवयावा वनिष्ठः ॥ २ ॥

स्वः । न । वस्तोः । उषसाम् । अरोचि । यज्ञम् । तन्वानाः । उशिजः । न । मन्म ।
अग्निः । जन्मानि । देवः । आ । वि । विद्वान् । द्रवत् । दूतः । देवऽयावा । वनिष्ठः ॥ २ ॥

अग्निः vवस्तोः अहनि । 'वस्तोः द्युः' इत्यहर्नामसु पाठात् । vउषसाम् अग्रे vस्वर्ण आदित्य इव । तथा च यास्कः—'स्वरादित्यो भवति सु अरणः सु ईरणः' (निरु. २·१४) इति । vअरोचि दीप्यते । vउशिजो vन ऋत्विजश्च vयज्ञं vतन्वानाः विस्तारयन्तः vमन्म मन्मानि मननीयानि स्तोत्राणि पठन्तीति शेषः । नेति संप्रत्यर्थे । अपि च vविद्वान्[3] जानन् vदूतः देवानां vदेवयावा देवान् प्रति गच्छन् vवनिष्ठः दातृतमः vअग्निः vवि vआ vद्रवत् विविधमाद्रवति ॥

---

१. ख-भ-वसिष्ठ ऋषिः । २. य-आश्रयति । ३. ज्ञ-देवो दीप्यमानोऽग्निः जन्मानि सर्वेषामुत्पत्तीः विद्वान् ।

अच्छा गिरो मतयो देवयन्तीरग्निं यन्ति द्रविणं भिक्षमाणाः ।
सुसंदृशं सुप्रतीकं स्वञ्चं हव्यवाहमरतिं मानुषाणाम् ॥ ३ ॥

अच्छ । गिरः । मतयः । देवऽयन्तीः । अग्निम् । यन्ति । द्रविणम् । भिक्षमाणाः ।
सुऽसंदृशम् । सुऽप्रतीकम् । सुऽअञ्चम् । हव्यऽवाहम् । अरतिम् । मानुषाणाम् ॥ ३ ॥

vमतयः स्तुतिरूपाः vदेवयन्तीः देवानिच्छन्त्यः vद्रविणं धनं vभिक्षमाणाः याचमानाः vगिरः वाचः vसुसंदृशं कल्याणसंदर्शनं vसुप्रतीकं सुरूपं शोभनाङ्गं वा vस्वञ्चं सुष्ठु गच्छन्तं vहव्यवाहं हव्यानां वोढारं vमानुषाणाम् vअरतिं स्वामिनम् vअग्निम् vअच्छ अभि vयन्ति अभिगच्छन्ति ॥

इन्द्रं नो अग्ने वसुभिः सजोषा रुद्रं रुद्रेभिरा वहा बृहन्तम् ।
आदित्येभिरदितिं विश्वजन्यां बृहस्पतिमृक्वभिर्विश्ववारम् ॥ ४ ॥

इन्द्रम् । नः । अग्ने । वसुऽभिः । सऽजोषाः । रुद्रम् । रुद्रेभिः । आ । वह । बृहन्तम् ।
आदित्येभिः । अदितिम् । विश्वऽजन्याम् । बृहस्पतिम् । ऋक्वऽभिः । विश्वऽवारम् ॥ ४ ॥

हे vअग्ने vवसुभिः देवैः vसजोषाः संगतस्त्वं vनः अस्मदर्थम् vइन्द्रम् vआ vवह । vरुद्रेभिः रुद्रैर्देवैः संगतः vबृहन्तं महान्तं vरुद्रं चा वह । vआदित्येभिः आदित्यैर्देवैः संगतः vविश्वजन्यां विश्वजनहिताम् vअदितिं चा वह । vऋक्वभिः स्तुत्यैः अङ्गिरोभिर्देवैः संगतः vविश्ववारं विश्वैः संभजनीयं vबृहस्पतिं चा वह ॥

मन्द्रं होतारमुशिजो यविष्ठमग्निं विशं ईळते अध्वरेषु ।
स हि क्षपावाँ अभवद्रयीणामतन्द्रो दूतो यजथाय देवान् ॥ ५ ॥

मन्द्रम् । होतारम् । उशिजः । यविष्ठम् । अग्निम् । विशः । ईळते । अध्वरेषु ।
सः । हि । क्षपाऽवान् । अभवत् । रयीणाम् । अतन्द्रः । दूतः । यजथाय । देवान् ॥ ५ ॥

vउशिजः कामयमानाः vविशः मनुष्याः vमन्द्रं स्तुत्यं vहोतारम् आह्वातारं vयविष्ठं युवतमम् vअग्निम् vअध्वरेषु यागेषु vईळते स्तुवन्ति । vहि यस्मात् कारणात् vसः अग्निः vक्षपावान् रात्रिमान् । रात्रौ खल्वग्नेऽग्निहोत्रं हूयते । vरयीणां रयिमतां हविष्मतां यजमानानां vदेवान् vयजथाय यष्टुम् vअतन्द्रः तन्द्रारहितः vदूतः vअभवत् । तथा च श्रूयते—'यस्माद्दूतोऽभवत्तस्माद्विशस्त्वमध्वर ईळते' इति ॥ ॥ १३ ॥

'महाँ असि' इति पञ्चर्चमेकादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम् । 'महान्' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्थो विनियोगः ॥

महाँ असि सूर्य ब्रह्मकेतो न ऋते त्वदमृता मादयन्ते ।
आ विश्वेभिः सरथं याहि देवैर्न्यग्ने होता प्रथमः सदेह ॥ १ ॥

महान् । असि । अध्वरस्य । प्रऽकेतः । न । ऋते । त्वत् । अमृताः । मादयन्ते ।
आ । विश्वेभिः । सऽरथम् । याहि । देवैः । नि । अग्ने । होता । प्रथमः । सद । इह ॥ १ ॥

हे vअग्ने त्वम् vअध्वरस्य vप्रकेतः प्रज्ञापनः सन् vमहानसि । vत्वत् vऋते त्वया विना vअमृताः देवाः vन vमादयन्ते न माद्यन्ति[1] । vविश्वेभिः विश्वैः vदेवैः vसरथं यथा भवति[2] vआ vयाहि च । vइह आस्तीर्णे बर्हिषि vप्रथमः मुख्यः vहोता आह्वाता सन् vनि vसद निषीद च ॥

वाजपेये बार्हस्पत्यचरोः स्विष्टकृतोऽनुवाक्या । सूत्रितं च—'त्वामीळते अजिरं दूत्यायाग्निं सुदीतिं सुदृशं गृणन्तः' (आश्व. श्रौ. ९. ९) इति ॥

त्वामीळते अजिरं दूत्याय हविष्मन्तः सदमिन्मानुषासः ।
यस्य देवैरासदो बर्हिरग्नेऽहान्यस्मै सुदिना भवन्ति ॥ २ ॥

त्वाम् । ईळते । अजिरम् । दूत्याय । हविष्मन्तः । सदम् । इत् । मानुषासः ।
यस्य । देवैः । आ । असदः । बर्हिः । अग्ने । अहानि । अस्मै । सुऽदिना । भवन्ति ॥२॥

हे vअग्ने vअजिरं प्रगामिनं vत्वां vमानुषासः मानुषाः vहविष्मन्तः यजमानाः vसदमित् सदैव vदूत्याय दूतकर्मणे हविर्वहनाय vईळते याचन्ते । किमर्थमित्यत आह । vयस्य हविष्मतः vबर्हिः vदेवैः सार्धम् vआसदः त्वमधितिष्ठसि vअस्मै हविष्मते vअहानि vसुदिना सुदिनानि शोभनदिनानि vभवन्ति ॥

त्रिश्चिदक्तोः प्र चिकितुर्वसूनि त्वे अन्तर्दाशुषे मर्त्याय ।
मनुष्वदग्न इह यक्षि देवान्भवा नो दूतो अभिशस्तिपावा ॥ ३ ॥

त्रिः । चित् । अक्तोः । प्र । चिकितुः । वसूनि । त्वे इति । अन्तः । दाशुषे । मर्त्याय ।
मनुष्वत् । अग्ने । इह । यक्षि । देवान् । भव । नः । दूतः । अभिशस्तिऽपावा ॥ ३ ॥

हे vअग्ने vत्वे त्वयि vअन्तः मध्ये vअक्तोः अह्नः । यद्यप्यक्तुरिति रात्रेर्नाम[3] तथाप्यत्राज्यन्ते व्यज्यन्ते रूपादीन्यस्मिन्नित्यह्नो नाम । vत्रिः त्रिवारं त्रिषु सवनेषु vवसूनि हवींषि vदाशुषे हविषां प्रदात्रे vमर्त्याय मनुष्याय । तदर्थमित्यर्थः । vप्र vचिकितुः प्रवेदयन्त्यृत्विजः । यद्वा । अक्तोरह्नि त्रिष्वीन् अग्निमन्थमजं च त्वय्यन्तर्निहितानि प्र चिकितुः । अविदन्नित्यर्थः । अपि च vमनुष्वत् मनोरिव vइह ममास्मिन् यज्ञे vदूतः त्वं vदेवान् vयक्षि यज । vनः अस्माकम् vअभिशस्तिपावा अभिशस्तेः अभिशंसकात् शात्रवात् पावा रक्षिता vभव ॥

अग्निरीशे बृहतो अध्वरस्याग्निर्विश्वस्य हविषः कृतस्य ।
क्रतुं ह्यस्य वसवो जुषन्ताथा देवा दधिरे हव्यवाहम् ॥ ४ ॥

अग्निः । ईशे । बृहतः । अध्वरस्य । अग्निः । विश्वस्य । हविषः । कृतस्य ।
क्रतुम् । हि । अस्य । वसवः । जुषन्त । अथ । देवाः । दधिरे । हव्यऽवाहम् ॥ ४ ॥

vबृहतः महतः vअध्वरस्य कौटिल्यरहितस्य यज्ञस्य vअग्निः vईशे ईष्टे । vविश्वस्य सर्वस्य vकृतस्य संस्कृतस्य vहविषः च vअग्निः एवेष्टे । vहि यस्मात् vअस्य अग्नेः vक्रतुं कर्म vवसवः देवाः vजुषन्त सेवन्ते । vअथ अपि च vदेवाः अग्निं vहव्यवाहं हव्यानां वोढारं vदधिरे चक्रिरे इत्यर्थः ॥

---

१. श–मादयन्ति । २. श–भवति तथा । ३. ख-भ–रात्रिनाम ।

आग्ने वह हविरद्याय देवानिन्द्रज्येष्ठास इह मादयन्ताम् ।
इमं यज्ञं दिवि देवेषु धेहि यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

आ । अग्ने । वह । हविःऽअद्याय । देवान् । इन्द्रऽज्येष्ठासः । इह । मादयन्ताम् ।
इमम् । यज्ञम् । दिवि । देवेषु । धेहि । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

हे vअग्ने vहविरद्याय हविषां भक्षणाय vदेवान् vआ vवह । किमर्थमित्यत आह । vइह अस्मिन् यज्ञे vइन्द्रज्येष्ठासः इन्द्रप्रमुखा देवाः vमादयन्ताम् । vइमं vयज्ञम् इदं यष्टव्यं हविः vदिवि स्थितेषु vदेवेषु vधेहि निधेहि । देवान्वेह नयेदं[1] हविर्वा देवेषु नयेति भावः । अन्तिमः पादो व्याख्यातचरः ॥ ॥ १४ ॥

'अगन्म महा' इति तृचात्मकं द्वादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयम् । तथा चानुक्रान्तम्–'अगन्म तृचम्' इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः । व्यूळ्हे दशरात्रे नवमेऽहनीदं सूक्तमाज्यशस्त्रम् । सूत्रितं च—'तृतीयस्यागन्म महेत्याज्यम्' (आश्व. श्रौ. ८. ११) इति ॥

अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे ।
चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् ॥ १ ॥

अगन्म । महा । नमसा । यविष्ठम् । यः । दीदाय । सम्ऽइद्धः । स्वे । दुरोणे ।
चित्रऽभानुम् । रोदसी इति । अन्तः । उर्वी इति । सुऽआहुतम् । विश्वतः । प्रत्यञ्चम् ॥ १ ॥

vयः अग्निः vस्वे vदुरोणे स्वे स्थान आहवनीये vसमिद्धः काष्ठैः समिद्धः सन् vदीदाय दीप्यते तमिमं vयविष्ठं युवतमम् vउर्वी विस्तीर्णयोः vरोदसी रोदस्योः द्यावापृथिव्योः vअन्तः मध्ये अन्तरिक्षे vचित्रभानुं चित्रज्वालं vस्वाहुतं सुष्ठु आहुतिभिर्हुतं सन्तं vविश्वतः सर्वतः vप्रत्यञ्चं प्रतिगच्छन्तमग्निं vमहा महता vनमसा नमस्कारेण vअगन्म वयमुपगच्छाम ॥

स महा विश्वा दुरितानि साह्वानग्निः ष्टवे दम आ जातवेदाः ।
स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत नो मघोनः ॥ २ ॥

सः । महा । विश्वा । दुःऽइतानि । सह्वान् । अग्निः । स्तवे । दमे । आ । जातऽवेदाः ।
सः । नः । रक्षिषत् । दुःऽइतात् । अवद्यात् । अस्मान् । गृणतः । उत । नः । मघोनः ॥ २ ॥

योऽग्निः vमहा महत्त्वेन vविश्वा विश्वानि vदुरितानि vसाह्वान् अभिभवन् vजातवेदाः जातधनो जातप्रज्ञो वा vदमे यज्ञगृहे vस्तवे अस्माभिः स्तूयते vसः vअग्निः अस्मान् vदुरितात् पापात् vअवद्यात् निन्दिताच्च कर्मणः vरक्षिषत् रक्षतु । vअस्मान् vगृणतः स्तुवतोऽपि रक्षिषत् । vउत अपि च सोऽग्निः vनः vमघोनः हविष्मतः रक्षिषत् ॥

त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः ।
त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

त्वम् । वरुणः । उत । मित्रः । अग्ने । त्वाम् । वर्धन्ति । मतिऽभिः । वसिष्ठाः ।
त्वे इति । वसु । सुऽसननानि । सन्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥

हे [v]अग्ने [v]त्वं [v]वरुणः असि। [v]उत अपि च त्वं [v]मित्रः असि जगतः प्रमीतेस्त्रातासि। [v]त्वां [v]वसिष्ठाः [v]मतिभिः स्तुतिभिः [v]वर्धन्ति[1] वर्धयन्ति। [v]त्वे त्वयि विद्यमानानि [v]वसु वसूनि [v]सुसननानि सुसंभजनानि[2] [v]सन्तु इति। स्पष्टमन्यत्॥ ॥ १५ ॥

'प्राग्नये' इति तृचं त्रयोदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वानराग्निदेवताकम्। तथा चानुक्रान्तं– 'प्राग्नये वैश्वानरीयम्' इति। विनियोगो लैङ्किकः॥

प्राग्नये विश्वशुचे धियंधेऽसुरघ्ने मन्म धीतिं भरध्वम्।
भरे हविर्न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनाम्॥ १॥

प्र। अग्नये। विश्वऽशुचे। धियम्ऽधे। असुरऽघ्ने। मन्म। धीतिम्। भरध्वम्।
भरे। हविः। न। बर्हिषि। प्रीणानः। वैश्वानराय। यतये। मतीनाम्॥ १॥

हे सखायः [v]विश्वशुचे विश्वं यो दीपयति तस्मै [v]धियंधे धियां कर्मणां यो धाता तस्मै [v]असुरघ्ने असुराणां यो हन्ता तस्मै [v]अग्नये [v]मन्म मननीयं स्तोत्रं [v]धीतिं कर्म च [v]प्र [v]भरध्वम्। [v]मतीनाम् अभिमतानां कामानां [v]यतये दात्रे [v]वैश्वानराय विश्वनरहितायाग्निविशेषाय [v]बर्हिषि यज्ञे [v]हविर्न हविरिव स्तुतिं [v]प्रीणानः प्रीयमाणोऽहं [v]भरे भरामि। यद्वा। हविः प्रीणानः प्रीणयन्नहं बर्हिषि हविर्भरे संभरामि। नेति संप्रत्यर्थे॥

त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः।
त्वं देवाँ अभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा॥ २॥

त्वम्। अग्ने। शोचिषा। शोशुचानः। आ। रोदसी इति। अपृणाः। जायमानः।
त्वम्। देवान्। अभिऽशस्तेः। अमुञ्चः। वैश्वानर। जातऽवेदः। महिऽत्वा॥ २॥

हे [v]अग्ने [v]त्वं [v]शोचिषा दीप्त्या [v]शोशुचानः दीप्यमानः [v]जायमानः जायमान एव [v]रोदसी द्यावापृथिव्यौ [v]आ [v]अपृणाः आपूरयः। अपि च [v]जातवेदः जातप्रज्ञ जातधन वा [v]वैश्वानर विश्वनरहित हे अग्ने [v]त्वं [v]देवान् [v]महित्वा महत्त्वेन [v]अभिशस्तेः अभिशंसकात् शत्रोः [v]अमुञ्चः अमोचयः॥

जातो यदग्ने भुवना व्यख्यः पशून्न गोपा इर्यः परिज्मा।
वैश्वानर ब्रह्मणे विन्द गातुं यूयं पात स्वस्तिभिः सदा नः॥ ३॥

जातः। यत्। अग्ने। भुवना। वि। अख्यः। पशून्। न। गोपाः। इर्यः। परिऽज्मा।
वैश्वानर। ब्रह्मणे। विन्द। गातुम्। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ३॥

हे [v]अग्ने [v]जातः सूर्यात्मना जातस्त्वम् [v]इर्यः स्वामी प्रेरयन् वा [v]परिज्मा परितो गन्ता सन् [v]पशून्न [v]गोपाः। यथा गवां पालकः पशून् पश्यति तद्वत्। [v]यत् यदा [v]भुवना भूतानि [v]व्यख्यः

---

१. ख-घ-ङ्ग-न-भ-श–'वर्धन्ति' नास्ति। २. ङ्ग–सुसंभजनीयानि।

रक्षार्थं पश्यसि तदा vब्रह्मणे । ब्रह्म स्तोत्रम् । तदर्थं vगातुं गतिं फलप्राप्तिं vविन्द । यद्वा । ब्रह्मणे ब्राह्मणार्थं गातुं विन्द । येन ब्राह्मणा उपद्रवान्निर्गच्छन्ति तं[1] गातुं विन्देत्यर्थः । स्पष्टमन्यत् ॥ ॥ १६ ॥

' समिधा जातवेदसे ' इति तृचं चतुर्दशं सूक्तं वसिष्ठस्यार्षमाग्नेयम् । आद्या बृहती द्वितीया-तृतीये त्रिष्टुभौ । तथा चानुक्रम्यते—' समिधा बृहत्यादि ' इति । विनियोगो लैङ्गिकः ॥

समिधा जातवेदसे देवाय देवहूतिभिः ।
हविर्भिः शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये ॥ १ ॥

सम्ऽइधा । जातऽवेदसे । देवाय । देवहूतिऽभिः ।
हविःऽभिः । शुक्रऽशोचिषे । नमस्विनः । वयम् । दाशेम । अग्नये ॥ १ ॥

vजातवेदसे जातवेदसं जातप्रज्ञम् vअग्नये अग्निं vसमिधा vवयं वसिष्ठाः vदाशेम परिचरेम । vदेवाय देवं स्तुत्यमग्निं vदेवहूतिभिः देवस्तुतिभिः दाशेम । vशुक्रशोचिषे शुक्रशोचिषं शुभ्रदीप्तिं[2] vनमस्विनः हविष्मन्तो वयं vहविर्भिः दाशेम । अत्र दाशतियोगात् कर्मणि चतुर्थी । प्रायेण सर्वत्र दाशतियोगे कर्मणि चतुर्थी दृश्यते ॥

वयं ते अग्ने समिधा विधेम वयं दाशेम सुष्टुती यजत्र ।
वयं घृतेनाध्वरस्य होतर्वयं देव हविषा भद्रशोचे ॥ २ ॥

वयम् । ते । अग्ने । सम्ऽइधा । विधेम । वयम् । दाशेम । सुऽस्तुती । यजत्र ।
वयम् । घृतेन । अध्वरस्य । होतः । वयम् । देव । हविषा । भद्रऽशोचे ॥ २ ॥

हे vअग्ने vते त्वां vवयं वसिष्ठाः vसमिधा vविधेम परिचरेम । हे vयजत्र यष्टव्याग्ने vवयं vसुष्टुती शोभनया स्तुत्या vदाशेम त्वां परिचरेम । vअध्वरस्य यज्ञस्य vहोतः अग्ने vवयं vघृतेन आज्येन त्वां दाशेम । हे vभद्रशोचे कल्याणज्वाल vदेव द्योतमानाग्ने त्वां vवयं vहविषा दाशेम ॥

आ नो देवेभिरुप देवहूतिमग्ने याहि वषट्कृतिं जुषाणः ।
तुभ्यं देवाय दाशतः स्याम यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

आ । नः । देवेभिः । उप । देवऽहूतिम् । अग्ने । याहि । वषट्ऽकृतिम् । जुषाणः ।
तुभ्यम् । देवाय । दाशतः । स्याम । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥

हे vअग्ने vनः अस्माकं vदेवहूतिं स्तोत्रं यज्ञं वा vदेवेभिः देवैः सार्धं vवषट्कृतिं हविः vजुषाणः सेवमानस्त्वम् vउप vआ vयाहि । vदेवाय द्योतमानाय vतुभ्यं वयं vदाशतः परिचरन्तः vस्याम भवेम । सिद्धमन्यत् ॥ ॥ १७ ॥

' उपसद्याय ' इति पञ्चदशर्चं पञ्चदशं सूक्तं वसिष्ठस्यार्षं गायत्रमाग्नेयम् । तथा चानुक्रान्तम्—' उपसद्याय पञ्चोना गायत्रम् ' इति । प्रातरनुवाक आग्नेये क्रतौ गायत्रे छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितं च—' उपसद्याय त्वमग्ने यज्ञानामिति तिस्र उत्तमा उद्धरेत् ' (आश्व. श्रौ. ४·१३) इति ।

१. ख-भ-' तं ' नास्ति । २. झ-ञ-न-भ-श—शुभ्रदीप्तिनम् ।

उपसदि[1] पौर्वाह्णिक्याम् 'उपसद्याय' इत्याद्यास्तिस्र ऋचः सामिधेन्यः । सूच्यते च—'उपसद्याय मीळ्हुष इति तिस्र एकैकां त्रिरनवानम्' (आश्व. श्रौ. ४. ८) इति । पवित्रेष्टयाम् 'अग्नी रक्षांसि' इत्येषा प्रथमाज्यभागानुवाक्या । सूत्रितं च—'पावकवन्तावाज्यभागावग्नी रक्षांसि सेधति' (आश्व. श्रौ. २·१२) इति । अन्वारम्भणीयायामग्नेर्भागिनो याज्या । सूत्रितं च—'आ सवं सवितुर्यथा स नो राधांस्या भर' (आश्व. श्रौ. २. ८) इति । स्वस्त्ययन्यामिष्टौ 'अग्ने रक्षा णः' इति प्रथमाज्यभागानुवाक्या । सूत्रितं च—'स्वस्त्ययन्यां रक्षितवन्तावग्ने रक्षा णो अंहसः' (आश्व. श्रौ. २·१०) इति ॥

उपसद्याय मीळ्हुष आस्ये जुहुता हविः । यो नो नेदिष्ठमाप्यम् ॥ १ ॥

उपऽसद्याय । मीळ्हुषे । आस्ये । जुहुत । हविः । यः । नः । नेदिष्ठम् । आप्यम् ॥ १ ॥

हे अध्वर्यवः [v]उपसद्याय उपसदनीयाय [v]मीळ्हुषे कामानां वर्षित्रेऽग्नये तत्प्रीत्यर्थम् [v]आस्ये तस्यैव मुखे [v]हविः [v]जुहुत । [v]यः अग्निः [v]नेदिष्ठम् आसन्नतमम् [v]आप्यं भवति । आसन्नतमो बन्धुर्भवतीत्यर्थः । आप्यमिति स्वार्थिकस्तद्धितः ॥

यः पञ्च चर्षणीरभि निषसाद दमेदमे । कविर्गृहपतिर्युवा ॥ २ ॥

यः । पञ्च । चर्षणीः । अभि । निऽससाद । दमेऽदमे । कविः । गृहऽपतिः । युवा ॥ २ ॥

[v]यः अग्निः [v]कविः प्राज्ञः [v]गृहपतिः गृहाणां पालयिता [v]युवा नित्यतरुणः सन् [v]पञ्च [v]चर्षणीः पञ्च जनान् मनुष्यान् [v]अभि अभिमुखं [v]दमेदमे गृहेगृहे [v]निषसाद निषीदति । उत्तरया वाक्यपरिसमाप्तिः ॥

स नो वेदो अमात्यमग्नी रक्षतु विश्वतः । उतास्मान् पात्वंहसः ॥ ३ ॥

सः । नः । वेदः । अमात्यम् । अग्निः । रक्षतु । विश्वतः । उत । अस्मान् । पातु । अंहसः ॥ ३ ॥

[v]सः [v]अग्निः [v]नः अस्माकं [v]वेदः धनम् [v]अमात्यम् अन्तिके भवं सहभूतं वा [v]विश्वतः सर्वतः बाधकात् [v]रक्षतु । [v]उत अपि च [v]अस्मान् वसिष्ठान् [v]अंहसः पापात् [v]पातु रक्षतु ॥

नवं नु स्तोममग्नये दिवः श्येनाय जीजनम् । वस्वः कुविद्वनाति नः ॥ ४ ॥

नवम् । नु । स्तोमम् । अग्नये । दिवः । श्येनाय । जीजनम् । वस्वः । कुवित् । वनाति । नः ॥ ४ ॥

[v]दिवः द्युलोकस्य [v]श्येनाय श्येनसदृशाय [v]नु क्षिप्रं गन्त्रे [v]अग्नये यस्मै [v]नवं नूतनं [v]स्तोमं [v]जीजनं[2] जनयामि सोऽग्निः [v]नः अस्मभ्यं [v]कुवित् बहु [v]वस्वः वसु धनम् । कर्मणि षष्ठी । [v]वनाति । ददात्वित्यर्थः ॥

स्पार्हा यस्य श्रियो दृशे रयिर्वीरवतो यथा । अग्ने यज्ञस्य शोचतः ॥ ५ ॥

स्पार्हाः । यस्य । श्रियः । दृशे । रयिः । वीरऽवतः । यथा । अग्ने । यज्ञस्य । शोचतः ॥ ५ ॥

[v]यज्ञस्य [v]अग्ने पुरस्ताद्भागे [v]शोचतः दीप्यमानस्य [v]यस्य अग्नेः [v]श्रियः दीप्तयः [v]वीरवतः पुत्रवतः [v]रयिः धनं [v]यथा तद्वत् [v]दृशे द्रष्टुं चक्षुषे वा [v]स्पार्हाः स्पृहणीया भवन्ति तस्मै नवं स्तोमं जीजनमित्यनुषङ्गः । उत्तरत्र संबन्धो वा ॥ ॥ १८ ॥

---

१. ख-भ–उपसदि सौमिक्याम् । २. झ-त-श–जीजनमजीजनम् ।

सेमां वेतु वषट्कृतिमग्निर्जुषत नो गिरः । यजिष्ठो हव्यवाहनः ॥ ६ ॥

सः । इमाम् । वेतु । वषट्ऽकृतिम् । अग्निः । जुषत । नः । गिरः । यजिष्ठः । हव्यऽवाहनः॥६॥

[v]यजिष्ठः यजनीयतमो यष्टृतमो वा [v]हव्यवाहनः हव्यानां हविषां वोढा [v]सः [v]अग्निः [v]इमां [v]वषट्कृतिम् अस्माभिर्दीयमानामाहुतिं [v]वेतु कामयतां भक्षयतु वा । [v]नः अस्माकं [v]गिरः स्तुतीश्च [v]जुषत सेवताम् ॥

नि त्वा नक्ष्य विश्पते द्युमन्तं देव धीमहि । सुवीरमग्न आहुत ॥ ७ ॥

नि । त्वा । नक्ष्य । विश्पते । द्युऽमन्तम् । देव । धीमहि । सुऽवीरम् । अग्ने । आऽहुत ॥७॥

[v]नक्ष्य उपगन्तव्य । नक्षतिर्व्याप्तिकर्मा । [v]विश्पते विशां पते [v]देव द्योतमान [v]आहुत सर्वैर्यजमानैरभिहुत हे [v]अग्ने [v]द्युमन्तं दीप्तिमन्तं [v]सुवीरं कल्याणस्तोतृकं [v]त्वा त्वां वयं [v]नि [v]धीमहि निहितवन्तः ॥

क्षपं उस्रश्च दीदिहि स्वग्नयस्त्वया वयम् । सुवीरस्त्वमस्मयुः ॥ ८ ॥

क्षपः । उस्रः । च । दीदिहि । सुऽअग्नयः । त्वया । वयम् । सुऽवीरः । त्वम् । अस्मऽयुः॥८॥

हे अग्ने त्वं [v]क्षपः रात्रीः [v]उस्रः अहानि[1] [v]च । सर्वदेति यावत् । [v]दीदिहि[2] दीप्यस्व । दीप्यमानेन [v]त्वया [v]वयं वसिष्ठाः [v]स्वग्नयः शोभमानाग्नयो भवाम । [v]अस्मयुः अस्मान् कामयमानः ॥ ' सुप आत्मनः क्यच् ' इति क्यचि कृते ' क्याच्छन्दसि ' इत्युप्रत्ययः । दकारलोपश्छान्दसः । तथा च यास्कः– ' अस्मयुरस्मान् कामयमानः ' (निरु. ६·२१) इति ॥ [v]त्वं [v]सुवीरः सुस्तोतृको भव ॥

उप त्वा सातये नरो विप्रासो यन्ति धीतिभिः । उपाक्षरा सहस्रिणी ॥ ९ ॥

उप । त्वा । सातये । नरः । विप्रासः । यन्ति । धीतिऽभिः । उप । अक्षरा । सहस्रिणी॥९॥

हे अग्ने [v]त्वा त्वां [v]नरः नेतारो यजमानाः [v]विप्रासः विप्रा मेधाविनः [v]धीतिभिः कर्मभिः [v]सातये धनाय कामानां लाभाय वा [v]उप [v]यन्ति उपगच्छन्ति । [v]सहस्रिणी सहस्रसंख्याका [v]अक्षरा क्षयरहिता स्तुतिरूपा अस्मदीया वाक् त्वाम् [v]उप याति च ॥

अग्नी रक्षाँसि सेधति शुक्रशोचिरमर्त्यः । शुचिः पावक ईड्यः ॥ १० ॥

अग्निः । रक्षांसि । सेधति । शुक्रऽशोचिः । अमर्त्यः । शुचिः । पावकः । ईड्यः ॥ १० ॥

[v]शुक्रशोचिः शुभ्रज्वालः [v]अमर्त्यः मरणरहितो देवतात्मा [v]शुचिः स्वयं शुद्धः [v]पावकः अन्येषामपि शोधकः [v]ईड्यः स्तुत्यः [v]अग्निः [v]रक्षांसि राक्षसान् [v]सेधति बाधताम् ॥ ॥ १९ ॥

स नो राधांस्या भरेशानः सहसो यहो । भगश्च दातु वार्यम् ॥ ११ ॥

सः । नः । राधांसि । आ । भर । ईशानः । सहसः । यहो इति । भगः । च । दातु । वार्यम्॥११॥

हे [v]सहसो [v]यहो बलस्य पुत्राग्ने [v]सः प्रसिद्धस्त्वम् [v]ईशानः सर्वस्य[3] जगतः[3] ईश्वरः सन् [v]नः अस्मभ्यं [v]राधांसि धनानि । ' रायो राधः ' इति धननामसु पाठात् । [v]आ[4] [v]भर आहर । [v]भगश्च

---

१. ख-न-भ-श–अहनि । २. घ-ङ्ग-त–दीदिहि च । ३. ख-न-भ–सर्वजगतः । ४. ख-ङ्ग-त-न-भ-श–नोऽस्मभ्यमा ।

भगो देवोऽपि ᵛवार्यं[1] धनं ᵛदातु अस्मभ्यं ददातु । अभ्यासलोपश्छान्दसः । भगोऽत्र सूक्ते निपातभागिनी देवता ॥

त्वमग्ने वीरवद्यशो देवश्च सविता भगः । दितिश्च दाति वार्यम् ॥ १२ ॥

त्वम् । अग्ने । वीरऽवत् । यशः । देवः । च । सविता । भगः । दितिः । च । दाति । वार्यम् ॥ १२ ॥

हे ᵛअग्ने ᵛत्वं ᵛवीरवत् पुत्रपौत्रोपेतं ᵛयशः अन्नं देहीति शेषः । ᵛदेवश्च ᵛसविता सविता देवोऽपि ᵛवार्यं वरणीयं धनं ᵛदाति ददातु । ᵛभगः च देवोऽपि ददातु । ᵛदितिश्च दितिरपि देवी ददातु । सवित्रादिः सूक्ते निपातभागिनी देवता ॥

अग्ने रक्षा णो अंहसः प्रति ष्म देव रीषतः । तपिष्ठैरजरो दह ॥ १३ ॥

अग्ने । रक्ष । नः । अंहसः । प्रति । स्म । देव । रिषतः । तपिष्ठैः । अजरः । दह ॥ १३ ॥

हे ᵛअग्ने त्वं ᵛनः अस्मान् ᵛअंहसः पापात् ᵛरक्ष पाहि । संहितायां दीर्घश्छान्दसः । अपि च हे ᵛदेव द्योतमानाग्ने ᵛअजरः जरारहितस्त्वं ᵛरिषतः हिंसतः शत्रून् ᵛतपिष्ठैः अतिशयेन तापकैस्तेजोभिः ᵛदह भस्मीकुरु ॥

अधा मही न आयस्यनाधृष्टो नृपीतये । पूर्भवा शतभुजिः ॥ १४ ॥

अध । मही । नः । आयसी । अनाधृष्टः । नृऽपीतये । पूः । भव । शतऽभुजिः ॥ १४ ॥

ᵛअध अधुना हे अग्ने ᵛअनाधृष्टः अप्रतिधर्षणीयस्त्वं ᵛनः अस्माकं ᵛनृपीतये[2] नृणां रक्षणार्थं ᵛमही महती ᵛआयसी अयसा निर्मिता ᵛशतभुजिः अत्यन्तं विस्तृता शतगुणा ᵛपूः पुरी । तद्रक्षासाधनभूतप्राकारादिर्वा पूरुच्यते[3] । ᵛभव । यथायसा निर्मिता पुरी तद्रक्षासाधनभूतप्राकारादिर्वा शत्रुभ्यो भीतान् रक्षति तद्वद्राक्षसेभ्यो भीतानस्मान् पाहीत्यर्थः ॥

त्वं नः पाह्यंहसो दोषावस्तरघायतः । दिवा नक्तमदाभ्य ॥ १५ ॥

त्वम् । नः । पाहि । अंहसः । दोषाऽवस्तः । अघऽयतः । दिवा । नक्तम् । अदाभ्य ॥ १५ ॥

हे ᵛअदाभ्य अहिंस्य ᵛदोषावस्तः रात्रेराच्छादयितः । तमसो वारयितरित्यर्थः । अग्ने ᵛत्वं ᵛनः अस्मान् ᵛअंहसः पापात् ᵛअघायतः पापमिच्छतः शत्रोश्च ᵛदिवा ᵛनक्तम् अहनि रात्रौ च सर्वदा ᵛपाहि रक्ष ॥ ॥ २० ॥

'एना वः' इति द्वादशर्चं षोडशं सूक्तं वसिष्ठस्यार्षमग्निदेवताकम् । अयुजो बृहत्यो युजः सतोबृहत्यः । तथा चानुक्रान्तम्—'एना वो द्वादश प्रागाथम्' इति । प्रातरनुवाक आग्नेये क्रतौ बार्हते छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितं च—'एना वो अग्निं प्र वो यह्वम्' (आश्व. श्रौ. ४·१३) इति । आग्निमारुतशस्त्रे 'देवो वो द्रविणोदाः' इति प्रगाथोऽनुरूपः । सूत्रितं च—'देवो वो द्रविणोदा इति प्रगाथौ स्तोत्रियानुरूपौ' (आश्व. श्रौ. ५·२०) इति ॥

एना वो अग्निं नमसोर्जो नपातमा हुवे ।
प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥ १ ॥

---

१. त-य-वार्यं वरणीयम् । २. ख-ङ्ग-त-न-भ-श-'नृपीतये' नास्ति । ३. ख१-थ-पुरीत्युच्यते; ज-पूरित्युच्यते ।

एना । वः । अग्निम् । नमसा । ऊर्जः । नपातम् । आ । हुवे ।
प्रियम् । चेतिष्ठम् । अरतिम् । सुऽअध्वरम् । विश्वस्य । दूतम् । अमृतम् ॥ १ ॥

vऊर्जः बलस्य vनपातं पुत्रम् । ' सूनुः नपात् ' इत्यपत्यनामसु पाठात् । vप्रियं प्रियमस्माकं[1] vचेतिष्ठम् अतिशयेन ज्ञातारं प्रज्ञापकं वा vअरतिं गन्तारं स्वामिनं वा vस्वध्वरं सुयज्ञं vविश्वस्य सर्वस्य यजमानस्य vदूतम् vअमृतं नित्यम् vअग्निम् vएना एनेन vनमसा स्तोत्रेण। यद्यप्यत्रान्वादेशो नास्ति तथापि छान्दसत्वादिदंशब्दस्यैनादेशः । यद्वा । एनैनमित्यग्नेर्विशेषणम् । समानार्थत्वात्[2] पूर्वेषु सूक्तेष्वादिष्टत्वाद्वसिष्ठेनान्वादिश्यते । vवः युष्मदर्थम् vआ vहुवे आह्वयामि ॥

स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः ।
सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम् ॥ २ ॥

सः । योजते । अरुषा । विश्वऽभोजसा । सः । दुद्रवत् । सुऽआहुतः ।
सुऽब्रह्मा । यज्ञः । सुऽशमी । वसूनाम् । देवम् । राधः । जनानाम् ॥ २ ॥

vसः अग्निः vअरुषा आरोचमानौ vविश्वभोजसा विश्वस्य पालयितारावश्वौ vयोजते रथे युनक्ति । यद्वा । सोऽरुषा आरोचमानेन तेजसा विश्वभोजसा विश्वस्य रक्षकेण योजते युज्यते । किंच vसः अग्निः vदुद्रवत् आनेतुं देवान् प्रति भृशं द्रवतु द्रवति वा । vस्वाहुतः सुष्ठु आहुतः vसुब्रह्मा सुस्तुतिः[3] शोभनान्नो वा vयज्ञः यष्टव्यः vसुशमी सुकर्मा च भवति । तमिमं vदेवं द्योतमानं vवसूनां वासकानां vजनानां वसिष्ठानां[4] vराधः हविः अभिगच्छत्विति शेषः । यद्वा । एवंगुणविशिष्टोऽग्निर्वसूनां धनानां मध्ये देवमत्यन्तप्रकाशमानं राधो धनं जनानां यजमानानाम् । धनवत् प्रियतम इत्यर्थः ॥

उदस्य शोचिरस्थादाजुह्वानस्य मीळ्हुषः ।
उद्धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः ॥ ३ ॥

उत् । अस्य । शोचिः । अस्थात् । आऽजुह्वानस्य । मीळ्हुषः ।
उत् । धूमासः । अरुषासः । दिविऽस्पृशः । सम् । अग्निम् । इन्धते । नरः ॥ ३ ॥

vमीळ्हुषः कामानां वर्षितुः vआजुह्वानस्य अभिहूयमानस्याग्नेः vशोचिः तेजः vउत् vअस्थात् उत्तिष्ठति । vअरुषासः आरोचमानाः vदिविस्पृशः अन्तरिक्षस्पृशः vधूमासः धूमाश्च vउत् अस्थुः । अस्थादित्येकवचनान्तं बहुवचनान्ततया विपरिणतं सदन्वेति । तमिमम् vअग्निं vनरः कर्मणां नेतार ऋत्विजः vसम् vइन्धते सम्यग्दीपयन्ति ॥

तं त्वा दूतं कृण्महे यशस्तमं देवाँ आ वीतये वह ।
विश्वा सूनो सहसो मर्तभोजना रास्व तद्यत्त्वेमहे ॥ ४ ॥

तम् । त्वा । दूतम् । कृण्महे । यशःऽतमम् । देवान् । आ । वीतये । वह ।
विश्वा । सूनो इति । सहसः । मर्तऽभोजना । रास्व । तत् । यत् । त्वा । ईमहे ॥ ४ ॥

---

१. ख-भ-अस्माकम्; घ-अस्माकं प्रियम् । २. ख-भ-समानार्थत्वात् । ३. ज्ञ-सुष्टुतिः । ४. ख-ज्ञ-न-भ-वसिष्ठा ।

हे ᵛसहसः ᵛसूनो बलस्य पुत्राग्ने ᵛयशस्तमम् अतिशयेन यशस्विनं ᵛतं प्रसिद्धं यं ᵛत्वा त्वां ᵛदूतं ᵛकृण्महे कुर्मः स त्वं ᵛदेवान् ᵛवीतये हविषां भक्षणाय ᵛआ ᵛवह । किंच ᵛयत् यदा ᵛत्वा त्वाम् ᵛईमहे याचामहे तदैव ᵛविश्वा विश्वानि मर्तभोजनानि[1] मनुष्याणां भोग्यानि कल्याणानि धनानि ᵛरास्व अस्मभ्यं देहि ॥

त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे ।
त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यम् ॥ ५ ॥

त्वम् । अग्ने । गृहऽपतिः । त्वम् । होता । नः । अध्वरे ।
त्वम् । पोता । विश्वऽवार । प्रऽचेताः । यक्षि । वेषि । च । वार्यम् ॥ ५ ॥

हे ᵛविश्ववार विश्वैर्वरणीय ᵛअग्ने ᵛत्वं ᵛनः अस्माकम् ᵛअध्वरे यागे ᵛगृहपतिः असि यजमानोऽसि । ᵛत्वं ᵛहोता देवानामाह्वाता । ᵛत्वं त्वमेव ᵛपोता असि । अतः ᵛप्रचेताः प्रकृष्टमतिस्त्वं ᵛवार्यं वरणीयं हविः ᵛयक्षि यज । ᵛवेषि ᵛच कामयस्व भक्षय वा ॥

कृधि रत्नं यजमानाय सुक्रतो त्वं हि रत्नधा असि ।
आ नः क्रते शिशीहि विश्वमृत्विजं सुशंसो यश्च दक्षते ॥ ६ ॥

कृधि । रत्नम् । यजमानाय । सुऽक्रतो इति सुऽक्रतो । त्वम् । हि । रत्नऽधाः । असि ।
आ । नः । क्रते । शिशीहि । विश्वम् । ऋत्विजम् । सुऽशंसः । यः । च । दक्षते ॥ ६ ॥

हे ᵛसुक्रतो शोभनकर्मन्नग्ने ᵛयजमानाय मह्यं ᵛरत्नं धनम् । 'श्वात्र रत्नम्' इति धननामसु पाठात् । ᵛकृधि कुरु । देहीत्यर्थः । ᵛहि यस्मात् ᵛत्वं ᵛरत्नधाः रत्नस्य दाता ᵛअसि । ᵛनः[2] अस्माकम् ᵛक्रते यज्ञे ᵛविश्वं सर्वम् ᵛऋत्विजम् ᵛआ ᵛशिशीहि तीक्ष्णीकुरु । किंच ᵛयः ᵛसुशंसः सुस्तुतिरस्मत्पुत्रः ᵛदक्षते वर्धते तं वर्धय । यद्वा । यः सुशंसो होता वर्धते तं वर्धयेत्यर्थः । होतुः पृथगुपादानमादरार्थम् ॥ ॥ २१ ॥

त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ॥ ७ ॥

त्वे इति । अग्ने । सुऽआहुत । प्रियासः । सन्तु । सूरयः ।
यन्तारः । ये । मघऽवानः । जनानाम् । ऊर्वान् । दयन्त । गोनाम् ॥ ७ ॥

हे ᵛअग्ने ᵛस्वाहुत यजमानैः सुष्ठु आहुत ᵛत्वे तव ᵛसूरयः प्रेरकाः स्तोतारो वा ᵛप्रियासः प्रियाः ᵛसन्तु भवन्तु । किंच ᵛये[3] ᵛमघवानः धनवन्तः ᵛयन्तारः प्रदातारः ᵛजनानाम् अस्मदीयानाम् ᵛऊर्वान् समूहान् ᵛगोनां गवां चोर्वान् ᵛदयन्त प्रयच्छन्ति ते च तव प्रियासः सन्विति पूर्वेणान्वयः ॥

येषामिळा घृतहस्ता दुरोण आँ अपि प्राता निषीदति ।
ताँस्त्रायस्व सहस्य द्रुहो निदो यच्छा नः शर्म दीर्घश्रुत् ॥ ८ ॥

---

१. घ–मर्तभोजना भोजनानि; य–मर्तभोजना । २. ख-न-भ–त्वं नः । ३. ख-न-भ–' ये ' नास्ति ।

येषाम् । इळा । घृतऽहस्ता । दुरोणे । आ । अपि । प्राता । निऽसीदति ।
तान् । त्रायस्व । सहस्य । द्रुहः । निदः । यच्छ । नः । शर्म । दीर्घऽश्रुत् ॥ ८ ॥

[v]येषां [v]दुरोणे गृहे [v]घृतहस्ता । घृतयुक्तो हस्तो यस्या असौ घृतहस्ता । घृतेनाभिघारितेत्यर्थः । [v]इळा अन्ननामसु पाठात् । इरा इळा ' इत्यन्ननामसु पाठात् । [v]प्राता पूर्णा [v]आ [v]निषीदति आसीदति । [v]अपि इति पूरणः । [v]तान् हविष्मतो यजमानान् हे [v]सहस्य सहसे बलाय हिताग्ने [v]द्रुहः द्रोग्धुः [v]निदः निन्दकाच्च शत्रोः [v]त्रायस्व । [v]नः अस्मभ्यं [v]दीर्घश्रुत् दीर्घकालं श्रोतव्यं [v]शर्म सुखं गृहं वा [v]यच्छ च देहि ॥

स मन्द्रया च जिह्वया वह्निरासा विदुष्टरः ।
अग्ने रयिं मघवद्भ्यो न आ वह हव्यदातिं च सूदय ॥ ९ ॥

सः । मन्द्रया । च । जिह्वया । वह्निः । आसा । विदुःऽतरः ।
अग्ने । रयिम् । मघवत्ऽभ्यः । नः । आ । वह । हव्यऽदातिम् । च । सुदय ॥ ९ ॥

हे [v]अग्ने [v]मन्द्रया [v]च[1] मोदयित्र्या[1] देवानाम् [v]आसा आस्यस्थानीयया [v]जिह्वया ज्वालया [v]वह्निः हविषां वोढा [v]विदुष्टरः विद्वत्तरः [v]सः प्रसिद्धस्त्वं [v]मघवद्भ्यः हविष्मद्भ्यः[2] [v]नः अस्मभ्यं [v]रयिं धनम् [v]आ [v]वह च । [v]हव्यदातिम् । हव्यानि ददातीति हव्यदातिर्यजमानः तम् । तथा च वाजसनेयिन आमनन्ति—' यजमानो वै हव्यदातिः ' (श. ब्रा. १. ४. १. २४) इति । [v]सूदय [v]च कर्मसु प्रेरय च ॥

ये राधांसि ददत्यश्व्या मघा कामेन श्रवसो महः ।
ताँ अंहसः पिपृहि पर्तृभिष्ट्वं शतं पूर्भिर्यविष्ठ्य ॥ १० ॥

ये । राधांसि । ददति । अश्व्या । मघा । कामेन । श्रवसः । महः ।
तान् । अंहसः । पिपृहि । पर्तृऽभिः । त्वम् । शतम् । पूःऽभिः । यविष्ठ्य ॥ १० ॥

हे [v]यविष्ठ्य युवतमाग्ने [v]त्वं [v]ये यजमानाः [v]महः महतः [v]श्रवसः यशसः [v]कामेन इच्छया । यशस्कामाः सन्त इत्यर्थः । [v]राधांसि साधकानि [v]अश्व्या अश्वात्मकानि [v]मघा मघानि [v]ददति [v]तान् दातॄन् [v]अंहसः पापात् शत्रोर्वा [v]पर्तृभिः रक्षासाधनभूतैः [v]शतम् अपरिमिताभिः [v]पूर्भिः नगरीभिश्च [v]पिपृहि पालय ॥

देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम् ।
उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥ ११ ॥

देवः । वः । द्रविणःऽदाः । पूर्णाम् । विवष्टि । आऽसिचम् ।
उत् । वा । सिञ्चध्वम् । उप । वा । पृणध्वम् । आत् । इत् । वः । देवः । ओहते ॥ ११ ॥

[v]द्रविणोदाः धनानां दाता [v]देवः अग्निः [v]वः युष्मदीयां [v]पूर्णां हविषा [v]आसिचम् आसिक्तां स्रुचं [v]विवष्टि कामयते । अतः [v]उत् [v]सिञ्चध्वं [v]वा सोमेन पात्रम् । [v]उप [v]पृणध्वं [v]वा सोमम् ।

---

१. ख-न-भ-श-मादयित्र्या । २. ख-न-भ-' हविष्मद्भ्यः ' नास्ति ।

वाशब्दौ समुच्चयार्थौ। ध्रुवग्रहेण होतृचमसं पूरयत चाग्नये सोमं यच्छत खेत्यर्थः। vआदित् अनन्तरमेव vदेवः अग्निः vवः युष्मान् vओहते वहति ॥

तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।
दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥ १२ ॥

तम्। होतारम्। अध्वरस्य। प्रऽचेतसम्। वह्निम्। देवाः। अकृण्वत।
दधाति। रत्नम्। विधते। सुऽवीर्यम्। अग्निः। जनाय। दाशुषे ॥ १२ ॥

vदेवाः vप्रचेतसं प्रकृष्टमतिमग्निम् vअध्वरस्य यज्ञस्य vवह्निं वोढारं vहोतारं च vअकृण्वत अकुर्वन्। किमर्थमित्यत आह। स च अग्निः vविधते परिचरते vदाशुषे हविषां प्रदात्रे vजनाय vसुवीर्यं शोभनवीर्योपेतं vरत्नं रमणीयं धनं vदधाति ददात्वित्यर्थः ॥ ॥ २२ ॥

'अग्ने भव सुषमिधा' इति सप्तर्चं सप्तदशं सूक्तं वसिष्ठस्यार्षमग्निदेवताकम्। सप्तापि द्विपदास्त्रिष्टुभः। तथैवानुक्रम्यते—'अग्ने भव सप्त द्वैपदं त्रैष्टुभम्' इति। अतिरात्रे षष्ठेऽहनि तृतीयसवने मैत्रावरुणशस्त्रे 'अग्ने भव' इति तृचोऽनुरूपः। सूत्र्यते हि—'अग्ने त्वं नोऽअन्तमोऽग्ने भव सुषमिधा समिद्ध इति स्तोत्रियानुरूपौ' (आश्व. श्रौ. ८. २) इति ॥

अग्ने भव सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीताम् ॥ १ ॥

अग्ने। भव। सुऽसमिधा। सम्ऽइद्धः। उत। बर्हिः। उर्विया। वि। स्तृणीताम् ॥ १ ॥

हे vअग्ने vसुषमिधा शोभनया समिधा vसमिद्धः vभव सम्यग्दीप्तो भव। vउत अपि च vबर्हिः vउर्विया विस्तीर्णम् उपस्तृणीतामध्वर्युः[1] ॥

उत द्वारं उशतीर्वि श्रयन्तामुत देवाँ उशत आ वहेह ॥ २ ॥

उत। द्वारः। उशतीः। वि। श्रयन्ताम्। उत। देवान्। उशतः। आ। वह। इह ॥२॥

vउत अपि च vउशतीः देवान् कामयमानाः vद्वारः यज्ञगृहस्य देव्यो वा। तथा च यास्कः—'द्वारो जवतेर्वा द्रवतेर्वा वारयतेर्वा' (निरु. ८. ९) इति। vवि vश्रयन्ताम्। vउत अपि च vउशतः यज्ञं कामयमानान् vदेवान् vइह यज्ञे vआ vवह ॥

अग्ने वीहि हविषा यक्षि देवान्त्स्वध्वरा कृणुहि जातवेदः ॥ ३ ॥

अग्ने। वीहि। हविषा। यक्षि। देवान्। सुऽअध्वरा। कृणुहि। जातऽवेदः ॥ ३ ॥

हे vजातवेदः जातधन vअग्ने vवीहि देवानभिगच्छ। vहविषा vदेवान् vयक्षि यज च। vस्वध्वरा स्वध्वरान् शोभनयज्ञांश्च vकृणुहि कुरु ॥

स्वध्वरा करति जातवेदा यक्षद्देवाँ अमृतान्पिप्रयच्च ॥ ४ ॥

सुऽअध्वरा। करति। जातऽवेदाः। यक्षत्। देवान्। अमृतान्। पिप्रयत्। च ॥ ४ ॥

---

१. श—विस्तृणीता°।

vजातवेदाः जातधनोऽग्निः vअमृतान् मरणरहितान् vदेवान् vस्वध्वरा स्वध्वरान् शोभनयज्ञान् vकरति करोतु vयक्षत् हविषा यजतु च। vपिप्रयत् स्तोत्रैः प्रीणयतु[1] vच ॥

वंस्व विश्वा वार्याणि प्रचेतः सत्या भवन्त्वाशिषो नो अद्य ॥ ५ ॥

वंस्व। विश्वा। वार्याणि। प्रचेत इति प्रऽचेतः। सत्याः। भवन्तु। आऽशिषः। नः। अद्य ॥५॥

हे vप्रचेतः प्रकृष्टमतिमन्नग्ने vविश्वा विश्वानि vवार्याणि वरणीयानि धनानि vवंस्व अस्मभ्यं देहि। vनः अस्माकम् vआशिषः vअद्य vसत्याः यथार्थाः vभवन्तु ॥

त्वामु ते दधिरे हव्यवाहं देवासो अग्न ऊर्ज आ नपातम् ॥ ६ ॥

त्वाम्। ऊँ इति। ते। दधिरे। हव्यऽवाहम्। देवासः। अग्ने। ऊर्जः। आ। नपातम् ॥६॥

हे vअग्ने vऊर्जः बलस्य vनपातं पुत्रम्। 'सूनुर्नपात्' इत्यपत्यनामसु पाठात्। vत्वामु त्वामेव vते प्रसिद्धाः vदेवासः देवाः vहव्यवाहं हविषो[2] वोढारम् vआ vदधिरे। अकुर्वन्नित्यर्थः ॥

ते तें देवाय दाशतः स्याम महो नो रत्ना वि दध इयानः ॥ ७ ॥

ते। ते। देवाय। दाशतः। स्याम। महः। नः। रत्ना। वि। दधः। इयानः ॥ ७ ॥

हे अग्ने vदेवाय द्योतमानाय vते तुभ्यं vते प्रसिद्धा वसिष्ठा वयं vदाशतः हवींषि ददतः vस्याम भवेम। अतः[3] vमहः महांस्त्वम् vइयानः उपगम्यमानो याच्यमानो वा vनः अस्मभ्यं vरत्ना रत्नानि रमणीयानि धनानि[4] vवि vदधः विधत्स्व ॥ ॥ २३ ॥ ॥ १ ॥

द्वितीयेऽनुवाके षोडश सूक्तानि। तत्र 'त्वे ह यत्पितरः' इति पञ्चविंशत्यृचं प्रथमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमिन्द्रदेवताकम्। द्वाविंशादिभिश्चतसृभिः सुदासनाम्नो[5] राज्ञो दानं स्तूयते। अतस्तास्तद्देवताकाः। अनुक्रम्यते हि—'त्वे ह यत्पञ्चाधिकैन्द्रं सुदासः पैजवनस्य चतस्रोऽन्त्या[6] दानस्तुतिः' इति। महाव्रत आदितः पञ्चदशर्चः शंसनीयाः। तथैव पञ्चमारण्यके सूत्रितं—'त्वे ह यत्पितरश्चिन्न इन्द्रेति पञ्चदश' (ऐ. आ. ५. २. २) इति ॥

त्वे ह यत्पितरश्चिन्न इन्द्र विश्वा वामा जरितारो असन्वन्।
त्वे गावः सुदुघास्त्वे ह्यश्वास्त्वं वसु देवयते वनिष्ठः ॥ १ ॥

त्वे इति। ह। यत्। पितरः। चित्। नः। इन्द्र। विश्वा। वामा। जरितारः। असन्वन्।
त्वे इति। गावः। सुऽदुघाः। त्वे इति। हि। अश्वाः। त्वम्। वसु। देवऽयते। वनिष्ठः ॥१॥

हे vइन्द्र vत्वे vह त्वय्येव vनः अस्माकं vपितरश्चित् पितरोऽपि vजरितारः स्तोतारः सन्तः vयत् यस्मात्कारणात् vविश्वा विश्वानि vवामा वामानि वननीयानि धनानि। तथा च यास्कः—'वामं वननीयं भवति' (निरु. ६. ३१) इति। vअसन्वन् अलभन्त तस्माद्वयमपि धनकामास्त्वां स्तुमः। तद्युक्तम्। vहि यस्मात् कारणात् vत्वे त्वयि vगावः vसुदुघाः दोग्धुं सुशकाः सन्ति vत्वे त्वयि vअश्वाः सन्ति vत्वं vवसु धनं vदेवयते देवं त्वामिच्छते यजमानाय vवनिष्ठः दातृतमो भवसि ॥

---

१. ख-भ-प्रीणयति। २. त-य-हविषाम्। ३. ख-भ-'अतः' नास्ति। ४. ख-भ-'धनानि' नास्ति। ५. ज्ञ-सुदानाम्नो। ६. ज्ञ-अन्त्याश्चतस्रो।

राजेव हि जनिभिः क्षेष्येवाव द्युभिरभि विदुष्कविः सन् ।
पिशा गिरो मघवन्गोभिरश्वैस्त्वायतः शिशीहि राये अस्मान् ॥ २ ॥

राजाऽइव । हि । जनिऽभिः । क्षेषि । एव । अव । द्युऽभिः । अभि । विदुः । कविः । सन् ।
पिशा । गिरः । मघऽवन् । गोभिः । अश्वैः । त्वाऽयतः । शिशीहि । राये । अस्मान् ॥२॥

हे इन्द्र त्वं [v]जनिभिः जायाभिः [v]राजेव [v]द्युभिः दीप्तिभिः सह [v]क्षेष्येव निवसस्येव। [v]हि इति पूरणः। किंच हे [v]मघवन् धनवन्निन्द्र [v]विदुः विद्वान् [v]कविः क्रान्तकर्मा क्रान्तप्रज्ञो वा [v]सन् [v]गिरः स्तोतॄनस्मान् [v]पिशा रूपेण हिरण्यादिना वा [v]गोभिः च [v]अश्वैः च [v]अभि अभितः रक्ष। [v]त्वायतः त्वत्कामान् [v]अस्मान् [v]राये [v]शिशीहि धनार्थं च संस्कुरु[1] ॥

इमा उ त्वा पस्पृधानासो अत्र मन्द्रा गिरो देवयन्तीरुप स्थुः ।
अर्वाचीं ते पथ्या राय एतु स्यामं ते सुमताविन्द्र शर्मन् ॥ ३ ॥

इमाः । ऊँ इति । त्वा । पस्पृधानासः । अत्र । मन्द्राः । गिरः । देवऽयन्तीः । उप । स्थुः ।
अर्वाचीं । ते । पथ्या । रायः । एतु । स्याम । ते । सुऽमतौ । इन्द्र । शर्मन् ॥ ३ ॥

हे [v]इन्द्र [v]त्वा त्वाम् [v]अत्र यज्ञे स्तोतरि वा प्रवर्तमानाः [v]पस्पृधानासः स्पर्धमानाः [v]मन्द्राः मोदमानाः [v]इमाः[2] [v]गिरः स्तुतयः [v]उप [v]स्थुः उपतिष्ठन्ति। अतः [v]ते तव [v]रायः धनस्य [v]पथ्या सृतिः [v]अर्वाची अस्मदभिमुखी [v]एतु गच्छतु। हे इन्द्र वयं च [v]ते [v]सुमतौ सुष्ठुतौ वर्तमानाः [v]शर्मन् शर्मणि सुखे [v]स्याम भूयास्म ॥

धेनुं न त्वा सूयवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वसिष्ठः ।
त्वामिन्मे गोपतिं विश्व आहा न इन्द्रः सुमतिं गन्त्वच्छ ॥ ४ ॥

धेनुम् । न । त्वा । सुऽयवसे । दुदुक्षन् । उप । ब्रह्माणि । ससृजे । वसिष्ठः ।
त्वाम् । इत् । मे । गोऽपतिम् । विश्वः । आह । आ । नः । इन्द्रः । सुऽमतिम् । गन्तु । अच्छ ॥४॥

हे इन्द्र [v]सुयवसे सुतृणे गोष्ठे वर्तमानां [v]धेनुं [v]न धेनुमिव सुहविष्के यज्ञगृहे। दृष्टान्त-सामर्थ्यात् दार्ष्टान्तिकलाभः। वर्तमानं त्वां [v]दुदुक्षन्। संहितायां व्यत्ययेन दकारः। कामान् दोग्धुमिच्छन् [v]वसिष्ठः [v]ब्रह्माणि वत्सस्थानीयानि स्तोत्राणि [v]उप [v]ससृजे उपसृजते। [v]मे मम [v]विश्वः सर्वः जनः [v]त्वामित् त्वामेव [v]गोपतिं गवां स्वामिनम् [v]आह ब्रवीति। अथ परोक्षस्तुतिः। [v]नः अस्माकं [v]सुमतिं सुष्टुतिम् [v]अच्छ अभि [v]इन्द्रः [v]आ [v]गन्तु आगच्छतु ॥

अर्णांसि चित्पप्रथाना सुदास इन्द्रो गाधान्यकृणोत्सुपारा ।
शर्धन्तं शिम्युमुचथस्य नव्यः शापं सिन्धूनामकृणोदशस्तीः ॥ ५ ॥

अर्णांसि । चित् । पप्रथाना । सुऽदासे । इन्द्रः । गाधानि । अकृणोत् । सुऽपाराः ।
शर्धन्तम् । शिम्युम् । उचथस्य । नव्यः । शापम् । सिन्धूनाम् । अकृणोत् । अशस्तीः ॥५॥

---

१. ख-भ-कुरु । २. घ-देवयन्तीः देवं त्वामिच्छयन्तीः इमाः; य-इमाः देवयन्तीः देवान् कामयमानाः ।

vनव्यः स्तुत्यः vइन्द्रः vअर्णांसि शत्रुभिर्विदारितायाः परुष्ण्याः उदकानि vप्रप्रथाना vचित् प्रथमानान्यपि vसुदासे राज्ञे vगाधानि[1] vसुपारा सुपाराणि पारयितुं तर्तुं योग्यानि च vअकृणोत् अकरोत्। अपि च vशर्धन्तम् उत्सहमानं[2] vशिम्युं बाधमानं vशापं विश्वरूपोऽवमात्मनोऽभिशापम् vअशस्तीः अभिशस्तीश्च vउचथस्य स्तोतुः vसिन्धूनां नदीनाम् vअकृणोत् अकरोत्॥ ॥ २४ ॥

पुरोळा इत्तुर्वशो यक्षुरासीद्राये मत्स्यासो निशिता अपीव।
श्रुष्टिं चक्रुर्भृगवो द्रुह्यवश्च सखा सख्यायमतरद्विषूचोः॥ ६॥

पुरोळाः। इत्। तुर्वशः। यक्षुः। आसीत्। राये। मत्स्यासः। निऽशिताः। अपिंऽइव। श्रुष्टिम्। चक्रुः। भृगवः। द्रुह्यवः। च। सखा। सख्यायम्। अतरत्। विषूचोः॥ ६॥

vयक्षुः यज्ञकुशलः॥ यजेः सन्प्रत्ययो न तु सनन्तः। अतो न द्विर्भावः॥ vपुरोळाः पुरोगामी पुरोदाता वा। vइत् इति पूरणः। vतुर्वशः नाम राजासीत्। सः तुर्वशः vराये धनप्राप्तये इन्द्रस्य सख्यं सुदासं जगाम। vमत्स्यासः vइव जालनिहिता मत्स्या इव vनिशिताः[3] नियन्त्रिताः[3] vअपि vभृगवः vद्रुह्यवश्च योधाश्च सुदासः तुर्वशस्य च vश्रुष्टिम् आशुप्राप्तिं vचक्रुः। vविषूचोः विष्वगञ्चतोरुभयोर्मध्ये vसखा सुदासश्चेन्द्रः vसख्यायं सुदासम् vअतरत् अतारयत्। तुर्वशं चावधीदित्यर्थः। यद्वा। यक्षुर्यज्ञशीलः पुरोळाः पुरोदाता तुर्वशो नाम राजासीत्। तेन मत्स्यासो मत्स्यजनपदा[4] निशिता बाधिता[5] आसन्। अपि च भृगवो द्रुह्यवश्च श्रुष्टिं सुखं तुर्वशस्य चक्रुः। विषूचोर्विष्वगञ्चतोरुभयोर्मध्ये सखा तुर्वशस्य सखेन्द्रः सख्यायं राजानमतरत् अतारयत्॥

आ पक्थासो भलानसो भनन्तालिनासो विषाणिनः शिवासः।
आ योऽनयत्सधमा आर्यस्य गव्या तृत्सुभ्यो अजगन्युधा नॄन्॥ ७॥

आ। पक्थासः। भलानसः। भनन्त। आ। अलिनासः। विषाणिनः। शिवासः।
आ। यः। अनयत्। सधऽमाः। आर्यस्य। गव्या। तृत्सुऽभ्यः। अजगन्। युधा। नॄन्॥७॥

vपक्थासः पक्था हविषां पाचकाः vभलानसः भद्रमुखाः। भलेति भद्रवाची। vअलिनासः अलिनाः। तपोभिरप्रवृद्धा[6] इत्यर्थः। vविषाणिनः कण्डूयनार्थं कृष्णविषाणहस्ताः। दीक्षिता इत्यर्थः। vशिवासः शिवाः यागादिना सर्वस्य लोकस्य शिवकराः[7]। यागेन हि शिवं भवति लोकस्य। vआ vभनन्त अभिष्टुवन्ति तमिन्द्रम्। भनतिः शब्दकर्मा 'नौति भनति' इति शब्दकर्मसु पाठात्। vयः इन्द्रः vसधमाः। सोमपानेन सह माद्यतीति सधमादः। सधमाद एव सधमाः। vआर्यस्य कर्मशीलस्य vगव्या गोसंघान् vतृत्सुभ्यः हिंसकेभ्यः vआ vअनयत्। vअजगन् अजगत् स्वयं च गोसंघान् लेभे। vयुधा युद्धेन तान् vनॄन्[8] शत्रून् जघान चेति शेषः॥

दुराध्यो३ अर्दितिं स्तवयन्तोऽचेतसो वि जगृभ्रे परुष्णीम्।
मन्ये वि व्यक्पृथिवीं पत्यमानः पशुष्कविरशयच्चायमानः॥ ८॥

---

१. घ–गाधानि तलस्पर्शानि। २. ख-घ-ङ-त-न-भ-श–उत्साहमानम्। ३. ख–निशिताः अवयन्त्रिताः; ङ-न-भ–निशितावनियन्त्रिताः; त–निशितावयन्त्रिताः। ४. ख–मत्स्या इव जानपदाः; भ–मत्स्य इव जनपदाः। ५. ङ-त-न-श–वावधिता। ६. घ-श–तपोभिः प्रवृद्धाः। ७. ख-न-भ–शिवतराः। ८. ख-ङ-त-न-भ-श–'नॄन्' नास्ति।

दुःऽआध्यः । अदितिम् । स्रेवयन्तः । अचेतसः । वि । जगृभ्रे । परुष्णीम् ।
मह्ना । अविव्यक् । पृथिवीम् । पत्यमानः । पशुः । कविः । अशयत् । चायमानः ॥ ८ ॥

vदुराध्यः दुष्टाभिसंधयः vअचेतसः मन्दमतयः सुदासः शत्रवः vअदितिम् अदीनां vपरुष्णीं नदीं vस्रेवयन्तः vवि vजगृभ्रे । विग्रहः कूलभेदः । तमकुर्वन् । परुष्ण्याः कूलं बिभिदुरित्यर्थः । सः[1] सुदासः vमह्ना इन्द्रप्रसादलब्धेन महिम्ना vपृथिवीम् vअविव्यक् तदैव व्याप्नोत् । न पुनरुदकेनाबाध्यत । ततः सुदासः शत्रुः vचायमानः चयमानस्य पुत्रः vकविः कविनामा vपत्यमानः पलायमानः[2] vपशुः यागे संज्ञप्तः पशुरिव vअशयत् अशेत । सुदासा निहत इत्यर्थः ॥

ईयुरर्थं न न्यर्थं परुष्णीमाशुश्चनेदभिपित्वं जगाम ।
सुदास इन्द्रः सुतुकाँ अमित्रानरन्धयन्मानुषे वध्रिवाचः ॥ ९ ॥

ईयुः । अर्थम् । न । निऽअर्थम् । परुष्णीम् । आशुः । चन । इत् । अभिऽपित्वम् । जगाम ।
सुऽदासे । इन्द्रः । सुऽतुकान् । अमित्रान् । अरन्धयत् । मानुषे । वध्रिऽवाचः ॥ ९ ॥

अथेन्द्रः परुष्ण्या विच्छिन्नानि पर्वाणि संदधे । ततः परुष्ण्या आपः यथापूर्वम् vअर्थं गन्तव्यमेव प्रवणदेशं[3] प्रति vपरुष्णीम् vईयुः आययां चक्रुः ॥ 'इण् गतौ' इति धातोरन्तर्भावितण्यर्थात् लिटि ईयुः इति[4]। अतो द्विकर्मकमाख्यातम् ॥ vन्यर्थम् अगन्तव्यं[5] परुष्ण्याः पार्श्वयोः स्थितं निम्नं देशं प्रति परुष्णीं vन ईयुः । vआशुश्चन राज्ञः सुदासोऽश्वोऽपि vअभिपित्वम् अभिप्राप्तव्यमेव vजगाम । vइन्द्रः च vसुदासे राज्ञे vमानुषे लोके vवध्रिवाचः जल्पकान् vअमित्रान् शत्रून् vसुतुकान् सुतोकान् । 'तुक् तोकम्' इत्यपत्यनामसु पाठात् । vअरन्धयत् वशमानयत् ॥

ईयुर्गावो न यवसादगोपा यथाकृतमभि मित्रं चितासः ।
पृश्निगावः पृश्निनिप्रेषितासः श्रुष्टिं चक्रुर्नियुतो रन्तयश्च ॥ १० ॥

ईयुः । गावः । न । यवसात् । अगोपाः । यथाऽकृतम् । अभि । मित्रम् । चितासः ।
पृश्निऽगावः । पृश्निऽनिप्रेषितासः । श्रुष्टिम् । चक्रुः । निऽयुतः । रन्तयः । च ॥ १० ॥

यदेन्द्रः सुदासो रक्षणार्थमागच्छति तदा vपृश्निनिप्रेषितासः पृश्निनिप्रेषिताः पृश्न्या मात्रा नितरां प्रहिताः vचितासः संहता जानन्तो वा vपृश्निगावः । पृश्निवर्णा गावोऽश्वा येषां ते पृश्निगावः मरुतः vयथाकृतम् इन्द्रस्य साहाय्यं करवामेति यथा पूर्वं समयः कृतस्तं समयमनतिक्रम्य vमित्रम् इन्द्रं vयवसात् । निमित्तार्थे पञ्चमी । यवसं निमित्तीकृत्य vअगोपाः गोपालेनारक्षिताः vगावो vन गाव इव vअभि vईयुः अभिजग्मुः । vरन्तयः रममाणाः vनियुतः मरुतामश्वाः vच । vश्रुष्टिं शीघ्रप्राप्तिं vचक्रुः । तस्मिन् युद्धे मरुत इन्द्रं साहाय्यार्थमभ्यगच्छन्नित्यर्थः ॥ ॥ २५ ॥

एकं च यो विंशतिं च श्रवस्या वैकर्णयोर्जनान्राजा न्यस्तः ।
दस्मो न सद्मन्नि शिशाति बर्हिः शूरः सर्गमकृणोदिन्द्र एषाम् ॥ ११ ॥

---

१. ख-भ-'सः' नास्ति । २. ख-झ-त-न-भ-श-पालयमानः । ३. ख-घ-भ-प्रवणं देशम् । ४. ख-इति रूपम् । ५. ख-झ-त-न-भ-श-आगन्तव्यम् ।

एकम्। च। यः। विंशतिम्। च। श्रवस्या। वैकर्णयोः। जनान्। राजा। नि। अस्तरित्यस्तः। दस्मः। न। सद्मन्। नि। शिशाति। बर्हिः। शूरः। सर्गम्। अकृणोत्। इन्द्रः। एषाम् ॥ ११ ॥

[v]यः सुदासो[1] राजा [v]श्रवस्या यशस इच्छया अन्नेच्छया वा परुष्ण्याः पार्श्वस्थयोः [v]वैकर्णयोः जनपदयोर्विद्यमानान् [v]एकं [v]च [v]विंशतिं [v]च [v]जनान् [v]न्यस्तः आत्मना अहन् सः [v]राजा [v]दस्मो [v]न दर्शनीयो युवाध्वर्युरिव [v]सद्मन् यज्ञगृहे [v]बर्हिः यस्मिन् युद्धे सपत्नान् [v]नि [v]शिशाति नितरां लुनाति तस्मिन् युद्धे [v]शूरः [v]इन्द्रः [v]एषां मरुतां [v]सर्गं प्रसवम् [v]अकृणोत् सुदासः साहाय्यार्थमकरोत् ॥

अधं श्रुतं कवषं वृद्धमप्स्वनुं द्रुह्युं नि वृणग्वज्रबाहुः ।
वृणाना अत्र सख्याय सख्यं त्वायन्तो ये अमदन्ननु त्वा ॥ १२ ॥

अधं। श्रुतम्। कवषम्। वृद्धम्। अप्ऽसु। अनु। द्रुह्युम्। नि। वृणक्। वज्रेऽबाहुः। वृणानाः। अत्र। सख्याय। सख्यम्। त्वाऽयन्तः। ये। अमदन्। अनु। त्वा ॥ १२ ॥

[v]अध अपि च [v]वज्रबाहुः इन्द्रः [v]श्रुतं [v]कवषं च [v]वृद्धं च त्रीन् तथा [v]द्रुह्युम् [v]अनु आनुपूर्व्येण [v]अप्सु उदकेषु [v]नि [v]वृणक् न्यमज्जयदित्यर्थः। [v]अत्र अस्मिन्नवसरे [v]ये [v]त्वायन्तः त्वत्कामाः [v]त्वा त्वाम् [v]अनु [v]अमदन् अस्तुवन् ते सखायः [v]सख्याय[2] सख्यार्थं[2] त्वां [v]वृणानाः [v]सख्यं लेभिर इति शेषः ॥

वि सद्यो विश्वा दंहितान्येषामिन्द्रः पुरः सहसा सप्त दर्दः ।
व्यानवस्य तृत्सवे गयं भाग्जेष्म पुरुं विदथे मृध्रवाचम् ॥ १३ ॥

वि। सद्यः। विश्वा। दंहितानि। एषाम्। इन्द्रः। पुरः। सहसा। सप्त। दर्दरितिं दर्दः। वि। आनवस्य। तृत्सवे। गयम्। भाक्। जेष्म। पुरुम्। विदथे। मृध्रऽवाचम् ॥ १३ ॥

[v]एषां कवषादीनां [v]विश्वा विश्वानि [v]दंहितानि दृढानि दुर्गाणि [v]पुरः नगरीश्च तद्रक्षासाधनभूतान् [v]सप्त प्राकारांश्च [v]इन्द्रः [v]सहसा बलेन [v]सद्यः एव [v]वि [v]ददेः विदारयामास। अपि च [v]आनवस्य अनोः संबन्धिनो बलस्य अनोः पुत्रस्य वा [v]गयं गृहं धनं वा [v]तृत्सवे तृत्सुनामकाय राज्ञे तृत्सूनां गणाय वा [v]वि [v]भाक् व्यभजत्। अदादित्यर्थः। इत्थमिन्द्रं स्तुवन्तो वयं [v]विदथे युद्धे [v]मृध्रवाचं बाधवाचं [v]पूरुं मनुष्यं [v]जेष्म जयेम ॥

नि गव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट् सहस्रा ।
षष्टिर्वीरासो अधि षड् दुवोयु विश्वेदिन्द्रस्य वीर्या कृतानि ॥ १४ ॥

नि। गव्यवः। अनवः। द्रुह्यवः। च। षष्टिः। शता। सुसुपुः। षट्। सहस्रा। षष्टिः। वीरासः। अधि। षट्। दुवःऽयु। विश्वा। इत्। इन्द्रस्य। वीर्या। कृतानि ॥ १४ ॥

[v]गव्यवः गोकामाः [v]अनवः अनोः संबन्धिनः [v]द्रुह्यवः द्रुह्योः संबन्धिनः [v]च [v]वीरासः वीराः [v]षष्टिः [v]शता शतानि। सहस्राणीत्यर्थः। [v]षट् [v]सहस्रा सहस्राणि च [v]षष्टिः च [v]अधि [v]षट् अधिकाः

---

१. ज्ञ–सुदाः। २. ख-घ-ज्ञ-भ–सख्याय; ज्ञ-त२-श–सखायः; त३-न–सख्यायः।

षट् च [v]दुवोयु दुवोयुवे। चतुर्थीलुक्। परिचरणकामाय सुदासे। 'नमस्यति दुवस्यति' इति परिचरणकर्मसु पाठात्। [v]नि [v]सुषुपुः नितरां शेरते। निहता[1] इत्यर्थः। तान्येतानि [v]विश्वा विश्वानि [v]कृतानि कार्याणि [v]इन्द्रस्य [v]इत् इन्द्रस्यैव [v]वीर्या वीर्याणीति ॥

इन्द्रेणैते तृत्सवो वेविषाणा आपो न सृष्टा अधवन्त नीचीः ।
दुर्मित्रासः प्रकलविन्मिमाना जहुर्विश्वानि भोजना सुदासे ॥ १५ ॥

इन्द्रेण । एते । तृत्सवः । वेविषाणाः । आपः । न । सृष्टाः । अधवन्त । नीचीः ।
दुःऽमित्रासः । प्रकलऽवित् । मिमानाः । जहुः । विश्वानि । भोजना । सुऽदासे ॥ १५ ॥

कदाचिदिन्द्रेण रक्षिता अप्यन्यदा तेनैव बाध्यन्ते[2]। [v]एते [v]तृत्सवः [v]दुर्मित्रासः दुष्टमित्राः [v]प्रकलवित् अजानन्तः[3] [v]इन्द्रेण [v]वेविषाणाः युद्धार्थं संगताः [v]सृष्टाः पलायनार्थमुद्युक्ताः [v]नीचीः नीचीनाः [v]आपो [v]न आप इव [v]अधवन्त अधावन्त। ततः [v]मिमानाः सुदासा बाध्यमानाः [v]विश्वानि [v]भोजना भोग्यानि धनानि [v]सुदासे राज्ञे [v]जहुः ॥ ॥ २६ ॥

अर्धं वीरस्य शृतपामनिन्द्रं परा शर्धन्तं नुनुदे अभि क्षाम् ।
इन्द्रो मन्युं मन्युम्यो मिमाय भेजे पथो वर्तनिं पत्यमानः ॥ १६ ॥

अर्धम् । वीरस्य । शृतऽपाम् । अनिन्द्रम् । परा । शर्धन्तम् । नुनुदे । अभि । क्षाम् ।
इन्द्रः । मन्युम् । मन्युऽम्यः । मिमाय । भेजे । पथः । वर्तनिम् । पत्यमानः ॥ १६ ॥

[v]इन्द्रः [v]अभि [v]क्षां भूमिमभि। भूम्यामित्यर्थः। [v]वीरस्य वीर्ययुक्तस्य[4] सुदासः [v]अर्धं हिंसकम् ॥ अर्धोहिंसाकर्मणोऽर्धशब्दस्य निष्पत्तिः ॥ [v]अनिन्द्रम्। यस्य बुद्धाविन्द्रो नास्त्यसावनिन्द्रः। तम्। इन्द्रमगणयन्तमित्यर्थः। [v]शृतपां शृतस्य क्षीरादेर्हविषः पातारं [v]शर्धन्तम् उत्साहमानं[5] [v]परा [v]नुनुदे। किंच [v]मन्युम्यः मन्युकर्तुर्मन्युना मिनतो हिंसतो वा शत्रोः [v]मन्युं क्रोधं [v]मिमाय बबाधे। अथ सुदासः शत्रुः [v]पथः मार्गान् [v]पत्यमानः गच्छन् [v]वर्तनिं पलायनमार्गं [v]भेजे प्राप ॥

आध्रेण चित्तद्वेकं चकार सिंह्यं चित्पेत्वेना जघान ।
अव स्रक्तीर्वेश्यावृश्चदिन्द्रः प्रायच्छद्विश्वा भोजना सुदासे ॥ १७ ॥

आध्रेण । चित् । तत् । ऊँ इति । एकम् । चकार । सिंह्यम् । चित् । पेत्वेन । जघान ।
अव । स्रक्तीः । वेश्या । अवृश्चत् । इन्द्रः । प्र । अयच्छत् । विश्वा । भोजना । सुऽदासे ॥ १७ ॥

[v]इन्द्रः [v]तत् तदा [v]आध्रेण [v]चित् दरिद्रेणापि सुदासा [v]एकं मुख्यं दानकर्म [v]चकार कारयामास। [v]सिंह्यं [v]चित् प्रवयाः सिंहः सिंह्यः। तमपि [v]पेत्वेन छागेन [v]जघान घातयामास। [v]वेश्या। वेशी सूची। तया [v]स्रक्तीः यूपादेरश्रीन् [v]अव [v]अवृश्चत् अववृक्तवान्। वेश्यादेः कृत्यं सूच्यैवाकरोदित्यर्थः। तान्येतानि त्रीणि कर्माणि असंभावितानीति नाशङ्कनीयानि इन्द्रस्य

---

१. ख-ञ-त-न-भ-श–निहिताः । २. त-न–बाधन्ते । ३. ख-भ–प्रकलविदः वणिजः । प्रकलवित् वणिक् भवति कलाश्च वेद प्रकलाश्चेति यास्कः । ४. ख-श–वीरयुक्तस्य । ५. ख-घ-ञ-त-न-भ-श–उत्साहमानम् ।

महिम्नोऽधिकत्वात्। [v]विश्वा विश्वानि [v]भोजना भोजनानि भोग्यानि धनानि [v]सुदासे राज्ञे [v]प्राय-च्छत् अदात्च ॥

शश्वन्तो हि शत्रवो ररधुष्टे भेदस्य चिच्छर्धतो विन्द रन्धिम् ।
मर्ताँ एनः स्तुवतो यः कृणोति तिग्मं तस्मिन्नि जहि वज्रमिन्द्र ॥ १८ ॥

शश्वन्तः । हि । शत्रवः । ररधुः । ते । भेदस्य । चित् । शर्धतः । विन्द । रन्धिम् ।
मर्तान् । एनः । स्तुवतः । यः । कृणोति । तिग्मम् । तस्मिन् । नि । जहि । वज्रम् । इन्द्र ॥१८॥

हे [v]इन्द्र [v]ते तव [v]शत्रवः अरयः [v]शश्वन्तः बहवः [v]ररधुः वशमीयुः । [v]चित् अपि च [v]शर्धतः उत्साहमानस्य[1] [v]भेदस्य । भिनत्ति मर्यादा इति भेदो नास्तिकः । तस्य । यद्वा । भेदो नाम सुदासः शत्रुः कश्चित् । तस्येत्यर्थः । [v]रन्धिं वशीकरं [v]विन्द लभस्व । [v]यः भेदः [v]स्तुवतः त्वां स्तुवतः [v]मर्तान् मर्त्यान् प्रति [v]एनः पापं [v]कृणोति करोति [v]तस्मिन् भेदे [v]तिग्मं निशितं योद्धारमुत्साहयन्तम् । तथा च यास्कः—' तिग्मं तेजतेरुत्साहकर्मणः ' (निरु. १०. ६) इति । [v]वज्रम् । वजति गच्छत्येव शत्रुं न प्रतिहन्यत इति वज्रः । तम् ॥ वज्रशब्दो वजेः ' ऋज्रेन्द्राग्रवज्रविप्र° ' इत्यादिना रन्प्रत्ययान्तो निपातितः ॥ तं[2] [v]जहि । वज्रेण भेदं प्रहरेत्यर्थः ॥

आवदिन्द्रं यमुना तृत्सवश्च प्रात्र भेदं सर्वताता मुषायत् ।
अजासश्च शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुरश्व्यानि ॥ १९ ॥

आवत् । इन्द्रम् । यमुना । तृत्सवः । च । प्र । अत्र । भेदम् । सर्वऽताता । मुषायत् ।
अजासः । च । शिग्रवः । यक्षवः । च । बलिम् । शीर्षाणि । जभ्रुः । अश्व्यानि ॥ १९ ॥

[v]अत्र अस्मिन् [v]सर्वताता सर्वतातौ युद्धे य इन्द्रः [v]भेदं नास्तिकं भेदनामकं वा सुदासः शत्रुं [v]प्र [v]मुषायत् प्रामुष्णात् । अवधीदित्यर्थः । तम् [v]इन्द्रं [v]यमुना [v]आवत् अतोषयत् । तत्तीर-वासी जनः सर्वोऽप्यतोषयदित्यर्थः । [v]तृत्सवः तृत्सोः पुरुषाश्चावन् । आवत् इत्येकवचनं बहुवचनान्ततया विपरिणतं सदत्र संबध्यते । किंच [v]अजासः अजाः जनपदाः [v]शिग्रवः जनपदाः [v]यक्षवश्च जनपदाः [v]अश्व्यानि अश्वसंबन्धीनि [v]शीर्षाणि शिरांसि । युद्धे हतानामश्वानां शिरांसीत्यर्थः । [v]बलिम् उपहारं तस्मा इन्द्राय[3] उप [v]जभ्रुः उपजहुः । यद्वा । अश्व्यानि शीर्षाणि युद्धे गृहीतान् मुख्यानश्वानिन्द्राय उपहारं जहुरित्यर्थः ॥

न ते इन्द्र सुमतयो न रायः संचक्षे पूर्वी उषसो न नूत्नाः ।
देवंकं चिन्मान्यमानं जघन्थाव त्मना बृहतः शम्बरं भेत् ॥ २० ॥

न । ते । इन्द्र । सुऽमतयः । न । रायः । सम्ऽचक्षे । पूर्वीः । उषसः । न । नूत्नाः ।
देवंकम् । चित् । मान्यमानम् । जघन्थ । अव । त्मना । बृहतः । शम्बरम् । भेत् ॥ २० ॥

हे [v]इन्द्र [v]ते तव [v]पूर्वाः पुरातनाः [v]सुमतयः शोभनमतयः [v]रायः धनानि च [v]उषसो [v]न उषस इव [v]न[4] [v]संचक्षे संख्यातुं न शक्याः । [v]न [v]नूत्नाः नूतनाश्च सुमतयो रायश्च न संचक्षे ।

---

१. घ-श–उत्साहमानस्य । २. य–तेन । ३. ख-न-भ–बलाय । ४. ख-ङ्ग-त-न-भ-श–' न ' नास्ति ।

किंच त्वं vमाम्यमानं मन्यमानस्य पुत्रं vदेवकं देवकनामानं शत्रुं vजघन्थ अवधीः । vत्मना स्वयमेव vबृहतः महतः शैलात् vशम्बरं च vअव vभेत् अवाभैस्सीरिति ॥ ॥ २७ ॥

प्र ये गृहादममदुस्त्वाया पराशरः शतयातुर्वसिष्ठः ।
न ते भोजस्य सख्यं मृषन्ताधा सूरिभ्यः सुदिना व्युच्छान् ॥ २१ ॥

प्र । ये । गृहात् । अममदुः । त्वाऽया । पराऽशरः । शतऽयातुः । वसिष्ठः ।
न । ते । भोजस्य । सख्यम् । मृषन्त । अध । सूरिऽभ्यः । सुऽदिना । वि । उच्छान् ॥२१॥

हे इन्द्र vपराशरः vशतयातुः बहुरक्षाः । बहूनि रक्षांसि बाधितुं यं कामयन्ते स शतयातुः, बहूनां रक्षसां शातयिता वा । शक्तिः vवसिष्ठः चैवमादयः vये ऋषयः vत्वाया त्वदिच्छया vगृहात् गृहं प्राप्य ॥ ल्यब्लोपे द्वितीयार्थे पञ्चमी (पा. सू. २. ३. २८. १) ॥ यद्वा गृहात् गृहे । सप्तम्यर्थे पञ्चमी । vप्र vअममदुः त्वां प्रतुष्टुवुः प्रकर्षेण तर्पितवन्तो वा ते पराशरप्रभृतयः vभोजस्य भोजकस्य पालकस्य vते तव vसख्यं सख्युः कर्म स्तोत्रं यजनं वा vन vमृषन्त न विस्मरन्ति । ' मृष मर्षे ' । मर्षो मर्षणम् । तन्न कुर्वन्तीत्यर्थः । यतो न विस्मरन्ति vअध अतो हेतोः vसूरिभ्यः सूरीणां स्तोतॄणामेषाम् । अत्र विभक्तिव्यत्ययः । vसुदिना सुदिनानि vव्युच्छान् व्युच्छन्ति निवसन्ति । उपगच्छन्तीत्यर्थः ॥

द्वे नप्तुर्देववतः शते गोर्द्वा रथा वधूमन्ता सुदासः ।
अर्हन्नग्ने पैजवनस्य दानं होतेव सद्म परयेमि रेभन् ॥ २२ ॥

द्वे इति । नप्तुः । देवऽवतः । शते इति । गोः । द्वा । रथा । वधूऽमन्ता । सुऽदासः ।
अर्हन् । अग्ने । पैजऽवनस्य । दानम् । होताऽइव । सद्म । परि । एमि । रेभन् ॥ २२ ॥

vदेववतः राज्ञः vनप्तुः पौत्रस्य vपैजवनस्य पिजवनपुत्रस्य vसुदासः राज्ञः vगोः गवां vद्वे vशते vवधूमन्ता वधूसंयुक्तौ vद्वा द्वौ vरथा रथौ च देयं vदानं दानभूतान् vरेभन् इन्द्रं स्तुवन् अत एव vअर्हन् योग्योऽहं वसिष्ठो हे vअग्ने vसद्म यज्ञगृहं vहोतेव वषट्कर्तेव vपर्येमि । अत्राग्नेः संबोधनं सर्वदेवमुख्यत्वप्रतिपादनार्थं न तु देवतात्वज्ञापनार्थमतद्देवताकत्वादस्य सूक्तस्य ॥

चत्वारो मा पैजवनस्य दानाः स्मद्दिष्टयः कृशनिनो निरेके ।
ऋज्रासो मा पृथिविष्ठाः सुदासस्तोकं तोकाय श्रवसे वहन्ति ॥ २३ ॥

चत्वारः । मा । पैजऽवनस्य । दानाः । स्मत्ऽदिष्टयः । कृशनिनः । निरेके ।
ऋज्रासः । मा । पृथिविऽस्थाः । सुऽदासः । तोकम् । तोकाय । श्रवसे । वहन्ति ॥२३॥

vपैजवनस्य पिजवनपुत्रस्य vसुदासः राज्ञः vस्मद्दिष्टयः प्रशस्तातिसर्जनाः श्रद्धादिदानाङ्गयुक्ताः vकृशनिनः हिरण्यालंकारवन्तः vनिरेके दुर्गतौ सत्याम् vऋज्रासः ऋजुगामिनः vपृथिविष्ठाः पृथिव्यां सुप्रतिष्ठिताः[1] vदानाः देयभूताः vचत्वारः अश्वाः vतोकं पुत्रवत्पालनीयं मां वसिष्ठं रथे स्थितं vतोकाय तोकस्य पुत्रस्य । षष्ठ्यर्थे चतुर्थी । vश्रवसे अन्नाय यशसे वा vवहन्ति । पुनः vमा इति पूरणः ॥

---

१. ख–समधिष्ठिताः ।

यस्य श्रवो रोदसी अन्तरुर्वी शीर्ष्णेशीर्ष्णे विबभाजा विभक्ता ।
सप्तेदिन्द्रं न स्रवतो गृणन्ति नि युध्यामधिमंशिशादभीके ॥ २४ ॥

यस्य । श्रवः । रोदसी इति । अन्तः । उर्वी इति । शीर्ष्णेऽशीर्ष्णे । विऽबभाज । विऽभक्ता ।
सप्त । इत् । इन्द्रम् । न । स्रवतः । गृणन्ति । नि । युध्यामधिम् । अशिशात् । अभीके ॥२४॥

[v]यस्य सुदासः [v]श्रवः यशः [v]उर्वी विस्तीर्णे [v]रोदसी द्यावापृथिव्यौ [v]अन्तः । विस्तीर्णयोर्द्यावापृथिव्योर्मध्ये वर्तत इत्यर्थः । यश्च सुदाः [v]विभक्ता धनस्य प्रदाता [v]शीर्ष्णेशीर्ष्णे श्रेष्ठाय श्रेष्ठाय [v]विबभाज धनं प्रददौ तं सुदासं [v]सप्तेत् सप्तैव लोकाः [v]इन्द्रं [v]न इन्द्रमिव [v]गृणन्ति स्तुवन्ति । किंच [v]स्रवतः नद्यः [v]अभीके युद्धे [v]युध्यामधिं युध्यामधिनामकं सपत्नं [v]नि [v]अशिशात् न्यहन् ॥

इमं नरो मरुतः सश्चतानु दिवोदासं न पितरं सुदासः ।
अविष्टना पैजवनस्य केतं दूणाशं क्षत्रमजरं दुवोयु ॥ २५ ॥

इमम् । नरः । मरुतः । सश्चत । अनु । दिवःऽदासम् । न । पितरम् । सुऽदासः ।
अविष्टन । पैजऽवनस्य । केतम् । दुःऽनशम् । क्षत्रम् । अजरम् । दुवःऽयु ॥ २५ ॥

हे [v]नरः नेतारः [v]मरुतः [v]इमं सुदासं राजानं [v]सुदासः राज्ञः [v]पितरं [v]दिवोदासं [v]न दिवोदासमिव । दिवोदास इति पिजवनस्यैव[1] नामान्तरम् । [v]अनु [v]सश्चत अनुसेवध्वम् । किंच [v]दुवोयु परिचरणकामस्य ॥ षष्ठ्या लुक् ॥ [v]पैजवनस्य पिजवनपुत्रस्य सुदासः [v]केतं मन्त्रं गृहं वा [v]अविष्टन रक्षत । अपि चास्य सुदासः [v]क्षत्रं बलं [v]दूणाशं दुर्नशमविनाशि [v]अजरम् अशिथिलं चास्तु ॥ ॥ २८॥

'यस्तिग्मशृङ्गः' इत्येकादशर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तं–'यस्तिग्मशृङ्ग एकादश' इति । आभिप्लविके पञ्चमेऽहन्येतन्निविद्धानम् । सूत्रितं च—'कया शुभा यस्तिग्मशृङ्ग इति मध्यंदिनः[2]' (आश्व. श्रौ. ७. ७) इति । विषुवति निष्केवल्यशस्त्रेऽप्येतत्सूक्तम् । सूत्रितं च—'यस्तिग्मशृङ्गोऽभि त्यं मेषम्' (आश्व. श्रौ. ८. ६) इति । महाव्रते निष्केवल्येऽप्येतत् सूक्तम् । सूत्रितं च—'यस्तिग्मशृङ्गो वृषभो न भीम उग्रो जज्ञे वीर्याय स्वधावान्' (ऐ. आ. ५. २. २) इति । आयुष्कामेष्टयां 'मा ते अस्याम्' इतीन्द्रस्य त्रातुर्याज्या । सूत्रितं च—'मा ते अस्यां सहसावन्परिष्टौ पाहि नो अग्ने पायुभिः[3]' (आश्व. श्रौ. २. १०) इति ॥

यस्तिग्मशृङ्गो वृषभो न भीम एकः कृष्टीश्च्यावयति प्र विश्वाः ।
यः शश्वतो अदाशुषो गयस्य प्रयन्तासि सुष्विंतराय वेदः ॥ १ ॥

यः । तिग्मऽशृङ्गः । वृषभः । न । भीमः । एकः । कृष्टीः । च्यवयति । प्र । विश्वाः ।
यः । शश्वतः । अदाशुषः । गयस्य । प्रऽयन्ता । असि । सुस्विऽतराय । वेदः ॥ १ ॥

[v]यः इन्द्रः [v]तिग्मशृङ्गः तीक्ष्णशृङ्गः [v]वृषभो [v]न वृषभ इव [v]भीमः भयंकरः सन् [v]एकः असहाय एव [v]विश्वाः सर्वान् [v]कृष्टीः शत्रुजनान् स्थानात् [v]प्र [v]च्यावयति । [v]यः चेन्द्रः [v]अदाशुषः अयजमानस्य [v]शश्वतः बहोः [v]गयस्य गृहस्य धनस्य वा । अपहर्ता भवतीति शेषः । हे इन्द्र

१. ख-श–पैजवनस्यैव । २. ख-ङ्ग-न भ-श–माध्यंदिनः । ३. ख–पायुभिरजस्रैः ।

स त्वं vसुष्वितराय[1] अतिशयेन सोमाभिषवं कुर्वते जनाय vवेदः धनं vप्रयन्ता प्रदाता vअसि ॥ तृन्नन्तत्वादत्र षष्ठ्या अभावः । असि इत्यस्याख्यातस्यानुदात्तत्वात् यद्वृत्तयोगाच्चानुदात्तत्वासंभवात् यद्वृत्तयुक्तमाख्यातान्तरमध्याहृत्य योजना कृता ॥

त्वं ह॒ त्यदि॑न्द्र कुत्स॑मावः शुश्रूषमाणस्त॒न्वा॑ सम॒र्ये ।
दास॑ं यच्छुष्ण॑ं कु॒यव॑ं न्य॑स्मा॒ अर॑न्धय आर्जु॒नेयाय॒ शिक्ष॑न् ॥ २ ॥

त्वम् । ह॒ । त्यत् । इ॒न्द्र॒ । कुत्स॑म् । आ॒वः॒ । शुश्रूषमाणः । त॒न्वा॑ । स॒ऽम॒र्ये । दास॑म् । यत् । शुष्ण॑म् । कु॒यव॑म् । नि । अ॒स्मै॒ । अर॑न्धयः । आ॒र्जु॒नेयाय॑ । शिक्ष॑न् ॥२॥

हे vइन्द्र vत्वं vह त्वं खलु vयत् तदा vतन्वा शरीरेण vशुश्रूषमाणः उपचरन् vसमर्ये मर्यैर्मर्त्यैर्योद्भृभिः सहिते युद्धे vकुत्सम् vआवः अरक्षः । कदेत्याह । vयत् यदा vआर्जुनेयाय अर्जुन्याः पुत्राय vअस्मै कुत्साय vशिक्षन् धनं प्रयच्छन् vदासं दासनामकमसुरं vशुष्णं च vकुयवं च vनि vअरन्धयः नितरां वशमानयः ॥

त्वं धृ॑ष्णो धृषता॒ वीत॑हव्यं॒ प्राव॒ो विश्वा॑भिरू॒तिभि॑ः सु॒दास॑म् ।
प्र पौरु॑कुत्सिं त्र॒सद॑स्युमावः॒ क्षेत्र॑साता वृत्र॒हत्ये॑षु पू॒रुम् ॥ ३ ॥

त्वम् । धृ॒ष्णो॒ इति॑ । धृ॒षता॑ । वीत॑ऽहव्यम् । प्र । आ॒व॒रि॒ति॑ । विश्वा॑भिः । ऊ॒तिऽभि॑ः । सु॒ऽदास॑म् । प्र । पौरु॑ऽकुत्सिम् । त्र॒सद॑स्युम् । आ॒व॒रि॒ति॑ । क्षेत्र॑ऽसाता । वृ॒त्र॒ऽहत्ये॑षु । पू॒रुम् ॥ ३ ॥

हे vधृष्णो शत्रूणां धर्षकेन्द्र vधृषता[2] धर्षकेण वज्रेण बलेन वा vवीतहव्यं दत्तहविष्कं प्रजनितहविष्कं वा vसुदासं राजानं vविश्वाभिः सर्वाभिः vऊतिभिः रक्षाभिः vप्रावः प्रकर्षेणारक्षः । किंच vवृत्रहत्येषु युद्धेषु vक्षेत्रसाता क्षेत्रसातौ क्षेत्रस्य भूमेर्भजने निमित्ते vपौरुकुत्सिं पुरुकुत्सस्यापत्यं vत्रसदस्युं vपूरुं च vप्र vआवः ॥

त्वं नृभि॑र्नृमणो दे॒ववी॑तौ॒ भूरी॑णि वृ॒त्रा ह॑र्यश्व हंसि ।
त्वं नि दस्यु॑ं चुमु॒रिं॑ धुनिं॒ चास्वा॑पयो द॒भीत॑ये सु॒हन्तु॑ ॥ ४ ॥

त्वम् । नृऽभिः । नृ॒ऽम॒नः॒ । दे॒वऽवी॑तौ । भूरी॑णि । वृ॒त्रा । ह॒रि॒ऽअ॒श्व॒ । हं॒सि॒ ।
त्वम् । नि । दस्यु॑म् । चु॒मु॒रिम् । धुनि॑म् । च॒ । अस्वा॑पयः । द॒भीत॑ये । सु॒ऽहन्तु॑ ॥ ४ ॥

हे vनृमणः नृभिर्यज्ञानां नेतृभिः स्तोतृभिर्मननीय स्तोतव्येन्द्र । नृषु मनो यस्येति बहुव्रीहिर्वा । vदेववतौ यज्ञे क्रियमाणे सति संग्रामे वा । देवा विजिगीषवो यस्मिन् वियन्ति गच्छन्तीति संग्रामो[3] देववीतिः[3] । vनृभिः मरुद्भिः सह vभूरीणि बहूनि vवृत्रा वृत्राणि शत्रून् vहंसि मारितवानसि । किंच हे vहर्यश्व इन्द्र vत्वं vदभीतये दभीतिनामकाय राजर्षये । तदर्थमित्यर्थः । vदस्युं vचुमुरिं च vधुनिं vच vसुहन्तु सुहन्तुना वज्रेण vनि नितराम् vअस्वापयः । मारितवानसीत्यर्थः ॥

तव॑ च्यौ॒त्नानि॑ वज्रहस्त॒ तानि॒ नव॒ यत्पुरो॑ नव॒तिं॑ च॒ सद्यः॑ ।
नि॒वेश॑ने शतत॒मावि॑वेषी॒रह॑ञ्च वृ॒त्रं न॑मुचि॒मुता॑हन् ॥ ५ ॥

---

१. त–सुस्वितराय । २. ख-भ–त्वं धृषता । ३. य–देववीतिः सग्रामः ।

तवं । च्यौत्नानि । वज्रऽहस्त । तानि । नवं । यत् । पुरः । नवतिम् । च । सद्यः ।
निऽवेशने । शतऽतमा । अविवेषीः । अहन् । च । वृत्रम् । नमुचिम् । उत । अहन् ॥५॥

हे ᵛवज्रहस्त ᵛतव ᵛच्यौत्नानि बलानि ᵛतानि तादृशानि । ᵛयत् यदा त्वं शम्बरस्य ᵛनव ᵛनवतिं ᵛच ᵛपुरः ᵛसद्यः युगपदेव विदारितवानसीति शेषः । तदा ᵛनिवेशने निवेशनार्थं ᵛशततमा शततमीं पुरम् ᵛअविवेषीः व्याप्नोः । ᵛवृत्रं ᵛच ᵛअहन् । ᵛउत अपि च ᵛनमुचिम् ᵛअहन् ॥ ॥ २९ ॥

सना ता तं इन्द्र भोजनानि रातहव्याय दाशुषे सुदासे ।
वृष्णे ते हरी वृषणा युनज्मि व्यन्तु ब्रह्माणि पुरुशाक वाजम् ॥ ६ ॥

सना । ता । ते । इन्द्र । भोजनानि । रातऽहव्याय । दाशुषे । सुऽदासे ।
वृष्णे । ते । हरी इति । वृषणा । युनज्मि । व्यन्तु । ब्रह्माणि । पुरुऽशाक । वाजम् ॥६॥

हे ᵛइन्द्र ᵛते तव ᵛरातहव्याय दत्तहव्याय ᵛदाशुषे यजमानाय ᵛसुदासे ᵛता[1] तानि त्वया दत्तानि ᵛभोजनानि भोग्यानि धनानि ᵛसना सनानि सनातनानि बभूवुरिति शेषः । हे ᵛपुरुशाक बहुकर्मन्निन्द्र ᵛवृष्णे कामानां वर्षित्रे ᵛते तुभ्यम् । त्वामानेतुमित्यर्थः । ᵛवृषणा वृषणौ ᵛहरी अश्वौ ᵛयुनज्मि रथे योजयामि । ᵛब्रह्माणि अस्मदीयानि स्तोत्राणि ᵛवाजं बलिनं त्वां ᵛव्यन्तु गच्छन्तु ॥

मा ते अस्यां सहसावन्परिष्टावघाय भूम हरिवः परादै ।
त्रायस्व नोऽवृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम ॥ ७ ॥

मा । ते । अस्याम् । सहसाऽवन् । परिष्टौ । अघाय । भूम । हरिऽवः । पराऽदै ।
त्रायस्व । नः । अवृकेभिः । वरूथैः । तव । प्रियासः । सूरिषु । स्याम ॥ ७ ॥

हे ᵛसहसावन् बलवन् ᵛहरिवः हरिवन्निन्द्र ᵛते तव ᵛअस्यां स्तोत्रेणास्माभिः क्रियमाणायां ᵛपरिष्टौ अन्वेषणायां ᵛपरादै परादानाय ᵛअघाय अ(?आ)हन्त्रे[2] वयं ᵛमा ᵛभूम । किंच ᵛनः अस्मान् ᵛअवृकेभिः अबाधैः ᵛवरूथैः । वारयन्त्युपद्रवेभ्य इति वरूथानि रक्षणानि । तैः ᵛत्रायस्व पाहि । ᵛतव ᵛसूरिषु स्तोतृषु मध्ये वयं ᵛप्रियासः प्रियाः ᵛस्याम भूयास्म ॥

प्रियास इत्ते मघवन्नभिष्टौ नरो मदेम शरणे सखायः ।
नि तुर्वशं नि याद्वं शिशीह्यतिथिग्वाय शंस्यं करिष्यन् ॥ ८ ॥

प्रियासः । इत् । ते । मघऽवन् । अभिष्टौ । नरः । मदेम । शरणे । सखायः ।
नि । तुर्वशम् । नि । याद्वम् । शिशीहि । अतिथिऽग्वाय । शंस्यम् । करिष्यन् ॥ ८ ॥

हे ᵛमघवन् धनवन्निन्द्र ᵛते तव ᵛअभिष्टौ अभ्येषणे ᵛनरः स्तोत्राणां नेतारो वयं ᵛसखायः समानख्यातयः ᵛप्रियासः प्रियाश्च सन्तः ᵛशरणे ᵛइत् गृह एव ᵛमदेम मोदेम । किंच ᵛअतिथिग्वाय । पूजयातिथीन् गच्छतीत्यतिथिग्वः । तस्मै सुदासे दिवोदासाय वास्मदीयाय[3] राज्ञे ᵛशंस्यं

१. ख-ञ-त-न-भ-श–'ता' नास्ति । २. ख–अघाय; घ-ञ-त-न-भ-श–अघाय अहन्त्रे । ३. ञ-त-न-भ-श– वा मदीयाय ।

शंसनीयं सुखं vकरिष्यन् कुर्वन् vतुर्वशं राजानं vनि vशिशीहि वशं कुरु । vयादुं च राजानं vनि शिशीहीत्यर्थः ॥

सद्यश्चिन्नु ते मघवन्नभिष्टौ नरः शंसन्त्युक्थशास उक्था ।
ये ते हवेभिर्वि पणीँरदाशन्नस्मान्वृणीष्व युज्याय तस्मै ॥ ९ ॥

सद्यः । चित् । नु । ते । मघऽवन् । अभिष्टौ । नरः । शंसन्ति । उक्थऽशासः । उक्था ।
ये । ते । हवेभिः । वि । पणीन् । अदाशन् । अस्मान् । वृणीष्व । युज्याय । तस्मै ॥९॥

हे vमघवन् धनवन्निन्द्र vते तव vनु अद्य vअभिष्टौ अभ्येषणे vये vनरः vउक्थशासः उक्थानां शंसितारः vउक्था उक्थानि शस्त्राणि vसद्यश्चित् सद्य एव vशंसन्ति । किंच vते तव vहवेभिः स्तोत्रैः vपणीन् अप्रदानशीलान् वणिजोऽपि vवि vअदाशन् । धनानि विशेषेणादापयन्नित्यर्थः । तान् vअस्मान् vतस्मै vयुज्याय सख्याय तत्सख्यमनुवर्तयितुं vवृणीष्व परिगृहाण ॥

एते स्तोमा नरां नृतम तुभ्यमस्मद्र्यञ्चो ददतो मघानि ।
तेषामिन्द्र वृत्रहत्ये शिवो भूः सखा च शूरोऽविता च नृणाम् ॥ १० ॥

एते । स्तोमाः । नराम् । नृऽतम । तुभ्यम् । अस्मद्र्यञ्चः । ददतः । मघानि ।
तेषाम् । इन्द्र । वृत्रऽहत्ये । शिवः । भूः । सखा । च । शूरः । अविता । च । नृणाम् ॥१०॥

हे vनृतम नेतृतम vइन्द्र vतुभ्यं vनरां नेतॄणां ये vएते vस्तोमाः संघाः vमघानि मंहनीयानि हवींषि vददतः ददन्तः vअस्मद्यञ्चः अस्मदभिमुखाः अभूवन्निति शेषः । vतेषां vनृणां vवृत्रहत्ये संग्रामे vशिवः कल्याणकृत् vभूः भव । vसखा vच भूः । vअविता[1] रक्षिता vच भूः ॥

नू इन्द्र शूर स्तवमान ऊती ब्रह्मजूतस्तन्वा वावृधस्व ।
उप नो वाजान्मिमीह्युप स्तीन्पायं पात स्वस्तिभिः सदा नः ॥ ११ ॥

नु । इन्द्र । शूर । स्तवमानः । ऊती । ब्रह्मऽजूतः । तन्वा । ववृधस्व ।
उप । नः । वाजान् । मिमीहि । उप । स्तीन् । पायम् । पात । स्वस्तिऽभिः । सदा । नः ॥११॥

हे vशूर vइन्द्र vनु अद्य vस्तवमानः अस्माभिः स्तूयमानः vब्रह्मजूतः ब्रह्मणा स्तोत्रेण प्रेरितः vतन्वा शरीरेण ऊत्या[2] रक्षणेन vववृधस्व । अपि च vनः अस्मभ्यं vवाजान् अन्नानि vउप vमिमीहि । प्रयच्छेत्यर्थः । vस्तीन् गृहांश्च vउप मिमीहि । स्पष्टमन्यत् ॥ ॥ ३० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पञ्चमाष्टके द्वितीयोऽध्यायः समाप्तः ॥

---

१. ज्ञ– शूरः शौर्योपेतः अविता । २. ख-ज्ञ-त-न-भ-श–' ऊत्या रक्षणेन ' नास्ति ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ[1] तृतीयोऽध्याय आरभ्यते । 'उग्रो जज्ञे' इति दशर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रम्यते–'उग्रो दश' इति । आभिप्लविके चतुर्थेऽहनि निष्केवल्य एतत्सूक्तं निविद्धानम् । सूत्रितं च—'चतुर्थस्योग्रो जज्ञ इति निष्केवल्यम्' (आश्व. श्रौ. ७·७) इति । महाव्रतेऽपि निष्केवल्य एतत्सूक्तम् । तथैव पञ्चमारण्यके सूत्रितम्–'उग्रो जज्ञे वीर्याय स्वधावानुदु ब्रह्माण्यैरत श्रवस्या' (ऐ. आ. ५. २. २.) इति । सौमिकचातुर्मास्येषु वैश्वदेवस्य स्थाने प्रथमं पृष्ठ्यमहः । तत्रापि[2] निष्केवल्य एतत्सूक्तं निविद्धानम् । सूत्रितं च–'जनिष्ठा उग्र उग्रो जज्ञ इति मध्यंदिनः[3]' (आश्व. श्रौ. ९·२) इति ॥

उग्रो जज्ञे वीर्याय स्वधावाञ्चक्रिरपो नर्यो यत्कर्करिष्यन् ।
जग्मिर्युवा नृषदनमवोभिस्त्राता न इन्द्र एनसो महश्चित् ॥ १ ॥

उग्रः । जज्ञे । वीर्याय । स्वधाऽवान् । चक्रिः । अपः । नर्यः । यत् । करिष्यन् ।
जग्मिः । युवा । नृऽसदनम् । अवःऽभिः । त्राता । नः । इन्द्रः । एनसः । महः । चित् ॥ १ ॥

[v]स्वधावान् बलवान् [v]उग्रः ओजस्वी उद्गूर्णो वा [v]इन्द्रः [v]वीर्याय वीर्यं कर्तुं [v]जज्ञे बभूव । [v]नर्यः नरहितः सन् [v]यत् कर्म [v]करिष्यन् भवति तत् [v]अपः कर्म [v]चक्रिः कर्तैव ॥ चक्रिः इति किन्प्रत्ययस्य लिङ्वद्भावात् 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' इति षष्ठीप्रतिषेधः ॥ अपि च [v]नृपदनं यज्ञगृहं [v]युवा नित्यतरुणः सन् [v]अवोभिः रक्षणैः सार्धं [v]जग्मिः गन्ता [v]महश्चित् महतोऽपि [v]एनसः पापात् [v]नः अस्माकं [v]त्राता रक्षिता च भवेति[4] ॥

हन्ता वृत्रमिन्द्रः शूशुवानः प्रावीन्नु वीरो जरितारमूती ।
कर्ता सुदासे अह वा उ लोकं दाता वसु मुहुरा दाशुषे भूत् ॥ २ ॥

हन्ता । वृत्रम् । इन्द्रः । शूशुवानः । प्र । आवीत् । नु । वीरः । जरितारम् । ऊती ।
कर्ता । सुऽदासे । अह । वै । ऊँ इति । लोकम् । दाता । वसु । मुहुः । आ । दाशुषे । भूत् ॥ २ ॥

[v]इन्द्रः [v]शूशुवानः वर्धमानः सन् [v]वृत्रम् असुरम् [v]हन्ता भवति ॥ तृन्नन्तत्वादत्र षष्ठ्यभावः ॥ [v]वीरः वीरः सन् [v]जरितारं स्तोतारं [v]नु क्षिप्रम् [v]ऊती ऊत्या रक्षया [v]प्रावीत् प्रारक्षच्च । [v]सुदासे राज्ञे [v]लोकं जनपदं [v]कर्ता च । यद्वा । सुदासे कल्याणदानाय यजमानाय लोकं कर्ता च भवति ॥ इहाप्युत्तरत्रापि तृन्नन्तत्वात् षष्ठ्यभावः ॥ [v]अह [v]वा [v]उ इति त्रयः पूरणाः । [v]दाशुषे यजमानाय [v]वसु धनं [v]मुहुः भूयो भूयः [v]दाता च [v]भूत् अभूत् । [v]आ इति चार्थे ॥

युध्मो अनर्वा खजकृत्समद्वा शूरः सत्राषाड्जनुषेमषाळ्हः ।
व्यास इन्द्रः पृतनाः स्वोजा अधा विश्वं शत्रूयन्तं जघान ॥ ३ ॥

युध्मः । अनर्वा । खजऽकृत् । समत्ऽवा । शूरः । सत्राषाट् । जनुषा । ईम् । अषाळ्हः ।
वि । आसे । इन्द्रः । पृतनाः । सुऽओजाः । अध । विश्वम् । शत्रुऽयन्तम् । जघान ॥ ३ ॥

---

१. न-श-अथ पञ्चमस्य । २. ख-ञ-न-भ-श-तत्र । ३. ख-ञ-भ-श-माध्यंदिनः । ४. ञ-भवति ।

vयुध्मः योद्धा vअनर्वा अभिगन्तृरहितो युद्धेष्वपराङ्मुखो वा vखजकृत् युद्धकृत्। 'खले खजे' इति युद्धनामसु पाठात्। vसमद्वा। समत् कलहः। तद्वान् vशूरः शौर्योपेतः vजनुषा जन्मना स्वभावत एव vसन्नाषाट् बहूनामभिभविता vअषाळ्हः स्वयं च केनाप्यनभिभूतः vस्वोजाः सुबलः vईम् अयम् vइन्द्रः vपृतनाः शत्रूणां सेनाः vव्यासे विक्षिपति। vअध अपि च vशत्रूयन्तं शात्रवमाचरन्तं vविश्वं सर्वं vजघान हन्ति ॥

उभे चिदिन्द्र रोदसी महित्वा पप्राथ तविषीभिस्तुविष्मः ।
नि वज्रमिन्द्रो हरिवान्मिमिक्षन्त्समन्धसा मदेषु वा उवोच ॥ ४ ॥

उभे इति। चित्। इन्द्र। रोदसी इति। महिऽत्वा। आ। पप्राथ। तविषीभिः। तुविष्मः। नि। वज्रम्। इन्द्रः। हरिऽवान्। मिमिक्षन्। सम्। अन्धसा। मदेषु। वै। उवोच ॥४॥

हे vतुविष्मः बहुधन vइन्द्र vमहित्वा महत्त्वेन vतविषीभिः बलैश्च vउभे vचित् उभे अपि vरोदसी द्यावापृथिव्यौ vआ vपप्राथ आपूरितवानसि। अथ परोक्षस्तुतिः। vहरिवान् अश्ववान् vइन्द्रः vवज्रं vनि vमिमिक्षन् शत्रुषु प्रापयन् vमदेषु यज्ञेषु निक्तेषु वा vअन्धसा सोमेन vसम् vउवोच संसेव्यते संगच्छते वा ॥ 'उच समवाये' इति धातुः। vवै इति पूरणः ॥

वृषा जजान वृषणं रणाय तमु चिन्नारी नर्यं सस्रुव ।
प्र यः सेनानीरध नृभ्यो अस्तीनः सत्वा गवेषणः स धृष्णुः ॥ ५ ॥

वृषा। जजान। वृषणम्। रणाय। तम्। ऊँ इति। चित्। नारी। नर्यम्। सस्रुव। प्र। यः। सेनाऽनीः। अध। नृऽभ्यः। अस्ति। इनः। सत्वा। गोऽएषणः। सः। धृष्णुः ॥५॥

vवृषा सेक्ता पिता कश्यपः vवृषणं कामानां वर्षितारमिन्द्रं vरणाय युद्धार्थं vजजान। 'जन जनने' इति धातुः। vनर्यं नरहितं vतमु तमेवेन्द्रं vनारी vचित् अदितिरपि vससुव सुषुवे। vअध अपि च vयः इन्द्रः vनृभ्यः नृणां vसेनानीः सेनानां नेता सन् vप्र vअस्ति प्रभवति vसः इन्द्रः vइनः सर्वस्य जगत ईश्वरो भवति। 'नियुत्वान् इनः' इति ईश्वरनामसु पाठात्। vसत्वा शत्रूणां सादकश्च vगवेषणः गवामन्वेष्टा च vधृष्णुः शत्रूणां धर्षकश्च भवतीति शेषः ॥ ॥ १ ॥

नू चित्स भेषते जनो न रेषन्मनो यो अस्य घोरमाविवासात् ।
यज्ञैर्य इन्द्रे दधते दुवांसि क्षयत्स राय ऋतपा ऋतेजाः ॥ ६ ॥

नु। चित्। सः। भेषते। जनः। न। रेषत्। मनः। यः। अस्य। घोरम्। आऽविवासात्। यज्ञैः। यः। इन्द्रे। दधते। दुवांसि। क्षयत्। सः। राये। ऋतऽपाः। ऋतेऽजाः ॥६॥

vयः जनः vअस्य इन्द्रस्य vघोरं शत्रूणां बाधकं vमनः vयज्ञैः vआविवासात् परिचरति vसः vजनः। नु इति प्रतिषेधे वर्तते। चिदित्येवकारार्थे। vनू vचित् नैव vभेषते स्थानान्न भ्रश्यति। vन vरेषत् नैव क्षीयेत[1]। अपि च vयः जनः vदुवांसि परिचरणसाधनानि स्तोत्रशस्त्राणि vइन्द्रे vदधते निधत्ते तस्मै जनाय vऋतपाः यज्ञपाता vऋतेजाः यज्ञे जातश्च vसः इन्द्रः vराये धनाय vक्षयत् निवसति। भवेदित्यर्थः ॥

---

१. ख-घ-त-भ-य–क्षीयते ।

यदिन्द्र पूर्वो अपराय शिक्षन्नयज्ज्यायान्कनीयसो देष्णम् ।
अमृत इत्पर्यासीत दूरमा चित्र चित्र्यं भरा रयिं नः ॥ ७ ॥

यत् । इन्द्र । पूर्वः । अपराय । शिक्षन् । अयत् । ज्यायान् । कनीयसः । देष्णम् ।
अमृतः । इत् । परि । आसीत । दूरम् । आ । चित्र । चित्र्यम् । भर । रयिम् । नः ॥७॥

हे [v]चित्र चायनीय [v]इन्द्र [v]यत् धनं [v]पूर्वः पिता ज्येष्ठो भ्राता वा [v]अपराय पुत्राय कनीयसे वा [v]शिक्षन् प्रयच्छन् । शिक्षतिर्दानकर्मा 'प्रीणाति शिक्षति' इति दानकर्मसु पाठात् । भवतीति शेषः। यच्च [v]देष्णं देयं धनं [v]ज्यायान् ज्येष्ठः [v]कनीयसः [v]अयत् प्राप्नुयात् । यच्चापि धनं पितृतो लब्ध्वा पुत्रः [v]अमृत [v]इत् अमृत एव सन् पितृगृहं विहाय [v]दूरं [v]पर्यासीत आस्ते तत्त्रिविधं [v]चित्र्यं चायनीयं [v]रयिं धनं [v]नः अस्मभ्यम् [v]आ [v]भर आहर ॥

यस्त इन्द्र प्रियो जनो ददाशदसन्निरेके अद्रिवः सखा ते ।
वयं ते अस्यां सुमतौ चनिष्ठाः स्याम वरूथे अघ्नतो नृपीतौ ॥ ८ ॥

यः । ते । इन्द्र । प्रियः । जनः । ददाशत् । असत् । निरेके । अद्रिऽवः । सखा । ते ।
वयम् । ते । अस्याम् । सुऽमतौ । चनिष्ठाः । स्याम । वरूथे । अघ्नतः । नृऽपीतौ ॥८॥

हे [v]इन्द्र [v]यः [v]ते तुभ्यं [v]प्रियः सखा [v]जनः [v]ददाशत् हवींषि दद्यात् हे [v]अद्रिवः सः [v]सखा [v]ते तव [v]निरेके दाने [v]असत् स्यात् । [v]वयं च वसिष्ठाः [v]अघ्नतः अहिंसतः [v]ते तव [v]अस्यां [v]सुमतौ अनुग्रहबुद्धौ वर्तमानाः [v]चनिष्ठाः स्तुतिमत्तरा अतिशयेनान्नवन्तो वा । चनोऽन्नम् । [v]नृपीतौ नृणां रक्षके [v]वरूथे गृहे वरणीये वा धने [v]स्याम वसेम भवेम वा ॥

एष स्तोमो अचिक्रदद्वृषा त उत स्तामुर्मघवन्नक्रपिष्ट ।
रायस्कामो जरितारं त आगन्त्वमङ्ग शक्र वस्व आ शको नः ॥ ९ ॥

एषः । स्तोमः । अचिक्रदत् । वृषा । ते । उत । स्तामुः । मघऽवन् । अक्रपिष्ट ।
रायः । कामः । जरितारम् । ते । आ । अगन् । त्वम् । अङ्ग । शक्र । वस्वः । आ । शकः । नः ॥९॥

हे [v]मघवन् धनवन्निन्द्र [v]ते त्वदर्थं [v]वृषा सेक्ता [v]एषः [v]स्तोमः सोमः सूयमानः[1] [v]अचिक्रदत् क्रन्दति । [v]उत अपि च [v]स्तामुः स्तोता [v]अक्रपिष्ट अस्तौत् । अपि च हे [v]शक्र [v]ते तव [v]जरितारं स्तोतारं मां [v]रायः धनस्य [v]कामः अभिलाषः [v]आगन् आगतः । अतः [v]त्वं [v]वस्वः धनम् । कर्मणि षष्ठी । [v]नः अस्मभ्यम् [v]अङ्ग क्षिप्रम् [v]आ [v]शकः धेहि ॥

स न इन्द्र त्वयताया इषे धास्त्मना च ये मघवानो जुनन्ति ।
वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः ॥ १० ॥

सः । नः । इन्द्र । त्वऽयतायै । इषे । धाः । त्मना । च । ये । मघऽवानः । जुनन्ति ।
वस्वी । सु । ते । जरित्रे । अस्तु । शक्तिः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥१०॥

---

१. ख-भ-श-स्तूयमानः ।

हे [v]इन्द्र [v]सः त्वं [v]स्वयताया [v]इषे त्वया दत्तमन्नं भोक्तुं [v]नः अस्मान् [v]धाः धारय। [v]ये [v]च [v]मघवानः हविष्मन्तः [v]स्वना स्वयमेव [v]जुनन्ति हवींषि त्वां प्रति प्रेरयन्ति तानपि त्वयताया इषे धाः। अपि च वस्वीषु अत्यन्तं प्रशस्तासु स्तुतिषु [v]ते तव [v]जरित्रे स्तोत्रे मह्यं [v]शक्तिः सामर्थ्यम् [v]अस्तु। यद्वा। जरित्रे मह्यं ते तव वस्वी षु प्रशस्ता शक्तिर्दानमस्तु। स्पष्टमन्यत्॥ ॥ २ ॥

'असावि देवम्' इति दशर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम्। तथा चानुक्रान्तम्–'असावि' इति। माध्यंदिनसवने मैत्रावरुणस्योक्षीयमाणमिदं सूक्तम्[1]। 'असावि देवमिहोप यातेत्यनुसवनम्' (आश्व. श्रौ. ५.५) इति। इन्द्रस्य वृत्रघ्नः पशौ 'अभिक्रत्वा' इति वपाया अनुवाक्या। सूत्रितं च–'अभि क्रत्वेन्द्र भूरध ओजस्त्वं महाँ इन्द्र तुभ्यं ह क्षाः' (आश्व. श्रौ. ३.८) इति॥

असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच।
बोधामसि त्वा हर्यश्व यज्ञैर्बोधा नः स्तोममन्धसो मदेषु॥ १॥

असावि। देवम्। गोऽऋजीकम्। अन्धः। नि। अस्मिन्। इन्द्रः। जनुषा। ईम्। उवोच। बोधामसि। त्वा। हरिऽअश्व। यज्ञैः। बोध। नः। स्तोमम्। अन्धसः। मदेषु॥ १॥

[v]देवं दीप्तं [v]गोऋजीकं गोभिः संस्कृतम्। गव्येन मिश्रितमित्यर्थः। [v]अन्धः सोमरूपमन्नम् [v]असावि अभिषुतम्। [v]ईम् अयम् [v]इन्द्रः [v]अस्मिन् अभिषुते सोमरूपेऽन्धसि [v]जनुषा स्वभावत एव [v]नि [v]उवोच नितरां संगतो भवति। अथ प्रत्यक्षस्तुतिः। हे [v]हर्यश्व [v]त्वा त्वां [v]यज्ञैः स्तोत्रैर्हविर्भिर्वा [v]बोधामसि बोधयामः। [v]अन्धसः सोमस्य [v]मदेषु [v]नः अस्माकं [v]स्तोमं स्तोत्रं [v]बोध बुध्यस्व च॥

प्र यन्ति यज्ञं विपयन्ति बर्हिः सोममादो विदथे दुध्रवाचः।
न्यु भ्रियन्ते यशसो गृभादा दूरेउपब्दो वृषणो नृषाचः॥ २॥

प्र। यन्ति। यज्ञम्। विपयन्ति। बर्हिः। सोमऽमादः। विदथे। दुध्रऽवाचः।
नि। ऊँ इति। भ्रियन्ते। यशसः। गृभात्। आ। दूरेऽउपब्दः। वृषणः। नृऽसाचः॥२॥

[v]यज्ञं [v]प्र [v]यन्ति यष्टारः [v]बर्हिः च [v]विपयन्ति स्तृणन्ति। विपिः स्तरणकर्मा। [v]विदथे यज्ञे [v]सोममादः ग्रावाणश्च [v]दुध्रवाचः दुर्धरवाचः भवन्ति। अपि च [v]यशसः यशस्विनः [v]दूरउपब्दः। दूर उपब्दिः शब्दो येषां ते दूरउपब्दः। नृषाचः। नृन्नेतॄन्ऋत्विजः सचन्त इति नृषाचः। [v]वृषणः ग्रावाणः [v]गृभात् गृहात्। गृहमध्यमग्रावा[2]। तस्मात्। [v]आ इति चार्थे। [v]नि [v]भ्रियन्ते अभिषववेलायां निगृह्यन्ते। [v]उ इति पूरणः॥

त्वमिन्द्र सवितवा अपस्कः परिष्ठिता अहिना शूर पूर्वीः।
त्वद्वावक्रे रथ्योऽ३ न धेना रेजन्ते विश्वा कृत्रिमाणि भीषा॥ ३॥

त्वम्। इन्द्र। सवितवै। अपः। करिति कः। परिऽस्थिताः। अहिना। शूर। पूर्वीः।
त्वत्। वावक्रे। रथ्यः। न। धेनाः। रेजन्ते। विश्वा। कृत्रिमाणि। भीषा॥ ३॥

---

१. ज्ञ–सूक्तम्। सूत्रितं च। २. ज्ञ–अहं मध्यमग्रावा; श–गृहमध्यमग्रामा वा।

हे vशूर vइन्द्र vत्वम् vअहिना वृत्रेण vपरिष्ठिताः आक्रान्ताः vपूर्वीः बह्वीः vअपः उदकानि vस्रवितवै स्रवितुं vकः अकार्षीः । vधेनाः नद्यश्च vस्वत् स्वत्तो हेतोः vरथ्यो vन रथिन इव vवावक्रे निर्गच्छन्ति । ' वकि कौटिल्ये ' इति धातुः । vविश्वा विश्वानि vकृत्रिमाणि भुवनानि च vभीषा त्वत्तो भीत्या vरेजन्ते कम्पन्ते ॥

भीमो विवेषायुधेभिरेषामपांसि विश्वा नर्याणि विद्वान् ।
इन्द्रः पुरो जर्हृषाणो वि दूधोद्वि वज्रहस्तो महिना जघान ॥ ४ ॥

भीमः । विवेष । आयुधेभिः । एषाम् । अपांसि । विश्वा । नर्याणि । विद्वान् ।
इन्द्रः । पुरः । जर्हृषाणः । वि । दुधोत् । वि । वज्रऽहस्तः । महिना । जघान ॥ ४ ॥

vइन्द्रः vनर्याणि नरहितानि vविश्वा विश्वानि vअपांसि कर्माणि vविद्वान् जानन् vआयुधेभिः आयुधैः vभीमः भयंकरः सन् vएषाम् । कर्मणि षष्ठी । एतानसुरान् vविवेष व्याप्तवान् । vपुरः च तेषां vवि vदूधोत् अकम्पयत् । अपि च vजर्हृषाणः हृष्यन् vमहिना महिम्ना युक्तः vवज्रहस्तः सन् तान् vवि vजघान ॥

न यातवे इन्द्र जूजुवुर्नो न वन्दना शविष्ठ वेद्याभिः ।
स शर्धदर्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपि गुर्ऋतं नः ॥ ५ ॥

न । यातवेः । इन्द्र । जूजुवुः । नः । न । वन्दना । शविष्ठ । वेद्याभिः ।
सः । शर्धत् । अर्यः । विषुणस्य । जन्तोः । मा । शिश्नऽदेवाः । अपि । गुः । ऋतम् । नः ॥५॥

हे vइन्द्र vयातवः राक्षसाः vनः अस्मान् vन vजूजुवुः न हिंस्युः । जूजुवुरिति हिंसाक्रियः पृथक्करणक्रियो वा । अपि च हे vशविष्ठ बलवत्तमेन्द्र vवन्दना वन्दनानि रक्षांसि vवेद्याभिः वेद्याभ्यः प्रजाभ्यो नोऽस्मान् vन जूजुवुः न पृथक्कुर्वन्तु । किंच vअर्यः स्वामी vसः इन्द्रः vविषुणस्य विषमस्य vजन्तोः प्राणिनः शासने vशर्धत् उत्सहेत । अथ च vशिश्नदेवाः । शिश्नेन दीव्यन्ति क्रीडन्त इति शिश्नदेवाः । अब्रह्मचर्या इत्यर्थः । vनः अस्माकम् vऋतं यज्ञं सत्यं वा vमा vअपि vगुः मा अपिगमन् । तथा च यास्कः—' स उत्सहतां यो विषुणस्य जन्तोर्विषमस्य मा शिश्नदेवा अब्रह्मचर्याः । शिश्नं श्नथतेः । अपि गुर्ऋतं नः सत्यं वा यज्ञं वा ' (निरु. ४. १९) इति ॥ ॥ ३ ॥

अभि क्रत्वेन्द्र भूरध ज्मन्न तें विव्यङ्महिमानं रजांसि ।
स्वेना हि वृत्रं शवसा जघन्थ न शत्रुरन्तं विविदद्युधा ते ॥ ६ ॥

अभि । क्रत्वा । इन्द्र । भूः । अध । ज्मन् । न । ते । विव्यक् । महिमानम् । रजांसि ।
स्वेन । हि । वृत्रम् । शवसा । जघन्थ । न । शत्रुः । अन्तम् । विविदत् । युधा । ते ॥६॥

हे vइन्द्र त्वं vक्रत्वा कर्मणा vज्मन् पृथिव्यां[1] वर्तमानान् जन्तून् वा vअभि vभूः अभ्यभूः । vअध अपि च vते तव vमहिमानं vरजांसि सर्वे[2] लोकाः[2] vन vविव्यक् । व्यचिर्व्याप्तिकर्मा ।

---

१. ख-न-भ-श–पृथिवीं पृथिव्याम् । २. ख-श–सर्वलोकाः; घ–लोकाः; झ–सर्वे लोके ।

न व्याप्नुवन्नित्यर्थः । ᵛस्वेन ᵛहि आत्मीयेन च ᵛशवसा बलेन ᵛवृत्रं ᵛजघन्थ त्वमवधीः । ᵛशत्रुः च ᵛयुधा युद्धेन ᵛते तव ᵛअन्तं हिंसां ᵛन ᵛविविदत् न लब्धवान् ॥

देवाश्चित्ते असुर्याय पूर्वेऽनु क्षत्राय ममिरे सहांसि ।
इन्द्रो मघानि दयते विषह्येन्द्रं वाजस्य जोहुवन्त सातौ ॥ ७ ॥

देवाः । चित् । ते । असुर्याय । पूर्वे । अनु । क्षत्राय । ममिरे । सहांसि ।
इन्द्रः । मघानि । दयते । विऽसह्य । इन्द्रम् । वाजस्य । जोहुवन्त । सातौ ॥ ७ ॥

ᵛपूर्वे ᵛदेवाश्चित् असुरा अपि ᵛअसुर्याय बलाय ᵛक्षत्राय । क्षदिर्हिंसाकर्मा । बलं हिंसां चोभे कर्तुमित्यर्थः । हे इन्द्र ᵛते तव ᵛसहांसि बलानि ᵛअनु ᵛममिरे ॥ ' हीने ' (पा. सू. १.४.८६) इत्यनुः कर्मप्रवचनीयः ॥ तव बलेभ्यो हीना ममिर इत्यर्थः । तथा च निगमान्तरम्—' अनु ते द्यौर्बृहती वीर्यं ममे ' (ऋ. सं. १.५७.५) इति । अथ परोक्षस्तुतिः । ᵛइन्द्रः शत्रून् ᵛविषह्य ᵛमघानि महनीयानि धनानि ᵛदयते भक्तेभ्यः प्रयच्छति । अपि च ᵛइन्द्रं ᵛवाजस्य अन्नस्य ᵛसातौ लाभार्थं ᵛजोहुवन्त स्तुवन्ति स्तोतार आह्वयन्ति वा ॥

कीरिश्चिद्धि त्वामवसे जुहावेशानमिन्द्र सौभगस्य भूरेः ।
अवो बभूथ शतमूते अस्मे अभिक्षत्तुस्त्वावतो वरूता ॥ ८ ॥

कीरिः । चित् । हि । त्वाम् । अवसे । जुहाव । ईशानम् । इन्द्र । सौभगस्य । भूरेः ।
अवः । बभूथ । शतम्ऽऊते । अस्मे इति । अभिऽक्षत्तुः । त्वाऽवतः । वरूता ॥ ८ ॥

हे ᵛइन्द्र ᵛईशानं ᵛत्वां ᵛकीरिः स्तोता । ' कारुः कीरिः ' इति स्तोतृनामसु पाठात् । वसिष्ठः ᵛअवसे रक्षणाय ᵛजुहाव ᵛहि स्तौति हि ह्वयति वा । ᵛचित् इति पूरणः । अपि च हे ᵛशतमूते बहुरक्षेन्द्र ᵛअस्मे अस्माकं ᵛभूरेः प्रभूतस्य ᵛसौभगस्य धनस्य ᵛअवः रक्षा[1] ᵛबभूथ बभूविथ । ᵛअभिक्षत्तुः अभिहिंसकस्य ᵛत्वावतः त्वत्सदृशस्य ᵛवरूता वारयिता च भव ॥

सखायस्त इन्द्र विश्वहा स्याम नमोवृधासो महिना तरुत्र ।
वन्वन्तु स्मा तेऽवसा समीके३भीतिमर्यो वनुषां शवांसि ॥ ९ ॥

सखायः । ते । इन्द्र । विश्वहा । स्याम । नमःऽवृधासः । महिना । तरुत्र ।
वन्वन्तु । स्म । ते । अवसा । सम्ऽईके । अभिऽईतिम् । अर्यः । वनुषाम् । शवांसि ॥९॥

हे ᵛइन्द्र ᵛते तव ᵛनमोवृधासः नमसा स्तुत्या हविषा वा वर्धयितारो वयं ᵛविश्वह सर्वदा ᵛसखायः ᵛस्याम भवेम । ᵛमहिना महिम्ना ᵛतरुत्र अत्यन्तं तारकेन्द्र ᵛते तव ᵛअवसा रक्षणेन ᵛसमीके संग्रामे ᵛअर्यः ᵛअभीतिम् अभिगमनं ᵛवनुषां हिंसकानां ᵛशवांसि बलानि च ᵛवन्वन्तु स्तोतारो हिंसन्तु ॥

---

१ त–रक्षकः ।

स नं इन्द्र त्वर्यताया इषे धास्त्मना च ये मघवानो जुनन्ति ।
वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः ॥ १० ॥

सः । नः । इन्द्र । त्वऽर्यतायै । इषे । धाः । त्मना । च । ये । मघऽवानः । जुनन्ति ।
वस्वी । सु । ते । जरित्रे । अस्तु । शक्तिः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १० ॥

इयमृग्व्याख्यातचरा ॥ ॥ ४ ॥

'पिबा सोममिन्द्र मन्दतु त्वा' इति नवर्चं पञ्चमं सूक्तम् । अनुक्रम्यते च—'पिब नव वैराजमृतेऽन्त्याम्' इति । वसिष्ठ ऋषिः । आदितोऽष्टौ विराजो नवमी त्रिष्टुप् । इन्द्रो देवता । दशरात्रे चतुर्थेऽहनि निष्केवल्यशस्त्रे 'पिबा सोममिन्द्र' इति षट् स्तोत्रियानुरूपौ । सूत्रितं च—'वैराजं चेत्पृष्ठं पिबा सोममिन्द्र मन्दतु त्वेति षट् स्तोत्रियानुरूपौ' (आश्व. श्रौ. ७. ११) इति । महाव्रतेऽपि निष्केवल्य आद्याः षड्ऋचः । सूत्रितं च—'पिबा सोममिन्द्र मन्दतु त्वेति षट्' (ऐ. आ. ५. ३. १) इति । आद्या निष्केवल्यशस्त्रयाज्या । सूत्रितं च—'पिबा सोममिन्द्र मन्दतु त्वेति याज्या' (आश्व. श्रौ. ५. १५) इति । चतुर्थेऽहनि माध्यंदिनसवने होत्रकशस्त्रेषु सप्त विराजस्त्रीं-स्तृचान् कृत्वैकैकस्तृचः शंसनीयः । तत्र 'न ते गिरः' इत्याद्याश्चतस्र ऋचः । सूत्रितं च—'न ते गिरो अपि मृष्ये तुरस्य प्र वो महे महिवृधे भरध्वम्' (आश्व. श्रौ. ७. ११) इति ॥

पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्राद्रिः ।
सोतुर्बाहुभ्यां सुयतो नार्वा ॥ १ ॥

पिब । सोमम् । इन्द्र । मन्दतु । त्वा । यम् । ते । सुसाव । हरिऽअश्व । अद्रिः ।
सोतुः । बाहुऽभ्याम् । सुऽयतः । न । अर्वा ॥ १ ॥

हे ᵛइन्द्र ᵛसोमं ᵛपिब । स सोमः ᵛत्वा त्वां ᵛमन्दतु मादयतु । हे ᵛहर्यश्व ᵛते त्वदर्थं ᵛसोतुः अभिषवकर्तुः ᵛबाहुभ्याम् ᵛअर्वा ᵛन रश्मिभ्यामश्व इव ᵛसुयतः सुष्ठु परिगृहीतः ᵛअद्रिः ग्रावा ᵛयं सोमं ᵛसुषाव ॥

यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि ।
स त्वामिन्द्र प्रभूवसो ममत्तु ॥ २ ॥

यः । ते । मदः । युज्यः । चारुः । अस्ति । येन । वृत्राणि । हरिऽअश्व । हंसि ।
सः । त्वाम् । इन्द्र । प्रभुवसो इति प्रभुऽवसो । ममत्तु ॥ २ ॥

हे ᵛहर्यश्व ᵛते तव ᵛयः[1] ᵛयुज्यः अनुगुणः ᵛचारुः समीचीनः ᵛमदः मदकरः सोमः ᵛअस्ति विद्यते ᵛयेन च पीतेन सोमेन ᵛवृत्राणि ᵛहंसि हे ᵛप्रभूवसो प्रभूतधन ᵛइन्द्र ᵛत्वां ᵛसः सोमः ᵛममत्तु मादयतु ॥

बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।
इमा ब्रह्म सधमादे जुषस्व ॥ ३ ॥

---

१ ख-त-न-भ-श–'यः' नास्ति ।

बोध। सु। मे। मघऽवन्। वाचम्। आ। इमाम्। याम्। ते। वसिष्ठः। अर्चति। प्रऽशस्तिम्। इमा। ब्रह्म। सधऽमादे। जुषस्व ॥ ३ ॥

हे [v]मघवन् धनवन्निन्द्र [v]ते तव [v]प्रशस्तिं स्तुतिरूपां [v]यां [v]वाचं [v]वसिष्ठः [v]अर्चति वदति ताम् [v]इमां [v]मे वसिष्ठस्य संबन्धिनीं वाचं [v]सु [v]आ [v]बोध सुष्ठु अभिबुध्यस्व। किंच [v]इमा इमानि [v]ब्रह्म ब्रह्माणि [v]सधमादे यज्ञे [v]जुषस्व सेवस्व ॥

श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषाम् ।
कृष्वा दुवांस्यन्तमा सचेमा ॥ ४ ॥

श्रुधि। हवम्। विऽपिपानस्य। अद्रेः। बोध। विप्रस्य। अर्चतः। मनीषाम्। कृष्व। दुवांसि। अन्तमा। सचा। इमा ॥ ४ ॥

हे इन्द्र [v]विपिपानस्य विपीतवतो विपिबतो वा मम [v]अद्रेः ग्राव्णः [v]हवम् आह्वानं [v]श्रुधि शृणु। तथा च निगमान्तरं—'ग्रावभ्यो वाचं वदता वदद्भ्यः' (ऋ. सं. १०. ९४. १) इति। [v]विप्रस्य प्राज्ञस्य वसिष्ठस्य [v]अर्चतः स्तुवतः [v]मनीषां स्तुतिं [v]बोध बुध्यस्व च। [v]इमा इमानि क्रियमाणानि [v]दुवांसि परिचरणानि [v]अन्तमा अन्तिकतमानि बुद्धिस्थानि [v]सचा सह सहायभूतः सन् वा [v]कृष्व कुरु च ॥

न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान् ।
सदा ते नाम स्वयशो विवक्मि ॥ ५ ॥

न। ते। गिरः। अपि। मृष्ये। तुरस्य। न। सुऽस्तुतिम्। असुर्यस्य। विद्वान्। सदा। ते। नाम। स्वऽयशः। विवक्मि ॥ ५ ॥

हे इन्द्र [v]तुरस्य शत्रूणां हिंसकस्य [v]ते तव [v]गिरः स्तुतीः [v]असुर्यस्य। द्वितीयार्थे षष्ठी। स्वदीयमसुर्यं बलं [v]विद्वान् जानन्नहं [v]न [v]अपि [v]मृष्ये। मृषिर्मार्जनकर्मा। न मार्जयामि। न परित्यजामीत्यर्थः। [v]सुष्टुतिं शोभनां स्तुतिं च [v]न अपि मृष्ये। मृषेर्मार्जनकर्मत्वमन्यत्रापि दृश्यते। तद्यथा—'मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठाः' (ऋ. सं. १. ७१. १०) इति। किंतु [v]स्वयशः असाधारणयशः [v]ते तव [v]नाम स्तोत्रं सदैव [v]विवक्मि ब्रवीमि ॥ ॥ ५ ॥

भूरि हि ते सवना मानुषेषु भूरिं मनीषी हवते त्वामित् ।
मारे अस्मन्मघवञ्ज्योक्कः ॥ ६ ॥

भूरि। हि। ते। सवना। मानुषेषु। भूरि। मनीषी। हवते। त्वाम्। इत्। मा। आरे। अस्मत्। मघऽवन्। ज्योक्। कः। इति। कः ॥ ६ ॥

हे [v]मघवन् [v]ते तव [v]सवना सवनानि सोमाभिषवणानि [v]भूरि भूरीणि [v]मानुषेषु अस्मासु वर्तन्त इति शेषः। [v]मनीषी स्तोता [v]त्वामित् त्वामेव [v]भूरि [v]हवते नितरां ह्वयति स्तौति। अतः [v]अस्मत् अस्मत्तः [v]आरे दूरे [v]ज्योक् चिरकालं [v]मा [v]कः आत्मानं मा कार्षीः। क्षिप्रमात्मानमस्मदासन्नं कुर्विस्यर्थः ॥

तुभ्येदिमा सवना शूर विश्वा तुभ्यं ब्रह्माणि वर्धना कृणोमि ।
त्वं नृभिर्हव्यो विश्वधासि ॥ ७ ॥

तुभ्य । इत् । इमा । सवना । शूर । विश्वा । तुभ्यम् । ब्रह्माणि । वर्धना । कृणोमि ।
त्वम् । नृऽभिः । हव्यः । विश्वधा । असि ॥ ७ ॥

हे vशूर vतुभ्येत् तुभ्यमेव vइमा इमानि vविश्वा विश्वानि vसवना सोमाभिषवणानि मया क्रियन्त इति शेषः । vतुभ्यं त्वदर्थमेव vवर्धना वर्धनानि vब्रह्माणि स्तोत्राणि vकृणोमि करोमि । vत्वम् एव vनृभिः यज्ञानां नेतृभिः vविश्वधा सर्वप्रकारैः vहव्यः ह्वातव्यः स्तुत्यो वा vअसि ॥

नू चिन्नु ते मन्यमानस्य दस्मोदंश्नुवन्ति महिमानमुग्र ।
न वीर्यमिन्द्र ते न राधः ॥ ८ ॥

नु । चित् । नु । ते । मन्यमानस्य । दस्म । उत् । अश्नुवन्ति । महिमानम् । उग्र ।
न । वीर्यम् । इन्द्र । ते । न । राधः ॥ ८ ॥

हे vदस्म दर्शनीय vमन्यमानस्य स्तूयमानस्य vते तव vमहिमानम् । नू चिदिति प्रतिषेधार्थः । vनु क्षिप्रं vनू vचित् vउदश्नुवन्ति केचन न प्राप्नुवन्ति । हे vउग्र उद्गूर्ण vते तव vराधः धनं vन उदश्नुवन्ति ॥

ये च पूर्व ऋषयो ये च नूत्ना इन्द्र ब्रह्माणि जनयन्त विप्राः ।
अस्मे ते सन्तु सख्या शिवानि यूयं पात स्वस्तिभिः सदा नः ॥ ९ ॥

ये । च । पूर्वे । ऋषयः । ये । च । नूत्नाः । इन्द्र । ब्रह्माणि । जनयन्त । विप्राः ।
अस्मे इति । ते । सन्तु । सख्या । शिवानि । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥९॥

vये vच vपूर्वे प्राक्तनाः vऋषयः vये vच vनूत्नाः नूतनाः vविप्राः मेधाविन ऋषयः vब्रह्माणि स्तोत्राणि vजनयन्त अजनयन्त तेष्विव vअस्मे अस्मास्वपि हे vइन्द्र vते तव vसख्या सख्यानि vशिवानि भद्राणि vसन्तु । स्पष्टमन्यत् ॥ ॥ ६ ॥

'उदु ब्रह्माणि' इति षड्ऋचं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । अनुक्रम्यते च— 'उदु षट्' इति । अग्निष्टोमे माध्यंदिने सवने ब्राह्मणाच्छंसिशस्त्र एतत्सूक्तम् । सूत्रितं च– 'उदु ब्रह्माण्यूर्जीषी वज्री वृषभस्तुराषाळिति याज्या' (आश्व. श्रौ. ५. १६) इति । चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्र एतदहरहःशस्यसंज्ञकं सूक्तम् । सूत्रितं च– 'उदु ब्रह्माण्यभि तष्टेवेतीतरावहरहःशस्ये' (आश्व. श्रौ. ७. ४) इति । अहर्गणेषु द्वितीयादिष्वहःसु एतदेव सूक्तम् । महाव्रतेऽपि निष्केवल्य एतत्सूक्तम् । सूत्रितं च– 'उदु ब्रह्माण्यैरत श्रवस्या ते मह इन्द्रोत्युग्रेति पञ्च सूक्तानि' (ऐ. आ. ५. २. २) इति ॥

उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।
आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि ॥ १ ॥

उत् । ऊँ इति । ब्रह्माणि । ऐरत । श्रवस्या । इन्द्रम् । सऽमर्ये । महय । वसिष्ठ ।
आ । यः । विश्वानि । शवसा । ततान । उपऽश्रोता । मे । ईवतः । वचांसि ॥ १ ॥

vअवस्या अन्नेच्छया vब्रह्माणि स्तोत्राणि हवींषि च इन्द्रार्थम् vउत् vऐरत[1] सर्वं ऋषय इति शेषः। vउ इति पूरणः। हे vवसिष्ठ त्वमपि vसमर्ये यज्ञे vइन्द्रं vमहय स्तोत्रेण हविषा च पूजय। अपि च vयः इन्द्रः vविश्वानि भुवनानि vशवसा बलेन vआ vततान सः[2] vईवतः उपगमनवतः vमे मम vवचांसि स्तुतिरूपाणि वाक्यानि vउपश्रोता भवतु॥

अयामि घोष इन्द्र देवजामिरिरज्यन्त यच्छुरुधो विवाचि।
नहि स्वमायुश्चिकिते जनेषु तानीदंहांस्यति पर्ष्यस्मान्॥ २॥

अयामि। घोषः। इन्द्र। देवऽजामिः। इरज्यन्त। यत्। शुरुधः। विऽवाचि।
नहि। स्वम्। आयुः। चिकिते। जनेषु। तानि। इत्। अंहांसि। अति। पर्षि। अस्मान्॥२॥

vयत् यदा vशुरुधः। शुचं रुन्धन्तीति शुरुध ओषध्यः। vइरज्यन्त वर्धन्ते तदा हे vइन्द्र त्वदर्थं vविवाचि स्तोतरि vदेवजामिः देवानां बन्धुः vघोषः। स्तुतिरूपः शब्दो घोषः। vअयामि अकारि। अपि च vजनेषु मध्ये केनापि vस्वमायुः स्वजीवितं[3] vनहि vचिकिते न ज्ञायते। यैः vआयुः क्षीयते vतानीत् तानि सर्वाण्येव vअंहांसि पापानि vअस्मान् vअति vपर्षि अतिपारय॥

युजे रथं गवेषणं हरिभ्यामुप ब्रह्माणि जुजुषाणमस्थुः।
वि बाधिष्ट स्य रोदसी महित्वेन्द्रो वृत्राण्यप्रती जघन्वान्॥ ३॥

युजे। रथम्। गोऽएषणम्। हरिऽभ्याम्। उप। ब्रह्माणि। जुजुषाणम्। अस्थुः।
वि। बाधिष्ट। स्यः। रोदसी इति। महिऽत्वा। इन्द्रः। वृत्राणि। अप्रति। जघन्वान्॥३॥

vगवेषणं गवां प्रापकमिन्द्रस्य vरथं vहरिभ्याम् इन्द्रवाहाभ्यां vयुजे स्तोत्रैरहं युनज्मि। vब्रह्माणि स्तोत्राणि vजुजुषाणं परिवारैः सेव्यमानमिन्द्रम्[4] vउप vअस्थुः उपातिष्ठन्त। vस्यः सोऽयमिन्द्रः vमहित्वा महत्त्वेन vरोदसी द्यावापृथिव्यौ vवि vबाधिष्ट व्यबाधिष्ट च। अपि च vइन्द्रः vवृत्राणि शत्रून् अप्रतिद्वन्द्वानि[5] vजघन्वान् हतवान्॥

आपश्चित्पिप्युः स्तर्यो[3] न गावो नक्षन्नृतं जरितारस्त इन्द्र।
याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान्॥ ४॥

आपः। चित्। पिप्युः। स्तर्यः। न। गावः। नक्षन्। ऋतम्। जरितारः। ते। इन्द्र।
याहि। वायुः। न। निऽयुतः। नः। अच्छ। त्वम्। हि। धीभिः। दयसे। वि। वाजान्॥४॥

हे vइन्द्र त्वत्प्रसादात् vआपश्चित् आपः vस्तर्यो vन vगावः स्तर्यो वशा गाव इव vपिप्युः वर्धन्ताम्। अप्रसूता गावो मांसला भवन्ति हि। vते तव vजरितारः स्तोतारश्च vऋतम् उदकं vनक्षन् व्याप्नुवन्। अपि च त्वं vनः अस्मान् vनियुतः vवायुर्न वायुरिव vअच्छ vयाहि अभियाहि। vत्वं vहि vधीभिः प्रज्ञाभिः कर्मभिर्वा vवाजान् अन्नानि vवि vदयसे स्तोतृभ्यः प्रयच्छसि॥

---

१. ज्ञ–ऐरत प्रेरितवन्तः। २. त–व्याप्तवान्। ३. त-न-भ-श–स्वं जीवितम्। ४. ख-भ–सेव्यमिन्द्रम्। ५. ख–अप्रतिद्वन्द्विनो; ज्ञ–प्रतिद्वन्द्वानि; न-भ–इति द्वन्द्वानि।

ते त्वा मदा इन्द्र मादयन्तु शुष्मिणं तुविराधसं जरित्रे ।
एको देवत्रा दयसे हि मर्तान्नस्मिञ्छूर सवने मादयस्व ॥ ५ ॥

ते । त्वा । मदाः । इन्द्र । मादयन्तु । शुष्मिणम् । तुविऽराधसम् । जरित्रे ।
एकः । देवऽत्रा । दयसे । हि । मर्तान् । अस्मिन् । शूर । सवने । मादयस्व ॥ ५ ॥

हे ᵛइन्द्र ᵛत्वा त्वां ᵛते एते ᵛमदाः मदकराः सोमाः ᵛमादयन्तु । अपि च ᵛजरित्रे स्तोत्रे ᵛशुष्मिणं बलवन्तं ᵛतुविराधसं बहुधनं पुत्रं प्रयच्छतीति शेषः । हे ᵛशूर त्वं ᵛदेवत्रा देवेषु ᵛएकः एव ᵛमर्तान् मनुष्यान् ᵛदयसे ᵛहि । दयतिरनुकम्पार्थः । ᵛअस्मिन् ᵛसवने यज्ञे ᵛमादयस्व ॥

एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः ।
स नः स्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

एव । इत् । इन्द्रम् । वृषणम् । वज्रऽबाहुम् । वसिष्ठासः । अभि । अर्चन्ति । अर्कैः ।
सः । नः । स्तुतः । वीरऽवत् । धातु । गोऽमत् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥६॥

ᵛवसिष्ठासः वसिष्ठाः ᵛवज्रबाहुं वज्रकल्पबाहुं ᵛवृषणं कामानां वर्षितारम् ᵛइन्द्रम् ᵛएवेत् उक्तेन प्रकारेणैव ᵛअर्कैः अर्चनीयैः स्तोत्रैः ᵛअभ्यर्चन्ति अभिपूजयन्ति । ᵛस्तुतः ᵛसः इन्द्रः ᵛनः अस्मभ्यं ᵛवीरवत् पुत्रादियुक्तं ᵛगोमत् गोयुक्तं[1] च धनं ᵛधातु ददातु । स्पष्टमन्यत् ॥ ॥ ७ ॥

' योनिष्ट इन्द्र सदने अकारि ' इति षड्चं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । अनुक्रम्यते च—' योनिः ' इति । महाव्रते निष्केवल्य एतत्सूक्तम् । सूत्रितं च—' योनिष्ट इन्द्र सदने अकारीत्येतस्य चतस्रः शस्त्वोत्तमामुपसंतत्योपोत्तमया परिदधाति ' (ऐ. आ. ५. ३. १) इति ॥

योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि ।
असो यथा नोऽविता वृधे च ददो वसूनि ममदश्च सोमैः ॥ १ ॥

योनिः । ते । इन्द्र । सदने । अकारि । तम् । आ । नृऽभिः । पुरुऽहूत । प्र । याहि ।
असः । यथा । नः । अविता । वृधे । च । ददः । वसूनि । ममदः । च । सोमैः ॥ १ ॥

हे ᵛइन्द्र ᵛते तव ᵛसदने सदनार्थं ᵛयोनिः स्थानम् ᵛअकारि । हे ᵛपुरुहूत ᵛनृभिः मरुद्भिः सार्धं ᵛतं योनिम् ᵛआ ᵛप्र ᵛयाहि । ᵛनः अस्माकं ᵛयथा ᵛअविता रक्षिता ᵛअसः भवसि नोऽस्माकं ᵛवृधे वर्धनाय ᵛच असः । तथा च ᵛवसूनि ᵛददः अस्मभ्यं देहि । ᵛसोमैः अस्मदीयैः ᵛममदः मादयस्व ᵛच ॥

गृभीतं ते मन इन्द्र द्विबर्हाः सुतः सोमः परिषिक्ता मधूनि ।
विसृष्टधेना भरते सुवृक्तिरियमिन्द्रं जोहुवती मनीषा ॥ २ ॥

---

१. ख-न-भ-श–गोयुतम्; त–गोयुतं कम् ।

गृभीतम्। ते। मनः। इन्द्र। द्विऽबर्हाः। सुतः। सोमः। परिऽसिक्ता। मधूनि।
विसृष्टऽधेना। भरते। सुऽवृक्तिः। इयम्। इन्द्रम्। जोहुवती। मनीषा ॥ २ ॥

हे vइन्द्र vद्विबर्हाः। षष्ठ्यर्थे प्रथमा। द्विबर्हसो द्वयोः स्थानयोः[1] परिवृढस्य vते तव vमनः vगृभीतम् अस्माभिः परिगृहीतम्। vसोमः च vसुतः अभिषुतः। vमधूनि च vपरिषिक्ता पात्रेषु परिषिक्तानि। vविसृष्टधेना विसृष्टजिह्वा मध्यमस्वरेणोच्चार्यमाणा vसुवृक्तिः सुसमाप्तिः vइयं vमनीषा स्तुतिः vइन्द्रं vजोहुवती भृशमाह्वयन्ती vभरते संश्रियते च ॥

आ नो दिव आ पृथिव्या ऋजीषिन्निदं बर्हिः सोमपेयाय याहि।
वहन्तु त्वा हरयो मद्यञ्चमाङ्गूषमच्छा तवसं मदाय ॥ ३ ॥

आ। नः। दिवः। आ। पृथिव्याः। ऋजीषिन्। इदम्। बर्हिः। सोमऽपेयाय। याहि।
वहन्तु। त्वा। हरयः। मद्यञ्चम्। आङ्गूषम्। अच्छ। तवसम्। मदाय ॥ ३ ॥

हे vऋजीषिन् इन्द्र vनः अस्माकम् vइदं vबर्हिः इमं यज्ञं vसोमपेयाय vदिवः स्वर्गात् vआ vयाहि आगच्छ। vपृथिव्याः अन्तरिक्षाच्च। 'आपः पृथिवी' इत्यन्तरिक्षनामसु पाठात्। vआ याहि। अपि च vतवसं प्रवृद्धं बलवन्तं वा vमद्यञ्चं मदभिमुखं vत्वा त्वाम् vआङ्गूषं स्तोत्रम् vअच्छ अभि vमदाय मदार्थं vहरयः अश्वाः vवहन्तु ॥

आ नो विश्वाभिरूतिभिः सजोषा ब्रह्म जुषाणो हर्यश्व याहि।
वरीवृजत्स्थविरेभिः सुशिप्रास्मे दधद्वृषणं शुष्ममिन्द्र ॥ ४ ॥

आ। नः। विश्वाभिः। ऊतिऽभिः। सऽजोषाः। ब्रह्म। जुषाणः। हरिऽअश्व। याहि।
वरीवृजत्। स्थविरेभिः। सुऽशिप्र। अस्मे इति। दधत्। वृषणम्। शुष्मम्। इन्द्र ॥४॥

हे vहर्यश्व हरिनामकाश्व vसुशिप्र शोभनहनो vइन्द्र vविश्वाभिः सर्वाभिः vऊतिभिः रक्षाभिः vसजोषाः संगतः vस्थविरेभिः वृद्धैर्मरुद्भिः सह vवरीवृजत् शत्रून् भृशं हिंसन् vअस्मे अस्मभ्यं vवृषणं कामानां वर्षितारं vशुष्मं बलवन्तं पुत्रं vदधत् प्रयच्छन्[2] vब्रह्म स्तोत्रं vजुषाणः सेवमानः vनः अस्मान् vआ vयाहि ॥

एष स्तोमो मह उग्राय वाहे धुरीव वात्यो न वाजयन्नधायि।
इन्द्रं त्वायमर्क ईट्टे वसूनां दिवीव द्यामधि नः श्रोमतं धाः ॥ ५ ॥

एषः। स्तोमः। महे। उग्राय। वाहे। धुरिऽइव। अत्यः। न। वाजयन्। अधायि।
इन्द्र। त्वा। अयम्। अर्कः। ईट्टे। वसूनाम्। दिविऽइव। द्याम्। अधि। नः। श्रोमतम्। धाः॥५॥

vमहे महते vउग्राय उद्गूर्णाय ओजस्विने वा vवाहे विश्वस्य वोढ्रे इन्द्राय vधुरीव रथस्य vअत्यो vन अश्व इव vवाजयन् बलं कुर्वन् vएष vस्तोमः vअधायि व्यधायि। अथ प्रत्यक्षस्तुतिः। हे vइन्द्र यं त्वाम् vअयमर्कः स्तोता vवसूनां वसूनि धनानि vईट्टे याचते स त्वं vनः अस्मासु vद्यां vदिवीव vश्रोमतं श्रवणीयमन्नं पुत्रं वा vअधि vधाः अधिधेहि ॥

---

१. श–स्थानयोः। तथा च निरुक्तं–' परिवृढो मध्यमे च स्थाने उत्तमे च ' (निरु. ६. १७)।
२. श–प्रयच्छंस्त्वम्।

एवा नं इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम ।
इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

एव । नः । इन्द्र । वार्यस्य । पूर्धि । प्र । ते । महीम् । सुऽमतिम् । वेविदाम ।
इषम् । पिन्व । मघवत्ऽभ्यः । सुऽवीराम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥६॥

हे ᵛइन्द्र ᵛनः अस्मान् ᵛएव एवं ᵛवार्यस्य । तृतीयार्थे षष्ठी । वरणीयेन धनेन ᵛपूर्धि पूरय । ᵛते तव ᵛमहीं महतीं ᵛसुमतिम् अनुग्रहबुद्धिं ᵛवेविदाम भृशं लभेमहि । ᵛमघवद्भयः हविष्मद्भयोऽस्मभ्यं ᵛसुवीरां शोभनपुत्रादियुताम् ᵛइषम् अन्नं ᵛपिन्व प्रयच्छेत्यर्थः । स्पष्टमन्यत् ॥ ॥ ८ ॥

'आ ते मह इन्द्र' इति षड्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । 'आ ते' इत्यनुक्रान्तम् । महाव्रते निष्केवल्य इदमादीनि पञ्च सूक्तानि । सूत्रितं च—'आ ते मह इन्द्रोत्युमेति पञ्च सूक्तानि' (ऐ. आ. ५. २. २) इति ॥

आ ते मह इन्द्रोत्युग्र समन्यवो यत्समरन्त सेनाः ।
पतति दिद्युन्नर्यस्य बाह्वोर्मा ते मनो विष्वद्र्यङ्गवि चारीत् ॥ १ ॥

आ । ते । महः । इन्द्र । ऊती । उग्र । सऽमन्यवः । यत् । सम्ऽअरन्त । सेनाः ।
पतति । दिद्युत् । नर्यस्य । बाह्वोः । मा । ते । मनः । विष्वद्र्यक् । वि । चारीत् ॥ १ ॥

हे ᵛउग्र उद्गूर्ण ओजस्विन् ᵛइन्द्र ᵛयत् यदा ᵛसमन्यवः । समो मन्युरभिमानो यासां ताः समन्यवः । ᵛसेनाः ᵛसमरन्त युध्यन्ते संगच्छन्ते[1] वा तदा ᵛनर्यस्य नरहितस्य ᵛमहः महतः ᵛते तव ᵛबाह्वोः स्थिता ᵛदिद्युत् आयुधम् । 'दिद्युत् हेतिः' इति वज्रनामसु पाठात् । ᵛऊती ऊत्यै अस्मद्रक्षायै ᵛआ ᵛपतति आपततु । तव[2] ᵛविष्वद्र्यक् विष्वगन्तृ ᵛमनः च ᵛमा ᵛवि ᵛचारीत् अस्मास्वेव स्थिरं भवतु ॥

नि दुर्ग इन्द्र श्नथिह्यमित्रानभि ये नो मर्तासो अमन्ति ।
आरे तं शंसं कृणुहि निनित्सोरा नो भर संभरणं वसूनाम् ॥ २ ॥

नि । दुःऽगे । इन्द्र । श्नथिहि । अमित्रान् । अभि । ये । नः । मर्तासः । अमन्ति ।
आरे । तम् । शंसम् । कृणुहि । निनित्सोः । आ । नः । भर । सम्ऽभरणम् । वसूनाम् ॥२॥

हे ᵛइन्द्र ᵛदुर्गे युद्धे ᵛये ᵛमर्तासः मर्ताः ᵛअभि अभिमुखाः सन्तः ᵛनः अस्मान् ᵛअमन्ति अभिभवन्ति तान् ᵛअमित्रान् शत्रून् ᵛनि ᵛश्नथिहि निजहि । अपि च ᵛनिनित्सोः अस्मान्निन्दितुमिच्छतो नरस्य ᵛतं ᵛशंसम् आशंसनम् ᵛआरे दूरे ᵛकृणुहि कुरु । अपि च ᵛनः अस्मभ्यं ᵛवसूनां धनानां ᵛसंभरणं समूहम् ᵛआ ᵛभर आहर ॥

शतं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु ।
जहि वधर्वनुषो मर्त्यस्यास्मे द्युम्नमधि रत्ना च धेहि ॥ ३ ॥

---

१. श्न–युद्धार्थं संगच्छन्ते; त-श–युद्धार्थं सगच्छन्ते । २. त२–ते तव ।

शतम् । ते । शिप्रिन् । ऊतयः । सुऽदासे । सहस्रम् । शंसाः । उत । रातिः । अस्तु ।
जहि । वधः । वनुषः । मर्त्यस्य । अस्मे इति । द्युम्नम् । अधि । रत्नम् । च । धेहि ॥३॥

हे ᵛशिप्रिन् उष्णीषिन्निन्द्र ᵛते त्वदीयाः ᵛशतं बह्वयः ᵛऊतयः रक्षाः ᵛसुदासे शोभनदानाय मह्यं सन्तु । ᵛसहस्रं ᵛशंसाः शंसनीयाः कामाश्च सन्तु । ᵛउत अपि च ᵛरातिः धनम् ᵛअस्तु । ᵛवनुषः हिंसकस्य ᵛमर्त्यस्य ᵛवधः हिंसासाधनमायुधं च ᵛजहि । अपि च ᵛअस्मे ᵛअधि अस्मासु ᵛद्युम्नं दीप्तिमदन्नं यशो वा ᵛरत्नं ᵛच ᵛधेहि । तथा च यास्कः—' द्युम्नं द्योततेर्यशो वान्नं वा । अस्मे द्युम्नमधि रत्नं च धेहि । अस्मासु द्युम्नं च रत्नं च धेहि ' (निरु. ५. ५) इति ॥

त्वावतो हीन्द्र क्रत्वे अस्मि त्वावतोऽवितुः शूर रातौ ।
विश्वेदहानि तविषीव उग्र ओकः कृणुष्व हरिवो न मर्धीः ॥ ४ ॥

त्वाऽवतः । हि । इन्द्र । क्रत्वे । अस्मि । त्वाऽवतः । अवितुः । शूर । रातौ ।
विश्वा । इत् । अहानि । तविषीऽवः । उग्र । ओकः । कृणुष्व । हरिऽवः । न । मर्धीः॥४॥

हे ᵛइन्द्र ᵛत्वावतः त्वत्सदृशस्य ᵛक्रत्वे कर्मणे ᵛअस्मि भवामि ᵛहि । हे ᵛशूर ᵛअवितुः विश्वस्य रक्षितुः ᵛत्वावतः त्वत्सदृशस्य ᵛरातौ दाने चास्मीति शेषः । हे ᵛतविषीवः बलवन् ᵛउग्र ओजस्विन्निन्द्र[1] ᵛविश्वेत् विश्वान्येव ᵛअहानि ᵛओकः अस्माकं स्थानं ᵛकृणुष्व कुरु । हे ᵛहरिवः हरिवन् ᵛन ᵛमर्धीः अस्मान्न हिंस्याः ॥

कुत्सा एते हर्यश्वाय शूषमिन्द्रे सहो देवजूतमियानाः ।
सत्रा कृधि सुहना शूर वृत्रा वयं तरुत्राः सनुयाम वाजम् ॥ ५ ॥

कुत्साः । एते । हरिऽअश्वाय । शूषम् । इन्द्रे । सहः । देवऽजूतम् । इयानाः ।
सत्रा । कृधि । सुऽहना । शूर । वृत्रा । वयम् । तरुत्राः । सनुयाम । वाजम् ॥ ५ ॥

ᵛएते ᵛवयं वसिष्ठाः ᵛहर्यश्वाय हरिनामकाश्वायेन्द्राय ᵛशूषं सुखकरं स्तोत्रं ᵛकुत्साः कुर्वाणाः । करोतेः कुत्सशब्दनिष्पत्तिः । ᵛइन्द्रे ᵛदेवजूतं देवैः प्रेरितं ᵛसहः बलम् ᵛइयानाः याचमानाः ᵛतरुत्राः दुर्गाणि तीर्णाः सन्तः ᵛवाजं बलं ᵛसनुयाम लभेमहि । अपि च हे ᵛशूर ᵛवृत्रा वृत्राणि शत्रून् ᵛसुहना हन्तुं सुशकानि ᵛसत्रा सर्वदा ᵛकृधि कुरु ॥

एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम ।
इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

एव । नः । इन्द्र । वार्यस्य । पूर्धि । प्र । ते । महीम् । सुऽमतिम् । वेविदाम ।
इषम् । पिन्व । मघवत्ऽभ्यः । सुऽवीराम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥६॥

इयं व्याख्यातचरा ॥ ॥ ९ ॥

' न सोम इन्द्रम् ' इति पञ्चर्चं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रम्यते— ' न सोमः पञ्च ' इति । महाव्रत उक्तो विनियोगः ॥

---

१. श—तेजस्विन्निन्द्र ।

न सोम इन्द्रमसुतो ममाद नाब्रह्माणो मघवानं सुतासः ।
तस्मा उक्थं जनये यज्जुजोषन्नवन्नवीयः शृणवद्यथा नः ॥ १ ॥

न । सोमः । इन्द्रम् । असुतः । ममाद । न । अब्रह्माणः । मघऽवानम् । सुतासः ।
तस्मै । उक्थम् । जनये । यत् । जुजोषत् । नूऽवत् । नवीयः । शृणवत् । यथा । नः ॥१॥

vमघवानं धनवन्तम् vइन्द्रम् vअसुतः नाभिषुतः vसोमः vन vममाद न तर्पयति । vसुतासः अभिषुता अपि सोमाः vअब्रह्माणः स्तोत्रहीनाः vन ममदुः । ममाद इत्येतदाख्यातं बहुवचनान्ततया विपरिणतं सदत्र संबध्यते । अत एव त्रिष्वपि सवनेषु पावमानैः स्तोत्रैः स्तुता एव सोमा हूयन्ते । अपि च vनः अस्मदीयं vयत् vउक्थम् इन्द्रः vजुजोषत् सेवेत vयथा च vनूवत् राजेवादरेण vशृणवत् शृणुयात् तथा vनवीयः नवतरम्[1] उक्थं शस्त्रं vतस्मै इन्द्राय vजनये । पठामीत्यर्थः ॥

उक्थउक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानं सुतासः ।
यदीं सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते ॥ २ ॥

उक्थेऽउक्थे । सोमः । इन्द्रम् । ममाद । नीथेऽनीथे । मघऽवानम् । सुतासः ॥
यत् । ईम् । सऽबाधः । पितरम् । न । पुत्राः । समानऽदक्षाः । अवसे । हवन्ते ॥ २ ॥

vयत् यस्मात् vउक्थेउक्थे शस्त्रेशस्त्रे क्रियमाणे vसोमः vमघवानम् vइन्द्रं vममाद मादयति vनीथेनीथे स्तोत्रेस्तोत्रे क्रियमाणे vसुतासः अभिषुताः सोमाः मादयन्ति तस्मात् vईम् एनमिन्द्रं vसबाधः परस्परं मिलिताः vसमानदक्षाः समानोत्साहा ऋत्विजः vपुत्राः vपितरं vन पितरमिव vअवसे तर्पणाय स्वरक्षणाय वा vहवन्ते । शस्त्रैः स्तोत्रैश्च स्तुवन्ति ॥

चकार ता कृणवन्नूनमन्या यानि ब्रुवन्ति वेधसः सुतेषु ।
जनीरिव पतिरेकः समानो नि मामृजे पुर इन्द्रः सु सर्वाः ॥ ३ ॥

चकार । ता । कृणवत् । नूनम् । अन्या । यानि । ब्रुवन्ति । वेधसः । सुतेषु ।
जनीःऽइव । पतिः । एकः । समानः । नि । ममृजे । पुरः । इन्द्रः । सु । सर्वाः ॥ ३ ॥

vवेधसः स्तोत्राणां विधातारः vसुतेषु सोमेष्वभिषुतेषु vयानि कर्माणि vब्रुवन्ति तानि वृत्रवधादीनि कर्माणीन्द्रः पूर्वस्मिन् काले vचकार । vनूनं संप्रत्यपि vअन्या अन्यानि कर्माणि vकृणवत् कुर्यात् । अपि च सः vइन्द्रः vसर्वाः vपुरः शत्रुनगरीः vसमानः समवृत्तिः vएकः[2] असहायः[2] vपतिः vजनीरिव जाया इव vसु vनि vमामृजे सम्यक् शोधयेत् ॥

एवा तमाहुरुत शृण्व इन्द्र एको विभक्ता तरणिर्मघानाम् ।
मिथस्तुरः ऊतयो यस्य पूर्वीरस्मे भद्राणि सश्चत प्रियाणि ॥ ४ ॥

---

१. ख-न-भ–नवम् । २. ख-ञ-त-न-भ-श–'एकः असहायः' नास्ति ।

एव । तम् । आहुः । उत । शृण्वे । इन्द्रः । एकः । विऽभक्ता । तरणिः । मघानाम् ।
मिथःऽतुरः । ऊतयः । यस्य । पूर्वीः । अस्मे इति । भद्राणि । सश्चत । प्रियाणि ॥ ४ ॥

vयस्य इन्द्रस्य vमिथः परस्परं vतुरः बाधमानाः संश्लिष्टा वा vपूर्वीः पूर्व्यो बह्व्यः vऊतयः रक्षाः सन्ति vतम् vएव एवमुक्तगुणम् vआहुः पूर्वे ऋषयः । vउत अपि चाद्यापि सः vइन्द्रः vमघानां मंहनीयानां धनानां vविभक्ता दाता इति vतरणिः आपदस्तारयितेति vशृण्वे श्रूयते । तस्य च प्रसादात् vअस्मे अस्मान् vप्रियाणि vभद्राणि कल्याणानि vसश्चत सेवन्ताम् ॥

एवा वसिष्ठ इन्द्रमूतये नॄन्कृष्टीनां वृषभं सुते गृणाति ।
सहस्रिण उप नो माहि वाजान्युयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

एव । वसिष्ठः । इन्द्रम् । ऊतये । नॄन् । कृष्टीनाम् । वृषभम् । सुते । गृणाति ।
सहस्रिणः । उप । नः । माहि । वाजान् । युयम् । पात । स्वस्तिऽभिः । सदा । नः ॥५॥

vवसिष्ठः vनॄन् नृणाम् । षष्ठ्यर्थे द्वितीया । vऊतये रक्षायै vकृष्टीनां प्रजानां vवृषभं कामानां वर्षितारम् vइन्द्रम् vएव एवं पूर्वोक्तप्रकारेण vगृणाति स्तौति । अथ प्रत्यक्षस्तुतिः । हे इन्द्र vनः अस्मभ्यं vसहस्रिणः सहस्रसंख्याकान् vवाजान् अन्नानि vउप vमाहि । प्रयच्छेत्यर्थः । स्पष्टमन्यत् ॥ ॥ १० ॥

' इन्द्रं नरः ' इति पञ्चर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । ' इन्द्रं नरः ' इत्यनुक्रान्तम् । महाव्रते निष्केवल्य एतत्सूक्तमुक्तं तृतीयत्वेन । ऐन्द्रे पशौ वपापुरोडाशहविषामाद्यास्तिस्रः क्रमेणानुवाक्याः । सूत्रितं च—' इन्द्रं नरो नेमधिता हवन्त इत्युरुं[1] नो लोकमनु नेषि विद्वान् ' (आश्व. श्रौ. ३. ७) इति ॥

इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः ।
शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वं नः ॥ १ ॥

इन्द्रम् । नरः । नेमऽधिता । हवन्ते । यत् । पार्याः । युनजते । धियः । ताः ।
शूरः । नृऽसाता । शवसः । चकानः । आ । गोऽमति । व्रजे । भज । त्वम् । नः ॥ १ ॥

vयत् यदा vपार्याः युद्धभरणनिमित्ताः vताः प्रसिद्धाः vधियः कर्माणि vयुनजते प्रयुञ्जन्ते तदा[2] vनरः नेतारः यम् vइन्द्रं vनेमधिता नेमधितौ संग्रामे vहवन्ते[2] ह्वयन्ति सः vत्वं vशूरः vनृषाता नृणां संभक्ता च vशवसः बलस्य बलं vचकानः कामयमानश्च सन् vगोमति[3] vव्रजे गोष्ठे गोसमूहे vनः अस्मान् vआ vभज प्रापय[3] ॥

---

१. ज्ञ–इति तिस्र ऊरुम् । २. ख-ज्ञ-न-भ-श–' तदा नरो नेतारो यमिन्द्रं हवन्ते; त-य–नेमधिता नेमधितौ संग्रामे नरः कर्मणां नेतार इन्द्रं हवन्त आह्वयन्तीत्यर्थः । यमिन्द्रं हवन्ते । ३. ख-ज्ञ-भ-श-' गोमति...प्रापय ' नास्ति; घ– नः अस्माकं गोमति गोयुक्ते व्रजे गोष्ठे गोष्ठमाभज संरक्ष; ज्ञ–गोमति गावः सन्त्यस्मिन्निति गोमत् तस्मिन् व्रजे गोष्ठे समूहे नोऽस्मानाभज प्रापय; त२–गोमति गावः सन्त्यस्मिन्निति गोमत् व्रजे गोष्ठे समूहे नोऽस्माना भज प्रापय; य–गोमति व्रजे नोऽस्माना भज देहीत्यर्थः ।

य इन्द्र शुष्मो मघवन्ते अस्ति शिक्षा सखिभ्यः पुरुहूत नृभ्यः ।
त्वं हि दृळ्हा मघवन्विचेता अपा वृधि परिवृतं न राधः ॥ २ ॥

यः । इन्द्र । शुष्मः । मघऽवन् । ते । अस्ति । शिक्ष । सखिऽभ्यः । पुरुऽहूत । नृऽभ्यः ।
त्वम् । हि । दृळ्हा । मघऽवन् । विऽचेताः । अप । वृधि । परिऽवृतम् । न । राधः ॥२॥

हे [v]पुरुहूत बहुभिराहूत [v]इन्द्र [v]ते तव [v]यः [v]शुष्मः बलम् [v]अस्ति तं शुष्मं [v]सखिभ्यः स्तोतृभ्यः [v]नृभ्यः [v]शिक्ष देहि । अपि च हे [v]मघवन् [v]हि यस्मात् [v]दृळ्हा दृढानि । पुरां[1] द्वाराणि[1] बिभेदिथेति शेषः । तस्मात् सः [v]त्वं [v]विचेताः विविक्तप्रज्ञः सन् [v]परिवृतं तिरोहितं [v]राधः धनम् [v]अप [v]वृधि अस्मभ्यमपवृणु । [v]न इति संप्रत्यर्थे ॥

इन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति ।
ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतश्चिदर्वाक् ॥ ३ ॥

इन्द्रः । राजा । जगतः । चर्षणीनाम् । अधि । क्षमि । विषुऽरूपम् । यत् । अस्ति ।
ततः । ददाति । दाशुषे । वसूनि । चोदत् । राधः । उपऽस्तुतः । चित् । अर्वाक् ॥ ३ ॥

सः[2] [v]इन्द्रः [v]जगतः जङ्गमस्य पश्वादेर्यतः [v]राजा ईश्वरो भवति [v]चर्षणीनां मनुष्याणां च राजा भवति [v]अधि [v]क्षमि क्षमायां [v]विषुरूपं नानारूपं [v]यत् धनम् [v]अस्ति तस्यापि राजा भवति [v]ततः [v]दाशुषे यजमानाय [v]वसूनि धनानि [v]ददाति । स इन्द्रोऽस्माभिः [v]उपस्तुतः एव सन् [v]राधः धनम् [v]अर्वाक् अस्मदभिमुखं [v]चोदत् प्रेरयतु ॥

नू चिन्न इन्द्रो मघवा सहूती दानो वाजं नि यमते न ऊती ।
अनूना यस्य दक्षिणा पीपाय वामं नृभ्यो अभिवीता सखिभ्यः ॥ ४ ॥

नु । चित् । नः । इन्द्रः । मघऽवा । सऽहूती । दानः । वाजम् । नि । यमते । नः । ऊती ।
अनूना । यस्य । दक्षिणा । पीपाय । वामम् । नृऽभ्यः । अभिऽवीता । सखिऽभ्यः ॥ ४ ॥

[v]मघवा धनवान् [v]दानः ददानः सः [v]इन्द्रः [v]नः अस्माकं [v]सहूती सहूत्या मरुद्भिः सहाह्वानेन [v]वाजम् अन्नं [v]नः अस्मभ्यं [v]ऊती ऊत्यै रक्षायै [v]नू [v]चित् क्षिप्रमेव [v]नि [v]यमते प्रयच्छतु । [v]यस्य इन्द्रस्य [v]अनूना संपूर्णा [v]अभिवीता अभिप्राप्ता [v]दक्षिणा दानं [v]सखिभ्यः स्तोतृभ्यः [v]नृभ्यः [v]वामं वननीयं धनं [v]पीपाय दोग्धि ॥

नू इन्द्र राये वरिवस्कृधी न आ ते मनो ववृत्याम मघाय ।
गोमदश्वावद्रथवद्वयन्तो यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

नु । इन्द्र । राये । वरिवः । कृधि । नः । आ । ते । मनः । ववृत्याम । मघाय ।
गोऽमत् । अश्वऽवत् । रथऽवत् । व्यन्तः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥५॥

---

१. ख-भ– पुरद्वाराणि । २. ख-ङ्ग-त३-न-भ-श– यः ।

हे ᵛइन्द्र ᵛनः अस्मभ्यं ᵛराये धनप्राप्तये ᵛनु क्षिप्रं ᵛवरिवः धनम्। 'वेदो वरिवः' इति धननामसु पाठात्। त्वं ᵛकृधि देहि। वयं ᵛते तव ᵛमनः ᵛमघाय मंहनीयाय स्तुत्या ᵛआ ᵛवृत्याम आवर्तयाम। स्पष्टमन्यत्॥ ॥ ११ ॥

'ब्रह्मा ण इन्द्र' इति पञ्चर्चमेकादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम्। 'ब्रह्मा णः' इत्यनुक्रान्तम्। महाव्रते निष्केवल्ये पञ्चमस्वेनास्य सूक्तस्य विनियोग उक्तः। अष्टमेऽहनि प्रउगशस्त्र आद्यस्तृचः ऐन्द्रः (आश्व. श्रौ. ८. १०)॥

ब्रह्मा ण इन्द्रोप याहि विद्वानर्वाञ्चस्ते हरयः सन्तु युक्ताः।
विश्वे चिद्धि त्वा विहवन्त मर्ता अस्माकमिच्छृणुहि विश्वमिन्व ॥ १ ॥

ब्रह्म। नः। इन्द्र। उप। याहि। विद्वान्। अर्वाञ्चः। ते। हरयः। सन्तु। युक्ताः।
विश्वे। चित्। हि। त्वा। विऽहवन्त। मर्ताः। अस्माकम्। इत्। शृणुहि। विश्वम्ऽइन्व॥१॥

हे ᵛइन्द्र त्वं ᵛविद्वान् जानन् ᵛनः अस्माकं ᵛब्रह्म स्तोत्रं ᵛउप ᵛयाहि। ᵛते तव ᵛहरयः अश्वाश्च ᵛअर्वाञ्चः अस्मदभिमुखाः ᵛयुक्ताः ᵛसन्तु। हे ᵛविश्वमिन्व विश्वप्रीणयितरिन्द्र ᵛत्वा त्वां ᵛविश्वे सर्वे ᵛमर्ताः मनुष्याः ᵛचित् ᵛहि यद्यपि ᵛविहवन्त पृथग्हवन्ते तथापि ᵛअस्माकमित् अस्माकमेव हवं ᵛशृणुहि शृणु॥

हवं त इन्द्र महिमा व्यानड् ब्रह्म यत्पासि शवसिन्नृषीणाम्।
आ यद्वज्रं दधिषे हस्त उग्र घोरः सन्क्रत्वा जनिष्टा अषाळ्हः ॥ २ ॥

हवम्। ते। इन्द्र। महिमा। वि। आनट्। ब्रह्म। यत्। पासि। शवसिन्। ऋषीणाम्।
आ। यत्। वज्रम्। दधिषे। हस्ते। उग्र। घोरः। सन्। क्रत्वा। जनिष्टाः। अषाळ्हः ॥२॥

हे ᵛशवसिन् बलवन् ᵛइन्द्र ᵛयत् यदा ᵛऋषीणां ᵛब्रह्म स्तोत्रं ᵛपासि रक्षसि। स्तोत्रस्य रक्षणं नाम फलप्रदानम्[1]। तदा ᵛते तव ᵛमहिमा ᵛहवं हवः स्तोता तं ᵛव्यानट् व्याप्नोतु[2]। हे ᵛउग्र ओजस्विन्निन्द्र ᵛयत् यदा ᵛहस्ते पाणौ ᵛवज्रम् ᵛआ ᵛदधिषे धारयसि तदा ᵛक्रत्वा शत्रुवधादिना कर्मणा ᵛघोरः ᵛसन् ᵛअषाळ्हः शत्रुभिरनभिभूतः ᵛजनिष्टाः अजनिष्टाः अभवः॥

तव प्रणीतीन्द्र जोहुवानान्त्सं यन्नृभिर्न रोदसी निनेथ।
महे क्षत्राय शवसे हि जज्ञेऽतूतुजिं चित्तूतुजिरशिश्नत् ॥ ३ ॥

तव। प्रऽनीती। इन्द्र। जोहुवानान्। सम्। यत्। नृन्। न। रोदसी इति। निनेथ।
महे। क्षत्राय। शवसे। हि। जज्ञे। अतूतुजिम्। चित्। तूतुजिः। अशिश्नत् ॥ ३ ॥

हे ᵛइन्द्र ᵛयत् यस्त्वं ᵛतव ᵛप्रणीती प्रणीत्या प्रणयनेन ᵛजोहुवानान् भृशं स्तुवतः ᵛनॄन् ᵛरोदसी द्यावापृथिव्यौ ᵛसं ᵛनिनेथ संगमयसि। दिवि पृथिव्यां च स्तोतॄन् प्रतिष्ठापयसीत्यर्थः[3]। स त्वं ᵛमहे महते ᵛक्षत्राय धनाय। 'रयिः क्षत्रम्' इति धननामसु पाठात्। ᵛशवसे बलाय च।

---

१. ख-न-भ-प्रदानम्। २. ख-व्याप्नोति। ३. ख-ङ्ग-त-न-भ-प्रतिष्ठापयतीत्यर्थः; श-प्रतिष्ठापयन्तीत्यर्थः।

यजमानेभ्यो महद्धनं बलं च दातुमित्यर्थः । ᵛजज्ञे जज्ञिषे । ᵛहि इति हेत्वर्थे । यत एवमतः कारणात् ᵛअतृतुजिम् अदातारमयजमानं ᵛतृतुजिः दाता यजमानः ᵛअशिश्नत् । श्नथतिर्हिंसाकर्मा । तस्माल्लडर्थे लुङ् । हिनस्ति । ᵛचित् इत्येवकारार्थे ॥

एभिर्नो इन्द्राहभिर्दशस्य दुर्मित्रासो हि क्षितयः पवन्ते ।
प्रति यच्चष्टे अनृतमनेना अव द्विता वरुणो मायी नः सात् ॥ ४ ॥

एभिः । नः । इन्द्र । अहऽभिः । दशस्य । दुःऽमित्रासः । हि । क्षितयः । पवन्ते ।
प्रति । यत् । चष्टे । अनृतम् । अनेनाः । अव । द्विता । वरुणः । मायी । नः । सात् ॥४॥

हे ᵛइन्द्र ᵛदुर्मित्रासः दुष्टमित्रभूता[1] बाधकाः ᵛक्षितयः जनाः ᵛपवन्ते अभिगच्छन्ति । पवतिर्गतिकर्मा । तेभ्यो धनमाच्छिद्य ᵛनः अस्मभ्यम् ᵛएभिः सात्त्विकैः ᵛअहभिः अहोभिः ᵛदशस्य देहि । किंच ᵛअनेनाः एनसां निहन्ता ᵛमायी प्रज्ञावान् ᵛवरुणः ᵛयत् ᵛअनृतं ᵛनः अस्मासु ᵛप्रति ᵛचष्टे अभिपश्यति तदनृतं हे इन्द्र त्वत्प्रसादात् ᵛद्विता द्विधा ᵛअव ᵛसात् अवस्यतु विमोचयतु । तथा च यास्कः—'स्यतिरुपसृष्टो विमोचने' (निरु. १. १७) इति ॥

वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

वोचेम । इत् । इन्द्रम् । मघऽवानम् । एनम् । महः । रायः । राधसः । यत् । ददत् । नः ।
यः । अर्चतः । ब्रह्मऽकृतिम् । अविष्ठः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

ᵛयत् य इन्द्रः ᵛमहः महतः ᵛराधसः संराधकस्य ᵛरायः धनस्य । द्वितीयार्थे षष्ठी । संराधकं महद्धनं ᵛनः अस्मभ्यं ᵛददत् प्रायच्छत् ᵛयः चेन्द्रः ᵛअर्चतः स्तुवतः ᵛब्रह्मकृतिं क्रियमाणं ब्रह्म स्तोत्रम् ᵛअविष्ठः अतिशयेन रक्षिता गन्ता भवति तम् ᵛएनं ᵛमघवानं धनवन्तम् ᵛइन्द्रं ᵛवोचेमेत् स्तुवेमैव । स्पष्टमन्यत् ॥ ॥ १२ ॥

'अयं सोम इन्द्र' इति पञ्चर्चं द्वादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । 'अयं सोमः' इत्यनुक्रान्तम् । व्यूळ्हे दशरात्रे नवमेऽहनि 'अयं सोम इन्द्र' इति प्रउगशस्त्र ऐन्द्रस्तृचः । सूत्रितं च—'अयं सोम इन्द्र तुभ्यं सुन्व आ तु प्र ब्रह्माणः' (आश्व. श्रौ. ८. ११) इति । षोडशिशस्त्रे 'ब्रह्मन्वीर' इत्येषा त्रिष्टुप् । सूत्रितं च—'ब्रह्मन्वीर ब्रह्मकृतिं जुषाण इति त्रिष्टुप्' (आश्व. श्रौ. ६. २) इति ॥

अयं सोम इन्द्र तुभ्यं सुन्व आ तु प्र याहि हरिवस्तदोकाः ।
पिबा त्वस्य सुषुतस्य चारोर्ददो मघानि मघवन्नियानः ॥ १ ॥

अयम् । सोमः । इन्द्र । तुभ्यम् । सुन्वे । आ । तु । प्र । याहि । हरिऽवः । तत्ऽओकाः ।
पिब । तु । अस्य । सुऽसुतस्य । चारोः । ददः । मघानि । मघऽवन् । इयानः ॥ १ ॥

---

१. ख-भ-दुष्टभूताः; य-दुष्टमित्राः; श-दुष्टा मित्रभूताः ।

हे [v]इन्द्र [v]तुभ्यं त्वदर्थम् [v]अयम् एषः [v]सोमः [v]सुन्वे अभिषुतोऽभवत् । हे [v]हरिवः हरिविन्द्र [v]तदोकाः । सवनीयो[1] यस्यासौ तदोकाः । [v]तु क्षिप्रम् [v]आ [v]प्र [v]याहि । [v]सुषुतस्य सम्यगभिषुतस्य [v]चारोः शोभनस्य [v]अस्य सोमस्य । द्वितीयार्थे षष्ठी । सम्यगभिषुतं शोभनमित्यर्थः । [v]तु क्षिप्रं [v]पिब च । अपि च हे [v]मघवन् [v]इयानः उपगम्यमानो याच्यमानो वा त्वं [v]मघानि धनानि [v]ददः अस्मभ्यं देहि ॥

ब्रह्मन्वीर ब्रह्मकृतिं जुषाणोऽर्वाचीनो हरिभिर्याहि तूयम् ।
अस्मिन्नु षु सवने मादयस्वोप ब्रह्माणि शृणव इमा नः ॥ २ ॥

ब्रह्मन् । वीर । ब्रह्मऽकृतिम् । जुषाणः । अर्वाचीनः । हरिऽभिः । याहि । तूयम् ।
अस्मिन् । ऊँ इति । सु । सवने । मादयस्व । उप । ब्रह्माणि । शृणवः । इमा । नः ॥२॥

हे [v]ब्रह्मन् परिवृढ [v]वीर इन्द्र [v]ब्रह्मकृतिं क्रियमाणं स्तोत्रं [v]जुषाणः सेवमानः [v]अर्वाचीनः अस्मदभिमुखः सन् [v]हरिभिः अश्वैः [v]तूयं क्षिप्रं [v]याहि । [v]अस्मिन्नु अस्मिन्नेव [v]सवने यज्ञे [v]सु सुष्ठु [v]मादयस्व च । [v]नः अस्मदीयानि [v]इमा इमानि [v]ब्रह्माणि स्तोत्राणि च [v]उप [v]शृणवः उपशृणु ॥

का ते अस्त्यरंकृतिः सूक्तैः कदा नूनं ते मघवन्दाशेम ।
विश्वा मतीरा ततने त्वायाधा म इन्द्र शृणवो हवेमा ॥ ३ ॥

का । ते । अस्ति । अरम्ऽकृतिः । सुऽउक्तैः । कदा । नूनम् । ते । मघऽवन् । दाशेम ।
विश्वाः । मतीः । आ । ततने । त्वाऽया । अध । मे । इन्द्र । शृणवः । हवा । इमा ॥ ३ ॥

हे इन्द्र [v]ते तव [v]सूक्तैः अस्माभिः क्रियमाणैः स्तोत्रैः [v]अरंकृतिः अलंकृतिः [v]का [v]अस्ति कीदृशी भवति । हे [v]मघवन् [v]ते तव [v]कदा [v]नूनं कदा खलु [v]दाशेम प्रीतिमुत्पादयेम । [v]त्वाया त्वत्कामनयैव [v]विश्वाः [v]मतीः सर्वाः स्तुतीः [v]आ [v]ततने करोमि । [v]अध अतः कारणात् हे [v]इन्द्र [v]मे मदीयानि [v]इमा इमानि [v]हवा हवानि स्तोत्राणि [v]शृणवः शृणु ॥

उतो घा ते पुरुष्या इदासन्येषां पूर्वेषामशृणोर्ऋषीणाम् ।
अधाहं त्वा मघवञ्जोहवीमि त्वं न इन्द्रासि प्रमतिः पितेव ॥ ४ ॥

उतो इति । घ । ते । पुरुष्याः । इत् । आसन् । येषाम् । पूर्वेषाम् । अशृणोः । ऋषीणाम् ।
अध । अहम् । त्वा । मघऽवन् । जोहवीमि । त्वम् । नः । इन्द्र । असि । प्रऽमतिः । पिताऽइव ॥४॥

[v]उत अपि च । [v]घ इति पूरणः । हे [v]मघवन् [v]येषां [v]पूर्वेषाम् [v]ऋषीणां स्तुतीः [v]अशृणोः [v]ते पूर्वे ऋषयः [v]पुरुष्याः [v]इत् पुरुषेभ्यो हिता एव [v]आसन् । [v]अध अतः [v]अहं [v]त्वा त्वां [v]जोहवीमि भृशं स्तौमि । अपि च हे [v]इन्द्र [v]त्वं [v]नः अस्माकं [v]पितेव जनक इव [v]प्रमतिः बन्धुः [v]असि ॥

वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो युयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

---

१. ख–संवनायः; घ-ङ-त३-न-श–सेवनीयः; ङ–तत् स सेवनीयः; त१-२–तत्सेवनीयः; य–सवनीस्तदेव सः ।

वोचेम । इत् । इन्द्रम् । मघऽवानम् । एनम् । महः । रायः । राधसः । यत् । ददत् । नः ।
यः । अर्चतः । ब्रह्मऽकृतिम् । अविष्ठः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

इयं व्याख्यातचरा ॥ ॥ १३ ॥

'आ नो देव' इति पञ्चर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रम् । 'आ नो देव' इत्यनुक्रान्तम् । प्रथमे छन्दोमे प्रउगशस्त्रे 'आ नः' इत्ययमैन्द्रस्तृचः । सूत्र्यते हि—'आ नो देव शवसा याहि शुष्मिन् प्र वो यज्ञेषु देवयन्तो अर्चन्' (आश्व. श्रौ. ८. ९) इति ॥

आ नो देव शवसा याहि शुष्मिन्भवा वृध इन्द्र रायः अस्य ।
महे नृम्णाय नृपते सुवज्र महि क्षत्राय पौंस्याय शूर ॥ १ ॥

आ । नः । देव । शवसा । याहि । शुष्मिन् । भव । वृधः । इन्द्र । रायः । अस्य ।
महे । नृम्णाय । नृऽपते । सुऽवज्र । महि । क्षत्राय । पौंस्याय । शूर ॥ १ ॥

हे ᵛदेव द्योतमान ᵛशुष्मिन् बलवन् ᵛइन्द्र ᵛनः अस्मान् ᵛशवसा बलेन सार्धम् ᵛआ ᵛयाहि । ᵛअस्य अस्मभ्यं देयस्य ᵛरायः धनस्य ᵛवृधः वर्धयिता च ᵛभव । हे ᵛनृपते ᵛसुवज्र ᵛमहे महते ᵛनृम्णाय बलाय च भव । 'बाधो नृम्णम्' इति बलनामसु पाठात् । हे ᵛशूर ᵛमहि महते ᵛक्षत्राय शत्रूणां हिंसकाय । क्षदिर्हिंसाकर्मा । ᵛपौंस्याय वीर्याय च भव ॥

हवन्त उ त्वा हव्यं विवाचि तनूषु शूराः सूर्यस्य सातौ ।
त्वं विश्वेषु सेन्यो जनेषु त्वं वृत्राणि रन्धया सुहन्तु ॥ २ ॥

हवन्ते । ऊँ इति । त्वा । हव्यम् । विऽवाचि । तनूषु । शूराः । सूर्यस्य । सातौ ।
त्वम् । विश्वेषु । सेन्यः । जनेषु । त्वम् । वृत्राणि । रन्धय । सुऽहन्तु ॥ २ ॥

हे इन्द्र ᵛहव्यं ह्वातव्यं ᵛत्वा त्वां ᵛविवाचि विविधा वाचो यस्मिन् प्रादुर्भवन्ति तस्मिन् युद्धे ᵛशूराः पुरुषाः ᵛतनूषु अङ्गेषु रक्षणीयासु ᵛसूर्यस्य ᵛसातौ संभजने । सरति गच्छतीत्यायुरत्र सूर्यो विवक्षितः । तस्य चिरकालं प्राप्त्यर्थं ᵛहवन्ते ह्वयन्ति । ᵛविश्वेषु सर्वेषु ᵛजनेषु ᵛत्वम् एव ᵛसेन्यः सेनार्होऽसि । अपि च ᵛत्वं ᵛवृत्राणि शत्रून् ᵛसुहन्तु सुहन्तुना वज्रेण ᵛरन्धय अस्मभ्यं वशीकुरु ॥

अहा यदिन्द्र सुदिना व्युच्छान्दधो यत्केतुमुपमं समत्सु ।
न्य१ग्निः सीददसुरो न होता हुवानो अत्र सुभगाय देवान् ॥ ३ ॥

अहा । यत् । इन्द्र । सुऽदिना । विऽउच्छान् । दधः । यत् । केतुम् । उपऽमम् । समत्ऽसु ।
नि । अग्निः । सीदत् । असुरः । न । होता । हुवानः । अत्र । सुऽभगाय । देवान् ॥ ३ ॥

हे ᵛइन्द्र ᵛयत् यदा ᵛअहा अहानि ᵛसुदिना सुदिनानि ᵛव्युच्छान् व्युच्छेयुः ᵛयत् यदा[1] च ᵛसमत्सु संग्रामेषु ᵛकेतुं ज्ञानम् ᵛउपमम् अन्तिकं ᵛदधः धारयेः तदा ᵛअसुरः बलवान् ᵛहोता देवानामाह्वाता ᵛअग्निः ᵛसुभगाय अस्माकं शोभनधनप्राप्तये ᵛदेवान् ᵛहुवानः ह्वयन् ᵛअत्र अस्मिन् यज्ञे ᵛनि ᵛसीदत् न्यसीदत् ॥

---

१. घ-ङ्ग-त-श—यथा ।

वयं ते त इन्द्र ये च देव स्तवन्त शूर ददतो मघानि ।
यच्छा सूरिभ्य उपमं वरूथं स्वाभुवो जरणामश्नवन्त ॥ ४ ॥

वयम् । ते । ते । इन्द्र । ये । च । देव । स्तवन्त । शूर । ददतः । मघानि ।
यच्छ । सूरिऽभ्यः । उपऽमम् । वरूथम् । सुऽआभुवः । जरणाम् । अश्नवन्त ॥ ४ ॥

हे ᵛदेव ᵛशूर ᵛइन्द्र ᵛते तव ᵛवयं वसिष्ठाः स्वभूताः । ᵛये जना मदीयपुत्रपौत्रादयः ᵛमघानि मंहनीयानि हवींषि ᵛददतः प्रयच्छन्तः ᵛस्तवन्त स्तुवन्ति ᵛते अपि तव स्वभूताः । तेभ्य उभयेभ्यः ᵛसूरिभ्यः स्तोतृभ्यः ᵛउपमं श्रेष्ठं ᵛवरूथं गृहं ᵛयच्छ प्रयच्छ । अपि च त उभे ᵛस्वाभुवः सुसमृद्धाः सन्तः ᵛजरणां जराम् ᵛअश्नवन्त प्राप्नुवन्तु ॥

वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

वोचेम । इत् । इन्द्रम् । मघऽवानम् । एनम् । महः । रायः । राधसः । यत् । ददत् । नः ।
यः । अर्चतः । ब्रह्मऽकृतिम् । अविष्ठः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥५॥

एषा सिद्धा ॥ ॥ १४ ॥

'प्र व इन्द्राय' इति द्वादशर्चं चतुर्दशं सूक्तं वसिष्ठस्यार्षं गायत्रमैन्द्रम्। दशम्याद्यास्तिस्रो विराजः शिष्टा गायत्र्यः। तथा चानुक्रान्तं–'प्र वो द्वादश गायत्रं त्रिविराळन्तम्' इति। सूक्तविनियोगो लैङ्गिकः। प्रथमे रात्रिपर्याये मैत्रावरुणशस्त्रे 'प्र व इन्द्राय' इत्याद्यस्तृचः स्तोत्रियः। सूत्रितं च– 'प्र व इन्द्राय मादनं प्र कृतान्यृजीषिणः' (आश्व. श्रौ. ६. ४) इति। अतिरात्रे प्रथमे पर्याये ब्राह्मणाच्छंसिशस्त्रे 'वयमिन्द्र त्वायवोऽभि' इत्यनुरूपस्तृचः। तथा च सूत्रितं–'वयमिन्द्र त्वायवोऽभि वार्त्रहत्यायेत्युत्तमामुद्धरेत्' (आश्व. श्रौ. ६. ४) इति। चतुर्थेऽहनि माध्यंदिनसवने होत्रकशस्त्र आरम्भणीयाभ्य ऊर्ध्वं वैराज एकस्तृच आहवनीयः। तदर्थाः 'प्र वो महे महिवृधे भरध्वम्' इत्याद्यास्तिस्रः। सूत्रितं च–'प्र वो महे महिवृधे भरध्वमिति चतस्रस्तिस्रश्च विराजः' (आश्व. श्रौ. ७. ११) इति ॥

प्र व इन्द्राय मादनं हर्यश्वाय गायत । सखायः सोमपाव्ने ॥ १ ॥

प्र । वः । इन्द्राय । मादनम् । हरिऽअश्वाय । गायत । सखायः । सोमऽपाव्ने ॥ १ ॥

हे ᵛसखायः ᵛवः यूयं ᵛहर्यश्वाय ᵛसोमपाव्ने सोमानां पात्रे ᵛइन्द्राय ᵛमादनं मदकरं स्तोत्रं ᵛप्र ᵛगायत ॥

शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः । चकृमा सत्यराधसे ॥ २ ॥

शंस । इत् । उक्थम् । सुऽदानवे । उत । द्युक्षम् । यथा । नरः । चकृम । सत्यऽराधसे ॥२॥

ᵛउत अपि च हे स्तोतः ᵛसुदानवे शोभनदानाय ᵛसत्यराधसे सत्यधनायेन्द्राय ᵛउक्थं स्तोमं ᵛयथा ᵛनरः अन्ये स्तोतारः ᵛद्युक्षं दीप्तेः साधनभूतं स्तोत्रं शंसन्ति तद्वरमपि ᵛशंस उच्चारय । ᵛइत् इति पूरणः । वयं च ᵛचकृम स्तोत्रं करवाम ॥

त्वं नं इन्द्र वाजयुस्त्वं गव्युः शतक्रतो। त्वं हिरण्ययुर्वसो ॥ ३ ॥

त्वम्। नः। इन्द्र। वाजऽयुः। त्वम्। गव्युः। शतक्रतो इति शतऽक्रतो।
त्वम्। हिरण्यऽयुः। वसो इति ॥ ३ ॥

हे ᵛइन्द्र ᵛत्वं ᵛनः अस्माकं ᵛवाजयुः अन्नकामो भव। हे ᵛशतक्रतो ᵛत्वं नोऽस्माकं ᵛगव्युः गोकामो भव। हे ᵛवसो वासयितरिन्द्र ᵛत्वं ᵛहिरण्ययुः हिरण्यकामोऽपि भव। 'छन्दसि परेच्छायामपि दृश्यते क्यच्' इति क्यच् ॥

वयमिन्द्र त्वायवोऽभि प्र णोनुमो वृषन्। विद्धी त्वस्य नो वसो ॥ ४ ॥

वयम्। इन्द्र। त्वाऽयवः। अभि। प्र। नोनुमः। वृषन्।
विद्धि। तु। अस्य। नः। वसो इति ॥ ४ ॥

हे ᵛवृषन् कामानां वर्षितः ᵛइन्द्र ᵛत्वायवः त्वत्कामाः ᵛवयं वसिष्ठास्त्वाम् ᵛअभि ᵛप्र ᵛणोनुमः प्रकर्षेण स्तुमः। हे ᵛवसो वासयितरिन्द्र ᵛअस्य इदमस्मदीयं स्तोत्रं ᵛतु क्षिप्रं ᵛविद्धि अवधारय ॥

मा नो निदे च वक्तवेऽर्यो रन्धीरराव्णे। त्वे अपि क्रतुर्मम ॥ ५ ॥

मा। नः। निदे। च। वक्तवे। अर्यः। रन्धीः। अराव्णे।
त्वे इति। अपि। क्रतुः। मम ॥ ५ ॥

हे इन्द्र ᵛअर्यः स्वामी त्वं ᵛवक्तवे परुषवाक्यानां वक्त्रे ᵛनिदे निन्दित्रे ᵛअराव्णे अदात्रे ᵛनः अस्मान् ᵛमा ᵛरन्धीः वशं मा कार्षीः। ᵛअपि अपि च ᵛत्वे त्वयि ᵛमम ᵛक्रतुः मदीयं स्तोत्रलक्षणं कर्म गच्छत्विति शेषः। अस्मदीयं स्तोत्रं भवच्चित्ते प्रविशत्वित्यर्थः ॥

त्वं वर्मासि सप्रथः पुरोयोधश्च वृत्रहन्। त्वया प्रति ब्रुवे युजा ॥ ६ ॥

त्वम्। वर्म। असि। सऽप्रथः। पुरःऽयोधः। च। वृत्रऽहन्।
त्वया। प्रति। ब्रुवे। युजा ॥ ६ ॥

हे ᵛवृत्रहन् शत्रूणां हिंसकेन्द्र ᵛत्वं ᵛवर्म अस्माकं कवचम् ᵛअसि। कवचवद्रक्षकोऽसीत्यर्थः। ᵛसप्रथः सर्वतः पृथुश्चासि। ᵛपुरोयोधश्च पुरो योद्धा चासि। ᵛत्वया ᵛयुजा त्वया सहायेन ᵛप्रति ᵛब्रुवे शत्रून् प्रतिब्रवीमि। प्रतिहन्मीत्यर्थः ॥ ॥ १५ ॥

महाँ उतासि यस्य तेऽनु स्वधावरी सहः। मन्नाते इन्द्र रोदसी ॥ ७ ॥

महान्। उत। असि। यस्य। ते। अनु। स्वधावरी इति स्वधाऽवरी। सहः।
मन्नाते इति। इन्द्र। रोदसी इति ॥ ७ ॥

ᵛउत अपि च हे ᵛइन्द्र त्वं ᵛमहान् ᵛअसि सर्वाधिकोऽसि। हे इन्द्र ᵛयस्य ᵛते तव ᵛसहः बलं ᵛस्वधावरी अन्नवत्यौ ᵛरोदसी द्यावापृथिव्यौ ᵛअनु ᵛमन्नाते अनुमन्येते। त्वदीयं सहः सर्वाधिकमित्यत्रोभावपि लोकौ विसंवादं न कुरुत इत्यर्थः ॥

तं त्वा मरुत्वती परि भुवद्वाणी सयावरी । नक्षमाणा सह द्युभिः ॥ ८ ॥

तम् । त्वा । मरुत्वती । परि । भुवत् । वाणी । सऽयावरी । नक्षमाणा । सह । द्युऽभिः ॥ ८ ॥

हे इन्द्र [v]तम् उक्तगुणविशिष्टं [v]त्वा त्वां [v]सयावरी त्वया सह गन्त्री । यत्र यत्र त्वं यासि तत्र तत्र यास्तीत्यर्थः । [v]द्युभिः तेजोभिः [v]नक्षमाणा व्याप्नुवती [v]मरुत्वती । मरुतः स्तोतारः । तद्वती [v]वाणी स्तुतिः [v]परि [v]भुवत् परिभवतु । परिभवतिरत्र परिग्रहार्थीयः । परिगृह्णात्वित्यर्थः ॥

ऊर्ध्वासस्त्वान्विन्दवो भुवन्दस्ममुप द्यवि । सं ते नमन्त कृष्टयः ॥ ९ ॥

ऊर्ध्वासः । त्वा । अनु । इन्दवः । भुवन् । दस्मम् । उप । द्यवि । सम् । ते । नमन्त । कृष्टयः ॥ ९ ॥

हे इन्द्र [v]उप [v]द्यवि द्युलोकसमीपे स्थितं [v]दस्मं दर्शनीयं [v]त्वा त्वाम् [v]अनु उद्दिश्य [v]ऊर्ध्वासः ऊर्ध्वाः [v]इन्दवः अस्मदीयाः सोमाः [v]भुवन् भवन्ति । [v]कृष्टयः प्रजाश्च [v]ते तुभ्यं [v]सं [v]नमन्त । भुवि सोमास्त्वदर्थमेव जायन्ते प्रजाश्च त्वामेव प्रणमन्तीतीन्द्रस्तुतिः ॥

प्र वो महे महिवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।
विशः पूर्वीः प्र चरा चर्षणिप्राः ॥ १० ॥

प्र । वः । महे । महिऽवृधे । भरध्वम् । प्रऽचेतसे । प्र । सुऽमतिम् । कृणुध्वम् ।
विशः । पूर्वीः । प्र । चर । चर्षणिऽप्राः ॥ १० ॥

हे मदीयाः पुरुषाः [v]वः यूयं [v]महिवृधे महतां धनानां वर्धयित्रे [v]महे महते इन्द्राय [v]प्र [v]भरध्वं सोमान् प्रणयत । [v]प्रचेतसे प्रकृष्टमतये इन्द्राय [v]सुमतिं सुष्टुतिं च [v]प्र [v]कृणुध्वं प्रकुरुत । अथ प्रत्यक्षस्तुतिः । हे इन्द्र [v]चर्षणिप्राः कामैः प्रजानां पूरयिता त्वं [v]पूर्वीः हविषां पूरयित्रीः [v]विशः प्रजाः [v]प्र [v]चर अभिगच्छ ॥

उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः ।
तस्य व्रतानि न मिनन्ति धीराः ॥ ११ ॥

उरुऽव्यचसे । महिने । सुऽवृक्तिम् । इन्द्राय । ब्रह्म । जनयन्त । विप्राः ।
तस्य । व्रतानि । न । मिनन्ति । धीराः ॥ ११ ॥

[v]उरुव्यचसे पृथुव्याप्तये [v]महिने महते यस्मै [v]इन्द्राय [v]सुवृक्तिं स्तुतिं [v]ब्रह्म अन्नं हविश्च [v]विप्राः प्राज्ञाः [v]जनयन्त जनयन्ति [v]तस्य इन्द्रस्य [v]व्रतानि रक्षणादीनि कर्माणि [v]धीराः प्राज्ञा देवा अपि [v]न [v]मिनन्ति न हिंसन्ति ॥

इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै ।
हर्यश्वाय बर्हया समापीन् ॥ १२ ॥

इन्द्रम् । वाणीः । अनुत्तऽमन्युम् । एव । सत्रा । राजानम् । दधिरे । सहध्यै ।
हरिऽअश्वाय । बर्हय । सम् । आपीन् ॥ १२ ॥

ᵛसम्रा ᵛराजानं सर्वजगत[1] ईश्वरम्[1] ᵛअनुत्तमन्युम्। केनाप्यनुत्तोऽबाधितो मन्युः क्रोधो यस्य सः। तम् ᵛएव ᵛइन्द्रं ᵛवाणीः स्तुतयः ᵛसहध्यै स्तोतॄणां शत्रूनभिभवितुं ᵛदधिरे। अतो हेतोर्हे स्तोतः त्वमपि ᵛहर्यश्वाय हर्यश्वमिन्द्रं स्तोतुमित्यर्थः। ᵛआपीन् बन्धून् ᵛसं ᵛबर्हय उत्साहय॥ ॥ १६ ॥

'मो षु त्वा' इति सप्तविंशत्यृचं पञ्चदशं सूक्तम्। अत्रेयमनुक्रमणिका—'मो षु सप्ताधिका प्रागाथं तृतीया द्विपदा सौदासैरग्नौ प्रक्षिप्यमाणः शक्तिरन्त्यं प्रगाथमालेभे सोऽर्धर्चं उक्तेऽदहत्। तं पुत्रोक्तं वसिष्ठः समापयतेति शाट्यायनकं वसिष्ठस्यैव हतपुत्रस्यार्षमिति ताण्डकम्' इति। मण्डलद्रष्टा वसिष्ठ ऋषिः। 'इन्द्र क्रतुं नः' इति प्रगाथस्यार्धर्चस्य च वसिष्ठपुत्रः शक्तिर्वसिष्ठो वा। इन्द्रो देवता। अयुजो बृहत्यो युजः सतोबृहत्यः। तृतीया तु द्विपदा विराट्। महाव्रते निष्केवल्ये बार्हततृचाशीतावेतत्सूक्तम्। तत्र द्विपदाम् 'अभि त्वा शूर' इत्येतं राथन्तरं प्रगाथं 'नकिः सुदासः' इति प्रगाथं च वर्जयेत्। तथैव पञ्चमारण्यके सूत्रितं—'मो षु त्वा वाघतश्चनेत्येतस्य द्विपदां चोद्धरति राथन्तरं च प्रगाथमथ हास्य नकिः सुदासो रथमित्येतं प्रगाथमुद्धृत्य[2] त्वामिदा ह्यो नर इत्येतं[2] प्रगाथं प्रत्यवदधाति' (ऐ. आ. ५. २. ४) इति। चातुर्विंशिकेऽहनि पञ्चमेऽहनि च निष्केवल्ये 'मो षु त्वा वाघतः' इति प्रगाथः सद्विपदः। सूत्रितं च—'मो षु त्वा वाघतश्चनेति सद्विपद उपसमस्येद्द्विपदाम्' (आश्व. श्रौ. ७. ३) इति। चातुर्विंशिकेऽहनि मरुत्वतीये प्राकृतात्[3] मरुत्वतीयात् प्रगाथादनन्तरं 'नकिः सुदासः' इति प्रगाथं शंसेत्। पृष्ठ्याभिप्लवषडहयोः तृतीये षष्ठेऽहनि चायं प्रगाथः। तथैव सूत्रितं—'नकिः सुदासो रथमिति मरुत्वतीया ऊर्ध्वं नित्यात्' इति। 'एवं स्थितान् प्रगाथान् पृष्ठ्याभिप्लवयोरन्वहं पुनःपुनरावर्तयेयुः' (आश्व. श्रौ. ७. ३) इति। अग्निष्टोमे माध्यंदिनसवनेऽच्छावाकशस्त्रे 'उदिश्वस्य रिच्यते' इति प्रगाथः। तथा च सूत्रितम्—'उदिश्वस्य रिच्यते भूय इत्' (आश्व. श्रौ. ५. १६) इति। अग्निष्टोमे माध्यंदिनसवने मैत्रावरुणशस्त्रे 'कस्तमिन्द्र' इति प्रगाथः। सूत्रितं च—'कस्तमिन्द्र त्वावसुं सद्यो ह जातः' (आश्व. श्रौ. ५. १६) इति। चातुर्विंशिकेऽहनि माध्यंदिनसवने मैत्रावरुणशस्त्रस्यायं प्रगाथः। अहर्गणेष्वपि द्वितीयादिष्वहःसु। सूत्रितं च—'कस्तमिन्द्र त्वावसुं कन्नव्यो अतसीनाम्' (आश्व. श्रौ. ७. ४) इति। 'आरम्भणीयाः पर्यासान् कद्वतोऽहरहःशस्यानीति होत्रकाः' (आश्व. श्रौ. ७. १) इति। पृष्ठ्यषडहस्य तृतीयेऽहनि निष्केवल्ये वैरूपसामपक्षे 'यदिन्द्र यावतः' इत्यनुरूपस्तृचः। सूत्रितं च—'यदिन्द्र यावतस्त्वमिति प्रगाथौ स्तोत्रियानुरूपौ' (आश्व. श्रौ. ७. १०) इति। अग्निष्टोमे चातुर्विंशिकेऽहनि माध्यंदिनसवनेऽच्छावाकशस्त्रे 'तरणिरित्सिषासति' इति वैकल्पिकस्तृचः। सूत्रितं च—'तरोभिर्वो विदद्वसुं तरणिरित्सिषासति' (आश्व. श्रौ. ७. ४) इति। अग्निष्टोमे निष्केवल्यशस्त्रे रथन्तरसामपक्षे 'अभि त्वा शूर' इति प्रगाथः स्तोत्रियः। सूत्रितं च—'अभि त्वा शूर नोनुमोऽभि त्वा पूर्वपीतय इति प्रगाथौ स्तोत्रियानुरूपौ' (आश्व. श्रौ. ५. १५) इति। आश्विनशस्त्रेऽप्ययं प्रगाथः। तथैव सूत्रितं च—'अभि त्वा शूर नोनुमो बहवः सूरचक्षस इति प्रगाथाः' (आश्व. श्रौ. ६.५) इति। महाव्रते निष्केवल्ये दक्षिणपक्षेऽयं प्रगाथः। तथैव पञ्चमारण्यके सूत्रितम्—'अभि त्वा शूर नोनुमोऽभि त्वा पूर्वपीतय इति रथन्तरस्य स्तोत्रियानुरूपौ प्रगाथौ' (ऐ. आ. ५. २. २) इति। आश्विनशस्त्रे 'इन्द्र क्रतुं नः' इति प्रगाथः। सूत्रितं च—'इन्द्र क्रतुं न आ भराभि त्वा शूर नोनुमः' (आश्व. श्रौ. ६. ५)

---

१. ख-ञ-ञ-त२-४–सर्वतः जगत ईश्वरं; न-भ-म-श२–सर्वत जगत ईश्वरं; श१–जगत ईश्वरं।

२. ख-ञ-त३-४-भ–'प्रगाथ°.....इत्येतं' नास्ति। ३. ख-ञ-त३-४-न-भ-श–प्रकृतात्।

इति। चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रेऽयं वैकल्पिकः स्तोत्रियः प्रगाथः। सूत्रितं च —' इन्द्र क्रतुं न आ भरेन्द्र ज्येष्ठं न आ भर ' (आश्व. श्रौ. ७. ४) इति ॥

मो षु त्वा वाघतश्चनारे अस्मन्नि रीरमन्।
आरात्ताच्चित्सधमादं न आ गहीह वा सन्नुप श्रुधि ॥ १ ॥

मो इति। सु। त्वा। वाघतः। चन। आरे। अस्मत्। नि। रीरमन्।
आरात्तात्। चित्। सधऽमादम्। नः। आ। गहि। इह। वा। सन्। उप। श्रुधि ॥ १ ॥

हे इन्द्र ᵛत्वा त्वां ᵛवाघतश्चन यजमाना अपि[1] ᵛअस्मत् अस्मत्तः ᵛआरे दूरे ᵛमो[2] ᵛनि ᵛरीरमन् न[3] नितरां रमयन्तु। अतस्त्वम् ᵛआरात्ताच्चित् दूरेऽपि वर्तमानोऽस्मदीयं ᵛसधमादं यज्ञम् ᵛआ ᵛगहि आगच्छ। ᵛइह ᵛवा अत्रापि वा ᵛसन् विद्यमानः ᵛउप ᵛश्रुधि अस्मदीयं स्तोत्रमुपशृणु ॥

इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते।
इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ॥ २ ॥

इमे। हि। ते। ब्रह्मऽकृतः। सुते। सचा। मधौ। न। मक्षः। आसते।
इन्द्रे। कामम्। जरितारः। वसुऽयवः। रथे। न। पादम्। आ। दधुः ॥ २ ॥

हे इन्द्र ᵛते त्वदर्थं ᵛसुते अभिषुते सोमे ᵛब्रह्मकृतः स्तोत्रकृतः ᵛमधौ ᵛन मधुनीव ᵛमक्षः मक्षिकाः ᵛसचा सह ᵛआसते उपविशन्ति। अथ परोक्षस्तुतिः। ᵛवसूयवः धनकामाः ᵛजरितारः स्तोतारः ᵛकामम् इष्टम् ᵛइन्द्रे ᵛरथे ᵛन ᵛपादं रथे पादमिव ᵛआ ᵛदधुः समर्पयन्ति ॥

रायस्कामो वज्रहस्तं सुदक्षिणं पुत्रो न पितरं हुवे ॥ ३ ॥

रायःऽकामः। वज्रऽहस्तम्। सुऽदक्षिणम्। पुत्रः। न। पितरम्। हुवे ॥ ३ ॥

ᵛरायस्कामः धनकामोऽहं ᵛसुदक्षिणं शोभनदानं ᵛवज्रहस्तम् इन्द्रं ᵛपुत्रो ᵛन पुत्र इव ᵛपितरं ᵛहुवे ह्वयामि ॥

इम इन्द्राय सुन्विरे सोमासो दध्याशिरः।
ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥ ४ ॥

इमे। इन्द्राय। सुन्विरे। सोमासः। दधिऽआशिरः।
तान्। आ। मदाय। वज्रऽहस्त। पीतये। हरिऽभ्याम्। याहि। ओकः। आ ॥ ४ ॥

हे ᵛवज्रहस्त ᵛदध्याशिरः दधिमिश्रणाः ᵛइमे ᵛसोमासः सोमाः ᵛइन्द्राय तुभ्यं ᵛसुन्विरे सुता बभूवुः। ᵛतान् सोमान् ᵛमदाय मदार्थं ᵛपीतये पानाय ᵛओकः यज्ञसदनम् ᵛआ अभि ᵛहरिभ्याम् अश्वाभ्याम् ᵛआ ᵛयाहि आगच्छ ॥

---

१. ख-ञ-त-न-भ-श-अप्येनो; ञ-अपि यतो। २. ख-भ-त३-' मो ' नास्ति; ञ-त४-श-मा; न-जा। ३. ख-भ-त३-' न ' नास्ति।

श्रवच्छुत्कर्ण ईयते वसूनां नू चिन्नो मर्धिषद्गिरः ।
सद्यश्चिद्यः सहस्राणि शता ददन्नकिर्दित्सन्तमा मिनत् ॥ ५ ॥

श्रवत् । श्रुत्ऽकर्णः । ईयते । वसूनाम् । नु । चित् । नः । मर्धिषत् । गिरः ।
सद्यः । चित् । यः । सहस्राणि । शता । ददत् । नकिः । दित्सन्तम् । आ । मिनत् ॥५॥

[v]श्रुत्कर्णः[1] याच्ञाश्रवणरूपकर्ण इन्द्रः [v]वसूनां वसूनि [v]ईयते याच्यते। [v]नः अस्मदीयाः [v]गिरः याच्ञावाक्यानि [v]श्रवत् शृणोतु। [v]नू [v]चित् नैव [v]मर्धिषत् हिनस्तु। अश्रवणेन याच्ञावाक्यानि निष्फलानि न करोत्वित्यर्थः। अपि चेन्द्रः[2] [v]सद्यश्चित् सद्य एव याच्ञानन्तरमेव [v]सहस्राणि शतानि च [v]ददत् प्रयच्छेत्। [v]दित्सन्तं दातुमिच्छन्तं तमिन्द्रं [v]नकिः [v]आ [v]मिनत् न हिंस्यात्। कश्चिदपि न वारयेदित्यर्थः ॥ ॥ १७ ॥

स वीरो अप्रतिष्कुत इन्द्रेण शूशुवे नृभिः ।
यस्ते गभीरा सवनानि वृत्रहन्त्सुनोत्या च धावति ॥ ६ ॥

सः । वीरः । अप्रतिऽस्कुतः । इन्द्रेण । शूशुवे । नृऽभिः ।
यः । ते । गभीरा । सवनानि । वृत्रऽहन् । सुनोति । आ । च । धावति ॥ ६ ॥

हे [v]वृत्रहन् [v]ते त्वदर्थं [v]यः पुमान् [v]गभीरा गभीराणि [v]सवनानि सोमान् [v]सुनोति [v]आ [v]धावति [v]च त्वां स्तुतिभिरुपधावति च [v]स [v]वीरः [v]इन्द्रेण हेतुना [v]अप्रतिष्कुतः केनाप्यप्रतिगतोऽप्रतिशब्दितो वा भवेत्। [v]नृभिः परिचारकैः [v]शूशुवे उपगम्यते च। श्वयतिर्गतिकर्मा ॥

भवा वरूथं मघवन्मघोनां यत्समजासि शर्धतः ।
वि त्वाहतस्य वेदनं भजेमह्या दुणाशो भरा गयम् ॥ ७ ॥

भव । वरूथम् । मघऽवन् । मघोनाम् । यत् । सम्ऽअजासि । शर्धतः ।
वि । त्वाऽहतस्य । वेदनम् । भजेमहि । आ । दुःऽनशः । भर । गयम् ॥ ७ ॥

हे [v]मघवन् धनवन्निन्द्र [v]मघोनां हविष्मतां [v]वरूथम् उपद्रवाणां वारकं वर्म [v]भव। [v]यत् यस्त्वं [v]शर्धतः उत्सहमानाञ्छत्रून् [v]समजासि संप्रेरयेः। अपि च [v]त्वाहतस्य त्वया हतस्य शत्रोः [v]वेदनं धनं [v]वि [v]भजेमहि विशेषेण लभेमहि। किंच [v]दुर्नशः नाशयितुमशक्यस्त्वं [v]गयं गृहं धनं वा [v]आ [v]भर अस्मभ्यमाहर ॥

सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे ।
पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः ॥ ८ ॥

सुनोत । सोमऽपाव्ने । सोमम् । इन्द्राय । वज्रिणे ।
पचत । पक्तीः । अवसे । कृणुध्वम् । इत् । पृणन् । इत् । पृणते । मयः ॥ ८ ॥

---

१. ज्ञ–यः श्रुत्कर्णः । २. ज्ञ–च य इन्द्रः ।

हे मदीयाः पुरुषाः ᵛवह्निणे ᵛसोमपात्रे सोमस्य पात्रे ᵛइन्द्राय ᵛसोमं ᵛसुनोत अभिषुणुत। ᵛअवसे इन्द्रं तर्पयितुं ᵛपक्तीः पक्तव्यान् पुरोडाशादीन् ᵛपचत च। ᵛकृणुध्वमित् इन्द्रप्रियकराणि कर्माणि च कुरुतैव। इन्द्रो हि ᵛमथः सुखं ᵛपृणञ्चित् यजमानाय प्रयच्छत्येव ᵛपृणते हवींषीति शेषः॥

मा स्रेधत सोमिनो दक्षता महे कृणुध्वं राय आतुजे।
तरणिरिज्जयति क्षेति पुष्यति न देवासः कवत्नवे॥ ९॥

मा। स्रेधत। सोमिनः। दक्षत। महे। कृणुध्वम्। राये। आऽतुजे।
तरणिः। इत्। जयति। क्षेति। पुष्यति। न। देवासः। कवत्नवे॥ ९॥

हे मदीया जनाः ᵛसोमिनः सोमवतो यागान् ᵛमा ᵛस्रेधत मा हिंसिष्ट। ᵛदक्षत यागादिकं कर्तुमुत्सहध्वं च। ᵛमहे महते ᵛआतुजे। तुजिर्हिंसाकर्मा दानकर्मा वा। शत्रूणामभिहिंसकाय धनानां प्रदात्रे वेन्द्राय ᵛराये धनलाभार्थं ᵛकृणुध्वं कर्माणि[1] कुरुत[2] च[2]। ᵛतरणिरित् कर्मसु त्वरित एव ᵛजयति शत्रून्। ᵛक्षेति गृहे निवसति च। ᵛपुष्यति प्रजया पशुभिश्च पुष्टो भवति। ᵛकवत्नवे कुत्सितक्रियायै। कवोपसृष्टस्यातेः सातत्यगमनकर्मणो रूपं कवत्नुरिति। ᵛदेवासः देवाः ᵛन भवन्तीति शेषः। सुखप्राप्तये भवन्तीत्यर्थः॥

नकिः सुदासो रथं पर्यास न रीरमत्।
इन्द्रो यस्याविता यस्य मरुतो गमत्स गोमति व्रजे॥ १०॥

नकिः। सुऽदासः। रथम्। परि। आस। न। रीरमत्।
इन्द्रः। यस्य। अविता। यस्य। मरुतः। गमत्। सः। गोऽमति। व्रजे॥ १०॥

ᵛसुदासः शोभनदानस्य यजमानस्य ᵛरथं ᵛनकिः ᵛपर्यास कश्चिन्न पर्यस्थति। ᵛन ᵛरीरमत् न रमयति च। आत्मार्थं[3] न कश्चिदेनं गृह्णातीत्यर्थः। अपि च ᵛयस्य ᵛइन्द्रः ᵛअविता रक्षिता ᵛयस्य च ᵛमरुतः अविताराः ᵛसः ᵛगोमति गोयुक्ते ᵛव्रजे गोष्ठे ᵛगमत् गच्छेत्॥ ॥ १८॥

गमद्वाजे वाजयन्निन्द्र मर्त्यो यस्य त्वमविता भुवः।
अस्माकं बोध्यविता रथानामस्माकं शूर नृणाम्॥ ११॥

गमत्। वाजम्। वाजयन्। इन्द्र। मर्त्यः। यस्य। त्वम्। अविता। भुवः।
अस्माकम्। बोधि। अविता। रथानाम्। अस्माकम्। शूर। नृणाम्॥ ११॥

हे ᵛइन्द्र ᵛत्वं ᵛयस्य मर्त्यस्य ᵛअविता रक्षिता ᵛभुवः भवेः सः ᵛमर्त्यः ᵛवाजयन् स्तोत्रेण त्वां बलिनं कुर्वन् ᵛवाजम् अन्नं ᵛगमत् गच्छेत्। अपि च हे ᵛशूर ᵛअस्माकं वासिष्ठानां ᵛरथानाम् ᵛअविता रक्षिता ᵛबोधि भव॥ भवतेर्लोटि रूपम्। भकारस्य बकारश्छान्दसः॥ ᵛअस्माकं ᵛनृणां पुत्रादीनां चाविता भव॥

उदिन्वस्य रिच्यतेऽशो धनं न जिग्युषः।
य इन्द्रो हरिवान्न दभन्ति तं रिपो दक्षं दधाति सोमिनि॥ १२॥

---

१. ख-भ-कर्म। २. त-कुरुत; श-च कुरुत। ३. ख-घ-त३-न-भ-आत्मानं।

उत्। इत्। नु। अस्य। रिच्यते। अंशः। धनम्। न। जिग्युषः।
यः। इन्द्रः। हरिऽवान्। न। दभन्ति। तम्। रिपः। दक्षम्। दधाति। सोमिनि ॥१२॥

vअस्य इन्द्रस्य vअंशः यज्ञे सोमस्य भागः अतिरिच्यतेऽन्येभ्योऽपि देवेभ्यः। इन्द्रस्य त्रिष्वपि सवनेषु सोमपानमस्ति[1] माध्यंदिनं हि सर्वमैन्द्रमिति। vजिग्युषः जितवतः vधनं vन धनमिव। vउदिषु इति त्रयः पूरणाः। अपि च vयः vहरिवान् vइन्द्रः vसोमिनि यजमाने vदक्षं बलं vदधाति संदधाति vतं vरिपः रिपवः vन vदभन्ति न हिंसन्ति ॥

मन्त्रमखर्वं सुधितं सुपेशसं दधात यज्ञियेष्वा।
पूर्वीश्चन प्रसितयस्तरन्ति तं य इन्द्रे कर्मणा भुवत् ॥ १३ ॥

मन्त्रम्। अखर्वम्। सुऽधितम्। सुऽपेशसम्। दधात। यज्ञियेषु। आ।
पूर्वीः। चन। प्रऽसितयः। तरन्ति। तम्। यः। इन्द्रे। कर्मणा। भुवत् ॥ १३ ॥

हे जनाः vअखर्वम् अनल्पं vसुधितं सुविहितं vसुपेशसं शोभनरूपं vमन्त्रं स्तोत्रं vयज्ञियेषु यजनीयेषु देवेषु मध्य इन्द्राय vदधात विधत्त। vयः जनः vकर्मणा स्तुत्यादिरूपेण vइन्द्रे इन्द्रस्य चित्ते vभुवत् भवेत् vतं जनं vपूर्वीः बह्व्यः vप्रसितयः पाशादीनि बन्धनानि। vचन इति समुदायो नेत्यर्थे वर्तते। न vतरन्ति। न व्याप्नुवन्ति[2] इत्यर्थः ॥

कस्तमिन्द्र त्वावसुमा मर्त्यो दधर्षति।
श्रद्धा इत्ते मघवन्पार्ये दिवि वाजी वाजं सिषासति ॥ १४ ॥

कः। तम्। इन्द्र। त्वाऽवसुम्। आ। मर्त्यः। दधर्षति।
श्रद्धा। इत्। ते। मघऽवन्। पार्ये। दिवि। वाजी। वाजम्। सिसासति ॥ १४ ॥

हे vइन्द्र तव चित्ते यो भवेत् vत्वावसुम्। त्वं वसुर्व्यापको यस्येति बहुव्रीहिः। vतं जनं vकः vमर्त्यः vआ vदधर्षति आधर्षेत्। हे vमघवन् vते त्वदर्थं यः vश्रद्धा श्रद्धया युक्तः सन् vवाजी हविष्मान् भवेत् vपार्ये vदिवि सौत्येऽहनि सः vवाजम् अन्नं बलं वा vसिषासति सेवते ॥

मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु।
तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता ॥ १५ ॥

मघोनः। स्म। वृत्रऽहत्येषु। चोदय। ये। ददति। प्रिया। वसु।
तव। प्रऽनीती। हरिऽअश्व। सूरिऽभिः। विश्वा। तरेम। दुःऽइता ॥ १५ ॥

हे इन्द्र vमघोनः धनवतस्ते। त्वदर्थमित्यर्थः। vप्रिया प्रियाणि vवसु vवसूनि धनानि vये जनाः vददति प्रयच्छन्ति तान् जनान् vवृत्रहत्येषु संग्रामेषु vचोदय प्रेरय। हे vहर्यश्व vतव vप्रणीती प्रणीत्या प्रणयनेन vसूरिभिः स्तोतृभिः पुत्रादिभिः सार्धं vविश्वा विश्वानि vदुरिता दुरितानि vतरेम ॥ ॥ १९ ॥

---

१. ज्ञ-त१-२–समानमस्ति; त४–सोमानमस्ति। २. ज्ञ-त-श–प्राप्नुवंति।

तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम् ।
सत्रा विश्वस्य परमस्य राजसि नकिष्टा गोषु वृण्वते ॥ १६ ॥

तव । इत् । इन्द्र । अवमम् । वसु । त्वम् । पुष्यसि । मध्यमम् ।
सत्रा । विश्वस्य । परमस्य । राजसि । नकिः । त्वा । गोषु । वृण्वते ॥ १६ ॥

हे Vइन्द्र Vअवमम् अधमं त्रपुसीसादिकं Vवसु धनम्। यद्वा भौमं वस्ववमम्। Vतवेत् तवैव। Vत्वं त्वमेव Vमध्यमं वसु रजतहिरण्यादिकमान्तरिक्षं वा Vपुष्यसि। Vविश्वस्य सर्वस्य Vपरमस्य उत्तमस्यापि रत्नादेर्दिव्यस्य वा वसुनः Vराजसि ईशिषे। Vसत्रा सत्यमेव[1]। अपि च Vत्वा त्वां Vगोषु निमित्तेषु Vनकिः Vवृण्वते केऽपि न वारयन्ति ॥

त्वं विश्वस्य धनदा असि श्रुतो य ईं भवन्त्याजयः ।
तवायं विश्वः पुरुहूत पार्थिवोऽवस्युर्नाम भिक्षते ॥ १७ ॥

त्वम् । विश्वस्य । धनऽदाः । असि । श्रुतः । ये । ईम् । भवन्ति । आजयः ।
तव । अयम् । विश्वः । पुरुऽहूत । पार्थिवः । अवस्युः । नाम । भिक्षते ॥ १७ ॥

हे इन्द्र Vत्वं Vविश्वस्य सर्वस्य स्तोतुर्यजमानस्य वा Vधनदाः धनस्य दाता सन् Vश्रुतः प्रसिद्धः Vअसि। Vय ईं य एते Vआजयः युद्धानि Vभवन्ति तेष्वपि धनदाः श्रुतोऽसि। हे Vपुरुहूत Vविश्वः सर्वोऽपि Vअयं Vपार्थिवः जनः Vतव। त्वत्त इत्यर्थः। Vअवस्युः रक्षामिच्छन् Vनाम अन्नमुदकं वा। 'बर्हिः नाम' इत्युदकनामसु पाठात्। Vभिक्षते याचते। त्वामेवेति शेषः ॥

यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
स्तोतारमिद्दिधिषेय रदावसो न पापत्वाय रासीय ॥ १८ ॥

यत् । इन्द्र । यावतः । त्वम् । एतावत् । अहम् । ईशीय ।
स्तोतारम् । इत् । दिधिषेय । रदऽवसो इति रदऽवसो । न । पापऽत्वाय । रासीय ॥ १८ ॥

हे Vइन्द्र[2] Vयत् यतः Vयावतः धनस्य Vत्वम्[3] ईशिषे Vएतावत्। षष्ठ्या लुक्। एतावतो धनस्य Vअहमीशीय ईश्वरो भवेयं हे Vरदवसो। ददाति ददाति वसूनीति रदवसुः। ततोऽहमस्मदीयं Vस्तोतारमित् Vदिधिषेय धनप्रदानेन धारयेयमेव। Vपापत्वाय Vन Vरासीय न दद्याम् ॥

शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
नहि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता चन ॥ १९ ॥

शिक्षेयम् । इत् । महऽयते । दिवेऽदिवे । रायः । आ । कुहचित्ऽविदे ।
नहि । त्वत् । अन्यत् । मघऽवन् । नः । आप्यम् । वस्यः । अस्ति । पिता । चन ॥ १९ ॥

---

१. ख-न-भ-सत्यस्य; श१-सहैव सत्यमेव। २. य - इन्द्र त्वं। ३. ख-ङ-न-भ-य-श-'त्वं' नास्ति।

vकुहचिद्विदे। कुत्रचिद्विद्यमानः कुहचिद्वित्। तस्मै। यत्र क्वापि विद्यमानायेत्यर्थः। vमहयते पूजयते जनाय vदिवेदिवे प्रतिदिनं vरायः धनानि vशिक्षेयमित् दद्यामेव। आकारः पूरणः। एवमिन्द्रस्य वाक्यं श्रुत्वा संतुष्ट ऋषिर्वदति। हे vमघवन् vत्वत् त्वत्तः vअन्यत् अस्माकम् vआप्यं ज्ञातेयं vनहि vअस्ति। vवस्यः प्रशस्यः vपिता vचन पालयिता च त्वदन्यो नास्तीत्यर्थः॥

तरणिरित्सिषासति वाजं पुरंध्या युजा।
आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्वम्॥ २०॥

तरणिः। इत्। सिषासति। वाजम्। पुरम्ऽध्या। युजा।
आ। वः। इन्द्रम्। पुरुऽहूतम्। नमे। गिरा। नेमिम्। तष्टाऽइव। सुऽद्वम्॥ २०॥

vतरणिरित् स्तुत्यादौ कर्मणि त्वरित एव पुमान् vपुरंध्या महत्या धिया vयुजा सहायभूतया vवाजम् अन्नं vसिषासति संभजते। vपुरुहूतं बहुभिराहूतम् vइन्द्रं vवः त्वां vगिरा स्तुत्या अहम् vआ vनमे vनेमिं चक्रस्य वलयं vसुद्वं शोभनदारुं vतष्टेव। यथा वर्धकिर्दारुनेमिमानमयते तद्वदित्यर्थः॥ ॥ २०॥

न दुष्टुती मर्त्यो विन्दते वसु न स्रेधन्तं रयिर्नशत्।
सुशक्तिरिन्मघवन् तुभ्यं मावते देष्णं यत्पार्ये दिवि॥ २१॥

न। दुःऽस्तुती। मर्त्यः। विन्दते। वसु। न। स्रेधन्तम्। रयिः। नशत्।
सुऽशक्तिः। इत्। मघऽवन्। तुभ्यम्। माऽवते। देष्णम्। यत्। पार्ये। दिवि॥ २१॥

vमर्त्यः मनुष्यः vदुष्टुती दुष्टुत्या vवसु धनं vन vविन्दते। इन्द्रं स्तुवन्नेव वसु लभत इत्यर्थः। vस्रेधन्तं हिंसन्तम्। इन्द्रविषयस्तुत्यादिकर्माण्यकुर्वन्तमित्यर्थः। vरयिः धनं vन vनशत् न व्याप्नोति। हे vमघवन् त्वया vपार्ये vदिवि सौत्ये दिवसे vमावते मत्सदृशाय vदेष्णं दातव्यं vयत् धनमस्ति तत् vतुभ्यं त्वत्तः vसुशक्तिरित् सुकर्मैव। विन्दत इति व्यवहितमप्यनुषज्यते अध्याहारस्यान्तिकत्वात्॥

अभि त्वा शूर नोनुमोऽदुग्धाइव धेनवः।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः॥ २२॥

अभि। त्वा। शूर। नोनुमः। अदुग्धाःऽइव। धेनवः।
ईशानम्। अस्य। जगतः। स्वःऽदृशम्। ईशानम्। इन्द्र। तस्थुषः॥ २२॥

हे vशूर vइन्द्र vअस्य vजगतः जङ्गमस्य vईशानम् ईश्वरं vतस्थुषः स्थावरस्य च vईशानम्। ईशानमिति पदस्यावृत्तिरादरार्था। vस्वर्दृशं सर्वदृशं vत्वा त्वाम् vअदुग्धाइव vधेनवः यथादुग्धा धेनवः क्षीरपूर्णोधस्त्वेन वर्तन्ते तद्वत्सोमपूर्णचमसत्वेन वर्तमाना वयम् vअभि vनोनुमः भृशमभिष्टुमः॥

न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ २३ ॥

न । त्वाऽवान् । अन्यः । दिव्यः । न । पार्थिवः । न । जातः । न । जनिष्यते ।
अश्वऽयन्तः । मघऽवन् । इन्द्र । वाजिनः । गव्यन्तः । त्वा । हवामहे ॥ २३ ॥

हे ᵛमघवन् ᵛइन्द्र ᵛदिव्यः दिवि भवः ᵛत्वावान् त्वत्सदृशः ᵛअन्यः ᵛन जायते । ᵛपार्थिवः पृथिव्यां भवोऽपि त्वावानन्यो ᵛन जायते । दिव्यः पार्थिवो वा त्वावानन्यो ᵛन ᵛजातः । ᵛन च ᵛजनिष्यते । पृथिव्यां दिवि च त्रिष्वपि लोकेषु त्वत्सदृशः कश्चिन्नास्तीत्यर्थः । ᵛअश्वायन्तः अश्वानिच्छन्तः ᵛवाजिनः वाजमिच्छन्तः । इच्छायामिनिप्रत्ययः ॥ हविष्मन्तो वा ᵛगव्यन्तः गा इच्छन्तश्च वयं ᵛत्वा त्वां ᵛहवामहे ह्वयामः ॥

अभी षतस्तदा भरेन्द्र ज्यायः कनीयसः ।
पुरूवसुर्हि मघवन्त्सनादसि भरेभरे च हव्यः ॥ २४ ॥

अभि । सतः । तत् । आ । भर । इन्द्र । ज्यायः । कनीयसः ।
पुरुऽवसुः । हि । मघऽवन् । सनात् । असि । भरेऽभरे । च । हव्यः ॥ २४ ॥

हे ᵛज्यायः ज्यायन् ᵛइन्द्र ॥ 'आमन्त्रितं पूर्वमविद्यमानवत्' इतीन्द्रपदस्याविद्यमानवद्भावात् ज्याय इत्यस्य सर्वानुदात्तत्वाभावः नकारस्य रुत्वं व्यत्ययासुमभावो वा ॥ ᵛकनीयसः ᵛसतः[1] मम ᵛतत् प्रसिद्धं धनम् ᵛअभि ᵛआ ᵛभर । हे ᵛमघवन् त्वं ᵛसनात् चिरादेवारभ्य ᵛपुरूवसुर्हि बहुधनो हि ᵛअसि । ᵛभरेभरे संग्रामे यज्ञे वा ᵛहव्यः हविष्यः ᵛच असि ॥

परा णुदस्व मघवन्नमित्रान्त्सुवेदा नो वसू कृधि ।
अस्माकं बोध्यविता महाधने भवा वृधः सखीनाम् ॥ २५ ॥

परा । नुदस्व । मघऽवन् । अमित्रान् । सुऽवेदाः । नः । वसु । कृधि ।
अस्माकम् । बोधि । अविता । महाऽधने । भव । वृधः । सखीनाम् ॥ २५ ॥

हे ᵛमघवन् ᵛपरा पराचीनान् ᵛअमित्रान् शत्रून् ᵛनुदस्व प्रेरय । ᵛनः अस्मभ्यं ᵛवसु वसूनि ᵛसुवेदा सुलभानि ᵛकृधि कुरु । ᵛमहाधने संग्रामे । 'वाजसातौ महाधने' इति संग्रामनामसु पाठात् । ᵛसखीनां स्तोतृणाम् ᵛअस्माकं वसिष्ठानाम् ᵛअविता रक्षिता ᵛबोधि भव । ᵛवृधः वर्धयिता च ᵛभव ॥

इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥ २६ ॥

इन्द्र । क्रतुम् । नः । आ । भर । पिता । पुत्रेभ्यः । यथा ।
शिक्ष । नः । अस्मिन् । पुरुऽहूत । यामनि । जीवाः । ज्योतिः । अशीमहि ॥ २६ ॥

---

१. ख-ञ-त-श–अतो ।

हे ᵛइन्द्र ᵛनः अस्मभ्यं ᵛक्रतुं कर्म प्रज्ञानं वा ᵛआ ᵛभर आहर। अपि च ᵛयथा ᵛपिता ᵛपुत्रेभ्यः धनं प्रयच्छति तथा ᵛनः अस्मभ्यं ᵛशिक्ष धनं देहि। हे ᵛपुरुहूत बहुभिराहूत ᵛयामनि यज्ञे ᵛजीवाः वयं ᵛज्योतिः सूर्यम् ᵛअशीमहि प्रतिदिनं प्राप्नुयाम ॥

मा नो अज्ञाता वृजना दुराध्यो३ माशिवासो अव क्रमुः ।
त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ॥ २७ ॥

मा । नः । अज्ञाताः । वृजनाः । दुःऽआध्यः । मा । अशिवासः । अव । क्रमुः ।
त्वया । वयम् । प्रऽवतः । शश्वतीः । अपः । अति । शूर । तरामसि ॥ २७ ॥

हे इन्द्र ᵛअज्ञाताः अज्ञातगमनाः ᵛवृजनाः हिंसकाः ᵛदुराध्यः ᵛनः अस्मान् ᵛमा ᵛअव ᵛक्रमुः मावचक्रमुः। हे ᵛशूर ᵛत्वया ᵛवयं वसिष्ठाः ᵛप्रवतः प्रवणकाः सन्तः ᵛशश्वतीः बह्वीः ᵛअपः ᵛअति ᵛतरामसि अतितराम ॥ ॥ २१ ॥

'श्वित्यञ्चः' इति चतुर्दशर्चं षोडशं सूक्तम्। अत्रेयमनुक्रमणिका—'श्वित्यञ्चः षळूना संस्तवो वसिष्ठस्य सपुत्रस्येन्द्रेण वा संवादः' इति। आदितो नवानां वसिष्ठ ऋषिः। वसिष्ठपुत्राणां स्तूयमानत्वात्त एव देवता। 'विद्युतो ज्योतिः' इत्यादिभिर्दशम्यादिभिः स्वपुत्रैर्वसिष्ठः स्तूयते। अतो वसिष्ठो देवता। त एव ऋषयः। 'या तेनोच्यते' इति न्यायात्। अनुक्तत्वात् त्रिष्टुप् ॥

श्वित्यञ्चो मा दक्षिणतस्कपर्दा धियंजिन्वासो अभि हि प्रमन्दुः ।
उत्तिष्ठन्वोचे परि बर्हिषो नॄन्न मे दूरादवितवे वसिष्ठाः ॥ १ ॥

श्वित्यञ्चः । मा । दक्षिणतःऽकपर्दाः । धियम्ऽजिन्वासः । अभि । हि । प्रऽमन्दुः ।
उत्ऽतिष्ठन् । वोचे । परि । बर्हिषः । नॄन् । न । मे । दूरात् । अवितवे । वसिष्ठाः ॥ १ ॥

ᵛश्वित्यञ्चः । श्वित्यं श्वेतवर्णमञ्चन्तीति श्वित्यञ्चः। श्वेतवर्णा इत्यर्थः। ᵛधियंजिन्वासः कर्मणां पूरयितारः ᵛदक्षिणतस्कपर्दाः। दक्षिणे शिरसो भागे कपर्दाश्चूडा येषां[1] ते दक्षिणतस्कपर्दाः। चूडाकर्मणि दक्षिणतो वसिष्ठानामिति स्मर्यते। ᵛमा माम् ᵛअभि ᵛप्रमन्दुः विद्याबलेनाभिप्राहर्षयन्। यतो मामभि प्रमन्दुरतः ᵛबर्हिषः यज्ञात्। ᵛपरि इति पञ्चम्यर्थानुवादः[2]। ᵛउत्तिष्ठन् अहं ᵛनॄन् यज्ञस्य नेतॄन् ᵛवोचे ब्रवीमि। ᵛमे मत्तः ᵛदूरात् ᵛवसिष्ठाः वसिष्ठस्य मम पुत्राः[3] ᵛअवितवे गन्तुं ᵛन[4] अर्हन्तीति शेषः ॥

दूरादिन्द्रमनयन्ना सुतेन तिरो वैशन्तमति पान्तमुग्रम् ।
पाशद्युम्नस्य वायतस्य सोमात्सुतादिन्द्रोऽवृणीता वसिष्ठान् ॥ २ ॥

दूरात् । इन्द्रम् । अनयन् । आ । सुतेन । तिरः । वैशन्तम् । अति । पान्तम् । उग्रम् ।
पाशऽद्युम्नस्य । वायतस्य । सोमात् । सुतात् । इन्द्रः । अवृणीत । वसिष्ठान् ॥ २ ॥

---

१. ख–एषां । २. ख-भ–°नुवादी । ३. ज्ञ–पुत्राः सुदासं राजानं; त१–पुत्राः सुदासराजानः; त२–पुत्राः सुदासराजान । ४. ख-त-न-भ-श–'न' नास्ति ।

यदा वसिष्ठस्य पुत्राः सुदासं राजानमयाजयन् तदैव पाशशुङ्नाख्योऽपि राजा सोमान् यष्टुमुद्यमं चकार। तदा ते वसिष्ठपुत्राः पाशशुङ्नं तिरस्कृत्य तदीये यागे सोमं पिबन्तमिन्द्रं मन्त्रबलेन तस्मादाच्छिद्य सुदासो यज्ञे स्थापयामासुः। तदेतद्वृत्तान्तं कीर्तयन् वसिष्ठः स्वसुताननेन मन्त्रेण स्तौति। vवैशन्तम्। वेशन्तः पल्वलम्। अत्र वेशन्तशब्देन सोमाधारश्रमसो लक्ष्यते। तत्स्थं सोमं vपान्तं पिबन्तम् vउग्रम् उदूर्णम् vइन्द्रं vसुतेन सुदासो यज्ञेऽभिषुतेन सोमेन हेतुना vतिरः पाशशुङ्नं तिरस्कृत्य vदूरात् vआ vअनयन् वसिष्ठा मन्त्रबलेनानीतवन्तः। vइन्द्रः अपि vवायतस्य वयतः पुत्रस्य vपाशशुङ्नस्य। द्वितीयार्थे षष्ठी। वायतं पाशशुङ्नम् vअति अतिहाय सुदासो यज्ञेऽभिषुतात् vसोमात् हेतोः vवसिष्ठान् वसिष्ठस्य पुत्रान् vअवृणीत। पाशशुङ्नस्य सोमयागे चमसस्थं सोमं पिबन्नपीन्द्रस्तं पाशशुङ्नं तिरस्कृत्य मन्त्रसामर्थ्यबलेन सुदासो यज्ञ आहवनकाले वसिष्ठानाजगामेत्यर्थः॥

एवेन्नु कं सिन्धुमेभिस्तारेवेन्नु कं भेदमेभिर्जघान।
एवेन्नु कं दाशराज्ञे सुदासं प्रावदिन्द्रो ब्रह्मणा वो वसिष्ठाः॥ ३॥

एव। इत्। नु। कम्। सिन्धुम्। एभिः। तार। एव। इत्। नु। कम्। भेदम्। एभिः। जघान। एव। इत्। नु। कम्। दाशऽराज्ञे। सुऽदासम्। प्र। आवत्। इन्द्रः। ब्रह्मणा। वः। वसिष्ठाः॥३॥

vएवेत् यथा पाशशुङ्नस्य सवाख्ये[1] सोमयागे चमसस्थं सोमं पिबन्तमपीन्द्रं वसिष्ठैः सुदाः प्राप्तवान् एवमेव vसिन्धुं नदीम् vएभिः वसिष्ठैः vकं सुखेन vततार तीर्णं आसीत्। vनु इति पूरणः। तथा च निगमान्तरम्–'अर्णांसि चित्प्रपाना सुदासे' (ऋ. सं. ७. १८. ५) इति। vएवेत् एवमेव vभेदं भेदनामकं शत्रुमपि vएभिः वसिष्ठैरेव vजघान। अथ प्रत्यक्षस्तुतिः। vएवेत् एवमेव हे vवसिष्ठाः vवः युष्मदीयेन vब्रह्मणा स्तोत्रेण vदाशराज्ञे दशभी राजभिः सह युद्धे प्रवृत्ते[2] सति vसुदासं राजानम् vइन्द्रः vप्रावत् प्ररक्षत्। तथा च निगमान्तरं–'दश राजानः समिता अयज्यवः सुदासमिन्द्रावरुणा न युयुधुः' (ऋ. सं. ७. ८३. ७) इति 'दाशराज्ञे परियत्ताय विश्वतः' (ऋ. सं. ७. ८३. ८) इति च॥

जुष्टी नरो ब्रह्मणा वः पितॄणामक्षमव्ययं न किला रिषाथ।
यच्छक्वरीषु बृहता रवेणेन्द्रे शुष्ममदधाता वसिष्ठाः॥ ४॥

जुष्टी। नरः। ब्रह्मणा। वः। पितॄणाम्। अक्षम्। अव्ययम्। न। किल। रिषाथ। यत्। शक्वरीषु। बृहता। रवेण। इन्द्रे। शुष्मम्। अदधात। वसिष्ठाः॥ ४॥

हे vनरः vवः युष्मदीयेन vब्रह्मणा स्तोत्रेण vपितॄणां vजुष्टी प्रीतिर्भवति। पितॄणामित्यनेन पारोक्ष्येण[3] वसिष्ठस्यैव कीर्तनम्। अहं प्रीतो भवामीत्यर्थः। अथेदानीं स्वमाश्रमं गन्तुमुद्यतोऽहम् vअक्षं रथस्याक्षम् vअव्ययं व्ययामि। लडर्थे लङ्। चालयामीत्यर्थः। यूयं vन vकिल vरिषाथ न च क्षीणा भवथ हे vवसिष्ठाः vयत् यस्मात् vशक्वरीषु ऋक्षु vबृहता श्रेष्ठेन vरवेण साम्ना vइन्द्रे vशुष्मं बलम् vअदधात अधारयत॥

---

१. ख-न-भ–संसवाख्ये; झ–'सवाख्ये' नास्ति; झ-त३-श–संवाख्ये; त१–ख्ये; त२–ख्ये।
२. श–प्रवृद्धे। ३. झ-त२–परोक्षेण; त४– परोक्ष्येण।

उद्द्यामिवेत्तृष्णजो नाथितासोऽदीधयुर्दाशराज्ञे वृतासः ।
वसिष्ठस्य स्तुवत इन्द्रो अश्रोदुरुं तृत्सुभ्यो अकृणोदु लोकम् ॥ ५ ॥

उत् । द्याम्ऽइव । इत् । तृष्णऽजः । नाथितासः । अदीधयुः । दाशऽराज्ञे । वृतासः ।
वसिष्ठस्य । स्तुवतः । इन्द्रः । अश्रोत् । उरुम् । तृत्सुऽभ्यः । अकृणोत् । ऊँ इति । लोकम् ॥५॥

vतृष्णजः जाततृष्णाः vवृतासः तृत्सुभी राजभिर्वृताः vनाथितासः वृष्टिं याचमानाः वसिष्ठाः vद्यामिव आदित्यमिव इन्द्रं vदाशराज्ञे दशानां राज्ञां संग्रामे vउत्[2] vअदीधयुः[1] उददीधयन् । vस्तुवतः vवसिष्ठस्य स्तोत्रम् vइन्द्रः vअश्रोत् अशृणोच्च । vउरुं विस्तीर्णं vलोकं vतृत्सुभ्यः राजभ्यः vअकृणोत् अकरोच्च अददाच्चेत्यर्थः ॥ ॥ २२ ॥

दण्डाइवेद्गोअर्जनास आसन्परिच्छिन्ना भरता अर्भकासः ।
अभवच्च पुरएता वसिष्ठ आदित्तृत्सूनां विशो अप्रथन्त ॥ ६ ॥

दण्डाःऽइव । इत् । गोऽअर्जनासः । आसन् । परिऽछिन्नाः । भरताः । अर्भकासः ।
अभवत् । च । पुरःऽएता । वसिष्ठः । आत् । इत् । तृत्सूनाम् । विशः । अप्रथन्त ॥ ६ ॥

vगोअजनासः गवां प्रेरकाः vदण्डाइव यथा दण्डाः परिच्छिन्नपत्रोपशाखा भवन्ति तद्वत् vभरताः । तृत्सूनामेव राज्ञां भरता इति नामान्तरेणोपादानम् । शत्रुभिः vपरिच्छिन्नाः एव vआसन् । vअर्भकासः अर्भकाः अल्पाश्चासन् । vआदित् परिच्छिन्नत्वादनन्तरमेव तेषां vतृत्सूनां vवसिष्ठः vपुरएता पुरोहितः vअभवच्च । तत्पौरोहित्यसामर्थ्यात्[2] तृत्सूनां vविशः प्रजाः vअप्रथन्त अवर्धन्त ॥

त्रयः कृण्वन्ति भुवनेषु रेतस्तिस्रः प्रजा आर्या ज्योतिरग्राः ।
त्रयो घर्मास उषसं सचन्ते सर्वाँ इत्ताँ अनु विदुर्वसिष्ठाः ॥ ७ ॥

त्रयः । कृण्वन्ति । भुवनेषु । रेतः । तिस्रः । प्रऽजाः । आर्याः । ज्योतिःऽअग्राः ।
त्रयः । घर्मासः । उषसम् । सचन्ते । सर्वान् । इत् । तान् । अनु । विदुः । वसिष्ठाः ॥ ७ ॥

vभुवनेषु पृथिव्यन्तरिक्षद्युषु vत्रयः अग्निवायुसूर्याः यथाक्रमेण vरेतः विश्वस्य धारकमुदकं vकृण्वन्ति कुर्वन्ति । तेषां त्रयाणां vज्योतिरग्राः आदित्यप्रमुखाः vआर्याः श्रेष्ठाः vतिस्रः प्रजाः भवन्ति । ते च vत्रयः अग्निवायुसूर्याः vघर्मासः दीप्यमानाः vउषसं vसचन्ते समवयन्ति[3] । दुर्ज्ञानान्[3] vसर्वानित् सर्वानेव vतान् vवसिष्ठाः vअनु vविदुः अभिजानन्ति । तेषां रहस्यविज्ञानादियमपि वसिष्ठानामेव स्तुतिः । तथा च शाकल्यायनकं—' त्रयः कृण्वन्ति भुवनेषु रेत इत्यग्निः पृथिव्यां रेतः कृणोति वायुरन्तरिक्ष आदित्यो दिवि तिस्रः प्रजा आर्या ज्योतिरग्रा इति वसवो रुद्रा आदित्यास्तासां ज्योतिर्यदसावादित्यस्त्रयो घर्मास उषसं सचन्त इत्यग्निरुषसं सचते वायुरुषसं सचत आदित्य उषसं सचते ' इति ॥

---

१. ख-ङ्ग-त३-४-न-भ-श–' उददीधयुः ' नास्ति; ङ्ग-त१-२–अदीधयुः । २. ख-न-भ–यत्पौरोहित्य°; ङ्ग–तत्पौरोहित्य°; त३–यत्पौरोहित्य° । ३. ख-भ–सेवंते ।

सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः ।
वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ॥ ८ ॥

सूर्यस्यऽइव । वक्षथः । ज्योतिः । एषाम् । समुद्रस्यऽइव । महिमा । गभीरः ।
वातस्यऽइव । प्रऽजवः । न । अन्येन । स्तोमः । वसिष्ठाः । अनुऽएतवे । वः ॥ ८ ॥

हे vवसिष्ठाः vएषां vवः युष्माकं vस्तोमः महिमापि वा vसूर्यस्य vज्योतिः vइव vवक्षथः प्रकाशोऽस्ति । हे वसिष्ठाः वो युष्माकं vमहिमा स्तोमोऽपि वा vसमुद्रस्येव vगभीरः गम्भीरोऽस्ति । तथा हे वसिष्ठाः एषां वो युष्माकं स्तोम ऋक्समूहो महिमापि वा vवातस्येव vप्रजवः यथा वातस्य प्रवेगोऽन्येनान्वेतुं न शक्यस्तद्वत् vअन्येन vअन्वेतवे[1] अन्वेतुं vन शक्यः ॥

त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभि सं चरन्ति ।
यमेन ततं परिधिं वयन्तोऽप्सरस उप सेदुर्वसिष्ठाः ॥ ९ ॥

ते । इत् । निण्यम् । हृदयस्य । प्रऽकेतैः । सहस्रऽवल्शम् । अभि । सम् । चरन्ति ।
यमेन । ततम् । परिऽधिम् । वयन्तः । अप्सरसः । उप । सेदुः । वसिष्ठाः ॥ ९ ॥

vत vइत् त एव वसिष्ठाः vनिण्यं निरोहितं दुर्ज्ञानम् । 'निण्यं स्वस्वः' इत्यन्तर्हितनामसु पाठात् । vसहस्रवल्शं सहस्रशाखं संसारं vहृदयस्य vप्रकेतैः प्रज्ञानैः vअभि vसं vचरन्ति । एवं स्वाच्छन्द्येन[2] अभिसंचरन्तस्ते vवसिष्ठाः vयमेन कारणात्मना सर्वनियन्त्रा vततं विस्तृतं vपरिधिं वस्त्रम् । परिधिरित्यनेन जन्मादिप्रवाहो विवक्षितः । तं vवयन्तोऽप्सरसः जननीत्वेन vउप vसेदुः । अत्र वसिष्ठा इति बहुवचनं पूजायाम् । वसिष्ठः पूर्वं प्रजापतेरुत्पन्नं देहमुत्सृज्याप्सरःसु जायेयेति बुद्धिमकरोदिति भावः ॥

विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा ।
तत्ते जन्मोतैकं वसिष्ठागस्त्यो यत्त्वा विश आजभार ॥ १० ॥

विऽद्युतः । ज्योतिः । परि । सम्ऽजिहानम् । मित्रावरुणा । यत् । अपश्यताम् । त्वा ।
तत् । ते । जन्म । उत । एकम् । वसिष्ठ । अगस्त्यः । यत् । त्वा । विशः । आऽजभार ॥ १० ॥

एतास्वृक्षु वसिष्ठस्यैव देहपरिग्रहः प्रतिपाद्यते । एताश्चेन्द्रस्य वाक्यमित्येके वर्णयन्त्यपरे वसिष्ठपुत्राणामिति । हे vवसिष्ठ vयत् यदा vविद्युतः विद्युत इव स्वीयं vज्योतिः देहान्तरपरिग्रहार्थं vपरि vसंजिहानं परित्यजन्तं vत्वा त्वाम् । छान्दसमात्मनेपदम् । यद्वा । जिघृक्षितदेहार्थं[3] स्वीयं ज्योतिः परि संजिहानम् । परिजिघृक्षन्तमित्यर्थः । अस्मिन् पक्षे जहातेर्गत्यर्थत्वादात्मनेपदं छान्दसं न भवति । vमित्रावरुणा मित्रावरुणौ vअपश्यताम् । आवाभ्यामयं जायेतेति समकल्पतामित्यर्थः । vतत् तदा vते तव vएकं vजन्म । vउत अपि च vयत् यदा vअगस्त्यः vविशः निवेशनान्मित्रावरुणौ आवां[4] जनयिष्याव इत्येतस्मात् पूर्वावस्थानात् त्वाम् vआजभार आजहार ॥ ॥ २३ ॥

१. ज्ञ–भवन्महिमा अन्वेतवे; त१-२-४– तव महिमा अन्वेतवे । २. ज्ञ-त१-२–स्वच्छंदेन । ३. ख-भ–जिघृक्षिकदेहाय; ज्ञ–जिघृक्षितं देहार्थं; न–जिघृक्षितदेहाय । ४. श– वा कदा ।

उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधि जातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त ॥ ११ ॥

उत । असि । मैत्रावरुणः । वसिष्ठ । उर्वश्याः । ब्रह्मन् । मनसः । अधि । जातः ।
द्रप्सम् । स्कन्नम् । ब्रह्मणा । दैव्येन । विश्वे । देवाः । पुष्करे । त्वा । अददन्त ॥ ११ ॥

vउत अपि च हे vवसिष्ठ vमैत्रावरुणः मित्रावरुणयोः पुत्रः vअसि । हे vब्रह्मन् वसिष्ठ vउर्वश्याः अप्सरसः vमनसः[1] ममायं पुत्रः स्यादितीदृशात् संकल्पात् vद्रप्सं रेतः मित्रावरुणयोरुर्वशीदर्शनात् vस्कन्नम् आसीत् । तस्मात् vअधि[2] vजातः असि । तथा च वक्ष्यते 'सत्रे ह जातौ' इत्यृचि । एवं जातं त्वा त्वां vदैव्येन देवसंबन्धिना vब्रह्मणा वेदराशिना अहंभुवा[3] युक्तं[3] vपुष्करे vविश्वे vदेवाः vअददन्त अधारयन्त । तथा च अदितेर्मित्रावरुणौ जज्ञाते इति प्रकृत्य पठ्यते–' तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्वशीम् । रेतश्चस्कन्द तत्कुम्भे न्यपतद्वासतीवरे ॥ तेनैव तु मुहूर्तेन वीर्यवन्तौ तपस्विनौ । अगस्त्यश्च वसिष्ठश्च तत्रर्षी संबभूवतुः ॥ बहुधा पतितं रेतः कलशे च जले स्थले । स्थले वसिष्ठस्तु मुनिः संभूत ऋषिसत्तमः ॥ कुम्भे त्वगस्त्यः संभूतो जले मत्स्यो महाद्युतिः । उदियाय ततोऽगस्त्यः शम्यामात्रो महातपाः ॥ मानेन संमितो यस्मात्तस्मान्मान्य इहोच्यते । यद्वा कुम्भादृषिजातः कुम्भेनापि हि मीयते ॥ कुम्भ इत्यभिधानं च[4] परिमाणस्य लक्ष्यते[4] । ततोऽप्सु गृह्यमाणासु वसिष्ठः पुष्करे स्थितः ॥ सर्वतः पुष्करे तं हि विश्वे देवा अधारयन् । ' (बृहद्दे. ५. १४९–१५५) इति ॥

स प्रकेत उभयस्य प्रविद्वान्त्सहस्रदान उत वा सदानः ।
यमेन ततं परिधिं वयिष्यन्नप्सरसः परि जज्ञे वसिष्ठः ॥ १२ ॥

सः । प्रऽकेतः । उभयस्य । प्रऽविद्वान् । सहस्रऽदानः । उत । वा । सऽदानः ।
यमेन । ततम् । परिऽधिम् । वयिष्यन् । अप्सरसः । परि । जज्ञे । वसिष्ठः ॥ १२ ॥

vसः वसिष्ठः vप्रकेतः प्रकृष्टज्ञानः vउभयस्य उभयं दिव च पृथिवीं च vप्रविद्वान् प्रकर्षेण जानन् vसहस्रदानः अभवत् किमनेन सहस्रदान इति विशेषणेन vउत vवा अपि वा vसदानः सर्वदानसहित एवाभवत् किंच vवसिष्ठः vयमेन कारणात्मना सर्वनियन्त्रा vततं विस्तृतं vपरिधिं वस्त्रम् । परिधिरित्यनेन संसारप्रवाहो विवक्षितः । तं vवयिष्यन् vअप्सरसः उर्वश्याः । vपरि इति पञ्चम्यर्थानुवादः । vजज्ञे जातः ॥

सत्रे ह जातावृषिता नमोभिः कुम्भे रेतः सिषिचतुः समानम् ।
ततो ह मान उदियाय मध्यात्ततो जातमृषिमाहुर्वसिष्ठम् ॥ १३ ॥

सत्रे । ह । जातौ । इषिता । नमःऽभिः । कुम्भे । रेतः । सिसिचतुः । समानम् ।
ततः । ह । मानः । उत् । इयाय । मध्यात् । ततः । जातम् । ऋषिम् । आहुः । वसिष्ठम् ॥ १३

---

१. ख-ङ्ग-त-न-भ-श–' मनसः ' नास्ति; घ–नमसः । २. ख-ङ्ग-त-न-भ-श–' अधि ' नास्ति ३. ख-घ-भ–अहंभुवा मुक्तं; ङ्ग-त४-श२–अहभुवा युक्तं; त३-न–अहभुवा मुक्तं । ४. ङ्ग-त१-परिमाणं च लक्ष्यते; त२–तत् परिमाणं च लक्ष्यते ।

vसत्रे बहुकर्तृके यागे। vइह इति पूरणः। vजातौ दीक्षितौ मित्रावरुणौ vइषिता अध्येषितौ स्वयमन्यैर्जनैः vनमोभिः स्तुतिभिः vकुम्भे वासतीवरे[1] कलशे vसमानम् एकदैव vरेतः vसिसिचतुः[2] असिञ्चताम्। vततः वासतीवरात्कुम्भात् vमध्यात् अगस्त्यः vमानः शमीप्रमाणः vउदियाय प्रादुर्बभूव। vततः एव कुम्भात् vवसिष्ठम् अपि vऋषिं vजातमाहुः ॥

उक्थभृतं साम॒भृतं बिभर्ति ग्रावा॑णं बिभ्रत्प्र वदात्यग्ने।
उपैनमाध्वं सुमन॒स्यमा॑ना॒ आ वो॑ गच्छाति प्रतृदो वसिष्ठः ॥ १४ ॥

उक्थऽभृतम्। साम॒ऽभृतम्। बिभर्ति। ग्रावा॑णम्। बिभ्रत्। प्र। वदाति। अग्ने।
उप। एनम्। आध्वम्। सुऽमन॒स्यमा॑नाः। आ। वः। गच्छाति। प्रऽतृदः। वसिष्ठः॥ १४॥

हे vप्रतृदः। प्रतृद इति तृत्सव एवाभिधीयन्ते नामान्तरेण। vवः युष्मान् vवसिष्ठः vआ vगच्छाति आगच्छति। vएनं वसिष्ठं vसुमनस्यमानाः सुमनसः सन्तः vउप vआध्वं उपतिष्ठत। आगतश्चासौ वसिष्ठः यज्ञे vअग्ने पुरोहितो ब्रह्मा सन् vउक्थभृतं शस्त्राणां संभर्त्तारं vबिभर्ति। vसामभृतम् उद्गातारं बिभर्ति। vग्रावाणम् अभिषवणं[3] vबिभ्रत् बिभ्रतम्[4] अध्वर्युं च बिभर्ति। vप्र vवदाति यज्ञे यत्प्रवदितव्यं श्रेषादिनिमित्ते कर्तव्यमस्ति[5] तदपि वदतीति तृत्सून् प्रतीन्द्रो ब्रवीति ॥ ॥ २४ ॥ ॥ २ ॥

तृतीयेऽनुवाके द्वाविंशतिसूक्तानि। तत्र 'प्र शुक्रा' इति पञ्चविंशत्यृचं प्रथमं सूक्तम्। अत्रेयमनुक्रमणिका—'प्र शुक्रा पञ्चाधिका वैश्वदेवं हाद्या एकविंशतिर्द्विपदा अज्जामहेरर्धर्चं उत्तरोऽहिर्बुध्न्याय' इति। वसिष्ठ ऋषिः। आद्या एकविंशतिर्द्विपदा विंशत्यक्षरा विराजो द्वाविंशाद्याश्चतस्रस्त्रिष्टुभः। विश्वे देवा देवता। व्यूळ्हे दशरात्रे चतुर्थेऽहनि वैश्वदेवशस्त्र इदं सूक्तं वैश्वदेवनिविद्धानम्। सूत्रितं च—'प्र शुक्रैत्विति वैश्वदेवम्' (आश्व. श्रौ. ८. ८) इति। षोडशिनि 'आ धूर्ष्वस्मा इति द्विपदा' (आश्व. श्रौ. ६. २) इति। महाव्रतेऽप्येषा द्विपदा। तथैव पञ्चमारण्यके सूत्रितं—'आ धूर्ष्वस्मा इत्येका सूददोहाः' (ऐ. आ. ५. २. २) इति ॥

प्र शुक्रैतु॒ दे॒वी म॑नी॒षा अ॒स्मत्सु॒तष्टो॒ रथो॒ न वा॒जी ॥ १ ॥

प्र। शु॒क्रा। ए॒तु॒। दे॒वी। म॒नी॒षा। अ॒स्मत्। सु॒ऽत॒ष्टः। रथः॑। न। वा॒जी ॥ १ ॥

vशुक्रा दीप्ता vदेवी सर्वेषां कामानां प्रदात्री vमनीषा स्तुतिः vअस्मत् अस्मत्तः अस्मिन् सूक्ते स्तोष्यमाणान् देवान् vवाजी वेगवान् vसुतष्टः सुसंस्कृतः vरथो vन रथ इव vप्र vएतु प्रगच्छतु[6] ॥

वि॒दुः पृ॑थि॒व्या दि॒वो ज॒नित्रं॑ शृ॒ण्वन्त्या॒पो अध॒ क्षर॑न्तीः ॥ २ ॥

वि॒दुः। पृ॒थि॒व्याः। दि॒वः। ज॒नित्र॑म्। शृ॒ण्वन्ति॑। आपः॑। अध॑। क्षर॑न्तीः ॥ २ ॥

अस्यामृच्यापः स्तूयन्ते। vक्षरन्तीः क्षरन्त्यः vआपः vदिवः vपृथिव्याः च। उभयोरपि लोकयोरित्यर्थः। vजनित्रम् उत्पत्तिं vविदुः जानन्ति। vअध अपि च vशृण्वन्ति स्तोत्राणीति शेषः ॥

---

१. ज्ञ—वासतीवरी°। २. ज्ञ—सिषिचतुः। ३. ज्ञ—अभिषवपाषाणं। ४. ख-घ-ङ्ग-त२-न-भ-श—बिभ्रंतं। ५. ख—कर्तव्ये सति; न-भ—कर्तव्यसस्ति। ६. त—गच्छतु; श—आगच्छतु।

आपश्चिदस्मै पिन्वन्त पृथ्वीर्वृत्रेषु शूरा मंसन्त उग्राः ॥ ३ ॥

आपः । चित् । अस्मै । पिन्वन्त । पृथ्वीः । वृत्रेषु । शूराः । मंसन्ते । उग्राः ॥ ३ ॥

इन्द्रोऽस्मिन् दृचे स्तूयते । vपृथ्वीः पृथ्व्यः प्रथमानाः vआपश्चित् आपोऽपि vअस्मै इन्द्राय vपिन्वन्त प्याय्यन्ते[1] । vवृत्रेषु उपद्रवेषु सत्सु vउग्राः उद्गूर्णास्तेजस्विनो वा vशूराः योद्धारोऽपि vमंसन्ते इममेवेन्द्रं स्तुवन्ति ॥

आ धूर्ष्वस्मै दधाताश्वानिन्द्रो न वज्री हिरण्यबाहुः ॥ ४ ॥

आ । धूःऽसु । अस्मै । दधात । अश्वान् । इन्द्रः । न । वज्री । हिरण्यऽबाहुः ॥ ४ ॥

vअस्मै । षष्ठ्यर्थे चतुर्थी । अस्येन्द्रस्यागमनाय vअश्वान् vधूर्षु रथस्य vआ vदधात । vइन्द्रो vन । नेति चार्थे । इन्द्रः vवज्री वज्रवान् vहिरण्यबाहुः हिरण्यहस्तश्च भवति ॥ योऽशिनि शस्यमानत्वादस्या ऐन्द्रत्वं गम्यते । 'आ धूर्ष्वस्मै' इत्यत्र 'अस्मै' इत्यस्य पदस्यानुदात्तत्वं पूर्वस्याभिन्द्रस्य प्रकृतत्वात् । अत एव पूर्वार्धेऽप्येन्द्रीति विज्ञायते । पूर्वस्यामप्यृचि 'अस्मै' इत्यत्रानुदात्तत्वमल्पीयोऽर्थतरमनुदात्तमिति । तथा च यास्कः—'अस्येति चोदात्तं प्रथमादेशेऽनुदात्तमन्वादेशे तीव्रार्थतरमुदात्तमल्पीयोऽर्थतरमनुदात्तम्' (निरु. ४. २५) इति । अल्पीयस्त्वं चेवंशब्दप्रवृत्तिनिमित्तस्य संनिधानस्य दूरस्थत्वेनेत्यवगन्तव्यम् ॥

अभि प्र स्थाताहेव यज्ञं यातेव पत्मन्त्मना हिनोत ॥ ५ ॥

अभि । प्र । स्थात । अहेऽइव । यज्ञम् । यातेऽइव । पत्मन् । त्मना । हिनोत ॥ ५ ॥

यज्ञस्तुतिरियम् । हे जनाः vयज्ञम् vअभि vप्र vस्थात अभिक्रमत । vअहेव इति पूरणौ । अपि च vपत्मन् पत्मनि यज्ञमार्गे vत्मना स्वयमेव vयातेव गन्तेव vहिनोत गच्छत । 'हि गतौ' इति धातुः ॥

त्मना समत्सु हिनोत यज्ञं दधात केतुं जनाय वीरम् ॥ ६ ॥

त्मना । समत्ऽसु । हिनोत । यज्ञम् । दधात । केतुम् । जनाय । वीरम् ॥ ६ ॥

उक्तस्यैव विवरणमत्र । हे मदीया जनाः vसमत्सु संग्रामेषु vत्मना स्वयमेव vहिनोत गच्छत । अपि च vकेतुं प्रज्ञापकं vवीरं पापानां वारयितारम् । नाशकमित्यर्थः । vयज्ञं vजनाय लोकाय । तद्रक्षार्थमित्यर्थः । vदधात विधत्त ॥

उदस्य शुष्माद्भानुर्नार्त बिभर्ति भारं पृथिवी न भूमं ॥ ७ ॥

उत् । अस्य । शुष्मात् । भानुः । न । आर्त । बिभर्ति । भारम् । पृथिवी । न । भूमं ॥ ७ ॥

vअस्य यज्ञस्य vशुष्मात् बलात् vभानुः सूर्यः vउत् vआर्त उद्गच्छति । vभूम भूतानि पृथिवीव[2] vभारं लोकस्यायं यज्ञो vबिभर्ति च[3] ॥

हुवामि देवाँ अयातुरग्ने साधन्नृतेन धियं दधामि ॥ ८ ॥

हुवामि । देवान् । अयातुः । अग्ने । साधन् । ऋतेन । धियम् । दधामि ॥ ८ ॥

१. श—आप्यायते । २. ज्ञ-त१-२—पृथिवी न पृथिवीव । ३. घ-ज्ञ-त१-२—च न पूरणः ।

अस्मिंस्तृचे देवाः स्तूयन्ते। हे vअग्ने vअयातुः अहिंसादिनियमयुक्तेन vऋतेन यज्ञेन vसाधन् कामान् साधयन् vदेवान् vहूयामि। अपि च vधियं देवानां परिचरणात्मकं कर्म vदधामि। करोमीत्यर्थः॥

अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वम् ॥ ९ ॥

अभि। वः। देवीम्। धियम्। दधिध्वम्। प्र। वः। देवऽत्रा। वाचम्। कृणुध्वम्॥ ९ ॥

हे जनाः vवः यूयम् vअभि देवानुद्दिश्य vदेवीं दीप्तां vधियं कर्म vदधिध्वं विधत्त। अपि च vवः यूयं vदेवत्रा देवेषु vवाचं स्तुतिरूपां vप्र vकृणुध्वं प्रकर्षेण कुरुध्वम्॥

आ चष्ट आसां पार्थो नदीनां वरुण उग्रः सहस्रचक्षाः ॥ १० ॥

आ। चष्टे। आसाम्। पार्थः। नदीनाम्। वरुणः। उग्रः। सहस्रऽचक्षाः॥ १० ॥

vसहस्रचक्षाः बहुचक्षुः vवरुणः vआसां vनदीनां vपार्थः जलम् vआ vचष्टे अभिपश्यति। कीदृशो वरुणः। vउग्रः उद्गूर्ण ओजस्वी वा॥ ॥ २५ ॥

राजा राष्ट्रानां पेशो नदीनामनुत्तमस्मै क्षत्रं विश्वायु ॥ ११ ॥

राजा। राष्ट्रानाम्। पेशः। नदीनाम्। अनुत्तम्। अस्मै। क्षत्रम्। विश्वऽआयु॥ ११ ॥

vराष्ट्रानां राष्ट्राणाम्॥ णत्वाभाव×छान्दसः॥ ईश्वराणामपि वरुणः vराजा ईश्वरः भवति। vनदीनां vपेशः रूपं रूपकृदपि भवतीत्यर्थः। vअस्मै। षष्ठ्यर्थे चतुर्थी। अस्य वरुणस्य vक्षत्रं बलम् vअनुत्तम् अन्यैरबाधितं vविश्वायु सर्वतो गन्तृ भवतीति॥

अविष्टो अस्मान्विश्वासु विक्ष्वद्युं कृणोतु शंसं निनित्सोः ॥ १२ ॥

अविष्टो इति। अस्मान्। विश्वासु। विक्षु। अद्युम्। कृणोतु। शंसम्। निनित्सोः॥ १२ ॥

अयं द्रुचो दैवः। हे देवाः vअस्मान् vविश्वासु सर्वासु vविक्षु प्रजासु। अविष्ट उ इति समुदितम् vअविष्टो इति। अविष्ट रक्षत। vशंसं[1] vनिनित्सोः निन्दितुमिच्छतः शत्रोः vअद्युम् अदीप्तिं vकृणोत कुरुत च॥

व्येतु दिद्युद्द्विषामशेवा युयोतु विष्वग्रपस्तनूनाम् ॥ १३ ॥

वि। एतु। दिद्युत्। द्विषाम्। अशेवा। युयोत। विष्वक्। रपः। तनूनाम्॥ १३ ॥

vद्विषां शत्रूणां vदिद्युत् आयुधम् vअशेवा असुखकरी[2] vविष्वक् सर्वतः vव्येतु अपगच्छतु। vतनूनाम् अङ्गानां vरपः पापं देवाः vयुयोत अस्मत्तः पृथक्कुरुत॥

अवीन्नो अग्निर्हव्यान्नमोभिः प्रेष्ठो अस्मा अधायि स्तोमः ॥ १४ ॥

अवीत्। नः। अग्निः। हव्यऽअत्। नमःऽभिः। प्रेष्ठः। अस्मै। अधायि। स्तोमः॥ १४ ॥

vहव्यात् हव्यानामत्ता vअग्निः vनमोभिः अस्मदीयैर्नमस्कारैः vप्रेष्ठः प्रियतमः सन् vनः अस्मान् vअवीत् रक्षतु। vअस्मै अग्नये स्तोत्रम् vअधायि अस्माभिर्ध्यधायि॥

---

१. ज्ञ–शंसं स्तुतिं। २. ख-ज्ञ–असुखकरा।

सजूर्देवेभिरपां नपातं सखायं कृध्वं शिवो नो अस्तु ॥ १५ ॥

सऽजूः । देवेभिः । अपाम् । नपातम् । सखायम् । कृध्वम् । शिवः । नः । अस्तु ॥१५॥

हे स्तोतरः vअपाम् उदकानां vनपातं पुत्रमग्निम् । 'सूनुः नपात्' इत्यपत्यनामसु पाठात् । vदेवेभिः देवैः vसजूः सह vसखायं मित्रं स्तुतिभिः vकृध्वं कुरुध्वम् । स चापां नपात् vनः अस्मभ्यं vशिवः सुखकरः vअस्तु भवतु ॥

अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजःसु षीदन् ॥ १६ ॥

अप्ऽजाम् । उक्थैः । अहिम् । गृणीषे । बुध्ने । नदीनाम् । रजःऽसु । सीदन् ॥ १६ ॥

vअहिं मेघानामाहन्तारं vनदीनाम् उदकानां vबुध्ने स्थाने । बुध्नमन्तरिक्षं बद्धा अस्मिन् धृता आप इति व्युत्पत्तेः । तस्मिन् vरजःसु उदकेषु vसीदन् सीदन्तम् vअब्जाम् अप्सु जातमिममग्निम् vउक्थैः स्तोत्रैः vगृणीषे[1] । 'बुध्ने नदीनां रजःसूदकेषु सीदन् बुध्नमन्तरिक्षं बद्धा अस्मिन् धृता आप इति' (निरु. १०. ४४) इति[2] ॥

मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदतायोः ॥ १७ ॥

मा । नः । अहिः । बुध्न्यः । रिषे । धात् । मा । यज्ञः । अस्य । स्रिधत् । ऋतऽयोः ॥१७॥

vअहिर्बुध्न्यः । बुध्नेऽन्तरिक्षे भवो बुध्न्यः । अहिश्चासौ बुध्न्यश्चेत्यहिर्बुध्न्योऽग्निः vनः अस्मान् vरिषे हिंसकाय vमा vधात् मा ददातु । vअस्य vऋतायोः यज्ञकामस्य यजमानस्य vयज्ञः vमा च vस्रिधत् न क्षीयेत । यद्वा । अस्याहिर्बुध्न्यस्य इममहिर्बुध्न्यमुद्दिश्य ऋतायोः यज्ञकामस्य यो यज्ञः स न क्षीयेतेत्यर्थः ॥

उत नः एषु नृषु श्रवो धुः प्र राये यन्तु शर्धन्तो अर्यः ॥ १८ ॥

उत । नः । एषु । नृषु । श्रवः । धुः । प्र । राये । यन्तु । शर्धन्तः । अर्यः ॥ १८ ॥

अयं क्रचो दैवो मारुतो वा । vउत अपि च vनः अस्मदीयेषु vएषु vनृषु पुरुषेषु vश्रवः अन्नं vधुः देवा मरुतो वा धारयन्तु । vराये धनार्थं vशर्धन्तः उत्सहमानाः प्रीयमाणा वा vअर्यः अरयः vप्र vयन्तु प्रगच्छन्तु । म्रियन्तामित्यर्थः ॥

तर्पन्ति शत्रुं स्वर्ण भूमा महासेनासो अमेभिरेषाम् ॥ १९ ॥

तर्पन्ति । शत्रुम् । स्वः । न । भूम । महाऽसेनासः । अमेभिः । एषाम् ॥ १९ ॥

vमहासेनासः महासेना राजानः vएषां मरुतां देवानां वा vअमेभिः बलैः vभूमा भुवनानि vस्वर्ण आदित्य इव vशत्रुं स्वकीयं vतपन्ति बाधन्ते । महान्तोऽपि राजानः अमैः[3] बलैः शत्रून् बाधन्ते । तानि बलानि देवानामेवेत्यर्थः ॥

आ यज्ञः पत्नीर्गमन्त्यच्छा त्वष्टा सुपाणिर्दधातु वीरान् ॥ २० ॥

आ । यत् । नः । पत्नीः । गमन्ति । अच्छ । त्वष्टा । सुऽपाणिः । दधातु । वीरान् ॥२०॥

---

१. ज्ञ–गृणीषे स्तौमि । २. ज्ञ–यास्कः । ३. ख-ज्ञ-श–यैः ।

अस्यां[1] देवपत्न्यस्त्वष्टा च देवता। Vयत् यदा Vपत्नीः देवानां पत्न्यः Vनः अस्मान् Vअच्छ अभि Vआ Vगमन्ति आगच्छन्ति तदा Vसुपाणिः शोभनहस्तः Vत्वष्टा देवः Vवीरान् पुत्रान् Vदधातु अस्मभ्यं ददातु ॥ ॥ २६ ॥

प्रति नः स्तोमं त्वष्टा जुषेत स्यादस्मे अरमतिर्वसूयुः ॥ २१ ॥

प्रति। नः। स्तोमम्। त्वष्टा। जुषेत। स्यात्। अस्मे इति। अरमतिः। वसुऽयुः ॥ २१ ॥

Vनः अस्माकं Vस्तोमं स्तोत्रं Vत्वष्टा Vप्रति Vजुषेत प्रतिसेवेत। अपि च Vअरमतिः पर्याप्तबुद्धिः सर्वविषयव्याप्तिबुद्धिर्वा त्वष्टा[2] Vअस्मे अस्मदर्थं Vवसूयुः धनकामः Vस्यात् भूयात् ॥

ता नो रासन्नातिषाचो वसून्या रोदसी वरुणानी शृणोतु।
वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः ॥ २२ ॥

ता। नः। रासन्। रातिऽसाचः। वसूनि। आ। रोदसी इति। वरुणानी। शृणोतु।
वरूत्रीभिः। सुऽशरणः। नः। अस्तु। त्वष्टा। सुऽदत्रः। वि। दधातु। रायः ॥ २२ ॥

Vता[3] यानि[3] अस्माकमभीष्टानि तानि[4] Vवसूनि धनानि Vरातिषाचः दानसमवेताः[5] देवपत्न्यः Vनः अस्मभ्यं Vरासन् प्रयच्छन्तु। अपि च Vवरुणानी वरुणस्य पत्नी Vआ Vशृणोतु अस्मदीयं स्तोत्रम् अभिशृणोतु[6]। Vरोदसी द्यावापृथिव्यौ चाभिशृणुताम्। Vसुदत्रः कल्याणदानः Vत्वष्टा च Vवरूत्रीभिः उपद्रवाणां वारयित्रीभिर्देवपत्नीभिः सह Vनः अस्मभ्यं Vसुशरणः सुशरणप्रदः Vअस्तु। Vरायः धनानि च Vवि Vदधातु ॥

तन्नो रायः पर्वतास्तन्न आपस्तद्रातिषाच ओषधीरुत द्यौः।
वनस्पतिभिः पृथिवी सजोषा उभे रोदसी परि पासतो नः ॥ २३ ॥

तत्। नः। रायः। पर्वताः। तत्। नः। आपः। तत्। रातिऽसाचः। ओषधीः। उत। द्यौः।
वनस्पतिऽभिः। पृथिवी। सऽजोषाः। उभे इति। रोदसी इति। परि। पासतः। नः ॥ २३ ॥

Vनः अस्माकम्। Vतत् इत्यव्ययम्। ताः Vरायः धनानि Vपर्वताः परिपान्तु। Vनः अस्माकं Vतत् ताः रायः Vआपः च परिपान्तु। Vतद्रातिषाचः दानसहिता देवपत्न्यश्च परिपान्तु। Vओषधीः ओषधयश्च तत् परिपान्तु। Vउत अपि च Vद्यौः तत् परिपातु। Vवनस्पतिभिः Vसजोषाः सहिता Vपृथिवी अन्तरिक्षं च तत् परिपातु। 'आपः पृथिवी' इत्यन्तरिक्षनामसु पाठात्। Vनः अस्माकं तत् Vउभे Vरोदसी द्यावापृथिव्यावपि Vपरि Vपासतः परिरक्षताम् ॥

अनु तदुर्वी रोदसी जिहातामनु द्युक्षो वरुण इन्द्रसखा।
अनु विश्वे मरुतो ये सहासो रायः स्याम धरुणं धियध्यै ॥ २४ ॥

---

१. ज्ञ-त१-२–अस्याः। २. ज्ञ-श–अनुपरतिर्वा त्वष्टा। ३. ज्ञ–ता तानि; य–तानि। ४. ज्ञ-त१-४-य–'तानि' नास्ति। ५. ज्ञ-य–दानेन समवेताः; त१–दानिन समवेताः; त२-४–दानिनः समवेताः। ६. ख-न-भ–अभिशृणोति।

अनु । तत् । उर्वी इति । रोदसी इति । जिहाताम् । अनु । द्युक्षः । वरुणः । इन्द्रऽसखा ।
अनु । विश्वे । मरुतः । ये । सहासः । रायः । स्याम । धरुणम् । धियध्यै ॥ २४ ॥

vतत् वक्ष्यमाणम् vउर्वी विस्तीर्णे vरोदसी द्यावापृथिव्यौ vअनु vजिहाताम् अनुगच्छताम् । अनुमन्येतामित्यर्थः । vद्युक्षः दीप्तेर्निवासभूतः vइन्द्रसखा इन्द्रसखः । इन्द्रः सखा यस्येति बहुव्रीहिः । vवरुणः च तत् vअनु जिहीताम् । द्विवचनान्तस्यैकवचनान्ततया विपरिणामः । vये vसहासः शत्रूणामभिभवितारः ते vमरुतः अपि तत् vअनु जिहताम् । अत्र बहुवचनान्ततया विपरिणामः । यदनुमन्तव्यं तदाह । vधियध्यै भरणीयं[1] धारयितुं vरायः धनस्य vधरुणं धाम स्थानं वयं vस्याम भवेमेति ॥

तन्न इन्द्रो वरुणो मित्रो अग्निरापं ओषधीर्वनिनो जुषन्त ।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥ २५ ॥

तत् । नः । इन्द्रः । वरुणः । मित्रः । अग्निः । आपः । ओषधीः । वनिनः । जुषन्त ।
शर्मन् । स्याम । मरुताम् । उपऽस्थे । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥२५॥

vनः अस्मदीयं vतत् इदं स्तोत्रम् vइन्द्रः vवरुणः च vमित्रः च vअग्निः च vआपः च vओषधीः ओषधयश्च vवनिनः वृक्षाश्च vजुषन्त जुषन्तां सेवन्ताम् । वयं च vमरुतामुपस्थे उपस्थाने वर्तमानाः vशर्मन् शर्मणि सुखे गृहे वा vस्याम भवेम । सिद्धमन्यत् ॥ ॥ २७ ॥

'शं न इन्द्राग्नी' इति पञ्चदशर्चं द्वितीयं सूक्तम् । अत्रेयमनुक्रमणिका–'शं नः पञ्चोना शाम्तिः' इति । वसिष्ठ ऋषिः । त्रिष्टुप् छन्दः । 'वैश्वदेवं ह' इत्युक्तत्वादिदमपि वैश्वदेवम् । महानाम्नीव्रत एतत् सूक्तं जप्यम् । तथा च सूत्रितं–'भद्रं कर्णेभिः शृणुयाम देवाः शं न इन्द्राग्नी भवतामवोभिः' (आश्व. श्रौ. ८. १४) इति । एव--सु ॥

शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।
शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ॥ १ ॥

शम् । नः । इन्द्राग्नी इति । भवताम् । अवःऽभिः । शम् । नः । इन्द्रावरुणा । रातऽहव्या ।
शम् । इन्द्रासोमा । सुविताय । शम् । योः । शम् । नः । इन्द्रापूषणा । वाजऽसातौ ॥ १ ॥

vनः अस्माकमस्मभ्यं वा vइन्द्राग्नी vअवोभिः रक्षणैः vशं शान्त्यै vभवताम् । vरातहव्या रातहव्यौ यजमानैर्दत्तहविष्कौ vइन्द्रावरुणा इन्द्रावरुणावपि vनः अस्मभ्यं vशं शान्त्यै भवताम् । vइन्द्रासोमा इन्द्रासोमावपि नः vशं शान्त्यै vसुविताय कल्याणाय च भवताम् । vशं शान्त्यै सुखाय[2] च । पुनरुक्तिरादरार्था । अथवा शं शमनहेतुकं सुखं vयोः विषययोगनिमित्तं सुखमित्यपुनरुक्तिः । vइन्द्रापूषणा इन्द्रापूषणावपि vवाजसातौ युद्धे अन्नलाभे निमित्ते वा vनः vशं शान्त्यै भवतामित्यर्थः ॥

शं नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः शमु सन्तु रायः ।
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ॥ २ ॥

---

१. श–तरणियां; त-न-श–भरणीयां । २. ख-भ–सुविताय; श–योः सुखाय ।

शम्। नः। भगः। शम्। ऊँ इति। नः। शंसः। अस्तु।
शम्। नः। पुरम्ऽधिः। शम्। ऊँ इति। सन्तु। रायः।
शम्। नः। सत्यस्य। सुऽयमस्य। शंसः। शम्। नः। अर्यमा। पुरुऽजातः। अस्तु॥ २॥

Vनः अस्माकं Vशं शान्त्यै Vभगः देवः Vअस्तु भवतु। Vनः अस्माकं Vशमु शान्त्या एव Vशंसः नराशंसोऽस्तु भवतु। Vनः अस्माकं Vशं शान्त्यै Vपुरंधिः बहुधीरप्यस्तु। Vरायः धनान्यपि Vशमु शान्त्या एव Vसन्तु। Vनः अस्माकं Vसुयमस्य शोभनयमयुक्तस्य Vसत्यस्य Vशंसः वचनमपि Vशम् अस्तु। Vनः अस्माकं Vशं शान्त्यै Vपुरुजातः बहुप्रादुर्भावः Vअर्यमा देवोऽपि Vअस्तु॥

शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः।
शं रोदसी बृहती शं नो अद्रिः शं नो देवानाँ सुहवानि सन्तु॥ ३॥

शम्। नः। धाता। शम्। ऊँ इति। धर्ता। नः। अस्तु। शम्। नः। उरूची। भवतु। स्वधाभिः।
शम्। रोदसी इति। बृहती इति। शम्। नः। अद्रिः। शम्। नः। देवानाम्। सुऽहवानि। सन्तु॥३॥

Vनः अस्माकं Vशं शान्त्यै Vधाता देवः Vअस्तु। Vनः अस्माकं Vशमु शान्त्या एव Vधर्ता[1] पुण्यपापानां विधारयिता वरुणो देवोऽप्यस्तु। Vनः अस्माकं Vशं शान्त्यै Vउरूची विवर्तगमना पृथिव्यपि Vस्वधाभिः अन्नैः सहास्तु। Vबृहती महत्यौ Vरोदसी द्यावापृथिव्यावपि Vशं भवताम्। Vअद्रिः पर्वतोऽपि Vनः अस्माकं Vशं शान्त्यै भवतु। Vशं शान्त्यै Vनः अस्माकं Vदेवानां Vसुहवानि सुष्टुतयः Vसन्तु भवन्तु॥

शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शम्।
शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः॥ ४॥

शम्। नः। अग्निः। ज्योतिःऽअनीकः। अस्तु। शम्। नः। मित्रावरुणौ। अश्विना। शम्।
शम्। नः। सुऽकृताम्। सुऽकृतानि। सन्तु। शम्। नः। इषिरः। अभि। वातु। वातः॥४॥

Vज्योतिरनीकः ज्योतिर्मुखः Vअग्निः Vनः अस्माकं Vशं शान्त्यै Vअस्तु भवतु। मित्रावरुणा मित्रावरुणावपि Vनः अस्माकं Vशं शान्त्यै भवताम्। Vअश्विना अश्विनावपि Vशं भवताम्। Vसुकृतां पुण्यकर्मणां पुरुषाणां Vसुकृतानि पुण्यकर्माण्यपि Vनः अस्माकं Vशं शान्त्यै Vसन्तु भवन्तु। Vइषिरः गमनशीलोऽपि[2] Vवातः वायुरपि Vनः अस्माकं Vशं शान्त्यै Vअभि Vवातु॥

शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु।
शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः॥ ५॥

शम्। नः। द्यावापृथिवी इति। पूर्वऽहूतौ। शम्। अन्तरिक्षम्। दृशये। नः। अस्तु।
शम्। नः। ओषधीः। वनिनः। भवन्तु। शम्। नः। रजसः। पतिः। अस्तु। जिष्णुः॥५॥

Vनः अस्माकं Vशं शान्त्यै Vद्यावापृथिवी द्यावापृथिव्यौ Vपूर्वहूतौ प्रथमाह्वाने[3] भवताम्। Vअन्तरिक्षम् अपि Vनः अस्माकं Vदृशये दर्शनाय Vशम् Vअस्तु। Vनः अस्माकं Vशं शान्त्यै

---

१. ज्ञ-त-श–विधर्ता। २. ज्ञ–गमनशीलः। ३. ख-ज्ञ-त-३-४–न-भ-म-श२–'प्रथमाह्वाने' नास्ति; ज्ञ-त१-२–प्रथममाहूतौ; य–पूर्वे प्रार्थितौ; श१– शं शान्त्यै।

vओषधीः ओषधयोऽपि vभवन्तु। vवनिनः वृक्षाश्च शं भवन्तु। vजिष्णुः जयशीलः vरजसः लोकस्य vपतिः इन्द्रोऽपि vनः अस्माकं vशं शान्त्यै vअस्तु ॥ ॥ २८ ॥

शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः।
शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु ॥ ६ ॥

शम्। नः। इन्द्रः। वसुऽभिः। देवः। अस्तु। शम्। आदित्येभिः। वरुणः। सुऽशंसः।
शम्। नः। रुद्रः। रुद्रेभिः। जलाषः। शम्। नः। त्वष्टा। ग्नाभिः। इह। शृणोतु ॥ ६ ॥

vदेवः द्योतनादिगुणयुक्तः[1] vइन्द्रः vवसुभिः देवैः सार्धं vनः अस्माकं vशं शान्त्यै भवतु। vसुशंसः शोभनस्तुतिः vवरुणः देवः vआदित्येभिः आदित्यैर्देवैः सार्धं vशं शान्त्यै vअस्तु भवतु। vजलाषः[2] vरुद्रः दुःखद्रावको देवः vरुद्रेभिः रुद्रैः सार्धं vशं शान्त्यै vनः अस्माकं भवतु। vइह यज्ञे vत्वष्टा देवः vग्नाभिः देवपत्नीभिः सार्धं vनः vशं शान्त्यै भवतु। इह यज्ञे नः स्तोत्रं vशृणोतु च ॥

शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः।
शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्वः शम्वस्तु वेदिः ॥ ७ ॥

शम्। नः। सोमः। भवतु। ब्रह्म। शम्। नः। शम्। नः। ग्रावाणः। शम्। ऊँ इति।
सन्तु। यज्ञाः ॥ शम्। नः। स्वरूणाम्। मितयः। भवन्तु।
शम्। नः। प्रऽस्वः। शम्। ऊँ इति। अस्तु। वेदिः ॥ ७ ॥

vनः अस्माकं vशं शान्त्यै vसोमः vभवतु। vब्रह्म स्तोत्रमपि vनः अस्माकं vशं शान्त्यै भवतु। vग्रावाणः अभिषवसाधनभूताः पाषाणा अपि vनः अस्माकं vशं शान्त्यै भवन्तु। vयज्ञाः च नः vशमु शान्त्या एव vसन्तु। vस्वरूणां यूपानां vमितयः उन्मानान्यपि vनः अस्माकं vशं शान्त्यै vभवन्तु। vप्रस्वः ओषधयोऽपि vनः अस्माकं vशं शान्त्यै भवन्ति। vवेदिः अपि नः vशमु शान्त्या एव vअस्तु ॥

शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ॥ ८ ॥

शम्। नः। सूर्यः। उरुऽचक्षाः। उत्। एतु। शम्। नः। चतस्रः। प्रऽदिशः। भवन्तु।
शम्। नः। पर्वताः। ध्रुवयः। भवन्तु। शम्। नः। सिन्धवः। शम्। ऊँ इति। सन्तु। आपः ॥ ८ ॥

vनः अस्माकं vशं शान्त्यै vसूर्यः vउरुचक्षाः विस्तीर्णतेजाः सन् vउदेतु उदयं प्राप्नोतु। vचतस्रः vप्रदिशः महादिशोऽपि vनः अस्माकं vशं शान्त्यै vभवन्तु। vनः अस्माकं vशं शान्त्यै vपर्वताः vध्रुवयः ध्रुवाः vभवन्तु। vनः अस्माकं vशं शान्त्यै vसिन्धवः नद्योऽपि भवन्तु। vआपः च नः vशमु शान्त्या एव vसन्तु ॥

---

१. ख-ग-त२-४-न-भ-श–द्योतमानादि°। २. घ–जलाषः गंगाधरः; ज्ञ-त१-२–जलाषः सुखरूपः; श–जलाषः जलाभिलाषी।

शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः ।
शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः ॥ ९ ॥

शम् । नः । अदितिः । भवतु । व्रतेभिः । शम् । नः । भवन्तु । मरुतः । सुऽअर्काः ।
शम् । नः । विष्णुः । शम् । ऊँ इति । पूषा । नः । अस्तु ।
शम् । नः । भवित्रम् । शम् । ऊँ इति । अस्तु । वायुः ॥ ९ ॥

vअदितिः देवी v व्रतेभिः व्रतैः कर्मभिः सार्धं vनः अस्माकं vशं शान्त्यै vभवतु । vस्वर्काः शोभनस्तुतयः vमरुतः अपि vनः अस्माकं vशं शान्त्यै सन्तु । vविष्णुः व्यापकः vनः अस्माकं vशं शान्त्या अस्तु । vपूषा देवोऽपि vनः अस्माकं vशमु शान्त्या एव vअस्तु । vभवित्रं भुवनमन्तरिक्षमुदकं वा vनः अस्माकं vशं शान्त्या अस्तु । vवायुः अपि नः vशमु शान्त्या एव vअस्तु ॥

शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः ।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः ॥ १० ॥

शम् । नः । देवः । सविता । त्रायमाणः । शम् । नः । भवन्तु । उषसः । विऽभातीः ।
शम् । नः । पर्जन्यः । भवतु । प्रऽजाभ्यः । शम् । नः । क्षेत्रस्य । पतिः । अस्तु । शम्ऽभुः ॥ १० ॥

vदेवः क्रीडनादिगुणयुक्तः vसविता vत्रायमाणः रक्षन् vनः अस्माकं vशं शान्त्यै भवतु । vविभातीः व्युच्छन्त्यः vउषसः अपि vनः अस्माकं vशं शान्त्यै vभवन्तु । vनः अस्माकं vप्रजाभ्यः vपर्जन्यः अपि vशं vभवतु । vशंभुः सुखस्य भावयिता vक्षेत्रस्य vपतिः vनः अस्माकं vशं शान्त्यै vअस्तु ॥ ॥ २९ ॥

शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु ।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ॥ ११ ॥

शम् । नः । देवाः । विश्वऽदेवाः । भवन्तु । शम् । सरस्वती । सह । धीभिः । अस्तु ।
शम् । अभिऽसाचः । शम् । ऊँ इति । रातिऽसाचः ।
शम् । नः । दिव्याः । पार्थिवाः । शम् । नः । अप्याः ॥ ११ ॥

vविश्वदेवाः बहुस्तोत्रकाः vदेवाः vनः अस्माकं vशं शान्त्यै vभवन्तु । vसरस्वती च vधीभिः स्तुतिभिः कर्मभिर्वा vसह नोऽस्माकं vशं शान्त्यै vअस्तु । vअभिषाचः यज्ञमभितः सेवमानाश्च नः vशं शान्त्यै भवन्तु । vरातिषाचः दानं सेवमाना अपि vशमु शान्त्या एव भवन्तु । vदिव्याः दिवि भवाश्च vनः अस्माकं vशं शान्त्यै भवन्तु । vपार्थिवाः पृथिव्यां संभूताश्च नः शं भवन्तु । vअप्याः अप्स्वन्तरिक्षे भवाश्च । 'आकाशमापः' इत्यन्तरिक्षनामसु पाठात् । vनः अस्माकं vशं शान्त्यै भवन्तु ॥

शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः ।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु ॥ १२ ॥

शम् । नः । सत्यस्य । पतयः । भवन्तु । शम् । नः । अर्वन्तः । शम् । ऊँ इति । सन्तु । गावः ।
शम् । नः । ऋभवः । सुऽकृतः । सुऽहस्ताः । शम् । नः । भवन्तु । पितरः । हवेषु ॥ १२ ॥

Vसत्यस्य Vपतयः पालकाः सत्यशीला देवाः Vनः अस्माकं Vशं शान्त्यै Vभवन्तु। Vअर्वन्तः अश्वाश्च Vनः अस्माकं Vशं शान्त्यै भवन्तु। Vगावः अपि नः Vशं शान्त्यै भवन्तु। Vसुकृतः सुकर्माणः Vसुहस्ताः शोभनहस्ताः Vऋभवः अपि Vनः अस्माकं Vशं शान्त्यै सन्तु। Vहवेषु स्तोत्रेषु सत्सु Vपितरः अपि Vनः अस्माकं Vशं शान्त्यै Vभवन्तु॥

शं नो अज एकपादेवो अस्तु शं नोऽहिर्बुध्न्यः शं समुद्रः।
शं नो अपां नपात्पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा॥ १३॥

शम्। नः। अजः। एकऽपात्। देवः। अस्तु। शम्। नः। अहिः। बुध्न्यः। शम्। समुद्रः। शम्। नः। अपाम्। नपात्। पेरुः। अस्तु। शम्। नः। पृश्निः। भवतु। देवऽगोपा॥१३॥

Vअज Vएकपात् अज एकपान्नामधेयः Vदेवः Vनः अस्माकं Vशं शान्त्यै Vअस्तु। Vअहिर्बुध्न्यः च Vनः अस्माकं Vशं शान्त्या अस्तु। Vसमुद्रः अपि नः Vशं शान्त्या अस्तु। Vपेरुः उपप्रवेभ्यः पारयिता Vअपां Vनपात् अपांनपान्नामधेयोऽपि देवः Vनः अस्माकं Vशं शान्त्यै Vअस्तु। Vदेवगोपा देवा गोपायितारो यस्यां सा Vपृश्निः मरुतां माता Vनः अस्माकं Vशं शान्त्यै Vभवतु॥

आदित्या रुद्रा वसवो जुषन्तेदं ब्रह्म क्रियमाणं नवीयः।
शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः॥ १४॥

आदित्याः। रुद्राः। वसवः। जुषन्त। इदम्। ब्रह्म। क्रियमाणम्। नवीयः।
शृण्वन्तु। नः। दिव्याः। पार्थिवासः। गोऽजाताः। उत। ये। यज्ञियासः॥ १४॥

Vनवीयः नवतरमस्माभिः Vक्रियमाणम् Vइदं Vब्रह्म स्तोत्रम् Vआदित्याः दिव्याः। 'अदितिर्द्यौः' (ऋ. सं. १. ८९. १०) इति श्रुतेः। Vरुद्राः आन्तरिक्षाः Vवसवः पार्थिवाश्च Vजुषन्त जुषन्तां सेवन्ताम्। अन्ये[1] Vदिव्याः दिवि भवाः Vपार्थिवासः पार्थिवाः Vगोजाताः गोः पृश्नेर्जाताः। 'नाको गौः' इति साधारणनामसु पाठात्। Vउत अपि च Vये Vयज्ञियासः यज्ञार्हास्ते सर्वेऽपि Vनः अस्माकं हवं Vशृण्वन्तु॥

ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः॥ १५॥

ये। देवानाम्। यज्ञियाः। यज्ञियानाम्। मनोः। यजत्राः। अमृताः। ऋतऽज्ञाः।
ते। नः। रासन्ताम्। उरुऽगायम्। अद्य। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥१५॥

Vयज्ञियानां यजनीयानां Vदेवानाम् अपि Vयज्ञियाः यजनीयाः Vमनोः प्रजापतेश्च Vयजत्राः यजनीयाः Vअमृताः मरणरहिताः Vऋतज्ञाः सत्यज्ञाः Vये देवाः सन्ति Vते सर्वे Vउरुगायं बहुकीर्तिं पुत्रम् Vअद्य Vनः अस्मभ्यं Vरासन्तां प्रयच्छन्तु। सिद्ध एवोत्तमः पादः॥ ॥ ३० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण[2] विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पञ्चमाष्टके तृतीयोऽध्यायः समाप्तः॥

---

१. इ-त-श-अन्ये च। २. त३-श२-सायणार्येण।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ पञ्चमाष्टके चतुर्थोऽध्याय आरभ्यते। तत्र षडनुवाकात्मकस्य वासिष्ठस्य सप्तमस्य मण्डलस्य तृतीयेऽनुवाके द्वाविंशतिसूक्तानि। तत्र 'प्र ब्रह्म' इति नवर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं पूर्ववद्वैश्वदेवम्। अनुक्रान्तं च—'प्र ब्रह्म नव' इति। विनियोगो लैङ्गिकः ॥

प्र ब्रह्मैतु सदनादृतस्य वि रश्मिभिः ससृजे सूर्यो गाः।
वि सानुना पृथिवी संस्र उर्वी पृथु प्रतीकमध्येधे अग्निः ॥ १ ॥

प्र। ब्रह्म। एतु। सदनात्। ऋतस्य। वि। रश्मिऽभिः। ससृजे। सूर्यः। गाः।
वि। सानुना। पृथिवी। संस्रे। उर्वी। पृथु। प्रतीकम्। अधि। आ। ईधे। अग्निः ॥ १ ॥

ऋतस्य यज्ञस्य सदनात् स्थानाद्देवयजनदेशात् ब्रह्म स्तोत्रं स्तुत्यान् सूर्यादीन् प्र एतु प्रकर्षेण गच्छतु। किं तद्ब्रह्मेति तदाह। सूर्यः सर्वस्य प्रेरकः शोभनवीर्यो वा देवः रश्मिभिः आत्मीयैः किरणैः गाः अपो वृष्ट्युदकानि वि ससृजे विसृजति विमुञ्चति। प्रवर्षति। श्रूयते हि—'याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति' (तै. आ. १०. ६३) इति। स्मृतिश्च भवति—'आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' इति। अत ईदृशं माहात्म्यं सूर्यस्यैव विद्यते नान्यस्य कस्यचिदित्यनेन पादेन सूर्यः स्तूयते। अपि च पृथिवी प्रथिता भूमिः सानुना समुच्छ्रितेन पर्वतादिना उर्वी विस्तीर्णा सती वि ससे विसरति व्याप्नोति। तथा अग्निः पृथु विस्तीर्णं प्रतीकं पृथिव्या अवयवं देवयजनलक्षणं स्थानम् अधि। 'अधिपरी अनर्थकौ' इत्यधेः कर्मप्रवचनीयसंज्ञायां 'कर्मप्रवचनीययुक्ते०' इति सप्तम्यर्थे द्वितीया। ईदृशे स्थाने एधे आदीप्यते ॥

इमां वां मित्रावरुणा सुवृक्तिमिषं न कृण्वे असुरा नवीयः।
इनो वामन्यः पदवीरदब्धो जनं च मित्रो यतति ब्रुवाणः ॥ २ ॥

इमाम्। वाम्। मित्रावरुणा। सुऽवृक्तिम्। इषम्। न। कृण्वे। असुरा। नवीयः।
इनः। वाम्। अन्यः। पदऽवीः। अदब्धः। जनम्। च। मित्रः। यतति। ब्रुवाणः ॥२॥

हे असुरा असुरौ बलवन्तौ हे मित्रावरुणा मित्रावरुणौ वां युवाभ्याम् इषं न हवीरूपमन्नमिव नवीयः नवीयसीम् इमाम् अस्मदीयां पुरोवर्तिनीं सुवृक्तिं स्तुतिं कृण्वे अहं स्तोता करोमि। वां युवयोः अन्यः अन्यतरः इनः प्रभुः अदब्धः शत्रुभिरहिंसितो वरुणः पदवीः पदस्य स्थानस्य प्रजनयिता। वरुणो हि धर्माधर्मयोर्धारयितेति पदवीरित्युच्यते। ब्रुवाणः अस्माभिः स्तूयमानः मित्रः च जनं सर्वं प्राणिजातं यतति यातयति प्रवर्तयति। तथा च श्रूयते—'मित्रो जनान्यातयति ब्रुवाणः' (ऋ. सं. ३. ५९. १) इति ॥

आ वातस्य ध्रजतो रन्त इत्या अपीपयन्त धेनवो न सूदाः।
महो दिवः सदने जायमानोऽचिक्रदद्वृषभः सस्मिन्नूधन् ॥ ३ ॥

आ । वातस्य । ध्रजतः । रन्ते । इत्याः । अपीपयन्त । धेनवः । न । सूदाः ।
महः । दिवः । सदने । जायमानः । अचिक्रदत् । वृषभः । सस्मिन् । ऊधन् ॥ ३ ॥

vध्रजतः गच्छतः vवातस्य वायोः vइत्याः गतयः vआ vरन्ते अभितो रमन्ते। तथा vसूदाः। 'सूद प्रेरणे' इति धातुः। क्षीरस्य प्रेरयित्र्यः vधेनवो vन। नेति चार्थे। गावश्च vअपीपयन्त प्यायन्ते[1] एधन्ते। अपि च vमहः महतः vदिवः द्योतमानस्यादित्यस्य vसदने स्थानेऽन्तरिक्षे vजायमानः उत्पद्यमानः vवृषभः वर्षणशीलः पर्जन्यः vसस्मिन्नूधन् तस्मिन्[2] अन्तरिक्षे vअचिक्रदत्[3] ॥

गिरा य एता युनजद्धरी त इन्द्र प्रिया सुरथा शूर धायू ।
प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं ववृत्याम् ॥ ४ ॥

गिरा । यः । एता । युनजत् । हरी इति । ते । इन्द्र । प्रिया । सुऽरथा । शूर । धायू इति ।
प्र । यः । मन्युम् । रिरिक्षतः । मिनाति । आ । सुऽक्रतुम् । अर्यमणम् । ववृत्याम् ॥ ४ ॥

अस्याः पूर्वोऽर्धर्चः इन्द्रस्तुतिरपरोऽर्यम्णः स्तुतिः। हे vशूर विक्रान्त vइन्द्र vते तव vप्रिया प्रियौ vसुरथा सुष्ठुरंहणौ vधायू धारकौ vएता एतौ vहरी त्वदीयावश्वौ vयः जनः vगिरा स्तुतिरूपया वाचा vयुनजत् रथे युञ्ज्यात् हे इन्द्र त्वम् अस्य[4] यागमायाहीति शेषः। vयः अर्यमा vरिरिक्षतः हिंसितुमिच्छतः शत्रोः संबन्धिनं vमन्युं कोपं vप्र vमिनाति प्रकर्षेण हिनस्ति[5] vसुक्रतुं शोभनकर्माणम् vअर्यमणम् vआ vववृत्यां स्तुत्यावर्तयामि ॥

यजन्ते अस्य सख्यं वयश्च नमस्विनः स्व ऋतस्य धामन् ।
वि पृक्षो बाबधे नृभिः स्तवान इदं नमो रुद्राय प्रेष्ठम् ॥ ५ ॥

यजन्ते । अस्य । सख्यम् । वयः । च । नमस्विनः । स्वे । ऋतस्य । धामन् ।
वि । पृक्षः । बाबधे । नृऽभिः । स्तवानः । इदम् । नमः । रुद्राय । प्रेष्ठम् ॥ ५ ॥

अनया रुद्रः स्तूयते। vनमस्विनः हविर्लक्षणान्नवन्तः vस्वे स्वकीये vऋतस्य यज्ञस्य vधामन् धामनि स्थाने। स्वकीये यज्ञगृहे स्थिता इत्यर्थः। vवयश्च गन्तारः कर्माणि कुर्वाणा यजमानाः vअस्य रुद्रस्य vसख्यं सखित्वमुद्दिश्य vयजन्ते पूजयन्ति। vनृभिः नेतृभिः vस्तवानः स्तूयमानो रुद्रः vपृक्षः अन्नं स्तोतृषु vवि vबाबधे विबध्नाति। ददातीत्यर्थः। vप्रेष्ठं रुद्रस्य प्रियतमम् vइदं vनमः तस्मै vरुद्राय मया क्रियते ॥ ॥ १ ॥

आ यत्साकं यशसो वावशानाः सरस्वती सप्तथी सिन्धुमाता ।
याः सुष्वयन्त सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः ॥ ६ ॥

आ । यत् । साकम् । यशसः । वावशानाः । सरस्वती । सप्तथी । सिन्धुऽमाता ।
याः । सुस्वयन्त । सुऽदुघाः । सुऽधाराः । अभि । स्वेन । पयसा । पीप्यानाः ॥ ६ ॥

---

१. श–आप्यायते । २. ज्ञ–य–सर्वस्मिन्; त१-४–सस्मिन्; त२–सिस्मिन्। ३. ज्ञ–अचिक्रदत् शब्दायते। ४. ख–ज्ञ-त३-४-न-भ-श–यस्य; ज्ञ–तस्य । ५. ज्ञ–हिनस्ति तं ।

vयत् यासां गङ्गादीनां नदीनां मध्ये vसिन्धुमाता अपां मातृभूता vसरस्वती एतदाख्या नदी vसप्तथी सप्तमी भवति vसुदुघाः कामान् दोग्धुं सुशक्त्याः vसुधाराः शोभनधारोपेताश्च नद्यः vसुष्वयन्त सुष्वयन्ते। गतिकर्मैतत्। प्रवहन्ति। vस्वेन स्वकीयेन vपथसा उदकेन vअभि vपीप्यानाः vयाः च अभिवर्धयन्त्यः vयशसः अन्नवत्यः vवावशानाः कामयमाना नद्यः vसाकं युगपदेव vआ गच्छन्तु। आ इत्युपसर्गस्य योग्यक्रियाध्याहारः ॥

उत त्ये नो मरुतो मन्दसाना धियं तोकं च वाजिनोऽवन्तु ।
मा नः परि ख्यदक्षरा चरन्त्यवीवृधन्युज्यं ते रयिं नः ॥ ७ ॥

उत । त्ये । नः । मरुतः । मन्दसानाः । धियम् । तोकम् । च । वाजिनः । अवन्तु ।
मा । नः । परि । ख्यत् । अक्षरा । चरन्ती । अवीवृधन् । युज्यम् । ते । रयिम् । नः ॥ ७ ॥

vउत अपि च vमन्दसानाः मोदमानाः vवाजिनः वेगवन्तः vत्ये ते vमरुतः vनः अस्मदीयं vधियं यज्ञाख्यं कर्म vतोकं vच अस्मदीयं पुत्रं च vअवन्तु रक्षन्तु। vअक्षरा व्याप्ता vचरन्ती वाग्देवता च vनः अस्मान् vपरि त्यक्त्वा अस्मद्व्यतिरिक्तानन्यान् vमा vख्यत् मा द्राक्षीत्। vते पूर्वोक्ता मरुतो वाक्च vयुज्यं युक्तमपि vनः अस्मदीयं vरयिं धनम् vअवीवृधन् वर्धयन्तु ॥

प्र वो महीमरमतिं कृणुध्वं प्र पूषणं विदथ्यं न वीरम् ।
भगं धियोऽवितारं नो अस्याः सातौ वाजं रातिषाचं पुरंधिम् ॥ ८ ॥

प्र । वः । महीम् । अरमतिम् । कृणुध्वम् । प्र । पूषणम् । विदथ्यम् । न । वीरम् ।
भगम् । धियः । अवितारम् । नः । अस्याः । सातौ । वाजम् । रातिऽसाचम् । पुरम्ऽधिम् ॥ ८ ॥

हे स्तोतारः vवः यूयम् vअरमतिम् उपरतिरहितां vमहीं महतीं भूमिं vप्र vकृणुध्वम् आह्वयत। तथा vविदथ्यं यज्ञार्हं vवीरं vन सर्वेषां प्रेरकं च vपूषणम् एतन्नामकं देवं vप्र कृणुध्वम्। तथा vअस्याः vधियः vनः अस्मदीयस्यास्य कर्मणः vअवितारं रक्षितारं vभगं देवं चाह्वयत। अपि च vसातौ अस्मदीये यज्ञे युद्धे वा vवाजम् ऋभूणामन्यतमं देवमाह्वयत। कीदृशं वाजम्। vरातिषाचं दानसेवकं vपुरंधिं पुराणां धारयितारम् ॥

यज्ञपुच्छे 'अच्छायं वः' इति चमसिनः स्वं स्वं चमसमभिमृशेयुः। सूत्रितं च—'अच्छायं वो मरुतः श्लोक एत्वित्येतयाभिमृशन्ति' (आश्व. श्रौ. ६. १२) इति ॥

अच्छायं वो मरुतः श्लोक एत्वच्छा विष्णुं निषिक्तपामवोभिः ।
उत प्रजायै गृणते वयो धुर्युयं पात स्वस्तिभिः सदा नः ॥ ९ ॥

अच्छ । अयम् । वः । मरुतः । श्लोकः । एतु । अच्छ । विष्णुम् । निसिक्तऽपाम् । अवःऽभिः ।
उत । प्रऽजायै । गृणते । वयः । धुः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ९ ॥

हे vमरुतः vवः युष्मान् vअयं vश्लोकः अस्मदीयमिदं स्तोत्रम् vअच्छ vएतु अभिगच्छतु। vनिषिक्तपां निषिक्तस्य गर्भस्य रक्षितारम्। यद्वा। चमसे निषिक्तानां सोमानां पातारम्। vअवोभिः अस्मद्विषयरक्षणैर्युक्तं vविष्णुं चास्मदीयं स्तोत्रम् vअच्छ एतु। vउत अपि च मरुतो

विष्णुश्च ᵛगृणते स्तुवते मह्यं ᵛप्रजायै पुत्ररूपां प्रजां ᵛवयः अन्नं च ᵛधुः अधुः दधतु। हे मरुतो हे विष्णो ᵛयूयं ᵛस्वस्तिभिः अविनाशैः ᵛनः अस्मान् ᵛसदा सर्वदा ᵛपात रक्षत ॥ ॥ २ ॥

'आ वो वाहिष्ठः' इत्यष्टर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवम्। अनुक्रम्यते च— 'आ वोऽष्टौ' इति। विनियोगो लैङ्गिकः ॥

आ वो वाहिष्ठो वहतु स्तवध्यै रथो वाजा ऋभुक्षणो अमृक्तः ।
अभि त्रिपृष्ठैः सवनेषु सोमैर्मदे सुशिप्रा महभिः पृणध्वम् ॥ १ ॥

आ । वः । वाहिष्ठः । वहतु । स्तवध्यै । रथः । वाजाः । ऋभुक्षणः । अमृक्तः ।
अभि । त्रिऽपृष्ठैः । सवनेषु । सोमैः । मदे । सुऽशिप्राः । महऽभिः । पृणध्वम् ॥ १ ॥

अनेन द्व्रुचेन ऋभवः स्तूयन्ते। ᵛऋभुक्षणः विस्तीर्णस्य तेजसो निवासभूता हे ᵛवाजाः ऋभवः ᵛवाहिष्ठः वोढृतमः ᵛस्तवध्यै स्तोतुमर्हः ᵛअमृक्तः केनाप्यहिंसितो युष्मदीयः ᵛरथः ᵛवः युष्मान् ᵛआ ᵛवहतु आ समन्तादस्मदीयं यज्ञं प्रापयतु। हे ᵛसुशिप्राः शोभनहनवः यूयं तेन रथेनागत्य ᵛसवनेषु अस्मदीययज्ञेषु ᵛमदे मदनिमित्ते ᵛत्रिपृष्ठैः क्षीरदधिसक्तुमिश्रैः ᵛमहभिः महद्भिः ᵛसोमैः ᵛअभि ᵛपृणध्वं युष्मदीयं जठरमभिपूरयत। स रथो युष्मानावहत्विति पूर्वेणान्वयः ॥

यूयं ह रत्नं मघवत्सु धत्थ स्वर्दृशो ऋभुक्षणो अमृक्तम् ।
सं यज्ञेषु स्वधावन्तः पिबध्वं वि नो राधांसि मतिभिर्दयध्वम् ॥ २ ॥

यूयम् । ह । रत्नम् । मघवत्ऽसु । धत्थ । स्वःऽदृशः । ऋभुक्षणः । अमृक्तम् ।
सम् । यज्ञेषु । स्वधाऽवन्तः । पिबध्वम् । वि । नः । राधांसि । मतिऽभिः । दयध्वम् ॥२॥

हे ᵛऋभुक्षणः हे ऋभवः ᵛस्वर्दृशः स्वर्गं पश्यन्तः ᵛयूयं ᵛह यूयमेव ᵛमघवत्सु हविर्लक्षणान्नवत्स्वस्मासु निमित्तेषु ᵛअमृक्तम् अहिंसितम्। चोरादिभिर्नापहृतमित्यर्थः। ᵛरत्नं रमणीयं ᵛधत्थ धारयथ। तदनन्तरं ᵛस्वधावन्तः बलवन्तस्ते यूयं ᵛयज्ञेषु अस्मदीययज्ञेषु ᵛसं ᵛपिबध्वं सम्यक् सोमं[1] पिबत। अपि च यूयं ᵛमतिभिः धनहेतुभिः[2] ᵛनः अस्मभ्यं ᵛराधांसि धनानि ᵛवि ᵛदयध्वं विशेषेण दत्त ॥

उवोचिथ हि मघवन्देष्णं महो अर्भस्य वसुनो विभागे ।
उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यमते वसव्या ॥ ३ ॥

उवोचिथ । हि । मघऽवन् । देष्णम् । महः । अर्भस्य । वसुनः । विऽभागे ।
उभा । ते । पूर्णा । वसुना । गभस्ती इति । न । सूनृता । नि । यमते । वसव्या ॥ ३ ॥

'उवोचिथ' इत्याद्याः पञ्चर्च इन्द्रदेवताकाः। हे ᵛमघवन् धनवन्निन्द्र त्वं ᵛमहः महतः ᵛअर्भस्य अल्पस्य च ᵛवसुनः धनस्य ᵛविभागे परिचरणानुकूले दाननिमित्ते ᵛदेष्णं धनम् ᵛउवोचिथ ᵛहि सेवसे खलु। उचतिः सेवाकर्मा। तथा ᵛते त्वदीयौ ᵛउभा उभौ ᵛगभस्ती बाहू ᵛवसुना धनेन ᵛपूर्णा संपूर्णौ भवतः। ते त्वदीया ᵛसूनृता वाक् ᵛवसव्या वसूनि धनानि

---

१. ज्ञ-ज्ञ-त१-४–संपिबत। २. ज्ञ-त१-२–धनहेतुभिः मननीयैः स्तोत्रैः।

vन vभि vयमते न नियच्छति। यद्वा। वसव्या वसुषु धनेषु साधुः सूनृता वाक् धनेन संपूर्णौ त्वदीयौ बाहू न नियच्छति। नाल्पं प्रदापयतीत्यर्थः ॥

त्वमिन्द्र स्वयशा ऋभुक्षा वाजो न साधुरस्तमेष्यृक्वा ।
वयं नु ते दाश्वांसः स्याम ब्रह्म कृण्वन्तो हरिवो वसिष्ठाः ॥ ४ ॥

त्वम् । इन्द्र । स्वऽयशाः । ऋभुक्षाः । वाजः । न । साधुः । अस्तम् । एषि । ऋक्वा ।
वयम् । नु । ते । दाश्वांसः । स्याम । ब्रह्म । कृण्वन्तः । हरिऽवः । वसिष्ठाः ॥ ४ ॥

हे vइन्द्र vस्वयशाः असाधारणकीर्तिः vऋभुक्षाः ऋभुनिवासकः ऋभूणामीश्वरो वा vत्वं vसाधुः साधकः vवाजः vन अन्नमिव vऋक्वाः ऋक्वणः स्तोतुर्मम vअस्तं गृहम् vएषि प्राप्नुहि। vनु अद्य vवसिष्ठाः एतत्संज्ञका ऋषयः vवयं हे vहरिवः स्वकीयाश्वोपेतेन्द्र vते त्वदर्थं vदाश्वांसः हविर्लक्षणान्नं दत्तवन्तः vब्रह्म स्तोत्रं vकृण्वन्तः कुर्वन्तः सन्तः vस्याम भवेम ॥

सनितासि प्रवतो दाशुषे चिद्याभिर्विवेषो हर्यश्व धीभिः ।
ववन्मा नु ते युज्याभिरूती कदा न इन्द्र राय आ दशस्येः ॥ ५ ॥

सनिता । असि । प्रऽवतः । दाशुषे । चित् । याभिः । विवेषः । हरिऽअश्व । धीभिः ।
ववन्म । नु । ते । युज्याभिः । ऊती । कदा । नः । इन्द्र । रायः । आ । दशस्येः ॥ ५ ॥

हे vहर्यश्व हरिनामकाश्वेन्द्र त्वं vयाभिः vधीभिः अस्मदीयाभिः स्तुतिभिः vविवेषः व्याप्नोषि स त्वं vदाशुषे vचित् हविर्दत्तवते यजमानायापि vप्रवतः प्रवणस्य धनस्य vसनिता vअसि दाता भवसि। अपि च हे vइन्द्र त्वं vनः अस्मभ्यं vकदा कस्मिन् काले vरायः धनानि vआ vदशस्येः प्रयच्छेः। vनु अद्य vते तव vयुज्याभिः योग्याभिः vऊती ऊतिभी रक्षाभिः vववन्म त्वां संभजेम ॥ ॥ ३ ॥

वासयसीव वेधसस्त्वं नः कदा न इन्द्र वचसो बुबोधः ।
अस्तं तात्या धिया रयिं सुवीरं पृक्षो नो अर्वा न्युहीत वाजी ॥ ६ ॥

वासयसिऽइव । वेधसः । त्वम् । नः । कदा । नः । इन्द्र । वचसः । बुबोधः ।
अस्तम् । तात्या । धिया । रयिम् । सुऽवीरम् । पृक्षः । नः । अर्वा । नि । उहीत । वाजी ॥ ६ ॥

हे vइन्द्र vत्वं vकदा कस्मिन् काले vनः अस्मदीयं vवचसः वचोरूपं स्तोत्रं vबुबोधः अवगच्छेः[1]। तथा स त्वं vवेधसः स्तोतॄनस्मान् vवासयसीव। इवेदानीमर्थे। इदानीं स्वकीये स्थानेऽवस्थापयसि। किंच vवाजी बलवान् vअर्वा वेगवांस्त्वदीयोऽश्वः। vतात्या। तनोतेरिदं रूपम्। संततया vधिया अस्मत्प्रेरितया स्तुत्या हेतुभूतया vसुवीरं शोभनपुत्रोपेतं vरयिं त्वदीयं धनं vपृक्षः अन्नं च vनः अस्मदीयम् vअस्तं गृहं vनि vउहीत निवहेत् ॥

अभि यं देवी निर्ऋतिश्चिदीशे नक्षन्त इन्द्रं शरदः सुपृक्षः ।
उप त्रिबन्धुर्जरदष्टिमेत्यस्ववेशं यं कृणवन्त मर्ताः ॥ ७ ॥

---

१. य—अवगच्छसि ।

अभि । यम् । देवी । निःऽऋतिः । चित् । ईशे । नक्षन्ते । इन्द्रम् । शरदः । सुऽदृक्षाः ।
उप । त्रिऽबन्धुः । जरत्ऽअष्टिम् । एति । अस्वऽवेशम् । यम् । कृणवन्त । मर्ताः ॥ ७ ॥

[v]देवी द्योतमाना [v]निर्ऋतिश्चित् भूमिरपि [v]ईशे ॥ कृत्यार्थे केन्प्रत्ययः ॥ ईशितव्या स्वभूता सती [v]यम् [v]इन्द्रम् [v]अभि नक्षते व्याप्नोति । [v]सुदृक्षः शोभनादर्शनरूपेताः [v]शरदः संवत्सराश्च यमिन्द्रं [v]नक्षन्ते व्याप्नुवन्ति । [v]मर्ताः मरणधर्माणः स्तोतारो वयं [v]यम् इन्द्रम् [v]अस्ववेशं स्वकीये स्थानेऽनुपविशन्तं [v]कृणवन्त कुर्वन्ति । [v]त्रिबन्धुः त्रयाणां लोकानां बन्धको विधारकः स इन्द्रः [v]जरदष्टिं जरज्जीर्णमष्टिरशनं यस्य बलस्य हेतुभूतं तद्बलम् [v]उप [v]एति उपगच्छति ॥

आ नो राधाँसि सवितः स्तवध्या आ रायो यन्तु पर्वतस्य रातौ ।
सदा नो दिव्यः पायुः सिषक्तु यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

आ । नः । राधाँसि । सवितरिति । स्तवध्यै । आ । रायः । यन्तु । पर्वतस्य । रातौ ।
सदा । नः । दिव्यः । पायुः । सिसक्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ८ ॥

हे [v]सवितः सर्वस्य प्रेरक देव त्वत्सकाशात् [v]स्तवध्यै स्तोतुं योग्यानि [v]राधांसि धनानि [v]नः अस्मान् [v]आ [v]यन्तु आगच्छन्तु । [v]पर्वतस्य । पर्वत इति कश्चिदिन्द्रस्य सखा । एतत्संज्ञकस्य देवस्य [v]रातौ दाने सति [v]रायः धनान्यस्मान् [v]आ यन्तु । [v]पायुः सर्वस्य पालकः [v]दिव्यः दिवि भवः स इन्द्रः [v]सदा सर्वदा [v]नः अस्मान् [v]सिषक्तु रक्षकत्वेन सेवताम् । अस्मिन् सूक्ते ये प्रतिपादिता[1] देवास्ते सर्वे [v]यूयं [v]नः अस्मान् [v]स्वस्तिभिः कल्याणैः [v]सदा [v]पात पालयत[2] ॥ ॥ ४ ॥

'उदु ष्य देवः' इत्यष्टर्चं पञ्चमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं सवितृदेवताकम् । सप्तम्यष्टम्यौ वाजिदेवताके । 'भगमुग्रोऽवसे' इत्यर्धर्चो भगदेवत्यः सावित्रो वा । तथा चानुक्रमणिका—'उदु ष्य सावित्रमन्त्ये वाजिन्यौ भगमिति भागो वार्धर्चः' इति । गतः सूक्तविनियोगः ॥

उदु ष्य देवः सविता ययाम हिरण्ययीममतिं यामशिश्रेत् ।
नूनं भगो हव्यो मानुषेभिर्वि यो रत्ना पुरूवसुर्दधाति ॥ १ ॥

उत् । ऊँ इति । स्यः । देवः । सविता । ययाम । हिरण्ययीम् । अमतिम् । याम् । अशिश्रेत् ।
नूनम् । भगः । हव्यः । मानुषेभिः । वि । यः । रत्ना । पुरुऽवसुः । दधाति ॥ १ ॥

[v]सविता सर्वस्य प्रेरकः [v]स्यः सः [v]देवः [v]हिरण्ययीं सुवर्णमयीं [v]याम् [v]अमतिम् । रूपनामैतत् । रूपं प्रभामित्यर्थः । [v]अशिश्रेत् आश्रयति तामम्मतिम् [v]उत् [v]ययाम उद्यच्छति उद्गमयति । [v]उ इति पादपूरणः । [v]नूनम् अद्य [v]भगः भजनीयो यः सविता [v]मानुषेभिः मनुष्यैः स्तोतृभिः [v]हव्यः हवनीयः स्तोतव्यो भवति । [v]पुरूवसुः बहुधनः [v]यः देवः स्तोतृभ्यः [v]रत्ना रत्नानि रमणीयानि धनानि [v]वि [v]दधाति करोति । स सविता देवः तामम्मतिमुद्ययामेति पूर्वेण संबन्धः ॥

उदु तिष्ठ सवितः श्रुध्यस्य हिरण्यपाणे प्रभृतावृतस्य ।
व्युर्वीं पृथ्वीममतिं सृजान आ नृभ्यो मर्तभोजनं सुवानः ॥ २ ॥

---

१. ख-ङ्ग-त-न-भ-श-प्रतिपादकाः । २. श-रक्षत ।

उत्। ऊँ इति। तिष्ठ। सवितरिति। श्रुधि। अस्य। हिरण्यऽपाणे। प्रऽभृतौ। ऋतस्य। वि। उर्वीम्। पृथ्वीम्। अमतिम्। सृजानः। आ। नृऽभ्यः। मर्तऽभोजनम्। सुवानः ॥२॥

हे ᵛसवितः सर्वस्य प्रेरयितर्देव त्वम् ᵛउत् ᵛतिष्ठ ऊर्ध्वं गच्छ। ततो हे ᵛहिरण्यपाणे हे सुवर्णहस्त त्वमस्मदभीप्सितप्रदानाय ᵛऋतस्य यज्ञस्य ᵛप्रभृतौ प्रणयने ᵛअस्य अस्मदीयमिदं स्तोत्रं ᵛश्रुधि शृणु। ᵛउ इति पूरणः। कीदृशस्त्वम्। ᵛउर्वीं विस्तीर्णां ᵛपृथ्वीं प्रथिताम् ᵛअमतिं रूपं प्रभां ᵛवि ᵛसृजानः विसृजन् ᵛनृभ्यः नेतृभ्यः स्तोतृभ्यः ᵛमर्तभोजनं मनुष्याणां भोगयोग्यं धनम् ᵛआ ᵛसुवानः प्रेरयन्। एवंभूतस्त्वमिदं स्तोत्रं शृण्विति संबन्धः ॥

अपि ष्टुतः सविता देवो अस्तु यमा चिद्विश्वे वसवो गृणन्ति।
स नः स्तोमाँअनमस्यश्चनो धाद्विश्वेभिः पातु पायुभिर्नि सूरीन् ॥ ३ ॥

अपि। स्तुतः। सविता। देवः। अस्तु। यम्। आ। चित्। विश्वे। वसवः। गृणन्ति। सः। नः। स्तोमान्। नमस्यः। चनः। धात्। विश्वेभिः। पातु। पायुऽभिः। नि। सूरीन् ॥३॥

ᵛअपि च ᵛसविता ᵛदेवः अस्माभिः ᵛस्तुतः ᵛअस्तु। अस्मदीयाः स्तुतीः शृणोत्वित्यर्थः। ᵛविश्वे ᵛवसवः ᵛचित् सर्वे देवा अपि ᵛयं सवितारम् ᵛआ ᵛगृणन्ति अभिष्टुवन्ति ᵛनमस्यः सर्वैर्नमस्करणीयः ᵛसः देवः ᵛस्तोमान् ᵛनः अस्मदीयानि स्तोत्राणि ᵛचनः अन्नं ᵛधात् दधातु। अन्नफलानि करोतु। ᵛविश्वेभिः विश्वैः सर्वैः ᵛपायुभिः पालनैः ᵛसूरीन् स्तोतॄनस्मान् ᵛनि ᵛपातु नितरां पालयतु ॥

अभि यं देव्यदितिर्गृणाति सवं देवस्य सवितुर्जुषाणा।
अभि सम्राजो वरुणो गृणन्त्यभि मित्रासो अर्यमा सजोषाः ॥ ४ ॥

अभि। यम्। देवी। अदितिः। गृणाति। सवम्। देवस्य। सवितुः। जुषाणा। अभि। सम्ऽराजः। वरुणः। गृणन्ति। अभि। मित्रासः। अर्यमा। सऽजोषाः ॥ ४ ॥

ᵛदेवी द्योतमाना ᵛअदितिः अदीना देवमाता ᵛयं सवितारम् ᵛअभि ᵛगृणाति अभिष्टौति। कीदृशी। ᵛसवितुः ᵛदेवस्य एव ᵛसवं प्रसवमनुज्ञां ᵛजुषाणा सेवमाना। ᵛसम्राजः सम्यग्राजमानाः ᵛवरुणः। उपलक्षणमेतत्। वरुणादयो देवाः यं सवितारम् ᵛअभि ᵛगृणन्ति अभिष्टुवन्ति। ᵛमित्रासः मित्रादयश्च ᵛसजोषाः समानप्रीतिः ᵛअर्यमा एतत्संज्ञको देवश्च यम् ᵛअभि गृणन्ति। स नः स्तोमाँअनो धादिति पूर्वयर्चा संबन्धः ॥

अभि ये मिथो वनुषः सपन्ते रातिं दिवो रातिषाचः पृथिव्याः।
अहिर्बुध्न्य उत नः शृणोतु वरूत्र्येकधेनुभिर्नि पातु ॥ ५ ॥

अभि। ये। मिथः। वनुषः। सपन्ते। रातिम्। दिवः। रातिऽसाचः। पृथिव्याः। अहिः। बुध्न्यः। उत। नः। शृणोतु। वरूत्री। एकधेनुऽभिः। नि। पातु ॥ ५ ॥

ᵛरातिषाचः दानसेविनः ᵛवनुषः संभक्तारः ᵛये यजमानाः ᵛमिथः परस्परं संहता भूत्वा सवितारमभिलक्ष्य ᵛसपन्ते परिचरन्ति। कीदृशम्। ᵛदिवः द्युलोकस्य ᵛपृथिव्याः भूमेश्च ᵛरातिं

मित्रभूतम्। vउत अपि च vअहिर्बुध्न्यः। बुध्नेऽन्तरिक्षे भवो बुध्न्यः। एतीत्यहिः। एतत्पदद्वयाभिधो मध्यमस्थानोऽग्निरहिर्बुध्न्य इत्युच्यते। सवितुर्मित्रभूतः सोऽपि तेषां vनः अस्माकं सवितृविषयं स्तोत्रं vशृणोतु। तथा vवरूत्री वाग्देवी च सवितृसहिता[1] सती vएकधेनुभिः मुख्याभिर्गोभिः vनि vपातु नितरामस्मान् पालयतु॥

अनु तन्नो जास्पतिर्मंसीष्ट रत्नं देवस्य सवितुरियानः।
भगमुग्रोऽवसे जोहवीति भगमनुग्रो अध याति रत्नम्॥ ६॥

अनु। तत्। नः। जाःपतिः। मंसीष्ट। रत्नम्। देवस्य। सवितुः। इयानः।
भगम्। उग्रः। अवसे। जोहवीति। भगम्। अनुग्रः। अध। याति। रत्नम्॥ ६॥

vइयानः अस्माभिर्याच्यमानः vजास्पतिः प्रजानां पालकः सविता देवः vसवितुः vदेवस्य स्वस्य संबन्धि vरत्नं रमणीयं vतत् प्रसिद्धं धनं vनः अस्माकम् vअनु vमंसीष्ट अनुमन्यताम्। vउग्रः ओजस्वी स्तोता vभगं भजनीयं सवितारं भगसंज्ञकं देवं वा vअवसे नोऽस्माकं रक्षणाय vजोहवीति भृशं ह्वयति। vअध अपि च vअनुग्रः असमर्थः स्तोता vभगम् एतत्संज्ञकं सवितारं वा vरत्नं रमणीयं तत्प्रसिद्धं धनं vयाति याचते॥

वैश्वदेवे पर्वणि वाजिनस्य हविषः 'शं नो भवन्तु' इत्यादिके द्वे याज्यानुवाक्ये। सूत्रितं च—'शं नो भवन्तु वाजिनो हवेषु वाजेवाजेऽवत वाजिनो न इत्यूर्ध्वज्ञुरनवानं याज्याम्' (आश्व. श्रौ. २. १६) इति॥

शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः।
जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः॥ ७॥

शम्। नः। भवन्तु। वाजिनः। हवेषु। देवऽताता। मितऽद्रवः। सुऽअर्काः।
जम्भयन्तः। अहिम्। वृकम्। रक्षांसि। सनेमि। अस्मत्। युयवन्। अमीवाः॥ ७॥

vदेवताता देवतातौ यज्ञे vहवेषु अस्मदीयेषु स्तोत्रेषु vमितद्रवः मितद्रवणा मितमार्गाः vस्वर्काः शोभनान्नाः[2] vवाजिनः एतदभिधायका देवाः vनः अस्माकं vशं सुखाय vभवन्तु। अपि च vअहिम् आगत्य हन्तारं vवृकं वसूनामादातारम्। चोरमिति शेषः। vरक्षांसि च vजम्भयन्तः हिंसन्तो वाजिनो देवाः vसनेमि। पुराणनामैतत्। पुरातनाः vअमीवाः रोगान् vअस्मत् अस्मत्तः vयुयवन् पृथक्कुर्वन्तु[3]॥

वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥ ८॥

वाजेऽवाजे। अवत। वाजिनः। नः। धनेषु। विप्राः। अमृताः। ऋतऽज्ञाः।
अस्य। मध्वः। पिबत। मादयध्वम्। तृप्ताः। यात। पथिऽभिः। देवऽयानैः॥ ८॥

---

१. ख-भ—सवित्रे प्रहिता; घ-न-श्र-श—सवितृप्रहिता। २. ख-न-भ—शोभनान्ताः; घ—शोभनागाः; श—शोभमानाः। ३. ख-ञ-श्र-त१-२-४-भ—पृथक्कुर्वंति।

हे [v]वाजिनः एतन्नामका देवाः [v]विप्राः मेधाविनः [v]अमृताः अमरणधर्माणः [v]ऋतज्ञाः सत्यं जानन्त पूर्वभूताः सन्तो यूयं [v]वाजेवाजे सर्वेषु युद्धेषु [v]नः अस्मान् [v]धनेषु धननिमित्तेषु [v]अवत पालयत। ततो यूयम् [v]अस्य [v]मध्वः मधुरोपेतमिमं[1] सोमं [v]पिबत। सोमपानानन्तरं[v] मादयध्वं यूयं तृप्ता भवत। ततः [v]तृप्ताः यूयं [v]देवयानैः देवगमनसाधनैः [v]पथिभिः मार्गैः [v]यात गच्छत ॥ ॥५॥

'ऊर्ध्वो अग्निः' इति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवम्। 'ऊर्ध्वः सप्त वैश्व देवं तु' इत्यनुक्रमणिका। सूक्तविनियोगो लैङ्गिकः। द्वितीये छन्दोमे प्रउगशस्त्रे 'ऊर्ध्वो अग्निः' इति वैश्वदेवस्तृचः। सूत्रितं च–'ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेदुत स्या नः सरस्वती जुषाणेति प्रउगम्' (आश्व. श्रौ. ८. १०) इति ॥

ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेत्प्रतीची जूर्णिर्देवतातिमेति ।
भेजाते अद्री रथ्येव पन्थामृतं होता न इषितो यजाति ॥ १ ॥

ऊर्ध्वः । अग्निः । सुऽमतिम् । वस्वः । अश्रेत् । प्रतीची । जूर्णिः । देवऽतातिम् । एति । भेजाते इति । अद्री इति । रथ्याऽइव । पन्थाम् । ऋतम् । होता । नः । इषितः । यजाति ॥१॥

[v]अग्निः अङ्गनादिगुणविशिष्टः [v]ऊर्ध्वः उद्गमनः सन् [v]वस्वः वासकस्य स्तोतुः [v]सुमतिम् अस्मदीयां शोभनां स्तुतिम् [v]अश्रेत् श्रयतु सेवताम्। [v]प्रतीची अभिमुखी [v]जूर्णिः सर्वासां प्रजानां जरयित्र्युषोदेवता [v]देवतातिं यज्ञम् [v]एति गच्छति। [v]अद्री आद्रियन्तौ श्रद्धावन्तौ पत्नीयजमानौ [v]पन्थां पन्थानं यज्ञमार्गं [v]रथ्येव रथिनाविव [v]भेजाते सेवेते। तथा [v]इषितः संप्रेषितः[2] [v]नः अस्मदीयः [v]होता [v]ऋतं यज्ञं [v]यजाति यजतु। करोत्वित्यर्थः ॥

प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते ।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥ २ ॥

प्र । ववृजे । सुऽप्रयाः । बर्हिः । एषाम् । आ । विश्पती इवेति विश्पतीऽइव । बीरिटे । इयाते इति । विशाम् । अक्तोः । उषसः । पूर्वऽहूतौ । वायुः । पूषा । स्वस्तये । नियुत्वान् ॥ २ ॥

[v]एषां यजमानानां संबन्धि [v]सुप्रयाः शोभनान्नेन युक्तं [v]बर्हिः कुशमयं [v]प्र [v]ववृजे प्रवृज्यते। आसाद्यत इत्यर्थः। [v]विश्पतीव। इवेतीदानीमर्थे। इदानीमस्मदीयानां प्रजानां पालकौ [v]नियुत्वान्। नियुच्छब्देन वडवा उच्यन्ते। तद्वान् [v]वायुः [v]पूषा च [v]विशां प्रजानां [v]स्वस्तये क्षेमाय [v]अक्तोः रात्रेः संबन्धिन्याः [v]उषसः सकाशात् [v]पूर्वहूतौ पूर्वस्मिन्नाह्वाने सति [v]बीरिटे[3] अन्तरिक्षे[3] [v]आ [v]इयाते आगच्छताम्। यद्वा। विश्पतीवेत्युपमा। विशां मनुष्याणां बीरिटे गणे विश्पतीव राजानौ यथागच्छतां तद्वत्। अस्मिन् पक्षे विशामित्युभयत्र संबध्यते ॥

उमया अत्र वसवो रन्त देवा उरावन्तरिक्षे मर्जयन्त शुभ्राः ।
अर्वाक्पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य ॥ ३ ॥

उमयाः । अत्र । वसवः । रन्त । देवाः । उरौ । अन्तरिक्षे । मर्जयन्त । शुभ्राः ।
अर्वाक् । पथः । उरुऽज्रयः । कृणुध्वम् । श्रोत । दूतस्य । जग्मुषः । नः । अस्य ॥ ३ ॥

---

१. श–मधुररसोपेत°। २. श–प्रेषितः। ३. श–बीरिटमंतरिक्षं तस्मिन्।

vवसवः वसुसंज्ञकाः vदेवाः vअत्र अस्मिन् यज्ञे vऊमयाः पृथिव्यां भवाः vरन्त रमयन्ताम्। vउरौ विस्तीर्णे vअन्तरिक्षे स्थिताः vशुभ्राः दीप्यमाना मरुतश्च vमर्जयन्त परिचर्यन्ते। हे vउरुव्रयः प्रभूतगमना वसवो मरुतश्च यूयं vपथः युष्मदीयान् मार्गान् vअर्वाक् अस्मदभिमुखं यथा भवति तथा vकृणुध्वं कुरुत। अपि च यूयं vजग्मुषः युष्मान् प्रति गतवतः[1] vनः अस्मदीयस्य vअस्य vदूतस्य अग्नेराह्वानं vश्रोत शृणुत। अग्निर्हि यजमानानां दूतः सन् देवानाह्वयतीत्यर्थः॥

ते हि यज्ञेषु यज्ञियास ऊमाः सधस्थं विश्वे अभि सन्ति देवाः।
ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरंधिम्॥ ४॥

ते। हि। यज्ञेषु। यज्ञियासः। ऊमाः। सधऽस्थम्। विश्वे। अभि। सन्ति। देवाः।
तान्। अध्वरे। उशतः। यक्षि। अग्ने। श्रुष्टी। भगम्। नासत्या। पुरम्ऽधिम्॥ ४॥

vयज्ञेषु यागेषु vते vहि ते[2] खलु प्रसिद्धाः vयज्ञियासः यज्ञार्हाः vऊमाः रक्षकाः vविश्वे सर्वे vदेवाः vसधस्थं सहस्थानम् vअभि vसन्ति अभिभवन्ति आक्रामन्ति। हे vअग्ने vअध्वरे अस्मदीये यज्ञे vउशतः कामयमानान् vतान् देवान् vयक्षि यज। तथा vश्रुष्टी। क्षिप्रनामैतत्। क्षिप्रं vभगम् एतत्संज्ञकं देवं vनासत्या नासत्यावश्विनौ च vपुरंधिं पुरूणां ध्यातारमिन्द्रं च यज॥

आग्ने गिरो दिव आ पृथिव्या मित्रं वह वरुणमिन्द्रमग्निम्।
आर्यमणमदितिं विष्णुमेषां सरस्वती मरुतो मादयन्ताम्॥ ५॥

आ। अग्ने। गिरः। दिवः। आ। पृथिव्याः। मित्रम्। वह। वरुणम्। इन्द्रम्। अग्निम्।
आ। अर्यमणम्। अदितिम्। विष्णुम्। एषाम्। सरस्वती। मरुतः। मादयन्ताम्॥ ५॥

हे vअग्ने त्वं vदिवः द्युलोकात् सकाशात् vगिरः गरणीयान् स्तुत्यान् देवानस्मदीयं यज्ञं प्रति vआ vवह आह्वानं कुरु। vपृथिव्याः अन्तरिक्षाच्च vआ वह। कान् देवानिति तदुच्यते। vमित्रम् एतत्संज्ञकं vवरुणं च vइन्द्रं च देवेषु देवतास्वरूपेणावस्थितं च vअग्निम् vअर्यमणम् एतत्संज्ञकम् vअदितिम् अदीनां पृथिवीं[3] च vविष्णुं च। एवंभूतान् देवान् vएषाम् अस्माकं यजमानानामर्थाय vआ वह। vसरस्वती वाग्देवता च vमरुतः च vमादयन्ताम्। अस्मदीयैः स्तोत्रैर्हविर्भिश्च माद्यन्तु॥

ररे हव्यं मतिभिर्यज्ञियानां नक्षत्कामं मर्त्यानामसिन्वन्।
धाता रयिमविदस्यं सदासां सक्षीमहि युज्येभिर्नु देवैः॥ ६॥

ररे। हव्यम्। मतिऽभिः। यज्ञियानाम्। नक्षत्। कामम्। मर्त्यानाम्। असिन्वन्।
धाता। रयिम्। अविऽदस्यम्। सदाऽसाम्। सक्षीमहि। युज्येभिः। नु। देवैः॥ ६॥

vयज्ञियानाम्। चतुर्थ्यर्थे षष्ठी। यज्ञार्हेभ्यो देवेभ्यः vमतिभिः अस्मदीयाभिः स्तुतिभिः सह vहव्यं हविः vररे अस्माभिर्दीयते। vमर्त्यानां मनुष्याणामस्माकं vकामम् अभिलाषम् vअसिन्वन् अप्रतिबध्नन्नग्निः vनक्षत् अस्मदीयं यज्ञं व्याप्नोतु[4]। हे देवा यूयम् vअविदस्यम् अनुपक्षपणीयं

---

१. ज्ञ–गंतुमिच्छतो। २. ज्ञ-त१-२-४–'ते' नास्ति। ३. त-मु–पृथ्वीं। ४ न–व्याप्नोति।

vसदासां सर्वदा संभजनीयं vरयिं धनं vधात अस्मभ्यं दत्त । vनु अद्य वयं vयुज्येभिः सहायभूतैरिह यज्ञे समागतैः vदेवैः vसक्षीमहि । यद्वा । ज्वित्युपमार्थे । युज्येभिर्नु बन्धुभिरिव देवैः सक्षीमहि[1] ॥

नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्के यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

नु । रोदसी इति । अभिस्तुते इत्यभिऽस्तुते । वसिष्ठैः । ऋतऽवानः । वरुणः । मित्रः । अग्निः । यच्छन्तु । चन्द्राः । उपऽमम् । नः । अर्कम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥७॥

vनु अद्य vरोदसी द्यावापृथिव्यौ vवसिष्ठैः अस्माभिः । पूजार्थं बहुवचनम् । vअभिष्टुते अभितः सर्वतः स्तुते अभूताम् । तथा vऋतावानः अस्माभिः क्रियमाणैर्यज्ञैरुपेताः vवरुणः vमित्रः vअग्निः च एवंभूता देवा अस्माभिरभिष्टुता आसन् । vचन्द्राः आह्लादकाः सर्वे देवाः vनः अस्मभ्यम् vउपमम् उपमानभूतमुत्कृष्टम् vअर्कम् अन्नं vयच्छन्तु ददतु । अस्मिन् सूक्ते प्रतिपादिता ये देवास्ते सर्वे vयूयं vनः अस्मान् vस्वस्तिभिः अविनाशैः vसदा सर्वदा vपात पालयत ॥ ॥ ६ ॥

'ओ श्रुष्टिः' इति सप्तर्चं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवम् । 'ओ श्रुष्टिः' इत्यनुक्रान्तम् । विनियोगो लैङ्गिकः ॥

ओ श्रुष्टिर्विदथ्या३ समेतु प्रति स्तोमं दधीमहि तुराणाम् ।
यदद्य देवः सविता सुवाति स्यामास्य रत्निनो विभागे ॥ १ ॥

ओ इति । श्रुष्टिः । विदथ्या । सम् । एतु । प्रति । स्तोमम् । दधीमहि । तुराणाम् । यत् । अद्य । देवः । सविता । सुवाति । स्याम । अस्य । रत्निनः । विऽभागे ॥ १ ॥

हे देवाः vविदथ्या विदथेन त्वदीयेन चित्तेन संपाद्या vश्रुष्टिः सुखमस्मान् vओ आ vसमेतु आगच्छतु । अथवा श्रुष्टिर्वेगवती विदथ्या विदथे यज्ञे क्रियमाणास्मदीया स्तुतिर्युष्मानागच्छतु । वयं vतुराणां वेगवतां देवानां vस्तोमं स्तोत्रं vप्रति vदधीमहि कुर्वीमहि । vअद्य इदानीं vसविता vदेवः vयत् धनं vसुवाति अस्मभ्यं प्रेरयेत् vरत्निनः रमणीयधनवतः vअस्य सवितुस्तस्य धनस्य vविभागे दाने vस्याम वयं भवेम ॥

मित्रस्तन्नो वरुणो रोदसी च द्युभक्तमिन्द्रो अर्यमा ददातु ।
दिदेष्टु देव्यदितिी रेक्णो वायुश्च यन्नियुवैते भगश्च ॥ २ ॥

मित्रः । तत् । नः । वरुणः । रोदसी इति । च । द्युऽभक्तम् । इन्द्रः । अर्यमा । ददातु । दिदेष्टु । देवी । अदितिः । रेक्णः । वायुः । च । यत् । नियुवैते इति निऽयुवैते । भगः । च ॥२॥

vमित्रः देवः vनः अस्मभ्यं vतत् प्रसिद्धं धनं vददातु प्रयच्छतु । तथा vवरुणः ददातु । vरोदसी vच द्यावापृथिव्यौ च दत्ताम् । तथा vइन्द्रः vद्युभक्तं द्युभिर्द्योतमानैः स्तोतृभिः सेवितं तद्धनं ददातु । vअर्यमा च ददातु । तथा vअदितिः vदेवी vरेक्णः धनं vदिदेष्टु तद्धनमस्मभ्यं दिशतु । vवायुश्च vभगश्च उभौ देवौ vयत् धनं vनियुवैते अस्मान्नितरां योजयेतां तद्धनमिति पूर्वेण संबन्धः ॥

---

१. श–सक्षीमहि संगता भवेम ।

सेदुग्रो अस्तु मरुतः स शुष्मी यं मर्त्यं पृषदश्वा अवाथ ।
उतेमग्निः सरस्वती जुनन्ति न तस्य रायः पर्येतास्ति ॥ ३ ॥

सः । इत् । उग्रः । अस्तु । मरुतः । सः । शुष्मी । यम् । मर्त्यम् । पृषत्ऽअश्वाः । अवाथ ।
उत । ईम् । अग्निः । सरस्वती । जुनन्ति । न । तस्य । रायः । परिऽएता । अस्ति ॥ ३ ॥

हे ᵛपृषदश्वाः । पृषच्छब्देन केचिन्मृगविशेषा उच्यन्ते । त एवाश्वा वाहा येषां ते । एवंभूता हे ᵛमरुतः रुद्रपुत्रा देवा यूयं ᵛमर्त्यं मरणधर्माणं ᵛयं यजमानम् ᵛअवाथ पालयेत[1] ᵛसेत् स एव यजमानः ᵛउग्रः ᵛअस्तु ओजस्वी भवतु । तथा ᵛसः ᵛशुष्मी बलवान् भवतु । तथा[2] ᵛउत अपि च ᵛअग्निः अङ्गनादिगुणयुक्तो देवः ᵛसरस्वती वाग्देवता चेत्याद्याः सर्वे देवाः ᵛईम् एनं यजमानं ᵛजुनन्ति प्रवर्तयन्ति । ᵛतस्य यजमानस्य संबन्धिनः ᵛरायः धनस्य कश्चिदपि ᵛपर्येता परिगन्ता ᵛन ᵛअस्ति नाशको न भवतीत्यर्थः ॥

अयं हि नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः ।
सुहवा देव्यदितिरनर्वा ते नो अंहो अति पर्षन्नरिष्टान् ॥ ४ ॥

अयम् । हि । नेता । वरुणः । ऋतस्य । मित्रः । राजानः । अर्यमा । अपः । धुरिति धुः ।
सुऽहवा । देवी । अदितिः । अनर्वा । ते । नः । अंहः । अति । पर्षन् । अरिष्टान् ॥ ४ ॥

ᵛऋतस्य यज्ञस्य सत्यस्य वा ᵛनेता प्रापयिता ᵛअयं ᵛहि अयं खलु ᵛवरुणः च ᵛमित्रः च ᵛअर्यमा चैते ᵛराजानः समर्था देवाः ᵛअपः अस्मदीयं यज्ञादिलक्षणं कर्म ᵛधुः अधुः दधति । ᵛअनर्वा केनाप्यप्रतिगता ᵛदेवी द्योतमाना ᵛअदितिः अदीना देवमाता ᵛसुहवा शोभनाह्वाना भवति । ᵛते वरुणादयो देवाः ᵛअरिष्टान् अबाधितान् सतः ᵛनः अस्मान् ᵛअंहः दुरितम् ᵛअति ᵛपर्षन् अतिपारयन्तु ॥

अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः ।
विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ॥ ५ ॥

अस्य । देवस्य । मीळ्हुषः । वयाः । विष्णोः । एषस्य । प्रऽभृथे । हविःऽभिः ।
विदे । हि । रुद्रः । रुद्रियम् । महिऽत्वम् । यासिष्टम् । वर्तिः । अश्विनौ । इरावत् ॥ ५ ॥

ᵛप्रभृथे ᵛहविर्भिः हवीरूपैरन्नैः ᵛएषस्य प्रापणीयस्य ᵛमीळ्हुषः कामानां सेक्तुः ᵛविष्णोः सर्वदेवात्मकस्य ᵛअस्य ᵛदेवस्य । 'विष्णुः सर्वा देवताः' (ऐ. ब्रा. १. १) इति श्रुतेः । अन्ये देवाः ᵛवयाः शाखा इव भवन्ति । ᵛरुद्रः देवः ᵛरुद्रियं रुद्रसंबन्धि सुखं ᵛमहित्वं महत्त्वं च ᵛविदे ᵛहि अस्मान् प्रापयति खलु । अपि च हे ᵛअश्विनौ देवौ युवाम् ᵛइरावत् हविर्लक्षणान्नयुक्तं ᵛवर्तिः अस्मदीयं गृहं ᵛयासिष्टम् अयासिष्टमागच्छतम् ॥

मात्रे पूषन्नाघृणे इरस्यो वरूत्री यद्वातिषाचश्च रासन् ।
मयोभुवो नो अर्वन्तो नि पान्तु वृष्टिं परिज्मा वातो ददातु ॥ ६ ॥

---

१. इ–पालयथ । २. इ–'तथा' नास्ति ।

मा । अत्र । पूषन् । आघृणे । इरस्यः । वरूत्री । यत् । रातिऽसाचः । च । रासन् ।
मयःऽभुवः । नः । अर्वन्तः । नि । पान्तु । वृष्टिम् । परिऽज्मा । वातः । ददातु ॥ ६ ॥

हे ᵛआघृणे प्राप्तदीप्ते एवंभूत हे ᵛपूषन् देव ᵛअत्र अस्मिन् दाने ᵛमा ᵛइरस्यः चिकीर्षा मा कृथाः । ᵛवरूत्री सर्वैर्वरणीया सरस्वती ᵛरातिषाचश्च । रातिर्दानम् । तस्य संभक्त्र्यो देवपत्न्यश्च ᵛयत् धनं ᵛरासन् अस्मभ्यं प्रयच्छेयुः । अत्र मा कृथा इति पूर्वेण संबन्धः । किंच ᵛमयोभुवः सुखस्य भावकाः ᵛअर्वन्तः गच्छन्तो देवाः[1] ᵛनः अस्मान् ᵛनि ᵛपान्तु नितरां पालयन्तु । ᵛपरिज्मा परितो गन्ता ᵛवातः वायुः ᵛवृष्टिं वृष्टिलक्षणमुदकं ᵛददातु प्रयच्छत्वस्मभ्यम् ॥

नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

नु । रोदसी इति । अभिस्तुते इत्यभिऽस्तुते । वसिष्ठैः । ऋतऽवानः । वरुणः । मित्रः । अग्निः ।
यच्छन्तु । चन्द्राः । उपऽमम् । नः । अर्कम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

पूर्वं व्याख्यातेयम् । अक्षरार्थस्तु । द्यावापृथिव्यौ वरुणादयो देवाश्च वसिष्ठैरस्माभिरभिष्टुता भवन्ति । एवंभूता आह्लादका देवाः सर्वोत्कृष्टमन्नमस्मभ्यं ददतु । अस्मिन् सूक्ते प्रतिपादिताः सर्वे देवा यूयं कल्याणैरस्मान् सर्वदा पालयत ॥ ॥ ७ ॥

'प्रातरग्निम्' इति सप्तर्चमष्टमं सूक्तम् । अत्रानुक्रमणिका—'प्रातर्भागं जगत्याद्या लिङ्गोक्तदेवतान्त्योष्णस्या' इति । वसिष्ठ ऋषिः । आद्या जगती शिष्टाश्चिष्टुभः । आद्याग्नीन्द्रादिदेवत्या द्वितीयाद्याः पञ्च भगदेवत्याः सप्तम्युषोदेवत्या । अत्र केचिदाहुः 'निवेष्टुकामो रोगार्तो भगसूक्तं जपेत्सदा । निवेशं विशति क्षिप्रं रोगैश्च परिमुच्यते' (ऋग्वि. २. २५) इति ॥

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ॥ १ ॥

प्रातः । अग्निम् । प्रातः । इन्द्रम् । हवामहे । प्रातः । मित्रावरुणा । प्रातः । अश्विना ।
प्रातः । भगम् । पूषणम् । ब्रह्मणः । पतिम् । प्रातरिति । सोमम् । उत । रुद्रम् । हुवेम ॥ १ ॥

ᵛप्रातः उषःकाले ᵛअग्निं देवं ᵛहवामहे वयं स्तोतार आह्वयामः । तथा प्रातःकाले ᵛइन्द्रं हवामहे । तथा ᵛमित्रावरुणा मित्रावरुणावहोरात्राभिमानिनौ देवौ ᵛप्रातः वयं हवामहे । तथाश्विनौ देवानां भिषजौ ᵛप्रातः वयं हवामहे । तथा ᵛप्रातः ᵛभगं देवं ᵛपूषणं देवं ᵛब्रह्मणस्पतिं मन्त्राभिमानिनमेतत्संज्ञकं चाह्वयामः । तथा ᵛप्रातः ᵛसोमम् एतत्संज्ञकं देवम् ᵛउत अपि च ᵛरुद्रं देवं च ᵛहुवेम आह्वयामः ॥

प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ २ ॥

---

१. ख-घ-त-न-भ-श–'देवाः' नास्ति ।

प्रातःऽजितम्। भगम्। उग्रम्। हुवेम। वयम्। पुत्रम्। अदितेः। यः। विऽधर्ता।
आध्रः। चित्। यम्। मन्यमानः। तुरः। चित्।
राजा। चित्। यम्। भगम्। भक्षि। इति। आह ॥ २ ॥

यः भगो देवः विधर्ता विश्वस्य जगतो धारकः जितं जयशीलम् उग्रम् उद्गूर्णम् अदितेः पुत्रं भगं देवं प्रातःकाल एव वयं हुवेम आह्वयामः। आध्रश्चित् दरिद्रोऽपि स्तोता यं भगं देवं मन्यमानः स्तुवन् भगं भजनीयं धनं भक्षि[1] भज विभज मह्यं देहि[1] इति आह ब्रवीति। तुरश्चित्। तुरतिर्गतिकर्मा। प्राप्तधनोऽपि राजा चित् समर्थोऽपि जनः यं भगं देवं भजनीयं धनं मह्यं भक्षि देहीत्याह। तं भगं प्रातरेव वयं हुवेमेति संबन्धः ॥

भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः।
भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥ ३ ॥

भग। प्रनेतरिति प्रऽनेतः। भग। सत्यऽराधः। भग। इमाम्। धियम्। उत्। अव। ददत्। नः।
भग। प्र। नः। जनय। गोभिः। अश्वैः। भग। प्र। नृऽभिः। नृऽवन्तः। स्याम ॥ ३ ॥

हे भग देव त्वं प्रणेता प्रकर्षेण नेतासि। तादृश प्रणेतः हे भग त्वं सत्यराधः सत्यधनोऽसि। तादृश सत्यराधो हे भग त्वं नः अस्मभ्यं ददत् कामान् प्रयच्छन् इमाम् अस्मदीयां धियं स्तुतिम् उदव उद्रक्ष फलयुक्तां कुरु। हे भग त्वं गोभिरश्वैः च नः अस्मान् प्र जनय प्रोद्भूतान् कुरु। हे भग त्वत्प्रसादाद्वयं नृभिः नेतृभिः पुत्रादिभिः नृवन्तः मनुष्यवन्तः प्र स्याम प्रभवेम ॥

उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम्।
उतोदिता मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम ॥ ४ ॥

उत। इदानीम्। भगऽवन्तः। स्याम। उत। प्रऽपित्वे। उत। मध्ये। अह्नाम्।
उत। उत्ऽइता। मघऽवन्। सूर्यस्य। वयम्। देवानाम्। सुऽमतौ। स्याम ॥ ४ ॥

उत अपि च इदानीं वयं भगवन्तः स्याम। हे भग भगेन त्वया स्वामिना युक्ता भवेम। यद्वा। भगवन्तो धनवन्तः स्याम। उत अपि च प्रपित्वे अह्नां प्राप्ते पूर्वाह्णे भगवन्तः स्याम। उत अपि च अह्नां दिवसानां मध्ये मध्याह्ने भगवन्तः स्याम। उत अपि च हे मघवन् धनवन् भग देव सूर्यस्य सर्वस्य प्रेरकस्य देवस्य उदिता उदितौ उदये सति वयं त्वदनुग्रहात् देवानाम् इन्द्रादीनां सुमतौ अनुग्रहबुद्धौ स्याम भवेम ॥

भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम।
तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह ॥ ५ ॥

भगः। एव। भगऽवान्। अस्तु। देवाः। तेन। वयम्। भगऽवन्तः। स्याम।
तम्। त्वा। भग। सर्वः। इत्। जोहवीति। सः। नः। भग। पुरःऽएता। भव। इह ॥५॥

---

१. ख-भक्षि भज मह्यं देहि; श-मह्यं भक्षि देहि।

हे vदेवाः vभगः देवः vएव vभगवान् धनवान् vअस्तु । vतेन भगेन देवेन धनेन वा vवयं vभगवन्तः vस्याम धनवन्तो भवेम । हे vभग vतं प्रसिद्धं vत्वा त्वां vसर्व vइत् सर्व एव जनः vजोहवीति भृशं पुनःपुनर्वाह्वयति । हे vभग देव vसः त्वम् vइह अस्मिन् यज्ञे vनः अस्माकं vपुरएता पुरोगन्ता vभव ॥

सम॑ध्व॒रायो॒षसो॑ नमन्त दधि॒क्रावे॑व॒ शुच॑ये प॒दाय॑ ।
अ॒र्वा॒ची॒नं व॑सु॒विदं॒ भगं॑ नो॒ रथ॑मि॒वाश्वा॑ वा॒जिन॒ आ व॑हन्तु ॥ ६ ॥

सम् । अ॒ध्व॒राय॑ । उ॒षसः॑ । न॒मन्त॒ । दधि॒क्रावा॑ऽइव । शुच॑ये । प॒दाय॑ ।
अ॒र्वा॒ची॒नम् । व॒सु॒ऽविद॑म् । भग॑म् । नः॒ । रथ॑म्ऽइव । अश्वाः॑ । वा॒जिनः॑ । आ । व॒ह॒न्तु॒ ॥६॥

vशुचये शुद्धाय गमनयोग्याय vपदाय स्थानाय vदधिक्रावेव अश्वो[1] यथा[1] तथा vउषसः उषोदेवताः vअध्वराय अस्मदीयाय यागाय vसं vनमन्त संगच्छन्तु । vवाजिनः वेगवन्तः vअश्वाः vरथमिव रथं यथा तथोषसः vअर्वाचीनम् अस्मदभिमुखं vवसुविदं धनस्य प्रापकं vभगं देवं vनः अस्मान् प्रति vआ vवहन्तु आनयन्तु ॥

अश्वा॑वती॒र्गोम॑तीर्न उ॒षासो॑ वी॒रव॑तीः सद॒मुच्छ॑न्तु भ॒द्राः ।
घृतं॑ दुहा॒ना वि॒श्वतः॒ प्रपी॑ता॒ यूय�ं पात स्व॒स्तिभि॒ः सदा॑ नः ॥ ७ ॥

अश्व॑ऽवतीः । गोऽम॑तीः । नः॒ । उ॒षसः॑ । वी॒रऽव॑तीः । सद॑म् । उ॒च्छ॒न्तु॒ । भ॒द्राः ।
घृत॑म् । दु॒हा॒नाः॒ । वि॒श्वतः॑ । प्रऽपी॑ताः । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥७॥

vभद्राः भजनीयाः vउषसः उषोदेवताः vअश्वावतीः अश्ववत्योऽश्वसहिताः सत्यः vगोमतीः गोमत्यश्च vवीरवतीः वीरवत्यः पुत्रादिजनोपेताश्च भवन्त्यः vनः अस्मभ्यं vसदं सर्वदा vउच्छन्तु व्युच्छन्तु नैशं तमो विवासयन्तु । कीदृश्यः । vघृतम् उदकं vदुहानाः सिञ्चन्त्यः vविश्वतः सर्वैर्गुणैः vप्रपीताः प्रवृद्धाः । एवंभूता उषसस्तम उच्छन्तु । अस्मिन् सूक्ते प्रतिपादिता हे सर्वे देवाः vयूयं vनः अस्मान् vसदा सर्वदा vस्वस्तिभिः कल्याणैः vपात पालयत ॥ ॥ ८ ॥

'प्र ब्रह्माणः' इति षड्चं नवमं सूक्तं वसिष्ठस्यार्षं त्रैदुभं वैश्वदेवम् । अत्रानुक्रान्तं—'प्र ब्रह्माणः षड्वैश्वदेवं तु' इति । सूक्तविनियोगो लैङ्गिकः । तृतीये छन्दोमे प्रउगशस्त्रे 'प्र ब्रह्माणः' इति वैश्वदेवस्तृचः । सूत्रितं च—'प्र ब्रह्माणो अङ्गिरसो नक्षन्त सरस्वतीं देवयन्तो हवन्ते' (आश्व. श्रौ. ८. ११) इति ॥

प्र ब्रह्मा॑णो अङ्गिरसो नक्षन्त॒ प्र क्रन्द॑नुर्नभ॒न्यस्य वेतु ।
प्र धे॒नव॑ उद॒प्रुतो॑ नवन्त यु॒ज्यातामद्री॑ अध्व॒रस्य॒ पेशः॑ ॥ १ ॥

प्र । ब्रह्मा॑णः । अङ्गिरसः । नक्षन्त । प्र । क्रन्द॑नुः । न॒भ॒न्यस्य॑ । वेतु॒ ।
प्र । धे॒नवः॑ । उ॒द॒ऽप्रुतः॑ । नव॑न्त । यु॒ज्याता॑म् । अद्री॒ इति॑ । अ॒ध्व॒रस्य॑ । पेशः॑ ॥ १ ॥

vब्रह्माणः vअङ्गिरसः एतन्नामका ऋषयः vप्र vनक्षन्त सर्वत्र व्याप्नुवन्तु । vक्रन्दनुः पर्जन्यः vनभन्यस्य स्तोत्रस्यास्मदीयं स्तोत्रं vप्र vवेतु प्रकर्षेणेच्छतु । vधेनवः प्रीणयित्र्यो नद्यः vउदप्रुतः

---

१. त—यथा अश्वः ।

उदकानि सिञ्चन्त्यः vप्र vनयन्त सर्पन्तु[1]। vअद्री आद्रियन्तौ पत्नीयजमानौ vअध्वरस्य यज्ञस्य vपेशः रूपं vयुज्यातां योजयेताम् ॥

सुगस्ते अग्ने सनवित्तो अध्वा युक्ष्वा सुते हरितो रोहितश्च।
ये वा सन्नन्नरुषा वीरवाहो हुवे देवानां जनिमानि सत्तः ॥ २ ॥

सुऽगः। ते। अग्ने। सनऽवित्तः। अध्वा। युक्ष्व। सुते। हरितः। रोहितः। च।
ये। वा। सन्न्। अरुषाः। वीरऽवाहः। हुवे। देवानाम्। जनिमानि। सत्तः ॥ २ ॥

हे vअग्ने vसनवित्तः सनाधिरकालादारभ्य लब्धः vते त्वदीयः vअध्वा मार्गः vसुगः सुष्ठु गन्तव्यो भवतु। किंच vहरितः श्यामवर्णाः vरोहितश्च लोहितवर्णाश्चेत्युभयविधाः vये vवा ये च ते त्वदीया अश्वाः vसन्नन् सन्नद्धे यज्ञगृहे vवीरवाहः वीरं शूरं त्वां वहन्तः vअरुषाः आरोचमाना भवन्ति तांश्च[2] त्वं सु[2] vयुक्ष्व त्वदीये रथे सुष्ठु संयोजय। निसत्तो यज्ञगृहे निषण्णोऽहं होता सन् vदेवानाम् इन्द्रादीनां जनिमा[3] जनान् संघान् vहुवे आह्वयामि ॥

समु वो यज्ञं महयन्नमोभिः प्र होता मन्द्रो रिरिचे उपाके।
यजस्व सु पुरुवणीक देवाना यज्ञियाममरमतिं ववृत्याः ॥ ३ ॥

सम्। ऊँ इति। वः। यज्ञम्। महयन्। नमःऽभिः। प्र। होता। मन्द्रः। रिरिचे। उपाके।
यजस्व। सु। पुरुऽअनीक। देवान्। आ। यज्ञियाम्। अरमतिम्। ववृत्याः ॥ ३ ॥

हे देवाः vवः युष्माकं vयज्ञं vनमोभिः नमस्कारैर्युक्ता इमे स्तोतारो वा यजमाना वा vसं vमहयन् सम्यक् पूजयन्ति। vउ इति पूरकः। vमन्द्रः स्तुतिशीलः vउपाके अस्माकं समीपे स्थितोऽस्मदीयः vहोता vप्र vरिरिचे अन्येभ्यो होतृभ्योऽतिरिच्यते। हे यजमान त्वं vदेवान् vसु सुष्ठु vयजस्व। हे vपुरुवणीक बहुतेजस्विन्नग्ने त्वं vयज्ञियां यज्ञार्हाम् vअरमतिं भूमिम् vआ vववृत्याः आवर्तय। तथा च निगमान्तरे—'आ नो महीमरमतिं सजोषाः' (ऋ. सं. ५. ४३. ६) इति ॥

यदा वीरस्य रेवतो दुरोणे स्योनशीरतिथिराचिकेतत्।
सुप्रीतो अग्निः सुधितो दम आ स विशे दाति वार्यमिर्यत्यै ॥ ४ ॥

यदा। वीरस्य। रेवतः। दुरोणे। स्योनऽशीः। अतिथिः। आऽचिकेतत्।
सुऽप्रीतः। अग्निः। सुऽधितः। दमे। आ। सः। विशे। दाति। वार्यम्। इर्यत्यै ॥ ४ ॥

vअतिथिः सर्वेषामतिथिभूतोऽग्निः vयदा vवीरस्य वीरकस्य स्तोत्राणां प्रेरयितुः vरेवतः हविष्मतो यजमानस्य vदुरोणे गृहे vस्योनशीः सुखेन शयनीयः vआचिकेतत् प्रज्ञायते vअग्निः vदमे यज्ञगृहे vसुधितः। आकारश्चार्थे। सुनिहितश्च सुष्ठु निहितः सन् यदा vसुप्रीतः भवति तदा vसः अग्निः vइर्यत्यै उपगच्छन्त्यै vविशे प्रजायै vवार्यं वरणीयं धनं vदाति ददाति प्रयच्छति ॥

---

१. ख–उपसर्पतु; ङ–न सर्पतु; त३–भ–तु सर्पतु; न–नु सर्पतु। २. ख–तां अश्वा युक्ष्व; घ–तान् सु; ङ–भ–तानश्वान् त्वं; ङ–त२-४–तांश्च त्वं; त१–तानश्वान्; त३–न– तां अश्वत्वं; श१– तेश्वाः त्वं; श२–तंश्च त्वं। ३. ख–ङ–त१-२–भ–जनिमानि।

इमं नो अग्ने अध्वरं जुषस्व मरुत्स्विन्द्रे यशसं कृधी नः ।
आ नक्तां बर्हिः सदतामुषासोशन्ता मित्रावरुणा यजेह ॥ ५ ॥

इमम् । नः । अग्ने । अध्वरम् । जुषस्व । मरुत्ऽसु । इन्द्रे । यशसम् । कृधि । नः ।
आ । नक्ता । बर्हिः । सदताम् । उषसा । उशन्ता । मित्रावरुणा । यज । इह ॥ ५ ॥

हे ᵛअग्ने त्वं ᵛनः अस्मदीयम् ᵛइमम् ᵛअध्वरं यज्ञं ᵛजुषस्व सेवस्व । किंच ᵛमरुत्सु इन्द्रस्य सखिभूतेषु देवेषु ᵛइन्द्रे च ᵛयशसं यशोयुक्तं हविर्लक्षणान्नवन्तं ᵛनः अस्मदीयं यज्ञं हे अग्ने त्वं ᵛकृधि कुरु । स्थापयेत्यर्थः । तथा ᵛनक्ता रात्रिश्च ᵛउषसा दिवसश्च । अहर्निशौ इत्यर्थः । ᵛबर्हिः बर्हिषि कुशमये ᵛआ ᵛसदताम् उपविशताम् । अपि च हे अग्ने ᵛउशन्ता उशन्तौ यज्ञमिच्छन्तौ ᵛमित्रावरुणा मित्रावरुणौ देवौ ᵛइह अस्मिन् यज्ञे ᵛयज पूजय ॥

एवाग्निं सहस्यं वसिष्ठो रायस्कामो विश्वप्स्न्यस्य स्तौत् ।
इषं रयिं पप्रथद्वाजमस्मे यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

एव । अग्निम् । सहस्यम् । वसिष्ठः । रायःऽकामः । विश्वऽप्स्न्यस्य । स्तौत् ।
इषम् । रयिम् । पप्रथत् । वाजम् । अस्मे इति । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥६॥

ᵛवसिष्ठः एतदाख्य ऋषिः ᵛरायस्कामः पश्वादिधनानीच्छन् ᵛएव एवमुक्तप्रकारेण ᵛसहस्यम् । सहो बलम् । तस्य पुत्रम् । तद्वन्तमिति वा । ᵛअग्निं देवं ᵛविश्वप्स्न्यस्य पुरुरूपस्य धनस्य लाभाय ᵛस्तौत् । एवंभूतोऽग्निः ᵛअस्मे अस्मभ्यम् ᵛइषम् अन्नं ᵛरयिं धनं ᵛवाजं बलं च ᵛपप्रथत् प्रथयतु विस्तारयतु । ददात्वित्यर्थः । अस्मिन् सूक्ते प्रतिपादिताः सर्वे देवाः यूयम् अस्मान् कल्याणैः सर्वदा पालयत ॥ ॥ ९ ॥

'प्र वो यज्ञेषु' इति पञ्चर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवम् । 'प्र वः पन्था' इत्यनुक्रान्तम् । सूक्तविनियोगो लैङ्गिकः । प्रथमे छन्दोमे प्रउगशस्त्रे 'प्र वो यज्ञेषु' इति वैश्वदेवस्तृचः । सूत्रितं च—'प्र वो यज्ञेषु देवयन्तो अर्चन् प्र क्षोदसा धायसा सस्र एषेति प्रउगम्' (आश्व. श्रौ. ८. ९) इति ॥

प्र वो यज्ञेषु देवयन्तो अर्चन्द्यावा नमोभिः पृथिवी इषध्यै ।
येषां ब्रह्माण्यसमानि विप्रा विष्वग्वियन्ति वनिनो न शाखाः ॥ १ ॥

प्र । वः । यज्ञेषु । देवऽयन्तः । अर्चन् । द्यावा । नमःऽभिः । पृथिवी इति । इषध्यै ।
येषाम् । ब्रह्माणि । असमानि । विप्राः । विष्वक् । विऽयन्ति । वनिनः । न । शाखाः ॥१॥

ᵛदेवयन्तः देवान् कामयमानाः विप्राः ᵛयज्ञेषु ᵛनमोभिः स्तुतिभिर्हविर्भिर्वा ᵛवः युष्मान् ᵛइषध्यै अभिप्राप्तुं ᵛप्र ᵛअर्चन् प्रार्चयन्ति प्रकर्षेण स्तुवन्ति । ᵛद्यावा दिवं च ᵛपृथिवी भूमिं च प्रस्तुवन्ति । ᵛयेषां विप्राणां मेधाविनां ᵛब्रह्माणि स्तोत्राणि ᵛवनिनो ᵛन ᵛशाखाः वृक्षस्य शाखा इव ᵛविष्वक् विश्वतः ᵛवियन्ति विशेषेण गच्छन्ति । ते ᵛविप्राः प्रार्चन्तीति पूर्वेण संबन्धः ॥

प्र यज्ञ एतु होतृवो न सप्तिरुधच्छध्वं समनसो घृताचीः ।
स्तृणीत बर्हिरध्वराय साधूर्ध्वा शोचींषि देवयून्यस्युः ॥ २ ॥

प्र। यज्ञः। एतु। होत्वः। न। सप्तिः। उत्। यच्छध्वम्। सऽमनसः। घृताचीः।
स्तृणीत। बर्हिः। अध्वराय। साधु। ऊर्ध्वा। शोचींषि। देवऽयूनि। अस्थुः॥ २॥

अयमस्मदीयः यज्ञः प्र एतु देवान् प्रति गच्छतु। तत्र दृष्टान्तः। होत्वो न सप्तिः शीघ्रगाम्यश्वो यथा तद्वत्। हे ऋत्विजः सर्वे यूयं समनसः सदृशमनस्काः सन्तः घृताचीः स्रुचः उद्यच्छध्वं हस्त उद्यम्य धारयत। तथा अध्वराय यागं कर्तुं साधु साधकं बर्हिः कुशमयं स्तृणीत वेद्यां छादयत। हे अग्ने देवयूनि देवान् कामयमानानि त्वदीयानि शोचींषि अर्चींषि ऊर्ध्वा ऊर्ध्वमुखानि अस्थुः तिष्ठन्तु॥

आ पुत्रासो न मातरं विभृत्राः सानौ देवासो बर्हिषः सदन्तु।
आ विश्वाचीं विदथ्यामनक्त्वग्ने मा नो देवताता मृधस्कः॥ ३॥

आ। पुत्रासः। न। मातरम्। विऽभृत्राः। सानौ। देवासः। बर्हिषः। सदन्तु।
आ। विश्वाचीं। विदथ्याम्। अनक्तु। अग्ने। मा। नः। देवऽताता। मृधः। करितं कः॥३॥

मातरं जननीं विभृत्राः विशेषेण भर्तव्याः पुत्रासो न पुत्रा इव तद्वदस्माकं भरणीयाः देवासः देवाः बर्हिषः कुशमयस्य वेद्यामास्तीर्णस्य सानौ उन्नते देशे आ सदन्तु उपविशन्तु। हे अग्ने विदथ्यां यज्ञयोग्यां त्वदीयां ज्वालां विश्वाची। विश्वं सर्वं हविरञ्चति गच्छतीति विश्वाची जुहूः। आ अनक्तु आ समन्तात् सिञ्चतु। देवताता देवतातौ युद्धे नः अस्माकं मृधः हिंसकान् हे अग्ने त्वं मा कः मा कार्षीः। यज्ञवाचको देवतातिशब्दोऽत्र संग्रामे वर्तते॥

ते सीषपन्त जोषमा यजत्रा ऋतस्य धाराः सुदुघा दुहानाः।
ज्येष्ठं वो अद्य महे आ वसूनामा गन्तन सदमनसो यतिष्ठ॥ ४॥

ते। सीषपन्त। जोषम्। आ। यजत्राः। ऋतस्य। धाराः। सुऽदुघाः। दुहानाः।
ज्येष्ठम्। वः। अद्य। महे। आ। वसूनाम्। आ। गन्तन। सऽमनसः। यतिष्ठ॥ ४॥

यजत्राः यजनीयाः ते इन्द्रादयो देवाः ऋतस्य उदकस्य सुदुघाः सुखेन दोग्धुं शक्याः धाराः दुहानाः वर्षन्तः जोषं पर्याप्तं यथा भवति तथा आ सीषपन्त। सपतिः परिचरणार्थः। स्तुतिभिः आ समन्तात् पर्यचीचरन्। अस्मान् परिचरणं कुर्वन्तु। स्वीकुर्वन्त्विति यावत्। अद्य[1] अस्मिन् दिने हे देवाः वसूनां धनानां मध्ये ज्येष्ठं श्रेष्ठं वः युष्मदीयं महः महनीयं धनम् आ गच्छतु। यूयमपि समनसः तुल्यमतयः सन्तः आ गन्तन आगच्छत। हे देवाः यूयं --- आगन्तनेति संबन्धः॥

एवा नो अग्ने विक्ष्वा दशस्य त्वया वयं सहसावन्नास्काः।
राया युजा सधमादो अरिष्टा यूयं पात स्वस्तिभिः सदा नः॥ ५॥

एव। नः। अग्ने। विक्षु। आ। दशस्य। त्वया। वयम्। सहसाऽवन्। आस्काः।
राया। युजा। सधऽमादः। अरिष्टाः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ५॥

---

१. ख-न-भ-तथा; घ-तथा अद्य; ग्र-त-श-अथ।

हे ᵛअग्ने ᵛएव एवं स्तुतस्त्वं ᵛविश्वु प्रजासु मध्ये ᵛनः अस्मभ्यम् ᵛआ ᵛदक्षस्य धनमभिप्रयच्छ। हे ᵛसहसावन् बलवन्नग्ने ᵛत्वया ᵛआस्काः अस्कन्नाः ᵛवयं ᵛयुजा मित्रयुक्तेन ᵛराया धनेन ᵛसधमादः सह माद्यन्तः ᵛअरिष्टाः अहिंसिता भवेम। अस्मिन् सूक्ते प्रतिपादिताः सर्वे देवाः ᵛयूयं ᵛनः अस्मान् कल्याणैः सर्वदा पालयत ॥ ॥ १० ॥

'दधिक्रां वः' इति पञ्चर्चमेकादशं सूक्तं वसिष्ठस्यार्षं दधिक्राख्यदेवताकम्। आद्या जगती सा तु दधिक्रादिलिङ्गोक्तदेवताका शिष्टाश्चतस्रस्त्रिष्टुभः। अनुक्रम्यते हि—'दधिक्रां दाधिक्रं जगत्याद्या लिङ्गोक्तदेवता' इति। गतो विनियोगः ॥

दधिक्रां वः प्रथममश्विनोषसमग्निं समिद्धं भगमूतये हुवे ।
इन्द्रं विष्णुं पूषणं ब्रह्मणस्पतिमादित्यान्द्यावापृथिवी अपः स्वः ॥ १ ॥

दधिऽक्राम्। वः। प्रथमम्। अश्विना। उषसम्। अग्निम्। सम्ऽइद्धम्। भगम्। ऊतये। हुवे।
इन्द्रम्। विष्णुम्। पूषणम्। ब्रह्मणः। पतिम्।
आदित्यान्। द्यावापृथिवी इति। अपः। स्वरिति स्वः ॥ १ ॥

हे स्तोतारः ᵛवः युष्माकम् ᵛऊतये रक्षणाय ᵛप्रथमं ᵛदधिक्राम् अश्वाभिमानिनीं देवतां ᵛहुवे आह्वयामि। ततः ᵛअश्विना अश्विनौ देवौ ᵛउषसम् उषोदेवतां च ᵛसमिद्धं सम्यग्दीप्तम् ᵛअग्निं च ᵛभगम् एतदाख्यं देवं च आह्वयामि। ᵛइन्द्रं ᵛविष्णुं ᵛपूषणं च ᵛब्रह्मणस्पतिमादित्यान् ᵛद्यावापृथिवी ᵛअपः उदकदेवताः[1] ᵛस्वः सूर्यमित्येतान् देवानाह्वयामि ॥

दधिक्रामु नमसा बोधयन्त उदीराणा यज्ञमुपप्रयन्तः ।
इळां देवीं बर्हिषि सादयन्तोऽश्विना विप्रा सुहवा हुवेम ॥ २ ॥

दधिऽक्राम्। ऊँ इति। नमसा। बोधयन्तः। उत्ऽईराणाः। यज्ञम्। उपऽप्रयन्तः।
इळाम्। देवीम्। बर्हिषि। सादयन्तः। अश्विना। विप्रा। सुऽहवा। हुवेम ॥ २ ॥

ᵛदधिक्राम् एतन्नामकमश्वविशेषं देवं ᵛनमसा स्तोत्रेण ᵛबोधयन्तः प्रज्ञापयन्तः ᵛउदीराणाः प्रेरयन्तः ᵛयज्ञं यागम् ᵛउपप्रयन्तः उपक्रममाणाः[2] वयं ᵛबर्हिषि ᵛइळां हवीरूपां[3] ᵛदेवीं ᵛसादयन्तः आस्थापयन्तः ᵛसुहवा शोभनाह्वानौ ᵛविप्रा विप्रौ मेधाविनौ ᵛअश्विना अश्विनौ देवौ ᵛहुवेम आह्वयाम। ᵛउ इति पूरणः ॥

दधिक्रावाणं बुबुधानो अग्निमुप ब्रुव उषसं सूर्यं गाम् ।
ब्रध्नं मँश्वतोर्वरुणस्य बभ्रुं ते विश्वास्मद्दुरिता यावयन्तु ॥ ३ ॥

दधिऽक्रावाणम्। बुबुधानः। अग्निम्। उप। ब्रुवे। उषसम्। सूर्यम्। गाम्।
ब्रध्नम्। मँश्वतोः। वरुणस्य। बभ्रुम्। ते। विश्वा। अस्मत्। दुःऽइता। यवयन्तु ॥ ३ ॥

---

१. ख-घ-ञ-त-न-भ-श—उदकं देवताः। २. ख-न-भ—उपद्रुममाणाः; ज्ञ-ञ-त१-४—उपक्रमणाः
३. श—देवीं भूरूपां।

vदधिक्रावाणम् अश्वविशेषं vबुबुधानः स्तोत्रेण बोधयन्नहम् vअग्निं देवम् vउप vस्तुवे उपस्तौमि । तथा च vउषसम् उषोदेवतां vसूर्यं सर्वस्य प्रेरकं देवं vगां भूमिम् । वाग्देवतां वा । पूर्वभूतान् देवानहमुपस्तौमि । vमंश्नुतोः । मन्यमानान् स्तुवतो जनांश्चेतयते जानातीति यद्वाभिमन्यमानांश्चातयते नाशयतीति मंश्नुतुः । तस्य vवरुणस्य vब्रह्मं महान्तं vबभ्रुं पिङ्गलवर्णमश्वं तस्यानयनार्थमहमुप स्तुवे । vते देवाः vअस्मत् अस्मत्तः vविश्वा विश्वानि सर्वाणि vदुरिता दुरितानि पापानि vयवयन्तु[1] पृथक्कुर्वन्तु ॥

दधिक्रावा प्रथमो वाज्यर्वाग्रे रथानां भवति प्रजानन् ।
संविदान उषसा सूर्येणादित्येभिर्वसुभिरङ्गिरोभिः ॥ ४ ॥

दधिऽक्रावा । प्रथमः । वाजी । अर्वा । अग्रे । रथानाम् । भवति । प्रऽजानन् ।
सम्ऽविदानः । उषसा । सूर्येण । आदित्येभिः । वसुऽभिः । अङ्गिरःऽभिः ॥ ४ ॥

vप्रथमः सर्वेषामश्वानां मुख्यः vवाजी शीघ्रगामी vअर्वा गमनशीलः vदधिक्रावा अश्वरूपो देवः vप्रजानन् रथसंयोजनीयांस्तांस्तानश्वानधिष्ठाय ज्ञातव्यानि सम्यग्जानन् vरथानाम् vअग्रे अग्रमुखः vभवति । कीदृशोऽश्वः । vउषसा उषोदेवतया vसूर्येण सर्वस्य प्रेरकेण देवेन vआदित्येभिः आदित्यैश्च vवसुभिः च vअङ्गिरोभिः देवैः सह स्तोतव्यैर्ऋषिभिश्च vसंविदानः सम्यग्जानन् । ऐकमत्यं[2] प्राप्त इत्यर्थः ॥

आ नो दधिक्राः पथ्यामनक्त्वृतस्य पन्थामन्वेतवा उ ।
शृणोतु नो दैव्यं शर्धो अग्निः शृण्वन्तु विश्वे महिषा अमूराः ॥ ५ ॥

आ । नः । दधिऽक्राः । पथ्याम् । अनक्तु । ऋतस्य । पन्थाम् । अनुऽएतवै । ऊँ इति ।
शृणोतु । नः । दैव्यम् । शर्धः । अग्निः । शृण्वन्तु । विश्वे । महिषाः । अमूराः ॥ ५ ॥

vदधिक्राः अश्वरूपो देवः vऋतस्य यज्ञस्य vपन्थां पन्थानं मार्गम् vअन्वेतवै अनुगन्तुं प्रवृत्तानां vनः अस्माकं vपथ्यां पदवीम् vआ vअनक्तु उदकेनासिञ्चतु । vउ इति पूरणः । vदैव्यं vशर्धः देवसंबन्धि बलमीदृग्रूपः vअग्निः vनः अस्मदीयं हवं vशृणोतु । vअमूराः अमूढाः vमहिषाः महान्तः vविश्वे सर्वे देवा अस्मदीयं हवं vशृण्वन्तु ॥ ॥ ११ ॥

'आ देवो यातु' इति चतुर्ऋचं द्वादशं सूक्तं वसिष्ठस्यार्षं सवितृदेवताकं त्रैष्टुभम् । 'आ देवश्चतुष्कं सावित्रम्' इत्यनुक्रान्तम् । व्यूळहे दशरात्रे चतुर्थेऽहनि वैश्वदेवशस्त्र इदं सावित्रमेवेविद्वानम् । सूत्र्यते हि—'चतुर्थेऽह्न्या देवो यातु---' (आश्व. श्रौ. ८. ८)।--' इत्येषा ऋगनुवाक्या । सूत्रितं च—'आ देवो यातु सविता सुरत्नः स घा नो देवः सविता सहावा' (आश्व. श्रौ. ३. ७) इति । अश्वमेधेऽनुसवनं तिस्रः सावित्र्य इष्टयः । तत्र द्वितीयस्यामिष्टौ शस्त्रेयम् । सूत्रितं च—'य इमा विश्वा जातान्या देवो यातु' (आश्व. श्रौ. १०. ६) इति ॥

आ देवो यातु सविता सुरत्नोऽन्तरिक्षप्रा वहमानो अश्वैः ।
हस्ते दधानो नर्या पुरूणि निवेशयंश्च प्रसुवंश्च भूम ॥ १ ॥

---

१. घ–यावयंतु । २. ख-ञ्च-त-न-श–एकमत्यं ।

आ । देवः । यातु । सविता । सुऽरत्नः । अन्तरिक्षऽप्राः । वहमानः । अश्वैः ।
हस्ते । दधानः । नर्या । पुरूणि । निऽवेशयन् । च । प्रऽसुवन् । च । भूम ॥ १ ॥

[v]सुरत्नः शोभनरत्नोपेतः [v]अन्तरिक्षप्राः स्वकीयेन तेजसान्तरिक्षस्य पूरयिता [v]अश्वैः स्वकीयै-
रंशुभिः [v]वहमानः उह्यमानः [v]सविता सर्वस्य प्रेरकः [v]देवः [v]आ [v]यातु आगच्छतु । कीदृशः । [v]नर्या
नर्याणि मनुष्यहितानि[1] [v]पुरूणि बहूनि धनानि [v]हस्ते पाणौ [v]दधानः दातुं धारयन् [v]भूम भूतानि
[v]निवेशयंश्च रात्रिषु स्वे[2] स्थाने[2] स्थापयंश्च [v]प्रसुवंश्च अहःसु प्रेरयंश्च । एवंभूतः सविता देव आ यातु ॥

उदस्य बाहू शिथिरा बृहन्ता हिरण्यया दिवो अन्ताँ अनष्टाम् ।
नूनं सो अस्य महिमा पनिष्ट सूरश्चिदस्मा अनु दादपस्याम् ॥ २ ॥

उत् । अस्य । बाहू इति । शिथिरा । बृहन्ता । हिरण्यया । दिवः । अन्तान् । अनष्टाम् ।
नुनम् । सः । अस्य । महिमा । पनिष्ट । सूरः । चित् । अस्मै । अनु । दात् । अपस्याम् ॥२॥

[v]शिथिरा शिथिलौ दानार्थं प्रसारितौ [v]बृहन्ता बृहन्तौ महान्तौ [v]हिरण्यया हिरण्ययौ सुवर्णमयौ
[v]अस्य सवितुः संबन्धिनौ [v]बाहू हस्तौ [v]दिवः अन्तरिक्षस्य [v]अन्तान् पर्यन्तान् [v]उत् [v]अनष्टाम् ऊर्ध्वौ
रन्तौ व्याप्नुवताम् । [v]नूनम् अद्य [v]अस्य ईदृग्भूतस्य सवितुः [v]सः तादृशः [v]महिमा महत्त्वं [v]पनिष्ट
रस्माभिः स्तूयते । [v]सूरश्चित् सूर्योऽपि [v]अस्मै सवित्रे [v]अपस्यां कर्मेच्छाम् [v]अनु [v]दात् अनुददातु ॥

सावित्रे पशौ पुरोडाशस्य हविषोः ' स घा नः ' इति द्वे अनुवाक्ये । सूत्रं पूर्वमुदाहृतम् ।
राश्वमेधिकीषु सावित्रेष्टिषु तृतीयस्यामिष्टावेव एव याज्यानुवाक्ये । सूत्रितं च–' स घा नो देवः
सविता सहावेति द्वे ' (आश्व. श्रौ. १०. ६) इति ॥

स घा नो देवः सविता सहावा साविष्द्वसुपतिर्वसूनि ।
विश्रयमाणो अमतिमुरूचीं मर्तभोजनमध रासते नः ॥ ३ ॥

सः । घ । नः । देवः । सविता । सहऽवा । आ । साविषत् । वसुऽपतिः । वसूनि ।
विऽश्रयमाणः । अमतिम् । उरूचीम् । मर्तऽभोजनम् । अध । रासते । नः ॥ ३ ॥

[v]सहावा । तेजोऽन्तराण्यभिभावुकं[3] तेजो यस्य सः । [v]वसुपतिः धनानां पालकः [v]सः [v]सविता
देवः [v]नः अस्मभ्यं [v]वसूनि धनानि [v]आ [v]साविषत् आ समन्तात् प्रेरयति । [v]घ इति पूरणः ।
स सविता देवः [v]उरूचीं विस्तीर्णगमनाम् [v]अमतिं रूपम् । दीप्तिमित्यर्थः । [v]विश्रयमाणः
नेवेवमाणः सन् [v]अध अधुना [v]नः अस्मभ्यं [v]मर्तभोजनं मनुष्याणां भोगयोग्यं धनं [v]रासते ददातु ॥

इमा गिरः सवितारं सुजिह्वं पूर्णगभस्तिमीळते सुपाणिम् ।
चित्रं वयो बृहदस्मे दधातु यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥

इमाः । गिरः । सवितारम् । सुऽजिह्वम् । पूर्णऽगभस्तिम् । ईळते । सुऽपाणिम् ।
चित्रम् । वयः । बृहत् । अस्मे इति । दधातु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥४॥

---

१. ख-न-भ–मनुष्याणां हितानि । २. ख-त–स्वस्थाने । ३. ख-भ–°न्तरस्याभिभावुकं ।

vइमाः ईडग्भूताः vगिरः। गृणन्ति स्तुवन्तीति गिरः स्तोत्र्यः प्रजाः। यद्वा। इमाः स्तुतिरूपा वाचः। vसुजिह्वं शोभनजिह्वम्। शोभनवाचमित्यर्थः। vपूर्णगर्भस्तं संपूर्णधनहस्तं vसवितारं देवम् vईळते स्तुवन्ति। स च सविता vचित्रं चायनीयं vबृहत् महत् vवयः अन्नम् vअस्मे अस्मासु vदधातु। यद्वा अस्मे अस्मभ्यं प्रयच्छतु। हे सवितृप्रमुखा देवाः vयूयं vनः अस्मान् vस्वस्तिभिः कल्याणैः vसदा सर्वदा vपात पालयत। ॥ १२ ॥

'इमा रुद्राय' इति चतुर्ऋचं त्रयोदशं सूक्तं वसिष्ठस्यार्षं रुद्रदेवताकम्। अन्त्या त्रिष्टुप् शिष्टा जगत्यः। तथा चानुक्रमणिका–'इमा रौद्रं त्रिष्टुबन्तम्' इति। शूलगवादिषु रौद्रयज्ञेष्वनेन सूक्तेनोदीची दिगुपस्थेया। सूत्र्यते हि–'इमा रुद्राय स्थिरधन्वन इति सर्वरुद्रयज्ञेषु दिशामुपस्थानम्' (आश्व. गृ. ४. ९. २१) इति॥

इमा रुद्रायं स्थिरधन्वनें गिरः क्षिप्रेषवे देवायं स्वधावें।
अषाळ्हायं सहमानाय वेधसें तिग्मायुधाय भरता शृणोतु नः ॥ १ ॥

इमाः। रुद्रायं। स्थिरऽधन्वने। गिरः। क्षिप्रऽइषवे। देवायं। स्वधाऽवें।
अषाळ्हाय। सहमानाय। वेधसें। तिग्मऽआयुधाय। भरत। शृणोतु। नः ॥ १ ॥

हे अस्मदीयाः स्तोतारः यूयम् vइमाः vगिरः स्तुतीः vरुद्राय एतन्नामकाय vदेवाय[1] vभरत धारयत। कीदृशाय। vस्थिरधन्वने दृढधनुष्काय vक्षिप्रेषवे शीघ्रगामिबाणाय vस्वधावे अन्नवते vअषाळ्हाय केनाप्यनभिभूताय vसहमानाय शत्रूणामभिभवित्रे vवेधसे विधात्रे vतिग्मायुधाय तीक्ष्णास्त्राय। एवंभूताय रुद्राय स्तुतीः भरत। स च रुद्रः vनः अस्मदीयाः स्तुतीः vशृणोतु॥

स हि क्षयेंण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेर्तति।
अवन्नवन्तीरुप नो दुरश्चरानमीवो रुद्र जासु नो भव ॥ २ ॥

सः। हि। क्षयेंण। क्षम्यस्य। जन्मनः। साम्ऽराज्येन। दिव्यस्य। चेर्तति।
अवन्। अवन्तीः। उप। नः। दुरः। चर। अनमीवः। रुद्र। जासु। नः। भव ॥ २ ॥

vस vहि स खलु रुद्रो देवः vक्षम्यस्य। क्षमायां पृथिव्यां भवः। तस्य vजन्मनः जनस्य vक्षयेण ऐश्वर्येण vचेतति प्रज्ञायते। vदिव्यस्य जनस्य च vसाम्राज्येन ऐश्वर्येण प्रज्ञायते। शेषः प्रत्यक्षकृतः। हे vरुद्र देव त्वं च vअवन्तीः त्वां स्तोत्रैस्तर्पयन्तीः vनः अस्मदीयाः प्रजाः vअवन् पालयन् vदुरः दुर्याणि अस्मदीयानि गृहाणि vउप vचर उपगच्छ। किंच त्वं vनः अस्मदीयासु प्रजासु vअनमीवः। अमीवा रोगः। तामकुर्वन् vभव॥

या तें दिद्युदवसृष्टा दिवस्परिं क्ष्मया चरति परि सा वृणक्तु नः।
सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः ॥ ३ ॥

या। ते। दिद्युत्। अवऽसृष्टा। दिवः। परि। क्ष्मया। चरति। परि। सा। वृणक्तु। नः।
सहस्रम्। ते। सुऽअपिवात। भेषजा। मा। नः। तोकेषु। तनयेषु। रिरिषः ॥ ३ ॥

---

१. ख-घ-त-न-भ-श–रुद्राय।

हे रुद्र vते वैद्युतात्मनस्तव संबन्धिनी vदिवस्परि अन्तरिक्षसकाशात्[1] vअवसृष्टा विमुक्ता । vदिद्युत् अशनिरूपा हेतिः vक्षमया क्षित्या क्षितौ वा vचरति वर्तते vसा दिद्युत् vनः अस्मान् रे vवृणक्तु परित्यजतु। अपि च हे vस्वपिवात vते तव vसहस्रं बहूनि vभेषजा भेषजानि यौषधानि सन्ति तान्यस्मभ्यं प्रयच्छेति शेषः। vनः अस्माकं vतोकेषु पुत्रेषु vतनयेषु च vमा रिषः हिंसां मा कृथाः ॥

मा नो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य ।
आ नो भज बर्हिषि जीवशंसे युयं पात स्वस्तिभिः सदा नः ॥ ४ ॥

। नः । वधीः । रुद्र । मा । परा । दाः । मा । ते । भूम । प्रऽसितौ । हीळितस्य ।
। नः । भज । बर्हिषि । जीवऽशंसे । युयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ४ ॥

हे vरुद्र त्वं vनः अस्मान् vमा vवधीः मा हिंसीः। तथा vमा vपरा vदाः मा च त्याक्षीः। च vहीळितस्य क्रुद्धस्य vते तव vप्रसितौ प्रकर्षेण बन्धने वयं च vमा vभूम। किंच vजीवशंसे राशंसनीये vबर्हिषि यज्ञे vनः अस्मान् vआ vभज भागिनः कुरु। हे रुद्रप्रमुखाः[2] देवाः vयूयं अस्मान् कल्याणैः[3] सर्वदा[4] पालयत ॥ ॥ १३ ॥

'आपो यं वः' इति चतुर्ऋचं चतुर्दशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमब्देवताकम्। 'आपो यम्' इत्यनुक्रान्तं च। गतो विनियोगः ॥

आपो यं वः प्रथमं देवयन्त इन्द्रपानमूर्मिमकृण्वतेळः ।
तं वो वयं शुचिमरिप्रमद्य घृतप्रुषं मधुमन्तं वनेम ॥ १ ॥

पः । यम् । वः । प्रथमम् । देवऽयन्तः । इन्द्रऽपानम् । ऊर्मिम् । अकृण्वत । इळः ।
। वः । वयम् । शुचिम् । अरिप्रम् । अद्य । घृतऽप्रुषम् । मधुऽमन्तम् । वनेम ॥ १ ॥

vदेवयन्तः देवानिच्छन्तोऽध्वर्यवः हे vआपः हे अब्देवताः vवः युष्माकं कार्यभूतम् vइन्द्रपानम् ण पातव्यम् vइळः इळायाः भूम्याः संभूतं vयम् vऊर्मिं सोमाख्यं[5] यं रसं vप्रथमं पुरा कृण्वत अभिषवणपवनादिभिः समस्कुर्वत vअद्य इदानीं vवयम् अपि vवः युष्मदीयं vतम् ं[5] vवनेम संभजेमहि। कीदृशम्। vशुचिं शुद्धम् vअरिप्रं पापरहितं vघृतप्रुषं वृष्टिलक्षणमुदकं वन्तं vमधुमन्तं मधुररसोपेतम्। एवंभूतं तं वनेमेति संबन्धः ॥

तमूर्मिमापो मधुमत्तमं वोऽपां नपादवत्वाशुहेमा ।
यस्मिन्निन्द्रो वसुभिर्मादयाते तमश्याम देवयन्तो वो अद्य ॥ २ ॥

। ऊर्मिम् । आपः । मधुमत्ऽतमम् । वः । अपाम् । नपात् । अवतु । आशुऽहेमा ।
स्मिन् । इन्द्रः । वसुऽभिः । मादयाते । तम् । अश्याम । देवऽयन्तः । वः । अद्य ॥ २ ॥

हे vआपः एतत्संज्ञका देवाः vवः युष्मदीयं vमधुमत्तमं रसवत्तमं vतमूर्मिं प्रसिद्धं सोमाख्यं म् vआशुहेमा शीघ्रगतिः vअपां vनपात् एतदाख्यो देवः vअवतु पालयतु। vइन्द्रः vयस्मिन्

१. ख-श-त-न-श–अंतरिक्षात् सकाशात्। २. ख-न-भ–रुद्रमुखाः। ३. ख-घ-श–स्वस्तिभिः ाणैः। ४. घ-श– सदा सर्वदा पात। ५. ख-त३-न-भ–'सोमाख्यं...तमूर्मिं' नास्ति।

ऊर्मौ ᵛवसुभिः वासकैर्देवैः सह ᵛमादयाते माद्येत् ᵛअद्य अस्मिन् दिने ᵛदेवयन्तः देवकामा वयं ᵛवः युष्मदीयं ᵛतम् ऊर्मिम् ᵛअश्याम प्राप्नुयाम ॥

शतपवित्राः स्वधया मदन्तीर्देवीर्देवानामपि यन्ति पाथः
ता इन्द्रस्य न मिनन्ति व्रतानि सिन्धुभ्यो हव्यं घृतवज्जुहोत ॥ ३ ॥

शतऽपवित्राः । स्वधया । मदन्तीः । देवीः । देवानाम् । अपि । यन्ति । पाथः ।
ताः । इन्द्रस्य । न । मिनन्ति । व्रतानि । सिन्धुऽभ्यः । हव्यम् । घृतऽवत् । जुहोत ॥३॥

ᵛशतपवित्राः शतं बहूनि पवित्राणि पावनानि रूपाणि यासां ताः ᵛस्वधया स्वकार्यभूतेनान्नेन ᵛमदन्तीः जनान् मादयन्त्यः ᵛदेवीः देव्यो द्योतमाना आपः ᵛदेवानाम् इन्द्रादीनां ᵛपाथः स्थानम् ᵛअपि ᵛयन्ति प्रविशन्ति । ᵛताः तादृश्य आपः ᵛइन्द्रस्य प्रीणनानि ᵛव्रतानि यज्ञादीनि कर्माणि ᵛन ᵛमिनन्ति न हिंसन्ति । उत्पादयन्तीत्यर्थः । हे अध्वर्यवः यूयं ᵛसिन्धुभ्यः ताभ्योऽद्भ्यः ᵛघृतवत् उपस्तरणाभिघारणलक्षणाज्ययुक्तं ᵛहव्यं पुरोडाशादिकं हविः ᵛजुहोत जुहुत ॥

याः सूर्यो रश्मिभिराततान याभ्य इन्द्रो अरदद्गातुमूर्मिम् ।
ते सिन्धवो वरिवो धातना नो यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥

याः । सूर्यः । रश्मिऽभिः । आऽततान । याभ्यः । इन्द्रः । अरदत् । गातुम् । ऊर्मिम् ।
ते । सिन्धवः । वरिवः । धातन । नः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ४ ॥

ᵛसूर्यः देवः ᵛयाः अपः ᵛरश्मिभिः स्वकीयैः किरणैः ᵛआततान विस्तारयति । सूर्यो हि रश्मिभिरुदकसारमादाय वर्षतीत्यर्थः । ᵛयाभ्यः अद्भ्यश्च ᵛऊर्मिम् । अर्तेरिदं रूपम् गमनयोग्यं ᵛगातुं मेघेभ्यो निर्गमनसाधनं मार्गम् ᵛइन्द्रः अपि ᵛअरदत् वज्रेण मेघांस्ताडयन् प्रयच्छति हे ᵛसिन्धवः आपः ᵛते यूयं ᵛनः अस्मभ्यं ᵛवरिवः धनं ᵛधातन धत्त प्रयच्छत । ते इति सिन्धुशब्देन समानाधिकरणत्वात् पुंल्लिङ्गत्वम् । हे अब्देवताः ᵛयूयं सर्वदा ᵛनः अस्मान् कल्याणैः पालयत ॥१४॥

'ऋभुक्षणः' इति चतुर्ऋचं पञ्चदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमृभुदेवताकम् । अन्त्याया विकल्पेन विश्वे देवा देवता । तथा चानुक्रान्तम्—'ऋभुक्षण आर्भवमन्त्या वैश्वदेवी वा' इति । दशमेऽहनि वैश्वदेवशस्त्र आर्भवनिविद्धानम् । सूत्र्यते हि—'ऋभुक्षण इत्यार्भवम्' (आश्व. श्रौ. ८. १२) इति ॥

ऋभुक्षणो वाजा मादयध्वमस्मे नरो मघवानः सुतस्य ।
आ वोऽर्वाचः क्रतवो न यातां विभ्यो रथं नर्यं वर्तयन्तु ॥ १ ॥

ऋभुक्षणः । वाजाः । मादयध्वम् । अस्मे इति । नरः । मघऽवानः । सुतस्य ।
आ । वः । अर्वाचः । क्रतवः । न । याताम् । विऽभ्वः । रथम् । नर्यम् । वर्तयन्तु ॥ १ ॥

ऋभुक्षेत्यृभूणां ज्येष्ठस्याख्या वाज इति तु कनिष्ठस्य । अत्र 'ऋभुक्षणो वाजाः' इति बहुवचनेन ऋभवस्त्रयो गृह्यन्ते । हे ᵛऋभुक्षणो ᵛवाजाः ᵛनरः नेतारः ᵛमघवानः धनवन्तः एवंभूता हे ऋभवः यूयम् ᵛअस्मे अस्मासु स्थितेन ᵛसुतस्य अभिषुतेन सोमेन ᵛमादयध्वं तृप्ता भवत । ᵛन इति

संप्रत्यर्थे । इदानीं ᵛयातां गच्छतां ᵛवः युष्मदीयाः ᵛऋतवः कर्मणां कर्तारः ᵛविभ्वः विभवः समर्थाः अश्वाः ᵛअर्वाचः अर्वाञ्चोऽस्मदभिमुखाः सन्तः ᵛनर्यं मनुष्यहितं ᵛरथं युष्मदीयम् ᵛआ ᵛवर्तयन्तु आगमयन्तु ॥

ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि ।
वाजो अस्माँ अवतु वाजसातावेन्द्रेण युजा तरुषेम वृत्रम् ॥ २ ॥

ऋभुः । ऋभुऽभिः । अभि । वः । स्याम । विऽभ्वः । विभुऽभिः । शवसा । शवांसि ।
वाजः । अस्मान् । अवतु । वाजऽसातौ । इन्द्रेण । युजा । तरुषेम । वृत्रम् ॥ २ ॥

हे ऋभवः ᵛऋभुभिः युष्माभिर्वयम् ᵛऋभुः । उरु भवन्तीत्यृभवः । सन्तः ᵛविभुभिः युष्माभिः ᵛविभ्वः विभवश्च सन्तः ᵛशवांसि शत्रूणां बलानि ᵛशवसा युष्मदीयेन बलेन ᵛअभि ᵛस्याम अभिभवेम । तथा ᵛवाजसातौ संग्रामे ᵛवाजः एतत्संज्ञक ऋभुः ᵛअस्मानवतु पालयतु । अपि च ᵛयुजा सहायभूतेन ᵛइन्द्रेण ᵛवृत्रं शत्रुं वयं ᵛतरुषेम हनाम । प्रायेणर्भवोऽपीन्द्रेण सह स्तूयन्त इति ॥

ते चिद्धि पूर्वीरभि सन्ति शासा विश्वाँ अर्य उपरताति वन्वन् ।
इन्द्रो विभ्वाँ ऋभुक्षा वाजो अर्यः शत्रोर्मिथत्या कृणवन्वि नृम्णम् ॥ ३ ॥

ते । चित् । हि । पूर्वीः । अभि । सन्ति । शासा । विश्वान् । अर्यः । उपरऽताति । वन्वन् ।
इन्द्रः । विऽभ्वा । ऋभुक्षाः । वाजः । अर्यः । शत्रोः । मिथत्या । कृणवन् । वि । नृम्णम् ॥३॥

ᵛते तादृशाः इन्द्रः ऋभवश्च ᵛपूर्वीः बह्वीरस्मच्छत्रुसेनाः ᵛशासा शासनेन स्वकीयया आज्ञया । यद्वा । विशस्यते हिंस्यतेऽनेनेति शासशब्द आयुधवाची । तेन ᵛअभि ᵛसन्ति अभिभवन्ति । ᵛचिद्धि इतीमौ पूरणौ । किंच ᵛउपरताति ॥ सप्तम्या लुक् ॥ उपरैः उपलैः पाषाणसदृशैरायुधैस्ताप्यते विस्तार्यत इत्युपरताति युद्धम् । तस्मिन् ᵛविश्वान् समस्तान् ᵛअर्यः अरीन्छत्रून् ᵛवन्वन् हिंसन्ति । ᵛविभ्वा ᵛऋभुक्षाः ᵛवाजः एतत्संज्ञका ऋभवश्च ᵛइन्द्रः च ᵛअर्यः शत्रूणामभिगन्तारः सन्तः ᵛशत्रोः संबन्धि ᵛनृम्णं बलं ᵛमिथत्या । मेथतेरिदं रूपम् । मिथतिर्हिंसा । तथा ᵛवि ᵛकृणवन् विकुर्वन्तु । विनाशयन्त्वित्यर्थः ॥

नू देवासो वरिवः कर्तना नो भूत नो विश्वेऽवसे सजोषाः ।
समस्मे इषं वसवो ददीरन्यूयं पात स्वस्तिभिः सदा नः ॥ ४ ॥

नु । देवासः । वरिवः । कर्तन । नः । भूत । नः । विश्वे । अवसे । सऽजोषाः ।
सम् । अस्मे इति । इषम् । वसवः । ददीरन् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥४॥

हे ᵛदेवासः देवाः द्योतमाना ऋभवः यूयं ᵛनु अद्य ᵛनः अस्मभ्यं ᵛवरिवः धनं ᵛकर्तन कुरुत प्रयच्छत । तथा ᵛविश्वे सर्वे ऋभवो यूयं ᵛसजोषाः सह प्रीयमाणाः सन्तः ᵛनः अस्माकम् ᵛअवसे रक्षणाय ᵛभूत भवत । अपि च ᵛवसवः प्रशस्या ऋभवः ᵛइषम् अन्नम् ᵛअस्मे अस्मभ्यं ᵛसं ᵛददीरन् संप्रयच्छेयुः । हे ऋभवः यूयम् अस्मान् सर्वदा कल्याणैः रक्षत ॥ ॥ १५ ॥

'समुद्रज्येष्ठाः' इति चतुर्ऋचं षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमप्देवताकम्। तथा चानुक्रान्तं—'समुद्रज्येष्ठा आपम्' इति। गतो विनियोगः॥

समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यन्त्यनिविशमानाः।
इन्द्रो या वज्री वृषभो ररादु ता आपो देवीरिह मामवन्तु ॥ १ ॥

समुद्रऽज्येष्ठाः। सलिलस्य। मध्यात्। पुनानाः। यन्ति। अनिऽविशमानाः।
इन्द्रः। याः। वज्री। वृषभः। ररादे। ताः। आपः। देवीः। इह। माम्। अवन्तु ॥१॥

Vसमुद्रज्येष्ठाः। समुद्रोऽर्णवो ज्येष्ठः प्रशस्यतमो यासामपां ताः। Vसलिलस्य। अन्तरिक्षनामैतत्। अन्तरिक्षस्य Vमध्यात् माध्यमिकात्[1] स्थानात्[1] Vयन्ति गच्छन्ति। कीदृश्यः। Vपुनानाः विश्वं शोधयन्त्यः Vअनिविशमानाः सर्वदा गच्छन्त्यः। Vवज्री वज्रभृत् Vवृषभः कामानां वर्षिता Vइन्द्रः Vयाः निरुद्धा अपः Vररादे लिखति[2] Vदेवीः देव्यः Vताः Vआपः Vइह अस्मिन् प्रदेशे स्थितं Vमामवन्तु रक्षन्तु अभिगच्छन्तु वा॥

या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्वयंजाः।
समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवन्तु ॥ २ ॥

याः। आपः। दिव्याः। उत। वा। स्रवन्ति। खनित्रिमाः। उत। वा। याः। स्वयम्ऽजाः।
समुद्रऽअर्थाः। याः। शुचयः। पावकाः। ताः। आपः। देवीः। इह। माम्। अवन्तु ॥२॥

Vया Vआपो Vदिव्याः अन्तरिक्षभवाः सन्ति। Vउत Vवा अपि च याः आपः नद्यादिगताः सत्यः Vस्रवन्ति गच्छन्ति। याश्च Vखनित्रिमाः खननेन निर्वृत्ताः। Vउत Vवा अपि च Vयाः Vस्वयंजाः स्वयमेव प्रादुर्भवन्त्यः Vसमुद्रार्थाः[3]। समुद्र एवार्थो गन्तव्यो यासां ताः समुद्रार्थाः। Vशुचयः दीप्तियुक्ताः Vपावकाः शोधयित्र्यश्च भवन्ति। Vता Vआपः Vमामवन्तु इति॥

यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्।
मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवन्तु ॥ ३ ॥

यासाम्। राजा। वरुणः। याति। मध्ये। सत्यानृते इति। अवऽपश्यन्। जनानाम्।
मधुऽश्चुतः। शुचयः। याः। पावकाः। ताः। आपः। देवीः। इह। माम्। अवन्तु ॥ ३ ॥

Vवरुणः Vयासाम् अपां Vराजा स्वामी Vमध्ये मध्यमलोके Vयाति गच्छति। किं कुर्वन्। Vजनानां प्रजानां Vसत्यानृते सत्यं चानृतं च Vअवपश्यन्। जानन्नित्यर्थः। Vयाः आपः Vमधुश्चुतः रसं क्षरन्त्यः Vशुचयः दीप्तियुक्ताः Vपावकाः शोधयित्र्यः। Vता Vआपः देव्यः Vमां रक्षन्त्विति॥

यासु राजा वरुणो यासु सोमो विश्वे देवा यास्वूर्जं मदन्ति।
वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिह मामवन्तु ॥ ४ ॥

---

१. ख-न-भ- माध्यमिकस्थानात्। २. ख-भ-विलिखति। ३. ख-म-त-न-भ-श-'समुद्रार्थाः' नास्ति।

यासु । राजा । वरुणः । यासु । सोमः । विश्वे । देवाः । यासु । ऊर्जम् । मदन्ति ।
वैश्वानरः । यासु । अग्निः । प्रऽविष्टः । ताः । आपः । देवीः । इह । माम् । अवन्तु ॥ ४ ॥

अपां [v]राजा [v]वरुणः [v]यासु अप्सु वर्तते । [v]सोमः[1] [v]यासु अप्सु वर्तते । [v]यासु अप्सु स्थिताः [v]विश्वे सर्वे [v]देवाः [v]ऊर्जम् अन्नं [v]मदन्ति । [v]वैश्वानरः [v]अग्निः [v]यासु [v]प्रविष्टः । [v]ताः [v]आपः देव्यः [v]इह स्थितं [v]मामवन्तु ॥ ॥ १६ ॥

'आ मां मित्रावरुणा[2]' इति[3] चतुर्ऋचं सप्तदशं सूक्तं वसिष्ठस्यार्षम् । चतुर्थ्यतिजगती न्यूहेन शाक्करी वादितस्तिस्रो जगत्यः । प्रथमा मैत्रावरुणी द्वितीयाग्नेयी तृतीया वैश्वदेवी चतुर्थी गङ्गादिनदीदेवताका । तथा चानुक्रमणिका—'आ मां मैत्रावरुण्याग्नेयी वैश्वदेवी नदीस्तुति-र्जागतमन्त्यातिजगती शाक्करी वा' इति । अस्य सूक्तस्य प्रत्यृचं विषादिहरणे विनियोगो लिङ्गादवगन्तव्यः ॥

आ मां मित्रावरुणेह रक्षतं कुलायय॑द्विश्वय॒न्मा न॒ आ ग॑न् ।
अज॒कावं दुर्दृशीकं ति॒रो द॑धे॒ मा मां पद्ये॑न॒ रप॑सा विद॒त्स॑रुः ॥ १ ॥

आ । माम् । मित्रावरुणा । इह । रक्षतम् । कुलाययत् । विऽश्वयत् । मा । नः । आ । गन् ।
अजकाऽवम् । दुःऽदृशीकम् । तिरः । दधे । मा । माम् । पद्येन । रपसा । विदत् । त्सरुः ॥१॥

हे [v]मित्रावरुणा हे मित्रावरुणौ युवाम् [v]इह अस्मिँल्लोके [v]माम् [v]आ [v]रक्षतम् आभि-मुख्येन पालयतम् । [v]कुलाययत् । कुलायं स्थानम् । तत्कुर्वत् [v]विश्वयत् विशेषेण वर्धमानं विषं [v]नः अस्मान् [v]आ आभिमुख्येन [v]मा [v]गन् मा गमत् मा गच्छतु । तथा [v]अजकावम् । अजका नाम रोगविशेषः । तद्वत् [v]दुर्दृशीकं दुर्दर्शनं विषं [v]तिरो [v]दधे तिरो धत्ताम् । नश्यत्वित्यर्थः । तथा [v]त्सरुः छद्मगामी[3] । जिह्मगः सर्प इत्यर्थः । [v]मां [v]पद्येन पादभवेन [v]रपसा । रपिः शब्दकर्मा । शब्देन [v]मा [v]विदत् न[4] जानातु ॥

यद्विजाम॒न्पर॑षि॒ वन्द॑नं॒ भुव॑दष्ठी॒वन्तौ॒ परि॑ कु॒ल्फौ च॒ देह॑त् ।
अ॒ग्निष्टच्छो॑च॒न्नप॑ बाधतामि॒तो मा मां पद्ये॑न॒ रप॑सा विद॒त्स॑रुः ॥ २ ॥

यत् । विऽजामन् । परुषि । वन्दनम् । भुवत् । अष्ठीवन्तौ । परि । कुल्फौ । च । देहत् ।
अग्निः । तत् । शोचन् । अप । बाधताम् । इतः । मा । माम् । पद्येन । रपसा । विदत् । त्सरुः ॥२॥

[v]वन्दनम् एतत्संज्ञकं [v]यत् विषं [v]विजामन् विविधजन्मनि [v]परुषि वृक्षादीनां पर्वणि [v]भुवत् उद्भवेत् । यच्च विषम् [v]अष्ठीवन्तौ जानुनी [v]कुल्फौ[5] गुल्फौ[5] [v]च [v]परि [v]देहत् । 'दिह उपचये' । उपचितं कुर्यात् । [v]अग्निः देवः [v]शोचन् दीप्यमानः सन् [v]इतः अस्माज्जनात् [v]तत् विषम् [v]अप [v]बाधताम् अपहन्तु । शिष्टं व्याख्यातम् ॥

---

१. ज्ञ-त१-२-श१-सकः सोमः; ज्ञ-त३-४-श२-साकः सोमः । २. ख-घ-ञ-त३-न-भ-श-मित्रेति । ३. ज्ञ-त-न-भ- छआगामी; श-आगामी । ४. त-मा । ५. ख-कुल्फौ गु; ज्ञ-गुल्फौ कुल्फौ; ज्ञ-त३-४-न-भ-श-गुल्फौ गुल्फौ; त२-कुल्फौ गुल्फौ ।

यच्छल्मलौ भवति यन्नदीषु यदोषधीभ्यः परि जायते विषम् ।
विश्वे देवा निरितस्तत्सुवन्तु मा मां पद्येन रपसा विदत्सरुः ॥ ३ ॥

यत् । शल्मलौ । भवति । यत् । नदीषु । यत् । ओषधीभ्यः । परि । जायते । विषम् ।
विश्वे । देवाः । निः । इतः । तत् । सुवन्तु । मा । माम् । पद्येन । रपसा । विदत् । त्सरुः ॥३॥

[v]यत् विषं [v]शल्मलौ एतत्संज्ञके वृक्षे [v]भवति । [v]यत् विषं [v]नदीषु तन्नस्थास्वप्सु प्रादुर्भवति । [v]परि इति पञ्चम्यर्थानुवादी । [v]ओषधीभ्यः सकाशात् [v]यत् विषं [v]जायते उत्पद्यते । [v]विश्वे सर्वे [v]देवाः [v]तत् विषम् [v]इतः अस्माज्जनादेशाद्वा [v]निः [v]सुवन्तु निःशेषेण प्रेरयन्तु । मा मामिति शिष्टं व्याख्यातम् ॥

याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः ।
ता अस्मभ्यं पयसा पिन्वमानाः शिवा देवीरशिपदा भवन्तु
सर्वा नद्यो अशिमिदा भवन्तु ॥ ४ ॥

याः । प्रऽवतः । निऽवतः । उत्ऽवतः । उदन्ऽवतीः । अनुदकाः । च । याः ।
ताः । अस्मभ्यम् । पयसा । पिन्वमानाः । शिवाः । देवीः । अशिपदाः । भवन्तु ।
सर्वाः । नद्यः । अशिमिदाः । भवन्तु ॥ ४ ॥

[v]याः नद्यः [v]प्रवतः[1] प्रवणदेशे गच्छन्त्यः । याः[2] [v]निवतः निम्नदेशे गच्छन्त्यः । याः [v]उद्वतः उन्नतदेशे गच्छन्त्यः[2] । याः [v]उदन्वतीः उदन्वत्य उदकयुक्ताः । [v]अनुदकाश्च उदकरहिताश्च [v]याः नद्यो यान्ति । [v]पयसा उदकेन [v]पिन्वमानाः विश्वमाप्याययन्त्यः [v]देवीः देव्यो द्योतमानाः [v]ताः तादृश्यो नद्यः [v]अस्मभ्यम् [v]अशिपदाः । शिपदं नाम रोगविशेषः । तदकुर्वत्यः सत्यः [v]शिवाः कल्याण्यः [v]भवन्तु । अपि च [v]सर्वाः ताः [v]नद्यः [v]अशिमिदाः । शिमिर्वधकर्मा । अहिंसाप्रदाः [v]भवन्तु ॥ ॥ १७ ॥

' आदित्यानाम् ' इति तृचमष्टादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमादित्यदेवताकम् । अनुक्रम्यते च–' आदित्यानां तृचमादित्यं तु ' इति । गतः सूक्तविनियोगः । आदित्यदेवताके पशौ ' आदित्यानामवसा ' इति वपाया अनुवाक्या । सूत्रितं च–' आदित्यानामवसा नूतनेनेमा गिर आदित्येभ्यः ' (आश्व. श्रौ. ३. ८) इति । आदित्यग्रहस्यैषानुवाक्या । सूत्रितं च–' आदित्यानामवसा नूतनेन होता यक्षदादित्यान् ' (आश्व. श्रौ. ५. १७) इति ॥

आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शंतमेन ।
अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः ॥ १ ॥

आदित्यानाम् । अवसा । नूतनेन । सक्षीमहि । शर्मणा । शम्ऽतमेन ।
अनागाःऽत्वे । अदितिऽत्वे । तुरासः । इमम् । यज्ञम् । दधतु । श्रोषमाणाः ॥ १ ॥

---

१. श–प्रवतः प्रकर्षेण वहन्त्यः निवतः । २. ख-ञ-त-न-भ-श–' या निवतो.....उन्नतदेशे गच्छन्त्यः ' नास्ति; घ–या निवतः नीचैर्गच्छन्त्यः उद्वतः या ऊर्ध्वं गच्छन्त्यः ।

vआदित्यानाम् अदितेः पुत्राणामेतत्संज्ञकानां देवानाम्[1] vअवसा रक्षणेन। तद्धेतुभूतेनेत्यर्थः। vनूतनेन अद्यतनेन vशंतमेन। शं सुखम्। अतिशयेन तत्करणेन vशर्मणा। शर्मेति गृहनामैतत्। गृहेण vसक्षीमहि वयं संगच्छेमहि। vतुरासः तुरास्त्वरिता आदित्याः vश्रोषमाणाः अस्मदीयानि स्तोत्राणि शृण्वन्तः vयज्ञं यष्टारम् vइमं जनम् vअनागास्त्वे अनपराधत्वे च[2] vअदितित्वे अदीनत्वे[3] च[3] vदधतु स्थापयन्तु ॥

'आदित्यासो अदितिः' इत्यादित्यग्रहस्य याज्या। सूत्रितं च—'आदित्यासो अदितिर्मादयन्तामिति नैतं ग्रहमीक्षेत हूयमानम्' (आश्व. श्रौ. ५. १७) इति ॥

आदित्यासो अदितिर्मादयन्तां मित्रो अर्यमा वरुणो रजिष्ठाः ।
अस्माकं सन्तु भुवनस्य गोपाः पिबन्तु सोममवसे नो अद्य ॥ २ ॥

आदित्यासः। अदितिः। मादयन्ताम्। मित्रः। अर्यमा। वरुणः। रजिष्ठाः।
अस्माकम्। सन्तु। भुवनस्य। गोपाः। पिबन्तु। सोमम्। अवसे। नः। अद्य ॥ २ ॥

vआदित्यासः आदित्या देवाः vअदितिः तेषां माता च। यद्वा अदितिरिति देवविशेषणम्। अदितिरदितयोऽदीनाः। vरजिष्ठाः अतिशयेनर्जवः vमित्रो vअर्यमा vवरुणः चैतत्संज्ञकाः vमादयन्तां तृप्ताः सन्तु। vभुवनस्य सर्वस्य जगतः vगोपाः रक्षका एवंभूता देवाः vअस्माकं vसन्तु। अस्माकमेव रक्षका भवन्त्वित्यर्थः। vअद्य अस्मिन् दिने vनः अस्माकम् vअवसे रक्षणाय vसोमम् अस्माभिरभिषुतं vपिबन्तु ॥

आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्व ऋभवश्च विश्वे ।
इन्द्रो अग्निरश्विना तुष्टुवाना यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

आदित्याः। विश्वे। मरुतः। च। विश्वे। देवाः। च। विश्वे। ऋभवः। च। विश्वे।
इन्द्रः। अग्निः। अश्विना। तुष्टुवानाः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः ॥ ३ ॥

vआदित्याः अदितेः पुत्राः vविश्वे सर्वे द्वादशसंख्याका अर्काः vविश्वे vमरुतश्च सर्वे एकोनपञ्चाशत्संख्योपेताश्च vविश्वे vदेवाश्च vविश्वे vऋभवश्च vइन्द्रः vअग्निः vअश्विना अश्विनावेतत्संज्ञकाः एवंभूता ये देवाः vतुष्टुवानाः अस्माभिः स्तुता बभूवुः सर्वे ते देवाः vयूयं vसदा सर्वदा vनः अस्मान् vस्वस्तिभिः कल्याणैः vपात रक्षत ॥ ॥ १८ ॥

'आदित्यासो अदितयः' इति तृचात्मकमेकोनविंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमादित्यदेवताकम्। आदित्यासः' इत्यनुक्रमणिका। गतो विनियोगः ॥

आदित्यासो अदितयः स्याम पूर्देवत्रा वसवो मर्त्यत्रा ।
सनेम मित्रावरुणा सनन्तो भवेम द्यावापृथिवी भवन्तः ॥ १ ॥

आदित्यासः। अदितयः। स्याम। पूः। देवऽत्रा। वसवः। मर्त्यऽत्रा।
सनेम। मित्रावरुणा। सनन्तः। भवेम। द्यावापृथिवी इति। भवन्तः ॥ १ ॥

---

१. ख-घ-न-भ-'देवानां' नास्ति। २. ख-भ-'च' नास्ति; झ-त-न-श-वा। ३. झ-त-न-ञ. भ-अदीनत्वेन; श-अदितित्वेन च।

हे vआदित्यासः आदित्या देवाः ॥ व्यत्ययेनाद्युदात्तत्वाभावः ॥ यद्वा । आदित्यानामिमं आदित्याः ॥ 'तस्येदम्' इत्यर्थे प्राग्दीव्यतीयो ण्यप्रत्ययः ॥ आदित्यानां शेषभूता वयम् vअदितयः अखण्डनीयाः vस्याम भवेम । vदेवत्रा देवेषु vवसवः वासका देवा युष्मदीयं vपूः पालनं vमर्त्यत्रा मनुष्येष्वस्मासु भवतु । हे vमित्रावरुणा मित्रावरुणौ vसनन्तः युवां संभजन्तो वयं vसनेम युवाभ्यां दत्तं धनं संभजेमहि । हे vद्यावापृथिवी द्यावापृथिव्यौ युवयोः प्रसादात् वयं vभवन्तः vभवेम भूतिमन्तः स्याम ॥

मित्रस्तन्नो वरुणो मामहन्त शर्म तोकाय तनयाय गोपाः ।
मा वो भुजेमान्यजातमेनो मा तत्कर्म वसवो यच्चयध्वे ॥ २ ॥

मित्रः । तत् । नः । वरुणः । ममहन्त । शर्म । तोकाय । तनयाय । गोपाः ।
मा । वः । भुजेम । अन्यऽजातम् । एनः । मा । तत् । कर्म । वसवः । यत् । चयध्वे ॥ २ ॥

vमित्रः vवरुणः अहर्निशाभिमानिनौ देवावेतदाद्याः सर्वे आदित्याः vनः अस्मभ्यं vतत् प्रसिद्धं vशर्म सुखं vममहन्त । मंहतिर्दानकर्मा । ददतु । vगोपाः विश्वस्य रक्षकास्ते देवाः vतोकाय अस्मदीयाय पुत्राय vतनयाय तत्पुत्राय च शर्म प्रयच्छन्तु । अथ प्रत्यक्षस्तुतिः । हे देवाः vवः युष्मदीया वयम् vअन्यजातम् अन्येनोत्पादितम् vएनः पापं vमा vभुजेम मा भुक्तवन्तः स्याम । हे vवसवः वासका देवाः vयत् येन युष्मदप्रियेण कर्मणा vचयध्वे यूयमस्मान्नाशयत vतत् तादृशं कर्म वयं vमा vकर्म मा कार्ष्म ॥ लुङि करोतेरुत्तमस्य बहुवचनम् । 'मन्त्रे घसह्वर°' इत्यादिना च्लेर्लोपः ॥

तुरण्यवोऽङ्गिरसो नक्षन्त रत्नं देवस्य सवितुरियानाः ।
पिता च तन्नो महान्यजत्रो विश्वे देवाः समनसो जुषन्त ॥ ३ ॥

तुरण्यवः । अङ्गिरसः । नक्षन्त । रत्नम् । देवस्य । सवितुः । इयानाः ।
पिता । च । तत् । नः । महान् । यजत्रः । विश्वे । देवाः । सऽमनसः । जुषन्त ॥ ३ ॥

vतुरण्यवः यज्ञादिकर्मसु त्वरिताः vअङ्गिरसः एतन्नामका ऋषयः vइयानाः सवितारं याचमानाः सन्तः vसवितुः प्रेरकस्य vदेवस्य संबन्धि vरत्नं रमणीयं यद्धनं vनक्षन्त आभुवन्त । उत्तरार्धगततच्छब्दापेक्षया यच्छब्दोऽत्राध्याहियते । vयजत्रः यजनशीलः vमहान् प्रभूतः vपिता vच वसिष्ठस्य पितृभूतो वरुणश्च । यद्वा । सर्वेषां पिता प्रजापतिः । vविश्वे सर्वे vदेवाः vसमनसः समानमनस्काः vतत् तादृशं रत्नं vनः अस्मान् vजुषन्त सेवयन्तु[1] । यद्वा नोऽस्मभ्यं ददतु ॥ ॥१९॥

'प्र द्यावा यज्ञैः' इति तृचात्मकं विंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं द्यावापृथिव्यम् । अनुक्रम्यते च—'प्र द्यावा द्यावापृथिव्यम्' इति । चतुर्थेऽहनि वैश्वदेवशस्त्र इदं द्यावापृथिव्यनिविद्धानम् । सूत्रितं च—'आ देवो यातु प्र द्यावेति वासिष्ठम्' (आश्व. श्रौ. ८. ८) इति । द्यावापृथिव्ये पशौ वपापुरोडाशयोः 'प्र द्यावा' इति द्वे ऋचौ याज्ये । सूत्रितं च—'प्र द्यावा यज्ञैः पृथिवी नमोभिरिति द्वे' (आश्व. श्रौ. ३. ८) इति ॥

प्र द्यावा यज्ञैः पृथिवी नमोभिः सबाध ईळे बृहती यजत्रे ।
ते चिद्धि पूर्वे कवयो गृणन्तः पुरो महीं दधिरे देवपुत्रे ॥ १ ॥

---

१. ख–सेवंते; घ-ङ्ग-त-न-भ-श–सेवयंत ।

प्र । द्यावा । यज्ञैः । पृथिवी इति । नमःऽभिः । सऽबाधः । ईळे । बृहती इति । यजत्रे इति । ते इति । चित् । हि । पूर्वे । कवयः । गृणन्तः । पुरः । मही इति । दधिरे । देवपुत्रे इति देवऽपुत्रे ॥ १

vयजत्रे यजनीये vबृहती बृहत्यौ महत्यौ vद्यावा vपृथिवी द्यावापृथिव्यौ vयज्ञैः यागैः vनमोभिः स्तोत्रैश्चाहं स्तोता vसबाधः बाधासहितः । ऋत्विजां संबाधयुक्त इत्यर्थः । vप्र vईळे प्रकर्षेण स्तौमि । vमही महत्यौ vदेवपुत्रे । देवाः पुत्रा ययोस्ते । vते vचिद्धि तादृश्यौ खल्वपि द्यावापृथिव्यौ vपूर्वे पुरातनाः vकवयः vगृणन्तः स्तुवन्तः vपुरः vदधिरे पुरस्तात् स्थापयामासुः ॥

आग्रयणे[1] द्यावापृथिव्यैकपालस्य ' प्र पूर्वजे ' इति याज्या । सूत्रितं च—' मही द्यौः पृथिवी च नः प्र पूर्वजे पितरा नव्यसीभिः ' (आश्व. श्रौ. २. ९) इति ॥

प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः कृणुध्वं सदने ऋतस्य ।
आ नो द्यावापृथिवी दैव्येन जनेन यातं महि वां वरूथम् ॥ २ ॥

प्र । पूर्वजे इति पूर्वऽजे । पितरा । नव्यसीभिः । गीःऽभिः । कृणुध्वम् । सदने इति । ऋतस्य । आ । नः । द्यावापृथिवी इति । दैव्येन । जनेन । यातम् । महि । वाम् । वरूथम् ॥ २ ॥

हे अस्मदीयाः स्तोतारो यूयं vनव्यसीभिः नवतराभिः vगीर्भिः स्तुतिरूपाभिर्वाग्भिः vऋतस्य यज्ञस्य vसदने स्थानभूते vपूर्वजे पूर्वं प्रजाते vपितरा पितरौ विश्वस्य मातापितृभूते द्यावापृथिव्यौ vप्र vकृणुध्वं पुरस्कुरुत । अथ प्रत्यक्षस्तुतिः । हे vद्यावापृथिवी द्यावापृथिव्यौ युवां vदैव्येन देवसंबन्धिना vजनेन सह vनः अस्मानभि vआ vयातम् आगच्छतम् । किमर्थम् आयातमित्युच्यते । vवां युवयोः vवरूथम् अस्माभिर्वरणीयं vमहि महत् । यद्धनमस्तीति शेषः । तद्धनमस्मभ्यं दीयतामित्यर्थः ॥

उतो हि वां रत्नधेयानि सन्ति पुरूणि द्यावापृथिवी सुदासे ।
अस्मे धत्तं यदसदस्कृधोयु यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

उतो इति । हि । वाम् । रत्नऽधेयानि । सन्ति । पुरूणि । द्यावापृथिवी इति । सुऽदासे । अस्मे इति । धत्तम् । यत् । असत् । अस्कृधोयु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३

vउतो vहि अपि च खलु हे vद्यावापृथिवी द्यावापृथिव्यौ vवां युवयोः vसुदासे शोभनहविर्दानाय यजमानाय देयानि vपुरूणि बहूनि vरत्नधेयानि रमणीयानि धनानि vसन्ति भवन्ति । तेषां मध्ये vयत् धनम् vअस्कृधोयु । कृधुको ह्रस्वः । अहस्वमनल्पम् vअसत् भवेत्तद्धनम् vअस्मे अस्मभ्यं vधत्तं प्रयच्छतम् । हे द्यावापृथिव्यौ vयूयं युवां vनः अस्मान् सर्वदा कल्याणैः vपात पालयतम् ॥ ॥२०॥

' वास्तोष्पते ' इति तृचात्मकमेकविंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वास्तोष्पत्यम् । तथा चानुक्रम्यते—' वास्तोष्पते वास्तोष्पत्यम् ' इति । स्मार्ते गृहनिर्माणे ' वास्तोष्पते ' इति चतसृभिः प्रत्यृचं जुहुयात् । सूत्रितं च—' वास्तोष्पते प्रति जानीह्यस्मानिति चतसृभिः प्रत्यृचं हुत्वा ' (आश्व. गृ. २. ९. ९) इति ॥

---

१. त१-४—आग्रायणे ।

वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः ।
यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥ १ ॥

वास्तोः । पते । प्रति । जानीहि । अस्मान् । सुऽआवेशः । अनमीवः । भव । नः ।
यत् । त्वा । ईमहे । प्रति । तत् । नः । जुषस्व । शम् । नः । भव । द्विऽपदे । शम् । चतुःऽपदे ॥ १ ॥

हे ᵛवास्तोष्पते गृहस्य पालयितर्देव त्वम् ᵛअस्मान् त्वदीयान् स्तोतॄनिति ᵛप्रति ᵛजानीहि प्रबुध्यस्व । तदनन्तरं ᵛनः अस्माकं ᵛस्वावेशः शोभननिवेशः ᵛअनमीवः अरोगकृच्च ᵛभव । किंच वयं ᵛत्वा त्वां ᵛयत् धनम् ᵛईमहे याचामहे त्वमपि ᵛतत् धनं ᵛनः अस्मभ्यं ᵛप्रति ᵛजुषस्व प्रयच्छ । अपि च ᵛनः अस्माकं ᵛद्विपदे पुत्रपौत्रादिजनाय ᵛशं सुखकरः ᵛभव । ᵛचतुष्पदे अस्मदीयाय गवाश्वादिवर्गाय च ᵛशं सुखकरो भव ॥

वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ।
अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥ २ ॥

वास्तोः । पते । प्रऽतरणः । नः । एधि । गयऽस्फानः । गोभिः । अश्वेभिः । इन्दो इति ।
अजरासः । ते । सख्ये । स्याम । पिताऽइव । पुत्रान् । प्रति । नः । जुषस्व ॥ २ ॥

हे ᵛवास्तोष्पते गृहस्य पालयितर्देव त्वं ᵛनः अस्माकं ᵛप्रतरणः प्रवर्धकः ᵛगयस्फानः गयस्य अस्मदीयस्य धनस्य स्फाययिता प्रवर्धकः ᵛएधि भव । हे ᵛइन्दो सोमवदाह्लादक ᵛते त्वया सह ᵛसख्ये सति वयं ᵛगोभिः पशुभिः ᵛअश्वेभिः अश्वैश्च सहिताः ᵛअजरासः जरारहिताः ᵛस्याम भवेम । विनाशरहिता इत्यर्थः । ᵛपितेव ᵛपुत्रान् यथा पिता पुत्रान् रक्षकत्वेन सेवते तथा त्वमपि ᵛनः अस्मान् ᵛप्रति ᵛजुषस्व सेवस्व ॥

वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या ।
पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

वास्तोः । पते । शग्मया । सम्ऽसदा । ते । सक्षीमहि । रण्वया । गातुऽमत्या ।
पाहि । क्षेमे । उत । योगे । वरम् । नः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥

हे ᵛवास्तोष्पते देव ᵛशग्मया सुखकर्या ᵛरण्वया रमणीयया ᵛगातुमत्या धनवत्या ᵛते त्वया देयया ᵛसंसदा स्थानेन ᵛसक्षीमहि वयं संगच्छेमहि । त्वमपि ᵛक्षेमे प्राप्तस्य रक्षणे ᵛउत अपि च ᵛयोगे अप्राप्तस्य प्रापणे ᵛवरं वरणीयं ᵛनः अस्मदीयं धनं ᵛपाहि रक्ष । हे वास्तोष्पते ᵛयूयं त्वं ᵛनः अस्मान् सर्वदा कल्याणैः ᵛपात पाहि ॥ ॥ २१ ॥

'अमीवहा' इत्यष्टर्चं द्वाविंशं सूक्तम् । आद्या गायत्री पञ्चम्याद्याश्चतस्रोऽनुष्टुभो द्वितीयाद्यास्तिस्र उपरिष्टाद्बृहत्यः । 'व्यष्टका चतुर्थद्वादशकौ बृहती' इति तल्लक्षणयोगात् । आद्या वास्तोष्पतिदेवताका शिष्टा ऐन्द्र्यः । तथा चानुक्रान्तम्—'अमीवहाष्टौ वास्तोष्पत्याद्या गायत्री शेषास्त्युपरिष्टाद्बृहत्यादयोऽनुष्टुभः प्रस्वापिन्य' उपनिषत्' इति । गतो विनियोगः । बृहद्देवतायां यदुक्तं तदिह लिख्यते—'वरुणस्य गृहान् रात्रौ वसिष्ठः स्वप्नमाचरन् । प्रविवेशाथ तं तत्र श्वा नदन्नभ्य-

१. ख-ग-त-श—इति प्रस्वापिन्य ।

वर्तत । क्रन्दन्तं सारमेयं स धावन्तं दष्टुमुद्यतम् ॥ यदर्जुनेति च द्वाभ्यां सान्त्वयित्वा ह्यसूषुपत् । एवं प्रस्वापयामास जनमन्यं च वारुणम्' (बृहद्दे. ६. ११–१३) इति । अत्र केचित् पुनरेवमाहुः—'आसां प्रस्वापिनित्वं[1] तु कथासु परिकल्प्यते । वसिष्ठस्तृषितोऽत्रार्थी त्रिरात्रालब्धभोजनः । चतुर्थरात्रौ चौर्यार्थं वारुणं गृहमेत्य तु ॥ कोष्ठागारे[2] प्रवेशाय पालकश्वादिसुप्तये । यदर्जुनेति सप्तर्चं ददर्श च जजाप च' (अनु. भा. ७. ५५) इति ॥

अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् । सखा सुशेव एधि नः ॥ १ ॥

अमीवऽहा । वास्तोः । पते । विश्वा । रूपाणि । आऽविशन् । सखा । सुऽशेवः । एधि । नः ॥१॥

हे [v]वास्तोष्पते गृहस्य पालकैतत्संज्ञक देव [v]अमीवहा अमीवानां रोगाणां नाशकस्त्वं[3] [v]विश्वा विश्वानि बहूनि [v]रूपाण्याविशन् प्रविशन् । 'यद्यद्रूपं कामयते तत्तद्देवता विशति' (निरु. १०. १७) इति यास्कः । [v]नः अस्माकं [v]सखा मित्रभूतः [v]सुशेवः सुष्ठु सुखकरः [v]एधि भव ॥

यदर्जुन सारमेय दतः पिशङ्ग यच्छसे ।
वीव भ्राजन्त ऋष्टय उप स्वकेषु बप्सतो नि षु स्वप ॥ २ ॥

यत् । अर्जुन । सारमेय । दतः । पिशङ्ग । यच्छसे ।
विऽइव । भ्राजन्ते । ऋष्टयः । उप । स्वकेषु । बप्सतः । नि । सु । स्वप ॥ २ ॥

हे [v]अर्जुन श्वेत हे [v]सारमेय । सरमा नाम देवशुनी । तस्याः कुलोद्भव हे [v]पिशङ्ग केषुचिदङ्गेषु पिङ्गलवर्णैर्वंभूत हे शुनक त्वं [v]दतः दन्तान् [v]यत् यदा [v]यच्छसे विवृणोषि । अस्मान् दष्टुमित्यर्थः । तदानीं [v]वीव [v]भ्राजन्त [v]ऋष्टयः यथायुधानि विशेषेण भासन्ते तथा [v]उप अस्मत्समीपे [v]बप्सतः भक्षयतस्त्वव दन्ताः [v]स्वकेषु स्वकासु भासन्ते । स्वकाशब्द ओष्ठप्रदेशविशेषवाचीत्यर्थः[4] । तथाभूतस्त्वमिदानीं [v]सु सुष्ठु [v]नि [v]स्वप नितरां निद्रां कुरु ॥

स्तेनं राय सारमेय तस्करं वा पुनःसर ।
स्तोतृनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥ ३ ॥

स्तेनम् । राय । सारमेय । तस्करम् । वा । पुनःऽसर ।
स्तोतॄन् । इन्द्रस्य । रायसि । किम् । अस्मान् । दुच्छुनऽयसे । नि । सु । स्वप ॥ ३ ॥

हे [v]पुनःसर । गतमेव देशं पुनः सरतीति पुनःसरः । तादृग्भूत हे [v]सारमेय त्वं [v]स्तेनम् । प्रच्छन्नधनापहारी स्तेनः । तं [v]तस्करम् । प्रत्यक्षधनापहारी तस्करः । तं [v]वा [v]राय गच्छ । [v]इन्द्रस्य [v]स्तोतॄन् अस्मान् [v]किं [v]रायसि गच्छसि । [v]अस्मान् [v]दुच्छुनायसे किं बाधसे । [v]नि [v]षु [v]स्वप अत्यन्तं निद्रां कुरु ॥

त्वं सूकरस्य दर्दृहि तव दर्दर्तु सूकरः ।
स्तोतृनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥ ४ ॥

---

१. अनु. भा. ७. ५५–प्रस्वापिनीत्वं । २. ख–कोशागारे; श– गोष्ठागारे; अनु. भा. ७. ५५–कोष्ठागार° । ३. ख-भ–हारक° । ४. श– दंष्ट्रप्रदेशवाची° ।

त्वम्। सूकरस्य। दर्दृहि। तवं। दर्दर्तु। सूकरः।
स्तोतॄन्। इन्द्रस्य। रायसि। किम्। अस्मान्। दुच्छुनऽयसे। नि। सु। स्वप॥ ४॥

हे सारमेय Vत्वं Vसूकरस्य वराहस्य। द्वितीयार्थे षष्ठी। Vदर्दृहि विदारय। Vसूकरः अपि Vतव Vदर्दर्तु विदारयतु। युवयोर्नित्यवैरित्वात्[1]। अस्मान् मा दशेत्यर्थः। स्तोतॄन् इत्यर्धर्चः पूर्वस्या-मृचि व्याख्यातः॥

सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः।
ससन्तु सर्वे ज्ञातयः सस्त्वयमभितो जनः॥ ५॥

सस्तु। माता। सस्तु। पिता। सस्तु। श्वा। सस्तु। विश्पतिः।
ससन्तु। सर्वे। ज्ञातयः। सस्तु। अयम्। अभितः। जनः॥ ५॥

हे सारमेय Vमाता त्वदीया जननी Vसस्तु स्वपतु। Vपिता च Vसस्तु। Vश्वा सारमेयो भवान् Vसस्तु। Vविश्पतिः जामाता यद्वा विशां जनानां पालको गृही Vसस्तु। Vसर्वे Vज्ञातयः बन्धवोऽपि Vससन्तु स्वपन्तु। Vअभितः परितः स्थितः Vअयम् अपि सर्वः Vजनः Vसस्तु स्वपतु॥

य आस्ते यश्च चरति यश्च पश्यति नो जनः।
तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा॥ ६॥

यः। आस्ते। यः। च। चरति। यः। च। पश्यति। नः। जनः।
तेषाम्। सम्। हन्मः। अक्षाणि। यथा। इदम्। हर्म्यम्। तथा॥ ६॥

Vयः जनः Vआस्ते अस्मिन् प्रदेशे तिष्ठति Vयश्च Vचरति गच्छति Vयश्च Vजनः Vनः अस्मान् Vपश्यति एवंभूतानां Vतेषां जनानाम् Vअक्षाणि इन्द्रियाणि Vसं Vहन्मः संहनाम। संहतिर्निमील-नम्। निमीलयामेत्यर्थः। Vइदं प्रत्यक्षेणोपलभ्यमानं Vहर्म्यं प्रासादादिस्थावरात्मकं वस्तुजातं Vयथा निश्चलं भवति Vतथा इमे सर्वे जना निश्चला भवन्त्वित्यर्थः॥

सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत्।
तेना सहस्येना वयं नि जनान्स्वापयामसि॥ ७॥

सहस्रऽशृङ्गः। वृषभः। यः। समुद्रात्। उत्ऽआचरत्।
तेन। सहस्येन। वयम्। नि। जनान्। स्वापयामसि॥ ७॥

Vसहस्रशृङ्गः सहस्रकिरणः Vवृषभः कामानां वर्षिता Vयः सूर्यः Vसमुद्रात् अम्बुधेः सकाशात् Vउदाचरत् उदागच्छति Vसहस्येन अभिभवित्रा Vतेन सूर्येण Vवयं स्तोतारः Vजनान् सर्वान् Vनि Vस्वापयामसि नितरां स्वापयामः॥

प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरीः।
स्त्रियो याः पुण्यगन्धास्ताः सर्वाः स्वापयामसि॥ ८॥

---

१. ख-घ-ञ-त२-३-न-भ-श-[1]वैरत्वात्।

प्रोष्ठेऽशयाः । वह्येऽशयाः । नारीः । याः । तल्पऽशीवरीः ।
स्त्रियः । याः । पुण्यऽगन्धाः । ताः । सर्वाः । स्वापयामसि ॥ ८ ॥

Vयाः यादृश्यः Vनारीः नार्यः स्त्रियः Vप्रोष्ठेशयाः प्राङ्गणे[1] शयानाः । याः Vवह्येशयाः । वह्यं वाहनम् । तस्मिन् शयानाः । याः Vतल्पशीवरीः तल्पशयाः[2] । Vयाः Vस्त्रियः Vपुण्यगन्धाः मङ्गल्यगन्धाः[3] । Vताः तादृशीः Vसर्वाः स्त्रीः Vस्वापयामसि वयं निद्रां कारयामः ॥ ॥ २२ ॥ ॥ ३ ॥

अथ चतुर्थेऽनुवाके पञ्चदश सूक्तानि । तत्र ' क ईं व्यक्ताः ' इति पञ्चविंशत्यृचं प्रथमं सूक्तं वसिष्ठस्यार्षं मरुद्देवताकम् । आद्या एकादश द्विपदा विंशत्यक्षरा विराजः शिष्टाश्चतुर्दश त्रिष्टुभः । तथा चानुक्रान्तं—' क ईं पञ्चाधिका मारुतं हाद्या एकादश द्विपदा ' इति । दशरात्रे चतुर्थेऽहन्यग्निमारुते शस्त्र इदं मारुतनिविद्धानम् । सूत्र्यते हि—' वैश्वानरस्य सुमतौ क ईं व्यक्ता नरः ' (आश्व. श्रौ. ८. ८) इति ॥

क ईं व्यक्ता नरः सनीळा रुद्रस्य मर्या अधा स्वश्वाः ॥ १ ॥
के । ईम् । विऽअक्ताः । नरः । सऽनीळाः । रुद्रस्य । मर्याः । अध । सुऽअश्वाः ॥ १ ॥

Vव्यक्ताः कान्तियुक्ताः Vनरः नेतारः Vसनीळाः समानौकसः Vरुद्रस्य महादेवस्य पुत्राः Vमर्याः मर्येभ्यो नृभ्यो हिताः Vअध अपि च Vस्वश्वाः शोभनवाहाः Vईम् इमे एवंभूताः Vके भवन्तीति रूपातिशयादविराश्रर्येणाह ॥

नकिर्येषां जनूंषि वेद ते अङ्ग विद्रे मिथो जनित्रम् ॥ २ ॥
नकिः । हि । एषाम् । जनूंषि । वेद । ते । अङ्ग । विद्रे । मिथः । जनित्रम् ॥ २ ॥

Vएषां मरुतां Vजनूंषि जन्मानि Vनकिर्हि Vवेद कश्चिदपि न खलु जानाति । Vते तादृशा मरुतः Vमिथः परस्परं Vजनित्रं रुद्रपृश्निभ्यां सकाशात् प्रादुर्भूतं स्वकीयं जन्म Vअङ्ग Vविद्रे स्वयमेव विदन्ति ॥

अभि स्वपूभिर्मिथो वपन्त वातस्वनसः श्येना अस्पृधन् ॥ ३ ॥
अभि । स्वऽपूभिः । मिथः । वपन्त । वातऽस्वनसः । श्येनाः । अस्पृधन् ॥ ३ ॥

मरुतः Vस्वपूभिः स्वकीयैः पवनैः संचरणैः स्वयमेव संचरन्तः Vमिथः परस्परम् Vअभि Vवपन्त संगच्छन्ते । अपि च Vवातस्वनसः वायुवत् स्वनन्तः शब्दायमानाः Vश्येनाः । ' श्यैङ् गतौ ' इति धातो रूपम् । गमनशीलाः । यद्वा श्येना इति लुप्तोपममेतत् । श्येनाः पक्षिणः । तद्वदुच्छन्तः । Vअस्पृधन् । परस्परं रूपसौन्दर्यादिभिः स्पर्धन्ते ॥

एतानि धीरो निण्या चिकेत पृश्निर्यदूधो मही जभार ॥ ४ ॥
एतानि । धीरः । निण्या । चिकेत । पृश्निः । यत् । ऊधः । मही । जभार ॥ ४ ॥

Vधीरः धीमान् शास्त्रज्ञो जनः Vनिण्या निण्यानि श्वेतवर्णानि Vएतानि मरुदात्मकानि भूतानि Vचिकेत जानीयात् । किंतु न सर्वे जना जानन्तीत्यर्थः । Vमही महती Vपृश्निः मरुतां जननी Vयत् यानि मरुदात्मकानि भूतानि Vऊधः ऊधन्यन्तरिक्षे स्वकीये जठरे वा Vजभार बभार । एतानि चिकेतेति पूर्वेण संबन्धः ॥

---

१. ख-श–प्रांगणे; झ-त१-२-४–प्राकणे । २. ख-श–तल्पे शयानाः । ३. ख-झ–मांगल्यगंधाः ।

सा विट् सुवीरा मरुद्भिरस्तु सनात्सहन्ती पुष्यन्ती नृम्णम् ॥ ५ ॥

सा । विट् । सुऽवीरा । मरुत्ऽभिः । अस्तु । सनात् । सहन्ती । पुष्यन्ती । नृम्णम् ॥ ५ ॥

vसा vविट् सा प्रजा मरुतः परिचरति । सा प्रजा vमरुद्भिः हेतुभिः vसनात् चिरात् vसहन्ती शत्रूनभिभवन्ती vनृम्णं धनं बलं वा vपुष्यन्ती लभन्ती vसुवीरा शोभनपुत्रयुक्ता vअस्तु भवतु ॥

यामं येष्ठाः शुभा शोभिष्ठाः श्रिया संमिश्ला ओजोभिरुग्राः ॥ ६ ॥

यामम् । येष्ठाः । शुभा । शोभिष्ठाः । श्रिया । सम्ऽमिश्लाः । ओजःऽभिः । उग्राः ॥ ६ ॥

मरुतः vयामं यातव्यं गन्तव्यं प्रदेशं vयेष्ठाः यातृतमा अतिशयेन गन्तारः vशुभा अलंकारेण vशोभिष्ठाः अतिशयेन शोभायुक्ताः vश्रिया कान्त्या vसंमिश्लाः संगच्छमानाः vओजोभिः बलैः vउग्राः उद्गूर्णाः । एवंभूता भवन्तीति शेषः ॥

उग्रं व ओजः स्थिरा शवांस्यधा मरुद्भिर्गणस्तुविष्मान् ॥ ७ ॥

उग्रम् । वः । ओजः । स्थिरा । शवांसि । अध । मरुत्ऽभिः । गणः । तुविष्मान् ॥ ७ ॥

हे मरुतः vवः युष्माकम् vओजः तेजः vउग्रम्[1] उद्गूर्ण[1] भवतु । vशवांसि युष्मदीयानि बलानि vस्थिरा स्थिराणि कैश्चिदनपहर्तव्यानि भवन्तु । vअध अपि च vमरुद्भिर्गणः मरुतां संघः vतुविष्मान् वृद्धिमान् भवतु ॥

शुभ्रो वः शुष्मः क्रुध्मी मनांसि धुनिर्मुनिरिव शर्धस्य धृष्णोः ॥ ८ ॥

शुभ्रः । वः । शुष्मः । क्रुध्मी । मनांसि । धुनिः । मुनिःऽइव । शर्धस्य । धृष्णोः ॥ ८ ॥

हे मरुतः vवः युष्माकं vशुष्मः बलं vशुभ्रः सर्वतः शोभमानम् । किंच वः [vमनांसि vक्रुध्मी संग्रामेषु शत्रुहननार्थं क्रोधनशीलानि । vधृष्णोः धर्षणशीलस्य vशर्धस्य बलवतो युष्मदीयस्य गणस्य vधुनिः वृक्षादीनां कम्पयितु(? तृ)वेगः[2] vमुनिरिव । मननात्[3] मुनिः स्तोता । स यथा बहुविधं शब्दमुत्पादयति एवं बहुविधशब्दस्योत्पादक इत्यर्थः ॥

सनेम्यस्मद्युयोतं द्विषुं मा वो दुर्मतिरिह प्रणङ्नः ॥ ९ ॥

सनेमि । अस्मत् । युयोत । द्विषुम् । मा । वः । दुःऽमतिः । इह । प्रणक् । नः ॥ ९ ॥

[हे मरुतः vसनेमि पुराणं vद्विषुम् आयुधम् vअस्मत् अस्मत्तः vयुयोत पृथक्कुरुत । vवः युष्मदीया vदुर्मतिः क्रूरमतिः vइह अस्मिन् कर्मणि vनः अस्मान् vमा vप्रणक् मा व्याप्नोतु ॥]

प्रिया वो नाम हुवे तुराणामा यत्तृपन्मरुतो वावशानाः ॥ १० ॥

प्रिया । वः । नाम । हुवे । तुराणाम् । आ । यत् । तृपत् । मरुतः । वावशानाः ॥ १० ॥

[हे vमरुतः vतुराणां शत्रूणां हिंसकानां त्वरावतां वा vवः युष्माकं vप्रिया प्रियेण vनाम नाम्ना vआ vहुवे आह्वयामि । vयत् येनानेन vवावशानाः कामयमानाः सन्तः vतृपत् तृप्तिं गच्छन्ति ॥] ॥२३॥

---

१. ख-भ-समुद्गूर्णं; घ-उग्रं समुद्गूर्णं । २. ख-घ-ङ-कम्पयितुं वेगः; ङ-त१-३-४-न-भ-कंपयितु-वेगः; त२-कंपयितुर्वेगः; श-कंपयतुं वेगः । ३. ख-मनशत्; ङ-त-न-मनसान्; श-मनसा ।

स्वायुधासः इष्मिणः सुनिष्का उत स्वयं तन्वः शुम्भमानाः ॥ ११ ॥

सुऽआयुधासः । इष्मिणः । सुऽनिष्काः । उत । स्वयम् । तन्वः । शुम्भमानाः ॥ ११ ॥

स्वायुधासः स्वायुधाः शोभनास्त्राः इष्मिणः गन्तारः सुनिष्काः शोभनालंकाराः उत अपि च तन्वः स्वकीयानि शरीराणि शुम्भमानाः स्वयमेव शोभयन्तो मरुत एवंभूता भवन्तीत्यर्थः ॥

मारुते पशौ 'शुची वो हव्या' इति वपाया अनुवाक्या । सूत्रितं च—'शुची वो हव्या मरुतः शुचीनां नू ष्टिरं मरुतः' (आश्व. श्रौ. ३. ७) इति ॥

शुची वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः ।
ऋतेन सत्यमृतसाप आयञ्छुचिजन्मानः शुचयः पावकाः ॥ १२ ॥

शुची । वः । हव्या । मरुतः । शुचीनाम् । शुचिम् । हिनोमि । अध्वरम् । शुचिऽभ्यः ।
ऋतेन । सत्यम् । ऋतऽसापः । आयन् । शुचिऽजन्मानः । शुचयः । पावकाः ॥ १२ ॥

हे मरुतः शुचीनां शुद्धानां वः युष्माकं शुची शुचीनि हव्या हव्यानि हवींषि भवन्तु । शुचिभ्यः प्रकाशमानेभ्यो युष्मभ्यं शुचिं शुद्धम् अध्वरं यागं हिनोमि अहं प्रेरयामि । ऋतसापः ऋतमुदकं स्पृशन्तो मरुतः ऋतेन सत्येनैव सत्यम् आयन् गच्छन्ति । कीदृशाः । शुचिजन्मानः शोभनजननाः शुचयः दीप्यमानाः पावकाः शोधकाः । एवंभूता गच्छन्तीत्यर्थः ॥

अंसेष्वा मरुतः खादयो वो वक्षःसु रुक्मा उपशिश्रियाणाः ।
वि विद्युतो न वृष्टिभी रुचाना अनु स्वधामायुधैर्यच्छमानाः ॥ १३ ॥

अंसेषु । आ । मरुतः । खादयः । वः । वक्षःऽसु । रुक्माः । उपऽशिश्रियाणाः ।
वि । विऽद्युतः । न । वृष्टिऽभिः । रुचानाः । अनु । स्वधाम् । आयुधैः । यच्छमानाः ॥ १३ ॥

हे मरुतः अंसेषु युष्मदीयेषु स्कन्धप्रदेशेषु खादयः अलंकारविशेषाः आ मुक्ता भवन्तीति शेषः । सुरुक्माः सुष्ठु रोचमाना हाराः वः युष्मदीयं वक्ष उरःप्रदेशम् उपशिश्रियाणाः आश्रिता भवन्ति । किंच हे मरुतः वृष्टिभिः वर्षैः सार्धं विद्युतो न तडितो यथा रुचानाः रोचमानाः तादृग्भूता यूयम् आयुधैः मेघताडनैः स्वधाम् उदकम् अनु यच्छमानाः प्रयच्छन्तः वि चरथेति शेषः ॥

गृहमेधीये 'प्र बुध्न्या वः' इति प्रधानस्य याज्या । सूत्रितं च—'प्र बुध्न्या व ईरते महांसीति पुष्टिमन्तौ विराजौ संयाज्ये' (आश्व. श्रौ. २. १८) इति ॥

प्र बुध्न्या व ईरते महांसि प्र नामानि प्रयज्यवस्तिरध्वम् ।
सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वम् ॥ १४ ॥

प्र । बुध्न्याः । वः । ईरते । महांसि । प्र । नामानि । प्रऽयज्यवः । तिरध्वम् ।
सहस्रियम् । दम्यम् । भागम् । एतम् । गृहऽमेधीयम् । मरुतः । जुषध्वम् ॥ १४ ॥

हे मरुतः वः युष्मदीयानि बुध्न्या बुध्न्यान्यन्तरिक्षे भवानि महांसि तेजांसि प्र ईरते प्रकर्षेण गच्छन्ति । किंच हे प्रयज्यवः प्रकर्षेण यष्टव्या मरुतः यूयं नामानि । पांसून्

नमयन्तीति नामान्युदकानि । vप्र vतिरध्वं वर्धयत । हे vमरुतः यूयं vसहस्रियं सहस्रसंख्याकं vदम्यं दमे गृहे भवं vगृहमेधीयं गृहमेधिगुणेभ्यो युष्मभ्यं देयम् vएतम् एतादृशं vभागं vजुषध्वं सेवध्वम्। एकं भागं सहस्रियमिति कथमाह। तथा च श्रूयते—' यावदेका देवता कामयते यावदेका तावदाहुतिः प्रथते न हि तदस्ति यत्तावदेव स्याद्यावज्जुहोति ' (तै. ब्रा. ३. २. ६. ४) इति ॥

यदि स्तुतस्य मरुतो अधीथेत्था विप्रस्य वाजिनो हवीमन् ।
मक्षू रायः सुवीर्यस्य दात नू चिद्यमन्य आदभद्रारावा ॥ १५ ॥

यदि । स्तुतस्य । मरुतः । अधि ऽइथ । इत्था । विप्रस्य । वाजिनः । हवीमन् ।
मक्षु । रायः । सु ऽवीर्यस्य । दात । नु । चित् । यम् । अन्यः । आ ऽदभत् । अरावा ॥ १५ ॥

vवाजिनः हविर्लक्षणान्नवतः vविप्रस्य मेधाविनो मम संबन्धिनि vहवीमन् हविष्मति हविषा युक्ते स्तोत्रे क्रियमाणे सति हे vमरुतः यूयं vयदि यस्मात् कारणात् vस्तुतस्य स्तुतं मदीयं स्तोत्रम् vइत्था इत्थमनेन प्रकारेण vअधीथ अवगच्छथ तस्मात् कारणात् हे मरुतः यूयं vसुवीर्यस्य शोभनपुत्रोपेतस्य vरायः रायं धनम्। द्वितीयार्थे षष्ठी। vमक्षु शीघ्रं vदात दत्त। vअरावा अरातिः शत्रुभूतः vअन्यः जनः vयं रायं vनू vचित् vआदभत् नैवाभिहन्यात्। तद्धनमस्मभ्यं दत्तेति संबन्धः ॥ ॥ २४ ॥

' मरुद्भ्यः क्रीळिभ्यः सप्तकपालम् ' (तै. सं. १. ८. ४. २) इत्यस्य ' अत्यासः ' इति याज्या। सूत्रितं च—' अत्यासो न ये मरुतः स्वञ्चो जुष्टो दमूनाः ' (आश्व. श्रौ. २. १८) इति ॥

अत्यासो न ये मरुतः स्वञ्चो यक्षदृशो न शुभयन्त मर्याः ।
ते हर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीळिनः पयोधाः ॥ १६ ॥

अत्यासः । न । ये । मरुतः । सु ऽअञ्चः । यक्ष ऽदृशः । न । शुभयन्त । मर्याः ।
ते । हर्म्ये ऽस्थाः । शिशवः । न । शुभ्राः । वत्सासः । न । प्र ऽक्रीळिनः । पयः ऽधाः ॥ १६ ॥

vअत्यासो vन अत्याः सततगामिनोऽश्वा इव vस्वञ्चः सुष्ठु गच्छन्तः vये vमरुतः vयक्षदृशो vन vमर्याः यक्षस्योत्सवस्य द्रष्टारो मनुष्या इव vशुभयन्त शोभन्ते vहर्म्येष्ठाः हर्म्ये स्थिताः vशिशवो vन कुमारा इव vशुभ्राः शोभमानाः vवत्सासो vन वत्सा इव vप्रक्रीळिनः[1] प्रकर्षेण क्रीडमानाः vते मरुतः vपयोधाः पयस उदकस्य धारयितारो दातारो वा भवन्ति ॥

दशस्यन्तो नो मरुतो मृळन्तु वरिवस्यन्तो रोदसी सुमेके ।
आरे गोहा नृहा वधो वो अस्तु सुम्नेभिरस्मे वसवो नमध्वम् ॥ १७ ॥

दशस्यन्तः । नः । मरुतः । मृळन्तु । वरिवस्यन्तः । रोदसी इति । सुमेके इति सु ऽमेके ।
आरे । गोऽहा । नृऽहा । वधः । वः । अस्तु । सुम्नेभिः । अस्मे इति । वसवः । नमध्वम् ॥ १७ ॥

vमरुतः vनः अस्मभ्यं vदशस्यन्तः धनानि प्रयच्छन्तः vसुमेके सुरूपे vरोदसी द्यावापृथिव्यौ vवरिवस्यन्तः स्वमहिम्ना पूरयन्तः vमृळन्तु मृळयन्तु। अस्मान् सुखयुक्तान् कुर्वन्तु।

---

१. क्त–प्रक्रीळिनः प्रक्रीडिनः ।

अपि च हे [v]वसवः वासका मरुतः [v]गोहा गवां मेघस्थानामुदकानां भेदकः [v]नृहा नृणां शत्रूणां हन्ता [v]वः युष्मदीयं [v]वधः आयुधम् [v]आरे [v]अस्तु अस्मत्तो दूरे भवतु। यूयमपि [v]सुक्षेभिः सुक्षैः सुखैः सह [v]अस्मे अस्मासु [v]नमध्वं स्वयमेवाभिमुखा भवत ॥

मारुते पशौ 'आ वो होता' इत्येषानुवाक्या। सूत्रितं च—'आ वो होता जोहवीति सत्तः प्र चित्रमर्कं गृणते तुराय' (आश्व. श्रौ. ३. ७) इति ॥

आ वो होता जोहवीति सत्तः सत्राचीं रातिं मरुतो गृणानः ।
य ईवतो वृषणो अस्ति गोपाः सो अद्वयावी हवते व उक्थैः ॥ १८ ॥

आ । वः । होता । जोहवीति । सत्तः । सत्राचीम् । रातिम् । मरुतः । गृणानः ।
यः । ईवतः । वृषणः । अस्ति । गोपाः । सः । अद्वयावी । हवते । वः । उक्थैः ॥ १८ ॥

हे [v]मरुतः [v]सत्तः होतृपदने निषण्णोऽस्मदीयः [v]होता [v]सत्राचीं सर्वतो गमनशीलं[1] [v]रातिं स्वदीयं दानं [v]गृणानः स्तुवन् [v]वः युष्मान् [v]आ [v]जोहवीति भृशमाह्वयति। हे [v]वृषणः कामानां वर्षितारो मरुतः [v]यः होता [v]ईवतः गच्छतः व्यापारवतो यजमानस्य [v]गोपाः [v]अस्ति युष्मदाह्वाननिमित्तेन रक्षको भवति [v]सः होता [v]अद्वयावी मायारहितः सन् [v]वः युष्मान् [v]उक्थैः स्तोत्रैः [v]हवते स्तौति ॥

इमे तुरं मरुतो रामयन्तीमे सहः सहस आ नमन्ति ।
इमे शंसं वनुष्यतो नि पान्ति गुरु द्वेषो अररुषे दधन्ति ॥ १९ ॥

इमे । तुरम् । मरुतः । रमयन्ति । इमे । सहः । सहसः । आ । नमन्ति ।
इमे । शंसम् । वनुष्यतः । नि । पान्ति । गुरु । द्वेषः । अररुषे । दधन्ति ॥ १९ ॥

[v]इमे ईदृशाः [v]मरुतः [v]तुरं कर्मसु क्षिप्रवन्तं यजमानं [v]रमयन्ति क्रीडयन्ति। [v]इमे मरुतः [v]सहः सहसा बलेन [v]सहसः बलवतो जनान् [v]आ [v]नमन्ति। [v]इमे मरुतः [v]वनुष्यतः हिंसकात् पुरुषात् [v]शंसं शंसकं स्तोतारं [v]नि [v]पान्ति नितरां पालयन्ति। [v]अररुषे हविरप्रयच्छते जनाय [v]गुरु महत् [v]द्वेषः अप्रियं [v]दधन्ति कुर्वन्ति ॥

इमे रध्रं चिन्मरुतो जुनन्ति भूमिं चिद्यथा वसवो जुषन्त ।
अप बाधध्वं वृषणस्तमांसि धत्त विश्वं तनयं तोकमस्मे ॥ २० ॥

इमे । रध्रम् । चित् । मरुतः । जुनन्ति । भूमिम् । चित् । यथा । वसवः । जुषन्त ।
अप । बाधध्वम् । वृषणः । तमांसि । धत्त । विश्वम् । तनयम् । तोकम् । अस्मे इति ॥ २० ॥

[v]इमे [v]मरुतः [v]रध्रं [v]चित् समृद्धमपि जनं [v]जुनन्ति प्रेरयन्ति। [v]भूमिं [v]चित् भ्रमणशीलमपि दरिद्रं जुनन्ति प्रेरयन्ति। [v]वसवः वासका देवा युष्मान् [v]यथा [v]जुषन्त कामयेरन् हे [v]वृषणः कामानां वर्षितारः ते यूयं [v]तमांसि [v]अप [v]बाधध्वं नाशयत। अपि च [v]अस्मे अस्मभ्यं [v]विश्वं बहुलं [v]तोकं पुत्रं [v]तनयं पौत्रं च [v]धत्त प्रयच्छत ॥ ॥ २५ ॥

---

१. ख—गमनशीला; भ-श—गमनशीलां।

मा वो दात्रान्मरुतो निरराम मा पश्चाद्घ्म रथ्यो विभागे ।
आ नः स्पार्हे भजतना वसव्ये[1] यदीं सुजातं वृषणो वो अस्ति ॥ २१ ॥

मा । वः । दात्रात् । मरुतः । निः । अराम । मा । पश्चात् । दघ्म । रथ्यः । विऽभागे ।
आ । नः । स्पार्हे । भजतन । वसव्ये । यत् । ईम् । सुऽजातम् । वृषणः । वः । अस्ति ॥२१॥

हे ᵛमरुतः ᵛवः युष्माकं ᵛदात्रात् दानात् ᵛमा ᵛनिरराम वयं मा निर्गमाम। यूयमस्मान् परित्यक्त्वान्येभ्यो धनं मा दत्तेत्यर्थः। हे ᵛरथ्यः रथवन्तो मरुतः ᵛविभागे युष्मदीयस्य धनस्य दाने ᵛपश्चात् ᵛमा ᵛदघ्म। दघ्यतिर्गतिकर्मा। वयं पश्चाद्गामिनो मा भूम। यूयं प्रथममस्मभ्यमेव दत्तेति यावत्। ᵛस्पार्हे स्पृहणीये ᵛवसव्ये धनसमूहे यूयं ᵛनः अस्मान् ᵛआ ᵛभजतन भागिनः कुरुत। हे ᵛवृषणः वर्षितारो[1] मरुतः ᵛवः युष्माकं ᵛसुजातं शोभनजनं ᵛयत् वसव्यम् ᵛअस्ति तस्मिन् भागिनः कुरुतेति संबन्धः। ᵛईम् इति पूरणः ॥

सं यद्धनन्त मन्युभिर्जनासः शूरा यह्वीष्वोषधीषु विक्षु ।
अधं स्मा नो मरुतो रुद्रियासस्त्रातारो भूत पृतनास्वर्यः ॥ २२ ॥

सम् । यत् । हनन्त । मन्युऽभिः । जनासः । शूराः । यह्वीषु । ओषधीषु । विक्षु ।
अध । स्म । नः । मरुतः । रुद्रियासः । त्रातारः । भूत । पृतनासु । अर्यः ॥ २२ ॥

ᵛयत् यदा ᵛशूराः विक्रान्ताः ᵛजनासः जनाः ᵛयह्वीषु महतीषु ᵛओषधीषु ᵛविक्षु प्रजासु च जेतव्यासु ᵛमन्युभिः कोपैरभिमानैर्वा ᵛसं ᵛहनन्त संगच्छन्ते ᵛअध तदानीं हे ᵛरुद्रियासः रुद्रपुत्रा हे ᵛमरुतः यूयं ᵛपृतनासु युद्धेषु ᵛअर्यः अरेः शत्रोः सकाशात् ᵛनः अस्माकं ᵛत्रातारः ᵛभूत रक्षका भवत ॥

भूरि चक्र मरुतः पित्र्याण्युक्थानि या वः शस्यन्ते पुरा चित् ।
मरुद्भिरुग्रः पृतनासु साळ्हा मरुद्भिरित्सनिता वाजमर्वा ॥ २३ ॥

भूरि । चक्र । मरुतः । पित्र्याणि । उक्थानि । या । वः । शस्यन्ते । पुरा । चित् ।
मरुत्ऽभिः । उग्रः । पृतनासु । साळ्हा । मरुत्ऽभिः । इत् । सनिता । वाजम् । अर्वा ॥२३॥

हे ᵛमरुतः यूयं ᵛभूरि भूरीणि बहूनि ᵛपित्र्याणि अस्मत्पितृसंबन्धीनि धनदानादीनि कर्माणि ᵛचक्र कृतवन्तो भवत। ᵛपुरा ᵛचित् पूर्वकालेऽपि ᵛवः युष्माकम् ᵛउक्थानि प्रशस्यानि यानि कर्माणि प्रशस्यन्ते प्रख्यायन्ते तानि चक्रेति संबन्धः। ᵛउग्रः ओजस्वी ᵛपृतनासु युद्धेषु ᵛमरुद्भिः युष्माभिर्हेतुभिः ᵛसाळ्हा शत्रूणामभिभविता भवति। ᵛमरुद्भिरित् मरुद्भिर्युष्माभिरेव हेतुभिः ᵛअर्वा स्तोत्रैरभिगन्ता ᵛवाजम् अन्नं ᵛसनिता संभक्ता भवति। यद्वा अर्वाश्वो वाजं युद्धं सनिता भवति ॥

अस्मे वीरो मरुतः शुष्म्यस्तु जनानां यो असुरो विधर्ता ।
अपो येन सुक्षितये तरेमाधि स्वमोको अभि वः स्याम ॥ २४ ॥

---

१. घ–कामानां वर्षितारो ।

अस्मे इति । वीरः । मरुतः । शुष्मी । अस्तु । जनानाम् । यः । असुरः । विऽधर्ता ।
अपः । येन । सुऽक्षितये । तरेम । अधं । स्वम् । ओकः । अभि । वः । स्याम ॥ २४ ॥

हे [v]मरुतः [v]अस्मे अस्माकं [v]वीरः पुत्रः [v]शुष्मी [v]अस्तु बलवान् भवतु। [v]असुरः प्रज्ञावान्[1] [v]यः [v]जनानां शत्रूणां [v]विधर्ता विधारकः। [v]येन पुत्रेण वयं [v]सुक्षितये सुष्ठु निवासाय [v]अपः आप्नुवतः शत्रून् [v]तरेम हिंसेम। स पुत्रो बलवानस्विति पूर्वेणान्वयः। [v]अध अपि च [v]वः युष्मदीया वयं [v]स्वमोकः आत्मीयं स्थानम् [v]अभि [v]स्याम आतिष्ठेम ॥

तन्न इन्द्रो वरुणो मित्रो अग्निरापः ओषधीर्वनिनो जुषन्त ।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥ २५ ॥

तत् । नः । इन्द्रः । वरुणः । मित्रः । अग्निः । आपः । ओषधीः । वनिनः । जुषन्त ।
शर्मन् । स्याम । मरुताम् । उपऽस्थे । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ २५ ॥

पूर्वं व्याख्यातेयम्। अक्षरार्थस्तु। इन्द्रादयो देवा अस्मदीयं स्तोत्रं सेवन्ताम्। मरुतामुपस्थाने वर्तमाना वयं सुखे स्याम। हे मरुतः यूयं सर्वदास्मानविनाशैः पालयत ॥ ॥ २६ ॥

'मध्वो वः' इति सप्तर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मरुद्देवताकम्। 'मध्वः सप्त' इत्यनुक्रान्तम्। दशरात्रे षष्ठेऽहन्याग्निमारुत इदं मारुतनिविद्धानम्। सूत्रितं च–'मध्वो वो नाम स प्रत्नथेत्याग्निमारुतम्' (आश्व. श्रौ. ८. ८) इति ॥

मध्वो वो नाम मारुतं यजत्राः प्र यज्ञेषु शवसा मदन्ति ।
ये रेजयन्ति रोदसी चिदुर्वी पिन्वन्त्युत्सं यदयासुरुग्राः ॥ १ ॥

मध्वः । वः । नाम । मारुतम् । यजत्राः । प्र । यज्ञेषु । शवसा । मदन्ति ।
ये । रेजयन्ति । रोदसी इति । चित् । उर्वी इति । पिन्वन्ति । उत्सम् । यत् । अयासुः । उग्राः ॥ १ ॥

हे [v]यजत्राः यजनीया मरुतः [v]वः युष्मदीयं [v]मारुतं मरुत्संबन्धि [v]नाम नामधेयं [v]मध्वः मधवो मादयितारः स्तोतारः [v]यज्ञेषु यागेषु [v]शवसा बलेन [v]प्र [v]मदन्ति प्रकर्षेण स्तुवन्ति। उच्चैः स्तुवन्तीत्यर्थः। [v]ये मरुतः [v]उर्वी विस्तीर्णे [v]रोदसी [v]चित् द्यावापृथिव्यावपि [v]रेजयन्ति कम्पयन्ति किंच [v]उत्सं मेघं [v]पिन्वन्ति वर्षयन्ति [v]उग्राः उद्गूर्णाः[2] [v]यत् ये मरुतः [v]अयासुः यान्ति सर्वत्र गच्छन्ति। तेषां मरुतां युष्माकं नाम प्र मदन्तीति पूर्वेणान्वयः ॥

निचेतारो हि मरुतो गृणन्तं प्रणेतारो यजमानस्य मन्म ।
अस्माकमद्य विदथेषु बर्हिरा वीतये सदत पिप्रियाणाः ॥ २ ॥

निऽचेतारः । हि । मरुतः । गृणन्तम् । प्रऽनेतारः । यजमानस्य । मन्म ।
अस्माकम् । अद्य । विदथेषु । बर्हिः । आ । वीतये । सदत । पिप्रियाणाः ॥ २ ॥

ये [v]मरुतः [v]गृणन्तं स्तुवन्तं जनं [v]निचेतारो [v]हि मृगयमाणा भवन्ति खलु अपि च [v]यजमानस्य [v]मन्म अभिमतं कामं [v]प्रणेतारः च भवन्ति। अपरोऽर्धर्चः प्रत्यक्षकृतः। हे मरुतः

१. ख-घ-ञ-न-भ–प्रजावान्। २. ख–उद्गूर्णबलाः।

यूयं vपिप्रियाणाः प्रीयमाणाः सन्तः vअद्य अस्मिन् दिवसे vअस्माकं vविदथेषु यज्ञेषु vपीतये सोमस्य भक्षणाय vबर्हिः[1] बर्हिषि कुशमये vआ vसदत आसीदत उपविशत ॥

नैतावदन्ये मरुतो यथेमे भ्राजन्ते रुक्मैरायुधैस्तनूभिः ।
आ रोदसी विश्वपिशः पिशानाः समानमञ्जिमञ्जते शुभे कम् ॥ ३ ॥

न । एतावत् । अन्ये । मरुतः । यथा । इमे । भ्राजन्ते । रुक्मैः । आयुधैः । तनूभिः ।
आ । रोदसी इति । विश्वऽपिशः । पिशानाः । समानम् । अञ्जि । अञ्जते । शुभे । कम् ॥३॥

vइमे ईदृशाः vमरुतः vयथा यत्परिमाणं धनादिकं ददति vअन्ये मरुद्व्यतिरिक्ता देवाः vएतावत् धनादिकं vन दधुरित्यर्थः । ते च vरुक्मैः रोचमानैराभरणैः vआयुधैः स्वकीयास्त्रैः vतनूभिः आत्मीयैः केवलैरङ्गैश्च vभ्राजन्ते सर्वदा भासन्ते । कश्चिदेकवाक्यतामाह । यथेमे मरुतो रुक्मादिभिर्भ्राजन्ते नैतावदेतद्व्यतिरिक्ता भ्राजन्त इति । अपि च vरोदसी द्यावापृथिव्यौ vपिशानाः प्रकाशयन्तः vविश्वपिशः व्याप्तदीप्तय एवंभूताः मरुतः vशुभे शोभायै[2] vसमानं सदृशरूपम् vअञ्जि आभरणम् vआ vअञ्जते स्वकीयावयवेष्वभिव्यक्तीकुर्वन्ति । vकम् इति पूरणः ॥

ऋधक्सा वो मरुतो दिद्युदस्तु यद्व आगः पुरुषता कराम ।
मा वस्तस्यामपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश्चनिष्ठा ॥ ४ ॥

ऋधक् । सा । वः । मरुतः । दिद्युत् । अस्तु । यत् । वः । आगः । पुरुषता । कराम ।
मा । वः । तस्याम् । अपि । भूम । यजत्राः । अस्मे इति । वः । अस्तु । सुऽमतिः । चनिष्ठा ॥४॥

हे vमरुतः vवः युष्मदीया vसा प्रसिद्धा vदिद्युत् हेतिः vऋधक् vअस्तु अस्मत्तः पृथग्भवतु । vयत् यद्यपि वयं vवः युष्माकम् vआगः अपराधं vपुरुषता पुरुषतया मनुष्यत्वेन vकराम कुर्याम । मनुष्याणां हि प्रमादः सुलभ इत्यर्थः । हे vयजत्राः यजनीया मरुतः vवः युष्मदीयायां vतस्यां दिद्युति vअपि[3] ईषदपि vमा vभूम । vचनिष्ठा अन्नवत्तमा । अतिशयेनान्नप्रदेत्यर्थः । vवः युष्मदीया vसुमतिः अनुग्रहबुद्धिः vअस्मे अस्मासु vअस्तु ॥

कृते चिदत्र मरुतो रणन्तानवद्यासः शुचयः पावकाः ।
प्र णोऽवत सुमतिभिर्यजत्राः प्र वाजेभिस्तिरत पुष्यसे नः ॥ ५ ॥

कृते । चित् । अत्र । मरुतः । रणन्त । अनवद्यासः । शुचयः । पावकाः ।
प्र । नः । अवत । सुमतिऽभिः । यजत्राः । प्र । वाजेभिः । तिरत । पुष्यसे । नः ॥ ५ ॥

vअत्र अस्मिन् vकृते vचित् अस्मदीये यज्ञकर्मण्येव vमरुतो vरणन्त रमन्ताम् । कीदृशा मरुतः । vअनवद्यासः अनिन्दिताः vशुचयः दीप्तियुक्ताः vपावकाः शोधका एवंभूता इति । किंच हे मरुतः vयजत्राः यजनीया यूयं vनः अस्मान् vसुमतिभिः अनुग्रहबुद्धिभिः सुष्टुतिभिर्हेतुभिर्वा vप्र vअवत प्रकर्षेण पालयत । तथा vनः अस्मान् vवाजेभिः वाजैरन्नैः vपुष्यसे पोषार्थं vप्र vतिरत प्रवर्धयत ॥

---

१. ख-ङ्ग-त-न-भ-श–‘ बर्हिः ’ नास्ति । २. ख-श–शोभनायै । ३. त–‘ अपि ’ नास्ति ।

उत स्तुतासो मरुतो व्यन्तु विश्वेभिर्नामभिर्नरो हवींषि ॥
ददात नो अमृतस्य प्रजायै जिगुत रायः सूनृता मघानि ॥ ६ ॥

उत । स्तुतासः । मरुतः । व्यन्तु । विश्वेभिः । नामऽभिः । नरः । हवींषि ।
ददात । नः । अमृतस्य । प्रऽजायै । जिगुत । रायः । सूनृता । मघानि ॥ ६ ॥

vउत अपि च vस्तुतासः एवमस्माभिः स्तुताः vमरुतः vहवींषि vव्यन्तु भक्षयन्तु । कीदृशाः । vविश्वेभिः विश्वैः vनामभिः उदकैः सहिताः vनरः नेतारः । शेषः प्रत्यक्षस्तुतः[1] । हे मरुतः vनः अस्मदीयायै vप्रजायै संततये vअमृतस्य अमृतमुदकं vददात दत्त । तथा हविषो दातुर्यजमानस्य vसूनृता सूनृतानि सुष्ठु नृत्यन्ति शोभनयोग्यानि[2] vमघानि धनानि vजिगुत उद्गिरत प्रयच्छतेत्यर्थः ॥

आ स्तुतासो मरुतो विश्व ऊती अच्छा सूरीन्त्सर्वताता जिगात ।
ये नस्त्मना शतिनो वर्धयन्ति यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

आ । स्तुतासः । मरुतः । विश्वे । ऊती । अच्छ । सूरीन् । सर्वऽताता । जिगात ।
ये । नः । त्मना । शतिनः । वर्धयन्ति । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

हे vमरुतः vस्तुतासः एवमस्माभिः स्तुताः vविश्वे सर्वे यूयम् vऊती ऊत्या रक्षया सहिताः vसूरीन् स्तोतॄन् vअच्छ अभिलक्ष्य vसर्वताता सर्वतातौ यज्ञे vआ vजिगात आगच्छत । vये मरुतः vत्मना आत्मनैव vनः अस्मान् vशतिनः शतसंख्याकान् vवर्धयन्ति । यथा वयं पुत्रपौत्रादिभिः शतिनो भवेम तथा वर्धयन्तीत्यर्थः । ते यूयमा जिगातेति पूर्वेण संबन्धः । एवंभूता मरुतः यूयं सर्वदा अस्मान् पालयत ॥ ॥ २७ ॥

' प्र साकमुक्षे ' इति षड्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मरुद्देवताकम् । अनुक्रान्तं च—' प्र साकमुक्षे षट् ' इति । गतो विनियोगः ॥

प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस्तुविष्मान् ।
उत क्षोदन्ति रोदसी महित्वा नक्षन्ते नाकं निर्ऋतेरवंशात् ॥ १ ॥

प्र । साकम्ऽउक्षे । अर्चत । गणाय । यः । दैव्यस्य । धाम्नः । तुविष्मान् ।
उत । क्षोदन्ति । रोदसी इति । महिऽत्वा । नक्षन्ते । नाकम् । निःऽऋतेः । अवंशात् ॥ १ ॥

हे स्तोतारो यूयं vसाकमुक्षे संततं वर्षित्रे vगणाय मरुत्समूहाय vप्र vअर्चत स्तोत्रं प्रोच्चारयत । vयः मरुद्गणः vदैव्यस्य देवसंबन्धिनः vधाम्नः स्वर्गाख्यस्य स्थानस्य vतुविष्मान् वृद्धिमान् भवति । सर्वेभ्यो देवेभ्यः प्रवृद्ध इत्यर्थः । तस्मै[3] गणायेति पूर्वेण संबन्धः । vउत अपि च मरुतः vमहित्वा स्वकीयेन महत्त्वेन सहिताः vरोदसी द्यावापृथिव्यौ vक्षोदन्ति भञ्जन्ति । तथा vनिर्ऋतेः भूमेः vअवंशात् अन्तरिक्षाच्च vनाकं स्वर्गं vनक्षन्ते व्याप्नुवन्ति ॥

---

१. घ–प्रत्यक्षः; ज्ञ–प्रत्यक्षकृतः; ञ्ञ–प्रत्यक्षस्तुतिः; भ– प्रत्यक्षः स्तुतः । २. त–शोभनयोगानि । ३. त–अस्मै ।

जनूश्चिद्वो मरुतस्त्वेष्येण भीमासस्तुविमन्यवोऽयासः ।
प्र ये महोभिरोजसोत सन्ति विश्वो वो यामन्भयते स्वर्दृक् ॥ २ ॥

जनूः । चित् । वः । मरुतः । त्वेष्येण । भीमासः । तुविऽमन्यवः । अयासः ।
प्र । ये । महःऽभिः । ओजसा । उत । सन्ति । विश्वः । वः । यामन् । भयते । स्वःऽदृक् ॥२॥

हे vभीमासः भीमाः vतुविमन्यवः प्रवृद्धमतयः vअयासः गन्तार इति त्रीणि संबोधनानि। एवंभूता हे vमरुतः vवः युष्माकं vजनूः जन्म vत्वेष्येण दीप्तेन रुद्रेण बभूवेति शेषः। vउत अपि च vये मरुतः vमहोभिः तेजोभिः vओजसा बलेन च vप्र vसन्ति प्रभवन्ति तेषां vवः युष्माकं vयामन् यामनि गमने vविश्वः vस्वर्दृक् सूर्यस्य द्रष्टा सर्वो जीवसमूहः। यद्वा। स्वरन्तरिक्षम्। तत् पश्यतीति वृक्षः स्वर्दृक्। सर्वदोत्तिष्ठन्नित्यर्थः। vभयते बिभेति ॥

बृहद्वयो मघवद्भ्यो दधातु जुजोषन्निन्मरुतः सुष्टुतिं नः ।
गतो नाध्वा वि तिराति जन्तुं प्र णः स्पार्हाभिरूतिभिस्तिरेत ॥ ३ ॥

बृहत् । वयः । मघवत्ऽभ्यः । दधात । जुजोषन् । इत् । मरुतः । सुऽस्तुतिम् । नः ।
गतः । न । अध्वा । वि । तिराति । जन्तुम् । प्र । नः । स्पार्हाभिः । ऊतिऽभिः । तिरेत ॥३॥

हे vमरुतः यूयं vमघवद्भ्यः हविर्लक्षणान्नवद्भ्योऽस्मभ्यं vबृहत् महत् vवयः अन्नं vदधात प्रयच्छत। vनः अस्मदीयां vसुष्टुतिं शोभनं स्तोत्रं vजुजोषन्नित् सेवन्तामेव। vगतः मरुद्भिः प्राप्तः vअध्वा मार्गः vजन्तुं प्राणिनं vन vवि vतिराति नाहन्ति। उदकेनाप्यायययत्येव। यद्वा। वितिरतिर्वर्धनार्थः। नेति चार्थे। मरुद्भिर्गतो मार्गश्च जन्तुं वर्धयति। तथा vनः अस्मान् vस्पार्हाभिः स्पृहणीयाभिः vऊतिभिः रक्षाभिः vप्र vतिरेत प्रवर्धयते ॥

युष्मोतो विप्रो मरुतः शतस्वी युष्मोतो अर्वा सहुरिः सहस्री ।
युष्मोतः सम्राळुत हन्ति वृत्रं प्र तद्वो अस्तु धूतयो देष्णम् ॥ ४ ॥

युष्माऽऊतः । विप्रः । मरुतः । शतस्वी । युष्माऽऊतः । अर्वा । सहुरिः । सहस्री ।
युष्माऽऊतः । सम्ऽराट् । उत । हन्ति । वृत्रम् । प्र । तत् । वः । अस्तु । धूतयः । देष्णम् ॥४॥

हे vमरुतः vयुष्मोतः युष्माभी रक्षितः vविप्रः स्तोता vशतस्वी शतसंख्योपेतधनवान् भवति। vयुष्मोतः युष्माभी रक्षितः vअर्वा अभिगन्ता vसहुरिः शत्रूणामभिभविता स्तोता vसहस्री सहस्रधनवान् भवति। vयुष्मोतः युष्माभी रक्षितः vसम्राट् साम्राज्ययुक्तो भवति। vउत अपि च vवृत्रं शत्रुं vहन्ति। युष्मद्रक्षको हिनस्ति। हे vधूतयः कम्पयितारो मरुतः vवः युष्माभिर्दत्तं vतत् प्रसिद्धं vदेष्णं धनं vप्र vअस्तु प्रभूतं भवतु ॥

ताँ आ रुद्रस्य मीळ्हुषो विवासे कुविन्नंसन्ते मरुतः पुनर्नः ।
यत्सस्वर्तो जिहीळिरे यदाविरव तदेन ईमहे तुराणाम् ॥ ५ ॥

तान् । आ । रुद्रस्य । मीळ्हुषः । विवासे । कुवित् । नंसन्ते । मरुतः । पुनः । नः ।
यत् । सस्वर्तो । जिहीळिरे । यत् । आविः । अव । तत् । एनः । ईमहे । तुराणाम् ॥ ५ ॥

vमीळ्हुषः कामानां वर्षितुः vरुद्रस्य ईश्वरस्य पुत्रान् vतान् मरुतः vआ vविवासे अहं होता[1] परिचरामि । ते vमरुतः vनः अस्मभ्यं vकुवित् बहुकृत्वः vपुनः भूयः vनंसन्ते नमन्ताम् । अभिमुखीभवन्तु । कुविच्छब्देनैव पुनःशब्दार्थस्य लब्धत्वात् पुनःशब्दग्रहणं किमर्थम् । आदरार्थम् । vसस्वर्ता अन्तर्हितेनाप्रकाशेन vयत् येन एनसा vजिहीळिरे मरुतः क्रुध्येयुः vआविः प्रकाशेन vयत् येनैनसा च जिहीळिरे vतुराणां क्षिप्राणां मरुतां संबन्धि vतत् उभयम् vएनः अपराधम् vअव vईमहे स्तोत्रेण वयमपनयामः ॥

प्र सा वाचि सुष्टुतिर्मघोनामिदं सूक्तं मरुतो जुषन्त ।
आराच्चिद्द्वेषो वृषणो युयोत यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

प्र । सा । वाचि । सुऽस्तुतिः । मघोनाम् । इदम् । सुऽउक्तम् । मरुतः । जुषन्त ।
आरात् । चित् । द्वेषः । वृषणः । युयोत । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

vमघोनां धनवतां मरुतां संबन्धिनी vसुष्टुतिः था शोभना स्तुतिरस्मिन् सूक्ते कृता vसा स्तुतिरस्माभिः vप्र vवाचि प्रोक्तासीत् । vमरुतः vइदम् इदम्भूतं vसूक्तं vजुषन्त सेवन्ताम् । हे vवृषणः कामानां वर्षितारः यूयं vद्वेषः द्वेषांसि शत्रून् vआराच्चित् दूरादेव vयुयोत अस्मत्तः पृथक्कुरुत । vयूयं vनः अस्मान् vस्वस्तिभिः सर्वदा रक्षत ॥ ॥ २८ ॥

'य त्रायध्वे' इति द्वादशर्चं चतुर्थं सूक्तम् । अत्रेयमनुक्रमणिका—'यं त्रायध्वे द्वादश त्रिप्रगाथादि नवम्याद्यास्तिस्रो गायत्र्योऽन्त्यानुष्टुब्द्वौ मृत्युविमोचनी' इति । आद्यातृतीयापञ्चमेभ्यो बृहत्यो द्वितीयाचतुर्थीषष्ठयः सतोबृहत्यः सप्तम्यष्टम्यावनुक्तत्वात् त्रिष्टुभौ नवमीदशम्येकादश्यो गायत्र्यः । द्वादश्यनुष्टुप् सा च रुद्रदेवताका । शिष्टा मारुत्यः । सूक्तविनियोगो लैङ्गिकः ॥

यं त्रायध्व इदमिदं देवासो यं च नयथ ।
तस्मा अग्ने वरुण मित्रार्यमन्मरुतः शर्म यच्छत ॥ १ ॥

यम् । त्रायध्वे । इदम्ऽइदम् । देवासः । यम् । च । नयथ ।
तस्मै । अग्ने । वरुण । मित्र । अर्यमन् । मरुतः । शर्म । यच्छत ॥ १ ॥

हे vदेवासः देवाः vइदमिदम् इतो भयहेतोः vयं स्तोतारं vत्रायध्वे पालयध्वे । vयं vच स्तोतारं vनयथ सन्मार्गं प्रापयथ । हे vअग्ने vवरुण vमित्र vअर्यमन् हे vमरुतः एवंभूता हे देवाः vतस्मै स्तोत्रे vशर्म सुखं vयच्छत दत्त ॥

युष्माकं देवा अवसाहनि प्रिय ईजानस्तरति द्विषः ।
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ॥ २ ॥

युष्माकम् । देवाः । अवसा । अहनि । प्रिये । ईजानः । तरति । द्विषः ।
प्र । सः । क्षयम् । तिरते । वि । महीः । इषः । यः । वः । वराय । दाशति ॥ २ ॥

हे vदेवाः vयुष्माकं युष्मदीयेन vअवसा रक्षणेन vप्रिये vअहनि सर्वेषां देवानां प्रियभूते सुत्याभिधाने दिवसे vईजानः इष्टवान् जनः vद्विषः शत्रून् vतरति आक्रामति । vसः यजमानः vक्षयं स्वकीयं निवासं vप्र vतिरते प्रवर्धयति । vयः यजमानः vवः युष्मभ्यं vमहीः

---

१. य–स्तोता ।

महान्ति ᵛइषः हविर्लक्षणान्यन्नानि ᵛवराय निवारणाय[1] यूयं नान्यत्र गच्छत अस्मदीयान्येव हवींषि स्वीकुरुतेति निरोधनं कर्तुं ᵛवि ᵛदाशति विशेषेण ददाति। अत एव स स्वकीयं निवासं वर्धयतीत्यर्थः ॥

नहि वश्चरमं चन वसिष्ठः परिमंसते ।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबत कामिनः ॥ ३ ॥

नहि । वः । चरमम् । चन । वसिष्ठः । परिऽमंसते ।
अस्माकम् । अद्य । मरुतः । सुते । सचा । विश्वे । पिबत । कामिनः ॥ ३ ॥

ᵛवसिष्ठः ऋषिः ᵛवः युष्माकं मध्ये ᵛचरमं ᵛचन अवरमपि ᵛनहि ᵛपरिमंसते वर्जयित्वा न स्तौति। किंतु सर्वानेव युष्मान् स्तौतीत्यर्थः। ᵛअद्य अस्मिन् दिने ᵛअस्माकम् अस्मदीये ᵛसुते सोमेऽभिषुते सति हे ᵛमरुतः ᵛकामिनः सोमं कामयमानाः ᵛविश्वे यूयं ᵛसचा संगत्य ᵛपिबत पानं कुरुत ॥

नहि वं ऊतिः पृतनासु मर्धति यस्मा अराध्वं नरः ।
अभि व आवर्त्सुमतिर्नवीयसी तूयं यात पिपीषवः ॥ ४ ॥

नहि । वः । ऊतिः । पृतनासु । मर्धति । यस्मै । अराध्वम् । नरः ।
अभि । वः । आ । अवर्त् । सुऽमतिः । नवीयसी । तूयम् । यात । पिपीषवः ॥ ४ ॥

हे मरुतः ᵛवः युष्मदीया ᵛऊतिः रक्षा ᵛपृतनासु युद्धेषु ᵛनहि ᵛमर्धति न खलु हिनस्ति। शत्रुभिः कृतां हिंसां न सहत इत्यर्थः। हे ᵛनरः नेतारः यूयं ᵛयस्मै[2] जनाय ᵛअराध्वं कामानदध्वं तं जनं न हिनस्तीति संबन्धः। ᵛनवीयसी नवतरा ᵛवः युष्मदीया ᵛसुमतिः अनुग्रहबुद्धिः ᵛअभि ᵛआवर्त् अस्मानभ्यावर्ततताम्। तथा हे ᵛपिपीषवः सोमपानकामाः यूयमपि ᵛतूयं क्षिप्रं ᵛयात आगच्छत ॥

ओ षु घृष्विराधसो यातनान्धांसि पीतये ।
इमा वो हव्या मरुतो ररे हि कं मो ष्व१न्यत्र गन्तन ॥ ५ ॥

ओ इति । सु । घृष्विऽराधसः । यातन । अन्धांसि । पीतये ।
इमा । वः । हव्या । मरुतः । ररे । हि । कम् । मो इति । सु । अन्यत्र । गन्तन ॥ ५ ॥

हे ᵛघृष्विराधसः परस्परघृष्टानि सुसंहतानि[3] राधांसि येषां ते हे मरुतः यूयम् ᵛअन्धांसि सोमलक्षणानि हवींषि ᵛपीतये भक्षणार्थं ᵛसु सुष्ठु ᵛओ ᵛयातन आयात। ᵛहि यस्मात् कारणात् हे ᵛमरुतः ᵛवः युष्मभ्यम् ᵛइमा इमानि ᵛहव्या हव्यानि हवींषि ᵛररे अहं ददामि अतः कारणात् यूयम् ᵛअन्यत्र ᵛमो ᵛषु ᵛगन्तन मा गच्छत ॥

आ च नो बर्हिः सदतावितां च नः स्पार्हाणि दातवे वसु ।
अस्मेधन्तो मरुतः सोम्ये मधौ स्वाहेह मादयाध्वै ॥ ६ ॥

---

१. ख–वरणाय। २. ख-ङ्ग-त-न-भ-श–अस्मै। ३. त४-य–सुसंहितानि।

आ । च । नः । बर्हिः । सदत । अवित । च । नः । स्पार्हाणि । दातवे । वसु ।
अहेळन्तः । मरुतः । सोम्ये । मधौ । स्वाहा । इह । मादयाध्वै ॥ ६ ॥

हे मरुतः यूयं ᵛनः अस्मदीये ᵛबर्हिः कुशमये बर्हिषि ᵛआ ᵛसदत ᵛच उपविशत । ᵛस्पार्हाणि स्पृहणीयानि ᵛवसु वसूनि धनानि ᵛदातवे अस्मभ्यं दातुं ᵛनः अस्मान् ᵛअवित ᵛच आगच्छत च । हे ᵛमरुतः ᵛअहेळन्तः अहिंसन्तो यूयम् ᵛइह अस्मिन् यज्ञे ᵛमधौ मदकरे ᵛसोम्ये सोमात्मके हविषि ᵛस्वाहा स्वाहाकारेण ᵛमादयाध्वै मादयध्वं माद्यत ॥ ॥ २९ ॥

सस्वश्चिद्धि तन्वः शुम्भमाना आ हंसासो नीलपृष्ठा अपप्तन् ।
विश्वं शर्धो अभितो मा नि षेद नरो न रण्वाः सवने मदन्तः ॥ ७ ॥

सस्वरिति । चित् । हि । तन्वः । शुम्भमानाः । आ । हंसासः । नीलऽपृष्ठाः । अपप्तन् ।
विश्वम् । शर्धः । अभितः । मा । नि । सेद । नरः । न । रण्वाः । सवने । मदन्तः ॥ ७ ॥

ᵛसस्वः अन्तर्हिता मरुतः ᵛतन्वः स्वकीयान्यङ्गानि ᵛशुम्भमानाः अलंकरणैः शोभयन्तो मरुतः ᵛनीलपृष्ठाः असितवर्णाः ᵛहंसासः हंसा इव ᵛअपप्तन् आपतन्तु आगच्छन्तु । ᵛविश्वं ᵛशर्धः व्यासो मरुद्गणः ᵛमा माम् ᵛअभितः समन्तात् ᵛनि ᵛषेद निषीदतु । तत्र दृष्टान्तः । ᵛसवने अस्मदीये यज्ञे ᵛमदन्तः हृष्यन्तः ᵛरण्वाः रमणीयाः ᵛनरो ᵛन मनुष्या इव तद्वत् ॥

साकमेधेषु ' मरुद्भ्यः सांतपनेभ्यः ' इत्यस्य ' यो नो मरुतः ' इति पूर्वानुवाक्या ' सांतपना इदम् ' इति याज्या । तथा च सूत्रितं—' सांतपना इदं हविर्यो नो मरुतो अभि दुर्हृणायुः ' (आश्व. श्रौ. २. १८) इति ॥

यो नो मरुतो अभि दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति ।
द्रुहः पाशान्प्रति स मुचीष्ट तपिष्ठेन हन्मना हन्तना तम् ॥ ८ ॥

यः । नः । मरुतः । अभि । दुःऽहृणायुः । तिरः । चित्तानि । वसवः । जिघांसति ।
द्रुहः । पाशान् । प्रति । सः । मुचीष्ट । तपिष्ठेन । हन्मना । हन्तन । तम् ॥ ८ ॥

हे ᵛवसवः प्रशस्या हे ᵛमरुतः ᵛनः अस्मदीयानि ᵛचित्तानि ᵛदुर्हृणायुः अशोभनं क्रुध्यन् ᵛतिरः सर्वैस्तिरस्कृतः ᵛयः जनः ᵛअभि ᵛजिघांसति आभिमुख्येन हन्तुमिच्छति ᵛसः जनः ᵛद्रुहः पापानां द्रोग्धुर्वरुणस्य ᵛपाशान् अस्मासु ᵛप्रति ᵛस ᵛमुचीष्ट बध्नीयात् । यूयं ᵛतं जनं ᵛतपिष्ठेन तप्ततमेन[1] ᵛहन्मना हननसाधनेनायुधेन ᵛहन्तन हत हिंस्त ॥

सांतपना इदं हविर्मरुतस्तज्जुजुष्टन । युष्माकोती रिशादसः ॥ ९ ॥

साम्ऽतपनाः । इदम् । हविः । मरुतः । तत् । जुजुष्टन । युष्माकं । ऊती । रिशादसः ॥९॥

ᵛसांतपनाः शत्रूणां संतापका हे ᵛमरुतः ᵛइदं प्रत्यक्षणोपलभ्यमानं ᵛहविः युष्मभ्यं कल्पितमिति शेषः । हे ᵛरिशादसः रिशतां हिंसतामसितारो रिशानामत्तारो वा यूयं ᵛयुष्माक युष्माकम् ᵛऊती ऊत्या रक्षया ᵛतत् तादृशं हविः ᵛजुजुष्टन सेवध्वम् ॥

---

१. ख-ञ-त२-श–तप्ततमेन ।

'गृहमेधासः' इति गृहमेधीयस्य हविषोऽनुवाक्या। सूत्रितं च—'गृहमेधास आगत प्र द्युम्ना व ईरते महांसि' (आश्व. श्रौ. २. १८) इति॥

गृहमेधास आ गत मरुतो माप भूतन। युष्माकोती सुदानवः॥ १०॥

गृहऽमेधासः। आ। गत। मरुतः। मा। अप। भूतन। युष्माक। ऊती। सुऽदानवः॥१०॥

vगृहमेधासः गृहे क्रियमाणो यज्ञो येषां ते vसुदानवः शोभनदाना हे vमरुतः यूयं vयुष्माक युष्माकम् vऊती ऊत्या रक्षया युक्ताः vआ vगत अस्मदीयं यज्ञं प्रत्यागच्छत। हे मरुतः vमाप vभूतन अपगता मा भवत। 'भू प्राप्तौ' इति धातुः॥

वैश्वदेवे पर्वणि मारुतस्यानुवाक्या 'इहेह वः' इत्येषा। सूत्रितं च—इहेह वः स्वतवसः प्र चित्रमर्कं गृणते तुराय' (आश्व. श्रौ. २. १६) इति॥

इहेह वः स्वतवसः कवयः सूर्यत्वचः। यज्ञं मरुत आ वृणे॥ ११॥

इहऽइह। वः। स्वऽतवसः। कवयः। सूर्यऽत्वचः। यज्ञम्। मरुतः। आ। वृणे॥ ११॥

हे vस्वतवसः स्वायत्तबलाः स्वयं प्रवृद्धा वा हे vकवयः क्रान्तदर्शिनः vसूर्यत्वचः सूर्यवर्णा एवंभूता हे vमरुतः यूयम् vइहेह इहैवास्मदीयं vयज्ञम् vआ vवृणे आभजामि कल्पयामि॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥ १२॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥ १२॥

अत्र शौनकः—'त्रिरात्रं नियतोऽपोष्य श्रपयेत्पायसं चरुम्। तेनाहुतिशतं पूर्णं जुहुयाच्छंसितव्रतः॥ समुद्दिश्य महादेवं त्र्यम्बकं त्र्यम्बकेत्यृचा। एतत्पर्वशतं कृत्वा जीवेद्वर्षशतं सुखी' (ऋग्वि. २. ३१४–१५)॥ [त्र्याणां ब्रह्मविष्णुरुद्राणामम्बकं पितरं vयजामहे इति शिष्यसमाहितो वसिष्ठो ब्रवीति। किंविशिष्टमित्यत आह। vसुगन्धिं प्रसारितपुण्यकीर्तिम्। पुनः किंविशिष्टम्। vपुष्टिवर्धनं जगद्बीजम्। उरुशक्तिमित्यर्थः। उपासकस्य वर्धनम्। अणिमादिशक्तिवर्धनम्। अतस्त्वत्प्रसादादेव vमृत्योः मरणात् संसाराद्वा vमुक्षीय मोचय। यथा बन्धनादुर्वारुकं कर्कटीफलं मुच्यते तद्वन्मरणात् संसाराद्वा मोचय। किं मर्यादीकृत्य। vआमृतात्। सायुज्यतामोक्षपर्यन्तमित्यर्थः। अथ तैत्तिरीयभाष्ये(तै. सं. १.८. ६. २)—"शोभनः शरीरगन्धः पुण्यगन्धो वा यस्यासौ सुगन्धिः। 'यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाति' (तै. आ. १०. ९) इति श्रुतेः। पुष्टिं शरीरधनादिविषयां वर्धयतीति पुष्टिवर्धनः। तादृशं त्र्यम्बकं यजामहे पूजयामः। लोके यथोर्वारुकफलानि बन्धनाद्गुन्तात् स्वयमेव मुच्यन्ते तद्वदहं त्र्यम्बकप्रसादेन मृत्योर्मुक्षीय मोचनयुक्तो भूयासम्। अमृताच्चिरजीवितात् स्वर्गादेर्वा मा मुक्षीय। चतुर्थपादार्थे मन्त्रस्य तात्पर्यातिशयं दर्शयति–'त्र्यम्बकं यजामह इत्याह मृत्योर्मुक्षीय मामृतादिति वावैतदाह' (तै.ब्रा. १. ६. १०.५) इति"॥] ॥३०॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पञ्चमाष्टके चतुर्थोऽध्यायः समाप्तः॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिल जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥
व्याख्याय निगमाभिज्ञः पञ्चमस्य चतुर्थकम्।
अध्यार्ध सायणाचार्यः पञ्चमं व्याकरोत्यथ॥

तत्र 'यदद्य सूर्य' इति द्वादशर्चं पञ्चमं सूक्तम्। अत्रानुक्रमणिका—'यदद्य मैत्रावरुणं तु वै सौर्याद्या' इति। मण्डलद्रष्टा वसिष्ठ ऋषिः। अनुक्तत्वात्त्रिष्टुप् छन्दः। 'तु वै' इत्युक्तत्वादेतदादीनि सप्त सूक्तानि मित्रावरुणदेवत्यानि आद्या सूर्यदेवत्या। विनियोगो लैङ्गिकः॥

यदद्य सूर्य ब्रवोऽनागा उद्यन्मित्राय वरुणाय सत्यम्।
वयं देवत्रादिते स्याम तव प्रियासो अर्यमन्गृणन्तः॥ १॥

यत्। अद्य। सूर्य। ब्रवः। अनागाः। उत्ऽयन्। मित्राय। वरुणाय। सत्यम्।
वयम्। देवऽत्रा। अदिते। स्याम। तव। प्रियासः। अर्यमन्। गृणन्तः॥ १॥

हे [v]सूर्य सर्वस्य प्रेरकैतन्नामक देव [v]उद्यन् उदयंस्त्वं [v]यत् यदि [v]अद्य अस्मिन्ननुष्ठानकाले अस्मान् [v]ब्रवः ब्रूयाः। किमिति। [v]अनागाः अनागस इति। एतेऽपापा इति यदि देवेषु मध्ये ब्रूयाः तर्हि [v]वयं हे [v]अदिते अदीन देव [v]देवत्रा देवेषु देवानां मध्ये [v]मित्राय [v]वरुणाय च [v]सत्यम् अवितथं [v]स्याम अनागसो भवेम। किंच हे [v]अर्यमन् दातः त्वां [v]गृणन्तः स्तुवन्तः [v]तव [v]प्रियासः प्रियाः स्याम त्वत्प्रेमविषया भवेम। यद्वा। उत्तरार्धं एकं वाक्यम्। हे अदिते हे अर्यमन् उक्तलक्षण देव वयं देवेषु मध्ये त्वां गृणन्तस्तवैव प्रियाः स्याम। यदि मां देवेष्वपापं ब्रूयास्तर्हि तैरयमनपराधीत्यनुगृहीतस्त्वां स्तुत्वा तव प्रियो भवेयमित्यर्थः॥

एष स्य मित्रावरुणा नृचक्षा उभे उदेति सूर्यो अभि ज्मन्।
विश्वस्य स्थातुर्जगतश्च गोपा ऋजु मर्तेषु वृजिना च पश्यन्॥ २॥

एषः। स्यः। मित्रावरुणा। नृऽचक्षाः। उभे इति। उत्। एति। सूर्यः। अभि। ज्मन्।
विश्वस्य। स्थातुः। जगतः। च। गोपाः। ऋजु। मर्तेषु। वृजिना। च। पश्यन्॥ २॥

हे [v]मित्रावरुणा [v]एषः पुरतो दृश्यमानः [v]स्यः सः सर्वैः स्तुत्यत्वेन प्रसिद्धः [v]नृचक्षाः[1] नृणां मनुष्याणां द्रष्टा[2] [v]सूर्यः [v]उभे द्यावापृथिव्यौ [v]अभि अभिलक्ष्य [v]उदेति [v]ज्मन् अन्तरिक्षे गच्छन्। स विशेष्यते। [v]विश्वस्य सर्वस्य [v]स्थातुः स्थावरस्य [v]जगतः जङ्गमस्य [v]च [v]गोपाः गोपायिता। किं कुर्वन्। [v]मर्तेषु मनुष्येषु स्थितानि[3] [v]ऋजु ऋजूनि सुकृतानि [v]वृजिना वृजिनानि पापानि [v]च [v]पश्यन्॥

अयुक्त सप्त हरितः सधस्थाद्या ईं वहन्ति सूर्यं घृताचीः।
धामानि मित्रावरुणा युवाकुः सं यो यूथेव जनिमानि चष्टे॥ ३॥

अयुक्त। सप्त। हरितः। सधऽस्थात्। याः। ईम्। वहन्ति। सूर्यम्। घृताचीः।
धामानि। मित्रावरुणा। युवाकुः। सम्। यः। यूथाऽइव। जनिमानि। चष्टे॥ ३॥

---

१. ख-ग्न-त-न-भ-श–'नृचक्षा.....द्रष्टा' नास्ति। २. ग्न-त२-३-४-न-श–स्विज्ञानि; त१–स्विन्ना।

हे vमित्रावरुणा मित्रावरुणौ युवयोरागमनाय vसधस्थात् सहस्थानादन्तरिक्षात् अन्तरिक्षे vसप्त सर्पणस्वभावान् एतत्संख्याकान् वा vहरितः हरिद्वर्णानश्वान् vअयुक्त युक्तवान् रथे। 'हरित आदित्यस्य' इति हि निरुक्तम्। vयाः हरितः vईम् एनम् vसूर्यं देवं vघृताचीः घृताञ्चना उदकवत्यः। उदकप्रदा इत्यर्थः। तादृश्यः सत्यो vवहन्ति ता अयुक्त। अथोदितः सन् vधामानि स्थानानि लोकान् vजनिमानि जन्मानि। जन्मभाजः प्राणिन इत्यर्थः। तांश्च vयुवाकुः युवां कामयमानः vयः देवः vसं vचष्टे सम्यक् पश्यति vयूथेव गोयूथानीव यूथपाः। स यथा सर्वं यूथं तदवान्तरगोव्यक्तिं च सम्यक् पश्यति तद्वल्लोकान् प्राणिनश्च पश्यति॥

उद्वां पृक्षासो मधुमन्तो अस्थुरा सूर्यो अरुहच्छुक्रमर्णः।
यस्मा आदित्या अध्वनो रदन्ति मित्रो अर्यमा वरुणः सजोषाः॥ ४॥

उत्। वाम्। पृक्षासः। मधुऽमन्तः। अस्थुः। आ। सूर्यः। अरुहत्। शुक्रम्। अर्णः।
यस्मै। आदित्याः। अध्वनः। रदन्ति। मित्रः। अर्यमा। वरुणः। सऽजोषाः॥ ४॥

हे मित्रावरुणौ vवां युवयोरर्थाय vपृक्षासः अन्नानि चरुपुरोडाशादीनि vमधुमन्तः माधुर्योपेतानि तत्साधनान्योषध्यादीनि वा vउत् vअस्थुः संपादितान्यासन्। vसूर्यः च vशुक्रं दीप्तम् vअर्णः अर्णवमन्तरिक्षम् vआ vअरुहत् आरोहति। vयस्मै सूर्याय तद्गमनार्थम् vआदित्याः अदितेः पुत्रा देवाः vअध्वनः मार्गान् vरदन्ति विलिखन्ति साधयन्ति। के ते। vमित्रः vअर्यमा vवरुणः च एते त्रयोऽपि देवाः सजोषसः समानप्रीतयः सन्तः। स देव आरुहदिति॥

इमे चेतारो अनृतस्य भूरेर्मित्रो अर्यमा वरुणो हि सन्ति।
इम ऋतस्य वावृधुर्दुरोणे शग्मासः पुत्रा अदितेरदब्धाः॥ ५॥

इमे। चेतारः। अनृतस्य। भूरेः। मित्रः। अर्यमा। वरुणः। हि। सन्ति।
इमे। ऋतस्य। ववृधुः। दुरोणे। शग्मासः। पुत्राः। अदितेः। अदब्धाः॥ ५॥

vइमे vमित्रः vअर्यमा vवरुणः च त्रयोऽपि vअनृतस्य पापस्य vभूरेः प्रभूतस्य vचेतारः हन्तारः vसन्ति भवन्ति vहि। vइमे मित्रादयः vऋतस्य यज्ञस्य vदुरोणे गृहे vववृधुः वर्धन्ते हविषा स्तुत्या च। कीदृशास्ते। vशग्मासः सुखकराः vअदितेः vपुत्राः vअदब्धाः अहिंसिताः॥

इमे मित्रो वरुणो दुळभासोऽचेतसं चिच्चितयन्ति दक्षैः।
अपि क्रतुं सुचेतसं वतन्तस्तिरश्चिदंहः सुपथा नयन्ति॥ ६॥

इमे। मित्रः। वरुणः। दुःऽदभासः। अचेतसम्। चित्। चितयन्ति। दक्षैः।
अपि। क्रतुम्। सुऽचेतसम्। वतन्तः। तिरः। चित्। अंहः। सुऽपथा। नयन्ति॥ ६॥

vइमे आदित्याः vमित्रः vवरुणः च। एतद्द्वयमर्थम्णोऽप्युपलक्षणम्। एते vदूळभासः दुर्दभाः अनभिभाव्याः vअचेतसं vचित् अप्रज्ञानमनुष्ठानविषयज्ञानरहितमपि vदक्षैः सामर्थ्यैः[1] vचितयन्ति। vअपि[1] vसुचेतसं प्रकृष्टज्ञानवन्तं[2] पुरुषं vक्रतुं कर्तारं कर्मानुष्ठानवन्तं vवतन्तः[3] गच्छन्तः vअंहः

१. ख-ङ्ग-त-न-भ-श–अपि क्रतुं; घ–सामर्थ्यैश्चितयंति। २. ङ्ग–प्रज्ञानवंतं; श–प्रकृतज्ञानवंतं। ३. ख-ङ्ग-त-न-भ-श–'वतन्तः' नास्ति।

दुष्कृतं vतिरश्चित् तिरो नयन्तोऽस्मान् vसुपथा शोभनेन मार्गेण vनयन्ति प्रापयन्त्यभिमतं पशं स्वर्गादिकं वा ॥ ॥ १ ॥

इमे दिवो अनिमिषा पृथिव्याश्चिकित्वांसो अचेतसं नयन्ति ।
प्रव्राजे चिन्नद्यो गाधमस्ति पारं नो अस्य विष्पितस्य पर्षन् ॥ ७ ॥

इमे । दिवः । अनिऽमिषा । पृथिव्याः । चिकित्वांसः । अचेतसम् । नयन्ति ।
प्रऽव्राजे । चित् । नद्यः । गाधम् । अस्ति । पारम् । नः । अस्य । विष्पितस्य । पर्षन् ॥७॥

vइमे मित्रादयः vदिवः द्युलोकस्य vपृथिव्याः च संबन्धिनः vअनिमिषा अनिमेषेण[1] सर्वदा 'चिकित्वांसः जानन्तः । कम् । vअचेतसम् अज्ञानम् । vनयन्ति प्रापयन्ति कर्माणि । vप्रव्राजे 'चित् प्रवणेऽप्यत्यन्तनिम्नेऽपि देशे vनद्यः नद्याः vगाधमस्ति भवति युष्मत्सामर्थ्यात् । ते महान्तः 'नः अस्माकम् vअस्य vविष्पितस्य व्याप्तितस्य(?) कर्मणः vपारं vपर्षन् पारयन्तु नयन्तु ॥

यद्गोपावददितिः शर्म भद्रं मित्रो यच्छन्ति वरुणः सुदासे ।
तस्मिन्ना तोकं तनयं दधाना मा कर्म देवहेळनं तुरासः ॥ ८ ॥

यत् । गोपावत् । अदितिः । शर्म । भद्रम् । मित्रः । यच्छन्ति । वरुणः । सुऽदासे ।
तस्मिन् । आ । तोकम् । तनयम् । दधानाः । मा । कर्म । देवऽहेळनम् । तुरासः ॥ ८ ॥

vयत् vशर्म सुखं गृहं वा vगोपावत् रक्षणोपेतं vभद्रं स्तुत्यम् vअदितिः अदीनोऽर्यादितिर्वा vमित्रः vवरुणः च एते त्रयो देवाः vसुदासे सुदानाय मह्यं vयच्छन्ति प्रयच्छन्ति 'तस्मिन् शर्मणि vतोकं पुत्रं vतनयं तत्पुत्रादिकम् । अथवा तनयशब्दोऽपत्यसामान्यवचनः । तोकं लघन्तं पुत्रम् vआ सर्वतः vदधानाः धारयन्तो वयं हे vतुरासः गमनाय त्वरमाणाः vदेवहेळनं देवानां मित्रादीनां कोपनं vमा vकर्म मा कार्ष्म ॥

अव वेदिं होत्राभिर्यजेत रिपुः काश्चिद्वरुणधृतः सः ।
परि द्वेषोभिरर्यमा वृणक्तूरुं सुदासे वृषणा उ लोकम् ॥ ९ ॥

अव । वेदिम् । होत्राभिः । यजेत । रिपुः । काः । चित् । वरुणऽधृतः । सः ।
परि । द्वेषःऽभिः । अर्यमा । वृणक्तु । उरुम् । सुऽदासे । वृषणौ । ऊँ इति । लोकम् ॥९॥

हे मित्रादयः vसः अस्मद्द्वेषी vवेदिं यागसाधनं vहोत्राभिः । वाङ्नामैतत् । वाग्रूपाभिः स्तुतिभिः गार्धम् vअव vयजेत । वेद्यां कर्माणि कुर्वन् देवान्न स्तुयादित्यर्थः । अवपूर्वो यजतिस्त्यागार्थः । र किं प्राप्नुयादिति तत्राह । vवरुणधृतः वरुणेन त्वया हिंसितः सः vकाश्चित् vरिपः हिंसाः राप्नुयादिति शेषः । अस्मांस्तु vअर्यमा देवः vद्वेषोभिः द्वेष्टृभ्यो रक्षःप्रभृतिभिः vपरि vवृणक्तु र्जयतु । vउरुं विस्तीर्णं vलोकं स्थानं vसुदासे शोभनदानाय मह्यं प्रयच्छतं हे vवृषणा वर्षकौ ामानां मित्रावरुणौ ॥

---

१. त—अनिमिषेण ।

सस्वश्चिद्धि समृतिस्त्वेष्यैषामपीच्येन सहसा सहन्ते ।
युष्मद्भिया वृषणो रेजमाना दक्षस्य चिन्महिना मृळता नः ॥ १० ॥

सस्वरिति । चित् । हि । सम्ऽऋतिः । त्वेषी । एषाम् । अपीच्येन । सहसा । सहन्ते ।
युष्मत् । भिया । वृषणः । रेजमानाः । दक्षस्य । चित् । महिना । मृळत । नः ॥ १० ॥

vएषां मित्रादीनां vसमृतिः संगतिः संहतिर्वा vसस्वः अन्तर्हिता निगूढा vत्वेषी दीप्ता च भवति । तादृशा एते vअपीच्येन । एतदप्यन्तर्हितनाम । निगूढेन vसहसा बलेन vसहन्ते अभिभवन्त्यस्मद्द्वेष्टॄन् । किंच हे vवृषणः अभिमतवर्षका मित्रादयः vयुष्मत् युष्मत्तः vभिया भीत्या vरेजमानाः कम्पमाना भवन्ति विरोधिनः । यस्मादेवं तस्मात् vदक्षस्य युष्माकं बलस्य vमहिना महिम्ना महत्त्वेन vनः अस्मभ्यं vमृळत उपदयां कुरुत ॥

यो ब्रह्मणे सुमतिमायजाते वाजस्य सातौ परमस्य रायः ।
सीक्षन्त मन्युं मघवानो अर्य उरु क्षयाय चक्रिरे सुधातु ॥ ११ ॥

यः । ब्रह्मणे । सुऽमतिम् । आऽयजाते । वाजस्य । सातौ । परमस्य । रायः ।
सीक्षन्त । मन्युम् । मघऽवानः । अर्यः । उरु । क्षयाय । चक्रिरे । सुऽधातु ॥ ११ ॥

vयः यजमानः vब्रह्मणे परिवृढस्वकर्मणे युष्मत्स्तोत्ररूपाय vसुमतिं शोभनां बुद्धिम् vआयजाते आयजते । यजतिरत्र दाने । ददाति करोति । किमर्थम् । vवाजस्य अन्नस्य vसातौ दाने निमित्ते vपरमस्य उत्कृष्टस्य vरायः धनस्य च सातौ । तस्य vअर्यः । इरयति स्तुतीः प्रेरयतीत्यरिः स्तोता । vमन्युं[1] स्तोत्रं vमघवानः दानवन्तोऽर्यमादयः vसीक्षन्त सचन्ते[2] । सेवित्वा च तस्य vउरुक्षयाय विस्तीर्णनिवासाय vसुधातु सुधाम शोभनस्थानं vचक्रिरे कुर्वते ॥

इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि ।
विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ॥ १२ ॥

इयम् । देवा । पुरःऽहितिः । युवऽभ्याम् । यज्ञेषु । मित्रावरुणौ । अकारि ।
विश्वानि । दुःऽगा । पिपृतम् । तिरः । नः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १२ ॥

अनया स्तुतिमुपसंहरति । हे vदेवा देवौ vमित्रावरुणौ vयुवभ्यां युवाभ्यां vयज्ञेषु vइयं vपुरोहितिः पुरस्क्रिया पूजा स्तुतिलक्षणा vअकारि कृताभूत् । तां सेवित्वा vविश्वानि सर्वाणि vदुर्गा दुःखेन गन्तव्यान्यापदः vतिरः तिरस्कुरुतम् । तथा कृत्वा vनः अस्मान् vपिपृतं पारयतम् । शिष्टो गतः ॥ ॥ २ ॥

' उद्वां चक्षुः ' इति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मैत्रावरुणम् । ' उद्वां सप्त ' इत्यनुक्रमणिका । विनियोगो लैङ्गिकः ॥

उद्वां चक्षुर्वरुण सुप्रतीकं देवयोरेति सूर्यस्ततन्वान् ।
अभि यो विश्वा भुवनानि चष्टे स मन्युं मर्त्येष्वा चिकेत ॥ १ ॥

---

१. ख-घ-त-न-भ-श-तासां मन्युं । २. ख-सच्यते; घ-सेवते; ङ-सेवत ।

उत्। वाम्। चक्षुः। वरुणा। सुऽप्रतीकम्। देवयोः। एति। सूर्यः। ततन्वान्।
अभि। यः। विश्वा। भुवनानि। चष्टे। सः। मन्युम्। मर्त्येषु। आ। चिकेत ॥ १ ॥

हे ᵛवरुणा मित्रावरुणौ ᵛदेवयोः द्योतमानयोः ᵛवां युवयोः ᵛचक्षुः प्रकाशकं तेजः ᵛसुप्रतीकं शोभनरूपमेवंरूपः ᵛसूर्यः ᵛततन्वान् तेजो विस्तारयन् ᵛउत् ᵛएति उद्गच्छति। अथोदितः ᵛयः देवः ᵛविश्वा सर्वाणि ᵛभुवनानि भूतजातानि ᵛअभि ᵛचष्टे अभिपश्यति ᵛसः देवः ᵛमर्त्येषु प्रवृत्तं ᵛमन्युं स्तोत्रं कर्म वा ᵛआ ᵛचिकेत आजानाति ॥

प्र वां स मित्रावरुणावृतावा विप्रो मन्मानि दीर्घश्रुदियर्ति ।
यस्य ब्रह्माणि सुक्रतू अवाथ आ यत्क्रत्वा न शरदः पृणैथे ॥ २ ॥

प्र। वाम्। सः। मित्रावरुणौ। ऋतऽवा। विप्रः। मन्मानि। दीर्घऽश्रुत्। इयर्ति।
यस्य। ब्रह्माणि। सुक्रतू इति सुऽक्रतू। अवाथः। आ। यत्। क्रत्वा। न। शरदः। पृणैथे इति ॥२॥

हे ᵛमित्रावरुणौ ᵛवां युवयोः ᵛमन्मानि मननीयानि स्तोत्राणि ᵛसः प्रसिद्धः ᵛविप्रः मेधावी ᵛऋतावा यज्ञवान् ᵛदीर्घश्रुत् चिरकालं श्रोता एवमुक्तलक्षणो वसिष्ठः ᵛइयर्ति प्रेरयति। ᵛयस्य ऋषेः ᵛब्रह्माणि परिवृढानि स्तोत्राणि हे ᵛसुक्रतू शोभनकर्माणौ ᵛअवाथः रक्षथः। ᵛयत् कर्म ᵛशरदः बहून् संवत्सरान् ᵛआ ᵛपृणैथे आपूरयेथे स उदियर्ति ॥

प्रोरोमित्रावरुणा पृथिव्याः प्र दिव ऋष्वाद्बृहतः सुदानू ।
स्पशो दधाथे ओषधीषु विक्ष्वृधग्यतो अनिमिषं रक्षमाणा ॥ ३ ॥

प्र। उरोः। मित्रावरुणा। पृथिव्याः। प्र। दिवः। ऋष्वात्। बृहतः। सुदानू इति सुऽदानू।
स्पशः। दधाथे इति। ओषधीषु। विक्षु। ऋधक्। यतः। अनिऽमिषम्। रक्षमाणा ॥ ३ ॥

हे ᵛमित्रावरुणा मित्रावरुणौ युवाम् ᵛउरोः विस्तीर्णायाः ᵛपृथिव्याः अपि ᵛप्र प्ररिरिचाथे। 'अस्येदेव प्र रिरिचे' (ऋ. सं. १. ६१. ९) इत्यादिषु प्रशब्दस्य रिरिच इत्यनेन सह संबन्धदर्शनादत्राप्युचितक्रियाध्याहारेण रिरिच इति योज्यम्। तथा ᵛऋष्वात् गुणैर्महतः ᵛबृहतः स्वरूपतोऽतिमहतः ᵛदिवः द्युलोकादपि ᵛप्र रिरिचाथे हे ᵛसुदानू शोभनदानौ। किंच ᵛओषधीषु ᵛविक्षु प्रजासु निमित्तभूतासु प्रजासु चेति वा ᵛस्पशः रूपं ᵛदधाथे धारयेथे। किं कुर्वन्तौ। ᵛऋधग्यतः ऋधक्सत्येन यतो विवेकात् सत्येन गच्छतो जनान् ᵛअनिमिषम् अव्यवधानेन सर्वदा ᵛरक्षमाणा पालयन्तौ ॥

शंसा मित्रस्य वरुणस्य धाम शुष्मो रोदसी बद्बधे महित्वा ।
अयन्मासा अयज्वनामवीराः प्र यज्ञमन्मा वृजनं तिराते ॥ ४ ॥

शंस। मित्रस्य। वरुणस्य। धाम। शुष्मः। रोदसी इति। बद्बधे। महिऽत्वा।
अयन्। मासाः। अयज्वनाम्। अवीराः। प्र। यज्ञऽमन्मा। वृजनम्। तिराते ॥ ४ ॥

हे ऋषे ᵛमित्रस्य ᵛवरुणस्य च ᵛधाम तेजःस्थानं ᵛशंस स्तुहि। ययोर्देवयोः ᵛशुष्मः बलं ᵛरोदसी द्यावापृथिव्यौ सह वर्तमाने ᵛमहित्वा स्वमहत्त्वेन ᵛबद्बधे बध्नाति पृथक् स्थापयति इयं पृथिवीयं द्यौरिति पृथक्करोति। 'द्यावापृथिवी सहास्ताम्' (तै. ब्रा. १. १. ३. २) इति श्रुतेः। ᵛअयज्वनाम् अननुष्ठातॄणां

vमासाः कालावयवाः vअवीराः अपुत्रा एव vअयन् यन्तु गच्छन्तु। तद्विपरीतः vयज्ञमन्मा यज्ञार्थं[1] मतिमान्[1] यज्वा vबृजनं बलं vप्र vतिराते प्रवर्धयतु। प्रपूर्वस्तिरतिर्वर्धनार्थः॥

अमूरा विश्वा वृषणाविमा वां न यासु चित्रं ददृशे न यक्षम्।
द्रुहः सचन्ते अनृता जनानां न वां निण्यान्यचिते अभूवन् ॥ ५ ॥

अमूरा। विश्वा। वृषणौ। इमाः। वाम्। न। यासु। चित्रम्। ददृशे। न। यक्षम्।
द्रुहः। सचन्ते। अनृता। जनानाम्। न। वाम्। निण्यानि। अचिते। अभूवन् ॥५॥

हे vअमूरा अमूढौ हे vविश्वा व्याप्तौ हे vवृषणौ वर्षितारौ vवां युवाभ्याम् vइमाः इमानि स्तुतिवाचांसि क्रियन्ते। vयासु स्तुतिषु vचित्रम् आश्चर्यं vन vददृशे न दृश्यते vन vयक्षं न पूजा दृश्यते। युवाभ्यां महिम्नोऽपि महत्त्वात् प्रयत्नेन क्रियमाणमपि स्तोत्रं न चमत्करोतीत्यर्थः। vजनानाम् vअनृता अस्तुत्यविषयाणि स्तोत्राणि vद्रुहः द्रोग्धारः vसचन्ते सेवन्ते। न महान्तः। vवां युवाभ्यां क्रियमाणानि vनिण्यानि अन्तर्हितानि रहस्यान्यपि स्तोत्राणि vअचिते अज्ञानाय vन vअभूवन् न भवन्ति॥

सम्मु वां यज्ञं महयं नमोभिर्हुवे वां मित्रावरुणा सबाधः।
प्र वां मन्मान्यृचसे नवानि कृतानि ब्रह्म जुजुषन्निमानि ॥ ६ ॥

सम्। ऊँ इति। वाम्। यज्ञम्। महयम्। नमःऽभिः। हुवे। वाम्। मित्रावरुणा। सऽबाधः।
प्र। वाम्। मन्मानि। ऋचसे। नवानि। कृतानि। ब्रह्म। जुजुषन्। इमानि ॥ ६ ॥

हे मित्रावरुणौ vवां युवयोः vयज्ञं vनमोभिः नमस्कारैः स्तुतिभिः vसमु vमहयं संपूजयाम्यहम्। तदर्थं हे vमित्रावरुणा मित्रावरुणौ vवां vसबाधः बाधायुक्तोऽहं vहुवे आह्वयामि बाधापरिहाराय। vवां युवाम् vऋचसे सेवितुं vनवानि नूतनानि स्तुत्यानि वा vमन्मानि स्तोत्राणि vप्र भवन्त्वित्यध्याहारः। vकृतानि मया समूहीकृतानि vइमानि इदानीं क्रियमाणानि vब्रह्म परिवृढानि स्तोत्राणि युवां vजुजुषन् प्रीणयन्तु॥

इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि।
विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

इयम्। देवा। पुरःऽहितिः। युवऽभ्याम्। यज्ञेषु। मित्रावरुणौ। अकारि।
विश्वानि। दुःऽगा। पिपृतम्। तिरः। नः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥७॥

'इयं देव' इति सप्तमी गता॥ ॥ ३ ॥

'उत्सूर्यः' इति षड्ऋचं सप्तमं सूक्तम्। अत्रानुक्रमणिका—'उत्सूर्यः षळाद्यास्तिस्रः सौर्यः' इति। वसिष्ठ ऋषिः। त्रिष्टुप् छन्दः। आद्यास्तिस्रः सूर्यदेवत्याः शिष्टा मित्रावरुणदेवत्याः। सूक्तविनियोगो लैङ्गिकः॥

---

१. ख-ञ-त-न-भ-श—यज्ञार्थमतिमान्।

उत्सूर्यो बृहदर्चींष्यश्रेत्पुरु विश्वा जनिम मानुषाणाम् ।
समो दिवा ददृशे रोचमानः कृत्वा कृतः सुकृतः कर्तृभिर्भूत् ॥ १ ॥

उत् । सूर्यः । बृहत् । अर्चींषि । अश्रेत् । पुरु । विश्वा । जनिम । मानुषाणाम् ।
समः । दिवा । ददृशे । रोचमानः । कृत्वा । कृतः । सुऽकृतः । कर्तृऽभिः । भूत् ॥ १ ॥

Vसूर्यः सर्वस्य प्रेरको देवः Vबृहत् अत्यधिकं Vपुरु पुरूणि बहूनि Vअर्चींषि तेजांसि Vउत् Vअश्रेत् ऊर्ध्वं श्रयति । किं प्रति । Vमानुषाणां मनुष्याणां Vविश्वा सर्वाणि Vजनिम जनिमानि जनान्[1] । जनशब्दः संघवचनः । तान् प्रत्युदश्रेत् । स देवः Vदिवा अहनि Vरोचमानः सन् Vसमः Vददृशे । एकरूपः प्रतिनियतः सन् दृश्यते । ' तस्मात्पुरुषं पुरुषं प्रत्यादित्यो भवति '(ऐ. आ. ३.२.३) इति हि श्रुतिः । स देवः Vकृत्वा सर्वस्य कर्ता Vकृतः संपादितः प्रजापतिना Vकर्तृभिः स्तुतिकर्तृभिः Vसुकृतः स्तुत्या तीक्ष्णीकृतः Vभूत् भवति ॥

स सूर्य प्रति पुरो नो उद्गा एभिः स्तोमेभिरेतशेभिरेवैः ।
प्र नो मित्राय वरुणाय वोचोऽनागसो अर्यम्णे अग्नये च ॥ २ ॥

सः । सूर्य । प्रति । पुरः । नः । उत् । गाः । एभिः । स्तोमेभिः । एतशेभिः । एवैः ।
प्र । नः । मित्राय । वरुणाय । वोचः । अनागसः । अर्यम्णे । अग्नये । च ॥ २ ॥

हे Vसूर्य Vसः प्रसिद्धस्त्वं Vनः अस्मान् Vप्रति Vपुरः पुरस्तात् Vउद्गाः उद्गच्छ । कैः साधनैः । Vएभिः Vस्तोमेभिः स्तोमैः स्तुत्यैः Vएतशेभिः एतवर्णैः । स्वार्थिकः शकारः ' या जरन्ता युवशा ता ' (ऋ. सं. १. १६१. ७) ' पुरुषः कृष्णशवास्युत्तरतः ' (ऐ. ब्रा. ५. १४) इत्यादिवत् । तादृशैः Vएवैः गमनशीलैरश्वैः उद्गाः । अथ तथा कृत्वास्माभिः स्तुतः सन् Vनः अस्मान् Vअनागसः अपापान् Vप्र Vवोचः । केभ्यः । Vमित्राय Vवरुणाय Vअर्यम्णे Vअग्नये Vच । अत्र सौर्ये इतरेषां मित्रादीनां संकीर्तनं तेषामपि निपातभाक्त्वादविरुद्धम् । एवं पूर्वत्रोत्तरत्र च मैत्रावरुणेऽर्यमादीनां संकीर्तनमपि न विरुध्यते ॥

वि नः सहस्रं शुरुधो रदन्त्वृतावानो वरुणो मित्रो अग्निः ।
यच्छन्तु चन्द्रा उपमं नो अर्कमा नः कामं पूपुरन्तु स्तवानाः ॥ ३ ॥

वि । नः । सहस्रम् । शुरुधः । रदन्तु । ऋतऽवानः । वरुणः । मित्रः । अग्निः ।
यच्छन्तु । चन्द्राः । उपऽमम् । नः । अर्कम् । आ । नः । कामम् । पूपुरन्तु । स्तवानाः ॥३॥

Vनः अस्मभ्यं Vशुरुधः शुचेर्दुःखस्य प्रतिरोद्धारः Vऋतावानः सत्यवन्तो वरुणादयः Vसहस्रं सहस्रसंख्याकं धनं Vवि Vरदन्तु वितरन्तु । अथवा शुरुध उक्तलक्षणाः सहस्रसंख्याका ओषधीः रदन्तु । किंच ते Vचन्द्राः आह्लादकारिणोऽस्मभ्यम् Vउपमं स्तुत्यम् Vअर्कम् अर्चनीयं Vयच्छन्तु । किंच Vस्तवानाः अस्माभिः स्तूयमानाः Vनः अस्माकं Vकामम् अपेक्षितं Vपूपुरन्तु पूरयन्तु । हे सूर्य त्वयानुज्ञाता इति सूर्यस्य स्तुतिः ॥

---

१. श–जनान् संघान् ।

द्यावाभूमी अदिते त्रासीथां नो ये वां जज्ञुः सुजनिमान ऋष्वे ।
मा हेळे भूम वरुणस्य वायोर्मा मित्रस्य प्रियतमस्य नृणाम् ॥ ४ ॥

द्यावाभूमी इति । अदिते । त्रासीथाम् । नः । ये । वाम् । जज्ञुः । सुऽजनिमानः । ऋष्वे इति । मा । हेळे । भूम । वरुणस्य । वायोः । मा । मित्रस्य । प्रियऽतमस्य । नृणाम् ॥ ४ ॥

हे [v]द्यावाभूमी द्यावापृथिव्यौ हे [v]अदिते अखण्डनीये । एतत् द्यावाभूम्योरेवैकवचनेन संबोधनम् । हे [v]ऋष्वे । महन्नामैतत् । हे[1] महत्यौ [v]नः अस्मान् [v]त्रासीथां रक्षतम् । [v]ये वयं [v]सुजनिमानः शोभनजन्मानः [v]वां युवां [v]जज्ञुः ज्ञातवन्तः स्म । किंच वयं [v]वरुणस्य [v]हेळे क्रोधे [v]मा [v]भूम । तथा [v]वायोः मा भूम । तथा [v]नृणां स्तुतिनेतॄणां मनुष्याणां [v]प्रियतमस्य [v]मित्रस्य हेळे [v]मा भूम ॥

'प्र बाहवा' इति पञ्चमी मैत्रावरुणे पशौ पशुपुरोडाशस्य याज्या । सूत्रितं च—'प्र बाहवा सिसृतं जीवसे नो यद्वंहिष्ठं नातिविधे सुदानू' (आश्व. श्रौ. ३. ८) इति ॥

प्र बाहवा सिसृतं जीवसे नु आ नो गव्यूतिमुक्षतं घृतेन ।
आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥ ५ ॥

प्र । बाहवा । सिसृतम् । जीवसे । नः । आ । नः । गव्यूतिम् । उक्षतम् । घृतेन ।
आ । नः । जने । श्रवयतम् । युवाना । श्रुतम् । मे । मित्रावरुणा । हवा । इमा ॥ ५ ॥

हे [v]मित्रावरुणा मित्रावरुणौ देवौ [v]बाहवा युवाभ्यां बाहू [v]प्र [v]सिसृतं प्रसारयतं हविःस्वीकाराय धनप्रदानाय वा । किमर्थमिति । [v]नः [v]जीवसे अस्माकं जीवनाय । किंच [v]नः अस्माकं [v]गव्यूतिम् । गावो यन्ति गच्छन्त्यत्रेति गव्यूतिर्गोमार्गभूमिः । तां तृणादिप्ररोहाय [v]घृतेन उदकेन [v]आ समन्तात् [v]उक्षतं सिञ्चतम् । किंच [v]नः अस्मान् [v]जने अस्मत्समाने मनुष्यसमूहे वा नोऽस्मान् [v]श्रवयतं विश्रुतं कुरुतम् । हे [v]युवाना नित्ययौवनौ सर्वत्र व्याप्तौ वा युवां [v]मे मम [v]इमा इमानि [v]हवा आह्वानानि [v]श्रुतं शृणुतम् ॥

नू मित्रो वरुणो अर्यमा नस्मने तोकाय वरिवो दधन्तु ।
सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

नु । मित्रः । वरुणः । अर्यमा । नः । त्मने । तोकाय । वरिवः । दधन्तु ।
सुऽगा । नः । विश्वा । सुऽपथानि । सन्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

[v]मित्रः [v]वरुणः [v]अर्यमा चैते त्रयो देवाः [v]नु अद्य [v]नः अस्माकं [v]त्मने आत्मने आत्महिताय [v]तोकाय पुत्राय च [v]वरिवः धनं [v]दधन्तु प्रयच्छन्तु । [v]नः अस्माकं [v]विश्वा सर्वाणि गन्तव्यानि [v]सुगा सुगमनानि [v]सुपथानि च [v]सन्तु भवन्तु । शिष्टं गतम् ॥ ॥ ४ ॥

'उद्वेति' इति षड्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभम् । आद्याश्चतस्रः पञ्चम्याः पूर्वार्धश्च सूर्यदेवत्या अवशिष्टास्त्रयोऽर्धर्चा मित्रावरुणदेवत्याः । तथा चानुक्रान्तम्—'उद्वेतीति चार्धपञ्चमाः' इति । विनियोगो लैङ्गिकः ॥

---

१. ख-ग्न-त-श—महे ।

उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणाम् ।
चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेव यः समविव्यक्तमांसि ॥ १ ॥

उत् । ऊँ इति । एति । सुऽभगः । विश्वऽचक्षाः । साधारणः । सूर्यः । मानुषाणाम् ।
चक्षुः । मित्रस्य । वरुणस्य । देवः । चर्मेऽइव । यः । सम्ऽअविव्यक् । तमांसि ॥ १ ॥

vउद्वेति उद्गच्छत्ययं vसूर्यः vसुभगः शोभनभाग्यः सुष्ठु भजनीयो वा vविश्वचक्षाः सर्वस्य द्रष्टा vमानुषाणां सर्वेषां मनुष्याणां vसाधारणः । साधारणत्वप्रतिपादकश्रुतिः पूर्वमुदाहृता । vमित्रस्य vवरुणस्य च vचक्षुः प्रकाशकः vदेवः द्योतमानः । vयः देवः vचर्मेव चर्माणीव vतमांसि vसमविव्यक् सह विचति संवेष्टयति[1] स महानुभावो देव उद्वेति ॥

उद्वेति प्रसवीता जनानां महान्केतुरर्णवः सूर्यस्य ।
समानं चक्रं पर्यावृत्सन्यदेतशो वहति धूर्षु युक्तः ॥ २ ॥

उत् । ऊँ इति । एति । प्रऽसविता । जनानाम् । महान् । केतुः । अर्णवः । सूर्यस्य ।
समानम् । चक्रम् । परिऽआवृत्सन् । यत् । एतशः । वहति । धूःऽसु । युक्तः ॥ २ ॥

अयं vसूर्यस्य सूर्यः । विभक्तिव्यत्ययः । vउद्वेति उद्गच्छति । कीदृशोऽयम् । vजनानां सर्वेषां vप्रसविता सर्वेषु कर्मस्वनुज्ञाता vमहान् पूज्यः vकेतुः सर्वस्य प्रज्ञापकः vअर्णवः उदकप्रदः । किं कुर्वंश्चुदेतीति उच्यते । vसमानं सर्वेषामेकरूपमेकमेव vचक्रं रथाङ्गं चरणशीलं रथं वा vपर्यावृत्सन् पर्यावर्तयितुमिच्छन् । vयत् रथचक्रं vधूर्षु रथस्य vयुक्तः vएतशः एतशवर्णो हरितवर्णोऽश्वः vवहति । 'एको अश्वो वहति सप्तनामा' (ऋ. सं. १. १६४. २) इत्युक्तम् ॥

विभ्राजमान उषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः ।
एष मे देवः सविता चच्छन्द यः समानं न प्रमिनाति धाम ॥ ३ ॥

विऽभ्राजमानः । उषसाम् । उपऽस्थात् । रेभैः । उत् । एति । अनुऽमद्यमानः ।
एषः । मे । देवः । सविता । चच्छन्द । यः । समानम् । न । प्रऽमिनाति । धाम ॥३॥

अयं सूर्यः vविभ्राजमानः विशेषेण दीप्यमानः vउषसामुपस्थात् उपस्थे मध्ये vरेभैः स्तोतृभिः vअनुमद्यमानः सन् vउदेति । किंच vएषः vदेवः द्योतमानः vसविता vमे मह्यं vचच्छन्द उपच्छन्दयति कामान् । एष इत्युक्तं क इति । vयः देवः vसमानं सर्वेषां प्राणिनामेकरूपं vधाम स्वीयं तेजःस्थानं vन vप्रमिनाति न हिनस्ति न संकोचयति स देव उदेतीति ॥

दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः ।
नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि ॥ ४ ॥

दिवः । रुक्मः । उरुऽचक्षाः । उत् । एति । दूरेऽअर्थः । तरणिः । भ्राजमानः ।
नूनम् । जनाः । सूर्येण । प्रऽसूताः । अयन् । अर्थानि । कृणवन् । अपांसि ॥ ४ ॥

---

१. ख–वेष्टयति ।

अयं सूर्यः vरुक्मः रोचमानः vउरुचक्षाः प्रभूततेजाश्च सन् vदिवः अन्तरिक्षात् vउदेति। यद्वा दिवोऽन्तरिक्षस्य रुक्म आभरणस्थानीयः। कीदृशोऽयम्। vदूरेअर्थः दूरे गन्ता। अर्थोऽर्तेः। दूरे प्रार्थ्यमानो वा। vतरणिः तारकः vभ्राजमानः दीप्यमानः सन्नुदेति। vनूनं निश्चयं vजनाः सर्वे प्राणिनः vसूर्येण प्रेरकेण देवेन vप्रसूताः अनुज्ञाताः प्रेरिताः सन्तः vअर्थानि गन्तव्यानि अनुष्ठेयानि vअपांसि कर्माणि vकृणवन् कुर्वन्ति॥

यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः।
प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः॥ ५॥

यत्र। चक्रुः। अमृताः। गातुम्। अस्मै। श्येनः। न। दीयन्। अनु। एति। पाथः।
प्रति। वाम्। सूरे। उत्ऽइते। विधेम। नमःऽभिः। मित्रावरुणा। उत। हव्यैः॥ ५॥

vयत्र यस्मिन्नन्तरिक्षे vअमृताः अमरणधर्माणः पूर्वे देवाः vअस्मै सूर्याय vगातुं मार्गं vचक्रुः अकुर्वन् तत् vपाथः अन्तरिक्षम् vअन्वेति अनुगच्छति। क इव। vदीयन् गच्छन् vश्येनो vन शंसनीयगमनो गृध्र इव। अयमर्थः सौर्य इत्युक्तम्। हे vमित्रावरुणा मित्रावरुणौ vवां युवां vसूरे सूर्ये vउदिते सति प्रातःसवने vनमोभिः नमस्कारैः स्तुतिभिः vउत अपि च vहव्यैः हविर्भिश्च vप्रति vविधेम परिचरेम॥

नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु।
सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः॥ ६॥

नु। मित्रः। वरुणः। अर्यमा। नः। त्मने। तोकाय। वरिवः। दधन्तु।
सुऽगा। नः। विश्वा। सुऽपथानि। सन्तु। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥६॥

'नू मित्रः' इति षष्ठी गता॥ ॥ ५॥

'दिवि क्षयन्ता' इति पञ्चर्चं नवमं सूक्तं वसिष्ठस्यार्षं मैत्रावरुणम्। 'दिवि पञ्च' इत्यनुक्रमणिका। तृतीये छन्दोमे प्रउगशस्त्र आद्यस्तृचो मैत्रावरुणस्य। सूत्रितं च—'दिवि क्षयन्ता रजसः पृथिव्यामा विश्ववाराश्विना गतं नः' (आश्व. श्रौ. ८. ११) इति॥

दिवि क्षयन्ता रजसः पृथिव्यां प्र वां घृतस्य निर्णिजो ददीरन्।
हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषन्त॥ १॥

दिवि। क्षयन्ता। रजसः। पृथिव्याम्। प्र। वाम्। घृतस्य। निःऽनिजः। ददीरन्।
हव्यम्। नः। मित्रः। अर्यमा। सुऽजातः। राजा। सुऽक्षत्रः। वरुणः। जुषन्त॥१॥

vदिवि द्युलोकेऽन्तरिक्षे vपृथिव्यां च वर्तमानस्य vरजसः उदकस्य vक्षयन्ता। क्षयतिरैश्वर्यकर्मा। स्वामिनौ भवथः। हे मित्रावरुणौ vवां युवाभ्यां प्रेरिता मेघाः vघृतस्य[1] vनिर्णिजः उदकस्य रूपाणि vददीरन् ददते प्रयच्छन्ति। अथवा वां युवाभ्यां घृतस्य निर्णिजो रूपाणि। घृतानीत्यर्थः। तानि ददीरन् दीयन्ते। vनः अस्माकं संबन्धि vहव्यं vमित्रः vसुजातः सुष्ठु प्रादुर्भूतः vअर्यमा vराजा सर्वस्य स्वामी vसुक्षत्रः शोभनबलः vवरुणः चैते vजुषन्त सेवन्ताम्॥

---

१. ज्ञ-न-म-श-घृतस्य च।

आ राजाना महऋतस्य गोपा सिन्धुपती क्षत्रिया यातमर्वाक् ।
इळां नो मित्रावरुणोत वृष्टिमवं दिव इन्वतं जीरदानू ॥ २ ॥

आ । राजाना । महः । ऋतस्य । गोपा । सिन्धुपती इति सिन्धुऽपती । क्षत्रिया । यातम् । अर्वाक् ।
इळाम् । नः । मित्रावरुणा । उत । वृष्टिम् ।
अव । दिवः । इन्वतम् । जीरदानू इति जीरऽदानू ॥ २ ॥

हे [v]राजाना सर्वस्य स्वामिनौ हे [v]महः महतः [v]ऋतस्य उदकस्य यज्ञस्य वा [v]गोपा गोपायितारौ । सुबामन्त्रिते 'पराङ्कवत्स्वरे' इति पराङ्कवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य निघातत्वम् । हे [v]सिन्धुपती नद्याः पालयितारौ हे [v]क्षत्रिया बलवन्तौ युवाम् [v]अर्वाक् अस्मदभिमुखम् [v]आ [v]यातम् आगच्छतम् । किंच हे [v]मित्रावरुणा मित्रावरुणौ हे [v]जीरदानू क्षिप्रदानौ युवां [v]नः अस्मभ्यम् [v]इळाम् अन्नम् [v]उत अपि च [v]पुष्टिं तत्साधिकां वृष्टिं च [v]दिवः अन्तरिक्षात् [v]अव अवस्तात् [v]इन्वतं प्रेरयतम् ॥

मित्रस्तन्नो वरुणो देवो अर्यः प्र साधिष्ठेभिः पथिभिर्नयन्तु ।
ब्रवद्यथा न आदरिः सुदासे इषा मदेम सह देवगोपाः ॥ ३ ॥

मित्रः । तत् । नः । वरुणः । देवः । अर्यः । प्र । साधिष्ठेभिः । पथिऽभिः । नयन्तु ।
ब्रवत् । यथा । नः । आत् । अरिः । सुऽदासे । इषा । मदेम । सह । देवऽगोपाः ॥३॥

[v]मित्रः [v]वरुणः [v]देवः [v]अर्यः अर्यमा चैते त्रयोऽपि [v]नः अस्मान् [v]तत् तदा यदास्माकमपेक्षितं तदा [v]साधिष्ठेभिः साधकतमैः [v]पथिभिः मार्गैः [v]नयन्तु प्रापयन्तु । किंच [v]नः अस्मान् [v]सुदासे शोभनदानाय जनाय [v]अरिः अर्यमा [v]यथा [v]ब्रवत् असावनुकम्प्य इति ब्रूयात्तथा कुर्वन्तु । अर्यम्णः पुनरभिधानमादरार्थम् । [v]देवगोपाः देवा यूयं गोपायितारो येषामस्माकं ते वयम् [v]इषा युष्माभिर्दातव्येनान्नेन [v]सह पुत्रादिसहिताः [v]मदेम हृष्येम ॥

यो वां गर्तं मनसा तक्षदेतमूर्ध्वां धीतिं कृणवद्धारयच्च ।
उक्षेथां मित्रावरुणा घृतेन ता राजाना सुक्षितीस्तर्पयेथाम् ॥ ४ ॥

यः । वाम् । गर्तम् । मनसा । तक्षत् । एतम् । ऊर्ध्वाम् । धीतिम् । कृणवत् । धारयत् । च ॥
उक्षेथाम् । मित्रावरुणा । घृतेन । ता । राजाना । सुऽक्षितीः । तर्पयेथाम् ॥ ४ ॥

हे मित्रावरुणौ [v]यः[1] [v]वां युवयोः [v]एतं [v]गर्तं रथं [v]मनसा [v]तक्षत् स्तोमेन संकल्पयेत् तथा कृत्वा [v]ऊर्ध्वाम् उन्नतां [v]धीतिं कर्म स्तुतिरूपं [v]कृणवत् कुर्यात् उच्चैः स्तुयात् एवं कृत्वा [v]धारयच्च यागे धारयेत् हे [v]राजाना स्वामिनौ [v]मित्रावरुणा मित्रावरुणौ [v]ता तौ युवां जनं [v]घृतेन उदकेन [v]उक्षेथां सिञ्चतम् । तस्मै [v]सुक्षितीः शोभननिवासाः प्रजाः [v]तर्पयेथाम् । यथा सुक्षितयो भवन्ति तथा तर्पयेथामिति ॥

---

१. ख-ञ-त-न-भ-श–'यः' नास्ति ।

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

एषः । स्तोमः । वरुण । मित्र । तुभ्यम् । सोमः । शुक्रः । न । वायवे । अयामि ।
अविष्टम् । धियः । जिगृतम् । पुरम्ऽधीः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥५॥

अनया स्तुतिमुपसंहरति । हे ᵛवरुण हे ᵛमित्र ᵛतुभ्यं युवयोः ᵛवायवे । वायुर्गन्तादित्यः । स एवार्यमा । तस्मै च ᵛएष ᵛस्तोमः स्तवः ᵛअयामि अकारि । किमिव । ᵛशुक्रः दीप्तः ᵛसोमः ᵛन युष्मभ्यं प्रीतिकरः सोमो यथा दीयते तद्वत् । ᵛधियः कर्माण्यस्मदीयानि ᵛअविष्टं रक्षतम्[1] । ᵛपुरंधीः स्तुतीः ᵛजिगृतं प्रबुध्यतम् । अन्यद्गतम् ॥ ॥ ६ ॥

'प्रति वां सूरे' इति पञ्चर्चं दशमं सूक्तं वसिष्ठस्यार्षं मैत्रावरुणम् । 'प्रति वाम्' इत्यनुक्रान्तम् । द्वितीये छन्दोभेदः प्रउगशस्त्रेऽप्येष तृचः । सूत्रितं च—'प्रति वां सूर उदिते सूक्तैर्धेनुः प्रत्नस्य' (आश्व. श्रौ. ८. १०) इति ॥

प्रति वां सूर उदिते सूक्तैर्मित्रं हुवे वरुणं पूतदक्षम् ।
ययोरसुर्यमक्षितं ज्येष्ठं विश्वस्य यामन्नाचिता जिगत्नु ॥ १ ॥

प्रति । वाम् । सूरे । उत्ऽइते । सुऽउक्तैः । मित्रम् । हुवे । वरुणम् । पूतऽदक्षम् ।
ययोः । असुर्यम् । अक्षितम् । ज्येष्ठम् । विश्वस्य । यामन् । आऽचिता । जिगत्नु ॥ १ ॥

ᵛसूरे सूर्ये ᵛउदिते प्रातःसवने ᵛमित्रं ᵛपूतदक्षं शुद्धबलं ᵛवरुणं ᵛवां ᵛसूक्तैः ᵛहुवे आह्वये । ᵛययोः मित्रावरुणयोः ᵛअक्षितम् अक्षीणमत एव ᵛज्येष्ठम् ᵛअसुर्यं बलम् ᵛआचिता आचित उपचिते शूरसंघैरुपेते ᵛयामन् यामनि संग्रामे ᵛविश्वस्य[2] शत्रुसंघस्य ᵛजिगत्नु जेतृ भवति ॥

ता हि देवानामसुरा तावर्या ता नः क्षितीः करतमूर्जयन्तीः ।
अश्याम मित्रावरुणा वयं वां द्यावा च यत्र पीपयन्नहा च ॥ २ ॥

ता । हि । देवानाम् । असुरा । तौ । अर्या । ता । नः । क्षितीः । करतम् । ऊर्जयन्तीः ।
अश्याम । मित्रावरुणा । वयम् । वाम् । द्यावा । च । यत्र । पीपयन् । अहा । च ॥ २ ॥

ᵛता ᵛहि तौ खलु देवौ ᵛदेवानां मध्ये ᵛअसुरा बलवन्तौ । ᵛअर्या अर्यौ ᵛतौ सर्वस्येश्वरौ ᵛता तौ ᵛनः अस्माकं ᵛक्षितीः पुत्रादिरूपाः प्रजाः ᵛऊर्जयन्तीः प्रवृद्धाः ᵛकरतं कुरुतम् । हे ᵛमित्रावरुणा मित्रावरुणौ ᵛवयं ᵛवां युवाम् ᵛअश्याम व्याप्नुयाम । ᵛयत्र यस्यां युवयोर्ब्यांप्तौ ᵛद्यावा द्यावापृथिव्यौ । सर्वदा तयोः सहभावादयमर्थो लभ्यते । ᵛअहा ᵛच । एतद्रात्रेरुपलक्षणम् । अहोरात्राणि च ᵛपीपयन् अस्मान् प्याययेयुः ॥

ता भूरिपाशावनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय ।
ऋतस्य मित्रावरुणा पथा वामपो न नावा दुरिता तरेम ॥ ३ ॥

---

१. ख-ञ-ट-त३-४-न-भ-श–'रक्षतं' नास्ति । २. श–विश्वस्य सर्वस्य ।

ता । भूरिऽपाशौ । अनृतस्य । सेतू इति । दुरत्येतू इति दुःऽअत्येतू । रिपवे । मर्त्याय । ऋतस्य । मित्रावरुणा । पथा । वाम् । अपः । न । नावा । दुःऽइता । तरेम ॥ ३ ॥

ᵛता तौ मित्रावरुणौ ᵛभूरिपाशौ प्रभूतबन्धनसाधनपाशोपेतौ ᵛअनृतस्य यागरहितस्य ᵛसेतू सेतुवद्बन्धकौ[1] ᵛरिपवे ᵛमर्त्याय वैरिजनाय ᵛदुरत्येतू दुरतिक्रमौ भवतः । हे ᵛमित्रावरुणा तादृशौ मित्रावरुणौ ᵛवां युवयोः ᵛऋतस्य यज्ञस्य युवयोरर्थायानुष्ठीयमानस्य यागस्य ᵛपथा मार्गेण ᵛदुरिता दुःखानि ᵛतरेम ᵛनावा ᵛअपो ᵛन प्रभूतान्युदकानीव ॥

मैत्रावरुणे पशौ ' आ नो मित्रावरुणा ' इत्येषा चतुर्थ्यनुवाक्या । सूत्रितं च—' आ नो मित्रावरुणा हव्यजुष्टिं युवं[2] वस्त्राणि पीवसा वसाथे[2] ' (आश्व. श्रौ. ३. ८) इति ॥

आ नो मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतमिळाभिः ।
प्रति वामत्र वरमा जनाय पृणीतमुद्रो दिव्यस्य चारोः ॥ ४ ॥

आ । नः । मित्रावरुणा । हव्यऽजुष्टिम् । घृतैः । गव्यूतिम् । उक्षतम् । इळाभिः ।
प्रति । वाम् । अत्र । वरम् । आ । जनाय । पृणीतम् । उद्रः । दिव्यस्य । चारोः ॥४॥

हे ᵛमित्रावरुणा मित्रावरुणौ ᵛनः अस्माकं ᵛहव्यजुष्टिं हविःसेवनवन्तं यज्ञम् ᵛआ गच्छतमिति शेषः । आगत्य च ᵛइळाभिः अन्नैः सह ᵛघृतैः उदकैः ᵛगव्यूतिम् अस्मदीयां भूमिम् ᵛउक्षतं सिञ्चतम् । ᵛवां युवां ᵛप्रति ᵛअत्र अस्मिँल्लोके ᵛवरम्[3] उत्कृष्टं हविः स्तोत्रं वा क ᵛआ यच्छेदिति शेषः । अतः केवलं कृपयैव ᵛदिव्यस्य दिवि भवस्य ᵛचारोः चरणीयस्य ᵛउद्रः उदकस्य । कर्मणि षष्ठी । उत्कृलक्षणमुदकं ᵛपृणीतं प्रयच्छतम् ॥

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

एषः । स्तोमः । वरुण । मित्र । तुभ्यम् । सोमः । शुक्रः । न । वायवे । अयामि ।
अविष्टम् । धियः । जिगृतम् । पुरम्ऽधीः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥५॥

' एष स्तोमः ' इति पञ्चमी गता ॥ ॥ ७ ॥

' प्र मित्रयोः ' इत्येकोनविंशत्यृचमेकादशं सूक्तं वसिष्ठस्यार्षम् । अत्रेयमनुक्रमणिका—' प्र मित्रयोरेकोना गायत्रं दशम्याद्याश्चयः प्रगाथाः पुरउष्णिक् चतुर्थ्याद्या दशादित्यास्तिस्रः सौर्यः ' इति । दशमी बृहत्येकादशी सतोबृहती द्वादशी बृहती त्रयोदशी सतोबृहती चतुर्दशी बृहती पञ्चदशी सतोबृहती षोडशी पुरउष्णिक् शिष्टा गायत्र्यः । चतुर्थ्याद्याश्चयोदश्यन्ता आदित्यदेवताः चतुर्दश्याद्यास्तिस्रः सूर्यदेवत्याः । आद्यन्तौ तृचौ पूर्ववन्मैत्रावरुणौ । अग्निष्टोमे माध्यंदिनसवने मैत्रावरुणशस्त्र आदितो नवर्चः शस्याः । ' प्र मित्रयोर्वरुणयोरिति नव ' (आश्व. श्रौ. ५. १०) इति सूत्रितत्वात् । पृष्ठ्याभिप्लवषडहयोः स्तोमबृद्धिनिमित्तमावापार्था आद्याः षडृचः । सूत्रितं च— ' प्र मित्रयोर्वरुणयोरिति षट् ' (आश्व. श्रौ. ७. ५) इति ॥

---

१. ख–सेतुबद्धकौ; घ–सेतूबंधकौ; ङ-त२–सेतुबंधकौ; न–सेतुबंधकौ । २. ख-भ–युवां स्तोमेभिर्देवयंतो अश्विना । ३. ख-ङ-त-न-श–वां युवां प्रति वरं ।

प्र मित्रयोर्वरुणयोः स्तोमो न एतु शूष्यः । नमस्वान्तुविजातयोः ॥ १ ॥

प्र । मित्रयोः । वरुणयोः । स्तोमः । नः । एतु । शूष्यः । नमस्वान् । तुविऽजातयोः ॥१॥

vमित्रयोर्वरुणयोः । मित्रावरुणयोरित्यर्थः । उभयत्र प्रतियोगापेक्षया द्विवचनत्वम् । vतुविजातयोः बहुप्रादुर्भावयोर्देवयोः vनः अस्मदीयः vशूष्यः सुखकरः vनमस्वान् अन्नवान् हविर्भिर्युक्तः vस्तोमः स्तोत्रं vप्र vएतु गच्छतु[1] । 'अहोरात्रे वै मित्रावरुणौ' (तै. सं. २. ४. १०. १) इति श्रुतिः । अनयोरहोरात्रापेक्षत्वात्तयोः पुनःपुनरागमनादनयोस्तुविजातत्वम् । अथवा बहूनामुपकारायानयोः प्रादुर्भावात्तुविजातत्वम् ॥

या धारयन्त देवाः सुदक्षा दक्षपितरा । असुर्याय प्रमहसा ॥ २ ॥

या । धारयन्त । देवाः । सुऽदक्षा । दक्षऽपितरा । असुर्याय । प्रऽमहसा ॥ २ ॥

vया यौ युवां vधारयन्त । के । vदेवाः आदिकर्तारः vअसुर्याय बलकरणाय । कीदृशौ युवाम् । vसुदक्षा शोभनबलौ vदक्षपितरा बलस्य पालकौ स्वामिनौ वा । बलप्रदावित्यर्थः । vप्रमहसा प्रकृष्टतेजस्कौ । तौ साधयतमित्युत्तरत्रान्वयः ॥

ता नः स्तिपा तनूपा वरुण जरितॄणाम् । मित्र साधयतं धियः ॥ ३ ॥

ता । नः । स्तिऽपा । तनूऽपा । वरुण । जरितॄणाम् । मित्र । साधयतम् । धियः ॥ ३ ॥

vता तौ vस्तिपा । स्त्यायन्त इति स्तयो गृहाः । तान् पात इति स्तिपौ । vतनूपा तन्वः पातारौ हे vवरुण हे vमित्र उक्तलक्षणौ युवां vजरितॄणां vनः अस्माकं vधियः कर्माणि स्तुतिरूपाणि vसाधयतं फलवन्ति कुरुतम् ॥

यदद्य सूर उदितेऽनागा मित्रो अर्यमा । सुवाति सविता भगः ॥ ४ ॥

यत् । अद्य । सूरे । उत्ऽइते । अनागाः । मित्रः । अर्यमा । सुवाति । सविता । भगः ॥४॥

vयत् धनमस्माकमपेक्षितं तत् vअद्य अस्मिन् काले vसूर vउदिते सति प्रातःसवने vअनागाः पापहन्ता vमित्रोऽर्यमा vसविता vभगः चैते प्रत्येकं vसुवाति प्रेरयेत् । अथवा । अनागा मित्रोऽर्यमा दाता भवतु । तदीप्सितं धनं भगो भजनीयः सविता सुवाति प्रेरयतु ॥

सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः । ये नो अंहोऽतिपिप्रति ॥ ५ ॥

सुप्रऽअवीः । अस्तु । सः । क्षयः । प्र । नु । यामन् । सुऽदानवः ।
ये । नः । अंहः । अतिऽपिप्रति ॥ ५ ॥

vसः vक्षयः स निवासः vसुप्रावीरस्तु सुष्ठु प्रकर्षेण रक्षितास्तु । प्रशब्द आदरार्थः । प्रकर्षेण vनु क्षिप्रं भवत्विति शेषः । कदेति उच्यते । हे vसुदानवः सुदानाः युष्माकं vयामन् यामनि गमने सति । कीदृशानां गमने । vये यूयमागत्य vनः अस्माकम् vअंहः पापम् vअतिपिप्रति अतिपारयथ तेषां गमन इति ॥ ॥ ८ ॥

---

१. श–प्रगच्छतु ।

उत स्वराजो अदितिरदब्धस्य व्रतस्य ये । महो राजान ईशते ॥ ६ ॥

उत । स्वऽराजः । अदितिः । अदब्धस्य । व्रतस्य । ये । महः । राजानः । ईशते ॥ ६ ॥

[v]उत अपि च [v]ये मित्रादयस्त्रयः [v]स्वराजः सर्वस्य स्वामिनः [v]अदितिः तेषां माता च सन्ति [v]अदब्धस्य अहिंसितस्य[1] [v]महः महतः [v]व्रतस्य अस्य कर्मणः [v]राजानः स्वामिनः ते [v]ईशते समर्था भवन्ति । अभिमतं दातुमिति शेषः । अथवैवं योज्यम् । ये[2] मित्रादयोऽदितिश्चादब्धस्य व्रतस्य स्वराज ईश्वराः ते महो महतोऽस्मदभिमतधनस्य राजानः स्वामिनः सन्त ईशतेऽस्मभ्यं तद्दातुम् ॥

'प्रति वाम्' इत्येष तृचश्चातुर्विंशिकेऽहनि प्रातःसवने मैत्रावरुणस्य पर्यासार्थः । सूत्रितं च—'प्रति वां सूर उदिते व्यन्तरिक्षमतिरत्' (आश्व. श्रौ. ७. २) इति ॥

प्रति वां सूर उदिते मित्रं गृणीषे वरुणम् । अर्यमणं रिशादसम् ॥ ७ ॥

प्रति । वाम् । सूरे । उत्ऽइते । मित्रम् । गृणीषे । वरुणम् । अर्यमणम् । रिशादसम् ॥७॥

हे मित्रावरुणौ [v]मित्रं त्वां [v]वरुणं च युवां [v]रिशादसं शत्रूणामत्तारम् [v]अर्यमणं च [v]प्रति प्रत्येकं [v]गृणीषे स्तुवे । कदेति उच्यते । [v]सूरे सूर्ये देवे [v]उदिते सति । प्रातरित्यर्थः ॥

राया हिरण्यया मतिरियमवृकाय शवसे । इयं विप्रा मेधसातये ॥ ८ ॥

राया । हिरण्यऽया । मतिः । इयम् । अवृकाय । शवसे । इयम् । विप्रा । मेधऽसातये ॥८॥

[v]हिरण्यया हितरमणीयेन [v]राया धनेन सहिताय [v]अवृकाय अहिंस्याय [v]शवसे अस्माकं बलाय [v]इयम् इदानीं क्रियमाणा [v]मतिः स्तुतिर्भवत्विति शेषः ॥ हिरण्ययेत्यत्र 'सुपां सुलुक्०' इति तृतीयैकवचनस्य याजादेशः ॥ किंच हे [v]विप्राः प्राज्ञाः [v]इयम् एव स्तुतिः [v]मेधसातये यज्ञलाभाय च भवतु ॥

ते स्याम देव वरुण ते मित्र सूरिभिः सह । इषं स्वश्च धीमहि ॥ ९ ॥

ते । स्याम । देव । वरुण । ते । मित्र । सूरिऽभिः । सह ।
इषम् । स्वः[1]रिति स्वः । च । धीमहि ॥ ९ ॥

हे [v]देव [v]वरुण [v]ते वयं तव स्तोतारः [v]स्याम समृद्धा भवेम । न केवलं वयमेव यजमानाः किंतु [v]सूरिभिः स्तोतृभिर्ऋत्विग्भिः [v]सह । तथा हे [v]मित्र देव [v]ते वयं सूरिभिः सह स्याम भवेम । किंच [v]इषम् अन्नं [v]स्वः उदकं [v]च [v]धीमहि धारयामहे ॥

आश्विनशस्त्रे 'बहवः सूरचक्षसः' इति प्रगाथः । सूत्रितं च—'बहवः सूरचक्षस इति प्रगाथाः' (आश्व. श्रौ. ६. ५) इति । दशरात्रे पञ्चमेऽहनि प्रउगशस्त्रेऽप्ययं प्रगाथः । सूत्रितं च—'बहवः सूरचक्षस इमा उ वां दिविष्टयः' (आश्व. श्रौ. ७. १२) इति ॥

बहवः सूरचक्षसोऽग्निजिह्वा ऋतावृधः ।
त्रीणि ये येमुर्विदथानि धीतिभिर्विश्वानि परिभूतिभिः ॥ १० ॥

---

१. ञ-त-न-श–अहिंसितस्य रक्षक । २. ख-त-न-भ–ते ।

बृहवः । सूरऽचक्षसः । अग्निऽजिह्वाः । ऋतऽवृधः ।
त्रीणि । ये । येमुः । विदथानि । धीतिऽभिः । विश्वानि । परिभूतिऽभिः ॥ १० ॥

vबहवः महान्तः vसूरचक्षसः सूर्यसदृशप्रकाशाः । सूरः प्रकाशको येषामिति वा । vअग्निजिह्वाः । अग्निरेव जिह्वादनसाधनो येषां तादृशाः । vऋतावृधः यज्ञस्य वर्धयितारो मित्रादयः । किंच vये vत्रीणि vविश्वानि व्याप्तानि vविदथानि क्षित्यादिस्थानानि क्षित्यादीनि vपरिभूतिभिः परिभावुकैः vधीतिभिः कर्मभिः vयेमुः प्रयच्छन्ति ते क्षत्रमाशतेत्युत्तरत्र संबन्धनीयम् । अथवात्रैव ये त्रीणि स्थानानि प्रयच्छन्ति ते बहुत्वादिगुणोपेता आगच्छन्त्वित्यध्याहार्यम् ॥ ॥ ९ ॥

वि ये दधुः शरदं मासमादहर्यज्ञमक्तुं चादृचम् ।
अनाप्यं वरुणो मित्रो अर्यमा क्षत्रं राजान आशत ॥ ११ ॥

वि । ये । दधुः । शरदम् । मासम् । आत् । अहः । यज्ञम् । अक्तुम् । च । आत् । ऋचम् ।
अनाप्यम् । वरुणः । मित्रः । अर्यमा । क्षत्रम् । राजानः । आशत ॥ ११ ॥

vये मित्रादयः vशरदं संवत्सरं vवि vदधुः अकुर्वन् vआत् अनन्तरमेव vमासम् अनन्तरम् vअहः अनन्तरमहःसाध्यं vयज्ञम् vआत् अनन्तरम् vअक्तुं रात्रिं vच vऋचं मन्त्रांश्च । यद्वा सर्वत्र आत् इत्ययम् अपीत्यर्थे वर्तते । तथा सति क्रमोऽविवक्षितः[1] । ते vवरुणः vमित्रः vअर्यमा च त्रयः vअनाप्यम् अन्यैरप्राप्तं vक्षत्रं बलं vराजानः राजमानाः vआशत व्याप्तवन्तः ॥

तद्वो अद्य मनामहे सुकृतैः सूर उदिते ।
यदोहते वरुणो मित्रो अर्यमा यूयमृतस्य रथ्यः ॥ १२ ॥

तत् । वः । अद्य । मनामहे । सुऽउक्तैः । सूरे । उत्ऽइते ।
यत् । ओहते । वरुणः । मित्रः । अर्यमा । यूयम् । ऋतस्य । रथ्यः ॥ १२ ॥

vतत् प्रसिद्धम् vअद्य अस्मिन् यागकाले vवः युष्मान् vमनामहे याचामहे । कैः साधनैः । vसूक्तैः । कस्मिन् काले । vसूर vउदिते । प्रातःकाल इत्यर्थः । vयत् धनं हे vऋतस्य उदकस्य vरथ्यः नेतारः vयूयं वरुणादयः vओहते । यूयमित्यनेन सामानाधिकरण्यात् ओहत इत्यत्र पुरुषव्यत्ययः । ओहध्व इत्यर्थः । तद्वनं मनामह इति ॥

ऋतावान ऋतजाता ऋतावृधो घोरासो अनृतद्विषः ।
तेषां वः सुम्ने सुच्छर्दिष्टमे नरः स्याम ये च सूरयः ॥ १३ ॥

ऋतऽवानः । ऋतऽजाताः । ऋतऽवृधः । घोरासः । अनृतऽद्विषः ।
तेषाम् । वः । सुम्ने । सुऽछर्दिःऽतमे । नरः । स्याम । ये । च । सूरयः ॥ १३ ॥

ये यूयम् vऋतावानः ऋतवन्तो यज्ञवन्त उदकवन्तो वा vऋतजाताः । उक्त ऋतशब्दार्थः । तदर्थमुत्पन्नाः । अथवा ऋतात् प्रजापतेः[2] सकाशादुत्पन्नाः । vऋतावृधः उक्तार्थस्य ऋतस्य वर्धयितारः

---

१. ख-भ-अक्रमोत्रापि° । २. ख-प्रजातेः प; क्ष-त३-४-न-प्रजातेः; श-प्रजाजातेः ।

[v]घोरासः घोराः [v]अनृतद्विषः अयथाद्वेष्टारः [v]तेषां [v]वः युष्माकं [v]सुच्छर्दिष्टमे सुखतमे [v]सुक्षे धने अत्यन्तरमणीयगृहयुक्ते सुखे वा ये वयं [v]ये [v]च अन्ये [v]सूरयः स्तोतारस्ते सर्वे [v]स्याम भवेम ॥

सोमातिरेके माध्यंदिनसवने नैमित्तिके शस्त्रे 'उदु त्यत्' इत्ययं प्रगाथोऽनुरूपः। सूत्रितं च—'बण्महाँ असि सूर्योदु त्यद्दर्शतं वपुरिति प्रगाथौ स्तोत्रियानुरूपौ' (आश्व. श्रौ. ६. ७) इति। चातुर्विंशिकेऽहनि माध्यंदिनसवनेऽयमेव वैकल्पिकः स्तोत्रियस्तृचः। सूत्रितं च—'उदु त्यद्दर्शतं वपुरुदु त्ये मधुमत्तमाः' (आश्व. श्रौ. ७. ४) इति ॥

उदु त्यद्दर्शतं वपुर्दिव एति प्रतिह्वरे ।
यदीमाशुर्वहति देव एतशो विश्वस्मै चक्षसे अरम् ॥ १४ ॥

उत् । ऊँ इति । त्यत् । दर्शतम् । वपुः । दिवः । एति । प्रतिऽह्वरे ।
यत् । ईम् । आशुः । वहति । देवः । एतशः । विश्वस्मै । चक्षसे । अरम् ॥ १४ ॥

[v]त्यत् तत् [v]दर्शतं दर्शनीयं [v]वपुः मण्डलं [v]दिवः अन्तरिक्षस्य [v]प्रतिह्वरे समीपे [v]उदु [v]एति उदेति। उ इति पूरणः। [v]यदीं यदेतन्मण्डलम् [v]आशुः शीघ्रगामी [v]एतशः एतवर्णोऽश्वो [v]वहति धारयति। किमर्थम्। [v]विश्वस्मै सर्वस्मै [v]अरं [v]चक्षसे सम्यक् सर्वलोकदर्शनाय ॥

शीर्ष्णःशीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमा रजः ।
सप्त स्वसारः सुविताय सूर्यं वहन्ति हरितो रथे ॥ १५ ॥

शीर्ष्णःऽशीर्ष्णः । जगतः । तस्थुषः । पतिम् । समया । विश्वम् । आ । रजः ।
सप्त । स्वसारः । सुविताय । सूर्यम् । वहन्ति । हरितः । रथे ॥ १५ ॥

[v]शीर्ष्णःशीर्ष्णः सर्वस्यापि शिरसः। तृतीयार्थे पञ्चमी। स्वस्वशिरसेत्यर्थः[1]। सूर्यं वहन्तीत्यनेन संबध्यते। अथवा शिरःशब्देन तद्वान् पदार्थो लक्ष्यते। वीप्सया तस्य कात्स्न्र्यमुच्यते। सर्वस्य श्रेष्ठमित्यर्थः। [v]जगतः जङ्गमस्य [v]तस्थुषः स्थावरस्य [v]पतिं स्वामिनं [v]रथे वर्तमानं [v]सूर्यं [v]सुविताय[2] कल्याणाय[2] [v]विश्वं [v]रजः [v]समया सर्वलोकस्य समीपे। 'अभितः-परितःसमया०' (पा. म. २. ३. २. १) इत्यादिना समयाशब्दयोगात् द्वितीया। [v]सप्त सप्त-संख्याकाः [v]स्वसारः अन्यनिरपेक्षेण स्वयमेव सरन्त्यः [v]हरितः हरितवर्णा अश्वाः [v]वहन्ति ॥ ॥१०॥

तच्चक्षुर्देवहितं शुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतम् ॥१६॥

तत् । चक्षुः । देवऽहितम् । शुक्रम् । उत्ऽचरत् । पश्येम । शरदः । शतम् ।
जीवेम । शरदः । शतम् ॥ १६ ॥

[v]तत् प्रसिद्धं [v]चक्षुः सर्वस्य प्रकाशकं [v]देवहितं देवानां हितम्। तेषां हविःस्वीकारस्यैतदधीनत्वात्[3]। अथवा देवेन हितं [v]शुक्रं निर्मलं सूर्यमण्डलम् [v]उच्चरत् उद्गच्छति। तत् [v]शरदः [v]शतं शतसंवत्सरं [v]पश्येम। [v]जीवेम [v]शरदः [v]शतम्। पुनःश्रुतिरादरार्था ॥

---

१. ख–सर्वशिरसे०। २. ख-ग्न-त-न-भ-श–'सुविताय कल्याणाय' नास्ति। ३. ख–हविः-स्वीकारस्यैतद्दधानत्वात्; ग्न-त१-२-४–हविःस्वीकारस्यैतदीर्याधीनत्वात्; त३–हविःस्वीकारस्यैतदीया-धीनत्वात्; न–हविःस्वीकारस्यैतदीर्याधीनत्वात्; श१–हविर्वहनादय तदीयाधीनत्वात्; श२–हविः-स्वीकारस्यैतदार्याधीनत्वात्।

पृष्ठयाभिप्लवषडहयोः स्तोमनिमित्त आवापे 'काव्येभिरदाभ्या' इति तृचः। 'काव्येभिरदाभ्येति तिस्रः' (आश्व. श्रौ. ७. ५) इति हि सूत्रितम्॥

काव्येभिरदाभ्या यातं वरुण द्युमत्। मित्रश्च सोमपीतये॥ १७॥

काव्येभिः। अदाभ्या। आ। यातम्। वरुण। द्युऽमत्। मित्रः। च। सोमऽपीतये॥१७॥

हे ᵛअदाभ्या अदम्भनीयौ हे ᵛवरुण त्वं ᵛमित्रश्च ᵛद्युमत् द्युतिमन्तौ युवां ᵛकाव्येभिः अस्मत्कृतैः स्तोत्रैः ᵛआ ᵛयातम्। किमर्थम्। ᵛसोमपीतये सोमपानाय॥

दिवो धामभिर्वरुण मित्रश्चा यातमद्रुहा। पिबतं सोममातुजी॥ १८॥

दिवः। धामऽभिः। वरुण। मित्रः। च। आ। यातम्। अद्रुहा।
पिबतम्। सोमम्। आतुजी इत्याऽतुजी॥ १८॥

हे ᵛवरुण त्वं ᵛमित्रश्च ᵛअद्रुहा अद्रोग्धारौ युवां ᵛदिवः द्युलोकसंबन्धिभ्यः ᵛधामभिः धामभ्यः स्थानेभ्यः। पञ्चम्यर्थे तृतीया। अथवा धामभिस्तेजोभिर्विभूतिभिः सार्धम् ᵛआ ᵛयातम् अस्मद्यज्ञमागच्छतम्। आगत्य च ᵛआतुजी शत्रूणां सर्वतो हिंसकावादातारौ वा धनानामेवंरूपौ सन्तौ ᵛसोमं ᵛपिबतम्। 'तुजि पिजि हिंसाबलादाननिकेतनेषु'। अत्र हिंसायामादाने वा वर्तते॥

आ यातं मित्रावरुणा जुषाणावाहुतिं नरा। पातं सोममृतावृधा॥ १९॥

आ। यातम्। मित्रावरुणा। जुषाणौ। आऽहुतिम्। नरा। पातम्। सोमम्। ऋतऽवृधा॥१९॥

हे ᵛमित्रावरुणा मित्रावरुणौ हे ᵛनरा यागनेतारौ ᵛआहुतिं सोमलक्षणां ᵛजुषाणौ प्रीयमाणौ सन्तौ ᵛआ ᵛयातम् आगच्छतं यज्ञम्। आगत्य च हे ᵛऋतावृधा यज्ञस्य वर्धकौ युवां ᵛसोमं ᵛपातं पिबतम्॥ ॥ ११ ॥

'प्रति वां रथम्' इति दशर्चं द्वादशं सूक्तम्। 'प्रति वां दशाश्विनं तु तत्' इत्यनुक्रमणिका। ऋषिर्वसिष्ठः। छन्दस्त्रिष्टुप्। तुह्यादिपरिभाषयैतदादीनि अष्ट सूक्तान्यश्विदेवत्यानि। प्रातरनुवाक आश्विने क्रतौ त्रैष्टुभे छन्दस्येतदादिसूक्तसप्तकं द्वितीयवर्जं शंस्यम्। तथा च सूत्रं—'प्रति वां रथमिति सप्तानां द्वितीयमुद्धरेत्' (आश्व. श्रौ. ४. १५) इति॥

प्रति वां रथं नृपती जरध्यै हविष्मता मनसा यज्ञियेन।
यो वां दूतो न धिष्ण्यावजीगरच्छा सुनुर्न पितरा विवक्मि॥ १॥

प्रति। वाम्। रथम्। नृपती इति नृऽपती। जरध्यै। हविष्मता। मनसा। यज्ञियेन।
यः। वाम्। दूतः। न। धिष्ण्यौ। अजीगः। अच्छ। सूनुः। न। पितरा। विवक्मि॥१॥

हे ᵛनृपती नृणामृत्विग्यजमानानां स्वामिनावश्विनौ ᵛवां युवयोः ᵛरथं ᵛजरध्यै। जरा स्तुतिः। स्तोतुं ᵛप्रति गच्छामीति शेषः। केन[1] साधनेनेति[1] तदुच्यते। ᵛहविष्मता हविर्युक्तेन ᵛयज्ञियेन यज्ञार्हेण ᵛमनसा स्तोत्रेण। ᵛयः रथो वां हे ᵛधिष्ण्यौ धिषणार्हौ। धिषणा स्तुतिः। ᵛवां युवां ᵛदूतो ᵛन दूत इव ᵛअजीगः जागरयति प्रबोधयति अस्मान् प्रति गन्तुं तं रथम् ᵛअच्छा

---

१. ख-त३-भ-श-केनेति; ज्ञ-न-वेनेति; त४-वनेति।

vविवक्मि आवक्मि। प्रबोधने दृष्टान्तः। vसूनुर्न vपितरा पुत्रो मातापितराविव। अथवात्र यो रथो युवामजीगः तेन रथेन गन्तुं बुध्यमानौ युवामच्छा विवक्मीति वा योज्यम्॥

अशोच्यग्निः समिधानो अस्मे उपो अदृश्रन्तमसश्चिदन्ताः।
अचेति केतुरुषसः पुरस्ताच्छ्रिये दिवो दुहितुर्जायमानः॥ २॥

अशोचि। अग्निः। सम्ऽइधानः। अस्मे इति। उपो इति। अदृश्रन्। तमसः। चित्। अन्ताः। अचेति। केतुः। उषसः। पुरस्तात्। श्रिये। दिवः। दुहितुः। जायमानः॥ २॥

vअस्मे अस्माभिः vसमिधानः समिध्यमानः सन् vअग्निः vअशोचि दीप्यते। vतमसश्चित् तमसोऽपि vअन्ताः पर्यन्ताः प्रदेशाः vउपो vअदृश्रन् उपदृश्यन्ते सर्वैः। vकेतुः सर्वस्य प्रज्ञापकः[1] सूर्यः vदिवो vदुहितुः vउषसः vपुरस्तात् पूर्वस्यां दिशि vश्रिये शोभायै vजायमानः सन् vअचेति ज्ञायते। यस्मादेवं तस्माद्युवयोरागमनसमयः। अत आगच्छतमिति शेषः॥

आभि वां नूनमश्विना सुहोता स्तोमैः सिषक्ति नासत्या विवक्वान्।
पूर्वीभिर्यातं पथ्याभिरर्वाक्स्वर्विदा वसुमता रथेन॥ ३॥

अभि। वाम्। नूनम्। अश्विना। सुऽहोता। स्तोमैः। सिसक्ति। नासत्या। विवक्वान्। पूर्वीभिः। यातम्। पथ्याभिः। अर्वाक्। स्वःऽविदा। वसुऽमता। रथेन॥ ३॥

हे vअश्विना vवां युवां vसुहोता सुष्ठु देवानां स्तोता vविवक्वान् स्तुतीनां वक्ताहं हे vनासत्या सत्यभूतौ। इदमश्विनावित्यत्र योज्यम्। vस्तोमैः vसिषक्ति सेवते। अतः vअर्वाक् अस्मदभिमुखं vपूर्वीभिः vपथ्याभिः पूर्वश्रुण्यैर्मार्गैः vस्वर्विदा स्वर्गमुदकं वा जानता स्वरणवता वा vवसुमता धनवता वा vरथेन vयातं गच्छतम्॥

अवोर्वां नूनमश्विना युवाकुर्हुवे यद्वां सुते माध्वी वसूयुः।
आ वां वहन्तु स्थविरासो अश्वाः पिबाथो अस्मे सुषुता मधूनि॥ ४॥

अवोः। वाम्। नूनम्। अश्विना। युवाकुः। हुवे। यत्। वाम्। सुते। माध्वी इति। वसुऽयुः। आ। वाम्। वहन्तु। स्थविरासः। अश्वाः। पिबाथः। अस्मे इति। सुऽसुता। मधूनि॥४॥

हे vअश्विना अश्विनौ vअवोः रक्षित्रोर्युवाभ्यां vयुवाकुः युवां कामयमानोऽहं vनूनम् अद्य स्वभूतो भवामीति शेषः। vयत् यस्मात् हे vमाध्वी मधुरस्य सोमस्याहौ मधुविद्यासंबन्धिनौ वा vवां युवां vसुते अभिषुते सोमे vवसूयुः वसुकामः vहुवे स्तौमि अतो वां स्वभूतः। vवां युवाम् vआ vवहन्तु। के। vस्थविरासः स्थूलाः प्रवृद्धाः vअश्वाः। एतयोरतिप्रवृद्धस्वाच्छीघ्रगतेरपेक्षितत्वाच्च स्थविरैरेव भाव्यम्। आगमनानन्तरम् vअस्मे अस्माभिः vसुषुता सुष्ठ्वभिषुतानि vमधूनि मधुररसान् vपिबाथः पिबतम्॥

प्राचीमु देवाश्विना धियं मेऽमृध्रां सातये कृतं वसूयुम्।
विश्वा अविष्टं वाज आ पुरंधीस्ता नः शक्तं शचीपती शचीभिः॥ ५॥

---

१. ख–प्रकाशकः।

प्राचीम्। ऊँ इति। देवा। अश्विना। धियम्। मे। अमृध्राम्। सातये। कृतम्। वसुऽयुम्। विश्वाः। अविष्टम्। वाजे। आ। पुरम्ऽधीः।
ता। नः। शक्तम्। शचीपती इति शचीऽपती। शचीभिः ॥ ५ ॥

हे vअश्विना अश्विनौ vदेवा देवौ युवां vप्राचीम् ऋज्वीम् vअमृध्राम् अहिंसितां vवसूयुं धनमिच्छन्तीं vमे मम vधियं बुद्धिं स्तुतिं कर्म वा vसातये लाभायोचितां vकृतं कुरुतम्। किंच vवाजे vआ संग्रामेऽपि vविश्वाः vपुरंधीः अस्मदीया बुद्धीः vअविष्टं रक्षतम्। हे vशचीपती। शचीति कर्मनाम। कर्मणां पालकौ vता तौ युवां vशचीभिः अस्मदीयैः स्तुत्यादिरूपैः कर्मभिः vनः अस्मान् vशक्तं प्रयच्छतं धनमिति शेषः ॥ ॥ १२ ॥

अविष्टं धीष्वश्विना न आसु प्रजावद्रेतो अह्रयं नो अस्तु ।
आ वां तोके तनये तूतुजानाः सुरत्नासो देववीतिं गमेम ॥ ६ ॥

अविष्टम्। धीषु। अश्विना। नः। आसु। प्रजाऽवत्। रेतः। अह्रयम्। नः। अस्तु।
आ। वाम्। तोके। तनये। तूतुजानाः। सुऽरत्नासः। देवऽवीतिम्। गमेम ॥ ६ ॥

हे vअश्विना अश्विनौ vनः अस्मान् vआसु vधीषु एषु कर्मसु vअविष्टं रक्षतम्। vनः अस्मभ्यम् vअह्रयम् अक्षीणं vप्रजावत् पुत्रान्पुपेतं पुत्रोत्पादनसमर्थं vरेतः vअस्तु। vवां युवयोरनुग्रहाल्लब्धे vतोके पुत्रे vतनये तत्पुत्रादौ च vतूतुजानाः अभिमतं धनं प्रयच्छन्तः vसुरत्नासः शोभनधनाश्च सन्तः vदेववीतिं देवानां वीतिः प्राप्तिर्यस्मिंस्तादृशं यज्ञम् vआ vगमेम आगच्छेम ॥

एष स्य वां पूर्वगत्वेव सख्ये निधिर्हितो माध्वी रातो अस्मे ।
अहेळता मनसा यातमर्वाङश्नन्ता हव्यं मानुषीषु विक्षु ॥ ७ ॥

एषः। स्यः। वाम्। पूर्वगत्वाऽइव। सख्ये। निऽधिः। हितः। माध्वी इति। रातः। अस्मे इति।
अहेळता। मनसा। आ। यातम्। अर्वाक्। अश्नन्ता। हव्यम्। मानुषीषु। विक्षु ॥ ७ ॥

vएषः पुरतो दीयमानः vस्यः सः युवयोः प्रियत्वेन प्रसिद्धः सोमो हे vमाध्वी मधुप्रियावश्विनौ vवां युवयोः पुरतः vनिधिः निधिस्थानीयः vहितः स्थापितः vअस्मे अस्माभिः vरातः दत्तः संकल्पितः संनिहितः। किमिव। vसख्ये सख्यार्थं vपूर्वगत्वेव पुरतो गन्ता दूत इव। स यथा प्रियं जनयन् स्वामिनः पुरतो वर्तते तद्वदित्यर्थः। यस्मादेवं तस्मात् vअहेळता अक्रुध्यता vमनसा अनुग्रहयुक्तेन चेतसा vअर्वाक् अस्मदभिमुखम् vआ vयातम् आगच्छतम्। vअश्नन्ता vहव्यं हविः सोमादिकमश्नन्तावभ्यवहरन्तौ। कुत्र। vमानुषीषु vविक्षु मनुष्यरूपासु प्रजासु वर्तमानम् ॥

एकस्मिन्योगे भुरणा समाने परि वां सप्त स्रवतो रथो गात् ।
न वायन्ति सुभ्वो देवयुक्ता ये वां धूर्षु तरणयो वहन्ति ॥ ८ ॥

एकस्मिन्। योगे। भुरणा। समाने। परि। वाम्। सप्त। स्रवतः। रथः। गात्।
न। वायन्ति। सुऽभ्वः। देवऽयुक्ताः। ये। वाम्। धूःऽसु। तरणयः। वहन्ति ॥८॥

हे [v]भुरणा सर्वस्य भर्तारौ युवयोः [v]एकस्मिन् [v]समाने उभयसाधारणे [v]योगे अस्मद्विषये सति [v]वां युवयोः [v]रथः [v]सप्त [v]ऋषतः सर्पणस्वभावाः सप्तसंख्याका वा गङ्गाद्याः [v]परि [v]गात् परिगच्छति । शीघ्रमागच्छतीत्यर्थः[1] । तद्रथानुकूलाः [v]सुभ्वः सुभवनाः [v]देवयुक्ताः देवाभ्यां युवाभ्यां युक्ता अश्वाः शीघ्रगमने[2] [v]न [v]वायन्ति न श्रुण्यन्ति न श्राम्यन्ते । [v]ये अश्वाः [v]वां [v]धूर्षु रथस्य [v]तरणयः तारकाः शीघ्रगन्तारः [v]वहन्ति युवां ते न वायन्तीति ॥

असश्चता मघवद्भ्यो हि भूतं ये राया मघदेयं जुनन्ति ।
प्र ये बन्धुं सूनृताभिस्तिरन्ते गव्या पृञ्चन्तो अश्व्या मघानि ॥ ९ ॥

असश्चता । मघवत्ऽभ्यः । हि । भूतम् । ये । राया । मघऽदेयम् । जुनन्ति ।
प्र । ये । बन्धुम् । सूनृताभिः । तिरन्ते । गव्या । पृञ्चन्तः । अश्व्या । मघानि ॥ ९ ॥

[v]असश्चता कुत्राप्यसज्यमानौ युवां [v]मघवद्भ्यः धनवद्भ्यो हविष्मद्भ्यो यजमानेभ्यस्तेषामर्थाय [v]भूतं [v]हि भवतम् । तेभ्य एवानुरक्तौ भवतम् । अनुग्राह्या एव विशेष्यन्ते । [v]ये [v]राया धनेन निमित्तेन राया युक्ता वा [v]मघदेयं दातव्यं मघं धनं हविर्विलक्षणं वा [v]जुनन्ति प्रेरयन्ति यच्छन्ति । [v]ये च [v]बन्धुम् । स्नेहेन बध्नातीति बन्धुः । तं स्वसंबन्धिनम् । अथवा फलेन बध्नातीति बन्धुरध्वर्वादिः । तं [v]सूनृताभिः प्रियसत्यास्मिकाभिर्वाग्भिः [v]प्र [v]तिरन्ते प्रवर्धयन्ति । प्रपूर्वस्तिरतिर्वर्धनार्थः । किं कुर्वन्तः । [v]गव्या गोरूपाणि [v]अश्व्या अश्वरूपाणि च [v]मघानि धनानि [v]पृञ्चन्तः अर्थिभ्यः[3] प्रयच्छन्तः[3] । तेभ्यो मघवद्भ्यो भूतमिति ॥

नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत् ।
धत्तं रत्नानि जरतं च सूरीन्युयं पात स्वस्तिभिः सदा नः ॥ १० ॥

नु । मे । हवम् । आ । शृणुतम् । युवाना । यासिष्टम् । वर्तिः । अश्विनौ । इरावत् ।
धत्तम् । रत्नानि । जरतम् । च । सूरीन् । युयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १० ॥

हे [v]युवाना नित्ययौवनौ [v]नु अद्य युवां [v]मे [v]हवम् अस्मदीयां स्तुतिम् [v]आ [v]शृणुतम् । श्रुत्वा च हे [v]अश्विनौ [v]इरावत् हविर्युक्तं [v]वर्तिः गृहं [v]यासिष्टम् आगच्छतम् । आगत्य च [v]रत्नानि रमणीयानि धनानि [v]धत्तं दत्तम् । [v]सूरीन् स्तोतॄन् [v]जरतं वर्धयतम् । धातूनामनेकार्थत्वात् । शिष्टं स्पष्टम् ॥ ॥ १३ ॥

'आ शुभ्रा यातम्' इति नवर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षमाश्विनम् । आदितः सप्त विराजोऽष्टमीनवम्यौ त्रिष्टुभौ । अनुक्रम्यते च—'आ शुभ्रा नव सप्ताद्या विराजः' इति । सूक्तविनियोगो लैङ्गिकः ॥

आ शुभ्रा यातमश्विना स्वश्वा गिरो दत्ता जुजुषाणा युवाकोः ।
हव्यानि च प्रतिभृता वीतं नः ॥ १ ॥

---

१. ख-भ–स्वतो गच्छती° । २. श–शीघ्रगमनेन । ३. ख–यच्छतोर्थिभ्यः; ज्ञ-त१-२–यतोर्थिभ्यः प्रयच्छंतः; त३-४-न-श–यंतोर्थिभ्यः प्रयच्छंतः; भ–यंतोर्थिभ्यः ।

आ । शुभ्रा । यातम् । अश्विना । सुऽअश्वा । गिरः । दस्रा । जुजुषाणा । युवाकोः ।
हव्यानि । च । प्रतिऽभृता । वीतम् । नः ॥ १ ॥

हे ᵛशुभ्रा दीप्तौ ᵛसुअश्वा शोभनाश्वौ हे ᵛअश्विना अश्विनौ ᵛआ ᵛयातम् अस्मद्यज्ञमागच्छतम् । ᵛदस्रा शत्रूणामुपक्षपयितारौ युवां ᵛयुवाकोः युवां कामयमानस्य मम ᵛगिरः स्तुतीः ᵛजुजुषाणा सेवमानौ भवतमिति शेषः । न केवलं स्तुतिं किंतु ᵛनः अस्मदीयानि ᵛप्रतिभृता संभृतानि ᵛहव्यानि हवींषि ᵛच ᵛवीतं भक्षयतम् ॥

'प्र वामन्धांसि' इत्येषाश्विनशस्त्रयाज्या । सूत्रितं च—'प्र वामन्धांसि मद्यान्यस्थुरुभा पिबतमश्विना' (आश्व. श्रौ. ६. ५) इति ॥

प्र वामन्धांसि मद्यान्यस्थुरर्वं गन्तं हविषो वीतये मे ।
तिरो अर्यो हवनानि श्रुतं नः ॥ २ ॥

प्र । वाम् । अन्धांसि । मद्यानि । अस्थुः । अरम् । गन्तम् । हविषः । वीतये । मे ।
तिरः । अर्यः । हवनानि । श्रुतम् । नः ॥ २ ॥

हे अश्विनौ ᵛवां युवाभ्यां ᵛमद्यानि मदजनकानि ᵛअन्धांसि सोमलक्षणान्यन्नानि ᵛप्र ᵛअस्थुः प्रास्थिषत । गृहीतान्यासन्नित्यर्थः । अतो युवां ᵛमे मम ᵛहविषः ᵛवीतये पानाय ᵛअरम् अत्यर्थं क्षिप्रं ᵛगन्तम् आगच्छतम् । ᵛअर्यः अरेरस्मद्विरोधिनः ᵛहवनानि[1] ᵛतिरः तिरस्कृत्य ᵛनः । अस्मदाह्वानमित्यर्थः । तत् ᵛश्रुतं शृणुतम् । श्रुतमित्यस्य वाक्यादित्वादनिघातः ॥

प्र वां रथो मनोजवा इयर्ति तिरो रजांस्यश्विना शतोतिः ।
अस्मभ्यं सूर्यावसू इयानः ॥ ३ ॥

प्र । वाम् । रथः । मनःऽजवाः । इयर्ति । तिरः । रजांसि । अश्विना । शतऽऊतिः ।
अस्मभ्यम् । सूर्यावसू इति । इयानः ॥ ३ ॥

हे ᵛसूर्यावसू सूर्यायाः सह रथे वसन्तौ ᵛवां युवयोः ᵛरथः ᵛअस्मभ्यम् अस्मदर्थम् ᵛइयानः याच्यमानः सन् ᵛइयर्ति । आगच्छत्यस्मद्यज्ञम् । अथवा वां प्रेरयति गमनाय । कीदृशो रथः । ᵛमनोजवाः मनोवेगः ᵛशतोतिः अपरिमितास्मद्विषयरक्षणः । किं कुर्वन् । ᵛरजांसि लोकान् ᵛतिरः तिरस्कृत्यातिक्रम्य इयर्तीति ॥

अयं ह यद्वां देवया उ अद्रिरूर्ध्वो विवक्ति सोमसुद्युवभ्याम् ।
आ वल्गू विप्रो ववृतीत हव्यैः ॥ ४ ॥

अयम् । ह । यत् । वाम् । देवऽयाः । ऊँ इति । अद्रिः । ऊर्ध्वः । विवक्ति । सोमऽसुत् । युवऽभ्याम् ।
आ । वल्गू इति । विप्रः । ववृतीत । हव्यैः ॥ ४ ॥

ᵛयत् यदा ᵛवां युवां प्रति ᵛदेवयाः देवौ युवां कामयमानः । ᵛउ इति पूरणः । ᵛअयम् ᵛअद्रिः अभिषवग्रावा ᵛसोमसुत् सोममभिषुण्वन् ᵛयुवभ्यां युवाभ्यामर्थायाभिषुण्वन्निति संबन्धः ।

---

१. घ–हवनानि आह्वानानि ।

एवं कुर्वन् ᵛऊर्ध्वः उन्नतः सन् ᵛविवक्ति उच्चैः शब्दयति तदानीं ᵛवक्वा सुन्दरौ युवां ᵛविप्रः मेधावी यजमानः ᵛहव्यैः हविर्भिः ᵛआ ᵛववृतीत आवर्तयति ॥

चित्रं हु यद्वां भोजनं न्वस्ति न्यत्रये महिष्वन्तं युयोतम् ।
यो वामोमानं दधते प्रियः सन् ॥ ५ ॥

चित्रम् । हु । यत् । वाम् । भोजनम् । नु । अस्ति । नि । अत्रये । महिष्वन्तम् । युयोतम् ।
यः । वाम् । ओमानम् । दधते । प्रियः । सन् ॥ ५ ॥

हे अश्विनौ ᵛवां युवयोः ᵛचित्रं चायनीयं ᵛयत् ᵛभोजनं धनम् ᵛअस्ति ᵛहु अस्ति खलु । ᵛनु इति पूरणः । तदस्मभ्यं दत्तमित्यर्थः । अथ तयोः स्तुतिः । ᵛअत्रये एतन्नामकायर्षेः । पञ्चम्यर्थे चतुर्थी । तस्मात् ᵛमहिष्वन्तम् ऋबीसं ᵛनि ᵛयुयोतं पृथक्कुरुतम् । ᵛयः अत्रिः ᵛप्रियः ᵛसन् स्तोतृत्वा-युवाभ्यां प्रियभूतः सन् युवाभ्यामेव कृतम् ᵛओमानं रक्षणं[1] सुखं[1] ᵛदधते धारयति[2] ॥ ॥१४॥

उत त्यद्वां जुरते अश्विना भूड्यवानाय प्रतीत्यं हविर्दे ।
अधि यद्वर्प इतऊति धत्थः ॥ ६ ॥

उत । त्यत् । वाम् । जुरते । अश्विना । भूत् । च्यवानाय । प्रतीत्यम् । हविःऽदे ।
अधि । यत् । वर्पः । इतःऽऊति । धत्थः ॥ ६ ॥

ᵛउत अपि च हे ᵛअश्विना अश्विनौ ᵛवां युवयोः कर्म कुर्वते ᵛजुरते जूर्णाय ᵛहविर्दे हविर्दात्रे ᵛच्यवानाय एतन्नामकाय महर्षये ᵛत्यत् तत् ᵛप्रतीत्यं प्रतिगमनं तस्य रूपस्य प्रत्याप्त्यै ᵛभूत् अभूत् । किं तदिति । ᵛयद्वर्पः रूपम् ᵛइतऊति इतोगमनाख्यं मृत्योः सकाशादितःप्राप्तिरूपम् ᵛअधि ᵛधत्थः अध्यधत्तम् । ' युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः ' (ऋ. सं. १. ११७. १३) इत्यादिषु च्यवानस्य युवयोर्नवीकरणं प्रसिद्धम् ॥

उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे ।
निरीं पर्षदरावा यो युवाकुः ॥ ७ ॥

उत । त्यम् । भुज्युम् । अश्विना । सखायः । मध्ये । जहुः । दुःऽएवासः । समुद्रे ।
निः । ईम् । पर्षत् । अरावा । यः । युवाकुः ॥ ७ ॥

ᵛउत अपि च ᵛत्यं तं ᵛभुज्युम् एतन्नामानं ᵛसमुद्रे ᵛमध्ये समुद्रोदकस्य मध्ये ᵛसखायः भुज्युसखिभूताः ᵛदुरेवासः दुष्टगमनाः ᵛजहुः त्यक्तवन्तः । ᵛईम् एनं समुद्रमध्ये क्षिप्तं ᵛनिः ᵛपर्षत् निरपारयतम् । ᵛयः भुज्युः ᵛयुवाकुः युवां कामयिता ᵛअरावा अरणवानभिगन्ता च तमेनं निरपारयतम् । अत्राश्विनेषु सूक्तेषु कथाः सूच्यन्ते । अत्रिभुज्वादीनामप्सिजलादिभ्यो रक्षणरूपास्ताः सर्वा महता प्रपञ्चेनास्माभिः ' नासत्याभ्यां बर्हिरिव ' (ऋ. सं. १. ११६. १) इत्यत्र प्रपञ्चिताः । तास्तत्र द्रष्टव्याः ॥

---

१. ख-ग्न-त-न-भ-श- रक्षणसुखं । २. घ- धारयेत्; ङ- धारयतं; ज्ञ- धारयतः; त३-न-श-धारयत ।

वृकाय चिज्जसमानाय शक्तमुत श्रुतं शयवे हूयमाना ।
यावुघ्न्यामपिन्वतमपो न स्तर्यं चिच्छक्त्यश्विना शचीभिः ॥ ८ ॥

वृकाय चित् । जसमानाय । शक्तम् । उत । श्रुतम् । शयवे । हूयमाना ।
यौ । अघ्न्याम् । अपिन्वतम् । अपः । न । स्तर्यम् । चित् । शक्ती । अश्विना । शचीभिः ॥८॥

वृकाय धनादात्रे । अभिलषत इत्यर्थः । चित् इति पूरणः । अथवा परेभ्यो धनानि प्रयच्छते । यद्वा । वृकाय वृकवद्धिंसकाय । एतन्नामकाय जसमानाय कर्मभिरुपक्षीयमाणायर्षये शक्तम् अभिमतं धनमदत्तम् । शकेर्दानार्थस्य लुङ्येतद्रूपम् । अडभावश्छान्दसः । उत अपि च शयवे एतन्नामकायर्षये हूयमाना आहूयमानौ युवां श्रुतम् अशृणुतम् । यौ युवाम् अघ्न्यां गाम् अपिन्वतम् अपूरयतं क्षीरेण अपो न अद्भिरिव नदीम् । तां यथोदकेन पूरयतस्तद्वत् । कीदृशीमघ्न्याम् । स्तर्यं चित् स्तरीमपि निवृत्तप्रसवां वृद्धामपि शक्ती शक्त्या सामर्थ्येन दोहनलक्षणेन युक्तां कृत्वा शचीभिः युष्मदीयैः कर्मभिर्हे अश्विनाविति । 'शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम्' (ऋ. सं. १. ११६. २२) इत्यादि ह्युक्तम् ॥

एष स्य कारुर्जरते सूक्तैरग्रे बुधान उषसां सुमन्माः ।
इषा तं वर्धदघ्न्या पयोभिर्युयं पात स्वस्तिभिः सदा नः ॥ ९ ॥

एषः । स्यः । कारुः । जरते । सुऽउक्तैः । अग्रे । बुधानः । उषसाम् । सुऽमन्माः ।
इषा । तम् । वर्धत् । अघ्न्या । पयःऽभिः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥९॥

एषः स्तोता स्यः स प्रसिद्धो वसिष्ठः कारुः स्तोता उषसाम् अग्रे प्रातःसवने बुधानः बुध्यमानः सुमन्माः शोभनमतिः सुष्ठुतिर्वा सूक्तैः जरते स्तौति । तम् इषा अन्नेन वर्धत् वर्धयतम् । वचनव्यत्ययः । अघ्न्या अहन्तव्या गौश्च वर्धत् वर्धयतु । अथवैकमेव वाक्यम् । अघ्न्या गौर्वसिष्ठस्य प्रतिनियताग्निहोत्रार्था गौरिषान्नेन । घृतादिनेत्यर्थः । पयोभिः च तं वसिष्ठं वर्धत् वर्धयतु । एवमात्मानं परोक्षेण निर्दिदेश । शिष्टं स्पष्टम् ॥ ॥ १५ ॥

'आ वां रथः' इत्यष्टर्चं चतुर्दशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनम् । अनुक्रम्यते च—'आ वां रथोऽष्टौ' इति । प्रातरनुवाकाश्विनशस्त्रयोर्विनियोग उक्तः ॥

आ वां रथो रोदसी बद्बधानो हिरण्ययो वृषभिर्यात्वश्वैः ।
घृतवर्तनिः पविभीं रुचान इषां वोळ्हा नृपतिर्वाजिनीवान् ॥ १ ॥

आ । वाम् । रथः । रोदसी इति । बद्बधानः । हिरण्ययः । वृषऽभिः । यातु । अश्वैः ।
घृतऽवर्तनिः । पविऽभिः । रुचानः । इषाम् । वोळ्हा । नृऽपतिः । वाजिनीऽवान् ॥१॥

हे अश्विनौ वां रथः वृषभिः युवभिः अश्वैः युक्तः सन् आ यातु यज्ञमस्मदीयम् । कीदृशो रथः । रथो विशेष्यते । रोदसी द्यावापृथिव्यौ बद्बधानः बाधमानः हिरण्ययः हिरण्मयः[1] घृतवर्तनिः घृतमुदकं वर्तन्यां यस्य तादृशः पविभिः रथनेमिभिर्मधुपात्रैर्वा रुचानः दीप्यमानः इषां वोळ्हा यजमानैर्दत्तानां हविषां वाहको दातव्यानां वान्नानां[2] वोळ्हा नृपतिः नृणां यजमानानां स्वामी वाजिनीवान् अन्नवान् ॥

---

१. ख– 'हिरण्मयः' नास्ति; ज्ञ-ञ्ञ-त१-२-न-भ–हिरण्यमयः । २. ख-त-न-भ–चान्नानां ।

स पप्रथानो अभि पञ्च भूमा त्रिवन्धुरो मनसा यातु युक्तः ।
विशो येन गच्छथो देवयन्तीः कुत्रा चिद्यामभश्विना दधाना ॥ २ ॥

सः । पप्रथानः । अभि । पञ्च । भूम । त्रिऽवन्धुरः । मनसा । आ । यातु । युक्तः ।
विशः । येन । गच्छथः । देवऽयन्तीः । कुत्र । चित् । यामम् । अश्विना । दधाना ॥२॥

vसः रथः vपञ्च vभूम भूतानि सर्वप्राणिनः vपप्रथानः प्रथमानः vत्रिवन्धुरः । वन्धुरमुच्चावचं सारथ्यवस्थानं काष्ठमयम् । तादृशैस्त्रिभिर्युक्तः vमनसा अस्मत्स्तुत्या vयुक्तः vअभि vआ vयातु । vयेन रथेन vदेवयन्तीः vविशः यजमानान् प्रति vगच्छथः । हे vअश्विना अश्विनौ vकुत्र vचित् यत्र क्वापि vयामं गमनं vदधाना धारयन्तौ येन विशो गच्छथः स यास्विति ॥

स्वश्वा यशसा यातमर्वाग्दस्रा निधिं मधुमन्तं पिबाथः ।
वि वां रथो वध्वा३ यादमानोऽन्तान्दिवो बाधते वर्तनिभ्याम् ॥ ३ ॥

सुऽअश्वा । यशसा । आ । यातम् । अर्वाक् । दस्रा । निऽधिम् । मधुऽमन्तम् । पिबाथः ।
वि । वाम् । रथः । वध्वा । यादमानः । अन्तान् । दिवः । बाधते । वर्तनिऽभ्याम् ॥ ३ ॥

हे देवौ vस्वश्वा शोभनाश्वेन vयशसा च vअर्वाक् अस्मदभिमुखं vयातम् आगच्छतम् । हे vदस्रा शत्रूणामुपक्षपयितारौ vमधुमन्तं मधुररसोपेतं vनिधिं निधिवन्निहितं सोमं vपिबाथः पिबतम् । vवां युवयोः vरथः vवध्वा सूर्यया सह vयादमानः गन्तव्यान् प्रति गच्छन् । गमयन्नित्यर्थः । एवं कुर्वन् vवर्तनिभ्यां स्वचक्राभ्यां vदिवः vअन्तान् पर्यन्तप्रदेशान् vबाधते शीघ्रगमनेन पीडयति ॥

युवोः श्रियं परि योषावृणीत सूरो दुहिता परितक्म्यायाम् ।
यदेत्रयन्तमवथः शचीभिः परिं ध्रंसमोमना वां वयो गात् ॥ ४ ॥

युवोः । श्रियम् । परि । योषा । अवृणीत । सूरः । दुहिता । परिऽतक्म्यायाम् ।
यत् । देवऽयन्तम् । अवथः । शचीभिः । परि । ध्रंसम् । ओमना । वाम् । वयः । गात् ॥४॥

vयुवोः युवयोः vश्रियम् । श्रयत इति श्री रथः । तं सेवामेव वा vयोषा सर्वदा मिश्रयन्ती योषित् vसूरः सूर्यस्य vदुहिता vपरि vअवृणीत । कदा । vपरितक्म्यायां रात्रौ परितस्तकनवति संग्रामे यज्ञे वा गन्तव्ये । किंच vयत् यदा vदेवयन्तं देवकामं यजमानं यज्ञं वा vशचीभिः युवयोर्गमनादिलक्षणैः कर्मभिः vअवथः रक्षथः तदानीं vध्रंसं दीप्तं vवयः अन्नं सोमादिलक्षणम् vओमना अवनेन रक्षणेन निमित्तेन vवां vपरि vगात् पर्यगात् ॥

यो ह स्य वां रथिरा वस्त उस्रा रथो युजानः परियाति वर्तिः ।
तेन नः शं योरुषसो व्युष्टौ न्यश्विना वहतं यज्ञे अस्मिन् ॥ ५ ॥

यः । ह । स्यः । वाम् । रथिरा । वस्ते । उस्राः । रथः । युजानः । परिऽयाति । वर्तिः ।
तेन । नः । शम् । योः । उषसः । विऽउष्टौ । नि । अश्विना । वहतम् । यज्ञे । अस्मिन् ॥५॥

vथः रथः। vह इति पूरणः। vस्यः स प्रसिद्धो रथो हे vरथिरा रथिनौ। मत्वर्थीयो रः। vउस्राः तेजांसि vवस्ते आच्छादयति। यश्च vरथः vयुजानः अश्वैर्युक्तः सन् vवर्तिः मार्गं यजमानगृहं वा vपरियाति परिगच्छति। vतेन रथेन हे vअश्विना अश्विनौ vनः अस्माकम् vअस्मिन् vयज्ञे vउषसो vव्युष्टौ प्रातःकाले vशं शमनाय पापानां vयोः मिश्रणाय च सुखानां vनि vवहतं नितरां प्राप्नुतम्॥

नरा॑ गौ॒रेव॑ वि॒द्युतं॑ तृषा॒णास्माक॑म॒द्य सव॒नोप॑ यातम्।
पु॒रु॒त्रा हि वां॑ म॒तिभि॒र्हव॑न्ते॒ मा वा॑म॒न्ये नि य॑मन्देव॒यन्तः॥ ६॥

नरा॑। गौरा॑ऽइव। वि॒ऽद्युत॑म्। तृ॒षा॒णा। अ॒स्माक॑म्। अ॒द्य। सव॑ना। उप॑। यात॑म्।
पु॒रु॒ऽत्रा। हि। वा॒म्। म॒तिऽभिः। हव॑न्ते। मा। वा॒म्। अ॒न्ये। नि। य॒म॒न्। दे॒व॒ऽयन्तः॥६॥

हे vनरा नेतारावश्विनौ vगौरेव गौरा मृगीव vविद्युतं विशेषेण दीप्यमानं सोमं प्रति vतृषाणा तृष्णायुक्तौ vअद्य vअस्माकं vसवना सवनानि vउप vयातम् उपागच्छतम्। vपुरुत्रा बहुषु यज्ञेषु vवां युवां यजमानाः vमतिभिः स्तुतिभिः vहवन्ते vहि स्तुवन्ति। अतः vवां युवाम् vअन्ये यष्टारः vदेवयन्तः देवौ कामयमाना वां युवां vमा vनि vयमन् मा नियच्छन्तु॥

युवं भु॒ज्युमर्व॑विद्धं समु॒द्र उदू॑हथु॒रर्ण॑सो॒ अस्रि॑धानैः।
प॒त॒त्रिभि॑रश्र॒मैर॑व्य॒थिभि॑र्दं॒सना॑भिरश्विना पा॒रय॑न्ता॥ ७॥

युव॑म्। भु॒ज्युम्। अर्व॑ऽविद्धम्। स॒मु॒द्रे। उत्। ऊ॒ह॒थुः। अर्ण॑सः। अस्रि॑धानैः।
प॒त॒त्रिऽभिः। अ॒श्र॒मैः। अ॒व्य॒थिऽभिः। दं॒सना॑भिः। अ॒श्वि॒ना। पा॒रय॑न्ता॥ ७॥

हे vअश्विना अश्विनौ vयुवं vभुज्युम् एतन्नामकम् vअवविद्धं विक्षिप्तं सखिभिः vसमुद्रे तन्मध्ये निमग्नम् vअर्णसः उदकात् vउदूहथुः। किं कुर्वन्ताविति तदुच्यते। vअस्रिधानैः अक्षीयमाणैः vअश्रमैः vअव्यथिभिः च vपतत्रिभिः पतनवद्भिर्गमनवद्भी रथे नियुक्तैरश्वैः vदंसनाभिः शारीरैः कर्मभिश्च vपारयन्ता पारयन्तौ समुद्रमर्णस उदूहथुरिति। 'नासत्या भुज्युमूहथुः पतद्भिः' (ऋ. सं. १. ११६. ४) इति ह्युक्तम्॥

नू मे॒ हव॒मा शृ॑णुतं युवाना यासि॒ष्टं व॒र्तिर॑श्विना॒विरा॑वत्।
ध॒त्तं र॒त्नानि॑ ज॒रत॑ं च सू॒रीन्यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः॥ ८॥

नु। मे॒। हव॑म्। आ। शृ॒णु॒त॒म्। यु॒वा॒ना॒। या॒सि॒ष्टम्। व॒र्तिः। अ॒श्वि॒नौ। इरा॑ऽवत्।
ध॒त्तम्। र॒त्नानि॑। ज॒रत॑म्। च॒। सू॒रीन्। यू॒यम्। पा॒त॒। स्व॒स्तिऽभिः। सदा॑। नः॥८॥

'नू मे हवम्' इत्यष्टमी सिद्धा॥ ॥ १६॥

'आ विश्ववारा' इति सप्तर्चं पञ्चदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनम्। अनुक्रम्यते च—'आ विश्ववारा सप्त' इति। प्रातरनुवाक आश्विनशस्त्रे च विनियोग उक्तः। आद्यस्तृचस्तृतीये छन्दोमे प्रउगशस्त्रे विनियुक्तः। 'आ विश्ववाराश्विना गतं नोऽयं सोम इन्द्र' (आश्व. श्रौ. ८. ११) इति सूत्रितत्वात्॥

आ विश्ववाराश्विना गतं नः प्र तत्स्थानमवाचि वां पृथिव्याम् ।
अश्वो न वाजी शुनपृष्ठो अस्थादा यत्सेदथुर्ध्रुवसे न योनिम् ॥ १ ॥

आ । विश्वऽवारा । अश्विना । गतम् । नः । प्र । तत् । स्थानम् । अवाचि । वाम् । पृथिव्याम् ।
अश्वः । न । वाजी । शुनऽपृष्ठः । अस्थात् । आ । यत् । सेदथुः । ध्रुवसे । न । योनिम् ॥ १ ॥

हे [v]विश्ववारा सर्ववरणीयौ [v]अश्विना अश्विनौ [v]नः अस्माकं यत् यं यागम् [v]आ [v]गतम् आगच्छतं [v]वां युवयोः [v]तत्स्थानं [v]पृथिव्यां वेद्यां [v]प्र [v]अवाचि प्रोच्यते । तदर्थं [v]शुनपृष्ठः सुखकरपृष्ठभागः । अत्यन्तविपुलत्वात् आरूढानां[1] सुखकरपृष्ठभाग इत्यर्थः । [v]वाजी वेगवान् [v]अश्वः[2] [v]अस्थात्[3] तिष्ठतु युवयोः समीपे । [v]यत् । यमित्यर्थः । यमश्वम् [v]आ [v]सेदथुः आसीदथः सोऽश्वः । यद्वा । यत्स्थानमासीदथः तत्स्थानमश्व आश्रयस्थितो गमनाय । स्थितौ दृष्टान्तः । [v]ध्रुवसे ध्रुवाय निवासाय [v]योनिं [v]न योनिं स्थानमिव ॥

सिषक्ति सा वां सुमतिश्चनिष्ठार्तापि घर्मो मनुषो दुरोणे ।
यो वां समुद्रान्त्सरितः पिपर्त्येतग्वा चिन्न सुयुजा युजानः ॥ २ ॥

सिसक्ति । सा । वाम् । सुऽमतिः । चनिष्ठा । अतापि । घर्मः । मनुषः । दुरोणे ।
यः । वाम् । समुद्रान् । सरितः । पिपर्ति । एतऽग्वा । चित् । न । सुऽयुजा । युजानः ॥ २ ॥

[v]सा [v]सुमतिः अस्माभिः क्रियमाणा शोभना स्तुतिः [v]चनिष्ठा कमनीयतमातिशयेनान्नवती वा [v]वां युवां [v]सिषक्ति सेवते । किंच [v]घर्मः प्रवर्ग्यश्च [v]मनुषः मनुष्यस्य यजमानस्य [v]दुरोणे यागगृहे [v]अतापि तप्तोऽभूत् । 'यत्[4] घ्रौं इत्यपतत्तद्घर्मस्य[5] घर्मत्वम्' (तै. आ. ५. १. ५) इति श्रुतिः । यज्ञस्य शिरःस्थानीयत्वादस्य । [v]यः घर्मः [v]वां युवां प्रामुवन्निति शेषः । [v]समुद्रान् [v]सरितः च [v]पिपर्ति पूरयति वृष्टिद्वारा । [v]एतग्वा [v]चित्र । चिदिति पूरणः । अश्वाविव यथा [v]सुयुजा सुष्ठु युक्तौ रथे भवतस्तथेत्यर्थः । नेत्युपमार्थे । तद्वद्युवां यज्ञे [v]युजानः योजयन् यज्ञः । स एवं करोति ॥

यानि स्थानान्यश्विना दधाथे दिवो यह्वीष्वोषधीषु विक्षु ।
नि पर्वतस्य मूर्धनि सदन्तेषुं जनाय दाशुषे वहन्ता ॥ ३ ॥

यानि । स्थानानि । अश्विना । दधाथे इति । दिवः । यह्वीषु । ओषधीषु । विक्षु ।
नि । पर्वतस्य । मूर्धनि । सदन्ता । इषम् । जनाय । दाशुषे । वहन्ता ॥ ३ ॥

हे [v]अश्विना युवां [v]दिवः द्युलोकादागत्य [v]यानि [v]स्थानानि [v]दधाथे कुरुथः । कुत्रेति उच्यते । [v]यह्वीषु महतीषु [v]ओषधीषु [v]विक्षु यजमानेषु च । तौ युवां [v]पर्वतस्य मेघस्यान्तरिक्षस्य वा [v]मूर्धनि स्थाने [v]नि [v]सदन्ता निषीदन्तौ [v]इषम् अन्नं [v]दाशुषे हविर्दात्रे [v]जनाय यजमानाय [v]वहन्ता प्रापयन्तौ भवतमिति शेषः ॥

---

१. ख– तदारूढानां; ज्ञ-त-३-न-भ– दारूढानां । २. घ-ज्ञ-त१-२– अश्वो न अश्वोस्थात्; ज्ञ– अत्यो न अश्वो न स्थात्; त३-४-श–अत्यो न अश्वोस्थात्; भ– अश्वो न श्वोस्थात् । ३. ख–यद्घ्रां इत्यतपत°; ज्ञ-ज्ञ-त१-२-४– यद्धर्म इत्यतपत्त०; त३-न-भ-श२– यद्धर्ममतपत्त°; श१–यद्धर्म इत्यपतत्त° ।

चनिष्टं देवा ओषधीष्वप्सु यद्योग्या अश्नवैथे ऋषीणाम् ।
पुरूणि रत्ना दधतौ न्य१स्मे अनु पूर्वाणि चख्यथुर्युगानि ॥ ४ ॥

चनिष्टम् । देवौ । ओषधीषु । अप्ऽसु । यत् । योग्याः । अश्नवैथे इति । ऋषीणाम् ।
पुरूणि । रत्ना । दधतौ । नि । अस्मे इति । अनु । पूर्वाणि । चख्यथुः । युगानि ॥४॥

हे देवा देवौ युवाम् ओषधीषु ओषधिविकारांश्चरुपुरोडाशादिकान् अप्सु सोमरसान् चनिष्टम् । अत्यन्तकमनीयतमं कामयेथामित्यर्थः । यत् यस्मात् योग्याः युवयोरुचिता ओषधीरपश्च ऋषीणां संबन्धिनीः अश्नवैथे व्याप्नुथः तस्मादस्मदीया अपि कामयेथामित्यर्थः । यद्वा । ऋषीणामस्माकमिति पूजार्थं बहुवचनम् । यद्यस्मादोषधीष्वप्सु च चनिष्टं योग्याः स्तुतीश्चाश्नवैथे तस्मात् अस्मे अस्मासु पुरूणि बहूनि रत्ना रमणीयानि धनानि नि दधतौ पूर्वाणि युगानि मिथुनानि जायापतिरूपाणि अनु चख्यथुः ख्यातवन्तौ । अनुकृष्टवन्तावनुग्रहार्थम् ॥

शुश्रुवांसा चिदश्विना पुरूण्यभि ब्रह्माणि चक्षाथे ऋषीणाम् ।
प्रति प्र यातं वरमा जनायास्मे वामस्तु सुमतिश्चनिष्ठा ॥ ५ ॥

शुश्रुऽवांसा । चित् । अश्विना । पुरूणि । अभि । ब्रह्माणि । चक्षाथे इति । ऋषीणाम् ।
प्रति । प्र । यातम् । वरम् । आ । जनाय । अस्मे इति । वाम् । अस्तु । सुऽमतिः । चनिष्ठा ॥५॥

हे अश्विना अश्विनौ । चित् इति पूरणः । युवां शुश्रुवांसा श्रुतवन्तौ सन्तौ पुरूणि बहूनि ब्रह्माणि परिवृढानि कर्माणि स्तुतिलक्षणानि ऋषीणाम् अस्माकं संबन्धीनि अभि चक्षाथे अभिपश्यथो युवाम् । अतः जनाय[1] जनस्य यजमानस्य मम वरं यज्ञं प्रति प्र यातम् । वां युवयोः चनिष्ठा उत्कृलक्षणा सुमतिः अनुग्रहमतिः अस्मे अस्मासु अस्तु भवतु[2] ॥

यो वां यज्ञो नासत्या हविष्मान्कृतब्रह्मा समर्यो१ भवाति ।
उप प्र यातं वरमा वसिष्ठमिमा ब्रह्माण्यृच्यन्ते युवभ्याम् ॥ ६ ॥

यः । वाम् । यज्ञः । नासत्या । हविष्मान् । कृतऽब्रह्मा । सऽमर्यः । भवाति ।
उप । प्र । यातम् । वरम् । आ । वसिष्ठम् । इमा । ब्रह्माणि । ऋच्यन्ते । युवऽभ्याम् ॥६॥

हे नासत्या अश्विनौ वां युवयोः यः यज्ञः यजमानः समर्यः ऋत्विग्भूपैर्मर्त्यैः सहितः सन् हविष्मान् हविषा युक्तः कृतब्रह्मा कृतस्तोत्ररूपकर्मा भवाति भवति तं वरं वरणीयं वसिष्ठम् आ उप प्र यातं प्रकर्षेणोपागच्छतम् । इमा इमानि ब्रह्माणि मन्त्रजातानि युवभ्यां युवाभ्यामर्थायागमनाय ऋच्यन्ते स्तूयन्ते । क्रियन्त इत्यर्थः ॥

इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम् ।
इमा ब्रह्माणि युवयून्यग्मन्युयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

इयम् । मनीषा । इयम् । अश्विना । गीः । इमाम् । सुऽवृक्तिम् । वृषणा । जुषेथाम् ।
इमा । ब्रह्माणि । युवऽयूनि । अग्मन् । युयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

---

१. ख-ञ-त-न-भ-श-'जनाय' नास्ति । २. ख-ञ-त-न-भ-भवति ।

अथ सप्तम्या स्तुतिमुपसंहरति। हे ᵛअश्विना अश्विनौ ᵛइयं ᵛमनीषा स्तुतिर्युवयोः कृतेति शेषः। तदेवादरार्थं पुनरुच्यते। ᵛइयं ᵛगीः स्तुतिः कृता। हे ᵛवृषणा कामानां वर्षकौ ᵛइमाम् अस्मत्कृतां ᵛसुवृक्तिं शोभनां स्तुतिं ᵛजुषेथां सेवेथाम्। ᵛइमा इमानि ᵛब्रह्माणि कर्माणि स्तुतिरूपाणि ᵛयुवयूनि युवां कामयमानानि सन्ति ᵛअग्मन् गच्छन्तु युवाम्। यूयं पातेति सिद्धम्॥ ॥ १७ ॥ ॥ ४ ॥

पञ्चमेऽनुवाके एकोनविंशतिसूक्तानि। तत्र 'अप स्वसुः' इति षडृचं प्रथमं सूक्तं[1] त्रैष्टुभमाश्विनम्। अनुक्रम्यते च—'अप स्वसुः षट्' इति। गतो विनियोगः॥

अप॒ स्वसु॒रुष॑सो नꣳजिही॒ते रि॒णक्ति॑ कृ॒ष्णीर॑रु॒षाय॒ पन्था॑म्।
अश्वा॑मघा॒ गोम॑घा॒ वां हु॒वेम॒ दिवा॒ नक्तं॑ शरु॒मस्मद्यु॑योतम्॥ १॥

अप। स्वसुः। उषसः। नक्। जिहीते। रिणक्ति। कृष्णीः। अरुषाय। पन्थाम्।
अश्वऽमघा। गोऽमघा। वाम्। हुवेम। दिवा। नक्तम्। शरुम्। अस्मत्। युयोतम्॥१॥

ᵛस्वसुः स्वसृस्थानीयायाः ᵛउषसः सकाशात् ᵛनक् नक्तं रात्रिः ᵛअप ᵛजिहीते अपगच्छति। तस्या अवकाशं दत्त्वा स्वयमपगतेत्यर्थः। 'स्वसा स्वस्रे ज्यायस्यै योनिमारैक्' (ऋ. सं. १. १२४. ८) इत्युक्तम्। ᵛकृष्णीः कृष्णवर्णा रात्रिः ᵛअरुषाय आरोचमानायाह्ने सूर्याय वा ᵛपन्थां पन्थानं मार्गं ᵛरिणक्ति रेचयति। यस्मादेवं तस्माद्युवयोरागमनसमयत्वात् हे ᵛअश्वामघा अश्वधनौ हे ᵛगोमघा गोधनौ। उभयोः प्रदातारावित्यर्थः। ईदृशौ ᵛवां युवां ᵛहुवेम स्तुमः। आह्वयामः। ᵛदिवा ᵛनक्तं सर्वदा ᵛशरुं हिंसकम् ᵛअस्मत् अस्मत्तः ᵛयुयोतं पृथक्कुरुतम्॥

उपा॑यातं दा॒शुषे॒ मर्त्या॑य॒ रथे॑न वा॒ममश्वि॑ना॒ वह॑न्ता।
यु॒यु॒तम॒स्मदनि॑राममी॒वां दिवा॒ नक्तं॑ माध्वी॒ त्रासी॑थां नः॥ २॥

उप॒ऽआया॑तम्। दा॒शुषे॑। मर्त्या॑य। रथे॑न। वा॒मम्। अश्वि॑ना। वह॑न्ता।
यु॒यु॒तम्। अ॒स्मत्। अनि॑राम्। अमी॑वाम्। दिवा॑। नक्त॑म्। माध्वी॒ इति॑। त्रासी॑थाम्। नः॥२॥

हे अश्विनौ युवाम् ᵛउपायातम् उपागच्छतमस्मदाह्वानं प्रति। किमर्थम्। ᵛदाशुषे हविषां दात्रे यजमानाय तदर्थं ᵛरथेन ᵛवामं वननीयं धनं ᵛवहन्ता वहन्तौ। ᵛअस्मत् अस्मत्तः ᵛयुयुतं पृथक्कुरुतम्। किम्। ᵛअनिराम्। इराऽन्नम्। तदभावं दारिद्र्यमित्यर्थः। ᵛअमीवां रोगं च। हे ᵛमाध्वी मधुमन्तौ युवां ᵛनः अस्मान् ᵛदिवा ᵛनक्तं सर्वदा ᵛत्रासीथां रक्षतम्॥

आ वां॒ रथ॑मवमस्यां॒ व्यु॑ष्टौ सु॒म्नाय॑वो वृषणो वर्तयन्तु।
स्यू॒म॒गभ॑स्तिमृत॒युग्भि॒रश्वै॒राश्वि॑ना॒ वसु॑मन्तं वहेथाम्॥ ३॥

आ। वा॒म्। रथ॑म्। अ॒व॒मस्या॑म्। वि॒ऽउ॑ष्टौ। सु॒म्न॒ऽय॑वः। वृ॒ष॒णः॒। व॒र्त॒य॒न्तु॒।
स्यू॒मऽगभ॑स्तिम्। ऋ॒त॒युक्ऽभिः॒। अश्वैः॑। आ। अ॒श्वि॒ना॒। वसु॑ऽमन्तम्। व॒हे॒था॒म्॥ ३॥

ᵛअवमस्याम् आसन्नायां ᵛव्युष्टौ व्युच्छन्न उषसि ᵛवां युवयोः ᵛरथं ᵛसुम्नायवः सुखेन योजयन्तोऽश्वाः ᵛवृषणः वर्षका[2] युवाम् ᵛआ ᵛवर्तयन्तु। ᵛस्यूमगभस्तिं सुखरश्मिं स्यूतरश्मिं ᵛवसुमन्तं प्रदेयधनयुक्तं रथं हे ᵛअश्विना अश्विनौ ᵛऋतयुग्भिः उदकयुक्तैः ᵛअश्वैः उदकप्रदैरश्वैः ᵛआ ᵛवहेथाम्॥

---

१. ख–सूक्तं वसिष्ठस्यार्षं; घ– सूक्तं वसिष्ठ ऋषिः। २. झ– वर्षकौ।

यो वां रथो नृपती अस्ति वोळ्हा त्रिवन्धुरो वसुमाँ उत्तरयामा ।
आ नः एना नासत्योप यातमभि यद्वां विश्वप्स्न्यो जिगाति ॥ ४ ॥

यः । वाम् । रथः । नृपती इति नृऽपती । अस्ति । वोळ्हा । त्रिऽवन्धुरः । वसुऽमान् । उत्तरऽयामा ।
आ । नः । एना । नासत्या । उप । यातम् । अभि । यत् । वाम् । विश्वऽप्स्न्यः । जिगाति ॥ ४ ॥

हे [v]नृपती नृणां यजमानानां पालकावश्विनौ [v]वां युवयोः [v]यः [v]रथः [v]वोळ्हा युवयोर्वाहकः [v]अस्ति सर्वदा संनिहितो वर्तते । कीदृशोऽसौ । [v]त्रिवन्धुरः सारथ्यधिष्ठानस्थानत्रयोपेतः [v]वसुमान् धनवान् [v]उत्तरयामा उत्तरं दिवसं प्रति गन्ता । [v]एना एतेन रथेन हे [v]नासत्या अश्विनौ [v]नः अस्मान् [v]उप [v]आ [v]यातम् । [v]यत्[1] रथः[1] यश्च रथः [v]वां [v]विश्वप्स्न्यः व्याप्तरूपः [v]अभि [v]जिगाति अभिगच्छति । अन्य आह । यद्यस्माद्विश्वप्स्न्यो वसिष्ठो वां जिगाति स्तौति अत उपा यातम् ॥

युवं च्यवानं जरसोऽमुमुक्तं नि पेदवे ऊहथुराशुमश्वम् ।
निरंहसस्तमसः स्पर्तमत्रिं नि जाहुषं शिथिरे धातमन्तः ॥ ५ ॥

युवम् । च्यवानम् । जरसः । अमुमुक्तम् । नि । पेदवे । ऊहथुः । आशुम् । अश्वम् ।
निः । अंहसः । तमसः । स्पर्तम् । अत्रिम् । नि । जाहुषम् । शिथिरे । धातम् । अन्तरिति ॥ ५ ॥

हे अश्विना [v]युवं युवां [v]च्यवानं [v]जरसः जीर्णाद्रूपात् [v]अमुमुक्तम् अमुञ्चतम् । 'युवं च्यवानमश्विना जरन्तं पुनर्युवानम्' (ऋ. सं. १. ११७. १३) इति ह्यन्यत्र । तथा [v]पेदवे एतन्नामकाय राज्ञे [v]आशुं शीघ्रगामिनम् [v]अश्वं [v]निः [v]ऊहथुः न्यवहतं युद्धे । 'युवं श्वेतं पेदवे' (ऋ. सं. १. ११८. ९) इति निगमः । तथा [v]अत्रिं महर्षिम् [v]अंहसः ऋबीसादग्नेः सकाशात् [v]तमसः च गुहान्तःस्थितात्च सकाशात् [v]निः [v]स्पर्तं न्यपारयतम् । 'युवमृबीसमुत तप्तमत्रय ओमन्वन्तं चक्रथुः' (ऋ. सं. १०. ३९. ९) इति निगमः । तथा [v]जाहुषं [v]शिथिरे शिथिले भ्रष्टे[2] स्वराष्ट्रे [v]अन्तः मध्ये पुनः [v]नि [v]धातं न्यधातम् । 'परिविष्टं जाहुषं विश्वतः सीम्' (ऋ. सं. १. ११६. २०) इति ह्युक्तम् ॥

इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम् ।
इमा ब्रह्माणि युवयून्यग्मन्युयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

इयम् । मनीषा । इयम् । अश्विना । गीः । इमाम् । सुऽवृक्तिम् । वृषणा । जुषेथाम् ।
इमा । ब्रह्माणि । युवऽयूनि । अग्मन् । युयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

'इयं मनीषा' इति षष्ठी गता ॥ ॥ १८ ॥

'आ गोमता' इति पञ्चर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनम् । अनुक्रम्यते च—'आ गोमता पञ्च' इति । विनियोगः प्रातरनुवाकाश्विनशस्त्रयोरुक्तः । आश्विने पशावाद्याश्चतस्रो याज्यानुवाक्याः । सूत्रितं च—'आ गोमता नासत्या रथेनेति चतस्रः' (आश्व. श्रौ. ३. ८) इति ॥

आ गोमता नासत्या रथेनाश्वावता पुरुभुजा यातम् ।
अभि वां विश्वा नियुतः सचन्ते स्पार्हया श्रिया तन्वा शुभाना ॥ १ ॥

---

१. ख-त३-न-भ-तद्रथः; घ-यत्; श-यद्वां । २. ख-भ-नष्टे ।

आ । गोऽमता । नासत्या । रथेन । अश्वऽवता । पुरुऽचन्द्रेण । यातम् ।
अभि । वाम् । विश्वाः । निऽयुतः । सचन्ते । स्पार्हया । श्रिया । तन्वा । शुभाना ॥ १ ॥

हे vनासत्या अश्विनौ vगोमता गोयुक्तेन vअश्वावता अश्वयुक्तेन । अश्वैर्वृषभैश्चोदनेत्यर्थः । यद्वा । गोमता गोप्रदेन । vपुरुश्चन्द्रेण बहुधनेन । धनप्रदेनेत्यर्थः । तादृशेन vरथेन[1] vआ[2] vयातम् आगच्छतम् । vवां vविश्वाः बह्व्यः vनियुतः स्तुतयः vसचन्ते सेवन्तेऽस्मत्प्रेरिताः । हे vस्पार्हया स्पृहणीयया vश्रिया शोभया vतन्वा शरीरेण च vशुभाना दीप्यमानौ युवाम् ॥

आ नो देवेभिरुप यातमर्वाक्सजोषसा नासत्या रथेन ।
युवोर्हि नः सख्या पित्र्याणि समानो बन्धुरुत तस्य वित्तम् ॥ २ ॥

आ । नः । देवेभिः । उप । यातम् । अर्वाक् । सऽजोषसा । नासत्या । रथेन ।
युवोः । हि । नः । सख्या । पित्र्याणि । समानः । बन्धुः । उत । तस्य । वित्तम् ॥ २ ॥

हे vनासत्या अश्विनौ युवां vदेवेभिः इतरैर्देवैः सह vसजोषसा समानप्रीतौ परस्परं सन्तौ vनः अस्माकम् vअर्वाक् अभिमुखं vरथेन vआ vयातम् आगच्छतम् । आगमने बन्धुत्वातिशयमाह । vयुवोः युवयोः vनः अस्माकं च vसख्या सख्यानि vपित्र्याणि पितृतः प्राप्तानि । नेदानीं स्तुत्याद्युपाधिना प्राप्तानि भवन्तीत्यर्थः । तदेवाह । vउत अपि च युवयोर्मम च vबन्धुः बन्धकः पितामहः vसमानः एक एव । vतस्य vवित्तम् । तस्येति कर्मणि षष्ठी । तं बन्धुं तद्बन्धुत्वं वा वित्तं जानीतम् । विवस्वान् वरुणश्चोभावपि कश्यपाददितेर्जातौ विवस्वानश्विनोर्जनको वरुणो वसिष्ठस्येतीत्येवं समानबन्धुत्वम् । तथा च बृहद्देवतायामुक्तम्—' अभवन्मिथुनं त्वष्टुः सरण्यूस्त्रिशिराः सह । स वै सरण्यूं[3] प्रायच्छत्स्वयमेव विवस्वते ॥ ततः सरण्यां[4] जाते ते यमयम्यौ विवस्वतः । तावप्युभौ यमावेव ह्यास्तां यम्या च वै यमः ॥ सृष्ट्वा भर्तुः परोक्षं तु सरण्यूः[5] सदृशीं स्त्रियम् । निक्षिप्य मिथुनं तस्यामश्वा[6] भूत्वा प्रचक्रमे ॥ अविज्ञानाद्विवस्वांस्तु[7] तस्यामजनयन्मनुम् । राजर्षिरासीत्स मनुर्विवस्वानिव तेजसा ॥ स विज्ञाय अपक्रान्तां सरण्यूमात्मरूपिणीम् । त्वाष्ट्रीं प्रतिजगामाशु वाजी भूत्वा सलक्षणः ॥ सरण्यूस्तु विवस्वन्तं विज्ञाय[8] हयरूपिणम्[9] । मैथुनायोपचक्राम तां च तन्नारुरोह सः ॥ ततस्तयोस्तु वेगेन मुक्तं रेतः पराक्षिपत् । उपाजिघ्रच्च सा त्वश्वा तच्छुक्रं गर्भकाम्यया ॥ आघ्राणान्नासाच्छुक्रं तत्कुमारौ संबभूवतुः । नासत्यश्चैव दस्रश्च यौ स्तुतावश्विनावपि ' (बृहद्दे. ६. १६२–७. ६) इति ॥

उदु स्तोमासो अश्विनोरबुध्रञ्जामि ब्रह्माण्युषसश्च देवीः ।
आविर्वासन्नोदसी धिष्ण्येमे अच्छा विप्रो नासत्या विवक्ति ॥ ३ ॥

उत् । ऊँ इति । स्तोमासः । अश्विनोः । अबुध्रन् । जामि । ब्रह्माणि । उषसः । च । देवीः ।
आऽविर्वासन् । रोदसी इति । धिष्ण्ये इति । इमे इति । अच्छ । विप्रः । नासत्या । विवक्ति ॥ ३ ॥

---

१. ख-ङ्ग-त३-न-भ-श- ' रथेन ' नास्ति । २. घ- अभ्या । ३. ख-ङ्ग-त-न-भ-श–सरण्युं । ४. ख–सण्यां; ङ्ग-त-न-श–सरण्यां । ५. ख-ङ्ग-त-न-भ-श–सरण्युः । ६. ख–°मश्वो । ७. ख-ङ्ग-त-न-भ-श–अविज्ञातान्वि° । ८. ख-ङ्ग-न-भ-श–जिज्ञाय । ९. ख-त३-न-भ-श–भयरूपिणं; ङ्ग-त२-४–भसरूपिणं ।

vस्तोमासः स्तोमाः स्तवाः अश्विनाश्विनौ vउदु vअबुध्रन् उत्कृष्टं बोधयन्ति । उ इति पूरणः । vजामि । बन्धुनामैतत् । बन्धुस्थानीयानि vब्रह्माणि परिवृढानि कर्माणि vदेवीः द्योतमानाः vउषसः । चकारादश्विनौ च । अबुध्रन् । vविप्रः मेधावी वसिष्ठः vइमे vरोदसी द्यावापृथिव्यौ vधिष्ण्ये धिषणार्हे स्तुत्ये vआविवासन्[1] परिचरन् vनासत्या अश्विनौ vअच्छ अभिमुखं vविवक्ति स्तौति ॥

वि चेदुच्छन्त्यश्विना उषासः प्र वां ब्रह्माणि कारवो भरन्ते ।
ऊर्ध्वं भानुं सविता देवो अश्रेद्बृहद्गय्यः समिधा जरन्ते ॥ ४ ॥

वि । च । इत् । उच्छन्ति । अश्विनौ । उषसः । प्र । वाम् । ब्रह्माणि । कारवः । भरन्ते ।
ऊर्ध्वम् । भानुम् । सविता । देवः । अश्रेत् । बृहत् । अग्नयः । सम्ऽइधा । जरन्ते ॥ ४ ॥

हे vअश्विनौ vउषासः उषसः vवि vउच्छन्ति vचेत् तमांसि विनाशयन्ति । चेदिति पूरणार्थे वा । स च वक्ष्यमाणसूर्योद्यपेक्षकः । चेद्योगादनिघातः । अतो युवयोः स्तुतिसमर्थत्वात् vब्रह्माणि स्तोत्राणि vकारवः स्तोतारः vप्र vभरन्ते प्रकर्षेण संपादयन्ति । vऊर्ध्वम् vअश्रेत् आश्रयति vभानुं तेजः vसविता vदेवः । vअग्नयः अपि vसमिधा समिन्धनेन vबृहत् अतिमहत् vजरन्ते स्तूयन्ते ॥

'आ पश्चातात्' इति पञ्चम्याश्विने पशौ वपाया अनुवाक्या । सूत्रितं च–'आ पश्चातान्नासत्या पुरस्तादा गोमता नासत्या रथेन' (आश्व. श्रौ. ३. ८) इति ॥

आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात् ।
आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

आ । पश्चातात् । नासत्या । आ । पुरस्तात् । आ । अश्विना । यातम् । अधरात् । उदक्तात् ।
आ । विश्वतः । पाञ्चऽजन्येन । राया । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

हे vनासत्या अश्विनौ vपश्चातात् पश्चाद्देशात् vआ vयातम् । तथा vपुरस्तात् पूर्वस्माद्देशात् तथा vअधरात् अधस्तनाद्देशाद्दक्षिणतः vउदक्तात् उदग्देशात् । सर्वत्र आ यातमिति संबन्धः । किं बहुना vविश्वतः सर्वस्माद्देशात् vपाञ्चजन्येन पञ्चजनहितेन vराया धनेन सह vआ यातम् । निषादपञ्चमाश्चत्वारो वर्णाः पञ्चजनाः ॥ ॥ १९ ॥

'अतारिष्म' इति पञ्चर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनम् । 'अतारिष्म' इत्यनुक्रमणिका । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

अतारिष्म तमसस्पारमस्य प्रति स्तोमं देवयन्तो दधानाः ।
पुरुदंसा पुरुतमा पुराजामर्त्या हवते अश्विना गीः ॥ १ ॥

अतारिष्म । तमसः । पारम् । अस्य । प्रति । स्तोमम् । देवऽयन्तः । दधानाः ।
पुरुऽदंसा । पुरुऽतमा । पुराऽजा । अमर्त्या । हवते । अश्विना । गीः ॥ १ ॥

vअस्य vतमसः अज्ञानस्य तत्कार्यस्य जननमरणवतः संसारदुःखस्य अथवा प्रकृतत्वात्[2] योगविषयाज्ञानस्य vपारम् vअतारिष्म तीर्णाः स्म । किं कुर्वन्तः । vदेवयन्तः देवकामाः vस्तोमं

---

१. ख-ङ्ग-त-न-भ-श–'आविवासन्' नास्ति । २. त–प्रत्यक्षत्वात् ।

स्तुतिं vप्रति vदधानाः देवेषु कुर्वाणाः। vपुरुदंसा बहुकर्माणौ vपुरुतमा प्रभूततमौ vपुराजा पूर्वजातौ अत एव vअमर्त्या अमरणधर्माणौ vअश्विना अश्विनौ vगीः गरिता स्तोता वसिष्ठः vहवते स्तौति आह्वयति वा ॥

न्यु ष्रियो मनुषः सादि होता नासत्या यो यजते वन्दते च ।
अभ्रीतं मध्वो अश्विना उपाक आ वां वोचे विदथेषु प्रयस्वान् ॥ २ ॥

नि । ऊँ इति । प्रियः । मनुषः । सादि । होता । नासत्या । यः । यजते । वन्दते । च ।
अभ्रीतम् । मध्वः । अश्विनौ । उपाके । आ । वाम् । वोचे । विदथेषु । प्रयस्वान् ॥ २ ॥

vप्रियः युवयोः प्रियभूतः vमनुषः मानुषो[1] मनुषः सकाशाज्जातो[1] वा vहोता देवानामाह्वाता स्तोतायं vनि vसादि न्यसादि निषण्णो भवति। युवयोः कर्मणि वर्तत इत्यर्थः। हे vनासत्या अश्विनौ vयः vयजते यागं करोति vवन्दते स्तौति vच तस्य संबन्धिनं vमध्वः मधुरं सोमरसं हे vअश्विना अश्विनौ vउपाके अन्तिक एव समीपे स्थित्वैव vअभ्रीतम्। पिबतमित्यर्थः। vविदथेषु यज्ञेषु vवां युवां vप्रयस्वान् अन्नवान् सन् vआ vवोचे आह्वये ॥

अहेम यज्ञं पथामुराणा इमां सुवृक्तिं वृषणा जुषेथाम् ।
श्रुष्टीवेव प्रेषितो वामबोधि प्रति स्तोमैर्जरमाणो वसिष्ठः ॥ ३ ॥

अहेम । यज्ञम् । पथाम् । उराणाः । इमाम् । सुऽवृक्तिम् । वृषणा । जुषेथाम् ।
श्रुष्टीवाऽइव । प्रऽईषितः । वाम् । अबोधि । प्रति । स्तोमैः । जरमाणः । वसिष्ठः ॥ ३ ॥

vउराणाः उरु स्तोत्रं कुर्वाणाः स्तोतारो वयं vपथां पततामागच्छतां देवानामर्थाय vयज्ञं यागं तत्साधनं हविर्वा vअहेम वर्धयेम। हे vवृषणा वर्षकौ कामानाम् vइमां vसुवृक्तिं शोभनस्तुतिं vजुषेथां सेवेथाम्। vवां युवां vश्रुष्टीवेव। श्रुष्टीति क्षिप्रनाम। क्षिप्रगन्ता[2] दूत इव vप्रेषितः अहम् vअबोधि। बोधयति शीघ्रं गन्तव्यमिति। किं कुर्वन्। vस्तोमैः स्तोत्रैः vप्रति vजरमाणः प्रतिस्तुवन्। कः। vवसिष्ठः अहमबोधीति ॥

उप त्या वह्नी गमतो विशं नो रक्षोहणा संभृता वीळुपाणी ।
समन्धांस्यग्मत मत्सराणि मा नो मर्धिष्टमा गतं शिवेन ॥ ४ ॥

उप । त्या । वह्नी इति। गमतः। विशम्। नः। रक्षःऽहना। सम्ऽभृता। वीळुपाणी इति वीळुऽपाणी।
सम्। अन्धांसि । अग्मत । मत्सराणि । मा । नः । मर्धिष्टम् । आ । गतम् । शिवेन ॥ ४ ॥

vत्या त्यौ तौ vवह्नी हविषां वोढारौ vनः अस्माकं vविशं प्रजासृत्विजम् vउप vगमतः उपगच्छताम्। कीदृशौ तौ। vरक्षोहणा रक्षसां हन्तारौ vसंभृता सम्यग्भृतौ पुष्टाङ्गौ vवीळुपाणी दृढपाणी। यद्वा। अयमर्धर्चोऽश्वपरतया व्याख्येयः। तथा सति तौ रथस्य वोढारौ दृढपादावश्विनोरश्वावुपगच्छतामिति तस्यार्थः। vअन्धांसि अन्नानि vमत्सराणि मदकराणि सोमान् vसम् vअग्मत समगच्छतं युवाम्। vनः अस्मान् vमा vमर्धिष्टं मा हिंस्तम्। किंतु vशिवेन मङ्गलेन धनेन सार्धम् vआ vगतम् आगच्छतम् ॥

---

१. ख-मानुषसकाशा°; ग्र-न-श-मानुषो मनुषसकाशा°। २. ग्र-क्षिप्रं गंता।

आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात् ।
आ विश्वतः पाञ्चजन्येन राया युयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

आ । पश्चातात् । नासत्या । आ । पुरस्तात् । आ । अश्विना । यातम् । अधरात् । उदक्तात् ।
आ । विश्वतः । पाञ्चऽजन्येन । राया । युयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

'आ पश्चातात्' इति पञ्चम्या विनियोगो व्याख्या च गता ॥ ॥२०॥

'इमा उ वाम्' इति षड्चं चतुर्थं सूक्तमाश्विनं वसिष्ठस्यार्षम् । आद्यातृतीयापञ्चम्यो बृहत्यः शिष्टाः सतोबृहत्यः । तथा चानुक्रान्तम्–'इमा उ वां षट् प्रागाथम्' इति । प्रातरनुवाक आश्विने क्रतौ बार्हते छन्दस्याश्विनशस्त्रे च सूक्तम् । सूत्रितं च— इमा उ वामयं वाम्' (आश्व. श्रौ. ४. १५) इति । दशरात्रे पञ्चमेऽहनि प्रउगशस्त्रे 'इमा उ वाम्' इत्यथमाश्विनस्तृचः । सूत्रितं च—'इमा उ वां दिविष्टयः पिबा सुतस्य रसिनः' (आश्व. श्रौ. ७. १२) इति ॥

इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः ॥ १ ॥

इमाः । ऊँ इति । वाम् । दिविष्टयः । उस्राः । हवन्ते । अश्विना ।
अयम् । वाम् । अह्वे । अवसे । शचीवसू इति शचीऽवसू । विशम्ऽविशम् । हि । गच्छथः ॥ १ ॥

vइमाः vदिविष्टयः दिवमिच्छन्त्यः प्रजाः ऋत्विजोऽपि । vउ इति चार्थे । हे vअश्विना vउस्राः वासकौ vवां vहवन्ते आह्वयन्ति । vअयं वसिष्ठोऽपि हे vशचीवसू कर्मधनौ vवां युवाम् vअवसे अस्मद्रक्षणाय युवयोस्तर्पणाय वा vअह्वे आह्वयामि । किमर्थमेवं प्रजा अप्यहमपीत्यादरोक्तिरिति तत्राह । vहि यस्मात्कारणाद्युवां vविशंविशं प्रजां प्रजां प्रति vगच्छथः ॥

युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते ।
अर्वाग्रथं समनसा नि यच्छतं पिबतं सोम्यं मधु ॥ २ ॥

युवम् । चित्रम् । ददथुः । भोजनम् । नरा । चोदेथाम् । सूनृतऽवते ।
अर्वाक् । रथम् । सऽमनसा । नि । यच्छतम् । पिबतम् । सोम्यम् । मधु ॥ २ ॥

हे अश्विनौ vयुवं युवां vचित्रं चायनीयं vभोजनं धनं vददथुः[1] धारयेथे । तद्धनं vसूनृतावते स्तुतिवते स्तोत्रे vचोदेथां प्रेरयतम् । तदर्थं vसमनसा समानमनस्कौ सन्तौ vरथं युवयोः संबन्धिनम् vअर्वाक् अस्मदभिमुखं vनि vयच्छतं नियमयतम् । तथा कृत्वा vसोम्यं सोमसंबन्धिनं vमधु मधुररसं[2] vपिबतम् ॥

आ यातमुप भूषतं मध्वः पिबतमश्विना ।
दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतम् ॥ ३ ॥

आ । यातम् । उप । भूषतम् । मध्वः । पिबतम् । अश्विना ।
दुग्धम् । पयः । वृषणा । जेन्यावसू इति । मा । नः । मर्धिष्टम् । आ । गतम् ॥ ३ ॥

---

१. ज्ञ-त२-३-दधतुः; न-श-दधथुः । २. ख-ज्ञ-त१-२-भ-मधुरं रसं; श-मधुरसं ।

हे vअश्विना युवाम् vआ vयातम् आगच्छतम्। आगत्य च vउप समीपे vभूषतं भवतम्। vमध्वः मधुरं सोमरसं vपिबतम्। पीत्वा च हे vवृषणा वर्षकौ[1] हे vजेन्यावसू जेतव्यधनौ। जितधनाविस्यर्थः। युवां vपयः वृष्टयुदकमन्तरिक्षात् vदुहथम्। vनः अस्मान् vमा vमर्धिष्टं मा हिंस्तम्। ईदृशप्रार्थनाकरणमेव हिंसा[2]। vआ vगतम् आगच्छतं शीघ्रम् ॥

अश्वासो ये वामुप दाशुषो गृहं युवां दीयन्ति बिभ्रतः।
मक्षूयुभिर्नरा हयेभिरश्विना देवा यातमस्मयू ॥ ४ ॥

अश्वासः। ये। वाम्। उप। दाशुषः। गृहम्। युवाम्। दीयन्ति। बिभ्रतः।
मक्षूयुऽभिः। नरा। हयेभिः। अश्विना। आ। देवा। यातम्। अस्मयू इत्यस्मऽयू ॥ ४ ॥

vये vअश्वासः अश्वाः vवां युवयोः स्वभूताः vदाशुषः हविर्दातुः vगृहं vयुवां vबिभ्रतः धारयन्तः vदीयन्ति। गमयन्तीत्यर्थः। vमक्षूयुभिः शीघ्रगन्तृभिः vहयेभिः हयैः अश्वैर्हे vनरा नेतारौ vअश्विना अश्विनौ vदेवा देवौ vअस्मयू अस्मान् कामयमानौ vआ vयातम् अस्मद्यज्ञमागच्छतम् ॥

अधा ह यन्तो अश्विना पृक्षः सचन्त सूरयः।
ता यंसतो मघवद्भ्यो ध्रुवं यशश्छर्दिरस्मभ्यं नासत्या ॥ ५ ॥

अध। ह। यन्तः। अश्विना। पृक्षः। सचन्त। सूरयः।
ता। यंसतः। मघवत्ऽभ्यः। ध्रुवम्। यशः। छर्दिः। अस्मभ्यम्। नासत्या ॥ ५ ॥

vअधा vह अपि च vअश्विना अश्विनौ vयन्तः स्तुतिभिर्गच्छन्तो यजमानाः vसूरयः मेधाविनः स्तोतारः vपृक्षः अन्नं प्रभूतं vसचन्त सेवन्ते संयन्ति वा। vता तौ युवां vमघवद्भ्यः अन्नवद्भ्यः vअस्मभ्यं vध्रुवम् अविचलितं vयशः अन्नं यश एव वा vछर्दिः गृहं vयंसतः प्रयच्छतं हे vनासत्या अश्विनौ ॥

प्र ये ययुरवृकासो रथाइव नृपातारो जनानाम्।
उत स्वेन शवसा शूशुवुर्नर उत क्षियन्ति सुक्षितिम् ॥ ६ ॥

प्र। ये। ययुः। अवृकासः। रथाःऽइव। नृऽपातारः। जनानाम्।
उत। स्वेन। शवसा। शूशुवुः। नरः। उत। क्षियन्ति। सुऽक्षितिम् ॥ ६ ॥

vये यजमानाः vअवृकासः परकीयधनस्यानादातारः vजनानां मनुष्याणां मध्ये vनृपातारः ऋत्विग्रूपाणां नृणां रक्षितारः सन्तः vययुः युवां प्राप्नुवन्ति हविर्भिः। प्राप्तौ दृष्टान्तः। vरथाइव व्रीह्यादिपूर्णा[3] रथा यथा प्राप्नुवन्ति स्वामिगृहम्। उतेत्यथमुत्तरवाक्यापेक्षः। अपि च ते vनरः यजमानाः vस्वेन vशवसा स्वीयेन बलेन vशूशुवुः वर्धन्ते। vउत अपि च vसुक्षितिं सुनिवासं vक्षियन्ति गच्छन्ति प्राप्नुवन्ति ॥ ॥ २१ ॥

'व्युषा आवः' इत्यष्टर्चं पञ्चमं सूक्तं वसिष्ठस्यार्षम्। अत्रानुक्रमणिका—'व्युषा अष्टावुषस्यं[4] तु वै' इति। तु वै इत्युक्तत्वात्तुह्यादिपरिभाषया इदमादीनि सप्त सूक्तान्युषोदेवत्यानि। प्रातरनुवाक उषस्ये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे वेदमादीनि षट् सूक्तानि। तथा च सूत्र्यते—'व्युषा

---

१. ज्ञ-त१-२-वर्षकौ कामानां। २. ज्ञ-हिंसा; श-अहिंसा। ३. श-द्रव्यादि°। ४. ज्ञ-त१-२-अनु.-अष्टा उषस्यं।

आवो दिविजा इति षळिति त्रैष्टुभम्' (आश्व. श्रौ. ४. १४) इति। ऋग्विधान आख्यातो विनियोगोऽत्र लिख्यते—'राज्ञा अपरकाले य उत्थाय प्रयतः शुचिः। व्युषा इत्युपतिष्ठेत षड्भिः सूक्तैः कृताञ्जलिः॥ प्राप्नुयात् स हिरण्यानि नानारूपं धनं बहु। गा अश्वान् पुरुषान् धान्यं स्त्रियो वासांस्यजाविकम्' (ऋग्वि. २. ३१७–१८) इति॥

व्यु॑ष्टा आ॒वो दि॒विजा ऋ॒तेनाविष्कृ॑ण्वा॒ना म॑हि॒मान॒मागा॑त्।
अप॒ द्रुह॒स्तम॑ आव॒रजु॑ष्टमङ्गि॒रस्तमा॒ पथ्या॑ अजीगः॥ १॥

वि। उ॒षाः। आ॒व॒रिति॑। दि॒वि॒ऽजाः। ऋ॒तेन॑। आ॒वि॒ःऽकृ॒ण्वा॒ना। म॒हि॒मान॑म्। आ। अ॒गा॒त्। अप॑। द्रुह॒ः। तमः॑। आ॒व॒रिति॑। अ॒जु॒ष्ट॒म्। अ॒ङ्गि॒रः॒ऽतमा। पथ्याः॑। अ॒जी॒ग॒रि॒ति॑॥ १॥

इयम् vउषाः vदिविजाः दिव्यन्तरिक्षे प्रादुर्भूता सती vवि vआवः द्यौश्छत्। विभानं[1] कृतवतीत्यर्थः। वसिर्निवासवाच्यत्र विपूर्वो व्युच्छने भवेत्। 'छन्दस्यपि दृश्यते' इत्यत्र दृशिग्रहणस्य विध्यन्तरोपसंग्रहणार्थत्वादनजादेरप्याडागमः। 'हलङ्याब्भ्यः' इति लोपः। सैवोषाः vऋतेन तेजसा vमहिमानं स्वमहत्वम् vआविष्कृण्वाना vआगात् आगतवती। आगत्य च vद्रुहः अस्मद्द्रोग्धॄन् vअजुष्टं सर्वेषामप्रियं vतमः च vअप vआवः अपवृणोति। किंच vअङ्गिरस्तमा। अङ्गेर्गत्यर्थादङ्गिराः। गन्तृतमा vपथ्याः पदवीः vअजीगः उद्गिरति। प्राणिनां व्यवहाराय प्रकाशयतीत्यर्थः॥

म॒हे नो॑ अ॒द्य सु॒वि॒ताय॑ बोध्यु॒षो म॒हे सौभ॑गाय॒ प्र य॑न्धि।
चि॒त्रं र॒यिं य॒शस॑ं धेह्य॒स्मे दे॒वि॒ मर्तेषु॒ मानु॑षि श्रव॒स्युम्॥ २॥

म॒हे। नः॒। अ॒द्य। सु॒वि॒ताय॑। बो॒धि॒। उ॒षः॒। म॒हे। सौभ॑गाय। प्र। य॒न्धि॒। चि॒त्रम्। र॒यिम्। य॒शस॑म्। धे॒हि॒। अ॒स्मे इति॑। दे॒वि॒। मर्तेषु॑। मानु॑षि। श्र॒व॒स्युम्॥ २॥

vअद्य vनः अस्माकं vमहे महते vसुविताय सुखप्राप्तये सुखगमनाय वा vबोधि भव। किंच हे vउषः vमहे महते vसौभगाय सौभाग्याय vप्र vयन्धि प्रयच्छास्मान्। किंच vचित्रं चायनीयं vयशसं यशोयुक्तं vरयिं धनं vधेहि धारय vअस्मे अस्मासु। हे vमानुषि मनुष्यहिते vदेवि vमर्तेषु[2] अस्मासु vश्रवस्युम् अन्नवन्तं पुत्रं धेहीत्यनुषङ्गः॥

ए॒ते त्ये भा॒नवो॑ दर्श॒तायाश्चि॒त्रा उ॒षसो॑ अ॒मृता॑स आगुः।
ज॒नय॑न्तो दैव्या॑नि व्र॒तान्या॒पृ॒ण॒न्तो॒ अ॒न्तरि॑क्षा॒ व्य॑स्थुः॥ ३॥

ए॒ते। त्ये। भा॒नवः॑। दर्श॒तायाः॑। चि॒त्राः। उ॒षसः॑। अ॒मृता॑सः। आ। अ॒गुः॒। ज॒नय॑न्तः। दैव्या॑नि। व्र॒तानि॑। आ॒ऽपृ॒ण॒न्तः॑। अ॒न्तरि॑क्षा। वि। अ॒स्थुः॒॥ ३॥

vदर्शतायाः दर्शनीयायाः प्रकाशयुक्तायाः vउषसः vएते पुरो दृश्यमानाः vत्ये ते प्रसिद्धाः vचित्राः पूज्या आश्चर्यभूता वा vअमृतासः अमरणा अनश्वराः vभानवः रश्मयः vआगुः आगच्छन्ति। किं कुर्वन्तः। vदैव्यानि देवानां संबन्धीनि vव्रतानि कर्माणि vजनयन्तः उत्पादयन्तः। तदनुकूलप्रकाशप्रदानात्तदुत्पादकत्वमेषाम्। vअन्तरिक्षा अन्तरिक्षाणि vआपृणन्तः आपूरयन्तः। एकस्यैवान्तरिक्षस्य वायुमेघपक्षिणामालम्बनोपाधिना त्रिविधत्वम्[3]। अतो बहुवचनमुपपन्नम्। एवं कुर्वन्तो भानवः vव्यस्थुः विविधं तिष्ठन्ति। सरन्ति[4]॥

---

१. ख-भ–विभावनं। २. ख-ञ-त१-२-३-न-भ-श–मर्त्येषु। ३. श–विविधत्वं। ४. ञ-त-श–प्रसरंति।

एषा स्या युजाना पराकात्पञ्च क्षितीः परि सद्यो जिगाति ।
अभिपश्यन्ती वयुना जनानां दिवो दुहिता भुवनस्य पत्नी ॥ ४ ॥

एषा । स्या । युजाना । पराकात् । पञ्च । क्षितीः । परि । सद्यः । जिगाति ।
अभिऽपश्यन्ती । वयुना । जनानाम् । दिवः । दुहिता । भुवनस्य । पत्नी ॥ ४ ॥

vएषा vस्या सोषाः vपराकात् दूरदेशाद्दूरे स्थितापि vयुजाना उद्योगं कुर्वाणा प्रकाशाय vपञ्च vक्षितीः निषादपञ्चमाश्चत्वारो वर्णास्तान् vसद्यः vपरि vजिगाति परिगच्छति। किं कुर्वती। vजनानां प्राणिनां vवयुना[1] प्रज्ञानानि vअभिपश्यन्ती साक्षित्वेनावलोकयन्ती । कीदृशी सा। vदिवो vदुहिता दुहितृस्थानीया vभुवनस्य भूतजातस्य vपत्नी पालयित्री। परि जिगातीत्यन्वयः ॥

वाजिनीवती सूर्यस्य योषा चित्रामघा राय ईशे वसूनाम् ।
ऋषिष्टुता जरयन्ती मघोन्युषा उच्छति वह्निभिर्गृणाना ॥ ५ ॥

वाजिनीऽवती । सूर्यस्य । योषा । चित्रऽमघा । रायः । ईशे । वसूनाम् ।
ऋषिऽस्तुता । जरयन्ती । मघोनी । उषाः । उच्छति । वह्निऽभिः । गृणाना ॥ ५ ॥

vवाजिनीवती बह्वन्ना। यद्यप्युषोनामैतत् तथापि चित्रामघा इत्यस्याप्युषोनामकस्य पृथग्विद्यमानत्वादत्रैको योगरूढोऽवगन्तव्यः। vसूर्यस्य vयोषा योषित् vचित्रामघा विचित्रधना विचित्ररश्म्याख्यधना वा vरायः धनस्याविशिष्टस्य[2] तस्य vवसूनां देवमनुष्यादिसर्वाश्रयाणां धनानां च vईशे ईष्टे। अथवा वसवो वासका रश्मयः। तेषामपीष्टे। vऋषिष्टुता ऋषिभिः स्तुता vजरयन्ती प्राणिजातानि। उषाः खलु पुनःपुनरावर्तमाना प्राणिनामायुः क्षपयति। vमघोनी धनवती vउषाः vवह्निभिः कर्मवोढृभिर्यजमानैः vगृणाना स्तूयमाना vउच्छति विभानं करोति ॥

प्रति द्युतानामरुषासो अश्वाश्चित्रा अदृश्रन्नुषसं वहन्तः ।
याति शुभ्रा विश्वपिशा रथेन दधाति रत्नं विधते जनाय ॥ ६ ॥

प्रति । द्युतानाम् । अरुषासः । अश्वाः । चित्राः । अदृश्रन् । उषसम् । वहन्तः ।
याति । शुभ्रा । विश्वऽपिशा । रथेन । दधाति । रत्नम् । विधते । जनाय ॥ ६ ॥

vद्युतानां द्योतमानाम् vउषसं vवहन्तः धारयन्तः vअरुषासः आरोचमानाः vचित्राः चायनीयाः vअश्वाः vप्रति vअदृश्रन् प्रतिदृश्यन्ते। सा चोषाः vशुभ्रा दीप्यमाना vविश्वपिशा बहुरूपेण vरथेन vयाति सर्वत्र गच्छति। vविधते परिचरते vजनाय vरत्नं रमणीयं धनं vदधाति ददाति च ॥

सत्या सत्येभिर्महती महद्भिर्देवी देवेभिर्यजता यजत्रैः ।
रुजद्दृळ्हानि दददुस्रियाणां प्रति गाव उषसं वावशन्त ॥ ७ ॥

सत्या । सत्येभिः । महती । महत्ऽभिः । देवी । देवेभिः । यजता । यजत्रैः ।
रुजत् । दृळ्हानि । ददत् । उस्रियाणाम् । प्रति । गावः । उषसम् । वावशन्त ॥ ७ ॥

---

१. ख–वयुना वयुनानि । २. ख१-श–धनस्यावशिष्टस्य; ज–धनस्य विशिष्टस्य ।

vसत्या अन्यैरबाध्या vमहती पूजनीया प्रवृद्धा वा गुणैः vदेवी द्योतमाना vयजता यजनीयोषाः vसत्येभिः सत्यैः vमहद्भिः देवैः vयजत्रैः उत्कलक्षणैः किरणैर्निपातभाग्भिरन्यैर्देवैर्वा सहिता सती vदृळ्हानि अत्यन्तं स्थिराणि तमांसि vरुजत् भिनत्ति। vउस्रियाणाम्। गोनामैतत्। उस्राविण आसां भोगा इति तद्व्युत्पत्तिः। तासां संचाराय vददत् ददाति। सामर्थ्यात् प्रकाशमित्यर्थः। अथवौस्रिया गा ददत् ददाति स्तोतृभ्यः। किंच vगावः। उपलक्षणमेतत्। सर्वेऽपि तमोऽवरुद्धाः प्राणिनः vउषसं vवावशन्त उशन्ति कामयन्ते। विशेषेण गवां प्रभाते संचारार्थमुषसोऽपेक्षितत्वात्तासां प्राधान्येनोक्तिः॥

नू नो गोमद्वीरवद्धेहि रत्नमुषो अश्वावत्पुरुभोजो अस्मे।
मा नो बर्हिः पुरुषता निदे कर्यूयं पात स्वस्तिभिः सदा नः॥ ८॥

नु। नः। गोऽमत्। वीरऽवत्। धेहि। रत्नम्। उषः। अश्वऽवत्। पुरुऽभोजः। अस्मे इति। मा। नः। बर्हिः। पुरुषता। निदे। कः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ८॥

हे vउषः vनु vनः अस्मभ्यं vगोमत् बहुभिर्गोभिर्युक्तं vवीरवत् वीरैः पुत्रैरुपेतं vरत्नं रमणीयं धनं vपुरुभोजः बह्वन्नं च' vअस्मे अस्मासु vधेहि देहि। पादभेदादस्मे इति पुनरभिधानम्। vनः अस्माकं vबर्हिः यज्ञं vपुरुषता पुरुषतायां पुरुषसमूहेषु। अस्मत्सदृशेष्वित्यर्थः। vनिदे निन्दायै vमा vकः मा कार्षीः। यथा ते निन्दन्ति तथा मा कुर्वित्यर्थः॥ ॥ २२॥

'उदु ज्योतिः' इति सप्तर्चं षष्ठं सूक्तं त्रैष्टुभमुषस्यम्। तथा चानुक्रान्तम्—'उदु सप्त' इति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत्।
कृत्वा देवानामजनिष्ट चक्षुराविरकर्भुवनं विश्वमुषाः॥ १॥

उत्। ऊँ इति। ज्योतिः। अमृतम्। विश्वऽजन्यम्। विश्वानरः। सविता। देवः। अश्रेत्। कृत्वा। देवानाम्। अजनिष्ट। चक्षुः। आविः। अकः। भुवनम्। विश्वम्। उषाः॥ १॥

vअमृतम् अमृतत्वसाधकमविनाशि वा vविश्वजन्यं विश्वेषां जनानां हितकरं vज्योतिः vविश्वानरः सर्वेषां नेता vसविता vदेवः vउत् vअश्रेत् ऊर्ध्वं श्रयति। vदेवानां व्यवहर्तॄणां स्तोतॄणां वा यजमानानां vकृत्वा कर्मणा निमित्तेन। यागानुष्ठानार्थमित्यर्थः। तदर्थं यद्वा देवानां vचक्षुः चक्षुःस्थानीयमौषसं तेजः कृत्वा कर्मणा निमित्तेन vअजनिष्ट प्रादुरभूत्। उत्पन्ना च vउषाः vविश्वं सर्वं vभुवनं भूतजातम् vआविरकः प्रादुरकः अकरोत्। समस्तं जगदाविष्कृतवती॥

प्र मे पन्था देवयाना अदृश्रन्नमर्धन्तो वसुभिरिष्कृतासः।
अभूदु केतुरुषसः पुरस्तात्प्रतीच्यागादधि हर्म्येभ्यः॥ २॥

प्र। मे। पन्थाः। देवऽयानाः। अदृश्रन्। अमर्धन्तः। वसुऽभिः। इष्कृतासः। अभूत्। ऊँ इति। केतुः। उषसः। पुरस्तात्। प्रतीची। आ। अगात्। अधि। हर्म्येभ्यः॥२॥

---

१ ख-ग-त-न-म-श-वा।

vमे मया vदेवयानाः देवप्रापकाः vपन्थाः पन्थानः vप्र vअदृश्रन् प्रदृश्यन्ते। कीदृशाः पन्थानः। vअमर्धन्तः अहिंसन्तः vवसुभिः तेजोभिः vहृत्कृतासः संस्कृताः। vपुरस्तात् पूर्वस्यां दिशि vउषसः vकेतुः प्रज्ञापकं तेजः vअभूत् अचेति ज्ञायते। सोषाश्च vप्रतीची प्रत्यगञ्चनास्मदभिमुखी vहर्म्येभ्यः vअधि उच्छ्रितेभ्यः प्रदेशेभ्यः। हर्म्यशब्द उन्नतप्रदेशोपलक्षकः। vआगात् आगच्छति ॥

तानीदहानि बहुलान्यासन्या प्राचीनमुदिता सूर्यस्य ।
यतः परि जारइवाचरन्त्युषो ददृक्षे न पुनर्यतीव ॥ ३ ॥

तानि। इत्। अहानि। बहुलानि। आसन्। या। प्राचीनम्। उत्ऽइता। सूर्यस्य।
यतः। परि। जारःऽइव। आऽचरन्ती। उषः। ददृक्षे। न। पुनः। यतीऽइव ॥ ३ ॥

हे उषः vतानीत् तान्येव तव[1] तेजांसि vबहुलानि vअहानि vआसन्। उषःप्रकाशयुक्तस्यैव कालस्याहःशब्दव्यवहारात्। तानीत्युक्तं कानीत्याह। vया यानि vसूर्यस्य vउदिता उदितावुदये सति vप्राचीनं तस्य प्रागदेशं प्रत्युदयन्ति। यद्वा सूर्यस्य प्राचीने देशे या यान्युदितोदितानि तानीत्यर्थः। हे vउषः vयतः यैश्च तेजोभिः vपरि vददृक्षे दृश्यसे त्वम्। vजारइव पत्याविव vआचरन्ती समीपे संचरन्ती साध्वी नारीव जारे रात्रेर्जरयितरि सूर्ये संचरन्ती त्वं[2] दृश्यसे। यथा लोके दुष्टं भ्रमणशीलमपि पतिमत्यज्यैव साध्वी संचरति तद्वत् तमविमुञ्चती[3] त्वमित्यर्थः। vन vपुनर्यतीव यती पतिं परित्यज्येतस्ततः संचरन्ती व्यभिचारिणीव सूर्यमपरित्यजन्ती[3] त्वम्। पुनरित्ययं वैलक्षण्यद्योतनार्थः। एवं यैस्तेजोभिर्युक्ता परिदृश्यसे तान्येवाहान्यासन्निति संबन्धः ॥

त इद्देवानां सधमादं आसन्नृतावानः कवयः पूर्व्यासः ।
गूळ्हं ज्योतिः पितरो अन्वविन्दन्त्सत्यमन्त्रा अजनयन्नुषासम् ॥ ४ ॥

ते। इत्। देवानाम्। सधऽमादः। आसन्। ऋतऽवानः। कवयः। पूर्व्यासः।
गूळ्हम्। ज्योतिः। पितरः। अनु। अविन्दन्। सत्यऽमन्त्राः। अजनयन्। उषसम् ॥ ४ ॥

vत vइत् तेऽङ्गिरस एवर्षीणां मध्ये vदेवानां vसधमादः सह माद्यन्तः vआसन् अभवन्। त इत्युक्तं क इत्याह। ये vऋतावानः सत्यवन्तः vकवयः अनूचानाः। 'ये वा अनूचानास्ते कवयः' (ऐ. ब्रा. २. ३८) इति श्रुतेः। vपूर्व्यासः पूर्वकालीनाः vपितरः पालयितारः सर्वस्याङ्गिरसः vगूळ्हं तमसावृतं vज्योतिः सौर्यं तेजः vअन्वविन्दन् लब्धवन्तो मन्त्रसामर्थ्यात् ते[4] vसत्यमन्त्राः सत्यस्तुतयः सन्तः vउषासम् उषसम् vअजनयन् प्रादुरकुर्वन्। 'तुरीयेण ब्रह्मणाविन्ददद्रिः' (ऋ. सं. ५. ४०. ६) 'अत्रयस्तमन्वविन्दन्' (ऋ. सं. ५. ४०. ९) इति निगमौ। अत्राङ्गिरसां स्तुत्योषस एव स्तुतिर्ज्ञातव्या ॥

समान ऊर्वे अधि संगतासः सं जानते न यतन्ते मिथस्ते ।
ते देवानां न मिनन्ति व्रतान्यमर्धन्तो वसुभिर्यादमानाः ॥ ५ ॥

समाने। ऊर्वे। अधि। सम्ऽगतासः। सम्। जानते। न। यतन्ते। मिथः। ते।
ते। देवानाम्। न। मिनन्ति। व्रतानि। अमर्धन्तः। वसुऽभिः। यादमानाः ॥ ५ ॥

vसमाने सर्वेषां साधारणे vऊर्वे गोसमूहे पणिभिरपहृते पुनर्लब्धव्ये सति। vअधि इत्यनर्थकः। vसंगतासः मिलिताः सन्तः vते vसं vजानते एकबुद्धयो भवन्ति। vन vमिथः

१. ख-घ-श-'तव' नास्ति। २, त-'त्वं ....'विमुञ्चती' नास्ति। ३. ज्ञ-त२-सूर्यमेव परित्यजती; ज्ञ-सूर्यमेव परित्यजती। ४. ख-ज्ञ-त-श-'ते' नास्ति।

परस्परं vयतन्ते। सहैव साधनमनुतिष्ठन्तीत्यर्थः। vते अङ्गिरसः vदेवानां vव्रतानि कर्माणि व लक्षणानि vन vमिनन्ति न हिंसन्ति। किंतु परिपालयन्तीत्यर्थः। किं कुर्वन्तः। vअमर्ध अहिंसन्तः vवसुभिः वासकैरुषसां तेजोभिः vयादमानाः गच्छन्तः॥

प्रति त्वा स्तोमैरीळते वसिष्ठा उषर्बुधः सुभगे तुष्टुवांसः।
गवां नेत्री वाजपत्नी न उच्छोषः सुजाते प्रथमा जरस्व॥ ६॥

प्रति। त्वा। स्तोमैः। ईळते। वसिष्ठाः। उषःऽबुधः। सुऽभगे। तुस्तुऽवांसः।
गवाम्। नेत्री। वाजऽपत्नी। नः। उच्छ। उषः। सुऽजाते। प्रथमा। जरस्व॥ ६॥

हे vसुभगे देव्युषः vत्वा त्वाम् vउषर्बुधः उषसि बुध्यन्तः vतुष्टुवांसः स्तुवन्तः vवसिष्ठ vस्तोमैः[१] स्तोत्रैः vईळते स्तुवन्ति। vगवां vनेत्री प्रापयित्री vवाजपत्नी अन्नस्य पालयित्री। अ दात्रीत्यर्थः। ईदृशी त्वं vनः अस्मदर्थम् vउच्छ विभाहि। हे vउषः vसुजाते सुप्रादुर्भावे vप्रथ इतरदेवेभ्यो मुख्यभूता vजरस्व॥

एषा नेत्री राधसः सूनृतानामुषा उच्छन्ती रिभ्यते वसिष्ठैः।
दीर्घश्रुतं रयिमस्मे दधाना युयं पात स्वस्तिभिः सदा नः॥ ७॥

एषा। नेत्री। राधसः। सूनृतानाम्। उषाः। उच्छन्ती। रिभ्यते। वसिष्ठैः।
दीर्घऽश्रुतम्। रयिम्। अस्मे इति। दधाना। यूयम्। पात। स्वस्तिऽभिः। सदा। नः।

vएषा vउषाः vराधसः स्तोतुः vसूनृतानां स्तुतीनां vनेत्री सती vउच्छन्ती तमो विवासय vवसिष्ठैः वसिष्ठगोत्रोत्पन्नैः vरिभ्यते स्तूयते। vदीर्घश्रुतं दीर्घे श्रूयमाणं सर्वत्र प्रसिद्धं vरयिं ध vअस्मे अस्मासु vदधाना धारयन्ती॥ ॥ २३॥

'उपो रुरुचे' इति षड्ऋचं सप्तमं सूक्तं वसिष्ठस्यार्षमुषस्यम्। तथा चानुक्रान्तम्—'उ रुरुचे षट्' इति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

उपो रुरुचे युवतिर्न योषा विश्वं जीवं प्रसुवन्ती चरायै।
अभूदग्निः समिधे मानुषाणामकर्ज्योतिर्बाधमाना तमांसि॥ १॥

उपो इति। रुरुचे। युवतिः। न। योषा। विश्वम्। जीवम्। प्रऽसुवन्ती। चरायै।
अभूत्। अग्निः। सम्ऽइधे। मानुषाणाम्। अकः। ज्योतिः। बाधमाना। तमांसि॥

इयमुषाः vउपो समीप एव सूर्यस्य vरुरुचे दीप्यते। vयुवतिः यौवनोपेता vयोषा vन योषिदि सा यथा वस्त्राभरणादिना पत्युः समीपे प्रदीप्यते तद्वत्। किं कुर्वती। vविश्वं सर्वं vजीवं जीवसंघं vच संचाराय vप्रसुवन्ती प्रेरयन्ती। किंच vअग्निः vमानुषाणां मनुष्याणामर्थाय vसमिधे vअभूत् समि नीयोऽभवत्। कृत्यार्थे केन्। समिद्धः सन् vतमांसि अन्धकारान् vबाधमाना बाधमानं बाधकं vज्यो तेजःसंघम् vअकः अकार्षीत्। अथवा। औषसं ज्योतिस्तमांसि बाधमाना बाध्यमानान्यकः अकरो

विश्वं प्रतीची सुप्रथा उदस्थाद्बृहद्वदेम विदथे सुवीराः।
हिरण्यवर्णा सुदृशीकसंदृग्गवां माता नेत्र्यह्नामरोचि॥ २॥

---

१. ख-भ-स्तोतारः। २. झ-स्तोमभिः; त-न-श-स्तोमेभिः।

विश्वम्। प्रतीची। सऽप्रथाः। उत्। अस्थात्। रुशत्। वासः। बिभ्रती। शुक्रम्। अश्वैत्। हिरण्यऽवर्णा। सुदृशीकऽसंदृक्। गवाम्। माता। नेत्री। अह्नाम्। अरोचि ॥ २ ॥

[v]विश्वं कृत्स्नं जगत् प्रति [v]प्रतीची अभिमुखी [v]सप्रथाः सर्वतः पृथुतरा [v]उदस्थात् उदगच्छत्। उदिता च [v]रुशत् दीप्तं [v]शुक्रं तेजोमयं [v]वासः वसनीयं तेजःसमूहं [v]बिभ्रती धारयन्ती [v]अश्वैत् वर्धते। [v]हिरण्यवर्णा हितरमणीयवर्णोपेता [v]सुदृशीकसंदृक्। संदर्शयतीति संदृक् तेजः। सुष्ठु दर्शनीयं संदृक् तेजो यस्याः सा तादृशी। [v]गवां वाचां गवामेव वा [v]माता निर्मात्री। उषःकाले हि पक्षिमनुष्यादीनां वाचो निर्गच्छन्ति। गवामपि तस्मिन् काले संचारात्तन्निर्मातृत्वम्। अथवा रश्मीनां निर्मात्री। [v]अरोचि रोचते [v]अह्नां [v]नेत्री दिवसानां प्रापयित्री ॥

देवानां चक्षुः सुभगा वहन्ती श्वेतं नयन्ती सुदृशीकमश्वम् ।
उषा अदर्शि रश्मिभिर्व्यक्ता चित्रामघा विश्वमनु प्रभूता ॥ ३ ॥

देवानाम्। चक्षुः। सुऽभगा। वहन्ती। श्वेतम्। नयन्ती। सुऽदृशीकम्। अश्वम्। उषाः। अदर्शि। रश्मिऽभिः। विऽअक्ता। चित्रऽअमघा। विश्वम्। अनु। प्रऽभूता ॥३॥

[v]देवानां [v]चक्षुः चक्षुःस्थानीयं तेजः [v]वहन्ती धारयन्ती [v]सुभगा शोभनधना [v]सुदृशीकं सुदर्शनम् [v]अश्वं सर्वदा गन्तारमादित्यं [v]नयन्ती प्रापयन्ती। किम्। [v]श्वेतं श्वेतवर्णोपेतं सूर्यम्। प्रकाशयुक्तं कुर्वतीत्यर्थः[1]। कीदृश्युषाः। [v]रश्मिभिः स्वकीयैः[2] [v]व्यक्ता [v]अदर्शि दृश्यते च। [v]चित्रामघा विचित्रधना [v]विश्वमनु सर्वं जगदनुलक्ष्य [v]प्रभूता प्रवृद्धा। सर्वजगद्व्यवहारायेत्यर्थः ॥

अन्तिवामा दूरे अमित्रमुच्छोर्वीं गव्यूतिमभयं कृधी नः ।
यावय द्वेष आ भरा वसूनि चोदय राधो गृणते मघोनि ॥ ४ ॥

अन्तिऽवामा। दूरे। अमित्रम्। उच्छ। उर्वीम्। गव्यूतिम्। अभयम्। कृधि। नः। यवय। द्वेषः। आ। भर। वसूनि। चोदय। राधः। गृणते। मघोनि ॥ ४ ॥

हे उषः [v]अन्तिवामा। अन्ति अस्मदन्तिके वामं वननीयं धनं यस्याः सा अन्तिवामा। त्वम् [v]अमित्रम् अस्मच्छत्रुं [v]दूरे अस्मत्तो विप्रकृष्टदेशे वर्तमानं कृत्वा व्युच्छ विभाहि। यथामित्रो दूरे भवति तथा व्युच्छेत्यर्थः। तथा [v]उर्वीं [v]गव्यूतिं भूमिम् [v]अभयं [v]नः अस्माकं [v]कृधि कुरु। किंच [v]द्वेषः अस्मद्द्वेष्टॄन् [v]यावय अस्मत्तः पृथक्कुरु। [v]वसूनि[3] शत्रूणां धनानि [v]आ [v]भर आहर[3]। [v]राधः धनं [v]चोदय प्रेरय [v]गृणते स्तुवते मह्यं हे [v]मघोनि धनवति ॥

अस्मे श्रेष्ठेभिर्भानुभिर्वि भाह्युषो देवि प्रतिरन्ती न आयुः ।
इषं च नो दधती विश्ववारे गोमदश्वावद्रथवच्च राधः ॥ ५ ॥

अस्मे इति। श्रेष्ठेभिः। भानुऽभिः। वि। भाहि। उषः। देवि। प्रऽतिरन्ती। नः। आयुः। इषम्। च। नः। दधती। विश्वऽवारे। गोऽमत्। अश्वऽवत्। रथऽवत्। च। राधः ॥५॥

हे [v]उषो [v]देवि [v]अस्मे अस्मभ्यं [v]श्रेष्ठेभिः प्रशस्यैः [v]भानुभिः रश्मिभिः प्रकाशैः [v]वि [v]भाहि प्रकाशय। किं कुर्वती। [v]नः अस्माकम् [v]आयुः आयुष्यं [v]प्रतिरन्ती वर्धयन्ती। हे [v]विश्व-

---

१. घ-ञ-त-न-कुर्वती°; श-करोती°। २. श-स्वकीयैः किरणैः। ३. ख-ञ-त-न-भ-श-'वसूनि ... आहर' नास्ति।

वारे विश्वैः संभजनीये देवि vनः अस्मभ्यम् vइषम् अन्नं vच vगोमत्[1] गोभिर्बहुभिरुपेतम् vअश्वावत् अश्वैश्चोपेतं vरथवत्[2] रथैरुपेतं[3] vराधः धनं vच vदधती वि भाहीति ॥

यां त्वा दिवो दुहितर्वर्धयन्त्युषः सुजाते मतिभिर्वसिष्ठाः ।
सास्मासु धा रयिमृष्वं बृहन्तं यूयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

याम् । त्वा । दिवः । दुहितः । वर्धयन्ति । उषः । सुऽजाते । मतिऽभिः । वसिष्ठाः ।
सा । अस्मासु । धाः । रयिम् । ऋष्वम् । बृहन्तम् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥६॥

हे vदिवो vदुहितः vउषः vसुजाते शोभनजनने vयां vत्वा त्वां vमतिभिः स्तोत्रैः vवसिष्ठाः vवर्धयन्ति vसा त्वम् vअस्मासु वसिष्ठेषु vऋष्वं प्रदीप्तं vबृहन्तं महान्तं vरयिं धनं vधाः धेहि ॥ ॥ २४ ॥

'प्रति केतवः' इति पञ्चर्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमुषस्यम् । 'प्रति पञ्च' इत्यनुक्रमणिका । उक्तो विनियोगः ॥

प्रति केतवः प्रथमा अदृश्रन्नूर्ध्वा अस्या अञ्जयो वि श्रयन्ते ।
उषो अर्वाचा बृहता रथेन ज्योतिष्मता वाममस्मभ्यं वक्षि ॥ १ ॥

प्रति । केतवः । प्रथमाः । अदृश्रन् । ऊर्ध्वाः । अस्याः । अञ्जयः । वि । श्रयन्ते ।
उषः । अर्वाचा । बृहता । रथेन । ज्योतिष्मता । वामम् । अस्मभ्यम् । वक्षि ॥ १ ॥

vअस्याः vप्रथमाः प्रथमोत्पन्नाः vकेतवः प्रज्ञापका रश्मयः vप्रति vअदृश्रन् प्रतिदृश्यन्ते । अस्याः vअञ्जयः व्यञ्जका रश्मयः vऊर्ध्वाः ऊर्ध्वमुखाः vवि vश्रयन्ते विविधं सर्वत्र[3] श्रयन्ति[3] । हे vउषः देवि vअर्वाचा अस्मदभिमुखेनागच्छता vबृहता महता vज्योतिष्मता तेजोवता vरथेन vअस्मभ्यं vवामं वननीयं धनं[4] vवक्षि वहसि ॥

प्रति षीमग्निर्जरते समिद्धः प्रति विप्रासो मतिभिर्गृणन्तः ।
उषा याति ज्योतिषा बाधमाना विश्वा तमांसि दुरितापा देवी ॥ २ ॥

प्रति । सीम् । अग्निः । जरते । सम्ऽइद्धः । प्रति । विप्रासः । मतिऽभिः । गृणन्तः ।
उषाः । याति । ज्योतिषा । बाधमाना । विश्वा । तमांसि । दुःऽइता । अप । देवी ॥ २ ॥

vअग्निः vसमिद्धः सन् vसीं सर्वतः vप्रति vजरते अभिवर्धते । vविप्रासः विप्रा मेधाविन ऋत्विजश्च vमतिभिः स्तुतिभिरुषसं vगृणन्तः स्तुवन्तो जरन्ते । vउषाः च vदेवी vज्योतिषा vविश्वा सर्वाणि vतमांसि vदुरिता अस्मद्दुरितानि vअप vबाधमाना vयाति ऊर्ध्वं गच्छति ॥

एता उ त्याः प्रत्यदृश्रन्पुरस्ताज्ज्योतिर्यच्छन्तीरुषसो विभातीः ।
अजीजनन्त्सूर्यं यज्ञमग्निमपाचीनं तमो अगादजुष्टम् ॥ ३ ॥

एताः । ऊँ इति । त्याः । प्रति । अदृश्रन् । पुरस्तात् । ज्योतिः । यच्छन्तीः । उषसः । विऽभातीः ।
अजीजनन् । सूर्यम् । यज्ञम् । अग्निम् । अपाचीनम् । तमः । अगात् । अजुष्टम् ॥ ३ ॥

---

१. ख-झ-त-न-भ-श–'गोमत्' नास्ति । २. ख-झ-त३-४-न-भ-श– 'रथवत् रथैरुपेतं' नास्ति ।
३. ख-झ-त-न-भ-श–सर्वत्राश्रयंति । ४. ख-झ-त-न-भ-श–धनमस्मभ्यं ।

vएता vउ । उ इति पूरणः । vत्याः ताः प्रसिद्धा एताः vविभातीः विभात्यो विभानं कुर्वत्यः vज्योतिः तेजः vयच्छन्तीः प्रयच्छन्त्यः vउषसः vपुरस्तात् पूर्वस्यां दिशि vप्रत्यदृश्रन् प्रतिदृश्यन्ते । ता उषसः vसूर्यं vयज्ञमग्निं च vअजीजनन् प्रादुरकुर्वन् । उषस उदयानन्तरं तेषां संभवात्तज्जनकत्वमुपचर्यते । किंच vअपाचीनं नीचीनम् vअजुष्टम् अप्रियम् । सर्वेषां दृष्टिनिरोधकत्वादप्रियत्वम् । तादृशं vतमः vअगात् अपगतमभूत् ॥

अचेति दिवो दुहिता मघोनी विश्वे पश्यन्त्युषसं विभातीम् ।
आस्थाद्रथं स्वधया युज्यमानमा यमश्वासः सुयुजो वहन्ति ॥ ४ ॥

अचेति । दिवः । दुहिता । मघोनी । विश्वे । पश्यन्ति । उषसम् । विऽभातीम् ।
आ । अस्थात् । रथम् । स्वधया । युज्यमानम् । आ । यम् । अश्वासः । सुऽयुजः । वहन्ति ॥४॥

vदिवो vदुहिता vमघोनी धनवत्युषाः vअचेति सर्वैर्ज्ञायते । vविश्वे सर्वेऽपि प्राणिनः vविभातीम् उच्छन्तीम् vउषसं vपश्यन्ति । तादृशी देवी vस्वधया अन्नेन vयुज्यमानं vरथम् vआस्थात् आतिष्ठत् आरोहति । vयं रथं vसुयुजः शोभनयोजनाः vअश्वासः अश्वाः vआ vवहन्ति अभिमतदेशं प्रापयन्ति तं रथमास्थादिति ॥

प्रति त्वाद्य सुमनसो बुधन्तास्माकासो मघवानो वयं च ।
तिल्विलायध्वमुषसो विभातीर्यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

प्रति । त्वा । अद्य । सुऽमनसः । बुधन्त । अस्माकासः । मघऽवानः । वयम् । च ।
तिल्विलायध्वम् । उषसः । विऽभातीः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

हे उषः vत्वा त्वाम् vअद्य अस्मिन् काले vसुमनसः शोभनस्तुतिकाः vमघवानः हविर्लक्षणाऽन्नवन्तः vअस्माकासः अस्माका अस्मदीयाः पुरुषा ऋत्विजः । यद्वा । मघवान इत्येतद्वयमित्येतस्य विशेषणम् । हविष्मन्तो वयम् । vप्रति vबुधन्त प्रत्यबोधयन् स्तुतिभिः । हे vउषसः यूयं च vविभातीः व्युच्छन्त्यः सत्यः vतिल्विलायध्वं जगत् स्निग्धभूमिकं कुरुत । 'तिल स्नेहने' इत्यस्मात्तिलुः । तिलुरिला भूमिर्यस्य तत्तिल्विलम् । तत् कुरुत । शिष्टं स्पष्टम् ॥ ॥ २५ ॥

'व्युषा आवः' इति पञ्चर्चं नवमं सूक्तं वसिष्ठस्यार्षमुषस्यं त्रैष्टुभम् । 'व्युषाः' इत्यनुक्रमणिका । प्रातरनुवाकाश्विनशस्त्रयोरुक्थो विनियोगः ॥

व्युषा आवः पथ्या जनानां पञ्च क्षितीर्मानुषीर्बोधयन्ती ।
सुसंदृग्भिरुक्षभिर्भानुमश्रेद्वि सूर्यो रोदसी चक्षसावः ॥ १ ॥

वि । उषाः । आवः । पथ्याः । जनानाम् । पञ्च । क्षितीः । मानुषीः । बोधयन्ती ।
सुसंदृक्ऽभिः । उक्षऽभिः । भानुम् । अश्रेत् ।
वि । सूर्यः । रोदसी इति । चक्षसा । आवरित्यावः ॥ १ ॥

vजनानां सर्वप्राणिनां vपथ्या पथि हिता vउषाः vवि vआवः व्यौच्छत् । यद्वा । जनानां हिताय व्यौच्छदिति योज्यम् । किं कुर्वती । vमानुषीः मनुष्यरूपाः vपञ्च vक्षितीः निषाद-पञ्चमांश्चतुरो वर्णान् vबोधयन्ती । ईदृश्युषाः vसुसंदृग्भिः । संदृश्यते संदर्शयतीति वा संदृक् तेजः ।

सुतेजोभिः ᵛउक्षभिः गोभिः ᵛभानुमश्रेत्। 'अरुणैरुषा आजिमधावत्' (ऐ. ब्रा. ४. ९) इति हि श्रुतिः। 'अरुण्यो गाव उषसाम्' (नि. १. १५. ७) इति निरुक्तम्। ᵛसूर्यः च ᵛरोदसी द्यावापृथिव्यौ तमोयुक्ते ᵛचक्षसा प्रकाशकेन तेजसा ᵛवि ᵛआवः विवृणोति॥

व्यञ्जते दिवो अन्तेष्वक्तून्विशो न युक्ता उषसो यतन्ते।
सं ते गावस्तम आ वर्तयन्ति ज्योतिर्यच्छन्ति सवितेव बाहू॥ २॥

वि। अञ्जते। दिवः। अन्तेषु। अक्तून्। विशः। न। युक्ताः। उषसः। यतन्ते।
सम्। ते। गावः। तमः। आ। वर्तयन्ति। ज्योतिः। यच्छन्ति। सविताऽइव। बाहू इति॥२॥

ᵛउषसः ᵛअक्तून् तेजांसि ᵛदिवः अन्तरिक्षस्य ᵛअन्तेषु पर्यन्तप्रदेशेषु ᵛव्यञ्जते व्यक्तीकुर्वन्तीत्यर्थः। ᵛयुक्ताः परस्परं संयुक्ताः ᵛविशो ᵛन प्रजा इव सेना इव ᵛयतन्ते प्रयतन्ते तमोनाशनाय अत्र गमनाय वा। अथ प्रत्यक्षवादः। हे उषः ᵛते तव ᵛगावः रश्मयः ᵛतमः अन्धकारं ᵛसम् ᵛआ ᵛवर्तयन्ति नाशयन्ति ᵛज्योतिः तेजो ᵛयच्छन्ति प्रयच्छन्ति। ᵛसविता सूर्यः ᵛबाहू ᵛइव॥

अभूदुषा इन्द्रतमा मघोन्यजीजनत्सुविताय श्रवांसि।
वि दिवो देवी दुहिता दधात्यङ्गिरस्तमा सुकृते वसूनि॥ ३॥

अभूत्। उषाः। इन्द्रऽतमा। मघोनी। अजीजनत्। सुविताय। श्रवांसि।
वि। दिवः। देवी। दुहिता। दधाति। आङ्गिरःऽतमा। सुऽकृते। वसूनि॥ ३॥

ᵛइन्द्रतमा सर्वस्येश्वरतमा ᵛमघोनी धनवती ᵛउषाः ᵛअभूत् प्रादुरभूत्। ᵛसुविताय कल्याणाय ᵛश्रवांसि अन्नानि ᵛअजीजनत् उदपादयत्। प्रकाशितवतीत्यर्थः। ᵛदिवः ᵛदुहिता ᵛअङ्गिरस्तमा गन्तृतमा। यद्वा। अङ्गिरोगोत्रैर्भारद्वाजैः सह रात्रेरप्युत्पत्ते रात्र्यवसानस्योषारूपत्वादङ्गिरस्तमेत्युच्यते। भारद्वाजै रात्रेः सहोत्पत्तिरनुक्रमण्यामुक्ता–'रात्री कुशिकः सौभरो रात्रिर्वा भारद्वाजी' (अनु. १०. १२७) इति। तादृगुषाः ᵛसुकृते यजमानाय ᵛवसूनि धनानि ᵛवि ᵛदधाति करोति॥

तावदुषो राधो अस्मभ्यं रास्व यावत्स्तोतृभ्यो अरदो गृणाना।
यां त्वा जज्ञुर्वृषभस्या रवेण वि दृळ्हस्य दुरो अद्रेरौर्णोः॥ ४॥

तावत्। उषः। राधः। अस्मभ्यम्। रास्व। यावत्। स्तोतृऽभ्यः। अरदः। गृणाना।
याम्। त्वा। जज्ञुः। वृषभस्य। रवेण। वि। दृळ्हस्य। दुरः। अद्रेः। और्णोः॥ ४॥

हे ᵛउषः ᵛयावत् ᵛराधः धनं ᵛस्तोतृभ्यः पूर्वम् ᵛअरदः दत्तवत्यसि ᵛतावत् राधो धनं ᵛगृणाना स्तूयमाना ᵛअस्मभ्यम् अपि ᵛरास्व देहि। ᵛयां ᵛत्वा त्वां ᵛवृषभस्य ᵛरवेण। लुप्तोपमैषा। वृषभस्येति कर्मणि षष्ठी। वृषभं रवेणेव त्वां प्रकाशेन ᵛजज्ञुः जानन्ति प्राणिनः। अथवा वृषभस्य प्रवृद्धस्य स्तोत्रस्य रवेण शब्देन जज्ञुः ज्ञापयन्ति। ᵛदृळ्हस्य दृढस्य ᵛअद्रेः ᵛदुरः द्वाराणि पणिभिर्गाः प्रवेश्य पिहितानि ᵛवि ᵛऔर्णोः विवृतान्यकरोः॥

देवंदेवं राधसे चोदयन्त्यस्मद्र्यक्सूनृता ईरयन्ती।
व्युच्छन्ती नः सनये धियो धा यूयं पात स्वस्तिभिः सदा नः॥ ५॥

देवम्ऽदेवम्। राधसे। चोदयन्ती। अस्मद्र्यक्। सूनृताः। ईरयन्ती।
विऽउच्छन्ती। नः। सनये। धियः। धाः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः॥५॥

vदेवंदेवं सर्वमपि स्तोतारं vराधसे धनाय vचोदयन्ती प्रेरयन्ती vअस्मद्यक् अस्मदभिमुखं vसूनृताः वचांसि vईरयन्ती प्रेरयन्ती vव्युच्छन्ती व्युच्छनं कुर्वती vनः अस्माकं vसनये दानाय धनलाभाय vधियः बुद्धीः vधाः धेहि । शिष्टं स्पष्टम् ॥ ॥२६॥

'प्रति स्तोमेभिः' इति तृचात्मकं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमुषस्यम् । 'प्रति तृचम्' इत्यनुक्रमणिका । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

प्रति॒ स्तोमे॑भिरु॒षस॑ं वसि॒ष्ठा गी॒र्भिर्वि॑प्रा॒सः प्र॑थ॒मा अ॑बुध्रन् ।
वि॒व॒र्तय॑न्तीं॒ रज॑सी॒ सम॑न्ते आविष्कृ॒ण्व॒तीं भु॑व॒नानि॒ विश्वा॑ ॥ १ ॥

प्रति । स्तोमेभिः । उषसम् । वसिष्ठाः । गीःऽभिः । विप्रासः । प्रथमाः । अबुध्रन् ।
विऽवर्तयन्तीम् । रजसी इति । समन्ते इति समऽअन्ते । आविःऽकृण्वतीम् । भुवनानि । विश्वा ॥ १ ॥

vविप्रासः मेधाविनः vवसिष्ठाः वसिष्ठगोत्राः vस्तोमेभिः स्तोतृभिः प्रयुज्यमानाः[1] vगीर्भिः स्तुतिभिः vप्रथमाः इतरयजमानेभ्यः पूर्वभूताः सन्तः vउषसं vप्रति vअबुध्रन् प्रतिबोधयन्ति । कीदृशीमुषसं च । vरजसी द्यावापृथिव्यौ vसमन्ते समानपर्यन्ते एकीभूतप्रान्ते vविवर्तयन्तीं व्यावर्तयन्तीं vविश्वा सर्वाणि vभुवनानि भूतजातानि vआविष्कृण्वतीं प्रकटीकुर्वतीं स्वभासा ॥

एषा स्या नव्य॒मायु॒र्दधा॑ना गू॒ढ्वी तमो॒ ज्योति॑षो॒षा अ॑बोधि ।
अग्रे॑ एति युव॒तिरह्र॑याणा॒ प्राचि॑कित॒त्सूर्यं॑ य॒ज्ञम॒ग्निम् ॥ २ ॥

एषा । स्या । नव्यम् । आयुः । दधाना । गूढ्वी । तमः । ज्योतिषा । उषाः । अबोधि ।
अग्रे । एति । युवतिः । अह्रयाणा । प्र । अचिकितत् । सूर्यम् । यज्ञम् । अग्निम् ॥ २ ॥

vएषा vउषाः vस्या सा गतदिवसेषु प्रसिद्धा दृश्यमानैषा[2] vनव्यं नवतरम् vआयुः आयुष्यम् । यौवनमित्यर्थः । तादृशं vदधाना धारयन्ती vगूढ्वी गूढं vतमः अन्धकारं vज्योतिषा स्वतेजसा निवारयन्ती vअबोधि बुध्यते । vअग्रे पुरोदेशे सूर्यस्य पुरस्तादेवानामग्रे वा । इतरदेवेभ्यः पूर्वमित्यर्थः । vयुवतिः नित्यतरुणी सर्वत्र मिश्रयन्ती वा vअह्रयाणा । लुप्तोपमैषा । अलज्जा युवतिरिव । सा यथा पत्युरग्रे संचरति तद्वत् सूर्यस्य पुरस्तात् vएति । एवंभूता सती vसूर्यं vयज्ञमग्निं च vप्राचिकितत् प्रज्ञापयति ॥

अश्वा॑वती॒र्गोम॑तीर्न॒ उषासो॑ वी॒रव॑तीः सद॒मुच्छ॑न्तु भ॒द्राः ।
घृतं॑ दुहा॒ना वि॒श्वतः॑ प्र॒पीता॑ यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥ ३ ॥

अश्वऽवतीः । गोऽमतीः । नः । उषसः । वीरऽवतीः । सदम् । उच्छन्तु । भद्राः ।
घृतम् । दुहानाः । विश्वतः । प्रऽपीताः । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ३ ॥

vअश्वावतीः बहुभिरस्मभ्यं प्रदेयैरश्वैस्तद्वत्यः तथा vगोमतीः गोमत्यो गोप्रदाः vवीरवतीः वीरवत्यः पुत्रप्रदा अत एव vभद्राः स्तुत्याः vउषासः उषसः vसदं सर्वदा vउच्छन्तु । पुनः कीदृश्यः । vघृतम् उदकं vदुहानाः दोग्ध्र्यः vविश्वतः vप्रपीताः सर्वतः प्रवृद्धाः । यूयं पातेति गतम् ॥ ॥२७॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पञ्चमाष्टमे पञ्चमोऽध्यायः समाप्तः ॥

---

१. ख–प्रयुज्यमानाभिः । २. ख–दृश्यमाना; झ-त-श–अदृश्यमानैषा ।

॥ श्रीगणेशायनमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ षष्ठो व्याख्यायते । सप्तमे मण्डले पञ्चमेऽनुवाके दश सूक्तानि व्याकृतानि । ' प्रत्यु अदर्शि ' इति षड्ऋचमेकादशं सूक्तं वसिष्ठस्यार्षमुषस्यम् । प्रथमाद्या अयुजो बृहत्यो द्वितीयाद्या युजः सतोबृहत्यः । तथा चानुक्रान्तं—' प्रत्यु षट् प्रागाथम् ' इति । प्रातरनुवाक उषस्ये क्रतौ बार्हते छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितं च—' प्रत्यु अदर्शि सह वामेनेति बार्हतम् ' (आश्व. श्रौ. ४. १४) इति ॥

प्रत्यु॑ अदर्श्यायत्यु॒च्छन्ती॑ दुहि॒ता दि॒वः ।
अपो॒ महि॑ व्ययति॒ चक्ष॑से॒ तमो॒ ज्योति॑ष्कृणोति सू॒नरी॑ ॥ १ ॥

प्रति॑ । ऊँ॒ इति॑ । अदर्शि॑ । आ॒ऽय॒ती । उ॒च्छन्ती॑ । दु॒हि॒ता । दि॒वः ।
अपो॒ इति॑ । महि॑ । व्य॒य॒ति॒ । चक्ष॑से । तमः॑ । ज्योतिः॑ । कृ॒णो॒ति॒ । सू॒नरी॑ ॥ १ ॥

ᵛआयती आगच्छन्ती व्युच्छन्ती तमांसि विवासयन्ती वर्जयन्ती ᵛदिवः द्युलोकस्य सूर्यस्य वा ᵛदुहिता पुत्री एवंभूतोषाः ᵛप्रति ᵛअदर्शि सर्वैः प्रतिदृश्यते । ᵛउ इति पूरकः । सैषा[1] ᵛमहि महत् ᵛतमः नैशमन्धकारम् । अप उ इति निपातद्वयसमुदायोऽपेत्यस्यार्थे । ᵛअपो ᵛव्ययति अपवृणोति । किमर्थम् । ᵛचक्षसे दर्शनार्थम् । एवं कृत्वा ᵛसूनरी जनानां सुष्ठु नेत्र्युषाः ᵛज्योतिः प्रकाशं ᵛकृणोति करोति ॥

उदु॒स्रिया॑ः सृजते॒ सूर्यः॑ सचा॑ उ॒द्यन्नक्ष॒त्रम॑र्चि॒वत् ।
तवे॑दु॒षो व्यु॒षि सूर्यस्य॒ च॒ सं भ॒क्तेन॑ गमेमहि ॥ २ ॥

उत् । उ॒स्रिया॑ः । सृ॒ज॒ते॒ । सूर्यः॑ । सचा॑ । उ॒त्ऽय॒त् । नक्ष॒त्रम् । अ॒र्चि॒ऽव॒त् ।
तव॑ । इ॒त् । उ॒षः॒ । वि॒ऽउ॒षि॒ । सूर्य॑स्य । च॒ । सम् । भ॒क्तेन॑ । ग॒मे॒म॒हि॒ । ॥ २ ॥

ᵛसूर्यः सर्वस्य प्रेरक आदित्यः ᵛउस्रियाः रश्मीन् ᵛसचा सह युगपदेव ᵛउत् ᵛसृजते उद्गमयति । तथा ᵛउद्यत् उद्गच्छत् प्रादुर्भवत् ᵛनक्षत्रं नभसि दृश्यमानं ग्रहनक्षत्रादिकम् ᵛअर्चिवत् दीप्तिमत् करोति । सौरेण तेजसा हि नक्तं चन्द्रप्रभृतीनि नक्षत्राणि भासन्ते । ' सुपुष्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः' (वा. सं. १८. ४०) इति हि निगमः । एवं च सति[2] हे ᵛउषः उषोदेवते ᵛतव ᵛसूर्यस्य ᵛच ᵛव्युषि विवासने प्रकाशने सति ᵛभक्तेन अन्नेन ᵛसं ᵛगमेमहि वयं संगच्छेमहि । इच्छन्दः पूरकः ॥

प्रति॑ त्वा दुहितर्दिव॒ उषो॑ जी॒रा अ॑भुत्स्महि ।
या व॒हसि॒ पुरु॒ स्पा॒र्हं व॑नन्व॒ति॒ रत्नं॑ न दा॒शुषे॒ मय॑ः ॥ ३ ॥

प्रति॑ । त्वा॒ । दु॒हि॒तः॒ । दि॒वः॒ । उ॒षः॒ । जी॒राः॒ । अ॒भु॒त्स्म॒हि॒ ।
या । व॒हसि॑ । पुरु॑ । स्पा॒र्हम् । व॒नन्ऽव॑ति । रत्न॑म् । न । दा॒शुषे॑ । मय॑ः ॥ ३ ॥

हे ᵛदिवः ᵛदुहितः दिवोऽन्तरिक्षाज्जायमाने हे ᵛउषः उषोदेवते ᵛत्वा त्वां ᵛजीराः क्षिप्रकारिणो वयं ᵛप्रति ᵛअभुत्स्महि प्रतिबोद्धारो भवेम । हे ᵛवनन्वति । वननं संभजनं संभक्तव्यं धनं वा । तद्वति

---

१. ञ-त१-२-सोषाः । २. ख-ञ-त-न-भ-श–सति हि ।

vया त्वं vपुरु बहु vस्पार्हं स्पृहणीयं धनं vवहसि प्रापयसि vदाशुषे हवींषि दत्तवते यजमानाय vर vन रमणीयं धनमिव vमयः सुखं च या त्वं वहसि तां त्वां प्रत्यभुस्महीत्यन्वयः ॥

उच्छन्ती या कृणोषि मंहना महि प्रख्यै देवि स्वर्दृशे ।
तस्यास्ते रत्नभाज ईमहे वयं स्याम मातुर्न सूनवः ॥ ४ ॥

उच्छन्ती । या । कृणोषि । मंहना । महि । प्रऽख्यै । देवि । स्वः । दृशे ।
तस्याः । ते । रत्नऽभाजः । ईमहे । वयम् । स्याम । मातुः । न । सूनवः ॥ ४ ॥

हे vमहि महति vदेवि दानादिगुणयुक्त उषोदेवते व्युच्छन्ती तमांसि वर्जयन्ती vमंहना महि युक्ता। यद्वा। मंहतिर्दानकर्मा। दानयुक्ता। vया त्वं vस्वः सर्वं जगत् vप्रख्यै प्रबोधनार्थं vदृशे दर्शना च vकृणोषि करोषि vतस्याः तादृश्याः vरत्नभाजः रत्नानां रमणीयानां धनानां भाजयित्र्याः सेवयित्र्य vईमहे याचामहे। किम्। रत्नभाज इति समभिव्याहाराद्रत्नानीति गम्यते। अपि च vवयं त प्रियतमाः vस्याम भवेम। vमातुर्न vसूनवः। यथा मातुर्जनन्याः सूनवः पुत्राः प्रियतमा भवन्ति तद्वत्

तच्चित्रं राध आ भरोषो यदीर्घश्रुत्तमम् ।
यत्ते दिवो दुहितर्मर्तभोजनं तद्रास्व भुनजामहै ॥ ५ ॥

तत् । चित्रम् । राधः । आ । भर । उषः । यत् । दीर्घश्रुत्ऽतमम् ।
यत् । ते । दिवः । दुहितः । मर्तऽभोजनम् । तत् । रास्व । भुनजामहै ॥ ५ ॥

हे vउषः vतच्चित्रं चायनीयं vराधः धनम् vआ vभर आहर। अस्मभ्यं प्रयच्छ। vयत्[1] ध vदीर्घश्रुत्तमं देशकालयोर्विप्रकर्षेऽप्यतिशयेन श्रोतव्यम्। अपि च हे vदिवो vदुहितः vते तव त्वद देयं vमर्तभोजनं मर्तानां मनुष्याणां भोगयोग्यं vयत् अन्नमस्ति vतत् vरास्व देह्यस्मभ्यम्। वयं त्वद्दत्तं धनमन्नं च vभुनजामहै अभ्यवहरेम ॥

श्रवः सूरिभ्यो अमृतं वसुत्वनं वाजाँ अस्मभ्यं गोमतः ।
चोदयित्री मघोनः सूनृतावत्युषा उच्छदप स्रिधः ॥ ६ ॥

श्रवः । सूरिऽभ्यः । अमृतम् । वसुऽत्वनम् । वाजान् । अस्मभ्यम् । गोऽमतः ।
चोदयित्री । मघोनः । सूनृताऽवती । उषाः । उच्छत् । अप । स्रिधः ॥ ६ ॥

हे उषः vसूरिभ्यः स्तोतृभ्योऽस्मभ्यम् vअमृतं मरणरहितं नित्यं vवसुत्वनं वासकं वसुत्वयु वा vश्रवः श्रवणीयं यशो रास्वेत्यनुषङ्गः। तथा vगोमतः बहुभिर्गोभिर्युक्तान् vवाजान् अन्नानि vअस्मभ्यं रास्व। शिष्टः परोक्षकृतः। vमघोनः हविष्मतो यजमानस्य vचोदयित्री प्रेरयित्री vसूनृतावती प्रियसत्यात्मिका वाक्सूनृता। तद्वती vउषाः vस्रिधः शोषकाञ्छत्रून् vअप vउच्छत् अपगमयतु ॥ ॥१

'इन्द्रावरुणा' इति दशर्चं द्वादशं सूक्तं वसिष्ठस्यार्षं जागतम्। इदमादीनि चत्वा सूक्तानीन्द्रावरुणदेवतानि। तथा चानुक्रान्तम्—'इन्द्रावरुणा दशैन्द्रावरुणं ह जागतं तु इति। तृतीये सवन उक्थ्ये प्रशास्तुः शस्त्र एतत्सूक्तम्। सूत्रितं च—'इन्द्रावरुणा युवमा राजानौ' (आश्व. श्रौ. ६. १) इति ॥

---

१. ज्ञ-त१—तत्।

इन्द्रावरुणा युवमध्वरायं नो विशे जनाय महि शर्म यच्छतम् ।
दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः ॥ १ ॥

इन्द्रावरुणा । युवम् । अध्वराय । नः । विशे । जनाय । महि । शर्म । यच्छतम् ।
दीर्घऽप्रयज्युम् । अति । यः । वनुष्यति । वयम् । जयेम । पृतनासु । दुःऽध्यः ॥ १ ॥

हे ᵛइन्द्रावरुणा इन्द्रावरुणौ ᵛयुवं युवां ᵛनः अस्माकं ᵛविशे निवेशयित्रे परिचारकाय ᵛजनाय पुत्रपौत्रादिलक्षणाय ᵛअध्वराय यज्ञानुष्ठानार्थं ᵛमहि महत् ᵛशर्म गृहं सुखं वा ᵛयच्छतं प्रयच्छतम् । अपि च ᵛदीर्घप्रयज्युं दीर्घप्रततयज्ञमस्मदीयं जनं ᵛयः शत्रुः ᵛअति ᵛवनुष्यति अतिजिघांसति ᵛपृतनासु संग्रामेषु ᵛदूढ्यः दुर्धियो दुष्टाभिसंधींस्ताञ्छत्रून् ᵛवयं ᵛजयेम अभिभवेम ॥

सम्राळन्यः स्वराळन्य उच्यते वां महान्ताविन्द्रावरुणा महावसू ।
विश्वे देवासः परमे व्योमनि सं वामोजो वृषणा सं बलं दधुः ॥ २ ॥

सम्ऽराट् । अन्यः । स्वऽराट् । अन्यः । उच्यते । वाम् ।
महान्तौ । इन्द्रावरुणा । महावसू इति महाऽवसू ।
विश्वे । देवासः । परमे । विऽओमनि । सम् । वाम् । ओजः । वृषणा । सम् । बलम् । दधुः ॥२॥

द्वितीयः पादः परोक्षकृतः शिष्टाः प्रत्यक्षकृताः । हे इन्द्रावरुणौ ᵛवां युवयोर्मध्ये ᵛअन्यः एको वरुणः ᵛसम्राट् सम्यग्राजमान इति ᵛउच्यते । 'ता सम्राजा घृतासुती' (ऋ. सं. २. ४१. ६) इत्यादिषु कीर्त्यते । ᵛअन्यः इन्द्रः ᵛस्वराट् स्वयमेवान्यनिरपेक्षयैव राजमान इत्युच्यते । 'स्वराळिन्द्रो दमे' (ऋ. सं. १. ६१. ९) इत्यादिषु कीर्त्यते । तथाविधौ ᵛइन्द्रावरुणा इन्द्रावरुणौ ᵛमहान्तौ गुणैरधिकौ ᵛमहावसू महाधनौ च भवतः । हे ᵛवृषणा कामानां वर्षितारविन्द्रावरुणौ ᵛवां युवां ᵛपरमे ᵛव्योमनि उत्कृष्टे आकाशे ᵛविश्वे ᵛदेवासः सर्वे देवाः ᵛओजः ᵛसं ᵛदधुः समयोजयन् शरीरदार्ढ्यार्थं । तद्धेतुभूतं तदोज इत्युच्यते । स्मर्यते च—'ओजो नामाष्टमी दशा' इति । तथा ᵛबलं वृत्रवधादेः कार्यस्य हेतुभूतं सामर्थ्यं च युवाभ्यां ᵛसं दधुः समयोजयन् ॥

अन्वपां खान्यतृन्तमोजसा सूर्यमैरयतं दिवि प्रभुम् ।
इन्द्रावरुणा मदे अस्य मायिनोऽपिन्वतमपितः पिन्वतं धियः ॥ ३ ॥

अनु । अपाम् । खानि । अतृन्तम् । ओजसा । आ । सूर्यम् । ऐरयतम् । दिवि । प्रऽभुम् ।
इन्द्रावरुणा । मदे । अस्य । मायिनः । अपिन्वतम् । अपितः । पिन्वतम् । धियः ॥ ३ ॥

हे इन्द्रावरुणौ ᵛअपाम् उदकानां ᵛखानि द्वाराणि वृत्रेण पिहितानि ᵛओजसा बलेन ᵛअनु ᵛअतृन्तम् अन्वविध्यतम् । आवरकस्य वृत्रस्य वधेन वृष्टिप्रतिबन्धं निराकृतवन्तावित्यर्थः । तथा ᵛसूर्यं सर्वस्य प्रेरकमादित्यं ᵛदिवि अन्तरिक्षे ᵛप्रभुं प्रभूतं सन्तम् ᵛआ ᵛऐरयतम् अभ्यगमयतम् । स्वर्भानुनावृतं सूर्यं तद्वधेन प्रकाशितवन्तावित्यर्थः । हे ᵛइन्द्रावरुणा इन्द्रावरुणौ ᵛमायिनः प्रज्ञाकरस्य ᵛअस्य सोमस्य पानेन ᵛमदे हर्षे सति ᵛअपितः जलरहिता नदीः ᵛअपिन्वतं जलेनापूरयतम् । तथा च निखिल्पदमाम्नायते—'अस्य मदे जरितरिन्द्रोऽजिन्वदजुर्वोऽपिन्वदपितः' (शा. श्रौ. ८. २५. १) इति । अपि च ᵛधियः कर्माण्यस्माभिरनुष्ठितानि कर्माणि ᵛपिन्वतं सिञ्चतं फलेन पूरयतम् ॥

युवामिद्युत्सु पृतनासु वह्वयो युवां क्षेमस्य प्रसवे मितज्ञवः ।
ईशाना वस्व उभयस्य कारव इन्द्रावरुणा सुहवा हवामहे ॥ ४ ॥

युवाम् । इत् । युत्ऽसु । पृतनासु । वह्वयः । युवाम् । क्षेमस्य । प्रऽसवे । मितऽज्ञवः ।
ईशाना । वस्वः । उभयस्य । कारवः । इन्द्रावरुणा । सुऽहवा । हवामहे ॥ ४ ॥

हे इन्द्रावरुणौ ᵛवह्वयः हविषां स्तोत्राणां वा वोढार ऋत्विजः ᵛयुत्सु युद्धेषु ᵛपृतनासु शत्रुसेनासु रक्षणार्थं ᵛयुवामित् युवामेव हवन्ते आह्वयन्ति। ᵛमितज्ञवः संकुचितजानुका अङ्गिरसोऽपि ᵛक्षेमस्य रक्षणस्य ᵛप्रसवे उत्पादने निमित्तभूते सति ᵛयुवाम् एव हवन्ते। अतः कारणात् हे इन्द्रावरुणौ ᵛकारवः स्तोतारो वयमपि ᵛउभयस्य दिव्यस्य पार्थिवस्य च ᵛवस्वः वसुनो धनस्य ᵛईशाना ईश्वरौ ᵛसुहवा सुखेन ह्वातव्यौ युवामेव ᵛहवामहे आह्वयामहे ॥

इन्द्रावरुणा यदिमानि चक्रथुर्विश्वा जातानि भुवनस्य मज्मना ।
क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिरुग्रः शुभमन्य ईयते ॥ ५ ॥

इन्द्रावरुणा । यत् । इमानि । चक्रथुः । विश्वा । जातानि । भुवनस्य । मज्मना ।
क्षेमेण । मित्रः । वरुणम् । दुवस्यति । मरुत्ऽभिः । उग्रः । शुभम् । अन्यः । ईयते ॥ ५ ॥

हे इन्द्रावरुणौ ᵛयत् यौ युवां ᵛभुवनस्य लोकस्य संबन्धीनि ᵛइमानि परिदृश्यमानानि ᵛविश्वा सर्वाणि ᵛजातानि जनिमन्ति भूतजातानि ᵛमज्मना आत्मीयेन बलेन ᵛचक्रथुः कृतवन्तौ तयोर्युवयोर्मध्य एकं ᵛवरुणं ᵛक्षेमेण रक्षणहेतुना ᵛमित्रः देवः ᵛदुवस्यति परिचरति। मित्रावरुणौ हि परस्परं प्राप्तसख्यौ। अत एव सहचरौ दृश्येते। ᵛअन्यः एक इन्द्रः ᵛमरुद्भिः मरुद्गणैः ᵛउग्रः उद्गूर्णबलः सन् ᵛशुभं शोभनमलंकारम् ᵛईयते प्राप्नोति। यद्वा। मरुद्भिर्मध्यस्थानैर्देवगणैः सार्धमुग्र ओजस्वीन्द्रः शुभमुदकमीयते प्रेरयति ॥ ॥ २ ॥

महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमस्य यत्स्वम् ।
अजामिमन्यः श्नथयन्तमातिरद्दभ्रेभिरन्यः प्र वृणोति भूयसः ॥ ६ ॥

महे । शुल्काय । वरुणस्य । नु । त्विषे । ओजः । मिमाते इति । ध्रुवम् । अस्य । यत् । स्वम् ।
अजामिम् । अन्यः । श्नथयन्तम् । आ । अतिरत् । दभ्रेभिः । अन्यः । प्र । वृणोति । भूयसः ॥ ६ ॥

ᵛवरुणस्य। उपलक्षणमेतत्। इन्द्रस्य वरुणस्य च ᵛत्विषे दीप्त्यर्थम् ᵛओजः बलं ᵛनु क्षिप्रं ᵛमिमाते स्तोत्रेण निर्मिमाते यजमानपरन्यौ। स्तोत्रेण हि बलं जायते। किमर्थम्। ᵛमहे महते ᵛशुल्काय धनाय। ईदृशस्य धनस्य लाभार्थम्। ᵛअस्य इन्द्रस्य वरुणस्य च ᵛध्रुवं नित्यं ᵛस्वं स्वकीयमसाधारणं ᵛयत् ओजः विद्यते तदोजो मिमात इत्यन्वयः। तयोरिन्द्रावरुणयोः ᵛअन्यः एको वरुणः ᵛअजामिम् अबन्धुमस्तुवन्तं ᵛश्नथयन्तं हिंसन्तं कर्माण्यकुर्वन्तमस्तोतारमयजमानं च ᵛआतिरत् अभिहन्ति। ᵛअन्यः एक इन्द्रः ᵛदभ्रेभिः अल्पैरेवोपायैः ᵛभूयसः बहुतराञ्छत्रून् ᵛप्र ᵛवृणोति प्रकर्षेणावृतान् बाधितान् करोति। यद्वा। भूयसो यजमानान् प्र वृणोति प्रवरानुत्कृष्टान् करोति ॥

न तमंहो न दुरितानि मर्त्यमिन्द्रावरुणा न तपः कुतश्चन ।
यस्य देवा गच्छथो वीथो अध्वरं न तं मर्तस्य नशते परिह्वृतिः ॥ ७ ॥

न । तम् । अंहः । न । दुःऽइतानि । मर्त्यम् । इन्द्रावरुणा । न । तपः । कुतः । चन ।
यस्य । देवा । गच्छथः । वीथः । अध्वरम् । न । तम् । मर्तस्य । नशते । परिऽहृतिः ॥ ७ ॥

हे [v]इन्द्रावरुणा इन्द्रावरुणौ [v]तं [v]मर्त्यं मनुष्यम् [v]अंहः पापं [v]न [v]नशते न व्याप्नोति। [v]न च [v]दुरितानि दुर्गमनानि पापफलानि च प्राप्नुवन्ति। [v]कुतश्चन कस्मादपि निमित्तात् [v]तपः संतापश्च तं [v]न प्राप्नोति। हे [v]देवा देवौ दानादिगुणयुक्ताविन्द्रावरुणौ [v]यस्य [v]मर्त्यस्य[1] मनुष्यस्य [v]अध्वरं यज्ञं [v]गच्छथः प्राप्नुथो युवां [v]वीथः कामयेथे च यस्य हवींषि [v]तं मनुष्यं [v]परिहृतिः परिबाधा [v]न नशते उक्तप्रकारेण न व्याप्नोति ॥

अर्वाङ्नरा दैव्येनावसा गतं शृणुतं हवं यदि मे जुजोषथः ।
युवोर्हि सख्यमुत वा यदाप्यं मार्डीकमिन्द्रावरुणा नि यच्छतम् ॥ ८ ॥

अर्वाक् । नरा । दैव्येन । अवसा । आ । गतम् । शृणुतम् । हवम् । यदि । मे । जुजोषथः ।
युवोः । हि । सख्यम् । उत । वा । यत् । आप्यम् । मार्डीकम् । इन्द्रावरुणा । नि । यच्छतम् ॥ ८ ॥

हे [v]नरा नेतारावित्यन्द्रावरुणौ [v]दैव्येन देवसंबन्धिना [v]अवसा रक्षणेन सह [v]अर्वाक् अस्मदभिमुखम् [v]आ [v]गतम् आगच्छतम्। आगत्य च मदीयं [v]हवं स्तोत्रं [v]शृणुतम्। [v]यदि [v]मे मम [v]जुजोषथः प्रीयेथे। मयि प्रीतिरस्ति चेत् युवाभ्यामागन्तव्यं मदीयं स्तोत्रं श्रोतव्यं च भवतीत्यर्थः। [v]युवोर्हि युवयोः खलु यत् [v]सख्यं सखित्वम् [v]उत [v]वा अपि च [v]यत् [v]आप्यम् आप्तिर्वं बान्धवं [v]मार्डीकं मृडीकस्य सुखस्य साधनं तदुभयं हे इन्द्रावरुणौ [v]नि [v]यच्छतम् अस्मभ्यं प्रयच्छतम् ॥

अस्माकमिन्द्रावरुणा भरेभरे पुरोयोधा भवतं कृष्टयोजसा ।
यद्वां हवन्त उभये अधि स्पृधि नरस्तोकस्य तनयस्य सातिषु ॥ ९ ॥

अस्माकम् । इन्द्रावरुणा । भरेऽभरे । पुरःऽयोधा । भवतम् । कृष्टिऽओजसा ।
यत् । वाम् । हवन्ते । उभये । अधि । स्पृधि । नरः । तोकस्य । तनयस्य । सातिषु ॥ ९ ॥

हे [v]कृष्टयोजसा शत्रूणां कर्षकमोजो बलं ययोस्तादृशौ हे इन्द्रावरुणौ [v]भरेभरे संग्रामे संग्रामे [v]अस्माकं [v]पुरोयोधा पुरस्ताद्योद्धारौ [v]भवतम्। [v]यत् यौ [v]वाम् युवाम् [v]उभये उभयविधाः पूर्वकालीना इदानींतनाश्च [v]नरः नेतारः स्तोतारः [v]स्पृधि युद्धे यौ युवां [v]हवन्ते। [v]अध अपि च [v]तोकस्य पुत्रस्य [v]तनयस्य पौत्रस्य [v]सातिषु संभजनीयेषु निमित्तभूतेषु च यौ युवां हवन्ते। तावस्माकं पुरोयोधा भवतमित्यन्वयः ॥

अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।
अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे ॥ १० ॥

अस्मे इति । इन्द्रः । वरुणः । मित्रः । अर्यमा । द्युम्नम् । यच्छन्तु । महि । शर्म । सऽप्रथः ।
अवध्रम् । ज्योतिः । अदितेः । ऋतऽवृधः । देवस्य । श्लोकम् । सवितुः । मनामहे ॥ १० ॥

[v]अस्मे अस्मभ्यमिन्द्रादयः [v]द्युम्नं द्योतमानं धनं [v]यच्छन्तु प्रयच्छन्तु। तथा [v]महि महत् [v]सप्रथः सर्वतः पृथु विस्तीर्णं [v]शर्म गृहं च प्रयच्छन्तु। अपि च [v]ऋतावृधः ऋतस्य यज्ञस्य वर्धयित्र्याः

१. शा२–मर्तस्य ।

vअदितेः अदीनाया देवमातुः vज्योतिः तेजश्च नोऽस्माकम् vअवध्रम् अहिंसकमस्तु। वयं च vदेवस्य दानादिगुणयुक्तस्य[1] vसवितुः सर्वस्य प्रेरकस्य vश्लोकं स्तोत्रं vमनामहे जानीमः। कुर्म इत्यर्थः। यद्वा। देवेन सवित्रास्मभ्यं देयं श्लोकं यशो मनामहे याचामहे ॥ ॥ ३ ॥

'युवां नरा' इति दशर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षं जागतमैन्द्रावरुणम्। 'युवां नरा' इत्यनुक्रान्तम्। आभिशूविकेषूक्थ्येषु स्तोमवृद्धौ प्रशास्तुरिदं सूक्तमावापार्थम्। सूत्रितं च—'युवां नरा पुनीषे वाम्' (आश्व. श्रौ. ७. ९) इति ॥

युवां नरा पश्यमानास आप्यं प्राचा गव्यन्तः पृथुपर्शवो ययुः।
दासा च वृत्रा हतमार्याणि च सुदासमिन्द्रावरुणावसावतम् ॥ १ ॥

युवाम्। नरा। पश्यमानासः। आप्यम्। प्राचा। गव्यन्तः। पृथुऽपर्शवः। ययुः।
दासा। च। वृत्रा। हतम्। आर्याणि। च। सुऽदासम्। इन्द्रावरुणा। अवसा। अवतम्॥ १॥

हे vनरा नेतारावित्यादिवरुणौ vयुवाम्। षष्ठ्यर्थे द्वितीया। युवयोः vआप्यं बन्धुभावं vपश्यमानासः पश्यन्तो युष्मद्बान्धवलाभार्थिनः[2] vगव्यन्तः गा आत्मन इच्छन्तो यजमानाः vपृथुपर्शवः। पृथुर्विस्तीर्णः पर्शुः पार्श्वास्थि येषां ते तथोक्ताः। विस्तीर्णाश्चपर्शुहस्ताः सन्तः vप्राचा प्राचीनं vययुः बर्हिराहरणार्थं गच्छन्ति। पर्श्वा हि बर्हिराच्छिद्यते। तथा च तैत्तिरीयकम्—'अश्वपर्श्वा बर्हिरच्छैति' (तै. ब्रा. ३. २. २. १) इति। हे इन्द्रावरुणौ युवां vदासा दासान्युपक्षपयितॄणि vच वृत्राणि आवरकाणि शत्रुजातानि vआर्याणि vच कर्मानुष्ठानपराणि च शत्रुजातानि vहतं हिंस्तम्। अपि च vसुदासम् अस्मद्याज्यमेतत्संज्ञं राजानम् vअवसा रक्षणेन सार्धम् vअवतम् आगच्छतम्॥

यत्रा नरः समयन्ते कृतध्वजो यस्मिन्नाजा भवति किं चन प्रियम्।
यत्रा भयन्ते भुवना स्वर्दृशस्तत्रा न इन्द्रावरुणाधि वोचतम् ॥ २ ॥

यत्र। नरः। सम्ऽअयन्ते। कृतऽध्वजः। यस्मिन्। आजा। भवति। किम्। चन। प्रियम्।
यत्र। भयन्ते। भुवना। स्वःऽदृशः। तत्र। नः। इन्द्रावरुणा। अधि। वोचतम्॥ २ ॥

vयत्र यस्मिन् संग्रामे vनरः मनुष्याः[3] vकृतध्वजः उच्छ्रितध्वजाः vसमयन्ते युद्धार्थं संगच्छन्ते। vयस्मिन् च vआजा आजौ युद्धे। vचन इति निपातद्वयसमुदायो विभज्य योजनीयः। किंच किमपि vप्रियम् अनुकूलं न vभवति अपि तु सर्वं दुष्करं भवति। vयत्र च युद्धे vभुवना भुवनानि भूतजातानि vस्वर्दृशः शरीरपातादूर्ध्वं स्वर्गस्य द्रष्टारो वीराश्च[4] vभयन्ते बिभ्यति vतत्र तादृशे संग्रामे हे इन्द्रावरुणौ vनः अस्मान् vअधि vवोचतम्। अस्मत्पक्षपातवचनौ भवतम्॥

सं भूम्या अन्ता ध्वसिरा अदृक्षतेन्द्रावरुणा दिवि घोष आरुहत्।
अस्थुर्जनानामुप मामरातयोऽर्वागवसा हवनश्रुता गतम् ॥ ३ ॥

सम्। भूम्याः। अन्ताः। ध्वसिराः। अदृक्षत। इन्द्रावरुणा। दिवि। घोषः। आ। अरुहत्।
अस्थुः। जनानाम्। उप। माम्। अरातयः। अर्वाक्। अवसा। हवनऽश्रुता। आ। गतम्॥ ३॥

---

१. ख—दानादिग्रहणयुक्तस्य; न-भ—दानादिदेवगुणयुक्तस्य। २. ख-न-भ—युष्मद्बांधवा लाभार्थिनः; ज्ञ-श्च-त२-४—युष्मद्बांधवः लाभार्थिनः; त३—युष्मद्बांधवलोभार्थिनः। ३. ख-भ—नेतारः। ४. ज्ञ-त-न-भ-श—वीताश्च।

हे इन्द्रावरुणौ vभूम्याः vअन्ताः पर्यन्ताः vध्वसिराः सैनिकैर्ध्वस्ताः vसम् vअदक्षत संदहयन्ते। तथा vदिवि द्युलोके vघोषः सैनिकानां शब्दश्च vआरुहत् आरूढोऽभूत्। vजनानाम् अस्मदीयानां भटानाम् vअरातयः शत्रवः vमाम् vउप vअस्थुः उपस्थिताः। एवं प्रवर्तमानेऽस्मिन्[1] युद्धे हे vहवनश्रुता आह्वानशीलाविन्द्रावरुणौ vअर्वाक् अस्मदभिमुखम् vअवसा रक्षणेन सह vआ vगतम् आगच्छतम्॥

इन्द्रावरुणा वधनाभिरप्रति भेदं वन्वन्ता प्र सुदासमावतम्।
ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः॥ ४॥

इन्द्रावरुणा। वधनाभिः। अप्रति। भेदम्। वन्वन्ता। प्र। सुदासम्। आवतम्।
ब्रह्माणि। एषाम्। शृणुतम्। हवीमनि। सत्या। तृत्सूनाम्। अभवत्। पुरःऽहितिः॥ ४॥

हे vइन्द्रावरुणा इन्द्रावरुणौ vवधनाभिः वधकरैरायुधैरप्रतिगतमप्राप्तं[2] vभेदम् एतत्संज्ञं सुदासः शत्रुं vवन्वन्ता हिंसन्तौ युवां vसुदासम्। शोभनं ददातीति सुदाः। एतत्संज्ञं मम याज्यं राजानं vप्र vआवतं प्रकर्षेणारक्षतम्। vएषां तृत्सूनां मम याज्यानां vब्रह्माणि स्तोत्राणि vशृणुतम् अशृणुतम्। कदा। vहवीमनि। आह्वयन्तेऽस्मिन् युद्धार्थं परस्परमिति हवीमा संग्रामः। तस्मिन्। यस्मादेवं तस्मात् vतृत्सूनाम् एतत्संज्ञानां मम याज्यानां vपुरोहितिः मम पुरोधानं vसत्या सत्यफलम् vअभवत्। तेषु यन्मम पौरोहित्यं तत् सफलं जातमित्यर्थः॥

इन्द्रावरुणाव्भ्या तपन्ति माघान्यर्यो वनुषामरातयः।
युवं हि वस्वः उभयस्य राजथोऽध स्मा नोऽवतं पार्ये दिवि॥ ५॥

इन्द्रावरुणौ। अभि। आ। तपन्ति। मा। अघानि। अर्यः। वनुषाम्। अरातयः।
युवम्। हि। वस्वः। उभयस्य। राजथः। अध। स्म। नः। अवतम्। पार्ये। दिवि॥ ५॥

हे vइन्द्रावरुणौ vअर्यः अरेः शत्रोः संबन्धीनि vअघानि आहन्तृण्यायुधानि vमा माम् vअभ्या vतपन्ति अभितो बाधन्ते। अपि च vवनुषां हिंसकानां मध्ये vअरातयः अभिगमनशीलाः शत्रवश्च मामभितपन्ति। vयुवं vहि युवां खलु vउभयस्य पार्थिवस्य दिव्यस्य vवस्वः वसुनो धनस्य vराजथः ईशाथे। राजतिरैश्वर्यकर्मा। vअध vस्म अतः कारणात् vपार्ये तरणीये vदिवि दिवसे युद्धदिने vनः अस्मान् vअवतं रक्षतम्॥ ॥ ४॥

युवां हवन्त उभयास आजिष्विन्द्रं च वस्वो वरुणं च सातये।
यत्र राजभिर्दशभिर्निबाधितं प्र सुदासमावतं तृत्सुभिः सह॥ ६॥

युवाम्। हवन्ते। उभयासः। आजिषु। इन्द्रम्। च। वस्वः। वरुणम्। च। सातये।
यत्र। राजऽभिः। दशऽभिः। निऽबाधितम्। प्र। सुऽदासम्। आवतम्। तृत्सुऽभिः। सह॥६॥

vउभयासः उभयविधाः सुदाःसंज्ञो राजा तत्सहायभूतास्तृत्सवश्चैवं द्विप्रकारा जनाः vआजिषु संग्रामेषु vइन्द्रं च vवरुणं च vयुवां vहवन्ते आह्वयन्ते। किमर्थम्। vवस्वः धनस्य vसातये संभजनार्थम्। vयत्र येष्वाजिषु vदशभिः दशसंख्याकैः vराजभिः शत्रुभूतैर्नृपैः vनिबाधितं नितरां हिंसितं vसुदासं vतृत्सुभिः vसह वर्तमानं vप्र vआवतं युवां प्रकर्षेणारक्षतम्। तेष्वाजिष्वित्थन्वयः॥

---

१. ख-न-भ-वर्तमाने°। २. ख-°मप्राप्ता; झ-त-न-भ-श२-°मप्राप्त; श१-°मप्राप्ति।

दश॒ राजा॑नः समि॒ता अ॑यज्यवः सु॒दास॑मिन्द्रावरुणा॒ न यु॑युधुः ।
स॒त्या नृ॒णाम॑ग्रसदा॒ग्रुप॑स्तुतिर्दे॒वा ए॑षामभवन्दे॒वहू॑तिषु ॥ ७ ॥

दश॑ । राजा॑नः । सम्ऽइ॑ताः । अ॒य॒ज्य॒वः । सु॒ऽदास॑म् । इ॒न्द्रा॒व॒रु॒णा॒ । न । यु॒यु॒धुः ।
स॒त्या । नृ॒णाम् । अ॒ग्र॒ऽस॒दा॒म् । उप॑ऽस्तुतिः । दे॒वाः । ए॒षा॒म् । अ॒भ॒व॒न् । दे॒व॒ऽहू॑तिषु ॥ ७ ॥

हे इन्द्रावरुणौ दशसंख्याकाः ᵛराजानः सुदासः शत्रवः ᵛसमिताः संगताः परस्परं समवेताः ᵛअयज्यवः अयजमाना एवंभूतास्ते ᵛसुदासम् एतत्संज्ञमेकमपि राजानं ᵛन ᵛयुयुधुः न संप्रजह्रुः। युवाभ्यामनुगृहीतं तं प्रहर्तुं न शेकुः। तदानीम् ᵛअग्रसदाम्। अग्रान्यज्ञे[1] हविषि सीदन्तीत्यग्रसद ऋत्विजः। हविर्भिर्युक्तानां ᵛनृणां यज्ञस्य नेतॄणामृत्विजाम् ᵛउपस्तुतिः स्तोत्रं ᵛसत्या सफलाभूत्। अपि च ᵛएषां ᵛदेवहूतिषु। देवा हूयन्त एष्विति देवहूतयो यज्ञाः। तेषु सर्वे च ᵛदेवाः ᵛअभवन् युष्मदनुग्रहात् प्रादुर्भवन्ति ॥

दा॒श॒रा॒ज्ञे परि॑यत्ताय वि॒श्वतः॑ सु॒दास॒ इन्द्रावरुणावशिक्षतम् ।
श्वि॒त्यञ्चो॒ यत्र॒ नर्म॑सा कप॒र्दिनो॑ धि॒या धी॒वन्तो॒ अस॑पन्त तृ॒त्सवः॑ ॥ ८ ॥

दा॒श॒ऽरा॒ज्ञे । परि॑ऽयत्ताय । वि॒श्वतः॑ । सु॒ऽदासे॑ । इ॒न्द्रा॒व॒रु॒णौ॒ । अ॒शि॒क्ष॒त॒म् ।
श्वि॒त्यञ्चः॑ । यत्र॑ । नर्म॑सा । क॒प॒र्दिनः॑ । धि॒या । धी॒ऽव॒न्तः॑ । अस॑पन्त । तृ॒त्सवः॑ ॥ ८ ॥

हे ᵛइन्द्रावरुणौ ᵛदाशराज्ञे दशशब्दस्य छान्दसो दीर्घः। विभक्तिव्यत्ययः। दशभी राजभिः शत्रुभूतैः ᵛविश्वतः सर्वतः ᵛपरियत्ताय परिवेष्टिताय ᵛसुदासे राज्ञे ᵛअशिक्षतं बलं प्रायच्छतम्[2]। ᵛयत्र यस्मिन् देशे ᵛश्वित्यञ्चः श्वितिं श्वैत्यं नैर्मल्यमञ्चन्तो गच्छन्तः ᵛकपर्दिनः जटिलाः ᵛधीवन्तः कर्मभिर्युक्ताः ᵛतृत्सवः वसिष्ठशिष्या एतत्संज्ञा ऋत्विजः ᵛनमसा हविर्लक्षणेनान्नेन ᵛधिया स्तुत्या च ᵛअसपन्त पर्यचरन्। तस्मिन् देशे युवां तस्मै राज्ञे बलं प्रायच्छतमित्यर्थः ॥

वृ॒त्राण्य॒न्यः सं॑मि॒थेषु॑ जिघ्नते व्र॒तान्य॒न्यो अ॒भि र॑क्षते॒ सदा॑ ।
हवा॑महे वां वृषणा सुवृ॒क्तिभि॒रस्मे इ॑न्द्रावरुणा॒ शर्म॑ यच्छतम् ॥ ९ ॥

वृ॒त्राणि॑ । अ॒न्यः । सम्ऽइ॑थेषु । जि॒घ्न॒ते॒ । व्र॒तानि॑ । अ॒न्यः । अ॒भि । र॒क्ष॒ते॒ । सदा॑ ।
हवा॑महे । वा॒म् । वृ॒ष॒णा॒ । सु॒ऽवृ॒क्तिऽभिः॑ । अ॒स्मे इति॑ । इ॒न्द्रा॒व॒रु॒णा॒ । शर्म॑ । य॒च्छ॒त॒म् ॥ ९ ॥

हे इन्द्रावरुणौ युवयोः ᵛअन्यः एक इन्द्रः ᵛवृत्राणि शत्रून् ᵛसमिथेषु संग्रामेषु ᵛजिघ्नते हन्ति। ᵛअन्यः एको वरुणः ᵛसदा सर्वदा ᵛव्रतानि कर्माणि ᵛअभि ᵛरक्षते अभितः सर्वतो रक्षति। हे ᵛवृषणा कामानां वर्षितारावित्रावरुणौ तथाविधौ ᵛवां युवां ᵛसुवृक्तिभिः सुप्रवृत्ताभिः स्तुतिभिः ᵛहवामहे आह्वयामहे। आहूतौ च युवाम् ᵛअस्मे अस्मभ्यं ᵛशर्म सुखं ᵛयच्छतं दत्तम् ॥

अ॒स्मे इन्द्रो॒ वरु॑णो मि॒त्रो अ॑र्य॒मा द्यु॒म्नं य॑च्छन्तु महि॒ शर्म॑ सु॒प्रथः॑ ।
अव॑ध्रं॒ ज्योति॑रदि॒तेर्ऋ॒तावृ॑धो दे॒वस्य॒ श्लोकं॑ सवि॒तुर्मनामहे ॥ १० ॥

---

१. ज्ञ-त२-४-अदन्यज्ञे; झ-भ-श-अग्रसदन्यज्ञे; त३-अदासदन्यज्ञे; न-अग्रह्मसहन्यज्ञे।
२. ख-न-भ-प्रयच्छतं।

अस्मे इति । इन्द्रः । वरुणः । मित्रः । अर्यमा । द्युम्नम् । यच्छन्तु । महि । शर्म । सऽप्रथः ।
अवध्रम् । ज्योतिः । अदितेः । ऋतऽवृधः । देवस्य । श्लोकम् । सवितुः । मनामहे ॥ १० ॥

व्याख्यातेयम्। अक्षरार्थस्तु। इन्द्रादयोऽस्मभ्यं द्योतमानं धनं[1] प्रयच्छन्तु सर्वतो विस्तीर्णं महद्गृहं च। यज्ञस्य वर्धयित्र्या अदीनाया देवमातुस्तेजश्चास्माकमबाधकं भवतु। वयं च प्रेरकस्य देवस्य स्तोत्रं मनामहे कुर्महे ॥ ॥ ५ ॥

'आ वाम्' इति पञ्चर्चं चतुर्दशं सूक्तं वासिष्ठं[2] त्रैष्टुभमैन्द्रावरुणम्। अनुक्रान्तं च—'आ वां पञ्च' इति। उक्थ्ये तृतीयसवने मैत्रावरुणशस्त्र इदं सूक्तम्। सूत्रितं च—'आ वां राजानाविन्द्रावरुणा मधुमत्तमस्येति याज्या' (आश्व. श्रौ. ६. १) इति ॥

आ वां राजानावध्वरे ववृत्यां हव्येभिरिन्द्रावरुणा नमोभिः ।
प्र वां घृताची बाह्वोर्दधाना परि त्मना विषुरूपा जिगाति ॥ १ ॥

आ । वाम् । राजानौ । अध्वरे । ववृत्याम् । हव्येभिः । इन्द्रावरुणा । नमःऽभिः ।
प्र । वाम् । घृताची । बाह्वोः । दधाना । परि । त्मना । विषुऽरूपा । जिगाति ॥ १ ॥

हे [v]राजानौ राजमानावीश्वरौ वेन्द्रावरुणौ [v]अध्वरे हिंसारहितेऽस्मिन् यागे [v]वां युवां [v]हव्येभिः हविर्भिः [v]नमोभिः स्तोत्रैश्च [v]आ [v]ववृत्याम् आवर्तयामि। अपि च [v]बाह्वोः हस्तयोः [v]दधाना धार्यमाणा [v]विषुरूपा। रूप्यत इति रूपं हविः। विविधहविर्युक्ता [v]घृताची घृतमञ्चन्ती जुहूः [v]त्मना आत्मना स्वयमेव [v]वां युवां [v]परि [v]प्र [v]जिगाति अभिप्रगच्छति। यद्वा। विषुरूपा नानाविधरूपौ वामिति योज्यम् ॥

युवो राष्ट्रं बृहदिन्वति द्यौर्यौ सेतृभिररज्जुभिः सिनीथः ।
परि नो हेळो वरुणस्य वृज्या उरुं न इन्द्रः कृणवदु लोकम् ॥ २ ॥

युवोः । राष्ट्रम् । बृहत् । इन्वति । द्यौः । यौ । सेतृऽभिः । अरज्जुऽभिः । सिनीथः ।
परि । नः । हेळः । वरुणस्य । वृज्याः । उरुम् । नः । इन्द्रः । कृणवत् । ऊँ इति । लोकम् ॥२॥

हे इन्द्रावरुणौ [v]युवोः युवयोः [v]बृहत् महत् [v]राष्ट्रं राज्यं [v]द्यौः द्युलोकरूपम् [v]इन्वति वृष्ट्या सर्वान् प्रीणयति। [v]यौ युवां [v]सेतृभिः बन्धकैः [v]अरज्जुभिः रज्जुरहितैः रोगादिभिः [v]सिनीथः पापकृतो बध्नीथः। 'षिञ् बन्धने' इति धातुः। तयोर्मध्ये [v]वरुणस्य वारयितुर्देवस्य [v]हेळः क्रोधः [v]नः अस्मान् [v]परि [v]वृज्याः परिवृणक्तु। परित्यज्यान्यत्र गच्छतु। [v]इन्द्रः [v]उ इन्द्रश्च [v]उरुं विस्तीर्णं [v]लोकं स्थानं [v]कृणवत् करोतु ॥

कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सुरिषु प्रशस्ता ।
उपो रयिर्देवजूतो न एतु प्र णः स्पार्हाभिरूतिभिस्तिरेतम् ॥ ३ ॥

कृतम् । नः । यज्ञम् । विदथेषु । चारुम् । कृतम् । ब्रह्माणि । सुरिषु । प्रऽशस्ता ।
उपो इति । रयिः । देवऽजूतः । नः । एतु । प्र । नः । स्पार्हाभिः । ऊतिऽभिः । तिरेतम् ॥३॥

---

१. त-न-भ-श–'धनं' नास्ति। २. ख-न-भ–वसिष्ठस्यार्षं।

हे इन्द्रावरुणौ ᵛनः अस्माकं ᵛविदथेषु गृहेषु क्रियमाणं ᵛयज्ञं ᵛचारुं शोभनं[1] फलसहितं[1] ᵛकृतं कुरुतम्। तथा ᵛसूरिषु स्तोतृष्वस्मासु विद्यमानानि ᵛब्रह्माणि परिवृढानि स्तोत्राणि ᵛप्रशस्ता प्रशस्तान्युत्कृष्टानि फलभाञ्जि ᵛकृतं कुरुतम्। अपि च ᵛदेवजूतः देवाभ्यां युवाभ्यां प्रेरितः ᵛरयिः धनं ᵛनः अस्मान् ᵛउपैतु प्राप्नोतु। तथा ᵛस्पार्हाभिः स्पृहणीयाभिः ᵛऊतिभिः रक्षाभिः ᵛनः अस्मान् ᵛप्र ᵛतिरेतं युवां वर्धयेथाम्। प्रपूर्वस्तिरतिर्वर्धनार्थः ॥

अस्मे इन्द्रावरुणा विश्ववारं रयिं धत्तं वसुमन्तं पुरुक्षुम्।
प्र य आदित्यो अनृता मिनात्यमिता शूरो दयते वसूनि ॥ ४ ॥

अस्मे इति। इन्द्रावरुणा। विश्वऽवारम्। रयिम्। धत्तम्। वसुऽमन्तम्। पुरुऽक्षुम्। प्र। यः। आदित्यः। अनृता। मिनाति। अमिता। शूरः। दयते। वसूनि ॥ ४ ॥

हे इन्द्रावरुणौ ᵛअस्मे अस्मभ्यं ᵛरयिं धनं ᵛधत्तं प्रयच्छतम्। कीदृशम्। ᵛविश्ववारं विश्वैः सर्वैर्वरणीयं संभजनीयं ᵛवसुमन्तं निवासयुक्तं ᵛपुरुक्षुं बह्वन्नं पुरुभिर्बहुभिः प्रशस्यं वा। ᵛआदित्यः अदितेः पुत्रः ᵛयः वरुणः ᵛअनृता अनृतानि सत्यरहितानि भूतानि ᵛप्र ᵛमिनाति प्रहिनस्ति। 'मीञ् हिंसायाम्' इति धातुः। ᵛशूरः शौर्यवान् स वरुणः ᵛअमिता अमिताम्यपरिमितानि ᵛवसूनि धनानि ᵛदयते स्तोतृभ्यो ददाति ॥

इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

इयम्। इन्द्रम्। वरुणम्। अष्ट। मे। गीः। प्र। आवत्। तोके। तनये। तूतुजाना। सुऽरत्नासः। देवऽवीतिम्। गमेम। यूयम्। पात। स्वस्तिऽभिः। सदा। नः ॥ ५ ॥

ᵛमे मदीया ᵛइयं ᵛगीः स्तुतिः ᵛइन्द्रं ᵛवरुणं च ᵛअष्ट अश्नुतां व्याप्नोतु। तथा ᵛतूतुजाना मया प्रेर्यमाणा सा ᵛतोके पुत्रे ᵛतनये पौत्रे च विषये ᵛप्रावत् प्ररक्षत्वस्मान्। वयं च ᵛसुरत्नासः शोभनधनाः सन्तः ᵛदेववीतिं देवैः कामयितव्यं यज्ञं ᵛगमेम प्राप्नुयाम। हे इन्द्रावरुणादयः सर्वे देवाः ᵛयूयं ᵛस्वस्तिभिः कल्याणैः ᵛनः अस्मान् ᵛसदा सर्वदा ᵛपात रक्षत ॥ ॥ ६ ॥

'पुनीषे वाम्' इति पञ्चर्चं पञ्चदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रावरुणम्। 'पुनीषे' इत्यनुक्रान्तम्। आभिप्लविकेषूक्थ्येषु तृतीयसवने स्तोमवृद्धौ प्रशास्तुरिदमावापार्थम्। सूत्रितं च— 'युवां नरा पुनीषे वाम्' (आश्व. श्रौ. ७. ९) इति ॥

पुनीषे वामरक्षसं मनीषां सोममिन्द्राय वरुणाय जुह्वत्।
घृतप्रतीकामुषसं न देवीं ता नो यामन्नुरुष्यताम्भीके ॥ १ ॥

पुनीषे। वाम्। अरक्षसम्। मनीषाम्। सोमम्। इन्द्राय। वरुणाय। जुह्वत्। घृतऽप्रतीकाम्। उषसम्। न। देवीम्। ता। नः। यामन्। उरुष्यताम्। अभीके ॥ १ ॥

हे इन्द्रावरुणौ ᵛवां युवाभ्यां युवयोरर्थम् ᵛअरक्षसं रक्षोरहितां राक्षसैरसंस्पृष्टां ᵛमनीषां स्तुतिं ᵛपुनीषे शोधयामि। किं कुर्वन्। ᵛइन्द्राय ᵛवरुणाय च ᵛसोमं ᵛजुह्वत् इन्द्रं वरुणं चोद्दिश्य

---

१. ख-म-श१—शोभनफलसहितं।

सोममग्नौ प्रक्षिपन्। कीरिणीं मनीषाम्। [v]देवीं द्योतमानाम् [v]उषसं [v]न उषसमिव [v]घृतप्रतीकां दीक्षावयवाम्। शिष्टः[1] परोक्षकृतः। [v]ता तावित्रद्रावरुणौ [v]अभीके अभिगते युद्धे [v]यामन् यामनि युद्धार्थं गमने सति [v]नः अस्मान् [v]उरुष्यतां रक्षताम्॥

स्पर्धन्ते वा उ देवहूये अत्र येषु ध्वजेषु दिद्यवः पतन्ति।
युवं ताँ इन्द्रावरुणावमित्रान्हतं पराचः शर्वा विषूचः॥ २॥

स्पर्धन्ते। वै। ऊँ इति। देवऽहूये। अत्र। येषु। ध्वजेषु। दिद्यवः। पतन्ति।
युवम्। तान्। इन्द्रावरुणौ। अमित्रान्। हतम्। पराचः। शर्वा। विषूचः॥ २॥

[v]देवहूये। देवा विजिगीषवो योद्धारो हूयन्ते युद्धार्थं परस्परमाहूयन्त इति देवहूयः संग्रामः। [v]अत्र अस्मिन् देवहूये संग्रामे [v]स्पर्धन्ते [v]वै[2] शत्रवोऽस्माभिः स्पर्धन्ते खलु। [v]उ इति पूरकः। [v]येषु संग्रामेषु [v]ध्वजेषु पताकासु [v]दिद्यवः शत्रुक्षिप्तान्यायुधानि [v]पतन्ति [v]तान् तेषु संग्रामेषु विद्यमानान् [v]अमित्रान् शत्रून् हे [v]इन्द्रावरुणौ [v]युवं युवां [v]शर्वा शरुणा हिंसकेनायुधेन [v]पराचः पराङ्मुखान् [v]विषूचः विविधगतींश्च [v]हतं हिंस्तम्। यथा ते शत्रवः पराङ्मुखा हतस्ततः पलायमानाश्च भवन्ति तथा तान् बाधेथामित्यर्थः॥

आपश्चिद्धि स्वयशसः सदःसु देवीरिन्द्रं वरुणं देवता धुः।
कृष्टीरन्यो धारयति प्रविक्ता वृत्राण्यन्यो अप्रतीनि हन्ति॥ ३॥

आपः। चित्। हि। स्वऽयशसः। सदःऽसु। देवीः। इन्द्रम्। वरुणम्। देवता। धुरिति धुः।
कृष्टीः। अन्यः। धारयति। प्रऽविक्ताः। वृत्राणि। अन्यः। अप्रतीनि। हन्ति॥ ३॥

[v]आपश्चित् अब्विकाराः सोमाश्च [v]स्वयशसः स्वायत्तयशस्काः [v]देवीः द्योतमानाः सन्तः [v]सदःसु सदनेषु स्थानेषु [v]इन्द्रं [v]वरुणं च [v]देवता एते द्वे देवते [v]धुः धारयन्ति अवस्थापयन्ति। सोमेनाप्यायिता हि देवताः स्वे स्वे स्थानेऽवतिष्ठन्ते। यद्वा। वसतीवर्याख्या आप एव सोमाभिषवद्वारा सदनेष्विन्द्रं वरुणं च धारयन्ति। तयोरिन्द्रावरुणयोः [v]अन्यः एकः [v]प्रविक्ताः पृथक्कृताः पुण्यापुण्यविवेकेन विचित्रफलभोक्त्रीः [v]कृष्टीः प्रजा असांकार्येण[3] [v]धारयति। [v]अन्यः इन्द्रः [v]वृत्राणि शत्रुजातानि [v]अप्रतीनि अन्यैरप्रतिगतानि [v]हन्ति हिनस्ति॥

स सुक्रतुर्ऋतचिदस्तु होता य आदित्य शवसा वां नमस्वान्।
आववर्तदवसे वां हविष्मानसदित्स सुविताय प्रयस्वान्॥ ४॥

सः। सुऽक्रतुः। ऋतऽचित्। अस्तु। होता। यः। आदित्या। शवसा। वाम्। नमस्वान्।
आऽववर्तत्। अवसे। वाम्। हविष्मान्। असत्। इत्। सः। सुविताय। प्रयस्वान्॥ ४॥

[v]सुक्रतुः शोभनकर्मा शोभनप्रज्ञो वा [v]सः [v]होता स्तोता [v]ऋतचित् ऋतस्योदकस्य यज्ञस्य वा चेता निचेता [v]अस्तु भवतु। हे [v]आदित्या अदितेः पुत्रावित्रद्रावरुणौ। छान्दसः सांहितिको

---

१. ख-न-भ–अवशिष्टः। २. ख-ग्र-त-न-भ-श–'वै' नास्ति। ३. घ-ग्र-त२–आसांकार्येण; ग्र-न–असांकार्येण।

हस्वः । [v]यः [v]नमस्वान् नमसा नमस्कारेण स्तोत्रेण वा युक्तः सन् [v]शवसा बलेन युक्तौ [v]वां युवां परिचरतीति शेषः । स सुक्रतुरित्यन्वयः । अपि च यः [v]हविष्मान् हविर्भिर्युक्तः सन् [v]अवसे तर्पणार्थं[1] [v]वां युवाम् [v]आववर्तत् आवर्तयेत् [v]सः यजमानः [v]प्रयस्वान् अन्नवान् भूत्वा [v]सुविताय सुष्ठु प्राप्तव्याय फलाय [v]असदित् भवेदेव ॥

इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

इयम् । इन्द्रम् । वरुणम् । अष्ट । मे । गीः । प्र । आवत् । तोके । तनये । तूतुजाना ।
सुऽरत्नासः । देवऽवीतिम् । गमेम । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

व्याख्यातेयम् । मदीया स्तुतिरिन्द्रं वरुणं चाश्रुताम् । मया प्रेर्यमाणा सा पुत्रे पौत्रे च विषयेऽस्मान् प्ररक्षतु । वयं शोभनधनाः सन्त उत्तरोत्तरं यागं प्राप्नुयाम । हे इन्द्रावरुणादयो देवाः अस्मान् सर्वदा कल्याणै रक्षत ॥ ॥ ७ ॥

'धीरा त्वस्य' इत्यष्टर्चं षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वरुणदेवत्यम् । तथा चानुक्रान्तं— 'धीराष्टौ वारुणं ह' इति । गतो विनियोगः ॥

धीरा त्वस्य महिना जनूंषि वि यस्तस्तम्भ रोदसी चिदुर्वी ।
प्र नाकमृष्वं नुनुदे बृहन्तं द्विता नक्षत्रं पप्रथच्च भूम ॥ १ ॥

धीरा । तु । अस्य । महिना । जनूंषि । वि । यः । तस्तम्भ । रोदसी इति । चित् । उर्वी इति ।
प्र । नाकम् । ऋष्वम् । नुनुदे । बृहन्तम् । द्विता । नक्षत्रम् । पप्रथत् । च । भूम ॥ १ ॥

[v]अस्य वरुणस्य [v]जनूंषि जन्मानि [v]महिना महिम्ना[2] [v]तु क्षिप्रं [v]धीरा धीराणि धैर्यवन्ति भवन्ति । [v]यः वरुणः [v]उर्वी विस्तीर्णे [v]रोदसी [v]चित् द्यावापृथिव्यावपि [v]वि [v]तस्तम्भ विविधं स्तब्धे स्वकीये स्थाने स्थिते अकरोत् । यश्च [v]बृहन्तं महान्तं [v]नाकम् [v]आदित्यं नक्षत्रं च [v]ऋष्वं दर्शनीयं [v]द्विता द्वैधं [v]प्र [v]नुनुदे प्रेरयति स्म । अहनि सूर्यं दर्शनीयं प्रेरयति रात्रौ नक्षत्रं तथेति[3] द्विप्रकारः । [v]भूम भूमिं [v]च यः [v]पप्रथत् अप्रथयत् विस्तारितवान् । तस्यास्य वरुणस्येत्यन्वयः ॥

उत स्वया तन्वा३ सं वदे तत्कदा न्व१न्तर्वरुणे भुवानि ।
किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यम् ॥ २ ॥

उत । स्वया । तन्वा । सम् । वदे । तत् । कदा । नु । अन्तः । वरुणे । भुवानि ।
किम् । मे । हव्यम् । अहृणानः । जुषेत । कदा । मृळीकम् । सुऽमनाः । अभि । ख्यम् ॥ २ ॥

वरुणं क्षीप्रं दिदृक्षमाण ऋषिरनया वितर्कयति । उतेति विचिकित्सायाम् । [v]उत किं [v]स्वया [v]तन्वा स्वीयेनात्मीयेन शरीरेण [v]सं [v]वदे सहवदनं करोमि । आहो स्वित् [v]तत् तेन वरुणेन सह संवदे । [v]कदा [v]नु कदा खलु [v]वरुणे देवे [v]अन्तः [v]भुवानि अन्तर्भूतो भवानि । वरुणस्य चित्ते संलग्नो भवानीत्यर्थः । अपि च [v]मे मदीयं [v]हव्यं स्तोत्रं हविर्वा [v]अहृणानः अक्रुध्यन् वरुणः [v]किं

---

१. श–रक्षणार्थं । २. ख-भ–महत्त्वेन । ३. ख-भ–प्रेरयति; श–प्रेरयति तथेति ।

केन हेतुना ᵛजुषेत सेवेत। ᵛसुमनाः शोभनमनस्कः सन्नहं ᵛकदा कस्मिन् काले ᵛमृळीकं सुखयितारं वरुणम् ᵛअभि ᵛख्यम् अभिपश्येयम् ॥

पृच्छे तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छम् ।
समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते ॥ ३ ॥

पृच्छे । तत् । एनः । वरुण । दिदृक्षु । उपो इति । एमि । चिकितुषः । विऽपृच्छम् ।
समानम् । इत् । मे । कवयः । चित् । आहुः । अयम् । ह । तुभ्यम् । वरुणः । हृणीते ॥३॥

हे ᵛवरुण ᵛतदेनः पापं ᵛपृच्छे त्वां पृच्छामि। ᵛदिदृक्षु । छान्दसः सुलोपः । द्रष्टुमिच्छन्नहम् । येन पापेन हेतुना त्वदीयैः पाशैर्बद्धोऽस्मि पृष्टः संस्तत् पापं कथय । अहं ᵛविपृच्छं विविधं प्रष्टुं ᵛचिकितुषः विदुषो जनान् ᵛउपो ᵛएमि उपागाम् । ते ᵛकवयश्चित् क्रान्तदर्शिनो जनाश्च ᵛमे मह्यं ᵛसमानमित् समानमेवैकरूपमेव ᵛआहुः अकथयन् । यदाहुस्तदाह । हे स्तोतः ᵛतुभ्यम् ᵛअयं ᵛह अयमेव ᵛवरुणः ᵛहृणीते क्रुध्यतीति । अतः क्रोधं परित्यज्यास्मान् पाशेभ्यो मोचय ॥

किमाग आस वरुण ज्येष्ठं यत्स्तोतारं जिघांससि सखायम् ।
प्र तन्मे वोचो दूळभ स्वधावोऽवं त्वानेना नमसा तुर इयाम् ॥ ४ ॥

किम् । आगः । आस । वरुण । ज्येष्ठम् । यत् । स्तोतारम् । जिघांससि । सखायम् ।
प्र । तत् । मे । वोचः । दुःऽदभ । स्वधाऽवः । अवं । त्वा । अनेनाः । नमसा । तुरः । इयाम् ॥ ४ ॥

हे ᵛवरुण ᵛज्येष्ठम् अधिकं ᵛकिमाग[1] ᵛआस कोऽपराधो मया कृतो बभूव । ᵛयत् येन आगसा ᵛसखायं मित्रभूतं सन्तं ᵛस्तोतारं ᵛजिघांससि हन्तुमिच्छसि । हे ᵛदूळभ दुर्दभान्यैर्बाधितुमशक्य ᵛस्वधावः तेजस्विन् हे वरुण ᵛतत् आगः ᵛमे मह्यं ᵛप्र ᵛवोचः प्रब्रूहि । एवं सति तस्य प्रायश्चित्तं कृत्वा ᵛअनेनाः अपापः सन्नहं ᵛतुरः त्वरमाणः शीघ्रः ᵛनमसा नमस्कारेण हविषा वा त्वाम् ᵛअव ᵛइयाम् उपगच्छेयम् ॥

अवं द्रुग्धानि पित्र्या सृजा नोऽव या वयं चकृमा तनूभिः ।
अवं राजन्पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम् ॥ ५ ॥

अवं । द्रुग्धानि । पित्र्या । सृज । नः । अवं । या । वयम् । चकृम । तनूभिः ।
अवं । राजन् । पशुऽतृपम् । न । तायुम् । सृज । वत्सम् । न । दाम्नः । वसिष्ठम् ॥ ५ ॥

हे वरुण ᵛपित्र्या[2] पितृतः प्राप्तानि ᵛनः अस्मदीयानि ᵛद्रुग्धानि द्रोहान् बन्धनहेतुभूतान्[3] ᵛअव ᵛसृज विमुञ्च । अस्मत्तो विश्लेषय[4] । ᵛवयं च ᵛया यानि द्रोहजातानि ᵛतनूभिः शरीरैः ᵛचकृम कृतवन्तः स्म तानि च ᵛअव सृज । हे ᵛराजन् राजमान वरुण ᵛपशुतृपं ᵛन ᵛतायुं स्तैन्यप्रायश्चित्तं कृत्वावसाने घासादिभिः पशूनां तर्पयितारं स्तेनमिव ᵛदाम्नः रज्जोः ᵛवत्सं ᵛन वत्समिव च ᵛवसिष्ठं मां बन्धकात् पापात् ᵛअव ᵛसृज विमुञ्च ॥

---

१. ख-घ-त-न-भ-श–आग । २. ख–पित्र्याणि; भ–पित्र्या पित्र्याणि । ३. ख–°हेतून् ।
४. ख-घ-त-न-भ-श–विश्लेषय च ।

न स स्वो दक्षो वरुण धृतिः सा सुरा मन्युर्विभीदको अचित्तिः ।
अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता ॥ ६ ॥

न । सः । स्वः । दक्षः । वरुण । धृतिः । सा । सुरा । मन्युः । विऽभीदकः । अचित्तिः ।
अस्ति । ज्यायान् । कनीयसः । उपऽअरे । स्वप्नः । चन । इत् । अनृतस्य । प्रऽयोता ॥ ६ ॥

हे [v]वरुण [v]सः [v]स्वो [v]दक्षः पुरुषस्य स्वभूतं तद्बलं पापप्रवृत्तौ कारणं [v]न भवति । किं तर्हि [v]धृतिः स्थिरा उत्पत्तिसमय एव निर्मिता दैवगतिः[1] कारणम् । 'धृ गतिस्थैर्ययोः' इति धातुः । [v]सा च धृतिर्वक्ष्यमाणरूपा । [v]सुरा प्रमादकारिणी[2] [v]मन्युः क्रोधश्च गुर्वादिविषयः सन्ननर्थहेतुः । [v]विभीदकः द्यूतसाधनोऽक्षः । स च द्यूतेषु पुरुषं प्रेरयन्ननर्थहेतुर्भवति । [v]अचित्तिः अज्ञानमविवेककारणम् । अत ईदृशी दैवकल्पितैव पुरुषस्य पापप्रवृत्तौ कारणम् । अपि च [v]कनीयसः अल्पस्य हीनस्य पुरुषस्य पापप्रवृत्तौ [v]उपारे उपागते समीपे नित्यमृत्वेन स्थितः [v]ज्यायान् अधिक ईश्वरः [v]अस्ति । स एव तं पापे प्रवर्तयति । तथा चाम्नातम्—'एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते' (कौ. उ. ३.८) इति । एवं च सति [v]स्वप्नश्चन स्वप्नोऽपि [v]अनृतस्य पापस्य [v]प्रयोता प्रकर्षेण मिश्रयिता भवति । [v]इत् इति पूरकः । स्वप्ने कृतैरपि कर्मभिर्बहूनि पापानि जायन्ते किमु वक्तव्यं जाग्रति कृतैः कर्मभिः पापान्युत्पद्यन्त इति । अतो ममापराधो दैवागत इति हे वरुण त्वया क्षन्तव्य[3] इति भावः ॥

अरं दासो न मीळ्हुषे कराण्यहं देवाय भूर्णयेऽनागाः ।
अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति ॥ ७ ॥

अरम् । दासः । न । मीळ्हुषे । कराणि । अहम् । देवाय । भूर्णये । अनागाः ।
अचेतयत् । अचितः । देवः । अर्यः । गृत्सम् । राये । कविऽतरः । जुनाति ॥ ७ ॥

[v]मीळ्हुषे सेक्त्रे कामानां वर्षित्रे [v]भूर्णये जगतो भर्त्रे [v]देवाय दानादिगुणयुक्ताय वरुणाय [v]अनागाः तत्प्रसादादपापः सन् [v]अहम् [v]अरम् अलं पर्याप्तं [v]कराणि परिचरणं करवाणि । [v]दासो [v]न यथा भृत्यः स्वामिने सम्यक् परिचरति तद्वत् । [v]अर्यः स्वामी स च [v]देवः [v]अचितः अजानतोऽस्मान् [v]अचेतयत् चेतयतु प्रज्ञापयतु । [v]गृत्सं स्तोतारं च [v]कवितरः प्राज्ञतरो देवः [v]राये धनाय धनप्राप्त्यर्थं [v]जुनाति जुनातु प्रेरयतु ॥

एकादशिने वारुणे पशौ 'अयम्' इति पुरोडाशस्यानुवाक्या । सूत्रितं च—'अयं सु तुभ्यं वरुण स्वधाव एवा वन्दस्व वरुणं बृहन्तम्' (आश्व. श्रौ. ३. ७) इति ॥

अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु ।
शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

अयम् । सु । तुभ्यम् । वरुण । स्वधाऽवः । हृदि । स्तोमः । उपऽश्रितः । चित् । अस्तु ।
शम् । नः । क्षेमे । शम् । ऊँ इति । योगे । नः । अस्तु । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ८ ॥

हे [v]स्वधावः अन्नवन् [v]वरुण [v]तुभ्यं त्वदर्थं क्रियमाणः [v]अयम् एतत्सूक्तात्मकः[4] [v]स्तोमः स्तोत्रं [v]हृदि त्वदीये हृदये [v]सु सुष्ठु [v]उपश्रितः उपगतः समवेतः [v]अस्तु । [v]चित् इति पूरकः ।

---

१. ङ-ञ-त२-४—देवगतिः । २. ख-ङ-त-न-भ-श—प्रमोदकारिणी । ३. घ-त३-श—क्षंतव्यं ।
४. ख-भ—°त्सूक्तात्मकः ।

अप्राप्तस्य प्रापणं योगः प्राप्तस्य रक्षणं क्षेमः। ᵛनः अस्मदीये ᵛक्षेमे रक्षणे ᵛनम् उपद्रवाणां शमनम् ᵛअस्तु। ᵛयोगे च ᵛनः अस्मदीये प्रापणे ᵛशमु शमनमेवास्तूपद्रवाणाम्। हे वरुणादयो देवाः ᵛनः अस्मान् सर्वदा ᵛस्वस्तिभिः अविनाशैः ᵛपात रक्षत ॥ ॥ ८ ॥

'रदत्पथः' इति सप्तर्चं सप्तदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वारुणम्। अनुक्रान्तं च—'रदत्सप्त' इति। गतो विनियोगः ॥

रदत्पथो वरुणः सूर्याय प्राणींसि समुद्रियो नदीनाम्।
सर्गो न सृष्टो अर्वतीरृतायञ्चकार महीरवनीरहभ्यः ॥ १ ॥

रदत्। पथः। वरुणः। सूर्याय। प्र। अणींसि। समुद्रियो। नदीनाम्।
सर्गः। न। सृष्टः। अर्वतीः। ऋतऽयन्। चकार। महीः। अवनीः। अहऽभ्यः ॥ १ ॥

अयं ᵛवरुणः देवः ᵛसूर्याय सर्वस्य प्रेरकायादित्याय ᵛपथः मार्गानन्तरिक्षप्रदेशान् ᵛप्र ᵛरदत् प्रायच्छत्। ᵛसमुद्रिया समुद्र उदधौ भवानि। यद्वा। समुद्रवन्त्यस्मादाप इति समुद्रमन्तरिक्षम्। तत्र भवानि। ᵛअर्णांसि उदकानि ᵛनदीनां प्रासृजत्। ᵛसर्गो ᵛन। सृज्यते युद्धभूमौ सादिना प्रेर्यत इति सर्गोऽश्वः। स यथा ᵛअर्वतीः वडवाः प्रति शीघ्रं गच्छति तद्वत् ᵛऋतायन् ऋतं शीघ्रं गमनमात्मन इच्छन् ᵛमहीः महतीः ᵛअवनीः रात्रीः ᵛअहभ्यः अहोभ्यः सकाशात् ᵛचकार भेदेन कृतवान्। अस्तं गच्छन् सूर्य एव वरुण इत्युच्यते। स हि स्वगमनेन रात्रीर्जनयति ॥

आत्मा ते वातो रज आ नवीनोत्पशुर्न भूर्णिर्यवसे ससवान्।
अन्तर्महो बृहती रोदसीमे विश्वा ते धाम वरुण प्रियाणि ॥ २ ॥

आत्मा। ते। वातः। रजः। आ। नवीनोत्। पशुः। न। भूर्णिः। यवसे। ससऽवान्।
अन्तः। मही इति। बृहती इति। रोदसी इति। इमे इति। विश्वा। ते। धाम। वरुण। प्रियाणि ॥२॥

हे वरुण ᵛते त्वदीयस्वयान्तरिक्षे प्रेर्यमाणः ᵛवातः वायुः ᵛआत्मा सर्वस्य प्राणिजातस्य प्राणरूपेण धारयिता। स च ᵛरजः उदकम् ᵛआ ᵛनवीनोत् समन्तात् प्रेरयति। वातेन हि वृष्टिर्जायते। ᵛभूर्णिः जगतो भर्ता स वायुः ᵛयवसे घासे प्रक्षिप्ते सति यथा पशुरन्नवान् भवति तद्वत् ᵛससवान्। 'ससम्' इत्यन्ननाम। तद्वान् भवति। हविर्लक्षणमन्नमपि तस्मै प्रयच्छन्तीत्यर्थः[1]। यद्वा सनोतेः क्वसौ रूपम्। ततः ससवान् संभक्तवान् वातो घासे सति पशुर्यथा भारवाही भवति तद्वज्जगतो भर्ता। हे ᵛवरुण ᵛमही महत्यौ ᵛबृहती परिवृढे ᵛइमे ᵛरोदसी द्यावापृथिव्यौ ᵛअन्तः मध्ये। द्यावापृथिव्योर्मध्य इत्यर्थः। ᵛते तव ᵛविश्वा सर्वाणि ᵛधाम धामानि स्थानानि तेजांसि वा ᵛप्रियाणि सर्वेषां प्रीतिकराणि भवन्ति ॥

परि स्पशो वरुणस्य स्मदिष्ट उभे पश्यन्ति रोदसी सुमेके।
ऋतावानः कवयो यज्ञधीराः प्रचेतसो य इषयन्त मन्म ॥ ३ ॥

परि। स्पशः। वरुणस्य। स्मत्ऽइष्टाः। उभे इति। पश्यन्ति। रोदसी इति। सुमेके इति सुऽमेके।
ऋतऽवानः। कवयः। यज्ञऽधीराः। प्रऽचेतसः। ये। इषयन्त। मन्म ॥ ३ ॥

---

१. ख-ङ्ग-त४-न-भ-प्रयच्छतीत्यर्थः; श२-प्रयच्छंत इत्यर्थः।

स्पशन्ति स्पृशन्तीति स्पशश्चराः । [v]वरुणस्य देवस्य [v]स्पशः चराः [v]स्मदिष्टाः । स्मदित्येतत् प्रशस्यार्थे सहार्थे च वर्तते । प्रशस्ततमाः । यद्वा । सह प्रेषिताः सन्तः । [v]सुमेके शोभनमेहने सुरूपे वा [v]उभे [v]रोदसी द्यावापृथिव्यौ [v]परि [v]पश्यन्ति परित ईक्षन्ते । उभयोर्लोकयोर्वर्तमानान् पुण्यापुण्यकारिणो जनान् पश्यन्तीत्यर्थः । यस्मादेवं तस्मात् तन्नीत्या [v]ऋतावानः कर्मवन्तः [v]यज्ञधीराः यज्ञेषु कृतबुद्धयः [v]प्रचेतसः प्राज्ञाः [v]कवयः क्रान्तदर्शिनः [v]ये जनाः [v]मन्म मन्मानि स्तोत्राणि [v]इषयन्त गमयन्ति वरुणं प्रापयन्ति । तानपि परिपश्यन्तीत्यर्थः । अतोऽस्मानपि स्तोतॄन् ज्ञात्वा पापात् मुञ्चन्विवस्वृषिराशास्ते ॥

उवाचं मे वरुणो मेधिराय त्रिः सप्त नामाघ्न्या बिभर्ति ।
विद्वान्पदस्य गुह्या न वोचद्युगाय विप्र उपराय शिक्षन् ॥ ४ ॥

उवाचं । मे । वरुणः । मेधिराय । त्रिः । सप्त । नाम । अघ्न्या । बिभर्ति ।
विद्वान् । पदस्य । गुह्या । न । वोचत् । युगाय । विप्रः । उपराय । शिक्षन् ॥ ४ ॥

[v]मेधिराय मेधाविने [v]मे मह्यं [v]वरुणः [v]उवाच उक्तवान् । किमुक्तवान् तदाह । [v]त्रिः [v]सप्त एकविंशतिसंख्याकानि नामानि [v]अघ्न्या गौः [v]बिभर्ति धारयतीति । वागत्र गौरुच्यते । सा च उरसि कण्ठे शिरसि च बद्धानि गायत्र्यादीनि सप्त छन्दसां नामानि बिभर्ति । यद्वा । वेदात्मिका वागेकविंशतिसंस्थानां यज्ञानां नामानि बिभर्ति धारयति । अपर आह । गौः पृथिवी । तस्याश्च 'गौर्न्मा उमा' इति पठितान्येकविंशतिनामानीति । अपि च [v]विद्वान् जानन् [v]विप्रः मेधावी स वरुणः [v]युगाय युक्ताय [v]उपराय उप समीपे रममाणायान्तेवासिने मह्यं [v]शिक्षन् उपदिशन् [v]पदस्य उत्कृष्टस्य स्थानस्य ब्रह्मलोकलक्षणस्य संबन्धीनि [v]गुह्या गुह्यानि रहस्यान्युपदेशगम्यानि । नशब्दश्चार्थे । इमानि च [v]वोचत् उक्तवान् । अतोऽहं वरुणस्य शिष्योऽस्मि । तस्मात् स वरुणः अस्मान्[1] पापात् मोचयत्वित्यर्थः[2] ॥

तिस्रो द्यावो निहिता अन्तरस्मिन्तिस्रो भूमीरुपराः षड्विधानाः ।
गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेङ्खं हिरण्ययं शुभे कम् ॥ ५ ॥

तिस्रः । द्यावः । निऽहिताः । अन्तः । अस्मिन् । तिस्रः । भूमीः । उपराः । षट्ऽविधानाः ।
गृत्सः । राजा । वरुणः । चक्रे । एतम् । दिवि । प्रऽईङ्खम् । हिरण्ययम् । शुभे । कम् ॥ ५ ॥

[v]तिस्रः त्रिप्रकारा उत्तममध्यमाधमभावेन त्रिविधाः [v]द्यावः द्युलोकाः [v]अस्मिन् वरुणे [v]अन्तः मध्ये [v]निहिताः । [v]तिस्रः पूर्ववत्त्रिविधाः [v]भूमीः भूम्यश्च [v]षड्विधानाः । विधानं विधा । वसन्तादृतुभेदेन षड्विधाः प्रकारा यासु ताइदृशाः । [v]उपराः अस्मिन्नेव वरुणे उप्ता अन्तर्भूताः । लोकानां त्रित्वं च 'त्रयो वा इमे त्रिवृतो लोकाः' (ऐ. ब्रा. २.१७) इत्यादिना ब्राह्मणेनावगम्यते । 'तिस्रो भूमीर्धारयन्' (ऋ. सं. २.२७.८) इति निगमश्च भवति । इमौ लोकावावृत्य वरुणस्तिष्ठतीत्यर्थः । अपि च [v]गृत्सः स्तुत्यः [v]राजा ईश्वरः सः [v]वरुणः [v]दिवि अन्तरिक्षे [v]हिरण्ययं हिरण्मयं सुवर्णमयं हितरमणीयं वा [v]प्रेङ्खं दोलावद्विगूढपर्यस्पर्शिनम् [v]एतं सूर्यं [v]शुभे [v]कं दीप्त्यर्थं [v]चक्रे कृतवान् । 'दिवि सूर्यमदधात्सोममद्रौ' (ऋ. सं. ५. ८५. २) इति हि श्रूयते ॥

---

१. ध-श-त-श-अस्मात् । २. ख-प्रमोचयति° ।

वारुणे पशौ ' अव सिन्धुम् ' इति वपाया अनुवाक्या । सूत्रितं च–' अव सिन्धुं वरुणो द्यौरिव स्यादयं सु तुभ्यं वरुण स्वधावः ' (आश्व. श्रौ. ३.७) इति ॥

अव॒ सिन्धुं॑ वरु॒णो द्यौरि॑व स्याद्दृ॒प्सो न श्वे॒तो मृ॒गस्तु॒विष्मा॑न् ।
गम्भी॒रशं॑सो॒ रज॑सो॒ वि॒मान॑: सु॒पार॑क्षत्रः॒ सत॒ो अ॒स्य राजा॑ ॥ ६ ॥

अव॑ । सिन्धु॑म् । वरु॑णः । द्यौः । इ॒व॒ । स्या॒त् । दृ॒प्सः । न । श्वे॒तः । मृ॒गः । तु॒विष्मा॑न् ।
गम्भी॒रऽशं॑सः । रज॑सः । वि॒ऽमान॑: । सु॒पार॑ऽक्षत्रः । सत॑: । अ॒स्य । राजा॑ ॥ ६ ॥

vद्यौरिव सूर्य इव दीप्तः vवरुणः vसिन्धुं समुद्रम् vअव vस्यात् वेलायामवस्थापयति । यथा वेलां नातिक्रामति तथा करोतीत्यर्थः । कीदृशो वरुणः । vदृप्सो vन द्रवणशील उदबिन्दुरिव vश्वेतः शुभ्रवर्णः vमृगः । लुप्तोपममेतत् । गौरमृग इव vतुविष्मान् बलवान् प्रवृद्धो वा vगम्भीरशंसः । गम्भीरो महान् शंसः स्तोत्रं यस्य स तथोक्तः । vरजसः उदकस्य vविमानः निर्माता vसुपारक्षत्रः सुष्ठु दुःखात् पारकं क्षत्रं बलं धनं वा यस्य तादृशो वरुणः vसतः विद्यमानस्य vअस्य जगतः vराजा ईश्वरो भवति ॥

यो मृ॒ळया॑ति॒ चक्रु॑षे॒ चि॒दाग॑ो॒ वय॑ स्याम॒ वरु॑णे॒ अना॑गाः ।
अनु॒ व्र॒तान्यदि॑तेर्ऋ॒धन्तो॒ यूय पा॑त स्व॒स्तिभि॒: सदा॑ नः ॥ ७ ॥

यः । मृ॒ळया॑ति । चक्रु॑षे । चि॒त् । आग॑: । व॒यम् । स्या॒म॒ । वरु॑णे । अना॑गाः ।
अनु॑ । व्र॒तानि॑ । अदि॑तेः । ऋ॒धन्तः॑ । यूय॒म् । पा॒त॒ । स्व॒स्तिऽभि॑: । सदा॑ । नः॒ ॥ ७ ॥

vआगः अपराधं vचक्रुषे vचित् कृतवतेऽपि स्तोत्रे vयः वरुणः vमृळयाति उपदयां करोति तस्मिन् vवरुणे vअनागाः अनागसोऽनपराधाः सन्तः vवयं vस्याम वर्तमाना भवेम । किं कुर्वन्तः । vअदितेः अदीनस्य वरुणस्य संबन्धीनि vव्रतानि कर्माणि vअनु आनुपूर्व्येण vऋधन्तः समर्धयन्तः । हे वरुणादयो देवा यूयमस्मान् सर्वदा कल्याणैः पालयत ॥ ॥ ९ ॥

' प्र शुन्ध्युवम् ' इति सप्तर्चमष्टादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वारुणम् । ' प्र शुन्ध्युवम् ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र शु॒न्ध्यु॒वं॑ वरु॒णाय॒ प्रेष्ठां॒ म॒तिं व॑सिष्ठ मी॒ळ्हुषे॑ भरस्व ।
य ईं॒वार्ञ्छं॑ क॒रते॒ यज॑त्रं स॒हस्रा॑मघं वृष॒णं बृ॒हन्त॑म् ॥ १ ॥

प्र । शु॒न्ध्यु॒वम् । वरु॑णाय । प्रेष्ठा॑म् । म॒तिम् । व॒सि॒ष्ठ॒ । मी॒ळ्हुषे॑ । भ॒र॒स्व॒ ।
यः । ई॒म् । अ॒र्वाञ्च॑म् । क॒रते॑ । यज॑त्रम् । स॒हस्र॑ऽमघम् । वृ॒ष॒णम् । बृ॒हन्त॑म् ॥ १ ॥

ऋषिरात्मानमेव प्रत्यक्षीकृत्य स्तुतौ नियुङ्क्ते । हे vवसिष्ठ त्वं vमीळ्हुषे सेक्त्रे vवरुणाय vशुन्ध्युवं शोधयित्रीं यद्वा स्वत एव शुद्धां vप्रेष्ठां प्रियतमां vमतिं मननीयामीदृशीं स्तुतिं vप्र vभरस्व प्रहर प्रापय । vयः वरुणः vईम् एनं सूर्यम् vअर्वाञ्चम् अस्मदभिमुखं vकरते अन्तरिक्षे करोति तस्मै वरुणायेत्यन्वयः । कीदृशं सूर्यम् । vयजत्रं यष्टव्यं vसहस्रामघं बहुधनं vवृषणं कामानां वर्षकं vबृहन्तं महान्तम् ॥

अधा॒ न्वस्य॑ सं॒दृशं॑ जगन्वा॒न्नेरनी॑कं॒ वरु॑णस्य मंसि ।
स्व१॑र्यदश्मन्न॒धिपा उ॒ अन्धो॒ऽभि मा॒ वपु॑र्दृ॒शये॑ निनीयात् ॥ २ ॥

अध । नु । अस्य । सम्ऽदृशम् । जगन्वान् । अग्नेः । अनीकम् । वरुणस्य । मंसि ।
स्वः । यत् । अश्मन् । अधिऽपाः । ऊँ इति । अन्धः । अभि । मा । वपुः । दृशये । निनीयात् ॥२॥

vअध अधुना vअस्य vवरुणस्य vसंदृशं संदर्शनं vनु क्षिप्रं vजगन्वान् गतवानहम् vअग्नेः vअनीकं ज्वालासंघं vमंसि स्तवानि । तं वरुणं षष्ठ्यभिति शेषः । vयत् यदा वरुणः vस्वः सुखकरं vअश्मन् अश्मन्यभिषवार्थे पाषाणेऽवस्थितम्[1] । अभिषुतमित्यर्थः । ईदृशम् vअन्धः सोमलक्षणमन्नम् vअधिपाः अधिकं पाता भवेत् । छान्दसः षष्ठ्यभावः । vउ इति पूरकः । तदानीं vमा मां vवपुः शरीरं स्वकीयम् । वपुरिति रूपनाम । प्रशस्तं रूपं वा vदृशये दर्शनार्थम् vअभि vनिनीयात् अभिप्रापयेत् ॥

आ यद्रुहाव वरुणश्च नावं प्र यत्समुद्रमीरयाव मध्यम् ।
अधि यदपां स्नुभिश्चराव प्र प्रेङ्ख ईङ्खयावहै शुभे कम् ॥ ३ ॥

आ । यत् । रुहाव । वरुणः । च । नावम् । प्र । यत् । समुद्रम् । ईरयाव । मध्यम् ।
अधि । यत् । अपाम् । स्नुऽभिः । चराव । प्र । प्रऽईङ्खे । ईङ्खयावहै । शुभे । कम् ॥ ३ ॥

vयत् यदा वरुणे प्रसन्ने सति अहं vवरुणश्च उभौ vनावं द्रुममयीं तरणसाधनभूताम् vआ vरुहाव उभावारूढावभूव[2] । तां च नावं vयत् यदा vसमुद्रं vमध्यं समुद्रस्य मध्यं प्रति vप्र vईरयाव प्रकर्षेण गमयाव । vयत् यदा च vअपाम् उदकानाम् vअधि उपरि vस्नुभिः गन्त्रीभिरन्याभिरपि नौभिः vचराव वर्तावहै । तदानीं vशुभे शोभार्थं vप्रेङ्खे नौरूपायां दोलायामेव[3] vप्र vईङ्खयावहै । निम्नोन्नतैस्तरङ्गैरितश्चेतश्च प्रविचलन्तौ संक्रीडावहै । vकम् इति पूरकः । यद्वा क्रियाविशेषणम् । कं सुखं यथा भवति तथेत्यर्थः ॥

वसिष्ठं ह वरुणो नाव्याधाद्ऋषिं चकार स्वपा महोभिः ।
स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन्यादुषासः ॥ ४ ॥

वसिष्ठम् । ह । वरुणः । नावि । आ । अधात् । ऋषिम् । चकार । सुऽअपाः । महःऽभिः ।
स्तोतारम् । विप्रः । सुदिनऽत्वे । अह्नाम् । यात् । नु । द्यावः । ततनन् । यात् । उषसः ॥४॥

एवं वसिष्ठेनात्मनोक्ते यद्वरुणेन कृतं तदर्शयति । vवसिष्ठं vह वसिष्ठं खलु vवरुणः vनावि स्वकीयायाम् vआधात् आरोहयत् । तथा तम् vऋषिम् vअवोभिः रक्षणैः vस्वपां स्वपसं शोभनकर्माणं vचकार वरुणः कृतवान् । अपि च vविप्रः मेधावी वरुणः vअह्नां दिवसानां मध्ये vसुदिनत्वे यत्फलत्वेन शोभनदिनत्वं तत्र vस्तोतारम् अस्थापयदिति[4] शेषः । किं कुर्वन् । vयात् यातो गच्छतः vद्यावः दिवसान् vयात् यातीः vउषासः उषसोपलक्षिता रात्रीश्च vनु क्षिप्रं vततनन् सूर्यात्मना विस्तारयन् ॥

क इ त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुरा चित् ।
वृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते ॥ ५ ॥

---

१. त–पाषाणेभिस्थितं । २. ख-न-भ-श१–°रूढावभूतां; घ–°रूढौ भवावः । ३. ख-ञ-ञ-त४-न-भ–डोलाया° । ४. त१-२–आस्थापय° ।

क। त्यानि। नौ। सख्या। बभूवुः। सचावहे इति। यत्। अवृकम्। पुरा। चित्।
बृहन्तम्। मानम्। वरुण। स्वधाऽवः। सहस्रऽद्वारम्। जगम। गृहम्। ते॥ ५॥

हे वरुण [v]त्यानि तानि पुरातनानि [v]नौ आवयोः [v]सख्या सख्यानि सखित्वानि [v]क कुत्र बभूवुः। [v]पुरा पूर्वस्मिन् काले [v]अवृकम् अहिंस्यमात्यन्तिकं [v]यत् सख्यमस्ति तत् [v]सचावहे आवां सेवावहे। [v]चित् इति पूरकः। अपि च हे [v]स्वधावः अन्नवन् [v]वरुण [v]ते त्वदीयं [v]गृहं जगम गच्छानि। लोडर्थे लिट्। कीदृशं गृहम्। [v]बृहन्तं महान्तं [v]मानम्। मान्यस्मिन् सर्वाणि [मा]नानीति मानम्। सर्वस्य भूतजातस्य परिच्छेदकमित्यर्थः। [v]सहस्रद्वारं बहुद्वारम्॥

य आपिर्नित्यो वरुण प्रियः सन्त्वामागांसि कृणवत्सखा ते।
मा तु एनस्वन्तो यक्षिन्भुजेम यन्धि ष्मा विप्रः स्तुवते वरूथम्॥ ६॥

यः। आपिः। नित्यः। वरुण। प्रियः। सन्। त्वाम्। आगांसि। कृणवत्। सखा। ते।
मा। ते। एनस्वन्तः। यक्षिन्। भुजेम। यन्धि। स्म। विप्रः। स्तुवते। वरूथम्॥ ६॥

हे [v]वरुण [v]यः वसिष्ठः [v]नित्यः ध्रुवः [v]आपिः बन्धुः। औरसः पुत्र इत्यर्थः। यः पूर्वं [v]प्रियः सन् [v]त्वां प्रति [v]आगांसि अपराधान् [v]कृणवत् अकरोत् स इदानीं [v]ते तव [v]सखा[1] समानख्यानः [v]अयोऽस्तु। हे [v]यक्षिन् यजनीय वरुण [v]ते तव स्वभूता वयम् [v]एनस्वन्तः एनसा पापेन युक्ताः [मा]स्तः [v]मा [v]भुजेम मा भुञ्महि। त्वत्प्रसादात् पापरहिता एव सन्तो भोगान् भुनजामहै। [v]विप्रः मावी त्वं च [v]स्तुवते स्तोत्रं कुर्वते वसिष्ठाय [v]वरूथम् अनिष्टनिवारकं वरणीयं[2] वा गृहं [v]यन्धि यच्छ। [v]स्म इति पूरकः॥

अत्र ऋग्विधानं—'ध्रुवासु त्वासु क्षितिषु जपन् बन्धात्प्रमुच्यते। तिष्ठन्रात्रौ जपेदेतां [न]शाचस्तं[3] न गच्छति' (ऋग्वि. २. ३१९) इति॥

ध्रुवासु त्वासु क्षितिषु क्षियन्तो व्य१स्मत्पाशं वरुणो मुमोचत्।
अवो वन्वाना अदितेरुपस्थाद्वयं पात स्वस्तिभिः सदा नः॥ ७॥

[ध्रु]वासु। त्वा। आसु। क्षितिषु। क्षियन्तः। वि। अस्मत्। पाशम्। वरुणः। मुमोचत्।
अवः। वन्वानाः। अदितेः। उपऽस्थात्। वयम्। पात। स्वस्तिऽभिः। सदा। नः॥ ७॥

[v]ध्रुवासु नित्यासु [v]आसु दृश्यमानासु [v]क्षितिषु भूमिषु [v]क्षियन्तः निवसन्तो वयं हे वरुण त्वा त्वां स्तुम इति शेषः। स च [v]वरुणः [v]अस्मत् अस्मत्तः [v]पाशं बन्धकं पापं [v]वि [v]मुमोचत् मोचयेत्। तथा [v]अदितेः अखण्डनीयायाः पृथिव्याः [v]उपस्थात् उपस्थानात् [v]अवः रक्षणं वरुणेन दत्तं वन्वानाः संभजमाना वयं स्याम। अन्यद्भूतम्॥ ॥ १०॥

'मो षु वरुण' इति पञ्चर्चमेकोनविंशं सूक्तं[4] वारुणम्। अस्या जगती शिष्टाश्चतस्रो गायत्र्यः। था चानुक्रान्तं—'मो षु पञ्च गायत्रं जगत्यन्तम्' इति। गतो विनियोगः॥

मो षु वरुण मृन्मयं गृहं राजन्नहं गमम्। मृळा सुक्षत्र मृळय॥ १॥

---

१. झ-श-सखा ससखा; त-सखा सखा; न-सखा सस्वखा। २. श-वरणीयं संभजनीयं। ३. झ-[न]शाचत्वं। ४. ख-भ-सूक्तं वसिष्ठस्यार्षं।

मो इति। सु। वरुण। मृत्ऽमयम्। गृहम्। राजन्। अहम्। गमम्। मृळ। सुऽक्षत्र। मृळय ॥१॥

हे [v]राजन् ईश्वर [v]वरुण त्वदीयं [v]मृन्मयं मृदादिभिर्निर्मितं[1] [v]गृहं [v]मो मा उ मैव [v]अहं [v]गमं गतोऽस्मि। अपि तु [v]सु शोभनं सुवर्णमयमेव त्वदीयं गृहं प्राप्तवानि। स त्वं मां [v]मृळ सुखय। हे [v]सुक्षत्र शोभनधन वरुण [v]मृळय उपदर्यां च कुरु ॥

यदेमि प्रस्फुरन्निव दृतिर्न ध्मातो अद्रिवः। मृळा सुक्षत्र मृळय ॥ २ ॥

यत्। एमि। प्रस्फुरन्ऽइव। दृतिः। न। ध्मातः। अद्रिऽवः। मृळ। सुऽक्षत्र। मृळय ॥ २ ॥

हे [v]अद्रिवः आयुधवन् वरुण [v]यत् यदा [v]प्रस्फुरन्निव शैत्येन प्रविचलन्निव त्वद्भयाद्वेपमानः [v]दृतिर्न दृतिरिव [v]ध्मातः वायुना पूर्णः संस्वधा बद्धोऽहम् [v]एमि गच्छामि तदानीं [v]मृळ[2] सुखय। हे [v]सुक्षत्र सुधन [v]मृळय उपदर्यां कुरु ॥

क्रत्वः समह दीनतां प्रतीपं जगमा शुचे। मृळा सुक्षत्र मृळय ॥ ३ ॥

क्रत्वः। समह। दीनताम्। प्रतिऽईपम्। जगम। शुचे। मृळ। सुऽक्षत्र। मृळय ॥ ३ ॥

हे [v]समह सधन [v]शुचे स्वभावतो निर्मल वरुण [v]दीनता दीनतयाशक्ततया [v]क्रत्वः कर्मणः कर्तव्यत्वेन विहितस्य श्रौतस्मार्तादिलक्षणस्य [v]प्रतीपं प्रतिकूलमननुष्ठानं [v]जगम प्राप्तवानस्मि। अत एव त्वया बद्धः। तादृशं मां [v]मृळ[3] सुखय। अन्यद्गृतम् ॥

अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारम्। मृळा सुक्षत्र मृळय ॥ ४ ॥

अपाम्। मध्ये। तस्थिऽवांसम्। तृष्णा। अविदत्। जरितारम्। मृळ। सुऽक्षत्र। मृळय ॥४॥

[v]अपां समुद्राणामुदकानां [v]मध्ये [v]तस्थिवांसं स्थितवन्तमपि [v]जरितारं तव स्तोतारं मां [v]तृष्णा पिपासा [v]अविदत् आसवती। लवणोत्कटस्य सामुद्रजलस्य[4] पानानर्हत्वात्। अतस्तादृशं मां [v]मृळ[5] सुखय। अन्यद्गृतम् ॥

देवसुवां हविःषु वारुणस्य हविषः 'यत्किं चेदम्' इति याज्या। सूत्रितं च—'यत्किं चेदं वरुण दैव्ये जन उप ते स्तोमान्पशुपा इवाकरमिति द्वे' (आश्व. श्रौ. ४. ११) इति ॥

यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि।
अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥ ५ ॥

यत्। किम्। च। इदम्। वरुण। दैव्ये। जने। अभिऽद्रोहम्। मनुष्याः। चरामसि।
अचित्ती। यत्। तव। धर्मा। युयोपिम। मा। नः। तस्मात्। एनसः। देव। रिरिषः ॥ ५ ॥

हे [v]वरुण [v]दैव्ये देवसमूहरूपे [v]जने [v]यत् [v]इदं किंचन [v]अभिद्रोहम् अपकारजातं [v]मनुष्याः वयं [v]चरामसि चरामः निर्वर्तयामः। तथा [v]अचित्ती अचित्त्याज्ञानेन [v]तव त्वदीयं [v]यत् [v]धर्मं धारकं कर्म [v]युयोपिम वयं विमोहितवन्तः। हे [v]देव [v]तस्मादेनसः पापात् [v]नः अस्मान् [v]मा [v]रीरिषः मा हिंसीः ॥ ॥ ११ ॥ ॥ ५ ॥

---

१. घ-श–मृदादिनिर्मितं; ज्ञ-त३–मृदादिविनिर्मितं; ज्ञ–मृदादतिनिर्मितं; त२-४-न–मृदादितिनिर्मितं। २. ख-भ–मृळय। ३. ख-त३-भ–मृळय सुखय; घ–मृळ; श–मृळय। ४. त–समुद्रजलस्य। ५. ख–मृळय; घ–मृळ; ज्ञ-त-श–मृळय सुखय।

षष्ठेऽनुवाके पञ्चदश सूक्तानि। तत्र 'प्र वीरया' इति सप्तर्चं प्रथमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वायव्यम्। यासु पञ्चम्याद्यासु द्विवचनमस्ति ता ऐन्द्रवायव्यः। तथा चानुक्रान्तं—'प्र वीरया सप्त वायव्यं त्रैष्टुभम् पञ्चम्या द्विवदुक्ताः' इति। तृतीये छन्दोमे प्रउगशस्त्रे 'प्र वीरया' इति वायव्यस्तृचः। सूत्रितं च—'प्र वीरया शुचयो दद्रिरे वां ते सत्येन मनसा दीध्यानाः' (आश्व. श्रौ. ८. ११) इति॥

प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय॥ १॥

प्र। वीरऽया। शुचयः। दद्रिरे। वाम्। अध्वर्युऽभिः। मधुऽमन्तः। सुतासः।
वह। वायो इति। निऽयुतः। याहि। अच्छ। पिब। सुतस्य। अन्धसः। मदाय॥ १॥

हे वायो [v]वीरया वीराय विविधमीरयित्रे॥ 'सुपां सुलुक्°' इति चतुर्थ्या याजादेशः॥ [v]वां ते। व्यत्ययेन द्विवचनम्। तुभ्यं [v]शुचयः शुद्धाः [v]मधुमन्तः माधुर्योपेताः [v]सुतासः अभिषुताः सोमा ऐतरेयिभिर्नवमेऽहनि प्रउगे [v]अध्वर्युभिः अध्वरस्य नेतृभिर्ऋत्विग्भिः [v]प्र [v]दद्रिरे प्रदीयन्ते। 'दद दाने' इत्यस्यैतद्रूपम्। यत एवमतः कारणात् हे [v]वायो [v]नियुतः वडवाः [v]वह रथं प्रापय। तेन च रथेन [v]अच्छ [v]याहि। अस्मद्यज्ञमभिगच्छ। अभिगत्य च [v]सुतस्य अभिषुतस्य [v]अन्धसः अन्नस्य सोमलक्षणस्य स्वकीयं भागं [v]पिब। किमर्थम्। [v]मदाय मदोत्पत्त्यर्थम्॥

शुनासीरीये पर्वणि वायव्यस्य हविषः 'ईशानाय' इति याज्या। सूत्रितं च—'स त्वं नो देव मनसेशानाय प्रहुतिं यस्त आनट्' (आश्व. श्रौ. २. २०) इति। वायव्ये पशावेवैष पशुपुरोडाशस्य याज्या। सूत्रितं च—'ईशानाय प्रहुतिं यस्त आनट् प्र वो वायुं रथयुजं कृणुध्वम्' (आश्व. श्रौ. ३. ८) इति॥

ईशानाय प्रहुतिं यस्त आनट् शुचिं सोमं शुचिपास्तुभ्यं वायो।
कृणोषि तं मर्त्येषु प्रशस्तं जातोजातो जायते वाज्यस्य॥ २॥

ईशानाय। प्रऽहुतिम्। यः। ते। आनट्। शुचिम्। सोमम्। शुचिऽपाः। तुभ्यम्। वायो इति।
कृणोषि। तम्। मर्त्येषु। प्रऽशस्तम्। जातःऽजातः। जायते। वाजी। अस्य॥ २॥

हे [v]वायो [v]ईशानाय ईश्वराय [v]ते तुभ्यं त्वदर्थं [v]प्रहुतिं प्रकृष्टामाहुतिं चरुपुरोडाशादिसाध्यां [v]यः यजमानः [v]आनट् प्राप्नोत्। दद्यादित्यर्थः। तथा हे [v]शुचिपाः शुद्धस्य[1] सोमस्य पातर्वायो [v]तुभ्यं [v]शुचिं शुद्धं [v]सोमं च यः प्रयच्छति [v]मर्त्येषु मनुष्येषु मध्ये [v]तं यजमानं [v]प्रशस्तं मुख्यं [v]कृणोषि करोषि। स च [v]जातोजातः सर्वत्र प्रादुर्भूतः प्रख्यातः सन् [v]वाज्यस्य प्राशस्त्यस्य धनस्य प्राप्तये[2] [v]जायते अवकल्पते। सर्वं धनं लभत इत्यर्थः॥

नियुत्वद्गुणविशिष्टवायुदेवताके पशौ 'राये नु यम्' इति पुरोडाशस्य याज्या। सूत्रितं च—'राये नु यं जज्ञतू रोदसीमे प्र वायुमच्छा बृहती मनीषा' (आश्व. श्रौ. ३. ८) इति॥

राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम्।
अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके॥ ३॥

---

१. ख-शुचेः शुद्धस्य; भ-शुद्धस्य शुचेः। २. ख-भ-प्राप्त्यै।

राये । नु । यम् । जज्ञतुः । रोदसी इति । इमे इति । राये । देवी । धिषणा । धाति । देवम् ।
अध । वायुम् । निऽयुतः । सश्चत । स्वाः । उत । श्वेतम् । वसुंऽधितिम् । निरेके ॥ ३ ॥

[v]इमे [v]रोदसी द्यावापृथिव्यौ [v]यं वायुं [v]राये धनार्थं [v]नु क्षिप्रं [v]जज्ञतुः जनयामासतुः तं [v]देवं दानादिगुणयुक्तं वायुं [v]देवी द्योतमाना [v]धिषणा स्तुतिः [v]राये धनार्थं [v]धाति धारयति । धनं यथा लभ्यते तथा प्रेरयतीत्यर्थः । [v]अध अधुनैवं स्तुतौ प्रवृत्तायां [v]स्वाः स्वकीयाः [v]नियुतः वडवा रथवाहाः [v]वायुं [v]सश्चत सचन्ते सेवन्ते । [v]उत अपि च [v]श्वेतं शुभ्रवर्णं [v]निरेके । नितरां रेको रिक्तता निरेकः । दारिद्र्यमित्यर्थः । तस्मिन् सति [v]वसुधितिं वसूनां धातारं प्रदातारं तं वायुं नियुतोऽस्मद्यज्ञं प्रापयन्तीति शेषः ॥

द्वितीये छन्दोमे प्रउगशस्त्रे वायव्यतृचस्य 'उच्छन्नुषसः' इति तृतीया । सूत्रितं च—'उच्छन्नुषसः सुदिना अरिप्रा इत्येकपात्तिन्यः' (आश्व. श्रौ. ८. १०) इति ॥

उच्छन्नुषसः सुदिना अरिप्रा उरु ज्योतिर्विविदुर्दीध्यानाः ।
गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः सस्रुरापः ॥ ४ ॥

उच्छन् । उषसः । सुऽदिनाः । अरिप्राः । उरु । ज्योतिः । विविदुः । दीध्यानाः ।
गव्यम् । चित् । ऊर्वम् । उशिजः । वि । वव्रुः । तेषाम् । अनु । प्रऽदिवः । सस्रुः । आपः ॥ ४ ॥

येऽङ्गिरसो वायुमस्तोषत तेषाम् [v]अरिप्राः पापरहिताः [v]उषसः [v]सुदिनाः शोभनदिनस्य हेतुभूताः सत्यः [v]उच्छन् औच्छन् व्यवासयन् । ते च [v]दीध्यानाः दीप्यमानाः सन्तः [v]उरु विस्तीर्णं [v]ज्योतिः सूर्याख्यं [v]विविदुः वायोः प्रसादादलभन्त । अपि च [v]उशिजः कामयमानास्तेऽङ्गिरसः [v]गव्यं [v]चित् गोसंघरूपमपि [v]ऊर्वं धनं पणिभिरपहृतं [v]वि [v]वव्रुः व्यवृण्वन् अलभन्त । तथा [v]तेषाम् अङ्गिरसामर्थाय [v]प्रदिवः पुराण्यः [v]आपः [v]अनु [v]सस्रुः अन्वसरन् अन्वगच्छन् । हिताचरणपरा आसन्नित्यर्थः । आवरकस्यासुरस्य वायुना हननादसुरेणाहृतानुषःप्रभृतीन्[1] पुनर्लब्धवन्त इत्यर्थः ॥

तृतीये छन्दोमे प्रउगशस्त्रे 'ते सत्येन' इत्यैन्द्रवायवस्तृचः । सूत्रितं च—'ते सत्येन मनसा दीध्याना दिवि क्षयन्ता रजसः पृथिव्याम्' (आश्व. श्रौ. ८. ११) इति ॥

ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहन्ति ।
इन्द्रवायू वीरवाहं रथं वामीशानयोरभि पृक्षः सचन्ते ॥ ५ ॥

ते । सत्येन । मनसा । दीध्यानाः । स्वेन । युक्तासः । क्रतुना । वहन्ति ।
इन्द्रवायू इति । वीरऽवाहम् । रथम् । वाम् । ईशानयोः । अभि । पृक्षः । सचन्ते ॥ ५ ॥

[v]ते प्रसिद्धाः [v]सत्येन यथार्थेन [v]मनसा मननीयेन स्तोत्रेण युक्ताः [v]दीध्यानाः दीप्यमानाः [v]स्वेन स्वकीयेन विहितेन [v]क्रतुना कर्मणा नित्यनैमित्तिकात्मना [v]युक्तासः युक्ता एवंभूता यजमाना हे [v]इन्द्रवायू [v]वीरवाहं वीरैर्विशेषेणेरयितृभिः स्तोतृभिर्वहनीयं प्रापणीयम् । यद्वा वीरैः अन्यैर्वहनीयम् । तम् [v]ईशानयोः ईश्वरयोः [v]वां युवयोः स्वभूतं [v]रथं [v]वहन्ति स्वं स्वं यज्ञं प्रापयन्ति । तत्र च [v]पृक्षः अन्नानि हविर्लक्षणानि [v]अभि [v]सचन्ते युवामभिसेवन्ते ॥

---

१. ङ्–°णाहूतानु°; श-°णापहूतानु° ।

ईशानासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः ।
इन्द्रवायू सूरयो विश्वमायुरर्वद्भिर्वीरैः पृतनासु सह्युः ॥ ६ ॥

ईशानासः । ये । दधते । स्वः । नः । गोभिः । अश्वेभिः । वसुऽभिः । हिरण्यैः ।
इन्द्रवायू इति । सूरयः । विश्वम् । आयुः । अर्वत्ऽभिः । वीरैः । पृतनासु । सह्युः ॥ ६ ॥

हे ᵛइन्द्रवायू ᵛईशानासः ईश्वराः प्रभवः ᵛये जनाः ᵛनः अस्मभ्यं ᵛगोभिः ᵛअश्वेभिः अश्वैः ᵛवसुभिः निवासकैः ᵛहिरण्यैः च सहितं ᵛस्वः सुष्ठ्वरणीयं सुखं ᵛदधते ददति प्रयच्छन्ति । यद्वा । हिरण्यव्यतिरिक्तानि धनानि वसूनि । तैर्हिरण्यैश्च सहेत्यर्थः । ते ᵛसूरयः दातारः ᵛविश्वं व्याप्तम् ᵛआयुः अन्नं जीवनं वा शत्रूणां स्वभूतं ᵛपृतनासु संग्रामेषु ᵛअर्वद्भिः अश्वैः ᵛवीरैः शूरभटैश्च साधनभूतैः ᵛसह्युः अभिभवेयुः । यद्वा सहार्थे तृतीया । अर्वद्भिर्वीरैः पुत्रैश्च सहितं शत्रूणामायुरभिभवेयुरित्यर्थः ॥

अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

अर्वन्तः । न । श्रवसः । भिक्षमाणाः । इन्द्रवायू इति । सुस्तुतिऽभिः । वसिष्ठाः ।
वाजऽयन्तः । सु । अवसे । हुवेम । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

ᵛअर्वन्तो ᵛन अश्वा इव हविषां वोढारः ᵛश्रवसः अन्नस्य । द्वितीयार्थे षष्ठी । अन्नं ᵛभिक्षमाणाः याचमानाः ᵛवाजयन्तः वाजं बलमात्मन इच्छन्तः ᵛवसिष्ठाः वयं ᵛस्ववसे शोभनरक्षणाय सुष्ठु तर्पणाय वा ᵛसुष्टुतिभिः शोभनाभिः स्तुतिभिः ᵛइन्द्रवायू इन्द्रं वायुं च ᵛहुवेम आह्वयेमहि । अन्यद्व्याख्यातम् ॥ ॥ १२ ॥

'कुविदङ्ग' इति सप्तर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वायव्यम् । 'कुविदङ्ग' इत्यनुक्रान्तम् । गतः सूक्तविनियोगः । वायव्ये पशौ 'कुविदङ्ग' इति वपाया याज्या । सूत्रितं च— 'कुविदङ्ग नमसा ये बृधास ईशानाय प्रहुतिं यस्त आनट्' (आश्व. श्रौ. ३. ८) इति ॥

कुविदङ्ग नमसा ये बृधासः पुरा देवा अनवद्यास आसन् ।
ते वायवे मनवे बाधितायावासयन्नुषसं सूर्येण ॥ १ ॥

कुवित् । अङ्ग । नमसा । ये । बृधासः । पुरा । देवाः । अनवद्यासः । आसन् ।
ते । वायवे । मनवे । बाधिताय । अवासयन् । उषसम् । सूर्येण ॥ १ ॥

दीव्यन्ति स्तुवन्तीति देवाः स्तोतारः । ᵛपुरा पूर्वस्मिन् काले ᵛये ᵛबृधासः वृद्धाः ᵛदेवाः स्तोतारः । कुविदिति बहुनाम । अङ्गेति क्षिप्रनाम । ᵛकुवित् बहुशः ᵛअङ्ग क्षिप्रं कृतेन ᵛनमसा वायुविषयेण स्तोत्रेण नमस्कारेण वा ᵛअनवद्यासः अवद्यरहिताः ᵛआसन् ᵛते अद्यापि ᵛवायवे हवींषि दातुं ᵛसूर्येण सह ᵛउषसम् ᵛअवासयन् । उषसो व्युष्टिं सूर्योदयं च वायुयागार्थं कुर्वन्तीत्यर्थः । किमर्थम् । ᵛमनवे मनुष्याणां ᵛबाधिताय बाधितानां पुत्रादीनां रक्षणार्थमित्यर्थः । यद्वा मनवे बाधितायेति षष्ठ्यर्थे चतुर्थी[1] । बाधितस्य मनोः प्रजापतेर्यागे वायवे हवींषि दातुमित्यन्वयः ॥

---

१. त—चतुर्थी ।

द्वितीये छन्दोमे प्रउगशस्त्र ऐन्द्रवायवबृहत्पक्ष्य 'उशन्ता' इत्येषा प्रथमा। सूत्रितं च— 'उशन्ता दूता न दभाय गोपा यावत्तरस्तन्वो यावदोज इत्येका द्वे च' (आश्व. श्रौ. ८. १०) इति ॥

उशन्ता दूता न दभाय गोपा मासश्च पाथः शरदश्च पूर्वीः ।
इन्द्रवायू सुष्टुतिर्वामियाना मार्डीकमीट्टे सुवितं च नव्यम् ॥ २ ॥

उशन्ता । दूता । न । दभाय । गोपा । मासः । च । पाथः । शरदः । च । पूर्वीः ।
इन्द्रवायू इति । सुऽस्तुतिः । वाम् । इयाना । मार्डीकम् । ईट्टे । सुवितम् । च । नव्यम् ॥ २ ॥

हे इन्द्रवायू vउशन्ता उशन्तौ कामयमानौ दूतौ । देवतेर्गतिकर्मणो दूतशब्दः । गन्तारौ vगोपा गोपायितारावीदृशौ युवां vदभाय हिंसायै vन भवतम्। अपि तु vमासः मासान् vच vपूर्वीः बह्वीः vशरदः संवत्सरान् vच चिरकालमस्मान् vपाथः रक्षतम्। अपि च हे vइन्द्रवायू vसुष्टुतिः अस्मदीया शोभना स्तुतिः vवां युवाम् vइयाना गच्छन्ती प्राप्नुवन्ती vमार्डीकं सुखम् vईट्टे याचते । यद्वा। सुखं यथा भवति तथा युवामीट्टे स्तौति। तथा vनव्यं प्रशस्यं vसुवितं सुष्ठु प्राप्यं धनं vच ईट्टे ॥

नियुत्वद्वायुदेवताके पशौ 'पीवोअन्नान्' इति वपाया याज्या। सूत्रितं च—'पीवोअन्नाँ रयिवृधः सुमेधा राये नु यं जज्ञतू रोदसीमे' (आश्व. श्रौ. ३. ८) इति। तथा द्वितीये छन्दोमे प्रउगशस्त्रे वायव्यबृहत्पक्ष्यैवैव द्वितीया। सूत्रितं च—'पीवोअन्नाँ रयिवृधः सुमेधा उच्छन्तुषसः सुदिना अरिप्राः' (आश्व. श्रौ. ८. १०) इति ॥

पीवोअन्नाँ रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।
ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥ ३ ॥

पीवःऽअन्नान् । रयिऽवृधः । सुऽमेधाः । श्वेतः । सिसक्ति । निऽयुताम् । अभिऽश्रीः ।
ते । वायवे । सऽमनसः । वि । तस्थुः । विश्वा । इत् । नरः । सुऽअपत्यानि । चक्रुः ॥ ३ ॥

vपीवोअन्नान् पीवांसि स्थूलानि प्रभूतान्यन्नानि येषां तान् vरयिवृधः रय्या धनेन वृद्धानेवंभूतानाढ्यजनान् vसुमेधाः शोभनप्रज्ञः vनियुतां वडवानां स्ववाहानाम् vअभिश्रीः अभिश्रयणीयः vश्वेतः श्वेतवर्णो वायुः vसिषक्ति सेवते । vते च जनाः vसमनसः समानमनस्काः सन्तः vवायवे वायुमुद्दिश्य यष्टुं vवि vतस्थुः विविधमवतिष्ठन्ते। स्थित्वा च ते vनरः कर्मणां नेतारो जनाः vविश्वेत् विश्वानि सर्वाण्येव vस्वपत्यानि शोभनापत्यहेतूनि यद्वा सुष्ठूपतन-कारणानि वायुदेवत्यानि कर्माणि vचक्रुः कुर्वन्ति ॥

द्वितीये छन्दोमे प्रउगशस्त्र ऐन्द्रवायवबृहत्पक्ष्य 'यावत्तरः' इत्यादिके द्वे ऋचौ। सूत्रं तु पूर्वमेवोदाहृतम् ॥

यावत्तरस्तन्वो यावदोजो यावन्नरश्चक्षसा दीध्यानाः ।
शुचिं सोमं शुचिपा पातमस्मे इन्द्रवायू सदतं बर्हिरेदम् ॥ ४ ॥

यावत् । तरः । तन्वः । यावत् । ओजः । यावत् । नरः । चक्षसा । दीध्यानाः ।
शुचिम् । सोमम् । शुचिऽपा । पातम् । अस्मे इति । इन्द्रवायू इति । सदतम् । बर्हिः । आ । इदम् ॥ ४ ॥

हे Vइन्द्रवायू युवयोः Vतन्वः शरीरस्य Vतरः वेगः Vयावत् अस्ति Vयावत् च Vओजः बलं Vयावत् च Vनरः कर्मणां नेतार ऋत्विजः Vचक्षसा ज्ञानेन Vदीध्यानाः दीप्यमाना भवन्ति तस्य सर्वस्यानुरूपं Vशुचिपा शुचेः सोमस्य पातारावित्यन्द्रवायू Vशुचिं शुद्धं Vसोमम् Vअस्मे अस्मदीयं Vपातं पिबतम्। Vइदं वेद्यां स्तीर्णं Vबर्हिः च Vआ Vसदतं पानार्थमासीदतम्। बर्हिष्युपविशतमित्यर्थः ॥

नियुवाना नियुतः स्पार्हवीरा इन्द्रवायू सरथं यातमर्वाक् ।
इदं हि वां प्रभृतं मध्वो अग्रमधा प्रीणाना वि मुमुक्तमस्मे ॥ ५ ॥

निऽयुवाना । निऽयुतः । स्पार्हऽवीराः । इन्द्रवायू इति । सऽरथम् । यातम् । अर्वाक् । इदम् । हि । वाम् । प्रऽभृतम् । मध्वः । अग्रम् । अध । प्रीणाना । वि । मुमुक्तम् । अस्मे इति ॥५॥

हे Vइन्द्रवायू Vस्पार्हवीराः स्पृहणीयस्तोतृकान् Vनियुतः आत्मीयानश्वान् Vसरथम् उभयोः समानमेकं[1] रथं[1] Vनियुवाना निमिश्रयन्तौ[2] युवाम् Vअर्वाक् अस्मदभिमुखं Vयातं गच्छतम्। Vइदं Vहि इदं खलु Vमध्वः मधुरस्य सोमस्य Vअग्रं ग्रहेष्वाद्यमैन्द्रवायवाख्यं ग्रहं Vवां युवयोरर्थं Vप्रभृतं प्रकर्षेण हृतं होमार्थमुत्तरवेदिं प्रति नीतम्। Vअध अथ तादृशस्य सोमस्य पानानन्तरं Vप्रीणाना प्रीयमाणौ युवाम् Vअस्मे अस्मान् Vवि Vमुमुक्तं पापाद्विमोचयतम् ॥

प्रथमे छन्दोमे प्रउगशस्त्र ऐन्द्रवायवतृचस्य 'या वां शतम्' इति तृतीया। सूत्रितं च— 'या वां शतं नियुतो याः सहस्रमित्येकपातिन्यः' (आश्व. श्रौ. ८. ९) इति ॥

या वां शतं नियुतो याः सहस्रमिन्द्रवायू विश्ववाराः सचन्ते ।
आभिर्यातं सुविदत्राभिरर्वाक्पातं नरा प्रतिभृतस्य मध्वः ॥ ६ ॥

याः । वाम् । शतम् । निऽयुतः । याः । सहस्रम् । इन्द्रवायू इति । विश्वऽवाराः । सचन्ते । आ । आभिः । यातम् । सुऽविदत्राभिः । अर्वाक् । पातम् । नरा । प्रतिऽभृतस्य । मध्वः ॥६॥

हे Vइन्द्रवायू Vयाः[3] Vनियुतः Vशतं शतसंख्याकाः सत्यः Vवां युवां Vसचन्ते सेवन्ते। Vयाः च Vविश्ववाराः विश्वैर्वरणीया नियुतः Vसहस्रं सहस्रसंख्याकाः सत्यो युवां सचन्ते। Vसुविदत्राभिः शोभनधनप्रदाभिः Vआभिः नियुद्भिः Vअर्वाक् अस्मदभिमुखम् Vआ Vयातम् आगच्छतम्। हे Vनरा नेतारौ Vप्रतिभृतस्य उत्तरवेदिं प्रति नीतस्य Vमध्वः मधुरस्य सोमस्य। द्वितीयार्थे षष्ठी। इदं सोमं Vपातं पिबतम् ॥

अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

अर्वन्तः । न । श्रवसः । भिक्षमाणाः । इन्द्रवायू इति । सुऽस्तुतिऽभिः । वसिष्ठाः । वाजऽयन्तः । सु । अवसे । हुवेम । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

व्याख्यातेयम्। अक्षरार्थस्तु। अश्वा इव हविषां वोढारोऽन्नं याचमाना बलं कामयमाना वसिष्ठा वयं शोभनरक्षणाय शोभनैः स्तोत्रैरिन्द्रवायू आह्वयेमहीति ॥ ॥ १३ ॥

---

१. घ-न-भ-°मेकरथं । २. ख-निमिश्रीतवंतौ; त१-निश्रयंतौ; न-निमितयंतौ; भ-निमिश्रितयंतौ; श-मिश्रयंतौ । ३. ख-क्ष-त-न-भ-श- 'याः' नास्ति ।

'आ वायो' इति पञ्चर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वायव्यम्। अनुक्रान्तं च—'आ वायो पञ्च' इति। शुनासीरीये पर्वणि वायोर्नियुत्वतो यागस्य 'आ वायो' इत्यनुवाक्या। सूत्रितं च—'आ वायो भूष शुचिपा उप नः प्र याभिर्यासि दाश्वांसमच्छ' (आश्व. श्रौ. २. २०) इति। नियुत्वद्वायुदेवताके पशावेषैव वपाया अनुवाक्या (आश्व. श्रौ. ३. ८)। प्रथमे छन्दोमे प्रउगशस्त्रे वायव्यतृचस्यैषैवाद्या। सूत्रितं च—'समुद्रादूर्मिरित्याज्यमा वायो भूष शुचिपाः' (आश्व. श्रौ. ८. ९) इति॥

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम्॥ १॥

आ। वायो इति। भूष। शुचिऽपाः। उप। नः। सहस्रम्। ते। निऽयुतः। विश्वऽवार। उपो इति। ते। अन्धः। मद्यम्। अयामि। यस्य। देव। दधिषे। पूर्वऽपेयम्॥ १॥

हे [v]शुचिपाः शुचेः शुद्धस्य सोमस्य पातः [v]वायो [v]नः अस्माकम् [v]उप[1] समीपे[1] [v]आ [v]भूष आगच्छ। 'भू प्राप्तौ' इत्यस्यैतद्रूपम्। हे [v]विश्ववार विश्वैर्वरणीय [v]ते तव वाहनभूताः [v]नियुतः वडवाः [v]सहस्रं सहस्रसंख्याका विद्यन्ते। यत एवमतः शीघ्रमागच्छ। [v]ते तव [v]मद्यं मदकरं सोमलक्षणम् [v]अन्धः अन्नम् [v]उपो उप उ उप [v]अयामि। उपयतं पात्रे गृहीतमासीत्। हे [v]देव वायो [v]यस्य सोमस्य [v]पूर्वपेयं प्रथमपानं [v]दधिषे दधासि धारयसि। ऐन्द्रवायवग्रहे प्रथमे वषट्कारे केवलाय वायवे हूयते द्वितीये त्विन्द्रवायुभ्यामिति वायोः प्रथमपानम्। तादृशमन्ध उपायामीत्यन्वयः॥

प्रथमे छन्दोमे प्रउगशस्त्र ऐन्द्रवायवतृचस्य 'प्र सोता' इत्याद्या। सूत्रितं च—'प्र सोता जीरो अध्वरेष्वस्थाद्ये वायव इन्द्रमादनासः' (आश्व. श्रौ. ८. ९) इति॥

प्र सोता जीरो अध्वरेष्वस्थात्सोममिन्द्राय वायवे पिबध्यै।
प्र यद्वां मध्वो अग्रियं भरन्त्यध्वर्यवो देवयन्तः शचीभिः॥ २॥

प्र। सोता। जीरः। अध्वरेषु। अस्थात्। सोमम्। इन्द्राय। वायवे। पिबध्यै।
प्र। यत्। वाम्। मध्वः। अग्रियम्। भरन्ति। अध्वर्यवः। देवऽयन्तः। शचीभिः॥ २॥

[v]जीरः क्षिप्रकारी [v]सोता अभिषोताध्वर्युः [v]इन्द्राय [v]वायवे च [v]पिबध्यै पानार्थम् [v]अध्वरेषु यागेषु [v]सोमं [v]प्र [v]अस्थात् प्रातिष्ठिपत्[2]। पुरस्तादुत्तरवेदिं प्रापितवान्। हे इन्द्रवायू [v]यत् येषु यज्ञेषु [v]मध्वः सोमस्य [v]अग्रियम् अग्रभवं प्रथमभागं [v]देवयन्तः देवकामाः [v]अध्वर्यवः [v]शचीभिः कर्मभिरभिषवादिलक्षणैः [v]वां युवयोरर्थं [v]प्र [v]भरन्ति प्रकर्षेण भरन्ति संपादयन्ति। तेष्वध्वरेष्वित्यन्वयः॥

शुनासीरीये पर्वणि नियुत्वद्वायोर्यागस्य 'प्र याभिः' इति याज्या। सूत्रितं च—'प्र याभिर्यासि दाश्वांसमच्छ स त्वं नो देव मनसा' (आश्व. श्रौ. २. २०) इति। तद्देवत्ये पशावेषैव पुरोडाशस्यानुवाक्या। सूत्रितं च—'प्र याभिर्यासि दाश्वांसमच्छा नो नियुद्भिः शतिनीभिः' (आश्व. श्रौ. ३. ८) इति। प्रथमे छन्दोमे प्रउगशस्त्र एषैव वायव्यतृचस्य द्वितीया। सूत्रितं च—'आ वायो भूष शुचिपा उप नः प्र याभिर्यासि दाश्वांसमच्छ' (आश्व. श्रौ. ८. ९) इति॥

प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे।
नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः॥ ३॥

---

१. ख-श-त-न-भ-श–'उप समीपे' नास्ति। २. ख-भ–प्रातिष्ठत्; न–प्रतिष्ठत्।

प्र । याभिः । यासि । दाश्वांसम् । अच्छ । नियुत्ऽभिः । वायो इति । इष्टये । दुरोणे ।
नि । नः । रयिम् । सुऽभोजसम् । युवस्व । नि । वीरम् । गव्यम् । अश्व्यम् । च । राधः ॥३॥

हे [v]वायो [v]दुरोणे यज्ञगृहे स्थितं [v]दाश्वांसं हविषां दातारं यजमानम् [v]इष्टये यागाय [v]याभिः [v]नियुद्भिः वडवाभिः [v]अच्छ [v]यासि अभिगच्छसि ताभिरस्मान् प्रत्यागच्छेति शेषः । आगत्य च [v]नः अस्मभ्यं [v]सुभोजसं शोभनान्नयुक्तं [v]रयिं धनं [v]नि [v]युवस्व नितरां मिश्रय प्रयच्छ । तथा [v]वीरं पुत्रं [v]गव्यं गोसंघम् [v]अश्व्यम् अश्वसंघमेतदुभयात्मकं[1] [v]राधः[2] धनं [v]च [v]नि युवस्व प्रयच्छ ॥

प्रथमे छन्दोमे प्रउगशस्त्र ऐन्द्रवायववृचस्य ' ये वायव इन्द्र° ' इति द्वितीया । सूत्रितं च—' ये वायव इन्द्रमादनासो या वां शतं नियुतो याः सहस्रम् ' (आश्व. श्रौ. ८. ९) इति ॥

ये वायव इन्द्रमादनास आदेवासो नितोशनासो अर्यः ।
घ्नन्तो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमित्रान् ॥ ४ ॥

ये । वायवे । इन्द्रऽमादनासः । आऽदेवासः । निऽतोशनासः । अर्यः ।
घ्नन्तः । वृत्राणि । सूरिऽभिः । स्याम । ससह्वांसः । युधा । नृऽभिः । अमित्रान् ॥ ४ ॥

[v]ये सूरयः स्तोतारः [v]इन्द्रमादनासः स्तोत्रैरिन्द्रस्य तर्पयितारस्तथा [v]वायवे वायोश्च मादनाः तर्पका[3] भवन्ति । ये च [v]आदेवासः जागतैरुपेता अत एव [v]अर्यः अरेः शत्रोः [v]नितोशनासः निहन्तारः । तैरस्मदीयैः [v]सूरिभिः स्तोतृभिः [v]वृत्राणि शत्रून् [v]घ्नन्तः हिंसन्तः [v]स्याम भवेम । किं कुर्वन्तः । [v]अमित्रान् शत्रुभटान् [v]नृभिः अस्मदीयैः पुरुषैः [v]युधा युद्धेभिः[4] [v]ससह्वांसः अभिभवन्तः ॥

नियुत्वद्वायुदेवताके पशौ ' आ नो नियुद्भिः ' इति हविषोऽनुवाक्या । सूत्रितं च—' आ नो नियुद्भिः शतिनीभिरध्वरं पीवोअन्नाँ रयिवृधः सुमेधाः ' (आश्व. श्रौ. ३. ८) इति । प्रथमे छन्दोमे प्रउगशस्त्रे वायव्यवृचस्यैषैव तृतीया । सूत्रितं च—' आ नो नियुद्भिः शतिनीभिरध्वरं प्र सोता जीरो अध्वरेष्वस्थात् ' (आश्व. श्रौ. ८. ९) इति ॥

आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञम् ।
वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ ५ ॥

आ । नः । नियुत्ऽभिः । शतिनीभिः । अध्वरम् । सहस्रिणीभिः । उप । याहि । यज्ञम् ।
वायो इति । अस्मिन् । सवने । मादयस्व । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ५ ॥

हे [v]वायो [v]नः अस्माकम् [v]अध्वरं हिंसारहितं [v]यज्ञं [v]शतिनीभिः शतसंख्यावतीभिः [v]सहस्रिणीभिः सहस्रसंख्यावतीभिश्च [v]नियुद्भिः वडवाभिः [v]उप [v]आ [v]याहि उपागच्छ । तदनन्तरम् [v]अस्मिन् [v]सवने प्रातःसवने [v]मादयस्व सोमेन तृप्यस्व । अन्यद्गतम् ॥ ॥ १४ ॥

' शुचिं नु ' इत्यष्टर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्राग्नम् । अनुक्रम्यते हि—' शुचिं त्वष्टा-वैन्द्राग्नं तु ' इति । गतः सूक्तविनियोगः । ऐन्द्राग्नस्य पशोर्वपायाः ' शुचिम् ' इत्येषा याज्या । सूत्रितं च—' शुचिं नु स्तोमं नवजातमद्य गीर्भिर्विप्रः प्रमतिमिच्छमानः ' (आश्व. श्रौ. ३. ७) इति ॥

---

१. ख-भ-मेवमुभया° । २. त-रायो । ३. ख-भ-वर्षका । ४. ख-भ-युद्धैः ।

शुचिं नु स्तोमं नवजातमद्येन्द्राग्नी वृत्रहणा जुषेथाम् ।
उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ॥ १ ॥

शुचिम् । नु । स्तोमम् । नवऽजातम् । अद्य । इन्द्राग्नी इति । वृत्रऽहना । जुषेथाम् ।
उभा । हि । वाम् । सुऽहवा । जोहवीमि । ता । वाजम् । सद्यः । उशते । धेष्ठा ॥ १ ॥

हे वृत्रहणा वृत्राणां शत्रूणां हन्तारौ इन्द्राग्नी शुचिं शुद्धं निरवद्यं नवजातम् इदानीमुत्पन्नं स्तोमम् अस्मदीयं स्तोत्रम् अद्य अस्मिन् काले नु क्षिप्रं जुषेथां सेवेथाम् । हि यस्मात् सुहवा सुखमाह्वातुं[1] शक्यौ उभा उभौ वां युवां जोहवीमि पुनःपुनराह्वयामि । अत आगत्य सेवेथामित्यर्थः । किंच ता तौ तथाविधौ युवाम् उशते कामयमानाय यजमानाय वाजम् अन्नं बलं वा सद्यः तदानीमेव शीघ्रं धेष्ठा धातृतमौ भवतम् ॥

ता सानसी शवसाना हि भूतं साकंवृधा शवसा शूशुवांसा ।
क्षयन्तौ रायो यवसस्य भूरेः पृङ्क्तं वाजस्य स्थविरस्य घृष्वेः ॥ २ ॥

ता । सानसी इति । शवसाना । हि । भूतम् । साकम्ऽवृधा । शवसा । शूशुऽवांसा ।
क्षयन्तौ । रायः । यवसस्य । भूरेः । पृङ्क्तम् । वाजस्य । स्थविरस्य । घृष्वेः ॥ २ ॥

हे इन्द्राग्नी ता तौ तादृशौ सानसी सर्वैः संभजनीयौ युवां शवसाना । शवो बलम् । तद्वदाचरन्तौ[2] हि खलु भूतम् । बलमिव शत्रूणां भञ्जकावास्तामित्यर्थः । कीदृशौ सन्तौ । साकंवृधा सह प्रवृद्धौ शवसा बलेन शूशुवांसा वर्धमानौ तथा रायः धनस्य भूरेः बहुलस्य यवसस्य अन्नस्य क्षयन्तौ ईश्वरौ । एवंविधौ युवं युवां स्थविरस्य स्थूलस्य घृष्वेः शत्रूणां घर्षकस्य वाजस्य अन्नस्य । 'क्रियाग्रहणमपि कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । ईदृशमन्नं पृङ्क्तं संयोजयतम्[3] । अस्मभ्यं प्रयच्छतमित्यर्थः ॥

उपो ह यद्विदथं वाजिनो गुर्धीभिर्विप्राः प्रमतिमिच्छमानाः ।
अर्वन्तो न काष्ठां नक्षमाणा इन्द्राग्नी जोहुवतो नरस्ते ॥ ३ ॥

उपो इति । ह । यत् । विदथम् । वाजिनः । गुः । धीभिः । विप्राः । प्रऽमतिम् । इच्छमानाः ।
अर्वन्तः । न । काष्ठाम् । नक्षमाणाः । इन्द्राग्नी इति । जोहुवतः । नरः । ते ॥ ३ ॥

वाजिनः हविष्मन्तः विप्राः मेधाविनः प्रमतिं प्रकृष्टां मतिमिन्द्राग्न्योरनुग्रहबुद्धिम् इच्छमानाः आत्मन इच्छन्तः यत् ये यजमानाः विदथम् । विदन्ति जानन्ति देवानत्र यष्टव्यत्वेनेति विदथो यज्ञः । तं धीभिः कर्मभिर्बुद्धिभिर्वा उपो गुः उपगच्छन्ति । उ इति पूरकः । ते नरः कर्मणां नेतारो जनाः अर्वन्तो न काष्ठां यथाश्वाः शीघ्रं युद्धभूमिं[4] व्याप्नुवन्ति[4] तथा नक्षमाणाः ऐन्द्राग्नानि कर्माणि व्याप्नुवन्तः इन्द्राग्नी इन्द्रमग्निं च जोहुवतः पुनःपुनराह्वयन्तो भवन्ति ॥

---

१. ख-भ-सुखेना°; घ-सुष्ठा°; श-सुष्टुमा° । २. ज्ञ-न-भ-श१-तद्वत् तदाचरतौ; श२-तत्र तदाचरतौ । ३. घ-योजयतं; ज्ञ-त-न-श-स्वयोजयतं । ४. ख-त-युद्धभूम्यां चाप्नुवंति; ज्ञ-न-भ-युद्धभूम्यां वाप्नुवंति; श-युद्धे भूम्यां वाप्नुवंति ।

अमावास्यायामैन्द्राग्नस्य हविषः ' गीर्भिः' इत्येषा याज्या । सूत्रितं च—' इन्द्राग्नी अवसा गतं गीर्भिर्विप्रः प्रमतिमिच्छमानः ' (आश्व. श्रौ. १. ६) इति । ऐन्द्राग्ने पशौ पुरोडाशस्यैषैव याज्या । सूत्रं तूदाहृतम् ॥

गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजम् ।
इन्द्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस्तिरतं देष्णैः ॥ ४ ॥

गीःऽभिः । विप्रः । प्रऽमतिम् । इच्छमानः । ईट्टे । रयिम् । यशसम् । पूर्वऽभाजम् ।
इन्द्राग्नी इति । वृत्रऽहना । सुऽवज्रा । प्र । नः । नव्येभिः । तिरतम् । देष्णैः ॥ ४ ॥

हे इन्द्राग्नी vप्रमतिं युवयोरनुग्रहबुद्धिम् vइच्छमानः इच्छन् vविप्रः मेधावी वसिष्ठः vयशसं यशसा युक्तं vपूर्वभाजं पूर्वमेव संभजनीयं vरयिं धनमुद्दिश्य vगीर्भिः स्तुतिभिः vईट्टे युवां स्तौति । हे vवृत्रहणा वृत्रस्य हन्तारौ vसुवज्रा शोभनायुधौ vइन्द्राग्नी vनव्येभिः नवतरैः प्रशस्तैः vदेष्णैः दातव्यैर्धनैः vनः अस्मान् vप्र vतिरतं प्रवर्धयतम् ॥

सं यन्महीं मिथती स्पर्धमाने तनूरुचा शूरसाता यतैते ।
अदेवयुं विदथे देवयुभिः सत्रा हतं सोमसुता जनेन ॥ ५ ॥

सम् । यत् । महीं इति । मिथती इति । स्पर्धमाने इति । तनूऽरुचा । शूरऽसाता । यतैते इति ।
अदेवऽयुम् । विदथे । देवयुऽभिः । सत्रा । हतम् । सोमऽसुता । जनेन ॥ ५ ॥

vमही महत्यौ vमिथती परस्परं हिंसन्त्यौ[1]। यद्वा । मेथतिराक्रोशकर्मा । परस्परमाक्रोशन्त्यौ । vस्पर्धमाने स्पर्धां कुर्वन्त्यौ vतनूरुचा --- vहतं हिंस्तम् । तथा vसोमसुता सोममभिषुण्वता vजनेन यजमानसंबन्धेनासोमसुतं जनं हिंस्तम् ॥ ॥ १५ ॥

इमामु षु सोमसुतिमुप न एन्द्राग्नी सौमनसाय यातम् ।
नू चिद्धि परिमन्थे अस्माना वां शश्वद्भिर्वृतीय वाजैः ॥ ६ ॥

इमाम् । ऊँ इति । सु । सोमऽसुतिम् । उप । नः । आ । इन्द्राग्नी इति । सौमनसाय । यातम् ।
नु । चित् । हि । परिमन्थे इति परिऽमन्थे । अस्मान् ।
आ । वाम् । शश्वत्ऽभिः । वृतीय । वाजैः ॥ ६ ॥

हे vइन्द्राग्नी vइमामु इमामेव vनः अस्मदीयां vसोमसुतिं सोमाभिषवक्रियां vसौमनसाय सुमनसो भावाय vसु सुष्ठु vउप vआ vयातम् उपागच्छतम् । अपि च युवाम् vअस्मान् परित्यज्य vनू vचित् नैव vमन्थे अन्याञ्च मन्येथे । अस्मानेव सर्वदा बुध्येथे । vहि यस्मादेवं तस्मात् vवां युवां vशश्वद्भिः बहुभिः vवाजैः अन्नैर्हविर्लक्षणैः vआ vवृतीय आवर्तयामि ॥

सो अंग्न एना नमसा समिद्धोऽच्छा मित्रं वरुणमिन्द्रं वोचेः ।
यत्सीमागश्चकृमा तत्सु मृळ तदर्यमादितिः शिश्रथन्तु ॥ ७ ॥

---

१. घ-ङ-ञ-न—हिंसत्यौ; त-थ—हिंसंतौ ।

सः । अग्ने । एना । नमसा । सम्ऽइद्धः । अच्छ । मित्रम् । वरुणम् । इन्द्रम् । वोचेः ।
यत् । सीम् । आगः । चकृम । तत् । सु । मृळ । तत् । अर्यमा । अदितिः । शिश्रथन्तु ॥७॥

हे [v]अग्ने [v]सः त्वम् [v]एना एनेन [v]नमसा अन्नेनास्मदीयेन हविषा [v]समिद्धः संदीप्तः सन् [v]मित्रं [v]वरुणमिन्द्रं च [v]अच्छ [v]वोचेः अभिब्रूयाः । अथमस्मदीयो रक्षणीय इति कथय । वयं [v]यत् [v]आगः अपराधम् । सीमिति परिग्रहार्थीयः । [v]सीं सर्वतो वाङ्मनःकायैः [v]चकृम कृतवन्तो वयं [v]तत् तस्मादागसः [v]सु [v]मृळ अस्मान् सुष्ठु रक्ष । [v]तत् चागः [v]अर्यमा [v]अदितिः मित्रादयश्च [v]शिश्रथन्तु अस्मत्तो वियोजयन्तु[1] ॥

एता अग्न आशुषाणास इष्टीर्युवोः सचाभ्यश्याम वाजान् ।
मेन्द्रो नो विष्णुर्मरुतः परि ख्यन्युयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

एताः । अग्ने । आशुषाणासः । इष्टीः । युवोः । सचा । अभि । अश्याम । वाजान् ।
मा । इन्द्रः । नः । विष्णुः । मरुतः । परि । ख्यन् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥८॥

हे [v]अग्ने । उपलक्षणमेतत् । हे इन्द्राग्नी [v]एताः [v]इष्टीः इमान् यज्ञान् [v]आशुषाणासः आशु शीघ्रं संभजमाना वयं [v]युवोः युवयोः स्वभूतान् [v]वाजान् अन्नानि [v]सचा सह युगपदेव [v]अभ्यश्याम अभिप्राप्नुयाम । अपि च [v]इन्द्रः [v]विष्णुः [v]मरुतः च [v]नः अस्मान् [v]मा [v]परि [v]ख्यन् अस्मान् परित्यज्यान्यान् मा द्राक्षुः । सर्वदास्मानेव पश्यन्तु । अन्यद्व्रतम् ॥ ॥ १६ ॥

'इयं वाम्' इति द्वादशर्चं पञ्चमं सूक्तं वसिष्ठस्यार्षमैन्द्राग्नम् । द्वादश्यनुष्टुप् शिष्टा गायत्र्यः । तथा चानुक्रान्तम्—'इयं वां द्वादश गायत्रमन्त्यानुष्टुप्' इति । ज्योतिष्टोमे प्रातःसवनेऽच्छावाकशस्त्र आदितो नवर्चः शस्यन्ते । सूत्र्यते हि—'इयं वामस्य मन्मन इति नव' (आश्व. श्रौ. ५.१०) इति । आभिप्लविकेषूक्थ्येषु स्तोमेषु बृह्दावच्छावाकस्य प्रातःसवन इदं सूक्तमावापार्थमुत्तमावर्जम् । सूत्रितं च—'इयं वामस्य मन्मन इत्येकादश' (आश्व. श्रौ. ७. ५) इति । चातुर्विंशिकेऽहनि प्रातःसवने तस्यैवाद्यस्तृचः । सूत्रितं च—'इयं वामस्य मन्मन इन्द्राग्नी युवामिमे' (आश्व. श्रौ. ७. २) इति ॥

इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः । अभ्राद्वृष्टिरिवाजनि ॥ १ ॥

इयम् । वाम् । अस्य । मन्मनः । इन्द्राग्नी इति । पूर्व्यऽस्तुतिः । अभ्रात् । वृष्टिःऽइव । अजनि ॥१॥

हे [v]इन्द्राग्नी [v]इयं [v]पूर्व्यस्तुतिः पूर्व्या मुख्या स्तुतिः [v]अस्य [v]मन्मनः स्तोतुरस्माद्बृसिष्टात् [v]वां युवाभ्यां युवयोरर्थम् [v]अभ्रात् मेघात् [v]वृष्टिरिव बह्वी सती [v]अजनि प्रादुर्भूता । तां शृणुतमित्युत्तरत्र संबन्धः ॥

शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः । ईशाना पिप्यतं धियः ॥ २ ॥

शृणुतम् । जरितुः । हवम् । इन्द्राग्नी इति । वनतम् । गिरः । ईशाना । पिप्यतम् । धियः ॥२॥

हे [v]इन्द्राग्नी [v]जरितुः स्तोतुः [v]हवम् आह्वानं युवां [v]शृणुतम् । श्रुत्वा च [v]गिरः तदीयाः स्तुतीः [v]वनतं संभजतम् । तथा [v]ईशाना ईश्वरौ युवां [v]धियः अनुष्ठितानि कर्माणि [v]पिप्यतं तत्स्थैः फलैः पूरयतम् ॥

---

१. ख-ङ्ग-त-न-भ-श–विजयंतु ।

मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये । मा नो रीरधतं निदे ॥ ३ ॥

मा । पापऽत्वाय । नः । नरा । इन्द्राग्नी इति । मा । अभिऽशस्तये । मा । नः । रीरधतम् । निदे ॥३॥

हे ᵛनरा नेतारौ ᵛइन्द्राग्नी ᵛनः अस्मान् ᵛपापत्वाय[1] हीनभावाय ᵛमा ᵛरीरधतम् । तथा ᵛअभिशस्तये शत्रुभिः कृतायाभिशंसनाय ᵛमा रीरधतम्[2] । तथा ᵛनिदे निन्दकाय जनाय ᵛनः अस्मान् ᵛमा रीरधतं मा वशीकुरुतम् ॥

चातुर्विंशिकेऽहनि प्रातःसवनेऽच्छावाकस्य 'इन्द्रे अग्ना' इत्ययं षडहस्तोत्रियसंज्ञकस्तृचः । सूत्रितं च—'इन्द्रे अग्ना नमो बृहत्ता हुवे ययोरिदम्' (आश्व. श्रौ. ७. २) इति ॥

इन्द्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे । धिया धेना अवस्यवः ॥ ४ ॥

इन्द्रे । अग्ना । नमः । बृहत् । सुऽवृक्तिम् । आ । ईरयामहे । धिया । धेनाः । अवस्यवः ॥ ४ ॥

ᵛअवस्यवः रक्षणकामा वयम् ᵛइन्द्रे देवे ᵛअग्ना अग्नौ च ᵛबृहत् बृंहणं वर्धकं ᵛनमः हविर्लक्षणमन्नं ᵛसुवृक्तिं सुप्रवृत्तां स्तुतिं च ᵛएरयामहे अभिप्रेरयामः । तथा ᵛधिया कर्मणा युक्ताः ᵛधेनाः । वाङ्नामैतत् । अप्रगीताः स्तुतिवाचश्चाभिप्रेरयामः ॥

ता हि शश्वन्त ईळत इत्था विप्रास ऊतये । सबाधो वाजसातये ॥ ५ ॥

ता । हि । शश्वन्तः । ईळते । इत्था । विप्रासः । ऊतये । सऽबाधः । वाजऽसातये ॥ ५ ॥

ᵛता ᵛहि तौ खल्विन्द्राग्नी ᵛशश्वन्तः बहवः ᵛविप्रासः मेधाविनो जनाः ᵛऊतये रक्षणाय ᵛइत्था इत्थमनेन प्रकारेण ᵛईळते स्तुवन्ति । तथा ᵛसबाधः समानं बाधमानाः परस्परं बाध्यमाना जनाः ᵛवाजसातये अन्नलाभाय तावेवेन्द्राग्नी ईळते स्तुवन्ति । यद्वा वाजसातिरिति[3] संग्रामनाम । संग्रामार्थम् ॥

ता वां गीर्भिर्विपन्यवः प्रयस्वन्तो हवामहे । मेधसाता सनिष्यवः ॥ ६ ॥

ता । वाम् । गीःऽभिः । विपन्यवः । प्रयस्वन्तः । हवामहे । मेधऽसाता । सनिष्यवः ॥ ६ ॥

ᵛविपन्यवः स्तोत्रमिच्छन्तः ᵛप्रयस्वन्तः हविर्लक्षणेनान्नेनोपेताः ᵛसनिष्यवः सनिं धनमात्मन इच्छन्तो वयं ᵛमेधसाता मेधानां यागानां सातौ संभजने निमित्तभूते सति हे इन्द्राग्नी ᵛता तौ ᵛवां युवां ᵛगीर्भिः स्तुतिभिः ᵛहवामहे आह्वयामहे ॥ ॥ १७ ॥

अमावास्यायामैन्द्राग्नस्य हविषः 'इन्द्राग्नी अवसा' इत्यनुवाक्या । सूत्रितं च—'इन्द्राग्नी अवसा गतं गीर्भिर्विप्रः प्रमतिमिच्छमानः' (आश्व. श्रौ. १. ६) इति ॥

इन्द्राग्नी अवसा गतमस्मभ्यं चर्षणीसहा । मा नो दुःशंस ईशत ॥ ७ ॥

इन्द्राग्नी इति । अवसा । आ । गतम् । अस्मभ्यम् । चर्षणिऽसहा । मा । नः । दुःऽशंसः । ईशत ॥७॥

हे ᵛचर्षणीसहा चर्षणीनां मनुष्याणां शत्रुभूतानामभिभवतारौ हे ᵛइन्द्राग्नी ᵛअस्मभ्यं स्तोतृभ्यो देयेन ᵛअवसा अन्नेन सह ᵛआ ᵛगतम् आगच्छतम् । ᵛदुःशंसः दुष्टाभिशंसनः पारुष्यवादी शत्रुश्च ᵛनः अस्मान् ᵛमा ᵛईशत ईशिष्ट[4] । अस्मान् बाधितुं मा शक्नोतु ॥

मा कस्य नो अरुषो धूर्तिः प्रणङ्मर्त्यस्य । इन्द्राग्नी शर्म यच्छतम् ॥ ८ ॥

---

१. ख—पापत्वाय पापत्वाय; झ-त-न-भ-श—पापत्वाय पापवत्त्वाय । २. ख-झ-त-भ-श—रीरधतं वशीकुरुतं । ३. झ-त१-२—वाजसाताविति । ४. श—मा ईशिष्ट ।

मा । कस्य । नः । अररुषः । धूर्तिः । प्रणक् । मर्त्यस्य । इन्द्राग्नी । शर्म । यच्छतम् ॥ ८ ॥

हे [v]इन्द्राग्नी [v]कस्य कस्यचिदपि [v]अररुषः अरेः [v]मर्त्यस्य मनुष्यस्य संबन्धिनी [v]धूर्तिः हिंसा [v]नः अस्मान् [v]मा [v]प्रणक् मा प्राप्नोतु । [v]शर्म सुखं चास्मभ्यं [v]यच्छतं[1] दत्तम् ॥

गोमद्धिरण्यवद्वसु यद्वामश्वावदीमहे । इन्द्राग्नी तद्वनेमहि ॥ ९ ॥

गोऽमत् । हिरण्यऽवत् । वसु । यत् । वाम् । अश्वऽवत् । ईमहे । इन्द्राग्नी इति । तत् । वनेमहि ॥९॥

हे [v]इन्द्राग्नी [v]गोमत् गोभिर्युक्तं [v]हिरण्यवत् हिरण्यैः सुवर्णैर्युक्तम् [v]अश्वावत् अश्वैश्चोपेतं [v]यत् [v]वसु [v]वां युवाम् [v]ईमहे याचामहे [v]तत् वसु युवयोः प्रसादाद्वयं [v]वनेमहि संभजेमहि ॥

चातुर्विंशिकेऽहनि प्रातःसवनेऽच्छावाकशस्त्रे ' यत्सोम आ सुते ' इत्यारम्भणीया अहर्गणेषु च द्वितीयादिष्वहःस्वेषा प्रातःसवने तेनैव शंसनीया। सूत्रितं च—' यत्सोम आ सुते नर इत्यारम्भणीयाः शस्त्वा ' (आश्व. श्रौ. ७. २) इति ॥

यत्सोम आ सुते नर इन्द्राग्नी अजोहवुः । ससीवन्ता सपर्यवः ॥ १० ॥

यत् । सोमे । आ । सुते । नरः । इन्द्राग्नी इति । अजोहवुः । ससिऽवन्ता । सपर्यवः ॥ १० ॥

[v]सोमे [v]सुते अभिषुते सति [v]नरः कर्मणां नेतार ऋत्विजः [v]सपर्यवः परिचरणकामाः सन्तः [v]ससीवन्ता प्रशस्ताश्वौ [v]इन्द्राग्नी इन्द्रमग्निं च [v]यत् यदा [v]आ [v]अजोहवुः अभिह्वयन्ते तदा युवामागच्छतमिति शेषः ॥

उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा । आङ्गूषैराविवासतः ॥ ११ ॥

उक्थेभिः । वृत्रहन्ऽतमा । या । मन्दाना । चित् । आ । गिरा । आङ्गूषैः । आऽविवासतः ॥ ११ ॥

[v]वृत्रहन्तमा वृत्राणामावरकाणां हन्तृतमौ [v]मन्दाना मोदमानौ [v]या यावेन्द्राग्नी [v]उक्थेभिः शस्त्रैः [v]गिरा [v]चित् स्तुत्या च [v]आविवासतः परिचर्येते । व्यत्ययेन कर्मणि कर्तृप्रत्ययः । [v]आङ्गूषैः आघोषैरन्यैश्च स्तोत्रैर्यावाविवासतः परिचर्येते तौ युवामागच्छतमिति शेषः ॥

तावित्[2] दुःशंसं मर्त्यं दुर्विद्वांसं रक्षस्विनम् ।
आभोगं हन्मना हतमुदधिं हन्मना हतम् ॥ १२ ॥

तौ । इत् । दुःऽशंसम् । मर्त्यम् । दुःऽविद्वांसम् । रक्षस्विनम् । आऽभोगम् । हन्मना । हतम् । उदऽधिम् । हन्मना । हतम् ॥ १२ ॥

हे[2] इन्द्राग्नी [v]तौ युवां[2] [v]दुःशंसं दुष्टाभिशंसनं [v]दुर्विद्वांसं दुर्विज्ञानं [v]रक्षस्विनं बलवन्तम् [v]आभोगम् आहृत्यास्मत्तोऽपहृत्य भोक्तारं [v]मर्त्यं मनुष्यं शत्रुं [v]हन्मना हननसाधनेनायुधेन [v]हतं हिंस्तम् । उक्तमेवार्थं दृष्टान्तेन द्रढयति । [v]उदधिम् । लुप्तोपममेतत् । उदधानं कुम्भमिव । यथा कुम्भोऽनायासेन भिद्यत एवमनायासेनैव शत्रुमायुधेन युवां हिंस्तम् ॥ ॥ १८ ॥

' प्र क्षोदसा ' इति षड्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं सरस्वतीदेवताकम् । तृतीया तु सरस्वद्देवताका । अनुक्रम्यते च—' प्र क्षोदसा षट् सारस्वतं तु तृतीया सरस्वते ' इति । गतः सूक्त-

---

१. ख-त३-न-श-प्रयच्छतं । २. ख-भ-तावित् तावेव; घ-हे इंद्राग्नी तावित्तौ युवां ।

विनियोगः। प्रथमे छन्दोमे प्रउगशस्त्रे 'प्र क्षोदसा धायसा सस्र एषेति प्रउगम्' (आश्व. श्रौ. ८. ९) इति। सारस्वते पशौ 'प्र क्षोदसा' इति वपाया याज्या। सूत्रितं च—'प्र क्षोदसा धायसा सस्र एषा पावीरवी कन्या चित्रायुः' (आश्व. श्रौ. ३. ७) इति॥

प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः।
प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्याः॥ १॥

प्र। क्षोदसा। धायसा। सस्रे। एषा। सरस्वती। धरुणम्। आयसी। पूः।
प्रऽबाबधाना। रथ्याऽइव। याति। विश्वाः। अपः। महिना। सिन्धुः। अन्याः॥ १॥

सरस्वत्या[1] एषा नदीवन्निगमा। [v]एषा दृश्यमाना नदीरूपा [v]सरस्वती [v]आयसी अयसा निर्मिता [v]पूः पुरीव [v]धरुणम्। लिङ्गव्यत्ययः। धरुणा धारयित्री [v]धायसा धारकेण [v]क्षोदसा उदकेन [v]प्र [v]सस्रे प्रधावति शीघ्रं गच्छति। [v]सिन्धुः स्यन्दनशीला नदीरूपा सा [v]अन्याः [v]विश्वाः सर्वाः [v]अपः आपगाः [v]महिना महिम्ना [v]प्रबाबधाना भृशं बाधमाना [v]रथ्येव प्रतोलीव विस्तीर्णा सती [v]याति गच्छति। यद्वा। रथ्येव रथिनेव यथा रथी रथेन मार्गस्थं तरुगुल्मादिकं चूर्णीकृत्य गच्छति तद्वत् स्वकीयेन वेगेन सर्वं संपिंषती गच्छतीत्यर्थः॥

सारस्वत एव पशौ वपायाः 'एकाचेतत्' इत्यनुवाक्या। सूत्रितं च—'एका चेतत्सरस्वती नदीनामुत स्या नः सरस्वती जुषाणा' (आश्व. श्रौ. ३. ७) इति॥

एकाचेतत्सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात्।
रायश्चेतन्ती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय॥ २॥

एका। अचेतत्। सरस्वती। नदीनाम्। शुचिः। यती। गिरिऽभ्यः। आ। समुद्रात्।
रायः। चेतन्ती। भुवनस्य। भूरेः। घृतम्। पयः। दुदुहे। नाहुषाय॥ २॥

सहस्रवत्सरेण[2] क्रतुना यक्ष्यमाणो नाहुषो नाम राजा सरस्वतीं नदीं प्रार्थयामास। सा च तस्मै सहस्रसंवत्सरपर्याप्तं पयो घृतं च प्रददौ। अथमर्थोऽत्र प्रतिपाद्यते। [v]नदीनाम् अन्यासां मध्ये [v]शुचिः शुद्धा [v]गिरिभ्यः सकाशात् [v]आ [v]समुद्रात् समुद्रपर्यन्तं [v]यती गच्छन्ती [v]एका [v]सरस्वती नदी [v]अचेतत्। नाहुषस्य प्रार्थनामज्ञासीत्। तथा [v]भुवनस्य भूतजातस्य [v]भूरेः बहुलस्य [v]रायः धनानि [v]चेतन्ती प्रज्ञापयन्ती प्रयच्छन्ती [v]नाहुषाय राज्ञे [v]घृतं [v]पयः च सहस्रसंवत्सरक्रतोः पर्याप्तं [v]दुदुहे दुग्धवती दत्तवती॥

सरस्वद्देवताके पशौ 'स वावृधे' इति पुरोडाशस्य याज्या। सूत्रितं च—'स वावृधे नर्यो योषणासु यस्य व्रतं पशवो यन्ति सर्वे' (आश्व. श्रौ. ३. ८) इति॥

स वावृधे नर्यो योषणासु वृषा शिशुर्वृषभो यज्ञियासु।
स वाजिनं मघवद्भ्यो दधाति वि सातये तन्वं मामृजीत॥ ३॥

सः। ववृधे। नर्यः। योषणासु। वृषा। शिशुः। वृषभः। यज्ञियासु।
सः। वाजिनम्। मघवत्ऽभ्यः। दधाति। वि। सातये। तन्वम्। ममृजीत॥ ३॥

---

१. ग्र-त-'सरस्वत्या' नास्ति। २. ख-ग्र-भ-सहस्रसंवत्सरेण।

मध्यस्थानो वायुः सरस्वान्। [v]नर्यः नृभ्यो[1] हितः[1] [v]वृषा सेचनसमर्थः [v]शिशुः अल्पः प्रादुर्भावसमयेऽल्पतया दृश्यमानः [v]वृषभः वर्षिता एवंभूतः [v]सः[2] सरस्वान् [v]यज्ञियासु यज्ञार्हासु [v]योषणासु योषित्स्वात्मनः कलत्रभूतासु मध्यमस्थानास्वप्सु मध्ये [v]ववृधे वर्धते। [v]सः तादृशः सरस्वान् [v]मघवन्नयः हविष्मन्नयो यजमानेभ्यः [v]वाजिनं बलिनं पुत्रं [v]दधाति ददाति। तथा [v]सातये लाभार्थं [v]तन्वं तेषां शरीरं [v]वि [v]मामृजीत विमार्ष्टि। लाभार्थं संस्करोतीत्यर्थः। यद्यप्येषा सरस्वतः स्तुतिस्तथापि सरस्वत्याः प्रीणनार्थं तत्स्तवनमिति छान्दोमिके सारस्वते[3] तृचेऽस्या उक्तो विनियोगो न विरुध्यते॥

दशरात्रेऽष्टमेऽहनि प्रउगे ' उत स्या नः ' इति सारस्वतः सप्तमस्तृचः। सूत्रितं च—' उत स्या नः सरस्वती जुषाणेति प्रउगम् ' (आश्व. श्रौ. ८. १०) इति। सारस्वते पशौ पुरोडाशस्य ' उत स्या नः ' इत्यनुवाक्या। सूत्रितं च—' उत स्या नः सरस्वती जुषाणा सरस्वत्यभि नो नेषि वस्यः ' (आश्व. श्रौ. ३. ७) इति॥

उत स्या नः सरस्वती जुषाणोप श्रवत्सुभगा यज्ञे अस्मिन्।
मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा सखिभ्यः॥ ४॥

उत। स्या। नः। सरस्वती। जुषाणा। उप। श्रवत्। सुऽभगा। यज्ञे। अस्मिन्।
मितज्ञुऽभिः। नमस्यैः। इयाना। राया। युजा। चित्। उत्ऽतरा। सखिऽभ्यः॥ ४॥

[v]उत अपि च [v]जुषाणा प्रीयमाणा [v]सुभगा शोभनधना [v]स्या सा [v]सरस्वती [v]नः अस्माकम् [v]अस्मिन् [v]यज्ञे [v]उप [v]श्रवत्। अस्मदीयाः स्तुतीरुपशृणोतु। कीदृशी सा। [v]मितज्ञुभिः प्रक्षीर्जानुभिः [v]नमस्यैः नमस्कारैर्देवैः[4] [v]इयाना उपगम्यमाना। चिच्छब्दश्चार्थे। [v]युजा नित्ययुक्तेन [v]राया धनेन च संगता [v]सखिभ्यः [v]उत्तरा उत्कृष्टतरा। ईदृशस्यस्मदीयाः स्तुतीरुपशृणोत्वित्यन्वयः॥

पवित्रेष्टयां[5] सारस्वतस्य हविषः ' इमा जुह्वानाः ' इति याज्या। सूत्रितं च—' इमा जुह्वाना युष्मदा नमोभिर्दधिक्राव्णो अकारिषम् ' (आश्व. श्रौ. २. १२) इति॥

इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व।
तव शर्मन्प्रियतमे दधाना उप स्थेयाम शरणं न वृक्षम्॥ ५॥

इमा। जुह्वानाः। युष्मत्। आ। नमःऽभिः। प्रति। स्तोमम्। सरस्वति। जुषस्व।
तव। शर्मन्। प्रियऽतमे। दधानाः। उप। स्थेयाम। शरणम्। न। वृक्षम्॥ ५॥

हे [v]सरस्वति [v]इमा इमान्यस्मदीयानि हवींषि [v]जुह्वानाः तुभ्यं जुह्वतो वयं [v]नमोभिः स्वद्विषयैः[6] नमस्कारैः [v]युष्मत् त्वत्सकाशात् [v]आ। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। आददीमहि धनानीति शेषः। [v]स्तोमं चास्मदीयं स्तोत्रं [v]प्रति [v]जुषस्व प्रतिसेवस्व। वयं च [v]प्रियतमे अतिशयेन प्रिये [v]तव त्वदीये [v]शर्मन् शर्मणि सुखे [v]दधानाः निधीयमानाः सन्तः [v]शरणं [v]न [v]वृक्षम् आश्रयभूतं वृक्षमिव [v]उप [v]स्थेयाम त्वामुपतिष्ठेम संगच्छेमहि॥

अयमु ते सरस्वति वासिष्ठो द्वारावृतस्य सुभगे व्यावः।
वर्धा शुभ्रे स्तुवते रासि वाजान्यूयं पात स्वस्तिभिः सदा नः॥ ६॥

---

१. त–योषणासु यतः। २. ख-ज्ञ-ञ्ञ-न–' सः ' नास्ति। ३. ञ्ञ-त-न-भ-श–सारस्वत°। ४. थ–नमस्कार्यै°। ५. ञ्ञ-त-न–परिवेष्टयां। ६. ख-ञ्ञ-त-भ–तृपद्वद्विषयैः।

अयम् । ऊँ इति । ते । सरस्वति । वसिष्ठः । द्वारौ । ऋतस्य । सुऽभगे । वि । आवरित्यावः । वर्धं । शुभ्रे । स्तुवते । रासि । वाजान् । युयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

हे ᵛसुभगे शोभनधने ᵛसरस्वति ᵛअयं ᵛवसिष्ठः ᵛते त्वां यन्तुः ᵛऋतस्य यज्ञस्य संबन्धिन्यौ ᵛद्वारौ पूर्वापरे ᵛव्यावः विवृणोति । ᵛउ इति पूरकः । हे ᵛशुभ्रे शुभ्रवर्णे देवि ᵛवर्धं वर्धस्व । तथा ᵛस्तुवते स्तोत्रं कुर्वते वसिष्ठाय ᵛवाजान् अन्नानि ᵛरासि प्रदेहि । अन्यद्गतम् ॥ ॥ १९ ॥

'बृहदु गायिषे' इति षड्वृचं सप्तमं सूक्तं वसिष्ठस्यार्षम् । आद्या बृहती द्वितीया सतोबृहती तृतीया प्रस्तारपङ्क्तिः शिष्टास्तिस्रो गायत्र्यः । आद्यस्तृचः सरस्वतीदेवताकोऽन्त्यश्च सरस्वद्देवताकः । तथा चानुक्रान्तं—'बृहदु प्रगाथः प्रस्तारपङ्क्तिः परास्तिस्रो गायत्र्यः सरस्वते' इति । पञ्चमेऽहनि प्रउगशस्त्र आद्यः प्रगाथः सारस्वतस्तृचः । सूत्रितं च—'बृहदु गायिषे' इति बार्हतं प्रउगं प्रगाथानेके' (आश्व. श्रौ. ७. १२) इति ॥

बृहदु गायिषे वचोऽसुर्यां नदीनाम् ।
सरस्वतीमिन्महया सुवृक्तिभिः स्तोमैर्वसिष्ठ रोदसी ॥ १ ॥

बृहत् । ऊँ इति । गायिषे । वचः । असुर्यां । नदीनाम् ।
सरस्वतीम् । इत् । महय । सुवृक्तिऽभिः । स्तोमैः । वसिष्ठ । रोदसी इति ॥ १ ॥

अनयर्षिरात्मानं संबोध्य सरस्वत्याः स्तुतौ प्रेरयति । हे ᵛवसिष्ठ त्वं ᵛबृहदु बृहदेव महदेव ᵛवचः स्तोत्रं ᵛगायिषे गायसि । किमर्थम् । ᵛनदीनां मध्ये ᵛअसुर्या । असुराशब्दाच्चतुर्थ्येकवचनस्य ङ्यादेशः । असुरायै बलवत्यै नदीरूपायै सरस्वत्यै । अस्याः प्रीणनार्थमित्यर्थः । तथा ᵛरोदसी द्यावापृथिव्योः स्थितां दिवि देवतारूपेण भूम्यां वाग्रूपेण निवसन्तीं ᵛसरस्वतीमित् सरस्वतीमेव ᵛसुवृक्तिभिः सुष्ठु दोषवर्जितैः ᵛस्तोमैः स्तोत्रैः ᵛमहय पूजय । सर्वदा सरस्वतीमेव स्तुहि नान्यां देवतामिति भावः ॥

उभे यत्ते महिना शुभ्रे अन्धसी अधिक्षियन्ति पूरवः ।
सा नो बोध्यवित्री मरुत्सखा चोदु राधो मघोनाम् ॥ २ ॥

उभे इति । यत् । ते । महिना । शुभ्रे । अन्धसी इति । अधिऽक्षियन्ति । पूरवः ।
सा । नः । बोधि । अवित्री । मरुत्ऽसखा । चोद । राधः । मघोनाम् ॥ २ ॥

हे ᵛशुभ्रे शुभ्रवर्णे सरस्वति ᵛयत् यस्याः ᵛते तव ᵛमहिना महिम्ना ᵛउभे ᵛअन्धसी उभयविधं दिव्यं पार्थिवं चाग्निं ग्राम्यमारण्यं वा ᵛपूरवः पूरयितव्या मनुष्याः ᵛअधिक्षियन्ति अधिगच्छन्ति ᵛसा त्वम् ᵛअवित्री रक्षित्री सती ᵛनः अस्मान् ᵛबोधि बुध्यस्व । अपि च ᵛमरुत्सखा । मरुतो माध्यमिका देवगणाः । ते सखायो यस्या माध्यमिकाया वाचस्तादृशी त्वं ᵛमघोनां हविर्लक्षणधनोपेतानामस्माकं ᵛराधः धनं ᵛचोद प्रेरय ॥

भद्रमिद्भद्रा कृणवत्सरस्वत्यकवारी चेतति वाजिनीवती ।
गृणाना जमदग्निवत्स्तुवाना च वसिष्ठवत् ॥ ३ ॥

---

१. त—गायिषे वचः ।

भद्रम्। इत्। भद्रा। कृणवत्। सरस्वती। अकवऽअरी। चेतति। वाजिनीऽवती। गृणाना। जमदग्निऽवत्। स्तुवाना। च। वसिष्ठऽवत्॥ ३॥

[v]भद्रा कल्याणी भजनीया वा [v]सरस्वती [v]भद्रमित् भद्रमेव कल्याणमेव [v]कृणवत् अस्माकं करोतु। तथा [v]अकवारी अकुत्सितगमना [v]वाजिनीवती अन्नवती [v]चेतति चेतयतु अस्मान् प्रज्ञापयतु। यद्वा। मदीयं स्तोत्रं चेतति जानातु। तथा [v]जमदग्निवत् जमदग्निनर्षिणेव मया [v]गृणाना स्तूयमाना [v]वसिष्ठवत्। अर्हार्थे वतिप्रत्ययः। वसिष्ठार्हं वसिष्ठस्यानुरूपं [v]स्तुवाना स्तूयमाना [v]च भव[1]॥

सरस्वद्देवताके पशौ 'जनीयन्तः' इति तिस्रः पशुपुरोडाशहविषां[2] क्रमेणानुवाक्याः। सूत्रितं च—'जनीयन्तो न्वग्रव इति तिस्रो दिव्यं सुपर्णं वायसं बृहन्तम्' (आश्व. श्रौ. ३. ८) इति॥

जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः। सरस्वन्तं हवामहे॥ ४॥

जनिऽयन्तः। नु। अग्रवः। पुत्रिऽयन्तः। सुऽदानवः। सरस्वन्तम्। हवामहे॥ ४॥

[v]जनीयन्तः। जायन्त आस्वपत्यानीति जनयो जायाः। ता इच्छन्तः [v]पुत्रीयन्तः पुत्रान् कामयमानाः [v]सुदानवः शोभनदानाः [v]अग्रवः उपगन्तारो वयं [v]नु अद्य [v]सरस्वन्तं देवं [v]हवामहे स्तुमहे आह्वयामहे वा॥

ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः। तेभिर्नोऽविता भव॥ ५॥

ये। ते। सरस्वः। ऊर्मयः। मधुऽमन्तः। घृतऽश्चुतः। तेभिः। नः। अविता। भव॥ ५॥

हे [v]सरस्वः सरस्वन्[1] देव[2] [v]ते त्वदीयाः [v]ये [v]ऊर्मयः जलसंघाः [v]मधुमन्तः रसवन्तः [v]घृतश्चुतः घृतस्य वृष्ट्युदकस्य क्षारिणो भवन्ति [v]तेभिः तैरूर्मिभिः [v]नः अस्माकम् [v]अविता रक्षिता [v]भव॥

अन्वारम्भणीयायां सरस्वतो यागस्य 'पीपिवांसम्' इत्यनुवाक्या। सूत्रितं च—'पीपिवांसं सरस्वतो दिव्यं सुपर्णं वायसं बृहन्तम्' (आश्व. श्रौ. २. ८) इति॥

पीपिवांसं सरस्वतः स्तनं यो विश्वदर्शतः। भक्षीमहि प्रजामिषम्॥६॥

पीपिऽवांसम्। सरस्वतः। स्तनम्। यः। विश्वऽदर्शतः। भक्षीमहि। प्रऽजाम्। इषम्॥६॥

[v]पीपिवांसं प्रवृद्धं [v]सरस्वतः देवस्य [v]स्तनं शब्दायमानं स्तनवद्रसाधारं वा मेघं [v]भक्षीमहि भजेमहि प्राप्नुयाम। [v]यः [v]विश्वदर्शतः विश्वैः सर्वैर्दर्शतो भवति दृश्यमानो भवति। तं स्तनं मेघमित्यर्थः। तथा [v]प्रजां पुत्रादिरूपाम् [v]इषम् अन्नं च सरस्वतः प्रसादात् भक्षीमहि[4]॥ ॥२०॥

'यज्ञे दिवः' इति दशर्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभम्। प्रथमैन्द्री तृतीयानवम्योरिन्द्राब्राह्मणस्पती देवता दशम्या इन्द्राबृहस्पती शिष्टानां तु बृहस्पतिः। तथा चानुक्रान्तं—'यज्ञे दशैन्द्र्यादि चार्हस्पत्यमन्त्यैन्द्री च तृतीयानवम्यावैन्द्राब्राह्मणस्पत्ये' इति। आभिप्लविकेषूक्थ्येषु तृतीयसवने स्तोमबृद्धौ ब्राह्मणाच्छंसिन इदमुत्तरं च सूक्तमावापार्थम्। सूत्रितं च—'यज्ञे दिवः' (आश्व. श्रौ. ७. ९) इति॥

यज्ञे दिवो नृषदने पृथिव्या नरो यत्र देवयवो मदन्ति।
इन्द्राय यत्र सवनानि सुन्वे गमन्मदाय प्रथमं वयश्च॥ १॥

---

१. झ–भवति। २. ख-न-भ–पुरोडाशस्य हविषां। ३. ख-श–सरस्वद्देव; घ–देव। ४. झ–भक्षीमहि प्राप्नुयामः; न–भक्षीमहि खिलं–यस्य व्रतं पशवो यंति सर्वे यस्य व्रतमुपतिष्ठंत आपः। यस्य व्रते पुष्टिपतिर्निविष्टस्तं सरस्वंतमवसे हुवेम॥ (ऋ. खै. १५)

यज्ञे । दिवः । नृऽसदने । पृथिव्याः । नरः । यत्र । देवऽयवः । मदन्ति ।
इन्द्राय । यत्र । सवनानि । सुन्वे । गमत् । मदाय । प्रथमम् । वयः । च ॥ १ ॥

Vयत्र यस्मिन् यज्ञे Vदेवयवः देवान् कामयमानाः Vनरः नेतार ऋत्विजः Vमदन्ति हृष्यन्ति Vयत्र यस्मिंश्च Vसवनानि अभिषोतव्याः सोमाः Vइन्द्राय इन्द्रार्थं Vसुन्वे अभिषूयन्ते Vपृथिव्याः संबन्धिनि Vनृषदने नृणां नेतृणां[1] सदनभूते तस्मिन् Vयज्ञे Vप्रथमं सर्वेभ्यो देवेभ्यः पूर्वं Vदिवः द्युलोकात् Vगमत् आगच्छतु । किमर्थम् । Vमदाय मदार्थम् । सोमं पातुमित्यर्थः । तथा Vवयश्च गन्तारस्तदीया अश्वाश्च गमत् आगच्छन्तु ॥

आ दैव्या वृणीमहेऽवांसि बृहस्पतिर्नो मह आ सखायः ।
यथा भवेम मीळ्हुषे अनागा यो नो दाता परावतः पितेव ॥ २ ॥

आ । दैव्या । वृणीमहे । अवांसि । बृहस्पतिः । नः । महे । आ । सखायः ।
यथा । भवेम । मीळ्हुषे । अनागाः । यः । नः । दाता । पराऽवतः । पिताऽइव ॥ २ ॥

हे Vसखायः समानख्यानाः स्तोतारो वयं Vदैव्या दैव्यानि देवसंबन्धीनि Vअवांसि रक्षणानि Vआ Vवृणीमहे अभिभजामहे[2] प्रार्थयामहे । Vनः अस्माकं हविः Vबृहस्पतिः बृहतां पालयिता देवः Vआ Vमहे । महतिर्दानार्थः । आमहते आदत्ते । 'लोपस्त आत्मनेपदेषु' इति तलोपः । Vयः बृहस्पतिः Vपरावतः दूरदेशाद्धनान्याहृत्य पुत्रेभ्यः Vपितेव Vनः अस्मभ्यं Vदाता भवति तस्मै Vमीळ्हुषे सेक्त्रे बृहस्पतये Vअनागाः अनागस अनपराधाः Vयथा वयं Vभवेम हे सखायस्तथा यूयं परिचरतेति शेषः ॥

तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे ।
इन्द्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा ॥ ३ ॥

तम् । ऊँ इति । ज्येष्ठम् । नमसा । हविःऽभिः । सुऽशेवम् । ब्रह्मणः । पतिम् । गृणीषे ।
इन्द्रम् । श्लोकः । महि । दैव्यः । सिसक्तु । यः । ब्रह्मणः । देवऽकृतस्य । राजा ॥ ३ ॥

Vज्येष्ठं प्रशस्यतमं Vसुशेवं सुसुखं Vब्रह्मणः मन्त्रस्य Vपतिं पालयितारमेतत्संज्ञं Vतमु तमेव देवं Vनमसा नमस्कारेण Vहविर्भिः चरुपुरोडाशादिभिश्च सार्धं Vगृणीषे गृणे स्तुवे । अपि च Vमहि महान्तम् Vइन्द्रं Vदैव्यः देवार्हः Vश्लोकः अस्मदीयः स्तावको मन्त्रः Vसिषक्तु सेवताम् । Vब्रह्मणः अन्नस्य मन्त्रस्य वा Vदेवकृतस्य देवैः स्तोतृभिः कृतस्य Vयः इन्द्रो ब्रह्मणस्पतिर्वा Vराजा ईश्वरः भवति । तमिन्द्रं तं ब्रह्मणस्पतिमिति संबन्धः ॥

स आ नो योनिं सदतु प्रेष्ठो बृहस्पतिर्विश्ववारो यो अस्ति ।
कामो रायः सुवीर्यस्य तं दात्पर्षन्नो अति सश्चतो अरिष्टान् ॥ ४ ॥

सः । आ । नः । योनिम् । सदतु । प्रेष्ठः । बृहस्पतिः । विश्वऽवारः । यः । अस्ति ।
कामः । रायः । सुऽवीर्यस्य । तम् । दात् । पर्षत् । नः । अति । सश्चतः । अरिष्टान् ॥ ४ ॥

---

१. ख-घ-श-'नेतृणां' नास्ति । २. श-अभिजानीमहे ।

[v]प्रेष्ठः प्रियतमः [v]सः [v]बृहस्पतिः [v]नः अस्माकं [v]योनिं स्थानं वेदिलक्षणम् [v]आ [v]सदतु आसीदतु आगत्योपविशतु । [v]यः बृहस्पतिः [v]विश्ववारः विश्वैर्वरणीयः [v]अस्ति भवति । अपि च [v]रायः धनस्य [v]सुवीर्यस्य शोभनवीर्यस्य च यः [v]कामः अस्माकमभिलाषोऽस्ति [v]तं काममस्मभ्यं [v]दात् ददातु । काम्यमानं प्रयच्छत्वित्यर्थः । तथा [v]सश्चतः उपद्रवैः संसक्तान् [v]नः अस्मान् [v]अरिष्टान् अहिंसितान् कृत्वा [v]अति [v]पर्षत् अतिपारयति शत्रून् ॥

तमा नो अर्कमृतायु जुष्टमिमे धासुरमृतासः पुराजाः ।
शुचिक्रन्दं यजतं पस्त्यानां बृहस्पतिमनुर्वाणं हुवेम ॥ ५ ॥

तम् । आ । नः । अर्कम् । अमृताय । जुष्टम् । इमे । धासुः । अमृतासः । पुराऽजाः ।
शुचिऽक्रन्दम् । यजतम् । पस्त्यानाम् । बृहस्पतिम् । अनर्वाणम् । हुवेम ॥ ५ ॥

[v]तं सर्वत्र भोक्तव्यतया प्रसिद्धम् [v]अमृताय अमरणत्वाय जीवनाय [v]जुष्टं पर्याप्तम् [v]अर्कम् अर्चनसाधनमन्नं [v]पुराजाः पुरा जाताः [v]इमे [v]अमृतासः अमरणा देवा बृहस्पतेराज्ञया [v]नः अस्मभ्यम् [v]आ [v]धासुः प्रदद्युः । वयं च [v]शुचिक्रन्दं शुद्धस्तोत्रं [v]पस्त्यानाम् । पस्त्यमिति गृहनाम । तेन तद्वन्तो लक्ष्यन्ते । गृहिणां [v]यजतं यष्टव्यम् [v]अनर्वाणम् अप्रत्यृतं केनाप्यप्रतिगतं [v]बृहस्पतिं बृहतां पालकं देवं [v]हुवेम आह्वयाम स्तुयेम[1] वा ॥ ॥ २१ ॥

तं शग्मासो अरुषासो अश्वा बृहस्पतिं सहवाहो वहन्ति ।
सहश्चित्यस्य नीलवत्सधस्थं नभो न रूपमरुषं वसानाः ॥ ६ ॥

तम् । शग्मासः । अरुषासः । अश्वाः । बृहस्पतिम् । सहऽवाहः । वहन्ति ।
सहः । चित् । यस्य । नीलऽवत् । सधऽस्थम् । नभः । न । रूपम् । अरुषम् । वसानाः ॥६॥

[v]शग्मासः शग्माः सुखकराः शक्ता वा [v]अरुषासः आरोचमानाः [v]सहवाहः संहत्य वाहकाः [v]अश्वाः [v]तं [v]बृहस्पतिं [v]वहन्ति वहन्तु । [v]यस्य बृहस्पतेः [v]सहश्चित् बलं च भवति । [v]नीलवत् । नीलं[2] निलयो निवासः[2] । तद्युक्तं [v]सधस्थं सहस्थानं च यस्य । तं बृहस्पतिमित्यन्वयः । कीदृशा अश्वाः । [v]नभो [v]न आदित्यमिव [v]अरुषम् आरोचमानं [v]रूपं [v]वसानाः धारयन्तः ॥

स हि शुचिः शतपत्रः स शुन्ध्युर्हिरण्यवाशीरिषिरः स्वर्षाः ।
बृहस्पतिः स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः ॥ ७ ॥

सः । हि । शुचिः । शतऽपत्रः । सः । शुन्ध्युः । हिरण्यऽवाशीः । इषिरः । स्वःऽसाः ।
बृहस्पतिः । सः । सुऽआवेशः । ऋष्वः । पुरु । सखिऽभ्यः । आऽसुतिम् । करिष्ठः ॥ ७ ॥

[v]स [v]हि स खलु बृहस्पतिः [v]शुचिः शुद्धः [v]शतपत्रः बहुविधवाहनः । [v]सः एव [v]शुन्ध्युः सर्वेषां शोधयिता [v]हिरण्यवाशीः । ' वाशी ' इति वाङ्नाम । हितरमणीयवाक्[3] । यद्वा । ' वाशीभिस्तक्षताश्मन्मयीभिः ' (ऋ. सं. १०. १०१. १०) इति निगमाद्वाश्यायुधम् । स्वर्णमयायुधः । [v]इषिरः गन्तान्येषणीयो वा [v]स्वर्षाः स्वर्गस्य संभक्ता । यद्वा सरणशीलस्योदकस्य सनिता दाता ।

---

१. ख–स्तूयेम; झ-त३-श१–स्तुवेम; श२–चुसुयेम । २. ख-झ-ञ-भ–नीलं न्यलयो निवासः; घ–नीलं निवासः; झ-त१-२-४–नीळन्यलयो निवासः; श–नीलान्यालयो निवासवत् । ३. ख-झ-त-ञ-भ-श–हितरमणीया वाक् ।

Vस एव Vबृहस्पतिः Vस्वावेशः सुनिवासः Vऋज्वः दर्शनीयः । ईदृशो देवः Vसखिभ्यः स्तोतृभ्यः Vपुरु बहुलम् Vआसुतिम् अन्नं Vकरिष्टः कर्तृतमो दातृतमो भवति ॥

देवी देवस्य रोदसी जनित्री बृहस्पतिं वावृधतुर्महित्वा ।
दक्षाय्याय दक्षता सखायः करद्ब्रह्मणे सुतरा सुगाधा ॥ ८ ॥

देवी इति । देवस्य । रोदसी इति । जनित्री इति । बृहस्पतिम् । ववृधतुः । महिऽत्वा ।
दक्षाय्याय । दक्षत । सखायः । करत् । ब्रह्मणे । सुऽतरा । सुऽगाधा ॥ ८ ॥

Vदेवी देव्यौ दानादिगुणयुक्ते Vदेवस्य बृहस्पतेः Vजनित्री जनयित्र्यौ Vरोदसी द्यावापृथिव्यौ Vमहित्वा महत्त्वेन युक्तं Vबृहस्पतिं Vववृधतुः वर्धयामासतुः । हे Vसखायः यूयमपि Vदक्षाय्याय वर्धनीयाय । द्वितीयार्थे चतुर्थी । वर्धनीयं तं बृहस्पतिं Vदक्षत वर्धयत । स च बृहस्पतिः Vब्रह्मणे बृंहिताय प्रभूतायान्नाय तदर्थं Vसुतरा[1] सुतरणानि[1] सुखेन तरणीयानि Vसुगाधा सुखेनावगाहनीयान्युदकानि Vकरत् करोतु ॥

इयं वां ब्रह्मणस्पते सुवृक्तिर्ब्रह्मेन्द्राय वज्रिणे अकारि ।
अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः ॥ ९ ॥

इयम् । वाम् । ब्रह्मणः । पते । सुऽवृक्तिः । ब्रह्म । इन्द्राय । वज्रिणे । अकारि ।
अविष्टम् । धियः । जिगृतम् । पुरम्ऽधीः । जजस्तम् । अर्यः । वनुषाम् । अरातीः ॥ ९ ॥

हे Vब्रह्मणस्पते तुभ्यं Vवज्रिणे वज्रवते Vइन्द्राय च Vवां युवाभ्याम् । तादर्थ्ये चतुर्थी । Vब्रह्म मन्त्ररूपा Vइयं Vसुवृक्तिः सुप्रवृत्ता स्तुतिः Vअकारि मया कृताभूत् । तौ युवां Vधियः अस्मदीयानि कर्माणि Vअविष्टं रक्षतम् । तथा Vपुरंधीः पुरुधीर्बह्वीः स्तुतीः Vजिगृतं निगिरतम् । शृणुतमिति यावत् । Vअर्यः अरीरभिगन्त्रीः Vवनुषां संभक्तॄणामस्माकम् Vअरातीः शत्रुसेनाः Vजजस्तम् उपक्षपयतम्[2] ॥

तृतीयसवन उक्थ्ये ब्राह्मणाच्छंसिनः 'बृहस्पते युवम्' इति शस्त्रयाज्या । सूत्रितं च—'बृहस्पते युवमिन्द्रश्च वस्व इति याज्या' (आश्व. श्रौ. ६. १) इति । वाजपेयेऽतिरिक्तोक्थस्यैषैव परिधानीया । सूत्रितं च—'बृहस्पते युवमिन्द्रश्च वस्व इति परिधानीया' (आश्व. श्रौ. ९. ९) इति ॥

बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद्युयं पात स्वस्तिभिः सदा नः ॥ १० ॥

बृहस्पते । युवम् । इन्द्रः । च । वस्वः । दिव्यस्य । ईशाथे इति । उत । पार्थिवस्य ।
धत्तम् । रयिम् । स्तुवते । कीरये । चित् । युयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १० ॥

हे Vबृहस्पते त्वं च Vइन्द्रश्च Vयुवं युवां Vदिव्यस्य दिवि भवस्य Vवस्वः वसुनो धनस्य Vईशाथे । अतः कारणात् Vस्तुवते स्तोत्रं कुर्वते Vकीरये । स्तोतृनामैतत् । स्तोत्रे Vरयिं धनं Vधत्तं दत्तम् । Vचित् इति पूरणः । अन्यद्गतम् ॥ ॥ २२ ॥

---

१. ख-ञ-भ-श-सुतरा सुतराणि; घ-'सुतरा सुतरणानि' नास्ति; न-सुतराणि । २. ख-त-उपलक्षयतं; घ-उपलयतं; ञ-श-उपक्षयतं; न-भ-उपलक्षणं यतं ।

'अध्वर्यवः' इति सप्तर्चं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रं सप्तम्यैन्द्राबार्हस्पत्या । तथा चानुक्रान्तम्—'अध्वर्यवः सप्तोक्तदेवतास्त्या' इति । पूर्वसूक्तेन सहोक्तो विनियोगः ॥

अध्वर्यवोऽरुणं दुग्धमंशुं जुहोतन वृषभाय क्षितीनाम् ।
गौरादेदीयाँ अवपानमिन्द्रो विश्वाहेद्याति सुतसोममिच्छन् ॥ १ ॥

अध्वर्यवः । अरुणम् । दुग्धम् । अंशुम् । जुहोतन । वृषभाय । क्षितीनाम् ।
गौरात् । वेदीयान् । अवऽपानम् । इन्द्रः । विश्वाहा । इत् । याति । सुतऽसोमम् । इच्छन् ॥१॥

हे Vअध्वर्यवः अध्वरस्य नेतार ऋत्विजः Vक्षितीनां जनानां मध्ये Vवृषभाय श्रेष्ठायेन्द्राय Vअरुणम् आरोचमानं Vदुग्धम् अभिषुतम् Vअंशुं सोमं Vजुहोतन जुहुत । Vअवपानम् अवक्रम्य स्थितं दूरस्थं पातव्यं सोमं Vगौरात् गौरमृगादपि Vवेदीयान् अतिशयेन विद्वान् Vइन्द्रः Vसुतसोमम् अभिषुतसोमं यजमानम् Vइच्छन् अन्विच्छन् Vविश्वाहा विश्वान्यहानि Vइत् एव सर्वदैव Vयाति गच्छति । अतस्तस्मा इन्द्राय सोमं जुहुतेत्यन्वयः ॥

यद्धिषे प्रदिवि चार्वन्नं दिवेदिवे पीतिमिदस्य वक्षि ।
उत हृदोत मनसा जुषाण उशन्निन्द्र प्रस्थितान्पाहि सोमान् ॥ २ ॥

यत् । दधिषे । प्रऽदिवि । चारु । अन्नम् । दिवेऽदिवे । पीतिम् । इत् । अस्य । वक्षि ।
उत । हृदा । उत । मनसा । जुषाणः । उशन् । इन्द्र । प्रऽस्थितान् । पाहि । सोमान् ॥२॥

हे इन्द्र Vप्रदिवि प्रगतेषु दिवसेषु पूर्वस्मिन् काले Vचारु शोभनं Vयत् सोमलक्षणम् Vअन्नं Vदधिषे पानेनोदरे धारयसि Vअस्य सोमस्य Vपीतिमित् पानमेव Vदिवेदिवे प्रतिदिवसमिदानीमपि Vवक्षि कामयसे । 'वश कान्तौ' इत्यस्य सिपि शपो लुकि षत्वकत्वषत्वेष्वेतद्रूपम् । Vउत अपि च हे Vइन्द्र Vहृदा हृदयेन । उतशब्दश्चार्थे । Vमनसा च Vजुषाणः सेवमानः Vउशन् अस्मान् कामयमानस्त्वं Vप्रस्थितान् पुरस्ताच्चीतानुत्तरवेदिस्थान् Vसोमान् Vपाहि पिब ॥

जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानमुवाच ।
एन्द्र पप्राथोर्वन्तरिक्षं युधा देवेभ्यो वरिवश्चकर्थ ॥ ३ ॥

जज्ञानः । सोमम् । सहसे । पपाथ । प्र । ते । माता । महिमानम् । उवाच ।
आ । इन्द्र । पप्राथ । उरु । अन्तरिक्षम् । युधा । देवेभ्यः । वरिवः । चकर्थ ॥ ३ ॥

हे इन्द्र त्वं Vजज्ञानः जायमान एव Vसहसे बलाय Vसोमं Vपपाथ पीतवानसि । Vते तव Vमहिमानं महत्त्वं Vमाता त्वदीया जनन्यदितिः Vप्र Vउवाच प्रोक्तवती । संवादसूक्ते 'अयं पन्था' इत्यादिके 'नहीं त्वस्य' (ऋ. सं. ४. १८. ४) इत्यर्धर्चादारभ्य आदित्येन्द्रमहत्त्वस्योक्तत्वात् । अतः कारणात् हे Vइन्द्र त्वम् Vउरु विस्तीर्णम् Vअन्तरिक्षम् Vआ Vपप्राथ स्वतेजसापूरितवानसि । अपि च Vयुधा युद्धेन Vदेवेभ्यः स्तोतृभ्यो देवेभ्य एव वा Vवरिवः धनं Vचकर्थ कृतवानसि ॥

यद्योधया महतो मन्यमानान्त्साक्ष्मा तान्बाहुभिः शाशदानान् ।
यद्वा नृभिर्वृत इन्द्राभियुध्यास्तं त्वयाजिं सौश्रवसं जयेम ॥ ४ ॥

यत् । योधयाः । महतः । मन्यमानान् । साक्षाम । तान् । बाहुऽभिः । शाशदानान् ।
यत् । वा । नृऽभिः । वृतः । इन्द्र । अभिऽयुध्याः । तम् । त्वया । आजिम् । सौश्रवसम् । जयेम ॥ ४ ॥

हे इन्द्र ᵛमहतः प्रभूतान् ᵛमन्यमानान् शत्रून् ᵛयत् यदा ᵛयोधयाः अस्माभिर्योधयेः । तैः सह योद्धुं बलं प्रयच्छेरित्यर्थः । तदानीं ᵛशाशदानान् हिंसतः ᵛतान् शत्रून् ᵛबाहुभिः आयुधनिरपेक्षैर्हस्तैरेव[1] त्वत्प्रसादात् ᵛसाक्षाम सहेम अभिभवेम । ᵛयद्वा यदि वा हे ᵛइन्द्र ᵛनृभिः नेतृभिर्मरुद्भिः ᵛवृतः परिवृतस्त्वमेव ᵛअभियुध्याः अस्मदीयान्छत्रूनभियुध्येश्च ᵛसौश्रवसम् । अन्नोऽन्नं यशो वा । शोभनस्य श्रवसो हेतुं ᵛतम् ᵛआजिं संग्रामं ᵛत्वया सहायेन वयं ᵛजयेम ॥

प्रेन्द्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकार ।
यदेददेवीरसहिष्ट मायाऽथाभवत्केवलः सोमो अस्य ॥ ५ ॥

प्र । इन्द्रस्य । वोचम् । प्रथमा । कृतानि । प्र । नूतना । मघऽवा । या । चकार ।
यदा । इत् । अदेवीः । असहिष्ट । मायाः । अथ । अभवत् । केवलः । सोमः । अस्य ॥ ५ ॥

ᵛइन्द्रस्य ᵛकृतानि वीर्यकर्माणि ᵛप्रथमा प्रथमानि पुरातनानि ᵛप्र ᵛवोचं प्रब्रवीमि । ᵛमघवा धनवानिन्द्रः ᵛया यानि ᵛचकार कृतवान् ᵛनूतना नूतनान्यभिनवानि च तानि ᵛप्र वोचम् । ᵛयदेत् यदैव ᵛअदेवीः आसुरीः ᵛमायाः तैः कृतानि ᵛअसहिष्ट अभ्यभूत् ᵛअथ अनन्तरमेव ᵛअस्य इन्द्रस्य ᵛसोमः ᵛकेवलः असाधारणः ᵛअभवत् । तदाप्रभृत्येव सोमस्येन्द्रस्य चासाधारणः संबन्धो जात इत्यर्थः ॥

तवेदं विश्वमभितः पशव्यं यत्पश्यसि चक्षसा सूर्यस्य ।
गवामसि गोपतिरेक इन्द्र भक्षीमहि ते प्रयतस्य वस्वः ॥ ६ ॥

तव । इदम् । विश्वम् । अभितः । पशव्यम् । यत् । पश्यसि । चक्षसा । सूर्यस्य ।
गवाम् । असि । गोऽपतिः । एकः । इन्द्र । भक्षीमहि । ते । प्रऽयतस्य । वस्वः ॥ ६ ॥

हे इन्द्र ᵛपशव्यम् । पशवो द्विविधा द्विपादश्चतुष्पादश्च । तेभ्यो हितम् ᵛअभितः सर्वतो विद्यमानम् ᵛइदं ᵛविश्वं सर्वं जगत् ᵛतवेत् तवैव स्वभूतम् । ᵛसूर्यस्य प्रेरकस्यादित्यस्य ᵛचक्षसा तेजसा ᵛयत् विश्वं ᵛपश्यसि त्वं प्रकाशयसि । अपि च हे ᵛइन्द्र ᵛएकः एव त्वं ᵛगोपतिः ᵛअसि । न केवलमेकस्या एव गोः पतिः अपि तु सर्वासामित्याह ᵛगवाम् इति । अतः कारणात् ᵛते त्वया ᵛप्रयतस्य प्रत्तस्य । द्वितीयार्थे षष्ठी । प्रत्तं ᵛवस्वः धनं ᵛभक्षीमहि भजेमहि ॥

बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये चिद्युयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

बृहस्पते । युवम् । इन्द्रः । च । वस्वः । दिव्यस्य । ईशाथे इति । उत । पार्थिवस्य ।
धत्तम् । रयिम् । स्तुवते । कीरये । चित् । युयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

व्याख्यातेयम् । अक्षरार्थस्तु । हे ᵛबृहस्पते त्वं च ᵛइन्द्रश्च युवां ᵛदिव्यस्य ᵛपार्थिवस्य चोभयविधस्य धनस्येश्वरौ भवथः । तौ युवां ᵛस्तुवते स्तोत्रे धनं दत्तमिति ॥ ॥ २३ ॥

---

१. श–शक्तनिरपेक्षै° ।

'परो मात्रया' इति सप्तर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभम्। 'उरुं यज्ञाय' इत्याद्यास्तिस्र ऐन्द्रावैष्णव्यः शिष्टाः केवलविष्णुदेवताकाः। तथा चानुक्रान्तं—'परो वैष्णवं तूरुमित्यैन्द्राश्च तिस्रः' इति। गतः सूक्तविनियोगः। विष्णुदेवताके पशौ 'परो मात्रया' इति पुरोडाशस्य याज्या। सूत्रितं च—'परो मात्रया तन्वा वृधानेरावती धेनुमती हि भूतम्' (आश्व. श्रौ. ३. ८) इति॥

परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति।
उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से॥ १॥

परः। मात्रया। तन्वा। वधान। न। ते। महिऽत्वम्। अनु। अश्नुवन्ति।
उभे इति। ते। विद्म। रजसी इति। पृथिव्याः। विष्णो इति। देव। त्वम्। परमस्य। वित्से॥१॥

पर इति सकारान्तं परस्तादित्यस्यार्थे। परशब्दाच्छान्दसोऽसिप्रत्ययः 'परो दिवा पर एना पृथिव्या' (ऋ. सं. १०. ८२. ५) इति यथा। मात्रयेति व्यत्ययेन तृतीया। [v]मात्रया [v]परः परस्ताद्वर्तमानयापरिमितया [v]तन्वा शरीरेण [v]वृधान वर्धमान हे विष्णो [v]ते तव [v]महित्वं महत्त्वं [v]न [v]अन्वश्नुवन्ति नानुव्याप्नुवन्ति। त्रैविक्रमसमये यत्तव माहात्म्यं तत्सर्वैरपि जनैर्ज्ञातुं न शक्यत इत्यर्थः। [v]ते तव [v]उभे [v]रजसी उभौ लोकौ [v]पृथिव्याः आरभ्य पृथिवीमन्तरिक्षं च [v]विद्म जानीमः। वयं चक्षुषोपलभामहे नान्यत्। हे [v]देव द्योतमान [v]विष्णो [v]त्वम् एव [v]परमस्य स्वर्गादेरुत्कृष्टलोकस्य[1]। द्वितीयार्थे षष्ठी। परमं लोकं [v]वित्से जानासि। अतस्तव महत्त्वं[2] न केनापि व्याप्तुं शक्यमिति भावः॥

पूर्वोक्त एव पशौ 'न ते विष्णो' इति वपाया अनुवाक्या। सूत्रितं च—'न ते विष्णो जायमानो न जातस्त्वं विष्णो सुमतिं विश्वजन्याम्' (आश्व. श्रौ. ३. ८) इति॥

न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप।
उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृथिव्याः॥ २॥

न। ते। विष्णो इति। जायमानः। न। जातः। देव। महिम्नः। परम्। अन्तम्। आप।
उत्। अस्तभ्नाः। नाकम्। ऋष्वम्। बृहन्तम्। दाधर्थ। प्राचीम्। ककुभम्। पृथिव्याः॥२॥

हे [v]देव दानादिगुणयुक्त [v]विष्णो [v]ते तव [v]महिम्नः महत्त्वस्य [v]परं विप्रकृष्टम् [v]अन्तम् अवसानं [v]जायमानः प्रादुर्भवन्नपि [v]न [v]आप न प्राप्नोति। तथा [v]जातः प्रादुर्भूतोऽपि जनः [v]न एव प्राप्नोति। तव महत्त्वस्यावसानं नास्ति। अत एव सर्वैर्न ज्ञायत इति भावः। कोऽसौ महिमा तमाह। [v]ऋष्वं दर्शनीयं [v]बृहन्तं महान्तं [v]नाकं द्युलोकम् [v]उदस्तभ्नाः त्वमूर्ध्वमधारयः। यथाद्यो न पतति तथा। [v]पृथिव्याः भूमेः संबन्धिनीं [v]प्राचीं [v]ककुभं च [v]दाधर्थ धारितवानसि। उपलक्षणमेतत् सर्वस्य भूतजातस्य। तथा च मन्त्रान्तरं—'य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा' (ऋ. सं. १. १५४. ४) इति॥

पूर्वोक्त एव पशौ 'इरावती' इति हविषो याज्या। सूत्रितं च—'इरावती धेनुमती हि भूतं विश्वकर्मन्हविषा वावृधान इति द्वे' (आश्व. श्रौ. ३. ८) इति॥

इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या।
व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः॥ ३॥

---

१. ख-श-°ष्टस्य लोकस्य। २. त३-श-माहात्म्यं।

इरावती इतीरा॑ऽवती । धेनुमती इति॑ धेनु॑ऽमती॑ । हि । भूतम् ।
सूयवसिनी इति॑ सु॒ऽय॒व॒सिनी॑ । मनु॑षे । दशस्या ।
वि । अस्त॑भ्नाः । रोदसी॒ इति॑ । विष्णो॒ इति॑ । एते इति॑ । दाधर्थ॑ । पृथि॒वीम् । अभि॑तः । मयू॒खैः॥३॥

हे द्यावापृथिव्यौ ᵛमनुषे स्तुवते मनुष्याय ᵛदशस्या दित्सया युक्ते युवाम् ᵛइरावती अन्नवत्यौ ᵛधेनुमती गोमत्यौ ᵛसूयवसिनी शोभनयवसे च ᵛभूतम् अभूतम् । हिशब्दः प्रसिद्धौ । विष्णुना विक्रान्तत्वाद्युवाम् एवमेव[1] खलु पूर्वमभूतमित्यर्थः । हे ᵛविष्णो ᵛएते इमे ᵛरोदसी द्यावापृथिव्यौ ᵛव्यस्तभ्नाः विविधमधारयः । पृथिवीमूर्ध्वमुखत्वेन द्यामधोमुखत्वेनेति[2] विविधत्वम् । अपि च ᵛपृथिवीं प्रथितामिमां भूमिम् ᵛअभितः सर्वत्र स्थितैः ᵛमयूखैः पर्वतैः[3] ᵛदाधर्थ धारितवानसि । यथा न चलति तथा दृढीकृतवानित्यर्थः । पर्वता हि विष्णोः स्वभूताः । ' विष्णुः पर्वतानामधिपतिः ' (तै. सं. ३. ४. ५. १) इति श्रुतेः ॥

उ॒रुं य॒ज्ञाय॑ चक्रथुरु॒ लोकं॑ ज॒नय॑न्ता॒ सूर्यं॑मु॒षास॑म॒ग्निम् ।
दास॑स्य चिद्वृषशि॒प्रस्य॑ मा॒या ज॒घ्नथु॑र्नरा पृ॒तना॒ज्येषु ॥ ४ ॥

उ॒रुम् । य॒ज्ञाय॑ । च॒क्र॒थुः॒ । ऊँ इति॑ । लो॒कम् । ज॒नय॑न्ता । सूर्य॑म् । उ॒षस॑म् । अ॒ग्निम् ।
दास॑स्य । चि॒त् । वृ॒ष॒ऽशि॒प्रस्य॑ । मा॒याः॒ । ज॒घ्नथुः॒ । नरा॒ । पृ॒तना॒ऽज्येषु ॥ ४ ॥

हे इन्द्राविष्णू ᵛयज्ञाय यजमानाय ᵛउरु विस्तीर्णं ᵛलोकं स्वर्गाख्यं ᵛचक्रथुरु[4] कृतवन्तौ[5] खलु युवाम् । किं कुर्वन्तौ । ᵛसूर्यं सर्वस्य प्रेरकमादित्यम् ᵛउषसं तमोनिवारकमुषःकालम् ᵛअग्निं चासुरैरावृतं जनयन्तौ[6] पुनः प्रादुर्भावयन्तौ । हे ᵛनरा नेतारावित्राविष्णू ᵛवृषशिप्रस्य एतत्संज्ञस्य ᵛदासस्य ᵛचित् उपक्षपयितुरसुरस्य ᵛमायाः ᵛपृतनाज्येषु संग्रामेषु ᵛजघ्नथुः जिहिंसथुः । युवां सूर्यादिकं जनयन्तावित्युच्यते ॥

इन्द्रा॑विष्णू दृंहि॒ताः शम्ब॑रस्य॒ नव॒ पुरो॑ नव॒तिं च॑ श्नथिष्टम् ।
श॒तं व॒र्चिनः॑ स॒हस्रं॑ च सा॒कं ह॒थो अप्र॑त्यसु॒रस्य॑ वी॒रान् ॥ ५ ॥

इन्द्रा॑विष्णू॒ इति॑ । दृं॒हि॒ताः । शम्ब॑रस्य । नव॑ । पुरः॑ । न॒व॒तिम् । च॒ । श्न॒थि॒ष्ट॒म् ।
श॒तम् । व॒र्चिनः॑ । स॒हस्र॑म् । च॒ । सा॒कम् । ह॒थः । अप्र॑ति । असु॒रस्य॑ । वी॒रान् ॥ ५ ॥

हे ᵛइन्द्राविष्णू ᵛदृंहिताः दृढीकृताः ᵛनव ᵛनवतिं ᵛच नवोत्तरनवतिसंख्याकाः ᵛपुरः पुराणि ᵛशम्बरस्य स्वभूतानि ᵛश्नथिष्टम् अहिंसिष्टम् । ' श्नथ हिंसायाम् '। अपि च ᵛशतं ᵛसहस्रं ᵛच ᵛवर्चिनः ᵛअसुरस्य ᵛवीरान् ᵛअप्रति प्रतिद्वन्द्विनो यथा न भवन्ति तथा ᵛसाकं सह संघश एव ᵛहथः अहिंसिष्टम् । ' यो वर्चिनः शतमिन्द्रः सहस्रम् ' । (ऋ. सं. २. १४. ६) इति हि निगमान्तरम् ॥

इ॒यं म॑नी॒षा बृ॒ह॒ती बृ॒ह॒न्तो॒रु॒क्रमा तु॒वसा॑ वर्धयन्ती ।
रे॒रे वां॑ स्तो॒मं वि॒दथे॑षु विष्णो पिन्व॒तमि॑षो वृ॒जने॑ष्विन्द्र ॥ ६ ॥

---

१. ख-घ-एव; झ-श१-एवमेवं; न-एमेवं; श२-एवं । २. ख-झ-त३-४-न-श-इति । ३. ख-झ-त-न-भ-श-' पर्वतैः ' नास्ति । ४. ख-चक्रथुः; घ-झ-त-न-श-चक्रथुः उरु° । ५. घ-त-क्रमवंतौ । ६. झ-त१-२-य-जनयंता जनयंतौ ।

इयम् । मनीषा । बृहती । बृहन्ता । उरुऽक्रमा । तवसा । वर्धयन्ती ।
ररे । वाम् । स्तोमम् । विदथेषु । विष्णो इति । पिन्वतम् । इषः । वृजनेषु । इन्द्र ॥ ६ ॥

[v]बृहती महती [v]इयं [v]मनीषा मननीया स्तुतिः [v]बृहन्ता बृहन्तौ महान्तौ [v]उरुक्रमा विस्तीर्णविक्रमौ । विष्णुना सहैकार्थीभावादिन्द्रस्याप्युरुक्रमत्वम् । [v]तवसा । तव इति बलस्य वृद्धेर्वा नामधेयम् । तदन्तावेवंभूतौ युवां [v]वर्धयन्ती प्रवृद्धौ कुर्वत्यस्माभिः कृता । हे [v]विष्णो हे [v]इन्द्र [v]विदथेषु यज्ञेषु [v]वां युवाभ्यां [v]स्तोमम् उक्तलक्षणं स्तोत्रं [v]ररे ददे । ' रा दाने ' इति धातुः । तौ युवां [v]वृजनेषु[1] [v]इषः अन्नानि [v]पिन्वतम् अस्मभ्यं वर्धयतम् ॥

अभ्युदयेष्टौ विष्णोः शिपिविष्टस्य ' वषट् ते ' इत्येषानुवाक्या । सूत्रितं च—' भद्रा ते हस्ता सुकृतोत पाणी वषट् ते विष्णवास आ कृणोमि ' (आश्व. श्रौ. ३. १३) इति ॥

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

वषट् । ते । विष्णो इति । आसः । आ । कृणोमि । तत् । मे । जुषस्व । शिपिऽविष्ट । हव्यम् ।
वर्धन्तु । त्वा । सुऽस्तुतयः । गिरः । मे । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ७ ॥

हे [v]विष्णो [v]ते तुभ्यम् [v]आसः आस्यात् [v]आ अभिमुखं [v]वषट् [v]कृणोमि करोमि[2] । वषट्कारेण हविर्हावयामि । हे [v]शिपिविष्ट । शिपयो रश्मयः । तैराविष्ट विष्णो [v]तत् वषट्कृतं [v]मे मदीयं [v]हव्यं हविः [v]जुषस्व सेवस्व । [v]सुष्टुतयः शोभनस्तुत्यात्मिकाः [v]गिरः वाचश्च त्वां [v]वर्धन्तु वर्धयन्तु । अन्यद्व्रतम् ॥ ॥ २४ ॥

' नू मर्तः ' इति सप्तर्चमेकादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैष्णवम् । ' नू मर्तः ' इत्यनुक्रान्तम् । उक्थ्ये[3] अच्छावाकशस्त्र इदं[4] शंसनीयम् । सूत्रितं च—' ऋतुर्जनित्री नू मर्तो भवा मित्रः ' (आश्व. श्रौ. ६. १) इति ॥

नू मर्तो दयते सनिष्यन्यो विष्णव उरुगायाय दाशत् ।
प्र यः सत्राचा मनसा यजात एतावन्तं नर्यमाविवासात् ॥ १ ॥

नु । मर्तः । दयते । सनिष्यन् । यः । विष्णवे । उरुऽगायाय । दाशत् ।
प्र । यः । सत्राचा । मनसा । यजाते । एतावन्तम् । नर्यम् । आऽविवासात् ॥ १ ॥

सः [v]मर्तः मनुष्यः [v]सनिष्यन् धनमिच्छन् [v]नु क्षिप्रं [v]दयते धनमादत्ते । दयतिराङ्पूर्वार्थे द्रष्टव्यः । [v]यः मनुष्यः [v]उरुगायाय बहुभिः कीर्तनीयाय [v]विष्णवे [v]दाशत् हवींषि दद्यात् । [v]यः च [v]सत्राचा सहाञ्चता [v]मनसा मननेन स्तोत्रेण [v]प्र [v]यजाते प्रकर्षेण पूजयेत् [v]एतावन्तम् एतावत्परिमाणं महान्तं [v]नर्यं नरेभ्यो हितं विष्णुम् [v]आविवासात् नमस्कारादिभिः परिचरेत् । स मर्तो दयत इत्यन्वयः । यद्वा । सनिष्यन्निति सनतेर्लाभार्थस्य लटि[5] रूपम् । स मर्तः सनिष्यन् धनादीनि लप्स्यमानो भवन्नेव हविरादिकं नु क्षिप्रं दयते विष्णवे ददातीति योज्यम् ॥

---

१. घ—वृजनेषु आपत्सु; त१-२—वृजनेषु बलेषु निमित्तसप्तमी; श—वृजनेषु संग्रामेषु । २. ज्ञ-त-श—वषट् करोमि । ३. ज्ञ-त-न-भ-श—उक्थे । ४. ज्ञ—इदं सूक्तं । ५. ख-न-लिटि; ज्ञ-त-श—लटि ।

विष्णुदेवत्ये पशौ पुरोडाशस्य 'त्वं विष्णो' इत्यनुवाक्या। सूत्रितं च—'त्वं विष्णो सुमतिं विश्वजन्यां वि चक्रमे पृथिवीमेष एताम्' (आश्व. श्रौ. ३. ८) इति ॥

त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतामेवयावो मतिं दाः ।
पर्चो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चन्द्रस्य रायः ॥ २ ॥

त्वम् । विष्णो इति । सुऽमतिम् । विश्वऽजन्याम् । अप्रऽयुताम् । एवऽयावः । मतिम् । दाः । पर्चः । यथा । नः । सुवितस्य । भूरेः । अश्वऽवतः । पुरुऽचन्द्रस्य । रायः ॥ २ ॥

हे ᵛएवयावः । एवाः प्राप्तव्याः कामाः । तान् यापयति प्रापयति स्तोतृनित्येवयावा । हे एवयावन् ᵛविष्णो ᵛत्वं ᵛविश्वजन्यां सर्वजनहिताम् ᵛअप्रयुतां दोषैर्वियुक्तां ᵛसुमतिम् अनुग्रहबुद्धिं ᵛदाः अस्मभ्यं देहि । ᵛसुवितस्य सुष्ठु प्राप्तव्यस्य ᵛभूरेः बहुलस्य ᵛअश्वावतः अश्वयुक्तस्य ᵛपुरुश्चन्द्रस्य पुरूणां बहूनामाह्लादकस्य ᵛरायः धनस्य ᵛपर्चः संपर्कः ᵛनः अस्माकं ᵛयथा भवति तथा देहीत्यन्वयः ॥

वैष्णवस्योपांशुयाजस्य 'त्रिर्देवः' इति याज्या। सूत्रितं च—'इदं विष्णुर्वि चक्रमे त्रिर्देवः पृथिवीमेष एताम्' (आश्व. श्रौ. १. ६) इति। वैष्णवे पशावप्येषैव वपाया याज्या। सूत्रितं च—'त्रिर्देवः पृथिवीमेष एतां परो मात्रया तन्वा वृधान' (आश्व. श्रौ. ३. ८) इति ॥

त्रिर्देवः पृथिवीमेष एतां वि चक्रमे शतर्चसं महित्वा ।
प्र विष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्य स्थविरस्य नाम ॥ ३ ॥

त्रिः । देवः । पृथिवीम् । एषः । एताम् । वि । चक्रमे । शतऽअर्चसम् । महिऽत्वा ।
प्र । विष्णुः । अस्तु । तवसः । तवीयान् । त्वेषम् । हि । अस्य । स्थविरस्य । नाम ॥ ३ ॥

ᵛएषः ᵛदेवः दानादिगुणयुक्तो विष्णुः ᵛशतर्चसं शतसंख्यान्यर्चींषि यस्यास्तादृशीम् ᵛएतां ᵛपृथिवीम् । उपलक्षणमेतत् । पृथिव्यादींस्त्रीँल्लोकान् ᵛमहित्वा महत्त्वेन ᵛत्रिः ᵛवि ᵛचक्रमे त्रिभिः पदैर्विक्रान्तवान् । ᵛतवसः तवस्विनो वृद्धादपि ᵛतवीयान् तवस्वितरः ᵛविष्णुः ᵛप्र ᵛअस्तु अस्माकं प्रभवतु स्वामी भवतु । ᵛअस्य ᵛस्थविरस्य वृद्धस्य विष्णोः ᵛनाम नामकं रूपं विष्णुरित्येतन्नामैव वा ᵛत्वेषं ᵛहि यस्माद्दीप्तं तस्मात्कारणात् स विष्णुः प्रभवत्वित्यर्थः ॥

पूर्वोक्त एव पशौ 'वि चक्रमे' इति वपाया अनुवाक्या। सूत्रितं च—'वि चक्रमे पृथिवीमेष एतां त्रिर्देवः पृथिवीमेष एताम्' (आश्व. श्रौ. ३. ८) इति ॥

वि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् ।
ध्रुवासो अस्य कीरयो जनासः उरुक्षितिं सुजनिमा चकार ॥ ४ ॥

वि । चक्रमे । पृथिवीम् । एषः । एताम् । क्षेत्राय । विष्णुः । मनुषे । दशस्यन् ।
ध्रुवासः । अस्य । कीरयः । जनासः । उरुऽक्षितिम् । सुऽजनिमा । चकार ॥ ४ ॥

ᵛएषः देवः ᵛविष्णुः ᵛएतां ᵛपृथिवीं पृथिव्यादीनिमांस्त्रीँल्लोकान् ᵛक्षेत्राय निवासार्थं ᵛमनुषे स्तुवते देवगणाय ᵛदशस्यन् असुरेभ्योऽपहृत्य प्रदास्यन् ᵛवि ᵛचक्रमे विक्रान्तवान् । ᵛअस्य च विष्णोः ᵛकीरयः स्तोतारः ᵛजनासः जनाः ᵛध्रुवासः निश्चला भवन्ति । ऐहिकामुष्मिकयोर्लाभेन स्थिरा भवन्तीत्यर्थः । ᵛसुजनिमा शोभनानि जनिमानि कीर्तनस्मरणादिना सुखहेतुभूतानि यस्य तादृशो विष्णुः ᵛउरुक्षितिं विस्तीर्णनिवासं ᵛचकार स्तोतृभ्यः करोति ॥

तृतीयसवनेऽतिरात्रादूर्ध्वं सोमातिरेके सति नैमित्तिके होतुः शस्त्रे ' प्र तत्ते अद्य ' इति स्तोत्रियस्तृचः (आश्व. श्रौ. ६. ७)। अभ्युदयेष्टौ विष्णोः शिपिविष्टस्य ' प्र तत्ते अद्य ' इति याज्या। सूत्रितं च—' वषट् ते विष्णवास आ कृणोमि प्र तत्ते अद्य शिपिविष्ट नाम ' (आश्व. श्रौ. ३. १३) इति ॥

प्र तत्ते॑ अ॒द्य शि॑पिविष्ट॒ नामा॒र्यः शं॑सामि व॒युना॑नि वि॒द्वान् ।
तं त्वा॑ गृणामि तु॒वस॒मत॑व्या॒न्क्षय॑न्त॒मस्य॒ रज॑सः परा॒के ॥ ५ ॥

प्र । तत् । ते॒ । अ॒द्य । शि॒पि॒ऽवि॒ष्ट॒ । नाम॑ । अ॒र्यः । शं॒सा॒मि॒ । व॒युना॑नि । वि॒द्वान् ।
तम् । त्वा॒ । गृ॒णा॒मि॒ । तु॒वस॑म् । अत॑व्यान् । क्षय॑न्तम् । अ॒स्य॒ । रज॑सः । प॒रा॒के ॥ ५ ॥

हे ᵛशिपिविष्ट रश्मिभिराविष्ट विष्णो ᵛते तव ᵛतत् प्रसिद्धं विष्णुरिति प्रख्यातं ᵛनाम ᵛअर्यः स्वामी स्तुतीनां हविषां वा तथा ᵛवयुनानि ज्ञातव्यान्यर्थजातानि ᵛविद्वान् जानन्नहम् ᵛअद्य इदानीं ᵛप्र ᵛशंसामि प्रकर्षेण स्तौमि । ᵛतवसं प्रवृद्धं ᵛतं ᵛत्वा त्वां विष्णुम् ᵛअतव्यान् अतवीयानवृद्धतरोऽहं ᵛगृणामि स्तौमि । कीदृशम् । ᵛअस्य ᵛरजसः लोकस्य ᵛपराके दूरदेशे ᵛक्षयन्तं निवसन्तम् ॥

किमि॒त्ते॑ विष्णो परि॒चक्ष्यं॑ भू॒त्प्र यद्ब॒वक्षे॑ शिपिवि॒ष्टो अ॑स्मि ।
मा वर्पो॑ अ॒स्मदप॑ गूह॒ एत॒द्यद॒न्यरू॑पः स॒मि॒थे ब॒भूथ॑ ॥ ६ ॥

किम् । इत् । ते॒ । वि॒ष्णो॒ इति॑ । प॒रि॒ऽच॒क्ष्य॑म् । भू॒त् । प्र । यत् । ब॒वक्षे । शि॒पि॒ऽवि॒ष्टः । अ॒स्मि॒ ।
मा । वर्पः॑ । अ॒स्मत् । अप॑ । गू॒हः॒ । ए॒तत् । यत् । अ॒न्यऽरू॑पः । स॒म्ऽइ॒थे । ब॒भूथ॑ ॥ ६ ॥

पुरा खलु विष्णुः स्वं रूपं परित्यज्य कृत्रिमं रूपान्तरं धारयन् संग्रामे वसिष्ठस्य साहाय्यं चकार। तं जानन्नृषिरनया प्रत्याचष्टे। अत्र निरुक्तं—' शिपिविष्टो विष्णुरिति विष्णोर्ह्वं नामनी भवतः। कुत्सितार्थीयं पूर्वं भवतीत्यौपमन्यवः। किं ते विष्णो प्रख्यातमेतद्भवत्यप्रख्यापनीयं यन्नः प्रब्रूषे शेप इव निर्वेष्टितोऽस्मीत्यप्रतिपन्नरश्मिः। अपि वा प्रशंसानामैवाभिप्रेतं स्यात्। किं ते विष्णो प्रख्यातमेतद्भवति प्रख्यापनीयं यदुत प्रब्रूषे शिपिविष्टोऽस्मीति प्रतिपन्नरश्मिः। शिपयोऽत्र रश्मय उच्यन्ते तैराविष्टो भवति। मा वर्पो अस्मदप गूह एतत्। वर्प इति रूपनाम वृणोतीतीति सतः। यदन्यरूपः समिथे संग्रामे भवसि संयतरश्मिः ' (निरु. ५. ७-८) इति। तत्र। कुत्सितार्थपक्षे योजना। हे ᵛविष्णो ᵛते तव तन्नाम ᵛकिं ᵛपरिचक्ष्यं प्रख्यापनीयं ᵛभूत् भवति। किंशब्दः क्षेपे। अप्रख्यापनीयमेव[1] तद्भवति[1]। ᵛयत् नामास्मभ्यं ᵛप्र ᵛबवक्षे प्रब्रूषे ᵛशिपिविष्टोऽस्मि इति। अन्तर्णीतोपमानमेतत्। शेप इव निर्वेष्टितस्तेजसानाच्छादितो भवामीति[2]। तदश्लीलार्थत्वादिदं नाम न प्रशस्तमित्यर्थः। तन्नाम किं परिचक्ष्यं वर्जनीयं परित्याज्यम्। विरुद्धार्थप्रतिपादकत्वात् स्वत एव परित्यक्तं हि तत्। शिष्टं समानं पूर्वेण। अत उक्तरूपविलक्षणं यद्वैष्णवरूपमस्ति ᵛएतत् ᵛवर्पः रूपम् ᵛअस्मत् अस्माकं ᵛमा ᵛअप ᵛगूहः अपगूढं संवृतं मा कुरु। ' गुहू संवरणे '। अपि तु तदेव रूपं प्रकटय। वैष्णवस्य रूपस्य गूहने का प्रसक्तिरिति चेत्। ᵛयत् यस्मात् ᵛअन्यरूपः रूपान्तरमेव धारयन् ᵛसमिथे संग्रामे ᵛबभूथ अस्माकं सहायो भवसि तस्मादिदं गूहनं न कार्यमिति। प्रशंसापक्षे तु। हे विष्णो ते तव तन्नाम किं परिचक्ष्यं भूत् किं प्रख्यापनीयं भवति। न प्रख्यापनीयम्। किं तन्नाम। शिपिविष्टो रश्मिभिराविष्टोऽस्मीति यन्नाम प्रब्रूषे। यत एवं प्रख्यातरूपस्त्वमतोऽस्माकमेतद्वैष्णवं रूपं संवृतं मा कार्षीः। इदानीं गूढरूपोऽपि यद्यस्मास्त्वं समिथे संग्रामेऽन्यरूपः कृत्रिमरूपं

---

१. ख-ङ्ग-न-भ-°नीयमेतद्भ°। २. ङ्ग-त१-४-भवतीति; ङ्ग-श-भवानीति।

यदन्यद्वैष्णवं रूपं शौर्यादिलक्षणं तादृग्रूप एव बभूथ भवसि तस्मात्त्वं गूढोऽपि ज्ञायस एवेति व्यर्थमेव तस्य रूपस्य गूहनम्। अतो बहुतेजस्कं यद्वैष्णवं रूपं तदस्माकं प्रदर्शयेति तात्पर्यार्थः ॥

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

वषट्। ते। विष्णो इति। आसः। आ। कृणोमि। तत्। मे। जुषस्व। शिपिऽविष्ट। हव्यम्। वर्धन्तु। त्वा। सुऽस्तुतयः। गिरः। मे। यूयम्। पात। स्वस्तिऽभिः। सदा। नः ॥ ७ ॥

व्याख्यातेयम्। अक्षरार्थस्तु। हे विष्णो तुभ्यमास्यादास्येन वषट्करोमि। वषट्कृतं तन्मदीयं[1] हविर्हे शिपिविष्ट सेवस्व। शोभनस्तुतिरूपा मदीया वाचश्च त्वां वर्धयन्त्विति। शिष्टः पादः सिद्धः ॥ ॥ २५ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पञ्चमाष्टके षष्ठोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ सप्तमो व्याख्यायते। सप्तममण्डलस्य षष्ठेऽनुवाक एकादश सूक्तानि व्याख्यातानि। 'तिस्रो वाचः' इति षड्चं द्वादशं सूक्तम्। अत्रानुक्रम्यते—'तिस्रः षट् पार्जन्यं[2] तु[3]' इति। 'एते कुमार आग्नेयोऽपश्यद्वसिष्ठ एव वा[4]' इति वक्ष्यमाणत्वादग्निपुत्रः कुमार ऋषिर्वसिष्ठो वा। अनुक्तत्वात् त्रिष्टुप्। इदमुत्तरं च पर्जन्यदेवत्यम्। अत्र शौनकः—'आस्थदग्नं विगाह्यापः प्राङ्मुखः प्रयतः शुचिः। सूक्ताभ्यां[5] तिस्र आदिभ्यामुपतिष्ठेत भास्करम्[6] ॥ अनभ्रतैतज्जपत्यं वृष्टिकामेन यत्नतः। पञ्चरात्रेऽप्यतिक्रान्ते महतीं वृष्टिमाप्नुयात् ॥' (ऋग्वि. २. ३२६–२७) इति ॥

तिस्रो वाचः प्र वद ज्योतिरग्रा या एतदुहे मधुदोघमूधः ।
स वत्सं कृण्वन्गर्भमोषधीनां सद्यो जातो वृषभो रोरवीति ॥ १ ॥

तिस्रः। वाचः। प्र। वद। ज्योतिःऽअग्राः। याः। एतत्। दुहे। मधुऽदोघम्। ऊधः। सः। वत्सम्। कृण्वन्। गर्भम्। ओषधीनाम्। सद्यः। जातः। वृषभः। रोरवीति ॥ १ ॥

---

१. ख-भ-अस्मदीयं। २. ज्ञ-त१(प्रान्ते)-पर्जन्याय तृचं गायत्रं द्वितीया पादनिचृत्। ३. ज्ञ-त१(प्रान्ते)-वा वृष्टिकामः संवत्सरं दश पर्जन्यस्तुतिः संहृष्टान् मण्डूकांस्तुष्टावाद्या त्रिष्टुप्; श-वा वृष्टिकामः। ४. ख-सूक्तानि तिस्रादादित्यमुपतिष्ठेत भास्करं; ज्ञ-सूक्तानि तिस्र एताभ्यामुपतिष्ठेत भास्करं; त१-सूक्तानि तिस्र आदिभ्यामुपतिष्ठेत भास्करं एताभ्यां; न-श-सूक्तानि तिस्र आदित्यामुपतिष्ठेत भास्करं; भ-सूक्तानि तिस्रादादित्यामुपतिष्ठेत भास्करं।

ऋषिरात्मानं स्तुतौ प्रेरयति। हे ऋषे vतिस्रः त्रिविधा ऋग्यजुःसामात्मिकाः स्तुतिरूपाः vवाचः vप्र vवद प्रब्रूहि[1]। कीदृश्यो वाचः। vज्योतिरग्राः। ज्योतिर्द्योतमानः प्रणवोऽग्रे प्रमुखो यासां तादृशीः। vयाः वाचः vमधुदोघं मधुन उदकस्य दोहकं वृष्ट्युदकस्य कर्तारम् vएतत् नभसि दृश्यमानम् vऊधः उद्धतं[2] मेघम्। यद्वा। लुप्तोपममेतत्। ऊध इव पयस आश्रयभूतं मेघं vदुहे दुहते। दुहेर्लटि 'लोपस्त आत्मनेपदेषु' (पा. सू. ७. १. ४१) इति तलोपः। बाहुलको रुट्। स्तोत्रैः प्रीतो हि पर्जन्यो मेघैर्वर्षयति। अतो वाच एव[3] दुहन्तीत्युपचर्यते। यद्वा। वदेति व्यत्ययेन मध्यमः। तिस्र इति द्रुतविलम्बितमध्यमभेदेन त्रिविधा ज्योतिरग्रा विद्युत्प्रमुखा वाचः प्रवदेतेति[4]। या गर्जितलक्षणा वाचो वृष्टिप्रदमेतं मेघं दुहे उदकानि दुहन्ति। एवंभूतः vसः च पर्जन्यः vवत्सं सह निवसन्तं वैद्युताग्निं vकृण्वन् प्रादुष्कुर्वन् तमेव vओषधीनां व्रीह्यादीनां च vगर्भं कुर्वन् vसद्यः झटिति vजातः प्रादुर्भूतः vवृषभः वर्षिता सन् vरोरवीति भृशं शब्दायते ॥

यो वर्धेन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे ।
स त्रिधातु शरणं शर्म यंसत्त्रिवर्तु ज्योतिः स्वभिष्टय[1] अस्मे ॥ २ ॥

यः । वर्धनः । ओषधीनाम् । यः । अपाम् । यः । विश्वस्य । जगतः । देवः । ईशे ।
सः । त्रिऽधातु । शरणम् । शर्म । यंसत् । त्रिऽवर्तु । ज्योतिः । सुऽअभिष्टि । अस्मे इति ॥२॥

vयः पर्जन्यः vओषधीनां vवर्धनः वर्धयिता। vयः च vअपाम् उदकानां वर्धकः। vयः च vदेवः द्योतमानः पर्जन्यः vविश्वस्य सर्वस्य vजगतः vईशे ईष्टे। 'लोपस्त आत्मनेपदेषु' इति तलोपः। 'अधीगर्थ°' (पा. सू. २. ३. ५२) इति कर्मणि शेषत्वेन विवक्षिते षष्ठी। अनुदात्तेत्त्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः। 'थड्वृत्तान्नित्यम्' इति निघातप्रतिषेधः। vसः पर्जन्यः vत्रिधातु त्रिभूमिकं vशरणं गृहं vशर्म सुखं च vयंसत् यच्छतु। अस्मभ्यं ददात्वित्यर्थः॥ यमेर्लेट्यडागमः। 'सिब्बहुलम्°' इति सिप्। 'इतश्च लोपः°' इतीकारलोपः। तथा vत्रिवर्तु त्रिषु ऋतुषु अतिशयेन वर्तमानम्। श्रूयते हि—'त्रीणि वा आदित्यस्य तेजांसि वसन्ता[5] प्रातर्ग्रीष्मे मध्यंदिने शरद्यपराह्णे' (तै. सं. २. १. २. ५) इति। एवंविधं vस्वभिष्टि स्वभ्येषणं vज्योतिः तेजश्च vअस्मे अस्मभ्यं प्रयच्छतु ॥

स्तरीरु त्वद्वदति सूत उ त्वद्यथावशं तन्वं चक्र एषः ।
पितुः पयः प्रति गृभ्णाति माता तेन पिता वर्धते तेन पुत्रः ॥ ३ ॥

स्तरीः । ऊँ इति । त्वत् । वदति । सूते । ऊँ इति । त्वत् । यथाऽवशम् । तन्वम् । चक्रे । एषः ।
पितुः । पयः । प्रति । गृभ्णाति । माता । तेन । पिता । वर्धते । तेन । पुत्रः ॥ ३ ॥

त्वदिति तकारान्तोऽन्यशब्दपर्यायोऽनुदात्तः सर्वनामसु पठितः। अस्य पर्जन्यस्य vत्वत् अन्यद्रूपं vस्तरीः निवृत्तप्रसवा गौः सा यथा न दोग्ध्री तद्वद्वर्षुकं न vभवति। vउ इति पूरकः। द्वितीय उशब्दश्चार्थे। vत्वत् अन्यच्च रूपं vसूते धेनुवत्प्रसूते। उदकानि प्रवर्षति। vएषः पर्जन्यः vतन्वं स्वकीयं शरीरं vयथावशं यथाकामं स्तरीत्वेन धेनुत्वेन च vचक्रे करोति। अपि च vपितुः दिवः सकाशात् vपयः वृष्ट्युदकं vमाता पृथिवी vप्रति vगृभ्णाति प्रतिगृह्णाति। 'ह्मह्रोर्भः'

---

१. ख–प्रकथय; न-भ–प्रकथ्य। २. त३–उद्वतं। ३. त–एवं। ४. ख-त३-न-भ–प्रवदतेति। ५. ग-त-न-भ–वसंते।

इति भत्वम्। प्रतिगृहीतेन ᵛतेन हविरात्मना परिणतेन ᵛपिता द्युलोकः ᵛवर्धते। ᵛतेन एवोदकेन ᵛपुत्रः पृथिव्यां भवः प्राणिसंघोऽपि वर्धते ॥

यस्मिन्विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः।
त्रयः कोशास उपसेचनासो मध्वः श्चोतन्त्यभितो विरप्शम् ॥ ४ ॥

यस्मिन्। विश्वानि। भुवनानि। तस्थुः। तिस्रः। द्यावः। त्रेधा। सस्रुः। आपः।
त्रयः। कोशासः। उपऽसेचनासः। मध्वः। श्चोतन्ति। अभितः। विऽरप्शम्॥ ४ ॥

ᵛयस्मिन् पर्जन्ये ᵛविश्वानि ᵛभुवनानि सर्वाणि भूतजातानि ᵛतस्थुः तिष्ठन्ति। यदधीनवृत्तीनि भवन्तीत्यर्थः। यस्मिंश्च ᵛद्यावः[1] द्युप्रभृतयो लोका अवतिष्ठन्ते। यस्माच्च ᵛआपः ᵛत्रेधा ᵛसस्रुः प्राच्यः प्रतीच्योऽवाच्यश्च सत्यो निर्गच्छन्ति। ᵛउपसेचनासः उपसेक्तारः ᵛत्रयः पौरस्त्यः प्रतीच्य उदीच्यश्चेति त्रिप्रकाराः ᵛकोशासः मेघाः ᵛविरप्शं महान्तं पर्जन्यम् ᵛअभितः परितः ᵛमध्वः। कर्मणि षष्ठी। मधूदकं ᵛश्चोतन्ति क्षारयन्ति वर्षन्ति ॥

इदं वचः पर्जन्याय स्वराजे हृदो अस्त्वन्तरं तज्जुजोषत्।
मयोभुवो वृष्टयः सन्त्वस्मे सुपिप्पला ओषधीर्देवगोपाः ॥ ५ ॥

इदम्। वचः। पर्जन्याय। स्वऽराजे। हृदः। अस्तु। अन्तरम्। तत्। जुजोषत्।
मयःऽभुवः। वृष्टयः। सन्तु। अस्मे इति। सुऽपिप्पलाः। ओषधीः। देवऽगोपाः ॥ ५ ॥

ᵛइदं ᵛवचः वचनं स्तोत्रं ᵛस्वराजे स्वायत्तदीप्तये ᵛपर्जन्याय क्रियते। एतच्च ᵛहृदः तदीयस्य हृदयस्य ᵛअन्तरम् अन्तर्गतम् ᵛअस्तु। सच ᵛतत् स्तोत्रं ᵛजुजोषत् सेवताम्। 'जुषी प्रीतिसेवनयोः'। लेट्यडागमश्छान्दसः। शपः श्लुः। ᵛमयोभुवः सुखस्य भावयित्र्यः ᵛवृष्टयः ᵛअस्मे अस्माकं तत्प्रसादात् ᵛसन्तु भवन्तु। तथा ᵛदेवगोपाः देवः पर्जन्यो गोपायिता रक्षिता यासां तथाविधाः ᵛओषधीः ओषधयश्च ᵛसुपिप्पलाः सुफला अस्माकं भवन्तु ॥

स रेतोधा वृषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च।
तन्म ऋतं पातु शतशारदाय युयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

सः। रेतःऽधाः। वृषभः। शश्वतीनाम्। तस्मिन्। आत्मा। जगतः। तस्थुषः। च ॥
तत्। मा। ऋतम्। पातु। शतऽशारदाय। युयम्। पात। स्वस्तिऽभिः। सदा। नः ॥ ६ ॥

ᵛसः पर्जन्यः ᵛशश्वतीनां बह्वीनामोषधीनां ᵛरेतोधाः रेतस उदकस्य बीजभूतस्य धाता विनिधाता[2] भवति। ᵛवृषभः इत्युपमा। यथा कश्चिद्वृषभो बह्वीनां गवां गर्भस्याधाता भवति तद्वत्। अतः ᵛतस्मिन् पर्जन्ये ᵛजगतः जङ्गमस्य ᵛतस्थुषः स्थावरस्य ᵛच ᵛआत्मा देहो वर्तते। ᵛतत् पर्जन्येन दत्तम् ᵛऋतम् उदकं ᵛमा मां ᵛशतशारदाय शतसंवत्सरजीवनार्थं ᵛपातु रक्षतु ॥ माशब्दस्य 'ऋत्यकः' इति प्रकृतिभावो ह्रस्वत्वं च। अन्यद्ऋतम् ॥ ॥ १ ॥

---

१. घ–तिस्रो द्यावः। २. ख-न-भ-श–विधाता।

'पर्जन्याय' इति तृचं त्रयोदशं सूक्तं गायत्रम्[1]। पूर्ववदृषिदेवते। तथा चानुक्रान्तं—'पर्जन्याय तृचं गायत्रम्[2]' इति। वैश्वानरपार्जन्यायामन्वारम्भणीयायां पार्जन्यस्य चरोः 'पर्जन्याय' इत्यनुवाक्या। सूत्र्यते हि —'पर्जन्याय प्र गायत प्र वाता वान्ति पतयन्ति विद्युतः' (आश्व. श्रौ. २. १५) इति॥

पर्जन्यायं प्र गायत दिवस्पुत्रायं मीळ्हुषे। स नो यवसमिच्छतु॥ १॥

पर्जन्यायं। प्र। गायत। दिवः। पुत्रायं। मीळ्हुषे। सः। नः। यवसम्। इच्छतु॥ १॥

हे स्तोतारः Vपर्जन्याय देवाय Vप्र Vगायत प्रकर्षेण स्तोत्रमुच्चारयत। कीदृशाय। Vदिवः अन्तरिक्षस्य Vपुत्राय। तत्र हि पर्जन्यः प्रादुर्भवति। Vमीळ्हुषे सेक्त्रे। Vसः तादृशः पर्जन्यः Vनः अस्मभ्यं Vयवसम् ओषध्यादिलक्षणमन्नं दातुम् Vइच्छतु॥

यो गर्भमोषधीनां गवां कृणोत्यर्वताम्। पर्जन्यः पुरुषीणाम्॥ २॥

यः। गर्भम्। ओषधीनाम्। गवाम्। कृणोति। अर्वताम्। पर्जन्यः। पुरुषीणाम्॥ २॥

Vयः पर्जन्यः Vओषधीनां व्रीह्यादीनां Vगवाम् Vअर्वताम् अवतीनां वडवानां Vपुरुषीणां नारीणां च यः Vपर्जन्यः Vगर्भं प्रसूतिहेतुं बीजमुदकरूपं Vकृणोति करोति तस्मै पर्जन्यायेत्युत्तरत्र संबन्धः॥

तस्मा इदास्यै हविर्जुहोता मधुमत्तमम्। इळां नः संयतं करत्॥ ३॥

तस्मै। इत्। आस्ये। हविः। जुहोत। मधुमत्ऽतमम्। इळाम्। नः। सम्ऽयतम्। करत्॥३॥

Vतस्मा Vइत् तस्मा एव पर्जन्याय Vआस्ये देवानामास्यभूतेऽग्नौ Vमधुमत्तमं रसवत्तमं Vहविः Vजुहोत जुहुत हे ऋत्विजः। स च पर्जन्यः Vनः अस्मभ्यम् Vइळाम् अन्नं Vसंयतं सम्यग्मिश्रितं यथा भवति तथा Vकरत् करोतु। ददात्वित्यर्थः॥ ॥ २॥

'संवत्सरम्' इति दशर्चं चतुर्दशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभम्। आद्या त्वनुष्टुप्। मण्डूका देवता। तथा चानुक्रान्तं—'संवत्सरं दश पर्जन्यस्तुतिः संहृष्टान्मण्डूकांस्तुष्टावाद्यानुष्टुप्' इति। वृष्टिकामेनैतत्सूक्तं जप्यम्[3]॥

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः।
वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः॥ १॥

संवत्सरम्। शशयानाः। ब्राह्मणाः। व्रतऽचारिणः।
वाचम्। पर्जन्यऽजिन्विताम्। प्र। मण्डूकाः। अवादिषुः॥ १॥

अत्र निरुक्तं—'वसिष्ठो वर्षकामः पर्जन्यं तुष्टाव तं मण्डूका अन्वमोदन्त स मण्डूकाननुमोदमानान् दृष्ट्वा तुष्टाव' (निरु. ९. ६) इति। 'मण्डूका मज्जूका मज्जनान्मदतेर्वा मोदतिकर्मणो मन्दतेर्वा तृप्तिकर्मणो मण्डयतेरिति वैयाकरणा मण्ड एषामोक इति वा मण्डो मदेर्वा मुदेर्वा तेषामेषा भवति' (निरु. ९. ५) इति। Vव्रतचारिणः व्रतं संवत्सरसत्रात्मकं कर्माचरन्तः Vब्राह्मणाः। लुप्तोपममेतत्। एवंभूता ब्राह्मणा इव Vसंवत्सरं शरत्प्रभृति आ वर्षतोरेकं संवत्सरं Vशशयानाः शिश्यानाः वर्षणार्थं

---

१. ख-भ-गायत्रं द्वितीया पादनिचृत्। २. ख-भ (प्रान्ते)-गायत्रं द्वितीया पादनिचृदेते कुमार आग्नेयोपश्यद्वसिष्ठ एव वा वृष्टिकामः। ३. ख-भ-जाप्यं।

तपश्चरन्त इव बिल एव सन्त[1] एते vमण्डूकाः vपर्जन्यजिन्विता पर्जन्येन प्रीतां यथा वाचा पर्जन्यः प्रीतो भवति तादृशीं vवाचं vप्र vवादिषुः प्रवदन्ति ॥

दिव्या आपो अभि यदेनमायन्दृतिं न शुष्कं सरसी शयानम् ।
गवामह न मायुर्वत्सिनीनां मण्डूकानां वग्रुरत्रा समेति ॥ २ ॥

दिव्याः । आपः । अभि । यत् । एनम् । आयन् । दृतिम् । न । शुष्कम् । सरसी इति । शयानम् ।
गवाम् । अह । न । मायुः । वत्सिनीनाम् । मण्डूकानाम् । वग्रुः । अत्र । सम् । एति ॥ २ ॥

vदिव्याः दिवि भवाः vआपः vदृतिं vन दृतिमिव vशुष्कं नीरसं vसरसी । महत्सरः सरसी । गौरादिलक्षणो ङीष् । सरस्याम् । ' सुपां सुलुक् ' इति सप्तम्या लुक् । ' ईदूतौ च सप्तम्यर्थे ' इति प्रगृह्यसंज्ञा । महति सरसि निर्जले घर्मकाले vशयानं निवसन्तम् vएनं मण्डूकगणं vयत् यदा vआयन् अभिगच्छन्ति तदा vअत्र अस्मिन् वर्षणे पर्जन्ये वा सति vवत्सिनीनां वत्सयुक्तानां vगवां vन vमायुः गवां शब्द इव vमण्डूकानां vवग्रुः शब्दः vसमेति संगच्छते । यथा वत्सैः संगतासु गोषु महान् घोषो जायते तद्वद्वृष्टे पर्जन्ये महान् कलकलशब्दो जायत इत्यर्थः । vअह इति पूरकः ॥

यदीमेनाँ उशतो अभ्यवर्षीत्तृष्यावतः प्रावृष्यागतायाम् ।
अस्खलीकृत्य पितरं न पुत्रो अन्यो अन्यमुप वदन्तमेति ॥ ३ ॥

यत् । ईम् । एनान् । उशतः । अभि । अवर्षीत् । तृष्याऽवतः । प्रावृषि । आऽगतायाम् ।
अस्खलीकृत्य । पितरम् । न । पुत्रः । अन्यः । अन्यम् । उप । वदन्तम् । एति ॥ ३ ॥

vउशतः कामयमानान् vतृष्यावतः तृष्णावतः vएनान् मण्डूकान् vप्रावृषि वर्षर्तौ vआगतायाम् आगते सति vयत् यदा vअभ्यवर्षीत् पर्जन्यो जलैरभिषिञ्चति । vईम् इति पूरणः । तदानीम् vअस्खलीकृत्य । अस्खल इति शब्दानुकरणम् । अस्खलशब्दं कृत्वा vपुत्रः vपितरं vन पितरमिव vअन्यः मण्डूकः vवदन्तं शब्दयन्तम् vअन्यं मण्डूकम् vउप vएति प्राप्नोति ॥

अन्यो अन्यमनु गृभ्णात्येनोरपां प्रसर्गे यदमन्दिषाताम् ।
मण्डूको यदभिवृष्टः कनिष्कन्पृश्निः संपृङ्क्ते हरितेन वाचम् ॥ ४ ॥

अन्यः । अन्यम् । अनु । गृभ्णाति । एनोः । अपाम् । प्रऽसर्गे । यत् । अमन्दिषाताम् ।
मण्डूकः । यत् । अभिऽवृष्टः । कनिस्कन् । पृश्निः । सम्ऽपृङ्क्ते । हरितेन । वाचम् ॥ ४ ॥

vएनोः एनयोर्द्वयोर्मण्डूकयोः vअन्यः मण्डूकः vअन्यं मण्डूकमनुगम्य vगृभ्णाति गृह्णाति । vअपाम् उदकानां vप्रसर्गे प्रसर्जने वर्षणे सति vयत् यदा vअमन्दिषातां हृष्टावभूताम् । vयत् यदा च vअभिवृष्टः पर्जन्येनाभिषिक्तः vकनिष्कन् । स्कन्दतेर्यङ्लुगन्तस्य रूपम् । भृशं स्कन्दन्नुत्प्लवं कुर्वन् vपृश्निः पृश्निवर्णः vमण्डूकः vहरितेन हरितवर्णेनान्येन मण्डूकेन vवाचं vसंपृङ्क्ते संयोजयति । उभावप्येकविधं शब्दं कुर्वाते । तदानीमन्योऽन्यमनु गृभ्णातीत्यन्वयः ॥

यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः ।
सर्वं तदेषां समृधेव पर्व यत्सुवाचो वदथनाध्यप्सु ॥ ५ ॥

---

१. श–निवसंत ।

यत्। एषाम्। अन्यः। अन्यस्य। वाचम्। शाक्तस्यऽइव। वदति। शिक्षमाणः।
सर्वम्। तत्। एषाम्। समृधाऽइव। पर्व। यत्। सुऽवाचः। वदथन। अधि। अप्ऽसु ॥५॥

हे मण्डूकाः ᵛयत्[1] यदा ᵛएषां[1] युष्माकं मध्ये ᵛअन्यः मण्डूकः ᵛअन्यस्य मण्डूकस्य ᵛवाचं ᵛवदति अनुवदति अनुकरोति ᵛशिक्षमाणः शिक्ष्यमाणः शिष्यः ᵛशाक्तस्येव शक्तिमतः शिक्षकस्य वाचं यथानुवदति तद्वत्। ᵛयत् यदा च ᵛसुवाचः शोभनवाचो यूयं सर्वे ᵛअप्सु वृष्टेपूदकेषु ᵛअधि उपरि प्लवन्तः ᵛवदथन वदत शब्दं कुरुत। ᵛतत् तदा ᵛएषां युष्माकं ᵛसर्वं ᵛपर्व परुष्मच्छरीरं ᵛसमृधेव समृद्धमेवाविकलावयवमेव भवति। इवशब्दोऽवधारणे। घर्मकाले मृन्नावमापन्ना मण्डूकाः पुनर्वर्षणे सत्यविकलाङ्गाः प्रादुर्भवन्तीत्यर्थः ॥ ॥ ३ ॥

गोमायुरेको अजमायुरेकः पृश्निरेको हरित एक एषाम्।
समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचं पिपिशुर्वदन्तः ॥ ६ ॥

गोऽमायुः। एकः। अजऽमायुः। एकः। पृश्निः। एकः। हरितः। एकः। एषाम्।
समानम्। नाम। बिभ्रतः। विऽरूपाः। पुरुऽत्रा। वाचम्। पिपिशुः। वदन्तः ॥ ६ ॥

ᵛएषां मण्डूकानां मध्ये ᵛएकः मण्डूकः ᵛगोमायुः[2] गोर्मायुरिव[2] मायुः शब्दो यस्य तादृशो भवति। ᵛएकः अन्यो मण्डूकः ᵛअजमायुः अजस्य मायुरिव मायुर्यस्य तादृशो भवति। ᵛएकः ᵛपृश्निः पृश्निवर्णः। ᵛएकः अपरः ᵛहरितः हरितवर्णः। एवं ᵛविरूपाः नानारूपा अपि ᵛसमानम् एकं मण्डूका इति ᵛनाम ᵛबिभ्रतः धारयन्तः ᵛपुरुत्रा बहुषु देशेषु ᵛवाचं ᵛवदन्तः शब्दं कुर्वन्तः ᵛपिपिशुः अवयवीभवन्ति प्रादुर्भवन्ति। 'पिश अवयवे'। पुरुशब्दात् 'देवमनुष्य०' इत्यादिना त्राप्रत्ययः ॥

ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदन्तः।
संवत्सरस्य तदहः परि ष्ठ यन्मण्डूकाः प्रावृषीणं बभूव ॥ ७ ॥

ब्राह्मणासः। अतिऽरात्रे। न। सोमे। सरः। न। पुर्णम्। अभितः। वदन्तः।
संवत्सरस्य। तत्। अहरिति। परि। स्थ। यत्। मण्डूकाः। प्रावृषीणम्। बभूव ॥ ७ ॥

रात्रिमतीत्य वर्तत इत्यतिरात्रः। ᵛअतिरात्रे ᵛन ᵛसोमे। यथातिरात्राख्ये सोमयागे ᵛब्राह्मणासः ब्राह्मणा रात्रौ स्तुतशस्त्राणि पर्यायेण शंसन्ति हे ᵛमण्डूकाः। द्वितीयो नशब्दः संप्रत्यर्थे। ᵛन संप्रति ᵛपूर्णं ᵛसरः ᵛअभितः सर्वतः ᵛवदन्तः रात्रौ शब्दं कुर्वाणा यूयं[3] ᵛतदहः तद्दिनं ᵛपरि ᵛष्ठ परितः सर्वतो भवथ। ᵛयत् अहः ᵛप्रावृषीणं प्रावृषेण्यं प्रावृषि भवं ᵛबभूव तस्मिन्नहनि सर्वतो वर्तमाना भवथेत्यर्थः ॥

ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम्।
अध्वर्यवो घर्मिणः सिष्विदाना आविर्भवन्ति गुह्या न के चित् ॥ ८ ॥

ब्राह्मणासः। सोमिनः। वाचम्। अक्रत। ब्रह्म। कृण्वन्तः। परिवत्सरीणम्।
अध्वर्यवः। घर्मिणः। सिस्विदानाः। आविः। भवन्ति। गुह्याः। न। के। चित् ॥ ८ ॥

---

१. ज्ञ-त-न-भ-श–येषां। २. ख-ज्ञ-त२-श–गोमायुरिव; घ-ज्ञ-त३-न–गोमायुः गोमायुरिव।
३. ज्ञ–यूयं संवत्सरस्य।

vसोमिनः सोमयुक्ताः vपरिवत्सरीणं सांवत्सरिकं गवामयनिकं vब्रह्म स्तुतशस्त्रात्मकं vकृण्वन्तः कुर्वन्तः vब्राह्मणासः । लुप्तोपममेतत् । ब्राह्मणा इव vवाचं शब्दम् vअकृत अकृषतेमे मण्डूकाः । अपि च vघर्मिणः घर्मेण प्रवर्ग्येण चरन्तः vअध्वर्यवः अध्वरस्य नेतार ऋत्विज इव vसिष्विदानाः स्विद्यन्तः vघ्राः vगुह्याः घर्मकाले बिलेऽभिगूढाः vके vचित् केचन मण्डूकाः vन संप्रति वृष्टौ सत्याम् vआविर्भवन्ति जायन्ते ॥

देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्र मिनन्त्येते ।
संवत्सरे प्रावृष्यागतायां तप्ता घर्मा अश्नुवते विसर्गम् ॥ ९ ॥

देवऽहितिम् । जुगुपुः । द्वादशस्य । ऋतुम् । नरः । न । प्र । मिनन्ति । एते ।
संवत्सरे । प्रावृषि । आऽगतायाम् । तप्ताः । घर्माः । अश्नुवते । विऽसर्गम् ॥ ९ ॥

vनरः नेतारः vएते मण्डूकाः vदेवहितिं देवैः कृतं विधानम् अस्यतीरयं धर्म इत्येवंरूपं vजुगुपुः गोपायन्ति । काले काले रक्षन्ति । अत एव vद्वादशस्य द्वादशमासात्मकस्य संवत्सरस्य vऋतुं तं तं वसन्तादिकं vन vप्र vमिनन्ति न हिंसन्ति । पर्जन्यस्तुतेरनुमोदनेन तत्तत्काले वृष्टिहेतवो भवन्तीत्यर्थः । vसंवत्सरे संपूर्णे[1] vप्रावृषि वर्षतौ vआगतायाम् आगते सति vघर्माः पूर्वं घर्मकाले वर्तमानाः vतप्ताः तापेन पीडिताः संप्रति vविसर्गं विसर्जनं बिलान्मोचनम् vअश्नुवते प्राप्नुवन्ति ॥

गोमायुरदादजमायुरदात्पृश्निरदाद्धरितो नो वसूनि ।
गवां मण्डूका ददतः शतानि सहस्रसावे प्र तिरन्त आयुः ॥ १० ॥

गोऽमायुः । अदात् । अजऽमायुः । अदात् । पृश्निः । अदात् । हरितः । नः । वसूनि ।
गवाम् । मण्डूकाः । ददतः । शतानि । सहस्रऽसावे । प्र । तिरन्ते । आयुः ॥ १० ॥

vगोमायुः गोरिव मायुः शब्दो यस्य तादृशो मण्डूकः vवसूनि धनानि vनः अस्मभ्यम् vअदात् ददातु । vअजमायुः च vअदात् ददातु । vहरितः हरितवर्णश्च अदात् ददातु । vपृश्निः पृश्निवर्णश्च vअदात् ददातु । तथा vसहस्रसावे सहस्रसंख्याका ओषधयः सूयन्त उत्पद्यन्त इति वर्षर्तुः सहस्रसावः । तस्मिन् सति सर्वे vमण्डूकाः vगवां vशतानि अपरिमिता गाः vददतः अस्मभ्यं प्रयच्छन्तः vआयुः जीवनं vप्र vतिरन्ते प्रवर्धयन्तु[2] ॥ ॥ ४ ॥

' इन्द्रासोमा ' इति पञ्चविंशत्यृचं पञ्चदशं सूक्तं वसिष्ठस्यार्षम् । आद्याः षट् जगत्यः सप्तमी जगती त्रिष्टुब्बाष्टादश्येकविंशीत्रयोविंश्यो जगत्योऽन्त्या ' प्रति चक्ष्व ' इत्यनुष्टुप् शिष्टाश्चतुर्दश त्रिष्टुभः । नवमीद्वादशीत्रयोदश्यः सोमदेवत्या एकादशी देवदेवत्याष्टमीषोडश्याविन्द्रदेवताके सप्तदशी द्यावदेवत्याष्टादशी मरुद्देवताका दशमीचतुर्दश्यावग्निदेवताके ' प्र वर्तय ' इत्याद्याः पञ्चर्चं इन्द्रदेवताकाः । ' मा नो रक्ष ' इति त्रयोविंश्याः पूर्वोऽर्धर्चो वसिष्ठस्य प्रार्थनापरः । अतस्तद्देवताकः । उत्तरोऽर्धर्चः पृथिव्यन्तरिक्षदेवत्यः । शिष्टानां रक्षोहणाविन्द्रासोमौ देवता । तथा चानुक्रान्तम्— ' इन्द्रासोमा पञ्चाधिकैन्द्रासोमं राक्षोघ्नं शापाभिशापप्रायं षट् सप्त वाद्या जगत्य एकविंशीत्रयोविंश्यौ चाष्टादशी मारुती च दशमीचतुर्दश्यावाग्नेय्यौ दैव्येकादश्यन्त्यानुष्टुभ्नवमी द्वादशी त्रयोदशी सौम्यः सप्तदशी द्याव्यष्टमीषोळश्यावैन्द्र्यौ प्र वर्तयेति पञ्चैन्द्र्यो[3] मा नो रक्ष इत्यृषेरात्मन आशी-

---

१. ख-न-भ-पूर्णे । २. न–प्रवर्धयंतु खिलः–उपप्लवद मंडूकि वर्ष मावद तादुरि । मध्ये हृदस्य प्लवस्व विगृह्य चतुरः पदः (ऋ. खै. १६) ॥ ३. ज्ञ-त४–चतस्र ऐंद्र्यः; ज्ञ–चतस्र ऐंद्र्यो वा; त३-भ-श–पंचैंद्र्यो वा ।

रुत्तरोऽर्धर्चः पृथिव्यन्तरिक्षदेवतः[1] ' इति । अत्र बृहद्देवतायामनुक्रम्यते—' संवत्सरं तु मण्डूकानैन्द्रा-सोमं परं तु यत् ॥ ऋषिर्ददर्श रक्षोघ्नं पुत्रशोकपरिप्लुतः । हते पुत्रशते क्रुद्धः सौदासैर्दुःखितस्तदा '॥ (बृहद्दे. ६. २७–२८) इति । अतो रक्षोनिबर्हणार्थमेतत्सूक्तं जप्यम् ॥

इन्द्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृधः ।
परा शृणीतमचितो न्योषतं हतं नुदेथां नि शिशीतमत्रिणः ॥ १ ॥

इन्द्रासोमा । तपतम् । रक्षः । उब्जतम् । नि । अर्पयतम् । वृषणा । तमःऽवृधः ।
परा । शृणीतम् । अचितः । नि । ओषतम् । हतम् । नुदेथाम् । नि । शिशीतम् । अत्रिणः ॥१॥

हे [v]इन्द्रासोमा । इन्द्रश्च सोमश्चेन्द्रासोमौ । ' देवताद्वन्द्वे च ' इति पूर्वपदस्यानङ् । आमन्त्रिताद्युदात्तत्वम् । [v]रक्षः रक्षांसि । जातावेकवचनम् । युवां [v]तपतं संतापयतम् । ' आमन्त्रितं पूर्वमविद्यमानवत् ' इत्यविद्यमानवत्त्वात् तपतमिति तिङन्तस्य निघाताभावः । तथा [v]उब्जतं हिंस्तम् । उब्जतिर्हिंसाकर्मा । तिङः परत्वान्निघाताभावः । हे [v]वृषणा वृषणौ कामानां वर्षितारौ [v]न्यर्पयतं रक्षांसि नीचैर्भूतं प्रापयतम् । [v]तमोवृधः तमसावरकेणान्धकारेण मायारूपेण वर्धमानान् तमसि रात्रौ वर्धमानान् वा [v]अचितः ज्ञानरहितान् मूढान् राक्षसान् [v]परा [v]शृणीतम् । पराङ्मुखा यथा भवन्ति तथा हिंस्तम् । तथा [v]न्योषतं नितरां दहतम् । ' उष दाहे ' । [v]हतं तान् मारयतम् । [v]नुदेथाम् अस्मत्तो हतांस्तान् प्रेरयेथाम् । [v]अत्रिणः अदनशीलांस्तान् राक्षसान् [v]नि [v]शिशीतं नितरां तनूकुरुतम् ॥

इन्द्रासोमा समघशंसमभ्यघं तपुर्ययस्तु चरुरग्निवाँइव ।
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने ॥ २ ॥

इन्द्रासोमा । सम् । अघऽशंसम् । अभि । अघम् । तपुः । ययस्तु । चरुः । अग्निवान्ऽइव ।
ब्रह्मऽद्विषे । क्रव्यऽअदे । घोरऽचक्षसे । द्वेषः । धत्तम् । अनवायम् । किमीदिने ॥ २ ॥

हे इन्द्रासोमौ [v]अघशंसम् अघस्यानर्थस्य शंसितारम् [v]अघम् आगत्य हन्तारं राक्षसं [v]सं सहैव । [v]अभि इति श्रुतेर्योग्यक्रियाध्याहारः । अभिभवतम् । स च [v]तपुः युवयोस्तेजसा तप्यमानो राक्षसः [v]अग्निवानिव अग्नियुक्तोऽग्नौ प्रक्षिप्तः [v]चरुः इव [v]ययस्तु । ' यसु प्रयत्ने ' । केवलोऽप्ययमाङ्पूर्वार्थो द्रष्टव्यः । आयस्यतु आयासं प्राप्नोतु । उपक्षीयतामित्यर्थः । अपि च [v]ब्रह्मद्विषे ब्राह्मणेभ्योऽस्मभ्यं द्वेष्ट्रे [v]क्रव्यादे क्रव्यं मांसं भक्षयित्रे [v]घोरचक्षसे घोरदर्शनाय परुषभाषिणे वा [v]किमीदिने किमिदानीमिति चरते पिशुनाय [v]द्वेषः द्वेष्यभावम् [v]अनवायम् अव्यवायमनवद्यं नैरन्तर्येण यथा भवति तथा [v]धत्तं दत्तम् ॥

इन्द्रासोमा दुष्कृतौ वज्रे अन्तरनारम्भणे तमसि प्र विध्यतम् ।
यथा नातः पुनरेकश्चनोदयत्तद्वामस्तु सहसे मन्युमच्छवः ॥ ३ ॥

इन्द्रासोमा । दुःऽकृतौ । वज्रे । अन्तः । अनारम्भणे । तमसि । प्र । विध्यतम् ।
यथा । न । अतः । पुनः । एकः । चन । उत्ऽअयत् ।
तत् । वाम् । अस्तु । सहसे । मन्युऽमत् । शवः ॥ ३ ॥

---

१. ऋ–°देवत्यः; ऋ-त२-अनु.–°दैवतः ।

हे इन्द्रासोमौ ᵛदुष्कृतः दुष्कर्मकारिणः राक्षसान् ᵛवव्रे वारके ᵛअन्तः मध्ये ᵛअनारम्भणे आलम्बनरहिते ᵛतमसि अन्धकारे ᵛप्र ᵛविध्यतं प्रवेश्य ताडयतम्। ᵛयथा येन प्रकारेणैषां मध्ये ᵛएकश्चन एकोऽपि राक्षसः ᵛअतः अस्मात्तमसः ᵛपुनः ᵛन ᵛउदयत् उद्गच्छेत्। तथा विध्यतमित्यर्थः। एतेर्लेट्यडागमः। 'इतश्च लोपः' इतीकारलोपः। गुणायादेशौ। ᵛतत् प्रसिद्धं ᵛमन्युमत् क्रोधयुक्तं ᵛवां युवयोः ᵛशवः बलं ᵛसहसे रक्षसामभिभवनाय ᵛअस्तु भवतु ॥

इन्द्रासोमा वर्तयतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणम् ।
उत्तक्षतं स्वर्यं१ पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥ ४ ॥

इन्द्रासोमा । वर्तयतम् । दिवः । वधम् । सम् । पृथिव्याः । अघऽशंसाय । तर्हणम् ।
उत् । तक्षतम् । स्वर्यम् । पर्वतेभ्यः । येन । रक्षः । ववृधानम् । निऽजूर्वथः ॥ ४ ॥

हे इन्द्रासोमौ ᵛदिवः अन्तरिक्षात् द्युलोकाद्वा ᵛवधं हननसाधनमायुधं ᵛसं ᵛवर्तयतम् उत्पादयतम्। ᵛपृथिव्याः अस्मादपि लोकात् ᵛतर्हणं हिंसकमायुधम् ᵛअघशंसाय अघशंसमनर्थस्याशंसकं राक्षसं हन्तुमुत्पादयतम्। तथा ᵛपर्वतेभ्यः पर्ववद्भ्यो मेघेभ्यः सकाशात् ᵛस्वर्यम्। 'स्वृ शब्दोपतापयोः'। उपतापकमशनिम् ᵛउत्तक्षतम् उद्धृतं कुरुतम्। ᵛयेन अशनिना ᵛवावृधानं वर्धमानं प्रवृद्धं वा ᵛरक्षः राक्षसं ᵛनिजूर्वथः निहथः। 'जुर्वी हिंसायाम्'। तमशनिमुत्तक्षतमित्यर्थः ॥

इन्द्रासोमा वर्तयतं दिवस्पर्यग्नित्तेभिर्युवमश्मन्हन्मभिः ।
तपुर्वधेभिरजरेभिरत्रिणो नि पर्शाने विध्यतं यन्तु निस्वरम् ॥ ५ ॥

इन्द्रासोमा । वर्तयतम् । दिवः । परि । अग्निऽतप्तेभिः । युवम् । अश्मन्हन्मऽभिः ।
तपुःऽवधेभिः । अजरेभिः । अत्रिणः । नि । पर्शाने । विध्यतम् । यन्तु । निऽस्वरम् ॥ ५ ॥

हे इन्द्रासोमौ ᵛदिवः अन्तरिक्षात् परितः सर्वतः ᵛवर्तयतम् आयुधानि प्रेरयतम्। ᵛयुवं तौ युवाम् ᵛअग्नितप्तेभिः अग्निना संतप्तैः ᵛतपुर्वधेभिः तापकप्रहारैः ᵛअजरेभिः जरारहितैर्दृढैः ᵛअश्मन्हन्मभिः अश्मसारभूतस्यायसो विकारैर्हननसाधनैस्तैरायुधैः ᵛअत्रिणः राक्षसस्य ᵛपर्शाने पार्श्वस्थाने ᵛनि ᵛविध्यतं निहतम्। ते च राक्षसाः ᵛनिःस्वरं निःशब्दं ᵛयन्तु अपयन्तु निर्गच्छन्तु[1] ॥ ॥५॥

इन्द्रासोमा परि वां भूतु विश्वत इयं मतिः कक्ष्याश्वेव वाजिना ।
यां वां होत्रां परिहिनोमि मेधयेमा ब्रह्माणि नृपतीव जिन्वतम् ॥ ६ ॥

इन्द्रासोमा । परि । वाम् । भूतु । विश्वतः । इयम् । मतिः । कक्ष्या । अश्वाऽइव । वाजिना ।
याम् । वाम् । होत्राम् । परिऽहिनोमि । मेधया ।
इमा । ब्रह्माणि । नृपती इतीति नृपतीऽइव । जिन्वतम् ॥ ६ ॥

हे इन्द्रासोमौ ᵛइयम् अस्माभिः क्रियमाणा ᵛमतिः मननीया स्तुतिः ᵛवाजिना वाजिनौ बलवन्तौ ᵛवां युवां ᵛविश्वतः सर्वतः ᵛपरि ᵛभूतु परिगृह्णातु व्याप्नोतु वा। तत्र दृष्टान्तः। ᵛकक्ष्या कक्षबन्धनी[2] रज्जुः ᵛअश्वेव यथाश्वं परिगृह्णाति तद्वत्। ᵛयां ᵛहोत्रां वाचं ᵛवां युवाभ्यां ᵛमेधया

---

१. ज्ञ-ज्ञ-त१-२-४-श–निर्गच्छंतु अपगच्छंतु। २. ज्ञ–कक्षसंबंधनी।

vपरिहिनोमि प्रेरयामि । सेयं मतिरिति संबन्धः । अपि च vइमा इमान्यस्माभिः कृतानि vब्रह्माणि स्तोत्राणि - - - यथा धनैः पूरयन्ति तथा vजिन्वतं फलैः पूरयतम्[1] ॥

प्रति स्मरेथां तुजयद्भिरेवैर्हतं द्रुहो रक्षसो भङ्गुरावतः ।
इन्द्रासोमा दुष्कृते मा सुगं भूद्यो नः कदा चिदभिदासति द्रुहा ॥ ७ ॥

प्रति । स्मरेथाम् । तुजयत्ऽभिः । एवैः । हतम् । द्रुहः । रक्षसः । भङ्गुरऽवतः ।
इन्द्रासोमा । दुःऽकृते । मा । सुऽगम् । भूत् ।
यः । नः । कदा । चित् । अभिऽदासति । द्रुहा ॥ ७ ॥

हे इन्द्रासोमौ vतुजयद्भिः त्वरमाणैः vएवैः गन्तृभिरश्वैः vप्रति vस्मरेथाम् अभिगच्छतम् । उपसर्गवशेन स्मरतिरत्रार्थान्तरे वर्तते । यथा प्रस्मरणं प्रस्थानमिति । अभिगत्य च vद्रुहः द्रोग्धॄन्[2] vभङ्गुरावतः भञ्जनकर्मवतः vरक्षसः राक्षसान् vहतं हिंस्तम् । हे इन्द्रासोमौ vदुष्कृते पापकारिणे राक्षसाय vसुगं सुखं vमा vभूत् मा भवतु । vद्रुहा द्रोहेण युक्तः vयः vनः अस्मान् vकदा vचित् अपि vअभिदासति अभिहन्ति तस्मै दुष्कृत इत्यन्वयः ॥

यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः ।
आपइव काशिना संगृभीता असन्नस्त्वासत इन्द्र वक्ता ॥ ८ ॥

यः । मा । पाकेन । मनसा । चरन्तम् । अभिऽचष्टे । अनृतेभिः । वचःऽभिः ।
आपःऽइव । काशिना । सम्ऽगृभीताः । असन् । अस्तु । असतः । इन्द्र । वक्ता ॥ ८ ॥

vपाकेन पक्वेन शुद्धेन vमनसा vचरन्तं वर्तमानं सत्यवादिनं vयः मां राक्षसः vअनृतेभिः अनृतैरसत्यैः vवचोभिः वचनैः vअभिचष्टे अभिशंसति मय्यसत्यवचनमारोपयति हे vइन्द्र vकाशिना मुष्टिना vसंगृभीताः सम्यग्गृहीताः vआपइव यथापो विशीर्णा भवन्ति तथा vअसतः असत्यस्य[3] vवक्ता[3] स राक्षसः vअसन्नस्तु अविद्यमानो भवतु । नश्यत्वित्यर्थः ॥

ये पाकशंसं विहरन्त एवैर्ये वा भद्रं दूषयन्ति स्वधाभिः ।
अहये वा तान्प्रददातु सोम आ वा दधातु निर्ऋतेरुपस्थे ॥ ९ ॥

ये । पाकऽशंसम् । विऽहरन्ते । एवैः । ये । वा । भद्रम् । दूषयन्ति । स्वधाभिः ।
अहये । वा । तान् । प्रऽददातु । सोमः । आ । वा । दधातु । निःऽऋतेः । उपऽस्थे ॥ ९ ॥

vये राक्षसाः vपाकशंसं परिपक्ववचनं सत्यभाषिणं माम् vएवैः एतन्यैः प्राप्तव्यैरात्मीयैः कामैर्हेतुभूतैः vविहरन्ते विशेषेण हरन्ति उपक्षपयन्ति । यथाकामं परिवदन्तीत्यर्थः[4] । vये vवा vस्वधाभिः बलैर्युक्ताः vभद्रं कल्याणवर्तनं[5] मां vदूषयन्ति दुष्टं कुर्वन्ति vतान् सर्वान् vसोमः vअहये vवा सर्पाय वा vप्रददातु । vनिर्ऋतेः पापदेवतायाः vउपस्थे उत्सङ्गे vवा vआ vदधातु प्रक्षिपतु ॥

---

१. घ–पूरयतं । दृष्टांतः नृपतीव राजानौ इव तौ यथा पूरयतः तद्वत् । २. ज-त३–द्वेष्टॄन् ।
३. ज्ञ-ञ-त१-२-४-न–असत्यवक्ता । ४. त३–परिभवंतीत्यर्थः । ५. ख-न-भ-श–कल्याणं वर्तमानं ।

यो नो॒ रसं॑ दिप्स॑ति पि॒त्वो अ॑ग्ने॒ यो अश्वा॑नां॒ यो गवां॒ यस्त॒नूना॑म् ।
रि॒पुः स्ते॒नः स्ते॒यकृ॑द्द्रभ्र॒मे॑तु॒ नि ष हीय॑तां त॒न्वा॒३॑ तना॑ च ॥ १० ॥

यः । नः । रस॑म् । दिप्स॑ति । पि॒त्वः । अ॒ग्ने॒ । यः । अश्वा॑नाम् । यः । गवा॑म् । यः । त॒नूना॑म् । रि॒पुः । स्ते॒नः । स्ते॒यऽकृ॑त् । द्रभ्र॑म् । ए॒तु॒ । नि । सः । ह॒ीय॒ता॒म् । त॒न्वा॑ । तना॑ । च॒ ॥ १० ॥

हे ᵛअग्ने ᵛयः राक्षसः ᵛनः अस्माकं ᵛपित्वः अन्नस्य ᵛरसं सारं ᵛदिप्सति जिघांसति । ᵛयः च ᵛअश्वानाम् अस्मदीयानां रसं दिप्सति । ᵛयः च ᵛगवां रसं दिप्सति । ᵛयः च ᵛतनूनाम् अस्मदीयानां शरीराणां रसं दिप्सति । ᵛरिपुः बाधकः ᵛस्तेनः चौरः ᵛस्तेयकृत् धनस्यापहर्ता सः सर्वो जनः ᵛदभ्रं हिंसाम् ᵛएतु प्राप्नोतु । अपि च ᵛसः बाधकः ᵛतन्वा स्वकीयेन शरीरेण ᵛतना ᵛच तनयेन च ᵛनि ᵛहीयतां निहीनो भवतु ॥ ॥ ६ ॥

पर॑ः सो अ॑स्तु त॒न्वा॒३॑ तना॑ च ति॒स्रः पृ॑थि॒वीर॒धो अ॑स्तु वि॒श्वाः ।
प्रति॑ शुष्यतु॒ यशो॑ अस्य देवा॒ यो नो॒ दिवा॒ दिप्स॑ति॒ यश्च॒ नक्त॑म् ॥ ११ ॥

पर॑ः । सः । अ॒स्तु॒ । त॒न्वा॑ । तना॑ । च॒ । ति॒स्रः । पृ॒थि॒वीः । अ॒धः । अ॒स्तु॒ । वि॒श्वाः । प्रति॑ । शु॒ष्य॒तु॒ । यशः॑ । अ॒स्य॒ । देवाः॑ । यः । नः॒ । दिवा॑ । दिप्स॑ति । यः । च॒ । नक्त॑म् ॥ ११ ॥

ᵛसः राक्षसः ᵛतन्वा ᵛतना ᵛच । व्यत्ययेन तृतीया । तन्वाः शरीरस्य तनयस्य च ᵛपरः परस्तात् ᵛअस्तु वर्तमानो भवतु । उभाभ्यां वियुक्तो भवत्वित्यर्थः । ᵛविश्वाः व्याप्ताः ᵛतिस्रः ᵛपृथिवीः त्रीँल्लोकान् ᵛअधो[1] ᵛअस्तु अधस्ताद्भवतु । लोकत्रयादपि प्रच्युतो भवत्वित्यर्थः । हे ᵛदेवाः ᵛअस्य शत्रोः ᵛयशः अन्नं कीर्तिर्वा ᵛप्रति ᵛशुष्यतु । ᵛयः राक्षसः ᵛनः अस्मान् ᵛदिवा अहनि ᵛदिप्सति जिघांसति ᵛयश्च ᵛनक्तं रात्रौ जिघांसति अस्योभयविधस्य यशः प्रति शुष्यत्विति संबन्धः॥

सु॒विज्ञा॑नं चिकि॒तुषे॒ जना॑य॒ सच्चास॑च्च॒ वच॑सी पस्पृधाते ।
तयो॒र्यत्स॒त्यं य॑त॒रदृ॒जीय॒स्तदित्सोमो॑ऽवति॒ हन्त्यास॑त् ॥ १२ ॥

सु॒ऽवि॒ज्ञा॒नम् । चि॒कि॒तुषे॑ । जना॑य । सत् । च॒ । अस॑त् । च॒ । वच॑सी॒ इति॑ । प॒स्पृ॒धा॒ते इति॑ । तयोः॑ । यत् । स॒त्यम् । य॒त॒रत् । ऋ॒जीयः॑ । तत् । इत् । सोमः॑ । अव॑ति । हन्ति॑ । अस॑त् ॥ १२ ॥

प्रायेणेदमादिभिर्ऋग्भी राक्षसेन सहर्षिणा शपथः क्रियते । अत्र केचिदाहुः—‘ हत्वा पुत्रशतं पूर्वं वसिष्ठस्य महात्मनः । वसिष्ठं राक्षसोऽसि त्वं वासिष्ठं रूपमास्थितः ॥ अहं वसिष्ठ इत्येवं जिघांसू राक्षसोऽब्रवीत् । अत्रोत्तरा ऋचो दृष्टा वसिष्ठेनेति नः श्रुतम् ’ ॥ इति । ᵛचिकितुषे विदुषे ᵛजनाय इदं ᵛसुविज्ञानं विज्ञातुं सुशकं भवति । किं तत् । ᵛसच्च सत्यं च ᵛअसच्च असत्यं च । ᵛवचसी सत्यासत्यरूपे वचने ᵛपस्पृधाते मिथः स्पर्धेते । ᵛतयोः सदसतोर्मध्ये ᵛयत्सत्यं यथार्थं वचनं ᵛयतरत् यच्च ᵛऋजीयः ऋजुतममकुटिलं ᵛतदित् तदेवाकुटिलं सत्यभाषणं ᵛसोमः ᵛअवति रक्षति । ᵛअसत् उक्तविलक्षणमसत्यं ᵛहन्ति हिनस्ति । एवं सत्यावयोर्मध्ये कतरोऽनृतभाषीति विद्वद्भिः सुविज्ञानमित्यर्थः॥

न वा उ॒ सोमो॑ वृजि॒नं हि॑नोति॒ न क्ष॒त्रियं॑ मिथु॒या धा॒रय॑न्तम् ।
हन्ति॑ रक्षो॒ हन्त्यास॒द्वद॑न्तमु॒भाविन्द्र॑स्य प्रसि॒तौ शया॑ते ॥ १३ ॥

---

१. ख-ग्न-त-न-भ-श—अधोधो ।

न । वै । ऊँ इति । सोमः । वृजिनम् । हिनोति । न । क्षत्रियम् । मिथुया । धारयन्तम् । हन्ति । रक्षः । हन्ति । असत् । वदन्तम् । उभौ । इन्द्रस्य । प्रऽसितौ । शयाते इति ॥१३॥

[v]वृजिनं पापकारिणं राक्षसं [v]सोमः देवः [v]न [v]वा [v]उ न खलु [v]हिनोति प्रेरयति। गच्छ त्वमिति न मुञ्चति । तथा [v]क्षत्रियम् । क्षत्रं बलम् । तद्वन्तं [v]मिथुया मिथ्याभूतं वचनं [v]धारयन्तं बिभ्रतमसत्यवादिनं पुरुषं [v]न च हिनोति न विसृजति । अपि तु [v]रक्षः राक्षसं [v]हन्ति । [v]असत् असत्यं [v]वदन्तं च [v]हन्ति हिनस्ति । [v]उभौ राक्षसानृतवादिनौ तौ सोमेन हतौ [v]इन्द्रस्य संबन्धिनि [v]प्रसितौ बन्धने [v]शयाते निवसतः । यद्वा । इन्द्रस्येति तृतीयार्थे षष्ठी । इन्द्रेणेश्वरेण सोमेन प्रसितौ बद्धौ । ' षिञ् बन्धने ' । अस्मात् कर्मणि निष्ठा । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् ॥

यदि वाहमनृतदेव आस मोघं वा देवाँ अप्यूहे अग्ने ।
किमस्मभ्यं जातवेदो हृणीषे द्रोघवाचस्ते निर्ऋथं सचन्ताम् ॥ १४ ॥

यदि । वा । अहम् । अनृतऽदेवः । आस । मोघम् । वा । देवान् । अपिऽऊहे । अग्ने । किम् । अस्मभ्यम् । जातऽवेदः । हृणीषे । द्रोघऽवाचः । ते । निःऽऋथम् । सचन्ताम् ॥१४॥

[v]यदि [v]वा [v]अहमनृतदेवः अनृता असत्यभूता देवा यस्य तादृशो यद्यहम् [v]आस अस्मि । अथवा [v]मोघं [v]वा निष्फलं वा [v]देवान् [v]अप्यूहे उपगच्छामि । अहं यद्युक्तरूपोऽस्मि हे [v]अग्ने तर्हि मां बाधस्व । न ह्यहं तथाविधोऽस्मि । एवं सति हे [v]जातवेदः जातानां वेदितरग्ने [v]अस्मभ्यं किं कारणं [v]हृणीषे क्रुध्यसि । तव क्रोधोऽस्मासु न जायतामित्यर्थः[1] । [v]द्रोघवाचः अनृतवाचो राक्षसाः [v]ते तव [v]निर्ऋथम् । निष्पूर्वोऽर्तिर्हिंसायां वर्तते । निर्ऋथं निःशेषेणार्तिं हिंसां [v]सचन्तां सेवन्ताम् ॥

अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्तपु पूरुषस्य ।
अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह ॥ १५ ॥

अद्य । मुरीय । यदि । यातुऽधानः । अस्मि । यदि । वा । आयुः । ततप । पुरुषस्य । अध । सः । वीरैः । दशऽभिः । वि । यूयाः । यः । मा । मोघम् । यातुऽधान । इति । आह ॥१५॥

इयमपि शपथरूपैव । [v]यदि अहं वसिष्ठः [v]यातुधानः राक्षसः [v]अस्मि [v]अद्य अस्मिन्नेव दिने [v]मुरीय म्रियेय । अपि [v]वा [v]पुरुषस्य मनुष्यस्य [v]आयुः जीवितं [v]यदि अहं राक्षसो भूत्वा [v]ततप हिंसितवानस्मि तर्ह्यप्यहमद्य म्रियेयेत्यन्वयः । [v]अध अथैवं स्यात् अहं वसिष्ठस्त्वं राक्षस इति तर्हि [v]सः त्वं [v]दशभिः [v]वीरैः पुत्रैः । उपलक्षणमेतत् । सर्वैर्बन्धुजनैः [v]वि [v]यूयाः वियुक्तो भवेः । [v]यः राक्षसः [v]मा मां [v]मोघं मृषैव हे [v]यातुधान हे राक्षस [v]इति संबोध्य [v]आह ॥ ॥ ७ ॥

यो मायातुं यातुधानेत्याहु यो वा रक्षाः शुचिरस्मीत्याह ।
इन्द्रस्तं हन्तु महता वधेन विश्वस्य जन्तोरधमस्पदीष्ट ॥ १६ ॥

यः । मा । अयातुम् । यातुऽधान । इति । आह । यः । वा । रक्षाः । शुचिः । अस्मि । इति । आह । इन्द्रः । तम् । हन्तु । महता । वधेन । विश्वस्य । जन्तोः । अधमः । पदीष्ट ॥ १६ ॥

---

१. घ-ङ-त-न-श-जायत्वि°।

ᵛयः राक्षसो माम्[1] ᵛअयातुम् अराक्षसं सन्तं हे ᵛयातुधान हे राक्षस ᵛइति संबोध्य ᵛआह ब्रूते ᵛयो ᵛवा यश्च ᵛरक्षाः राक्षसः ᵛशुचिरस्मि शुद्धो भवामि न राक्षसोऽस्मि ᵛइत्याह ब्रूते ᵛतम् उभयविधं राक्षसम् ᵛइन्द्रः ᵛमहता प्रौढेन ᵛवधेन आयुधेन वज्रेण ᵛहन्तु हिनस्तु। स च ᵛविश्वस्य सर्वस्य ᵛजन्तोः जनस्य ᵛअधमः निकृष्टः सन् ᵛपदीष्ट पततु ॥

प्र या जिगाति खर्गलेव नक्तमप दुहा तन्वं गूहमाना ।
वव्रान् अनन्ताँ अव सा पदीष्ट ग्रावाणो घ्नन्तु रक्षस उपब्दैः ॥ १७ ॥

प्र । या । जिगाति । खर्गलाऽइव । नक्तम् । अप । दुहा । तन्वम् । गूहमाना ।
वव्रान् । अनन्तान् । अव । सा । पदीष्ट । ग्रावाणः । घ्नन्तु । रक्षसः । उपब्दैः ॥ १७ ॥

ᵛया राक्षसी ᵛनक्तं रात्रौ ᵛदुहा द्रोहेण युक्ता ᵛखर्गलेव उलूकीव ᵛप्र ᵛजिगाति प्रगच्छति । किं कुर्वती । ᵛतन्वं स्वकीयं शरीरम् ᵛअप ᵛगूहमाना अपवृण्वती प्रकाशयन्ती । ᵛसा राक्षसी ᵛअनन्तान् अपर्यन्तान् ᵛवव्रान् गर्तान् ᵛअव ᵛपदीष्ट अवाङ्मुखी पतत्। ᵛग्रावाणः सोमाभिषववार्थाः पाषाणाश्च ᵛउपब्दैः अभिषवशब्दैः ᵛरक्षसः राक्षसान् ᵛघ्नन्तु हिंसन्तु ॥

वि तिष्ठध्वं मरुतो विक्ष्विच्छत गृभायत रक्षसः सं पिनष्टन ।
वयो ये भूत्वी पतयन्ति नक्तभिर्ये वा रिपो दधिरे देवे अध्वरे ॥ १८ ॥

वि । तिष्ठध्वम् । मरुतः । विक्षु । इच्छत । गृभायत । रक्षसः । सम् । पिनष्टन ।
वयः । ये । भूत्वी । पतयन्ति । नक्तऽभिः । ये । वा । रिपः । दधिरे । देवे । अध्वरे ॥ १८ ॥

हे ᵛमरुतः यूयं ᵛविक्षु प्रजासु ᵛवि ᵛतिष्ठध्वं विविधं तिष्ठत । तत्र गूढान् राक्षसान् हन्तुम् ᵛइच्छत अन्विच्छत । तदनन्तरं ᵛरक्षसः तान् राक्षसान् ᵛगृभायत गृभ्णीत गृह्णीत । गृहीत्वा च ᵛसं ᵛपिनष्टन चूर्णयत । ᵛये राक्षसाः ᵛवयः पक्षिणः ᵛभूत्वी भूत्वा ᵛनक्तभिः रात्रिभी रात्रिषु ᵛपतयन्ति आगच्छन्ति । ᵛये ᵛवा ये च ᵛदेवे दीप्ते ᵛअध्वरे यागे ᵛरिपः हिंसाः ᵛदधिरे विदधिरे । तान् राक्षसान् सं पिनष्टनेत्यन्वयः ॥

प्र वर्तय दिवो अश्मानमिन्द्र सोमशितं मघवन्त्सं शिशाधि ।
प्राक्तादपाक्तादधरादुदक्तादभि जहि रक्षसः पर्वतेन ॥ १९ ॥

प्र । वर्तय । दिवः । अश्मानम् । इन्द्र । सोमऽशितम् । मघऽवन् । सम् । शिशाधि ।
प्राक्तात् । अपाक्तात् । अधरात् । उदक्तात् । अभि । जहि । रक्षसः । पर्वतेन ॥ १९ ॥

हे ᵛइन्द्र ᵛदिवः अन्तरिक्षात् ᵛअश्मानम् अशनिं[2] ᵛप्र ᵛवर्तय प्रेरय राक्षसान् हन्तुम्। तथा ᵛसोमशितं सोमेन तीक्ष्णीभूतं यजमानं हे ᵛमघवन् धनवन्निन्द्र ᵛसं ᵛशिशाधि संस्कुरु । अपि च ᵛप्राक्तात् प्राच्याः ᵛअपाक्तात् प्रतीच्याः ᵛअधरात् अवाच्याः ᵛउदक्तात् उत्तरतः सर्वस्मादपि दिग्भागात् ᵛरक्षसः राक्षसान् ᵛपर्वतेन पर्ववता वज्रेण ᵛअभि ᵛजहि मारय ॥

---

१. ख-घ-भ–मा मां । २. ज्ञ-त१-२-४–अशनं ; न–ग्रावाणं ।

एत उ त्ये पतयन्ति श्वयातव इन्द्रं दिप्सन्ति दिप्सवोऽदाभ्यम् ।
शिशीते शक्रः पिशुनेभ्यो वधं नूनं सृजदशनिं यातुमद्भ्यः ॥ २० ॥

एते । ऊँ इति । त्ये । पतयन्ति । श्वऽयातवः । इन्द्रम् । दिप्सन्ति । दिप्सवः । अदाभ्यम् ।
शिशीते । शक्रः । पिशुनेभ्यः । वधम् । नूनम् । सृजत् । अशनिम् । यातुमत्ऽभ्यः ॥ २० ॥

[v]त्ये ते [v]एते राक्षसाः [v]श्वयातवः श्वभिः परिकरभूतैर्हिंसन्तः श्वभिः सह यान्तो वा [v]पतयन्ति पतन्ति । ये [v]दिप्सवः जिघांसवः सन्तः [v]अदाभ्यम् अहिंस्यम् [v]इन्द्रं [v]दिप्सन्ति जिघांसन्ति तेभ्यः [v]पिशुनेभ्यः पिशुनान् कपटान् हन्तुं [v]शक्रः शक्त इन्द्रः [v]वधम् आयुधमशनिरूपं [v]शिशीते तीक्ष्णीकरोति । [v]यातुमद्भ्यः[1] राक्षसेभ्यः [v]नूनं क्षिप्रम् [v]अशनिं [v]सृजत् विसृजतु हननार्थम् ॥ ॥ ८ ॥

इन्द्रो यातूनामभवत्पराशरो हविर्मथीनामभ्या३विवासताम् ।
अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्त्सत एति रक्षसः ॥ २१ ॥

इन्द्रः । यातूनाम् । अभवत् । पराऽशरः । हविःऽमथीनाम् । अभि । आऽविवासताम् ।
अभि । इत् । ऊँ इति । शक्रः । परशुः । यथा । वनम् ।
पात्राऽइव । भिन्दन् । सतः । एति । रक्षसः ॥ २१ ॥

[v]यातूनां हिंसकानां रक्षसामयम् [v]इन्द्रः [v]पराशरः पराशातयिता हिंसिता [v]अभवत् । कीदृशानाम्[2] । [v]हविर्मथीनां हवींषि मथ्नतामभिमुखम्[3] [v]आविवासताम् आगच्छताम् । अपि चायं [v]शक्रः इन्द्रः [v]वनं वृक्षजातं [v]परशुर्यथा छिन्दन् कुठार इव [v]पात्रेव मृन्मयानि पात्राणि [v]भिन्दन् मुद्गर इव च [v]सतः । प्राप्तनामैतत् । यदाह यास्कः—'तिरः सत इति प्राप्तस्य' (निरु. ३. २०) इति । प्राप्तान् [v]रक्षसः राक्षसान् भिन्दन् हिंसन् [v]अभि [v]एति अभिगच्छति । इदू पूरणौ ॥

उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम् ।
सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र ॥ २२ ॥

उलूकऽयातुम् । शुशुलूकऽयातुम् । जहि । श्वऽयातुम् । उत । कोकऽयातुम् ।
सुपर्णऽयातुम् । उत । गृध्रऽयातुम् । दृषदाऽइव । प्र । मृण । रक्षः । इन्द्र ॥ २२ ॥

[v]उलूकयातुम् । उलूकैः परिकरभूतैः सह यातयति हिनस्तीति याति गच्छतीति वोलूकयातुः । यद्वा उलूकरूपी यातीत्युलूकयातुः । हे इन्द्र तादृशं राक्षसं [v]जहि विनाशय । तथा च बृहद्देवतायामुक्तम्—'उलूकयातुं जह्येतान्नानारूपान्निशाचरान् ॥ स्त्रीपुंरूपांश्च तिर्यञ्चो जिघांसून्निन्द्र मे जहि' (बृहद्दे. ६. ३२) इति । एवमुत्तरत्रापि योज्यम् । [v]शुशुलूकयातुम् । उलूका द्विविधा बृहदुलूका अल्पोलूकाश्चेति । तत्रोलूकयातुमिति बृहदुलूकाभिप्रायेणोक्तम् । शिशुरल्प उलूकः शुशुलूकः । तद्रूपेण वर्तमानं राक्षसं [v]श्वयातुं श्वरूपेण वर्तमानं राक्षसम् [v]उत अपि च [v]कोकयातुम् । कोकश्चक्रवाकः । तद्रूपेण वर्तमानं राक्षसं [v]सुपर्णयातुम् । सुपर्णः श्येनः । तदाकारं यातुधानम् [v]उत अपि च [v]गृध्रयातुं गृध्ररूपं च यातुधानम् । एतान् सर्वाञ्ज्ञानाकारान् हे [v]इन्द्र जहि । किं बहुना [v]दृषदेव पाषाणेनेव वज्रेण [v]रक्षः राक्षसमात्रं [v]प्र [v]मृण मारय ॥

---

१. म-श—यातुमद्भ्यो हिंसावद्भ्यः । २. ख-घ-ञ-त-भ-श—कीदृशीनां । ३. श—मथ्नतामभ्याविवासतामभि° ।

मा नो रक्षो अभि नड्यातुमावतामपोच्छतु मिथुना या किमीदिना ।
पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ॥ २३ ॥

मा । नः । रक्षः । अभि । नट् । यातुऽमावताम् । अप । उच्छतु । मिथुना । या । किमीदिना ।
पृथिवी । नः । पार्थिवात् । पातु । अंहसः । अन्तरिक्षम् । दिव्यात् । पातु । अस्मान् ॥२३॥

vरक्षः राक्षसजातिः vनः अस्मान् vमा vअभि vनट् माभिव्याप्नोतु । नशतेर्व्याप्तिकर्मणो लुङि 'मन्त्रे घस' इति च्लेर्लुक् । 'न माङ्योगे' इत्यडभावः । तथा vयातुमावतां यातनावतां राक्षसानां vमिथुना मिथुनानि स्त्रीपुंसरूपाणि युगलानि vअपोच्छतु । उषा अपि विवासयतु अपवर्जयतु । vया यानि मिथुनानि vकिमीदिना किमीदिनानि किमिदं किमिदमिति जिघांसया वर्तमानानि भवन्ति । अपि च vपृथिवी प्रथितेयं भूमिश्च vनः अस्मान् vपार्थिवात् पृथिव्या अन्तरिक्षस्य संबन्धिनः vअंहसः पापात् vपातु रक्षतु । vअन्तरिक्षं च vदिव्यात् दिविभवात् पापात् vअस्मान् vपातु रक्षतु ॥

इन्द्र जहि पुमांसं यातुधानमुत स्त्रियं मायया शाशदानाम् ।
विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम् ॥ २४ ॥

इन्द्र । जहि । पुमांसम् । यातुऽधानम् । उत । स्त्रियम् । मायया । शाशदानाम् ।
विऽग्रीवासः । मूरऽदेवाः । ऋदन्तु । मा । ते । दृशन् । सूर्यम् । उत्ऽचरन्तम् ॥ २४ ॥

हे vइन्द्र vपुमांसं पुंरूपधारिणं vयातुधानं राक्षसं vजहि मारय । vउत अपि च vमायया वञ्चनया vशाशदानां हिंसन्तीं vस्त्रियं राक्षसीं च जहि । अपि च vमूरदेवाः मारणक्रीडा राक्षसाः vविग्रीवासः विच्छिन्नग्रीवाः सन्तः vऋदन्तु नश्यन्तु । vते तथाविधा राक्षसाः vउच्चरन्तम् उद्यन्तं vसूर्यम् आदित्यं vमा दृशन् मा द्राक्षुः ॥

उपाकरणोत्सर्जनयोर्मण्डलाद्यन्तहोमे 'प्रति चक्ष्व' इत्येषा । सूत्रितं च—'यो नः स्वो अरणः प्रति चक्ष्व' (आश्व. गृ. ३. ५. ७) इति ॥

प्रति चक्ष्व वि चक्ष्वेन्द्रश्च सोम जागृतम् ।
रक्षोभ्यो वधमस्यतमशनिं यातुमद्भ्यः ॥ २५ ॥

प्रति । चक्ष्व । वि । चक्ष्व । इन्द्रः । च । सोम । जागृतम् ।
रक्षःऽभ्यः । वधम् । अस्यतम् । अशनिम् । यातुमत्ऽभ्यः ॥ २५ ॥

हे vसोम त्वम् vइन्द्रश्च vप्रति vचक्ष्व प्रत्येकं पश्य राक्षसान् । तथा vवि vचक्ष्व विविधं पश्य । यथास्मान् बाधेरन् तथा पश्येत्यर्थः । युवां च संहतौ vजागृतम् । जागरूकौ रक्षोवधोद्युक्तौ भवतम् । vयातुमद्भ्यः हिंसावद्भ्यः vरक्षोभ्यः राक्षसेभ्यः vअशनिम् अशनिरूपं vवधम् आयुधम् vअस्यतं क्षिपतम् ॥ ॥ ९ ॥

॥ इति सप्तमे मण्डले षष्ठोऽनुवाकः । सप्तमं मण्डलं समाप्तम् ॥

ॐ

॥ अथाष्टमं मण्डलम् ॥

अष्टमे मण्डले दशानुवाकाः । तत्र प्रथमेऽनुवाके पञ्च सूक्तानि । तेषु 'मा चिदन्यत्' इति चतुस्त्रिंशदृचं प्रथमं सूक्तम् । अत्रानुक्रम्यते—'मा चिच्चतुस्त्रिंशन्मेधातिथिमेध्यातिथी ऐन्द्रं बार्हतं द्विप्रगाथादि द्वित्रिष्टुबन्तमाद्यं द्व्यृचं प्रगाथोऽपश्यत्स घौरः सन्भ्रातुः कण्वस्य पुत्रतामगात् प्लायोगिश्चासङ्गो यः स्त्री भूत्वा पुमानभूत्स मेध्यातिथये दानं दत्त्वा स्तुहि स्तुहीति चतसृभिरात्मानं तुष्टाव पत्नी चास्याङ्गिरसी शश्वती पुंस्त्वमुपलभ्यैनं प्रीतान्यया तुष्टाव' इति । अस्यायमर्थः । अस्य सूक्तस्य मेधातिथिमेध्यातिथिनामानौ द्वावृषी तौ च कण्वगोत्रौ । ऋषिश्चानुक्तगोत्रः 'प्राङ्मस्त्यात् काण्वः' इति परिभाषितत्वात् । आद्यस्य द्व्यृचस्य तु घोरस्य पुत्रः स्वकीयभ्रातुः कण्वस्य पुत्रतां प्राप्तत्वात् काण्वः प्रगाथाख्य ऋषिः । प्लयोगनाम्नो राज्ञः पुत्र आसङ्गाभिधानो राजा देवशापात् स्त्रीत्वमनुभूय पश्चात्तपोबलेन मेधातिथेः प्रसादात् पुमान् भूत्वा तस्मै बहु धनं दत्त्वा स्वकीयमन्तरात्मानं दत्तदानं स्तुहि स्तुहीत्यादिभिश्चतसृभिर्ऋग्भिरस्तौत् । अतस्तासामासङ्गाख्यो राजा ऋषिः । अस्यासङ्गस्य भार्याङ्गिरसः सुता शश्वत्याख्या भर्तुः पुंस्त्वमुपलभ्य प्रीता सती स्वभर्तारम् 'अन्वस्य स्थूरम्' इत्यनया स्तुतवती । अतस्तस्या ऋचः शश्वत्यृषिका । अन्त्ये द्वे त्रिष्टुभौ द्वितीयाचतुर्थ्यौ सतोबृहत्यौ शिष्टा बृहत्यः । कृत्स्नस्य सूक्तस्येन्द्रो देवता । 'स्तुहि स्तुहि' इत्याद्याश्चतस्र आत्मकृतस्य दानस्य स्तूयमानत्वात्तद्देवताकाः । 'अन्वस्य' इत्यस्या आसङ्गाख्यो राजा देवता । 'या तेनोच्यते सा देवता' इति न्यायात् । महाव्रते निष्केवल्ये बार्हततृचाशीतावादित एकोनत्रिंशद्ऋचो नियुक्ताः । तथैव पञ्चमारण्यके सूत्रितं—'मा चिदन्यद्वि शंसतेत्येकया न त्रिंशत्' (ऐ. आ. ५. २. ४) इति । चातुर्विंशिकेऽहनि माध्यंदिनसवने मैत्रावरुणस्य 'मा चिदन्यत्' इति वैकल्पिकः स्तोत्रियः प्रगाथः । सूत्रितं च—'मा चिदन्यद्वि शंसत यद्विद्वि त्वा जना इम इति स्तोत्रियानुरूपौ' (आश्व. श्रौ. ७.४) इति । प्रावस्तोत्रेऽप्याद्या विनियुक्ता । सूत्रितं च—'आ तू न इन्द्र क्षुमन्तं मा चिदन्यद्वि शंसत' (आश्व. श्रौ. ५. १२) इति । उपाकरणोत्सर्जनयोः[1] मण्डलादिहोमेऽप्येषा । सूत्र्यते हि—'मा चिदन्यदाग्ने याहि स्वादिष्टया' इति ॥

मा चिदन्यद्वि शंसत सखायो मा रिषण्यत ।
इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥ १ ॥

मा । चित् । अन्यत् । वि । शंसत । सखायः । मा । रिषण्यत ।
इन्द्रम् । इत् । स्तोत । वृषणम् । सचा । सुते । मुहुः । उक्था । च । शंसत ॥ १ ॥

हे vसखायः समानख्यानाः स्तोतारः इन्द्रस्तोत्रात् vअन्यत् स्तोत्रं vमा vचित् vवि vशंसत मैवोच्चारयत । vमा vरिषण्यत मा हिंसितारो भवत । अन्यदीयस्तोत्रोच्चारणेन वृथोपक्षीणा मा भवत । vसुते अभिषुते सोमे vवृषणं कामानां वर्षितारम् vइन्द्रमित् इन्द्रमेव हे प्रस्तोत्रादयः vसचा सह संघीभूय vस्तोत स्तुत । हे प्रशास्त्रादयः vउक्था vच उक्थानि शस्त्राणि चेन्द्रविषयाणि यूयं vमुहुः पुनःपुनः vशंसत ॥

अवक्रक्षिणं वृषभं यथाजुरं गां न चर्षणीसहम् ।
विद्वेषणं संवननोभयंकरं मंहिष्ठमुभयाविनम् ॥ २ ॥

---

१. ख-श-त-श—उपाकर्मोत्सर्जनयोः ।

अवऽक्रक्षिणम्। वृषभम्। यथा। अजुरम्। गाम्। न। चर्षणिऽसहम्।
विऽद्वेषणम्। सम्ऽवनना। उभयम्ऽकरम्। मंहिष्ठम्। उभयाविनम्॥ २॥

वृषभं यथा वृषभमिव अवक्रक्षिणम् अवकर्षणशीलं शत्रूणां हिंसितारम् अजुरं जरारहितमहिंसितं वा गां न गामिव वृषभिव[1] चर्षणीसहं चर्षणीनां मनुष्याणां शत्रुभूतानामभिभवितारं विद्वेषणं विद्वेष्टारं शत्रूणां संवनना संवननं सम्यक्संभजनीयं स्तोतृभिः उभयंकरं निग्रहानुग्रहयोरुभयोः कर्तारं मंहिष्ठं दातृतमम् उभयाविनं दिव्यपार्थिवलक्षणेनोभयविधधनेनोपेतम्। यद्वा। स्थावरजङ्गमरूपेण द्विप्रकारेण रक्षितव्येनोपेतम्। अथवोभयविधैः स्तोतृभिर्यष्टृभिश्चोपेतम्। एवंविधमिन्द्रमित् स्तोतेत्यन्वयः॥

चातुर्विंशिकेऽहनि माध्यंदिनसवने 'यच्चिद्धि त्वा' इति प्रशास्तुर्वैकल्पिकोऽनुरूपः प्रगाथः। सूत्रं तदाहृतम्॥

यच्चिद्धि त्वा जना इमे नाना हवन्त ऊतये।
अस्माकं ब्रह्मेदमिन्द्र भूतु तेऽहा विश्वा च वर्धनम्॥ ३॥

यत्। चित्। हि। त्वा। जनाः। इमे। नाना। हवन्ते। ऊतये।
अस्माकम्। ब्रह्म। इदम्। इन्द्र। भूतु। ते। अहा। विश्वा। च। वर्धनम्॥ ३॥

इमे दृश्यमानाः सर्वे जनाः हे इन्द्र त्वाम् ऊतये रक्षणाय तर्पणाय वा नाना पृथक्पृथक् यत्-चित् यद्यपि हवन्ते स्तुवन्ति। हि इति पूरणः। तथापि अस्माकम् इदं ब्रह्म स्तोत्रमेव हे इन्द्र ते तव वर्धनं वर्धकं भूतु भवतु। न केवलमिदानीमेव अपि तु विश्वा अहा सर्वाण्यहानि सर्वेष्वहःसु च इदमेव स्तोत्रं त्वां वर्धयत्वित्यर्थः॥

वि तर्तूर्यन्ते मघवन्विपश्चितोऽर्यो विपो जनानाम्।
उप क्रमस्व पुरुरूपमा भर वाजं नेदिष्ठमूतये॥ ४॥

वि। ततूर्यन्ते। मघऽवन्। विपःऽचितः। अर्यः। विपः। जनानाम्।
उप। क्रमस्व। पुरुऽरूपम्। आ। भर। वाजम्। नेदिष्ठम्। ऊतये॥ ४॥

हे मघवन् धनवन्निन्द्र विपश्चितः विद्वांसस्त्वदीयाः स्तोतारः अर्यः अभिगन्तारः जनानां शत्रूणां विपः वेपयितारः सन्तः वि ततूर्यन्ते भृशमापदो वितरन्ति अतिक्रामन्ति। तादृशस्त्वम् उप क्रमस्व उपगच्छास्मान्। पुरुरूपं बहुरूपम् नेदिष्ठम् अन्तिकतमं वाजम् अन्नम् ऊतये तर्पणाय आ भर अस्मभ्यम्॥

महे चन त्वामद्रिवः परा शुल्काय देयाम्।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ॥ ५॥

महे। चन। त्वाम्। अद्रिऽवः। परा। शुल्काय। देयाम्।
न। सहस्राय। न। अयुताय। वज्रिऽवः। न। शताय। शतऽमघ॥ ५॥

---

१. त४–वृषभमिव।

हे vअद्रिवः वज्रवन्निन्द्र vत्वाम्। vउत इति निपातद्वयसमुदायो विभज्य योजनीयः। vमहे च महतेऽपि vशुल्काय मूल्याय न vपरा vदेयां न विक्रीणानि। हे vवज्रिवः वज्रहस्तेन्द्र vसहस्राय सहस्रसंख्याय च धनाय vन परा देयाम्। vअयुताय दशसहस्राय च शुल्काय vन परा देयाम्। हे vशतामघ बहुधनेन्द्र vशताय। बहुनामैतत्। अपरिमिताय च धनाय vन परा देयां न विक्रीणानि। उक्तसंख्याद्धनादपि त्वं मम प्रियतमोऽसीत्यर्थः॥ ॥ १० ॥

वस्यॉं इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥ ६ ॥

वस्यान्। इन्द्र। असि। मे। पितुः। उत। भ्रातुः। अभुञ्जतः।
माता। च। मे। छदयथः। समा। वसो इति। वसुऽत्वनाय। राधसे ॥ ६ ॥

हे vइन्द्र त्वं vमे मदीयात् vपितुः जनकादपि vवस्यान् वसीयान् वसुमत्तरः vअसि। vउत अपि च vअभुञ्जतः अपालयतो मम vभ्रातुः अपि वसीयांस्त्वमधिकोऽसि। हे vवसो वासकेन्द्र vमे मदीया vमाता vच त्वं च vसमा समौ समानौ सन्तौ। 'पुमान् स्त्रिया' (पा. सू. १. २. ६७) इति पुंसः शेषः। vछदयथः। अर्चतिकर्मायम्। मां पूजितं कुरुथः। किमर्थम्। vवसुत्वनाय व्यापनाय vराधसे धनाय च। उभयोर्लाभायेत्यर्थः॥

क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः।
अलर्षि युध्म खजकृत्पुरंदर प्र गायत्रा अगासिषुः ॥ ७ ॥

क्व। इयथ। क्व। इत्। असि। पुरुऽत्रा। चित्। हि। ते। मनः।
अलर्षि। युध्म। खजऽकृत्। पुरम्ऽदर। प्र। गायत्राः। अगासिषुः ॥ ७ ॥

हे इन्द्र vक्व कुत्र देशे vइयथ गतवानसि पुरा। vक्वेत् कुत्र च vअसि भवसि। इदानीं वर्तसे। vपुरुत्रा vचिद्धि बहुषु हि यजमानेषु vते त्वदीयं vमनः संचरति। हे vयुध्म युद्धकुशल vखजकृत् युद्धस्य कर्तर्हे vपुरंदर आसुरीणां पुरां दारयितर्हे इन्द्र vअलर्षि आगच्छ। vगायत्राः गानकुशला अस्मदीयाः स्तोतारः vप्र vअगासिषुः प्रगायन्ति स्तुवन्ति। 'अलर्षि' इत्येतत् दाधर्त्यादौ (पा. सू. ७. ४. ६५) इत्यर्तेर्निपात्यते॥

प्रास्मै गायत्रमर्चत वावातुर्यः पुरंदरः।
याभिः काण्वस्योप बर्हिरासदं यासद्वज्री भिनत्पुरः ॥ ८ ॥

प्र। अस्मै। गायत्रम्। अर्चत। ववातुः। यः। पुरम्ऽदरः।
याभिः। काण्वस्य। उप। बर्हिः। आऽसदम्। यासत्। वज्री। भिनत्। पुरः ॥ ८ ॥

vअस्मै[1] इन्द्राय vगायत्रं गातव्यं साम गायत्रसंज्ञं वा vप्र vअर्चत प्रगायत। vपुरंदरः पुरां दारयिता vयः इन्द्रः vवावातुः[2] वननीयः संभजनीयः। यद्वा वावातुः संभक्तुः स्तोतुः य इन्द्रः पुरंदरः शत्रुपुराणां दारयिता। vयाभिः ऋग्भिः vकाण्वस्य कण्वपुत्रस्य मेधातिथेर्मेध्यातिथेश्च vबर्हिः यज्ञम् vउप vआसदम् उपासत्तुमुपगन्तुं vयासत् गच्छेत् vवज्री वज्रयुक्तः सन्। याभिश्च ऋग्भिः स्तूयमानः सन् vपुरः शात्रवीः vभिनत् भिन्द्यात्। तास्वृक्षु गायत्रं साम गायतेत्यर्थः॥

---

१. ख-ग्र-त-श–यस्मै। २. ख-ग्र-त-न-भ-श–ववातुः।

ये ते सन्ति दशग्विनः शतिनो ये सहस्रिणः ।
अश्वासो ये ते वृषणो रघुद्रुवस्तेभिर्नस्तूयमा गहि ॥ ९ ॥

ये । ते । सन्ति । दशऽग्विनः । शतिनः । ये । सहस्रिणः ।
अश्वासः । ये । ते । वृषणः । रघुऽद्रुवः । तेभिः । नः । तूयम् । आ । गहि ॥ ९ ॥

हे इन्द्र [v]दशग्विनः दशयोजनगामिनः [v]ये अश्वाः [v]ते तव [v]सन्ति विद्यन्ते । [v]ये चान्ये [v]शतिनः शतसंख्याकाः [v]सहस्रिणः सहस्रसंख्याकाः सन्ति । [v]ये [v]ते त्वदीयाः [v]अश्वासः अश्वाः [v]वृषणः सेचनसमर्थाः युवानः [v]रघुद्रुवः शीघ्रगामिनश्च । [v]तेभिः तैः सर्वैरश्वैः [v]नः अस्मान् [v]तूयं क्षिप्रम् [v]आ [v]गहि आगच्छ ॥

आ त्वद्य सबर्दुघां हुवे गायत्रवेपसम् ।
इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतम् ॥ १० ॥

आ । तु । अद्य । सबःऽदुघाम् । हुवे । गायत्रऽवेपसम् ।
इन्द्रम् । धेनुम् । सुऽदुघाम् । अन्याम् । इषम् । उरुऽधाराम् । अरम्ऽकृतम् ॥ १० ॥

अनयेन्द्रं धेनुरूपेण वृष्टिरूपेण च निरूपयन् स्तौति । [v]अद्य इदानीं [v]धेनुं धेनुरूपम् [v]इन्द्रं [v]तुक्षिप्रम् [v]आ [v]हुवे आह्वये । कीदृशीं धेनुम् । [v]सबर्दुघां पयसो दोग्ध्रीं [v]गायत्रवेपसं प्रशस्यवेगां [v]सुदुघां सुखेन दोग्धुं शक्याम् । [v]अन्याम् उक्तविलक्षणाम् [v]उरुधारां बहूदकधाराम् [v]इषम् एषणीयां वृष्टिम् । एतद्रूपेण वर्तमानम् [v]अरंकृतम् अलंकर्तारं पर्याप्तकारिणं वेन्द्रं चाह्वये[1] ॥ ॥ ११ ॥

यत्तुदत्सूर एतशं वङ्कू वातस्य पर्णिना ।
वहत्कुत्समार्जुनेयं शतक्रतुः त्सरद्गन्धर्वमस्तृतम् ॥ ११ ॥

यत् । तुदत् । सूरः । एतशम् । वङ्कू इति । वातस्य । पर्णिना ।
वहत् । कुत्सम् । आर्जुनेयम् । शतऽक्रतुः । त्सरत् । गन्धर्वम् । अस्तृतम् ॥ ११ ॥

[v]सूरः सूर्यः [v]एतशम् एतत्संज्ञं राजर्षिं [v]यत् यदा [v]तुदत् अश्वयथयत् तदानीमेतशं रक्षितुं [v]वङ्कू वक्रगामिनौ [v]वातस्य वायोः सदृशौ [v]पर्णिना पर्णिनौ पतनवन्तावीदृशावश्वौ [v]शतक्रतुः बहुविधकर्मेन्द्रः [v]आर्जुनेयम् अर्जुन्याः पुत्रं [v]कुत्सम् ऋषिं [v]वहत् अवहत् अनयत् । कुत्सेन सार्धं समानं रथमारुह्यैतशरक्षणायागच्छदित्यर्थः । तथा च निगमान्तरं—' प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिन्द्रः ' (ऋ. सं. १. ६१. १५) इति । [v]गन्धर्वं गवां रश्मीनां धर्तारं सूर्यम् [v]अस्तृतं केनाप्यहिंसितं [v]त्सरत् अत्सरत् । छद्मगत्यागच्छत् । सूर्येण योद्धुं गतवानित्यर्थः ॥

य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
संधाता संधिं मघवा पुरूवसुरिष्कर्ता विह्रुतं पुनः ॥ १२ ॥

यः । ऋते । चित् । अभिऽश्रिषः । पुरा । जत्रुऽभ्यः । आऽतृदः ।
सम्ऽधाता । सम्ऽधिम् । मघऽवा । पुरुऽवसुः । इष्कर्ता । विऽह्रुतम् । पुनरिति ॥ १२ ॥

---

१. ख-भ—चाह्वयामहे; झ—चाह्वयेम ।

vयः इन्द्रः vअभिश्रिषः अभिश्लिषोऽभिश्लेषणात् संधानद्रव्यात् vऋते vचित् विनापि vजत्रुभ्यः ग्रीवाभ्यः सकाशात् vआतृदः आतर्दनात् आ रुधिरनिःस्रवणात् vपुरा पूर्वमेव vसंधिं संधातव्यं तं vसंधाता संयोजयिता भवति vमघवा धनवान् vपुरूवसुः[1] बहुधनः स इन्द्रः vविहुतं विच्छिन्नं तं vपुनः vइष्कर्ता संस्कर्ता भवति ॥

मा भूम निष्ट्याइवेन्द्र त्वदरणाइव ।
वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि ॥ १३ ॥

मा । भूम । निष्ट्याःऽइव । इन्द्र । त्वत् । अरणाःऽइव ।
वनानि । न । प्रऽजहितानि । अद्रिऽवः । दुरोषासः । अमन्महि ॥ १३ ॥

हे vइन्द्र vत्वत् त्वत्तः त्वत्प्रसादात् vनिष्ट्याइव । नीचैर्भूता हीना निष्ट्याः । त इव वयं vमा vभूम । तथा vअरणाइव अरमणा दुःखिन इव वयं मा भूम । अपि च vप्रजहितानि प्रक्षीणानि शाखादिभिर्वियुक्तानि vवनानि vन वृक्षजातानीव वयं पुत्रादिभिर्वियुक्ता मा भूम । हे vअद्रिवः वज्रवन्निन्द्र vदुरोषासः ओषितुमन्यैर्दग्धुमशक्या दुर्येषु गृहेषु निवसन्तो वा वयम् vअमन्महि त्वां स्तुमः ॥

अमन्महीदनाशवोऽनुग्रासश्च वृत्रहन् ।
सकृत्सु ते महता शूर राधसानु स्तोमं मुदीमहि ॥ १४ ॥

अमन्महि । इत् । अनाशवः । अनुग्रासः । च । वृत्रऽहन् ।
सकृत् । सु । ते । महता । शूर । राधसा । अनु । स्तोमम् । मुदीमहि ॥ १४ ॥

हे vवृत्रहन् वृत्रस्यासुरस्य हन्तरिन्द्र vअनाशवः अशीघ्रा अत्वरमाणाः vअनुग्रासः अनुग्रा अनुद्गूर्णाः vच सन्तो वयं भक्तिश्रद्धापुरःसरं शनैस्त्वाम् vअमन्महीत् स्तुम एव । हे vशूर वीर्यवन्निन्द्र vते त्वदर्थं vसकृत् एकवारमपि vमहता प्रभूतेन vराधसा धनेन हविर्लक्षणेन सह vसु शोभनं vस्तोमं स्तोत्रम् vअनु vमुदीमहि अनुमोदेमहि । अनुब्रवामेत्यर्थः ॥

यदि स्तोमं मम श्रवदस्माकमिन्द्रमिन्दवः ।
तिरः पवित्रं ससृवांस आशवो मन्दन्तु तुभ्यावृधः ॥ १५ ॥

यदि । स्तोमम् । मम । श्रवत् । अस्माकम् । इन्द्रम् । इन्दवः ।
तिरः । पवित्रम् । ससृऽवांसः । आशवः । मन्दन्तु । तुभ्यऽवृधः ॥ १५ ॥

अयमिन्द्रः vमम मदीयं स्तोत्रं[2] vयदि vश्रवत् शृणुयात् तदानीं तम् vइन्द्रम् vअस्माकम् अस्मदीयाः vइन्दवः सोमाः vमदन्तु मादयन्तु हर्षयन्तु । कीदृशाः सोमाः । vतिरः तिर्यगवस्थितं vपवित्रं पवनसाधनं दशापवित्रं vससृवांसः प्रासवन्तः । दशापवित्रेण पूता इत्यर्थः । vआशवः शीघ्रं मदजनकाः vतुभ्यावृधः तुभ्यमिर्वसतीवर्षेकधनाख्याभिरग्निवर्धमानाः ॥ ॥ १२ ॥

आ त्वद्य सधस्तुतिं वावातुः सख्युरा गहि ।
उपस्तुतिर्मघोनां प्र त्वावत्वधा ते वश्मि सुष्टुतिम् ॥ १६ ॥

---

१. त१-२-४–पुरुवसुः । २. घ-श–स्तोमं स्तोत्रं ।

आ । तु । अध । सधऽस्तुतिम् । ववार्तुः । सख्युः । आ । गहि ।

उपऽस्तुतिः । मघोनाम् । प्र । त्वा । अवतु । अध । ते । वक्षिम । सुऽस्तुतिम् ॥ १६ ॥

हे इन्द्र ᵛवावातुः संभक्तुस्त्वां सेवमानस्य ᵛसख्युः स्तोतुः ᵛसधस्तुतिम् अन्यैर्ऋत्विग्भिः सह क्रियमाणां स्तुतिम् ᵛअध इदानीं ᵛतु क्षिप्रम् ᵛआ ᵛगहि आगच्छ । ᵛमघोनां हविष्मतामन्येषामपि यजमानानाम् ᵛउपस्तुतिः स्तोत्रं ᵛत्वा त्वां ᵛप्र ᵛअवतु प्रगच्छतु प्रतर्पयतु वा । ᵛअध अधुना ᵛसुष्टुतिं त्वद्विषयां शोभनां स्तुतिमहमपि ᵛवक्षिम कामये ॥

सोता॒ हि सोम॒मद्रि॑भि॒रेमे॑नम॒प्सु धा॑वत ।
गव्या॑ वस्रे॒व वा॒सय॑न्त इ॒त्नरो॒ निर्धु॑क्षन्व॒क्षणा॑भ्यः ॥ १७ ॥

सोत॑ । हि । सोम॑म् । अद्रि॑ऽभिः । आ । ई॒म् । ए॒न॒म् । अप्ऽसु । धा॒व॒त ।

गव्या॑ । वस्राऽइ॑व । वा॒सय॑न्तः । इ॒त् । नरः॑ । निः । धु॒क्ष॒न् । व॒क्षणा॑भ्यः ॥ १७ ॥

हे अध्वर्यवः ᵛअद्रिभिः ग्रावभिः ᵛसोमं ᵛसोत । हिरवधारणे । अभिषुणुतैव[1] । ᵛएनम् इमम् ᵛअप्सु वसतीवरीषु ᵛआ ᵛधावत । अस्य सोमस्य धवनं कुरुत । अदाभ्यग्रहे हिमादासुत इत्यादिभिर्मन्त्रैर्वसतीवरीष्वाधवनं सोमस्य क्रियते । तत् कुरुतेत्यर्थः । ᵛगव्या गवि भवानि ᵛवस्रेव वस्राण्याच्छादकानि चर्माणीव मेघान् ᵛवासयन्त ᵛइत् आच्छादयन्त एव ᵛनरः नेतार इन्द्रस्यानुचरा मरुतः ᵛवक्षणाभ्यः नदीभ्यो नदीनामर्थाय ᵛनिर्धुक्षन् उदकानि निर्दुहन्ति क्षारयन्ति । यत एवमतः कारणादिन्द्रयागाय सोममद्रिभिरभिषुणुतैव । मोदासिषतेत्यर्थः ॥

अध॒ ज्मो अध॑ वा दि॒वो बृ॒हतो॑ रोच॒नादधि॑ ।
अ॒या व॑र्धस्व त॒न्वा॑ गि॒रा मम॑ जा॒ता सु॑क्रतो पृण ॥ १८ ॥

अध॑ । ज्मः । अध॑ । वा॒ । दि॒वः । बृ॒हतः॑ । रो॒च॒नात् । अधि॑ ।

अ॒या । व॒र्ध॒स्व॒ । त॒न्वा॑ । गि॒रा । मम॑ । आ । जा॒ता । सु॒ऽक्र॒तो॒ इति॑ सुऽक्रतो । पृ॒ण॒ ॥ १८ ॥

हे इन्द्र ᵛअध अधुना ᵛज्मः । जमन्ति गच्छन्त्यस्यामिति ज्मा पृथिवी । तस्याः सकाशात् ᵛअध ᵛवा अपि वा ᵛदिवः अन्तरिक्षात् ᵛबृहतः महतः ᵛरोचनात्[2] नक्षत्रैर्दीप्यमानात् स्वर्गाद्वा आगत्य । अधिः पञ्चम्यर्थानुवादी । ᵛअया अनया ᵛतन्वा ततया विस्तृतया ᵛमम मदीयया ᵛगिरा स्तुत्या ᵛवर्धस्व वृद्धो भव । हे ᵛसुक्रतो शोभनकर्मवन्निन्द्र ᵛजाता जातानस्मदीयान् जनान् ᵛआ ᵛपृण अभिलषितैः फलैरापूरय ॥

इन्द्रा॑य सु म॒दिन्त॑मं॒ सोमं॑ सोता॒ वरे॑ण्यम् ।
श॒क्र एणं॑ पीपय॒द्विश्व॑या धि॒या हि॑न्वा॒नं न वाज॑युम् ॥ १९ ॥

इन्द्रा॑य । सु । म॒दिन्ऽत॑मम् । सोम॑म् । सो॒त॒ । वरे॑ण्यम् ।

श॒क्रः । एन॑म् । पी॒प॒य॒त् । विश्व॑या । धि॒या । हि॒न्वा॒नम् । न । वाज॑ऽयुम् ॥ १९ ॥

---

१. ख-श–अभिषुतैव । २. ख-भ-श–रोचमानात् ।

हे अध्वर्यवः ᵛइन्द्राय इन्द्रार्थं ᵛमदिन्तमं मादयितृतमं ᵛवरेण्यं वरणीयं संभजनीयं ᵛसोमं ᵛसु ᵛसोत अभिषुणुत[1]। कुत इत्यत आह। ᵛशक्रः इन्द्रः ᵛविश्वथा ᵛधिया सर्वथा क्रियया अभिष्टोमादिलक्षणया ᵛहिन्वानं प्रीणयन्तं ᵛवाजयुम् अन्नमात्मन इच्छन्तम् ᵛएनं यजमानम्। ᵛन इति संप्रत्यर्थीयः। संप्रति ᵛपीपयत् वर्धयति। अतः कारणात्तस्मा इन्द्राय सोमं सुनुतेत्यर्थः॥

मा त्वा सोमस्य गल्दया सदा याचञ्चहं गिरा।
भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत्॥ २०॥

मा। त्वा। सोमस्य। गल्दया। सदा। याचन्। अहम्। गिरा।
भूर्णिम्। मृगम्। न। सवनेषु। चुक्रुधम्। कः। ईशानम्। न। याचिषत्॥ २०॥

हे इन्द्र त्वां ᵛसवनेषु यज्ञेषु ᵛसोमस्य ᵛगल्दया गालनेनास्रावणेन[2] ᵛगिरा स्तुत्या च युक्तः ᵛअहं ᵛसदा सर्वदा ᵛयाचन् याचमानः सन् ᵛमा ᵛचुक्रुधं मा क्रोधयानि। बहुशो याच्यमाने त्वयि क्रोधो जायते तं सोमस्य गालनेन स्तुत्या चापनयामीत्यर्थः। कीदृशं त्वाम्। ᵛभूर्णिं भर्तारं ᵛमृगं ᵛन सिंहमिव भीमम्। स्वामिन इन्द्रस्य याचने लौकिकन्यायं दर्शयति। लोके ᵛकः वा पुरुषः ᵛईशानम् ईश्वरं स्वामिनं ᵛन ᵛयाचिषत् न याचेत। सर्व एव हि याचते। अतोऽहमपि त्वां स्वामिनं याच इति भावः॥ ॥ १३॥

मदेनेषितं मदमुग्रमुग्रेण शवसा।
विश्वेषां तरुतारं मदच्युतं मदे हि ष्मा ददाति नः॥ २१॥

मदेन। इषितम्। मदम्। उग्रम्। उग्रेण। शवसा।
विश्वेषाम्। तरुतारम्। मदऽच्युतम्। मदे। हि। स्म। ददाति। नः॥ २१॥

ᵛमदेन मादयित्रा स्तोत्रा ᵛइषितं प्रेषितं ᵛमदं मदकरं सोमम् ᵛउग्रम् उद्गूर्णं रसम् ᵛउग्रेण उद्गूर्णेनाधिकेन ᵛशवसा बलेन युक्त इन्द्रः पिबत्विति शेषः। पीत्वा च ᵛविश्वेषां सर्वेषां शत्रूणां ᵛतरुतारं तरीतारं जेतारं ᵛमदच्युतं मदस्य शत्रूणां गर्वस्य च्यावयितारं पुत्रं ᵛमदे सोमपानेन जनिते हर्षे सति ᵛनः अस्मभ्यं ᵛददाति ᵛहि ᵛष्म ददाति खलु। अतः सोमं पिबत्वित्यर्थः॥

शेवारे वार्या पुरु देवो मर्ताय दाशुषे।
स सुन्वते च स्तुवते च रासते विश्वगूर्तो अरिष्टुतः॥ २२॥

शेवारे। वार्या। पुरु। देवः। मर्ताय। दाशुषे।
सः। सुन्वते। च। स्तुवते। च। रासते। विश्वऽगूर्तः। अरिऽस्तुतः॥ २२॥

ᵛशेवारे। शेवं सुखम्। तस्य गमके यज्ञे ᵛदाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय ᵛपुरु पुरूणि बहूनि वार्याणि वरणीयानि धनानि ᵛदेवः दानादिगुणयुक्त इन्द्रः ᵛरासते ददाति। ᵛसः एव ᵛसुन्वते ᵛच सोमाभिषवं कुर्वते च ᵛस्तुवते ᵛच स्तोत्रं कुर्वते च धनानि रासते। कीदृशः सः। ᵛविश्वगूर्तः विश्वेषु सर्वेषु कार्येषूद्यतः स्वतः प्रवृत्तः ᵛअरिष्टुतः अरिभिः प्रेरयितृभिः प्रशस्तः॥

---

१. त१-२–सुष्ठु अभिषुणुत। २. ख-न-भ–°नाश्रवणेन; त३–°नाश्रावणेन।

एन्द्र याहि मत्स्व चित्रेण देव राधसा।
सरो न प्रास्युदरं सपीतिभिरा सोमेभिरुरु स्फिरम् ॥ २३ ॥

आ। इन्द्र। याहि। मत्स्व। चित्रेण। देव। राधसा।
सरः। न। प्रासि। उदरम्। सपीतिऽभिः। आ। सोमेभिः। उरु। स्फिरम्॥ २३ ॥

हे vइन्द्र vआ vयाहि आगच्छ। हे vदेव द्योतमान vचित्रेण दर्शनीयेन vराधसा धनेन सोमलक्षणेन vमत्स्व माद्य। vसपीतिभिः मरुद्भिः सह पीयमानैः vसोमेभिः सोमैः vउरु विस्तीर्णं vस्फिरं वृद्धम् vउदरम् आत्मीयं जठरं vसरो vन सर इव vआ vप्रासि आपूरय। 'प्रा पूरणे'। आदादिकः॥

चातुर्विंशिकेऽहनि माध्यंदिने ब्रह्मशस्त्रे[1] 'आ त्वा' इति वैकल्पिकः स्तोत्रियस्तृचः। सूत्र्यते हि—'आ त्वा सहस्रमा शतं मम त्वा सूर उदित इति ब्राह्मणाच्छंसिनः' (आश्व. श्रौ. ७.४) इति॥

आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये।
ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ २४ ॥

आ। त्वा। सहस्रम्। आ। शतम्। युक्ताः। रथे। हिरण्यये।
ब्रह्मऽयुजः। हरयः। इन्द्र। केशिनः। वहन्तु। सोमऽपीतये॥ २४ ॥

हे vइन्द्र vत्वा त्वां vसहस्रं सहस्रसंख्याकाः vहरयः त्वदीया अश्वाः vआ vवहन्तु आनयन्त्वस्मद्यज्ञम्। तथा vशतं शतसंख्याकाश्च भवदीयाः[2] अश्वास्त्वाम् vआ वहन्तु। यद्यपि द्वावेवास्य[3] हरी तथापि तद्विभूतयोऽन्येऽपि बहवोऽश्वाः सन्ति। ननु युगपदनेकैरश्वैः कथं यातुं शक्यत इति अत आह vयुक्ताः इति। vहिरण्यये हिरण्मये स्वर्णविकारे। हिरण्यशब्दाद्विकारार्थे विहितस्य मयटः 'ऋत्व्यवास्त्व०' इत्यादौ मलोपो निपात्यते। तादृशे vरथे vयुक्ताः संबद्धाः। बहूनामश्वानां शीघ्रगमनाय रथे नियुक्तत्वाद्युगपदेव सर्वैरश्वैर्गन्तुं शक्यत इति भावः। कीदृशा हरयः। vब्रह्मयुजः ब्रह्मणा परिवृढेनेन्द्रेण युक्ताः। यद्वा ब्रह्मणास्मदीयेन स्तोत्रेणास्माभिर्दत्तेन हविषा वा युक्ताः। vकेशिनः। केशाः केसराः। तैर्युक्ताः। किमर्थमिन्द्रस्य वहनं तत्राह। vसोमपीतये सोमस्य पानाय। यथास्मदीयं सोमं पिबेत् अत आवहन्त्वित्यर्थः॥

आ त्वा रथे हिरण्यये हरी मयूरशेप्या।
शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये ॥ २५ ॥

आ। त्वा। रथे। हिरण्यये। हरी इति। मयूरऽशेप्या।
शितिऽपृष्ठा। वहताम्। मध्वः। अन्धसः। विवक्षणस्य। पीतये॥ २५ ॥

पूर्वं हर्योर्विभूतिरूपा अश्वा इन्द्रमावहन्त्विति प्रार्थितम्। अधुना तावेवेन्द्रमावहतामिति प्रार्थ्यते। vहिरण्यये हिरण्मये vरथे युक्तौ vमयूरशेप्या मयूरशेपौ मयूरवर्णशेपो ययोस्तौ। 'सुपां सुलुक्०' इति विभक्तेर्ड्यादेशः। vशितिपृष्ठा श्वेतपृष्ठौ एवंभूतावश्वौ[4] हे इन्द्र त्वाम् vआ vवहताम्।

---

१. श–ब्राह्मणाच्छंसिशस्त्रे। २. ख-भ–त्वदीया। ३. ख–द्वावेवाश्वौ; भ–द्वावेवास्याश्वौ। ४. घ-श–एवंभूतौ हरी अश्वौ।

किमर्थम्। [v]मध्वः मधुररसस्य [v]विवक्षणस्य वक्तुमिष्टस्य स्तुत्यस्य यद्वा वोढव्यस्य प्राप्तव्यस्य [v]अन्धसः अन्नस्य सोमरूपस्य [v]पीतये पानार्थम् ॥ ॥ १४ ॥

पिबा त्वस्य गिर्वणः सुतस्य पूर्वपाइव ।
परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते ॥ २६ ॥

पिब । तु । अस्य । गिर्वणः । सुतस्य । पूर्वपाःऽइव ।
परिऽकृतस्य । रसिनः । इयम् । आऽसुतिः । चारुः । मदाय । पत्यते ॥ २६ ॥

हे [v]गिर्वणः गीर्भिर्वननीय स्तुतिभिः संभजनीयेन्द्र [v]सुतस्य अभिषुतस्य [v]अस्य सोमस्य ॥ 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥ इममभिषुतं सोमं [v]तु क्षिप्रं [v]पिब । तत्र दृष्टान्तः । [v]पूर्वपाइव । पूर्वः सर्वेभ्यो देवेभ्यः प्रथमभावी सन् पिबतीति पूर्वपा वायुः । स इवैन्द्रवायवे मुख्ये ग्रहे सर्वेभ्यो देवेभ्यः पूर्वं पिबेत्यर्थः । कीदृशस्य सोमस्य । [v]परिष्कृतस्य अभिषवादिभिः संस्कृतस्य ॥ 'संपर्युपेभ्यः०' (पा. सू. ६. १. १३७) इति करोतेर्भूषणे सुट् । 'परिनिविभ्यः०' (पा. सू. ८. ३. ७०) इति सुटः षत्वम् ॥ [v]रसिनः रसवतः । अपि च [v]इयमासुतिः अयमासवो मदकरः [v]चारुः शोभनः सोमरसः [v]मदाय हर्षाय हर्षजननाय [v]पत्यते संपद्यते । 'पतृ गतौ' । यद्वा । पत्यतिरैश्वर्यकर्मा । मदाय मदस्य पत्यते ईष्टे । मदोत्पादने शक्त इत्यर्थः ॥

य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः ।
गमत्स शिप्री न स योषदा गमद्धवं न परि वर्जति ॥ २७ ॥

यः । एकः । अस्ति । दंसना । महान् । उग्रः । अभि । व्रतैः ।
गमत् । सः । शिप्री । न । सः । योषत् । आ । गमत् । हवम् । न । परि । वर्जति ॥ २७ ॥

[v]यः इन्द्रः [v]एकः केवलोऽसहाय एव [v]व्रतैः आत्मीयैः कर्मभिः [v]अभि [v]अस्ति शत्रूनभिभवति । यश्च [v]दंसना कर्मणा [v]महान् अधिकः अत एव [v]उग्रः उद्गूर्णबलः [v]शिप्री । शिप्रं शिरस्त्राणम् । प्रशंसायामिनिः । शोभनशिरस्त्राणः । यद्वा । शिप्रे हनू नासिके वा । तद्वान् । [v]सः इन्द्रः [v]गमत् गच्छतु प्राप्नोतु सर्वदा । [v]सः तादृशः [v]न [v]योषत् न पृथग्भवतु । न वियुक्तो भवतु ॥ गमेर्यौतेश्च लेव्यडागमः । 'इतश्च लोपः०' इतीकारलोपः । गमेः 'बहुलं छन्दसि' इति शपो लुक् । यौतेः 'सिब्बहुलम्०' इति सिप् । [v]हवम् अस्मदीयं स्तोत्रं च [v]आ [v]गमत् अभिगच्छतु प्राप्नोतु । [v]न [v]परि [v]वर्जति न परिवर्जयतु न परित्यजतु । सर्वदास्मानस्मदीयं स्तोत्रं चेन्द्रः प्राप्नोत्विति यावत् ॥

त्वं पुरं चरिष्ण्वं वधैः शुष्ण्यस्य सं पिणक् ।
त्वं भा अनु चरो अध द्विता यदिन्द्र हव्यो भुवः ॥ २८ ॥

त्वम् । पुरम् । चरिष्ण्वम् । वधैः । शुष्ण्यस्य । सम् । पिणक् ।
त्वम् । भाः । अनु । चरः । अध । द्विता । यत् । इन्द्र । हव्यः । भुवः ॥ २८ ॥

हे इन्द्र [v]त्वं [v]शुष्ण्यस्य शोषकस्यासुरस्य [v]चरिष्ण्वं चरणशीलम् ॥ 'वा छन्दसि' इत्यभि पूर्वत्वस्य विकल्पितत्वाद्यणादेशः ॥ [v]पुरं निवासस्थानं [v]वधैः वज्रादिभिरायुधैः [v]सं [v]पिणक् समचूर्णयः । अभाक्षीरित्यर्थः । पिनष्टेर्लङि मध्यमैकवचने रूपमेतत् । [v]अध अपि च [v]भाः

भासमानः ᵛत्वम् ᵛअनु ᵛचरः तं शुष्णं हन्तुमन्वगच्छः । यद्वा । अध शुष्णस्य पुरभेदनानन्तरं भा दीप्तीस्त्वमनु चरः अन्वगच्छः । प्राप्तवानित्यर्थः । हे ᵛइन्द्र त्वं ᵛयत् यदा ᵛद्विता द्विधा द्विविधैः स्तोतृभिर्यैष्टृभिश्च ᵛहव्यः ह्वातव्यः ᵛभुवः भवेः । तदानीं त्वं शुष्णस्य पुरं सं पिणगित्यन्वयः । भवतेर्लेटि सिप्यडागमः । छान्दसः शपो लुक् । ' भूसुवोस्तिङि ' इति गुणप्रतिषेधादुवङ् ॥

चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्रह्मशस्त्रे ' मम त्वा ' इति वैकल्पिकोऽनुरूपस्तृचः । सूत्रं तु पूर्वमुदाहृतम् ॥

मम॑ त्वा॒ सूर॒ उदि॑ते॒ मम॑ मध्यं॒दिने॑ दि॒वः ।
मम॑ प्रपि॒त्वे अ॑पिशर्व॒रे व॑सवा॒ स्तोमा॑सो अवृत्सत ॥ २९ ॥

मम॑ । त्वा॒ । सूरे॑ । उत्ऽइ॑ते । मम॑ । म॒ध्यं॒दिने॑ । दि॒वः ।
मम॑ । प्र॒ऽप॒त्वे॑ । अ॒पि॒ऽश॒र्व॒रे॒ । व॒सो॒ इति॑ । आ । स्तोमा॑सः । अ॒वृ॒त्स॒त॒ ॥ २९ ॥

ᵛसूरे सूर्ये ᵛउदिते उदयं प्राप्ते पूर्वाह्णसमये ᵛमम ᵛस्तोमासः स्तोत्राणि हे ᵛवसो वासकेन्द्र त्वाम् ᵛआ ᵛअवृत्सत आवर्तयन्तु । अस्मदभिमुखं गमयन्तु । तथा ᵛदिवः दिवसस्य ᵛमध्यंदिने मध्याह्नेऽपि मदीयाः स्तोमास्त्वामावर्तयन्तु । तथा ᵛप्रपित्वे प्राप्ते दिवसस्यावसाने सायाह्नेऽपि मदीयाः स्तोमास्त्वामावर्तयन्तु । ᵛअपिशर्वरे । शर्वरीं रात्रिमपिगतः कालः अपिशर्वरः । शार्वरे कालेऽपि मदीयाः स्तोमास्त्वामावर्तयन्तु ॥

स्तु॒हि स्तु॒हीदे॒ते घा॑ ते॒ मंहि॑ष्ठासो म॒घोना॑म् ।
नि॒न्दि॒ताश्वः॑ प्रप॒थी प॑रम॒ज्या म॒घस्य॑ मेध्यातिथे ॥ ३० ॥

स्तु॒हि॒ । स्तु॒हि॒ । इत् । ए॒ते । घ॒ । ते॒ । मंहि॑ष्ठासः । म॒घोना॑म् ।
नि॒न्दि॒तऽअ॑श्वः । प्र॒ऽप॒थी । पर॑मऽज्याः । म॒घस्य॑ । मेध्यऽअतिथे ॥ ३० ॥

आसङ्गो राजर्षिर्मेध्यातिथये बहु धनं दत्त्वा तमृषिं दत्तदानस्य स्वस्य स्तुतौ प्रेरयति । हे ᵛमेध्यातिथे यज्ञार्हातिथ एतत्संज्ञर्षे ᵛस्तुहि ᵛस्तुहीत् । पुनःपुनरस्मान् प्रशंसैव । मोदास्व औदासीन्यं मा कार्षीः । ᵛएते ᵛघ एते खलु वयं ᵛमघोनां धनवतां मध्ये ᵛते तुभ्यं ᵛमघस्य धनस्य ᵛमंहिष्ठासः दातृतमाः । अतोऽस्मान् स्तुहीत्यर्थः । कासौ स्तुतिस्तामाह । ᵛनिन्दिताश्वः । यस्य वीर्येण परेषामश्वा निन्दिताः कुत्सिता भवन्ति तादृशः । ᵛप्रपथी । प्रकृष्टः पन्थाः प्रपथः । तद्वान् । सन्मार्गवर्तीत्यर्थः । ᵛपरमज्याः उत्कृष्टज्यः । अनेन धनुरादिकं लक्ष्यते । उत्कृष्टायुध इत्यर्थः । यद्वा । परमानुत्कृष्टाञ्छत्रून् जिनाति हिनस्तीति परमज्याः । 'ज्या वयोहानौ' । अस्मात् 'आतो मनिन्' इति विच् । एवंभूतोऽहमासङ्ग इति स्तुहीत्यर्थः ॥ ॥ १५ ॥

आ यदश्वा॒न्वन॑न्वतः श्र॒द्धया॒हं रथे॑ रु॒हम् ।
उ॒त वा॒मस्य॒ वसु॑नश्चिकेतति॒ यो अ॑स्ति॒ याद्वः॑ प॒शुः ॥ ३१ ॥

आ । यत् । अश्वा॑न् । वन॑न्ऽवतः । श्र॒द्धया॑ । अ॒हम् । रथे॑ । रु॒हम् ।
उ॒त । वा॒मस्य॑ । वसु॑नः । चि॒के॒त॒ति॒ । यः । अ॒स्ति॒ । याद्वः॑ । प॒शुः ॥ ३१ ॥

vवनन्वतः वननवतः संभक्तवतः vअश्वान् तुरगान् vअहं प्रायोगिः vश्रद्धया आदरातिशयेन युक्तः सन् vयत् यदा हे मेध्यातिथे त्वदीये vरथे vआ vरुहं आरोहयम्[1]। रुहेरन्तर्भावितण्यर्थाल्लुङि 'कृमृदृरुहिभ्यः०' इति च्लेरङादेशः। तदानीं मामेवं स्तुहि। vउत अपि च। प्रकृतस्तुत्यपेक्ष एष समुच्चयः। vवामस्य वननीयस्य vवसुनः धनस्य। पूर्ववत् कर्मणि षष्ठी। ईदृशं धनं vचिकेतति। एष आसङ्गो दातुं जानाति। vयादवः यदुवंशोद्भवः। यद्वा। यदवो मनुष्याः। तेषु प्रसिद्धः। vपशुः। लुप्तमत्वर्थमेतत्। पशुमान्। यद्वा। पशुः पश्यतेः। सूक्ष्मस्य द्रष्टा। vयः आसङ्गः vअस्ति विद्यते एष चिकेततीत्यन्वयः॥

य ऋज्रा मह्यं मामहे सह त्वचा हिरण्यया।
एष विश्वान्यभ्यस्तु सौभगासङ्गस्य स्वनद्रथः॥ ३२॥

यः। ऋज्रा। मह्यम्। ममहे। सह। त्वचा। हिरण्यया।
एषः। विश्वानि। अभि। अस्तु। सौभगा। आऽसङ्गस्य। स्वनत्ऽरथः॥ ३२॥

एवमेवं मां स्तुहीत्यासङ्गो मेध्यातिथिं ब्रूते। vयः आसङ्गस्यात्मा vऋज्रा गमनशीलानि धनानि vहिरण्यया हिरण्मय्या vत्वचा चर्मणास्तरणेन vसह सहितानि vमह्यं मेध्यातिथये vममहे ददौ। मंहतिर्दानकर्मा। vएषः आसङ्गस्यात्मा vस्वनद्रथः शब्दायमानरथः सन् vविश्वानि व्याप्तानि सौभगानि धनानि शत्रूणां स्वभूतानि vअभ्यस्तु अभिभवतु॥

अध प्रायोगिरतिं दासदन्यानासङ्गो अग्ने दशभिः सहस्रैः।
अधोक्षणो दश मह्यं रुशन्तो नळाइव सरसो निरतिष्ठन्॥ ३३॥

अध। प्रायोगिः। अतिं। दासत्। अन्यान्। आऽसङ्गः। अग्ने। दशऽभिः। सहस्रैः।
अध। उक्षणः। दश। मह्यम्। रुशन्तः। नळाःऽइव। सरसः। निः। अतिष्ठन्॥ ३३॥

vअध अपि च vप्रायोगिः[2] प्रयोगनाम्नः पुत्रः vआसङ्गः नाम राजा vदशभिः दशगुणितः vसहस्रैः सहस्रसंख्याकैर्गवादिभिः vअन्यान् दातॄन् vअति vदासत् अतिक्रम्य ददाति। vअध अनन्तरम् vउक्षणः सेचनसमर्थाः vमह्यम् आसङ्गेन दत्ताः vरुशन्तः दीप्यमानाः vदश दशगुणितसहस्रसंख्याकास्ते गवादयः vनळाइव। नळास्तटाकोद्भवास्तृणविशेषाः। ते यथा vसरसः तटाकात् संघशो निर्गच्छन्ति तथैव मह्यं दत्ता गवादयोऽस्मादासङ्गात् vनिरतिष्ठन् निर्गत्यावास्थिषत। एवमेवंप्रकारेण मां स्तुहीति मेध्यातिथिं प्रत्युक्तवादेतासां चतसृणामृचां प्रायोगिरासङ्ग ऋषिः स एव देवतेत्येतदुपपन्नं भवति॥

अन्वस्य स्थूरं ददृशे पुरस्तादनस्थ ऊरुरवरम्बमाणः।
शश्वती नारीभिचक्ष्याह सुभद्रमर्य भोजनं बिभर्षि॥ ३४॥

अनु। अस्य। स्थूरम्। ददृशे। पुरस्तात्। अनस्थः। ऊरुः। अवऽरम्बमाणः।
शश्वती। नारी। अभिऽचक्ष्य। आह। सुऽभद्रम्। अर्य। भोजनम्। बिभर्षि॥ ३४॥

अथमासङ्गो राजा कदाचिद्देवशापेन नपुंसको बभूव। तस्य पत्नी शश्वती भर्तुर्नपुंसकत्वेन खिन्ना सती महत्तपस्तेपे। तेन च तपसा स च पुंस्त्वं प्राप। प्राप्तपुंस्त्वञ्च तं रात्रावुपलभ्य प्रीता शश्वत्य-

---

१. ख–आयोरोक्त्वं; झ-त-न-भ-श–आरोहयंत। २. त१–प्रायोगिः।

नया तमस्तौत् । ᵛअस्य आसङ्गस्य ᵛपुरस्तात् पूर्वभागे गुह्यदेशे ᵛस्थूरं स्थूलं वृद्धं सत् पुंष्यञ्जनम् ᵛअनु ᵛदृदृशे अनुदृश्यते । ᵛअनस्थः अस्थिरहितः स चावयवः ᵛऊरुः उरुर्विस्तीर्णः ᵛअवरम्बमाणः अतिदीर्घत्वेनावाङ्मुखं लम्बमानः । यद्वा । ऊरुः । ' सुपां सुलुक्° ' इति द्विवचनस्य सुः । ऊरू प्रत्यवलम्बमानो भवति । ᵛशश्वती नामाङ्गिरसः सुता ᵛनारी तस्यासङ्गस्य भार्या ᵛअभिचक्ष्य एवंभूतमवयवं निशि दृष्ट्वा हे ᵛअर्य स्वामिन् भर्तः ᵛसुभद्रम् अतिशयेन कल्याणं ᵛभोजनं भोगसाधनं ᵛबिभर्षि धारयसीति ᵛआह ब्रूते ॥ ॥ १६ ॥

' इदं वसो ' इति द्विचत्वारिंशदृचं द्वितीयं सूक्तं काण्वस्य मेधातिथेराङ्गिरसस्य च प्रियमेधस्यार्षम् । ' शिक्षा विभिन्दो ' इत्यादिके द्वे मेधातिथेरेव । ' स्वादवः सोमाः ' इत्येषानुष्टुप् शिष्टा गायत्र्यः । इन्द्रो देवता । अन्ये द्वे ऋचौ विभिन्दोर्दानस्तुतित्वात्तद्देवताके । तथा चानुक्रान्तम्— ' इदं वसो द्विचत्वारिंशन्मेधातिथिराङ्गिरसश्च प्रियमेधः स्वादवोऽनुष्टुबन्त्याभ्यां मेधातिथिर्विभिन्दोर्दानं तुष्टाव ' इति । गतः सूक्तविनियोगः । ज्योतिष्टोमे मरुत्वतीय आद्यस्तृचोऽनुचरः । सूत्र्यते हि—' इदं वसो सुतमन्ध इति मरुत्वतीयस्य प्रतिपदनुचरौ ' (आश्व. श्रौ. ५. १४) इति । द्वितीये रात्रिपर्याये ब्रह्मशस्त्रेऽयमेव स्तोत्रियस्तृचः । सूत्रितं च—' इदं वसो सुतमन्ध इन्देहि मत्स्यन्धसः ' (आश्व. श्रौ. ६. ४) इति । अयमेव चतुर्थेऽहन्यपि मरुत्वतीयस्यानुचरस्तृचः । सूत्रितं च—' तं त्वा यज्ञेभिरीमह इदं वसो सुतमन्ध इति मरुत्वतीयस्य प्रतिपदनुचरौ ' (आश्व. श्रौ. ७. ११) इति ॥

इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम् । अनाभयिन्ररिमा ते ॥ १ ॥

इदम् । वसो इति । सुतम् । अन्धः । पिब । सुऽपूर्णम् । उदरम् । अनाभयिन् । ररिम । ते ॥ १ ॥

हे ᵛवसो वासयितरिन्द्र ᵛइदं पुरोवर्तमानं ᵛसुतम् अभिषुतम् ᵛअन्धः अन्नं सोमलक्षणं ᵛपिब । यथा ᵛउदरं त्वदीयं जठरं ᵛसुपूर्णम् अतिशयेन संपूर्णं भवति तथेत्यर्थः । हे ᵛअनाभयिन् । आ समन्ताद्बिभेतीत्याभयी । बिभेतेरौणादिक इनिः । नाभय्यनाभयी । तादृश हे इन्द्र ᵛते तुभ्यं त्वदर्थं ᵛररिम उक्तलक्षणं सोमं दद्मः । ' रा दाने ' । छान्दसो लिट् ॥

नृभिर्धूतः सुतो अश्नैरव्यो वारैः परिपूतः । अश्वो न निक्तो नदीषु ॥ २ ॥

नृऽभिः । धूतः । सुतः । अश्नैः । अव्यैः । वारैः । परिऽपूतः । अश्वः । न । निक्तः । नदीषु ॥ २ ॥

ᵛनृभिः अध्वरस्य नेतृभिर्ऋत्विग्भिः ᵛधूतः आधूतोऽदाभ्यग्रह[1] आधवनेन संस्कृतः ᵛअश्नैः अश्मभिर्ग्रावभिः करणभूतैः ᵛसुतः अध्वर्युभिरभिषुतः ᵛअव्यः अवेर्मेषस्य ᵛवारैः वालैः ᵛपरिपूतः । दशापवित्रस्य नाभिभूतया ऊर्णास्तुकया हि सोमः परिपूयते । तदुक्तं भगवता आपस्तम्बेन— ' शुक्लामूर्णास्तुकां यजमानाय प्रयच्छति तां शकटे दशापवित्रस्य नाभिं कुरुते शुक्लं वलक्ष्याः पवित्रममोतं भवति ' इति । ᵛनदीषु नदनास्वप्सु ᵛअश्वो ᵛन अश्व इव ᵛनिक्तः निर्णिक्तः शोधितः । यथाप्सु स्नातोऽश्वोऽपगतमलः सन् दीप्तो भवति एवं वसतीवर्याख्याभिरद्भिरभिषुतः सोमो दीप्तो भवतीत्यर्थः । ईदृशो यः सोमः ' तं ते यवम् ' इत्युत्तरया संबन्धः ॥

तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः । इन्द्र त्वास्मिन्त्सधमादे ॥ ३ ॥

तम् । ते । यवम् । यथा । गोभिः । स्वादुम् । अकर्म । श्रीणन्तः ।
इन्द्र । त्वा । अस्मिन् । सधऽमादे ॥ ३ ॥

---

१. ज्ञ-य–अवधूतो°; त१-२-४–अधूतो° ।

vतं पूर्वोक्तगुणं सोमं हे इन्द्र vते त्वदर्थं vयवं vयथा यवमयं सवनीयपुरोडाशमिव vगोभिः गवि भवैः क्षीरादिभिः श्रयणद्रव्यैः vश्रीणन्तः मिश्रीकुर्वन्तः vस्वादुं रसत्वेन स्वादनीयम् vअकर्म अकार्ष्म । करोतेर्लुङि ' मन्त्रे घस° ' इति च्लेर्लुक् । यस्मादेवं तस्मात् हे vइन्द्र vत्वा त्वां तादृशं सोमं पातुम् vअस्मिन् वर्तमाने vसधमादे सहमदने यज्ञे आह्वयामीति शेषः ॥

महाव्रते निष्केवल्ये गायत्रतृचाशीतौ ' इन्द्र इत्सोमपाः ' इत्येतदादिसूक्तशेषः शंसनीयः । अन्त्यास्तिस्रो वर्जयित्वा तत्रापि ' स्वादवः ' इत्येतां परित्यज्य तत्र स्थाने ' न ह्यन्यं बळाकरम् ' इत्येतामावपेत् । तथैव पञ्चमारण्यके सूत्रितम्—' इन्द्र इत्सोमपा एक इत्येतत्प्रभृतीनां तिस्र उत्तमा उद्धरति । तासां स्वादवः सोमा आ याहीत्येतामुद्धृत्य न ह्यन्यं बळाकरमित्येतां प्रत्यवदधाति ' (ऐ. आ. ५. २. ३) इति । पञ्चमेऽहनि मरुत्वतीये ' इन्द्र इत् ' इत्यनुचरस्तृचः । सूत्र्यते हि— ' इन्द्र इत्सोमपा एक इति मरुत्वतीयस्य प्रतिपदनुचरौ ' (आश्व. श्रौ. ७. १२) इति ॥

इन्द्र इत्सोमपा एक इन्द्रः सुतपा विश्वायुः । अन्तर्देवान्मर्त्यांश्च ॥ ४ ॥

इन्द्रः । इत् । सोमऽपाः । एकः । इन्द्रः । सुतऽपाः । विश्वऽआयुः ।
अन्तः । देवान् । मर्त्यान् । च ॥ ४ ॥

vइन्द्र vइत् इन्द्रः vएकः एव vदेवान् vमर्त्यान् मनुष्यान् vच vअन्तः मध्ये देवेषु च मध्ये vसोमपाः कृत्स्नस्य सोमस्य पाता । नान्ये । ते ह्येकदेशभाजः । अत एव vसुतपाः सुतस्याभिषुतस्यास्मदीयस्य सोमस्य कार्त्स्न्येन पाता । vइन्द्रः एक एव vविश्वायुः । स चेन्द्रः सर्वान्नो भवति । धानाकरम्भादिहवींषि सवनेष्विन्द्रायैव हूयन्ते तदभिप्रायेणेदमुच्यते । अत एवंविध इन्द्रोऽस्मदीयं हविः स्वीकरोत्वित्यर्थः ॥

न यं शुक्रो न दुराशीर्न तृप्रा उरुव्यचसम् । अपस्पृण्वते सुहार्दम् ॥ ५ ॥

न । यम् । शुक्रः । न । दुःऽआशीः । न । तृप्राः । उरुऽव्यचसम् ।
अपऽअस्पृण्वते । सुऽहार्दम् ॥ ५ ॥

vउरुव्यचसं विस्तीर्णव्यापनं vसुहार्दं सुहृदयं vयम् इन्द्रं vशुक्रः रसाधिक्येन दीप्तः सोमः vन अपस्पृणुते[1] । ' स्पृ प्रीतिबलयोः ' । अत्रोपसर्गवशात् प्रीत्यभावे वर्तते । नत्रा च प्रीत्यभावो निवार्यते । न प्रीणयतीति न अपि तु प्रीणयत्येव । तथा vदुराशीः दुःखेन निष्पाद्याशीराश्रयणद्रव्यं यस्य तार्तीयसवनिकस्य सोमस्य सोऽपि यमिन्द्रं vन अपस्पृणुते प्रीणयत्येव । vतृप्राः तर्पका अन्ये चरुपुरोडाशादयश्च यमिन्द्रं vन vअपस्पृण्वते न न प्रीणयन्ति अपि तु प्रीणयन्त्येव तमिन्द्रं स्तुम इति शेषः । यद्वा । अप इत्युपसर्गो धात्वर्थानुवादकः । यमिन्द्रं शुक्रादयो नापस्पृण्वते न प्रीणयन्ति । उरुव्यचसमिति हेतुगर्भविशेषणम् । यतोऽयमिन्द्र उरुव्यचा विस्तीर्णव्याप्तिकः अतः कारणादपर्याप्ताः सन्तः शुक्रादयः प्रीणयितुं न शक्नुवन्तीति भावः ॥ ॥ १७ ॥

गोभिर्यदीमन्ये अस्मन्मृगं न व्रा मृगयन्ते । अभित्सरन्ति धेनुभिः ॥ ६ ॥

गोभिः । यत् । ईम् । अन्ये । अस्मत् । मृगम् । न । व्राः । मृगयन्ते । अभिऽउत्सरन्ति । धेनुऽभिः ॥ ६ ॥

vयत् ये vअस्मत् अस्मत्तः vअन्ये ऋत्विग्यजमानाः vईम् एनमिन्द्रं vगोभिः गवि भवैः क्षीरादिभिः संस्कृतैः सोमैः सहिताः सन्तः vमृगयन्ते अन्विष्यन्ते । तत्र दृष्टान्तः । vव्राः वरीतारो

१. ख-घ-भ–अपस्पृण्वते ।

जालादिभिरुपायैर्निरुन्धाना व्याधाः vमृगं vन यथा मृगमन्विष्यन्ति तद्वदनधिकारिण एव बलादिन्द्रस्यान्वेषणे वर्तन्त इत्यर्थः । ' मृग अन्वेषणे ' इति धातुः । ये च जनाः vधेनुभिः । धेनुरिति वाङ्नाम । वाग्भिः स्तुतिभिश्च vअभित्सरन्ति अभिमुखं कुत्सितं गच्छन्ति । सम्यक् स्तोतुं न शक्नुवन्तीत्यर्थः । ' त्सर च्छद्मगतौ ' । तथाविधा जना इन्द्रं नोपलभन्त इत्यर्थः ॥

दशरात्रे तृतीयेऽहनि मरुत्वतीयस्य ' त्रय इन्द्रस्य ' इति तृचोऽनुचरः । सूच्यते हि—' तं तमिद्राधसे महे त्रय इन्द्रस्य सोमा इति मरुत्वतीयस्य प्रतिपदनुचरौ ' (आश्व. श्रौ. ७. १०) इति ॥

त्रय इन्द्रस्य सोमाः सुतासः सन्तु देवस्य । स्वे क्षये सुतपात्रः ॥ ७ ॥

त्रयः । इन्द्रस्य । सोमाः । सुतासः । सन्तु । देवस्य । स्वे । क्षये । सुतऽपात्रः ॥ ७ ॥

vदेवस्य दानादिगुणयुक्तस्य vइन्द्रस्य पानार्थं vत्रयः सवनत्रयरूपेण त्रिधा वर्तमानाः vस्वे vक्षये स्वकीये यज्ञगृहे vसुतासः अभिषुताः vसन्तु भवन्तु । vसुतपात्रः । हेतुगर्भविशेषणमेतत् । यस्मादयमिन्द्रोऽभिषुतस्यैव सोमस्य पाता तस्मादभिषुताः सन्त्वित्यर्थः ॥

त्रयः कोशासः श्वोतन्ति तिस्रश्चम्वः सुपूर्णाः । समाने अधि भार्मन् ॥ ८ ॥

त्रयः । कोशासः । श्वोतन्ति । तिस्रः । चम्वः । सुऽपूर्णाः । समाने । अधि । भार्मन् ॥ ८ ॥

vत्रयः त्रिसंख्याकाः vकोशासः कोशाः सोमस्याश्रयभूता द्रोणकलशपूतभृदाधवनीयाख्याः vश्वोतन्ति क्षरन्ति । इन्द्रार्थं सोमं स्रावयन्ति । vतिस्रः त्रिविधाः सवनत्रये वर्तमानाः vचम्वः चमसाश्च vसुपूर्णाः इन्द्रयागाय सोमैः सुपूरिता आसन् । एतत्सर्वं कुत्रेति चेदुच्यते । vसमाने एकस्मिन्नेव vभार्मन् भर्मणि भरे ऋत्विग्भिर्भ्रियमाणे यज्ञे । vअधि[1] सप्तम्यर्थानुवादी ॥

शुचिरसि पुरुनिःष्ठाः क्षीरैर्मध्यत आशीतः । दध्ना मन्दिष्ठः शूरस्य ॥ ९ ॥

शुचिः । असि । पुरुनिःऽस्थाः । क्षीरैः । मध्यतः । आऽशीतः । दध्ना । मन्दिष्ठः । शूरस्य ॥ ९ ॥

हे सोम त्वं vशुचिरसि । दशापवित्रेण शोधितो भवसि । स त्वं vपुरुनिष्ठाः पुरुषु बहुषु पात्रेषु ग्रहचमसादिषु निःशेषेण स्थाता[2] vमध्यतः मध्ये मैत्रावरुणग्रहादौ vक्षीरैः पयःप्रभृतिभिः श्रयणद्रव्यैः[3] vआशीतः मिश्रणेन संस्कृतः । तृतीये सवने vदध्ना चाशीतः । एवंभूतस्त्वं vशूरस्य विक्रान्तस्येन्द्रस्य vमन्दिष्ठः मादयितृतमो भव ॥

इमे ते इन्द्र सोमास्तीव्रा अस्मे सुतासः । शुक्रा आशिरं याचन्ते ॥ १० ॥

इमे । ते । इन्द्र । सोमाः । तीव्राः । अस्मे इति । सुतासः । शुक्राः । आऽशिरम् । याचन्ते ॥ १० ॥

हे vइन्द्र vते त्वदीयाः vइमे vसोमाः vतीव्राः तीव्रमदाः vअस्मे अस्माभिरध्वर्युभिः vसुतासः अभिषुताः vशुक्राः शुद्धाः सन्तः vआशिरं क्षीरादिकं श्रयणद्रव्यं[4] त्वां vयाचन्ते । ताञ्छ्रीणीहीत्युत्तरत्रान्वयः ॥ ॥ १८ ॥

ताँ आशिरं पुरोळाशमिन्द्रेमं सोमं श्रीणीहि । रेवन्तं हि त्वा शृणोमि ॥ ११ ॥

तान् । आऽशिरम् । पुरोळाशम् । इन्द्र । इमम् । सोमम् । श्रीणीहि । रेवन्तम् । हि । त्वा । शृणोमि ॥ ११ ॥

---

१. ज्ञ-त१-२-४-अधिः । २. ख-स्था; भ-स्थाः; श-स्थापितः । ३. ख-श-श्रपणद्रव्यैः । ४. श-श्रपणद्रव्यं ।

हे ᵛइन्द्र ᵛतान् पूर्वोक्तान् सोमान् ᵛआशिरं श्रयणद्रव्यं च क्षीरादिकं ᵛश्रीणीहि मिश्रय यागार्थम् । तदनन्तरं ᵛपुरोळाशं धानाकरम्भादिलक्षणं सवनीयपुरोडाशम् ᵛहमम् अस्मदीयं ᵛसोमं च श्रीणीहि मिश्रय । प्रथमं भक्षितं पुरोळाशं पश्चात्पीतेन सोमेन संयोजयेत्यर्थः । तव प्रार्थने को हेतुरिति चेत् । ᵛहि यस्मात् ᵛरेवन्तं रयिमन्तम् । ' रयेर्मतौ बहुलम् ' इति संप्रसारणम् । बहुलधनं त्वां ᵛश्रृणोमि त्वं बहुधन इति सर्वत्र श्रूयते अतः कारणात् त्वामेव प्रार्थयामहे ॥

हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम् । ऊधर्न नग्ना जरन्ते ॥ १२ ॥

हृत्ऽसु । पीतासः । युध्यन्ते । दुःऽमदासः । न । सुरायाम् । ऊधः । न । नग्नाः । जरन्ते ॥१२॥

हे इन्द्र ᵛपीतासः त्वया पीताः सोमाः ᵛहृत्सु हृदयेषु त्वदीयेषु ᵛयुध्यन्ते । परस्परं संप्रहारं कुर्वते । तत्र दृष्टान्तः । ᵛसुरायां पीतायां जायमानाः ᵛदुर्मदासो ᵛन । दुष्टमदा यथा पातारं मादयन्ति तद्वत्त्वां मादयितुं परस्परं युध्यन्त इत्यर्थः । अपि च । ग्राश्छन्दांसि । तानि न जहतीति ᵛनग्नाः स्तोतारः । ते च ᵛऊधर्न पयसा पूर्णं गवादेरूध इव सोमपूर्णं त्वां ᵛजरन्ते स्तुवन्ति । जरतिः स्तुतिकर्मा ॥

षष्ठेऽहनि यदि रैवतसामसाध्यं पृष्टस्तोत्रं तदा निष्केवल्ये ' रेवाँ इत् ' इत्यनुरूपस्तृचः । सूत्र्यते हि—' रेवतीर्नः सधमादे रेवाँ इद्रेवतः स्तोतेति स्तोत्रियानुरूपौ ' (आश्व. श्रौ. ८. १) इति ॥

रेवाँ इद्रेवतः स्तोता स्यात्त्वावतो मघोनः । प्रेदु हरिवः श्रुतस्य ॥ १३ ॥

रेवान् । इत् । रेवतः । स्तोता । स्यात् । त्वाऽवतः । मघोनः ।
प्र । इत् । ऊँ इति । हरिऽवः । श्रुतस्य ॥ १३ ॥

हे ᵛहरिवः हरिवन् । ' मतुवसो रुः ' इति नकारस्य रुत्वम् । हरी अश्वौ । तद्वन्निन्द्र ᵛरेवतः रयिमतो बहुधनोपेतस्य तव[1] ᵛस्तोता ᵛरेवान् ᵛस्यात् रयिमान् भवेत् । इच्छब्दोऽवधारणे । धनवान् भवेदेव न तु दारिद्र्यं प्राप्नोति । उक्तमेवार्थं कैमुतिकन्यायेन द्रढयति । ᵛत्वावतः त्वत्सदृशस्य । ' युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् ' इति वतुप् । ᵛमघोनः मघवतो धनाढ्यस्य ᵛश्रुतस्य विश्रुतस्य सर्वत्र प्रख्यातस्यान्यस्यापि स्तोता ᵛप्रेदु । स्यात् इत्यनुषज्यते । प्रस्यात् । प्रभवेदेव न तु निहीयते । किमु वक्तव्यं तव स्तोता धनवान् भवेदेवेति ॥

उक्थं चन शस्यमानमगोरारिरा चिकेत । न गायत्रं गीयमानम् ॥ १४ ॥

उक्थम् । चन । शस्यमानम् । अगोः । अरिः । आ । चिकेत । न । गायत्रम् । गीयमानम्॥१४॥

गायतेर्गौः[2] । ᵛअगोः अस्तोतुः ᵛअरिः शत्रुरिन्द्रः ᵛशस्यमानं होत्रा पठ्यमानम् ᵛउक्थं ᵛचन शस्त्रमपि ᵛआ ᵛचिकेत अभिजानाति । ' कित ज्ञाने ' । छान्दसो लिट् । नेति संप्रत्यर्थे । ᵛन संप्रति प्रस्तोत्रादिभिः[3] ᵛगीयमानं ᵛगायत्रं गातव्यं साम यद्वा गायत्रास्थमपि चिकेतेत्येव । अतः कारणात् वयमपि तमिन्द्रं स्तुम इत्यर्थः ॥

मा नं इन्द्र पीयत्नवे मा शर्धते परा दाः । शिक्षा शचीवः शचीभिः ॥ १५ ॥

मा । नः । इन्द्र । पीयत्नवे । मा । शर्धते । परा । दाः । शिक्ष । शचीऽवः । शचीभिः॥१५॥

---

१. ख-ङ्ग-त-न-भ-श–अत एव । २. ख-ङ्ग-त३-न-भ-श–°र्गोः; ज्ञ-त१-२-४–°र्गाः । ३. ख-ङ्ग-त–स्तोत्रादिभिः ।

हे ᵛइन्द्र त्वं ᵛपीयत्नवे। पीयतिर्वधकर्मा। वधशीलाय हिंसाकारिणे शत्रवे ᵛनः अस्मान् ᵛमा ᵛपरा ᵛदाः मा परित्याक्षीः। ᵛमा च ᵛशर्धते अभिभवित्रे अस्मान् मा परा दाः। 'शृधु प्रसहने' इति धातुः। अपि तु हे ᵛशचीवः शक्तिमन्निन्द्र ᵛशचीभिः आत्मीयैः कर्मभिः ᵛशिक्ष अस्माननुशाधि। यद्वा। शिक्षतिर्दानकर्मा। अभीष्टं धनमस्मभ्यं देहि। यद्वा। शत्रून् जेतुं शिक्ष शक्तान् कर्तुमिच्छ। शकेः सनन्तस्य 'सनि मीमा॰' इति इसादेशेऽभ्यासलोपे च कृते लोटि रूपमेतत्॥ ॥ १९ ॥

प्रथमे रात्रिपर्याये ब्रह्मशस्त्रे 'वयमु त्वा' इति स्तोत्रियस्तृचः। सूत्रितं च—'वयमु त्वा तदिदर्था वयमिन्द्र त्वायवोऽभि' (आश्व. श्रौ. ६. ४) इति॥

वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः। कण्वा उक्थेभिर्जरन्ते॥ १६॥

वयम्। ऊँ इति। त्वा। तदित्ऽअर्थाः। इन्द्र। त्वाऽयन्तः। सखायः।
कण्वाः। उक्थेभिः। जरन्ते॥ १६॥

हे ᵛइन्द्र ᵛत्वायन्तः त्वामात्मन इच्छन्तः ᵛसखायः समानख्यानाः ᵛवयं ᵛतदिदर्थाः यत्त्वद्विषयं स्तोत्रं तदित्तदेवार्थः प्रयोजनं येषां तादृशाः सन्तः ᵛत्वा त्वां जरामहे स्तुमहे। ᵛउ इति पूरणः। ᵛकण्वाः कण्वगोत्रोत्पन्ना अस्मदीयाः पुत्रादयश्च ᵛउक्थेभिः उक्थैः शस्त्रैः ᵛजरन्ते त्वां स्तुवन्ति॥

न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ। तवेदु स्तोमं चिकेत॥ १७॥

न। घ। ईम्। अन्यत्। आ। पपन। वज्रिन्। अपसः। नविष्टौ।
तव। इत्। ऊँ इति। स्तोमम्। चिकेत॥ १७॥

हे ᵛवज्रिन् वज्रवन्निन्द्र ᵛअपसः अपस्विनः कर्मवतः तव संबन्धिनि ᵛनविष्टौ अभिनवे यागे वर्तमानोऽहम् ᵛअन्यत् त्वद्विषयादन्यत् स्तोत्रं ᵛन ᵛघं नैव ᵛआ ᵛपपन अभिष्टौमि। पनतेः स्तुतिकर्मण उत्तमे णलि लिटि रूपम्। अपि तु ᵛतवेदु तवैव ᵛस्तोमं स्तोत्रं ᵛचिकेत अभिजानामि। त्वामेव सर्वदा स्तौमीत्यर्थः॥

इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति। यन्ति प्रमादमतन्द्राः॥१८॥

इच्छन्ति। देवाः। सुन्वन्तम्। न। स्वप्नाय। स्पृहयन्ति। यन्ति। प्रऽमादम्। अतन्द्राः॥१८॥

ᵛसुन्वन्तं सोमाभिषवं कुर्वन्तं यजमानं ᵛदेवाः इन्द्रादयः सर्वे ᵛइच्छन्ति रक्षितुम्। ᵛस्वप्नाय ᵛन ᵛस्पृहयन्ति। स्वप्नावस्थां तस्य सुन्वतो नेप्सन्ति। सर्वदा प्रबुद्धमेव कुर्वन्तीत्यर्थः। 'स्पृहेरीप्सितः' (पा. सू. १. ४. ३६) इति कर्मणि चतुर्थी। 'स्पृह ईप्सायाम्'। चुरादिरदन्तः। यत एवमतः कारणात् ᵛअतन्द्राः अनलसा देवाः ᵛप्रमादं प्रकर्षेण मदकरं तदीयं सोमं ᵛयन्ति प्राप्नुवन्ति॥

ओ षु प्र याहि वाजेभिर्मा हृणीथा अभ्य१स्मान्। महाँइव युवजानिः॥१९॥

ओ इति। सु। प्र। याहि। वाजेभिः। मा। हृणीथाः। अभि। अस्मान्।
महान्ऽइव। युवऽजानिः॥ १९॥

हे इन्द्र ᵛवाजेभिः वाजैरस्मभ्यं दातव्यैरन्नैः सार्धम् ᵛअस्मान् ᵛअभि आभिमुख्येन ᵛसु सुष्ठु ᵛप्र प्रकर्षेण ᵛओ आ उ ᵛयाहि शीघ्रमायाह्येव आगच्छैव। ᵛमा ᵛहृणीथाः मा क्रुध्यस्व। हृणीयतिः क्रुध्यतिकर्मा। यद्वा मा लज्जां प्राप्नुहि। 'हृणीङ् लज्जायाम्' इति कण्ड्वादौ पठ्यते। तत्र दृष्टान्तः।

vमहानिव vयुवजानिः। युवतिर्जाया यस्य स तथोक्तः। 'जायाया निङ्' इति समासान्तो निङादेशः। ईदृशो महान् गुणैरधिकोऽपि यथा स्वभार्यां प्रति निर्लज्जः सन् क्षीघ्रं गच्छति तद्वत् ॥

मो ष्व१द्य दुर्हणावान्त्सायं करदारे अस्मत्। अश्रीरइव जामाता ॥ २० ॥

मो इति। सु। अद्य। दुःऽहनावान्। सायम्। करत्। आरे। अस्मत्।
अश्रीरःऽइव। जामाता ॥ २० ॥

vदुर्हणावान्। परैर्दुःसहहननं दुर्हणम्। तद्वानिन्द्रः vअद्य इदानीम् vअस्मत् vआरे अस्माकं समीप आगच्छतु। vसु सुष्ठु अतिशयेन vसायं दिवसस्यावसानं सायंकालं vमो vकरत् मा कार्षीत्। करोतेर्माङि लुङि 'कृमृदरुहिभ्यः' इति च्लेरङादेशः। vजामाता। जायत इति जा अपत्यम्। तस्य निर्माता दुहितुः पतिः। vअश्रीरइव। न श्रीरश्रीः। तदस्यास्तीत्यश्रीरः। मत्वर्थीयो रः। गुणैर्विहीनः कुत्सितो जामातासकृदाहूयमानोऽप्यासायंकालं विलम्बते। तद्वत्त्वं कालविलम्बं मा कृथा इत्यर्थः ॥ ॥ २० ॥

विद्मा ह्यस्य वीरस्य भूरिदावरीं सुमतिम्। त्रिषु जातस्य मनांसि ॥ २१ ॥

विद्म। हि। अस्य। वीरस्य। भूरिऽदावरीम्। सुऽमतिम्। त्रिषु। जातस्य। मनांसि ॥ २१ ॥

vअस्य इन्द्रस्य vवीरस्य विक्रान्तस्य vभूरिदावरीं बहुधनस्य दात्रीं vसुमतिं कल्याणीं मतिमनुग्रहबुद्धिं vविद्म vहि जानीमः खलु। तथा vत्रिषु भूम्यादिषु त्रिषु लोकेषु vजातस्य तत्कार्यार्थं प्रादुर्भूतस्य vमनांसि हृदयानि च जानीमः। अतस्तस्येन्द्रस्य यथा प्रीतिर्जनिष्यते तथा स्तोत्रं कुर्म इत्यर्थः ॥

आ तू षिञ्च कण्वमन्तं न घा विद्म शवसानात्। यशस्तरं शतमूतेः ॥ २२ ॥

आ। तु। सिञ्च। कण्वऽमन्तम्। न। घ। विद्म। शवसानात्। यशःऽतरम्। शतम्ऽऊतेः ॥ २२ ॥

हे अध्वर्यो vकण्वमन्तम्। कणतिः शब्दकर्मा। कण्वाः स्तोतारः। यद्वा। कण्वगोत्रा ऋषयः। तैर्युक्तमिन्द्रमुद्दिश्य vतु क्षिप्रम् vआ vसिञ्च सोमं जुहुधि। vशवसानात्। शवो बलम्। तदिवाचरतोऽतिबलात् vशतमूतेः। शतं बहुनामैतत्। बह्व्य ऊतयो रक्षा यस्मिन् स शतमूतिः। तादृशादस्मादिन्द्रात् vयशस्तरं यशस्वितरं पुरुषं vन vघ नैव vविद्म जानीमः। अतस्तमेवोद्दिश्य सोमं जुहुधीत्यर्थः ॥

ज्येष्ठेन सोतरिन्द्राय सोमं वीराय शक्राय। भरा पिबन्नर्याय ॥ २३ ॥

ज्येष्ठेन। सोतः। इन्द्राय। सोमम्। वीराय। शक्राय। भर। पिबत्। नर्याय ॥ २३ ॥

हे vसोतः अभिषोतरध्वर्यो vवीराय विक्रान्ताय vशक्राय शक्तियुक्ताय vनर्याय नृभ्यो हिताय vइन्द्राय vज्येष्ठेन मुख्येनैन्द्रवायवग्रहेण। स हि धाराग्रहाणां मध्ये ज्येष्ठः। तेन vसोमं vभर हर आहर। वीर्यं प्रापय। स चेन्द्रः vपिबत् तं सोमं पिबतु ॥

यो वेदिष्ठो अव्यथिष्वश्वावन्तं जरितृभ्यः। वाजं स्तोतृभ्यो गोमन्तम् ॥ २४ ॥

यः। वेदिष्ठः। अव्यथिषु। अश्वऽवन्तम्। जरितृऽभ्यः। वाजम्। स्तोतृऽभ्यः। गोऽमन्तम् ॥ २४ ॥

ᵛयः[1] इन्द्रः ᵛअभ्यथिषु अभ्यथयितृषु सुखकरेषु स्तोतृषु ᵛवेदिष्टः अतिशयेन वेदिता कृतस्य स्तोत्रस्य ज्ञाता स इन्द्रः ᵛजरितृभ्यः शंसितृभ्यो होत्रादिभ्यः ᵛस्तोतृभ्यः प्रस्तोत्रादिभ्यश्च ᵛअश्वावन्तं बहुभिरश्वैरुपेतं ᵛगोमन्तं बहुभिर्गोभिरुपेतं सन्तं ᵛवाजम् अन्नं बलं वा ददातीति शेषः ॥

अहीनान्तर्गतेऽतिरात्रे प्रथमे पर्याये होतुः शस्त्रे ' पन्यंपन्यम् ' इति स्तोत्रियस्तृचः छन्दोगैरस्य तृचस्य स्तूयमानत्वात् । ' छन्दोगप्रत्ययं स्तोमः[2] स्तोत्रियः ' (आश्व. श्रौ. ८. १३) इति हि स्मर्यते ॥

पन्यँपन्यमित्सोतार आ धावत मद्याय । सोमं वीराय शूराय ॥ २५ ॥

पन्यम्ऽपन्यम् । इत् । सोतारः । आ । धावत । मद्याय । सोमम् । वीराय । शूराय ॥ २५ ॥

हे ᵛसोतारः अभिषोतारोऽध्वर्यवः ᵛमद्याय मादयितव्याय ᵛवीराय विक्रान्ताय ᵛशूराय शौर्यवत इन्द्राय ᵛपन्यंपन्यमित् सर्वत्र स्तुत्यमेव ᵛसोमम् ᵛआ ᵛधावत अभिगमयत । प्रयच्छतेत्यर्थः ॥ ॥ २१ ॥

पाता वृत्रहा सुतमा घा गमन्नारे अस्मत् । नि यमते शतमूतिः ॥ २६ ॥

पाता । वृत्रऽहा । सुतम् । आ । घ । गमत् । न । आरे । अस्मत् । नि । यमते । शतम्ऽऊतिः ॥२६॥

ᵛसुतम् अभिषुतं सोमं ᵛपाता पानशीलः । ताच्छीलिकस्तृन् । ' न लोकाव्यय° ' इति कर्मणि षष्ठ्याः प्रतिषेधः । ᵛवृत्रहा वृत्रस्यासुरस्य हन्तेन्द्रः ᵛआ ᵛगमत् । ᵛघ इत्यवधारणे । आगच्छत्येव । ᵛअस्मत् अस्मत्तः ᵛआरे दूरदेशे मा भवतु । आगत्य च ᵛशतमूतिः बहुविधरक्षण इन्द्रः ᵛनि ᵛयमते अस्मदीयाञ्छत्रून्नियच्छतु तिरस्करोतु । यद्वा धनान्यस्मभ्यं नियच्छतु ददातु ॥

एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम् । गीर्भिः श्रुतं गिर्वणसम् ॥२७॥

आ । इह । हरी इति । ब्रह्मऽयुजा । शग्मा । वक्षतः । सखायम् ।

गीःऽभिः । श्रुतम् । गिर्वणसम् ॥ २७ ॥

(ᵛब्रह्मयुजा ब्रह्मणा मन्त्रेण स्तोत्रेण हविषा वा युज्यमानौ ᵛशग्मा शग्मौ सुखकरौ शक्तौ वा ईदृशौ ᵛहरी अश्वौ ᵛइह अस्मिन् यज्ञे ᵛसखायं समानख्यानं मित्रभूतमिन्द्रम् ᵛआ ᵛवक्षतः आवहताम् । कीदृशमिन्द्रम् । ᵛगीर्भिः स्तुतिभिः ᵛश्रुतं प्रख्यापितमाहात्म्यं ᵛगिर्वणसं गिरां संभक्तारं स्तुतिभिः संभजनीयं वा ॥)

स्वादवः सोमा आ याहि श्रीताः सोमा आ याहि ।
शिप्रिन्नृषीवः शचीवो नायमच्छा सधमादम् ॥ २८ ॥

स्वादवः । सोमाः । आ । याहि । श्रीताः । सोमाः । आ । याहि ।

शिप्रिन् । ऋषिऽवः । शचीऽवः । न । अयम् । अच्छ । सधऽमादम् ॥ २८ ॥

हे ᵛशिप्रिन् । शिप्रं शिरस्त्राणम् । यद्वा । शिप्रे हनू नासिके वा । तद्वन् हे ᵛऋषीवः ऋषिभिः स्तोतृभिर्युक्त ᵛशचीवः शक्तिमन् एवंभूत हे इन्द्र अस्मदीया इमे ᵛसोमाः ᵛस्वादवः । अभिषवादिभिः संस्कृतत्वेनास्वादनार्हा जाताः । अतस्त्वम् ᵛआ ᵛयाहि आगच्छ । तथा ते ᵛसोमाः ᵛश्रीताः पयआदिभिः श्रयणद्रव्यैर्मिश्रिताः[3] संस्कृताः । अतोऽपि ᵛआ ᵛयाहि आगच्छ । नेति संप्रत्यर्थे ।

---

१. त–सः । २. ज्ञ-त४–स्तोम; त१-२–स्तोमं । ३. ख-ज्ञ-भ–श्रवणद्रव्यै°; श–श्रपणद्रव्यै° ।

vन संप्रति vअयं स्तोता vसधमादं सह मादयितव्यं त्वाम् vअच्छ अभिमुखं स्तौतीति शेषः। अतोऽप्यायाहीत्यर्थः ॥

स्तुतश्च यास्त्वा वर्धन्ति महे राधसे नृम्णाय। इन्द्र कारिणं वृधन्तः ॥२९॥

स्तुतः। च। याः। त्वा। वर्धन्ति। महे। राधसे। नृम्णाय। इन्द्र। कारिणम्। वृधन्तः ॥२९॥

हे vइन्द्र vकारिणं कर्मणां कर्तारं vवृधन्तः वर्धयन्तो ये vस्तुतः स्तोतारः vयाः vच तदीयाः स्तुतयः vत्वा त्वां vवर्धन्ति वर्धयन्ति। किमर्थम्। vमहे महते vराधसे धनाय vनृम्णाय बलाय च। उभयोर्लाभार्थम्। ते तदुभयं लभन्त इत्यध्याहारः। यद्वा। उत्तरत्र ते सत्रा दधिरे शवांसि इति संबन्धः ॥

गिरश्च यास्ते गिर्वाह उक्था च तुभ्यं तानि। सत्रा दधिरे शवांसि ॥ ३० ॥

गिरः। च। याः। ते। गिर्वाहः। उक्था। च। तुभ्यम्। तानि। सत्रा। दधिरे। शवांसि ॥३०॥

हे vगिर्वाहः गीर्भिः स्तुतिभिः वहनीयेन्द्र[1] vते तुभ्यं क्रियमाणाः vगिरश्च स्तुतिरूपाश्च वाचः vयाः सन्ति। vउक्था vच उक्थानि च शस्त्ररूपाणि च वचांसि vतुभ्यं त्वदर्थं क्रियमाणानि यानि सन्ति। vतानि सर्वाणि vसत्रा सहैव vशवांसि बलानि vदधिरे तव विदधिरे ॥ ॥ २२ ॥

एवेदेष तुविकूर्मिर्वाजाँ एको वज्रहस्तः। सनादमृक्तो दयते ॥ ३१ ॥

एव। इत्। एषः। तुविऽकूर्मिः। वाजान्। एकः। वज्रऽहस्तः। सनात्। अमृक्तः। दयते ॥३१॥

vएषः vएव इन्द्रः vतुविकूर्मिः बहुकर्मा। vइत् इति पूरकः। vएकः[2] सर्वेषु देवेषु मुख्यः vवज्रहस्तः वज्रबाहुः vसनात् चिरकालादारभ्य vअमृक्तः शत्रुभिरबाधित एवंभूतः स इन्द्रः vवाजान् अन्नानि बलानि वा vदयते स्तोतृभ्यो ददाति ॥

हन्ता वृत्रं दक्षिणेनेन्द्रः पुरू पुरुहूतः। महान्महीभिः शचीभिः ॥ ३२ ॥

हन्ता। वृत्रम्। दक्षिणेन। इन्द्रः। पुरु। पुरुऽहूतः। महान्। महीभिः। शचीभिः ॥३२॥

अयम् vइन्द्रः vदक्षिणेन हस्तेनैकेनैव vवृत्रम् आवरकमसुरं vहन्ता साधु हतवान्। हन्तेः साधुकारिणि तृन्। 'न लोकाव्यय०' इति षष्ठीप्रतिषेधः। vपुरु पुरुषु। 'सुपां सुलुक्०' इति विभक्तेर्लुक्। बहुषु देशेषु vपुरुहूतः vमहीभिः महतीभिः vशचीभिः क्रियाभिः शक्तिभिर्वा vमहान् सर्वेभ्य उत्कृष्टः। एवंभूत इन्द्रोऽस्मान् रक्षत्वित्यर्थः ॥

यस्मिन्विश्वाश्चर्षणय उत च्यौत्ना ज्रयांसि च। अनु घेन्मन्दी मघोनः ॥ ३३ ॥

यस्मिन्। विश्वाः। चर्षणयः। उत। च्यौत्ना। ज्रयांसि। च।
अनु। घ। इत्। मन्दी। मघोनः ॥ ३३ ॥

vविश्वाः सर्वाः vचर्षणयः प्रजाः vयस्मिन् इन्द्रे वर्तन्ते यदधीना भवन्ति। vउत अपि च vच्यौत्ना च्यौत्नानि। बलनामैतत्। प्रच्युतिसाधनानि बलानि vच vज्रयांसि शत्रुविषयाण्यभिभवनानि यस्मिन्निन्द्रे वर्तन्ते। 'जि ज्रि अभिभवने' इति धातुः। स इन्द्रः vमघोनः। मघं हविर्लक्षणं धनम्। तद्वतो यजमानान् vअनु vमन्दी अनुमोदको भवति। vघेत् इति पूरकौ।

---

१. श–हवनीयेंद्र। २. त–एषः।

यद्वा। मन्दी स्तुत्यः स इन्द्रस्ताननु गृह्णातीति शेषः। अथवा। यस्य मघोनो धनवत इन्द्रस्य मन्दी स्तोतानुकूलो भवति एष एतानि इत्युत्तरत्रैकवाक्यता ॥

एष एतानि चकारेन्द्रो विश्वा योऽतिं शृण्वे। वाजदावा मघोनाम् ॥ ३४ ॥

एषः। एतानि। चकार। इन्द्रः। विश्वा। यः। अतिं। शृण्वे। वाजऽदावा। मघोनाम्॥३४॥

vएषः vइन्द्रः vविश्वा विश्वानि व्यासानि vएतानि वृत्रवधादीनि वीर्याणि। यद्वा। पृथिव्यादीनि भूतजातानि। तानि vचकार कृतवान्। vयः इन्द्रः बलैरतिशयितः vशृण्वे[1] श्रूयते सर्वत्र स्तूयते। अपि च स इन्द्रः vमघोनां हविष्मतां यजमानानां vवाजदावा वाजस्यान्नस्य दाता भवति ॥

प्रभर्ता रथं गव्यन्तमपाकाच्चिद्यमवति। इनो वसु स हि वोळ्हा ॥ ३५ ॥

प्रऽभर्ता। रथम्। गव्यन्तम्। अपाकात्। चित्। यम्। अवति।
इनः। वसु। सः। हि। वोळ्हा॥ ३५ ॥

vप्रभर्ता प्रहर्ता प्रहरणशील इन्द्रः vरथं रंहणं vगव्यन्तं गा इच्छन्तं vयं स्तोतारम् vअपाकात् अविपक्वप्रज्ञाच्छत्रोः। चिच्छब्दोऽनुक्तसमुच्चयार्थः। विपक्वप्रज्ञादपि vअवति रक्षति vस vहि स खलु स्तोता vइनः ईश्वरः सन् vवसु धनं vवोळ्हा साधुवाही भवति। वहेः साधुकारिणि तृन्। अतो 'न लोकाव्यय०' इति कर्मणि षष्ठ्याः प्रतिषेधः ॥ ॥ २३ ॥

सनिता विप्रो अर्वद्भिर्हन्ता वृत्रं नृभिः शूरः। सत्योऽविता विधन्तम् ॥३६॥

सनिता। विप्रः। अर्वत्ऽभिः। हन्ता। वृत्रम्। नृऽभिः। शूरः। सत्यः। अविता। विधन्तम्॥३६॥

vविप्रः मेधावी स इन्द्रः vअर्वद्भिः अश्ववाहनभूतैः vसनिता गन्तव्यं संभक्ता। तथा vशूरः शौर्योपेतः सन् vनृभिः नेतृभिर्मरुद्भिः सार्धं vवृत्रम् आवरकमसुरं vहन्ता साधुघाती। अपि च vविधन्तं परिचरन्तं यजमानं[2] vसत्यः[2] साधुरवितथस्वभावो वा स इन्द्रः vअविता परिचरतो यजमानस्य रक्षिता भवति। सर्वविधीनां छन्दसि विकल्पितत्वादत्र कर्मणि षष्ठी न प्रवर्तते ॥

यजध्वैनं प्रियमेधा इन्द्रं सत्राचा मनसा। यो भूत्सोमैः सत्यमद्वा ॥ ३७ ॥

यजध्व। एनम्। प्रियऽमेधाः। इन्द्रम्। सत्राचा। मनसा। यः। भूत्। सोमैः। सत्यऽमद्वा॥३७॥

हे vप्रियमेधाः। प्रियोऽनुकूलो मेधो यज्ञो येषां ते तथोक्ताः। आत्मनि पूजार्थं बहुवचनम्। प्रियमेधाख्य ऋषिरात्मानं संबोध्य ब्रूते। हे प्रियमेधाः vसत्राचा सहाञ्चता स्तोतव्येनेन्द्रेण सह वर्तमानेन vमनसा चित्तेन vएनम् vइन्द्रं vयजध्व यजध्वम्। बुद्धिपूर्वकं यजेत्यर्थः। 'यजध्वैनम्' (पा. सू. ७. १. ४३) इति निपातनाद्वर्णलोपः। vयः इन्द्रः vसोमैः करणभूतैः[3] vसत्यमद्वा vभूत् सत्यमदोऽवितथमदो भवति ॥

गाथश्रवसं सत्पतिं श्रवस्कामं पुरुत्मानम्। कण्वासो गात वाजिनम् ॥३८॥

गाथऽश्रवसम्। सत्ऽपतिम्। श्रवःऽकामम्। पुरुऽत्मानम्। कण्वासः। गात। वाजिनम्॥३८॥

---

१. ख-ङ्ग-त३-इ शृण्वे; घ-न-श-इति शृण्वे। २. ङ्ग-त-न-श-यजमानः सत्सु। ३. ख-त२-भ-कारणभूतैः।

हे vकण्वासः कण्वपुत्रा मेधातिथयः। पूर्ववद्बहुवचनमात्मनः संबोधनं च। हे कण्वस्य पुत्रा मेधातिथयः यूयं vगाथश्रवसं गातव्यश्रवसं vसत्पतिं सतां पालयितारं vश्रवस्कामम्। श्रवःस्वन्नेषु हविःषु कामोऽभिलाषो यस्य तादृशम्। vपुरुत्मानं[1] बह्वात्मानं[1] यद्वा पुरुषु बहुषु प्रदेशेष्वतन्तं सततं गच्छन्तं vवाजिनं वेगवन्तमेवंगुणकमिन्द्रं vगात गायत स्तुध्वम्॥

य ऋते चिद्भास्पदेभ्यो दात्सखा नृभ्यः शचीवान्।
ये अस्मिन्कामममश्रियन्॥ ३९॥

यः। ऋते। चित्। गाः। पदेभ्यः। दात्। सखा। नृऽभ्यः। शचीऽवान्।
ये। अस्मिन्। कामम्। अश्रियन्॥ ३९॥

पणिभिर्देवगवीष्वपहृतासु vपदेभ्यः गतानां गवां मार्गे संलग्नेभ्योऽन्वेषणसाधनभूतेभ्यः vऋते vचित् ऋतेऽपि विनापि vसखा मित्रभूतः vशचीवान् कर्मवान् प्रशस्तकर्मा vयः इन्द्रः vनृभ्यः नेतृभ्यः देवेभ्यः vगाः पणिभिरपहृता vदात् पुनर्दत्तवान्। vये देवाः vअस्मिन् इन्द्रे vकामम् अभिलाषम् vअश्रियन् असेवन्त प्राप्नुवन्। तेभ्यो नृभ्य इत्यन्वयः। तमिन्द्रं गातेति पूर्वेण सहैकवाक्यता॥

इत्था धीवन्तमद्रिवः काण्वं मेध्यातिथिम्। मेषो भूतोऽभि यन्नयः॥ ४०॥

इत्था। धीऽवन्तम्। अद्रिऽवः। काण्वम्। मेध्यऽअतिथिम्।
मेषः। भूतः। अभि। यन्। अयः॥ ४०॥

vइत्था इत्थमनेनोक्तेन प्रकारेण vधीवन्तं स्तुतिमन्तं vकाण्वं कण्वपुत्रं vमेध्यातिथिं यज्ञार्हातिथिमेतत्संज्ञमृषिं हे vअद्रिवः वज्रवन्निन्द्र vमेषो vभूतः मेषरूपतां प्राप्तः vअभि vयन् अभिगच्छन्। य इत्यनुवर्तते। तद्योगाच्च तिङो निघाताभावः। यस्त्वम् vअयः अगमयः तं त्वां स्तुम इत्यर्थः। 'मेधातिथेर्मेष' (तै. आ. १. १२. ३) इति सुब्रह्मण्यामन्त्रैकदेशस्य व्याख्यानरूपं ब्राह्मणं छन्दोगैरेवमाम्नायते— 'मेधातिथिं हि[2] काण्वायनिं मेषो भूत्वाजहार' (प. ब्रा. १. १) इति। तदभिप्रायेणेयं स्तुतिः कृता॥

शिक्षा विभिन्दो अस्मै चत्वार्ययुता ददत्। अष्टा परः सहस्रा॥ ४१॥

शिक्ष। विऽभिन्दो इति विऽभिन्दो। अस्मै। चत्वारि। अयुता। ददत्।
अष्ट। परः। सहस्रा॥ ४१॥

विभिन्दुनाम्नो राज्ञः सकाशाद्बहु धनं लब्ध्वा तदीयं दानमिदमादिकेन द्रुचेन प्रशंसति। हे vविभिन्दो राजन् vददत् दाता त्वम् vअस्मै मह्यमृषये vचत्वारि vअयुता अयुतानि दशसहस्राणि चत्वारिंशत्सहस्राणि vशिक्ष अशिक्षः दत्तवानसि। vपरः परस्तात् ऊर्ध्वमपि अष्टसंख्याकानि vसहस्रा सहस्राणि च दत्तवानसि॥

उत सु त्ये पयोवृधा माकी रणस्य नप्त्या। जनित्वनाय मामहे॥ ४२॥

उत। सु। त्ये इति। पयःऽवृधा। माकी इति। रणस्य। नप्त्या। जनिऽत्वनाय। ममहे॥ ४२॥

---

१. ख-भ-पुरुत्मानं पुरुषात्मानं; ज्ञ-ञ-त२-४-पुरुषात्मानं बह्वात्मानं; त३-न-पुरुषात्मानं। २. ख-न-भ-श-'हि' नास्ति; त३-प.ब्रा.- ह।

vउत अपि च vसु सुष्ठु vत्ये ते सर्वत्र प्रसिद्धे vपयोवृधा पयस उदकस्य वर्धयित्र्यौ vमाकी निर्मात्र्यौ भूतजातस्य vरणस्य। स्तोतृनामैतत्। स्तोतुः vनप्त्या नप्त्र्यौ न पातयित्र्यौ सर्वदानुग्रहशीले द्यावापृथिव्यौ vजनित्वनाय पूर्वोक्तधनस्य जननाय प्रादुर्भावाय लाभाय vममहे स्तुतवानस्मि। द्यावापृथिव्योः प्रसन्नयोरेवेदं दानं लभ्यते नान्यदेति दानमाहात्म्यप्रशंसाधिगन्तव्या ॥ ॥ २४ ॥

'पिबा सुतस्य' इति चतुर्विंशत्यृचं तृतीयं सूक्तं काण्वस्य मेध्यातिथेरार्षम्[1]। अयुजो बृहत्यो युजः सतोबृहत्यः एकविंश्यनुष्टुब्द्वाविंशीत्रयोविंश्यौ गायत्र्यौ चतुर्विंशी बृहती। एताश्चतस्रः कुरयाणस्य[2] पुत्रस्य पाकस्थामनाम्नो राज्ञो[3] दानस्तुतिप्रतिपादिकाः। अतस्तद्देवताकाः। शिष्टा ऐन्द्र्यः। तथा चानुक्रान्तं—'पिब चतुर्विंशतिर्मेध्यातिथिः प्रागाथं त्वनुष्टुब्गायत्र्यौ बृहती चान्त्याः कौरयाणस्य पाकस्थाम्नो दानस्तुतिः' इति। महाव्रते निष्केवल्ये बार्हततृचाशीतौ दानस्तुतीर्विनेदं सूक्तं सप्तम्यष्टम्योश्चोद्धारः। तथैव पञ्चमारण्यके सूत्रितं—'पिबा सुतस्य रसिन इति विंशतेः सप्तमीं चाष्टमीं चोद्धरति' (ऐ. आ. ५. २. ४) इति। ज्योतिष्टोमे निष्केवल्ये आद्यो रथन्तरसामप्रगाथः शंसनीयः। सूत्र्यते हि—'पिबा सुतस्य रसिन इति सामप्रगाथः' (आश्व. श्रौ. ५. १५) इति। चातुर्विंशिकेऽहनि निष्केवल्येऽप्ययं प्रगाथः। सूत्र्यते हि—'उक्तो रथन्तरस्योभयं शृणवच्च न इति बृहतः' (आश्व. श्रौ. ७. ३) इति। एवमन्यत्रापि यदि रथन्तरं पृष्ठं भवति तत्र सर्वत्रायं प्रगाथो द्रष्टव्यः। पञ्चमेऽहनि प्रउगशस्त्रे 'पिबा सुतस्य' इत्ययमैन्द्रः प्रगाथः। सूत्रितं च—'पिबा सुतस्य रसिनो देवंदेवं वोऽवसे' (आश्व. श्रौ. ७. १२) इति ॥

पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः।
आपिर्नो बोधि सधमाद्यो वृधेऽस्माँ अवन्तु ते धियः ॥ १ ॥

पिब। सुतस्य। रसिनः। मत्स्व। नः। इन्द्र। गोऽमतः।
आपिः। नः। बोधि। सधऽमाद्यः। वृधे। अस्मान्। अवन्तु। ते। धियः ॥ १ ॥

हे vइन्द्र vरसिनः रसवतः vगोमतः गोविकारैः पयःप्रभृतिभिः श्रयणद्रव्यैर्युक्तस्य vनः अस्मदीयस्य vसुतस्य अभिषुतस्य। 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। ईदृशं सोमं vपिब। पीत्वा च vमत्स्व तृप्तो भव। अपि च vसधमाद्यः सह मादयितव्यः सहितैरस्माभिस्तर्पयितव्यस्त्वम् vआपिः आपयिता बन्धुः सन् vनः अस्माकं vवृधे वर्धनाय vबोधि बुध्यस्व। vते त्वदीयाः vधियः बुद्धयोऽनुग्रहात्मिकाः vअस्मान् स्तोतॄन् vअवन्तु रक्षन्तु ॥

भूयाम ते सुमतौ वाजिनो वयं मा नः स्तरभिमातये।
अस्माञ्चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय ॥ २ ॥

भूयाम। ते। सुऽमतौ। वाजिनः। वयम्। मा। नः। स्तः। अभिऽमातये।
अस्मान्। चित्राभिः। अवतात्। अभिष्टिऽभिः। आ। नः। सुम्नेषु। यमय ॥ २ ॥

हे इन्द्र vते तव vसुमतौ शोभनायां मतावनुग्रहबुद्धौ vवाजिनः हविष्मन्तः vवयं vभूयाम वर्तमाना भवाम[4]। vअभिमातये। अभिमन्यत इत्यभिमातिः शत्रुः। तस्मै तदर्थं vनः अस्मान् vमा vस्तः मा हिंसीः। 'स्तृङ् हिंसायाम्'। माङि लुङि छान्दसश्चेर्लुक्। अपि तु vअभिष्टिभिः अभ्येषणी-

---

१. त-श—मेधातिथे°। २. ज्ञ-त१-२-४—कुरुयाणस्य। ३. ख-भ—यज्ञे। ४. ज्ञ-त१-२—भवेम।

याभिः प्रार्थनीयाभिः vचित्राभिः चायनीयाभिर्बहुविधाभिर्वा त्वदीयाभिरूतिभिः vअस्मान् vअवतात् अव रक्ष। तथा vनः अस्मान् vसुम्नेषु सुखेषु vआ vयामय आयतान् कुरु। सर्वदा सुखिन एव कुरु॥

इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत॥ ३॥

इमाः। ऊँ इति। त्वा। पुरुवसो इति पुरुऽवसो। गिरः। वर्धन्तु। याः। मम।
पावकऽवर्णाः। शुचयः। विपःऽचितः। अभि। स्तोमैः। अनूषत॥ ३॥

हे vपुरूवसो बहुधनेन्द्र vमम मदीयाः vइमाः vगिरः शस्त्ररूपा वाचः vत्वा[1] त्वां vवर्धन्तु वर्धयन्तु। तथा vपावकवर्णाः अग्निसमानतेजस्काः अत एव vशुचयः शुद्धाः vविपश्चितः विद्वांस उद्गातारश्च vस्तोमैः स्तोत्रैर्बहिष्पवमानादिभिः vअभि vअनूषत त्वामभिष्टुवन्ति। 'नू[2] स्तुतौ'। कुटादिः॥

अयं सहस्रमृषिभिः सहस्कृतः समुद्रइव पप्रथे।
सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये॥ ४॥

अयम्। सहस्रम्। ऋषिऽभिः। सहःऽकृतः। समुद्रःऽइव। पप्रथे।
सत्यः। सः। अस्य। महिमा। गृणे। शवः। यज्ञेषु। विप्रऽराज्ये॥ ४॥

vअयम् इन्द्रः vसहस्रं सहस्रसंख्याकैः vऋषिभिः अतीन्द्रियार्थदर्शिभिः स्तोतृभिः vसहस्कृतः सहसा बलेन युक्तः कृतः। स्तुत्या हि देवताया बलं वर्धते। स चैवंभूतः सन् vसमुद्रइव उदधिरिव vपप्रथे प्रथितो विस्तीर्णो बभूव। vअस्य चेन्द्रस्य vसत्यः अवितथः vसः प्रसिद्धः vमहिमा महत्त्वं vशवः बलं च vयज्ञेषु यागेषु vविप्रराज्ये। राज्ञः कर्म राज्यम्। विप्राणां स्तोतॄणां राज्ये स्तुतशस्त्रसंघे vगृणे स्तूयते॥

चातुर्विंशिकेऽहनि निष्केवल्ये 'इन्द्रमिद्देवतातये' इति रैवतसामप्रगाथः शंसनीयः पृष्ठ्येऽहनि निष्केवल्ये स्वयं प्रगाथः। सूत्र्यते हि—'इन्द्रमिद्देवतातय इतीतरेषां पृष्ठ्य एवैकैकमन्वहम्' (आश्व. श्रौ. ७. ३) इति॥

इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे।
इन्द्रं समीके वनिनो हवामहे इन्द्रं धनस्य सातये॥ ५॥

इन्द्रम्। इत्। देवऽतातये। इन्द्रम्। प्रऽयति। अध्वरे।
इन्द्रम्। समऽईके। वनिनः। हवामहे। इन्द्रम्। धनस्य। सातये॥ ५॥

vदेवतातये। देवैः स्तोतृभिस्तायते विस्तार्यत इति देवतातिर्यज्ञः। तदर्थम् vइन्द्रमित् देवेषु मध्य इन्द्रमेव आह्वयामहे। vअध्वरे यज्ञे vप्रयति प्रगच्छत्युपक्रान्ते सति vइन्द्रं vहवामहे। तथा vसमीके सम्यग्गते संपूर्णे च यागे vवनिनः संभजमाना वयम् vइन्द्रम् एवाह्वयामहे। यद्वा। समीकमिति संग्रामनाम। समीके संग्राम इन्द्रमाह्वयामहे। vधनस्य vसातये लाभाय vइन्द्रम् एवाह्वयामहे। अतः शीघ्रमिन्द्र आगच्छेत्यर्थः॥ ॥ २५॥

---

१. ख-ञ्च-त-न-भ-श-'त्वा' नास्ति। २. ञ्च-त१-२-नु।

इन्द्रो॑ म॒ह्ना रोद॑सी पप्रथ॒च्छव॒ इन्द्रः॒ सूर्यं॑मरोचयत् ।
इन्द्रे॑ ह॒ विश्वा॒ भुव॑नानि येमिर॒ इन्द्रे॑ सुवा॒नास॒ इन्द॑वः ॥ ६ ॥

इन्द्रः॑ । म॒ह्ना । रोद॑सी॒ इति॑ । प॒प्र॒थ॒त् । शवः॑ । इन्द्रः॑ । सूर्य॑म् । अ॒रो॒च॒य॒त् ।
इन्द्रे॑ । ह॒ । विश्वा॑ । भुव॑नानि । येमि॑रे । इन्द्रे॑ । सु॒वा॒नासः॑ । इन्द॑वः ॥ ६ ॥

अयम् ᵛइन्द्रः ᵛशवः शवस आत्मीयस्य बलस्य ᵛमह्ना महिम्ना महत्त्वेन ᵛरोदसी द्यावापृथिव्यौ ᵛपप्रथत् अप्रथयत् विस्तारितवान् । तथा स्वर्भानुनावृतं ᵛसूर्यम् अयमेव ᵛइन्द्रः ᵛअरोचयत् अदीपयत् । तस्यासुरस्य वधेन प्रकाशितवान् । अपि च ᵛइन्द्रे ᵛह अस्मिन्नेवेन्द्रे ᵛविश्वा विश्वानि व्याप्तानि ᵛभुवनानि भूतजातानि ᵛयेमिरे उपरमन्ते । इन्द्रेण नियम्यन्त इत्यर्थः । तथा ᵛसुवानासः सूयमाना अभिषूयमाणाः ᵛइन्दवः सोमाश्च अस्मिन्नेव ᵛइन्द्रे नियम्यन्ते अन्तर्भवन्तीत्यर्थः ॥

ज्योतिष्टोमो यदि रथन्तरपृष्ठस्तदा निष्केवल्ये ' अभि त्वा पूर्वपीतये ' इति प्रगाथोऽनुरूपः । सूय्यते हि–' अभि त्वा पूर्वपीतय इति प्रगाथौ स्तोत्रियानुरूपौ ' (आश्व. श्रौ. ५. १५) इति । महाव्रतेऽपि[1] निष्केवल्ये दक्षिणपक्षेऽप्यथं प्रगाथः । सूत्रितं च–' अभि त्वा पूर्वपीतय इति रथन्तरस्य स्तोत्रियानुरूपौ प्रगाथौ ' (ऐ. आ. ५. २. २) इति ॥

अ॒भि त्वा॑ पू॒र्वपी॑तय॒ इन्द्र॒ स्तोमे॑भिरा॒यवः॑ ।
स॒मी॒ची॒नास॒ ऋभ॑वः॒ सम॑स्वरन्रु॒द्रा गृ॑णन्त॒ पूर्व्य॑म् ॥ ७ ॥

अ॒भि । त्वा॒ । पू॒र्वऽपी॑तये । इन्द्र॑ । स्तोमे॑भिः । आ॒यवः॑ ।
स॒म्ऽई॒ची॒नासः॑ । ऋभ॑वः । सम् । अ॒स्व॒र॒न् । रु॒द्राः । गृ॒ण॒न्त॒ । पूर्व्य॑म् ॥ ७ ॥

हे ᵛइन्द्र ᵛआयवः मनुष्याः स्तोतारः ᵛस्तोमेभिः स्तोत्रैस्त्वामभिष्टुवन्ति । किमर्थम् । ᵛपूर्वपीतये सर्वेभ्यो देवेभ्यः पूर्वं प्रथमत एव सोमस्य पानाय । सवनमुखे हि चमसगणैरिन्द्रस्यैव सोमो हूयते । तथा ᵛसमीचीनासः संगताः ᵛऋभवः । प्रथमवाचकेन शब्देन त्रयोऽप्युपलक्ष्यन्ते । ऋभुर्विभ्वा वाज इत्येते च ᵛसमस्वरन् त्वामेव सम्यगस्तुवन् । ' स्वृ शब्दोपतापयोः ' । ᵛरुद्राः रुद्रापुत्रा मरुतश्च ᵛपूर्व्यं पुरातनं वृद्धं त्वामेव ᵛगृणन्त अभ्यस्तुवन् । वृत्रवधसमये ' प्रहर भगवो जहि वीरयस्व ' इत्येवंरूपया वाचा त्वां स्तुतवन्त इत्यर्थः ॥

अ॒स्येदिन्द्रो॑ वावृधे वृष्ण्यं॒ शवो॒ मदे॑ सु॒तस्य॒ विष्ण॑वि ।
अ॒द्या तम॑स्य महि॒मान॑मा॒यवोऽनु॑ ष्टुवन्ति पू॒र्वथा॑ ॥ ८ ॥

अ॒स्य । इत् । इन्द्रः॑ । व॒वृ॒धे॒ । वृ॒ष्ण्य॑म् । शवः॑ । मदे॑ । सु॒तस्य॑ । विष्ण॑वि ।
अ॒द्य । तम् । अ॒स्य॒ । म॒हि॒मान॑म् । आ॒यवः॑ । अनु॑ । स्तु॒व॒न्ति॒ । पू॒र्वऽथा॑ ॥ ८ ॥

ᵛअस्येत् अस्यैव यजमानस्य ᵛवृष्ण्यं वृषत्वं वीर्यं ᵛशवः बलं च ᵛइन्द्रः ᵛवावृधे वर्धयति । ᵛसुतस्य अभिषुतस्य सोमस्य पानेन ᵛविष्णवि कृत्स्नदेहस्य व्यापके ᵛमदे हर्षे सति तस्यैव यजमानस्य बलं वर्धयतीत्यर्थः । ᵛअद्य अस्मिन् काले ᵛअस्य इन्द्रस्य ᵛतम् उक्तगुणं ᵛमहिमानं महत्त्वम् ᵛआयवः

१. ज्ञ-ज्ञ-त१-२-४–महाव्रते ।

मनुष्याः ᵛअनु ᵛष्टुवन्ति। आनुपूर्व्येण स्तुवन्ति। ᵛपूर्वथा। पूर्वशब्दादिवार्थे ' प्रत्नपूर्व° ' इत्यादिना थाल्प्रत्ययः। यथा पूर्वस्मिन् काले ऽस्तुवन् एवमिदानीमपि तेनैव क्रमेण स्तुवन्तीत्यर्थः॥

ज्योतिष्टोमे माध्यंदिनसवने ब्रह्मशस्त्रे ' तत्त्वा यामि ' इति प्रगाथोऽनुरूपः। सूत्रितं च—' तत्त्वा यामि सुवीर्यमिति प्रगाथौ स्तोत्रियानुरूपौ ' (आश्व. श्रौ. ५. १६) इति। चातुर्विंशिकेऽहनि माध्यंदिनसवनेऽप्ययं प्रगाथस्तस्यैवानुरूपः। सूत्रितं च—' तत्त्वा यामि सुवीर्यमभि प्र वः सुराधसम् ' (आश्व. श्रौ. ७. ४) इति॥

तत्त्वा यामि सुवीर्यं तद्ब्रह्म पूर्वचित्तये।
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ॥ ९॥

तत्। त्वा। यामि। सुऽवीर्यम्। तत्। ब्रह्म। पूर्वऽचित्तये।
येन। यतिऽभ्यः। भृगवे। धने। हिते। येन। प्रस्कण्वम्। आविथ॥ ९॥

हे इन्द्र ᵛतत् ᵛसुवीर्यं शोभनवीर्यं ᵛत्वा त्वां ᵛयामि याचामि। छान्दसो वर्णलोपः। तथा ᵛतत् ᵛब्रह्म परिवृढमन्नं ᵛपूर्वचित्तये पूर्वप्रज्ञानायान्येभ्यः पूर्वमेव लाभाय त्वां याचामि। ᵛधने ᵛहिते अभीष्टे सति ᵛयेन सुवीर्येण ᵛयतिभ्यः कर्मसूपरतेभ्योऽयष्टृभ्यो जनेभ्यः सकाशाद्धनमाहृत्य ᵛभृगवे महर्षये प्रयच्छसि। यद्वा। कर्मसु नियता अङ्गिरसो यतयः। तेषामर्थं धनं प्रयच्छसि। तादर्थ्ये चतुर्थी। ᵛयेन च ब्रह्मणा ᵛप्रस्कण्वं कण्वप्रभवं कण्वस्य पुत्रमृषिम् ᵛआविथ ररक्षिथ। तदुभयं याचामीत्यन्वयः॥

येना समुद्रमसृजो महीरपस्तदिन्द्र वृष्णि ते शवः।
सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे॥ १०॥

येन। समुद्रम्। असृजः। महीः। अपः। तत्। इन्द्र। वृष्णि। ते। शवः।
सद्यः। सः। अस्य। महिमा। न। सम्ऽनशे। यम्। क्षोणीः। अनुऽचक्रदे॥ १०॥

हे ᵛइन्द्र ᵛयेन आत्मीयेन[1] बलेन ᵛसमुद्रम् अब्धिं प्रति ᵛमहीः महतीः ᵛअपः उदकानि ᵛअसृजः व्यसृजः। महान् समुद्रो यावद्भिर्जलैः पूर्यते तावन्ति जलानि पुरा त्वं सृष्टवानित्यर्थः। ᵛते त्वदीयं ᵛतत् ᵛशवः बलं ᵛवृष्णि वर्षकम्। अभीष्टफलदमित्यर्थः। ᵛअस्य इन्द्रस्य ᵛसः ᵛमहिमा ᵛन ᵛसंनशे न सम्यगापनीयः[2]। परैरप्रधृष्य इत्यर्थः। नशेः कृत्यार्थे केन्प्रत्ययः। ᵛयं महिमानं ᵛक्षोणीः क्षोणी पृथिवी ᵛअनुचक्रदे अनुगच्छति। क्रदिरत्र गत्यर्थः। यदधीना वर्तत इत्यर्थः॥ ॥२६॥

शृग्धी न इन्द्र यत्त्वा रयिं यामि सुवीर्यम्।
शृग्धि वाजाय प्रथमं सिषासते शृग्धि स्तोमाय पूर्व्य॥ ११॥

शृग्धि। नः। इन्द्र। यत्। त्वा। रयिम्। यामि। सुऽवीर्यम्।
शृग्धि। वाजाय। प्रथमम्। सिसासते। शृग्धि। स्तोमाय। पूर्व्य॥ ११॥

---

१. ख-त३-न-भ-अस्मदीयेन। २. ख-सम्यग्नासनीयः; ज्ञ-त१-२-४-न-भ-सम्यग्वापनीयः; त३-श-सम्यग्व्यापनीयः।

हे ᵛइन्द्र ᵛसुवीर्यं शोभनवीर्योपेतम्। बहुव्रीहौ ' वीरवीर्यौ च ' इत्युत्तरपदाद्युदात्तत्वम्। ᵛयत् ᵛरयिं धनं त्वा[1] ᵛयामि याचामि। छान्दसो वर्णलोपः। ᵛनः अस्मभ्यं तद्धनं ᵛशग्धि देहि। शकिरत्र दानार्थः। तस्मात् लोटि हौ छान्दसो विकरणस्य लुक्। ' हुझल्भ्यः° ' इति हेर्धित्वम्। तथा ᵛसिषासते संभक्तुमिच्छते। सनतेः सनि ' सनीवन्तर्ध° ' इति विकल्पनादिडभावे ' जनसनखनाम्° ' इत्यात्वम्। ᵛवाजाय। वाज इत्यन्ननाम। तेन च तद्वाह्यँक्ष्यते। हविष्मते यजमानाय ᵛप्रथमं सर्वेभ्यः पूर्वमेव ᵛशग्धि धनं प्रयच्छ। यद्वा वाजायेति द्वितीयार्थे चतुर्थी। कर्मभिस्त्वां संभक्तुमिच्छते जनाय प्रथमं वाजाय वाजमन्नं शग्धि देहि। पश्चात् ᵛस्तोमाय स्तोत्रे हे ᵛपूर्व्य पूर्वस्मिन् काले भव चिरंतनेन्द्र ᵛशग्धि देहि। स्तौतेः कर्तरि ' अर्तिस्तुसु° ' इत्यादिना मन्प्रत्ययः॥

शग्धी नो अस्य यद्ध पौरमाविथ धियं इन्द्र सिषासतः।
शग्धि यथा रुशमं श्यावकं कृपमिन्द्र प्रावः स्वर्णरम्॥ १२॥

शग्धि। नः। अस्य। यत्। ह। पौरम्। आविथ। धियः। इन्द्र। सिसासतः।
शग्धि। यथा। रुशमम्। श्यावकम्। कृपम्। इन्द्र। प्र। आवः। स्वःऽनरम्॥ १२॥

हे ᵛइन्द्र ᵛधियः कर्माणि स्तोत्राणि वा ᵛसिषासतः संभक्तवतः ᵛनः अस्माकं संबन्धिनः ᵛअस्य यजमानस्य तद्धनं ᵛशग्धि प्रदेहि ᵛयद्ध येन खलु धनेन ᵛपौरम्। पुरुर्नाम राजा। तस्य पुत्रम् ᵛआविथ ररक्षिथ। अपि च हे ᵛइन्द्र ᵛरुशमं ᵛश्यावकं ᵛकृपं चैतन्नामकांस्त्रीन् राजर्षीन् ᵛयथा येन प्रकारेण ᵛप्रावः प्रारक्षः तथा ᵛस्वर्णरं सर्वस्य हविषो नेतारं प्रापयितारम्। यद्वा। स्वः स्वर्गं प्रति नेतव्यमिमं यजमानं ᵛशग्धि शक्तं कुरु। धनादिसंपत्त्या यागानुष्ठानाय यथा शक्तो भवति तथा कुर्वित्यर्थः। इन्द्र इत्यामन्त्रितस्य पादादित्वेनाष्टमिकनिघाताभावे पाष्टिकमामन्त्रिताद्युदात्तत्वम्॥

चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्रह्मशस्त्रे ' कन्नव्यः ' इति कद्वत्प्रगाथः। सूत्रितं च— ' कन्नव्यो अतसीनां कदू न्वस्याकृतमिति कद्वन्तः प्रगाथाः ' (आश्व. श्रौ. ७. ४) इति। अहर्गणेषु द्वितीयादिष्वहःसु तस्मिञ्छस्त्रे तस्यैवार्यं प्रगाथः। सूत्र्यते हि—' आरम्भणीयाः पर्यासान् कद्वतोऽहरहःशस्यानीति होत्रका द्वितीयादिष्वेव ' (आश्व. श्रौ. ७. १) इति॥

कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः।
नहि न्वस्य महिमानमिन्द्रियं स्वर्गृणन्त आनशुः॥ १३॥

कत्। नव्यः। अतसीनाम्। तुरः। गृणीत। मर्त्यः।
नहि। नु। अस्य। महिमानम्। इन्द्रियम्। स्वः। गृणन्तः। आनशुः॥ १३॥

ᵛअतसीनाम् अतन्तीनां सततगामिनीनां स्तुतीनां ᵛतुरः प्रेरयिता ᵛमर्त्यः मरणधर्मा ᵛनव्यः अभिनव इदानींतनः ᵛकत् को नाम स्तोता ᵛगृणीत इन्द्रं स्तुयात्। अल्पप्रज्ञैरिदानींतनैरिन्द्रः स्तोतुं न शक्यत[2] इत्यर्थः। ' गृ शब्दे '। क्रैयादिकः। ' प्वादीनां ह्रस्वः ' इति ह्रस्वत्वम्। ᵛनु पुरा पूर्वस्मिन्नपि काले विद्यमानाः ᵛस्वः सर्वे ᵛगृणन्तः स्तोतारः। यद्वा। स्वः सुष्ठुरणीयं प्राप्तव्यमिन्द्रं गृणन्तः स्तुवन्तो जनाः। ᵛइन्द्रियम्। इन्द्रियमिन्द्रस्य लिङ्गमिन्द्रस्यैवासाधारणम्। ᵛअस्य इन्द्रस्य ᵛमहिमानं महत्त्वं ᵛनहि ᵛआनशुः न खलु प्राप्नुवन्। अश्नोतेर्लिटि व्यत्ययेन परस्मैपदम्। ' अत आदेः ' इत्यभ्यासस्यात्वम्। ' अश्नोतेश्च ' इति नुट्। ' हि च ' इति निघातप्रतिषेधः॥

---

१. ज्ञ-त१-२—त्वा त्वां। २. ज्ञ-त१-२-४—शक्य।

कदु॑ स्तु॒वन्त॑ ऋतय॒न्त दे॒वत॒ ऋषिः॑ को विप्र॑ ओहते ।
कु॒दा हव॑मघवन्निन्द्र सुन्व॒तः कदु॑ स्तु॒वत आ ग॑मः ॥ १४ ॥

कत् । ऊँ इति । स्तुवन्तः । ऋतऽयन्त । देवता । ऋषिः । कः । विप्रः । ओहते ।
कदा । हवम् । मघऽवन् । इन्द्र । सुन्वतः । कत् । ऊँ इति । स्तुवतः । आ । गमः ॥ १४ ॥

हे इन्द्र [v]स्तुवन्तः स्तोत्रं कुर्वन्तः [v]कदु के खलु जनाः [v]देवता । 'देवात्तल्' इति स्वार्थिक-स्तलप्रत्ययः । व्यत्ययेन प्रथमा । देवं[1] त्वामुद्दिश्य [v]ऋतयन्त ऋतं यज्ञमैच्छन् । त्वदीययागेच्छापि दुर्लभा दूरे त्वद्यागकथा । [v]ऋषिः द्रष्टा [v]विप्रः मेधावी [v]कः स्तोता [v]ओहते वहति । त्वां स्तुतीः प्रापयति । न कश्चिदपि त्वां स्तोतुं शक्नोतीत्यर्थः । यत एवमतः कारणात् हे [v]मघवन् धनवन् [v]इन्द्र अनुग्रहीत्रा त्वयैवागन्तव्यम् । स त्वं [v]कदा कस्मिन् काले [v]सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य [v]हवम् आह्वानं प्रति [v]आ [v]गमः आगच्छः । [v]कदु कदा च कस्मिंश्च काले [v]स्तुवतः केवलं स्तोत्रं कुर्वतो यजमानस्य हवमाह्वानमा[2] गमः अभ्यगच्छः[3] । सुन्वतः स्तुवतः इत्युभयत्र 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम् । गमेर्लुङि लृदित्त्वात् च्लेरङादेशः ॥

ज्योतिष्टोमे माध्यंदिनसवने ब्रह्मशस्त्रे 'उदु त्ये' इति प्रगाथोऽनुरूपानन्तरं[4] शंसनीयः । सूत्रितं च—'उदु त्ये मधुमत्तमा इन्द्रः पूर्भित्' (आश्व. श्रौ. ५. १६) इति । चातुर्विंशिके माध्यंदिनसवने तस्मिन्नेव शस्त्रेऽयं प्रगाथो वैकल्पिकोऽनुरूपः । सूत्रितं च—'उदु त्ये मधुमत्तमा-स्त्वमिन्द्र प्रतूर्तिषु' (आश्व श्रौ. ७. ४) इति ॥

उदु॒ त्ये मधु॑मत्तमा॒ गिरः॑ स्तोमा॑स ईरते ।
सत्रा॒जितो॑ धन॒सा अ॑क्षि॒तोतयो वाज॒यन्तो॒ रथा॑इव ॥ १५ ॥

उत् । ऊँ इति । त्ये । मधुमत्ऽतमाः । गिरः । स्तोमासः । ईरते ।
सत्राऽजितः । धनऽसाः । अक्षितऽऊतयः । वाजऽयन्तः । रथाःऽइव ॥ १५ ॥

[v]त्ये ते प्रसिद्धाः [v]मधुमत्तमाः अतिशयेन मधुराः [v]गिरः अप्रगीताः शस्त्ररूपा वाचः [v]स्तोमासः प्रगीतानि बहिष्पवमानादीनि स्तोत्राणि च [v]उत् [v]ईरते । हे इन्द्र त्वामुद्दिश्य उद्गच्छन्ति । ऊर्ध्वं प्रसरन्ति । 'ईर गतौ' । आदादिकः[5] । तत्र दृष्टान्तः । [v]सत्राजितः सहैव[6] शत्रून् जयन्तः अत एव [v]धनसाः धनानि संभजन्तः । 'वन षण संभक्तौ' । 'जनसनखनक्रमगमो विट्' । 'विड्वनोरनुना-सिकस्यात्' इत्यात्वम् । [v]अक्षितोतयः । अक्षिताः क्षयरहिता ऊतयो रक्षा येषां ते तथोक्ताः । क्षियो भावे निष्ठा । 'निष्ठायामण्यदर्थे' इति पर्युदासादीर्घाभावः । अत एव 'क्षियो दीर्घात्' इति निष्ठानत्वाभावश्च । [v]वाजयन्तः वाजमन्नमिच्छन्तः । क्यचि 'न च्छन्दस्यपुत्रस्य' इतीत्वदीर्घयोः प्रतिषेधः । एवंगुणविशिष्टाः [v]रथाइव । ते यथा विविधमितस्तत उत्तिष्ठन्ति तद्वदुदीरत इत्यर्थः॥ ॥२७॥

कण्वा॑इव॒ भृग॑वः॒ सूर्या॑इव॒ विश्व॒मिद्धी॒तमा॑नशुः ।
इन्द्रं॒ स्तोमे॑भि॒र्महय॑न्त आय॒वः प्रि॒यमे॑धासो अस्वरन् ॥ १६ ॥

---

१. ख-न-भ-देवतासु° । २. झ-°माह्वानं प्रत्या । ३. ज-प्रत्यागच्छः; श-अत्यगच्छः । ४. ख-प्रगाथो वैकल्पिकोनुरूपानंतरं । ५. ख-झ-न-भ-श-अदादिकः । ६. ख-त३-न-भ-सदैव ।

कण्वाःऽइव । भृगवः । सूर्याःऽइव । विश्वम् । इत् । धीतम् । आनशुः ।
इन्द्रम् । स्तोमेभिः । महयन्तः । आयवः । प्रियऽमेधासः । अस्वरन् ॥ १६ ॥

vकण्वाइव कण्वगोत्रोत्पन्ना ऋषय इव स्तुवन्तः vभृगवः भृगुगोत्रोत्पन्ना ऋषयः vधीतम् आध्यातं vविश्वमित् व्याप्तं तमेवेन्द्रम् vआनशुः व्यापुः । vसूर्याइव । यथा सूर्यरश्मयः सर्वं जगद्व्याप्नुवन्ति तद्वत् । अपि च vप्रियमेधासः प्रियप्रज्ञा एतत्संज्ञा वा vआयवः मनुष्यास्तमेव vइन्द्रं vमहयन्तः पूजयन्तः vस्तोमेभिः स्तोत्रैः vअस्वरन् अस्तुवन् । ' स्वृ शब्दोपतापयोः ' । भौवादिकः ॥

युक्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।
अर्वाचीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि ॥ १७ ॥

युक्ष्व । हि । वृत्रहन्ऽतम । हरी इति । इन्द्र । पराऽवतः ।
अर्वाचीनः । मघऽवन् । सोमऽपीतये । उग्रः । ऋष्वेभिः । आ । गहि ॥ १७ ॥

हे vवृत्रहन्तम । वृत्रं हतवान् वृत्रहा । अतिशयेन हतवान् वृत्रहन्तमः । यथा पुनर्नोत्तिष्ठति तथा हतवानित्यर्थः । ' अनो नुट् ' इति तमपो नुट् । हे तादृश vइन्द्र vहरी त्वदीयावश्वौ vयुक्ष्व । हिरवधारणे । आत्मीये रथे योजयैव । हे vमघवन् धनवन् vउग्रः उद्गूर्णस्त्वं vसोमपीतये सोमपानार्थम् । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । vअर्वाचीनः अस्मदभिमुखः vऋष्वेभिः ऋष्वैः दर्शनीयैर्मरुद्भिः सार्धं vपरावतः । दूरनामैतत् । दूरे वर्तमानाद्द्युलोकात् vआ vगहि आगच्छ । गमेर्लोटः सेर्हिः । छान्दसः शपो लुक् । ' अनुदात्तोपदेश° ' इत्यनुनासिकलोपः । तस्य ' असिद्धवदत्रा भात् ' इत्यसिद्धत्वात् हेर्लुगभावः ॥

इमे हि ते कारवो वावशुर्धिया विप्रासो मेधसातये ।
स त्वं नो मघवन्निन्द्र गिर्वणो वेनो न शृणुधी हवम् ॥ १८ ॥

इमे । हि । ते । कारवः । वावशुः । धिया । विप्रासः । मेधऽसातये ।
सः । त्वम् । नः । मघऽवन् । इन्द्र । गिर्वणः । वेनः । न । शृणुधि । हवम् ॥ १८ ॥

vकारवः कर्मणां कर्तारः vविप्रासः मेधाविनः vइमे vहि इमे खलु यजमानाः vधिया स्तुत्या हे इन्द्र vते त्वां vवावशुः पुनरस्तुवन् । ' वाश्र शब्दे ' इत्यस्माद्यङ्लुगन्ताद्रूपमेतत् । यद्वा वावशुः पुनःपुनरकामयन्त । ' वश कान्तौ ' । अस्माद्यङ्लुगन्ताल्लिङि ' सिजभ्यस्त° ' इति झेर्जुस् । बाहुलकोऽडभावः । लिटि वा तुजादित्वादभ्यासदीर्घत्वम् । ' हि च ' इति निघातप्रतिषेधः । किमर्थम् । vमेधसातये मेधस्य यागस्य संभजनार्थम् । सनतेः क्तिनि ' जनसनखनाम् ° ' इत्यात्वम् । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । हे vमघवन् धनवन् vगिर्वणः गीर्भिर्वननीय vनः अस्माकं vहवं स्तोत्रं सर्वपूर्वोक्तगुणस्त्वं vशृणुधि शृणु । बुध्यस्व । vवेनो vन । वेनतिः कान्तिकर्मा । यथा कान्तो जाताभिलाषः पुरुषः कामयितव्यमैकाग्र्येण शृणोति तद्वत् । ' श्रुशृणुपृकृवृभ्यः° ' इति हेर्धित्वम् । ' अन्येषामपि° ' इति सांहितिको दीर्घः ॥

निरिन्द्र बृहतीभ्यो वृत्रं धनुभ्यो अस्फुरः ।
निर्बुदस्य मृगयस्य मायिनो निः पर्वतस्य गा आजः ॥ १९ ॥

निः । इन्द्र । बृहतीभ्यः । वृत्रम् । धनुऽभ्यः । अस्फुरः ।

निः । अर्बुदस्य । मृगयस्य । मायिनः । निः । पर्वतस्य । गाः । आजः ॥ १९ ॥

हे ᵛइन्द्र ᵛवृत्रम् आवरकमसुरं ᵛबृहतीभ्यः महद्भ्यः । लिङ्व्यत्ययः । ᵛधनुभ्यः धनुर्भ्यः कोदण्डेभ्यः । छान्दसो रेफलोपः । हेतौ पञ्चमी । महद्भिर्धनुर्भिर्हेतुभिः ᵛनिः ᵛअस्फुरः । स्फुरतिर्वधकर्मा । निरवधीः । निःशेषेण हतवानसि । यद्वा । वृत्रमावरकं मेघं धनुभ्यः । धन्वन्ति गच्छन्तीति धनव आपः । महतीभ्योऽद्भ्यः । तादर्थ्ये चतुर्थी । ईदृशीनामपां लाभार्थं निरवधीः । अपि च ᵛमायिनः मायाविनः ᵛअर्बुदस्य एतत्संज्ञकस्यासुरस्य ᵛमृगयस्य एतत्संज्ञकस्य च । उभयत्र कर्मणि षष्ठी । इमावप्यसुरौ ᵛनिः अस्फुरः निःशेषेणावधीः । मायाशब्दस्य व्रीह्यादिषु पाठात् ' व्रीह्यादिभ्यश्च ' इति मत्यर्थीयो विनिः । तथा ᵛपर्वतस्य वलनाम्नासुरेण[1] गवामदर्शनाय निहितस्य गिरेः संबन्धिनीः ᵛगाः वलेनापहृताः ᵛनिः ᵛआजः निरगमयः । ' अज गतिक्षेपणयोः ' ॥

निरग्नयो रुरुचुर्निरु सूर्यो निः सोम इन्द्रियो रसः ।
निरन्तरिक्षादधमो महामहिं कृषे तदिन्द्र पौंस्यम् ॥ २० ॥

निः । अग्नयः । रुरुचुः । निः । ऊँ इति । सूर्यः । निः । सोमः । इन्द्रियः । रसः ।

निः । अन्तरिक्षात् । अधमः । महाम् । अहिम् । कृषे । तत् । इन्द्र । पौंस्यम् ॥ २० ॥

हे ᵛइन्द्र ᵛमहां महान्तं कृत्स्नस्य जगतो व्यापकम् ᵛअहिम् आहननशीलं वृत्रं यदा त्वम् ᵛअन्तरिक्षात् आकाशात् ᵛनिः ᵛअधमः निरगमयः । धमतिर्गतिकर्मा । ᵛतत् तदानीं ᵛपौंस्यं वृत्रहननहेतुभूतं[2] बलं ᵛकृषे कुरुषे पुरस्कुरुषे । करोतेश्छान्दसो विकरणस्य लुक् । ᵛअग्नयः च त्रिस्थानगताः ᵛनिः ᵛरुरुचुः निःशेषेण दिदीपिरे । ᵛसूर्यः प्रेरक आदित्योऽपि निःशेषेण दिदीपे । ᵛइन्द्रियः इन्द्रेण सेव्यः ᵛरसः रसात्मकोऽमृतमयः ᵛसोमः च निःशेषेण दिदीपे । अग्न्यादयः सर्वे पूर्वं वृत्रेणावृतत्वान्निष्प्रभाः सन्त इदानीं तस्मिन्नावरके हते सम्यक् प्राकाशिषतेत्यर्थः ॥ ॥ २८ ॥

यं मे दुरिन्द्रो मरुतः पाकस्थामा कौरयाणः ।
विश्वेषां त्मना शोभिष्ठमुपेव दिवि धावमानम् ॥ २१ ॥

यम् । मे । दुः । इन्द्रः । मरुतः । पाकऽस्थामा । कौरयाणः ।

विश्वेषाम् । त्मना । शोभिष्ठम् । उपऽइव । दिवि । धावमानम् ॥ २१ ॥

इदमादिकेन चतुर्ऋचेन कुरयाणपुत्रात् पाकस्थामनाम्नो राज्ञो दानं लब्ध्वा[3] मेध्यातिथिस्तदीयं दानं स्तौति । ᵛयं यादृशं धनसंघं ᵛमे मह्यम् ᵛइन्द्रः ᵛमरुतः च ᵛदुः दत्तवन्तः तादृशमेव धनसमूहं ᵛकौरयाणः । शत्रून् प्रति युद्धाभिमुख्येन कृतं यानं हस्त्यश्वादिकं येनासौ कुरयाणः । तस्य पुत्रः कौरयाणः । ᵛपाकस्थामा । तिष्ठत्यनेनेति स्थाम बलम् । परिपक्वबलः । एतत्संज्ञो राजा मह्यं प्रादात् । ददातेर्लुङि ' गातिस्थ° ' इति सिचो लुक् । अडभावश्छान्दसः । कीदृशं धनसंघम् । ᵛविश्वेषां सर्वेषां धनानां मध्ये ᵛत्मना आत्मना स्वत एव ᵛशोभिष्ठम् अतिशयेन शोभावन्तम् । 'मन्त्रेष्वाङ्यादेः°' इत्यात्मन आकारलोपः । शोभावच्छब्दादातिशायनिक इष्ठन् । ' विन्मतोर्लुक् ' । ' यस्य ° ' इति लोपः ।

---

१. ख-घ-ज्ञ-त२-न-भ-श-बलनाम्ना° । २. ज-त३-वृत्रहननाय हेतुभूतं । ३. ख-ज्ञ-न-भ-श-लब्धा ।

अतिशयेन शोभावत्त्वे दृष्टान्तः। [v]दिवि आकाशे [v]उपेव [v]धावमानं प्रभाभिरुपेतं शीघ्रगामिनं सूर्यमिव। शोभावत्तममित्यर्थः॥

रोहितं मे पाकस्थामा सुधुरं कक्ष्यप्राम्। अदाद्रायो विबोधनम्॥ २२॥

रोहितम्। मे। पाकऽस्थामा। सुऽधुरम्। कक्ष्यऽप्राम्। अदात्। रायः। विऽबोधनम्॥२२॥

[v]पाकस्थामा राजा [v]रोहितं लोहितवर्णं वृषभमश्वं वा [v]मे मह्यम् [v]अदात् दत्तवान्। कीदृशम्। [v]सुधुरं शोभनधुरं शोभनवहनप्रदेशम्। 'ऋक्पूरब्धूः०' (पा. सू. ५. ४. ७४) इत्यकारः समासान्तः। 'ऋत्वादयश्च' इति बहुव्रीहावुत्तरपदाद्युदात्तत्वम्। [v]कक्ष्यप्राम्। कक्ष्या कक्षयोः बाहुमूलयोः[1] बध्यमाना रज्जुः। तस्याः प्रातारं पूरयितारम्। पीवरमित्यर्थः। 'प्रा पूरणे'। [v]रायः धनस्य [v]विबोधनं विशेषेण बोधकम्[2]। बहुधनप्राप्तिहेतुमित्यर्थः। 'ऊडिदम्०' इत्यादिना रायो विभक्तिरुदात्ता॥

यस्मा अन्ये दश प्रति धुरं वहन्ति वह्नयः। अस्तं वयो न तुग्र्यम्॥ २३॥

यस्मै। अन्ये। दश। प्रति। धुरम्। वहन्ति। वह्नयः। अस्तम्। वयः। न। तुग्र्यम्॥२३॥

पूर्वोक्त एवाश्वो विशेष्यते। [v]यस्मै। षष्ठ्यर्थे चतुर्थी। यस्याश्वस्य वृषभस्य वा [v]धुरं वोढव्यं युगधुरम् [v]अन्ये प्रकृतादस्माद्विलक्षणा दशसंख्याकाः [v]वह्नयः वोढारोऽश्वा बलीवर्दा वा प्रतिनिधयः सन्तो मां वोढुं [v]वहन्ति बिभ्रति। बहूनामेकत्रवहने दृष्टान्तः। [v]अस्तम्। अस्यते क्षिप्यते तस्मिन् पदार्थजातमित्यस्तं गृहम्। प्रति [v]वयो [v]न गन्तारोऽश्वा यथा [v]तुग्र्यं तुग्रपुत्रं भुज्युं समुद्रतीरादवहन् तद्वत्। तादृशमश्वं मह्यं प्रादादिति पूर्वस्यामृच्यन्वयः। भुज्योर्वहनं च 'नासत्या भुज्युमूहथुः' (ऋ. सं. १. ११६. ४) इत्यादावावगन्तव्यम्। यद्वा यस्मा इति कर्मणि चतुर्थी। यं रथमन्ये दशसंख्याका वह्नयो वोढारोऽश्वा धुरं वहनप्रदेशं प्रति गताः सन्तो वहन्ति तादृशं रथमपि मह्यं दत्तवानित्यर्थः॥

आत्मा पितुस्तनूर्वासं ओजोदा अभ्यञ्जनम्।
तुरीयमिद्रोहितस्य पाकस्थामानं भोजं दातारमब्रवम्॥ २४॥

आत्मा। पितुः। तनूः। वासः। ओजःऽदाः। अभिऽअञ्जनम्।
तुरीयम्। इत्। रोहितस्य। पाकऽस्थामानम्। भोजम्। दातारम्। अब्रवम्॥ २४॥

अयं पाकस्थामा [v]आत्मा स्वयं [v]पितुः जनकस्य [v]तनूः तनयः। पिता यथा सन्मार्गवर्तितया प्रशस्त एवमयमपीत्यर्थः। तथा [v]वासः वासयिता निवासयिता। वासयतेरौणादिकोऽसुन्। [v]अभ्यञ्जनम् अभिव्यक्तं यथा भवति तथा [v]ओजोदाः ओजसो बलस्य दाता धारयिता वा। यद्वा। आत्मा सततगामी। पितुरित्यन्ननाम। व्यासमन्नं येन दत्तम्। तनूर्विस्तृतं वासो वस्त्रमभ्यञ्जनमभ्यञ्जनसाधनं घृततैलादिकं च येन दत्तम्। यश्चौजोदा बलस्य दाता। तं [v]पाकस्थामानं [v]तुरीयं स्वकीयप्रपितामहापेक्षया चतुर्थं यद्वा तुरीयं शत्रूणां त्वरकं हिंसितारं [v]भोजं शत्रूणां भोजयितारं [v]रोहितस्य लोहितवर्णस्य पूर्वोक्तस्याश्वस्य [v]दातारम् एवंगुणकं पाकस्थामानम् [v]अब्रवम्। उक्तेन प्रकारेणास्तौषम्। [v]इत् इति पूरकः॥ ॥ २९॥

'यदिन्द्र' इत्येकविंशत्यृचं चतुर्थं सूक्तं काण्वगोत्रस्य देवातिथेरार्षम्। 'वृक्षाश्चिन्मे' इत्येषा पुरउष्णिक् शिष्टास्त्वयुजो बृहत्यो युजः सतोबृहत्यः। 'स्थूरं राधः' इत्यादिभिस्तिसृभिः कुरुङ्गदानस्य स्तूयमानत्वात्तास्तद्देवताकाः। तत्पूर्वाः पञ्चदश्याद्याश्चतस्रः पूषदेवताका इन्द्रदेवताका वा

---

१. ख–पार्श्वयोः। २. त३–अवबोधकं; श–बाधकं।

शिष्टा ऐन्द्र्यः । तथा चानुक्रान्तं—' यदिन्द्र सैका देवातिथिस्तृचोऽन्त्यः पुरउष्णिगन्तः कुरुङ्गस्य दानस्तुतिस्तत्पूर्वाश्वतस्रः पौष्ण्यो वा ' इति । महाव्रते निष्केवल्ये बार्हततृचाशीतावाद्याश्चतुर्दशर्चः शंसनीयाः । तथैव पञ्चमारण्यके—' यदिन्द्र प्रागपागुदगिति चतुर्दश ' (ऐ. आ. ५. २. ४) इति । चातुर्विंशिकेऽहनि माध्यंदिने सवनेऽच्छावाकशस्त्र आद्यः प्रगाथो वैकल्पिकः स्तोत्रियः । सूत्र्यते हि—' यदिन्द्र प्रागपागुदग्यथा गौरो अपा कृतम् ' (आश्व. श्रौ. ७. ४) इति ॥

यदिन्द्र प्रागपागुदङ् न्यग्वा हूयसे नृभिः ।
सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥ १ ॥

यत् । इन्द्र । प्राक् । अपाक् । उदक् । न्यक् । वा । हूयसे । नृऽभिः ।
सिम । पुरु । नृऽसूतः । असि । आनवे । असि । प्रऽशर्ध । तुर्वशे ॥ १ ॥

हे ᵛइन्द्र ᵛयत् यदि ᵛप्राक् प्राच्यां दिशि वर्तमानैः । सप्तम्यन्ताद्दिक्छब्दाद्धिहितस्यास्तातेः ' अञ्चेर्लुक् ' (पा. सू. ५. ३. ३०) इति लुक् । ᵛअपाक् प्रतीच्यां दिशि वर्तमानैः । यदि वा ᵛउदक् उदीच्यां दिशि वर्तमानैः । यत् ᵛवा ᵛन्यक् नीच्यां दिशि अधस्ताद्वर्तमानैः । ' न्यधी च ' इति नेः प्रकृतिस्वरत्वम् । ' उदात्तस्वरितयोर्यणः° ' इति परस्यानुदात्तस्य स्वरितत्वम् । एवंभूतैः ᵛनृभिः स्तोतृभिस्त्वं ᵛहूयसे स्वस्वकार्याय आहूयसे हे ᵛसिम श्रेष्ठेन्द्र । ' सिम इति वै श्रेष्ठमाचक्षते ' इति वाजसनेयकम् । यद्यप्येवं बहुभिराहूयसे तथापि ᵛआनवे । अनुर्नाम राजा । तस्य पुत्रे[1] राजर्षौ[1] ᵛपुरु बहुलं ᵛनृषूतः नृभिस्तदीयैः स्तोतृभिः प्रेरितः ᵛअसि भवसि । राज्ञो हितकरणे त्वां स्तोतारः प्रेरयन्तीत्यर्थः । ' षू प्रेरणे ' । अस्मात् कर्मणि निष्ठा । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । अपि च हे ᵛप्रशर्ध प्रकर्षेण शर्धयितरभिभवितरिन्द्र ᵛतुर्वशे एतत्संज्ञे च राजनि नृषूतः ᵛअसि नृभिः प्रेरितो भवसि ॥

यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा ।
कण्वासस्त्वा ब्रह्मभिः स्तोमवाहस इन्द्रा यच्छन्त्या गहि ॥ २ ॥

यत् । वा । रुमे । रुशमे । श्यावके । कृपे । इन्द्र । मादयसे । सचा ।
कण्वासः । त्वा । ब्रह्मऽभिः । स्तोमऽवाहसः । इन्द्र । आ । यच्छन्ति । आ । गहि ॥ २ ॥

ᵛयद्वा यद्यपि रुमादिषु चतुर्षु राजसु हे ᵛइन्द्र त्वं ᵛसचा सह ᵛमादयसे माद्यसि तथापि ᵛस्तोमवाहसः स्तोमानां स्तोत्राणां वोढारः ᵛकण्वासः कण्वगोत्रा ऋषयः ᵛब्रह्मभिः परिवृढैर्मन्त्रैर्हविर्भिर्वा हे ᵛइन्द्र त्वाम् ᵛआ ᵛयच्छन्ति आगमयन्ति । यद्वा । द्वितीयार्थे तृतीया । ब्रह्मभिर्ब्रह्माणि हवींष्याभिमुख्येन प्रयच्छन्ति ददति । ' दाण् दाने ' । ' पाघ्रा° ' इत्यादिना यच्छादेशः । अतस्त्वम् ᵛआ ᵛगहि शीघ्रमागच्छ । गमेर्लोटि छान्दसः शपो लुक् ॥

चातुर्विंशिकेऽहनि माध्यंदिनसवनेऽच्छावाकशस्त्रे ' यथा ' इति प्रगाथोऽनुरूपः । सूत्रितं च—' यथा गौरो अपा कृतमित्यच्छावाकस्य ' (आश्व. श्रौ. ७. ४) इति ॥

यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥ ३ ॥

---

१. ख१–पुत्रै राजर्षिभिः ।

यथा । गौरः । अपा । कृतम् । तृष्यन् । एति । अव । इरिणम् ।
आऽप्रित्वे । नः । प्रऽप्रित्वे । तूयम् । आ । गहि । कण्वेषु । सु । सचा । पिब ॥ ३ ॥

vगौरः गौरमृगः vतृष्यन् पिपासन् vअपा अद्भिरुदकैः । व्यत्ययेनैकवचनम् । 'ऊडिदम्' इत्यादिना विभक्तेरुदात्तत्वम् । vकृतं संपूर्णं कृतम् vइरिणं निस्तृणं तटाकदेशं vयथा येन प्रकारेण vअव vएति अवगच्छति । अवशब्दोऽभिशब्दस्यार्थे । अभिमुखः सन् शीघ्रं गच्छति तथा vआप्रित्वे बन्धुत्वे vप्रप्रित्वे[1] प्राप्ते सति हे इन्द्र त्वं vनः अस्मान् vतूयम् । क्षिप्रनामैतत् । शीघ्रम् vआ vगहि आगच्छ । आगत्य च vकण्वेषु कण्वपुत्रेष्वस्मासु vसचा सहैकयत्नेनैव विद्यमानं सवं सोमं vसु सुष्ठु vपिब ॥

मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते ।
आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तदधिषे सहः ॥ ४ ॥

मन्दन्तु । त्वा । मघऽवन् । इन्द्र । इन्दवः । राधःऽदेयाय । सुन्वते ।
आऽमुष्य । सोमम् । अपिबः । चमू इति । सुतम् । ज्येष्ठम् । तत् । दधिषे । सहः ॥ ४ ॥

हे vमघवन् धनवन् vइन्द्र vइन्दवः क्लेदनाः सोमास्त्वां vमन्दन्तु मादयन्तु हर्षयन्तु । मदेर्व्यत्ययेन[2] परस्मैपदम् । किमर्थम् । vसुन्वते सोमाभिषवं कुर्वते यजमानाय vराधोदेयाय राधसो धनस्य दानार्थम् । ददातेः 'अचो यत्' इति भावे यत् । 'ईद्यति' इतीकारः । 'यतोऽनावः' इत्याद्युदात्तत्वे[3] कृदुत्तरपदप्रकृतिस्वरत्वम् । 'शनुरनुमः०' इति सुन्वच्छब्दात् परा विभक्तिरुदात्ता । अपि च त्वं vसोमम् vआमुष्य आमोषणं कृत्वा अदत्तमपि बलादपहृत्य vअपिबः पीतवानसि । 'स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत्' (तै. सं. २. ४. १२. १) इति श्रुतेः । कीदृशं सोमम् । vचमू चम्वोरधिषवणफलकयोः vसुतम् अभिषुतम् । यद्वा चमूभ्यां चमसाभ्यां होतुर्मैत्रावरुणस्य च संबन्धिभ्यां संस्कृताभिर्वसतीवरीभिः सुतमभिषुतम् । यस्मादेवं vतत् तस्मात् कारणात् vज्येष्ठं प्रशस्यतमं वृद्धतमं वा vसहः बलं vदधिषे हे इन्द्र त्वं धारयसि । अतो मदीया अपि सोमास्त्वां मादयन्त्विति प्रार्थ्यते ॥

प्र चक्रे सहसा सहो बभञ्ज मन्युमोजसा ।
विश्वे त इन्द्र पृतनायवो यहो नि वृक्षाइव येमिरे ॥ ५ ॥

प्र । चक्रे । सहसा । सहः । बभञ्ज । मन्युम् । ओजसा ।
विश्वे । ते । इन्द्र । पृतनाऽयवः । यहो इति । नि । वृक्षाःऽइव । येमिरे ॥ ५ ॥

स इन्द्रः vसहसा आत्मीयेनाभिभवेन वीर्यकर्मणा vसहः शत्रूणामभिभवनं vप्र vचक्रे प्रकर्षेण कृतवान् । तथा vओजसा बलेन vमन्युं परकीयं क्रोधं vबभञ्ज भग्नवान् । उत्तरोऽर्धश्चैः प्रत्यक्षकृतः । हे vयहो । महन्नामैतत् । हे महन् vइन्द्र vविश्वे सर्वे vपृतनायवः युद्धकामाः शत्रवः vते त्वया vवृक्षाइव महीरुहा इव vनि vयेमिरे नियता आसन् । यथा वृक्षा निश्चलास्तिष्ठन्ति तद्वन्निर्व्यापारा अभूवन्नित्यर्थः ॥ ॥ ३० ॥

सहस्रेणेव सचते यवीयुधा यस्त आनळुपस्तुतिम् ।
पुत्रं प्रावर्गं कृणुते सुवीर्ये दाश्नोति नमउक्तिभिः ॥ ६ ॥

---

१. ख-ञ-न-भ-'प्रपित्वे' नास्ति । २. ख-ञ-त३-न-भ-मदेर्व्य° । ३. त-इत्यार्द्युदात्तत्वात् ।

सहस्रेणऽइव । सचते । यविऽयुधा । यः । ते । आनट् । उपऽस्तुतिम् ।
पुत्रम् । प्रावर्गम् । कृणुते । सुऽवीर्ये । दाश्नोति । नमऽउक्तिऽभिः ॥ ६ ॥

हे इन्द्र vते तव vउपस्तुतिं स्तोत्रं vयः पुरुषः vआनट् प्राप्नोति त्वां प्रापयति । अश्नोतेर्लङि व्यत्ययेन परस्मैपदम्[1] । --- vसचते समवैति । ' षच समवाये ' । vसहस्रेणेव यथा सहस्रसंख्येन बलेन तथेत्यर्थः । यश्च यजमानः vनमउक्तिभिः नमस्कारवचनैः स्तोत्रैः सार्धं vदाश्नोति हवींषि तुभ्यं ददाति । ' दाशृ दाने ' । स यजमानः vसुवीर्ये शोभनवीर्ययुक्ते संग्रामे vप्रावर्गं प्रकर्षेण शत्रूणां वर्जयितारं vपुत्रं vकृणुते करोति उत्पादयति । त्वत्प्रसादाल्लभत इत्यर्थः । प्रपूर्वाद्वृजेः ' कृत्यल्युटो बहुलम् ' इति कर्तरि घञ् । ' उपसर्गस्य घञ्यमनुष्ये° ' (पा. सू. ६. ३. १२२) इति दीर्घः । थाथादिनोत्तरपदान्तोदात्तत्वम् । यद्वा । सुवीर्यं इत्येतत् पुत्रस्य विशेषणम् । द्वितीयार्थे सप्तमी । शोभनवीर्यं पुत्रम् । बहुव्रीहौ ' वीरवीर्यौ च ' इत्युत्तरपदाद्युदात्तत्वम् ॥

मा भेम मा श्रमिष्मोग्रस्य सख्ये तव ।
महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥ ७ ॥

मा । भेम । मा । श्रमिष्म । उग्रस्य । सख्ये । तव ।
महत् । ते । वृष्णः । अभिऽचक्ष्यम् । कृतम् । पश्येम । तुर्वशम् । यदुम् ॥ ७ ॥

हे इन्द्र vउग्रस्य उद्गूर्णबलस्य vतव vसख्ये सखित्वे सति वयं vमा vभेम मा भैष्म । कुतश्चिदपि शत्रोर्भीता मा भूम । vमा vश्रमिष्म श्रान्ताः पीडिताश्च मा भूम । vवृष्णः कामानां वर्षितुः vते तव संबन्धि vमहत् प्रभूतं vकृतं वृत्रवधादिलक्षणं कर्म vअभिचक्ष्यम् अभितः ख्यापनीयं स्तोतव्यम् । अतो महानुभावस्य तव सख्यं प्राप्तानां भीतिश्रमौ न जायेते इत्यर्थः । तत् कथमवगम्यत इति चेदुच्यते । vतुर्वशम् एतत्संज्ञं राजर्षिं vयदुम् एतत्संज्ञं च त्वत्प्रसादात् सुखेन जीवन्तौ vपश्येम दृष्टवन्तः खलु वयम् । अतः कारणात् त्वत्सख्यं प्राप्तस्य भयादिकं न जायत इत्येतदुपपन्नमित्यर्थः ॥

सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।
मध्वा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥ ८ ॥

सव्याम् । अनु । स्फिग्यम् । ववसे । वृषा । न । दानः । अस्य । रोषति ।
मध्वा । सम्ऽपृक्ताः । सारघेण । धेनवः । तूयम् । आ । इहि । द्रव । पिब ॥ ८ ॥

vवृषा कामानां वर्षितेन्द्रः vसव्यां दक्षिणेतरां vस्फिग्यं कटिप्रदेशम् vअनु । तृतीयार्थेऽनोः कर्मप्रवचनीयत्वम् । सव्यया स्फिग्या शरीरैकदेशेनैव vववसे वस्ते । सर्वभूतजातमाच्छादयति । स्वयं कृत्स्नं जगदतीत्य वर्तत इत्यर्थः । निगमान्तरं च भवति—' यदन्यया स्फिग्या क्षामवस्थाः ' (ऋ. सं. ३. ३२. ११) इति । अपि च vदानः अवखण्डयिता । ' दान[2] अवखण्डने ' । पचाद्यच् । स च vअस्य इममिन्द्रं vन vरोषति न हिनस्ति । ' रिष[3] रुष[3] हिंसायाम् ' । इन्द्रं हिंसितुं शक्तः कश्चिदपि नास्तीत्यर्थः । यद्वा । दानो हविषां दाता यजमानश्चास्येन्द्रस्य न रोषति रोषं न जनयति । सर्वदा हविर्भिः परिचरतीत्यर्थः । उत्तरोऽर्धर्चः प्रत्यक्षकृतः । vसारघेण । सरघा मधुमक्षिका ।

---

१ . ख-ञ्च-त३-४-न-भ-' परस्मैपदं ' नास्ति । २ ख-ञ्च-दो; भ-दा । ३. ख-रूष रिष ।

तत्संबन्धिना ᵛमध्वा मधुना । लुप्तोपममेतत् । मधुनेव रसवता क्षीरादिना श्रयणद्रव्येण ᵛसंपृक्ताः संसृष्टाः संस्कृताः ᵛधेनवः धेनुवत् प्रीतिजनका अस्मदीयाः सोमाः । यद्वा । धिवेः प्रीणनार्थाद्धेनवः । प्रीणयितार इत्यर्थः । अथवा । 'धेट् पाने' । 'धेट इच्च' इत्यौणादिको नुप्रत्ययः । तत्संनियोगेन इकारान्तादेशश्च । पातव्याः सोमा इत्यर्थः । यत एवमतः कारणात् हे इन्द्र ᵛतूयं क्षिप्रम् ᵛएहि अस्मत्समीपमागच्छ । आगत्य च ᵛद्रव । सोमा यस्मिन्नुत्तरवेदिलक्षणे स्थाने हूयन्ते[1] तं देशं शीघ्रं गच्छ । 'द्रु गतौ' इति धातुः । 'ह्रचोऽतस्तिङः' इति सांहितिको दीर्घः । तदनन्तरमध्वर्युणा दत्तं सोमं ᵛपिब । तेन सोमेन सम्यक् स्वोदरं पूरयेत्यर्थः ॥

अश्वी रथी सुरूप इद्गोमाँ इदिन्द्र ते सखा ।
श्वात्रभाजा वयसा सचते सदा चन्द्रो याति सभामुप ॥ ९ ॥

अश्वी । रथी । सुऽरूपः । इत् । गोऽमान् । इत् । इन्द्र । ते । सखा ।
श्वात्रऽभाजा । वयसा । सचते । सदा । चन्द्रः । याति । सभाम् । उप ॥ ९ ॥

हे ᵛइन्द्र ᵛते तव ᵛसखा मित्रभूतः पुरुषोऽश्व्यादिगुणविशिष्ट एव भवति । इच्छब्दः प्रत्येकमभिसंबध्यते । ᵛअश्वी इत् बहुभिरश्वैरुपेत एव भवति । न कदाचिदश्वैर्वियुज्यते । ᵛरथी रथवानेव स भवति । ᵛसुरूप ᵛइत् शोभनरूपः शोभनावयव एव स भवति । ᵛगोमाँ ᵛइत् बह्वीभिर्गोभिर्युक्त एव स भवति । न कदाचिदेतैर्वियुज्यत इत्यर्थः । अपि च ᵛश्वात्रभाजा । 'श्वात्रम्' इति धननाम । आशु अतनीयं शीघ्रं प्राप्तव्यं शोभनं धनं संभजता ईदृग्धनसंयुक्तेन ᵛवयसा । अन्ननामैतत् । अन्नेन स सर्वदा ᵛसचते समवैति । संगच्छते । 'षच समवाये' । अत एव ᵛचन्द्रः सर्वेषामाह्लादकः सन् ᵛसभां जनसंसदम् ᵛउप ᵛयाति उपगच्छति ॥

ऋश्यो न तृष्यन्नवपानमा गहि पिबा सोमं वशाँ अनु ।
निमेघमानो मघवन्दिवेदिव ओजिष्ठं दधिषे सहः ॥ १० ॥

ऋश्यः । न । तृष्यन् । अवऽपानम् । आ । गहि । पिब । सोमम् । वशान् । अनु ।
निऽमेघमानः । मघऽवन् । दिवेऽदिवे । ओजिष्ठम् । दधिषे । सहः ॥ १० ॥

हे इन्द्र ᵛऋश्यो ᵛन ऋश्यास्त्यो मृग इव ᵛतृष्यन् पिपासंस्त्वम् ᵛअवपानम् अवनीतं ग्रहचमसादिषु पात्रेष्वानीतं पातव्यं सोमम् ᵛआ ᵛगहि अभिगच्छ । गत्वा च तमस्मदीयं ᵛसोमं ᵛवशाँ ᵛअनु अनुकामं यथाकामं ᵛपिब । यावता पीतेन पर्याप्तिर्जायते तावता सोमेन स्वोदरं पूरयेत्यर्थः । अत एव सोमपानात् प्राप्तबलस्त्वं ᵛदिवेदिवे प्रतिदिवसं ᵛनिमेघमानः न्यञ्च्यवाङ्मुखानि वृष्टयुदकानि सिञ्चन् हे ᵛमघवन् इन्द्र ᵛओजिष्ठम् ओजस्वितममुत्कृष्टं ᵛसहः बलं ᵛदधिषे धारयसि । ओजस्विशब्दादिष्ठनि 'विन्मतो लुक्' इति विनो लुक् । 'टेः' इति टिलोपः ॥ ॥ ३१ ॥

अध्वर्यो द्रावया त्वं सोममिन्द्रः पिपासति ।
उप नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥ ११ ॥

अध्वर्यो इति । द्रवय । त्वम् । सोमम् । इन्द्रः । पिपासति ।
उप । नूनम् । युयुजे । वृषणा । हरी इति । आ । च । जगाम । वृत्रऽहा ॥ ११ ॥

---

१. त–वर्यते ।

हे vअध्वर्यो अध्वरस्य नेतः vत्वं vसोमं vद्रावय। उत्तरवेदिलक्षणं स्थानं प्रापय। यद्वा। रसात्मना द्रवणशीलं कुरु। अभिषुण्वित्यर्थः। किं कारणमिति चेत्। vइन्द्रः vपिपासति इमं सोमं पातुमिच्छति। त्वयैतत् कथमवगतमिति चेत् तत्राह। vवृषणा वर्षितारौ युवानौ वा vहरी अश्वौ vनूनम् अद्य vयुयुजे। उपगम्य सारथिर्योजितवान् रथे। vवृत्रहा वृत्रस्य हन्तेन्द्रः vच vआ vजगाम आगतवान्॥

स्वयं चित्स मन्यते दाशुरिर्जनो यत्रा सोमस्य तृम्पसि।
इदं ते अन्नं युज्यं समुक्षितं तस्येहि प्र द्रवा पिब॥ १२॥

स्वयम्। चित्। सः। मन्यते। दाशुरिः। जनः। यत्र। सोमस्य। तृम्पसि।
इदम्। ते। अन्नम्। युज्यम्। सम्ऽउक्षितम्। तस्य। आ। इहि। प्र। द्रव। पिब॥१२॥

vदाशुरिः दाश्वान्। दाशतेरौणादिक उरिन्। हविषां दाता vसः यजमानलक्षणो vजनः vस्वयं vचित् स्वयमेव आत्मनैव vमन्यते सर्वं जानाति। परायत्तप्रज्ञो न भवतीत्यर्थः। vयत्र यस्मिन् जने vसोमस्य पानेन हे इन्द्र त्वं vतृम्पसि तृप्यसि। 'तृप तृम्प तृप्तौ'। तौदादिकः। 'शे तृम्पादीनाम्' (पा. सू. ७. १. ५९.१) इति नुम्। vते त्वदीयं vयुज्यं योग्यम् vइदम् अस्मदीयं सोमलक्षणम् vअन्नं vसमुक्षितं सम्यक् पात्रेष्वासिक्तम्। 'उक्ष सेचने'। कर्मणि निष्ठा। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। अतस्तं तादृशं सोमम् vएहि अभिगच्छ। vप्र vद्रव शीघ्रं प्राप्नुहि। तदनन्तरं vपिब पानं कुरु॥

रथेष्ठायाध्वर्यवः सोममिन्द्राय सोतन।
अधि ब्रध्नस्यार्द्रयो वि चक्षते सुन्वन्तो दाश्वध्वरम्॥ १३॥

रथेऽस्थाय। अध्वर्यवः। सोमम्। इन्द्राय। सोतन।
अधि। ब्रध्नस्य। अद्रयः। वि। चक्षते। सुन्वन्तः। दाशुऽअध्वरम्॥ १३॥

vरथेष्ठाय। रथे तिष्ठतीति रथेष्ठः। 'सुपि स्थः' इति कप्रत्ययः। 'तत्पुरुषे कृति बहुलम्' इति सप्तम्या अलुक्। एवंलक्षणाय vइन्द्राय हे vअध्वर्यवः vसोमं vसोतन अभिषुणुत। 'षुञ् अभिषवे'। 'तप्तनप्तनथनाश्च' इति तनबादेशः। vब्रध्नस्य बुध्नस्य मूलस्याभिषवार्थं चर्मणि स्थापितस्योपरालस्य विस्तृतस्याद्मनः vअधि उपरि vअद्रयः अन्ये ग्रावाणश्चतसृषु दिक्षु वर्तमानाः vदाश्वध्वरं दाशोर्दातुर्यजमानस्य अध्वरो यागो येन[1] निष्पद्यते तादृशं सोमं vसुन्वन्तः ऋत्विङ्निरपेक्षं स्वयमेवाभिषुण्वन्तः vवि vचक्षते विशेषेण प्रकाशन्ते। सोमाभिषवेऽतिशयेनानुकूला वर्तन्त इत्यर्थः। अथवाद्रयस्तैरद्रिभिर्हे अध्वर्यवः सोममभिषुणुतेति योज्यम्॥

उप ब्रध्नं वावाता वृषणा हरी इन्द्रमपसु वक्षतः।
अर्वाञ्चं त्वा सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप॥ १४॥

उप। ब्रध्नम्। ववाता। वृषणा। हरी इति। इन्द्रम्। अपऽसु। वक्षतः।
अर्वाञ्चम्। त्वा। सप्तयः। अध्वरऽश्रियः। वहन्तु। सवना। इत्। उप॥ १४॥

---

१. ख–योना; श–तथा।

vब्रध्नम् अन्तरिक्षं vवावाता[1] संभक्तवन्तौ । वनतेर्निष्ठायां छान्दसं द्विर्वचनमिडभाव आत्वं धातुस्वरश्च । ' अन्येषामपि दृश्यते ' इति सांहितिकोऽभ्यासदीर्घः । यद्वा । वावाता पुनः पुनर्गच्छन्तौ । ' वा गतिगन्धनयोः ' । अस्माद्यङ्लुगन्तात् कर्तरि निष्ठा । vवृपणा वृषणौ सेक्तारौ vहरी हरणशीलावश्वौ उक्तगुणौ[2] सन्तौ vअपसु अस्मदीयेषु कर्मसु । अपस्शब्दः सकारान्तः कर्मवचनः । ' पीवोपवसनानां छन्दसि लोपो वक्तव्यः ' (पा. म. ६. ३. १०९.६) इतीह सकारो लुप्यते । तत्रेमम् vइन्द्रम् vउप vवक्षतः उपवहतामुपानयताम् । वहतेर्लेड्यडागमः । ' सिब्बहुलम्° ' इति सिप् । अपि च vअध्वरश्रियः अध्वरं सेवमानाः vसप्तयः सर्पणशीला अन्येऽपि त्वदीया अश्वाः vसवना सवनानि प्रातःसवनादीन्यस्मद्यागसंबन्धीनि प्रति हे इन्द्र त्वाम् vअर्वाञ्चम् अभिमुखम् vउप vवहन्तु उपगमयन्तु । vइत् इति पूरकः ॥

प्र पूषणं वृणीमहे युज्याय पुरूवसुम् ।
स शक्र शिक्ष पुरुहूत नो धिया तुजे राये विमोचन ॥ १५ ॥

प्र । पूषणम् । वृणीमहे । युज्याय । पुरुऽवसुम् ।
सः । शक्र । शिक्ष । पुरुऽहूत । नः । धिया । तुजे । राये । विऽमोचन ॥ १५ ॥

इदमाद्यासु चतसृषु पूष्ण इन्द्रस्य च लिङ्गसद्भावादेता उभयथा व्याख्यायन्ते । vपुरूवसुं बहुधनं vपूषणं पोषकमिन्द्रं यद्वैतत्संज्ञं देवं vप्र vवृणीमहे प्रकर्षेण संभजामहे । किमर्थम् । vयुज्याय । युङ्क्त इति युड् सखा । तस्य भावाय । सख्यित्वायेत्यर्थः । हे vशक्र शक्त vपुरुहूत बहुभिराहूत हे vविमोचन पापाद्विमोचयितरिन्द्र पूषन् वा vसः त्वं vनः अस्मान् vधिया आत्मीयया बुद्ध्या vशिक्ष शक्तान् कर्तुमिच्छ । किमर्थम् । vराये धनाय धनप्राप्त्यर्थं vतुजे शत्रूंस्तोजयितुं हिंसितुम् । ' तुज हिंसायाम् ' । अस्मात् कृत्यार्थे केन्प्रत्ययः । यद्वा । राये इति ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वाच्चतुर्थी । जातावेकवचनम् । रायो धनानि धिया स्तुत्या प्रीतः सन्नोऽस्मभ्यं शिक्ष देहि । शिक्षतिर्दानकर्मा । ' ऊडिदम्° ' इति रायो विभक्तिरुदात्ता ॥ ॥ ३२ ॥

सं नः शिशीहि भुरिजोरिव क्षुरं रास्व रायो विमोचन ।
त्वे तन्नः सुवेदमुस्रियं वसु यं त्वं हिनोषि मर्त्यम् ॥ १६ ॥

सम् । नः । शिशीहि । भुरिजोः ऽइव । क्षुरम् । रास्व । रायः । विऽमोचन ।
त्वे इति । तत् । नः । सुऽवेदम् । उस्रियम् । वसु । यम् । त्वम् । हिनोषि । मर्त्यम् ॥ १६ ॥

हे इन्द्र पूषन् वा vनः अस्मान् vसं vशिशीहि सम्यक् निश्य[3] तीक्ष्णबुद्धीन् कुरु । vभुरिजोरिव । बाहुनामैतत् । नापितस्य बाह्वोरिव[4] स्थितं vक्षुरम् इव । अपि च हे vविमोचन पापाद्विमोचन पापाद्विमोचयितः vरायः धनानि vरास्व अस्मभ्यं देहि । ' रा दाने ' । तत् कस्य हेतोः । vत्वे त्वयि खलु vउस्रियम् । उस्रा गावः । तत्संबद्धं vतत् vवसु निवासकं धनं vनः अस्माकं vसुवेदं सुलभं नान्येषु देवेषु । vयं धनसमूहं vमर्त्यं मनुष्यं स्तोतारं प्रति vत्वं vहिनोषि प्रेरयसि तद्वसु त्वयीत्यन्वयः । यत एवं तस्मात् रास्व इति योज्यम् ॥

वेमि त्वा पूषन्नृञ्जसे वेमि स्तोतव आघृणे ।
न तस्य वेम्यरणं हि तद्वसो स्तुषे पज्राय साम्ने ॥ १७ ॥

---

१. ख-भ–ववाता । २. न-श–उक्तलक्षणौ । ३. ख-भ–शिश्य; श–तिश्य । ४. ञ–बाह्वोः ।

वेमि । त्वा । पूषन् । ऋञ्जसे । वेमि । स्तोतवे । आघृणे ।
न । तस्य । वेमि । अरणम् । हि । तत् । वसो इति । स्तुषे । पज्राय । साम्ने ॥ १७ ॥

हे ᵛपूषन् पोषकेन्द्र एतत्संज्ञ[1] वा[1] देव ᵛत्वा त्वाम् ᵛऋञ्जसे प्रसाधयितुं ᵛवेमि कामये । ᵛआघृणे आगतदीप्ते ᵛस्तोतवे त्वां स्तोतुं ᵛवेमि कामये । यत्त्वद्व्यतिरिक्तं देवतान्तरं ᵛतस्य स्तोत्रं ᵛन ᵛवेमि न कामये । तत् कुत इति चेत् । ᵛहि यस्मात् ᵛअरणम् अरमणमसुखकरम् । अतस्त्वामेव स्तोतुं कामय इत्यर्थः । हे ᵛवसो वासक ᵛस्तुषे स्तुवते ᵛपज्राय प्राजकाय[2] स्तोत्राणां ᵛसाम्ने । साम स्तोत्रम् । सामर्थ्यादत्र तद्वाङ्लक्ष्यते । तद्वते । यद्वा । पज्र इति कक्षीवत आख्या । आम्नातं हि— 'यद्वां पज्रासो अश्विना हवन्ते' (ऋ. सं. १. ११७. १०) इति । तस्मै कक्षीवत इव मह्यम् । सामर्थ्यादुपमार्थो लभ्यते । अपेक्षितं धनं देहीति शेषः ॥

परा गावो यवसं कच्चिदाघृणे नित्यं रेक्णो अमर्त्य ।
अस्माकं पूषन्नविता शिवो भव मंहिष्ठो वाजसातये ॥ १८ ॥

परा । गावः । यवसम् । कत् । चित् । आघृणे । नित्यम् । रेक्णः । अमर्त्य ।
अस्माकम् । पूषन् । अविता । शिवः । भव । मंहिष्ठः । वाजऽसातये ॥ १८ ॥

हे ᵛआघृणे आगतदीप्ते पूषन्निन्द्र वा ᵛकच्चित् कस्मिंश्चित् काले अस्मदीयाः ᵛगावो ᵛयवसं तृणं भक्षितुं ᵛपरा गच्छन्ति । हे ᵛअमर्त्य अमरण देव तदानीं ᵛरेक्णः तद्रूपं धनं ᵛनित्यम् अस्माकं ध्रुवमस्तु । चोरव्याघ्रादिभिर्हिंसितं मा भूत् । अपि च हे ᵛपूषन् पोषयितः ᵛअस्माकम् ᵛअविता रक्षिता भूत्वा ᵛशिवः सुखकरः ᵛभव । तथा ᵛवाजसातये वाजस्यान्नस्य बलस्य वा संभजनार्थं ᵛमंहिष्ठः दातृतमो भव ॥

स्थूरं राधः शताश्वं कुरुङ्गस्य दिविष्टिषु ।
राज्ञस्त्वेषस्य सुभगस्य रातिषु तुर्वशेष्वमन्महि ॥ १९ ॥

स्थूरम् । राधः । शतऽअश्वम् । कुरुङ्गस्य । दिविष्टिषु ।
राज्ञः । त्वेषस्य । सुऽभगस्य । रातिषु । तुर्वशेषु । अमन्महि ॥ १९ ॥

इदमादिकेन तृचेन देवातिथिः कुरुङ्गनाम्नो राज्ञो दानं स्तौति । ᵛकुरुङ्गस्य । कुरून्गेतुं गच्छति कुलं गच्छतीति वा कुरुङ्गः । 'डोऽन्यत्रापि दृश्यते' इति गमेर्डः । पृषोदरादिः । एतत्संज्ञस्य ᵛत्वेषस्य दीप्तस्य ᵛसुभगस्य शोभनधनस्य एवंभूतस्य ᵛराज्ञः संबन्धिनीषु ᵛदिविष्टिषु दिवः स्वर्गस्यैषणेषु प्राप्तिहेतुभूतासु यागक्रियासु ᵛरातिषु दानेषु दक्षिणारूपेषु सत्सु ᵛतुर्वशेषु । मनुष्यनामैतत् । निर्धारणे सप्तमी । मनुष्येषु मध्ये वयं ᵛस्थूरं स्थूलं प्रभूतं ᵛशताश्वम् अश्वानां शतेन युक्तं ᵛराधः धनम् ᵛअमन्महि अज्ञासिष्म । अलभामहीत्यर्थः ॥

धीभिः सातानि काण्वस्य वाजिनः प्रियमेधैरभिद्युभिः ।
षष्टिं सहस्रानु निर्मजामजे निर्यूथानि गवामृषिः ॥ २० ॥

---

१. ख-भ–एतत्संज्ञक । २. त–पार्जकाय ।

धीभिः । सातानि । काण्वस्य । वाजिनः । प्रियऽमेधैः । अभिद्युऽभिः ।
षष्टिम् । सहस्रा । अनु । निःऽमंजाम् । अजे । निः । यूथानि । गवाम् । ऋषिः ॥ २० ॥

vकाण्वस्य कण्वपुत्रस्य vवाजिनः हविष्मतो मेधातिथेः संबन्धिभिः vधीभिः ध्यातृभिः स्तोतृभिः vसातानि संभक्तानि vअभिद्युभिः अभिगतदीप्तिभिः vप्रियमेधैः एतत्संज्ञैरृषिभिः सेवितानि vनिर्मजां निःशेषेण शुद्धानां vगवां vषष्टिं vसहस्रा षष्टिसंख्याकानि सहस्राणि vयूथानि vऋषिः देवातिथिरहम् vअनु पश्चात् vनिः vअजे निःशेषेणागच्छम्। साकल्येन प्राप्तवानस्मि। 'अज गतिक्षेपणयोः'। यथा प्रियमेधानां काण्वानां च गवां यूथानि राज्ञा दत्तानि तैः प्रतिगृहीतानि एवं तेन दत्तानि मया प्रतिगृह्यन्त इत्यर्थः ॥

वृक्षाश्चिन्मे अभिपित्वे अरारणुः । गां भजन्त मेहनाश्वं भजन्त मेहना ॥२१॥

वृक्षाः । चित् । मे । अभिऽपित्वे । अरारणुः ।
गाम् । भजन्त । मेहना । अश्वम् । भजन्त । मेहना ॥ २१ ॥

vमे मया vअभिपित्वे पूर्वोक्ते धने अभिप्राप्ते सति vवृक्षाश्चित् वृक्षा अपि vअरारणुः अशब्दयन्। कथमिति तदाह। इमे ऋषयः vमेहना मंहनीयां प्रशस्यां vगां vभजन्त असेवन्त अलभन्त। vमेहना मंहनीयम् vअश्वं च vभजन्त अलभन्तेति। गामश्वमिति जात्यभिप्रायमेकवचनम्। यद्वा। मेहनेति म इह नेति पदत्रयात्मकमेकं पदम्। यदाह यास्कः—'यदिन्द्र चित्रं[1] चायनीयं मंहनीयं धनमस्ति। यन्म इह नास्तीति वा त्रीणि मध्यमानि पदानि' (निरु. ४. ४)। तदैवं व्याख्येयम्। इम ऋषयो गामश्वं चालभन्त। इहास्मिन् राजनि प्रशस्तस्य धनस्य तद्दानं मम नासीन्मम नासीदिति वृक्षप्रमुखाः सर्वेऽपि जनाः प्रोचुरित्यर्थः ॥ ॥ ३३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये
पञ्चमाष्टके सप्तमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथाष्टमो[2] व्याख्यातुमारभ्यते। अष्टमे मण्डले प्रथमेऽनुवाके चत्वारि सूक्तानि व्याकृतानि। 'दूरात्' इत्येकोनचत्वारिंशदृचं पञ्चमं सूक्तं कण्वगोत्रस्य ब्रह्मातिथेरार्षम्। आदितः षट्त्रिंशदृाद्यस्यः। ततो द्वे बृहत्यौ। अन्तिमानुष्टुप्। अन्त्येषु पञ्चस्वर्धर्चेषु चेदिपुत्रस्य कशुनाम्नो राज्ञो दानं स्तूयते। अतस्तद्देवताकाः। शिष्टा आश्विन्यः। तथा चानुक्रान्तं—'दूरादेकान्नचत्वारिंशद्ब्रह्मातिथिराश्विनं द्विबृहत्यनुष्टुबन्तमन्त्याः पञ्चार्धर्चाश्चैद्यस्य कशोर्दानस्तुतिः' इति। प्रातरनुवाकाश्विनशस्त्रयोराश्विने क्रतौ गायत्रे छन्दसि अन्त्यतृचवर्जमिदं सूक्तम्। सूत्र्यते हि—'दूरादिहेवेति तिस्र उत्तमा उद्धरेत्' (आश्व. श्रौ. ४. १५) इति ॥

---

१. ख–चित्र। २. श–अथ पंचमस्या°।

दूरादिहेव यत्सत्यरुणप्सुरशिश्वितत् । वि भानुं विश्वधातनत् ॥ १ ॥

दूरात् । इहऽईव । यत् । सती । अरुणऽप्सुः । अशिश्वितत् । वि । भानुम् । विश्वधा । अतनत् ॥ १ ॥

[v]दूरात् दूरत एव विप्रकृष्ट एव नभसः प्राक्प्रदेशे वर्तमाना [v]इहेव [v]सती इह समीपे विद्यमानेव । अस्तेः शतरि श्नसोरल्लोपे 'उगितश्च' इति ङीप् । 'शतुरनुमः०' इति नद्या उदात्तत्वम् । [v]अरुणप्सुः आरोचमानरूपा ईदृशी उषाः [v]यत् यदा [v]अशिश्वितत् अश्वेतयत् । 'श्विता वर्णे' । अस्माण्ण्यन्तात् लुङि चङि रूपम् । 'यङ्लुक्तान्नित्यम्' इति निघातप्रतिषेधः । तदा [v]भानुं दीप्तिं [v]विश्वधा[1] बहुविधं [v]वि [v]अतनत् विस्तारितवती । तनोतेर्व्यत्ययेन शप् । ईदृशीमुषसं हे अश्विनौ सचेथे इत्युत्तरयैकवाक्यता । यद्वा । प्रातरनुवाक्य[2] उषस्येन[3] काण्डेन उषाः स्तुता सती प्रादुर्बभूव । हे अश्विनौ शंसिष्यमाणमाश्विनं ऋतुं श्रोतुं युवामपि प्रादुर्भवतमित्यध्याहारेण वाक्यं पूरणीयम् ॥

नृवद्दस्रा मनोयुजा रथेन पृथुपाजसा । सचेथे अश्विनोषसम् ॥ २ ॥

नृऽवत् । दस्रा । मनःऽयुजा । रथेन । पृथुऽपाजसा । सचेथे इति । अश्विना । उषसम् ॥ २ ॥

हे [v]दस्रा दस्रौ दर्शनीयौ शत्रूणामुपक्षपयितारौ वा । 'सुपां सुलुक्०' इत्याकारः । ईदृशौ हे [v]अश्विना अश्विनौ [v]नृवत् नृभिः नेतृभिस्तुल्यं वर्तमानौ युवाम् । 'तेन तुल्यम्०' इति प्रथमार्थे वतिः । यद्वा । नृवतीम्[4] । नृशब्दान्मतुपश्छान्दसत्वम् । रश्रुतिसामान्याद्वा[5] 'छन्दसीरः' इति वत्वम् । ङीपश्छान्दसो लुक् । 'ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वम् । ईदृशीम् [v]उषसं [v]रथेन आत्मीयेन वाहनेन [v]सचेथे सम्यगागच्छथः[6] । 'षच समवाये' । यद्वा । सचतिः सेवनार्थः । सचेथे सेवेथे । तदाह यास्कः—'सचस्वा नः स्वस्तये सेवस्व नः स्वस्तये' (निरु. ३. २१) इति । कीदृशेन रथेन । [v]मनोयुजा मनसैव व्यापारान्तरनिरपेक्षेण स्मरणमात्रेणाश्वैर्युज्यमानेन [v]पृथुपाजसा विस्तीर्णबलेन बह्वन्नेन वा । उषसोऽनन्तरमश्विनोः स्तूयमानत्वात्तामश्विनौ गच्छत इत्युच्यते ॥

युवाभ्यां वाजिनीवसू प्रति स्तोमा अदृक्षत । वाचं दूतो यथोहिषे ॥ ३ ॥

युवाभ्याम् । वाजिनीवसू इति वाजिनीऽवसू । प्रति । स्तोमाः । अदृक्षत ।
वाचम् । दूतः । यथा । ओहिषे ॥ ३ ॥

हे [v]वाजिनीवसू । वाजो हविर्लक्षणमन्नम् । तद्युक्ता यागक्रिया वाजिनी । तस्यां वसु धनं ययोरस्ति तौ तथोक्तौ । यद्वा । अन्नयुक्तं स्तोतृभ्यो देयं वसु धनं ययोरस्ति तादृशौ । हे अश्विनौ [v]युवाभ्यां [v]स्तोमाः अस्माभिः कृतानि स्तोत्राणि [v]प्रति [v]अदृक्षत प्रतिदृश्यन्ताम् । दृशेश्छान्दसः कर्मणि लुङ् । 'लिङ्सिचावात्मनेपदेषु' इति किरवात् 'सृजिदृशोः०' इत्यमभावः । षत्वकत्वषत्वानि । अहं च [v]यथा येन प्रकारेण [v]दूतः प्रेष्यः [v]वाचं स्वामिनो वाक्यं याचते तथा युवयोः प्रीतिपूर्विकां वाचम् [v]ओहिषे । पुरुषव्यत्ययः । याचे । 'उहिर्दर्दने' । याचन इत्यर्थः । व्यत्ययेनात्मनेपदम् । यद्वा । दूतो यथा स्वामिनोक्तां वाचं विदेशस्थमन्यं प्रापयति एवमहमपि स्तुतिरूपां वाचमोहिषे वहे युवां प्रापयामि ॥ वहेर्व्यत्ययेन[7] मध्यमः । छान्दसं संप्रसारणम् । 'छन्दस्युभयथा' इत्यार्धधातुकत्वात् इडागमः । शबभावो लघूपधगुणश्च । 'एङि पररूपम्' इति पररूपत्वम् ॥

---

१. ख-भ-विश्वधातनत् । २. ज्ञ-प्रातरनुवाक । ३. ख-भ-ता उषस्येन; ज्ञ-उषसे उषस्येन; श-उषसेन । ४. ज्ञ-त-श-नेतृमतीं । ५. ख-भ-रथश्रुतिसामान्याद्वा; त३-श्रुतिसामान्याद्वा । ६. ख-ज्ञ-त४-न-य-सम्यगाच्छथः; ज्ञ-त२-३-भ-श-सम्यग्गच्छथः । ७. ख-ज्ञ-ज्ञ-त२-श-ऊहे० ।

पुरुप्रिया ण ऊतये पुरुमन्द्रा पुरूवसू । स्तुषे कण्वासो अश्विना ॥ ४ ॥

पुरुऽप्रिया । नः । ऊतये । पुरुऽमन्द्रा । पुरुवसू इति पुरुऽवसू ।
स्तुषे । कण्वासः । अश्विना ॥ ४ ॥

[v]पुरुप्रिया बहूनां प्रियौ [v]पुरुमन्द्रा बहुमदौ बहूनां मादयितारौ वा । यद्वा । पुरु बहुलं माद्यन्तौ । [v]पुरुवसू बहुधनौ ईदृशौ [v]अश्विना अश्विनौ [v]नः अस्माकम् [v]ऊतये रक्षणाय [v]कण्वासः कण्वगोत्रा वयं [v]स्तुषे स्तुमहे । पुरुषवचनयोर्व्यत्ययः । यद्वा । कण्वास इति पूजार्थं बहुवचनम् । ऋषिरात्मानं संबोध्य ब्रूते । हे अन्तरात्मन् कण्वासः कण्वगोत्रस्त्वं स्तुषे अश्विनौ स्तुहि ॥

मंहिष्ठा वाजसातमेषयन्ता शुभस्पती । गन्तारा दाशुषो गृहम् ॥ ५ ॥

मंहिष्ठा । वाजऽसातमा । इषयन्ता । शुभः । पती इति । गन्तारा । दाशुषः । गृहम् ॥ ५ ॥

[v]मंहिष्ठा मंहिष्ठौ मंहनीयौ पूजनीयौ यद्वा दातृतमौ [v]वाजसातमा । वाजोऽन्नं बलं वा । तस्य अतिशयेन दातारौ । यद्वा वाजो हविर्लक्षणमन्नम् । तस्य संभक्तृतमौ । सनोतेः सनतेर्वा ' जनसन° ' इति विट् । विड्वनोरनुनासिकस्यात्वम्[1] । [v]इषयन्ता स्तोतृभ्य इषमन्नं कुर्वन्तौ । इट्शब्दात् ' तत्करोति° ' इति णिच् । णेरिष्ठवद्भावेन टिलोपे प्राप्ते ' प्रकृत्यैकाच् ' इति प्रकृतिभावः । यद्वा । इषयन्ता एषयन्तौ श्रेयांसि प्रापयन्तौ । ' इष गतौ ' । अस्माद्धेतुमण्णिच्[2] । संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः । [v]शुभः शोभनस्य धनस्योदकस्य वा [v]पती स्वामिनौ । ' षष्ठ्याः पतिपुत्र° ' इति विसर्जनीयस्य सत्वम् । [v]दाशुषः चरुपुरोडाशादीनि दत्तवतो यजमानस्य [v]गृहं [v]गन्तारा गमनशीलौ । गमेस्ताच्छीलिकस्तृन् । अतः ' न लोकाव्यय° ' इति कर्मणि षष्ठ्याः प्रतिषेधः । ईदृशावश्विनौ स्तुम इति शेषः ॥ ॥ १ ॥

ता सुदेवाय दाशुषे सुमेधामवितारिणीम् । घृतैर्गव्यूतिमुक्षतम् ॥ ६ ॥

ता । सुऽदेवाय । दाशुषे । सुऽमेधाम् । अविऽतारिणीम् । घृतैः । गव्यूतिम् । उक्षतम् ॥ ६ ॥

हे अश्विनौ [v]ता तौ तादृशौ युवां [v]सुदेवाय । शोभना देवा येन यष्टव्याः स तथोक्तः । बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । तस्मै [v]दाशुषे हविर्दत्तवते यजमानाय । तादर्थ्ये चतुर्थी । ईदृग्यजमानार्थं [v]सुमेधां शोभनयज्ञाम् [v]अवितारिणीम् । वितरणं विगमनमपायः । अनपायिनीम् । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वम् । ईदृशीं [v]गव्यूतिम् । गावो यूयन्ते संयुज्यन्तेऽत्रेति गव्यूतिर्गोसंचारभूमिः । ' गोर्यूतौ छन्दसि ' (पा. सू. ६. १. ७९. २) इत्यवादेशः । तां [v]घृतैः क्षरणशीलैरुदकैः [v]उक्षतं सिञ्चतम् । ' उक्ष सेचने ' ॥

आ नः स्तोममुप द्रवत्तूयं श्येनेभिराशुभिः । यातमश्वेभिरश्विना ॥ ७ ॥

आ । नः । स्तोमम् । उप । द्रवत् । तूयम् । श्येनेभिः । आशुऽभिः । यातम् । अश्वेभिः । अश्विना ॥ ७ ॥

हे [v]अश्विना अश्विनौ [v]नः अस्माकं [v]स्तोमं स्तोत्रम् [v]अश्वेभिः अश्वैः । ' द्रवत् तूयम् ' इत्युभे क्षिप्रनामनी । एकः पूरकः । [v]तूयं क्षिप्रम् [v]उप [v]आ [v]यातम् उपागच्छतम् । यद्वा । द्रवदिति स्तोमविशेषणम् । [v]द्रवत् शीघ्रं प्रवर्तमानं स्तोममित्यर्थः । कीदृशैरश्वैः । [v]श्येनेभिः शंसनीयगतिभिः प्रशस्यगमनैः [v]आशुभिः शीघ्रगैः ॥

---

१. ख-भ-श-°स्यादित्यात्वं । २. ङ्ग-त-श-°द्धेतुमति णिच् ।

येभिस्तिस्रः परावतो दिवो विश्वानि रोचना । त्रीरुक्तून्परिदीयथः ॥८॥

येभिः । तिस्रः । पराऽवतः । दिवः । विश्वानि । रोचना । त्रीन् । अक्तून् । परिऽदीयथः ॥८॥

हे अश्विनौ vतिस्रः vदिवः त्रीन् दिवसान् vत्रीन् vअक्तून् तिस्रो रात्रीश्च । अत्यन्तसंयोगे द्वितीया । एतावन्तं कालं vविश्वानि सर्वाणि व्याप्तानि वा vरोचना रोचमानानि नक्षत्ररूपाणि देवगृहाणि vपरावतः दूरदेशात् vयेभिः यैरश्वैः vपरिदीयथः परिगच्छथः । दीयतिर्गतिकर्मा । तैरस्माकं स्तोत्रमुपयातमिति पूर्वत्रान्वयः ॥

उत नो गोमतीरिष उत सातीरहर्विदा । वि पथः सातये सितम् ॥ ९ ॥

उत । नः । गोऽमतीः । इषः । उत । सातीः । अहःऽविदा । वि । पथः । सातये । सितम् ॥९॥

vउत अपि च हे vअहर्विदा अह्नो लम्भयितारौ । यद्वा । अह्नि प्रभातसमये वेदितव्यौ स्तोतव्यौ । vनः अस्मभ्यं vगोमतीः बहुभिर्गोभिर्युक्ताः vइषः अन्नानि दत्तमिति शेषः । vउत अपि च vसातीः संभजनीया दातव्या वा रायश्चास्मभ्यं दत्तम् । सनतेः सनोतेर्वा कर्मणि क्तिन् । 'जनसनखनाम्०' इत्यात्वम् । 'ऊतियूति०' इत्यादिना क्तिन उदात्तत्वं निपात्यते । अपि चास्माकं vसातये उक्तानां गवादीनां लाभाय संभजनाय वा vपथः तदुपायरूपान् मार्गान् vवि vसितं विशेषेण बध्नीतम् । यथान्ये न प्रविशन्ति तथा कुरुतमित्यर्थः । 'षिञ् बन्धने' । छान्दसो विकरणस्य लुक् । यद्वा । उपसर्गवशादयं धातुः स्वार्थविपरीते बन्धनाभावे वर्तते । प्रस्मरणं प्रस्थानमिति यथा । पथो मार्गान् वि सितं विमुञ्चतम् । प्रदर्शयतमित्यर्थः । पथिच्छब्दोऽन्तोदात्तः । तस्य शसि टिलोप उदात्तनिवृत्तिस्वरेण शस उदात्तत्वम् ॥

आ नो गोमन्तमश्विना सुवीरं सुरथं रयिम् । वोळ्हमश्वावतीरिषः ॥१०॥

आ । नः । गोऽमन्तम् । अश्विना । सुऽवीरम् । सुऽरथम् । रयिम् । वोळ्हम् । अश्वऽवतीः । इषः ॥१०॥

हे vअश्विना अश्विनौ vनः अस्मभ्यं vरयिं धनम् vआ vवोळ्हम् आवहतम् आहरतम् । वहेर्लोटि छान्दसः शपो लुक् । ढ्रलोपे पूर्वदीर्घः । ढ्रत्वधत्वष्टुत्वढलोपेषु कृतेषु 'सहिवहोरोदवर्णस्य' इत्योत्वम् । कीदृशं रयिम् । vगोमन्तं बह्वीभिर्गोभिर्युक्तं vसुवीरम् । वीर्याजायन्त इति वीराः पुत्राः । शोभनैस्तैरुपेतम् । विविधमीरयन्ति शत्रूनिति वा वीराः शूराः । तैरुपेतम् । vसुरथं शोभनरथेन युक्तम् । अपि च vअश्वावतीः अश्वयुक्ताः । 'मन्त्रे सोमाश्व०' इति मतौ दीर्घः । vइषः इष्यमाणान्यन्नानि चास्मभ्यमावहतम् ॥ ॥ २ ॥

द्विदेवत्यस्याश्विनग्रहस्य 'वावृधाना' इत्येषा याज्या । सूत्र्यते हि—'होता यक्षदश्विना नासत्या वावृधाना शुभस्पती[1]' (आश्व. श्रौ. ५. ५) इति ॥

वावृधाना शुभस्पती दस्रा हिरण्यवर्तनी । पिबतं सोम्यं मधु ॥ ११ ॥

वावृधाना । शुभः । पती इति । दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी ।
पिबतम् । सोम्यम् । मधु ॥ ११ ॥

हे vशुभस्पती शुभः शोभनस्यालंकारस्योदकस्य वा पती स्वामिनौ हे अश्विनौ ॥ 'सुब्रामन्त्रिते०' इति षष्ठ्यन्तस्य पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्याष्टमिकं सर्वानुदात्तत्वम् ॥

---

१. त–शुभस्पतीति ।

vदस्रा दर्शनीयौ शत्रूणामुपक्षपयितारौ वा vहिरण्यवर्तनी हिरण्मयमार्गौ। यद्वा। वर्ततेऽस्मिन्निति वर्तनी रथः। हिरण्मयो रथो ययोस्तौ। यद्वा। वर्तनि वर्तनमाचरणम्। हितरमणीयाचरणौ। vवृधाना[1] प्रवृद्धौ। वृधेर्लिटः कानच्। ईदृशौ युवां vसोम्यं सोममयं vमधु माधुर्योपेतं मदकरं वा रसं vपिबतम्॥

अस्मभ्यं वाजिनीवसू मघवद्भ्यश्च सप्रथः। छर्दिर्यन्तमदाभ्यम्॥ १२॥

अस्मभ्यम्। वाजिनीवसू इति वाजिनीऽवसू। मघवत्ऽभ्यः। च। सऽप्रथः। छर्दिः। यन्तम्। अदाभ्यम्॥ १२॥

हे vवाजिनीवसू। वाजिनी हविर्युक्ता यागक्रिया। तस्यां वसु धनं हविर्भागलक्षणं ययोस्तथाविधौ हे अश्विनौ vअस्मभ्यं स्तोतृभ्यः vमघवद्भ्यः। मघं धनं हविर्लक्षणम्। तद्वद्भ्यो यजमानेभ्यः vच vसप्रथः सर्वतः पृथु विस्तीर्णम् vअदाभ्यं केनाप्यहिंस्यं vछर्दिः। गृहनामैतत्। गृहं vयन्तं नियच्छतं दत्तमिति यावत्॥ यमेश्छान्दसः शपो लुक्। 'छन्दस्युभयथा' इत्यार्धधातुकत्वेन ङित्त्वाभावादनुनासिकलोपाभावः॥

नि षु ब्रह्म जनानां याविष्टं तूयमा गतम्। मो ष्वन्याँ उपारतम्॥ १३॥

नि। सु। ब्रह्म। जनानाम्। या। अविष्टम्। तूयम्। आ। गतम्। मो इति। सु। अन्यान्। उप। अरतम्॥ १३॥

हे अश्विनौ vया यौ युवां vजनानां प्राणिनां मध्ये vब्रह्म ब्राह्मणजातिं vसु सुष्ठु vनि नितराम् vअविष्टम् अरक्षिष्टम्। यद्वा। जनानां यजमानानां ब्रह्म परिवृढं स्तोत्रं हविर्लक्षणमन्नं वा यौ युवां न्यविष्टं न्यगच्छतम्। अवतिर्गत्यर्थः। तौ युवां vतूयं क्षिप्रम् vआ vगतम् अस्मानप्यागच्छतम्। vअन्यान् अस्मद्व्यतिरिक्तान् यजमानान् vमो मैव vसु vउपारतम् उपगमतम्। कदाचिदपि मैव प्राप्नुतमित्यर्थः॥ अर्तेर्माङि लुङि 'सर्तिशास्त्यर्तिभ्यश्च' इति च्लेरङादेशः॥

आपराह्णिके प्रवर्ग्ये धर्मस्य हविषः 'अस्य पिबतम्' इति द्वितीया याज्या। सूत्रितं च—'अस्य पिबतमश्विनेति चाप्रेषितो होता' (आश्व. श्रौ. ४. ७) इति॥

अस्य पिबतमश्विना युवं मदस्य चारुणः। मध्वो रातस्य धिष्ण्या॥ १४॥

अस्य। पिबतम्। अश्विना। युवम्। मदस्य। चारुणः। मध्वः। रातस्य। धिष्ण्या॥ १४॥

हे vअश्विना अश्विनौ हे vधिष्ण्या। धिषणा स्तुतिः। तदर्हौ vयुवं युवां vमदस्य मदकरस्य vचारुणः शोभनस्य vरातस्य अस्माभिर्दत्तस्य vअस्य vमध्वः मधुरस्य सोमस्य स्वांशलक्षणं भागं vपिबतम्। यद्वा। द्वितीयार्थे षष्ठी। इमं सोमं पिबतम्॥

अस्मे आ वहतं रयिं शतवन्तं सहस्रिणम्। पुरुक्षुं विश्वधायसम्॥ १५॥

अस्मे इति। आ। वहतम्। रयिम्। शतऽवन्तम्। सहस्रिणम्। पुरुऽक्षुम्। विश्वऽधायसम्॥ १५॥

हे अश्विनौ vअस्मे अस्मभ्यं vरयिं धनं vआ vवहतम् आनयतम्। कथंभूतम्। vशतवन्तं शतसंख्योपेतं vसहस्रिणं सहस्रसंख्योपेतं च vपुरुक्षुं बहुनिवासं यद्वा पुरुभिर्बहुभिः स्तुत्यं vविश्वधायसं विश्वेषां सर्वेषामस्मदीयानां धारकम्। 'वहिहाधाभ्यश्छन्दसि' इति धातेरसुन्। 'णित्' इत्यनुवृत्तेर्णिद्वद्भावेन युगागमः॥ ॥ ३॥

---

१. ज्ञ-त३—वावृधाना।

पुरुत्रा चिद्धि वां नरा विह्वयन्ते मनीषिणः । वाघद्भिरश्विना गतम् ॥१६॥

पुरुऽत्रा । चित् । हि । वाम् । नरा । विऽह्वयन्ते । मनीषिणः ।
वाघत्ऽभिः । अश्विना । आ । गतम् ॥ १६ ॥

हे ᵛनरा नरौ स्तोतृणां धनस्य नेतारावश्विनौ ᵛमनीषिणः मनस ईशितारः स्तोतारः ᵛवां युवां ᵛपुरुत्रा ᵛचिद्धि बहुषु हि देशेषु ᵛविह्वयन्ते विविधमाह्वयन्ति। तथा सति हे अश्विनौ ᵛवाघद्भिः वाहकैरृत्विग्भिः ᵛआ ᵛगतम् अस्मानेवागच्छतम् ॥

जनासो वृक्तबर्हिषो हविष्मन्तो अरंकृतः । युवां हवन्ते अश्विना ॥१७॥

जनासः । वृक्तऽबर्हिषः । हविष्मन्तः । अरम्ऽकृतः । युवाम् । हवन्ते । अश्विना ॥ १७ ॥

ᵛवृक्तबर्हिषः । वृक्तं छिन्नं बर्हिर्यैस्ते तथोक्ताः । ᵛहविष्मन्तः हविर्भिर्युक्ताः ᵛअरंकृतः पर्याप्तकारिणः यद्वा हविरादीनामलंकर्तारः ᵛजनासः ऋत्विग्लक्षणा जना हे ᵛअश्विना अश्विनौ ᵛयुवां ᵛहवन्ते आह्वयन्ति । अत आगच्छतमिति शेषः ॥

अस्माकमद्य वामयं स्तोमो वाहिष्ठो अन्तमः । युवाभ्यां भूत्वश्विना ॥१८॥

अस्माकम् । अद्य । वाम् । अयम् । स्तोमः । वाहिष्ठः । अन्तमः । युवाभ्याम् । भुतु । अश्विना ॥१८॥

ᵛअद्य इदानीम् ᵛअस्माकम् ᵛअयं ᵛस्तोमः अस्मदीयं स्तोत्रं हे अश्विनौ ᵛवां युवयोः ᵛवाहिष्ठः वाहयितृतमः प्रापयितृतमः सन् ᵛयुवाभ्याम्[1] ᵛअन्तमः अन्तिकतमः अतिशयेन समीपवर्ती ᵛभूतु भवतु। 'तमे तादेश्च' (पा. सू. ६. ४. १४९. ९) इत्यन्तिकशब्दस्य तादिर्लुप्यते। भवतेश्छान्दसः शपो लुक् ॥

यो ह वां मधुनो दृतिराहितो रथचर्षणे । ततः पिबतमश्विना ॥ १९ ॥

यः । ह । वाम् । मधुनः । दृतिः । आऽहितः । रथऽचर्षणे । ततः । पिबतम् । अश्विना ॥१९॥

हे ᵛअश्विना अश्विनौ ᵛरथचर्षणे रथस्य चर्षणे द्रष्टव्ये मध्ये देशे ᵛयः ᵛदृतिः ᵛमधुनः मधुरस्यास्माभिर्दत्तस्य सोमस्य संबन्धी तेन मधुना पूर्णः ᵛआहितः स्थापितो वर्तते ᵛततः दृतेः सकाशात् सोमं ᵛपिबतम् ॥

तेन नो वाजिनीवसू पश्वे तोकाय शं गवे । वहतं पीवरीरिषः ॥ २० ॥

तेन । नः । वाजिनीवसू इति वाजिनीऽवसू । पश्वे । तोकाय । शम् । गवे ।
वहतम् । पीवरीः । इषः ॥ २० ॥

हे ᵛवाजिनीवसू । वाजोऽन्नं बलं वा । तद्युक्तधनौ ᵛनः अस्माकं ᵛपश्वे पशवे अश्वादिलक्षणाय ॥ 'जसादिषु छन्दसि वावचनम्' इति 'घेर्ङिति' इति गुणस्य विकल्पितत्वाद्यण् ॥ ᵛतोकाय पुत्राय ᵛगवे च । जात्यभिप्रायं सर्वत्रैकवचनम्। पशुप्रभृतिभ्यः ᵛशं सुखं यथा भवति तथा ᵛपीवरीः प्रवृद्धान् ᵛइषः अन्नानि ᵛतेन भवदीयेन रथेन ᵛवहतम् आवहतं प्रापयतम्। दत्तमित्यर्थः ॥ ॥ ४ ॥

उत नो दिव्या इष उत सिन्धूरहर्विदा । अप द्वारेव वर्षथः ॥ २१ ॥

---

१. ख-भ–युवाभ्यां युवयोः ।

उत । नः । दिव्याः । इषः । उत । सिन्धून् । अहःऽविदा । अप । द्वारांऽइव । वर्षथः ॥२१

vउत अपि च हे vअहर्विदा अह्नो लम्भयितारौ । यद्वा । अह्नि प्रभातसमये वेदितव्यौ स्तोतव्यावश्विनौ । vदिव्याः दिविभवाः vइषः इष्यमाणा अपः vनः अस्मदर्थं vद्वारेव द्वारेणेव छिद्रेणेव vअप vवर्षथः मेघादपकृष्य युवां सिञ्चथः । vउत अपि च vसिन्धून् स्यन्दनशीला नदीः वृष्टैस्तैरुदकैः अस्माकं स्नानपानादिकार्याय कृतवन्तावित्यर्थः ॥

कदा वां तौग्र्यो विधत्समुद्रे जहितो नरा । यद्वां रथो विभिष्पतात् ॥२२॥

कदा । वाम् । तौग्र्यः । विधत् । समुद्रे । जहितः । नरा । यत् । वाम् । रथः । विऽभिः । पतात् ॥२२

हे vनरा नरौ नेतारावश्विनौ vतौग्र्यः तुग्रपुत्रो भुज्युः vसमुद्रे जलधौ vजहितः असुरैः प्रक्षिप्तः सन् vकदा कस्मिन् काले vवां युवां vविधत् अविधत् स्तुतिभिः पर्यचरत् । vयत्[1] यदा[1] vवां युवयोः vविभिः गन्तृभिरश्वैरुपेतः vरथः vपतात् तं भुज्युमानेतुं पतेत् गच्छेत् तदानीं भुज्युरस्तौदिति पूर्वेणार्धेन पृष्टस्य प्रतिवचनम् ॥

युवं कण्वाय नासत्यापिरिप्ताय हर्म्ये । शश्वदूतीर्दशस्यथः ॥ २३ ॥

युवम् । कण्वाय । नासत्या । अपिऽरिप्ताय । हर्म्ये । शश्वत् । ऊतीः । दशस्यथः ॥ २३ ॥

हे vनासत्या । सत्सु साधू सत्यौ । न सत्यावसत्यौ । न असत्यौ नासत्यौ । ' नभ्राण्नपात् ' इति नञः प्रकृतिभावः । यद्वा । सत्यस्य नेतारौ नासिकाप्रभवौ वा । उक्तं च भगवता यास्केन— ' सत्यावेव नासत्यावित्यौर्णवाभः । सत्यस्य प्रणेतारावित्याग्रायणः । नासिकाप्रभवौ बभूवतुरिति[2] वा ' (निरु. ६.१३) इति । तौ युवां vकण्वाय एतत्संज्ञायर्षये vहर्म्ये हर्म्यतले vअपिरिप्ताय असुरैर्बाधिताय vशश्वत् शश्वतीः बह्वीः vऊतीः रक्षाः vदशस्यथः दत्तवन्तौ । ' युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तम् ' (ऋ. सं. १. ११८. ७) इत्यत्रेतिहास उक्तः । सोऽत्र द्रष्टव्यः ॥

ताभिरा यातमूतिभिर्नव्यसीभिः सुशस्तिभिः । यद्वां वृषण्वसू हुवे ॥ २४ ॥

ताभिः । आ । यातम् । ऊतिऽभिः । नव्यसीभिः । सुशस्तिऽभिः ।
यत् । वाम् । वृषण्वसू इति वृषण्ऽवसू । हुवे ॥ २४ ॥

हे vवृषण्वसू वर्षणधनौ । ' वृषण्वस्वश्वयोरुपसंख्यानम् ' (पा. सू. १. ४. १८. ४) इति वृषण्भावो निपात्यते । तदानीं vताभिः पूर्वोक्ताभिः vनव्यसीभिः नवतराभिः vसुशस्तिभिः सुप्रशस्याभिः vऊतिभिः रक्षाभिः सार्धम् vआ vयातम् आगच्छतम् । vयत् यदा vवां vहुवे स्तुतिभिराह्वयामि ॥

यथा चित्कण्वमावतं प्रियमेधमुपस्तुतम् । अत्रिं शिञ्जारमश्विना ॥ २५ ॥

यथा । चित् । कण्वम् । आवतम् । प्रियऽमेधम् । उपऽस्तुतम् । अत्रिम् । शिञ्जारम् । अश्विना ॥२५

हे vअश्विना अश्विनौ vयथा vचित् येन खलु प्रकारेण vकण्वम् एतत्संज्ञमृषिम् vआवतम् अरक्षतं vप्रियमेधं प्रिययज्ञमेतत्संज्ञं च vउपस्तुतम् एतदाख्यं च vशिञ्जारं शब्दयन्तं स्तुवन्तम् vअत्रिम् एतानृषींश्च येन प्रकारेणारक्षतं तथास्मानपि रक्षतमिति शेषः । यद्वा । ' एतावद्वां वृषण्वसू ' इत्यनयैकवाक्यता ॥ ॥ ५ ॥

---

१. ख-ञ-त-न-भ-श–' यद्यदा ' नास्ति । २. ञ-त-न-श–' बभूवतुरिति ' नास्ति ।

यथोत कृत्व्ये धनेंऽशुं गोष्वगस्त्यम् । यथा वाजेषु सोभरिम् ॥ २६ ॥

यथा । उत । कृत्व्ये । धने । अंशुम् । गोषु । अगस्त्यम् । यथा । वाजेषु । सोभरिम् ॥ २६ ॥

vउत अपि च vयथा येन प्रकारेण vधने vकृत्व्ये कर्तव्ये प्राप्तव्ये सति vअंशुम् एतत्संज्ञं स्तोतारमावतमरक्षतम् । vगोषु च लब्धव्यासु vयथा vअगस्त्यम् ऋषिमरक्षतम् । vवाजेषु अन्नेषु लब्धव्येषु यथा येन प्रकारेण vसोभरिम् एतत्संज्ञमृषिं चारक्षतम् । अत्रापि पूर्ववद्वाक्यशेष उत्तरयैकवाक्यता वा ॥

एतावद्वां वृषण्वसू अतो वा भूयो अश्विना । गृणन्तः सुम्नमीमहे ॥ २७ ॥

एतावत् । वाम् । वृषण्वसू इति वृषण्ऽवसू । अतः । वा । भूयः । अश्विना । गृणन्तः । सुम्नम् । ईमहे ॥ २७ ॥

हे vवृषण्वसू वर्षणधनौ vअश्विना अश्विनौ vगृणन्तः स्तुवन्तो वयम् vएतावत् 'यथा चित् कण्वम्' इत्यादिना यावदनुक्रान्तमेतत्परिमाणं vसुम्नं सुखम् vअतो vवा अस्माद्वा vभूयः बहुतरमधिकं सुम्नं vवां युवाम् vईमहे याचामहे ॥

रथं हिरण्यवन्धुरं हिरण्याभीशुमाश्विना । आ हि स्थाथो दिविस्पृशम् ॥२८॥

थम् । हिरण्यऽवन्धुरम् । हिरण्यऽअभीशुम् । अश्विना । आ । हि । स्थाथः । दिविऽस्पृशम् ॥२८॥

हे vअश्विना अश्विनौ vहिरण्यवन्धुरम् । सारथिस्थानं वन्धुरम् । हिरण्मयसारथिस्थानं vहिरण्याभीशुं हिरण्मयप्रग्रहं vदिविस्पृशम् अत्युन्नतत्वादिवं स्पृशन्तम् । स्पृशेः क्विन् । दिव्शब्दाद्द्वितीयार्थे सप्तमी । 'हृद्युभ्यां ङेरुपसंख्यानम्' इत्यलुक् । ईदृशं vरथम् vआ vहि vस्थाथः युवामातिष्ठथ एव । हिरवधारणे । अस्मदीयां स्तुतिं श्रोतुं शीघ्रं रथमास्थायागतमिति भावः । 'ष्ठा गतिनिवृत्तौ' । लटि छान्दसः शपो लुक् ॥

हिरण्ययी वां रभिरीषा अक्षो हिरण्ययः । उभा चक्रा हिरण्ययी ॥२९॥

हिरण्ययी । वाम् । रभिः । ईषा । अक्षः । हिरण्ययः । उभा । चक्रा । हिरण्ययी ॥ २९ ॥

हे अश्विनौ vवां युवयोः vरभिः आरम्भणीयालम्भनभूता रथस्य vईषा vहिरण्ययी हिरण्मयी हिरण्यविकारा । vअक्षः च vहिरण्ययः हिरण्मयो हिरण्यनिर्मितः । 'ईषा अक्षादिषु च्छन्दसि' (पा. सू. ६. १. १२७. २) इति प्रकृतिभावः । अपि च vउभा उभे द्वे अपि vचक्रा चक्रे रथचरणे vहिरण्यया हिरण्मये सुवर्णनिर्मिते । 'सुपां सुलुक्' इति द्विवचनस्याकारः । 'ऋत्व्यवास्त्व्यवास्त्व' इत्यादिना हिरण्यशब्दान्मयटो मलोपो निपात्यते ॥

तेन नो वाजिनीवसू परावर्तश्चिदा गतम् । उपेमां सुष्टुतिं मम ॥ ३० ॥

तेन । नः । वाजिनीवसू इति वाजिनीऽवसू । पराऽवर्तः । चित् । आ । गतम् । उप । इमाम् । सुऽस्तुतिम् । मम ॥ ३० ॥

हे vवाजिनीवसू अन्नवद्धनावश्विनौ य उक्तो हिरण्मयसर्वावयवो रथः vतेन रथेन vनः अस्मान् vपरावतश्चित् दूरदेशादपि vआ vगतम् आगच्छतम् । गमेश्छान्दसः शपो लुक् । 'अनुदात्तोपदेश' इत्यनुनासिकलोपः । इदानीमृषिरेकवदाह । vमम मदीयाम् vइमाम् इदानीं क्रियमाणां vसुष्टुतिं शोभनां स्तुतिं चोपगच्छतम् ॥ ॥ ६ ॥

आ वहेथे पराकात्पूर्वीरश्नन्तावश्विना । इषो दासीरमर्त्या ॥ ३१ ॥

आ । वहेथे इति । पराकात् । पुर्वीः । अश्नन्तौ । अश्विना । इषः । दासीः । अमर्त्या ॥३

हे ᵛअमर्त्या अमरणौ ᵛअश्विना अश्विनौ ᵛदासीः । दासा उपक्षपयितारोऽसुराः । तत्संबन्धिः ᵛपूर्वीः पुरीः ᵛअश्नन्तौ भक्षयन्तौ भञ्जन्तौ युवाम् ᵛइषः अन्नानि ᵛपराकात् परागताद्दूरदेशात् ᵛ ᵛवहेथे अस्मान्प्रापयथः । यद्वा । अश्नन्तौ व्याप्नुवन्तौ । 'अशू व्याप्तौ' । अस्माद्व्यत्ययेन परस्मैपदं च । पूर्वीः बह्वीः ᵛदासीः दासस्योपक्षपयितुः शत्रोः संबन्धिनीः इषः अन्न शत्रुभ्योऽपहृत्य अस्मान् प्रापयथः ॥

आ नो द्युम्नैरा श्रवोभिरा राया यातमश्विना । पुरुश्चन्द्रा नासत्या ॥ ३२ ॥

आ । नः । द्युम्नैः । आ । श्रवःऽभिः । आ । राया । यातम् । अश्विना । पुरुऽचन्द्रा । नासत्या ॥३

हे ᵛपुरुश्चन्द्रा बहुहिरण्यौ यद्वा पुरूणां बहूनामाह्लादकौ ॥ 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे' इ सुट् । पादादित्वात् षाष्ठिकमामन्त्रिताद्युदात्तत्वम् ॥ हे ᵛनासत्या सत्यस्वभावौ सत्यस्य नेत नासिकाप्रभवौ वा ॥ 'आमन्त्रितं पूर्वमविद्यमानवत्' इति पूर्वस्यामन्त्रितस्याविद्यमानवद्भाव इदमपि आमन्त्रितमाद्युदात्तम्[1] । न च 'नामन्त्रिते समानाधिकरणे' इत्यविद्यमानवत्त्वनिषे पुरुश्चन्द्रेत्यस्य विशेषवचनत्वात् ॥ ईदृशौ हे ᵛअश्विना अश्विनौ ᵛद्युम्नैः द्योतमानैरन्नैर्दातव्यैः स ᵛनः अस्मान् ᵛआ ᵛयातम् आगच्छतम् । तथा ᵛश्रवोभिः श्रवणीयैर्यशोभिश्च अस्मानागच्छतः तथा ᵛराया धनेन चास्मानागच्छतम् ॥

एह वां प्रुषितप्सवो वयो वहन्तु पर्णिनः । अच्छा स्वध्वरं जनम् ॥ ३३ ॥

आ । इह । वाम् । प्रुषितऽप्सवः । वयः । वहन्तु । पर्णिनः । अच्छ । सुऽअध्वरम् । जनम् ॥३

हे अश्विनौ ᵛइह अस्मिन् यागे ᵛवां युवां ᵛप्रुषितप्सवः । प्रुषिः स्नेहनकर्मा । स्निग्धरू ᵛपर्णिनः पक्षोपेताः । यद्वा । लुप्तोपममेतत् । पक्षिण इव शीघ्रगामिनः ᵛवयः गन्तारोऽश ᵛस्वध्वरं शोभनयज्ञं यजमानलक्षणं ᵛजनम्[2] ᵛअच्छ अभिमुखम् ᵛआ ᵛवहन्तु आनयन्तु ॥

रथं वामनुगायसं य इषा वर्तते सह । न चक्रमभि बाधते ॥ ३४ ॥

रथम् । वाम् । अनुऽगायसम् । यः । इषा । वर्तते । सह । न । चक्रम् । अभि । बाधते ॥३

हे अश्विनौ ᵛयः रथोऽस्मभ्यं देयेनान्नेन[3] ᵛसह ᵛवर्तते ᵛवां युवयोः स्वभूतम् ᵛअनुगा स्तोतृभिरनुगातव्यं तं ᵛरथं ᵛचक्रं परसैन्यं ᵛन ᵛअभि ᵛबाधते नाभिहन्ति । यद्वा । चक्रं वी कर्मसाधनम् । 'घञर्थे कविधानम्' ' इति कः । 'कृत्यादीनां के' ' (का. ६. १. १२. १) इ द्विर्वचनम् । अस्मिन्[4] पक्षे अन्यः शत्रुरिति कर्तृपदमध्याहर्तव्यम् ॥

हिरण्ययेन रथेन द्रवत्पाणिभिरश्वैः । धीजवना नासत्या ॥ ३५ ॥

हिरण्ययेन । रथेन । द्रवत्पाणिऽभिः । अश्वैः । धीऽजवना । नासत्या ॥ ३५ ॥

हे ᵛधीजवना मनोवद्वेगवन्तौ[5] । आमन्त्रिताद्युदात्तत्वम् । हे ᵛनासत्या सत्यस्वभावौ सत्य नेतारौ वा । 'आमन्त्रितं पूर्वमविद्यमानवत्' इति पूर्वस्याविद्यमानत्वेन[6] पदादपरत्वादाद्युदा

---

१. ज्ञ-त-न-भ-श-°माद्युदात्तत्वं । २. ख-ज्ञ-त-न-भ-श-' जनं ' नास्ति । ३. घ-देयेन इषाने श-इषान्नेन । ४. ज्ञ-त-न-श-यस्मिन् । ५. ख-भ-धीवद्वेग° । ६. ज्ञ-त२-श-°विद्यमानवत्त्वेन ।

निघाताभावः । न च नामन्त्रितविद्यमानवत्त्वनिषेधो धीजवनेत्यस्य विशेषणत्वेन सामान्यवचनत्वाभावात् । व्यावर्तकं हि विशेषणम् । ईदृशौ युवां ᵛद्रवत्पाणिभिः शीघ्रगमनपादैः[1] ᵛअश्वैः युक्तेन ᵛहिरण्ययेन हिरण्मयेन स्वर्णमयेन ᵛरथेन आगतमिति शेषः । यद्वा । धीजवना नासत्या इत्येतदुद्वयमपि प्रथमान्तमेव नामन्त्रितम् । धियो जव इव जवो ययोस्तौ । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । ईदृशेन रथेन शीघ्रगमनौ नासत्यावश्विनौ आगच्छतमिति शेषः ॥ ॥ ७ ॥

युवं मृगं जागृवांसं स्वदथो वा वृषण्वसू । ता नः पृङ्क्तमिषा रयिम् ॥ ३६ ॥

युवम् । मृगम् । जागृऽवांसम् । स्वदथः । वा । वृषण्वसु इति वृषण्ऽवसू ।
ता । नः । पृङ्क्तम् । इषा । रयिम् ॥ ३६ ॥

वाशब्दः समुच्चये । अपि च हे ᵛवृषण्वसू वर्षणधनावश्विनौ ᵛयुवं युवां ᵛजागृवांसं जागरणशीलं स्वकार्ये मदजनने व्यग्रं ᵛमृगं मृग्यमन्वेषणीयं सोमं ᵛस्वदथः आस्वादयथः । यद्वा । जागृवांसं जाग्रतं मृगं मृगनामानमसुरं[2] स्वदथः स्वादयथः हिंस्थ इत्यर्थः । ᵛता तौ युवां ᵛनः अस्मदर्थम् ᵛइषा अन्नेन ᵛरयिं धनं ᵛपृङ्क्तं संपृङ्क्तं[3] कुरुतम् । ईदृशं धनमस्मभ्यं प्रयच्छतमित्यर्थः ॥

ता मे अश्विना सनीनां विद्यातं नवानाम् ।
यथा चिच्चैद्यः कशुः शतमुष्ट्रानां ददत्सहस्रा दश गोनाम् ॥ ३७ ॥

ता । मे । अश्विना । सनीनाम् । विद्यातम् । नवानाम् ।
यथा । चित् । चैद्यः । कशुः । शतम् । उष्ट्रानाम् । ददत् । सहस्रा । दश । गोनाम् ॥ ३७ ॥

हे ᵛअश्विना अश्विनौ ᵛता तादृशौ युवां ᵛनवानाम् अभिनवानां श्रेष्ठानां ᵛसनीनां संभजनीयानां धनानाम् । कर्मणि षष्ठी । ईदृशानि धनानि ᵛमे मह्यं दापयितुं ᵛविद्यातं जानीतम् । ᵛयथा ᵛचित् येन खलु प्रकारेण ᵛचैद्यः चेदिपुत्रः ᵛकशुः एतत्संज्ञो राजा ᵛउष्ट्रानां ᵛशतं तथा ᵛगोनां गवां ᵛदश ᵛसहस्रा दशसंख्यानि सहस्राणि ᵛददत् दद्यात् तथा विद्यातमिति पूर्वत्रान्वयः ॥

यो मे हिरण्यसंदृशो दश राज्ञो अमंहत ।
अधस्पदा इच्चैद्यस्य कृष्टयश्चर्मम्ना अभितो जनाः ॥ ३८ ॥

यः । मे । हिरण्यऽसंदृशः । दश । राज्ञः । अमंहत ।
अधः ऽपदाः । इत् । चैद्यस्य । कृष्टयः । चर्मऽम्नाः । अभितः । जनाः ॥ ३८ ॥

ᵛयः कशुसंज्ञो राजा ᵛमे मह्यं ᵛहिरण्यसंदृशः हिरण्यसंदर्शनान् हिरण्यसमानतेजस्कान् ᵛदश ᵛराज्ञः ᵛअमंहत परिचरणार्थं दत्तवान् । दशसंख्याकान् राज्ञो युद्धे पराजितान् गृहीत्वा दासत्वेनास्मै दत्तवानित्यर्थः । नन्वीदृशानां बहुविधानां राज्ञां दान एकः कथं शक्नुयादिति तत्राह । ᵛकृष्टयः सर्वाः प्रजास्तस्य ᵛचैद्यस्य चेदिपुत्रस्य कशोः ᵛअधस्पदा ᵛइत् पादयोरधस्तादेव वर्तन्ते । न कश्चिदपि तत्समानस्तदधिको वा विद्यते । ᵛअभितः सर्वतो वर्तमानाः ᵛजनाः ᵛचर्मम्नाः चर्मणि चरणसाधनान्यश्वादीनि वाहनानि । तेषु मनन्त्यभ्यस्यन्तीति चर्मम्नाः । ' म्ना अभ्यासे ' । ' आतो मनिन् ' इति विच् । सर्वे मनुष्यास्तस्य भटा इत्यर्थः ॥

---

१. ख-ज्ञ-त१-२-४-भ-श–°गमनपादैः । २. ख-भ–मृगयमानं तम°; ज्ञ-त३-श–मृगयनामानम°; न–मृगयमामानानम° । ३. ख-ज्ञ-त३-भ-श–संपृक्तं; घ-ज्ञ-त१-२-४-न–' संपृङ्क्तं ' नास्ति ।

माकिरेना पथा गाद्येनेमे यन्ति चेदयः ।
अन्यो नेत्सूरिरोहते भूरिदावत्तरो जनः ॥ ३९ ॥

माकिः । एना । पथा । गात् । येन । इमे । यन्ति । चेदयः ।
अन्यः । न । इत् । सूरिः । ओहते । भूरिदावत्ऽतरः । जनः ॥ ३९ ॥

ᵛयेन मार्गेण ᵛइमे ᵛचेदयः अस्य राज्ञः पितृपितामहादयः ᵛयन्ति गच्छन्ति ᵛएना अनेन ᵛपथा मार्गेण ᵛमाकिः ᵛगात् अन्यो न गन्तुं शक्नोति । अपि च अस्माद्राज्ञः ᵛअन्यः ᵛभूरिदावत्तरः बहुदातृतमः ᵛसूरिः विद्वान् सन् ᵛजनः ᵛनेत् नैव ᵛओहते वहति स्तोतृभ्यो धनं प्रापयति । यद्वा । बहुदातृतमो यो जनः कश्चिन्नाम अस्मादन्यः । व्यत्ययेन प्रथमा । अन्यं ᵛसूरिः स्तोता नेदोहते नैव याचते । ओहिर्याच्ञाकर्मा । यथान्यं न याचते तथा बहु धनं प्रयच्छतीत्यर्थः ॥ ॥ ८ ॥ ॥ १ ॥

द्वितीयेऽनुवाके सप्त सूक्तानि । तत्र 'महाँ इन्द्रः' इत्यष्टाचत्वारिंशदृचं प्रथमं सूक्तं काण्वस्य[1] वत्सस्यार्षं गायत्रम् । अन्त्यतृचवर्जमैन्द्रम् । तस्मिन्[2] परशुनाम्नो राज्ञः पुत्रस्य तिरिन्दिरस्य दानं स्तूयते । अतः स तृचस्तद्देवताकः । तथा चानुक्रान्तं—'महाँ इन्द्रोऽष्टाचत्वारिंशद्वत्सस्तृचोऽन्त्यस्तिरिन्दिरस्य पारशव्यस्य दानस्तुतिः' इति । महाव्रते गायत्रतृचाशीतौ अन्त्यतृचवर्जमिदं सूक्तम् । तथैव पञ्चमारण्यके सूत्र्यते—'महाँ इन्द्रो य ओजसेति तिस्र उत्तमा उद्धरति' (ऐ. आ. ५. २. ३) इति । प्रातःसवने सोमातिरेके 'महान्' इत्यादिकाः स्तोमातिशंसनार्थाः । सूत्रितं च—'महाँ इन्द्रो य ओजसातो देवा अवन्तु न इत्यैन्द्रीभिर्वैष्णवीभिश्च स्तोममतिशस्य' (आश्व. श्रौ. ६. ७) इति । तृतीये पर्याये होतुः शस्त्रे 'महाँ इन्द्रः' इति तृचोऽनुरूपः । सूत्रितं च—'महाँ इन्द्रो य ओजसा समस्य मन्यवे विश इति' (आश्व. श्रौ. ६. ४) इति । अप्तोर्यामे ब्रह्मणोऽतिरिक्तोक्थे अयमेव तृचोऽनुरूपः । सूत्र्यते हि—'महाँ इन्द्रो य ओजसा नूनमश्विना' (आश्व. श्रौ. ९. ११) इति । दर्शयागे महेन्द्रयाजिनः सांनाय्यस्य 'महान्' इत्येषानुवाक्या । सूत्र्यते हि—'महाँ इन्द्रो य ओजसा भुवस्त्वमिन्द्र ब्रह्मणा महान्' (आश्व. श्रौ. १. ६) इति ॥

महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँइव । स्तोमैर्वत्सस्य वावृधे ॥ १ ॥

महान् । इन्द्रः । यः । ओजसा । पर्जन्यः । वृष्टिमान्ऽइव । स्तोमैः । वत्सस्य । ववृधे ॥ १ ॥

ᵛयः ᵛइन्द्रः ᵛओजसा बलेन ᵛमहान् सर्वेभ्योऽधिकः । क इव । ᵛवृष्टिमानिव[3] । यथा[4] वृष्ट्या युक्तः ᵛपर्जन्यः रसानां प्रार्जयिता देवो महान् स इवेत्यर्थः । स इन्द्रः ᵛवत्सस्य[5] पुत्रस्थानीयस्य स्तोतुर्वत्सनाम्न एवर्षेः स्तोत्रैः ᵛववृधे प्रवर्धते ॥

प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः । विप्रा ऋतस्य वाहसा ॥ २ ॥

प्रऽजाम् । ऋतस्य । पिप्रतः । प्र । यत् । भरन्त । वह्नयः । विप्राः । ऋतस्य । वाहसा ॥ २ ॥

ᵛऋतस्य यज्ञस्य सत्यस्य वा ᵛप्रजां प्रकर्षेण जातमिन्द्रं ᵛपिप्रतः नभसः प्रदेशान् पूरयन्तः ᵛवह्नयः वाहका अश्वाः ᵛयत् यदा ᵛप्र ᵛभरन्त प्रकर्षेण भरन्ति वहन्ति तदा ᵛविप्राः मेधाविनः[6] ᵛऋतस्य यज्ञस्य ᵛवाहसा प्रापकेण स्तोत्रेण तमिन्द्रं स्तुवन्तीति शेषः ॥

---

१. ख-न-भ-श-कण्वस्य । २. ख-न-भ-तस्य । ३. भ-वृष्टिमान् पर्जन्य इव । ४. झ-यथा वृष्टिमान् । ५. त१-वत्सस्य पुत्रस्य । ६. श-मेधाविनः स्तोतारः ।

कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् । जामि ब्रुवत आयुधम् ॥ ३ ॥

कण्वाः । इन्द्रम् । यत् । अक्रत । स्तोमैः । यज्ञस्य । साधनम् । जामि । ब्रुवते । आयुधम् ॥३॥

vकण्वाः । स्तोतृनामैतत् । स्तोतारः कण्वगोत्रा वा vइन्द्रं vस्तोमैः स्तोत्रैः vयज्ञस्य यागस्य vसाधनं साधयितारं निष्पादकं vयत् यदा vअक्रत अकृषत । करोतेर्लुङि 'मन्त्रे घस०' इति च्लेर्लुक् । तदानीम् vआयुधं शत्रूणां हिंसकं बाणादिकं vजामि । अतिरेकनामैतत् । अतिरिक्तमहितं प्रयोजनरहितं vब्रुवते कथयन्ति । आयुधसाध्यस्य सर्वकार्यस्येन्द्रेण कृतत्वादायुधं निष्प्रयोजनमित्यर्थः। यद्वा । आयुधमायोधनशीलमिन्द्रं जामिं जामिं भ्रातरं ब्रुवते वदन्ति । सर्वकार्येषु भ्रातृवद्वर्तत इत्यर्थः॥

तृतीये पर्याये होतुः शस्त्रे 'समस्य मन्यवे' इत्याद्या द्विचत्वारिंशदृचः । सूत्र्यते हि—'समस्य मन्यवे विश इति द्विचत्वारिंशद्विश्वजिते' (आश्व. श्रौ. ६. ४) इति ॥

समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः । समुद्रायेव सिन्धवः ॥ ४ ॥

सम् । अस्य । मन्यवे । विशः । विश्वाः । नमन्त । कृष्टयः । समुद्रायऽइव । सिन्धवः ॥ ४ ॥

vविशः विशन्त्यः vविश्वाः सर्वाः vकृष्टयः प्रजाः vअस्य इन्द्रस्य vमन्यवे क्रोधाय । यद्वा । मन्युः[1] मननसाधनं स्तोत्रम् । तदर्थं vसं vनमन्त सम्यक् स्वत एव नमन्ति । नमतेः कर्मकर्तरि छान्दसो लङ् । 'न दुहस्नुनमाम्०' इति यक्चिणोः प्रतिषेधः । प्रह्वीभवन्ति । तत्र दृष्टान्तः । vसमुद्रायेव यथा समुद्रमभिं प्रति vसिन्धवः स्यन्दनशीला नद्यः स्वयमेव नमन्ते तद्वत् ॥

ओजस्तदस्य तित्विष उभे यत्समवर्तयत् । इन्द्रश्चर्मेव रोदसी ॥ ५ ॥

ओजः । तत् । अस्य । तित्विषे । उभे इति । यत् । सम्ऽअवर्तयत् ।

इन्द्रः । चर्मऽइव । रोदसी इति ॥ ५ ॥

vअस्य इन्द्रस्य vतत् vओजः बलं vतित्विषे दिदीपे । 'त्विष दीप्तौ' । vयत् येन ओजसा अयम् vइन्द्रः vउभे vरोदसी द्यावापृथिव्यौ vचर्मेव vसमवर्तयत् सम्यग्वर्तयति । यथा कश्चित् किंचिच्चर्म कदाचिद्विस्तारयति कदाचित् संकोचयति एवं तदधीने अभूतामित्यर्थः ॥ ॥ ९ ॥

वि चिद्वृत्रस्य दोधतो वज्रेण शतपर्वणा । शिरो बिभेद वृष्णिना ॥ ६ ॥

वि । चित् । वृत्रस्य । दोधतः । वज्रेण । शतऽपर्वणा । शिरः । बिभेद । वृष्णिना ॥ ६ ॥

चिच्छब्दोऽप्यर्थे । स च भिन्नक्रमः । vवृत्रस्य vचित् आवरकस्यापि vदोधतः अत्यर्थं जगत्कम्पयतोऽसुरस्य vशिरः मूर्धानं vशतपर्वणा शतसंख्याकपर्वाणि धारा यस्य तादृशेन vवृष्णिना वीर्यवता vवज्रेण इन्द्रः vवि vबिभेद विचिच्छेद ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने प्रशास्तुः शस्त्रे 'इमा अभि' इति तृचो वैकल्पिकोऽनुरूपः । सूत्रितं च—'इमा अभि प्र णोनुम इत्यथ ब्राह्मणाच्छंसिनः' (आश्व. श्रौ. ७. ८) इति ॥

इमा अभि प्र णोनुमो विपामग्रेषु धीतयः । अग्नेः शोचिर्न दिद्युतः ॥७॥

इमाः । अभि । प्र । नोनुमः । विपाम् । अग्रेषु । धीतयः । अग्नेः । शोचिः । न । दिद्युतः ॥७॥

१. ज्ञ-त१-२-४-मन्यु ।

vविपां स्तोतॄणाम् vअग्रेषु पुरस्तात् vइमाः अस्मदीयाः vधीतयः धियः स्तोत्राणि vअभि vप्र vणोनुमः आभिमुख्येन पुनःपुनः प्रवदामः । 'णु शब्दे' । कीदृशीः स्तुतीः । vअग्नेः vशोचिर्न दीप्तिरिव vदिद्युतः दीप्यमाना वेदरूपाः ॥

गुहा सतीरुप त्मना प्र यच्छोचन्त धीतयः । कण्वा ऋतस्य धारया ॥८॥

गुहा । सतीः । उप । त्मना । प्र । यत् । शोचन्त । धीतयः । कण्वाः । ऋतस्य । धारया ॥८॥

vगुहा गुहायां vसतीः सत्यो भवन्त्यः vयत् याः vधीतयः स्तुतयः कर्माणि वा vत्मना आत्मना स्वेनेन्द्रेणोपगम्यमानाः vप्र vशोचन्त प्रादीप्यन्त । यद्वा । आत्मना स्वत एवेन्द्रमुपगच्छन्त्यः प्रदीप्यन्ते । ताः स्तुतीः vकण्वाः कण्वगोत्रा ऋषयः vऋतस्य उदकस्य सोमात्मकस्य vधारया सहिताः कुर्वन्तीति शेषः ॥

प्र तमिन्द्र नशीमहि रयिं गोमन्तमश्विनम् । प्र ब्रह्म पूर्वचित्तये ॥ ९ ॥

प्र । तम् । इन्द्र । नशीमहि । रयिम् । गोऽमन्तम् । अश्विनम् । प्र । ब्रह्म । पूर्वऽचित्तये ॥९॥

हे vइन्द्र vगोमन्तं गोभिर्युक्तम् vअश्विनम् अश्वैरुपेतं vतं प्रसिद्धं vरयिं त्वदीयं धनं vप्र vनशीमहि प्राप्नुयाम । तथा vब्रह्म परिवृढमन्नं च vपूर्वचित्तये अन्येभ्यः पूर्वमेव ज्ञानाय प्राप्नवाम[1] ॥

अहमिद्धि पितुष्परि मेधामृतस्य जग्रभ । अहं सूर्य इवाजनि ॥ १० ॥

अहम् । इत् । हि । पितुः । परि । मेधाम् । ऋतस्य । जग्रभ । अहम् । सूर्यः ऽइव । अजनि ॥१०॥

vपितुः पालकस्य vऋतस्य सत्यस्य अवितथस्येन्द्रस्य vमेधाम् अनुग्रहास्मिकां बुद्धिम् vअहमित् अहमेव vपरि vजग्रभ परिगृहीतवानस्मि नान्ये । vहि यस्मादेवं तस्मात् vअहं vसूर्यइवाजनि सूर्यो यथा प्रकाशमानः सन् प्रादुर्भवति तथाजनिषं प्रादुरभूवम् ॥ ॥ १० ॥

अहं प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत् । येनेन्द्रः शुष्ममिद्दधे ॥११॥

अहम् । प्रत्नेन । मन्मना । गिरः । शुम्भामि । कण्वऽवत् ।
येन । इन्द्रः । शुष्मम् । इत् । दधे ॥ ११ ॥

vकण्ववत् मम जनकः कण्व इव vअहं vप्रत्नेन नित्येन वेदरूपेण vमन्मना मननसाधनेनेन्द्रविषयेण स्तोत्रेण vगिरः वाचः vशुम्भामि अलंकरोमि । यदा हीन्द्रविषये प्रयुज्यन्ते तदानीं यथार्थत्वाद्वाचोऽलंकृता भवन्ति । vयेन खलु स्तोत्रेण vइन्द्रः vशुष्मं शत्रूणां शोषकं बलं vदधे vइत् धत्त एव धारयत्येव । यस्स्तोत्रमिन्द्रे ईदृशं बलमवश्यं जनयति तेन मन्मनेत्यर्थः ॥

ये त्वामिन्द्र न तुष्टुवुर्ऋषयो ये च तुष्टुवुः । ममेद्वर्धस्व सुष्टुतः ॥१२॥

ये । त्वाम् । इन्द्र । न । तुस्तुवुः । ऋषयः । ये । च । तुस्तुवुः ।
मम । इत् । वर्धस्व । सुऽस्तुतः ॥ १२ ॥

हे vइन्द्र vये जनाः vत्वां vन vतुष्टुवुः न स्तुवन्ति vये vच vऋषयः मन्त्राणां द्रष्टारो जनाः vतुष्टुवुः त्वां स्तुवन्ति उभयेषां मध्ये vममेत् ममैव स्तोत्रेण vसुष्टुतः शोभनं स्तुतः सन् vवर्धस्व वृद्धो भव ॥

---

१. ज्ञ-त२-य–प्राप्नुयाम ।

यदस्य मन्युरध्वनीद्वि वृत्रं पर्वशो रुजन् । अपः समुद्रमैरयत् ॥ १३ ॥

यत् । अस्य । मन्युः । अध्वनीत् । वि । वृत्रम् । पर्वऽशः । रुजन् । अपः । समुद्रम् । ऐरयत् ॥ १३ ॥

[v]अस्य[1] इन्द्रस्य [v]मन्युः क्रोधः [v]वृत्रम् आवृत्य तिष्ठन्तमसुरं मेघं वा [v]पर्वशः पर्वणि पर्वणि परुषि परुषि [v]वि [v]रुजन् विभञ्जन् [v]यत् यदा [v]अध्वनीत् स्तनयित्नुलक्षणं शब्दमकरोत् तदानीं [v]समुद्रं समुन्दनीयमुदधिं प्रति [v]अपः वृष्टयुदकानि [v]ऐरयत् स इन्द्रः प्रेरितवान् ॥

नि शुष्णं इन्द्र धर्णसिं वज्रं जघन्थ दस्यवि । वृषा ह्युग्र शृण्विषे ॥ १४ ॥

नि । शुष्णं । इन्द्र । धर्णसिम् । वज्रम् । जघन्थ । दस्यवि । वृषा । हि । उग्र । शृण्विषे ॥ १४ ॥

हे [v]इन्द्र [v]शुष्णे शोषक एतत्संज्ञे [v]दस्यवि उपक्षपयितर्यसुरे [v]धर्णसिं धारयितव्यं [v]वज्रं कुलिशं त्वं [v]नि [v]जघन्थ निहतवानसि[2] । वज्रेण तमसुरं न्यवधीरित्यर्थः । हे [v]उग्र उद्गूर्णबलेन्द्र [v]वृषा कामानां वर्षितेति [v]हि [v]शृण्विषे श्रूयसे । अतोऽस्मदपेक्षितं धनं देहीति शेषः ॥

न द्याव इन्द्रमोजसा नान्तरिक्षाणि वज्रिणम् । न विव्यचन्त भूमयः ॥ १५ ॥

न । द्यावः । इन्द्रम् । ओजसा । न । अन्तरिक्षाणि । वज्रिणम् । न । विव्यचन्त । भूमयः ॥ १५ ॥

[v]द्यावः द्युलोका इमम् [v]इन्द्रम् [v]ओजसा बलेन [v]न [v]विव्यचन्त न व्याप्नुवन्ति । द्युलोकेभ्योऽप्यस्य बलमधिकमित्यर्थः । तथा [v]अन्तरिक्षाणि अन्तरा क्षान्तानि द्यावापृथिव्योर्मध्ये वर्तमाना लोकाः [v]वज्रिणं वज्रवन्तमिन्द्रं [v]न व्याप्नुवन्ति । तथा [v]भूमयः भूलोकाश्च तमिन्द्रं [v]न व्याप्नुवन्ति । ' त्रयो वा इमे त्रिवृतो लोकाः ' (ऐ. आ. १. १. २) इति ब्राह्मणादेकैकस्य लोकस्य त्रित्वम् । ' तिस्रो भूमीः ' (ऋ. सं. २. २७. ८) इत्यादिनिगमाच्च ॥ ॥ ११ ॥

यस्ते इन्द्र महीरपः स्तभूयमान आशयत् । नि तं पद्यासु शिश्नथः ॥ १६ ॥

यः । ते । इन्द्र । महीः । अपः । स्तभ्नुऽयमानः । आ । अशयत् । नि । तम् । पद्यासु । शिश्नथः ॥ १६ ॥

हे [v]इन्द्र [v]ते तव संबन्धिनीः [v]महीः महतीः [v]अपः आन्तरिक्ष्याण्युदकानि [v]यः वृत्रः [v]स्तभूयमानः स्तम्भयन् यथाधो न पतन्ति तथा कुर्वन् [v]आशयत् आवृत्याशेत [v]तम् असुरं [v]पद्यासु गमनशीलास्वप्सु मध्ये [v]नि [v]शिश्नथः न्यहिंसीः । श्नथिर्हिंसार्थः । वज्रेण तमसुरं हत्वा नदीषु पातितवानित्यर्थः ॥

य इमे रोदसी मही समीची समजग्रभीत् । तमोभिरिन्द्र तं गुहः ॥ १७ ॥

यः । इमे इति । रोदसी इति । मही इति । समीची इति सम्ऽईची । सम्ऽअजग्रभीत् ।

तमःऽभिः । इन्द्र । तम् । गुहः ॥ १७ ॥

[v]यः वृत्रः [v]मही महत्यौ विस्तीर्णे [v]समीची संगते [v]इमे प्रत्यक्षत उपलभ्यमाने [v]रोदसी द्यावापृथिव्यौ [v]समजग्रभीत् सम्यगग्रहीत् । आवृणोदित्यर्थः । [v]तम् असुरं हे [v]इन्द्र त्वं [v]तमोभिः अन्धकारैः [v]गुहः संवृतमकरोः । अनाद्यनन्तं मरणलक्षणं तमः प्रावेशय इत्यर्थः ॥

य इन्द्र यतयस्त्वा भृगवो ये च तुष्टुवुः । ममेदुग्र श्रुधी हवम् ॥ १८ ॥

---

१. ख-ञ-त-न-भ-श–यस्य । २. ख-भ–नितरां हतवानसि; त४–निवांनसि; न-श–निहितवानसि ।

ये । इन्द्र । यतयः । त्वा । भृगवः । ये । च । तुस्तुवुः ।
मर्म । इत् । उग्र । श्रुधि । हवम् ॥ १८ ॥

हे ᵛइन्द्र ᵛये ᵛयतयः नियता अङ्गिरसस्त्वां ᵛतुष्टुवुः ᵛये ᵛच ᵛभृगवः भृगुगोत्रास्त्वां[1] तुष्टुवुः स्तुवन्ति तेषु मध्ये ᵛममेत् ममैव ᵛहवं स्तोत्रं हे ᵛउग्र ओजस्विन्निन्द्र ᵛश्रुधि शृणु ॥

इमास्ते इन्द्र पृश्नयो घृतं दुहत आशिरम् । एनामृतस्य पिप्युषीः ॥ १९ ॥

इमाः । ते । इन्द्र । पृश्नयः । घृतम् । दुहते । आऽशिरम् । एनाम् । ऋतस्य । पिप्युषीः ॥१९॥

हे ᵛइन्द्र ᵛते त्वदीयाः ᵛइमाः ᵛपृश्नयः प्राष्टवर्णाः[2] गावः ᵛघृतं क्षरणशीलम् ᵛएनाम्[3] ᵛआशिरम् आश्रयणद्रव्यं पयः ᵛदुहते दुहन्ति क्षारयन्ति । कीदृश्यः पृश्नयः । ᵛऋतस्य सत्यस्यावितथस्येन्द्रस्य यज्ञस्य वा ᵛपिप्युषीः वर्धयित्र्यः ॥

या इन्द्र प्रस्वस्त्वासा गर्भमचक्रिरन् । परि धर्मेव सूर्यम् ॥ २० ॥

याः । इन्द्र । प्रऽस्वः । त्वा । आसा । गर्भम् । अचक्रिरन् । परि । धर्मऽइव । सूर्यम् ॥२०॥

हे ᵛइन्द्र ᵛप्रस्वः । प्रसुवते गर्भं विमुञ्चन्तीति प्रस्वः । सूतेः 'सत्सद्विष०' इति क्विप् । ईदृश्यः ᵛयाः गावः ᵛआसा आस्येन ᵛत्वा त्वदीयं वीर्यं वृत्रवधानन्तरमोषध्यादिरूपेण परिणतं भक्षयित्वा ᵛगर्भमचक्रिरन् अकुर्वन् त्वदीयं वीर्यमन्तरधारयन् । तत्र दृष्टान्तः । ᵛसूर्यं परितः सूर्यमण्डलस्योपरि ᵛधर्मेव धारकं पोषकमुदकं यथा रश्मयो गर्भरूपेण बिभ्रति तद्वत् । यद्वा । परि धर्मेव परितो धारयितारं सूर्यमिव । यथा सूर्यः परितः सर्वं जगद्भक्ते तद्वत् । कृत्स्नस्य जगतो धारकमिन्द्रस्य वीर्यमित्यर्थः । ओषध्यादिरूपेण परिणतस्येन्द्रवीर्यस्य गोभिरात्मनि धारणम् 'इन्द्रस्य वृत्रं जघ्नुषः' इत्यारभ्य तैत्तिरीयके विस्पष्टमाम्नातं—'तत्पशव ओषधीभ्योऽध्यात्मन्त्समनयन् तत्प्रत्यदुहन्' (तै. सं. २. ५. ३. ३) इति । पयोरूपेण परिणतं तद्वीर्यमिमा गाव आशिरार्थं दुहत इति पूर्वस्यामृच्यन्वयः ॥ ॥ १२ ॥

वाजपेयेऽतिरिक्तोक्थे 'त्वामिच्छवसस्पते' इत्येषा । सूत्रितं च—'त्वामिच्छवसस्पते तं प्रत्नथा' (आश्व. श्रौ. ९. ९) इति ॥

त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः । त्वां सुतास इन्दवः ॥ २१ ॥

त्वाम् । इत् । शवसः । पते । कण्वाः । उक्थेन । ववृधुः । त्वाम् । सुतासः । इन्दवः ॥ २१ ॥

हे ᵛशवसस्पते बलस्य स्वामिन्निन्द्र ᵛत्वाम्[4] एव[5] ᵛकण्वाः स्तोतारः कण्वगोत्रा वा ऋषयः ᵛउक्थेन शस्त्रेण ᵛववृधुः वर्धयन्ति । ᵛसुतासः अध्वर्युभिरभिषुताः ᵛइन्दवः सोमाश्च ᵛत्वाम् एव वर्धयन्ति ॥

तवेदिन्द्र प्रणीतिषूत प्रशस्तिरद्रिवः । यज्ञो वितन्तसाय्यः ॥ २२ ॥

तव । इत् । इन्द्र । प्रऽनीतिषु । उत । प्रऽशस्तिः । अद्रिऽवः । यज्ञः । वितन्तसाय्यः ॥२२॥

ᵛउत अपि च हे ᵛअद्रिवः । आदृणात्यनेनेत्यद्रिर्वज्रः । तद्वन् ᵛइन्द्र ᵛतवेत् तवैव ᵛप्रणीतिषु प्रकृष्टेषु नयनेषु धनप्रदानेषु सत्सु ᵛप्रशस्तिः प्रकृष्टा स्तुतिः क्रियते । तथा ᵛवितन्तसाय्यः विस्तृत-

---

१. ज्ञ-त१-२-४—भृगुगोत्रास्त्वा त्वां; श—भृगुगोत्रोत्पन्नास्त्वां । २. श—पृश्निवर्णाः । ३. ज्ञ-त४-श—एनं । ४. घ-श—त्वामित्त्वामेव ।

तमः । तनोतेश्छान्दसमेतद्रूपम् । यद्वा । तन्तसिः कण्ड्वादिर्वृद्ध्यर्थः । तस्मादौणादिक आय्यप्रत्ययः । प्रवृद्धो ᵛयज्ञः च तवैव क्रियते ॥

आ नं इन्द्र महीमिषं पुरं न दर्षि गोमतीम् । उत प्रजां सुवीर्यम् ॥ २३ ॥

आ । नः । इन्द्र । महीम् । इषम् । पुरम् । न । दर्षि । गोऽमतीम् । उत । प्रऽजाम् । सुऽवीर्यम् ॥२३॥

हे ᵛइन्द्र ᵛनः अस्मभ्यम् अस्मदर्थं ᵛमहीं महतीं ᵛगोमतीं गोभिर्युक्ताम् ᵛइषम् अन्नम् ᵛआ ᵛदर्षि आदृियस्व दातुं कामयस्व । न शब्दश्चार्थे । ᵛपुरं ᵛन । पालनं पूः । पालनं रक्षणं चास्मभ्यं कर्तुमादृियस्व ॥

उत त्यदाश्वश्व्यं यदिन्द्र नाहुषीष्वा । अग्ने विक्षु प्रदीदयत् ॥ २४ ॥

उत । त्यत् । आशुऽअश्व्यम् । यत् । इन्द्र । नाहुषीषु । आ । अग्ने । विक्षु । प्रऽदीदयत् ॥२४॥

हे ᵛइन्द्र ᵛनाहुषीषु । नहुषा इति मनुष्यनाम । तत्संबन्धिनीषु । यद्वा । नाहुषो नाम कश्चिद्राजा । तदीयासु ᵛविक्षु प्रजासु ᵛअग्ने पुरस्तात् ᵛयत् ᵛआश्वश्व्यं शीघ्रगाम्यश्वसंघात्मकं बलं ᵛप्रदीदयत् प्रादीप्यत ᵛउत अपि च ᵛत्यत् तदपि अस्मभ्यं देहीति शेषः । आकारः पूरकः ॥

अभि व्रजं न तत्निषे सूर उपाकचक्षसम् । यदिन्द्र मृळयासि नः ॥ २५ ॥

अभि । व्रजम् । न । तत्निषे । सूरः । उपाकऽचक्षसम् । यत् । इन्द्र । मृळयासि । नः ॥२५॥

न संप्रत्यर्थे । ᵛन संप्रतीदानीं हे इन्द्र ᵛसूरः प्राज्ञस्त्वं ᵛव्रजं गोष्ठम् ᵛउपाकचक्षसम् । उपाक इत्यन्तिकनाम । अन्तिके द्रष्टव्यम् ᵛअभि ᵛतत्निषे अभितनोषि अभिविस्तारयसि । गोभिः पूर्णं करोषीत्यर्थः । तनोतेश्छान्दसे लिटि 'तनिपत्योश्छन्दसि' इत्युपधालोपः । ᵛयत् यदा हे ᵛइन्द्र त्वं ᵛनः अस्मान् ᵛमृळयासि मृळयसि सुखयसि ॥ ॥ १३ ॥

यदङ्ग तविषीयस इन्द्रं प्रराजसि क्षितीः । महाँ अपार ओजसा ॥ २६ ॥

यत् । अङ्ग । तविषीऽयसे । इन्द्र । प्रऽराजसि । क्षितीः । महान् । अपारः । ओजसा ॥२६॥

ᵛअङ्ग इत्यभिमुखीकरणे । हे ᵛइन्द्र ᵛयत् यस्त्वं ᵛतविषीयसे । तविषीति बलनाम । बलमिवाचरसि । हस्त्यश्वरथादिकं बलं यथा सर्वं शत्रुजातं भनक्ति[1] तद्वत्त्वमसहाय एव सन् सर्वमेव शत्रुजातं मारयसीत्यर्थः । यश्च त्वं ᵛक्षितीः । मनुष्यनामैतत् । मनुष्यान् ᵛप्रराजसि प्रकर्षेणेशिषे । राजतिरैश्वर्यकर्मा । अस्यापि यद्वृत्तयोगान्न निघातः । स इन्द्रः ᵛओजसा बलेन ᵛमहान् सर्वेभ्योऽधिकः अत एव ᵛअपारः पाररहितः । केनाप्यवसानं प्रापयितुमशक्य इत्यर्थः ॥

तं त्वा हविष्मतीर्विश उप ब्रुवत ऊतये । उरुञ्जयसमिन्दुभिः ॥ २७ ॥

तम् । त्वा । हविष्मतीः । विशः । उप । ब्रुवते । ऊतये । उरुऽञ्जयसम् । इन्दुऽभिः ॥२७॥

हे इन्द्र[2] ᵛतं पूर्वोक्तगुणम् ᵛउरुञ्जयसं विस्तीर्णंज्यापिनं त्वां ᵛहविष्मतीः हविर्भिश्चरुपुरोडाशादिभिर्युक्ताः ᵛविशः प्रजाः ᵛउप ᵛब्रुवते उपेत्य स्तुवन्ति । किमर्थम् । ᵛइन्दुभिः सोमैः ᵛऊतये तर्पणाय[3] । यद्वा । इन्दुभिः सोमैः उरुञ्जयसं विस्तीर्णंजवमूतये रक्षणाय स्तुवन्ति ॥

---

१. ख-भ-भिनत्ति । २. ख-भ-इंद्र त्वं । ३. श-रक्षणाय ।

उपह्वरे गिरीणां संगथे च नदीनाम् । धिया विप्रो अजायत ॥ २८ ॥

उपऽह्वरे । गिरीणाम् । सम्ऽगथे । च । नदीनाम् । धिया । विप्रः । अजायत ॥ २८ ॥

[v]गिरीणां पर्वतानाम् [v]उपह्वरे उपह्वर्तव्ये प्रान्ते [v]नदीनां सरितां [v]संगथे संगमने [v]च ईदृग्विधे देशे क्रियमाणया [v]धिया यागक्रियया स्तुत्या वा [v]विप्रः[1] मेधावीन्द्रः [v]अजायत प्रादुर्भवति। अतो वयमपि तादृशे देशे यजामः स्तुमो वेति भावः। गिरीणामित्यत्र 'नामन्यतरस्याम्' इति नाम उदात्तत्वम् ॥

अतः समुद्रमुद्वतश्चिकित्वाँ अव पश्यति । यतो विपान एजति ॥ २९ ॥

अतः । समुद्रम् । उत्ऽवतः । चिकित्वान् । अव । पश्यति । यतः । विपानः । एजति ॥ २९ ॥

[v]यतः यस्मिन् द्युलोके[2] [v]विपानः व्याप्नुवन् विशिष्टपानयुक्तो वा इन्द्रः [v]एजति चेष्टते [v]उद्वतः उद्वतात्। 'उपसर्गाच्छन्दसि धात्वर्थे' (पा. सू. ५. १. ११८) इति वतिः। [v]अतः अस्मात् द्युलोकात् [v]चिकित्वान् जानन् स इन्द्रः [v]समुद्रं समुन्दनशीलं यजमानैर्दीयमानं सोमम् [v]अव [v]पश्यति अवाङ्मुखः सन्नीक्षते। यद्वा। सूर्यात्मनेन्द्रः स्तूयते। यस्मिन्नभसि विपानः व्याप्नुवन् सूर्यात्मेन्द्र एजति वर्तते चिकित्वाञ्जानन् विद्वान्वा स इन्द्र उद्वत उद्वतादतोऽस्मादन्तरिक्षात् समुद्रम्। उपलक्षणमेतत्। समुद्रोपलक्षितं सर्वं जगदव पश्यति। अवाङ्मुखं प्रसृतैः किरणैः प्रकाशयति ॥

आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरम् । परो यदिध्यते दिवा ॥ ३० ॥

आत् । इत् । प्रत्नस्य । रेतसः । ज्योतिः । पश्यन्ति । वासरम् । परः । यत् । इध्यते । दिवा ॥ ३० ॥

[v]परः [v]दिवा दिवः परस्तात् द्युलोकस्योपरि [v]यत् यदा अयमिन्द्रः सूर्यात्मना [v]इध्यते दीप्यते [v]आदित् अनन्तरमेव [v]प्रत्नस्य चिरंतनस्य [v]रेतसः गन्तुः ॥ 'री गतिरेषणयोः'। अस्मात् 'खुरीभ्यां तुट् च' (उ. सू. ४. ६४१) इत्यसुन् तुडागमश्च ॥ यद्वा। रेत इत्युदकनाम। रेतस्विन उदकवतः। सामर्थ्यात् मत्वर्थो लक्ष्यते। ईदृशस्येन्द्रस्य सूर्यात्मनः [v]वासरं निवासकं वासरस्य निवासस्य हेतुभूतं वा [v]ज्योतिः द्योतमानं तेजः [v]पश्यन्ति सर्वे जनाः। यद्वा। वासरमिति अत्यन्तसंयोगे द्वितीया। कृत्स्नमहरुदयप्रभृत्यास्तमनं यावज्ज्योतिष्पश्यन्तीत्यर्थः। 'इसुसोः सामर्थ्ये' इति विसर्जनीयस्य षत्वम् ॥ ॥ १४ ॥

कण्वास इन्द्र ते मतिं विश्वे वर्धन्ति पौंस्यम् । उतो शविष्ठ वृष्ण्यम् ॥ ३१ ॥

कण्वासः । इन्द्र । ते । मतिम् । विश्वे । वर्धन्ति । पौंस्यम् । उतो इति । शविष्ठ । वृष्ण्यम् ॥ ३१ ॥

हे [v]इन्द्र [v]ते त्वदीयां [v]मतिं बुद्धिं [v]पौंस्यम्। बलनामैतत्। बलं च [v]विश्वे सर्वे [v]कण्वासः कण्वाः स्तोतारः कण्वगोत्रा वा ऋषयः [v]वर्धन्ति वर्धयन्ति। 'छन्दस्युभयथा' इति शप आर्धधातुकत्वात् 'णेरनिटि' इति णिलोपः। [v]उतो अपि च हे [v]शविष्ठ शवस्वितम बलवत्तम। 'विन्मतोर्लुक्'। 'टेः' इति टिलोपः। ईदृशेन्द्र [v]वृष्ण्यं त्वदीयं वीर्यं बलकर्म[3] च कण्वासो वर्धयन्त्येव[4] ॥

इमां मे इन्द्र सुष्टुतिं जुषस्व प्र सु मामव । उत प्र वर्धया मतिम् ॥ ३२ ॥

इमाम् । मे । इन्द्र । सुऽस्तुतिम् । जुषस्व । प्र । सु । माम् । अव । उत । प्र । वर्धय । मतिम् ॥ ३२ ॥

---

१. श–एवंविधो विप्रः। २. ख-भ–लोके। ३. ख-ञ-श–बलं कर्म। ४. ञ-त१-२-४–वर्धयंतीत्येव।

हे vइन्द्र vइमां पुरोवर्तिनीं vमे मदीयां vसुष्टुतिं शोभनां स्तुतिं vजुषस्व सेवस्व। सेवित्वा च स्तोतारं vमां vसु शोभनं vप्र vअव प्रकर्षेण रक्ष। vउत अपि च vमतिं अस्मदीयां बुद्धिं vप्र vवर्धय प्रवृद्धां कुरु। यथा बह्वर्थदर्शिनी भवति तथा कुर्वित्यर्थः॥

उत ब्रह्मण्या वयं तुभ्यं प्रवृद्ध वज्रिवः। विप्रा अतक्ष्म जीवसे ॥ ३३ ॥

उत। ब्रह्मण्या। वयम्। तुभ्यम्। प्रऽवृद्ध। वज्रिऽवः। विप्राः। अतक्ष्म। जीवसे॥ ३३ ॥

vउत अपि च हे vप्रवृद्ध स्तुतिभिः प्रकृष्टां वृद्धिं प्राप्त हे vवज्रिवः वज्रवन्निन्द्र। एको मत्वर्थीयोऽनुवादः। यद्वा। वज्रोऽस्यास्तीति वज्री हस्तः। तद्वान्। 'छन्दसीरः' इति मतुपो वत्वम्। 'मतुवसो रुः०' इति मकारस्य रुत्वम्। ईदृशेन्द्र vतुभ्यं त्वदर्थं vविप्राः मेधाविनः vवयं vब्रह्मण्या ब्रह्माणि स्तोत्राणि हविर्लक्षणान्यन्नानि वा। 'सुपां सुलुक्०' इति सुपो याजादेशः। vजीवसे जीवनार्थम् vअतक्ष्म अकार्ष्म। 'तक्षू त्वक्षू तनूकरणे'। लङि छान्दसः शपो लुक्॥

अभि कण्वा अनूषतापो न प्रवता यतीः। इन्द्रं वनन्वती मतिः ॥ ३४ ॥

अभि। कण्वाः। अनूषत। आपः। न। प्रऽवता। यतीः। इन्द्रम्। वनन्ऽवती। मतिः॥३४॥

vकण्वाः कण्वगोत्रा ऋषयः vअभि vअनूषत इन्द्रमभिष्टुवन्ति। 'नू स्तुतौ'। कुटादिः। vप्रवता प्रवणेन मार्गेण vयतीः गच्छन्त्यः vआपो vन आप इव vमतिः मननीया कण्वैः क्रियमाणा स्तुतिः स्तुत्यम् vइन्द्रं vवनन्वती स्वयमेव संभजनवती भवति॥

इन्द्रमुक्थानि वावृधुः समुद्रमिव सिन्धवः। अनुत्तमन्युमजरम् ॥ ३५ ॥

इन्द्रम्। उक्थानि। ववृधुः। समुद्रम्ऽइव। सिन्धवः। अनुत्तऽमन्युम्। अजरम्॥ ३५ ॥

vउक्थानि शस्त्राण्यस्माभिः शस्यमानानि vइन्द्रं[1] vवावृधुः वर्धयन्ति। vसिन्धवः स्यन्दनशीला नद्यः vसमुद्रमिव समुद्रं जलधिं यथा वर्धयन्ति तद्वत्। कीदृशमिन्द्रम्। vअनुत्तमन्युम्। अनुत्तोऽप्रेरितः परैरनभिभूतो मन्युः क्रोधो यस्य तादृशम्। 'नुदविदोन्दत्रा०' (पा. सू. ८. २. ५६) इत्यादिना विकल्पितत्वान्निष्ठानत्वाभावः। vअजरं जरारहितम्। बहुव्रीहौ 'नञो जरमरमित्रमृताः' इत्युत्तरपदाद्युदात्तत्वम्॥ ॥ १५ ॥

आ नो याहि परावतो हरिभ्यां हर्यताभ्याम्। इममिन्द्र सुतं पिब ॥३६॥

आ। नः। याहि। पराऽवतः। हरिऽभ्याम्। हर्यताभ्याम्। इमम्। इन्द्र। सुतम्। पिब॥३६॥

हे vइन्द्र vपरावतः परागताद्दूरे वर्तमानात् द्युलोकात् vहर्यताभ्यां कान्ताभ्यां vहरिभ्याम् अश्वाभ्यां vनः अस्मान् vआ vयाहि आगच्छ। आगत्य च vइमम् अस्मदीयं vसुतम् अभिषुतं सोमं vपिब॥

त्वामिद्वृत्रहन्तम जनासो वृक्तबर्हिषः। हवन्ते वाजसातये ॥ ३७ ॥

त्वाम्। इत्। वृत्रहन्ऽतम। जनासः। वृक्तऽबर्हिषः। हवन्ते। वाजऽसातये॥ ३७ ॥

हे vवृत्रहन्तम अतिशयेन वृत्राणामावृण्वतां शत्रूणां हन्तः vत्वामित् त्वामेव vवृक्तबर्हिषः वृक्तं यागार्थं छिन्नं बर्हिर्येषां तथाविधोक्ताः प्रवृत्तयज्ञाः vजनासः जना ऋत्विग्लक्षणाः vह्वयन्ते आह्वयन्ति। ह्वेञः शपि 'बहुलं छन्दसि' इति संप्रसारणम्। किमर्थम्। vवाजसातये वाजस्य

---

१. ख-ञ-त-न-भ-श–'इन्द्रं' नास्ति।

अन्नस्य बलस्य वा सातये लाभाय। यद्वा। संग्रामनामैतत्। वाजस्य सातिर्यस्मिन् संग्रामे तत्र साहाय्याय त्वामाह्वयन्तीत्यर्थः ॥

अनु त्वा रोदसी उभे चक्रं न वर्त्येतशम्। अनु सुवानास इन्दवः ॥ ३८ ॥

अनु। त्वा। रोदसी इति। उभे इति। चक्रम्। न। वर्ति। एतशम्।
अनु। सुवानासः। इन्दवः ॥ ३८ ॥

हे इन्द्र ᵛत्वा त्वाम् ᵛउभे ᵛरोदसी द्यावापृथिव्यौ अनुवर्तेते। त्वदधीने भवत इत्यर्थः। तत्र दृष्टान्तः। ᵛचक्रं ᵛन यथा रथचक्रम् ᵛएतशम्। अश्वनामैतत्। पुरो गच्छन्तमश्वम् ᵛअनु ᵛवर्ति अनुवर्तते तद्वत्। अपि च ᵛसुवानासः ऋत्विग्भिरभिषूयमाणाः ᵛइन्दवः सोमाश्च त्वाम् ᵛअनु वर्तन्ते ॥

मन्दस्वा सु स्वर्णर उतेन्द्र शर्यणावति। मत्स्वा विवस्वतो मती ॥३९॥

मन्दस्व। सु। स्वः ऽनरे। उत। इन्द्र। शर्यणाऽवति। मत्स्व। विवस्वतः। मती ॥ ३९ ॥

ᵛउत अपि च हे ᵛइन्द्र ᵛशर्यणावति। शर्यणा नाम कुरुक्षेत्रवर्तिनो देशाः। तेषामदूरभवं सरः शर्यणावत्। 'मध्वादिभ्यश्च' इति स्वार्थिको मतुप्। 'मतौ बह्वचः०' इति दीर्घः। 'संज्ञायाम्' इति वत्वम्। तस्मिन् सरसि विद्यमाने[1] ᵛस्वर्णरे सर्वैर्ऋत्विग्भिर्नेतव्ये यज्ञे ᵛसु सुष्ठु ᵛमन्दस्व माद्य तृप्तो भव। अपि च ᵛविवस्वतः परिचरणवतो यजमानस्य ᵛमती मत्या च ᵛमत्स्व मदं प्राप्नुहि। मतिशब्दात्तृतीयायाः 'सुपां सुलुक्०' इति पूर्वसवर्णदीर्घः ॥

वावृधान उप द्यवि वृषा वज्र्यरोरवीत्। वृत्रहा सोमपातमः ॥ ४० ॥

ववृधानः। उप। द्यवि। वृषा। वज्री। अरोरवीत्। वृत्रऽहा। सोमऽपातमः ॥ ४० ॥

ᵛवावृधानः वृद्धः[2] ᵛवज्री वज्रवानत एव ᵛवृत्रहा वृत्रस्य मेघस्यासुरस्य वा हन्ता ᵛसोमपातमः अतिशयेन सोमस्य पाता इन्द्रः ᵛवृषा उदकानां वर्षिता ᵛद्यवि द्युलोकेऽन्तरिक्षे ᵛउप समीपे यथास्माभिः श्रूयते तथा ᵛअरोरवीत् भृशं स्तनयित्नुलक्षणं शब्दमकरोत्। मेघेन वज्रहतेनेदृशं शब्दमचीकरदित्यर्थः ॥ ॥ १६ ॥

ऋषिर्हि पूर्वजा अस्येक ईशान ओजसा। इन्द्र चोष्कूयसे वसु ॥ ४१ ॥

ऋषिः। हि। पूर्वऽजाः। असि। एकः। ईशानः। ओजसा। इन्द्र। चोष्कूयसे। वसु ॥४१॥

हे ᵛइन्द्र ᵛपूर्वजाः सर्वेभ्यो देवेभ्यः पूर्वं जात उत्पन्नः। यद्वा। यज्ञेषु प्रथममेव प्रादुर्भूतः। त्वम् ᵛऋषिर्हि द्रष्टा सर्वज्ञः खलु ᵛअसि भवसि। अपि च सर्वेषु देवेषु मध्ये ᵛएकः मुख्यः ᵛओजसा बलेन ᵛईशानः ईश्वरो भवसि। यद्वा। एकोऽसहाय एव सन्नोजसा आत्मीयेनैव बलेन ईशानः सर्वस्य जगत ईश्वरो भवसि। स त्वं ᵛवसु धनं ᵛचोष्कूयसे पुनःपुनः स्तोतृभ्यो ददासि। 'स्कुञ् आप्रवणे' इह दानार्थः। तथा चोक्तं—'चोष्कूयमाण इन्द्र भूरि वामं ददिन्द्र बहु वननीयम्' (निरु. ६. २२) इति ॥

अस्माकं त्वा सुताँ उप वीतपृष्ठा अभि प्रयः। शतं वहन्तु हरयः ॥४२॥

अस्माकम्। त्वा। सुतान्। उप। वीतऽपृष्ठाः। अभि। प्रयः। शतम्। वहन्तु। हरयः ॥४२॥

---

१. ख-ङ्ग-त-न-भ-श—विद्यमानेन। २. ख-भ—वर्धमानः।

हे इन्द्र vअस्माकम् अस्मदीयान्[1] सोमानुपलक्ष्य vप्रयः। अन्ननामैतत्। धानाकरम्भादि-हविर्लक्षणमन्नं चाभिलक्ष्य vवीतपृष्ठाः प्रशस्तोपरिभागाः vशतं शतसंख्याकाः vहरयः अश्वाः त्वां vवहन्तु प्रापयन्तु ॥

इमां सु पूर्व्यां धियं मधोर्घृतस्य पिप्युषीम् । कण्वा उक्थेन वावृधुः ॥४३॥

इमाम्। सु। पूर्व्याम्। धियम्। मधोः। घृतस्य। पिप्युषीम्। कण्वाः। उक्थेन। ववृधुः ॥४३॥

vइमाम् इदानीं क्रियमाणां vसु सुष्ठु vपूर्व्यां पूर्वैः पित्रादिभिः कृतां vमधोः मधुरस्य vघृतस्य क्षरणशीलस्योदकस्य vपिप्युषीं वर्धयित्रीं यद्वा मधुरेण घृतेनाज्येन प्रवृद्धां vधियं यागक्रियां vकण्वाः कण्वगोत्रा ऋषयः vउक्थेन शस्त्रेण vवावृधुः इन्द्रार्थं वर्धयन्ति। उक्थैर्हि यागो वर्धते। अत्यग्निष्टोमादिषूत्तरासु संस्थासु शस्त्रवृद्धेर्दृष्टत्वात्। यद्वा। पूर्व्यां चिरंतनीमिमामिन्द्रस्य धियमनुग्रह-बुद्धिं क्षरणशीलेन मधुरेण सोमेन पिप्युषीं वर्धनीयामुक्थेन स्तोत्रेण वावृधुः वर्धयन्ति ॥

इन्द्रमिद्विमहीनां मेधे वृणीत मर्त्यः । इन्द्रं सनिष्युरूतये ॥ ४४ ॥

इन्द्रम्। इत्। विऽमहीनाम्। मेधे। वृणीत। मर्त्यः। इन्द्रम्। सनिष्युः। ऊतये ॥ ४४ ॥

vविमहीनां विशेषेण महतां देवानां मध्ये vइन्द्रमित् इन्द्रमेव vमेधे यज्ञे vमर्त्यः मनुष्यो होता vवृणीत स्तुतिभिः संभजते। तथा vसनिष्युः धनकामश्च स्तोता vऊतये रक्षणाय vइन्द्रम् एव वृणीते स्तुत्या संभजते ॥

अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी । सोमपेयाय वक्षतः ॥ ४५ ॥

अर्वाञ्चम्। त्वा। पुरुऽस्तुत। प्रियमेधऽस्तुता। हरी इति। सोमऽपेयाय। वक्षतः ॥ ४५ ॥

हे vपुरुष्टुत बहुभिः स्तुतेन्द्र vप्रियमेधस्तुता प्रियमेधैः प्रिययज्ञैर्ऋषिभिः स्तुतौ। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम्। 'सुपां सुलुक्०' इत्याकारः। ईदृशौ vहरी अश्वौ vसोमपेयाय सोमपानार्थं त्वाम् vअर्वाञ्चम् अस्मदभिमुखं vवक्षतः वहताम् ॥

शतमहं तिरिन्दिरे सहस्रं पर्शावा ददे । राधांसि याद्वानाम् ॥ ४६ ॥

शतम्। अहम्। तिरिन्दिरे। सहस्रम्। पर्शौ। आ। ददे। राधांसि। याद्वानाम् ॥ ४६ ॥

इदमादिकेन तृचेन तिरिन्दिरस्य राज्ञो दानं स्तूयते। vपर्शौ परशुनाम्नः पुत्रे। उपचाराज्जन्ये जनकशब्दः। vतिरिन्दिरे एतत्संज्ञे राजनि vयाद्वानाम्। यदुरिति मनुष्यनाम। यदव एव याद्वाः। स्वार्थिकस्तद्धितः। तेषां मध्ये vअहं vशतं शतसंख्याकानि vसहस्रं सहस्रसंख्याकानि च vराधांसि धनानि vआ vददे स्वीकरोमि। यद्वा। याद्वानां यदुकुलजानामन्येषां[2] राज्ञां स्वभूतानि राधांसि बलादपहृतानि तिरिन्दिरे वर्तमानान्यहं प्राप्नोमि ॥

त्रीणि शतान्यर्वतां सहस्रा दश गोनाम् । ददुष्पज्राय साम्ने ॥ ४७ ॥

त्रीणि। शतानि। अर्वताम्। सहस्रा। दश। गोनाम्। ददुः। पज्राय। साम्ने ॥ ४७ ॥

पूर्वस्यामृचि स्वसंप्रदानकं दानमुक्तम्। अधुनान्येभ्योऽप्यृषिभ्यस्तिरिन्दिरो बहु धनं दत्त-वानित्याह। vअर्वतां गन्तॄणामश्वानां vत्रीणि vशतानि vगोनां गवां vदश दशगुणितानि vसहस्रा

---

१. घ–अस्मदीयान् सुतानभिषुतान्। २. ज्ञ-त२-श–यदुकुलजातानाम°; भ–यदुकुलजाम°।

सहस्राणि च ᵛपत्राय स्तुतीनां प्रार्जकाय ᵛसाम्ने एतत्संज्ञायर्षये । यद्वा । साम्ने । साम स्तोत्रम् । तद्वते पत्राय पत्रकुलजाताय कक्षीवते । ᵛददुः तिरिन्दिराख्या राजानो दत्तवन्तः ॥

उदानट्ककुहो दिवमुष्ट्राञ्चतुर्युजो ददत् । श्रवसा याद्वं जनम् ॥ ४८ ॥

उत् । आनट् । ककुहः । दिवम् । उष्ट्रान् । चतुःऽयुजः । ददत् । श्रवसा । याद्वम् । जनम् ॥४८॥

अयं राजा ᵛककुहः उच्छ्रितः सन् ᵛश्रवसा कीर्त्या ᵛदिवं स्वर्गम् ᵛउदानट् उत्कृष्टतरं व्याप्नोत् । किं कुर्वन् । ᵛचतुर्युजः चतुर्भिः स्वर्णभारैर्युक्तान् ᵛउष्ट्रान् ᵛददत् प्रयच्छन् । तथा ᵛयाद्वं ᵛजनं च दासत्वेन प्रयच्छन् ॥ ॥ १७ ॥

'प्र यद्वः' इति षट्त्रिंशदृचं द्वितीयं सूक्तं कण्वगोत्रस्य पुनर्वत्सस्यार्षं मारुतं गायत्रम् । तथा चानुक्रान्तं—'प्र यद्वः षट्त्रिंशत्पुनर्वत्सो मारुतम्' इति । व्यूळ्हे दशरात्रे प्रथमे छन्दोम आग्निमारुतशस्त्र इदं सूक्तं मारुतनिविद्धानम् । सूत्रितं च—'प्र यद्वस्त्रिष्टुभं दूतं व इत्याग्निमारुतम्' (आश्व. श्रौ. ८. ९) इति ॥

प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत् । वि पर्वतेषु राजथ ॥ १ ॥

प्र । यत् । वः । त्रिऽस्तुभम् । इषम् । मरुतः । विप्रः । अक्षरत् । वि । पर्वतेषु । राजथ ॥१॥

हे ᵛमरुतः[1] मितराविणो[2] मितरोचिनो वा[3] एतत्संज्ञा माध्यमका देवगणाः । पादादित्वात् 'ᵒअपादादौ' इति पर्युदासादाष्टमिकनिघाताभावे षाष्ठिकमामन्त्रिताद्युदात्तत्वम् । ᵛवः युष्मभ्यं ᵛविप्रः मेधावी स्तोता ᵛत्रिष्टुभं त्रिषु सवनेषु प्रशस्यां त्रिभिर्दैवैः स्तुतां वा यद्वा त्रिष्टुप्छन्दसा संबद्धां माध्यंदिनसवनिकीम् ᵛइषं सोमलक्षणमन्नं ᵛयत् यदा ᵛप्र ᵛअक्षरत् प्रासिञ्चत् अग्नौ प्राक्षिपत् । यद्वा । त्रिष्टुभं त्रिष्टुप्छन्दस्कं स्तोत्रमिषं सोमं चेति योज्यम् । तदानीं यूयं ᵛपर्वतेषु पर्ववत्सु शिलोच्चयेषु ᵛवि ᵛराजथ । तेन सोमेन लब्धबलाः सन्तो विशेषेण दीप्ता भवथ ॥

यदङ्ग तविषीयवो यामं शुभ्रा अचिध्वम् । नि पर्वता अहासत ॥ २ ॥

यत् । अङ्ग । तविषीऽयवः । यामम् । शुभ्राः । अचिध्वम् । नि । पर्वताः । अहासत ॥ २ ॥

हे ᵛतविषीयवः । तविषीति बलनाम । तां कामयमानाः । यद्वा । बलयुक्ताः । हे ᵛशुभ्राः शोभमानाः ᵛअङ्ग हे मरुतः ᵛयामम् । याति गच्छतीति यामो रथः । तं ᵛयत् यदा ᵛअचिध्वं समचिनुध्वं अश्वादिभिः साधनैः संचितं संश्लिष्टं कुरुथ गमनार्थं तदानीं ᵛपर्वताः गिरयोऽपि ᵛनि ᵛअहासत नितरां गच्छन्ति युष्मद्रथवेगाद्भीताः सन्तः स्वस्थानात् प्रचलन्ति । 'ओहाङ् गतौ' । छान्दसो लुङ् ॥

उदीरयन्त वायुभिर्वाश्रासः पृश्निमातरः । धुक्षन्त पिप्युषीमिषम् ॥ ३ ॥

उत् । ईरयन्त । वायुऽभिः । वाश्रासः । पृश्निऽमातरः । धुक्षन्त । पिप्युषीम् । इषम् ॥ ३ ॥

ᵛवाश्रासः वाशनशीलाः शब्दकारिणः ᵛपृश्निमातरः । पृश्निर्माध्यमिका वाक् । सा माता जननी येषां ते तथोक्ताः । 'ऋतश्छन्दसि' (पा. सू. ५. ४. १५८) इति कपः प्रतिषेधः । ईदृशा मरुतः ᵛवायुभिः । वान्ति गच्छन्तीति वायवः पृषत्यः । पृषतीभिर्वाहनभूताभिः स्वावयवभूतैर्वायुभिरेव वा ᵛउदीरयन्त उद्गमयन्ति मेघादिकम् । तथा ᵛपिप्युषीं वर्धयित्रीम् ᵛइषम् अन्नं च स्तोतृभ्यः ᵛधुक्षन्त दुहन्ति ॥

---

१. ज्ञ-त१-२-मरुतो मरुतो । २. ज्ञ-त१-२-मितराविणो वा । ३. ज्ञ-वा महद्भ्रवंतीति वेति निरुक्तं; त१ (प्रान्ते)-वा महद्भ्रवंतीति वा ।

वर्पन्ति मरुतो मिहं प्र वेपयन्ति पर्वतान् । यद्यामं यान्ति वायुभिः ॥४॥

वर्पन्ति । मरुतः । मिहम् । प्र । वेपयन्ति । पर्वतान् । यत् । यामम् । यान्ति । वायुऽभिः ॥४॥

vमरुतः एतत्संज्ञा देवाः vमिहं वृष्टिं vवपन्ति विकिरन्ति विक्षिपन्ति । तथा vपर्वतान् गिरीन् vप्र vवेपयन्ति प्रकम्पयन्ति । अयमर्थः कदेति चेत् । vयत् यदा vवायुभिः सार्धं vयामं रथं गमनं वा vयान्ति प्राप्नुवन्ति तदानीमित्यर्थः ॥

नि यद्यामाय वो गिरिर्नि सिन्धवो विधर्मणे । महे शुष्माय येमिरे ॥५॥

नि । यत् । यामाय । वः । गिरिः । नि । सिन्धवः । विऽधर्मणे । महे । शुष्माय । येमिरे ॥५॥

हे मरुतः vवः युष्माकं vयामाय रथाय गमनाय वा vगिरिः । ' सुपां सुलुक्° ' इति जसः सुः । गिरयः पर्वताः vयत् यदा vनि vयेमिरे स्वयमेव नियम्यन्ते । तथा vसिन्धवः स्यन्दनशीलाः समुद्रा नद्यो वा vविधर्मणे विधरणाय vमहे महते vशुष्माय शोषकाय युष्मदीयाय बलाय vनि येमिरे स्वयमेव नियम्यन्ते । गिरयो नद्यश्च युष्मद्यामाद्बलाच्च भीत्या एकत्रैव स्थाने नियता वर्तन्त इत्यर्थः । तदानीं वपन्ति मरुतो मिहमिति शेषः ॥ यमेः कर्मकर्तरि लिट् । ' यद्वृत्तान्नित्यम् ' इति निघातप्रतिषेधः ॥ ॥ १८ ॥

युष्माँ उ नक्तमूतये युष्मान्दिवा हवामहे । युष्मान्प्रयत्यध्वरे ॥ ६ ॥

युष्मान् । ऊँ इति । नक्तम् । ऊतये । युष्मान् । दिवा । हवामहे ।

युष्मान् । प्रऽयति । अध्वरे ॥ ६ ॥

हे मरुतः vयुष्माँ vउ युष्मानेव vनक्तं रात्रौ vऊतये रक्षणार्थं vहवामहे । vदिवा अह्नि च vयुष्मान् एव आह्वयामहे । vअध्वरे । ध्वरो नास्त्यस्मिन्नित्यध्वरो यागः । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । यागे vप्रयति प्रगच्छति प्रवर्तमाने सति रक्षणार्थं vयुष्मान् एवाह्वयामहे ॥

उदु त्ये अरुणप्सवश्चित्रा यामेभिरीरते । वाश्रा अधि ष्णुना दिवः ॥ ७ ॥

उत् । ऊँ इति । त्ये । अरुणऽप्सवः । चित्राः । यामेभिः । ईरते ।

वाश्राः । अधि । स्नुना । दिवः ॥ ७ ॥

vत्ये ते पूर्वोक्तगुणाः vअरुणप्सवः अरुणवर्णरूपाः vचित्राः चायनीयाः आश्चर्यभूता वा vवाश्राः शब्दकारिणः एवंभूता मरुतः vयामेभिः यामैर्यानैः vदिवः vअधि द्युलोकस्योपरि vस्नुना सानुना समुच्छ्रितप्रदेशेन vउत् vईरते उद्गच्छन्ति । vउ इति पूरणः ॥ ' पदादिषु मांस्पृत्स्नूनामुपसंख्यानम् ' इति सानुशब्दस्य स्नुभावः ॥

कारीर्यां सौर्यस्य हविषः ' सृजन्ति रश्मिम् ' इत्येषानुवाक्या । सूत्र्यते हि—' सृजन्ति रश्मिमोजसा वहिष्ठेभिर्विहरन्यासि तन्तुम् ' (आश्व. श्रौ. २. १३) इति ॥

सृजन्ति रश्मिमोजसा पन्थां सूर्याय यातवे । ते भानुभिर्वि तस्थिरे ॥८॥

सृजन्ति । रश्मिम् । ओजसा । पन्थाम् । सूर्याय । यातवे । ते । भानुऽभिः । वि । तस्थिरे ॥८॥

तच्छब्दश्रुतेर्यच्छब्दाध्याहारः । ये मरुतः ᵛसूर्याय सूर्यस्य । ' षष्ठ्यर्थे चतुर्थी वक्तव्या ' इति चतुर्थी । ᵛयातवे[1] गन्तुं ᵛरश्मिं व्याप्तम् । ' अशे रश च ' इत्यभोतेरौणादिको मिप्रत्ययो रशादेशश्च । यद्वा । रश्मिभिस्तेजोभिर्युक्तम् । ᵛपन्थां पन्थानम् ᵛओजसा बलेन ᵛसृजन्ति उत्पादयन्ति । वृत्रादिभिरावृतं सूर्यपथमावरकस्य वृत्रादेरपनयनेन जनयन्तीत्यर्थः । ᵛते मरुतः ᵛभानुभिः तेजोभिः ᵛविᵛतस्थिरे कृत्स्नं जगत् व्याप्य अवतिष्ठन्ते ॥

इमां मे मरुतो गिरमिमं स्तोममृभुक्षणः । इमं मे वनता हवम् ॥ ९ ॥

इमाम् । मे । मरुतः । गिरम् । इमम् । स्तोमम् । ऋभुक्षणः । इमम् । मे । वनत । हवम् ॥९॥

हे ᵛमरुतः ᵛइमां पुरोवर्तिनीं ᵛमे मम ᵛगिरं शस्त्ररूपां वाचं ᵛवनत संभजत । हे ᵛऋभुक्षणः । महन्नामैतत् । महान्तः । जसि ' इतोऽत्सर्वनामस्थाने ' इत्यकारः । ' वा षपूर्वस्य निगमे ' इति दीर्घाभावः । ते यूयम् ᵛइमं ᵛस्तोमं स्तोत्रं प्रगीतमन्त्रसाध्यं ᵛमे मम ᵛइमं पुरोवर्तिनं ᵛहवम् आह्वानरूपं च याजुषं मन्त्रं वनत संभजत सेवध्वम् ॥

त्रीणि सरांसि पृश्नयो दुदुह्रे वज्रिणे मधु । उत्सं कवन्धमुद्रिणम् ॥ १० ॥

त्रीणि । सरांसि । पृश्नयः । दुदुह्रे । वज्रिणे । मधु । उत्सम् । कवन्धम् । उद्रिणम् ॥ १० ॥

ᵛपृश्नयः मरुन्मातृभूता गावः ᵛवज्रिणे वज्रवत इन्द्राय । तादर्थ्ये चतुर्थी । इन्द्रार्थं ᵛमधु मधुरं क्षीरादिकमाश्रयणद्रव्यं ᵛत्रीणि ᵛसरांसि सर इव सोमैः पूरितानि त्रीणि सवनानि त्रिष्वपि सवनेषु श्रयणार्थं ᵛदुदुह्रे दुदुहिरे । यद्वा । मधु मधुरं सोमं वज्रिणे वज्रयुक्ताय मरुद्गणाय त्रीणि सरांसि द्रोणकलशाधवनीयपूतभृल्लक्षणानि प्रति पृश्नयो माध्यमिका वाचो दुदुह्रे वृष्टिद्वारा दुहन्ति । यद्वा पृश्नय इति मातृवाचिना शब्देन पुत्रा उच्यन्ते । पृश्निमातरो मरुत इद्रार्थं त्रीणि सरांसि द्रोणकलशादीनि मधु मधुना सोमेन पूरयितुम् ᵛउत्सम् उत्स्रवणशीलं ᵛकवन्धम् उदकम् ᵛउद्रिणम् उदकवन्तं मेघं दुदुह्रे दुहते ॥ दुहेश्छान्दसो लिट् । ' इरयो रे ' इति रेभावः । पादादित्वादनिघातः ॥ ॥ १९ ॥

मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे । आ तू न उप गन्तन ॥ ११ ॥

मरुतः । यत् । ह । वः । दिवः । सुम्नऽयन्तः । हवामहे । आ । तु । नः । उप । गन्तन ॥११॥

हे ᵛमरुतः ᵛयद्ध यदा खलु ᵛवः युष्मान् ᵛसुम्नायन्तः सुम्नं सुखमात्मन इच्छन्तो वयं ᵛदिवः द्युलोकात् ᵛहवामहे स्तुतिभिराह्वयामहे । ᵛआ ᵛतु अनन्तरमेव शीघ्रं ᵛनः अस्मान् ᵛउप ᵛगन्तन उपगच्छत । गमेर्लोटि ' तप्तनप्तनथनाश्च ' इति तनबादेशः ॥

यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे । उत प्रचेतसो मदे ॥ १२ ॥

यूयम् । हि । स्थ । सुऽदानवः । रुद्राः । ऋभुक्षणः । दमे । उत । प्रऽचेतसः । मदे ॥ १२ ॥

ᵛउत अपि च हे ᵛसुदानवः शोभनदाना हे ᵛरुद्राः रुद्रपुत्राः । पादादित्वादमन्निघातनिघाताभावः । हे ᵛऋभुक्षणः महान्तः उरुतेजस्का वा ईदृशा हे मरुतः ᵛयूयं ᵛहि[2] खलु ᵛदमे यज्ञगृहे ᵛमदे मदकरे सोमे पीते सति ᵛप्रचेतसः ᵛस्थ प्रकृष्टज्ञाना भवथ ॥

आ नो रयिं मदच्युतं पुरुक्षुं विश्वधायसम् । इयर्ता मरुतो दिवः ॥ १३ ॥

---

१. ख-ञ-त-न-भ-श–गंतवे । २. ख-ञ-त-न-भ-श–' हि ' नास्ति ।

ा । नः । रयिम् । मदऽच्युतम् । पुरुऽक्षुम् । विश्वऽधायसम् । इयर्त । मरुतः । दिवः ॥१३॥

हे vमरुतः vनः अस्माकं vरयिं धनं vदिवः द्युलोकात् vआ vइयर्त आगमयत । 'ऋ गतौ' त्यस्मादन्तर्भावितण्यर्थात् जौहोत्यादिकाल्लोटि तस्य 'तप्तनप्तन०' इति तबादेशः । 'अनुदात्ते च' त्यभ्यस्ताद्युदात्तत्वम् । कीदृशं रयिम् । vमदच्युतं मदं स्तवन्तं यद्वा शात्रवस्य मदस्य च्यावयितारं पुरुक्षुं बहुनिवासं बहुभिः स्तूयमानं वा vविश्वधायसं विश्वेषां सर्वेषामस्मदीयानां धारणाय ोषणाय पर्याप्तम् ॥

अधीव यद्गिरीणां यामं शुभ्रा अचिध्वम् । सुवानैर्मन्दध्व इन्दुभिः ॥१४॥

धिऽइव । यत् । गिरीणाम् । यामम् । शुभ्राः । अचिध्वम् । सुवानैः । मन्दध्वे । इन्दुऽभिः ॥१४॥

हे vशुभ्राः शोभमाना मरुतः vगिरीणां पर्वतानाम् vअधीव उपरीव vयत् यदा vयामं ष्मदीयं रथम् vअचिध्वं गमनसाधनैरश्वादिभिः उपचितं[1] कुरुथ तदानीं vसुवानैः अभिषूयमाणैः इन्दुभिः सोमैः vमन्दध्वे मादयध्वे ॥

एतावतश्चिदेषां सुम्नं भिक्षेत मर्त्यः । अदाभ्यस्य मन्मभिः ॥ १५ ॥

तावतः । चित् । एषाम् । सुम्नम् । भिक्षेत । मर्त्यः । अदाभ्यस्य । मन्मऽभिः ॥ १५ ॥

vमर्त्यः मनुष्यः स्तोता vमन्मभिः स्तोत्रैः vसुम्नं सुखं धनं वा vएषां मरुतां स्वभूतं vभिक्षेत ाचेत । इदानीं गणाभिप्रायेणैकवदाह । vएतावतश्चित् यत्परिमाणस्य च vअदाभ्यस्य केनापि हिंसितुम- क्यस्य मरुद्गणस्य सुम्नं भिक्षेत ॥ एतच्छब्दात् 'यत्तदेतेभ्यः०' इति परिमाणेऽर्थे वतुप् । 'आ र्वनाङ्नः' इत्यात्वम् ॥ ॥ २० ॥

ये द्रप्साइव रोदसी धमन्त्यनु वृष्टिभिः । उत्सं दुहन्तो अक्षितम् ॥ १६ ॥

। द्रप्साःऽइव । रोदसी इति । धमन्ति । अनु । वृष्टिऽभिः । उत्सम् । दुहन्तः । अक्षितम् ॥१६॥

vये मरुतः vद्रप्साइव उदबिन्दव इव vरोदसी द्यावापृथिव्यौ vवृष्टिभिः वर्षणैः vअनु vधमन्ति ानुगच्छन्ति साकल्येन व्याप्नुवन्ति । यद्वा । अनुध्मायते उच्छ्वसितावयवे कुर्वन्ति । किं कुर्वन्तः । अक्षितम् अक्षीणमुदकम् vउत्सं मेघं vदुहन्तः पूरयन्तो मेघादवाङ्मुखं पातयन्तः । दुहेः 'लक्षण- त्वोः०' (पा. सू. ३. २. १२६) इति हेतौ शतृप्रत्ययः । यत एवं दुहन्ति ततो रोदसी अनुधमन्तीत्यर्थः ॥

उदु स्वानेभिरीरत उद्रथैरुदु वायुभिः । उत्स्तोमैः पृश्निमातरः ॥ १७ ॥

उत् । ऊँ इति । स्वानेभिः । ईरते । उत् । रथैः । उत् । ऊँ इति । वायुऽभिः ।
उत् । स्तोमैः । पृश्निऽमातरः ॥ १७ ॥

vस्वानेभिः स्वानैः शब्दैर्मरुतः vउत् vईरते उद्गच्छन्ति । 'स्वन शब्दे' । 'स्वनहसोर्वा' पा. सू. ३. ३. ६२) इत्यप्रो विकल्पितत्वात् पक्षे घञ् । 'कर्षात्वतः०' इत्यन्तोदात्तत्वम् । 'बहुलं न्दसि' इति भिस ऐसभावः । vउ इति पूरणः । तथा vरथैः रथप्रमुखैः[2] वाहनैश्चोदीरते[3] । 'पृश्निमातरः[4] - - - ॥

१. ख१-भ-संचितं । २ ज्ञ-त१-२-रथप्रमुखैर्वायुभिः । ३. ज-°दीरते स्तोमैः स्तोत्रैः । ४. घ-ज्ञ- ा१-२-मु- पृश्निमातरः मरुतस्तथा स्तोमैः स्तोत्रैः उदीरते; श- पृश्निमातरः पृश्नेः पुत्रा मरुतः स्तोमै- स्माभिः कृतैः स्तोत्रैः एव एवं बहुधा उदीरते उद्गच्छंति ।

येनाव तुर्वशं यदुं येन कण्वं धनस्पृतम् । राये सु तस्य धीमहि ॥ १८ ॥

येन । आव । तुर्वशम् । यदुम् । येन । कण्वम् । धनऽस्पृतम् । राये । सु । तस्य । धीमहि ॥ १८ ॥

[v]येन[1] आत्मीयेन रक्षणेन [v]तुर्वशम् एतत्संज्ञं [v]यदुम् एतत्संज्ञं च राजर्षिम् [v]आव यूयं रक्षितवन्तः स्थ । अवतेर्लिटि मध्यमबहुवचने रूपमेतत् । [v]येन च [v]धनस्पृतं धनकामं [v]कण्वम् ऋषिं रक्षितवन्तः स्थ [v]तस्य युष्मदीयं रक्षणं [v]राये धनार्थं [v]सु [v]धीमहि शोभनं ध्यायाम ॥

इमा उ वः सुदानवो घृतं न पिप्युषीरिषः । वर्धान्काण्वस्य मन्मभिः ॥ १९ ॥

इमाः । ऊँ इति । वः । सुऽदानवः । घृतम् । न । पिप्युषीः । इषः ।
वर्धान् । काण्वस्य । मन्मऽभिः ॥ १९ ॥

हे [v]सुदानवः शोभनदाना मरुतः [v]घृतं [v]न घृतमिव [v]पिप्युषीः वर्धयित्र्यः शरीरपुष्टिहेतुभूताः [v]इमाः इदानीं[2] प्रदीयमानाः [v]इषः अन्नानि सोमलक्षणानि [v]काण्वस्य कण्वगोत्रस्य मम संबन्धिभिः [v]मन्मभिः स्तोत्रैः सार्धं [v]वः युष्मान् [v]वर्धान् वर्धयन्तु ॥ वृधेर्ण्यन्तात् लेटि रूपमेतत् । [v]उ इति पूरणः ॥

क्व नूनं सुदानवो मदथा वृक्तबर्हिषः । ब्रह्मा को वः सपर्यति ॥ २० ॥

क्व । नुनम् । सुऽदानवः । मदथ । वृक्तऽबर्हिषः । ब्रह्मा । कः । वः । सपर्यति ॥ २० ॥

मरुदागमनस्य विलम्बमसहमान ऋषिरनया वितर्कयति । [v]सुदानवः शोभनदाना हे [v]वृक्तबर्हिषः । वृक्तं वृक्णं छिन्नं बर्हियेषां यागाय । यद्वा । बर्हिरिति यज्ञनाम । वृक्तः प्रवृक्तो यज्ञो येषां ते तथोक्ताः । हे ईदृशा मरुतः [v]क्व कुत्र देशे [v]नूनम् इदानीं [v]मदथ माद्यथ । 'मदी हर्षे' । व्यत्ययेन शप् । [v]कः च [v]ब्रह्मा ब्राह्मणः स्तोता [v]वः युष्मान् [v]सपर्यति परिचरति । किंकारणं बहुशः स्तुतैरपि भवद्भिरिदानीं नागम्यत इति न जानीमः ॥ ॥ २१ ॥

नहि ष्म यद्व वः पुरा स्तोमेभिर्वृक्तबर्हिषः । शर्धाँ ऋतस्य जिन्वथ ॥ २१ ॥

नहि । स्म । यत् । ह । वः । पुरा । स्तोमेभिः । वृक्तऽबर्हिषः । शर्धान् । ऋतस्य । जिन्वथ ॥ २१ ॥

पूर्वया वितर्क्य इदानीं निश्चिनोति । हे [v]वृक्तबर्हिषः प्रवृक्तयज्ञका मरुतः [v]नहि [v]ष्म तन्न खलु संभवति । [v]वः यूयं [v]पुरा अस्मत्तः पूर्वमेव कृतैः स्तोमैरन्यदीयैः स्तोत्रैः [v]ऋतस्य उदकस्य सत्यस्य यज्ञस्य वा संबन्धिनः [v]शर्धान् आत्मीयानि बलानि [v]जिन्वथ प्रीणयथ इति [v]यद्ध यत्खलु तन्न संभवत्येव । अतः शीघ्रमागच्छतेत्यर्थः । यद्वा । वृक्तबर्हिष इत्यृत्विङ्नाम । हे ऋत्विजः वः युष्माकं संबन्धिभिः स्तोमेभिः स्तोत्रैर्ऋतस्य यज्ञस्य संबन्धिनो यागार्हान्छर्धान् मारुतानि बलानि पुरा अन्येभ्यः स्तोतृभ्यः पूर्वं यद्यस्मात्कारणाज्जिन्वथ यूयं प्रीणयथ । जिविः प्रीणनार्थः । तस्मादन्यदीयैः स्तोत्रैः नहि ष्म न खलु ते मरुतो वशीभवन्तीत्यर्थः ॥

प्रवर्ग्ये महावीरे पयसोरासिक्तयोः सतोः 'समु त्ये महतीरपः' इत्येषानुवक्तव्या[3]। सूत्र्यते हि—'आसिक्तयोः समु त्ये महतीरप इति महावीरमादायोत्तिष्ठत्सु' (आश्व. श्रौ. ४. ७) इति ॥

समु त्ये महतीरपः सं क्षोणी समु सूर्यम् । सं वज्रं पर्वशो दधुः ॥ २२ ॥

---

१. श–हे मरुतः येन । २. ज्ञ-त१-२–इमानि । ३. ख-ज्ञ-भ–°नुवाक्या ।

सम्। ऊँ इति। त्ये। महतीः। अपः। सम्। क्षोणी इति। सम्। ऊँ इति। सूर्यम्। सम्। वज्रम्। पर्वऽशः। दधुः ॥ २२ ॥

vत्ये ते पूर्वोक्तगुणा मरुतः vमहतीः बह्वीः vअपः वृष्टयुदकानि vसमु vदधुः संदधति। ओषध्यादिभिः संयोजयन्ति। यद्वा। घर्मकाले सूर्यरश्मिभिराहृता उपरि सम्यग्धारयन्ति॥ 'बृहन्महतोरुपसंख्यानम्' इति महतः परस्य ङीप उदात्तत्वम्। 'ऊडिदम्' इत्यादिना अप्शब्दात्परः शस् उदात्तः॥ तथा vक्षोणी क्षोण्यौ द्यावापृथिव्यौ च ते मरुतः vसं दधुः। यथा स्वे स्वे स्थानेऽवतिष्ठेते तथा धारयन्ति। सूत्रात्मना वायुना सर्वं जगद्धार्यते। तथा च श्रूयते—'वायुर्वै गोतम तत्सूत्रं वायुना वै गोतम सूत्रेणायं च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति' (बृ. उ. ३. ७. २) इति। तथा vसूर्यं सर्वस्य प्रेरकमादित्यं चान्तरिक्षे vसं दधुः सम्यग्धारयन्ति। उशब्दः समुच्चये। ईदृशास्ते मरुतः vवज्रम् आत्मीयमायुधं vपर्वशः पर्वणि पर्वणि वृत्रस्य सर्वेष्ववयवसंबन्धिषु हननार्थं vसं दधुः समयूयुजन्[1] ॥

वि वृत्रं पर्वशो ययुर्वि पर्वताँ अराजिनः। चक्राणा वृष्णि पौंस्यम् ॥ २३ ॥

वि। वृत्रम्। पर्वऽशः। ययुः। वि। पर्वतान्। अराजिनः। चक्राणाः। वृष्णि। पौंस्यम्॥२३॥

vअराजिनः राज्ञा केनचित्स्वामिनानधिष्ठिताः। यद्वा। राजा स्वामी अस्य न विद्यत इत्यराजेन्द्रः। तद्युक्ताः। vवृष्णि वीर्यवत् vपौंस्यं बलं vचक्राणाः कुर्वाणा मरुतः vवृत्रम् आवरकमसुरं मेघं वा vपर्वशः पर्वणि पर्वणि भेदेन vवि vययुः विशिष्टं वधमगमयन्। तथा vपर्वतान् गिरींश्च विशिष्टं वधं प्रापयन्॥

अनु त्रितस्य युध्यतः शुष्ममावन्नुत क्रतुम्। अन्विन्द्रं वृत्रतूर्ये ॥ २४ ॥

अनु। त्रितस्य। युध्यतः। शुष्मम्। आवन्। उत। क्रतुम्। अनु। इन्द्रम्। वृत्रऽतूर्ये॥ २४॥

vत्रितस्य आप्त्यस्यैतत्संज्ञस्य vयुध्यतः शत्रून् संप्रहरतो राजर्षेः vशुष्मं परेषां शोषकं बलं मरुतः vअनु vआवन् साहाय्यार्थमन्वगच्छन्। यद्वा। अनुगुणमरक्षन्। vउत अपि च vक्रतुं तदीयं कर्म चारक्षन्। अपि च vवृत्रतूर्ये वृत्रवधार्थे संग्रामे vइन्द्रं च vअनु आवन् अरक्षन्॥

विद्युद्धस्ता अभिद्यवः शिप्राः शीर्षन्हिरण्ययीः। शुभ्रा व्यञ्जत श्रिये ॥२५॥

विद्युत्ऽहस्ताः। अभिऽद्यवः। शिप्राः। शीर्षन्। हिरण्ययीः। शुभ्राः। वि। अञ्जत। श्रिये॥२५॥

vविद्युद्धस्ताः विद्योतमानायुधबाहवः vअभिद्यवः अभिगतदीप्तयः vशुभ्राः शोभमाना मरुतः vशीर्षन् शीर्षणि शिरस्यात्मीयेषु शिरःसु vहिरण्ययीः हिरण्मयीः स्वर्णमयानि vशिप्राः शिरस्त्राणानि vश्रिये शोभार्थं vव्यञ्जत व्यञ्जयन्ति। व्यक्तीकुर्वन्ति। धारयन्तीत्यर्थः॥ ॥ २२ ॥

उशना यत्परावत उक्षणो रन्ध्रमयातन। द्यौर्न चक्रदद्भिया ॥ २६ ॥

उशनाः। यत्। पराऽवतः। उक्षणः। रन्ध्रम्। अयातन। द्यौः। न। चक्रदत्। भिया॥ २६॥

हे मरुतः vउशनाः। व्यत्ययेन प्रथमा। उशनसा काव्येनर्षिणा स्तूयमाना यूयम्। यद्वा। उशनःशब्दात् 'सुपां सुलुक्' इति जसः सुः॥ उशनसः स्तोतॄन् कामयमाना यूयम् vउक्षणः सेक्तुः

---

१. श–समयोजयन्।

कामानां वर्षितुरात्मीयस्य रथस्य वृष्टिहेतोरन्तरिक्षस्य वा vरन्ध्रं मध्यं vपरावतः दूरदेशात् vयत् यदा vअयातन अगच्छत ॥ यातेर्लङि मध्यमबहुवचनस्य ' तप्तनप्तनथनाश्च ' इनि तनादेशः ॥ तदानीं vद्यौर्न । अत्र द्युशब्देन तत्रत्यो जनसंघो लक्ष्यते । द्युलोके वर्तमानो जनसंघ इव पार्थिवमपि सर्वं भूतजातं vभिया युष्मद्वेगजनितया भीत्या vचक्रदत् अशब्दयत् अकम्पत वा ॥

आ नो मखस्य दावनेऽश्वैर्हिरण्यपाणिभिः । देवासः उप गन्तन ॥२७॥

आ । नः । मखस्य । दावने । अश्वैः । हिरण्यपाणिऽभिः । देवासः । उप । गन्तन ॥ २७ ॥

हे vदेवासः दानादिगुणयुक्ता मरुतः vनः अस्माकं vमखस्य यज्ञस्य vदावने दानाय । ददातेरौणादिको भावे वनिः । vहिरण्यपाणिभिः स्वर्णमयपादैः स्वर्णालंकृतैर्हितरमणीयपादैर्वा vअश्वैः vआ vउप vगन्तन उपागच्छत प्राप्नुत ॥ गमेर्लोटि छान्दसः शपो लुक् । ' तप्तनप्तनथनाश्च ' इति तमबादेशः । अत एव ङित्त्वाभावादनुनासिकलोपो न क्रियते ॥

यदेषां पृषती रथे प्रष्टिर्वहति रोहितः । यान्ति शुभ्रा रिणन्नपः ॥ २८ ॥

यत् । एषाम् । पृषतीः । रथे । प्रष्टिः । वहति । रोहितः । यान्ति । शुभ्राः । रिणन् । अपः ॥२८॥

vएषां मरुतां vरथे vपृषतीः पृषद्भिः श्वेतबिन्दुभिर्युक्ता मृग्यः vयत् यदा वहन्ति यदा च vप्रष्टिः प्राशुः शीघ्रगामी । यद्वा । प्रमुखे युज्यमानः सन् । vरोहितः पृषतः पृषद्भिर्युक्तो मृगः vवहति तदानीं vशुभ्राः शोभमाना मरुतः vयान्ति गच्छन्ति । तेषां गमने च सति vअपः उदकानि वृष्टिलक्षणानि vरिणन् अरिणन् अगच्छन् । सर्वत्र प्रवहन्ति ॥ ' री गतिरेषणयोः ' । क्रैयादिकः । ' प्वादीनां ह्रस्वः ' । छान्दसोऽडभावः । ' समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः ' (पा. सू. ८. १. १८. ५) इति वचनादत्र पूर्वपदस्य वाक्यान्तरगतत्वात् ' तिङुतिङः ' इति निघाताभावः ॥

सुषोमे शर्यणावत्यार्जीके पस्त्यावति । ययुर्निचक्रया नरः ॥ २९ ॥

सुऽसोमे । शर्यणाऽवति । आर्जीके । पस्त्यऽवति । ययुः । निऽचक्रया । नरः ॥ २९ ॥

vसुषोमे शोभनसोमयुक्ते vआर्जीके । ऋजीका नाम देशाः । तत्संबन्धिनि vशर्यणावति कुरुक्षेत्रस्य जघनार्धे शर्यणावत्संज्ञे सरसि vपस्त्यावति । पस्त्यम् इति गृहनाम । यज्ञगृहोपेते सोमपानाय vनरः नेतारो मरुतः vनिचक्रया नीचीनचक्रया अवाङ्मुखं प्रवर्तमानया रथचक्र्या vययुः यान्ति गच्छन्ति । यातेश्छान्दसो लिट् । यद्वा । नरो नेतार ऋत्विज उक्तगुणविशिष्टे शर्यणावति मरुद्यागाय सोममाहर्तुं निचक्रया नीचीनचक्रया शकट्या ययुः गच्छन्ति ॥

कदा गच्छाथ मरुत इत्था विप्रं हवमानम् । मार्डीकेभिर्नाधमानम् ॥३०॥

कदा । गच्छाथ । मरुतः । इत्था । विप्रम् । हवमानम् । मार्डीकेभिः । नाधमानम् ॥ ३० ॥

हे vमरुतः vइत्था इत्थम् अनेन प्रकारेण vहवमानम् आह्वयन्तं स्तुवन्तं vनाधमानं याचमानं vविप्रं मेधाविनं स्तोतारं मां vकदा कस्मिन् काले vमार्डीकेभिः सुखहेतुभिर्धनैः सार्धं vगच्छाथ गच्छथ । विलम्बं मा कृषत शीघ्रमागच्छतेति भावः ॥ ॥ २३ ॥

कद्धु नूनं कधप्रियो यदिन्द्रमजहातन । को वः सखित्व ओहते ॥ ३१ ॥

कत् । ह । नूनम् । कधऽप्रियः । यत् । इन्द्रम् । अजहातन । कः । वः । सखिऽत्वे । ओहते ॥३१॥

हे vकधप्रियः कथया स्तुत्या प्रीयमाणाः । ' कथ वाक्यप्रबन्धने ' । अस्माद्भावे ' चिन्तिपूजि° ' (पा. सू. ३. ३. १०५) इत्यादिना अङ् । ततष्टाप् । उत्तरपदे ' ङ्यापोः संज्ञाच्छन्दसोः° ' (पा. सू. ६. ३. ६३) इति ह्रस्वत्वम् । धत्वं छान्दसम् । ईदृशा हे मरुतः वृत्रेण सह युध्यमानम् vइन्द्रं vनूनं सत्यम् vअजहातन पर्यत्यजतेति vयत् एतत् तत् vकद्ध कदा खलु कस्मिन् काले जातम् । न कदाचिदपीत्यर्थः । तथा च ब्राह्मणं—' मरुतो हैनं नाजहुः प्रहर भगवो जहि वीरयस्व ' (ऐ. ब्रा. ३. २०) इति । ' वृत्रस्य त्वा श्वसथादीषमाणाः ' (ऋ. सं. ८. ९६. ७) इत्यादि च निगमान्तरम् । यत एवमतः कारणात् vवः युष्माकं vसख्यित्वे । व्यत्ययेन सप्तमी । सख्यिभावं vकः स्तोता vओहते याचते । यद्वा । वहते प्राप्नोति । ईदृशमनपायं युष्मत्सख्यित्वं दुर्लभमित्यर्थः ॥

सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः । स्तुषे हिरण्यवाशीभिः ॥३२॥

सहो इति । सु । नः । वज्रऽहस्तैः । कण्वासः । अग्निम् । मरुत्ऽभिः ।

स्तुषे । हिरण्यऽवाशीभिः ॥ ३२ ॥

vवज्रहस्तैः वज्रबाहुभिः vहिरण्यवाशीभिः । हिरण्मयी वाशी तक्षणसाधनमायुधं येषामस्ति तादृशैः । vमरुद्भिः vसहो सहैव वर्तमानम् vअग्निं vनः अस्मदीया हे vकण्वासः कण्वाः स्तोतारः कण्वगोत्रा वा ऋषयः यूयं vस्तुषे स्तुध्वम् । यद्वा । न इति प्रथमार्थे द्वितीया । नः वयं कण्वगोत्राः ॥ ' अस्मदो द्वयोश्च ' (पा. सू. १. २. ५९) इत्येकस्मिन् बहुवचनम् । ' सविशेषणस्य प्रतिषेधः ' (का. १. २. ५९. १) इति तु व्यत्ययेन प्रवर्तते । स्तुषे स्तुवे ॥ स्तौतेरुत्तमैकवचने ' सिब्बहुलम् ° ' इति सिप् ॥

ओ षु वृष्णः प्रयज्यून्ना नव्यसे सुवितायं । ववृत्यां चित्रवाजान् ॥ ३३ ॥

ओ इति । सु । वृष्णः । प्रऽयज्यून् । आ । नव्यसे । सुऽवितायं । ववृत्याम् । चित्रऽवाजान् ॥३३॥

vवृष्णः वर्षितॄन् अभीष्टफलदान् vप्रयज्यून् प्रकर्षेण यष्टव्यान् vचित्रवाजान् विचित्रगमनान् विचित्रबलान् विचित्रधनान् वा एवंभूतान् मरुतः vसु सुष्ठु vओ आ उ vववृत्यां आवर्तयामि[1] । अस्मदभिमुखं यथा गच्छन्ति तथा करोमि । अपि च vनव्यसे नवीयसे नवतराय अत्यन्तं प्रशस्ताय vसुविताय सुष्ठु प्राप्तव्याय धनाय च तान् vआ ववृत्याम् आवर्तयामि ॥

गिरयश्चित्नि जिहते पर्शानासो मन्यमानाः । पर्वताश्चित्नि येमिरे ॥३४॥

गिरयः । चित् । नि । जिहते । पर्शानासः । मन्यमानाः । पर्वताः । चित् । नि । येमिरे ॥३४॥

मरुत्सु आगच्छत्सु vगिरयश्चित् गिरयोऽपि शिलोच्चया अपि vपर्शानासः पीड्यमानाः । यद्वा । मरुद्भिः स्पृश्यमानाः । अत एव vमन्यमानाः अभिमन्यमाना बाध्यमानाः सन्तः vनि vजिहते नितरां गच्छन्ति । मरुद्वेगेन स्थानात् प्रच्यवन्ते । तथा vपर्वताश्चित् पर्ववन्तो मेघा अपि तदीयेन गमनेन vनि vयेमिरे नियम्यन्ते । यद्वा । गिरयः क्षुद्राः शिलोच्चया महान्तः पर्वताः ॥

आक्षण्यावानो वहन्त्यन्तरिक्षेण पर्ततः । धातारः स्तुवते वयः ॥ ३५ ॥

आ । अक्षण्ऽयावानः । वहन्ति । अन्तरिक्षेण । पर्ततः । धातारः । स्तुवते । वयः ॥ ३५ ॥

---

१. ख-ञ-त-न-भ-श–आवर्तयानि ।

vअक्षण्यावानः अक्ष्णं व्याप्तं गच्छन्तः। यद्वा। अक्ष्णश्चक्षुषोऽपि क्षीघ्रं यान्तीत्यक्ष्णयावानः। यातेः 'आतो मनिन्' इति वनिप्। ईदृशा अश्वाः vअन्तरिक्षेण आकाशमार्गेण vपततः गच्छतो मरुतः vआ vवहन्ति आनयन्ति। यद्वा। पतत इत्यश्वानां विशेषणम्। अन्तरिक्षे नभसि पततो गच्छन्तः। छान्दसो नुमभावः। किं कुर्वन्तः। vस्तुवते स्तोत्रं कुर्वते जनाय vवयः अन्नं vधातारः विधातारः कुर्वाणाः॥

अग्निर्हि जानि पूर्व्यश्छन्दो न सूरो अर्चिषा। ते भानुभिर्वि तस्थिरे॥३६॥

अग्निः। हि। जनि। पूर्व्यः। छन्दः। न। सूरः। अर्चिषा। ते। भानुऽभिः। वि। तस्थिरे॥३६॥

vअग्निर्हि अग्निः खलु vअर्चिषा तेजसा vपूर्व्यः सर्वेषु देवेषु मुख्यः vजानि अजायत। 'दीपजन°' (पा. सू. ३. १. ६१) इत्यादिना कर्तरि लुङि च्लेश्निणादेशः। तत्र दृष्टान्तः। vछन्दः उपच्छन्दनीयः vसूरः vन सूर्य इव। तदनन्तरं vते पूर्वोक्तगुणा मरुतः vभानुभिः दीप्तिभिः vवि vतस्थिरे विविधमवतिष्ठन्ते। आग्निमारुते ह्यग्निः पूर्वं स्तूयते पश्चान्मरुतः। तदपेक्षया च पूर्वोत्तरयोरर्धर्चयोः क्रमेणाग्निर्मरुतश्च स्तूयन्ते॥ ॥ २४॥

'आ नो विश्वाभिः' इति त्रयोविंशत्यृचं तृतीयं सूक्तं सध्वंसाख्यस्य काण्वस्यार्षमानुष्टुभम्। एतदादीनि त्रीणि सूक्तान्यश्विदेवत्यानि। तथा चानुक्रान्तम्—'आ नस्त्र्यधिका सध्वंस आश्विनं ह्यानुष्टुभं तु' इति। प्रातरनुवाक आश्विने क्रतावानुष्टुभे छन्दस्याश्विनशस्त्रे चैतत्सूक्तम्। सूत्र्यते हि—'आ नो विश्वाभिस्त्यं चिदत्रिमित्यानुष्टुभम्' (आश्व. श्रौ. ४. १५) इति। असोर्यामे प्रशास्तुरतिरिक्तोक्थेऽप्येतत्। सूत्रितं च—'आ नो विश्वाभिः प्रातर्यावाणा' (आश्व. श्रौ. ९. ११) इति। चतुर्थेऽहनि प्रउगशस्त्रे 'आ नो विश्वाभिः' इत्याश्विनस्तृचः। सूत्रितं च—'आ नो विश्वाभिरूतिभिस्त्यमु वो अप्रहणम्' (आश्व. श्रौ. ७. ११) इति॥

आ नो विश्वाभिरूतिभिरश्विना गच्छतं युवम्।
दस्रा हिरण्यवर्तनी पिबतं सोम्यं मधु॥ १॥

आ। नः। विश्वाभिः। ऊतिऽभिः। अश्विना। गच्छतम्। युवम्।
दस्रा। हिरण्यवर्तनी इति हिरण्यऽवर्तनी। पिबतम्। सोम्यम्। मधु॥ १॥

हे vअश्विना अश्विनौ अश्नुवानौ सर्वं जगद्व्याप्नुवन्तौ यद्वा अश्वैर्युक्तौ vयुवं युवां vविश्वाभिः सर्वाभिर्ऱक्षाभिर्वा vऊतिभिः रक्षाभिः दातव्याभिः सार्धं vनः अस्मान् vआ vगच्छतम्। आगत्य च हे vदस्रा दस्रौ दर्शनीयौ शत्रूणामुपक्षपयितारौ वा हे vहिरण्यवर्तनी हिरण्मयरथौ हितरमणीयाचरणौ वा ईदृशौ हे अश्विनौ vसोम्यं सोममयं vमधु vपिबतम्॥

आ नूनं यातमश्विना रथेन सूर्यत्वचा।
भुजी हिरण्यपेशसा कवी गम्भीरचेतसा॥ २॥

आ। नूनम्। यातम्। अश्विना। रथेन। सूर्यऽत्वचा।
भुजी इति। हिरण्यऽपेशसा। कवी इति। गम्भीरऽचेतसा॥ २॥

हे vभुजी हविषां भोक्तारौ यद्वा स्तोतृभिरन्नानां भोजयितारौ सर्वस्य जगतः पालकौ वा हे vहिरण्यपेशसा हिरण्मयालंकारौ हिरण्मयावयवौ वा हे vकवी क्रान्तदर्शिनौ स्तोतव्यौ वा हे

vगम्भीरचेतसा प्रशस्तज्ञानौ ईदृशौ हे vअश्विना अश्विनौ vसूर्यत्वचा सूर्यवद्भासमानेन vरथेन vनूनम् अवश्यमस्मान् vआ vयातम् आगच्छतम् ॥

आ यातं नहुषस्पर्यान्तरिक्षात्सुवृक्तिभिः ।
पिबाथो अश्विना मधु कण्वानां सवने सुतम् ॥ ३ ॥

आ । यातम् । नहुषः । परि । आ । अन्तरिक्षात् । सुवृक्तिऽभिः ।
पिबाथः । अश्विना । मधु । कण्वानाम् । सवने । सुतम् ॥ ३ ॥

हे अश्विनौ vनहुषस्परि । नहुष इति मनुष्यनाम । सामर्थ्याच्चात्र तत्संबद्धो लोको लक्ष्यते । मानुषात्तस्माल्लोकात् । परि पञ्चम्यर्थानुवादी । vसुवृक्तिभिः सुष्ठु दोषवर्जिताभिः सुप्रवृत्ताभिर्वा स्तुतिभिर्हेतुभूताभिः vआ vयातम् आगच्छतम् । तथा vअन्तरिक्षात् अन्तरा क्षान्तान्मध्यमा-लोकादप्यागच्छतम् । आगत्य च vकण्वानां कण्वगोत्राणामस्माकं vसवने यज्ञे प्रातःसवनादौ vसुतम् अभिषुतं vमधु मधुरं सोमं हे अश्विनौ vपिबाथः पिबतम् ॥

आ नो यातं दिवस्पर्यान्तरिक्षादधप्रिया ।
पुत्रः कण्वस्य वामिह सुषाव सोम्यं मधु ॥ ४ ॥

आ । नः । यातम् । दिवः । परि । आ । अन्तरिक्षात् । अधऽप्रिया ।
पुत्रः । कण्वस्य । वाम् । इह । सुषाव । सोम्यम् । मधु ॥ ४ ॥

हे अश्विनौ vदिवस्परि दिवोऽधि द्युलोकात् vनः अस्मान् vआ vयातम् आगच्छतम् । 'पञ्चम्याः परावध्यर्थे' इति विसर्जनीयस्य सत्वम् । हे vअधप्रिया अधोऽधस्तादस्मिँल्लोके विद्यमानेन सोमेन प्रीयमाणौ । यद्वा । कथप्रिया । छान्दसो वर्णलोपः । कथया स्तुत्या प्रीयमाणौ । हे ईदृशावश्विनौ vअन्तरिक्षात् अप्यागच्छतम् । vइह अस्मिन्यज्ञे vकण्वस्य ऋषेः vपुत्रः vसोम्यं सोममयं vमधु vवां युवाभ्यां युवयोरर्थं vसुषाव अभिषुणोति । अत आ यातमित्यन्वयः ॥

आ नो यातमुपश्रुत्यश्विना सोमपीतये ।
स्वाहा स्तोमस्य वर्धना प्र कवी धीतिभिर्नरा ॥ ५ ॥

आ । नः । यातम् । उपऽश्रुति । अश्विना । सोमऽपीतये ।
स्वाहा । स्तोमस्य । वर्धना । प्र । कवी इति । धीतिऽभिः । नरा ॥ ५ ॥

हे vअश्विना अश्विनौ vनः अस्माकम् vउपश्रुति । श्रूयत इति श्रुत् स्तुतिः । उपगता श्रुद्यस्मिन् तस्मिन् यज्ञे vसोमपीतये सोमपानाय vआ vयातम् आगच्छतम् । हे vवर्धना वर्धनौ[1] vकवी क्रान्त-दर्शिनावश्विनौ vस्वाहा स्वाहाकृतौ स्वाहाकारेण सम्यगिष्टौ सन्तौ । यद्वा । स्वाहेति वाङ्नाम । स्तुतिरूपया वाचा स्तुतौ वाचा vस्तोमस्य स्तोतुः प्रवर्धकौ भवतम् । तथा हे vनरा नेतारावश्विनौ vधीतिभिः कर्मभिः यष्टुश्च[2] प्रवर्धकौ[1] भवतम् । यद्वा । स्वाहेत्यादीन्यामन्त्रितानि । हे स्वाहा स्वाहाकृतौ स्तोमस्य स्तोत्रस्य स्तोतुर्वा हे प्रवर्धना प्रवर्धयितारौ हे कवी क्रान्तदर्शिनौ धीतिभिर्बुद्धिभिरात्मीयैः

---

१. श–वर्धकौ । २. न–यष्टुयज्ञप्रवर्धकौ; भ–यष्टुः प्रवर्धकौ; श–यष्टुं प्रवर्धकौ ।

कर्मभिर्वा हे नरा सर्वेषां नेतारावश्विनौ सोमपानाय आ यातमित्येकमेव वाक्यम्। अस्मिन् पक्षे धीतिभिरित्यपराङ्गवस्त्वाभावश्छान्दसः[1]। यद्वा। धीतिभिर्ध्यातव्याभिर्युष्मदीयाभिरूतिभिः सार्धम् आ यातमिति क्रियया संबन्धः॥ ॥ २५ ॥

यच्चिद्धि वां पुरा ऋषयो जुहूरेऽवसे नरा।
आ यातमश्विना गन्तमुपेमां सुष्टुतिं मम ॥ ६ ॥

यत्। चित्। हि। वाम्। पुरा। ऋषयः। जुहूरे। अवसे। नरा।
आ। यातम्। अश्विना। आ। गतम्। उप। इमाम्। सुऽस्तुतिम्। मम॥ ६ ॥

हे ᵛनरा नेतारावश्विनौ ᵛयच्चिद्धि यदा खलु ᵛवां युवां ᵛपुरा पूर्वस्मिन् काले ᵛऋषयः अतीन्द्रियार्थदर्शिनः स्तोतारः ᵛअवसे रक्षणाय ᵛजुहूरे जुहुविरे स्तुतिभिराह्वयन्। ह्वयतेर्लिटि 'अभ्यस्तस्य च' इति संप्रसारणम्। 'हलः' इति दीर्घः। 'इरयो रे' इति रेभावः। तदानीं हे अश्विनौ ᵛआ ᵛयातम् आगच्छतम् आगतवन्तौ[2] स्थः। अतः ᵛमम मदीयाम् ᵛइमां ᵛसुष्टुतिं शोभनां स्तुतिमपि ᵛउप ᵛआ ᵛगतम् उपागच्छतम्॥

दिवश्चिद्रोचनादध्या नो गन्तं स्वर्विदा।
धीभिर्वत्सप्रचेतसा स्तोमेभिर्हवनश्रुता ॥ ७ ॥

दिवः। चित्। रोचनात्। अधि। आ। नः। गन्तम्। स्वःऽविदा।
धीभिः। वत्सऽप्रचेतसा। स्तोमेभिः। हवनऽश्रुता॥ ७ ॥

हे ᵛस्वर्विदा स्वः सूर्यस्य द्युलोकस्य वा लम्भयितारावश्विनौ ᵛदिवश्चित् द्युलोकाच्च ᵛरोचनादधि रोचमानादन्तरिक्षाच्च ᵛनः अस्मान् ᵛआ ᵛगन्तम् आगच्छतम्। पूर्ववदधिः पञ्चम्यर्थानुवादकः। हे ᵛवत्सप्रचेतसा वत्से स्तोतरि प्रकृष्टज्ञानौ। यद्वा। वत्सं निवासकं वेदितव्यं वा प्रकृष्टं चेतो ज्ञानं ययोस्तौ तथोक्तौ। तौ युवां ᵛधीभिः आत्मीयाभिर्बुद्धिभिः सहागच्छतम्। हे ᵛहवनश्रुता हवनस्यास्मदीयस्याह्वानस्य स्तोत्रस्य श्रोतारौ ᵛस्तोमेभिः स्तोत्रैरस्मत्कृतैर्युज्यमानौ सन्तावागच्छतम्॥

किमन्ये पर्यासतेऽस्मत्स्तोमेभिरश्विना।
पुत्रः कण्वस्य वामृषिर्गीर्भिर्वत्सो अवीवृधत् ॥ ८ ॥

किम्। अन्ये। परि। आसते। अस्मत्। स्तोमेभिः। अश्विना।
पुत्रः। कण्वस्य। वाम्। ऋषिः। गीःऽभिः। वत्सः। अवीवृधत्॥ ८ ॥

ᵛअस्मत् अस्मत्तः ᵛअन्ये व्यतिरिक्ताः स्तोतारः ᵛस्तोमेभिः स्तोत्रैः ᵛअश्विना अश्विनौ देवौ ᵛकिं ᵛपर्यासते। अस्मद्व्यतिरिक्ताः केऽप्यश्विनौ स्तोतुं न शक्नुवन्तीत्यर्थः। ᵛकण्वस्य ऋषेः[3] ᵛपुत्रः ᵛऋषिः मन्त्रद्रष्टा ᵛवत्सः ᵛगीर्भिः स्तुतिभिर्हे अश्विनौ ᵛवां युवाम् ᵛअवीवृधत् अवर्धयत्॥

आ वां विप्र इहावसेऽहुत्स्तोमेभिरश्विना।
अरिप्रा वृत्रहन्तमा ता नो भूतं मयोभुवा ॥ ९ ॥

---

१. ख-झ-न-भ-°त्यपरांगत्वाभाव°। २. ख-भ-आगतौ; झ-त२-४-आगच्छवंतौ; झ-न-आगच्छतवंतौ। ३. झ-त१-२-४-य- ऋषिः।

आ । वाम् । विप्रः । इह । अवसे । अह्वत् । स्तोमेभिः । अश्विना ।
अरिप्रा । वृत्रहन्ऽतमा । ता । नः । भुवम् । मयःऽभुवा ॥ ९ ॥

हे vअश्विना अश्विनौ vविप्रः मेधावी स्तोता vइह अस्मिन् यागे vअवसे रक्षणार्थं vस्तोमेभिः स्तोत्रैः vवां युवाम् vआ vअह्वत् आहूतवान् । ह्वयतेर्लुङि 'लिपिसिचिह्वश्च' इति च्लेरङादेशः । हे vअरिप्रा । रिप्रमिति पापनाम । अपापौ हे vवृत्रहन्तमा वृत्राणां शत्रूणां हन्तृतमौ vता तौ तादृशौ युवां vनः अस्माकं vमयोभुवा सुखस्य भावयितारौ vभूतं भवतम् ॥

आ यद्वां योषणा रथमतिष्ठद्वाजिनीवसू ।
विश्वान्यश्विना युवं प्र धीतान्यगच्छतम् ॥ १० ॥

आ । यत् । वाम् । योषणा । रथम् । अतिष्ठत् । वाजिनीवसू इति वाजिनीऽवसू ।
विश्वानि । अश्विना । युवम् । प्र । धीतानि । अगच्छतम् ॥ १० ॥

हे vवाजिनीवसू । वाजिनी हविष्मती यागक्रिया । तस्यां विद्यमानस्वांशलक्षणधनावश्विनौ vयोषणा योषित् सूर्या आजिधावनेन त्रियमाणा सती vवां युवयोः vरथं vयत् यदा vआ vअतिष्ठत् आस्थितवती आरूढवती तदा हे vअश्विना अश्विनौ vयुवं युवां vधीतानि ध्यातान्यभिलषितानि vविश्वानि सर्वाणि प्रकर्षेण vअगच्छतं प्रापतम्[1] ॥ ॥ २६ ॥

अतः सहस्रनिर्णिजा रथेना यातमश्विना ।
वत्सो वां मधुमद्वचोऽशंसीत्काव्यः कविः ॥ ११ ॥

अतः । सहस्रऽनिर्णिजा । रथेन । आ । यातम् । अश्विना ।
वत्सः । वाम् । मधुऽमत् । वचः । अशंसीत् । काव्यः । कविः ॥ ११ ॥

हे vअश्विना अश्विनौ येषु लोकेषु यत्र वर्तेथे vअतः अस्मात्स्थानात् vसहस्रनिर्णिजा । निर्णिगिति रूपनाम । स्वर्णमयतया बहुविधरूपयुक्तेन vरथेन vआ vयातम् आगच्छतम् । vकाव्यः कवेः पुत्रः vकविः मेधावी vवत्सः ऋषिः vवां युवाभ्यां युवयोरर्थं vमधुमत् माधुर्योपेतं vवचः वचनमुक्थम् vअशंसीत् शंसितवान् । यत एवमत आगच्छतमित्यर्थः ॥

पुरुमन्द्रा पुरूवसू मनोतरा रयीणाम् ।
स्तोमं मे अश्विनाविमममि वह्नी अनूषताम् ॥ १२ ॥

पुरुऽमन्द्रा । पुरुवसू इति पुरुऽवसू । मनोतरा । रयीणाम् ।
स्तोमम् । मे । अश्विनौ । इमम् । अभि । वह्नी इति । अनूषताम् । ॥ १२ ॥

vपुरुमन्द्रा बहुमदौ बहुभिः सोमैर्मादयितव्यौ वा vपुरूवसू बहुधनौ बहूनां निवासकौ वा vरयीणां धनानां vमनोतरा मन्तारौ दातारौ । मन्यतेस्तृचि पृषोदरादित्वाद्रूपसिद्धिः । 'नामन्यतरस्याम्' इति रैशब्दान्नाम उदात्तत्वम् । vवह्नी कृत्स्नस्य जगतो वोढारौ ईदृशौ vअश्विनौ vमे मम

---

१. ख-भ–प्रापयतं ।

vइमं vस्तोमं स्तोत्रम् vअभि vअनूषातां सम्यक् स्तुतमिति प्राशंसिषाताम् ॥ 'णु स्तुतौ'। यद्वा। नुवतिरत्र श्रवणार्थे वर्तते। अभिप्राप्तावश्रौष्टाम् ॥

आ नो विश्वान्यश्विना धत्तं राधांस्यह्रया ।
कृतं न ऋत्वियावतो मा नो रीरधतं निदे ॥ १३ ॥

आ । नः । विश्वानि । अश्विना । धत्तम् । राधांसि । अह्रया ।
कृतम् । नः । ऋत्वियऽवतः । मा । नः । रीरधतम् । निदे ॥ १३ ॥

हे vअश्विना अश्विनौ vअह्रया अह्रयाणि अह्रीतिकरणान्यलज्जाहेतूनि प्रशस्तानि vविश्वानि सर्वाणि vराधांसि धनानि vनः अस्मभ्यम् vआ vधत्तं प्रयच्छतम्। अपि च vनः अस्मान् vऋत्वियावतः। ऋतौ काले भवं प्रजोत्पादनरूपं कर्म ऋत्वियम्। तद्वतः कुरुतम्। तथा vनिदे निन्दायै निन्दकाय वा vनः अस्मान् vमा vरीरधतं मा वशं नैष्टम् ॥

यन्नासत्या परावति यद्वा स्थो अध्यम्बरे ।
अतः सहस्रनिर्णिजा रथेना यातमश्विना ॥ १४ ॥

यत् । नासत्या । पराऽवति । यत् । वा । स्थः । अधि । अम्बरे ।
अतः । सहस्रऽनिर्निजा । रथेन । आ । यातम् । अश्विना ॥ १४ ॥

हे vनासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वाश्विनौ vयत् यदि vपरावति दूरदेशे vस्थः। vयद्वा यदि च vअम्बरे। अन्तिकनामैतत्। समीपे स्थः भवथः। अधिः सप्तम्यर्थानुवादी। vअतः अस्मात्सर्वस्मात् स्थानात् vसहस्रनिर्णिजा बहुविधरूपेण vरथेन हे अश्विनौ आगच्छतम् ॥

यो वां नासत्यावृषिर्गीर्भिर्वत्सो अवीवृधत् ।
तस्मै सहस्रनिर्णिजमिषं धत्तं घृतश्चुतम् ॥ १५ ॥

यः । वाम् । नासत्यौ । ऋषिः । गीःऽभिः । वत्सः । अवीवृधत् ।
तस्मै । सहस्रऽनिर्निजम् । इषम् । धत्तम् । घृतऽश्चुतम् ॥ १५ ॥

हे vनासत्यौ vयः वत्साख्यः vऋषिः vवां युवां vगीर्भिः स्तुतिभिः vअवीवृधत् अवर्धयत् vतस्मै ऋषये vसहस्रनिर्णिजं बहुविधरूपं vघृतश्चुतं घृतं क्षरन्तीम्[1] vइषम् अन्नं vधत्तं प्रयच्छतम् ॥ ॥ २७ ॥

प्रास्मा ऊर्जं घृतश्चुतमश्विना यच्छतं युवम् ।
यो वां सुम्नाय तुष्टवद्वसुयादानुनस्पती ॥ १६ ॥

प्र । अस्मै । ऊर्जम् । घृतऽश्चुतम् । अश्विना । यच्छतम् । युवम् ।
यः । वाम् । सुम्नाय । तुस्तवत् । वसुऽयात् । दानुनः । पती इति ॥ १६ ॥

---

१. स-श्च-न-क्षरंती; श-क्षरंतं ।

हे [v]अश्विना अश्विनौ [v]अस्मै स्तोत्रे [v]घृतश्चुतं घृतधारया युक्ताम्[1] [v]ऊर्जं बलकरमन्नरसं [v]युवं युवां [v]प्र [v]यच्छतं दत्तम्। हे [v]दानुनस्पती दानस्याधिपती [v]वां युवां [v]सुम्नाय सुखार्थं [v]यः [v]तुष्टवत् स्तुयात्। यश्च [v]वसूयात् वसु धनमात्मन इच्छेत्। अस्मा इत्यन्वयः ॥

आ नो गन्तं रिशादसेमं स्तोमं पुरुभुजा ।
कृतं नः सुश्रियो नरेमा दातमभिष्टये ॥ १७ ॥

आ । नः । गन्तम् । रिशादसा । इमम् । स्तोमम् । पुरुऽभुजा ।
कृतम् । नः । सुऽश्रियः । नरा । इमा । दातम् । अभिष्टये ॥ १७ ॥

हे [v]रिशादसा रिशतां हिंसतां निरसितारौ यद्वा रिशानां हिंसकानामत्तारौ भक्षयितारौ हे [v]पुरुभुजा बहुलस्य[2] हविषो भोक्तारौ बहूनां पालकौ वा हे अश्विनौ [v]नः अस्माकम् [v]इमं [v]स्तोमं स्तोत्रम् [v]आ [v]गन्तम् अभिगच्छतम्। आगत्य च हे [v]नरा नेतारौ [v]नः अस्मान् [v]सुश्रियः सुश्रीकान् शोभनया संपदा युक्तान् [v]कृतं कुरुतम्। तदर्थम् [v]इमा इमानि पुरो वर्तमानानि पार्थिवानि[3] [v]अभिष्टये अभिप्राप्तये [v]दातं दत्तम्। ददातेर्लोटि छान्दसः शपो लुक् ॥

आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ।
राजन्तावध्वराणामश्विना यामहूतिषु ॥ १८ ॥

आ । वाम् । विश्वाभिः । ऊतिऽभिः । प्रियऽमेधाः । अहूषत ।
राजन्तौ । अध्वराणाम् । अश्विना । यामऽहूतिषु ॥ १८ ॥

हे [v]अश्विना अश्विनौ [v]यामहूतिषु यामानां यातॄणां देवानां हूतिराह्वानं येषु यागेषु तेषु [v]प्रियमेधाः प्रियमेधा एतत्संज्ञा ऋषयः [v]अध्वराणां यज्ञानां [v]राजन्तौ ईश्वरौ। राजतिरैश्वर्यकर्मा। 'अश्विनौ हि देवानामध्वर्यू आस्ताम्' (तै. ब्रा. ३. २. २. १) इति हि ब्राह्मणम्। ईदृशौ [v]विश्वाभिः सर्वाभिः [v]ऊतिभिः रक्षाभिः सहितौ [v]वां युवाम् [v]आ [v]अहूषत आह्वयन् अस्तुवन्नित्यर्थः ॥

आ नो गन्तं मयोभुवाश्विना शंभुवा युवम् ।
यो वां विपन्यू धीतिभिर्गीर्भिर्वत्सो अवीवृधत् ॥ १९ ॥

आ । नः । गन्तम् । मयःऽभुवा । अश्विना । शम्ऽभुवा । युवम् ।
यः । वाम् । विपन्यू इति । धीतिऽभिः । गीःऽभिः । वत्सः । अवीवृधत् ॥ १९ ॥

हे [v]अश्विना अश्विनौ [v]मयोभुवा मयसः सुखस्य भावयितारौ [v]शंभुवा रोगाणां शमस्य भावयितारौ [v]युवं युवां [v]नः अस्मान् [v]आ [v]गन्तम् आगच्छतम्। हे [v]विपन्यू स्तुत्यावश्विनौ [v]यः [v]वत्सः स्तोता [v]वां युवां [v]धीतिभिः कर्मभिः परिचरणैः [v]गीर्भिः स्तुतिभिश्च [v]अवीवृधत् अवर्धयत् तानस्मानिति पूर्वत्रान्वयः ॥

याभिः कण्वं मेधातिथिं याभिर्वशं दशव्रजम् ।
याभिर्गोशर्यमावतं ताभिर्नोऽवतं नरा ॥ २० ॥

---

१. घ-ज्ञ-त१-२-श–युक्तं। २. ख-भ–बहुधनस्य। ३. श–पार्थिवानि धनानि।

याभिः । कण्वम् । मेधऽअतिथिम् । याभिः । वशम् । दशऽव्रजम् ।
याभिः । गोऽशर्यम् । आवतम् । ताभिः । नः । अवतम् । नरा ॥ २० ॥

हे अश्विनौ vयाभिः ऊतिभिः vकण्वम् ऋषिं vमेधातिथिं च vआवतम् अरक्षतम्। vयाभिः च vवशम् एतत्संज्ञं[1] चावतम्। vयाभिः च vगोशर्यम्। शीर्णा गौर्यस्य स गोशर्यः शयुः। तथा चान्नातं—'शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम्' (ऋ. सं. १. ११६. २२) इति। ईदृशं[2] गोशर्यं शयुमावतमरक्षतम्। हे vनरा नेतारौ vताभिः ऊतिभिः vनः अस्मान् vअवतं रक्षतम्॥ ॥ २८ ॥

याभिर्नरा त्रसदस्युमावतं कृत्व्ये धने ।
ताभिः ष्व१स्माँ अश्विना प्रावतं वाजसातये ॥ २१ ॥

याभिः । नरा । त्रसदस्युम् । आवतम् । कृत्व्ये । धने ।
ताभिः । सु । अस्मान् । अश्विना । प्र । अवतम् । वाजऽसातये ॥ २१ ॥

हे vनरा नेतारावश्विनौ vधने vकृत्व्ये कर्तव्ये प्राप्तव्ये सति vत्रसदस्युम् एतत्संज्ञं पुरुकुत्सपुत्रमृषिं vयाभिः ऊतिभिः vआवतम् अरक्षतं हे अश्विनौ vताभिः ऊतिभिः vसु सुष्ठु vअस्मान् vप्रावतं प्ररक्षतम्। किमर्थम्। vवाजसातये वाजस्यान्नस्य बलस्य वा सातये संभजनार्थम्॥

प्र वां स्तोमाः सुवृक्तयो गिरो वर्धन्त्वश्विना ।
पुरुत्रा वृत्रहन्तमा ता नो भूतं पुरुस्पृहा ॥ २२ ॥

प्र । वाम् । स्तोमाः । सुऽवृक्तयः । गिरः । वर्धन्तु । अश्विना ।
पुरुऽत्रा । वृत्रहन्ऽतमा । ता । नः । भूतम् । पुरुऽस्पृहा ॥ २२ ॥

हे अश्विनौ vस्तोमाः प्रगीतमन्त्ररूपाः स्तुतयः vसुवृक्तयः सुप्रवृत्ताः सुष्ठु दोषवर्जिता वा vगिरः शस्त्ररूपा वाचश्च vवां युवां vप्र vवर्धन्तु प्रवर्धयन्तु। अपि च हे vपुरुत्रा बहूनां त्रातारौ हे vवृत्रहन्तमा वृत्राणां शत्रूणां हन्तृतमौ ईदृशौ हे अश्विनौ vता तौ युवां vनः अस्माकं vपुरुस्पृहा पुरु बहुलं स्पृहणीयावीप्सितव्यौ vभूतं भवतम्॥

त्रीणि पदान्यश्विनोराविः सान्ति गुहा परः ।
कवी ऋतस्य पत्मभिरर्वाग्जीवेभ्यस्परि ॥ २३ ॥

त्रीणि । पदानि । अश्विनोः । आविः । सन्ति । गुहा । परः ।
कवी इति । ऋतस्य । पत्मऽभिः । अर्वाक् । जीवेभ्यः । परि ॥ २३ ॥

vत्रीणि त्रिसंख्याकानि अनयोः vअश्विनोः देवयो रथस्य संबन्धीनि vपदानि चक्राणि vगुहा गुहायां वर्तमानान्येतावन्तं कालमदृश्यमानानि vपरः गुहायाः परस्तादृष्टिगोचरे देशे vआविः vसन्ति आविर्भवन्ति॥ सांहितिकश्छान्दसो दीर्घः। व्यत्ययेन निघाताभावः। यद्वा। सन्तीत्येतत् अस्तेः शतरि जसि रूपम्॥ आविर्भूतानि दृश्यन्ते। आश्विनस्य रथस्य चक्रत्रयोपेतत्वं च 'रथश्चिचक्रः

१. ज्ञ-त१-२-एतत्संज्ञं दशव्रजं। २. ख-भ-तादृशं।

परि वर्तते ' (ऋ. सं. ४. ३६. १) इत्यादिनिगमान्तरे प्रसिद्धम् । [v]कवी क्रान्तदर्शिनावश्विनौ [v]ऋतस्य सत्यस्योदकस्य यज्ञस्य वा हेतुभूतैः [v]पत्मभिः यैः पदैः [v]जीवेभ्यस्परि । परिरुपर्यर्थः ' पञ्चम्याः परावध्यर्थे ' इति सत्वम् । जीवानामुपरि जीवेष्वस्मासु [v]अर्वाक् अभिमुखम् । आगच्छत मिति शेषः । तानि पदानीदानीमुपलभ्यन्त इत्यन्वयः ॥ ॥ २९ ॥

' आ नूनम् ' इत्येकविंशत्यृचं चतुर्थं सूक्तं शशकर्णस्यार्षमश्विदेवत्यम् । विंश्येकविंश्यौ द्वितीया तृतीये चेति चतस्रो गायत्र्यः प्रथमा चतुर्थी षष्ठी चतुर्दशी पञ्चदशी चेति पञ्च बृहत्यः पञ्चमी ककु ' मध्यमश्चेत्ककुप् ' (अनु. ५. ३) इत्युक्तलक्षणसद्भावात् । दशमी त्रिष्टुबेकादशी विराड्द्वादश जगती शिष्टा अनुष्टुभः । तथा चानुक्रान्तम्—' आ नूनं सैका शशकर्णोऽन्त्ये गायत्र्यावुपाद्ये चाद्य चतुर्थी षष्ठी चतुर्दश्याद्ये च बृहत्यः पञ्चमी ककुब्दशम्याद्यास्त्रिष्टुब्विराड्जगत्यः ' इति । अक्षोर्यो ब्राह्मणाच्छंसिनोऽतिरिक्तोक्थ इदं सूक्तम् । सूच्यते हि—' आ नूनमश्विना तं वां रथम् ' (आश्व श्रौ. ९. ११) इति ॥

आ नूनमश्विना युवं वत्सस्य गन्तमवसे ।
प्रास्मै यच्छतमवृकं पृथु च्छर्दिर्युयुतं या अरातयः ॥ १ ॥

आ । नूनम् । अश्विना । युवम् । वत्सस्य । गन्तम् । अवसे ।
प्र । अस्मै । यच्छतम् । अवृकम् । पृथु । छर्दिः । युयुतम् । याः । अरातयः ॥ १ ॥

हे [v]अश्विना अश्विनौ [v]युवं युवां [v]वत्सस्य स्तोतुर्मम [v]अवसे रक्षणार्थं [v]नूनम् अवश्यम् [v]आ [v]गन्तम् आगच्छतम् । आगत्य च [v]अस्मै ऋषये [v]अवृकं बाधकरहितं [v]पृथु विस्तीर्णं [v]छर्दिः गृहं [v]प्र [v]यच्छतं प्रदत्तम् । तथा [v]याः [v]अरातयः अदानशीलाः शत्रुभूताः प्रजास्ताः [v]युयुतं स्तोतृभ्यः पृथक्कुरुतम् ॥

यदन्तरिक्षे यदिवि यत्पञ्च मानुषाँ अनु । नृम्णं तद्धत्तमश्विना ॥ २ ॥

यत् । अन्तरिक्षे । यत् । दिवि । यत् । पञ्च । मानुषान् । अनु ।
नृम्णम् । तत् । धत्तम् । अश्विना ॥ २ ॥

[v]अन्तरिक्षे गन्धर्वादिभिः सेविते मध्यमे लोके [v]यत् [v]नृम्णं धनमस्ति । [v]दिवि द्युलोके [v]यत् अस्ति । [v]पञ्च पञ्चसंख्याकान् [v]मानुषान् मनुष्यान् [v]अनु । लक्षणेऽनोः कर्मप्रवचनीयत्वम् ' कर्मप्रवचनीययुक्ते० ' इति द्वितीया । पञ्चविधा मनुष्या निषादपञ्चमाश्चत्वारो वर्णा यत्र वर्तन्ते तः चेह लोके [v]यत् नृम्णं धनमस्ति । हे अश्विनौ [v]तत् त्रिविधं नृम्णं धनं [v]धत्तम् अस्मभ्यं प्रयच्छतम् ।

ये वां दंसांस्यश्विना विप्रासः परिमामृशुः । एवेत्काण्वस्य बोधतम् ॥ ३ ॥

ये । वाम् । दंसांसि । अश्विना । विप्रासः । परिऽममृशुः । एव । इत् । काण्वस्य । बोधतम् ॥ ३

हे अश्विनौ [v]वां युवयोः संबन्धीनि [v]दंसांसि कर्माणि परिचरणात्मकानि [v]ये [v]विप्रासः विप्र मेधाविनो यजमानाः [v]परिमामृशुः परिमृशन्ति पुनःपुनः स्पृशन्ति । अनुतिष्ठन्तीत्यर्थः । यथ तदीयानि[1] परिचरणानि युवां जानीथः [v]एवेत् एवमेव [v]काण्वस्य कण्वपुत्रस्य मम परिचरणं [v]बोधतः अवगच्छतम् ॥

---

१. ख-भ- तदानींतनानि; झ- तदादीनानि; त- तदीनानि; न- तदानानि ।

अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते ।
अयं सोमो मधुमान्वाजिनीवसू येन वृत्रं चिकेतथः ॥ ४ ॥

अयम् । वाम् । घर्मः । अश्विना । स्तोमेन । परि । सिच्यते ।
अयम् । सोमः । मधुऽमान् । वाजिनीवसू इति वाजिनीऽवसू । येन । वृत्रम् । चिकेतथः ॥४॥

हे अश्विनौ [v]वां युवयोः संबन्धी [v]अयं [v]घर्मः प्रवर्ग्यं [v]स्तोमेन स्तोत्रेण ऋक्सामरूपेण [v]परि [v]षिच्यते आर्द्रीक्रियते । यथा युवयोस्तृप्तिकरो भवति तथा क्रियत इत्यर्थः । यद्वा । घर्मस्य हविष आधारभूतो महावीरो घर्मः । स स्तोमेन स्तोतव्येन पयसा परि षिच्यते आसिच्यते वां युवयोरर्थम् । अपि च हे [v]वाजिनीवसू अन्नवद्धनौ[1] [v]अयं [v]सोमः तार्तीयसवनिको [v]मधुमान् माधुर्यवान् युवाभ्यां दीयते । [v]येन युवां [v]वृत्रम् आवरकं शत्रुं [v]चिकेतथः हन्तव्यतया जानीथः । अयं घर्मः सोमश्चेत्युभयत्रान्वयः[2] ॥

यदप्सु यद्वनस्पतौ यदोषधीषु पुरुदंससा कृतम् । तेन माविष्टमश्विना ॥५॥

यत् । अप्ऽसु । यत् । वनस्पतौ । यत् । ओषधीषु । पुरुऽदंससा । कृतम् ।
तेन । मा । अविष्टम् । अश्विना ॥ ५ ॥

हे [v]पुरुदंससा बहुकर्माणावश्विनौ [v]अप्सु उदकेषु [v]यत् भेषजं [v]कृतं युवामकार्ष्टम् । करोतेर्लुङि 'मन्त्रे घस०' इत्यादिना च्लेर्लुक् । तथा [v]वनस्पतौ । वनानां पतिर्वनस्पतिः । पारस्करादित्वात् सुट् । 'उभे वनस्पत्यादिषु०' इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् । जातौ चेदमेकवचनम् । वनस्पतिषु वृक्षेषु [v]यत् च भेषजं युवामकुरुतम् । [v]ओषधीषु । ओषः पाक आसु धीयते इत्योषधयो व्रीह्यादयः ॥ 'कर्मण्यधिकरणे च' इति दधातेरधिकरणे किप्रत्ययः । दासीभारादिषु पठितत्वात् पूर्वपदप्रकृतिस्वरत्वम् । 'ओषधेश्च विभक्तावप्रथमायाम्' (पा. सू. ६. ३. १३२) इति दीर्घः ॥ व्रीह्यादिष्वोषधीषु च [v]यत् भेषजं कृतं युवामकार्ष्टम् । हे [v]अश्विना अश्विनौ [v]तेन सर्वेण भेषजेन [v]मा माम् [v]अविष्टं रक्षतम् । अवतेर्लोटि 'सिब्बहुलम्०' इति बहुलग्रहणात् सिप् । तत इट् ॥ ॥३०॥

यन्नासत्या भुरण्यथो यद्वा देव भिषज्यथः ।
अयं वां वत्सो मतिभिर्न विन्धते हविष्मन्तं हि गच्छथः ॥ ६ ॥

यत् । नासत्या । भुरण्यथः । यत् । वा । देवा । भिषज्यथः ।
अयम् । वाम् । वत्सः । मतिऽभिः । न । विन्धते । हविष्मन्तम् । हि । गच्छथः ॥ ६ ॥

हे [v]नासत्या सत्यस्वभावावश्विनौ [v]यत् यौ युवां [v]भुरण्यथः सर्वं जगत्पोषयथः । 'भुरण् धारणपोषणयोः' । कण्ड्वादिः । हे [v]देवा दानादिगुणयुक्तावश्विनौ । छान्दसः सांहितिको ह्रस्वः । [v]यद्वा यौ च युवां [v]भिषज्यथः सर्वस्य प्राणिजातस्य भैषज्यं रोगोपशमनं कुरुथः । 'भिषज् चिकित्सायाम्' । अयमपि कण्ड्वादिः । तौ [v]वां युवाम् [v]अयं [v]वत्सः स्तोता [v]मतिभिः मननीयैः केवलैः स्तोत्रैः [v]न [v]विन्धते न विन्दते न लभते । वर्णविकारश्छान्दसः । कुत इति चेत् उच्यते । [v]हविष्मन्तं हविर्भिर्युक्तं स्तोतारं [v]हि युवां [v]गच्छथः । तस्माद्युवां हविर्भिर्युक्तैः स्तोत्रैः प्रसीदथ इति भावः ॥

---

१. श–अन्नधनौ । २. ज्ञ-त-१-२-४-श–स्तोमश्चे° ।

प्रवर्ग्ये महावीरे गोपयस्यासिच्यमाने 'आ नूनम्' इत्येषानुवक्तव्या। सूत्र्यते हि—'आ नूनमश्विनोर्ऋषिरिति गत्व आ सुते सिञ्चत श्रियमित्याजे' (आश्व. श्रौ. ४. ७) इति ॥

आ नूनमश्विनोर्ऋषिः स्तोमं चिकेत वामया ।
आ सोमं मधुमत्तमं घर्मं सिञ्चादथर्वणि ॥ ७ ॥

आ । नूनम् । अश्विनोः । ऋषिः । स्तोमम् । चिकेत । वामया ।
आ । सोमम् । मधुमत्ऽतमम् । घर्मम् । सिञ्चात् । अथर्वणि ॥ ७ ॥

हे अश्विनौ यदा युवामागच्छेयाथां तदानीं युवयोः vअश्विनोः vस्तोमं स्तोत्रम् vऋषिः मन्त्रद्रष्टा vवामया वननीययोत्कृष्टया[1] बुद्ध्या vनूनम् अवश्यम् vआ vचिकेत अभिजानीयात्। 'कित ज्ञाने'। छान्दसो लिट्। तथा vमधुमत्तमम् अतिशयेन मधुरं vसोमं vघर्मं प्रवर्ग्यसंबन्धि घर्माख्यं हविश्च vअथर्वणि अहिंसके अग्नौ। यद्वा। अथर्वा ऋषिः। तेन निर्मथितोऽग्निः उपचारादथर्वेत्युच्यते। अथर्वणा निर्मथनं च 'त्वामग्ने पुष्करादधि' (ऋ. सं. ६. १६. १३) इत्यादिनिगमान्तरेऽवगम्यते। तस्मिन्नग्नौ vआ vसिञ्चात् आसिञ्चेत् प्रक्षिपेत्। अतः शीघ्रमागच्छतमित्यर्थः ॥

आ नूनं रघुवर्तनिं रथं तिष्ठाथो अश्विना ।
आ वां स्तोमा इमे मम नभो न चुच्यवीरत ॥ ८ ॥

आ । नूनम् । रघुऽवर्तनिम् । रथम् । तिष्ठाथः । अश्विना ।
आ । वाम् । स्तोमाः । इमे । मम । नभः । न । चुच्यवीरत ॥ ८ ॥

हे अश्विनौ vरघुवर्तनिं लघुवर्तनं शीघ्रगमनं vरथं vनूनम् अवश्यमिदानीमेव vआ vतिष्ठाथः आतिष्ठतम् अधिरोहतम्। 'वालमूललम्बलम्' इति लघोर्लकारस्य रेफः। vमम मदीयाः vइमे vस्तोमाः स्तोत्राणि vनभो vन सूर्यमिव तेजस्विनौ vवां युवाम् vआ vचुच्यवीरत आच्यवन्ते अभिगच्छन्ति। यद्वा। च्यवतिरत्र अन्तर्भावितण्यर्थः। आच्यावयन्ति[2] युवामभिप्रापयन्ति ॥

यद्द्य वां नासत्योक्थैरा चुच्युवीमहि ।
यद्वा वाणीभिरश्विनेवेत्काण्वस्य बोधतम् ॥ ९ ॥

यत् । अद्य । वाम् । नासत्या । उक्थैः । आऽचुच्युवीमहि ।
यत् । वा । वाणीभिः । अश्विना । एव । इत् । काण्वस्य । बोधतम् ॥ ९ ॥

हे नासत्यौ vअद्य इदानीम् vउक्थैः शस्त्रैः vयत् यथा[3] येन प्रकारेण vवां युवाम् vआचुच्युवीमहि आगमयेम हे अश्विनौ vयद्वा यथा vवाणीभिः उक्थव्यतिरिक्ताभिरपि वाग्भिः स्तुतिभिः युवामागमयेम vएवेत् एवमेव तथैव vकाण्वस्य मम तदुक्थादिकं vबोधतम् अवगच्छतम् ॥

यद्वां कक्षीवाँ उत यद्वयश्व ऋषिर्यद्वां दीर्घतमा जुहाव ।
पृथी यद्वैन्यः सादनेष्वेवेदतो अश्विना चेतयेथाम् ॥ १० ॥

---

१. ज्ञ-त-१-२-४-श–मननीय*। २. ज्ञ-त-१-२-४-श–आच्यवयंति। ३. श–यदा।

यत् । वाम् । कक्षीवान् । उत । यत् । विऽअश्वः । ऋषिः । यत् । वाम् । दीर्घऽतमाः । जुहाव ।
पृथी । यत् । वाम् । वैन्यः । सदनेषु । एव । इत् । अतः । अश्विना । चेतयेथाम् ॥ १० ॥

हे अश्विनौ ᵛवां युवां ᵛकक्षीवान् ᵛऋषिः ᵛयत् यथा[1] ᵛजुहाव तुष्टाव । ᵛउत अपि च ᵛव्यश्वः एतत्संज्ञः ऋषिश्च ᵛयत् यथा जुहाव । ᵛयत् यथा च ᵛवां युवां ᵛदीर्घतमाः ऋषिर्जुहाव । ᵛसदनेषु यज्ञगृहे[2] ᵛवैन्यः वेनस्य पुत्रः ᵛपृथी एतत्संज्ञो राजर्षिः ᵛवां युवां ᵛयत् यथा जुहाव तुष्टाव । ᵛएवेत् एवमेव स्तुवतो मम ᵛअतः इदं स्तोत्रम् । इदंशब्दात् द्वितीयार्थे तसिः । हे अश्विनौ ᵛचेतयेथां जानीतम् ॥ ॥ ३१ ॥

यातं छर्दिष्पा उत नः परस्पा भूतं जगत्पा उत नस्तनूपा ।
वर्तिस्तोकाय तनयाय यातम् ॥ ११ ॥

यातम् । छर्दिःऽपौ । उत । नः । परःऽपा । भूतम् । जगत्ऽपौ । उत । नः । तनूऽपा ।
वर्तिः । तोकाय । तनयाय । यातम् ॥ ११ ॥

हे अश्विनौ ᵛछर्दिष्पौ । छर्दिरिति गृहनाम । तस्यास्मदीयस्य पालकौ सन्तौ युवां ᵛयातम्[3] आगच्छतम् । ᵛउत अपि च ᵛनः अस्माकं ᵛपरस्पा परमतिशयेन पालकौ ᵛभूतं भवतम् । पारस्करादित्वात्सुट् । तथा ᵛजगत्पौ सर्वस्य जगतो जङ्गमस्य प्राणिजातस्यास्मदीयस्य पालकौ भवतम् । ᵛउत अपि च ᵛनः अस्माकं ᵛतनूपा तनूनां शरीराणां तनयानां वा पालकौ भवतम् । एतत्सर्वार्थं ᵛतोकाय तोकस्य पुत्रस्य ᵛतनयाय तनयस्य पौत्रस्य चास्मदीयस्य ᵛवर्तिः गृहं ᵛयातं गच्छतम् ॥

यदिन्द्रेण सरथं याथो अश्विना यद्वा वायुना भवथः समोकसा ।
यदादित्येभिर्ऋभुभिः सजोषसा यद्वा विष्णोर्विक्रमणेषु तिष्ठथः ॥ १२ ॥

यत् । इन्द्रेण । सऽरथम् । याथः । अश्विना । यत् । वा । वायुना । भवथः । सम्ऽओकसा ।
यत् । आदित्येभिः । ऋभुऽभिः । सऽजोषसा । यत् । वा । विष्णोः । विऽक्रमणेषु । तिष्ठथः ॥ १२ ॥

हे अश्विनौ ᵛइन्द्रेण सह ᵛसरथं समानमेकं रथमास्थाय ᵛयत् यदि ᵛयाथः गच्छथः । ᵛयद्वा यदि वा ᵛवायुना सह ᵛसमोकसा समाननिवासौ ᵛभवथः । ᵛयत् यदि वा ᵛआदित्येभिः अदितिपुत्रैर्मित्रादिभिः[4] ᵛऋभुभिः च ᵛसजोषसा सह प्रीयमाणौ वर्तेथे । ᵛयद्वा यदि वा ᵛविष्णोर्विक्रमणेषु विष्णुना देवेन विक्रान्तेषु त्रिषु लोकेषु ᵛतिष्ठथः । अतः सर्वस्मादपि स्थानादागच्छतमिति शेषः ॥

यदद्याश्विनावहं हुवेय वाजसातये ।
यत्पृत्सु तुर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः ॥ १३ ॥

यत् । अद्य । अश्विनौ । अहम् । हुवेय । वाजऽसातये ।
यत् । पृत्ऽसु । तुर्वणे । सहः । तत् । श्रेष्ठम् । अश्विनोः । अवः ॥ १३ ॥

---

१. ख-१–यद्वार्षि; ज-झ-त-श–यदा; भ–यद्वावी । २. झ-त-१-२-श– यज्ञगृहेषु । ३. श–आयातं । ४. झ-त१-२-४-श–अदितेः पुत्रै° ।

ᵛयत् यदा ᵛअहम् ᵛअश्विनौ ᵛवाजसातये संग्रामार्थं ᵛहुवेय आह्वयेय[1] ᵛअद्य इदानीं तावागच्छतमिति शेषः । ᵛपृत्सु पृतनासु संग्रामेषु ᵛतुर्वणे शत्रूणां हिंसने ᵛयत् ᵛसहः शत्रूणामभिभवित्रं रक्षणम् ᵛअश्विनोः ᵛतत् ᵛअवः रक्षणं ᵛश्रेष्ठं प्रशस्यतमम् । अतस्तावाह्वयामीति भावः ॥

आ नूनं यातमश्विनेमा हव्यानि वां हिता ।
इमे सोमासो अधि तुर्वशे यदाविमे कण्वेषु वामथ ॥ १४ ॥

आ । नूनम् । यातम् । अश्विना । इमा । हव्यानि । वाम् । हिता ।
इमे । सोमासः । अधि । तुर्वशे । यदौ । इमे । कण्वेषु । वाम् । अथ ॥ १४ ॥

हे अश्विनौ ᵛनूनम् अवश्यम् ᵛआ ᵛयातम् आगच्छतम् । ᵛइमा इमानि पुरोवर्तीनि ᵛहव्यानि हवींषि ᵛवां[2] युवाभ्यां[2] ᵛहिता हितानि । यद्वा । युवयोरर्थं विहितानि कृतानि । ᵛइमे च ᵛसोमासः सोमाः ᵛतुर्वशे ᵛयदौ च वर्तमानाः । वां युवाभ्यां युवयोरर्थे संस्कृता वा । अधिः सप्तम्यर्थानुवादकः । ᵛअथ अपि च ᵛकण्वेषु कण्वपुत्रेष्वस्मासु[3] च ᵛइमे सोमाः ᵛवां युवाभ्यां दत्ताः । अत आयातमित्यर्थः ॥

यन्नासत्या पराके अर्वाके अस्ति भेषजम् ।
तेन नूनं विमदाय प्रचेतसा छर्दिर्वत्साय यच्छतम् ॥ १५ ॥

यत् । नासत्या । पराके । अर्वाके । अस्ति । भेषजम् ।
तेन । नूनम् । विऽमदाय । प्रऽचेतसा । छर्दिः । वत्साय । यच्छतम् ॥ १५ ॥

हे नासत्यावश्विनौ ᵛपराके दूरदेशे ᵛअर्वाके समीपे च ᵛयत् युवयोः संबन्धि ᵛभेषजं रोगोपशमनकारणम्[4] ᵛअस्ति ᵛतेन भेषजेन सहितं ᵛछर्दिः गृहं हे ᵛप्रचेतसा प्रकृष्टज्ञानावश्विनौ ᵛविमदाय । लुप्तोपममेतत् । एतत्संज्ञायेत्यर्थे ᵛवत्साय ᵛनूनम् अवश्यं प्रयच्छतम् ॥ ॥ ३२ ॥

अभुत्स्यु प्र देव्या साकं वाचाहमश्विनोः ।
व्यावर्देव्या मतिं वि रातिं मर्त्येभ्यः ॥ १६ ॥

अभुत्सि । ऊँ इति । प्र । देव्या । साकम् । वाचा । अहम् । अश्विनोः ।
वि । आवः । देवि । आ । मतिम् । वि । रातिम् । मर्त्येभ्यः ॥ १६ ॥

ᵛअश्विनोः संबन्धिन्या ᵛदेव्या द्योतमानया ᵛवाचा स्तुतिरूपया ᵛसाकं सह ᵛअहं ᵛप्र ᵛअभुत्सि प्रबुद्धोऽस्मि । ᵛउ इति पूरणः । हे ᵛदेवि द्योतमान उषः त्वं च ᵛमतिं मया कृतां स्तुतिम् ᵛआ अभिलक्ष्य ᵛव्यावः तमांसि विवृणु अपगमय । प्रकाशयेत्यर्थः । वृणोतेश्छान्दसे लुङि ' मन्त्रे घस० ' इत्यादिना च्लेर्लुक् । ' छन्दस्यपि दृश्यते ' इत्याडागमः । अपि च ᵛमर्त्येभ्यः मनुष्येभ्यः स्तोतृभ्योऽस्मभ्यं ᵛरातिं धनं ᵛवि आवः प्रकाशय ॥

प्र बोधयोषो अश्विना प्र देवि सूनृते महि ।
प्र यज्ञहोतरानुषक्प्र मदाय श्रवो बृहत् ॥ १७ ॥

---

१. ज्ञ-त१-२-४-श–आह्वये । २. ज्ञ-त१-२-४–युवाभ्यां; श–वां । ३. श–कण्वगोत्रेष्व° । ४. घ-ज-ज्ञ–रोगोपशमनकरणं; ज्ञ-श–रोगापशमनकारणं; त३–रोगाय शमनकरणं ।

प्र। बोधय। उषः। अश्विना। प्र। देवि। सुनृते। महि।
प्र। यज्ञऽहोतः। आनुषक्। प्र। मदाय। श्रवः। बृहत्॥ १७॥

हे vउषः अश्विनौ देवौ vप्र vबोधय अस्मत्स्तोत्रस्य श्रवणार्थम्। हे vदेवि दानादिगुणयुक्ते हे vसूनृते सुष्ठु नेत्रि हे vमहि महति इत्थंमहाभागा त्वमश्विनौ vप्र बोधय। हे vयज्ञहोतः यज्ञानां यष्टव्यानां देवानामाह्वातर्होतर्वा vआनुषक् अनुषक्तं संततं यथा भवति तथाश्विनौ स्तुतिभिः vप्र बोधय। तथा vमदाय अश्विनोर्मदोत्पादनार्थं vबृहत् महत् vश्रवः श्रवणीयं सोमलक्षणमन्नमस्माभिः कल्पितम्॥

यदुषो यासि भानुना सं सूर्येण रोचसे।
आ ह्ययमश्विनो रथो वर्तिर्याति नृपाय्यम्॥ १८॥

यत्। उषः। यासि। भानुना। सम्। सूर्येण। रोचसे।
आ। ह। अयम्। अश्विनोः। रथः। वर्तिः। याति। नृऽपाय्यम्॥ १८॥

हे vउषः vभानुना दीप्त्या सह vयत् यदा vयासि गच्छसि तदानीं vसूर्येण vसं vरोचसे सम्यग्दीप्यसे। अपि च तस्मिन् समये vअश्विनोः vअयं vरथः vनृपाय्यं यत् नृभिर्नेतृभिर्ऋत्विग्भिः पालनीयं vवर्तिः यज्ञगृहम् vआ vयाति vह आगच्छति खलु॥

यदापीतासो अंशवो गावो न दुह्र ऊधभिः।
यद्वा वाणीरनूषत प्र देवयन्तो अश्विना॥ १९॥

यत्। आऽपीतासः। अंशवः। गावः। न। दुह्रे। ऊधऽभिः।
यत्। वा। वाणीः। अनूषत। प्र। देवऽयन्तः। अश्विना॥ १९॥

vयत् यदा vआपीतासः आ समन्तात् पीतवर्णाः vअंशवः सोमलताः vऊधभिः vगावो vन गाव इव vदुह्रे रसं[1] दुहते[1]। 'लोपस्त आत्मनेपदेषु' इति तलोपः[2]। 'बहुलं छन्दसि' इति रुडागमः। vयद्वा यदा च vदेवयन्तः देवान् कामयमाना ऋत्विजः vवाणीः वाचः स्तुतीः vअनूषत अस्तुवन्। अकुर्वन्नित्यर्थः। तदाश्विनौ देवौ प्रावतं प्ररक्षतम्॥

प्र द्युम्नाय प्र शवसे प्र नृषाह्याय शर्मणे। प्र दक्षाय प्रचेतसा॥ २०॥

प्र। द्युम्नाय। प्र। शवसे। प्र। नृऽसह्याय। शर्मणे। प्र। दक्षाय। प्रऽचेतसा॥ २०॥

vप्रचेतसा प्रकृष्टज्ञानावश्विनौ vद्युम्नाय द्योतमानायान्नाय यशसे वा। तादर्थ्ये चतुर्थी। द्युम्नार्थमस्मान् प्ररक्षतम्। vशवसे बलाय च प्ररक्षतम्। vनृषह्याय[3] नृभिः सोढव्याय vशर्मणे सुखाय च प्ररक्षतम्। vदक्षाय वृद्ध्यर्थं प्ररक्षतम्। यद्वा। द्युम्नायेत्यादौ 'क्रियाग्रहणमपि कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थी। द्युम्नादीन्यस्मभ्यं प्रयच्छतमित्यर्थः॥

यन्नूनं धीभिरश्विना पितुर्योना निषीदथः। यद्वा सुम्नेभिरुक्थ्या॥ २१॥

---

१. ख-भ- संदुहते; घ-दुहते; ज्ञ-त२-४-असंदुहते; न-सं संदुहते। २. ख-ज्ञ-त२-श-लोपः; त४- ललोपः। ३. ख-नृषाह्याय; श-नृषह्ये।

यत्। नूनम्। धीभिः। अश्विना। पितुः। योनौ। निऽसीदथः।
यत्। वा। सुम्नेभिः। उक्थ्या ॥ २१ ॥

हे अश्विनौ ᵛपितुः पालयितुर्युलोकस्य संबन्धिनि ᵛयोना योनौ स्थाने ᵛयत्[१] यदि[१] ᵛधीभिः कर्मभिः सह ᵛनिषीदथः निवसथः। ᵛयद्वा यदि वा हे ᵛउक्थ्या उक्थ्यौ प्रशस्यौ ᵛसुम्नेभिः सुम्नैः सुखैः सह निवसथः। तदास्माभिः स्तुतौ सन्तावागच्छतमिति शेषः। अथवा। पितुः पालयितुर्यजमानस्य संबन्धिनि योनौ यज्ञगृहे धीभिः स्तुतिभिः सार्धं यदि निवसथः यदि च सुम्नैः सुखकरैर्हविर्भिश्च सह निवसथः तर्ह्यागच्छतम्। ᵛनूनम् इति पदपूरणः। उक्तं च यास्केन—'अथापि पदपूरणः। नूनं सा ते प्रति वरं जरित्रे' (निरु. १. ७) इति ॥ ॥ ३३ ॥

'यत्स्थः' इति षड्चं पञ्चमं सूक्तं कण्वपुत्रस्य प्रगाथस्यार्षमाश्विनम्। आद्या बृहती। द्वितीया मध्येज्योतिस्त्रिष्टुप् 'यतोऽष्टकस्ततो ज्योतिः' (अनु. ९, ८) इत्युक्तलक्षणसद्भावात्। तृतीयानुष्टुप् चतुर्थी आस्तारपङ्क्तिः। 'अन्त्यौ चेदास्तारपङ्क्तिः' (अनु. ८. ७) इति हि तल्लक्षणम्। पञ्चमी बृहती षष्ठी सतोबृहती। तथा चानुक्रान्तं—'यत्स्थः षट् प्रगाथोऽपश्यद्बृहती मध्येज्योतिरनुष्टुबास्तारपङ्क्तिः प्रगाथः' इति। प्रातरनुवाकाश्विने क्रतौ बार्हते छन्दस्याश्विनशस्त्रे चेदं सूक्तम्। सूय्यते हि—'द्युम्नी वां यत्स्थ इति बार्हतम्' (आश्व. श्रौ. ४. १५) इति ॥

यत्स्थो दीर्घप्रसद्मनि यद्वादो रोचने दिवः।
यद्वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना ॥ १ ॥

यत्। स्थः। दीर्घऽप्रसद्मनि। यत्। वा। अदः। रोचने। दिवः।
यत्। वा। समुद्रे। अधि। आऽकृते। गृहे। अतः। आ। यातम्। अश्विना ॥ १ ॥

हे अश्विनौ ᵛदीर्घप्रसद्मनि। प्रसीदन्ति एषु देवा इति प्रसद्मानो यज्ञगृहाः। दीर्घा आयताः प्रसद्मानो यस्मिन्[२] तस्मिँल्लोके[२] ᵛयत् यदि ᵛस्थः भवथः वर्तेथे। ᵛयद्वा यदि वा ᵛअदः अमुष्मिन् ᵛदिवः द्युलोकस्य संबन्धिनि ᵛरोचने रोचमाने स्थाने भवथः। ᵛयद्वा यदि वा ᵛसमुद्रे अन्तरिक्षे। समुद्रवन्त्यस्मादाप इति समुद्रमन्तरिक्षम्। तस्मिन्। ᵛआकृते निर्मिते ᵛगृहे अधिवसथः। ᵛअतः त्रितयादपि स्थानात् हे अश्विनौ ᵛआ ᵛयातम् आगच्छतम् ॥

यद्वा यज्ञं मनवे संमिमिक्षथुरेवेत्काण्वस्य बोधतम्।
बृहस्पतिं विश्वान्देवाँ अहं हुव इन्द्राविष्णू अश्विनावाशुहेषसा ॥ २ ॥

यत्। वा। यज्ञम्। मनवे। सम्ऽमिमिक्षथुः। एव। इत्। काण्वस्य। बोधतम्।
बृहस्पतिम्। विश्वान्। देवान्। अहम्। हुवे। इन्द्राविष्णू इति। अश्विनौ। आशुऽहेषसा ॥ २ ॥

हे अश्विनौ ᵛयद्वा यथा वा येन वा[३] प्रकारेण ᵛमनवे प्रजापतये यजमानाय ᵛयज्ञं ᵛसंमिमिक्षथुः संसिक्तवन्तौ युवां कृतवन्तौ ᵛएवेत् एवमेव ᵛकाण्वस्य कण्वगोत्रस्य मम यज्ञं कर्तुं ᵛबोधतम् अवगच्छतम्। अपि च ᵛबृहस्पतिं बृहतां देवानां पतिं देवपुरोहितं ᵛविश्वान् सर्वान्[४] मित्रादीन् ᵛदेवान् च ᵛइन्द्राविष्णू च ᵛआशुहेषसा शीघ्राश्वौ। यद्वा। 'हेषृ शब्दे'। शीघ्रं सर्वत्र शब्द्यमानौ[५] स्तूयमानौ ᵛअश्विनौ च ᵛअहं ᵛहुवे आह्वये ॥

१. ख-भ-यद्यदा; घ-यदि। २. ख-श-अस्मिन् तस्मि°; घ-यस्मि°। ३. ज्ञ-त१-२-श-'वा' नास्ति। ४. ज्ञ-त१-२-४-य-श-देवान्। ५. ख-भ-शब्दमानौ; श-शिष्यमाणौ।

त्या न्व१श्विना हुवे सुदंससा गृभे कृता ।
ययोरस्ति प्र णः सख्यं देवेष्वध्याप्यम् ॥ ३ ॥

त्या । नु । अश्विना । हुवे । सुऽदंससा । गृभे । कृता ।
ययोः । अस्ति । प्र । नः । सख्यम् । देवेषु । अधि । आप्यम् ॥ ३ ॥

vत्या त्यौ पूर्वोक्तगुणावश्विनौ vनु क्षिप्रम् अहम् vहुवे आह्वयामि । कीदृशौ । vसुदंससा शोभनकर्माणौ vगृभे ग्रहे[1] ग्रहणायास्माभिर्दत्तानां हविषां स्वीकरणायास्मभ्यं धनदानाय वा vकृता कृतौ प्रादुर्भूतौ vदेवेषु मध्ये । अधिः सप्तम्यर्थानुवादी । vययोः अश्विनोः vआप्यम् आप्तव्यं vनः अस्माकं vसख्यं सखित्वं vप्र vअस्ति प्रभवति उत्कर्षेण वर्तते तौ हुव इत्यन्वयः ॥

ययोरधि प्र यज्ञा असूरे सन्ति सूरयः ।
ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु ॥ ४ ॥

ययोः । अधि । प्र । यज्ञाः । असूरे । सन्ति । सूरयः ।
ता । यज्ञस्य । अध्वरस्य । प्रऽचेतसा । स्वधाभिः । या । पिबतः । सोम्यम् । मधु ॥ ४ ॥

vययोः अश्विनोः vअधि उपरि vयज्ञाः ज्योतिष्टोमादयः सर्वे यागाः vप्र vसन्ति प्रभवन्ति[2] । छिन्नस्य यज्ञशिरसोऽश्विभ्यां संधानात् । तथा च 'यज्ञस्य शिरोऽच्छिद्यत' इत्युपक्रम्य तैत्तिरीयकं– 'तावेतद्यज्ञशिरः प्रत्यधत्तां यदाश्विनो गृह्यते यज्ञस्य निष्कृत्यै' (तै. सं. ६. ४. ९. १) इति । vअसूरे स्तोतृरहितेऽपि देशे ययोश्च vसूरयः स्तोतारः सन्ति तावश्विनौ vअध्वरस्य हिंसाप्रत्यवायरहितस्य vयज्ञस्य ज्योतिष्टोमादेः vप्रचेतसा प्रकृष्टं ज्ञातारौ vस्वधाभिः बलहेतुभिः स्तुतिभिराह्वयामीति शेषः । vया यावश्विनौ vसोम्यं सोममयं vमधु मधुरं सोमरसं vपिबतः ॥

यदद्याश्विनावपाग्यत्प्राक्स्थो वाजिनीवसू ।
यद्द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतम् ॥ ५ ॥

यत् । अद्य । अश्विनौ । अपाक् । यत् । प्राक् । स्थः । वाजिनीवसु इति वाजिनीऽवसू ।
यत् । द्रुह्यवि । अनवि । तुर्वशे । यदौ । हुवे । वाम् । अथ । मा । आ । गतम् ॥ ५ ॥

हे vअश्विनौ vअद्य इदानीं vयत् यदि vअपाक् प्रतीच्यां दिशि vस्थः भवथः वर्तेथे । हे vवाजिनीवसू अन्नवद्धनौ vयत् यदि vप्राक् प्राच्यां दिशि स्थः भवथः । vयत् यदि वा द्रुह्युप्रभृतिषु[3] चतुर्षु स्तोतृषु[3] संनिहितौ भवथः । एवं सर्वत्र संनिहितौ vवां युवां vहुवे अहमाह्वयामि । vअथ अनन्तरमेव vमा माम् vआ vगतम् आगच्छतम् ॥

यदन्तरिक्षे पतथः पुरुभुजा यद्वेमे रोदसी अनु ।
यद्वा स्वधाभिरधितिष्ठथो रथमत आ यातमश्विना ॥ ६ ॥

यत् । अन्तरिक्षे । पतथः । पुरुऽभुजा । यत् । वा । इमे इति । रोदसी इति । अनु ।
यत् । वा । स्वधाभिः । अधिऽतिष्ठथः । रथम् । अतः । आ । यातम् । अश्विना ॥ ६ ॥

१. ख-ज्ञ-ञ्ञ-त२-३-न-भ–गृहे'। २. ख-भ–भवंति । ३. ज्ञ–द्रुह्यवि अनवि तुर्वशे यदौ ।

हे vपुरुभुजा बहूनां पालयितारौ बहुलहविषो भोक्तारौ वा vयत् यदि vअन्तरिक्षे vपतथः गच्छथः । vयद्वा यदि वा vइमे vरोदसी द्यावापृथिव्यौ अनुलक्ष्य गच्छथः । vयद्वा यदि वा vस्वधाभिः आत्मीयैस्तेजोभिर्बलैर्वा सार्धं vरथम् vअधितिष्ठथः रथे उपविशथः । 'अधिशीङ्स्थासाम्' इत्याधारस्य कर्मसंज्ञा । vअतः सर्वस्मात् स्थानात् हे अश्विनौ vआ vयातम् आगच्छतम् ॥ ॥३४॥

'त्वमग्ने' इति दशर्चं षष्ठं सूक्तं कण्वगोत्रस्य वत्सस्यार्षमाग्नेयम् । आद्या प्रतिष्ठागायत्री अष्टकसप्तकषट्कोपेतत्वात् । द्वितीया वर्धमाना षट्कसप्तकाष्टकोपेतत्वात् । तथा चोक्तं—' षट्कसप्तकाष्टकैर्वर्धमाना विपरीता प्रतिष्ठा ' (पि. सू. ३. १४-१५) इति । दशमी त्रिष्टुप् शिष्टा गायत्र्यः । तथा चानुक्रान्तं—' त्वमग्ने दश वत्स आग्नेये गायत्रेऽन्त्या त्रिष्टुबाद्या प्रतिष्ठोपाद्या वर्धमाना ' इति । प्रातरनुवाकस्याग्नेये क्रतौ गायत्रे छन्दस्याश्विनशस्त्रे चोत्तमावर्जमेतत्सूक्तम् । सूत्र्यते हि—' त्वमग्ने व्रतपा इत्युत्तमामुद्धरेत् ' (आश्व. श्रौ. ४. १३) इति । व्रातपत्याद्यानुवाक्या । सूत्रितं च—' त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानि ' (आश्व. श्रौ. ३. १३) इति ॥

त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा । त्वं यज्ञेष्वीड्यः ॥ १ ॥

त्वम् । अग्ने । व्रतऽपाः । असि । देवः । आ । मर्त्येषु । आ । त्वम् । यज्ञेषु । ईड्यः ॥ १ ॥

हे vअग्ने vदेवः द्योतमानः vत्वं vमर्त्येष्वा मनुष्येषु च देवेषु च मध्ये vव्रतपाः vअसि । व्रतानां कर्मणां रक्षिता भवसि । अतः कारणात् vयज्ञेषु vत्वम् vईड्यः स्तुत्योऽसि ॥

त्वमसि प्रशस्यो विदथेषु सहन्त्य । अग्ने रथीरध्वराणाम् ॥ २ ॥

त्वम् । असि । प्रऽशस्यः । विदथेषु । सहन्त्य । अग्ने । रथीः । अध्वराणाम् ॥ २ ॥

हे vसहन्त्य शत्रूणामभिभवितः vअग्ने vविदथेषु यज्ञेषु vत्वं vप्रशस्यः स्तुत्यः vअसि । vअध्वराणां यागानां vरथीः नेता च भवसि ॥

स त्वमस्मदप द्विषो युयोधि जातवेदः । अदेवीरग्ने अरातीः ॥ ३ ॥

सः । त्वम् । अस्मत् । अप । द्विषः । युयोधि । जातऽवेदः । अदेवीः । अग्ने । अरातीः ॥३॥

हे vजातवेदः जातानां वेदितः vअग्ने vसः पूर्वोक्तगुणः vत्वम् vअस्मत् अस्मत्तः vद्विषः द्वेष्टॄञ्छत्रून् vअप vयुयोधि पृथक्कुरु । vअदेवीः आसुरीः vअरातीः शत्रुसेनाश्च पृथक्कुरु ॥

अन्ति चित्सन्तमह यज्ञं मर्तस्य रिपोः । नोप वेषि जातवेदः ॥ ४ ॥

अन्ति । चित् । सन्तम् । अह । यज्ञम् । मर्तस्य । रिपोः । न । उप । वेषि । जातऽवेदः ॥४॥

हे vजातवेदः vअन्ति vचित् अन्तिकेऽपि vसन्तं भवन्तं समीपे विद्यमानमपि vरिपोः अस्मच्छत्रोः vमर्तस्य मनुष्यस्य vयज्ञं vनोप vवेषि । अहशब्दोऽवधारणे[1] । नैव कामयसे[1] ॥

मर्ता अमर्त्यस्य ते भूरि नाम मनामहे । विप्रासो जातवेदसः ॥ ५ ॥

मर्ताः । अमर्त्यस्य । ते । भूरि । नाम । मनामहे । विप्रासः । जातऽवेदसः ॥ ५ ॥

vमर्ताः मनुष्याः vविप्रासः मेधाविनो वयं हे अग्ने vजातवेदसः जातानां वेदितुः vअमर्त्यस्य मरणरहितस्य देवस्य vभूरि विस्तृतं vनाम स्तोत्रं vमनामहे जानीमः । कुर्म इति यावत् ॥ ॥ ३५ ॥

विप्रं विप्रासोऽवसे देवं मर्तास ऊतये । अग्निं गीर्भिर्हवामहे ॥ ६ ॥

---

१. श—नेच्छसि ।

विप्रम्। विप्रासः। अवसे। देवम्। मतासः। ऊतये। अग्निम्। गीःऽभिः। हवामहे ॥ ६ ॥

vविप्रासः मेधाविनः vमतासः मर्ता मनुष्या वयं vविप्रं मेधाविनं vदेवं दानादिगुणयुक्तम् vअग्निम् vअवसे हविर्भिस्तर्पयितुम् vऊतये अस्माकं रक्षणार्थं च vगीर्भिः स्तुतिभिः vहवामहे आह्वयामहे ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने ' आ ते वत्सः ' इति वैकल्पिकः स्तोत्रियस्तृचः। सूत्रितं च— ' आ ते वत्सो मनो यमदाग्ने स्थूरं रयिं भर ' (आश्व. श्रौ. ७. ८) इति ॥

आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्। अग्ने त्वांकामया गिरा ॥ ७ ॥

आ। ते। वत्सः। मनः। यमत्। परमात्। चित्। सधऽस्थात्। अग्ने। त्वाम्ऽकामया। गिरा ॥ ७ ॥

हे vअग्ने vवत्सः ऋषिः vते तव vमनः vपरमाच्चित् उत्कृष्टादपि vसधस्थात् सहस्थानात् द्युलोकात् vआ vयमत् आयमयति। केन साधनेन। vत्वांकामया त्वामभिलषन्त्या vगिरा स्तुत्या ॥

पुरुत्रा हि सदृङ्असि विशो विश्वा अनु प्रभुः। समत्सु त्वा हवामहे ॥ ८ ॥

पुरुऽत्रा। हि। सऽदृङ्। असि। विशः। विश्वाः। अनु। प्रऽभुः। समत्ऽसु। त्वा। हवामहे ॥ ८ ॥

हे अग्ने vपुरुत्रा vहि बहुषु देशेषु त्वं vसदृङ्कसि समानं द्रष्टा भवसि। अत एव vविश्वाः सर्वाः vविशः प्रजा अनुलक्ष्य vप्रभुः ईश्वरो भवसि। ईदृशं त्वां vसमत्सु संग्रामेषु रक्षणार्थं vहवामहे आह्वयामहे ॥

समत्स्वग्निमवसे वाजयन्तो हवामहे। वाजेषु चित्रराधसम् ॥ ९ ॥

समत्ऽसु। अग्निम्। अवसे। वाजऽयन्तः। हवामहे। वाजेषु। चित्रऽराधसम् ॥ ९ ॥

vसमत्सु सहमदनेषु संग्रामेषु vवाजयन्तः बलमिच्छन्तो वयम् vअवसे रक्षणार्थम् vअग्निं vहवामहे। कीदृशम्। vवाजेषु संग्रामेषु vचित्रराधसं चायनीयधनम् ॥

प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि।
स्वां चाग्ने तन्वं पिप्रयस्वास्मभ्यं च सौभगमा यजस्व ॥ १० ॥

प्रत्नः। हि। कम्। ईड्यः। अध्वरेषु। सनात्। च। होता। नव्यः। च। सत्सि।
स्वाम्। च। अग्ने। तन्वम्। पिप्रयस्व। अस्मभ्यम्। च। सौभगम्। आ। यजस्व ॥ १० ॥

हे अग्ने vअध्वरेषु यज्ञेषु[1] vईड्यः स्तुत्यस्त्वं vप्रत्नो vहि चिरंतनः खलु भवसि। vकम् इति पूरकः। तथा vसनात् चिरकालादारभ्य vहोता देवानामाह्वाता vच सन् vनव्यः स्तुत्यः vच सन् vसत्सि यज्ञेषु निषीदसि। हे vअग्ने देवानां हविर्वहंस्त्वं vस्वां vच vतन्वम् आत्मीयं च शरीरं vपिप्रयस्व त्वदीयेन हविर्भागेन तर्पय। vअस्मभ्यं स्तोतृभ्यश्च vसौभगं सुभगत्वं vच vआ vयजस्व प्रदेहि। सुभगशब्दाद्भावार्थे ' सुभगान्मन्त्रे[2] ' इति उद्गात्रादिषु पाठात् अञ्प्रत्ययः ॥ ॥ ३६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पञ्चमाष्टकेऽष्टमोऽध्यायः समाप्तः ॥

---

१. ख-ङ्ग-न-भ-' यज्ञेषु ' नास्ति। २. ख-ङ्ग-त-न-भ-सुभगमंत्रे।

ॐ

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः[1] सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्तुस्तं नमामि गजाननम्[1] ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

इत्थं पञ्चमाष्टकं व्याख्यायेदानीमृषिच्छन्दोदेवताविनियोगप्रदर्शनपुरःसरं षष्ठस्य प्रथमोऽध्यायो व्याख्यातुमारभ्यते । अष्टममण्डलस्य द्वितीयेऽनुवाके षट् सूक्तानि जातानि[2] । ' य इन्द्र ' इति त्रयस्त्रिंशदृचं सप्तमं सूक्तं कण्वगोत्रस्य पर्वतास्यस्यार्षमौष्णिहमैन्द्रम् । तथा चानुक्रान्तं–' य इन्द्र त्रयस्त्रिंशत्पर्वत औष्णिहं तु ' इति । महाव्रते निष्केवल्य औष्णिहतृचाशीताविदमादिके द्वे सूक्ते । तथैव पञ्चमारण्यके सूत्र्यते—' औष्णिही तृचाशीतिर्य इन्द्र सोमपातम इति सूक्ते ' (ऐ. आ. ५. २. ५) इति । दशमेऽहनि निष्केवल्य आदितः षड्तृचः शंसनीयाः । सूत्र्यते हि—' य इन्द्र सोमपातम इति षळुष्णिहः ' (आश्व. श्रौ. ८. १२) इति । आभिप्लविकेपूक्थ्येषु तृतीयसवने ब्रह्मशस्त्र आद्यस्तृचो वैकल्पिकोऽनुरूपः । सूत्रितं च—' य इन्द्र सोमपातम एन्द्र नो गधि ' (आश्व. श्रौ. ७. ८) इति । तृतीये पर्यायेऽच्छावाकशस्त्रेऽप्ययमेव तृचोऽनुरूपः । सूत्रितं च—' इन्द्रः सुतेषु सोमेषु य इन्द्र सोमपातमः ' (आश्व. श्रौ. ६. ४) इति ॥

य ईन्द्र सोमपातमो मदः शविष्ठ चेतति । येना हंसि न्यत्रिणं तमीमहे ॥१॥

यः । इन्द्र । सोमऽपातमः । मदः । शविष्ठ । चेतति । येन । हंसि । नि । अत्रिणम् । तम् । ईमहे ॥१॥

हे [v]इन्द्र [v]यः त्वं [v]सोमपातमः अतिशयेन सोमस्य पाता । हे [v]शविष्ठ बलवत्तम । शव इति बलनाम । तस्माद्विनन्तादतिशायनिक इष्ठन् । ' विन्मतोर्लुक् ' । टिलोपः । हे ईदृशेन्द्र तस्य तव सोमपानजनितो यः [v]मदः [v]चेतति सम्यग्जानाति वृत्रवधादीनि कार्याणि[3] कर्तुम् । य इत्यस्य चेततीत्यनेनापि संबन्धात् ' यद्वृत्तान्नित्यम् ' इति तिङ् न निहन्यते । अथवैतदेवं[4] वाक्यम् । हे बलवत्तमेन्द्र[5] सोमपातमः सोमस्य पातृतमो यस्त्वं मदः सोमैर्मादयितव्यस्तर्पणीयः[6] संश्चेतति । पुरुषव्यत्ययः । चेतसि सम्यग्जानासि । ' मदोऽनुपसर्गे ' इति मदेः कर्मण्यप् । [v]येन सोमपानजनितेन[7] मदेन [v]अत्रिणम् अत्तारं राक्षसादिकं [v]नि [v]हंसि निहिनस्सि निकृष्टां हिंसां प्रापयसि [v]तं मदं तादृङ्मदोपेतं त्वां वा [v]ईमहे । याच्ञाकर्मायम् । याचामहे । यद्वा । ' ईं गतौ ' । दैवादिकः । छान्दसो विकरणस्य लुक् । ईयामहे उपगच्छामः । स्तुतिभिः संभजामह[8] इत्यर्थः ॥

येना दशग्वमध्रिगुं वेपयन्तं स्वर्णरम् । येना समुद्रमाविथा तमीमहे ॥ २ ॥

येन । दशऽग्वम् । अध्रिऽगुम् । वेपयन्तम् । स्वःऽनरम् । येन । समुद्रम् । आविथ । तम् । ईमहे ॥२॥

हे इन्द्र [v]येन सोमपानजनितेन मदेन [v]दशग्वम् । ये दशभिर्मासैः सत्त्रासनं परिसमाप्य निरगमन् ते दशग्वा अङ्गिरसः । तेषामन्यतमम् [v]अध्रिगुम् अधृतगमनमनिवारितगतिमेतत्संज्ञं[9] [10]ऋषिं[10]

---

१. ख-ग-घ-त२-४-न-भ-श–'वागीशाद्याः...गजाननं ' नास्ति । २. ग-न-भ-श–गतानि; त४–तानि । ३. ग–कर्माणि । ४. ग-न–अथवैतदेव; भ–अथवैतदेक । ५. ग–बलवन् त्वमिन्द्र । ६. ग–°स्तर्पयितव्यः । ७. ख-त-न-भ२-श–सोमपानाय जनितेन; ग–सोमपानेन जनितेन । ८. श–ईड् । ९. भ२-श–ईमहे । १०. ग–संभजाम । ११. ग–°मेतत्संज्ञकं वा ऋषिं ।

[v]वेपयन्तं तमांसि वर्जयन्तं [v]स्वर्णरं सर्वस्य नेतारं सूर्यं च [v]आविथ वृत्रादेर्दस्योरपनयनेन[1] ररक्षिथ। [v]येन च मदेन [v]समुद्रम् उदधिमन्तरिक्षं वा आविथ ररक्षिथ। [v]तं त्वदीयं मदं तद्वन्तं त्वां वा [v]ईमहे याचामहे। मदे हि सति हृष्टः[2] सन्निन्द्रो बहु धनं प्रयच्छति। अतस्तत्कारणस्य मदस्य याच्ञोपपन्ना ॥

येन॒ सिन्धुं॒ म॒हीर॒पो रथाँ॑इव प्रचो॒दयः। पन्थां॑मृ॒तस्य॒ यात॑वे॒ तमी॑महे ॥३॥

येन॑। सिन्धु॑म्। म॒हीः। अ॒पः। रथा॑न्ऽइव। प्र॒ऽचो॒दयः॑।
पन्था॑म्। ऋ॒तस्य॑। यात॑वे। तम्। ई॒म॒हे॒ ॥ ३ ॥

हे इन्द्र [v]महीः महतीः [v]अपः वृष्टयुदकानि [v]सिन्धुं स्यन्दनशीलां नदीं समुद्रं वा प्रति [v]येन सोमपानजन्येन मदेन [v]प्रचोदयः प्रेरयसि। तत्र दृष्टान्तः। [v]रथानिव। यथा रथिनो रथान् स्वाभिलषितदेशगमनाय प्रेरयन्ति तद्वत्। [v]ऋतस्य यज्ञस्य [v]पन्थां पन्थानं मार्गं [v]यातवे यातुं प्राप्तुं [v]तं मदम् [v]ईमहे याचामहे ॥

इ॒मं स्तोम॑म॒भिष्ट॑ये घृ॒तं न पू॒तम॑द्रिवः। येना॒ नु सद्य ओज॑सा व॒वक्षि॑थ ॥४॥

इ॒मम्। स्तोम॑म्। अ॒भिष्ट॑ये। घृ॒तम्। न। पू॒तम्। अ॒द्रि॒ऽवः॒।
येन॑। नु। स॒द्यः। ओज॑सा। व॒वक्षि॑थ ॥ ४ ॥

हे [v]अद्रिवः वज्रवन्निन्द्र [v]घृतं [v]न घृतमिव मन्त्रपूतमाज्यमिव [v]पूतं शुद्धम् [v]इमम् अस्मदीयं [v]स्तोमं स्तोत्रं बुध्यस्वेति शेषः। किमर्थम्। [v]अभिष्टये अभिप्राप्त्यै। इष्टस्य धनादेरस्माकं लाभायेत्यर्थः। [v]येन स्तोत्रेण स्तूयमानः सन् [v]ओजसा आत्मीयेन बलेन [v]सद्यः तदानीमेव स्तुतिसमथ[3] एव[3] नु क्षिप्रं [v]ववक्षिथ अस्मान् वहसि अभिलषितं प्रापयसि इमं स्तोममित्यन्वयः ॥

इ॒मं जु॑षस्व गिर्वणः समु॒द्रई॑व पिन्वते। इन्द्र॒ विश्वा॑भिरू॒तिभि॑र्ववक्षिथ ॥५॥

इ॒मम्। जु॒ष॒स्व॒। गि॒र्व॒णः॒। स॒मु॒द्रःऽई॑व। पि॒न्व॒ते॒। इन्द्र॑। विश्वा॑भिः। ऊ॒तिऽभिः॑। व॒वक्षि॑थ ॥५॥

हे [v]गिर्वणः गिरां स्तुतीनां संभक्तः यद्वा स्तुतिभिः संभजनीयेन्द्र [v]इमं स्तोमं मया क्रियमाणं [v]जुषस्व सेवस्व। स च स्तोमः [v]समुद्रइव समुद्रो यथा चन्द्रोदयं प्राप्य [v]पिन्वते[4] वर्धते। अभिधेयस्येन्द्रगुणगणस्याधिक्येन तत्प्रतिपादिका स्तुतिरपि विस्तृता भवतीत्यर्थः ॥ पूर्वस्यामृचि ववक्षिथेत्यनेन युक्तो येनेति शब्दोऽत्रापि सामर्थ्यात्तेन संबध्यते। अत एवास्य 'तिङुतिङः' इति निघाताभावः ॥ हे [v]इन्द्र येन स्तोमेन हेतुना [v]विश्वाभिः व्याप्ताभिः [v]ऊतिभिः रक्षाभिः [v]ववक्षिथ वहसि श्रेयांस्यस्मान् प्रापयसि ॥ वहेः सनन्ताल्लिटि ''अमन्त्रे'' इति निषेधादामभावे थलि लिटि रूपमेतत् ॥ ॥ १ ॥

यो नो॑ दे॒वः प॑रा॒वतः॑ सखित्व॒नाय॑ माम॒हे। दि॒वो न वृ॒ष्टिं प्र॑थय॑न्व॒वक्षि॑थ ॥६॥

यः। नः॒। दे॒वः। प॒रा॒ऽवतः॑। स॒खि॒ऽत्व॒नाय॑। म॒म॒हे॒।
दि॒वः। न। वृ॒ष्टिम्। प्र॒थय॑न्। व॒वक्षि॑थ ॥ ६ ॥

---

१. ख-घ१-ज्ञ-त-२-४-भ२-°र्दस्योरपनये; न-°र्दस्योरपनयनैनं; भ१-°र्दस्यापनयनेन; श-°र्दस्योरपनयेन। २. ग-तृप्तः। ३. ख-ज्ञ-त२-°समयामेव; ग-न-भ-°समयमेव; त४-°समयामवं। ४. ख-ग-त-भ-श-' पिन्वते ' नास्ति।

[v]यः [v]देवः दानादिगुणयुक्त इन्द्रः [v]परावतः परावताद्दूरात् द्युलोकादागत्य [v]नः अस्माकं [v]सखित्वनाय सखित्वाय [v]मामहे धनानि[1] प्रददौ। मंहतेर्दानकर्मण एतद्रूपम्। यद्वा। अस्माभिः पूज्यते। 'मह पूजायाम्'। अस्माच्छान्दसः कर्मणि लिट्। उत्तरार्धर्चः प्रत्यक्षकृतः। हे इन्द्र [v]दिवो [v]न [v]वृष्टिं दिवः सकाशाद्वृष्टिमिव [v]प्रथयन् अस्मदीयानि धनानि विस्तारयन् यस्त्वं [v]ववक्षिथ अस्मान् वोढुमिच्छसि तादृशं त्वां स्तौमीति शेषः॥

ववक्षुरस्य केतव उत वज्रो गभस्त्योः। यत्सूर्यो न रोदसी अवर्धयत् ॥ ७ ॥

ववक्षुः। अस्य। केतवः। उत। वज्रः। गभस्त्योः। यत्। सूर्यः। न। रोदसी इति। अवर्धयत्॥७॥

[v]अस्य इन्द्रस्य [v]केतवः प्रज्ञानान्यस्मत्स्तुतिविषयाणि। यद्वा। रथे उत्क्षिप्ताः पताकाः केतवः। [v]ववक्षुः अवहन्। अस्मान्छ्रेयांसि प्रापयन्। [v]उत अपि च [v]गभस्त्योः। बाहुनामैतत्। इन्द्रस्य हस्तयोरवस्थितः [v]वज्रः च अवहत्। [v]यत् यदायमिन्द्रः [v]सूर्यो [v]न सर्वस्य प्रेरक आदित्य इव [v]रोदसी द्यावापृथिव्यौ वृष्ट्यादिप्रदानेन [v]अवर्धयत् तदानीमित्यर्थः॥

यदिं प्रवृद्ध सत्पते सहस्रं महिषाँ अधः। आदित्ते इन्द्रियं महि प्र वावृधे ॥८॥

यदिं। प्रऽवृद्ध। सत्ऽपते। सहस्रम्। महिषान्। अधः।
आत्। इत्। ते। इन्द्रियम्। महि। प्र। ववृधे ॥ ८ ॥

हे [v]प्रवृद्ध प्रकर्षेण महन् हे [v]सत्पते सतामनुष्ठातॄणां[2] पालयितरिन्द्र [v]सहस्रं सहस्रसंख्याकान् [v]महिषान्। महन्नामैतत्। महतोऽसुरान् वृत्रादीन् [v]यदि यदा [v]अधः अवधीः। हन्तेश्छान्दसमेतद्रूपम्। यद्वा। 'घस्लृ अदने'। लुङि सिपि 'मन्त्रे घस०' इति च्लेर्लुक्। [v]आदित् अनन्तरमेव हे इन्द्र [v]ते तव [v]इन्द्रियं वीर्यं [v]महि महद्बहुलं[3] सत् [v]प्र [v]वावृधे प्रकर्षेण वर्धते॥

इन्द्रः सूर्यस्य रश्मिभिर्न्यर्शसानमोषति। अग्निर्वनेव सासहिः प्र वावृधे ॥९॥

इन्द्रः। सूर्यस्य। रश्मिऽभिः। नि। अर्शसानम्। ओषति।
अग्निः। वनाऽइव। ससहिः। प्र। ववृधे ॥ ९ ॥

अयम् [v]इन्द्रः [v]सूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य [v]रश्मिभिः किरणैः करणभूतैः [v]अर्शसानम्॥ 'अर्त्तेर्गुणः शुट् च' (उ. सू. २. २४५) इति 'ऋ गतौ' इत्यस्मादसानच्प्रत्ययः शुडागमश्च। अत्र केवलोऽप्यर्तिराङ्पूर्वार्थो द्रष्टव्यः। आङ्पूर्वश्च बाधने वर्तते। यथा 'आर्तिमार्तोः' (श. ब्रा. १३. १. २. ४) इति॥ अर्शसानं बाधमानं मन्देहादिकमसुरं[4] [v]नि [v]ओषति नितरां दहति। 'उष दाहे'। तत्र दृष्टान्तः। [v]अग्निर्वनेव। यथा वनारण्यानि[5] दावानलो भस्मसात् करोति तद्वत्। एवं [v]सासहिः शत्रूणामभिभवनशील इन्द्रः [v]प्र [v]वावृधे प्रकर्षेण वर्धते॥

इयं ते ऋत्वियावती धीतिरेति नवीयसी। सपर्यन्ती पुरुप्रिया मिमीत इत् ॥१०॥

इयम्। ते। ऋत्वियाऽवती। धीतिः। एति। नवीयसी। सपर्यन्ती। पुरुऽप्रिया। मिमीते। इत्॥१०॥

हे इन्द्र [v]ते त्वाम् [v]इयं पुरोवर्तिनी मया क्रियमाणा [v]धीतिः स्तुतिः [v]एति गच्छति। कीदृशी। [v]ऋत्वियावती। ऋतौ वसन्तादिकालेऽनुष्ठेयं यज्ञकर्म ऋत्वियम्। तद्वती [v]नवीयसी अति-

---

१. ग–धनादीनि। २. ग–सतामुत्तमानां। ३. ग–मह प्रबलं; घ–महिमत् सत्। ४. ग–मन्देह-नामकम्° ५. ख-ग-घ-ङ–वनान्यरण्यानि; त–वनाचरण्यानि।

शयेनाभिनवा स्तुतिः। ᵛसपर्यन्ती पूजयन्ती ᵛपुरुप्रिया पुरु बहुलं प्रीणयित्री सती ᵛमिमीत ᵛइत् इन्द्रगतान् गुणान् परिच्छिनत्त्येव[1]। माहात्म्यं प्रख्यापयत्येव सेयमित्यन्वयः। अनुमीयमानेन[2] यच्छब्देन च योगान्मिमीत इत्यस्य निघाताभावः। यद्वा। सपर्यन्ती पुरुप्रियेतीदमप्येतीत्थनेन[3] संबन्धनीयम्। अतः पूर्वपदस्य भिन्नवाक्यस्थत्वात् 'समानवाक्ये युष्मदस्मदादेशा वक्तव्याः' इति वचनात्तदपेक्षया निघाताभावे सति 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम्॥ ॥ २ ॥

गर्भो यज्ञस्य देवयुः क्रतुं पुनीत आनुषक्।
स्तोमैरिन्द्रस्य वावृधे मिमीत इत् ॥ ११ ॥

गर्भः। यज्ञस्य। देवऽयुः। क्रतुम्। पुनीते। आनुषक्। स्तोमैः। इन्द्रस्य। ववृधे। मिमीते। इत्॥ ११॥

ᵛयज्ञस्य यष्टव्यस्येन्द्रस्य ᵛगर्भः गरिता स्तोता। 'गृ शब्दे'। 'अर्तिगृभ्यां भन्'। यद्वा। यजेर्भाव एव नङ्प्रत्ययः। यागस्य गर्भो ग्रहीतानुष्ठाता ᵛदेवयुः देवं दानादिगुणयुक्तमिन्द्रमात्मन इच्छन् ᵛआनुषक् अनुषक्तमानुपूर्व्येण संततं यथा भवति तथा ᵛक्रतुं प्रज्ञापकं सोमं ᵛपुनीते दशापवित्रेण शोधयति। इन्द्रपानार्थमिति शेषः। यद्वा। यज्ञस्य गर्भो दीक्षितः। 'पुनर्वा एतमृत्विजो गर्भं कुर्वन्ति' (ऐ. ब्रा. १. ३) इत्यादि ब्राह्मणम्। स देवकामः क्रतुं ज्योतिष्टोमादिकमानुषक्। आनुपूर्व्येणामैतत्। यदाह यास्कः—'आनुषगिति नामानुपूर्व्यस्य' (निरु. ६. १४) इति[4]। स स्तोता ᵛइन्द्रस्य। कर्मणि षष्ठी। इन्द्रविषयैः ᵛस्तोमैः स्तोत्रैः ᵛववृधे[5] वर्धते। यद्वा। वृधिना प्रयोज्यव्यापारवाचिना प्रयोजकव्यापारो लक्ष्यते। स्तोमैः स्तोत्रैस्तमिन्द्रं वर्धयति। स च स्तोमैः ᵛमिमीत ᵛइत् इन्द्रस्य गुणजातं परिच्छिनत्त्येव। अनुगतार्थो भवतीत्यर्थः॥

सनिर्मित्रस्य पप्रथ इन्द्रः सोमस्य पीतये।
प्राची वाशीव सुन्वते मिमीत इत् ॥ १२ ॥

सनिः। मित्रस्य। पप्रथे। इन्द्रः। सोमस्य। पीतये।
प्राची। वाशीऽइव। सुन्वते। मिमीते। इत्॥ १२ ॥

ᵛमित्रस्य मित्रभूतस्य स्तोतुः ᵛसनिः धनस्य दाता ᵛइन्द्रः ᵛसोमस्य ᵛपीतये पानाय ᵛपप्रथे प्रथितो विस्तीर्णशरीरो बभूव। यथा पीतो बहुलः सोमः उदरेऽन्तर्भवति तथा प्रवृद्धशरीरो बभूवेत्यर्थः। तत्र प्रथमे दृष्टान्तः। ᵛप्राची प्राञ्चन्ती प्रकर्षेण स्तुत्यगुणगणं प्राप्नुवती ᵛवाशीव। वाङ्नामैतत्। स्तुतिरूपा वाक् ᵛसुन्वते। 'षष्ठ्यर्थे चतुर्थी वक्तव्या' इति चतुर्थी। सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य संबन्धिनी यथा स्तुत्यगुणबाहुल्येन विस्तीर्णा भवति तथेन्द्रः पप्रथ इत्यर्थः। प्रथिता च सा ᵛमिमीत ᵛइत् इन्द्रमाहात्म्यं यथावत् परिच्छिनत्त्येव॥

यं विप्रा उक्थवाहसोऽभिप्रमन्दुरायवः। घृतं न पिप्य आसन्यृतस्य यत् ॥१३॥

यम्। विप्राः। उक्थऽवाहसः। अभिऽप्रमन्दुः। आयवः।
घृतम्। न। पिप्ये। आसनि। ऋतस्य। यत्॥ १३ ॥

---

१. ख-त-श-आपरि°। २. ग-न-य-श-अनुशब्दमानेन; भ१-२-अनुषज्यमानेन। ३. ग-पुरुप्रियेणत्याममपि एतीत्यनेन; श-पुरुप्रिया मिमीत इतीत्यनेन। ४. ग-भ-इति दर्शपूर्णमासाभ्यामिष्ट्वे (°मास्याविष्ट्वे°-ग-भ१-य)ष्टिपशुचातुर्मास्यैरथ सोमेनेत्येवमानुपूर्व्येण पुनीते शोधयति(साधयति-ग) सम्यगनुतिष्ठति। ५. ग-वावृधे।

vविप्राः मेधाविनः vउक्थवाहसः उक्थानां शस्त्राणां वोढारः प्रापयितारः vआयवः मनुष्याः vयम् इन्द्रम् vअभिप्रमन्दुः अभि प्रकर्षेण मादयन्ति ॥ मदेर्ण्यत्ययेन परस्मैपदम्। ' द्विर्वचनप्रकरणे छन्दसि वा० ' (का. ६. १. ८. १) इति वचनात् द्विर्वचनाभावः ॥ तस्येन्द्रस्य vआसनि आस्ये। ' पहन्० ' इत्यादिना आस्यशब्दस्य आसन्नादेशः। vघृतं vन घृतमिव शुद्धं vपिप्ये सेचनेन वर्धये। प्यायतेश्छान्दसो लिट्। ' लिड्यङोश्च ' इति पीभावः। किं तत्। हविः। vऋतस्य यज्ञस्य संबन्धि vयत् सोमलक्षणं हविरस्ति तदित्यर्थः ॥

उत स्वराजे अदितिः स्तोममिन्द्राय जीजनत् ।
पुरुप्रशस्तमूतय ऋतस्य यत् ॥ १४ ॥

उत । स्वऽराजे । अदितिः । स्तोमम् । इन्द्राय । जीजनत् ।
पुरुऽप्रशस्तम् । ऊतये । ऋतस्य । यत् ॥ १४ ॥

vउत अपि च vअदितिः अदीना देवमाता अखण्डनीयस्तोता वा vस्वराजे स्वयमेव राजमानाय vइन्द्राय vपुरुप्रशस्तं बहुलमुत्कृष्टं यद्वा पुरुभिर्बहुभिः प्रशंसितव्यं vस्तोमं स्तोत्रं vजीजनत् अजीजनत् अजनयत्। किमर्थम्। vऊतये रक्षणार्थम्। vयत् स्तोत्रम् vऋतस्य यज्ञस्य सत्यस्य वा संबन्धि भवति तं स्तोममित्यन्वयः ॥

अभि वह्नय ऊतयेऽनूषत प्रशस्तये । न देव विव्रता हरी ऋतस्य यत् ॥१५॥

अभि । वह्नयः । ऊतये । अनूषत । प्रऽशस्तये । न । देव । विऽव्रता । हरी इति । ऋतस्य । यत्॥१५॥

vवह्नयः वोढार ऋत्विजः vऊतये रक्षणार्थं vप्रशस्तये प्रशस्त्यर्थं[1] च vअभि vअनूषत इन्द्रमभ्यष्टुवन्। ' नू स्तुतौ '। कुटादिः। हे vदेव दानादिगुणयुक्तेन्द्र। vन इति संप्रत्यर्थे। संप्रति vविव्रता विविधकर्माणौ vहरी त्वदीयावश्वौ vऋतस्य यज्ञस्य सत्यस्य वा संबन्धि vयत् स्तोत्रं हविर्वा विद्यते तदभिलक्ष्य त्वां वहत इति शेषः ॥ ॥ ३ ॥

यत्सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये ।
यद्वा मरुत्सु मन्दसे समिन्दुभिः ॥ १६ ॥

यत् । सोमम् । इन्द्र । विष्णवि । यत् । वा । घ । त्रिते । आप्त्ये ।
यत् । वा । मरुत्ऽसु । मन्दसे । सम् । इन्दुऽभिः ॥ १६ ॥

हे vइन्द्र vविष्णवि विष्णौ पानार्थमागते[2] सत्यन्यदीये यागे vसोमं vयत् यदि तेन विष्णुना सार्धं पिबसि। vयद्वा यदि च vआप्त्ये अपां पुत्रे vत्रिते एतत्संज्ञे राजर्षौ यजमाने सोमं पिबसि। vघ इति पूरणः। vयद्वा यदि च vमरुत्सु च सोमपानायागतेष्वन्यदीये यज्ञे vमन्दसे माद्यसि। तथाप्यस्मदीयैरेव vइन्दुभिः सोमैः vसं सम्यक् माद्य ॥

यद्वा शक्र परावति समुद्रे अधि मन्दसे ।
अस्माकमित्सुते रणा समिन्दुभिः ॥ १७ ॥

---

१. ख-ज्ञ-त३-४–प्रशस्त्यार्थ; ग१-भ–प्राशस्त्यार्थ; ग२-त२-न–प्राशस्त्यार्थ। २. ग१–सोमपानार्थ°; ग२–घपानार्थ° ।

यत्। वा। शक्र। पराऽवति। समुद्रे। अधि। मन्दसे।
अस्माकम्। इत्। सुते। रण। सम्। इन्दुऽभिः ॥ १७ ॥

हे Vशक्र शक्तेन्द्र[1] Vपरावति परागते दूरदेशे Vसमुद्रे समुन्दनशीले सोमे। Vअधि[2] सप्तम्यर्थानुवादी। Vयद्वा यदि वा Vमन्दसे माद्यसि तथापि Vअस्माकमित् अस्माकमेव सोमे अभिषुते सति Vइन्दुभिः सोमरसैः Vसं Vरण सम्यग्रमस्व ॥

यद्वासि सुन्वतो वृधो यजमानस्य सत्पते।
उक्थे वा यस्य रण्यसि समिन्दुभिः ॥ १८ ॥

यत्। वा। असि। सुन्वतः। वृधः। यजमानस्य। सत्ऽपते।
उक्थे। वा। यस्य। रण्यसि। सम्। इन्दुऽभिः ॥ १८ ॥

हे Vसत्पते सतां पालयितरिन्द्र Vसुन्वतः सोमाभिषवं कुर्वतः Vयजमानस्य Vयद्वा यदि वा Vवृधः Vअसि वर्धयिता भवसि। वृधेरन्तर्णीतण्यर्थादिगुपधलक्षणः कः। Vयस्य च यजमानस्य Vउक्थे शस्त्रे Vवा शंसिते सति Vरण्यसि रमसे। एवमपि Vइन्दुभिः अस्मदीयैरेव सोमैः सम्यग्रमस्व॥

देवंदेवं वोऽवस इन्द्रमिन्द्रं गृणीषणि। अधा यज्ञाय तुर्वणे व्यानशुः ॥१९॥

देवम्ऽदेवम्। वः। अवसे। इन्द्रम्ऽइन्द्रम्। गृणीषणि। अध। यज्ञाय। तुर्वणे। वि। आनशुः ॥१९॥

हे ऋत्विग्यजमानाः Vवः युष्माकम् Vअवसे रक्षणाय Vदेवंदेवम् Vइन्द्रमिन्द्रं दानादिगुणयुक्तम्। इन्द्रो बहुषु देशेषु युगपत्प्रवृत्तेषु यागेषु तत्र तत्र हविःस्वीकरणाय बहूनि शरीराण्यादत्ते स्वयमेकोऽप्यनेकः संस्तत्र तत्र संनिधत्ते। तथा च निगमान्तरम्—'इन्द्रो मायाभिः पुरुरूप ईयते' (ऋ. सं. ६. ४७. १८) इति। तदपेक्षयेयं वीप्सा। बहु विभज्य वर्तमानं सर्वं तमिन्द्रं Vगृणीषणि अहं स्तौमि। गृणातेर्लिङि छान्दसमेतद्रूपम्। यद्वा। कारकमेवैतत्। गृणीषणि स्तवनेच्छायां सत्याम्। Vअध अनन्तरं सर्वमिन्द्रं मदीयाः स्तुतयः Vव्यानशुः व्याप्नुवन्ति। किमर्थम्। Vतुर्वणे तूर्णं संभजनाय Vयज्ञाय यागार्थम्। यद्वा। 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थी। यज्ञं यष्टव्यं तुर्वणे शत्रूणां हिंसितारं तूर्णसंभजनं वा ॥

यज्ञेभिर्यज्ञवाहसं सोमेभिः सोमपातमम्। होत्राभिरिन्द्रं वावृधुर्व्यानशुः ॥२०॥

यज्ञेभिः। यज्ञऽवाहसम्। सोमेभिः। सोमऽपातमम्।
होत्राभिः। इन्द्रम्। ववृधुः। वि। आनशुः ॥ २० ॥

Vयज्ञेभिः यज्ञैर्यजनसाधनैर्हविर्भिः Vयज्ञवाहसं यज्ञे[3] वोढव्यं[3] प्रापणीयं यज्ञैर्यागैर्यज्ञानां यजमानानां फलस्य प्रापयितारं वा। अथवा यज्ञवाहसं यज्ञेन प्राप्यम्। न केवलमेकेन यज्ञेन अपि तु सर्वैरित्याह यज्ञेभिरिति। एवं Vसोमेभिः Vसोमपातमं सर्वेषां सोमानां पातृतमम् Vइन्द्रं Vहोत्राभिः स्तुतिभिः Vवावृधुः स्तोतारो वर्धयन्ति। ताश्च क्रियमाणाः स्तुतयः Vव्यानशुः तमिन्द्रं व्याप्नुवन्ति च। अश्नोतेर्व्यत्ययेन परस्मैपदम् ॥ ॥ ४ ॥

---

१. ख-त२-४-भ३–शक्रेंद्र ; घ-ज्ञ-त३-श–ईंद्र। २. ग–अधिः। ३. ग-त१-२–यज्ञवोढव्यं।

महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः । विश्वा वसूनि दाशुषे व्यानशुः ॥२१॥

महीः। अस्य। प्रऽनीतयः। पूर्वीः। उत। प्रऽशस्तयः। विश्वा। वसूनि। दाशुषे। वि। आनशुः॥२१॥

[v]अस्य इन्द्रस्य [v]प्रणीतयः प्रणयनानि धनानां प्रकृष्टप्रापणानि [v]महीः महत्यो महान्ति भवन्ति। [v]उत अपि च अस्य [v]प्रशस्तयः प्रशंसनीयाः कीर्तयः [v]पूर्वीः बह्व्यः विस्तृततमा भवन्ति। ता उभयविधाः [v]दाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय दातुं [v]विश्वा विश्वानि सर्वाणि [v]वसूनि धनानि [v]व्यानशुः व्याप्नुवन्ति ॥

इन्द्रं वृत्राय हन्तवे देवासो दधिरे पुरः । इन्द्रं वाणीरनूषता समोजसे ॥ २२ ॥

इन्द्रम्। वृत्राय। हन्तवे। देवासः। दधिरे। पुरः।

इन्द्रम्। वाणीः। अनूषत। सम्। ओजसे ॥ २२ ॥

[v]देवासः देवाः [v]वृत्राय [v]हन्तवे वृत्रमावरकमसुरं हन्तुम्। हन्तेस्तुमर्थे तवेन्प्रत्ययः। इमम् [v]इन्द्रं [v]पुरः [v]दधिरे पुरस्तात् स्वाभिमुखेनाधारयन्। [v]वाणीः वाण्यः स्तुतिरूपा वाचश्चेममेव[1] [v]इन्द्रम् [v]अनूषत स्तुवन्ति। किमर्थम्। [v]सं समीचीनाय [v]ओजसे बलार्थम्। यथा वृत्रवधानुगुण-मुत्कृष्टं बलमस्य[2] जायते[3] तथा स्तुवन्तीत्यर्थः ॥

महान्तं महिना वयं स्तोमेभिर्हवनश्रुतम्। अर्कैरभि प्र णोनुमः समोजसे ॥२३॥

महान्तम्। महिना। वयम्। स्तोमेभिः। हवनऽश्रुतम्।

अर्कैः। अभि। प्र। नोनुमः। सम्। ओजसे ॥ २३ ॥

[v]महिना महिम्ना [v]महान्तं सर्वेभ्योऽधिकं [v]हवनश्रुतं हवनस्याह्वानस्य श्रोतारमिन्द्रं[3] [v]वयं [v]स्तोमेभिः स्तोमैश्चिवृत्पञ्चदशादिभिः [v]अर्कैः अर्चनसाधनैः शस्त्रैश्च [v]अभि [v]प्र [v]णोनुमः आभिमुख्येन प्रकर्षेण पुनःपुनः स्तुमः ॥

न यं विविक्तो रोदसी नान्तरिक्षाणि वज्रिणम् ।
अमादिदस्य तित्विषे समोजसः ॥ २४ ॥

न। यम्। विविक्तः। रोदसी इति। न। अन्तरिक्षाणि। वज्रिणम्।

अमात्। इत्। अस्य। तित्विषे। सम्। ओजसः॥ २४ ॥

[v]यं [v]वज्रिणं वज्रवन्तमिन्द्रं [v]रोदसी द्यावापृथिव्यौ [v]न [v]विविक्तः न पृथक्कुरुतः स्वसमीपात् पृथक्कर्तुं न शक्नुतः। द्यावापृथिव्यौ व्याप्य य इन्द्रो वर्तत इत्यर्थः। 'विचिर् पृथग्भावे'। [v]अन्तरिक्षाणि अन्तरा क्षान्तानि द्यावापृथिव्योर्वर्तमानानि[4] गन्धर्वादीनां स्थानानि च यं [v]न पृथक्कुर्वन्ति। [v]अस्य इन्द्रस्य [v]अमादित्। अमति रुजति शत्रूननेनेत्यमो बलम्। बलादेव [v]तित्विषे सर्वं जगद्दीप्यते। किमर्थम्। [v]ओजसः[5] बलस्य संगमाय। यद्वा। ओजःशब्दाद्विहितस्य विनो 'बहुलं छन्दसि' इति लुक्। ओजस्विनो बलवतोऽस्येन्द्रस्येति योज्यम्। समित्युपसर्गः तित्विष इत्यनेन संबध्यते ॥

---

१. ख-ज्ञ-त२-३-४–वाचश्चरममेव; श–वाचपरमेश्वरमेव। २. ग–फलमस्य ख्याप्यते। ३. ख-घ-त२-३-४-भ२-य-श–स्तोतारमिंद्रं। ४. ग–°व्योरधिवर्तमानानि। ५. ख-त-न-भ२-श–ओजसे।

षोडशिशस्त्रे 'यदिन्द्र पृतनाज्ये' इति तृचः। सूत्र्यते हि—'यदिन्द्र पृतनाज्येऽयं ते अस्तु हर्यत इत्यौष्णिहवार्हतौ तृचौ' (आश्व. श्रौ. ६. २) इति॥

यदिन्द्र पृतनाज्ये देवास्त्वा दधिरे पुरः। आदित्ते हर्यता हरी ववक्षतुः ॥२५॥

यत्। इन्द्र। पृतनाज्ये। देवाः। त्वा। दधिरे। पुरः।
आत्। इत्। ते। हर्यता। हरी इति। ववक्षतुः॥ २५॥

हे [v]इन्द्र [v]पृतनाज्ये। संग्रामनामैतत्। पृतनाः सेना अजन्ति गच्छन्त्यस्मिन्निति वा पृतना जीयतेऽत्रेति वा पृतनाज्यं संग्रामः। तत्र [v]त्वा त्वां [v]यत् यदा [v]देवाः [v]पुरः [v]दधिरे वृत्रहननाय पुरतोऽधारयन् [v]आदित् अनन्तरमेव [v]हर्यता हर्यतौ कान्तौ। 'हर्य गतिकान्त्योः'। 'भृमृदृशि' इत्यादिनौणादिकोऽतच्प्रत्ययः। ईदृशौ [v]हरी अश्वौ [v]ते त्वां [v]ववक्षतुः अवहताम्॥ ॥ ५ ॥

यदा वृत्रं नदीवृतं शवसा वज्रिन्नवधीः। आदित्ते हर्यता हरी ववक्षतुः ॥२६॥

यदा। वृत्रम्। नदीऽवृतम्। शवसा। वज्रिन्। अवधीः।
आत्। इत्। ते। हर्यता। हरी इति। ववक्षतुः॥ २६॥

हे [v]वज्रिन् वज्रवन्निन्द्र [v]नदीवृतम्। नदनान्नद्य आपः। श्रूयते हि—'अहावनदता हते तस्मादा नद्यो नाम स्थ' (तै. सं. ५. ६. १. २) इति। ता आवृण्वन्तं [v]वृत्रम् अवर्षणशीलं मेघमसुरं वा [v]यदा यस्मिन् काले [v]शवसा बलेन [v]अवधीः अहिंसीः। शिष्टं समानम्॥

यदा ते विष्णुरोजसा त्रीणि पदा विचक्रमे। आदित्ते हर्यता हरी ववक्षतुः ॥२७॥

यदा। ते। विष्णुः। ओजसा। त्रीणि। पदा। विऽचक्रमे।
आत्। इत्। ते। हर्यता। हरी इति। ववक्षतुः॥ २७॥

हे इन्द्र [v]ते तवानुजः [v]विष्णुः व्यापनशीलो देवः [v]ओजसा बलेन [v]यदा यस्मिन् काले [v]त्रीणि पदानि पदत्रयरूपेण त्रीँल्लोकान् [v]विचक्रमे विक्रान्तवान् परिच्छिन्नवान्। गतमन्यत्॥

यदा ते हर्यता हरी वावृधाते दिवेदिवे। आदित्ते विश्वा भुवनानि येमिरे ॥२८॥

यदा। ते। हर्यता। हरी इति। ववृधाते इति। दिवेऽदिवे।
आत्। इत्। ते। विश्वा। भुवनानि। येमिरे॥ २८॥

हे इन्द्र त्वदीयौ[1] [v]हर्यता हर्यतौ कान्तौ [v]हरी हरणशीलावश्वौ [v]दिवेदिवे प्रतिदिवसं [v]यदा यस्मिन् काले [v]वावृधाते[2] प्रवृद्धौ बभूवतुः [v]आदित् अनन्तरमेव त्वया [v]विश्वा विश्वानि सर्वाणि [v]भुवनानि भूतजातानि [v]येमिरे नियम्यन्ते स्म॥

यदा ते मारुतीर्विशस्तुभ्यमिन्द्र नियेमिरे। आदित्ते विश्वा भुवनानि येमिरे ॥२९॥

यदा। ते। मारुतीः। विशः। तुभ्यम्। इन्द्र। निऽयेमिरे।
आत्। इत्। ते। विश्वा। भुवनानि। येमिरे॥ २९॥

---

१. घ–ते त्वदीयौ। २. ख-ज्ञ-त१-भ–ववृधाते; त३-४-न–विवृधाते; श–विवृते।

हे ᵛइन्द्र ᵛतुभ्यं त्वदर्थं ᵛमारुतीः मारुत्यो[1] मरुद्रूपाः ᵛते त्वदीयाः ᵛविशः प्रजाः ᵛयदा यस्मिन् काले ᵛनियेमिरे नियच्छन्ति भूतजातानि। अन्यद्गतम् ॥

यदा सूर्यममुं दिवि शुक्रं ज्योतिरधारयः ।
आदित्ते विश्वा भुवनानि येमिरे ॥ ३० ॥

यदा । सूर्यम् । अमुम् । दिवि । शुक्रम् । ज्योतिः । अधारयः ।
आत् । इत् । ते । विश्वा । भुवनानि । येमिरे ॥ ३० ॥

हे इन्द्र ᵛअमुं विप्रकृष्टं ᵛशुक्रं निर्मलं ᵛज्योतिः द्योतमानं ᵛसूर्यं सर्वस्य प्रेरकं शोभनवीर्यं वादित्यं ᵛदिवि द्युलोके जगतः प्रकाशनाय[2] ᵛयदा यस्मिन् काले ᵛअधारयः धारितवानसि। समानमन्यत् ॥

इमां त इन्द्र सुष्टुतिं विप्र इयर्ति धीतिभिः । जामिं पदेव पिप्रतीं प्राध्वरे ॥३१॥

इमाम् । ते । इन्द्र । सुऽस्तुतिम् । विप्रः । इयर्ति । धीतिऽभिः ।
जामिम् । पदाऽइव । पिप्रतीम् । प्र । अध्वरे ॥ ३१ ॥

हे ᵛइन्द्र ᵛविप्रः मेधावी स्तोता ᵛअध्वरे यज्ञे ᵛइमां पुरोवर्तिनीं ᵛपिप्रतीं पूजयन्तीं प्रीणयन्तीं वा ᵛसुष्टुतिं शोभनां स्तुतिं ᵛधीतिभिः कर्मभिः परिचरणैः सार्धं ᵛते त्वां ᵛप्र ᵛइयर्ति प्रेरयति प्रगमयति। ᵛजामिं ᵛपदेव यथा बन्धुभूतं पुरुषमुत्कृष्टानि पदानि स्थानानि प्रापयति तद्वत् ॥

यदस्य धामनि प्रिये समीचीनासो अस्वरन् ।
नाभा यज्ञस्य दोहना प्राध्वरे ॥ ३२ ॥

यत् । अस्य । धामनि । प्रिये । सम्ऽईचीनासः । अस्वरन् ।
नाभा । यज्ञस्य । दोहना । प्र । अध्वरे ॥ ३२ ॥

ᵛअध्वरे यज्ञे ᵛअस्य इन्द्रस्य ᵛधामनि स्थाने तेजसि वा ᵛप्रिये प्रीणयितव्ये सति ᵛसमीचीनासः संगताः स्तोतारः ᵛयत् यदा ᵛप्र ᵛअस्वरन् प्रकर्षेणास्तुवन्। 'स्वृ शब्दोपतापयोः'। 'अयालिन्द्रस्य प्रिया धामानि' (तै. ब्रा. ३. ५. ७. ६) इति हि निगमः। कस्मिन् देशे। ᵛनाभा नाभौ पृथिव्या नाभिस्थानीये मध्ये ᵛयज्ञस्य यजनसाधनस्य[3] सोमस्य ᵛदोहना दोहने दोहनाधिकरणेऽभिषवस्थाने। वेद्यामित्यर्थः। तदानीं धनं प्रदेहीत्युत्तरत्र संबन्धः ॥

सुवीर्यं स्वश्व्यं सुगव्यमिन्द्र दद्धि नः । होतेव पूर्वचित्तये प्राध्वरे ॥३३॥

सुऽवीर्यम् । सुऽअश्व्यम् । सुऽगव्यम् । इन्द्र । दद्धि । नः ।
होताऽइव । पूर्वऽचित्तये । प्र । अध्वरे ॥ ३३ ॥

ᵛसुवीर्यं शोभनवीर्योपेतं ᵛस्वश्व्यं शोभनेनाश्वसंघेन च युक्तं ᵛसुगव्यं शोभनगोसंघयुक्तं च धनं हे ᵛइन्द्र ᵛनः अस्मभ्यं ᵛदद्धि ददस्व। 'ददᵉ दाने'। अनुदात्तेत्। व्यत्ययेन परस्मैपदम्।

---

१. ख-त-न-भ-श–मरुत्यो। २. ख-त-न-भ-श–प्रकाशमानाय। ३. घ–यजमानसाधनस्य। ४. श–दा।

छान्दसः शपो लुक्। अहं च ᵛअध्वरे यागे ᵛहोतेव यथा मानुषी[1] होतर्त्विक् स्तौति एवमेव ᵛपूर्वचित्तये पूर्वप्रज्ञानायान्येभ्यः स्तोतृभ्यः पूर्वमेवास्मत्स्तोत्रपरिज्ञानाय प्राशंसिषमिति शेषः ॥ ॥ ६ ॥ ॥ २ ॥

तृतीयेऽनुवाकेऽष्ट सूक्तानि। तत्र 'इन्द्रः सुतेषु' इति त्रयस्त्रिंशदृचं प्रथमं सूक्तं काण्वस्य नारदस्यार्षमौष्णिहमैन्द्रम्। तथा चानुक्रान्तम्—'इन्द्रः सुतेषु नारदः' इति। महाव्रते निष्केवल्ये औष्णिहतृचाशीतौ पूर्वसूक्तेन सहोक्तो विनियोगः। तृतीये पर्यायेऽच्छावाकशस्त्रे 'इन्द्रः सुतेषु' इति तृचः स्तोत्रियः। सूत्र्यते हि—'इन्द्रः सुतेषु सोमेषु य इन्द्र सोमपातमः' (आश्व. श्रौ. ६. ४) इति ॥

इन्द्रः सुतेषु सोमेषु क्रतुं पुनीत उक्थ्यम्। विदे वृधस्य दक्षसो महान्हि षः ॥१॥

इन्द्रः। सुतेषु। सोमेषु। क्रतुम्। पुनीते। उक्थ्यम्। विदे। वृधस्य। दक्षसः। महान्। हि। सः ॥१॥

ᵛसोमेषु ᵛसुतेषु अभिपुतेषु सत्सु ᵛइन्द्रः तान् पीत्वा ᵛक्रतुं कर्मणां कर्तारम् ᵛउक्थ्यं स्तोतारं च ᵛपुनीते शोधयति। यद्वा। सोमेष्वभिपुतेषूक्थ्यारूयं क्रतुं यागं तैः सोमैः पुनीते यजमानैः पूतं कारयति। किमर्थम्। ᵛवृधस्य वर्धकस्य ᵛदक्षसः बलस्य ᵛविदे लाभाय। ᵛसः तादृश इन्द्रः ᵛमहान् ᵛहि महान् खलु। अत एवं कर्तुं शक्नोतीति भावः ॥

स प्रथमे व्योमनि देवानां सदने वृधः। सुपारः सुश्रवस्तमः समप्सुजित् ॥२॥

सः। प्रथमे। विऽओमनि। देवानाम्। सदने। वृधः।
सुऽपारः। सुऽश्रवःऽतमः। सम्। अप्सुऽजित् ॥ २ ॥

ᵛसः इन्द्रः ᵛप्रथमे प्रथिते विस्तीर्णे मुख्ये वा ᵛव्योमनि विशेषेण रक्षके ᵛदेवानां ᵛसदने। सीदत्यस्मिन्निति सदनं स्थानं स्वर्गाख्यम्। तत्र स्थितः सन् ᵛवृधः यजमानानां वर्धयिता भवति। तथा ᵛसुपारः सुष्ठु पारयिता प्रारब्धस्य सम्यक्परिसमापयिता ᵛसुश्रवस्तमः। अतिशयेन शोभनं श्रवोऽन्नं यशो वा यस्य स तथोक्तः। ᵛसं सम्यक् ᵛअप्सुजित् अप्सूदकेषु प्राप्येषु सत्सु तद्विघातिनो वृत्रादेर्जेता। यद्वा। आप इत्यन्तरिक्षनाम। अन्तरिक्षे वर्तमानानामसुराणां जेता। तमह्व इत्युत्तरत्र संबन्धः ॥

तमह्वे वाजसातय इन्द्रं भराय शुष्मिणम्। भवा नः सुम्ने अन्तमः सखा वृधे ॥३॥

तम्। अह्वे। वाजऽसातये। इन्द्रम्। भराय। शुष्मिणम्।
भव। नः। सुम्ने। अन्तमः। सखा। वृधे ॥ ३ ॥

ᵛतं पूर्वोक्तगुणं ᵛशुष्मिणं बलवन्तम् ᵛइन्द्रं ᵛवाजसातये बलानामन्नानां वा सातिर्लाभो यस्मिन् तादृशाय ᵛभराय संग्रामाय। यद्वा। भ्रियन्ते तस्मिन्[2] हवींषीति भरो यज्ञः। प्रायेण संग्रामनामानि यज्ञनामत्वेन च दृश्यन्ते। भराय यज्ञार्थम् ᵛअह्वे आह्वये[3]। 'लिपिसिचिह्वश्च' 'आत्मनेपदेष्वन्यतरस्याम्' इति ह्वयतेश्छान्दसे लुङि च्लेरङादेशः। हे इन्द्र त्वं ᵛसुम्ने सुखे धने वा लिप्सिते सति ᵛनः अस्माकम् ᵛअन्तमः अन्तिकतमः संनिकृष्टतमः ᵛभव। 'तमे तादेश्च' इत्यन्तिकशब्दस्य तादिलोपः। तथा ᵛवृधे वर्धनार्थं च ᵛसखा समानख्यानो मित्रभूतो भव ॥

इयं ते इन्द्र गिर्वणो रातिः क्षरति सुन्वतः। मन्दानो अस्य बर्हिषो वि राजसि ॥४॥

इयम्। ते। इन्द्र। गिर्वणः। रातिः। क्षरति। सुन्वतः।
मन्दानः। अस्य। बर्हिषः। वि। राजसि ॥ ४ ॥

१. ग१–मन्त्रेण; ग२–मात्रेण। २. ग१–अस्मिन्। ३. ग–ह्वेऽो।

हे [v]गिर्वणः गीर्भिः स्तुतिभिर्वननीय संभजनीय [v]इन्द्र [v]ते तुभ्यं त्वदर्थम् [v]इयं पुरोवर्तिनी [v]सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य संबन्धिनी [v]रातिः ऋत्विग्भिर्दीयमाना सोमाहुतिः [v]क्षरति आहवनीयं प्रति गच्छति । त्वं च तया [v]मन्दानः मन्दमानो मोदमानस्तृप्यन् [v]अस्य [v]बर्हिषः[1] यज्ञस्य [v]वि [v]राजसि विशेषेणेशिषे । राजतिरैश्वर्यकर्मा ॥

नूनं तदिन्द्र दद्धि नो यत्त्वा सुन्वन्त ईमहे । रयिं नश्चित्रमा भरा स्वर्विदम् ॥५॥

नूनम् । तत् । इन्द्र । दद्धि । नः । यत् । त्वा । सुन्वन्तः । ईमहे ।
रयिम् । नः । चित्रम् । आ । भर । स्वःऽविदम् ॥ ५ ॥

हे [v]इन्द्र [v]नूनम् अवश्यं [v]तत् धनं [v]नः अस्मभ्यं [v]दद्धि ददस्व । 'दद दाने' । व्यत्ययेन परस्मैपदम् । छान्दसः शपो लुक् । [v]यत् धनं [v]त्वा त्वां [v]सुन्वन्तः सोममभिषुण्वन्तो[2] वयम् [v]ईमहे याचामहे । अपि च [v]चित्रं चायनीयं [v]स्वर्विदं सर्वस्य लम्भकं यद्वा स्वर्गस्य वेदितारमास्तिकं [v]रयिं पुत्रं [v]नः अस्मभ्यम् [v]आ [v]भर आहर[3] ॥ ॥ ७ ॥

स्तोता यत्ते विचर्षणिरतिप्रशर्धयद्गिरः । वयाइवानु रोहते जुषन्त यत् ॥६॥

स्तोता । यत् । ते । विऽचर्षणिः । अतिऽप्रशर्धयत् । गिरः ।
वयाःऽइव । अनु । रोहते । जुषन्त । यत् ॥ ६ ॥

हे इन्द्र [v]विचर्षणिः विशेषेण द्रष्टा [v]स्तोता [v]ते तुभ्यं त्वदर्थं [v]गिरः स्तुतीः [v]यत् यदा [v]अतिप्रशर्धयत् अतिशयेन प्रशर्धयित्रीरकरोत् । शत्रूणां प्रसहनसमर्थाः । 'शृधु प्रसहने' । [v]यत् यदा च ता गिरः [v]जुषन्त त्वामसेवन्त अप्रीणयन् वा तदा [v]वयाइव शाखा इव यथैकस्मिन् वृक्षे बह्व्यः शाखा उपरि प्ररोहन्ति तथा [v]अनु [v]रोहते स्तुत्या सर्वे गुणास्त्वयि प्ररोहन्ति ॥

प्रत्नवज्जनया गिरः शृणुधी जरितुर्हवम् । मदेमदे ववक्षिथा सुकृत्वने ॥७॥

प्रत्नऽवत् । जनय । गिरः । शृणुधि । जरितुः । हवम् । मदेऽमदे । ववक्षिथ । सुऽकृत्वने ॥७॥

हे इन्द्र [v]प्रत्नवत् पुरा यथा स्तोतृभ्योऽपेक्षितफलप्रदानेन स्तुतीर्जनयसि एवमिदानीमपि [v]गिरः स्तुतीः [v]जनय उत्पादय । [v]जरितुः स्तोतुः [v]हवम् आह्वानं च [v]शृणुधि शृणु । जानीहि । तादृशस्त्वं [v]मदेमदे सोमेन तर्पणे तर्पणे सति [v]सुकृत्वने शोभनकर्त्रे यजमानाय [v]ववक्षिथ अपेक्षितं फलं वहसि ददासीत्यर्थः ॥

क्रीळन्त्यस्य सूनृता आपो न प्रवता यतीः । अया धिया य उच्यते पतिर्दिवः ॥८॥

क्रीळन्ति । अस्य । सूनृताः । आपः । न । प्रऽवता । यतीः ।
अया । धिया । यः । उच्यते । पतिः । दिवः ॥ ८ ॥

[v]अस्य इन्द्रस्य [v]सूनृताः प्रियसत्यास्मिका वाचः [v]क्रीळन्ति विहरन्ति । तत्र दृष्टान्तः । [v]प्रवता प्रवणेन मार्गेण [v]यतीः गच्छन्त्यः [v]आपो [v]न आप इव । यथा निम्नोन्नतेन पथा गच्छन्त्य आप

---

१. ग–बर्हिषि । २. ख-घ-त-न–सोमाभिषुण्वंतः; ग-भ–सोमानभिषुण्वंतः; श–सोमाभिषवं कुर्वंतः ।
३. ग-त-न-भ-श–आहरेति ।

उत्पतननिपतनेन विहरन्ति तद्वत्। vदिवः स्वर्गस्य vपतिः पालयिता vयः इन्द्रः vअथा अनया vधिया स्तुत्या vउच्यते प्रतिपाद्यते अस्येन्द्रस्येत्यन्वयः॥

उतो पतिर्य उच्यते कृष्टीनामेक इद्वशी। नमोवृधैरवस्युभिः सुते रण ॥ ९ ॥

उतो इति। पतिः। यः। उच्यते। कृष्टीनाम्। एकः। इत्। वशी।
नमःऽवृधैः। अवस्युऽभिः। सुते। रण ॥ ९ ॥

vउतो अपि च vवशी वशयिता vएक vइत् एक एव vकृष्टीनां मनुष्याणां vपतिः पालयितेति vयः इन्द्रः vउच्यते। कैः। vनमोवृधैः नमसा स्तोत्रेण हविषा वा वर्धयितृभिः vअवस्युभिः रक्षणेच्छुभिः। स त्वं पूर्वोक्ते vसुते अभिषुते सोमे vरण रमस्व। यद्वा। हे स्तोतः तमिन्द्रं सुते सोमे स्तुहि[1]। रणतिः शब्दार्थः॥

स्तुहि श्रुतं विपश्चितं हरी यस्य प्रसक्षिणा। गन्तारा दाशुषो गृहं नमस्विनः ॥१०॥

स्तुहि। श्रुतम्। विपःऽचितम्। हरी इति। यस्य। प्रऽसक्षिणा।
गन्तारा। दाशुषः। गृहम्। नमस्विनः ॥ १० ॥

हे स्तोतः vविपश्चितं विशिष्टज्ञानं vश्रुतं विश्रुतं प्रख्यातं तमिन्द्रं vस्तुहि प्रशंस। vयस्य इन्द्रस्य vहरी अश्वौ vप्रसक्षिणा शत्रूणां प्रसहनशीलौ vनमस्विनः हविष्मतः vदाशुषः दत्तवतो यजमानस्य vगृहं vगन्तारा गमनशीलौ च तमिन्द्रं स्तुहीति संबन्धः। गमेस्ताच्छीलिकस्तृन्॥ ॥ ८ ॥

तुतुजानो महेमतेऽश्वेभिः प्रुषितप्सुभिः। आ याहि यज्ञमाशुभिः शमिद्धि ते ॥११॥

तुतुजानः। महेऽमते। अश्वेभिः। प्रुषितप्सुऽभिः।
आ। याहि। यज्ञम्। आशुऽभिः। शम्। इत्। हि। ते ॥ ११ ॥

हे vमहेमते। महते फलाय मतिर्बुद्धिर्यस्यासौ महेमतिः। अलुक् छान्दसः। स तादृश हे इन्द्र vतुतुजानः त्वरमाणः सन् vप्रुषितप्सुभिः स्निग्धरूपैः vआशुभिः शीघ्रगामिभिः vअश्वेभिः अश्वैः vयज्ञम् अस्मदीयम् vआ vयाहि आगच्छ। vहि यस्मात् vते तव तस्मिन् यज्ञे vशमित् सुखं विद्यत एव। अत आगच्छेत्यर्थः॥

इन्द्र शविष्ठ सत्पते रयिं गृणत्सु धारय। श्रवः सूरिभ्यो अमृतं वसुत्वनम् ॥१२॥

इन्द्र। शविष्ठ। सत्ऽपते। रयिम्। गृणत्ऽसु। धारय।
श्रवः। सूरिऽभ्यः। अमृतम्। वसुऽत्वनम्॥ १२ ॥

हे vशविष्ठ बलवत्तम vसत्पते सतां पालयितः vइन्द्र vगृणत्सु अस्मासु vरयिं धनं vधारय अवस्थापय। अपि च vसूरिभ्यः स्तोतृभ्यः vअमृतम् अनश्वरं vवसुत्वनं व्याप्तिमत् vश्रवः अन्नं यशो वा देहीति शेषः॥

हवे त्वा सूर उदिते हवे मध्यंदिने दिवः। जुषाण इन्द्र सप्तिभिर्न आ गहि ॥१३॥

---

१. म१-३-रण स्तुहि।

हवे॑। त्वा। सू॒रे। उत्ऽई॑ते। हवे॑। म॒ध्यं॒दिने॑। दि॒वः।

जु॒षा॒णः। इ॒न्द्र॒। स॒स्मि॒ऽभिः। नः। आ। ग॒हि॒॥ १३॥

हे [v]इन्द्र [v]सूरे सूर्ये [v]उदिते उदयं प्राप्ते सति प्रातःसवने त्वां[1] [v]हवे आह्वये। तथा [v]दिवः दिवसस्य [v]मध्यंदिने मध्यभागे माध्यंदिनसवने त्वां [v]हवे आह्वये। हे इन्द्र स त्वं [v]जुषाणः प्रीयमाणः सन् [v]सस्मिभिः सर्पणशीलैरश्वैः [v]नः अस्मान् [v]आ [v]गहि आगच्छ॥

आ तू ग॑हि॒ प्र तु द्र॑व॒ मत्स्वा सु॒तस्य॒ गोम॑तः।
तन्तुं॑ तनुष्व पू॒र्व्यं यथा॑ वि॒दे॥ १४॥

आ। तु। ग॒हि॒। प्र। तु। द्र॒व॒। मत्स्व॑। सु॒तस्य॑। गोऽम॑तः।

तन्तु॑म्। त॒नु॒ष्व॒। पू॒र्व्यम्। यथा॑। वि॒दे॥ १४॥

हे इन्द्र [v]तु क्षिप्रम् [v]आ [v]गहि आगच्छ। आगत्य च [v]तु क्षिप्रं [v]प्र [v]द्रव। सोमो यत्र निवसति तं देशं प्रति शीघ्रं गच्छ। गत्वा च [v]गोमतः गोविकारैः पयःप्रभृतिभिः श्रयणद्रव्यैर्युक्तस्य [v]सुतस्य अभिषुतस्य सोमस्य पानेन [v]मत्स्व माद्य हृष्टो भव। तदनन्तरं [v]यथा अहं [v]विदे उपलभे तथा [v]पूर्व्यं पूर्वैः कृतं [v]तन्तुं विस्तृतं यज्ञं [v]तनुष्व सम्यङ्निष्पादय। फलोत्पादनसमर्थं कुर्वित्यर्थः॥

यच्छ॒क्रासि॑ परा॒वति॒ यदर्वा॑वति॑ वृत्रहन्। यद्वा॑ समु॒द्रे अन्ध॑सोऽवि॒तेदसि॥१५॥

यत्। श॒क्र॒। असि॑। परा॑ऽवति। यत्। अर्वा॑ऽवति। वृ॒त्र॒ऽह॒न्।

यत्। वा॒। स॒मु॒द्रे। अन्ध॑सः। अ॒वि॒ता। इत्। अ॒सि॒॥ १५॥

हे [v]शक्र शक्तेन्द्र [v]परावति दूरदेशे [v]यत् यदि [v]असि भवसि। हे [v]वृत्रहन् [v]यत् यदि वा [v]अर्वावति समीपे भवसि वर्तसे। [v]यद्वा यदि वा [v]समुद्रे जलधावन्तरिक्षे वा वर्तसे। तस्मात् सर्वस्मात् स्थानादागत्य [v]अन्धसः अन्नस्य सोमलक्षणस्य पानेन [v]अवितेदसि रक्षितैव भवसि॥ ॥९॥

इन्द्रं॑ वर्धन्तु नो॒ गिर॒ इन्द्रं॑ सु॒तास॒ इन्द॑वः। इन्द्रे॑ ह॒विष्म॑तीर्विशो॒ अरा॑णिषुः॥१६॥

इन्द्र॑म्। व॒र्ध॒न्तु॒। नः॒। गिरः॑। इन्द्र॑म्। सु॒तासः॑। इन्द॑वः।

इन्द्रे॑। ह॒विष्म॑तीः। विशः॑। अरा॑णिषुः॥ १६॥

[v]नः अस्माकं [v]गिरः स्तुतिरूपा वाचः [v]इन्द्रं [v]वर्धन्तु वर्धयन्तु। [v]सुतासः अभिषुताः [v]इन्दवः सोमाश्चास्मदीयाः तम् [v]इन्द्रं वर्धयन्तु। [v]हविष्मतीः हविष्मत्यो हविर्भिश्चरुपुरोडाशादिभिर्युक्ताः [v]विशः प्रजास्तस्मिन् [v]इन्द्रे [v]अराणिषुः अरंसिषुः॥

तमिद्विप्रा॑ अवस्यवः॒ प्रव॑त्वतीभि॒रूति॑भिः। इन्द्रं॑ क्षो॒णीर॑वर्धयन्व॒याइ॑व॥१७॥

तम्। इत्। विप्राः॑। अ॒व॒स्य॒वः॑। प्रव॑त्वतीभिः। ऊ॒तिऽभिः॑।

इन्द्र॑म्। क्षो॒णीः॑। अ॒व॒र्ध॒य॒न्। व॒याःऽइ॑व॥ १७॥

---

१. घ-त्वा त्वां।

vविप्राः मेधाविनः vअवस्यवः रक्षणकामाः स्तोतारः vतमित् तमेव vइन्द्रं vप्रवत्वतीभिः प्रकर्षेणाभिगन्त्रीभिः vऊतिभिः तृप्तिकरीभिराहुतिभिः स्तुतिभिर्वा वर्धयन्ति। तथा vक्षोणीः क्षोण्यः। क्षोणीति पृथिवीनाम। तदुपलक्षिताः सर्वे लोकाः vवयाइव वृक्षस्य शाखा इव तदधीनाः सन्तः vअवर्धयन् वर्धयन्ति॥

त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत। तमिद्वर्धन्तु नो गिरः सदावृधम् ॥१८॥

त्रिऽकद्रुकेषु। चेतनम्। देवासः। यज्ञम्। अत्नत।
तम्। इत्। वर्धन्तु। नः। गिरः। सदाऽवृधम्॥ १८॥

vत्रिकद्रुकेषु। त्रिकद्रुका नाम ज्योतिर्गौरायुरिति त्रीण्याभिप्लविकान्यहानि। तेषु vदेवासः देवाः vचेतनं चेतयितारमिन्द्रं vयज्ञं यष्टव्यम् vअत्नत अतन्वत अकृषत। तनोतेर्लङि छान्दसो विकरणस्य लुक्। 'तनिपत्योश्छन्दसि' इत्युपधालोपः। vतमित् तमेवेन्द्रं vनः अस्माकं vगिरः स्तुतयश्च वर्धयन्तु। कीदृशम्। vसदावृधं सर्वदा स्तोतॄणां वर्धयितारम्॥

स्तोता यत्ते अनुव्रत उक्थान्यृतुथा दधे। शुचिः पावक उच्यते सो अद्भुतः ॥१९॥

स्तोता। यत्। ते। अनुऽव्रतः। उक्थानि। ऋतुऽथा। दधे।
शुचिः। पावकः। उच्यते। सः। अद्भुतः॥ १९॥

हे इन्द्र vयत् यस्य vते तव vस्तोता vअनुव्रतः अनुकूलकर्मा सन् vऋतुथा ऋतुषु काले काले vउक्थानि शस्त्रादि[1] vदधे विधत्ते करोति। 'लोपस्त आत्मनेपदेषु' इति तलोपः। परोऽर्धर्चः परोक्षकृतः। vसः इन्द्रः vअद्भुतः आश्चर्यभूतः vशुचिः शुद्धः vपावकः अन्येषामपि शोधकः vउच्यते स्तोतृभिः स्तूयते॥

तदिद्रुद्रस्य चेतति यह्वं प्रत्नेषु धामसु। मनो यत्रा वि तदधुर्विचेतसः ॥२०॥

तत्। इत्। रुद्रस्य। चेतति। यह्वम्। प्रत्नेषु। धामऽसु।
मनः। यत्र। वि। तत्। दधुः। विऽचेतसः॥ २०॥

vतदित् तदेव vरुद्रस्य। रुत् दुःखम्। तस्य द्रावयितुरीश्वरस्य vयह्वम् अपत्यं मरुत्संघात्मकम्। यद्वा। रुद्रशब्देन लक्षणया मरुद्गण उच्यते। रुद्रस्य रुद्रपुत्रस्य मरुद्गणस्य यह्वम्। महन्नामैतत्। महत् तदेव बलं vप्रत्नेषु चिरंतनेषु vधामसु पृथिव्यादिस्थानेषु vचेतति ज्ञायते वर्तते। vयत्र यस्मिन् बलविषये vविचेतसः विशिष्टज्ञानाः स्तोतारः vतत् प्रसिद्धं vमनः मननसाधनं स्तोत्रं vवि vदधुः कुर्वन्ति तदित्यन्वयः॥ ॥ १० ॥

यदि मे सख्यामावरं इमस्य पाह्यन्धसः। येन विश्वा अति द्विषो अतारिम ॥२१॥

यदि। मे। सख्यम्। आऽवरः। इमस्य। पाहि। अन्धसः।
येन। विश्वाः। अति। द्विषः। अतारिम॥ २१॥

हे इन्द्र मम[2] vसख्यं सखित्वं vयदि vआवरः यद्याभिमुख्येन वृणुयास्तर्हि vइमस्य अस्य। इलि लोपाभावश्छान्दसः। पुरोवर्तिनः vअन्धसः अन्नस्य सोमलक्षणस्य स्वांशं[3] vपाहि पिब।

१. ग–शस्त्राणि। २. घ-ङ-त१-२–मे मम। ३. ग–त्वं।

अन्धस इति कर्मणि वा षष्ठी । पिबतेश्छान्दसः शपो लुक् । [v]येन [ ]त्वत्पीतेन सोमेन हेतुना वयं [v]विश्वाः सर्वाः [v]द्विषः द्वेष्ट्रीः शत्रुसेनाः [v]अति [v]अतारिम अतितरेम अतिक्रामेम ॥

कदा त इन्द्र गिर्वणः स्तोता भवाति शंतमः ।
कदा नो गव्ये अश्व्ये वसौ दधः ॥ २२ ॥

कदा । ते । इन्द्र । गिर्वणः । स्तोता । भवाति । शम्ऽतमः ।
कदा । नः । गव्ये । अश्व्ये । वसौ । दधः ॥ २२ ॥

हे [v]गिर्वणः गिरां स्तुतीनां संभक्तः [v]इन्द्र [v]ते तव [v]स्तोता [v]शंतमः सुखतमोऽतिशयेन सुखवान् [v]कदा कस्मिन् काले [v]भवाति भवेत् । [v]कदा कस्मिंश्च काले [v]नः अस्मान् [v]गव्ये गोसमूहे [v]अश्व्ये अश्वसंघे [v]वसौ निवासभूतेऽन्यस्मिन्नपि धने [v]दधः धारयेः ॥

उत ते सुष्टुता हरी वृषणा वहतो रथम् । अजुर्यस्य मदिन्तमं यमीमहे ॥ २३ ॥

उत । ते । सुऽस्तुता । हरी इति । वृषणा । वहतः । रथम् ।
अजुर्यस्य । मदिन्ऽतमम् । यम् । ईमहे ॥ २३ ॥

[v]उत अपि च हे इन्द्र [v]सुष्टुता शोभनं[1] स्तुतौ[1] वृषणौ[2] कामानां वर्षितारौ [v]हरी अश्वौ [v]अजुर्यस्य जरारहितस्य [v]ते तव [v]रथम् इदानीं [v]वहतः अस्मन्निकटं प्रापयतः । [v]मदिन्तमम् अतिशयेन मदवन्तं [v]यं त्वां धनम् [v]ईमहे याचामहे तस्य त इत्यन्वयः ॥

तमीमहे पुरुष्टुतं यद्धं प्रत्नाभिरूतिभिः । नि बर्हिषि प्रिये सदद्धा दिता ॥२४॥

तम् । ईमहे । पुरुऽस्तुतम् । यद्धम् । प्रत्नाभिः । ऊतिऽभिः ।
नि । बर्हिषि । प्रिये । सदत् । अध । दिता ॥ २४ ॥

[v]यद्धं महान्तं [v]पुरुस्तुतं[3] बहुभिः स्तुतं [v]तम् इन्द्रं [v]प्रत्नाभिः पुराणीभिः[4] [v]ऊतिभिः तृप्तिकरीभिः सोमाहुतिभिर्हेतुभिः [v]ईमहे याचामहे । स चेन्द्रः [v]प्रिये प्रीतिकरे [v]बर्हिषि आस्तीर्णे दर्भे [v]नि [v]षदत् निषीदतु हविःस्वीकरणायोपविशतु । [v]अध अनन्तरं [v]दिता द्वैधं[5] वर्तमानानि चरुपुरोडाशादीनि सोमलक्षणानि च हवींषि स्वीकरोत्विति शेषः ॥

वर्धस्वा सु पुरुष्टुत ऋषिष्टुताभिरूतिभिः । धुक्षस्व पिप्युषीमिषमवा च नः ॥२५॥

वर्धस्व । सु । पुरुऽस्तुत । ऋषिऽस्तुताभिः । ऊतिऽभिः ।
धुक्षस्व । पिप्युषीम् । इषम् । अव । च । नः ॥ २५ ॥

हे [v]पुरुष्टुत बहुभिः स्तुतेन्द्र [v]ऋषिष्टुताभिः[6] ऋषिभिः मन्त्रदर्शिभिः पुरा स्तुताभिः [v]ऊतिभिः रक्षाभिः [v]सु सुष्ठु [v]वर्धस्व अस्मान् वर्धय । यद्वा । ऋषिभिरुत्पादिताभिरूतिभिः स्तुतिभिस्त्वं वर्धस्व वृद्धिं प्राप्नुहि । [v]नः अस्मभ्यं [v]च [v]पिप्युषीं प्रवृद्धाम् [v]इषम् इष्यमाणमन्नम् [v]अव [v]धुक्षस्व अवाङ्मुखमस्मदभिमुखं धुक्षस्व[7] क्षारय । देहीत्यर्थः ॥ ॥ ११ ॥

---

१. ख-घ-ज्ञ-त१-२-३-भ१-३-श–शोभनस्तुती; ग–शोभनश्च्तौ । २. भ–वृषणा वृषणौ । ३. ग१-त२–पुरुष्टुतं । ४. ग–पुराणाभिः । ५. ग–द्विधा । ६. त१-२-भ३–ऋषिस्तुताभिः; भ२–ऋषिभिः स्तुताभिः । ७. ग-न-भ१–धुक्ष्व ।

इन्द्र त्वमवितेदसीत्था स्तुवतो अद्रिवः । ऋतादियर्मि ते धियं मनोयुजम् ॥ २६ ॥

इन्द्र । त्वम् । अविता । इत् । असि । इत्था । स्तुवतः । अद्रिऽवः ।
ऋतात् । इयर्मि । ते । धियम् । मनःऽयुजम् ॥ २६ ॥

हे vअद्रिवः वज्रवन् vइन्द्र vत्वम् vइत्था इत्थमनेन प्रकारेण vस्तुवतः स्तोत्रं कुर्वतो यजमानस्य vअवितेदसि रक्षितैव भवसि । यत एवमतः कारणादहमपि vऋतात् यज्ञाद्धेतोः[1] vमनोयुजं मनसा मननीयेन स्तोत्रेण प्राप्यां vते त्वदीयां vधियम् अनुग्रहबुद्धिम् vइयर्मि प्राप्नोमि । यद्वा । ऋतात् सत्यभूतात्त्वत्तः स्तोत्रेण युक्तं त्वत्प्रीतिकरं कर्माहं प्राप्नोमि ॥

इह त्या सधमाद्या युजानः सोमपीतये । हरी इन्द्र प्रतद्वसू अभि स्वर ॥२७॥

इह । त्या । सधऽमाद्या । युजानः । सोमऽपीतये ।
हरी इति । इन्द्र । प्रतद्वसू इति प्रतत्ऽवसू । अभि । स्वर ॥ २७ ॥

हे vइन्द्र vइह अस्मिन् यागे vसोमपीतये सोमपानाय vअभि vस्वर अभिगच्छ । किं कुर्वन् । vत्या त्यौ तौ प्रसिद्धौ vसधमाद्या त्वया सह हविर्भिर्मादयितव्यौ तर्पयितव्यौ vप्रतद्वसू प्रततवसू विस्तीर्णधनौ ईदृशौ vहरी त्वदीयावश्वौ vयुजानः रथेन संयोजयन् ॥

अभि स्वरन्तु ये तव रुद्रासः सक्षत श्रियम् । उतो मरुत्वतीर्विशो अभि प्रयः ॥२८॥

अभि । स्वरन्तु । ये । तव । रुद्रासः । सक्षत । श्रियम् ।
उतो इति । मरुत्वतीः । विशः । अभि । प्रयः ॥ २८ ॥

vअभि vस्वरन्तु अभिगच्छन्तु ते हे इन्द्र vतव अनुचराः vरुद्रासः रुद्रपुत्राः vये मरुतः सन्ति । अपि च ते vश्रियं श्रयणीयमिमं यज्ञं vसक्षत सचन्तु प्राप्नुवन्तु । vउतो अपि च vमरुत्वतीः मरुद्भिर्युक्ताः vविशः अन्या अपि दैवीः प्रजाः vप्रयः । अन्ननामैतत् । अस्मदीयं हविर्लक्षणमन्नमभिगच्छन्तु ॥

इमा अस्य प्रतूर्तयः पदं जुषन्त यद्दिवि । नाभा यज्ञस्य सं दधुर्यथा विदे ॥ २९ ॥

इमाः । अस्य । प्रऽतूर्तयः । पदम् । जुषन्त । यत् । दिवि ।
नाभा । यज्ञस्य । सम् । दधुः । यथा । विदे ॥ २९ ॥

vअस्य इन्द्रस्य संबन्धिन्यः vइमाः पूर्वोक्ता मरुदादिरूपाः प्रजाः vप्रतूर्तयः प्रकर्षेण शत्रूणां हिंसिन्यः सत्यः vपदं स्थानं vजुषन्त असेवन्त । vदिवि द्युलोके vयत् स्थानमन्यैर्दुष्प्रापमस्ति तत्पदमित्यर्थः । अपि च ताः vयज्ञस्य ज्योतिष्टोमादेः vनाभा नाभौ नाभिस्थानीये हविर्धाने उत्तरवेद्यां वा vसं vदधुः संनिदधते । vयथा येन प्रकारेण vविदे विन्दे अपेक्षितं धनं लभे तथेत्यर्थः । यद्वा । विदे ज्ञानाय यथास्माकं दक्षावरं[2] ज्ञानं भवति तथेत्यर्थः ॥

अयं दीर्घाय चक्षसे प्राचिं प्रयत्यध्वरे । मिमीते यज्ञमानुषग्विचक्ष्यं ॥ ३० ॥

अयम् । दीर्घाय । चक्षसे । प्राचिं । प्रऽयति । अध्वरे ।
मिमीते । यज्ञम् । आनुषक् । विऽचक्ष्यं ॥ ३० ॥

---

१. ख-त-न-भ-श-यज्ञाद्धोतुः । २. ख-त-न-भ-दक्षोवरं; ग-पक्षेवरं; श-दीक्षावरं ।

vप्राचि प्राचीने प्रागायते यज्ञगृहे vअध्वरे हिंसारहिते यज्ञे vप्रयति गच्छति प्रवर्तमाने सति vअयम् इन्द्रः प्रवर्तमानं तं vयज्ञमानुषक् अनुषक्तमानुपूर्व्येण vविचक्ष्य विशेषेण दृष्ट्वा vमिमीते निष्पादयति। किमर्थम्। vदीर्घाय आयताय vचक्षसे[1] दर्शनाय। यद्वा। द्रष्टव्याय फलाय ॥ ॥१२॥

वृषायमिन्द्र ते रथ उतो ते वृषणा हरी। वृषा त्वं शतक्रतो वृषा हवः ॥ ३१ ॥

वृषा। अयम्। इन्द्र। ते। रथः। उतो इति। ते। वृषणा। हरी इति।

वृषा। त्वम्। शतक्रतो इति शतऽक्रतो। वृषा। हवः ॥ ३१ ॥

हे vइन्द्र vते त्वदीयः vअयं vरथः vवृषा कामानां वर्षिता। vउतो अपि च vते तव vहरी अश्वौ vवृषणा वृषणौ वर्षितारौ। हे vशतक्रतो बहुकर्मन् बहुप्रज्ञ वेन्द्र vत्वं च vवृषा वर्षिता कामानाम्। तथा vहवः त्वद्विषयमाह्वानं च vवृषा वर्षिता। त्वद्विषयमाह्वानमपि कामान् वर्षति। किमु वक्तव्यं त्वदीया रथादयो वर्षन्तीति भावः ॥

वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः। वृषा यज्ञो यमिन्वसि वृषा हवः ॥ ३२ ॥

वृषा। ग्रावा। वृषा। मदः। वृषा। सोमः। अयम्। सुतः।

वृषा। यज्ञः। यम्। इन्वसि। वृषा। हवः ॥ ३२ ॥

vग्रावा अभिषवसाधनपाषाणः vवृषा वर्षिता कामानाम्। हे इन्द्र त्वदीयः सोमपानजन्यः vमदः च vवृषा वर्षिता। vसुतः त्वदर्थमभिषुतः vअयं vसोमः च vवृषा वर्षिता। vयं यज्ञम् vइन्वसि त्वं प्राप्नोषि स च vयज्ञः vवृषा अभीष्टस्य फलस्य वर्षिता। त्वदीयः vहवः च vवृषा ॥

वृषा त्वा वृषणं हुवे वज्रिञ्चित्राभिरूतिभिः। वावन्थ हि प्रतिष्टुतिं वृषा हवः ॥ ३३ ॥

वृषा। त्वा। वृषणम्। हुवे। वज्रिन्। चित्राभिः। ऊतिऽभिः।

ववन्थ। हि। प्रतिऽस्तुतिम्। वृषा। हवः ॥ ३३ ॥

हे vवज्रिन् वज्रवन्निन्द्र vवृषणं वृषाणं वर्षितारं त्वां[2] vवृषा वर्षिता हविषामासेक्ताहं vचित्राभिः चायनीयाभिर्नानाविधाभिर्वा vऊतिभिः तृप्तिकरीभिः स्तुतिभिः vहुवे आह्वये। vहि यस्मात्त्वं vप्रतिष्टुतिं त्वामभिलक्ष्य कृतं स्तोत्रं vववन्थ[3] वनसि संभजसि अतस्त्वदीयः vहवः आह्वानं vवृषा वर्षिता। यद्वा। हवो ह्वातव्यो वृषा वर्षिता त्वं यस्मात् स्तुतिं वनसि तस्मात्त्वां हुव इत्यर्थः ॥ ॥१३॥

'यदिन्द्राहम्' इति पञ्चदशर्चं द्वितीयं सूक्तं गोपूक्त्यश्वसूक्तिनोः काण्वगोत्रयोरार्षं गायत्रमैन्द्रम्। तथा चानुक्रान्तं—'यदिन्द्र पञ्चोना गोपूक्त्यश्वसूक्तिनौ काण्वायनौ' इति। महाव्रते निष्केवल्य एतत्सूक्तम्। तथैव पञ्चमारण्यके सूत्र्यते—'यदिन्द्राहं यथा त्वं प्र सम्राजं चर्षणीनामिति सूक्ते' (ऐ. आ. ५. २. ५) इति। तृतीये पर्याये ब्रह्मशस्त्रेऽपीदं सूक्तम्। सूत्रितं च—'यदिन्द्राहं प्र ते महे' (आश्व. श्रौ. ६. ४) इति ॥

यदिन्द्राहं यथा त्वमीशीय वस्व एक इत्। स्तोता मे गोषखा स्यात् ॥ १ ॥

यत्। इन्द्र। अहम्। यथा। त्वम्। ईशीय। वस्वः। एकः। इत्।

स्तोता। मे। गोऽसखा। स्यात्॥ १ ॥

---

१. घ-त-न-चक्षसे च। २. घ-त्वा त्वां। ३. श-वावंथ।

हे [v]इन्द्र [v]यथा [v]त्वम् [v]एक [v]इत् एक एव केवलं [v]वस्वः वसुनः धनस्य ईशिषे[1] एवम् अहम् अपि [v]यत् यदि [v]ईशीय ऐश्वर्ययुक्तः स्यां तदानीं [v]मे मम [v]स्तोता [v]गोसखा [v]स्यात् गोभिः हितो भवेत्। ईश्वरस्य तव स्तोता कुतो हेतोर्गोसहितो न भवेत् अपि तु भवेदित्यभिप्रायः[2] ॥

शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे। यदहं गोपतिः स्याम् ॥ २ ॥

क्षेयम्। अस्मै। दित्सेयम्। शचीऽपते। मनीषिणे। यत्। अहम्। गोऽपतिः। स्याम्॥२॥

हे [v]शचीपते शक्तिमन्निन्द्र [v]अस्मै [v]मनीषिणे मनस ईशित्रे स्तोत्रे [v]दित्सेयं दातुमिच्छेयम्। दनन्तरं [v]शिक्षेयं प्रार्थितं धनं दद्यां च। [v]यत् यदि [v]अहं [v]गोपतिः गवामधिपतिः [v]स्यां भवेयं त्प्रसादादिति शेषः ॥

धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते। गामश्वं पिप्युषीं दुहे ॥ ३ ॥

नुः। ते। इन्द्र। सूनृता। यजमानाय। सुन्वते। गाम्। अश्वम्। पिप्युषीं। दुहे ॥ ३ ॥

हे [v]इन्द्र [v]ते तव [v]सूनृता स्तुतिरूपा वाक् [v]धेनुः दोग्ध्री गौर्भूत्वा [v]सुन्वते सोमाभिषवं र्वते [v]यजमानाय [v]गामश्वं च। उपलक्षणमेतत्। गवाश्वादिकं सर्वमभिलषितं [v]दुहे दुग्धे। किं र्वती। [v]पिप्युषी तमेव[3] प्रवर्धयित्री ॥

न ते वर्तास्ति राधस इन्द्र देवो न मर्त्यः। यदित्ससि स्तुतो मघम् ॥ ४ ॥

ते। वर्ता। अस्ति। राधसः। इन्द्र। देवः। न। मर्त्यः। यत्। दित्ससि। स्तुतः। मघम्॥४॥

हे [v]इन्द्र [v]ते तव [v]राधसः धनस्य स्तोतृभ्यो दातव्यस्य [v]वर्ता निवारकः [v]देवः [v]न [v]अस्ति विद्यते। [v]न [v]मर्त्यः मनुष्योऽपि निवारको नास्ति[4]। [v]स्तुतः स्तोतृभिः प्रख्यापितगुणः सन् [v]यत् [v]मघं मंहनीयं धनं [v]दित्ससि त्वं दातुमिच्छसि ॥

यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत्। चक्राण ओपशं दिवि ॥ ५ ॥

ज्ञः। इन्द्रम्। अवर्धयत्। यत्। भूमिम्। वि। अवर्तयत्। चक्राणः। ओपशम्। दिवि ॥५॥

[v]यज्ञः यजमानैरनुष्ठीयमानो यागः [v]इन्द्रं देवम् [v]अवर्धयत्। श्रूयते हि—'इन्द्र इदं वैरजुषतावीवृधत महो ज्यायोऽकृत' (तै. ब्रा. ३. ५. १०. ३) इति। स इन्द्रः [v]यत् यस्मात् भूमिं पृथिवीं [v]व्यवर्तयत् वृष्ट्यादिप्रदानेन विशेषेण वर्तमानामकरोत्। किं कुर्वन्। [v]दिवि अन्तरिक्षे ाम् [v]ओपशम् उपेत्य शयानं [v]चक्राणः कुर्वन्। यद्वा। आत्मनि समवेतो वीर्यविशेष ओपशः। न्तरिक्षे कुर्वन् ॥ ॥ १४ ॥

वावृधानस्य ते वयं विश्वा धनानि जिग्युषः। ऊतिमिन्द्रा वृणीमहे ॥ ६ ॥

धानस्य। ते। वयम्। विश्वा। धनानि। जिग्युषः। ऊतिम्। इन्द्र। आ। वृणीमहे ॥६॥

हे [v]इन्द्र [v]वावृधानस्य[5] वर्धमानस्य [v]विश्वा विश्वानि सर्वाणि [v]धनानि शत्रुसंबन्धीनि जिग्युषः जितवतः [v]ते तव [v]ऊतिं रक्षां [v]वयम् [v]आ [v]वृणीमहे आभिमुख्येन संभजामहे ॥

---

१. भ१-३-ईशिषे मह एव ईश्वरो भवसि मपि; य-ईशिषे ईश्वरो भवसि। २. ग-भ१-३-य-देवेत्य°; न-भवेदेत्य°। ३. भ-तमेव यजमानं। ४. त-न-भ-अस्ति। ५. ग-भ-ववृधानस्य

चातुर्विंशिकेऽहनि प्रातःसवने ब्रह्मशस्त्रे 'व्यन्तरिक्षमतिरत्' इत्ययं पर्यासस्तृचः। सूय्यते हि—'व्यन्तरिक्षमतिरच्छयावाश्वस्य सुन्वत इति तृचाः पर्यासाः' (आश्व. श्रौ. ७.२) इति। अहर्गणेषु द्वितीयादिष्वहःस्वपि तस्यैव तस्मिन्नेव शस्त्रेऽयं पर्यासस्तृचः। सूत्रितं च—'पर्यासान्कृतोऽहरहःशस्यानीति[1] होत्रका द्वितीयादिष्वेव' (आश्व. श्रौ. ७. १) इति ॥

व्य१न्तरिक्षमतिरन्मदे सोमस्य रोचना । इन्द्रो यदभिनद्बलम् ॥ ७ ॥

वि । अन्तरिक्षम् । अतिरत् । मदे । सोमस्य । रोचना । इन्द्रः । यत् । अभिनत् । बलम् ॥७॥

Vसोमस्य पानेन Vमदे हर्षे सति Vरोचना रोचमानम् Vअन्तरिक्षम् अयम् Vइन्द्रः Vवि Vअतिरत् व्यवर्धयत् । Vयत् यस्मात्कारणात् Vबलम् आवृत्य स्थितमसुरं मेघं वा Vअभिनत् व्यदारयत् ॥

उद्गा आजदङ्गिरोभ्य आविष्कृण्वन्गुहा सतीः । अर्वाञ्चं नुनुदे बलम् ॥ ८ ॥

उत् । गाः । आजत् । अङ्गिरःऽभ्यः । आविः । कृण्वन् । गुहा । सतीः ।
अर्वाञ्चम् । नुनुदे । बलम् ॥ ८ ॥

Vअङ्गिरोभ्यः ऋषिभ्यो वलानुचरैः पणिभिरपहृताः Vगाः Vउत् Vआजत् उदगमयत् । किं कुर्वन् । Vगुहा गुहायां बिले Vसतीः विद्यमानाः यथा न दृश्यन्ते तथा पणिभिर्गूढास्ता गाः Vआविष्कृण्वन् प्रकाशयन् । अपि च पणीनामधिपतिं Vबलम् असुरमपि Vअर्वाञ्चम् अधोमुखं Vनुनुदे प्रेरितवान् ॥

इन्द्रेण रोचना दिवो दृळ्हानि दंहितानि च । स्थिराणि न पराणुदे ॥ ९ ॥

इन्द्रेण । रोचना । दिवः । दृळ्हानि । दंहितानि । च । स्थिराणि । न । पराऽनुदे ॥ ९ ॥

Vदिवः द्युलोकस्य संबन्धीनि Vरोचना रोचमानानि देवगृहात्मकानि नक्षत्राणि Vइन्द्रेण Vदृळ्हानि दृढावयवानि बलवन्ति कृतानि Vदंहितानि Vच दृढीकृतानि । यथैकत्र नैश्चल्येनावतिष्ठन्ते तथा कृतानीत्यर्थः । यद्वा । 'दह दहि वृहि वृद्धौ' । दंहितानि वर्धितानि चेत्यर्थः । अपि च Vस्थिराणि स्थास्नूनि[2] दृढानि तानि Vन Vपराणुदे परानोदनीयानि न भवन्ति । न केनापि स्थानात् प्रच्यावयितुं शक्यानीत्यर्थः । 'नुद प्रेरणे' । अस्मात् 'कृत्यार्थे°' इति केन्प्रत्ययः[3] ॥

अपामूर्मिर्मदन्निव स्तोम इन्द्राजिरायते । वि ते मदा अराजिषुः ॥ १० ॥

अपाम् । ऊर्मिः । मदन्ऽइव । स्तोमः । इन्द्र । अजिरऽयते । वि । ते । मदाः । अराजिषुः॥१०॥

Vअपां समुद्राणाम् Vऊर्मिः तरङ्गः Vमदन्निव यथा माद्यन्नुपर्युपरि जायते । हे Vइन्द्र Vस्तोमः त्वदीयं स्तोत्रं तथा Vअजिरायते । अजिरः क्षिप्रगामी । स इवाचरति । अपि च Vते त्वदीयाः Vमदाः स्तोत्रजन्याः सोमपानजन्याश्च Vवि Vअराजिषुः विशेषेण राजन्ते दीप्यन्ते ॥ ॥ १५ ॥

त्वं हि स्तोमवर्धन इन्द्रास्युक्थवर्धनः । स्तोतॄणामुत भद्रकृत् ॥ ११ ॥

वम् । हि । स्तोमऽवर्धनः । इन्द्र । असि । उक्थऽवर्धनः । स्तोतॄणाम् । उत । भद्रऽकृत् ॥११॥

---

१. ख-त-न-भ२-श—पर्यासान्युद्वतो°। २. ख-ज्ञ-त३-श—स्थाणूनि; ग—स्थस्नूनि; त४-न-भ१—स्थाण्नूनि। ३. त१-२—केन्यप्रत्ययः।

हे ᵛइन्द्र ᵛत्वं ᵛहि त्वं खलु ᵛस्तोमवर्धनः स्तोमेन स्त्रिवृत्पञ्चदशादिना वर्धनीयः ᵛअसि । तथा क्थवर्धनः उक्थैः शस्त्रैर्वर्धनीयश्च त्वमेवासि । ᵛउत अपि च ᵛस्तोतॄणाम् अस्माकं ᵛभद्रकृत् स्य कल्याणस्य फलस्य कर्तापि त्वमेवासि ॥

इन्द्रमित्केशिना हरी सोमपेयाय वक्षतः । उप यज्ञं सुराधसम् ॥ १२ ॥

र् । इत् । केशिना । हरी इति । सोमऽपेयाय । वक्षतः । उप । यज्ञम् । सुऽराधसम् ॥ १२ ॥

ᵛकेशिना केशिनौ । मूर्धजानि लोमानि केशाः । तद्वन्तौ ᵛहरी अश्वौ ᵛसुराधसं शोभनधनम् न्द्रमित् इन्द्रमेव ᵛयज्ञम् ᵛउप अस्मद्यज्ञं प्रति ᵛसोमपेयाय सोमपानार्थं ᵛवक्षतः वहताम् । यद्वा । । यष्टव्यमिन्द्रमुपवहताम् ॥

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः । विश्वा यदजयः स्पृधः ॥ १३ ॥

म् । फेनेन । नमुचेः । शिरः । इन्द्र । उत् । अवर्तयः । विश्वाः । यत् । अजयः । स्पृधः ॥ १३ ॥

पुरा किलेन्द्रोऽसुराञ्जित्वा नमुचिमसुरं ग्रहीतुं न शशाक । स च युध्यमानस्तेनासुरेण जगृहे । च गृहीतमिन्द्रमेवमवोचत् । त्वां विसृजामि रात्रावह्नि च शुष्केणार्द्रेण चायुधेन यदि मां मा रीरिति । स इन्द्रस्तेन विसृष्टः सन्नहोरात्रयोः संधौ शुष्कार्द्रविलक्षणेन फेनेन तस्य शिरश्चिच्छेद । मर्थोऽस्यां प्रतिपाद्यते । हे ᵛइन्द्र ᵛअपां ᵛफेनेन वज्रीभूतेन ᵛनमुचेः असुरस्य ᵛशिरः ᵛउदवर्तयः ोरादुद्वृतमवर्तयः । अच्छैत्सीरित्यर्थः । कदेति चेत् । ᵛयत् यदा ᵛविश्वाः सर्वाः ᵛस्पृधः स्पर्धमाना पुरीः सेनाः ᵛअजयः जितवानसि । इन्द्रो वृत्रं हत्वासुरान् - - - ॥

मायाभिरुत्सिसृप्सत इन्द्र द्यामारुरुक्षतः । अव दस्यूँरधूनुथाः ॥ १४ ॥

याभिः । उत्ऽसिसृप्सतः । इन्द्र । द्याम् । आऽरुरुक्षतः । अव । दस्यून् । अधूनुथाः ॥ १४ ॥

- - - हे ᵛइन्द्र त्वम् ᵛअव ᵛअधूनुथाः अवाङ्मुखं प्रेरितवानसि ॥

असुन्वामिन्द्र संसदं विषूचीं व्यनाशयः । सोमपा उत्तरो भवन् ॥ १५ ॥

न्वाम् । इन्द्र । सम्ऽसदम् । विषूचीम् । वि । अनाशयः । सोमऽपाः । उत्ऽतरः । भवन् ॥ १५ ॥

हे ᵛइन्द्र त्वं ᵛसोमपाः सोमस्य पाता भूत्वा ᵛउत्तरः उत्कृष्टतरः ᵛभवन् ᵛअसुन्वां गाभिषवहीनां ᵛसंसदं जनसंहतिं ᵛविषूचीं परस्परविरोधेन विषु नाना गन्त्रीं ᵛव्यनाशयः ोषेण नाशयसि ॥ ॥ १६ ॥

' तम्वभि ' इति त्रयोदशर्चं तृतीयं सूक्तमौष्णिहमैन्द्रम् । पूर्वोक्तावेवर्षी । तथा चानुक्रम्यते— म्वभि ससोनौष्णिहम् ' इति । महाव्रते निष्केवल्य औष्णिहतृचाशीतावुत्तमावर्जमेतत्सूक्तम् । यते हि—' तम्वभि प्र गायतेत्युत्तमामुद्धरति ' (ऐ. आ. ५. २. ५) इति । आभिप्लविकेषूक्थ्येषु ोत्थसवने ब्रह्मशस्त्र आद्यस्तृचो वैकल्पिकोऽनुरूपः । सूत्रितं च—' तम्वभि प्र गायत वयमु मपूर्व्यं ' (आश्व. श्रौ. ७. ८) इति ॥

तम्वभि प्र गायत पुरुहूतं पुरुष्टुतं । इन्द्रं गीर्भिस्तविषमा विवासत ॥ १ ॥

ं । ऊँ इति । अभि । प्र । गायत । पुरुऽहूतम् । पुरुऽस्तुतम् ।

म् । गीःऽभिः । तविषम् । आ । विवासत ॥ १ ॥

vपुरुहूतं बहुभिराहूतं vपुरुष्टुतं बहुभिः स्तुतं vतमु तमेवेन्द्रं ह स्तोतारः vअभि vप्र vगायत अभिमुखं प्रकर्षेण स्तुध्वम्। एतदेव स्पष्टयति। vतविषं महान्तम् vइन्द्रं vगीर्भिः वाग्भिः vआ vविवासत परिचरत ॥

यस्य द्विबर्हसो बृहत्सहो दाधार रोदसी। गिरीँरज्राँ अपः स्वर्वृषत्वना ॥ २ ॥

यस्य। द्विऽबर्हसः। बृहत्। सहः। दाधार। रोदसी इति।
गिरीन्। अज्रान्। अपः। स्वः। वृषऽत्वना ॥ २ ॥

vद्विबर्हसः द्वयोः स्थानयोः परिवृढस्य vयस्य इन्द्रस्य vबृहत् महत् vसहः बलं vरोदसी द्यावापृथिव्यौ vदाधार धारयति। छान्दसो लिट्। तुजादित्वादभ्यासदीर्घः। तथा vअज्रान् क्षिप्रगमनान् vगिरीन् पर्वतान् मेघान् वा vस्वः सरणशीलाः vअपः उदकानि च vवृषत्वना वृषत्वेन वीर्येण यस्येन्द्रस्य बलं धारयति तत्रावस्थापयति। तम्वभीति पूर्वया संबन्धः स त्वमित्युत्तरया वा[1] ॥

स राजसि पुरुष्टुतँ एको वृत्राणि जिघ्नसे। इन्द्र जैत्रा श्रवस्या च यन्तवे ॥ ३ ॥

सः। राजसि। पुरुऽस्तुत। एकः। वृत्राणि। जिघ्नसे।
इन्द्र। जैत्रा। श्रवस्या। च। यन्तवे ॥ ३ ॥

हे vपुरुष्टुत बहुभिः स्तुत vइन्द्र vसः पूर्वोक्तगुणस्त्वं vराजसि दीप्यसे ईशिषे वा। अपि च त्वम् vएकः सहायरहितः[2] केवल एव सन् vवृत्राणि आवरकाणि शत्रुजातानि vजिघ्नसे हतवानसि। किमर्थम्। जैत्राणि[3] जेतव्यानि धनानि vश्रवस्या श्रवस्यानि श्रवणीयान्यन्नानि यद्वा श्रवणार्हाणि यशांसि vच vयन्तवे यन्तुं नियन्तुं स्वाधीनं कर्तुम् ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्रह्मशस्त्रे 'तं ते मदम्' इति तृचो वैकल्पिकः स्तोत्रियः। सूत्र्यते हि—'तं ते मदं गृणीमसि तम्वभि प्र गायत' (आश्व. श्रौ. ७. ८) इति ॥

तं ते मदं गृणीमसि वृषणं पृत्सु सासहिम्। उ लोककृत्नुमद्रिवो हरिश्रियम् ॥ ४ ॥

तम्। ते। मदम्। गृणीमसि। वृषणम्। पृत्ऽसु। ससहिम्।
ऊँ इति। लोकऽकृत्नुम्। अद्रिऽवः। हरिऽश्रियम् ॥ ४ ॥

हे vअद्रिवः वज्रवन्निन्द्र vते त्वदीयं vतं vमदं सोमपानजनितं हर्षं vगृणीमसि गृणीमः प्रशंसामः। 'गृ शब्दे'। क्र्यादिः। 'प्वादीनां ह्रस्वः'। 'इदन्तो मसि' इति मस इकारागमः। कीदृशम्। vवृषणं वर्षितारं कामानां vपृत्सु संग्रामेषु vसासहिं शत्रूणामभिभवितारं vलोककृत्नुं लोकस्य स्थानस्य कर्तारं vहरिश्रियं हरिभ्यामश्वाभ्यां श्रयणीयं सेव्यम्। उशब्दः समुच्चये[4] पदपूरणे वा ॥

येन ज्योतींष्यायवे मनवे च विवेदिथ। मन्दानो अस्य बर्हिषो वि राजसि ॥ ५ ॥

येन। ज्योतींषि। आयवे। मनवे। च। विवेदिथ। मन्दानः। अस्य। बर्हिषः। वि। राजसि ॥५॥

हे इन्द्र vयेन आत्मीयेन मदेन vआयवे और्वशेयाय vमनवे विवस्वतः पुत्राय vच vज्योतींषि सूर्यादीनि वृत्रादिभिरावृतानि तद्धरणेन vविवेदिथ अलम्भयः। प्रज्ञापितवान् प्रकाशितवानसीत्यर्थः।

---

१. ख-घ-त-भ२-च। २. घ-असहायः। ३. घ-जैत्रा। ४. ग-एषां समुच्चये; त-न-भ२-येषां समुच्चये; भ१-३-सर्वेषां समुच्चये।

तेन मदेन vमन्दानः मोदमानस्त्वम् vअस्य vबर्हिषः वृद्धस्य यज्ञस्य vवि vराजसि विशेषेणेशिषे । यद्वा । अस्येति तृतीयार्थे षष्ठी । अनेन बर्हिषा वृद्धेन[1] हृष्यन् वि राजसि विशेषेण दीप्यसे ॥ ॥१७॥

तदु॒ द्या चि॑त्त उ॒क्थिनोऽनु॑ ष्टुवन्ति पू॒र्वथा॑ । वृषप॑त्नीरपो॒ जया॒ दि॒वेदि॑वे ॥ ६ ॥

तत् । अ॒द्य । चि॒त् । ते॒ । उ॒क्थिनः॑ । अनु॑ । स्तु॒व॒न्ति॒ । पू॒र्वऽथा॑ ।

वृष॑ऽपत्नीः । अ॒पः॒ । जय॑ । दि॒वेऽदि॑वे ॥ ६ ॥

हे इन्द्र vते त्वदीयं vतत् प्रसिद्धं बलम् vअद्य vचित् अद्यापि vपूर्वथा पूर्वस्मिन्काल इव vउक्थिनः शस्त्रिणः स्तोतारः vअनु vष्टुवन्ति क्रमेण प्रशंसन्ति । स त्वं vवृषपत्नीः वृषा वर्षिता पर्जन्यः पतिर्यासां तादृशीः vअपः vदिवेदिवे प्रतिदिवसं vजय स्वायत्तं कुरु ॥

तव॒ त्यदि॑न्द्रि॒यं बृ॒हत्तव॒ शुष्म॑मु॒त क्रतु॑म् । वज्रं॑ शिशाति धि॒षणा॒ वरे॑ण्यम् ॥७॥

तव॑ । त्यत् । इ॒न्द्रि॒यम् । बृ॒हत् । तव॑ । शुष्म॑म् । उ॒त । क्रतु॑म् ।

वज्र॑म् । शि॒शा॒ति॒ । धि॒षणा॑ । वरे॑ण्यम् ॥ ७ ॥

हे इन्द्र vत्यत्[2] तत् प्रसिद्धम् vइन्द्रियम् इन्द्रस्य लिङ्गं vबृहत् प्रभूतं वीर्यं vधिषणा स्तुतिः vशिशाति निःश्यति तीक्ष्णीकरोति । तथा vतव त्वदीयं vशुष्मं शोषकं बलम् vउत अपि च vक्रतुं प्रज्ञानं बलं कर्म वा vवरेण्यं वरणीयं vवज्रम् आयुधं च स्तुतिस्तीक्ष्णीकरोति ॥

तव॒ द्यौरि॑न्द्र पौंस्यं पृथि॒वी व॑र्धति श्र॒वः । त्वामापः॒ पर्व॑तासश्च हिन्विरे ॥८॥

तव॑ । द्यौः । इ॒न्द्र॒ । पौंस्य॑म् । पृ॒थि॒वी । व॒र्ध॒ति॒ । श्र॒वः॑ । त्वाम् । आपः॑ । पर्व॑तासः । च॒ । हि॒न्वि॒रे ॥८॥

हे vइन्द्र vतव त्वदीयं vपौंस्यं बलं vद्यौः vवर्धति वर्धयति । त्वदीयं vश्रवः यशः vपृथिवी वर्धयति । वृधेर्ण्यन्ताल्लटि[3] शपि ' छन्दस्युभयथा ' इत्यार्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः । तं vत्वाम् vआपः उदकानि अन्तरिक्षाणि vपर्वतासः पर्वताः पर्ववन्तो मेघाः vच गिरयश्च वा vहिन्विरे प्रीणयन्ति स्वामित्वेन प्राप्नुवन्ति वा ॥

त्वां विष्णु॑र्बृ॒हन्क्षयो॑ मि॒त्रो गृ॑णाति॒ वरु॑णः । त्वां शर्धो॑ मद॒त्यनु॑ मारु॒तम् ॥ ९ ॥

त्वाम् । विष्णुः॑ । बृ॒हन् । क्षयः॑ । मि॒त्रः । गृ॒णा॒ति॒ । वरु॑णः ।

त्वाम् । शर्धः॑ । म॒द॒ति॒ । अनु॑ । मा॒रु॒तम् ॥ ९ ॥

हे इन्द्र vबृहन् महान् vक्षयः निवासहेतुः vविष्णुः vमित्रः vवरुणः च vत्वां vगृणाति स्तौति । तथा vमारुतं मरुत्संबन्धि vशर्धः बलं vत्वाम् vअनु vमदति तव मदमनुलक्ष्य पश्चान्माद्यति । त्वामनुमादयति वा ॥

त्वं वृषा॒ जना॑नां मंहिष्ठ इन्द्र जज्ञिषे । स॒त्रा विश्वा॑ स्वप॒त्यानि॑ दधिषे ॥ १० ॥

त्वम् । वृषा॑ । जना॑नाम् । मंहिष्ठः । इ॒न्द्र॒ । ज॒ज्ञि॒षे॒ । स॒त्रा । विश्वा॑ । सु॒ऽअ॒प॒त्यानि॑ । दु॒धि॒षे॒ ॥ १० ॥

---

१. न-भ-बृद्धेन मदेन । २. ज्ञ-भ-तव त्यत् । ३. ख-त-न-श-°ल्लटि ।

हे [v]इन्द्र [v]वृषा वर्धिता [v]त्वं [v]जनानां देवजनानां मध्ये [v]मंहिष्ठः दातृतमः [v]जज्ञिषे प्रादुर्भवसि। अत एव [v]विश्वा सर्वाणि[1] [v]स्वपत्यानि शोभनैः पुत्रादिभिः सहितानि [v]सत्रा सह [v]दधिषे[2] दातुं धारयसि। ददासि वा ॥ ॥ १८ ॥

सत्रा त्वं पुरुष्टुतँ एको वृत्राणि तोशसे। नान्य इन्द्रात्करणं भूर्यं इन्वति ॥११॥

सत्रा। त्वम्। पुरुऽस्तुत। एकः। वृत्राणि। तोशसे।
न। अन्यः। इन्द्रात्। करणम्। भूर्यः। इन्वति ॥ ११ ॥

हे [v]पुरुष्टुत बहुभिः स्तुतेन्द्र [v]त्वम् [v]एकः असहाय एव सन् [v]सत्रा। महन्नामैतत्। महान्ति [v]वृत्राणि शत्रुजातानि। यद्वा। सत्रेति सहार्थे। सहैव युगपदेवैकयत्नेनैव [v]तोशसे हिनस्सि। तोशतिर्वधकर्मा। अकर्तुं शक्तानीति भावः। अपि चास्मात् [v]इन्द्रात् [v]अन्यः कश्चित् [v]भूयः बहुतरं [v]करणं कर्म वृत्रवधादिकं [v]न [v]इन्वति न प्राप्नोति। इन्द्र[3] एव कर्तुं शक्नोतीति भावः ॥

यदिन्द्र मन्मशस्त्वा नाना हवन्त ऊतयें। अस्माकेभिर्नृभिरत्रा स्वर्जय ॥ १२ ॥

यत्। इन्द्र। मन्मऽशः। त्वा। नाना। हवन्ते। ऊतये।
अस्माकेभिः। नृऽभिः। अत्र। स्वः। जय ॥ १२ ॥

हे [v]इन्द्र [v]यत् यस्मिन् संग्रामे त्वां[4] [v]मन्मशः मन्मना[5] स्तोत्रेण [v]नाना बहुप्रकारं [v]हवन्ते आह्वयन्ति। किमर्थम्। [v]ऊतये रक्षायै। [v]अत्र अस्मिन् संग्रामे [v]अस्माकेभिः अस्माकैरस्मदीयैरेव [v]नृभिः नेतृभिः स्तोतृभिराहूतः सन् [v]स्वः शत्रुबलं[6] [v]जय अभिभव ॥

अरं क्षयाय नो महे विश्वा रूपाण्याविशन्। इन्द्रं जैत्राय हर्षया शचीपतिम् ॥१३॥

अरम्। क्षयाय। नः। महे। विश्वा। रूपाणि। आऽविशन्।
इन्द्रम्। जैत्राय। हर्षय। शचीऽपतिम् ॥ १३ ॥

हे स्तोतः [v]महे महते [v]नः अस्माकं [v]क्षयाय। गृहनामैतत्। गृहाय। तादर्थ्ये चतुर्थी। गृहार्थम् [v]अरम् अलं पर्याप्तं [v]विश्वा विश्वानि व्याप्तानि[7] [v]रूपाणि इन्द्रगतानि गुणजातानि [v]आविशन् स्तुत्या व्याप्नुवन् [v]शचीपतिम्। शचीति कर्मनाम। कर्मणां पालकम्। यद्वा। शच्या इन्द्राण्या भर्तारम्। तमेव [v]इन्द्रं [v]जैत्राय जेतव्यधनार्थं [v]हर्षय तोषय। स्तुत्या परिचरणेन वेति शेषः ॥ ॥ १९ ॥

'प्र सम्राजम्' इति द्वादशर्चं चतुर्थं सूक्तमिरिम्बिठिनाम्नः काण्वस्यार्षं गायत्रमैन्द्रम्। अनुक्रम्यते हि—'प्र सम्राजं द्वादशेरिम्बिठिः' इति। अतिरात्रे द्वितीये पर्यायेऽच्छावाकशस्त्र एतत्सूक्तम्। सूत्रितं च—'प्र सम्राजमुप क्रमस्वा भर' (आश्व. श्रौ. ६. ४) इति। महाव्रतेऽपि निष्केवल्य एतदादिके द्वे सूक्ते उपरितनस्यान्त्यं द्वचं वर्जयित्वा। तथैव पञ्चमारण्यके सूत्रितं—'प्र सम्राजं चर्षणीनामिति सूक्ते उत्तरस्योत्तमे उद्धरति' (ऐ. आ. ५. २. ५) इति ॥

प्र सम्राजँ चर्षणीनामिन्द्रँ स्तोता नव्यँ गीर्भिः। नरँ नृषाहुं मंहिष्ठम् ॥ १ ॥

---

१. भ–सर्वाणि धनानि। २. ख–दधिषे स्तोतृतमो जज्ञिषे प्रादुर्भवसि; ग–दधिषे सर्वेभ्यो; त-न-श– दधिषे स्तोतृतमो जज्ञिषे प्रादुर्भवसि अत एव विश्वा सर्वाभ्यो; भ–दधिषे स्तोतृभ्यो। ३. ग-न-भ–अपि तु इंद्र। ४. घ–त्वा त्वां। ५. ग–मन्मना मन्मना; त-भ–मन्मना मज्मना; न–मन्मना मत्मना। ६. ग-भ२–सर्वं शत्रुबलं; घ-न-भ१-३– सर्वशत्रुबलं। ७. ग–समस्तानि।

प्र । सम्ऽराजम् । चर्षणीनाम् । इन्द्रम् । स्तोत । नव्यम् । गीःऽभिः ।
नरम् । नृऽसहम् । मंहिष्ठम् ॥ १ ॥

Vचर्षणीनां मनुष्याणां मध्ये Vसम्राजं सम्यग्राजमानं यद्वा मनुष्याणामधीश्वरम् Vइन्द्रं हे स्तोतारः Vप्र Vस्तोत प्रकर्षेण स्तुत । कीदृशम् । Vगीर्भिः स्तुतिभिः Vनव्यं स्तुत्यं Vनरं नेतारं Vनृषाहं नृणां शत्रुमनुष्याणामभिभवितारं Vमंहिष्ठं दातृतमम् ॥

यस्मिन्नुक्थानि रण्यन्ति विश्वानि च श्रवस्या । अपामवो न समुद्रे ॥ २ ॥
यस्मिन् । उक्थानि । रण्यन्ति । विश्वानि । च । श्रवस्या । अपाम् । अवः । न । समुद्रे ॥ २ ॥

Vयस्मिन् इन्द्रे Vउक्थानि शस्त्राणि Vरण्यन्ति रमन्ते Vविश्वानि सर्वाणि Vश्रवस्या श्रवस्यानि श्रवणीयानि हविर्लक्षणान्यन्नानि Vच रमन्ते । तत्र दृष्टान्तः । Vसमुद्रे उदधौ Vअपाम् उदकानाम् Vअवो Vन । अवति गच्छतीत्यवस्तरङ्गजालम् । तद्यथा समुद्रेऽन्तर्भवति तथा रण्यन्तीत्यर्थः ॥

तं सुष्टुत्या विवासे ज्येष्ठराजं भरे कृत्नुम् । महो वाजिनं सनिभ्यः ॥ ३ ॥
तम् । सुऽस्तुत्या । आ । विवासे । ज्येष्ठऽराजम् । भरे । कृत्नुम् । महः । वाजिनम् । सनिऽभ्यः ॥३॥

Vतम् इन्द्रं Vसुष्टुत्या शोभनया स्तुत्या Vआ Vविवासे परिचरामि । कीदृशम् । Vज्येष्ठराजं ज्येष्ठेषु प्रशस्यतमेषु देवेषु मध्ये राजमानम् । राजतेः 'सत्सूद्विष°' इति क्विप् । Vभरे संग्रामे Vमहः महतो वृत्रवधादेः Vकृत्नुं कर्तारं Vवाजिनम् अन्नवन्तं बलवन्तं वा । किमर्थम् । Vसनिभ्यः धनेभ्यः । धनलाभायेत्यर्थः ॥

यस्यानूना गभीरा मदा उरवस्तरुत्राः । हर्षुमन्तः शूरसातौ ॥ ४ ॥
यस्य । अनूनाः । गभीराः । मदाः । उरवः । तरुत्राः । हर्षुऽमन्तः । शूरऽसातौ ॥ ४ ॥

Vयस्य इन्द्रस्य Vमदाः सोमपानजनिताः Vअनूनाः अन्यूनाः Vगभीराः गाम्भीर्योपेताः Vउरवः विस्तीर्णाः Vतरुत्राः शत्रूणां तारकाः Vशूरसातौ शूरसंभजनीये संग्रामे Vहर्षुमन्तः हर्षयुक्ताः संग्रामोत्सुका भवन्ति । तमिन्द्रमिति पूर्वयोत्तरया वा संबन्धः ॥

तमिद्धनेषु हितेष्वधिवाकाय हवन्ते । येषामिन्द्रस्ते जयन्ति ॥ ५ ॥
तम् । इत् । धनेषु । हितेषु । अधिऽवाकाय । हवन्ते । येषाम् । इन्द्रः । ते । जयन्ति ॥ ५ ॥

Vधनेषु Vहितेषु शत्रुषु निहितेषु प्राप्तव्येषु सत्सु Vतमित् तं पूर्वोक्तगुणमेवेन्द्रम् Vअधिवाकाय अधिवचनाय पक्षपातवचनाय Vहवन्ते स्तोतार आह्वयन्ति । तत्र च Vयेषां पक्षे Vइन्द्रः वर्तते Vते एव Vजयन्ति । जयेन तानि धनानि लभन्ते नान्ये ॥

तमिच्यौत्नैरार्यन्ति तं कृतेभिश्चर्षणयः । एष इन्द्रो वरिवस्कृत् ॥ ६ ॥
तम् । इत् । च्यौत्नैः । आर्यन्ति । तम् । कृतेभिः । चर्षणयः । एषः । इन्द्रः । वरिवःऽकृत् ॥ ६ ॥

Vतमित् तमेवेन्द्रं Vच्यौत्नैः बलकरैः स्तोत्रैः Vआर्यन्ति आर्यमभिज्ञमीश्वरं कुर्वन्ति । Vचर्षणयः मनुष्याः कृतैः[1] कर्मभिश्चार्यन्ति । Vएषः एवंगुणकः Vइन्द्रः Vवरिवस्कृत् धनस्य कर्ता भवति स्तोतृणाम् ॥ ॥ २० ॥

---

१. ग-भ१-३–कृतेभिः कृतैः; घ–कृतेभिः ।

इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरू पुरुहूतः । महान्महीभिः शचीभिः ॥ ७ ॥

इन्द्रः । ब्रह्मा । इन्द्रः । ऋषिः । इन्द्रः । पुरु । पुरुऽहूतः । महान् । महीभिः । शचीभिः ॥ ७ ॥

अयम् vइन्द्रः vब्रह्मा परिवृढः सर्वेभ्योऽधिकः । स एव vइन्द्रः vऋषिः द्रष्टा सर्वस्यार्थजातस्य[1] । सः vइन्द्रः vपुरु बहुलं vपुरुहूतः बहुभिराहूतश्च vमहीभिः महतीभिः vशचीभिः क्रियाभिर्वृत्रवधादिरूपाभिः vमहान् प्रभूतो भवति ॥

स स्तोम्यः स हव्यः सत्यः सत्वा तुविकूर्मिः । एकश्चित्सन्नभिभूतिः ॥ ८ ॥

सः । स्तोम्यः । सः । हव्यः । सत्यः । सत्वा । तुविऽकूर्मिः ।

एकः । चित् । सन् । अभिऽभूतिः ॥ ८ ॥

vसः पूर्वोक्त इन्द्रः vस्तोम्यः स्तोमार्हः स्तुत्यर्हः । vसः एव vहव्यः ह्वातव्यश्च vसत्यः सत्सु साधुरवितथस्वभावो वा vसत्वा शत्रूणामवसादयिता vतुविकूर्मिः बहुकर्मा । यत एवमतः कारणात् vएकश्चित्सन् असहायोऽपि भवन् vअभिभूतिः शत्रूणामभिभविता तिरस्कर्ता भवति ॥

तमर्केभिस्तं साम्भिस्तं गायत्रैर्श्वर्षणयः । इन्द्रं वर्धन्ति क्षितयः ॥ ९ ॥

तम् । अर्केभिः । तम् । साम्ऽभिः । तम् । गायत्रैः । चर्षणयः । इन्द्रम् । वर्धन्ति । क्षितयः ॥९॥

vचर्षणयः द्रष्टारो मन्त्राणां vक्षितयः मनुष्याः vतं इन्द्रम् vअर्केभिः अर्चनसाधनैर्यजूरूपैर्मन्त्रैः vवर्धन्ति वर्धयन्ति । तथोद्गातारः vसामभिः गानविशिष्टैर्मन्त्रैः vतं वर्धयन्ति । तथा vगायत्रैः गायत्र्यादिच्छन्दोयुक्तैः शस्त्ररूपैरप्रगीतैर्मन्त्रैः vतम् एव vइन्द्रं होतारो वर्धयन्ति ॥

प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु । सासह्वांसं युधामित्रान् ॥१०॥

प्रऽनेतारम् । वस्यः । अच्छ । कर्तारम् । ज्योतिः । समत्ऽसु । ससह्वांसम् । युधा । अमित्रान् ॥१०॥

vवस्यः वसीयः प्रशस्तं वसु धनम् vअच्छ आभिमुख्येन vप्रणेतारं प्रापयितारं vसमत्सु संग्रामेषु शत्रुनिरसनेन vज्योतिः प्रकाशं जयलक्षणं vकर्तारं करणशीलम् । करोतेस्तृच्छीलिकस्तृन् । कुत इत्यत आह । vयुधा युद्धेन vअमित्रान् शत्रून् vससह्वांसम् अभिभूतवन्तम् । एवंगुणकमिन्द्रं वर्धयन्तीति शेषः ॥

स नः पप्रिः पारयति स्वस्ति नावा पुरुहूतः । इन्द्रो विश्वा अति द्विषः ॥११॥

सः । नः । पप्रिः । पारयाति । स्वस्ति । नावा । पुरुऽहूतः । इन्द्रः । विश्वाः । अति । द्विषः ॥११॥

vपप्रिः प्राता पूरयिता vपुरुहूतः बहुभिराहूतः vसः vइन्द्रः vविश्वाः सर्वाः vद्विषः द्वेष्ट्रीः प्रजाः vनः अस्मान् vनावा तरणसाधनेन vस्वस्ति क्षेमेण vअति vपारयाति अतिपारयतु[2] ॥

स त्वं न इन्द्र वाजेभिर्दशस्या च गातुया च । अच्छा च नः सुम्नं नेषि ॥१२॥

सः । त्वम् । नः । इन्द्र । वाजेभिः । दशस्य । च । गातुऽय । च ।

अच्छ । च । नः । सुम्नम् । नेषि ॥ १२ ॥

---

१. ग-न-म-सर्वस्यार्थ° । २. ग-त-न-म-अतिपारयतु अतिपालयतु ।

हे ᵛइन्द्र ᵛसः तादृशः ᵛत्वम् ᵛनः अस्मभ्यं ᵛवाजेभिः बलैः ᵛदशस्य ᵛच धनं प्रयच्छ च। दशस्यतिर्दानकर्मा। ᵛगातुय ᵛच गातुं मार्गमस्मभ्यमिच्छ च। गातुशब्दात् 'छन्दसि परेच्छायाम्०' इति क्यच्। 'न च्छन्दस्यपुत्रस्य' इति दीर्घनिषेधः। तथा ᵛनः अस्मान् ᵛसुम्नं सुखं ᵛच ᵛअच्छ ᵛनेषि अभिप्रापय[1]॥ ॥ २१ ॥

'आ याहि' इति पञ्चदशर्चं पञ्चमं सूक्तमिरिम्बिठेरार्षमैन्द्रम्। चतुर्दशी बृहती पञ्चदशी सतोबृहत्यादितस्त्रयोदश गायत्र्यः। अनुक्रम्यते हि—'आ याहि पञ्चोना प्रगाथान्तम्' इति। अन्त्यं प्रगाथं वर्जयित्वा शिष्टस्य महाव्रत उक्तो विनियोगः। ज्योतिष्टोमे प्रातःसवने ब्रह्मशस्त्र आद्याः षड्चः स्तोत्रियानुरूपार्थाः। तथानन्तराः सप्तर्चश्च शंसनीयाः। सूत्र्यते हि—'आ याहि सुषुमा हि त इति षट् स्तोत्रियानुरूपावनन्तराः सप्त' (आश्व. श्रौ. ५. १०) इति। चातुर्विंशिकेऽहनि प्रातःसवन आद्यस्तृचोऽस्मिन्नेव शस्त्रे षळहस्तोत्रियसंज्ञक आवापार्थः। सूत्रितं च—'आ याहि सुषुमा हि त इन्द्रमिद्गाथिनो बृहत्' (आश्व. श्रौ. ७. २) इति॥

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम्। एदं बर्हिः सदो मम ॥ १ ॥

आ। याहि। सुषुम। हि। ते। इन्द्र। सोमम्। पिब। इमम्। आ। इदम्। बर्हिः। सदः। मम ॥१॥

हे ᵛइन्द्र त्वम् ᵛआ ᵛयाहि आगच्छ। ᵛते त्वदर्थं ᵛसुषुम[2] ᵛहि अभिषुतवन्तः खलु सोमं वयम्। तम् ᵛइमम् अभिषुतं ᵛसोमं ᵛपिब। तदर्थं ᵛमम मदीयम् ᵛइदं ᵛबर्हिः वेद्यामास्तीर्णम् ᵛआ ᵛसदः आसीद अभिनिषीद॥

आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना। उप ब्रह्माणि नः शृणु ॥ २ ॥

आ। त्वा। ब्रह्मऽयुजा। हरी इति। वहताम्। इन्द्र। केशिना। उप। ब्रह्माणि। नः। शृणु ॥२॥

हे ᵛइन्द्र ᵛब्रह्मयुजा ब्रह्मणा मन्त्रेण युज्यमानौ ᵛकेशिना केशिनौ केशवन्तौ ᵛहरी हरणशीलावश्वौ ᵛत्वा त्वाम् ᵛआ ᵛवहताम् अभिप्रापयताम्। त्वं चास्मद्यज्ञमुपेत्य ᵛनः अस्माकं ᵛब्रह्माणि स्तोत्राणि ᵛशृणु स्तोत्राणि गृहाण। सम्यक् चित्ते धारय॥

ब्रह्माणस्त्वा वयं युजा सोमपामिन्द्र सोमिनः। सुतावन्तो हवामहे ॥ ३ ॥

ब्रह्माणः। त्वा। वयम्। युजा। सोमऽपाम्। इन्द्र। सोमिनः। सुतऽवन्तः। हवामहे ॥ ३ ॥

हे ᵛइन्द्र ᵛब्रह्माणः ब्राह्मणाः ᵛवयं ᵛत्वा त्वां ᵛयुजा योग्येन स्तोत्रेण ᵛहवामहे आह्वयामहे। कथंभूतम्। ᵛसोमपां सोमस्य पातारम्। कीदृशा वयम्। ᵛसोमिनः सोमयुक्ताः ᵛसुतवन्तः अभिषुतैश्च सोमैरुपेताः॥

आ नो याहि सुतावतोऽस्माकं सुष्टुतीरुप। पिबा सु शिप्रिन्नन्धसः ॥ ४ ॥

आ। नः। याहि। सुतऽवतः। अस्माकम्। सुऽस्तुतीः। उप। पिब। सु। शिप्रिन्। अन्धसः ॥४॥

हे इन्द्र ᵛसुतवतः अभिषुतसोमयुक्तानस्मान् ᵛआ ᵛयाहि अभिगच्छ। ततः ᵛअस्माकं संबन्धीनि ᵛसुष्टुतीः शोभनानि स्तोत्राण्युपगच्छ जानीहि। हे ᵛसुशिप्रिन् शोभनशिरस्त्राण शोभनहनुक वेन्द्र ᵛअन्धसः अन्नस्य सोमलक्षणस्य स्वांशलक्षणं भागं ᵛपिब। यद्वा कर्मणि षष्ठी। अन्धोऽस्मदीयं सोमं पिब॥

---

१. ग१–अभिप्रापयसि; ग२–अभिप्रापयः। २. ग-त-भ–सुषुमा।

आ ते सिञ्चामि कुक्ष्योरनु गात्रा वि धावतु । गृभाय जिह्वया मधु ॥ ५ ॥

आ । ते । सिञ्चामि । कुक्ष्योः । अनु । गात्रा । वि । धावतु । गृभाय । जिह्वया । मधु ॥ ५ ॥

हे इन्द्र [v]ते तव [v]कुक्ष्योः उदरयोः [v]आ [v]सिञ्चामि सोमानवनयामि । कुक्षी सोमेन पूरयामीत्यर्थः । इन्द्रस्य हि द्वे उदरे । तथा च श्रूयते—'ओभा कुक्षी पृणता वात्रघ्नं च माघोनं च' इति[1] । यद्वा । एकस्यैवोदरस्य सव्यदक्षिणभेदेनोर्ध्वाधोभागभेदेन वा द्वित्वम् । स[2] चासिक्तः[2] सोमो गात्राणि[3] शरीरावयवानि हस्तपादादीनि सर्वाण्यनुक्रमेण[4] [v]वि [v]धावतु व्याप्नोतु । त्वं च [v]मधु मधुरं मया सिच्यमानं सोमं [v]जिह्वया रसनेन्द्रियेण [v]गृभाय गृहाण । 'छन्दसि शायजपि' इति ग्रहेः[5] उत्तरस्य भ्रः शायजादेशः । 'ह्मग्रहोर्भः०' इति भत्वम् ॥ ॥ २२ ॥

स्वादुष्टे अस्तु संसुदे मधुमान्तन्वे३ तव । सोमः शमस्तु ते हृदे ॥ ६ ॥

स्वादुः । ते । अस्तु । सम्ऽसुदे । मधुऽमान् । तन्वे । तव । सोमः । शम् । अस्तु । ते । हृदे ॥६॥

[v]संसुदे सम्यक् सुष्ठु दात्रे हे इन्द्र [v]ते तुभ्यं [v]मधुमान् माधुर्यवानयं सोमः [v]स्वादुः [v]अस्तु रुचिकरो भवतु । [v]तव [v]तन्वे शरीराय च स्वादुरस्तु । तव [v]हृदे हृदयाय च सः [v]सोमः [v]शमस्तु सुखजनकं भवतु ॥

अयमु त्वा विचर्षणे जनीरिवाभि संवृतः । प्र सोम इन्द्र सर्पतु ॥ ७ ॥

अयम् । ऊँ इति । त्वा । विऽचर्षणे । जनीःऽइव । अभि । सम्ऽवृतः । प्र । सोमः । इन्द्र । सर्पतु ॥७॥

हे [v]विचर्षणे विद्रष्टः [v]इन्द्र [v]जनीरिव जनयो जाया इव ता यथा शुक्लैः वस्त्रैः संवृता भवन्ति एवं [v]संवृतः पयःप्रभृतिभिः श्रयणद्रव्यैरावृतः [v]अयं [v]सोमः[6] [v]अभि [v]प्र [v]सर्पतु अभिगच्छतु । [v]उ इति पूरकः ॥

तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे । इन्द्रो वृत्राणि जिघ्नते ॥ ८ ॥

तुविऽग्रीवः । वपाऽउदरः । सुऽबाहुः । अन्धसः । मदे । इन्द्रः । वृत्राणि । जिघ्नते ॥ ८ ॥

[v]तुविग्रीवः विस्तीर्णकन्धरः [v]वपोदरः पीवरोदरः[7] यथा बहवः सोमाः पीता अन्तर्भवन्ति तथा विस्तृतजठर इत्यर्थः । [v]सुबाहुः शोभनबाहुरेवंगुणकः [v]इन्द्रः [v]अन्धसः अन्नस्य सोमात्मकस्य [v]मदे हर्षे सति [v]वृत्राणि शत्रुजातानि [v]जिघ्नते हिनस्ति ॥

इन्द्र प्रेहि पुरस्त्वं विश्वस्येशान ओजसा । वृत्राणि वृत्रहञ्जहि ॥ ९ ॥

इन्द्र । प्र । इहि । पुरः । त्वम् । विश्वस्य । ईशानः । ओजसा । वृत्राणि । वृत्रऽहन् । जहि ॥९॥

हे [v]इन्द्र [v]ओजसा बलेन [v]विश्वस्य सर्वस्य जगतः [v]ईशानः स्वामी भवन् [v]त्वं [v]पुरः अस्माकं पुरस्तात् [v]प्रेहि प्रगच्छ प्राप्नुहि । हे [v]वृत्रहन् वृत्राणामावरकाणां शत्रूणां हन्तः [v]वृत्राणि अस्मदीयानि शत्रुजातानि [v]जहि विनाशय ॥

अभ्युदयेष्टाविन्द्रस्य प्रदातुः 'दीर्घस्ते अस्वङ्कुशः' इत्यनुवाक्या । सूच्यते हि—'दीर्घस्ते अस्वङ्कुशो भद्रा ते हस्ता सुकृतोत पाणी' (आश्व. श्रौ. ३. १३) इति ॥

---

१. ग-त-भ–इति स चासिक्तः । २. ग-त-भ–'स चासिक्तः' नास्ति । ३. भ–गात्रा गात्राणि । ४. य–सर्वाण्यनु अनुक्रमेग । ५. ग–ग्रहेः । ६. ग-भ–सोमस्त्वां । ७. ग–वगावदुदरः ।

दीर्घस्ते अस्त्वङ्कुशो येना वसु प्रयच्छसि । यजमानाय सुन्वते ॥ १० ॥

दीर्घः । ते । अस्तु । अङ्कुशः । येन । वसु । प्रऽयच्छसि । यजमानाय । सुन्वते ॥ १० ॥

हे इन्द्र [v]ते तव [v]अङ्कुशः सृणिराकर्षणसाधनमायुधं [v]दीर्घः [v]अस्तु आयतो भवतु । यथा दूरस्थमपि वस्तु व्याप्नोति तथायामवान् भवत्वित्यर्थः । [v]येन अङ्कुशेन [v]सुन्वते सोमाभिषवं कुर्वते [v]यजमानाय [v]वसु धनमाहृत्य [v]प्रयच्छसि ददासि ॥ ॥ २३ ॥

द्वितीये पर्याये होतुः शस्त्रे ' अयं त इन्द्र ' इति स्तोत्रियस्तृचः । सूत्रितं च—' अयं त इन्द्र सोमोऽयं ते मानुषे जने ' (आश्व. श्रौ. ६. ४) इति ॥

अयं ते इन्द्र सोमो निपूतो अधि बर्हिषि । एहीमस्य द्रवा पिब ॥ ११ ॥

अयम् । ते । इन्द्र । सोमः । निऽपूतः । अधि । बर्हिषि ।
आ । इहि । ईम् । अस्य । द्रव । पिब ॥ ११ ॥

हे [v]इन्द्र [v]ते तुभ्यं त्वदर्थम् [v]अयं [v]सोमः [v]बर्हिषि [v]अधि वेद्यामास्तीर्णे दर्भे [v]निपूतः नितरां दशापवित्रेण शोधितः । अभिषवादिसंस्कारैः संस्कृत इत्यर्थः । [v]ईम् इदानीम् [v]अस्य इमं सोमं प्रति [v]एहि आगच्छ । आगत्य यत्र रसात्मकः सोमो हूयते[1] तं देशं प्रति [v]द्रव शीघ्रं गच्छ । तदनन्तरं तं सोमं [v]पिब ॥

शाचिगो शाचिपूजनायं रणाय ते सुतः । आखण्डल प्र हूयसे ॥ १२ ॥

शाचिगो इति शाचिऽगो । शाचिऽपूजन । अयम् । रणाय । ते । सुतः ।
आखण्डल । प्र । हूयसे ॥ १२ ॥

हे [v]शाचिगो । शाचयः शक्ता गावो यस्यासौ शाचिगुः । यद्वा । ' शच व्यक्तायां वाचि '। अस्मादौणादिक इङ्प्रत्ययः[2] । शाचयो व्यक्ताः प्रख्याता गावो रश्मयो गाव एव वा यस्य तादृश । हे [v]शाचिपूजन । पूज्यतेऽनेनेति पूजनं स्तोत्रादि । प्रख्यातपूजन [v]ते तव [v]रणाय रमणाय सुखजननाय [v]अयं सोमः [v]सुतः अभिषुतः । यतः कारणात् हे [v]आखण्डल शत्रूणामाखण्डयितः[3] [v]प्र [v]हूयसे प्रकृष्टाभिः स्तुतिभिराहूयसे । अत आगत्येमं सोमं पिबेति भावः ॥

यस्ते शृङ्गवृषो नपात्प्रणपात्कुण्डपाय्यः । न्यस्मिन्दध्र आ मनः ॥ १३ ॥

यः । ते । शृङ्गऽवृषः । नपात् । प्रनपादिति प्रऽनपात् । कुण्डऽपाय्यः ।
नि । अस्मिन् । दध्रे । आ । मनः ॥ १३ ॥

हे [v]शृङ्गवृषो [v]नपात् । शृङ्गवृषा नाम कश्चिदृषिः । तस्य चेन्द्रः स्वयमेव पुत्रतया जज्ञ इत्याख्यायिका । नपादित्यपत्यनाम । शृङ्गवृषः पुत्र । यद्वा । शृणन्ति हिंसन्तीति शृङ्गाणि रश्मयः । तैर्वर्षतीति शृङ्गवृडादित्यः । तस्य नपातयितः स्वकीये स्थानेऽवस्थापयितः । ' सुबामन्त्रिते° ' इति षष्ठ्यन्तस्य पराङ्गवद्भावेनामन्त्रितानुप्रवेशात् समुदायस्याष्टमिकं सर्वानुदात्तत्वम् । ईदृश हे इन्द्र [v]ते तव संबन्धी [v]प्रणपात् प्रकर्षेण न पातयिता रक्षिता [v]कुण्डपाय्यः । कुण्डैः पीयतेऽस्मिन् सोम इति कुण्डपाय्यः क्रतुविशेषः । ' क्रतौ कुण्डपाय्यसंचाय्यौ ' (पा. सू. ३. १. १३०) इति पिबतेरधिकरणे ण्यत्प्रत्ययो

१. ग-त-द्रियते । २. ग-इण्प्रत्ययः । ३. य-°माखंडयितरिंद्र ।

युगागमश्च निपात्यते। एतत्संज्ञो यः क्रतुरस्ति अस्मिन् कुण्डपाख्ये क्रतौ मनः स्वान्तम् आ नि दधे। अभितो वर्तमानाः कुण्डपायिनामान ऋषयः पुरा नि दधिरे। सम्यक् स्वहेवत्यं क्रतुमनुष्ठितवन्त इत्यर्थः। दधातेर्लिटि 'हरयो रे' इति रेभावः॥

वास्तोष्पते ध्रुवा स्थूणांसत्रं सोम्यानाम्।
द्रप्सो भेत्ता पुरां शश्वतीनामिन्द्रो मुनीनां सखा॥ १४॥

वास्तोः। पते। ध्रुवा। स्थूणा। अंसत्रम्। सोम्यानाम्।
द्रप्सः। भेत्ता। पुराम्। शश्वतीनाम्। इन्द्रः। मुनीनाम्। सखा॥ १४॥

हे वास्तोष्पते गृहपते स्थूणा गृहाधारभूतः स्तम्भः ध्रुवा स्थिरा भवतु। सोम्यानां सोमार्हाणां सोमसंपादिनां[1] वास्माकं अंसत्रम् अंसत्राणमंसोपलक्षितस्य[2] कृत्स्नशरीरस्य त्रायकं रक्षकं बलं भवतु। अपि च द्रप्सः द्रवणशीलः सोमः तद्वान्। अर्शआदित्वाद्रप्रत्ययः। शश्वतीनां बह्वीनां पुराम् असुरपुरीणां भेत्ता विदारयिता एवंभूतः इन्द्रः मुनीनाम् ऋषीणामस्माकं सखा मित्रभूतो भवतु॥

पृदाकुसानुर्यजतो गवेषण एकः सन्नभि भूयसः।
भूर्णिमश्वं नयत्तुजा पुरो गृभेन्द्रं सोमस्य पीतये॥ १५॥

पृदाकुऽसानुः। यजतः। गोऽएषणः। एकः। सन्। अभि। भूयसः।
भूर्णिम्। अश्वम्। नयत्। तुजा। पुरः। गृभा। इन्द्रम्। सोमस्य। पीतये॥ १५॥

पृदाकुसानुः। पृदाकुः सर्पः। स इव सानुः समुच्छ्रितः। तद्वदुन्नतशिरस्क इत्यर्थः। यद्वा। पृदाकुवत् सानुः संभजनीयः। स यथा बहुभिर्मणिमन्त्रौषधादिभिः संसेव्यो नाल्पैः एवमिन्द्रोऽपि बहुभिः स्तोत्रादिभिर्यत्नैः सेव्य इत्यर्थः। यजतः यष्टव्यः गवेषणः गवामेषयिता प्रापयिता एवंगुणको य इन्द्रः एकः सन् असहायः केवल एव सन् भूयसः बहुतरान्छत्रूनभिभवति भूर्णिं भरणशीलम् अश्वं व्याप्नुवन्तं तम् इन्द्रं सोमस्य पीतये पानार्थं पुरः अस्माकं पुरस्तात् नयत् नयति प्रापयति। सामर्थ्यात् स्तोतेति लभ्यते। केन साधनेन। तुजा क्षिप्रगामिना गृभा ग्रहणसाधनेन स्तोत्रेण। यद्वा। अश्वमिति लुप्तोपममेतत्। यथा वोढारमश्वं दुर्ग्रहं पाशेनानयन्ति एवमुक्तेन प्रकारेण महानुभावमिन्द्रं स्तुत्या स्तोतानयतीत्यर्थः॥ ॥ २४॥

'इदं ह' इति द्वाविंशत्यृचं षष्ठं सूक्तमिरिम्बिठेरार्षमुष्णिक्छन्दस्कम्। 'उत त्या' इत्येषा अश्विदेवताका। 'शमग्निः' इत्येषा अग्निसूर्यवायुदेवताका। शिष्टा आदित्यदेवताकाः। तथा चानुक्रम्यते—'इदं ह द्व्यधिकादित्यमौष्णिहमष्टम्यश्विभ्यां पराग्निसूर्यानिलानाम्' इति। गतो विनियोगः॥

इदं ह नूनमेषां सुम्नं भिक्षेत मर्त्यः। आदित्यानामपूर्व्यं सवीमनि॥ १॥

इदम्। ह। नूनम्। एषाम्। सुम्नम्। भिक्षेत। मर्त्यः। आदित्यानाम्। अपूर्व्यम्। सवीमनि॥१॥

इदं ह इदानीं खलु नूनम् अवश्यम् आदित्यानाम् अदितेः पुत्राणाम् एषां देवानां मित्रादीनां सवीमनि प्रसवे प्रेरणे सति मर्त्यः मनुष्यः स्तोता अपूर्व्यम् अभिनवं सुम्नं सुखकरं धनं भिक्षेत याचेत। न कालान्तरे॥

---

१. त३-न-सोमसंपादितानां। २. घ-भ-°मंसोपलक्षितकृत्स्न°।

अनर्वाणो ह्येषां पन्था आदित्यानाम् । अदब्धाः सन्ति पायवः सुगेवृधः ॥२॥

अनर्वाणः । हि । एषाम् । पन्थाः । आदित्यानाम् । अदब्धाः । सन्ति । पायवः । सुगेऽवृधः ॥२॥

vएषाम् vआदित्यानां vपन्थाः पन्थानो मार्गाः । ' सुपां सुलुक् ' इति जसः सुः । vअनर्वाणः अप्रत्यृताः परैरप्रतिगताः अत एव vअदब्धाः अहिंसिताश्च vसन्ति भवन्ति । vहि यस्मादेवं तस्मात् vपायवः पालयितारस्ते मार्गाः vसुगेवृधः सुगमे सुखे विषये वर्धका भवन्तु ॥

तत्सु नः सविता भगो वरुणो मित्रो अर्यमा । शर्म यच्छन्तु सप्रथो यदीमहे ॥३॥

तत् । सु । नः । सविता । भगः । वरुणः । मित्रः । अर्यमा ।

शर्म । यच्छन्तु । सऽप्रथः । यत् । ईमहे ॥ ३ ॥

सवित्रादयश्चत्वारो देवाः vसप्रथः सर्वतः पृथु विस्तीर्णं vतत् vशर्म सुखं गृहं वा vनः अस्मभ्यं vसु सुष्ठु vयच्छन्तु ददतु । vयत् शर्म vईमहे वयं याचामहे ॥

देवेभिर्देव्यदितेऽरिष्टभर्मन्ना गहि । स्मत्सूरिभिः पुरुप्रिये सुशर्मभिः ॥ ४ ॥

देवेभिः । देवि । अदिते । अरिष्टऽभर्मन् । आ । गहि ।

स्मत् । सूरिऽभिः । पुरुऽप्रिये । सुऽशर्मऽभिः ॥ ४ ॥

हे vदेवि दानादिगुणयुक्ते हे vअरिष्टभर्मन् अहिंसितभरणे हे vपुरुप्रिये बहुभिः प्रीयमाणे हे एवंगुणविशिष्टे vअदिते vसूरिभिः प्राज्ञैः vसुशर्मभिः सुसुखैः vदेवेभिः देवैरात्मीयैः पुत्रैः सार्धम् । स्मदिति निपातः शोभनार्थः । vस्मत् शोभनं यथा भवति तथा vआ vगहि आगच्छ ॥

ते हि पुत्रासो अदितेर्विदुर्द्वेषांसि योतवे । अंहोश्चिदुरुचक्रयोऽनेहसः ॥ ५ ॥

ते । हि । पुत्रासः । अदितेः । विदुः । द्वेषांसि । योतवे ।

अंहोः । चित् । उरुऽचक्रयः । अनेहसः ॥ ५ ॥

vअदितेः vपुत्रासः पुत्राः vते vहि ते खलु मित्रादयो देवाः vद्वेषांसि द्वेष्टॄणि राक्षसादीनि vयोतवे पृथक्कर्तुं vविदुः जानन्ति । ' विदो लटो वा ' इति विद उत्तरस्य झेरुसादेशः । तथा vउरुचक्रयः विस्तीर्णस्य कर्मणः कर्तारः vअनेहसः अनाहन्तारो रक्षकास्ते vअंहोश्चित् आहननशीलात् पापादपि योतवे पृथक्कर्तुमस्मान् जानन्ति ॥ ॥ २५ ॥

अदितिर्नो दिवा पशुमदितिर्नक्तमद्वयाः । अदितिः पात्वंहसः सदावृधा ॥६॥

अदितिः । नः । दिवा । पशुम् । अदितिः । नक्तम् । अद्वयाः ।

अदितिः । पातु । अंहसः । सदाऽवृधा ॥ ६ ॥

vनः अस्माकं vपशुम् vअदितिः अदीना अखण्डनीया वा देवमाता vदिवा अहनि vपातु रक्षतु । तथा vअद्वयाः बाह्याभ्यन्तरभेदेन प्रकारद्वयरहिता सर्वदैकप्रकारा कपटरहिता सा vअदितिः vनक्तं रात्रौ चास्मदीयं गवादिपशुजातं रक्षतु । तथास्मानपि vअंहसः पापात् पातु रक्षतु । केन साधनेन । vसदावृधा सर्वदा वृद्धिमतात्मीयेन रक्षणेन ॥

उत स्या नो दिवा मतिरदितिरूत्या गमत् । सा शंताति मयस्करदप स्रिधः ॥७॥

उत । स्या । नः । दिवा । मतिः । अदितिः । ऊत्या । आ । गमत् ।

सा । शम्ऽतांति । मयः । करत् । अप । स्रिधः ॥ ७ ॥

vउत अपि च vस्या सा पूर्वोक्ता vमतिः मन्त्री मन्तव्या स्तोतव्या वा vअदितिः vऊत्या रक्षया सार्धं vदिवा अहनि vनः अस्मान् vआ vगमत् आगच्छतु । आगत्य च vशंताति शान्तिकरं vमयः सुखं vसा अदितिः vकरत् करोतु । vस्रिधः बाधकान्छत्रूंश्चापगमयतु । स्रिधिर्बाधनार्थः । 'शिवशमरिष्टस्य करे' (पा. सू. ४. ४. १४३) इति शंशब्दात्करणेऽर्थे तातिल्प्रत्ययः ॥

उत त्या दैव्या भिषजा शं नः करतो अश्विना । युयुयातामितो रपो अप स्रिधः ॥८॥

उत । त्या । दैव्या । भिषजा । शम् । नः । करतः । अश्विना ।

युयुयातम् । इतः । रपः । अप । स्रिधः ॥ ८ ॥

vउत अपि च vत्या तौ प्रसिद्धौ vदैव्या देवेषु भवौ vभिषजा चिकित्सकौ ईदृशौ vअश्विना अश्विनौ vनः अस्माकं vशं सुखं रोगाणां शमनं वा vकरतः कुरुताम् । vइतः अस्मत्तः vरपः पापं vयुयुयातां पृथक्कुर्यातम् । vस्रिधः शत्रूंश्चापगमयतम् ॥

शमग्निरग्निभिः करच्छं नस्तपतु सूर्यः । शं वातो वात्वरपा अप स्रिधः ॥ ९ ॥

शम् । अग्निः । अग्निऽभिः । करत् । शम् । नः । तपतु । सूर्यः ।

शम् । वातः । वातु । अरपाः । अप । स्रिधः ॥ ९ ॥

vअग्निभिः स्वविभूत्या विभिन्नैर्गार्हपत्यादिभिः vअग्निः देवः vशं vकरत् अस्माकं रोगशान्तिं सुखं वा करोतु । vसूर्यः सर्वस्य प्रेरक आदित्यश्च vनः अस्माकं vशं सुखं यथा भवति तथा vतपतु प्रदीप्यताम् । vवातः वायुश्च vअरपाः अपापः सन् vशं यथा भवति तथा च[1] vवातु अनुवर्तताम्[2] । vस्रिधः शत्रूंश्चैतेऽग्न्यादयोऽपगमयन्तु ॥

अपामीवामप स्रिधमप सेधत दुर्मतिम् । आदित्यासो युयोतना नो अंहसः ॥१०॥

अप । अमीवाम् । अप । स्रिधम् । अप । सेधत । दुःऽमतिम् ।

आदित्यासः । युयोतन । नः । अंहसः ॥ १० ॥

हे आदित्याः vअमीवां रोगम् vअप vसेधत अस्मत्तोऽपगमयत । vस्रिधं चापसेधकं शत्रुं च vअप सेधत । vदुर्मतिम् अस्माकं दुःखस्य मन्तारं च vअप सेधत । अपि च हे vआदित्यासः आदित्याः vनः अस्मान् vअंहसः पापात् vयुयोतन पृथक्कुरुत । यौतेर्लोटि छान्दसः शपः श्लुः । 'तप्तनप्तनथनाश्च' इति तस्य तनबादेशः । पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । 'आमन्त्रितं पूर्वमविद्यमानवत्' इति पूर्वस्यामन्त्रितस्याविद्यमानत्वेन पदादपरत्वान्निघातो न भवति ॥ ॥ २६ ॥

युयोता शरुमस्मदाँ आदित्यास उतामतिम् । ऋधग्द्वेषः कृणुत विश्ववेदसः ॥ ११ ॥

---

१. ग–'च' नास्ति । २. ग–वर्धतां; न-भ–वर्ततां ।

युयोत॑ । शरु॑म् । अ॒स्मत् । आ । आदि॑त्यासः । उ॒त । अम॑तिम् ।
ऋध॑क् । द्वेषः॑ । कृ॒णु॒त॒ । वि॒श्व॒ऽवे॒द॒सः॒ ॥ ११ ॥

हे आदित्याः ᵛशरुं हिंसकम् ᵛअस्मदा अस्मत्तश्च ᵛयुयोत पृथक्कुरुत । ᵛउत अपि च ᵛअमतिं दुर्बुद्धिं च पृथक्कुरुत । हे ᵛविश्ववेदसः सर्वधनाः सर्वज्ञा वा ᵛद्वेषः द्वेष्टॄन्छत्रून् ᵛऋधक् पृथक् ᵛकृणुत कुरुत । अस्मत्तो वियोजयत ॥

तत्सु नः॑ शर्म॑ यच्छतादि॑त्या॒ यन्मु॒मोच॑ति । एन॑स्वन्तं चि॒दे॒नसः॑ सुदानवः ॥१२॥

तत् । सु । नः॑ । शर्म॑ । य॒च्छ॒त॒ । आदि॑त्याः । यत् । मु॒मोच॑ति ।
एन॑स्वन्तम् । चि॒त् । एन॑सः । सु॒ऽदा॒न॒वः॒ ॥ १२ ॥

हे ᵛआदित्याः ᵛतत् ᵛशर्म सुखं ᵛनः अस्मभ्यं ᵛसु सुष्ठु ᵛयच्छत दत्त । हे ᵛसुदानवः शोभनदानाः युष्मदीयं ᵛयत् शर्म ᵛएनस्वन्तं ᵛचित् पापिनमपि स्तोतारम् ᵛएनसः पापात् ᵛमुमोचति मोचयति तद्यच्छतेत्यन्वयः ॥

यो नः॑ क॒श्चिद्रि॑रि॒क्षति॑ रक्ष॒स्त्वेन॒ मर्त्यः॑ । स्वैः ष एवै॑ रिरिषीष्ट॒ युर्जनः॑ ॥१३॥

यः । नः॑ । कः । चि॒त् । रि॒रि॒क्षति॑ । रक्षः॑ऽत्वेन॑ । मर्त्यः॑ ।
स्वैः । सः । एवै॑ः । रि॒रि॒षी॒ष्ट॒ । युः । जनः॑ ॥ १३ ॥

ᵛयः ᵛकश्चित् ᵛमर्त्यः मनुष्यः ᵛनः अस्मान् ᵛरक्षस्त्वेन रक्षोभावेन पिशाचाद्यात्मना ᵛरिरिक्षति जिहिंसिषति । 'रिष हिंसायाम्' इति धातुः । ᵛसः मनुष्यः ᵛस्वैः ᵛएवैः आत्मीयैरेव चेष्टितैः ᵛरिरिषीष्ट हिंसितो भूयात् । सः ᵛजनः ᵛयुः यातापगमनशीलश्च भवतु । यद्वा । स जनः स्वैरेव गमनैर्युर्दुःखं गच्छन् हिंसितो भवतु ॥

समित्तम॒घम॑श्नवद्दुःशं॑सं मर्त्यं॑ रि॒पुम् । यो अ॑स्म॒त्रा दु॒र्हणा॑वाँ॒ उप॑ द्व॒युः ॥१४॥

सम् । इ॒त् । तम् । अ॒घम् । अ॒श्न॒व॒त् । दुः॒ऽशंस॑म् । मर्त्य॑म् । रि॒पुम् ।
यः । अ॒स्म॒ऽत्रा । दुः॒ऽह॒नावा॑न् । उप॑ । द्व॒युः ॥ १४ ॥

ᵛदुःशंसं दुष्कीर्तिं ᵛरिपुं शत्रुं ᵛतं ᵛमर्त्यम्[1] ᵛइत् मनुष्यमेव[1] ᵛअघं पापं ᵛसम् ᵛअभवत् सम्यग्व्याप्नोतु । ᵛयः मर्त्यः ᵛअस्मत्रा अस्मासु अस्मद्विषये ᵛदुर्हणावान् दुष्टहननवान् उपजायते ᵛद्वयुः द्वाभ्यां प्रकाराभ्यां युक्तश्च भवति । अयमर्थः । प्रत्यक्षकृतो[2] हितं वदति परोक्षकृतस्वहितम् । तादृशः कपटो द्वयुरित्युच्यते । यश्चास्मद्विषये कपटो भवति तमपि पापं व्याप्नोत्विति[2] ॥

पा॒क॒त्रा स्थ॑न देवा हृ॒त्सु जा॑नीथ॒ मर्त्य॑म् । उप॑ द्व॒युं चाद्व॑युं च वसवः ॥१५॥

पा॒क॒ऽत्रा । स्थ॒न॒ । दे॒वाः॒ । हृ॒त्ऽसु । जा॒नी॒थ॒ । मर्त्य॑म् ।
उप॑ । द्व॒युम् । च॒ । अद्व॑युम् । च॒ । व॒स॒वः॒ ॥ १५ ॥

---

१. ग-त-न-भ-श–मर्त्यं मनुष्यं इदेव । २. ग–प्रत्यक्षीकृतो हितं वदति परोक्षे अहितं वदति तं रिपुमिति पूर्वत्रान्वयः ।

हे [v]देवाः दानादिगुणयुक्ता आदित्या यूयं [v]पाकत्रा पाकेषु विपक्वप्रज्ञेषु स्तोतृषु [v]स्थन भवथ। यद्वा। प्रथमार्थे त्राप्रत्ययः। पाकत्रा[1] पाकाः परिपक्वज्ञाना भवथ। यत एवमतः कारणात् [v]हृत्सु आत्मीयेषु हृदयेषु [v]द्वयुं द्विप्रकारयुक्तं कपटिनं [v]च [v]अद्वयुं [v]च तद्विलक्षणं कापट्यरहितं च [v]मर्त्यं मनुष्यमुपेत्य हे [v]वसवः वासकाः [v]जानीथ अवगच्छथ ॥ ॥ २७ ॥

आ शर्म पर्वतानामोतापां वृणीमहे । द्यावाक्षामारे अस्मद्रपस्कृतम् ॥१६॥

आ। शर्म। पर्वतानाम्। आ। उत। अपाम्। वृणीमहे।
द्यावाक्षामा। आरे। अस्मत्। रपः। कृतम्॥ १६ ॥

[v]पर्वतानां मेघानां गिरीणां वा संबन्धि [v]शर्म सुखं वयम् [v]आ [v]वृणीमहे आभिमुख्येन संभजामहे। [v]उत अपि च [v]अपाम् उदकानां च। हे [v]द्यावाक्षामा द्यावापृथिव्यौ [v]अस्मत् [v]आरे अस्मत्तो विप्रकृष्टे देशे [v]रपः पापं [v]कृतं कुरुतम्। अस्मत्तो वियोजयतमित्यर्थः ॥

ते नो भद्रेण शर्मणा युष्माकै नावा वसवः। अति विश्वानि दुरिता पिपर्तन ॥१७॥

ते। नः। भद्रेण। शर्मणा। युष्माकम्। नावा। वसवः।
अति। विश्वानि। दुःऽइता। पिपर्तन॥ १७ ॥

हे [v]वसवः वासयितारः आदित्याः [v]ते पूर्वोक्तगुणा यूयं [v]भद्रेण शोभनेन [v]शर्मणा सुखेन [v]युष्माकं [v]नावा [v]नः अस्मान् [v]विश्वानि सर्वाणि [v]दुरिता दुर्गमनानि [v]अति [v]पिपर्तन पिपृत अतिपारयत ॥

तुचे तनाय तत्सु नो द्राघीय आयुर्जीवसे। आदित्यासः सुमहसः कृणोतन ॥ १८ ॥

तुचे। तनाय। तत्। सु। नः। द्राघीयः। आयुः। जीवसे।
आदित्यासः। सुऽमहसः। कृणोतन॥ १८ ॥

हे [v]आदित्यासः अदितेः पुत्राः [v]सुमहसः शोभनतेजस्काः [v]नः अस्माकं [v]तुचे पुत्राय [v]तनाय तत्तनयाय पौत्राय च [v]जीवसे जीवनाय [v]द्राघीयः दीर्घतमं [v]तत् प्रसिद्धम् [v]आयुः जीवितं [v]सु सुष्ठु [v]कृणोतन कुरुत ॥

यज्ञो हीळो वो अन्तर आदित्या अस्ति मृळत।
युष्मे इद्वो अपि ष्मसि सजात्ये ॥ १९ ॥

यज्ञः। हीळः। वः। अन्तरः। आदित्याः। अस्ति। मृळत।
युष्मे इति। इत्। वः। अपि। स्मसि। सऽजात्ये॥ १९ ॥

हे [v]आदित्याः [v]हीळः। हीडिर्गत्यर्थः। गन्तव्यः प्राप्तव्योऽस्माभिरनुष्ठितः [v]यज्ञः [v]वः युष्माकम् [v]अन्तरः [v]अस्ति अन्तिके वर्तमानो भवति। अतोऽस्मान् [v]मृळत सुखयत। [v]वः युष्माकं [v]सजात्ये सजातत्वे ज्ञातित्वे बान्धवे वर्तमाना वयं [v]युष्मे [v]इत् युष्मास्वेव [v]अपि [v]स्मसि सर्वदा भवामोऽपि। इदन्तो मसिः ॥

बृहद्वयं मरुतां देवं त्रातारमश्विना। मित्रमीमहे वरुणं स्वस्तये ॥ २० ॥

---

१. ख-ग-त-न–पाकत्राः।

बृहत्। वरूथम्। मरुताम्। देवम्। त्रातारम्। अश्विना।
मित्रम्। ईमहे। वरुणम्। स्वस्तये ॥ २० ॥

vमरुतां देवानां स्वामिनां vत्रातारं पालयितारं vदेवम् इन्द्रम् vअश्विना अश्विनौ च vमित्रं vवरुणं च vबृहत् प्रौढं vवरूथं शीतातपादिनिवारकं गृहं vस्वस्तये अविनाशाय vईमहे याचामहे ॥

अनेहो मित्रार्यमन्नृवद्वरुण शंस्यम्। त्रिवरूथं मरुतो यन्त नश्छर्दिः ॥ २१ ॥

अनेहः। मित्र। अर्यमन्। नृऽवत्। वरुण। शंस्यम्।
त्रिऽवरूथम्। मरुतः। यन्त। नः। छर्दिः ॥ २१ ॥

हे vमित्र हे vअर्यमन् हे vवरुण हे vमरुतः ते सर्वे यूयम् vअनेहः अहिंसितं vनृवत् नृभिः पुत्रादिभिरुपेतं vशंस्यं स्तुत्यं vत्रिवरूथं त्रयाणां शीतातपवर्षाणां निवारकं यद्वा त्रिभूमिकं vछर्दिः गृहं vनः अस्मभ्यं vयन्त यच्छत दत्तेत्यर्थः ॥

ये चिद्धि मृत्युबन्धव आदित्या मनवः स्मसि।
प्र सु न आयुर्जीवसे तिरेतन ॥ २२ ॥

ये। चित्। हि। मृत्युऽबन्धवः। आदित्याः। मनवः। स्मसि।
प्र। सु। नः। आयुः। जीवसे। तिरेतन ॥ २२ ॥

हे vआदित्याः vये vचित् ये च वयं vमनवः मनुष्याः vहि यस्मात् vमृत्युबन्धवः vस्मसि मृत्योर्यमस्य बन्धुभूताः प्रत्यासन्नमरणा भवामः अतो हेतोस्तेषां vनः अस्माकं vजीवसे जीवनाय चिरकालावस्थानाय vआयुः जीवितं vसु vप्र vतिरेतन शोभनं प्रवर्धयत ॥ ॥ २८ ॥

'तं गूर्धय' इति सप्तत्रिंशदृचं सप्तमं सूक्तं काण्वस्य सोभरेरार्षम्। प्रथमातृतीयाद्ययुजः ककुभो द्वितीयाचतुर्थ्यादियुजः सतोबृहत्यः। 'पितुर्न पुत्रः' एषा सप्तविंशी द्विपदा विंशत्यक्षरा विराट्। 'यमादित्यासः' इत्येषा चतुस्त्रिंश्युष्णिक्। 'यूयं राजानः' एषा पञ्चत्रिंशी सतोबृहती। 'अदान्मे' इत्येषा ककुप्। 'उत मे' इत्येषा सप्तत्रिंशी पङ्क्तिः। षट्त्रिंशी सप्तत्रिंशी च त्रसदस्युनाम्नो राज्ञो दानस्तुतिरूपत्वात्तद्देवताके। चतुस्त्रिंशीपञ्चत्रिंश्यावादित्यदेवताके। शिष्टा आग्नेय्यः। तथा चानुक्रान्तं—'तं गूर्धय सप्तत्रिंशत् सोभरिराग्नेयं काकुभं प्रागाथ ह पितुर्न द्विपदान्त्ये ककुप्पङ्क्ती त्रसदस्योर्दानस्तुतिस्तत्पूर्वे उष्णिक्सतोबृहत्यावादित्येभ्यः' इति। गतः सूक्तविनियोगः ॥

तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे। देवत्रा हव्यमोहिरे ॥ १ ॥

तम्। गूर्धय। स्वःऽनरम्। देवासः। देवम्। अरतिम्। दधन्विरे।
देवऽत्रा। हव्यम्। आ। ऊहिरे ॥ १ ॥

हे स्तोतः vतं प्रसिद्धमग्निं vगूर्धय स्तुहि। गूर्धयतिः स्तुतिकर्मा। कीदृशम्। vस्वर्णरं सर्वस्य नेतारं सर्वैर्यजमानैः कर्मादौ नीतं[1] वा। अथवा स्वर्गं प्रति हविषां नेतारम्। vदेवासः। दीव्यन्ति स्तुवन्तीति देवा ऋत्विजः। vदेवं दानादिगुणयुक्तम् vअरतिम् अर्यं स्वामिनं यद्वाभिप्रासद्रष्टव्यं vदध-

१. ख-ग-न-भ-श–नेतव्यं वा; ज्ञ-त१-२–नेतव्यं।

न्त्विरे धन्वन्ति गच्छन्ति स्तुत्यादिभिः प्राप्नुवन्ति । धविर्गत्यर्थः । प्राप्य च तेनाग्निना [v]देवत्रा देवान् । 'देवमनुष्य०' इत्यादिना द्वितीयार्थे त्राप्रत्ययः । [v]हव्यं चरुपुरोडाशादिलक्षणं हविः [v]ओहिरे अभिप्रापयन्ति । वहेर्लिटि यजादित्वात् संप्रसारणम् ॥

विभूतरातिं विप्र चित्रशोचिषमग्निमीळिष्व यन्तुरम् ।
अस्य मेधस्य सोम्यस्य सोभरे प्रमंध्वराय पूर्व्यम् ॥ २ ॥

विभूतऽरातिम् । विप्र । चित्रऽशोचिषम् । अग्निम् । ईळिष्व । यन्तुरम् ।
अस्य । मेधस्य । सोम्यस्य । सोभरे । प्र । ईम् । अध्वराय । पूर्व्यम् ॥ २ ॥

ऋषिरात्मानं संबोध्य स्तुतौ प्रेरयति । हे [v]विप्र मेधाविन् [v]सोभरे एतत्संज्ञ ऋषे [v]अध्वराय यागाय [v]ईम् इमम् [v]अग्निं [v]प्र [v]ईळिष्व प्रस्तुहि । कीदृशम् । [v]विभूतरातिं ख्यातधनं प्रभूतदानं वा [v]चित्रशोचिषं चायनीयतेजस्कं विचित्ररदीप्तिकं वा [v]सोम्यस्य सोमसाध्यस्य [v]अस्य [v]मेधस्य यज्ञस्य [v]यन्तुरं नियन्तारं [v]पूर्व्यं चिरंतनम् ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने प्रशास्तुः शस्त्रे 'यजिष्ठं त्वा' इत्यादिकौ प्रगाथौ वैकल्पिकौ स्तोत्रियानुरूपौ । सूत्रितं च—'यजिष्ठं त्वा ववृमहे यः समिधा य आहुती' (आश्व. श्रौ. ७. ८) इति ॥

यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारमर्मर्त्यम् । अस्य यज्ञस्य सुक्रतुम् ॥ ३ ॥

यजिष्ठम् । त्वा । ववृमहे । देवम् । देवऽत्रा । होतारम् । अमर्त्यम् । अस्य । यज्ञस्य । सुऽक्रतुम् ॥३॥

हे अग्ने [v]यजिष्ठं यष्टृतमं [v]त्वा[1] [v]ववृमहे वृणीमहे संभजामहे । कीदृशं त्वाम् । [v]देवत्रा देवेषु मध्ये [v]देवम् अतिशयेन दानादिगुणयुक्तं [v]होतारं देवानामाह्वातारम् [v]अमर्त्यम् अविनाशम्[2] [v]अस्य [v]यज्ञस्य यागस्य [v]सुक्रतुं सुष्ठु कर्तारम् ॥

ऊर्जो नपातं सुभगं सुदीदितिमग्निं श्रेष्ठशोचिषम् ।
स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि ॥ ४ ॥

ऊर्जः । नपातम् । सुऽभगम् । सुऽदीदितिम् । अग्निम् । श्रेष्ठऽशोचिषम् ।
सः । नः । मित्रस्य । वरुणस्य । सः । अपाम् । आ । सुम्नम् । यक्षते । दिवि ॥ ४ ॥

[v]ऊर्जः अन्नस्य [v]नपातं न पातयितारम् । यद्वा । नप्तारं चतुर्थम् । हविर्लक्षणेनान्नेनापो जायन्ते अग्निश्चौषधिवनस्पतयस्तेभ्य एष जात[3] इति चतुर्थत्वम् । 'नभ्राण्नपात्०' इति नप्तः प्रकृतिभावः । [v]सुभगं शोभनधनं [v]सुदीदितिं सुष्ठु दीपयितारं[4] [v]श्रेष्ठशोचिषं प्रशस्यतमतेजस्कम् [v]अग्निं स्तौमीति शेषः । [v]सः तादृशोऽग्निः [v]नः अस्मदर्थं [v]दिवि द्योतमाने देवयजने द्युलोके वा [v]मित्रस्य देवस्य [v]वरुणस्य च [v]सुम्नं सुखम् [v]आ अभिलक्ष्य [v]यक्षते यजतु । तथा [v]सः अग्निः [v]अपाम् अब्देवतानां सुम्नमभियजतु ॥

यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये । यो नमसा स्वध्वरः ॥ ५ ॥

यः । समऽइधा । यः । आऽहुती । यः । वेदेन । ददाश । मर्तः । अग्नये ।
यः । नमसा । सुऽअध्वरः ॥ ५ ॥

---

१. ग-न-भ–त्वां; घ–त्वा त्वां । २. घ-न-भ–अविनाशिनं । ३. भ–जायत । ४. ग-घ-न-भ–दीपयंतं ।

इयं पाकयज्ञप्रशंसापरेति भगवताश्वलायनेन ब्राह्मणान्तरप्रदर्शनेन व्याख्याता (आश्व. गृ. १. १.४-५)। vयः vमर्तः मनुष्यः vसमिधा पालाशादिनेध्मेन vअग्नये अग्न्यर्थं vददाश परिचरति। vयः च vआहुती आहुत्या आज्यादिसाध्यया परिचरति। vयः च vवेदेन वेदाध्ययनेन ब्रह्मयज्ञेन परिचरति। vयः च vस्वध्वरः शोभनेनाध्वरेण ज्योतिष्टोमादिना युक्तः सन् vनमसा अन्नेन चरुपुरोडाशादिनाग्नये ददाश अग्न्यर्थं परिचरति। तस्येदर्वन्त इत्युत्तरत्र संबन्धः ॥ ॥ २९ ॥

तस्येदर्वन्तो रंहयन्त आशवस्तस्य द्युम्नितमं यशः ।
न तमंहो देवकृतं कुतश्चन न मर्त्यकृतं नशत् ॥ ६ ॥

तस्य । इत् । अर्वन्तः । रंहयन्ते । आशवः । तस्य । द्युम्निऽतमम् । यशः ।
न । तम् । अंहः । देवऽकृतम् । कुतः । चन । न । मर्त्यऽकृतम् । नशत् ॥ ६ ॥

यः पूर्वोक्तः vतस्येत् तस्यैव vआशवः व्यापनशीलाः vअर्वन्तः अश्वाः vरंहयन्ते वेगं कुर्वन्ति। शत्रून् प्रसहन्त इत्यर्थः। vद्युम्नितमं दीप्तिमत्तमं[1] vयशः कीर्तिश्च vतस्य एव भवति। यद्वा। द्युम्नमिति धननाम। धनवत्तमं यशोऽन्नं च तस्य भवति। अपि च vदेवकृतम् देवैः कृतम् vअंहः पापं vकुतश्चन कस्मादपि हेतोः vतं vन vनशत् न प्राप्नोति। vन[2] vमर्त्यकृतं मनुष्यैः कृतम् ॥

स्वग्नयो वो अग्निभिः स्याम सूनो सहस ऊर्जां पते । सुवीरस्त्वमस्मयुः ॥ ७ ॥

सुऽअग्नयः । वः । अग्निऽभिः । स्याम । सूनो इति । सहसः । ऊर्जाम् । पते ।
सुऽवीरः । त्वम् । अस्मऽयुः ॥ ७ ॥

हे vसहसः vसूनो बलस्य पुत्र। अग्निर्हि बलेन मथ्यमानो जायते। हे vऊर्जां vपते अन्नानां हविर्लक्षणानां स्वामिन्नग्ने vवः। वचनव्यत्ययः। तवावयवभूतैः vअग्निभिः गार्हपत्यादिभिर्वयं vस्वग्नयः शोभनाग्निकाः vस्याम भवेम। vसुवीरः शोभनैर्वीरैरुपेतः vत्वं च vअस्मयुः अस्मान् कामयमानो भव ॥

प्रशंसमानो अतिथिर्न मित्रियोऽग्नी रथो न वेद्यः ।
त्वे क्षेमासो अपि सन्ति साधवस्त्वं राजा रयीणाम् ॥ ८ ॥

प्रऽशंसमानः । अतिथिः । न । मित्रियः । अग्निः । रथः । न । वेद्यः ।
त्वे इति । क्षेमासः । अपि । सन्ति । साधवः । त्वम् । राजा । रयीणाम् ॥ ८ ॥

vप्रशंसमानः स्तुवन् vअतिथिर्न अतिथिरिव। यद्वा। व्यत्ययेन कर्मणि कर्तृप्रत्ययः। प्रशस्यमानः सः vअग्निः vमित्रियः मित्राणां स्तोतॄणां हितो भवति। तथा vरथो vन रथ इव vवेद्यः लम्भनीयोऽभीष्टफलसाधनत्वेन ज्ञातव्यो वा। उत्तरोऽर्धश्चैः प्रत्यक्षकृतः। हे अग्ने vत्वे त्वयि vसाधवः साधकाः समीचीनाः vक्षेमासः धारणानि vअपि vसन्ति भवन्ति। तथा vरयीणां धनानां vत्वम् एव vराजा ईश्वरो भवसि।

सो अद्धा दाश्वध्वरोऽग्ने मर्तः सुभग स प्रशंस्यः । स धीभिरस्तु सनिता ॥ ९ ॥

सः । अद्धा । दाशुऽअध्वरः । अग्ने । मर्तः । सुऽभग । सः । प्रऽशंस्यः ।
सः । धीभिः । अस्तु । सनिता ॥ ९ ॥

---

१. ग १–दीप्ततमं; ग२-घ-त-न-भ-श–दीप्तितमं। २. घ-न-भ– न च।

हे vअग्ने यः vमर्तः[1] मनुष्यः vदाश्वध्वरः दत्तयज्ञो भवति vसः vअद्धा । सत्यनामैतत् । सत्यफलो भवतु । हे vसुभग शोभनधन अग्ने[2] vसः एव vप्रशंस्यः प्रशंसनीयः श्लाघनीयश्च भवतु । तथा vसः vधीभिः कर्मभिः स्तोत्रैर्वा vसनिता vअस्तु संभजनशीलो भवतु[3] ॥

यस्य त्वमूर्ध्वो अध्वराय तिष्ठसि क्षयद्वीरः स साधते ।
सो अर्वद्भिः सनिता सः विपन्युभिः स शूरैः सनिता कृतम् ॥१०॥

यस्य । त्वम् । ऊर्ध्वः । अध्वराय । तिष्ठसि । क्षयत्ऽवीरः । सः । साधते ।
सः । अर्वत्ऽभिः । सनिता । सः । विपन्युऽभिः । सः । शूरैः । सनिता । कृतम् ॥१०॥

हे अग्ने vयस्य यजमानस्य vअध्वराय यागनिष्पादनाय[4] vत्वम् vऊर्ध्वः उद्युक्तः सन् vतिष्ठसि अवतिष्ठसे vसः यजमानः vक्षयद्वीरः निवसद्भिरित्वरैर्वा[5] वीरैः पुत्रादिभिरुपेतः सन् vसाधते सर्वं कर्तव्यं साधयति । तदेव[6] विवृणोति । vसः तादृशो जनः vअर्वद्भिः अश्वैः vकृतं निष्पादितं जयादिकं vसनिता संभजनशीलो भवति । vसः[7] तादृशो जनः vविपन्युभिः मेधाविभिः vसः vशूरैः च vसनिता भवति[8] ॥ ॥ ३० ॥

यस्याग्निर्वपुर्गृहे स्तोमं चनो दधीत विश्ववार्यः । हव्या वा वेविषद्विषः ॥११॥

यस्य । अग्निः । वपुः । गृहे । स्तोमम् । चनः । दधीत । विश्वऽवार्यः ।
हव्या । वा । वेविषत् । विषः ॥ ११ ॥

vयस्य यजमानस्य vगृहे vविश्ववार्यः विश्वैर्वरणीयः vवपुः । रूपनामैतत् । रूपवान् दीप्तिमान् vअग्निः vस्तोमं स्तोत्रं vचनः अन्नं च हविर्लक्षणं vदधीत धारयेत् । यस्य च vहव्या । वाशब्दः समुच्चये । हव्यानि हवींषि च vविषः व्याप्तान् देवान् vवेविषत् प्रापयेत् । 'विष्लृ व्याप्तौ' । अस्माल्लेटि रूपमेतत् । स यजमान इति पूर्वत्र संबन्धः ॥

विप्रस्य वा स्तुवतः सहसो यहो मक्षूतमस्य रातिषु ।
अवोदेवमुपरिमर्त्यं कृधि वसो विविदुषो वचः ॥ १२ ॥

विप्रस्य । वा । स्तुवतः । सहसः । यहो इति । मक्षुऽतमस्य । रातिषु ।
अवःऽदेवम् । उपरिऽमर्त्यम् । कृधि । वसो इति । विविदुषः । वचः ॥ १२ ॥

हे vसहसो vयहो बलस्य पुत्राग्ने vविप्रस्य मेधाविनः vस्तुवतः स्तोतुः vवा vरातिषु हविर्दानेषु vमक्षुतमस्य[9] शीघ्रतमस्य यष्टुर्वा vविविदुषः ज्ञातवतोऽभिज्ञस्य vवचः वचनं हे vवसो वासकाग्ने vअवोदेवं देवानामवस्तात् vउपरिमर्त्यं मर्त्यानामुपरिष्टाच्च vकृधि कुरु । सर्वं नभःप्रदेशं व्यापयेति यावत् ॥

यो अग्निं हव्यदातिभिर्नमोभिर्वा सुदक्षमाविवासति । गिरा वाजिरशोचिषम् ॥१३॥

---

१. ग–मर्त्यः । २. ख-ग-त-न-भ-श–'अग्ने' नास्ति । ३. ख-त-श–भवति । ४. ग-घ-न-भ–यागनिष्पादनार्थं । ५. ग-त-भ–निवसद्भिरीश्वरैर्वा । ६. ख-ग-ज्ञ-त१-२-न-भ-श–एतदेव । ७. ख-त-न-भ-श–विपन्युभिः स्तोतृभिः कृतं च स ('स' नास्ति–ख-त-श) सनिता भवति । शूरैः शौर्योपेतैः मृत्यैः कृतं च स सनिता संभजनशीलो भवति (भवतु-श) । ८. ग-ज्ञ-श–मक्षूतमस्य ।

यः । अग्निम् । हव्यदातिऽभिः । नमःऽभिः । वा । सुऽदक्षम् । आऽविवासति ।
गिरा । वा । अजिरऽशोचिषम् ॥ १३ ॥

vयः यजमानः vहव्यदातिभिः हविषां दानैः vनमोभिः नमस्कारैः vवा vसुदक्षं शोभनबलम् vअग्निम् vआविवासति परिचरति vगिरा vवा स्तुत्या वा vअजिरशोचिषं क्षिप्रगामितेजस्कं तमग्निं परिचरति स समृद्धो भवतीति शेषः ॥

समिधा यो निशिती दाशदर्दितिं धामभिरस्य मर्त्यः ।
विश्वेत्स धीभिः सुभगो जनाँ अति द्युम्नैरुद्रइव तारिषत् ॥ १४ ॥

सम्ऽइधा । यः । निऽशिती । दाशत् । अदितिम् । धामऽभिः । अस्य । मर्त्यः ।
विश्वा । इत् । सः । धीभिः । सुऽभगः । जनान् । अति । द्युम्नैः । उद्रःऽइव । तारिषत् ॥ १४ ॥

vयः vमर्त्यः मनुष्यः vअस्य अग्नेः vधामभिः शरीरैः गार्हपत्यादिरूपेण विभज्य वर्तमानैः सार्धम् vअदितिम् अखण्डनीयं तमेवाग्निं vनिशिती निशित्या निशानसाधनया प्रज्वलनहेतुभूतया vसमिधा vदाशत् परिचरेत् vधीभिः[1] कर्मभिः बुद्धिविशेषैर्वा vसः vसुभगः[2] सन् vविश्वेत् सर्वानेव vजनान् vद्युम्नैः द्योतमानैरन्नैर्यशोभिर्वा vउद्रइव उदकानीव vअति vतारिषत् अतितरेत् अतिक्रामेत् ॥

तदग्ने द्युम्नमा भर यत्सासहत्सदने कं चिदत्रिणम् । मन्युं जनस्य दूढ्यः ॥ १५ ॥

तत् । अग्ने । द्युम्नम् । आ । भर । यत् । ससहत् । सदने । कम् । चित् । अत्रिणम् ।
मन्युम् । जनस्य । दुःऽध्यः ॥ १५ ॥

हे vअग्ने vतत् vद्युम्नम्[3] vआ vभर अस्मभ्यमाहर । vयत् vसदने गृहे वर्तमानं vकं vचित् कमपि vअत्रिणम् अत्तारं राक्षसादिकं vसासहत् अत्यर्थमभिभवेत् । तथा vदूढ्यः दुर्धियः पापबुद्धेः शत्रुजनस्य vमन्युं क्रोधं यच्च द्युम्नमभिभवेत् तदाहरेत्यन्वयः । 'ध्यै च' इति पृषोदरादिपाठात् दुरो रेफस्योत्वं उत्तरपदादेर्दुत्वं च ॥ ॥ ३१ ॥

येन चष्टे वरुणो मित्रो अर्यमा येन नासत्या भगः ।
वयं तत्ते शवसा गातुवित्तमा इन्द्रत्वोता विधेमहि ॥ १६ ॥

येन । चष्टे । वरुणः । मित्रः । अर्यमा । येन । नासत्या । भगः ।
वयम् । तत् । ते । शवसा । गातुवित्ऽतमाः । इन्द्रत्वाऽऊताः । विधेमहि ॥ १६ ॥

vयेन अग्नेयेन तेजसा vवरुणः देवः vचष्टे प्रकाशयति । येन च vमित्रः vअर्यमा च चष्टे । vयेन च vनासत्या अश्विनौ च चक्षाते । vभगः भजनीय एतत्संज्ञो देवश्च चष्टे । vशवसा बलेन vगातुवित्तमाः गातोर्गातव्यस्य स्तोत्रस्य ज्ञातृतमाः । यद्वा । गन्तव्यस्य प्राप्तव्यस्य लब्धृतमाः । vइन्द्रत्वोताः इन्द्रेणेश्वरेण त्वयोता रक्षिताः सन्तः vवयं हे अग्ने vते त्वदीयं vतत् तेजः vविधेमहि परिचरेमहि ॥

धेदग्ने स्वाध्यो३ ये त्वा विप्र निदधिरे नृचक्षसम् । विप्रासो देव सुक्रतुम् ॥ १७ ॥

---

१. त-न-भ-धीतिभिः । २. ग-न-भ-श-सुभगः शोभनधनः । ३. घ-द्युम्नं सामर्थ्यं ।

ते । घ । इत् । अग्ने । सुऽआध्यः । ये । त्वा । विप्र । निऽददधिरे । नृऽचक्षसम् ।
विप्रासः । देव । सुऽक्रतुम् ॥ १७ ॥

हे vअग्ने vते vघेत् त एव खलु vस्वाध्यः शोभनाध्याना भवन्ति । हे vविप्र मेधाविन् vदेव द्योतमानाग्ने vये vविप्रासः विप्रा मेधाविन ऋत्विजः vनृचक्षसं नृणां चष्टारं[1] vसुक्रतुं सुकर्माणं शोभनप्रज्ञं वा vत्वा त्वां vनिदधिरे निदधति यागार्थं गार्हपत्यादिस्थानेष्वाधानसंस्कारेण स्थापयन्ति ते घेदित्यन्वयः ॥

त इद्वेदिं सुभग त आहुतिं ते सोतुं चक्रिरे दिवि ।
त इद्वाजेभिर्जिग्युर्महद्धनं ये त्वे कामं न्येरिरे ॥ १८ ॥

ते । इत् । वेदिम् । सुऽभग । ते । आऽहुतिम् । ते । सोतुम् । चक्रिरे । दिवि ।
ते । इत् । वाजेभिः । जिग्युः । महत् । धनम् । ये । त्वे इति । कामम् । निऽएरिरे ॥ १८ ॥

हे vसुभग शोभनधनाग्ने vत vइत् त एव यजमानास्त्वद्यागाय vवेदिं vचक्रिरे कुर्वन्ति । तदनन्तरं vते यजमानाः vआहुतिं चरुपुरोडाशादिसाध्यां दीक्षणीयादिषु कुर्वन्ति । ततः vदिवि द्योतमाने सौत्येऽहनि vसोतुं सोममभिषोतुं चक्रिरे उद्योगं कुर्वन्ति । अनुष्ठितयज्ञाः vत vइत् त एव vवाजेभिः वाजैर्बलैः vमहत् प्रभूतं vधनं vजिग्युः जयन्ति । शत्रुभ्यो लभन्ते । कुत इत्यत आह । vये यजमाना हे अग्ने vत्वे त्वयि vकामम् अभिलाषं vन्येरिरे नितरां गच्छन्ति[2] । त्वामादरातिशयेन स्तुवन्तीत्यर्थः ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने प्रशास्तुः शस्त्रे ' भद्रो नः ' इति प्रगाथो वैकल्पिकः स्तोत्रियः । सूत्र्यते हि—' भद्रो नो अग्निराहुतो यदी घृतेभिराहुतः ' (आश्व. श्रौ. ७. ८) इति ॥

भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
भद्रा उत प्रशस्तयः ॥ १९ ॥

भद्रः । नः । अग्निः । आऽहुतः । भद्रा । रातिः । सुऽभग । भद्रः । अध्वरः ।
भद्राः । उत । प्रऽशस्तयः ॥ १९ ॥

vआहुतः हविर्भिस्तर्पितः vअग्निः vनः अस्माकं vभद्रः कल्याणो भवतु । हे vसुभग शोभनधनाग्ने vभद्रा कल्याणी vरातिः दानं चास्माकं भवतु । vभद्रः कल्याणः vअध्वरः यागश्च भवतु । vउत अपि च vभद्राः कल्याण्यः vप्रशस्तयः प्रशंसाः स्तुतयश्च भवन्तु ॥

भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहः ।
अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टिभिः ॥ २० ॥

भद्रम् । मनः । कृणुष्व । वृत्रऽतूर्ये । येन । समत्ऽसु । ससहेः ।
अव । स्थिरा । तनुहि । भूरि । शर्धताम् । वनेम । ते । अभिष्टिऽभिः ॥ २० ॥

---

१. ख-घ-त-न-म-श–चेष्टारं । २. ग–प्रेरयन्ति ।

हे अग्ने ᵛवृत्रतूर्ये संग्रामे ᵛभद्रं शोभनं ᵛमनः ᵛकृणुष्व अस्माकं कुरु। ᵛयेन मनसा त्वं ᵛसमत्सु संग्रामेषु ᵛसासहः भृशं शत्रूनभिभवसि। अपि च ᵛशर्धताम् अभिभवतां शत्रूणां ᵛभूरि भूरीणि बहूनि स्थिराणि[1] दृढान्यपि ᵛअव ᵛतनुहि अवाञ्चि कुरु। पराजितानि कुर्वित्यर्थः। वयं च ᵛअभिष्टिभिः अभ्येषणसाधनैर्हविर्भिः स्तोत्रैश्च ᵛते त्वां ᵛवनेम संभजेमहि। यद्वा। ते तव प्रसादात् अभिष्टिभिः अभीष्टैः फलैर्वनेम संगच्छेमहि ॥ ॥ ३२ ॥

ईळे गिरा मनुर्हितं यं देवा दूतमरतिं न्येरिरे। यजिष्ठं हव्यवाहनम् ॥ २१ ॥

ईळे। गिरा। मनुःऽहितम्। यम्। देवाः। दूतम्। अरतिम्। निऽएरिरे।

यजिष्ठम्। हव्यऽवाहनम् ॥ २१ ॥

ᵛगिरा वाचा स्तुतिरूपया ᵛमनुर्हितं मनुना प्रजापतिना यजमानेनाहितं तमग्निम् ᵛईळे स्तौमि। कीदृशम्। ᵛयजिष्ठं यष्टृतमं ᵛहव्यवाहनं हविषां वोढारं ᵛअरतिम् अर्यमीश्वरं वा ᵛदूतं देवानां दूरये वर्तमानम्। ᵛयम् अग्निं ᵛदेवाः ᵛन्येरिरे नितरां प्रेरयन्ति ॥

तिग्मजम्भाय तरुणाय राजते प्रयो गायस्यग्नये।
यः पिंशते सूनृताभिः सुवीर्यमग्निर्घृतेभिराहुतः ॥ २२ ॥

तिग्मऽजम्भाय। तरुणाय। राजते। प्रयः। गायसि। अग्नये।

यः। पिंशते। सूनृताभिः। सुऽवीर्यम्। अग्निः। घृतेभिः। आऽहुतः ॥ २२ ॥

ᵛतिग्मजम्भाय तीक्ष्णज्वालाय ᵛतरुणाय नित्ययूने जरामरणरहिताय ᵛराजते राजमानाय ᵛअग्नये ᵛप्रयः हविर्लक्षणमन्नं ᵛगायसि हे स्तोतः। प्रवृद्धिं प्रयच्छेत्यर्थः। ᵛयः ᵛअग्निः ᵛसूनृताभिः प्रियसत्यात्मिकाभिर्वाग्भिः स्तुतः ᵛघृतेभिः घृतैराज्यैः ᵛआहुतः अभिहुतश्च सन् ᵛसुवीर्यं शोभनवीर्यं ᵛपिंशते आश्लेषयति स्तोतृभिः संयोजयति। 'पिश अवयवे'। तस्मा अग्नय इत्यन्वयः ॥

आभिप्लविकेपूक्थ्येषु प्रशास्तुः शस्त्रे यदा 'भद्रो नः' (ऋ. सं. ८. १९. १९) इति प्रगाथः स्तोत्रियः तदानीं 'यदी घृतेभिः' इति प्रगाथोऽनुरूपः। सूत्रं तु पूर्वमेवोदाहृतम् ॥

यदी घृतेभिराहुतो वाशीमग्निर्भरत उच्चा च। असुरइव निर्णिजम् ॥ २३ ॥

यदि। घृतेभिः। आऽहुतः। वाशीम्। अग्निः। भरते। उत्। च। अव। च।

असुरःऽइव। निःऽनिजम् ॥ २३ ॥

ᵛघृतेभिः घृतैः ᵛआहुतः अभिहुतोऽयम् ᵛअग्निः ᵛयदि यदा यस्मिन्काले ᵛवाशीम्। वाङ्नामैतत्। वाचं शब्दम् ᵛउच्च ऊर्ध्वं च ᵛअव ᵛच अवाक्च ᵛभरते संपादयति। यद्वा। वाशीं वाशनशीलां शब्दकारिणीं ज्वालामुद्भरते उद्धरति उद्गमयत्यूर्ध्वमुखम् अव च भरते अवाङ्मुखं च हरति उपसंहरति। ᵛअसुरइव रश्मीनां क्षेप्ता सूर्यो यथा ᵛनिर्णिजम् आत्मीयं रूपमुपरितनेषु लोकेषु प्रकाशतयोद्गमयति अधस्तनेषु चावाङ्मुखं गमयति तद्वदुच्चनीचभावनयाग्निस्तेज उद्गमयति। तं स्तुम इति शेषः ॥

---

१. घ-न-स्थिरा स्थिराणि।

यो हव्यान्यैरयता मनुर्हितो देव आसा सुगन्धिना ।
विवासते वार्याणि स्वध्वरो होता देवो अमर्त्यः ॥ २४ ॥

यः । हव्यानि । ऐरयत । मनुःऽहितः । देवः । आसा । सुऽगन्धिना ।
विवासते । वार्याणि । सुऽअध्वरः । होता । देवः । अमर्त्यः ॥ २४ ॥

[v]यः [v]मनुर्हितः मनुना प्रजापतिनाहितः [v]देवः द्योतमानोऽग्निः [v]सुगन्धिना शोभनगन्धयुक्तेन [v]आसा आस्येन [v]हव्यानि अस्मदीयानि हवींषि [v]ऐरयत देवान्प्रति प्रेरयति [v]स्वध्वरः शोभनयज्ञः [v]होता देवानामाह्वाता [v]देवः दीप्यमानः [v]अमर्त्यः मरणरहितः सोऽग्निः [v]वार्याणि वरणीयानि धनानि [v]विवासते परिचरते । यजमानाय प्रयच्छतीति शेषः ॥

यदग्ने मर्त्यस्त्वं स्यामहं मित्रमहो अमर्त्यः । सहसः सूनवाहुत ॥ २५ ॥

यत् । अग्ने । मर्त्यः । त्वम् । स्याम् । अहम् । मित्रऽमहः । अमर्त्यः ।
सहसः । सूनो इति । आऽहुत ॥ २५ ॥

हे [v]सहसः [v]सूनो बलस्य पुत्र [v]आहुत घृतैरभिहुत हे [v]मित्रमहः अनुकूलदीप्तिमन् [v]अग्ने [v]मर्त्यः मरणधर्मा [v]अहं [v]यत् यदि [v]त्वं [v]स्यां त्वदुपासनया त्वद्रूपमापन्नो भवेयम् । 'ये[1] यथा-यथोपासते ते[2] तदेव भवन्ति' इति श्रुतेः । तर्ह्यहम् [v]अमर्त्यः मरणरहितो[3] देव एव भवेयमिति ॥ ॥३३॥

न त्वा रासीयाभिशस्तये वसो न पापत्वाय सन्त्य ।
न मे स्तोतामतीवा न दुर्हितः स्यादग्ने न पापया ॥ २६ ॥

न । त्वा । रासीय । अभिऽशस्तये । वसो इति । न । पापऽत्वाय । सन्त्य ।
न । मे । स्तोता । अमतिऽवा । न । दुःऽहितः । स्यात् । अग्ने । न । पापया ॥ २६ ॥

हे [v]वसो वासकाग्ने [v]त्वा त्वाम् [v]अभिशस्तये अभिशंसनाय मिथ्यापवादाय हिंसायै वा [v]न [v]रासीय नाक्रोशयेयम् । 'रासृ शब्दे' । हे [v]सन्त्य संभजनीयाग्ने [v]पापत्वाय त्वां [v]न रासीय । [v]मे मदीयः [v]स्तोता चानभिमतवचनेन त्वां न आक्रोशयतु । अत[4] एव[4] [v]अमतीवा । अमतिरशोभना बुद्धिः । तद्वान् अपि च [v]दुर्हितः शत्रुर्हे [v]अग्ने अस्माकं [v]न [v]स्यात् न भवतु । अत एव [v]पापया अशोभनया बुद्ध्या सः [v]न बाधताम् ॥

पितुर्न पुत्रः सुभृतो दुरोण आ देवाँ एतु प्र णो हविः ॥ २७ ॥

पितुः । न । पुत्रः । सुऽभृतः । दुरोणे । आ । देवान् । एतु । प्र । नः । हविः ॥ २७ ॥

[v]पितुर्न [v]पुत्रः पितुः पुत्र इवास्माकं [v]सुभृतः सुष्ठु भर्ता । यद्वा । पित्रा पुत्र इवास्माभिः सम्यग्भृतो हविर्भिः पोषितः । अयमग्निः पुत्र इवास्माकं सुभृतः [v]दुरोणे यज्ञगृहे [v]देवान् [v]आ अभिलक्ष्य [v]नः अस्माकं [v]हविः [v]प्र [v]एतु प्र गमयतु । यद्वा अग्निरैतु आगच्छतु । अस्मदीयं हविश्च देवान् प्राप्नोतु ॥

---

१. भ–यं । २. त-भ–'ते' नास्ति । ३. ज्ञ-त१-२–मरणधर्मरहितो । ४. ख-घ-त-न-श–अत एव पापया; भ–कीदृशः स्तोता ।

तवाहमग्न ऊतिभिर्नेदिष्ठाभिः सचेय जोषमा वसो। सदा देवस्य मर्त्यैः ॥२८॥

तव। अहम्। अग्ने। ऊतिऽभिः। नेदिष्ठाभिः। सचेय। जोषम्। आ। वसो इति।
सदा। देवस्य। मर्त्यैः ॥ २८ ॥

हे ᵛवसो वासक ᵛअग्ने ᵛनेदिष्ठाभिः अन्तिकतमाभिः ऋजुगामिनीभिर्वा ᵛदेवस्य ᵛतव ᵛऊतिभिः रक्षाभिः ᵛमर्त्यैः मनुष्यैः ᵛअहं स्तोता ᵛसदा सर्वदा ᵛजोषम् ᵛआ ᵛसचेय प्रीतिमभिसेवेय ॥

तव क्रत्वा सनेयं तव रातिभिरग्ने तव प्रशस्तिभिः।
त्वामिदाहुः प्रमतिं वसो ममाग्ने हर्षस्व दातवे ॥ २९ ॥

तव। क्रत्वा। सनेयम्। तव। रातिऽभिः। अग्ने। तव। प्रशस्तिऽभिः।
त्वाम्। इत्। आहुः। प्रऽमतिम्। वसो इति। मम। अग्ने। हर्षस्व। दातवे ॥ २९ ॥

हे ᵛअग्ने ᵛतव ᵛक्रत्वा त्वदीयेन परिचरणरूपेण कर्मणा ᵛसनेयं त्वां संभजेयम्। एतदेव विशदयति। ᵛतव ᵛरातिभिः त्वदीयैर्हविर्दानैश्च सनेयम्। तथा ᵛतव ᵛप्रशस्तिभिः प्रशंसनैः स्तोत्रैश्च त्वां संभजेयम्। अस्यैव संभजने किं कारणं तदाह। हे ᵛवसो वासकाग्ने ᵛमम स्तोतुः ᵛप्रमतिं प्रकृष्टबुद्धिं रक्षकं ᵛत्वामित् त्वामेव ᵛआहुः ब्रह्मवादिनः कथयन्ति। अतो हे ᵛअग्ने ᵛदातवे दातुं ᵛहर्षस्व हृष्टो भव। हर्षयुक्तः सन् बहु धनं प्रयच्छेत्यर्थः ॥

पूर्वोक्त एव प्रशास्तुः शस्त्रे 'प्र सः' इति प्रगाथो वैकल्पिकोऽनुरूपः। सूत्र्यते हि—'प्र सो अग्ने तवोतिभिरग्निं वो वृधन्तम्' (आश्व. श्रौ. ७. ८) इति ॥

प्र सो अग्ने तवोतिभिः सुवीराभिस्तिरते वाजभर्मभिः।
यस्य त्वं सख्यमावरः ॥ ३० ॥

प्र। सः। अग्ने। तव। ऊतिऽभिः। सुऽवीराभिः। तिरते। वाजभर्मऽभिः।
यस्य। त्वम्। सख्यम्। आऽवरः ॥ ३० ॥

हे ᵛअग्ने ᵛतवोतिभिः रक्षाभिः ᵛसः यजमानः ᵛप्र ᵛतिरते प्रवर्धते। ऊतयो विशेष्यन्ते। ᵛसुवीराभिः। शोभना वीराः पुत्रादयो यासु तास्तथोक्ताः। ᵛवाजभर्मभिः। वाजानामन्नानां बलानां वा भर्म भरणं यासु तादृशीभिः। हे अग्ने ᵛत्वं ᵛयस्य यजमानस्य ᵛसख्यं सखित्वं मित्रत्वम् ᵛआवरः अभिवृणोषि स तिरत इत्यन्वयः ॥ ॥ ३४ ॥

तव द्रप्सो नीलवान्वाश ऋत्विय इन्धानः सिष्णवा ददे।
त्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु राजसि ॥ ३१ ॥

तव। द्रप्सः। नीलऽवान्। वाशः। ऋत्वियः। इन्धानः। सिष्णो इति। आ। ददे।
त्वम्। महीनाम्। उषसाम्। असि। प्रियः। क्षपः। वस्तुषु। राजसि ॥ ३१ ॥

हे ᵛसिष्णो। सिषिः सेचनार्थः। सोमेनासिच्यमानाग्ने ᵛद्रप्सः द्रवणशीलः ᵛनीलवान् शकटनीडेऽवस्थानात्[1] तद्वान् ᵛवाशः कान्तः शब्दायमानो वा ᵛऋत्वियः ऋतौ वसन्तादिकालविशेषे भवः

१. ग–शकटानेयत्वात्।

[v]इन्धानः संदीपयन् एवंभूतः [v]तव सोमः [v]आ [v]ददे तुभ्यं होमायाध्वर्युणादीयते । अपि च [v]एवं [v]महीनां महतीनाम् [v]उषसां [v]प्रियः मित्रभूतः [v]असि । उषसि ह्यग्नयो होमाय प्रज्वाल्यन्ते । तथा [v]क्षपः क्षपाया रात्रेः संबन्धिषु [v]वस्तुषु[1] [v]राजसि प्रकाशसे । यद्वा । रात्रिसंबन्धीनि वस्तूनि पदार्थजातानि त्वं प्रकाशयसि ॥

तमा॑ग॒न्म॒ सो॒भ॒रयः॒ स॒ह॒स्र॒मु॒ष्कं स्व॒भि॒ष्टिम॑व॒से । स॒म्ऽरा॒ज॒म् त्रा॒स॒द॒स्य॒वम् ॥ ३२॥

तम् । आ । अ॒ग॒न्म॒ । सो॒भ॒रयः॒ । स॒ह॒स्र॒ऽमु॒ष्कम् । सु॒ऽअ॒भि॒ष्टिम् । अ॒व॒से ।
स॒म्ऽरा॒ज॒म् । त्रा॒स॒द॒स्य॒वम् ॥ ३२ ॥

[v]सोभरयः ऋषयो वयम् [v]अवसे रक्षणाय [v]तम् अग्निम् [v]आगन्म हविर्भिः स्तुतिभिश्च प्राप्ता अभूम । कीदृशम् । [v]सहस्रमुष्कम् । मुष्णन्ति तमांस्यपहरन्तीति मुष्काणि तेजांसि । बहुतेजस्कं [v]स्वभिष्टिं शोभनाभ्येषणं [v]सम्राजं सम्यग्राजमानं [v]त्रासदस्यवम् । त्रसदस्युर्नाम राजर्षिः । तस्य स्तोतव्यत्वेन संबन्धिनम् ॥

यस्य॑ ते अग्ने अ॒न्ये अ॒ग्नय॑ उप॒क्षितो॑ व॒याइ॑व ।
विपो॒ न द्यु॒म्ना नि यु॑वे॒ जना॑नां॒ तव॑ क्ष॒त्राणि॑ व॒र्धय॑न् ॥ ३३ ॥

यस्य॑ । ते॒ । अ॒ग्ने॒ । अ॒न्ये । अ॒ग्नयः॑ । उ॒प॒ऽक्षितः॑ । व॒याःऽइ॑व ।
विपः॑ । न । द्यु॒म्ना । नि । यु॒वे॒ । जना॑नाम् । तव॑ । क्ष॒त्राणि॑ । व॒र्धय॑न् ॥ ३३ ॥

हे [v]अग्ने [v]यस्य [v]ते तव [v]अन्ये [v]अग्नयः [v]वयाइव वृक्षस्य शाखा इव [v]उपक्षितः समीपे निवसन्तो भवन्ति [v]जनानां जनिमतां मनुष्याणां मध्येऽहं तस्य [v]तव [v]क्षत्राणि बलानि स्तुत्या [v]वर्धयन् [v]विपो [v]न । स्तोतॄनामैतत् । अन्ये स्तोतार इव [v]द्युम्ना द्योतमानान्यन्नानि यशांसि वा [v]नि [v]युवे नितरां प्राप्नोमि । त्वत्प्रसादाल्लभेयेत्यर्थः ॥

यमा॑दित्यासो अद्रुहः॒ पा॒रं न॑यथ॒ मर्त्य॑म् । म॒घोना॑ं विश्वे॑षां सुदानवः ॥३४॥

यम् । आ॒दि॒त्या॒सः॒ । अ॒द्रु॒हः॒ । पा॒रम् । न॒य॒थ॒ । मर्त्य॑म् । म॒घोना॑म् । विश्वे॑षाम् । सु॒ऽदा॒न॒वः॒ ॥३४॥

हे [v]अद्रुहः अद्रोग्धारः हे [v]सुदानवः[2] हे [v]आदित्यासः अदितेः पुत्रा मित्रादयः [v]मघोनां हविष्मतां [v]विश्वेषां सर्वेषां मध्ये [v]यं [v]मर्त्यं मनुष्यं यजमानं [v]पारं [v]नयथ आरब्धस्य कर्मणः समाप्तिं प्रापयथ । स तत्फलं लभत इत्यर्थः ॥

यूय॑ रा॒जा॒नः॒ कं चि॒च्च॒र्ष॒णी॒स॒हः॒ क्षय॑न्तं मानु॒षाँ अनु॑ ।
व॒यं ते॑ वो॒ वरु॑ण मित्रार्यम॒न्त्स्यामे॒तस्य॑ र॒थ्यः॑ ॥ ३५ ॥

यू॒यम् । रा॒जा॒नः॒ । कम् । चि॒त् । च॒र्ष॒णि॒ऽस॒हः॒ । क्षय॑न्तम् । मा॒नु॒षान् । अनु॑ ।
व॒यम् । ते॒ । वः॒ । वरु॑ण । मित्र । अ॒र्य॒म॒न् । स्याम॑ । इ॒त् । ऋ॒तस्य॑ । र॒थ्यः॑ ॥ ३५ ॥

हे [v]राजानः राजमाना हे [v]चर्षणीसहः शत्रुभूतानामभिभवितार आदित्याः [v]यूयं [v]मानुषाननु मनुष्यान् यजमानाननुलक्ष्य [v]क्षयन्तं क्षपयन्तं [v]कं [v]चित् कमपि शत्रुं सर्वमपि शत्रुवर्गमभिभवथेति

१. ख-त-न-सत्सु; भ-वस्तुषु आच्छादकेषु तमःसु सत्सु त्वं; श-मरुत्सु । २. घ-सुदानवः शोभनदानाः ।

शेषः। यद्वा। मनुष्येषु[1] यजमानेषु क्षयन्तं स्तुतीनामीश्वरं कं चित् कमपि स्तोतारं मा यूयं गच्छत। हे ᵛवरुण हे ᵛमित्र हे ᵛअर्यमन् ᵛते तादृशाः ᵛवयं ᵛवः युष्माकं संबन्धिनः ᵛऋतस्य यज्ञस्य ᵛरथ्यः ᵛस्याम नेतारो भवेम ॥

अदान्मे पौरुकुत्स्यः पञ्चाशतं त्रसदस्युर्वधूनाम् । मंहिष्ठो अर्यः सत्पतिः ॥३६॥

अदात्। मे। पौरुऽकुत्स्यः। पञ्चाशतम्। त्रसदस्युः। वधूनाम्।

मंहिष्ठः। अर्यः। सत्ऽपतिः ॥ ३६ ॥

इदमादिकेन प्रगाथेन त्रसदस्योर्दानमृषिः प्रशंसति। ᵛपौरुकुत्स्यः पुरुकुत्सपुत्रः ᵛत्रसदस्युः ᵛमे मह्यं ᵛवधूनां ᵛपञ्चाशतम् ᵛअदात् दत्तवान्। कीदृशः। ᵛमंहिष्ठः दातृतमः ᵛअर्यः अभिगन्तव्यः स्वामी वा ᵛसत्पतिः सतां श्रेष्ठानां स्तोतॄणां पालयिता ॥

उत मे प्रयियोर्वयियोः सुवास्त्वा अधि तुर्वनि ।
तिसॄणां सप्ततीनां श्यावः प्रणेता भुवद्वसुर्दियानां पतिः ॥ ३७ ॥

उत। मे। प्रयियोः। वयियोः। सुऽवास्त्वाः। अधि। तुर्वनि।

तिसॄणाम्। सप्ततीनाम्। श्यावः। प्रऽनेता। भुवत्। वसुः। दियानाम्। पतिः ॥ ३७ ॥

– – – – – – – ॥ ३५ ॥

'आ गन्त' इति षड्विंशत्यृचमष्टमं सूक्तं काण्वस्य सोभरेरार्षं मारुतम्। प्रथमाद्ययुजः ककुभो द्वितीयादियुजः सतोबृहत्यः। अनुक्रम्यते हि—'आ गन्त षड्विंशतिर्मारुतम्' इति। गतो विनियोगः ॥

आ गन्ता मा रिषण्यत प्रस्थावानो मापस्थाता समन्यवः ।
स्थिरा चिन्नमयिष्णवः ॥ १ ॥

आ। गन्त। मा। रिषण्यत। प्रऽस्थावानः। मा। अप। स्थात। सऽमन्यवः।

स्थिरा। चित्। नमयिष्णवः ॥ १ ॥

हे ᵛप्रस्थावानः प्रस्थातारः प्रगन्तारो मरुतः ᵛआ ᵛगन्त अस्मानागच्छत। ᵛमा ᵛरिषण्यत अनागमनेनास्मान्[2] मा हिंस्त। हे ᵛसमन्यवः समानतेजस्काः समानक्रोधा वा ᵛस्थिरा ᵛचित् स्थिराणि दृढान्यपि पर्वतादीनि हे ᵛनमयिष्णवः नमनशीलाः कम्पयितारः ᵛमाप ᵛस्थात अस्मत्तोऽपेत्यान्यत्र मा तिष्ठत। अस्मास्वेव तिष्ठतेत्यर्थः ॥

वीळुपविभिर्मरुत ऋभुक्षण आ रुद्रासः सुदीतिभिः ।
इषा नो अद्या गता पुरुस्पृहो यज्ञमा सोभरीयवः ॥ २ ॥

वीळुपविऽभिः। मरुतः। ऋभुक्षणः। आ। रुद्रासः। सुदीतिऽभिः।

इषा। नः। अद्य। आ। गत। पुरुऽस्पृहः। यज्ञम्। आ। सोभरीऽयवः ॥ २ ॥

---

१. ग-त-भ-मानुषेषु। २. ग–अन्यगम°।

हे [v]ऋभुक्षणः महान्त उरुभासमाननिवासा वा हे [v]रुद्रासः रुद्रा रुद्रपुत्राः ईदृशा हे [v]मरुतः [v]सुदीतिभिः शोभनदीप्तिकैः [v]वीळुपविभिः। रथनेमयः पवयः। वीळु दृढाः पवयो येषु तादृशै रथैः [v]आ[1] [v]गत[1] आगच्छत। एतदेव विवृणोति। हे [v]पुरुस्पृहः बहुभिः स्पृहणीया ईप्सितव्याः [v]सोभरीयवः सोभरिमृषिं मां कामयमानाः [v]नः[2] अस्माकं [v]यज्ञं प्रति [v]अद्य इदानीम् [v]इषा अन्नेन सहागच्छत। आ पूरणः[2] ॥

विद्मा हि रुद्रियाणां शुष्ममुग्रं मरुतां शिमीवताम्। विष्णोरेषस्य मीळ्हुषाम् ॥ ३ ॥

विद्म। हि। रुद्रियाणाम्। शुष्मम्। उग्रम्। मरुताम्। शिमीऽवताम्।
विष्णोः। एषस्य। मीळ्हुषाम् ॥ ३ ॥

[v]रुद्रियाणां[3] रुद्रपुत्राणां [v]शिमीवतां कर्मवतां [v]विष्णोः व्याप्तस्य [v]एषस्य एषणीयस्य वृष्टयुदकस्य [v]मीळ्हुषां सेक्तॄणां [v]मरुताम् [v]उग्रम् उत्पूर्णं [v]शुष्मं बलं [v]विद्म [v]हि जानीमः खलु[3] ॥

वि द्वीपानि पार्पतन्तिष्ठदुच्छुनोभे युजन्त रोदसी।
प्र धन्वान्यैरत शुभ्रखादयो यदेजथ स्वभानवः ॥ ४ ॥

वि। द्वीपानि। पार्पतन्। तिष्ठत्। दुच्छुना। उभे इति। युजन्त। रोदसी इति।
प्र। धन्वानि। ऐरत। शुभ्रऽखादयः। यत्। एजथ। स्वऽभानवः ॥ ४ ॥

[v]द्वीपानि द्वयोः पार्श्वयोरापो येषु तान्युदमध्यस्थलानि[4]। 'द्वयन्तरुपसर्गेभ्योऽप ईत्' (पा. सू. ६. ३. ९७) इतीत्वम्। 'ऋक्पूः' इत्यादिनाकारः समासान्तः। तानि च [v]वि [v]पापतन् अत्यर्थं मरुद्वेगेन विपतन्ति। [v]तिष्ठत् स्थावरं चान्यद्वृक्षजातं[5] [v]दुच्छुना दुःखेन युज्यते। [v]उभे [v]रोदसी द्यावापृथिव्यावपि [v]युजन्त। ते मरुतः स्वागमनजनितेन कम्पनेन योजयन्ति। परोऽर्धर्चः परोक्षकृतः। [v]धन्वानि गमनशीलान्युदकानि च [v]प्र [v]ऐरत प्रगच्छन्ति। हे [v]शुभ्रखादयः शोभनायुधाः[6] शोभनहविष्का वा हे [v]स्वभानवः स्वायत्तदीप्तयः यूयं [v]यत् यदा [v]एजथ कम्पयथ। तदैतत्पूर्वोक्तं सर्वं निष्पद्यत इत्यर्थः ॥

अच्युता चिद्वो अज्मन्ना नानदति पर्वतासो वनस्पतिः। भूमिर्यामेषु रेजते ॥५॥

अच्युता। चित्। वः। अज्मन्। आ। नानदति। पर्वतासः। वनस्पतिः। भूमिः। यामेषु। रेजते ॥५॥

हे मरुतः [v]वः युष्माकम् [v]अज्मन् अज्मनि गमने सति [v]अच्युता [v]चित् च्यावयितुमशक्या अपि [v]पर्वतासः पर्वता मेघा गिरयो वा [v]वनस्पतिः। जातावेकवचनम्। वनस्पतयो वृक्षाश्च [v]आ [v]नानदति अभितो भृशं शब्दायन्ते। अपि च [v]यामेषु युष्मदीयेषु गमनेषु निमित्तेषु [v]भूमिः पृथिवी च [v]रेजते कम्पते ॥ ॥ ३६ ॥

---

१. ग-त-भ-श–'आ गत' नास्ति। २. ख-ज्ञ-त१-२-भ-मु–संतः अद्येदानीं यज्ञमस्मदीयं यागं इषा अस्मभ्यं दातव्येनान्नेन सह आगत आगच्छत शीघ्रं कालविलम्बं मा कुरुत; ग-त३-४-श–'नः अस्माकं... आ पूरणः' नास्ति। ३. ख-ज्ञ-त१-२-भ–एषां मरुतां शुष्मं बलं वयं स्तोतार सोभरयः उग्रमुद्गूर्णं विद्म जानीमः। कीदृशानां मरुतां। रुद्रियाणां रुद्रपुत्राणां शिमीवतां कर्मवतां विष्णोर्व्याप्तस्य एषस्य एषणीयस्य वृष्टयुदकस्य मीळ्हुषां सेक्तॄणां; ग-त३-४–'मरुतां...खलु' नास्ति। ४. ग-भ-श–तान्युदकमध्यस्थलानि। ५. ग–°द्वस्तुजातं। ६. न-भ–शोभमानायुधाः।

अमाय वो मरुतो यातवे द्यौर्जिहीत उत्तरा बृहत् ।
यत्रा नरो देदिशते तनूष्वा त्वक्षांसि बाह्वोजसः ॥ ६ ॥

अमाय । वः । मरुतः । यातवे । द्यौः । जिहीते । उत्ऽतरा । बृहत् ।
यत्र । नरः । देदिशते । तनूषु । आ । त्वक्षांसि । बाहुऽओजसः ॥ ६ ॥

हे vमरुतः vवः युष्माकम् vअमाय बलाय vयातवे यातुं vद्यौः द्युलोकः vबृहत् अन्तरिक्षं विसृज्य vउत्तरा उन्नततरा vजिहीते गच्छति । युष्मदागमनाद्भीता सती युष्मदीयमान्तरिक्षं स्थानं परित्यज्योर्ध्वं पलायत इत्यर्थः । vयत्र यस्मिन्नन्तरिक्षे vबाह्वोजसः बाह्वोरोजो बलं येषां तादृशाः vनरः नेतारो मरुतः vत्वक्षांसि दीप्तान्याभरणानि vतनूषु आत्मीयेषु शरीरेषु vआ vदेदिशते आदिष्टानि धृतानि कुर्वन्ति । यद्वा । तनूषु विस्तृतासु मेघस्थास्वप्सु त्वक्षांसि तनूकृतानि तीक्ष्णीकृतान्यायुधानि मेघोद्भेदनाय आ देदिशते पुनःपुनरादिशन्ति । तद्बृहदन्तरिक्षं जिहीत इत्यन्वयः ॥

स्वधामनु श्रियं नरो महि त्वेषा अमवन्तो वृष्प्सवः । वहन्ते अहुतप्सवः ॥७॥

स्वधाम् । अनु । श्रियम् । नरः । महि । त्वेषाः । अमऽवन्तः । वृष्ऽप्सवः ।
वहन्ते । अहुतऽप्सवः ॥ ७ ॥

vनरः नेतारो मरुतः vस्वधामनु । स्वधेत्यन्ननाम । हविर्लक्षणमन्नमनुलक्ष्य vश्रियं शोभां vमहि महत्प्रौढं vवहन्ते धारयन्ति । कीदृशाः । vत्वेषाः दीप्ताः vअमवन्तः बलवन्तः vवृष्प्सवः वर्षणरूपाः vअहुतप्सवः अकुटिलरूपाश्च ॥

गोभिर्वाणो अज्यते सोभरीणां रथे कोशे हिरण्यये ।
गोबन्धवः सुजातासो इषे भुजे महान्तो नः स्परसे नु ॥ ८ ॥

गोभिः । वाणः । अज्यते । सोभरीणाम् । रथे । कोशे । हिरण्यये ।
गोऽबन्धवः । सुऽजातासः । इषे । भुजे । महान्तः । नः । स्परसे । नु ॥ ८ ॥

vसोभरीणाम् ऋषीणां vगोभिः शब्दैः स्तुतिलक्षणैः vवाणः मरुद्गणो vअज्यते व्यज्यते प्रकटीक्रियते । कुत्र । vहिरण्यये vरथे vकोशे कोशवद्वेष्टिते मध्यदेशे । यद्वा । गोभिर्गन्तृभिर्गोमातृकैर्वा मरुद्गिर्वाणोऽज्यते व्यज्यते । सोभरीणां ज्ञानायेदृशे रथे वाद्यत इत्यर्थः । अपि च vगोबन्धवः गोमातृकाः vसुजातासः शोभनजन्मानः vमहान्तः महानुभावास्ते मरुतः vनः अस्माकम् vइषे अन्नाय vभुजे भोगाय vस्परसे प्रीत्यै च बलनाय वा vनु क्षिप्रं भवन्त्विति शेषः ॥

प्रति वो वृषदञ्जयो वृष्णे शर्धाय मारुताय भरध्वम् । हव्या वृष्प्रयाण्ये ॥ ९ ॥

प्रति । वः । वृषत्ऽअञ्जयः । वृष्णे । शर्धाय । मारुताय । भरध्वम् । हव्या । वृष्ऽप्रयाण्ये ॥९॥

हे vवृषदञ्जयः वृषता वर्षकेण सोमेनाञ्जन्तः सिञ्चन्तोऽध्वर्यवः vवः यूयं vवृष्णे वर्षित्रे vमारुताय मरुत्संघरूपाय vशर्धाय बलाय हव्यानि हवींषि vप्रति vभरध्वम् । आहवनीयं प्रति हरत । शर्धं विशेष्यते । vवृषप्रयाण्ये । वृषाणः सेक्तारः प्रयावानः प्रकृष्टं गन्तारो मरुतो यस्मिन् तत्तथोक्तम् । तस्मै ॥

वृषणश्वेन मरुतो वृष्प्सुना रथेन वृषनाभिना ।
आ श्येनासो न पक्षिणो वृथा नरो हव्या नो वीतये गत ॥ १० ॥

वृषणश्वेन । मरुतः । वृषऽप्सुना । रथेन । वृषऽनाभिना ।
आ । श्येनासः । न । पक्षिणः । वृथा । नरः । हव्या । नः । वीतये । गत ॥ १० ॥

हे ᵛनरः नेतारः ᵛमरुतः ᵛवृषणश्वेन वृषभिः सेचनसमर्थैरश्वैरुपेतेन ᵛवृषप्सुना वर्षकरूपयुक्तेन ᵛवृषनाभिना । नाभिश्चक्रच्छिद्रम् । वर्षकनाभियुक्तेन ᵛरथेन ᵛनः अस्माकं हव्यानि[1] हवींषि ᵛआ ᵛगत आगच्छत । ᵛवृथा अनायासेनैव ᵛवीतये भक्षणार्थम् । तत्र दृष्टान्तः । ᵛश्येनासो ᵛन ᵛपक्षिणः श्येनाः शंसनीयगतयः पक्षिणो यथा शीघ्रमागच्छन्ति तद्वदनायासेन शीघ्रमागच्छतेत्यर्थः ॥ ॥३७॥

समानमञ्जयेषां वि भ्राजन्ते रुक्मासो अधि बाहुषु । दविद्युतत्यृष्टयः ॥ ११ ॥

समानम् । अञ्जि । एषाम् । वि । भ्राजन्ते । रुक्मासः । अधि । बाहुषु ।
दविद्युतति । ऋष्टयः ॥ ११ ॥

ᵛएषां मरुताम् ᵛअञ्जि रूपाभिव्यञ्जकमाभरणं ᵛसमानम् एकविधमेव । एतदेवाह । ᵛरुक्मासः रुक्मा दीप्यमानाः सुवर्णमया हाराः ᵛवि ᵛभ्राजन्ते । वक्षःस्थलेषु विशेषेण दीप्यन्ते । तथा ᵛबाहुषु ᵛअधि अंसेषु ᵛऋष्टयः शक्त्यादीन्यायुधानि ᵛदविद्युतति अत्यर्थं द्योतन्ते ॥

त उग्रासो वृषण उग्रबाहवो नकिष्टनूषु येतिरे ।
स्थिरा धन्वान्यायुधा रथेषु वोऽनीकेष्वधि श्रियः ॥ १२ ॥

ते । उग्रासः । वृषणः । उग्रऽबाहवः । नकिः । तनूषु । येतिरे ।
स्थिरा । धन्वानि । आयुधा । रथेषु । वः । अनीकेषु । अधि । श्रियः ॥ १२ ॥

ᵛउग्रासः उद्गूर्णाः सर्वकार्येषूद्यताः ᵛवृषणः वर्षितारः ᵛउग्रबाहवः उद्गूर्णबाहुकाः ᵛते मरुतः ᵛतनूषु आत्मीयेषु शरीरेषु ᵛनकिः ᵛयेतिरे रक्षणाय न प्रयतन्ते । न हि कश्चित्तेषां शरीराणि बाधितुं शक्नोति येन यत्नः क्रियेत । परोऽर्धर्चः प्रत्यक्षकृतः । हे मरुतः ᵛवः युष्माकं ᵛरथेषु ᵛधन्वानि धनूंष्यायुधानि आयोधनानि बाणादीनि च ᵛस्थिरा स्थिराणि दृढतराणि सन्ति । अत[2] एव[2] कारणात् ᵛअनीकेष्वधि सेनामुखेषु ᵛश्रियः जयसंपदः युष्माकं भवन्ति ॥

येषामर्णो न सप्रथो नाम त्वेषं शश्वतामेकमिद्भुजे । वयो न पित्र्यं सहः ॥१३॥

येषाम् । अर्णः । न । सऽप्रथः । नाम । त्वेषम् । शश्वताम् । एकम् । इत् । भुजे ।
वयः । न । पित्र्यम् । सहः ॥ १३ ॥

ᵛअर्णो ᵛन उदकमिव ᵛसप्रथः सर्वतः पृथु विस्तीर्णं ᵛत्वेषं दीप्तं ᵛशश्वतां बहूनां ᵛयेषां[1] मरुतामीदृशं ᵛनाम मरुत इति नामधेयम् ᵛएकमित् एकमेवासहायमेव सत् ᵛभुजे स्तोतॄणां भोगाय भवति । तत्र दृष्टान्तः । ᵛसहः प्रसहनशीलं ᵛपित्र्यं पितुरागतं ᵛवयो ᵛन अन्नमिव । यथा तद्विनम्भेन भोगाय भवति तथेत्यर्थः । तानित्युत्तरत्रैकवाक्यता ॥

---

१. घ-श-हव्या । २. ग-यन्तः अतः । ३. ख-ग-त-भ२-श-एषां; न-' येषा ' नास्ति ।

तान्वन्दस्व मरुतस्ताँ उप स्तुहि तेषां हि धुनीनाम् ।
अराणां न चरमस्तदेषां दाना मह्ना तदेषाम् ॥ १४ ॥

तान् । वन्दस्व । मरुतः । तान् । उप । स्तुहि । तेषाम् । हि । धुनीनाम् ।
अराणाम् । न । चरमः । तत् । एषाम् । दाना । मह्ना । तत् । एषाम् ॥ १४ ॥

हे अन्तरात्मन् ᵛतान् पूर्वोक्तगुणान् ᵛमरुतः ᵛवन्दस्व प्रणम । ᵛतान् एवोपेत्य ᵛस्तुहि । ᵛहि यस्मात् ᵛधुनीनां कम्पयितॄणां ᵛतेषां मरुतां वयं शेषभूताः स्मः । ᵛअराणाम्[१] अर्थाणां[२] स्वामिनां यथा ᵛचरमः[३] हीनः सेवकः शेषभूतस्तद्वत् । ᵛतत् तस्मात् ᵛएषां मरुतां ᵛदाना दानानि ᵛमह्ना महत्त्वेन युक्तान्यस्माकं भवन्ति । ᵛतदेषाम् इति द्विरुक्तिरादरार्था पदपूरणार्था वा ॥

सुभगः स वं ऊतिष्वास पूर्वासु मरुतो व्युष्टिषु । यो वां नूनमुतासति ॥ १५ ॥

सुऽभगः । सः । वः । ऊतिषु । आस । पूर्वासु । मरुतः । विऽउष्टिषु ।
यः । वा । नूनम् । उत । असति ॥ १५ ॥

हे ᵛमरुतः ᵛवः युष्माकम् ᵛऊतिषु रक्षासु सतीषु ᵛसः स्तोता ᵛसुभगः ᵛआस शोभनधनो भवति । अस्तेश्छान्दसो भूभावाभावः । यद्वा । सुभग आस[४] दीप्यते । ' अस गतिदीप्त्यादानेषु ' । कदेति चेत् उच्यते । ᵛपूर्वासु ᵛव्युष्टिषु पूर्वेष्वतीतेषु विवासितेषु दिवसेषु । यद्वा । पूर्वास्वागामिनीषु व्युष्टिपूषःसु । उषःकालोपलक्षितेषु दिवसेषु । ᵛउत अपि च ᵛयः[५] मनुष्यः स्तोता यष्टा वा ᵛनूनम् अवश्यम् ᵛअसति युष्माकं भवति । अस्तेः छान्दसः शपो लुगभावः । स सुभग इत्यन्वयः ॥ ॥३८॥

यस्य वा यूयं प्रति वाजिनो नर आ हव्या वीतये गथ ।
अभि ष द्युम्नैरुत वाजसातिभिः सुम्ना वो धूतयो नशत् ॥ १६ ॥

यस्य । वा । यूयम् । प्रति । वाजिनः । नरः । आ । हव्या । वीतये । गथ ।
अभि । सः । द्युम्नैः । उत । वाजसातिऽभिः । सुम्ना । वः । धूतयः । नशत् ॥ १६ ॥

हे ᵛनरः नेतारो मरुतः ᵛयूयं ᵛयस्य ᵛवा यस्य च ᵛवाजिनः हविष्मतो यजमानस्य ᵛहव्या हव्यानि हवींषि ᵛप्रति ᵛवीतये भक्षणाय ᵛआ ᵛगथ आगच्छथ ᵛसः यजमानः हे ᵛधूतयः कम्पयितारो मरुतः ᵛद्युम्नैः द्योतमानैरन्नैर्यशोभिर्वा ᵛउत अपि च ᵛवाजसातिभिः वाजानां[६] संभजनैश्च ᵛवः युष्माकं संबन्धीनि ᵛसुम्ना सुम्नानि सुखानि ᵛअभि ᵛनशत् अभितो व्याप्नोति ॥

यथा रुद्रस्य सूनवो दिवो वशन्त्यसुरस्य वेधसः । युवानस्तथेदसत् ॥१७॥

यथा । रुद्रस्य । सूनवः । दिवः । वशन्ति । असुरस्य । वेधसः ।
युवानः । तथा । इत् । असत् ॥ १७ ॥

ᵛरुद्रस्य दुःखद्रावयितुरीश्वरस्य ᵛसूनवः पुत्राः ᵛअसुरस्य उदकानां क्षेप्तुर्मेघस्य ᵛवेधसः विधातारः । यद्वा । असवः प्राणाः । तान् राति ददातीत्यसुरं वृष्टिजलम् । तस्य कर्तारः । ᵛयुवानः

१. घ–अराणां न । २. ज्ञ-त१-२-भ१–आर्याणां । ३. ख-त-न-भ१-श–चरमो न । ४. त-भ–सन् । ५. घ–यो वा यश्च । ६. घ–अन्नानां ।

नित्यतरुणा ईदृशा मरुतः vदिवः अन्तरिक्षादागत्य vयथा येन प्रकारेण vवशन्ति अस्मान् कामयन्ते vतथेत् तेनैव प्रकारेण vअसत् इदं स्तोत्रं भवतु । वष्टेः छान्दसः शपो लुगभावः ॥

ये चार्हन्ति मरुतः सुदानवः स्मन्मीळ्हुषश्चरन्ति ये ।
अतश्चिदा न उप वस्यसा हृदा युवान आ ववृध्वम् ॥ १८ ॥

ये । च । अर्हन्ति । मरुतः । सुऽदानवः । स्मत् । मीळ्हुषः । चरन्ति । ये ।
अतः । चित् । आ । नः । उप । वस्यसा । हृदा । युवानः । आ । ववृध्वम् ॥ १८ ॥

vसुदानवः शोभनदानाः vये vच[1] यजमानाः vमरुतः देवान् vअर्हन्ति पूजयन्ति । vये च vमीळ्हुषः सेक्तॄन् मरुतः vस्मत् प्रशस्तं vचरन्ति हविर्भिः प्रचरन्ति यजन्ति । यत एवम् vअतः[2] अपि[2] कारणात् तानुभयविधान् vनः अस्मान् vआ अभिलक्ष्य vवस्यसा वसीयसा वसुमत्तमेन vहृदा हृदयेन हे vयुवानः मरुतः vउप vआ vववृध्वम् उपेत्याभिसंभजत ॥

यूनं ऊ षु नविष्ठया वृष्णः पावकाँ अभि सोभरे गिरा ।
गाय गाइव चर्कृषत् ॥ १९ ॥

यूनः । ऊँ इति । सु । नविष्ठया । वृष्णः । पावकान् । अभि । सोभरे । गिरा ।
गायं । गाःऽइव । चर्कृषत् ॥ १९ ॥

हे vसोभरे vयूनः नित्यतरुणान् vवृष्णः वर्षितॄन् vपावकान् तान् मरुतः vनविष्ठया अतिशयेनाभिनवया vगिरा वाचा स्तुतिरूपया vसु शोभनम् vअभि vगाय अभिष्टुहि । vचर्कृषत् पुनःपुनः कृषन् कृषीवलः vगाइव । स यथा यूनः शक्ताननड्वहः स्तौति तद्वत् ॥

साहा ये सन्ति मुष्टिहेव हव्यो विश्वासु पृत्सु होतृषु ।
वृष्णश्चन्द्रान्न सुश्रवस्तमान् गिरा वन्दस्व मरुतो अह ॥ २० ॥

सहाः । ये । सन्ति । मुष्टिहाऽइव । हव्यः । विश्वासु । पृत्ऽसु । होतृषु ।
वृष्णः । चन्द्रान् । न । सुश्रवःऽतमान् । गिरा । वन्दस्व । मरुतः । अह ॥ २० ॥

vविश्वासु सर्वासु vपृत्सु पृतनासु युद्धेषु vहोतृषु आह्वानशीलेषु योद्धृषु च vये मरुतः vसहाः vसन्ति अभिभवितारो भवन्ति vहव्यः ह्वातव्यः vमुष्टिहेव । मुष्टिभिरेव हन्तीति मुष्टिहा मल्लः । स इव । नेति संप्रत्यर्थे । vन संप्रति vवृष्णः वर्षितॄन् vचन्द्रान् आह्लादकान् vसुश्रवस्तमान् अतिशयेन शोभनयशस्कांस्तान् vमरुतः vअह मरुत एव vगिरा वाचा vवन्दस्व स्तुहि ॥ ॥ ३९ ॥

गावश्चिद्धा समन्यवः सजात्येन मरुतः सबन्धवः ।
रिहते ककुभो मिथः ॥ २१ ॥

गावः । चित् । घ । सऽमन्यवः । सऽजात्येन । मरुतः । सऽबन्धवः ।
रिहते । ककुभः । मिथः ॥ २१ ॥

---

१. ग–'च' नास्ति । २. घ–अतश्चिदतोपि ।

हे [v]समन्यवः समानतेजस्काः समानक्रोधा वा हे [v]मरुतः [v]गावश्चित् गावश्च युष्मन्मातृभूताः [v]सजात्येन समानजातित्वेन[1] [v]सबन्धवः समानबन्धुकाः सत्यः [v]ककुभः दिशः प्राच्यादिदिग्भागान् प्राप्य [v]मिथः परस्परं [v]रिहते लिहन्ति । [v]घ इति पूरकः ॥

मर्तश्चिद्वो नृतवो रुक्मवक्षस उप भ्रातृत्वमायति ।
अधि नो गात मरुतः सदा हि व आपित्वमस्ति निध्रुवि ॥ २२ ॥

मर्तः । चित् । वः । नृतवः । रुक्मऽवक्षसः । उप । भ्रातृऽत्वम् । आ । अयति ।
अधि । नः । गात । मरुतः । सदा । हि । वः । आपिऽत्वम् । अस्ति । निऽध्रुवि ॥२२॥

हे [v]नृतवः नृत्यन्तो हे [v]रुक्मवक्षसः । रोचमानमाभरणं रुक्मं वक्षसि येषां ते तथोक्ताः । ईदृशा हे [v]मरुतः [v]मर्तश्चित् मनुष्योऽपि स्तोता [v]वः युष्माकं [v]भ्रातृत्वं सख्वित्वम् [v]आ आभिमुख्येन [v]उप [v]अयति उपगच्छति । अतः [v]नः अस्मान् मनुष्यान् स्तोतॄन् [v]अधि [v]गात अधिभूत अस्मत्पक्षपातवचना भवत । [v]हि यस्मात् [v]वः युष्माकम् [v]आपित्वं बन्धुत्वं [v]निध्रुवि नितरां धारयितव्ये स्तोत्रे यज्ञे वा [v]सदा सर्वदा [v]अस्ति विद्यते तस्मादित्यर्थः ॥

मरुतो मारुतस्य न आ भेषजस्य वहता सुदानवः । यूयं सखायः सप्तयः ॥२३॥

मरुतः । मारुतस्य । नः । आ । भेषजस्य । वहत । सुऽदानवः । यूयम् । सखायः । सप्तयः ॥२३॥

हे [v]सुदानवः शोभनदाना हे [v]सखायः समानस्थाना हे [v]सप्तयः सर्पणशीलाः [v]मरुतः [v]नः अस्माकं [v]मारुतस्य [v]भेषजस्य मरुत्संबन्धि भेषजमौषधं [v]यूयम् [v]आ [v]वहत आनयत ॥

याभिः सिन्धुमवथ याभिस्तूर्वथ याभिर्दशस्यथा क्रिविम् ।
मयो नो भूतोतिभिर्मयोभुवः शिवाभिरसचद्विषः ॥ २४ ॥

याभिः । सिन्धुम् । अवथ । याभिः । तूर्वथ । याभिः । दशस्यथ । क्रिविम् ।
मयः । नः । भुत । ऊतिऽभिः । मयःऽभुवः । शिवाभिः । असचऽद्विषः ॥ २४ ॥

हे मरुतः [v]याभिः ऊतिभिः [v]सिन्धुं समुद्रम् [v]अवथ रक्षथ । [v]याभिः च [v]तूर्वथ स्तोतॄणां शत्रून् हिंस्थ । तुर्वी हिंसार्थः । [v]याभिः च [v]क्रिविं कूपं तृष्णजे गोतमाय [v]दशस्यथ प्रयच्छथ । हे [v]मयोभुवः मयसः सुखस्य भावयितारो हे [v]असचद्विषः असक्तशत्रवः शत्रुरहिताः [v]शिवाभिः कल्याणीभिस्ताभिः सर्वाभिः [v]ऊतिभिः रक्षाभिः [v]नः अस्माकं [v]मयः सुखं [v]भूत भावयत उत्पादयत । यद्वा । ' भू प्राप्तौ ' । प्रापयत ॥

यत्सिन्धौ यदसिक्न्यां यत्समुद्रेषु मरुतः सुबर्हिषः । यत्पर्वतेषु भेषजम् ॥ २५ ॥

यत् । सिन्धौ । यत् । असिक्न्याम् । यत् । समुद्रेषु । मरुतः । सुऽबर्हिषः ।
यत् । पर्वतेषु । भेषजम् ॥ २५ ॥

हे [v]सुबर्हिषः शोभनयज्ञाः [v]मरुतः [v]सिन्धौ एतत्संज्ञे स्यन्दनशीले नदे [v]यत् [v]भेषजम् अस्ति [v]यत् च [v]असिक्न्यां [v]यत् च [v]समुद्रेषु जलधिषु [v]यत् च [v]पर्वतेषु भेषजं विद्यते तत्सर्वं भेषजं पश्यन्त इत्युत्तरयैकवाक्यता ॥

---

१. भ–समानजातित्वेन एकस्माद्राजाता इत्येवं ।

विश्वं पश्यन्तो बिभृथा तनूष्वा तेना नो अधि वोचत ।
क्षमा रपो मरुत आतुरस्य न इष्कर्ता विहुतं पुनः ॥ २६ ॥

विश्वम् । पश्यन्तः । बिभृथ । तनूषु । आ । तेन । नः । अधि । वोचत ।
क्षमा । रपः । मरुतः । आतुरस्य । नः । इष्कर्त । विऽहुतम् । पुनरिति ॥ २६ ॥

vविश्व सर्वं पूर्वोक्तं भेषजं vपश्यन्तः जानन्तो यूयं vतनूषु अस्मदीयेषु विषयेषु vआ vबिभृथ आहरथ । आहृतेन च vतेन vनः अस्मान् vअधि vवोचत अधिभूत । चिकित्सतेत्यर्थः । अपि च हे vमरुतः vनः अस्माकं मध्ये vआतुरस्य रोगिणः vरपः । पापनामैतत् । रपसः पापफलस्य रोगस्य vक्षमा क्षान्तिर्यथा भवति तथा vविहुतं विबाधितमङ्गं vपुनः vइष्कर्त निःशेषेण संपूर्णं कुरुत । निसो नलोपश्छान्दसः । करोतेर्लोटि छान्दसो विकरणस्य लुक् । ' तसनसनथनाश्च ' इति तशब्दस्य तबादेशः । अत एवोपसर्गसमुदायो नावगृह्यते ॥ ॥ ४० ॥ ॥ ३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः[1] ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये षष्ठाष्टके प्रथमोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्[2] ॥

चतुर्थेऽनुवाके[3] दश सूक्तानि । तत्र ' वयमु त्वाम् ' इत्यष्टादशर्चं प्रथमं सूक्तम् । अत्रानुक्रमणिका—' वयमु द्वयूनान्ये द्वचे चित्रस्य दानस्तुतिः ' इति । ' ऋषिश्चान्यस्मात् ' इति परिभाषया काण्वः सोभरिर्ऋषिः । ' काकुभं प्रागाथं ह ' इत्युक्तत्वादस्यापि सूक्तस्यायुजः ककुभो युजः सतो बृहत्यः । अन्ये द्वचे चित्रस्य दानं देवता । शिष्टा ऐन्द्र्यः । सूक्तविनियोगो लैङ्गिकः । उक्थ्ये ब्राह्मणाच्छंसिशस्त्रे ' वयमु त्वाम् ' इति प्रगाथः स्तोत्रियः । सूत्रितं च—' वयमु त्वामपूर्व्य यो न इदमिदं पुरेति प्रगाथौ ' (आश्व. श्रौ. ६. १) इति । आभिप्लविकेपूक्थ्येष्वपि तृतीयसवने ब्राह्मणाच्छंसिनो वैकल्पिकोऽयं स्तोत्रियः प्रगाथः । सूत्रमुक्तम् । अस्मिन्नेव शस्त्रे ' त्वं न इन्द्रा भर ' इति प्रगाथो यदा स्तोत्रियः तदा ' वयमु त्वा ' इत्यनुरूपतृचस्याद्या । सूत्रितं च—' वयमु त्वामपूर्व्य यो न इदमिदं पुरा याहीम इन्दव इति समाहारयोऽनुरूपः ' (आश्व. श्रौ. ७. ८) इति ॥

वयमु त्वामपूर्व्य स्थूरं न कचिद्भरन्तोऽवस्यवः । वाजे चित्रं हवामहे ॥ १ ॥

वयम् । ऊँ इति । त्वाम् । अपूर्व्य । स्थूरम् । न । कत् । चित् । भरन्तः । अवस्यवः ।
वाजे । चित्रम् । हवामहे ॥ १ ॥

---

१. ज्ञ–°महेश्वरः ॥ इत्थं श्रीबुक्कभूपालसाम्राज्यैकधुरंधरः । विद्यातीर्थगुरोर्दृष्टया प्राप्तसार्वज्ञवैभवः । श्रीमत्सायणमंत्रीशो दाशतय्याश्च षष्ठके । अष्टके प्रथमाध्यायं पश्यतैतद्विमत्सराः ॥ २. ज्ञ–°महेश्वरं ॥ इत्थं षष्ठाष्टकगः प्रथमाध्याय आदरात् । व्याख्यातः सायणार्येण द्वितीयो व्याकरिष्यति(? ते) ॥
३. श–अथ षष्ठाष्टके द्वितीयोऽध्याय आरभ्यते । चतुर्थेनुवाके ।

हे ᵛअपूर्व्य त्रिषु सवनेषु प्रादुर्भूतत्वादभिनवेन्द्र ᵛभरन्तः सोमलक्षणैरन्नैस्त्वां पोषयन्तः ᵛवयं ᵛवाजे । वाजयन्ति गच्छन्ति योद्धारोऽत्रेति वाजयन्त्यायुधान्यत्रेति वा वाजः संग्रामः । तस्मिन् ᵛचित्रे चायनीयं विविधरूपं वा ᵛत्वाम् ᵛउ त्वामेव ᵛअवस्यवः रक्षणमात्मन इच्छन्तः सन्तः ᵛहवामहे त्वामाह्वयामः । तत्र दृष्टान्तः । ᵛस्थूरं ᵛन यथा भरन्तो ब्रीह्यादिभिर्गृहं पूरयन्तो जनाः वाजे अन्नविषये स्थूरं स्थूलं गुणाधिकं ᵛकञ्चित् कंचिन्मानवं यथाह्वयन्ति तद्वत् ॥

उप॑ त्वा कर्मन्नू॒तये स नो॒ युवो॒ग्रश्च॑क्राम॒ यो धृष॑त् ।
त्वामिद्धर्यवि॒तारं॑ ववृमहे॒ सखा॑य इन्द्र सान॒सिम् ॥ २ ॥

उप॑ । त्वा । कर्मन् । ऊ॒तये॑ । सः । नः॒ । युवा॑ । उ॒ग्रः । च॒क्रा॒म॒ । यः । धृष॑त् ।
त्वाम् । इ॒त् । हि । अ॒वि॒तार॑म् । व॒वृ॒महे॑ । सखा॑यः । इ॒न्द्र॒ । सा॒न॒सिम् ॥ २ ॥

प्रथमपादः प्रत्यक्षकृतः । हे इन्द्र ᵛकर्मन् अग्निष्टोमादिकर्मणि ᵛऊतये रक्षणाय ᵛत्वा त्वामुपगच्छामः । द्वितीयः पादः परोक्षकृतः । ᵛयः इन्द्रः ᵛधृषत् धृष्णोति शत्रूनभिभवति । 'शिधृषा प्रागल्भ्ये' । 'बहुलं छन्दसि' इति शप्रत्ययः । ᵛयुवा तरुणः ᵛउग्रः उद्गूर्णः ᵛसः इन्द्रः ᵛनः अस्मान् प्रति ᵛचक्राम आगच्छतु । यद्वा । चक्राम अस्मानुत्साहयुक्तान् करोतु । क्रमतेः सर्गार्थे व्यत्ययेन परस्मैपदम् (पा. सू. १. ३. ३८) । परोऽर्धर्चः प्रत्यक्षकृतः । ᵛसखायः समानख्याना बन्धुभूता वा वयं ᵛसानसिम् । 'वन पण संभक्तौ' । संभजनीयम् ᵛअवितारं सर्वस्य रक्षितारं ᵛत्वामित् त्वामेव ᵛववृमहे वृणीमहे संभजामहे । हिः प्रसिद्धौ । हियोगादनिघातः ॥

आ या॑हीम इन्द॒वोऽश्व॑पते॒ गोप॑त॒ उर्व॑रापते । सोमं॑ सोमपते पिब ॥ ३ ॥

आ । या॒हि॒ । इ॒मे । इ॒न्द॒वः । अश्व॑ऽपते । गोऽप॑ते । उर्व॑राऽपते । सोम॑म् । सो॒मऽप॒ते॒ । पि॒ब ॥३॥

ᵛअश्वपते अश्वानां स्वामिन् ᵛगोपते गवां पालयितः ᵛउर्वरापते । सर्वसस्याढ्या भूमिरुर्वरा । तस्याः पते हे इन्द्र ᵛइन्दवः सोमाः ᵛइमे भवदीयाः । त्वदर्थमभिषुता इत्यर्थः । तस्मात् ᵛआ ᵛयाहि आगच्छ । आगत्य ᵛसोमपते हे इन्द्र ᵛसोमं ᵛपिब ॥

वयं हि त्वा॒ बन्धु॑मन्तमब॒न्धवो॒ विप्रा॑स इन्द्र येमि॒म ।
या ते॒ धामा॑नि वृषभ॒ तेभि॒रा ग॑हि॒ विश्वे॑भिः सोम॑पीतये ॥ ४ ॥

व॒यम् । हि । त्वा॒ । बन्धु॑ऽमन्तम् । अ॒ब॒न्धवः॑ । विप्रा॑सः । इ॒न्द्र॒ । ये॒मि॒म ।
या । ते॒ । धामा॑नि । वृ॒ष॒भ॒ । तेभिः॑ । आ । ग॒हि॒ । विश्वे॑भिः । सोम॑ऽपीतये ॥ ४ ॥

हे ᵛइन्द्र ᵛअबन्धवः बन्धुरहिताः ᵛविप्रासः मेधाविनः ᵛवयं ᵛबन्धुमन्तं बन्धुभिर्देवैरङ्गिरोभिर्वा तद्वन्तं ᵛत्वा त्वाम् । हिरवधारणे । त्वामेव ᵛयेमिम बन्धुत्वेन नियच्छाम । यच्छतेर्लिटि[1] रूपम् । तथा सति हे ᵛवृषभ कामानां वर्षितरिन्द्र ᵛते तव ᵛया यानि ᵛधामानि शरीराणि तेजांसि वा विद्यन्ते ᵛतेभिः तैः ᵛविश्वेभिः सर्वैर्धामभिः सह ᵛसोमपीतये सोमपानार्थम् ᵛआ ᵛगहि आगच्छ ॥

सीद॑न्तस्ते॒ वयो॑ यथा॒ गोश्री॑ते॒ मधौ॑ मदि॒रे वि॒वक्ष॑णे । अ॒भि त्वामि॑न्द्र नोनुमः ॥५॥

---

१. ञ–°र्लङि; त-न-भ१-३–°र्लिङि; भ२–°र्लुङि ।

सीदन्तः । ते । वयः । यथा । गोऽश्रीते । मधौ । मदिरे । विवक्षणे ।
अभि । त्वाम् । इन्द्र । नोनुमः ॥ ५ ॥

हे vइन्द्र vगोश्रीते । 'श्रीङ् पाके'। गोविकारे दधिपयसी गोशब्देनोच्येते। दध्ना पयसा च श्रीते श्रयणद्रव्येण मिश्रिते vमदिरे मदकरे vविवक्षणे स्वर्गप्रापणशीले त्वदीये vमधौ सोमे vसीदन्तः निवसन्तः । सदने दृष्टान्तः । vवयो vयथा पक्षिणो यथैकत्र संघीभूय तिष्ठन्ति तद्वत् सीदन्तो वयं vत्वाम् vअभि आभिमुख्येन vनोनुमः पुनःपुनर्भृशं वा स्तुमः ॥ ॥ १ ॥

अच्छा च त्वेना नमसा वदामसि किं मुहुश्चिद्वि दीधयः ।
सन्ति कामासो हरिवो ददिष्ट्वं स्मो वयं सन्ति नो धियः ॥ ६ ॥

अच्छ । च । त्वा । एना । नमसा । वदामसि । किम् । मुहुः । चित् । वि । दीधयुः ।
सन्ति । कामासः । हरिऽवः । ददिः । त्वम् । स्मः । वयम् । सन्ति । नः । धियः ॥ ६ ॥

हे इन्द्र vअच्छ vच अपि चा आभिमुख्येन व vएना एनेन vनमसा स्तोत्रेण हविर्लक्षणेनान्नेन वा सह vत्वा त्वां vवदामसि अभिवदामः । 'चवायोगे प्रथमा' इति न निघातः । त्वं तु vमुहुश्चित् मुहुर्मुहुः vकिं कस्माद्धेतोः vवि vदीधयः । विपूर्वो दीधितिश्चिन्तने । विचिन्तयसि । 'दीधीङ् दीप्तिदेवनयोः' । व्यत्ययेन परस्मैपदं लुगभावश्च । किमर्थं यूयं वदथेति चेत् । vहरिवः हरिताश्ववन् हे इन्द्र अस्माकं vकामासः पुत्रपश्वादिविषयाः कामाः vसन्ति कामाः सन्तु । अहं न प्रयच्छामीति चेत् । vत्वं तु vददिः धनादिदाता खलु । तस्मात् vवयं त्वत्संनिधौ vस्मः भवामः । किंच vनः अस्माकं vधियः कर्माणि च तव समीपे vसन्ति तिष्ठन्ति । ततो धनादिलाभार्थं त्वां वदाम इत्यर्थः ॥

नूत्ना इदिन्द्र ते वयमूती अभूम नहि नू ते अद्रिवः । विद्मा पुरा परीणसः ॥७॥

नूत्नाः । इत् । इन्द्र । ते । वयम् । ऊती । अभूम । नहि । नु । ते । अद्रिऽवः ।
विद्म । पुरा । परीणसः ॥ ७ ॥

हे vइन्द्र vते तव vऊती ऊत्यै[1] रक्षणे[2] vवयं vनूत्ना vइत् नूतना एव vअभूम भवामः । vअद्रिवः वज्रिन् हे इन्द्र vपुरा पूर्वं त्वां vपरीणसः । सुब्व्यत्ययः । परीणसं परितो व्याप्तं महान्तं वेति vनहि vविद्म न जानीमः । vनु संप्रति तु vते त्वां महान्तमिति जानन्तो वयं भवता रक्ष्या इति ॥

विद्मा सखित्वमुत शूर भोज्यमा ते ता वज्रिन्नीमहे ।
उतो समस्मिन्ना शिशीहि नो वसो वाजे सुशिप्र गोमति ॥ ८ ॥

विद्म । सखिऽत्वम् । उत । शूर । भोज्यम् । आ । ते । ता । वज्रिन् । ईमहे ।
उतो इति । समस्मिन् । आ । शिशीहि । नः । वसो इति । वाजे । सुऽशिप्र । गोऽमति ॥ ८ ॥

vशूर शत्रूणां शातयितर्बलवन् हे इन्द्र vसखित्वं तव सखिभावं वयं vविद्म जानीमः । vउत अपि च vभोज्यम् अभ्यवहार्यं धनं च विद्म । vवज्रिन् हे इन्द्र vते त्वदीये vता ते सख्यधने vआ आभिमुख्येन vईमहे वयं याचामहे । vउतो अपि च vवसो सर्वस्य वासयितः vसुशिप्र शोभनहनो

१. ग–ऊत्या । २. ग–रक्षणेन; घ–रक्षायै ।

यद्वा शोभनशिरस्त्राण हे इन्द्र ᵛगोमति गवादियुक्ते ᵛसमस्मिन् सर्वस्मिन् ᵛवाजे अन्ने ᵛनः अस्मान् ᵛआ ᵛशिशीहि तीक्ष्णीकुरु । उपलक्षणम् । प्रदानेनास्मान् प्रसिद्धान् कुर्वित्यर्थः । 'शिशृ निशाने' इत्यस्य छान्दसः श्लुः ॥

उक्थ्ये ब्राह्मणाच्छंसिशस्त्रे 'यो न इदमिदम्' इत्ययं प्रगाथोऽनुरूपः । 'यो न इदमिदं पुरेति प्रगाथौ सर्वाः ककुभः' (आश्व. श्रौ. ६. १) इति सूत्रितम् । आभिप्लविकेषूक्थ्येष्वपि ब्राह्मणाच्छंसिशस्त्रेऽयं वैकल्पिकोऽनुरूपः (आश्व. श्रौ. ७. ८)। आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे 'त्वं न इन्द्रा भर' इति प्रगाथे स्तोत्रिये सत्यनुरूपतृचः समाहार्यः । तत्रेयं 'यो न इदमिदम्' इति द्वितीया । सूत्रितं च—'यो न इदमिदं पुरा याहीम इन्दव इति समाहार्योऽनुरूपः' (आश्व. श्रौ. ७. ८) इति ॥

यो नं इदमिदं पुरा प्र वस्यं आनिनाय तमु वः स्तुषे । सखायं इन्द्रमूतये ॥९॥

यः । नः । इदम्ऽइदम् । पुरा । प्र । वस्यः । आऽनिनाय । तम् । ऊँ इति । वः । स्तुषे । सखायः । इन्द्रम् । ऊतये ॥ ९ ॥

ᵛसखायः समानख्याना हे ऋत्विग्यजमानाः ᵛयः इन्द्रः ᵛपुरा पूर्वमिदं दर्शनीयतया[1] विद्यमानं[1] ᵛवस्यः वसीयः । वसोरीयसुनि ईकारलोपश्छान्दसः । प्रशस्तं वसु ᵛनः अस्मान् ᵛप्राणिनाय प्रकर्षेणानीतवान् ᵛतमु तमेव धनानामानेतारम् ᵛइन्द्रं ᵛवः युष्माकं धनलाभार्थम् ᵛऊतये रक्षणाय च ᵛस्तुषे सोभरिरहं स्तौमि ॥

हर्यश्वं सत्पतिं चर्षणीसहं स हि ष्मा यो अमन्दत ।
आ तु नः स वयति गव्यमश्व्यं स्तोतृभ्यो मघवा शतम् ॥ १० ॥

हरिऽअश्वम् । सत्ऽपतिम् । चर्षणिऽसहम् । सः । हि । स्म । यः । अमन्दत ।
आ । तु । नः । सः । वयति । गव्यम् । अश्व्यम् । स्तोतृऽभ्यः । मघऽवा । शतम् ॥ १० ॥

ᵛहर्यश्वं हरितवर्णाश्वोपेतं ᵛसत्पतिं स्वप्रकाशाधिक्येन सतां नक्षत्राणां पतिं सतां श्रेष्ठानां पतिं वा ᵛचर्षणीसहं चर्षणीनां शत्रुभूतानां मनुष्याणामभिभवितारं ᵛस ᵛहि ᵛष्म स खलु जनः स्तौति । ᵛयः जनः ᵛअमन्दत ततो लब्धधनः संस्तुतो भवति स एनं तुष्टूषति । एवं[2] सति ᵛमघवा धनवान् ᵛसः इन्द्रः ᵛशतं ᵛगव्यमश्व्यम् अनेकं गवाश्वसंघं ᵛस्तोतृभ्यः ᵛनः अस्मभ्यं ᵛतु क्षिप्रम् ᵛआ ᵛवयति आप्रापयतु । वी गत्यादिषु । अस्मालेट्यडागमः । ततो लब्धगवादिका वयं चैनं स्तुम इति ॥ ॥२॥

त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि । संस्थे जनस्य गोमतः ॥११॥

त्वया । ह । स्वित् । युजा । वयम् । प्रति । श्वसन्तम् । वृषभ । ब्रुवीमहि ।
सम्ऽस्थे । जनस्य । गोऽमतः ॥ ११ ॥

ᵛवृषभ वर्षितर्हे इन्द्र ᵛगोमतः गवादियुक्तस्य ᵛजनस्य ᵛसंस्थे स्थाने युद्धे ᵛश्वसन्तम् अस्मान् प्रति क्रोधातिशयेन श्वासकारिणं शत्रुं ᵛयुजा सहायेन ᵛत्वया ᵛह ᵛस्वित् त्वयैव खलु ᵛवयं ᵛप्रति ᵛब्रुवीमहि प्रतिवचनं कुर्मः । निराकरिष्याम इत्यर्थः ॥

---

१. ख-त-न-श-दर्शनीयं तवाविद्यमानं; घ-दर्शनीयं तव विद्यमानं । २. ख-त-न-भ-श-य एवं ।

जयेम कारे पुरुहूत कारिणोऽभि तिष्ठेम दुर्ध्यः ।
नृभिर्वृत्रं हन्यामं शूशुयाम चावेरिन्द्र प्र णो धियः ॥ १२ ॥

जयेम । कारे । पुरुऽहूत । कारिणः । अभि । तिष्ठेम । दुःऽध्यः ।
नृऽभिः । वृत्रम् । हन्याम । शूशुयाम । च । अवेः । इन्द्र । प्र । नः । धियः ॥ १२ ॥

vपुरुहूत बहुभिराह्वातव्य' हे vइन्द्र अस्माकं विविधाः शत्रव उपद्रवकारिणो बाधां मनसा स्मरन्तश्चेति । तत्र vकारिणः हिंसां कुर्वतः शत्रून् vकारे । कीर्यन्त आयुधान्यत्रेति कारो युद्धम् । तस्मिंस्तान् वयं vजयेम । vदूध्यः दुर्धियः पापबुद्धीनपि vअभि[२] vतिष्ठेम[२] अभितः स्थास्यामः । किंच vवृत्रं गवामावरकं शत्रुं vनृभिः आयुधनेतृभिर्मरुद्भिः सह vहन्याम हिंस्याम । हत्वा vशूशुयाम vच । शत्रुराहित्येन पुत्रपौत्रैरग्निष्टोमादिकर्मभिश्च वर्धयेमहि । यद्वा । श्वयतिरत्रान्तर्णीतण्यर्थः । शत्रुभ्यो बाधाभावात् सोमलक्षणैरन्नैस्त्वां वर्धयेम । ततस्त्वं vनः अस्माकं vधियः कर्माणि vप्र vअवेः प्रकर्षेण रक्ष ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे 'अभ्रातृव्यः' इत्यादिकौ द्वौ प्रगाथौ वैकल्पिकौ स्तोत्रियानुरूपौ । सूत्रितं च—'अभ्रातृव्यो अना त्वं मा ते अमाजुरो यथा' (आश्व. श्रौ. ७. ८) इति ॥

अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि । युधेदापित्वमिच्छसे ॥१३॥

अभ्रातृव्यः । अना । त्वम् । अनापिः । इन्द्र । जनुषा । सनात् । असि ।
युधा । इत् । आपिऽत्वम् । इच्छसे ॥ १३ ॥

हे vइन्द्र vत्वं vजनुषा जन्मनैव vअभ्रातृव्यः । 'व्यन् सपत्ने' (पा. सू. ४. १. १४५) इति व्यन्प्रत्ययः । vअना[३] अनेतृकः[३] । 'ऋतश्छन्दसि' इति कपः[४] प्रतिषेधः । अनियन्तृक इत्यर्थः । vअनापिः बन्धुवर्जितश्च vसनादसि चिरादेव भ्रातृव्यादिवर्जितोऽसि । यच्च त्वया vआपित्वं बान्धवम् vइच्छसे इच्छसि तत्र vयुधेत् युद्धेनैव युद्धं कुर्वन्नेव स्तोतृणां सखा भवसीति ॥

नकिं रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः ।
यदा कृणोषि नदनुं समूहस्यादित्पितेव हूयसे ॥ १४ ॥

नकिः । रेवन्तम् । सख्याय । विन्दसे । पीयन्ति । ते । सुराऽश्वः ।
यदा । कृणोषि । नदनुम् । सम् । ऊहसि । आत् । इत् । पिताऽइव । हूयसे ॥ १४ ॥

हे इन्द्र vरेवन्तं धनवन्तं केवलधनवन्तं दानादिरहितमयष्टारमाढ्यं मानवं[५] vसख्याय सखिभावाय vनकिः vविन्दसे न भजसे नाश्रयसीत्यर्थः । अयष्टारो जनाः किं सन्तीत्यत आह । vसुराश्वः । 'दुओभि गतिवृद्ध्योः' । सुरया वृद्धास्तद्वत् प्रमत्ता नास्तिकाः vते त्वां vपीयन्ति । पीयतिर्हिंसाकर्मा । हिंसन्ति । तान्नाश्रयसीत्यर्थः ॥

---

१. घ–°राहूत । २. त-न-भ२–नाभितिष्ठेम; भ१-३–भितिष्ठेम । ३. ख-त-२-३-४-न–अना अनेतकः; घ–अना अनियंतृकः; ज्ञ–सपत्नरहितः अना अनेतृकः; भ१–अना सपत्नरहितः अना अनेतृकः; भ२-३–अना सपत्नरहितः अना अनेतकः (अनेकः–भ३); श–अना त्वं अनेकः । ४. ख-त-न-श–शपः । ५. ख-ग-ज्ञ-त१-२-न-भ–अन्यं मानवं ।

मा ते अमाजुरो यथा मूरास इन्द्र सख्ये त्वावतः । नि षदाम सचा सुते ॥१५॥

मा । ते । अमाऽजुरः । यथा । मुरासः । इन्द्र । सख्ये । त्वाऽवतः ।
नि । सदाम । सचा । सुते ॥ १५ ॥

हे ᵛइन्द्र ᵛते तव स्वभूता वयं तथा ᵛमा भूम मा भवाम ᵛयथा ᵛत्वावतः त्वादृशः त्वस्-दृशस्य देवस्य ᵛसख्ये ᵛमूरासः मूराः । सोमप्रदानादिन्द्रेण सह सख्यं कुर्म इत्येतदजानन्तो मूढा जनाः । ᵛअमाजुरः सोमाभिषवमकुर्वन्तस्ते गृहैः[1] पुत्रैः पौत्रैर्धनादिभिश्च सह जीर्णा भवन्ति । तथा वयममाजुरो न भवाम । कथम् । ᵛसचा ऋत्विग्भिः सह ᵛसुते अभिषुते सोमे वयं तु ᵛनि ᵛषदाम निवसाम[2] । तस्मात् सोमदानेन त्वया सह सखिभावं कुर्म इत्यर्थः ॥ ॥ ३ ॥

मा ते गोदत्र निररम राधस इन्द्र मा ते गृहामहि ।
दृळ्हा चिदर्यः प्र मृशाभ्या भर न ते दामान आदभे ॥ १६ ॥

मा । ते । गोऽदत्र । निः । अराम । राधसः । इन्द्र । मा । ते । गृहामहि ।
दृळ्हा । चित् । अर्यः । प्र । मृश । अभि । आ । भर । न । ते । दामानः । आऽदभे ॥१६॥

हे ᵛगोदत्र स्तोतृणां गवादिदानशील हे ᵛइन्द्र ᵛते तव स्वभूता वयं ᵛराधसः धनान् ᵛमा ᵛनिरराम मा निर्गमाम । अर्तेर्लुङि ' सर्तिशास्त्यर्तिभ्यश्च ' इत्यङादेशः । ' ऋदृशोऽङि ' इति गुणः । सर्वदा त्वत्तो[3] धनाढ्या भवाम । किंच ᵛते तव स्वभूता वयं धनं प्रयच्छाम । कस्माच्चित् ᵛमा ᵛगृहामहि मा गृह्णीमः । अपि तु त्वत्त एव धनं गृह्णीम इत्यर्थः । ग्रहेर्लुङि ' बहुलं छन्दसि ' इति शः । ङित्त्वात्संप्रसारणम् । ᵛअर्यः स्वामी त्वं ᵛदृळ्हा ᵛचित् दृढान्यपि विनश्वराणि धनानि ᵛप्र ᵛमृश प्रकर्षेणास्मासु स्थापय । किंच ᵛअभि आभिमुख्येन ᵛआ ᵛभर धनादिभिः समन्तादस्मान् पोषय । ᵛते तव ᵛदामानः तानि दानानि ᵛन ᵛआदभे न कैश्चिदपि आदम्भितुं शक्यन्ते । तस्मात् दानादियुक्तानस्मान् कुर्वित्यर्थः ॥

इन्द्रो वा घेदिर्यन्मघं सरस्वती वा सुभगा ददिर्वसु । त्वं वा चित्र दाशुषे ॥१७॥

इन्द्रः । वा । घ । इत् । इर्यत् । मघम् । सरस्वती । वा । सुऽभगा । ददिः । वसु ।
त्वम् । वा । चित्र । दाशुषे ॥ १७ ॥

अत्र चित्रस्य दानं स्तौति । चित्रो नाम राजा सरस्वतीतीर इन्द्रार्थं यागमकृत । तत्र मन्त्र-द्रष्टर्षिर्बहुधनलाभान्मह्यमेतावद्धनं को वा प्रायच्छदिति विकल्पयते[4] । ᵛदाशुषे इन्द्राय हवींषि दत्त-वते मह्यम् ᵛइन्दो ᵛवा ᵛघेत् इन्द्र एव किं खल्वेतावत्[5] ᵛमघं मंहनीयं धनं ᵛददिः प्रायच्छत् । यद्वा ᵛसुभगा शोभनधना ᵛसरस्वती नदी ᵛवसु धनं ददिः किं प्रायच्छत् । अथवा ᵛचित्र एतन्नामक हे राजन् ᵛत्वं ᵛवा एतावद्धनं[6] मह्यं प्रादा इति ॥

चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु ।
पर्जन्यइव ततनद्धि वृष्ट्या सहस्रमयुता ददत् ॥ १८ ॥

१. घ-भ-गृहे । २. ख-त-न-भ२-श-निवासामः; ग-घ-त१-भ१-३-निवसामः । ३. ग-त्वद्दत्तधना । ४. घ-विकल्पते । ५. भ-खल्वियदेतावत् । ६. घ-इयदेतावद्धनं ।

चित्रः । इत् । राजा । राजकाः । इत् । अन्यके । यके । सरस्वतीम् । अनु ।
पर्जन्यःऽइव । ततनत् । हि । वृष्ट्या । सहस्रम् । अयुता । ददत् ॥ १८ ॥

अनया चित्र एव प्रादादिति निश्चयमकार्षीत् । vसहस्रं सहस्रसंख्याकं धनम् vअयुता अयुतानि च धनानि च vददत् प्रयच्छन् vचित्र vइत् चित्रनामैव vराजा । vअन्यके vयके । अल्प इत्यर्थे कः । अल्पा येऽन्ये vराजका vइत् राजान एव vसरस्वतीमनु सरस्वत्यास्तीरे वर्तन्ते । तान् सर्वान् याचमानानयमेव चित्रो राजा vततनत् धनैस्तनोति । तनोतेर्लुङि चङि रूपम् । 'चङ्यन्यतरस्याम्' इति स्वरः । तत्र दृष्टान्तः । vपर्जन्यइव । यथा पर्जन्यः पृथिवीं vवृष्ट्या तनोति प्रीणयति तथायं चित्रः सर्वान् धनैः प्रीणयतीत्यर्थः ॥ ॥ ४ ॥

'ओ त्यमह्वे' इत्यष्टादशर्चं द्वितीयं सूक्तं काण्वस्य सोभरेरार्षम् । आद्यातृतीयापञ्चम्यो बृहत्यो द्वितीयाचतुर्थीषष्ठ्यः सतोबृहत्यः सप्तमी बृहती अष्टम्यनुष्टुप् । 'काकुभं प्रागाथं ह' इत्युक्तस्यानुवृत्तेः शिष्टाश्चत्वारः काकुभाः प्रगाथाः । अश्विनौ देवता । तथा चानुक्रान्तम्—'ओ त्यमाश्विनं त्रिप्रगाथादि बृहत्यनुष्टुबेकादश्याद्ये ककुम्मध्येज्योतिषी' इति । प्रातरनुवाक आश्विने क्रतौ बार्हते छन्दस्याश्विनशस्त्रे चाद्याः सप्तर्चः । सूत्रितं च—'ओ त्यमह्व आ रथमिति सप्त' (आश्व. श्रौ. ४. १५) इति ॥

ओ त्यमह्व आ रथमद्या दंसिष्ठमूतये ।
यमश्विना सुहवा रुद्रवर्तनी आ सूर्यायै तस्थथुः ॥ १ ॥

ओ इति । त्यम् । अह्वे । आ । रथम् । अद्य । दंसिष्ठम् । ऊतये ।
यम् । अश्विना । सुऽहवा । रुद्रवर्तनी इति रुद्रऽवर्तनी । आ । सूर्यायै । तस्थथुः ॥ १ ॥

हे अश्विनौ vदंसिष्ठम् अत्यन्तदर्शनीयं यद्वातिशयेन शत्रूणामुपक्षपयितारं vत्यं तं युवयोः[1] vरथम्[1] vऊतये रक्षणाय vअद्य अस्मिन् यागदिने vअह्वे सोभरिरहमाह्वयामि । vसुहवा सुहवौ स्तोत्रशस्त्रादिभिः शोभनाह्वानौ vरुद्रवर्तनी संग्रामे रोदनशीलमार्गौ यद्वा स्तूयमानमार्गौ हे अश्विनौ vसूर्यायै सूर्यां स्वयंवरे वरयितुं vयं रथं युवाम् vआ vतस्थथुः आश्रयथः तं रथमाह्वयामीति ॥

पूर्वापुषं सुहवं पुरुस्पृहं भुज्युं वाजेषु पूर्व्यम् ।
सचनावन्तं सुमतिभिः सोभरे विद्वेषसमनेहसम् ॥ २ ॥

पूर्वऽआपुषम् । सुऽहवम् । पुरुऽस्पृहम् । भुज्युम् । वाजेषु । पूर्व्यम् ।
सचनाऽवन्तम् । सुमतिऽभिः । सोभरे । विऽद्वेषसम् । अनेहसम् ॥ २ ॥

हे vसोभरे vसुमतिभिः कल्याणीभिः स्तुतिभिरश्विनो रथं स्तुहि । किंविशिष्टम् । vपूर्वापुषं पूर्वेषां स्तोतॄणां धनादिदानेन पोषकं[2] vसुहवं यज्ञेषु शोभनाह्वानं vपुरुस्पृहं बहुभिः स्पृहणीयं vभुज्युम् । 'भुज पालने' । सर्वस्य रक्षकं vवाजेषु vपूर्व्यं संग्रामेष्वग्रतो गन्तारं vसचनावन्तं सर्वैर्भजनवन्तं vविद्वेषसं शत्रूणां विशेषेण द्वेष्टारम् vअनेहसं कैश्चिदप्यनुपद्रवं पापरहितं वा रथं स्तुहीत्यन्वयः ॥

इह त्या पुरुभूतमा देवा नमोभिरश्विना ।
अर्वाचीना स्ववसे करामहे गन्तारा दाशुषो गृहम् ॥ ३ ॥

१. ख-त-न-श–युवयोरर्थं । २. त१-२-भ२–आपोषकं ।

इह । त्या । पुरुऽभूतमा । देवा । नमःऽभिः । अश्विना ।
अर्वाचीना । सु । अवसे । करामहे । गन्तारा । दाशुषः । गृहम् ॥ ३ ॥

vपुरुभूतमा अतिशयेन बहूनां शत्रूणां भावयितारौ vदेवा देवौ द्योतनशीलौ स्तोतव्यौ वा vदाशुषः हविर्दत्तवतो यजमानस्य vगृहं प्रति गन्तारौ गमनशीलौ vत्या तौ vअश्विना अश्विनौ युवाम् vइह अस्मिन् कर्मणि vअवसे रक्षणाय vनमोभिः हविर्भिः स्तोत्रैर्वा vअर्वाचीना अर्वाचीनौ अभिमुखमागच्छन्तौ vसु vकरामहे वयं सुष्ठु कुर्मः ॥

युवो रथस्य परि चक्रमीयत ईर्मान्यद्वामिषण्यति ।
अस्माँ अच्छा सुमतिर्वी शुभस्पती आ धेनुरिव धावतु ॥ ४ ॥

युवोः । रथस्य । परि । चक्रम् । ईयते । ईर्मा । अन्यत् । वाम् । इषण्यति ।
अस्मान् । अच्छ । सुऽमतिः । वाम् । शुभः । पती इति । आ । धेनुःऽइव । धावतु ॥ ४ ॥

हे अश्विनौ vयुवोः युवयोः vरथस्य एकं vचक्रं vपरि vईयते परितो याति गच्छति । vअन्यत् अवस्थितं रथस्य चक्रम् vईर्मा ईर्मौ सर्वस्यान्तर्यामितया प्रेरकौ यद्वोदकस्य प्रेरयितारौ vवां युवाम् vइषण्यति गच्छति । उक्तार्थे मन्त्रान्तरं—' न्यघ्न्यस्य मूर्धनि ' (ऋ. सं. १. ३०. १९) इति । हे vशुभस्पती उदकस्य पालयितारौ हे अश्विनौ vवां युवयोः vसुमतिः कल्याणी मतिः vअच्छ आभिमुख्येन vअस्मान् vआ vधावतु आगच्छतु । तत्र दृष्टान्तः । vधेनुरिव । यथा नवप्रसूता गौर्वत्सं प्रति पयोदानार्थमागच्छति तद्वद्युवयोः सुमतिरस्मान् प्रति धनादिप्रदानार्थमागच्छतु ॥

रथो यो वां त्रिवन्धुरो हिरण्याभीशुरश्विना ।
परि द्यावापृथिवी भूषति श्रुतस्तेन नासत्या गतम् ॥ ५ ॥

रथः । यः । वाम् । त्रिऽवन्धुरः । हिरण्यऽअभीशुः । अश्विना ।
परि । द्यावापृथिवी इति । भूषति । श्रुतः । तेन । नासत्या । आ । गतम् ॥ ५ ॥

हे vअश्विना अश्विनौ vत्रिवन्धुरः । वन्धुरं सारथिस्थानम् । त्रिप्रकारवन्धुरोपेतः । यद्वा । द्वे ईषे तन्मध्ये रज्जुसज्जनार्थको दण्डः एते त्रयो वन्धुरशब्देनोच्यन्ते । त्रिवन्धुरयुक्तः vहिरण्याभीशुः हिरण्मयाश्वादिरज्जुः vवां युवयोः vयः vरथः vश्रुतः सर्वत्र प्रसिद्धः सन् vद्यावापृथिवी द्यावापृथिव्यौ vपरि vभूषति स्वबलेन परिभवति । भवतेर्लेटि सिप्यडागमः । यद्वा परितः स्वप्रकाशेनालंकरोति । हे vनासत्या नासत्यौ vतेन पूर्वोक्तेन रथेन vआ vगतम् आगच्छतम् ॥ ॥ ५ ॥

दशस्यन्ता मनवे पूर्व्यं दिवि यवं वृकेण कर्षथः ।
ता वामद्य सुमतिभिः शुभस्पती अश्विना प्र स्तुवीमहि ॥ ६ ॥

दशस्यन्ता । मनवे । पूर्व्यम् । दिवि । यवम् । वृकेण । कर्षथः ।
ता । वाम् । अद्य । सुमतिऽभिः । शुभः । पती इति । अश्विना । प्र । स्तुवीमहि ॥ ६ ॥

हे अश्विनौ vपूर्व्यं पुरातनं vदिवि द्युलोके स्थितमुदकं vमनवे एतन्नामकाय राज्ञे vदशस्यन्ता दशस्यन्तौ प्रयच्छन्तौ युवां vवृकेण । ' वृको लाङ्गलं भवति विकर्तनात् ' (निरु. ६. २६) इति यास्कः ।

तेन लाङ्गलेन [v]यवं यवनामकं धान्यं [v]कर्षथः । पुनश्च तस्मै विलेखनं कुरुथः । [v]शुभस्पती उदकस्य पालयितारौ हे [v]अश्विना अश्विनौ [v]ता तौ पूर्वोक्तलक्षणयुक्तौ [v]वां युवाम् [v]अथ अस्मिन् यज्ञदिने [v]सुमतिभिः शोभनाभिः स्तुतिभिः प्रकर्षेण [v]स्तुवीमहि वयं स्तुमः ॥

उप॑ नो वाजिनीवसू या॒तमृ॑तस्य॒ प॒थिभिः॑ ।
येभि॑स्तु॒ग्रिं वृ॑षणा त्रासद॒स्यवं॑ म॒हे क्ष॒त्राय॒ जिन्व॑थः ॥ ७ ॥

उप॑ । नः॒ । वा॒जि॒नी॒व॒सू॒ इति॑ वाजिनीऽवसू । या॒तम् । ऋ॒तस्य॑ । प॒थिऽभिः॑ ।
येभिः॑ । तु॒ग्रिम् । वृ॒ष॒णा॒ । त्रा॒स॒द॒स्यव॑म् । म॒हे । क्ष॒त्राय॑ । जिन्व॑थः ॥ ७ ॥

हे [v]वाजिनीवसू अन्नधनवन्तौ । अन्नमेव धनं ययोस्तौ । अश्विनौ [v]ऋतस्य सत्यभूतस्य यज्ञस्य [v]पथिभिः मार्गैः [v]नः अस्मान् [v]उप [v]यातम् आगच्छतम् । [v]वृषणा वृषणौ धनानां सेक्तारौ हे अश्विनौ [v]त्रासदस्यवं त्रसदस्योः पुत्रं [v]तृक्षिम् एतन्नामकं [v]येभिः यैर्यज्ञमार्गैः [v]महे महते [v]क्षत्राय धनाय [v]जिन्वथः प्रीणथथ । एवं तैर्मार्गैरस्मान् धनादिभिः प्रीणयितुमागच्छतमित्यर्थः ॥

अ॒यं वा॒मद्रि॑भिः सु॒तः सोमो॑ नरा वृषण्वसू ।
आ या॑तं॒ सोम॑पीतये॒ पिब॑तं दा॒शुषो॑ गृ॒हे ॥ ८ ॥

अ॒यम् । वा॒म् । अद्रि॑ऽभिः । सु॒तः । सोमः॑ । नरा॑ । वृ॒ष॒ण्व॒सू॒ इति॑ वृषण्ऽवसू ।
आ । या॒त॒म् । सोम॑ऽपीतये । पिब॑तम् । दा॒शुषः॑ । गृ॒हे ॥ ८ ॥

[v]नरा सर्वस्य नेतारौ यद्वा स्तोतृणां धनस्य नेतारौ [v]वृषण्वसू वर्षणशीलधनवन्तौ हे अश्विनौ [v]वां युष्मदर्थम् [v]अद्रिभिः ग्रावभिः [v]अयं [v]सोमः [v]सुतः अभिषुतः । तस्मात् [v]सोमपीतये सोमपानार्थं युवाम् [v]आ [v]यातम् । आगत्य च [v]दाशुषः हविर्दत्तवतो यजमानस्य [v]गृहे यज्ञस्थाने सोमं युवां [v]पिबतम् ॥

आ हि रु॒हत॑मश्विना॒ रथे॒ कोशे॑ हिर॒ण्यये॑ वृषण्वसू । यु॒ञ्जाथा॑मरु॒षीरिषः॑ ॥९॥

आ । हि । रु॒हत॑म् । अ॒श्वि॒ना॒ । रथे॑ । कोशे॑ । हि॒र॒ण्यये॑ । वृ॒ष॒ण्व॒सू॒ इति॑ वृषण्ऽवसू ।
यु॒ञ्जाथा॑म् । पी॒वरीः॑ । इषः॑ ॥ ९ ॥

[v]वृषण्वसू वर्षणशीलधनौ हे [v]अश्विना अश्विनौ [v]हिरण्यये हिरण्मयरज्ज्वादियुक्ते [v]कोशे आयुधादीनां कोशस्थाने रमणशीले [v]रथे । हिरण्मयधारणे । युवामेव [v]आ [v]रुहतम् आरोहणं कुरुतम् । ततः [v]पीवरीः पावयितॄणि स्थूलानि वा [v]इषः अन्नानि [v]युञ्जाथाम् अस्मासु योजयतम् ॥

याभि॑ः प॒क्थमव॑थो॒ याभि॒रध्रि॑गुं॒ याभि॑र्ब॒भ्रुं वि॑जो॒षस॑म् ।
ताभि॑र्नो म॒क्षू तू॒यम॑श्विना॒ गत॑ं भिष॒ज्यत॑ं॒ यदा॑तु॒रम् ॥ १० ॥

याभिः॑ । प॒क्थम् । अव॑थः । याभिः॑ । अध्रि॑ऽगुम् । याभिः॑ । ब॒भ्रुम् । वि॒ऽजो॒षस॑म् ।
ताभिः॑ । नः॒ । म॒क्षु । तू॒यम् । अ॒श्वि॒ना॒ । आ । ग॒त॒म् । भि॒ष॒ज्यत॑म् । यत् । आ॒तु॒रम् ॥ १० ॥

हे अश्विनौ [v]याभिः ऊतिभिः [v]पक्थम् एतन्नामकं राजानम् [v]अवथः रक्षथः । [v]याभिः ऊतिभिश्च [v]अध्रिगुम् अधृतगमनं राजानमवथः । [v]याभिः ऊतिभिश्च [v]बभ्रुं राजानं च [v]विजोषसं विशेषेण सोमैः प्रीणयन्तम् । एतान् सर्वान् यैः पालनैरवथः [v]ताभिः तै रक्षणैः [v]मक्षु क्षिप्रं [v]तूयं तूर्णं [v]नः

अस्मान् vआ vगतं रक्षणार्थमागच्छतम्। किंच vयत् vआतुरं रोगादिसहितमस्माकं पुत्रादिकं प्रति vभिषज्यतं भैषज्यं कुरुतम्। भिषक्पुण्डादिः ॥ ॥ ६ ॥

यदश्विगावो अश्विगू इदा चिदह्नो अश्विना हवामहे। वयं गीर्भिर्विपन्यवः ॥११॥

यत्। अश्विऽगावः। अश्विगू इत्यश्विऽगू। इदा। चित्। अह्नः। अश्विना। हवामहे। वयम्। गीःऽभिः। विपन्यवः ॥ ११ ॥

vअश्विगावः अधृतगमनाः कर्मसु त्वरमाणाः vविपन्यवः मेधाविनः vवयम् vअश्विगू अधृतगमनौ संग्रामे शत्रुवधार्थं त्वरया गच्छन्तौ vअश्विना अश्विनौ युवाम् vअह्नः दिवसस्य vइदा vचित् इदानीमेव प्रातःकाले vगीर्भिः स्तुतिलक्षणाभिर्वाग्भिः vयत् यदा vहवामहे युवामाह्वयामस्तदा ताभिरूतिभिरस्मानागच्छतमित्युत्तरत्र संबन्धः ॥

ताभिरा यातं वृषणोप मे हवं विश्वप्सुं विश्ववार्यम्।
इषा मंहिष्ठा पुरुभूतमा नरा याभिः क्रिविं वावृधुस्ताभिरा गतम् ॥ १२ ॥

ताभिः। आ। यातम्। वृषणा। उप। मे। हवम्। विश्वऽप्सुम्। विश्वऽवार्यम्। इषा। मंहिष्ठा। पुरुऽभूतमा। नरा। याभिः। क्रिविम्। ववृधुः। ताभिः। आ। गतम्॥१२॥

vवृषणा वृषणौ वर्षणशीलौ हे अश्विनौ vविश्वप्सुम्। प्सुरिति रूपनाम। स्तोत्रशस्त्रात्मकरवेन नानारूपं vविश्ववार्यं सर्वैर्देवैर्वरणीयं vमे मदीयं vहवं युष्मद्विषयमाह्वानम् vआ अभिमुखीकृत्य vताभिः ऊतिभिः vउप vयातं युवामागच्छतम्। याभिः vनरा नरौ सर्वस्य नेतारावश्विनौ vइषा। 'इष इच्छायाम्'। हवींषीच्छन्तौ vमंहिष्ठा मंहिष्ठावतिशयेन धनानां दातारौ vपुरुभूतमा पुरुभूतमौ युद्धेष्वत्यन्तं पुरुधा भवन्तौ यद्वातिशयेन बहूनां शत्रूणामभिभवितारौ भवन्तौ vक्रिविं कूपं प्रति vयाभिः ऊतिभिरुदकानि vवावृधुः अवर्धयतः। द्वयोर्बहुवचनं पूजार्थम्। कूपपतितो वन्दनो मायाभिः कूपं पूरयित्वा युवाभ्यामुत्थापितः खलु। तथा मन्त्रः—'उद्वन्दनमैरयतं स्वर्दृशे' (ऋ. सं. १. ११२. ५) इति। vताभिः तैः पालनैः vआ vगतम् अस्मद्रक्षणार्थमागच्छतम् ॥

ताविदा चिदहानां तावश्विना वन्दमान उप ब्रुवे। ता ऊ नमोभिरीमहे ॥१३॥

तौ। इदा। चित्। अहानाम्। तौ। अश्विना। वन्दमानः। उप। ब्रुवे। तौ। ऊँ इति। नमःऽभिः। ईमहे ॥ १३ ॥

vतौ संग्रामे आयुधानि स्तोतृभ्यो धनानि वा विस्तारयन्तौ पूर्वोक्तौ vअश्विना अश्विनौ vअहानाम् अह्नाम् vइदा vचित् इदानीमेव प्रातःकाले vवन्दमानः अभिवादनं कुर्वन् सन् vउप vब्रुवे तयोः समीपे स्तौमि। ततः vता vउ तावेव vनमोभिः हविर्भिः स्तोत्रैर्वा vईमहे वयं धनादिकं याचामहे ॥

ताविद्दोषा ता उषसि शुभस्पती ता यामन्रुद्रवर्तनी।
मा नो मर्ताय रिपवे वाजिनीवसू पुरो रुद्रावति ख्यतम् ॥ १४ ॥

तौ। इत्। दोषा। तौ। उषसि। शुभः। पती इति। ता। यामन्। रुद्रवर्तनी इति रुद्रऽवर्तनी ॥ मा। नः। मर्ताय। रिपवे। वाजिनीवसू इति वाजिनीऽवसू। पुरः। रुद्रौ। अति। ख्यतम् ॥ १४ ॥

[v]द्युभस्पती उदकस्य पालयितारौ [v]रुद्रवर्तनी युद्धे रोदनशीलमार्गौ स्तूयमानमार्गौ वा [v]तावित् तावेवाश्विनौ [v]दोषा दोषायां रात्रौ [v]तौ एव [v]उषसि उषःकाले तावश्विनौ [v]यामन् यामन्यहनि च सर्वेषु कालेषु वयमश्विनावाह्वयामः। एवं सति [v]वाजिनीवसू अन्नधनौ [v]रुद्रौ हे अश्विनौ [v]मर्ताय मनुष्याय [v]रिपवे शत्रवे [v]नः अस्मान् [v]परः परस्तात् [v]मा [v]अति [v]रृयतं मा ब्रूतम्। शत्रवे अस्मान्मा कुरुतमित्यर्थः॥

आ सुग्म्याय सुग्म्यं प्राता रथेनाश्विना वा सक्षणी। हुवे पितेव सोभरी ॥१५॥

आ। सुग्म्याय। सुग्म्यम्। प्रातरिति। रथेन। अश्विना। वा। सक्षणी इति।
हुवे। पिताऽइव। सोभरी॥ १५॥

[v]वा अपि च [v]सक्षणी सेवनीयशीलौ [v]अश्विना अश्विनौ युवां [v]सुग्म्याय सुखार्हाय मह्यं [v]सुग्म्यं सुखं प्रातःकाले [v]रथेन आवहतम्। ततः [v]सोभरी सोभरिरहं [v]हुवे युवामाह्वयामि। तत्र दृष्टान्तः। [v]पितेव यथा मम पिता आजुहाव[1] तद्वदहमाह्वयामि॥ ॥ ७ ॥

मनोजवसा वृषणा मदच्युता मक्षुंगमाभिरूतिभिः।
आरात्ताच्चिद्भूतमस्मे अवसे पूर्वीभिः पुरुभोजसा ॥ १६ ॥

मनःऽजवसा। वृषणा। मदऽच्युता। मक्षुम्ऽगमाभिः। ऊतिऽभिः।
आरात्तात्। चित्। भूतम्। अस्मे इति। अवसे। पूर्वीभिः। पुरुऽभोजसा॥ १६॥

हे [v]मनोजवसा मनोवच्छीघ्रं गच्छन्तौ [v]वृषणा वृषणौ धनानां वर्षितारौ [v]मदच्युता। माद्यन्तीति मदाः शत्रवः। तेषां च्यावयितारौ [v]पुरुभोजसा बहूनां भोक्तारौ रक्षकौ यद्वा बहून् स्तोतॄन् धनादिभिर्भोजयन्तौ हे अश्विनौ [v]मक्षुंगमाभिः शीघ्रं गच्छन्तीभिः [v]ऊतिभिः[2] रक्षाभिः [v]पूर्वीभिः बहुभिः[2] [v]अस्मे अस्माकम् [v]अवसे रक्षणाय [v]आरात्ताच्चित् अन्तिक एव [v]भूतं भवतम्॥

आ नो अश्वावदश्विना वर्तिर्यासिष्टं मधुपातमा नरा। गोमद्दस्रा हिरण्यवत् ॥१७॥

आ। नः। अश्वऽवत्। अश्विना। वर्तिः। यासिष्टम्। मधुऽपातमा। नरा।
गोऽमत्। दस्रा। हिरण्यऽवत्॥ १७॥

[v]मधुपातमा अतिशयेन मधोः सोमस्य पातारौ [v]नरा नेतारौ [v]दस्रा सर्वैर्दर्शनीयौ हे अश्विनौ [v]नः अस्माकं [v]वर्तिः। वर्तन्तेऽत्रेति वर्तिर्गृहम्। तत् [v]अश्वावत् अश्वयुक्तं [v]गोमत् गवादियुक्तं [v]हिरण्यवत् सुवर्णकनकादियुक्तं कृत्वा [v]आ [v]यासिष्टम् आगच्छतम्। यद्वा। अस्मान् प्रति वर्तिर्यज्ञमार्गम् अश्वादियुक्तं कृत्वागच्छतम्। यातेर्लुङि रूपम्॥

सुप्रावर्गं सुवीर्यं सुष्ठु वार्यमनाधृष्टं रक्षस्विना।
अस्मिन्ना वामायाने वाजिनीवसू विश्वा वामानि धीमहि ॥ १८ ॥

सुऽप्रावर्गम्। सुऽवीर्यम्। सुष्ठु। वार्यम्। अनाधृष्टम्। रक्षस्विना।
अस्मिन्। आ। वाम्। आऽयाने। वाजिनीवसू इति वाजिनीऽवसू।
विश्वा। वामानि। धीमहि॥ १८॥

---

१. ख-त-यज्जुहाव; ग-अश्विनावाजुहाव; न-वजुहाव; भ२-श-तावजुहाव। २. ख-ग-त-भ२-श-पूर्वीभिर्बहुभिः; भ१-३-पूर्वीभिर्बहुभिरूतिभी रक्षाभिः।

vसुप्रावर्गं शोभनं प्रवर्जनं यस्य तत्। स्तोतृभ्यः स्वयमेव प्रयच्छतीत्यर्थः। तथाविधं vसुवीर्यं शोभनवीर्यं vसुष्ठु शोभनं यथा भवति तथा vवार्यं सर्वैर्वरणीयं vरक्षस्विना बलवतापि vअनाधृष्टम् अनभिभवनीयं धनम् vआ vधीमहि त्वत्तो वयं धारयामः। तदेवाह। vवाजिनीवसू बलयुक्तधनौ अश्वधनौ वाश्विनौ vवां युवयोः vअस्मिन् vआयाने अस्मद्गृहं प्रत्यागमने[1] vविश्वा विश्वानि दिव्यभौमादीनि vवामानि धनानि आ धीमहि वयं लभामहे। 'धीङ् आधारे' इत्यस्य लिङि छान्दसो विकरणस्य लुक्॥ ॥ ८॥

'ईळिष्व' इति त्रिंशदृचं तृतीयं सूक्तम्। व्यश्वपुत्रो विश्वमना ऋषिः। उष्णिक् छन्दः। अग्निर्देवता। तथा चानुक्रान्तम्—'ईळिष्व त्रिंशद्विश्वमना वैयश्व आग्नेयमौष्णिहं ह' इति। प्रातरनुवाक आग्नेये क्रतावौष्णिहे छन्दस्याश्विनशस्त्रे चेदं सूक्तम्। सूत्रितं च—'ईळिष्वा हीत्यौष्णिहम्' (आश्व. श्रौ. ४. १३) इति॥

ईळिष्वा हि प्रतीव्यं१ यजस्व जातवेदसम्। चरिष्णुधूममगृभीतशोचिषम्॥ १॥

ईळिष्व। हि। प्रतीव्यम्। यजस्व। जातऽवेदसम्। चरिष्णुऽधूमम्। अगृभीतऽशोचिषम्॥१॥

vप्रतीव्यं शत्रुषु प्रतिगमनशीलमग्निम्। हिरवधारणे। अग्निमेव vईळिष्व स्तुतिभिः स्तोत्रं कुरु। किंच vचरिष्णुधूमं सर्वतश्चरणशीलधूमजालम् vअगृभीतशोचिषं रक्षोभिरगृह्यमाणदीप्तिं vजातवेदसं जातप्रज्ञम्। यद्वा। जातानि भूतानि वेत्तीति जातवेदाः। तमग्निं vयजस्व हविर्भिः पूजय॥

दामानं विश्वचर्षणेऽग्निं विश्वमनो गिरा। उत स्तुषे विष्पर्धसो रथानाम्॥ २॥

दामानम्। विश्वऽचर्षणे। अग्निम्। विश्वऽमनः। गिरा।
उत। स्तुषे। विऽस्पर्धसः। रथानाम्॥ २॥

vउत अपि च हे vविश्वचर्षणे विश्वस्य सर्वस्यार्थस्य ज्ञानेन द्रष्टः vविश्वमनः। सर्वेषु स्थावरजङ्गमात्मकेष्वेकं मनो यस्य सः। एतन्नामक हे ऋषे vविस्पर्धसः विगतमात्सर्यस्य यजमानस्य vरथानां रथादीनां vदामानं दातारमेवंविधम् vअग्निं vगिरा स्तुतिलक्षणया वाचा vस्तुषे स्तोत्रं कुरु॥

येषामाबाध ऋग्मियं इषः पृक्षश्च निग्रभे। उपविदा वह्निर्विन्दते वसु॥ ३॥

येषाम्। आऽबाधः। ऋग्मियः। इषः। पृक्षः। च। निऽग्रभे।
उपऽविदा। वह्निः। विन्दते। वसु॥ ३॥

vआबाधः शत्रूणामाभिमुख्येन बाधकः vऋग्मियः ऋग्भिरर्चनीयोऽग्निः vयेषाम् अयजमानानाम् vइषः अन्नानि vपृक्षः अन्नादिरसांश्च vनिग्रभे निगृह्णीते। ग्रहेर्लटि छान्दसो विकरणस्य लुक्। 'लोपस्त आत्मनेपदेषु' इति तलोपः। 'हग्रहोर्भश्छन्दसि' इति भकारः। निगृह्य च vवह्निः हविषां वोढा स एवाग्निः vउपविदा उपवेदनेन एते हवींषि देवार्थं न प्रयच्छन्तीत्येतज्ज्ञानेन तेषामेव vवसु धनं vविन्दते लभते॥

उदस्य शोचिरस्थादीदियुषो व्य१जरम्। तपुर्जम्भस्य सुद्युतो गणश्रियः॥ ४॥

उत्। अस्य। शोचिः। अस्थात्। दीदियुषः। वि। अजरम्।
तपुःऽजम्भस्य। सुऽद्युतः। गणऽश्रियः॥ ४॥

---

१. ख-त-न-भ-प्रत्येतन्नागमने; ग-प्रत्यत्रागमने।

[v]दीदियुषः । दीदितिर्दीक्षिकर्मा । संदीप्यमानस्य [v]तपुर्जम्भस्य तापयितृदंष्ट्रस्य [v]सुषुतः शोभन-दीक्षेः [v]गणश्रियः । हविरादानार्थं यजमानगणं श्रयति तस्य । [v]अस्य एतादृशोऽग्नेः[1] [v]अजरं जरारहितं पुनःपुनर्मथ्यमानत्वान्नूतनं हविर्भिर्वर्धमानत्वादभिनवं वा [v]शोचिः तेजः [v]उत् [v]अस्थात् उद्गतमभूत् ॥

उदु तिष्ठ स्वध्वर स्तवानो देव्या कृपा । अभिख्या भासा बृहता शुशुक्वनिः ॥५॥

उत् । ऊँ इति । तिष्ठ । सुऽअध्वर । स्तवानः । देव्या । कृपा ।
अभिऽख्या । भासा । बृहता । शुशुक्वनिः ॥ ५ ॥

[v]स्वध्वर शोभनयज्ञ हे अग्ने [v]अभिख्या अभिमुखं गच्छन्त्याभितः प्रसिद्धया वा [v]बृहता बृहत्या [v]भासा दीप्त्या [v]शुशुक्वनिः । 'शुच दीप्तौ' । दीपनशीलस्त्वं [v]स्तवानः स्तोतृभिः स्त्यमानः सन् [v]देव्या द्योतमानया [v]कृपा ज्वालया [v]उत्तिष्ठ तमःपरिहारार्थमुद्गच्छ । [v]उ प्रसिद्धौ ॥ ॥ ९ ॥

अग्ने याहि सुशस्तिभिर्हव्या जुह्वान आनुषक् । यथा दूतो बभूथ हव्यवाहनः ॥६॥

अग्ने । याहि । सुशस्तिऽभिः । हव्या । जुह्वानः । आनुषक् ।
यथा । दूतः । बभूथ । हव्यऽवाहनः ॥ ६ ॥

हे [v]अग्ने [v]आनुषक् अनुषक्तं यथा भवति तथा [v]हव्या हव्यानि हवनयोग्यान्यन्नानि [v]जुह्वानः जुह्वत् देवेभ्यः प्रयच्छंस्त्वं [v]सुशस्तिभिः शोभनैः स्तोत्रैः सह [v]याहि देवानां हविष्प्रदानार्थं गच्छ । अस्य हविष्प्रदातृत्वं कथमित्याशङ्क्याह । [v]यथा त्वं [v]हव्यवाहनः हविषां वोढा देवानां [v]दूतो [v]बभूथ भवसि तथा जुह्वान इत्यन्वयः ॥

अग्निं वः पूर्व्यं हुवे होतारं चर्षणीनाम् । तमया वाचा गृणे तमु वः स्तुषे ॥७॥

अग्निम् । वः । पूर्व्यम् । हुवे । होतारम् । चर्षणीनाम् ।
तम् । अया । वाचा । गृणे । तम् । ऊँ इति । वः । स्तुषे ॥ ७ ॥

[v]चर्षणीनां[2] मनुष्याणां [v]होतारं होमनिष्पादकं [v]पूर्व्यं पुरातनं [v]वः यष्टृत्वेन युष्मत्संबन्धिनम् [v]अग्निं [v]हुवे आह्वयामि । आहूय च [v]तम् अग्निम् [v]अया अनया सूक्तरूपया [v]वाचा गिरा [v]गृणे शंसामि । किंच [v]वः युष्मदर्थं [v]तमु तमेवाग्निं [v]स्तुषे स्तौमि ॥

यज्ञेभिरद्भुतक्रतुं यं कृपा सूदयन्त इत् । मित्रं न जने सुधितमृतावनि ॥ ८ ॥

यज्ञेभिः । अद्भुतऽक्रतुम् । यम् । कृपा । सूदयन्ते । इत् ।
मित्रम् । न । जने । सुऽधितम् । ऋतऽवनि ॥ ८ ॥

[v]अद्भुतक्रतुं बहुविधप्रज्ञं यद्वा चित्रकर्माणं [v]मित्रं [v]न यजमानानां मित्रमिव स्थितं [v]सुधितं हविर्भिः संतर्पितं [v]यम् अग्निम् [v]ऋतावनि[3] यज्ञवति [v]जने यजमाने [v]कृपा स्वसामर्थ्येन [v]यज्ञेभिः यज्ञैः [v]सूदयन्ते । सूदिः क्षरणकर्मा । अध्वर्यवोदयः कामान् क्षारयन्त्येव । यजमानस्य कामान् प्रापयन्तीत्यर्थः । तमग्निमुपासेवध्वमित्युत्तरत्र संबन्धः ॥

---

१. ग–एतादृशस्याग्नेः; त–एतादृशाग्निः; भ–एतादृशाग्नेः । २. घ–हे देवाः चर्षणीनां । ३. त-न-भ–ऋतवनि ।

ऋतावानमृतायवो यज्ञस्य साधनं गिरा । उपो एनं जुजुषुर्नमस्पदे ॥ ९ ॥

ऋतऽवानम् । ऋतऽयवः । यज्ञस्य । साधनम् । गिरा ।

उपो इति । एनम् । जुजुषुः । नमसः । पदे ॥ ९ ॥

[v]ऋतायवः यज्ञकामा हे यजमानाः [v]ऋतावानं यज्ञवन्तं [v]यज्ञस्य [v]साधनं साधनभूतम् [v]एनम् अग्निं[1] [v]नमसः हविषः [v]पदे स्थाने यज्ञाङ्गे वा [v]गिरा स्तुतिलक्षणया वाचा [v]उपो [v]जुजुषुः उपासेवध्वम् ॥ 'तिङां तिङो भवन्ति' इति मध्यमपुरुषस्य प्रथमपुरुषादेशः ॥

अच्छा नो अङ्गिरस्तमं यज्ञासो यन्तु संयतः । होता यो अस्ति विक्ष्वा यशस्तमः ॥ १० ॥

अच्छ । नः । अङ्गिरःऽतमम् । यज्ञासः । यन्तु । सम्ऽयतः ।

होता । यः । अस्ति । विक्षु । आ । यशःऽतमः ॥ १० ॥

[v]संयतः स्रुगादिभिर्नियमिताः [v]नः अस्माकं [v]यज्ञासः यज्ञाः [v]अङ्गिरस्तमम् अङ्गिरसां विशिष्टमग्निम् [v]अच्छ आभिमुख्येन च[2] [v]यन्तु गच्छन्तु । [v]यः अग्निः [v]विक्षु मनुष्येषु [v]होता होमनिष्पादकः सन् [v]आ सर्वतः [v]यशस्तमः । लुप्तमत्वर्थीयः । यशस्वितमः [v]अस्ति भवति तमग्निं यन्त्वित्यन्वयः ॥ ॥१०॥

अग्ने तव त्ये अजरेन्धानासो बृहद्भाः । अश्वाइव वृषणस्तविषीयवः ॥ ११ ॥

अग्ने । तव । त्ये । अजर । इन्धानासः । बृहत् । भाः ।

अश्वाःऽइव । वृषणः । तविषीऽयवः ॥ ११ ॥

[v]अजर जरारहित हे [v]अग्ने [v]इन्धानासः इन्धाना दीप्यमानाः [v]बृहत् बृहन्तो महान्तः [v]त्ये[3] ते सर्वगताः [v]तव[4] त्वदीयाः [v]भाः भासो रश्मयः [v]वृषणः कामानां वर्षितारः सन्तः [v]तविषीयवः बलमाचरन्तो भवन्ति । तत्र दृष्टान्तः । [v]अश्वाइव । यथा वृषणो रेतसः सेक्तारोऽश्वा बलमाचरन्तो भवन्ति तद्वत् ॥

स त्वं नो ऊर्जो पते रयिं रास्व सुवीर्यम् । प्राव नस्तोके तनये समत्स्वा ॥ १२ ॥

सः । त्वम् । नः । ऊर्जाम् । पते । रयिम् । रास्व । सुऽवीर्यम् ।

प्र । अव । नः । तोके । तनये । समत्ऽसु । आ ॥ १२ ॥

[v]ऊर्जाम् अन्नानां [v]पते स्वामिन् हे अग्ने [v]सः तथाविधः [v]त्वं [v]नः अस्मभ्यं [v]सुवीर्यं शोभनवीर्योपेतं [v]रयिं धनं [v]रास्व देहि । [v]नः अस्माकं [v]तोके पुत्रे [v]तनये । तनोति विस्तारयति पुत्रमिति[4] तनयः पौत्रः । तस्मिन्वर्तमानं धनं [v]समत्सु संग्रामेषु च यत् रक्षितव्यं[5] धनं तच्च [v]प्राव प्रकर्षेण रक्ष । अनेन पुत्रपौत्रप्रार्थनं करोति ॥

यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशि । विश्वेदग्निः प्रति रक्षांसि सेधति ॥ १३ ॥

यत् । वै । ऊँ इति । विश्पतिः । शितः । सुऽप्रीतः । मनुषः । विशि ।

विश्वा । इत् । अग्निः । प्रति । रक्षांसि । सेधति ॥ १३ ॥

---

१. ख-घ१-त-न-भ१-२-श-एवमग्निं । २. ग-'च' नास्ति । ३. ग-त-भ-त्ये सर्वगतास्ते तव । ४. ख-त-न-भ१-२-पुमिति; ग-श-कुलमिति । ५. ग-भटैर्विजेतव्यं ।

vविश्पतिः विशां पालयिता vशितः हविर्भिस्तीक्ष्णीकृतः सोऽग्निः vसुप्रीतः सुष्ठु प्रीतः सन् vमनुषः मनुष्यस्य vविशि निवेशने गृहे vयद्वै यदा खलु वर्तते तदानीम् vअग्निः vविश्वेत् विश्वान्येव तस्य बाधकानि vरक्षांसि vप्रति vषेधति हिनस्ति ॥ 'षिधु गत्याम्' । भौवादिकः । vउ प्रसिद्धौ ॥

श्रुष्टी अग्ने नवस्य मे स्तोमस्य वीर विश्पते । नि मायिनस्तपुषा रक्षसो दह ॥१४॥

श्रुष्टी । अग्ने । नवस्य । मे । स्तोमस्य । वीर । विश्पते ।
नि । मायिनः । तपुषा । रक्षसः । दह ॥ १४ ॥

vवीर शत्रूणां विनाशयितर्वीर्यवन् vविश्पते विशां पालयितर्हे vअग्ने vनवस्य इदानीं क्रियमाणत्वाद्भूतनं vमे मदीयं vस्तोमस्य स्तोत्रशस्त्रादिकं vश्रुष्टी श्रुत्वा vमायिनः मायाविनः vरक्षसः कर्मविघ्नकारिणो राक्षसान् vतपुषा तापकेन तेजसा vनि vदह नितरां भस्मीकुरु ॥ श्रुष्टी । 'स्नात्व्या-दयश्च' इति निपातितः । वकारलोपश्छान्दसः ॥

न तस्य मायया चन रिपुरीशीत मर्त्यः । यो अग्नये ददाश हव्यदातिभिः॥१५॥

न । तस्य । मायया । चन । रिपुः । ईशीत । मर्त्यः ।
यः । अग्नये । ददाश । हव्यदातिऽभिः ॥ १५ ॥

vमर्त्यः मनुष्यः vरिपुः शत्रुः । चनेति निपातसमुदायोऽप्यर्थे । vमायया vचन माययापि vतस्य जनस्य vन vईशीत ईश्वरो न भवति । vयः जनः vहव्यदातिभिः हविषां दातृभिर्ऋत्विग्भिः vअग्नये vददाश हवींषि प्रयच्छति । तस्य रिपुर्नास्तीत्यर्थः ॥ ॥ ११ ॥

व्यश्वस्त्वा वसुविदमुक्षण्युरप्रीणादृषिः । महो राये तमु त्वा समिधीमहि ॥१६॥

विऽअश्वः । त्वा । वसुऽविदम् । उक्षण्युः । अप्रीणात् । ऋषिः ।
महः । राये । तम् । ऊँ इति । त्वा । सम् । इधीमहि ॥ १६ ॥

vउक्षण्युः धनानां सेक्तारमात्मन इच्छन् यद्वा वृष्टिसेक्तारमिच्छन् vव्यश्वः vऋषिः एतन्नामको मम पिता vवसुविदं वसूनां धनानां लम्भकं vत्वा त्वाम् vअप्रीणात् धनादिप्राप्त्यर्थं हविर्भिरतोषयत् । तथा वयमपि vमहः महते vराये धनाय vतमु तथाविधमेव vत्वा त्वां vसमिधीमहि सम्यगाज्या-दिहविर्भिर्दीपयेम ॥

उशना काव्यस्त्वा नि होतारमसादयत् । आयजिं त्वा मनवे जातवेदसम् ॥१७॥

उशना । काव्यः । त्वा । नि । होतारम् । असादयत् ।
आऽयजिम् । त्वा । मनवे । जातऽवेदसम् ॥ १७ ॥

हे अग्ने vकाव्यः कविपुत्रः vउशना एतन्नामक ऋषिः vमनवे राज्ञे । तस्य गृह इत्यर्थः । vआयजिम् आभिमुख्येन यष्टारं vजातवेदसं जातप्रज्ञं vत्वा त्वाम् । पुनस्त्वाशब्द आदरार्थः । त्वामेव vहोतारं होमनिष्पादकं vनि vअसादयत् नितरामुपावेशयत् ॥

विश्वे हि त्वा सजोषसो देवासो दूतमक्रत । श्रुष्टी देव प्रथमो यज्ञियो भुवः॥१८॥

विश्वे । हि । त्वा । सऽजोषसः । देवासः । दूतम् । अक्रत ।
श्रुष्टी । देव । प्रथमः । यज्ञियः । भुवः ॥ १८ ॥

हे अग्ने vविश्वे सर्वे vदेवासः देवाः vसजोषसः संगताः सन्तः अस्माकं हवींष्यानयतीति विचार्य vत्वा। हिरवधारणे। त्वामेव vदूतं हविषां वोढारं दूतम् vअक्रत अकार्षुः। ततः vदेव द्योतमान हे अग्ने vप्रथमः देवानां मुख्यभूतस्त्वं vश्रुष्टी। श्रुष्टीति क्षिप्रनाम। क्षिप्रं vयज्ञियः देवानां हविर्दातृत्वेन यज्ञार्हः vभुवः भूयाः ॥

इमं धा वीरो अमृतं दूतं कृण्वीत मर्त्यः । पावकं कृष्णवर्तनिं विहायसम् ॥१९॥
इमम् । घ । वीरः । अमृतम् । दूतम् । कृण्वीत । मर्त्यः ।
पावकम् । कृष्णऽवर्तनिम् । विऽहायसम् ॥ १९ ॥

अनया यजमानश्चाग्निं देवानां दूतमकार्षीदित्याह। vवीरः कर्मणि समर्थः vमर्त्यः मनुष्यो यजमानः vअमृतं मरणधर्मरहितं vपावकं पापानां शोधकं vकृष्णवर्तनिम्। वर्तनिर्मार्गः। कृष्णमार्गं vविहायसम्। विहाया इति महन्नाम। गुणैस्तेजोऽधिकत्वेन वा महान्तम् vइमं vघ इममेवाग्निं vदूतं देवानां वोढृत्वेन दूतं vकृण्वीत अकार्षीत् ॥

तं हुवेम यतस्रुचः सुभासं शुक्रशोचिषम् । विशामग्निमजरं प्रत्नमीड्यम् ॥२०॥
तम् । हुवेम । यतऽस्रुचः । सुऽभासम् । शुक्रऽशोचिषम् ।
विशाम् । अग्निम् । अजरम् । प्रत्नम् । ईड्यम् ॥ २० ॥

vयतस्रुचः गृहीतस्रुचो यद्वा तत्तत्स्थानेषु नियमितस्रुचो वयं vसुभासं शोभनदीप्तिं vशुक्रशोचिषं दीपनशीलतेजस्कं vविशां स्वामिनम्। यद्वा। विशाम् vईड्यम् इत्यन्वयः। मनुष्याणां स्तोतव्यम् vअजरं जरारहितं vप्रत्नं पुरातनं vतं तथाविधम् vअग्निं vहुवेम स्तोत्रशस्त्रादिभिराह्वयामः ॥ ॥ १२ ॥

यो अस्मै हव्यदातिभिराहुतिं मर्तोऽविधत् । भूरि पोषं स धत्ते वीरवद्यशः ॥२१॥
यः । अस्मै । हव्यदातिऽभिः । आऽहुतिम् । मर्तः । अविधत् ।
भूरि । पोषम् । सः । धत्ते । वीरऽवत् । यशः ॥ २१ ॥

vयः vमर्तः मनुष्यः vहव्यदातिभिः हविर्दातृभिर्ऋत्विग्भिः vअस्मै अग्नये vआहुतिम् vअविधत् विदधाति vसः मनुष्यः vभूरि बहु vपोषं धनादिभिः पोषणम् vवीरवत् पुत्रपौत्रादियुक्तं vयशः कीर्तिं च vधत्ते धारयति। तस्मै धनादीनि प्रयच्छतीत्यर्थः ॥

प्रथमं जातवेदसमग्निं यज्ञेषु पूर्व्यम् । प्रति स्रुगेति नमसा हविष्मती ॥ २२ ॥
प्रथमम् । जातऽवेदसम् । अग्निम् । यज्ञेषु । पूर्व्यम् ।
प्रति । स्रुक् । एति । नमसा । हविष्मती ॥ २२ ॥

vप्रथमं देवानां प्रधानभूतं vजातवेदसं जातप्रज्ञं vपूर्व्यं पुरातनमेतादृशम् vअग्निं vयज्ञेषु अग्निष्टोमादियज्ञेषु vहविष्मती सोमादिहविर्युक्ता vस्रुक् vनमसा स्तोत्रेण नमस्कारेण वा सह vप्रति vएति अग्निं प्रति गच्छति ॥

आभिर्विधेमाग्नये ज्येष्ठाभिर्व्यश्वत्‌वत्‌ । मंहिष्ठाभिर्मतिभिः शुक्रशोचिषे ॥ २३ ॥

आभिः । विधेम । अग्नये । ज्येष्ठाभिः । व्यश्वऽवत्‌ ।

मंहिष्ठाभिः । मतिऽभिः । शुक्रऽशोचिषे ॥ २३ ॥

विश्वमनोनामका वयं vज्येष्ठाभिः प्रशस्यतमाभिः vमंहिष्ठाभिः पूज्यतमाभिः vआभिः सूक्त रूपाभिः स्तुतिभिः vशुक्रशोचिषे ज्वलत्तेजसे vअग्नये vविधेम परिचरेम । कथमिव । vव्यश्ववत्‌ यथा व्यश्वोऽस्माकं पिता अग्निं स्तुतिभिः पर्यचरत्‌ तद्वद्वयमपि परिचरेम ॥

नूनमर्च विहायसे स्तोमेभिः स्थूरयूपवत्‌ । ऋषे वैयश्व दम्याय्याग्नये ॥ २४

नूनम्‌ । अर्च । विऽहायसे । स्तोमेभिः । स्थूरयूपऽवत्‌ । ऋषे । वैयश्व । दम्याय । अग्नये ॥ २४

vवैयश्व व्यश्वस्य पुत्र हे विश्वमनोनामक vऋषे vविहायसे महते vदम्याय दमे गृहेऽरणीभि मथ्यमानत्वेन भवाय । यद्वा । यजमानगृहाणां बाधपरिहारेण हिताय । vअग्नये vनूनं संप्रा vस्तोमेभिः त्रिवृत्पञ्चदशादिलक्षणैः स्तोमैः vअर्च स्तुहि । तत्र दृष्टान्तः । vस्थूरयूपवत्‌ । यथा स्थूरयू नामर्षिरेनमग्निमानर्च तद्वदर्चेत्यर्थः ॥

अतिथिं मानुषाणां सूनुं वनस्पतीनाम्‌ । विप्रा अग्निमवसे प्रत्नमीळते ॥ २५ ॥

अतिथिम्‌ । मानुषाणाम्‌ । सूनुम्‌ । वनस्पतीनाम्‌ ।

विप्राः । अग्निम्‌ । अवसे । प्रत्नम्‌ । ईळते ॥ २५ ॥

vविप्राः मेधाविनो यजमानाः vमानुषाणां मनुष्याणाम्‌ vअतिथिम्‌ अतिथिवत्पूज्यं vवनस्पतीन vसूनुं वनस्पतिरूपाभिररणीभिर्जायमानत्वेन[1] तेषां सूनुं vप्रत्नं पुरातनमेवंविधम्‌ vअग्निमव कर्मरक्षणाय vईळते स्तुतिभिः स्तुवन्ति ॥ ॥ १३ ॥

महो विश्वाँ अभि षतो३भि हव्यानि मानुषा । अग्ने नि षत्सि नमसाधि बर्हिषि॥२६

महः । विश्वान्‌ । अभि । सतः । अभि । हव्यानि । मानुषा ।

अग्ने । नि । सत्सि । नमसा । अधि । बर्हिषि ॥ २६ ॥

हे vअग्ने vमहः कर्मकर्तृत्वेन महतः vविश्वान्‌ सर्वान्‌ vसतः स्तोत्रकरणार्थं वर्तमानान्‌ स्तोतृ vअभि अभितस्त्वं vनमसा स्तुत्यतया vबर्हिषि vअधि vनि vषत्सि निषीद । तथा vमानुष मनुष्यसंबन्धीनि vहव्यानि हवींषि vअभि अभितस्तानि स्वीकर्तुं निषीद[2] ॥

वंस्वा नो वार्या पुरु वंस्व रायः पुरुस्पृहः । सुवीर्यस्य प्रजावतो यशस्वतः ॥२७

वंस्व । नः । वार्या । पुरु । वंस्व । रायः । पुरुऽस्पृहः ।

सुऽवीर्यस्य । प्रजाऽवतः । यशस्वतः ॥ २७ ॥

---

१. घ–°र्जायमानत्वात्‌ । २. ख–मानुषाणां; ग-त-भ-श–मानुषा मानुषाणां; न–मानुष मानुषाणि । ३. ख-ग-ज्ञ-त१-२-भ–निषीद । किंच अधि बर्हिषि यज्ञे नमसा स्तोत्रेण हविषा च स (सह वा त्वमिह–ग) निषत्सि नितरां सीद ।

हे अग्ने ᵛवार्या वार्याणि वरणीयानि ᵛपुरु पुरूणि बहूनि गवादीनि ᵛनः अस्मभ्यं ᵛदंस्व प्रयच्छ। तथा ᵛपुरुस्पृहः पुरुभिर्बहुभिः स्पृहणीयं ᵛरायः धनम्। किंविशिष्टम्। ᵛसुवीर्यस्य शोभनवीर्योपेतं ᵛप्रजावतः पुत्रपौत्रादिसहितं ᵛयशस्वतः कीर्तिमच्च धनं नोऽस्मभ्यं ᵛदंस्व प्रयच्छ ॥

त्वं वरो सुषाम्णेऽग्ने जनाय चोदय । सदा वसो रातिं यविष्ठ शश्वते ॥ २८ ॥

त्वम्। वरो इति। सुऽसाम्ने। अग्ने। जनाय। चोदय।

सदा। वसो इति। रातिम्। यविष्ठ। शश्वते ॥ २८ ॥

ᵛवरो सर्वैर्वरणीय ᵛवसो शत्रूणां वासयितः ᵛयविष्ठ पुनःपुनर्जायमानत्वेन युवतम हे ᵛअग्ने ᵛत्वं ᵛसुषाम्णे सुसाम्ने। सुषामादित्वात् षत्वम्। त्वत्प्रसादाच्छोभनसामवते ᵛशश्वते बहवे ᵛजनाय प्रादुर्भूताय स्तोतॄणां ᵛसदा सर्वदा ᵛरातिं धनादिकं ᵛचोदय प्रेरय ॥

त्वं हि सुप्रतूरसि त्वं नो गोमतीरिषः । महो रायः सातिमग्ने अपा वृधि ॥ २९ ॥

त्वम्। हि। सुऽप्रतूः। असि। त्वम्। नः। गोऽमतीः। इषः।

महः। रायः। सातिम्। अग्ने। अप। वृधि ॥ २९ ॥

हे ᵛअग्ने ᵛत्वम्। हिरवधारणे। त्वमेव ᵛसुप्रतूः स्तोतॄणां धनादिकं सुष्ठु प्रदाता ᵛअसि प्रयच्छसीत्यर्थः। अत एव ᵛगोमतीः पश्वादियुक्तानि ᵛइषः अन्नानि ᵛमहः महतः ᵛरायः धनस्य मध्ये ᵛसातिं देयं धनं च ᵛनः स्तोतॄणामस्माकम् ᵛअपा ᵛवृधि अपावृणु। प्रयच्छेत्यर्थः ॥

अग्ने त्वं यशा अस्या मित्रावरुणा वह । ऋतावाना सम्राजा पूतदक्षसा ॥ ३० ॥

अग्ने। त्वम्। यशाः। असि। आ। मित्रावरुणा। वह।

ऋतऽवाना। सम्ऽराजा। पूतऽदक्षसा ॥ ३० ॥

हे ᵛअग्ने ᵛत्वं ᵛयशाः। लुप्तमत्वर्थीयः। देवानां मध्ये यशस्वी ᵛअसि भवसि। अत एव त्वम् ᵛऋतावाना ऋतावानौ सत्यवन्तौ यज्ञवन्तौ वा ᵛसम्राजा सम्राजौ सम्यग्राजमानौ ᵛपूतदक्षसा पूतदक्षसौ। दक्ष इति बलनाम। शुद्धबलौ मित्रावरुणावस्मिन् कर्मणि ᵛआ ᵛवह आह्वय। प्रायेण कर्मणि अग्नेर्मित्रावरुणसहितत्वमस्तीति[1] सूचयति ॥ ॥ १४ ॥

'सखाय आ शिषामहि' इति त्रिंशदृचं चतुर्थं सूक्तम्। अग्नेयमनुक्रमणिका—'सखायस्तृचोऽन्त्यः सौषाम्णस्य वरोदानस्तुतिरन्त्यानुष्टुप्' इति। त्र्यश्वपुत्रो विश्वमना ऋषिः। 'औष्णिहं ह' इत्युक्तत्वादेतदादीनि त्रीणि सूक्तानि उष्णिक्छन्दस्कानि। अनुक्तत्वादिन्द्रो देवता। अन्त्यासु तिसृषु सुषामाख्यस्य राज्ञः पुत्रस्य वरुनाख्यो राज्ञो दानं स्तूयते। अतस्तास्तद्देवताकाः। महाव्रते निष्केवल्ये औष्णिहतृचाशीतावेतत्सूक्तम्। तथैव पञ्चमारण्यके शौनकेन सूत्र्यते—'सखाय आ शिषामहि य एक इद्विदयते' (ऐ. आ. ५. २. ५) इति। दशमेऽहनि मरुत्वतीयशस्त्रे 'सखायः' इति तिस्र ऋचः। सूत्र्यते च—'सखाय आ शिषामहीति तिस्र उष्णिहः' (आश्व.श्रौ. ८.१२) इति ॥

सखाय आ शिषामहि ब्रह्मेन्द्राय वज्रिणे । स्तुष ऊ षु वो नृतमाय धृष्णवे ॥१॥

---

१. ग—अग्निर्मित्रावरुणसहितश्चमसभागिति।

सखायः । आ । शिषामहि । ब्रह्म । इन्द्राय । वज्रिणे ।
स्तुषे । ऊँ इति । सु । वः । नृऽतमाय । धृष्णवे ॥ १ ॥

vसखायः मित्रभूता हे ऋत्विजः vवज्रिणे वज्रहस्ताय vइन्द्राय vब्रह्म कर्तव्यमेतत्सूक्तरूपं स्तोत्रम् vआ vशिषामहि वयम् आशास्महे[1] । ' शासु अनुशिष्टौ ' । लुङि च्लेरङादेशः । इत्वचत्वे । व्यत्ययेनात्मनेपदम् । तत्र vवः सर्वेषामेव युष्माकमर्थाय vनृतमाय सर्वेषां नेतृतमाय यद्वा संग्रामेष्वायुधादीनां नेतृतमाय vधृष्णवे शत्रूणां धर्षणशीलाय तस्मा इन्द्रायाहमेव vसु सुष्ठु vस्तुषे स्तौमि ॥

शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा । मघैर्मघोनो अति शूर दाशसि ॥ २ ॥

शवसा । हि । असि । श्रुतः । वृत्रऽहत्येन । वृत्रऽहा ।
मघैः । मघोनः । अति । शूर । दाशसि ॥ २ ॥

हे इन्द्र त्वं vशवसा बलेन vश्रुतः प्रसिद्धः vअसि भवसि । vहि प्रसिद्धौ । तदेवाह । vवृत्रहत्येन वृत्रासुरहननेन vवृत्रहा वृत्रहेति प्रसिद्धो भवसि । vशूर शौर्यवन् हे इन्द्र vमघोनः मघवतो धनवतः पुरुषात् vमघैः त्वदीयैर्धनैः vअति अतिक्रम्य vदाशसि स्तोतृभ्योऽस्मभ्यं प्रयच्छसि ॥

स नः स्तवान आ भर रयिं चित्रश्रवस्तमम् । निरेके चिद्यो हरिवो वसुर्ददिः ॥३॥

सः । नः । स्तवानः । आ । भर । रयिम् । चित्रश्रवःऽतमम् ।
निरेके । चित् । यः । हरिऽवः । वसुः । ददिः ॥ ३ ॥

हे इन्द्र vसः तथाविधस्त्वं vस्तवानः अस्माभिः स्तूयमानः सन् vचित्रश्रवस्तमम् अतिशयेन नानाविधान्नोपेतं vरयिं पुत्रं धनं वा vनः अस्मभ्यम् vआ vभर संपादय[2] । देहीत्यर्थः । vहरिवः । हरी अश्वौ । तद्वन् हे इन्द्र vयः त्वं vनिरेके vचित् निर्गमन एव vवसुः शत्रूणां वासयिता भवसि । तवायुधनिर्गमनादेव शत्रवः पलायन्ते खलु । किंच त्वं vददिः धनानां दाता भवसि ॥

आ निरेकमुत प्रियमिन्द्र दर्षि जनानाम् । धृषता धृष्णो स्तवमान आ भर ॥४॥

आ । निरेकम् । उत । प्रियम् । इन्द्र । दर्षि । जनानाम् ।
धृषता । धृष्णो इति । स्तवमानः । आ । भर ॥ ४ ॥

हे vइन्द्र vउत अपि च vप्रियं प्रीणनात् प्रियतमं vनिरेकम् । निरेकं धनं भवति विरेचनान्निर्गमनाद्वेति । तद्धनं vजनानां स्तोतॄणामस्माकम् vआ vदर्षि आविदारय विवृतं कुरु । ' दृ विदारणे ' । छान्दसो विकरणस्य लुक् । विवृत्य च vधृष्णो धर्षणशील[3] हे इन्द्र vस्तवमानः स्तोतृभिरस्माभिः स्तूयमानः सन् vधृषता धृष्टेन मनसा सह vआ vभर तद्धनमस्मभ्यं देहि ॥

न ते सख्यं न दक्षिणं हस्तं वरन्त आमुरिः । न परिबाधो हरिवो गविष्टिषु ॥५॥

न । ते । सख्यम् । न । दक्षिणम् । हस्तम् । वरन्ते । आऽमुरिः ।
न । परिऽबाधः । हरिऽवः । गोऽइष्टिषु ॥ ५ ॥

---

१. ख-ज्ञ-त१-२-भ–आशास्महे यद्वा ब्रह्म अस्माभिर्दीयमानं हविरूपमन्नमाशास्महे । २. ख-त-न-भ-श–आसंपादय । ३. ख-ग-त-न-भ२–शत्रूणां धर्षणशील; भ१-३–मनसा शत्रूणां धर्षणशील ।

हे ऋत्विजः [v]इन्दुं स्यन्दनशीलं सोममिन्द्रार्थम्[1] [v]आ [v]सिञ्चत आश्रयणद्रव्येण सेचनं कुरुत। अभिषुणुतेत्यर्थः। ततः [v]सोम्यं सोममयं [v]मधु मदकरं सोमरसं [v]पिबाति पिबतु। पीत्वा च स इन्द्रः [v]महित्वना स्वमहत्त्वेनैव [v]राधसा अन्नेन सह धनादिकं स्तोतृभ्यः [v]प्र [v]चोदयाते प्रकर्षेण चोदयति। यद्वा। यजमानो महित्वना। इन्द्राय प्रदीयमानत्वादस्य महत्त्वम्। महत्त्वयुक्तेन राधसा अन्नेन सह स्तोतॄन् प्रचोदयति। इन्द्राय हविर्दत्तेति स्तोतॄन् प्रेरयतीत्यर्थः॥

उपो॒ हरी॑णां॒ पति॒ दक्षं॑ पृञ्च॒न्तम॒ब्रव॑म्। नू॒नं श्रु॒धि स्तु॒वतो॒ अ॒श्व्यस्य॑॥ १४॥

उपो॒ इति॑। हरी॑णाम्। पति॑म्। दक्ष॑म्। पृ॒ञ्च॒न्त॑म्। अ॒ब्र॒व॒म्।
नू॒न॒म्। श्रु॒धि॒। स्तु॒व॒तः। अ॒श्व्यस्य॑॥ १४॥

[v]हरीणां हरितवर्णानामश्वानां [v]पतिं पालयितारं [v]दक्षं वर्धकं स्वबलं [v]पृञ्चन्तम्। 'पृची संपर्के'। मरुत्सु योजयन्तम्। यद्वा। शत्रुषु स्वबलमायुधादिभिः संपर्चयन्तम्। एतादृशमिन्द्रं त्वाम् [v]उपो [v]अब्रवम्। विश्वमना अहं स्तोत्रं करवाणि। [v]अश्व्यस्य। व्यश्वो नामर्षिरश्वशब्देनोच्यते। तस्य पुत्रस्य [v]स्तुवतः स्तोत्रं कुर्वतो मम संबन्धिनीं[2] त्वद्विषयां स्तुतिं [v]नूनं संप्रति [v]श्रुधि शृणु॥

नह्य॑ङ्ग पु॒रा च॒न जज्ञे॑ वी॒रत॑र॒स्त्वत्। नकी॑ रा॒या नैव॑था॒ न भ॒न्दना॑॥ १५॥

न॒हि। अ॒ङ्ग। पु॒रा। च॒न। ज॒ज्ञे। वी॒रऽत॑रः। त्वत्।
नकिः॑। रा॒या। न। एव॑ऽथा। न। भ॒न्दना॑॥ १५॥

हे इन्द्र [v]त्वत् त्वत्तः [v]पुरा पूर्वं [v]वीरतरः सामर्थ्यवान् कश्चित् [v]नहि [v]जज्ञे जातः[3] खलु। [v]अङ्ग प्रसिद्धौ। त्वमेव सामर्थ्यवान् जात इत्यर्थः। किंच त्वत्तोऽपि [v]राया धनेन समर्थः [v]नकिः न कश्चिदस्ति। तथा [v]एवथा[4] शत्रुपुराणि संग्रामं वा प्रति गमनेन त्वत्तोऽधिकः [v]न जातः। यद्वा। एवथा। अव रक्षणादिषु। अकारस्यैकारश्छान्दसः। औणादिकोऽथप्रत्ययः। शरणागतानां स्तोतॄणां चावनेन त्वत्तोऽधिको नास्ति। किंच [v]भन्दना। भन्दतिः स्तुतिकर्मा। स्तुत्या च त्वदधिकः [v]न जातः। धनवान् रक्षकः स्तुत्यश्च त्वत्तोऽन्यो न जज्ञ इति॥ ॥ १७॥

'एदु मध्वः' इति तृचः पूर्वोक्ते ब्राह्मणाच्छंसिशस्त्रे वैकल्पिकोऽनुरूपः। सूत्रितं च—'एदु मध्वो मदिन्तरमेतो न्विन्द्रं स्तवाम सखायः' (आश्व. श्रौ. ७. ८) इति॥

एदु मध्वो॒ मदि॑न्तरं सि॒ञ्चा वा॑ध्वर्यो॒ अन्ध॑सः। एवा हि वी॒रः स्तव॑ते॒ सदा॑वृधः॥ १६॥

आ। इत्। ऊँ॒ इति॑। मध्वः॑। मदि॑न्ऽतरम्। सि॒ञ्च॒। वा॒। अ॒ध्व॒र्यो॒ इति॑। अन्ध॑सः।
एव॑। हि। वी॒रः। स्तव॑ते। सदा॑ऽवृधः॥ १६॥

हे [v]अध्वर्यो अध्वरस्य नेतर्ऋत्विक् [v]मध्वः मदकरस्य [v]अन्धसः सोमलक्षणस्यान्नस्य [v]मदिन्तरम् अत्यर्थं मादयिततमं सोमरसमेव [v]आ [v]सिञ्च इन्द्रार्थमभिषुणु। [v]इदु इत्यवधारणे। [v]वीरः समर्थः [v]सदावृधः सर्वदा हविर्भिर्वर्धनीयः। यद्वा सर्वदा स्वबलस्य वर्धकोऽयम् [v]एव इन्द्रः [v]स्तवते [v]हि स्तोत्रशस्त्रादिभिः स्तूयते खलु। स्तुतायेन्द्राय सोमो दातव्यः। तस्मादा सिञ्चेति समन्वयः॥

---

१. घ-भ२-°मिंद्रायेंद्रार्थं। २. भ-संबन्धिनीं हे इंद्र। ३. घ-भ-न जातः। ४. ज्ञ-त१-४-य-एव यथा; ग२-एव तथा।

इन्द्र । यथा । हि । अस्ति । ते । अपरिऽइतम् । नृतो इति । शवः ।
अमृक्ता । रातिः । पुरुऽहूत । दाशुषे ॥ ९ ॥

हे [v]नृतो सर्वस्यान्तर्यामितया नर्तयितः [v]इन्द्र [v]ते त्वदीयं [v]शवः बलं [v]यथा [v]अपरीतम् [v]अस्ति शत्रुभिरपरिगतमव्याप्तं भवति । [v]हि प्रसिद्धौ । तथा हे [v]पुरुहूत पुरुभिर्बहुभिराहूतेन्द्र [v]दाशुषे हविर्दत्तवते यजमानाय [v]रातिः धनादिदानम् [v]अमृक्ता शत्रुभिरहिंसितं भवति । त्वत्तो लब्धं यजमानस्य धनं शत्रवो न हिंसन्ति । यथा त्वदीयबलस्य रक्षक एवं तस्य धनस्यापि रक्षक इत्यर्थः ॥

आ वृषस्व महामह महे नृतम राधसे । दृळहश्चिद्दृह्य मघवन्मघत्तये ॥ १० ॥

आ । वृषस्व । महाऽमह । महे । नृऽतम । राधसे ।
दृळहः । चित् । दृह्य । मघऽवन् । मघत्तये ॥ १० ॥

हे [v]महामह अतिशयेन सर्वैः पूजनीय [v]नृतम नेतृतमेन्द्र [v]महे महते [v]राधसे शत्रुधनानां संसाधकाय बलाय बलार्थम् [v]आ [v]वृषस्व स्वोदरमासिञ्च । सोमं पिबेत्यर्थः । हे [v]मघवन् धनवन्निन्द्र सोमपानेन मत्तः सन् [v]दृळहश्चित् दृढानि परैरबाधितान्यपि शत्रुपुराणि [v]मघत्तये मघानां धनानां लाभाय [v]दृह्य जिघांस । विदारयेत्यर्थः ॥ ॥ १६ ॥

नू अन्यत्रा चिदद्रिवस्त्वन्नो जग्मुराशसः । मघवञ्छग्धि तव तन्न ऊतिभिः ॥११॥

नु । अन्यत्र । चित् । अद्रिऽवः । त्वत् । नः । जग्मुः । आऽशसः ।
मघऽवन् । शग्धि । तव । तत् । नः । ऊतिऽभिः ॥ ११ ॥

हे [v]अद्रिवः वज्रवन्निन्द्र त्वं धनवान् दाता चेत्यभिज्ञाय [v]नः अस्मदीयानि [v]आशसः आशंसनानि अभिलाषाः [v]त्वत् त्वत्तः [v]अन्यत्र देवादौ [v]नू [v]चित् पुरा [v]जग्मुः अगच्छन् । तत्र फलं नालभन्त । इदानीं त्वं धनवान् दानशील इत्यस्माभिर्ज्ञातम् । अत एव हे [v]मघवन् धनवन्निन्द्र [v]तव त्वदीयं [v]तत् शत्रुपुरविदारणलब्धं धनम् [v]ऊतिभिः त्वद्रक्षणैः [v]नः अस्मभ्यं [v]शग्धि देहि । शग्धीति दानकर्मा । शक्नोतेर्लोटि छान्दसो विकरणस्य लुक् ॥

नहि त्वङ्ग नृतो त्वदन्यं विन्दामि राधसे । राये द्युम्नाय शवसे च गिर्वणः ॥१२॥

नहि । अङ्ग । नृतो इति । त्वत् । अन्यम् । विन्दामि । राधसे ।
राये । द्युम्नाय । शवसे । च । गिर्वणः ॥ १२ ॥

हे [v]नृतो नर्तयितः [v]गिर्वणः गीर्भिः स्तुतिभिर्वननीय संभजनीयेन्द्र [v]राधसे बलसंसाधकायान्नाय [v]राये धनाय [v]द्युम्नाय द्योतमानाय यशसे [v]शवसे वर्धकाय बलाय [v]च [v]त्वत् त्वत्तः [v]अन्यं [v]नहि [v]विन्दामि न लभे । [v]अङ्ग प्रसिद्धौ ॥

एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु । प्र राधसा चोदयाते महित्वना॥१३॥

आ । इन्दुम् । इन्द्राय । सिञ्चत । पिबाति । सोम्यम् । मधु ।
प्र । राधसा । चोदयाते । महिऽत्वना ॥ १३ ॥

हे ऋत्विजः [v]इन्दुं स्यन्दनशीलं सोममिन्द्रार्थम्[1] [v]आ [v]सिञ्चत आश्रयणद्रव्येण सेचनं कुरुत। अभिषुणुतेत्यर्थः। ततः [v]सोम्यं सोममयं [v]मधु मदकरं सोमरसं [v]पिबाति पिबतु। पीत्वा च स इन्द्रः [v]महित्वना स्वमहत्त्वेनैव [v]राधसा अन्नेन सह धनादिकं स्तोतृभ्यः [v]प्र [v]चोदयाते प्रकर्षेण चोदयति। यद्वा। यजमानो महित्वना। इन्द्राय प्रदीयमानत्वादस्य महत्त्वम्। महत्त्वयुक्तेन राधसा अन्नेन सह स्तोतॄन् प्रचोदयति। इन्द्राय हविर्दत्तेति स्तोतॄन् प्रेरयतीत्यर्थः॥

उपो॒ हरी॑णां॒ पति॒ दक्षं॑ पृञ्च॒न्तम॒ब्रव॑म्। नू॒नं श्रु॒धि स्तु॒वतो॒ अ॒श्व्यस्य॑॥ १४॥

उपो॒ इति॑। हरी॑णाम्। पति॑म्। दक्ष॑म्। पृ॒ञ्च॒न्त॑म्। अ॒ब्र॒व॒म्।
नू॒न॒म्। श्रु॒धि॒। स्तु॒व॒तः। अ॒श्व्यस्य॑॥ १४॥

[v]हरीणां हरितवर्णानामश्वानां [v]पतिं पालयितारं [v]दक्षं वर्धकं स्वबलं [v]पृञ्चन्तम्। 'पृची संपर्के'। मरुत्सु योजयन्तम्। यद्वा। शत्रुषु स्वबलमायुधादिभिः संपर्चयन्तम्। एतादृशमिन्द्रं त्वाम् [v]उपो [v]अब्रवम्। विश्वमना अहं स्तोत्रं करवाणि। [v]अश्व्यस्य। व्यश्वो नामर्षिरश्वशब्देनोच्यते। तस्य पुत्रस्य [v]स्तुवतः स्तोत्रं कुर्वतो मम संबन्धिनीं[2] त्वद्विषयां स्तुतिं [v]नूनं संप्रति [v]श्रुधि शृणु॥

नह्य॑ङ्ग पु॒रा च॒न जज्ञे॑ वी॒रत॑र॒स्त्वत्। नकी॑ रा॒या नैव॑था॒ न भ॒न्दना॑॥ १५॥

न॒हि। अ॒ङ्ग। पु॒रा। च॒न। ज॒ज्ञे। वी॒रऽत॑रः। त्वत्।
नकिः॑। रा॒या। न। एव॑ऽथा। न। भ॒न्दना॑॥ १५॥

हे इन्द्र [v]त्वत् त्वत्तः [v]पुरा पूर्वं [v]वीरतरः सामर्थ्यवान् कश्चित् [v]नहि [v]जज्ञे जातः[3] खलु। [v]अङ्ग प्रसिद्धौ। त्वमेव सामर्थ्यवान् जात इत्यर्थः। किंच त्वत्तोऽपि [v]राया धनेन समर्थः [v]नकिः न कश्चिदस्ति। तथा [v]एवथा[4] शत्रुपुराणि संग्रामं वा प्रति गमनेन त्वत्तोऽधिकः [v]न जातः। यद्वा। एवथा। अव रक्षणादिषु। अकारस्यैकारश्छान्दसः। औणादिकोऽथप्रत्ययः। शरणागतानां स्तोतॄणां चावनेन त्वत्तोऽधिको नास्ति। किंच [v]भन्दना। भन्दतिः स्तुतिकर्मा। स्तुत्या च त्वदधिकः [v]न जातः। धनवान् रक्षकः स्तुत्यश्च त्वत्तोऽन्यो न जज्ञ इति॥ ॥ १७॥

'एदु मध्वः' इति तृचः पूर्वोक्ते ब्राह्मणाच्छंसिशस्त्रे वैकल्पिकोऽनुरूपः। सूत्रितं च—'एदु मध्वो मदिन्तरमेतो न्विन्द्रं स्तवाम सखायः' (आश्व. श्रौ. ७. ८) इति॥

एदु मध्वो॒ मदि॑न्तरं सि॒ञ्चा वा॑ध्वर्यो॒ अन्ध॑सः। एवा हि वी॒रः स्तव॑ते॒ सदा॑वृधः॥ १६॥

आ। इत्। ऊँ॒ इति॑। मध्वः॑। मदि॑न्ऽतरम्। सि॒ञ्च॒। वा॒। अ॒ध्व॒र्यो॒ इति॑। अन्ध॑सः।
एव॑। हि। वी॒रः। स्तव॑ते। सदा॑ऽवृधः॥ १६॥

हे [v]अध्वर्यो अध्वरस्य नेतर्ऋत्विक् [v]मध्वः मदकरस्य [v]अन्धसः सोमलक्षणस्यान्नस्य [v]मदिन्तरम् अत्यर्थं मादयिततमं सोमरसमेव [v]आ [v]सिञ्च इन्द्रार्थमभिषुणु। [v]इदु इत्यवधारणे। [v]वीरः समर्थः [v]सदावृधः सर्वदा हविर्भिर्वर्धनीयः। यद्वा सर्वदा स्वबलस्य वर्धकोऽयम् [v]एव इन्द्रः [v]स्तवते [v]हि स्तोत्रशस्त्रादिभिः स्तूयते खलु। स्तुतायेन्द्राय सोमो दातव्यः। तस्मादा सिञ्चेति समन्वयः॥

---

१. घ-भ२-°मिंद्रायेंद्रार्थं। २. भ-संबन्धिनीं हे इंद्र। ३. घ-भ-न जातः। ४. ज्ञ-त१-४-य-एव यथा; ग२-एव तथा।

इन्द्रं स्थातर्हरीणां नकिष्टे पूर्व्यस्तुतिम् । उदानंश शवसा न भन्दना ॥ १७ ॥

इन्द्रं । स्थातः । हरीणाम् । नकिः । ते । पूर्व्यऽस्तुतिम् ।
उत् । आनंश । शवसा । न । भन्दना ॥ १७ ॥

हे [v]हरीणां [v]स्थातः अश्वानामधिष्ठातः [v]इन्द्र [v]ते त्वदीयां [v]पूर्व्यस्तुतिं पूर्वैर्ऋषिभिः कृतां स्तुतिम्। उपलक्षणमेतत्। इदानींतनैः क्रियमाणामपि स्तुतिं [v]नकिः न कश्चित् [v]शवसा बलेन [v]उदानंश व्याप्नोति । 'अशू व्याप्तौ' । लिटि 'अश्नोतेश्च' इति नुट्। छान्दसो सुम् । कश्चिन्नातिक्रामतीत्यर्थः । किंच [v]भन्दना सर्वैः प्रार्थनीयत्वात् पूजनीयेन धनेन स्तुत्या वा त्वदीयां स्तुतिं [v]न कश्चिदतिक्रामति । त्वत्तो बलवान् धनी स्तुत्यो वान्यो नास्तीत्यर्थः ॥

तं वो वाजानां पतिमहूमहि श्रवस्यवः । अप्रायुभिर्यज्ञेभिर्ववृधेन्यम् ॥ १८ ॥

तम् । वः । वाजानाम् । पतिम् । अहूमहि । श्रवस्यवः ।
अप्रायुऽभिः । यज्ञेभिः । ववृधेन्यम् ॥ १८ ॥

[v]अप्रायुभिः कर्मसु अप्रमाद्यन्मनुष्ययुक्तैः । अथवा । अप्रमत्ता एकत्र स्थिरवैव कर्म कुर्वन्ति । कर्म प्रारभ्य नान्यं देशं गच्छन्तीत्यर्थः । एवंविधमनुष्ययुक्तैः [v]यज्ञेभिः यज्ञैः एतादृशमनुष्यैर्यज्ञैर्वा [v]वावृधेन्यं वर्धनीयं [v]वाजानाम् अन्नानां [v]पतिं स्वामिनं [v]वः यष्टृयष्टव्यसंबन्धेन युष्मदीयं [v]तं तादृशमिन्द्रं [v]श्रवस्यवः वयमन्नकामाः सन्तः [v]अहूमहि आह्वयामः। ह्वयतेर्लुङि 'बहुलं छन्दसि' इति संप्रसारणम् ॥

पूर्वोक्त एव शस्त्रे 'एतो न्विन्द्रम्' इत्येतौ तृचौ वैकल्पिकौ स्तोत्रियानुरूपौ । सूत्रितं च— 'एतो न्विन्द्रं स्तवाम सखायः स्तुहीन्द्रं त्र्यश्वत्' (आश्व. श्रौ. ७. ८) इति ॥

एतो न्विन्द्रं स्तवाम सखायः स्तोम्यं नरम् । कृष्टीर्यो विश्वा अभ्यस्त्येक इत्॥१९॥

एतो इति । नु । इन्द्रम् । स्तवाम । सखायः । स्तोम्यम् । नरम् ।
कृष्टीः । यः । विश्वाः । अभि । अस्ति । एकः । इत् ॥ १९ ॥

हे [v]सखायः समानख्याना मित्रभूता वा हे ऋत्विजः [v]नु क्षिप्रम् [v]एतो आगच्छतैव । किमर्थं तदाह । [v]स्तोम्यं स्तोमार्हं [v]नरं सर्वस्य नेतारं तम् [v]इन्द्रं [v]स्तवाम स्तोत्रं करवाम । [v]यः इन्द्रः [v]एक [v]इत् एकोऽसहाय[1] एव सन् [v]विश्वाः सर्वाः [v]कृष्टीः शत्रुसेनाः [v]अभ्यस्ति अभिभवति । तं स्तवामेति शेषः ॥

अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः । घृतात्स्वादीयो मधुनश्च वोचत ॥२०॥

अगोऽरुधाय । गोऽइषे । द्युक्षाय । दस्म्यम् । वचः ।
घृतात् । स्वादीयः । मधुनः । च । वोचत ॥ २० ॥

हे ऋत्विजः [v]अगोरुधाय । गाः स्तुती रुणद्धीति गोरुधः । न गोरुधोऽगोरुधः । ता न विनाशयत्यादरेण शृणोतीत्यर्थः । तादृशाय अत एव [v]गविषे स्तोत्राणीच्छते [v]द्युक्षाय दीप्यमानायेन्द्राय [v]दस्म्यं दर्शनीयं[2] [v]घृतात् स्वादुतरादाज्यात् [v]मधुनश्च [v]स्वादीयः अतिशयेन स्वादुभूतं[3] [v]वचः स्तोत्ररूपं वाक्यं [v]वोचत ब्रूत । ऋत्विग्भिः कृतं कर्म यजमानोऽपि कृतवान् भवतीति मदीयमिन्द्रविषयं वचो

१. न-भ-एकाकी असहाय । २. ख-ज्ञ-त१-२-न-भ-अत्यंतदर्शनीयं । ३. घ-स्वादुतरं ।

घृतान्मधुनश्च स्वादुतरं भवत्वित्याशास्ते । तदाह[1] भगवानाश्वलायनः—' वच एव म इदं घृताच्च मधुनश्च स्वादीयोऽस्ति प्रीतिः स्वादीयोऽस्त्वित्येव तदाह ' (आश्व. गृ. १. १. ५) इति ॥ ॥ १८ ॥

यस्यामितानि वीर्या३ न राधः पर्येतवे । ज्योतिर्न विश्वमभ्यस्ति दक्षिणा ॥२१॥

यस्य । अमितानि । वीर्या । न । राधः । परिऽएतवे ।
ज्योतिः । न । विश्वम् । अभि । अस्ति । दक्षिणा ॥ २१ ॥

[v]यस्य इन्द्रस्य [v]वीर्या वीर्याणि वृत्रहननादिलक्षणानि[2] सामर्थ्यानि [v]अमितानि अस्य इयन्ति सामर्थ्यानि[3] नान्यानीति परिमितानि न भवन्ति । यद्वा । ' मीङ् हिंसायाम् ' । छान्दसो ह्रस्वः । शत्रुभिरहिंसितानि भवन्ति । तथा यस्येन्द्रस्य [v]राधः धनं [v]पर्येतवे[4] शत्रुभिः परिगन्तुं प्राप्तुं शक्यं [v]न भवति । अत एव यस्य[5] [v]दक्षिणा धनदानं [v]विश्वमभ्यस्ति सर्वं स्तोतृजनमभिभवति । तत्र दृष्टान्तः । [v]ज्योतिर्न । ज्योतिषामयनत्वाज्ज्योतिरन्तरिक्षम् । यथान्तरिक्षं सर्वलोकं पिधाय तिष्ठति तद्वत् स्तोतृजनं धनदानेन पिधत्त इत्यर्थः[6] ॥

स्तुहीन्द्रं व्यश्ववदनूर्मिं वाजिनं यमम् । अर्यो गयं मंहमानं वि दाशुषे ॥२२॥

स्तुहि । इन्द्रम् । व्यश्वऽवत् । अनूर्मिम् । वाजिनम् । यमम् ।
अर्यः । गयम् । मंहमानम् । वि । दाशुषे ॥ २२ ॥

हे विश्वमनः [v]अनूर्मिम् । ऊर्मिर्हिंसाकर्मा । कैश्चिदप्यहिंस्यम् । अथवा शत्रुभिरगन्तव्यम्[7] । अत एव [v]वाजिनं बलवन्तं [v]यमं स्तोतृभिः[8] सुनियतमेतादृशम्[9] [v]इन्द्रं [v]स्तुहि । स्तोत्रे दृष्टान्तः । [v]व्यश्ववत् । यथा व्यश्वो[10] विश्वमनसः[11] पिता इन्द्रमस्तौत् तद्वत् स्तुहीत्यर्थः । स्तुतश्चेत् [v]अर्यः स्वामी इन्द्रः [v]दाशुषे हविर्दत्तवते यजमानाय [v]मंहमानं पूज्यमानं [v]गयं धनम् । यद्वा । देवानां पूजायै गयं गृहम् । गृहमस्ति चेत् देवा हविर्भिः पूज्यन्ते । तादृशं गृहं वितरति । तस्मात् स्वं धनगृहलाभाय स्तुहीत्यर्थः ॥

एवा नूनमुप स्तुहि वैयश्व दशमं नवम् । सुविद्वांसं चर्कृत्यं चरणीनाम् ॥२३॥

एव । नूनम् । उप । स्तुहि । वैयश्व । दशमम् । नवम् ।
सुऽविद्वांसम् । चर्कृत्यम् । चरणीनाम् ॥ २३ ॥

हे [v]वैयश्व व्यश्वस्य पुत्र विश्वमनः [v]चरणीनां[12] मनुष्याणां देहे स्थितानां नवानां प्राणानां [v]दशमं दशसंख्यापूरकम् । तत्र मन्त्रः—' नव वै पुरुषे प्राणा मनुष्येषु वर्तमाना इन्द्रस्तेषां दशधा भवतीन्द्रस्यात्मानं दशधा चरन्तम् ' इति । एतादृशमत एव [v]नवं स्तुत्यं [v]सुविद्वांसम्[13] अन्तर्यामित्वात्

---

१. ग-भ–तथाह । २. घ–°रूपाणि । ३. न-भ–बलानि । ४. त१-२-य–न पर्येतवे; भ२–न पद्यर्थेतवे । ५. ज्ञ-त१-२–अस्य । ६. ख-ग-त-न-भ-श–इत्यर्थः । यद्वा येन दत्तं धनं सर्वं शत्रुजनमभिभवति येन (एतत्-ग) दत्तं (' दत्तं ' नास्ति–ग-न-भ) धनमादाय असतः (मदृतः–ग-भ; सतः–त३; सर्वतः–भ३) शत्रूनभिभवंतीत्यर्थः (°भवतीत्यर्थः–ख-त-भ३-श)। ७. ग–°रनभिगन्तव्यं । ८. ख–स्तुतिभिः सुनियंतव्य°; ग-न-भ–अर्थिभिः स्तोतृभिश्च नियंतव्य°; घ-त१-२–स्तुतिभिः स्तोतृभिः सुनियंतव्य°; श–अर्थिभिः स्तोतृभिः सुनियंतव्य° । ९. ग–व्यश्वर्षिस्तव; घ–व्यश्वो नाम तव; न-भ१-२–व्यश्वो वामिति व; भ३–व्यश्वो वाग्मी तव । १०. त-न-भ–चर्षणीनां । ११. ख–शुचिरिंद्रशसं; त-न–शुचिरिंद्रप्रशसं; भ–शुचिप्रशंस्यं; श–सुविद्वांसं प्रशंसंत ।

सुष्ठु सर्वं जानन्तं ᵛचर्कृत्यं भूयो भूयः कार्येषु सर्वैर्नमस्कर्तव्यमेवंविधमिन्द्रम् ᵛएव ᵛनूनम् इदानीम् ᵛउप ᵛस्तुहि समीपे स्तुहि ॥

वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् । अहरहः शुन्ध्युः परिपदामिव ॥२४॥

वेत्थ । हि । निःऽऋतीनाम् । वज्रऽहस्त । परिऽवृजम् ।

अहःऽअहः । शुन्ध्युः । परिपदाम्ऽइव ॥ २४ ॥

इदानीमृषिरिन्द्रं संबोध्याह । हे ᵛवज्रहस्त वज्रयुक्तहस्तेन्द्र ᵛनिर्ऋतीनाम् उपद्रवकारिणां रक्षसां[1] ᵛपरिवृजं परिवर्जनम् । हिरवधारणे । त्वमेव ᵛवेत्थ जानीषे । तत्र दृष्टान्तः । ᵛअहरहः ᵛशुन्ध्युः । अस्मिन्नुदिते सति ब्राह्मणा आत्मीयं कर्म कृत्वा शुद्धा भवन्तीति शोधनहेतुत्वात् शुन्ध्युरादित्यः । ᵛपरिपदामिव परितो यजमानानामिव । यद्वा । परिपदां समानाधिकरणः । परितः पततां पक्षिणां वर्जनं स्वस्थानत्यागमहरहः प्रतिदिवसं यथा वेत्ति । उदिते सूर्ये पक्षिणः स्वस्थानं परित्यज्य सर्वतो गच्छन्ति खलु । एवं त्वयीन्द्रे स्वबलेन प्रकाशमाने सति शत्रवः स्वपुरादि त्यक्त्वा पलायन्त इत्यर्थः ॥

तदिन्द्राव आ भर येना दंसिष्ठ कृत्वने । द्विता कुत्साय शिश्नथो नि चोदय॥२५॥

तत् । इन्द्र । अवः । आ । भर । येन । दंसिष्ठ । कृत्वने ।

द्विता । कुत्साय । शिश्नथः । नि । चोदय ॥ २५ ॥

हे ᵛइन्द्र ᵛतत् ᵛअवः तद्रक्षणमस्मभ्यम् ᵛआ ᵛभर । हे ᵛदंसिष्ठ अत्यन्तं दर्शनीय यद्वा शत्रूणामुपक्षपयितरिन्द्र ᵛकृत्वने कर्म कुर्वते यजमानाय तदर्थं ᵛयेन पालनमकृथाः तद्रक्षणम् आभरेति समन्वयः । किंच ᵛकुत्साय कुत्सनामकाय राजर्षये ᵛद्विता द्विधा द्विप्रकारेण ᵛशिश्नथः त्वं शत्रूनवधीः । तस्मै द्वैधं[2] पालनमकार्षीरित्यर्थः । तद्रक्षणमस्मभ्यं[3] ᵛनि ᵛचोदय नितरामत्यर्थं प्रेरय । यद्वा कृत्वन इति सामान्येनोक्त्वा विशेषेण तदेवाह कुत्सायेत्यादि । शेषं पूर्ववत् ॥ ॥ १९ ॥

तमु त्वा नूनमीमहे नव्यं दंसिष्ठ सन्यसे ।
स त्वं नो विश्वा अभिमातीः सक्षणिः ॥ २६ ॥

तम् । ऊँ इति । त्वा । नूनम् । ईमहे । नव्यम् । दंसिष्ठ । सन्यसे ।

सः । त्वम् । नः । विश्वाः । अभिऽमातीः । सक्षणिः ॥ २६ ॥

हे ᵛदंसिष्ठ अतिशयेन दर्शनीयेन्द्र ᵛनव्यं स्तोतृभिः स्तोतव्यं ᵛतमु तादृशमेव ᵛत्वा त्वां ᵛनूनम् इदानीम् ᵛईमहे वयं याचामहे । किमर्थम् । ᵛसंन्यसे । 'असु क्षेपणे' । भावे क्विप् । संन्यासार्थं याचामह इति शेषः । ᵛसः तादृशः ᵛत्वं ᵛनः अस्माकं ᵛविश्वाः सर्वाः ᵛअभिमातीः शत्रुसेनाः ᵛसक्षणिः । सहेः सनिप्रत्ययः । सहनशीलोऽभिभवनशीलो भवसि ॥

य ऋक्षादंहसो मुचद्यो वार्यात्सप्त सिन्धुषु । वधर्दासस्य तुविनृम्ण नीनमः ॥२७॥

यः । ऋक्षात् । अंहसः । मुचत् । यः । वा । आर्यात् । सप्त । सिन्धुषु ।

वधः । दासस्य । तुविऽनृम्ण । नीनमः ॥ २७ ॥

---

१. ज्ञ-भ-राक्षसादीनां । २. ग-न-भ-श-द्विविधं । ३. ग-त-य-°मप्यस्मभ्यं ।

पूर्वोऽर्धर्चः परोक्षकृतः । [v]यः इन्द्रः [v]ऋक्षात् । ऋन् मनुष्यान् क्षणोति । क्षणोतेरौणादिको डप्रत्ययः । तस्मात् रक्षसो जातात् [v]अंहसः पापरूपादुपद्रवात् [v]मुचत् मुञ्चति । राक्षस एनं न बाधते किं पुनस्तं हन्तीत्यर्थः । अपि[1] च[1] [v]यः इन्द्रः [v]सप्त [v]सिन्धुषु गङ्गाद्यासु नदीषु । यद्वा । सप्त सर्पणशीलासु सिन्धुषु । तत्कूलेष्वित्यर्थः । गङ्गायां घोष इतिवत् । तेषु वर्तमानानां स्तोतॄणाम् [v]आर्यात् धनादिकं प्रेरयेत् । ' ऋ गतिप्रापणयोः ' । आशीर्लिङि ' गुणोऽर्तिसंयोगाद्योः ' (पा. सू. ७. ४. २९) इति गुणः । ' बहुलं छन्दसि ' इति लिङ्यप्याडागमः । अथ प्रत्यक्षः । हे [v]तुविनृम्ण बहुधनेन्द्र [v]दासस्य उपक्षपयितुरसुरस्य [v]वधः हननसाधनमायुधं [v]नीनमः नमय ॥

यथा वरो सुषाम्णे सनिभ्य आवहो रयिम् । व्यश्वेभ्यः सुभगे वाजिनीवति ॥२८॥

यथा । वरो इति । सुऽसाम्ने । सनिऽभ्यः । आ । अवहः । रयिम् ।
विऽअश्वेभ्यः । सुऽभगे । वाजिनीऽवति ॥ २८ ॥

अनेन तृचेन वरोदानं स्तूयते । हे [v]वरो वरुनामक राजन् [v]सुषाम्णे सुसाम्ने सुषामास्त्यं राजानं स्वपितरमुद्दिश्य तस्योत्तमलोकप्राप्त्यर्थं [v]सनिभ्यः भिक्षमाणेभ्यः [v]आ कोशादाहृत्य [v]रयिं धनं [v]यथा पुरा [v]अवहः प्रापितवानसि अत एवमिदानीं [v]व्यश्वेभ्यः व्यश्वपुत्रेभ्यः[2] अस्मभ्यं धनमावह। वाजिनीवतीति पदलिङ्गादियमुषस्या । अयं तृचोऽप्युषस्य इति शौनकेनोक्तं—' यथा वरो सुषाम्ण इत्युत्तमस्वौषसस्तृचः ' इति । हे [v]सुभगे शोभनधनयुक्ते [v]वाजिनीवति अन्नवति । मतुबनुवादार्थः । यद्वा । वाजो वाजनं गमनमस्यास्तीति वाजिन्यन्नम् । तद्वति हे उषः त्वं चास्मभ्यं धनं प्रयच्छ। वरोर्बहुधनदानात्तस्य दानस्तुतिः । यद्वा । विश्वमना ऋषिर्वरुं संबोध्याह । हे सुभगे शोभनधने वाजिनीवति अन्नवति हे उषः यथा त्वं सुषाम्णे सुपामनाम्ने मम पित्रे धनं दत्वा तेनैव सुपाम्णा सनिभ्यो याचमानेभ्यो धनं यथा प्रापितवत्यसि तेन यथा दानमकारयः एवं मह्यमपि धनं दत्वा व्यश्वेभ्यः । पूजायां बहुवचनम् । व्यश्वपुत्राय विश्वमनसे धनं प्रापयेति मयापि दानं करोषि । हे वरो उपसमेवं वदेत्यृषिराह ॥

आ नार्यस्य दक्षिणा व्यश्वाँ एतु सोमिनः । स्थूरं च राधः शतवत्सहस्रवत् ॥२९॥

आ । नार्यस्य । दक्षिणा । विऽअश्वान् । एतु । सोमिनः ।
स्थूरम् । च । राधः । शतऽवत् । सहस्रऽवत् ॥ २९ ॥

अनया धनमृषिरादत्तवानित्याह । [v]नार्यस्य । नरहितो नर्यः । तस्यापत्यं नार्यः । तस्मात् संबन्धमात्रे ' तस्येदम् ' इत्यण् । तस्य [v]सोमिनः सोमवतो यजमानस्य । यद्वा । व्यश्वानां विशेषणम् । तादृशस्य वरोः [v]दक्षिणा दानं सोमवतः [v]व्यश्वान् व्यश्वपुत्रानस्मान् [v]आ [v]एतु आगच्छतु[3] । किंच [v]स्थूरं स्थूलं [v]शतवत्सहस्रवत् शतसहस्रधनयुक्तं [v]राधः अन्नं [v]च अस्मानागच्छतु ॥

यत्त्वा पृच्छादीजानः कुहया कुहयाकृते । एष अपश्रितो वलो गोमतीमव तिष्ठति ॥३०॥

यत् । त्वा । पृच्छात् । ईजानः । कुहया । कुहयाऽकृते ।
एषः । अपऽश्रितः । वलः । गोऽमतीम् । अव । तिष्ठति ॥ ३० ॥

इदानीमुषसं संबोध्याभिधीयते । हे [v]कुहयाकृते स वरुः कुह कुत्र तिष्ठतीत्येतदिच्छया[4] अभिलक्षणप्रवृत्तैर्जिज्ञासुभिः पुरस्कृते । कुहशब्दात् क्यच् । एतादृशे हे उषः [v]त्वा त्वां [v]यत् यदा

१. ग–योपि वा; घ–वा अपि च; न-भ१-३–व्येपि च; भ३–योपि च । २. ग-भ३–व्यश्वस्य°; त-न-भ१–स्वव्यश्व°; य–सुव्यश्व° । ३. ख-घ-त-न-भ२-य-श–आगच्छति; भ१–अगच्छती । ४. भ–°त्येतयेच्छया ।

कश्चित् [v]पृच्छात् पृच्छति [v]ईजानः इष्टवान् वरुः [v]कुहया क्व तिष्ठतीति यदा पृच्छति तदानीम् [v]अपश्रितः सर्वैराश्रितः। यद्वा। विवृतद्वारः। यदा याचमाना आगच्छन्ति तदा दौवारिका न प्रतिबध्नन्तीत्यर्थः। तादृशः [v]वलः वरः स्वबलेनावारकः शत्रूणाम्। यद्वा। भिक्षूणां धनादिप्रदानेनावरिता। [v]एषो एष वरुः [v]गोमतीम् एतन्नामिकां नदीम्। 'कालाध्वनोः' इति द्वितीया। तस्यास्तीरे [v]अव [v]तिष्ठति इति तदानीं त्वं कथयसि ॥ ॥ २० ॥

'ता वाम्' इति चतुर्विंशत्यृचं पञ्चमं सूक्तम्। अत्रेयमनुक्रमणिका—'ता वां चतुर्विंशतिर्मैत्रावरुणं दृशम्याद्यास्तिस्रो वैश्वदेव्य उपान्त्योष्णिगगर्भा' इति। व्यश्वपुत्रो विश्वमना ऋषिः। उष्णिक्[1] छन्दः। उपान्त्या[2] उष्णिगगर्भा 'षट्सप्तैकादशा उष्णिगगर्भा' (अनु. ४. ३) इति तल्लक्षणोपेतत्वात्। दशम्येकादशीद्वादश्यो वैश्वदेव्योऽवशिष्टानां मित्रावरुणौ देवता। सूक्तविनियोगो लैङ्गिकः ॥

ता वां विश्वस्य गोपा देवा देवेषु यज्ञिया। ऋतावाना यजसे पूतदक्षसा ॥ १ ॥

ता। वाम्। विश्वस्य। गोपा। देवा। देवेषु। यज्ञिया। ऋतऽवाना। यजसे। पूतऽदक्षसा ॥१॥

हे मित्रावरुणौ [v]विश्वस्य सर्वस्य लोकस्य [v]गोपा गोपायितारौ [v]देवा देवौ द्योतनशीलौ[3] [v]देवेषु[4] मध्ये [v]यज्ञिया यज्ञार्हौ [v]ता तौ तादृशौ [v]वां युवां हविष्प्रदानार्थं यजमानं भजथः। अत एव हे विश्वमनः [v]ऋतावाना ऋतावानौ सत्यवन्तौ यज्ञवन्तौ वा पूतदक्षसौ शुद्धबलौ। आवां बलवन्ताविति वचनमात्रेण बलवन्तौ न भवतः किंतु यथार्थत्वेन सामर्थ्यवन्तौ[4]। मित्रावरुणौ [v]यजसे हविर्भिः पूजयसि ॥

मित्रा तना न रथ्या वरुणो यश्च सुक्रतुः। सनात्सुजाता तनया घृतव्रता ॥२॥

मित्रा। तना। न। रथ्या। वरुणः। यः। च। सुऽक्रतुः।
सनात्। सुऽजाता। तनया। घृतऽव्रता ॥ २ ॥

[v]सुक्रतुः शोभनकर्मा [v]यः [v]वरुणः सुकर्मा [v]मित्रा [v]च मित्रावरुणौ। कीदृशौ। [v]तना। तन्वन्ति मुकुटकटकादिनेति तनानि धनानि। नश्चार्थे। धनानि च [v]रथ्या रथ्यौ नेतारौ। यद्वा। धनानि कर्मणः कर्त्रपेक्षत्वात् प्रयच्छन्ताविति संबध्यते। तादृशौ रथ्यौ रथवन्तौ [v]सनात् चिरादेव [v]सुजाता सुजातौ शोभनजन्मानौ। तदेवाह। [v]तनया तनयौ अदितेः पुत्रौ [v]घृतव्रता घृतव्रतौ घृतकर्माणौ ता यजस इति पूर्वेण समन्वयः ॥

ता माता विश्ववेदसासुर्याय प्रमहसा। मही जजानादितिर्ऋतावरी ॥ ३ ॥

ता। माता। विश्वऽवेदसा। असुर्याय। प्रऽमहसा। मही। जजान। अदितिः। ऋतऽवरी ॥३॥

अदितेस्तनयत्वमेव स्फुटयति। [v]विश्ववेदसा विश्ववेदसौ सर्वधनौ। यद्वा। विश्वानि स्थावरजङ्गमात्मकानि सर्वाणि विदतुर्जानीत इति विश्ववेदसौ। [v]प्रमहसा प्रमहसौ प्रकृष्टतेजस्कौ [v]ता तौ तादृशौ मित्रावरुणौ [v]मही महती [v]ऋतावरी सत्यवती [v]माता देवमाता [v]अदितिः [v]जजान जनयामास। किमर्थम्। [v]असुर्याय असुराणां हन्त्रे बलाय। असुरान् हन्तुमुत्पादितवतीत्यर्थः ॥

महान्ता मित्रावरुणा सम्राजा देवावसुरा। ऋतावानावृतमा घोषतो बृहत् ॥४॥

---

१. ख-ज्ञ-त१-२-भ–पूर्ववदुष्णिक्। २. त१-२-भ–त्रयोविंशी। ३. त-न-भ–द्योतमानशीलौ। ४. ग–युवां बलवन्ताविति वचनमात्रेण बलवन्तौ न भवतः। किंतु यज्ञार्थत्वेन सामर्थ्यवन्तौ यज्ञवन्तौ वा पूतदक्षसौ शुद्धबलौ युवां बलवन्तौ इति वचनमात्रेण।

महान्ता । मित्रावरुणा । सम्ऽराजा । देवौ । असुरा ।
ऋतऽवानौ । ऋतम् । आ । घोषतः । बृहत् ॥ ४ ॥

vमहान्ता गुणाधिक्येन महान्तौ vसम्राजा सम्राजौ सम्यग्दीप्यमानौ[1] vअसुरा असुरौ बलवन्तौ । यद्वा । सर्वान्तर्यामितया प्रेरकौ । ऋतावाना सत्यवन्तौ मित्रावरुणौ[2] vदेवौ vबृहत् स्तोत्रशस्त्रादिना महान्तम् vऋतं यज्ञम् vआ vघोषतः स्वदीप्त्या प्रकाशयतः । घुषेर्लटि रूपम् ॥

नपाता शवसो महः सूनू दक्षस्य सुक्रतू । सुप्रदानू इषो वास्त्वधि क्षितः ॥ ५ ॥

नपाता । शवसः । महः । सूनू इति । दक्षस्य । सुक्रतू इति सुऽक्रतू ।
सुप्रदानू इति सुप्रऽदानू । इषः । वास्तु । अधि । क्षितः ॥ ५ ॥

vमहः महतः vशवसः बलस्य vनपाता नपातौ पौत्रौ । बलत[3] उत्पादितावितिः[3] बलस्य पौत्रौ । तादृशौ vदक्षस्य । ' दक्ष वृद्धौ शीघ्रार्थे च ' इति दक्षो वेगः । तस्य vसूनू पुत्रौ । बलाद्वेग इति तयोः पुत्रत्वम् । तौ vसुक्रतू शोभनकर्माणौ vसुप्रदानू प्रसृतधनादिदानौ मित्रावरुणौ vइषः अन्नस्य vवास्तु[4] निवासस्थाने vअधि vक्षितः अधिवसतः । ' अधिशीङ्° ' इति वास्तुनः कर्मसंज्ञा । क्षयतेः[5] लटि छान्दसो विकरणस्य लुक् ॥ ॥ २१ ॥

सं या दानूनि येमथुर्दिव्याः पार्थिवीरिषः । नभस्वतीरा वां चरन्तु वृष्टयः ॥६॥

सम् । या । दानूनि । येमथुः । दिव्याः । पार्थिवीः । इषः ।
नभस्वतीः । आ । वाम् । चरन्तु । वृष्टयः ॥ ६ ॥

हे[6] मित्रावरुणौ यौ युवां vदानूनि देयानि धनानि vसं vयेमथुः अस्मासु संयच्छतं तथा vदिव्याः दिव्यानि दिवि भवानि vपार्थिवीः पृथिव्यामुत्पन्नानि vइषः अन्नानि संयच्छतम् । वृष्टयभावे कथमन्नं लभ्यत इति चेत् तदुच्यते । vनभस्वतीः उदकवत्यः vवृष्टयः तादृशौ vवां युवाम् vआ vचरन्तु उपतिष्ठन्तु । यदा वृष्टयवेला तदा वर्षतमित्यर्थः[6] ॥

अधि या बृहतो दिवोऽभि यूथेव पश्यतः । ऋतावाना सम्राजा नमसे हिता ॥७॥

अधि । या । बृहतः । दिवः । अभि । यूथाऽइव । पश्यतः ।
ऋतऽवाना । सम्ऽराजा । नमसे । हिता ॥ ७ ॥

vया यौ मित्रावरुणौ vबृहतो vदिवः द्योतमानान् देवान् vअधि vपश्यतः । तत्र दृष्टान्तः । vयूथेव । यथा वृषभो गोयूथानि रन्तुम् vअभि अभिमुखं पश्यति तद्वदेतौ स्ववीर्येणासुरान् हत्वा देवान् मोदयितुं पश्यत इत्यर्थः । कीदृशौ । vऋतावाना सत्यवन्तौ vसम्राजा सम्राजौ सम्यग्दीप्यमानौ vनमसे हविषे vहिता हितौ प्रियौ पश्यत इति ॥

ऋतावाना नि षेदतुः साम्राज्याय सुक्रतू । धृतव्रता क्षत्रिया क्षत्रमाशतुः ॥ ८ ॥

---

१. ग–सम्यग्राजमानौ । २. घ–मित्रावरुणा मित्रावरुणौ । ३. ग–बलेनोत्पा°; त२–बलतोत्पा°; भ-श–बलवतोत्पा° । ४. भ२-३–वास्तु वास्तुनि । ५. भ–क्षी(? क्षि)यतेः । ६. ग–यौ युवां दानूनि देयानि धनानि सं येमथुः सम्यक् प्रयच्छथः दिव्याः पार्थिवारिषः दिव्यानि पार्थिवानि चान्नानि तव युवां नभस्वतीरुदकवत्यः वृष्टयः आचरन्तूपतिष्ठन्तु ।

ऋतऽवाना । नि । सेदतुः । साम्ऽराज्याय । सुऽकृतू इति सुऽकृतू ।
धृतऽव्रता । क्षत्रियां । क्षत्रम् । आशतुः ॥ ८ ॥

vऋतावाना ऋतावानौ सत्यवन्तौ vसुकृतू शोभनकर्माणौ सुप्रज्ञौ वा मित्रावरुणौ vसाम्राज्याय साम्राज्यार्थं vनि vषेदतुः न्यसीदताम् । तथा मन्त्रः —'नि षसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुः' (ऋ. सं. १. २५. १०) इति । vधृतव्रता धृतव्रतौ धृतकर्माणौ vक्षत्रिया क्षत्रियौ बलवन्तौ vक्षत्रं बलम् vआशतुः आनशाते व्याप्नुत इत्यर्थः ॥

अक्ष्णश्चिद्धातुवित्तरानुल्बणेन चक्षसा । नि चिन्मिषन्ता निचिरा नि चिक्यतुः ॥९॥

अक्ष्णः । चित् । गातुवित्ऽतरा । अनुल्बणेन । चक्षसा ।
नि । चित् । मिषन्ता । निऽचिरा । नि । चिक्यतुः ॥ ९ ॥

vअक्ष्णश्चित् चक्षुषोऽपि पूर्वं vगातुवित्तरा गातुवित्तरावतिशयेन मार्गवेत्तारौ । यद्वा । गातुवित्तरौ गातु गमनशीलं प्राणिजातं चक्षुषोऽपि पूर्वं वेत्तारौ मित्रावरुणौ । कीदृशौ । vनि vमिषन्ता निमिषन्तौ सर्वमुन्मेषयन्तौ स्वस्वकर्मणि vनिचिरा नितरां चिरंतनौ तौ vअनुल्बणेन । उल्बणमिति[1] दुःसहमप्रेस्तेजः[2] । तद्वददुःसहेन vचक्षसा अहोरात्रयोर्व्याप्तेन तेजसैव vनि vचिक्यतुः पूजितौ बभूवतुः । vचित् अवधारणे ॥

उत नो देव्यदितिरुरुष्यतां नासत्या । उरुष्यन्तु मरुतो वृद्धशवसः ॥ १० ॥

उत । नः । देवी । अदितिः । उरुष्यताम् । नासत्या । उरुष्यन्तु । मरुतः । वृद्धऽशवसः ॥१०॥

vउत अपि च vदेवी[3] द्योतनशीला vअदितिः मित्रावरुणयोर्माता vनः अस्मान् रक्षतु । vनासत्या नासत्यौ । असत्यमनयोर्नास्तीति नासत्यौ । अश्विनौ च vउरुष्यतां रक्षताम् । उरुष्यतिः कण्ड्वादिः । vवृद्धशवसः वृद्धवेगाः । अतिशयेन वेगवन्त इत्यर्थः । यद्वा वर्धनशीलहविर्लक्षणान्नोपेताः । vमरुतः vउरुष्यन्तु अस्मान् पालयन्तु ॥ ॥ २२ ॥

ते नो नावमुरुष्यत दिवा नक्तं सुदानवः । अरिष्यन्तो नि पायुभिः सचेमहि ॥११॥

ते । नः । नावम् । उरुष्यत । दिवा । नक्तम् । सुऽदानवः ।
अरिष्यन्तः । नि । पायुऽभिः । सचेमहि ॥ ११ ॥

हे vसुदानवः शोभनदाना मरुतः vअरिष्यन्तः केनाप्यहिंसिताः vते तादृशा यूयं vनः अस्मदीयां vनावं यज्ञियां नावं vदिवा vनक्तं च vउरुष्यत पालयत । ततो वयं vपायुभिः युष्मदीयैः पालनैः vनि vसचेमहि नितरां समवेता भवेम ॥

अघ्नते विष्णवे वयमरिष्यन्तः सुदानवे । श्रुधि स्वयावन्त्सिन्धो पूर्वचित्तये ॥१२॥

अघ्नते । विष्णवे । वयम् । अरिष्यन्तः । सुऽदानवे ।
श्रुधि । स्वऽयावन् । सिन्धो इति । पूर्वऽचित्तये ॥ १२ ॥

---

१. न-भ१-श-°मतिदुःसह° । २. त-न-भ-अदितिः देवी ।

पूर्वोऽर्धर्चः परोक्षकृतः । vअरिष्यन्तः[1] पालनवत्त्वात् केनाप्यबाधिताः vवयम् vअग्नते स्तोतॄणां यष्टॄणां चाहिंसकाय vसुदानवे शोभनदानाय vविष्णवे स्वमहत्त्वेन सर्वव्यापकायैतन्नामकाय देवाय स्तुतिं कुर्मः । अथ प्रत्यक्षः । हे vस्वयावन् । स्वयमेवासहायः सन् दिवि संग्रामे वा यातीति स्वयावान् । vसिन्धो स्तोतॄन् प्रति धनानां स्यन्दनशील विष्णो vपूर्ववित्तये । चित्तिः कर्म । मन्त्रान्तरेऽपि तथा श्रवणात्—'सा चित्तिभिर्नि हि चकार मर्त्यम्' (ऋ. सं. १. १६४. २९) इति । पूर्वं प्रारब्धकर्मणे यजमानाय तदर्थं vश्रुधि अस्माभिः क्रियमाणां स्तुतिं त्वं शृणु ॥

तद्वार्यं वृणीमहे वरिष्ठं गोपयत्यम् । मित्रो यत्पान्ति वरुणो यदर्यमा ॥ १३ ॥

तत् । वार्यम् । वृणीमहे । वरिष्ठम् । गोपयत्यम् ।
मित्रः । यत् । पान्ति । वरुणः । यत् । अर्यमा ॥ १३ ॥

vवरिष्ठम् उरुतरं vगोपयत्यं सर्वेषां रक्षकं यतैः[2] पालनीयं वा vवार्यं सर्वैर्वननीयं vतत् धनं vवृणीमहे वयं संभजामहे । vयत् धनं vमित्रः सर्वेषां मित्रभूतः vवरुणः शत्रूणां वारयिता vअर्यमा सर्वदा गच्छन् एतन्नामकास्त्रयो देवाः vपान्ति पालयन्ति । तद्धनं वृणीमहे । अस्मदीयस्य धनस्य रक्षका भवन्तीत्यर्थः ॥

उत नः सिन्धुरपां तन्मरुतस्तद्दश्विना । इन्द्रो विष्णुर्मीढ्वांसः सजोषसः ॥१४॥

उत । नः । सिन्धुः । अपाम् । तत् । मरुतः । तत् । अश्विना ।
इन्द्रः । विष्णुः । मीढ्वांसः । सऽजोषसः ॥ १४ ॥

पुनरपि धनरक्षणमेवाशास्ते । vउत अपि च vअपाम् उदकानां vसिन्धुः स्यन्दनशीलः पर्जन्यः vनः अस्मदीयं vतत् धनं रक्षतु । vतत् एव vमरुतः च पालयन्तु । vअश्विना अश्विनौ देवौ तद्धनं पालयताम् । तथा vइन्द्रः vविष्णुः च vमीढ्वांसः कामानां सेक्तार एते सर्वे देवाः vसजोषसः संगताः सन्तोऽस्मदीयं धनं रक्षन्तु । एते देवा अस्मभ्यं धनं दत्त्वा पालयन्त्वित्यर्थः ॥

ते हि ष्मा वनुषो नरोऽभिमातिं कयस्य चित् । तिग्मं न क्षोदः प्रतिघ्नन्ति भूर्णयः ॥१५॥

ते । हि । स्म । वनुषः । नरः । अभिऽमातिम् । कयस्य । चित् ।
तिग्मम् । न । क्षोदः । प्रतिऽघ्नन्ति । भूर्णयः ॥ १५ ॥

vवनुषः वननीयाः संभजनीयाः vनरः नेतारः vते vहि vष्मा ते खलु देवाः vभूर्णयः क्षिप्रगमनाः सन्तः vकयस्य vचित् कस्यचिच्छत्रोः vअभिमातिम् अभिमानं vप्रतिघ्नन्ति प्रतिकूलं यथा भवति तथा हिंसन्ति । तत्र दृष्टान्तः । vतिग्मं vन यथा तिग्मं तीक्ष्णं जवेन गच्छत् vक्षोदः उदकमग्रतः स्थितं वृक्षमुन्मूलयति तद्वत्तस्याभिमानं घ्नन्तीत्यर्थः ॥ ॥ २३ ॥

अयमेकं इत्था पुरूरु चष्टे वि विश्पतिः । तस्य व्रतान्यनु वश्चरामसि ॥ १६ ॥

अयम् । एकः । इत्था । पुरु । उरु । चष्टे । वि । विश्पतिः ।
तस्य । व्रतानि । अनु । वः । चरामसि ॥ १६ ॥

---

१. न-श–अरिष्यंतो मारुतः; भ१-२–अरिष्यंतो मरुतः । २. ज्ञ्य–सर्वैः; भ२–स्तवैः ।

मित्रस्य कर्माण्याह । vविशपतिः विशां पालयिता अनयोर्मित्रावरुणयोः vएकः vअयं मित्रः vपुरु पुरूणि बहूनि च vउरु उरूणि च द्रव्याणि vइत्था इत्थं vवि vचष्टे स्वतेजसा पश्यति । vतस्य मित्रस्य vव्रतानि कर्माणि[1] vवः युष्मदर्थम् vअनु vचरामसि अनुचरामः । कुर्म इत्यर्थः ॥

अनु पूर्वाण्योक्या साम्राज्यस्य सश्चिम । मित्रस्य व्रता वरुणस्य दीर्घश्रुत् ॥१७॥

अनु । पूर्वाणि । ओक्या । साम्ऽराज्यस्य । सश्चिम ।
मित्रस्य । व्रता । वरुणस्य । दीर्घऽश्रुत् ॥ १७ ॥

vसाम्राज्यस्य । सम्राजो भावः साम्राज्यम् । साम्राज्यमस्यास्तीति साम्राज्यः । 'अर्श-आदिभ्यः' इत्यच्प्रत्ययः । साम्राज्यवतो वरुणस्य vपूर्वाणि[2] पुरातनानि vओक्या । ओको गृहम् । तस्मै हितानि कर्माणि वयं vसश्चिम । सश्चतिर्गतिकर्मा । लिटि रूपम् । द्विर्वचनस्य छन्दसि विकल्पितत्वादत्र द्विर्वचनाभावः । तदेवाह । vमित्रस्य vव्रता व्रतानि कर्माणि च vदीर्घश्रुत् । 'सुपां सुलुक्०' इति षष्ठ्या लुक् । दीर्घश्रुतोऽतिशयेन प्रसिद्धस्य vवरुणस्य व्रतानि च सश्चिमेति ॥

परि यो रश्मिना दिवोऽन्तान्ममे पृथिव्याः । उभे आ पप्रौ रोदसी महित्वा॥१८॥

परि । यः । रश्मिना । दिवः । अन्तान् । ममे । पृथिव्याः ।
उभे इति । आ । पप्रौ । रोदसी इति । महिऽत्वा ॥ १८ ॥

vयः मित्रः vदिवः vपृथिव्याः द्यावापृथिव्योः vअन्तान्[3] vरश्मिना स्वतेजसा vपरि vममे परिमिनोति । तयोः पर्यन्तान् स्वरश्मिना भासयतीत्यर्थः । स एव vउभे vरोदसी द्यावापृथिव्यौ vमहित्वा स्वमहिम्ना vआ vपप्रौ आ समन्तात् पूरयति ॥

उदु ष्य शरणे दिवो ज्योतिरयंस्त सूर्यः । अग्निर्न शुक्रः समिधान आहुतः॥१९॥

उत् । ऊँ इति । स्यः । शरणे । दिवः । ज्योतिः । अयंस्त । सूर्यः ।
अग्निः । न । शुक्रः । सम्ऽइधानः । आऽहुतः ॥ १९ ॥

vसूर्यः सुवीर्यः सुष्ठु सर्वस्य प्रेरकः vस्यः स मित्रो वरुणश्च vदिवः द्योतमानस्यादित्यस्य vशरणे स्थाने नभसि vज्योतिः आत्मीयं तेजः vउत् vअयंस्त उद्यच्छति । ऊर्ध्वं गमयति । सर्वत्र विस्तारयतीत्यर्थः । यमेर्लुङि रूपम् । ततः सः vअग्निर्न vशुक्रः अग्निरिव दीप्यमानः vसमिधानः हविर्भिः समिध्यमानः vआहुतः सर्वैराहूतस्तिष्ठति ॥

वचो दीर्घप्रसद्मनीशे वाजस्य गोमतः । ईशे हि पित्वोऽविषस्य दावने ॥ २० ॥

वचः । दीर्घऽप्रसद्मनि । ईशे । वाजस्य । गोऽमतः । ईशे । हि । पित्वः । अविषस्य । दावने ॥२०॥

हे स्तोतः vदीर्घप्रसद्मनि दीर्घं प्रततं विस्तृतं सद्म सदनं यस्मिन् यज्ञे vवचः मित्रं वरुणं च स्तुहि । वक्तेर्लेट्यडागमः । स वरुणः vगोमतः पशुमतः vवाजस्य अन्नस्य vईशे ईष्टे स्वामी भवति । केवलं स्वामी न भवति किंतु vअविषस्य महतः प्रीतिकारिणः vपित्वः अन्नस्य vदावने दानाय च vईशे समर्थो भवति । ये स्तोत्रं कुर्वन्ति तेभ्योऽन्नं ददातीत्यर्थः ॥ ॥ २४ ॥

---

१. घ–कर्माणि हे देवाः । २. त-भ–पूर्व्याणि । ३. ख-त२-३-न–अंतरान्; घ-श–अंतान् अंतरान् ।

तत्सूर्यं रोदसी उभे दोषा वस्तोरुप ब्रुवे । भोजेष्वस्माँ अभ्युच्चरा सदा ॥ २१ ॥

तत् । सूर्यम् । रोदसी इति । उभे इति । दोषा । वस्तोः । उप । ब्रुवे ।
भोजेषु । अस्मान् । अभि । उत् । चर । सदा ॥ २१ ॥

[v]सूर्यं सुवीर्यं [v]तत् वारुणं मैत्रं च तेजः [v]उभे [v]रोदसी उभे द्यावापृथिव्यौ च [v]दोषा[1]। 'सुपां सुलुक्' इति द्वितीयाया लुक्। 'कालाध्वनोः' इति द्वितीया। रात्रौ [v]वस्तोः[2] अहनि चाहम् [v]उप [v]ब्रुवे उपस्तौमि। त्वं स्तूयमानो वरुणः [v]भोजेषु दातृषु [v]अस्मान् [v]सदा [v]अभ्युच्चर सर्वदाभिमुखं प्रेरय। दातृष्वेतेषां दानेष्वस्मान् पुरोभाविनः कुर्वित्यर्थः ॥

ऋज्रमुक्षण्यायने रजतं हरयाणे । रथं युक्तमसनाम सुषामणि ॥ २२ ॥

ऋज्रम् । उक्षण्यायने । रजतम् । हरयाणे । रथम् । युक्तम् । असनाम । सुऽसामनि ॥ २२ ॥

सुषाम्णः पुत्रो वरुणाम राजा। स यद्दानं प्रादात् विश्वमनसे तदसौ विश्वमना ऋषिरनया आचष्टे । [v]उक्षण्यायने । उक्षनामा कश्चिद्वरोः पूर्वजः। तस्य गोत्रापत्य उक्षण्शब्दाण्ण्यः। तदन्तात् फक्प्रत्ययः। एतौ छान्दसौ। वृद्धिभावोऽपि 'संज्ञापूर्वको विधिरनित्यः' इति न भवति। तस्य गोत्रापत्ये [v]हरयाणे शत्रुजीवितैश्वर्यादिहरणशीलयाने एतादृशे [v]सुषामणि। बहुवल्पितृशब्देन पुत्रोऽभिधीयते । सुषाम्णः पुत्रे वरौ राजनि ददति सति किमभूत्। [v]ऋज्रम् ऋजुगामिनं [v]रजतं रजतमयं रजतसदृशं वा [v]युक्तम् अश्वाभ्यां युक्तं [v]रथम् [v]असनाम। एतेषां मित्रादीनां[3] प्रसादात् वयं संभक्तवन्तो लब्धवन्तोऽभूम ॥

ता मे अश्व्यानां हरीणां नितोशना । उतो नु कृत्व्यानां नृवाहसा ॥ २३ ॥

ता । मे । अश्व्यानाम् । हरीणाम् । निऽतोशना । उतो इति । नु । कृत्व्यानाम् । नृऽवाहसा ॥ २३ ॥

ऋषिः प्रतिगृहीतावश्वावाह[4]। [v]हरीणां हरितवर्णानाम् [v]अश्व्यानाम् अश्वसंघानां मध्ये [v]नितोशना नितोशनौ । तोशतिर्हिंसाकर्मा । शत्रूणामत्यन्तं बाधकृतौ [v]उतो अपि च [v]कृत्व्यानां युद्धकर्मणि कुशलानां च स्वकुशलमिति बाधकौ [v]नृवाहसा नृवाहसौ आयुधनेतॄणां मनुष्याणां वोढारौ [v]ता तावश्वौ [v]मे मह्यं [v]नु क्षिप्रं सौषाम्णेन वरुणा दत्तौ भवेताम् ॥

स्मदभीशू कशावन्ता विप्रा नविष्ठया मती । मुहो वाजिनावर्वन्ता सचासनम् ॥२४॥

स्मदभीशू इति स्मत्ऽअभीशू । कशाऽवन्ता । विप्रा । नविष्ठया ।
मती । मुहः । वाजिनौ । अर्वन्ता । सचा । असनम् ॥ २४ ॥

ऋषिरिदानीं तावश्वावग्रहीषमित्याह। [v]स्मदभीशू। स्मत्सुमत् । उकारलोपश्छान्दसः। शोभनरज्जुयुक्तौ यद्वा शोभनशरीरकान्ती[5] [v]कशावन्ता कशावन्तौ कशायुक्तौ [v]विप्रा विप्रौ मेधाविनामुचितौ। मेधावी स्तोता यथा स्तुत्यं देवं स्तुतिभिः प्रीणयति तद्वत् संतोषकौ। [v]महः महतः सौषाम्णस्य वरोः संबन्धिनौ [v]वाजिनौ शीघ्रगमनवन्तौ [v]अर्वन्ता अर्वन्तौ द्वावश्वौ [v]सचा सह

---

१. ख-त२-३-४-न-भ१-२-दोषां; घ-श-दोषावस्तोः। २. ख-घ-त-न-भ-श-'वस्तोः' नास्ति। ३. न-भ-मित्रादीनां देवानां। ४. भ१-प्रगृहीता°। ५. ख-त-न-भ-शोभनस्वशरीरकांती; श-शोभनकांती।

युगपदेव ᵛनविष्ठया नवतरया ᵛमती मत्या स्तुत्या मित्रादीन् स्तुवन् ᵛअसनम्। विश्वमना अहं समभजम्। प्रत्यग्रहीषमित्यर्थः ॥ ॥ २५ ॥

'युवोरु षू' इति पञ्चविंशत्यृचं षष्ठं सूक्तम्। अत्रानुक्रमणिका—'युवोः पञ्चाधिका व्यश्वो वाङ्गिरस आश्विनं विंश्याद्या वायव्यास्तत्पूर्वाश्चतस्रो गायत्र्योऽन्त्यैकविंश्यौ च विंश्यनुष्टुप्' इति। आङ्गिरसो व्यश्वो वैयश्वो विश्वमना वा ऋषिः। षोडश्याद्याश्चतस्रो गायत्र्यो विंश्यनुष्टुबेकविंशी पञ्चविंशी च गायत्र्यौ शिष्टाः पूर्ववदुष्णिहः। अश्विनौ देवता। विंश्याद्याः पञ्चर्चो वायुदेवताकाः। प्रातरनुवाक आश्विने क्रतौ औष्णिहे छन्दस्याश्विनशस्त्रे चादितः पञ्चदशर्चः। सूत्रितं च—'युवोरु षू रथं हुव इति पञ्चदशेत्यौष्णिहम्' (आश्व. श्रौ. ४. १५) इति ॥

युवोरु षू रथं हुवे सधस्तुत्याय सूरिषु। अर्तूर्तदक्षा वृषणा वृषण्वसू ॥ १ ॥

युवोः। ऊँ इति। सु। रथम्। हुवे। सधऽस्तुत्याय। सूरिषु।
अर्तूर्तऽदक्षा। वृषणा। वृषण्वसू इति वृषण्ऽवसू ॥ १ ॥

हे ᵛअर्तूर्तदक्षा। 'तॄ प्लवनतरणयोः' इत्यस्य निष्ठायां 'नसत्त०' इति सूत्रेण निपातितः[1]। परैरहिंसितबलौ ᵛवृषणा वृषणौ कामानां सेक्तारौ अत एव ᵛवृषण्वसू वर्षणशीलधनवन्तावश्विनौ ᵛयुवोः युवयो रथं ᵛसु ᵛहुवे सुष्ठु स्तोत्रादिभिराह्वयामि। किमर्थम्। ᵛसूरिषु प्राज्ञेषु स्तोतृषु मध्ये ᵛसधस्तुत्याय। स्तौतेर्भावे क्यप्। सह भवन्तौ स्तोतुम्। तस्माद्युवयोः शीघ्रगत्यै युष्मद्गमनसाधनरथमेवाह्वयामि ॥

युवं वरो सुषाम्णे महे तने नासत्या। अवोभिर्याथो वृषणा वृषण्वसू ॥ २ ॥

युवम्। वरो इति। सुऽसाम्ने। महे। तने। नासत्या।
अवःऽभिः। याथः। वृषणा। वृषण्वसू इति वृषण्ऽवसू ॥ २ ॥

ऋषिर्वरुं राजानं संबोध्याह। हे ᵛनासत्या नासत्यौ। न विद्यतेऽसत्यमनयोरिति नासत्यौ। ᵛवृषणा कामानां वर्षितारौ ᵛवृषण्वसू वर्षणशीलवसुमन्तावश्विनौ[2] ᵛयुवं युवां ᵛसुषाम्णे सुषामाख्यराज्ञे मम पित्रेऽस्मै ᵛमहे महते ᵛतने। तनोतीति तनं धनम्। धनाय। 'क्रियार्थोपपदस्य०' इति चतुर्थी। तस्मै धनं दातुं पुरा यथागच्छतं तद्वत् मह्यमपि धनं दातुम् ᵛअवोभिः पालनैः सह ᵛयाथः[3] युवामायातमिति हे ᵛवरो वरुनामक राजन्नेवं ब्रूहीति ऋषिर्वदति ॥

ता वामद्य हवामहे हव्येभिर्वाजिनीवसू। पूर्वीरिष इषयन्तावति क्षपः ॥ ३ ॥

ता। वाम्। अद्य। हवामहे। हव्येभिः। वाजिनीवसू इति वाजिनीऽवसू।
पूर्वीः। इषः। इषयन्तौ। अति। क्षपः ॥ ३ ॥

हे ᵛवाजिनीवसू अन्नयुक्तधनवन्तावश्विनौ ᵛपूर्वीः बहूनि ᵛइषः अन्नानि ᵛइषयन्तौ। 'इषु इच्छायाम्'। इच्छन्तौ ᵛता तौ प्रसिद्धौ ᵛवां युवाम् ᵛअद्य अस्मिन् यागदिने ᵛअति ᵛक्षपः क्षपाया अतिक्रमे। उषःकाल इत्यर्थः। तस्मिन्नुषःकाले ᵛहव्येभिः हविर्लक्षणैरन्नैः सह वयं ᵛहवामहे आह्वयामः। आश्विनशस्त्रस्य तत्र शस्यमानत्वादुषःकाल एवाह[4]। याग[4] इत्यर्थः ॥

आ वां वाहिष्ठो अश्विना रथो यातु श्रुतो नरा। उप स्तोमान्तुरस्य दर्शथः श्रिये ॥४॥

---

१. भ–निपातः। २. घ–वर्षणशीलधनावश्विनौ। ३. त-भ–आयाथः। ४. भ३–एवाह्वयाम।

आ । वाम् । वाहिष्ठः । अश्विना । रथः । यातु । श्रुतः । नरा ।
उप । स्तोमान् । तुरस्य । दर्शथः । श्रिये ॥ ४ ॥

हे vनरा सर्वस्य नेतारौ vअश्विना अश्विनौ vवां युवयोः vवाहिष्ठः वोढृतमः vश्रुतः विश्रुतः सर्वत्र प्रसिद्धः vरथः vआ vयातु अस्मदीयं यज्ञं प्रत्यागच्छतु । तेन रथेन युवामागत्य vतुरस्य क्षिप्रं स्तोत्रं कुर्वतस्तस्य vस्तोमान् त्रिवृत्पञ्चदशादिस्तोमान् vश्रिये तस्यैश्वर्यप्रदानाय vउप vदर्शथः । पश्यतिर्ज्ञानकर्मा । जानीतम् । दृशेर्लटि व्यत्ययेनाङादेशः ॥

जुहुराणा चिदश्विना मन्येथां वृषण्वसू । युवं हि रुद्रा पर्षथो अति द्विषः ॥ ५ ॥

जुहुराणा । चित् । अश्विना । आ । मन्येथाम् । वृषण्वसू इति वृषण्ऽवसू ।
युवम् । हि । रुद्रा । पर्षथः । अति । द्विषः ॥ ५ ॥

हे vवृषण्वसू वर्षणशीलधनवन्तौ vअश्विना अश्विनौ vजुहुराणा vचित् । ' हुर्छा कौटिल्ये ' । ' हुर्छेः सनो लुक् छलोपश्च ' (उ. सू. २. २४८) इत्यानच्प्रत्ययः । कुटिलान् कर्मविघ्नकारिणो मायाविनोऽपि शत्रून् vआ आभिमुख्येन vमन्येथां जानीतम् । ततो हे vरुद्रा संग्रामे रोदनशीलौ रुवन्तौ वा अश्विनौ vयुवम् । हिरवधारणे । युवामेव vद्विषः द्वेषकारिणः तान् शत्रून् vअति vपर्षथः अतीत्य संक्लेशयतम् । हतमित्यर्थः । ' पृषु हिंसासंक्लेशनयोः ' इति भौवादिकः ॥ ॥ २६ ॥

दस्रा हि विश्वमानुषङ्मक्षूभिः परिदीयथः । धियंजिन्वा मधुवर्णा शुभस्पती ॥ ६ ॥

दस्रा । हि । विश्वम् । आनुषक् । मक्षुऽभिः । परिऽदीयथः ।
धियम्ऽजिन्वा । मधुऽवर्णा । शुभः । पती इति ॥ ६ ॥

vदस्रा दस्रौ सर्वैर्दर्शनीयौ । यद्वा । ' दसु उपक्षये ' । शत्रूणामुपक्षपयितारावश्विनौ । कीदृशौ । vधियंजिन्वा धियंजिन्वौ । जिविः प्रीणनार्थः । कर्माणि प्रीणयन्तौ vमधुवर्णा मधुवर्णौ सर्वेषां मादनशीलशरीरकान्ती । ये युवयो रूपं पश्यन्ति ते तत्रैव हृष्टा भवन्तीत्यर्थः । तादृशौ vशुभस्पती उदकस्य पालयितारौ तादृशौ युवां vमक्षुभिः शीघ्रगमनैरश्वैः vआनुषक् अनुषक्तं यथा भवति तथा vविश्वम् ऋत्विग्भिर्हविर्भिश्च व्याप्तम् । हिरवधारणे । अस्मदीयं यज्ञमेव प्रति vपरिदीयथः । दीयतिर्गतिकर्मा । परित आगच्छतम् ॥

उप नो यातमश्विना राया विश्वपुषा सह । मघवाना सुवीरावनपच्युता ॥ ७ ॥

उप । नः । यातम् । अश्विना । राया । विश्वऽपुषा । सह ।
मघऽवाना । सुऽवीरौ । अनपऽच्युता ॥ ७ ॥

हे vअश्विना अश्विनौ vविश्वपुषा विश्वस्य सर्वस्य पोषकेण vराया धनेन vसह vनः अस्मदीयं यज्ञम् vउप vयातम् उपागच्छतम् । यज्ञमागत्य धनमस्यभ्यं प्रयच्छतमिति भावः । किमनयोर्धनमस्तीत्यत आह । vमघवाना मघवानौ महनीयधनवन्तौ vसुवीरौ शोभनसामर्थ्योपेतौ । यद्वा । वीराः समर्थाः शत्रवः । तद्वन्तौ । तथापि vअनपच्युता तैरपच्यावनीयौ न भवतः । तौ यज्ञं प्रत्यागच्छतम् ॥

आ मे अस्य प्रतीव्य१मिन्द्रनासत्या गतम् । देवा देवेभिरद्य सचनस्तमा ॥८॥

आ। मे। अस्य। प्रतीव्यम्। इन्द्रनासत्या। गतम्। देवा। देवेभिः। अद्य। सचनःऽतमा ॥ ८ ॥

हे vइन्द्रनासत्या इन्द्राश्विनौ vसचनस्तमा। 'षच समवाये'। 'कृत्यल्युटः०' इति कर्मणि ल्युट्। अतिशयेन सर्वैः समवेतव्यौ सेव्यमानौ युवां vप्रतीव्यम्। वी गत्यादिषु। अधिकरणे औणादिकः क्विप्। प्रतिशब्दस्य वीप्सार्थोऽस्ति। पुनःपुनर्वियन्ति भक्षयन्ति हवींषि देवा अत्रेति प्रतीवीर्यज्ञः। तम् vअस्य पुरोवर्तिनः[1] vमे मम संबन्धिनं यज्ञम् vअद्य अस्मिन् दिने vदेवेभिः देवैः सार्धम् vआ vगतम् आगच्छतम्। यद्वा। मे मम अस्य क्रियमाणस्य स्तोत्रस्य प्रतीव्यं प्रतिगतं यथा भवति तथाभिमुख्येनायातम् ॥

वयं हि वां हवामह उक्षण्यन्तो व्यश्ववत्। सुमतिभिरुप विप्राविहा गतम् ॥ ९ ॥

वयम्। हि। वाम्। हवामहे। उक्षण्यन्तः। व्यश्वऽवत्।
सुमतिऽभिः। उप। विप्रौ। इह। आ। गतम् ॥ ९ ॥

vउक्षण्यन्तः धनादिसेक्तारावात्मन इच्छन्तः vवयं vवां vहि धनादीनां प्रत्तारौ युवामेव vहवामहे तल्लाभार्थमाह्वयामः। तत्र दृष्टान्तः। vव्यश्ववत्। यथास्माकं पिता युवामेव स्तुत्वा धनमलभत तद्वत्। हे vविप्रौ मेधाविनावश्विनौ vसुमतिभिः अस्माभिः क्रियमाणैः कल्याणैः स्तोत्रैः सह। यद्वा। सुमतिभिः शोभनाभिरनुग्रहबुद्धिभिः सह। vइह अस्मिन् यागदिने vउप vआ vगतम् उपागच्छतम् ॥

अश्विना सु ऋषे स्तुहि कुवित्ते श्ववतो हवम्। नेदीयसः कूळयातः पणीँरुत ॥१०॥

अश्विना। सु। ऋषे। स्तुहि। कुवित्। ते। श्ववतः। हवम्।
नेदीयसः। कूळयातः। पणीन्। उत ॥ १० ॥

हे vऋषे विश्वमनः vअश्विना अश्विनौ देवौ vसु vष्टुहि शोभनं स्तुहि। ततस्तावश्विनौ vते स्तोतुस्तव vहवम् आह्वानं vकुवित्। कुविदिति बहुनाम। बहुवारं vश्ववतः शृणुताम्। 'श्रु श्रवणे'। लेट्यडागमः। एवं त्वया स्तुतावश्विनौ vनेदीयसः अन्तिकतमान् शत्रून् vकूळयातः हिंस्ताम्। vउत अपि च vपणीन् एतन्नामकान् अङ्गिरोगवामपनेतॄन् असुरानपि हिंस्ताम्॥ 'कुडि दाहे'। ण्यन्तस्य लेट्याडागमः ॥ ॥ २७ ॥

वैयश्वस्य श्रुतं नरोतो मे अस्य वेदथः। सजोषसा वरुणो मित्रो अर्यमा ॥११॥

वैयश्वस्य। श्रुतम्। नरा। उतो इति। मे। अस्य। वेदथः।
सऽजोषसा। वरुणः। मित्रः। अर्यमा ॥ ११ ॥

हे vनरा नेतारावश्विनौ vवैयश्वस्य व्यश्वपुत्रस्य विश्वमनसो ममाह्वानं vश्रुतं शृणुतम्। vउत अपि च vमे मदीयम् vअस्य तदाह्वानं vवेदथः आत्मीयतया जानीथः। अथ vवरुणःvमित्रः मित्रावरुणौ च vसजोषसा संगतौ सन्तौ vअर्यमा एतन्नामको देवश्च मदीयमाह्वानं श्रुत्वा मह्यं धनादिकं प्रयच्छन्तु ॥

युवादत्तस्य धिष्ण्या युवानीतस्य सूरिभिः। अहरहर्वृषणा मह्यं शिक्षतम् ॥१२॥

युवाऽदत्तस्य। धिष्ण्या। युवाऽनीतस्य। सूरिऽभिः।
अहःऽअहः। नृऽपणा। मह्यम्। शिक्षतम् ॥ १२ ॥

---

१. घ-त३-न-भ२-३–पुरोवर्तिनं; ज्ञ-त१-२–यागपुरोवर्तिनं; त४-भ१–गपुरोवर्तिनं।

हे [v]धिष्ण्या धिष्ण्यौ धिषणार्हौ स्तुत्यौ वृषणौ कामानां सेक्तारावश्विनौ[1] [v]सूरिभिः। 'सुपां सुपो भवन्ति' इति चतुर्थ्यास्तृतीया। सूरिभ्यः स्तोतृभ्यः [v]युवादत्तस्य युवाभ्यां यत्स्तोतृभ्यो दीयते तत् तथा [v]युवानीतस्य युवाभ्यां यत्स्तोतृभ्यो नीयते तच्च धनादिकम् [v]अहरहः अहन्यहनि [v]मह्यं विश्वमनसे स्तोत्रं कुर्वाणाय युवां [v]शिक्षतं प्रयच्छतम् ॥

यो वां यज्ञेभिरावृतोऽधिवस्त्रा वधूरिव। सपर्यन्ता शुभे चक्राते अश्विना ॥१३॥

यः। वाम्। यज्ञेभिः। आऽवृतः। अधिऽवस्त्रा। वधूःऽइव।
सपर्यन्ता। शुभे। चक्राते इति। अश्विना ॥ १३ ॥

अथ पूर्वोऽर्धर्चः परोक्षकृतः। [v]यः मनुष्यः [v]वां युवयोः [v]यज्ञेभिः यजनैः पूजनैः यद्वा युष्मद्विषयैर्यागैः [v]आवृतः परिवृतो भवति। तत्र दृष्टान्तः। [v]अधिवस्त्रा उपरिनिहितवस्त्रा [v]वधूः[2] अन्येन[3] वस्त्रेण[3] यथाच्छादिता भवति तथावृतो यदा भवति तदा [v]सपर्यन्ता अभीष्टप्रदानेन तं परिचरन्तौ [v]अश्विना अश्विनौ भवन्तौ तं मनुष्यं [v]शुभे [v]चक्राते मङ्गले धने कृतवन्तौ। तं धनादियुक्तमकार्ष्टामित्यर्थः। यो युवाभ्यां हवींषि प्रयच्छति तं धनादियुक्तं कुरुतमित्यर्थः ॥

यो वामुरुव्यचस्तमं चिकेतति नृपाय्यम्। वर्तिरश्विना परि यातमस्मयू ॥१४॥

यः। वाम्। उरुव्यचःऽतमम्। चिकेतति। नृऽपाय्यम्।
वर्तिः। अश्विना। परि। यातम्। अस्मऽयू इत्यस्मऽयू ॥ १४ ॥

हे अश्विनौ [v]उरुव्यचस्तमम् अतिशयेन ग्रहेषु भूतं व्याप्तं [v]नृपाय्यं नेतृभ्यां युवाभ्यां पातव्यं सोमं [v]यः मनुष्यः [v]वां युवाभ्यां तं सोमं दातुं [v]चिकेतति भृशं जानाति तस्य [v]वर्तिः। वर्ततेऽत्रेति वर्तिर्गृहम्। [v]अस्मयू अस्मान्। पूजार्थं बहुवचनम्। विश्वमनसं मां कामयमानौ युवां [v]परि [v]यातं सोमपानार्थं तस्य गृहं प्रत्यायातम्॥ चिकेतति। 'कित ज्ञाने' इत्यस्य यङ्लुगन्तस्य लेट्यडागमः ॥

अस्मभ्यं सु वृषण्वसू यातं वर्तिर्नृपाय्यम्। विषुद्रुहेव यज्ञमूहथुर्गिरा ॥ १५ ॥

अस्मभ्यम्। सु। वृषण्वसू इति वृषण्ऽवसू। यातम्। वर्तिः। नृऽपाय्यम्।
विषुद्रुहाऽइव। यज्ञम्। ऊहथुः। गिरा ॥ १५ ॥

हे [v]वृषण्वसू वर्षणशीलधनवन्तावश्विनौ [v]अस्मभ्यम् अस्मदर्थं [v]नृपाय्यं नेतृभ्यां पातव्यं सोमं प्रति [v]वर्तिः अस्मदीयं गृहं प्रति [v]सु [v]यातं युवां सुष्ठु आयातम्। [v]गिरा स्तुतिलक्षणया वाचा युवां [v]यज्ञमूहथुः मनुष्येषु यज्ञसमाप्तिं[4] प्रापयथः। तत्र दृष्टान्तः। [v]विषुद्रुहेव। 'द्रुह जिघांसायाम्'। विश्वान् हिनस्ति शत्रूनिति विषुद्रुहः शरः। तेन यथा व्याधो मृगमभिलषितं देशं प्रापयति तद्वत् स्तुत्या यज्ञमवैकल्येन समाप्तिं प्रापयथ इत्यर्थः ॥ ॥ २८ ॥

प्रातरनुवाक आश्विने क्रतौ गायत्रे छन्दसि 'वाहिष्ठो वां हवानाम्' इति चतस्रः। सूत्रितं च— 'वाहिष्ठो वां हवानामिति चतस्र उदीराथामा मे हवमिति गाथन्नम्' (आश्व. श्रौ. ४.१५) इति ॥

वाहिष्ठो वां हवानां स्तोमो दूतो हुवन्नरा। युवाभ्यां भूत्वश्विना ॥ १६ ॥

वाहिष्ठः। वाम्। हवानाम्। स्तोमः। दूतः। हुवत्। नरा। युवाभ्याम्। भूतु। अश्विना ॥ १६ ॥

---

१. घ–वर्षितारा°। २. घ–वधूरिव। ३. भ–नववस्त्रेण। ४. त-भ–यज्ञं समाप्तिं।

हे ᵛनरा नरौ सर्वस्य नेतारावश्विनौ[1] ᵛहवानां स्तोतॄणां स्तोत्राणां मध्ये ᵛस्तोमः ᵛवाहिष्ठः[2] युवामतिशयेन व्याप्नुवन् मदीयः स्तोमः ᵛदूतः दूतभूतः सन् ᵛहुवत् आह्वयतु । सोऽयं मदीयः स्तोमः ᵛयुवाभ्यां प्रियकरः ᵛभूतु भवतु ॥

यद॒दो दि॒वो अ॑र्ण॒व इ॒षो वा॒ मद॑थो गृ॒हे । श्रु॒तमि॑न्मे अमर्त्या ॥ १७ ॥

यत् । अ॒दः । दि॒वः । अ॒र्ण॒वे । इ॒षः । वा॒ । मद॑थः । गृ॒हे । श्रु॒तम् । इत् । मे॒ । अ॒म॒र्त्या॒ ॥ १७ ॥

हे अश्विनौ ᵛदिवः द्युलोकस्य ᵛअदः । 'सुपां सुलुक्०' इति ससम्याः सः । अमुष्मिन् ᵛअर्णवे अपां स्थाने ᵛयत् यदि ᵛमदथः माद्यथः । ᵛवा अपि च ᵛइषः युवाभिच्छतो यजमानस्य ᵛगृहे यदि माद्यथः । एवं चेत् हे ᵛअमर्त्या मरणधर्मरहितावमनुष्यौ वाश्विनौ ᵛमे मदीयं स्तोत्रं ᵛश्रुतमित् युवां शृणुतमेव । ममैव स्तोत्रं श्रुत्वा युवां माद्यतमित्यर्थः । यद्वा । अदः स्तोत्रमिति संबध्यते ॥

उ॒त स्या श्वे॒तया॑वरी॒ वाहि॑ष्ठा वां न॒दीना॑म् । सिन्धु॒र्हिर॑ण्यवर्तनिः ॥ १८ ॥

उ॒त । स्या । श्वे॒त॒ऽया॒व॒री॒ । वाहि॑ष्ठा । वा॒म् । न॒दीना॑म् । सिन्धुः॑ । हिर॑ण्यऽवर्तनिः ॥ १८ ॥

विश्वमना ऋषिः श्वेतयावरीनाम्न्या नद्यास्तीरेऽश्विनावस्तौत् । अनया नद्यपि स्तुतवतीत्याह । ᵛउत अपि च ᵛश्वेतयावरी । श्वेतजला यातीति श्वेतयावरी । कीदृशी । ᵛसिन्धुः स्यन्दमाना ᵛहिरण्यवर्तनिः हिरण्मयस्वीयमार्गा हिरण्मयोभयकूला । ᵛस्या एषा श्वेतयावरीनामिका ᵛनदीनाम्[3] अन्यासां नदीनां मध्ये ᵛवां युवां ᵛवाहिष्ठा स्तुत्यातिशयेनागन्त्री भवति । एषापि[4] युवां स्तौतीत्यर्थः । यद्वा । एषा नदी युवयो रथस्य वाहिष्ठा वोढृतमा सती प्रियकरी भवति । यस्मादहमस्यास्तीरे युवामस्तुवमिति ॥

स्म॒दे॒तया॑ सुकी॒र्त्याश्वि॑ना श्वे॒तया॑ धि॒या । व॒हेथे॑ शुभ्रयावाना ॥ १९ ॥

स्म॒त् । ए॒तया॑ । सु॒ऽकी॒र्त्या॒ । अश्वि॑ना । श्वे॒तया॑ । धि॒या । व॒हेथे॑ इति॑ । शु॒भ्र॒ऽया॒वा॒ना॒ ॥ १९ ॥

हे ᵛशुभ्रयावाना शोभनशीलगमनवन्तौ हे ᵛअश्विना अश्विनौ ᵛसुकीर्त्या शोभनस्तुत्या ᵛश्वेतया श्वेतजलया ᵛधिया धारयित्र्या हिरण्मयकूलवत्त्वादुभयकूलस्थितानां प्राणिनां धनदानेन पोषयित्र्या ᵛएतया नद्या ᵛस्मत् सुमत् शोभनं ᵛवहेथे युवां स्तुतिं प्राप्नुथः । एषा युवामस्तौदित्यर्थः ॥

युक्ष्वा हि त्वं र॑थ॒सहा॑ युवस्व॒ पोष्या॑ वसो ।
आ नो॑ वायो॒ मधु॑ पिबा॒स्माकं॑ सव॒ना ग॑हि ॥ २० ॥

युक्ष्व॑ । हि । त्वम् । र॒थ॒ऽसहा॑ । यु॒व॒स्व॒ । पोष्या॑ । व॒सो॒ इति॑ ।
आत् । नः॒ । वा॒यो॒ इति॑ । मधु॑ । पि॒ब॒ । अ॒स्माक॑म् । स॒व॒ना । आ । ग॒हि॒ ॥ २० ॥

एतदाद्या वायव्यः । हे वायो ᵛरथसहा रथसहौ रथवहनसमर्थावश्वौ । हिरवधारणे । ᵛत्वम्[5] एव[5] ᵛयुक्ष्व संयोजय । हे ᵛवसो वासयितः शत्रूणां[6] ᵛपोष्या पोष्यौ कण्ठेषु करतलास्फालनैराश्वास्य पोषणीयौ तावश्वौ ᵛयुवस्व संग्रामेषु शत्रुवधार्थं मिश्रय । यद्वा । अस्मद्यज्ञेषु संमिश्रय । ताभ्यां युक्तः सन् यज्ञं प्रत्यागच्छेत्यर्थः । हे ᵛवायो ᵛआत् अनन्तरं ᵛनः अस्मदीयं ᵛमधु मदकरं सोमं त्वं ᵛपिब । अत एव ᵛअस्माकं यज्ञेषु ᵛसवना त्रिषु सवनेषु ᵛआ ᵛगहि सोमपानार्थमागच्छ ॥ ॥ २९ ॥

---

१. घ–नेतारावश्विनाश्विनौ । २. घ–वां वाहिष्ठः । ३. भ१-३–नदी । ४. घ–स्या एषापि । ५. घ–त्वं हि त्वमेव । ६. घ–स्तोत्राणां ।

वायव्ये पशौ वपायाः 'तव वायो' इत्येषा वानुवाक्या। सूत्रितं च–'प्र वायुमच्छा बृहती मनीषा तव वायवृतस्पते' (आश्व. श्रौ. ३. ८) इति ॥

तव वायवृतस्पते त्वष्टुर्जामातरद्भुत। अवांस्या वृणीमहे ॥ २१ ॥

तव। वायो इति। ऋतःपते। त्वष्टुः। जामातः। अद्भुत। अवांसि। आ। वृणीमहे ॥२१॥

हे ऋतस्पते ऋतपते यज्ञानां पते। 'सर्वप्रातिपदिकेभ्यो लालसायां सुक्' (का. ७.१.५१.४) इति सुगागमः। त्वष्टुर्जामातः ब्रह्मणो जामातः। एषा कथेतिहासादिभिरवगन्तव्या। तादृश अद्भुत महन् विचित्रकर्मन् हे वायो तव त्वदीयानि अवांसि पालनानि आ वृणीमहे वयमस्मिन् पशुयागे संभजामहे ॥

त्वष्टुर्जामातरं वयमीशानं राय ईमहे। सुतावन्तो वायुं द्युम्ना जनासः ॥ २२ ॥

त्वष्टुः। जामातरम्। वयम्। ईशानम्। रायः। ईमहे।
सुतऽवन्तः। वायुम्। द्युम्ना। जनासः ॥ २२ ॥

इमे जनासः जनाः वयं त्वष्टुः ब्रह्मणः जामातरम् ईशानं सर्वस्येश्वरमेतादृशं वायुं सुतवन्तः अभिषुतसोमाः रायः धनम् ईमहे याचामहे। तेन दत्तेन वयं द्युम्ना धनवन्तः स्यामेति शेषः ॥

वायव्यतृचे 'वायो याहि शिवा दिवः' इत्यादिके द्वे ऋचौ द्वितीयातृतीये। सूत्रितं च—'वायो याहि शिवा दिव इति द्वे' (आश्व. श्रौ. ७. १०) इति ॥

वायो याहि शिवा दिवो वहस्वा सु स्वश्व्यम्। वहस्व महः पृथुपक्षसा रथे ॥२३॥

वायो इति। याहि। शिव। आ। दिवः। वहस्व। सु। सुऽअश्व्यम्।
वहस्व। महः। पृथुऽपक्षसा। रथे ॥ २३ ॥

हे वायो दिवः द्युलोकस्य शिव। 'सुपां सुलुक्०' इति द्वितीयाया लुक्। शिवं कल्याणम् आ याहि आप्रापय। सर्वज्योतिषां त्वदाधारत्वात् तेषामाधारो भूत्वा द्युलोके तानि स्थापयेति प्रार्थ्यते। ततस्त्वं स्वश्व्यम्। अश्वानां संघोऽश्व्यः। शोभनाश्वसंघं रथं सु सुष्ठु वहस्व सर्वतो दिक्षु प्रापय। इदानीं तेभ्योऽपि समर्थावश्वावावह। महः महांस्त्वं पृथुपक्षसा पृथुपार्श्वद्वययुक्तावश्वौ रथे स्वकीये वहस्व शत्रुहननार्थं संयोजय ॥

वायव्ये पशौ पुरोडाशहविषः 'त्वां हि सुष्परस्तमम्' इति द्वे अनुवाक्ये। सूत्रितं च—'त्वां हि सुष्परस्तममिति द्वे कुविदङ्ग नमसा ये वृधासः' (आश्व. श्रौ. ३. ८) इति ॥

त्वां हि सुष्परस्तमं नृषदनेषु हूमहे। ग्रावाणं नाश्वपृष्ठं मंहना ॥ २४ ॥

त्वाम्। हि। सुष्परःऽतमम्। नृऽसदनेषु। हुमहे। ग्रावाणम्। न। अश्वऽपृष्ठम्। मंहना ॥२४॥

हे वायो सुष्परस्तमम्। सुष्प इति रूपनाम। रो मत्वर्थीयः। अतिशयेन शोभनरूपवन्तं मंहना स्वकीयेन महत्त्वेन अश्वपृष्ठं सर्वतो व्याप्तपृष्ठम्। पृष्ठशब्दः सर्वाङ्गं लक्षयति। व्याप्तकृत्स्नाङ्गमित्यर्थः[1]। त्वाम्। हिरवधारणे। त्वामेव नृषदनेषु नृसदनेषु। नरोऽध्वरस्य नेतार ऋत्विजोऽत्र सीदन्तीति नृषदना यज्ञाः। तेषु हूमहे वयमाह्वयामः। कथमिव। ग्रावाणं न[2]। यथा सोमाभिषवार्थं ग्रावाणं[2] स्तुतिभिराह्वयन्ति तद्वत्त्वां स्तुतिभिराह्वयामः ॥

१. ख-घ-श–व्याप्तसर्वांग°। २. त-भ–सोमाभिषवार्थ।

शुनासीरीये ' स त्वं नो देव ' इत्येषा वायोरनुवाक्या । सूत्रितं च—' स त्वं नो देव मनसेशानाय प्रहुतिं यस्त आनट् ' (आश्व. श्रौ. २. २०) इति ॥

स त्वं नो देव मनसा वायो मन्दानो अग्रियः । कृधि वाजाँ अपो धियः ॥२५॥

सः । त्वम् । नः । देव । मनसा । वायो इति । मन्दानः । अग्रियः ।
कृधि । वाजान् । अपः । धियः ॥ २५ ॥

हे vदेव द्योतमान यद्वा स्तोतव्य vवायो vअग्रियः देवानां मध्ये मुख्योऽग्रतो गन्तासि । तादृशः vत्वं vमनसा vमन्दानः मन्दमानः स्वयमेव मोदमानः सन् vनः अस्माकं vवाजान् अन्नानि vअपः मेघभेदनेनोदकानि च उभयस्मिंस्त्वया प्रदत्ते सति vधियः अग्निहोत्रादिकर्माणि च vकृधि कुरु । कारयेत्यर्थः ॥ ॥ ३० ॥

' अग्निरुक्थे ' इति द्वाविंशत्यृचं सप्तमं सूक्तम् । अत्रानुक्रमणिका—' अग्निरुक्थे द्वयधिका मनुर्वैवस्वतो वैश्वदेवं ह प्रागाथम् ' इति । विवस्वतः पुत्रो मनुर्ऋषिः । प्रथमातृतीयाद्ययुजो बृहत्यो द्वितीयाचतुर्थ्यादियुजः सतोबृहत्यः । इदमादीनां चतुर्णां सूक्तानां विश्वे देवा देवता । सूक्तविनियोगो लैङ्गिकः ॥

अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे ।
ऋचा यामि मरुतो ब्रह्मणस्पतिं देवाँ अवो वरेण्यम् ॥ १ ॥

अग्निः । उक्थे । पुरःऽहितः । ग्रावाणः । बर्हिः । अध्वरे ।
ऋचा । यामि । मरुतः । ब्रह्मणः । पतिम् । देवान् । अवः । वरेण्यम् ॥ १ ॥

मनुः प्रार्थयते । vउक्थे स्तोत्रशस्त्रात्मके vअध्वरे हिंसारहितेऽस्मिन् यज्ञे vअग्निः vपुरोहितः यज्ञार्थं पुरत उत्तरवेद्यामृत्विग्भिर्निहितोऽभूत् । तथा vग्रावाणः च सोमाभिषवार्थं पुरतो निहिताः । vबर्हिः च पुरतो निहितमासादितम् । एवं सामग्र्यां सत्यां vमरुतः एकोनपञ्चाशन्मरुद्गणान् vब्रह्मणस्पतिं स्तोत्रस्य पालयितारमेतन्नामकं देवं vदेवान् इन्द्रादींश्च एतान् सर्वान् देवान् vवरेण्यं वरणीयं भजनीयम्[1] vअवः रक्षणम् vऋचा सूक्तरूपया स्तुत्या vयामि मनुरहं याचामि । याचतेर्लटि रूपम् । वर्णलोपश्छान्दसः ॥

आ पशुं गासि पृथिवीं वनस्पतीनुषासा नक्तमोषधीः ।
विश्वे च नो वसवो विश्ववेदसो धीनां भूत प्रावितारः ॥ २ ॥

आ । पशुम् । गासि । पृथिवीम् । वनस्पतीन् । उषसा । नक्तम् । ओषधीः ।
विश्वे । च । नः । वसवः । विश्वऽवेदसः । धीनाम् । भूत । प्रऽअवितारः ॥ २ ॥

पूर्वार्धर्चेऽग्निः संबोध्यते पश्वादिशब्दसद्भावात् । हे अग्ने नोऽस्मदीये यज्ञे vपशुम् अग्नीषोमीयं पशुं प्रति vआ vगासि आगच्छसि । ' गाङ्[2] गतौ ' । व्यत्ययेन परस्मैपदम् । तथा vपृथिवीम् इदं देवसदनं प्रति किंच vवनस्पतीन् मथनसाधनानरणिरूपान् वनस्पतीन् प्रति तथा vउषासा[3] होतव्यत्वेन उषःकालं तथा vनक्तं यष्टव्यतया रात्रिं च प्रति किंच vओषधीः । ' उष दाहे ' अत्र मादनकर्मा । ओषन्ति माद्यन्त्यनेनेत्योषः सोमः । स धीयते निधीयते येष्वित्योषधयो ग्रावाणः । तान् प्रत्यागच्छसि । यद्वा । ओषध्यः फलपाकान्ता लताः । ताः प्रत्यायाहि । अथवा हे स्तोतः पश्वादीन्

१. भ—संभजनीयं । २. ख-त-न-तौ च; श—गम्लृ । ३. त-भ—उषसा ।

आ गासि समन्तात् स्तुहि। 'कै गै शब्दे' इति धातुः। ततो हे [v]वसवः वासयितारः [v]विश्ववेदसः सर्वधनाः सर्वज्ञाना वा हे [v]विश्वे सर्वेऽपि देवाः [v]नः[1] अस्मदीयानां कर्मणां[2] [v]प्राविताराः [v]भूत। अनेनाग्निना सह यूयं प्रकर्षेण रक्षका भवत ॥

प्र सु नः एत्वध्वरोऽग्ना देवेषु पूर्व्यः।
आदित्येषु प्र वरुणे धृतव्रते मरुत्सु विश्वभानुषु ॥ ३ ॥

प्र। सु। नः। एतु। अध्वरः। अग्ना। देवेषु। पूर्व्यः।
आदित्येषु। प्र। वरुणे। धृतऽव्रते। मरुत्ऽसु। विश्वऽभानुषु ॥ ३ ॥

[v]पूर्व्यः पुरातनः। पूर्व्यान् पुरातनानिन्द्रादीन् देवान् प्रति क्रियमाणत्वात् यज्ञोऽपि पूर्व्य इत्युच्यते। तादृशो मुख्यः [v]नः अस्मदीयः [v]अध्वरः यज्ञः [v]अग्ना। 'सुपां सुलुक्०' इति सप्तम्या डादेशः। अग्नौ। अग्निर्देवानां मुख्यत्वात् प्रथममभिहितः। तस्मिन्नग्नौ सर्वेष्वन्येषु [v]देवेषु च [v]सु सुष्ठु [v]प्र [v]एतु प्रकर्षेण गच्छतु। देवान् विशिनष्टि। [v]आदित्येषु अदितेः पुत्रेष्विन्द्रादिषु [v]धृतव्रते धृतकर्मणि [v]वरुणे च [v]विश्वभानुषु सर्वतो व्याप्ततेजस्केषु [v]मरुत्सु च [v]प्र एतु ॥

विश्वे हि ष्मा मनवे विश्ववेदसो भुवन्वृधे रिशादसः।
अरिष्टेभिः पायुभिर्विश्ववेदसो यन्ता नोऽवृकं छर्दिः ॥ ४ ॥

विश्वे। हि। स्म। मनवे। विश्वऽवेदसः। भुवन्। वृधे। रिशादसः।
अरिष्टेभिः। पायुऽभिः। विश्वऽवेदसः। यन्त। नः। अवृकम्। छर्दिः ॥ ४ ॥

[v]विश्ववेदसः सर्वतो व्याप्तधनाः। बहुधना इत्यर्थः। तादृशाः [v]रिशादसः रिशतां हिंसतां शत्रूणामसितार उपक्षपयितारो वा [v]विश्वे [v]हि [v]ष्म सर्वे खलु देवाः [v]मनवे। षष्ठ्यर्थे चतुर्थी। मनोः [v]वृधे वर्धनाय [v]भुवन् भवन्तु। स्तोत्रे मनुष्याय धनं दत्वा तं वर्धयन्तु इत्याशास्ते। ततो हे [v]विश्ववेदसः सर्वधनाः सर्वज्ञा वा देवाः [v]अरिष्टेभिः परैरहिंसितैः [v]पायुभिः पालनैः सह [v]अवृकम्। वृकः स्तेनः। तद्रहितम्। बाधारहितमित्यर्थः। तादृशं [v]छर्दिः गृहं [v]नः अस्मभ्यं [v]यन्त प्रयच्छत। शत्रून् हत्वा गृहेष्वस्माभिः कर्माणि कारयतेत्यर्थः। यन्तेति यमेर्लोटि छान्दसो विकरणस्य लुक्। तस्य तबादेशः। तेनानुनासिकलोपाभावः ॥

आ नो अद्य समनसो गन्ता विश्वे सजोषसः।
ऋचा गिरा मरुतो देव्यदिते सदने पस्त्ये महि ॥ ५ ॥

आ। नः। अद्य। सऽमनसः। गन्त। विश्वे। सऽजोषसः।
ऋचा। गिरा। मरुतः। देवि। अदिते। सदने। पस्त्ये। महि ॥ ५ ॥

[v]समनसः सर्वेषु स्तोतृषु समानमनस्काः [v]विश्वे सर्वे देवा यूयं [v]सजोषसः परस्परं संगताः सन्तः [v]गिरा। शुश्रूषुतया प्राप्तव्ययेत्यर्थः। तथा [v]ऋचा सह [v]अद्य अस्मिन् यागदिने [v]नः यष्टॄन् अस्मान् [v]आ [v]गन्त आगच्छत। अनन्तरं हे [v]मरुतः [v]देवि द्योतमाने [v]महि महति देवानां

---

१. भ-धीनां नः। २. घ-धीनां कर्मणां।

मातृत्वान्मह्त्वयुक्ते हे vअदिते अदीने एतन्नामिके देवि vसदने स्थाने[1] vपस्त्ये अस्मदीये गृहे स्तोतव्यतयोपविशत ॥ मरुत इत्यादेर्वाक्यभेदादनिघातः। उत्तरत्र पूर्वस्यामन्त्रितस्याविद्यमानवत्त्वेन वाक्यादित्वादनिघातः ॥ ॥ ३१ ॥

अभि प्रिया मरुतो या वो अश्व्या हव्या मित्र प्रयाथन ।
आ बर्हिरिन्द्रो वरुणस्तुरा नर आदित्यासः सदन्तु नः ॥ ६ ॥

अभि । प्रिया । मरुतः । या । वः । अश्व्या । हव्या । मित्र । प्रऽयाथन । आ । बर्हिः । इन्द्रः । वरुणः । तुराः । नरः । आदित्यासः । सदन्तु । नः ॥ ६ ॥

हे vमरुतः vप्रिया प्रियाणि vया यानि vवः युष्माकम् vअश्व्या अश्व्यानि प्रियानश्वसंघान् vअभि vप्रयाथन अस्मद्यज्ञं प्रति प्रापयत। यूयमश्वैर्युक्ताः सन्त आगच्छतेत्यर्थः। अथ हे vमित्र। मित्रशब्देनान्ये वरुणादयोऽप्युच्यन्ते। हे मित्रादयो देवाः vहव्या हव्यानि हवनयोग्यानि हवींषि स्वीकर्तुमागच्छतेत्यर्थः। स्तूयमाना आगच्छत। प्रपूर्वाद्यातेर्लोटि ' तप्तनप्तनथनाश्च ' इति थनादेशः। आगत्य च vइन्द्रो vवरुणः इन्द्रावरुणौ[2] vतुराः संग्रामे शत्रुवधार्थं त्वरमाणाः vनरः नेतारः vआदित्यासः अदितेः पुत्रा मरुदादयो देवाश्च vनः अस्मदीये यज्ञे vबर्हिः बर्हिषि आसादिते vआ vसदन्तु आसीदन्तु प्रविशन्तु। सदेः सीदादेशाभावश्छान्दसः ॥

वयं वो वृक्तबर्हिषो हितप्रयस आनुषक् ।
सुतसोमासो वरुण हवामहे मनुष्वदिद्धाग्नयः ॥ ७ ॥

वयम् । वः । वृक्तऽबर्हिषः । हितऽप्रयसः । आनुषक् ।
सुतऽसोमासः । वरुण । हवामहे । मनुष्वत् । इद्धऽअग्नयः ॥ ७ ॥

हे vवरुण वरुणादयो हे देवाः vवृक्तबर्हिषः ऋत्विजः vवयम् vआनुषक् सुगादिष्वनुषक्तं यथा भवति तथा vहितप्रयसः। प्रीणातीति प्रयोऽन्नम्। तेषु निहितहविष्काः सन्तः vवः युष्मान् vहवामहे एतानि[3] हवींष्यादातुमाह्वयामः। कीदृशाः। vसुतसोमासः अभिषुतसोमाः vइद्धाग्नयः आहुतिभिः समिद्धाग्नयो वयमाह्वयामः। तत्र दृष्टान्तः। vमनुष्वत्। मनुर्यथा यज्ञे युष्मानाजुहाव तद्वत् ॥

आ प्र यातु मरुतो विष्णो अश्विना पूषन्माकीनया धिया ।
इन्द्र आ यातु प्रथमः सनिष्युभिर्वृषा यो वृत्रहा गृणे ॥ ८ ॥

आ । प्र । यातु । मरुतः । विष्णो इति । अश्विना । पूषन् । माकीनया । धिया ।
इन्द्रः । आ । यातु । प्रथमः । सनिष्युऽभिः । वृषा । यः । वृत्रऽहा । गृणे ॥ ८ ॥

हे विश्वे देवाः vप्र vयात प्रकर्षेणास्मदीयकर्मण्यागच्छत। हे vमरुतः हे vविष्णो स्वबलेन सर्वतो व्याप्तैतन्नामक देव हे vअश्विना अश्विनौ vपूषन्। स्तोतॄन् धनादिना पोषयतीति पूषा। एतन्नामक देव मरुदादयो हे देवाः vमाकीनया[4]। अस्मच्छब्दात् ' युष्मदस्मदोः० ' (पा. सू. ४. ३. १)

१. ख-ज्ञ-श–सदनस्थाने; त२-३-४–षदनस्थाने; न-भ–निषदनस्थाने। २. घ–ईद्रावरुणौ मित्रश्च। ३. श–दत्तानि। ४. भ-श–माकीनया मामकीनया।

इति खत्र् शैषिकः । एकवचने ' तवकममकौ° ' इति ममकादेशः । वर्णलोपश्छान्दसः । मया क्रियमाणया vधिया स्तुत्या सहास्मद्यज्ञं प्रत्यागच्छत । मरुदादेरामन्त्रितस्य वाक्यभेदादनिघातः । किंच vप्रथमः देवानां मुख्यः सः vइन्द्रः च vआ vयातु । vवृषा कामानां सेक्ता vयः इन्द्रः vसनिष्युभिः । सनिः संभजनम् । तदात्मन इच्छद्भिः स्तोतृभिः vवृत्रहा अपामावरकस्य वृत्रासुरस्य हन्तेति vगृणे स्तूयते । ' गृ शब्दे ' इत्यस्य कर्मणि लिटि छान्दसो विकरणः ॥

वि नो देवासो अद्रुहोऽच्छिद्रं शर्म यच्छत ।
न यद्दूराद्वसवो नू चिदन्तितो वरूथमाद्धर्षति ॥ ९ ॥

वि । नः । देवासः । अद्रुहः । अच्छिद्रम् । शर्म । यच्छत ।
न । यत् । दूरात् । वसवः । नु । चित् । अन्तितः । वरूथम् । आऽद्धर्षति ॥ ९ ॥

हे vअद्रुहः स्तोतृणामद्रोग्धारः । यद्वा । द्रुहेरौणादिकः कर्मणि क्विप् । शत्रुभिरहिंस्याः । हे vदेवासः मरुदादयो देवाः vअच्छिद्रं बाधकरहितं साधीयो वा vशर्म । शृणाति दुःखादिकमिति शर्म गृहम् । तत् vनः अस्मभ्यं vवि vयच्छत । हे vवसवः शत्रूणां वासयितारो मरुदादयः vदूरात् दूरदेशात् vअन्तितः अन्तिकदेशाद्वा कश्चिदागत्य vनू vचित् कदाचिदपि vवरूथं वरणीयं संभजनीयं vयत् गृहं vन vआदधर्षति आधर्षणं हिंसनं न करोति तद्गृहं प्रयच्छतेति समन्वयः । ' धृष प्रसहने ' इत्यस्य विभाषितणिचूत्वात् यदा णिच् नास्ति तदा रूपम् ॥

अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यम् ।
प्र णः पूर्वस्मै सुवितायं वोचत मक्षू सुम्नाय नव्यसे ॥ १० ॥

अस्ति । हि । वः । सऽजात्यम् । रिशादसः । देवासः । अस्ति । आप्यम् ।
प्र । नः । पूर्वस्मै । सुवितायं । वोचत । मक्षु । सुम्नायं । नव्यसे ॥ १० ॥

हे vरिशादसः रिशतां हिंसतामसितारः vदेवासः देवा द्योतमाना मरुदादयः vवः युष्माकं vसजात्यम् vअस्ति परस्परं समानजातिभावोऽस्ति खलु । किंच vआप्यम् । आपिर्बन्धुः । तस्य भाव आप्यम् । स्तोतृषु[1] स्तुत्यलक्षणेन संबन्धात्[1] वैवस्वतेन मनुना मया स्तोत्रा सह युष्माकं बन्धुभावः vअस्ति खलु । ततः vपूर्वस्मै प्रथमभाविने vसुविताय । सुष्ठु ईयते सर्वैरागम्यत इति सुवितोऽभ्युदयः । तस्मै vनव्यसे नवीयसे नवतराय vसुम्नाय च उभयं vमक्षु शीघ्रं vनः अस्माकं vप्र vवोचत प्रकर्षेण ब्रूत । अभ्युदयधनानि प्रयच्छतेत्यर्थः ॥ ॥ ३२ ॥

इदा हि व उपस्तुतिमिदा वामस्य भक्तये ।
उप वो विश्ववेदसो नमस्युराँ असृक्ष्यन्यामिव ॥ ११ ॥

इदा । हि । वः । उपऽस्तुतिम् । इदा । वामस्य । भक्तये ।
उप । वः । विश्वऽवेदसः । नमस्युः । आ । असृक्षि । अन्याम्ऽइव ॥ ११ ॥

हे vविश्ववेदसः सर्वधना हे देवाः vनमस्युः अन्नमिच्छन् मनुरहं vवः युष्मद्विषयाम् vउपस्तुतिम् vअन्यामिव अदृष्टपूर्वामिव स्थिताम् । कैश्चिदप्यकृतामित्यर्थः । तादृशीमुपस्तुतिम् vइदा vहि ।

१. त–स्तोतृषु स्तुत्यलक्षणे संबंधात्; भ–स्तोतृस्तुत्यलक्षणसंबंधात् ।

हिरवधारणे । इदानीमेव ᵛउप ᵛआ ᵛअसृक्षि उपासृजामि करोमीत्यर्थः । किमर्थम् । ᵛवः युष्मत्संबन्धिनः ᵛवामस्य वननीयस्य ᵛइदा इदानीमेव ᵛभक्तये संभजनाय । लाभायेत्यर्थः । असृक्षीति सृजेर्लुङि रूपम् । पादादित्वादनिघातः ॥

उदु ष्य वः सविता सुप्रणीतयोऽस्थादूर्ध्वो वरेण्यः ।
नि द्विपादश्चतुष्पादो अर्थिनोऽविश्रन्पतयिष्णवः ॥ १२ ॥

उत् । ऊँ इति । स्यः । वः । सविता । सुऽप्रनीतयः । अस्थात् । ऊर्ध्वः । वरेण्यः ।
नि । द्विऽपादः । चतुःऽपादः । अर्थिनः । अविश्रन् । पतयिष्णवः ॥ १२ ॥

हे ᵛसुप्रणीतयः । शोभनप्रणीतिः स्तुतिः । शोभनप्रणयनाः शोभनस्तुतयो मरुतः ᵛवः युष्माकं मध्ये ᵛऊर्ध्वः ऊर्ध्वं गन्ता ᵛवरेण्यः सर्वैर्वरणीयः संभजनीयः सः[1] ᵛसविता सर्वस्य स्वकर्मणि प्रेरक एतन्नामकः स देवो यदा ᵛउत् ᵛअस्थात् स्वतेजसोद्गतोऽभूत् तदा ᵛअर्थिनः ᵛद्विपादः पाददयुक्ताः पुरुषाः ᵛचतुष्पादः पादचतुष्टययुक्ता अश्वादयः ᵛपतयिष्णवः पतनशीलाः पक्षिणश्च ᵛनि ᵛअविश्रन् स्वस्वकार्येषु निविशन्ते । सूर्ये उदिते[2] केचन पुरुषा अग्निहोत्रादिकं कुर्वन्ति केचन देवताविषयं स्तोत्रं कुर्वते । पश्वादयस्तृणादिभक्षणार्थं सर्वत्र संचरन्ति ॥ न्यविश्रन् । निपूर्वाद्विशतेर्लङि व्यत्ययेन परस्मैपदम् । ' बहुलं छन्दसि ' इति रुडागमः ॥

पञ्चमेऽहनि प्रउगशस्त्रे ' देवंदेवम् ' इति वैश्वदेवस्तृचः । सूत्रितं च—' देवंदेवं बृहदु गायिषे वचः ' (आश्व. श्रौ. ७. १२) इति ॥

देवंदेवं वोऽवसे देवंदेवमभिष्टये ।
देवंदेवं हुवेम वाजसातये गृणन्तो देव्या धिया ॥ १३ ॥

देवम्ऽदेवम् । वः । अवसे । देवम्ऽदेवम् । अभिष्टये ।
देवम्ऽदेवम् । हुवेम । वाजऽसातये । गृणन्तः । देव्या । धिया ॥ १३ ॥

वयं ᵛदेव्या द्योतमानया ᵛधिया स्तुत्या ᵛगृणन्तः स्तुवन्तः सन्तः ᵛवः युष्माकं मध्ये ᵛदेवंदेवं दीप्यमानं देवम् ᵛअवसे कर्मरक्षणाय आह्वयाम । अनुक्रमेणाह । ᵛअभिष्टये अभिलषितप्राप्त्यर्थं च ᵛदेवंदेवं वयमाह्वयाम[3] । ततः ᵛवाजसातये अन्नलाभाय ᵛहुवेम ह्वयाम ॥

देवासो हि ष्मा मनवे समन्यवो विश्वे साकं सरातयः ।
ते नो अद्य ते अपरं तुचे तु नो भवन्तु वरिवोविदः ॥ १४ ॥

देवासः । हि । स्म । मनवे । सऽमन्यवः । विश्वे । साकम् । सऽरातयः ।
ते । नः । अद्य । ते । अपरम् । तुचे । तु । नः । भवन्तु । वरिवःऽविदः ॥ १४ ॥

ᵛसमन्यवः समानमनसः यद्वा संग्रामेषु शत्रुहननार्थं समानक्रोधयुक्ताः ᵛविश्वे सर्व एव ᵛदेवासो ᵛहि ᵛष्म मरुदादयो देवाः खलु ᵛमनवे एतन्नामकाय ऋषये मह्यं ᵛसाकं सह युगपदेव ᵛसरातयः धनादिदानेन सहिताः भवन्तु । पुनरपि प्रार्थयते । ᵛते देवाः ᵛनः अस्माकम् ᵛअद्य अस्मिन् दिने ᵛअपरं च किं बहुना सर्वेषु दिवसेषु धनदातारो भवन्तु । न केवलमस्माकमेव किंतु

१. घ–स्यः सः । २. न-भ–उदिते सति । ३. त-भ१–°माह्वयामः ।

vतुचे । तुगित्यन्ननाम । ' तुजि पिजि हिंसादाननिकेतनेषु ' । तोजयति हिनस्ति पितुर्दुःखादिकमिति[1] तुक् पुत्रः । तस्मै vनः अस्माकं पुत्राय vवरिवोविदः वरणीयस्य धनस्य लम्भयितारः vभवन्तु ॥

प्र वः शंसाम्यद्रुहः संस्थे उपस्तुतीनाम् ।
न तं धूर्तिर्वरुण मित्र मर्त्यं यो वो धामभ्योऽविधत् ॥ १५ ॥

प्र । वः । शंसामि । अद्रुहः । सम्ऽस्थे । उपऽस्तुतीनाम् ।
न । तम् । धूर्तिः । वरुण । मित्र । मर्त्यम् । यः । वः । धामऽभ्यः । अविधत् ॥ १५ ॥

हे vअद्रुहः अद्रोग्धारोऽहिंस्या वा मरुदादयः vउपस्तुतीनाम् उपस्तोत्राणां vसंस्थे तासां यज्ञे क्रियमाणत्वादस्मत्संस्थानभूतेऽस्मिन् यज्ञे vवः युष्मान् vप्र vशंसामि प्रकर्षेण स्तौमि । हे vवरुण vमित्र मित्रावरुणौ vतं vमर्त्यं मनुष्यं vधूर्तिः । धुर्वी हिंसार्थः । शत्रुभ्यो हिंसा तं vन बाधते vयः मनुष्यः vवः युष्माकं vधामभ्यः तेजोभ्यः । धीयतेऽस्मिन्निति धाम शरीरं वा । तेभ्यः vअविधत् । ' विध विधाने ' । हवींषि विदधाति प्रयच्छति । एतेन तेजसामपि हविर्भाक्त्वमस्तीति ज्ञायते ॥

प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ।
प्र प्रजाभिर्जायते धर्मणस्परि्रष्टः सर्व एधते ॥ १६ ॥

प्र । सः । क्षयम् । तिरते । वि । महीः । इषः । यः । वः । वराय । दाशति ।
प्र । प्रऽजाभिः । जायते । धर्मणः । परि । अरिष्टः । सर्वः । एधते ॥ १६ ॥

हे मरुदादयः vसः मनुष्यः vक्षयम् । क्षियन्ति निवसन्त्यत्रेति क्षयो गृहम् । तत् स मनुष्यः vप्र vतिरते प्रकर्षेण वर्धयति । तिरतिर्वृद्धिकर्मा । स एव vमहीः महान्ति vइषः अन्नानि च vवि वर्धयति vयः मनुष्यः vवराय वरणीयाय धनाय तदर्थं vवः युष्मभ्यं vदाशति हवींषि प्रयच्छति । धनादिभिर्वर्धयतीत्यन्वयः । किंच vधर्मणः । ध्रियते ऋत्विग्भिरिति धर्म कर्म । युष्मद्विषयात् कर्मणः सकाशात् स मनुष्यः vप्रजाभिः पुत्रपौत्रादिभिः vपरि परितः सर्वतः vप्र vजायते प्रकर्षेणाविर्भवति । ' आत्मा वै पुत्रनामासि ' (श. ब्रा. १४. ९. ४. २६) इति श्रुतेः । ततः vअरिष्टः अन्यैरहिंसितः vसर्वः युष्माकं हविष्प्रदानात्[2] सकलो जनः vएधते धनादिभिर्वर्धते ॥ ॥ ३३ ॥

ऋते स विन्दते युधः सुगेभिर्यात्यध्वनः ।
अर्यमा मित्रो वरुणः सरातयो यं त्रायन्ते सजोषसः ॥ १७ ॥

ऋते । सः । विन्दते । युधः । सुऽगेभिः । याति । अध्वनः ।
अर्यमा । मित्रः । वरुणः । सऽरातयः । यम् । त्रायन्ते । सऽजोषसः ॥ १७ ॥

vसः अर्यमादीनां हविर्दाता मनुष्यः vयुधः । ' युध संप्रहारे ' । भावे क्विप् । युद्धात् vऋते विनापि vविन्दते धनानि लभते । किंच vसुगेभिः शोभनगमनैः सुष्ठु गन्तृभिर्वाह्यैः सह vअध्वनः मार्गान् । गन्तव्यान् देशानित्यर्थः । तान् vयाति गच्छति । vयं जनम् vअर्यमा सततं[3] गच्छन्[3] vमित्रः स्तोतॄणां यष्टॄणां च धनप्रदानेन मित्रभूतः vवरुणः निवारयिता शत्रूणां यद्वा वरणीयः संभजनीय

१. त२-३-न-भ-°मिति वा । २. भ१-हविष्प्रदाता । ३. ख-त-अतनन् वांच्छन्; न-य-अततत्वांच्छन्; श-अतस्तत्वांच्छन् ।

एतन्नामकाः [v]सरातयः समानदानाख्यो देवाः [v]सजोषसः परस्परं संगताः सन्तः यं हव्यप्रदातारं [v]त्रायन्ते स्वरक्षणैः पालयन्ति स धनादीनि विन्दतीत्यन्वयः ॥

अञ्जे चिदस्मै कृणुथा न्यञ्जनं दुर्गे चिदा सुसरणम् ।
एषा चिदस्मादशनिः परो नु सास्रेधन्ती वि नश्यतु ॥ १८ ॥

अञ्जे । चित् । अस्मै । कृणुथ । नि-ऽअञ्जनम् । दुः-ऽगे । चित् । आ । सु-ऽसरणम् ।
एषा । चित् । अस्मात् । अशनिः । परः । नु । सा । अस्रेधन्ती । वि । नश्यतु ॥ १८ ॥

हे देवाः [v]अञ्जे [v]चित् । 'ञ्जि अभिभवे' । परैरनभिभवनीयेऽपि परपुरे [v]न्यञ्जनं नितरां गमनम् [v]अस्मै मनवे [v]कृणुथ यूयं कुरुत । यद्वा । अञ्जे ऋजुगमने प्रस्थे गमनं कुरुत । तथा [v]दुर्गे [v]चित् अगन्तव्येऽपि स्थले [v]सुसरणम् । 'सृ गतौ' । शोभनगमनम् [v]आ समन्तात् कुरुत । एवं सति सा [v]एषा [v]अशनिः शत्रूणां तदेतदायुधम् [v]अस्मात् सर्वतो गन्तुमनोः [v]नु क्षिप्रं [v]परः परस्ताद्भवेत्[1] । पश्चात् [v]सा अशनिः [v]अस्रेधन्ती कांश्चिदप्यहिंसती [v]वि [v]नश्यतु विनष्टा[2] भवेत् ॥

यदद्य सूर्य उद्यति प्रियक्षत्रा ऋतं दध ।
यन्निम्रुचि प्रबुधि विश्ववेदसो यद्वा मध्यंदिने दिवः ॥ १९ ॥

यत् । अद्य । सूर्ये । उत्-ऽयति । प्रियऽक्षत्राः । ऋतम् । दध ।
यत् । नि-ऽम्रुचि । प्र-ऽबुधि । विश्व-ऽवेदसः । यत् । वा । मध्यंदिने । दिवः ॥ १९ ॥

हे [v]प्रियक्षत्राः प्रीणयितृबला देवाः [v]सूर्ये सर्वस्य स्वस्वकर्मणि प्रेरके सवितरि [v]उद्यति उद्गच्छति सति [v]अद्य अस्मिन् दिने [v]यत् यदा [v]ऋतं कल्याणभूतं गृहं [v]दध धारयत । दधातेर्लिटि मध्यमबहुवचने रूपम् । [v]यत् यदा हे [v]विश्ववेदसः सर्वधना देवाः [v]निम्रुचि । म्रुचिर्गत्यर्थः । सूर्यस्य निम्रोचने नितरां गमने । सायमित्यर्थः । तस्मिन् धारयथ । यद्वा [v]प्रबुधि तस्य प्रबोधने प्रातःकाले । [v]यद्वा [v]दिवः सूर्यतेजसा दीप्यमानस्याह्नः [v]मध्यंदिने मध्ये धनं मनवे धत्तेत्युत्तरत्र संबन्धः ॥

यद्वाभिपित्वे असुरा ऋतं यते छर्दिर्येम वि दाशुषे ।
वयं तद्वो वसवो विश्ववेदस उप स्थेयाम मध्य आ ॥ २० ॥

यत् । वा । अभि-ऽपित्वे । असुराः । ऋतम् । यते । छर्दिः । येम । वि । दाशुषे ।
वयम् । तत् । वः । वसवः । विश्व-ऽवेदसः । उप । स्थेयाम । मध्ये । आ ॥ २० ॥

हे [v]असुराः प्राज्ञाः संग्राम आयुधानां क्षेप्तारो वा देवाः [v]यद्वा [v]अभिपित्वे अस्मद्यज्ञं प्रति युष्माकमभिप्राप्तौ [v]ऋतं सत्यभूतं यज्ञं [v]यते । इणः शतरि रूपम् । गच्छते [v]दाशुषे हवींषि दत्तवते यजमानाय [v]छर्दिः । 'छर्दिर्दीप्तिदेवनयोः' । दीप्यतेऽनेनेति छर्दिस्तेजः । यद्वा । छर्दन्ति[3] दीप्यन्ते[3] अग्नेति छर्दिर्गृहम् । तद्गृहं तेजो वा [v]वि [v]येम प्रयच्छथ । यद्येवं यूयं कुरुथ तर्हि [v]वयं हे [v]वसवः स्तोतॄणां धनादिभिराच्छादयितारः यद्वा शत्रूणां विवासयितारः [v]विश्ववेदसः सर्वधनाः सर्वज्ञाना वा

---

१. ख-त-न-श-परस्ताद्रवत्; ग-परस्ताद्रवन्ती; घ-भ२-३-परस्ताद्भवतु; भ१-परस्ताद्रवतु ।
२. ज्ञ-त२-न-भ-श-स्वयमेव विनष्टा । ३. ग-छर्दयते दीप्यते ।

हे देवाः ᵛवः युष्मत्संबन्धि ᵛतत् कल्याणं गृहम्। षष्ठ्यर्थे द्वितीया। भवद्भिः प्रत्तस्य[1] गृहस्य ᵛमध्ये ᵛउप ᵛस्थेयाम उपतिष्ठेम। युष्मान् हविर्भिः पूजयेम ॥ तिष्ठतेराशीर्लिङि ' लिङ्याशिष्यङ् ' इत्यङ्प्रत्ययः ॥

यद॒द्य सू॒र॒ उदि॑ते॒ यन्म॒ध्यंदि॑न आ॒तुचि॑ ।
वा॒मं ध॒त्थ मन॑वे विश्ववेदसो॒ जुह्वा॑नाय॒ प्रचे॑तसे ॥ २१ ॥

यत्। अ॒द्य। सू॒रे॑। उत्ऽई॑ते। यत्। म॒ध्यंदि॑ने। आऽतुचि॑ ।
वा॒मम्। ध॒त्थ। मन॑वे। वि॒श्व॒ऽवे॒द॒सः॒। जुह्वा॑नाय। प्रऽचे॑तसे ॥ २१ ॥

हे ᵛविश्ववेदसः सर्वतो[2] व्याप्तधना हे देवाः ᵛयत्[3] यदा[3] ᵛअद्य इदानीम्। यद्वा सूर्ये ᵛउदिते सति । ᵛयत् यदा ᵛमध्यंदिने दिवसस्य मध्ये । यद्वा ᵛआतुचि । आतुचिर्गमनार्थः । सूर्यस्य निम्रोचने । सायमित्यर्थः । ᵛजुह्वानाय अग्नौ हवींषि जुह्वते अत एव ᵛप्रचेतसे प्रकृष्टज्ञानाय ᵛमनवे एतन्नामकायर्षये मह्यं ᵛवामं वननीयं धनं ᵛधत्थ दत्थ तद्वृणीमह इत्युत्तरत्र संबन्धः ॥

व॒यं तद्वः॑ सम्राज॒ आ वृ॑णीमहे पु॒त्रो न ब॒हुपा॑य्यम् ।
अ॒श्याम॒ तदा॑दित्या जुह्व॒तो ह॒विर्येन॒ वस्यो॒ऽनशा॑महै ॥ २२ ॥

व॒यम्। तत्। वः॒। स॒म्ऽरा॒जः॒। आ। वृ॒णी॒म॒हे॒। पु॒त्रः। न। ब॒हुऽपा॑य्यम् ।
अ॒श्याम॑। तत्। आ॒दि॒त्याः॒। जु॒ह्व॑तः। ह॒विः। येन॑। वस्यः॑। अ॒नशा॑महै ॥ २२ ॥

हे ᵛसम्राजः सम्यग्दीप्यमाना देवाः ᵛपुत्रो ᵛन । एकवचनं छान्दसम्। युष्माकं पुत्रा इव स्थिताः पुत्रा यथा पितृभिः पोष्यास्तद्वद्युष्माभिः पोष्याः ᵛवयम्। ᵛबहुपाय्यं बहुभिर्भोज्यं ᵛवः युष्मत्संबन्धि ᵛतत् धनम् ᵛअश्याम प्राप्नुयाम । ᵛयेन[4] धनेन ᵛवस्यः वसीयोऽतिशयेन वसुमत्त्वम् ᵛअनशामहै अश्नवामहै प्राप्नुमः ॥ अश्नोतेर्लोटि व्यत्ययेन श्नम्प्रत्ययः ॥ ॥ ३४ ॥

' ये त्रिंशति ' इति पञ्चर्चमष्टमं सूक्तम्। अत्रानुक्रान्तं—' ये त्रिंशति पञ्चोपान्त्या पुर-उष्णिक् ' इति । मनुर्ऋषिः । प्राग्वत्सप्रीयपरिभाषया गायत्री छन्दः । उपान्त्या पुरउष्णिक् । पूर्ववत् विश्वे देवा देवता । तृतीये छन्दोमे वैश्वदेवशस्त्रे ' ये त्रिंशति ' इत्येतत्सूक्तं वैश्वदेवनिविद्धानम्। सूत्रितं च—' ये त्रिंशतीति वैश्वदेवम् ' (आश्व. श्रौ. ८. ११) इति ॥

ये त्रिं॑शति त्रय॑स्परो दे॒वासो॑ ब॒र्हिरा॑सदन् । वि॒दन्नह॑ द्वि॒तास॑नन् ॥ १ ॥

ये। त्रिं॑शति। त्रय॑ः। प॒रः। दे॒वास॑ः। ब॒र्हिः। आ। अ॒स॒द॒न्। वि॒दन्। अह॑। द्वि॒ता। अ॒स॒न॒न् ॥ १ ॥

मनुराह । ᵛत्रिंशति त्रिंशत्संख्यायाः ᵛपरः परस्तात् ᵛत्रयः । त्रयस्त्रिंशद्देवता इत्यर्थः । ᵛये ᵛदेवासः देवाः ᵛबर्हिः अस्मदीययज्ञसंबन्धिनि बर्हिषि हविःस्वीकरणार्थम् ᵛआसदन् आसीदन्तु अथानन्तरं[5] ᵛविदन् ते देवा अस्मान् हविषां प्रदातृनिति जानन्तु । ततः ᵛद्विता द्विधा द्विप्रकारम् ᵛअसनन् अस्मभ्यं धनं पश्वादिकं च प्रयच्छन्तु । यद्वा । द्विता द्वैधम्। अनेन पौनःपुन्यं लक्ष्यते । पुनःपुनरस्मभ्यं धनादिकं ददत्वित्यर्थः ॥

वरु॑णो मि॒त्रो अ॑र्य॒मा स्मद्रा॑तिषाचो अ॒ग्नयः॑ । पत्नी॑वन्तो॒ वष॑ट्कृताः ॥ २ ॥

---

१. ग–तस्य; घ–दत्तस्य; भ–प्रदत्तस्य। २. श–सर्वत्र। ३. ग-भ–यद्यद्वा; घ-त-न–यद्वा। ४. ख-त-न-भ२-य-श–एतेन। ५. ग-घ-न-श–अह अथा°।

वरुणः । मित्रः । अर्यमा । स्मद्रातिऽसाचः । अग्नयः । पत्नीऽवन्तः । वषट्ऽकृताः ॥ २ ॥

[v]वरुणः वरणीयः संभजनीयः [v]मित्रः स्तोतॄणां यष्टॄणां च धनादिदानेन मित्रभूतः [v]अर्यमा स्तोत्रकारिणे धनं प्रापयन् यद्वा सततं गच्छन् एतन्नामकास्त्रयो देवाः [v]स्मद्रातिषाचः । स्मत् सुमच्छोभना रातिः हविष्प्रदानं येषामस्तीति स्मद्रातयो यजमानाः । तान् सचन्ते धनादिप्रदानेन सेवन्त इति तथोक्ताः । यद्वा । कल्याणं यथा भवति तथा हविषां दातॄन् सचन्त इति । ते तादृशाः [v]पत्नीवन्तः देवपत्नीसहिताः [v]अग्नयः अङ्गनशीला नानाविधा अग्नयः [v]वषट्कृताः । मया 'सोमस्याग्ने वीहि वौषट्' (आश्व. श्रौ. ५. ५) इत्यादिना स्वाहाकृताः । सुहुता इत्यर्थः ॥

ते नो गोपा अपाच्यास्त उदक्त इत्था न्यक् । पुरस्तात्सर्वया विशा ॥ ३ ॥

ते । नः । गोपाः । अपाच्याः । ते । उदक् । ते । इत्था । न्यक् । पुरस्तात् । सर्वया । विशा ॥३॥

[v]ते वरुणादयो देवाः [v]सर्वया सर्वेण [v]विशा अनुचरवर्गेण सह [v]अपाच्याः । अपाची प्रतीची । ततः [v]नः अस्माकं [v]गोपाः गोपायितारो भवन्तु । [v]ते एव [v]उदक् उदीच्याः । 'अञ्चेर्लुक्' इति पञ्चम्यर्थे विहितस्यास्तातेर्लुक् । ततोऽपि अस्माकं रक्षका भवन्तु । [v]इत्था इति शब्देनोर्ध्वां दिशं दक्षिणां च निर्दिशति । इत्थमनेन पूर्वोक्तेन प्रकारेणोर्ध्वाया दक्षिणस्याश्च दिशः [v]ते देवा अस्माकं पालयितारो भवन्तु । तथा [v]न्यक् नीच्या दिशः । अत्रापि पूर्ववदस्तातेर्लुक् । अधस्तादेवाप्यस्माकं[1] त्रातारो भवन्तु । किंच [v]पुरस्तात् प्राच्या दिशश्च ते देवा अस्माकं गोपायितारो भवन्तु ॥

यथा वशन्ति देवास्तथेदसत्तदेषां नकिरा मिनत् । अरावा चन मर्त्यः ॥ ४ ॥

यथा । वशन्ति । देवाः । तथा । इत् । असत् । तत् । एषाम् । नकिः । आ । मिनत् । अरावा । चन । मर्त्यः ॥ ४ ॥

[v]देवाः द्योतमानाः सर्वे देवाः [v]यथा [v]वशन्ति यथा कामयन्ते । 'वश कान्तौ' । 'संप्रसारणाच्च' इति पूर्वरूपस्य छन्दसि विकल्पितत्वाद्यणादेशः । [v]तथेत् यथोशन्ति तथैव [v]असत् तद्भवत्येव । तदेवाह । [v]एषां देवानां [v]तत् कामनं [v]नकिः न कश्चिदपि [v]मिनत्[2] हिनस्ति । 'मीङ् हिंसायाम्' । लेटि रूपम् । 'मीनातेर्निगमे' इति ह्रस्वत्वम् । कथं देवानामभिलषितं तथा भवतीति चेत् तदाह । [v]अरावा । यदि देवाः कस्यचिदप्यदातारं मनुष्यं कामयेरन् तदा अरावा अदाता । [v]चन इत्यप्यर्थे । अदातापि [v]मर्त्यः मनुष्य उशद्भ्यो देवेभ्यो हवींषि प्रयच्छति । तस्मात्तेषां यत्कामनं तत्तथा भवत्येवेत्यर्थः ॥

सप्तानां सप्त ऋष्टयः सप्त द्युम्नान्येषाम् । सप्तो अधि श्रियो धिरे ॥ ५ ॥

सप्तानाम् । सप्त । ऋष्टयः । सप्त । द्युम्नानि । एषाम् । सप्तो इति । अधि । श्रियः । धिरे ॥ ५ ॥

अत्र पुरातनी कथा । इन्द्रसमानं पुत्रमिच्छन्त्या अदितेः (?) गर्भस्य केनचित्कारणेनेन्द्रेण सप्तधा भिन्नत्वात् स गर्भः सप्तगणात्मकोऽभवत् । ततो मरुतः संपन्नाः । 'सप्तगणा वै मरुतः' (तै. सं. २. २. ११. १) इति श्रुतेः । एषा[3] कथा[3] 'इदं पित्रे मरुतामुच्यते वचः' (ऋ. सं. १. ११४. ६) इत्यस्मिन् वर्गे सप्रपञ्चेनाभ्यधायि । तथा चास्या ऋचोऽयमर्थः । [v]सप्तानां मरुतां गणानां [v]सप्त सप्तसंख्याकाः [v]ऋष्टयः आयुधविशेषा विभिन्नाः सन्ति । तथा [v]सप्त सप्तसंख्याकानि [v]द्युम्नानि द्योतमानानि कुण्डलादीन्याभरणानि । द्युम्नान्यन्नानि वा । [v]एषां गणानां विभिन्नानि सन्ति ।

१. ग१–अधस्तादप्य°; ग२–अतस्थादेप्य°; त-भ–अधस्तादेरप्य° । २. घ–आमिनत् । ३. ग–एषोर्थः ।

ततः सप्त मरुतां गणाः vससो सप्तैव सप्तधाः vश्रियः सकला दीप्तीः vअधि vधिरे[1] परस्परमधिकं दधिरे ॥ ॥ ३५ ॥

'बभ्रुरेकः' इति दशर्चं नवमं सूक्तम्। मरीचिपुत्रः कश्यपो वैवस्वतो मनुर्वा ऋषिः। तथा चानुक्रम्यते—'बभ्रुर्दश कश्यपो वा मारीचो द्वैपदम्' इति। दशापि द्विपदा विंशत्यक्षरा विराजः। पूर्ववद्विश्वे देवा देवता। तृतीये छन्दोमे वैश्वदेवशस्त्रे[2] वैश्वदेवसूक्तात् पूर्वमेव द्वैपदं सूक्तं शंसनीयम्। सूत्र्यते हि—'बभ्रुरेक इति द्विपदासूक्तानि पुरस्ताद्वैश्वदेवसूक्तानाम्' (आश्व. श्रौ. ८. ७) इति[3] ॥

बभ्रुरेको विषुणः सूनरो युवाऽऽङ्यङ्क्ते हिरण्ययम् ॥ १ ॥

बभ्रुः। एकः। विषुणः। सूनरः। युवा। अञ्जि। अङ्क्ते। हिरण्ययम्॥ १ ॥

अत्र दशानामृचां किंचित्पदलिङ्गात् पृथग्देवताः। अत्र प्रथमायां बभ्रुरित्यनेन सोमोऽभिधीयते। 'सौम्यं बभ्रुमा लभेत' (तै. सं. २. १. ३. ३) इत्यादिषु दृष्टत्वात्। vबभ्रुः बभ्रुवर्णः शबलतादिषु परिपक्वः। यद्वा। 'डुभृञ् धारणपोषणयोः'। 'कुर्भ्रश्च' (उ. सू. १. २२) इति कुप्रत्ययः। सर्वस्य सुधामयैः किरणैस्तावदुद्वते चन्द्रमसि दुःखोपशमनानि पुष्टानि खलु। तादृशः vविषुणः विश्वगञ्चनः vसूनरः सुष्ठु रात्रीणां नेता। रात्रयश्चन्द्रनेतृकाः खलु। एतादृशः vयुवा प्रतिदिवसमाविर्भूतत्वात्तरुणः vएकः देवः सोमः vहिरण्ययं हिरण्मयम् vअञ्जि। अभिव्यज्यते प्रकाश्यते अनेन इत्यञ्जि आभरणम्। अभिव्यक्तिसाधनं कुण्डलमुकुटादिकं[4] स्वशरीरम् vअङ्क्ते अभिव्यञ्जयति।

योनिमेक आ ससाद द्योतनोऽन्तर्देवेषु मेधिरः ॥ २ ॥

योनिम्। एकः। आ। ससाद। द्योतनः। अन्तः। देवेषु। मेधिरः ॥ २ ॥

अत्र योनिमिति लिङ्गादग्निरुच्यते। 'अग्नये गृहपतये' इत्यादिषु दृष्टत्वात्। vदेवेषु देवानाम् vअन्तः मध्ये vद्योतनः[5] स्वतेजसा दीप्यमानः vमेधिरः मेधावी। अथवा मेधाकाङ्क्षिणां स्तोतॄणां मेधादातृत्वेन मेधायुक्तः। एवंविधः vएकः अग्निः vयोनिं[6] स्थानभूतमाहवनीयादिकम् vआ vससाद हविःस्वीकरणार्थमासीदति ॥

वाशीमेको बिभर्ति हस्त आयसीमन्तर्देवेषु निध्रुविः ॥ ३ ॥

वाशीम्। एकः। बिभर्ति। हस्ते। आयसीम्। अन्तः। देवेषु। निऽध्रुविः ॥ ३ ॥

vदेवेषु vअन्तः देवानां मध्ये द्योतमानः vनिध्रुविः निश्चले स्थाने वर्तमानः। यद्वा। नितरां गमनमस्यास्तीति निध्रुविः सर्वदा गच्छन्। अथवा संग्रामेषु शत्रूणां पुरतोऽतिशयेन स्थैर्यवान्। एतादृशः vएकः त्वष्टृनामको देवः vआयसीम् अयोमयधारां vवाशीम्। 'वाशृ शब्दे'। शब्दयत्याक्रन्दयति शत्रूननयेति वाशी तक्षणसाधनं कुठारः। तं स्वकीये vहस्ते vबिभर्ति धारयति ॥

वज्रमेको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते ॥ ४ ॥

वज्रम्। एकः। बिभर्ति। हस्ते। आऽहितम्। तेन। वृत्राणि। जिघ्नते ॥ ४ ॥

अत्र वज्रलिङ्गादिन्द्रो देवता। vएकः इन्द्रः vआहितं स्वकीयहस्ते निहितं vवज्रम् एतन्नामकमायुधं vबिभर्ति धत्ते। स एवेन्द्रः vतेन निहितेन वज्रेण vवृत्राणि आवरकाणि रक्षांसि पापानि वा vजिघ्नते भृशं हन्ति ॥

---

१. घ-त-न-भ-दधिरे। २. ग-वैश्वदेवशस्त्रे एतत्। सूत्रितं च। इमा नु कं बभ्रुरेक इति द्विपदासूक्तानीति। ३. श-अलंकारणकटकमुकुटादिकं। ४. त-भ-द्योतमानः। ५. ख-त-न-भ१-२-एवं।

तिग्ममेको बिभर्ति हस्त आयुधं शुचिरुग्रो जलाषभेषजः ॥ ५ ॥

तिग्मम् । एकः । बिभर्ति । हस्ते । आयुधम् । शुचिः । उग्रः । जलाषऽभेषजः ॥ ५ ॥

अत्र जलाषभेषज इत्यनेन रुद्रोऽभिधीयते । vशुचिः । 'शुच दीप्तौ' । सर्वतः स्वतेजसा दीप्यमानः । यद्वा । 'शुच शोके' । शत्रूणां शोचयिता दुःखयिता । अत एव vउग्रः उद्गूर्णबलः vजलाषभेषजः रोगापनयनेन सुखकरभैषज्यवान् । यद्वा । स्तोतॄणां दुःखरूपसंसारोच्छेदेन सुखकारिभिषग्रूपः । 'प्रथमो दैव्यो भिषक्' इत्यादिश्रुतिभिरस्य भिषक्त्वं श्रूयते । तादृशः vएकः रुद्रः vतिग्मं तीक्ष्णधारम् vआयुधम् । आयुध्यति संप्रहरति शत्रूननेनेत्यायुधं पिनाकः । तं स्वकीये vहस्ते vबिभर्ति ॥

पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनाम् ॥ ६ ॥

पथः । एकः । पीपाय । तस्करः । यथा । एषः । वेद । निऽधीनाम् ॥ ६ ॥

पथ इति लिङ्गेन पूषा निगद्यते । 'सं पूषन्नध्वनस्तिर' (ऋ. सं. १. ४२. १) इत्यादिषु दृष्टत्वात् । vएकः पूषनामको देवः vपथः मार्गान् vपीपाय । प्यायतिर्वर्धनकर्माप्यत्र रक्षणार्थः । ये अग्निहोत्रादि कर्म कुर्वन्ति तेषां स्वर्गमार्गं ये दुष्कृतं कर्म कुर्वन्ति तेषां यातनामार्गं च रक्षति । उभयेषां मार्गविपर्ययो यथा न भवति तथा पालयतीत्यर्थः । vएषः सोऽयं पूषा vनिधीनां पृथिव्यां निहितानि धनानि vवेद वेत्ति । ज्ञात्वा स्तोतॄणां तानि ददातीत्यर्थः । तत्र दृष्टान्तः । vतस्करो vयथा । यथा चोरः पथि गच्छतां पुरुषाणां धनहरणार्थं मार्गं रक्षति तथा च स चोरो गृहे निहितानि ज्ञात्वा तदाहृत्य स्वसहायेभ्यो यथा तानि ददाति तद्वत् ॥

त्रीण्येक उरुगायो वि चक्रमे यत्र देवासो मदन्ति ॥ ७ ॥

त्रीणि । एकः । उरुऽगायः । वि । चक्रमे । यत्र । देवासः । मदन्ति ॥ ७ ॥

उरुगायो वि चक्रमे इति पदलिङ्गाद्विष्णुरुच्यते । vउरुगायः उरुभिर्बहुभिर्गातव्यः । यद्वा । बहुषु देशेषु गन्ता बहुकीर्तिर्वा । सर्वान् शत्रून् स्वसामर्थ्येन शब्दयत्याक्रन्दयतीति वा उरुगायः । एतादृशः vएकः असहायो विष्णुः vत्रीणि पदानि भुवनानि vवि vचक्रमे साधु पादेन विक्रान्तवान् । 'वेः पादविहरणे' (पा. सू. १. ३. ४१) इति क्रमतेरात्मनेपदम् । vयत्र येषु लोकेषु vदेवासः इन्द्रादयो देवाः vमदन्ति यजमानदत्तैर्हविर्भिर्माद्यन्ति तानि वि चक्रम इत्यन्वयः ॥

विभिर्द्वा चरत एकया सह प्र प्रवासेव वसतः ॥ ८ ॥

विऽभिः । द्वा । चरतः । एकया । सह । प्र । प्रवासाऽइव । वसतः ॥ ८ ॥

एकया सह इति लिङ्गादश्विनावभिधीयेते । vद्वा द्वौ द्वित्वसंख्योपेतावश्विनौ vविभिः । वी गत्यादिषु । क्विप् । छान्दसो ह्रस्वः । गमनसाधनैरंशैः vचरतः संचरेते । किंच इमावश्विनौ vएकया सूर्याख्यया ताभ्यां स्वयंवृतया स्त्रिया vसह vप्र vवसतः प्रवासं सर्वत्र गमनं कुरुतः । प्रवासे दृष्टान्तः । vप्रवासेव । यथा प्रवासिनौ द्वौ पुरुषौ एकया स्त्रिया सह प्रवसतस्तद्वत् ॥

सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती ॥ ९ ॥

सदः । द्वा । चक्राते इति । उपऽमा । दिवि । सम्ऽराजा । सर्पिरासुती इति सर्पिःऽआसुती ॥ ९ ॥

सम्राजाविति लिङ्गेन मित्रावरुणावभिधीयेते । vउपमा उपमौ परस्परं स्वकान्त्योपमानभूतौ । यद्वा । उपमीयत आभ्यां सर्वमित्युपमौ सर्वस्य । एतावेव vसम्राजा सम्राजौ सम्यग्दीप्यमानौ vसर्पि-

रासुती । सर्पिर्घृतमाभ्यामासूयत इति[1] सर्पिरासुती । घृतहविष्कौ ᵛद्वा द्वौ मित्रावरुणौ ᵛदिवि द्युलोके ᵛसदः । सीदन्त्यत्रेति सदः स्थानम् । तत् ᵛचक्राते अकार्ष्टाम् ॥

अर्चन्त एके महि साम मन्वत तेन सूर्यमरोचयन् ॥ १० ॥

अर्चन्तः । एके । महि । साम । मन्वत । तेन । सूर्यम् । अरोचयन् ॥ १० ॥

ᵛएके[2] अत्रयः ᵛमहि महत् ᵛसाम त्रिवृत्पञ्चदशादि ᵛमन्वत अमन्वत । तदेव ᵛअर्चन्तः पूजयन्त एतादृशा[2] अत्रयः ᵛतेन उक्तेन साम्ना ᵛसूर्यमरोचयन् अदीपयन् । त एवात्र देवता ॥ ॥३६॥

'नहि वः' इति चतुर्ऋचं दशमं सूक्तम् । आद्या गायत्री द्वितीया पुरउष्णिक् तृतीया बृहती चतुर्थ्यनुष्टुप् । मनुर्वैवस्वत ऋषिः । पूर्ववद्विश्वे देवा देवता । तथा चानुक्रान्तं—'नहि वश्चतुष्कं पुरउष्णिग्बृहत्यनुष्टुबन्तम्' इति । विनियोगस्तु[3] लिङ्गादवगन्तव्यः[3] ॥

नहि वो अस्त्यर्भको देवासो न कुमारकः । विश्वे सतोमहान्त इत् ॥ १ ॥

नहि । वः । अस्ति । अर्भकः । देवासः । न । कुमारकः । विश्वे । सतः ऽमहान्तः । इत् ॥ १ ॥

हे ᵛदेवासः देवाः ᵛवः युष्माकं मध्ये ᵛअर्भकः ᵛनहि ᵛअस्ति शिशुर्नास्ति खलु[4] । तथा ᵛन ᵛकुमारकः युष्माकं मध्ये कुमारोऽपि नास्ति । किंतु सर्वे यूयं सवयसो नित्यतरुणा भवथ । एतदेव प्रतिपादयति । ᵛविश्वे सर्वे देवा यूयं ᵛसतोमहान्त ᵛइत् । सर्वस्माद्विद्यमानात् पृथिव्यामपि ये महान्तस्ते सतोमहान्त इत्युच्यन्ते । तस्माद्युष्माकमर्भकोऽपि कुमारोऽपि नास्तीत्यर्थः ॥

इति स्तुतासो असथा रिशादसो ये स्थ त्रयश्च त्रिंशच्च । मनोर्देवा यज्ञियासः ॥ २ ॥

इति । स्तुतासः । असथ । रिशादसः । ये । स्थ । त्रयः । च । त्रिंशत् । च ।
मनोः । देवाः । यज्ञियासः ॥ २ ॥

हे ᵛरिशादसः रिशतां हिंसतामसितारो[5] हे ᵛमनोः ᵛयज्ञियासः मनुनामकस्य मम यज्ञार्हा हे ᵛदेवाः ᵛये यूयं ᵛत्रयश्च त्रिसंख्याकाः ᵛत्रिंशच्च त्रिंशत्संख्याकास्त्रयस्त्रिंशद्देवताः ᵛस्थ भवथ अभूत ते यूयम् ᵛइति इत्थमनेन प्रकारेण ᵛस्तुतासः ᵛअसथ । मया मनुना स्तुता भवथ । अस्तेर्लेटि छान्दसो लुगभावः । यद्वा । असतिः कान्त्यर्थः । इत्थं स्तुता यूयं हवींषि कामयध्वम् ॥

ते नस्त्राध्वं तेऽवत त उ नो अधि वोचत ।
मा नः पथः पित्र्यान्मानवादधि दूरं नैष्ट परावतः ॥ ३ ॥

ते । नः । त्राध्वम् । ते । अवत । ते । ऊँ इति । नः । अधि । वोचत ।
मा । नः । पथः । पित्र्यात् । मानवात् । अधि । दूरम् । नैष्ट । पराऽवतः ॥ ३ ॥

हे देवाः ᵛते यूयं ᵛनः अस्मान् ᵛत्राध्वं बाधकेभ्यो रक्षोभ्यस्त्रायध्वम् । ᵛते यूयम् ᵛअवत धनादिप्रदानैरस्मान् रक्षत । ᵛते[6] एव देवाः ᵛनः अस्मान् ᵛअधि ᵛवोचत अधिकं भवन्तः कर्मकारिणो

---

१. ख-श–हूतं; ग-भ–हूयते; त-न–हूत । २. ख-ज्ञ-त१-२-भ-मु–अर्चतः देवान् पूजयन्तः एके केचनात्रयः महि महत् साम मन्वत (मन्वत मन्यंते–भ) उच्चारयंतीत्यर्थः तादृशा; ग–एकेत्रयो महि महत् साम सांत्वनं गानं वा अमन्वत तादृशा; त३-४-न-श–तादृशा । ३. ख-ग-त-न-भ–स्तल्लिंगाद° । ४. ख-ग-त-न-भ-श–कल्पनया नास्तीत्यर्थः । ५. ग–°मत्तारो । ६. घ–त उ ते ।

धनादिमन्तश्च भवन्त्विति यूयं ब्रूत । किंच हे देवाः ᵛमानवात् । मनुः सर्वेषां पिता । तत आगतात् ᵛपित्र्यात्[1] पिता मनुर्यं मार्गं चक्रे तस्मात् ᵛपथः मार्गात् ᵛनः अस्मान् ᵛमा ᵛनैष्ट मा नयत । अपनयनं मा कुरुतेत्यर्थः । सर्वदा ब्रह्मचर्याग्निहोत्रादिकर्माणि येन मार्गेण भवन्ति तमेवास्मान्नयत । किंतु ᵛदूरं य एतद्व्यतिरिक्तो विप्रकृष्टमार्गोऽस्ति तस्मात् ᵛअधि । अधिकमित्यर्थः । अस्मानपनयत ॥

ये देवास इह स्थन विश्वे वैश्वानरा उत ।
अस्मभ्यं शर्म सप्रथो गवेऽश्वाय यच्छत ॥ ४ ॥

ये । देवासः । इह । स्थन । विश्वे । वैश्वानराः । उत ।
अस्मभ्यम् । शर्म । सऽप्रथः । गवे । अश्वाय । यच्छत ॥ ४ ॥

हे ᵛदेवासः देवाः ᵛउत अपि च ᵛवैश्वानराः । विश्वे सर्वे नरः कर्मनेतारोऽध्वर्यवादयो यस्य स विश्वानरो यज्ञः । तस्मिन् सोमादिहवींषि स्वीकर्तुं भवाः प्रादुर्भूताः । भवार्थेऽण्प्रत्ययः । यद्वा । विश्वानरोऽग्निः । देवानां तन्मुखत्वात् तस्य संबन्धिनः । ᵛविश्वे सर्वे ᵛये देवा यूयम् ᵛइह अस्मिन्नस्मदीये यज्ञे ᵛस्थन हवींष्यादातुं भवथ ततः ᵛसप्रथः । 'प्रथ प्रख्याने' । सर्वतः प्रसिद्धं सर्वत्र पृथुतमं वा ᵛशर्म । सर्वं[2] शृणाति हिनस्ति दुःखमिति शर्म सुखम् । तत् ᵛअस्मभ्यं प्रयच्छत । तथा ᵛगवे अस्मदीयेभ्यो यज्ञसाधनभूतेभ्यो गोभ्यः ᵛअश्वाय शर्म सुखं प्रदत्त ॥ ॥ ३७ ॥ ॥ ४ ॥

पञ्चमेऽनुवाके द्वादश सूक्तानि । तत्र 'यो यजाति' इत्यष्टादशर्चं प्रथमं सूक्तम् । वैवस्वतो मनुर्ऋषिः । नवमीचतुर्दश्यावनुष्टुभौ शिष्टाः पञ्चदश्याद्याश्चतस्रः पङ्क्तयः । दशमी पादनिचृत् । 'त्रयः सप्तकाः पादनिचृत्' (अनु. ४. ४) इति तल्लक्षणात्[3] । शिष्टा एकादश प्राग्वत्सप्रपरिभाषया गायत्र्यः । आद्यासु चतसृषु यज्ञस्ततो यजमानप्रशंसा च श्रूयते[4] । अतस्तद्देवताकाः । 'या दंपती' इत्याद्यासु पञ्चम्यादिषु दंपती प्रशस्येते अतस्तद्देवताकाः । अवशिष्टासु नवसु दंपत्योराशिषः प्रतिपाद्यन्ते । अतस्ता एव देवताः । तथा चानुक्रम्यते—'यो यजाति द्वयूनात्रेज्यास्तवो यजमानप्रशंसा च येत्यादिपञ्च दंपत्योः शिष्टास्तदाशिषोऽनुष्टुप्[5] चतुष्पङ्क्त्यन्तं नवम्यनुष्टुब्दशमी पादनिचृत्' इति ॥

यो यजाति यजात इत्सुनवच्च पचाति च । ब्रह्मेदिन्द्रस्य चाकनत् ॥ १ ॥

यः । यजाति । यजाते । इत् । सुनवत् । च । पचाति । च । ब्रह्मा । इत् । इन्द्रस्य । चाकनत् ॥ १ ॥

ᵛयः यजमानः सकृत् ᵛयजाति यागं करोति हविर्भिर्देवान् पूजयति स देवेभ्यो लब्धधनादिकः सन् ᵛयजात ᵛइत् पुनरभीष्टप्राप्तये देवेभ्यो हवींषि प्रयच्छत्येव । तथा स एव यजमानः ᵛसुनवच्च सोमाभिषवं करोति च । स एव ᵛपचाति ᵛच पशुपुरोडाशादिकं पचति च । सर्वत्र यजादिषु लेट्यडागमाः । स यजमानः ᵛइन्द्रस्य ᵛब्रह्म ब्रह्माणि । ᵛइत् अवधारणे । इन्द्रसंबन्धीनि स्तोत्राण्येव ᵛचाकनत् पुनःपुनः कामयते । कनतेः कान्त्यर्थात् यङ्लुकि अभ्यासत्वं छान्दसम् । ततो लेट्यडागमः । अत्र यागे यजमानो धनादि[6] लभत इति यज्ञप्रशंसा । स एव दृष्टफलः सन् सोमाभिषवादीन् करोतीति यजमानप्रशंसा ॥

---

१. ग–परावतः पित्र्य; घ–परावतः दूरात् ; त-न-भ–परावतः । २. भ–'सर्वं' नास्ति । ३. ख-त-न–तल्लक्षण; भ-श–तल्लक्षणं । ४. ग-त-न–स्तूयते । ५. ग-त-न-भ-श–शिष्टा अंत्यास्त° । ६. ख-त-न-भ-श–धनादीन् ।

पुरोळाशं यो अस्मै सोमं ररत आशिरम्। पादित्तं शक्रो अंहसः ॥ २ ॥

पुरोळाशम्। यः। अस्मै। सोमम्। ररते। आऽशिरम्। पात्। इत्। तम्। शक्रः। अंहसः ॥२॥

vयः यजमानः vअस्मै इन्द्राय पशुपुरोळाशं तथा vआशिरं तृतीयसवने गोक्षीरेणामिश्रितं[1] vसोमं[2] vररते प्रयच्छति। रातेर्लेटि[3] शपः श्लुः। अडागमः। vशक्रः समर्थः स इन्द्रः vतं यष्टारम् vअंहसः पापात् तद्रूपाद्रक्षसो वा vपात्। vइत् अवधारणे। अपादेव। रक्षत्येव। पातेर्लुङि रूपम् ॥

तस्य द्युमाँ असद्रथो देवजूतः स शुशुवत्। विश्वा वन्वन्नमित्रिया ॥ ३ ॥

तस्य। द्युऽमान्। असत्। रथः। देवऽजूतः। सः। शुशुवत्। विश्वा। वन्वन्। अमित्रिया ॥३॥

vतस्य देवान् पूजयतो यजमानस्य vदेवजूतः देवैरिन्द्रादिभिः प्रेरितः vद्युमान् दीप्तिमान् vरथः रंहणशीलः स्यन्दनो देवानां हविष्प्रदानरूपेण यज्ञेन vअसत् भवति आगच्छति। ततस्तेन रथेन vअमित्रिया अमित्रियान् शत्रुभिः कृतान् vविश्वा सर्वान् बाधान् vवन्वन्। 'वनोतिर्हिंसाकर्मा' इति यास्कः। हिंसन् vसः एव vशुशुवत् पुत्रादिभिर्धनैश्च वर्धते। अत्र येन मे रथो बाधाभावश्चाभूदिति यागप्रशंसा येन सम्यगिष्टदेवा रथं दत्तवन्त इति यजमानप्रशंसा ॥

अस्य प्रजावती गृहेऽसश्चन्ती दिवेदिवे। इळा धेनुमती दुहे ॥ ४ ॥

अस्य। प्रजाऽवती। गृहे। असश्चन्ती। दिवेऽदिवे। इळा। धेनुऽमती। दुहे ॥ ४ ॥

vप्रजावती पुत्रादियुक्तम्[4] vअसश्चन्ती। सश्चतिर्गतिकर्मा। अगमनशीलं[5] तादृशं[6] vधेनुमती। पयसा सर्वान् धिनोति प्रीणयतीति धेनुर्गौः। तत्सहितम्[7] vइळा अन्नम् vअस्य यष्टुः vगृहे vदिवेदिवे अहरहः vदुहे देवैः दुह्यते। यद्वा। इळेति गवां देवता। सा स्थिरा धेनुमती। गवां पतित्वात् धेनुभिर्धेनुमती। इळा गोदेवता। देवैः प्रेरिता सती अस्य यजमानस्य गृहे दोग्धा। पुत्रादिकमस्मै ददातीत्यर्थः। दुहेर्लटि 'लोपस्त आत्मनेपदेषु' इति तलोपः। अत्र इज्यास्तवः ॥

या दंपती समनसा सुनुत आ च धावतः। देवासो नित्ययाशिरा ॥ ५ ॥

या। दंपती इति दम्ऽपती। सऽमनसा। सुनुतः। आ। च। धावतः।
देवासः। नित्यया। आऽशिरा ॥ ५ ॥

अत्र यजने[8] दंपत्योः[9] स्तुतिः। हे vदेवासः देवाः vसमनसा समनसौ कर्मणि समानमनस्कौ vया यौ vदंपती यज्ञकारिणौ जायापती[10] vसुनुतः सोमाभिषवं कुरुतः। यौ दंपती ततस्तमभिषुतं सोमम् vआ vधावतः vच दशापवित्रेण शोधयतः। 'धावु गतिशुद्ध्योः'। तथा vनित्यया। यत्र तृतीयसवने सोमोऽस्ति तत्राश्रयणद्रव्यं गोक्षीरमस्त्येव। तस्मात् नित्यसंबन्धेन vआशिरा आश्रयणेन गोक्षीरेण संयुतं सोमं यौ प्रयच्छतः तावन्नादीन् प्राप्नुत इत्युत्तरत्र संबन्धः ॥ ॥ ३८ ॥

प्रति प्राशव्यां इतः सम्यञ्चा बर्हिरीशाते। न ता वार्जेषु वायतः ॥ ६ ॥

ति। प्राशव्यान्। इतः। सम्यञ्चा। बर्हिः। आशाते इति। न। ता। वार्जेषु। वायतः ॥६॥

---

१. घ-श-गोक्षीरेण मिश्रितं। २. ख-त-न-भ-श-सोममस्मै। ३. ग-°लेटि; त-न-भ-°लोटि। ४. ग-पुत्रादियुक्ता। ५. ग-अगमनशीलां स्थिरेत्यर्थ; त-अगमनशीलयतीत्यर्थः; न-भ-अगमनशीलं यतीत्यर्थः। ६. ग-तादृशी। ७. ग-तत्सहिता। ८. ग-श-यजमानदम्पत्योः। ९. ख-ग-त-न-भ-श-यौ जायापती।

तौ देवेभ्यो हविषां दातारौ दंपती ᵛप्राशव्यान् । ' अश भोजने ' । प्रपूर्वस्यास्यौणादिको भाव उण्प्रत्ययः । प्राशुर्भक्षणम् । तस्मै साधून् हितान् वा अन्नादीन् ᵛप्रति ᵛइतः प्रतिगच्छतः । यद्वा । प्राशितव्यान् । अत्र वर्णलोपः । तावेव ᵛसम्यञ्चा सम्यञ्चौ समीचीनौ संगतौ ᵛबर्हिः यज्ञम् ᵛआशाते आनशाते । तत्र द्रव्यैर्व्याप्नुतः । तस्मात् तौ यष्टारौ भार्यापती ᵛवाजेषु देवैर्दत्तेष्वन्नेषु ᵛन ᵛवायतः । वयतिर्गत्यर्थः । न गच्छतः[1] । सर्वदान्नसहितौ तिष्ठेतामित्यर्थः ॥

न देवानामपि ह्वुतः सुमतिं न जुगुक्षतः । श्रवो बृहद्विवासतः ॥ ७ ॥

न । देवानाम् । अपि । ह्वुतः । सुऽमतिम् । न । जुघुक्षतः । श्रवः । बृहत् । विवासतः ॥ ७ ॥

एतौ दंपती ᵛदेवानाम् इन्द्रादीनां ᵛन ᵛअपि ᵛह्वुतः अपलापं न कुरुतः । अपिह्नवोऽपलापः[2] । देवेभ्यो हविः प्रदास्याम इति प्रतिज्ञाय पुनरदानमपलापः । ' हुङ् अपनये ' । कथं नापलपन्तीत्यवसीयते । तदाह । ᵛसुमतिं युष्मदीयां शोभनां मतिं ᵛन ᵛजुगुक्षतः जुघुक्षतः न संवरीतुमिच्छतः । संवारणमाच्छादनम् । न छादयत इत्यर्थः । किंतु स्तुतिं कुरुतः । ' गुहू संवरणे ' । ' सनिग्रहगुहोश्च ' (पा. सू. ७. २. १२) इति इट्प्रतिषेधः । ह्रस्वत्वाभावौ । संहिताकाले भत्वाभावो नास्ति छान्दसत्वात् । किंच ᵛबृहत् देवेभ्यो दीयमानत्वात् महत् ᵛश्रवः । श्रव इत्यन्ननाम । महदन्नं ᵛविवासतः युष्मभ्यं प्रयच्छतः । विवासतिः परिचरणकर्मा । दानमपि च[3] परिचरणमेव । देवैर्दत्तमन्नं घृतादिभिर्मिश्रीकृत्य पुनःपुनर्यजत इत्यर्थः[4] ॥

पुत्रिणा ता कुमारिणा विश्वमायुर्व्यश्नुतः । उभा हिरण्यपेशसा ॥ ८ ॥

पुत्रिणा । ता । कुमारिणा । विश्वम् । आयुः । वि । अश्नुतः । उभा । हिरण्यऽपेशसा ॥ ८ ॥

ᵛपुत्रिणा पुत्रवन्तौ तत्रापि ᵛकुमारिणा षोडशवर्षदेशीयपुत्रवन्तौ ᵛहिरण्यपेशसा हिरण्मयैराभरणैरलंकृतरूपौ ᵛउभा उभौ ᵛता तौ दंपती ᵛविश्वं सर्वम् ᵛआयुः आयुष्यं ᵛव्यश्नुतः व्याप्नुतः । यज्ञेन तयोः पुत्रादिकं[5] धनमायुश्च संभवतीत्यर्थः ॥

वीतिहोत्रा कृतद्वसू दशस्यन्तामृताय कम् । समूर्धो रोमशं हतो देवेषु कृणुतो दुवः ॥ ९ ॥

वीतिऽहोत्रा । कृतद्वसू इति कृतत्ऽवसू । दशस्यन्ता । अमृताय । कम् । सम् । ऊर्धः । रोमशम् । हतः । देवेषु । कृणुतः । दुवः ॥ ९ ॥

ᵛवीतिहोत्रा वीतिहोत्रौ । वीतिः प्रियकरो होत्रा यज्ञो ययोस्तौ । अनेन यज्ञेन तयोः सुखादिकं संभवति । तादृशौ । यद्वा । वीतिः कान्त्यर्थः । होत्रेति वाङ्नाम । अस्मद्विषयां स्तुतिं कुरुतमिति पृथक्पृथग्देवैः काम्यमानस्तुती । अत एव ᵛकं सुखप्रदं हवीरूपमन्नं ᵛदशस्यन्ता देवेभ्यः प्रयच्छन्तौ ᵛकृतद्वसू । तकारोपजनश्छान्दसः । याचमानकृतधनौ । पात्रेपूपयुक्तधनावित्यर्थः । एवंविधौ दंपती ᵛअमृताय अमरणाय संतानाभिवृद्धये ᵛरोमशं रोमवन्तं वृषणम् ᵛऊधः योनिं च ᵛसं ᵛहतः संयोजयत इति मैथुनमनूद्यते । ततः सपुत्रादिकौ तौ ᵛदेवेषु ᵛदुवः स्तुत्यन्नदानरूपां परिचर्यां ᵛकृणुतः कुरुतः । पञ्चभिर्दंपती अस्तूयेताम् ॥

आ शर्म पर्वतानां वृणीमहे नदीनाम् । आ विष्णोः सचाभुवः ॥ १० ॥

---

१. ख-त-न-भ-श–गच्छतः सुप्यत इत्यर्थः; ग–गच्छतः श्विष्यत इत्यर्थः । २. ख-ग-ज्ञ-त२–अपह्नवो°; त१–अपह्नुवो° । ३. ख-ग-त-न-भ-श– स्व° । ४. श–अन्नं देवेभ्यः प्रयच्छंतौ कुरुत इत्यर्थः । ५. श–पुत्रपौत्रादिकं ।

आ । शर्म । पर्वतानाम् । वृणीमहे । नदीनाम् । आ । विष्णोः । सचाऽभुवः ॥ १० ॥

एतदादिषु दंपत्योराशिषः । यष्टारो वयं [v]पर्वतानां फलपुष्पसहितलताभिर्युक्तानां[1] यत् [v]शर्म सुखं तत्तेषां स्थैर्यलक्षणं सुखं वा [v]नदीनां चोभयकूलवासिभिर्मुनिभिर्मनुष्यैर्वा जपाद्यनुष्ठाने कृते यत्सुखं तासां भवति तत्सुखमेकत्र स्थित्वा सकलपदार्थभोक्तृत्वलक्षणमनुष्ठानलक्षणं सुखम् [v]आ [v]वृणीमहे संभजामहे । [v]सचाभुवः देवैः सह भवतो देवसहितस्य [v]विष्णोः अपि शत्रुहननलक्षणं यत्सुखं तदपि वयम् [v]आ वृणीमहे । बाधाभावाद्धविष्प्रदानेन देवैः सह वर्तामह इत्यर्थः ॥ ॥ ३९ ॥

ऐतु पूषा रयिर्भगः स्वस्ति सर्वधातमः । उरुरध्वा स्वस्तये ॥ ११ ॥

आ । एतु । पूषा । रयिः । भगः । स्वस्ति । सर्वऽधातमः । उरुः । अध्वा । स्वस्तये ॥ ११ ॥

[v]रयिः धनानां दाता [v]भगः भजनीयः सर्वैः [v]सर्वधातमः सर्वेषां धारयितृतमः सर्वेषां धनादिभिः पोषयितृतमः [v]पूषा एतन्नामको देवः [v]स्वस्ति क्षेमेण [v]आ [v]एतु अस्मान् प्रत्यागच्छतु । ततो मार्गरक्षके पूषण्यागते सति [v]उरुः विस्तीर्णः [v]अध्वा मार्गः [v]स्वस्तये अस्माकमविनाशाय भवतु ॥

अरमतिरनर्वणो विश्वो देवस्य मनसा । आदित्यानामनेहः इत् ॥ १२ ॥

अरमतिः । अनर्वणः । विश्वः । देवस्य । मनसा । आदित्यानाम् । अनेहः । इत् ॥ १२ ॥

देवानां मध्ये पूषणमाह । [v]अनर्वणः । अर्वा गन्तव्यः । शत्रुभिरगन्तव्यस्य अप्रत्यृतस्य[2] [v]देवस्य द्योतमानस्य पूष्णः [v]विश्वः सर्वः स्तोतृजनः [v]मनसा श्रद्धया भक्त्यैव [v]अरमतिः अलंमतिः पर्याप्तस्तुतिर्भवति । तथा हि [v]आदित्यानाम् अदितेः पुत्राणां देवानां दानम् [v]अनेह [v]इत् अपापमेव खलु । तस्मादन्नादिप्राप्तये स्तोतृजनः पूषणं स्तौतीत्यर्थः ॥

यथा नो मित्रो अर्यमा वरुणः सन्ति गोपाः । सुगा ऋतस्य पन्थाः ॥ १३ ॥

यथा । नः । मित्रः । अर्यमा । वरुणः । सन्ति । गोपाः । सुऽगाः । ऋतस्य । पन्थाः ॥ १३ ॥

[v]मित्रोऽर्यमा [v]वरुणः एते त्रयो देवाः [v]नः अस्माकं [v]गोपाः गोपायितारः [v]यथा [v]सन्ति भवन्ति यैर्मार्गैर्वयमेतैः पालयितव्या भवाम ते [v]ऋतस्य सत्यभूतस्य यज्ञस्य [v]पन्थाः पन्थानः [v]सुगाः एषां सुगमना भवन्तु । तैरागत्य अस्मान् यज्ञमार्गे स्थापयन्त्वित्यर्थः ॥

अग्निं वः पूर्व्यं गिरा देवमीळे वसूनाम् ।
सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम् ॥ १४ ॥

अग्निम् । वः । पूर्व्यम् । गिरा । देवम् । ईळे । वसूनाम् ।
सपर्यन्तः । पुरुऽप्रियम् । मित्रम् । न । क्षेत्रऽसाधसम् ॥ १४ ॥

हे देवाः [v]वः युष्माकं [v]पूर्व्यं मुख्यं पुरतो गन्तारं वा [v]देवं स्वभासा दीप्यमानम् [v]अग्निं [v]वसूनां प्राप्तये [v]गिरा स्तुतिलक्षणया वाचा [v]ईळे अहं स्तौमि । किंच [v]सपर्यन्तः युष्मान् परिचरन्तो मनुष्याः [v]पुरुप्रियं बहुविधप्रियं बहूनामभिमतदानेन प्रीणयितारं वा [v]क्षेत्रसाधसम् । क्षियन्ति निवसन्ति कर्मकरणार्थमत्रेति क्षेत्रो यज्ञः । तस्य साधकम् । साधने दृष्टान्तः । [v]मित्रं [v]न । यथा मित्रं सुहृदन्यस्य क्षेत्रं केदारादिकं साधयति तद्वद्यज्ञसाधकमग्निं वसुप्राप्तये स्तुवन्ति ॥

---

१. ख-ग-त-न-भ-श–स्वर्गफलपुष्प° । २. ख-त-भ-श–अप्रत्यृतव्यस्य; ग–आप्तस्य अप्रतृदेवस्य ।

मक्षू देववतो रथः शूरो वा पृत्सु कासु चित् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥१५॥

मक्षु । देवऽवतः । रथः । शूरः । वा । पृत्ऽसु । कासु । चित् ।
देवानाम् । यः । इत् । मनः । यजमानः । इयक्षति । अभि । इत् । अयज्वनः । भुवत् ॥१५॥

[v]देववतः । देवा यष्टव्यतया यस्य सन्ति स देववान् । तस्य [v]रथः देवैर्दत्तः[1] [v]मक्षु शीघ्रं दुर्गमं मार्गमपि प्रविशति । सर्वत्राप्रतिहतगतिरित्यर्थः । तत्र दृष्टान्तः । [v]वा इतिशब्दोऽत्र उपमानवाची । यथा [v]शूरः योद्धा [v]कासु [v]चित् [v]पृत्सु पृतनासु[2] तद्वत् । [v]यः [v]देवानाम् । [v]इत् अवधारणे[3] । [v]मनः एव [v]इयक्षति स्तुतिभिः पूजयितुमिच्छति । यद्वा । देवानां मन इयक्षति हविर्भिर्यष्टुमिच्छति । सः [v]यजमानः [v]अयज्वनः यागमकुर्वतो जनान् [v]अभि [v]भुवत् स्वसामर्थ्येनाभिभवत्येव ॥ इयक्षति । 'यक्ष पूजायाम्' । यज देवपूजादिषु । उभयोरभ्यासस्य संप्रसारणं छान्दसम् । पूर्वस्य 'स्कोः संयोगाद्योः' इति ककारलोपः ॥

न यजमान रिष्यसि न सुन्वान न देवयो ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥ १६ ॥

न । यजमान । रिष्यसि । न । सुन्वान । न । देवयो इति देवऽयो ।
देवानाम् । यः । इत् । मनः । यजमानः । इयक्षति । अभि । इत् । अयज्वनः । भुवत् ॥१६॥

हे [v]यजमान [v]यः[3] भवान्[4] [v]देवानां [v]मनः [v]इयक्षति स त्वं [v]न [v]रिष्यसि विनष्टो न भवसि । किंतु पुत्रपौत्रादिभिर्वर्धसे । हे [v]सुन्वान सोमाभिषवं कुर्वन् यः सुन्वंस्तेषां मन इयक्षति स त्वमपि [v]न रिष्यसि । हे [v]देवयो देवान् कामयमान यो देवानियक्षति तादृशस्त्वमपि [v]न रिष्यसि किंतु धनादिभिर्वर्धसे । देवानां मनो यो यजमानो यष्टुमिच्छति स[5] यागमकुर्वतो जनानभिभवति ॥

नकिष्टं कर्मणा नशन्न प्र योषन्न योषति ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥ १७ ॥

नकिः । तम् । कर्मणा । नशत् । न । प्र । योषत् । न । योषति ।
देवानाम् । यः । इत् । मनः । यजमानः । इयक्षति । अभि । इत् । अयज्वनः । भुवत् ॥१७॥

[v]यः यजमानः [v]देवानां [v]मनः यष्टुमिच्छति[4] [v]तं [v]नकिः न कश्चिदपि [v]नशत् स्वकीयेन [v]कर्मणा न व्याप्नोति । नशतिर्व्याप्तिकर्मा । किंच स यष्टा [v]न [v]प्र [v]योषत् स्वस्मात् स्थानान्न विभक्तः पृथक्कृतो न भवति । किंच [v]न [v]योषति पुत्रादिभिर्धनादिभिश्च न विभक्तो भवति । 'युमिश्रणाभिश्रणयोः' इत्यस्य उभयत्र लेट्यडागमः । शिष्टं व्याख्यातम् ॥

---

१. ग–°देवैरधिष्ठितः । २. ख-ङ्ग-त१-२-भ–पृतनासु संग्रामेषु अप्रतिबद्धगमनः सन् शत्रुहननार्थं प्रविशति तद्वत् । किंच यो यजमानः देवानामिंद्रादीनां मन इदवधारणे; ग–पृतनासु देवानां मन इत् इत्यवधारणे; त३-४-न–पृतना इदवधारणे । ३. घ–हविर्भिः; त-न-भ–सः भवान् । ४. घ–सः अयज्वनः । ५. घ–इयक्षति यष्टुमिच्छति ।

असदत्र सुवीर्यमुत त्यदाश्वश्व्यम् ।
देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥ १८ ॥

असत् । अत्र । सुऽवीर्यम् । उत । त्यत् । आशुऽअश्व्यम् ।
देवानाम् । यः । इत् । मनः । यजमानः । इयक्षति । अभि । इत् । अयज्वनः । भुवत् ॥ १८ ॥

यः यजमानः देवानां मनः यष्टुमिच्छति अत्र अस्मिन् यजमाने सुवीर्यं शोभनवीर्योपेतं पुत्रादिकम् असत् भवत्येव । उत अपि च आश्वश्व्यम् आशुगमनाश्वसंघयुक्तं त्यत् तद्धनादिकं तस्मिन् यजमाने भवति । देवानां मनो यो जनो हविर्भिर्यष्टुमिच्छति यद्वा पूजयितुमिच्छति स जनः अयज्वनः सर्वानभिभवत्येव ॥ ॥ ४० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये षष्ठाष्टके द्वितीयोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ षष्ठस्य तृतीयोऽध्याय आरभ्यते । ' प्र कृतानि ' इति त्रिंशदृचं द्वितीयं सूक्तम् । तत्रेयमनुक्रमणिका— ' प्र कृतानि त्रिंशन्मेधातिथिः ' इति । काण्वो मेधातिथिर्ऋषिः । ' परं गायत्रं प्राग्वत्सप्रेः ' इति परिभाषया गायत्री छन्दः । अनादेशपरिभाषयेन्द्रो देवता । महाव्रते निष्केवल्ये गायत्रतृचाशीतावेतत्सूक्तम् । तथैव पञ्चमारण्यके शौनकेन सूत्रितं—' प्र कृतान्यृजीषिण आ घा ये अग्निमिन्धते ' (ऐ. आ. ५. २. ३) इति । अतिरात्रे प्रथमे पर्याये मैत्रावरुणशस्त्रे ' प्र कृतानि ' इति तृचोऽनुरूपः । सूत्रितं च—' प्र व इन्द्राय मादनं[1] प्र कृतान्यृजीषिणः ' (आश्व. श्रौ. ६. ४) इति । तस्मिन्नेव शस्त्रे ' प्रति श्रुताय ' इत्याद्याः पञ्चदशर्चः । सूच्यते हि—' प्रति श्रुताय वो धृषदिति पञ्चदश ' (आश्व श्रौ. ६. ४) इति । दशमेऽहनि प्रातःसवनेऽच्छावाकवादे पत्नीयजमानस्थाने ' प्रति श्रुताय ' इति तृचः । सूत्रितं च—' प्रति श्रुताय वो धृषदिति तृचौ ' (आश्व. श्रौ. ८. १२) इति । अहीनान्तर्गतस्यातिरात्रस्य प्रथमे पर्याये होतुः ' पन्थ इदुप गायत ' इत्यनुरूपः ॥

प्र कृतान्यृजीषिणः कण्वा इन्द्रस्य गाथया । मदे सोमस्य वोचत ॥ १ ॥

प्र । कृतानि । ऋजीषिणः । कण्वाः । इन्द्रस्य । गाथया । मदे । सोमस्य । वोचत ॥ १ ॥

हे कण्वाः[2] ऋजीषिणः ऋजीषवतः सोमस्य कृतानि कर्माणि इन्द्रस्य गाथया इन्द्रस्य वाचा मदे अस्य मदे संजाते सति प्र वोचत प्रब्रूत ॥

यः सूर्बिन्दुमनर्शनिं पिप्रुं दासमहीशुवम् । वधीदुग्रो रिणन्नपः ॥ २ ॥

---

१. त-न-भ-मादनं प्रति श्रुतायेति तृचः । सूत्रितं च । प्रति श्रुताय वो धृषदिति तृचाविति ।
२. त१-३-४-न-काण्वाः ।

यः । सृबिन्दम् । अनर्शनिम् । पिप्रुम् । दासम् । अहीशुवम् । वधीत् । उग्रः । रिणन् । अपः ॥२॥

[v]यः इन्द्रः [v]उग्रः उर्वणस्तेजस्वी वा सः [v]अपः उदकानि [v]रिणन् प्रेरयन् [v]सृबिन्दं सृबिन्द-नामकं शत्रुम् [v]अनर्शनिम् अनर्शनिनामकं [v]पिप्रुं पिप्रुनामकं च [v]दासं च [v]अहीशुवं च शत्रुं [v]वधीत् अवधीत् जघान ॥

न्यर्बुदस्य विष्टपं वर्ष्माणं बृहतस्तिर । कृषे तदिन्द्र पौंस्यम् ॥ ३ ॥

नि । अर्बुदस्य । विष्टपम् । वर्ष्माणम् । बृहतः । तिर । कृषे । तत् । इन्द्र । पौंस्यम् ॥ ३ ॥

हे [v]इन्द्र [v]बृहतः महतः [v]अर्बुदस्य मेघस्य [v]वर्ष्माणम् उदकस्य वारकं [v]विष्टपं स्थानं [v]नि [v]तिर विध्य । [v]तत् प्रसिद्धं [v]पौंस्यं व्रतं च [v]कृषे कुरु ॥

प्रति श्रुतार्य वो धृषत्तूर्णीशं न गिरेरधि । हुवे सुशिप्रमूतये ॥ ४ ॥

प्रति । श्रुतार्य । वः । धृषत् । तूर्णीशम् । न । गिरेः । अधि । हुवे । सुऽशिप्रम् । ऊतये ॥४॥

हे स्तोतारः [v]वः युष्माकं [v]श्रुताय स्तुतीनां श्रवणाय रक्षणाय च [v]धृषत् शत्रून् धृषन्तं [v]सुशिप्रं सुहनुमिन्द्रं [v]प्रति [v]हुवे ह्वयामि । [v]तूर्णाशं [v]न । यथा घर्मेऽभितप्तः[1] पुमांस्तूर्णाशमुदकम् । तथा च यास्कः—' तूर्णाशमुदकं भवति तूर्णमश्नुते ' (निरु. ५. १६) इति । [v]गिरेरधि मेघं प्रति ह्वयति । ' पर्वतो गिरिः ' इति मेघनामसु पाठात् । तद्वदित्यर्थः ॥

स गोरश्वस्य वि व्रजं मन्दानः सोम्येभ्यः । पुरं न शूर दर्षसि ॥ ५ ॥

सः । गोः । अश्वस्य । वि । व्रजम् । मन्दानः । सोम्येभ्यः । पुरम् । न । शूर । दर्षसि ॥ ५ ॥

हे [v]शूर इन्द्र [v]सः प्रसिद्धस्त्वं [v]मन्दानः मोदमानः [v]गोः [v]अश्वस्य च [v]व्रजं निवासस्थानं [v]सोम्येभ्यः सोमार्हेभ्यः [v]पुरं [v]न शत्रूणां नगरीमिव [v]वि [v]दर्षसि विवृतद्वारं करोषि ॥ ॥ १ ॥

यदिं मे रारणः सुत उक्थे वा दधसे चनः । आरादुप स्वधा गहि ॥ ६ ॥

यदिं । मे । ररणः । सुते । उक्थे । वा । दधसे । चनः । आरात् । उप । स्वधा । आ । गहि ॥६॥

हे इन्द्र [v]मे मम [v]सुते अभिषुते सोमे [v]उक्थे स्तोत्रे [v]वा [v]यदि [v]रारणः रमसे [v]चनः अन्नं यदि च [v]दधसे मह्यं प्रयच्छसि तर्हि [v]आरात् दूरात् [v]स्वधा अन्नेन [v]उप [v]आ [v]गहि उपागच्छ ॥

वयं घा ते अपि ष्मसि स्तोतार इन्द्र गिर्वणः । त्वं नो जिन्व सोमपाः ॥७॥

वयम् । घ । ते । अपि । स्मसि । स्तोतारः । इन्द्र । गिर्वणः । त्वम् । नः । जिन्व । सोमऽपाः ॥७॥

हे [v]गिर्वणः गीर्भिर्वननीय [v]इन्द्र [v]ते तव [v]अपि [v]वयं [v]घ वयं खलु [v]स्तोतारः [v]स्मसि भवामः । हे [v]सोमपाः सोमस्य पातरिन्द्र [v]त्वं [v]नः अस्मान् [v]जिन्व प्रीणयसि ॥

उत नः पितुमा भर संरराणो अविक्षितम् । मघवन्भूरि ते वसु ॥ ८ ॥

उत । नः । पितुम् । आ । भर । सम्ऽररराणः । अविऽक्षितम् । मघऽवन् । भूरि । ते । वसु ॥८॥

---

१. ख–घर्ममभितप्तः; ग-भ-श–घर्माभितप्तः; त-न–घर्मभितप्तः ।

vउत अपि च हे vमघवन् vसंरराणः संरममाणस्त्वम् vअविक्षितम् अविक्षीणं vपितुम् अन्नम् । 'पृक्षः पितुः' इत्यन्ननामसु पाठात् । vनः अस्मभ्यम् vआ vभर आहर । vते तव vवसु धनं vभूरि अधिकं हि ॥

उत नो गोमतस्कृधि हिरण्यवतो अश्विनः । इळाभिः सं रभेमहि ॥ ९ ॥

उत । नः । गोऽमतः । कृधि । हिरण्यऽवतः । अश्विनः । इळाभिः । सम् । रभेमहि ॥ ९ ।

vउत अपि च हे इन्द्र vनः अस्मान् vगोमतः गोमिनः vकृधि कुरु । vअश्विनः[1] अश्वयुक्तान् कृधि[1] । vहिरण्यवतः धनवतश्च[2] कृधि । vइळाभिः अन्नैश्च vसं vरभेमहि वयं संरब्धा भवेम ॥

बृबदुक्थं हवामहे सुप्रकरस्नमूतये । साधु कृण्वन्तमवसे ॥ १० ॥

बृबत्ऽउक्थम् । हवामहे । सुप्रऽकरस्नम् । ऊतये । साधु । कृण्वन्तम् । अवसे ॥ १० ॥

vऊतये लोकस्य रक्षणाय vसुप्रकरस्नं प्रसृतबाहुम् । 'करस्नौ बाहू कर्मणां प्रस्नातारौ' (निरु. ६. १७) इति यास्कवचनात् । vअवसे लोकस्य पालनाय vसाधु vकृण्वन्तं साधु कुर्वन्तं vबृबदुक्थं महदुक्थमिन्द्रं vहवामहे ह्वयामः । तथा च यास्कः —' बृबदुक्थो महदुक्थो वक्तव्यमस्मा उक्थम्' (निरु. ६. ४) इति ॥ ॥ २ ॥

यः संस्थे चिच्छतक्रतुरादीं कृणोति वृत्रहा । जरितृभ्यः पुरूवसुः ॥ ११ ॥

यः । सम्ऽस्थे । चित् । शतऽक्रतुः । आत् । ईम् । कृणोति । वृत्रऽहा ।
जरितृऽभ्यः । पुरुऽवसुः ॥ ११ ॥

vयः प्रसिद्ध इन्द्रः vसंस्थे संग्रामे vशतक्रतुः बहुकर्मा भवति अपि च vआत् अनन्तरम् vईम् इदं शत्रुवधादिकं vकृणोति करोति vचित् एव अयमिन्द्रः vवृत्रहा शत्रूणां हन्ता भवति । किंच vजरितृभ्यः स्तोतृणामर्थे vपुरूवसुः[3] बहुधनो भवति । न स्वार्थमित्यर्थः ॥

स नः शक्रश्चिदा शकदानवाँ अन्तराभरः । इन्द्रो विश्वाभिरूतिभिः ॥१२॥

सः । नः । शक्रः । चित् । आ । शकत् । दानऽवान् । अन्तरऽआभरः ।
इन्द्रः । विश्वाभिः । ऊतिऽभिः ॥ १२ ॥

vशक्रः शक्तः vसः इन्द्रः vनः vचित् अस्मानपि vआ vशकत् शक्तान् करोतु । अपि च vइन्द्रः vदानवान् vविश्वाभिः सर्वैः vऊतिभिः पालनैः vअन्तराभरः अन्तराहरश्छिद्राणामापूरकः । छिद्रापिधायीत्यर्थः ॥

यो रायोऽवनिर्महान्त्सुपारः सुन्वतः सखा । तमिन्द्रमभि गायत ॥ १३ ॥

यः । रायः । अवनिः । महान् । सुऽपारः । सुन्वतः । सखा । तम् । इन्द्रम् । अभि । गायत ॥ १३ ।

vयः इन्द्रः vरायः धनस्य vअवनिः पालकः vमहान् सर्वोत्तमः vसुपारः शोभनपारणश्च भवति । यश्च vसुन्वतः सोमाभिषवं कुर्वतो यजमानस्य vसखा प्रियो भवति । vतमिन्द्रमभि vगायत अभिष्टुत[4] ॥

---

१. ख-ग-त-न-भ-श–'अश्विनः... कृधि' नास्ति । २. ख-त-न-भ-श–मेघवतश्च; ग–मघवतश्च; घ–धनिनश्च । ३. ग–पुरुवसुः । ४. ख-त-भ–अभिष्टुवत हे स्तोतार इति शेषः ।

आयन्तारं महिं स्थिरं पृतनासु श्रवोजितम्। भूरेरीशानमोजसा ॥ १४ ॥

आऽयन्तारम्। महिं। स्थिरम्। पृतनासु। श्रवःऽजितम्। भूरेः। ईशानम्। ओजसा ॥ १४ ॥

vआयन्तारम् आगन्तारं[1] vमहि महान्तं vपृतनासु संग्रामेषु vस्थिरम् अचलं vश्रवोजितं श्रवसो जेतारम् vओजसा बलेन vभूरेः बहोर्धनस्य vईशानम् ईश्वरमभिगायत ॥

नकिरस्य शचीनां नियन्ता सूनृतानाम्। नकिर्वक्ता न दादिति ॥ १५ ॥

नकिः। अस्य। शचीनाम्। निऽयन्ता। सूनृतानाम्। नाकिः। वक्ता। न। दात्। इति ॥१५॥

vअस्य इन्द्रस्य vसूनृतानां शोभनानां vशचीनां कर्मणाम्। 'धीः शची' इति कर्मनामसु पाठात्। vनकिः न कश्चित् vनियन्ता नियामकः। अयमिन्द्रः vन vदादिति न प्रयच्छतीति vनकिर्वक्ता न कश्चिद्वदति। किंतु सर्वोऽपि जनोऽयं प्रदातेत्येव ब्रवीतीत्यर्थः ॥ ॥ ३ ॥

न नूनं ब्रह्मणामृणं प्राशूनामस्ति सुन्वताम्। न सोमो अप्रता पपे ॥ १६ ॥

न। नूनम्। ब्रह्मणाम्। ऋणम्। प्राशूनाम्। अस्ति। सुन्वताम्। न। सोमः। अप्रता। पपे ॥१६॥

vप्राशूनाम्। ये सोमं प्राप्नुवन्ति ते प्राशवः। तेषां सोमं vसुन्वतां vब्रह्मणां ब्राह्मणानाम् vऋणं देवर्णं vन vनूनम् vअस्ति न खलु विद्यते। तथा च श्रूयते—'एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी' (तै. सं. ६. ३. १०. ५) इति। किंच vअप्रता अविस्तीर्णधनेन vसोमः vन vपपे न पीयते। प्रभूतधनेनैव सोमः पीयत इत्यर्थः ॥

पन्य इदुप गायत पन्य उक्थानि शंसत। ब्रह्मा कृणोत पन्य इत् ॥१७॥

पन्ये। इत्। उप। गायत। पन्ये। उक्थानि। शंसत। ब्रह्म। कृणोत। पन्ये। इत् ॥ १७ ॥

हे उपगातारः vपन्य vइत् स्तुत्य एवेन्द्रे[2] vउप vगायत उपगानं कुरुत। किंच vपन्ये[3] एवेन्द्रे vउक्थानि स्तोत्राणि vशंसत। हे स्तोतार इति शेषः। vपन्ये vइत् स्तुत्य एवेन्द्रे ब्रह्माण्यन्यानि स्तोत्राणि vकृणोत कुरुत[4] ॥

पन्य आ दर्दिरच्छता सहस्रा वाज्यवृतः। इन्द्रो यो यज्वनो वृधः ॥१८॥

पन्यः। आ। दर्दिरत्। शता। सहस्रा। वाजी। अवृतः। इन्द्रः। यः। यज्वनः। वृधः ॥ १८ ॥

vयः vवाजी बलवान् vशता वीराणां शतानि vसहस्रा सहस्राणि च vआ vदर्दिरत् आभिमुख्येन दारयति सोऽयम् vइन्द्रः शत्रुभिः vअवृतः[5] vपन्यः स्तुत्यो भवति। vयज्वनः विधिनेष्टवतो यजमानस्य vवृधः वर्धयिता च भवति ॥

वि षू चर स्वधा अनु कृष्टीनामन्वाहुवः। इन्द्र पिब सुतानाम् ॥ १९ ॥

वि। सु। चर। स्वधाः। अनु। कृष्टीनाम्। अनु। आऽहुवः। इन्द्र। पिब। सुतानाम् ॥१९॥

---

१. ख-त-भ-आभिमुख्येत नेतारं। यच्छंतमित्यर्थः; ग-आयामवन्तं; घ-सर्वतो नियामकं। २. ज्ञ-त१-२-एवेंद्रे तस्मिन् सामानि। ३. ख-त-भ-पन्ये स्तुत्ये। ४. घ-पुस्तकेऽस्य मन्त्रस्य भाष्यमेवं विद्यते-हे उपगातारः पन्य इत् स्तुत्य एव इंद्रस्तस्मिन् सामानि उपगायत। हे होतारः पन्ये तस्मिन्निंद्रे उक्थानि स्तोत्राणि शंसत। हे अध्वर्यवः पन्ये इत् तस्मिन्नेवेंद्रे ब्रह्मा अन्नानि कृणोत कुरुत जुहुत। ५. ग-त-न-भ-आवृतः।

हे ᵛइन्द्र ᵛआहुवः आह्वातव्यस्त्वं ᵛकृष्टीनां मनुष्याणां ᵛस्वधाः हवींषि ᵛअनु ᵛसु सुष्ठु ᵛवि ᵛचर । द्वितीयः ᵛअनु पूरणः । ᵛसुतानाम् अभिषुतान् सोमांश्च ᵛपिब ॥

पिबा स्वधैनवानामुत यस्तुग्र्ये सचा । उतायमिन्द्र यस्तवे ॥ २० ॥

पिब । स्वऽधैनवानाम् । उत । यः । तुग्र्ये । सचा । उत । अयम् । इन्द्र । यः । तवे ॥२०॥

हे ᵛइन्द्र ᵛस्वधैनवानां स्वधैनवान् स्वभूतपयसो धेनोः संबन्धिनः सोमान् । धेन्वा क्रीतानित्यर्थः । तथा च श्रूयते—' धेन्वा क्रीणाति ' (तै. सं. ६. १. १०. २) इति । ᵛउत अपि च ᵛय सोमः ᵛतुग्र्ये उदके । ' बुसं तुग्र्यम् ' इत्युदकनामसु पाठात् । ᵛसचा संसृष्टः तमपि सोमं ᵛपिब । ᵛउत अपि च ᵛयः सोमः ᵛतव त्वदीयः त्वामुद्दिश्य गृहीतः सः ᵛअयं त्वया पातव्य इति शेषः ॥ ॥ ४ ॥

अतीहि मन्युषाविणं सुषुवांसमुपारणे । इमं रातं सुतं पिब ॥ २१ ॥

अति । इहि । मन्युऽसाविनम् । सुषुऽवांसम् । उपऽअरणे । इमम् । रातम् । सुतम् । पिब ॥२१॥

हे इन्द्र ᵛमन्युषाविणं क्रोधेन सोमं सुन्वन्तम् ᵛअतीहि अतिगच्छ । तथा ᵛउपारणे । ब्राह्मणा उपेत्य यस्मिन् देशे न रमन्ते स उपारणः । तस्मिन् देशे ᵛसुषुवांसं सुन्वन्तम् अतीहि । ᵛइमं ᵛरातं ब्राह्मणोपद्रवरहिते देशे अस्माभिर्दत्तमिमं ᵛसुतं सोमं ᵛपिब ॥

इहि तिस्रः परावत इहि पञ्च जनाँ अति । धेना इन्द्रावचाकशत् ॥ २२ ॥

इहि । तिस्रः । पराऽवतः । इहि । पञ्च । जनान् । अति । धेनाः । इन्द्र । अवऽचाकशत् ॥२२॥

हे ᵛइन्द्र ᵛधेनाः अस्मदीयाः स्तुतीः ᵛअवचाकशत् योऽपश्यत् स त्वं ᵛपरावतः दूरात् । ' आरे परावतः ' इति दूरनामसु पाठात् । ᵛतिस्रः अग्रपृष्ठपार्श्वदिशः ᵛइहि गच्छ । अनेन अग्रतः पृष्ठतः पार्श्वतश्च इन्द्रस्यागमनमाशास्ते । अपि च ᵛपञ्च[1] ᵛजनान् मनुष्यान् ᵛअति ᵛइहि अतिगच्छ । यद्वा । गन्धर्वाः पितरो देवा असुरा रक्षांसि च पञ्चजनाः । तानतीहीत्यर्थः । तथा च यास्कः—' गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः' (निरु. ३. ८) इति ॥

सूर्यो रश्मिं यथा सृजा त्वा यच्छन्तु मे गिरः । निम्नमापो न सध्र्यक् ॥२३॥

सूर्यः । रश्मिम् । यथा । सृज । आ । त्वा । यच्छन्तु । मे । गिरः ।
निम्नम् । आपः । न । सध्र्यक् ॥ २३ ॥

हे इन्द्र ᵛसूर्यः ᵛयथा ᵛरश्मिं रश्मीन् किरणानश्वप्रग्रहान् वा विसृजति तथा मह्यं धनं विसृज । अपि च ᵛमे मदीयाः ᵛगिरः स्तुतयः ᵛसध्यक् सह त्वाम् ᵛआ ᵛयच्छन्तु । ᵛनिम्नमापो ᵛन । यथा निम्नं देशमापः सह परिगृह्णन्ति तद्वदित्यर्थः ॥

अध्वर्यवा तु हि षिञ्च सोमं वीराय शिप्रिणे । भरा सुतस्य पीतये ॥ २४ ॥

अध्वर्यो इति । आ । तु । हि । सिञ्च । सोमम् । वीराय । शिप्रिणे । भर । सुतस्य । पीतये ॥२४॥

हे ᵛअध्वर्यो ᵛशिप्रिणे हनूमते ᵛवीराय शूरायेन्द्राय ᵛसोमं ᵛतु ᵛहि क्षिप्रमेव ᵛआ ᵛसिञ्च । ᵛसुतस्य सुतं सोमं ᵛपीतये पानाय च[2] ᵛभर आहर च ॥

---

१. ग२-त-न-भ–' पञ्च ' नास्ति । २. ग–' च ' नास्ति ।

य उद्नः फलिगं भिनदय्१क्सिन्धूँरवासृजत् । यो गोषु पक्वं धारयत् ॥२५॥

यः । उद्नः । फलिऽगम् । भिनत् । न्यक् । सिन्धून् । अव३ऽअसृजत् ।
यः । गोषु । पक्वम् । धारयत् ॥ २५ ॥

vयः vउद्नः उदकार्थं vफलिगं मेघम् । 'रैवतः फलिगः' इति मेघनामसु पाठात् । vभिनत् अभिनत् । vसिन्धून् अपश्च अन्तरिक्षात् vन्यक् अर्वाक् vअवासृजत् । vयः च vगोषु vपक्वं पयः vधारयत् अधारयत् । स इन्द्र इत्यर्थः ॥ ॥ ५ ॥

अहन्वृत्रमृचीषम और्णवाभमहीशुवम् । हिमेनाविध्यदर्बुदम् ॥ २६ ॥

अहन् । वृत्रम् । ऋचीषमः । और्णऽवाभम् । अहीशुवम् । हिमेन । अविध्यत् । अर्बुदम् ॥२६॥

vऋचीषमः ऋचा दीप्त्या सम इन्द्रः vवृत्रं वृत्रनामकं शत्रुम् vअहन् जघान । तथा vऔर्णवाभम् और्णवाभनामकम् vअहीशुवम् अहीशुवनामकं च शत्रुमहन् । तथा vहिमेन तुषारेणोदकेन वा vअर्बुदं मेघम् vअविध्यत् ॥

प्र वः उग्राय निष्टुरेऽषाळ्हाय प्रसक्षिणे । देवत्तं ब्रह्म गायत ॥ २७ ॥

प्र । वः । उग्राय । निःऽतुरे । अषाळ्हाय । प्रऽसक्षिणे । देवत्तम् । ब्रह्म । गायत ॥ २७ ॥

हे उद्गातारः vवः यूयम् vउग्राय उद्गूर्णाय vनिष्टुरे शत्रून्निस्तरते vअषाळ्हाय शत्रूणामभिभवित्रे vप्रसक्षिणे प्रसहनशीलायेन्द्राय vदेवत्तं देवप्रसादलब्धं vब्रह्म स्तोत्रं vप्र vगायत ॥

यो विश्वान्यभि व्रता सोमस्य मदे अन्धसः । इन्द्रो देवेषु चेतति ॥ २८ ॥

यः । विश्वानि । अभि । व्रता । सोमस्य । मदे । अन्धसः । इन्द्रः । देवेषु । चेतति ॥ २८ ॥

vअन्धसः अद्यमानस्य vसोमस्य vमदे संजाते vविश्वानि सर्वाणि vव्रता व्रतानि कर्माणि vयः vइन्द्रः vदेवेषु vअभि vचेतति ज्ञापयति तस्मा इन्द्राय देवत्तं ब्रह्म गायतेत्यर्थः ॥

इह त्या सधमाद्या हरी हिरण्यकेश्या । वोळ्हामभि प्रयो हितम् ॥ २९ ॥

इह । त्या । सधऽमाद्या । हरी इति । हिरण्यऽकेश्या । वोळ्हाम् । अभि । प्रयः । हितम् ॥२९॥

vइह यज्ञे vत्या तौ प्रसिद्धौ vसधमाद्या सह माद्यन्तौ vहिरण्यकेश्या हिरण्यकेश्यौ vहरी अश्वौ[1] vहितं हितकरं vप्रयः सोमरूपमन्नम्[2] vअभि अभिलक्ष्य vवोळ्हाम् इन्द्रं वहताम् । प्रापयतामिति ॥

अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी । सोमपेयाय वक्षतः ॥ ३० ॥

अर्वाञ्चम् । त्वा । पुरुऽस्तुत । प्रियमेधऽस्तुता । हरी इति । सोमऽपेयाय । वक्षतः ॥ ३० ॥

हे vपुरुष्टुत[3] इन्द्र vत्वा त्वां vप्रियमेधस्तुता vहरी[4] अश्वौ vसोमपेयाय सोमपानाय vअर्वाञ्चम् अस्मदभिमुखं vवक्षतः वहतः ॥ ॥ ६ ॥

---

१. ख-घ-ज्ञ-त१-२-भ२-३—एतन्नामकावश्वौ । २. घ-त-भ-हविरूपमन्नं । ३. श—पुरुष्टुत बहुभिः स्तुत । ४. श—प्रियमेधैः प्रिययज्ञैः ऋषिभिः स्तुतौ । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं । सुपां सुलुगित्याकारः । ईदृशौ हरी ।

' वयं घ त्वा ' इत्येकोनविंशत्यृचं तृतीयं सूक्तं काण्वस्य मेध्यातिथेरार्षं[1] बृहतीच्छन्दस्कम्। षोडश्याद्यास्तिस्रो गायत्र्य एकोनविंश्यनुष्टुप्। इन्द्रो देवता। तथा चानुक्रान्तं—' वयं घैकोना मेध्यातिथिर्बार्हतं त्रिगायत्र्यनुष्टुबन्तम् ' इति। महाव्रते निष्केवल्ये बार्हततृचाशीतावादितः पञ्चदशर्चैः। तथैव पञ्चमारण्यके शौनकेन सूत्र्यते—' वयं घ त्वा सुतावन्त इति पञ्चदश मो षु त्वा वाघतश्चनेत्येतस्य द्विपदां चोद्धरति ' (ऐ. आ. ५. २. ४) इति। चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रे ' वयं घ त्वा ' इति तृचो वैकल्पिकः स्तोत्रियः। तथा च सूत्रं—' वयं घ त्वा सुतावन्तः क ईं वेद सुते सचा ' (आश्व. श्रौ. ७. ४) इति। स्वरसाहृययमेव तृचोऽनुरूपः। सूत्रितं च—' वयं घ त्वा सुतावन्त इति तिस्रो बृहत्यः ' (आश्व. श्रौ. ८. ५) इति। तस्मिन्नेव शस्त्रे ' क ईं वेद ' इति वैकल्पिकोऽनुरूपः। सूत्रमुक्तमेव ॥

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः।
पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते ॥ १ ॥

वयम्। घ। त्वा। सुतऽवन्तः। आपः। न। वृक्तऽबर्हिषः।
पवित्रस्य। प्रऽस्रवणेषु। वृत्रऽहन्। परि। स्तोतारः। आसते ॥ १ ॥

हे [v]वृत्रहन् इन्द्र[2] [v]त्वा त्वां [v]वयं [v]घ वयं खलु [v]सुतवन्तः सोममभिषुतवन्तः [v]आपो [v]न आप इव प्रवणमभिगच्छामः। [v]पवित्रस्य सोमानां [v]प्रस्रवणेषु [v]वृक्तबर्हिषः स्तीर्णबर्हिषः [v]स्तोतारः च त्वां पर्युपासते[3] ॥

स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः।
कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः ॥ २ ॥

स्वरन्ति। त्वा। सुते। नरः। वसो इति। निरेके। उक्थिनः।
कदा। सुतम्। तृषाणः। ओकः। आ। गमः। इन्द्र। स्वब्दीऽइव। वंसगः ॥ २ ॥

हे [v]वसो वासयितरिन्द्र [v]त्वा त्वां [v]सुते अभिषुते सोमे [v]निरेके निर्गमने [v]उक्थिनः[4] [v]नरः नेतारः [v]स्वरन्ति शब्दायन्ते। अपि चेन्द्रः [v]सुतं सोमं प्रति [v]तृष्यन् [v]स्वब्दीव स्वभूतशब्द इव [v]वंसगः वननीयगमनो वृषभः शब्दं कुर्वन् [v]कदा [v]ओकः स्थानम् [v]आ गमत् ॥

कण्वेभिर्धृष्ण्वा धृषद्वाजं दर्षि सहस्रिणम्।
पिशङ्गरूपं मघवन्विचर्षणे मक्षू गोमन्तमीमहे ॥ ३ ॥

कण्वेभिः। धृष्णो इति। आ। धृषत्। वाजम्। दर्षि। सहस्रिणम्।
पिशङ्गऽरूपम्। मघऽवन्। विऽचर्षणे। मक्षु। गोऽमन्तम्। ईमहे ॥ ३ ॥

हे [v]धृष्णो धर्षकेन्द्र [v]कण्वेभिः कण्वानुद्दिश्य। विभक्तिव्यत्ययः। [v]सहस्रिणं सहस्रसंख्याकं [v]वाजम् [v]आ [v]दर्षि देहि[5]। हे [v]मघवन् धनवन् [v]विचर्षणे विद्रष्टरिन्द्र [v]धृषत् धृष्टं [v]पिशङ्गरूपं [v]गोमन्तं च वाजं [v]मक्षु शीघ्रम् [v]ईमहे याचामहे। त्वामिति शेषः ॥

---

१. ग-घ-त-न-भ–मेधातिथे°। २. ग-त-न-भ–' इन्द्र ' नास्ति। ३. घ–पर्यासते उपासते। ४. ग-घ-त-न–' उक्थिनः ' नास्ति। ५. ग-त-न-भ–' देहि ' नास्ति।

पाहि गायान्धसो मद इन्द्राय मेध्यातिथे ।
यः संमिश्लो हर्योर्यः सुते सचा वज्री रथो हिरण्ययः ॥ ४ ॥

पाहि । गाय । अन्धसः । मदे । इन्द्राय । मेध्यऽअतिथे ।
यः । सम्ऽमिश्लः । हर्योः । यः । सुते । सचा । वज्री । रथः । हिरण्ययः ॥ ४ ॥

हे ᵛमेध्यातिथे ᵛपाहि सोमं पिब । ᵛअन्धसः पीतस्य सोमस्य ᵛमदे तस्मै ᵛइन्द्राय ᵛगाय स्तोत्रं पठ[1] च[1] । ᵛयः इन्द्रः ᵛहर्योः अश्वयोः ᵛसंमिश्लः स्वरथे संमिश्रयिता । ᵛयः च ᵛसुते सोमे ᵛसचा सहायः । य इन्द्रः ᵛवज्री । यस्य ᵛरथः ᵛहिरण्ययः हिरण्मयः ॥

यः सुषव्यः सुदक्षिण इनो यः सुक्रतुर्गृणे ।
य आकरः सहस्रा यः शतामघ इन्द्रो यः पूर्भिदारितः ॥ ५ ॥

यः । सुऽसव्यः । सुऽदक्षिणः । इनः । यः । सुऽक्रतुः । गृणे ।
यः । आऽकरः । सहस्रा । यः । शतऽमघः । इन्द्रः । यः । पुःऽभित् । आरितः ॥ ५ ॥

ᵛयः ᵛसुषव्यः शोभनसव्यहस्तः यश्च ᵛसुदक्षिणः यश्च ᵛइनः ईश्वरः । ' नियुत्वान् इनः ' इतीश्वरनामसु पाठात् । ᵛयः चापि ᵛसुक्रतुः सुप्रज्ञः । ᵛसहस्रा सहस्राणां बहूनां ᵛयः च ᵛआकरः कर्ता । ᵛयः चापि ᵛशतमघः[2] बहुधनः । ᵛयः च ᵛपूर्भित् पुरां भेत्ता । यश्च ᵛआरितः प्रत्यृतः स्तोमान् । तथा च यास्कः—' य आरितः कर्मणि कर्मणि स्थिरः प्रत्यृतः स्तोमान् ' (निरु. ५. १५) इति । सः ᵛइन्द्रः ᵛगृणे अस्माभिः स्तूयते च ॥ ॥ ७ ॥

यो धृषितो योऽवृतो यो अस्ति श्मश्नुषु श्रितः ।
विभूतद्युम्नश्च्यवनः पुरुष्टुतः क्रत्वा गौरिव शाकिनः ॥ ६ ॥

यः । धृषितः । यः । अवृतः । यः । अस्ति । श्मश्नुषु । श्रितः ।
विभूतऽद्युम्नः । च्यवनः । पुरुऽस्तुतः । क्रत्वा । गौःऽइव । शाकिनः ॥ ६ ॥

ᵛयो ᵛधृषितः शत्रूणां धर्षयिता ᵛयः च ᵛअवृतः शत्रुभिरपरिवृतः ᵛयः चापि ᵛश्मश्नुषु युद्धेषु । श्वः श्रयन्त्यस्मिन्निति व्युत्पत्तेः श्मश्नु युद्धमिति वृद्धा वदन्ति । ᵛश्रितः ᵛअस्ति भवति । यश्चापि ᵛविभूतद्युम्नः प्रभूतधनः । यश्च ᵛच्यवनः सोमानां च्यावयिता । यश्चापि ᵛपुरुष्टुतः बहुस्तुतः । स इन्द्रः ᵛक्रत्वा कर्मणा ᵛशाकिनः शक्तस्य यजमानस्य ᵛगौरिव यथा गौः पयसो दोग्ध्री तथा कामानां दोग्धा भवति ॥

क ईं वेद सुते सचा पिबन्तं कद्वयो दधे ।
अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ॥ ७ ॥

कः । ईम् । वेद । सुते । सचा । पिबन्तम् । कत् । वयः । दधे ।
अयम् । यः । पुरः । विऽभिनत्ति । ओजसा । मन्दानः । शिप्री । अन्धसः ॥ ७ ॥

---

१. घ-त-न-भ-च पठ । २. ग-शतामघः ।

vसुते अभिषुते सोमे vसचा ऋत्विजा सह सोमं vपिबन्तम् vईम् एनमिन्द्रं vकः vवेद वेत्ति । न कोऽपि वेत्तीत्यर्थः । vकत् किं वा vवयः अन्नं vदधे धारयति । vयः vअयम् इन्द्रः vशिप्री हनूमान् vअन्धसः सोमेन vमन्दानः मन्दमानः vओजसा बलेन vपुरः vविभिनत्ति ॥

दाना मृगो न वारणः पुरुत्रा चरथं दधे ।
नकिष्ट्वा नि यमदा सुते गमो महाँश्चरस्योजसा ॥ ८ ॥

दाना । मृगः । न । वारणः । पुरुऽत्रा । चरथम् । दधे ।
नकिः । त्वा । नि । यमत् । आ । सुते । गमः । महान् । चरसि । ओजसा ॥ ८ ॥

vमृगः शत्रूणामन्वेषकः vवारणः गजः vदाना मदजलानीव vपुरुत्रा बहुषु यज्ञेषु vचरथं चरणशीलं मदं vदधे इन्द्रो धारयति । अथ प्रत्यक्षस्तुतिः । हे इन्द्र vत्वा त्वां vनकिः vनि vयमत् न कश्चिन्नियच्छति । vसुते सोमे vआ vगमः आगच्छ । vमहान् हि त्वम् vओजसा बलेन सर्वतः vचरसि ॥

य उग्रः सन्ननिष्टृतः स्थिरो रणाय संस्कृतः ।
यदिं स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत् ॥ ९ ॥

यः । उग्रः । सन् । अनिःऽस्तृतः । स्थिरः । रणाय । संस्कृतः ।
यदिं । स्तोतुः । मघऽवा । शृणवत् । हवम् । न । इन्द्रः । योषति । आ । गमत् ॥ ९ ॥

vयः vउग्रः उरूर्णं ओजस्वी वा vसन् भवन् vअनिष्टृतः शत्रुभिरनिस्तीर्णः vस्थिरः अचलः vरणाय युद्धाय vसंस्कृतः शस्त्रैरलंकृतः सोमैर्वा संस्कृतः सः vइन्द्रः vमघवा धनवान् vयदि vस्तोतुः vहवम् आह्वानं vशृणवत् शृणोति तर्ह्यन्यत्र vन योषति न गच्छति । किंतु vआ vगमत् तत्रैवागच्छति ॥

सत्यमित्था वृषेदसि वृषजूतिर्नोऽवृतः ।
वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥ १० ॥

सत्यम् । इत्था । वृषा । इत् । असि । वृषऽजूतिः । नः । अवृतः ।
वृषा । हि । उग्र । शृण्विषे । पराऽवति । वृषो इति । अर्वाऽवति । श्रुतः ॥ १० ॥

हे vउग्र उरूर्णेन्द्र त्वं vसत्यम् vइत्था इत्थं vवृषेत् कामानां वर्षक एव vअसि । vवृषजूतिः वृषभिश्चाकृष्टः vनः अस्माकम् vअवृतः शत्रुभिरपरिवृतश्चासि । vवृषा vहि सेचक एव vशृण्विषे श्रूयसे । vपरावति दूरेऽपि वृषैव vअर्वावति समीपेऽपि वृषा सेचक एव vश्रुतः वृषैवाश्रूयथाः ॥ ॥८॥

वृषणस्ते अभीशवो वृषा कशा हिरण्ययी ।
वृषा रथो मघवन्वृषणा हरी वृषा त्वं शतक्रतो ॥ ११ ॥

वृषणः । ते । अभीशवः । वृषा । कशा । हिरण्ययी ।
वृषा । रथः । मघऽवन् । वृषणा । हरी इति । वृषा । त्वम् । शतक्रतो इति शतऽक्रतो ॥ ११ ॥

हे [v]मघवन् [v]ते तव [v]अभीशवः रश्मयोऽश्वरश्मानः [v]वृषणः वर्षितारः । [v]हिरण्ययी हिरण्मयी [v]कशा अपि [v]वृषा । [v]रथः अपि [v]वृषा वर्षिता । [v]हरी अश्वावपि [v]वृषणा वृषणौ वर्षितारौ । हे [v]शतक्रतो बहुप्रज्ञेन्द्र [v]त्वं च [v]वृषा वर्षिता ॥

वृषा सोता सुनोतु ते वृषन्नृजीषिन्ना भर ।
वृषा दधन्वे वृषणं नदीष्वा तुभ्यं स्थातर्हरीणाम् ॥ १२ ॥

वृषा । सोता । सुनोतु । ते । वृषन् । ऋजीषिन् । आ । भर ।
वृषा । दधन्वे । वृषणम् । नदीषु । आ । तुभ्यम् । स्थातः । हरीणाम् ॥ १२ ॥

हे [v]वृषन् वर्षितरिन्द्र [v]ते तव [v]सोता अभिषवकर्ता [v]वृषा वर्षिता सन् [v]सुनोतु सोमम-भिषुणोतु । हे [v]ऋजीषिन्[1] ऋजुगमनेन्द्र [v]आ [v]भर धनमस्मभ्यमाहर । [v]हरीणाम् अश्वानाम् [v]आ आभिमुख्येन हे [v]स्थातः इन्द्र [v]तुभ्यं [v]नदीषु उदकेषु [v]वृषणं वर्षितारं सोमं [v]वृषा वर्षिता [v]दधन्वे धारितवानभिषवार्थम् ॥

एन्द्र याहि पीतये मधु शविष्ठ सोम्यम् ।
नायमच्छा मघवा शृणवद्गिरो ब्रह्मोक्था च सुक्रतुः ॥ १३ ॥

आ । इन्द्र । याहि । पीतये । मधु । शविष्ठ । सोम्यम् ।
न । अयम् । अच्छ । मघऽवा । शृणवत् । गिरः । ब्रह्म । उक्था । च । सुऽक्रतुः ॥ १३ ॥

हे [v]शविष्ठ बलवत्तम [v]इन्द्र [v]सोम्यं सोमात्मकं [v]मधु अमृतं [v]पीतये पानाय [v]आ [v]याहि आगच्छ । किमर्थमागमनमित्यत आह । यत आगमनमन्तरेण [v]मघवा धनवान् [v]सुक्रतुः सुकर्मा शोभनप्रज्ञो वा [v]अयम् इन्द्रः [v]गिरः स्तुतीः [v]ब्रह्म स्तोत्राण्युक्थानि [v]च[2] [v]न [v]अच्छ[3] [v]शृणवत् नाभिशृणोति । अत आगमनमित्यर्थः ॥

वहन्तु त्वा रथेष्ठामा हरयो रथयुजः ।
तिरश्चिदर्यं सवनानि वृत्रहन्नन्येषां या शतक्रतो ॥ १४ ॥

वहन्तु । त्वा । रथेऽस्थाम् । आ । हरयः । रथऽयुजः ।
तिरः । चित् । अर्यम् । सवनानि । वृत्रऽहन् । अन्येषाम् । या । शतऽक्रतो इति शतऽक्रतो ॥१४॥

हे [v]वृत्रहन् [v]शतक्रतो बहुप्रज्ञ [v]रथेष्ठां रथस्थम् [v]अर्यम् ईश्वरं [v]त्वा त्वां [v]रथयुजः रथे युक्ताः [v]हरयः अश्वाः [v]अन्येषां [v]या यानि सवनानि सन्ति तानि [v]तिरः[4] तिरस्कुर्वन्तः [v]सवनानि अस्मदीयानि सवनानि [v]आ [v]वहन्तु ॥

अस्माकमद्यान्तमं स्तोमं धिष्व महामह ।
अस्माकं ते सवना सन्तु शंतमा मदाय द्युक्ष सोमपाः ॥ १५ ॥

---

१. ख-त-न-भ-श-ऋजीषिन् । २. घ-शस्त्राणि च । ३. ग-घ-त-न-भ-अच्छा । ४. घ-ज्ञ-त१-२-तिरश्चित् ।

अस्माकम्। अद्य। अन्तमम्। स्तोमम्। धिष्व। महाऽमह।
अस्माकम्। ते। सवना। सन्तु। शम्ऽतमा। मदाय। द्युक्ष। सोमऽपाः ॥ १५ ॥

हे [v]महामह महतामपि महन् महापूज वा [v]अद्य [v]अन्तमम् अन्तिकतमम् [v]अस्माकं मेध्यातिथीनां [v]स्तोमं [v]धिष्व धारय। हे [v]द्युक्ष दीप्त [v]सोमपाः सोमस्य पातरिन्द्र [v]ते तव [v]मदाय मदार्थं [v]सवना सवनानि [v]अस्माकं [v]शंतमा शंतमानि सुखतमानि [v]सन्तु भवन्तु ॥ ॥ ९ ॥

नहि षस्तव नो मम शाख्ने अन्यस्य रण्यति। यो अस्मान्वीर आनयत् ॥१६॥

नहि। सः। तव। नो इति। मम। शाख्ने। अन्यस्य। रण्यति।
यः। अस्मान्। वीरः। आ। अनयत् ॥ १६ ॥

[v]यः [v]वीरः शूरः [v]अस्मान् [v]आनयत् [v]सः इन्द्रः [v]तव [v]शाख्ने शासने [v]नहि [v]रण्यति न रमते। [v]मम अपि शाख्ने शासने [v]नो रण्यति। [v]अन्यस्य अपि शासने न रण्यति। किंतु रक्षण एव रमत इत्यर्थः ॥

इन्द्रश्चिद्धा तदब्रवीत्स्त्रिया अशास्यं मनः। उतो अह क्रतुं रघुम् ॥ १७ ॥

इन्द्रः। चित्। घ। तत्। अब्रवीत्। स्त्रियाः। अशास्यम्। मनः।
उतो इति। अह। क्रतुम्। रघुम् ॥ १७ ॥

यो मेध्यातिथेर्धनप्रदाता प्लायोगिरासङ्गः स पुमान् भूत्वा रूयभवत्। तदा यदिन्द्र उवाच तदिदमाह। तथा चाहुः—'प्लायोगिश्चासङ्गो[१] यः स्त्री भूत्वा पुमानभूत् स मेध्यातिथये दानं दत्त्वा' इति। [v]इन्द्रश्चिद्ध इन्द्रः खलु [v]तदब्रवीत्। [v]स्त्रियाः [v]मनः चित्तम् [v]अशास्यं पुरुषेणाशिष्यं शासितुमशक्यं प्रबलत्वादिति। [v]उतो अपि च स्त्रियाः [v]क्रतुं प्रज्ञां [v]रघुं लघुमाह ॥

सप्ती चिद्धा मदच्युता मिथुना वहतो रथम्। एवेद्धूर्वृष्ण उत्तरा ॥ १८ ॥

सप्ती इति। चित्। घ। मदऽच्युता। मिथुना। वहतः। रथम्।
एव। इत्। धूः। वृष्णः। उत्ऽतरा ॥ १८ ॥

[v]सप्ती [v]चिद्ध इन्द्रस्याश्वावपि खलु [v]मदच्युता सोमं प्रति गन्तारावित्यर्थः [v]रथं मिथुनौ[२] [v]वहतः। [v]एवेत् एवमेव [v]वृष्णः इन्द्रस्य रथस्य [v]धूः [v]उत्तरा अश्वयोरुत्तरा भवति ॥

अधः पश्यस्व मोपरि संतरां पादकौ हर।
मा ते कशप्लकौ दृशन्स्त्री हि ब्रह्मा बभूविथ ॥ १९ ॥

अधः। पश्यस्व। मा। उपरि। सम्ऽतराम्। पादकौ। हर।
मा। ते। कशाऽप्लकौ। दृशन्। स्त्री। हि। ब्रह्मा। बभूविथ ॥ १९ ॥

एवमन्तरिक्षादागच्छन् रथस्थ इन्द्रः स्त्रियं सन्तं स्वस्मात् पुंस्वमिच्छन्तं प्लायोगिं यदुवाच तदाह। हे प्लायोगे[३] त्वं स्त्री सती [v]अधः [v]पश्यस्व। एष स्त्रीणां धर्मः। [v]उपरि [v]मा पश्यस्व[४]।

---

१. ग-त-न-भ-प्रायोगि°। २. घ-मिथुना मिथुनौ। ३. घ-प्रयोगे; त३-प्रायोगे; त४-न-भ१-२-प्लायोगे। ४. ग-पश्य।

उपरिदर्शनं स्त्रीणां धर्मो न भवति हि । [v]पादकौ पादावपि [v]संतरां संश्लिष्टौ यथा भवतस्तथा [v]हर । यथा पुरुषो विश्लिष्टपादनिधानो भवति तथा त्वया स्त्रिया न कर्तव्यमित्यर्थः । अपि च [v]ते [v]कशप्लकौ । कशश्च प्लकश्च कशप्लकौ । कशातिराहननकर्मा । कशप्लकावुभे अङ्गे [v]मा [v]दृशन् पुरुषा न पश्यन्तु । तयोरदर्शनं वाससः सुष्ठु परिधानेन भवति । अतः सुष्ठु वाससा परिधानं कुरु । स्त्रियो हि आ गुल्फादभिसंवीता भवन्तीत्यर्थः । [v]हि यस्मात् कारणात् [v]ब्रह्मा सन् [v]स्त्री [v]बभूविथ ॥ ॥ १० ॥

' एन्द्र याहि ' इत्यष्टादशर्चं चतुर्थं सूक्तं काण्वस्य नीपातिथेरार्षमानुष्टुभम् । षोडश्याद्यास्तिस्रो गायत्र्यः । वसुरोचिषोऽङ्गिरोगोत्राः[1] सहस्रसंख्याकाः ' आ यदिन्द्रश्च ' इत्यादीनां तासां तिसृणामृषयः । इन्द्रो देवता । तथा चानुक्रमणम्—' एन्द्र याहि द्वयूना नीपातिथिरानुष्टुभं तृचोऽन्त्यो गायत्रस्तं सहस्रं वसुरोचिषोऽङ्गिरसोऽपश्यन् ' इति । विनियोगो लैङ्गिकः ॥

एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १ ॥

आ । इन्द्र । याहि । हरिऽभिः । उप । कण्वस्य । सुऽस्तुतिम् ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवाऽवसो इति दिवाऽवसो ॥ १ ॥

हे [v]इन्द्र [v]कण्वस्य[2] [v]सुष्टुतिं शोभनां स्तुतिं [v]हरिभिः अश्वैः [v]उप [v]आ [v]याहि[3] । [v]दिवः द्युलोकम् । द्वितीयार्थे षष्ठी । [v]अमुष्य अमुष्मिन्निन्द्रे [v]शासतः शासति[4] । विभक्तिव्यत्ययः । तत्र वयं सुखमास्महे । हे [v]दिवावसो दीप्तहविष्केन्द्र [v]दिवं[5] स्वर्गं [v]यय यूयं गच्छत । बहुवचनं पूजार्थम् । यद्वा । हे दिवावसो दिवो द्युनामकम् अमुष्य अमुं लोकं[6] शासनं कुर्वन्तो यूयं दिवं स्वर्गं यय गच्छत । अत्र बहुवचनं पूजार्थमित्यर्थः ॥

आ त्वा ग्रावा वदन्निह सोमी घोषेण यच्छतु ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ २ ॥

आ । त्वा । ग्रावा । वदन् । इह । सोमी । घोषेण । यच्छतु ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवाऽवसो इति दिवाऽवसो ॥ २ ॥

हे इन्द्र [v]त्वा त्वाम् [v]इह यज्ञे [v]ग्रावा सोमाभिषवपाषाणः [v]सोमी सोमवान् [v]वदन् शब्दं कुर्वन् [v]घोषेण ध्वनिना सह [v]आ [v]यच्छतु । सिद्धमन्यत् ॥

अत्रा वि नेमिरेषामुरां न धूनुते वृकः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ३ ॥

अत्र । वि । नेमिः । एषाम् । उराम् । न । धूनुते । वृकः ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवाऽवसो इति दिवाऽवसो ॥ ३ ॥

---

१. त३-न-भ–वसुमत्तोचिनोंगिरोगोत्राः । २. ख-ज्ञ-त१-२-भ२-३–कण्वस्य एतन्नामकस्यर्षेः । ३. भ–याहि आगच्छ । ४. भ–शासति सति । ५. त-न–दिवं कुर्व । ६. ख-त-न-भ२–लोकं शासतः ।

vअत्र अस्मिन् यज्ञे vएषाम् अभिषवग्राव्णां vनेमिः सोमलता vवि vधूनुते विशेषेण कम्पयति । vउरां मेषीं vवृको vन वृक इव । सिद्धमन्यत् ॥

आ त्वा कण्वा इहावसे हवन्ते वाजसातये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ४ ॥

आ । त्वा । कण्वाः । इह । अवसे । हवन्ते । वाजऽसातये ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवाऽवसो इति दिवाऽवसो ॥ ४ ॥

हे इन्द्र vत्वा त्वाम् vइह यज्ञे vकण्वाः vअवसे रक्षणाय vवाजसातये अन्नस्य प्राप्त्यर्थं च vआ vहवन्ते आभिमुख्येन ह्वयन्ति । सिद्धमन्यत् ॥

दधामि ते सुतानां वृष्णे न पूर्वपाय्यम् ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ५ ॥

दधामि । ते । सुतानाम् । वृष्णे । न । पूर्वऽपाय्यम् ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवाऽवसो इति दिवाऽवसो ॥ ५ ॥

हे इन्द्र vते तुभ्यं vसुतानाम् । द्वितीयार्थे षष्ठी । सुतान् सोमान् vदधामि प्रयच्छामि । vवृष्णे vन यथा वायवे vपूर्वपाय्यं यज्ञमुखे पेयं प्रयच्छन्ति[1] तद्वदहं प्रयच्छामीत्यर्थः । सिद्धमन्यत् ॥ ॥११॥

स्मत्पुरंधिर्न आ गहि विश्वतोधीर्न ऊतये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ६ ॥

स्मत्ऽपुरंधिः । नः । आ । गहि । विश्वतःऽधीः । नः । ऊतये ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवाऽवसो इति दिवाऽवसो ॥ ६ ॥

हे[2] इन्द्र vस्मत्पुरंधिः स्वर्गकुटुम्बी vनः अस्मान् vआ vगहि । तथा vविश्वतोधीः सर्वजगतो धारकस्त्वं vनः अस्माकम् vऊतये रक्षणाय आ गहि आगच्छ[2] ॥

आ नो याहि महेमते सहस्रोते शतामघ ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ७ ॥

आ । नः । याहि । महेऽमते । सहस्रऽऊते । शतऽमघ ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवाऽवसो इति दिवाऽवसो ॥ ७ ॥

हे vमहेमते महाबुद्धे vसहस्रोते सहस्ररक्षण vशतामघ बहुधनेन्द्र त्वं vनः अस्मान् vआ vयाहि आगच्छ । सिद्धमन्यत् ॥

आ त्वा होता मनुर्हितो देवत्रा वक्षदीड्यः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ८ ॥

---

१. ख-ग-घ-त-न-भ-श–प्रयच्छति । २. त३-४-भ१-य-श–पुस्तकेषु षष्ठमन्त्रभाष्यं नास्ति ।

आ । त्वा । होता । मनुःऽहितः । देवऽत्रा । वक्षत् । ईडयः ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ८ ॥

हे इन्द्र ᵛत्वा त्वां ᵛदेवत्रा देवानां मध्ये ᵛईड्यः स्तुत्यः ᵛहोता देवानामाह्वाताग्निः ᵛमनुर्हितः मनुष्यैर्गृहेषु निहितः ᵛआ ᵛवक्षत् वहतु[1] । सिद्धमन्यत् ॥

आ त्वा मदच्युता हरी श्येनं पक्षेव वक्षतः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ९ ॥

आ । त्वा । मदऽच्युता । हरी इति । श्येनम् । पक्षाऽइव । वक्षतः ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ९ ॥

हे इन्द्र ᵛत्वा त्वां ᵛमदच्युता मदच्युतौ शत्रूणां मदस्य च्यावयितारौ ᵛहरी अश्वौ ᵛश्येनं श्येनाख्यं पक्षिणं ᵛपक्षेव आत्मीयपक्षाविव ᵛआ ᵛवक्षतः आवहताम् । सिद्धमन्यत् ॥

आ याह्यर्य आ परि स्वाहा सोमस्य पीतये ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १० ॥

आ । याहि । अर्यः । आ । परि । स्वाहा । सोमस्य । पीतये ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ १० ॥

हे ᵛअर्य ईश्वर त्वम् ᵛआ ᵛपरि सर्वतः ᵛआ ᵛयाहि आगच्छ । ᵛपीतये तव पानार्थं ᵛसोमस्य सोमं ᵛस्वाहा स्वाहा करोमि । सिद्धमन्यत् ॥ ॥ १२ ॥

आ नो याह्युपश्रुत्युक्थेषु रणया इह ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ११ ॥

आ । नः । याहि । उपऽश्रुति । उक्थेषु । रणय । इह ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ ११ ॥

हे इन्द्र त्वं ᵛनः अस्माकम् ᵛइह यज्ञे ᵛउक्थेषु शस्त्रेषु पठ्यमानेषु[2] ᵛउपश्रुति उपश्रुतौ समीपम् ᵛआ ᵛयाहि आगच्छ । अस्मान् ᵛरणय च । सिद्धमन्यत् ॥

सरूपैरा सु नो गहि संभृतैः संभृताश्वः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १२ ॥

सऽरूपैः । आ । सु । नः । गहि । सम्ऽभृतैः । संभृतऽअश्वः ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ १२ ॥

हे इन्द्र ᵛसंभृताश्वः पुष्टाश्वस्त्वं ᵛसु ᵛसंभृतैः ᵛसरूपैः समानरूपैरश्वैः ᵛनः अस्मान् ᵛआ ᵛगहि आगच्छ । सिद्धमन्यत् ॥

---

१. ग–आवहतु । २. ग–शस्यमानेषु ।

आ याहि पर्वतेभ्यः समुद्रस्याधि विष्टपः ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १३ ॥

आ । याहि । पर्वतेभ्यः । समुद्रस्य । अधि । विष्टपः ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ १३ ॥

हे इन्द्र त्वं ᵛपर्वतेभ्यः ᵛआ ᵛयाहि आगच्छ । ᵛसमुद्रस्य अन्तरिक्षस्य ᵛविष्टपः विष्टपाच्च ᵛअधि आयाहीत्यर्थः । सिद्धमन्यत् ॥

आ नो गव्यान्यश्व्या सहस्रा शूर दर्दहि ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १४ ॥

आ । नः । गव्यानि । अश्व्या । सहस्रा । शूर । दर्दहि ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ १४ ॥

हे ᵛशूर इन्द्र त्वं ᵛनः अस्मभ्यं ᵛसहस्रा सहस्राणि सहस्रसंख्यानि ᵛगव्यानि गोहितानि गोरूपाणि वा अश्व्यानि[1] अश्वहितान्यश्वात्मकानि[2] वा ᵛआ ᵛदर्दहि आविवृणु । सिद्धमन्यत् ॥

आ नः सहस्रशो भरायुतानि शतानि च ।
दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १५ ॥

आ । नः । सहस्रऽशः । भर । अयुतानि । शतानि । च ।
दिवः । अमुष्य । शासतः । दिवम् । यय । दिवावसो इति दिवाऽवसो ॥ १५ ॥

हे इन्द्र ᵛनः अस्मभ्यं ᵛसहस्रशः सहस्रधा ᵛअयुतानि ᵛशतानि ᵛच अभीष्टानि वस्तूनि[3] ᵛआ ᵛभर आहर । सिद्धमन्यत् ॥

आ यदिन्द्रश्च दद्वहे सहस्रं वसुरोचिषः । ओजिष्ठमश्व्यं पशुम् ॥ १६ ॥

आ । यत् । इन्द्रः । च । दद्वहे इति । सहस्रम् । वसुऽरोचिषः । ओजिष्ठम् । अश्व्यम् । पशुम् ॥ १६ ॥

ᵛवसुरोचिषः वसुदीप्तयो वयं ᵛसहस्रम् अस्माकं नेता ᵛइन्द्रश्च ᵛओजिष्ठं बलवत्तरम् ᵛअश्व्यम् अश्वात्मकं ᵛपशुं च ᵛयत् यदा ᵛआ ᵛदद्वहे पारावतादादग्रहे । उत्तरत्र संबन्धः ॥

य ऋज्रा वातरंहसोऽरुषासो रघुष्यदः । भ्राजन्ते सूर्यांइव ॥ १७ ॥

ये । ऋज्राः । वातऽरंहसः । अरुषासः । रघुऽस्यदः । भ्राजन्ते । सूर्यांःऽइव ॥ १७ ॥

तदा ᵛये ᵛऋज्राः ऋजुगामिनः ᵛवातरंहसः वायुसदृशवेगाः ᵛअरुषासः आरोचमानाः ᵛरघुष्यदः लघु स्यन्दमाना अश्वाः ᵛसूर्यांइव यथा सूर्यस्तथा ᵛभ्राजन्ते ॥

पारावतस्य रातिषु द्रुवच्चक्रेष्वाशुषु । तिष्ठं वनस्य मध्य आ ॥ १८ ॥

पारावतस्य । रातिषु । द्रुवत्ऽचक्रेषु । आशुषु । तिष्ठम् । वनस्य । मध्ये । आ ॥ १८ ॥

---

१. ज्ञ–अश्व्या । २. ग–अश्वसिहितान्य°; त-न-भ–अश्वसहितान्य° । ३. घ-ज्ञ-श–वसूनि ।

तेषु ᵛपारावतस्य ᵛरातिषु देयेषु ᵛद्रवच्चक्रेषु द्रवद्रथचक्रेषु ᵛआशुषु अश्वेषु । 'तार्क्ष्यः आशुः' इत्यश्वनामसु पाठात् । प्रतिगृहीतेषु सत्सु[1] ᵛवनस्य[2] ᵛमध्ये ᵛआ ᵛतिष्ठम् इति वसुरोचिषां सहस्रं ददति ॥ ॥ १३ ॥

'अग्निनेन्द्रेण' इति चतुर्विंशत्यृचं पञ्चमं सूक्तं इयावाश्वस्यात्रेयस्यार्षम् । अत्रानुक्रमणिका—'अग्निना चतुर्विंशतिः इयावाश्व आग्निनमौपरिष्टाज्ज्योतिषं पङ्क्तिर्महाबृहतीपङ्क्त्यन्तम्' इति । उपरिष्टाज्ज्योतिश्छन्दः । चतुर्थपादस्याष्टाक्षरत्वात् । 'यतोऽष्टकस्ततो ज्योतिः' (अनु. ९. ८) इति तल्लक्षणम् । द्वाविंशी पङ्क्तिः । त्रयोविंशी महाबृहती 'चत्वारोऽष्टका जागतश्च महाबृहती' (अनु. ९. ९) इत्युक्तलक्षणोपेतत्वात् । चतुर्विंशी पङ्क्तिः । अश्विनौ देवता । अतोर्यामे होतुरतिरिक्तोक्थे 'अग्निनेन्द्रेण' इत्येतत्सूक्तम् । सूत्रितं च—'अग्निनेन्द्रेणा भात्यग्निः' (आश्व. श्रौ. ९. ११) इति ॥

अग्निनेन्द्रेण वरुणेन विष्णुनादित्यै रुद्रैर्वसुभिः सचाभुवा ।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥ १ ॥

अग्निना । इन्द्रेण । वरुणेन । विष्णुना । आदित्यैः । रुद्रैः । वसुऽभिः । सचाऽभुवा । सऽजोषसौ । उषसा । सूर्येण । च । सोमम् । पिबतम् । अश्विना ॥ १ ॥

हे ᵛअश्विना अश्विनौ ᵛअग्निनेन्द्रेण ᵛवरुणेन ᵛविष्णुनादित्यैः ᵛरुद्रैः ᵛवसुभिः च ᵛसचाभुवा सहभूतौ ᵛउषसा ᵛसूर्येण ᵛच ᵛसजोषसा संगतौ युवां ᵛसोमं ᵛपिबतम् ॥

विश्वाभिर्धीभिर्भुवनेन वाजिना दिवा पृथिव्याद्रिभिः सचाभुवा ।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥ २ ॥

विश्वाभिः । धीभिः । भुवनेन । वाजिना । दिवा । पृथिव्या । अद्रिऽभिः । सचाऽभुवा । सऽजोषसौ । उषसा । सूर्येण । च । सोमम् । पिबतम् । अश्विना ॥ २ ॥

हे ᵛवाजिना बलिनावश्विनौ ᵛविश्वाभिः सर्वाभिः ᵛधीभिः प्रज्ञाभिः ᵛभुवनेन अखिलेन भूतजातेन च ᵛदिवा द्युलोकेन च ᵛपृथिव्या च ᵛअद्रिभिः च ᵛसचाभुवा सहभूतौ ᵛउषसा ᵛसूर्येण ᵛच[3] संगतौ युवां ᵛसोमं ᵛपिबतम् ॥

विश्वैर्देवैस्त्रिभिरेकादशैरिहाद्भिर्मरुद्भिर्भृगुभिः सचाभुवा ।
सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥ ३ ॥

विश्वैः । देवैः । त्रिऽभिः । एकादशैः । इह । अत्ऽभिः । मरुत्ऽभिः । भृगुऽभिः । सचाऽभुवा । सऽजोषसौ । उषसा । सूर्येण । च । सोमम् । पिबतम् । अश्विना ॥ ३ ॥

हे अश्विनौ ᵛविश्वैर्देवैस्त्रिभिरेकादशैः त्रयस्त्रिंशैः ᵛइह यज्ञे ᵛअद्भिः ᵛमरुद्भिः ᵛभृगुभिः च ᵛसचाभुवा सहभूतौ[4] ᵛउषसा ᵛसूर्येण ᵛच संगतौ[5] युवां[5] ᵛसोमं ᵛपिबतम् ॥

---

१. ख-त-न-भ१-२-श—सत्सु वनस्पतयः । २. ग-ज्ञ-त४—तपोवनस्य । ३. भ३— च सजोषसौ । ४. ख-घ-त-न-भ—सहभूतौ युवां सजोषसा । ५. ख-घ-त-न-भ—'संगतौ युवां' नास्ति ।

जुषेथां यज्ञं बोधतं हवस्य मे विश्वेह देवौ सवनावं गच्छतम् ।
सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥ ४ ॥

जुषेथाम् । यज्ञम् । बोधतम् । हवस्य । मे । विश्वा । इह । देवौ । सवना । अव । गच्छतम् ।
सऽजोषसौ । उषसा । सूर्येण । च । आ । इषम् । नः । वोळ्हम् । अश्विना ॥ ४ ॥

हे अश्विनौ [v]यज्ञं [v]जुषेथां सेवेथाम् । [v]मे मम [v]हवस्य हवं [v]बोधतं जानीतम् । [v]इह यज्ञे [v]विश्वा [v]सवना सर्वाणि सवनानि [v]अव [v]गच्छतं प्राप्नुतम् । [v]इषम् अन्नं [v]नः [v]आ [v]वोळ्हं प्रापयतम् ॥

स्तोमं जुषेथां युवशेव कन्यनां विश्वेह देवौ सवनावं गच्छतम् ।
सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥ ५ ॥

स्तोमम् । जुषेथाम् । युवशाऽईव । कन्यनाम् । विश्वा । इह । देवौ । सवना । अव । गच्छतम् ।
सऽजोषसौ । उषसा । सूर्येण । च । आ । इषम् । नः । वोळ्हम् । अश्विना ॥ ५ ॥

हे अश्विनौ [v]देवौ युवामिहास्मिन् यज्ञे [v]स्तोमं [v]जुषेथां सेवेथाम् । [v]युवशेव यथा युवानौ [v]कन्यनां कन्यानामाह्वानं सेवेते । तद्वदित्यर्थः । [v]इह[१] यज्ञे [v]विश्वा[१] विश्वानि सवनानि [v]अव[१] [v]गच्छतं प्राप्नुतम्[१] । सिद्धमन्यत् ॥

गिरो जुषेथामध्वरं जुषेथां विश्वेह देवौ सवनावं गच्छतम् ।
सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥ ६ ॥

गिरः । जुषेथाम् । अध्वरम् । जुषेथाम् । विश्वा । इह । देवौ । सवना । अव । गच्छतम् ।
सऽजोषसौ । उषसा । सूर्येण । च । आ । इषम् । नः । वोळ्हम् । अश्विना ॥ ६ ॥

हे [v]देवौ अश्विनौ नोऽस्माकं [v]गिरः स्तुतीः [v]जुषेथां सेवेथाम् । तथा [v]अध्वरं यज्ञं च [v]जुषेथाम् । [v]इह यज्ञे विश्वानि[१] सवनानि [v]अव [v]गच्छतं प्राप्नुतम् ॥ ॥ १४ ॥

हारिद्रवेव पतथो वनेदुप सोमं सुतं महिषेवावं गच्छथः ।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥ ७ ॥

हारिद्रवाऽईव । पतथः । वना । इत् । उप । सोमम् । सुतम् । महिषाऽईव । अव । गच्छथः ।
सऽजोषसौ । उषसा । सूर्येण । च । त्रिः । वर्तिः । यातम् । अश्विना ॥ ७ ॥

हे अश्विनौ युवां [v]सुतम् अभिषुतं [v]सोमम् [v]उप [v]पतथः [v]हारिद्रवाविव[४] यथा हारिद्रवौ पक्षिणौ [v]वना वनान्युदकानि[५] । 'वाः वनम्' इत्युदकनामसु पाठात् । उपपततः । तद्वदित्यर्थः । [v]महिषाविव[६] यथा पिपासितौ महिषावुदकान्युपगच्छतः [v]तथा [v]सुतं [v]सोमम् [v]अव [v]गच्छथः । [v]उषसा [v]सूर्येण [v]च संगतौ [v]त्रिर्वर्तिः त्रिर्मार्गं[७] [v]यातं च ॥

---

१. ग-त-न-भ१-२-'इह यज्ञे विश्वा' नास्ति । २. ज्ञ-चागच्छंतु; त१-२-४-न-भ१-२-चागच्छंति; त३-ह्यागच्छंति; भ३-चागच्छतं । ३. ज्ञ-त१-२-न-भ२-विश्वा विश्वानि । ४. घ-हारिद्रवेव । ५. घ-°न्युदकादि । ६. घ-महिषेव । ७. त-भ१-२-त्रिमार्ग ।

हंसाविव पतथो अध्वगाविव सोमं सुतं महिषेवाव गच्छथः ।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥ ८ ॥

हंसौऽईव । पतथः । अध्वगौऽईव । सोमम् । सुतम् । महिषाऽईव । अव । गच्छथः ।
सऽजोषसौ । उषसा । सूर्येण । च । त्रिः । वर्तिः । यातम् । अश्विना ॥ ८ ॥

हे अश्विनौ युवां vहंसाविव यथा हंसौ vअध्वगाविव यथा च पथिकावुदकं[1] गच्छतः तथा वेगेन vसुतं vसोमं vपतथः । सिद्धमन्यत् ॥

श्येनाविव पतथो हव्यदातये सोमं सुतं महिषेवाव गच्छथः ।
सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥ ९ ॥

श्येनौऽईव । पतथः । हव्यऽदातये । सोमम् । सुतम् । महिषाऽईव । अव । गच्छथः ।
सऽजोषसौ । उषसा । सूर्येण । च । त्रिः । वर्तिः । यातम् । अश्विना ॥ ९ ॥

हे अश्विनौ युवां vश्येनाविव यथा श्येनौ गगनं गच्छतः तथा वेगेन vसुतं vसोमं vहव्यदातये यजमानार्थं vपतथः गच्छथः । सिद्धमन्यत् ॥

पिबतं च तृप्णुतं चा च गच्छतं प्रजां च धत्तं द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥ १० ॥

पिबतम् । च । तृप्णुतम् । च । आ । च । गच्छतम् । प्रऽजाम् । च । धत्तम् । द्रविणम् । च । धत्तम् ।
सऽजोषसौ । उषसा । सूर्येण । च । ऊर्जम् । नः । धत्तम् । अश्विना ॥ १० ॥

हे अश्विनौ युवां सोमं vपिबतं vच vतृप्णुतं vच तृप्यतं च । पानार्थं तृप्त्यर्थं vच vआ vगच्छतम्[2] । सोमं पीत्वा तृप्तौ सन्तौ युवामस्मभ्यं vप्रजां vच vधत्तं धारयतम् । vद्रविणं धनं vच vधत्तम् । vउषसा vसूर्येण vच संगतौ vनः अस्मभ्यम् vऊर्जं बलं च vधत्तम् ॥

जयतं च प्र स्तुतं च प्र चावतं प्रजां च धत्तं द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥ ११ ॥

जयतम् । च । प्र । स्तुतम् । च । प्र । च । अवतम् । प्रऽजाम् । च । धत्तम् । द्रविणम् । च ।
धत्तम् । सऽजोषसौ । उषसा । सूर्येण । च । ऊर्जम् । नः । धत्तम् । अश्विना ॥ ११ ॥

हे अश्विनौ युवां vजयतं शत्रून् vच जयतम् । vप्र vस्तुतं स्तोतॄन् vच vप्र vचावतम् अस्मांश्च प्ररक्षतम् । अन्यत् सिद्धम् ॥

हतं च शत्रून्यततं च मित्रिणः प्रजां च धत्तं द्रविणं च धत्तम् ।
सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥ १२ ॥

---

१. ख-घ-त-श–पथिगावु° । २. ग-घ-त-न-भ–गच्छतं च ।

हतम्। च। शत्रून्। यतंतम्। च। मित्रिणः। प्रऽजाम्। च। धत्तम्। द्रविणम्। च। धत्तम्।
सऽजोषसौ। उषसा। सूर्येण। च। ऊर्जम्। नः। धत्तम्। अश्विना ॥ १२ ॥

हे अश्विनौ युवां vशत्रून् vच vहतम्। उतापि च vयततं vमित्रिणः मैत्रीयुक्तान् vच गच्छतम्। सिद्धमन्यत् ॥ ॥ १५ ॥

मित्रावरुणवन्ता उत धर्मवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम्।
सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥ १३ ॥

मित्रावरुणऽवन्तौ। उत। धर्मऽवन्ता। मरुत्वन्ता। जरितुः। गच्छथः। हवम्।
सऽजोषसौ। उषसा। सूर्येण। च। आदित्यैः। यातम्। अश्विना ॥ १३ ॥

vउत अपि च हे अश्विनौ युवां vमित्रावरुणवन्ता मित्रावरुणयुक्तौ vधर्मवन्ता धर्मयुक्तौ च vमरुत्वन्ता मरुद्भिर्युक्तौ च vजरितुः स्तोतुः vहवम् आह्वानं vगच्छथः आगच्छतम्। vउषसा vसूर्येण vच vआदित्यैः च[1] vयातं गच्छतम् ॥

अङ्गिरस्वन्ता उत विष्णुवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम्।
सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥ १४ ॥

अङ्गिरस्वन्तौ। उत। विष्णुऽवन्ता। मरुत्वन्ता। जरितुः। गच्छथः। हवम्।
सऽजोषसौ। उषसा। सूर्येण। च। आदित्यैः। यातम्। अश्विना ॥ १४ ॥

vउत अपि च हे अश्विनौ युवाम् vअङ्गिरस्वन्तौ अङ्गिरोभियुक्तौ vविष्णुवन्ता विष्णुना च सहितौ मरुद्भिश्च[2] सहितौ स्तोतुराह्वानं[3] गच्छतम्। सिद्धमन्यत् ॥

ऋभुमन्ता वृषणा वाजवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम्।
सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥ १५ ॥

ऋभुऽमन्ता। वृषणा। वाजऽवन्ता। मरुत्वन्ता। जरितुः। गच्छथः। हवम्।
सऽजोषसौ। उषसा। सूर्येण। च। आदित्यैः। यातम्। अश्विना ॥ १५ ॥

हे अश्विनौ vऋभुमन्ता ऋभुसहितौ vवृषणा कामानां वर्षितारौ वाजवन्तौ[4] वाजयुक्तौ[4] मरुत्वन्तौ च स्तोतुराह्वानं गच्छतम्। ऋभुमन्ता वाजवन्ता इति ज्येष्ठकनिष्ठाभ्यां व्यपदेशः। सिद्धमन्यत् ॥

ब्रह्म जिन्वतमुत जिन्वतं धियो हतं रक्षांसि सेधतममीवाः।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥ १६ ॥

ब्रह्म। जिन्वतम्। उत। जिन्वतम्। धियः। हतम्। रक्षांसि। सेधतम्। अमीवाः।
सऽजोषसौ। उषसा। सूर्येण। च। सोमम्। सुन्वतः। अश्विना ॥ १६ ॥

---

१. ख-घ-ञ-त१-२–च सजोषसा संगतौ। २. ख-घ-ञ-त१-२–मरुत्वंता मरुद्भिश्च। ३. ख-घ-ञ-त१-२–मे जरितुः मम स्तोतुराह्वानं। ४. घ-भ३–वाजवंता अन्नयुक्तौ।

हे अश्विनौ युवां vब्रह्म ब्राह्मणं[1] vजिन्वतं प्रीणयतम्। vउत अपि च vधियः कर्माणि vजिन्वतम्। vहतं च vरक्षांसि। vअमीवाः राक्षसांश्च[2] vसेधतम्। vउषसा vसूर्येण vच संगतौ vसुन्वतः यजमानस्य vसोमं पिबतमित्यर्थः ॥

क्षत्रं जिन्वतमुत जिन्वतं नृन्हतं रक्षाꣳसि सेधतममीवाः ।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥ १७ ॥

क्षत्रम्। जिन्वतम्। उत। जिन्वतम्। नॄन्। हतम्। रक्षाꣳसि। सेधतम्। अमीवाः।
सऽजोषसौ। उषसा। सूर्येण। च। सोमम्। सुन्वतः। अश्विना ॥ १७ ॥

हे अश्विनौ युवां vक्षत्रं क्षत्रियं vजिन्वतम्। vउत अपि च vनॄन् योद्धॄन् vजिन्वतम्। सिद्धमन्यत् ॥

धेनूर्जिन्वतमुत जिन्वतं विशो हतं रक्षाꣳसि सेधतममीवाः ।
सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥ १८ ॥

धेनूः। जिन्वतम्। उत। जिन्वतम्। विशः। हतम्। रक्षाꣳसि। सेधतम्। अमीवाः।
सऽजोषसौ। उषसा। सूर्येण। च। सोमम्। सुन्वतः। अश्विना ॥ १८ ॥

हे अश्विनौ vधेनूर्जिन्वतम्। vउत अपि च vविशः वैश्यांश्च vजिन्वतम्। सिद्धमन्यत् ॥ ॥ १६ ॥

अत्रेरिव शृणुतं पूर्व्यस्तुतिं श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥ १९ ॥

अत्रेःऽइव। शृणुतम्। पूर्व्यऽस्तुतिम्। श्यावऽअश्वस्य। सुन्वतः। मदऽच्युता।
सऽजोषसौ। उषसा। सूर्येण। च। अश्विना। तिरःऽअह्न्यम् ॥ १९ ॥

हे अश्विनौ vमदच्युता शत्रूणां मदस्य च्यावयितारौ युवां vसुन्वतः सोमाभिषवं कुर्वतः vश्यावाश्वस्य मम पितामहस्य vअत्रेरिव vपूर्व्यस्तुतिं मुख्यां स्तुतिं vशृणुतम्। vउषसा vसूर्येण vच संगतौ vतिरोअह्न्यं सोमं पिबतम्। तिरोहिते पूर्वस्मिन्नहनि अपरेद्युः प्रातरश्विनोर्याग इति ॥

सर्गाँइव सृजतं सुष्टुतीरुप श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥ २० ॥

सर्गान्ऽइव। सृजतम्। सुऽस्तुतीः। उप। श्यावऽअश्वस्य। सुन्वतः। मदऽच्युता।
सऽजोषसौ। उषसा। सूर्येण। च। अश्विना। तिरःऽअह्न्यम् ॥ २० ॥

हे अश्विनौ vश्यावाश्वस्य मम vसुष्टुतीः शोभनाः स्तुतीः vसर्गानिव[3]। आभरणानि वा हवींषि वा सर्गाः। तान् यथा तथा आत्मनि vउप vसृजतम्। सिद्धमन्यत् ॥

---

१. ख-त-ब्रह्मणो; ग-न-ब्रह्मणं; श-ब्रह्माणं। २. ग-रोगांश्च। ३. ग-त२-३-४-सर्गाणि; ज्ञ-न-भ-श-सर्गाणि वस्त्राणि; त१-सर्गाणिव।

रश्मीँरिव यच्छतमध्वराँ उप श्यावाश्वस्य सुन्वतो मदच्युता ।
सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥ २१ ॥

रश्मीन्ऽइव । यच्छतम् । अध्वरान् । उप । श्यावऽअश्वस्य । सुन्वतः । मदऽच्युता ।
सऽजोषसौ । उषसा । सूर्येण । च । अश्विना । तिरःऽअह्न्यम् ॥ २१ ॥

हे अश्विनौ[1] vश्यावाश्वस्य मम vअध्वरान्[2] vरश्मीनिव यथाश्वप्रग्रहांस्तद्वत् vउप vयच्छतम् उपगच्छतम् । सिद्धमन्यत् ॥

अर्वाग्रथं नि यच्छतं पिबतं सोम्यं मधु ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥ २२ ॥

अर्वाक् । रथम् । नि । यच्छतम् । पिबतम् । सोम्यम् । मधु । आ । यातम् । अश्विना ।
आ । गतम् । अवस्युः । वाम् । अहम् । हुवे । धत्तम् । रत्नानि । दाशुषे ॥ २२ ॥

हे अश्विनौ वां स्वीयं vरथम् vअर्वाक् अस्मदभिमुखं vनि vयच्छतम् । vसोम्यं सोममयं vमधु अमृतं च vपिबतम् । यज्ञम् vआ vयातं च । सोमं प्रति vआ vगतम् आगच्छतं च । vअवस्युः रक्षणकामः vअहं श्यावाश्वः vवां vहुवे ह्वयामि । vदाशुषे हवींषि प्रयच्छते मह्यं vरत्नानि vधत्तं धारयतम् ॥

नमोवाके प्रस्थिते अध्वरे नरा विवक्षणस्य पीतये ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥ २३ ॥

नमःऽवाके । प्रऽस्थिते । अध्वरे । नरा । विवक्षणस्य । पीतये । आ । यातम् । अश्विना ।
आ । गतम् । अवस्युः । वाम् । अहम् । हुवे । धत्तम् । रत्नानि । दाशुषे ॥ २३ ॥

हे अश्विनौ vनरा नेतारौ युवां vविवक्षणस्य हवनशीलस्य[3] मम vप्रस्थिते vनमोवाके । नमस्काराय प्रोच्यते स नमोवाकः । तस्मिन् vअध्वरे यज्ञे । तथा च ब्राह्मणम्—'उभयं सह वा एतद्यज्ञ एव यत्सूक्तवाकश्च नमोवाकश्च' (श. ब्रा. १. ९. १. ४) इति । vपीतये सोमपानाय vआ vयातम् । सिद्धमन्यत् ॥

स्वाहाकृतस्य तृम्पतं सुतस्य देवावन्धसः ।
आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥ २४ ॥

स्वाहाऽकृतस्य । तृम्पतम् । सुतस्य । देवौ । अन्धसः । आ । यातम् । अश्विना ।
आ । गतम् । अवस्युः । वाम् । अहम् । हुवे । धत्तम् । रत्नानि । दाशुषे ॥ २४ ॥

हे अश्विनौ vदेवौ युवां vसुतस्य अभिषुतस्य vस्वाहाकृतस्य हुतस्य vअन्धसः सोमस्य vतृम्पतं तृप्यतम् । सिद्धमन्यत् ॥ ॥ १७ ॥

---

१. घ–अश्विनौ मदच्युता शत्रूणां मदस्य च्यावयितारौ युवां सुन्वतः । २. भ–अध्वरान् यज्ञान् । ३. ग-भ३–वहनशीलस्य; श–दर्शनशीलस्य ।

'अवितासि' इति सप्तर्चं षष्ठं सूक्तमात्रेयस्य श्यावाश्वस्यार्षम्। अत्रेयमनुक्रमणिका—'अविता सप्त शाक्करं महापङ्क्त्यन्तम्' इति। षट्पञ्चाशदक्षरा शक्करी छन्दः। 'श्यावाश्वस्य' इति सप्तमी महापङ्क्तिः 'षळष्टका वा महापङ्क्तिः' (अनु. १०. ३) इति लक्षणसद्भावात्। दशरात्रे पञ्चमेऽहनि मरुत्वतीय इदं सूक्तम्। सूत्रितं च–'अवितासीत्था हि' (आश्व. श्रौ. ७. १२) इति॥

अवितासि सुन्वतो वृक्तबर्हिषः पिबा सोमं मदाय कं शतक्रतो।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः सम्प्सुजिन्मरुत्वाँ इन्द्र सत्पते॥१॥

अविता। असि। सुन्वतः। वृक्तऽबर्हिषः। पिब। सोमम्। मदाय। कम्। शतक्रतो इति शतऽक्रतो। यम्। ते। भागम्। अधारयन्। विश्वाः। सेहानः। पृतनाः। उरु। ज्रयः। सम्। अप्सुऽजित्। मरुत्वान्। इन्द्र। सत्ऽपते॥ १॥

हे ᵛशतक्रतो बहुकर्मन्निन्द्र ᵛसुन्वतः सोमाभिषवं कुर्वतः ᵛवृक्तबर्हिषः स्तीर्णबर्हिषो यजमानस्य ᵛअविता रक्षिता ᵛअसि भवसि। ᵛमदाय मदार्थं ᵛसोमं ᵛपिब। हे ᵛसत्पते सतां पते ᵛइन्द्र ᵛते तुभ्यं ᵛयं सोमस्य ᵛभागमधारयन् सर्वे देवा अकल्पयन्। तथा च यजुर्ब्राह्मणं—'स एतं माहेन्द्रमुद्धारमुदहरत वृत्रं हत्वान्यासु देवतास्वधि' (तै. सं. ६. ५. ५. ३) इति। तं भागं ᵛविश्वाः ᵛपृतनाः शत्रूणां सर्वाः सेनाः ᵛउरु बहु ᵛज्रयः वेगं च ᵛसं ᵛसेहानः सम्यगभिभवन् ᵛअप्सुजित् अप्सु जेता च सन् पिब॥

प्राव स्तोतारं मघवन्नव त्वां पिबा सोमं मदाय कं शतक्रतो।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः सम्प्सुजिन्मरुत्वाँ इन्द्र सत्पते॥२॥

प्र। अव। स्तोतारम्। मघऽवन्। अव। त्वाम्। पिब। सोमम्। मदाय। कम्। शतक्रतो इति शतऽक्रतो। यम्। ते। भागम्। अधारयन्। विश्वाः। सेहानः। पृतनाः। उरु। ज्रयः। सम्। अप्सुऽजित्। मरुत्वान्। इन्द्र। सत्ऽपते॥ २॥

हे ᵛमघवन् ᵛस्तोतारं ᵛप्राव प्ररक्ष। ᵛत्वां च ᵛअव सोमपानेन रक्ष। सिद्धमन्यत्॥

ऊर्जा देवाँ अवस्योर्जसा त्वां पिबा सोमं मदाय कं शतक्रतो।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः सम्प्सुजिन्मरुत्वाँ इन्द्र सत्पते॥३॥

ऊर्जा। देवान्। अवसि। ओजसा। त्वाम्। पिब। सोमम्। मदाय। कम्। शतक्रतो इति शतऽक्रतो। यम्। ते। भागम्। अधारयन्। विश्वाः। सेहानः। पृतनाः। उरु। ज्रयः। सम्। अप्सुऽजित्। मरुत्वान्। इन्द्र। सत्ऽपते॥ ३॥

हे इन्द्र त्वं ᵛदेवान् ᵛऊर्जा अन्नेन हविषा ᵛअवसि रक्षसि। ᵛत्वाम् अपि ᵛओजसा बलेन अवसि। सिद्धमन्यत्॥

जनिता दिवो जनिता पृथिव्याः पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥४॥

जनिता । दिवः । जनिता । पृथिव्याः । पिब । सोमम् । मदाय । कम् । शतक्रतो इति शतऽक्रतो ।
यम् । ते । भागम् । अधारयन् । विश्वाः । सेहानः । पृतनाः । उरु । ज्रयः ।
सम् । अप्सुऽजित् । मरुत्वान् । इन्द्र । सत्ऽपते ॥ ४ ॥

हे इन्द्र त्वं ᵛदिवः द्युलोकस्य ᵛजनिता जनकोऽसि । ᵛपृथिव्याः च ᵛजनिता असि । सिद्धमन्यत् ॥

जनिताश्वानां जनिता गवामसि पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥५॥

जनिता । अश्वानाम् । जनिता । गवाम् । असि ।
पिब । सोमम् । मदाय । कम् । शतक्रतो इति शतऽक्रतो ।
यम् । ते । भागम् । अधारयन् । विश्वाः । सेहानः । पृतनाः । उरु । ज्रयः ।
सम् । अप्सुऽजित् । मरुत्वान् । इन्द्र । सत्ऽपते ॥ ५ ॥

हे इन्द्र त्वम् ᵛअश्वानां ᵛजनिता जनकः ᵛअसि । ᵛगवां च ᵛजनिता असि । सिद्धमन्यत् ॥

अत्रीणां स्तोममद्रिवो महस्कृधि पिबा सोमं मदाय कं शतक्रतो ।
यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥६॥

अत्रीणाम् । स्तोमम् । अद्रिऽवः । महः । कृधि ।
पिब । सोमम् । मदाय । कम् । शतक्रतो इति शतऽक्रतो ।
यम् । ते । भागम् । अधारयन् । विश्वाः । सेहानः । पृतनाः । उरु । ज्रयः ।
सम् । अप्सुऽजित् । मरुत्वान् । इन्द्र । सत्ऽपते ॥ ६ ॥

हे ᵛअद्रिवः अद्रिमन् ᵛअत्रीणां ᵛस्तोमं ᵛमहस्कृधि पूजितं कुरु । सिद्धमन्यत् ॥

श्यावाश्वस्य सुन्वतस्तथा शृणु यथाशृणोरत्रेः कर्माणि कृण्वतः ।
प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इन्द्र ब्रह्माणि वर्धयन् ॥ ७ ॥

श्यावऽअश्वस्य । सुन्वतः । तथा । शृणु । यथा । अशृणोः । अत्रेः । कर्माणि । कृण्वतः ।
प्र । त्रसदस्युम् । आविथ । त्वम् । एकः । इत् । नृऽसह्ये । इन्द्र । ब्रह्माणि । वर्धयन् ॥ ७ ॥

हे ᵛइन्द्र त्वं ᵛसुन्वतः सोमाभिषवं कुर्वतः ᵛश्यावाश्वस्य मम स्तुतिं ᵛकर्माणि ᵛकृण्वतः कुर्वतः ᵛअत्रेः ᵛयथाशृणोः अशृणोः ᵛतथा ᵛशृणु । अपि च ᵛत्वमेक ᵛइत् एक एव ᵛनृषाह्ये युद्धे ᵛब्रह्माणि स्तोत्राणि कामैः ᵛवर्धयन् ᵛत्रसदस्युं ᵛप्र ᵛआविथ ॥ ॥ १८ ॥

'प्रेदं ब्रह्म' इति सप्तर्चं सप्तमं सूक्तमात्रेयस्य श्यावाश्वस्यार्षम् । आद्या द्वापञ्चाशदक्षरातिजगती । शिष्टाः षड्चः षडष्टका महापङ्क्तयः । इन्द्रो देवता । तथा चानुक्रान्तं–'प्रेदं महापाङ्क्तमा-

यातिजगती ' इति । महाव्रते निष्केवल्य एतत्सूक्तम्[1] । तथा च सूत्रं—' प्रेदं ब्रह्मेन्द्रो मदाय ' (आश्व. श्रौ. ७. १२) इति ॥

प्रेदं ब्रह्म वृत्रतूर्येष्वाविथ प्र सुन्वतः शचीपत इन्द्र विश्वाभिरूतिभिः।
माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ १ ॥

प्र । इदम् । ब्रह्म । वृत्रऽतूर्येषु । आविथ । प्र । सुन्वतः । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः । माध्यंदिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ १ ॥

हे [v]शचीपते [v]इन्द्र त्वं [v]वृत्रतूर्येषु संग्रामेषु [v]इदं [v]ब्रह्म इमान् ब्राह्मणान् [v]विश्वाभिः सर्वाभिः [v]ऊतिभिः[2] रक्षाभिः [v]प्र [v]आविथ प्ररक्ष । [v]सुन्वतः सोमाभिषवं कुर्वतो यजमानांश्च [v]प्र आविथ । अपि च हे [v]अनेद्य अनिन्द्य [v]वज्रिवः वज्रिन् [v]वृत्रहन् [v]इन्द्र [v]माध्यंदिनस्य [v]सवनस्य संबन्धिनं [v]सोमस्य सोमं [v]पिब ॥

सेहान उग्र पृतना अभि द्रुहः शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ २ ॥

सेहानः । उग्र । पृतनाः । अभि । द्रुहः । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः । माध्यंदिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ २ ॥

हे [v]शचीपते कर्मपते [v]उग्र उदूर्ण [v]इन्द्र [v]अभि [v]द्रुहः द्रोग्ध्रीः [v]पृतनाः सेनाः [v]सेहानः अभिभवन् सर्वैः पालनैर्ब्राह्मणान् प्राविथेत्यर्थः । सिद्धमन्यत् ॥

एकराळस्य भुवनस्य राजसि शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ३ ॥

एकऽराट् । अस्य । भुवनस्य । राजसि । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः । माध्यंदिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ३ ॥

हे [v]शचीपते [v]इन्द्र [v]अस्य [v]भुवनस्य [v]एकराट् एक एव राजा सन् [v]राजसि भ्राजसे । सिद्धमन्यत् ॥

सस्थावाना यवयसि त्वमेक इच्छचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥ ४ ॥

सऽस्थावाना । यवयसि । त्वम् । एकः । इत् । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः । माध्यंदिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ४ ॥

हे [v]शचीपते [v]इन्द्र [v]त्वमेकः एव [v]सस्थावाना समानं तिष्ठन्ताविमौ लोकौ [v]यवयसि पृथक्करोषि । सिद्धमन्यत् ॥

---

१. त–एव सूक्तं । २. ख-त-न-भ-श–' ऊतिभिः ' नास्ति ।

क्षेमस्य च प्रयुजश्च त्वमीशिषे शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्नेनेद्य पिबा सोमस्य वज्रिवः ॥ ५ ॥

क्षेमस्य । च । प्रऽयुजः । च । त्वम् । ईशिषे । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।
माध्यंदिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ५ ॥

अपि च हे vशचीपते vइन्द्र सर्वस्य जगतः vक्षेमस्य vप्रयुजश्च प्रयोगस्य च । योगक्षेमयोरित्यर्थः । vईशिषे ईश्वरो भवसि । सिद्धमन्यत् ॥

क्षत्राय त्वमवसि न त्वमाविथ शचीपत इन्द्र विश्वाभिरूतिभिः ।
माध्यंदिनस्य सवनस्य वृत्रहन्नेनेद्य पिबा सोमस्य वज्रिवः ॥ ६ ॥

क्षत्राय । त्वम् । अवसि । न । त्वम् । आविथ । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।
माध्यंदिनस्य । सवनस्य । वृत्रऽहन् । अनेद्य । पिब । सोमस्य । वज्रिऽवः ॥ ६ ॥

हे vशचीपते vइन्द्र vत्वं vक्षत्राय जगतो बलाय भवसि । vअवसि आश्रितान् रक्षसि । vत्वं vन vआविथ केनापि न रक्ष्यसे । सिद्धमन्यत् ॥

इयावाश्वस्य रेभतस्तथा शृणु यथाशृणोरत्रेः कर्माणि कृण्वतः ।
प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इन्द्र क्षत्राणि वर्धयन् ॥ ७ ॥

इयावऽअश्वस्य । रेभतः । तथा । शृणु । यथा । अशृणोः । अत्रेः । कर्माणि । कृण्वतः ।
प्र । त्रसदस्युम् । आविथ । त्वम् । एकः । इत् । नृऽसह्यो । इन्द्र । क्षत्राणि । वर्धयन् ॥७॥

हे vइन्द्र vरेभतः स्तुवतः vइयावाश्वस्य मम स्तुतिं vकर्माणि vकृण्वतः vअत्रेः vयथा vअशृणोः vतथा vशृणु । अपि च vक्षत्राणि[1] बलानि कामैः vवर्धयन्[1] युद्धे vत्वमेकः एव vत्रसदस्युं vप्र vआविथ ॥ ॥ १९ ॥

'यज्ञस्य हि' इति दशर्चमष्टमं सूक्तं इयावाश्वस्यार्षं प्राग्वत्सप्रपरिभाषया गायत्रमिन्द्राग्निदेवताकम् । तथा चानुक्रान्तं—'यज्ञस्य दशैन्द्राग्नम्' इति । पृष्ठ्याभिप्लवषडहयोः प्रातःसवनेऽच्छावाकशस्त्र आवापार्थमेतत्सूक्तम् । सूत्रितं च—'यज्ञस्य हि स्थ इत्यच्छावाकस्य' (आश्व. श्रौ. ७. ५) इति । चातुर्विंशिकेऽहनि प्रातःसवने 'यज्ञस्य हि स्थः' इति षळहस्तोत्रियसंज्ञकस्तृचः । सूत्रितं च—'इन्द्राग्नी युवामिमे यज्ञस्य हि स्थ ऋत्विजेत्यच्छावाकस्य' (आश्व. श्रौ. ७. २) इति । अग्निष्टोमे प्रातःसवनेऽच्छावाकस्य 'प्रातर्यावभिः' इति प्रातःसवनीयस्य प्रस्थितयाज्या । सूत्रितं च—'प्रातर्यावभिरिति यजति' (आश्व. श्रौ. ५. ७) इति । चातुर्विंशिके प्रातःसवनेऽच्छावाकशस्त्रे 'इयावाश्वस्य' इत्ययं पर्यासस्तृचः । अन्यत्राप्यहर्गणेषु द्वितीयादिष्वहःसु । सूच्यते हि—'इयावाश्वस्य सुन्वत इति तृचाः पर्यासाः' (आश्व. श्रौ. ७. २) इति ॥

यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु । इन्द्राग्नी तस्य बोधतम् ॥ १ ॥

यज्ञस्य । हि । स्थः । ऋत्विजा । सस्नी इति । वाजेषु । कर्मऽसु । इन्द्राग्नी इति । तस्य । बोधतम् ॥ १ ॥

---

१. ग-त-न-भ-'क्षत्राणि...वर्धयन्' नास्ति ।

हे [v]इन्द्राग्नी [v]सत्यौ शुद्धौ युवां [v]यज्ञस्य [v]ऋत्विजा ऋत्विजौ [v]स्थः भवथः [v]हि । [v]वाजेषु युद्धेषु [v]कर्मसु चोपतिष्ठन्ताविन्द्राग्नी [v]तस्य तं मां तस्य मम स्तुतिं वा [v]बोधतं जानीतम् ॥

तोशासा रथयावाना वृत्रहणापराजिता । इन्द्राग्नी तस्य बोधतम् ॥ २ ॥

तोशासा । रथऽयावाना । वृत्रऽहना । अपराऽजिता । इन्द्राग्नी इति । तस्य । बोधतम् ॥ २ ॥

हे [v]इन्द्राग्नी [v]तोशासा शत्रून् हिंसन्तौ [v]रथयावाना रथेन गच्छन्तौ [v]वृत्रहणा वृत्रस्य हन्तारौ [v]अपराजिता केनाप्यपराजितौ [v]तस्य तं मां [v]बोधतम् ॥

इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः । इन्द्राग्नी तस्य बोधतम् ॥ ३ ॥

इदम् । वाम् । मदिरम् । मधु । अधुक्षन् । अद्रिऽभिः । नरः । इन्द्राग्नी इति । तस्य । बोधतम् ॥ ३ ॥

हे [v]इन्द्राग्नी [v]वां युवामुद्दिश्य [v]नरः यज्ञस्य नेतारः [v]अद्रिभिः ग्रावभिः [v]मदिरं मदकरं [v]मधु सोमात्मकममृतम् [v]अधुक्षन् अपूरयन् । सिद्धमन्यत् ॥

जुषेथां यज्ञमिष्टये सुतं सोमं सधस्तुती । इन्द्राग्नी आ गतं नरा ॥ ४ ॥

जुषेथाम् । यज्ञम् । इष्टये । सुतम् । सोमम् । सधस्तुती इति सधऽस्तुती ।
इन्द्राग्नी इति । आ । गतम् । नरा ॥ ४ ॥

हे [v]सधस्तुती सहभूतस्तुती [v]नरा नेतारौ [v]इन्द्राग्नी [v]यज्ञं [v]जुषेथां सेवेथाम् । [v]इष्टये यागाय [v]सुतम् अभिषुतं [v]सोमं च [v]आ [v]गतम् आगच्छतम् ॥

इमा जुषेथां सवना येभिर्हव्यान्यूहथुः । इन्द्राग्नी आ गतं नरा ॥ ५ ॥

इमा । जुषेथाम् । सवना । येभिः । हव्यानि । ऊहथुः । इन्द्राग्नी इति । आ । गतम् । नरा ॥ ५ ॥

हे [v]इन्द्राग्नी [v]नरा नेतारौ युवां [v]येभिः[1] यैः सवनैः [v]हव्यानि [v]ऊहथुः वहथः तानि [v]इमा इमानि [v]सवना सवनानि [v]जुषेथां सेवेथाम् । [v]आ [v]गतं च ॥

इमां गायत्रवर्तनिं जुषेथां सुष्टुतिं मम । इन्द्राग्नी आ गतं नरा ॥ ६ ॥

इमाम् । गायत्रऽवर्तनिम् । जुषेथाम् । सुऽस्तुतिम् । मम । इन्द्राग्नी इति । आ । गतम् । नरा ॥ ६ ॥

हे [v]इन्द्राग्नी नरौ युवां [v]मम [v]गायत्रवर्तनिं गायत्रमार्गाम् [v]इमां [v]सुष्टुतिं शोभनां स्तुतिं [v]जुषेथां सेवेथाम् । [v]आ [v]गतं च ॥ ॥ २० ॥

प्रातर्यावभिरा गतं देवेभिर्जेन्यावसू । इन्द्राग्नी सोमपीतये ॥ ७ ॥

प्रातर्यावऽभिः । आ । गतम् । देवेभिः । जेन्यावसु इति । इन्द्राग्नी इति । सोमऽपीतये ॥ ७ ॥

हे [v]जेन्यावसू जेतव्यशत्रुधनौ [v]इन्द्राग्नी [v]प्रातर्यावभिः देवैः सह [v]सोमपीतये सोमस्य पानाय [v]आ [v]गतम् आगच्छतम् ॥

श्यावाश्वस्य सुन्वतोऽत्रीणां शृणुतं हवम् । इन्द्राग्नी सोमपीतये ॥ ८ ॥

---

१. ग-त-न-भ-'येभिः' नास्ति ।

श्यावऽअश्वस्य । सुन्वतः । अत्रीणाम् । शृणुतम् । हवम् । इन्द्राग्नी इति । सोमऽपीतये ॥ ८ ॥

हे [v]इन्द्राग्नी युवां [v]सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य [v]श्यावाश्वस्य मम [v]अत्रीणाम् ऋत्विजां [v]हवम् आह्वानं सोमस्य पानाय [v]शृणुतम् ॥

एवा वामह ऊतये यथाहुवन्त मेधिराः । इन्द्राग्नी सोमपीतये ॥ ९ ॥

एव । वाम् । अह्व । ऊतये । यथा । अहुवन्त । मेधिराः । इन्द्राग्नी इति । सोमऽपीतये ॥ ९ ॥

हे [v]इन्द्राग्नी [v]वां युवां [v]यथा [v]मेधिराः प्राज्ञाः [v]अहुवन्त आहूतवन्तः एवमहम् [v]ऊतये रक्षणाय सोमस्य पीतये च [v]अह्व[1] ह्वयामि ॥

आहं सरस्वतीवतोरिन्द्राग्न्योरवो वृणे । याभ्यां गायत्रमुच्यते ॥ १० ॥

आ । अहम् । सरस्वतीऽवतोः । इन्द्राग्न्योः । अवः । वृणे । याभ्याम् । गायत्रम् । ऋच्यते ॥ १० ॥

[v]याभ्यां ययोरिन्द्राग्न्योरर्थं [v]गायत्रं साम [v]ऋच्यते[2] स्तूयते तयोः [v]सरस्वतीवतोः स्तुतिमतोः [v]इन्द्राग्न्योः संबन्धि [v]अवः रक्षणम् [v]अहम् [v]आ [v]वृणे ॥ ॥ २१ ॥

'अग्निमस्तोषि' इति दशर्चं नवमं सूक्तं काण्वस्य नाभाकस्यार्षम् । षडष्टका महापङ्क्तिश्छन्दः । अग्निर्देवता । अनुक्रान्तं च—'अग्निमस्तोषि नाभाक आग्नेयं महापाङ्क्तं हि' इति । विनियोगो लैङ्गिकः ॥

अग्निमस्तोष्यृग्मियमग्निमीळा यजध्यै ।
अग्निर्देवाँ अनक्तु न उभे हि विदथे कविरन्तश्चरति दूत्यं१ नभन्तामन्यके समे ॥१॥

अग्निम् । अस्तोषि । ऋग्मियम् । अग्निम् । ईळा । यजध्यै ।
अग्निः । देवान् । अनक्तु । नः । उभे इति । हि । विदथे इति । कविः ।
अन्तरिति । चरति । दूत्यम् । नभन्ताम् । अन्यके । समे ॥ १ ॥

[v]ऋग्मियम् ऋगर्हम् [v]अग्निम् [v]अस्तोषि स्तौमि । अपि च [v]अग्निं [v]यजध्यै यष्टुम् [v]ईळा स्तुत्या स्तौमीत्यर्थः । अपि च [v]अग्निः [v]नः अस्माकं [v]विदथे यज्ञे [v]देवान् हविर्भिः [v]अनक्तु । [v]कविः क्रान्तदर्शनोऽग्निः [v]उभे द्यावापृथिव्यौ [v]अन्तः [v]दूत्यं हविर्वहनादिलक्षणं दूतकर्म [v]चरति । [v]अन्यके शत्रवोऽपि [v]समे सर्वे [v]नभन्ताम् । नभतिर्हिंसाकर्मा । अग्निना हिंस्यन्ताम् ॥

न्यग्ने नव्यसा वचस्तनूषु शंसमेषाम् ।
न्यरातीररराण्यां विश्वा अर्यो अरातीरितो युच्छन्त्वामुरो नभन्तामन्यके समे ॥२॥

नि । अग्ने । नव्यसा । वचः । तनूषु । शंसम् । एषाम् । नि । अरातीः । ररराण्याम् ।
विश्वाः । अर्यः । अरातीः । इतः । युच्छन्तु । आऽडमुरः । नभन्ताम् । अन्यके । समे ॥ २ ॥

हे [v]अग्ने [v]तनूषु अस्माकमङ्गेषु [v]नव्यसा नवतरेण [v]वचः[3] वचसा स्तोत्रेण [v]एषां शत्रूणां [v]शंसं शंसनं [v]नि दहेत्यर्थः । [v]ररराण्यां हविः प्रयच्छताम् [v]अरातीः शत्रूंश्च [v]नि दह । अपि च [v]विश्वाः सर्वे [v]अर्यः अभिगच्छन्तः [v]आमुरः आमूढाः [v]अरातीः शत्रवः [v]इतः [v]युच्छन्तु गच्छन्तु । सिद्धमन्यत् ॥

---

१. त-न-भ–अहं । २. त-न-भ१-२–उच्यते । ३. ग-त-न-भ–'वचः' नास्ति ।

अग्ने मन्मानि तुभ्यं कं घृतं न जुह्व आसनि ।
स देवेषु प्र चिकिद्धि त्वं ह्यसि पूर्व्यः शिवो दूतो विवस्वतो नभन्तामन्यके समे॥३॥

अग्ने । मन्मानि । तुभ्यम् । कम् । घृतम् । न । जुह्वे । आसनि ।
सः । देवेषु । प्र । चिकिद्धि । त्वम् । हि । असि । पूर्व्यः । शिवः । दूतः । विवस्वतः ।
नभन्ताम् । अन्यके । समे ॥ ३ ॥

हे vअग्ने vतुभ्यं त्वदर्थम् vआसनि आस्ये vकं vघृतं vन यथा सुखकरं घृतं जुह्वत्यग्ये तद्वदहमपि तवास्ये vमन्मानि मननीयानि स्तोत्राणि vजुह्वे जुहोमि । vसः त्वं vदेवेषु देवानां मध्ये vप्र vचिकिद्धि अस्मदीयाः स्तुतीर्जानीहि । अपि च vत्वं vपूर्व्यः प्रत्नः vअसि । vशिवः सुखकरश्चासि । vविवस्वतः vदूतः चासि । सिद्धमन्यत् ॥

तत्तदग्निर्वयो दधे यथायथा कृपण्यति ।
ऊर्जाहुतिर्वसूनां शं च योश्च मयो दधे विश्वस्यै देवहूत्यै नभन्तामन्यके समे ॥ ४ ॥

तत्ऽतत् । अग्निः । वयः । दधे । यथाऽयथा । कृपण्यति ।
ऊर्जाऽआहुतिः । वसूनाम् । शम् । च । योः । च । मयः । दधे । विश्वस्यै । देवऽहूत्यै ।
नभन्ताम् । अन्यके । समे ॥ ४ ॥

vयथायथा यद्यदन्नं vकृपण्यति स्तोतृभिर्याच्यते vतत्तत् vवयः vअग्निः vदधे स्तोतृभ्यः प्रयच्छति । अपि च vऊर्जाहुतिः अग्नेनाहूयमानोऽग्निः vवसूनां हविषां वासकानां यजमानानां vशं शान्तिनिमित्तं vयोः विषययोगजनितं vच vमयः सुखं vदधे करोति । vविश्वस्यै vदेवहूत्यै सर्वस्मै देवानां ह्वानाय च भवति । यः कश्चनापि देवो यदि हूयते अग्निरेव सर्वं करोतीत्यर्थः । सिद्धमन्यत् ॥

स चिकेत सहीयसाग्निश्चित्रेण कर्मणा ।
स होता शश्वतीनां दक्षिणाभिरभीवृत इनोति च प्रतीव्यं नभन्तामन्यके समे ॥५॥

सः । चिकेत । सहीयसा । अग्निः । चित्रेण । कर्मणा ।
सः । होता । शश्वतीनाम् । दक्षिणाभिः । अभिऽवृतः । इनोति । च । प्रतीव्यम् ।
नभन्ताम् । अन्यके । समे ॥ ५ ॥

vसः vअग्निः vसहीयसा अभिभावुकेन vचित्रेण नानाविधेन vकर्मणा व्यापारेण vचिकेत ज्ञायते । vसः अग्निः vशश्वतीनां बह्वीनां देवतानां vहोता ह्वाता vदक्षिणाभिः पशुभिश्च vअभीवृतः परिवृतः vप्रतीव्यं प्रत्येतव्यं शत्रुम् vइनोति vच गच्छति च । सिद्धमन्यत् ॥ ॥ २२ ॥

अग्निर्जाता देवानामग्निर्वेद मर्तानामपीच्यम् ।
अग्निः स द्रविणोदा अग्निर्द्वारा व्यूर्णुते स्वाहुतो नवीयसा नभन्तामन्यके समे ॥६॥

अग्निः । जाता । देवानाम् । अग्निः । वेद । मर्तानाम् । अपीच्यम् ।
अग्निः । सः । द्रविणःऽदाः । अग्निः । द्वारा । वि । ऊर्णुते । सुऽआहुतः । नवीयसा ।
नभन्ताम् । अन्यके । समे ॥ ६ ॥

vदेवानां vजाता जातानि जन्मानि vअग्निः वेत्ति[1]। vमर्तानां मनुष्याणां च vअपीच्यम् गुह्यम् vअग्निः vवेद वेत्ति। vसः vअग्निः vद्रविणोदाः धनस्य दाता। vनवीयसा नवतरेण हविषा vस्वाहुतः सम्यग्घुतः vअग्निः vद्वारा धनस्य द्वाराणि vव्यूर्णुते च। सिद्धमन्यत्॥

अग्निर्देवेषु संवसुः स विक्षु यज्ञियास्वा।
स मुदा काव्या पुरु विश्वं भूमेव पुष्यति देवो देवेषु यज्ञियो नभन्तामन्यके समे॥७॥

अग्निः। देवेषु। सम्ऽवसुः। सः। विक्षु। यज्ञियासु। आ।
सः। मुदा। काव्या। पुरु। विश्वम्। भूमऽइव। पुष्यति। देवः। देवेषु। यज्ञियः।
नभन्ताम्। अन्यके। समे॥ ७॥

vदेवेषु[2] मध्ये vअग्निः vसंवसुः संवसति। vसः अग्निः vयज्ञियासु यज्ञार्हासु vविक्षु प्रजास्वपि संवसुः[3]। किंच vसः अग्निः vपुरु बहूनि vकाव्या कर्माणि vभूमेव यथा भूमिः vविश्वं तथा vमुदा मोदेन vपुष्यति। vदेवेषु मध्ये vदेवः अग्निः vयज्ञियः यज्ञार्हश्च भवति। सिद्धमन्यत्॥

यो अग्निः सप्तमानुषः श्रितो विश्वेषु सिन्धुषु।
तमागन्म त्रिपस्त्यं मन्धातुर्दस्युहन्तममग्निं यज्ञेषु पूर्व्यं नभन्तामन्यके समे॥८॥

यः। अग्निः। सप्तऽमानुषः। श्रितः। विश्वेषु। सिन्धुषु।
तम्। आ। अगन्म। त्रिऽपस्त्यम्। मन्धातुः। दस्युहन्ऽतमम्। अग्निम्। यज्ञेषु। पूर्व्यम्।
नभन्ताम्। अन्यके। समे॥ ८॥

vयोऽग्निः vसप्तमानुषः[4] vविश्वेषु सर्वेषु vसिन्धुषु नदीषु vश्रितः vत्रिपस्त्यं त्रिस्थानं vमन्धातुः यौवनाश्वस्य मान्धातुः vदस्युहन्तमं दस्यूनां हन्तारं vयज्ञेषु vपूर्व्यं मुख्यं[5] vतम् vअग्निं वयम् vआगन्म। सिद्धमन्यत्॥

अग्निस्त्रीणि त्रिधातून्या क्षेति विदथा कविः।
स त्रींरेकादशाँ इह यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतो नभन्तामन्यके समे॥९॥

अग्निः। त्रीणि। त्रिऽधातूनि। आ। क्षेति। विदथा। कविः।
सः। त्रीन्। एकादशान्। इह। यक्षत्। च। पिप्रयत्। च। नः।
विप्रः। दूतः। परिऽकृतः। नभन्ताम्। अन्यके। समे॥ ९॥

vकविः क्रान्तदर्शी vअग्निः vत्रीणि vत्रिधातूनि त्रिबन्धनादीनि पृथिव्यादीनि vविदथा वेदनीयानि स्थानानि vआ vक्षेति आवसति। अपि च vसः अग्निः vदूतः देवानां vविप्रः प्राज्ञः vपरिष्कृतः अलंकृतश्च सन् vइह यज्ञे vत्रीनेकादशान् त्रयस्त्रिंशद्देवान् vयक्षत् यजतु। vनः अस्मान् vपिप्रयच्च कामैः पूरयतु च। सिद्धमन्यत्॥

---

१. ख-घ-ङ-त१-२-वेद वेत्ति। २. ख-त-न-हे देवेषु; ग-श-यः देवेषु। ३. ख-ग-त-न-भ-श-आ संवसुः। ४. घ-सप्तमानुषः सप्तहोता। ५. त-न-मुखं।

त्वं नो अग्न आयुषु त्वं देवेषु पूर्व्य वस्व एक इरज्यसि ।
त्वामापः परिस्रुतः परि यन्ति स्वसेतवो नभन्तामन्यके समे ॥ १० ॥

त्वम् । नः । अग्ने । आयुषु । त्वम् । देवेषु । पूर्व्य । वस्वः । एकः । इरज्यसि ।
त्वाम् । आपः । परिऽस्रुतः । परि । यन्ति । स्वऽसेतवः । नभन्ताम् । अन्यके । समे ॥ १० ॥

हे [v]पूर्व्य [v]अग्ने [v]त्वम् [v]एकः एव [v]आयुषु मनुष्येषु । ' द्रुह्यवः आयवः ' इति मनुष्यनामसु पाठात् । [v]नः अस्माकं [v]वस्वः धनस्य [v]इरज्यसि ईशिषे । [v]देवेषु अपि [v]त्वम् एक एव वस्व इरज्यसि । अपि च [v]त्वां [v]स्वसेतवः[1] स्वभूतसेतवः [v]परिस्रुतः परिस्रवन्त्यः [v]आपः [v]परि [v]यन्ति परिगच्छन्ति । सिद्धमन्यत् ॥ ॥ २३ ॥

' इन्द्राग्नी युवम् ' इति द्वादशर्चं दशमं सूक्तं नाभाकस्यार्षम् । द्वितीया षट्पञ्चाशदक्षरा शाकरी द्वादशी त्रिष्टुप् शिष्टा महापङ्क्तयः । इन्द्राग्नी देवता । तथा चानुक्रान्तम्—' इन्द्राग्नी द्वादशेन्द्राग्नं त्रिष्टुबन्तं द्वितीया शाकरी ' इति । महाव्रते निष्केवल्ये ऊरुभाग एतत्सूक्तम् । तथा च पञ्चमारण्यके सूत्रितम्—' ऊरू इन्द्राग्नी युवं सु नः ' (ऐ. आ. ५. ३. १) इति । चातुर्विंशिकेऽहनि तृतीयसवने मैत्रावरुणो यदि महावालभिदं शंसेत्तदानीं माध्यंदिनसवने होत्रकाः स्वशस्त्र आरम्भणीयाभ्य ऊर्ध्वं नाभाकतृचावापेरन् । तत्र ' ता हि मध्यम् ' इत्यच्छावाकस्य नाभाकतृचः । सूत्रितं च—' ता हि मध्यं भराणामित्यच्छावाकः ' (आश्व. श्रौ. ७. २) इति । चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिनः ' पूर्वीष्ट इन्द्र ' इति नाभाकतृचः । सूत्रितं च—' पूर्वीष्ट इन्द्रोपमातय इति ब्राह्मणाच्छंसी ' (आश्व. श्रौ. ७. २) इति ॥

इन्द्राग्नी युवं सु नः सहन्ता दासथो रयिम् ।
येन दृळ्हा समत्स्वा वीळु चित्साहिषीमहाभिर्वनेव वात इन्नभन्तामन्यके समे ॥१॥

इन्द्राग्नी इति । युवम् । सु । नः । सहन्ता । दासथः । रयिम् ।
येन । दृळ्हा । समत्ऽसु । आ । वीळु । चित् । सहिषीमहि ।
अभिः । वनाऽइव । वाते । इत् । नभन्ताम् । अन्यके । समे ॥ १ ॥

हे [v]इन्द्राग्नी [v]सहन्ता शत्रूनभिभवन्तौ [v]युवं युवां [v]नः अस्मभ्यं [v]रयिं धनं सुष्ठु[2] [v]दासथः दत्तम्[3] । तं रयिं विशिनष्टि । [v]येन रयिणा [v]समत्सु [v]चित् संग्रामे[4] [v]दृढा [v]चित् दृढानि स्थिराण्यपि [v]वीळु शत्रुबलानि [v]अभिर्वनेव यथाग्निर्वनानि [v]वात [v]इत् वातेनैवाभिभवति तथा [v]सहिषीमहि अभिभवाम । सिद्धमन्यत् ॥

नहि वां वत्रयामहेऽथेन्द्रमिद्यजामहे शविष्ठं नृणां नरम् ।
स नः कदा चिदर्वता गमदा वाजसातये गमदा मेधसातये नभन्तामन्यके समे ॥२॥

नहि । वाम् । वत्रयामहे । अथ । इन्द्रम् । इत् । यजामहे । शविष्ठम् । नृणाम् । नरम् ।
सः । नः । कदा । चित् । अर्वता । गमत् । आ । वाजऽसातये । गमत् । आ । मेधऽसातये ।
नभन्ताम् । अन्यके । समे ॥ २ ॥

---

१. त१-२–स्वसेतवस्तव । २. ज्ञ-त४–सु सुष्ठु । ३. ग-त-न-भ–' दत्तं ' नास्ति । ४. भ३–संग्रामेषु ।

हे इन्द्राग्नी ᵛवां युवां ᵛन ᵛवव्रयामहे वयं धनं न याचामहे । ᵛअथ ᵛहि अपि तर्हि ᵛज्ञविष्ठम् अतिशयेन बलवन्तं ᵛनृणां ᵛनरं नेतृणामपि नेतारम् ᵛइन्द्रमित् इन्द्रमेव ᵛयजामहे । ᵛसः इन्द्रः ᵛनः अस्मान् ᵛअर्वता अश्वेन ᵛकदा ᵛचित् ᵛवाजसातये अन्नलाभाय ᵛआ ᵛगमत् आगच्छति । कदाचित् ᵛमेधसातये यज्ञभजनाय ᵛआ ᵛगमत् । सिद्धमन्यत् ॥

ता हि मध्यं भराणामिन्द्राग्नी अधिक्षितः ।
ता उ कवित्वना कवी पृच्छ्यमाना सखीयते सं धीतमश्नुतं नरा
नभन्तामन्यके समे ॥ ३ ॥

ता । हि । मध्यम् । भराणाम् । इन्द्राग्नी इति । अधिऽक्षितः ।
तौ । ऊँ इति । कविऽत्वना । कवी इति । पृच्छ्यमाना । सखिऽयते ।
सम् । धीतम् । अश्नुतम् । नरा । नभन्ताम् । अन्यके । समे ॥ ३ ॥

ᵛता तौ प्रसिद्धौ ᵛइन्द्राग्नी ᵛभराणां संग्रामाणां ᵛमध्यम् ᵛअधिक्षितः अधिनिवसतः ᵛहि । अथ प्रत्यक्षस्तुतिः । हे ᵛनरा नेतारौ ᵛकवित्वना कवित्वेन ᵛकवी क्रान्तकर्माणौ ᵛपृच्छ्यमाना कविजनैः पृच्छ्यमानौ[1] ᵛता ᵛउ तावेव युवां ᵛसखीयते सखित्वमिच्छते यजमानाय ᵛधीतं तत्कृतं कर्म ᵛसम् ᵛअश्नुतम् । सिद्धमन्यत् ॥

अभ्यर्च नभाकवदिन्द्राग्नी यजसा गिरा ।
ययोर्विश्वमिदं जगदियं द्यौः पृथिवी महुपस्थे बिभृतो वसु नभन्तामन्यके समे ॥४॥

अभि । अर्च । नभाकऽवत् । इन्द्राग्नी इति । यजसा । गिरा ।
ययोः । विश्वम् । इदम् । जगत् । इयम् । द्यौः । पृथिवी । मही ।
उपऽस्थे । बिभृतः । वसु । नभन्ताम् । अन्यके । समे ॥ ४ ॥

हे नाभाक ᵛनभाकवदिन्द्राग्नी ᵛयजसा यागेन ᵛगिरा स्तुत्या च ᵛअभ्यर्च अभिपूजय । ᵛययोः इन्द्राग्न्योः ᵛविश्वं सर्वम् ᵛइदं ᵛजगत् तिष्ठति । ययोश्च ᵛउपस्थे ᵛइयं ᵛद्यौः ᵛमही महती ᵛपृथिवी च द्यावापृथिव्यावुभे ᵛवसु धनं ᵛबिभृतः धारयतः । सिद्धमन्यत् ॥

प्र ब्रह्माणि नभाकवदिन्द्राग्निभ्यामिरज्यत ।
या ससवुध्नमर्णवं जिह्मबारमपोर्णुत इन्द्र ईशान ओजसा नभन्तामन्यके समे ॥५॥

प्र । ब्रह्माणि । नभाकऽवत् । इन्द्राग्निऽभ्याम् । इरज्यत ।
या । ससऽबुध्नम् । अर्णवम् । जिह्मऽबारम् । अपऽऊर्णुतः ।
इन्द्रः । ईशानः । ओजसा । नभन्ताम् । अन्यके । समे ॥ ५ ॥

ᵛब्रह्माणि स्तोत्राणि ᵛइन्द्राग्निभ्यां ᵛनभाकवत् ᵛप्र ᵛइरज्यत नाभाकः प्रेरयते । ᵛया[2] याविन्द्राग्नी ᵛससवुध्नं ससमूलं ᵛजिह्मबारं पिहितद्वारम् ᵛअर्णवम् ᵛअपोर्णुतः तेजोभिराच्छादयतः तयोर्मध्ये ᵛओजसा बलेन ᵛइन्द्रः ᵛईशानः ईश्वरो भवति । सिद्धमन्यत् ॥

---

१. घ-त-न-भ–पृच्छमानौ । २. त-न-भ–' या ' नास्ति ।

अपि वृश्च पुराणवद्व्रततेरिव गुष्पितमोजो दासस्य दम्भय ।
वयं तदस्य संभृतं वस्विन्द्रेण वि भजेमहि नभन्तामन्यके समे ॥ ६ ॥

अपि । वृश्च । पुराणऽवत् । व्रततेःऽइव । गुष्पितम् । ओजः । दासस्य । दम्भय ।
वयम् । तत् । अस्य । सम्ऽभृतम् । वसु । इन्द्रेण । वि । भजेमहि । नभन्ताम् । अन्यके । समे ॥६॥

अपि च हे इन्द्र ᵛपुराणवत् प्रत्नो यथा ᵛव्रततेरिव यथा वल्ल्याः ᵛगुष्पितं निर्गतां शाखां वृश्चति तथा शत्रूणां ᵛवृश्च छेदय । तदेवाह । ᵛदासस्य दासनामकस्य शत्रोः ᵛओजः बलं ᵛदम्भय नाशय । अथ परोक्षस्तुतिः । ᵛवयं नाभाकाः ᵛअस्य दासस्य ᵛसंभृतं ᵛवसु[1] ᵛइन्द्रेण हेतुना ᵛवि ᵛभजेमहि । सिद्धमन्यत् ॥ ॥ २४ ॥

यदिन्द्राग्नी जना इमे विह्वयन्ते तना गिरा ।
अस्माकेभिर्नृभिर्वयं सासह्याम पृतन्यतो वनुयाम वनुष्यतो नभन्तामन्यके समे ॥७॥

यत् । इन्द्राग्नी इति । जनाः । इमे । विऽह्वयन्ते । तना । गिरा ।
अस्माकेभिः । नृऽभिः । वयम् । ससह्याम । पृतन्यतः । वनुयाम । वनुष्यतः ।
नभन्ताम् । अन्यके । समे ॥ ७ ॥

ᵛयत् ये ᵛइमे ᵛजनाः ᵛतना धनेन ᵛगिरा स्तुत्या च ᵛइन्द्राग्नी ᵛविह्वयन्ते विशेषेण ह्वयन्ति तेषु मध्ये ᵛवयं नाभाकाः ᵛपृतन्यतः पृतनामिच्छन्तः ᵛअस्माकेभिः अस्माकीनैः ᵛनृभिः मनुष्यैः ᵛससह्याम शत्रूनभिभवेम । ᵛवनुष्यतः स्तुतिमिच्छन्तः शत्रून् ᵛवनुयाम च[2] । सिद्धमन्यत् ॥

या नु श्वेतावो दिव उच्चरात उप द्युभिः ।
इन्द्राग्न्योरनु व्रतमुहाना यन्ति सिन्धवो यान्त्सीं बन्धादमुञ्चतां नभन्तामन्यके समे॥८॥

या । नु । श्वेतौ । अवः । दिवः । उत्ऽचरातः । उप । द्युऽभिः ।
इन्द्राग्न्योः । अनु । व्रतम् । उहानाः । यन्ति । सिन्धवः । यान् । सीम् । बन्धात् । अमुञ्चताम् ।
नभन्ताम् । अन्यके । समे ॥ ८ ॥

ᵛया ᵛनु यावेवेन्द्राग्नी ᵛश्वेतौ श्वेतवर्णौ । सत्त्वगुणोपेतावित्यर्थः । ᵛअवः अधस्तात् ᵛद्युभिः दीप्तिभिः ᵛदिवः ᵛउप ᵛउच्चरातः उच्चरतः तयोरेव ᵛइन्द्राग्न्योः ᵛउहानाः हविर्वहन्तो यजमानाः ᵛव्रतं कर्म ᵛअनु ᵛयन्ति । अपि ᵛसीम् इमाविन्द्राग्नी ᵛयान् प्रसिद्धान् ᵛसिन्धवः सिन्धून् ᵛबन्धात् बन्धनात् ᵛअमुञ्चताम् । सिद्धमन्यत् ॥

पूर्वीष्ट इन्द्रोपमातयः पूर्वीरुत प्रशस्तयः सूनो हिन्वस्य हरिवः ।
वस्वो वीरस्यापृचो या नु साधन्त नो धियो नभन्तामन्यके समे ॥ ९ ॥

पूर्वीः । ते । इन्द्र । उपऽमातयः । पूर्वीः । उत । प्रऽशस्तयः । सूनो इति । हिन्वस्य । हरिऽवः ।
वस्वः । वीरस्य । आऽपृचः । याः । नु । साधन्त । नः । धियः । नभन्ताम् । अन्यके । समे ॥९॥

---

१. घ–तद्वसु । २. घ–च स्तुमः ।

हे ᵛहरिवः वज्रिन् ᵛसूनो[1] प्रेरयितः ᵛइन्द्र ᵛहिन्वस्य प्रीणयितुः ᵛवस्वः[2] दीपकस्य ᵛवीरस्य ᵛआपृचः धनान्युपयच्छतः ᵛते तव ताः ᵛउपमातयः उपमानानि ᵛपूर्वीः बहूनि । ᵛउत अपि च ᵛप्रशस्तयः ᵛपूर्वीः । ᵛयाः ᵛनः ᵛधियः प्रज्ञां ᵛसाधन्त असाधयन् । सिद्धमन्यत् ॥

तं शिशीता सुवृक्तिभिस्त्वेषं सत्वानमृग्मियम् ।
उतो नु चिद्य ओजसा शुष्ण्स्याण्डानि भेदति जेषत्स्वर्वतीरपो नभन्तामन्यके समे॥१०॥

तम् । शिशीत । सुवृक्तिऽभिः । त्वेषम् । सत्वानम् । ऋग्मियम् ।
उतो इति । नु । चित् । यः । ओजसा । शुष्ण्स्य । आण्डानि । भेदति ।
जेषत् । स्वःऽवतीः । अपः । नभन्ताम् । अन्यके । समे ॥ १० ॥

हे स्तोतारः ᵛत्वेषं दीप्तं ᵛसत्वानं संभक्तारं धनानाम् ᵛऋग्मियं ऋगर्हमृग्भिः स्तोतव्यं ᵛतम् इन्द्रं ᵛसुवृक्तिभिः स्तुतिभिः ᵛशिशीत संस्कुरुत । ᵛउतो ᵛनु ᵛचित् अपि च ᵛयः इन्द्रः ᵛओजसा बलेन ᵛशुष्णस्य शुष्णनामकस्यासुरस्य ᵛआण्डानि अण्डजातान्यपत्यानि ᵛभेदति अभिनत् सः ᵛस्वर्वतीः दिव्यानि ᵛअपः सलिलानि ᵛजेषत् जयतु । सिद्धमन्यत् ॥

तं शिशीता स्वध्वरं सत्यं सत्वानमुत्वियम् ।
उतो नु चिद्य ओहते आण्डा शुष्ण्स्य भेदत्यजैः स्वर्वतीरपो नभन्तामन्यके समे॥११॥

तम् । शिशीत । सुऽअध्वरम् । सत्यम् । सत्वानम् । ऋत्वियम् ।
उतो इति । नु । चित् । यः । ओहते । आण्डा । शुष्ण्स्य । भेदति ।
अजैः । स्वःऽवतीः । अपः । नभन्ताम् । अन्यके । समे ॥ ११ ॥

हे स्तोतारः ᵛस्वध्वरं सुयज्ञं ᵛसत्यम् अविनाशं ᵛसत्वानं संभक्तारम् ᵛऋत्वियम् ऋतौ यष्टव्यं ᵛतम् इन्द्रं ᵛशिशीत स्तुतिभिः संस्कुरुत । अथ प्रत्यक्षस्तुतिः । ᵛउतो ᵛनु ᵛचित् अपि च ᵛयः इन्द्रः ᵛओहते यज्ञं प्रति गच्छति । ᵛशुष्णस्य ᵛआण्डा आण्डान्यण्डजातानि च ᵛभेदति[3] भिनत्ति[3] स त्वं ᵛस्वर्वतीः दिव्यानि ᵛअपः सलिलानि ᵛअजैः अजैषीः । सिद्धमन्यत् ॥

एवेन्द्राग्निभ्यां पितुवन्नवीयो मन्धातुवदङ्गिरस्वदवाचि ।
त्रिधातुना शर्मणा पातमस्मान्वयं स्याम पतयो रयीणाम् ॥ १२ ॥

एव । इन्द्राग्निऽभ्याम् । पितुऽवत् । नवीयः । मन्धातुऽवत् । अङ्गिरस्वत् । अवाचि ।
त्रिऽधातुना । शर्मणा । पातम् । अस्मान् । वयम् । स्याम । पतयः । रयीणाम् ॥ १२ ॥

ᵛएव एवं याभ्याम् ᵛइन्द्राग्निभ्यां ᵛपितृवत् नभाकवत् ᵛमन्धातृवत् यौवनाश्वमान्धातृवच्च ᵛअङ्गिरस्वत् अङ्गिरोवच्च ᵛनवीयः नवतरम् ᵛअवाचि नाभाकेन मया पाठिताविन्द्राग्नी ᵛत्रिधातुना त्रिपर्वणा ᵛशर्मणा गृहेण[4] नः ᵛअस्मान् नाभाकान्[5] ᵛपातं रक्षतम् । ᵛवयं ᵛरयीणां धनानां ᵛपतयः स्वामिनः ᵛस्याम भवेम ॥ ॥ २५ ॥

---

१. ग-त-न-भ-'सूनो' नास्ति । २. त-न-भ२-वस्वो वा । ३. ख-ग-त-न-भ-श-'भेदति भिनत्ति' नास्ति; घ-भेदति अभिनत् । ४. ग-गृहे तु नास्मान्ना°; त-न-भ-गृहे नास्मान्ना° ।

' अस्मा ऊ षु ' इति दशर्चमेकादशं सूक्तम् । अत्रेयमनुक्रमणिका—' अस्मा ऊ षु दश वारुणं तु ' इति । नाभाक ऋषिरनुवृत्तत्वात् । ' महापाङ्क्तं हि ' इत्युक्तत्वादिदमपि महापाङ्क्तम् । इदमादिके द्वे सूक्ते वरुणदेवत्ये । विनियोगो लैङ्गिकः । चातुर्विंशिकेऽहनि माध्यंदिनसवने मैत्रावरुणशस्त्र आरम्भणीयाया ऊर्ध्वं ' स क्षपः ' इत्ययं नाभाकतृचः । सूत्रितं च—' स क्षपः परि पस्वज इति मैत्रावरुणः ' (आश्व. श्रौ. ७. २) इति । ' यः ककुभः ' इत्येतत्प्रभृतिको वा नाभाकतृचः । सूत्रितं च—' यः ककुभो निधारय इति[1] वा ' (आश्व. श्रौ. ७. २) इति[1] ॥

अस्मा ऊ षु प्रभूतये वरुणाय मरुद्भ्योऽर्चा विदुष्टरेभ्यः ।
यो धीता मानुषाणां पश्वो गाइव रक्षति नभन्तामन्यके समे ॥ १ ॥

अस्मै । ऊँ इति । सु । प्रऽभूतये । वरुणाय । मरुत्ऽभ्यः । अर्च । विदुःऽतरेभ्यः । यः । धीता । मानुषाणाम् । पश्वः । गाःऽइव । रक्षति । नभन्ताम् । अन्यके । समे ॥ १ ।

हे स्तोतः [v]सु [v]प्रभूतये प्रकृष्टधनाय [v]अस्मै [v]वरुणाय [v]विदुष्टरेभ्यः विद्वत्तरेभ्यः [v]मरुद्भ्यः च [v]अर्च स्तुहि । [v]यः वरुणः [v]धीता कर्मणा [v]मानुषाणां मनुष्याणां [v]पश्वः पशून् [v]गाइव [v]रक्षति[2] । सिद्धमन्यत् ।

तमू षु समना गिरा पितॄणां च मन्मभिः ।
नाभाकस्य प्रशस्तिभिर्यः सिन्धूनामुपोदये सप्तस्वसा स मध्यमो
नभन्तामन्यके समे ॥ २ ॥

तम् । ऊँ इति । सु । समना । गिरा । पितॄणाम् । च । मन्मऽभिः । नाभाकस्य । प्रशस्तिऽभिः । यः । सिन्धूनाम् । उप । उत्ऽअये । सप्तऽस्वसा । सः । मध्यमः । नभन्ताम् । अन्यके । समे ॥ २ ॥

[v]तमु तमेव वरुणं [v]समना समानया [v]गिरा स्तुत्या [v]सु अभिष्टौमि । [v]पितॄणां [v]मन्मभिः स्तोमैः [v]च अभिष्टौमि । [v]नाभाकस्य ऋषेः [v]प्रशस्तिभिः स्तोत्रैश्चाभिष्टौमि । [v]सिन्धूनां स्यन्दमानानां नदीनाम् [v]उप समीपे [v]यः [v]उदये उद्गच्छति यश्च [v]सप्तस्वसा [v]स [v]मध्यमः इति वाग्भिर्निरुच्यते । [v]अन्यके दुर्धियः शत्रवः [v]समे सर्वे [v]नभन्तां मा भूवन् । तथा च यास्कः—' तं स्वभिष्टौमि समानया गिरा गत्या स्तुत्या पितॄणां च मननीयैः स्तोमैर्नाभाकस्य प्रशस्तिभिः । ऋषिर्नाभाको बभूव । यः स्यन्दमानानामासामपामुपोदये सप्तस्वसारमेनमाह वाग्भिः स मध्यम इति निरुच्यतेऽथैष एव भवति । नभन्तामन्यके समे मा भूवन्नन्यके सर्वे ये नो द्विषन्ति दुर्धियः पापधियः पापसंकल्पाः ' (निरु. १०. ५) इति ॥

स क्षपः परि पस्वजे न्युस्रो मायया दधे स विश्वं परि दर्शतः ।
तस्य वेनीरनु व्रतमुषस्तिस्रो अवर्धयन्नभन्तामन्यके समे ॥ ३ ॥

सः । क्षपः । परि । सस्वजे । नि । उस्रः । मायया । दधे । सः । विश्वम् । परि । दर्शतः । तस्य । वेनीः । अनु । व्रतम् । उषः । तिस्रः । अवर्धयन् । नभन्ताम् । अन्यके । समे ॥ ३

१. ख-त-इति च; ग-इति चेति; न-भ-इवेति; श-इति । २. ग-त-न-भ२-गच्छति इव रक्षति घ-रक्षति यथा गोपालो गा रक्षति तद्वत्; भ१-गच्छति ।

vसः वरुणः vक्षपः रात्रीः vपरि vषस्वजे परिष्वजते । अपि च vदर्शतः दर्शनीयः vसः वरुणः vउस्रः उत्सरणशीलः सन् vविश्वं vमायया कर्मणा vपरि परितः vनि vदधे निदधाति । किंच vतस्य वरुणस्य vव्रतं कर्म vवेनीः कामयमानाः प्रजाः vतिस्रः vउषः त्रिषु प्रातर्माध्यंदिनं सायं च vअनु vअवर्धयन् अनुवर्धयन्ति । सिद्धमन्यत् ॥

यः कुकुभो निधारयः पृथिव्यामधि दर्शतः ।
स माता पूर्व्यं पदं तद्वरुणस्य सप्त्यं स हि गोपाइवेर्यो नभन्तामन्यके समे ॥४॥

यः । कुकुभः । निऽधारयः । पृथिव्याम् । अधि । दर्शतः ।
सः । माता । पूर्व्यम् । पदम् । तत् । वरुणस्य । सप्त्यम् । सः । हि । गोपाःऽइव । इर्यः ।
नभन्ताम् । अन्यके । समे ॥ ४ ॥

vयः वरुणः vपृथिव्यामधि पृथिव्या उपरि vदर्शतः दर्शनीयः सन् vककुभः दिशः vनिधारयः निधारयति vसः वरुणः vमाता निर्माता । vपूर्व्यं प्रत्नं vपदं स्वर्गाख्यं स्थानं vसप्त्यम् अस्माभिश्च सर्पणीयं vतत् vवरुणस्य स्वकृतम्[1] । अपि च vस vहि स एव vइर्यः[2] ईश्वरः सन् vगोपाइव गोपाल इव पशूनामस्माकं रक्षिता । सिद्धमन्यत् ॥

यो धर्ता भुवनानां य उस्राणामपीच्या३ वेद नामानि गुह्या ।
स कविः काव्या पुरु रूपं द्यौरिव पुष्यति नभन्तामन्यके समे ॥ ५ ॥

यः । धर्ता । भुवनानाम् । यः । उस्राणाम् । अपीच्या । वेद । नामानि । गुह्या ।
सः । कविः । काव्या । पुरु । रूपम् । द्यौःऽइव । पुष्यति । नभन्ताम् । अन्यके । समे ॥५

vयः वरुणः vभुवनानां vधर्ता धारयिता vयः च vउस्राणां देवाधिष्ठानभूतानां रश्मीनाम् vअपीच्या अपीच्यान्यन्तर्हितानि vगुह्या गुह्यानि गुहायां निहितानि vनामानि vवेद जानाति vसः वरुणः vकविः प्राज्ञः सन् vकाव्या काव्यानि कविकर्माणि vपुरु बहूनि vरूपं vद्यौरिव vपुष्यति सिद्धमन्यत् ॥ ॥ २६ ॥

यस्मिन्विश्वानि काव्या चक्रे नाभिरिव श्रिता ।
त्रितं जूती सपर्यत व्रजे गावो न संयुजे युजे अश्वाँ अयुक्षत नभन्तामन्यके समे॥६

यस्मिन् । विश्वानि । काव्या । चक्रे । नाभिःऽइव । श्रिता ।
त्रितम् । जूती । सपर्यत । व्रजे । गावः । न । सम्ऽयुजे ।
युजे । अश्वान् । अयुक्षत । नभन्ताम् । अन्यके । समे ॥ ६ ॥

vयस्मिन् वरुणे vविश्वानि सर्वाणि vकाव्या काव्यानि कविकर्माणि vचक्रे vनाभिरिव यथा रथस्य चक्रे नाभिस्तथा vश्रिता श्रितानि तं vत्रितं[3] त्रिस्थानं वरुणं vजूती जूत्या क्षिप्रं vसपर्यत हे मदीया जनाः परिचरत । किमर्थमित्यत आह । vव्रजे गोष्ठे vगावो vन यथा गाः vसंयुजे संयोगार्थं

१. ख-त-भ१-२-स्वनुतं; ग-स्वदतं; न-नुतं; भ३-श-स्वभूतं । २. त-न-भ-अर्यः । ३. घ-त्रितं भूर्भुवःस्वः ।

सह स्थापयितुं ᵛयुजे युञ्जन्ति तथास्माकमभियोगाय ᵛअश्वानयुक्षत सपत्ना युञ्जन्ति । अतस्तदुपद्रव-परिहाराय वरुणं परिचरतेत्यर्थः ॥

य आस्वर्त्क आशये विश्वा जातान्येषाम् ।
परि धामानि मर्मृशद्वरुणस्य पुरो गये विश्वे देवा अनु व्रतं नभन्तामन्यके समे ॥७॥

यः । आसु । अर्त्कः । आऽशये । विश्वा । जातानि । एषाम् ।
परि । धामानि । मर्मृशत् । वरुणस्य । पुरः । गये । विश्वे । देवाः । अनु । व्रतम् ।
नभन्ताम् । अन्यके । समे ॥ ७ ॥

--- ᵛपरिमृशतः ᵛवरुणस्य ᵛपुरो ᵛगये रथस्य पुरताद्भवति तस्य वरुणस्य पुरस्तात् ᵛविश्वे सर्वे ᵛदेवाः ᵛव्रतं कर्म ᵛअनु गच्छन्तीत्यर्थः । सिद्धमन्यत् ॥

स समुद्रो अपीच्यस्तुरो द्यामिव रोहति नि यदासु यर्जुर्दधे ।
स माया अर्चिना पदास्तृणान्नाकमारुहन्नभन्तामन्यके समे ॥ ८ ॥

सः । समुद्रः । अपीच्यः । तुरः । द्याम्ऽइव । रोहति । नि । यत् । आसु । यर्जुः । दधे ।
सः । मायाः । अर्चिना । पदा । अस्तृणात् । नाकम् । आ । अरुहत् ।
नभन्ताम् । अन्यके । समे ॥ ८ ॥

यस्मादापः समुद्रवन्ति ᵛसः वरुणः ᵛसमुद्रः ᵛअपीच्यः अन्तर्हितः ᵛतुरः क्षिप्रः ᵛद्यामिव यथादित्यो द्यां रोहति तथा नाकं ᵛरोहति । अपि च ᵛयत् यः वरुणः ᵛआसु दिक्षु ᵛयजुः प्रजाभ्यो दानं ᵛनि ᵛदधे निदधाति ᵛसः वरुणः ᵛमायाः असुराणां मायाः ᵛअर्चिना अर्चिष्मता ᵛपदा स्थानेन । तेजसेत्यर्थः । ᵛआ ᵛअस्तृणात् समन्ताद्विनस्ति । ᵛनाकं स्वर्गम् ᵛआरुहत् आरोहति । सिद्धमन्यत् ॥

यस्य श्वेता विचक्षणा तिस्रो भूमीरधिक्षितः ।
त्रिरुत्तराणि पप्रतुर्वरुणस्य ध्रुवं सदः स सप्तानामिरज्यति नभन्तामन्यके समे॥९॥

यस्य । श्वेता । विऽचक्षणा । तिस्रः । भूमीः । अधिऽक्षितः ।
त्रिः । उत्ऽतराणि । पप्रतुः । वरुणस्य । ध्रुवम् । सदः ।
सः । सप्तानाम् । इरज्यति । नभन्ताम् । अन्यके । समे ॥ ९ ॥

ᵛयस्य वरुणस्य ᵛअधिक्षितः अन्तरिक्षेऽधिवसतः ᵛश्वेता श्वेतानि ᵛविचक्षणा तेजांसि ᵛतिस्रो ᵛभूमीः ᵛत्रिरुत्तराणि तिसृणामधिस्थितानि भुवनानि ᵛपप्रतुः प्रथयन्ति । तथा च मन्त्रवर्णः— ' तिस्रो भूमीर्धारयन् त्रीँरुत द्यून् ' (ऋ. सं. २. २७. ८) इति । तस्य ᵛवरुणस्य ᵛसदः स्थानं ᵛध्रुवम् अचलमिति । किंच ᵛसः वरुणः ᵛसप्तानां सिन्धूनाम् ᵛइरज्यति ईश्वरो भवति । सिद्धमन्यत् ॥

यः श्वेताँ अधिनिर्णिजश्चक्रे कृष्णाँ अनु व्रता ।
स धामं पूर्व्यं ममे यः स्कम्भेन वि रोदसी
अजो न द्यामधारयन्नभन्तामन्यके समे ॥ १० ॥

यः । श्वेतान् । अधिऽनिर्निजः । चक्रे । कृष्णान् । अनु । व्रता ।
सः । धाम । पूर्व्यम् । ममे । यः । स्कम्भेन । वि । रोदसी इति ।
अजः । न । द्याम् । अधारयत् । नभन्ताम् । अन्यके । समे ॥ १० ॥

यः वरुणः निर्णिजः आत्मीयान् रश्मीन् दिवा श्वेतान् अधि चक्रे अधिकरोति तथा रात्रौ कृष्णान् चक्रे सः वरुणः अनु व्रता कर्माणि लक्षीकृत्योभयविधकर्मानुगुणं पूर्व्यं धाम अन्तरिक्षं दिवं वा ममे निर्ममे। अपि च यः स्कम्भेन अन्तरिक्षेण अजो न यथा आदित्यः द्यां धारयति तथा रोदसी द्यावापृथिव्यौ वि अधारयत् विधारयति स वरुण इत्यर्थः । सिद्धमन्यत् ॥ ॥ २७ ॥

' अस्तभ्नात् ' इति षड्चं द्वादशं सूक्तम् । अर्चनाना ऋषिः काण्वो नाभाको वा ऋषिः । उत्तरे त्वर्चनानाः । आद्यस्तृचश्चैष्टुभो वरुणदेवत्यो द्वितीयस्तृच आनुष्टुभोऽश्विदेवताकः[1] । तथा चानुक्रान्तम्—' अस्तभ्नात् षळर्चनाना वा त्रैष्टुभमन्त्यं वा तृचमाश्विनमानुष्टुभमपश्यत् ' इति । सूक्तविनियोगो लैङ्गिकः । वारुणे पशौ हविषो याज्या ' अस्तभ्नात् ' इति । सूत्रितं च—' अस्तभ्नाद्द्यामसुरो विश्ववेदा इत्यैकादशिनाः ' (आश्व. श्रौ. ३. ७) इति । अग्नीषोमप्रणयनेऽप्येषोत्तरा परिधानीया । तथा सूत्रितम्—' अस्तभ्नाद्द्यामसुरो विश्ववेदा इति परिदध्यादुत्तरया वा ' (आश्व. श्रौ. ४. १०) इति । ' एवा वन्दस्व ' इत्येषा वारुणे पशौ हविषोऽनुवाक्या । सूत्रितं च—' एवा वन्दस्व वरुणं बृहन्तं तत्वा यामि ब्रह्मणा वन्दमान इति द्वे ' (आश्व. श्रौ. ३. ७) । सोमप्रवहणे ' इमां धियम् ' इत्येषा परिधानीया । सूत्रितं च—' इमां धियं शिक्षमाणस्य देवेति निहिते परिदध्यात् ' (आश्व. श्रौ. ४. ४) इति ॥

अस्तभ्नाद् द्यामसुरो विश्ववेदा अमिमीत वरिमाणं पृथिव्याः ।
आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि ॥ १ ॥

अस्तभ्नात् । द्याम् । असुरः । विश्वऽवेदाः । अमिमीत । वरिमाणम् । पृथिव्याः ।
आ । असीदत् । विश्वा । भुवनानि । सम्ऽराट् । विश्वा । इत् । तानि । वरुणस्य । व्रतानि ॥ १

विश्ववेदाः विश्वधनः असुरः बलवान् वरुणः द्याम् अस्तभ्नात् । तथा पृथिव्याः च वरिमाणं परिमाणम् अमिमीत चक्रे । एवं निर्मितानि विश्वा सर्वाणि भुवनानि सम्राट् भूत्वा आसीदत् च अध्यतिष्ठच्च । वरुणस्य[2] तानि एतानि व्रतानि[3] कर्माणि विश्वेत् विश्वान्येव[4] । अतो वर्णयितुमशक्यानीत्यर्थः[4] ॥

एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपाम् ।
स नः शर्म त्रिवरूथं वि यंसत्पातं नो द्यावापृथिवी उपस्थे ॥ २ ॥

एव । वन्दस्व । वरुणम् । बृहन्तम् । नमस्य । धीरम् । अमृतस्य । गोपाम् ।
सः । नः । शर्म । त्रिऽवरूथम् । वि । यंसत् । पातम् । नः । द्यावापृथिवी इति । उपऽस्थे ॥ २

हे स्तोतः बृहन्तं महान्तं वरुणम् एव एवं वन्दस्व स्तुहि । अमृतस्य गोपां गोपायितारं धीरं प्राज्ञं वरुणं नमस्य नमस्कुरु च । सः वरुणः नः अस्मभ्यं त्रिवरूथं त्रिस्थानं

१. ख-घ-त-न-श–°ष्टुभो विश्वेदेवताकः । २. घ–एतादृशस्य वरुणस्य । ३. त-न-भ–' व्रतानि ' नास्ति । ४. घ–बहूनि संति ।

vशर्म गृहं vवि vयंसत् प्रयच्छतु । vउपस्थे उपस्थाने वर्तमानान् vनः अस्मान् vद्यावापृथिवी द्यावापृथिव्यौ vपातं रक्षतम् ॥

इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि ।
ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम ॥ ३ ॥

इमाम् । धियम् । शिक्षमाणस्य । देव । क्रतुम् । दक्षम् । वरुण । सम् । शिशाधि ।
ययाऽअति । विश्वा । दुःऽइता । तरेम । सुऽतर्माणम् । अधि । नावम् । रुहेम ॥ ३ ॥

हे vदेव द्योतमान vवरुण vइमां vधियम् इदं कर्म vशिक्षमाणस्य अनुतिष्ठतो मम vक्रतुं प्रज्ञानं vदक्षं बलं च vसं vशिशाधि तीक्ष्णीकुरु । vयया नावा यज्ञरूपया vविश्वा सर्वाणि vदुरिता दुरितानि vअति vतरेम तां vसुतर्माणं सुष्ठु तारयित्रीं यज्ञरूपां vनावम् vअधि vरुहेम वयमारुहेम । दुःखसागरतरणे हेतुत्वाद्यज्ञो नौरित्यत्र व्यपदिश्यते ॥

आ वां ग्रावाणो अश्विना धीभिर्विप्रा अचुच्यवुः ।
नासत्या सोमपीतये नभन्तामन्यके समे ॥ ४ ॥

आ । वाम् । ग्रावाणः । अश्विना । धीभिः । विप्राः । अचुच्यवुः ।
नासत्या । सोमऽपीतये । नभन्ताम् । अन्यके । समे ॥ ४ ॥

हे vनासत्या सत्यौ[1] सत्यप्रणेतारौ वा । तथा च यास्कः—'सत्यावेव नासत्यावित्यौर्णवाभः सत्यस्य प्रणेतारौ' (निरु. ६. १३) इति । vअश्विना अश्विनौ vवां युवां vसोमपीतये सोमस्य पानाय vविप्राः प्राज्ञा ऋत्विजः vग्रावाणः सोमाभिषवपाषाणाश्च vधीभिः कर्मभिः स्वस्वव्यापारैः vअचुच्यवुः अभिगच्छन्ति । सिद्धमन्यत् ॥

यथा वामत्रिरश्विना गीर्भिर्विप्रो अजोहवीत् ।
नासत्या सोमपीतये नभन्तामन्यके समे ॥ ५ ॥

यथा । वाम् । अत्रिः । अश्विना । गीःऽभिः । विप्रः । अजोहवीत् ।
नासत्या । सोमऽपीतये । नभन्ताम् । अन्यके । समे ॥ ५ ॥

हे नासत्यावश्विनौ vवां युवां vविप्रः प्राज्ञः vअत्रिः vयथा vगीर्भिः स्तुतिभिः vसोमपीतये vअजोहवीत् तथाहमपि जोहवीमि ॥

एवा वामह्व ऊतये यथाहुवन्त मेधिराः ।
नासत्या सोमपीतये नभन्तामन्यके समे ॥ ६ ॥

एव । वाम् । अह्वे । ऊतये । यथा । अहुवन्त । मेधिराः ।
नासत्या । सोमऽपीतये । नभन्ताम् । अन्यके । समे ॥ ६ ॥

इयं व्याख्यातचरा ॥ ॥ २८ ॥ ॥ ५ ॥

---

१. ज्ञ-भ-नासत्यौ ।

षष्ठेऽनुवाके षट् सूक्तानि । तत्र 'इमे विप्रस्य' इति त्रयस्त्रिंशदृचं प्रथमं सूक्तमाङ्गिरसस्य विरूपस्यार्षं गायत्रमग्निदेवताकम् । तथा चानुक्रान्तम्—'इमे त्रयस्त्रिंशद्विरूप आङ्गिरस आग्नेयं तु' इति । प्रातरनुवाक आग्नेये क्रतौ गायत्रे छन्दस्याश्विनशस्त्रे चैतदादिके द्वे सूक्ते । सूत्रितं च—'इमे विप्रस्येति सूक्ते' (आश्व. श्रौ. ४. १३) इति । कारीर्यवभृथेष्टयोः प्रथमाज्यभागस्य 'अप्स्वग्ने' इत्यनुवाक्या । तथा च सूत्रितम्—'अप्सुमन्तावाज्यभागावप्स्वग्ने सधिष्टव' (आश्व. श्रौ. २. १३) इति । आग्नीध्रस्य प्रातःसवने प्रस्थितयाज्या । श्रूयते च—'उक्षान्नाय वशान्नायेत्याग्नीध्रो यजति' (ऐ. ब्रा. ६. १०) इति । अग्निवतीष्टौ 'त्वं ह्यग्ने' इत्येषा याज्या । सूत्रितं च—'त्वं ह्यग्ने अग्निनाग्ने त्वमस्मद्युयोध्यमीवाः' (आश्व. श्रौ. ३. १३) इति । अग्निमन्थनेऽप्येषा । सूत्रितं च—'त्वं ह्यग्ने अग्निना तं मर्जयन्त सुक्रतुम्' (आश्व. श्रौ. २. १६) इति । अग्नये कामायाष्टाकपालेष्टौ 'तुभ्यं ता अङ्गिरस्तम' इत्येषानुवाक्या । सूत्रितं च—'तुभ्यं ता अङ्गिरस्तमाइयाम तं काममग्ने तवोतीति कामाय' (आश्व. श्रौ. २. १०) इति । अन्वाहिताग्नेः प्रयाणे समारोपणपक्षेऽनयैकाहुतिः कर्तव्या । तथा च सूत्रितं—'तुभ्यं ता अङ्गिरस्तमेति वाज्याहुतिं हुत्वा समारोपयेत्' (आश्व. श्रौ. ३. १०) इति । वैद्युताग्निनाग्नीनां संसर्गेऽग्नयेऽप्सुमतीष्टिः । तत्र 'यदग्ने दिविजाः' इति याज्या । 'यदग्ने दिविजा अस्यग्निर्होता न्यसीदद्यजीयान्' (आश्व. श्रौ. ३. १३) इति ॥

इमे विप्रस्य वेधसोऽग्नेरस्तृतयज्वनः । गिरः स्तोमास ईरते ॥ १ ॥

इमे । विप्रस्य । वेधसः । अग्नेः । अस्तृतऽयज्वनः । गिरः । स्तोमासः । ईरते ॥ १ ॥

vइमे अस्मदीयाः vस्तोमासः स्तोतारः vविप्रस्य मेधाविनः vवेधसः विधातुः vअस्तृतयज्वनः अहिंसितयजमानस्य vअग्नेः vगिरः स्तुतीः vईरते प्रेरयन्ति ॥

अस्मै ते प्रतिहर्यते जातवेदो विचर्षणे । अग्ने जनामि सुष्टुतिम् ॥ २ ॥

अस्मै । ते । प्रतिऽहर्यते । जातऽवेदः । विऽचर्षणे । अग्ने । जनामि । सुऽस्तुतिम् ॥ २ ॥

हे vजातवेदः जातधन vविचर्षणे विद्रष्टः vअग्ने vअस्मै vप्रतिहर्यते प्रयच्छते vते तुभ्यं vसुष्टुतिं शोभनां स्तुतिं vजनामि आङ्गिरसोऽहं जनयामि ॥

आरोकाइव घेदहं तिग्मा अग्ने तव त्विषः । दद्भिर्वनानि बप्सति ॥ ३ ॥

आरोकाःऽइव । घ । इत् । अहं । तिग्माः । अग्ने । तव । त्विषः । दत्ऽभिः । वनानि । बप्सति ॥३॥

हे vअग्ने vतव vतिग्माः तीक्ष्णाः vत्विषः दीप्तयः vआरोकाइव आरोचमानाः पशव इव vदद्भिः दन्तैः vवनानि अरण्यानि vबप्सनि भक्षयन्ति । vघेदह इति त्रयं पूरकम् ॥

हरयो धूमकेतवो वातजूता उप द्यवि । यतन्ते वृथगग्नयः ॥ ४ ॥

हरयः । धूमऽकेतवः । वातऽजूताः । उप । द्यवि । यतन्ते । वृथक् । अग्नयः ॥ ४ ॥

vहरयः हरणशीलाः vवातजूताः वातप्रेरिताः vधूमकेतवः धूमध्वजाः vअग्नयः vउप vद्यवि अन्तरिक्षे vवृथक्[1] पृथक् vयतन्ते गच्छन्ति । पृथगित्यनेन सममव्ययं वृथगिति । पृथगित्येव वाजसनेयिनः पठन्ति (वा. सं. ३३. २) ॥

एते त्ये वृथगग्नय इद्धासः समदक्षत । उषसामिव केतवः ॥ ५ ॥

---

१. ग-ज्ञ-त४–'वृथक्' नास्ति; त२-३-भ–पृथक् ।

एते । त्ये । वृथक् । अग्नयः । इद्धासः । सम् । अदृक्षत । उषसाम्ऽइव । केतवः ॥ ५ ॥

[v]एते [v]त्ये एते [v]अग्नयः [v]वृथक्[1] पृथक् [v]इद्धासः अग्निहोत्रिभिः समिद्धाः सन्तः [v]उषसामिव [v]केतवः उषसां प्रज्ञापका इव [v]समदृक्षत सम्यग्दृश्यन्ते ॥ ॥ २९ ॥

कृष्णा रजांसि पत्सुतः प्रयाणे जातवेदसः । अग्निर्यद्रोधति क्षमि ॥ ६ ॥

कृष्णा । रजांसि । पत्सुतः । प्रऽयाने । जातऽवेदसः । अग्निः । यत् । रोधति । क्षमि ॥६॥

[v]जातवेदसः अग्नेः [v]प्रयाणे [v]पत्सुतः पत्तः [v]रजांसि पांसवः कृष्णानि[2] भवन्ति । कदेत्यत आह । [v]क्षमि क्षमायां [v]यत् यदा [v]अग्निः [v]रोधति शुष्कान् वनस्पतीन् निरुणद्धि ॥

धासिं कृण्वान ओषधीर्बप्सदग्निर्न वायति । पुनर्यन्तरुणीरपि ॥ ७ ॥

धासिम् । कृण्वानः । ओषधीः । बप्सत् । अग्निः । न । वायति । पुनः । यन् । तरुणीः । अपि ॥ ७ ॥

[v]अग्निः [v]ओषधीः [v]धासिम् अन्नम् । 'क्षुत् धासि' इत्यन्ननामसु पाठात् । [v]कृण्वानः कुर्वन् [v]बप्सत् भक्षयन् [v]न [v]वायति न शाम्यति । [v]पुनः च [v]तरुणीः ओषधीः [v]अपि [v]यन् गच्छन् भवति । भक्षयितुमिति शेषः ॥

जिह्वाभिरह नन्नमदर्चिषा जञ्जणाभवन् । अग्निर्वनेषु रोचते ॥ ८ ॥

जिह्वाभिः । अह । नन्नमत् । अर्चिषा । जञ्जणाऽभवन् । अग्निः । वनेषु । रोचते ॥ ८ ॥

[v]अग्निः [v]जिह्वाभिरह ज्वालाभिरेव [v]नन्नमत् वनस्पतीनत्यन्तं नमयन् [v]अर्चिषा तेजसा [v]जञ्जणाभवन् ज्वलन् । 'जञ्जणाभवन् मल्मलाभवन्[3]' इति ज्वलतिकर्मसु पाठात् । [v]वनेषु अरण्येषु [v]रोचते प्रकाशते ॥

अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः ॥ ९ ॥

अप्ऽसु । अग्ने । सधिः । तव । सः । ओषधीः । अनु । रुध्यसे । गर्भे । सन् । जायसे । पुनरिति ॥९॥

हे [v]अग्ने यस्य [v]तव [v]अप्सु [v]सधिः प्रवेशस्थानं [v]सः त्वम् [v]ओषधीः [v]अनु [v]रुध्यसे अनुरुणत्सि । [v]पुनः च तासां भूमिष्ठानां [v]गर्भे [v]सन् भवन् [v]जायसे प्रादुर्भवसि ॥

उदग्ने तव तद्घृतादर्ची रोचत आहुतम् । निसानं जुह्वो३ मुखे ॥ १० ॥

उत् । अग्ने । तव । तत् । घृतात् । अर्चिः । रोचते । आऽहुतम् । निसानम् । जुह्वः । मुखे ॥ १० ॥

हे [v]अग्ने [v]तव [v]घृतात् [v]आहुतं [v]जुह्वः होमसाधनभूतायाः स्रुचः [v]मुखे [v]निसानं[4] लिहानं[5] [v]तत् [v]अर्चिः [v]उत् [v]रोचते प्रकाशते ॥ ॥ ३० ॥

उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे । स्तोमैर्विधेमाग्नये ॥ ११ ॥

उक्षऽअन्नाय । वशाऽअन्नाय । सोमऽपृष्ठाय । वेधसे । स्तोमैः । विधेम । अग्नये ॥ ११ ॥

---

१. ग-घ-त-न-भ-पृथक् । २. ख-घ-ज्ञ-त२-कृष्णा कृष्णानि । ३. ग-त२-३-४-मस्मनाभवन्; ज्ञ-भस्मनाभवन्; न-मनानाभवन् । ४. ग-त३-४-न 'निसानं' नास्ति । ५. ख-ग-घ-त-न-श-निलिहानं ।

vउक्षान्नाय। उक्षान्नमदनीयं हविर्यस्यासावुक्षान्नः। तस्मै vवशान्नाय। वशान्नं यस्यासौ वशान्नः। तस्मै vसोमपृष्ठाय सोमघृतपृष्ठाय vवेधसे विधात्रे कामानाम् vअग्नये vस्तोमैः vविधेम परिचरेम ॥

उत त्वा नमसा वयं होतर्वरेण्यक्रतो। अग्ने समिद्भिरीमहे ॥ १२ ॥

उत। त्वा। नमसा। वयम्। होतः। वरेण्यक्रतो इति वरेण्यऽक्रतो।
अग्ने। समित्ऽभिः। ईमहे ॥ १२ ॥

vउत अपि च हे vहोतः देवानां ह्वातः vवरेण्यक्रतो वरणीयप्रज्ञ vअग्ने vत्वा त्वां vवयम् आङ्गिरसाः vनमसा अन्नेन हविषा vसमिद्भिः च vईमहे याचामहे ॥

उत त्वा भृगुवच्छुचे मनुष्वदग्न आहुत। अङ्गिरस्वद्ध्वामहे ॥ १३ ॥

उत। त्वा। भृगुऽवत्। शुचे। मनुष्वत्। अग्ने। आऽहुत। अङ्गिरस्वत्। हवामहे ॥ १३ ॥

हे[1] vशुचे स्वभावतः शुद्ध vआहुत vअग्ने vत्वा त्वां vभृगुवत् यथा भृगुस्तथा vमनुष्वत् यथा च मनुस्तथा vअङ्गिरस्वत् अङ्गिरोवच्च vहवामहे ॥

त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता। सखा सख्या समिध्यसे ॥ १४ ॥

त्वम्। हि। अग्ने। अग्निना। विप्रः। विप्रेण। सन्। सता। सखा। सख्या। सम्ऽइध्यसे ॥ १४ ॥

हे vअग्ने vविप्रः मेधावी vसन् विद्यमानः vसखा च vत्वं vविप्रेण vसता[2] vसख्या vअग्निना vसमिध्यसे। तथा च ब्राह्मणं–'त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सतेति विप्र इतरो विप्र इतरः सन्नितरः सन्नितरः सखा सख्या समिध्यस इत्येष ह वा अस्य स्वः सखा' (ऐ. ब्रा. १. १६) इति ॥

स त्वं विप्राय दाशुषे रयिं देहि सहस्रिणम्। अग्ने वीरवतीमिषम् ॥ १५ ॥

सः। त्वम्। विप्राय। दाशुषे। रयिम्। देहि। सहस्रिणम्। अग्ने। वीरऽवतीम्। इषम् ॥ १५ ॥

हे vअग्ने vसः प्रसिद्धः vत्वं vविप्राय मेधाविने vदाशुषे हविषां प्रदात्रे यजमानाय vसहस्रिणं सहस्रसंख्याकमपरिमितं vरयिं धनं vवीरवतीं पुत्रपौत्रादिसहितम्[3] vइषम् अन्नं च vदेहि ॥ ॥३१॥

अग्ने भ्रातः सहस्कृत रोहिदश्व शुचिव्रत। इमं स्तोमं जुषस्व मे ॥ १६ ॥

अग्ने। भ्रातरिति। सहःऽकृत। रोहित्ऽअश्व। शुचिऽव्रत। इमम्। स्तोमम्। जुषस्व। मे ॥ १६ ॥

हे vअग्ने vभ्रातः भ्रातृवद्यजमानानां मित्रभूत vसहस्कृत सहसा बलेन कृत vरोहिदश्व लोहितवर्णाश्व vशुचिव्रत शुद्धकर्मन्नग्ने vमे आङ्गिरसस्य मम[4] vइमं[4] vस्तोमं vजुषस्व सेवस्व ॥

उत त्वाग्ने मम स्तुतो वाश्राय प्रतिहर्यते। गोष्ठं गावइवाशत ॥ १७ ॥

उत। त्वा। अग्ने। मम। स्तुतः। वाश्राय। प्रतिऽहर्यते। गोऽस्थम्। गावःऽइव। आशत ॥ १७ ॥

vउत अपि च हे vअग्ने vत्वा त्वां vमम आङ्गिरसस्य vस्तुतः स्तुतयः vवाश्राय वाशनशीलाय वत्साय vप्रतिहर्यते पयः कामयमानाय दोग्धुं vगोष्ठं vगावइव यथा गावः प्रविशन्ति तथा vआशत प्राप्नुवन्ति ॥

---

१. घ–उतापि च हे। २. घ–सता साधुना। ३. ख-ग-त-न-भ-श–°सहितां। ४. ज्ञ-त१-२-३–मे मम।

तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् । अग्ने कामाय येमिरे ॥ १८ ॥

तुभ्यम् । ताः । अङ्गिरःऽतम । विश्वाः । सुऽक्षितयः । पृथक् । अग्ने । कामाय । येमिरे ॥१८॥

हे ᵛअङ्गिरस्तम अङ्गिरसां श्रेष्ठ ᵛअग्ने ᵛतुभ्यं ᵛविश्वाः सर्वाः ᵛताः प्रसिद्धाः ᵛसुक्षितयः प्रजाः[1] ᵛकामाय आत्मनः कामसिद्ध्यर्थं ᵛपृथक् ᵛयेमिरे नियच्छन्ति ॥

अग्निं धीभिर्मनीषिणो मेधिरासो विपश्चितः । अग्नसद्याय हिन्विरे ॥ १९ ॥

अग्निम् । धीभिः । मनीषिणः । मेधिरासः । विपःऽचितः । अग्नऽसद्याय । हिन्विरे ॥ १९ ॥

ᵛमनीषिणः मनस ईश्वराः ᵛमेधिरासः मेधाविनः ᵛविपश्चितः प्राज्ञा यजमानाः ᵛधीभिः कर्मभिः ᵛअग्नसद्याय अन्नस्य भजनाय ᵛअग्निं ᵛहिन्विरे प्रीणयन्ति ॥

तं त्वामज्मेषु वाजिनं तन्वाना अग्ने अध्वरम् । वह्निं होतारमीळते ॥ २० ॥

तम् । त्वाम् । अज्मेषु । वाजिनम् । तन्वानाः । अग्ने । अध्वरम् । वह्निम् । होतारम् । ईळते ॥२०॥

हे ᵛअग्ने ᵛवाजिनं बलिनं ᵛवह्निं हविषां वोढारं ᵛहोतारं[2] देवानामाह्वातारं ᵛतं प्रसिद्धं ᵛत्वाम् ᵛअज्मेषु गृहेषु ᵛअध्वरं यज्ञं ᵛतन्वानाः विस्तारयन्तो यजमानाः ᵛईळते स्तुवन्ति ॥ ॥ ३२ ॥

पुरुत्रा हि सदृङ्असि विशो विश्वा अनु प्रभुः । समत्सु त्वा हवामहे ॥ २१ ॥

पुरुऽत्रा । हि । सऽदृङ् । असि । विशः । विश्वाः । अनु । प्रऽभुः । समत्ऽसु । त्वा । हवामहे ॥२१॥

हे अग्ने त्वं ᵛहि यतः ᵛप्रभु प्रभुः । सुलोपश्छान्दसः । ᵛपुरुत्रा बहुषु प्रदेशेषु ᵛविश्वाः सर्वाः ᵛविशः प्रजाः ᵛअनु ᵛसदृङ् समानदर्शी ᵛअसि अतः ᵛत्वा त्वां ᵛसमत्सु संग्रामेषु ᵛहवामहे ह्वयामः॥

तमीळिष्व य आहुतोऽग्निर्विभ्राजते घृतैः । इमं नः शृणवद्धवम् ॥ २२ ॥

तम् । ईळिष्व । यः । आऽहुतः । अग्निः । विऽभ्राजते । घृतैः । इमम् । नः । शृणवत् । हवम् ॥२२॥

ᵛयः ᵛअग्निः ᵛघृतैः सह ᵛआहुतः ᵛविभ्राजते यश्च ᵛनः अस्माकम् ᵛइमं ᵛहवम् आह्वानं ᵛशृणवत् शृणोति ᵛतम् अग्निम् ᵛईळिष्व स्तुहि ॥

तं त्वा वयं हवामहे शृण्वन्तं जातवेदसम् । अग्ने घ्नन्तमप द्विषः ॥ २३ ॥

तम् । त्वा । वयम् । हवामहे । शृण्वन्तम् । जातऽवेदसम् । अग्ने । घ्नन्तम् । अप । द्विषः ॥२३॥

हे ᵛअग्ने ᵛजातवेदसं जातधनं जातप्रज्ञं वा ᵛद्विषः शत्रून् ᵛअप ᵛघ्नन्तं हिंसन्तं ᵛशृण्वन्तम् अस्मदीयमाह्वानं शृण्वन्तं च त्वां ᵛवयम् आङ्गिरसाः ᵛहवामहे ॥

विशां राजानमद्भुतमध्यक्षं धर्मणामिमम् । अग्निमीळे स उ श्रवत् ॥ २४ ॥

विशाम् । राजानम् । अद्भुतम् । अधिऽअक्षम् । धर्मणाम् । इमम् ।
अग्निम् । ईळे । सः । ऊँ इति । श्रवत् ॥ २४ ॥

---

१. घ-त-न-भ२-य-प्रज्ञाः । २. त-न-भ-'होतारं' नास्ति ।

vविशां प्रजानां vराजानम् ईश्वरम् vअद्भुतं महान्तं vधर्मणां कर्मणाम् vअध्यक्षम् अनुसंधातारं यं vइममग्निमीळे[1] स्तौमि vस vउ स एवाग्निः vश्रवत् अस्मदीयां स्तुतिं शृणोतु ॥

अग्निं विश्वायुवेपसं मर्यं न वाजिनं हितम् । सप्तिं न वाजयामसि ॥ २५ ॥

अग्निम् । विश्वायुऽवेपसम् । मर्यम् । न । वाजिनम् । हितम् । सप्तिम् । न । वाजयामसि ॥२५॥

vविश्वायुवेपसं सर्वगतबलम् vअग्निं vवाजिनं बलिनं vमर्यं vन मनुष्यमिव vहितं vसप्तिं vन अश्वमिव vवाजयामसि स्तुतिभिर्हविर्भिश्च बलिनं कुर्मः ॥ ॥ ३३ ॥

घ्नन्मृध्राण्यप द्विषो दहन्रक्षांसि विश्वहा । अग्ने तिग्मेन दीदिहि ॥ २६ ॥

घ्नन् । मृध्राणि । अप । द्विषः । दहन् । रक्षांसि । विश्वहा । अग्ने । तिग्मेन । दीदिहि ॥२६॥

हे vअग्ने त्वं vमृध्राणि हिंसकान् vद्विषः द्वेष्टॄन् vअप vघ्नन् हिंसन् vविश्वहा सर्वदा vरक्षांसि च vदहन् vतिग्मेन तीक्ष्णेन तेजसा vदीदिहि दीप्यस्व[2] ॥

यं त्वा जनास इन्धते मनुष्वदङ्गिरस्तम । अग्ने स बोधि मे वचः ॥ २७ ॥

यम् । त्वा । जनासः । इन्धते । मनुष्वत् । अङ्गिरःऽतम । अग्ने । सः । बोधि । मे । वचः ॥२७॥

हे vअङ्गिरस्तमाग्ने vयं vत्वा त्वां vजनासः जनाः vमनुष्वत् यथा मनुस्तथा vइन्धते दीपयन्ति vसः त्वं vमे मदीयं vवचः स्तुतिं vबोधि बुध्यस्व ॥

यदग्ने दिविजा अस्यप्सुजा वा सहस्कृत । तं त्वा गीर्भिर्हवामहे ॥ २८ ॥

यत् । अग्ने । दिविऽजाः । असि । अप्सुऽजाः । वा । सहःऽकृत ।
तम् । त्वा । गीःऽभिः । हवामहे ॥ २८ ॥

हे vअग्ने vयत् यस्त्वं vदिविजाः दिवि भवः vअसि भवसि vअप्सुजा vवा अन्तरिक्षजातश्च भवसि vसहस्कृतः सहसा बलेन कृतश्चासि vतं vत्वा त्वामग्निं vगीर्भिः स्तुतिभिः vहवामहे ह्वयामः[3] ॥

तुभ्यं घेत्ते जना इमे विश्वाः सुक्षितयः पृथक् । धासिं हिन्वन्त्यत्तवे ॥ २९ ॥

तुभ्यम् । घ । इत् । ते । जनाः । इमे । विश्वाः । सुऽक्षितयः । पृथक् ।
धासिम् । हिन्वन्ति । अत्तवे ॥ २९ ॥

हे अग्ने vतुभ्यं vघ[4] त्वदर्थमेव vते vइमे मया दृश्यमानाः vजनाः vविश्वाः सर्वाः vसुक्षितयः प्रजाश्च vधासिम् अन्नं हविः vअत्तवे अदनाय vपृथक् vहिन्वन्ति प्रेरयन्ति ॥

ते घेदग्ने स्वाध्योऽहा विश्वा नृचक्षसः । तरन्तः स्याम दुर्गहा ॥ ३० ॥

ते । घ । इत् । अग्ने । सुऽआध्यः । अहा । विश्वा । नृऽचक्षसः । तरन्तः । स्याम । दुःऽगहा ॥३०॥

हे vअग्ने vते vघेत् त्वदर्थमेव खलु वयं vस्वाध्यः सुकर्माणः सन्तः vविश्वा विश्वानि vअहा अहानि vनृचक्षसः द्रष्टारश्च vदुर्गहा दुःखेन गाहयितव्यानि vतरन्तः vस्याम भवेम ॥ ॥ ३४ ॥

---

१. ग-त-न-भ-श–अग्निमीळे । २. ग-त-न-भ-श–' दीप्यस्व ' नास्ति । ३. घ-त-न-भ–ह्वयाम । ४. ख-घ-त१-२–घेत् ।

अग्निं मन्द्रं पुरुप्रियं शीरं पावकशोचिषम् । हृद्भिर्मन्द्रेभिरीमहे ॥ ३१ ॥

अग्निम् । मन्द्रम् । पुरुऽप्रियम् । शीरम् । पावकऽशोचिषम् । हृत्ऽभिः । मन्द्रेभिः । ईमहे ॥३१॥

vमन्द्रं मादनं vपुरुप्रियं बहुप्रियं vशीरं यज्ञेषु शयनशीलं vपावकशोचिषं पावकदीप्तिम् vअग्निं vहृद्भिः मनोहरैर्मन्द्रैः[1] मादनैः स्तोत्रैः vईमहे याचामहे ॥

स त्वमग्ने विभावसुः सृजन्त्सूर्यो न रश्मिभिः । शर्धन्तमांसि जिघ्नसे ॥३२॥

सः । त्वम् । अग्ने । विभाऽवसुः । सृजन् । सूर्यः । न । रश्मिऽभिः ।
शर्धन् । तमांसि । जिघ्नसे ॥ ३२ ॥

हे vअग्ने vविभावसुः दीप्तिधनः vसः प्रसिद्धः vत्वं vसृजन् उद्यन् vसूर्यो vन यथा सूर्यस्तथा vरश्मिभिः vशर्धन् बलं कुर्वन् vतमांसि vजिघ्नसे नाशयसि ॥

तत्ते सहस्व ईमहे दात्रं यन्नोपदस्यति । त्वदग्ने वार्यं वसु ॥ ३३ ॥

तत् । ते । सहस्वः । ईमहे । दात्रम् । यत् । न । उपऽदस्यति । त्वत् । अग्ने । वार्यम् । वसु ॥३३॥

हे vसहस्वः बलवन् vअग्ने vते तव vयत् वसु vनोपदस्यति नोपक्षीयते vतत् vदात्रं दातव्यं vवार्यं वरणीयं च vवसु धनं vत्वत् त्वत्तः vईमहे याचामहे ॥ ॥ ३५ ॥

'समिधाग्निम्' इति त्रिंशदृचं द्वितीयं सूक्तमाङ्गिरसस्य विरूपस्यार्षं प्राग्वत्सप्रपरिभाषया गायत्रमाग्नेयम् । तथा चानुक्रम्यते—'समिधाग्निं त्रिंशत्' इति । प्रातरनुवाके गायत्रे छन्दस्याश्विनशस्त्रे चेदं विनियुक्तम् । महाव्रते 'समिधाग्निम्' इत्याद्याश्वतस्त्रः सामिधेन्यः । तथा च पञ्चमारण्यके सूत्रितं—'समिधाग्निमिति चतस्रो वैश्वकर्मण ऋषभः' (ऐ. आ. ५. १. १) इति । आतिथ्यायां 'समिधाग्निम्' इत्येषा प्रथमाज्यभागस्यानुवाक्या । सूत्रितं च—'समिधाग्निं दुवस्यता प्यायस्व समेतु ते' (आश्व. श्रौ. ४. ५) इति[2] । अमावास्यायां प्रथमाज्यभागस्यानुवाक्या । सूत्रितं च—'वृधन्वन्तावमावास्यायामग्निः प्रत्नेन मन्मना' (आश्व. श्रौ. १. ५) इति । दर्शपूर्णमासयोराग्नेयस्यानुवाक्या 'अग्निर्मूर्धा' इत्येषा । सूत्रितं च—'अग्निर्मूर्धा भुवो यज्ञस्य' (आश्व. श्रौ. १. ६) इति । मूर्धन्वद्रुणस्याग्नेरप्येषैवानुवाक्या । सूत्रितं च—'नित्ये मूर्धन्व' इति । पवमानेष्टिषु द्वितीयस्यामिष्टावग्नेः शुचेरनुवाक्या 'अग्निः शुचिव्रततमः' इत्येषा । सूत्रितं च—'अग्निः शुचिव्रततम उदग्ने शुचयस्तव' (आश्व. श्रौ. २. १) इति ॥

समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन ॥ १ ॥

सम्ऽइधा । अग्निम् । दुवस्यत । घृतैः । बोधयत । अतिथिम् ।
आ । अस्मिन् । हव्या । जुहोतन ॥ १ ॥

हे ऋत्विजः vअतिथिम् अतिथिवत् प्रियम् vअग्निं vसमिधा vदुवस्यत परिचरत । vघृतैः दीप्तिसाधनैराज्यैः vबोधयत च । vअस्मिन् समिद्धेऽग्नौ vहव्या हवींषि vआ vजुहोतन[3] आजुहुत[3] च ।

अग्ने स्तोमं जुषस्व मे वर्धस्वानेन मन्मना । प्रति सूक्तानि हर्य नः ॥ २ ॥

१. घ–°र्मद्रेभिः; त-न-भ–°र्भन्त्रैः । २. ग–इतीति । अग्निः प्रत्नेनेति । ३. ग–आजुहोत आजुहत; ज्ञ-त१-२-भ३–जुहोतन जुहुत; भ१–जुहोत तां जुहुते ।

अग्ने । स्तोमम् । जुषस्व । मे । वर्धस्व । अनेन । मन्मना । प्रति । सुऽउक्तानि । हर्य । नः॥२॥

हे ᵛअग्ने ᵛमे आङ्गिरसस्य मम ᵛस्तोमं स्तोत्रं ᵛजुषस्व सेवस्व । ᵛअनेन ᵛमन्मना मननीयेन स्तोत्रेण ᵛवर्धस्व च । ᵛनः अस्माकं ᵛसूक्तानि ᵛप्रति ᵛहर्य कामय च ॥

अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे । देवाँ आ सादयादिह ॥ ३ ॥

अग्निम् । दूतम् । पुरः । दधे । हव्यऽवाहम् । उप । ब्रुवे । देवान् । आ । सादयात् । इह ॥३॥

ᵛदूतं देवानां ᵛहव्यवाहं हविषां वोढारं च ᵛअग्निं ᵛपुरो ᵛदधे पुरस्करोमि । ᵛउप ᵛब्रुवे उपस्तौमि च । सोऽग्निः ᵛइह यज्ञे ᵛदेवान् ᵛआ ᵛसादयत्[1] आसादयतु ॥

उत्ते बृहन्तो अर्चयः समिधानस्य दीदिवः । अग्ने शुक्रास ईरते ॥ ४ ॥

उत् । ते । बृहन्तः । अर्चयः । सम्ऽइधानस्य । दीदिऽवः । अग्ने । शुक्रासः । ईरते ॥ ४ ॥

हे ᵛदीदिवः दीप्त ᵛअग्ने ᵛसमिधानस्य समिध्यमानस्य ᵛते तव ᵛबृहन्तः महान्तः ᵛशुक्रासः ज्वलन्तः ᵛअर्चयः दीप्तयः ᵛउत्[2] ᵛईरते[2] ॥

उप त्वा जुह्वो३ मम घृताचीर्यन्तु हर्यत । अग्ने हव्या जुषस्व नः ॥ ५ ॥

उप । त्वा । जुह्वः । मम । घृताचीः । यन्तु । हर्यत । अग्ने । हव्या । जुषस्व । नः ॥ ५ ॥

हे ᵛहर्यत कामयमान ᵛअग्ने ᵛमम मदीयाः ᵛघृताचीः घृतमञ्चन्त्यः ᵛजुह्वः स्रुचः ᵛत्वा त्वाम् ᵛउप ᵛयन्तु । ᵛनः अस्माकं ᵛहव्या हव्यानि ᵛजुषस्व सेवस्व च ॥ ॥ ३६ ॥

मन्द्रं होतारमृत्विजं चित्रभानुं विभावसुम् । अग्निमीळे स उ श्रवत् ॥ ६ ॥

मन्द्रम् । होतारम् । ऋत्विजम् । चित्रऽभानुम् । विभाऽवसुम् ।
अग्निम् । ईळे । सः । ऊँ इति । श्रवत् ॥ ६ ॥

ᵛमन्द्रं मादनं[3] ᵛहोतारं देवानामाह्वातारम् ᵛऋत्विजम् ऋतौ यष्टव्यं ᵛचित्रभानुं चित्रदीप्तिं ᵛविभावसुं दीप्तिधनम् ᵛअग्निम् ᵛईळे स्तौमि । ᵛसः अग्निः ᵛश्रवत्[4] अस्मदीयां स्तुतिं शृणोत्वेव ॥

प्रत्नं होतारमीड्यं जुष्टमग्निं कविक्रतुम् । अध्वराणामभिश्रियम् ॥ ७ ॥

प्रत्नम् । होतारम् । ईड्यम् । जुष्टम् । अग्निम् । कविऽक्रतुम् । अध्वराणाम् । अभिऽश्रियम् ॥ ७ ॥

ᵛप्रत्नं पुराणं ᵛहोतारं देवानामाह्वातारम् ᵛईड्यं स्तुत्यं ᵛजुष्टं प्रीतं सेवितं वा ᵛकविक्रतुं क्रान्तकर्माणम् ᵛअध्वराणां यज्ञानाम् ᵛअभिश्रियम् अभिश्रयितारमीड्यम्[5] ᵛअग्निम् ईळे स्तौमि ॥

जुषाणो अङ्गिरस्तमेमा हव्यान्यानुषक् । अग्ने यज्ञं नय ऋतुथा ॥ ८ ॥

जुषाणः । अङ्गिरःऽतम । इमा । हव्यानि । आनुषक् । अग्ने । यज्ञम् । नय । ऋतुऽथा ॥८॥

हे ᵛअङ्गिरस्तम अङ्गिरसां श्रेष्ठ ᵛअग्ने ᵛइमा इमान्यस्मदीयानि ᵛहव्यानि हवींषि ᵛआनुषक् अनुषक्तं यथा भवति तथा ᵛजुषाणः सेवमानो भव । ᵛऋतुथा काले काले ᵛयज्ञं च ᵛनय ॥

---

१. त१-२–सादयात् । २. ख–उद्गच्छति उदीरयते; ग-त३-४-न–उदीरयते; ज्ञ-त१-२–उदीरयते उद्गच्छति; य–उदीरते उद्गच्छति । ३. भ–मोदनं । ४. घ–उ श्रवत् । ५. त१-न-भ–अभिश्रयितारं ।

समिधान उ सन्त्य शुक्रशोच इहा वह । चिकित्वान्दैव्यं जनम् ॥ ९ ॥

सम्ऽइधानः । ऊँ इति । सन्त्य । शुक्रऽशोचे । इह । आ । वह । चिकित्वान् । दैव्यम् । जनम् ॥ ९ ॥

हे ᵛसन्त्य भजनशील ᵛशुक्रशोचे ज्वलदीप्ते त्वं ᵛसमिधान ᵛउ समिध्यमान एव ᵛदैव्यं देवसंबन्धिनं ᵛजनं ᵛचिकित्वान् जानन् ᵛइह यज्ञे ᵛआ ᵛवह ॥

विप्रं होतारमद्रुहं धूमकेतुं विभावसुम् । यज्ञानां केतुमीमहे ॥ १० ॥

विप्रम् । होतारम् । अद्रुहम् । धूमऽकेतुम् । विभाऽवसुम् । यज्ञानाम् । केतुम् । ईमहे ॥ १० ॥

ᵛविप्रं मेधाविनं ᵛहोतारं देवानामाह्वातारम्[१] ᵛअद्रुहम् अद्रोग्धारं ᵛधूमकेतुं धूमध्वजं[२] ᵛविभावसुं दीप्तिधनं ᵛयज्ञानां ᵛकेतुं पताकास्थानीयमग्निम् ᵛईमहे अभीष्टं याचामहे ॥ ॥ ३७ ॥

अग्ने नि पाहि नस्त्वं प्रति ष्म देव रीषतः । भिन्धि द्वेषः सहस्कृत ॥ ११ ॥

अग्ने । नि । पाहि । नः । त्वम् । प्रति । स्म । देव । रिषतः । भिन्धि । द्वेषः । सहःऽकृत ॥ ११ ॥

हे ᵛसहस्कृत बलेन कृत ᵛदेव दीप्त ᵛअग्ने ᵛरिषतः हिंसकान् ᵛनः अस्मान् ᵛप्रति ᵛनि ᵛपाहि प्रतिरक्ष । ᵛस्म इति पूरणः । ᵛद्वेषः द्विषः शत्रूंश्च ᵛभिन्धि विदारय ॥

अग्निः प्रत्नेन मन्मना शुम्भानस्तन्वं[१] स्वाम् । कविर्विप्रेण वावृधे ॥ १२ ॥

अग्निः । प्रत्नेन । मन्मना । शुम्भानः । तन्वम् । स्वाम् । कविः । विप्रेण । ववृधे ॥ १२ ॥

ᵛकविः क्रान्तकर्मा ᵛअग्निः ᵛप्रत्नेन पुराणेन ᵛमन्मना मननीयेन स्तोत्रेण ᵛस्वां स्वकीयां ᵛतन्वं तनुमङ्गं ᵛशुम्भानः शोभयन् ᵛविप्रेण मेधाविना स्तोत्रा ᵛवावृधे प्रवृद्धो भवति ॥

ऊर्जो नपातमा हुवेऽग्निं पावकशोचिषम् । अस्मिन्यज्ञे स्वध्वरे ॥ १३ ॥

ऊर्जः । नपातम् । आ । हुवे । अग्निम् । पावकऽशोचिषम् । अस्मिन् । यज्ञे । सुऽअध्वरे ॥ १३ ॥

ᵛऊर्जः अन्नस्य ᵛनपातं पुत्रं ᵛपावकशोचिषं शोधकदीप्तिम् ᵛअग्निं ᵛस्वध्वरे असुरैरत्यन्तमहिंस्ये ᵛअस्मिन् ᵛयज्ञे ᵛआ ᵛहुवे आह्वयामि ॥

स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा । देवैरा सत्सि बर्हिषि ॥ १४ ॥

सः । नः । मित्रऽमहः । त्वम् । अग्ने । शुक्रेण । शोचिषा । देवैः । आ । सत्सि । बर्हिषि ॥ १४ ॥

हे ᵛमित्रमहः मित्राणां पूजनीय ᵛअग्ने ᵛसः ᵛत्वं ᵛशुक्रेण ज्वलता ᵛशोचिषा तेजसा ᵛदेवैः सह ᵛबर्हिषि यज्ञे ᵛआ ᵛसत्सि आसीद ॥

यो अग्निं तन्वो[२] दमे देवं मर्तः सपर्यति । तस्मा इदीदयद्वसु ॥ १५ ॥

यः । अग्निम् । तन्वः । दमे । देवम् । मर्तः । सपर्यति । तस्मै । इत् । दीदयत् । वसु ॥ १५ ॥

ᵛयः ᵛमर्तः मनुष्यः ᵛदमे गृहे ᵛअग्निं ᵛदेवं ᵛतन्वः धनस्य प्राप्त्यर्थमिति शेषः । 'भोजनं तना' इति धननामसु पाठात् । ᵛसपर्यति परिचरति ᵛतस्मा ᵛइत् तस्मा एव ᵛवसु धनं ᵛदीदयत् । सोऽग्निः प्रयच्छति ॥ ॥ ३८ ॥

---

१. त-न-भ२-ह्वातारं; भ१-३-माह्वातारं । २. त-धूमकं ध्वजं ।

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वति ॥ १६ ॥

अग्निः । मूर्धा । दिवः । ककुत् । पतिः । पृथिव्याः । अयम् । अपाम् । रेतांसि । जिन्वति ॥१६॥

vमूर्धा देवानां श्रेष्ठः vदिवः द्युलोकस्य vककुत्[1] उच्छ्रितः vपृथिव्याः च vपतिः vअयम् vअग्निः vअपां vरेतांसि स्थावरजङ्गमात्मकानि भूतानि vजिन्वति प्रीणयति ॥

उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते । तव ज्योतींष्यर्चयः ॥ १७ ॥

उत् । अग्ने । शुचयः । तव । शुक्राः । भ्राजन्तः । ईरते । तव । ज्योतींषि । अर्चयः ॥ १७ ॥

हे vअग्ने ते vतव vशुचयः निर्मलाः vशुक्राः शुक्लवर्णाः[2] vभ्राजन्तः दीप्यमानाः vअर्चयः प्रभाः vतव vज्योतींषि तेजांसि vउत् vईरते प्रेरयन्ति ॥

ईशिषे वार्यस्य हि दात्रस्याग्ने स्वर्पतिः । स्तोता स्यां तव शर्मणि ॥ १८ ॥

ईशिषे । वार्यस्य । हि । दात्रस्य । अग्ने । स्वःऽपतिः । स्तोता । स्याम् । तव । शर्मणि ॥१८॥

हे vअग्ने vस्वर्पतिः स्वर्गस्य स्वामी त्वं vवार्यस्य वरणीयस्य vदात्रस्य दातव्यस्य धनस्य vईशिषे ईश्वरोऽसि । vशर्मणि सुखे निमित्ते vतव vस्तोता vस्यां भवेयम् ॥

त्वामग्ने मनीषिणस्त्वां हिन्वन्ति चित्तिभिः । त्वां वर्धन्तु नो गिरः ॥ १९ ॥

त्वाम् । अग्ने । मनीषिणः । त्वाम् । हिन्वन्ति । चित्तिऽभिः । त्वाम् । वर्धन्तु । नः । गिरः ॥१९॥

हे vअग्ने vत्वां vमनीषिणः मनस ईश्वराः स्तोतारः स्तुतिभिः स्तुवन्तीति शेषः । किंच vत्वाम् एव vचित्तिभिः कर्मभिः vहिन्वन्ति प्रीणयन्ति । vनः अस्माकं vगिरः स्तुतयः vत्वाम् एव vवर्धन्तु वर्धयन्तु ॥

अदब्धस्य स्वधावतो दूतस्य रेभतः सदा । अग्नेः सख्यं वृणीमहे ॥ २० ॥

अदब्धस्य । स्वधाऽवतः । दूतस्य । रेभतः । सदा । अग्नेः । सख्यम् । वृणीमहे ॥ २० ॥

हे अग्ने vअदब्धस्य केनाप्यहिंसितस्य vस्वधावतः बलवतः vदूतस्य देवानां vरेभतः देवान् स्तुवतस्तव vसख्यं vसदा वयं vवृणीमहे ॥ ॥ ३९ ॥

अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः । शुची रोचत आहुतः ॥२१॥

अग्निः । शुचिव्रतऽतमः । शुचिः । विप्रः । शुचिः । कविः । शुचिः । रोचते । आऽहुतः ॥२१॥

vशुचिव्रततमः अतिशयेन शुद्धकर्मा vशुचिः शुद्ध एव vविप्रः मेधावी vशुचिः शुद्धः सन्नेव vकविः क्रान्तकर्मा vशुचिः एव vआहुतः vअग्निः vरोचते प्रकाशते ॥

उत त्वा धीतयो मम गिरो वर्धन्तु विश्वहा । अग्ने सख्यस्य बोधि नः ॥२२॥

उत । त्वा । धीतयः । मम । गिरः । वर्धन्तु । विश्वहा । अग्ने । सख्यस्य । बोधि । नः ॥२२॥

vउत अपि च हे vअग्ने vत्वा त्वां vमम vधीतयः कर्माणि vगिरः स्तुतयश्च vविश्वहा सर्वदा vवर्धन्तु वर्धयन्तु । vनः अस्माकं vसख्यस्य सख्यं सखिकर्म स्तुत्यादिकं vबोधि बुध्यस्व ॥

---

१. त-न-ककुप् । २. ग-त-न-शुक्लवर्णाः ।

यदग्ने स्यामहं त्वं त्वं वा घा स्या अहम् । स्युष्टे सत्या इहाशिषः ॥ २३ ॥

यत् । अग्ने । स्याम् । अहम् । त्वम् । त्वम् । वा । घ । स्याः । अहम् ।
स्युः । ते । सत्याः । इह । आऽशिषः ॥ २३ ॥

हे vअग्ने vयत् यदि vअहं vत्वं बहुधनः vस्यां भवेयं vत्वं vवा vघ त्वं वा खलु vअहं दरिद्रः स्तोता vस्याः भवेः ततस्तव[1] vआशिषः आशासनानि vइह अस्मद्विषये vसत्याः सत्यानि vस्युः भवेयुः ॥

वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः । स्याम ते सुमतावपि ॥ २४ ॥

वसुः । वसुऽपतिः । हि । कम् । असि । अग्ने । विभाऽवसुः । स्याम । ते । सुऽमतौ । अपि ॥२४॥

हे vअग्ने त्वं vविभावसुः दीप्तिधनः vवसुपतिः धनपतिः vवसुः वासयिता च[2] vअसि[2] भवसि vहि यस्मादतो वयम् vअपि vते तव vसुमतौ अनुग्रहबुद्धौ vस्याम भवेम ॥

अग्ने घृतव्रताय ते समुद्रायेव सिन्धवः । गिरो वाश्रास ईरते ॥ २५ ॥

अग्ने । घृतऽव्रताय । ते । समुद्रायऽइव । सिन्धवः । गिरः । वाश्रासः । ईरते ॥ २५ ॥

हे vअग्ने vघृतव्रताय घृतकर्मणे vते तुभ्यं vवाश्रासः वाशनशीलाः vगिरः मम स्तुतयः vसिन्धवः नद्यः vसमुद्रायेव यथा समुद्राय तथा vईरते प्रवर्तन्ते ॥ ॥ ४० ॥

युवानं विश्पतिं कविं विश्वादं पुरुवेपसम् । अग्निं शुम्भामि मन्मभिः ॥२६॥

युवानम् । विश्पतिम् । कविम् । विश्वऽअदम् । पुरुऽवेपसम् । अग्निम् । शुम्भामि । मन्मऽभिः॥२६॥

vयुवानं नित्यतरुणं vविश्पतिं विशां पतिं vकविं क्रान्तकर्माणं vविश्वादं सर्वस्य हविषोऽत्तारं vपुरुवेपसं बहुकर्माणम् । 'वेशः वेपः' इति कर्मनामसु पाठात् । vअग्निं vमन्मभिः मननीयैः[3] स्तोत्रैः[3] vशुम्भामि शोभयामि ॥

यज्ञानां रथ्यं वयं तिग्मजम्भाय वीळवे । स्तोमैरिषेमाग्नये ॥ २७ ॥

यज्ञानाम् । रथ्यम् । वयम् । तिग्मऽजम्भाय । वीळवे । स्तोमैः । इषेम । अग्नये ॥ २७ ॥

vयज्ञानां vरथ्ये नेत्रे vतिग्मजम्भाय तीक्ष्णज्वालाय vवीळवे बलवते vअग्नये vस्तोमैः स्तोत्रैः vवयम् आङ्गिरसाः vइषेम स्तुतिं कर्तुमिच्छेम ॥

अयमग्ने त्वे अपि जरिता भूतु सन्त्य । तस्मै पावक मृळय ॥ २८ ॥

अयम् । अग्ने । त्वे इति । अपि । जरिता । भूतु । सन्त्य । तस्मै । पावक । मृळय ॥ २८ ॥

हे vपावक शोधक vसन्त्य भजनीय vअग्ने vत्वे vअपि त्वय्यपि vअयम् अस्मदीयो जनः vजरिता स्तोता vभूतु भवतु । vतस्मै जरित्रे vमृळय सुखमुत्पादय । तं सुखय वा ॥

धीरो ह्यस्यद्विप्रो न जागृविः सदा । अग्ने दीदयसि द्यवि ॥ २९ ॥

धीरः । हि । असि । अस्यत् । विप्रः । न । जागृविः । सदा । अग्ने । दीदयसि । द्यवि ॥२९॥

---

१. घ–ते तव । २. ग-घ–असि; त-न–वासि । ३. त-न-भ१-२–मननीयस्तोत्रैः ।

हे vअग्ने त्वं vधीरः vअसि[1] vहि भवसि खलु[1]। vअद्यसत् हविषि सीदन् vविप्रो vन मेधावीव vजागृविः प्रजानां हितकरणे जागरणशीलोऽसि। vसदा vद्यवि अन्तरिक्षे vदीदयसि दीव्यसि च ॥

पुराग्ने दुरितेभ्यः पुरा मृध्रेभ्यः कवे । प्र ण आयुर्वसो तिर ॥ ३० ॥

पुरा । अग्ने । दुःऽइतेभ्यः । पुरा । मृध्रेभ्यः । कवे । प्र । नः । आयुः । वसो इति । तिर ॥३०॥

हे vवसो वासक vकवे क्रान्तकर्मन् vअग्ने vदुरितेभ्यः पापेभ्यः vपुरा vमृध्रेभ्यः हिंसकेभ्यश्च vपुरा। यदा दुरितानि शत्रवश्चास्मान् हिंसितुमुद्युञ्जते ततः प्रागेवेत्यर्थः। vनः अस्माकम् vआयुः vप्र vतिर वर्धय ॥ ॥ ४१ ॥

'आ घा ये' इति द्विचत्वारिंशदृचं तृतीयं सूक्तम्। अत्रेयमनुक्रमणिका—'आ घ द्विचत्वारिंशत्त्रिशोक आद्याग्नेन्द्री'। अनुक्तगोत्रत्वात् काण्वस्त्रिशोक[2] ऋषिः। 'परं गायत्रं प्राग्वत्सप्रेः' इति परिभाषया गायत्री छन्दः। अनुक्तत्वादिन्द्रो देवता। आद्यायास्त्वग्निश्चेन्द्रश्च। महाव्रते निष्केवल्ये गायत्रनृचाशीतावेतत्सूक्तम्। तथैव पञ्चमारण्यके सूत्रितम्—'आ घा ये अग्निमिन्धत आ तू न इन्द्र क्षुमन्तमिति सूक्ते' (ऐ. आ. ५. २. ३) इति। तृतीये पर्यायेऽच्छावाकशस्त्र आदितः सप्तदशर्चः। तथैव 'अतिरात्रे' इति खण्डे सूत्र्यते—'आ घा ये अग्निमिन्धत इति सप्तदश' (आश्व. श्रौ. ६. ४) इति। आग्रयण आग्नेन्द्रस्य हविषः 'आ घा ये' इत्येषानुवाक्या। सूत्रितं च—'आ घा ये अग्निमिन्धते सुकर्माणः सुरुचो देवयन्त इति स्तोत्रम्' (आश्व. श्रौ. २. ९) इति। मैत्रावरुणातिरिक्तोक्थे 'स्तोत्रमिन्द्राय' इत्याद्याः षड्रचो विकल्पेन स्तोत्रियानुरूपाः। सूत्रितं च—'तद्वो गाय सुते सचा स्तोत्रमिन्द्राय गायत' (आश्व. श्रौ. ९. ११) इति। द्वितीये पर्याये ब्राह्मणाच्छंसिनः 'अभि त्वा वृषभ' इति स्तोत्रियस्तृचः। सूत्रितं च—'अभि त्वा वृषभा सुतेऽभि प्र गोपतिं गिरा' (आश्व. श्रौ. ६. ४) इति। चातुर्विंशिकेऽहनि प्रातःसवने 'भिन्धि विश्वाः' इति ब्राह्मणाच्छंसिनः षळहस्तोत्रियः। तथा च सूत्रितं—'भिन्धि विश्वा अप द्विष इति ब्राह्मणाच्छंसिनः' (आश्व. श्रौ. ७. २) इति ॥

आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा ॥१॥

आ । घ । ये । अग्निम् । इन्धते । स्तृणन्ति । बर्हिः । आनुषक् । येषाम् । इन्द्रः । युवा । सखा ॥१॥

vये ऋषयः vआ vघ आभिमुख्येन खलु vअग्निमिन्धते दीपयन्ति vयेषां च vयुवा नित्यतरुणः vइन्द्रः vसखा भवति ते vआनुषक् आनुपूर्व्येण vबर्हिः[3] vस्तृणन्ति ॥

बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः । येषामिन्द्रो युवा सखा ॥ २ ॥

बृहन् । इत् । इध्मः । एषाम् । भूरि । शस्तम् । पृथुः । स्वरुः । येषाम् । इन्द्रः । युवा । सखा ॥२॥

vएषाम् ऋषीणाम् vइध्मः vबृहन्नित् महान् खलु vभूरि बहु च vशस्तं स्तोत्रं vस्वरुः च vपृथुः महान्। सिद्धमन्यत् ॥

अयुद्ध इद्युधा वृतं शूर आजति सत्वभिः । येषामिन्द्रो युवा सखा ॥ ३ ॥

अयुद्धः । इत् । युधा । वृतम् । शूरः । आ । अजति । सत्वऽभिः । येषाम् । इन्द्रः । युवा । सखा ॥३॥

तेष्वन्तर्भूतः कश्चित् vअयुद्ध vइत् प्रागयोद्धैव सन् vयुधा vवृतं योद्धृभिर्भटैरावृतं शत्रुं vसत्वभिः आत्मीयैर्बलैः vशूरः सन् vआजति नमयति ॥

---

१. ख-त-भ-श–असि भवसि हि। २. घ-त३-४-न-भ१-२–काण्वो विशोधक। ३. त-न-भ–बर्हिषः।

आ बुन्दं वृत्रहा ददे जातः पृच्छद्वि मातरम् । क उग्राः के ह शृण्विरे ॥ ४ ॥

आ । बुन्दम् । वृत्रऽहा । ददे । जातः । पृच्छत् । वि । मातरम् । के । उग्राः । के । ह । शृण्विरे ॥४॥

vजातः उत्पन्नः vवृत्रहा इन्द्रः vबुन्दम् इषुम् । तथा च यास्कः—'बुन्द इषुर्भवति' (निरु. ६. ३२) इति । vआ vददे । आदाय च इषुम् vउग्राः उत्कृर्णबलाः vके vके च vश्रृण्विरे वीर्येण विश्रुता इति स्वमातरं vवि vपृच्छत् अप्राक्षीत् ॥

प्रतिं त्वा शवसी वदद्गिरावप्सो न योधिषत् । यस्ते शत्रुत्वमाचके ॥ ५ ॥

प्रतिं । त्वा । शवसी । वदत् । गिरौ । अप्सः । न । योधिषत् ।
यः । ते । शत्रुऽत्वम् । आऽचके ॥ ५ ॥

हे इन्द्र vत्वा त्वां vशवसी बलवती माता vप्रति vवदत् प्रत्यवोचत् । vयस्ते[1] vशत्रुत्वमाचके कामयते सः vगिरौ पर्वते vअप्सो vन दर्शनीयो गज इव vयोधिषत् योधयति ॥ ॥ ४२ ॥

उत त्वं मघवञ्छृणु यस्ते वष्टि ववक्षि तत् । यद्वीळयासि वीळु तत् ॥ ६ ॥

उत । त्वम् । मघऽवन् । शृणु । यः । ते । वष्टि । ववक्षि । तत् । यत् । वीळयासि । वीळु । तत् ॥६॥

vउत अपि च हे vमघवन् vत्वं vश्रृणु अस्मदीयां स्तुतिम् । vते त्वत्तो यत् vवष्टि कामयते स्तोता vतत् vववक्षि तस्मै तत् वहसि । किंच त्वं vयत् vवीळयासि दृढीकरोषि vतत् vवीळु तत् दृढमेव सर्वत्र भवति ॥

यदाजिं यात्याजिकृदिन्द्रः स्वश्वयुरुपं । रथीतमो रथीनाम् ॥ ७ ॥

यत् । आजिम् । याति । आजिऽकृत् । इन्द्रः । स्वश्वऽयुः । उप । रथिऽतमः । रथिनाम् ॥ ७ ॥

vयत् यदा vआजिकृत् युद्धकृत् vइन्द्रः vस्वश्वयुः कल्याणमश्वमिच्छन् vआजिं युद्धम् vउप vयाति तदा vरथीतमः अतिशयेन रथी भवति । vरथीनां सर्वान् रथिनश्च जयतीति शेषः ॥

वि षु विश्वा अभियुजो वज्रिन्विष्वग्यथा वृह । भवा नः सुश्रवस्तमः ॥ ८ ॥

वि । सु । विश्वाः । अभिऽयुजः । वज्रिन् । विष्वक् । यथा । वृह । भव । नः । सुश्रवःऽतमः ॥८॥

हे vवज्रिन् त्वं vविश्वाः सर्वाः vअभियुजः अभियोक्त्रीः प्रजाः vयथा vविष्वक् भवन्ति तथा vसु सुष्ठु vवि vवृह[2] । vनः अस्माकं vसुश्रवस्तमः शोभनान्नवत्तमश्च[3] vभव ॥

अस्माकं सु रथं पुर इन्द्रः कृणोतु सातये । न यं धूर्वन्ति धूर्तयः ॥ ९ ॥

अस्माकम् । सु । रथम् । पुरः । इन्द्रः । कृणोतु । सातये । न । यम् । धूर्वन्ति । धूर्तयः ॥ ९ ॥

vयम् इन्द्रं vधूर्तयः हिंसकाः vन vधूर्वन्ति न हिंसन्ति सः vइन्द्रः vअस्माकं vसातये अभीष्टलाभाय vसु vरथं कल्याणं रथं vपुरः vकृणोतु पुरस्करोतु ॥

वृज्यामं ते परि द्विषोऽरं ते शक्र दावने । गमेमेदिन्द्र गोमतः ॥ १० ॥

वृज्याम । ते । परि । द्विषः । अरम् । ते । शक्र । दावने । गमेम । इत् । इन्द्र । गोऽमतः ॥१०॥

---

१. ग-घ-त—ते यः; न—मे य । २. घ—वृह कुरु । ३. घ—सुष्ठु अतिशयेन अन्नवान् ।

हे vशक्र vइन्द्र याचमाना वयं vते तव vद्विषः द्वेष्टॄन् vपरि vवृज्याम नोपगच्छेम । किंतु vते तव vगोमतः पशुमतः vदावने अभीष्टदानाय vअरं पर्याप्तं vगमेमेत् गच्छेमैव ॥ ॥४३॥

शनैश्चिद्यन्तोऽद्रिवोऽश्वावन्तः शतग्विनः । विवक्षणा अनेहसः ॥ ११ ॥

शनैः । चित् । यन्तः । अद्रिऽवः । अश्वऽवन्तः । शतऽग्विनः । विवक्षणाः । अनेहसः ॥११॥

हे vअद्रिवः वज्रिन् वयं vशनैः मन्दं मन्दं vयन्तः गच्छन्तः vअश्वावन्तः अश्ववन्तः vशतग्विनः बहुधनाः vविवक्षणाः वोढव्यं वहन्तः vअनेहसः उपद्रवरहिताश्च सन्तो गमेमेदिति संबन्धः ॥

ऊर्ध्वा हि ते दिवेदिवे सहस्रा सूनृता शता । जरितृभ्यो विमंहते ॥ १२ ॥

ऊर्ध्वा । हि । ते । दिवेऽदिवे । सहस्रा । सूनृता । शता । जरितृऽभ्यः । विऽमंहते ॥ १२ ॥

हे इन्द्र vते तव vजरितृभ्यः स्तोतृभ्यः vसहस्रा सहस्राणि vशता शतानि च vऊर्ध्वा ऊर्ध्वानि मुख्यानि vसूनृता सूनृतानि साधनानि vदिवेदिवे अन्वहं vविमंहते यजमानः प्रयच्छति । मंहतिर्दानकर्मा ॥

विद्मा हि त्वा धनंजयमिन्द्र दृळ्हा चिदारुजम् । आदारिणं यथा गयम् ॥१३॥

विद्म । हि । त्वा । धनम्ऽजयम् । इन्द्र । दृळ्हा । चित् । आऽरुजम् ।
आऽदारिणम् । यथा । गयम् ॥ १३ ॥

हे vइन्द्र vत्वा त्वां vधनंजयं धनानां जेतारं vदृढा vचित् दृढानामपि शत्रूणाम् vआरुजम् आभिमुख्येन भङ्क्तारम् vआदारिणम् आदर्तारं च vयथा vगयं गृहमिवोपद्रवेभ्यो रक्षकं च vविद्म जानीम ॥

ककुहं चित्त्वा कवे मन्दन्तु धृष्णविन्दवः । आ त्वा पृणि यदीमहे ॥ १४ ॥

ककुहम् । चित् । त्वा । कवे । मन्दन्तु । धृष्णो इति । इन्दवः ।
आ । त्वा । पृणिम् । यत् । ईमहे ॥ १४ ॥

हे vकवे क्रान्तकर्मन् vधृष्णो धर्षकेन्द्र vयत् यदा vपृणिं पणमानं[1] vत्वा त्वाम् vआ आभिमुख्येन vईमहे अभीष्टं याचामहे तदा vककुहम्[2] उच्छ्रितं[2] vत्वा त्वाम् vइन्दवः vचित् सोमा अपि vमन्दन्तु मादयन्तु ॥

यस्ते रेवाँ अदाशुरिः प्रममर्ष मघत्तये । तस्य नो वेद आ भर ॥ १५ ॥

यः । ते । रेवान् । अदाशुरिः । प्रऽममर्ष । मघत्तये । तस्य । नः । वेदः । आ । भर ॥१५॥

हे इन्द्र vमघत्तये धनदानाय vते तुभ्यं vयः पुमान् vरेवान् धनवान् सन् vअदाशुरिः अदानशीलः vप्रममर्ष अभ्यसूयति vतस्य पुंसः vवेदः धनं vनः अस्मभ्यम् vआ vभर आहर ॥ ॥ ४४ ॥

इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः । पुष्टावन्तो यथा पशुम् ॥ १६ ॥

इमे । ऊँ इति । त्वा । वि । चक्षते । सखायः । इन्द्र । सोमिनः । पुष्टऽवन्तः । यथा । पशुम् ॥१६॥

---

१. घ–पणिनामानं । २. ग-त-भ२–ककुहं चित्; न-भ१–ककुहं; भ३–ककुह उच्छ्रितं ।

हे vइन्द्र vत्वा त्वां vसोमिनः अभिषुतसोमाः vसखायः vइम vउ इम एव खल्वस्मदीया जनाः vपुष्टावन्तः संभृतघासाः vयथा vपशुं पशुमिव vवि vचक्षते विपश्यन्ति ॥

उत त्वाबधिरं वयं शृत्कर्णं सन्तमूतये । दूरादिह हवामहे ॥ १७ ॥

उत । त्वा । अबधिरम् । वयम् । शृत्ऽकर्णम् । सन्तम् । ऊतये । दूरात् । इह । हवामहे ॥१७॥

vउत अपि च हे इन्द्र vअबधिरम् अनुपहतश्रोत्रेन्द्रियमत एव vशृत्कर्णं श्रवणपरकर्णं vसन्तं vत्वा त्वां vवयं त्रिशोकाः vइह यज्ञे vऊतये रक्षणाय vदूरात् vहवामहे ह्वयामः ॥

यच्छ्रुश्रूया इमं हवं दुर्मर्षं चक्रिया उत । भवेरापिर्नो अन्तमः ॥ १८ ॥

यत् । शुश्रुयाः । इमम् । हवम् । दुःऽमर्षम् । चक्रियाः । उत । भवेः । आपिः । नः । अन्तमः ॥१८॥

हे इन्द्र vयत् यदि vइमम् अस्मदीयं vहवम् आह्वानं vशुश्रुयाः शृणुयाः तर्हि vदुर्मर्षं शत्रूणां दुःसहं बलं vचक्रियाः कुर्याः । vउत अपि च vनः अस्माकम् vअन्तमः अन्तिकतमः vआपिः बन्धुः vभवेः ॥

यच्चिद्धि ते अपि व्यथिर्जगन्वांसो अमन्महि । गोदा इदिन्द्र बोधि नः ॥१९॥

यत् । चित् । हि । ते । अपि । व्यथिः । जगन्वांसः । अमन्महि ।
गोऽदाः । इत् । इन्द्र । बोधि । नः ॥ १९ ॥

vअपि vचित् अपि च हे vइन्द्र vते तुभ्यं vयत् यदा vहि vव्यथिः दारिद्र्येण व्यथिताः vजगन्वांसः गन्तारो वयम् vअमन्महि विष्टुमः तदा vनः अस्माकं vगोदा vइत् गवां दातैव[1] भवामीति vबोधि बुध्यस्व ॥

आ त्वा रम्भं न जिव्रयो ररभ्मा शवसस्पते । उश्मसि त्वा सधस्थ आ ॥२०॥

आ । त्वा । रम्भम् । न । जिव्रयः । ररभ्म । शवसः । पते । उश्मसि । त्वा । सधऽस्थे । आ ॥२०॥

हे vशवसस्पते बलस्य पते[2] vत्वा त्वां वयं vजिव्रयः क्षीणा वृद्धाः vरम्भं vन दण्डमिव vररभ्म[3] रभामहे । तथा च यास्कः—'आरभामहे त्वा जीर्णा इव दण्डम्' (निरु. ३. २१) इति । अपि च vत्वा त्वां vसधस्थे यज्ञे vउश्मसि कामयामहे ॥ ॥ ४५ ॥

स्तोत्रमिन्द्राय गायत पुरुनृम्णाय सत्वने । नकिर्यं वृण्वते युधि ॥ २१ ॥

स्तोत्रम् । इन्द्राय । गायत । पुरुऽनृम्णाय । सत्वने । नकिः । यम् । वृण्वते । युधि ॥ २१ ॥

vयम् इन्द्रं vयुधि युद्धे vनकिः vवृण्वते केऽपि न वारयन्ति तस्मै vसत्वने दानशीलाय vपुरुनृम्णाय बहुधनाय vइन्द्राय vस्तोत्रं vगायत पठत ॥

अभि त्वा वृषभा सुते सुतं सृजामि पीतये । तृम्पा व्यश्नुही मदम् ॥ २२ ॥

अभि । त्वा । वृषभ । सुते । सुतम् । सृजामि । पीतये । तृम्प । वि । अश्नुहि । मदम् ॥ २२ ॥

हे vवृषभ इन्द्र vत्वा त्वां vसुते सोमेऽभिषुते सति vसुतम् अभिषुतं सोमं vपीतये पानाय vअभि vसृजामि । vतृम्प तृप्य vमदं मदकरं[4] vव्यश्नुहि च ॥

---

१. ज्ञ-त१-२-३—दातेव । २. घ—पते इंद्र । ३. ग-त-भ—ररभ्मा । ४. ख-ज्ञ-त१-भ—मदकरं सोमं ।

मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन् । माकीं ब्रह्मद्विषो वनः ॥२३॥

मा । त्वा । मूराः । अविष्यवः । मा । उपऽहस्वानः । आ । दभन् ।
माकीम् । ब्रह्मऽद्विषः । वनः ॥ २३ ॥

हे इन्द्र [v]त्वा त्वां [v]मूराः मूरका मूढा मनुष्याः[1] [v]अविष्यवः[1] पालनकामाः[2] [v]मा [v]आ [v]दभन्[2] मा हिंसन्तु । [v]उपहस्वानः उपहसनपराश्च [v]मा[3] भवन्तु । [v]ब्रह्मद्विषः ब्राह्मणानां द्वेष्टॄन् [v]माकीं [v]वनः मा भजेथाः ॥

इह त्वा गोपरीणसा महे मन्दन्तु राधसे । सरो गौरो यथा पिब ॥ २४ ॥

इह । त्वा । गोऽपरीणसा । महे । मन्दन्तु । राधसे । सरः । गौरः । यथा । पिब ॥ २४ ॥

हे इन्द्र [v]त्वा त्वाम् [v]इह यज्ञे [v]गोपरीणसा गव्येन पयसा संमिश्रितेन सोमेन [v]महे महते [v]राधसे धनाय [v]मन्दन्तु मनुष्या मादयन्तु । त्वं च तं सोमं [v]यथा [v]गौरः मृगः [v]सरः पिबति तथा [v]पिब ॥

या वृत्रहा परावति सना नवा च चुच्युवे । ता संसत्सु प्र वोचत ॥ २५ ॥

या । वृत्रऽहा । पराऽवति । सना । नवा । च । चुच्युवे । ता । संसत्ऽसु । प्र । वोचत ॥२५॥

[v]वृत्रहा इन्द्रः [v]परावति दूरे [v]या यानि [v]सना सनातनानि [v]नवा नवानि नूतनानि [v]च धनानि [v]चुच्युवे प्रेरितवान् तानि[4] धनानि [v]संसत्सु यज्ञेषु सभासु वा [v]प्र [v]वोचत प्रब्रूते विद्वज्जनः ॥ ॥ ४६ ॥

अपिबत्कद्रुवः सुतमिन्द्रः सहस्रबाह्वे । अत्रादेदिष्ट पौंस्यम् ॥ २६ ॥

अपिबत् । कद्रुवः । सुतम् । इन्द्रः । सहस्रऽबाह्वे । अत्र । अदेदिष्ट । पौंस्यम् ॥ २६ ॥

[v]इन्द्रः [v]कद्रुवः कद्रुनामकस्यर्षेः संबन्धिनं [v]सुतम् अभिषुतं सोमम् [v]अपिबत् पीतवान् । [v]सहस्रबाह्वे सहस्रबाहोः शत्रूंश्चाहन्निति शेषः । [v]अत्र अस्मिन्नवसरे [v]पौंस्यम् इन्द्रस्य वीर्यम् [v]अदेदिष्ट अदीप्यत ॥

सत्यं तत्तुर्वशे यदौ विदानो अह्नवाय्यम् । व्यानट् तुर्वणे शमि ॥ २७ ॥

सत्यम् । तत् । तुर्वशे । यदौ । विदानः । अह्नवाय्यम् । वि । आनट् । तुर्वणे । शमि ॥२७॥

[v]तुर्वशे राज्ञि [v]यदौ च यदुनामके च राज्ञि [v]तत् प्रसिद्धं यागादिलक्षणं [v]शमि कर्म । 'शची शमी' इति कर्मनामसु पाठात् । [v]सत्यं परमार्थं [v]विदानः जानंस्तयोः प्रीत्यर्थम् [v]अह्नवाय्यम् अह्नवाय्यनामकं तयोः शत्रुं [v]तुर्वणे संग्रामे [v]व्यानट् व्याप्तवान् ॥

तरणिं वो जनानां त्रदं वाजस्य गोमतः । समानमु प्र शंसिषम् ॥ २८ ॥

तरणिम् । वः । जनानाम् । त्रदम् । वाजस्य । गोऽमतः । समानम् । ऊँ इति । प्र । शंसिषम् ॥२८॥

---

१. ग-ज्ञ-त४-न-मनुष्याणामविष्यवः; घ-मनुष्याणा अविष्यवः; त१-२-३-मनुष्याणां मविष्यवः । २. ग-पालकामादभन्; ज्ञ-त१-२-पालकामा आदभन्; त३-४-न-पालकामा मादभन्; भ१-पालनकामादभन् । ३. त-न-'मा':नास्ति। ४. घ-ता तानि ।

हे अस्मदीयाः पुरुषाः ᵛवः युष्माकं ᵛजनानां पुत्रपौत्रादीनां ᵛतरणिं तारकं ᵛत्रदं शत्रूणां तर्दयितारं ᵛगोमतः पशुमतोऽन्नस्य दातारं चेन्द्रं ᵛसमानमु साधारणमेव ᵛप्र ᵛशंसिषं स्तौमि ॥

ऋभुक्षणं न वर्तव उक्थेषु तुग्र्यावृधम् । इन्द्रं सोमे सचा सुते ॥ २९ ॥

ऋभुक्षणम् । न । वर्तवे । उक्थेषु । तुग्र्यऽवृधम् । इन्द्रम् । सोमे । सचा । सुते ॥ २९ ॥

ᵛऋभुक्षणं महान्तं ᵛतुग्र्यावृधम् उदकस्य वर्धयितारम् । 'तुग्र्या बुर्बुरम्' इत्युदकनामसु पाठात् । ᵛइन्द्रं ᵛसोमे ᵛसचा स्तोत्रेण सह ᵛसुते अभिषुते सति ᵛउक्थेषु शस्त्रेषु ᵛवर्तवे धनं वरितुं प्रशंसामीति शेषः । ᵛन इति संप्रत्यर्थे ॥

यः कुन्तदिद्धि योन्यं त्रिशोकाय गिरिं पृथुम् । गोभ्यो गातुं निरेतवे ॥३०॥

यः । कुन्तत् । इत् । वि । योन्यम् । त्रिऽशोकाय । गिरिम् । पृथुम् ।
गोभ्यः । गातुम् । निःऽएतवे ॥ ३० ॥

ᵛयः ᵛइत् य एवेन्द्रः ᵛयोन्यम् उदकनिर्गमनद्वारं ᵛपृथुं विस्तीर्णं ᵛगिरिं मेघम् । 'गिरिः व्रजः' इति मेघनामसु पाठात् । ᵛत्रिशोकाय त्रिशोकनामकार्थं ᵛवि ᵛकृन्तत् व्यच्छिनत् सः ᵛगोभ्यः गमनवन्धय उदकेभ्यः ᵛनिरेतवे निर्गमनाय ᵛगातुं भूमिम् । 'भूमिः गातुः' इति तन्नामसु पाठात् । मार्गमित्यर्थः । करोतीति शेषः ॥ ॥ ४७ ॥

यद्दधिषे मनस्यसि मन्दानः प्रेदियक्षसि । मा तत्करिन्द्र मृळय ॥३१॥

यत् । दधिषे । मनस्यसि । मन्दानः । प्र । इत् । इयक्षसि । मा । तत् । कः । इन्द्र । मृळय ॥३१॥

हे ᵛइन्द्र ᵛमन्दानः मोदमानस्त्वं ᵛयत् शुभं वस्तु ᵛदधिषे धारयसि यच्च ᵛमनस्यसि पूजयसि यदपि च ᵛप्रेदियक्षसि प्रयच्छस्येव ᵛतत् सर्वं ᵛमा ᵛकः किं नाकार्षीः । अस्माकं कृतवानेव । किंचास्मान् ᵛमृळय सुखय ॥

दभ्रं चिद्धि त्वावतः कृतं शृण्वे अधि क्षमि । जिगात्विन्द्र ते मनः ॥३२॥

दभ्रम् । चित् । हि । त्वाऽवतः । कृतम् । शृण्वे । अधि । क्षमि । जिगातु । इन्द्र । ते । मनः ॥३२॥

हे ᵛइन्द्र ᵛत्वावतः त्वत्सदृशस्य ᵛदभ्रं ᵛचित् अल्पमपि ᵛकृतं कर्म ᵛअधि ᵛक्षमि क्षमायाम् । अधीति सप्तम्यर्थानुवादः । ᵛशृण्वे विश्रुतं भवति हि । तथा सति ᵛते तव ᵛमनः ᵛजिगातु मयि गच्छतु ॥

तवेदु ताः सुकीर्तयोऽसन्नुत प्रशस्तयः । यदिन्द्र मृळयासि नः ॥ ३३ ॥

तव । इत् । ऊँ इति । ताः । सुऽकीर्तयः । असन् । उत । प्रऽशस्तयः ।
यत् । इन्द्र । मृळयासि । नः ॥ ३३ ॥

हे ᵛइन्द्र त्वं ᵛनः अस्मान् ᵛयत् याभिः ᵛमृळयासि[1] सुखयसि ᵛताः ᵛसुकीर्तयः शोभनाख्यातयः[2] ᵛतवेत्[3] तवैव ᵛअसन् भवेयुः । ᵛउत अपि च ताः ᵛप्रशस्तयः स्तुतयश्च तवैव भवेयुः ॥

मा नु एकस्मिन्नागसि मा द्वयोरुत त्रिषु । वधीर्मा शूर भूरिषु ॥ ३४ ॥

---

१. ख-ग-त-न-भ-श–मृळयसि । २. ग-भ–शोभनाः ख्यातयः । ३. ग-घ–तवेदु ।

मा । नः । एकस्मिन् । आगसि । मा । द्वयोः । उत । त्रिषु । वधीः । मा । शूर । भूरिषु ॥३४॥

हे vशूर इन्द्र vनः अस्मान् vएकस्मिन्नागसि अपराधे vमा vवधीः मा हिंसीः । vद्वयोः आगसोरपि vमा वधीः । vउत अपि च vत्रिषु आगःस्वपि vमा हिंसीः । vभूरिषु असंख्यातेष्वप्यागःसु मा च वधीः ॥

बिभया हि त्वावत उग्रादभिप्रभङ्गिणः । दस्मादृहमृतीषहः ॥ ३५ ॥

बिभयं । हि । त्वाऽवतः । उग्रात् । अभिऽप्रभङ्गिनः । दस्मात् । अहम् । ऋतिऽसहः ॥३५॥

हे इन्द्र vत्वावतः त्वत्सदृशात् vउग्रात् उद्गूर्णात् vअभिप्रभङ्गिणः शत्रूणामभिप्रहर्तुः vदस्मात् पापानामुपक्षपयितुः vऋतीषहः शत्रुकृतां हिंसां सहतः vअहं[1] vबिभय vहि[1] ॥ ॥ ४८ ॥

मा सख्युः शूनमा विदे मा पुत्रस्य प्रभूवसो । आवृत्वद्भूतु ते मनः ॥३६॥

मा । सख्युः । शूनम् । आ । विदे । मा । पुत्रस्य । प्रभुवसो इति प्रभुऽवसो ।
आऽवृत्वत् । भुतु । ते । मनः ॥ ३६ ॥

हे vप्रभूवसो प्रभूतधनेन्द्र vते तव vसख्युः vशूनं वृद्धं vमा vआ vविदे मावेदयामि । vपुत्रस्य अपि शूनं vमा विदे । तव vमनः अस्मासु vआवृत्वत् आवर्तनवत् vभूतु भवतु । पुनःपुनः सुखं करोत्वित्यर्थः ॥

को नु मर्या अमिथितः सखा सखायमब्रवीत् । जहा को अस्मदीषते ॥३७॥

कः । नु । मर्याः । अमिथितः । सखा । सखायम् । अब्रवीत् । जहा । कः । अस्मत् । ईषते ॥३७॥

vको vनु कः खलु हे vमर्याः मनुष्याः vअमिथितः । मेथतिराक्रोशकर्मा । अनाकृष्टः[2] इन्द्रादन्यः vसखा vसखायं प्रति vजहा अहं कं जघान vकः को वा vअस्मत् अस्मत्तो भीतः vईषते पलायते[3] इति vअब्रवीत् वदति । इन्द्र एवैतादृशस्य वचनस्य वक्तेत्यभिप्रायः । तथा च यास्कः—' मेथतिराक्रोशकर्मा । अपापकं जघान कमहं जातु कोऽस्मद्भीतः पलायते ' (निरु. ४. २) इति । ' मा न एकस्मिन्नागसि ' इत्यादिकया श्रुत्या नूनमृषिमिन्द्र आजहारेत्यत्रर्षिर्विस्मयत इति ॥

एवारे वृषभा सुतेऽसिन्वन्भूर्यावयः । श्वघ्नीव निवता चरन् ॥ ३८ ॥

एवारे[4] । वृषभ । सुते । असिन्वन् । भूरि । आवयः । श्वघ्नीऽइव । निऽवता । चरन् ॥ ३८ ॥

हे vवृषभ कामानां वर्षकेन्द्र vएवारे । एवारो नाम कश्चित् । तस्मिन् vसुते[5] अभिषुते[4] सोमे सति vभूरि बहूनि धनानि vअसिन्वन् न[5] बध्नन् vश्वघ्नी । श्वघ्नी कितवः । तथा च यास्कः—' श्वघ्नी कितवो भवति स्वं* हन्ति* - - - ' (निरु. ५. २२) - - - ॥

आ ते एता वचोयुजा हरी गृभ्णे सुमद्रथा । यदी ब्रह्मभ्य इद्ददः ॥३९॥

आ । ते । एता । वचःऽयुजा । हरी इति । गृभ्णे । सुमत्ऽरथा ।
यत् । ईम् । ब्रह्मऽभ्यः । इत् । ददः ॥ ३९ ॥

---

१. ग-त-न-भ-' अहं...हि ' नास्ति । २. ग-घ-त-न-अनाकृष्ट । ३. न-भ-पालयत । ४. ग-त१-४-न-भ-अभिषुते; ज्ञ-त-२-३ अभिसुते । ५. घ-अबध्नन् श्वघ्नीव कितव इव स सोमः त्वामेव प्राप्तः आवयः दृश्यमानाः सर्वे देवा निवता अधोमुखाः संतः आचरन्निर्गताः । *ख-संहते; ग-सहन्ते; त-न-संहते; भ१-३-स्वं हं; भ२-स्वं हंतीति; श-संहंतेति ।

vते[1] तव vसुमद्रथा कल्याणरथौ vवचोयुजा मन्त्रेण युज्यमानौ vएता एतौ vहरी अश्वौ vआ vगृभ्णे। अस्मदभिमुखं[2] यातुं हस्ताभ्यामाकर्षामीत्यर्थः। vयत् यस्मात् त्वं vब्रह्मभ्य vइत् ब्राह्मणेभ्य एव vईम् इदं धनं vददः ददासि ॥

भिन्धि विश्वा अप द्विषः परि बाधो जहि मृधः। वसु स्पार्हं तदा भर ॥४०॥

भिन्धि। विश्वाः। अप। द्विषः। परि। बाधः। जहि। मृधः। वसु। स्पार्हम्। तत्। आ। भर ॥४०॥

हे इन्द्र त्वं vविश्वाः सर्वाः vद्विषः द्वेष्ट्रीः शत्रुसेनाः vअप vभिन्धि विदारय। vबाधः हिंसित्रीः vमृधः संग्रामान्। 'स्पृधः मृधः' इति संग्रामनामसु पाठात्। vपरि vजहि हिन्धि। अतस्तासां vस्पार्हं स्पृहणीयं vतत् प्रसिद्धं vवसु vआ vभर अस्मभ्यमाहर ॥

यद्वीळाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम्। वसु स्पार्हं तदा भर ॥४१॥

यत्। वीळौ। इन्द्र। यत्। स्थिरे। यत्। पर्शाने। पराऽभृतम्।
वसु। स्पार्हम्। तत्। आ। भर ॥ ४१ ॥

हे vइन्द्र त्वया च vवीळौ दृढे परैः कम्पयितुमशक्ये vयत् धनं vपराभृतं विन्यस्तं vयत् च vस्थिरे स्वयमचले पराभृतं vयत् चापि vपर्शाने विमर्शनक्षमे पराभृतं[3] vतत् vस्पार्हं vवसु vआ vभर ॥

यस्य ते विश्वमानुषो भूरेर्दत्तस्य वेदति। वसु स्पार्हं तदा भर ॥ ४२ ॥

यस्य। ते। विश्वऽमानुषः। भूरेः। दत्तस्य। वेदति। वसु। स्पार्हम्। तत्। आ। भर ॥४२॥

हे इन्द्र vते त्वया[4]। विभक्तिव्यत्ययः। vदत्तस्य दत्तं vभूरेः बहु vयस्य यद्धनम्। कर्मणि षष्ठी। vविश्वमानुषः सर्वो मनुष्यः vवेदति जानाति vतत् vस्पार्हं स्पृहणीयं vवसु vआ vभर ॥ ॥ ४९ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
ऋक्संहिताभाष्ये षष्ठाष्टके तृतीयोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
षष्ठे तृतीयमध्यायं व्याख्याय श्रीमतीसुतः।
श्रीसायणार्यः संगृह्य चतुर्थं व्याकरोत्यथ ॥

तत्र 'त्वावतः' इति त्रयस्त्रिंशदृचं चतुर्थं सूक्तमश्वपुत्रस्य वशाख्यस्यार्षम्। प्राग्वत्सप्रपरिभाषयाद्याश्चतस्रो गायत्र्यः। तत्राद्या पादनिचृत् 'त्रयः सप्तकाः पादनिचृत्' (अनु. ४. ४) इत्युक्तलक्षणोपेतत्वात्। 'दधानो गोमदश्ववत्' इत्येषा पञ्चमी ककुप् अष्टकद्वादशाष्टकैः पादैरुपेतत्वात्। 'मध्यमश्रेत् ककुप्' (अनु. ५. ३) इति हि तल्लक्षणम्। 'तमिन्द्रम्' इति षष्ठी

---

१. ग-त-न-'ते' नास्ति। २. ख-त-न-भ-श-°दभिमुखे; घ-°दभिमुखो। ३. त१-२-३-न-प्रातरामृतं। ४. ग-त्वं; ज्ञ-त-१-३-त्वां; त-४-न-भ-१-२-त्वा।

गायत्री । ' तस्मिन् हि सन्ति ' इति सप्तमी बृहती । ' यस्ते मदः ' इत्यष्टम्यनुष्टुप् । ' यो दुष्टरः ' इति नवमी सतोबृहती । ' अयुजौ जागतौ सतोबृहती ' (अनु. ८. ४) इति ह्युक्तम् । ' गव्यो षु णः ' इति दशमी गायत्री । ' नहि ते शूर ' इत्येकादशी बृहती । ' य ऋष्वः ' इति द्वादशी विपरीता सतोबृहती[1] प्रथमतृतीययोरष्टाक्षरा द्वितीयचतुर्थयोर्द्वादशाक्षरा च । ' युजौ चेद्विपरीता ' (अनु. ८. ५) इत्युक्तत्वात् । ' स नो वाजेषु ' इति त्रयोदशी चतुर्विंशत्यक्षरा द्विपदा । ' अभि वो वीरम् ' इति चतुर्दशी पिपीलिकमध्या बृहती । त्रयोदशिनोर्मध्येऽष्टकः पिपीलिकमध्या ' (अनु. ७. ७) इत्युक्तत्वात् । ' ददी रेक्णः ' इति पञ्चदशी ककुम्न्यङ्कुशिरा ' त्रैष्टुभजागतचतुष्काः ककुम्न्यङ्कुशिरा ' (अनु. ५. ४) इत्युक्तत्वात् । ' विश्वेषाम् ' इति षोडशी विराट् । ' महः सु वः ' इति सप्तदशी जगती । ' ये पातयन्ते ' इत्यष्टादश्युपरिष्टाद्बृहती चतुर्थपादस्य द्वादशाक्षरत्वात् । ' प्रभङ्गम् ' इत्येकोनविंशी बृहती । ' सनितः सुसनितः ' इति विंशी विषमपदा बृहती ' नवकाष्टयैकादश्यष्टिनो विषमपदा ' (अनु. ७. ८) इत्युक्तत्वात् । ' आ स एतु ' ' षष्टिं सहस्रा ' इत्येकविंशीद्वाविंश्यौ पङ्क्ती । ' दश इयावाः ' इति त्रयोविंशी गायत्री । ' दानासः ' इति चतुर्विंशी पङ्क्तिः । पञ्चविंशीसप्तविंश्यौ बृहत्यौ । षड्विंश्यष्टाविंश्यौ सतोबृहत्यौ । एकोनत्रिंशी गायत्री । ' गावो न यूथम् ' इति त्रिंशी विंशत्यक्षरा द्विपदा विराट् । एकत्रिंश्युष्णिक्[2] । द्वात्रिंशी पङ्क्तिः । त्रयस्त्रिंशी गायत्री । ' आ स एतु ' इत्यादिभिश्चतसृभिः कनीतपुत्रस्य[3] पृथुश्रवसो दानं स्तूयते । अतस्तद्देवताकाः। 'आ नो वायो' इत्यादीनां चतसृणां द्वात्रिंश्याश्च वायुर्देवता । शिष्टा अनादेशपरिभाषयेन्द्रदेवताकाः । एतत्सर्वमनुक्रमण्यामुक्तं—'त्वावतस्त्रयस्त्रिंशद्वृशोऽन्त्य आ स आदि कानीतस्य पृथुश्रवसो दानस्तुतिराद्या पादनिचृत् पञ्चम्यादि ककुब्गायत्री बृहत्यनुष्टुप् सतोबृहती गायत्री विपरीतोत्तरः प्रगाथो द्विपदा चतुर्विंशिका बृहती पिपीलिकमध्या ककुभ्यङ्कुशिरा विराड्जगत्युपरिष्टाद्बृहतीबृहत्यौ विषमपदोत्तरे पङ्क्ती गायत्री पङ्क्तिः प्रगाथौ च वायव्यौ गायत्री द्विपदोष्णिक् पङ्क्तिर्वायव्या गायत्री' इति । महाव्रते निष्केवल्ये ' सनितः सुसनितः ' इत्यन्तमेव[4] सूक्तम् । तथा च पञ्चमारण्यके शौनकेन सूत्रितं—' त्वावतः पुरूवसविति वशः सनितः सुसनितरित्येतदन्तः ' (ऐ. आ. ५. २. ५) इति ॥

त्वावतः पुरूवसो वयमिन्द्र प्रणेतः । स्मसि स्थातर्हरीणाम् ॥ १ ॥

त्वाऽवतः । पुरुवसो इति पुरुऽवसो । वयम् । इन्द्र । प्रनेतरिति प्रऽनेतः । स्मसि । स्थातः । हरीणाम् ॥ १ ॥

हे ᵛपुरूवसो बहुधनेन्द्र ᵛप्रणेतः कर्मणां पारं प्रकर्षेण प्रापयितः ᵛहन्द्र ᵛत्वावतः त्वत्सदृशस्य । इन्द्रसमानस्यान्यस्याभावात्तवेत्यर्थः । तव स्वभूताः ᵛवयं ᵛस्मसि स्मः । हे ᵛहरीणाम् एतत्संज्ञकानामश्वानां ᵛस्थातः अधिष्ठातः ॥

त्वां हि सत्यमद्रिवो विद्म दातारमिषाम् । विद्म दातारं रयीणाम् ॥ २ ॥

त्वाम् । हि । सत्यम् । अद्रिऽवः । विद्म । दातारम् । इषाम् । विद्म । दातारम् । रयीणाम् ॥ २ ॥

हे ᵛअद्रिवः । अत्ति शत्रुमित्यद्रिर्वज्रः । तद्वन्निन्द्र ᵛत्वां ᵛसत्यं निश्चयम् ᵛइषाम् अन्नानां ᵛदातारं ᵛविद्म जानीमः[5] । तथा ᵛरयीणां धनानां ᵛदातारं ᵛविद्म ॥

आ यस्य ते महिमानं शतमूते शतक्रतो । गीर्भिर्गृणन्ति कारवः ॥ ३ ॥

---

१. ग-त-भ-श-बृहती । २. ख-ग-त-भ-उष्णिक् । ३. ख-घ-त-न-भ-श-कनीन° । ४. ग-इत्यन्तमेतत् । ५. ख-घ-ज्ञ-त-२-४-भ-श-प्रनेतः; ग-प्राणेतः । ६. न-जानीम ।

आ । यस्य । ते । महिमानम् । शतम्ऽऊते । शतक्रतो इति शतऽक्रतो ।
गीःऽभिः । गृणन्ति । कारवः ॥ ३ ॥

हे vशतमूते अपरिमितरक्षण हे vशतक्रतो बहुकर्मयुक्तेन्द्र vयस्य vते vमहिमानं माहात्म्यं vकारवः स्तोतारः vगीर्भिः स्तुतिभिः vगृणन्ति स्तुवन्ति स्वाभीष्टाय ॥

सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा । मित्रः पान्त्यद्रुहः ॥ ४ ॥

सुऽनीथः । घ । सः । मर्त्यः । यम् । मरुतः । यम् । अर्यमा । मित्रः । पान्ति । अद्रुहः ॥४॥

vस vमर्त्यः मनुष्यो यजमानः vसुनीथः सुयज्ञः सुनयनो वा भवति । vघ इति प्रसिद्धौ । स इत्युक्तं कमित्याह । vयं यजमानं vमरुतः देवाः vपान्ति रक्षन्ति vअद्रुहः अद्रोहकर्तारः । तथा vयमर्यमा पाति । यं च vमित्रः पाति । स एवं भवतीति ॥

दधानो गोमदश्ववत्सुवीर्यमादित्यजूत एधते । सदा राया पुरुस्पृहा ॥ ५ ॥

दधानः । गोऽमत् । अश्वऽवत् । सुऽवीर्यम् । आदित्यऽजूतः । एधते ।
सदा । राया । पुरुऽस्पृहा ॥ ५ ॥

vआदित्यजूतः आदित्यप्रेरित आदित्यानुगृहीतो[1] यजमानः vगोमत् गोभिरुपेतम् vअश्ववत् अश्वैरुपेतं vसुवीर्यं शोभनवीर्योपेतं पुत्रं vदधानः धारयन् vएधते वर्धते vसदा सर्वदा । किंच vपुरुस्पृहा बहुभिः स्पृहणीयेन vराया धनेन सदैधते ॥ ॥ १ ॥

तमिन्द्रं दानमीमहे शवसानमभीर्वम् । ईशानं राय ईमहे ॥ ६ ॥

तम् । इन्द्रम् । दानम् । ईमहे । शवसानम् । अभीर्वम् । ईशानम् । रायः । ईमहे ॥ ६ ॥

vतं प्रसिद्धम् vइन्द्रं vदानं देयं vरायः[2] धनम् vईमहे याचामहे । कीदृशमिन्द्रम् । vशवसानं धलमाचरन्तम् vअभीर्वम् अभीरुम् vईशानं सर्वस्य स्वामिनम् ॥

तस्मिन्हि सन्त्यूतयो विश्वा अभीरवः सचा ।
तमा वहन्तु सप्तयः पुरूवसुं मदाय हरयः सुतम् ॥ ७ ॥

तस्मिन् । हि । सन्ति । ऊतयः । विश्वाः । अभीरवः । सचा ।
तम् । आ । वहन्तु । सप्तयः । पुरुऽवसुम् । मदाय । हरयः । सुतम् ॥ ७ ॥

vतस्मिन् इन्द्रे vऊतयः गन्त्र्यः vविश्वाः सर्वाः vअभीरवः अकातराः vसचा सहायभूता मरुद्रूपाः सेनाः vसन्ति भवन्ति । अथवा तस्मिन् सर्वा रक्षणाः सह संभवन्ति । vतम् इन्द्रं vसप्तयः सर्पणशीलाः vहरयः अश्वाः vपुरूवसुं बहुधनम् । बहुधनप्रदमित्यर्थः । तं vमदाय vसुतम् अभिषुतं सोमं प्रति vआ vवहन्तु आगमयन्तु ॥

यस्ते मदो वरेण्यो य इन्द्र वृत्रहन्तमः ।
य आददिः स्व१र्नृभिर्यः पृतनासु दुष्टरः ॥ ८ ॥

---

१. ख-ग-त–आदित्यानुगतो; न–आदितानुगृतो । २. ख-ग-त-न-भ-श–' रायः ' नास्ति।

यः । ते । मदः । वरेण्यः । यः । इन्द्र । वृत्रहन्ऽतमः ।
यः । आऽददिः । स्वः । नृऽभिः । यः । पृतनासु । दुस्तरः ॥ ८ ॥

पूर्वमन्त्रे मदाय हरय इत्युक्तं स मदः स्तूयते । हे vइन्द्र vते तव[1] vयः vमदः vवरेण्यः वरणीयः । vयः च मदः संग्रामे vवृत्रहन्तमः शत्रूणामतिशयेन हन्ता । vयः च vआददिः आदाता vस्वः स्वरणं धनं vनृभिः नृभ्यः शत्रुभ्यः । vयः च vपृतनासु संग्रामेषु vदुष्टरः अनभिभाव्यः । तस्मै मदाय हरयो वहन्त्विति ॥

यो दुष्टरो विश्ववार श्रवाय्यो वाजेष्वस्ति तरुता ।
स नः शविष्ठ सवना वसो गहि गमेम गोमति व्रजे ॥ ९ ॥

यः । दुस्तरः । विश्वऽवार । श्रवाय्यः । वाजेषु । अस्ति । तरुता ।
सः । नः । शविष्ठ । सवना । आ । वसो इति । गहि । गमेम । गोऽमति । व्रजे ॥ ९ ॥

हे vविश्ववार विश्वैर्वरणीयेन्द्र vवाजेषु युद्धेषु vयः तव vदुष्टरः दुःखेन तरीतुं शक्यः vतरुता शत्रूणां तारकः[2] vअस्ति भवति हे vवसो वासक हे vशविष्ठ अतिशयेन बलवन्निन्द्र vसः त्वं vनः vसवना अस्माकं सवनानि vआ vगहि आगच्छ । वयं च vगोमति vव्रजे गोमन्तं व्रजं vगमेम गच्छेम ॥

गव्यो षु णो यथा पुराश्वयोत रथया । वरिवस्य महामह ॥ १० ॥

गव्यो इति । सु । नः । यथा । पुरा । अश्वऽया । उत । रथऽया । वरिवस्य । महाऽमह ॥ १० ॥

हे vमहामह महाधनेन्द्र vगव्या । गव्या उ इति निपातानिपातद्वयसमुदायस्यादिवद्भावेन निपातवद्भावात् प्रकृतिभावः । अस्माकं गवाभिच्छया अस्माकं[3] गा दातुं vयथा vपुरा पूर्वं यथास्माकं[4] गवादिदानाय वरिवस्यसि तद्वदद्यापि vसु सुष्ठु vवरिवस्य परिचर । आगच्छेत्यर्थः । न केवलं गवेच्छया किंतु vअश्वया अश्वप्रदानेच्छया । vउत अपि च vरथया रथेच्छया च वरिवस्येति ॥ ॥ २ ॥

नहि ते शूर राधसोऽन्तं विन्दामि सत्रा ।
दशस्या नो मघवन्नू चिदद्रिवो धियो वाजेभिराविथ ॥ ११ ॥

नहि । ते । शूर । राधसः । अन्तम् । विन्दामि । सत्रा ।
दशस्य । नः । मघऽवन् । नु । चित् । अद्रिऽवः । धियः । वाजेभिः । आविथ ॥ ११ ॥

हे vशूर विक्रान्तेन्द्र vते तव vराधसः धनस्य vअन्तम् इयत्तां vसत्रा सत्यं vनहि vविन्दामि न लभे[5]। यस्मादेवं तस्मात् हे vमघवन् धनवन् हे vअद्रिवः वज्रवन्निन्द्र vनः अस्माकं vनू vचित् क्षिप्रमेव vदशस्य देहि तद्धनम् । किंच vवाजेभिः वाजैरन्नैः vधियः अस्मदीयानि कर्माणि vआविथ रक्ष[6] ॥

य ऋष्वः श्रावयत्सखा विश्वेत्स वेद जनिमा पुरुष्टुतः ।
तं विश्वे मानुषा युगेन्द्रं हवन्ते तविषं यतस्रुचः ॥ १२ ॥

---

१. ख-ग-त-न-भ-श-'तव' नास्ति । २. घ-तारकः श्रवाय्यः श्रवणीयः दयः । ३. घ-नः अस्माकं । ४. ख-घ-त-न-भ-श-यथास्माकं यागं । ५. घ-लभे खलु । ६. ग-ररक्षिथ ।

यः । ऋष्वः । श्रवयत्सखा । विश्वा । इत् । सः । वेद । जनिम । पुरुऽस्तुतः ।
तम् । विश्वे । मानुषा । युगा । इन्द्रम् । हवन्ते । तविषम् । यतऽस्रुचः ॥ १२ ॥

[v]यः इन्द्रः [v]ऋष्वः दर्शनीयः [v]श्रावयत्सखा[1] । श्रावयन्तः सखाय ऋत्विजो यस्य स तादृशः श्रावयत्सखा । [v]पुरुष्टुतः बहुभिर्यजमानैः स्तुतो य इन्द्रः [v]सः [v]विश्वेत् सर्वाण्यपि [v]जनिमा[2] जन्मानि प्राणिनां [v]वेद जानाति । [v]तं [v]तविषं बलवन्तम् [v]इन्द्रं [v]विश्वे सर्वेऽप्यध्वर्यवादयः [v]यतस्रुचः स्वीकृतहविष्काः सन्तः [v]मानुषा मनुष्यसंबन्धिनः [v]युगा युगानि कालान् सर्वेषु कालेषु [v]हवन्ते आह्वयन्ति स्तुवन्ति ॥

स नो वाजेष्वविता पुरूवसुः पुरःस्थाता मघवा वृत्रहा भुवत् ॥१३॥

सः । नः । वाजेषु । अविता । पुरुऽवसुः । पुरःऽस्थाता । मघऽवा । वृत्रऽहा । भुवत् ॥१३

एषा द्विपदा जगती । [v]सः [v]पुरूवसुः बहुधनः [v]मघवा धनवान् [v]वृत्रहा शत्रूणां हन्तेन्द्रः [v]न अस्माकं [v]वाजेषु संग्रामेषु [v]अविता रक्षिता [v]पुरःस्थाता तदर्थं पुरतो वर्तमानः [v]भुवत् भवतु ॥

अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम् ।
इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा ॥ १४ ॥

अभि । वः । वीरम् । अन्धसः । मदेषु । गाय । गिरा । महा । विऽचेतसम् ।
इन्द्रम् । नाम । श्रुत्यम् । शाकिनम् । वचः । यथा ॥ १४ ॥

हे उद्गात्रादयः [v]वः । यूयमित्यर्थः । अथवा हे यजमानाः वो युष्माकं हिताय [v]अन्धसः सोमस्य [v]मदेषु उत्पाद्यमानेषु सत्सु [v]वीरं शत्रूणामीरयितारं [v]नाम शत्रूणां नामकं [v]विचेतसं विशिष्टप्रज्ञं [v]श्रुत्यं सर्वत्र श्रोतव्यं[3] [v]शाकिनं शक्तमीदृशम् [v]इन्द्रं [v]महा महत्या [v]गिरा स्तुत्या [v]वचः वाग्युष्मदीया [v]यथा येन प्रकारेण प्रवर्तते गायत्र्या त्रिष्टुभा वा तथा [v]गाय गायत । स्तुतिं कुरुत ॥

ददी रेक्णस्तन्वे ददिर्वसु ददिर्वाजेषु पुरुहूत वाजिनम् । नूनमर्थ ॥१५॥

ददिः । रेक्णः । तन्वे । ददिः । वसु । ददिः । वाजेषु । पुरुऽहूत । वाजिनम् । नूनम् । अर्थ ॥१५

हे [v]पुरुहूत बहुभिराहूतेन्द्र त्वं [v]तन्वे मह्यं शरीराय [v]रेक्णः धनं [v]ददिः दाता भव । कदेति उच्यते । [v]नूनं क्षिप्रम् अद्येदानीमेव[4] । एवं प्रतिवाक्यं योज्यम् । तथा [v]वसु धनं पुत्रादिभ्यः [v]ददि दाता भव । तथा [v]वाजेषु संग्रामेषु [v]वाजिनम् अन्नवन्तं रयिं [v]ददिः दाता भवेति । अत्र सर्वेष्वा वाक्येषु ददिः इत्यस्य लिङ्भावात् ' न लोकाव्यय° ' इति षष्ठीप्रतिषेधः ॥ ॥ ३ ॥

विश्वेषामिरज्यन्तं वसूनां सासह्वांसं चिदस्य वर्पसः । कुपयतो नूनमत्यर्थ ॥१६॥

विश्वेषाम् । इरज्यन्तम् । वसूनाम् । ससह्वांसम् । चित् । अस्य । वर्पसः ।
कुपऽयतः । नूनम् । अर्ति । अर्थ ॥ १६ ॥

---

१. ग-श्रवयत्सखा । २. ग-त-न-भ-श-जनिमानि । ३. न-भ-श्रोतव्यं स्तुत्यं । ४. ग-भ-सु-अर्थेदानीमेव ।

हे इन्द्र त्वां [v]विश्वेषां सर्वेषां [v]वसूनां धनानाम् [v]इरज्यन्तम् ईशानम् [v]अस्य [v]वर्पसः वारकस्य [v]कृपयतः युद्धं कल्पयतः शत्रोः [v]सासह्वांसम् अभिभवितारं स्तुवत इति शेषः। स त्वं [v]नूनं क्षिप्रमद्यापीदानीमपि[१] धनं प्रयच्छेत्यर्थः ॥

महः सु वो अरमिषे स्तवामहे मीळ्हुषे अरंगमाय जग्मये ।
यज्ञेभिर्गीर्भिर्विश्वमनुषां मरुतामियक्षसि गाये त्वा नमसा गिरा ॥१७॥

महः । सु । वः । अरम् । इषे । स्तवामहे । मीळ्हुषे । अरम्ऽगमाय । जग्मये ।
यज्ञेभिः । गीःऽभिः । विश्वऽमनुषाम् । मरुताम् । इयक्षसि । गाये । त्वा । नमसा । गिरा ॥१७॥

हे इन्द्र [v]महः महतः [v]वः । तवेत्यर्थः । व्यत्ययेन बहुवचनम् । [v]अरं[२] गमनमस्मद्विषयमिच्छामि । अर्तेररमिति रूपम् । तदर्थं [v]मीळ्हुषे सेक्त्रे [v]अरंगमाय[३] संपूर्णगमनाय [v]जग्मये गमनशीलाय यज्ञं प्रति एवंभूताय[४] देवाय [v]स्तवामहे । त्वां स्तुम इत्यर्थः । केन साधनेनेति तदुच्यते । [v]यज्ञेभिः यजनसाधनैर्हविर्भिर्यज्ञैरेव[५] वा [v]गीर्भिः स्तुतिभिः । हे देव [v]विश्वमनुषां विश्वेषां मनुष्याणां यष्टॄणाम् [v]इयक्षसि एतैरिज्यसे । [v]मरुतां संबन्धी त्वम् । किंच [v]त्वा त्वां [v]नमसा नमस्कारेण [v]गिरा स्तुत्या च [v]गाये स्तुवे ॥

ये पातयन्ते अज्मभिर्गिरीणां स्नुभिरेषाम् ।
यज्ञं महिष्वणीनां सुम्नं तुविष्वणीनां प्राध्वरे ॥ १८ ॥

ये । पातयन्ते । अज्मऽभिः । गिरीणाम् । स्नुऽभिः । एषाम् ।
यज्ञम् । महिऽस्वनीनाम् । सुम्नम् । तुविऽस्वनीनाम् । प्र । अध्वरे ॥ १८ ॥

[v]ये मरुतः [v]गिरीणां मेघानां [v]स्नुभिः प्रस्नवद्भिः [v]अज्मभिः[६] बलैः बलकरैरुदकैः सह [v]पातयन्ते पतन्ति गच्छन्ति [v]एषां मरुतां [v]महिष्वणीनां प्रभूतध्वनीनां [v]यज्ञं कुर्म इति शेषः । कृत्वा च [v]तुविष्वणीनां बहुध्वनीनां[७] [v]सुम्नं सुखं तैः कृतम् [v]अध्वरे यज्ञे [v]प्र प्राप्नुयाम । अथवा चतुर्थ्यर्थे षष्ठी । प्रभूतस्वनेभ्यः सुम्नमुक्तलक्षणं हविः प्र प्राप्नुयामाध्वरे यज्ञे ॥

प्रभङ्गं दुर्मतीनामिन्द्र शविष्ठा भर ।
रयिमस्मभ्यं युज्यं चोदयन्मते ज्येष्ठं चोदयन्मते ॥ १९ ॥

प्रऽभङ्गम् । दुःऽमतीनाम् । इन्द्र । शविष्ठ । आ । भर ।
रयिम् । अस्मभ्यम् । युज्यम् । चोदयत्ऽमते । ज्येष्ठम् । चोदयत्ऽमते ॥ १९ ॥

[v]दुर्मतीनां दुष्टमनस्कानां वृत्रादीनां [v]प्रभङ्गं प्रकर्षेण भञ्जकं त्वां याचामह इति शेषः । हे [v]इन्द्र [v]शविष्ठ अतिशयेन बलवन्[८] स्तुतस्त्वम् [v]अस्मभ्यं [v]रयिं धनं [v]युज्यं योग्यमस्माकमुचितं

---

१. ग-भ–क्षिप्रमथापी°; घ–क्षिप्रमिदानीं अथचित् अनंतरमपि । २. ख-ञ-त-१-२–अरंगमाय अरं । ३. ञ-त३-४-न-भ२-श–अरंगमनाय । ४. ख-ग-त-न-श–स एवंभूताय । ५. ग-घ-त-न–यजमानसाधनै°; श–यज्ञसाधनै° । ६. ग-त३-४-न-श–' अज्मभिः ' नास्ति । ७. त-श–बहुधनीनां । ८. ख-ग-त-न-भ-श–बलवत्तेन्द्र ।

धनम् vआ vभर आहर। हे vचोदयन्मते। चोदयन्ती धनं प्रेरयन्ती मतिर्यस्य स तथोक्तः। हे तादृश देव। किंच हे vचोदयन्मते उक्तार्थं vउग्रेष्ठं धनमा भर ॥

सनितः सुसनितरुग्र चित्र चेतिष्ठ सूनृत ।
प्रासहा सम्राट् सहुरिं सहन्तं भुज्युं वाजेषु पूर्व्यम् ॥ २० ॥

सनितरिति। सुऽसनितः। उग्र। चित्र। चेतिष्ठ। सूनृत।
प्रऽसहा। सम्ऽराट्। सहुरिम्। सहन्तम्। भुज्युम्। वाजेषु। पूर्व्यम् ॥ २० ॥

हे vसनितः संभक्तर्दातर्वा[1] vउग्र उद्गूर्णबल vचित्र चायनीय vचेतिष्ठ अत्यन्तं चेतयितः vसूनृत सुसत्य vप्रासहा प्रसह्य हे vसम्राट् सर्वस्य स्वामिन् सम्यग्राजमान वा त्वं vसहुरिं सहनशीलं[2] vभुज्युं भोजयितारं vपूर्व्यं प्रवृद्धम्। मुख्यमित्यर्थः। ईदृशं धनं vवाजेषु संग्रामेष्वाभरेति शेषः ॥ ॥ ४ ॥

आ स एतु य ईवदाँ अदेवः पूर्तमादद े ।
यथा चिद्वशो अश्व्यः पृथुश्रवसि कानीते[3]स्या व्युष्यादद े ॥ २१ ॥

आ। सः। एतु। यः। ईवत्। आ। अदेवः। पूर्तम्। आऽददे ।
यथा। चित्। वशः। अश्व्यः। पृथुऽश्रवसि। कानीते। अस्याः। विऽउषि। आऽददे ॥ २१ ॥

अत्र शौनकः—'वशायाश्व्याय यत्प्रादात्कानीतस्तु पृथुश्रवाः। तदत्र स्तूयते[3] दानमा स एवेवमादिभिः' (बृहद्दे ६. ७९–८०)। vएतु आगच्छतु vसः vयः vअदेवः देवादन्यो मनुष्यो वशः vईवत् गमनवत् गवादिलक्षणं vपूर्तं पूर्णम् vआददे आदत्ते। स्वीकृतवानित्यर्थः। देवश्चेन्मायायाप्यागन्तुमर्हति। अतः प्रकाशेनैवागच्छत्वित्यर्थः। कथमस्य धनावाप्तिप्रसङ्ग आगमनप्रसङ्गश्चेति तदुच्यते। vयथा vचित्। चिदिति पूरणः। येन कारणेन[4] यस्माद्वा vवशः एतत्संज्ञकः vअश्व्यः अश्वपुत्रः vपृथुश्रवसि एतन्नामके राज्ञि vकानीते कनीतपुत्रे कन्यायाः पुत्रे vअस्याः उषसः vव्युषि व्युष्टौ vआददे आदत्ते तेन कारणेन[4] तस्माद्वा कारणादायात्विति। एवमश्वो बन्धुवर्गो वा ब्रूते ॥

षष्टिं सहस्राश्व्यस्यायुतासनमुष्ट्रानां विंशतिं शता ।
दश श्यावीनां शता दश त्र्यरुषीणां दश गवां सहस्रा ॥ २२ ॥

षष्टिम्। सहस्रा। अश्व्यस्य। अयुता। असनम्। उष्ट्रानाम्। विंशतिम्। शता।
दश। श्यावीनाम्। शता। दश। त्रिऽअरुषीणाम्। दश। गवाम्। सहस्रा ॥ २२ ॥

स वश आगत्य ब्रूते। vअश्व्यस्य अश्वसंबन्धिनः vषष्टिं vसहस्रा सहस्राणि vअयुता अयुतानि च vअसनम् अभजम्। vउष्ट्राणां vविंशतिं vशता शतानि चासनम्। vश्यावीनां श्यावर्णानां वडवानां vदश vशता शतानि चासनम्। vत्र्यरुषीणां त्रीण्यारोचमानानि शुभ्राणि ककुप्पृष्ठपार्श्वादिस्थानानि यासां तादृशीनां vगवां vदश vसहस्रा सहस्राण्यभजम् ॥

---

१. घ–संभक्तः सुसनितः सुष्ठु संभक्तर्दातर्वा। २. घ–सहनशीलं सहंतं पुत्रादियुक्तं। ३. भ१-३-श–श्रूयते। ४. घ-त३-भ-श–प्रकारेण। ५. ख-ग-घ-त-न-भ-श–प्रकारेण।

दश॑ श्या॒वा ऋ॒धद्र॑यो वी॒तवा॑रास आ॒शवः॑ । म॒थ्रा ने॒मिं नि वा॑वृतुः ॥ २३ ॥

दश॑ । श्या॒वाः । ऋ॒धत्ऽर॑यः । वी॒तऽवा॑रासः । आ॒शवः॑ । म॒थ्राः । ने॒मिम् । नि । व॒वृ॒तुः ॥२३॥

[v]दश दशसंख्याकाः [v]श्यावाः श्यामवर्णाः [v]आशवः अश्वाः [v]नेमिं रथनेमिं [v]नि [v]वावृतुः निवर्तयन्ति । रथं वहन्तीत्यर्थः । ईदृशास्ते [v]ऋधद्रयः प्रवृद्धवेगाः [v]वीतवारासः क्रान्तबलाः प्राप्तबला वा आशवः [v]मथ्राः[1] मथनशीलाः ॥

दा॒नास॑: पृथु॒श्रव॑सः का॒नी॒तस्य॑ सु॒राध॑सः ।
रथं॑ हिर॒ण्यय॑ं ददु॒न्मंहि॑ष्ठः सू॒रिर॑भू॒द्वर्षि॑ष्ठमकृत॒ श्रवः॑ ॥ २४ ॥

दा॒नास॑: । पृथु॒ऽश्रव॑सः । का॒नी॒तस्य॑ । सु॒ऽराध॑सः ।
रथ॑म् । हिर॒ण्यय॑म् । ददत् । मंहि॑ष्ठः । सू॒रिः । अ॒भू॒त् । वर्षि॑ष्ठम् । अ॒कृ॒त॒ । श्रवः॑ ॥ २४ ॥

पूर्वमन्त्रैः प्रतिपादितानि धनानि[2] बन्धूनां पितुर्वा पुरस्तान्निर्दिशन्नाशास्ते । [v]पृथुश्रवसः [v]कानीतस्य[3] [v]सुराधसः शोभनधनस्य । यतस्तस्य धनं दानाय कल्पितमतः स सुराधाः । तस्य [v]दानासः दाना दत्तानि धनानीमानि । स च पृथुश्रवाः पूर्वमुक्तानि [v]हिरण्ययं हिरण्मयं [v]रथं च [v]ददत् प्रयच्छन् [v]मंहिष्ठः अतिशयेन दाता [v]सूरिः सर्वस्य प्रेरकः प्राज्ञो वा [v]अभूत् भवति भवतु वा । [v]वर्षिष्ठम् अतिशयेन प्रवृद्धं[4] [v]श्रवः कीर्तिम् [v]अकृत करोति करोतु वा ॥

'आ नो वायो' इत्येषा पञ्चमेऽहनि प्रउगशस्त्रे वायव्यतृचे तृतीया । 'आ नो वायो महे तन इत्येका रथेन पृथुपाजसा' (आश्व. श्रौ. ७. १२) इति हि सूत्रितम् ॥

आ नो॑ वायो म॒हे त॑ने या॒हि म॒खाय॒ पाज॑से ।
व॒यं हि ते॑ चकृ॒मा भूरि॑ दा॒वने॑ सु॒वश्चि॒न्महि॑ दा॒वने॑ ॥ २५ ॥

आ । नः॒ । वा॒यो॒ इति॑ । म॒हे । त॒ने॑ । या॒हि । म॒खाय॑ । पाज॑से ।
व॒यम् । हि । ते॒ । च॒कृ॒म । भूरि॑ । दा॒वने॑ । सु॒वः । चि॒त् । महि॑ । दा॒वने॑ ॥ २५ ॥

हे [v]वायो त्वं [v]नः अस्मान् प्रति [v]आ [v]याहि आगच्छ । किमर्थम् । [v]महे महते [v]तने धनाय [v]मखाय महनीयाय[5] [v]पाजसे बलाय च । उभयं प्रदातुमित्यर्थः । किमत्रास्तीति तदुच्यते । [v]वयं [v]हि वयं[6] खलु [v]ते [v]भूरि [v]दावने प्रभूतधनदात्रे [v]चकृम स्तुतिं हविर्वा । [v]सुवश्चित् तदानीमेव तवागमनानन्तरमेव चकृम [v]महि महतो धनस्य [v]दावने दात्रे ॥ ॥ ५ ॥

यो अश्वे॑भि॒र्वह॑ते॒ वस्त॑ उ॒स्राः॒ त्रिः स॒प्त स॑प्त॒तीना॑म् ।
ए॒भिः सोमे॑भिः सोम॒सुद्भिः॑ सोमपा दा॒नाय॑ शुक्रपूतपाः ॥ २६ ॥

यः । अश्वे॑भिः । वह॑ते । वस्ते॑ । उ॒स्राः॒ । त्रिः । स॒प्त । स॒प्त॒तीना॑म् ।
ए॒भिः । सोमे॑भिः । सो॒म॒सुत्ऽभिः॑ । सो॒म॒ऽपाः॒ । दा॒नाय॑ । शु॒क्र॒पू॒तऽपाः॒ ॥ २६ ॥

---

१. ख-घ-त३-४-न-भ–मथ्नाः । २. ज्ञ-त२-४–धनानि य; त३-न–धनानीय; श–धनान्यानीय । ३. ख-भ१–कानीनस्य । ४. ख-ग-ज्ञ-त१-२-भ–प्रवृद्धं । ५. घ-ज्ञ-त१-२–मंहनीयाय । ६. ग-त३-४-श–' वयं ' नास्ति ।

[v]यः[1] पृथुश्रवाः [v]अश्वेभिः अश्वैः [v]वहते गृहं [v]वस्ते[2] च [v]उस्राः गाः। ताभिश्च गच्छतीत्यर्थः। त्रिः सप्तेति तासां गवां संख्योक्ता[3]। सा[4] संख्या विशेष्यते। [v]सप्तानां [v]त्रिः[5] [v]सप्त। उक्तसंख्याकाभिर्गोभिरश्वैश्च यो गच्छति स पृथुश्रवाः [v]एभिः [v]सोमेभिः सोमैः [v]सोमसुद्भिः सोममभिषुण्वद्भिश्च[6] हे[7] [v]सोमपाः। सोमस्य पातरिति वायोः संबोधनम्। हे [v]शुक्रपूतपाः दीप्तपूतस्य च सोमस्य पातर्वायो [v]दानाय तुभ्यं सोमं दातुं सोमैर्युक्तो भवतीति शेषः ॥

यो मे इमं चिदु त्मनामन्दच्चित्रं दावने ।
अरट्वे अक्षे नहुषे सुकृत्वनि सुकृत्तराय सुक्रतुः ॥ २७ ॥

यः। मे। इमम्। चित्। ऊँ इति। त्मना। अमन्दत्। चित्रम्। दावने।
अरट्वे। अक्षे। नहुषे। सुऽकृत्वनि। सुकृत्ऽतराय। सुऽक्रतुः ॥ २७ ॥

[v]यः पृथुश्रवाः [v]मे मह्यम् [v]इमं पुरतो वर्तमानं [v]चित्रं चायनीयं गवाश्वादिकं [v]दावने दानाय [v]त्मना आत्मना स्वबुद्धयैव [v]अमन्दत् अमन्दत अमाद्यत। स च [v]सुक्रतुः शोभनकर्मा राजा [v]सुकृत्तराय सुकृतकर्तृत्वाय [v]अरट्वे [v]अक्षे [v]नहुषे [v]सुकृत्वनि च। एते तस्य राज्ञोऽध्यक्षाः। तेष्वन्वशात् अस्मै गवादिकान् संयोजयतेति। यद्वा। अरट्वादयोऽन्ये राजानः। तेषु मध्ये सुकृत्तरायामन्ददिति ॥

उच्चथ्ये[8] वपुषि यः स्वराळुत वायो घृतस्नाः ।
अश्वेषितं रजेषितं शुनेषितं प्राज्म तदिदं नु तत् ॥ २८ ॥

उच्चथ्ये। वपुषि। यः। स्वऽराट्। उत। वायो इति। घृतऽस्नाः।
अश्वऽइषितम्। रजःऽइषितम्। शुनाऽइषितम्। प्र। अज्म। तत्। इदम्। नु। तत् ॥ २८ ॥

[v]उच्चथ्ये[9] वक्तव्ये स्तुत्ये [v]वपुषि शरीरे [v]यः [v]स्वराट् स्वयं राजते। यद्वा। उच्चथ्यो वपुश्चोभौ राजानौ। तयोरपि यः स्वराट् स्वाराज्यं करोति अतिशयेन वर्तते। हे [v]वायो यश्च [v]घृतस्नाः घृतवच्छुद्धः स राजा [v]अश्वेषितम् अश्वैः प्रापितं [v]रजेषितम्। रजःशब्देनोष्ट्रो गर्दभो वोच्यते। तेनाप्यानीतं [v]शुनेषितं च [v]अज्म अन्नं [v]प्र अदात्। [v]तत् अन्नमश्वाद्यानीतम् [v]इदं पुरतो दृश्यते। [v]तत् तवैवानुग्रहादित्यर्थः। अथवैकस्तच्छब्दः पूरणः। अश्वाद्यानीतं यदस्ति तदिदं खल्विति ॥

अध प्रियमिषिरायं षष्टिं सहस्रासनम् । अश्वानामिन्न वृष्णाम् ॥ २९ ॥

अध। प्रियम्। इषिरायं। षष्टिम्। सहस्रा। असनम्। अश्वानाम्। इत्। न। वृष्णाम् ॥ २९ ॥

[v]अध अधुना [v]इषिराय धनादिप्रेरयित्रे राज्ञे [v]प्रियं श्रद्धेयमश्वानामिव[10] [v]वृष्णां सेक्तृणां गवां [v]सहस्रा सहस्राणां [v]षष्टिं षष्टिसहस्रसंख्याकं प्रियभूतम् [v]असनम् अभजम् ॥

गावो न यूथमुप यन्ति वध्रयु उप मा यन्ति वध्रयः ॥ ३० ॥

गावः। न। यूथम्। उप। यन्ति। वध्रयः। उप। मा। आ। यन्ति। वध्रयः ॥ ३० ॥

---

१. ख-त३-४-न-श-'यः' नास्ति। २. ख-घ-ज्ञ-त१-२-वस्ते वसति। ३. ग-त३-४-श-संख्योक्ता च। ४. ख-ग-घ-ज्ञ-न-भ-सा च। ५. ख-त३-न-श-अभिषुण्वद्भिश्च। ६. न-भ-प्रावभिर्हे। ७. घ-उतापि च उच्चथ्ये। ८. ख-ज्ञ-°मश्वानामित् अश्वानामिव; घ-त१-२-°मश्वानामित् अश्वानामेव।

vगादो vन गाव इव ता यथा संगवे vयूथमुप vयन्ति उपगच्छन्ति तद्वत् vवध्रयः छिन्नमुष्का वृषभाः पृथुश्रवसा दत्ताः vमा[1] माम् vउप vयन्ति समीपं प्राप्नुवन्ति। मा मां vवध्रयः उपा यन्तीति पुनरुक्तिरादरार्था ॥

अध यच्चारथे गणे शतमुष्ट्राँ अचिक्रदत् । अध श्वित्नेषु विंशतिं शता ॥ ३१ ॥

अध। यत्। चारथे। गणे। शतम्। उष्ट्रान्। अचिक्रदत्। अध। श्वित्नेषु। विंशतिम्। शता॥३१॥

vअध अथ vयत् यदा vचारथे। चरथं चरणं गमनम्। तत्संबन्धिनि चार्यमाणे। वनाय प्रेर्यमाण इत्यर्थः। तादृशे vगणे उष्ट्रसंघे vउष्ट्रान् vशतम् उष्ट्राणां शतम् vअचिक्रदत् अस्मभ्यं प्रदानायाजुहाव। vअध अपि चास्मदर्थमेव vश्वित्नेषु श्वेतवर्णेषु गोयूथेषु vविंशतिं च vशता[2] शतानि च अथवा शतानां विंशतिमचिक्रदत् ॥

शतं दासे बल्बूथे विप्रस्तरुक्ष आ ददे ।
ते तै वायविमे जना मदन्तीन्द्रगोपा मर्दन्ति देवगोपाः ॥ ३२ ॥

शतम्। दासे। बल्बूथे। विप्रः। तरुक्षे। आ। ददे।
ते। ते। वायो इति। इमे। जनाः। मर्दन्ति। इन्द्रऽगोपाः। मर्दन्ति। देवऽगोपाः॥ ३२ ॥

अयं vविप्रः मेधावी वशो जनोऽहं vबल्बूथे एतन्नामके vदासे vतरुक्षे गवाश्वादीनां तारके गवाद्यधिकृते राज्ञास्माकं प्रदिष्टधनदातरि vआ vददे। किं दानम्। गवाश्वादीनां vशतम्। शतशब्दोऽपरिमितवचनः। हे vवायो vते तव स्वभूताः vते स्तोतारः vइमे vजनाः। वयमित्यर्थः। आत्मन एव परोक्षत्वेन वादः। स्वयानुगृहीतत्वात् vइन्द्रगोपाः। इन्द्रो गोपायिता येषां ते तथोक्ताः। इन्द्रेण रक्षिताः vमदन्ति। तथा vदेवगोपाः vमदन्ति। इन्द्रं देवांश्च[3] राज्ञो[4] लब्धेन धनेन यजन्तो मदन्तीत्यर्थः ॥

अध स्या योषणा मही प्रतीची वशमश्व्यम् । अधिरुक्मा वि नीयते ॥३३॥

अध। स्या। योषणा। मही। प्रतीची। वशम्। अश्व्यम्। अधिऽरुक्मा। वि। नीयते॥३३॥

vअध अधुना vस्या सा vयोषणा योषा राज्ञा प्रदत्ता vमही महती पूज्या vप्रतीची अस्मदभिमुखी vअश्व्यम् अश्वपुत्रं vवशं मां प्रति साधिरुक्माभरणा[5] सती vवि vनीयते। तां कन्यां मां प्रत्यानयन्तीत्यर्थः। अत्र वायव्यास्वृक्षु यत्र वायुर्न स्तूयते परं दानप्रशंसैव तासु सर्वासु हे वायो त्वदनुग्रहादेवमिति योज्यं वायुपरत्वमवगन्तव्यम् ॥ ॥ ६ ॥

'महि वः' इत्यष्टादशर्चं पञ्चमं सूक्तमाप्त्यस्य त्रितस्यार्षम्। षडुष्टका महापङ्क्तिश्छन्दः। आद्यास्त्रयोदशर्चं आदित्यदेवताकाः। 'यच्च गोषु' इत्याद्याः पञ्चर्चं उषोदेवताका आदित्यदेवताकाश्च। तथा चानुक्रमणिका—'महि वो ह्वूना त्रित आप्त्य आदित्येभ्योऽन्त्याः पञ्चोषसेऽपि महापाङ्क्तम्' इति। सूक्तविनियोगो लैङ्गिकः ॥

महि वो महतामवो वरुण मित्र दाशुषे ।
यमादित्या अभि द्रुहो रक्षथा नेमघं नशदनेहसो व ऊतयः सुऊतयो व ऊतयः॥१॥

---

१. ख-ग-त-न-भ-श–'मा' नास्ति। २. ख-ग-त-न-भ-श–'शता' नास्ति। ३. ख-ग-त-न-भ-श–देवान्। ४. ख-ग-त-न-श–राज्ञा। ५. ग–साधिरुक्मा साभरणा; न-भ–अधिरुक्मा अधिष्ठितरुक्माभरणा।

महि । वः । महताम् । अवः । वरुण । मित्र । दाशुषे ।
यम् । आदित्याः । अभि । द्रुहः । रक्षथ । न । ईम् । अघम् । नशत् ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १ ॥

हे [v]वरुण हे [v]मित्र । एतद्द्वयमर्थम्णोऽप्युपलक्षणम् । हे वरुणादयः [v]महतां [v]वः युष्माकम् [v]अवः रक्षणं [v]महि महत् । कस्मै । [v]दाशुषे हविर्दात्रे यजमानाय क्रियमाणम् । किंच हे [v]आदित्याः [v]यं यजमानं [v]द्रुहः द्रोग्धुः सकाशात् [v]अभि [v]रक्षथ [v]ईम् एनं यजमानम् [v]अघं पापं [v]न [v]नशत् न प्राप्नोति । कुत एवमिति तत्रोच्यते । [v]वः युष्माकम् [v]ऊतयः रक्षणानि [v]अनेहसः अपापान्यनुपद्रवाणि च । [v]ऊतयः युष्माकं रक्षणानि [v]सुऊतयः शोभनरक्षणानि । पुनरुक्तिरादरार्था ॥

विदा देवा अघानामादित्यासो अपाकृतिम् ।
पक्षा वयो यथोपरि व्यस्मे शर्म यच्छतानेहसो व ऊतयः सुऊतयो व ऊतयः ॥२॥

विद । देवाः । अघानाम् । आदित्यासः । अपऽआकृतिम् ।
पक्षा । वयः । यथा । उपरि । वि । अस्मे इति । शर्म । यच्छत ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ २ ॥

हे [v]देवाः [v]आदित्यासः आदित्याः यूयम् [v]अघानां दुःखानाम् [v]अपाकृतिम् अपाकरणं परिहारप्रकारं [v]विद जानीथ । यस्मादेवं तस्मात् [v]वयः पक्षिणः [v]यथा[1] [v]पक्षा पक्षौ[2] [v]उपरि स्वशिशुकानामुपरि कुर्वन्ति सुखाय तद्वत् [v]अस्मे अधि अस्मासु [v]शर्म सुखं [v]यच्छत कुरुत । अधीति सप्तम्यर्थानुवादी । अस्मे अस्माकमुपरीति वा ॥

व्यस्मे अधि शर्म तत्पक्षा वयो न यन्तन ।
विश्वानि विश्ववेदसो वरूथ्या मनामहेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥३॥

वि । अस्मे इति । अधि । शर्म । तत् । पक्षा । वयः । न । यन्तन ।
विश्वानि । विश्वऽवेदसः । वरूथ्या । मनामहे ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ३ ॥

हे आदित्याः यूयम् [v]अस्मे [v]अधि अस्मासु [v]तत् । युष्मास्वेवासाधारणं यत् [v]शर्म अस्ति तदित्यर्थः । तत्[3] [v]वि [v]यन्तन[3] विशेषेण प्रापयत । हे [v]विश्ववेदसः सर्वधनाः युष्मान् [v]विश्वानि[4] सर्वाणि [v]वरूथ्या । वरूथं गृहम् । तदुचितानि धनानि [v]मनामहे याचामहे ॥

यस्मा अरासत क्षयं जीवातुं च प्रचेतसः ।
मनोर्विश्वस्य घेदिम आदित्या राय ईशतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः ॥४॥

---

१. ख-ग-त-न-भ–'यथा' नास्ति । २. ख-त-भ–स्वपक्षौ; न– पक्षौ । ३. ख-घ-ज्ञ-त१-२ –तद्यो न पक्षा पक्षिणः शिशुकानां स्वपक्षो परि (पक्षोपरि–ज्ञ-त२) यथा तथा वि यंतन । ४. ख-त-न-भ१-२-श – विश्वा ।

यस्मै । अरासत । क्षयम् । जीवातुम् । च । प्रऽचेतसः ।
मनोः । विश्वस्य । घ । इत् । इमे । आदित्याः । रायः । ईशते ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ४ ॥

vयस्मै मनुष्याय vक्षयं निवासं vजीवातुं जीवनसाधनमन्नं vच vप्रचेतसः प्रकृष्टमतयः vअरासत प्रयच्छन्ति तस्मै यजमानाय तदर्थम् vइमे vआदित्याः vविश्वस्य vचेत् सर्वस्याप्ययष्टुः vमनोः[1] मनुष्यस्य धनिकस्य vरायः धनस्य vईशते स्वामिनो भवन्त्यपहृत्य यजमानाय प्रदातुम् ॥

परि णो वृणजन्नघा दुर्गाणि रथ्यो यथा ।
स्यामेदिन्द्रस्य शर्मण्यादित्यानामुतावस्यनेहसो व ऊतयः सुऊतयो व ऊतयः॥५॥

परि । नः । वृणजन् । अघा । दुःऽगानि । रथ्यः । यथा ।
स्याम । इत् । इन्द्रस्य । शर्मणि । आदित्यानाम् । उत । अवसि ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ५ ॥

vपरि vवृणजन् परिवर्जयन्तु vनः अस्माकम् vअघा अघानि पापानि । तत्र दृष्टान्तः । vदुर्गाणि दुर्गमनान् प्रदेशानवटधिष्ण्यादिकान् vयथा परिवर्जयन्ति तद्वत् । vइन्द्रस्य vशर्मणि vस्याम भवेम वयम् । vउत अपि च vआदित्यानाम् vअवसि रक्षणे च स्याम ॥ ॥ ७ ॥

परिहृतेदना जनो युष्मादत्तस्य वायति ।
देवा अदभ्रमाश वो यमादित्या अहेतनानेहसो व ऊतयः सुऊतयो व ऊतयः॥६॥

परिऽहृता । इत् । अना । जनः । युष्माऽदत्तस्य । वायति । देवाः । अदभ्रम् । आश । वः ।
यम् । आदित्याः । अहेतन । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ६ ॥

vपरिहृतेत्[2] परिपीडितेनैव तपोनियमादिना vअना प्राणयुक्तः vजनः vयुष्मावत्तस्य युष्माभिर्दत्तं धनम् । कर्मणि षष्ठी । vवायति गच्छति । हे vदेवाः हे vआशवः शीघ्रगमनाः[3] यूयं vयं यजमानम् vअहेतन प्रामुथः स[4] जनः[4] vअदभ्रम् अनल्पं धनं वायति प्राप्नोतीति संबन्धः ॥

न तं तिग्मं चन त्यजो न द्रासदभि तं गुरु ।
यस्मा उ शर्म सप्रथ आदित्यासो अराध्वमनेहसो व ऊतयः सुऊतयो व ऊतयः॥७॥

न । तम् । तिग्मम् । चन । त्यजः । न । द्रासत् । अभि । तम् । गुरु । यस्मै । ऊँ इति । शर्म ।
सुऽप्रथः । आदित्यासः । अराध्वम् । अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥७॥

vतं मनुष्यं vतिग्मं vचन तीक्ष्णमेव सन्तं vत्यजः । क्रोधनामैतत् । अत्र क्रोधात् प्रयुज्यमानमायुधमुच्यते । vन vद्रासत् । 'द्रा कुत्सायां गतौ' । कुत्सितं नागच्छति[5] । न हिनस्तीत्यर्थः । तथा vतं जनं vगुरु प्रवृद्धमपरिहार्यं दुःखं vन द्रासत् न गच्छति । हे vआदित्यासः आदित्याः vसप्रथः

१. ग-त-न-भ-श–'मनोः' नास्ति । २. त-न-भ-श–परिहृतादित् । ३. घ–शीघ्रगमना आदित्या;
४. ख-त-न– स धनः; श–यजमानः । ५. न-श– गच्छति ।

समानप्रथनाः सर्वतः पृथुभूता वा यूयं [V]यस्मा [V]उ यस्मै यजमानाय। उशब्दः पूरणः। [V]शर्म सुखम् [V]अराध्वम् अदत्त तं[1] नः[1] द्रासदिति ॥

युष्मे देवा अपि ष्मसि युध्यन्तइव वर्मसु ।
युयं महो नु एनसो युयमर्भादुरुष्यतानेहसो व ऊतयः सुऊतयो व ऊतयः ॥८॥

युष्मे इति। देवाः। अपि। स्मसि। युध्यन्तःऽइव। वर्मऽसु।
युयम्। महः। नः। एनसः। युयम्। अर्भात्। उरुष्यत।
अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः ॥ ८ ॥

हे [V]देवाः आदित्याः [V]युष्मे युष्मासु वयम् [V]अपि [V]स्मसि अपि भवेम। युष्माभिरपिहिताः स्मेत्यर्थः। तत्र दृष्टान्तः। [V]युध्यन्तः शूराः [V]वर्मसु कवचेषु यथा भवन्ति तद्वत्। [V]यूयं [V]नः अस्मान् [V]महः महतः [V]एनसः पापात्[2] [V]उरुष्यत रक्षत। तथा [V]यूयम् अस्मान् [V]अर्भात् अल्पादप्येनसः उरुष्यत ॥

अदितिर्न उरुष्यत्वदितिः शर्म यच्छतु ।
माता मित्रस्य रेवतोऽर्यम्णो वरुणस्य चानेहसो व ऊतयः सुऊतयो व ऊतयः ॥९॥

अदितिः। नः। उरुष्यतु। अदितिः। शर्म। यच्छतु।
माता। मित्रस्य। रेवतः। अर्यम्णः। वरुणस्य। च।
अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः ॥ ९ ॥

[V]नः अस्मान् [V]अदितिः अखण्डनीया देवमाता [V]उरुष्यतु रक्षतु। तथा [V]अदितिः [V]शर्म सुखं [V]यच्छतु। अदितिर्विशेष्यते। या [V]माता निर्मात्री। कस्य। [V]मित्रस्य [V]रेवतः धनवतः [V]अर्यम्णः [V]वरुणस्य [V]च। सा न उरुष्यत्विति ॥

यद्देवाः शर्म शरणं यद्भद्रं यदनातुरम् ।
त्रिधातु यद्वरूथ्यं तदस्मासु वि यन्तनानेहसो व ऊतयः सुऊतयो व ऊतयः॥१०॥

यत्। देवाः। शर्म। शरणम्। यत्। भद्रम्। यत्। अनातुरम्।
त्रिऽधातु। यत्। वरूथ्यम्। तत्। अस्मासु। वि। यन्तन।
अनेहसः। वः। ऊतयः। सुऽऊतयः। वः। ऊतयः ॥ १० ॥

हे [V]देवाः आदित्याः [V]यत् [V]शर्म सुखं [V]शरणं शरणीयम्। [V]यत् [V]भद्रं सर्वैर्भजनीयम्। [V]यत् [V]अनातुरं रोगरहितम्। यत् [V]त्रिधातु त्रिगुणम्। [V]यद्वरूथ्यम्। वरूथं गृहम्। तदर्हम्। [V]तत् उक्तगुणकं शर्म [V]अस्मासु [V]वि [V]यन्तन वियच्छत ॥ ॥ ८ ॥

आदित्या अव हि ख्यताधि कूलादिव स्पशः ।
सुतीर्थमर्वतो यथानु नो नेषथा सुगमनेहसो व ऊतयः सुऊतयो व ऊतयः ॥११॥

---

१. त-न–तन; भ–नत; श–तेन। २. त-श–पापं; न-भ१-२– पाप।

आदित्याः । अव । हि । ख्यत । अधि । कूलात्ऽइव । स्पशः ।
सुऽतीर्थम् । अर्वतः । यथा । अनु । नः । नेषथ । सुऽगम् ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ ११ ॥

हे [v]आदित्याः यूयम् [v]अव [v]हि [v]ख्यत अव हि पश्यताधस्तास्थितानस्मान् । तत्र दृष्टान्तः । [v]कूलात् [v]अधि कूले [v]स्पशः स्पष्टाः । स्थिता इत्यर्थः । यथा कूलस्थः पुरुषोऽधोगतमुदकं जिज्ञासुस्तत्रस्थं मनुष्यं वा विलोकयितुमवाक्पश्यति तद्वत् । तथा कृत्वा [v]सुतीर्थं शोभनावतार-प्रदेशम्[1] [v]अर्वतः अश्वान् [v]यथा प्रापयन्त्यश्वरक्षकास्तद्वत् [v]नः अस्मान् [v]सुगं सुपन्थानम् [v]अनु [v]नेषथ अनुनयथ[2] ॥

नेह भद्रं रक्षस्विने नावयै नोपया उत ।
गवे च भद्रं धेनवे वीराय च श्रवस्यतेऽनेहसो व ऊतयः सुऊतयो व ऊतयः॥१२॥

न । इह । भद्रम् । रक्षस्विने । न । अवऽयै । न । उपऽयै । उत ।
गवे । च । भद्रम् । धेनवे । वीराय । च । श्रवस्यते ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १२ ॥

हे आदित्याः [v]इह भूमौ [v]भद्रं कल्याणं सुखं [v]रक्षस्विने । रक्षो बलम् । बलवतेऽस्मद्द्वेष्ट्रे [v]न भवत्विति शेषः ।[v]अवयै अस्मान् हिंसितुमवगच्छते [v]न भवतु भद्रम् । तथा [v]उपयै उपगच्छते [v]न भवतु । तर्हि कस्य भवत्वित्युच्यते । [v]गवे [v]च [v]भद्रं युष्मदीयं[3] भवतु । चशब्दो वक्ष्यमाण-धेन्वाद्यपेक्षः । किंच [v]धेनवे नवप्रसूतिकायै भद्रं भवतु । [v]वीराय अस्मत्पुत्रादिकाय भद्रं भवतु । कीदृशाय वीराय । [v]श्रवस्यते अन्नमिच्छते । अथवोत्तरार्धेऽपि नेत्यनुवर्तते । अस्मद्विरोधिनो गवादि-काय भद्रं न भवत्विति तस्यार्थः ॥

यदाविर्यदपीच्यं१ देवासो अस्ति दुष्कृतम् ।
त्रिते तद्विश्वमाप्त्य आरे अस्मद्दधातनानेहसो व ऊतयः सुऊतयो व ऊतयः॥१३॥

यत् । आविः । यत् । अपीच्यम् । देवासः । अस्ति । दुःऽकृतम् ।
त्रिते । तत् । विश्वम् । आप्त्ये । आरे । अस्मत् । दधातन ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १३ ॥

हे [v]देवासः देवा आदित्याः [v]यदाविः यत् पापमाविर्भूतम् [v]अस्ति । [v]दुष्कृतं [v]यत् च [v]अपीच्यम् अन्तर्हितमस्ति । 'अपीच्यम्' इत्यन्तर्हितनाम । [v]तद्विश्वं तदुभयम् [v]आप्त्ये [v]त्रिते मयि मा भूत् । किंतु [v]अस्मत् [v]आरे दूरे [v]दधातन स्थापयत ॥

'यच्च गोषु' इत्यादिसूक्तशेषेण दुःस्वप्नं दृष्ट्वादित्यमुपतिष्ठेत । तथा च 'स्वप्नममनोज्ञं दृष्ट्वा' इत्युपक्रम्य 'यच्च गोषु दुष्वप्न्यमिति पञ्चभिरादित्यमुपतिष्ठेत' (आश्व. गृ. ३. ६. ६) इति सूत्रितम् ॥

---

१. ख-त-भ-श–शोभनावतर°; घ–शोभन° । २. ख-त-भ–अनुनयथ आनुकूल्येन प्रापयथ । ३. घ–अस्मदीयं ।

यच्च गोषु दुष्ष्वप्न्यं यच्चास्मे दुहितर्दिवः ।
त्रिताय तद्विभावर्याप्त्याय परा वहानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१४॥

यत् । च । गोषु । दुःऽस्वप्न्यम् । यत् । च । अस्मे इति । दुहितः । दिवः ।
त्रिताय । तत् । विभाऽवरि । आप्त्याय । परा । वह ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः । ॥ १४ ॥

हे [v]दिवः [v]दुहितः उषः उषोदेवते [v]यच्च [v]गोषु अस्मदीयासु [v]दुष्ष्वप्न्यम् अनर्थसूचकं दृष्टम् । स्वार्थिको यत् । किंच [v]यच्च दुष्ष्वप्न्यम् [v]अस्मे अस्मासु दृष्टम् । गोपीडानिमित्तकमस्माकं पीडानिमित्तकं च यद्दुःस्वप्नं[1] पश्याम इत्यर्थः । [v]तत् सर्वं हे [v]विभावरि । उषोनामैतत् । हे व्युच्छन्नगति देवि [v]आप्त्याय [v]त्रिताय [v]परा [v]वह दूरे परिहर ॥

निष्कं वा घा कृणवते स्रजं वा दुहितर्दिवः ।
त्रिते दुष्ष्वप्न्यं सर्वमाप्त्ये परि दद्मस्यनेहसो व ऊतयः सुऊतयो व ऊतयः॥१५॥

निष्कम् । वा । घ । कृणवते । स्रजम् । वा । दुहितः । दिवः ।
त्रिते । दुःऽस्वप्न्यम् । सर्वम् । आप्त्ये । परि । दद्मसि ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १५ ॥

हे [v]दिवः [v]दुहितः उषः [v]निष्कं [v]वा [v]घ आभरणविशेषं वा [v]कृणवते कुर्वते स्वर्णकाराय यत् [v]दुष्ष्वप्न्यं दृष्टम् । स्वर्णकारेण निर्माणसमये दृष्टमित्यर्थः । घेति पूरणः । वाशब्दश्चार्थे । [v]वा अथवा [v]स्रजं माल्यं कृणवते । कुर्वाण इत्यर्थः । तस्मिन्नपि मालाकारे मालानिर्माणसमये यद्दुष्ष्वप्न्यं दृष्टं तदुभयविषयं दुःस्वप्नम् [v]आप्त्ये अपां पुत्रे [v]त्रिते वर्तमानं [v]परि[2] [v]दद्मसि उपरि[2] दद्मः । वयं त्रिताः परित्यजामेत्यर्थः । अथवा । त्रिते मयि यत् दुष्ष्वप्न्यं दृष्टं तत् स्वर्णकाराय मालाकाराय वा परि दद्मसि । अस्मत्तोऽपि निष्कृष्य[3] तयोरुपरि[3] स्थापयामः ॥ ॥ ९ ॥

तदन्नाय तदपसे तं भागमुपसेदुषे ।
त्रितायं च द्वितायं चोषो दुष्ष्वप्न्यं वहानेहसो व ऊतयः सुऊतयो व ऊतयः ॥१६॥

तत्ऽअन्नाय । तत्ऽअपसे । तम् । भागम् । उपऽसेदुषे ।
त्रितायं । च । द्वितायं । च । उषः । दुःऽस्वप्न्यम् । वह ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १६ ॥

[v]तदन्नाय । यदेव जागरावस्थायां भोज्यत्वेन प्रसिद्धं मधुपायसादि स्वप्नेऽपि तदेवान्नं यस्य सः । तादृशाय । प्रत्यक्षभोजनवत् स्वप्नेऽपि भोक्त्र इत्यर्थः । तथा [v]तदपसे । यदेवापः कर्म निन्दितं जाग्रदवस्थायां क्रियते तदेव कर्म स्वप्ने यस्य स तत्कर्मा । तादृशाय देवाय[4] [v]तं [v]भागं दुःस्वप्न-

---

१. ख-ग-भ१-३–दुःस्वप्नं; त-न-भ२–दुःष्वप्नं; श–दुःष्वप्न्यं । २. ख-त-भ–परिदद्मसुपरि; घ-न-श–परिदद्मसि परि । ३. ग–निष्कृष्टयो°; त२-३-श–निष्कृष्टतयो°; न–निष्कृष्यंदतयो° । ४. ख-घ-त-भ–देवाह; न–तदेवाह ।

स्यांशम् vउपसेदुषे प्राप्नुवते vत्रिताय vद्विताय vच हे vउषः देवि vदुष्वप्न्यम् अन्नकर्मविषयं vवह अन्यत्र प्रापय । स्वप्ने दृष्टं मधुभोजनादिकं जाग्रदवस्थानुभूतवत् सुखकरं भवत्वित्यर्थः ॥

यथा कलां यथा शफं यथर्णं संनयामसि ।
एवा दुष्वप्न्यं सर्वमाप्त्ये सं नयामस्यनेहसो व ऊतयः सुऊतयो व ऊतयः॥१७॥

यथा । कलाम् । यथा । शफम् । यथा । ऋणम् । सम्ऽनयामसि ।
एव । दुःऽस्वप्न्यम् । सर्वम् । आप्त्ये । सम् । नयामसि ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १७ ॥

संज्ञपितं पशुं दानार्थं संस्कुर्वन्तः[1] vयथा येन प्रकारेण vकलां vशफम् इति संदायान्यत्र संनयन्ति । अथापरो यथाशब्दः पूरणः । अथवा । यथा कलां हृदयाद्यवयवमवदानार्हं संनयन्ति यथा च शफं शफोपलक्षितमनवदानार्हं शफास्थ्यादिकं संनयन्ति । vयथा वा vऋणं शनैः संनयन्ति vएव एवं vदुष्वप्न्यं vसर्वमाप्त्ये वर्तमानं vसं vनयामसि संनयामः अपसारयामः ॥

अजैष्माद्यासनाम चाभूमानागसो वयम् ।
उषो यस्मादुष्वप्न्यादभैष्माप तदुच्छत्वनेहसो व ऊतयः सुऊतयो व ऊतयः॥१८॥

अजैष्म । अद्य । असनाम । च । अभूम । अनागसः । वयम् ।
उषः । यस्मात् । दुःऽस्वप्न्यात् । अभैष्म । अप । तत् । उच्छतु ।
अनेहसः । वः । ऊतयः । सुऽऊतयः । वः । ऊतयः ॥ १८ ॥

vवयं त्रिताः vअद्य vअजैष्म जयेम । vअसनाम vच[2] संभजेम च सुस्वप्नं सुखं वा । vअनागसः अपापाः vअभूम भवेम । हे vउषः vयस्मात् vदुष्वप्न्यात् vअभैष्म भीताः स्म vतत् पापम् vअप vउच्छतु अपगच्छतु[3] ॥ ॥ १० ॥

'स्वादोरभक्षि' इति पञ्चदशर्चं षष्ठं सूक्तं काण्वस्य प्रगाथस्यार्षं सोमदेवताकं त्रैष्टुभम् । पञ्चमी जगती । सोमो देवता । तथा चानुक्रान्तं—'स्वादोः पञ्चोना प्रगाथः सौम्यं त्रैष्टुभं पञ्चमी जगती' इति । सूक्तविनियोगो लैङ्गिकः ॥

स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य ।
विश्वे यं देवा उत मर्त्यासो मधु ब्रुवन्तो अभि संचरन्ति ॥ १ ॥

स्वादोः । अभक्षि । वयसः । सुऽमेधाः । सुऽआध्यः । वरिवोवित्ऽतरस्य ।
विश्वे । यम् । देवाः । उत । मर्त्यासः । मधु । ब्रुवन्तः । अभि । सम्ऽचरन्ति ॥ १ ॥

अहं प्रगाथः vसुमेधाः शोभनप्रज्ञः vस्वाध्यः स्वाध्ययनः सुकर्मा vवरिवोवित्तरस्य अतिशयेन पूजां लभमानस्य vस्वादोः सुष्ठ्वदनीयस्य स्वादुभूतस्य vवयसः अन्नस्य । एताः कर्मणि षष्ठ्यः ।

---

१. ख-त–संस्तुवंतो; ग–स्तुवंतो; न–संस्तुर्वतो । २. ख-ग-त-न-श–'च' नास्ति । ३. ख-ग-त-न-भ-श–अपागच्छतु ।

उक्तलक्षणं वयोऽन्नं सोमाख्यम् vअभक्षि भक्षयेयं। vयं यदन्नं vविश्वे vदेवाः सर्वेऽपीन्द्रादयः vउत अपि च vमर्त्यासः मर्त्या मनुष्याः vमधु vब्रुवन्तः मनोहरमेतदिति शब्दायन्तः[1] vअभि vसंचरन्ति अभिसंगच्छन्ते प्राप्नुवन्ति तदन्नमभक्षीति ॥

अग्नीषोमप्रणयने 'अन्तश्च' इत्येषा। तथा च सूत्रितम्—'अन्तश्च प्रागा अदितिर्भवासि इयेनो न योनिं सदनं धिया कृतम्' (आश्व. श्रौ. ४. १०) इति ॥

अन्तश्च प्रागा अदितिर्भवास्यवयाता हरसो दैव्यस्य।
इन्दविन्द्रस्य सख्यं जुषाणः श्रौष्टीव धुरमनु राय ऋध्याः ॥ २ ॥

अन्तरिति। च। प्र। अगाः। अदितिः। भवासि। अवऽयाता। हरसः। दैव्यस्य। इन्दो इति। इन्द्रस्य। सख्यम्। जुषाणः। श्रौष्टीऽइव। धुरम्। अनु। राये। ऋध्याः ॥२॥

हे सोम त्वम् vअन्तश्च vप्रागाः। हृदयस्य यागागारस्य वान्तर्गच्छसि। गत्वा च vअदितिः अदीनस्त्वं[2] vदैव्यस्य vहरसः क्रोधस्य vअवयाता पृथक्कर्ता vभवासि भवसि। हर इति क्रोधनाम। हे vइन्दो सोम त्वम् vइन्द्रस्य vसख्यं vजुषाणः सेवमानः vश्रौष्टी। श्रुष्टीति क्षिप्रनाम। तत्संबन्धी श्रौष्टी। क्षिप्रगाम्यश्वः vधुरम् vइव vराये अस्माकं धनलाभाय vअनु vऋध्याः अनुगच्छसि। अथवाश्वो यथा धुरं वृत्वाभिमतदेशं[3] प्रापयति तद्वदस्मान् प्रापय[4]। अनुपूर्वं ऋधिर्गत्यर्थः ॥

'अपाम सोमम्' इत्यादिके द्वे सोमपानोत्तरकालीनास्याभिमर्शने हृदयाभिमर्शने च क्रमेण विनियुक्ते। तथा च सूत्रितम्—'अपाम सोममृता अभूम शं नो भव हृद आ पीत इन्दविति मुखहृदये अभिमृशेरन्' (आश्व. श्रौ ५. ६) इति ॥

अपाम सोममृता अभूमागन्म ज्योतिरविदाम देवान्।
किं नूनमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥ ३ ॥

अपाम। सोमम्। अमृताः। अभूम। अगन्म। ज्योतिः। अविदाम। देवान्। किम्। नूनम्। अस्मान्। कृणवत्। अरातिः। किम्। ऊँ इति। धूर्तिः। अमृत। मर्त्यस्य ॥ ३॥

हे vअमृत[5] अमरण सोम त्वाम् vअपाम पानं करवाम। कुर्मः। ततः vअमृताः vअभूम भवेम। यस्मात्त्वममृतः अतस्तव पानाद्वयमप्यमृताः स्याम। पश्चात् vज्योतिः द्योतमानं स्वर्गम् vअगन्म। vअविदाम ज्ञातवन्तः vदेवान्। तथाभूतान्[6] vअस्मान् vनूनम् इदानीम् vअरातिः शत्रुः vकिं vकृणवत् कुर्यात्। vकिमु किं वा[7] vमर्त्यस्य इदानीं मनुष्यभूतस्य मम vधूर्तिः हिंसकः किं कृणवत् कुर्यात् ॥

शं नो भव हृद आ पीत इन्दो पितेव सोम सूनवे सुशेवः।
सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः ॥ ४ ॥

शम्। नः। भव। हृदे। आ। पीतः। इन्दो इति। पिताऽइव। सोम। सूनवे। सुऽशेवः। सखाऽइव। सख्ये। उरुऽशंस। धीरः। प्र। नः। आयुः। जीवसे। सोम। तारीः ॥ ४ ॥

---

१. ग–शब्दयन्तः। २. ख-ग-त-न-भ-श–त्वं। ३. ग-भ–धूत्वा°। ४. ख-त-न-भ१-२–प्रय; ग–नय; श–राय। ५. ख-त१-२–अमृत अविद। ६. ख-ग-त-न-भ-श–अयं तथाभूतान्। ७. त३-न भ२–चा; श–च।

हे ᵛइन्दो ᵛसोम अस्माभिः[1] ᵛपीतः त्वं[1] ᵛनः अस्माकं ᵛहृदे हृदयाय ᵛशं सुखम् ᵛआ ᵛभव। सुखभवने दृष्टान्तद्वयम्। ᵛपिता[2] ᵛसूनवे स्वात्मजाय यथा सुखाय भवति यथा वा ᵛसखा अहितान्निवर्त्य हिते स्थापयिता सखा स स्वसख्ये यथा ᵛसुशेवः सुसुखो भवति। शेवमिति सुखनाम। तद्वत्त्वमपि भव। किंच हे ᵛउरुशंस बहुभिर्बहुधा वा शंसनीय बहुकीर्ते ᵛसोम ᵛधीरः धीमांस्त्वं ᵛनः अस्माकं ᵛजीवसे जीवनाय ᵛआयुः आयुष्यं ᵛप्र ᵛतारीः प्रवर्धय[3] ॥

इमे मा पीता यशसं उरुष्यवो रथं न गावः समनाह पर्वसु ।
ते मा रक्षन्तु विस्रसश्चरित्रादुत मा स्रामाद्यवयन्त्विन्दवः ॥ ५ ॥

इमे । मा । पीताः । यशसः । उरुष्यवः । रथम् । न । गावः । सम् । अनाह । पर्वसु ।
ते । मा । रक्षन्तु । विऽस्रसः । चरित्रात् । उत । मा । स्रामात् । यवयन्तु । इन्दवः ॥ ५ ॥

ᵛइमे ᵛपीताः ᵛयशसः यशस्कराः ᵛउरुष्यवः अस्माकं रक्षाकामाः सोमाः ᵛगावः गोविकारभूता वध्यः ᵛरथं ᵛन रथमिव ता[4] यथा रथं विस्रस्तं ᵛपर्वसु ᵛसमनाह[5] संदधते तद्वत् मां पीताः सोमाः पर्वसु संनह्यन्तु। किंच ᵛते सोमाः ᵛमा मां ᵛविस्रसः विस्रस्तात् ᵛचरित्रात् चरणादनुष्ठानात् ᵛरक्षन्तु। सोमः पीतश्चेत् कर्म ह्यविस्रस्तं भवति ᵛउत अपि च ᵛमा मां ᵛस्रामात् व्याधेः सकाशात् ᵛइन्दवः पीताः ᵛयवयन्तु पृथक्कुर्वन्तु ॥ ॥ ११ ॥

अग्निं न मा मथितं सं दिदीपः प्र चक्षय कृणुहि वस्यसो नः ।
अथा हि ते मद आ सोम मन्ये रेवाँइव प्र चरा पुष्टिमच्छ ॥ ६ ॥

अग्निम् । न । मा । मथितम् । सम् । दिदीपः । प्र । चक्षय । कृणुहि । वस्यसः । नः ।
अथ । हि । ते । मदे । आ । सोम । मन्ये । रेवान्ऽइव । प्र । चर । पुष्टिम् । अच्छ ॥ ६ ॥

हे सोम पीतस्त्वं ᵛमा मां ᵛमथितम् ᵛअग्निं ᵛन अग्निमिव ᵛसं ᵛदिदीपः संदीपय। ᵛप्र ᵛचक्षय च चक्षुषः संधुक्षणेन। ᵛनः अस्मान् ᵛवस्यसः अतिशयेन वसुमतः ᵛकृणुहि कुरु। ᵛअथ अधुना ᵛहि खलु ᵛते त्वां हे ᵛसोम ᵛमदे[6] मदाय[6] ᵛमन्ये स्तौमि। तथा सति ᵛरेवानिव धनवानिह। इवेति संप्रत्यर्थे। ᵛपुष्टिम् अस्मत्पोषम् ᵛअच्छ ᵛप्र ᵛचर अभिगच्छ ॥

इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः ।
सोम राजन्प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि ॥ ७ ॥

इषिरेण । ते । मनसा । सुतस्य । भक्षीमहि । पित्र्यस्यऽइव । रायः ।
सोम । राजन् । प्र । नः । आयूंषि । तारीः । अहानिऽइव । सूर्यः । वासराणि ॥ ७ ॥

ᵛइषिरेण इच्छावता ᵛमनसा ᵛसुतस्य ᵛते सुतमभिषुतं त्वां ᵛभक्षीमहि। ᵛपित्र्यस्य पितृसंबन्धिनो[7] धनस्येव धनमिव। पित्र्यं धनं यथैषेण मनसोपभुञ्जते तद्वत्। भक्षित हे ᵛसोम ᵛराजन् स्वामिन् ᵛनः अस्माकम् ᵛआयूंषि ᵛप्र ᵛतारीः प्रवर्धय। ᵛवासराणि जगद्वासकानि

---

१. ख-ग-त-न-भ-श–'अस्माभिः...त्वं' नास्ति। २. घ–पितेव। ३. ग–प्रावर्धयः; घ-ङ-त१-२-न-श–प्रवर्धयः। ४. ख-ग-त-न-भ-श–ते। ५. ख-ग-त-न-भ-श–'समनाह' नास्ति। ६. ख-ग-त-न-भ-श–'मदे मदाय' नास्ति। ७. घ–°संबंधिनो रायः।

vअहानि vसूर्यः vइव[1]। अत्र 'ईषणेन[2] वैषणेन वार्षणेन वा' (निरु. ४. ७) इत्यादि निरुक्तं ज्ञातव्यम् ॥

सोम॑ राजन्मृळया॑ नः स्व॒स्ति तव॑ स्मसि व्र॒त्या॒३॒॑स्तस्य॑ विद्धि ।
अल॑र्ति॒ दक्ष॑ उ॒त म॒न्युरि॑न्दो मा नो॑ अ॒र्यो अ॑नु॒कामं॑ परा॑ दाः ॥ ८ ॥

सोम॑ । रा॒जन् । मृ॒ळय॑ । नः॒ । स्व॒स्ति । तव॑ । स्म॒सि॒ । व्र॒त्याः॑ । तस्य॑ । वि॒द्धि॒ ।
अल॑र्ति । दक्षः॑ । उ॒त । म॒न्युः॒ । इ॒न्दो॒ इति॑ । मा । नः॒ । अ॒र्यः॑ । अ॒नु॒ऽका॒मम् । परा॑ । दा॒रिति॑ दाः ॥ ८ ॥

हे vसोम vराजन् vनः अस्मान् vस्वस्ति अविनाशाय vमृळय सुखय च। vव्रत्याः व्रतिनो वयं vतव vस्मसि स्वभूताः स्मः। vतस्य तं स्वकीयं तव vविद्धि जानीहि। अथवा तव त्वमित्यर्थः। त्वं जानीहि। किंच हे vइन्दो vदक्षः प्रवृद्धोऽस्मच्छत्रुः vअलर्ति गच्छति। vउत अपि च vमन्युः क्रोधः क्रुद्धो वा अलर्ति। तादृशस्योभयविधस्य vअर्यः अरेः vअनुकामं यथाकामं vनः अस्मान् vमा vपरा vदाः परादेहि ॥

त्वं हि न॑स्त॒न्वः सोम गो॒पा गात्रे॑गात्रे नि॒षस॑त्था नृ॒चक्षाः॑ ।
यत्ते॑ व॒यं प्र॑मि॒नाम॑ व्र॒तानि॒ स नो॑ मृळ सुष॒खा दे॑व वस्यः ॥ ९ ॥

त्वम् । हि । नः॒ । त॒न्वः॑ । सो॒म॒ । गो॒पाः॒ । गात्रे॑ऽगात्रे । नि॒ऽस॒सत्थ॑ । नृ॒ऽचक्षाः॑ ।
यत् । ते॒ । व॒यम् । प्र॒ऽमि॒नाम॑ । व्र॒तानि॑ । सः । नः॒ । मृ॒ळ॒ । सु॒ऽस॒खा । दे॒व॒ । व॒स्यः॒ ॥ ९ ॥

हे vसोम देव vत्वं vनः अस्माकं vतन्वः तनोरङ्गस्य vगोपाः vहि रक्षिता खलु। अतः vगात्रेगात्रे सर्वेष्वङ्गेषु vनृचक्षाः नृणां कर्मनेतॄणां द्रष्टा त्वं vनिषसत्थ निषीदसि। vयत् यद्यपि vते तव vव्रतानि कर्माणि vवयं vप्रमिनाम हिंस्मः तथापि हे vदेव vसः त्वं vवस्यः श्रेष्ठान् vनः अस्मान् vसुषखा शोभनसखा सन् vमृळ सुखय ॥

ऋ॒दू॒दरे॑ण सख्या॑ सचेय॒ यो मा॒ न रिष्ये॑द्धरिवश्च पीतः ।
अ॒यं यः सोमो॒ न्यधा॑य्य॒स्मे तस्मा॒ इन्द्रं॒ प्रति॑रमे॒म्यायुः॑ ॥ १० ॥

ऋ॒दू॒दरे॑ण । सख्या॑ । सचे॑य । यः । मा॒ । न । रिष्ये॑त् । ह॒रि॒ऽअ॒श्व॒ । पी॒तः ।
अ॒यम् । यः । सोमः॑ । नि । अधा॑यि । अ॒स्मे इति॑ । तस्मै॑ । इन्द्र॑म् । प्रऽतिर॑म् । ए॒मि॒ । आयुः॑ ॥ १० ॥

अहं प्रगाथः vऋदूदरेण उदराबाधकेन सोमेन vसख्या vसचेय संगच्छेय। संगतो भवामि। 'ऋदूदरः सोमो मृदूदरः' (निरु. ६. ४) इति यास्कः। vयः सोमः vपीतः सन् vमा मां vन vरिष्येत् न हिंस्येत्[3] हे vहर्यश्व इन्द्र। सौम्ये सूक्त इन्द्रस्य कीर्तनं सोमस्येन्द्रस्वामिकत्वान्न विरुद्धम्। vयः vअयं vसोमः vअस्मे अस्मासु vन्यधायि निहितोऽभूत् vतस्मै सोमाय vप्रतिरम् vआयुः जठरे चिरकालावस्थानम् vइन्द्रम् vएमि याचे ॥ ॥ १२ ॥

अप॒ त्या अ॑स्थु॒रनि॑रा॒ अमी॑वा॒ निर॑त्रसन्तमि॒षीचीर॑भैषुः ।
आ सोमो॑ अ॒स्माँ अ॑रुहद्वि॒हाया॒ अग॑न्म॒ यत्र॑ प्रति॒रन्त॒ आयुः॑ ॥ ११ ॥

---

१. घ–इव स यथा वर्षणेन प्रवर्धयति तद्वत्। २. ख-त-न-भ-श–एषणेन। ३. भ२–हिंसेत्; भ३–हिंसत्।

अप । त्याः । अस्युः । अनिराः । अमीवाः । निः । अत्रसन् । तमिषीचीः । अभैषुः ।
आ । सोमः । अस्मान् । अरुहत् । विऽहायाः । अगन्म । यत्र । प्रऽतिरन्ते । आयुः ॥ ११ ॥

vत्याः ताः vअनिराः प्रेरयितुमशक्याः vअमीवाः बलवत्यः पीडाः[1] vअप vअस्थुः अपगच्छन्तु । याः vतमिषीचीः बलवत्योऽस्मान् vनिः नितराम् vअत्रसन् प्राप्नुवन् कम्पयन्ति तथा vअभैषुः । अपगमे[2] कारणमाह । यस्मात् vसोमः vविहायाः महान् सन् vअस्मान् vआ vअरुहत् आगमत् प्राप्तवान् अतोऽपास्थुरिति भावः । vयत्र यस्मिन् सोमे पीते vआयुः आयुष्यं vप्रतिरन्ते वर्धयन्ति मनुष्यास्तं सोमम् vअगन्म इति ॥

यो न इन्दुः पितरो हृत्सु पीतोऽमर्त्यो मर्त्याँ आविवेश ।
तस्मै सोमाय हविषा विधेम मृळीके अस्य सुमतौ स्याम ॥ १२ ॥

यः । नः । इन्दुः । पितरः । हृत्ऽसु । पीतः । अमर्त्यः । मर्त्यान् । आऽविवेश ।
तस्मै । सोमाय । हविषा । विधेम । मृळीके । अस्य । सुऽमतौ । स्याम ॥ १२ ॥

हे vपितरः vयः vइन्दुः vहृत्सु vपीतः सन् vअमर्त्यः मृतिरहितः सन् vआविवेश vमर्त्यान्[3] vनः अस्मान् vतस्मै vसोमाय vहविषा vविधेम परिचरेम । vअस्य सोमस्य vमृळीके सुखे vसुमतौ चानुग्रहबुद्धौ च vस्याम भवेम ॥

महापितृयज्ञे 'सोमाय पितृमते पुरोडाशम्' इत्यत्र 'त्वं सोम' इति याज्या । सूत्रितं च— 'त्वं सोम पितृभिः संविदानो बर्हिषदः पितर ऊत्यर्वाक्' (आश्व. श्रौ. २. १९) इति । तृतीयसवने सौम्यस्य चरोरपीयं[4] याज्या । 'त्वं सोम पितृभिः संविदान इति सौम्यस्य' (आश्व. श्रौ. ५. १९) इति हि सूत्रितम् ॥

त्वं सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ।
तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम् ॥ १३ ॥

त्वम् । सोम । पितृऽभिः । सम्ऽविदानः । अनु । द्यावापृथिवी इति । आ । ततन्थ ।
तस्मै । ते । इन्दो इति । हविषा । विधेम । वयम् । स्याम । पतयः । रयीणाम् ॥ १३ ॥

हे vसोम vत्वं vपितृभिः सह vसंविदानः संगच्छमानः vद्यावापृथिवी द्यावापृथिव्यौ vअनु vआ vततन्थ क्रमेण विस्तारयसि । vतस्मै सोमाय vहविषा vविधेम परिचरेम । vवयं vरयीणां धनानां vपतयः vस्याम भवेम ॥

त्रातारो देवा अधि वोचता नो मा नो निद्रा ईशत मोत जल्पिः ।
वयं सोमस्य विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥ १४ ॥

त्रातारः । देवाः । अधि । वोचत । नः । मा । नः । निऽद्रा । ईशत । मा । उत । जल्पिः ।
वयम् । सोमस्य । विश्वह । प्रियासः । सुऽवीरासः । विदथम् । आ । वदेम ॥ १४ ॥

हे vत्रातारः रक्षितारो हे vदेवाः vनः अस्मान् vअधि vवोचत अधिवचनं कुरुत । किंच vनः अस्मान् vनिद्राः स्वमाः vमा vईशत ईश्वरा मा भूवन् बाधितुम् । vउत अपि च vजल्पिः

---

१. ख-त-न-भ-श–'पीडाः' नास्ति । २. ख-त-न-भ१-२-श–अपरामे; घ–त्यजंतु अपराधे । ३. त-न-भ-श–मर्तान् । ४. ख-त-भ–°पीयमेव ।

निन्दकः अस्मान् ᵛमा निन्दतु । ᵛवयं ᵛसोमस्य ᵛप्रियासः प्रियाः स्याम ᵛविश्वह सर्वेष्वप्यहःसु । सर्वदेत्यर्थः । ᵛसुवीरासः शोभनपुत्राः सन्तः ᵛविदथं स्तोत्रम् ᵛआ ᵛवदेम आभिमुख्येन वदेम । अथवा सुपुत्रा विदथं गृहमा वदेम । आवदनं पुत्रपौत्राणां धनेनोपच्छन्दनम् ॥

'त्वं नः सोम विश्वतः' इति सौम्ये पशौ हविषोऽनुवाक्या । सूत्रितं च—'त्वं नः सोम विश्वतो वयोधा या ते धामानि दिवि या पृथिव्याम्' (आश्व. श्रौ. ३. ७) इति ॥

त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विश नृचक्षाः ।
त्वं न इन्द ऊतिभिः सजोषाः पाहि पश्चादुत वा पुरस्तात् ॥ १५ ॥

त्वम् । नः । सोम । विश्वतः । वयःऽधाः । त्वम् । स्वःऽवित् । आ । विश । नृऽचक्षाः । त्वम् । नः । इन्दो इति । ऊतिऽभिः । सऽजोषाः । पाहि । पश्चात् । उत । वा । पुरस्तात् ॥ १५ ॥

हे ᵛसोम ᵛत्वं ᵛनः अस्माकं ᵛविश्वतः सर्वाभ्यो दिग्भ्यः ᵛवयोधाः अन्नदाता । तथा ᵛत्वं ᵛस्वर्वित् स्वर्गलम्भकः ᵛनृचक्षाः सर्वमनुष्यद्रष्टा त्वम् ᵛआ ᵛविश । हे ᵛइन्दो ᵛत्वं ᵛसजोषाः[1] सह प्रीयमाणः सन् ᵛऊतिभिः सह । अथवोतयो गन्तारो मरुतः । तैः सहितः सन् ᵛपश्चात् पश्चात् ᵛउत ᵛवा ᵛपुरस्तात् च ᵛपाहि[2] ॥ ॥ १३ ॥ ॥ ६ ॥

॥ अथ वालखिल्यम् ॥

॥ प्रथमं सूक्तम् ॥

अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ १ ॥

१. ख-ग-घ-त-न-भ-श-ऊतिभिः । २. घ-पाहि रक्ष ।

वालखिल्यसूक्तभाष्यम्*

श्रीगणेशाय नमः । श्रुतिकञ्जार्थलक्ष्मी यो विकासयति हृद्गतम्(? °ताम्) । स पायात्सच्चिदानन्दः सूर्यमण्डलगो हरिः ॥ 'अभि प्र वः' इति दशर्चं प्रथमं सूक्तं प्रस्कण्वस्यार्षमैन्द्रम् । अनुक्रान्तं च—'अभि प्र दश प्रस्कण्वः प्रागाथं तत्' इति । अयुजां बृहती छन्दः । युजां सतोबृहती छन्दः । विनियोगः सूत्रादवगन्तव्यः ॥

(१) ऋषिरात्मानं ब्रूते । हे प्रस्कण्व वः युष्माकम् । बहुवचनं पुत्रपौत्राभिप्रायेण । युष्मत्स्वामिभूतमिन्द्रमभिलक्ष्य प्रार्च प्रकर्षेण पूजय । तत्र दृष्टान्तः । यथा विदे विद्वांसं स्वगुरुं पूजयसि तद्वत् । कीदृशम् । सुराधसम् । शोभनं राधो धनं यस्य तम् । कोऽसाविन्द्र इत्युच्यते । य इन्द्रः मघवा धन-

*वाराणसीस्थराजकीयसंस्कृतपाठशालायाः प्राप्ते ज्ञ-संज्ञकलिखितपुस्तके वालखिल्यसूक्तानां भाष्यं लिखितमुपलभ्यते । परं त्वितरेषु सर्वेष्वपि पुस्तकेष्वनुपलम्भात् व्याख्याशैल्या विभिन्नत्वाच्च नैतत्सायणाचार्यकृतमिति व्यक्तं प्रतीयते । तथाप्येतद्विदुषामुपयोगाय स्यादिति मत्वात्र दीयते ।

एतस्मिन् विषयेऽस्माभिः पृष्टा एतत्पाठशालाधिकारिणः एवं लिखन्ति—'एतद्धस्तलिखितं पाठशालायाः कृते रेवानगरे क्रीतमासीत् । तस्य लेखनं पुण्यपत्तन एवाभूदिति श्रूयते । एतल्लिखितपुस्तकगतवालखिल्यसूक्तभाष्यं केन विरचितमिति निश्चितं वक्तुमशक्यम । न केनापि वाराणसीस्थेन पण्डितेनैतद्विरचितमिति निश्चितमेव' ।

अभि । प्र । वः । सुऽराधसम् । इन्द्रम् । अर्च । यथा । विदे ।
यः । जरितृऽभ्यः । मघऽवा । पुरुऽवसुः । सहस्रेणऽइव । शिक्षति ॥ १ ॥

शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥ २ ॥

शतानीकाऽइव । प्र । जिगाति । धृष्णुऽया । हन्ति । वृत्राणि । दाशुषे ।
गिरेःऽइव । प्र । रसाः । अस्य । पिन्विरे । दत्राणि । पुरुऽभोजसः ॥ २ ॥

आ त्वा सुतास इन्दवो मदा य इन्द्र गिर्वणः ।
आपो न वज्रिन्नोक्यं सरः पृणन्ति शूर राधसे ॥ ३ ॥

आ । त्वा । सुतासः । इन्दवः । मदाः । ये । इन्द्र । गिर्वणः ।
आपः । न । वज्रिन् । अनु । ओक्यम् । सरः । पृणन्ति । शूर । राधसे ॥ ३ ॥

अनेहसं प्रतरणं विवक्षणं मध्वः स्वादिष्ठमीं पिब ।
आ यथा मन्दसानः किरासि नः प्र क्षुद्रेव त्मना धृषत् ॥ ४ ॥

अनेहसम् । प्रऽतरणम् । विवक्षणम् । मध्वः । स्वादिष्ठम् । ईम् । पिब ।
आ । यथा । मन्दसानः । किरासि । नः । प्र । क्षुद्राऽइव । त्मना । धृषत् ॥ ४ ॥

वान् पुरूवसुः बहूनां वासयिता जरितृभ्यः स्तोतृभ्यः सहस्रेणेव अपरिमितमेव शिक्षति ददाति । धनादिकमिति शेषः । अत्र योशब्दोऽवधारणार्थः । सहस्रेणेव (? इवशब्दोऽवधारणार्थः । सहस्रेणैव) ॥

(२) धृष्णुया शत्रुधर्षणशील इन्द्रः शतानीकेव अपरिमितान्येव रिपुसैन्यानि प्र जिगाति प्रकर्षेण गच्छति । स्ववशीकरोति । किंच य इन्द्रः दाशुषे हविर्दत्तवतो यजमानस्य वृत्राणि पापानि शत्रून् वा हन्ति नाशयति । तस्यास्य पुरुभोजसः बहुपालकस्येन्द्रस्य दत्राणि हिरण्यादीनि धनानि । दत्रमत्र हिरण्यं ' मरुत् दत्रम् ' इति हिरण्यनामसु पाठात् । प्र पिन्विरे प्रकर्षेण प्रीणयन्ति तर्पयन्ति जगत् । अत्र दृष्टान्तः । गिरेरिव पर्वतस्य मेघस्य वा संबन्धिनो यथा रसाः जलानि जगत् प्रीणयन्ति तद्वत् ॥

(३) हे गिर्वणः गीर्भिर्वननीयेन्द्र मदाः हर्षकराः ये इन्दवः सोमाः सुतासः अभिषुताः सन्ति ते हे वज्रिन् वज्रोपेत हे शूर शौर्ययुक्तेन्द्र ओक्यं समवयितुमर्हं (? समवेतुमर्हं) त्वा त्वामापृणन्ति सर्वतः पूरयन्ति । स्वरसप्रदानेन त्वां तर्पयन्तीत्यर्थः । कथम् । आपो न सरः । ता यथा महाजलाशयं पूरयन्ति तद्वत् । किमर्थम् । राधसे यजमानस्य धनलाभाय ॥

(४) हे इन्द्र अनेहसं यथाकालम् ईम् एनं सोमं पिब । कीदृशम् । प्रतरणं प्रवर्धनम् । प्रपूर्वस्तिरतिर्वर्धनार्थः । विवक्षणम् अतिशयेन स्तुत्यं मध्वः मधुनः सकाशादपि स्वादिष्ठं स्वादुतमम् । कमेतम् । यस्य पानेन मन्दसानः हर्षीणि संभजमानस्त्वं नोऽस्मभ्यं यजमानेभ्यः यथा यथावत् फलमाकिरासि कात्स्न्येन विक्षिपसि । ददासीत्यर्थः । केभ्य इव । धृषत् शत्रुधर्षकस्त्वं त्मना आत्मना स्वयमेव क्षुद्रेव दीनेभ्य इव तेभ्यो यथा प्र ददासि तद्वत् । उपसर्गवशाद्योग्यक्रियाध्याहारः ॥

आ नः स्तोममुप द्रवद्धियानो अश्वो न सोतृभिः ।
यं ते स्वधावन्त्स्वदयन्ति धेनव इन्द्र कण्वेषु रातयः ॥ ५ ॥

आ । नः । स्तोमम् । उप । द्रवत् । हियानः । अश्वः । न । सोतृऽभिः ।
यम् । ते । स्वधाऽवन् । स्वदयन्ति । धेनवः । इन्द्र । कण्वेषु । रातयः ॥ ५ ॥ ॥ १४ ॥

उग्रं न वीरं नमसोप सेदिम विभूतिमक्षितावसुम् ।
उद्रीव वज्रिन्नवतो न सिञ्चते क्षरन्तीन्द्र धीतयः ॥ ६ ॥

उग्रम् । न । वीरम् । नमसा । उप । सेदिम । विऽभूतिम् । अक्षितऽवसुम् ।
उद्रीऽइव । वज्रिन् । अवतः । न । सिञ्चते । क्षरन्ति । इन्द्र । धीतयः ॥ ६ ॥

यद्ध नूनं यद्वा यज्ञे यद्वा पृथिव्यामधि ।
अतो नो यज्ञमाशुभिर्महेमत उग्र उग्रेभिरा गहि ॥ ७ ॥

यत् । ह । नूनम् । यत् । वा । यज्ञे । यत् । वा । पृथिव्याम् । अधि ।
अतः । नः । यज्ञम् । आशुऽभिः । महेऽमते । उग्रः । उग्रेभिः । आ । गहि ॥ ७ ॥

---

(५) हे इन्द्र स भवान् नोऽस्मदीयैः सोतृभिः सोमाभिषवकर्तृभिरध्वर्यादिभिर्ऋत्विग्भिः कृतं स्तोत्रविशेषम् आ आभिमुख्येन उप द्रवत् उपगच्छतु समीपं प्राप्नोतु । क इव । हियानः प्रेर्यमाणः अश्वो न अश्व इव । स यथा अभिलषितं देशं प्राप्नोति तद्वत् । हे स्वधावन् अन्नवन्निन्द्र ते तव स्वभूतानि धेनवः तर्पकाणि कण्वेषु अस्मासु वर्तमानानि रातयः हविर्दानानि यं त्वां स्वदयन्ति स्वादयन्ति । त्वदुदरे प्रविश्य त्वां तर्पयन्तीत्यर्थः । स भवान् उप द्रवत् इति पूर्वेण संबन्धः ॥ ॥ १४ ॥

(६) हे इन्द्र वीरं विशेषेण शत्रुभटान् प्रेरयन्तं त्वां नमसा हविर्लक्षणेनान्नेन सह । यद्वा नमसा प्रह्वीभावेन सह उप सेदिम शरणं प्राप्नुमो वयम् । कमिव । उग्रं न उद्गूर्णबलमिव । तं यथा केचन दीनाः शरणं प्राप्नुवन्ति तद्वत् । कीदृशं त्वाम् । विभूतिं विविधैश्वर्योपेतम् । अथवा विविधभवनस्वभावम् । ' इन्द्रो मायाभिः पुरुरूप ईयते ' इति श्रुतेः । ' रूपंरूपं प्रतिरूपो बभूव' इति श्रुत्यन्तरात् । अक्षितवसुम् अक्षीणधनम् । किंच हे वज्रिन् वज्रवन्निन्द्र सिञ्चते स्वर्गादिफलसेक्त्रे तुभ्यं त्वदर्थं धीतयः अस्मदङ्गुलयः क्षरन्ति स्रवन्ति सोमरसम् । क इव । उद्रीव । उदकान्(? उदकवान्[1]) अवतो न कूप इव । स यथा सस्यादिसेक्त्रे जलं क्षरति तद्वत् । अत्र इवशब्दोऽनर्थकः ।

(७) हे महेमते पूजासक्तबुद्धे इन्द्र यद्ध यत्र क्वचित् स्थानविशेषे नूनं निश्चितं वर्तसे । यत् यत्र वा यज्ञे अध्वरे वर्तसे । यत् यत्र वा पृथिव्याम् अधि अधिकं वर्तसे । अतः अस्मात्स्थानविशेषात् उग्रः उद्गूर्णबलस्त्वम् उग्रेभिः उद्गूर्णबलैः आशुभिः शीघ्रगामिभिरश्वैः नोऽस्माकं यज्ञम् आ गहि आगच्छ ॥

---

१. ऋ. सं. ८. ५०. ६ द्रष्टव्यम् ।

अजिरासो हरयो ये ते आशवो वाताइव प्रसक्षिणः ।
येभिरपत्यं मनुषः परीयसे येभिर्विश्वं स्वर्दृशे ॥ ८ ॥

अजिरासः । हरयः । ये । ते । आशवः । वाताःऽइव । प्रऽसक्षिणः ।
येभिः । अपत्यम् । मनुषः । परिऽईयसे । येभिः । विश्वम् । स्वः । दृशे ॥ ८ ॥

एतावतस्त ईमह इन्द्र सुम्नस्य गोमतः
यथा प्रावो मघवन्मेध्यातिथिं यथा नीपातिथिं धने ॥ ९ ॥

एतावतः । ते । ईमहे । इन्द्र । सुम्नस्य । गोऽमतः ।
यथा । प्र । आवः । मघऽवन् । मेध्यऽअतिथिम् । यथा । नीपऽअतिथिम् । धने ॥ ९ ॥

यथा कण्वे मघवन्त्रसदस्यवि यथा पक्थे दशव्रजे ।
यथा गोशर्ये असनोर्ऋजिश्वनीन्द्र गोमद्धिरण्यवत् ॥ १० ॥

यथा । कण्वे । मघऽवन् । त्रसदस्यवि । यथा । पक्थे । दशऽव्रजे ।
यथा । गोऽशर्ये । असनोः । ऋजिश्वनि । इन्द्र । गोऽमत् । हिरण्यऽवत् ॥ १० ॥ ॥१५॥

---

(८) हे इन्द्र ते तव स्वभूताः ये हरयः अश्वाः वाताइव वायव इव प्रसक्षिणः प्रकर्षेण संगच्छमानाः सन्ति । कीदृशास्ते पुनः । आजिरासः शत्रून् क्षिपन्तः आशवः शीघ्रगामिनश्च । येभिः यैरश्वैः मनुषः मनोः अपत्यम् अपतनहेतुं यजमानं परीयसे सर्वत आगच्छसि येभिः यैश्चाश्वैः विश्वं स्वः सर्वं स्वर्लोकं दृशे द्रष्टुमिच्छसि तैरा गहि इति पूर्वेणान्वयः ॥

(९) हे मघवन् धनवन्निन्द्र धने निमित्तभूते सति यथा येन प्रकारेण मेध्यातिथिम् एतन्नामकऋषिं प्रावः प्रकर्षेण रक्षितवानसि यथा येन च प्रकारेण नीपातिथिम् एतन्नामानमृषिं प्रावः एतावतः इयदेव ते तव स्वभूतं गोमतः गवाश्वाद्युपेतं सुम्नस्य सुखम् ईमहे याचामहे वयं कण्वाः । सर्वत्र कर्मणि षष्ठ्यः ॥

(१०) हे मघवन् धनवन्निन्द्र यथा येन प्रकारेण कण्वे एतन्नाम्नि मत्पितरि गोमत् गवोपेतं हिरण्यवत् काञ्चनोपेतं च सुम्नम् असनोः दत्तवानसि । यथा च त्रसदस्यवि एतन्नामके राज्ञि यथा च पक्थे एतत्संज्ञे राज्ञि यथा च दशव्रजे एतत्संज्ञके नृपे यथा च गोशर्ये एतन्नाम्नि क्षत्रिये यथा च ऋजिश्वनि एतत्संज्ञके राजनि गवाद्युपेतं सुम्नमसनोः एतावदीमहे इति पूर्वेण संबन्धः ॥ ॥ १५ ॥

'प्र सु श्रुतम्' इति दशर्चं द्वितीयं सूक्तं काण्वस्य पुष्टिगोरार्षमैन्द्रम् । अनुक्रम्यते च–'प्र सु श्रुतं पुष्टिगुः' इति । कण्वस्य पुत्रः पुष्टिगुः ऋषिः । इन्द्रो देवता । अयुजां बृहती छन्दः । युजां सतोबृहती छन्दः । विनियोगः सूत्रादवगन्तव्यः ॥

॥ अथ द्वितीयं सूक्तम् ॥

प्र सु श्रुतं सुराधसमर्चा शक्रमभिष्टये ।
यः सुन्वते स्तुवते काम्यं वसु सहस्रेणेव मंहते ॥ १ ॥

प्र । सु । श्रुतम् । सुऽराधसम् । अर्च । शक्रम् । अभिष्टये ।
यः । सुन्वते । स्तुवते । काम्यम् । वसु । सहस्रेणऽइव । मंहते ॥ १ ॥

शतानीका हेतयो अस्य दुष्टरा इन्द्रस्य समिषो महीः ।
गिरिर्न भुज्मा मघवत्सु पिन्वते यदीं सुता अमन्दिषुः ॥ २ ॥

शतऽअनीकाः । हेतयः । अस्य । दुस्तराः । इन्द्रस्य । सम्ऽइषः । महीः ।
गिरिः । न । भुज्मा । मघवत्ऽसु । पिन्वते । यत् । ईम् । सुताः । अमन्दिषुः ॥ २ ॥

यदीं सुतास इन्दवोऽभि प्रियममन्दिषुः ।
आपो न धायि सवनं म आ वसो दुघाइवोप दाशुषे ॥ ३ ॥

यत् । ईम् । सुतासः । इन्दवः । अभि । प्रियम् । अमन्दिषुः ।
आपः । न । धायि । सवनम् । मे । आ । वसो इति । दुघाःऽइव । उप । दाशुषे ॥ ३ ॥

---

(१) ऋषिरात्मानं ब्रूते । हे पुष्टिगो त्वम् अभिष्टये अभिलषितसिद्धये तं शक्रं सर्वकर्मसु शक्तमिन्द्रं सु सुष्ठु यथा तथा प्र अर्च प्रकर्षेण पूजय । कीदृशम् । श्रुतं विख्यातं सुराधसं शोभनधनोपेतम् । तं कम् । य इन्द्रः सुन्वते सोमाभिषवं कुर्वते स्तुवते स्तुतिं कुर्वते यजमानाय काम्यं कामिनं(? कमनीयं) वसु धनं सहस्रेणेव असंख्यातमेव मंहते ददाति तम् । मंहतिर्दानार्थः । दानकर्मसु तत्पाठात् ॥

(२) सुता अभिषुताः सोमाः यद्यदा ईमेनमिन्द्रम् अमन्दिषुः अमादयन् तदा अस्येन्द्रस्य हेतयः हननसाधनान्यायुधानि मघवत्सु हविर्लक्षणधनवत्सु यजमानेषु पिन्वते । तदीयशत्रुधनानि तेषु समर्प्य तान् प्रीणयन्तीत्यर्थः । क इव । भुज्मा गिरिर्न पालको मेघ इव । स यथा भुवि जलानि समर्प्य तां प्रीणयति तद्वत् । शत्रुधनाहरणं तु ' शत्रूयतामा भरा भोजनानि ' (ऋ. सं. ५. ४. ५) इत्यादिश्रुतिप्रसिद्धम् । कीदृश्यो हेतयः । शतानीकाः । शतमपरिमितानि अनीकानि मुखानि यासां ताः । सर्वतोमुखा इत्यर्थः । अत एव दुस्तरा दुर्निवार्याः । समिषः सम्यक् इट् अन्नं याभ्यस्ताः । महीः महत्यः ॥

(३) हे इन्द्र यद्यदा सुतासः अभिषुताः इन्दवः सोमाः यं(? प्रियं)वल्लभम् ईम् एनं त्वाम् अभि अभिलक्ष्य अमन्दिषुः अमादयन् । तदा हे वसो वासयितरिन्द्र त्वया दाशुषे हविर्दत्तवते मे मह्यं मदर्थं सवनं यज्ञः उपगम्य आ धायि कात्स्न्र्येन सफलीकृतः । तत्र दृष्टान्तः । आपो न । ता यथा स्नानपानादिना सफलीक्रियन्ते तद्वत् । अपरो दृष्टान्तः । दुघाइव । हविर्दुघा धेनवो यथा सांनाय्यसेवनादिना सफलीक्रियन्ते तद्वत् सोमपानादिना यज्ञः सफलीकृत इत्यर्थः ॥

अनेहसं वो हवमानमूतये मध्वः क्षरन्ति धीतयः ।
आ त्वा वसो हवमानास इन्दव उप स्तोत्रेषु दधिरे ॥ ४ ॥

अनेहसम् । वः । हवमानम् । ऊतये । मध्वः । क्षरन्ति । धीतयः ।
आ । त्वा । वसो इति । हवमानासः । इन्दवः । उप । स्तोत्रेषु । दधिरे ॥ ४ ॥

आ नः सोमे स्वध्वर इयानो अत्यो न तोशते ।
यं ते स्वदावन्त्स्वदन्ति गूर्तयः पौरे छन्दयसे हवम् ॥ ५ ॥

आ । नः । सोमे । सुऽअध्वरे । इयानः । अत्यः । न । तोशते ।
यम् । ते । स्वदाऽवन् । स्वदन्ति । गूर्तयः । पौरे । छन्दयसे । हवम् ॥ ५ ॥ ॥१६॥

प्र वीरमुग्रं विविचिं धनस्पृतं विभूतिं राधसो महः ।
उद्रीव वज्रिन्नवतो वसुत्वना सदा पीपेथ दाशुषे ॥ ६ ॥

प्र । वीरम् । उग्रम् । विविचिम् । धनऽस्पृतम् । विऽभूतिम् । राधसः । महः ।
उद्रीऽइव । वज्रिन् । अवतः । वसुऽत्वना । सदा । पीपेथ । दाशुषे ॥ ६ ॥

---

(४) हे ऋत्विजः वः युष्मत्संबन्धिन्यः धीतयोऽङ्गुलयः ऊतये रक्षार्थं हवमानं स्तूयमानमिन्द्रमुद्दिश्य मध्वः मधुररसं सोमं क्षरन्ति । कीदृशम् । अनेहसम् । न आहन्यत इत्यनेहः तम् । शत्रुभिरनभिभाव्यमित्यर्थः । हे वसो वासयितरिन्द्र हवमानासः स्तूयमानाः इन्दवः सोमाः स्तोत्रेषु निमित्तेषु त्वा त्वाम् उप समीपे आ दधिरे आभिमुख्येन स्थापितवन्तः ॥

(५) नोऽस्माकं यजमानानां संबन्धिनि स्वध्वरे शोभनयज्ञे सोमे सोमपाने निमित्तभूते सति अत्यो न सततगमनशीलोऽश्व इव इयानः गच्छन्निन्द्रः आ तोशते अस्मच्छत्रून् हिनस्ति । तोशतिर्वधकर्मा । ' नितोशते निवर्हयति ' इति वधकर्मसु पाठात् । इन्द्रं प्रत्यक्षीकृत्य ब्रूते । हे स्वदावन् आस्वादनकुशलेन्द्र ते तव स्वभूताः गूर्तयः उद्यताः स्तुतयः यं त्वां स्वदन्ति आत्मानमास्वादयन्ति स त्वं पौरे पुरजनसमूहे हवमात्मनः स्तुतिं छन्दयसे कामयसे । ऋत्विग्भिः स्वस्तुतिः कर्तव्येत्यभिलषसीत्यर्थः ॥ ॥१६॥

(६) हे इन्द्र वीरं विशेषेण शत्रूणां प्रेरयितारं महः महत् राधसः राधो धनम् । कर्मणि षष्ठ्यौ । प्र प्रार्थये याचामि । उपसर्गवशाद्योग्यक्रियाध्याहारः । कीदृशं त्वाम् । उग्रमुद्गूर्णबलं विविचिं पुण्यापुण्ययोर्विवेक्तारं धनस्पृतं धनदातारं विभूतिं विविधैश्वर्योपेतान् (? ष्पेतं) यतः हे वज्रिन् वज्रवन्निन्द्र त्वं दाशुषे हविषां दातारम् । कर्मणि चतुर्थी । सदा सर्वदा वसुत्वना धनदानेन पीपेथ आप्याययसि । वर्धयसीत्यर्थः । क इव । उद्रीव अवतः उदकवान् कूप इव । स यथा उदकदानेन जगदाप्याययति तद्वत् ॥

यद्ध नूनं परावति यद्वा पृथिव्यां दिवि ।
युजान इन्द्र हरिभिर्महेमत ऋष्व ऋष्वेभिरा गहि ॥ ७ ॥

यत् । ह । नूनम् । पराऽवति । यत् । वा । पृथिव्याम् । दिवि ।
युजानः । इन्द्र । हरिऽभिः । महेऽमते । ऋष्वः । ऋष्वेभिः । आ । गहि ॥ ७ ॥

रथिरासो हरयो ये ते अस्रिध ओजो वातस्य पिप्रति ।
येभिर्नि दस्युं मनुषो निघोषयो येभिः स्वः परीयसे ॥ ८ ॥

रथिरासः । हरयः । ये । ते । अस्रिधः । ओजः । वातस्य । पिप्रति ।
येभिः । नि । दस्युम् । मनुषः । निऽघोषयः । येभिः । स्वरिति स्वः । परिऽईयसे ॥८॥

एतावतस्ते वसो विद्याम शूर नव्यसः ।
यथा प्राव एतशं कृत्व्ये धने यथा वशं दशव्रजे ॥ ९ ॥

एतावतः । ते । वसो इति । विद्याम । शूर । नव्यसः ।
यथा । प्र । आवः । एतशम् । कृत्व्ये । धने । यथा । वशम् । दशऽव्रजे ॥ ९ ॥

यथा कण्वे मघवन्मेधे अध्वरे दीर्घनीथे दमूनसि ।
यथा गोशर्ये असिषासो अद्रिवो मयि गोत्रं हरिश्रियम् ॥ १० ॥

---

(७) हे महेमते पूजासक्तबुद्धे इन्द्र यद्ध यत्र क्वचित् परावति दूरदेशे नूनं निश्चितं वर्तसे । यद्वा यत्र वा पृथिव्यां भुवि दिवि द्युलोके वा वर्तसे । अस्मात् स्थानविशेषात् ऋष्वैः महद्भिः हरिभिः एतत्संज्ञकैरश्वैः रथं युजानः युक्तं कुर्वाणः ऋष्वः महांस्त्वमा गहि आगच्छास्मद्यज्ञम् ॥

(८) ये हरयोऽश्वाः ते तव स्वभूताः रथिरासः रथार्हाः अस्रिधः । स्रिधो हिंसकाः शत्रवः । तद्रहिताः सन्ति । येभिर्यैरश्वैः मनुषः मनुष्यस्य यजमानस्य संबन्धिनं दस्युमुपक्षपयितारं शत्रुं निः निरन्तरं निघोषयः नितरामाक्रोशयसि । अश्वशफप्रहारैस्तं चूर्णयन् विशब्दितं करोषीत्यर्थः । किंच येभिः यैरश्वैः स्वः स्वर्लोकं परीयसे परितो गच्छसि । ते हरयो वातस्य वायोः ओजः बलं पिप्रति पूरयन्ति । वायोः सामर्थ्यमात्मनि संपादयन्तीत्यर्थः ॥

(९) हे वसो वासयितः हे शूर विक्रान्तेन्द्र यथा येन प्रकारेण कृत्व्ये कर्तव्ये धने निमित्ते सति एतशम् एतन्नामानमृषिं प्रावः प्रकर्षेण रक्षितवानसि । किंच यथा येन प्रकारेण दशव्रजे दशसंख्याक-शत्रुसमूहे वशम् एतत्संज्ञकमृषिं प्रावः प्रकर्षेण रक्षितवानसि । एतावतः एतावत्पराक्रमोपेतं ते त्वां नव्यसः स्तुत्यं विद्याम जानीमो वयम् । सर्वत्र कर्मणि षष्ठी ॥

(१०) हे अद्रिवः वज्रिवन् (!) इन्द्र मेधे यज्ञे यथा येन प्रकारेण कण्वे एतन्नामके ऋषौ निमित्ते हरिश्रियम् । हरिः जगत्तापहर्त्री हरितवर्णा वा श्रीः जललक्ष्मीर्यस्य तादृशम् । गोत्रं मेघम् असिसासः दत्तवानसि । ईदृशे कण्वे अध्वरे । ध्वरतिर्हिंसाकर्मा । तद्रहिते दीर्घनीथे दीर्घं स्वर्लोकपर्यन्तं नीथं हविः-

यथा । कण्वे । मघऽवन् । मेधे । अध्वरे । दीर्घऽनीथे । दमूनसि ।
यथा । गोऽशर्ये । असिसासः । अद्रिऽवः । मयि । गोत्रम् । हरिऽश्रियम् ॥ १० ॥ ॥ १७ ॥

॥ अथ तृतीयं सूक्तम् ॥

यथा मनौ सांवरणौ सोममिन्द्रापिबः सुतम् ।
नीपातिथौ मघवन्मेध्यातिथौ पुष्टिगौ श्रुष्टिगौ सचा ॥ १ ॥

यथा । मनौ । साम्ऽवरणौ । सोमम् । इन्द्र । अपिबः । सुतम् ।
नीपऽअतिथौ । मघऽवन् । मेध्यऽअतिथौ । पुष्टिऽगौ । श्रुष्टिऽगौ । सचा ॥ १ ॥

पार्ष्द्वाणः प्रस्कण्वं समसादयच्छयानं जिव्रिमुद्धितम् ।
सहस्राण्यसिषासद्वामृषिस्त्वोतो दस्यवे वृकः ॥ २ ॥

पार्ष्द्वाणः । प्रस्कण्वम् । सम् । असादयत् । शयानम् । जिव्रिम् । उद्धितम् ।
सहस्राणि । असिसासत् । गवाम् । ऋषिः । त्वाऽऊतः । दस्यवे । वृकः ॥ २ ॥

य उक्थेभिर्न विन्धते चिकिद्य ऋषिचोदनः ।
इन्द्रं तमच्छा वद नव्यस्या मत्यरिष्यन्तं न भोजसे ॥ ३ ॥

प्रापणं यस्य तथाभूते । पुनः कीदृशे । दमूनसि दानमनसि उदारे । यथा च गोशर्ये एतन्नामके ऋषौ मेघं दत्तवानसि तथा मयि पुष्टिगौ हरिश्रियं गोत्रं देहि । यथा तयोरनुग्रहदृष्टया मेघवृष्टिं कृतवानसि तथा मय्यपि कृपादृष्टया अभिलषितवृष्टिं कुर्वित्यभिप्रायः ॥ ॥ १७ ॥

'यथा मनौ सांवरणौ' इति दशर्चं तृतीयं सूक्तं काण्वस्य श्रुष्टिगोरार्षमैन्द्रम् । अनुक्रान्तं च— 'यथा मनौ श्रुष्टिगुः' इति । अयुजां बृहती छन्दः युजां सतोबृहती छन्दः । विनियोगः सूत्रादवगन्तव्यः ॥

(१) हे इन्द्र यथा येन प्रकारेण सांवरणौ संवरणस्य पुत्रे मनौ वर्तमानं सुतमभिषुतं सोममपिबः पीतवानसि । तथा हे मघवन् धनवन्निन्द्र नीपातिथौ । नयति हविर्देवान् पाति रक्षति यजमानं चेति नीपः । तादृशोऽतिथिर्यस्य तस्मिन् । एतत्संज्ञके ऋषौ मेध्यातिथौ । मेध्यः यज्ञार्हः अतिथिर्यस्य तादृशे एतन्नामके ऋषौ पुष्टिगौ । पुष्टिः कुटुम्बपोषिका गौर्यस्य तादृशे ऋषौ । 'क्तिच्क्तौ च संज्ञायाम्' इति पुषिधातोः कर्तरि क्तिच् । श्रुष्टिगौ । श्रुष्टिः शीघ्रव्यापिनी गौर्यस्य तादृशे मयि च । 'श्रुष्टीति क्षिप्रनाम आशु अष्टि' इति निरुक्तमत्रानुसंधेयम् । एतेष्वस्मासु वर्तमानभिषुतं सोमं सचा सहैव पिबेति शेषः । इह सचापदेन युगपदनेकरूपधारणशक्तिः सूच्यते । संभवति च सा । 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिश्रुतेः ॥

(२) हे इन्द्र पार्ष्द्वाणः परुषवाक् श्चिछत्तुः(? कश्चिच्छत्रुः) । वाण इति वाङ्नाम 'वाणीचीवाणः' इति तन्नामसु पाठात् । शयानं स्वपन्तं प्रस्कण्वं कण्वस्य पुत्रं यदा समसादयत् सम्यगपीडयत् । कीदृशम् । जिव्रिं जराजीर्णम् उद्धितम् ऊर्ध्वदेशे स्थापितम् । तदा त्वोतः त्वया इन्द्रेण रक्षितः स ऋषिः प्रस्कण्वः दस्यवे उपक्षपयितुः शत्रोः वृकः विकर्तनः सन् तदीयानि गवां सहस्राणि असिसासत् संभजते स्म । इत्थंप्रभावस्त्वमसि तस्मात्त्वां स्तुम इत्यर्थः ॥

यः । उक्थेभिः । न । विन्धते । चिकित् । यः । ऋषिऽचोदनः ।
इन्द्रम् । तम् । अच्छ । वद । नव्यस्या । मती । अरिष्यन्तम् । न । भोजसे ॥ ३ ॥

यस्मा अर्कं सप्तशीर्षाणमानृचुस्त्रिधातुमुत्तमे पदे ।
स त्विमा विश्वा भुवनानि चिक्रददादिज्जनिष्ट पौंस्यम् ॥ ४ ॥

यस्मै । अर्कम् । सप्तऽशीर्षाणम् । आनृचुः । त्रिऽधातुम् । उत्ऽतमे । पदे ।
सः । तु । इमा । विश्वा । भुवनानि । चिक्रदत् । आत् । इत् । जनिष्ट । पौंस्यम् ॥ ४ ॥

यो नो दाता वसूनामिन्द्रं तं हूमहे वयम् ।
विद्मा ह्यस्य सुमतिं नवीयसीं गमेम गोमति व्रजे ॥ ५ ॥

यः । नः । दाता । वसूनाम् । इन्द्रम् । तम् । हुमहे । वयम् ।
विद्म । हि । अस्य । सुऽमतिम् । नवीयसीम् । गमेम । गोऽमति । व्रजे ॥ ५ ॥ ॥१८॥

---

(३) ऋषिरात्मानं ब्रूते । हे श्रुष्टिगो य इन्द्रः न संप्रति उक्थेभिः उक्थैः स्तोत्रैः स्तुतः सन् चिकित् स्तोतुः ज्ञानं विन्धते परिचरति । विधतिः परिचरणकर्मा । मत्स्तवने तव सम्यक् ज्ञानमस्तीत्या-(?त्य)भिनन्दति । यश्चेन्द्रः ऋषिचोदनः ऋषीणां मन्त्राणां तद्द्रष्टॄणां वा चोदनः प्रवर्तकोऽस्ति तमिन्द्रं परमेश्वरम् अच्छाभिलक्ष्य नव्यस्या नवतना(?नवतरां) मती मतिं स्तुतिं वद ब्रूहि । तत्र दृष्टान्तः । अरिष्यन्तं न भोजसे । यथा कश्चिदरिष्यन्तम् अहिंसन्तं स्वामिनं भोजसे स्वपालनाय नवतरां स्तुतिं ब्रूते तद्वत् ॥

(४) यस्मै इन्द्राय परमेश्वराय तदर्थम् उत्तमे पदे उत्कृष्टतमे स्थाने द्युलोकाख्ये स्थितम् अर्कम् अर्चनीयमादित्यमानृचुः अर्चन्ति सर्वे । 'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' (छा. उ. १. ६. ६) इत्यादिश्रुत्युक्तं यदीयं स्वरूपमुपलब्धम् । सर्वे सूर्यमाराधयन्तीत्यर्थः । कीदृशमर्कम् । सप्तशीर्षाणम् । सप्तसंख्याकाः शीर्षवत् प्रधानभूता रश्मयो यस्य तादृशम् । त्रिधातुं त्रयाणां भूरादिलोकानां पोषकम् । सूर्यस्य त्रिलोकीपोषकत्वं तु वृष्ट्यादिव्यापारेण प्रसिद्धम् । यत्स्वरूपलाभाय अर्कमर्चन्ति स तु परमेश्वरः इमा इमानि दृश्यमानानि विश्वा सर्वाणि भुवनानि भूतजातानि देवासुरमनुष्यरूपाणि उद्दिश्य अचिक्रदत् आक्रन्दति । माध्यमिक्या वाचा ददद्शब्दैर्गम(?र्दम)दयादानवाचकैः । आदित् अनन्तरमेव पौंस्यं बलं शिक्षालक्षणं जनिष्ट जनयति आविर्भावयति । अयं भावः । परमेश्वर आदौ मेघस्तनितलक्षणया स्ववाण्या भूक्षेभ्यो (?भूस्थेभ्यो) हितमुपदिशति । अनाकर्णिते च तस्मिन् पश्चाद्दारिद्र्यादिलक्षणां शिक्षामाविष्करोतीति । अत्राभिहितोऽर्थो बृहदारण्यके खिलकाण्डे 'त्रया ह वै प्राजापत्याः' इत्यादिना ग्रन्थेन प्रपञ्चितः (बृ. उ. ५. २) ॥

(५) य इन्द्रः नोऽस्माकं वसूनां वासहेतूनां धनानां दाता भवति तमिन्द्रं परमेश्वरं हूमहे आह्वयामो वयं स्तोतारः । हि यस्मादस्येन्द्रस्य नवीयसीं नवतरामकृतपूर्वां सुमतिं कल्याणीं मतिमनुग्रहबुद्धिं विद्म जानीमः । अतस्तमाह्वयामेति पूर्वेण संबन्धः । यया सुमत्या वयं गोमति गवोपेते व्रजे गजाश्वादिपशुसमूहे गमेम स्वामित्वेन प्राप्नुयाम ॥ ॥ १८ ॥

यस्मै त्वं वसो दानाय शिक्षसि स रायस्पोषमश्नुते ।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥ ६ ॥

यस्मै । त्वम् । वसो इति । दानाय । शिक्षसि । सः । रायः । पोषम् । अश्नुते ।
तम् । त्वा । वयम् । मघऽवन् । इन्द्र । गिर्वणः । सुतऽवन्तः । हवामहे ॥ ६ ॥

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥ ७ ॥

कदा । चन । स्तरीः । असि । न । इन्द्र । सश्चसि । दाशुषे ।
उपऽउप । इत् । नु । मघऽवन् । भूयः । इत् । नु । ते । दानम् । देवस्य । पृच्यते ॥७॥

प्र यो ननक्षे अभ्योजसा क्रिविं वधैः शुष्णं निघोषयन् ।
यदेदस्तम्भीत्प्रथयन्नमूं दिवमादिज्जनिष्ट पार्थिवः ॥ ८ ॥

प्र । यः । ननक्षे । अभि । ओजसा । क्रिविम् । वधैः । शुष्णम् । निऽघोषयन् ।
यदा । इत् । अस्तम्भीत् । प्रथयन् । अमूम् । दिवम् । आत् । इत् । जनिष्ट । पार्थिवः ॥८॥

यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
तिरश्चिद्यें रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥ ९ ॥

---

(६) हे वसो वासयितरिन्द्र त्वं यस्मै यजमानाय दानाय धनदानार्थं शिक्षसि आज्ञापयसि स यजमानः रायः धनस्य पोषं पुष्टिमश्नुते व्याप्नोति । यं यजमानं धनं दातुं प्रवर्तयसि स त्वदाज्ञया धनत्यागेन वसुसमृद्धो भवतीत्याश्चर्यम् । अतो हे गिर्वणः गीर्भिर्वननीय मघवन् धनवन्निन्द्र तं तादृशं त्वा त्वां सुतावन्तः अभिषुतसोमा वयं हवामहे आह्वयामः ॥

(७) हे मघवन् धनवन्निन्द्र नु क्षिप्रं दानं हविःसमर्पणं नु निश्चितं भूय इत् प्रचुरं सदेव ते तव देवस्य द्योतमानस्य परमेश्वरस्य उपोपेत् समीपमेव पृच्यते त्वया संपृक्तं भवति । स्वल्पमपि शीघ्रं सत्पात्रे समर्पितं बहुलीभूय ईश्वरे संगतं भवतीत्यभिप्रायः । अतः हे इन्द्र परमेश्वर दाशुषे हविर्दत्तवतो यजमानस्य स्तरीः हिंसकः कदाचन कदापि नासि न भवसि । अपि तु सश्चसि तेन संगच्छसे । तदीयं सख्यं संपादयसीत्यर्थः । ' प्रसमुपोदः पादपूरणे ' (पा. सू. ८. १. ६) इत्यनेन उप इत्यस्य द्विर्वचनं (द्विर्वचनं) पादपूरणार्थम् ॥

(८) य इन्द्रः वधैः आयुधप्रहारैः क्रिविं विकृत्तं शुष्णमेतन्नामानमसुरम् ओजसा बलेन निघोषयन् नितरां शब्दयन् सन् अभि अभितः प्र प्रकर्षेण ननक्षे व्याप्नोति स्म । असुरं हत्वा स्वसामर्थ्यं सर्वतः प्रकाशितवानित्यर्थः । कदेत्यपेक्षायामाह । यदेत् यदैव सोऽसुरः प्रथयन् आत्मानं पृथुं कुर्वन् अमुं दूरे दृश्यमानं दिवं द्युलोकम् अस्तम्भीत् स्तब्धं कृतवान् । आदित् अनन्तरमेव पार्थिवोऽग्निः जनिष्ट प्रादुरभूत् । लोकानां प्राणनिरोधेन अग्निः समजनि यदा तदेत्यर्थः ॥

(९) विश्वः सर्वः अयं दृश्यमानः आर्यः असुरस्वामिको गणः यस्येन्द्रस्य अरिः शत्रुर्भवति । कीदृशः सः । दासः धनादेरुपक्षयिता शेवधिपाः । शेवधिर्निधिस्तं पाति रक्षतीति । तथा असुरादि-

यस्य । अयम् । विश्वः । आर्यः । दासः । शेवधिऽपाः । अरिः ।
तिरः । चित् । अर्ये । रुशमे । पवीरवि । तुर्म्ये । इत् । सः । अज्यते । रयिः ॥ ९ ॥

तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः ।
अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे सुवानास इन्दवः ॥ १० ॥

तुरण्यवः । मधुऽमन्तम् । घृतऽश्चुतम् । विप्रासः । अर्कम् । आनृचुः ।
अस्मे इति । रयिः । पप्रथे । वृष्ण्यम् । शवः । अस्मे इति । सुवानासः । इन्दवः ॥१०॥ ॥१९॥

॥ अथ चतुर्थं सूक्तम् ॥

यथा मनौ विवस्वति सोमं शुक्रापिबः सुतम् ।
यथा त्रिते छन्द इन्द्र जुजोषस्यायौ मादयसे सचा ॥ १ ॥

यथा । मनौ । विवस्वति । सोमम् । शुक्र । अपिबः । सुतम् ।
यथा । त्रिते । छन्दः । इन्द्र । जुजोषसि । आयौ । मादयसे । सचा ॥ १ ॥

धनस्यापहर्ता स्वधनस्य च रक्षितेत्यर्थः । तेनेन्द्रेण रुशमे अकल्याणे अर्ये अरिगणे तस्मिन् तिरश्चित् अन्तर्हितमेव पवीरवि । पवी रथनेमिस्तद्वन्तोऽराः पवीराः । तदुपेतं चक्रं पवीरवि । अत्र 'पवी रथनेमिर्भवति' (निरु. ५. ५) इत्यादि निरुक्तं द्रष्टव्यम् । तादृशं चक्रमज्यते प्रक्षिप्यते । चतुर्थपादे प्रत्यक्षीकृत्य उच्यते । हे इन्द्र तुभ्यमेव त्वदर्थमेव सः असुरगणे विद्यमानः रयिः निधिलक्षणो धनराशिः अज्यते प्रक्षिप्यतेऽरिगणेन । असुरगणे गुप्तं चक्रदानमपि इन्द्राय निधिप्रदमभवत् तदा सत्पात्रे गुप्तं धनदानं महाफलदं स्यादिति किमु वक्तव्यमित्याशयः ॥

(१०) तुरण्यवः त्वरमाणाः विप्रासो मेधाविनो यजमानाः अर्कमर्चनीयमिन्द्रम् आनृचुः अर्चन्ति । कीदृशम् । मधुमन्तं मधुरामृतरसोपेतं घृतश्चुतं जलस्रावि णं मेघभेदनेन वृष्टिं कुर्वन्तमित्यर्थः । केनाभिप्रायेणार्चन्तीत्युच्यते । अस्मे अस्मासु रयिः धनराशिः पप्रथे प्रथितो भवतु । तथा वृष्ण्यम् अपत्योत्पादकं शवः बलमस्तु । किंचास्मे अस्मासु सुवानासः अभिषुता इन्दवः सोमाः सन्तु । इन्द्रानुग्रहेणैव तत्सर्वमस्मासु संपद्यतामित्याशयेनेत्यर्थः ॥ ॥ १९ ॥

'यथा मनौ विवस्वति' इति दशर्चं चतुर्थं सूक्तम् आयवमैन्द्रम् । अनुक्रान्तं च—'यथा मनावायुः' इति । काण्व आयुर्ऋषिः इन्द्रो देवता । अयुजां बृहती छन्दः युजां सतोबृहती छन्दः । विनियोगः सूत्रादवगन्तव्यः ॥

(१) हे शक्र समर्थेन्द्र यथा येन प्रकारेण विवस्वति विवस्वतः पुत्रे वैवस्वते मनौ वर्तमानं सुतमभिषुतं सोमम् अपिबः पीतवानसि । हे इन्द्र परमेश्वर यथा च त्रिते एतन्नामके ऋषौ वर्तमानं छन्दः वेदजातं जुजोषसि भृशं सेवसे । तथा आयौ एतन्नामके मयि सचा सह वर्तमानं सोमं छन्दोलक्षणं तदुभयं संसेव्य मादयसे आनन्दयसि मामात्मानं च ॥

पृषध्रे मेध्ये मातरिश्वनीन्द्र सुवाने अमन्दथाः ।
यथा सोमं दशशिप्रे दशोण्ये स्यूमरश्मावृजूनसि ॥ २ ॥

पृषध्रे । मेध्ये । मातरिश्वनि । इन्द्र । सुवाने । अमन्दथाः ।
यथा । सोमम् । दशऽशिप्रे । दशऽओण्ये । स्यूमऽरश्मौ । ऋजूनसि ॥ २ ॥

य उक्था केवला दधे यः सोमं धृषितापिबत् ।
यस्मै विष्णुस्त्रीणि पदा विचक्रम उप मित्रस्य धर्मभिः ॥ ३ ॥

यः । उक्था । केवला । दधे । यः । सोमम् । धृषिता । अपिबत् ।
यस्मै । विष्णुः । त्रीणि । पदा । विऽचक्रमे । उप । मित्रस्य । धर्मऽभिः ॥ ३ ॥

यस्य त्वमिन्द्र स्तोमेषु चाकनो वाजे वाजिञ्छतक्रतो ।
तं त्वा वयं सुदुघामिव गोदुहो जुहूमसि श्रवस्यवः ॥ ४ ॥

यस्य । त्वम् । इन्द्र । स्तोमेषु । चाकनः । वाजे । वाजिन् । शतक्रतो इति शतऽक्रतो ।
तम् । त्वा । वयम् । सुदुघाम्ऽइव । गोऽदुहः । जुहूमसि । श्रवस्यवः ॥ ४ ॥

यो नो दाता स नः पिता महाँ उग्र ईशानकृत् ।
अयामन्नुग्रो मघवा पुरूवसुर्गोरश्वस्य प्र दातु नः ॥ ५ ॥

---

(२) हे इन्द्र सुवाने सोमाभिषवं कुर्वाणे पृषध्रे एतन्नामके ऋषौ वर्तमानं सोमं पीत्वा यथा अमन्दथाः हृष्टवानसि । यथा च मेध्ये मातरिश्वनि दशशिप्रे दशोण्ये स्यूमरश्मौ ऋजूनसि च एतेषु सर्वेष्वृषिषु वर्तमानं सोमं पीत्वा अमन्दथाः । तथा मां मादयसे इति पूर्वेण संबन्धः ॥

(३) य इन्द्रः केवला केवलानि आत्मस्वामिकानि उक्था उक्थानि शस्त्राणि दधे अवधारयति । शृण्वतीत्यर्थः (शृणोती°) । यश्चेन्द्रः धृषितः[1] शत्रूणां धर्षकः अभिभविता सन् सोममपिबत् पीतवान् । यस्मै इन्द्राय तदर्थं विष्णुर्व्यापक उपेन्द्रः मित्रस्य । मित्रोऽहरभिमानी देवः । 'अहर्वै मित्रो रात्रिर्वरुणः' (ऐ. ब्रा. ४. १०) इति श्रुतेः । तस्य धर्मभिः धर्मैः उदयास्तमयैर्व्यापारैरुपलक्षितः सन् त्रीणि पदा त्रिभिः पादैः विचक्रमे विशेषेण आक्रान्तवान् त्रिलोकीम् । स इन्द्रोऽस्मान् मादयत्विति आशीः ॥

(४) हे वाजिन् अन्नवन् हे शतक्रतो बहुकर्मवन्निन्द्र त्वं यस्य यजमानस्य स्तोमेषु स्तोत्रेषु निमित्तेषु वाजे हविर्लक्षणे अन्ने च निमित्तभूते सति चाकनः तृप्यसि तं तादृशं त्वा त्वामिन्द्रं श्रवस्यवः । श्रव इत्यन्ननाम । अन्नकामा वयं यजमानाः जुहुमः हविर्दद्मः । तत्र दृष्टान्तः । सुदुघामिव गोदुहः । गोदोग्धारः सुदोग्ध्रीं गां प्रति यथा हरितृणादिकं ददति तद्वत् ॥

(५) य इन्द्रः नोऽस्मभ्यं दाता धनादेर्ददति(!°र्ददाति) स इन्द्रः नोऽस्माकं पिता पालको भवतु । कीदृशः सः । महान् प्रौढः उग्रः उद्गूर्णबलः ईशानकृत् । दीनमीशानं प्रभुं करो-

---

१. ' धृषिता ' इति पदपाठः ।

यः । नः । दाता । सः । नः । पिता । महान् । उग्रः । ईशानऽकृत् ।
अयामन् । उग्रः । मघऽवा । पुरुऽवसुः । गोः । अश्वस्य । प्र । दातु । नः ॥५॥ ॥२०॥

यस्मै त्वं वसो दानाय मंहसे स रायस्पोषमिन्वति ।
वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे ॥ ६ ॥

यस्मै । त्वम् । वसो इति । दानाय । मंहसे । सः । रायः । पोषम् । इन्वति ।
वसुऽयवः । वसुऽपतिम् । शतऽक्रतुम् । स्तोमैः । इन्द्रम् । हवामहे ॥ ६ ॥

कदा चन प्र युच्छस्युभे नि पासि जन्मनी ।
तुरीयादित्य हवनं त इन्द्रियमा तस्थावमृतं दिवि ॥ ७ ॥

कदा । चन । प्र । युच्छसि । उभे इति । नि । पासि । जन्मनी इति ।
तुरीय । आदित्य । हवनम् । ते । इन्द्रियम् । आ । तस्थौ । अमृतम् । दिवि ॥ ७ ॥

यस्मै त्वं मघवन्निन्द्र गिर्वणः शिक्षो शिक्षसि दाशुषे ।
अस्माकं गिर उत सुष्टुतिं वसो कण्ववच्छृणुधी हवम् ॥ ८ ॥

तीति तथा । दीनदयालुरित्यर्थः । तादृशः स मघवा धनवानिन्द्रः नोऽस्मभ्यं गोः गामश्वस्य अश्वं च । उभयत्र कर्मणि षष्ठी । प्रदातु प्रकर्षेण ददातु । कीदृशो मघवा । अयामन् । यान्त्यनेनेति यामा मार्गः। स न विद्यते यस्यासावयामा । तस्मिन्नयामनि । ' सुपां सुलुक्° ' इति सप्तम्या लुक् । मार्गरहिते पापिनि पुंसि उग्रः उद्गूर्णबलः तस्मिन् आविष्कृतप्रभुशक्तिरित्यर्थः । पुरुवसुश्च प्रभूतगवाश्वादिधनोपेतः॥ ॥२०॥

(६) हे वसो वासयितरिन्द्र त्वं यस्मै यजमानाय दातव्यं धनादिकं मंहसे ददासि स तादृशो यजमानः रायः धनस्य पोषं पुष्टिम् इन्वति व्याप्नोति । धनसमृद्धिं प्राप्नोतीत्यर्थः । अतो हे इन्द्र वसूयवः धनकामा वयं यजमानाः वसुपतिं धनपालकं शतक्रतुं बहुकर्माणम् इन्द्र परमेश्वर (इन्द्रं परमेश्वरं) त्वां स्तोत्रैः हवामहे आह्वयामः ॥

(७) इदानीमृषिः सूर्यरूपेणेन्द्रं स्तौति । हे इन्द्र कदाचन कदापि त्वं प्र युच्छसि प्रमत्तो भवसि । नैव भवसीति कटाक्षः । अहोरात्रं जागरूक एवासीत्यर्थः । यतस्त्वमुभे जन्मनी । एकमदितेरिन्द्ररूपेण जन्म । द्वितीयं ब्रह्मविद्यातः जगदात्मरूपेणेति द्वे जनुषी । नि पासि नितरां पालयसि । न त्वसावधानः प्रपञ्चं परमार्थं च उभयं कर्तुं शक्नुयात् कश्चिदिति भावः । हे तुरीय प्रत्यगात्मरूपेण अवस्थात्रयातीत हे आदित्य अदितिपुत्र इन्द्र ते तव स्वभूतमिन्द्रियमिन्द्रस्य तव लिङ्गं द्योतकं हवनम् । हूयतेऽस्मिन्निति हवनमादित्यमण्डलम् । ' अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ' इति स्मृतेरादित्यमण्डलस्य होमाधिष्ठानत्वं प्रसिद्धम् । तादृशं मण्डलम् अमृतं मरणधर्मरहितं सत् दिवि द्युलोके आ तस्थौ आभिमुख्येनातिष्ठत् । यस्मात्त्वं जगदात्मासीत्यतस्त्वां हवामह इति पूर्वेणान्वयः ॥

(८) हे मघवन् धनवन् हे गिर्वणः गीर्भिर्वननीय हे शिक्षो शिक्षकेन्द्र दाशुषे हविर्दत्तवते यस्मै यजमानाय शिक्षसि अपेक्षितं धनादि ददासि तत्संबन्धिनामस्माकं गिरः प्रार्थनावाचः शृणुधि

यस्मै । त्वम् । मघऽवन् । इन्द्र । गिर्वणः । शिक्षो इति । शिक्षसि । दाशुषे ।
अस्माकम् । गिरः । उत । सुऽस्तुतिम् । वसो इति । कण्वऽवत् । शृणुधि । हवम् ॥ ८ ॥

अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत ।
पूर्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥ ९ ॥

अस्तावि । मन्म । पूर्व्यम् । ब्रह्म । इन्द्राय । वोचत ।
पूर्वीः । ऋतस्य । बृहतीः । अनूषत । स्तोतुः । मेधाः । असृक्षत ॥ ९ ॥

समिन्द्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यम् ।
सं शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिषुः ॥ १० ॥

सम् । इन्द्रः । रायः । बृहतीः । अधूनुत । सम् । क्षोणी इति । सम् । ऊँ इति । सूर्यम् ।
सम् । शुक्रासः । शुचयः । सम् । गोऽआशिरः । सोमाः । इन्द्रम् । अमन्दिषुः ॥ १० ॥ ॥ २१ ॥

॥ अथ पञ्चमं सूक्तम् ॥

उपमं त्वा मघोनां ज्येष्ठं च वृषभाणाम् ।
पूर्भित्तमं मघवन्निन्द्र गोविदमीशानं राय ईमहे ॥ १ ॥

शृणु । उतापि च हे वसो वासयितरिन्द्र सुष्टुतिं शोभनां स्तुतिं शृणुधि । किंच कण्ववत् यथा कण्वस्य हवमाह्वानमशृणोः एवमस्माकं हवं शृणु ॥

(९) हे ऋत्विजः मन्म मननीयं पूर्व्यं पुरातनं यत् ब्रह्म स्तोत्रम् असावि(ऽअस्तावि) स्तुतिविषयीकृतं भवद्भिस्तत् ब्रह्म स्तोत्रम् इन्द्राय परमेश्वराय तदर्थं वोचत ब्रूत । यतो भवन्तः ऋतस्य सत्यस्येन्द्रस्य संबन्धिनीः पूर्वीः बह्वीः बृहतीः महतीः । सामर्थ्यात् मूर्तीः इन्द्रस्य प्रचुरान् महतो गुणावतारानित्यर्थः । अनूषत स्तुतिविषयीकृतवन्तः । किंच स्तोतुर्मम आयोः मेधाः धारणावतीः बुद्धीः असृक्षत सृष्टवन्तः । अतः प्रार्थये ब्रह्मेन्द्राय वोचतेति ॥

(१०) य इन्द्रः बृहतीः महान्ति रायः हिरण्यादिधनानि समधूनुत सम्यगकरोत् । यश्चेन्द्रः क्षोणी द्यावापृथिव्यौ समधूनुत सम्यक् रचयांचक्रे । क्षोणी इति द्यावापृथिव्योर्नामधेयम् । 'रोदसी क्षोणी अन्धसी' इति तन्नामसु पाठात् । किंच य इन्द्रः सूर्यं मङ्गलात्मानं समधूनुत समजनयत् । तमिन्द्रं शुक्रासः शुक्लाः दीप्ताः शुचयः पूताः आपः वसतीवर्येकधनालक्षणाः सममन्दिषुः सम्यगमादयन् । किंच गवाशिरः गोदुग्धं सोमाः तद्रसाश्च तमिन्द्रं सममन्दिषुः । इत्थं महानुभाव इन्द्रोऽसीति त्वदर्थं ब्रह्म वोचत इति पूर्वेण संबन्धः ॥ ॥ २१ ॥

'उपमं त्वा' इत्यष्टर्चं पञ्चमं सूक्तं काण्वस्य मेध्यस्यार्षम् । अनुक्रान्तं च—'उपमं त्वाष्टौ मेध्यः' इति । अयुजां बृहती छन्दः । युजां सतोबृहती छन्दः । विनियोगः सूत्रादवगन्तव्यः ॥

(१) हे मघवन् धनवन्निन्द्र मघोनां धनवतां मध्ये उपमं उपमाभूतं वृषभाणां कामवर्षितॄणां मध्ये ज्येष्ठमतिशयेन प्रशस्यं च त्वा त्वां रायः गवाश्वादिधनानि ईमहे याचामहे वयम् । कीदृशं त्वाम् ।

उपऽमम्। त्वा। मघोनाम्। ज्येष्ठम्। च। वृषभाणाम्।
पूर्भित्ऽतमम्। मघऽवन्। इन्द्र। गोऽविदम्। ईशानम्। रायः। ईमहे ॥ १ ॥

य आयुं कुत्समतिथिग्वमर्दयो वावृधानो दिवेदिवे।
तं त्वा वयं हर्यश्वं शतक्रतुं वाजयन्तो हवामहे ॥ २ ॥

यः। आयुम्। कुत्सम्। अतिथिऽग्वम्। अर्दयः। ववृधानः। दिवेऽदिवे।
तम्। त्वा। वयम्। हरिऽअश्वम्। शतऽक्रतुम्। वाजऽयन्तः। हवामहे ॥ २ ॥

आ नो विश्वेषां रसं मध्वः सिञ्चन्त्वद्रयः।
ये परावति सुन्विरे जनेष्वा ये अर्वावतीन्दवः ॥ ३ ॥

आ। नः। विश्वेषाम्। रसम्। मध्वः। सिञ्चन्तु। अद्रयः।
ये। पराऽवति। सुन्विरे। जनेषु। आ। ये। अर्वाऽवति। इन्दवः ॥ ३ ॥

विश्वा द्वेषांसि जहि चाव चा कृधि विश्वे सन्वन्त्वा वसु।
शीष्टेषु चित्ते मदिरासो अंशवो यत्रा सोमस्य तृम्पसि ॥ ४ ॥

विश्वा। द्वेषांसि। जहि। च। अव। च। आ। कृधि। विश्वे। सन्वन्तु। आ। वसु।
शीष्टेषु। चित्। ते। मदिरासः। अंशवः। यत्र। सोमस्य। तृम्पसि ॥ ४ ॥ ॥ २२ ॥

पूर्भित्तमम् अतिशयेन शत्रुपुरां भेत्तारमत एव गोविदं गवां लम्भयितारम् ईशानं सर्वविद्यानां नियन्तारम्। 'ईशानः सर्वविद्यानाम्' (तै. आ. १०.४७) इति श्रुतेः ॥

(२) हे इन्द्र यस्त्वं दिवेदिवे प्रतिदिनं वावृधानः स्तुत्यः अतिशयेन वर्धमानः सन् आयुम् एतन्नामानमृषिम् उत्सम् एतत्संज्ञमृषिम् अतिथिग्वम् एतत्संज्ञमृषिं च अर्दयः वरप्रदाने (१°प्रदानेन) पीडयसि। ते आत्मानम् अलं मन्यमानाः वारयन्ति। त्वं तु हठात् अभीष्टवरं याचते(याचत) इत्युक्त्वा तान् क्लेशयसीत्यर्थः। तं तादृशं हर्यश्वं हरिसंज्ञौ अश्वौ यस्य तादृशं शतक्रतुं बहुकर्माणं त्वा त्वाम् वाजवन्तः(१°यन्तः)अन्नकामा वयं यजमानाः हवामहे आह्वयामः ॥

(३) विश्वेषां सर्वेषां नोऽस्माकं संबन्धिनः अद्रयः। तात्स्थ्यात्ताच्छब्द्यम्। अद्रिप्रभवास्ते सोमाः मध्वः मधुरम्। कर्मणि षष्ठी। रसमात्मीयं द्रवमासिञ्चन्तु कात्स्न्र्येन क्षरन्तु। इन्द्रार्थमिति शेषः। ते के। ये इन्दवः सोमाः परावति दूरदेशे वर्तमानाः। जनेषु यजमानलक्षणेषु निमित्तेषु आ सुन्विरे आभिमुख्येन अभिषुता ऋत्विग्भिः। ये च इन्दवः अर्वावति समीपदेशे वर्तमानाः सुन्विरे अभिषुतास्ते सर्वेऽपि मिलित्वा इन्द्रार्थं स्वरसं सिञ्चन्त्वित्यर्थः ॥

(४) हे इन्द्र विश्वा विश्वानि सर्वाणि द्वेषांसि अस्माकममित्राणि जहि नाशय। किंचास्मान् अव रक्ष। आ च कृधि आ समन्तात् प्रशस्तान् कुरु च। किंच विश्वे सर्वे जनाः वसु धनम् आ सन्वन्तु आभिमुख्येन ददतु। अस्मभ्यमिति शेषः। अथ च यत्र येष्वस्मासु स्थितस्य सोमस्य तृम्पसि पानेन तृप्तो भवसि तेषु शीष्टेषु विशिष्टेष्वस्मासु वर्तमानाः अंशवः सोमाः ते चित् तवैव मदिरासः मादकाः सन्तु। नेतरस्य कस्यचित् ॥ ॥ २२ ॥

इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः ।
आ शंतम शंतमाभिरभिष्टिभिरा स्वापे स्वापिभिः ॥ ५ ॥

इन्द्र । नेदीयः । आ । इत् । इहि । मितऽमेधाभिः । ऊतिऽभिः ।
आ । शम्ऽतम । शम्ऽतमाभिः । अभिष्टिऽभिः । आ । सुऽआपे । स्वापिऽभिः ॥ ५ ॥

आजितुरं सत्पतिं विश्वचर्षणिं कृधि प्रजास्वाभगम् ।
प्र सू तिरा शचीभिर्ये ते उक्थिनः ऋतुं पुनत आनुषक् ॥ ६ ॥

आजिऽतुरम् । सत्ऽपतिम् । विश्वऽचर्षणिम् । कृधि । प्रऽजासु । आऽभगम् ।
प्र । सु । तिर । शचीभिः । ये । ते । उक्थिनः । ऋतुम् । पुनते । आनुषक् ॥ ६ ॥

यस्ते साधिष्ठोऽवसे ते स्याम भरेषु ते ।
वयं होत्राभिरुत देवहूतिभिः ससवांसो मनामहे ॥ ७ ॥

यः । ते । साधिष्ठः । अवसे । ते । स्याम । भरेषु । ते ।
वयम् । होत्राभिः । उत । देवहूतिऽभिः । ससऽवांसः । मनामहे ॥ ७ ॥

अहं हि ते हरिवो वज्रयुराजिं यामि सदोतिभिः ।
त्वामिदेव तममे समश्वयुर्गव्युरग्रे मथीनाम् ॥ ८ ॥

---

(५) हे इन्द्र परमेश्वर त्वं मितमेधाभिः मिताः परिच्छिन्नाः मेधाः अनुग्रहबुद्धयो याभिस्ताभिरनुग्रहसहिताभिः ऊतिभिः रक्षाभिः सह नेदीय इत् अन्तिकतममेव एहि आगच्छ । किंच हे शंतम सुखतमेन्द्र शंतमाभिरभिष्टिभिः अभितः प्रियाभिश्च ऊतिभिः एहि । अथ च हे स्वापे सुतरामाप्तेन्द्र स्वापिभिः शोभना आपयः आप्ता बन्धवः यासु ताभिरूतिभिरेहि । उपसर्गवशाद्योग्याक्रियाध्याहारः ॥

(६) हे इन्द्र त्वं प्रजासु अस्मत्पुत्रपौत्रादिषु आभगम् आभिमुख्येन भगं भजनीयं धनं कृधि कुरु । कीदृशम् । आजितुरं संग्रामे त्वरमाणम् । जित्वरमित्यर्थः । सत्पतिं सतां पालकं विश्वचर्षणिम् । विश्वाः सर्वाश्चर्षणयो मनुष्या दासदासीलक्षणा यस्मिन् तम् । किंच ये यजमानाः उक्थिनः स्तुतिमतस्ते तव आनुषक् अनुषक्तम् । त्वया संगतमित्यर्थः । ऋतुं कर्मविशेषं पुनते कुर्वते तानस्मान् शचीभिः धनप्रदानादिकर्मभिः सु सुतरां प्र तिर प्रवर्धय । प्रपूर्वस्तिरतिर्वर्धनार्थः ॥

(७) हे इन्द्र यः अस्मद्गणः अवसे रक्षणाय ते तव साधिष्ठः अतिशयेन योऽस्ति (?) तद्गणगतास्ते वयं भरेषु संग्रामेषु ते तव संबन्धिनः स्याम भवेम । संगते त्वत्पालनीया भवेमेत्यर्थः । उतापि च हे इन्द्र ससवांसः हविर्लक्षणान्नवन्तः । ससमित्यन्ननाम ' नेमः ससम् ' इत्यन्ननामसु पाठात् । तादृशा वयं यजमानाः देवहूतिभिः । देवानिन्द्रादीन् हवन्ति ता देवहूतयः । ताभिः होत्राभिः वाग्भिः स्तुतिलक्षणाभिः त्वां मनामहे स्तुमः । होत्रेति वाङ्नाम ' ऋक् होत्रा गीः ' इति वाङ्नामसु पाठात् ॥

(८) हे हरिवः हरिसंज्ञकाश्वोपेतेन्द्र ते त्वदीयः योऽहं मेध्य ऋषिः वाजयुः अन्नकामः सन् ब्रह्म अन्नमुद्दिश्य सदा सर्वदा ऊतिभिः त्वत्कृताभिः रक्षाभिः सह आजिं संग्रामं यामि प्राप्नोमि । हीति

अहम्। हि। ते। हरिऽवः। ब्रह्म। वाजऽयुः। आजिम्। यामि। सदा। ऊतिऽभिः।
त्वाम्। इत्। एव। तम्। अमे। सम्। अश्वऽयुः। गव्युः। अग्ने। मथीनाम् ॥८॥ ॥२३॥

॥ अथ षष्ठं सूक्तम् ॥

एतत्ते इन्द्र वीर्यं गीर्भिर्गृणन्ति कारवः।
ते स्तोभन्त ऊर्जमावन्घृतश्चुतं पौरासो नक्षन्धीतिभिः ॥ १ ॥

एतत्। ते। इन्द्र। वीर्यम्। गीःऽभिः। गृणन्ति। कारवः।
ते। स्तोभन्तः। ऊर्जम्। आवन्। घृतऽश्चुतम्। पौरासः। नक्षन्। धीतिऽभिः ॥ १ ॥

नक्षन्त इन्द्रमवसे सुकृत्यया येषां सुतेषु मन्दसे।
यथा संवर्ते अमदो यथा कृश एवास्मे इन्द्र मत्स्व ॥ २ ॥

नक्षन्ते। इन्द्रम्। अवसे। सुऽकृत्यया। येषाम्। सुतेषु। मन्दसे।
यथा। सम्ऽवर्ते। अमदः। यथा। कृशे। एव। अस्मे इति। इन्द्र। मत्स्व ॥ २ ॥

आ नो विश्वे सजोषसो देवासो गन्तनोप नः।
वसवो रुद्रा अवसे न आ गमञ्छृण्वन्तु मरुतो हवम् ॥ ३ ॥

प्रसिद्धम्। त्वामेव सम् अमे संगतो भवामि। संग्रामे त्वामेवाश्रयामि। नेतरं कंचनेत्यर्थः। एवेत्यनर्थको निपातः ॥ ॥ २३ ॥

'एतत्ते' इति अष्टर्चं षष्ठं सूक्तं काण्वस्य मातरिश्वानस्यार्षमैन्द्रम् (मातरिश्वन आर्षमैन्द्रम्)। अनुक्रम्यते च–'एतत्ते मातरिश्वा नो विश्व इति वैश्वदेवः प्रगाथः' इति। तृतीयाचतुर्थ्यौ विश्वेदेवदेवताके। अन्यासां षण्णामिन्द्रो देवता। अयुजां बृहती छन्दः युजां सतोबृहती छन्दः। विनियोगः सूत्रादवगन्तव्यः ॥

(१) हे इन्द्र ये कारवः स्तोतारः ते तव संबन्धि एतत् दृश्यमानं वृष्ट्यादिलक्षणसामर्थ्यं गीर्भिः स्तुतिरूपाभिर्वाग्भिः गृणन्ति स्तुवन्ति ते स्तोभन्तः स्तोतारः ऊर्जम् अन्नम् आवन् प्राप्नुवन्ति। किंच ते पौरासः पुरे भवाः स्तोतारः धीतिभिरङ्गुलीभिः घृतश्चुतं घृतस्राविणं गवादिगणं नक्षन् व्याप्नुवन्ति। त्वदनुग्रहात् गवादिपशून् अङ्गुलीभिः सर्वदा दुहन्तीत्यर्थः ॥

(२) हे इन्द्र येषां यजमानानां संबन्धिषु सुतेष्वभिषुतेषु सोमेषु निभातेषु (? निपीतेषु) त्वं मन्दसे हृष्यसि ते यजमानाः अवसे अन्नाय रक्षणाय वा सुकृत्यया शोभनेन सोमाभिषवकर्मणा इन्द्रं परमेश्वरं त्वां नक्षन्ते व्याप्नुवन्ति। नक्षतिर्व्याप्तिकर्मा 'इन्वति नक्षति' इति व्याप्तिकर्मसु पाठात्। अन्नाद्यर्थं त्वामाश्रयन्त इत्यर्थः। अतो हे इन्द्र यथा येन प्रकारेण संवर्ते एतन्नामके ऋषौ यजमाने सति अमदः हृष्टवानसि यथा च कृशे एतन्नाम्नि यजमाने अमदः एव एवमनेन प्रकारेण अस्मे अस्मासु काण्वेषु मत्स्व हृष्टो भव सोमपानादिनेति शेषः ॥

(३) सजोषसः सह जुषमाणाः विश्वे देवासः सर्वे देवाः नोऽस्माकं यज्ञमुद्दिश्येति शेषः।

आ। नः। विश्वे। सऽजोषसः। देवासः। गन्तन। उप। नः।
वसवः। रुद्राः। अवसे। नः। आ। गमन्। शृण्वन्तु। मरुतः। हवम्॥ ३ ॥

पूषा विष्णुर्हवनं मे सरस्वत्यवन्तु सप्त सिन्धवः।
आपो वातः पर्वतासो वनस्पतिः शृणोतु पृथिवी हवम्॥ ४ ॥

पूषा। विष्णुः। हवनम्। मे। सरस्वती। अवन्तु। सप्त। सिन्धवः।
आपः। वातः। पर्वतासः। वनस्पतिः। शृणोतु। पृथिवी। हवम्॥ ४ ॥ ॥ २४ ॥

यदिन्द्र राधो अस्ति ते माघोनं मघवत्तम।
तेन नो बोधि सधमाद्यो वृधे भगो दानाय वृत्रहन्॥ ५ ॥

यत्। इन्द्र। राधः। अस्ति। ते। माघोनम्। मघवत्ऽतम।
तेन। नः। बोधि। सधऽमाद्यः। वृधे। भगः। दानाय। वृत्रऽहन्॥ ५ ॥

आजिपते नृपते त्वमिद्धि नो वाज आ वक्षि सुक्रतो।
वीती होत्राभिरुत देववीतिभिः ससवांसो वि शृण्विरे॥ ६ ॥

नोऽस्माकमुप समीपे आ गन्तन आगच्छन्तु। किंच वसवोऽष्टौ रुद्रा एकादश च नोऽस्माकमवसे रक्षणाय आ गमन् आगच्छन्तु। मरुतः एकोनपञ्चाशत्संख्याका देवास्तु हवमस्मत्कृतं स्तोत्रं शृण्वन्तु॥

(४) पूषा पोषको देवः विष्णुर्व्यापको देवः सरस्वती। सर इत्युदकनाम। तद्वती देवी च एते सर्वे मे मम मातरिश्वानस्य (मातरिश्वनः) ऋषेः हवनमाह्वानम्। स्तोत्रमिति यावत्। अवन्तु शृण्वन्तु। अवतिरत्र श्रवणकर्मा। 'अव रक्षणगति०' इत्यस्मिन् सूत्रे (?) तस्य श्रवणाभिधानात्। किंच सप्त सप्तसंख्याकाः सिन्धवो गङ्गाद्या नद्य आपः जलाभिमानिन्यो देवताः वातो वायुः पर्वतासः पर्वतां मेर्वादीनामभिमानिनो देवाश्च मे हवनम् अवन्तु शृण्वन्तु। अथ च वनस्पतिः वनानां पातारः पालको (पालका) देवाः पृथिवी च देवी मे इवं स्तोत्रं शृणोतु॥ ॥ २४॥

(५) हे मघवत्तम अतिशयेन धनवन्निन्द्र ते तव स्वभूतं माघोनं मघवत्स्वामिकं यत् प्रसिद्धं राधः धनमस्ति भवति तेन राधसा धनेन हे वृत्रहन् वृत्रहन्तरिन्द्र त्वं दानार्थं वृधे वर्धनार्थं च नोऽस्मान् पात्रभूतान् बोधि बुध्यस्व। तद्धनदानेन अस्मान् समृद्धान् कर्तुं जानीहीत्यर्थः। कीदृशस्त्वम्। सधमाद्यः सहमादनयोग्यः भगो भजनीयश्च॥

(६) हे आजिपते संग्रामपालक हे नेतृपते (नृपते) नेतृणां सैनिकानां पालक हे सुक्रतो शोभनकर्मवन्निन्द्र त्वमित् त्वमेव नोऽस्मान् वाजे संग्रामे आवक्षि आवहसि प्रापयसि। त्वत्साहाय्येन वयं धनार्थं संग्रामं गन्तुमुत्सहामह इत्यर्थः। कीदृशस्त्वम्। होत्राभिः स्तुतिलक्षणाभिः वाग्भिः सह। वीती अशनवान् स्तुतिभिः प्रोत्सहमानो हविरित्यर्थः। उतापि च ससवांसः हविर्लक्षणान्नवन्तो यजमानाः

आजिऽपते । नृऽपते । त्वम् । इत् । हि । नः । वाजे । आ । वक्षि । सुऽक्रतो इति सुऽक्रतो । वीती । होत्राभिः । उत । देववीतिऽभिः । ससऽवांसः । वि । श्रुण्विरे ॥ ६ ॥

सन्ति ह्यार्य आशिष इन्द्र आयुर्जनानाम् ।
अस्मान्नक्षस्व मघवन्नुपावसे धुक्षस्व पिप्युषीमिषम् ॥ ७ ॥

सन्ति । हि । अर्ये । आऽशिषः । इन्द्रे । आयुः । जनानाम् ।
अस्मान् । नक्षस्व । मघऽवन् । उप । अवसे । धुक्षस्व । पिप्युषीम् । इषम् ॥ ७ ॥

वयं त इन्द्र स्तोमेभिर्विधेम त्वमस्माकं शतक्रतो ।
महि स्थूरं शशयं राधो अह्रयं प्रस्कण्वाय नि तोशय ॥ ८ ॥

वयम् । ते । इन्द्र । स्तोमेभिः । विधेम । त्वम् । अस्माकम् । शतक्रतो इति शतऽक्रतो ।
महि । स्थूरम् । शशयम् । राधः । अह्रयम् । प्रस्कण्वाय । नि । तोशय ॥ ८ ॥ ॥२५॥

॥ अथ सप्तमं सूक्तम् ॥

भूरीदिन्द्रस्य वीर्यं व्यख्यमभ्यायति । राधस्ते दस्यवे वृक ॥ १ ॥

देववीतिभिः देवकर्तृकाशनैः वि श्रुण्विरे विशेषेण श्रूयन्ते । यदा हि त्वादृशा देवास्तेषां हविरश्नुवन्ति तदा ते विख्याता भवन्तीत्यर्थः ॥

(७) हे परमेश्वर हि यस्मात् जनानां जायमानानां यजमानानामस्माकं स्वभूतमायुः चरुपुरोडाशाद्यन्नम् आशिषः गवाश्वाद्यैश्वर्याणि च अर्ये जगत्स्वामिनि इन्द्रे परमेश्वरे त्वयि सन्ति समर्पितानि भवन्ति । अतो हे मघवन् धनवन्निन्द्र अस्मान् यजमानान् उप नक्षस्व समीपे व्याप्नुहि । आत्मीयत्वेन स्वसमीपे कुर्वित्यर्थः । किंचास्माकमवसे रक्षणाय पिप्युषीम् अतिशयेन पालयित्रीम् इषमन्नं धुक्षस्व प्रपूरय देहीत्यर्थः ॥

(८) हे इन्द्र वयं यजमानाः ते त्वदीयाः स्मः । त्वं चास्माकमसि । 'त्वमस्माकं तवस्मसि' (ऋ. सं. ८. ९२. ३२) इति श्रुतेः । अतः हे शतक्रतो बहुकर्मवन्निन्द्र स्तोमेभिः स्तोत्रैः विधेम परिचरेम त्वाम् । यस्मात्त्वदीया वयं तस्मात्त्वं प्रस्कण्वाय कण्वपुत्राय मह्यं मातरिश्वानाय (? मातरिश्वने) राधो धनं नि तोशय नियमेन देहि । तदेव राधो विशिनष्टि । महि महत् पूज्यं स्थूरं स्थूलम् । प्रौढमित्यर्थः । शशयं देवब्राह्मणादिशरीरे शयानं तैरुपभोग्यमित्यर्थः । अह्रयं लज्जारहितम् । पापवर्त्मना लब्धं धनं हि लज्जासहितं भवति । इदं तु न तथा । ईश्वरानुग्रहलब्धत्वात्तस्येत्यर्थः ॥ ॥ २५ ॥

'भूरीत्' इति पञ्चर्चं सप्तमं सूक्तं काण्वस्य कृशस्यार्षं प्रस्कण्वदानदेवताकं गायत्रम् । अनुक्रान्तं च—'भूरीत् पञ्च कृशः प्रस्कण्वस्य दानस्तुतिर्गायत्रं तु[1] तृतीयान्त्ये अनुष्टुभौ' ' इति । अन्त्यातृतीययोरनुष्टुप् छन्दः । अन्यासां गायत्री छन्दः । विनियोगः सूत्रादवगन्तव्यः ॥

(१) इन्द्रस्य समर्थस्य प्रस्कण्वस्य वीर्यं दानलक्षणसामर्थ्यं भूरीत् प्रचुरमेव सत् अभि अभितः आ अयति आभिमुख्येन प्राप्नोतीति व्यख्यं व्यशासिषमहम् । ईश्वरेणाल्पमपि कृतं कर्म बहु भवत्

१. अनु.—' तृतीयापञ्चम्यावनुष्टुभौ । '

भूरि । इत् । इन्द्रस्य । वीर्यम् । वि । अल्यम् । अभि । आ । अयति ।
राधः । ते । दस्यवे । वृक ॥ १ ॥

शतं श्वेतासं उक्षणो दिवि तारो न रोचन्ते । महा दिवं न तस्तभुः ॥२॥
शतम् । श्वेतासः । उक्षणः । दिवि । तारः । न । रोचन्ते । महा । दिवम् । न । तस्तभुः ॥२॥

शतं वेणूञ्छतं शुनः शतं चर्माणि म्लातानि ।
शतं मे बल्बजस्तुका अरुषीणां चतुःशतम् ॥ ३ ॥
शतम् । वेणून् । शतम् । शुनः । शतम् । चर्माणि । म्लातानि ।
शतम् । मे । बल्बजऽस्तुकाः । अरुषीणाम् । चतुःऽशतम् ॥ ३ ॥

सुदेवाः स्थ काण्वायना वयोवयो विचरन्तः । अश्वासो न चङ्क्रमत ॥४॥
सुऽदेवाः । स्थ । काण्वायनाः । वयःऽवयः । विऽचरन्तः । अश्वासः । न । चङ्क्रमत ॥ ४ ॥

आदित्सास्य चर्किरन्नानूनस्य महि श्रवः ।
श्यावीरतिष्वसन्पथश्चक्षुषा चन संनशे ॥ ५ ॥

प्रसिद्धयतीत्यर्थः । इदानीमृषिः प्रत्यक्षीकृत्याह । हे वृक शत्रुविकर्तन प्रस्कण्व ते तव संबन्धि राधो धनं दस्यवे दस्युं हन्तुं समर्थं भवतीति शेषः ॥

(२) हे प्रस्कण्व त्वया दत्ताः शतसंख्याकाः श्वेतासः श्वेताः शुक्लवर्णाः उक्षणः उक्षाणः रेतःसेचनसमर्था बलीवर्दा रोचन्ते दीप्यन्ते । क इव । दिवि द्युलोके तारो न तारा इव । ता यथा दिवि रोचन्ते तद्वदेते भुवीत्यर्थः । किंच महा तेजसो महत्त्वे (महत्त्वेन) दिवं न तारा यथा द्युलोकं तस्तभुः व्याप्नुवन्ति तद्वदेते महा यशसो महत्त्वेन भुवं व्याप्नुवन्ति ॥

(३) प्रस्कण्वः शतमपरिमितान् वेणून् मस्करान् । प्रादादिति सर्वत्र शेषः । शतं शतसंख्याकान् शुनः सारमेयान् प्रादात् । तथा शतं बहूनि म्लातानि मृदूकृतानि चर्माणि अजिनानि प्रादात् । किंच शतमपरिमिताः बल्बजस्तुकाः तृणपूलाः मे मह्यं कृशनाश्वे ऋषये प्रादात् । अथ च अरुषीणामारोचमानानां गवां चतुःशतं प्रादात् ॥

(४) हे काण्वायनाः कण्वगोत्राः प्रस्कण्वाः वयोवयः अतिशयेन पक्षिण इव । लुप्तोपमेयम् । विचरन्तः विहायसि चरन्तः यूयं सुदेवाः स्थ कल्याणदेवाः भवथ । अतोऽस्मदाशिषा अश्वा इव चङ्क्रमत विहरत यूयम् ॥

(५) आदित् दानानन्तरमेव अनूनस्य अन्यूनस्य । सर्वोत्कृष्टस्येति यावत् । सास्य एवंनाम्नः कण्वपुत्रस्य संबन्धि महि महत् श्रवः यशः न चर्किरन् न कर्तुमिच्छन्ति । तद्यशः संपादयितुं केचित् नेशते इत्यर्थः । किंच पथः धर्ममार्गात् सकाशात् अतिध्वसन् अतिशयेनाधः पतन् कृपणः पुमान् श्यावीः

आत् । इत् । साप्तस्य । चर्किरन् । न । अनूनस्य । महि । श्रवः ।
श्यावीः । अतिऽध्वसन् । पथः । चक्षुषा । चन । सम्ऽअशे ॥ ५ ॥ ॥ २६ ॥

॥ अथाष्टमं सूक्तम् ॥

प्रति ते दस्यवे वृक राधो अदर्श्यहूयम् । द्यौर्न प्रथिना शवः ॥ १ ॥

प्रति । ते । दस्यवे । वृक । राधः । अदर्शि । अहूयम् । द्यौः । न । प्रथिना । शवः ॥ १ ॥

दश मह्यं पौतक्रतः सहस्रा दस्यवे वृकः । नित्याद्रायो अमंहत ॥ २ ॥

दश । मह्यम् । पौतऽक्रतः । सहस्रा । दस्यवे । वृकः । नित्यात् । रायः । अमंहत ॥ २ ॥

शतं मे गर्दभानां शतमूर्णावतीनाम् । शतं दासाँ अति स्रजः ॥ ३ ॥

शतम् । मे । गर्दभानाम् । शतम् । ऊर्णाऽवतीनाम् । शतम् । दासान् । अति । स्रजः ॥३॥

कपिला गाः चक्षुषा चन नेत्रेणापि संनशे सम्यक् व्याप्तुं संद्रष्टुं नेष्टे । किमुत वक्तव्यं तद्यशःसंपादने नेष्टे इति ॥ ॥ २६ ॥

'प्रति ते' इति पञ्चर्चमष्टमं सूक्तं काण्वस्य पृषध्रस्यार्षं गायत्रम् । अनुक्रान्तं च—प्रति ते पृषध्रोऽन्त्या[1] अग्निसूर्यदेवत्या पङ्क्तिश्छन्दस्का । शेषा इन्द्रदेवत्या गायत्रीछन्दस्काः । विनियोगः सूत्रादवगन्तव्यः ॥

(१) हे वृक शत्रुविकर्तनेन्द्र ते तव स्वभूतं राधो धनं दस्यवे उपक्षयित्रे शत्रवे प्रति प्रतिकूलम् अदर्शि दृष्टम् । शत्रुनापहृतं सन् (शत्रुणापहृतं सत्) न तस्य उपकाराय भवति प्रत्युतापकारायैव जायत इत्यर्थः । कीदृशं राधः । अहूयं लज्जारहितम् । शत्रुहनने प्रगल्भमिति यावत् । किंच ते शवः बलं प्रथिना पृथुत्वेन द्यौर्न द्युलोक इवास्ति । अतः सर्वोत्कृष्टं त्वामहं स्तौमीत्यभिप्रायः ॥

(२) हे पौतक्रतः पवित्रकर्मवन्निन्द्र मह्यं मदर्थं दश सहस्रा अयुतसंख्याकान् दस्यून्[2] उपक्षयितॄन् शत्रून् वृकः विवृत्तवान् छिन्नवानसि । अत एव नित्यात् शाश्वतात् त्वत्तः भीताः सन्तस्ते शत्रवः रायः धनानि अमंहत अदुः मह्यम् । मंहतिदानकर्मा तत्र तस्य पाठात् ॥

(३) किंच हे इन्द्र त्वत्तो भीतास्ते मे मह्यमृषये पृषध्रिनाम्ने (पृषध्र°) गर्दभानां रासभानां शतम् । अमंहत अदुः इति पूर्वमन्त्रगतेनान्वयः सर्वत्र । अथ च ऊर्णावतीनां मेषीनां शतमदुः । तथा शतान् शतसंख्याकान् दासान् भृत्यान् अति अतिशयिताः स्रजो मालाश्च अदुः । एवंप्रभावस्त्वां (°प्रभावं त्वां) स्तौमीत्यर्थः । यद्वा उभयोर्मन्त्रयोरयमर्थः । पौतक्रतः । पूते पवित्रे स्थाने क्रतः पादविक्षेपो यस्याः सा पूतक्रता अदितिः । पवित्रदेशे पादन्यासः अदितेरुचित एव । 'दृष्टिपूतं न्यसेत् पादम्' इति वचनात् । तस्या अपत्यं पौतक्रत इन्द्रः । दस्यवे । दस्युः कर्मोपक्षयिता तमःसंघः । तं हन्तुं वृकश्चन्द्रमाः सन (सन्) नित्यात् अनुपक्षीणात् स्वकोशात् सकाशात् दश सहस्रा अयुतसंख्याकानि रायः धनानि मह्यं पृषध्रनाम्ने अमंहत प्रादात् । किंच गर्दभमेषीदासमालाशतान्यपि मे मह्यं स एव प्रादात् इति । 'वृकश्चन्द्रमा भवति' (निरु. ५. २०) इति यास्कः ॥

---

१. 'पृषध्रोऽन्त्याग्निसौरी पङ्क्तिः इति । अन्त्या' इति भाव्यम् । २. 'दस्यवे' इति मन्त्रपाठः ।

तत्रो अपि प्राणीयत पूतक्रतायै व्यक्ता । अश्वानामिन्न यूथ्याम् ॥ ४ ॥

तत्रो इति । अपि । प्र । अनीयत । पूतऽक्रतायै । विऽअक्ता । अश्वानाम् । इत् । न । यूथ्याम् ॥४॥

अचेत्यग्निश्चिकितुर्हव्यवाट् स सुमद्रथः ।
अग्निः शुक्रेण शोचिषा बृहत्सूरो अरोचत दिवि सूर्यो अरोचत ॥ ५ ॥

अचेति । अग्निः । चिकितुः । हव्यऽवाट् । सः । सुमत्ऽरथः ।
अग्निः । शुक्रेण । शोचिषा । बृहत् । सूरः । अरोचत । दिवि । सूर्यः । अरोचत ॥५॥ ॥२७॥

॥ अथ नवमं सूक्तम् ॥

युवं देवा क्रतुना पूर्व्येण युक्ता रथेन तविषं यजत्रा ।
आगच्छतं नासत्या शचीभिरिदं तृतीयं सवनं पिबाथः ॥ १ ॥

युवम् । देवा । क्रतुना । पूर्व्येण । युक्ताः । रथेन । तविषम् । यजत्रा ।
आ । अगच्छतम् । नासत्या । शचीभिः । इदम् । तृतीयम् । सवनम् । पिबाथः ॥ १ ॥

---

(४) किंच व्यक्ता विविधं गन्ता नानादेशेषु प्रचलन् इन्द्रः तत्र स्वर्गे वर्तमानैः (? वर्तमानायै) पूतक्रतायै एतन्नामे (? °न्नाम्यै) समात्रेऽपि (स्वमात्रेऽपि) प्रानीयत प्रापितवान् । किमित्युच्यते । अश्वानां वडवानां यूथ्यां संहतिम् । न केवलं मह्यमेव प्रादादपि तु स्वजनन्या अपि वडवावृन्दं प्रापितवान् इतीयानिन्द्रः समर्थ इति भावः । इत् न इति निपातद्वयमनर्थकम् ॥

(५) अथानयाग्निसूर्यौ स्तूयेते । स प्रसिद्धोऽग्निः चिकितुः चेतनावतो यजमानस्य । कर्मणि षष्ठी । चेतनावन्तं यजमानम् अचेति जानाति । कीदृशः सः । हव्यवाट् हविषां वोढा सुमद्रथः स्वयमेव रंहणस्वभावः । ' सुमत् स्वयमित्यर्थः' (निरु. ६. २२) इति यास्कः । असहायगमनशील इत्यर्थः । किंच बृहत् महान् योऽग्निः शुक्रेण शुक्लेन शोचिषा तेजसा सूरः सुष्ठु ईरयिता प्रेरकः सन् रात्रौ भुवि अरोचत दीप्यते । अथ च दिवा दिवि (?) द्योतमाने स्वर्लोके सूर्यः सुष्ठु प्रेरयितादित्यः अरोचत दीप्यते । उभाभ्यामहोरात्रात्मकः सर्वः काल आक्रान्त इत्यभिप्रायः ॥ ॥ २७ ॥

' युवं देवा ' इति चतूऋचं नवमं सूक्तं काण्वस्य मेध्यस्यार्षमाश्विनं त्रैष्टुभम् । अनुक्रम्यते– ' युवं देवा चतुष्कं मेध्य आश्विनं त्रैष्टुभम् ' इति । विनियोगः सूत्रादवगन्तव्यः ॥

(१) हे यजत्रा यजनीयौ पूज्यौ देवौ द्योतमानावश्विनौ पूर्व्येण पुरा भवेन क्रतुना कर्मणा अनुग्रहबुद्धया वा उपेतौ युवं युवां प्रति रथेन रंहणस्वभावेन स्यन्दनेन युक्ताः संयुक्ता अश्वाः तविषं बलं यथा भवति तथा वहन्तीति शेषः । तस्मात् हे नासत्या नासत्यौ सत्यभूतौ युवां शचीभिः अनुग्रहलक्षणैः कर्मभिः सह इदं तृतीयं सवनमुद्दिश्य आगच्छतमागच्छतम् । आगत्य च पिबाथः पिबतं सोममिति शेषः ॥

युवां देवास्त्रय एकादशासः सत्याः सत्यस्य दद्दशे पुरस्तात् ।
अस्माकं यज्ञं सवनं जुषाणा पातं सोममश्विना दीद्यग्नी ॥ २ ॥

युवाम् । देवाः । त्रयः । एकादशासः । सत्याः । सत्यस्य । ददृशे । पुरस्तात् ।
अस्माकम् । यज्ञम् । सवनम् । जुषाणा । पातम् । सोमम् । अश्विना । दीद्यग्नी इति दीदिऽअग्नी ॥२॥

पनाय्यं तदश्विना कृतं वां वृषभो दिवो रजसः पृथिव्याः ।
सहस्रं शंसा उत ये गविष्टौ सर्वाँ इत्ताँ उप याता पिबध्यै ॥ ३ ॥

पनाय्यम् । तत् । अश्विना । कृतम् । वाम् । वृषभः । दिवः । रजसः । पृथिव्याः ।
सहस्रम् । शंसाः । उत । ये । गोऽइष्टौ । सर्वान् । इत् । तान् । उप । यात । पिबध्यै ॥३॥

अयं वां भागो निहितो यजत्रेमा गिरो नासत्योप यातम् ।
पिबतं सोमं मधुमन्तमस्मे प्र दाश्वांसमवतं शचीभिः ॥ ४ ॥

अयम् । वाम् । भागः । निऽहितः । यजत्रा । इमाः । गिरः । नासत्या । उप । यातम् ।
पिबतम् । सोमम् । मधुऽमन्तम् । अस्मे इति । प्र । दाश्वांसम् । अवतम् । शचीभिः ॥४॥ ॥२८॥

(२) हे अश्विनाश्विनौ युवां द्वौ अपरे च त्रय एकादशासः त्रयस्त्रिंशद्देवाः । ते च ' अष्टौ वसवः एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च ' इति श्रुतिप्रसिद्धाः । सर्वे यूयं सत्याः यथार्थभूताः सन्तः सत्यस्यावितथस्य यज्ञस्य पुरस्तात् पुरोदेशे ददृशे दृश्यमाना भवथ । अतोऽस्माकं संबन्धिनं सवनम् । सूयतेऽभिषूयते सोमो यत्रेति सवनः । तं तादृशं यज्ञं यजनीयमध्वरं जुषाणा जुष्यमाणौ सेवमानौ युवां सोमम् अभिषुतसोमरसं पातं पिबतम् । कीदृशौ युवाम् । दीद्यग्नी । दीदिः अतिशयेन दीप्यमानः अग्निः जठरानलो ययोस्तौ तादृशौ । भिषजोः भवतोर्दीप्ताग्नित्वमप्युचितमिति भावः ॥

(३) हे अश्विनाश्विनौ पृथिव्याः भूमेर्हेतोः दिवः द्युलोकात् सकाशात् रजसः उदकस्य वृषभः वर्षिता सूर्योऽस्तीति यत् तत्सर्वं वां युवयोः कृतं कर्म पनाय्यं स्तुत्यं भवति । भवदनुग्रहादेव युष्मत्पिता सूर्यः पृथिव्यां वर्षति । नो चेत् तेन तु स्वरश्मिनाडीभिः भूमेर्जलमाकृष्टमस्ति । स कथं वर्षेदाकर्षकः सन् । तस्मात् भवतोरेवैतत्कर्मेत्यभिप्रायः । यत एवमतः गविष्टौ गवामेषणे निमित्ते सति ते[1] प्रसिद्धाः सहस्रसंख्याकाः शंसाः । शस्यन्ते स्तूयन्त इति शंसा यज्ञाः । आरब्धाः सन्तीति शेषः । तान् सर्वानित् सर्वानपि यज्ञान् युवामुपयातं समीपे गच्छतम् । वचनव्यत्ययश्छान्दसः । किमर्थम् । पिबध्यै सोमं पातुम् । उत इत्यनर्थकः ॥

(४) हे यजत्रा यजनीयावश्विनौ अयं पुरोवर्ती वां युवयोः भागः भजनीयोंऽशः सोमलक्षणः निहितः नियमेन स्थापितः । अतस्तं गृहीतुमागच्छतमिति (ग्रहीतु°) शेषः । किंच हे नासत्या नासत्यौ सत्यभूतावश्विनौ युवामिमाः संनिकृष्टाः गिरः स्तुतिलक्षणा वाचः उपयातं समीपे गच्छतं श्रोतुम् । अथ च मधुमन्तं माधुर्योपेतं सोमं पिबतम् । किंच अस्मे अस्माकं संबन्धिनं दाश्वांसं हविर्दत्तवन्तं यजमानं शचीभिः अभिमतफलप्रदानलक्षणैः कर्मभिः प्र अवतं प्रकर्षेण रक्षतम् ॥ ॥ २८ ॥

१. ' ये ' इति मन्त्रपाठः ।

॥ अथ दशमं सूक्तम् ॥

यमृत्विजो बहुधा कल्पयन्तः सचेतसो यज्ञमिमं वहन्ति ।
यो अनूचानो ब्राह्मणो युक्त आसीत्का स्वित्तत्र यजमानस्य संवित् ॥ १ ॥

यम् । ऋत्विजः । बहुधा । कल्पयन्तः । सऽचेतसः । यज्ञम् । इमम् । वहन्ति ।
यः । अनूचानः । ब्राह्मणः । युक्तः । आसीत् । का । स्वित् । तत्र । यजमानस्य । सम्ऽवित् ॥ १ ॥

एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः ।
एकैवोषाः सर्वमिदं वि भात्येकं वा इदं वि बभूव सर्वम् ॥ २ ॥

एकः । एव । अग्निः । बहुधा । सम्ऽइद्धः । एकः । सूर्यः । विश्वम् । अनु । प्रऽभूतः ।
एका । एव । उषाः । सर्वम् । इदम् । वि । भाति । एकम् । वै । इदम् । वि । बभूव । सर्वम् ॥ २ ॥

ज्योतिष्मन्तं केतुमन्तं त्रिचक्रं सुखं रथं सुषदं भूरिवारम् ।
चित्रामघा यस्य योगेऽधिजज्ञे तं वां हुवे अति रिक्तं पिबध्यै ॥ ३ ॥

'यमृत्विजः' इति तृचात्मकं दशमं सूक्तं काण्वस्य मेध्यस्यार्षं वैश्वदेवं त्रैष्टुभम् । अनुक्रान्तं च–'यमृत्विजस्तृचं[1] वैश्वदेवमाद्य ऋत्विक्स्तुतिर्वा[1]' इति । आद्या ऋत्विग्देवत्या वा इत्यर्थः । विनियोगः सूत्रादवगन्तव्यः ॥

(१) सचेतसः समानप्रज्ञाः ऋत्विजः यमिमं यज्ञं यजनीयकर्मविशेषं बहुधा अनेकप्रकारेण कल्पयन्तः रचयन्तः सन्तः वहन्ति देवान् प्रापयन्ति । तमिमं यज्ञं कुर्वन् ब्राह्मणः ऋत्विग्लक्षणो विप्रः यज्ञकर्मविशेषे युक्तः समाहितः आसीत् । तत्र कर्मणि का स्वित् । स्विदिति वितर्के । का वा यजमानस्य संवित् प्रज्ञा । न किंचित्करा इत्यर्थः । यत्र कर्मणि ऋत्विगेव सावधानोऽस्ति तत्र यजमानस्य प्रज्ञापाटवेन किं प्रयोजनमस्ति । न किंचिदपीति भावः । कीदृशो ब्राह्मणः । अनूचानः गुरोः सकाशादधीतवेदवेदाङ्गः ॥

(२) एकः केवल एवाग्निः दानादिगुणयुक्तो देवः बहुधा वाडववैद्युताद्यनेकप्रकारेण समिद्धः सम्यक् दीप्तो भवति । तथा एकः एकाकी सूर्यः प्राणिनां सुषु कर्मस्वीरयिता देवः विश्वं सर्वं जगदनु अनुप्रविश्य । 'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै. उ. २. ६) इति श्रुतेः । प्रभूतः अनेकात्मतया प्रादुर्भूतोऽस्ति । 'सूर्य आत्मा जगतस्तस्थुषश्च' (ऋ. सं. १. ११५. १) इति श्रुतेः । किंच एका एकाकिन्येव उषाः तमो विवासयन्ती देवी सर्वं समस्तमिदं दृश्यमानं जगत् वि भाति विशेषेण दीपयति । तस्मादेकं वै एकमेवाद्वितीयं ब्रह्म इदमाब्रह्मस्तम्बपर्यन्तं जगत् वि बभूव विशेषेणाभवदिति युक्तमिति शेषः । यदाग्न्यादयो देवा अप्येकाकिनः सन्तोऽनेकभवनसमर्थास्तदा परं ब्रह्म एकं सदनेकं भवेदिति किमु वक्तव्यमित्यभिप्रायः ॥

(३) हे विश्वेदेवाः वाम् । वचनव्यत्ययश्छान्दसः । वो युष्माकं मध्ये अतिरिक्तं[2] निरतिशयं तं तच्छब्दवाच्यं परमात्मानं पिबध्यै सोमं पातुं हुवे आह्वयामि । तं कम् । यस्य परमात्मनः योगे सेव्यसेवकभावसंबन्धे सति चित्रमघा । चित्रं चायनीयं मघं गवाश्वादिलक्षणं धनं यस्याः सा चित्रमघा ।

---

१. अनुक्रमण्यामेतन्नोपलभ्यते । मॅक्.– पृ. ३१ द्रष्टव्यम् ॥ २. 'अति । रिक्तम्' इति पदपाठः ।

ज्योतिष्मन्तम्। केतुऽमन्तम्। त्रिऽचक्रम्। सुऽखम्। रथम्। सुऽसदम्। भूरिऽवारम्। चित्रऽमघा। यस्य। योगे। अधिऽजज्ञे। तम्। वाम्। हुवे। अति। रिक्तम्। पिबध्यै ॥३॥॥२९॥

॥ अथैकादशं सूक्तम् ॥

इमानि वां भागधेयानि सिस्रत इन्द्रावरुणा प्र महे सुतेषु वाम्।
यज्ञेयज्ञे ह सवना भुरण्यथो यत्सुन्वते यजमानाय शिक्षथः ॥ १ ॥

इमानि। वाम्। भागऽधेयानि। सिस्रते। इन्द्रावरुणा। प्र। महे। सुतेषु। वाम्। यज्ञेऽयज्ञे। ह। सवना। भुरण्यथः। यत्। सुन्वते। यजमानाय। शिक्षथः ॥ १ ॥

निष्षिध्वरीरोषधीरापं आस्तामिन्द्रावरुणा महिमानमाशत।
या सिस्रतू रजसः पारे अध्वनो ययोः शत्रुर्नाकिरादेव ओहते ॥ २ ॥

पूजनीयानेकधनोपेता लक्ष्मीः अधि जज्ञे अधिकं प्रादुरभूत् युधिष्ठिरादेस्तम्। कीदृशं तम्। ज्योतिष्मन्तं ज्योतीषि सूर्यादीनि प्रकाश्यत्वेन सन्ति यस्य तम्। 'तस्य भासा सर्वमिदं विभाति' इति श्रुतेः। केतुमन्तम्। केतवः प्रज्ञाः विषयाः सन्ति यस्य तम्। 'यः सर्वज्ञः सर्ववित्' (मु. उ. १. १. ९) इति श्रुतेः। केतुरिति प्रज्ञानाम। 'केतुः केतः' इति तन्नामसु पाठात्। त्रिचक्रं त्रिषु भूरादिलोकेषु चक्रं चंक्रमणं त्रिविक्रमावतारे यस्य तम्। 'इदं विष्णुर्विचक्रमे' (ऋ. सं. १. २३. १७) इत्यादिश्रुतेः। यद्वा त्रिषु लोकेषु अप्रतिहतं चक्रं सुदर्शनाख्यं यस्य तम्। सुखं निरतिशयानन्दात्मकम्। 'ओं खं ब्रह्म खम्' (इति) श्रुतेः। रथं रंहणस्वभावम्। गमनशीलमिति यावत्। 'अपाणिपादो जवनो ग्रहीता' (श्वे. उ. ३. १९) इति श्रुतेः। सुपदम्। शोभने आत्मस्वरूपे सीदति तिष्ठतीति सुपत् सुप्रतिष्ठः तम्। 'प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म' इति श्रुतेः। भूरिवारं भूरिभिर्बहुभिः प्राणिभिः वारो वरणीयस्तम्। सर्वात्मकत्वात् सर्वप्रियत्वमुचितमस्य। 'आत्मनः कामाय सर्वं प्रियं भवति' (बृ. उ. २. ४. ५) इति श्रुतेः ॥ ॥ २९ ॥

'इमानि वाम्' इति सप्तर्चमेकादशं सूक्तं काण्वस्य सुपर्णस्यार्षमैन्द्रावरुणं जागतम्। 'इमानि वां सप्त सुपर्णो ऐन्द्रावरुणं जागतम्' इत्यनुक्रान्तत्वात्। विनियोगः सूत्रादवगन्तव्यः ॥

(१) हे इन्द्रावरुणा इन्द्रावरुणौ इमानि इदानीं कृतानि भागधेयानि भवदंशभूतानि चरुपुरोडाशादिहवींषि वां युवां प्रति सिस्रते प्राप्तुमिच्छन्ति। अतः सुतेषु अभिषुतेषु सोमेषु सत्सु महे महते पूजनाय वां युवां प्र प्रार्चये। उपसर्गवशाद्योग्यक्रियाध्याहारः। यत् यस्मात् यज्ञेयज्ञे प्रतियज्ञं सवना त्रिष्वपि सवनेषु भुरण्यथो ह गच्छथः खलु। किंच सुन्वते सोमाभिषवं कुर्वते यजमानाय शिक्षथः अभिमतं प्रयच्छथः। शिक्षतिर्दानकर्मा। 'पृणाति शिक्षति' इति दानकर्मसु पाठात् ॥

(२) हे इन्द्रावरुणा इन्द्रावरुणौ भवन्तौ यदा आस्ताम् ओषध्यादिकर्तृत्वेनाभूतां तदा निःसिध्वरीः नितरां मङ्गलस्वभावा ओषधीः व्रीह्याद्या ओषधयः आपः उदकानि च महिमानं भवतोर्माहात्म्यम् आशत व्याप्नुवन्ति। किंच या यौ भवन्तौ रजसोऽन्तरिक्षलोकस्य संबन्धिनः अध्वनो

निःऽसिध्वरीः । ओषधीः । आपः । आस्ताम् । इन्द्रावरुणा । महिमानम् । आशत ।
या । सिस्रतुः । रजसः । पारे । अध्वनः । ययोः । शत्रुः । नकिः । अदेवः । ओहते ॥२॥

सत्यं तदिन्द्रावरुणा कृशस्य वां मध्व ऊर्मिं दुहते सप्त वाणीः ।
ताभिर्दाश्वांसमवतं शुभस्पती यो वामदब्धो अभि पाति चित्तिभिः ॥ ३ ॥

सत्यम् । तत् । इन्द्रावरुणा । कृशस्य । वाम् । मध्वः । ऊर्मिम् । दुहते । सप्त । वाणीः ।
ताभिः । दाश्वांसम् । अवतम् । शुभः । पती इति ।
यः । वाम् । अदब्धः । अभि । पाति । चित्तिऽभिः ॥ ३ ॥

घृतप्रुषः सौम्या जीरदानवः सप्त स्वसारः सदन ऋतस्य ।
या ह वामिन्द्रावरुणा घृतश्चुतस्ताभिर्धत्तं यजमानाय शिक्षतम् ॥ ४ ॥

घृतऽप्रुषः । सौम्याः । जीरऽदानवः । सप्त । स्वसारः । सदने । ऋतस्य ।
याः । ह । वाम् । इन्द्रावरुणा । घृतऽश्चुतः । ताभिः । धत्तम् । यजमानाय । शिक्षतम् ॥४॥ ॥३०॥

अवोचाम महते सौभगाय सत्यं त्वेषाभ्यां महिमानमिन्द्रियम् ।
अस्मान्त्स्विन्द्रावरुणा घृतश्चुतस्त्रिभिः साप्तेभिरवतं शुभस्पती ॥ ५ ॥

मार्गस्य पारे परतीरे सिस्रतुः यथेच्छं सरणं कुरुतः । ययोर्भवतोः शत्रुः शातयिता अदेवः देवप्रतियोगी असुरादिः नकिः ओहते न कोऽपि तर्कगोचरो भवति । स्वेच्छया विहरतोर्भवतोः गतिप्रतिघातकः शत्रुः न कोऽप्यस्तीत्यर्थः ॥

(३) हे इन्द्रावरुणा इन्द्रावरुणौ याः सप्तसंख्याकाः सर्पणस्वभावा वा वाणीः वाण्यः सप्तहोत्रकाणां स्तुतिरूपा वाचः कृशस्य एतन्नाम्नो यजमानस्य संबन्धिनः मध्वः मधुरस्य सोमस्य ऊर्मिं तदुपलक्षितं रसं प्रति वां युवां दुहते प्रपूरयन्तीति यत् तत्सत्यमवितथमेव । तस्मात्ताभिर्वाणीभिर्हेतुभूताभिः युवां दाश्वांसं हविर्दत्तवन्तं यजमानम् अवतं रक्षतम् । यजमानं विशिनष्टि । हे शुभस्पती उदकस्य पालयितारविन्द्रावरुणौ यो यजमानः अदब्धः केनाप्यहिंसितः सन् चित्तिभिः प्रज्ञोपलक्षितैः कर्मभिः वां युवामभि पाति सर्वतो रक्षति । तमवतमिति पूर्वेणान्वयः ॥

(४) ताः सत्यवाण्यः क्व सन्तीत्यपेक्षायामाह । ऋतस्य यज्ञस्य सदने स्थाने सप्त सप्तसंख्याकाः स्वसारः स्वयंसारिण्यो वाण्यः सन्ति । कीदृश्यस्ताः । घृतप्रुषः । घृतमित्युदकनाम । तेन सोमरसो लक्ष्यते । तथा च सोमरसस्राविण्य इत्यर्थः । सोम्याः सोमार्हाः जीरदानवः क्षिप्रदानाः । किंच हे इन्द्रावरुणा इन्द्रावरुणौ या वाण्यः वां युवामुद्दिश्य घृतश्चुतः सोमरसस्राविण्यो भवन्ति अथवा आज्यस्राविण्यो भवन्ति । हेति प्रसिद्धम् । ताभिर्हेतुभूताभिः धत्तं यजमानं पुण्णीतम् । तदर्थं च यजमानाय शिक्षतमभिमतं दत्तम् ॥ ॥ ३० ॥

(५) हे इन्द्रावरुणा इन्द्रावरुणौ त्वेषाभ्यां दीप्ताभ्यां भवद्भ्यां संपादितं महिमानं कीर्तिविशेषं वयं महते बृहते सौभगाय ऐश्वर्याय अवोचाम वर्णयेम । कीदृशं महिमानम् । सत्यमवितथम् । युष्मत्स्वरू-

अवोचाम । महते । सौभगाय । सत्यम् । त्वेषाभ्याम् । महिमानम् । इन्द्रियम् ।
अस्मान् । सु । इन्द्रावरुणा । घृतऽश्चुतः । त्रिऽभिः । साप्तेभिः । अवतम् । शुभः । पती इति ॥५॥

इन्द्रावरुणा यदृषिभ्यो मनीषां वाचो मतिं श्रुतमदत्तमग्रे ।
यानि स्थानान्यसृजन्त धीरा यज्ञं तन्वानास्तपसाभ्यपश्यम् ॥ ६ ॥

इन्द्रावरुणा । यत् । ऋषिऽभ्यः । मनीषाम् । वाचः । मतिम् । श्रुतम् । अदत्तम् । अग्रे ।
यानि । स्थानानि । असृजन्त । धीराः । यज्ञम् । तन्वानाः । तपसा । अभि । अपश्यम् ॥६॥

इन्द्रावरुणा सौमनसमदृप्तं रायस्पोषं यजमानेषु धत्तम् ।
प्रजां पुष्टिं भूतिमस्मासु धत्तं दीर्घायुत्वाय प्र तिरतं न आयुः ॥ ७ ॥

इन्द्रावरुणा । सौमनसम् । अदृप्तम् । रायः । पोषम् । यजमानेषु । धत्तम् ।
प्रऽजाम् । पुष्टिम् । भूतिम् । अस्मासु । धत्तम् ।
दीर्घायुऽत्वाय । प्र । तिरतम् । नः । आयुः ॥ ७ ॥ ॥ ३१ ॥

॥ इति वालखिल्यं समाप्तम् ॥

पानुकूलमित्यर्थः । इन्द्रियम् इन्द्रयोः परमेश्वरयोर्भवतोर्ज्ञापकम् । तस्मात् हे शुभस्पती उदकस्य पालयितारविन्द्रावरुणौ युवां घृतश्चुतः सोमरसस्राविणोऽस्मान् यजमानान् त्रिभिः साप्तेभिः । सप्तयोऽश्वाः तेषां समूहः । सप्तयूथैस्तैः त्रिसंख्याकैरश्वसमूहैः सोतं (? सु अवतं) सुतरां पालयतम् । इन्द्रावरुणयोरैश्वर्ययोगात् अश्वैरस्मत्पालनं समञ्जसमिति भावः ॥

(६) हे इन्द्रावरुणा इन्द्रावरुणौ यत् ये ऋषयः यज्ञं तन्वानाः कर्मविशेषं विस्तारयन्तः अत एव धीराः शुद्धान्तःकरणत्वेन धीमन्तः सन्तः अग्रे अन्तःकरणशुद्धेः प्राक् यानि स्थानानि गृहक्षेत्रादीनि स्थितानि तानि असृजन्त विसृष्टवन्तः । तत्यजिरिति (? तत्यजुरिति) यावत् । तेभ्य ऋषिभ्यः मन्त्रदृग्भ्यः मनीषादिश्रुतान्तं सर्वं युवाम् अदत्तं दत्तवन्तौ इत्यहं तपसा आलोचनात्मकेन ज्ञानेन अभ्यपश्यं सर्वतो दृष्टवानस्मि । मनीषा अत्र चिज्जडविवेकवती बुद्धिः । वाचः उपनिषल्लक्षणा गिरः । मतिर्मननं तर्कसामर्थ्यम् । श्रुतं शास्त्रमीमांसालक्षणम् । एतत्सर्वं भवद्भ्यां तेभ्यो दत्तमिति श्रीमच्चरणप्रसादाल्लब्धज्ञानेन मया ज्ञातमित्यृषेर्वक्तुरभिप्रायः ॥

(७) हे इन्द्रावरुणा इन्द्रावरुणौ युवां सौमनसं प्रसन्नमनस्कत्वं तथा अदृप्तम् अनुद्धतम् । मोहशून्यमिति यावत् । रायः धनस्य पोषं पुष्टिं च यजमानेषु धत्तं धारयतम् । किंचास्मासु स्तोतृषु प्रजां पुत्रपौत्रादिरूपां पुष्टिं धनादेः समृद्धिं भूतिं गवाश्वादिगजान्तसंपदं च धत्तं धारयतम् । अथ च दीर्घायुत्वाय चिरजीवनाय नोऽस्माकमायुः जीवितकालं प्र तिरतं प्रवर्धयतम् । प्रपूर्वस्तिरतिर्वर्धनार्थः ॥ ॥ ३१ ॥

सप्तमेऽनुवाके दश सूक्तानि । तत्र 'अग्न आ याहि' इति विंशत्यृचं प्रथमं सूक्तं प्रगाथपुत्रस्य[1] भर्गस्यार्षमाग्नेयम्[1]। प्रथमातृतीयाद्ययुजो बृहत्यो द्वितीयाचतुर्थ्यादियुजः सतोबृहत्यः। तथा चानुक्रान्तम्—'अग्न आ विंशतिर्भर्गः प्रागाथ आग्नेयं प्रागाथं तु' इति। प्रातरनुवाक आग्नेये क्रतौ बार्हते छन्दस्याश्विनशस्त्रे चेदं सूक्तम्। तथा च सूत्रितम्—'अयमग्निरग्न आ याहि' (आश्व. श्रौ. ४. १३) इति ॥

अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे ।
आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥ १ ॥

अग्ने। आ। याहि। अग्निऽभिः। होतारम्। त्वा। वृणीमहे।
आ। त्वाम्। अनक्तु। प्रऽयता। हविष्मती। यजिष्ठम्। बर्हिः। आऽसदे ॥ १ ॥

हे [v]अग्ने [v]अग्निभिः यष्टृभ्यैः सह [v]आ [v]याहि आगच्छ। तदर्थं [v]होतारं देवानामाह्वातारं [v]त्वा त्वां [v]वृणीमहे। त्वा त्वामागतं [v]प्रयता अध्वर्युहस्ताभ्यां नियता [v]हविष्मती घृतवती[2] [v]यजिष्ठं [v]त्वां [v]बर्हिः[3] बर्हिषि [v]आसदे आसाद्य [v]आ सर्वतः [v]अनक्तु[4] ॥

अच्छा हि त्वा सहसः सूनो अङ्गिरः सुचश्चरन्त्यध्वरे ।
ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् ॥ २ ॥

अच्छ। हि। त्वा। सहसः। सूनो इति। अङ्गिरः। सुचः। चरन्ति। अध्वरे।
ऊर्जः। नपातम्। घृतऽकेशम्। ईमहे। अग्निम्। यज्ञेषु। पूर्व्यम् ॥ २ ॥

हे [v]सहसः [v]सूनो बलस्य पुत्र। बलेन मथ्यमानत्वात्। हे [v]अङ्गिरः अङ्गिरसां मध्ये एक। अथवाङ्गतिर्गतिकर्मा। सर्वत्र संगत। [v]त्वा त्वाम् [v]अध्वरे यागे [v]अच्छ अभिप्राप्तुं [v]सुचः [v]चरन्ति गच्छन्ति। अतः [v]ऊर्जः अन्नस्य [v]नपातं न पातयितारं रक्षकं बलस्य नप्तारं वा [v]घृतकेशं प्रदीप्तकेशस्थानीयज्वालं [v]पूर्व्यं[5] पुरातनं पूरकं वा [v]अग्निं [v]यज्ञेषु अस्मदीयेषु [v]ईमहे स्तौमि ॥

अग्ने कविर्वेधा असि होता पावक यक्ष्यः ।
मन्द्रो यजिष्ठो अध्वरेष्वीड्यो विप्रेभिः शुक्र मन्मभिः ॥ ३ ॥

अग्ने। कविः। वेधाः। असि। होता। पावक। यक्ष्यः।
मन्द्रः। यजिष्ठः। अध्वरेषु। ईड्यः। विप्रेभिः। शुक्र। मन्मऽभिः ॥ ३ ॥

हे [v]अग्ने [v]कविः मेधावी त्वं [v]वेधाः विधाता [v]असि फलानाम्। हे [v]पावक[6] [v]होता देवानामाह्वाता होमनिष्पादको वा [v]यक्ष्यः यष्टृभ्योऽसि। हे [v]शुक्र दीप्त [v]मन्द्रः मोदनीयः [v]यजिष्ठः यष्टृतमस्त्वम् [v]अध्वरेषु यज्ञेषु [v]विप्रेभिः मेधाविभिर्ऋत्विग्भिः [v]मन्मभिः मननीयैः स्तोत्रैः [v]ईड्यः स्तुत्योऽसि ॥

अद्रोघमा वहोशतो यविष्ठ्य देवाँ अजस्र वीतये ।
अभि प्रयाँसि सुधिता वसो गहि मन्दस्व धीतिभिर्हितः ॥ ४ ॥

---

१. ग-त-न-श–प्रगाथपुत्रभर्गस्या° । २. भ१-२–घृतवती स्रुक्; भ३–हविर्भिर्युक्ता स्रुक् । ३. ग-त-श–'बर्हिः' नास्ति । ४. य–अनक्तु भक्षयतु । ५. त३-४-न-श–सपूर्व्यं । ६. घ–पावक शोधक ।

अद्रोघम्। आ। वह। उशतः। यविष्ठ्य। देवान्। अजस्र। वीतये।
अभि। प्रयांसि। सुऽधिता। आ। वसो इति। गहि। मन्दस्व। धीतिऽभिः। हितः ॥४॥

vअद्रोघम् अद्रोग्धारं मां प्रति हे vयविष्ठ्य युवतम vअजस्र नित्य vआ vवह आनय। कान्। vउशतः अस्मदर्थं कामयमानान् vदेवान्। किमर्थम्। vवीतये हविर्भक्षणाय। हे vवसो वासकाग्ने vसुधिता सुनिहितानि vप्रयांसि अन्नानि vअभि vगहि अभिगच्छ। आगत्य च vधीतिभिः[1] स्तुतिभिः vहितः निहितः सन् vमन्दस्व। यद्वा। धीतिभिर्मन्दस्वेति संबन्धः ॥

त्वमित्सप्रथा असयग्ने त्रातरृतस्कविः।
त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥ ५ ॥

त्वम्। इत्। सऽप्रथाः। असि। अग्ने। त्रातः। ऋतः। कविः।
त्वाम्। विप्रासः। सम्ऽइधान। दीदिऽवः। आ। विवासन्ति। वेधसः ॥ ५ ॥

हे vअग्ने vत्रातः रक्षक vऋतः सत्यभूतः vकविः क्रान्तप्रज्ञः vत्वमित् त्वमेव vसप्रथाः सर्वतः पृथुः vअसि भवसि। हे vसमिधान समिध्यमान हे vदीदिवः दीप्त vत्वां vविप्रासः विप्रा मेधाविनः vवेधसः विधातारः स्तोतारः vविवासन्ति[2] परिचरन्ति ॥ ॥ ३२ ॥

शोचा शोचिष्ठ दीदिहि विशे मयो रास्व स्तोत्रे महाँ असि।
देवानां शर्मन्मम सन्तु सूरयः शत्रूषाहः स्वग्नयः ॥ ६ ॥

शोच। शोचिष्ठ। दीदिहि। विशे। मयः। रास्व। स्तोत्रे। महान्। असि।
देवानाम्। शर्मन्। मम। सन्तु। सूरयः। शत्रुऽसहः। सुऽअग्नयः ॥ ६ ॥

हे vशोचिष्ठ अतिशयेन शोचयितरग्ने vशोच दीप्यस्व। vदीदिहि दीपयास्मान्। vविशे प्रजायै vस्तोत्रे vमयः सुखं vरास्व देहि। त्वं vमहानसि। vदेवानां[3] संबन्धिनि vशर्मन् शर्मणि सुखे vमम vसूरयः स्तोतारो मेधाविनोऽस्माकं पुत्रादयो वा vसन्तु भवन्तु। vशत्रूषाहः शत्रूणामभिभवितारः vस्वग्नयः शोभनाग्नयश्च सन्तु ॥

यथा चिद्वृद्धमतसमग्ने संजूर्वसि क्षमि।
एवा दह मित्रमहो यो अस्मध्रुग्दुर्मन्मा कश्च वेनति ॥ ७ ॥

यथा। चित्। वृद्धम्। अतसम्। अग्ने। सम्ऽजूर्वसि। क्षमि।
एव। दह। मित्रऽमहः। यः। अस्मऽध्रुक्। दुःऽमन्मा। कः। च। वेनति ॥ ७ ॥

हे vअग्ने vक्षमि क्षमायां वर्तमानं vवृद्धमतसं शुष्कं काष्ठं vयथा येन प्रकारेण vसंजूर्वसि। जूर्वतिर्हिंसाकर्मा। सम्यग्दहसीत्यर्थः। vएव एवं vदह हे vमित्रमहः मित्राणामस्माकं पूजक तेजो[4] वा। कम्[5]। vयः vअस्मध्रुक् अस्माकं द्रोग्धा vकश्च कश्चित् vदुर्मन्मा दुर्मतिः vवेनति कामयते अस्मान् द्रोग्धुं तं दहेति[6] ॥

---

१. ज्ञ-भ-धीतिभिः कर्मभिः। २. घ-आविवासंति। ३. ख-घ-त-न-भ-श-मु-त्वं देवानां। ४. ख-ज्ञ-त१-२-तेजो वार्यक; ग-तेजो वा; त३-४-श-तेजोवाक। ५. त-न-भ१-२-श-दहतेति; भ३-दहति।

मा नो मर्ताय रिपवे रक्षस्विने माघशंसाय रीरधः ।
अस्रेधद्भिस्तरणिभिर्यविष्ठ्य शिवेभिः पाहि पायुभिः ॥ ८ ॥

मा । नः । मर्ताय । रिपवे । रक्षस्विने । मा । अघऽशंसाय । रीरधः ।
अस्रेधत्ऽभिः । तरणिऽभिः । यविष्ठ्य । शिवेभिः । पाहि । पायुऽभिः ॥ ८ ॥

vनः अस्मान् vमर्ताय[1] मरणधर्माय[1] vरिपवे शत्रवे हिंसित्रे vरक्षस्विने बलवते vमा vरीरधः वक्षमानय[2] । तथा vअघशंसाय पापशंसकाय vमा रीरधः । हे vयविष्ठ्य युवतम vअस्रेधद्भिः अहिंसकैः vतरणिभिः तारकैः vशिवेभिः सुखकरैः vपायुभिः पालनैः नोऽस्मान् vपाहि रक्ष ॥

पाहि नो अग्न एकया पाह्युत द्वितीयया ।
पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥ ९ ॥

पाहि । नः । अग्ने । एकया । पाहि । उत । द्वितीयया ।
पाहि । गीःऽभिः । तिसृऽभिः । ऊर्जाम् । पते । पाहि । चतसृऽभिः । वसो इति ॥ ९ ॥

हे vअग्ने vनः अस्मान् vएकया ऋचा गिरा vपाहि रक्ष । vउत अपि च vद्वितीयया ऋचा vपाहि पालय । vपाहि vतिसृभिः vगीर्भिः vऊर्जाम् अन्नानां बलानां वा vपते[3] स्वामिन् । तथा vपाहि vचतसृभिः गीर्भिर्हे vवसो वासकाग्ने ॥

पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजेषु नोऽव ।
त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥ १० ॥

पाहि । विश्वस्मात् । रक्षसः । अराव्णः । प्र । स्म । वाजेषु । नः । अव ।
त्वाम् । इत् । हि । नेदिष्ठम् । देवऽतातये । आपिम् । नक्षामहे । वृधे ॥ १० ॥

हे अग्ने vविश्वस्मात् सर्वस्मात् vरक्षसः vअराव्णः अदातुः सकाशात् vपाहि रक्षास्मान् । vवाजेषु संग्रामेषु vनः अस्मान् vप्र vअव प्रकर्षेण रक्ष । vस्म इति पूरणः । vहि यस्मात् vनेदिष्ठम् आसन्नम् vआपिं बन्धुभूतं vत्वामित् त्वामेव vदेवतातये यज्ञाय यज्ञसिद्धयर्थं vवृधे वर्धनाय vनक्षामहे व्याप्नुमः । नक्षतिर्व्याप्तिकर्मा ॥ ॥ ३३ ॥

आ नो अग्ने वयोवृधं रयिं पावक शंस्यम् ।
रास्वा च न उपमाते पुरुस्पृहं सुनीती स्वयशस्तरम् ॥ ११ ॥

आ । नः । अग्ने । वयःऽवृधम् । रयिम् । पावक । शंस्यम् ।
रास्व । च । नः । उपऽमाते । पुरुऽस्पृहम् । सुऽनीती । स्वयशःऽतरम् ॥ ११ ॥

हे vअग्ने vपावक शोधक vवयोवृधम् अन्नस्य वर्धकं vशंस्यं शंसनीयं[4] vरयिं धनं vनः अस्मभ्यम् vआ हरेति शेषः । आहृत्य च हे vउपमाते । उपास्मत्समीपे माति नो धनमित्युपमातिः । हे तादृशाग्ने

१. ख-ग-त-न-भ-श–‘ मर्ताय मरणधर्माय ’ नास्ति । २. भ–वशं मानय । ३. ग-त-न-भ-श–‘ पते ’ नास्ति । ४. ख-ग-त-न-भ-श–‘ शंसनीयं ’ नास्ति ।

vनः अस्मभ्यं vसुनीती सुनीत्या शोभननयनेन vपुरुस्पृहं बहुभिः स्पृहणीयं vस्वयशस्तरम् अत्यन्तं स्वभूतकीर्तिं धनं vरास्व vच देहि ॥

येन॒ वंसा॑म पृत॒नासु॒ शर्ध॑त॒स्तर॑न्तो अ॒र्य आ॒दिशः॑ ।
स त्वं नो॑ वर्धृ प्रय॑सा शचीवसो॒ जिन्वा॒ धियो॑ वसु॒विदः॑ ॥ १२ ॥

येन । वंसाम । पृतनासु । शर्धतः । तरन्तः । अर्यः । आऽदिशः ।
सः । त्वम् । नः । वर्ध । प्रयसा । शचीवसो इति शचीऽवसो । जिन्व । धियः । वसुऽविदः ॥१२॥

vयेन धनेन vपृतनासु संग्रामेषु vशर्धतः[1] वेगं कुर्वतः[1] vअर्यः अरीञ्छत्रून् vआदिशः आदेष्टॄञ्छस्त्रप्रक्षेप्तॄन् vतरन्तः vवंसाम हिंसाम तद्धनं देहि । हे vशचीवसो प्रज्ञया वासयितः कर्मधन वा vसः प्रसिद्धः vत्वं vनः अस्मान् vवर्ध वर्धय प्रीणय । vप्रयसा अन्नेन त्वं वा वर्ध । अस्मदीयेन प्रयसा हविषा vवसुविदः वसूनां लम्भकानि vधियः कर्माण्यस्मदीयानि vजिन्व प्रीणय ॥

शिशा॑नो वृष॒भो यथा॒ग्निः शृ॒ङ्गे दवि॑ध्वत् ।
ति॒ग्मा अ॑स्य॒ हन॑वो॒ न प्र॑ति॒धृषे॑ सु॒जम्भ॒ः सह॑सो य॒हुः ॥ १३ ॥

शिशानः । वृषभः । यथा । अग्निः । शृङ्गे इति । दविध्वत् ।
तिग्माः । अस्य । हनवः । न । प्रतिऽधृषे । सुऽजम्भः । सहसः । यहुः ॥ १३ ॥

अथम् vअग्निः vशृङ्गे vशिशानः तीक्ष्णीकुर्वन् vवृषभो vयथा vदविध्वत् कम्पयति शिरः एवं शृङ्गस्थानीया[2] ज्वालाः शिशानस्तीक्ष्णीकुर्वन् दविध्वत् कम्पयति शिरः । vअस्य अग्नेः vहनवो vन हनव इव हनुस्थानीया ज्वालाः vतिग्माः[3] vन vप्रतिधृषे प्रतिधर्षितुमशक्याः । योऽग्निः vसुजम्भः सुदंष्ट्रः vसहसो vयहुः सहसः पुत्रः अस्य हनव इत्यर्थः ॥

नहि ते॑ अग्ने वृषभ प्रति॒धृषे॒ जम्भा॑सो॒ यद्वि॒तिष्ठ॑से ।
स त्वं नो॑ होतः॒ सुहु॑तं ह॒विष्कृ॑धि॒ वंस्वा॑ नो॒ वार्या॑ पु॒रु ॥ १४ ॥

नहि । ते । अग्ने । वृषभ । प्रतिऽधृषे । जम्भासः । यत् । विऽतिष्ठसे ।
सः । त्वम् । नः । होतरिति । सुऽहुतम् । हविः । कृधि । वंस्व । नः । वार्या । पुरु ॥१४॥

हे vवृषभ वर्षक vते तव vजम्भासः जम्भा दन्तस्थानीया ज्वालाः vनहि vप्रतिधृषे प्रतिधर्षितुं न शक्याः । vयत् यस्मात् vवितिष्ठसे विविधं गच्छसि । प्रवर्धस इत्यर्थः । हे vहोतः होमनिष्पादक vस vत्वं vहविः अस्मद्दत्तं vसुहुतं vकृधि कुरु । vनः अस्मभ्यं vवार्या वरणीयानि vपुरु बहूनि vवंस्व देहि ॥

शेषे॒ वने॑षु मा॒तृषु॑ सं त्वा॒ मर्ती॑स इन्धते ।
अत॑न्द्रो ह॒व्या व॑हसि ह॒विष्कृ॒त आदिद्दे॒वेषु॑ राजसि ॥ १५ ॥

---

१. ग–शर्धतीं वेगं कुर्वतः; घ-ज्ञ-त१-२-श–शर्धतः वेगं कुरुतः; त३-४–शर्धत वेगं कुरुत; न–वर्धत वेगं कुरुत । २. ज्ञ-त२-४-न-भ१-३-श–शृंगे स्थानीया । ३. ख-ग-त-न-भ-श–' तिग्माः ' नास्ति ।

शेषे । वनेषु । मात्रोः । सम् । त्वा । मर्तासः । इन्धते ।

अतन्द्रः । हव्या । वहसि । हविःऽकृतः । आत् । इत् । देवेषु । राजसि ॥ १५ ॥

हे अग्ने ᵛवनेषु वर्तमानयोः ᵛमात्रोः अरण्योः ᵛशेषे स्वपिषि वर्तसे । ᵛत्वा त्वां तथाभूतं ᵛमर्तासः मनुष्या अध्वर्यवादयो मथनेनोत्पाद्य ᵛसम् ᵛइन्धते । पश्चात् प्रवृद्धस्त्वम् ᵛअतन्द्रः अनलसः सन् ᵛहविष्कृतः यजमानस्य ᵛहव्या हवींषि ᵛवहसि देवान् प्रति । ᵛआदित् अनन्तरमेव ᵛदेवेषु मध्ये ᵛराजसि दीप्यसे ॥ ॥ ३४ ॥

सप्त होतारस्तमिदीळते त्वाग्ने सुत्यजमह्रयम् ।
भिनत्स्यद्रिं तपसा वि शोचिषा प्राग्ने तिष्ठ जनाँ अति ॥ १६ ॥

सप्त । होतारः । तम् । इत् । ईळते । त्वा । अग्ने । सुऽत्यजम् । अह्रयम् ।

भिनत्सि । अद्रिम् । तपसा । वि । शोचिषा । प्र । अग्ने । तिष्ठ । जनान् । अति ॥ १६ ॥

हे ᵛअग्ने ᵛतमित् तमेव ᵛत्वा त्वां ᵛसप्त ᵛहोतारः होत्रकाः ᵛईळते स्तुवन्ति । कीदृशं त्वाम् । ᵛसुत्यजं सुत्यागम् । अभिमतप्रदमित्यर्थः । ᵛअह्रयम् अक्षीणं प्रवृद्धम् । किंच ᵛअद्रिं मेघं ᵛतपसा तापकेन ᵛशोचिषा तेजसा । तपसा शोचिषा चेति वा योज्यम् । ᵛवि ᵛभिनत्सि । हे ᵛअग्ने ᵛजनान् अस्मान् ᵛअति अतीत्य ᵛप्र ᵛतिष्ठ प्रगच्छ हविरादाय देवान् प्रति । अथवास्मद्विरोधिजनानतिक्रम्य प्र तिष्ठ ॥

अग्निमंग्निं वो अधिगुं हुवेम वृक्तबर्हिषः ।
अग्निं हितप्रयसः शश्वतीष्वा होतारं चर्षणीनाम् ॥ १७ ॥

अग्निम्ऽअग्निम् । वः । अधिऽगुम् । हुवेम । वृक्तऽबर्हिषः ।

अग्निम् । हितऽप्रयसः । शश्वतीषु । आ । होतारम् । चर्षणीनाम् ॥ १७ ॥

ᵛअग्निमग्निम् । वीप्सादरार्था । अग्निमेव हे यजमानाः ᵛवः युष्मदर्थं ᵛहुवेम आह्वयाम । अथवा । हे देवाः[1] वो[1] युष्मदर्थमिति वा व्याख्येयम् । कीदृशा वयम् । ᵛवृक्तबर्हिषः छिन्नदर्भाः । कीदृशमग्निम् । ᵛअधिगुम् अधृतगमनं[2] सर्वदा गृहे वर्तमानम् ᵛअग्निम् । ᵛहितप्रयसः निहितहविष्का वयम् ᵛआ हुवेमेति शेषः । कीदृशमग्निम् । ᵛशश्वतीषु बह्वीषु भूमिषु वर्तमानं ᵛहोतारं होमनिष्पादकम् । किमर्थम् । ᵛचर्षणीनां मनुष्याणामर्थाय । अग्नौ तृप्ते सति वृष्टिलाभात् प्राण्युपकारसिद्धं[3] प्राण्यर्थत्वम् । अथवा मनुष्याणां यजमानानां होतारं होमसाधकम् ॥

केतेन शर्मन्त्सचते सुषामण्यग्ने तुभ्यं चिकित्वना ।
इषण्यया नः पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥ १८ ॥

केतेन । शर्मन् । सचते । सुऽसामनि । अग्ने । तुभ्यम् । चिकित्वना ।

इषण्यया । नः । पुरुऽरूपम् । आ । भर । वाजम् । नेदिष्ठम् । ऊतये ॥ १८ ॥

---

१. ख-त-श–वा यो; न– वा वो । २. ख-ग-त–अधृतकर्माणं; न-भ–अधृतगमनकर्माणं ।
३. ख-त-न-म२-३-श–प्राण्युपकारं सिद्धं ।

हे vअग्ने vतुभ्यं vचिकित्वना चिकित्तुषा जनेन होत्रादिना सह यजमानः vकेतेन प्रज्ञापकेन स्तोत्रेण यजत इति शेषः। कुत्रेति तदुच्यते। vसुषामणि शोभनरथन्तरादिसामोपेते vशर्मन् शर्मणि सुखसाधने यज्ञे। अतो हे अग्ने vदृषण्यया इच्छया स्वीयया vनः अस्मभ्यं vपुरुरूपं नानारूपं vनैदिष्टम् अन्तिके सर्वदा वर्तमानं vवाजम् अन्नम् vऊतये रक्षणाय vआ vभर आहर ॥

अग्ने जरितर्विश्पतिस्तेपानो देव रक्षसः ।
अप्रोषिवान्गृहपतिर्महाँ असि दिवस्पायुर्दुरोणयुः ॥ १९ ॥

अग्ने। जरितः। विश्पतिः। तेपानः। देव। रक्षसः।
अप्रोषिऽवान्। गृहऽपतिः। महान्। असि। दिवः। पायुः। दुरोणऽयुः ॥ १९ ॥

हे vअग्ने vदेव vजरितः स्तोतः। स्तुत्येत्यर्थः। vविश्पतिः प्रजानां पालकः vरक्षसः राक्षसानां vतेपानः संतापकोऽसि। vअप्रोषिवान् यजमानगृहमत्यजन्। तदेवाह। vगृहपतिः यजमानगृहस्य पालकश्च त्वं vमहान् अतिशयेन पूज्यः vअसि। vदिवः द्युलोकस्य vपायुः पाता vदुरोणयुः यजमानगृहस्य मिश्रयिता। सर्वदा वर्तमान इत्यर्थः। तादृशस्त्वं महानसीत्यन्वयः ॥

मा नो रक्ष आ वेशीदाघृणीवसो मा यातुर्यातुमावताम् ।
परोगव्यूत्यनिरामप क्षुधमग्ने सेध रक्षस्विनः ॥ २० ॥

मा। नः। रक्षः। आ। वेशीत्। आघृणिवसो इत्याघृणिऽवसो। मा। यातुः। यातुऽमावताम्।
परःऽगव्यूति। अनिराम्। अप। क्षुधम्। अग्ने। सेध। रक्षस्विनः ॥ २० ॥

हे vआघृणीवसो दीप्तधनाग्ने vनः अस्मान् vरक्षः राक्षसादिः। 'रक्षो रक्षितव्यमस्मात्' (निरु. ४. १८) इति यास्कः। vमा vआ vवेशीत् सर्वतो न प्रविशतु। तथा vयातुमावताम्। यातुर्यातना पीडा। तद्वतां यातुधानानां vयातुः पीडा vमा वेशीत्। हे vअग्ने vअनिराम्। इरान्नम्। अन्नाभावं दारिद्र्यं vक्षुधं क्षपयितारं vरक्षस्विनः बलवन्ति रक्षांसि च vपरोगव्यूति क्रोशद्वयादेशात् परस्तात्। एतदुपलक्षणम्। अत्यन्तं दूरदेशे vअप vसेध परिहर। अनिरा क्षुत् बाह्यानि रक्षांसि च न पीडयन्विति ॥ ॥ ३५ ॥

'उभयं शृणवत्' इत्यष्टादशर्चं द्वितीयं सूक्तं प्रागाथस्य भर्गस्यार्षम्। अत्रानुक्रमणिका–'उभयं द्यूना' इति। पूर्वसूक्ते 'प्रागाथं' तु' इत्युक्तत्वादिदमपि प्रागाथम्[1]। अत्रायुजो बृहत्यो युजः सतोबृहत्यः। अनुक्तत्वादिन्द्रो देवता। महाव्रते निष्केवल्ये बार्हततृचाशीतावेतत्सूक्तं सप्तम्यष्टमीवर्जम्। तथैव पञ्चमारण्यके सूत्रितं शौनकेन–'उभयं शृणवच्च न इति सप्तमीं चाष्टमीं चोद्धरति' (ऐ. आ. ५. २. ४) इति। चातुर्विंशिकेऽहनि निष्केवल्ये 'उभयम्' इति बृहत्सामप्रगाथः। सूत्रितं च–'उभयं शृणवच्च नः' (आश्व. श्रौ. ७. ३) इति। चातुर्विंशिकेऽहनि माध्यंदिनसवनेऽच्छावाकस्यायमेव स्तोत्रियः प्रगाथः। तथा च सूत्रितम्–'उभयं शृणवच्च न आ वृषस्व पुरुवसो' (आश्व. श्रौ. ७. ४) इति। एवमन्यत्रापि यस्मिन्नहनि पृष्ठस्तोत्रे बृहत्साम क्रियते तस्मिन्नहनि निष्केवल्येऽयं प्रगाथः ॥

---

१. ख-ग-त-भ२-श–प्रगाथं; न–प्रगाथां। २. ख-ग–प्रगाथं।

उभयँ शृणवच्च न इन्द्रो अर्वागिदं वचः ।
सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत् ॥ १ ॥

उभयम् । शृणवत् । च । नः । इन्द्रः । अर्वाक् । इदम् । वचः ।
सत्राच्या । मघऽवा । सोमऽपीतये । धिया । शविष्ठः । आ । गमत् ॥ १ ॥

vउभयं स्तोत्रात्मकं शस्त्रात्मकं चोभयविधम् vइदं vवचः vअर्वाक् अस्मदभिमुखम् vइन्द्रः vश्रृणवत् शृणोतु । श्रुत्वा च vसत्राच्या अस्माकं सहाञ्चन्त्या vधिया युक्तः सन् vमघवा vशविष्ठः अतिशयेन बलवान् vआ vगमत् आगच्छतु vसोमपीतये सोमपानाय ॥

तं हि स्वराजं वृषभं तमोजसे धिषणे निष्टतक्षतुः ।
उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः ॥ २ ॥

तम् । हि । स्वऽराजम् । वृषभम् । तम् । ओजसे । धिषणे इति । निःऽततक्षतुः ।
उत । उपऽमानाम् । प्रथमः । नि । सीदसि । सोमऽकामम् । हि । ते । मनः ॥ २ ॥

vतं vहि तं खल्विन्द्रं vस्वराजं स्वयमेव राजमानं vधिषणे द्यावापृथिव्यौ vवृषभं जगदुपकारिकाया वृष्टेर्वर्षकं vनिष्टतक्षतुः संघस्करतुः । vतं तमेवेन्द्रम् vओजसे बलाय निष्टतक्षतुः । vउत यस्मादेवं तस्मात् हे इन्द्र vउपमानाम् उपमानभूतानामन्येषां देवानां मध्ये vप्रथमः मुख्यः सन् vनि vषीदसि वेद्याम् । vसोमकामं vहि खलु vते vमनः ॥

पूर्वोक्तेऽच्छावाकशस्त्रे 'आ वृषस्व' इति प्रगाथो वैकल्पिकोऽनुरूपः । सूत्रमुक्तम् ॥

आ वृषस्व पुरूवसो सुतस्येन्द्रान्धसः ।
विद्मा हि त्वा हरिवः पृत्सु सासहिमधृष्टं चिद्धृष्वणिम् ॥ ३ ॥

आ । वृषस्व । पुरुऽवसो इति पुरुऽवसो । सुतस्य । इन्द्र । अन्धसः ।
विद्म । हि । त्वा । हरिऽवः । पृत्ऽसु । सऽसहिम् । अधृष्टम् । चित् । दधृष्वणिम् ॥ ३ ॥

हे vपुरूवसो बहुधन vइन्द्र त्वम् vआ vवृषस्व आसिञ्चस्व । किम्[1] । vसुतस्य vअन्धसः सुतमन्धः सोमं जठरे । हे vहरिवः हरिभ्यां तद्वन्निन्द्र vत्वा त्वां vविद्म[2] vहि[3] जानीमः खलु । कीदृशम् । vपृत्सु संग्रामेषु vसासहिम् अभिभवितारं शत्रूणाम् vअधृष्टं vचित् कैरप्यधर्षणीयं vदधृष्वणिम् अन्येषां धर्षकम् ॥

अप्रामिसत्य मघवन्तथेदसदिन्द्र क्रत्वा यथा वशः ।
सनेम वाजं तव शिप्रिन्नवसा मक्षू चिद्यन्तो अद्रिवः ॥ ४ ॥

अप्रामिऽसत्य । मघऽवन् । तथा । इत् । असत् । इन्द्र । क्रत्वा । यथा । वशः ।
सनेम । वाजम् । तव । शिप्रिन् । अवसा । मक्षु । चित् । यन्तः । अद्रिऽवः ॥ ४ ॥

---

१. ख-त-न-भ-श–किंच; ग–किं तत् । २. ग–विद्यामही; ज्ञ-त२–विद्यमहि; त३-४-न-श–विद्यामहि; म१–विद्माहि ।

हे vअप्रामिसत्य अहिंसितसत्य हे vमघवन् इन्द्र vतथेदसत् तथैव भवति । हे vइन्द्र vऋत्वा कर्मणा प्रज्ञानेन vयथा[1] येन[1] प्रकारेण vवशः कामयेः । हे vशिप्रिन् vअवसा रक्षणेन निमित्तेन vवाजम् अन्नं vसनेम संभजेम वयं vतव त्वदनुग्रहात् । कीदृशा वयम् । vमक्षु vचित् शीघ्रमेव vयन्तः शत्रून् गच्छन्तोऽभिभवन्तः । हे vअद्रिवः । अद्रिर्वज्रः । तद्वन्निन्द्रेति ॥

शग्ध्यू[2] षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥ ५ ॥

शग्धि । ऊँ इति । सु । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः ।
भगम् । न । हि । त्वा । यशसम् । वसुऽविदम् । अनु । शूर । चरामसि ॥ ५ ॥

हे vशचीपते vइन्द्र vशग्धि देह्यभिमतम् । vविश्वाभिः सर्वाभिः vऊतिभिः[3] मरुद्भिः सह । हे vशूर vभगं vन भाग्यमिव vयशसं यशस्विनं vवसुविदं धनस्य लम्भकं vत्वा त्वाम् vअनु vचरामसि अनुचरामः । परिचरामेत्यर्थः ॥ ॥ ३६ ॥

पौरो अश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्ययः ।
नकिर्हि दानं परिमर्धिषत्त्वे यद्यद्यामि तदा भर ॥ ६ ॥

पौरः । अश्वस्य । पुरुऽकृत् । गवाम् । असि । उत्सः । देव । हिरण्ययः ।
नकिः । हि । दानम् । परिऽमर्धिषत् । त्वे इति । यत्ऽयत् । यामि । तत् । आ । भर ॥ ६ ॥

हे इन्द्र त्वम् vअश्वस्य vपौरः पूरयिता vअसि भवसि । तथा vगवां[3] vपुरुकृत् बहुकर्तासि । हे vदेव vहिरण्ययः हिरण्मयशरीरस्त्वम् vउत्सः[4] उत्ससदृशोऽसि । हे इन्द्र vत्वे त्वयि वर्तमानं vदानम् अस्मद्विषयं देयं धनं वा vनकिः[5] vपरिमर्धिषत् न कश्चिद्धिनस्ति । अतः vयद्यद्यामि याचे vतदा vभर आहर मह्यम् ॥

यद्यग्निष्टोमे[6] बृहत्सामन्[6] तदानीं निष्केवल्ये प्रगाथोऽनुरूपः । सूत्रितं च—'त्वं ह्येहि चेरव इति प्रगाथा एते भवन्ति' (आश्व. श्रौ. ५. १५) इति । महाव्रते निष्केवल्य उत्तरपक्षेऽयं प्रगाथः । तथैव पञ्चमारण्यके सूत्रितं—'त्वामिद्धि हवामहे त्वं ह्येहि चेरव इति बृहतः स्तोत्रियानुरूपौ प्रगाथौ' (ऐ. आ. ५. २. २) इति ॥

त्वं ह्येहि चेरवे विदा भगं वसुत्तये । उद्वावृषस्व मघवन्गविष्टय उदिन्द्राश्वमिष्टये ॥७॥

त्वम् । हि । आ । इहि । चेरवे । विदाः । भगम् । वसुत्तये ।
उत् । ववृषस्व । मघऽवन् । गोऽइष्टये । उत् । इन्द्र । अश्वम्ऽइष्टये ॥ ७ ॥

हे इन्द्र vत्वं vहि त्वं खलु । सामर्थ्यादातेति गम्यते । अतः vएहि आगच्छ । आगत्य चास्मभ्यं vभगं भजनीयं धनं vविदाः लभस्व दत्स्व । किमर्थम् । vवसुत्तये अस्माकं वसुदानाय । हे vमघवन् vगविष्टये गा इच्छते मह्यं vउद्ववृषस्व उत्सिञ्चस्व गामिति शेषः । तथा हे vइन्द्र vअश्वमिष्टये अश्वैषणवते मह्यमश्वान् vउत् ववृषस्व उत्सिञ्चस्व देहि ॥

---

१. ख-ञ-त१-२-वा यद्ययथानेन; घ-त३-४-भ३-यद्यथानेन; भ२-वा यद्यथा येन; न-श-यथानेन । २. ख-ञ-त१-२-मु-ऊतिभी रक्षकैः; घ-रक्षकैः । ३. ख-घ-ञ-त१-२-गवां पौरः । ४. ख-ग-त-श-'उत्सः' नास्ति । ५. ख-ग-त-न-भ१-२-श-नकिर्दानं; भ३-नकिर्हि । ६. ख-ग-त-न-श-'ष्टोमबृहत्साम ।

त्वं पुरू सहस्राणि शतानि च यूथा दानाय मंहसे ।
आ पुरंदरं चकृम विप्रवचस इन्द्रं गायन्तोऽवसे ॥ ८ ॥

त्वम् । पुरु । सहस्राणि । शतानि । च । यूथा । दानाय । मंहसे ।
आ । पुरम्ऽदरम् । चकृम । विप्रऽवचसः । इन्द्रम् । गायन्तः । अवसे ॥ ८ ॥

हे इन्द्र ᵛत्वं ᵛपुरु पुरूणि बहूनि ᵛसहस्राणि ᵛशतानि ᵛच ᵛयूथा गवादियूथानि ᵛदानाय यजमानविषयाय ᵛमंहसे अनुमन्यसे। यद्वा । दानाय दात्रे यजमानाय मंहसे प्रयच्छसि । मंहतिर्दानकर्मा । अथ परोक्षेण ब्रवीति । ᵛपुरंदरं शत्रुपुराणां दारयितारम् ᵛइन्द्रम् ᵛअवसे रक्षणाय प्रीतये वा ᵛगायन्तः स्तुवन्तः ᵛविप्रवचसः विविधप्रकृष्टवचना वयम् ᵛआ आगन्तारमभिमुखं वा ᵛचकृम कुर्मः ॥

अविप्रो वा यदविधद्विप्रो वेन्द्र ते वचः ।
स प्र ममन्दत्त्वाया शतक्रतो प्राचामन्यो अहंसन ॥ ९ ॥

अविप्रः । वा । यत् । अविधत् । विप्रः । वा । इन्द्र । ते । वचः ।
सः । प्र । ममन्दत् । त्वाऽया । शतक्रतो इति शतऽक्रतो ।
प्राचामन्यो इति प्राचाऽमन्यो । अहंऽसन ॥ ९ ॥

हे ᵛइन्द्र ᵛते तव ᵛवचः स्तोत्रं ᵛयत् यः ᵛअविप्रो ᵛवा अमेधाव्यस्तुतिकुशलो वा ᵛविप्रः मेधावी स्तुतिकुशलः ᵛवा ᵛअविधत् कुर्यात् । त्वां स्तौतीत्यर्थः । ᵛसः स्तोता ᵛत्वाया त्वयीच्छया साधनेन ᵛप्र ᵛममन्दत् प्रकर्षेण मोदते । हे ᵛशतक्रतो बहुकर्मन् हे ᵛप्राचामन्यो प्राचीनक्रोध । अप्रतिहतक्रोधेत्यर्थः । न हीन्द्रक्रोधं प्रतिहन्ति कश्चित् । हे ᵛअहंसन । संग्रामेऽहमित्यात्मनो महत्त्वं प्रकाशयन् यः शत्रुं संभजते स तथोक्तः । तादृशेन्द्र ॥

उग्रबाहुर्म्रक्षकृत्वा पुरंदरो यदि मे शृणवद्धवम् ।
वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे ॥ १० ॥

उग्रऽबाहुः । म्रक्षऽकृत्वा । पुरम्ऽदरः । यदि । मे । शृणवत् । हवम् ।
वसुऽयवः । वसुऽपतिम् । शतऽक्रतुम् । स्तोमैः । इन्द्रम् । हवामहे ॥ १० ॥

ᵛउग्रबाहुः उद्गूर्णभुजः ᵛम्रक्षकृत्वा वधकर्ता शत्रूणां ᵛपुरंदरः पुराणां दारयितेन्द्रः ᵛयदि ᵛमे ᵛहवं ᵛशृणवत् शृणुयात् तर्हि ᵛवसूयवः वसुकामा वयं ᵛवसुपतिं[1] बहुधनस्वामिनं ᵛशतक्रतुम् अपरिमितप्रज्ञम् ᵛइन्द्रं ᵛस्तोमैः स्तोत्रैः ᵛहवामहे आह्वयामः ॥ ॥ ३७ ॥

न पापासो मनामहे नारायासो न जल्हवः ।
यदिन्द्रिवन्द्रं वृषणं सचा सुते सखायं कृणवामहै ॥ ११ ॥

न । पापासः । मनामहे । न । अरायासः । न । जल्हवः ।
यत् । इत् । नु । इन्द्रम् । वृषणम् । सचा । सुते । सखायम् । कृणवामहै ॥ ११ ॥

---

१. त-न-पशुपतिं ।

वयमिन्द्रं ᵛपापासः पापा अकृतपुण्या ब्रह्मचर्यव्रतादिरहिताः[1] ᵛन ᵛमनामहे न मन्यामहे । तथा ᵛअरायासः अराया अधना वा अहविष्का वा ᵛन मनामहे । ᵛन ᵛजल्हवः अज्वलनाः अनग्नयो न मनामहे । कृतव्रतनियमादिपुण्या दानवन्तोऽग्निसहितास्तं स्तुम इत्यृषिरात्मानमाह । ᵛयदित् यस्मादेव कारणात् ᵛनु इदानीं ᵛवृषणं वर्षकम् ᵛइन्द्रं ᵛसुते सोमेऽभिषुते ᵛसचा सहिताः[2] ᵛसख्यं ᵛकृणवामहै कुर्मः तस्मात् पापादिरहिता मनामहे । पापादिविशिष्टानामिन्द्रसाहाय्यकरणासंभवात् । अत्र ' न पापा मन्यामहे ' (निरु. ६. २५) इत्यादि निरुक्तं द्रष्टव्यम् ॥

उग्रं युयुज्म पृतनासु सासहिमृणकातिमदाभ्यम् ।
वेदा भूमं चित्सनिता रथीतमो वाजिनं यमिद् नशत् ॥ १२ ॥

उग्रम् । युयुज्म । पृतनासु । ससहिम् । ऋणऽकातिम् । अदाभ्यम् ।
वेद । भूमम् । चित् । सनिता । रथिऽतमः । वाजिनम् । यम् । इत् । ऊँ इति । नशत् ॥ १२ ॥

ᵛउग्रम् उद्गूर्णबलमिन्द्रं ᵛयुयुज्म योजयामः । कीदृशमिन्द्रम् । ᵛपृतनासु संग्रामेषु ᵛसासहिं शत्रूणामभिभवितारम् ᵛऋणकातिम् ऋणभूतस्तुतिम् । यस्मै स्तुतिर्ऋणवदवश्यं क्रियते तं[3] तादृशम् । अथवा ऋणवदवश्यफलप्रदस्तुतिकम् । ᵛअदाभ्यं केनाप्यहिंस्यम् । य इन्द्रः ᵛभूमं ᵛचित् बहुष्वध्वेषु भ्रमणशीलमेव ᵛवाजिनं बलवन्तमश्वं ᵛरथीतमः रथस्वामी ᵛवेद वेत्ति गृह्णाति तद्वत् ᵛसनिता इन्द्रो वाजिनं हविष्मन्तं ᵛयमित् यमेव जनं बहूनां यजमानानां मध्ये ᵛनशत् व्याप्नोति तमिन्द्रमिति । ते वयमिति वा योज्यम् । वयं युयुज्मेति पक्षे व्यत्ययेन बहुवचनम् ॥

चातुर्विंशिकेऽहनि माध्यंदिनसवनेऽच्छावाकस्य ' यत इन्द्र ' इति वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितं च—' यत इन्द्र भयामहे यथा गौरो अपा कृतम् ' (आश्व. श्रौ. ७. ४) इति । दुःस्वप्नदर्शनेऽप्येतदादिसूक्तशेषो जप्यः[4] (आश्व. गृ. ३. ११. २) ॥

यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवञ्छग्धि तव तन्न ऊतिभिर्वि द्विषो वि मृधो जहि ॥ १३ ॥

यतः । इन्द्र । भयामहे । ततः । नः । अभयम् । कृधि ।
मघऽवन् । शग्धि । तव । तत् । नः । ऊतिऽभिः । वि । द्विषः । वि । मृधः । जहि ॥ १३ ॥

हे ᵛइन्द्र ᵛयतः हिंसकात् ᵛभयामहे वयं ᵛततः ᵛनः[5] अस्मभ्यम् ᵛअभयं ᵛकृधि कुरु । हे ᵛमघवन् ᵛशग्धि शक्तो भवसि ᵛनः अस्मभ्यमभयं कर्तुं ᵛतव ᵛतत् तैः ᵛऊतिभिः रक्षणैः रक्षकैः पुरुषैः । किंच ᵛवि ᵛजहि ᵛद्विषः अस्मद्द्वेष्टॄन् । ᵛवि जहि ᵛमृधः अस्मद्धिंसकान् ॥

त्वं हि राधस्पते राधसो महः क्षयस्यासि विधतः ।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥ १४ ॥

त्वम् । हि । राधःऽपते । राधसः । महः । क्षयस्य । असि । विधतः ।
तम् । त्वा । वयम् । मघऽवन् । इन्द्र । गिर्वणः । सुतऽवन्तः । हवामहे ॥ १४ ॥

---

१. ख-ज्ञ-त१-२-न-भ-°रहिताः संतः । २. ख-सयसहिताः; ज्ञ-त१-२-भ१-२-सहायसहिताः; त३-४-सहसेहिताः; न-सहासहिताः श-सेहिताः । ३. ख-त-न-भ-तत् । ४. ख-ज्ञ-त१-२-जप्यः सूत्रितं च यत इंद्र भयामह इति च सूक्तशेषं । ५. ख-ग-त-न-भ-श-' नः ' नास्ति ।

हे [v]राधस्पते धनस्वामिन् [v]त्वं [v]हि त्वं खलु [v]महः महतः [v]राधसः धनस्य [v]क्षयस्य च गृहस्य[1] च[2] वर्धयिता [v]असि[3] हि खलु। सामर्थ्यादेवं लभ्यते। कस्य राधसो गृहस्य च[2] वर्धक इत्युच्यते। [v]विधतः परिचरतो यजमानस्य। [v]तं तादृशं [v]त्वा त्वां [v]वयं हे [v]मघवन्निन्द्र [v]गिर्वणः गीर्भिर्वननीय [v]सुतावन्तः अभिषुतसोमाः [v]हवामहे आह्वयामः ॥

इन्द्रः स्पळुत वृत्रहा परस्पा नो वरेण्यः ।
स नो रक्षिषच्चरमं स मध्यमं स पश्चात्पातु नः पुरः ॥ १५ ॥

इन्द्रः । स्पट् । उत । वृत्रऽहा । परःऽपाः । नः । वरेण्यः ।
सः । नः । रक्षिषत् । चरमम् । सः । मध्यमम् । सः । पश्चात् । पातु । नः । पुरः ॥१५॥

अयम् [v]इन्द्रः [v]स्पट् सर्वस्य ज्ञाता। स्पशतिर्ज्ञानकर्मा[4]। [v]उत अयं [v]वृत्रहा वृत्रहन्ता [v]परस्पाः परपालयिता [v]नः अस्माकं [v]वरेण्यः वरणीयः। [v]सः इन्द्रः [v]नः अस्माकम्। पुत्रमिति शेषः। [v]रक्षिषत् रक्षतु। [v]चरमं पुत्रं तथा स रक्षिषत्। [v]सः [v]मध्यमं पुत्रं[5] रक्षिषत्। [v]सः [v]नः अस्मान् [v]पश्चात् रक्षिषत्। [v]नः [v]पुरः पुरस्तात् रक्षिषत्॥ ॥ ३८ ॥

त्वं नः पश्चादधरादुत्तरात्पुर इन्द्र नि पाहि विश्वतः ।
आरे अस्मत्कृणुहि दैव्यं भयमारे हेतीरदेवीः ॥ १६ ॥

त्वम् । नः । पश्चात् । अधरात् । उत्तरात् । पुरः । इन्द्र । नि । पाहि । विश्वतः ।
आरे । अस्मत् । कृणुहि । दैव्यम् । भयम् । आरे । हेतीः । अदेवीः ॥ १६ ॥

हे [v]इन्द्र [v]त्वं [v]नः अस्मान् [v]पश्चात् पश्चाद्भागात् [v]पुरः पूर्वभागात् [v]अधरात् अधोभागात्। एतदुपरिभागस्योपलक्षणम्। [v]उत्तरात् उत्तरभागात्। एतद्दक्षिणस्याप्युपलक्षणम्। किं बहुना [v]विश्वतः सर्वस्मात् प्रदेशात् [v]नि [v]पाहि। हे इन्द्र [v]दैव्यं [v]भयम् [v]अस्मत् अस्मत्तः [v]आरे दूरे [v]कृणुहि कुरु। तथा [v]अदेवीः आसुराणि [v]हेतीः आयुधानि [v]आरे कृणुहि ॥

अद्याद्या श्वःश्व इन्द्र त्रास्व परे च नः ।
विश्वा च नो जरितॄन्त्सत्पते अहा दिवा नक्तं च रक्षिषः ॥ १७ ॥

अद्यऽअद्य । श्वःऽश्वः । इन्द्र । त्रास्व । परे । च । नः ।
विश्वा । च । नः । जरितॄन् । सत्ऽपते । अहा । दिवा । नक्तम् । च । रक्षिषः ॥ १७ ॥

[v]अद्याद्य यदद्यशब्दवाच्यमहरस्ति तत्र सर्वत्र एवं [v]श्वःश्वः [v]त्रास्व रक्ष। तथा [v]परे [v]च परस्मिंस्तृतीयेऽहनि च त्रास्व। हे [v]सत्पते सतां पालक [v]विश्वा सर्वाण्यपि [v]अहा अहानि सर्वेष्वप्यहःसु [v]नः अस्मान् [v]जरितॄन् [v]रक्षिषः रक्षसि। तथा [v]दिवा [v]नक्तं [v]च रक्षिषः रक्षसि रक्ष वा॥

प्रभङ्गी शूरो मघवा तुवीमघः संमिश्लो वीर्याय कम् ।
उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः ॥ १८ ॥

---

१. ग-त-श–'गृहस्य च' नास्ति। २. ख-ग-त-न-भ१-२-श–'असि' नास्ति। ३. ख-ग-त-श–'च' नास्ति। ४. ख-ग-त-न-श-स्पर्शति'। ५. ख-त–पुत्रं स।

प्रऽभङ्गी । शूरः । मघऽवा । तुविऽमघः । सम्ऽमिश्लः । वीर्याय । कम् ।
उभा । ते । बाहू इति । वृषणा । शतक्रतो इति शतऽक्रतो । नि । या । वज्रम् । मिमिक्षतुः ॥१८॥

अयं मघवा इन्द्रः प्रभङ्गी प्रभञ्जनशीलः शूरः तुवीमघः प्रभूतधनः संमिश्लः सम्यक् मिश्रयिता । किमर्थम् । वीर्याय शत्रूणां वीर्यकरणाय । कम् इति पादपूरणः । एवंमहानुभावो भवति । अथ प्रत्यक्षवादः । हे इन्द्र ते उभा उभावपि बाहू वृषणा वर्षकौ कामानां हे शतक्रतो बहुप्रज्ञ या यौ वज्रम् आयुधं नि मिमिक्षतुः परिगृह्णीतः ॥ ॥ ३९ ॥

'प्रो अस्मै' इति द्वादशर्चं तृतीयं सूक्तं काण्वस्य प्रगाथस्यार्षम् । पञ्चपदा पङ्क्तिः । सप्तम्याद्यास्तिस्रो बृहत्यः । इन्द्रो देवता । अत्रानुक्रमणिका—'प्रो अस्मै द्वादश प्रगाथः पाङ्क्तं सप्तम्याद्याश्च[1] तिस्रो बृहत्यः' इति । विनियोगो लैङ्गिकः ॥

प्रो अस्मा उपस्तुतिं भरता यजुर्जोषति ।
उक्थैरिन्द्रस्य माहिनं वयो वर्धन्ति सोमिनो भद्रा इन्द्रस्य रातयः ॥ १ ॥

प्रो इति । अस्मै । उपऽस्तुतिम् । भरत । यत् । जुजोषति ।
उक्थैः । इन्द्रस्य । माहिनम् । वयः । वर्धन्ति । सोमिनः । भद्राः । इन्द्रस्य । रातयः ॥१॥

अस्मै इन्द्राय उपस्तुतिम् उपेत्य क्रियमाणां स्तुतिं प्रो भरत प्रकर्षेण संपादयत हे ऋत्विजः । यत्[2] यदि[2] अयमिन्द्रः जुजोषति सेवते तर्हि भरतेति । सोमिनः सोमप्रियस्य इन्द्रस्य स्वभूतं माहिनं महत् वयः अन्नं सोमलक्षणम् उक्थैः[3] शस्त्रैः[3] वर्धन्ति वर्धयन्ति । भद्राः स्तुत्यानि खलु इन्द्रस्य रातयः दानानि ॥

अयुजो असमो नृभिरेकः कृष्टीरयास्यः ।
पूर्वीरति प्र वावृधे विश्वा जातान्योजसा भद्रा इन्द्रस्य रातयः ॥ २ ॥

अयुजः । असमः । नृऽभिः । एकः । कृष्टीः । अयास्यः ।
पूर्वीः । अति । प्र । ववृधे । विश्वा । जातानि । ओजसा । भद्राः । इन्द्रस्य । रातयः ॥२॥

अयुजः असहायः असमः असदृशोऽन्यैः नृभिः[4] देवैः एकः मुख्यः अयास्यः उपक्षपयितुमशक्यः पूर्वीः कृष्टीः पूर्वतन्यः प्रजाः अति प्र ववृधे अतिप्रवर्धते । किंच विश्वा सर्वाणि जातानि इदानीमुत्पन्नानि ओजसा बलेनाति प्र वावृधे । भद्राः हि इन्द्रस्य रातयः । अथवा । अयमृषिरयुजोऽसहायोऽन्यैरसदृश एक एव सन् पूर्वीः प्रजा जातानि सर्वाण्यप्यतिक्रम्य वर्धते । शिष्टं समानम् ॥

अहितेन चिदर्वता जीरदानुः सिषासति ।
प्रवाच्यमिन्द्र तत्तव वीर्याणि करिष्यतो भद्रा इन्द्रस्य रातयः ॥ ३ ॥

अहितेन । चित् । अर्वता । जीरऽदानुः । सिसासति ।
प्रऽवाच्यम् । इन्द्र । तत् । तव । वीर्याणि । करिष्यतः । भद्राः । इन्द्रस्य । रातयः ॥ ३ ॥

---

१. ग-भ२-श-अनु.—सप्तम्याद्यास्तिस्रो । २. ख-घ-त-यद्यपि; ग-यद्यदा; श-पद्यवि ।
३. ग-ज्ञ-त३-४-न-श-'उक्थैः शस्त्रैः' नास्ति । ४. न-भ—नृभिर्नेतृभिः ।

अयं vजीरदानुः क्षिप्रप्रदान इन्द्रः vअहितेन अयोजितेनाप्रेरितेन[1] vचित् vअर्वता अरणवता-श्वेन vसिषासति संभक्तुमिच्छति । तस्माद्धे[2] vइन्द्र vवीर्याणि सामर्थ्यानि vकरिष्यतः vतव महत्त्वं vप्रवाच्यम् । स्तुत्यमित्यर्थः ॥

आ याहि कृणवाम त इन्द्र ब्रह्माणि वर्धना ।
येभिः शविष्ठ चाकनो भद्रमिह श्रवस्यते भद्रा इन्द्रस्य रातयः ॥ ४ ॥

आ । याहि । कृणवाम । ते । इन्द्र । ब्रह्माणि । वर्धना ।
येभिः । शविष्ठ । चाकनः । भद्रम् । इह । श्रवस्यते । भद्राः । इन्द्रस्य । रातयः ॥ ४ ॥

हे vइन्द्र vआ vयाहि आगच्छ[3] । vते[4] vकृणवाम । किम् । vब्रह्माणि परिवृढानि स्तुति-लक्षणानि कर्माणि । कीदृशानि । vवर्धना उत्साहवर्धकानि । vयेभिः यैः कर्मभिः हे vशविष्ठ अति-शयेन बलवन्निन्द्र vचाकनः कामयसे । किम् । vभद्रं कर्तुम् । कस्मै । vश्रवस्यते अन्नमिच्छते स्तोत्रे ॥

धृषतश्चिद्धृषन्मनः कृणोषीन्द्र यत्त्वम् ।
तीव्रैः सोमैः सपर्यतो नमोभिः प्रतिभूषतो भद्रा इन्द्रस्य रातयः ॥ ५ ॥

धृषतः । चित् । धृषत् । मनः । कृणोषि । इन्द्र । यत् । त्वम् ।
तीव्रैः । सोमैः । सपर्यतः । नमःऽभिः । प्रतिऽभूषतः । भद्राः । इन्द्रस्य । रातयः ॥ ५ ॥

हे vइन्द्र vधृषतश्चित् धृष्टादपि vधृषत् धृष्टं vमनः vकृणोषि । अत्यन्तं धृष्टं करोषि । vयत् यस्मात् vत्वं vतीव्रैः मदजनकैः vसोमैः vसपर्यतः पूजयतः[5] vनमोभिः नमस्कारैश्च vप्रतिभूषतः अलंकुर्वतो यजमानस्याभिमतं दित्ससीति[6] शेषः ॥

अर्व चष्ट ऋचीषमोऽवताँइव मानुषः ।
जुष्टी दक्षस्य सोमिनः सखायं कृणुते युजं भद्रा इन्द्रस्य रातयः ॥ ६ ॥

अर्व । चष्टे । ऋचीषमः । अवतान्ऽइव । मानुषः ।
जुष्टी । दक्षस्य । सोमिनः । सखायम् । कृणुते । युजम् । भद्राः । इन्द्रस्य । रातयः ॥ ६ ॥

अयमिन्द्रः vऋचीषमः ऋचा स्तुत्या[7] समस्तथा परिच्छिन्नः सन् vअव vचष्टे पश्यत्यनुग्रहेणा-स्मान् । तत्र दृष्टान्तः । vमानुषः मनुष्यः vअवतान् अवटान् कूपादिप्रदेशान् vइव । दृष्ट्वा च vजुष्टी प्रीतोऽयं vदक्षस्य प्रवृद्धस्य vसोमिनः यजमानस्य vयुजं युज्यमात्मानं vसखायं vकृणुते करोति । तस्याभिमतं साधयतीत्यर्थः । अथवा । तृषितो मनुष्यो जलपूर्णानवटानिव स्तुतः सन् पश्यति सोमं पातुम् । पश्चादवेक्षितं तं युज्यमानं सोमं जुष्टी सेवित्वा दक्षस्य सोमिनः सखायं कुरुते[8] ॥ ॥ ४० ॥

विश्वे त इन्द्र वीर्यं देवा अनु क्रतुं ददुः ।
धुवो विश्वस्य गोपतिः पुरुष्टुत भद्रा इन्द्रस्य रातयः ॥ ७ ॥

---

१. ख-ज्ञ-त१-२-३-भ२-अयोजितेन प्रेरितेन । २. घ-तत्तस्माद्धे । ३. घ-आगच्छ इहास्मिन् यज्ञे । ४. घ-ते तव । ५. त-न-पूजतः । ६. ख-घ-त१-२-दिशसीति । ७. ख-घ-त-श-स्तुत्यः । ८. ख-ज्ञ-त१-२-कृणुते कुरुते ।

विश्वे । ते । इन्द्र । वीर्यम् । देवाः । अनु । । कर्तुम् । ददुः ।
भुवः । विश्वस्य । गोऽपतिः । पुरुऽस्तुत । भद्राः । इन्द्रस्य । रातयः ॥ ७ ॥

हे vइन्द्र vते तव vवीर्यं सामर्थ्यं vकर्तुं प्रज्ञां च vअनु अनुसृत्य vविश्वे सर्वे vदेवाः vददुः[1] दधुः । धारयन्ति वीर्यं प्रज्ञां च । तव बलेन प्रज्ञया च तेऽपि बलिनः प्रज्ञावन्तश्च भवन्तीत्यर्थः । तादृशस्त्वं vगोपतिः प्रसिद्धानां गवामुदकानां स्तुतिवचसो वा पतिः vभुवः भवसि । vविश्वस्य इत्येतत् पदान्तर्गतस्यापि गोशब्दस्य विशेषः । हे vपुरुष्टुत बहुभिः स्तुतेन्द्र[2] भवसीति समन्वयः ॥

गृणे तदिन्द्र ते शवं उपमं देवतातये ।
यद्धंसि वृत्रमोजसा शचीपते भद्रा इन्द्रस्य रातयः ॥ ८ ॥

गृणे । तत् । इन्द्र । ते । शवः । उपऽमम् । देवऽतातये ।
यत् । हंसि । वृत्रम् । ओजसा । शचीऽपते । भद्राः । इन्द्रस्य । रातयः ॥ ८ ॥

हे vइन्द्र vते तव vतत् vशवः बलम् vउपमम् अन्तिकं vदेवतातये यजमानाय यज्ञार्थं वा vगृणे स्तुवे । vयत् यस्माद्धे vशचीपते vवृत्रम् vओजसा बलेन vहंसि तस्मात्ते शवो गृणे ॥

समनेव वपुष्यतः कृणवन्मानुषा युगा ।
विदे तदिन्द्रश्चेतनमधं श्रुतो भद्रा इन्द्रस्य रातयः ॥ ९ ॥

समनाऽइव । वपुष्यतः । कृणवत् । मानुषा । युगा ।
विदे । तत् । इन्द्रः । चेतनम् । अधं । श्रुतः । भद्राः । इन्द्रस्य । रातयः ॥ ९ ॥

vसमनेव समानमनस्का योषिदिव सा यथा vवपुष्यतः वपुरिच्छतः पुरुषान् vकृणवत् करोति स्ववशान् एवमयमिन्द्रः vमानुषा मनुष्यान् vयुगा युगानि कालान् संवत्सरायनर्तुमासादीन् vविदे लम्भयति । vतत् युगनिर्माणात्मकं कर्म vइन्द्रः vचेतनं सर्वस्य प्रज्ञापकं कृतवानिति शेषः । vअध अथैवं कृत्वा vश्रुतः सर्वत्र ख्यातोऽभूत् ॥

उज्जातमिन्द्र ते शव उत्त्वामुत्तव क्रतुम् ।
भूरिगो भूरि वावृधुर्मघवन्तव शर्मणि भद्रा इन्द्रस्य रातयः ॥ १० ॥

त् । जातम् । इन्द्र । ते । शवः । उत् । त्वाम् । उत् । तव । क्रतुम् ।
रिगो इति भूरिऽगो । भूरि । ववृधुः । मघऽवन् । तव । शर्मणि । भद्राः । इन्द्रस्य । रातयः ॥ १० ॥

हे vइन्द्र vउत् । अयं व्यवहितेनापि vवावृधुः[3] इत्यनेन संबध्यते । उद्वर्धयन्ति सोमेन । किम् । vते vशवः बलम् । न केवलं बलं किंतु vत्वाम् vउत् वर्धयन्ति स्तुत्यादिना । पश्चात् vतव vक्रतुं प्रज्ञां स्वानुकूलाम् vउत् वर्धयन्ति । vभूरि इत्येतत् प्रत्याख्यातं संबध्यते । अतिप्रभूतमुद्वर्धयन्तीत्यर्थः । क एवं कुर्वन्तीति उच्यते । हे vभूरिगो बहुपशो हे vमघवन् धनवन्निन्द्र vतव vशर्मणि त्वदीये सुखे ये वर्तन्ते ते च कुर्वन्तीति ॥

---

१. ख-ग-त-न-भ–' ददुः ' नास्ति । २. घ–स्तुतेंद्र त्वं विश्वस्य पतिः । ३. ज्ञ-न-भ–ववृधुः ।

अहं च त्वं च वृत्रहन्त्सं युज्याव सनिभ्य आ ।
अरातीवा चिदद्रिवोऽनु नौ शूर मंसते भद्रा इन्द्रस्य रातयः ॥ ११ ॥

अहम् । च । त्वम् । च । वृत्रऽहन् । सम् । युज्याव । सनिऽभ्यः । आ ।
अरातिऽवा । चित् । अद्रिऽवः । अनु । नौ । शूर । मंसते । भद्राः । इन्द्रस्य । रातयः ॥ ११ ॥

हे [v]वृत्रहन् इन्द्र [v]त्वं [v]च [v]अहं [v]च [v]सं [v]युज्याव संगतौ भवाव । कियदवधीति उच्यते । [v]सनिभ्य [v]आ यावता कालेन धनानि लभ्यन्ते तावत्कालम् । [v]नौ संगतयोश्चावयोर्हे [v]अद्रिवः वज्रवन् इन्द्र[1] [v]अरातीवा अदानोऽपि जनस्त्वदत्तधनस्य [v]अनु [v]मंसते अनुमतिं करोति ॥

सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम नानृतम् ।
महाँ असुन्वतो वधो भूरि ज्योतींषि सुन्वतो भद्रा इन्द्रस्य रातयः ॥ १२ ॥

सत्यम् । इत् । वै । ऊँ इति । तम् । वयम् । इन्द्रम् । स्तवाम । न । अनृतम् ।
महान् । असुन्वतः । वधः । भूरि । ज्योतींषि । सुन्वतः । भद्राः । इन्द्रस्य । रातयः ॥ १२ ॥

[v]वयं प्रगाथाः [v]तम् [v]इन्द्रं [v]सत्यमित् सत्यमेव [v]स्तवाम । [v]नानृतम् असत्यं न स्तवाम । अस्माभिरुक्ता गुणाः सत्या एव सन्तु नानृता इत्यर्थः । स्तुत्यस्येन्द्रस्य संबन्धि [v]असुन्वतः अयष्टुः [v]वधः [v]महान् प्रभूतो भवति । [v]भूरि [v]ज्योतींषि बहून् सोमान् [v]सुन्वतः अभिषवं कुर्वतो यजमानस्येन्द्रकृतोऽनुग्रहो महान् भवतीत्यर्थः ॥ ॥ ४१ ॥

'स पूर्व्यः' इति द्वादशर्चं चतुर्थं सूक्तम् । अत्रानुक्रमणिका— 'स पूर्व्यो गायत्रमाद्या चतुर्थ्यादिद्वे ससमी चानुष्टुभो गायत्रेऽन्त्या दैवी त्रिष्टुप्' इति । प्रथमाचतुर्थीपञ्चमीसप्तम्यश्चतस्रोऽनुष्टुभः 'अस्मे रुद्राः' इत्यन्त्या त्रिष्टुबवशिष्टा गायत्र्यः । अन्त्याया देवा देवता शिष्टा ऐन्द्र्यः । षष्ठेऽहनि मरुत्वतीयस्याद्यस्तृचः प्रतिपत् । सूत्रितं च—'स पूर्व्यो महानां त्रय इन्द्रस्य सोमा इति मरुत्वतीयस्य प्रतिपदनुचरौ' (आश्व. श्रौ. ८. १) इति ॥

स पूर्व्यो महानां वेनः क्रतुभिरानजे । यस्य द्वारा मनुष्पिता देवेषु धिय आनजे ॥ १ ॥

सः । पूर्व्यः । महानाम् । वेनः । क्रतुऽभिः । आनजे ।
यस्य । द्वारा । मनुः । पिता । देवेषु । धियः । आनजे ॥ १ ॥

[v]सः[2] [v]पूर्व्यः मुख्यः[3] [v]महानां पूज्यानां यजमानानां [v]क्रतुभिः कर्मभिर्निमित्तभूतैः [v]वेनः कान्तस्तेषां हविः कामयमानः [v]आनजे आगच्छति । [v]यस्य इन्द्रस्य [v]द्वारा द्वाराणि प्राप्युपायानि [v]धियः कर्माणि [v]देवेषु एतेषु मध्ये [v]पिता सर्वेषां पालकः [v]मनुः [v]आनजे प्राप । आनजिः प्राप्तिकर्मा ॥

दिवो मानं नोत्सदन्त्सोमपृष्ठासो अद्रयः । उक्था ब्रह्म च शंस्या ॥ २ ॥

दिवः । मानम् । न । उत् । सदन् । सोमऽपृष्ठासः । अद्रयः । उक्था । ब्रह्म । च । शंस्या ॥ २ ॥

[v]दिवः द्युलोकस्य [v]मानं निर्मातारमिन्द्रं [v]नोत्सदन् नोत्पृजन्तु । के । [v]सोमपृष्ठासः सोमस्पष्टारः सोमाभिषवकर्तारः [v]अद्रयः ग्रावाणः । किंच [v]उक्था उक्थानि शस्त्राणि [v]ब्रह्म [v]च ब्रह्माणि स्तोत्राणि

१. घ–शूरेंद्र । २. ख-ज्ञ-त१-२-न-भ-स इंद्रः । ३. घ–मुख्य इंद्रः ।

[v]शंस्या शंसनीयानि भवन्तीति शेषः । यद्वा । यानि स्तोत्राणि शस्त्राणि च सन्ति तानीन्द्रं नोत्सृजन्त्विति समन्वयः ॥

स विद्वाँ अङ्गिरोभ्य इन्द्रो गा अवृणोदप । स्तुषे तदस्य पौंस्यम् ॥ ३ ॥

सः । विद्वान् । अङ्गिरःऽभ्यः । इन्द्रः । गाः । अवृणोत् । अप । स्तुषे । तत् । अस्य । पौंस्यम् ॥३॥

[v]सः [v]विद्वान् उपायज्ञः [v]इन्द्रः [v]अङ्गिरोभ्यः तेषामर्थाय [v]गाः पणिभिरपहृताः पिहिताः [v]अप [v]अवृणोत् अपवारितवान् । [v]तत् तादृशम् [v]अस्य [v]पौंस्यं पुंस्त्वं सामर्थ्यं [v]स्तुषे स्तौमि ॥

स प्रत्नथा कविवृध इन्द्रो वाकस्य वक्षणिः । शिवो अर्कस्य होमन्यस्मत्रा गन्त्ववसे ॥४॥

सः । प्रत्नऽथा । कविऽवृधः । इन्द्रः । वाकस्य । वक्षणिः ।
शिवः । अर्कस्य । होमनि । अस्मऽत्रा । गन्तु । अवसे ॥ ४ ॥

[v]सः [v]इन्द्रः [v]प्रत्नथा प्रत्नवत् पूर्वस्मिन् काले यथा तद्वदिदानीमपि [v]कविवृधः मेधाविनां स्तोतृणां वर्धयिता [v]वाकस्य स्तोतुः [v]वक्षणिः वोढा [v]शिवः सुखकरः [v]अर्कस्य । अर्कमन्नमर्चनीयत्वादर्चनसाधनत्वाद्वा । तादृशस्य सोमस्य [v]होमनि होमे सः [v]अस्मत्रा अस्मासु निमित्तभूतेषु [v]अवसे रक्षणाय [v]गन्तु गच्छतु ॥

आदु नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः । श्वात्रमर्का अनूषतेन्द्र गोत्रस्य दावने ॥५॥

आत् । ऊँ इति । नु । ते । अनु । क्रतुम् । स्वाहा । वरस्य । यज्यवः ।
श्वात्रम् । अर्काः । अनूषत । इन्द्र । गोत्रस्य । दावने ॥ ५ ॥

[v]आदु अनन्तरमेव [v]नु अद्य हे [v]इन्द्र [v]ते तव [v]क्रतुं कर्म [v]अनु क्रमेण [v]अनूषत इति संबन्धः । अनुक्रमेण स्तुवन्ति । के । [v]स्वाहावरस्य स्वाहादेव्याः पतेरग्नेः [v]यज्यवः यष्टारः । त्वदर्थमग्नौ यागं कुर्वन्त इत्यर्थः । तादृशाः [v]अर्काः अर्चयितारः स्तोतारः । [v]श्वात्रम् इति क्षिप्रनाम । अन्यदेवतास्तुतिरूपविलम्बमकृत्वातिशीघ्रमतिदीर्घं स्तुवन्तीत्यभिप्रायः । किमर्थं स्तुवन्तीति उच्यते । [v]गोत्रस्य [v]दावने धनस्य दानाय ॥

इन्द्रे विश्वानि वीर्या कृतानि कर्त्वानि च । यमर्का अध्वरं विदुः ॥ ६ ॥

इन्द्रे । विश्वानि । वीर्या । कृतानि । कर्त्वानि । च । यम् । अर्काः । अध्वरम् । विदुः ॥ ६ ॥

अस्मिन् [v]इन्द्रे [v]विश्वानि सर्वाणि [v]वीर्या वीर्याणि सामर्थ्यानि [v]कृतानि [v]कर्त्वानि [v]च[1] कर्तव्यानि च वर्तन्त इति शेषः । [v]यम् इन्द्रम् [v]अर्काः स्तोतारः [v]अध्वरम् अहिंसकं [v]विदुः जानन्ति तस्मिन्निन्द्र इति ॥ ॥ ४२ ॥

पञ्चमेऽहनि मरुत्वतीये 'यत्पाञ्चजन्यया' इति तृचः प्रतिपत् । सूत्रितं च—'यत्पाञ्चजन्यया विशेन्द्र इत्सोमपा एक इति मरुत्वतीयस्य प्रतिपदनुचरौ' (आश्व. श्रौ. ७. १२) इति ॥

यत्पाञ्चजन्यया विशेन्द्रे घोषा असृक्षत । अस्तृणाद्बर्हणा विप्योर्यो मानस्य स क्षयः ॥७॥

यत् । पाञ्चऽजन्यया । विशा । इन्द्रे । घोषाः । असृक्षत ।
अस्तृणात् । बर्हणा । विपः । अर्यः । मानस्य । सः । क्षयः ॥ ७ ॥

---

१. ख-ग-घ-त-भ२-श–'च' नास्ति ।

vयत् यदा vपाञ्चजन्यया । निषादपञ्चमाश्चत्वारो वर्णाः पञ्चजनाः । तत्र भवया vविशा प्रजया vइन्द्रे vघोषाः स्तुतयः vअसृक्षत सृज्यन्ते तदानीमयमिन्द्रः vअस्तृणात् हिनस्ति शत्रून् vबर्हणा स्वमहत्त्वेन । अनन्यसहायेनेत्यर्थः[1] । तादृशः vसः vअर्यः[2] इन्द्रः vविपः मेधाविनः स्तोतुर्मम vमानस्य[3] पूजायाः सत्कारस्य vक्षयः निवासो भवति ॥

इयꣳ ते अनुष्टुतिश्चकृषे तानि पौꣳस्या । प्रावश्चक्रस्य वर्तनिम् ॥ ८ ॥

इयम् । ऊँ इति । ते । अनुऽस्तुतिः । चकृषे । तानि । पौꣳस्या । प्र । आवः । चक्रस्य । वर्तनिम् ॥८॥

vइयम् इदानीं क्रियमाणा vअनुष्टुतिः अनुकूला स्तुतिः vते तव स्वभूता । कुतस्त[4] इति उच्यते । vतानि प्रसिद्धानि वृत्रवधादीनि vपौंस्या पुंस्त्वानि यतः vचकृषे । अतस्त इत्यर्थः । हे इन्द्र vचक्रस्य रथाधारस्य vवर्तनिं मार्गं vप्रावः प्रारक्षः । अथास्मद्यज्ञगमनाय रक्षःकृता चक्रमार्गबाधा यथा न भवति तथा रक्षसीत्यर्थः ॥

अस्य वृष्णो व्योदन उरु क्रमिष्ट जीवसे । यवं न पश्व आ ददे ॥ ९ ॥

अस्य । वृष्णः । विऽओदने । उरु । क्रमिष्ट । जीवसे । यवम् । न । पश्वः । आ । ददे ॥ ९ ॥

vअस्य vवृष्णः वर्षितुरिन्द्रस्य vव्योदने विविधेऽन्ने लब्धे सति vजीवसे जीवनाय vउरु विस्तीर्णं vक्रमिष्ट पदनिधानं करोति सर्वो लोकः । अथवेन्द्रस्य स्वभूतेऽन्ने लब्धे लब्धव्ये वा सति पदन्यासं करोति । तथा कृत्वा vयवं vन vपश्वः यवं पशव इव सर्वो जनः vआ vददे आदत्ते स्तुतादस्मात् ॥

तद्धाना अवस्यवो युष्माभिर्दक्षपितरः । स्याम मरुत्वतो वृधे ॥ १० ॥

तत् । दधानाः । अवस्यवः । युष्माभिः । दक्षऽपितरः । स्याम । मरुत्वतः । वृधे ॥ १० ॥

vतत् स्तोत्रं vदधानाः धारयन्तः vअवस्यवः रक्षाकामा वयं हे ऋत्विजः vयुष्माभिः । सहिता इति वा योज्यम्[5] । तादृशाः vदक्षपितरः । दक्षोऽन्नम् । तस्य पितरः पालकाः स्वामिनः vस्याम । किमर्थम् । vमरुत्वतः मरुद्भिस्तद्वत इन्द्रस्य vवृधे वर्धनाय यागाय ॥

बळित्थाय धाम्ने ऋक्वभिः शूर नोनुमः । जेषामेन्द्र त्वया युजा ॥ ११ ॥

बट् । ऋत्वियाय । धाम्ने । ऋक्वऽभिः । शूर । नोनुमः । जेषाम । इन्द्र । त्वया । युजा ॥ ११ ॥

vबट् सत्यम् vऋत्वियाय ऋतौ भवाय । ऋतुशब्दो यागकालोपलक्षकः । यागकाले[6] प्रादुर्भूताय vधाम्ने कल्याणतेजसे तुभ्यं हे vशूर इन्द्र vऋक्वभिः मन्त्रैः vनोनुमः अतिशयेन[7] स्तुमः[7] । हे vइन्द्र स्तुतेन vत्वया vयुजा सहायभूतेन vजेषाम जयेम शत्रून् ॥

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ॥१२॥

---

१. ख-ग-त-न-श-अन्य° । २. घ-ज्ञ-अर्यः स्वामी । ३. ख-ज्ञ-त१-२-३-यजमानस्य । ४. ख-ग-त न-भ-श-कुतस्त्व । ५. त-न-श-योज्ये । ६. ख-ग-त-न-भ-श-काले । ७. ख-ग-त-न-भ-श-' अतिशयेन स्तुमः ' नास्ति ।

अस्मे इति । रुद्राः । मेहना । पर्वतासः । वृत्रऽहत्ये । भरेऽहूतौ । सऽजोषाः ।
यः । शंसते । स्तुवते । धायि । पज्रः । इन्द्रेऽज्येष्ठाः । अस्मान् । अवन्तु । देवाः ॥ १२ ॥

vअस्मे अस्मान् vरुद्राः vमेहना उदकसेचनयुक्ताः vपर्वतासः मेघाश्च vवृत्रहत्ये वृत्रहननसाधने vभरहूतौ संग्रामाह्वाने vसजोषाः अस्मत्समानप्रीतिश्च vयः इन्द्रः vशंसते शस्त्रं पठते vस्तुवते स्तोत्रं कुर्वते च यजमानाय vपज्रः बलवान् वेगवान् वा vधायि गच्छति स इन्द्रश्चेमे vइन्द्रज्येष्ठाः vदेवाः vअस्मानवन्तु रक्षन्तु । अस्मानिति पूरणः । अथवैवं योज्यम् । रुद्रा रुद्रपुत्रा मेहना सेचनेन युक्ताः पर्वताः पर्वतसदृशाः पूरणवन्तः प्रीणनवन्तो वा । 'पर्व पुनः पृणातेः प्रीणातेर्वा' (निरु. १. २०) इति निरुक्तम् । वृत्रहत्ये भरहूतौ सजोषाः सजोषसः सहायभूता मरुतो देवा इन्द्रज्येष्ठा उक्तलक्षण इन्द्रश्चास्मानवन्त्विति ॥ ॥ ४३ ॥

'उस्रा मन्दन्तु' इति द्वादशर्चं पञ्चमं सूक्तं प्रगाथस्यार्षम् । प्राग्वत्सप्रपरिभाषया गायत्रमैन्द्रम् । 'उस्रा' इत्यनुक्रमणिका । विनियोगो लैङ्गिकः ॥

उस्रा मन्दन्तु स्तोमाः कृणुष्व राधो अद्रिवः । अव ब्रह्मद्विषो जहि ॥ १ ॥

उत् । त्वा । मन्दन्तु । स्तोमाः । कृणुष्व । राधः । अद्रिऽवः । अव । ब्रह्मऽद्विषः । जहि ॥ १ ॥

हे इन्द्र vत्वा त्वां vस्तोमाः स्तुतयः vउत् उत्कृष्टं vमन्दन्तु मादयन्तु । vकृणुष्व कुरु vराधः अन्नं हे vअद्रिवः वज्रवन्निन्द्र अस्मभ्यम् । किंच vब्रह्मद्विषः ब्राह्मणद्वेष्टॄन् vअव vजहि ॥

पदा पणीँरराधसो नि बाधस्व महाँ असि । नहि त्वा कश्चन प्रति ॥ २ ॥

पदा । पणीन् । अराधसः । नि । बाधस्व । महान् । असि । नहि । त्वा । कः । चन । प्रति ॥ २ ॥

vपणीन् लुब्धान् vअराधसः यष्टव्यधनरहितान् केवलधनान् vपदा पादेन अतिक्रम्य[1] vनि[1] नितरां vबाधस्व । vत्वा त्वां तव vकश्चन कश्चिदपि देवोऽसुरो मनुष्यो वा vप्रति प्रतिनिधिः सदृशो vनहि अस्ति खलु[2] ॥

त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम् । त्वं राजा जनानाम् ॥ ३ ॥

त्वम् । ईशिषे । सुतानाम् । इन्द्र । त्वम् । असुतानाम् । त्वम् । राजा । जनानाम् ॥ ३ ॥

हे vइन्द्र vत्वं vसुतानाम् अभिषुतानां सोमानाम् vईशिषे ईश्वरो भवसि । तथा vत्वम् vअसुतानां वल्ल्याकारे वर्तमानानां चेशिषे । vत्वं vजनानां सर्वेषां vराजा भवसि ॥

एहि प्रेहि क्षयो दिव्या३ घोषञ्चर्षणीनाम् । ओभे पृणासि रोदसी ॥ ४ ॥

आ । इहि । प्र । इहि । क्षयः । दिवि । आऽघोषन् । चर्षणीनाम् ।
आ । उभे इति । पृणासि । रोदसी इति ॥ ४ ॥

हे इन्द्र vएहि आगच्छ । तथा vप्रेहि प्रगच्छ[3] । vदिवि द्युलोकात् । किम् । vक्षयः निवासम् । किं कुर्वन् । vआघोषन् शब्दं कुर्वन् । किमर्थम् । vचर्षणीनां मनुष्याणामर्थाय । अथवा । हविः स्वीकृत्य प्रेहि सुखेन गच्छ । दिवमाघोषन् यजमानं स्तुवन् । vउभे vरोदसी द्यावापृथिव्यौ vआ vपृणासि आपूरयसि तेजसा वृष्ट्या वा ॥

---

१. ख-त-न-श–नातिक्रम्य । २. घ–खलु अतस्त्वं महानसि । ३. ख-घ-त-न-भ–प्रागच्छ; श–आगच्छ ।

त्यं चित्पर्वतं गिरिं शतवन्तं सहस्रिणम् । वि स्तोतृभ्यो रुरोजिथ ॥ ५ ॥

त्यम् । चित् । पर्वतम् । गिरिम् । शतऽवन्तम् । सहस्रिणम् । वि । स्तोतृऽभ्यः । रुरोजिथ ॥५॥

हे इन्द्र त्वं Vत्यं Vचित् तम् । चिदिति पूरणः । Vपर्वतं पर्ववन्तं Vगिरिं मेघम् । उभयोर्मेघनामत्वादेको योगरूढो द्रष्टव्यः । Vशतवन्तं शतोदकवन्तं तथा Vसहस्रिणम् अपरिमितवृष्टिं मेघं Vस्तोतृभ्यः अर्थाय Vवि Vरुरोजिथ विरुज वज्रेण ॥

वयमु त्वा दिवा सुते वयं नक्तं हवामहे । अस्माकं काममा पृण ॥ ६ ॥

वयम् । ऊँ इति । त्वा । दिवा । सुते । वयम् । नक्तम् । हवामहे । अस्माकम् । कामम् । आ । पृण ॥६॥

हे इन्द्र Vवयं Vत्वा त्वां Vदिवा अहनि Vसुते सोमेऽभिषुते Vहवामहे आह्वयामः । तथा Vवयं Vनक्तं हवामहे । आहूत[1] आगत्य Vअस्माकं Vकाममा Vपृण आपूरय ॥ ॥ ४४ ॥

क[2] स्य वृषभो युवा तुविग्रीवो अनानतः । ब्रह्मा कस्तं सपर्यति ॥ ७ ॥

कः । स्यः । वृषभः । युवा । तुविऽग्रीवः । अनानतः । ब्रह्मा । कः । तम् । सपर्यति ॥ ७ ॥

Vस्यः सः Vवृषभः वर्षिता Vयुवा नित्यतरुणः Vतुविग्रीवः विस्तीर्णकन्धरः[2] Vअनानतः कदाचिदप्यनवनत इन्द्रः Vक कुत्र वर्तत इति को जानातीत्यर्थः । Vकः Vब्रह्मा स्तोता[3] त्वा त्वां[3] Vसपर्यति पूजयति ॥

कस्य स्वित्सवनं वृषा जुजुष्वाँ अव गच्छति । इन्द्रं क उ स्विदा चके ॥८॥

कस्य । स्वित् । सवनम् । वृषा । जुजुष्वान् । अव । गच्छति ।
इन्द्रम् । कः । ऊँ इति । स्वित् । आ । चके ॥ ८ ॥

Vकस्य Vस्वित् Vसवनम् । स्विदिति विचिकित्सायाम् । Vवृषा वर्षितेन्द्रः Vजुजुष्वान् प्रीयमाणः Vअव Vगच्छति । Vक Vउ को वा यजमानः Vइन्द्रम् Vआ Vचके जानाति स्तोतुम् । Vस्वित् इति पूरणः ॥

कं ते दाना असक्षत वृत्रहन्कं सुवीर्या । उक्थे क उ स्विदन्तमः ॥ ९ ॥

कम् । ते । दानाः । असक्षत । वृत्रऽहन् । कम् । सुऽवीर्या ।
उक्थे । कः । ऊँ इति । स्वित् । अन्तमः ॥ ९ ॥

Vते त्वां Vदानाः यजमानैर्दत्ताः Vअसक्षत सेवन्ते[4] । हे Vवृत्रहन् वृत्रस्य हन्तरिन्द्र Vकं कीदृशं त्वाम् Vउक्थे शस्त्रे Vसुवीर्या शोभनवीर्याणि स्तोत्राण्यसक्षत । Vक Vउ Vस्विदन्तमः वान्तिकतमो भवति युद्धे[5] ॥

द्वितीये पर्याये होतुः शस्त्रे 'अयं ते मानुषे' इति तृचोऽनुरूपः । सूत्रितं च—'अयं ते मानुषे जन उद्वेदभि' (आश्व. श्रौ. ६. ४) इति ॥

---

१. ख-त-न-आभूत । २. ग-त३-४-न-श-'विस्तीर्णकन्धरः' नास्ति । ३. घ१-स्तोतारं वा; च-स्तोता तं त्वां; य-स्तोता तं । ४. ग-असेवन्त । ५. ख-त-श-युद्धे द्वितीये युद्धे ।

अयं ते मानुषे जने सोमः पूरुषु सूयते । तस्येहि प्र द्रवा पिब ॥ १० ॥

अयम् । ते । मानुषे । जने । सोमः । पुरुषु । सुयते । तस्य । आ । इहि । प्र । द्रव । पिब ॥१०॥

vअयं vसोमः vते त्वदर्थं तव स्वभूतो वा vपूरुषु मनुष्येषु मध्ये vमानुषे vजने मयि vसूयते[1] । अथवा पूरुनामसु राजसु सूयते । vतस्य । तमित्यर्थः । तम् vएहि आगच्छ । आगत्य च vप्र vद्रव गृहसमीपम् । तथा कृत्वा vपिब तं सोमम् ॥

अयं ते शर्यणावति सुषोमायामधि प्रियः । आर्जीकीये मदिन्तमः ॥ ११ ॥

अयम् । ते । शर्यणाऽवति । सुऽसोमायाम् । अधि । प्रियः । आर्जीकीये । मदिन्ऽतमः ॥११॥

vअयम् अस्माभिरभिषुतः सोमः vते त्वां vमदिन्तमः मादयितृतमः । अयम् vअधि श्रितः आश्रितः । कुत्रेति तदुच्यते । vशर्यणावति कुरुक्षेत्रस्य जघनार्धभवे शरतृणोपेते सरसि । तत्सरः कुत्र वर्तत इति उच्यते । vसुषोमायाम् एतन्नामिकायां नद्याम् । सा च कुत्र वर्तत इति तदुच्यते । vआर्जीकीये एतन्नामके देशे । एवमुक्तप्रकारेणात्यन्तदूरदेशे वर्तते यः सोमः स एवायमभिषुतः । तं पिबेत्युत्तरत्रान्वयः ॥

तमद्य राधसे महे चारुं मदाय घृष्वये । एहीमिन्द्र द्रवा पिब ॥ १२ ॥

तम् । अद्य । राधसे । महे । चारुम् । मदाय । घृष्वये । आ । इहि । ईम् । इन्द्र । द्रव । पिब ॥१२॥

vतं पूर्वमन्त्र उपवर्णितं vचारुं चरणशीलं सोमं vमहे महते vराधसे अस्माकं धनाय तव vघृष्वये शत्रूणां धर्षणशीलाय vमदाय vपिब । हे vइन्द्र तदर्थं vद्रव गच्छ शीघ्रं सोमपात्रं प्रति । तदर्थम् vईम् इदानीम् vएहि आगच्छ ॥ ॥ ४५ ॥

'यदिन्द्र प्राक्' इति द्वादशर्चं षष्ठं सूक्तं प्रगाथस्यार्षं गायत्रमैन्द्रम् । 'यदिन्द्र' इत्यनुक्रान्तम् । विनियोगो लैङ्गिकः ॥

यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः । आ याहि तूयमाशुभिः ॥ १ ॥

यत् । इन्द्र । प्राक् । अपाक् । उदक् । न्यक् । वा । हूयसे । नृऽभिः ।
आ । याहि । तूयम् । आशुऽभिः ॥ १ ॥

हे vइन्द्र त्वं vनृभिः कर्मनेतृभिरस्मदीयैरध्वर्वादिभिः vप्राक् वा vअपागुदक् वा vन्यग्वा यतः[2] कुतश्चित् vहूयसे अतः vतूयं तूर्णम् vआशुभिः आशुगामिभिरश्वैः vआ vयाहि आगच्छ ॥

---

१. त-न-स्तूयते; श-श्रूयते । २. घ-यत् यतः ।

आ त्वा गीर्भिर्महामुरुं हुवे गामिव भोजसे । इन्द्र सोमस्य पीतये ॥ ३ ॥

आ । त्वा । गीःऽभिः । महाम् । उरुम् । हुवे । गाम्ऽइव । भोजसे । इन्द्र । सोमस्य । पीतये ॥३॥

हे ᵛइन्द्र ᵛत्वा त्वां ᵛगीर्भिः स्तुतिभिः ᵛहुवे आह्वयामि । कीदृशं त्वाम् । ᵛमहां महान्तम् ᵛउरुं प्रभूतम् । किमर्थम् । ᵛसोमस्य ᵛपीतये पानाय । ह्वाने दृष्टान्तः । ᵛभोजसे भोगाय ᵛगामिव ॥

आ ते इन्द्र महिमानं हरयो देव ते महः । रथे वहन्तु बिभ्रतः ॥ ४ ॥

आ । ते । इन्द्र । महिमानम् । हरयः । देव । ते । महः । रथे । वहन्तु । बिभ्रतः ॥ ४ ॥

हे ᵛइन्द्र ᵛते तव ᵛमहिमानं माहात्म्यं ᵛरथे ᵛबिभ्रतः धारयन्तः ᵛहरयः अश्वाः ᵛआ ᵛवहन्तु । तथा हे ᵛदेव ᵛते ᵛमहः तेजः रथे बिभ्रतोऽश्वा[1] आ वहन्तु । अत्र महिम्नो महसश्च पृथगावहनासंभवात्ताभ्यां विशिष्टं वहन्त्वित्यर्थः । अथवा महिमानं बिभ्रतस्ते त्वां रथे वहन्तु महो बिभ्रतश्च त्वां वहन्त्विति योज्यम् ॥

इन्द्र गृणीष उ स्तुषे महाँ उग्र ईशानकृत् । एहि नः सुतं पिब ॥ ५ ॥

इन्द्र । गृणीषे । ऊँ इति । स्तुषे । महान् । उग्रः । ईशानऽकृत् । आ । इहि । नः । सुतम् । पिब ॥५॥

हे ᵛइन्द्र त्वं ᵛगृणीषे उच्यसे । इदं देहीदं कुर्विति । तथा ᵛस्तुषे ᵛउ स्तूयसे च । उ इति चार्थे । कीदृशस्त्वम् । ᵛमहान् गुणैः प्रवृद्धः ᵛउग्रः उद्गूर्णबलः ᵛईशानकृत् ऐश्वर्यकर्ता । तादृशस्त्वम् ᵛएहि आगच्छ । आगत्य च ᵛनः ᵛसुतं सोमं ᵛपिब ॥

सुतावन्तस्त्वा वयं प्रयस्वन्तो हवामहे । इदं नो बर्हिरासदे ॥ ६ ॥

सुतऽवन्तः । त्वा । वयम् । प्रयस्वन्तः । हवामहे । इदम् । नः । बर्हिः । आऽसदे ॥ ६ ॥

ᵛसुतावन्तः अभिषुतसोमवन्तः ᵛप्रयस्वन्तः चरुपुरोडाशाद्यन्नवन्तश्च ᵛवयं ᵛत्वा त्वां ᵛहवामहे आह्वयामः । किमर्थम् । ᵛइदं ᵛनः अस्मदीयं ᵛबर्हिः बर्हिषि यज्ञे बर्हिषि वा ᵛआसदे आसादनाय[2] ॥ ॥ ४६ ॥

यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वम् । तं त्वा वयं हवामहे ॥ ७ ॥

यत् । चित् । हि । शश्वताम् । असि । इन्द्र । साधारणः । त्वम् । तम् । त्वा । वयम् । हवामहे ॥७॥

हे ᵛइन्द्र ᵛत्वं ᵛयच्चिद्धि यस्मात् खलु ᵛशश्वतां बहूनां यजमानानां ᵛसाधारणः ᵛअसि । चिदिति पूरणः । हीति प्रसिद्धौ । ᵛतं तादृशं साधारणं ᵛत्वा त्वां ᵛवयं ᵛहवामहे आह्वयामः । इतरेभ्यः पूर्वमिति भावः ॥

प्रातःसवने ' इदं ते सोम्यम् ' इति होतुः प्रस्थितयाज्या । सूत्रितं च–' इदं ते सोम्यं मधु मित्रं वयं हवामहे ' (आश्व. श्रौ. ५. ५) इति ॥

इदं ते सोम्यं मध्वधुक्षन्नद्रिभिर्नरः । जुषाण इन्द्र तत्पिब ॥ ८ ॥

इदम् । ते । सोम्यम् । मधु । अधुक्षन् । अद्रिऽभिः । नरः । जुषाणः । इन्द्र । तत् । पिब ॥८॥

---

१. ख-ग-त-न-श–बिभ्रतः । २. ख-ज्ञ-त१-२-भ१-२–आसदनाय ।

हे इन्द्र Vते त्वदर्थम् Vइदं Vसोम्यं सोमसंबन्धि Vमधु Vअधुक्षन् Vअद्रिभिः ग्रावभिरभिषवसाधनैः[१] Vनरः अस्मदीया अध्वर्यवादयः। हे Vइन्द्र Vतत् मधु Vजुषाणः प्रीयमाणः Vपिब ॥

विश्वाँ अर्यो विपश्चितोऽति ख्यस्तूयमा गहि। अस्मे धेहि श्रवो बृहत् ॥ ९ ॥

विश्वान्। अर्यः। विपःऽचितः। अति। ख्यः। तूयम्। आ। गहि।
अस्मे इति। धेहि। श्रवः। बृहत् ॥ ९ ॥

हे इन्द्र Vअर्यः स्वामी त्वं Vविश्वान् Vविपश्चितः स्तोतॄन्[२] Vअति Vख्यः अतिक्रम्य पश्य। तदर्थं Vतूयं क्षिप्रम् Vआ Vगहि। आगत्य च Vअस्मे अस्मासु Vबृहत् Vश्रवः अन्नं यशो वा Vधेहि ॥

दाता मे पृषतीनां राजा हिरण्यवीनाम्। मा देवा मघवा रिषत् ॥ १० ॥

दाता। मे। पृषतीनाम्। राजा। हिरण्यऽवीनाम्। मा। देवाः। मघऽवा। रिषत् ॥ १० ॥

Vहिरण्यवीनां हिरण्यवीतानां Vपृषतीनां[३] Vराजा इन्द्रः Vमे Vदाता भवतु। हे Vदेवाः Vमघवा इन्द्रः Vमा Vरिषत् रिष्टो मा भवतु ॥

सहस्रे पृषतीनामधि श्रन्द्रं बृहत्पृथु। शुक्रं हिरण्यमा ददे ॥ ११ ॥

सहस्रे। पृषतीनाम्। अधि। चन्द्रम्। बृहत्। पृथु। शुक्रम्। हिरण्यम्। आ। ददे ॥ ११ ॥

अहं Vपृषतीनां गवां Vसहस्रे Vअधि उपरि धारितं Vबृहत् महत्[४] Vपृथु विस्तृतं Vचन्द्रम्[५] आह्लादकं[६] Vशुक्रं निर्मलं Vहिरण्यमा Vददे स्वीकरोमीन्द्रेणानीतम् ॥

नपातो दुर्गहस्य मे सहस्रेण सुराधसः। श्रवो देवेष्वक्रत ॥ १२ ॥

नपातः। दुःऽगहस्य। मे। सहस्रेण। सुऽराधसः। श्रवः। देवेषु। अक्रत ॥ १२ ॥

Vनपातः अरक्षितस्य Vदुर्गहस्य दुःखं गाहमानस्य Vमे[७] संबन्धिनो जनाः Vसहस्रेण अपरिमितेनेन्द्रदत्तेन गवादिधनेन Vसुराधसः सुधनाः सन्तः Vदेवेषु प्रीतेषु। इन्द्रे प्रीत इत्यर्थः। Vश्रवः अन्नं यशो वा Vअक्रत। अलभन्तेत्यर्थः ॥ ॥ ४७ ॥

'तरोभिर्वः' इति पञ्चदशर्चं सप्तमं सूक्तं प्रगाथपुत्रस्य[८] कलेरार्षम्। प्रथमातृतीयाद्ययुजो बृहत्यौ द्वितीयाचतुर्थ्यादियुजः सतोबृहत्यः पञ्चदशी त्वनुष्टुप्। तथा चानुक्रमणिका—'तरोभिः पञ्चोना कलिः प्रागाथः[९] प्रागाथमन्त्यानुष्टुप्[१०]' इति। महाव्रते निष्केवल्ये बार्हततृचाशीतावेतत्सूक्तम्। तथा च पञ्चमारण्यके सूत्रितं—'तरोभिर्वो विदद्वसुमित्युत्तमामुद्धरति' (ऐ. आ. ५. २. ४) इति। अग्निष्टोमेऽच्छावाकशस्त्रेऽयं प्रगाथः स्तोत्रियः। तथा च सूत्रितं—'तरोभिर्वो विदद्वसुं तरणिरित्सिषासतीति प्रगाथौ स्तोत्रियानुरूपौ' (आश्व. श्रौ. ५. १६) इति। चातुर्विंशिकेऽहन्ययमेव प्रगाथः स्तोत्रियः। सूत्रितं च—'तरोभिर्वो विदद्वसुं तरणिरित्सिषासति' (आश्व. श्रौ. ७. ४) इति ॥

---

१. घ—°साधनैरभिषुतवंतः के। २. घ—सर्वान् स्तोतॄन्। ३. घ—पृषतीनामश्वानां। ४. ख-ग-घ-त-न-श—'महत्' नास्ति। ५. ख-त-न-भ-श—चंद्रं हि। ६. ख-घ-त-न-भ—आह्लादकं हि। ७. ख-घ-ञ-त१—मे मम। ८. ग-त-न-श—प्रगाथपुत्र°। ९. ख-ग-त१-३-न—प्रगाथः। १०. ख-ग-भ—प्रगाथ°।

तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये ।
बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ १ ॥

तरःऽभिः । वः । विदत्ऽवसुम् । इन्द्रम् । सऽबाधः । ऊतये ।
बृहत् । गायन्तः । सुतऽसोमे । अध्वरे । हुवे । भरम् । न । कारिणम् ॥ १ ॥

हे ऋत्विजः vवः यूयं vतरोभिः वेगैरश्वैरुपेतं वेगैरेव वा vविदद्वसुं वेदयद्वसुं धनावेदकम् vइन्द्रं vसबाधः बाधासहिताः vऊतये रक्षणाय vबृहत् साम एतत्संज्ञं vगायन्तः सन्तः परिचरतेति शेषः । कुत्रेति तदुच्यते । vसुतसोमे सुतसोमके[1] vअध्वरे यज्ञे सोमयागे । अहं च तमिन्द्रं[2] vहुवे आह्वयामि । कमिव । vभरं भर्तारं कुटुम्बपोषकं vकारिणं हितकरणशीलं[3] यथा स्वहितकरणायाह्वयन्ति पुत्रादयस्तद्वत्तथाभूतमिन्द्रं हुव इति ॥

न यं दुधा वरन्ते न स्थिरा मुरो मदे सुशिप्रमन्धसः ।
य आदित्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम् ॥ २ ॥

न । यम् । दुधाः । वरन्ते । न । स्थिराः । मुरः । मदे । सुऽशिप्रम् । अन्धसः ।
यः । आऽदित्य । शशमानाय । सुन्वते । दाता । जरित्रे । उक्थ्यम् ॥ २ ॥

vयं vसुशिप्रम् इन्द्रं vदुधाः दुर्धरा असुरादयो vन vवरन्ते न वारयन्ति संग्रामे । तथा vस्थिराः देवाः vन वरन्ते । किंच vमुरः मरणस्वभावा मनुष्या न वरन्ते । vअन्धसः अन्नस्य[4] सोमस्य[4] vमदे मदाय सोमपानजनिताय vआदित्य vयः vशशमानाय शंसमानाय vसुन्वते अभिषवं कुर्वते vजरित्रे स्तोत्रे च vदाता भवति । किम् । vउक्थ्यं स्तुत्यं धनम् । स रेजयतीत्युत्तरत्र संबन्धः ॥

यः शुक्रो मृक्षो अश्व्यो यो वा कीजो हिरण्ययः ।
स ऊर्वस्य रेजयत्यपावृतिमिन्द्रो गव्यस्य वृत्रहा ॥ ३ ॥

यः । शुक्रः । मृक्षः । अश्व्यः । यः । वा । कीजः । हिरण्ययः ।
सः । ऊर्वस्य । रेजयति । अपऽवृतिम् । इन्द्रः । गव्यस्य । वृत्रऽहा ॥ ३ ॥

vयः vशुक्रः इन्द्रः स्तोतृणां vमृक्षः शोधकः परिचरणीयो वा । यश्च vअश्व्यः । अश्वकुशलोऽश्व्यः । अथवाश्व्य इति स्वार्थिको यत् । मृक्षोऽश्वः प्रक्षालितोऽश्व इव वर्तते । vयो vवा vकीजः । कीज इत्यद्भुतमाह । किमस्य कथं जात इति व---। यश्च vहिरण्ययः हिरण्मयशरीरः vसः एवमाश्चर्यभूतः vइन्द्रः vवृत्रहा vगव्यस्य गोसमूहस्य । कीदृशस्य । vऊर्वस्य बहुलस्य vअपावृतिम्[5] अपवरणीयं vरेजयति । कम्पयतीत्यर्थः ॥

निखातं चिद्यः पुरुसंभृतं वसूदिद्वपति दाशुषे ।
वज्री सुशिप्रो हर्यश्व इत्करदिन्द्रः कृत्वा यथा वशत् ॥ ४ ॥

---

१. घ-न-अभिषुतसोमके । २. ख-ग-त-न-भ-श-त्वदर्थं । ३. ख-त-न-श-सहितकरण°; भ-स्वहितकरण° । ४. ख-ग-त-भ-श-'अन्नस्य सोमस्य' नास्ति । ५. ख-त-न-भ१-२-मावृतिं; ।

निऽखातम्। चित्। यः। पुरुऽसंभृतम्। वसु। उत्। इत्। वपति। दाशुषे।
वज्री। सुऽशिप्रः। हरिऽअश्वः। इत्। करत्। इन्द्रः। कृत्वा। यथा। वशत्॥ ४॥

[v]निखातं [v]चित् भूमौ खात्वा स्थापितमपि [v]संभृतं संगृहीतं यागदानादिकं कृत्वेदृशं [v]पुरु बहु [v]वसु धनम् [v]उदिद्वपति उद्वपत्येव[1] [v]दाशुषे यजमानाय। एवं यो देवः करोति सः [v]वज्री [v]सुशिप्रः सुहनुः [v]हर्यश्व [v]इत् हरितवर्णाश्वयुक्तः [v]इन्द्रः एव करोति[2]। केनोपाधिना। [v]कृत्वा कर्मणा यागेनोपाधिना। [v]यथा [v]वशत् येन प्रकारेण प्रकामयते तथा स एव करोति॥

यद्वावन्थ पुरुष्टुत पुरा चिच्छूर नृणाम्।
वयं तत्त इन्द्र सं भरामसि यज्ञमुक्थं तुरं वचः॥ ५॥

यत्। ववन्थ। पुरुऽस्तुत। पुरा। चित्। शूर। नृणाम्।
वयम्। तत्। ते। इन्द्र। सम्। भरामसि। यज्ञम्। उक्थम्। तुरम्। वचः॥ ५॥

हे [v]पुरुष्टुत बहुभिः स्तुतेन्द्र [v]शूर विक्रान्त [v]नृणां नेतॄणां[3] स्तोतॄणां[3] सकाशात् [v]पुरा। [v]चित् इत्युपमार्थे। तथेदानीमपि [v]यद्ववन्थ अचीकमथाः [v]तत् एव [v]वयं [v]तुरं तूर्णं [v]ते तुभ्यम् [v]इन्द्र [v]सं [v]भरामसि संभरामः। किं तदिति उच्यते। [v]यज्ञं यागयोग्यं हविः [v]उक्थं शस्त्रं [v]वचः वाच्यम्। तव प्रियतमं हविः स्तोत्रं च संभराम इत्यर्थः॥ ॥ ४८॥

सचा सोमेषु पुरुहूत वज्रिवो मदाय द्युक्ष सोमपाः।
त्वमिद्धि ब्रह्मकृते काम्यं वसु देष्ठः सुन्वते भुवः॥ ६॥

सचा। सोमेषु। पुरुऽहूत। वज्रिऽवः। मदाय। द्युक्ष। सोमऽपाः।
त्वम्। इत्। हि। ब्रह्मऽकृते। काम्यम्। वसु। देष्ठः। सुन्वते। भुवः॥ ६॥

हे [v]पुरुहूत बहुभिराहूत हे [v]वज्रिवः वज्रवन् [v]द्युक्ष द्युमन् [v]सोमपाः सोमस्य पातः त्वं [v]सोमेषु अभिषुतेषु [v]मदाय [v]सचा सह भवेति शेषः। [v]त्वमित् त्वमेव [v]ब्रह्मकृते स्तोत्रकर्त्रे [v]सुन्वते च [v]काम्यं कमनीयं [v]वसु धनं [v]देष्ठः दातृतमः [v]भुवः भवसि॥

चातुर्विंशिकेऽहनि माध्यंदिनसवनेऽच्छावाकशस्त्रे 'वयमेनम्' इति वैकल्पिकोऽनुरूपः। तथा च सूत्रितं—'वयमेनमिदा ह्यो यो राजा चर्षणीनाम्' (आश्व. श्रौ. ७. ४) इति॥

वयमेनमिदा ह्योऽपीपेमेह वज्रिणम्।
तस्मा उ अद्य समना सुतं भरा नूनं भूषत श्रुते॥ ७॥

वयम्। एनम्। इदा। ह्यः। अपीपेम। इह। वज्रिणम्।
तस्मै। ऊँ इति। अद्य। समना। सुतम्। भर। आ। नूनम्। भूषत। श्रुते॥ ७॥

[v]वयं यजमानाः [v]एनम् इन्द्रं [v]वज्रिणम् [v]इदा इदानीं [v]ह्यः च [v]इह अत्र [v]अपीपेम आप्याययाम सोमेन। [v]तस्मा[4] [v]उ[4] तस्मा एव [v]अद्य अत्र [v]समना संग्रामार्थं [v]सुतम् अभिषुतं सोमं [v]भर हरत हे अध्वर्यवादयः। [v]नूनम् इदानीं [v]श्रुते स्तोत्रे श्रुते सति [v]आ [v]भूषत आभवतु आगच्छतु॥

---

१. ग–उपेत्यैव; ज्ञ-त३-४-श–उपति उपेत्येव; त२-न–उपेत्येव। २. ख-घ-ज्ञ-त१-२-न-भ२–करत् करोति; त३-४-श–क करोति। ३. ख-भ१-३-श–नेतॄणां; घ–स्तोतॄणां। ४. ग-त-न-भ-श–'तस्मा उ' नास्ति।

वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति ।
सेमं नः स्तोमं जुजुषाण आ गहीन्द्र प्र चित्रया धिया ॥ ८ ॥

वृकः । चित् । अस्य । वारणः । उराऽमथिः । आ । वयुनेषु । भूषति ।
सः । इमम् । नः । स्तोमम् । जुजुषाणः । आ । गहि । इन्द्र । प्र । चित्रया । धिया ॥८॥

[v]वृकश्चित् स्तेनोऽपि [v]वारणः वारयिता सर्वस्य सन्नपि [v]उरामथिः शत्रूणां मार्गे गच्छतां मथिता सन्नपि [v]अस्य इन्द्रस्य [v]वयुनेषु मार्गेषु प्रज्ञानेषु वा [v]आ [v]भूषति आनुकूल्यमेव भजते । अतीव हिंस्रोऽपीन्द्रस्यानुकूलो भवतीत्यर्थः । यद्वा । अस्येति कर्मणि षष्ठी । अमुमिन्द्रमुक्तरूपो वृकोऽपि वयुनेषु स्तोत्रेष्वा भूषति । [v]सः त्वम् [v]इमं [v]नः [v]स्तोमं [v]जुजुषाणः प्रीयमाणः [v]आ [v]गहि आगच्छ । हे [v]इन्द्र [v]चित्रया [v]धिया कर्मणा स्तुतिलक्षणेन निमित्तेन [v]प्र प्रकर्षेण आ गहि शीघ्रमागच्छ ॥

चातुर्विंशिकेऽहनि माध्यंदिनसवनेऽच्छावाकशस्त्र एव 'कदू नु' इति कद्वत्प्रगाथः । 'कदू न्वस्याकृतमिति कद्वन्तः प्रगाथाः' (आश्व. श्रौ. ७. ४) इति हि सूत्रितम् ॥

कदू न्व१स्याकृतमिन्द्रस्यास्ति पौंस्यम् ।
केनो नु कं श्रोमतेन न शुश्रुवे जनुषः परि वृत्रहा ॥ ९ ॥

कत् । ऊँ इति । नु । अस्य । अकृतम् । इन्द्रस्य । अस्ति । पौंस्यम् ।
केनो इति । नु । कम् । श्रोमतेन । न । शुश्रुवे । जनुषः । परि । वृत्रऽहा ॥ ९ ॥

[v]अस्य [v]इन्द्रस्य [v]कदू [v]नु किं नु खलु [v]पौंस्यं पौरुषम् [v]अकृतम् अनाचरितम् [v]अस्ति । सर्वमपि वृत्रवधादिकमनेन कृतमेव इतः परं न किंच पौंस्यं कृत्यमस्तीत्यर्थः । लोके स्वल्पमपि यः[1] पुंस्वं[2] कुर्यात् स तेन स्तूयतेऽयं तु[3] न स्तुत एतदुच्यते । [v]केनो [v]नु [v]कं केन खलु [v]श्रोमतेन श्रवणीयेन[4] पुंस्त्वेन [v]न [v]शुश्रुवे न श्रूयते । किं कतिपयैरेवाहोभिः कृतेन नेत्याह । अयं [v]वृत्रहा वृत्रस्यातिप्रबलस्य हन्तायं [v]जनुषः [v]परि जन्मप्रभृति क्रियमाणैः सामर्थ्यैः श्रूयते । वृत्रहेत्येतत्पुंस्त्वप्रदर्शनद्योतनाय । यथा वृत्रहननं सर्वैः श्रूयते तद्वदन्यान्यपीति भावः ॥

कदू महीरधृष्टा अस्य तविषीः कदु वृत्रघ्नो अस्तृतम् ।
इन्द्रो विश्वान्बेकनाटाँ अहर्दृशे उत क्रत्वा पणीँरभि ॥ १० ॥

कत् । ऊँ इति । महीः । अधृष्टाः । अस्य । तविषीः । कत् । ऊँ इति । वृत्रऽघ्नः । अस्तृतम् ।
इन्द्रः । विश्वान् । वेकऽनाटान् । अहःऽदृशे । उत । क्रत्वा । पणीन् । अभि ॥ १० ॥

[v]कदू[5] कदा[6] खलु [v]अस्य इन्द्रस्य [v]तविषीः बलानि [v]महीः महान्ति [v]अधृष्टाः अधृष्टान्यधर्षकाणि आसन् । [v]कदु कदा नु खलु [v]वृत्रघ्नः वृत्रहन्तुरिन्द्रस्य हन्तव्यम् [v]अस्तृतम् अहिंसितमभवत् । न कदाचिदित्य------ध्यहं अभवदित्यर्थः । अथवास्य महान्ति बलानि सेनालक्षणानि कदाप्यधृष्टान्यन्यबलैरहिंसितानि तथा वृत्रघ्नः[7] शारीरं[8] बलमस्तृतमन्यैरहिंस्यम् । ईदृशेन द्विविधेन

---

१. ख-त-भ२-श-पुंस्त्वं; न-भ१-३-य-पुंस्वं यः । २. ख-त-न-भ-श-यंतु । ३. ख-त-न-भ-श-श्रपणीयेन; घ-श्रयणीयेन । ४. ख-त-न-श-कदू नु । ५. ख-ग-घ१-त-न-भ-श-कदा नु । ६. ख-त-न-श-वृत्रघ्नशारीरं; भ१-२-वृत्रघ्ना शारीरं ।

बलेन vइन्द्रः vविश्वान् सर्वान् vबेकनाटान्। अनेन कुसीदिनो वृद्धिजीविनो वार्धुषिका उच्यन्ते। कथं तद्व्युत्पत्तिः। वे इत्यपभ्रंशो द्विशब्दार्थे। एकं कार्षापणमृणिकाय प्रयच्छन् द्वौ मह्यं दातव्य --- नयेन दर्शयन्ति[1] ततो द्विशब्देनैकशब्देन च नाटयन्तीति बेकनाटाः। तान्[2] vअहर्दृशः[2]। अहःशब्देन तदुत्पादक आदित्योऽभिधेयो भवति। तं पश्यन्तीत्यहर्दृशः। ननु सर्वे सूर्यं पश्यन्ति कोऽत्रातिशय इति उच्यते। इहैव जन्मनि सूर्यं पश्यन्ति न जन्मान्तरे। लुब्धका अयष्टारोऽन्धे तमसि मज्जन्ति। अथवा लौकिकान्येवाहानि पश्यन्ति न पारलौकिकान्यदृष्टानि। दृष्टप्रधाना हि नास्तिकाः। ईदृशान् vपणीन् पणिसदृशान् शूद्रकल्पान्। उतशब्द एवार्थे। vऋत्वा vउत कर्मणैव ताडनादिव्यापारेणैव vअभि भवतीति शेषः। यद्वा। पणीनुत पणीनेवाभिभवति न यष्टारम्। पणीनां निन्दा स्मर्यते—' गोरक्षकानापणिकांस्तथा कारुकुशीलवान्। प्रेष्यान् वार्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत् ' (मनु. ८. १०२) इति ॥ ॥ ४९ ॥

वयं घा ते अपूर्व्येन्द्र ब्रह्माणि वृत्रहन्।
पुरूतमासः पुरुहूत वज्रिवो भृतिं न प्र भरामसि ॥ ११ ॥

वयम्। घ। ते। अपूर्व्या। इन्द्र। ब्रह्माणि। वृत्रऽहन्।
पुरुऽतमासः। पुरुऽहूत। वज्रिऽवः। भृतिम्। न। प्र। भरामसि ॥ ११ ॥

हे vइन्द्र vवयं vघ खलु vते तव vअपूर्व्या नूतनानि vब्रह्माणि परिवृढानि स्तोत्राणि vप्र vभरामसि संभरामः vपुरूतमासः बहुतमा वयमृत्विग्यजमानरूपेण vवृत्रहन् वृत्रस्य हन्तः vपुरुहूत बहुभिराहूत हे vवज्रिवः वज्रयुक्तेन्द्र। किमिव। vभृतिं vन भृतिमिव। तां यथा नियमेन प्रयच्छन्ति तद्वत्। नियमेन प्रदानतात्पर्यात् भृतिदृष्टान्तत्वमविरुद्धम् ॥

पूर्वीश्चिद्धि त्वे तुविकूर्मिन्नाशसो हवन्त इन्द्रोतयः।
तिरश्चिदर्यः सवना वसो गहि शविष्ठ श्रुधि मे हवम् ॥ १२ ॥

पूर्वीः। चित्। हि। त्वे इति। तुविऽकूर्मिन्। आऽशसः। हवन्ते। इन्द्र। ऊतयः।
तिरः। चित्। अर्यः। सवना। आ। वसो इति। गहि। शविष्ठ। श्रुधि। मे। हवम् ॥ १२ ॥

हे vतुविकूर्मिन् बहुकर्मन् vइन्द्र vत्वे त्वयि vपूर्वीः बहूनि vआशसः आशंसनानि स्थितानि तथा vऊतयः रक्षाश्च त्वय्यवस्थिता[3] लब्धुं vहवन्ते आह्वयन्ति स्तोतारोऽन्ये। अतः vअर्यः अरेः vसवना सवनानि vतिरश्चित् तिरस्कृत्य अरीन् वा तिरस्कृत्य अस्मत्सवनान्यभिलक्ष्य हे vवसो वासकेन्द्र vआ vगहि आगच्छ। अतो हे vशविष्ठ अतिशयेन बलवन् vमे vहवं vश्रुधि शृणु ॥

वयं घा ते त्वे इद्विन्द्र विप्रा अपि ष्मसि।
नहि त्वदन्यः पुरुहूत कश्चन मघवन्नस्ति मर्डिता ॥ १३ ॥

वयम्। घ। ते। त्वे इति। इत्। ऊँ इति। इन्द्र। विप्राः। अपि। स्मसि।
नहि। त्वत्। अन्यः। पुरुऽहूत। कः। चन। मघऽवन्। अस्ति। मर्डिता ॥ १३ ॥

---

१. ख-ज्ञ-त१-२-३-मु—दर्शयति। २. ख-ग-त१-२-न-भ-श—न्ते चाहर्दृशः; ज्ञ-त३-४—न्ते वाहर्दृशः। ३. ख-घ-त-श—°वस्थितानि; ग-भ—°वस्थितास्तानि; न—°वस्थितानि तानि।

हे ᵛइन्द्र ᵛवयं ᵛघ वयं खलु ᵛते तव स्वभूताः । अतः ᵛत्वे ᵛइत् त्वय्येव ᵛविप्राः मेधाविनः स्तोतारः ᵛअपि ᵛस्मसि । अपिः संभावनायाम् । त्वदधीनाः स्मेत्यर्थः । अन्यान् विहायेन्द्र एव वर्तामहे । तस्मिन् कोऽतिशय इत्याह । हे ᵛपुरुहूत ᵛत्वदन्यः ᵛकश्चन हे ᵛमघवन् ᵛमर्डिता सुखयिता न ᵛअस्ति ॥

त्वं नो अस्या अमतेरुत क्षुधोऽभिशस्तेरव स्पृधि ।
त्वं न ऊती तव चित्रया धिया शिक्षा शचिष्ठ गातुवित् ॥ १४ ॥

त्वम् । नः । अस्याः । अमतेः । उत । क्षुधः । अभिऽशस्तेः । अव । स्पृधि ।
त्वम् । नः । ऊती । तव । चित्रया । धिया । शिक्ष । शचिष्ठ । गातुऽवित् ॥ १४ ॥

हे इन्द्र ᵛत्वं ᵛनः अस्मान् ᵛअस्या ᵛअमतेः दारिद्र्यात्मिकायाः ᵛउत अपि च ᵛक्षुधः ᵛअभिशस्तेः निन्दायाश्च सकाशात् ᵛअव ᵛस्पृधि अवमोचय । किंच ᵛत्वं ᵛनः अस्मभ्यं ᵛतव ᵛऊती ऊत्या ᵛचित्रया ᵛधिया विचित्रेण कर्मणा ᵛशिक्ष देह्यभिमतम् । हे ᵛशचिष्ठ[1] ᵛगातुवित् मार्गज्ञ उपायज्ञस्त्वम् ॥

सोम इद्वः सुतो अस्तु कलयो मा बिभीतन ।
अपेदेष ध्वस्मायति स्वयं घैषो अपायति ॥ १५ ॥

सोमः । इत् । वः । सुतः । अस्तु । कलयः । मा । बिभीतन ।
अप । इत् । एषः । ध्वस्मा । अयति । स्वयम् । घ । एषः । अप । अयति ॥ १५ ॥

ᵛसोमः ᵛसुतः अभिषुतः ᵛवः युष्माकं संबन्धी ᵛअस्तु ᵛइत् भवत्वेवेन्द्राय । हे ᵛकलयः । कलिमहर्षेर्ज्ञातयः[2] पुत्राश्चात्र संबोध्यन्ते । यूयं ᵛमा ᵛबिभीतन भीता मा भवत । भीत्यभावे कारणमाह । ᵛएष ᵛध्वस्मा ध्वंसको राक्षसादिः ᵛअप ᵛअयति अपगच्छत्येवेन्द्रसामर्थ्यात् । ᵛस्वयं ᵛघ स्वयमेव[3] ᵛएषः ᵛअपायति । ᵛउ इति पूरणः । पुनरुक्तिर्दार्ढ्यार्था ॥ ॥ ५० ॥

'त्यान्नु' इत्येकविंशत्यृचमष्टमं सूक्तम् । अत्रानुक्रमणिका—'त्यान्नु सैका मत्स्यः सांमदो मैत्रावरुणिर्मान्यो वा बहवो वा मत्स्या जालनद्धा आदित्यानस्तुवन्' । संमदाख्यस्य महामीनस्य पुत्रो मत्स्यो[4] यद्वा मित्रावरुणयोः पुत्रो मान्योऽथवा बहवो वा मत्स्या जालनद्धाः[5] सन्तो बन्धनमोक्षायादित्यानस्तुवन् । अतस्त एवर्षयः । 'परं गायत्रं प्राग्वरसप्रेः' इति परिभाषया गायत्री छन्दः । आदित्या देवता । सूक्तविनियोगो लैङ्गिकः ॥

त्यान्नु क्षत्रियाँ अव आदित्यान्याचिषामहे । सुमृळीकाँ अभिष्टये ॥ १ ॥

त्यान् । नु । क्षत्रियान् । अवः । आदित्यान् । याचिषामहे । सुऽमृळीकान् । अभिष्टये ॥ १ ॥

ᵛत्यान् तान् ᵛआदित्यान् ᵛक्षत्रियान् जात्या क्षत्रियान् ᵛअवः ᵛरक्षणं ᵛयाचिषामहे याचामहे । कीदृशान् । ᵛसुमृळीकान् सुष्ठु सुखयितॄन् । किमर्थम् । ᵛअभिष्टये अभिगमनायाभिमताय वा । मत्स्यपक्षे जालनिर्गमनं प्रार्थितमितरपक्षेऽभिमतमिति विवेकः ॥

---

१. ख-घ-ञ-त१-२-शविष्ठ बलवन् । २. ख-त-न-श-कलितहर्षे°; घ-कलितहर्षा° । ३. ख-ग-त-न-श-अहमेव । ४. ख-ग-त१-२-३-मात्स्यः; श-मान्यः । ५. न-जाले नद्धाः; भ-जालेन नद्धाः ।

मित्रो नो अत्यंहतिं वरुणः पर्षदर्यमा । आदित्यासो यथा विदुः ॥ २ ॥

मित्रः । नः । अति । अंहतिम् । वरुणः । पर्षत् । अर्यमा । आदित्यासः । यथा । विदुः ॥२॥

vमित्रः[1] vवरुणः vअर्यमा vआदित्यासः आदित्याः[1] vनः अस्मान् vअंहतिम् vअति vपर्षत् अतिनयन्तु । ते vयथा vविदुः येन[2] प्रकारेण दुःसहं जानन्ति तथाति पर्षदिति । इतरपक्षे अंहतिं पापमति पर्षदिति ॥

तेषां हि चित्रमुक्थ्यं१ वरूथमस्ति दाशुषे । आदित्यानामरंकृते ॥ ३ ॥

तेषाम् । हि । चित्रम् । उक्थ्यम् । वरूथम् । अस्ति । दाशुषे । आदित्यानाम् । अरम्ऽकृते ॥३॥

vतेषाम् vआदित्यानां vहि खलु vचित्रं चायनीयम् vउक्थ्यं स्तुत्यं vवरूथं धनम् vअस्ति vदाशुषे हविर्दात्रे vअरंकृते अलंकर्त्रे पर्याप्तकारिणे यजमानाय दातव्यं धनमस्तीति ॥

महिं वो महतामवो वरुण मित्रार्यमन् । अवांस्या वृणीमहे ॥ ४ ॥

महिं । वः । महताम् । अवः । वरुण । मित्र । अर्यमन् । अवांसि । आ । वृणीमहे ॥४॥

हे वरुणादयः vमहतां vवः[3] vअवः[3] रक्षणं vमहि महत् दाशुषे हविर्दात्रे करणीयमस्ति । अतः vअवांसि रक्षणानि vआ vवृणीमहे ॥

जीवान्नो अभि धेतनादित्यासः पुरा हथात् । कद्ध स्थ हवनश्रुतः ॥ ५ ॥

जीवान् । नः । अभि । धेतन । आदित्यासः । पुरा । हथात् । कत् । ह । स्थ । हवनऽश्रुतः ॥५॥

हे vआदित्यासः आदित्याः vनः अस्मान् vजीवान् इदानीं जीवतः सतः vअभि vधेतन अभिधावत । अभिधावनं कुरुत । vपुरा vहथात् हननात् पुरा मृतेः पूर्वम् । vकत् क vस्थ भवथ । हे vहवनश्रुतः आह्वानश्रोतारः । आह्वानं श्रुत्वा शीघ्रमागच्छतेति ॥ ॥ ५१ ॥

यद्धः श्रान्ताय सुन्वते वरूथमस्ति यच्छर्दिः । तेना नो अधि वोचत ॥ ६ ॥

यत् । वः । श्रान्ताय । सुन्वते । वरूथम् । अस्ति । यत् । छर्दिः । तेन । नः । अधि । वोचत ॥६॥

vश्रान्ताय कर्मणः[4] vसुन्वते अभिषुण्वते यजमानाय दातव्यं vयत् vवरूथं वरणीयं धनं vवः युष्माकम् vअस्ति vयत् च vछर्दिः सुखवासयोग्यं गृहमस्ति vतेन द्वयेनास्मान् प्रीणयित्वा vनः अस्मान् vअधि vवोचत अधिवचनं कुरुत ॥

अस्ति देवा अंहोरुर्वस्ति रत्नमनागसः । आदित्या अद्भुतैनसः ॥ ७ ॥

अस्ति । देवाः । अंहोः । उरु । अस्ति । रत्नम् । अनागसः । आदित्याः । अद्भुतऽएनसः ॥७॥

हे vदेवाः vअंहोः हन्तुः पापशीलस्य vउरु vअस्ति महत् पापमस्ति । vअनागसः अपापस्य vरत्नं रमणीयं सुकृतं श्रेयः vअस्ति । ततो[5] हे vआदित्याः vअद्भुतैनसः अभूतपापाः । अतोऽस्मदभिमतं कुरुतेति भावः ॥

---

१. ख-त-न-भ-श–मित्रवरुणार्यमादित्याः । २. ख-ग-त-न-भ-श–तेन । ३. ख-घ-त१-३-श–यो अव । ४. भ२–कर्मणी; भ३–कर्मणा । ५. ख-न-भ–अतो ।

मा नः सेतुः सिषेदयं महे वृणक्तु नस्परि । इन्द्र इद्धि श्रुतो वशी ॥ ८ ॥

मा । नः । सेतुः । सिसेत् । अयम् । महे । वृणक्तु । नः । परि । इन्द्रः । इत् । हि । श्रुतः । वशी ॥८॥

[v]नः अस्मान् [v]सेतुः बन्धको जालः [v]मा [v]सिषेत् मा बध्नातु । [v]नः अस्मान् [v]महे महते कर्मणे [v]परि [v]वृणक्तु परिवर्जयतु जालात् । कः । [v]इन्द्र [v]इत् इन्द्र एव [v]श्रुतः विश्रुतः [v]वशी सर्वस्य वशीकर्ता । स परि वृणक्तु ॥

मा नो मृचा रिपूणां वृजिनानामविष्यवः । देवा अभि प्र मृक्षत ॥ ९ ॥

मा । नः । मृचा । रिपूणाम् । वृजिनानाम् । अविष्यवः । देवाः । अभि । प्र । मृक्षत ॥९॥

हे [v]अविष्यवः रक्षितुमिच्छन्तः [v]देवाः [v]नः अस्मान् [v]वृजिनानां हिंसकानां [v]रिपूणां [v]मृचा । मृचिर्हिंसाकर्मा । ' यत्क्षुरेण मर्चयता सुपेशसा ' (आश्व. गृ. १. १७. १५) इत्यादिषु तथा दृष्टत्वात् । हिंसकेन जालेन [v]मा [v]अभि [v]प्र [v]मृक्षत । अभिमर्शनमुपरि जालस्य प्रेरणं मा कुरुत । यद्वा । मृचा जालेन प्राप्ता बाधा नोऽस्माकं मा भवतु । हे देवाः यूयं च परिमार्जयत परिहरत ॥

आधाने पवमानेष्टिषु ' उत त्वामदिते ' इत्यनुवाक्या । सूत्रितं च—' उत त्वामदिते महि महीमू षु मातरम् ' (आश्व. श्रौ. २. १) इति । आदित्ये पशौ वपाया अनुवाक्येयमेव । सूत्रितं च—' उत त्वामदिते मह्यनेहो न उरुव्रजे ' (आश्व. श्रौ. ३. ८) इति ॥

उत त्वामदिते मह्यहं देव्युप ब्रुवे । सुमृळीकामभिष्टये ॥ १० ॥

उत । त्वाम् । अदिते । महि । अहम् । देवि । उप । ब्रुवे । सुऽमृळीकाम् । अभिष्टये ॥१०॥

हे[1] [v]महि महति [v]अदिते देवमातः [v]देवि [v]त्वाम् [v]अहं मत्स्यपक्षे मत्स्यप्रमुखोऽहम् [v]उप [v]ब्रुवे उपेत्य स्तौमि । कीदृशीम् । [v]सुमृळीकां सुष्ठु सुखयित्रीम् । किमर्थम् । [v]अभिष्टये अभिमताय ॥ ॥५२॥

पर्षि दीने गभीर आँ उग्रपुत्रे जिघांसतः । मार्किस्तोकस्य नो रिषत् ॥ ११ ॥

पर्षि । दीने । गभीरे । आ । उग्रऽपुत्रे । जिघांसतः । मार्किः । तोकस्य । नः । रिषत् ॥११॥

हे अदिते [v]आ [v]पर्षि सर्वतः पालयसि । [v]दीने क्षीणे [v]गभीरे उदके । उदकनामैतत् ' गभीरं गहनम् ' इति तन्नामसु पाठात् । [v]उग्रपुत्रे । उद्गूर्णाः पुत्रा यस्मिन् तत्[2] । तस्मिन्नुदके [v]जिघांसतः हिंसतो जालं [v]तोकस्य अस्माकं तनयस्य तनयं [v]माकिः [v]रिषत् मैव हिंसां करोतु[3] ॥

आदित्यस्य पशौ ' अनेहो नः ' इति पुरोडाशस्यानुवाक्या । सूत्रितं च—' अनेहो न उरुव्रजेऽदितिर्यजनिष्ट ' (आश्व. श्रौ. ३. ८) इति ॥

अनेहो नं उरुव्रज उरूचि वि प्रसर्तवे । कृधि तोकाय जीवसे ॥ १२ ॥

अनेहः । नः । उरुऽव्रजे । उरूचि । वि । प्रऽसर्तवे । कृधि । तोकाय । जीवसे ॥ १२ ॥

[v]अनेहः अपापान् [v]नः अस्मान् हे [v]उरुव्रजे विस्तीर्णगमने । दूरमियमदितिर्भूमिरूपा[4] गता भवत्यतिविस्तृतत्वात् । अथवोरुगमने धीरे हे [v]उरूचि उरुत्वं [v]वि [v]प्रसर्तवे अभिसरणाय [v]कृधि

---

१. ख-घ-ङ्ग-त१-२—उतापि च हे । २. घ-त२-३-श—' तत् ' नास्ति । ३. ख-त-न-भ-श—करोति । ४. ग—दूरं हि इयमदिति°; न—दूरं यंमदिति°; त३-भ१-श—दूरं यमदति°; भ२—दूरं यमदिति°; भ३—दूरं यथा व्रजति° ।

कुरु । कस्मै । vतोकाय पुत्राय मत्स्याय vजीवसे तस्य जीवनाय । यथा जीवेम पुत्रान्रक्षितुं तथोरुत्वं कुर्विति ॥

ये मूर्धानः क्षितीनामदब्धासः स्वयशसः । व्रता रक्षन्ते अद्रुहः ॥ १३ ॥

ये । मूर्धानः । क्षितीनाम् । अदब्धासः । स्वऽयशसः । व्रता । रक्षन्ते । अद्रुहः ॥ १३ ॥

vये vमूर्धानः सर्वेषां मूर्धस्थानीया उच्छ्रिताः vक्षितीनां मनुष्याणाम् vअदब्धासः अहिंसकाः vस्वयशसः स्वायत्तकीर्तयः vव्रता व्रतान्यस्मदीयानि कर्माणि vरक्षन्ते पालयन्ते vअद्रुहः अद्रोग्धारः सन्तः ॥

ते नं आस्नो वृकाणामादित्यासो मुमोचत । स्तेनं बद्धमिवादिते ॥ १४ ॥

ते । नः । आस्नः । वृकाणाम् । आदित्यासः । मुमोचत । स्तेनम् । बद्धम्ऽइव । अदिते ॥ १४ ॥

हे vआदित्यासः आदित्याः vते यूयं vनः अस्मान्[1] vवृकाणां हिंसकानामादातॄणां वा vआस्नः आस्यात् सकाशात् vमुमोचत विमोचनं कुरुत vस्तेनं vबद्धमिव । हे vअदिते त्वं च मोचयास्मानिति ॥

अपो षु णं इयं शरुरादित्या अप दुर्मतिः । अस्मदेत्वजघ्नुषी ॥ १५ ॥

अपो इति । सु । नः । इयम् । शरुः । आदित्याः । अप । दुःऽमतिः । अस्मत् । एतु । अजघ्नुषी ॥ १५ ॥

हे vआदित्याः vइयं vशरुः हिंसिका प्रमतिः जालिकप्रेरिता vअजघ्नुषी अहिंसन्ती सती vअस्मत् अस्मत्तः vसु सुष्ठु vअपो vएतु अपगच्छत्वेव । तथा vदुर्मतिः दुष्टा मतिरप्यजघ्नुषी अस्मत्तः vअप गच्छतु ॥ ॥ ५३ ॥

शश्वद्धि वः सुदानव आदित्या ऊतिभिर्वयम् । पुरा नूनं बुभुज्महे ॥ १६ ॥

शश्वत् । हि । वः । सुऽदानवः । आदित्याः । ऊतिऽभिः । वयम् । पुरा । नूनम् । बुभुज्महे ॥ १६ ॥

हे vसुदानवः सुदाना हे vआदित्याः vवः युष्माकम् vऊतिभिः रक्षाभिः vवयं vपुरा vनूनम् इदानीमपि vशश्वत् सर्वदा vबुभुज्महे । यद्वा । शश्वत् बहून् भोगान् भुञ्ज्महे ॥

शश्वन्तं हि प्रचेतसः प्रतियन्तं चिदेनसः । देवाः कृणुथ जीवसे ॥ १७ ॥

शश्वन्तम् । हि । प्रऽचेतसः । प्रतिऽयन्तम् । चित् । एनसः । देवाः । कृणुथ । जीवसे ॥ १७ ॥

हे vप्रचेतसः प्रकृष्टमतयो हे vदेवाः vशश्वन्तं बहुमपि vप्रतियन्तं vचित् प्रतिगच्छन्तमपि शत्रुम् vएनसः पापस्य कर्तारम् । अथवैनसः पापकृतः । व्यत्ययेन बहुवचनम् । पापकर्तारं vजीवसे जीवनायास्माकं vकृणुथ कुरुत । अस्मत्तो वियुक्तमिति शेषः ॥

तत्सु नो नव्यं सन्यस आदित्या यन्मुमोचति । बन्धाद्बुद्धमिवादिते ॥ १८ ॥

---

१. ख–अस्मान् कारणान् क्राणान्; घ-ङ-त१-३-४-न-भ१-श–अस्मान् क्राणान्; त२–अस्मान् प्राणान्; भ३–अस्मान् ऋषीन् ॥ अत्र 'वृकाणाम्' इत्यस्य पुनरुक्तिः स्यादथवा 'नोऽस्माकं प्राणान्' इत्यभिप्रेतं स्यादिति मॅक्समुल्लरमहाशयः संभावयति ।

तत् । सु । नः । नव्यम् । सन्यसे । आदित्याः । यत् । मुमोचति ।
बन्धात् । बद्धम्ऽइव । अदिते ॥ १८ ॥

vतत् बन्धकं vनः अस्माकं vसु सुष्ठु vनव्यं स्तुत्यं vसन्यसे संभजनाय भवतु । अस्माकं मोचनेन स्तुत्यं भवत्वित्यर्थः । हे vआदित्याः अदितेः पुत्रा हे vअदिते त्वदनुग्रहात् vयत् vमुमोचति मुञ्चत्यस्मान् बन्धनसाधनं[1] पूर्वं यत् प्रतिबन्धकत्वादासीत्[2] तदेव युष्मदनुग्रहादस्मान् मुञ्चतु[3] । यद्वा । युष्माकं यद्रक्षणमस्मान् मुञ्चति तत् सुष्ठु स्तुत्यं संभजनाय भवत्विति योज्यम् ॥

नास्माकंमस्ति तत्तर आदित्यासो अतिष्कदे । यूयमस्मभ्यं मृळत ॥ १९ ॥
न । अस्माकम् । अस्ति । तत् । तरः । आदित्यासः । अतिऽस्कदे ।
यूयम् । अस्मभ्यम् । मृळत ॥ १९ ॥

हे vआदित्यासः आदित्या युष्मत्कर्तृकः vतत् vतरः वेगः vअस्माकं vन vअस्ति यो वेगो बन्धकाजालात् vअतिष्कदे अस्माकमतिस्कन्दनाय प्रभवति । अतः vयूयमस्मभ्यं vमृळत । तत्तादृशं तरः कुरुतेत्यर्थः ॥

मा नो हेतिर्विवस्वत आदित्याः कृत्रिमा शरुः । पुरा नु जरसो वधीत् ॥२०॥
मा । नः । हेतिः । विवस्वतः । आदित्याः । कृत्रिमा । शरुः । पुरा । नु । जरसः । वधीत् ॥२०॥

हे vआदित्याः vनः अस्मान् vविवस्वतः विवस्वत्पुत्रस्य यमस्य । पुत्रे पितृशब्दः । तस्य vहेतिः आयुधभूता vकृत्रिमा[4] क्रियया[4] निष्पन्ना vशरुः हिंसिका प्रसितिः vपुरा पूर्वं vनु इदानीम् । सर्वदेत्यर्थः । vजरसः इदानीं जीर्णान् vमा vवधीत् मा हिंस्यात् ॥

वि षु द्वेषो व्यंहतिमादित्यासो वि संहितम् । विष्वग्वि वृहता रपः ॥२१॥
वि । सु । द्वेषः । वि । अंहतिम् । आदित्यासः । वि । सम्ऽहितम् ।
विष्वक् । वि । वृहत । रपः ॥ २१ ॥

हे vआदित्यासः आदित्याः vद्वेषः द्वेष्टॄन् vसु सुष्ठु vवि vवृहत उन्मूलयत[5] । नाशयतेत्यर्थः । तथा vअंहतिं पातकं पापं vवि वृहत । ' हन्तेरंह च ' (उ. सू. ४. ५०२) इत्यतिप्रत्ययः । तथा vसंहितं[6] जालं vवि वृहत । तथा vरपः पापं सर्वं vविष्वक् विषूचीनं vवि वृहत । ' रपो रिप्रमिति पापनामनी भवतः ' (निरु. ४. २१) इति यास्कः ॥ ॥ ५४ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
ऋक्संहिताभाष्ये षष्ठाष्टके चतुर्थोऽध्यायः ॥

---

१. ख-ज्ञ-त१-३-४-न-भ२–बंधकं न साधनं; घ–बंधकसाधनं; त२–बंधकं बंधनसाधनं; श–बंधकसाधने । २. ख-त-न-भ२-श–प्रतिबंधकत्वाद्यमासीत् । ३. ख-ग-त-न-भ-श–मुंचतु स्तुत्यं भवत्वित्यर्थः; घ–मुंचतु दृष्टांतः बंधात् बद्धमिव बद्धं पुरुषं बंधात् यथा विमुंचति तद्वत् । ४. ख-ज्ञ-त३-४-भ२-श–कृत्रिमक्रियया; घ–कृत्रिमा कृत्रिमक्रियया; न–कृत्रिमक्रिया; भ१–शत्रिमक्रियया । ५. ग-त-न-भ२-श–विवृहन्मन्मलयत; भ१–विमधमन्मलयत । ६. त३-न-श–हितं ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
षष्ठे चतुर्थमध्यायं श्रीमायणसुतः सुधीः ।
व्याख्याय सायणाचार्यः पञ्चमं व्याकरोत्यथ ॥

तत्र 'आ त्वा रथम्' इत्येकोनविंशत्यृचं नवमं सूक्तम् । अत्रेयमनुक्रमणिका–'आ त्वैकोनाप्रियमेध आदावनुष्टुम्मुखास्तृचाश्चत्वारोऽन्त्याः षळृक्षाश्वमेधयोर्दानस्तुतिः' इति । आङ्गिरसः प्रियमेध ऋषिः । प्रथमाचतुर्थीसप्तमीदशम्योऽनुष्टुभः शिष्टाः 'परं गायत्रम्' इति परिभाषया गायत्र्यः । अन्ततः षट्स्वृक्षु ऋक्षाश्वमेधयोर्दानं स्तूयते । अतस्तास्तद्देवताकाः । शिष्टा अनुक्तपरिभाषयैन्द्र्यः । सूक्तविनियोगो लैङ्गिकः । आद्यस्तृचो मरुत्वतीयस्य प्रतिपत् । तथा च सूत्रितम्—'आ त्वा रथं यथोतय इदं वसो सुतमन्ध इति मरुत्वतीयस्य प्रतिपदनुचरौ' (आश्व. श्रौ. ५. १४) इति । महाव्रतादिष्वपि यत्र तृचान्तरं न विधीयते तत्र सर्वत्रायमेव[1] प्रतिपद्भवति ॥

आ त्वा रथं यथोतये सुम्नाय वर्तयामसि । तुविकूर्मिमृतीषहमिन्द्र शविष्ठ सत्पते ॥ १ ॥

आ । त्वा । रथम् । यथा । ऊतये । सुम्नाय । वर्तयामसि ।
तुविऽकूर्मिम् । ऋतिऽसहम् । इन्द्र । शविष्ठ । सत्ऽपते ॥ १ ॥

हे इन्द्र ᵛत्वा त्वाम् ᵛआ ᵛवर्तयामसि आवर्तयामः । किमर्थम् । ᵛऊतये अस्माकं रक्षणाय ᵛसुम्नाय सुखाय च । किमिव । ᵛरथं ᵛयथा । रथं यथोतये सुखाय चावर्तयन्ति तद्वत् । कीदृशं त्वाम् । ᵛतुविकूर्मिं बहुकर्माणम् ᵛऋतीषहं हिंसकानामभिभवितारम् । हे ᵛइन्द्र ᵛशविष्ठ अतिशयेन बलवन् हे ᵛसत्पते सतां पालक त्वामिति समन्वयः ॥

तुविशुष्म तुविक्रतो शचीवो विश्वया मते । आ पप्राथ महित्वना ॥ २ ॥

तुविऽशुष्म । तुविक्रतो इति तुविऽक्रतो । शचीऽवः । विश्वया । मते । आ । पप्राथ । महिऽत्वना ॥ २ ॥

हे ᵛतुविशुष्म प्रभूतबल हे ᵛतुविक्रतो बहुकर्मन् । अथवा बहुप्रज्ञ कर्मणः पृथगभिधानात् । हे ᵛशचीवः बहुकर्मोपेत ᵛमते पूजनीयेन्द्र ᵛविश्वया विश्वव्यापेन ᵛमहित्वना महत्त्वेन ᵛआ ᵛपप्राथ आपूरितवानसि । अविशेषाद्विश्वमित्यर्थः ॥

यस्य ते महिना महः परि ज्मायन्तमीयतुः । हस्ता वज्रं हिरण्ययम् ॥ ३ ॥

यस्य । ते । महिना । महः । परि । ज्मायन्तम् । ईयतुः । हस्ता । वज्रम् । हिरण्ययम् ॥ ३ ॥

ᵛमहः महतः ᵛयस्य ᵛते तव । यच्छब्दः प्रकृतपरामर्शकः । प्रकृतं तूक्तमृग्द्वयम् । तत्रत्यतुविकूर्मिमृतीषहमित्याद्युक्तलक्षणस्य तवेत्यर्थः[2] । ᵛमहिना महत्त्वेन ᵛहस्ता तव हस्ता हस्तौ ᵛज्मायन्तं पृथिव्यां सर्वतो व्याप्नुवन्तं ᵛहिरण्ययं हिरण्मयं ᵛवज्रम्[3] ᵛईयतुः परिगृह्णीतः । सर्वदास्माकं भयनिवारणायेति भावः ॥

---

१. ख-त१-२-भ-°यमेव तृचः । २. ख-त-त इत्यर्थः; ग-इत्यर्थः; न-भद्र इत्यर्थः; भ१-व इत्यर्थः; श-स इत्यर्थः । ३. ख-त-न-श-वज्रहस्तं; भ-वज्रं हस्तौ ।

पृष्ठ्याभिप्लवषडहयोर्द्वितीयेऽहनि ' विश्वानरस्य ' इति प्रतिपत्तृचः । सूत्रितं च—' विश्वानरस्य वस्पतिमिन्द्र इत्सोमपा एक इति मरुत्वतीयस्य प्रतिपदनुचरौ ' (आश्व. श्रौ. ७. ६) इति ॥

विश्वानरस्य वस्पतिमनानतस्य शवसः । एवैश्च चर्षणीनामूती हुवे रथानाम् ॥४॥

विश्वानरस्य । वः । पतिम् । अनानतस्य । शवसः ।
एवैः । च । चर्षणीनाम् । ऊती । हुवे । रथानाम् ॥ ४ ॥

vविश्वानरस्य विश्वान् शत्रून् प्रत्यृतस्य vअनानतस्य शत्रूणामप्रह्वस्य vशवसः बलस्य vपतिं स्वामिनमिन्द्रं वा । अत्रेन्द्रसंबन्धिनो[1] मरुतोऽपि संकीर्त्यन्ते । हे मरुतः vवः । युष्माकमित्यर्थः । यद्यपि मरुत्संशब्दनं नास्ति तथापि व[2] इति[3] सामर्थ्यात्लभ्यते । युष्माकं vचर्षणीनां सैनिकानाम् vएवैः गमनैः सह । यद्वा चर्षणीनाम् इन्द्रस्य सेनारूपाणां वो युष्माकं गमनैरिति सामानाधिकरण्यम् । युष्माकं vरथानां च vऊती ऊतिभिर्गमनैश्च सह vहुवे आह्वयामि । गन्तृभी रथैर्गन्तृभिर्मरुद्भिश्च सहेन्द्रं हुव इत्यर्थः । यद्वा । हे यजमानाः युष्मदीयाः सैनिकाः सरथा यदा प्रविशन्ति युद्धाय संग्रामं तदानीं तेषां साहाय्यायेन्द्रं हुव इत्यर्थः ॥

अभिष्टये सदावृधं स्वर्मीळ्हेषु यं नरः । नाना हवन्त ऊतये ॥ ५ ॥

अभिष्टये । सदाऽवृधम् । स्वःऽमीळ्हेषु । यम् । नरः । नाना । हवन्ते । ऊतये ॥ ५ ॥

हे यजमानाः युष्माकम् vअभिष्टये साहाय्यार्थमभिगमनायाभिष्टये वा vसदावृधं सर्वदा वर्धयन्तं सेवकान् स्वयं सर्वदा वर्धमानं वा हुव इति शेषः । vयं vस्वर्मीळ्हेषु संग्रामेषु vनरः नेतारो मनुष्याः vनाना बहुप्रकारं vहवन्ते आह्वयन्ति vऊतये रक्षार्थं तं हुव इति शेषः ॥ ॥ १ ॥

परोमात्रमृचीषममिन्द्रमुग्रं सुराधसम् । ईशानं चिद्वसूनाम् ॥ ६ ॥

परःऽमात्रम् । ऋचीषमम् । इन्द्रम् । उग्रम् । सुऽराधसम् । ईशानम् । चित् । वसूनाम् ॥६॥

vपरोमात्रम् । परा मात्रा यस्य तादृशम् । अथवा मीयत इति मात्रं दूरदेशः । ततः परस्ताद्वर्तमानमपरिमितस्वरूपम् । तथापि vऋचीषमम् ऋचा स्तुत्या समम् । यद्यप्यपरिच्छिन्नः तथापि स्तुतिर्यावन्मात्रं विषयीकरोति तत्सम इत्यर्थः । तदेवाह । vइन्द्रं परमैश्वर्ययोगादिच्छानुकूलस्वरूपम् vउग्रम् उद्गूर्णबलं vसुराधसम् । राध इति धननाम । शोभनधनं शोभनान्नं वा vईशानं vचित् ईश्वरं च । केषाम् । vवसूनाम् अस्मभ्यं प्रदेयानां गवादिधनानाम् । एवंमहानुभावमिन्द्रं हुव इति शेषः ॥

तृतीयेऽहनि मरुत्वतीये ' तंतमित् ' इति प्रतिपत्तृचः । सूत्रितं च—' तंतमिद्राधसे महे त्रय इन्द्रस्य सोमाः ' (आश्व. श्रौ. ७. १०) इति ॥

तंतमिद्राधसे महे इन्द्रं चोदामि पीतये । यः पूर्व्यामनुष्टुतिमीशे कृष्टीनां नृतुः ॥७॥

तम्ऽतम् । इत् । राधसे । महे । इन्द्रम् । चोदामि । पीतये ।
यः । पूर्व्याम् । अनुऽस्तुतिम् । ईशे । कृष्टीनाम् । नृतुः ॥ ७ ॥

vतंतमित् तमेव इन्द्रम् । सर्वेष्वपि यागकालेषु तमेवेन्द्रमित्यर्थः । तं प्रति vचोदामि प्रेरयामि स्तुतिं vपीतये सोमपानाय । ततः को लाभ इति उच्यते । vमहे महते vराधसे धनाय प्रभूतधन-

लाभार्थम्। vयः vनृतुः फलस्य नेता देवः vपूर्व्या पूर्वे भवां यज्ञमुखस्थाम् vअनुष्टुतिम् अनुक्रमेण क्रियमाणां स्तुतिं vकृष्टीनां मनुष्याणामृत्विजां संबन्धिनीम् vईशे ईष्टे श्रोतुं तं चोदामीति संबन्धः ॥

न यस्य ते शवसान सख्यमानंश मर्त्यः । नकिः शवांसि ते नशत् ॥ ८ ॥

न । यस्य । ते । शवसान । सख्यम् । आनंश । मर्त्यः । नकिः । शवांसि । ते । नशत् ॥ ८ ॥

हे vशवसान बलवन्निन्द्र[1] vयस्य[1] vते तव vसख्यं vमर्त्यः मरणधर्मा मनुष्यः vन vआनंश न व्याप्नोति vते vशवांसि बलान्यपि vनकिः नैव vनशत् व्याप्नोति ॥

त्वोतासस्त्वा युजाप्सु सूर्ये महद्धनम् । जयेम पृत्सु वज्रिवः ॥ ९ ॥

त्वाऽऊतासः । त्वा । युजा । अप्ऽसु । सूर्ये । महत् । धनम् । जयेम । पृत्ऽसु । वज्रिऽवः ॥९॥

हे इन्द्र vत्वोतासः त्वया रक्षिताः vत्वा त्वया vयुजा सहायेन vअप्सु स्नातुं सूर्यं द्रष्टुं च। स्नानादिव्यवहारं कर्तुं vसूर्ये उदिते सति गमनादिव्यवहारं कर्तुमित्यर्थः। तदर्थं vपृत्सु संग्रामेषु हे vवज्रिवः वज्रवन्निन्द्र vमहद्धनं vजयेम। शत्रून् संग्रामे जित्वा तेषां धनं लभेमेत्यर्थः ॥

चतुर्थेऽहनि मरुत्वतीये ' तं त्वा यज्ञेभिः ' इति तृचः प्रतिपत्। सूत्रितं च—' तं त्वा यज्ञेभिरीमह इदं वसो सुतमन्ध इति मरुत्वतीयस्य प्रतिपदनुचरौ ' (आश्व. श्रौ. ७. ११) इति ॥

तं त्वा यज्ञेभिरीमहे तं गीर्भिर्गीर्वणस्तम ।
इन्द्र यथा चिदाविथ वाजेषु पुरुमाय्यम् ॥ १० ॥

तम् । त्वा । यज्ञेभिः । ईमहे । तम् । गीःऽभिः । गिर्वणःऽतम ।
इन्द्र । यथा । चित् । आविथ । वाजेषु । पुरुऽमाय्यम् ॥ १० ॥

vतं स्तुत्यत्वेन प्रसिद्धं vत्वा त्वां vयज्ञेभिः यागसाधनैः सोमादिभिः vईमहे याचामहे । vतम् एवेन्द्रं vगीर्भिः स्तुतिभिरीमहे । हे vगिर्वणस्तम गीर्भिः स्तुतिभिर्वननीयतम इन्द्र तं त्वामिति समन्वयः । हे vइन्द्र त्वं vयथा vचिदाविथ येन प्रकारेण ररक्षिथ माम् । चिदिति पूरणः । कुत्रेति उच्यते । vवाजेषु संग्रामेषु । कीदृशं माम् । vपुरुमाय्यं बहुप्रज्ञम् । बहुस्तुतिमित्यर्थः[2] ॥ ॥ २ ॥

यस्य ते स्वादु सख्यं स्वाद्वी प्रणीतिरद्रिवः । यज्ञो वितन्तसाय्यः ॥ ११ ॥

यस्य । ते । स्वादु । सख्यम् । स्वाद्वी । प्रऽनीतिः । अद्रिऽवः । यज्ञः । वितन्तसाय्यः ॥११॥

हे vअद्रिवः वज्रवन्निन्द्र vयस्य स्तुत्यत्वेन प्रसिद्धस्य vते तव vसख्यं vस्वादु अतीवानुभवार्हम् । किंच ते vप्रणीतिः प्रणयनं धनादीनां vस्वाद्वी स्वादु सुहर्षकम् । तथोभे त्वद्विषयो vयज्ञः च vवितन्तसाय्यः विशेषेण तननीयः ॥

उरु णस्तन्वे३ तन उरु क्षयाय नस्कृधि । उरु णो यन्धि जीवसे ॥ १२ ॥

उरु । नः । तन्वे । तने । उरु । क्षयाय । नः । कृधि । उरु । नः । यन्धि । जीवसे ॥ १२ ॥

---

१. ख-श-त१-२-न—बलवन्निद्र न यस्य; त३-४-भ२—बल - - - - नि यस्य; श—बलानि यस्य । २. न—बहुस्तुतिकमिति समन्वयः हे इन्द्र त्वत्यर्थः; भ—बहुस्तुतिकमित्यर्थः ।

हे इन्द्र त्वं vनः अस्माकं vतन्वे आत्मजाय vउरु प्रभूतं vकृधि कुरु । सामर्थ्याद्धनं सुखं वेति गम्यते । तथा vतने तत्पुत्राय vउरु कृधि । तथा vक्षयाय निवासाय vउरु कृधि । vनः अस्माकं vजीवसे जीवनाय vयन्धि प्रयच्छाभिमतम् ॥

उरुं नृभ्य उरुं गवे उरुं रथाय पन्थाम् । देववीतिं मनामहे ॥ १३ ॥

उरुम् । नृऽभ्यः । उरुम् । गवे । उरुम् । रथाय । पन्थाम् । देवऽवीतिम् । मनामहे ॥ १३ ॥

हे इन्द्र vनृभ्यः अस्मदीयेभ्यो भृत्येभ्यः vउरुं हितं vमनामहे याचामहे । तथा vगवे । एतदुपलक्षणम् । गवाश्वादिकाय तथा vरथाय vपन्थां पन्थानं मार्गम् । अथवा नृप्रभृतीनां संचाराय शोभनं मार्गं मनामहे । तथा vदेववीतिं यज्ञं मनामहे ॥

उप मा षड् द्वाद्वा नरः सोमस्य हर्ष्यी । तिष्ठन्ति स्वादुरातयः ॥ १४ ॥

उप । मा । षट् । द्वाऽद्वा । नरः । सोमस्य । हर्ष्यी । तिष्ठन्ति । स्वादुऽरातयः ॥ १४ ॥

एतदाद्याः षडृच ऋक्षाश्वमेधयोर्दानस्तुतिरूपाः । यद्यपि बृहद्देवतानुक्रमण्याम् ' ऋक्षाश्वमेधयोरत्र पञ्च दानप्रशंसकाः ' (बृहद्दे. ६. ९२) इत्युक्तं तथापि ' उप मा षट् ' इत्यस्या राजदानस्तुतिशेषत्वादविरोधः । अनेनैवाशयेनानुक्रमण्याम् ' अन्त्याः षळृच ऋक्षाश्वमेधयोर्दानस्तुतिः ' इत्युक्तम् । vमा मां प्रियमेधं यज्ञे[1] प्रसर्पन्तः[1] vषट् एतत्संख्याकाः vनरः नेतारो राजानः vसोमस्य पीतस्य vहर्ष्या हर्षेण vस्वादुरातयः सुष्ठूपभोगार्हदानाः सन्तः vद्वाद्वा द्वौ द्वौ पितृपुत्ररूपेण युग्मौ भूत्वा माम् vउप vतिष्ठन्ति । तेषां युग्मानां नाम तूत्तरत्र स्पष्टीक्रियते ॥

ऋज्रावि॑न्द्रोत आ ददे हरी ऋक्षस्य सूनवि । आश्वमेधस्य रोहिता ॥ १५ ॥

ऋज्रौ । इन्द्रोते । आ । ददे । हरी इति । ऋक्षस्य । सूनवि । आश्वऽमेधस्य । रोहिता ॥ १५ ॥

vइन्द्रोते[2] एतन्नामक आतिथिग्वेऽतिथिग्वनाम्नो राज्ञः पुत्रे । ' अतिथिग्वाय शम्बरम् ' (ऋ. सं. १. ५१. ६) ' अतिथिग्वाय शंस्यम् ' (ऋ. सं. ६. २६. ३) इत्यादिष्वतिथिग्वः प्रसिद्धः । तत्पुत्र इन्द्रोते vऋज्रौ ऋजुगामिनावश्वौ vआ vददे स्वीकृतवानस्मि[3] । तथा vऋक्षस्य vसूनवि ऋक्षनाम्नः[4] पुत्रेऽन्यस्मिन् राजनि vहरी हरितवर्णावश्वौ आ ददे । तथा vआश्वमेधस्य अश्वमेधपुत्रे राजनि vरोहिता रोहितवर्णावश्वौ आ ददे । नन्वनुक्रमण्यामुभयोरेव दानप्रशंसारूपत्वमुक्तम् अत्र कथं त्रयाणां दानकीर्तनमिति । नैष दोषः । ऋक्षाश्वमेधपुत्रयोरेव यागेऽस्यर्षेः प्रवृत्तेस्तयोरेव दानं प्रस्तुतम् । इन्द्रोतस्तु स्वपित्रा सह तयोर्यज्ञदिदृक्षयागत्य तयोर्दानं दृष्ट्वा स्वपित्रा प्रेरितो दत्तवानश्वौ । अतस्तद्दानं प्रासङ्गिकमिति । एवमृक्षाश्वमेधयोर्दानस्तुतित्वं न[5] व्याहन्यते[5] । पितृपुत्रयोरभेदात्तयोः[6] पक्षकर्तृत्वाच्च[7] । इन्द्रोतदानस्य प्रासङ्गिकत्वं ' षळश्वान् ' इत्यत्र विस्पष्टयिष्यते ॥ ॥ ३ ॥

सुरथाँ आतिथिग्वे स्वभीशूँरार्क्षे । आश्वमेधे सुपेशसः ॥ १६ ॥

सुऽरथान् । आतिथिऽग्वे । सुऽअभीशून् । आर्क्षे । आश्वऽमेधे । सुऽपेशसः ॥ १६ ॥

---

१. ख-त-यज्ञं प्रसर्पतं; ग-यज्ञे प्रसर्प्य; घ-यज्ञे प्रसर्पतः; भ-यज्ञे प्रसर्पतं; श-यज्ञे प्रसर्पत । २. ख-त-न-भ-श-हे इन्द्रोत । ३. ख-भ-स्वीकृतवानसि । ४. ख-त-श-°नाम्ना । ५. ख-त३-४-मव्याहन्यते; ज्ञ-श-अव्याहन्यते । ६. भ१-२-°त्तयोः प्राद्योः; घ-°त्तयोः प्राद्याः । ७. ख-त-न-भ-श-प्रक्षकर्तृत्वा°; ग-प्रयोजककर्तृत्वा° ।

vआतिथिग्वे इन्द्रोते vसुरथान् शोभनरथोपेतानश्वानाददे। vआर्क्षे ऋक्षपुत्रे vस्वभीशून् अश्वानाददे। vआश्वमेधे अश्वमेधपुत्रे vसुपेशसः सुरूपानश्वान्[1] शोभनालंकारानाददे ॥

षळश्वाँ आतिथिग्व इन्द्रोते वधूमतः। सचा पूतक्रतौ सनम् ॥ १७ ॥

षट्। अश्वान्। आतिथिऽग्वे। इन्द्रोते। वधूऽमतः। सचा। पूतऽक्रतौ। सनम्॥ १७॥

vआतिथिग्व vइन्द्रोते vपूतक्रतौ शुद्धप्रज्ञे शुद्धकर्मोपेते वा तस्मिन् vवधूमतः वधूभिर्वडवाभिस्तद्वतः vषडश्वान् vसचा ऋक्षाश्वमेधयोः पुत्राभ्यां दत्तेनाश्वादिधनेन सचा सह vसनं लब्धवानस्मि। एतत्साहित्यवचनमिन्द्रोतदानस्य प्रासङ्गिकत्वे लिङ्गम् ॥

ऐषु चेतद्वृषण्वत्यन्तर्ऋज्रेष्वरुषी। स्वभीशुः कशावती ॥ १८ ॥

आ। एषु। चेतत्। वृषण्ऽवती। अन्तः। ऋज्रेषु। अरुषी। सुऽअभीशुः। कशाऽवती॥१८॥

vएषु vऋज्रेषु ऋजुगामिष्वश्वेषु vअन्तः मध्ये vआ vचेतत् आज्ञायते। का। vवृषण्वती वर्षकैः पुमश्चैस्तद्वती vअरुषी आरोचमाना vस्वभीशुः शोभनप्रग्रहा vकशावती दृप्ता वडवा ज्ञायते ॥

न युष्मे वाजबन्धवो निनित्सुश्चन मर्त्यः। अवद्यमधि दीधरत् ॥ १९ ॥

न। युष्मे इति। वाजऽबन्धवः। निनित्सुः। चन। मर्त्यः। अवद्यम्। अधि। दीधरत्॥१९॥

हे vवाजबन्धवः अन्नबन्धवोऽन्नप्रदाः। एवं पुत्राणां पितृपुत्ररूपाणां षण्णां वा संबोधनम्। हे राजानः vयुष्मे युष्मासु vनिनित्सुश्चन निन्दकोऽपि vमर्त्यः मनुष्यः vअवद्यं निन्दां vन vअधि vदीधरत् नान्वधारयत्। नारोपयति युष्मासु। अतोऽनिन्द्या यूयमिति दातॄणां स्तुतिः ॥ ॥ ४ ॥

'प्रप्र वः' इत्यष्टादशर्चं दशमं सूक्तं प्रियमेधस्याङ्गिरसस्यार्षम्। द्वितीया 'नदं वः' इत्येषा चतुःसप्तकोष्णिक् चतुर्थ्यद्यास्तिस्रो गायत्र्य एकादशीपोडश्यौ पङ्क्ती[2] शिष्टा दशानुष्टुभः। 'अपादिन्द्रः' इत्यर्धर्चो वैश्वदेवो 'वरुण इदिह' इत्याद्यास्रयोऽर्धर्चा वरुणदेवताकाः शिष्टा ऐन्द्र्यः। तथा चानुक्रान्तं—'प्रप्र द्वयूनानुष्टुभं द्विबृहत्यन्तं द्वितीयोष्णिक् चतुर्थ्यद्यास्तिस्रो गायत्र्यः पोळश्येकादश्यौ पङ्क्ती अपाद्वैश्वदेवोऽर्धर्चस्रयो वारुणाः' इति। आद्यस्तृचः षोडशिशस्त्र आनुष्टुभः। सूत्रितं च—'प्रप्र वस्त्रिष्टुभमिषमर्चत प्रार्चत' (आश्व. श्रौ. ६. २) इति ॥

प्रप्र वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे। धिया वो मेधसातये पुरंध्या विवासति ॥१॥

प्रऽप्र। वः। त्रिऽस्तुभम्। इषम्। मन्दत्ऽवीराय। इन्दवे।
धिया। वः। मेधऽसातये। पुरम्ऽध्या। आ। विवासति ॥ १ ॥

हे अध्वर्यवोदृथः vवः यूयम्। प्रथमार्थे द्वितीया। vत्रिष्टुभं स्तोभत्रयोपेतम् vइषम् अन्नं vप्रप्र। अपरः प्रशब्दः पूरणः। प्रभरतेति शेषः। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। कस्मै। vमन्दद्वीराय। यो वीरान् हर्षयति स मन्दद्वीरः। तस्मै vइन्दवे इन्द्राय। इन्दतेरैश्वर्यकर्मणः[3] इदं रूपम्। अथवा फलैर्वृष्टिभिर्वोनत्तीतीन्दुरिन्द्रः। तस्मै। स चेन्द्रः vवः युष्मान् vमेधसातये यज्ञसंभजनाय vपुरंध्या बहुप्रज्ञया vधिया कर्मणा vआ vविवासति[4]। अभिमतफलयोजनेन सत्करोतीत्यर्थः ॥

---

१. ख-त-न-सुरूपान् तान्; भ-सुरूपाननान्। २. ख-ग-त-भ-श-पंक्त्यौ; न-पंक्तौ। ३. ख-त-न-भ-श-ईधते°। ४. न-भ-विवासति परिचरति।

महाव्रते निष्केवल्ये ' नदं वः ' इत्येषा विहरणीया। तथैव पञ्चमारण्यके सूत्रितं च—' नदं व ओदतीनामित्येतयैतानि व्यतिषजति ' (ऐ. आ. ५. १. ६) इति ॥

नदं व ओदतीनां नदं योयुवतीनाम्। पतिं वो अघ्न्यानां धेनूनामिषुध्यसि॥२॥

नदम्। वः। ओदतीनाम्। नदम्। योयुवतीनाम्।
पतिम्। वः। अघ्न्यानाम्। धेनूनाम्। इषुध्यसि ॥ २ ॥

[v]ओदतीनाम्। ओदत्य उषसः ' ओदती भास्वती ' इति तन्नामसु पाठात्। तासां[1] [v]नदम्। उत्पादकमित्यर्थः। इन्द्रेण ह्युषस उत्पद्यन्त इन्द्रस्यैव सूर्यत्वात्। ' विवस्वदिन्द्र सुगम्य ' इति द्वादशादित्यमध्य इन्द्रः पठितः। तादृशमिन्द्रं हे यजमानाः [v]वः युष्मदर्थम्। आह्वयतेत्यर्थः। तथा [v]योयुवतीनां सर्वत्र मिश्रयन्तीनां नदीनां [v]नदं[2] शब्दयितारं [v]वः युष्मदर्थमाह्वयामि। [v]अघ्न्यानाम् अहन्तव्यानां गवां[3] [v]पतिम् आह्वये। अथ प्रत्यक्षकृता। हे यजमान त्वं [v]धेनूनां क्षीरादिना प्रीणयित्रीणां गवाम् [v]इषुध्यसि अन्नमिच्छसि ॥

अग्निहोत्रे पूर्वाहुतौ हुतायां ' ता अस्य ' इत्यनयोत्तरामाहुतिं काङ्क्षमाणस्तिष्ठेत्। तथा च सूत्रितं—' ता अस्य सूददोहस इति पूर्वामाहुतिमुपोत्थायोत्तरां काङ्क्षेत ' (आश्व. श्रौ. २. ३) इति। महाव्रते निष्केवल्येऽप्येषा। तथैव पञ्चमारण्यके सूत्रितं—' ता अस्य सूददोहस इत्येतदादिः सूददोहाः सूददोहाः ' (ऐ. आ. ५. १. ६) इति ॥

ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः।
जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥ ३ ॥

ताः। अस्य। सूदऽदोहसः। सोमम्। श्रीणन्ति। पृश्नयः।
जन्मन्। देवानाम्। विशः। त्रिषु। आ। रोचने। दिवः ॥ ३ ॥

[v]ताः प्रसिद्धाः [v]सूददोहसः। सूद इति कूपनाम। तत्सदृशदोहनाः [v]पृश्नयः पृश्निवर्णा गावः [v]अस्य इन्द्रस्य [v]सोमं [v]श्रीणन्ति मिश्रयन्त्याशिरेण। कदा। [v]त्रिषु त्रिष्वपि सवनेषु। गावो विशेष्यन्ते। [v]देवानां [v]जन्मन्[4] जन्मस्थाने। दिवीत्यर्थः। [v]दिवः आदित्यस्य [v]आ [v]रोचने आरोचमाने। अनेन द्यौर्विशेष्यते। तस्मिन् स्थाने [v]विशः निविशन्त्यः। यज्ञार्थोपयुक्तानां गवां द्युप्राप्तिः प्रसिद्धा ॥

द्वितीये पर्याये मैत्रावरुणशस्त्रे ' अभि प्र गोपतिम् ' इति तृचोऽनुरूपः। सूत्रितं च—' अभि त्वा वृषभा सुतेऽभि प्र गोपतिं गिरा ' (आश्व. श्रौ. ६. ४) इति ॥

अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे। सूनुं सत्यस्य सत्पतिम् ॥ ४ ॥

अभि। प्र। गोऽपतिम्। गिरा। इन्द्रम्। अर्च। यथा। विदे। सूनुम्। सत्यस्य। सत्ऽपतिम् ॥४॥

[v]गोपतिं[5] गवां स्वामिनम् [v]इन्द्रम् [v]अभि [v]प्र [v]अर्च। प्रकर्षेण पूजय स्तुत्या। [v]यथा [v]विदे स यथा स्वात्मानं स्तुतप्रकारं जानाति यथा वा यागं प्रति गन्तव्यमिति जानाति तथार्चेति।

---

१. ख-त-भ-श–भासां। २. ख-ग-त-न-भ-श–' नदं ' नास्ति। ३. ख-ग-घ-ज्ञ-त१-२–वः; त३-४-न-भ-श–वां। ४. ख-त-न-भ-श–जन्मनि। ५. ख-ग-त१-३-न-भ-श–अभि प्र गोपतिं।

कीदृशमिन्द्रम् । vसत्यस्य यज्ञस्य सत्यस्य[1] वा vसूनुं पुत्रम् । तत्रानुरक्तत्वात् सूनुरित्युपचर्यते । vसत्पतिं सतां यजमानानां पालकम् ॥

आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि । यत्राभि संनवामहे ॥ ५ ॥

आ । हरयः । ससृज्रिरे । अरुषीः । अधि । बर्हिषि । यत्र । अभि । सम्ऽनवामहे ॥ ५ ॥

vहरयः हरितवर्णा अश्वाः vअरुषीः आरोचमानाः vअधि vबर्हिषि । अधीति सप्तम्यर्थानुवादी । बर्हिष्यास्तृते vआ vससृज्रिरे आसृजन्तु । vयत्र यस्मिन् बर्हिषि स्थितमिन्द्रम् vअभि vसंनवामहे अभिसंस्तुमः ॥ ॥ ५ ॥

इन्द्राय गावो आशिरं दुदुह्रे वज्रिणे मधु । यत्सीमुपह्वरे विदत् ॥ ६ ॥

इन्द्राय । गावः । आऽशिरम् । दुदुह्रे । वज्रिणे । मधु । यत् । सीम् । उपऽह्वरे । विदत् ॥ ६ ॥

vइन्द्राय vगावः vआशिरम् आश्रयणसाधनं पयआदिकं vमधु मदकरं vदुदुह्रे दुहते । कीदृशाय । vवज्रिणे वज्रयुक्तायेन्द्राय । vयत् यदा vउपह्वरे समीपे वर्तमानं मधु सोमरसं vसीं सर्वतः vविदत् लभते तदा ॥

षोडशिशस्त्रस्य ' उद्यद्ब्रध्नस्य ' इत्येषान्त्या । सूत्रितं च—' उद्यद्ब्रध्नस्य विष्टपमित्येषा परिधानीया ' (आश्व. श्रौ. ६. २) इति ॥

उद्यद्ब्रध्नस्य विष्टपं गृहमिन्द्रश्च गन्वहि ।
मध्वः पीत्वा सचेवहि त्रिः सप्त सख्युः पदे ॥ ७ ॥

उत् । यत् । ब्रध्नस्य । विष्टपम् । गृहम् । इन्द्रः । च । गन्वहि ।
मध्वः । पीत्वा । सचेवहि । त्रिः । सप्त । सख्युः । पदे ॥ ७ ॥

vयत्[2] यदा vब्रध्नस्य vविष्टपं सूर्यस्य स्थानं[2] vगृहमिन्द्रश्च अहं चोभौ vउत् vगन्वहि उद्गच्छावः तदानीं vमध्वः मधुरं सोमरसं vपीत्वा vसचेवहि संसृष्टौ भवेव । कुत्र । vसख्युः[3] सर्वेषां सखिभूतस्यादित्यस्य । vत्रिः vसप्त इत्यनेन देवलोकानामुत्तममेकविंशं स्थानमुच्यते आदित्यस्यैकविंशत्वात् । तथा च ब्राह्मणं—' द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः ' (ऐ. ब्रा. १. ३०) इति । तादृश एकविंशस्थाने सचेवहीति ॥

पूर्वोक्त एव शस्त्रे ' अर्चत ' इति द्वितीय आनुष्टुभस्तृचः । सूत्रितं च—' प्र प्र वस्त्रिष्टुभमिषमर्चत प्रार्चत ' (आश्व. श्रौ. ६. २) इति ॥

अर्चत प्रार्चत प्रियमेधासो अर्चत । अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत ॥ ८ ॥

अर्चत । प्र । अर्चत । प्रियऽमेधासः । अर्चत ।
अर्चन्तु । पुत्रकाः । उत । पुरम् । न । धृष्णु । अर्चत ॥ ८ ॥

---

१. ग-न-भ-२–' सत्यस्य ' नास्ति । २. ख-ज्ञ-त१-२-न-भ–यद्यदा ब्रध्नस्य । महन्नाम ब्रध्न इति । महतः आदित्यस्य विष्टपं स्थानं; ग–ब्रध्नस्यादित्यस्य विष्टपं स्थानं; त३-श–ब्रध्नस्य विष्टपं स्थानं । ३. ख-घ-ज्ञ-त१-२–सख्युः पदे ।

हे अध्वर्वादयः यूयमिन्द्रम् ᵛअर्चत पूजयत स्तुत्या। ᵛप्रार्चत प्रकर्षेणार्चतेन्द्रमेव। हे ᵛप्रियमेधासः प्रियमेधसंबन्धिनस्तद्गोत्रा यूयम् ᵛअर्चत इन्द्रम्। ᵛपुत्रकाः पुत्रा अपि ᵛअर्चन्तु इन्द्रम्। ᵛउत अपि च ᵛपुरं ᵛन ᵛधृष्णु यथा पुरं धर्षणशीलमर्चन्ति तादृशमिन्द्रम् ᵛअर्चत॥

अवं स्वराति गर्गरो गोधा परिं सनिष्वणत्।
पिङ्गा परिं चनिष्कददिन्द्रायं ब्रह्मोद्यतम्॥ ९॥

अवं। स्वराति। गर्गरः। गोधा। परिं। सनिस्वनत्।
पिङ्गा। परिं। चनिस्कदत्। इन्द्रांय। ब्रह्मं। उत्ऽयतम्॥ ९॥

ᵛगर्गरः गर्गरध्वनियुक्तो वाद्यविशेषो युद्धे ᵛअव ᵛस्वराति भयं शब्दयति। ᵛगोधा हस्तघ्नः ᵛपरि परितः ᵛसनिष्वणत् स्वनति भृशम्। ᵛपिङ्गा पिङ्गवर्णा ज्यापि ᵛपरि ᵛचनिष्कदत् परिस्कन्दते। यस्मादेवं युद्धः संनद्धोऽत ᵛइन्द्राय ᵛब्रह्म परिवृढं कर्म स्तुतिलक्षणम् ᵛउद्यतं भवत्विति शेषः॥

आ यत्पतन्त्येन्यः सुदुघा अनपस्फुरः। अपस्फुरं गृभायत सोममिन्द्रांय पातवे॥१०॥

आ। यत्। पतन्ति। एन्यः। सुऽदुघाः। अनपऽस्फुरः।
अपऽस्फुरम्। गृभायत। सोमम्। इन्द्रांय। पातवे॥ १०॥

ᵛयत् यदा ᵛएन्यः एतवर्णाः शुभ्रवर्णा नद्यः ᵛआ[1] ᵛपतन्ति[1] आगच्छन्ति सर्वतः प्रवहन्ति। कीदृश्यः। ᵛसुदुघाः सुदोहाः ᵛअनपस्फुरः। अपस्फुरोऽपस्फुरा अप्रवृद्धाः। अतादृश्योऽनपस्फुरः। अत्यन्तं प्रवृद्धा इत्यर्थः। यद्वा। सुदुघाः प्रवृद्धा एतवर्णा गावो यदा पयआद्यर्थाय आ पतन्ति तदा ᵛअपस्फुरम्। अत्रापशब्दो धात्वर्थानुवादी। अत्यन्तप्रवृद्धं ᵛसोममिन्द्राय ᵛपातवे पातुं ᵛगृभायत ग्रहणं कुरुत। अथवानपस्फुर इत्यत्राप्यपशब्दोऽनुवादी धात्वर्थस्य। तथा सत्ययमर्थः। यदा एन्यो नद्योऽनपस्फुरोऽप्रवृद्धोदका आ पतन्ति वृष्टिरल्पा यदा भवति तदा सोममिन्द्रार्थं संपादयतेति॥॥६॥

अपांदिन्द्रो अपांदग्निर्विश्वे देवा अमत्सत।
वरुण इदिह क्षयत्तमापो अभ्यनूषत वत्सं संशिश्वरीरिव॥ ११॥

अपात्। इन्द्रः। अपात्। अग्निः। विश्वे। देवाः। अमत्सत।
वरुणः। इत्। इह। क्षयत्। तम्। आपः। अभि। अनूषत। वत्सम्। संशिश्वरीः ऽइव॥११॥

ᵛइन्द्रः ᵛअपात् अपिबत् सोमम्। ᵛअग्निः अप्यपिबत्। ᵛविश्वे ᵛदेवाः अपि ᵛअमत्सत तृप्ता अभवन् सोमपानेन। ᵛवरुण ᵛइत् वरुणोऽपि ᵛइह अस्मिन् यागगृहे ᵛक्षयत् निवसतु सोमपानार्थम्। निवसन्तं ᵛतम् ᵛआपः अपि ᵛअभ्यनूषत। उदकान्यापनशीला स्तुतयो वाभ्यष्टुवन्। किमिव। ᵛवत्सं[2] स्वीयं ᵛसंशिश्वरीः संशिश्वर्यः संगच्छमाना गावः ᵛइव। ता यथा धावन्त्यो हम्भारवं कुर्वन्ति तद्वत्॥

सुदेवो असि वरुण यस्यं ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव॥१२॥

सुऽदेवः। असि। वरुण। यस्यं। ते। सप्त। सिन्धवः।
अनुऽक्षरन्ति। काकुदम्। सूर्म्यम्। सुषिराम्ऽइव॥ १२॥

---

१. ग-त३-४-श–' आ पतन्ति ' नास्ति। २. ख-त–वत्सना; श–वत्सना।

हे [v]वरुण जलाभिमानिन् देव त्वं [v]सुदेवोऽसि [v]यस्य सुदेवस्य [v]ते तव [v]काकुदं तालुं समुद्राख्यं [v]सप्त [v]सिन्धवः गङ्गाद्याः सप्त नद्यः [v]अनुक्षरन्ति जिह्वायां सर्वदा स्रवन्ति[1] ॥

षोडशिशस्त्रे ' यो व्यतीन् ' इति तृतीय आनुष्टुभस्तृचः । सूत्रितं च—' यो व्यतीँरफाणयदिति तृचा आनुष्टुभाः ' (आश्व. श्रौ. ६. २) इति ॥

यो व्यतीँरफाणयत्सुयुक्ताँ उप दाशुषे । तक्को नेता तदिद्वपुरुपमा यो अमुच्यत ॥१३॥

यः । व्यतीन् । अफाणयत् । सुऽयुक्तान् । उप । दाशुषे ।
तक्कः । नेता । तत् । इत् । वपुः । उपऽमा । यः । अमुच्यत ॥ १३ ॥

[v]यः इन्द्रः [v]व्यतीन् विविधगमनान् [v]सुयुक्तान् सुष्ठु रथे संबद्धानश्वान् [v]दाशुषे हविर्दात्रे यजमानाय गन्तुं प्राप्तुम् [v]उप [v]अफाणयत् उपगमयति । फणतिर्गतिकर्मा । यदैवं करोति [v]तदित् तदानीमेव [v]तक्कः । तकतिर्गतिकर्मा । यज्ञगमनशीलः [v]नेता उदकस्य फलस्य वा नायक इन्द्रः [v]वपुः उदकमुत्पादयतीति शेषः । [v]यः इन्द्रः [v]उपमा उपमानभूतः [v]अमुच्यत अन्यैर्वृष्टिनिवारकैरसुरादिभिर्मुक्तो भवति ॥

अतीदु शक्र ओहत इन्द्रो विश्वा अति द्विषः ।
भिनत्कनीन ओदनं पच्यमानं परो गिरा ॥ १४ ॥

अति । इत् । ऊँ इति । शक्रः । ओहते । इन्द्रः । विश्वाः । अति । द्विषः ।
भिनत् । कनीनः । ओदनम् । पच्यमानम् । परः । गिरा ॥ १४ ॥

अयमिन्द्रः [v]शक्रः शक्तः सन् [v]अतीत् [v]ओहते । अतिक्रम्य गच्छत्येव संग्रामे निरोधकान् शत्रून् । तदेवाह । अयम् [v]इन्द्रः [v]विश्वाः [v]द्विषः द्वेष्टॄन् शत्रून् [v]अति अतिक्रम्य गच्छति । [v]कनीनः कमनीयः [v]परः मेघानां परस्ताद्वर्तमान इन्द्रः [v]ओदनम् । मेघनामैतत् । मेघं [v]भिनत् अभिनत् भिनत्ति वृष्ट्यर्थम् । कीदृशम् । [v]गिरा माध्यमिकया वाचा स्तनितलक्षणया [v]पच्यमानम् । वज्रनिर्घोषेण ताड्यमानमित्यर्थः ॥

अर्भको न कुमारकोऽधि तिष्ठन्नवं रथम् । स पक्षन्महिषं मृगं पित्रे मात्रे विभुक्रतुम् ॥१५॥

अर्भकः । न । कुमारकः । अधि । तिष्ठत् । नवम् । रथम् ।
सः । पक्षत् । महिषम् । मृगम् । पित्रे । मात्रे । विभुऽक्रतुम् ॥ १५ ॥

अयमिन्द्रः[2] [v]अर्भको [v]न अल्पशरीरः [v]कुमारकः[3] कुमारक इव [v]नवं स्तुत्यं [v]रथम् [v]अधि [v]तिष्ठत् अधितिष्ठति । [v]सः इन्द्रः [v]महिषं महान्तं [v]मृगं मृगवदितस्ततो धावन्तं सर्वैर्मृग्यं वा [v]विभुक्रतुं बहुकर्माणं मेघं [v]पक्षत् पचति । वृष्ट्यभिमुखं करोतीत्यर्थः ॥

आ तू सुशिप्र दंपते रथं तिष्ठा हिरण्ययम् ।
अधा द्युक्षं सचेवहि सहस्रपादमरुषं स्वस्तिगामनेहसम् ॥ १६ ॥

---

१. ग–स्रवन्ति तत्र दृष्टान्तः । सूर्म्य लोहप्रतिमां सुषिरामिव सा यथा जलपूर्णा स्रवति तद्वदित्यर्थः; घ-त-सु–दृष्टांतः सूर्म्यं सुषिरामिव यथा सूर्य प्रति रश्मिजालं तद्वत् । २. ख-घ-त१-२–अयमिंद्रः पित्ते मात्रे स यथाधितिष्ठति तद्वत् । ३. न-भ–कुमारको न ।

आ । तु । सुऽशिप्र । दम्ऽपते । रथम् । तिष्ठ । हिरण्ययम् ।
अध । घुक्षम् । सचेवहि । सहस्रऽपादम् । अरुषम् । स्वस्तिऽगाम् । अनेहसम् ॥ १६ ॥

हे [v]सुशिप्र सुहनो हे [v]दंपते गृहस्वामिन् । अत्र गृहो रथः । तस्य स्वामिन् । [v]तु[1] त्वं[1] तावत् [v]रथम् [v]आ [v]तिष्ठ । हविःस्वीकरणान्तरं पश्चादहमारोहामीति भावः । कीदृशम् । [v]हिरण्ययं हिरण्मयम् । [v]अध तवारोहणानन्तरमहमप्यारुह्योभौ [v]सचेवहि संगच्छेवहि । संगतौ भवेव । पुनः[2] कीदृशम्[2] । [v]घुक्षं दीप्तं रथं[3] [v]सहस्रपादं बहुपादम् [v]अरुषम् आरोचमानं[4] [v]स्वस्तिगां कुशलगमनम् [v]अनेहसम् अपापम् ॥

पूर्वाह्णे प्रवर्ग्ये ' तं घेमित्था ' इत्येषा । सूत्रितं च—' तं घेमित्था नमस्विन इति प्रागार्थीं पूर्वाह्णे ' (आश्व. श्रौ. ४. ७) इति ॥

तं घेमित्था नमस्विन उप स्वराजमासते ।
अर्थं चिदस्य सुधितं यदेतव आवर्तयन्ति दावने ॥ १७ ॥

तम् । घ । ईम् । इत्था । नमस्विनः । उप । स्वऽराजम् । आसते ।
अर्थम् । चित् । अस्य । सुऽधितम् । यत् । एतवे । आऽवर्तयन्ति । दावने ॥ १७ ॥

[v]तं [v]घ तं खलु [v]ईम् एनमिन्द्रम् [v]इत्था इत्थमनेन प्रकारेण [v]नमस्विनः अन्नवन्तः स्तुतिवन्तो वाध्वर्यवादयः [v]स्वराजं स्वयं राजमानं वा [v]उप [v]आसते सेवन्ते । तथा कृत्वा [v]अर्थं [v]चित् अरणीयं धनं [v]सुधितं सुष्ठु स्थापितम् [v]अस्य इन्द्रस्य संबन्धिनं प्राप्नुवन्तीति शेषः । कदेति आह । [v]यत् यदा [v]एतवे अस्येन्द्रस्य गमनाय स्वयं प्राप्तुं वा [v]दावने हविर्दानाय [v]आवर्तयन्ति स्तुतयः तदेत्यर्थः । अथवाश्वा वावर्तयन्ति तदेत्यर्थः ॥

अनु प्रत्नस्यौकसः प्रियमेधास एषाम् ।
पूर्वामनु प्रयतिं वृक्तबर्हिषो हितप्रयस आशत ॥ १८ ॥

अनु । प्रत्नस्य । ओकसः । प्रियऽमेधासः । एषाम् ।
पूर्वीम् । अनु । प्रऽयतिम् । वृक्तऽबर्हिषः । हितऽप्रयसः । आशत ॥ १८ ॥

अनया स्तुतिमुपसंहरति । [v]एषां देवानामिन्द्रादीनां [v]प्रत्नस्य पुराणस्य [v]ओकसः स्थानस्य पुराणं स्थानं [v]प्रियमेधासः प्रियमेधाः [v]अनु [v]आशत अनुप्राप्ताः । कीदृशाः प्रियमेधाः । [v]पूर्वां मुख्यां[5] [v]प्रयतिं प्रदानम् [v]अनु लक्षीकृत्य [v]वृक्तबर्हिषः स्तीर्णदर्भाः [v]हितप्रयसः आसादितसोमादिहविष्काः ॥ ॥ ७ ॥ ॥ ७ ॥

अष्टमेऽनुवाक एकादश सूक्तानि । तत्र ' यो राजा ' इति पञ्चदशर्चं प्रथमं सूक्तम् । अत्रानुक्रमणिका—' यो राजा पञ्चोना पुरुहन्मा बार्हतं त्रिप्रगाथाद्युष्णिगनुष्टुप्पुरउष्णिगन्तम् ' इति । पुरुहन्मा ऋषिः । स च ' क्वचित् कथंचिदविशेषितम् ' (अनु. २. ३) इति परिभाषयाङ्गिरसः । आद्यातृतीयापञ्चम्यो बृहत्यः । द्वितीयाचतुर्थीषष्ठ्यः सतोबृहत्यः । सप्तम्याद्याः षट् बृहत्यः । त्रयोदश्युष्णिक् चतुर्दश्यनुष्टुप् पञ्चदशी पुरउष्णिगाद्यद्वादशका द्व्यष्टका । ' आद्यश्चेत्पुरउष्णिक् ' (अनु. ५.

१. ख-त-भ-उ त्वं; ग-त्वं । २. ख-त-भ-श-त किं; ग-किं तत् । ३. ग-त-भ-श-रथं कीदृशं । ४. ख-ग-त-श-आरोचनं । ५. ख-ग-घ-त-श-मुख्यां ।

२) इति हि तल्लक्षणम्। इन्द्रो देवता। महाव्रते निष्केवल्ये बार्हततृचाशीतावादित एकादशर्चः। तथा च पञ्चमारण्यके सूत्रितं—' यो राजा चर्षणीनामित्येकादश ' (ऐ. आ. ५. २. ४) इति ॥

यो राजा चर्षणीनां याता रथेभिरध्रिगुः।
विश्वासां तरुता पृतनानां ज्येष्ठो यो वृत्रहा गृणे ॥ १ ॥

यः। राजा। चर्षणीनाम्। याता। रथेभिः। अध्रिऽगुः।
विश्वासाम्। तरुता। पृतनानाम्। ज्येष्ठः। यः। वृत्रऽहा। गृणे ॥ १ ॥

vयः इन्द्रः vचर्षणीनां मनुष्याणां vराजा स्वामी रथैः[1] vयाता गन्ता च vअध्रिगुः अधृतगमनोऽन्यैः vविश्वासां vपृतनानां सेनानां[2] vतरुता तारकः। vयः च vज्येष्ठः गुणैर्ज्यायान्। यश्च vवृत्रहा वृत्रं हतवान्। तं महाभागमिन्द्रं vगृणे स्तौमि ॥

इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि।
हस्ताय वज्रः प्रति धायि दर्शतो महो दिवे न सूर्यः ॥ २ ॥

इन्द्रम्। तम्। शुम्भ। पुरुऽहन्मन्। अवसे। यस्य। द्विता। विऽधर्तरि।
हस्ताय। वज्रः। प्रति। धायि। दर्शतः। महः। दिवे। न। सूर्यः ॥ २ ॥

हे vपुरुहन्मन् ऋषे त्वं vतम् vइन्द्रं vशुम्भ हविष्प्रदानादिनालंकुरु। किमर्थम्। vअवसे रक्षणाय। एवमात्मानं संबोध्य ब्रवीति। vयस्य तव vविधर्तरि विधारक इन्द्रे vद्विता द्वित्वमस्यौद्ग्यमनौद्ग्यम्। तव शत्रून् हन्तुमुग्रत्वं त्वदनुग्रहायानौद्ग्यं चेति द्वैतमस्ति। तत्रौद्ग्यचिह्नं[3] दर्शयति। vहस्ताय कराय हननाय शत्रूणां vदर्शतः दर्शनीयः vमहः महान् vवज्रः vप्रति vधायि प्रतिनिहितो भवति vदिवे प्रकाशाय दिवसाय वा अथवा[4] दिवि दृश्यमानः vसूर्यः इव ॥

तस्मिन्नेव शस्त्रे ' नकिष्टम् ' इति प्रगाथो वैकल्पिकः स्तोत्रियः। सूत्रितं च—' नकिष्टं कर्मणा नशन्न त्वा बृहन्तो अद्रयः ' (आश्व. श्रौ. ७. ४) इति ॥

नकिष्टं कर्मणा नशद्यश्चकार सदावृधम्।
इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णवोजसम् ॥ ३ ॥

नकिः। तम्। कर्मणा। नशत्। यः। चकार। सदाऽवृधम्।
इन्द्रम्। न। यज्ञैः। विश्वऽगूर्तम्। ऋभ्वसम्। अधृष्टम्। धृष्णुऽओजसम् ॥ ३ ॥

vतं जनमन्यो मर्षको[5] जनः vकर्मणा हननादिव्यापारेण vनकिः vनशत् नैव व्याप्नोति। vयः vइन्द्रं vचकार इन्द्रमेवानुकूलं vयज्ञैः साधनैः। कीदृशमिन्द्रम्। vसदावृधं सदा[6] वर्धकं vविश्वगूर्तं सर्वैः स्तुत्यम् vऋभ्वसं महान्तम् vअधृष्टम् अन्यैः vधृष्ण्वोजसं धर्षकबलम् ॥

अषाळ्हमुग्रं पृतनासु सासहिं यस्मिन्महीरुरुज्रयः।
सं धेनवो जायमाने अनोनवुर्द्यावः क्षामो अनोनवुः ॥ ४ ॥

---

१. घ-भ-मु-रथेभी रथैः। २. ख-घ-ङ-त१-२-सर्वेषां संग्रामाणां; ग-त३-४-श-' सेनानां ' नास्ति। ३. ख-त-श-तत्रौम्यं चिह्नं। ४. ख-त१-' अथवा ' नास्ति। ५. ग-धर्षको। ६. घ-भ-सर्वदा।

अषाळ्हम्। उग्रम्। पृतनासु। सासहिम्। यस्मिन्। महीः। उरुऽज्रयः।
सम्। धेनवः। जायमाने। अनोनवुः। द्यावः। क्षामः। अनोनवुः॥ ४॥

vअषाळ्हम् असोढम् vउग्रम् उद्गूर्णबलं vपृतनासु शत्रुसेनासु vसासहिम् अभिभवितारं स्तौमीत्यर्थः। vयस्मिन् इन्द्रे vजायमाने vमहीः महत्यः vउरुज्रयः बहुवेगाः vधेनवः हविरादिना प्रीणयित्र्यः प्रजा गाव एव वा vसम् vअनोनवुः समस्तुवन्[1]। न केवलं धेनव एव अपि तु vद्यावः द्युलोकाः vक्षामः पृथिव्यश्च सम् vअनोनवुः। तत्रत्याः सर्वे प्राणिनो नमन्त इत्यर्थः। 'त्रिवृतो लोकाः' (ऐ. ब्रा. २. १७) इति श्रुतेर्बहुवचनम्॥

तृतीयेऽहनि निष्केवल्ये वैरूपसामपक्षे 'यद्द्यावः' इति प्रगाथः स्तोत्रियः। सूत्रितं च— 'यद्द्याव इन्द्र ते शतं यदिन्द्र यावतस्त्वमिति प्रगाथौ स्तोत्रियानुरूपौ' (आश्व. श्रौ. ७. १०) इति॥

यद्द्यावं इन्द्र ते शतं शतं भूमीरुत स्युः।
न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी॥ ५॥

यत्। द्यावः। इन्द्र। ते। शतम्। शतम्। भूमीः। उत। स्युरिति स्युः।
न। त्वा। वज्रिन्। सहस्रम्। सूर्याः। अनु। न। जातम्। अष्ट। रोदसी इति॥ ५॥

हे vइन्द्र vते तव प्रतिमानार्थं vयत् यदि vद्यावः[2] द्युलोकाः vस्युः तथापि नाश्नुवन्ति। vउत अपि च vभूमीः भूम्यस्ते तव मूर्तिप्रतिबिम्बाय vशतं स्युः तथापि नाश्नुवन्ति। हे vवज्रिन् vत्वा त्वां vसहस्रं vसूर्याः अगणिता अपि सूर्याः[3] vन vअनु भवन्ति। न प्रकाशयन्तीत्यर्थः। 'न तत्र सूर्यो भाति' (क. उ. ५. १५) इति श्रुतेः। किं बहुना। vजातं पूर्वमुत्पन्नं किंचन vन vअष्ट नाश्नुते। तथा vरोदसी द्यावापृथिव्यौ नाश्नुवाते। सर्वेभ्योऽतिरिच्यस इत्यर्थः। 'ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः' (छा. उ. ३. १४. ३) इति श्रुतेः॥ ॥ ८॥

आ पप्राथ महिना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा।
अस्माँ अव मघवन्गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः॥ ६॥

आ। पप्राथ। महिना। वृष्ण्या। वृषन्। विश्वा। शविष्ठ। शवसा।
अस्मान्। अव। मघऽवन्। गोऽमति। व्रजे। वज्रिन्। चित्राभिः। ऊतिऽभिः॥ ६॥

हे vवृषन्[4] अभिमतवर्षकेन्द्र त्वम्[5] vआ vपप्राथ आपूरयसि व्याप्नोषि। कानि। vविश्वा[6] सर्वाणि vवृष्ण्या वर्षकाणि बलानि शत्रुसंबन्धीनि। केन साधनेन। vमहिना महता vशवसा बलेन स्वीयेन। अथवा वृष्ण्येत्येतच्छवोविशेषणम्। तथा सति अभिमतवर्षकेण महता बलेनास्मदीयानि बलानि पूरयसीत्यर्थः। अथ तथा कृत्वा vअस्मान् vगोमति बहुभिर्गोभिर्युक्ते vव्रजे[7] शत्रुसंबन्धिनि निमित्ते सत्यस्मान् vअव हे vवज्रिन् वज्रयुक्तेन्द्र। कैः साधनैः। vचित्राभिः नानाविधैः vऊतिभिः रक्षणैरिति॥

न सीमदेव आप दिषं दीर्घायो मर्त्यः।
एतग्वा चिद्य एतशा युयोजते हरी इन्द्रो युयोजते॥ ७॥

---

१. ग–सम्यगस्तुवन्। २. ख-त२–वा द्यावो; त१–या द्यावो। ३. घ–सूर्याः अनु न जातं। ४. ख-घ-ज्ञ-त१-२–शविष्ठ बलवन् मघवन् धनवन् हे वृषन्। ५. ख-ग-त-न-भ-श–त्वं वृषा। ६. ख-त–विश्वानि। ७. ख-घ-त-भ१-२-श–वज्रे।

न । सीम् । अदेवः । आपत् । इषम् । दीर्घायो इति दीर्घऽआयो । मर्त्यः ।
एतऽग्वा । चित् । यः । एतशा । युयोजते । हरी इति । इन्द्रः । युयोजते ॥ ७ ॥

हे [v]दीर्घायो नित्येन्द्र सः[1] [v]अदेवः इन्द्राख्यदेवरहितः [v]मर्त्यः मरणधर्मा मनुष्यः [v]सीं सर्वम् [v]इषम् अन्नं [v]न [v]आपत् न प्राप्नोति । [v]यः मर्त्योऽस्येन्द्रस्य [v]एतग्वा [v]चित् । एतवर्णावेवाश्वौ भवतोऽभिमतदेशगमनाय । [v]एतशा[2] एतशावश्वौ [v]युयोजते योजयति[3] रथे यज्ञं गन्तुम् । यश्च [v]इन्द्रः [v]हरी [v]युयोजते तं न यः स्तौति । स न प्राप्नोतीति समन्वयः ॥

तं वो महो महाय्यमिन्द्रं दानाय सक्षणिम् ।
यो गाधेषु य आरणेषु हव्यो वाजेष्वस्ति हव्यः ॥ ८ ॥

तम् । वः । महः । महाय्यम् । इन्द्रम् । दानाय । सक्षणिम् ।
यः । गाधेषु । यः । आऽअरणेषु । हव्यः । वाजेषु । अस्ति । हव्यः ॥ ८ ॥

हे ऋत्विजः [v]महः महान्तः [v]वः यूयं [v]तं [v]महाय्यं पूज्यम् [v]इन्द्रं [v]दानाय [v]सक्षणिं सचमानं परिचरतेति शेषः । [v]यः इन्द्रः [v]गाधेषु उदकेषु [v]हव्यः [v]अस्ति आह्वातव्यो भवति । [v]यः च [v]आरणेषु गन्तव्येषु निम्नेषूदकेषु स्थलेषु वा हव्योऽस्ति । तथा [v]वाजेषु संग्रामेषु जयाय [v]हव्यः ह्वातव्योऽस्ति भवति ॥

उदु षु णो वसो महे मृशस्व शूर राधसे ।
उदु षु मह्यै मघवन्मघत्तय उदिन्द्र श्रवसे महे ॥ ९ ॥

उत् । ऊँ इति । सु । नः । वसो इति । महे । मृशस्व । शूर । राधसे ।
उत् । ऊँ इति । सु । मह्यै । मघऽवन् । मघत्तये । उत् । इन्द्र । श्रवसे । महे ॥ ९ ॥

हे [v]वसो वासयितः [v]शूर इन्द्र त्वं [v]नः अस्मान् [v]सु सुष्ठु [v]उदु [v]मृशस्व उन्मृशस्वैव । उत्थापय । किमर्थम् । [v]महे महते [v]राधसे अन्नाय । तथा हे शूर [v]मघवन् इन्द्र [v]उत् मृशस्व [v]मह्यै महते [v]मघत्तये धनदानाय । तथा [v]उत् मृशस्व [v]इन्द्र [v]महे महत्यै [v]श्रवसे कीर्त्यै ॥

त्वं न इन्द्र ऋतयुस्त्वानिदो नि तृम्पसि ।
मध्ये वसिष्व तुविनृम्णोर्वोर्नि दासं शिश्नथो हथैः ॥ १० ॥

त्वम् । नः । इन्द्र । ऋतऽयुः । त्वाऽनिदः । नि । तृम्पसि ।
मध्ये । वसिष्व । तुविऽनृम्ण । ऊर्वोः । नि । दासम् । शिश्नथः । हथैः ॥ १० ॥

हे [v]इन्द्र [v]ऋतयुः यज्ञकामः [v]त्वं [v]नः अस्मान् [v]त्वानिदः । त्वां यो निन्दति सः । अयजनमेव निन्दा तव । तस्मादयष्टुः सकाशात् [v]नि नितरां [v]तृम्पसि प्रीणयसि । तस्य धनमपहरत्येति भावः । एवं संतर्प्य हे [v]तुविनृम्ण प्रभूतधन स त्वं तव [v]ऊर्वोः [v]मध्ये अस्मान् [v]वसिष्व । ऊरुभ्यामाच्छादय रक्षार्थम् । [v]दासम् उपक्षपयितारमस्मद्द्वेषिणं पापं वा [v]हथैः हननैः [v]नि [v]शिश्नथः मारयसि । अथवा त्वद्विरोधिनं दासमसुरं नि शिश्नथो हननैः ॥ ॥ ९ ॥

---

१. घ–यः । २. ख-त-श–वैतशा; न-भ–चैतशा । ३. ख-त३-श–योजयंति ।

अन्यव्रतममानुषमयज्वानमदेवयुम् ।
अव स्वः सखा दुधुवीत पर्वतः सुघ्नाय दस्युं पर्वतः ॥ ११ ॥

अन्यऽव्रतम् । अमानुषम् । अयज्वानम् । अदेवऽयुम् ।
अव । स्वः । सखा । दुधुवीत । पर्वतः । सुऽघ्नाय । दस्युम् । पर्वतः ॥ ११ ॥

हे इन्द्र [v]अन्यव्रतं[१] व्यतिरिक्तकर्माणम्[२] अत एव [v]अमानुषं मानुषाणामिन्द्रयाजिनामप्रियम् [v]अयज्वानम् अयष्टारम् [v]अदेवयुम् अदेवकर्मिणं पापिनं [v]स्वः स्वर्गात् [v]अव [v]दुधुवीत । अवचालयेदित्यर्थः । कः । [v]सखा[३] [v]पर्वतः तव सखिभूतः पर्वत ऋषिः । यद्यप्यन्यं देवमिष्ट्वा स्वर्गं प्राप्नोति सः तथापि[४] पातयति[४] ऋषिः । न केवलं धूननमात्रमपि तु [v]सुघ्नाय सुष्ठु हन्त्रे मृत्यवे [v]दस्युम् उक्तलक्षणं [v]पर्वतः प्रेरयतीति शेषः । अत इन्द्रमेवावइयं यजध्वमिति शेषः ॥

त्वं न इन्द्रासां हस्ते शविष्ठ दावने ।
धानानां न सं गृभायास्मयुर्द्विः सं गृभायास्मयुः ॥ १२ ॥

त्वम् । नः । इन्द्र । आसाम् । हस्ते । शविष्ठ । दावने ।
धानानाम् । न । सम् । गृभाय । अस्मऽयुः । द्विः । सम् । गृभाय । अस्मऽयुः ॥ १२ ॥

हे [v]शविष्ठ बलवन् [v]इन्द्र [v]त्वं [v]नः अस्मभ्यं [v]दावने प्रदानाय [v]आसां गवाम् । कर्मणि षष्ठी । एता गाः [v]हस्ते [v]गृभाय गृहाण । ग्रहणे दृष्टान्तः । [v]धानानां [v]न । धाना भृष्टयवाः । अत्रापि कर्मणि षष्ठी । धाना यथा संगृह्णाति तद्वद्गृहाण । कीदृशस्त्वम् । [v]अस्मयुः अस्मान् कामयमानः । गृहीत्वा च [v]अस्मयुः सन् [v]द्विः [v]सं [v]गृभाय । पुनर्द्विवारं संगृहाण ॥

सखायः क्रतुमिच्छत कथा राधाम शरस्य । उपस्तुतिं भोजः सूरियो अह्रयः ॥१३॥

सखायः । क्रतुम् । इच्छत । कथा । राधाम । शरस्य ।
उपऽस्तुतिम् । भोजः । सूरिः । यः । अह्रयः ॥ १३ ॥

हे [v]सखायः ऋत्विजोऽध्वर्यवादयः [v]क्रतुं कर्म इन्द्रसंबन्धिनम् [v]इच्छत कर्तुम् । हे सखायः [v]शरस्य । 'शृ हिंसायाम्' । हिंसकस्येन्द्रस्य [v]कथा कथं [v]राधाम साधयाम । किम् । [v]उपस्तुतिं स्तोत्रम् । [v]यः इन्द्रः [v]भोजः शत्रूणां भोजयिता [v]सूरिः प्रेरकः [v]अह्रयः अनवनतः शत्रूणामिति ॥

भूरिभिः समह ऋषिभिर्बर्हिष्मद्भिः स्तविष्यसे ।
यदित्थमेकमेकमिच्छरं वत्सान्पराददः ॥ १४ ॥

भूरिऽभिः । समह । ऋषिऽभिः । बर्हिष्मत्ऽभिः । स्तविष्यसे ।
यत् । इत्थम् । एकम्ऽएकम् । इत् । शरं । वत्सान् । पराऽददः ॥ १४ ॥

---

१. ख-ग-त-श–'अन्यव्रतं' नास्ति । २. न-भ–इंद्रव्यतिरिक्तकर्माणं । ३. ख-ग-त-भ-श–सखा यः । ४. ख-त१-२-३-४–तथा तथापि तयतिः; ग–तथा तथापि त इति; ज्ञ–तथा तथापि पातयति; न–तथापि तथा तपति; भ–तथापि त पातयति; श–तथा तथापि तपति ।

हे इन्द्र ᵛसमह समानपूज। सर्वैः पूज्येत्यर्थः। ᵛभूरिभिः बहुभिः ᵛऋषिभिः अतीन्द्रियज्ञैर्ऋत्विग्भिः ᵛबर्हिष्मद्भिः यागवद्भिः ᵛस्तविष्यसे स्तूयसे। ᵛयत् य इन्द्रः ᵛहत्थमेकमेकमित् एकमेकमेव वत्समित्येवं बहून् ᵛवत्सान् स्तोतृभ्यः ᵛपराददः प्रयच्छसि[1]। हे ᵛशर हिंसक शत्रोः। अत्र वत्सशब्दो वत्समातॄणां गवामुपलक्षकः। गाः प्रयच्छसीति ॥

कर्णगृह्या मघवा शौरदेव्यो वत्सं नस्त्रिभ्य आनयत्। अजां सूरिर्न धातवे ॥ १५ ॥

कर्णऽगृह्या। मघऽवा। शौरऽदेव्यः। वत्सम्। नः। त्रिऽभ्यः। आ। अनयत्। अजाम्। सूरिः। न। धातवे ॥ १५ ॥

अयं ᵛमघवा इन्द्रः ᵛत्रिभ्यः हिंसकेभ्यः सकाशात् ᵛशौरदेव्यः। दीव्यन्ति क्रीडन्त इति देवा योद्धारः। शूराश्च ते देवाश्च शूरदेवाः। तेषां हितं शौरदेवं युद्धम्। तत्संबन्धिन्यो गाः। युद्धे शत्रून् हत्वा तत्संबन्धिन्य इत्यर्थः। ताः ᵛवत्सं ᵛन। नेति चार्थे। वत्ससहिता अस्मभ्यं ᵛकर्णगृह्य कर्णे गृहीत्वा ᵛआनयत् आनयतु। ᵛसूरिर्न प्रेरकः स्वामीव ᵛधातवे पानाय ᵛअजां यथा स आनयति कर्णे गृहीत्वा तद्वदिति ॥ ॥ १० ॥

'त्वं नो अग्ने' इति पञ्चदशर्चं द्वितीयं सूक्तम्। सुदीतिपुरुमीळहावृषी तयोरन्यतरो वा। आदौ नव गायत्र्यो दशमीद्वादशीचतुर्दश्यो बृहत्य एकादशीत्रयोदशीपञ्चदश्यः सतोबृहत्यः। अग्निर्देवता। तथा चानुक्रान्तं—'त्वं नः सुदीतिपुरुमीळहौ तयोर्वान्यतर आग्नेयं तु त्रिप्रगाथान्तम्' इति। प्रातरनुवाक आग्नेये क्रतौ गायत्रे छन्दस्याश्विनशस्त्रे चादितो नवर्चः। तथा च सूत्रितं—'त्वं नो अग्ने महोभिरिति नव' (आश्व. श्रौ. ४. १३) इति ॥

त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः। उत द्विषो मर्त्यस्य ॥ १ ॥

त्वम्। नः। अग्ने। महःऽभिः। पाहि। विश्वस्याः। अरातेः। उत। द्विषः। मर्त्यस्य ॥ १ ॥

हे ᵛअग्ने ᵛत्वं ᵛनः अस्मान् ᵛमहोभिः पूजाभिर्महद्भिर्धनैर्वा ᵛपाहि रक्ष। ᵛविश्वस्याः बहुविधात् ᵛअरातेः अदातुः सकाशात् अदानाद्वा पाहि। त्वमेव महद्धनं दत्त्वादातुरदानाद्वा सकाशाद्रक्षेत्यर्थः। यद्वा। महोभिर्युक्तस्त्वमिति योज्यम्। ᵛउत अपि च ᵛद्विषः द्वेष्टुः ᵛमर्त्यस्य मर्त्यात् सकाशात् पाहि। अस्मभ्यं बलं दत्त्वेति भावः। अथवा मर्त्यस्य द्विषो द्वेषाद्रक्षेति संबन्धः। अरातेरित्यस्यादानादिति पक्षे तत्रापि मर्त्यस्यादानादिति संबन्धनीयम् ॥

नहि मन्युः पौरुषेय ईशे हि वः प्रियजात। त्वमिदसि क्षपावान् ॥ २ ॥

नहि। मन्युः। पौरुषेयः। ईशे। हि। वः। प्रियऽजात। त्वम्। इत्। असि। क्षपाऽवान् ॥ २ ॥

हे ᵛप्रियजात[2] अग्ने ᵛवः तव ᵛपौरुषेयः पुरुषसंबन्धी ᵛमन्युः क्रोधः ᵛन ᵛईशे नेष्टे बाधितुम्[3]। अस्मदादिभी रक्षितत्वादिति भावः। दिवाचराः खलु पुरुषाः अतो दिवा तव हानिर्नास्तीति भावः। अथ रात्रिंचरा रक्षःप्रभृतयः। तेभ्योऽपि पीडा नास्तीत्युच्यते। ᵛत्वमित्[4] त्वमेव खलु ᵛक्षपावान् रात्रिमान् ᵛअसि। रात्रौ ह्यग्निर्विशेषेण तेजस्वी भवति ॥

स नो विश्वेभिर्देवेभिरूर्जो नपाद्भद्रशोचे। रयिं देहि विश्ववारम् ॥ ३ ॥

---

१. ख-ग-त-म-श-प्रायच्छसि। २. ख-ग-त-न-म-श-'प्रियजात' नास्ति। ३. ग-अस्मान् बाधितुं। ४. घ-त्वमिद्धि।

सः । नः । विश्वेभिः । देवेभिः । ऊर्जः । नपात् । भद्रऽशोचे । रयिम् । देहि । विश्वऽवारम् ॥३॥

हे अग्ने vसः स्तुत्यस्त्वं vनः अस्मभ्यं[1] वस्वो वसु धनमुप मासि प्रयच्छसि । हे vऊर्जो vनपात् बलस्य नप्तर्न पातयितर्वा हे vभद्रशोचे स्तुत्यप्रकाश । तदेवादरार्थं पुनराह । vरयिं धनं vविश्ववारं सर्वैर्वरणीयं धनं vदेहि । अथवा यद्वसूप मासि अस्मभ्यं दातुं तद्धनं गृहादिलक्षणं तच्च रयिं दानार्हं गोहिरण्यादिकं च देहीत्यपुनरुक्तिः ॥

न तमग्ने अरातयो मर्तं युवन्त रायः । यं त्रायसे दाश्वांसम् ॥ ४ ॥

न । तम् । अग्ने । अरातयः । मर्तम् । युवन्त । रायः । यम् । त्रायसे । दाश्वांसम् ॥ ४ ॥

हे vअग्ने vतं स्तोतारम् vअरातयः अदानशीला द्वेषिणः vरायः रयिमन्तः[2] vन vयुवन्त न पृथक्कुर्वन्ति । रायो धनाद्वा न युवन्त । vयं vदाश्वांसं हविर्दातारं[3] vत्रायसे पालयसे ॥

यं त्वं विप्र मेधसातावग्ने हिनोषि धनाय । स तवोती गोषु गन्ता ॥ ५ ॥

यम् । त्वम् । विप्र । मेधऽसातौ । अग्ने । हिनोषि । धनाय । सः । तव । ऊती । गोषु । गन्ता ॥५॥

हे vअग्ने vविप्र[4] vत्वं vयं मर्त्यं vमेधसातौ यज्ञस्य संभजने vहिनोषि प्रेरयसि vधनाय गवादिधनलाभाय vसः यजमानः vतव vऊती ऊत्या रक्षणेन vगोषु vगन्ता भवति । गोमान् भवतीत्यर्थः ॥ ॥ ११ ॥

त्वं रयिं पुरुवीरमग्ने दाशुषे मर्तीय । प्र णो नय वस्यो अच्छ ॥ ६ ॥

त्वम् । रयिम् । पुरुऽवीरम् । अग्ने । दाशुषे । मर्तीय । प्र । नः । नय । वस्यः । अच्छ ॥ ६ ॥

हे vअग्ने vत्वं vदाशुषे हविर्दत्तवते मर्त्याय यजमानाय vरयिं धनं vपुरुवीरं बहुभिर्वीरैर्युक्तं प्रयच्छसि । अतः vनः अस्मानपि vवस्यः वसीयो धनम् vअच्छ अभिप्राप्तुं vप्र vणय प्रापय ॥

उरुष्या णो मा परा दा अघायते जातवेदः । दुराध्ये मर्तीय ॥ ७ ॥

उरुष्य । नः । मा । परा । दाः । अघऽयते । जातऽवेदः । दुःऽआध्ये । मर्तीय ॥ ७ ॥

हे vजातवेदः जातविद्य जातधन वाग्ने vनः अस्मान् vउरुष्य रक्ष । 'उरुष्यती रक्षाकर्मा' (निरु. ५. २३) इति यास्कः । vमा vपरा vदाः मा परादेह्यस्मान् । कस्मा इति स उच्यते । vअघायते अघं पापमिच्छते vदुराध्ये दुराध्यानाय दुर्विचिन्तकाय हिंसाबुद्धये vमर्तीय मनुष्याय ॥

अग्ने माकिष्टे देवस्य रातिमदेवो युयोत । त्वमीशिषे वसूनाम् ॥८॥

अग्ने । माकिः । ते । देवस्य । रातिम् । अदेवः । युयोत । त्वम् । ईशिषे । वसूनाम् ॥ ८ ॥

हे vअग्ने vदेवस्य द्योतमानस्य vते[5] तव vरातिं[5] दानं दत्तं धनं वा कश्चित् vअदेवः मर्त्यादिः vमाकिः vयुयोत मैव पृथक्करोतु । vत्वम् एव vईशिषे । कस्य । vवसूनां धनानामीश्वरो भवसि दातुम् । अनेनामिश्रणीयाया रातेः सद्भाव उक्तो भवति ॥

स नो वस्व उप मास्यूर्जो नपान्माहिनस्य । सख्ये वसो जरितृभ्यः ॥ ९ ॥

---

१. घ-ज्ञ-अस्मभ्यं विश्वेभिर्देवेभिः । २. ख-ग-घ-त-न-भ-श-रयिवंतः । ३. घ-°र्दातारं मर्तं यजमानं । ४. घ-विप्र प्राज्ञ । ५. ख-त-न-भ-श-देवरातिं; घ-तव रातिं ।

सः । नः । वस्वः । उप । मासि । ऊर्जः । नपात् । माहिनस्य । सखे । वसो इति । जरितृऽभ्यः ॥९॥

हे vऊर्जो vनपात् बलस्यान्नस्य पुत्र । बलेन मथ्यमानत्वादाज्यलक्षणेनान्नेन प्रवर्धनादूर्जो-पात्रम् । हे vसखे सखिवद्धितकारिन्[1] vवसो वासकाम्ने vसः स्तुत्यत्वेनैव प्रसिद्धस्त्वं vजरितृभ्यः गरितृभ्यः स्तोतृभ्यः vनः अस्मभ्यं vमाहिनस्य vवस्वः । माहिन इति महन्नाम । महद्धनम् vउप vमासि समीपे मासि निर्मासि । प्रयच्छसीत्यर्थः ॥

प्रातरनुवाके बार्हते छन्दसि ' अच्छा नः ' इत्याद्याः षड्ऋचः । तथा च सूत्रितम्—' अच्छा नः शीरशोचिषमिति षट् ' (आश्व. श्रौ. ४.१३) इति । दशमेऽहनि प्रातःसवने ' अच्छा वो अग्निम् ' इति तृचस्य स्थाने ' अच्छा नः ' इति तृचोऽच्छावाकवादः । सूत्रितं च—' अच्छा नः शीरशोचिषं प्रति श्रुताय वो धृषदिति तृचौ ' (आश्व. श्रौ. ८.१२) इति ॥

अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतम् ।
अच्छा यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतये ॥ १० ॥

अच्छ । नः । शीरऽशोचिषम् । गिरः । यन्तु । दर्शतम् ।
अच्छ । यज्ञासः । नमसा । पुरुऽवसुम् । पुरुऽप्रशस्तम् । ऊतये ॥ १० ॥

vअच्छ अभिमुखं vयन्तु गच्छन्तु vनः अस्माकं vगिरः स्तुतयः । कम् । vशीरशोचिषम् अशनशीलज्वालं[2] vदर्शतं सर्वैर्दर्शनीयमग्निम् । तथा vयज्ञासः यज्ञाश्चास्मदीयाः vनमसा हविषा-ज्यादिलक्षणेन vअच्छ अभिमुखं यन्तु गच्छन्तु । कीदृशम् । vपुरुवसुं प्रभूतधनं vपुरुप्रशस्तं बहु-स्तुतम्[3] । किमर्थम् । vऊतये अस्माकं रक्षणाय ॥ ॥ १२ ॥

अग्निं सूनुं सहसो जातवेदसं दानाय वार्याणाम् ।
द्विता यो भूदमृतो मर्त्येष्वा होता मन्द्रतमो विशि ॥ ११ ॥

अग्निम् । सूनुम् । सहसः । जातऽवेदसम् । दानाय । वार्याणाम् ।
द्विता । यः । भूत् । अमृतः । मर्त्येषु । आ । होता । मन्द्रऽतमः । विशि ॥ ११ ॥

vअग्निं vसहसः vसूनुं बलस्य पुत्रं vजातवेदसं जातधनं vवार्याणां वरणीयानां गवादिधनानां vदानाय गिरः अच्छ यन्त्वित्यनुवर्तते । vयः अग्निः vअमृतः अमरणधर्मा देवेषु भवति सः vमर्त्येष्वा । आकारश्चार्थे । मनुष्येषु चाभूत् अभवदित्येवं vद्विता द्वैधं भवति । देवेष्वमृतत्वमस्य प्रसिद्धं मनुष्येषु कीदृशोऽभूदिति उच्यते । vविशि विक्षु यजमानरूपासु प्रजासु vहोता होमनिष्पादकः vमन्द्रतमः मादयितृतमश्च भवति । अच्छ यन्त्विति समन्वयः । अथवा योऽमृतो द्विता द्वित्वं द्वैधं द्विप्रकारोऽभूत् । कथम् । मर्त्येषु सामान्येन दाहपाकादिसाधनोऽभवदित्येतत् प्रसिद्धं विशि यजमानरूपायां तु होता मन्द्रतमः[4] अभवदित्येवं द्वित्वम् ॥

अग्निं वो देवयज्ययाग्निं प्रयत्यध्वरे ।
अग्निं धीषु प्रथममग्निमर्वत्यग्निं क्षैत्राय साधसे ॥ १२ ॥

---

१. ख-त-भ-श-°द्धितकारी । २. ख-त-भ-श-°शीलज्वालं वाग्निं । ३. न-भ-बहुभिः स्तुतं । ४. ख-ग-त-न-श-मंद्रतमो वा ।

अग्निम्। वः। देवऽयज्यया। अग्निम्। प्रऽयति। अध्वरे।
अग्निम्। धीषु। प्रथमम्। अग्निम्। अर्वति। अग्निम्। क्षैत्राय। साधसे॥ १२॥

हे यजमानाः युष्माकं[1] vदेवयज्यया देवयागेन निमित्तेन देवयागार्थम् vअग्निं स्तौमीति शेषः। तथा vअग्निम् vअध्वरे यागे vप्रयति प्रकर्षेण गच्छति प्रवृत्ते सति स्तौमि[2] vप्रथमम् इतरदेवेभ्यः। तथा vअग्निम् vअर्वति आगते भ्रातृव्ये स्तौमि यज्ञविघ्नपरिहारार्थम्[3]। तथा[4] vक्षैत्राय[5] क्षैत्राय[6] क्षेत्रसंबन्धिने vसाधसे साधनाय क्षेत्रलाभाय स्तौमि। यज्ञान्ते क्षेत्रलाभरूपाय फलाय च स्तौमि। एवमादौ मध्येऽन्ते च सर्वदा स्तौमीत्यर्थः॥

अग्निरिषां सख्ये ददातु न ईशे यो वार्याणाम्।
अग्निं तोके तनये शश्वदीमहे वसुं सन्तं तनूपाम्॥ १३॥

अग्निः। इषाम्। सख्ये। ददातु। नः। ईशे। यः। वार्याणाम्।
अग्निम्। तोके। तनये। शश्वत्। ईमहे। वसुम्। सन्तम्। तनूऽपाम्॥ १३॥

vअग्निः देवः vसख्ये समानख्यानाय vनः मह्यम्। सख्युः कर्म सख्यम्। तस्मिन् वा। नोऽस्मभ्यम् vइषाम् इषोऽन्नानि vददातु। vयः अग्निः vवार्याणां धनानाम् vईशे ईष्टे स ददात्विति। तमेव vअग्निं vतोके पुत्रार्थं vतनये तत्पुत्रार्थं च vशश्वत् बहु धनमन्नं वा vईमहे याचामहे। वार्याणामीश इत्युक्तत्वादेवं लभ्यते। कीदृशमग्निम्। vवसुं वासकं vसन्तं सर्वदा वर्तमानं vतनूपाम् अङ्गानां पालयितारम्॥

अग्निमींळिष्वावसे गाथाभिः शीरशोचिषम्।
अग्निं राये पुरुमीळ्ह श्रुतं नरोऽग्निं सुदीतये छर्दिः॥ १४॥

अग्निम्। ईळिष्व। अवसे। गाथाभिः। शीरऽशोचिषम्।
अग्निम्। राये। पुरुऽमीळ्ह। श्रुतम्। नरः। अग्निम्। सुऽदीतये। छर्दिः॥ १४॥

हे vपुरुमीळ्ह[7] त्वम् vअग्निम् vअवसे आवयो रक्षणाय vईळिष्व स्तुहि vगाथाभिः। गाथेति वाङ्नाम। मन्त्ररूपाभिर्वाग्भिः। कीदृशम्। vशीरशोचिषं शयनस्वभावरोचिष्कम्। तथा[8] vराये धनाय ईळिष्व। vश्रुतम् एनं vनरः अन्येऽपि यजमानाः स्तुवन्ति स्वार्थम्। तस्मात् vसुदीतये मह्यम् vअग्निं[9] vछर्दिः गृहं याचस्वेत्येवं सुदीतिः पुरुमीळ्हं[10] ब्रूते॥

अग्निं द्वेषो योतवै नो गृणीमस्यग्निं शं योश्च दातवे।
विश्वासु विक्ष्वविते हव्यो भुवद्वस्तुर्ऋषूणाम्॥ १५॥

अग्निम्। द्वेषः। योतवै। नः। गृणीमसि। अग्निम्। शम्। योः। च। दातवे।
विश्वासु। विक्षु। अविताऽइव। हव्यः। भुवत्। वस्तुः। ऋषूणाम्॥ १५॥

---

१. ग–वो युष्माकं। २. घ–स्तौमि तथाग्निं धीषु सुबुद्धिषु प्रथममितरदेवेभ्यः मुख्यं स्तौमि। ३. ग-घ-त-न-भ–यज्ञे विघ्न°; ख–यज्ञैर्विप्र°। ४. घ–तथाग्निं। ५. ख-ग-घ-त-न-श–'क्षैत्राय' नास्ति। ६. भ–'क्षेत्राय' नास्ति। ७. घ–पुरुमीळ्ह बहुसेक्तः। ८. घ–तथाग्निं। ९. ख-घ-त-न-भ–अग्निः। १०. त-श–पुरुमीळ्हे।

vअग्निं vनः अस्माकं vद्वेषः द्वेष्टॄन् vयोतवै पृथक्कर्तुं vगृणीमसि गृणीमः स्तुमः । तथा vअग्निं vशं सुखं vयोश्च भयानामभिश्रवणं च vदातवे दातुम् । अथवा शं सुखस्य योर्मिश्रणाय च गृणीमसि । अस्मिन् पक्षे द्वेषो योतवा इत्यनेन सह समुच्चयार्थश्चशब्दः । सोऽग्निः vविश्वासु सर्वासु vविक्षु[1] प्रजासु vअवितेव रक्षिता राजेव vऋषूणाम् ऋषीणामस्माकं vवस्तुः वासको देवः vहव्यो[2] vभुवत् भवतु । अथवा सर्वासु विक्षु यजमानरूपासु प्रजासु मध्य ऋषूणामृषीणां सूक्तद्रष्टॄणामस्माकमेव हव्यो भवतु वस्तुः सर्वस्य वासको देवः ॥ ॥ १३ ॥

' हविष्कृणुध्वम् ' इत्यष्टादशर्चं तृतीयं सूक्तम् । अत्रानुक्रमणिका—' हविर्द्रव्येण हर्यतः प्रागाथो हविषां स्तुतिर्वा ' इति । प्रगाथपुत्रो हर्यत ऋषिः । ' परं गायत्रं प्राग्वत्सप्रेः ' इति परिभाषया गायत्री छन्दः । ' आग्नेयं तु ' इत्युक्तत्वादग्निर्देवता यद्वा हविषां स्तूयमानत्वात्तद्देवताकं वा । सूक्तविनियोगो लैङ्किकः ॥

हविष्कृणुध्वमा गमदध्वर्युर्वनते पुनः । विद्वाँ अस्य प्रशासनम् ॥ १ ॥

हविः । कृणुध्वम् । आ । गमत् । अध्वर्युः । वनते । पुनरिति । विद्वान् । अस्य । प्रऽशासनम् ॥१॥

हे अध्वर्युसंबन्धिनो हविष्कर्तारः यूयं vहविः vकृणुध्वं कुरुध्वं शीघ्रम् । यतः vआ vगमत् आजगामायमग्निः अतः कृणुध्वम् । vअध्वर्युः vपुनः vवनते संभजते । किम् । सामर्थ्यादध्वरमिति गम्यते । कीदृशोऽध्वर्युः । vअस्य हविषः vप्रशासनं प्रदानं vविद्वान् ॥

नि तिग्ममभ्यं१शुं सीदद्धोता मनावधि । जुषाणो अस्य सख्यम् ॥ २ ॥

नि । तिग्मम् । अभि । अंशुम् । सीदत् । होता । मनौ । अधि । जुषाणः । अस्य । सख्यम् ॥२॥

vहोता ऋत्विक्[3] vतिग्मं तीक्ष्णम् vअंशुं तमग्निं vनि vषीदत् निषीदति । कीदृशो होता । vअस्य अग्नेः vसख्यं vमनावधि यजमाने vजुषाणः[4] । अधीति सप्तम्यर्थानुवादी ॥

अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया । गृभ्णन्ति जिह्वया ससम् ॥ ३ ॥

अन्तः । इच्छन्ति । तम् । जने । रुद्रम् । परः । मनीषया । गृभ्णन्ति । जिह्वया । ससम् ॥३॥

vतं vरुद्रम् । रुत् दुःखम् । तस्य द्रावयितारम् । अथवा रुत् स्तुतिः । तया गन्तव्यम् । स्तुत्यमित्यर्थः । तादृशमग्निं vजने यजमानार्थं vमनीषया स्वप्रज्ञानेन vपरः परस्तात् पुरोदेशे[5] vइच्छन्ति स्थापयितुम् । त एव पश्चात् vससं स्वपन्तमग्निं vजिह्वया । जन्ये जनकशब्दः । जिह्वाप्रभवया स्तुत्या vगृभ्णन्ति गृह्णन्त्यङ्गुलिभिः । अत्र यास्कः—' स्वप्नमेतन्मध्यमं[6] ज्योतिरनित्यदर्शनम् ' (निरु. ५. ३) इति ॥

जाम्यतीतपे धनुर्वयोधा अरुहद्वनम् । दृषदं जिह्वयावधीत् ॥ ४ ॥

जामि । अतीतपे । धनुः । वयःऽधाः । अरुहत् । वनम् । दृषदम् । जिह्वया । आ । अवधीत् ॥४॥

vवयोधाः अन्नस्य दाताग्निर्मध्यमस्थानः vजामि प्रवृद्धं सर्वमतिरिच्य वर्तमानम् । ' जाम्यतिरेकनाम ' (निरु. ४. २०) इति यास्कः । vधनुः धन्वान्तरिक्षम् vअतीतपे अतितपति । अथवा-

---

१. ख-ग-त-श–' विक्षु ' नास्ति । २. घ–हव्यः आह्वातव्यः ३. घ–ऋत्विक् अभि सर्वतः । ४. न-जुषाणः प्रीयमाणः; भ१–जुषाणः यमाणः । ५. घ–पुरोदेशे अंतः आयतनमध्ये । ६. ख-त२-निरु.–स्वपनमेतन्माध्यमिकं; ज्ञ-त१-स्वपमेतन्माध्यमिकं; न-भ–स्वपनमेतन्मध्यमं ।

प्रेर्जाभि गमनशीलं धनुरतितपते स्वविरोधिनम्। स च वयोधा अन्नस्य दाताग्निः Vघनम् उदकम् Vअरुहत् आरोहति विमोकाय। तदर्थं Vजिह्वया ज्वालया Vदृषदं मेघम् Vअवधीत् हन्ति। दावाग्निपक्षे वनं तरुसमूहं हन्ति। जिह्वया दृषदं कठिनमपि पाषाणं भिनत्तीति ॥

चरन्वत्सो रुशन्निह निदातारं न विन्दते। वेति स्तोतव अम्ब्यम् ॥ ५ ॥

चरन्। वत्सः। रुशन्। इह। निऽदातारम्। न। विन्दते। वेति। स्तोतवे। अम्ब्यम् ॥५॥

Vवत्सः। वत्सवच्चापलेन धावनाद्वत्स इत्युपचर्यते। अथवा वत्स इव संचरन्। इवशब्दो लुप्यते। Vरुशन् श्वेतो भवन् Vइह अस्मिँल्लोके Vनिदातारं निरोधकं Vन Vविन्दते न लभते। किंतु Vस्तोतवे स्तोतुम् Vअम्ब्यं स्तोतारं स्वयं Vवेति कामयते। अथवात्र वैद्युतोऽग्निरुच्यते। वैद्युतोऽयं रुशंश्वरंश्चेहान्तरिक्षे वत्सः सर्वदा वसन् वत्सस्थानीयो वा सन्निदातारं निरोधकं न विन्दते। किंतु स्तोतुमम्ब्यं माध्यमिकां वाचं वेति[1] ॥ ॥ १४ ॥

उतो न्वस्य यन्महदश्वावद्योजनं बृहत्। दामा रथस्य दर्दृशे ॥ ६ ॥

उतो इति। नु। अस्य। यत्। महत्। अश्वऽवत्। योजनम्। बृहत्। दामा। रथस्य। दर्दृशे ॥६॥

Vउतो अपि च Vनु क्षिप्रमद्य Vअस्य आदित्यस्य Vयन्महत् माहात्म्ययुक्तम् Vअश्वावत् संवृद्धाश्ववत् Vबृहत्[2] महत् स्थूलं Vयोजनं दृश्यते। तदेवाह। Vरथस्य Vदामा Vदर्दृशे दृश्यते[3]। अन्तरिक्षे रथेऽश्वान्नियोजयतीत्यर्थः। तदा दुहन्तीत्युत्तरत्र संबन्धः ॥

अभिष्टवे घर्मदाहे 'दुहन्ति सप्त' इत्येषा। सूत्रितं च—'दुहन्ति सप्तैकां समिद्धो अग्निरश्विना' (आश्व. श्रौ. ४. ७) इति। ग्रावस्तोत्रेऽप्येषा। सूत्रितं च—'दुहन्ति सप्तैकामधुक्षत्पिप्युषीमिषम्' (आश्व. श्रौ. ५. १२) इति ॥

दुहन्ति सप्तैकामुप द्वा पञ्च सृजतः। तीर्थे सिन्धोरधि स्वरे ॥ ७ ॥

दुहन्ति। सप्त। एकाम्। उप। द्वा। पञ्च। सृजतः। तीर्थे। सिन्धोः। अधि। स्वरे ॥ ७ ॥

Vसप्त ऋत्विजः Vएकां धर्मं[4] Vदुहन्ति। तेषां[5] मध्ये Vद्वा द्वौ प्रतिप्रस्थातारावध्वर्यू[6] Vपञ्च[7] अन्यान्[7] Vउप Vसृजतः प्रयोजयतः। के ते पञ्च त उच्यन्ते। यजमानं ब्रह्माणं होतारमाग्नीध्रं प्रस्तोतारमिति। कुत्रेति उच्यते। Vसिन्धोः कस्याश्चित् सरस्वत्यादिप्रस्थाताया नद्याः Vतीर्थे। यत्रायमृषिर्यजति तत्र। Vस्वरे Vअधि। स्वरतिः शब्दकर्मा। अधीति सप्तम्यर्थानुवादी। स्वरोपेते शब्दवति। यत्तीर्थमृत्विजाम् ओ श्रावय इत्यादिशब्दैः शब्दवद्भवति तस्मिन्नित्यर्थः ॥

प्रवर्ग्येऽभिष्टवे ग्राव्णोऽभिष्टवे च 'आ दशभिः' इत्येषा। सूत्रितं च—'आ दशभिर्विवस्वतो दुहन्ति सप्तैकाम्' (आश्व. श्रौ. ४. ७; ५. १२) इति ॥

आ दशभिर्विवस्वत इन्द्रः कोशमचुच्यवीत्। खेदया त्रिवृता दिवः ॥ ८ ॥

आ। दशऽभिः। विवस्वतः। इन्द्रः। कोशम्। अचुच्यवीत्। खेदया। त्रिऽवृता। दिवः ॥८॥

---

१. ख-ज्ञ-त१-२-न-भ१-चेति। २. ख-त-श-'बृहत्' नास्ति। ३. ख-त-न-भ-श- स दृश्यते। ४. ख-ग-घ-त-भ-श-घर्म। ५. ख-ग-त-न-भ-श-तयोः। ६. ख-त-श-प्रस्थातारा°; ग-अध्वर्युप्रस्थातारौ। ७. ख-त-भ-पंचोनान्यान्; श-पंचमोन्यान्।

[v]विवस्वतः परिचरतो यजमानस्य [v]दशभिः अङ्गुलीभिर्याचितः सन् [v]इन्द्रः [v]कोशम्। मेघनामैतत्। उदकसेचकं मेघं [v]दिवः अन्तरिक्षसंबन्धिनं तत्सकाशाद्वा [v]आ [v]अचुच्यवीत्। च्यदारयदित्यर्थः। केन साधनेनेति तदुच्यते। [v]त्रिवृता त्रिप्रकारवर्तनवता [v]खेदया रश्मिना। यद्वा। अत्रेन्द्रशब्देनाग्निरादित्यो वा गृह्यते। खेदया त्रिवृतेति लिङ्गात्॥

परिं त्रिधातुरध्वरं जूर्णिरेति नवीयसी। मध्वा होतारो अञ्जते॥ ९॥

परि। त्रिऽधातुः। अध्वरम्। जूर्णिः। एति। नवीयसी। मध्वा। होतारः। अञ्जते॥९॥

अयमग्निः [v]त्रिधातुः लोहितशुक्लकृष्णभेदेन त्रिवर्णः [v]जूर्णिः जवो वेगवान् [v]नवीयसी नवीयस्या ज्वालया [v]अध्वरं प्रवर्ग्यम् [v]एति गच्छति। [v]होतारः होमनिष्पादका अध्वर्व्वादयः [v]मध्वा आज्यादिना [v]परि [v]अञ्जते। अथवाग्नेस्त्रिस्त्रिप्रकारा क्षिप्रा जवतरा[1] ज्वाला पर्येति महावीरम्। तं मध्वाञ्जत इति॥

सिञ्चन्ति नमसावतमुच्चाचक्रं परिज्मानम् नीचीनबारमक्षितम्॥ १०॥

सिञ्चन्ति। नमसा। अवतम्। उच्चाऽचक्रम्। परिऽज्मानम्। नीचीनऽबारम्। अक्षितम्॥१०॥

[v]नमसा नमनेन [v]अवतं महावीरम् [v]उच्चाचक्रम् उपरिस्थितचक्रं [v]परिज्मानं परितो व्याप्तं [v]नीचीनबारं नीचीनद्वारम् [v]अक्षितम् अक्षीणमीदृशं क्षीराद्यवशेषयुक्तमाहवनीयस्योपरि नमनेन [v]सिञ्चन्ति जुह्वति। महावीरेण ह्याहवनीये हूयते॥ ॥ १५ ॥

अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु। अवतस्य विसर्जने॥ ११॥

अभिऽआरम्। इत्। अद्रयः। निऽसिक्तम्। पुष्करे। मधु। अवतस्य। विऽसर्जने॥ ११॥

[v]अद्रयः आद्रियमाणा अध्वर्व्वादयः [v]अभ्यारमित् अभिगम्यैव [v]निषिक्तम् अतिरिक्तं [v]मधु [v]पुष्करे वपुष्करे प्रवृद्ध उपयमनीपात्रे सिञ्चन्ति अग्निहोत्रार्थम् [v]अवतस्य महावीरस्य [v]विसर्जने विसर्जनसमये। होमानन्तरं खलु महावीरमासन्न्यामासादयन्ति॥

गाव उपावतावतं मही यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया॥ १२॥

गावः। उप। अवत। अवतम्। मही इति। यज्ञस्य। रप्सुदा। उभा। कर्णा। हिरण्यया॥१२॥

हे [v]गावः धर्मदुघा यूयम् [v]अवतं महावीरं प्रति [v]उपावत उपागच्छत। यस्मात् [v]यज्ञस्य धर्मयागस्य साधनभूते [v]रप्सुदा। रप्सुदारप्सुदे[2] आरिप्सोः फलप्रदे। लिप्सोरश्विनोर्दातव्ये वा। यद्वा रपणं शब्दनम्। रप् मन्त्रः। तेन सुष्ठु दातव्ये। अथवा 'पूद क्षरणे'। रपा मन्त्रेण क्षारणीये[3] दोहनीये। ईदृशे गवाजयोः पयसी [v]मही महती बहुले अपेक्षिते अत उपावतम्। गौरजाया अप्युपलक्षकः अजापयसोऽपि महावीरे सेचनीयत्वात्। अपि चास्य महावीरस्य [v]उभा उभौ [v]कर्णा कर्णस्थानीयौ द्वौ रुक्मौ [v]हिरण्यया हिरण्मयौ सुवर्णरजतमयावित्यर्थः॥

प्रवर्ग्येऽजापयसि महावीर आनीयमाने 'आ सुते' इत्येषा। सूत्रितं च—'आ सुते सिञ्चत श्रियमित्याजे' (आश्व. श्रौ. ४. ७) इति॥

आ सुते सिञ्चत श्रियं रोदस्योरभिश्रियम्। रसा दधीत वृषभम्॥ १३॥

---

१. ग–नवतरा; त-न-श–भवतरा। २. ख-ग-ज्ञ-त१-२-न-भ-श-मु–रप्सुदे। ३. ग-श–क्षरणीये।

आ । सुते । सिञ्चत । श्रियम् । रोदस्योः । अभिऽश्रियम् । रसा । दधीत । वृषभम् ॥१३॥

vसुते दुग्धे गोपयसि vश्रियं श्रयणमाजं पयः vआ vसिञ्चत । सिञ्चत हे अध्वर्यवः । कीदृशमाजम् । vरोदस्योः । कर्मणि षष्ठ्येषा । द्यावापृथिव्यौ vअभिश्रियम् अभिश्रयन्तम् । अग्निसंयोगात्तावत्पर्यन्तं प्रवृद्धमित्यर्थः । अथवा 'तत्कावश्विनौ द्यावापृथिव्यावित्येके' (निरु. १२. १) इति निरुक्तत्वादश्विनोरभिश्रियमित्यर्थः । सेचनानन्तरं vरसा रस आजे पयसि vवृषभं वर्षकमग्निं vदधीत स्थापयत । अजाया आग्नेयीत्वात् क्षीरस्याप्यग्निसंयोजनमुचितम् । 'आग्नेयी वा एषा यदजा' (तै. ब्रा. ३. ७. ३. १) इति[1] ब्राह्मणम् ॥

ते जानत स्वमोक्यं१ सं वत्सासो न मातृभिः । मिथो नसन्त जामिभिः ॥१४॥

ते । जानत । स्वम् । ओक्यम् । सम् । वत्सासः । न । मातृऽभिः ।
मिथः । नसन्त । जामिऽभिः ॥ १४ ॥

vते ता गावः vजानत ज्ञातवत्यः । अथवा सामान्याकारेण त इति पुंनिर्देशः । किम् । vस्वं स्वकीयम् vओक्यं निवासं महावीरम् । तत्र दोग्धुमगमन्नित्यर्थः । तदेवाह । vवत्सासः वत्साः vमातृभिः vन जननीभिः सह यथा संगच्छन्ति तद्वत् vजामिभिः बन्धुभिः सहिता गावः vमिथः प्रत्येकं vसं vनसन्त संगच्छन्ते[2] महावीरम् ॥

उप स्रक्वेषु बप्सतः कृण्वते धरुणं दिवि । इन्द्रे अग्ना नमः स्वः ॥ १५ ॥

उप । स्रक्वेषु । बप्सतः । कृण्वते । धरुणम् । दिवि । इन्द्रे । अग्ना । नमः । स्व१रिति स्वः ॥१५॥

महावीरस्य vस्रक्वेषु vबप्सतः ज्वालया भक्षयतोऽग्नेरग्नं[3] vधरुणम् इन्द्रे अग्ना इति वक्ष्यमाणस्वादिन्द्राग्न्योर्धारकं vदिवि अन्तरिक्षे vउप vकृण्वते उपकुर्वते । यदाग्निर्महावीरं दहति तदा तस्योपर्युभयविधं क्षीरमासेचयन्तीत्यर्थः । एवं[4] महावीर आसिच्य vइन्द्रे vअग्ना अग्नौ च vस्वः सर्वं गव्यमाजं[5] च vनमः अन्नम् । अथवा स्वरन्तरिक्षे । योजयन्तीति शेषः ॥ ॥ १६ ॥

प्रवर्ग्ये घर्मदुहि दुग्धायाम् 'अधुक्षत्' इत्येषा । सूत्रितं च—'दुग्धायामधुक्षत्पिप्युषीम्' (आश्व. श्रौ. ४. ७) इति । ग्रावस्तोत्रेऽप्येषा 'अधुक्षत्पिप्युषीमिषमा कलशेषु धावति' (आश्व. श्रौ. ५. १२) इति सूत्रितत्वात् ॥

अधुक्षत्पिप्युषीमिषमूर्जं सप्तपदीमरिः । सूर्यस्य सप्त रश्मिभिः ॥ १६ ॥

अधुक्षत् । पिप्युषीम् । इषम् । ऊर्जम् । सप्तऽपदीम् । अरिः । सूर्यस्य । सप्त । रश्मिऽभिः ॥१६॥

vअरिः अरणशीलो वायुः vसूर्यस्य vसप्त vरश्मिभिः साधनैः vपिप्युषीम् आप्यायायत् vइषम् अन्नम् vऊर्जं रसं च vसप्तपदीं सर्पणस्वभावपादां माध्यमिकां वाचं घर्मधुग्रूपेणावस्थिताम् vअधुक्षत् दुग्धवान् । यद्यप्यध्वर्युः पात्रेण गां दुग्धे तथाप्येवंभावनया साङ्गं भवति । माध्यमिकाया वाचो मधुधुक्त्वं 'हिङ्कृण्वती, गौरमीमेत्' (ऋ. सं. १. १६४. २७, २८) इत्यादिषु प्रसिद्धम् ॥

सोमस्य मित्रावरुणोदिता सूर आ ददे । तदातुरस्य भेषजम् ॥ १७ ॥

सोमस्य । मित्रावरुणा । उत्ऽइता । सूरे । आ । ददे । तत् । आतुरस्य । भेषजम् ॥ १७ ॥

---

१. न-भ-इति हि । २. ख-ग-त-न-भ-संगच्छंते ते । ३. ख-°ग्नेरग्नं; घ-°ग्नेः; ज्ञ-त१-२-३-श-°ग्नेरग्ने । ४. ख-त-श-अत एवं; ग-अत एनं । ५. ख-घ-ज्ञ-त१-२-३-°माज्यं ।

हे[1] मित्रावरुणौ [v]सूरे सूर्ये [v]उदिता उदिते [v]सोमस्य सोमम् [v]आ [v]ददे स्वीकरोति। तत्र हेतुमाह। [v]तत् स्वीकाररूपं कर्म [v]आतुरस्य अस्मदादेः [v]भेषजम् औषधम्। हितकरमित्यर्थः॥

उतो न्वस्य यत्पदं हर्यतस्य निधान्यम्। परि द्यां जिह्वयातनत् ॥१८॥

उतो इति। नु। अस्य। यत्। पदम्। हर्यतस्य। निऽधान्यम्।
परि। द्याम्। जिह्वया। अतनत्॥ १८॥

पवमाने सोमे [v]उतो अपि च [v]अस्य सोमदातुः [v]हर्यतस्य प्रदानं कामयमानस्य मम [v]यत्पदं [v]निधान्यं हविषां निधानार्हमुत्तरवेदिलक्षणं तत्र स्थित्वाग्निः [v]द्यां [v]परि परितः [v]जिह्वया ज्वालया [v]अतनत् व्याप्नोत्[2]॥ ॥ १७॥

'उदीराथाम्' इत्यष्टादशर्चं चतुर्थं सूक्तमात्रेयस्य गोपवनस्य सप्तवध्रेर्वार्षं गायत्रमाश्विनम्। तथा चानुक्रमणिका—'उदीराथां गोपवन आत्रेयः सप्तवध्रिर्वाश्विनम्' इति। प्रातरनुवाक आश्विने क्रतौ गायत्रे छन्दस्याश्विनशस्त्रे चेदं सूक्तम्। 'उदीराथामा मे हवमिति गायत्रम्' (आश्व. श्रौ. ४. १५.) इति सूत्रितत्वात्॥

उदीराथामृतायते युञ्जाथामश्विना रथम्। अन्ति षद्भूतु वामवः॥ १॥

उत्। ईराथाम्। ऋतऽयते। युञ्जाथाम्। अश्विना। रथम्।
अन्ति। सत्। भूतु। वाम्। अवः॥ १॥

हे [v]अश्विना अश्विनौ [v]ऋतायते यज्ञमिच्छते मह्यं मदर्थम् [v]उदीराथाम् उच्चैस्तम्। तदर्थं हवमाह्वानं यज्ञं वा[3] प्राप्तुं [v]युञ्जाथां योजयतमश्वैः [v]रथम्। [v]वां युवयोः [v]अवः रक्षणम् [v]अन्ति अस्मदन्तिके [v]सत् वर्तमानं [v]भूतु भवतु॥

निमिषश्चिज्जवीयसा रथेना यातमश्विना। अन्ति षद्भूतु वामवः॥ २॥

निऽमिषः। चित्। जवीयसा। रथेन। आ। यातम्। अश्विना।
अन्ति। सत्। भूतु। वाम्। अवः॥ २॥

[v]निमिषश्चित् निमेषादपि [v]जवीयसा अतिशयवेगेन [v]रथेन [v]आ [v]यातम् आगच्छतमस्मद्यज्ञं हे [v]अश्विना। शिष्टमुक्तम्॥

उप स्तृणीतमत्रये हिमेन घर्ममश्विना। अन्ति षद्भूतु वामवः॥ ३॥

उप। स्तृणीतम्। अत्रये। हिमेन। घर्मम्। अश्विना। अन्ति। सत्। भूतु। वाम्। अवः॥३॥

[v]अत्रये महर्षयेऽसुरैरग्नौ प्रक्षिप्ताय तस्य हितार्थं [v]घर्मम् अग्निदाहकं [v]हिमेन उदकेन[4] [v]उप [v]स्तृणीतम् उपस्तीर्णवन्तौ। 'हिमेनाग्निं घ्रंसमवारयेथाम्' (ऋ. सं. १. ११६. ८) इति निगमः॥

कुह स्थः कुह जग्मथुः कुह श्येनेव पेतथुः। अन्ति षद्भूतु वामवः॥ ४॥

---

१. घ-न-भ–हे मित्रावरुणा। २. घ१–व्याप्नोतु नु शीघ्रं; य–व्याप्नोति। ३. ज्ञ-त१-२-भ–'वा' नास्ति। ४. त-भ१-२-श–उदक; भ३–उदके।

कुहं । स्थः । कुहं । जग्मथुः । कुहं । श्येनाऽइव । पेतथुः ।
अन्ति । सत् । भुतु । वाम् । अवः ॥ ४ ॥

हे अश्विनौ युवां vकुह क्व vस्थः भवथः । इदानीं vकुह क्व कुत्र vजग्मथुः गच्छथः स्वेच्छया । vकुह क्व वा vश्येनेव श्येनाविव शीघ्रपतनौ सन्तौ vपेतथुः पतथः । एवमचिन्त्यस्वभावौ कृपया संनिहितौ भवतमिति शेषः । तादृशयोः vअवः अन्तिके भवतु ॥

यदद्य कर्हि कर्हि चिच्छुश्रूयातमिमं हवम् । अन्ति षद्भूतु वामवः ॥ ५ ॥

यत् । अद्य । कर्हि । कर्हि । चित् । शुश्रूयातम् । इमम् । हवम् ।
अन्ति । सत् । भुतु । वाम् । अवः ॥ ५ ॥

vयत् यस्मात्र निर्धार्यतेऽतः vअद्य अस्मिन् काले vकर्हि कस्मिन्नपि देशे vकर्हि कस्मिन्नपि काले vइमं vहवम् अस्मदीयमाह्वानं vशुश्रूयातं शृणुयातम् ॥ ॥ १८ ॥

अश्विना यामहूतमा नेदिष्ठं याम्याप्यम् । अन्ति षद्भूतु वामवः ॥ ६ ॥

अश्विना । यामऽहूतमा । नेदिष्ठम् । यामि । आप्यम् । अन्ति । सत् । भुतु । वाम् । अवः ॥ ६ ॥

vयामहूतमा अतिशयेन काले ह्वातव्यौ vअश्विना अश्विनौ vयामि । vनेदिष्ठम् अन्तिकतमम् vआप्यं[1] बान्धवं च यामि तयोः ॥

अवन्तमत्रये गृहं कृणुतं युवमश्विना । अन्ति षद्भूतु वामवः ॥ ७ ॥

अवन्तम् । अत्रये । गृहम् । कृणुतम् । युवम् । अश्विना । अन्ति । सत् । भुतु । वाम् । अवः ॥ ७ ॥

हे vअश्विना[2] vयुवं युवाम् vअत्रये अग्न्यागारे दह्यमानाय vअवन्तं रक्षन्तं[3] vगृहं vकृणुतं कृतवन्तौ । तादृशयोः vवामवः भवतु । अवन्तमिति व्यत्ययेन पुँल्लिङ्गता ॥

वरेथे अग्निमातपो वदते वल्गवत्रये । अन्ति षद्भूतु वामवः ॥ ८ ॥

वरेथे इति । अग्निम् । आऽतपः । वदते । वल्गु । अत्रये । अन्ति । सत् । भुतु । वाम् । अवः ॥ ८ ॥

हे अश्विनौ vवल्गु मनोहरं vवदते स्तुवते vअत्रये vआतपः आतपादीष्ण्यात् vअग्निं vवरेथे आवारयतम् ॥

प्र सप्तवध्रिराशसा धारामग्नेरशायत । अन्ति षद्भूतु वामवः ॥ ९ ॥

प्र । सप्तऽवध्रिः । आऽशसा । धाराम् । अग्नेः । अशायत । अन्ति । सत् । भुतु । वाम् । अवः ॥ ९ ॥

vसप्तवध्रिः महर्षिर्हे अश्विनौ युवयोः vआशसा आशंसनेन स्तुत्या मञ्जूषाया निर्गत्य vअग्नेः vधारां तस्यां मञ्जूषायां vप्र[4] vअशायत[5] आशाययत् । स्वनिरोधिकां[5] तां दग्धवानित्यर्थः । सप्तवध्रेः पेटिकान्तःप्रवेशोऽश्विनोरनुग्रहान्निर्गमश्च ' वि जिह्रीष्व वनस्पते ' (ऋ. सं. ५. ७८. ५) इत्यत्र स्पष्टमुक्तम् ॥

---

१. ख-घ-ङ-त१-२—आप्यं प्राप्तव्यं । २. घ—आश्विनाश्विनौ । ३. ख-घ-त-न—रक्षतं; ग—रक्षितं । ४. ग—अशायत; ङ—अशायत् ; त३-४-भ—आशायत । ५. ख—स्वस्वग्निरोधिकं; ग-त-न-भ-श—स्वस्वनिरोधिका ।

इहा गतं वृषण्वसू शृणुतं मे इमं हवम् । अन्ति षद्भूतु वामवः ॥ १० ॥

इह । आ । गतम् । वृषण्वसु इति वृषण्ऽवसू । शृणुतम् । मे । इमम् । हवम् ।
अन्ति । सत् । भुतु । वाम् । अवः ॥ १० ॥

हे [v]वृषण्वसू वर्षणधनावश्विनौ[1] [v]इह अस्मिन् यज्ञे [v]आ [v]गतम् आगच्छतम् । तदर्थं [v]मे मम [v]इमं [v]हवं [v]शृणुतम् ॥ ॥ १९ ॥

किमिदं वां पुराणवज्जरतोरिव शस्यते । अन्ति षद्भूतु वामवः ॥ ११ ॥

किम् । इदम् । वाम् । पुराणऽवत् । जरतोःऽइव । शस्यते । अन्ति । सत् । भुतु । वाम् । अवः ॥ ११ ॥

हे अश्विनौ [v]वां युवयोरर्थमागमनाय [v]पुराणवत् पुराणयोरतिवृद्धयोरिव । तदेवाह । [v]जरतोरिव [v]शस्यते । पुनःपुनरागच्छतमिति शस्यते । [v]किमिदम् । यथा लोके वृद्धो जीर्णो बहुवारमाहूतोऽपि नागच्छति तद्वद्युवामपीत्यर्थः । एवमनागमाद्ब्रवीति ॥

समानं वां सजात्यं समानो बन्धुरश्विना । अन्ति षद्भूतु वामवः ॥ १२ ॥

समानम् । वाम् । सऽजात्यम् । समानः । बन्धुः । अश्विना ।
अन्ति । सत् । भुतु । वाम् । अवः ॥ १२ ॥

हे [v]अश्विना अश्विनौ [v]वां युवयोः परस्परं [v]सजात्यं समानजातित्वं [v]समानम्[2] एकमेव । उभयोरप्यश्वरूपायाः सूर्यपत्न्या उत्पत्तेः सजात्यम् । तथा युवयोः [v]बन्धुः बन्धकः स्तुवः [v]समानः एक एव । अथवर्षिरहं समान एक एव बन्धुः ॥

यो वां रजांस्यश्विना रथो वियाति रोदसी । अन्ति षद्भूतु वामवः ॥ १३ ॥

यः । वाम् । रजांसि । अश्विना । रथः । विऽयाति । रोदसी इति ।
अन्ति । सत् । भुतु । वाम् । अवः ॥ १३ ॥

[v]वां युवयोः [v]यः [v]रथः अस्ति स रथः [v]रजांसि लोकान् [v]रोदसी द्यावापृथिव्यौ च [v]वियाति विशेषेण गच्छति । अतस्तेन रथेन शीघ्रमागच्छतमिति शेषः ॥

आ नो गव्यैभिरश्व्यैः सहस्रैरुप गच्छतम् । अन्ति षद्भूतु वामवः ॥ १४ ॥

आ । नः । गव्यैभिः । अश्व्यैः । सहस्रैः । उप । गच्छतम् ।
अन्ति । सत् । भुतु । वाम् । अवः ॥ १४ ॥

हे अश्विनौ [v]नः अस्मान् [v]सहस्रैः अपरिमितैः [v]गव्यैभिः[3] गोसमूहैः [v]अश्व्यैः अश्वसमूहैश्च [v]उप [v]गच्छतम् ॥

मा नो गव्यैभिरश्व्यैः सहस्रैभिरति ख्यतम् । अन्ति षद्भूतु वामवः ॥ १५ ॥

---

१. ख-त-श–वर्षणधर्मा°; ग–वृषणधना° । २. ख-ग-त-न-भ-श–समं । ३. ग-त-न-भ-श–'गव्यैभिः' नास्ति ।

मा । नः । गव्येभिः । अश्व्यैः । सहस्रेभिः । अति । ख्यतम् ।
अन्ति । सत् । भुतु । वाम् । अर्वः ॥ १५ ॥

हे अश्विनौ vगव्येभिः गोसमूहैः vअश्व्यैः अश्वसमूहैः vसहस्रेभिः सहस्रसंख्याकैः vमा अस्मान् vअति vख्यतम् । अतीति प्रतीत्यस्मिन्नर्थे । मा निवारयतमित्यर्थः ॥

अरुणप्सुरुषा अभूदकर्ज्योतिर्ऋतावरी । अन्ति षद्भूतु वामवः ॥ १६ ॥
अरुणऽप्सुः । उषाः । अभुत् । अकः । ज्योतिः । ऋतऽवरी ।
अन्ति । सत् । भुतु । वाम् । अर्वः ॥ १६ ॥

हे अश्विनौ vउषाः vअरुणप्सुः शुभ्रवर्णा vअभूत् भवति । न केवलं स्वयम् । vज्योतिः तेजः[1] vअकः[1] करोति vअन्ति सर्वतः vऋतावरी ऋतवत्युषाः[2] ॥

अश्विना सु विचाकशद्वृक्षं परशुमाँइव । अन्ति षद्भूतु वामवः ॥ १७ ॥
अश्विना । सु । विऽचाकशत् । वृक्षम् । परशुमान्ऽइव ।
अन्ति । सत् । भुतु । वाम् । अर्वः ॥ १७ ॥

vसु vविचाकशत् अत्यन्तं दीप्यमानः सूर्योऽग्निर्वा vवृक्षं vपरशुमानिव स यथा शकलयति तद्वत्तमो निशारयतीति शेषः । दृष्टान्तसामर्थ्यादेवं लभ्यते । यस्मादेवं तस्मात् vअश्विना अश्विना-वाह्वय इति शेषः ॥

पुरं न धृष्णवा रुज कृष्णया बाधितो विशा । अन्ति षद्भूतु वामवः ॥१८॥
पुरम् । न । धृष्णो इति । आ । रुज । कृष्णया । बाधितः । विशा ।
अन्ति । सत् । भुतु । वाम् । अर्वः ॥ १८ ॥

हे vधृष्णो धर्षक ससवध्रे त्वं[3] vकृष्णया आकर्षया vविशा प्रवेशयन्त्या पेटिकया vबाधितः त्वं ततो निर्गत्य तामेव vआ vरुज पीडय[4] अश्विनोरनुग्रहात् । एवं स्वयं स्वात्मानं प्रेष्यति । अथवा गोपवनः ससवध्रिमेवं ब्रवीति । vवां युवयोः vअवः रक्षणं गमनं वा समीपे । तत्र त्रिषु वर्गेषु 'अन्ति षत्' इत्युत्तरोऽर्धर्चोऽन्वितपदाध्याहारेण योज्यः ॥ ॥ २० ॥

'विशोविशो वः' इति पञ्चदशर्चं पञ्चमं सूक्तम् । अत्रेयमनुक्रमणिका—'विशोविशो वः पञ्चोनाग्नेयं त्वनुष्टुभ्मुखास्तृचाश्चत्वारोऽन्त्यास्तिस्रोऽनुष्टुभ आर्क्षस्य श्रुतर्वणो दानस्तुतिः' इति । अनुवृत्तेर्गोपवन ऋषिः । आदितस्त्रिषु तृचेषु सर्वाः प्रथमा अनुष्टुभो द्वितीयातृतीये प्राग्वत्सप्रपरिभाषया गायत्र्यौ त्रयोदश्याद्यास्तिस्रोऽनुष्टुभः । अस्योत्तरस्य चाग्निर्देवता । अन्त्यास्तिस्रः श्रुतर्वनाम्नो राज्ञो दानस्तुतिः । व्योमविश्वदेवस्तुत्पञ्चशारदीयेष्विदं सूक्तमाज्यशस्त्रम् । सूत्रितं च—'विशोविशो वो अतिथिमित्याज्यम्' (आश्व. श्रौ. ९. ८) इति ॥

विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
अग्निं वो दुर्यं वचः स्तुषे शुष्स्य मन्मभिः ॥ १ ॥

---

१. ख-त-भ-श–तेजस्काकः । २. घ-सत्यवत्युषाः । ३. ग–'त्वं' नास्ति । ४. घ–पीडय दृष्टांतः पुरं न यथा पुरं शत्रुः पीडयति तद्वत् ।

विशःऽविशः । वः । अतिथिम् । वाजऽयन्तः । पुरुऽप्रियम् ।
अग्निम् । वः । दुर्यम् । वचः । स्तुषे । शुषस्य । मन्मऽभिः ॥ १ ॥

हे अन्य ऋत्विजो यजमानाश्च [V]वः यूयं [V]वाजयन्तः अन्नमिच्छन्तः [V]विशोविशः सर्वस्याः प्रजायाः [V]अतिथिं पूज्यं [V]पुरुप्रियं बहुप्रियम् [V]अग्निं स्तुत्या परिचरतेति शेषः । अहं च [V]वः युष्मदर्थं [V]दुर्यं[1] गुहा हितं [V]वचः [V]स्तुषे [V]शूषस्य[2] सुखस्य लाभाय । कैः साधनैः । [V]मन्मभिः मननीयैः स्तोत्रैः ॥

यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिम् । प्रशंसन्ति प्रशस्तिभिः ॥२॥

यम् । जनासः । हविष्मन्तः । मित्रम् । न । सर्पिःऽआसुतिम् । प्रऽशंसन्ति । प्रशस्तिऽभिः ॥२॥

[V]यम् अग्निं [V]जनासः जना यजमानाः [V]हविष्मन्तः सन्तः [V]मित्रं [V]न मित्रमिवादित्यमिव सखायमिव वा [V]सर्पिरासुतिं सर्पिरासूयते हूयते यस्मिंस्तादृशं [V]प्रशंसन्ति स्तुवन्ति [V]प्रशस्तिभिः स्तुतिभिः स्तुव इति शेषः ॥

पन्यांसं जातवेदसं यो देवतात्युद्यता । हव्यान्यैरयद्दिवि ॥ ३ ॥

पन्यांसम् । जातऽवेदसम् । यः । देवऽतांति । उत्ऽयता । हव्यानि । ऐरयत् । दिवि ॥३॥

[V]पन्यांसम् अतिशयेन स्तोतारं साधु कृतमिति यजमानं स्तुवन्तं [V]जातवेदसं जातधनं जातविद्यं वा स्तुव इति शेषः । [V]यः अग्निः [V]देवतांति देवतातौ यज्ञे [V]उद्यता[3] उद्यतानि [V]हव्यानि हवींषि [V]दिवि [V]ऐरयत् प्रेरयति दिवि देवेभ्यः ॥

आगन्म वृत्रहन्तमं ज्येष्ठममग्निमानवम् ।
यस्य श्रुतर्वा बृहन्नार्क्षो अनीक एधते ॥ ४ ॥

आ । अगन्म । वृत्रहन्ऽतमम् । ज्येष्ठम् । अग्निम् । आनवम् ।
यस्य । श्रुतर्वा । बृहन् । आर्क्षः । अनीके । एधते ॥ ४ ॥

[V]वृत्रहन्तमं पापानामतिशयेन हन्तारं [V]ज्येष्ठं प्रशस्यम्[4] [V]आनवं[4] मनुष्यसंबन्धिनं तेषां हितकारिणम् [V]अग्निम् [V]आगन्म आगता वयम् । पूजार्थं बहुवचनम् । [V]यस्य[5] अग्नेः [V]अनीके ज्वालासंघे [V]बृहन् महान् [V]आर्क्षः ऋक्षपुत्रः [V]श्रुतर्वा नाम राजा [V]एधते वर्धते । कर्म करोतीत्यर्थः । तमग्निमागन्मेति समन्वयः । एवं श्रुतर्वाणं भिक्षयागतो गोपवनोऽग्निं स्तौति[6] ॥

अमृतं जातवेदसं तिरस्तमांसि दर्शतम् । घृताहवनमीड्यम् ॥ ५ ॥

अमृतम् । जातऽवेदसम् । तिरः । तमांसि । दर्शतम् । घृतऽआहवनम् । ईड्यम् ॥ ५ ॥

स एवागत्य स्तौति । [V]अमृतम् अमरणं [V]जातवेदसं जाततेजआद्युपलक्षणधनं [V]तमांसि [V]तिरः [V]दर्शतं नाशयन्तमित्यर्थः । [V]घृताहवनम् । घृतमाहूयते यत्र तम् । [V]ईड्यं स्तुत्यम् । ईदृशमागन्मेति संबन्धः ॥ ॥ २१ ॥

---

१. ख-त-न-भ१-दुर्गं । २. ग-शिष्यस्य; त-३-४-भ१-सूयस्य; श-सूर्यस्य । ३. ग-त३-४-भ-श-'उद्यता' नास्ति । ४. ख-ग-त-न-भ-श-प्रशस्यं मानवं । ५. भ-अस्य । ६. ख-त-भ१-श-स्तौमि ।

सबाधो यं जना इमेऽग्निं हव्येभिरीळते । जुह्वानासो यतस्रुचः ॥ ६ ॥

सऽबाधः । यम् । जनाः । इमे । अग्निम् । हव्येभिः । ईळते । जुह्वानासः । यतऽस्रुचः ॥६॥

vइमे vसबाधः बाधसहिता अध्वर्वादयः vयम् vअग्निं vहव्येभिः हविर्भिः vईळते स्तुवन्ति । कीदृशा जनाः । vजुह्वानासः यागं कुर्वाणाः vयतस्रुचः तदर्थं धृतस्रुग्दण्डाः । तमागन्मेति समन्वयः ॥

इयं ते नव्यसी मतिरग्ने अधायि अस्मदा ।
मन्द्र सुजात सुक्रतोऽमूर दस्मातिथे ॥ ७ ॥

इयम् । ते । नव्यसी । मतिः । अग्ने । अधायि । अस्मत् । आ ।
मन्द्र । सुऽजात । सुक्रतो इति सुऽक्रतो । अमूर । दस्म । अतिथे ॥ ७ ॥

हे vअग्ने vइयम् इदानीं क्रियमाणा vनव्यसी नवतरा स्तुतिः vते तव स्वभूता vअस्मत् अस्मासु vअधायि[1] धृताभूत् । वयं तव स्तुतिं कुर्म इत्यर्थः । हे vमन्द्र मोदमान vसुजात शोभनजनन vसुक्रतो शोभनकर्मन् vअमूर अमूढ vदस्म दर्शनीय vअतिथे अतिथिवत् पूज्य इत्यग्नेर्विशेषणानि ॥

सा ते अग्ने शंतमा चनिष्ठा भवतु प्रिया । तया वर्धस्व सुष्टुतः ॥ ८ ॥

सा । ते । अग्ने । शम्ऽतमा । चनिष्ठा । भवतु । प्रिया । तया । वर्धस्व । सुऽस्तुतः ॥ ८ ॥

हे vअग्ने vसा अस्माभिः क्रियमाणा स्तुतिः[2] vशंतमा अत्यन्तं सुखकरा[3] vचनिष्ठा अतिशयेनान्नवती vते तव vप्रिया vभवतु । vतया स्तुत्या vसुष्टुतः सुष्ठु स्तुतः सन् vवर्धस्व प्रवृद्धो भव ॥

सा द्युम्नैर्द्युम्निनी बृहदुपोप श्रवसि श्रवः । दधीत वृत्रतूर्ये ॥ ९ ॥

सा । द्युम्नैः । द्युम्निनी । बृहत् । उपऽउप । श्रवसि । श्रवः । दधीत । वृत्रऽतूर्ये ॥ ९ ॥

vसा अस्माभिः क्रियमाणा स्तुतिः vद्युम्नैः द्योतमानैरन्नैः अस्मभ्यं[4] प्रदेयैः vद्युम्निनी अन्नवती vश्रवसि[5] पूर्वस्मिन् विद्यमानेऽन्ने[6] पुनरपि vबृहत् महत् vश्रवः अन्नम् vउपोप[7] vदधीत पुनरुपरि[8] धारयतु । कुत्रेति उच्यते । vवृत्रतूर्ये संग्रामे । शत्रोः संबन्धीति यावत् ॥

अश्वमिद्गां रथप्रां त्वेषमिन्द्रं न सत्पतिम् ।
यस्य श्रवांसि तूर्वथ पन्यंपन्यं च कृष्टयः ॥ १० ॥

अश्वम् । इत् । गाम् । रथऽप्राम् । त्वेषम् । इन्द्रम् । न । सत्ऽपतिम् ।
यस्य । श्रवांसि । तूर्वथ । पन्यम्ऽपन्यम् । च । कृष्टयः ॥ १० ॥

vगां गन्तारम् vअश्वमित् । इच्छब्द इवार्थे । अश्वमिव । तं यथा स्तुवते तथेत्यर्थः । vरथप्रां रथानामस्मदीयानां पूरयितारं धनैः तथा vत्वेषं दीप्तमग्निं vसत्पतिं सतां पालकम् vइन्द्रं vन इन्द्रमिवेमं

---

१. घ–आ अधायि । २. ख-ग-त-न-भ-श–'स्तुतिः' नास्ति । ३. ग–सुखकरी भ–सुखकरो । ४. त-भ-श–द्युरस्मभ्यं । ५. ख-त-न-भ-श–अस्यभ्यं सुश्रवसि; घ–सुश्रवसि । ६. ज्ञ-त१-२–विद्यमानोन्ने; त३-४–विद्यमानोन्न; श–अविद्यमानोत्र । ७. त-भ-श–उप । ८. ग-भ–पुनरपि ।

vकृष्टयः मनुष्याः परिचरतेति[1] शेषः। vयस्य अग्नेर्बलेन vश्रवांसि अन्नानि शत्रुसंबन्धीनि vतूर्वथ तथा vपन्यंपन्यं vच यद्यत् स्तुत्यं धनमस्ति तदपि तूर्वथ हिंस्थ ॥ ॥ २२ ॥

यं त्वा गोपवनो गिरा चनिष्ठदग्ने अङ्गिरः। स पावक श्रुधी हवम् ॥ ११ ॥

यम्। त्वा। गोपवनः। गिरा। चनिष्ठत्। अग्ने। अङ्गिरः। सः। पावक। श्रुधि। हवम् ॥ ११ ॥

हे vअग्ने vयं vत्वा त्वां vगोपवनः ऋषिः vगिरा स्तुत्या vचनिष्ठत् अतिशयेनान्नप्रदातारमकरोत् vसः तादृशाग्ने vअङ्गिरः सर्वत्र गन्तरङ्गिरसां मध्य एक वा vपावक शोधक vहवं गोपवनस्य vश्रुधि शृणु ॥

यं त्वा जनासः ईळते सबाधो वाजसातये। स बोधि वृत्रतूर्ये ॥ १२ ॥

यम्। त्वा। जनासः। ईळते। सऽबाधः। वाजऽसातये। सः। बोधि। वृत्रऽतूर्ये ॥ १२ ॥

हे अग्ने vयं vत्वा त्वां vजनासः जनाः स्तोतारो वा vवाजसातये अन्नस्य लाभाय vसबाधः निर्बन्धरूपबाधोपेताः[2] सन्तः vईळते स्तुवन्ति vसः त्वं vवृत्रतूर्ये वैरिनाशनाय पापक्षयाय वा vबोधि बुध्यस्व। अथवा वृत्रतूर्ये संग्रामे बोधि ॥

अहं हुवान आर्क्षे श्रुतर्वणि मदच्युतिं।
शधींसीव स्तुकाविनां मृक्षा शीर्षा चतुर्णाम् ॥ १३ ॥

अहम्। हुवानः। आर्क्षे। श्रुतर्वणि। मदऽच्युतिं।
शधींसिऽइव। स्तुकाऽविनाम्। मृक्षा। शीर्षा। चतुर्णाम् ॥ १३ ॥

vअहम् ऋषिः vहुवानः हूयमानो यज्ञदिदक्षार्थं vश्रुतर्वणि एतन्नाम्नि राजनि vमदच्युति शत्रूणां मदस्य च्यावयितरि vस्तुकाविनाम्। स्तुकाविन ऊर्णायवः। स्तुकः केशसंघातः। तद्वतां vशधींसीव उच्छ्रितानि लोमानीव तानि यथा स्पृशन्ति तद्वत् vवृक्षा वृक्षाणि। वृक्ष्यन्त इति वृक्षाः केशाः। तद्वन्ति वृक्षाणि vशीर्षा[3] शीर्षाणि शिरांसि। केषाम्। vचतुर्णां श्रुतर्वणा प्रदत्तानामश्वानां शिरांस्युन्मृजामीति शेषः। अथवा वृक्षा वृक्षेण। व्रश्चनसाधनत्वाद्वृक्षो हस्तः। तेनोन्मृजामि[4] ॥

मां चत्वारं आशवः शविष्ठस्य द्रविल्नवः।
सुरथासो अभि प्रयो वक्षन्वयो न तुग्र्यम् ॥ १४ ॥

माम्। चत्वारः। आशवः। शविष्ठस्य। द्रविल्नवः।
सुऽरथासः। अभि। प्रयः। वक्षन्। वयः। न। तुग्र्यम् ॥ १४ ॥

vमां vशविष्ठस्य अतिशयेनान्नवतः श्रुतर्वणो राज्ञः संबन्धिनः vचत्वारः vआशवः अश्वाः vद्रविल्नवः गमनशीलाः vसुरथासः शोभनरथा अश्वाः vप्रयः अन्नं शत्रूणां प्रति vअभि vवक्षन् अभिवहन्ति। vवयो[5] vन vतुग्र्यम्[6]। भुज्युं यथाश्विभ्यां प्रेरिताश्चतस्रो नावः स्वगृहं प्रापयन् तद्वदिति ॥

---

१. ख-परिचरंति; घ-त-न-भ-परिचरंतेति। २. ख-ग-घ१-ज्ञ-त१-४-भ-श-°वधोपेताः; च-°बंधोपेताः; त२-३-°बधोपेताः। ३. ग-त-भ-श-' शीर्षा ' नास्ति। ४. ख-त-न-भ-श-तेनोन्मृजानि। ५. ख-त१-२-न-तुग्रं; ग-तु उग्र्यं; घ-तुग्र्यं न; त३-४-तुग्र; भ-उग्र; ज्ञ-श-तुग्र्यं।

सत्यमित्त्वा महेनदि परुष्ण्यव देदिशम् ।
नेमापो अश्वदातरः शविष्ठादस्ति मर्त्यः ॥ १५ ॥

सत्यम् । इत् । त्वा । महेऽनदि । परुष्णि । अव । देदिशम् ।
न । ईम् । आपः । अश्वऽदातरः । शविष्ठात् । अस्ति । मर्त्यः ॥ १५ ॥

हे ᵛमहेनदि[1] ᵛपरुष्णि एतन्नामिके ᵛत्वा त्वां ᵛसत्यमित् सत्यमेव ᵛअव ᵛदेदिशम् आदिशामि वदामि । नद्याकारेण संबोध्यापः संबोधयति । हे ᵛआपः ᵛईम् अस्मात् ᵛशविष्ठात् बलवत्तमाच्छुतर्वणोऽधिकः[2] कश्चित् ᵛअश्वदातरः अश्वानां दातृतमः ᵛमर्त्यः ᵛन ᵛअस्ति । परुष्ण्यास्तीरे राज्ञोऽश्वमेधप्रतिग्रहात्तां संबोध्य ब्रूते ॥ ॥ २३ ॥

'युक्ष्वा हि' इति षोडशर्चं षष्ठं सूक्तमाङ्गिरसस्य विरूपस्यार्षं गायत्रमाग्नेयम् । तथा चानुक्रमणिका—'युक्ष्वा हि षोळश विरूपः' इति । दशरात्रे तृतीयेऽहनीदं सूक्तमाज्यशस्त्रम् । सूत्रितं च—' तृतीये युक्ष्वा हीत्याज्यम् ' (आश्व. श्रौ. ७. १०) इति । प्रातरनुवाकेऽप्याग्नेये गायत्रे छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितं च—' युक्ष्वा हि प्रेष्ठं वः ' (आश्व. श्रौ. ४. १३) इति ॥

युक्ष्वा हि देवहूतमाँ अश्वाँ अग्ने रथीरिव । नि होता पूर्व्यः सदः ॥ १ ॥

युक्ष्व । हि । देवऽहूतमान् । अश्वान् । अग्ने । रथीःऽइव । नि । होता । पूर्व्यः । सदः ॥१॥

हे ᵛअग्ने ᵛदेवहूतमान् देवानामाह्वातृतमान् ᵛअश्वान् ᵛयुक्ष्व योजय रथे । ᵛरथीरिव यथा रथी स्वाश्वानिष्टदेशगमनाय योजयति तद्वत् । तथा कृत्वा ᵛहोता त्वं ᵛपूर्व्यः मुख्यः सन् ᵛनि ᵛषदः[3] उपविश[4] च ॥

उत नो देव देवाँ अच्छा वोचो विदुष्टरः । श्रद्धिश्चा वार्या कृधि ॥ २ ॥

उत । नः । देव । देवान् । अच्छ । वोचः । विदुःऽतरः । श्रत् । विश्वा । वार्या । कृधि ॥२॥

हे ᵛदेव अग्ने ᵛउत अपि च ᵛनः अस्मान् ᵛदेवान् ᵛअच्छा ᵛवोचः अभिब्रूयाः । सम्यगनुष्ठितवन्त इति । तथा ᵛविदुष्टरः विद्वत्तमान् वोचः । तथा कृत्वा ᵛविश्वा सर्वाणि ᵛवार्या वरणीयानि धनानि देवसंबन्धीनि ᵛश्रत् सत्यानि ᵛकृधि कुर्वस्माकम् । अथवास्मदीयानि सर्वाणि वरणीयानि हवींषि श्रत् सत्यानि कुरु । देवान् प्रापयेत्यर्थः ॥

त्वं ह यद्यविष्ठ्य सहसः सूनवाहुत । ऋतावा यज्ञियो भुवः ॥ ३ ॥

त्वम् । ह । यत् । यविष्ठ्य । सहसः । सूनो इति । आऽहुत । ऋतऽवा । यज्ञियः । भुवः ॥३॥

हे अग्ने ᵛयविष्ठ्य युवतम ᵛसहसः ᵛसूनो बलस्य पुत्र ᵛआहुत सर्वतो हुत आहूत वा ᵛत्वं ᵛयत् यदा ᵛह खलु ᵛऋतावा सत्यवान् ᵛयज्ञियः यज्ञार्हश्च ᵛभुवः भवसि तदा वार्याणि श्रत्कुर्विति[5] संबन्धः ॥

दर्शपूर्णमासयोराग्नेयस्य ' अयमग्निः ' इति वैकल्पिकी याज्या । सूत्रितं च—' अयमग्निः सहस्त्रिण इति वेदं विष्णुर्वि चक्रमे ' (आश्व. श्रौ. १. ६) इति ॥

---

१. ख-ग-श–महे महे नदि; घ–महे महते नदि । २. ख-ग-ज्ञ-त२-३-४-न-भ-श–°तर्वणो नाधि; घ१–°तर्वणः; च–°तर्वणादधिकः; त१–°तर्वणो नाधिकः । ३. त३-४-भ-श–षद । ४. ख-ग-त-भ-श–' उपविश ' नास्ति । ५. ग-त-श्रुत्कुर्विति; भ–श्रुतकुर्विति; श–श्रु कुर्विति ।

अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्धा कवी रयीणाम् ॥ ४ ॥

अयम् । अग्निः । सहस्रिणः । वाजस्य । शतिनः । पतिः । मूर्धा । कविः । रयीणाम् ॥४॥

vअयमग्निः vशतिनः vसहस्रिणः चोक्तसंख्योपेतस्य vवाजस्य अन्नस्य vपतिः स्वामी vमूर्धा शिरोवदुन्नतः श्रेष्ठः vकविः मेधावी vरयीणां धनानामपि पतिरिति शेषः । तदुभयं प्रयच्छत्वित्यर्थः ॥

तं नेमिमृभवो यथा नमस्व सहूतिभिः । नेदीयो यज्ञमङ्गिरः ॥ ५ ॥

तम् । नेमिम् । ऋभवः । यथा । आ । नमस्व । सहूतिऽभिः । नेदीयः । यज्ञम् । अङ्गिरः ॥५॥

हे vअङ्गिरः त्वं vसहूतिभिः समानाह्वानैरन्यैर्देवैः सह vनेदीयः अन्तिकतमं vयज्ञम्[1] vआ vनमस्व[1] आनमय । vऋभवः vनेमिं रथमिव[2] ॥ ॥ २४ ॥

तस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिम् ॥ ६ ॥

तस्मै । नूनम् । अभिऽद्यवे । वाचा । विऽरूप । नित्यया । वृष्णे । चोदस्व । सुऽस्तुतिम् ॥६॥

हे vविरूप नानारूपैतन्नामक महर्षे त्वं vतस्मै प्रसिद्धाय vअभिद्यवे अभिगतदीप्तये vवृष्णे वर्षकायाग्नये vनित्यया उत्पत्तिरहितया vवाचा मन्त्ररूपया vसुष्टुतिं vनूनम् इदानीं vचोदस्व स्तुहीत्येवमृषिः स्वात्मानं ब्रवीति यजमानो वा होतारं विरूपम् ॥

कमु ष्विदस्य सेनयाग्नेरपाकचक्षसः । पणिं गोषु स्तरामहे ॥ ७ ॥

कम् । ऊँ इति । स्वित् । अस्य । सेनया । अग्नेः । अपाकऽचक्षसः ।
पणिम् । गोषु । स्तरामहे ॥ ७ ॥

vअस्य vअग्नेः vअपाकचक्षसः अनल्पचक्षसोऽग्नेः vसेनया ज्वालारूपया vगोषु निमित्तेषु vकमु vष्वित् कं[3] खलु vपणिं vस्तरामहे । स्तरणं[4] हिंसनम्[5] । इदानीं बलिनमभिभवेमेत्यर्थः[6] ॥

मा नो देवानां विशः प्रस्रातीरिवोत्साः । कृशं न हासुरध्र्याः ॥ ८ ॥

मा । नः । देवानाम् । विशः । प्रस्रातीःऽइव । उत्साः । कृशम् । न । हासुः । अध्न्याः ॥८॥

vदेवानां सर्वेषां vविशः प्रजाभूतान् परिचारकान् vनः अस्मान् vमा हासीत् अग्निर्मा परित्यजतु । vप्रस्रातीः[7] vउत्साः[8] vइव पयः क्षरन्तीर्गाव इव । ता यथा न मुञ्चन्ति । उभयमपि न परित्यजत्वित्यर्थः । किमिव । vकृशम् अल्पं स्ववत्सम् vअध्न्याः गावो यथा vन vहासुः न परित्यजन्ति तद्वत् ॥

मा नः समस्य दूढ्यः परिद्वेषसो अंहतिः । ऊर्मिर्न नावमा वधीत् ॥ ९ ॥

मा । नः । समस्य । दुःऽध्यः । परिऽद्वेषसः । अंहतिः । ऊर्मिः । न । नावम् । आ । वधीत् ॥९॥

---

१. ख-घ-त–आनमस्व यज्ञं; ग-न-भ–आनमस्व । २. ग–अरमिव । ३. ख-त-भ-श–कः; ग–कमु; न–कुः । ४. ख–स्तरणिंसक; ग–स्तरणीं हिंसनं; ज्ञ-त३–स्तरणिं हिंसक; त४-न-भ-श–स्तरणं हिंसकं । ५. ख-ग-त-न-भ-श–°मभिभवामे° । ६. ख-भ१–प्रस्नवतीः; ग-भ२–प्रस्रवंतीः; त-भ३-श–प्रस्रवतीः । ७. ज्ञ-त३-श–उषा ।

vसमस्य सर्वस्य vपरिद्वेषसः परितो द्विषतः vदूढ्यः[1] पापबुद्धेः vअंहतिः हननं vमा[2] vआ vवधीत् मा हिंस्यात्[2]। vनावम् vऊर्मिः समुद्रतरङ्ग इव। स यथा तां पीडयति तद्वन्मा वधीदित्यर्थः[3]। अत्र 'मा नः सर्वस्य दुर्धियः' (निरु. ५. २३) इत्यादि निरुक्तं द्रष्टव्यम् ॥

नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः। अमैरमित्रमर्दय ॥ १० ॥

नमः। ते। अग्ने। ओजसे। गृणन्ति। देव। कृष्टयः। अमैः। अमित्रम्। अर्दय ॥ १० ॥

हे vअग्ने vदेव vते तुभ्यं vनमः vगृणन्ति नमस्कारशब्दमुच्चारयन्ति। किमर्थम्। vओजसे बलाय। के। vकृष्टयः मनुष्या यजमानाः। अतोऽहमपि गृणामीत्यर्थः। तथा vअमैः बलैः vअमित्रं शत्रुम् vअर्दय नाशय ॥ ॥ २५ ॥

ग्राम्येणाग्निना वैतानिकस्य संसर्गेऽग्नये संवर्गायेष्टिः कार्या। तत्र 'कुवित्सु नः' इत्यनुवाक्या 'मा नो अस्मिन्' इति याज्या। सूत्रितं च—'कुवित्सु नो गविष्टये मा नो अस्मिन्महाधने' (आश्व. श्रौ. ३. १३) इति ॥

कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम्। उरुकृदुरु णस्कृधि ॥ ११ ॥

कुवित्। सु। नः। गोऽईष्टये। अग्ने। सम्ऽवेषिषः। रयिम्। उरुऽकृत्। उरु। नः। कृधि ॥ ११ ॥

हे vअग्ने त्वं vनः अस्माकं vगविष्टये गवामेषणाय vकुवित् बहु vरयिं धनं vसंवेषिषः संप्रापय। vउरुकृत् त्वं vनः अस्मान्[4] vउरु vकृधि कुरु ॥

मा नो अस्मिन्महाधने परा वर्ग्भारभृद्यथा। संवर्गं सं रयिं जय ॥ १२ ॥

मा। नः। अस्मिन्। महाऽधने। परा। वर्क्। भारऽभृत्। यथा। सम्ऽवर्गम्। सम्। रयिम्। जय ॥ १२ ॥

vनः अस्मान् vअस्मिन् vमहाधने संग्रामे vमा vपरा vवर्क् मा परित्याक्षीः। vभारभृद्यथा। भारवाही यथा भारमन्ते परित्यजति तद्वत्। vसंवर्गं शत्रुभ्यः सहाच्छिद्यमानं vरयिं धनं vसं vजय अस्मदर्थम् ॥

अन्यमस्मद्रिया इयमग्ने सिषक्तु दुच्छुना। वर्धा नो अमवच्छवः ॥ १३ ॥

अन्यम्। अस्मत्। भियै। इयम्। अग्ने। सिसक्तु। दुच्छुना। वर्ध। नः। अमऽवत्। शवः ॥ १३ ॥

हे vअग्ने त्वदीया vइयं vदुच्छुना बाधकसंहतिः vअस्मत् vअन्यम् अस्तोतारं vभियै भयाय vसिषक्तु सेवताम्। त्वं च vनः अस्माकम् vअमवत् बलोपेतं vशवः वेगं vवर्ध वर्धय संग्रामे ॥

यस्याजुषन्नमस्विनः शमीमदुर्मखस्य वा। तं घेदग्निर्वृधावति ॥ १४ ॥

यस्य। अजुषत्। नमस्विनः। शमीम्। अदुःऽमखस्य। वा। तम्। घ। इत्। अग्निः। वृधा। अवति ॥ १४ ॥

vयस्य vनमस्विनः नमस्कारवतः vअदुर्मखस्य vवा अदुष्टयागस्य वा vशमीं कर्म vअजुषत् असेवत vतं vघेत् तमेव यजमानं संग्रामे vअग्निर्विधावति विशेषेण गच्छति। अतो नमोयुक्ता अदुर्मखाश्च भवामेति भावः ॥

---

१. ख-ग-घ-त-भ—दूर्ध्यः। २. ख-ज्ञ-त१-२—अस्मानावधीत् मां हिंस्यात्; घ—नोस्मान् मा वधीत् मा हिंस्यात्; त३-४-न-भ—आवधीत् मा हिंस्यात्। ३. ख-ग-त-न-भ-श—वधीरित्यर्थः। ४. घ—अस्मान् सु सुष्ठु।

परस्या अधि संवतोऽवराँ अभ्या तर । यत्राहमस्मि ताँ अव ॥ १५ ॥

परस्याः । अधि । सम्ऽवतः । अवरान् । अभि । आ । तर । यत्र । अहम् । अस्मि । तान् । अव ॥ १५ ॥

हे अग्ने vपरस्याः अन्यस्याः vसंवतः सेनायाः vअवरान् अन्यानस्मदीयान् vअभि अभिमुखम् vआ सर्वतः vतर तारय । वैरिसेना अस्मद्भटैः पराभावयेत्यर्थः । vयत्र येष्वस्मदीयपरिजनमध्ये vअहमस्मि स्वामी[1] vतानव रक्ष ॥

विद्मा हि ते पुरा वयमग्ने पितुर्यथावसः । अधा ते सुम्नमीमहे ॥ १६ ॥

विद्म । हि । ते । पुरा । वयम् । अग्ने । पितुः । यथा । अवसः । अध । ते । सुम्नम् । ईमहे ॥ १६ ॥

हे vअग्ने vपितुः पालकस्य vते तव vअवसः अवो रक्षणं vपुरा vयथा तथेदानीमपीति vविद्म[2] । vअध[3] तत् vते[3] तव vसुम्नं सुखम् vईमहे याचामहे । अथवा पितुर्यथेति दृष्टान्तः । पितुः पालनं पुत्रो यथा वेत्ति तथेत्यर्थः ॥ ॥ २६ ॥

'इमं नु मायिनम्' इति द्वादशर्चं सप्तमं सूक्तम् । कुरुसुतिर्नाम काण्व ऋषिः । गायत्री छन्दः । इन्द्रो देवता । तथा चानुक्रान्तम्—'इमं नु द्वादश कुरुसुतिः काण्वः' इति । व्यूढे दशरात्रे चतुर्थेऽहनि मरुत्वतीय आद्यस्तृचः । सूत्रितं च—'इमं नु मायिनं हुवे त्यमु वः सत्रासाहम्' (आश्व. श्रौ. ८. ८) इति ॥

इमं नु मायिनं हुव इन्द्रमीशानमोजसा । मरुत्वन्तं न वृञ्जसे ॥ १ ॥

इमम् । नु । मायिनम् । हुवे । इन्द्रम् । ईशानम् । ओजसा । मरुत्वन्तम् । न । वृञ्जसे ॥ १ ॥

vइमं vमायिनं प्रज्ञावन्तम् vओजसा स्वबलेन vईशानं सर्वस्य स्वामिनं vमरुत्वन्तं vन । नेति संप्रत्यर्थे । मरुद्भिस्तद्वन्तमिदानीम् vइन्द्रं vवृञ्जसे शत्रूणां छेदनाय vहुवे आह्वयामि ॥

अयमिन्द्रो मरुत्सखा वि वृत्रस्याभिनच्छिरः । वज्रेण शतपर्वणा ॥ २ ॥

अयम् । इन्द्रः । मरुत्ऽसखा । वि । वृत्रस्य । अभिनत् । शिरः । वज्रेण । शतऽपर्वणा ॥ २ ॥

vअयमिन्द्रो[4] vमरुत्सखा मरुद्युक्तः vवृत्रस्य vवि vअभिनत् व्यच्छिनत् vशिरः vवज्रेण vशतपर्वणा शतसंधिना[4] ॥

वावृधानो मरुत्सखेन्द्रो वि वृत्रमैरयत् । सृजन्त्समुद्रिया अपः ॥ ३ ॥

ववृधानः । मरुत्ऽसखा । इन्द्रः । वि । वृत्रम् । ऐरयत् । सृजन् । समुद्रियाः । अपः ॥ ३ ॥

अयम् vइन्द्रः vवावृधानः वर्धमानः vमरुत्सखा मरुत्सहायः vवृत्रं मेघं vवि vऐरयत् विदारितवान् । किं कुर्वन् । vसमुद्रियाः । समुद्रमन्तरिक्षम् । तत्संबन्धिन्यः vअपः vसृजन् ॥

---

१. ग–भवामि । २. ख-घ-ञ-त१-२–विद्म नवं । ३. ख-त२-४-न–अधी तत्ते; ग–अधमः ते; घ–अतस्ते; ञ–अधित् ते; भ१–अधितस्ते; भ३–अधीतितस्ते; श-अधीते । ४. ख-ग-त-न-भ-श–अयमिंद्रो मरुद्युक्तो वृत्रस्य व्यच्छिनच्छिरो वज्रेण शतसंधिना (ख-ञ-त३-४-भ१-२-श–शतशत°)।

षष्ठेऽहनि मरुत्वतीये 'अयं ह येन' इति मरुत्वन्निविद्धानीयः। सूत्रितं च—'अयं ह येन वा इदमुप नो हरिभिः सुतम्' (आश्व. श्रौ. ८. ८) इति ॥

अयं हु येन वा इदं स्वर्मरुत्वता जितम्। इन्द्रेण सोमपीतये ॥ ४ ॥

अयम्। ह। येन। वै। इदम्। स्वः। मरुत्वता। जितम्। इन्द्रेण। सोमऽपीतये ॥ ४ ॥

vअयं vह[1] खल्विन्द्रः vयेन vवै येन खलु vमरुत्वता मरुद्भिर्युक्तेन vइन्द्रेण vइदं vस्वः स्वर्गाख्यं स्थानमिदं स्वः सर्वं[2] कर्म[3] वा यद्वेदं सर्वं जगत् vजितम्। किमर्थम्। vसोमपीतये सोमपानाय ॥

मरुत्वन्तमृजीषिणमोजस्वन्तं विरप्शिनम्। इन्द्रं गीर्भिर्हवामहे ॥ ५ ॥

मरुत्वन्तम्। ऋजीषिणम्। ओजस्वन्तम्। विऽरप्शिनम्। इन्द्रम्। गीःऽभिः। हवामहे ॥५॥

vमरुत्वन्तं मरुद्भिस्तद्वन्तम् vऋजीषिणम्। अभिपुतशेष ऋजीषः। स च तृतीयसवने पुनः सूयते। तद्वन्तम् vओजस्वन्तम्। ओजो नामाष्टमी दशा। शरीरवृद्ध्युपेतमित्यर्थः। vविरप्शिनम्। महन्नामैतत्। महान्तमेवंमहानुभावम् vइन्द्रं vगीर्भिः स्तुतिभिः vहवामहे आह्वयामः ॥

इन्द्रं प्रत्नेन मन्मना मरुत्वन्तं हवामहे। अस्य सोमस्य पीतये ॥ ६ ॥

इन्द्रम्। प्रत्नेन। मन्मना। मरुत्वन्तम्। हवामहे। अस्य। सोमस्य। पीतये ॥ ६ ॥

vमरुत्वन्तम् vइन्द्रं vप्रत्नेन पुराणेन vमन्मना मननीयेन स्तोत्रेण vहवामहे vअस्य vसोमस्य vपीतये पानाय ॥ ॥ २७ ॥

पञ्चमेऽहनि मरुत्वतीये 'मरुत्वाँ इन्द्र मीढ्वः' इति तृचो निविद्धानीयः। सूत्रितं च—'मरुत्वाँ इन्द्र मीढ्वस्तमिन्द्रं वाजयामसि' (आश्व. श्रौ. ८. ८) इति ॥

मरुत्वाँ इन्द्र मीढ्वः पिबा सोमं शतक्रतो। अस्मिन्यज्ञे पुरुष्टुत ॥ ७ ॥

मरुत्वान्। इन्द्र। मीढ्वः। पिब। सोमम्। शतक्रतो इति शतऽक्रतो।
अस्मिन्। यज्ञे। पुरुऽस्तुत ॥ ७ ॥

हे vमीढ्वः फलस्य वृष्टेर्वा सेक्तः vशतक्रतो बहुकर्मन् vइन्द्र त्वं vमरुत्वान्[3] vसोमं vपिब vअस्मिन् vयज्ञे हे vपुरुष्टुत बहुभिराहूत ॥

तुभ्येदिन्द्र मरुत्वते सुताः सोमासो अद्रिवः। हृदा हूयन्त उक्थिनः ॥ ८ ॥

तुभ्य। इत्। इन्द्र। मरुत्वते। सुताः। सोमासः। अद्रिऽवः। हृदा। हूयन्ते। उक्थिनः ॥८॥

हे vअद्रिवः वज्रवन् vइन्द्र vमरुत्वते vतुभ्येत् तुभ्यमेव vसोमासः vसुताः अभिषुताः। ते च vउक्थिनः शस्त्रवन्तः vहृदा[4] मनसा भक्त्या[4] vहूयन्ते त्वदर्थम् ॥

पिबेदिन्द्र मरुत्सखा सुतं सोमं दिविष्टिषु। वज्रं शिशान ओजसा ॥ ९ ॥

---

१. न-भ-ह अयं। २. ख-ग-त-न-भ-श-सर्वकर्म। ३. न-भ-मरुत्वान् सन्। ४. त३-४-न-भ श-'हृदा...भक्त्या' नास्ति।

पिबेत्। इत्। इन्द्र। मरुत्ऽसखा। सुतम्। सोमम्। दिविष्टिषु। वज्रम्। शिशानः। ओजसा ॥९॥

हे ᵛइन्द्र ᵛमरुत्सखा त्वं ᵛसुतम् अभिषुतं ᵛसोमं ᵛपिब। किमर्थम्। ᵛदिविष्टिषु अस्माकमह्वामभिगमनेषु ᵛदिवः स्वर्गस्य वैषणेषु निमित्तेषु। पीत्वा च ᵛओजसा बलेन सोमपानजनितेन ᵛवज्रं ᵛशिशानः तीक्ष्णीकुर्वन्। शत्रूञ्जहीति भावः ॥

चतुर्विंशेऽहनि प्रातःसवने ब्राह्मणाच्छंसिशस्त्रे 'उत्तिष्ठन्' इति तृचः षळहस्तोक्तियः। सूत्रितं च—'उत्तिष्ठन्नोजसा सह भिन्धि विश्वा अप द्विष इति ब्राह्मणाच्छंसिनः' (आश्व. श्रौ. ७. २) इति ॥

उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः। सोममिन्द्र चमू सुतम् ॥१०॥

उत्ऽतिष्ठन्। ओजसा। सह। पीत्वी। शिप्रे इति। अवेपयः।
सोमम्। इन्द्र। चमू इति। सुतम् ॥ १० ॥

हे ᵛइन्द्र त्वं ᵛपीत्वी पीत्वा ᵛओजसा बलेन ᵛसह ᵛउत्तिष्ठन् ᵛशिप्रे हनू ᵛअवेपयः अकम्पयः। मदावेशादिति भावः। किं पीत्वा। ᵛचमू चम्वोरधिषवणफलकयोः ᵛसुतं ᵛसोमम् ॥

अनु त्वा रोदसी उभे क्रक्षमाणमकृपेताम्। इन्द्र यद्दस्युहाभवः ॥ ११ ॥

अनु। त्वा। रोदसी इति। उभे इति। क्रक्षमाणम्। अकृपेताम्।
इन्द्र। यत्। दस्युऽहा। अभवः ॥ ११ ॥

हे ᵛइन्द्र ᵛक्रक्षमाणं शत्रून् विलिखन्तं ᵛत्वा त्वाम् ᵛउभे ᵛरोदसी उभे अपि द्यावापृथिव्यौ ᵛअनु ᵛअकृपेताम् अनुकल्पयेताम्। ᵛयत् यदा ᵛदस्युहा ᵛअभवः भवसि तदा ॥

वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम्। इन्द्रात्परि तन्वं ममे ॥ १२ ॥

वाचम्। अष्टाऽपदीम्। अहम्। नवऽस्रक्तिम्। ऋतऽस्पृशम्।
इन्द्रात्। परि। तन्वम्। ममे ॥ १२ ॥

ᵛअष्टापदीम्। अष्टाभिर्दिग्भिर्विदिग्भिः साष्टापदी। ᵛनवस्रक्तिम् उपरि स्थितेनादित्येन नवस्रक्तिम्। आसु दिक्षु व्याप्तामित्यर्थः। ᵛऋतस्पृशं यज्ञस्पृशं ᵛवाचं स्तुतिम्[1] ᵛअहं[1] परिपूर्णात् ᵛइन्द्रात् ᵛतन्वं ततुं न्यूनां सतीं ᵛपरि ᵛममे। अन्यूनेयत्तां करोमीत्यर्थः। कात्स्न्र्येन स्वरूपं स्तुत्या विषयीकर्तुमशक्यत्वादिति भावः ॥ ॥ २८ ॥

'जज्ञानः' इत्येकादशर्चमष्टमं सूक्तं काण्वस्य कुरुसुतेरार्षम्। आद्या नव गायत्र्यो दशमी बृहत्येकादशी सतोबृहती। इन्द्रो देवता। तथा चानुक्रान्तं—'जज्ञान एकादश प्रगाथान्तम्' इति। महाव्रते निष्केवल्ये 'जज्ञानो नु शतक्रतुः' इत्येषा। तथैव पञ्चमारण्यके सूत्रितं—'जज्ञानो नु शतक्रतुरित्येका' (ऐ. आ. ५. २. ३) इति ॥

जज्ञानो नु शतक्रतुर्वि पृच्छदिति मातरम्। क उग्राः के ह शृण्विरे ॥ १ ॥

जज्ञानः। नु। शतऽक्रतुः। वि। पृच्छत्। इति। मातरम्। के। उग्राः। के। ह। शृण्विरे ॥१॥

---

१. ख–स्तुतिम; त-न-भ१-२-श–स्तुतिमयां; भ३–स्तुतिमयी।

अयमिन्द्रः vजज्ञानो vनु जायमान एव vशतक्रतुः बहुकर्मा vइति इत्थं vमातरं स्वजननीं विपृच्छति । किमिति । vक vउग्राः उद्गूर्णबला लोके । vके vह vशृण्विरे श्रूयन्ते गुणैः । के विश्रुता इत्यर्थः ॥

आदीं शवस्यब्रवीदौर्णवाभमहीशुवम् । ते पुत्र सन्तु निष्टुरः ॥ २ ॥

आत् । ईम् । शवसी । अब्रवीत् । और्णऽवाभम् । अहीशुवम् । ते । पुत्र । सन्तु । निःऽतुरः ॥२॥

इन्द्रेण पृष्टा vशवसी माता अनन्तरमेव[1] एनमिन्द्रम् vअब्रवीत् । किमिति उच्यते । vऔर्णवाभमहीशुवम्[2] एतन्नामानावसुरौ तिष्ठतः । तावुक्तवन्ये च तादृशा हे vपुत्र तव vनिष्टुरः निस्तारणीयाः vसन्तु इति ॥

समित्तान्वृत्रहाखिदत्खे अराँइव खेदया । प्रवृद्धो दस्युहाभवत् ॥ ३ ॥

सम् । इत् । तान् । वृत्रऽहा । अखिदत् । खे । अरान्ऽइव । खेदया ।
प्रऽवृद्धः । दस्युऽहा । अभवत् ॥ ३ ॥

vतान् जनन्योक्तान् vवृत्रहा इन्द्रः vसमित्[3] सहैव vअखिदत्[3] । खेदनं नाम आकर्षणम् । vखे रथचक्रस्य नाभौ[4] vअरान् चक्राङ्गभूताञ्छङ्कून् vखेदया रज्ज्वा vइव । तया तान् यथा संखिदन्ति तद्वत् । तथा कृत्वा vदस्युहा शत्रुघातीन्द्रः vप्रवृद्धः vअभवत् ॥

एकया प्रतिधापिबत्साकं सरांसि त्रिंशतम् । इन्द्रः सोमस्य काणुका ॥ ४ ॥

एकया । प्रतिऽधा । अपिबत् । साकम् । सरांसि । त्रिंशतम् । इन्द्रः । सोमस्य । काणुका ॥४॥

अयम् vइन्द्रः vएकया एकेन vप्रतिधा प्रतिधानेन vसाकम्[5] एकधैव vत्रिंशतम् अपि । उक्थपात्राणीत्यर्थः । कीदृशानि । vसरांसि vसोमस्य पूर्णानि सोमरसेन पूर्णानि vकाणुका कान्तानि क्रान्तानि वा सोमेन कृतानि वा सोमपूर्णानि vअपिबत् पीतवान् माध्यंदिनसवने । याज्ञिकप्रसिद्धयैवम् । नैरुक्तप्रसिद्ध्या तु कालाभिमानीन्द्रः । त्रिंशदपरपक्षस्याहोरात्राण्यिंशत् पूर्वपक्षस्य च सन्ति । तानेकरूपमनुभवतीति । एतत्सर्वम् ' एकेन प्रतिधानेनापिबत् ' (निरु. ५. ११) इत्यादिनिरुक्ते तद्व्याख्याने च स्पष्टमुक्तम् । तदत्र द्रष्टव्यम् ॥

अभि गन्धर्वमतृणदबुध्नेषु रजःस्वा । इन्द्रो ब्रह्मभ्य इद्वृधे ॥ ५ ॥

अभि । गन्धर्वम् । अतृणत् । अबुध्नेषु । रजःऽसु । आ । इन्द्रः । ब्रह्मऽभ्यः । इत् । वृधे ॥५॥

अयम् vइन्द्रः vगन्धर्वम् । गामुदकं धारयतीति गन्धर्वो मेघः । तम् vअभि vआ vअतृणत् सर्वतो हिंसितवान् । कुत्र । vअबुध्नेषु पदनिधानयोग्यस्थानरहितेषु[6] vरजःसु लोकेषु । अन्तरिक्षप्रदेशेष्वित्यर्थः । किमर्थम् । vब्रह्मभ्य vइत् ब्राह्मणेभ्य एव vवृधे वर्धनाय ॥ ॥ २९ ॥

निरविध्यद्गिरिभ्य आ धारयत्पक्वमोदनम् । इन्द्रो बुन्दं स्वाततम् ॥ ६ ॥

निः । अविध्यत् । गिरिऽभ्यः । आ । धारयत् । पक्वम् । ओदनम् ।
इन्द्रः । बुन्दम् । सुऽआततम् ॥ ६ ॥

---

१. घ–आदनंतरमेव; न-भ-आनंतरमेव । २. ख-त–°महीशुवं न; न-भ–°महीशुवं च । ३. त३-भ१-श–सह वै सह खिदत् । ४. घ–नाभौ अरानिव । ५. ख-त-श–सह; न-भ–साकं सह । ६. ख-त-श–पदनिध्यान° ।

अयम् vइन्द्रः vगिरिभ्यः मेघेभ्यः सकाशादुदकं निर्गमयितुं vनिराविध्यत् संप्राहरत्[1] तानेव मेघान्। किं कुर्वन्। vपक्वं परिपक्वम् vओदनं कुर्वन् मनुष्याणामर्थाय। केन साधनेनेति तदुच्यते। vबुन्दम् इषुं vस्वाततं सुष्ठु सर्वतो विस्तृतमादायेति शेषः॥

शतब्रध्न इषुस्तव सहस्रपर्ण एक इत्। यमिन्द्र चकृषे युजम्॥ ७॥

शतऽब्रध्नः। इषुः। तव। सहस्रऽपर्णः। एकः। इत्। यम्। इन्द्र। चकृषे। युजम्॥ ७॥

हे vइन्द्र vतव vइषुः vशतब्रध्नः शताग्रः vसहस्रपर्णः सहस्रसंख्याकैः पत्रैः संवृतः शीघ्रगमनाय। अपरिमितगमनो वा। स च vएक vइत् एक एव। vयं च इषुं vयुजं सहायं vचकृषे करोषि युद्धाय॥

तेन स्तोतृभ्य आ भर नृभ्यो नारिभ्यो अत्तवे। सद्यो जात ऋभुक्षिर॥८॥

तेन। स्तोतृऽभ्यः। आ। भर। नृऽभ्यः। नारिऽभ्यः। अत्तवे। सद्यः। जातः। ऋभुऽक्षिर॥८॥

vतेन इषुणा vस्तोतृभ्यः अस्मभ्यं vनृभ्यः मनुष्येभ्यः। पुत्रेभ्य इत्यर्थः। तथा vनारिभ्यः स्त्रीभ्यश्च vअत्तवे अदनाय पर्याप्तं धनम् vआ vभर आहर। vसद्यः तदानीमेव vजातः अस्माभिर्दत्तेन सोमेन प्रवृद्धः सन् हे vऋभुक्षिर। उरुः प्रभूतः स्थिरश्च संग्रामे स तथोक्तः। हे तादृशेन्द्र त्वमा भरेति समन्वयः॥

एता च्यौत्नानि ते कृता वर्षिष्ठानि परीणसा। हृदा वीळ्वधारयः॥ ९॥

एता। च्यौत्नानि। ते। कृता। वर्षिष्ठानि। परीणसा। हृदा। वीळु। अधारयः॥ ९॥

हे इन्द्र vते त्वया vएता एतानि पुरतः सर्वैर्दृश्यमानानि vवर्षिष्ठानि अतिशयेन प्रवृद्धानि vपरीणसा परितो नतानि अत एव vच्यौत्नानि[2] इति भावः[2]। भूमेः कीलवद्धारणाय vकृता कृतानि। पर्वतास्त्वया कृता इत्यर्थः। या यानि vहृदा बुद्ध्या vवीळु स्थिराणि vअधारयः। बुद्ध्या कर्तव्यानीति यान्यधारयः तानीमानीति॥

विश्वेत्ता विष्णुराभरदुरुक्रमस्त्वेषितः।
शतं महिषान्क्षीरपाकमोदनं वराहमिन्द्र एमुषम्॥ १०॥

विश्वा। इत्। ता। विष्णुः। आ। अभरत्। उरुऽक्रमः। त्वाऽईषितः।
शतम्। महिषान्। क्षीरऽपाकम्। ओदनम्। वराहम्। इन्द्रः। एमुषम्॥ १०॥

अस्या ऋचो नैरुक्तैतिहासिकमतभेदेन द्विधा योजना। नैरुक्तपक्षे तावत्। हे इन्द्र vता तानि यानि त्वया स्रष्टव्यान्युदकानि सन्ति तानि vविष्णुः व्यापनशील आदित्यः vआभरत् आभरति। लोकाय प्रयच्छतीत्यर्थः। कीदृशो विष्णुः। vउरुक्रमः बहुगतिः। किं स्वविरोधेन नेत्याह। vत्वेषितः त्वया प्रेरितः। न केवलमुदकान्येव अपि च vशतं vमहिषान् शतसंख्याकान् पशून्। महिषशब्दो गवादेरप्युपलक्षकः। अथवा शतशब्दोऽपरिमितवचनो महिष इति महन्नाम। असंख्यातान् महतो यज्ञान् यजमानेभ्य आभरत् ददातीत्यर्थः। किंच vक्षीरपाकं क्षीरपक्वम् vओदनं पायसम्। एतच्चरुपुरोडाशादेरुपलक्षकम्। तद्यजमानेभ्य आभरत्। अथवा सर्वार्थं वृष्टिप्रदानद्वारौदनं प्राहरत्। किंच vइन्द्रः[3]

---

१. घ–संप्रहरत्; त-श–संप्रहारन्; भ–संप्रहारत्। २. घ–च्यौलानि अत्युत्कृष्टानि तव बलानि।
३. ख-ग-त-न-श–नवानपींद्रो।

[v]वराहं जलपूर्णं[1] मेघं[1] हन्तीति शेषः। कीदृशं तम्। [v]एमुषम्। आ इत्यस्य स्थाने छान्दस एकारः। आमुषमुदकस्य मोषकमित्यर्थः। निरुक्तपक्ष एवम्। ऐतिहासिकपक्षे चरकब्राह्मण इतिहास आम्नायते। विष्णुर्यज्ञः। स देवेभ्य आत्मानमन्तरधात्। तमन्यदेवता नाविदन्निन्द्रस्त्ववेत्। स इन्द्रमब्रवीत्को भवानिति। तमिन्द्रः प्रत्यब्रवीदहं दुर्गाणामसुराणां च हन्ता भवांस्तु क इति। सोऽब्रवीदहं दुर्गादाहर्ता त्वं तु यदि दुर्गाणामसुराणां हन्ता ततोऽयं वराहो वाममुष[2] एकविंशत्याः[3] पुरां[3] पारेऽश्ममयीनां वसति तस्मिन्नसुराणां वसु वाममस्ति तमिमं जहीति। तस्येन्द्रस्ताः पुरो भित्त्वा हृदयमविध्यत्[4]। अधि तत्र यदासीत्तद्विष्णुराहरदिति। सोऽयमितिहासः 'अस्येदु मातुः सवनेषु' (ऋ. सं. १. ६१. ७) 'विश्वेत्ता विष्णुः' इत्याभ्यां प्रतिपादितः। तयोर्मध्ये 'अस्येदु मातुः' इत्यत्र विष्णुना हे इन्द्र त्वं दुर्गाणां हन्तेत्यात्मानं कथयसि तर्हि वाममुषं वराहमसुरं जहीत्युक्तार्थो 'विध्यद्वराहम्' इति पादेन प्रतिपादितः। इन्द्रेण च विष्णो त्वं दुर्गादाहर्तेति ब्रूषे मया पुराणि जितान्यसुरश्च घातितस्तस्य वामं वस्वानयेत्युक्तो विष्णुमूर्तिस्तस्य वराहासुरस्य धनं मुमोष। सोऽर्थः 'मुषायद्विष्णुः पचतम्' इति पादेन सूचितः। स किं पुनर्मुषितवानिति तदत्रोच्यते 'विश्वेत्ता' इति। हे इन्द्र त्वेषितस्त्वया प्रेरितो विष्णुर्यज्ञरूपी त्वेषितस्त्वं दुर्गादाहर्ता किल तर्हि त्वं तस्य धनान्याहरेति त्वया प्रेरितः सन्नुरुक्रमो भूत्वा विश्वेत्ता यानि त्वयाहर्तव्यानीत्युक्तानि यानि च तत्र स्थितानि तानि सर्वाण्याभरत् आभरतु। कानि तानीति। शतं महिषानपरिमितान् प्रशस्तान् पदार्थान् तेषां वाहनरूपान्[5] महिषान् वा क्षीरपाकमोदनं च पक्वमात्रमेवौदनं चाभरत्। 'विध्यद्वराहम्' इत्यत्रोक्तोऽर्थश्च चरमपादेनोच्यते। इन्द्रस्तु वराहं वराहारं स्वीकृतासुरसर्वस्वं वराहरूपिणं वैमुषमेमुषनामानमथवैमुषं धनानामामोषकं[6] वराहमसुरं हृदयेऽविध्यदिति शेषः॥

तुविक्षं ते सुकृतं सूमयं धनुः साधुर्बुन्दो हिरण्ययः।
उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूवृधा॥ ११॥

तुविऽक्षम्। ते। सुऽकृतम्। सुऽमयम्। धनुः। साधुः। बुन्दः। हिरण्ययः।
उभा। ते। बाहू इति। रण्या। सुऽसंस्कृता। ऋदुऽपे। चित्। ऋदुऽवृधा॥ ११॥

*एषा निरुक्त एकमपि पदं (अ)विहाय यास्केन व्याख्याता। तदेव लिख्यते—'तुविक्षं बहुविक्षेपं महाविक्षेपं वा ते सुकृतं सूमयं सुसुखं धनुः साधयिता ते बुन्दो हिरण्मयः। उभौ ते बाहू रण्यौ रमणीयौ सांग्राम्यौ[7] वर्दूपे अर्दनपातिनौ गमनपातिनौ[8] मर्मण्यर्दनवेधिनौ गमनवेधिनौ[8] वा' (निरु. ६. ३३) इति॥ ॥ ३०॥

'पुरोळाशं नः' इति दशर्चं नवमं सूक्तं काण्वस्य कुरुसुतेरार्षम्। आद्या नव गायत्र्यो दशमी बृहती। इन्द्रो देवता। तथा चानुक्रान्तं—'पुरोळाशं दश बृहत्यन्तम्' इति। सूक्तविनियोगो

---

१. ख-त१–जलपूर्णं एवं ब; ग-न-भ-श–जलपूर्णं एवं; ज्ञ-त३-४–जलपूर्णां एवं; त२–जलपूर्णांगं। २. ख-त-श–वामसुषः; ग–वाममोष; भ१–वामनुषः। ३. ख-ग-त-भ१-श–एकविंशत्या पुरा। ४. ख-त–हृदम°; ग–हृदम°; श–हृदम°। ५. ग–आहाररूपान्।। ६. ख-त–धनानामोषकं; ग–इन्धनानां मोषकं। ७. ज्ञ-त१-न-भ१–संग्राम्यौ। ८. ख-ज्ञ-त१-२–गमनपातिनौ शब्दपातिनौ दूरपातिनौ वा मर्मण्यर्दनवेधिनौ गमनवेधिनौ शब्दवेधिनौ दूरवेधिनौ। *घ-मु-पुस्तकयोरस्य मन्त्रस्य भाष्यमेवं विद्यते–हे इंद्र ते तव धनुः तुविक्षं महाक्षेपं सुकृतं सूमयं सुसुखं च। ते बुंदः इषुः साधुः हिरण्ययः हिरण्मयः। ते उभा उभौ बाहू रण्या रमणीयौ सुसस्कृता सुष्ठुलंकृतौ ऋदूपे चित् संग्रामे अर्दनपातिनौ ऋदूवृधा हनवर्धनौ।

लैङ्गिकः । महाव्रते निष्केवल्ये गायत्रतृचाशीतावाद्यास्तिस्र ऋचः । तथा च सूत्रितं—'पुरोळाश नो अन्धस इति तिस्रः' (ऐ. आ. ५. २. ३) इति ॥

पुरोळाशं नो अन्धस इन्द्र सहस्रमा भर । शता च शूर गोनाम् ॥ १ ॥

पुरोळाशम् । नः । अन्धसः । इन्द्र । सहस्रम् । आ । भर । शता । च । शूर । गोनाम् ॥ १

हे ᵛशूर[1] ᵛइन्द्र ᵛपुरोळाशं पुरो दीयमानमेतत्संज्ञकम् ᵛअन्धसः अन्नं[2] स्वीकृत्य ᵛगोनां ग ᵛसहस्रं ᵛशता शतानि ᵛच ᵛनः[3] अस्मभ्यम् ᵛआ ᵛभर आहर। अथवा[3] नोऽस्मभ्यं पुरतो दीयमा मन्धसोऽन्धो व्यञ्जनं सहस्रं सहस्रसंख्याकं गोसहस्रं चाहरेति योज्यम् ॥

आ नो भर व्यञ्जनं गामश्वमभ्यञ्जनम् । सचा मना हिरण्यया ॥ २ ॥

आ । नः । भर । विऽअञ्जनम् । गाम् । अश्वम् । अभिऽअञ्जनम् । सचा । मना । हिरण्यया ॥ २

हे इन्द्र त्वं ᵛनः अस्मभ्यं ᵛव्यञ्जनं ᵛगामश्वमभ्यञ्जनं तैलं च ᵛआ[4] ᵛभर। ᵛमना मननीयाभि ᵛहिरण्यया हिरण्मयान्युपकरणानि[4] ᵛसचा सहाभरेति ॥

उत नः कर्णशोभना पुरूणि धृष्णवा भर । त्वं हि शृण्विषे वसो ॥ ३ ॥

उत । नः । कर्णऽशोभना । पुरूणि । धृष्णो इति । आ । भर ।
त्वम् । हि । शृण्विषे । वसो इति ॥ ३ ॥

ᵛउत अपि च ᵛनः अस्मभ्यं ᵛकर्णशोभना कर्णाभरणानि ᵛपुरूणि बहूनि ᵛआ ᵛभर। हे ᵛधृष्ण धर्षकेन्द्र ᵛवसो वासयितरिन्द्र ᵛत्वं ᵛहि[5] खलु ᵛशृण्विषे श्रूयसे। किमिति। उदारोऽयमिन्द्र इति

नकीं वृधीक इन्द्र ते न सुषा न सुदा उत । नान्यस्त्वच्छूर वाघतः ॥ ४ ॥

नकीम् । वृधीकः । इन्द्र । ते । न । सुऽसाः । न । सुऽदाः । उत ।
न । अन्यः । त्वत् । शूर । वाघतः ॥ ४ ॥

हे ᵛइन्द्र ᵛते त्वत्तोऽन्यः कश्चित् ᵛवृधीकः वर्धयिता ᵛनकीं नैव। तथा ᵛसुषाः सुष्ठु संभ संग्रामादौ त्वत्तोऽन्यः ᵛन। ᵛउत अपि च ᵛसुदाः सुदाता ᵛन। तथा हे ᵛशूर ᵛत्वत् त्वत्तोऽन्य ᵛवाघतः। ऋत्विग्नामैतत्। ऋत्विजो यजमानस्य नेता ᵛनान्यः अस्ति त्वामृते ॥

नकीमिन्द्रो निकर्तवे न शक्रः परिशक्तवे । विश्वं शृणोति पश्यति ॥ ५ ॥

नकीम् । इन्द्रः । निऽकर्तवे । न । शक्रः । परिऽशक्तवे । विश्वम् । शृणोति । पश्यति ॥ ५

अयम् ᵛइन्द्रः ᵛनिकर्तवे निकर्तुं ᵛनकीं नैव शक्यः। तथा ᵛशक्रः शक्तोऽयं ᵛपरिशक्तवे परिभावाय ᵛन शक्यत इति। स तु ᵛविश्वं ᵛशृणोति ᵛपश्यति च ॥ ॥ ३१ ॥

स मन्युं मर्त्यानामदब्धो नि चिकीषते । पुरा निदश्चिकीषते ॥ ६ ॥

---

१. ख-ग-त-न-भ-श–'शूर' नास्ति। २. घ–सोमं। ३. ख-ग-त-श–'नः ··· अथवा' नास्ति ४. खं-त-न-भ-श–'आ' नास्ति। ५. ख-त-न-भ१-श–हिरण्यमयान्यु°। ६. ख-ग-त-न-भ-श–'हि नास्ति। ७. ख-ग-त-न-भ–परिकर्तवे।

सः । मन्युम् । मर्त्यानाम् । अदब्धः । नि । चिकीषते । पुरा । निदः । चिकीषते ॥ ६ ॥

vसः इन्द्रः vमन्युं क्रोधम् । केषाम् । vमर्त्यानाम् । vअदब्धः केनाप्यहिंसितः सन् vनि vचिकीषते निकरोति । किं मन्युं प्राप्यैव नेत्याह । vनिदः निन्दायाः vपुरा पूर्वमेव vचिकीषते । यदा तं निन्दितुमिच्छति कश्चित्ततः पूर्वमेव तं निकरोतीत्यर्थः ॥

क्रत्व इत्पूर्णमुदरं तुरस्यास्ति विधतः । वृत्रघ्नः सोमपात्नः ॥ ७ ॥

क्रत्वः । इत् । पूर्णम् । उदरम् । तुरस्य । अस्ति । विधतः । वृत्रऽघ्नः । सोमऽपात्नः ॥ ७ ॥

vतुरस्य त्वरमाणस्य vवृत्रघ्नः वृत्रं हतवतः vसोमपात्नः सोमपातुः vउदरं[1] vक्रत्व vइत् कर्मणैव vपूर्णम् vअस्ति भवति । कस्य कर्मणेति उच्यते । vविधतः परिचरतो यजमानस्य । यतः परिचरणाभावे तस्य कुक्षिपूर्त्यभावोऽतस्तत्पूर्तये परिचरतेति शेषः ॥

त्वे वसूनि संगता विश्वा च सोम सौभगा । सुदात्वपरिह्वृता ॥ ८ ॥

त्वे इति । वसूनि । सम्ऽगता । विश्वा । च । सोम । सौभगा । सुऽदातु । अपरिऽह्वृता ॥८॥

हे इन्द्र vत्वे त्वयि vवसूनि धनान्यस्मदिष्टानि vसंगता संगतानि । तथा हे vसोम सोमवन्निन्द्र त्वयि vविश्वा सर्वाणि vसौभगा सौभाग्यानि संगतानि । तथा vसुदातु सुदानानि vअपरिह्वृता अकुटिलानि । अतस्तानि कुर्विति भावः । यद्वा । इन्द्रः सोमं पीत्वा सोम इत्यभिहितः सोमश्रुतेः ॥

त्वामिद्धवयुर्मम कामो गव्युर्हिरण्ययुः । त्वामश्वयुरेषते ॥ ९ ॥

त्वाम् । इत् । यवऽयुः । मम । कामः । गव्युः । हिरण्यऽयुः ।
त्वाम् । अश्वऽयुः । आ । ईषते ॥ ९ ॥

vत्वामित् त्वामेव vएषते । किम् । vमम vकामः । स कीदृशः । vयवयुः यवेच्छुः सन्नेषते । तथा vगव्युः सन्नेषते[2] । तथा vहिरण्ययुः च सन्नेषते । तथा vअश्वयुः च सन्नेषते । तं काममासेच्छं कुर्विति भावः ॥

तवेदिन्द्राहमाशसा हस्ते दात्रं चना ददे ।
दिनस्य वा मघवन्त्संभृतस्य वा पूर्धि यवस्य काशिना ॥ १० ॥

तव । इत् । इन्द्र । अहम् । आऽशसा । हस्ते । दात्रम् । चन । आ । ददे ।
दिनस्य । वा । मघऽवन् । सम्ऽभृतस्य । वा । पूर्धि । यवस्य । काशिना ॥ १० ॥

हे vइन्द्र[3] vतवेत् तवैव vआशसा आशंसनेन त्वमस्मदीयं क्षेत्रं यवसमृद्धं करोषीत्याशंसनेन vहस्ते vदात्रं vचन लवनसाधनं दात्रमपि[4] vआ vददे स्वीकरोमि । किमनेन प्रयासेन । vदिनस्य vवा पूर्वमेव छिन्नस्य वा यवस्य vसंभृतस्य[5] vवा पूर्वमेव छित्वा निष्कृतस्य राशीकृतस्य वा vयवस्य vकाशिना मुष्टिना vपूर्धि पूरय । आशंसनं देहि च[6] ॥ ॥ ३२ ॥

---

१. ख-त-न-भ१-२-श-उदकं । २. त-भ१-श-सत्वेषु ते । ३. घ-मघवन्निद्र । ४. ख-घ-त-भ-श-दात्रमथ । ५. ख-ग-त-न-भ-श-' संभृतस्य ' नास्ति । ६. ख-व; ग-त-न-भ-श- वा ।

'अयं कृत्नुः' इति नवर्चं दशमं सूक्तम्। अत्रेयमनुक्रमणिका—'अयं कृत्नुर्नव कृत्नुर्भार्गवः सौम्यमन्त्यानुष्टुप्' इति। भार्गवः कृत्नुर्ऋषिः। नवम्यनुष्टुप्। अष्टौ गायत्र्यः। सोमो देवता। विनियोगो लैङ्गिकः॥

अयं कृत्नुरगृभीतो विश्वजिदुद्भिदित्सोमः। ऋषिर्विप्रः काव्येन॥ १॥

अयम्। कृत्नुः। अगृभीतः। विश्वऽजित्। उत्ऽभित्। इत्। सोमः।
ऋषिः। विप्रः। काव्येन॥ १॥

vअयं vसोमः vकृत्नुः कर्ता सर्वस्य vअगृभीतः अन्यैरगृहीतः vविश्वजित् सर्वस्य जेता vउद्भित् फलस्योद्भेदकः। अथवा विश्वजिदुद्भिदौ सोमयागौ। तयोर्निष्पादकत्वात्तद्रूपः। vऋषिः ज्ञानवान् vविप्रः मेधावी विप्रवत् पूज्यो विशेषेण पूरको वा। एवंमहानुभावः सोमः vकाव्येन स्तोत्रेण स्तुत्यो भवतीति शेषः॥

अभ्यूर्णोति यन्नग्नं भिषक्ति विश्वं यत्तुरम्। प्रेमन्धः ख्यन्निः श्रोणो भूत्॥२॥

अभि। ऊर्णोति। यत्। नग्नम्। भिषक्ति। विश्वम्। यत्। तुरम्।
प्र। ईम्। अन्धः। ख्यत्। निः। श्रोणः। भूत्॥ २॥

अयं सोमः vयन्नग्नम् अस्ति तत् vअभ्यूर्णोति आच्छादयति। यन्नग्नमिव विफलं वर्तते तदाच्छादयति[1] फलेन। अथवा वस्त्रं जनयन्नाच्छादयति। तथा vयत् vतुरम् आतुरं रुग्णं vविश्वं तत् vभिषक्ति भिषज्यति। यज्ञद्वारा स्वर्गसाधनेनौषधरूपेण[2] च शरीरसिद्धिसाधनश्च। vअन्धः सन् अन्धोऽपि vप्र vख्यत् पश्यति। vश्रोणः[3] अपि[3] पङ्गुरपि[4] vनिः vभूत् निर्भवति निर्गच्छति॥

त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः। उरु यन्तासि वरूथम्॥ ३॥

त्वम्। सोम। तनूकृत्ऽभ्यः। द्वेषःऽभ्यः। अन्यऽकृतेभ्यः। उरु। यन्ता। असि। वरूथम्॥३॥

हे vसोम vत्वं vतनूकृद्भ्यः कृशीकुर्वद्भ्यः। अथवाङ्गानां विच्छेदकेभ्यः vअन्यकृतेभ्यः vद्वेषोभ्यः शत्रुकृतेभ्योऽप्रियेभ्यः। कृत्याभ्य इत्यर्थः। vवरूथं वरकं[5] रक्षणम् vउरु vयन्तासि[6] भवसि स्तोतॄणाम्। 'अन्यकृतानि हि रक्षांसि' इति ब्राह्मणम्॥

त्वं चित्ती तव दक्षैर्दिव आ पृथिव्या ऋजीषिन्। यावीरघस्य चिद्द्वेषः॥४॥

त्वम्। चित्ती। तव। दक्षैः। दिवः। आ। पृथिव्याः। ऋजीषिन्।
यावीः। अघस्य। चित्। द्वेषः॥ ४॥

हे vऋजीषिन् तृतीयसवनगतेनर्जीषेण तद्वन् सोम vत्वं vतव vचित्ती चित्या प्रज्ञया vदक्षैः बलैश्च vदिव vआ दिवश्च। आ इति चार्थे। vपृथिव्याः आ पृथिव्याश्च सकाशात् vअघस्य vचित् अस्माकमाहन्तुरपि vद्वेषः शत्रोः कृत्यां vयावीः पृथक्कुरु॥

---

१. ख-ग-त-न-श-तत्तदा°। २. ख-°साधनानीमौषध°; ग-°साधनानां नाम्नौषध°; घ-ङ्ग-त२-°साधनान ईमौषध°; त१-°साधनानिमौषध°; त३-४-न-भ-°साधनाननौषध°; श-°साधनानुनौषध°। ३. ख-घ-ङ्ग-त१-२-श्रोणः श्रोणोपि। ४. ग-त३-४-श-'पंगुरपि' नास्ति। ५. ग-वारकं। ६. स्व-घ-ङ्ग-त१-२-यंतासि बहुकृत्।

अर्थिनो यन्ति चेदर्थं गच्छानिद्दुषो रातिम् । ववृज्युस्तृष्यतः कामम् ॥ ५ ॥

अर्थिनः । यन्ति । च । इत् । अर्थम् । गच्छान् । इत् । ददुषः । रातिम् ।
ववृज्युः । तृष्यतः । कामम् ॥ ५ ॥

vअर्थिनः धनानि कामयमानाः vयन्ति vचेत् यन्ति च vअर्थं प्रति । गत्वा च vददुषः दातुः vरातिं दानं vगच्छानित् गच्छन्ति च । गतेषु मध्ये यं हे सोम त्वमनुगृह्णासि तस्य vतृष्यतः भिक्षमाणस्य vकामं vववृज्युः । पुनः कामानावर्जयन्ति[1] । तावत्पर्यन्तं पूरयन्तीत्यर्थः ॥ ॥ ३३ ॥

विदद्यत्पूर्व्यं नष्टमुदीमृतायुमीरयत् । प्रेमायुंस्तारीदतीर्णम् ॥ ६ ॥

विदत् । यत् । पूर्व्यम् । नष्टम् । उत् । ईम् । ऋतऽयुम् । ईरयत् ।
प्र । ईम् । आयुः । तारीत् । अतीर्णम् ॥ ६ ॥

vयत् यदा vपूर्व्यं पुराणं vनष्टं स्वकीयं धनं vविदत् लभते नष्टधनः vईम् एनम् vऋतायुं नष्टधनलाभार्थं यज्ञकामम् vउत् vईरयत् प्रेरयति । धनं साधयतीत्यर्थः[2] ॥

सुशेवो नो मृळयाकुरद्दक्षक्रतुरवातः । भवा नः सोम शं हृदे ॥ ७ ॥

सुऽशेवः । नः । मृळयाकुः । अद्दक्षऽक्रतुः । अवातः । भव । नः । सोम । शम् । हृदे ॥७॥

हे vसोम पीतस्त्वं vनः अस्माकं vहृदे हृदये वर्तमानः vसुशेवः सुसुखः vमृळयाकुः सुखयिता vअद्दक्षक्रतुः अप्रमत्तप्रज्ञः vअवातः अगमनश्च [तव हृदये पीताय हृदय ?] सं (?vशं) भव । अपरो नः पूरणः ॥

मा नः सोम सं वीविजो मा वि बीभिषथा राजन् । मा नो हार्दि त्विषा वधीः ॥८॥

मा । नः । सोम । सम् । वीविजः । मा । वि । बीभिषथाः । राजन् ।
मा । नः । हार्दि । त्विषा । वधीः ॥ ८ ॥

हे vसोम पीतस्त्वं vनः अस्मान् vमा vसं vवीविजः । चलिताङ्गान् मा कार्षीः । हे vराजन् सोम अस्मान् vमा vवि vबीभिषथाः भीतान् मा कुरु । vनः अस्माकं vहार्दि हृदयं[3] vत्विषा दीप्त्या vमा vवधीः ॥

अव यत्स्वे सधस्थे देवानां दुर्मतीरीक्षे ।
राजन्नप द्विषः सेध मीढ्वो अप स्निधः सेध ॥ ९ ॥

अव । यत् । स्वे । सधऽस्थे । देवानाम् । दुःऽमतीः । ईक्षे ।
राजन् । अप । द्विषः । सेध । मीढ्वः । अप । स्निधः । सेध ॥ ९ ॥

---

१. ख-त-न–कामानां वर्जयंति; घ–कामानावर्जयति; भ–कामानां वर्जयंती; श–कामानां वर्जयेति ।
२. ख-ज्ञ-त१-२–साधयतीत्यर्थः । तदा ईं अतीर्णमेनं यज्ञारंभिणं आयुः जीवनं प्र तारीत् प्रकर्षेण वर्धयेत् । ३. ख-ग-त-न-भ-श–हृदये ।

vस्वे vसधस्थे स्वकीये सहस्थाने गृहे vदेवानां vदुर्मतीः दुर्मतयो न प्रविशन्त्विति। vयत् यदा vअव vईक्षे अहं त्वं वेक्षसे तदा हे vराजन् vद्विषः अस्मद्द्वेष्टॄन् vअप vसेध। हे vमीढ्वः सोमरसस्य सेक्तः vस्निधः हिंसकान् vअप vसेध। हिन्धीत्यर्थः ॥ ॥ ३४ ॥

'नह्यन्यम्' इति दशर्चमेकादशं सूक्तम्। अत्रेयमनुक्रमणिका—'न ह्यन्यं दशैकधूनौंधसो गायत्रेऽन्त्या दैवी त्रिष्टुप्' इति। एकधूर्नाम नोधसः पुत्र ऋषिः। अन्त्या त्रिष्टुप्। सा च देवदेवत्या[1] शिष्टा गायत्र्य ऐन्द्र्यः। द्वितीये पर्याये मैत्रावरुणशस्त्र आदितोऽष्टर्चः। सूत्रितं च—'नह्यन्यं बळाकरमित्यष्टौ' (आश्व. श्रौ. ६. ४) इति। महाव्रते निष्केवल्ये गायत्रतृचाशीतावाद्या विनियुक्ता। तथा च पञ्चमारण्यके शौनकः—'नह्यन्यं बळाकरमित्येतां प्रत्यवदधाति' (ऐ. आ. ५. २. ३) इति ॥

नह्यन्यं बळाकरं मर्डितारं शतक्रतो। त्वं न इन्द्र मृळय ॥ १ ॥

नहि। अन्यम्। बळा। अकरम्। मर्डितारम्। शतक्रतो इति शतऽक्रतो।
त्वम्। नः। इन्द्र। मृळय ॥ १ ॥

हे vशतक्रतो त्वत्तः vअन्यं vमर्डितारं सुखयितारं vबळा बट् सत्यं vन vअकरं न करोमि। तस्माद्धे vइन्द्र vत्वं vनः अस्मान् vमृळय ॥

यो नः शश्वत्पुराविथामृधो वाजसातये। स त्वं न इन्द्र मृळय ॥ २ ॥

यः। नः। शश्वत्। पुरा। आविथ। अमृधः। वाजऽसातये।
सः। त्वम्। नः। इन्द्र। मृळय ॥ २ ॥

vयः[2] vअमृधः अहिंसकः vनः अस्मान् vवाजसातये अन्नलाभाय vपुरा पूर्वम् vआविथ रक्षितवान्। हे vइन्द्र vस vत्वं vनः अस्मान् vशश्वत् सदा vमृळय सुखय[2] ॥

किमङ्ग रध्रचोदनः सुन्वानस्याविते दसि। कुवित्स्विन्द्र णः शकः ॥ ३ ॥

किम्। अङ्ग। रध्रऽचोदनः। सुन्वानस्य। अविता। इत्। असि।
कुवित्। सु। इन्द्र। नः। शकः ॥ ३ ॥

हे vइन्द्र त्वं vरध्रचोदनः। रध्रं राधकं चोदयतीति रध्रचोदनः। तादृशस्त्वं vसुन्वानस्य vअवितेदसि रक्षक एव भवसि। अतः vनः अस्माकं vकुवित् बहु vसु सुष्ठु vशकः अशकः शक्तो भव[3]। बहु धनं कुर्वित्यर्थः। अस्मान् वा बहु कुर्विति ॥

इन्द्र प्र णो रथमव पश्चाच्चित्सन्तमद्रिवः। पुरस्तादेनं मे कृधि ॥ ४ ॥

---

१. ख-त-श-देवत्या। २. ख-त-न-भ१-२-पुस्तकेष्वस्य मन्त्रस्य भाष्यं न विद्यते; ग-यस्त्वं नोस्मान् शश्वत् सर्वदा पुरा रक्षिथ अन्नलाभाय स त्वं नोस्मान् मृळय। त्वं च कीदृशः अमृधः अहिंसितः; श-य इंद्रः नोस्मान् पूर्वं शश्वद्बहुवारं वाजसातये अन्नलाभाय मृधः संग्रामात् आविथ रक्षितवानसि स तादृशस्त्वं इन्द्र नः अस्मान् मृळय सुखय; ज्ञ-मु-हे इन्द्र यस्त्वममृधः शत्रुभिरहिंसितः सन् पुरा पूर्वस्मिन् काले शश्वत् बहुवारं नोस्मानाविथ रक्षितवानसि स त्वं नोस्मान् वाजसातयेऽन्नदानार्थं यद्वा अन्नसंभजनार्थं मृळय सुखय। ३. ख-त१-२-भ-अभवः।

इन्द्र । प्र । नः । रथम् । अव । पश्चात् । चित् । सन्तम् । अद्रिऽवः ।
पुरस्तात् । एनम् । मे । कृधि ॥ ४ ॥

हे vइन्द्र vनः vरथं vप्र vअव प्ररक्ष । कीदृशं रथम् । vपश्चाच्चित्सन्तम् । चिदप्यर्थे । अस्मत्समानरथानां पश्चाद्भूतमपि vएनं vमे रथं हे vअद्रिवः वज्रवन्निन्द्र vपुरस्तात् वर्तमानं vकृधि कुरु ॥

हन्तो नु किमाससे प्रथमं नो रथं कृधि । उपमं वाजयु श्रवः ॥ ५ ॥

हन्तो इति । नु । किम् । आससे । प्रथमम् । नः । रथम् । कृधि । उपऽमम् । वाजऽयु । श्रवः ॥५॥

हन्तेत्येतदादि मुख्यकृदामन्त्रितेन समानम् । vहन्त[1] इन्द्र[1] vनु इदानीं vकिं त्वं तूष्णीम् vआससे । तत्र किं करोमीति चेदुच्यते[2] । vनः vरथं vप्रथमं सर्वेषां मुख्यं vकृधि कुरु । vवाजयु[3] अस्माकमन्नमिच्छत्[3] vश्रवः अन्नं हविर्लक्षणम् vउपमम् । अन्तिकनामैतत् । तवान्तिकभूतं वर्तत इति शेषः । यस्मादेवं तस्माद्रथमस्मदीयं प्रथमं कृधीति ॥ ॥ ३५ ॥

अर्वा नो वाजयुं रथं सुकरं ते किमित्परि । अस्मान्त्सु जिग्युषस्कृधि ॥ ६ ॥

अर्वा । नः । वाजऽयुम् । रथम् । सुऽकरम् । ते । किम् । इत् । परि ।
अस्मान् । सु । जिग्युषः । कृधि ॥ ६ ॥

हे इन्द्र vनः vवाजयुम् अन्नेच्छुं vरथम् vअव रक्ष संग्रामे । vते तव vकिमित् किमपि सर्वकर्तव्यजातं vपरि परितः vसुकरं सुखेन कर्तव्यम् । तव कर्तुमशक्यं न किंचिदस्ति । यस्मादेवं तस्मात्[4] vसु vजिग्युषः सुष्ठु जेतॄन्[5] कुरु संग्रामे ॥

इन्द्र दृह्यस्व पूरसि भद्रा त एति निष्कृतम् । इयं धीर्ऋत्वियावती ॥ ७ ॥

इन्द्र । दृह्यस्व । पूः । असि । भद्रा । ते । एति । निःऽकृतम् । इयम् । धीः । ऋत्वियऽवती ॥७॥

हे vइन्द्र त्वं vदृह्यस्व दृढो भव संग्रामे । त्वं vपूरसि पुरमसि । यथा पुरमविचलितं तद्वत्त्वमसि । अथवा । अस्मदीये यज्ञे दृढो भव । त्वं पुनरन्ययज्ञजिगमिषुर्मा भूः । त्वं पूः पूरकः कामानामसि । किमत्र विद्यत इति चेदुच्यते । vनिष्कृतं निष्कर्तारं vते त्वां vभद्रा कल्याणी vइयं vधीः स्तुतिः क्रिया वा vऋत्वियावती । ऋतुशब्दः कालोपलक्षकः । स्वकालोपेता सती vएति गच्छति । यद्वा । ते निष्कृतं स्थानमेति ॥

मा सीमवद्य आ भागुर्वी काष्ठा हितं धनम् । अपावृक्ता अरत्नयः ॥ ८ ॥

मा । सीम् । अवद्ये । आ । भाक् । उर्वी । काष्ठा । हितम् । धनम् । अपऽआवृक्ताः । अरत्नयः ॥८॥

vमा[6] अस्मान्[6] vसीं सर्वतः vअवद्यः निन्दा vआ vभाक् माभजतु । प्राप्नोतु न कुतश्चित् । पापरहितान् कुर्वित्यर्थः । किंच vउर्वी vकाष्ठा बह्वन्तरालमाज्यन्तः । 'आज्यन्तोऽपि काष्ठोच्यते क्रान्त्वा स्थिता भवति[7]' (निरु. २. १५) इति यास्कः । तत्र vहितं निहितं शत्रुसंबन्धि vधनम् अस्माकं भवत्वित्यर्थः । vअरत्नयः अरममाणाः शत्रवः vअपावृक्ताः[8] सन्त्विति शेषः ॥

---

१. ग–हे इन्द्र; घ–हंतो हे इंद्र । २. ख-ग-त-श–चेत् । ३ घ–वाजयुः ···· °मिच्छन् । ४. न-भ–तस्मादस्मान् । ५. घ–जेतॄनस्मान् कृधि । ६. ख-त–तस्मात् । ७. ख-त-भ-श–भवंति । ८. ख–अपावृताः; ज्ञ-त३-४-भ–अपावृत्ताः ।

तुरीयं नाम यज्ञियं यदा करस्तदुश्मसि । आदित्पतिर्न ओहसे ॥ ९ ॥

तुरीयम् । नाम । यज्ञियम् । यदा । करः । तत् । उश्मसि । आत् । इत् । पतिः । नः । ओहसे ॥९॥

हे इन्द्र त्वं यज्ञियं यज्ञसंबन्धि[1] तुरीयं चतुर्थं नाम यदा करः करोषि तदुश्मसि कामयामहे । आदित् अनन्तरमेव नामकामानन्तरमेव पतिः पालकस्त्वं नः अस्मान् ओहसे वहसि प्रापयसि । नक्षत्रनाम गुह्यं नाम प्रकाशं नामेति त्रीणि नामानि सोमयाजीति तुरीयं नाम तच्च यज्ञियम् ॥

अवीवृधद्वो अमृता अमन्दीदेकद्यूर्देवा उत याश्च देवीः ।
तस्मा उ राधः कृणुत प्रशस्तं प्रातर्मक्षू धियावसुर्जगम्यात् ॥ १० ॥

अवीवृधत् । वः । अमृताः । अमन्दीत् । एकऽद्यूः । देवाः । उत । याः । च । देवीः ।
तस्मै । ऊँ इति । राधः । कृणुत । प्रऽशस्तम् । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥१०॥

इयं वैश्वदेवी । हे देवाः हे अमृताः अमरणाः वः युष्मानयम् अवीवृधत् वर्धयति स्तुत्या अमन्दीत् तर्पयति सोमेन[2] एकद्यूः ऋषिरहम् । उत अपि च हे देवीः देव्यो देवपत्न्यः याश्च यूयं स्थ युष्मानप्यवीवृधदमन्दीच्च । तस्मै राधः धनं प्रशस्तं प्रवृद्धं कृणुत कुरुत । उ इति पूरण एवकारार्थो वा । प्रातः प्रातरेव मक्षु क्षिप्रं धियावसुः कर्मधन इन्द्रः जगम्यात् आगच्छतु । इन्द्रस्य देवस्वामित्वादाधिक्यद्योतनाय पुनरभिधानम् ॥ ॥ ३६ ॥ ॥ ८ ॥

नवमेऽनुवाके त्रयोदश सूक्तानि । तत्र ' आ तू न इन्द्र ' इति नवर्चं प्रथमं सूक्तं कण्वपुत्रस्य कुसीदिन आर्षं गायत्रमैन्द्रम् । तथा चानुक्रम्यते—' आ तू नो नव कुसीदी काण्वः ' इति । महाव्रते निष्केवल्ये गायत्रतृचाशीतावेतदादिके द्वे सूक्ते । तथैव पञ्चमारण्यके सूत्रितं च शौनकेन–'आ तू न इन्द्र क्षुमन्तमिति सूक्ते सूददोहाः' (ऐ. आ. ५. २. ३) इति । द्वितीये पर्याये मैत्रावरुणशस्त्र आद्यस्तृचः स्तोत्रियः । सूत्रितं च—' आ तू न इन्द्र क्षुमन्तमा प्र द्रव परावतः ' (आश्व. श्रौ. ६. ४) इति ॥

आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय । महाहस्ती दक्षिणेन ॥ १ ॥

आ । तु । नः । इन्द्र । क्षुऽमन्तम् । चित्रम् । ग्राभम् । सम् । गृभाय । महाऽहस्ती । दक्षिणेन ॥१॥

हे इन्द्र महाहस्ती महाहस्तवान् त्वं[3] तु[3] तदानीमेव नः अस्मभ्यं दातुं क्षुमन्तं शब्दवन्तम् । स्तुत्यमित्यर्थः[4] । चित्रं चायनीयं ग्राभं ग्राहकं ग्रहणार्हं वा धनं दक्षिणेन हस्तेन आ सं गृभाय आभिमुख्येन संगृहाण ॥

विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् । तुविमात्रमवोभिः ॥ २ ॥

विद्म । हि । त्वा । तुविऽकूर्मिम् । तुविऽदेष्णम् । तुविऽमघम् । तुविऽमात्रम् । अवःऽभिः ॥२॥

हे इन्द्र त्वा त्वां विद्म हि जानीमः खलु । कीदृशमिति । तुविकूर्मिं बहुकर्माणं तुविदेष्णं बहुप्रदेयं तुविमघं[5] बहुधनं तुविमात्रं बहुप्रमाणम् अवोभिः युक्तम् ॥

नहि त्वा शूर देवा न मर्तासो दित्संन्तम् । भीमं न गां वारयन्ते ॥ ३ ॥

---

१. ख-घ-त-न-भ-श–यज्ञसंबंधिनं । २. त-न-श–सोमेनैकः; भ–मासेनैकः । ३. ख-त-न-भ-श–' त्वं तु ' नास्ति । ४. भ–स्तुतमि° । ५. ख-न–तुवीमघं ।

नहि । त्वा । शूर । देवाः । न । मर्तासः । दित्सन्तम् । भीमम् । न । गाम् । वारयन्ते ॥३॥

हे [v]शूर इन्द्र [v]त्वा त्वां [v]दित्सन्तं दातुमिच्छन्तं [v]देवाः[1] [v]नहि [v]वारयन्ते न निवारयन्ति। तथा [v]मर्तासः मर्त्या अपि [v]न वारयन्ते। [v]भीमं [v]न [v]गां भयजनकं[2] वृषभं[2] यवसे प्रवृत्तमिव। तं यथा वारयितुं न शक्नुवन्ति तद्वत् ॥

प्रथमे पर्यायेऽच्छावाकशस्त्रे 'एतो न्विन्द्रम्' इति तृचः। तथा च सूत्रितम्—'एतो न्विन्द्रं स्तवामेशानं मा नो अस्मिन्मघवन्' (आश्व. श्रौ. ६. ४) इति ॥

एतो न्विन्द्रं स्तवामेशानं वस्वः स्वराजम्। न राधसा मर्धिषन्नः ॥ ४ ॥

एतो इति। नु। इन्द्रम्। स्तवाम। ईशानम्। वस्वः। स्वऽराजम्।
न। राधसा। मर्धिषत्। नः ॥ ४ ॥

हे अस्मदीया जनाः [v]एतो आगच्छतैव [v]नु क्षिप्रम्। किं कर्तुम्। [v]स्तवाम [v]इन्द्रम्। कीदृशं तम्। [v]वस्वः वसुनः धनस्य [v]ईशानं स्वामिनं [v]स्वराजं स्वयमेव राजमानं[3] स्वर्गे[4] राजमानं[4] वा। [v]नः अस्मान् इन्द्रेणानुगृहीतान् [v]राधसा धनेनान्यो धनी [v]न [v]मर्धिषत् न बाधताम्। आख्यानामस्मत्समानानामप्याढ्यत्वाय स्तवामेत्यर्थः ॥

प्र स्तोषदुप गासिषच्छ्रवत्सामं गीयमानम्। अभि राधसा जुगुरत् ॥५॥

प्र। स्तोषत्। उप। गासिषत्। श्रवत्। सामं। गीयमानम्। अभि। राधसा। जुगुरत् ॥५॥

*पूर्वमन्त्रे स्तवामेत्युक्तम्। तदेव स्तोत्रमिन्द्रः [v]प्र [v]स्तोषत्। प्रस्तुत्वा च [v]गासिषत्[1] उपगानं च करोतु। तदर्थं [v]गीयमानं [v]साम स्तोत्रं [v]श्रवत् शृणोतु। [v]राधसा धनेन च[6] युक्तोऽस्मान्[6] [v]अभि [v]जुगुरत् अभिगृणातु स्वीकुर्विति ॥ ॥ ३७ ॥

आ नो भर दक्षिणेनाभि सव्येन प्र मृश। इन्द्र मा नो वसोर्निर्भाक् ॥६॥

आ। नः। भर। दक्षिणेन। अभि। सव्येन। प्र। मृश। इन्द्र। मा। नः। वसोः। निः। भाक् ॥६॥

हे [v]इन्द्र [v]नः अस्मभ्यम् [v]आ [v]भर। आहृत्य [v]दक्षिणेन [v]सव्येन च हस्तेनोभाभ्यां हस्ताभ्याम् [v]अभि [v]प्र [v]मृश। प्रयच्छेत्यर्थः। [v]नः अस्मान् [v]वसोः धनात् [v]मा [v]निर्भाक् मा निर्भाक्षीः ॥

द्वितीये पर्यायेऽच्छावाकशस्त्रे 'उप क्रमस्व' इति तृचः। सूत्रितं च—'उप क्रमस्वा भर धृषता तदस्मै नव्यम्' (आश्व. श्रौ. ६. ४) इति ॥

उप क्रमस्वा भर धृषता धृष्णो जनानाम्। अदाशूष्टरस्य वेदः ॥ ७ ॥

उप। क्रमस्व। आ। भर। धृषता। धृष्णो इति। जनानाम्। अदाशूःऽतरस्य। वेदः ॥ ७ ॥

---

१. ख-त-न-भ-श–'देवाः' नास्ति। २. ख-त-श–भयजनकं वृष्णं; भ–जनभयजनकं वृष्णं। ३. ख-ज्ञ-त१-२–'राजमानं' नास्ति। ४. त३-४-श–'स्वर्गे राजमानं' नास्ति। * ग–पुस्तकेऽस्य मन्त्रस्य भाष्यमेवं विद्यते–सोता इन्द्रं प्रस्तोतु। उपगासिषदुपगानं च करोतु। गीयमानं साम श्रवत् शृणोतु। राधसा धनेन प्रसाधनेन वा युक्तोऽस्मानभिजुगुरदभिगृणातु स्वीकुर्विति। ५. भ३–उपगासिषत्। ६. त-भ१–चायुक्तो°; ग-श–वायुक्तो°।

हे इन्द्र त्वम् ᵛउप ᵛक्रमस्व धनं प्रत्युपगच्छ। प्रवृत्तो भव वा दातुम्। हे ᵛवृष्णो धर्षक शत्रूणां ᵛधृषता धृष्टेन चेतसा युक्तः सन् ᵛआ ᵛभर आहर च। कस्य धनमाहरेति उच्यते। ᵛजनानां मध्ये ᵛअदाशूष्टरस्य अत्यन्तमदातृतमस्य ᵛवेदः धनम्॥

इन्द्र॒ य उ॒ नु ते॒ अस्ति॒ वाजो॒ विप्रे॑भिः सनि॒त्वः। अ॒स्माभिः॑ सु तं सनुहि॥८॥

इन्द्र॑। यः। ऊँ॒ इति॑। नु। ते॒। अस्ति॑। वाजः॑। विप्रे॑भिः। सनि॒त्वः।
अ॒स्माभिः॑। सु। तम्। स॒नु॒हि॒॥ ८॥

हे ᵛइन्द्र ᵛयः ᵛवाजः अन्नं ᵛविप्रेभिः मेधाविभिः ᵛसनित्वः संभजनीयः ᵛते तव ᵛअस्ति ᵛतं[1] वाजम् ᵛअस्माभिः याचितः सन् अस्मभ्यं वा ᵛसु सुष्ठु ᵛसनुहि देहि॥

स॒द्योजु॑वस्ते॒ वाजा॑ अस्म॒भ्यं॑ वि॒श्वश्च॑न्द्राः। वशै॑श्च॒ मक्षू॑ जरन्ते॥ ९॥

स॒द्यः॒ऽजु॒वः॑। ते॒। वाजाः॑। अ॒स्म॒भ्य॑म्। वि॒श्वऽच॑न्द्राः। वशैः॑। च॒। मक्षु॑। ज॒र॒न्ते॒॥ ९॥

हे इन्द्र ᵛते तव ᵛवाजाः ᵛअस्मभ्यं ᵛसद्योजुवः शीघ्रं गन्तारो भवन्तु। कीदृशास्ते। ᵛविश्वचन्द्राः[2] सर्वहिरण्योपेता बहूनामाह्लादका वा। अस्मदीयाश्च जनाः ᵛवशैः कामैरनेकैर्युक्ताः ᵛमक्षु शीघ्रं ᵛजरन्ते स्तुवन्ति॥ ॥ ३८॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये षष्ठाष्टके पञ्चमोऽध्यायः॥

॥ श्रीगणेशाय नमः॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥

'आ प्र द्रव' इति नवर्चं द्वितीयं सूक्तम्। तथा चानुक्रम्यते—'आ प्र द्रव' इति। 'ऋषिश्चान्यस्मात्' इति परिभाषया काण्वः[3] कुसीदृषिः। प्राग्वत्सप्रीयपरिभाषया गायत्री छन्दः। अनादेशपरिभाषयेन्द्रो देवता। महाव्रते निष्केवल्ये सूक्तविनियोग उक्तः। द्वितीये रात्रिपर्याये मैत्रावरुणशस्त्रे 'आ प्र द्रव' इति तृचोऽनुरूपः। सूत्रितं च—'आ प्र द्रव परावतो नह्यन्यं बलाकरमित्यष्टौ' (आश्व. श्रौ. ६. ४) इति॥

आ प्र द्र॑व परा॒वतो॑ऽर्वा॒वत॑श्च वृत्रहन्। मघ॒वन्॑ प्रति॒ प्रभ॑र्मणि॥ १॥

आ। प्र। द्र॒व॒। परा॑ऽवतः। अ॒र्वा॒ऽवतः॑। च॒। वृ॒त्र॒ऽह॒न्। मघ॑ऽवन्। प्रति॑। प्रऽभ॑र्मणि॥ १॥

हे ᵛवृत्रहन् अपामावरकस्य वृत्रासुरस्य हन्तर्हे इन्द्र ᵛप्रभर्मणि। प्रकृष्टानि भर्माणि भरणानि पशुप्रहादिसंपादनानि यस्मिन् स प्रभर्मा यज्ञः। यद्वा। प्रकृष्टाः कर्मणि कुशला भर्माणो देवानां हविष्प्रदानेन पोषका ऋत्विजो यस्मिन्निति स तथोक्तः। एतादृशे यज्ञे ᵛमघवः मदकरान् सोमान् ᵛप्रति ᵛपरावतः विप्रकृष्टात् दूरस्थादेशादपि ᵛअर्वावतश्च समीपस्थादेशादपि आभिमुख्येन ᵛप्र ᵛद्रव त्वं त्वरयागच्छ। मघव इति 'वा छन्दसि' इति पूर्वसवर्णदीर्घाभावः॥

---

१. ख-त-न-भ१-२-श–तथा; ग–तथा तं। २. ख-ग-भ३-श–विश्वश्चंद्राः। ३. ख-घ-त-न-भ–कण्वः।

तीव्राः सोमास आ गहि सुतासो मादयिष्णवः । पिबा दधृग्यथोचिषे ॥ २ ॥

तीव्राः । सोमासः । आ । गहि । सुतासः । मादयिष्णवः । पिब । दधृक् । यथा । ओचिषे ॥२॥

हे इन्द्र [v]तीव्राः तीव्रमदाः । क्षिप्रं मदकारिण इत्यर्थः । [v]मादयिष्णवः मादनशीला मादनकारिणो वेमे [v]सोमासः सोमाः [v]सुतासः त्वदर्थमभिषुताः । तस्मात् [v]आ [v]गहि अस्मदीयं यज्ञं प्रत्यागच्छ । आगत्य च तान् [v]पिब । सोमपाने कारणमाह । त्वं [v]यथा [v]दधृक् धृष्टस्तत्प्रीतौ प्रगल्भः संस्तान् [v]ऊचिषे[1] समवैषि सेवसे । ततस्तान् यथाकामं पिबेत्यर्थः । दधृगिति 'भिधृषा प्रागल्भ्ये' इत्यस्मात् 'ऋत्विग्दधृक्०' इत्यादिना क्विन्प्रत्ययान्तो निपात्यते । ऊचिषे । 'उच समवाये' । छान्दसे लिटि रूपम् ॥

इषा मन्दस्वादु तेऽरं वराय मन्यवे । भुवत्त इन्द्र शं हृदे ॥ ३ ॥

इषा । मन्दस्व । आत् । ऊँ इति । ते । अरम् । वराय । मन्यवे ।
भुवत् । ते । इन्द्र । शम् । हृदे ॥ ३ ॥

हे [v]इन्द्र [v]इषा सोमलक्षणेनान्नेन [v]मन्दस्व मोदस्व हृष्टो भव । [v]उ इत्यवधारणे । [v]आत् अनन्तरमेव [v]ते तव [v]वराय शत्रुनिवारकाय [v]मन्यवे क्रोधाय स सोमः [v]अरम् अलं पर्याप्तो भवतु । क्रोधशमने समर्थो भवतु । यदा सोमं पिबति तदा मन्युं त्यजतीत्यर्थः । किंच [v]ते तव [v]हृदे हृदये स सोमः [v]शं शंकरः सुखकरः [v]भुवत् भवतु ॥

तृतीये पर्याये 'आ त्वशत्रो' इत्यनुरूपस्तृचः । सूत्रितं च—'आ त्वेता नि षीदता त्वशत्रवा गहि' (आश्व. श्रौ. ६. ४) इति ॥

आ त्वशत्रवा गहि न्यु१क्थानि च हूयसे । उपमे रोचने दिवः ॥ ४ ॥

आ । तु । अशत्रो इति । आ । गहि । नि । उक्थानि । च । हूयसे । उपऽमे । रोचने । दिवः ॥४॥

हे [v]अशत्रो सपत्नरहित । अस्य बहुविधबलत्वाद्रणाभिमुखं गन्तारः शत्रवो न सन्तीत्यर्थः । तादृशेन्द्र [v]तु क्षिप्रम् [v]आ[2] [v]गहि[2] आयाहि अस्मद्यज्ञं प्रत्यागच्छ । यतः [v]दिवः स्वतेजसा दीप्यमानात् द्युलोकात् । तत्रस्थैर्देवैरित्यर्थः । [v]रोचने अग्निभिर्दीप्यमाने लोके च [v]उपमे समीपे । स्तोतारः स्तोत्रशस्त्रात्मकं शब्दं कुर्वन्त्यत्रेत्युपमो यज्ञः । तस्मिन्नस्मदीये यज्ञे [v]च [v]उक्थानि त्रिवृत्पञ्चदशादिलक्षणानि स्तोत्राणि प्रति [v]नि [v]हूयसे त्वं स्तोतव्यतया नितरामाहूयसे । यस्मादेवं तस्मादागच्छेति समन्वयः ॥

तुभ्यायमद्रिभिः सुतो गोभिः श्रीतो मदाय कम् । प्र सोम इन्द्र हूयते ॥५॥

तुभ्यं । अयम् । अद्रिऽभिः । सुतः । गोभिः । श्रीतः । मदाय । कम् ।
प्र । सोमः । इन्द्र । हूयते ॥ ५ ॥

हे [v]इन्द्र [v]अद्रिभिः अभिषवसाधनैर्ग्रावभिः [v]अयं [v]सोमः तुभ्यं त्वदर्थं [v]सुतः अभिषुतः । ततो दशापवित्रेण पूत्वा [v]गोभिः गोविकारैः क्षीरादिभिः [v]श्रीतः सोऽस्माभिः परावत[3] एव[3] संस्कृतः सोमस्तव [v]मदाय मदार्थं [v]कं सुखेन [v]प्र [v]हूयते अग्नौ स्वाहा क्रियते । तस्मादागत्य सोमं पिब ॥ ॥१॥

---

१. घ–ऊचिषे ओचिषे । २. ख-ग-त-न-भ-श–'आ गहि' नास्ति । ३. घ–'परावत एव' नास्ति ।

इन्द्र श्रुधि सु मे हवमस्मे सुतस्य गोमतः । वि पीतिं तृप्तिमश्नुहि ॥ ६ ॥

इन्द्र । श्रुधि । सु । मे । हवम् । अस्मे इति । सुतस्य । गोऽमतः ।
वि । पीतिम् । तृप्तिम् । अश्नुहि ॥ ६ ॥

हे [v]इन्द्र [v]मे[1] मदीयं [v]हवं त्वद्विषयमाह्वानं [v]सु सुष्ठु [v]श्रुधि शृणु । तथा [v]अस्मे अस्माभिः [v]सुतस्य अभिषुतस्य [v]गोमतः गव्यक्षीरवतः । क्षीरेण मिश्रितस्येत्यर्थः । तादृशस्य सोमस्य [v]पीतिं पानं [v]वि [v]अश्नुहि विविधं प्राप्नुहि[2] । तत्पानेन विविधां [v]तृप्तिं च गच्छ । ' अशू व्याप्तौ ' । व्यत्ययेन परस्मैपदम् ॥

तृतीये पर्याय एवाच्छावाकशस्त्रे ' य इन्द्र चमसेषु ' इति तृचः । सूत्रितं च—' य इन्द्र चमसेष्वा सोमः प्र वः सताम् ' (आश्व. श्रौ. ६. ४) इति ॥

य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः । पिबेदस्य त्वमीशिषे ॥ ७ ॥

यः । इन्द्र । चमसेषु । आ । सोमः । चमूषु । ते । सुतः ।
पिब । इत् । अस्य । त्वम् । ईशिषे ॥ ७ ॥

हे [v]इन्द्र [v]ते त्वदर्थं [v]सुतः अभिषुतः [v]यः [v]सोमः [v]चमसेषु एतन्नामकेषु पात्रेषु तथा [v]चमूषु । चमन्ति यजन्त्यत्रेति[3] चम्वो ग्रहाः । तेषु च [v]आ सर्वतः अस्ति [v]अस्य तमेतं सोमं [v]पिबेत् । इदवधारणे । पिबैव । कथमस्य सोमपानयोग्यता तत्राह । हे इन्द्र [v]त्वमीशिषे तस्य त्वमेवेश्वरो भवसि खलु । यत एवं ततः पिबेति समन्वयः । ' ईश ऐश्वर्ये ' । लटि ' ईशः से ' (पा. सू. ७. २. ७७) इतीडागमः ॥

यो अप्सु चन्द्रमाइव सोमश्चमूषु दद्दशे । पिबेदस्य त्वमीशिषे ॥ ८ ॥

यः । अप्ऽसु । चन्द्रमाःऽइव । सोमः । चमूषु । दद्दशे । पिब । इत् । अस्य । त्वम् । ईशिषे ॥८॥

हे इन्द्र [v]यः गृहीतः [v]सोमः [v]चमूषु ग्रहेषु [v]दद्दशे अन्तर्दृश्यते । तत्र दृष्टान्तः । [v]चन्द्रमाइव यथा चन्द्रमाः [v]अप्सु अन्तरिक्षे निर्मलतया दृश्यते तद्वत् । यद्वा । अप्सूदकेषु चन्द्रमाः प्रतिबिम्बतया नानाविधो दृश्यते तथाष्टग्रहेष्वनेकरूपः सन् दृश्यते तमेतं सोमं पिबैव यतस्त्वमेवेशिषे खलु ॥

यं ते श्येनः पदाभरत्तिरो रजांस्यस्पृतम् । पिबेदस्य त्वमीशिषे ॥ ९ ॥

यम् । ते । श्येनः । पदा । आ । अभरत् । तिरः । रजांसि । अस्पृतम् ।
पिब । इत् । अस्य । त्वम् । ईशिषे ॥ ९ ॥

हे इन्द्र [v]श्येनः शंसनीयः पक्षी । पक्षिरूपधारिणी गायत्रीत्यर्थः । स पक्षी [v]रजांसि अन्तरिक्षादिलोकस्थितान् सोमपालान् गन्धर्वान् [v]तिरः तिरः[4] कुर्वन्[5] [v]अस्पृतं शत्रुभिरस्पृष्टं सन्तं [v]यं सोमं [v]ते त्वदर्थं [v]पदा पद्भ्याम् [v]आभरत् । पदेति सवनद्वयाभिप्रायम् । सवनद्वय आहृतं सोमं त्वं पिब । गायत्री पक्षिरूपं धारयित्वा पद्भ्यां सोममाहरदित्यत्रार्थे यजुर्ब्राह्मणं—' पद्भ्यां द्वे सवने समगृह्णान्मुखेनैकं[6] तस्माद्द्वे सवने शुक्रवती प्रातःसवनं च माध्यंदिनं च ' (तै. सं. ६. १. ६. ४) इति । तं पिबैव । त्वमेव तस्येश्वरो भवसि ॥ ॥ २ ॥

---

१. ख-त-श-' मे ' नास्ति । २. ख-प्राश्नुहि । ३. ख-त४-न-जयंत्यत्रेति; ग-भक्षयंत्यत्रेति; ज्ञ-त१-२-३-जयंतीत्यत्रेति । ४. घ-ज्ञ-तिरस्कुर्वन् । ५. श-तै. सं.-°मुखेनैकं यन्मुखेन समगृह्णात्तदधयत् ।

'देवानाम्' इति नवर्चं तृतीयं सूक्तं काण्वस्य कुसीदिन आर्षं गायत्रं वैश्वदेवम्। तथा चानुक्रम्यते–'देवानां वैश्वदेवम्' इति। दशरात्रेऽष्टमेऽहनि वैश्वदेवशस्त्र इदं सूक्तं वैश्वदेवनिविद्धानम्। सूत्रितं च—'देवानामिदव इति वैश्वदेवम्' (आश्व. श्रौ. ८. १०) इति॥

देवानामिदवो महत्तदा वृणीमहे वयम्। वृष्णामस्मभ्यमूतये॥ १॥

देवानाम्। इत्। अवः। महत्। तत्। आ। वृणीमहे। वयम्। वृष्णाम्। अस्मभ्यम्। ऊतये॥१।

हे देवाः ᵛदेवानां स्वतेजसा सर्वतो दीप्यमानानाम्। ᵛइत् एवार्थे। युष्माकमेव ᵛमहत् व्याप्तं महनीयं वा ᵛअवः पालनं यद्विद्यते तत् ᵛवृष्णां कामानां वर्षितॄणां युष्माकं स्वभूतं ᵛतत् रक्षणं यजमानाः ᵛवयम् ᵛआ ᵛवृणीमहे समन्तात्संभजामहे। किमर्थम्। ᵛअस्मभ्यमूतये। पूर्वमस्मभ्यमस्मदर्थमिति साधारण्येनोक्त्वा तद्विशिनष्टि ऊतय इति। अस्माकं पालनायेति॥

ते नः सन्तु युजः सदा वरुणो मित्रो अर्यमा। वृधासश्च प्रचेतसः॥२॥

ते। नः। सन्तु। युजः। सदा। वरुणः। मित्रः। अर्यमा। वृधासः। च। प्रऽचेतसः॥ २।

ᵛते देवाः ᵛवरुणः शत्रूणां निवारकः ᵛमित्रः सर्वेषां मित्रभूतः ᵛअर्यमा सततं गच्छन् एतन्नामकास्ते त्रयो देवाः ᵛसदा सर्वदा सर्वेषु कालेषु ᵛनः अस्माकं ᵛयुजः सहायाः ᵛसन्तु भवन्तु। अग्निहोत्रादिकर्मणि इन्द्रादिदेवाः सहागमनादियज्ञपरिसमापनान्तेषु साहाय्यं कुर्वन्त्वित्यर्थः। ततः ᵛप्रचेतसः प्रकृष्टज्ञानाः। यद्वा। चेतः स्तोत्रम्। शोभनस्तुतयः[1]। ते देवाः ᵛवृधासः वर्धकाः ᵛच अस्माकं धनादिदानेन वर्धयितारश्च सन्तु॥

अतिं नो विष्पिता पुरु नौभिरपो न पर्षथ। यूयमृतस्य रथ्यः॥ ३॥

अतिं। नः। विष्पिता। पुरु। नौभिः। अपः। न। पर्षथ। यूयम्। ऋतस्य। रथ्यः॥३॥

ᵛऋतस्य सत्यस्य यज्ञस्य वा हे ᵛरथ्यः नेतारो देवाः। यद्वा। ऋतस्येति संबन्धिशब्दत्वात्कर्ताक्षिप्यते। यज्ञस्य साधका हे रथ्यो रथवन्तो देवाः ᵛविष्पिता विष्पितानि विप्रासानि वितानि ᵛपुरु। सुपो लुक्। पुरूणि बहूनि शत्रुबलानि कर्माणि वा ᵛनः[2] अस्मान् ᵛअति ᵛपर्षथ[2] पारं[2] समाप्तिं रक्षणैर्गमयत[3]। तत्र दृष्टान्तः[4]। ᵛनौभिरपो ᵛन। यथा नाविकोऽप उदकानि नौभिर्जनांस्तीरं प्रति प्रापयति तद्वत्॥

वामं नो अस्त्वर्यमन्वामं वरुण शंस्यम्। वामं ह्यावृणीमहे॥ ४॥

वामम्। नः। अस्तु। अर्यमन्। वामम्। वरुण। शंस्यम्। वामम्। हि। आऽवृणीमहे॥४॥

हे ᵛअर्यमन् देव ᵛवामं वननीयं संभजनीयं धनं ᵛनः अस्माकम् ᵛअस्तु भवतु। हे ᵛवरुण ᵛशंस्यं सर्वैः शंसनीयं स्तुत्यं ᵛवामं धनमस्माकमस्तु। कुतः। हिशब्दो हेतौ। यस्मात्कारणाद्वयं ᵛवामं धनं युष्मान् ᵛआवृणीमहे याचामह इत्यर्थः। तस्मान्नोऽस्त्वित्याशास्ते॥

वामस्य हि प्रचेतस ईशानासो रिशादसः। नेमादित्या अघस्य यत्॥ ५॥

---

१. ख-त-भ-श-शोभनास्तुतयः। २. ग-त३-४-श–'नः ...पर्षथ' नास्ति। ख-ज्ञ-त१-२-भ२-य–नोस्मान् यूयं अतिपर्षथ। ३. ख-ज्ञ-त१-२-भ-य–बलानि चेत् तेषां ('बलानि..तेषां' नास्ति–भ१) वर्धेन अतीत्य गमयत (गमेयत–ज्ञ-त१-२-भ) कर्माणि चेत् नोस्मदीयानि कर्माणि पारं समाप्तिं रक्षणैर्गमयत। ४. ख-त-भ-श-दृष्टांतः नः।

वामस्य । हि । प्रऽचेतसः । ईशानासः । रिशादसः । न । ईम् । आदित्याः । अघस्य । यत् ॥५॥

हे [v]प्रचेतसः प्रकृष्टज्ञानाः शोभनस्तुतयो वा हे [v]रिशादसः रिशतां हिंसतां शत्रूणामसितारः क्षेप्तारो देवा यूयं [v]वामस्य वननीयस्य धनस्य [v]ईशानासः ईशानाः । हिरवधारणे । ईशाना एव स्वामिन एव भवथ । तस्माद्युष्मान् याचामह इत्यर्थः । ईशानाः । 'ईश ऐश्वर्ये' । अनुदात्तेत् । 'तास्यनुदात्तेत्०' इति स्वरेणाद्युदात्तता भवति । न संबुद्धिः । ततो हे [v]आदित्याः अदितेः पुत्रा देवाः [v]ईम् एनं याचमानं मां तद्धनं [v]न प्राप्नोतु [v]यत् धनम् [v]अघस्य पापस्य संबन्धि विद्यते ॥ ॥३॥

वयमिद्धः सुदानवः क्षियन्तो यान्तो अध्वन्ना । देवा वृधाय हूमहे ॥ ६ ॥

वयम् । इत् । वः । सुऽदानवः । क्षियन्तः । यान्तः । अध्वन् । आ । देवाः । वृधाय । हुमहे ॥६॥

हे [v]सुदानवः शोभनदाना हे [v]देवाः [v]क्षियन्तः गृहेष्वग्निहोत्रार्थं निवसन्तः [v]अध्वन् । सुपो लुक् । अध्वनि समिदाहरणार्थं [v]यान्तः गच्छन्तोऽपि [v]वयं [v]वः [v]इत् युष्मानेव [v]वृधाय हविर्भिर्वर्धनाय [v]हूमहे आह्वयामः । यद्वा । वयं गृहेषु गृहाग्निर्गमनकाले मार्गेषु च वृधायास्माकं धनादिभिर्वर्धनायाह्वयामः ॥

अधि न इन्द्रैषां विष्णौ सजात्यानाम् । इता मरुतो अश्विना ॥ ७ ॥

अधि । नः । इन्द्र । एषाम् । विष्णो इति । सऽजात्यानाम् । इत । मरुतः । अश्विना ॥ ७ ॥

हे [v]इन्द्र [v]विष्णो [v]मरुतः हे [v]अश्विना अश्विनौ हे इन्द्रादयो देवाः [v]सजात्यानाम् । समानायां जातौ भवाः सजात्या भ्रातृमित्रादयः । तेषाम् [v]एषां मध्ये [v]नः अस्मान् [v]अधि' [v]इत' यूयं स्तुत्यतयाधिगच्छत ॥

प्र भ्रातृत्वं सुदानवोऽध द्विता समान्या । मातुर्गर्भे भरामहे ॥ ८ ॥

प्र । भ्रातृऽत्वम् । सुऽदानवः । अध । द्विता । समान्या । मातुः । गर्भे । भरामहे ॥ ८ ॥

हे [v]सुदानवः शोभनदाना आदित्याः [v]अध अथ अस्मत्प्रत्यागमनानन्तरं वयं [v]समान्या सामान्येन । सुपो ङ्यादेशः । पूर्वं सर्वेषां देवानां सांहत्येन ततः [v]द्विता द्विधा द्विप्रकारेण च [v]मातुः अदितेः [v]गर्भे संजातं यद्युष्माकं [v]भ्रातृत्वं विद्यते तदिदानीं वयं [v]प्र [v]भरामहे । प्रभरणमुच्चारणं प्रकाशनं वा । उच्चारयामः प्रकाशयामो वा । सर्वेषां देवानां द्वंद्वशो जननं तैत्तिरीयके स्पष्टमभिहितम्— 'अदितिः पुत्रकामा साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत्' (तै. सं. ६. ५. ६) इत्युपक्रम्य 'तस्यै पूषा चार्यमा चाजायेताम्' इत्यादिना ॥

यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः । अधा चिद्व उत ब्रुवे ॥ ९ ॥

यूयम् । हि । स्थ । सुऽदानवः । इन्द्रज्येष्ठाः । अभिऽद्यवः । अध । चित् । वः । उत । ब्रुवे ॥९॥

पूर्वोऽर्धर्चः सिद्धः । हे [v]सुदानवः शोभनदाना देवाः [v]इन्द्रज्येष्ठाः । इन्द्रो ज्येष्ठो मुख्यो येषां ते तथोक्ताः । सर्वे देवा इन्द्रनेतृका इत्यर्थः । तादृशाः [v]अभिद्यवः अभिगतदीप्तयः [v]यूयं [v]हि [v]स्थ अस्मद्यज्ञे भवथ खलु । हि प्रसिद्धौ । [v]अध [v]चित् अथानन्तरमेव [v]वः युष्मान् अहं [v]ब्रुवे स्तौमि । [v]उत अपि च पुनःपुनः स्तौमीत्यर्थः ॥ ॥ ४ ॥

---

१. ख-त-न-श–अव अधीत; भ१-२–अवधीत ।

' प्रेष्ठं वः ' इति नवर्चं चतुर्थं सूक्तं कवेः पुत्रस्योशनस आर्षं गायत्रमाग्नेयम्। तथानुक्रम्यते– ' प्रेष्ठमुशना काव्य आग्नेयम् ' इति । प्रातरनुवाक आग्नेये क्रतौ गायत्रे छन्दस्याश्विनशस्त्रे चेदं सूक्तम्। सूत्रितं च—' युक्ष्वा हि प्रेष्ठं वः ' (आश्व. श्रौ. ४. १३) इति । आभिप्लविकेषूक्थ्येषु मैत्रावरुणे ' प्रेष्ठं वः ' इति तृचो वैकल्पिकः स्तोत्रियः । सूत्रितं च—' प्रेष्ठं वो अतिथिं श्रेष्ठं यविष्ठ भारत ' (आश्व. श्रौ. ७. ८) इति ॥

प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम्। अग्निं रथं न वेद्यम् ॥ १ ॥

प्रेष्ठम्। वः। अतिथिम्। स्तुषे। मित्रम्ऽइव। प्रियम्। अग्निम्। रथम्। न। वेद्यम्॥१॥

हे यजमानाः ᵛप्रेष्ठं युष्माकं धनदानेन प्रियतमम् ᵛअतिथिं युष्माभिरतिथिवत्पूज्यम्। यद्वा। ' अत सातत्यगमने '। ' ऋतन्यञ्जि° ' इत्यादिना अतेरिथिन्। सततं देवानां हविः प्रदातुं गच्छन्तम्। ᵛमित्रमिव सखायमिव ᵛप्रियं स्तोतुः प्रीणनकरं ᵛरथं ᵛन रथमिव ᵛवेद्यम्। वेदो धनम्। धनहितं लाभहेतुम्। यथा रथी[1] रथेन[1] धनं[2] लभते तद्वत्स्तोतारोऽनेन धनं लभन्ते। तादृशं धनलाभकारणम् ᵛअग्निं ᵛवः युष्मत्कर्मसिद्ध्यर्थं ᵛस्तुषे काव्य उशनाः स्तौमि ॥

कविमिव प्रचेतसं यं देवासो अधा दिता। नि मर्त्येष्वादधुः ॥ २ ॥

कविम्ऽइव। प्रऽचेतसम्। यम्। देवासः। अध। दिता। नि। मर्त्येषु। आऽदधुः॥ २ ॥

ᵛअध अपि च ᵛदेवासः देवा इन्द्रादयः ᵛयम् अग्निं ᵛमर्त्येषु मनुष्येषु ᵛदिता द्विधा ᵛनि ᵛआदधुः गार्हपत्याहवनीयात्मकत्वेन द्विधा निहितवन्तः। तत्र दृष्टान्तः। ᵛकविमिव ᵛप्रचेतसम्। प्रकृष्टज्ञानं कविं क्रान्तकर्माणं पुरुषं यथा द्विधा कार्यद्वयेऽन्यो नियोजयति तद्वत्। यद्वा। दिवि पृथिव्यां च निहितवन्तः। भूमौ तु हविराहरणार्थं दिवि तु हविष्प्रदानार्थमिति द्वैधं विधानं कृतवन्त इत्यर्थः ॥

त्वं यविष्ठ दाशुषो नॄंः पाहि शृणुधी गिरः। रक्षा तोकमुत त्मना ॥ ३ ॥

त्वम्। यविष्ठ। दाशुषः। नॄन्। पाहि। शृणुधि। गिरः। रक्ष। तोकम्। उत। त्मना॥३॥

हे ᵛयविष्ठ युवतम। यद्वा। यौतेस्तृजन्तस्येष्ठनि रूपम्। देवानां हविषां मिश्रयितृतमाग्ने ᵛत्वं ᵛदाशुषः हविर्दत्तवतः ᵛनॄन् कर्मणां नेतॄन् यजमानान् ᵛपाहि धनादिदानेन रक्ष। नॄंः पाहीत्यत्र संहितायां ' नृन्पे ' (पा. सू. ८. ३. १०) इति नकारस्य रुत्वम्। ' अत्रानुनासिकः° ' (पा. सू. ८. ३. २) इति पूर्वस्यानुनासिकः। किंच ᵛगिरः त्वद्विषयाः स्तुतीः ᵛशृणुधि अवहितः सञ्छृणु। ' श्रु श्रवणे '। ' श्रुशृणुपृ° ' इत्यादिना हेर्ध्यादेशः। ᵛउत अपि च ᵛत्मना आत्मनैव स्वयमेव ᵛतोकम् अस्मदीयं तनयं पुत्रं ᵛरक्ष पालय। त्मनेति सर्वत्र संबध्यते। आत्मना स्वयमेव रक्ष। त्वदन्यं पालयितारं न विन्दामः। त्वमेवास्मदीयं[3] स्तोत्रं[3] शृणु ॥

कया ते अग्ने अङ्गिर ऊर्जो नपादुपस्तुतिम्। वराय देव मन्यवे ॥ ४ ॥

कया। ते। अग्ने। अङ्गिरः। ऊर्जः। नपात्। उपऽस्तुतिम्। वराय। देव। मन्यवे॥ ४ ॥

हे ᵛअङ्गिरः अङ्गिरसां वरिष्ठ । यद्वा। अङ्गति सर्वत्र गच्छतीत्यङ्गिराः। तादृश हे ᵛऊर्जो ᵛनपात्। नपादित्यपत्यनाम । अन्नस्य पुत्र । हविर्भिर्वर्धमानत्वात्। यद्वा। नपादिति नसा।

---

१. ख-ज्ञ-त१-२–रथ्येधनक; त३-४-भ–रथ्येधक; श–रथ्यको। २. ख-ज्ञ-त१-२–धनेन। ३. ख-ज्ञ-त१-२-४-श–°स्मदीयस्तोत्रं।

हविर्लक्षणस्यान्नस्य नसः । 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिः ' इति । वृष्टेरोषधय ओषधीभ्योऽन्नमित्यन्नस्य नसा । हे [v]देव द्योतमान [v]अग्ने [v]वराय सर्ववरणीयाय [v]मन्यवे शत्रूनतिमन्यमानाय [v]ते तुभ्यं [v]कया कीदृश्या वाचा [v]उपस्तुतिम् उपस्तोत्रमहं भरेयम् । त्वं महान् खल्वहमल्पः । तदर्थं स्तुतिं कुर्यामित्यृषिरग्निं प्रति वदति ॥

दाशेम कस्य मनसा यज्ञस्य सहसो यहो । कदु वोच इदं नमः ॥ ५ ॥

दाशेम । कस्य । मनसा । यज्ञस्य । सहसः । यहो इति ।
कत् । ऊँ इति । वोचे । इदम् । नमः ॥ ५ ॥

ऋषिरग्निं प्रति ब्रूते । हे [v]सहसो [v]यहो । यदुरित्यपत्यनाम । बलेन निष्पाद्यमानत्वाद्बलस्य पुत्र हे अग्ने [v]कस्य कीदृशस्य [v]यज्ञस्य यज्ञवतो यजनीयदेववतो यजमानस्य [v]मनसा युक्ताः सन्तो हवींषि तुभ्यं वयं [v]दाशेम प्रयच्छेम । पूजायां बहुवचनम् । किंच तुभ्यम्[1] [v]इदं [v]नमः हविर्नमस्कारं वा [v]कत् कदा[2] [v]वोचे अहं वदामि । [v]उ इति प्रश्ने । ऋषिः कदा यक्ष्यामि कदा स्तोष्यामीत्यग्निं पृच्छति । वोचे । वच्यादेशस्य लुङ्यात्मनेपद उत्तमैकवचने रूपम् ॥ ॥ ५ ॥

अधा त्वं हि नस्करो विश्वा अस्मभ्यं सुक्षितीः । वाजद्रविणसो गिरः ॥६॥

अध । त्वम् । हि । नः । करः । विश्वाः । अस्मभ्यम् । सुऽक्षितीः । वाजऽद्रविणसः । गिरः ॥६॥

हे अग्ने [v]अध अनन्तरं [v]त्वम् । हिरवधारणे । त्वमेव [v]अस्मभ्यं [v]करः कुरु । देहीत्यर्थः । करोतेः लेव्यडागमः । किमित्यपेक्षायामाह । [v]नः अस्मदीयाः [v]गिरः त्वद्विषयाः [v]विश्वाः सर्वाः स्तुतीरेवं कुरु यथा [v]सुक्षितीः । क्षियन्ति निवसन्त्यत्रेति[3] क्षितयो गृहाः । शोभननिवासाः । यद्वा । क्षितयो मनुष्याः । कल्याणपुत्रपौत्रादियुक्ताः । तथा [v]वाजद्रविणसः अन्नयुक्तधनवतीः । अथवा वाजो दीप्तिः[4] । सर्वतो दीप्तधनाश्च कुरु । त्वमस्माभिः स्तुतः सन् गृहपुत्रान्नधनादीनि देहीत्यर्थः ॥

कस्य नूनं परीणसो धियो जिन्वसि दंपते । गोषाता यस्य ते गिरः ॥ ७ ॥

कस्य । नूनम् । परीणसः । धियः । जिन्वसि । दम्ऽपते । गोऽसाता । यस्य । ते । गिरः ॥७॥

हे [v]दंपते[5] यदा गार्हपत्ये वर्तसे तदा जायापतिस्वरूपोऽसि । तस्माद्दंपतिशब्देनाग्निरभिधीयते । तथाविध हे अग्ने [v]नूनम् इदानीं [v]कस्य कीदृशस्य जनस्य [v]परीणसः बहूनि [v]धियः कर्माणि [v]जिन्वसि प्रीणयसि । [v]यस्य [v]ते तव संबन्धिन्यः [v]गिरः स्तुतयः [v]गोसाता गोसातौ गवां लाभे भवन्ति खलु । तस्मात्त्वं कुत्र तिष्ठसि । अस्माकमिदानीं गवेच्छा प्रवर्तते । यद्वा । हे अग्ने त्वमिदानीं कस्य कर्माणि प्रीणयसि । न कस्यापीत्यर्थः । अस्माकमेव कर्माणि प्रीणयेति भावः ॥

अग्निमन्थने ' तं मर्जयन्त सुक्रतुम् ' इत्येषा । सूत्रितं च—' तं मर्जयन्त सुक्रतुं यज्ञेन यज्ञमयजन्त देवाः[6] ' (आश्व. श्रौ. २. १६) इति ॥

तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु । स्वेषु क्षयेषु वाजिनम् ॥ ८ ॥

तम् । मर्जयन्त । सुऽक्रतुम् । पुरःऽयावानम् । आजिषु । स्वेषु । क्षयेषु । वाजिनम् ॥ ८ ॥

---

१. ख-ग-त-न-भ-श–वस्तुभ्यं । २. ख-त-न-भ–कदा वा । ३. ख-त–निवसंतीत्यत्रेति । ४. ख-ग-त-३-भ–दीप्तः । ५. ख-त१-२-न-भ-श–दंपते गृहपते । ६. ज्ञ–देवा इति परिदध्यात् ।

vसुकृतुं शोभनप्रज्ञं सुकर्माणं वा vआजिषु संग्रामेषु vपुरोयावानं शत्रुहननार्थं[1] पुरत एव गन्तारं vवाजिनं बलवन्तं तादृशमग्निं[2] यजमानाः vस्वेषु आत्मीयेषु vक्षयेषु गृहेषु vमर्जयन्त निर्मथितमग्निमलंकुर्वन्ति । परिचरन्तीति यावत् ॥

क्षेति क्षेमेभिः साधुभिर्नकिर्यं घ्नन्ति हन्ति यः । अग्ने सुवीर एधते ॥ ९ ॥

क्षेति । क्षेमेभिः । साधुऽभिः । नकिः । यम् । घ्नन्ति । हन्ति । यः । अग्ने । सुऽवीरः । एधते ॥९॥

हे vअग्ने यो मनुष्यः vसाधुभिः साधयद्भिः vक्षेमेभिः पालनैः सह vक्षेति स्वगृहे निवसति । तथा vयं जनं vनकिः न केचन vघ्नन्ति न हिंसन्ति । vयः[3] एव vहन्ति शत्रून् स्वयमेव हन्ति । स मनुष्यस्तव स्तोता खलु । अन्यथा तस्यैतावन्न घटते । ततः स स्तोता vसुवीरः शोभनपुत्रादियुक्तः सन् vएधते आत्मीयगृहेषु धनादिभिर्वर्धते ॥ ॥ ६ ॥

'आ मे हवम्' इति नवर्चं पञ्चमं सूक्तम् । कृष्णो नामाङ्गिरस ऋषिः । गायत्री छन्दः । एतदादीनि त्रीणि सूक्तान्यश्विदेवत्यानि । तथा चानुक्रान्तम्—'आ मे कृष्ण आश्विनं हि' इति । प्रातरनुवाक आश्विने क्रतौ गायत्रे छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितं च—'उदीराथामा मे हवम्' (आश्व. श्रौ. ४. १५) इति ॥

आ मे हवं नासत्याश्विना गच्छतं युवम् । मध्वः सोमस्य पीतये ॥ १ ॥

आ । मे । हवम् । नासत्या । अश्विना । गच्छतम् । युवम् । मध्वः । सोमस्य । पीतये ॥ १ ॥

हे vनासत्या । असत्यमनयोर्नास्तीति नासत्यौ । तादृशौ हे vअश्विना अश्विनौ vयुवं युवां vमे मदीयं vहवम् आह्वानं श्रुत्वा । यद्वा । हवम् । हूयतेऽत्रेति हवो यज्ञः । केवलस्याधिकरणेऽप् छान्दसः । मदीयं यज्ञं प्रति vमध्वः मदकरस्य vसोमस्य vपीतये पानाय तदर्थम् vआ vगच्छतम् ॥

इमं मे स्तोममश्विनेमं मे शृणुतं हवम् । मध्वः सोमस्य पीतये ॥ २ ॥

इमम् । मे । स्तोमम् । अश्विना । इमम् । मे । शृणुतम् । हवम् । मध्वः । सोमस्य । पीतये ॥२॥

हे vअश्विना अश्विनौ vमे मदीयम् vइमं vस्तोमं स्तोत्रं[4] किंच vमे मदीयम् vइमम् इदमागमनविषयं vहवम् आह्वानं च vशृणुतम् ॥

अयं वां कृष्णो अश्विना हवते वाजिनीवसू । मध्वः सोमस्य पीतये ॥ ३ ॥

अयम् । वाम् । कृष्णः । अश्विना । हवते । वाजिनीवसू इति वाजिनीऽवसू ।
मध्वः । सोमस्य । पीतये ॥ ३ ॥

हे vवाजिनीवसू अन्नयुक्तधनौ । अत्रेनिरनुवादार्थः । यद्वा । वाजो वजनं क्रिया । तद्वती वाजिनी । तद्युक्तधनवन्तौ हे vअश्विना अश्विनौ vअयं vकृष्णः नाम मन्त्रद्रष्टा ऋषिः vवां युवां vहवते स्तुतिभिराह्वयति । किमर्थम् । vमध्वः vसोमस्य vपीतये इति ॥

शृणुतं जरितुर्हवं कृष्णस्य स्तुवतो नरा । मध्वः सोमस्य पीतये ॥ ४ ॥

शृणुतम् । जरितुः । हवम् । कृष्णस्य । स्तुवतः । नरा । मध्वः । सोमस्य । पीतये ॥ ४ ॥

---

१. त–°हननार्थ वा । २. भ–तं तादृश° । ३. ख-त-श–'यः' नास्ति । ४. ख-ग-त-न-भ-श–स्तोत्रं वा ।

हे [v]नरा नरौ सर्वस्य नेतारावश्विनौ [v]जरितुः। तच्छीलार्थे तृन्। व्यत्ययेनान्तोदात्तत्वम्। जरितुः स्तवनशीलस्य संप्रति [v]स्तुवतः स्तोत्रं कुर्वतः [v]कृष्णस्य एतन्नामकस्यर्षेः संबन्धि [v]हवं युष्मद्विषयमाह्वानं [v]शृणुतम्। यद्वा। जरितुरन्यदेवानां स्तोतुः स्तुवत इदानीं युवयोः स्तोत्रकारिणस्तस्य हवं शृणुतम्। शिष्टं गतम्॥

छर्दिर्यन्तमदाभ्यं विप्राय स्तुवते नरा। मध्वः सोमस्य पीतये॥ ५॥

छर्दिः। यन्तम्। अदाभ्यम्। विप्राय। स्तुवते। नरा। मध्वः। सोमस्य। पीतये॥ ५॥

हे [v]नरा नेतारावश्विनौ [v]विप्राय मेधाविने अत एव [v]स्तुवते स्तोत्रं कुर्वते कृष्णायर्षये [v]अदाभ्यम्। 'दभेश्च' इति ण्यत्प्रत्ययः। परैरहिंस्यं [v]छर्दिः गृहं [v]यन्तं प्रयच्छतम्। किमर्थम्। सोमपानाय। स्तोत्रे गृहे दीयमाने सति तदा स सोमं युवाभ्यां प्रयच्छति॥ ॥ ७ ॥

गच्छतं दाशुषो गृहमित्था स्तुवतो अश्विना। मध्वः सोमस्य पीतये॥६॥

गच्छतम्। दाशुषः। गृहम्। इत्था। स्तुवतः। अश्विना। मध्वः। सोमस्य। पीतये॥ ६॥

हे [v]अश्विना अश्विनौ [v]इत्था इत्थमनेन प्रकारेण [v]स्तुवतः युवयोः स्तोत्रं कुर्वतः [v]दाशुषः हवींषि दत्तवतो यजमानस्य [v]गृहं प्रति [v]गच्छतं युवामागच्छतम्। किमर्थम्। [v]मध्वः [v]सोमस्य [v]पीतये इति॥

युञ्जाथां रासभं रथे वीळुङ्गे वृषण्वसू। मध्वः सोमस्य पीतये॥ ७॥

युञ्जाथाम्। रासभम्। रथे। वीळुऽअङ्गे। वृषण्वसू इति वृषण्ऽवसू। मध्वः। सोमस्य। पीतये॥७॥

हे [v]वृषण्वसू वर्षणशीलधनवन्तावश्विनौ युवां [v]वीळुङ्गे। वीळुर्दृढः। दृढाङ्गोपेते[1] स्वरथे [v]रासभं शब्दायमानमेतन्नामकमश्वं [v]युञ्जाथां संयोजयतम्। किमर्थम्। [v]मध्वः [v]सोमस्य [v]पीतये इति। 'रासभावश्विनोः' इति रासभावेवाश्विनौ रथस्य वाहनौ॥

त्रिवन्धुरेण त्रिवृता रथेना यातमश्विना। मध्वः सोमस्य पीतये॥ ८॥

त्रिऽवन्धुरेण। त्रिऽवृता। रथेन। आ। यातम्। अश्विना। मध्वः। सोमस्य। पीतये॥ ८॥

हे [v]अश्विना अश्विनौ [v]त्रिवन्धुरेण त्रिफलकासंघटितेन [v]त्रिवृता त्रिकोणेन। यद्वा। त्रिवृता। त्रीणि कवचादिभिरावरणानि यस्य स तथोक्तः। तेन [v]रथेन अस्मद्यज्ञं प्रति [v]आ [v]यातं युवामागच्छतं च[2]। शिष्टं गतम्॥

नू मे गिरो नासत्याश्विना प्रावतं युवम्। मध्वः सोमस्य पीतये॥ ९॥

नु। मे। गिरः। नासत्या। अश्विना। प्र। अवतम्। युवम्। मध्वः। सोमस्य। पीतये॥९॥

हे [v]नासत्या असत्यरहितौ हे [v]अश्विना अश्विनौ [v]मे मदीयाः [v]गिरः स्तुतिलक्षणा वाचः प्रति [v]युवं युवां [v]नु क्षिप्रं [v]प्रावतं प्रकर्षेणागच्छतम्। यद्वा। मे गिरः प्रावतं आत्मीयतया प्ररक्षतम्। किमर्थम्। [v]मध्वः मदकरस्य [v]सोमस्य [v]पीतये पानाय तदर्थम्। सर्वे देवाः स्तुतिभिराहूताः सन्तो यज्ञं प्रत्यागच्छन्तीति[3] गच्छतं रक्षतं चेति युक्तं भवति॥ ॥ ८ ॥

---

१. ख-भ१-दृढ आद्यंगोपेते; ग-त-भ२-दृढा आद्यंगोपेते; श-दृढाद्यंगोपेते। २. ग-'च' नास्ति।
३. ख-ग-त-न-भ-श-प्रत्यागच्छंति स्तुतिभिर्विना नागच्छंतीति।

'उभा हि दस्रा' इति पञ्चर्चं षष्ठं सूक्तम्। विश्वको नाम कृष्णस्य पुत्रः कृष्ण एव वर्षिः। जगती छन्दः। अश्विनौ देवता। तथानुक्रम्यते—'उभा हि पञ्च विश्वको वा कार्ष्णिर्जागतम्' इति। विनियोगो लिङ्गादवगन्तव्यः॥

उभा हि दस्रा भिषजा मयोभुवोभा दक्षस्य वचसो बभूवथुः।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥१॥

उभा। हि। दस्रा। भिषजा। मयःऽभुवा। उभा। दक्षस्य। वचसः। बभुवथुः।
ता। वाम्। विश्वकः। हवते। तनूऽकृथे। मा। नः। वि। यौष्टम्। सख्या। मुमोचतम् ॥१॥

हे अश्विनौ [v]दस्रा दर्शनीयौ। यद्वा। 'दसु उपक्षये'। सर्वेषां शत्रूणामुपक्षपयितारौ। [v]भिषजा देवानां वैद्यौ। यद्वा भीतीनां त्रासयितारौ। यदा नरा अश्विनौ स्तुवन्ति तदा तौ तेषां भीतिमपनयत इत्यर्थः। पृषोदरादित्वाद्रूपसिद्धिः। तादृशौ अत एव [v]मयोभुवा मयसः सुखस्य भावयितारौ [v]उभा परस्परं द्वित्वसंख्यापूरकौ [v]उभा उभौ द्वौ युवां [v]दक्षस्य एतन्नामस्य प्रजापतेः [v]वचसः स्तुतेः संबन्धिनौ [v]बभूवथुः। [v]हि प्रसिद्धौ। पुरा युवां दक्षेणास्ताविषाथां खलु। [v]ता[1] तादृशौ प्रशस्तौ[2] [v]वां युवां [v]विश्वकः एतन्नामक ऋषिः [v]तनूकृथे। तनोति कुलमिति तनूः पुत्रः। तस्य विष्णाप्वो निमित्तं [v]हवते स्तुतिभिराह्वयति। तस्मात् [v]नः अस्माकं [v]सख्या सख्यानि यष्टृयष्टव्यतया जातानि सख्यित्वानि [v]मा [v]वि [v]यौष्टं मा पृथक्कुरुतम्। यौतेर्लुङि सिचि रूपम्। किंच युवां [v]मुमोचतम् अस्मानागन्तुं रथे स्थित्वाश्वप्रग्रहान्मुञ्चतम्। मुञ्चतेर्लोटि 'बहुलं छन्दसि' इति शपः श्लुः। अडागमः। अत्र विष्णापूनामानं पुत्रमुद्दिश्य तस्य पिता विश्वको युवामाह्वयतीत्यात्मानमाह। यद्वा। विश्वकस्य पिता कृष्णो नामर्षिर्मम पुत्रो विश्वकः पुत्रार्थं युवामधिह्वयतीति वदति॥

कथा नूनं वां विमना उप स्तवद्युवं धियं ददथुर्वस्यइष्टये।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥ २ ॥

कथा। नूनम्। वाम्। विऽमनाः। उप। स्तवत्। युवम्। धियम्। ददथुः। वस्यःऽइष्टये।
ता। वाम्। विश्वकः। हवते। तनूऽकृथे। मा। नः। वि। यौष्टम्। सख्या। मुमोचतम् ॥२॥

हे अश्विनौ [v]विमनाः एतन्नामक ऋषिः [v]नूनं पुरा [v]कथा कथं [v]वां युवाम् [v]उप [v]स्तवत् कथमुपास्तौत्। तेन स्तुतौ [v]युवं युवां [v]वस्यइष्टये। वस्यो वसीयः प्रशस्तं धनम्। तस्याभिलषितस्येष्टयेऽभिगमनाय यद्वा[3] वसिष्ठधनस्येष्टये[3] प्राप्तये [v]धियं बुद्धिं विमनसे [v]ददथुः अददाथां खलु। वस्य इति वसुमच्छब्दादीयसुनि 'विन्मतोर्लुक्' इति लुक्। ईयसुन ईकारलोपश्छान्दसः। तादृशौ युवां [v]विश्वको [v]हवते इति गतम्॥

युवं हि ष्मा पुरुभुजेममेधतुं विष्णाप्वे ददथुर्वस्यइष्टये।
ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥ ३ ॥

युवम्। हि। स्म। पुरुऽभुजा। इमम्। एधतुम्। विष्णाप्वै। ददथुः। वस्यःऽइष्टये।
ता। वाम्। विश्वकः। हवते। तनूऽकृथे। मा। नः। वि। यौष्टम्। सख्या। मुमोचतम् ॥३॥

---

१. ख-ग-ज्ञ-त१-२-३-न-भ-श—तौ। २. ख-त-न-श—प्रयस्तौ। ३. ख-यद्वावसिष्ट°; ग-भ३—यद्वा विशिष्ट°; त-न-भ२-मु—यद्वावशिष्ट°; श—यद्वा अवशिष्ट°।

हे [v]पुरुभुजा पुरुभुजौ पुरूणां बहूनां धनादिदानेन भोजयितारौ । यद्वा । बहूनां स्तोतॄणां पालयितारावश्विनौ । [v]युवम् । [v]हि [v]ष्म इत्यवधारणे । युवामेव [v]इममेधतुम् । एधतेः ' एधिवहोश्नुः[1] ' (उ. सू. १. ७८) इति चतुप्रत्ययः । चित्त्वादन्तोदात्तः । इमां धनादिवृद्धिं [v]विष्णाप्वे । विष्णोः सर्वेषां देवानां मुख्यत्वात् तद्ग्रहणे[2] सर्वे देवा गृहीता भवन्ति । विष्ण्वादीन् कर्मणा व्याप्नोतीति विष्णापूः । पृषोदरादिः । यद्वा । विष्णुं सर्वग्रहेषु व्याप्तं सोमं दशापवित्रेणापुनातीति । तस्य चतुर्थी विष्णाप्व इति । एतन्नामके मम पुत्रे पौत्रे वा । पुत्राय पौत्राय वा । इमां धनादिवृद्धिं [v]ददथुः अदत्तम् । किमर्थम् । [v]वस्यइष्टये वसीयसः प्रशस्तधनस्येष्टय इच्छां पूरयितुम् । ' क्रियार्थोपपदस्य ' (पा. सू. २. ३. १४) इति चतुर्थी । [v]ता [v]वाम् इति पूर्ववद्व्याख्येयम् ॥

उत त्यं वीरं धनसामृजीषिणं दूरे चित्सन्तमवसे हवामहे ।
यस्य स्वादिष्ठा सुमतिः पितुर्यथा मा नो वि यौष्टं सख्या मुमोचतम् ॥४॥

उत । त्यम् । वीरम् । धनऽसाम् । ऋजीषिणम् । दूरे । चित् । सन्तम् । अवसे । हवामहे ।
यस्य । स्वादिष्ठा । सुऽमतिः । पितुः । यथा । मा । नः । वि । यौष्टम् । सख्या । मुमोचतम् ॥४॥

हे अश्विनौ [v]उत अपि च [v]वीरं कर्मणि समर्थं [v]धनसां धनानां संभक्तारम् [v]ऋजीषिणम् । ऋजीषोऽपार्जितोऽभिषुतः[3] सोमः[3] । तद्वन्तं [v]दूरे [v]चित् दूर एव [v]सन्तं भवन्तं विनष्टमिव [v]त्यं तं विष्णाप्वम् [v]अवसे अस्माकं रक्षणाय [v]हवामहे आह्वयामः । पुत्रो हि पितरं रक्षति । किंच [v]यस्य पुत्रस्य पौत्रस्य वा [v]सुमतिः शोभना स्तुतिः [v]स्वादिष्ठा स्वादुतमा । अतिशयेन देवानां स्वादुकारिणीत्यर्थः । तत्र दृष्टान्तः । [v]पितुर्यथा । पितुर्विश्वकस्य स्तुतिर्यथा देवानां प्रीतिकरी[4] तद्वत् । तस्मात्तमाह्वयाम इति शेषः । [v]मा [v]नो इति गतार्थः ॥

ऋतेन देवः सविता शमायत ऋतस्य शृङ्गमुर्विया वि पप्रथे ।
ऋतं सासाह महि चित्पृतन्यतो मा नो वि यौष्टं सख्या मुमोचतम् ॥५॥

ऋतेन । देवः । सविता । शम्ऽआयते । ऋतस्य । शृङ्गम् । उर्विया । वि । पप्रथे ।
ऋतम् । ससाह । महि । चित् । पृतन्यतः । मा । नः । वि । यौष्टम् । सख्या । मुमोचतम् ॥५॥

ऋषिः सत्यप्रशंसां करोति । हे अश्विनौ [v]देवः[5] द्योतमानः [v]सविता सर्वस्य स्वस्वकर्मणि प्रेरक एतन्नामको देवः [v]ऋतेन सत्येन [v]शमायते सायंकाले स्वकिरणसमूहं शमयति । ततोऽनन्तरं स एव सविता [v]ऋतस्य सत्यस्य [v]शृङ्गम् अग्रम् [v]उर्विया उरु विस्तीर्णं यथा भवति तथा प्रातःकाले [v]वि [v]पप्रथे विशेषेण प्रथयति । सर्वतो विस्तारयति । किंच [v]पृतन्यतः पृतनामिच्छतः संयुयुत्सोः शत्रोः [v]महि [v]चित् महदपि बलम् [v]ऋतं सत्यं[6] स्वयमेवाभिभवति । इत्थमृतं प्रशस्तमभूत् । तस्माद्युवामपि तेनर्तेन [v]नः अस्माकं सख्यानि [v]मा [v]वि [v]यौष्टम् । अत्रागन्तुमश्वरभ्मीन् मुञ्चतमिति ॥ ॥ ९ ॥

' शुन्ध्यू वाम् ' इति षड्र्चं सप्तमं सूक्तम् । तथा चानुक्रम्यते—' शुन्ध्यू षड्वासिष्ठो वा शुन्ध्यूकः प्रियमेधो वा प्रागाथं ह ' इति । वसिष्ठपुत्रो शुन्ध्यूक ऋषिराङ्गिरसः प्रियमेधो वा । उभयत्र

---

१. ग-उ-सू-°वह्योश्नुः । २. श-तद्ग्रहणेन । ३. घ-उपार्जितः अभिषुतसोमः; ज्ञ-त४-भ-श-ऋजीषोपार्जितोऽभिषुतसोमः । ४. ग-प्रीतिकारिणी । ५. ख-त-भ-श-देवौ । ६. घ-सत्यं ससाह ।

वाशब्दाद्यदोभावपि न स्यातां तदा प्रकृत आङ्गिरसः कृष्ण एव ऋषिः । अयुजो बृहत्यो युजः सतोबृहत्यः । अश्विनौ देवता । प्रातरनुवाक आश्विने क्रतौ बार्हते छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । सूत्रितं च—' द्युम्नी वां यत्स्थ इति बार्हतम् ' (आश्व. श्रौ. ४. १५) इति ॥

द्युम्नी वां स्तोमो अश्विना क्रिविर्न सेक आ गतम् ।
मध्वः सुतस्य स दिवि प्रियो नरा पातं गौराविवेरिणे ॥ १ ॥

द्युम्नी । वाम् । स्तोमः । अश्विना । क्रिविः । न । सेके । आ । गतम् ।
मध्वः । सुतस्य । सः । दिवि । प्रियः । नरा । पातम् । गौरौऽइव । इरिणे ॥ १ ॥

हे ᵛअश्विना अश्विनौ अयमनुपक्षीणस्तोत्रो द्युम्नीक एतन्नामक ऋषिः ᵛवां युवयोः ᵛस्तोमः स्तोता भवति । युष्मत्स्तुतौ कृतायां स्तोत्राणि नाल्पीभवन्ति[1] किंतु पुनर्वर्धन्त इत्यर्थः । तत्र दृष्टान्तः । ᵛक्रिविर्न । क्रिविरिति कूपनाम । कूपो यथा ᵛसेके उदकसेचने वृष्टौ[2] भवन्त्यां नाल्पोदको[3] भवति[4] तद्वत् । यद्वा । वां युवयोः स्तोमो युष्मद्विषया स्तुतिर्धुक्ष्यन्नवती खलु । स्तोत्रे कृते तस्मा अन्नादिकं प्रयच्छत इत्यर्थः । तस्माद्युवामस्मदीयं यज्ञं प्रति ᵛआ ᵛगतम् । स्तोत्राणि श्रोतुमागच्छतम् । हे ᵛनरा नरौ नेतारावश्विनौ ᵛसः अगं स्तोता ᵛदिवि द्योतमाने अस्मिन्[4] यज्ञे ᵛसुतस्य अभिपुतस्य ᵛमध्वः मदकरस्य सोमस्य ᵛप्रियः स्तोत्रकारित्वेन प्रियतमो भवति । ततस्तेन सुतं सोमं ᵛपातं युवां शीघ्रमागत्य पिबतम् । तत्र दृष्टान्तः । ᵛगौराविव यथा तृषितौ गौरावेतन्नामकौ मृगौ ᵛइरिणे तटाकादिषूदकपानार्थं शीघ्रमागच्छतस्तद्वत् ॥

पिबतं घर्मं मधुमन्तमश्विना बर्हिः सीदतं नरा ।
ता मन्दसाना मनुषो दुरोण आ नि पातं वेदसा वयः ॥ २ ॥

पिबतम् । घर्मम् । मधुऽमन्तम् । अश्विना । आ । बर्हिः । सीदतम् । नरा ।
ता । मन्दसाना । मनुषः । दुरोणे । आ । नि । पातम् । वेदसा । वयः ॥ २ ॥

*हे ᵛअश्विना अश्विनौ ᵛमधुमन्तं मदवन्तम् । मदकारिणमित्यर्थः । तादृशं रसवन्तं वा ᵛघर्मम् । ' घृ क्षरणदीप्त्योः ' । पात्रेषु क्षरन्तं सोमं ᵛपिबतम् । यद्वा । मधुमन्तम् । मधुर्मदकरः सोमः तद्वन्तं घर्मं महावीरपात्रागतं क्षीरं पिबतं सोमं चेति । न तु साहचर्येण तदसंभवात् । हे ᵛनरा नरौ नेतारौ सर्वस्य हे अश्विनौ ᵛबर्हिः बर्हिषि यज्ञे ᵛआ ᵛसीदतम् उपविशतम् । यद्वा । पूर्वं द्वितीयं पादं व्याख्याय प्रथमपादो व्याख्येयः । उपसदनानन्तरं सोमपानं युक्तमिति । किंच ᵛमनुषः मनुष्यस्य ᵛदुरोणे गृहभूतेऽस्मिन् देवयजने ᵛमन्दसाना[5] सोमपानेन मोदमानौ ᵛता तौ पूर्वोक्तलक्षणौ युवां ᵛवेदसा पुरोडाशादिलक्षणेन हविषा सह ᵛवयः सोमरूपमन्नम्[6] ᵛआ आगत्य ᵛनि ᵛपातं निपिबतम् । यद्वा । वेदसा धनेन सह वयोऽस्माकमायुर्नि पातं नितरां रक्षतम् ॥

आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ।
ता वर्तिर्यातमुप वृक्तबर्हिषो जुष्टं यज्ञं दिविष्टिषु ॥ ३ ॥

---

१. ख-त-भ१-२—वाल्पीभवंति; श—वा नाल्पीभवंति । २. त-श—दृष्टौ । ३. ख-ज्ञ-त२-भ१-२—अल्पोदका भवति; ग-त१-३-४—अल्पोदका भवंति; श—अस्त्योदका भवंति । ४. ख-त-श—देवतेस्मिन्; ग—देवताभिरस्मिन्; भ—देवातस्मिन् । * ग-त३-४-श—पुस्तकेषु द्वितीयतृतीयचतुर्थमन्त्राणां भाष्यं न विद्यते । ५. भ—मंदसाना मंदसानौ । ६. घ—सोमलक्षणमन्नं ।

आ । वाम् । विश्वाभिः । ऊतिऽभिः । प्रियऽमेधाः । अहूषत ।
ता । वर्तिः । यातम् । उप । वृक्तऽबर्हिषः । जुष्टम् । यज्ञम् । दिविष्टिषु ॥ ३ ॥

हे अश्विनौ ᵛप्रियमेधाः । मेधो यज्ञः । प्रियतमयज्ञा यजमानाः । यद्वा । प्रियमेधा एतन्नामक ऋषिः । पूजायां बहुवचनम् । यष्टार ऋषिवा ᵛविश्वाभिरूतिभिः सर्वैः पालनैः सह । अथवा अवतिः याच्ञाकर्मा । सर्वैरभिलषितयाचनैः सहिताः ᵛअहूषत आह्वासिषुः आह्वासीत् । आत्मनः पालनहेतुकत्वेन । यद्वाभिलषितदानाय वामाह्वयन्ति । ᵛता तौ युवां ᵛवृक्तबर्हिषः आस्तरणार्थं छिन्नबर्हिषो यष्टुः संबन्धि ᵛजुष्टं सर्वैर्देवैः सेवितं पर्याप्तं वा ᵛयज्ञं यजनीयं हविः प्रति ᵛदिविष्टिषु दिवसानामह्नामागमनेषु प्रातःकालेषु यज्ञेषु वा ᵛवर्तिः । वर्तन्तेऽत्रेति वर्तिर्गृहम् । तत् ᵛउप ᵛआ ᵛयातं हविःस्वीकरणार्थं युवामागच्छतम् ॥

पिबतं सोमं मधुमन्तमश्विना बर्हिः सीदतं सुमत् ।
ता वावृधाना उप सुष्टुतिं दिवो गन्तं गौराविवेरिणम् ॥ ४ ॥

पिबतम् । सोमम् । मधुऽमन्तम् । अश्विना । आ । बर्हिः । सीदतम् । सुऽमत् ।
ता । ववृधानौ । उप । सुऽस्तुतिम् । दिवः । गन्तम् । गौरौऽइव । इरिणम् ॥ ४ ॥

हे ᵛअश्विना अश्विनौ ᵛमधुमन्तं रसवन्तं मदवन्तं वा ᵛसोमं युवां ᵛपिबतम् । ततः ᵛबर्हिः बर्हिषि यज्ञे ᵛसुमत् शोभनम् ᵛआ ᵛसीदतम् । पश्चात् ᵛववृधानौ सोमपानेन वृद्धौ ᵛता तौ युवां ᵛदिवः द्युलोकात् ᵛसुष्टुतिम् अस्माभिः क्रियमाणां शोभनां स्तुतिम् ᵛउप ᵛगन्तं उपगच्छतम् । तत्र दृष्टान्तः । ᵛगौराविव यथा गौरमृगावन्यस्मादेशात् ᵛइरिणं तटाकादिकं प्रति जलपानार्थमागच्छतस्तद्वत् ॥

आ नूनं यातमश्विनाश्वेभिः प्रुषितप्सुभिः ।
दस्रा हिरण्यवर्तनी शुभस्पती पातं सोममृतावृधा ॥ ५ ॥

आ । नूनम् । यातम् । अश्विना । अश्वेभिः । प्रुषितप्सुऽभिः ।
दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी । शुभः । पती इति । पातम् । सोमम् । ऋतऽवृधा ॥५॥

हे ᵛअश्विना अश्विनौ युवां ᵛप्रुषितप्सुभिः । प्सु[1] इति रूपनाम । 'प्रुष[2] स्नेहनसेचनपूरणेषु' । स्निग्धरूपैः दीप्तरूपैरित्यर्थः । तादृशैः शीघ्रगामिभिरश्वैः सह ᵛनूनम् इदानीम् ᵛआ ᵛयातम् अस्मदीयं यज्ञं प्रत्यागच्छतम् । हे ᵛदस्रा दस्रौ दर्शनीयावुपक्षपयितारौ वा हे ᵛहिरण्यवर्तनी । वर्ततेऽत्रेति वर्तनी रथः । हिरण्मयरथौ हे ᵛशुभस्पती उदकस्य कल्याणस्य वा पालयितारौ हे ᵛऋतावृधा सत्यस्य[3] यज्ञस्य वा वर्धयितारौ हे अश्विनौ युवां शीघ्रमागत्य ᵛसोमं ᵛपातं पिबतम् ॥

वयं हि वां हवामहे विपन्यवो विप्रासो वाजसातये ।
ता वल्गू दस्रा पुरुदंससा धियाश्विना श्रुष्टया गतम् ॥ ६ ॥

वयम् । हि । वाम् । हवामहे । विपन्यवः । विप्रासः । वाजऽसातये ।
ता । वल्गू इति । दस्रा । पुरुऽदंससा । धिया । अश्विना । श्रुष्टी । आ । गतम् ॥ ६ ॥

---

१. ख-ज्ञ-त१-२-३-भ२-३–प्स; ज्ञ४-भ१–स; श–अप्स । २. ख-ज्ञ-त१-भ३–प्रुष प्लुष । ३. ख-ज्ञ-त१-२–ऋतस्य सत्यस्य ।

हे अश्विनौ[1] ᵛविपन्यवः स्तोतारः अत एव ᵛविप्रासः विप्राः[2] मेधाविनः ᵛवयं ᵛवाजसातये अन्नलाभाय ᵛवाम्। हिरवधारणे। युवामेव ᵛहवामहे स्तुतिभिराह्वयामः। ततः[3] ᵛवल्गू। वल्गनं कुशलगमनम्। कुशलगमनशीलौ ᵛपुरुदंससा बहुकर्माणौ तौ युवां ᵛधिया अस्मदीयया स्तुत्याहूतौ सन्तौ ᵛश्रुष्टी। श्रुष्टीति क्षिप्रनाम। क्षिप्रमस्मभ्यं धनादिदानाय ᵛआ ᵛगतम् आगच्छतम्॥ ॥१०॥

'तं वो दस्मम्' इति षड्चमष्टमं सूक्तं गौतमस्य[4] नोधस आर्षम्। तथा चानुक्रम्यते—'तं वो दस्मं नोधाः' इति। 'प्रागाथं ह' इत्युक्त्वादेतदादिसूक्तत्रयं प्रागाथम्। इन्द्रो देवता। महाव्रते निष्केवल्ये बार्हततृचाशीतावेतत्सूक्तम्। तथा च पञ्चमारण्यके सूत्रितं—'तं वो दस्ममृतीषहमा नो विश्वासु हव्यः' (ऐ. आ. ५. २. ४) इति। अग्निष्टोमे माध्यंदिनसवनेऽच्छावाकशस्त्रे 'तं वो दस्मम्' इति प्रगाथः स्तोत्रियः[5]। सूत्रितं च—'तं वो दस्ममृतीषहं तरवा यामि सुवीर्यमिति प्रगाथौ स्तोत्रियानुरूपौ' (आश्व. श्रौ. ५. १६) इति। चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिनो वैकल्पिकः स्तोत्रियोऽयमेव प्रगाथः (आश्व. श्रौ. ७. ४)। विषुवत्यपि माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रे 'तं वो दस्ममृतीषहम्' इति नौधसस्य योनिः शंसनीया। 'तं वो दस्ममृतीषहमभि प्र वः सुराधसम्' (आश्व. श्रौ. ८. ६) इति॥

तं वो॑ दस्ममृती॒षहं॑ वसो॒र्मन्दा॑नमन्ध॒सः।
अ॒भि व॒त्सं न स्वस॑रेषु धे॒नव॒ इन्द्रं॑ गी॒र्भिर्न॑वामहे॥ १॥

तम्। वः। दस्मम्। ऋतिऽसहम्। वसोः। मन्दानम्। अन्धसः।
अभि। वत्सम्। न। स्वसरेषु। धेनवः। इन्द्रम्। गीःऽभिः। नवामहे॥ १॥

नोधा इन्द्रं स्तौति। हे ऋत्विग्यजमानाः ᵛदस्मं दर्शनीयम् ᵛऋतीषहम्। ऋतयो बाधकाः शत्रवः। तेषामभिभवितारम्। पुनः कीदृशम्। ᵛवसोः वासयितुर्दुःखस्य निवासयितुः। यद्वा। वसोः पात्रे निवसतः। तादृशस्य ᵛअन्धसः सोमलक्षणस्यान्नस्य पानेन ᵛमन्दानं मन्दमानं मोदमानं ᵛवः यष्टृयष्टव्यत्वेन युष्मत्संबन्धिनं ᵛतं तादृशम् ᵛइन्द्रं ᵛगीर्भिः स्तुतिलक्षणाभिर्वाग्भिः ᵛअभि ᵛनवामहे। 'नू स्तवने' 'नु शब्दे'। अभिष्टुमः। कुत्रेति। ᵛस्वसरेषु। अत्र यास्कः—'स्वसराण्यहानि[6] स्वयंसारीण्यपि वा स्वरादित्यो भवति स एनानि सारयति' (निरु. ५. ४) इति। सूर्यनेतृकेषु दिवसेषु वयमभिष्टुमः। तत्र दृष्टान्तः। ᵛवत्सं ᵛन यथा ᵛधेनवः नवप्रसूतिका धेनवः स्वसरेषु। सुष्ठ्वस्यन्ते प्रेर्यन्ते गावोऽत्रेति स्वसराणि गोष्ठानि। तेषु वत्समभिलक्ष्य शब्दयन्ति तद्वत्॥

द्यु॒क्षं सु॒दानुं॑ तवि॒षीभि॒रावृ॑तं गि॒रिं न पु॑रुभो॒जस॑म्।
क्षु॒मन्तं॑ वा॒जं श॒तिनं॑ सह॒स्रिणं॑ म॒क्षू गोम॑न्तमीमहे॥ २॥

द्युक्षम्। सुऽदानुम्। तविषीभिः। आऽवृतम्। गिरिम्। न। पुरुऽभोजसम्।
क्षुऽमन्तम्। वाजम्। शतिनम्। सहस्रिणम्। मक्षु। गोऽमन्तम्। ईमहे॥ २॥

ᵛद्युक्षं दीप्तीनां निवासस्थानम्। अतिशयितदीप्तिमित्यर्थः। यद्वा। द्युक्षं दिवि द्युलोके[7] क्षियन्तं निवसन्तम्। ᵛसुदानुं शोभनदानं ᵛतविषीभिः बलैः ᵛआवृतम् आच्छादितम्। आवरणे दृष्टान्तः।

---

१. घ–अश्विना अश्विनौ। २. ख-घ-ज्ञ-त१-२-भ१-३–'विप्रा' नास्ति। ३. ख-ग-ज्ञ-त१-२-भ३–ता तौ; भ१–ता तो। ४. त-भ–गोतमस्य। ५. ख-त-श–'स्तोत्रियः' नास्ति। ६. ज्ञ-निरु.–°ण्यहानि भवंति। ७. ख-ज्ञ-त१-२–लोके।

vगिरिं vन तविषीभिर्बलयुक्तैर्मेघैरावृतं शिलोच्चयमिव स्थितम्। पुनः कीदृशम्। vपुरुभोजसं सोमादिहविष्प्रदानेन बहुभिर्यजमानैर्भोजयितव्यं यद्वा बहूनां पालयितारमिन्द्रं vक्षुमन्तम्। 'टुक्षु शब्दे'। शब्दवन्तम्। अनेन पुत्रादिकं लक्ष्यते। स्तोत्रादीनि कुर्वाणं vशतिनं vसहस्रिणं शतसहस्रसंख्याकधनयुक्तं vगोमन्तं गवादियुक्तं vवाजम् अन्नं vमक्षु शीघ्रम् vईमहे याचामहे। यद्वा। पूर्वार्धो वाजविशेषणत्वेन वा योजनीयः। प्रदीसं शोभनदानयोग्यं बलादियुक्तं बहुभिः पुत्रमित्रादिभिर्भोक्तव्यं शब्दादियुक्तमन्नमिन्द्रं याचामह इति ॥

चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिनः 'न त्वा बृहन्तः' इति वैकल्पिकोऽनुरूपः। सूत्रितं च—'न त्वा बृहन्तो अद्रय उभयं शृणवच्च नः' (आश्व. श्रौ. ७. ४) इति ॥

न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीळवः।
यद्दित्ससि स्तुवते मावते वसु नकिष्टदा मिनाति ते ॥ ३ ॥

न। त्वा। बृहन्तः। अद्रयः। वरन्ते। इन्द्र। वीळवः।
यत्। दित्ससि। स्तुवते। माऽवते। वसु। नकिः। तत्। आ। मिनाति। ते ॥ ३ ॥

हे vइन्द्र vबृहन्तः बलेन महान्तः अत एव vवीळवः सर्वतो दृढा अपि vअद्रयः पर्वताः vत्वा त्वां vन vवरन्ते बलेन न निवारयन्ति। अनिवारणमेवोत्तरार्धेन विवृणोति। vस्तुवते त्वद्विषयं स्तोत्रं कुर्वते vमावते मत्सदृशाय मादृशाय[1] स्तोत्रे vयत् vवसु[2] यद्धनं vदित्ससि त्वं दातुमिच्छसि तव देयं vतत् धनं vनकिः न कश्चित् vआ vमिनाति आभिमुख्येन हिनस्ति ॥ 'मीञ् हिंसायाम्'। 'मीनातेर्निगमे' इति ह्रस्वः। मावते। 'युष्मदस्मद्भ्यां सादृश्य उपसंख्यानम्' इति वतुप् ॥

योद्धासि क्रत्वा शवसोत दंसना विश्वा जाताभि मज्मना।
आ त्वायमर्क ऊतये ववर्तति यं गोतमा अजीजनन् ॥ ४ ॥

योद्धा। असि। क्रत्वा। शवसा। उत। दंसना। विश्वा। जाता। अभि। मज्मना।
आ। त्वा। अयम्। अर्कः। ऊतये। ववर्तति। यम्। गोतमाः। अजीजनन् ॥ ४ ॥

हे इन्द्र vक्रत्वा वृत्रहननादिकर्मणा अपि वा प्रज्ञानेन vशवसा आत्मीयेन बलेन vयोद्धा शत्रूणां संप्रहारकः[3] vअसि। vउत अपि च त्वं vदंसना स्वकीयेन कर्मणा vमज्मना। 'मज मुजि शब्दार्थाः'। मजमुजी चेति मजतिः शब्दार्थः। शत्रूणामाक्रोशनसमर्थेन बलेन vविश्वा vजाता सर्वाणि भूतजातान्यभिभवसि। उक्तार्थस्य[4] 'विश्वा जातान्यभ्यसि मह्ना' (ऋ. सं. ८. १००. ४) इत्यादिमन्त्रेणैवोक्तत्वात्। एतादृशं vत्वा त्वाम् vअर्कः। 'अर्च पूजायाम्'। अर्चनीयः vअयं मन्त्रः यद्वार्को देवानामर्चकः पूजकोऽयं स्तोता vऊतये स्वरक्षणाय vआ vववर्तति आवर्तयति। आत्माभिमुख्ये[5] करोतीत्यर्थः। वर्ततेर्लेटि बहुलं श्लुरडागमश्च। vयं त्वां vगोतमाः गोतमपुत्राः[6] नोधःप्रभृतयः vअजीजनन् स्वयज्ञे प्रादुरबीभवन्। तं[7] त्वामयं[7] vमन्त्रः स्तोता वावर्तयति ॥

---

१. ख-ग-न-'मादृशाय' नास्ति। २. त-भ१-२-वस्तु। ३. ग-संहारकः। ४. ख-त-न-भ-उक्तार्थस्य; श-उक्तार्थोस्य। ५. ग-आत्माभिमुखं। ६. ख-त-भ-गौतम°। ७. ख-त-भ-श-तं त्वां वयं; न-तं त्वा वयं।

प्र हि रिरिक्ष ओजसा दिवो अन्तेभ्यस्परि ।
न त्वा विव्याच रज इन्द्र पार्थिवमनु स्वधां ववक्षिथ ॥ ५ ॥

प्र । हि । रिरिक्षे । ओजसा । दिवः । अन्तेभ्यः । परि ।
न । त्वा । विव्याच । रजः । इन्द्र । पार्थिवम् । अनु । स्वधाम् । ववक्षिथ ॥ ५ ॥

हे इन्द्र vदिवः द्युलोकस्य पर्यन्तेभ्यः vओजसा । हिरवधारणे । स्वबलेनैव vप्र vरिरिक्षे प्रकर्षेणातिरिक्तो भवसि । रिचेर्लटि ' बहुलं छन्दसि ' इति श्लुः । प्रत्ययस्वरः । किंच हे vइन्द्र vपार्थिवं पृथिव्यां भवः vरजः लोकः vत्वा त्वां महता स्वशरीरेण vन vविव्याच न व्याप्नोति । द्यावापृथिवीभ्यामपि स्वतः स त्वं बलेन समर्थो भवसीत्यर्थः । एवंभूतः सन्नस्माकं vस्वधाम् अन्नमुदकं वा vअनु vववक्षिथ अनुवोढुमिच्छ । वहेः सनन्तस्य छान्दसे लिटि रूपम् । मन्त्रत्वादामभावः ॥

नकिः परिष्टिर्मघवन्मघस्य ते यदाशुषे दशस्यसि ।
अस्माकं बोध्युचथस्य चोदिता मंहिष्ठो वाजसातये ॥ ६ ॥

नकिः । परिष्टिः । मघऽवन् । मघस्य । ते । यत् । दाशुषे । दशस्यसि ।
अस्माकम् । बोधि । उचथस्य । चोदिता । मंहिष्ठः । वाजऽसातये ॥ ६ ॥

हे vमघवन् धनवन्निन्द्र vते तव vमघस्य मंहनीयस्य धनस्य vपरिष्टिः परिबाधको निरोद्धा vनकिः न कश्चिदस्ति । vयत् यदा vदाशुषे हविर्दत्तवते यजमानाय vदशस्यसि धनं प्रयच्छसि तदा तस्य निरोधको नास्तीत्यर्थः । तथा सति vचोदिता धनानां चोदयिता स्तोतृभ्यः प्रेरयिता अत एव vमंहिष्ठः दातृतमो मंहनीयो वा स त्वम् vअस्माकं संबन्धि vउचथस्य स्तोत्रं vवाजसातये अन्नलाभाय तदर्थं क्रियमाणमिति vबोधि बुध्यस्व । स्तोत्रेण स्तुतः सन्नस्मभ्यमन्नादिकं प्रयच्छेति शेषः । बोधि । ' बुध अवबोधने[1] ' । भौवादिकः । लोटि छान्दसः शपो लुक् । ध्यादेशः ॥ ॥ ११ ॥

' बृहदिन्द्राय ' इति सप्तर्चं नवमं सूक्तम् । नृमेधपुरुमेधावृषी । तौ चानुक्रत्वादाङ्गिरसौ । आदितो द्वौ प्रगाथौ पञ्चमीषष्ठ्यावनुष्टुभौ सप्तमी बृहती । इन्द्रो देवता । तथा चानुक्रम्यते—' बृहदिन्द्राय सप्त नृमेधपुरुमेधौ द्व्यनुष्टुब्बृहत्यन्तम् ' इति । चातुर्विंशिकेऽहनि मरुत्वतीये प्राकृतान्मरुत्वतीयात्प्रगाथावूर्ध्वं द्वौ मरुत्वतीयौ प्रगाथौ शंसनीयौ । ' बृहदिन्द्राय गायत ' इत्ययमाद्यः प्रगाथः । पृष्ठ्याभिप्लवषडहयोः द्वितीयेऽहन्ययं[2] प्रगाथः । सूत्रितं च—' बृहदिन्द्राय गायत नकिः सुदासो रथमिति मरुत्वतीया ऊर्ध्वं नित्यात् ' (आश्व. श्रौ. ७. ३) इति ॥

बृहदिन्द्राय गायत मरुतो वृत्रहंतमम् ।
येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥ १ ॥

बृहत् । इन्द्राय । गायत । मरुतः । वृत्रहमऽतमम् ।
येन । ज्योतिः । अजनयन् । ऋतऽवृधः । देवम् । देवाय । जागृवि ॥ १ ॥

हे vमरुतः । ' रु शब्दे ' । मितं रुवन्तीति मरुतः । हे मितभाषिणः स्तोतारः vवृत्रहंतमम् अतिशयेन पापविनाशनं vबृहत् साम vइन्द्राय इन्द्रार्थं[3] vगायत अस्मदीययज्ञे गानं कुरुत । vऋता-

१. ख-ज्ञ-त१-२-३-बोधने । २. ख-ग-त-श-द्वितीयेऽहनि । ३. ख-त१-२-इंद्रार्थं देवां यः अजनयन् उत्पादयन् ।

वृधः सत्यस्य यज्ञस्य वा वर्धका विश्वे देवाः vदेवाय द्योतमानायेन्द्राय vदेवं देवनशीलं - - - vजागृवि सर्वेषां जागरणशीलं vज्योतिः सूर्यं vयेन साम्ना vअजनयन् इन्द्रार्थमुदपादयन् तत्साम गायतेति ॥

अर्पाधमद्भिर्शस्तीरशस्तिहाथेन्द्रो द्युम्न्याभवत् ।
देवास्त इन्द्र सख्यायं येमिरे बृहद्भानो मरुद्गण ॥ २ ॥

अर्प । अधमत् । अभिऽशस्तीः । अशस्तिऽहा । अथ । इन्द्रः । द्युम्नी । आ । अभवत् ।
देवाः । ते । इन्द्र । सख्याय । येमिरे । बृहद्भानो इति बृहत्ऽभानो । मरुत्ऽगण ॥ २ ॥

vअशस्तिहा स्तोत्रशंसनरहितानां शत्रूणां हन्ता इन्द्रः vअभिशस्तीः । 'शसु हिंसायाम्' । अभितो हिंसा येषां ते । तादृशान् । यद्वा । अभिशस्तीः शत्रुकृता हिंसाः । vअपाधमत् अपागमयत् । vअथ शत्रुहननानन्तरम् vइन्द्रः vद्युम्नी सर्वत्र द्योतमानयशोयुक्तः । यद्वा । तेषां धनापहरणेन धनादिमान् । vआभवत् सर्वतः प्रसिद्धोऽभवत् । अथोत्तरार्धः प्रत्यक्षकृतः । हे vबृहद्भानो बृंहणशीलतेजस्क महादीप्ते वा vमरुद्गण । मरुतां सप्त गणा यस्य सन्ति स तथोक्तः । तादृश हे vइन्द्र[1] vदेवाः द्योतमानाः सर्वे देवाः vसख्याय आत्मनः सखिभावाय vते[2] त्वां vयेमिरे नियच्छन्ति ॥

अग्निष्टोमे मरुत्वतीये 'प्र व इन्द्राय' इत्ययं मरुत्वतीयः प्रगाथः । सूत्रितं च —'प्र व इन्द्राय बृहत इति मरुत्वतीयः प्रगाथः' (आश्व. श्रौ. ५. १४) इति ॥

प्र वु इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥ ३ ॥

प्र । वः । इन्द्राय । बृहते । मरुतः । ब्रह्म । अर्चत ।
वृत्रम् । हनति । वृत्रऽहा । शतऽक्रतुः । वज्रेण । शतऽपर्वणा ॥ ३ ॥

हे vमरुतः मितराविणः स्तोतारः vबृहते महते vवः स्तुत्यस्तोतृत्वलक्षणेन संबन्धेन युष्मदीयाय vइन्द्राय vब्रह्म सामलक्षणं स्तोत्रं vप्र vअर्चत प्रोच्चारयत । ततः vवृत्रहा वृत्रस्य पापस्य वा हन्ता vशतक्रतुः शतविधकर्मा बहुविधप्रज्ञो वेन्द्रः vशतपर्वणा शतसंख्याकधारेण vवज्रेण एतन्नामकेनायुधेन vवृत्रम् अपामावरकं वृत्रास्यमसुरं vहनति युष्माभिरभिष्टुतः सन् हन्तु । हन्तेर्लेट्यडागमः ॥

अभि प्र भर धृषता धृषन्मनः श्रवश्चित्ते असद्बृहत् ।
अर्षन्त्वापो जवसा वि मातरो हनो वृत्रं जया स्वः ॥ ४ ॥

अभि । प्र । भर । धृषता । धृषत्ऽमनः । श्रवः । चित् । ते । असत् । बृहत् ।
अर्षन्तु । आपः । जवसा । वि । मातरः । हनः । वृत्रम् । जय । स्वरिति स्वः ॥ ४ ॥

हे vधृषन्मनः शत्रूणां धर्षणशीलमनस्केन्द्र vते तवैव vबृहत् महत् अतिप्रभूतम् vश्रवः अन्नम् vअसत् अस्ति । तदन्नं vधृषता धृष्टेन मनसा[3] युक्तः सन् अस्मभ्यम् vअभि vप्र vभर आभिमुख्येन[4]

---

१. ग–इन्द्र ते । २. ग–'ते' नास्ति । ३. ख-त१-४–नमसा । ४. ख-ग-त२-३-भ-श– अभि आभि° ।

प्रकर्षेण संपादय । देहीत्यर्थः । हे इन्द्र [v]मातरः अस्माकमुत्पादनहेतुत्वान्मातृभूताः । कथमपां मातृत्वम् । 'अद्भ्यः पृथिवी पृथिव्या ओषधयः' (तै. उ. २. १) इत्यादिश्रुतेः । तादृश्यः [v]आपः [v]जवसा वेगेन [v]वि [v]अर्षन्तु विविधं भूमिं प्रति गच्छन्तु । कथमापो गच्छन्तीति चेत्तदाह । [v]वृत्रम् अपामावरितारं शत्रुं मेघं [v]हनः जहि ताडय । ततो मेघभेदनेनोदकानि विगच्छन्तु । पुनरपि [v]स्वः सर्वं भूतजातं [v]जय ॥

प्रथमे स्वरसाम्नि निष्केवल्ये 'यज्जायथा अपूर्व्य' इति स्तोत्रियः । तथा च सूत्र्यते—'तेषां स्तोत्रिया यज्जायथा अपूर्व्यं' (आश्व. श्रौ. ८. ५) इति ॥

यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय । तत्पृथिवीमप्रथयस्तद्दृंहा उत द्याम् ॥५॥

यत् । जायथाः । अपूर्व्य । मघऽवन् । वृत्रऽहत्याय ।

तत् । पृथिवीम् । अप्रथयः । तत् । अस्तभ्नाः । उत । द्याम् ॥ ५ ॥

हे [v]अपूर्व्य त्वत्तो व्यतिरिक्तेन पूर्व्येण वर्जित हे [v]मघवन् मंहनीयधनवन्निन्द्र [v]वृत्रहत्याय वृत्रासुरहननाय [v]यत् यदा त्वं [v]जायथाः उत्पन्नः प्रादुर्भूतोऽसि [v]तत् तदानीमेव [v]पृथिवीं प्रथमानाम् [v]अप्रथयः प्रसिद्धां दृढामकरोः । [v]उत अपि च [v]तत् तदानीमेव [v]द्यां द्युलोकमन्तरिक्षेण [v]अस्तभ्नाः निरुद्धामकार्षीः । एतादृशं वीर्यं त्वदन्यस्य न संभवतीत्यर्थं द्योतयितुमपूर्व्येति पदम् ॥

तत्ते यज्ञो अजायत तदर्क उत हस्कृतिः ।
तद्विश्वमभिभूरसि यज्जातं यच्च जन्त्वम् ॥ ६ ॥

तत् । ते । यज्ञः । अजायत । तत् । अर्कः । उत । हस्कृतिः ।

तत् । विश्वम् । अभिऽभूः । असि । यत् । जातम् । यत् । च । जन्त्वम् ॥ ६ ॥

हे इन्द्र यद्यदा त्वमजायथाः [v]तत् तदानीं [v]ते त्वदर्थं [v]यज्ञः अग्निष्टोमादिः [v]अजायत सोमपानार्थमभूत् । [v]उत अपि च तदानीं [v]हस्कृतिः । 'हसे हसने' । हासकारी प्रीत्यर्थं क्रियमाणो हर्षस्य सूचकः [v]अर्कः अर्चनीयो मन्त्रोऽप्यजायत । किंच तदा [v]यज्जातं भूतजातं [v]यच्च [v]जन्त्वम् । कृत्यार्थे त्वन्प्रत्ययः । जनितव्यं यत्[1] [v]विश्वम् अस्ति [v]तत् सर्वम् [v]अभिभूरसि स्वमहिम्नाभिभूतवानसि ॥

आमासु पक्वमैरय आ सूर्यं रोहयो दिवि ।
घर्मं न सामन्तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत् ॥ ७ ॥

आमासु । पक्वम् । ऐरयः । आ । सूर्यम् । रोहयः । दिवि ।

घर्मम् । न । सामन् । तपत । सुवृक्तिऽभिः । जुष्टम् । गिर्वणसे । बृहत् ॥ ७ ॥

हे इन्द्र [v]आमासु अपक्वासु गोषु [v]पक्वं पयः [v]ऐरयः प्रैरयश्च । तथा मन्त्रः—'आमासु चिद्दधिषे पक्वमन्तः' (ऋ. सं. १. ६२. ९) इति । किंच [v]दिवि द्युलोके [v]सूर्यम् [v]आ [v]रोहयः च । पूर्वं पणयो नामासुरा अङ्गिरसां गा अपहृत्यान्धकारावृते कस्मिंश्चित्पर्वते ताः स्थापितवन्तः । ततोऽङ्गिरस इन्द्रं स्तुत्वा गाः पुनरस्मभ्यमाहरेति तैरुक्त इन्द्रो गवां स्थानं तमसावृतं दृष्ट्वा तत्र गोदर्शनाय द्युलोके सर्वप्रकाशकं सूर्यमारोहितवान् । स्थापितवानसि । 'चादिलोपे विभाषा' इति पूर्वस्यैरय इत्यस्य

---

१. ख-घ-ङ-त१-२-३-न-श–'यत्' नास्ति ।

न निघातः । अथ परोक्षकृतोऽर्चति । हे स्तोतारः [v]सुवृक्तिभिः शोभनाभिः स्तुतिभिः [v]तपत इन्द्रं तीक्ष्णीकुरुत । इन्द्रं स्तुतिभिः प्रवर्धयतेत्यर्थः । तत्र दृष्टान्तः । [v]घर्मं [v]न । यथा घर्मं दीपनशीलं प्रवर्ग्यं [v]सामन् । 'सुपां सुलुक्' इति तृतीयाया लुक् । सामभिर्यथा तपन्ति तद्वत् । ततः [v]गिर्वणसे गीर्भिर्वननीयायेन्द्राय [v]जुष्टं प्रीतिकरं पर्याप्तं वा [v]बृहत्[1] साम गायत ॥ ॥ १२ ॥

'आ नो विश्वासु' इति षड्चं दशमं सूक्तम् । नृमेधपुरुमेधावृषी । विषमसंख्याका बृहत्यः समसंख्याकाः[2] सतोबृहत्यः[2] । इन्द्रो देवता । तथा चानुक्रान्तम्–'आ नो विश्वासु षट्' इति । महाव्रते निष्केवल्ये बार्हतगृचाशीतावेतत्सूक्तम् । सूय्यते हि पञ्चमारण्यके–'आ नो विश्वासु हव्यो या इन्द्र भुज आभरः[3]' (ऐ. आ. ५. २. ४) इति[3] ॥

आ नो विश्वासु हव्य इन्द्रः समत्सु भूषतु ।
उप ब्रह्माणि सवनानि वृत्रहा परमज्या ऋचीषमः ॥ १ ॥

आ । नः । विश्वासु । हव्यः । इन्द्रः । समत्ऽसु । भूषतु ।
उप । ब्रह्माणि । सवनानि । वृत्रऽहा । परमऽज्याः । ऋचीषमः ॥ १ ॥

ऋषिरनयेन्द्र एवं करोत्वित्याशास्ते । [v]विश्वासु सर्वासु [v]समत्सु असुरयुद्धेषु [v]हव्यः सर्वैर्देवैरात्मरक्षणार्थमाह्वातव्य एतादृशः [v]इन्द्रः [v]नः अस्माकं [v]ब्रह्माणि स्तोत्राणि हवीरूपाण्यन्नानि वा [v]उप [v]आ [v]भूषतु अनुभवतु । सेवतामित्यर्थः । यद्वा । एतान्यलंकरोतु । तदागमनेन स्तोत्राणि हवींषि वालंकृतानि भवन्ति । तथा [v]सवनानि प्रातःसवनादीनि त्रीणि सवनानि च भूषतु । कीदृश इन्द्रः । [v]वृत्रहा वृत्रस्यासुरस्य पापस्य वा हन्ता [v]परमज्याः । युद्धेषु शत्रुहननार्थं परमाविनश्वरी ज्या मौर्वी यस्य स तथोक्तः । यद्वा । परमान् बलेन प्रकृष्टाञ्शत्रूञ्जिनाति हिनस्तीति परमज्याः । [v]ऋचीषमः स्तुत्या समः स्तुतिभिरभिमुखीकरणीयः । एतादृगिन्द्रः स्तोत्राणि भूषत्विति ॥

त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत् ।
तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः ॥ २ ॥

त्वम् । दाता । प्रथमः । राधसाम् । असि । असि । सत्यः । ईशानऽकृत् ।
तुविऽद्युम्नस्य । युज्या । आ । वृणीमहे । पुत्रस्य । शवसः । महः ॥ २ ॥

हे इन्द्र [v]प्रथमः सर्वेषां मुख्यः [v]त्वं [v]राधसां धनानां [v]दाता [v]असि । यद्वा । धनदातृणां मध्ये त्वं प्रथम आदिमो भवसि । तथा [v]ईशानकृत् तव स्तोतॄन् ईशानान्[4] ऐश्वर्ययुक्तान् कुर्वस्त्वं [v]सत्यः सत्यकर्मा [v]असि । यथार्थकर्मा भवसीत्यर्थः । यस्मादेवं तस्माद्वयं [v]तुविद्युम्नस्य बहुधनवतो बह्वन्नस्य वा [v]शवसः बलस्य [v]पुत्रस्य शत्रुवधार्थं बलकारणत्वेनोत्पन्नत्वात्तत्पुत्रस्य अत एव [v]महः महतस्तव [v]युज्या योग्यानि धनानि [v]आ [v]वृणीमहे संभजामहे ॥

ब्रह्मा त इन्द्र गिर्वणः क्रियन्ते अनतिद्रुता ।
इमा जुषस्व हर्यश्व योजनेन्द्र या ते अमन्महि ॥ ३ ॥

---

१. भ–बृहत् महत् । २. ख-त–'सम° .... °बृहत्यः' नास्ति । ३. ख-त-न-भ-श–आभरेति । ४. ख-ग-त-न-भ-श–ईशान् ।

ब्रह्म । ते । इन्द्र । गिर्वणः । क्रियन्ते । अनतिद्रुता ।
इमा । जुषस्व । हरिऽअश्व । योजना । इन्द्र । या । ते । अमन्महि ॥ ३ ॥

हे vगिर्वणः गीर्भिर्वननीय vइन्द्र vअनतिद्रुता त्वद्गुणान् सर्वानतिक्रम्य न भवन्ति। इन्द्र-गुणव्यापकानि । यथार्थभूतानीत्यर्थः । तादृशानि यानि vब्रह्म ब्रह्माणि स्तोत्राणि vते त्वदर्थमस्माभिः vक्रियन्ते हे vहर्यश्च हरिताश्ववन् हे इन्द्र योजनानि तव सम्यग्योजनशीलानि[1] तानि vइमा इमानि स्तोत्राणि vजुषस्व सेवस्व । किंच हे vइन्द्र vते त्वदर्थं vया यानि स्तोत्राणि vअमन्महि वयमुच्चरामः[2] तानि सर्वाणि सेवस्व ॥

त्वं हि सत्यो मघवन्ननानतो वृत्रा भूरि न्यृञ्जसे ।
स त्वं शविष्ठ वज्रहस्त दाशुषेऽर्वाञ्चं रयिमा कृधि ॥ ४ ॥

त्वम् । हि । सत्यः । मघऽवन् । अनानतः । वृत्रा । भूरि । निऽऋञ्जसे ।
सः । त्वम् । शविष्ठ । वज्रऽहस्त । दाशुषे । अर्वाञ्चम् । रयिम् । आ । कृधि ॥ ४ ॥

हे vमघवन् धनवन्निन्द्र vसत्यः सत्यकर्मा vत्वम् एव vअनानतः केषामप्यप्रह्वः सन् vभूरि भूरीणि वृत्राणि[3] रक्षांसि vन्यृञ्जसे तानि प्रह्वीभावयसि । न्यक्करोषीत्यर्थः । हिरवधारणे । हे vशविष्ठ बलेन वृद्धतम[4] हे vवज्रहस्त । वज्रो हस्ते यस्य स तथोक्तः । हे इन्द्र vसः तादृशः vत्वं vदाशुषे तुभ्यं हविर्दत्तवते यजमानाय vरयिं धनादिकम् vअर्वाञ्चम् अवार्चीनमभिमुखं यथा गच्छति[5] तथा तम् vआ vकृधि समन्तात्कुरु ॥

चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रे 'त्वमिन्द्र यशा असि' इति प्रगाथो वैकल्पिकोऽनुरूपः । सूत्र्यते च—'त्वमिन्द्र यशा असीन्द्र क्रतुं न आ भर' (आश्व. श्रौ. ७. ४) इति ॥

त्वमिन्द्र यशा अस्यृजीषी शवसस्पते ।
त्वं वृत्राणि हंस्यप्रतीन्येक इदनुत्ता चर्षणीधृता ॥ ५ ॥

त्वम् । इन्द्र । यशाः । असि । ऋजीषी । शवसः । पते ।
त्वम् । वृत्राणि । हंसि । अप्रतीनि । एकः । इत् । अनुत्ता । चर्षणिऽधृता ॥ ५ ॥

हे vशवसस्पते बलस्य पालयितर्हे vइन्द्र vऋजीषी । ऋजीषोऽपार्जितोऽभिषुतः सोमः । तद्वान् vत्वं vयशाः यशस्वी vअसि[6] । कथमस्य यशस्वित्वं तदाह । vअप्रतीनि बलिभिरप्यप्रतिगतानि अत एव अनुत्तानि अन्यैर्नोत्तुमशक्यानि vवृत्राणि रक्षांसि vत्वम् vएक vइत् असहाय एव vचर्षणीधृता असुरादिहननद्वारेण मनुष्याणां धारकेण वज्रेण vहंसि संप्रहरसि । अत एवास्य यशस्वित्वम् ॥

तमु त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे ।
महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन् ॥ ६ ॥

---

१. ख–सप्तस्य योजन°; ज्ञ–सम्यक् तस्य योजन°; त१-२-३-४-सस्ययोजन°; श–सस्यस्य योजन° । २. ख-घ-त-भ–वयमुच्चराम; ग–वयमुच्चारयामः; श–वयमुच्चारोम । ३. घ–वृत्रा वृत्राणि । ४. घ–प्रवृद्धतम । ५. ख-त-भ-श–गच्छंति । ६. ख-ज्ञ-त१-२-भ–असि भवसि ।

तम्। ऊँ इति। त्वा। नूनम्। असुर। प्रऽचेतसम्। राधः। भागम्ऽईव। ईमहे। महीऽईव। कृत्तिः। शरणा। ते। इन्द्र। प्र। ते। सुम्ना। नः। अश्नवन्॥ ६॥

हे ᵛअसुर बलवन् प्राणवन् हे इन्द्र य उक्तगुणोऽस्ति[1] ᵛतं ᵛप्रचेतसं[2] प्रकृष्टज्ञानं ᵛत्वा। ᵛउ इत्यवधारणे। पितृवत्पोषकं त्वामेव ᵛराधः धर्मादिसाधनं धनं[3] ᵛनूनम् इदानीम् ᵛईमहे वयं याचामहे। तत्र दृष्टान्तः। ᵛभागमिव। यथा कश्चित्पितृभागभूतं धनं याचते तद्वदिन्द्रो यजमानेभ्यः स्तोतृभ्यश्च धनं प्रयच्छत्येव। तस्माद्भागभूतं धनं यष्टारो वयं याचामहे। हे ᵛइन्द्र ᵛमहीव ᵛकृत्तिः। कृत्तिर्यशो वाऽन्नं वा। 'कृती छेदने'। करणे क्तिन्। कृन्तत्यनेनेति[4]। ईदृशी कृत्तिरिव ᵛते तव ᵛशरणा शरणं गृहमन्तरिक्षे द्युलोके महद्वर्तते। अत्र यास्कः—'कृत्तिः कृन्ततेर्यशो वाऽन्नं वा महीव कृत्तिः शरणा त इन्द्र सुमहत्त इन्द्र शरणमन्तरिक्षे कृत्तिरिव[5]' (निरु. ५. २२) इति। किंच ᵛते तव स्वभूतानि ᵛसुम्ना सुम्नानि पुत्रादिविषयसुखानि च ᵛनः अस्मान् ᵛप्र ᵛअश्नवन् प्रकर्षेणाश्नुवतां व्याप्नुवन्तु। अश्नोतेर्लेट्यडागमः॥ ॥ १३ ॥

'कन्या वाः' इति सप्तर्चमेकादशं सूक्तम्। अत्रेः पुत्र्यपालाख्या त्वग्दोषपरिहारायानेन सूक्तेनेन्द्रं स्तुतवती। अतः सैवर्षिः। प्रथमाद्वितीये पङ्क्ती शिष्टाः पञ्चानुष्टुभः। इन्द्रो देवता। तथा चानुक्रान्तं—'कन्या वाः सप्तात्रेय्यपालेतिहास ऐन्द्र आनुष्टुभं द्विपङ्क्त्यादि' इति। विनियोगो लैङ्गिकः। अत्रेतिहासमाचक्षते। पुरा किलात्रिसुतापाला ब्रह्मवादिनी केनचित्कारणेन त्वग्दोषदुष्टा सत्यत एव दुर्भगेति भर्त्रा परित्यक्ता पितुराश्रमे त्वग्दोषपरिहाराय चिरकालमिन्द्रमधिकृत्य तपस्तेपे। सा कदाचिदिन्द्रस्य सोमः प्रियकरो भवति तमिन्द्राय दास्यामीति बुद्ध्या नदीतीरं प्रत्यागमत्[6]। सा तत्र स्नात्वा पथि सोममप्यलभत। तमादाय गृहं प्रत्यागच्छन्ती मार्ग एव तं चखाद। तद्भक्षणकाले दन्तघर्षणजातं शब्दं ग्राव्णां सोमाभिषवध्वनिमिति[7] मत्वा तदानीमेवेन्द्रः समागमत्। आगत्य तामुवाच। किमत्र ग्रावाणोऽभिषुण्वन्तीति। सा प्रत्यूचे। अत्र कन्या स्नानार्थमागत्य सोमं दृष्ट्वा तं भक्षयति तद्भक्षणजो ध्वनिरेव न तु ग्राव्णां सोमाभिषवध्वनिरिति। तथा प्रत्युक्त इन्द्रः पराङावर्तत। गच्छन्तमिन्द्रं सा पुनरब्रवीत्। किमर्थं निवर्तसे त्वं तु सोमपानाय गृहं गृहं प्रति गच्छसि। इदानीमत्रापि मम दंष्ट्राभ्यामभिषुतं सोमं पिब धानादींश्च भक्षयेति। सैवेन्द्रमनादृियमाणा सती पुनरप्याह। अत्रागतं त्वामिन्द्र[8] इति न जानामि त्वयि गृहमागते बहुमानं करिष्यामीतीन्द्रमुक्त्वात्र समागत इन्द्र एव नान्य इति निश्चित्य स्वास्ये निहितं सोममाह। हे सोम त्वमागतायेन्द्राय पूर्वं शनैस्ततः शनकैः क्षिप्रं परिस्रवेति। तत इन्द्रस्तां[9] कामयित्वा तस्या आस्य एव दंष्ट्राभिपुतं सोममपात्। तत इन्द्रेण सोमे पीते सति त्वग्दोषादहं भर्त्रा परित्यक्ता सतीदानीमिन्द्रेण संगतेत्यपालायामुक्तायामिन्द्रस्तां व्याजहार। किं कामयसे तदहं करिष्यामीत्युक्ते सा वरमचीकमत। मम पितुः शिरो रोमवर्जितं तस्योषरं क्षेत्रं फलादिरहितं मम गुह्यस्थानमप्यरोमशमेतानि रोमफलादियुक्तं कुर्वित्युक्तायां तस्मिन्पितृशिरःस्थितं[10] खलतिमपहाय क्षेत्रं च फलादियुक्तं कृत्वैतस्यास्त्वग्दोषपरिहाराय स्वकीयरथच्छिद्रे शकटस्य युगस्य च छिद्र एतां त्रिवारं निश्चकर्ष। तस्याः पूर्वापहता या त्वक् शल्यको द्वितीया गोधा तृतीया कृकलासोऽभूत्। तत इन्द्रस्तामप्यपालां सूर्यसदृशत्वचमकरोदित्यैतिहासिकी कथा। एतच्च शाट्यायनब्राह्मणे स्पष्टमुक्तम्। तद्ब्राह्मणं तत्तद्व्याख्यानसमये दर्शयिष्यते। एषोऽर्थः[11] 'कन्या वाः' इत्यादिष्वृक्षु प्रतिपाद्यते॥

---

१. ग—उक्तगुणोसि। २. त-भ१-२—सप्रचेतसं; श—प्रचेतसं। ३. ख-त१-२-३-४-भ२-३-श—दानं; ज्ञ-भ१—धनं दानं। ४. ख-ग-त—कृतं कृत्यनेनेति; श—कृते कृंतत्यनेनेति। ५. ज्ञ—कृत्तिरिवेति। ६. ख-त-श—प्रत्यागमयत्; भ१-२—प्रत्यगमयत्। ७. ज्ञ—°ध्वनिरिति। ८. ग-त-भ-श—त्वामिंद्रमिति। ९. ग—इंद्रः सोमं। १०. ग-त—°शिरःस्थितां। ११. भ१-२-य—एषोर्थः क्रमेण।

कन्या३ वारवायती सोममपि स्रुताविदत् ।
अस्तं भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा ॥ १ ॥

कन्या । वाः । अवऽयती । सोमम् । अपि । स्रुता । अविदत् ।
अस्तम् । भरन्ती । अब्रवीत् । इन्द्राय । सुनवै । त्वा । शक्राय । सुनवै । त्वा ॥ १ ॥

Vवाः उदकं प्रति Vअवायती स्नानार्थमभ्यवगच्छन्ती Vकन्या अपाला नाम स्त्री Vस्रुता स्रुतौ मार्गे Vसोममपि Vअविदत् अलभत । 'विदॢ लाभे' । लतारूपं तं सोमम् Vअस्तं गृहं प्रति Vभरन्ती आहरन्ती सा[1] सोमम् Vअब्रवीत् । हे सोम Vत्वा त्वाम् Vइन्द्राय Vसुनवै मम दन्तैरेवाभिषुणवै । पुनर्हे सोम Vत्वा त्वां Vशक्राय समर्थायेन्द्राय Vसुनवै इदानीमेवाभिषवं करवै । सोमभक्षणकाले दन्तध्वनिं[2] ग्रावध्वनिमिति[3] मत्वेन्द्रस्तामगमत् । एषोऽर्थः शाट्यायनब्राह्मणे स्पष्टमभिहितः— 'सा तीर्थमभ्यवयन्ती सोमांशुमविन्दत्तं समखादत्तस्यै ह[4] ग्रावाण इव दन्ता ऊदुः[5] । स इन्द्र आद्रवत् ग्रावाणो वै वदन्तीति । सा तमभिव्याजहार कन्या वारवायती सोममपि स्रुताविददित्यस्यै[6] त इदं ग्रावाण इव दन्ता वदन्तीति विदित्वेन्द्रः पराङावर्तत । तमब्रवीदसौ य एषि वीरक इत्यादिना' इति ॥

असौ य एषि वीरको गृहंगृहं विचाकशत् ।
इमं जम्भसुतं पिब धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् ॥ २ ॥

असौ । यः । एषि । वीरकः । गृहम्ऽगृहम् । विऽचाकशत् ।
इमम् । जम्भऽसुतम् । पिब । धानाऽवन्तम् । करम्भिणम् । अपूपऽवन्तम् । उक्थिनम् ॥२॥

सा शक्रमब्रवीत् । हे इन्द्र Vवीरकः वीरः समर्थस्त्वं Vयः Vअसौ त्वं Vविचाकशत् । 'काशृ दीप्तौ' । यङ्लुकि शतरि रूपम् । धातोर्ह्रस्वश्छान्दसः । अत्यर्थं दीप्यमानः सन् Vगृहंगृहं यजमानगृहं प्रति सोमपानाय त्वम् Vएषि गच्छसि । अतस्त्वमत्रापि Vजम्भसुतं मम दन्तैरभिषुतम् Vइमं सोमं Vपिब । कीदृशम् । Vधानावन्तम् । धाना भृष्टयवाः । तद्वन्तं Vकरम्भिणं सक्तुमन्तम् Vअपूपवन्तं पुरोडाशादिसहितम् Vउक्थिनं स्तोत्रादियुक्तमेतादृशं सोममत्रैव पिबेति । सा सोमेन सह धानादीनावेदयत् स्तोत्रं चाकार्षीदित्यर्थः ॥

आ चन त्वा चिकित्सामोऽधि चन त्वा नेमसि ।
शनैरिव शनकैरिवेन्द्रायेन्दो परि स्रव ॥ ३ ॥

आ । चन । त्वा । चिकित्सामः । अधि । चन । त्वा । न । इमसि ।
शनैःऽइव । शनकैःऽइव । इन्द्राय । इन्दो इति । परि । स्रव ॥ ३ ॥

पुनरपि सा तमनादृत्याह । हे इन्द्र । Vचन इति निपातसमुदायोऽवधारणार्थे । Vत्वा त्वाम् Vआ Vचिकित्सामः ज्ञातुमिच्छाम एव । इह मार्गे एवागतं Vत्वा त्वां Vन Vअधि Vइमसि नाधिगच्छामः । अत्रापि Vचन इत्यवधारणे । मम गृहमागच्छन्तं त्वामिन्द्र इति न जानीम एवेत्य-

---

१. ख-त-श—'सा' नास्ति । २. त-भ१-२—दंते वाजं धनं; भ३—दंतैर्जातं; श—दंतवाद्यमाने । ३. ग—ग्रावध्वनिरिति । ४. भ—ह वा । ५. ख-त-भ१-ऊधुः; भ२—ऊधः; भ३—ऊर्ध्वः; श—ऊचुः । ६. ख-त-भ१-२—श्रुताविद°।

पाला तमिन्द्रमुक्त्वा स्वास्थे स्थितं सोमं प्रत्याह । हे ᵛइन्दो क्षरणशील सोम अस्मा आगताय ᵛइन्द्राय तदर्थं पूर्वं ᵛशनैः मन्दं मन्दं ततः ᵛशनकैरिव । कुत्सितार्थेऽकच् । कुत्सितं शनैः शनकैः । क्षिप्रमित्यर्थः । क्षिप्रमेव त्वं ᵛपरि ᵛस्रव मदीयदंष्ट्राभिरभिपूयमाणः सन् परितः क्षरेति । तथा यज्ञेष्वपि ग्रावभिरभिषूयमाणः सोमः प्रथमं शनैः परिस्रवति ततः शनकैः क्षिप्रमिति तदभिप्रायेणोक्तम् । तत इन्द्र एतद्वाक्यं श्रुत्वा तदानीमेवमभिषुतं[1] सोमं यज्ञस्थानीयादपालामुखादेवाधासीत् । उक्तार्थः शाट्यायनकब्राह्मणे स्पष्टमभ्यधायि—'अनाद्रियमाणैव[2] तमब्रवीदा चन त्वा चिकित्सामोऽधि चन त्वा नेमसीति । पुरा मां सर्वयर्चापाला स्तौतीत्युपपर्यावर्तत शनैरिव शनकैरिवेन्द्रायेन्दो परि स्रवेति ह वा अस्यै मुखात्सोमं निरधयत्सोमपीथ इह वा अस्य भवति य एवं विद्वान् स्त्रीमुपजिघ्रति' इति ॥

कुविच्छकत्कुवित्करत्कुविन्नो वस्यसस्करत् ।
कुवित्पतिद्विषो यतीरिन्द्रेण संगमामहै ॥ ४ ॥

कुवित् । शकत् । कुवित् । करत् । कुवित् । नः । वस्यसः । करत् ।
कुवित् । पतिऽद्विषः । यतीः । इन्द्रेण । सम्ऽगमामहै ॥ ४ ॥

सोमं पीतवानिन्दोऽस्मानेवं करोत्वित्याह । स इन्द्रः ᵛकुवित् बहुवारमस्मान् ᵛशकत् शक्तान् समर्थान् करोतु । किंच ᵛकुवित् बहु चास्मभ्यं ᵛकरत् करोतु[3] । किंच स[3] एवेन्द्रः ᵛनः अस्मान् ᵛकुवित् बहुकृत्वः ᵛवस्यसः वसीयसोऽतिशयेन वसुमतः करोतु । करोतेः शक्नोतेश्च लेट्यडागमः । इदानीमात्रेय्यहमेवं करिष्यामीति वदति । पूर्वं ᵛकुवित् बहु ᵛपतिद्विषः त्वग्दोषात्पतिभिर्भर्तृभिर्बहुवारं द्विष्टा अत एव ᵛयतीः पतिभ्यः सकाशादितो गच्छन्त्यो वयं कैश्चिदप्यनूह्यमानाः सत्यः संप्रति ᵛइन्द्रेण सह ᵛसंगमामहै संगच्छामहै । सर्वत्र पूजार्थे बहुवचनम् । संगमशब्देनेन्द्रोऽपालामचकमतेति ॥

इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय ।
शिरस्ततस्योर्वरामादिदं म उपोदरे ॥ ५ ॥

इमानि । त्रीणि । विष्टपा । तानि । इन्द्र । वि । रोहय ।
शिरः । ततस्य । उर्वराम् । आत् । इदम् । मे । उप । उदरे ॥ ५ ॥

इन्द्रेण किं कामयसे तदहास्यामीत्युक्ता सा वरमनया प्रार्थयते । हे ᵛइन्द्र ᵛइमानि ᵛत्रीणि विष्टपानि स्थानानि सन्ति । ᵛतानि त्रीणि स्थानानि ᵛवि ᵛरोहय उत्पादय । कानि तानि । ᵛततस्य मम पितुः रोमवर्जितं ᵛशिरः । खलतिमित्यर्थः । तच्चापगमय । रोमशं कुर्वित्यर्थः । ᵛउर्वरां तस्योषरं क्षेत्रं सर्वसस्याढ्यं कुरु । ᵛआत् अनन्तरं ᵛमे मम ᵛउपोदरे[4] उपोदरस्य समीपे यत् ᵛइदं स्थानम् । गुह्यमित्यर्थः । तच्च त्वग्दोषे सत्यसंजातरोमकम् । तदपि त्वग्दोषपरिहारेण रोमयुक्तं कुरु । एतानि त्रीणि स्थानानि । एषोऽर्थः शाट्यायनके प्रपञ्चेनोक्तः—'तामब्रवीदपाले किं कामयसीति । साब्रवीदिमानि त्रीणि विष्टपेति खलतिर्हास्यै पिता स तं ह्याखलतिं चकारोर्वरा ह्यस्य न जज्ञे सो ह जज्ञ उपस्थे ह्यस्यै रोमाणि नासुस्तान्यु ह जज्ञिर इत्यस्योत्तरा भूयसे निर्वचनायासौ च या नः' इति ॥

---

१. भ–°मेवाभि° । २. ख-त–अनाद्रियमाणेव; ग–अनाद्रियमाणे च; श–अनाद्रियमाणे । ३. ख-त२–करोतु त्वदाहम; ज्ञ-भ२-श–करोतु तदाह स; त१–त्वदाहम । ४. भ–उपोदरे उदरे ।

असौ च या न उर्वरादिमां तन्वं१ मम ।
अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि ॥ ६ ॥

असौ । च । या । नः । उर्वरा । आत् । इमाम् । तन्वम् । मम ।
अथो इति । ततस्य । यत् । शिरः । सर्वा । ता । रोमशा । कृधि ॥ ६ ॥

उक्तमेवार्थमनया विवृणोति । vनः अस्माकं पितुः vया[1] vअसौ[1] vउर्वरा यदिदमूषरं क्षेत्रमस्ति । vआत् अनन्तरं vमम vइमां vतन्वम् इदं त्वग्दोषदुष्टं गुह्यस्थानम् । vअथो अथापि च vततस्य तातस्य vयच्छिरः रोमवर्जितमस्ति एतानि vसर्वा सर्वाणि तानीमानि[2] त्रीणि स्थानानि vरोमशा रोमशानि vकृधि कुरु ॥

खे रथस्य खेऽनसः खे युगस्य शतक्रतो ।
अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम् ॥ ७ ॥

खे । रथस्य । खे । अनसः । खे । युगस्य । शतक्रतो इति शतऽक्रतो ॥
अपालाम् । इन्द्र । त्रिः । पूत्वी । अकृणोः । सूर्यऽत्वचम् ॥ ७ ॥

अनयापालां सूर्यसदृशप्रभामकरोदित्याह । हे vशतक्रतो हे शतसंख्याकयज्ञ बहुविधप्रज्ञ वा हे vइन्द्र vरथस्य स्वकीयस्य vखे पृथुतरे छिद्रे तथा vअनसः शकटस्य vखे तदपेक्षयाल्पे छिद्रे vयुगस्य vखे चाल्पतरे सूक्ष्मे छिद्रे रथशकटयुगानां छिद्रेषु त्वग्दोषपरिहाराय vत्रिः त्रिवारं निष्कर्षणेन vपूत्वी शोधयित्वा ततः vअपालाम् एतन्नामिकामत्रिसुतां ब्रह्मवादिनीं vसूर्यत्वचं सूर्यसमानत्वचम् vअकृणोः अकरोः । कल्याणतमरूपभाजमकरोरित्यर्थः शाट्यायनकब्राह्मणे स्पष्टमभिहितः[3]—' तां खे रथस्यात्यवृहत्सा गोधाभवत्तां खेऽनसोऽत्यवृहत्सा संश्लिष्टकाभवत्तदेषाभ्यनूच्यते खे रथस्य खेऽनस इति । तस्यै ह यत्कल्याणतमं रूपाणां तदूपमास ' इति । त्वग्दोषापनयनाय अक्षादिद्वारेष्वतिकर्षणमिति[4] । यस्त्वग्दोषदूषितः सन्नेतत्सूक्तं पठति तस्य[5] त्वग्दोषमपगमय्य सूर्यसदृशकान्तिमिन्द्रः[6] करोतीति सूक्तं प्रशस्यते ॥ ॥ १४ ॥

' पान्तमा वः ' इति त्रयस्त्रिंशदृचं द्वादशं सूक्तमाङ्गिरसस्य श्रुतकक्षस्य सुकक्षस्य वार्षमैन्द्रम् । आद्यानुष्टुप् शिष्टा गायत्र्यः । तथानुक्रम्यते—' पान्तं त्रयस्त्रिंशच्छ्रुतकक्षः सुकक्षो वाद्यानुष्टुप् ' इति । महाव्रते गायत्रतृचाशीतौ प्रथमावर्जमिदं सूक्तमुत्तरं च । पञ्चमारण्यके सूत्रितं च–' पुरुहूतं पुरुष्टुतमिति शेषः ' (ऐ. आ. ५. २. ३) इति । प्रथमे रात्रिपर्याये होतुः शस्त्र आद्यौ तृचौ स्तोत्रियानुरूपौ । सूत्रितं च—' पान्तमा वो अन्धसोऽपादु शिप्रयन्धसः ' (आश्व. श्रौ. ६. ४) इति ॥

पान्तमा वो अन्धस इन्द्रमभि प्र गायत । विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥१॥

पान्तम् । आ । वः । अन्धसः । इन्द्रम् । अभि । प्र । गायत ।
विश्वऽसहम् । शतऽक्रतुम् । मंहिष्ठम् । चर्षणीनाम् ॥ १ ॥

हे ऋत्विजः vवः युष्मदीयम् vअन्धसः सोमलक्षणमन्नम् vआ vपान्तम् आभिमुख्येन पिबन्तम् । ' पा पाने ' । छान्दसः शपो लुक् । ' सर्वे विधयश्छन्दसि विकल्प्यन्ते[7] ' इति ' न

१. घ–असौ च यासा । २. घ–ता तानीमानि । ३. ख-त–°मभिहितं; भ१–°मभिहिता । ४. ग–युगादिः । ५. ग-त-श–' तस्य ' नास्ति । ६. ग-त१-२-४-भ–°सदृक्षः; न–°सदृशक्षः । ७. त-भ१-२–विकल्प्यंते ।

लोकाव्यय° ' इति षष्ठीप्रतिषेधाभावः । ततोऽन्धसः इत्यस्य ' कर्तृकर्मणोः° ' इति षष्ठी[1] । सोममाभिमुख्येन पिबन्तमेतादृशम् Vइन्द्रं Vप्र Vगायत प्रकर्षेणाभिष्टुत । कीदृशम् । Vविश्वसहं सर्वेषां शत्रूणामभिभवितारं सर्वेषां भूतजातानां वा अत एव Vशतक्रतुं बहुविधप्रज्ञानं बहुविधकर्माणं वा Vचर्षणीनां मनुष्याणां Vमंहिष्ठं धनस्य दातृतमम् । यद्वा । यजमानानां यष्टव्यत्वेन पूजनीयमिन्द्रं गायतेति समन्वयः ॥

पुरुहूतं पुरुष्टुतं गाथान्यं१ सनश्रुतम् । इन्द्र इति ब्रवीतन ॥ २ ॥

पुरुऽहूतम् । पुरुऽस्तुतम् । गाथान्यम् । सनऽश्रुतम् । इन्द्रः । इति । ब्रवीतन ॥ २ ॥

हे ऋत्विग्यजमानाः Vपुरुहूतं यज्ञेषु बहुभिराहूतं Vपुरुष्टुतं बहुभिः स्तोत्रशस्त्रादिभिः स्तुतम् अत एव Vगाथान्यं गानयोग्यं गातव्यं Vसनश्रुतं सनातनतया प्रसिद्धमेवंविधं देवम् Vइन्द्र Vइति यूयं Vब्रवीतन ब्रूयात । ' ब्रूञ् व्यक्तायां वाचि ' इत्यस्य लोटि व्यत्ययेन ध्वमस्तनबादेशः । अत एव गुणः ॥

इन्द्र इन्नो महानां दाता वाजानां नृतुः । महाँ अभिज्ञ्वा यमत् ॥ ३ ॥

इन्द्रः । इत् । नः । महानाम् । दाता । वाजानाम् । नृतुः । महान् । अभिऽज्ञु । आ । यमत् ॥ ३ ॥

Vइन्द्र Vइत् पूर्वोक्तलक्षण इन्द्र एव Vनः अस्मभ्यं Vमहानां महतां Vवाजानाम्[2] अन्नानाम् । यद्वा । महानाम् । वर्णव्यत्ययः । मघानां धनानां वाजानामन्नानां च Vदाता भवतु । कीदृशः । Vनृतुः । ' नृतिश्रथ्योः कूः ' (उ. सू. १. ९१) इति कूप्रत्ययः । ह्रस्वश्छान्दसः । सर्वस्य नर्तयिता । यद्वा । ' नॄ[3] नये[3] ' । औणादिकस्तुप्रत्ययः । धातोर्ह्रस्वश्छान्दसः । स्तोतृभ्यो गवादिनेता । अत एव Vमहान् स इन्द्रः Vअभिज्ञु अभिगतजानुकमस्मभ्यम् Vआ Vयमत् आयच्छतु ददातु । यद्वा स इन्द्रोऽभिज्ञवस्मदभिमुखमागच्छद्धनं स्वहस्तयोः परिगृह्यास्मान्नयतु । धनं यत्वास्मभ्यं ददात्वित्यर्थः ॥

अपादु शिप्र्यन्धसः सुदक्षस्य प्रहोषिणः । इन्दोरिन्द्रो यवाशिरः ॥ ४ ॥

अपात् । ऊँ इति । शिप्री । अन्धसः । सुऽदक्षस्य । प्रऽहोषिणः ।
इन्दोः । इन्द्रः । यवऽआशिरः ॥ ४ ॥

Vशिप्री । शिप्रे हनू नासिके वा । शोभनहनुः । यद्वा । शिप्राः शीर्षण्याः । सुशिरस्त्राणः । सः Vइन्द्रः एव Vप्रहोषिणः प्रकर्षेण देवान् हविर्भिर्जुह्वतः Vसुदक्षस्य एतन्नामकस्य ऋषेः संबन्धि Vयवाशिरः । ' श्रीङ् पाके ' । आङ्पूर्वस्य ' अपस्पृधेथामानृचुः° ' इत्यादिना धातोः शिरादेशः । यवैरामिश्रितं यवैः सह पक्वम् Vइन्दोः सर्वतः पात्रेषु क्षरत् Vअन्धसः सोमलक्षणमन्नम् Vअपात् अपिबत् । यद्वा । अस्य सोमस्य भागमिन्द्रार्थं परिकल्पितं सोमांशमपिबत्[4] । Vउ इत्यवधारणे ॥

तम्वभि प्रार्चतेन्द्रं सोमस्य पीतये । तदिद्धर्यस्य वर्धनम् ॥ ५ ॥

तम् । ऊँ इति । अभि । प्र । अर्चत । इन्द्रम् । सोमस्य । पीतये ।
तत् । इत् । हि । अस्य । वर्धनम् ॥ ५ ॥

---

१. ख-त-न-भ२-३-श-षष्ठ्याः; भ१-षष्ठ्या । २. ख-ग-त-भ-श-' वाजानां ' नास्ति । ३. ग-नृणातेः । ४. ख-त२-३-४भ१-२-श-सोमांसमपिबतु; ग-सोमांशपिबत्; ज्ञ-त१-सोमं साम पिबतु; भ३-सोमं संपिबतु ।

हे ऋत्विजः vतमु तमेव vइन्द्रम् vअभि आभिमुख्येन vप्रार्चत प्रकर्षेण स्तुत। किमर्थम्। vसोमस्य vपीतये अन्नागत्य सोमपानाय। किमर्थं सोमपानायेति विशेष्यते तदाह। vतदित् तत्सोमपानमेव vअस्य इन्द्रस्य vवर्धनं[1] वर्धकं भवति खलु। तस्मात्सोमपानजहर्षाय प्रार्चत॥ ॥ १५ ॥

अस्य पीत्वा मदानां देवो देवस्यौजसा। विश्वाभि भुवना भुवत्॥ ६ ॥

अस्य। पीत्वा। मदानाम्। देवः। देवस्य। ओजसा। विश्वा। अभि। भुवना। भुवत्॥ ६ ॥

vदेवः द्योतमान इन्द्रः vअस्य अस्माभिर्दीयमानस्य सोमस्य vमदानां मदकरान् रसान् vपीत्वा पानं कृत्वा। यद्वा। अस्यैतं सोमं पीत्वा तथा मदानां मदसाधनादीनि भक्षयित्वा। vदेवस्य ग्रहेषु शोभमानस्य[2] यद्वा देवनशीलस्य देवैः काम्यमानस्य सोमस्य पानजातेन vओजसा बलेन vविश्वा vभुवना सर्वाणि भुवनानि भूतजातानि vअभि vभुवत् अभिभवति। 'सोमस्य ता मद इन्द्रश्चकार' (ऋ. सं. २. १५. २) इत्यादिषु सोमपानमदे सर्वाणि वृत्रहननादिकर्माणि चकारेत्येवमन्त्रापि सर्वाणि भूताभिभवनादीनि कर्माण्यकार्षीदिति॥

प्रथमे पर्याये होतुः शस्त्रे 'त्यमु वः सत्रासाहम्' इत्यादिसूक्तशेषः। सूत्रितं च—'त्यमु वः सत्रासाहमिति सूक्तशेषोऽभि त्यं मेषम्' (आश्व. श्रौ. ६. ४) इति। असोर्यामेऽच्छावाकातिरिक्तोक्थे 'त्यमु वः सत्रासाहम्' इति तृचो वैकल्पिकः स्तोत्रियः। सूत्रितं च—'त्यमु वः सत्रासाहं सत्रा ते अनु कृष्टय इति वा स्तोत्रियानुरूपौ' (आश्व. श्रौ. ९. ११) इति। व्यूळहस्य दशरात्रस्य चतुर्थेऽहनि निष्केवल्य एष एव तृचो निविद्धानीयः। सूत्रितं च—'इमं नु मायिनं हुवे त्यमु वः सत्रासाहम्' (आश्व. श्रौ. ८. ८) इति॥

त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम्। आ च्यावयस्यूतये॥ ७ ॥

त्यम्। ऊँ इति। वः। सत्राऽसहम्। विश्वासु। गीर्षु। आऽयतम्। आ। च्यवयसि। ऊतये॥७॥

यजमानः स्तोतारं संबोध्याह। हे स्तोतः vसत्रासाहम्। सत्राशब्दो बहुवाची। बहूनामभिभवितारम्। यद्वा। शत्रून् स्वबलेन संगत्य जेतारम्। vवः युष्मदीयेषु vविश्वासु vगीर्षु सर्वेषु स्तोत्रेषु vआयतं विस्तृतम्। सर्वत्रेन्द्र एव स्तूयते। तस्मात्तेषु विततं vत्यम्। vउ इत्यवधारणे। तमेवेन्द्रम् vऊतये अस्मद्रक्षणाय vआ vच्यावयसि। 'च्युङ् प्लुङ् गतौ'। त्वदीयैः स्तोत्रैर्यज्ञं प्रत्याभिमुख्येनागमय॥

युध्मं सन्तमनर्वाणं सोमपामनपच्युतम्। नरमवार्यक्रतुम्॥ ८ ॥

युध्मम्। सन्तम्। अनर्वाणम्। सोमऽपाम्। अनपऽच्युतम्। नरम्। अवार्यऽक्रतुम्॥ ८ ॥

एवंगुणोपेतमिन्द्रमागमयेत्याह। vयुध्मं शत्रूणां संप्रहारकं[3] vसन्तम् अत एव vअनर्वाणम् अन्यैरप्रत्यृतमनभिगतं तस्मात् vअनपच्युतं संग्रामेषु शत्रुभिरहिंसितं vसोमपां सोमस्य पातारमस्य सोमस्य मदे सति vअवार्यक्रतुं भटैरनिवारणीयकर्माणं[4] vनरं सर्वस्य नेतारम्। एतादृग्गुणोपेतमिन्द्रमागमयेति पूर्वेण सह संबन्धः॥

शिक्षा ण इन्द्र राय आ पुरु विद्वाँ ऋचीषम। अवा नः पार्ये धने॥९॥

---

१. घ–वर्धनं हि। २. न–शोभनस्य। ३. ख-त-न-भ१-२-श–संप्रसारकं; घ–संप्रतारकं। ४. ज्ञ-त१-२-३-श–°राभिवारणीय°।

शिक्षं । नः । इन्द्र । रायः । आ । पुरु । विद्वान् । ऋचीषम । अव । नः । पार्ये । धने ॥ ९ ॥

हे ᵛऋचीषम स्तुत्या सम । यद्वा । 'ईष गतिहिंसादर्शनेषु' । अस्मादमप्रत्ययः । सर्वैर्गन्तव्य दर्शनीय वा । उक्तगुणोपेत हे ᵛइन्द्र ᵛविद्वान् सर्वविषयज्ञानवांस्त्वं शत्रुभ्य[1] आहृत्य[2] ᵛरायः धनानि ᵛनः अस्मभ्यं ᵛपुरु[3] बहुवारं ᵛशिक्ष प्रयच्छ । यद्वा । पुर्विति रायो विशेषणम् । बहूनि धनानि प्रयच्छ । किंच ᵛपार्ये । पाराः[4] शत्रवः । तत्र भवे ᵛधने आजिहीर्षिते शत्रुधने ᵛनः अस्मान् ᵛअव रक्ष । शत्रून् हत्वा तद्धनेनास्मान् पालयेत्यर्थः ॥

अतश्चिदिन्द्र ण उपा याहि शतवाजया । इषा सहस्रवाजया ॥१०॥

अतः । चित् । इन्द्र । नः । उप । आ । याहि । शतऽवाजया । इषा । सहस्रऽवाजया ॥१०॥

हे ᵛइन्द्र ᵛअतश्चित् अस्मात् द्युलोकादेव यद्वास्मात् शत्रुस्थानात् ᵛशतवाजया शतसंख्याक-बलयुक्तेन तथा ᵛसहस्रवाजया । वाजोऽन्नम् । सहस्रसंख्यान्नवता बहुबलान्नेन ᵛइषा अन्नरसेन युक्तः सन् ᵛनः अस्मान् ᵛउपा ᵛयाहि अधिकमाभिमुख्येनागच्छ ॥ ॥ १६ ॥

अयाम धीवतो धियोऽवद्भिः शक्र गोदरे । जयेम पृत्सु वज्रिवः ॥११॥

अयाम । धीऽवतः । धियः । अवद्भिऽभिः । शक्र । गोऽदरे । जयेम । पृत्ऽसु । वज्रिऽवः॥११॥

हे ᵛशक्र समर्थेन्द्र ᵛधीवतः । 'छन्दसीरः' इति मतुपो वत्वम् । कर्मकरणात्कर्मवन्तो वयं ᵛधियः युद्धजयार्थं कर्माणि ᵛअयाम गच्छाम । ततः ᵛगोदरे । 'दृ विदारणे' । 'अच इः' इति इप्रत्ययः । गवां पर्वतानां[5] दारयितर्हे[6] ᵛवज्रिवः वज्रवन् । यद्वा । वजनं गमनं वज्रः । तद्वान् कुलिशः । तद्वन्निन्द्र ᵛपृत्सु संग्रामेषु ᵛअवद्भिः सर्वतो गन्तृभिः त्वया दत्तैरश्वैः ᵛजयेम वयं तवादातॄञ्जेष्यामः ॥

वयमु त्वा शतक्रतो गावो न यवसेष्वा । उक्थेषु रणयामसि ॥१२॥

वयम् । ऊँ इति । त्वा । शतक्रतो इति शतऽक्रतो । गावः । न । यवसेषु । आ । उक्थेषु । रणयामसि ॥ १२ ॥

हे ᵛशतक्रतो बहुप्रज्ञान बहुकर्मन् वेन्द्र ᵛत्वा सर्वतः । ᵛउ इत्यवधारणे । त्वामेव ᵛउक्थेषु स्तोत्र-शस्त्रादिकेषु वयं ᵛरणयामसि । 'इदन्तो मसिः' । आरणयामः शब्दयामः । रमयाम इत्यर्थः । तत्र दृष्टान्तः। ᵛगावो ᵛन। यथा गोपालः ᵛयवसेषु तृणविशेषेषु गावो गाः पशून् ᵛआ समन्ताद्रमयति तद्वत्। गाव इति सर्वविधीनां छन्दसि विकल्पितत्वात् 'औतोऽम्०' (पा. सू. ६. १. ९३) इत्यात्वाभावः ॥

विश्वा हि मर्त्यत्वनानुकामा शतक्रतो । अगन्म वज्रिन्नाशसः ॥१३॥

विश्वा । हि । मर्त्यऽत्वना । अनुऽकामा । शतक्रतो इति शतऽक्रतो ।
अगन्म । वज्रिन् । आऽशसः ॥ १३ ॥

---

१. ग-त-न-भ-आनृभ्य; श-आतृभ्य । २. ख-ज्ञ-त२-३-न-भ१-आहृभ्य; त४-श-अहृभ्य । ३. ख-ग-त-श-'पुरु' नास्ति; घ-आपुरु । ४. ग-पराः । ५. ख-ज्ञ-त१-२-न-भ-पर्वतानां मेघानां । ६. ख-त२-३-भ१-श-चरयितहे; ज्ञ-त४-य-वरयितहे; न-चरयितर्हे; भ२-दरयितहे ।

हे [v]शतक्रतो बहुप्रज्ञेन्द्र [v]मर्त्यत्वना मर्त्यत्वानि । ' सुपां सुलुक् ' ' इति विभक्तेराजादेशः । संज्ञापूर्वकस्य विधेरनित्यत्वाद्दीर्घाभावः । [v]विश्वा [v]हि विश्वान्येव मर्त्यत्वानि [v]अनुकामा कामानभिलाषानुगतानि । कामोपेतानीत्यर्थः । मनुष्याश्चैतानि[1] कामयन्त इत्यर्थः । तथा सति हे [v]वज्रिन् वज्रवन्निन्द्र[2] वयमपि [v]आशसः आशंसनानि धनादिकामान् [v]अगन्म अवगच्छाम । गमेर्लेटि ' बहुलं छन्दसि ' इति शपो लुक् । ' म्वोश्च ' इति मकारस्य नकारः ॥

त्वे सु पुत्र शवसोऽवृत्रन्कामकातयः । न त्वामिन्द्राति रिच्यते ॥१४॥

त्वे इति । सु । पुत्र । शवसः । अवृत्रन् । कामऽकातयः ।
न । त्वाम् । इन्द्र । अति । रिच्यते ॥ १४ ॥

हे [v]शवसः[3] [v]पुत्र[3] बलनिमित्तमुत्पन्नत्वाद्बलस्य पुत्रेन्द्र [v]कामकातयः । ' कै गै शब्दे ' । कामपराः कातयः शब्दाः येषां भवन्ति ते तथोक्ताः । तादृशा मनुष्याः [v]त्वे त्वयि [v]सु [v]अवृत्रन् स्वस्वकामाभिपूरणार्थं सुष्ठु[4] वर्तन्ते । तस्मान्मर्त्यत्वानि कामोपेतानि इत्युत्पन्नम् । ' वृतु वर्तने ' । लङि[5] छान्दसो विकरणस्य लुक् । ' बहुलं छन्दसि ' इति रुडागमः । यत एवं ततो हे [v]इन्द्र [v]त्वां कश्चिदपि देवः [v]न [v]अति [v]रिच्यते । बलेन धनेन वातिरिक्तः समर्थो नास्ति ॥

स नो वृषन्त्सनिष्ठया सं घोरया द्रवित्न्वा । धियाविड्ढि पुरंध्या ॥१५॥

सः । नः । वृषन् । सनिष्ठया । सम् । घोरया । द्रवित्न्वा । धिया । अविड्ढि । पुरम्ऽध्या ॥१५॥

हे [v]वृषन् कामानां वर्षितरिन्द्र [v]सः पूर्वोक्तलक्षणस्त्वं [v]सनिष्ठया । ' षणु दाने ' । धनादेर्दातृतमया [v]घोरया सपत्नानां[6] भयकारिण्या अत एव [v]द्रवित्न्वा द्रावयित्र्या शत्रूणां पलायित्र्या[7] । द्रवतेरित्नुच्प्रत्ययः । [v]पुरंध्या बहूनां धारयित्र्या पोषयित्र्या [v]धिया तादृशेन[8] कर्मणा [v]नः अस्मान् [v]सम् [v]अविड्ढि समन्तात्पालय । अवतेर्लोटि ' बहुलं छन्दसि ' इति शपो लुक् । बहुलवचनात्सिप इडागमः । अस्मान् धनदानादिना रक्षेत्यर्थः ॥ ॥ १७ ॥

यस्ते नूनं शतक्रतविन्द्र द्युम्नितमो मदः । तेन नूनं मदे मदेः ॥१६॥

यः । ते । नूनम् । शतक्रतो इति शतऽक्रतो । इन्द्र । द्युम्निऽतमः । मदः ।
तेन । नूनम् । मदे । मदेरिति मदेः ॥ १६ ॥

अत्र सोमः स्तूयते । हे [v]शतक्रतो शतविधप्रज्ञान हे [v]इन्द्र [v]द्युम्नितमः यशस्वितमः [v]यः [v]मदः । माद्यन्त्यनेनेति[9] मदः सोमः । यः सोमः [v]नूनं पुरा [v]ते त्वदर्थमस्माभिरभिषुतोऽस्ति [v]तेन अस्माभिः प्रदीयमानेन सोमेन [v]नूनम् इदानीं [v]मदे तत्पानेन मदे तव संजाते सत्यस्मानपि [v]मदेः धनादिदानेन त्वं मादय । ' मदी हर्षे ' । अत्रान्तर्णीतण्यर्थः । ' बहुलम् ' ' इति शप् ॥

यस्ते चित्रश्रवस्तमो य इन्द्र वृत्रहन्तमः । य ओजोदातमो मदः ॥१७॥

---

१. ख-ग-त२-३-भ-श-°श्चैतानि तानि । २. ग-त४-न-श-°श्चिद्र सृष्टाके; ज्ञ-त१-२-भ-°श्चिद्र सृष्टके । ३. ख-ग-त-भ२-श-सहसस्पुत्र; भ१-३-सहस्पुत्र । ४. घ-भ-सु सुष्ठु । ५. ख-त१-२-३-४-न-भ१-२-श-लटि; ज्ञ-लिटि; भ३-लेटि । ६. ख-त-न-भ-श-संपन्नानां । ७. ख-त-न-भ-श-पालयित्र्या । ८. न-भ-एतादृशेन । ९. ख-त-न-भ-माद्यत्य°; श-मादयत्य° ।

यः । ते । चित्रश्रवःऽतमः । यः । इन्द्र । वृत्रहन्ऽतमः । यः । ओजःऽदातमः । मदः ॥१७॥

हे [v]इन्द्र [v]चित्रश्रवस्तमः अतिशयेन नानाविधकीर्तिः [v]यः [v]मदः सोमः [v]ते त्वदर्थमस्माभिरभिषुतः । [v]यः सोमः [v]वृत्रहन्तमः अतिशयेन पापानां हन्ता । किंच [v]यः सोमः [v]ओजोदातमः अतिशयेन बलस्य दाता । तेनास्माभिर्दीयमानेन सोमेन त्वं माद्येरिति पूर्वेण संबन्धः ॥

विद्मा हि यस्ते अद्रिवस्त्वादत्तः सत्य सोमपाः । विश्वासु दस्म कृष्टिषु ॥१८॥

विद्म । हि । यः । ते । अद्रिऽवः । त्वाऽदत्तः । सत्य । सोमऽपाः ।
विश्वासु । दस्म । कृष्टिषु ॥ १८ ॥

हे [v]अद्रिवः । अद्रिर्वज्रः । तद्वन् हे [v]सत्य यथार्थकर्मन् [v]सोमपाः सोमस्य पातः [v]दस्म दर्शनीय यद्वा शत्रूणामुपक्षपयितरिन्द्र [v]विश्वासु [v]कृष्टिषु सर्वेषु सोमस्य दातृषु यजमानेषु [v]त्वादत्तः त्वया दत्तः [v]ते त्वदीयः [v]यः रयिरस्ति तं [v]विद्म [v]हि । यष्टारो वयमपि जानीम एव । यद्वा । हे इन्द्र सर्वेषु यष्टृषु मध्ये वयं ते त्वदीयमेव नान्यदीयमिति तं सोमं जानीम एव यः सोमस्त्वादत्तोऽस्माभिस्त्वदर्थं दीयते । अत्र त्वादेशश्छान्दसः ॥

प्रथमे पर्यायेऽच्छावाकस्य 'इन्द्राय मद्वने सुतम्' इति स्तोत्रियः । सूत्रितं च—'इन्द्राय मद्वने सुतमिन्द्रमित्राथिनो बृहत्' (आश्व. श्रौ. ६. ४) इति ॥

इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः । अर्कमर्चन्तु कारवः ॥ १९ ॥

इन्द्राय । मद्वने । सुतम् । परि । स्तोभन्तु । नः । गिरः । अर्कम् । अर्चन्तु । कारवः ॥ १९ ॥

[v]मद्वने । माद्यतेः क्वनिप् । मदनशीलाय [v]इन्द्राय तदर्थं [v]सुतम् अभिषुतं सोमं [v]नः अस्मदीयाः [v]गिरः स्तुतिलक्षणा वाचः [v]परि [v]ष्टोभन्तु । स्तोभतिः स्तुतिकर्मा । परितः सोमं स्तुवन्तु । ततः [v]कारवः स्तुतिकारिणः स्तोतारश्च [v]अर्कं सर्वैरर्चनीयं सोमम् [v]अर्चन्तु पूजयन्तु ॥

यस्मिन्विश्वा अधि श्रियो रणन्ति सप्त संसदः । इन्द्रं सुते हवामहे ॥ २० ॥

यस्मिन् । विश्वाः । अधि । श्रियः । रणन्ति । सप्त । सम्ऽसदः । इन्द्रम् । सुते । हवामहे ॥२०॥

[v]यस्मिन् इन्द्रे [v]विश्वाः सर्वाः [v]श्रियः कान्तयः [v]अधि अधिकं भवन्ति । अतिशयेन तेजस्वीत्यर्थः । किंच [v]सप्त सप्तसंख्याकाः [v]संसदः । सम्यक् यज्ञेषु कर्मकरणार्थं सीदन्तीति संसदः होत्रकाः । यस्मिन् [v]रणन्ति सोमप्रदानार्थं रमन्ते । यद्वा । यं शब्दयन्ति स्तुवन्ति । तं पूर्वोक्तलक्षणम् [v]इन्द्रं [v]सुते सोमेऽभिषुते सति [v]हवामहे वयं सोमपानायाह्वयामः ॥ ॥ १८ ॥

त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत । तमिद्वर्धन्तु नो गिरः ॥ २१ ॥

त्रिऽकद्रुकेषु । चेतनम् । देवासः । यज्ञम् । अत्नत । तम् । इत् । वर्धन्तु । नः । गिरः ॥ २१ ॥

हे [v]देवासः देवा इन्द्रादयः [v]त्रिकद्रुकेषु आभिप्लविकेष्वहःसु । ज्योतिर्गौरायुरिति त्रिकद्रुकाः । तेषु [v]चेतनम् । 'चिती संज्ञाने' । चेतन्ति जानन्त्यनेन स्वर्गादिकमिति चेतनः । ज्ञानसाधनं [v]यज्ञम् [v]अत्नत अतन्वत स्वैः स्वैः कर्मभिः पालनैश्च विस्तारितवन्तः । 'तनु विस्तारे' । लङि 'बहुलं छन्दसि' इति विकरणस्य लुक् । 'तनिपत्योश्छन्दसि' इत्युपधालोपः । [v]तमित् तमेवास्मदीयं यज्ञं [v]नः अस्माकं [v]गिरः स्तुतिलक्षणा वाचः [v]वर्धन्तु वर्धयन्तु ॥

आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः । न त्वामिन्द्राति रिच्यते ॥२२॥

आ । त्वा । विशन्तु । इन्दवः । समुद्रम्ऽइव । सिन्धवः । न । त्वाम् । इन्द्र । अति । रिच्यते ॥२२॥

हे इन्द्र [v]इन्दवः स्रवन्तोऽस्माभिर्दीयमानाः सोमाः [v]त्वा त्वाम् [v]आ [v]विशन्तु । सर्वतः प्रविशन्तु । तत्र दृष्टान्तः । [v]समुद्रमिव [v]सिन्धवः । स्यन्दमाना नद्यः यथा समुद्रं जलाशयं सर्वतः प्रविशन्ति तद्वत् । यत एवं तस्मात् हे [v]इन्द्र [v]त्वां कश्चिदपि देवो बलेन धनेन वा [v]न [v]अति [v]रिच्यते नातिरिक्तोऽस्ति । सामर्थ्यवांस्त्वत्तोऽधिको नास्तीत्यर्थः ॥

विश्वकर्थ महिना वृषन्भक्षं सोमस्य जागृवे । य इन्द्र जठरेषु ते ॥ २३ ॥

विश्वकर्थ । महिना । वृषन् । भक्षम् । सोमस्य । जागृवे । यः । इन्द्र । जठरेषु । ते ॥ २३ ॥

हे [v]वृषन् कामानां वर्षितर्हे [v]जागृवे जागरणशीलेन्द्र त्वं तस्य [v]सोमस्य [v]भक्षं पानं प्रति [v]महिना स्वमहिम्ना [v]विश्वकर्थ सर्वतो व्याप्तवानसि । व्यचेर्लिटि थलि 'अभ्यासस्योभयेषाम्' (पा. सू. ६. १. १७) इति संप्रसारणम् । हे [v]इन्द्र [v]यः सोमः [v]ते [v]जठरेषु उदरेषु प्रविशति तस्य पानं व्याप्तवानसीति शेषः ॥

अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन् । अरं धामभ्य इन्दवः ॥ २४ ॥

अरम् । ते । इन्द्र । कुक्षये । सोमः । भवतु । वृत्रऽहन् । अरम् । धामऽभ्यः । इन्दवः ॥२४॥

हे [v]वृत्रहन् वृत्रस्यापामावरकस्यासुरस्य पापस्य वा हन्तर्हे [v]इन्द्र [v]सोमः अस्माभिर्दीयमानः [v]ते तव [v]कुक्षये [v]अरम् अलं पर्याप्तः [v]भवतु । किंच [v]इन्दवः सर्वतः क्षरणशीलाः सोमास्तव [v]धामभ्यः नानाविधेभ्यः शरीरेभ्यस्तव तेजोभ्यो वा [v]अरम् अलं पर्याप्ता भवन्तु । अनेन तेजसां हविर्भाक्त्वमस्तीति सूचितम् । अस्मदीयाः सोमा एव तव कुक्षये देहेभ्योऽपि पर्याप्ता भवन्तु नान्यदीया इति भावः ॥

अरमश्वाय गायति श्रुतकक्षो अरं गवे । अरमिन्द्रस्य धाम्ने ॥ २५ ॥

अरम् । अश्वाय । गायति । श्रुतऽकक्षः । अरम् । गवे । अरम् । इन्द्रस्य । धाम्ने ॥ २५ ॥

श्रुतकक्षो नामर्षिः गवाश्वादिन्द्रं[1] स्तौति । अयं [v]श्रुतकक्षः एतन्नामक ऋषिः [v]अश्वाय इन्द्रेण दीयमानायाश्वायैतदर्थम् [v]अरम् अलं [v]गायति इन्द्रविषयं स्तोत्रं करोति । तथा [v]गवे [v]अरम्[2] अलं[2] गायति । [v]इन्द्रस्य इन्द्रकर्तृकाय [v]धाम्ने गृहाय तदर्थं च [v]अरं पर्याप्तं स्तौति । यदश्वादिकमिन्द्रः प्रयच्छति तस्मै गायतीति । यद्वा । इन्द्रस्येति कर्मणि षष्ठी । गवादिलाभार्थमिन्द्रं[3] स्तौति ॥

अरं हि ष्मा सुतेषु णः सोमेष्विन्द्र भूषसि । अरं ते शक्र दावने ॥ २६ ॥

अरम् । हि । स्म । सुतेषु । नः । सोमेषु । इन्द्र । भूषसि । अरम् । ते । शक्र । दावने ॥२६॥

हे [v]इन्द्र [v]सुतेषु अभिषुतेषु [v]नः अस्मदीयेषु [v]सोमेषु । [v]हि [v]ष्म इत्यवधारणे । त्वमेव तेषां पाने अलं[4] पर्याप्तः [v]भूषसि भवसि । यद्वा । सोमेष्वभिषुतेषु सत्सु नोऽस्माकं पर्याप्तं धनं भूषसि । 'भू प्राप्तौ' । त्वं प्रापय । तथा भवति हे [v]शक्र समर्थेन्द्र [v]दावने धनादिकस्य दात्रे [v]ते तुभ्यमस्माभिर्दीयमानाः सोमाः [v]अरम् अलं पर्याप्ता भवन्तु ॥ ॥ १९ ॥

---

१. ख-ज्ञ-त१-२-भ१-२–गावोश्वादिंद्रं; त३-४-न–गावाश्वादिंद्रं; भ३–गवेश्वायेंद्रं; श–गावीश्वर्दिंद्रं । मु–गवाश्वादिलाभार्थमिन्द्रं । २. ख-ज्ञ-त२-भ१–श्वलं; ग-भ३–अलं; घ–अरं; भ२–स्वलं । ३. ख-त-श–नावादि° । ४ग–अरं; घ–अरमलं ।

पराकात्त्वांचिदद्रिवस्त्वां नक्षन्त नो गिरः । अरं गमाम ते वयम् ॥ २७ ॥

पराकात्त्वात् । चित् । अद्रिऽवः । त्वाम् । नक्षन्त । नः । गिरः । अरम् । गमाम । ते । वयम् ॥२७॥

हे ᵛअद्रिवः वज्रवन्निन्द्र ᵛनः अस्मदीयाः ᵛगिरः इतो निर्गताः स्तुतयः ᵛपराकात्त्वात् । ᵛचित् अप्यर्थः । अतिदूरादपि ᵛत्वां ᵛनक्षन्त व्याप्नुवन्तु । किमुत समीपात्त्वामश्नुवतामिति । नक्षतेर्व्याप्तिकर्मणो नशतेर्वा[1] लेटि सिपि रूपम् । एवं सति स्तोतारः ᵛवयं ᵛते त्वदीयं धनम् ᵛअरम् अलं पर्याप्तं ᵛगमाम त्वत्तो गच्छाम ॥

आभिप्लविकेषूक्थ्येषु[2] तृतीयसवने ब्राह्मणाच्छंसिनः ' एवा ह्यसि वीरयुः ' इति वैकल्पिकः स्तोत्रियः । सूत्रितं च—' एवा ह्यसि वीरयुरेवा ह्यस्य सूनृता ' (आश्व. श्रौ. ७. ८) इति ॥

एवा ह्यसि वीरयुरेवा शूर उत स्थिरः । एवा ते राध्यं मनः ॥ २८ ॥

एव । हि । असि । वीरऽयुः । एव । शूरः । उत । स्थिरः । एव । ते । राध्यम् । मनः ॥२८॥

हे इन्द्र त्वं ᵛवीरयुः वीरान् युद्धकर्मणि समर्थान्[3] हन्तुं कामयमानः ᵛएव ᵛअसि भवसि खलु । ᵛहि प्रसिद्धौ । अत ᵛएव त्वं ᵛशूरः सामर्थ्यवानेव भवसि । ᵛउत अपि च ᵛस्थिरः संग्रामे धैर्यवान् भवसि । एकत्र स्थित्वैव शत्रून् संप्रहरसीत्यर्थः । एवं सति ᵛते तव ᵛमनः ᵛराध्यं स्तुतिभिराराधनीयम् ᵛएव यतोऽनेन मनसा त्वं शत्रुवधं संग्रामे धैर्यादिकं च[4] करोषीति । तव मन एव सर्वैः स्तुत्यमित्यर्थः ॥

एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः । अधा चिदिन्द्र मे सचा ॥ २९ ॥

एव । रातिः । तुविऽमघ । विश्वेभिः । धायि । धातृऽभिः । अध । चित । इन्द्र । मे । सचा ॥२९॥

हे ᵛतुविमघ । तुविरिति बहुनाम । बहुधनवन्निन्द्र ᵛविश्वेभिः विश्वैः ᵛधातृभिः कर्माधारकैः[5] । यद्वा । देवानां हविर्दानेन पोषयितृभिः । सर्वैर्यजमानैस्तव ᵛरातिः गवाश्वधनादिदानं ᵛधायि तैर्धार्यते ᵛएव । दधातेर्लुङि कर्मणि रूपम् । चिदेवार्थे । ᵛअध अत एव हे ᵛइन्द्र एवंविध त्वं ᵛमे यष्टुर्ममापि ᵛसचा धनादिदानेन कर्मसहायो भव ॥

मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानां पते । मत्स्वा सुतस्य गोमतः ॥ ३० ॥

मो इति । सु । ब्रह्माऽइव । तन्द्रयुः । भुवः । वाजानाम् । पते । मत्स्व । सुतस्य । गोऽमतः ॥३०॥

हे ᵛवाजानां ᵛपते अन्नानां पते बलानां वा हे इन्द्र ᵛतन्द्रयुः निष्कारणं निवृत्तकर्मवत्त्वादालस्ययुक्तः ᵛब्रह्मेव ब्राह्मण इव । ' अथापि तद्वदर्थे भाष्यते ' (निरु. ६. ३१) इति यास्कोक्तमनुसृत्य तन्द्रयुक्त इत्युक्तम् । अथवा यागादिकर्मपरित्यागेनालस्यमिच्छन्नास्तिको ब्राह्मण इव त्वं ᵛमो ᵛषु ᵛभुवः सुष्ठु मा भवः । सर्वदास्मत्कर्मान्वितो भवेत्याशासनम् । तदेवाह । ᵛसुतस्य अभिषुतस्य ततः ᵛगोमतः गव्येन क्षीरेण दध्ना वा मिश्रणवतः सोमस्य पानेन ᵛमत्स्व माद्य हृष्टो भव ॥

मा नं इन्द्राभ्याऽदिशः सूरो अक्तुष्वा यमन् । त्वा युजा वनेम तत् ॥ ३१ ॥

मा । नः । इन्द्र । अभि । आऽदिशः । सूरः । अक्तुषु । आ । यमन् ।
त्वा । युजा । वनेम । तत् ॥ ३१ ॥

---

१. ख-त-न-भ-श—नसतेर्वा । २. ज्ञ-त२-३-भ१-३—°षूक्थेषु । ३. ख-ज्ञ-त१-२-न-भ—समर्थान् शत्रून् । ४. ख-ग-घ-त-न-भ-श—' च ' नास्ति । ५. ख-ग-घ-भ३—कर्मधारकैः ।

हे vइन्द्र vआदिशः आदेष्टारः समन्तादायुधान्यतिविसृजन्तः[1] vसूरः । 'सृ गतौ' । सर्वत्र सरणशीला राक्षसाः vअक्तुषु रात्रिषु दिवापि vनः अस्माकं vमा vअभि vआ vयमन् आभिमुख्येन मा नियन्तारो[2] भवन्तु । यद्यागताश्चेत्तदा vतत् रक्षःकुलं vत्वा त्वया vयुजा सहायेन[3] वयं vवनेम हिंसाम । 'भथ क्रथ कथ कृथ हिंसार्था वन च' इत्यत्र पठितत्वाद्धिंसार्थः ॥

त्वयेदिन्द्र युजा वयं प्रति ब्रुवीमहि स्पृधः । त्वमस्माकं तव स्मसि ॥ ३२ ॥

त्वया । इत् । इन्द्र । युजा । वयम् । प्रति । ब्रुवीमहि । स्पृधः ।
त्वम् । अस्माकम् । तव । स्मसि ॥ ३२ ॥

हे vइन्द्र vत्वयेत् । इदवधारणे । त्वयैव vयुजा सहायेन vस्पृधः स्पर्धमानाञ्छत्रून् vवयं vप्रति vब्रुवीमहि निराकुर्वीमहि । प्रतिवचनं निराकरणम् । उत्तरार्धेनेन्द्रसाहाय्यमेव प्रतिपादयति । हे इन्द्र vत्वमस्माकं भवसि स्तुत्यस्तोतृयष्टृयष्टव्यतया त्वमस्माकं भवसि वयं vतव vस्मसि भवामः । तथारण्यकं—'त्वमिदं सर्वं भवसि तव वयं स्मः त्वमस्माकमसि' इति । तस्मात्त्वया सहायेन शत्रून् हन्यामेति[4] ॥

त्वामिद्धि त्वायवोऽनुनोनुवतश्चरान् । सखाय इन्द्र कारवः ॥ ३३ ॥

त्वाम् । इत् । हि । त्वाऽयवः । अनुऽनोनुवतः । चरान् । सखायः । इन्द्र । कारवः ॥३३॥

हे vइन्द्र कर्मोपद्रवपरिहारादनन्तरं vत्वायवः त्वां धनादिदानार्थं कामयमानाः अत एव vअनुनोनुवतः । नौतेर्यङ्लुगन्तस्य शतरि रूपम् । अनुक्रमेण पुनःपुनः स्तुतिं कुर्वन्तः[5] तस्मात्तव vसखायः सखिभूताः vकारवः स्तोतारः vत्वामित् । इदवधारणे । त्वामेव vचरान् स्तुतिभिः परिचरन्तु खलु । vहि इति प्रसिद्ध्यर्थः । चरतेर्लंड्याडागमः । हियोगादनिघातः ॥ ॥ २० ॥

'उद्ध' इति चतुस्त्रिंशदृचं त्रयोदशं सूक्तं सुकक्षस्यार्षं गायत्रमैन्द्रम् । अन्त्या त्विन्द्रर्भुदेवताका । तथा चानुक्रान्तम्—'उद्ध चतुस्त्रिंशत्सुकक्षोऽन्त्यैन्द्राभवी' इति । द्वितीये पर्याये होतुः शस्त्र उत्तमावर्जमेतत्सूक्तम् । सूत्रितं च—'उद्धेदभीत्युत्तमामुद्धरेत्' (आश्व. श्रौ. ६. ४) इति । महाव्रतेऽप्यस्य विनियोगः पूर्वसूक्तेन सहोक्तः । ज्योतिष्टोमे ब्राह्मणाच्छंसिशस्त्र आद्यस्तृचः । सूत्रितं च—'उद्धेदभीति तिस्र इन्द्र क्रतुविदं सुतमिति याज्या' (आश्व. श्रौ. ५. १०) इति । तथासोर्यामे मैत्रावरुणातिरिक्तोक्थ्येऽयं तृचोऽनुरूपः । सूत्रितं च—'यदद्य कच्च वृत्रहन्नुद्धेदभि श्रुतामघमा नो विश्वाभिः' (आश्व. श्रौ. ९. ११) इति ॥

उद्धेदभि श्रुतामघं वृषभं नर्यापसम् । अस्तारमेषि सूर्य ॥ १ ॥

उत् । घ । इत् । अभि । श्रुतऽमघम् । वृषभम् । नर्यऽपसम् । अस्तारम् । एषि । सूर्य ॥१॥

सुकक्ष इन्द्रगुणानाह । हे vसूर्य । द्वादशसु भानुष्विन्द्रोऽपि सूर्यात्मना पठितः । तस्मात्सूर्यात्मक सुवीर्य हे इन्द्र vश्रुतमघं सर्वदा देयत्वेन विख्यातधनमत एव vवृषभं याचमानानां[6] धनस्य वर्षितारं vनर्यापसम् । नरहितं नर्यम् । नरहितकर्माणम् । vअस्तारं दानशौण्डमौदार्यवन्तमेतादृशानुभावमभितः vउत् vएषि । vइत् अवधारणे । त्वमेव तस्य यज्ञे सूर्यात्मना उद्गतोऽसि[7] । vघ इति प्रसिद्धौ ॥

---

१. ग–°न्यतिसृजन्तः । २. न-भ–नियंतारो गंतारो । ३. घ–त्वत्सहायेन । ४. त–हन्यातमेति; श–हन्यातेमेति । ५. ख-ग-घ-त-न-भ२-श–कुर्वति; भ१–कुर्वती; भ३–कुर्वतः । ६. ख–याबानानां; ग–याचकानां त१-न–पावमानानां; त२-३-४-श–पावनानां । ७. ख-ज्ञ-त१-२-३-न–उद्गातासि; त४-भ१-२-श–उद्गातोसि ।

नव॒ यो नव॑तिं पुरो॒ बिभेद॑ बा॒ह्वोजसा । अहिं॑ च वृत्र॒हाव॑धीत् ॥ २ ॥

नव॑ । यः । नव॑तिम् । पुरः॑ । बि॒भेद॑ । बा॒हुऽओ॑जसा । अहि॑म् । च॒ । वृ॒त्र॒ऽहा । अव॑धीत् ॥२॥

[v]यः इन्द्रः [v]नव [v]नवतिं नवनवतिसंख्याका एकोनशतसंख्याकाः शम्बरस्य [v]पुरः पुरीः [v]बाह्वोजसा स्वबाहुबलेनैव [v]बिभेद दिवोदासाय भिनत्ति स्म । तथा च मन्त्रः—'दिवोदासाय नवतिं च नवेन्द्रः पुरो व्यैरच्छम्बरस्य' (ऋ. सं. २. १९. ६) इति । सः [v]वृत्रहा वृत्रासुरस्य हन्ता स इन्द्रः [v]अहिं [v]च केनाप्यहन्तव्यं मेघमपामावरकं वृत्रं वा [v]अवधीत् । स इन्द्रोऽस्माकं धनं ददात्वित्युत्तरेण संबन्धः ॥

स न॒ इन्द्रः॑ शि॒वः सखाश्वा॑वद्गो॒मद्यव॑मत् । उ॒रुधा॑रेव दोहते ॥ ३ ॥

सः । नः॒ । इन्द्रः॑ । शि॒वः । सखा॑ । अश्व॑ऽवत् । गोऽम॑त् । यव॑ऽमत् । उ॒रुधा॑राऽइव । दो॒ह॒ते ॥३॥

[v]सः पूर्वोक्तलक्षणः [v]शिवः कल्याणतमः [v]सखा यष्टृयष्टव्यस्तोतृस्तुत्यलक्षणेन[1] संबन्धेनास्माकं मित्रभूतः एतादृशः [v]इन्द्रः [v]अश्ववत् अश्वयुक्तं [v]गोमत् पश्वादिसहितं [v]यवमत् । 'अयवादिभ्यः' (पा. सू. ८. २. ९) इति प्रतिषेधान्मतुपो वत्वाभावः । यव इति धान्यविशेषः । धान्ययुक्तं धनं [v]नः अस्मभ्यं [v]दोहते दोग्धु ददातु । तत्र दृष्टान्तः । [v]उरुधारेव । दोहनकाले प्रभूतपयोधारा यद्वा बहूनां पोषयित्री गौर्यथा वत्सस्य पयो दोग्धि तथा प्रभूतं धनमस्माकं दोग्धु ददातु । दुहेर्लेट्यडागमः ॥

असोर्यामे मैत्रावरुणातिरिक्तोक्थे 'यदद्य' इति तृचः स्तोत्रियः । सूत्रं तु पूर्वेण तृचेन सहोदाहृतम् ॥

यदु॒द्य कच्च वृ॑त्रहन्नु॒दगा॑ अ॒भि सू॑र्य । सर्वं॒ तदि॑न्द्र ते॒ वशे॑ ॥ ४ ॥

यत् । अ॒द्य । कत् । च॒ । वृ॒त्र॒ऽह॒न् । उ॒त्ऽअगाः॑ । अ॒भि । सू॒र्य॒ ।
सर्व॑म् । तत् । इ॒न्द्र॒ । ते॒ । वशे॑ ॥ ४ ॥

हे [v]वृत्रहन् वृत्रस्यापामावरकस्य मेघस्य हन्तः हे [v]सूर्य सूर्यात्मक [v]इन्द्र [v]अद्य अस्मिन् दिने [v]यत् [v]कच्च यत्किंचित्पदार्थजातम् [v]अभि अभिमुखीकृत्य [v]उदगाः । 'इण् गतौ' । उत्पूर्वः । तस्य लुङि गादेशः । स्वतेजसोद्गतः प्रादुर्भूतोऽसि तदा [v]तत् [v]सर्वं स्थावरजङ्गमात्मकं जगत् [v]ते[2] तव[2] [v]वशे भवति । त्वदधीनं भवति । उदिते सूर्ये त्वदर्थं[3] प्राक्कर्म कुर्वन्ति जुह्वति च ॥

यद्वा॑ प्रवृद्ध सत्पते॒ न म॑रा॒ इति॒ मन्य॑से । उ॒तो तत्स॒त्यमित्तव॑ ॥ ५ ॥

यत् । वा॒ । प्र॒ऽवृ॒द्ध॒ । स॒त्ऽप॒ते॒ । न । मरै॑ । इति॑ । मन्य॑से ।
उ॒तो इति॑ । तत् । स॒त्यम् । इत् । तव॑ ॥ ५ ॥

वाशब्दः समुच्चये । अपि च हे [v]प्रवृद्ध स्वबलेन प्रवर्धमान [v]सत्पते सतां पते स्वप्रकाशाधिक्येन सतां नक्षत्राणां पते हे इन्द्र [v]न [v]मरै [v]इति मनुष्यवद्वार्धक्येनाहं न म्रिय इति [v]यत् यदि [v]मन्यसे बुध्यसे । 'मृङ् प्राणत्यागे' । लेट्यडागमः । 'वैतोऽन्यत्र' इत्यैकारः । [v]उतो[4] अपि च [v]तव

---

१. ख–सख्या यष्टव्यस्तौतृस्तुत्यक्षणेन; त-न-भ२-श–यष्टव्यस्तोतृस्तुत्यलक्षणेन; भ१–यष्टव्यानातृस्तुत्यलक्षणेन; भ३–यष्टव्येन स्तुतिलक्षणेन । २. ख-घ-त१-२-न–तत्ते तव; ग–तव; त३-४श–तत्तव; भ१-२-तत् । ३. ख-त-न-भ–तदर्थी; श–तदधी । ४. ख-त–उत ।

vतत् न म्रिय इति मननं vसत्यमित् यथार्थमेव। इन्द्रो न म्रियत इत्यर्थे मन्त्रान्तरं—'न ह्यस्या अपरं चन जरसा मरते पतिः' (ऋ. सं. १०. ८६. ११) इति॥ ॥ २१ ॥

ये सोमासः परावति ये अर्वावति सुन्विरे। सर्वांस्ताँ इन्द्र गच्छसि ॥ ६ ॥

ये। सोमासः। पराऽवति। ये। अर्वाऽवति। सुन्विरे। सर्वान्। तान्। इन्द्र। गच्छसि॥६॥

हे vइन्द्र vये vसोमासः सोमाः vपरावति विप्रकृष्टेऽतिदूरदेशे[1] vये सोमाः vअर्वावति अन्तिकतमे देशे च vसुन्विरे। छन्दसि द्विर्वचनस्य विकल्पितत्वादत्र द्विर्वचनाभावः। ये सोमा ऋत्विग्भिरभिपूयन्ते vसर्वान् दूरे समीपे चाभिपूयमाणान् vतान् सोमान् vगच्छसि तत्पानार्थं युगपत्प्राप्नोषि। अनेनेन्द्रस्य सर्वगतत्वं सूचितम्॥

अक्षोर्यामे ब्राह्मणाच्छंसिनोऽतिरिक्तोक्थे 'तमिन्द्रं वाजयामसि' इति स्तोत्रियस्तृचः। सूत्रितं च—'तमिन्द्रं वाजयामसि महाँ इन्द्रो य ओजसा' (आश्व. श्रौ. ९. ११) इति। व्यूळहस्य दशरात्रस्य पञ्चमेऽहनि निष्केवल्येऽयमेव तृचो निविद्धानीयः। सूत्रितं च व्यूळहश्चेदिति खण्डे—'मरुत्वाँ इन्द्र मीढ्वस्तमिन्द्रं वाजयामसि' (आश्व. श्रौ. ८. ८) इति॥

तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे। स वृषा वृषभो भुवत् ॥ ७ ॥

तम्। इन्द्रम्। वाजयामसि। महे। वृत्राय। हन्तवे। सः। वृषा। वृषभः। भुवत्॥ ७ ॥

यजमाना आहुः। vतं पूर्वोक्तलक्षणम् vइन्द्रं vवाजयामसि वाजयामः। सोमेन स्तुतिभिर्वा वाजवन्तं बलवन्तं कुर्मः। किमर्थम्। vमहे महते[2] vवृत्राय अपामावरकं वृत्रासुरं vहन्तवे हन्तुम्। सोमपानेन मत्तः स्तुतिभिर्वा स्तुतः सन् vवृषा धनानां सेक्ता दाता vसः इन्द्रः vवृषभः अस्माकं[3] स्तोतॄणां सोमस्य दातॄणां धनादिसेचको[4] दाता[5] vभुवत् भवतु॥

इन्द्रः स दामने कृत ओजिष्ठः स मदे हितः। द्युम्नी श्लोकी स सोम्यः ॥८॥

इन्द्रः। सः। दामने। कृतः। ओजिष्ठः। सः। मदे। हितः। द्युम्नी। श्लोकी। सः। सोम्यः॥८॥

vसः vइन्द्रः vदामने स्तोतृभ्यो धनादिदानायैव vकृतः प्रजापतिना सृष्टः। किंच vओजिष्ठः ओजस्वितमः vसः एवेन्द्रः vमदे। माद्यन्त्यनेनेति[6] मदः सोमः। तस्मिंश्च प्रजापतिना सृष्टिकाले vहितः। सोमपानार्थं च निहित इत्यर्थः। vद्युम्नी। 'द्युम्नं द्योततेर्यशो वान्नं वा' इति। यशस्व्यन्नवान् वा अत एव vश्लोकी। श्लोकः स्तुतिः। तद्वान् vसः इन्द्रः vसोम्यः सोमार्हो भवति॥

गिरा वज्रो न संभृतः सबलो अनपच्युतः। ववक्ष ऋष्वो अस्तृतः ॥ ९ ॥

गिरा। वज्रः। न। सम्ऽभृतः। सऽबलः। अनपऽच्युतः। ववक्षे। ऋष्वः। अस्तृतः॥९॥

vगिरा स्तुतिलक्षणया वाचा स्तोतृभिः vसंभृतः उत्पादितस्तीक्ष्णीकृतः। तत्र दृष्टान्तः। vवज्रो vन। वज्र आयुधम्। तत्कर्तृभिर्निशितधारो[7] यथा भवति तीक्ष्णीक्रियते तद्वत् स्तोतृभिः स्तुत्या संभृतोऽत एव vसबलः बलसहितस्तस्मात् vअनपच्युतः परैरप्रच्युतः[8]। अनभिगत इत्यर्थः। तादृशः vऋष्वः महान् दीप्यमानो वा vअस्तृतः युद्धे शत्रुभिरहिंसित इन्द्रः vववक्षे स्तोतृभ्यो धनादिकं वोढुमिच्छति॥

---

१. न-भ-°तिदूरे देशे। २. ख-ग-त-न-भ-श-महांतं। ३. कामानां सेचको। ४. ख-ग-त-श-होता। ५. ख-ग-त-श-माद्यत्य°; न-मात्य°; भ-माद्य°। ६. ख-त-यत्कर्तृभि°। ७. ख-त४-भ१-२-'परैरप्रच्यतः' नास्ति।

दुर्गे चिन्नः सुगं कृधि गृणान इन्द्र गिर्वणः । त्वं च मघवन्वशः ॥१०॥

दुःऽगे । चित् । नः । सुऽगम् । कृधि । गृणानः । इन्द्र । गिर्वणः ।

त्वम् । च । मघऽवन् । वशः ॥ १० ॥

हे vगिर्वणः गीर्भिर्वननीय vइन्द्र vगृणानः स्तोतृभिः स्तूयमानस्त्वं vनः अस्माकं vदुर्गे vचित् दुर्गमेऽपि[1] मार्गे[1] vसुगं सुगमं पन्थानं vकृधि तथा कुरु । हे vमघवन् धनवन्निन्द्र vत्वम् । चशब्दश्चेदर्थे । यदि vवशः सोमपानार्थं तत्प्रदातृनस्मान् कामयेथाः तदा पन्थानं शोभनगमनं कुरुष्व । वष्टेर्लेट्यडागमः । चशब्दयोगादनिघातः ॥ ॥ २२ ॥

यस्य ते नू चिदादिशं न मिनन्ति स्वराज्यम् । न देवो नाधिगुर्जनः ॥११॥

यस्य । ते । नु । चित् । आऽदिशम् । न । मिनन्ति । स्वऽराज्यम् ।

न । देवः । न । अधिऽगुः । जनः ॥ ११ ॥

हे इन्द्र vयस्य vते तव vआदिशम् । आदिशति नयति सर्वत्रानयेत्यादिग्बलम् । औणादिकः करणे प्रत्ययः । यद्वा । आदेश एवादिगाज्ञा । भावे क्विप् । त्वदीयामाज्ञां vनू vचित् इदानीं पुरा च vन vमिनन्ति केचिदपि न हिंसन्ति । किंच । vस्वराज्यं तव स्वभूतं राज्यं च । यद्वा । स्वशब्देन स्वर्गोऽभिधीयते । स्वर्गस्वामित्वं च न हिंसन्ति । हिंसकानाह । vन vदेवः त्वदन्यो देवोऽपि च तथापि vअधिगुः अधृतगमनः संग्रामे त्वरमाणो वीरोऽपि vन च vजनः प्रादुर्भूतो मनुष्योऽपि । एते न मिनन्तीत्यर्थः ॥

अधा ते अप्रतिष्कुतं देवी शुष्मं सपर्यतः । उभे सुशिप्र रोदसी ॥१२॥

अध । ते । अप्रतिऽस्कुतम् । देवी इति । शुष्मम् । सपर्यतः ।

उभे इति । सुऽशिप्र । रोदसी इति ॥ १२ ॥

हे vसुशिप्र सुहनो शोभनशिरस्त्राणेन्द्र vअध अपि च vदेवी देव्यौ[2] स्वतेजसा दीप्यमाने vउभे vरोदसी द्यावापृथिव्यौ vअप्रतिष्कुतम् । स्कु इति सौत्रो धातुः स्तम्भने वर्तते । शत्रुभिरप्रतिरोधनीयं vते त्वदीयं vशुष्मं परबलशोषकं बलं vसपर्यतः पूजयतः । त्वदधीने एव भवतः ॥

त्वमेतदधारयः कृष्णासु रोहिणीषु च । परुष्णीषु रुशत्पयः ॥ १३ ॥

त्वम् । एतत् । अधारयः । कृष्णासु । रोहिणीषु । च । परुष्णीषु । रुशत् । पयः ॥ १३ ॥

अस्य सामर्थ्यमेवोपपादयति । हे इन्द्र vकृष्णासु कृष्णवर्णासु गोषु तथा vरोहिणीषु । ' वर्णादनुदात्तात्तोपधात्तो नः ' (पा. सू. ४. १. ३९) इति ङीप् । रोहितवर्णासु[3] vच गोषु vरुशत् । रोचतेर्दीप्तिकर्मणः । दीप्यमानं श्वेतम् vएतत् परिदृश्यमानं vपयः क्षीरं vत्वम् vअधारयः धारयसि । तस्मात्त्वद्बलं पूजयत इति समन्वयः ॥

वि यदहेरधं त्विषो विश्वे देवासो अक्रमुः । विदन्मृगस्य ताँ अमः ॥१४॥

---

१. ख-ङ्ग-त१-२-३–दुर्गमपि मार्गे । २. ख-त-न-भ-श–सदेव्यौ । ३. घ-रोहितवर्णासु परुष्णिषु ।

वि । यत् । अहेः । अध । त्विषः । विश्वे । देवासः । अक्रमुः ।
विदत् । मृगस्य । तान् । अमः ॥ १४ ॥

vअध अपि च vअहेः अहन्तव्यस्य[1] वृत्रासुरस्य vत्विषः तेजोरूपादुच्छ्वासाद्गीताः यद्वा तस्य प्रभावेन परिगमिताः vविश्वे सर्वे vदेवासः देवाः vयत् यदा vवि vअक्रमुः विविधं पादविहरणमकुर्वन् । स्वस्थानं परित्यज्यान्यं देशमगच्छन्नित्यर्थः । तदानीं vमृगस्य । एवं तान् भीषयितुं वृत्रो मृगरूपोऽभवत् । तद्रूपस्य[2] संबन्धि vअमः सर्वतो गमनशीलं बलं तज्जातं भयं वा vतान् सर्वान् देवान् vविदत् अविन्दत् । प्राप्नोदित्यर्थः । तस्यासुरस्येन्द्रो निवारको हन्ताभवदित्युत्तरेण संबन्धः ॥

आदु मे निवरो भुवद्वृत्रहादिष्ट पौंस्यम् । अजातशत्रुरस्तृतः ॥१५॥
आत् । ऊँ इति । मे । निऽवरः । भुवत् । वृत्रऽहा । अदिष्ट । पौंस्यम् ।
अजातऽशत्रुः । अस्तृतः ॥ १५ ॥

vआदु इत्यवधारणे । देवानां भीत्या सर्वतो गमनानन्तरमेव vमे स्तोतृस्तुत्यलक्षणेन संबन्धेन मम संबन्ध्ययमिन्द्रः vनिवरः वृत्रासुरस्य निवारयिता हन्ता vभुवत् अभवत् । ततः vवृत्रहा वृत्रस्य हन्तेन्द्रः vपौंस्यम् । पुंसः कर्म पौंस्यम् । यद्वा । ' स्त्रीपुंसाभ्याम्° ' (पा. सू. ४. १. ८७) इति भवार्थे स्नञ् । नकारस्य यकारो वर्णव्यत्ययेन । पुंसीन्द्रे भवम् । यद्वा । बलनामैतत् । स्वबलम् । vअदिष्ट तस्य राज्ये दिशति निदधाति[3] । तद्राज्यं स्ववशमकरोदित्यर्थः । ततः प्रभृतीन्द्रः vअजातशत्रुः अनुत्पन्नशत्रुः vअस्तृतः संग्रामे परैरहिंसितश्चाभवत् ॥ ॥ २३ ॥

श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम् । आ शुषे राधसे महे ॥१६॥
श्रुतम् । वः । वृत्रहन्ऽतमम् । प्र । शर्धम् । चर्षणीनाम् । आ । शुषे । राधसे । महे ॥ १६ ॥

हे ऋत्विग्यष्टारः vश्रुतं बलवत्तया प्रसिद्धमत एव vवृत्रहन्तमम् अतिशयेन वृत्रहन्तारं vशर्धं बलभूतं वेगवन्तं वा एतादृशमिन्द्रं vचर्षणीनां मनुष्याणां vवः युष्माकम् vआशुषे । अश्नोतेर्लेटि व्युत्तम इटि[4] सिप् । व्यत्ययेनोप्रत्ययः । ' बहुलं छन्दसि ' इत्यडागमः । तमिन्द्रं स्तुतिभिः प्रीणयित्वा युष्मभ्यं प्रकर्षेणाश्नवै[5] । प्रयच्छामीत्यर्थः । किमर्थम् । vमहे महते vराधसे धनाय धनं युष्मभ्यं दातुम् ॥

अया धिया च गव्यया पुरुणामन्पुरुष्टुत । यत्सोमेसोम आभवः ॥१७॥
अया । धिया । च । गव्यऽया । पुरुऽनामन् । पुरुऽस्तुत । यत् । सोमेऽसोमे । आ । अभवः ॥१७॥

हे vपुरुनामन् बहुविधशक्रवृत्रहादिनामोपेत । यद्वा । बहुस्तुतिमन् । नामयन्ति स्तुत्यं देवं वशं नयन्तीति नाम स्तोत्रम् । अत एव vपुरुष्टुत बहुभिरभिष्टुतेन्द्र vसोमेसोमे अस्मदीयेषु सोमेषु त्वं यदा vआभवः तेषां पानार्थं समन्तादभवः तदा वयम् vअया अनया । कीदृश्या । vगव्यया गा आत्मन इच्छन्त्या vधिया अनया बुद्ध्या युक्ता भवेम । सोमं पीतवति त्वयि वयं गवादियुक्ता भवेमेत्यर्थः ॥

बोधिन्मना इदस्तु नो वृत्रहा भूर्यासुतिः । शृणोतु शुक्र आशिषम् ॥ १८ ॥

---

१. ग–आहन्तव्यस्य । २. न-भ–तद्रूपस्य वृत्रस्य । ३. ग-न-भ–निदधाति स्म । ४. ख-त-भ–इति । ५. ग–प्रकर्षेणाशुषे ।

बोधित्ऽमनाः । इत् । अस्तु । नः । वृत्रऽहा । भूरिऽआसुतिः ।
शृणोतु । शक्रः । आऽशिषम् ॥ १८ ॥

अयं[1] परोक्षकृतः । [v]वृत्रहा वृत्रहन्ता [v]भूर्यासुतिः । बहुषु देशेष्विन्द्रार्थं सोम आसूयतेऽभिषूयत इति तादृशः । यद्वा । बहूनि सोमादिहवींषीन्द्रार्थमासूयन्ते हूयन्त इति तादृशः । [v]बोधिन्मनाः । ' बुध अवगमने ' । औणादिक इतिप्रत्ययः । यस्य मनः स्तोतृणामभिमतं[2] बुध्यते जानातीति तथोक्तः । [v]इत् अवधारणे । [v]नः अस्माकं बोधिन्मना एव [v]अस्तु । सर्वदास्मदभीप्सितानि जानात्वेवेत्यर्थः । यद्वा । एतादृश इन्द्रो नोऽस्माकं यज्ञे भवत्विति । ततः [v]शक्रः संग्रामे शत्रुहननसमर्थ इन्द्रः [v]आशिषम् अस्मदीयां स्तुतिमाशासनं वा [v]शृणोतु ॥

ज्योतिष्टोमे चातुर्विंशिकेऽहनि माध्यंदिने मैत्रावरुणस्य ' कया त्वं न ऊत्या ' इति तृचोऽनुरूपः। सूत्रितं च—' होत्रकाणां कया नश्चित्र आ भुवत् कया त्वं न ऊत्या ' (आश्व. श्रौ. ७. ४) इति ॥

कया त्वं न ऊत्याभि प्र मन्दसे वृषन् । कया स्तोतृभ्य आ भर ॥ १९ ॥

कया । त्वम् । नः । ऊत्या । अभि । प्र । मन्दसे । वृषन् । कया । स्तोतृऽभ्यः । आ । भर ॥ १९ ॥

हे [v]वृषन् कामानां वर्षितरिन्द्र [v]कया केन [v]ऊत्या । अव रक्षणादिषु गत्यर्थे । ' ऊतियूति° ' इत्यादिना निपातितः । केनाभिगमनेन [v]नः अस्मान् [v]अभि[3] अभितः [v]प्र [v]मन्दसे प्रकर्षेण मादयसि । अस्मदीयं यज्ञं प्रति सोमपानार्थमागमनेन वा त्वदीयस्तुतिश्रवणार्थमागमनेन वा कदास्मान् प्रमादयसीति । किंच [v]कया केनाभिगमनेन [v]स्तोतृभ्यः अस्मभ्यं धनम् [v]आ [v]भर आबिभर्षीतीन्द्रं स्तोता पृच्छति ॥

कस्य वृषा सुते सचा नियुत्वान्वृषभो रणत् । वृत्रहा सोमपीतये ॥ २० ॥

कस्य । वृषा । सुते । सचा । नियुत्वान् । वृषभः । रणत् । वृत्रऽहा । सोमऽपीतये ॥ २० ॥

[v]वृषा इन्द्रः [v]कस्य यजमानस्य [v]सचा [v]सुते ऋग्भिः[4] सहाभिषुते सोमे । अनेन तद्वान् यज्ञो लक्ष्यते । कस्य यज्ञे [v]सोमपीतये सोमपानाय तदर्थं [v]रणत् रमते । कीदृशः । [v]नियुत्वान् । नितरां युवन्ति मिश्रयन्ति स्वबलेन शत्रूनिति नियुतो मरुतः । तद्वान् । यद्वा । नियुत इति वायोर्वाहनाश्वाः[5] । स वायुः कदाचित् संग्राम इन्द्राय स्वाश्वानदात् । तद्वान् । [v]वृषभः धनानामपां वा वर्षकः [v]वृत्रहा वृत्रस्य हन्तेन्द्रः कस्य यज्ञे रमते । इदानीं नोऽस्मदीयं[6] यागं[7] प्रत्यागच्छतु । यद्वा । कस्याध्वरे रमते । न कुत्रापि । किंत्वस्मद्यज्ञ एव सोमपानार्थं संक्रीडते ॥ ॥ २४ ॥

अभी षु णस्त्वं रयिं मन्दसानः सहस्रिणम् । प्रयन्ता बोधि दाशुषे ॥ २१ ॥

अभि । सु । नः । त्वम् । रयिम् । मन्दसानः । सहस्रिणम् । प्रऽयन्ता । बोधि । दाशुषे ॥ २१ ॥

हे इन्द्र [v]त्वं [v]मन्दसानः अस्माभिर्दत्तेन सोमेन मोदमानः सन् [v]सहस्रिणं सहस्रसंख्याकं धनं[8] [v]नः अस्मभ्यं [v]सु सुष्ठु [v]अभि आभर । तदेवाह । त्वं [v]दाशुषे हविर्दत्तवते यजमानाय [v]प्रयन्ता धनादेः प्रदाता कर्मणो नियन्ता वा भवानीति [v]बोधि बुध्यस्व । ' बुध अवगमने ' । भौवादिकः । लोटि छान्दसो विकरणस्य लुक् । हेर्धिः[9] । धित्वे[9] धकारलोपश्छान्दसः ॥

---

१. ख-त-श–अथ । २. ख-ज्ञ-त१-२-३–स्तोत्रिणा° । ३. ख-ग-त-न-भ-श–' अभि ' नास्ति । ४. ख-ग-घ-ज्ञ-त२-न-भ–ऋत्विग्भिः । ५. ख-त-न-भ२-श–°वाहनाश्वाः ते; भ१–°र्वाहनाश्वाः से; भ३–°र्वाहनाश्वास्तैः । ६. ख-त-न-भ–नास्मदीयं । ७. ख-त–यज्ञं । ८. घ–रयिं धनं । ९. ग–हेर्धित्वे ।

पत्नीवन्तः सुता इम उशन्तो यन्ति वीतये । अपां जग्मिर्निचुम्पुणः ॥ २२ ॥

पत्नीऽवन्तः । सुताः । इमे । उशन्तः । यन्ति । वीतये । अपाम् । जग्मिः । निऽचुम्पुणः ॥२२॥

vपत्नीवन्तः । सोमसेकार्थे पत्न्यः पालयित्र्य आपो वसतीवर्य एकधनाश्च । तद्वन्तः vसुताः अस्माभिरभिषुताः vइमे ग्रहस्थाश्चमसस्थाश्च सोमाः vउशन्तः आत्मनः पानं कामयमानाः सन्तः vयन्ति इन्द्रं गच्छन्ति । किमर्थम् । vवीतये आत्मनः पानाय । किंच vनिचुम्पुणः । ' निचान्तपूणः ' (निरु. ५. १७) इति यास्कः । ' चमु अदने ' । निचान्तो भक्षितः पृणः प्रीणयिता । यद्वा । ' निचमनेन प्रीणाति ' इति भक्षणेन तर्पयतीति निचुम्पुणः । अभिषुतस्य सोमस्याप्सु प्रक्षेपासंभवात् सामर्थ्यादजीषरूपः सोमो गृह्यते । तादृशः सोमः vअपां vजग्मिः । अपामिति ' न लोकाव्यय° ' इति षष्ठीप्रतिषेधाभावश्छान्दसः । अप इत्यर्थः । यद्वा । अपां मध्यं वापः प्रति वा जग्मिर्गमनशीलः साधुगन्ता वा । सोमश्चेन्द्रं गच्छति । स ह्यवभृथकाल[1] ऋजीषमप्सु प्रास्यन्तीति वचनादप्स्वृजीषरूपः प्रक्षिप्यते । तदाह अपां जग्मिरिति ॥

इष्टा होत्रा असृक्षतेन्द्रं वृधासो अध्वरे । अच्छावभृथमोजसा ॥ २३ ॥

इष्टाः । होत्राः । असृक्षत । इन्द्रम् । वृधासः । अध्वरे । अच्छ । अवऽभृथम् । ओजसा ॥२३॥

अपां जग्मिरिति सामर्थ्यादवभृथदिन एव - - - - र - वि - जः कुर्वन्तीत्युक्तम् । तत्प्रसङ्गादाह । vअध्वरे अस्मदीये यज्ञे vवृधासः हविर्भिरिन्द्रं वर्धयन्तः vइष्टाः इष्टवन्तो यागं कृतवन्तः सप्तसंख्याकाः vहोत्राः होत्रकाः vअवभृथम् अन्त्यदिवसम् vअच्छ प्रति[2] vओजसा स्वतेजसा[3] सहिताः vइन्द्रम् vअसृक्षत विसृजन्ति । यावदवभृथं सप्तहोत्रका यजन्तीति ॥

इह त्या सधमाद्या हरी हिरण्यकेश्या । वोळ्हामभि प्रयो हितम् ॥ २४ ॥

इह । त्या । सधऽमाद्या । हरी इति । हिरण्यऽकेश्या । वोळ्हाम् । अभि । प्रयः । हितम् ॥२४॥

एषा व्याख्याता (ऋ. सं. ८. ३२. २९) । अत्रापि वाक्यार्थो विधीयते । vसधमाद्या इन्द्रेण सह हविर्भिस्तर्पयितव्यौ यद्वा संग्रामे सह माद्यन्तौ vहिरण्यकेश्या हिरण्मयस्कन्धगतकेशवन्तौ vत्या तौ प्रसिद्धौ vहरी हरितवर्णावेतन्नामकावश्वौ vइह अस्मिन् यज्ञे vहितं - - वादिषु निहितं हितकरं वा vप्रयः हवीरूपमन्नमभिलक्ष्य[4] vवोळ्हाम् इन्द्रं वहताम् । प्रापयतामिति ॥

तुभ्यं सोमाः सुता इमे स्तीर्णं बर्हिर्विभावसो । स्तोतृभ्य इन्द्रमा वह ॥२५॥

तुभ्यम् । सोमाः । सुताः । इमे । स्तीर्णम् । बर्हिः । विभावसो इति विभाऽवसो । स्तोतृऽभ्यः । इन्द्रम् । आ । वह ॥ २५ ॥

हे vविभावसो विशेषेण भासमानवसुमन् । यद्वा । विशिष्टा भा विभाः प्रकृष्टदीप्तयः । ता निवसन्त्यत्रेति विभावसुरग्निः । हे तादृशाग्ने vतुभ्यं त्वदर्थम् vइमे vसोमाः vसुताः अभिषुताः । तथा vबर्हिः vस्तीर्णम् । तस्मात् vस्तोतृभ्यः अस्मभ्यमस्मदर्थम् vइन्द्रं सोमपानार्थम् vआ vवह आह्वय । यज्ञं प्रति प्रापयेत्यर्थः ॥ ॥ २५ ॥

---

१. ख-त-न-श–ह्यवभृथ° । २. ख-ग-त-न-भ-श–अभि प्रति । ३. ख-घ-भ१-३–' स्वतेजसा ' नास्ति । ४. घ–°मन्नमभ्यभि° ।

आ ते दक्षं वि रोचना दधद्रत्ना वि दाशुषे। स्तोतृभ्य इन्द्रमर्चत ॥ २६ ॥

आ। ते। दक्षम्। वि। रोचना। दधत्। रत्ना। वि। दाशुषे।
स्तोतृऽभ्यः। इन्द्रम्। अर्चत ॥ २६ ॥

ऋषिर्ऋत्विग्यजमानान् प्रत्याह। हे यष्टः vदाशुषे इन्द्राय हविर्दत्तवते vते तुभ्यं vरोचना रोचनं दीप्यमानं vदक्षं बलम् vआ आभिमुख्येन vवि vदधत इन्द्रो विदधातु। यद्वा। रोचनमिति स्वर्गः। देवतेजसा दीप्तं रोचननामानं लोकं विदधातु। तथा vरत्ना रत्नानि च तुभ्यं करोतु। 'डुधाञ् धारणपोषणयोः'। लेटि 'धोर्लोपो लेटि वा' (पा. सू. ७. ३. ७०) इत्याकारलोपः। अडागमः। हे स्तोतारः vस्तोतृभ्यः इन्द्रविषयस्तोत्रकारिभ्यो[1] युष्मभ्यं च बलरत्नादिकमिन्द्रः कुरुताम्। तस्मात तम् vइन्द्रं यूयम् vअर्चत हविर्भिः स्तुतिभिश्च पूजयत ॥

आ ते दधामीन्द्रियमुक्था विश्वा शतक्रतो। स्तोतृभ्य इन्द्र मृळय ॥२७॥

आ। ते। दधामि। इन्द्रियम्। उक्था। विश्वा। शतक्रतो इति शतऽक्रतो।
स्तोतृऽभ्यः। इन्द्र। मृळय ॥ २७ ॥

हे[2] vशतक्रतो इन्द्र vते तव vइन्द्रियं वीर्यवन्तं सोमं vविश्वा vउक्था सर्वाणि स्तोत्राणि vआ vदधामि संपादयामि। हे vइन्द्र त्वं vस्तोतृभ्यः vमृळय सुखय[3] ॥

भद्रंभद्रं न आ भरेषमूर्जं शतक्रतो। यद्दिन्द्र मृळयासि नः ॥ २८ ॥

भद्रम्ऽभद्रम्। नः। आ। भर। इषम्। ऊर्जम्। शतक्रतो इति शतऽक्रतो।
यत्। इन्द्र। मृळयासि। नः ॥ २८ ॥

हे vशतक्रतो शतविधकर्मन् शतप्रज्ञ वा vइन्द्र vभद्रंभद्रं कल्याणतममथ सुखोत्पादकं वा धन vनः अस्मभ्यम् vआ vभर आसंपादय देहि। तथा vइषम् अन्नम् vऊर्जम् अन्नरसं यद्वा बलवदन्नं च देहि। vनः अस्मान् vयत् यदि vमृळयासि सुखयसि तर्हि तद्धनादिकं[3] देहीति। 'मृड सुखने' ण्यन्तस्य लेळ्याडागमः ॥

स नो विश्वान्या भर सुवितानि शतक्रतो। यद्दिन्द्र मृळयासि नः ॥ २९ ॥

सः। नः। विश्वानि। आ। भर। सुवितानि। शतक्रतो इति शतऽक्रतो।
यत्। इन्द्र। मृळयासि। नः ॥ २९ ॥

हे vशतक्रतो इन्द्र vसः पूर्वोक्तलक्षणस्त्वं vविश्वानि सर्वाणि vसुवितानि। सुष्ठीयते प्राप्यते येष्विति सुवितानि मङ्गलानि। सुपूर्वादेतेः क्ते[4] प्रत्यये[4] उवङादेशः। सर्वानभ्युदयान् vनः अस्मभ्यमाहर। हे vइन्द्र यदि vनः अस्मान् सुखयसि तर्हि धनादिसहितानभ्युदयान् देहीति ॥

त्वामिद्वृत्रहन्तम सुतावन्तो हवामहे। यद्दिन्द्र मृळयासि नः ॥ ३० ॥

त्वाम्। इत्। वृत्रहन्ऽतम। सुतऽवन्तः। हवामहे। यत्। इन्द्र। मृळयासि। नः ॥ ३० ॥

---

१. ख–इदंविशेषण°; ङ-त१-२-३–ईद्रविशेषण°; त४-न-भ१-श–ईद्रविषण°। २. त३-४-न-भ-श–पुस्तकेष्वस्य मन्त्रस्य भाष्यं नास्ति। ३. ख-त-न-भ-श–चेद्धनादिकं। ४. ग-भ–क्तप्रत्यये।

हे [v]वृत्रहन्तम अतिशयेन वृत्रस्यापामावरकस्य हन्तरिन्द्र [v]सुतवन्तः अभिषुतसोमवन्तो वयम्। इदवधारणे[1]। [v]त्वामित् त्वामेव [v]हवामहे। अस्मद्यज्ञमागत्य सोमपानायाह्वयामः। हे [v]इन्द्र [v]नः अस्मान् यदि सुखयसि[2] तर्ह्याह्वयाम इति ॥ ॥ २६ ॥

व्यूळहस्य[3] दशरात्रस्य षष्ठेऽहनि निष्केवल्ये 'उप नो हरिभिः' इति तृचो निविद्धानीयः। सूत्रितं च—'अयं ह येन वा इदमुप नो हरिभिः सुतम्' (आश्व. श्रौ. ८. ८) इति ॥

उप॑ नो॒ हरि॑भिः सु॒तं या॑हि म॒दानां॑ पते। उप॑ नो॒ हरि॑भिः सु॒तम् ॥ ३१ ॥

उप॑। नः॒। हरि॑ऽभिः। सु॒तम्। या॒हि। म॒दाना॑म्। प॒ते॒। उप॑। नः॒। हरि॑ऽभिः। सु॒तम्॥३१॥

हे [v]मदानां [v]पते। माद्यन्तेऽनेनेति मदाः सोमाः। 'मदोऽनुपसर्गे' इति करणेऽप्प्रत्ययः। सोमानां स्वामिन्निन्द्र [v]हरिभिः 'आ शतेन हरिभिः' (ऋ. सं. २.१८.६) इत्यादिषु बहूनामश्वानां श्रुतेरत्रापि शतसहस्रसंख्याकैरश्वैः[4] सह [v]नः अस्माकं यज्ञे [v]सुतम् अभिषुतं सोमम् [v]उप [v]याहि। तत्पानार्थं शीघ्रमायाहि। पुनः [v]उप [v]नः इत्यादरार्थः ॥

द्वि॒ता यो वृ॒त्रहन्त॑मो वि॒द इन्द्रः॒ श॒तक्र॑तुः। उप॑ नो॒ हरि॑भिः सु॒तम् ॥ ३२ ॥

द्वि॒ता। यः। वृ॒त्रहन्ऽत॑मः। वि॒दे। इन्द्रः॑। श॒तऽक्र॑तुः। उप॑। नः॒। हरि॑ऽभिः। सु॒तम्॥३२॥

[v]वृत्रहन्तमः[5] अतिशयेन वृत्रस्य हन्ता [v]शतक्रतुः नानाविधकर्मा [v]यः [v]इन्द्रः [v]द्विता द्विधा [v]विदे वृत्रवधादावुग्रकर्मा जगद्रक्षणकाले शान्तकर्मेति द्विप्रकारेण सर्वैर्ज्ञायते। 'विद ज्ञाने'। कर्मणि विहितस्य तप्रत्ययस्य 'लोपस्त आत्मनेपदेषु' इति तलोपः। स त्वं [v]हरिभिः सह [v]सुतं[6] सोममुपयाहि ॥

त्वं हि वृ॒त्रहन्ने॑षां पा॒ता सोमा॑नामसि। उप॑ नो॒ हरि॑भिः सु॒तम् ॥ ३३ ॥

त्वम्। हि। वृ॒त्रऽहन्। ए॒षा॒म्। पा॒ता। सोमा॑नाम्। असि॑। उप॑। नः॒। हरि॑ऽभिः। सु॒तम्॥३३॥

हे [v]वृत्रहन् वृत्रस्य पापस्य वा हन्तरिन्द्र। हिशब्दो हेत्वर्थे। यस्मात् [v]त्वम् [v]एषाम् अस्मदीयानां [v]सोमानां [v]पाता पानकर्ता [v]असि भवसि। एषाम् इति इदमोऽन्वादेशे अशादेशोऽनुदात्तश्च। अतस्त्वम् अश्वैः[7] सह सोमं पातुमुपयाहि आगच्छ ॥

व्यूळहस्य दशरात्रस्य नवमेऽहनि वैश्वदेवे अभिप्लवतृचस्य[8] 'इन्द्र इषे ददातु नस्ते नो रत्नानि धत्तन' इति द्वे ऋचावार्भव्यौ। सूत्रितं च—'इन्द्र इषे ददातु नस्ते नो रत्नानि धत्तनेत्येका द्वे च' (आश्व. श्रौ. ८. ११) इति ॥

इन्द्र॒ इषे॑ ददातु न ऋभु॒क्षण॑मृ॒भुं र॒यिम्। वा॒जी द॑दातु वा॒जिन॑म् ॥ ३४ ॥

इन्द्रः॑। इषे॑। द॒दा॒तु॒। नः॒। ऋ॒भु॒क्षण॑म्। ऋ॒भुम्। र॒यिम्। वा॒जी। द॒दा॒तु॒। वा॒जिन॑म्॥३४॥

[v]इन्द्रः एवास्माभिः स्तुत इष्टः सन् [v]ऋभुक्षणम्। 'वा षपूर्वस्य०' इति दीर्घाभावः। यागादिकर्मकरणेन महान्तं सर्वेषां भ्रातॄणां श्रेष्ठं वा। अथवा तृतीयसवने[9] प्रजापतिसवित्रोर्मध्ये सोमपातृत्वात् महान्तम्। [v]रयिं दातारम् [v]ऋभुं सोमपानेनामर्त्यत्वं प्राप्तं तादृशमेतन्नामकं देवं [v]नः अस्मभ्यम्

---

१. ख-ज्ञ-त१-२-३-न-श–इहचयोरणे; त४-भ–इहवयोरणे। २. घ–मृळयासि सुखयसि। ३. ख-श–व्यूळ्हे; ग-त२-३-४-भ–व्यूळ्ह°। ४. भ–सहस्र°। ५. घ– यः वृत्रर्हंतमः। ६. घ–नः सुतं। ७. घ–हरिभिः। ८. ग–आर्भव°। ९. त४-न-भ–°सवनेन।

[v]इषे अन्नार्थं [v]ददातु प्रयच्छतु। तथा [v]वाजी बलवानिन्द्रः [v]वाजिनं बलवन्तमन्नवन्तं वा वाजनामानं[1] कनीयांसं[2] भ्रातरं च[3] अस्माकमन्नलाभाय [v]ददातु ॥ ॥ २७ ॥ ॥ ९ ॥

दशमेऽनुवाके दश सूक्तानि। तत्र ' गौर्धयति ' इति द्वादशर्चमाद्यं सूक्तमाङ्गिरसस्य बिन्दुनाम्नः पूतदक्षनाम्नो वार्षं गायत्रं मरुद्देवताकम्। तथा चानुक्रम्यते—' गौर्धयति द्वादश बिन्दुः पूतदक्षो वा मारुतम् ' इति। सूक्तविनियोगो लैङ्गिकः। प्रातःसवने सोमातिरिक्त[4] एकं शस्त्रमुपजायते। तत्राद्यस्तृचोऽनुरूपः। सूत्रितं च—'अस्ति सोमो अयं सुतो गौर्धयति मरुतामिति स्तोत्रियानुरूपौ ' (आश्व. श्रौ. ६. ७) इति ॥

गौर्धयति मरुतां श्रवस्युर्माता मघोनाम्। युक्ता वह्नी रथानाम् ॥ १ ॥

गौः। धयति। मरुताम्। श्रवस्युः। माता। मघोनाम्। युक्ता। वह्निः। रथानाम्॥ १ ॥

[v]मघोनां धनवतां [v]मरुतां [v]माता निर्मात्री [v]गौः पृश्निरूपा। ' पृश्नयै वै पयसो मरुतो जाताः ' इति श्रुतेः। यद्वा। गौर्माध्यमिकी वाक्। तत्रैव मध्यमस्थाने मरुतामपि। वर्तनात्तेषां तत्पुत्रत्वमुपचर्यते। [v]धयति सोमं पिबति पाययति वा स्वपुत्रान् मरुतः। किमिच्छन्ती। [v]श्रवस्युः अन्नं कामयमाना। कीदृशी। [v]रथानां मारुतानां [v]वह्निः पृषतीभिर्वंडवाभिर्वोढ्री संयोजयित्री सा [v]युक्ता सर्वत्र समन्तात् पूज्या भवति ॥

यस्या देवा उपस्थे व्रता विश्वे धारयन्ते। सूर्यामासा दृशे कम् ॥ २ ॥

यस्याः। देवाः। उपऽस्थे। व्रता। विश्वे। धारयन्ते। सूर्यामासा। दृशे। कम्॥ २ ॥

गौः सर्वदेवमयीत्याह। [v]यस्याः मरुतां मातुर्गोः [v]उपस्थे वर्तमानाः [v]विश्वे सर्वे [v]देवाः [v]व्रता व्रतानि स्वस्वकर्माणि [v]धारयन्ते बिभ्रति। इयमेवास्माकं स्वपयोमिश्रितस्य सोमस्य दात्रीति सर्वे तत्समीपे तिष्ठन्तीत्यर्थः। किंच [v]सूर्यामासा। माति स्वकलाभिस्तिथीनिति माश्चन्द्रमाः। ' देवताद्वन्द्वे च ' इत्युभयपदप्रकृतिस्वरत्वम्। सूर्याचन्द्रमसौ [v]दृशे दर्शनाय सर्वलोकप्रकाशनाय च यस्या गोः समीपे [v]कं सुखेन वर्तमानौ भवतः। सेयं गौः सोमं धयतीति पूर्वेण समन्वयः ॥

तत्सु नो विश्वे अर्य आ सदा गृणन्ति कारवः। मरुतः सोमपीतये ॥ ३ ॥

तत्। सु। नः। विश्वे। अर्यः। आ। सदा। गृणन्ति। कारवः। मरुतः। सोमऽपीतये॥३॥

[v]अर्यः स्तोत्रकरणार्थमितस्ततो गन्तारः [v]नः अस्मदीयाः [v]विश्वे सर्वे [v]कारवः स्तोतारः [v]तत् मरुतां बलं [v]सदा सर्वदा [v]आ [v]गृणन्ति। आभिमुख्येन स्तुतिभिः स्तुवन्ति। किमर्थम्। [v]सोमपीतये अस्माभिर्दीयमानं सोमं पातुम्। [v]मरुतः एतन्नामका देवा अस्माभिराह्वातव्याः खलु। ततः पुरस्तात्तद्बलं स्तुवन्तीत्यर्थः ॥

पूर्वाभिहित एव शस्त्रे ' अस्ति सोमः ' इति स्तोत्रियस्तृचः। सूत्रं तु पूर्वेण सहोदाहृतम् ॥

अस्ति सोमो अयं सुतः पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना ॥ ४ ॥

अस्ति। सोमः। अयम्। सुतः। पिबन्ति। अस्य। मरुतः। उत। स्वऽराजः। अश्विना॥४॥

---

१. ख-त-वाजां नामानं; ग-वाजीनामानं। २. ख-ग-घ-त-न-भ-श-कनीयांसं च। ३. घ-' च ' नास्ति। ४. य-सोमातिरेक।

vअयं पुरोवर्ती vसोमः vसुतः मरुदर्थमस्माभिरभिषुतः vअस्ति विद्यते । तस्मात् vअस्य । अन्वादेशे । एनं सुतं सोमं vस्वराजः स्वयं दीप्यमानाः । स्वतेजसा नान्यदीयेनेत्यर्थः । तादृशाः vमरुतः vपिबन्ति । vउत अपि च vअश्विना अश्विनौ च सोमं पिबतः ॥

पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः । त्रिषधस्थस्य जावतः ॥ ५ ॥

पिबन्ति । मित्रः । अर्यमा । तना । पूतस्य । वरुणः । त्रिऽसधस्थस्य । जाऽवतः ॥ ५ ॥

न[1] केवलं मरुत एव सोमपातारः किंत्वेतेऽपीत्याह । vमित्रः सर्वेषां स्वस्वकर्मणि प्रवर्तकत्वात् सखिभूतः vअर्यमा च vवरुणः दुःखादीनां शत्रूणां वा वरिता निवारकः । एतन्नामकास्त्रयो देवाः vतना । ततमूर्णास्तुकेनेति तनं दशापवित्रम् । ' सुपां सुलुक्° ' इति तृतीयाया आलादेशः । तनाद्युदात्तः । तना vपूतस्य शोधितं[2] vत्रिसधस्थस्य[3] । सह तिष्ठन्त्यत्रेति[4] सधस्थं स्थानम् । द्रोणकलशाधवनीयपूतभृदात्मानि त्रीणि स्थानानि यस्य तं तथोक्तं तादृशं vजावतः स्तुत्यजनवन्तमिमं सोमं vपिबन्ति[5] । द्वितीयार्थे षष्ठ्यः ॥

उतो न्वस्य जोषमाँ इन्द्रः सुतस्य गोमतः । प्रातर्होतेव मत्सति ॥ ६ ॥

उतो इति । नु । अस्य । जोषम् । आ । इन्द्रः । सुतस्य । गोऽमतः ।
प्रातः । होताऽइव । मत्सति ॥ ६ ॥

vउतो अपि च vइन्द्रः vसुतस्य अस्माभिरभिषुतस्य vगोमतः गव्यैर्मिश्रणवतः vअस्य[6] । अन्वादेशः । पूर्ववद्दशापवित्रेण पूतस्य सोमस्य vजोषं पानरूपां सेवां vप्रातः प्रातःसवने vनु क्षिप्रम् vआ vमत्सति । मदि स्तुत्यादिषु । आभिमुख्येन स्तौति । यद्वा । सोमसेवां कामयते । तत्र दृष्टान्तः । vहोतेव । यथा होता प्रातःसवने देवानभिष्टौति देवान् स्तोतुं वाभिवाञ्छति ॥ ॥ २८ ॥

कदत्विषन्त सूर्यस्तिर आपइव स्रिधः । अर्षन्ति पूतदक्षसः ॥ ७ ॥

कत् । अत्विषन्त । सूर्यः । तिरः । आपःऽइव । स्रिधः । अर्षन्ति । पूतऽदक्षसः ॥ ७ ॥

ऋषिर्मरुतो बहुवारं स्तुत्वेदानीमात्मानं वितर्कयति । vसूरयः प्राज्ञाः vआपइव उदकानीव vतिरः यथोदकानि तिर्यग्गच्छन्ति तद्वत्तिरश्चीनगतयः सन्तः vकत् कदा vअत्विषन्त । ' त्विष दीप्तौ ' । अन्तरिक्षे कदा दीप्यन्ते । किंच vस्रिग्धः शत्रूणां शोषका हन्तारस्त इमे मरुतः vपूतदक्षसः शुद्धबलाः सन्तः कदा वा vअर्षन्ति । अस्मदीयं यज्ञं प्रत्यागच्छन्ति ॥

कद्वो अद्य महानां देवानामवो वृणे । त्मना च दस्मवर्चसाम् ॥ ८ ॥

कत् । वः । अद्य । महानाम् । देवानाम् । अवः । वृणे । त्मना । च । दस्मऽवर्चसाम् ॥ ८ ॥

हे मरुतः vमहानां मंहनीयानां[7] महतां वा vत्मना vच आत्मनैवालंकरणैर्विनापि vदस्मवर्चसां दर्शनीयतेजस्कानामत एव vदेवानां द्योतमानानां vवः युष्माकम् vअवः पालनं vकत् कदाहं vवृणे संभजे । ' वृङ् संभक्तौ ' । क्रैयादिकः ॥

---

१. ख-त-भ-श-' न ' नास्ति । २. ख-परंशोधितं; ज्ञ-त१-२-न-भ२-परिशोधितं; घ-पूतं शोधितं; भ१-परिशोधनं । ३. घ१-त्रिषधस्थस्य । ४. ख-त-न-भ-श-तिष्ठत्यत्रेति । ५. ख-त-न-श-पिबति; भ२-पिबती । ६. ख-ग-त-न-' अस्य ' नास्ति । ७. ख-त-श-महनीयानां ।

आ ये विश्वा पार्थिवानि पप्रथन्रोचना दिवः । मरुतः सोमपीतये ॥ ९ ॥

आ । ये । विश्वा । पार्थिवानि । पप्रथन् । रोचना । दिवः । मरुतः । सोमऽपीतये ॥ ९ ॥

[v]ये मरुतः [v]विश्वा विश्वानि [v]पार्थिवानि पृथिव्यां भवानि भूतजातानि [v]दिवः द्युलोकस्य [v]रोचना रोचमानानि ज्योतींषि च [v]आ [v]पप्रथन् सर्वत्र विस्तारितान्यकार्षुः । 'प्रथ प्रख्याने'। ण्यन्तस्य चङि 'अत्सृदृस्वरप्रथम्रदस्तॄस्पशाम्' (पा. सू. ७. ४. ९५) इत्यभ्यासस्यादादेशः । 'चङ्यन्यतरस्याम्' इति स्वरेण[1] मध्योदात्तः । तादृशान् [v]मरुतः देवान् [v]सोमपीतये सोमपानाया-हमाह्वयामि ॥

त्यान्नु पूतदक्षसो दिवो वो मरुतो हुवे । अस्य सोमस्य पीतये ॥ १० ॥

त्यान् । नु । पूतऽदक्षसः । दिवः । वः । मरुतः । हुवे । अस्य । सोमस्य । पीतये ॥ १० ॥

हे [v]मरुतः मितराविण एतन्नामका देवाः [v]पूतदक्षसः परिशुद्धबलान् [v]दिवः स्वतेजसा दीप्यमानान् । यद्वा । दिवो द्युलोकस्थितान् । [v]त्यान् तान् प्रसिद्धान् [v]वः युष्मान् [v]नु क्षिप्रं [v]हुवे आह्वयामि । किमर्थम् । [v]अस्य अस्मदीयस्य [v]सोमस्य [v]पीतये पानाय ॥

त्यान्नु ये वि रोदसी तस्तभुर्मरुतो हुवे । अस्य सोमस्य पीतये ॥ ११ ॥

त्यान् । नु । ये । वि । रोदसी इति । तस्तभुः । मरुतः । हुवे । अस्य । सोमस्य । पीतये ॥ ११ ॥

[v]ये [v]मरुतः [v]रोदसी द्यावापृथिव्यौ [v]वि [v]तस्तभुः स्वबलेनैवात्यर्थं स्तब्धे चक्रुः । ते रोदसी स्वाधीने अकार्षुरित्यर्थः । [v]त्यान् तान् सर्वतः[2] प्रसिद्धान् [v]नु क्षिप्रमहं [v]हुवे आह्वयामि । किमर्थम् । [v]अस्य इत्यादि ॥

त्यं नु मारुतं गणं गिरिष्ठां वृषणं हुवे । अस्य सोमस्य पीतये ॥ १२ ॥

त्यम् । नु । मारुतम् । गणम् । गिरिऽस्थाम् । वृषणम् । हुवे । अस्य । सोमस्य । पीतये ॥ १२ ॥

[v]त्यं तं सर्वत्र विश्रुतं [v]गिरिष्ठां गिरिषु मेघेषु पर्वतेषु वा तिष्ठन्तं [v]वृषणम् उदकानां कामानां वा वर्षितारं [v]मारुतं मरुत्संबन्धिनं [v]गणं संघं [v]हुवे बिन्दुरहमाह्वयामि । किं प्रयोजनम् । [v]अस्य अस्मदीयस्य [v]सोमस्य [v]पीतये पानाय ॥ ॥ २९ ॥

'आ त्वा' इति नवर्चं द्वितीयं सूक्तमानुष्टुभमैन्द्रम् । तिरश्चीनार्माङ्गिरस ऋषिः । तथा चानु-क्रम्यते—'आ त्वा नव तिरश्चीरानुष्टुभम्[3]' इति । आभिप्लविकेषूक्थ्येषु[4] तृतीयसवनेऽच्छावाकस्य 'आ त्वा गिरः' इति तृचो वैकल्पिकोऽनुरूपः । सूत्र्यते हि—'गायन्ति त्वा गायत्रिण आ त्वा गिरो रथीरिव' (आश्व. श्रौ. ७. ८) इति ॥

आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः ।
अभि त्वा समनूषतेन्द्रं वत्सं न मातरः ॥ १ ॥

आ । त्वा । गिरः । रथीःऽइव । अस्थुः । सुतेषु । गिर्वणः ।
अभि । त्वा । सम् । अनूषत । इन्द्रं । वत्सम् । न । मातरः ॥ १ ॥

---

१. ख-ज्ञ-त२-३–ङित्स्वरेण; त१–निस्स्वरेण । २. ख-ग-घ-त-श–सर्वान्; भ१–सर्वान् सर्वतः । ३. ज्ञ-न-अनु.–तिरश्चीरांगिरस आनु° । ४. ख-भ–°षूक्थेषुः ।

हे vगिर्वणः गीर्भिर्वननीयेन्द्र vसुतेषु सोमेष्वभिषुतेषु सत्सु vगिरः अस्माकं स्तुतिलक्षणा वाचः vत्वा त्वाम् vआ vअस्थुः आभिमुख्येन शीघ्रं तिष्ठन्ति। तत्र दृष्टान्तः। vरथीरिव। यथा रथवान् रथेन गच्छन् वीरः प्राप्यं देशं क्षिप्रं गच्छति तद्वदस्माभिरभिगन्तव्यं त्वां स्तुतयोऽभिगच्छन्ति। किंच हे vइन्द्र अस्मदीया गिरः vत्वा त्वामभिलक्ष्य[1] vसमनूषत सम्यक् शब्दायन्ते। स्तुवन्तीत्यर्थः। 'नू स्तवने'। कुटादिः। तस्य लुङि रूपम्। तत्र दृष्टान्तः। vवत्सं[2] vन vमातरः[2]। यथा मातरो गावो वत्समभिलक्ष्य हम्भारवादिशब्दं कुर्वन्ति तद्वत् ॥

आ त्वा शुक्रा अचुच्यवुः सुतासं इन्द्र गिर्वणः।
पिबा त्व१स्यान्धसं इन्द्र विश्वासु ते हितम् ॥ २ ॥

आ। त्वा। शुक्राः। अचुच्यवुः। सुतासः। इन्द्र। गिर्वणः।
पिब। तु। अस्य। अन्धसः। इन्द्र। विश्वासु। ते। हितम् ॥ २ ॥

हे vगिर्वणः गीर्भिर्वननीय हे vइन्द्र vशुक्राः ग्रहेषु पात्रेषु च दीप्यमानाः vसुतासः अस्माभिः अभिषुताः सोमाः vत्वा त्वाम् vआ vअचुच्यवुः आगच्छन्तु। 'च्युङ् प्लुङ् गतौ'। लङि 'बहुलं छन्दसि' इति शपः श्लुः। ततस्त्वमस्माभिर्दीयमानस्य vअन्धसः सोमस्य भवदीयं भागं vतु क्षिप्रं vपिब[3]। तदेवोपपादयति। हे vइन्द्र vविश्वासु सर्वासु दिक्षु vते त्वदर्थं सोमपुरोडाशादिहविः vहितं निहितं भवति ॥

पिबा सोमं मदाय कमिन्द्र श्येनाभृतं सुतम्।
त्वं हि शश्वतीनां पती राजा विशामसि ॥ ३ ॥

पिब। सोमम्। मदाय। कम्। इन्द्र। श्येनऽआभृतम्। सुतम्।
त्वम्। हि। शश्वतीनाम्। पतिः। राजा। विशाम्। असि ॥ ३ ॥

हे vइन्द्र त्वं vश्येनाभृतम्। 'हृग्रहोर्भश्छन्दसि' इति हकारस्य भकारः। द्युलोकात् श्येनरूपया गायत्र्याहृतं vसुतम् अभिषुतं vसोमं vमदाय हर्षाय vपिब। vकम् इति पूरणः सुखार्थो वा। सुखेन सोमं पिब। हिशब्दो हेतौ। vहि यस्मात् vत्वं vशश्वतीनां बह्वीनां vविशां मरुद्गणानां सर्वेषां देवगणानां च vपतिः पालयिता स्वामी vअसि भवसि तथा vराजा स्वतेजसा दीप्यमानश्चासि। अतस्त्वं पूर्वं सोमं पिबेति ॥

आभिप्लविकेषूक्थ्येषु[4] तृतीयसवनेऽच्छावाकस्य 'श्रुधी हवं तिरश्चया' इति वैकल्पिकः स्तोत्रियः। सूत्रितं च—'श्रुधी हवं तिरश्चया आशुत्कर्ण श्रुधी हवम्' (आश्व. श्रौ. ७. ८) इति ॥

श्रुधी हवं तिरश्चया इन्द्र यस्त्वा सपर्यति।
सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥ ४ ॥

श्रुधि। हवम्। तिरश्चयाः। इन्द्र। यः। त्वा। सपर्यति।
सुऽवीर्यस्य। गोऽमतः। रायः। पूर्धि। महान्। असि ॥ ४ ॥

---

१. घ–त्वामभ्यभिलक्ष्य। २. ख-त–वत्सं न च; घ–वत्सं न; न-श–वत्सं नव; भ–वत्समिव। ३. ख-ज्ञ-त२-न-भ–पिब यद्वा क्रियाग्रहणमपि कर्तव्यमिति संप्रदानं। चतुर्थ्यर्थे बहुलं (ख-ज्ञ-त२–बहुलं छंदसि) षष्ठी। तदिदं सोमरूपमन्नं शीघ्रं पिब। ४. ख-भ१–°षूक्थेषु।

हे [v]इन्द्र [v]यस्त्वा त्वां [v]सपर्यति। सपरशब्दः कण्ड्वादिः। हविर्भिः परिचरति तादृशस्य [v]तिरश्चयाः एतन्नामकस्यर्षेः मम [v]हवं स्तुतिभिस्त्वद्विषयमाह्वानं [v]श्रुधि शृणु। श्रुत्वा च हे इन्द्र त्वं [v]सुवीर्यस्य शोभनवीर्योपेतस्य। यद्वा। वीरे पुत्रे भवं वीर्यम्। सुपुत्रवतः। [v]गोमतः गवादिपशुमतः [v]रायः धनस्य दानेन [v]पूर्धि अस्मान् पूरय। एतत्सामर्थ्यं कुत इत्यत आह। त्वं [v]महान् गुणाधिको देवानां श्रेष्ठश्च [v]असि भवसि खलु ॥

इन्द्र यस्ते नवीयसीं गिरं मन्द्रामजीजनत्।
चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम् ॥ ५ ॥

इन्द्र। यः। ते। नवीयसीम्। गिरम्। मन्द्राम्। अजीजनत्।
चिकित्वित्ऽमनसम्। धियम्। प्रत्नाम्। ऋतस्य। पिप्युषीम् ॥ ५ ॥

हे [v]इन्द्र [v]यः यजमानः [v]नवीयसीं नवतरां पुनःपुनः क्रियमाणतया [v]मन्द्रां मदकरीं [v]गिरं स्तुतिलक्षणां वाचं [v]ते त्वदर्थम् [v]अजीजनत् उदपीपदत्। अकार्षीदित्यर्थः। तस्मै स्तोत्रे त्वं [v]प्रत्नां पुरातनम् [v]ऋतस्य सत्यस्य संबन्धि। यद्वा। तृतीयार्थे षष्ठी। सत्येन [v]पिप्युषीं प्रवृद्धम्[1]। 'लिड्यङोश्च' इति प्यायतेः पीभावः। तादृशं [v]चिकित्विन्मनसम्। 'कित ज्ञाने'। क्वसौ रूपम्। अकारस्येकारश्छान्दसः। चिकित्वांसि ज्ञातानि सर्वेषां हृदयानि ययेति[2]। अमायया क्रियमाणं यत्तव रक्षणं सर्वेषां हृदयं प्रज्ञापयतीति तदतीन्द्रियार्थदर्शकं [v]धियं त्वदीयं रक्षणाख्यं तस्मै कुरु ॥ ॥ ३० ॥

तमु ष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः।
पुरूण्यस्य पौंस्या सिषासन्तो वनामहे ॥ ६ ॥

तम्। ऊँ इति। स्तवाम। यम्। गिरः। इन्द्रम्। उक्थानि। ववृधुः।
पुरूणि। अस्य। पौंस्या। सिसासन्तः। वनामहे ॥ ६ ॥

ऋषयः परस्परमाहुः। [v]तं पूर्वोक्तलक्षणम्। [v]उ इत्यवधारणे। तमेवेन्द्रं [v]स्तवाम स्तुतिभिः स्तुमः। [v]यम्[3] [v]इन्द्रं[3] [v]गिरः अस्माकं स्तुतयः [v]उक्थानि शस्त्राणि च [v]वावृधुः प्रावर्धयन् तं स्तुमः। ततो वयम् [v]अस्य इन्द्रस्य [v]पुरूणि बहूनि [v]पौंस्या वीर्याणि [v]सिषासन्तः। 'षण संभक्तौ'। सनीडभावपक्ष आत्वे कृते 'सनोतेरनः' इति सांहितिकं षत्वम्। तानि वीर्याणि संभक्तुमिच्छन्तः सन्तः [v]वनामहे। तमिन्द्रं स्तुतिभिः संभजामहे ॥

एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना।
शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु ॥ ७ ॥

एतो इति। नु। इन्द्रम्। स्तवाम। शुद्धम्। शुद्धेन। साम्ना।
शुद्धैः। उक्थैः। ववृध्वांसम्। शुद्धः। आशीःऽवान्। ममत्तु ॥ ७ ॥

अत्रेतिहासमाचक्षते। पुरा किलेन्द्रो वृत्रादिकानसुरान् हत्वा ब्रह्महत्यादिदोषेणात्मानमपरिशुद्धमित्यमन्यत। ततस्तदोषपरिहारायेन्द्र ऋषीनवोचत्। अपूतं मां युष्मदीयेन साम्ना शुद्धं कुरुतेति।

---

१. ख-ग-त-न-भ-श–प्रवृद्धां। २. ख-त-न-भ-श–नयेति; ज–अनयेति। ३. ख-ग-त-भ–इंद्रं; घ–यं।

ततस्ते च शुद्धयुत्पादकेन साम्ना शस्त्रैश्च परिशुद्धमकार्षुः । पश्चात्पूतायेन्द्राय[1] यागादिकर्माणि सोमादीनि हवींषि प्रादुरिति । एषोऽर्थः शाट्यायनकब्राह्मणे प्रतिपादितः—' इन्द्रो वासुरान्हत्वापूत इवामेध्योऽमन्यत । सोऽकामयत शुद्धमेव मा सन्तं शुद्धेन साम्ना स्तुयुरिति[2] । स ऋषीनब्रवीत् स्तुत मेति । तत[3] ऋषयः सामापश्यन्[4] । तेनास्तुवन्नेतो न्विन्द्रमिति । ततो वा इन्द्रः पूतः शुद्धो मेध्योऽभवत् ' इति । तथा चास्या ऋचोऽयमर्थः । ऋषयः परस्परं ब्रुवन्ति । vनु क्षिप्रम् vएतो आगच्छतैव । आगत्य च vशुद्धेन शुद्धयुत्पादकेन vसाम्ना तथा vशुद्धैः शुद्धिहेतुभिः vउक्थैः शस्त्रैश्च vइन्द्रं vशुद्धम् अपापिनं कृत्वा vस्तवाम स्तुयाम[5] । ततः सामशस्त्रैश्च vवावृध्वांसं पापराहित्येन वर्धमानं तमिममिन्द्रं vशुद्धः दशापवित्रेण vआशीर्वान् आश्रयणवान् गव्यादिभिः । ' छन्दसीरः ' इति मतुपो वत्वम् । तादृशः सोमः vममत्तु इन्द्रं मादयतु । माद्यतेश्छान्दसः श्लुः ॥

इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः ।
शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्यः ॥ ८ ॥

इन्द्र । शुद्धः । नः । आ । गहि । शुद्धः । शुद्धाभिः । ऊतिऽभिः ।
शुद्धः । रयिम् । नि । धारय । शुद्धः । ममद्धि । सोम्यः ॥ ८ ॥

हे vइन्द्र vशुद्धः अस्मदीयैः सामभिः शस्त्रैश्च परिशुद्धस्त्वं vनः अस्मान् vआ vगहि आगच्छ । vशुद्धाभिरूतिभिः । ऊतयो मरुतः । अवन्ति सर्वत्र गच्छन्तीति वा । तेऽपि सामभिः शस्त्रैः परिपूताः । तैर्मरुद्भिः सह vशुद्धः पापरहितस्त्वमा गहि । आगत्य च vशुद्धः त्वं vरयिं धनमस्मासु vनि vधारय नितरां स्थापय । किंच vशुद्धः त्वं vसोम्यः[6] सोमार्हो भूत्वा vममद्धि सोमेन माद्य । ' मदी हर्षे ' । लोटि ' बहुलं छन्दसि ' इति शपः श्लुः ॥

इन्द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे ।
शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि ॥ ९ ॥

इन्द्र । शुद्धः । हि । नः । रयिम् । शुद्धः । रत्नानि । दाशुषे ।
शुद्धः । वृत्राणि । जिघ्नसे । शुद्धः । वाजम् । सिसाससि ॥ ९ ॥

हे vइन्द्र vशुद्धः । हिरवधारणे । शुद्ध एव त्वं vरयिं धनं vनः अस्मभ्यं प्रयच्छ । तथा vशुद्धः त्वं vदाशुषे हविर्दत्तवते यजमानाय vरत्नानि रमणीयानि धनादीनि[7] च देहि । ततः vशुद्धः पापरहितस्त्वं vवृत्राणि अपामावरकान् कर्मविघ्नकारिणः शत्रून् पापानि वा vजिघ्नसे हंसि । ततः vशुद्धः शत्रुहननदोषपरिहारायास्मदीयैः सामभिः शस्त्रैः परिशुद्धस्त्वं vवाजम् अन्नमस्मभ्यं vसिषाससि प्रदातुमिच्छसि । यदा यदा शत्रूनहं हन्यां तदा तदा शुद्धयुत्पादकैः सामभिः शस्त्रैश्च यूयं मां परिशुद्धं कुरुतेत्यस्मभ्यमन्नं दातुमिच्छसीत्यर्थः ॥ ॥ ३१ ॥

' अस्मै ' इत्येकविंशत्यृचं तृतीयं सूक्तम् । अत्रानुक्रम्यते—' अस्मै सैका द्युतानो वा मारुतस्त्रैष्टुभं[8] चतुर्थी विराळिष्यामीति मारुतः पादः परैन्द्राबार्हस्पत्या ' इति । द्युतानाख्यो मरुतां पुत्र ऋषिस्तिरश्चीर्नामाङ्गिरसो वा । चतुर्थी विराट् । शिष्टास्त्रिष्टुभः । इन्द्रो देवता । ' इष्यामि वो मरुतः ' इति पादो मरुद्देवत्यः । ' अध द्रप्सः ' इत्येषा स्विन्द्राबृहस्पतिदेवताका । सूक्तविनियोगो लिङ्गादवगन्तव्यः ॥

---

१. श–पश्चाच्छुद्धायेंद्राय । २. ख-ज्ञ-त२-३-भ२-श–स्तुयुरिति स्तुयुः; त१–शस्त्रैः स्तुयुरिति स्तुयुः । ३. ख-त-भ-तव; ग–त एते । ४. ख-त-भ-श–सामापश्यं । ५. घ–स्तूयाम । ६. ख-ग-त-श–' सोम्यः ' नास्ति । ७. ख-त–धनकवधनादीनि; ग-श–धनकनकादीनि; न–कनकवस्त्रधनादीनि; भ–कनकवधनादीनि । ८. ग-न-भ–मरुत° ।

अस्मा उषास आतिरन्त यामभिन्द्राय नक्तमूर्म्याः सुवाचः ।
अस्मा आपो मातरः सप्त तस्थुर्नृभ्यस्तराय सिन्धवः सुपाराः ॥ १ ॥

अस्मै । उषसः । आ । अतिरन्त । यामम् । इन्द्राय । नक्तम् । ऊर्म्याः । सुऽवाचः ।
अस्मै । आपः । मातरः । सप्त । तस्थुः । नृऽभ्यः । तराय । सिन्धवः । सुऽपाराः ॥ १ ॥

इन्द्रसामर्थ्याद्गीताः ᵛउषसः उषःकालाः ᵛअस्मै पूर्वोक्तगुणोपेताय ᵛइन्द्राय ᵛयामं स्वस्वगमनम् ᵛआतिरन्त । तिरतिर्वर्धनकर्मा । समन्तादवर्धयन्त[1] । यथा पूर्वमुद्यन्ति तथेदानीमप्यस्मा उद्गता अभवन् । तथा ᵛऊर्म्याः । रात्रिनामैतत् । ' ऋ गतिप्रापणयोः ' । ' अर्तेरू च ' (उ. सू. ४. ४८४) इति मिप्रत्ययः । ' भवे छन्दसि ' इति यत् । सर्वैरभिगन्तव्याः । रात्रौ हि सर्वे स्वनिवासं गच्छन्ति । स्वनिलयप्राप्तिहेतुभूता रात्रयः । ᵛनक्तम् अपररात्रिकाले ᵛसुवाचः शोभनवाचो भवन्ति । तस्मिन् काले हि सर्वे वेदाध्ययनादीनि[2] कुर्वन्ति । तस्मात् कल्याणवाचोऽभवन् । इन्द्रेऽनुशासति[3] वेदाद्यनुमाने[4] निरता[4] अभवन् । तथा ᵛआपः । ' आप्लृ व्याप्तौ ' । सर्वतो व्याप्ताः ᵛमातरः जगतां निर्मात्र्यः ᵛसप्त सप्तसंख्याकाः ᵛसिन्धवः स्यन्दमाना गङ्गाद्या नद्यः । यद्वा । सप्त सर्पणशीलाः सिन्धवः सरितः । तासामावरकस्याहेर्हननोत्पादकत्वात् ᵛअस्मै इन्द्राय ᵛनृभ्यस्तराय मनुष्याणां सुखेन तरणार्थं ᵛसुपाराः शोभनपाराः सुखेन तर्तुं योग्या अभवन्नित्यर्थः ॥

अतिविद्धा विथुरेणा चिदस्रा त्रिः सप्त सानु संहिता गिरीणाम् ।
न तद्देवो न मर्त्यस्तुतुर्याद्यानि प्रवृद्धो वृषभश्चकार ॥ २ ॥

अतिऽविद्धा । विथुरेण । चित् । अस्रा । त्रिः । सप्त । सानु । सम्ऽहिता । गिरीणाम् ।
न । तत् । देवः । न । मर्त्यः । तुतुर्यात् । यानि । प्रऽवृद्धः । वृषभः । चकार ॥ २ ॥

ᵛविथुरेण । वर्णव्यत्ययः । ᵛचित् अप्यर्थे । विथुरेणासहायेनापि ᵛअस्रा । ' असु क्षेपणे ' । ताच्छीलिकस्तृन् । शत्रुक्षेपणशीलेनेन्द्रेण । यद्वा । अस्त्रास्त्रेण वज्रेण । ᵛत्रिः ᵛसप्त[5] एकविंशतिसंख्यानि ᵛसंहिता संहितान्येकत्र संघीभूतानि ᵛगिरीणां सप्तानां पर्वतानां ᵛसानु[6] सानूनि ᵛअतिविद्धा अतिविद्धानि । अतीत्य ताडितानि । तेन मुक्तो वज्रपातस्तानि भित्त्वागमदित्यर्थः । अत्र तैत्तिरीयकं ब्राह्मणं—' दर्भपिञ्जूलमुद्धृत्य सप्त गिरीन् भित्त्वा तमहन् ' (तै. सं. ६. २. ४. ३) इत्यादि । तस्येन्द्रस्य ᵛतत् तानि सानुभेदनादीनि कर्माणि ᵛदेवः इन्द्राद्यतिरिक्तो देवः ᵛमर्त्यः मनुष्यो वा ᵛन ᵛतुतुर्यात् न तरेत्[7] । तथा कर्तुं न शक्नोतीत्यर्थः ॥ ' तॄ प्लवनतरणयोः ' । लिङि छान्दसः शपः श्लुः । ' बहुलं छन्दसि ' इत्युत्वम् । यद्वा । ' तुर त्वरणे ' । जौहोत्यादिकः । ᵛप्रवृद्धः सोमपानेन बलेन वा प्रवृद्धः ᵛवृषभः कामानामुदकानां वा वर्षक इन्द्रः ᵛयानि कर्माणि ᵛचकार कृतवान् तानि देवो मनुष्यो वा न तथा कर्तुं शक्नोतीत्यर्थः[9] ॥

---

१. ख-घ-त–समंताद्वर्धयंत; ग-न–समंताद्वर्धयंते; भ–समंताद्वर्धयंतो । २. ख-ग-त-न-भ-श–वेदाध्ययनानि शास्त्रश्रवण (ख-त-१-२-३–°श्रवणः) चिंतया(ग–°चिंतना°)दीनि । ३. ख-ग-त–ईद्देनुशासनं । ४. त३-४-न-भ-श–वेदाद्यनुमाननिरताः । ५. ख-ग-घ-त२-३-भ२-श–सप्तकृत्वः । ६. घ–यानि सानु । ७. श– हन्यात् हंतुं शक्तो न भवेत् । अस्मिन् पक्षे तूरी गतिहिंसत्वरणयोरित्येतस्य रूपं । यथायोग्यं दीर्घाभावो ह्रस्वश्छांदसः । न तथा कर्तुं शक्नोतीत्यर्थः ।

इन्द्रस्य वज्र आयसो निमिश्ल इन्द्रस्य बाह्वोर्भूयिष्ठमोजः ।
शीर्षन्निन्द्रस्य क्रतवो निरेक आसन्नेषन्त श्रुत्या उपाके ॥ ३ ॥

इन्द्रस्य । वज्रः । आयसः । निऽमिश्लः । इन्द्रस्य । बाह्वोः । भूयिष्ठम् । ओजः ।
शीर्षन् । इन्द्रस्य । क्रतवः । निरेके । आसन् । आ । ईषन्त । श्रुत्यै । उपाके ॥ ३ ॥

उक्तगुणस्य [v]इन्द्रस्य [v]वज्र [v]आयसः अयसा निर्मितः। अयोमय इत्यर्थः। स[1] वज्रः इन्द्रेण स्वहस्ते [v]निमिश्लः संमिश्रः अत्यन्तं[2] संबद्धः[2] कृतः। अत एव [v]इन्द्रस्य [v]बाह्वोः भुजयोः [v]भूयिष्ठं बहुतमम् [v]ओजः वीर्यमस्ति। तथा [v]निरेके। निपूर्वाद्रिच्यतेर्वा[3] निस्पूर्वादेतेर्वेति संदेहादनवग्रहः। निर्गमने यदा युद्धार्थमिन्द्रो निर्गच्छति तदानीम् [v]इन्द्रस्य [v]शीर्षन् शिरसि [v]क्रतवः कर्माणि शिरस्त्राणनिधानादीनि। यद्वा। शिर इति गलप्रभृत्यूर्ध्वमङ्गमुच्यते। तत्रत्याभ्यामक्षिभ्यां दर्शनप्रेरणादीनि कर्माणि भवन्ति। तथा [v]आसन्। आस्यस्यासन्नादेशः। आस्ये च यानि कर्माणि युद्धार्थं वाजिनो गजान् संनाहयतेत्यादीनि भवन्ति। किंच [v]श्रुत्यै संग्रामाय निर्गच्छतोऽनुशासत इन्द्रस्य वाक्यश्रवणार्थं सर्वं उपजीविनो भृत्याः [v]उपाके अन्तिके [v]एषन्त। अयमिन्द्रोऽस्मान् कुत्र कुत्र कार्ये नियोक्ष्यतीत्येतेन मनसा तदन्तिके समन्तादागच्छन्ति। 'ईष गतिहिंसादर्शनेषु'। भौवादिकः ॥

मन्ये त्वा यज्ञियं यज्ञियानां मन्ये त्वा च्यवनमच्युतानाम् ।
मन्ये त्वा सत्वनामिन्द्र केतुं मन्ये त्वा वृषभं चर्षणीनाम् ॥ ४ ॥

मन्ये । त्वा । यज्ञियम् । यज्ञियानाम् । मन्ये । त्वा । च्यवनम् । अच्युतानाम् ।
मन्ये । त्वा । सत्वनाम् । इन्द्र । केतुम् । मन्ये । त्वा । वृषभम् । चर्षणीनाम् ॥ ४ ॥

एतदादयः प्रत्यक्षाः। हे इन्द्र [v]त्वा त्वां [v]यज्ञियानां यज्ञार्हाणां देवानामपि [v]यज्ञियं पुरस्तादेव यज्ञार्हमिति[4] [v]मन्ये अवबुध्ये। तथा [v]त्वा त्वाम् [v]अच्युतानां च्युतिरहितानामपि पर्वतानां [v]च्यवनं च्यावयितारं वज्रेण विभेदकमिति [v]मन्ये जानामि। यद्वा। अच्युतानां बलेन च्यावयितुमशक्यानां बलिनां वीराणामपि स्वबलेन विद्रावयितारमिति[5] जाने। किंच हे [v]इन्द्र[6] [v]सत्वनाम्[7]। 'षण संभक्तौ'। क्वनिप्। संभजमानानां भटानां [v]केतुम् उच्छ्रितमिति [v]मन्ये। यद्वा। सत्वनां[8] स्तुतिभिः हविर्भिर्वा संभक्तॄणां यष्टॄणां केतुमात्मनः प्रज्ञापकं तेषां पूजनीयमिति वा मन्ये। तथा [v]त्वा त्वां [v]चर्षणीनां मनुष्याणां [v]वृषभम् अभिमतफलवर्षकमिति [v]मन्ये जानामि ॥

आ यद्वज्रं बाह्वोरिन्द्र धत्से मदच्युतमहये हन्तवा उ ।
प्र पर्वता अनवन्त प्र गावः प्र ब्रह्माणो अभिनक्षन्त इन्द्रम् ॥ ५ ॥

आ । यत् । वज्रम् । बाह्वोः । इन्द्र । धत्से । मदऽच्युतम् । अहये । हन्तवै । ऊँ इति ।
प्र । पर्वताः । अनवन्त । प्र । गावः । प्र । ब्रह्माणः । अभिऽनक्षन्तः । इन्द्रम् ॥ ५ ॥

---

१. ख-घ-ङ-त१-२–स च । २. ख-ङ-त१-२–अत्यंतसंबंधः; न-भ–अत्यंतं संबंधः । ३. ख-त–निपूर्वाद्विच्यतेर्वा । ४. ख-त–यज्ञियार्हमिति । ५. ग–च्यावयितारमिति । ६. घ-भ–इंद्र त्वा त्वां । ७. ख-त-श–सत्वनां सत्वानां; ग-घ–सत्वानां; भ–षत्वाणां । ८. ख-ग-त-भ-श–सत्वानां ।

हे [v]इन्द्र [v]बाह्वोः [v]वज्रम् आयुधम्। कीदृशम्। [v]मदच्युतं शत्रूणां मदस्य च्यावयितारं [v]यत् यदा [v]आ [v]धत्से आदधासि। किमर्थम्। [v]अहये अहिनामानमसुरं मेघं वा [v]हन्तवै। [v]उ इत्यवधारणे। हन्तुमेव। किंच यदा वेन्द्रेणाहिनामकेऽसुरे हते सति [v]पर्वताः जगदापूरका मेघाः [v]प्र [v]अनवन्त। 'नु शब्दे'। प्रकर्षेणाशब्दयन्। यदा वा [v]गावः तत्स्थान्युदकानि च प्रकर्षेण ध्वनिमकुर्वन्। उदकान्यध्वनयश्चित्यत्र याजुषो निगमः—'यददः संप्रयतीरहावनदता हते तस्मादा नद्यो नाम स्थ' (तै. सं. ५. ६. १. २; अ. सं. ३. १३. १) इति। तुरीयः पादः परोक्षः। तदानीम् [v]अभिनक्षन्तः अभित इन्द्रं स्तुतिभिर्हविर्भिर्गच्छन्तः [v]ब्रह्माणः ब्राह्मणाः [v]इन्द्रं पर्यचरन्। यद्वा। ब्रह्माणः। 'बृह वृद्धौ'। प्रवृद्धाः पर्वतादय इन्द्रमस्तुवन्निति॥ ॥ ३२ ॥

तꣳ ष्टवाम य इमा जजान विश्वा जातान्यवराण्यस्मात् ।
इन्द्रेण मित्रं दिधिषेम गीर्भिरुपो नमोभिर्वृषभं विशेम ॥ ६ ॥

तम्। ऊँ इति। स्तवाम। यः। इमा। जजान। विश्वा। जातानि। अवराणि। अस्मात्। इन्द्रेण। मित्रम्। दिधिषेम। गीःऽभिः। उपो इति। नमःऽभिः। वृषभम्। विशेम ॥ ६ ॥

परस्परं स्तोतार आहुः। [v]तमु तमेवेन्द्रं वयं संहत्य [v]स्तवाम स्तोत्रं करवाम। [v]यः इन्द्रः [v]इमा इमानि भूतानि [v]जजान जनयामास। तस्मात् [v]अस्मात् इन्द्रादेव [v]विश्वा विश्वानि सर्वाणि वस्तुजातानि सर्वाणि जगन्ति वा [v]अवराणि अवरकालीनानि पश्चाद्भवानि भवन्ति। तेनानेन [v]इन्द्रेण वयं [v]गीर्भिः स्तुतिभिः [v]मित्रम्। लुप्तभावप्रत्ययेन निर्देशः। मैत्रीं [v]दिधिषेम धारयेम। 'धिष धारणे' इति धातुं केचिद्वदन्ति। यद्वा। मित्रम्। छान्दसमेकवचनम्। वयमिन्द्रेण सह मित्राणि सुहृदो भवामेति गीर्भिरिन्द्रं शब्दयेम। 'धिष शब्दे'। जौहोत्यादिकः। अत्र व्यत्ययेन द्विकिरणता श्लुश्च शश्च। ततः [v]नमोभिः क्रियमाणैर्नमस्कारैर्दीयमानैर्हविर्भिर्वा [v]वृषभं कामानां वर्षकमिन्द्रम् [v]उपो [v]विशेम अस्मदभिमुखमेव कुर्याम॥

वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः ।
मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥ ७ ॥

वृत्रस्य। त्वा। श्वसथात्। ईषमाणाः। विश्वे। देवाः। अजहुः। ये। सखायः। मरुत्ऽभिः। इन्द्र। सख्यम्। ते। अस्तु। अथ। इमाः। विश्वाः। पृतनाः। जयासि ॥७॥

हे इन्द्र तव [v]ये [v]विश्वे [v]देवाः प्राक् [v]सखायः संग्रामे सखित्वं कुर्यामेति[1] मित्राण्यभवन् ते सर्वे देवाः [v]वृत्रस्य वृत्रासुरस्य [v]श्वसथात्। श्वसेरौणादिकोऽथप्रत्ययः। सर्वानागच्छतो दृष्ट्वा तेषां भीत्युत्पादनाय वृत्रासुरः श्वासमकार्षीत्। श्वासाद्भीताः सन्तः अत एव [v]ईषमाणाः सर्वतः पलायमानाः [v]त्वा त्वाम् [v]अजहुः संग्रामे त्यक्तवन्तः। एवं सति हे [v]इन्द्र [v]मरुद्भिः सह [v]सख्यं सखिभावः [v]ते तव [v]अस्तु। ये मरुतस्त्वां न परित्यजन्ति तैः सहेति। [v]अथ अनन्तरम् [v]इमाः [v]विश्वाः[2] [v]पृतनाः शत्रुसेनाः [v]जयासि स्वबलेनाभिभवसि। अनेन वृत्रं घ्नन्तमिन्द्रमाह। अत्र 'इन्द्रो वै वृत्रं हनिष्यन्' (ऐ. ब्रा. ३. २०) इत्यादि ब्राह्मणमनुसंधेयम्॥

त्रिः षप्तिस्त्वा मरुतो वावृधाना उत्साइव रशयो यज्ञियासः ।
उप त्वेमः कृधि नो भागधेयं शुष्मं त एना हविषा विधेम ॥ ८ ॥

---

१. ख-त-श-कुर्यामिति। २. भ-विश्वाः सर्वाः।

त्रिः । षष्टिः । त्वा । मरुतः । ववृधानाः । उस्राःऽइव । राशयः । यज्ञियासः ।
उप । त्वा । आ । इमः । कृधि । नः । भागऽधेयम् । शुष्मम् । ते । एना । हविषा । विधेम ॥ ८ ॥

प्रसङ्गादेतावन्तो मरुतः सहाया अभवन्नित्याह । हे इन्द्र ᵛत्रिः त्रयः । जसः ' सुपां सुलुक् ' इति सुः । षष्टिन्युत्तरसंख्याका मरुतः । ते च तैत्तिरीयके ' ईट्कृचान्याट्कृच ' (तै. सं. ४. ६. ५. ५) इत्यादिना नवसु गणेषु सप्त सप्त प्रतिपादिताः । तत्रादितः पञ्च गणाः संहितायामाम्नायन्ते । ' स्वतवांश्च प्रघासी च सांतपनश्च गृहमेधी च क्रीडी च शाकी चोज्जेषी ' (वा. सं. १७. ८५) इति खैलिकः षष्ठो गणः । ततो ' धुनिश्च धवान्तश्च ' (तै. आ. ४. २४) इत्याद्यास्त्रयोऽरण्येऽनुवाक्याः । इत्थं त्रयः-षष्टिसंख्याकाः ᵛउस्राइव ᵛराशयः गाव इव संघीभूतास्ते त्वां ᵛवावृधानाः स्वबलेन वर्धितवन्तः । ते ᵛमरुतः ᵛयज्ञियासः यज्ञार्हा अभवन् । तं मरुत्सहायमिन्द्रं ᵛत्वा त्वां वयम् ᵛएमः उपगच्छामः । ततस्त्वं ᵛनः अस्मभ्यं ᵛभागधेयं भजनीयं धनं ᵛकृधि कुरु । पश्चाद्वयमपि ᵛएना एनेन सोमलक्षणेन ᵛहविषा ᵛते तुभ्यं ᵛशुष्मं शत्रूणां शोषकं बलं ᵛविधेम । ' विध विधाने ' । विदध्म । कुर्म इत्यर्थः[1] ॥

तिग्ममायुधं मरुतामनीकं कस्ते इन्द्र प्रति वज्रं दधर्ष ।
अनायुधासो असुरा अदेवाश्चक्रेण ताँ अप वप ऋजीषिन् ॥ ९ ॥

तिग्मम् । आयुधम् । मरुताम् । अनीकम् । कः । ते । इन्द्र । प्रति । वज्रम् । दधर्ष ।
अनायुधासः । असुराः । अदेवाः । चक्रेण । तान् । अप । वप । ऋजीषिन् ॥ ९ ॥

हे ᵛइन्द्र ᵛते तव स्वभूतं ᵛतिग्मं तीक्ष्णम् ᵛआयुधम् । आयुध्यतेऽनेनेत्यायुधं धनुः । तत्र ᵛमरुतां त्रयःषष्टिसंख्याकानां त्वत्सहायानाम् ᵛअनीकं संघं च त्वदीयं ᵛवज्रं च ᵛकः को वा देवो मनुष्यो वा ᵛप्रति ᵛदधर्ष प्रतिकूलमभिभवति । अभिभावुको नास्तीत्यर्थः । ' धृष प्रसहने ' । ' आ धृषाद्वा ' इति विभाषितणिच् । तदभावे लिटि रूपम् । अत एव ᵛअनायुधासः धनुराद्यायुधवर्जिताः ᵛअदेवाः देववर्जिता देवद्विषो ये ᵛअसुराः सन्ति हे ᵛऋजीषिन् । अपार्जितोऽभिषुतः सोम ऋजीषः । तद्वन्निन्द्र ᵛतान् असुरान् ᵛचक्रेण चक्रसमानवीर्येण चक्ररूपेण वज्रेण वा ᵛअप ᵛवप अपगतान् कुरु । अपनुदेत्यर्थः ॥

महे उग्राय तवसे सुवृक्तिं प्रेरय शिवतमाय पश्वः ।
गिर्वाहसे गिर इन्द्राय पूर्वीर्धेहि तन्वे कुविदङ्ग वेदत् ॥ १० ॥

महे । उग्राय । तवसे । सुऽवृक्तिम् । प्र । ईरय । शिवऽतमाय । पश्वः ।
गिर्वाहसे । गिरः । इन्द्राय । पूर्वीः । धेहि । तन्वे । कुवित् । अङ्ग । वेदत् ॥ १० ॥

हे स्तोतः ᵛमहे महते गुणैः ᵛउग्राय बलेनोद्गूर्णाय ᵛतवसे । तु इति धातुर्वृद्ध्यर्थः । प्रवृद्धाय ᵛशिवतमाय कल्याणतमायेन्द्राय ᵛसुवृक्तिं शोभनां स्तुतिं ᵛप्रेरय चोदय । कुरु । किमर्थम् । ᵛपश्वः पशोः । द्विपाच्चतुष्पाच्च[2] । पशोर्ममास्मदीयाय गवे वा । यद्वा पशोरतीन्द्रियार्थ[3] द्रष्टुमैम धनादिकं दातुं गवे सुखादिकं प्रदातुमिन्द्राय स्तुतिं प्रेरय । एतदेवाह । हे स्तोतः ᵛगिर्वाहसे गीर्भिः स्तुतिभिरुह्यमानाय ᵛइन्द्राय ᵛपूर्वीः बह्वीः ᵛगिरः स्तुतीः ᵛधेहि कुरु । ततः स इन्द्रः ᵛतन्वे । तनोति कुलमिति

१. ख-त१-२-भ–इत्यर्थः । सोमपानेनास्य बलं भवतीत्यर्थः । २. ख-त१-२–द्विपाच्च चतुष्पाच्च ।
३. ग–°रतींद्रियार्थं; त१-भ–°रतीद्रियार्थं ।

तनूस्तनयः । तस्मै पुत्राय स्वशरीरायात्मने वा ᵛकुवित् । बहुनामैतत् । बहु धनम् ᵛअङ्ग क्षिप्रं ᵛवेदत् लम्भयतु ददातु । ' विदॢ लाभे ' । लेट्यडागमः । कुविच्छब्दयोगादनिघातः ॥ ॥ ३३ ॥

उक्थवाहसे विभ्वे मनीषां द्रुणा न पारमीरया नदीनाम् ।
नि स्पृश धिया तन्वि श्रुतस्य जुष्टतरस्य कुविदङ्ग वेदत् ॥ ११ ॥

उक्थऽवाहसे । विऽभ्वे । मनीषाम् । द्रुणा । न । पारम् । ईरय । नदीनाम् ।
नि । स्पृश । धिया । तन्वि । श्रुतस्य । जुष्टऽतरस्य । कुवित् । अङ्ग । वेदत् ॥ ११ ॥

हे स्तोतः ᵛउक्थवाहसे उक्थैः स्तोत्रशस्त्रादिभिरुह्यमानाय अत एव ᵛविभ्वे महते यद्वा शत्रूणामभिभवित्र इन्द्रायेन्द्रार्थं[1] ᵛमनीषां मनस ईषां स्तुतिम् ᵛईरय प्रेरय । तत्र दृष्टान्तः । ᵛद्रुणा ᵛन यथा नाविकः ᵛनदीनां नदमानानां सरितां ᵛपारं तीरं प्रति पथिकं द्रुणा नावा प्रापयति तद्वदिन्द्रं प्रति स्तुतिं गमयेति[2] । किंच ᵛनि ᵛस्पृश नितरां धनं स्पर्शय गमय ᵛतन्वि आत्मनि पुत्रे वा । कीदृशम् । ᵛश्रुतस्य सर्वत्र विश्रुतस्य प्रसिद्धस्य ᵛजुष्टतरस्य अत्यर्थं प्रीणयितुरिन्द्रस्य स्वभूतम् । धनं ᵛधिया त्वदीयया स्तुत्या कर्मणा वात्मानं गमय । ततस्त्वयाभिष्टुत इन्द्रः ᵛकुवित् बहु धनं क्षिप्रं[3] ᵛवेदत् लम्भयतु ददातु ॥

तद्विविड्ढि यत्त इन्द्रो जुजोषत्स्तुहि सुष्टुतिं नमसा विवास ।
उप भूष जरितर्मा रुवण्यः श्रावया वाचं कुविदङ्ग वेदत् ॥ १२ ॥

तत् । विविड्ढि । यत् । ते । इन्द्रः । जुजोषत् । स्तुहि । सुऽस्तुतिम् । नमसा । आ । विवास ।
उप । भूष । जरितः । मा । रुवण्यः । श्रवय । वाचम् । कुवित् । अङ्ग । वेदत् ॥ १२ ॥

हे ऋत्विक् ᵛतत् सोमादिहविः स्तोत्रं वा ᵛविविड्ढि व्यापय । तानीन्द्रार्थं कुर्वित्यर्थः । ᵛते तव स्वभूतं ᵛयत् हविः स्तोत्रं वा ᵛइन्द्रः ᵛजुजोषत् स्वीकुर्यात् तत्कुरु । ' जुषी प्रीतिसेवनयोः ' । लेटि शपः श्लुः । अडागमः । छान्दसत्वात् ' नाभ्यस्तस्य° ' इति गुणप्रतिषेधाभावः । हे स्तोतः ᵛसुष्टुतिं सुस्तुतिम् । शोभना स्तुतिर्यस्य स तथोक्तः । तादृशमिन्द्रं ᵛस्तुहि । तथा ᵛनमसा स्तोत्रेण हविषा वा ᵛआ ᵛविवास इन्द्रमाभिमुख्येन परिचर । विवासतिः परिचरणकर्मा । लोटि रूपम् । हे ᵛजरितः स्तोतः ᵛउप ᵛभूष । ' भूष अलंकारे ' । अलंकृतो भव । ᵛमा ᵛरुवण्यः धनाभावात् मा ध्वनयः । मा रोदीरित्यर्थः । धनागमने कारणमाह । हे स्तोतः ᵛवाचं स्तुतिमिन्द्रं ᵛश्रावय ज्ञापय । ततस्त्वया स्तुत इन्द्रस्तुभ्यं ᵛकुवित् बहु धनं क्षिप्रं[4] प्रयच्छतु ॥

पृष्ठ्यषडहगतेपूक्थ्येषु[5] तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे ' अव द्रप्सः ' इति तृचः । सूत्रितं च— ' अव द्रप्सो अंशुमतीमतिष्ठदिति तिस्रोऽच्छा म इन्द्रमिति नित्यमैकाहिकम्' (आश्व. श्रौ. ८. ३) इति ॥

अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः ।
आवत्तमिन्द्रः शच्या धमन्तमप स्नेहितीर्नृमणा अधत्त ॥ १३ ॥

---

१. ख–ईद्रार्थ । २. ख-घ-त-भ-श–गमयेदिति । ३. ख-घ-ज्ञ-त१-२–अंग क्षिप्रं । ४. घ–अंग क्षिप्रं वेदत् । ५. ख-त-श–°षूक्तेषु; भ१–°षूक्थेषु ।

अव । द्रप्सः । अंशुऽमतीम् । अतिष्ठत् । इयानः । कृष्णः । दशऽभिः । सहस्रैः ।
आवत् । तम् । इन्द्रः । शच्या । धमन्तम् । अप । स्नेहितीः । नृऽमनाः । अधत्त ॥ १३ ॥

अत्रेतिहासमाचक्षते किल । कृष्णो नामासुरो दशसहस्रसंख्यैरसुरैः परिवृतः सन्नंशुमतीनामधेयाया नद्यास्तीरेऽतिष्ठत् । तत्र तं कृष्णमुदकमध्ये स्थितमिन्द्रो बृहस्पतिना सहागच्छत् । आगत्य तं कृष्णं तस्यानुचरांश्च बृहस्पतिसहायो जघानेति । केचिदन्यथा वदन्ति । तेषां कथा हेतुः । द्रप्स इत्युदककणोऽभिधीयते[1] स तु सोमो 'द्रप्सश्चस्कन्द' (ऋ. सं. १०. १७. ११) इत्यादिषु सोमपरत्वेनोक्तत्वात् । एतत्पदमाश्रित्याहुः—'अपक्रम्य तु देवेभ्यः सोमो वृत्रभयार्दितः ॥ नदीमंशुमतीं नामाभ्यतिष्ठत्[2] कुरून् प्रति । तं बृहस्पतिनैकेन सोऽभ्ययाद्वृत्रहा सह ॥ योत्स्यमानः सुसंहृष्टैर्मरुद्भिर्विविधायुधैः । दृष्ट्वा तानायतः सोमः स्वबलेन व्यवस्थितः ॥ मन्वानो वृत्रमायान्तं जिघांसुमरिसेनया । व्यवस्थितं धनुष्मन्तं तमुवाच बृहस्पतिः ॥ मरुत्पतिरयं सोम प्रेहि देवान् पुनर्विभो । सोऽब्रवीन्नेति तं शक्रः स्वर्ग एव बलाद्बली । इयाय देवानादाय तं पपुर्विधिवत्सुराः ॥ जघ्नुः पीत्वा च दैत्यानां समरे नवतीर्नव । तदेव द्रप्स इत्यस्मिन् तृचे सर्वं निगद्यते' (बृहद्दे. ६. १०९–११५) । एतदनार्षत्वेनानादरणीयं भवति । एषोऽर्थः क्रमेणर्क्षु वक्ष्यते । तथा चास्या ऋचोऽयमर्थः । [v]द्रप्सः । द्रुतं सरति गच्छतीति द्रप्सः । पृषोदरादिः । द्रुतं गच्छन् [v]दशभिः [v]सहस्रैः दशसहस्रसंख्यैरसुरैः [v]इयानः [v]कृष्णः एतन्नामकोऽसुरः [v]अंशुमतीं नाम नदीम्[3] [v]अव [v]अतिष्ठत् अवतिष्ठते । ततः [v]शच्या कर्मणा प्रज्ञानेन वा [v]धमन्तम् उदकस्यान्तरुच्छ्वसन्तं यद्वा जगद्भीतिकरं शब्दं कुर्वन्तं [v]तं कृष्णमसुरम्[4] [v]इन्द्रः मरुद्भिः सह [v]आवत् प्राप्नोत् । पश्चात्तं कृष्णमसुरं[4] तस्यानुचरांश्च हतवानिति वदति । [v]नृमणाः नृपु मनो यस्य सः । यद्वा । कर्मनेतृष्वृत्विक्ष्वेकविधं मनो यस्य स तथोक्तः । तादृशः सन् [v]स्नेहितीः । स्नेहतिर्वधकर्मसु पठितः । सर्वस्य हिंसित्रीस्तस्य सेनाः [v]अप [v]अधत्त । अपधानं[5] हननम् । अवधीदित्यर्थः । 'अप स्नीहितिं नृमणा अधद्राः' (सा. सं. १. ४. १. ४. १) इति छन्दोगाः पठन्ति । तस्यानुचरान् हत्वा तं द्रुतं गच्छन्तमसुरमपाधत्त[6] । हतवान् ॥

द्रप्समपश्यं विषुणे चरन्तमुपह्वरे नद्यो अंशुमत्याः
नभो न कृष्णमवतस्थिवांसमिष्यामि वो वृषणो युध्यताजौ ॥ १४ ॥

द्रप्सम् । अपश्यम् । विषुणे । चरन्तम् । उपऽह्वरे । नद्यः । अंशुऽमत्याः ।
नभः । न । कृष्णम् । अवतस्थिऽवांसम् । इष्यामि । वः । वृषणः । युध्यत । आजौ ॥ १४ ॥

तुरीयपादो[7] मारुतः । मरुतः प्रति यद्वाक्यमिन्द्र उवाच तदत्र कीर्त्यते । हे मरुतः [v]द्रप्सं द्रुतगामिनं कृष्णमहम् [v]अपश्यम् अदर्शम् । कुत्र वर्तमानम् । [v]विषुणे विष्वगञ्चने सर्वतो विस्तृते देशे । यद्वा । विषुणो विषमः । विषमे परैरदृश्ये गुहारूपे देशे । [v]चरन्तं परितो गच्छन्तम् । किंच [v]अंशुमत्याः एतन्नामिकायाः [v]नद्याः नद्याः [v]उपह्वरे[8] अत्यन्तं गूढे स्थाने [v]नभो [v]न नभसि यथादित्यो दीप्यते । तद्वत्तत्र दीप्यमानम्[9] [v]अवतस्थिवांसम् उदकस्यान्तरवस्थितं [v]कृष्णम् एतन्नामकमसुरमपश्यम् । तस्मिन् दृष्टे सति हे [v]वृषणः कामानामुदकानां वा सेक्तारो मरुतः [v]वः युष्मान् युद्धार्थम् [v]इष्यामि अहमिच्छामि । ततो यूयं तमिमं कृष्णम् [v]आजौ । अजन्ति गच्छन्त्यत्र योद्धार आयुधानि प्रक्षेपय-

१. ख-ग-त-भ-श–°त्युदककर्णो° । २. ख-ग-त२-भ–°भ्यतिष्ठन् । ३. ख-ग-त-भ–नदीमनु । ४. ख-ग-त–कृष्णासुरं । ५. ख-ग-त–कृष्णासुरं । ६. ख-ग-त–अपाधानं । ७. ख-त-भ-श–गतमसुरमपधत्त । ८. ख-ग-त-भ-श–तृतीय° । ९. श–उपह्वरे उपस्थे । १०. ख-घ-त-श-दीप्यमाने ।

न्तीति वाजिः संग्रामः । तस्मिन् vयुध्यत संहरत[1] । वाक्यभेदादनिघातः । केचित् इष्यामि वो मरुतः इति पठन्ति । तत्र हे मरुतः वो युष्मानिच्छामीत्यर्थो भवति ॥

अधं द्रप्सो अंशुमत्या उपस्थेऽधारयत्तन्वं तित्विषाणः ।
विशो अदेवीरभ्याचरन्तीर्बृहस्पतिना युजेन्द्रः ससाहे ॥ १५ ॥

अधं । द्रप्सः । अंशुऽमत्याः । उपऽस्थे । अधारयत् । तन्वम् । तित्विषाणः ।
विशः । अदेवीः । अभि । आऽचरन्तीः । बृहस्पतिना । युजा । इन्द्रः । ससहे ॥ १५ ॥

vअध अथ vद्रप्सः द्रुतगामी कृष्णः vअंशुमत्याः नद्याः vउपस्थे समीपे vतित्विषाणः दीप्यमानः सन् vतन्वम् आत्मीयं शरीरम् vअधारयत् । परैरहिंस्यत्वेन बिभर्ति । यद्वा । बलप्राप्त्यर्थं स्वशरीरमाहारादिभिरपोषयत् । तत्र vइन्द्रः गत्वा vबृहस्पतिना एतन्नामकेन देवेन vयुजा सहायेन vअदेवीः अद्योतमानाः । कृष्णरूपा इत्यर्थः । यद्वा । पापयुक्तत्वादस्तुत्याः । vआचरन्तीः आगच्छन्तीः vविशः असुरसेनाः vअभि vससहे जघान । तमवधीदित्यर्थः प्रसङ्गादवगम्यते ॥ ॥ ३४ ॥

त्वं ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिन्द्र ।
गूळ्हे द्यावापृथिवी अन्वविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥ १६ ॥

त्वम् । ह । त्यत् । सप्तऽभ्यः । जायमानः । अशत्रुऽभ्यः । अभवः । शत्रुः । इन्द्र ।
गूळ्हे इति । द्यावापृथिवी इति । अनु । अविन्दः । विभुमत्ऽभ्यः । भुवनेभ्यः । रणम् । धाः ॥ १६ ॥

हे vइन्द्र vत्वं[2] खलु vत्यत् तत् कर्म कृतवानसि । किं तत् उच्यते । vजायमानः त्वं प्रादुर्भवन्नेव vअशत्रुभ्यः शत्रुरहितेभ्यः vसप्तभ्यः कृष्णवृत्रनमुचिशम्बरादिसप्तभ्यो बलवद्भ्यः शत्रुभ्यः तदर्थं[3] vशत्रुः vअभवः । यद्वा । सप्तभ्यः । सप्तैवाङ्गिरसः । सप्तभ्योऽङ्गिरोभ्यो गवानयनार्थं प्रादुर्भवन्नेवाशत्रुभ्यो बलवद्भ्यः पणिभ्यः शत्रुरभवः । किंच हे इन्द्र त्वं vगूळ्हे तमसा गूढे संवृते vद्यावापृथिवी द्यावापृथिव्यौ सूर्यात्मना ते प्रकाश्यानुक्रमेण vअविन्दः अलभथाः । तथा vविभुमद्भ्यः महत्त्वयुक्तेभ्यः vभुवनेभ्यः लोकेभ्यः vरणं[4] रमणं vधाः धारयसि । विदधासीत्यर्थः ॥

त्वं ह त्यदप्रतिमानमोजो वज्रेण वज्रिन्धृषितो जघन्थ ।
त्वं शुष्णस्यावातिरो वधत्रैस्त्वं गा इन्द्र शच्येदविन्दः ॥ १७ ॥

त्वम् । ह । त्यत् । अप्रतिऽमानम् । ओजः । वज्रेण । वज्रिन् । धृषितः । जघन्थ ।
त्वम् । शुष्णस्य । अव । अतिरः । वधत्रैः । त्वम् । गाः । इन्द्र । शच्या । इत् । अविन्दः ॥ १७ ॥

हे इन्द्र त्वं vह vत्वं खलु vत्यत् एतत् कर्माकार्षीः । किं तत् अभिधीयते । हे[5] vवज्रिन् वज्रवन्निन्द्र vधृषितः धृष्टः संग्रामेषु शत्रुहनने कुशलः सन् । यद्वा । धृष्टो धीरः सन् vअप्रतिमानम् । प्रतिमानमुपमा[6] । निरुपमम् । अस्य सदृशमन्यदीयं वीर्यं नास्तीत्यर्थः । तादृशं vशुष्णस्य vओजः बलं vवज्रेण आयुधेन vजघन्थ हतवानसि । 'अभ्यासाच्च' इति हन्तेर्धत्वम् । पूर्वं[7] शुष्णस्य बलं विनाशये-

---

१. ख-ग-त-भ-श-तत् संहरत । २. घ-भ-त्वं ह त्वं । ३. भ-तदर्थं त्वं । ४. ख-त-भ-शरणं । ५. ख-त-भ-श-यतः हे; ग-यत् हे । ६. श-उपमारहितं । ७. ख-सपूर्वत्वं; ज्ञ-त२-सपूर्वं; भ-सर्वं ।

दानीं शुष्णमपि हतवानित्याह । [v]त्वं [v]वधत्रैः हननसाधनैरायुधैः [v]शुष्णस्य । 'क्रियाग्रहणं कर्तव्यम्' इति संप्रदानसंज्ञा । 'चतुर्थ्यर्थे बहुलम्०' इति षष्ठी । शुष्णम् [v]अवातिरः । कुत्साय राजर्षयेऽवाङ्मुखं कृत्वावधीः । तथा च निगमः—'कुत्साय शुष्णमशुषं नि बर्हीः' (ऋ. सं. ४. १६. १२) इति । तथा हे [v]इन्द्र [v]त्वं [v]शच्या स्वकीयया प्रज्ञया कर्मणा वा [v]गाः शत्रून् हत्वा तेषां गाः [v]अविन्दः अलभथाः । यद्वा । अङ्गिरसां गाः पणीन् संप्रहृत्य लब्धवानसि ॥

त्वं ह त्यद्वृषभ चर्षणीनां घनो वृत्राणां तविषो बभूथ ।
त्वं सिन्धूँरसृजस्तस्तभानान् त्वमपो अजयो दासपत्नीः ॥ १८ ॥

त्वम् । ह । त्यत् । वृषभ । चर्षणीनाम् । घनः । वृत्राणाम् । तविषः । बभूथ ।
त्वम् । सिन्धून् । असृजः । तस्तभानान् । त्वम् । अपः । अजयः । दासऽपत्नीः ॥ १८ ॥

[v]त्वं खलु तत् कर्म कृतवानसि । किं तत् । हे [v]वृषभ कामानां वर्षितरिन्द्र [v]चर्षणीनां यष्टॄणां मनुष्याणां भावितानां [v]वृत्राणाम् उपद्रवाणां [v]घनः हन्ता । अमूर्त्यर्थेऽपि छन्दोविषयत्वान्निपातनम् । तादृशस्त्वं [v]तविषः प्रवृद्धो बलवान् वा [v]बभूथ बभूविथ । 'बभूथा ततन्थ०' इतीडभावो निपात्यते । ततः [v]त्वं [v]तस्तभानान् असुरैर्विरुध्यमानाः [v]सिन्धून् सप्त गङ्गाद्याः नदीः सरणाय [v]असृजः[1] । पश्चात् [v]त्वं [v]दासपत्नीः । दासा उपक्षपयितारः शत्रवः । ते पतयः स्वामिनो यासां ताः । 'नित्यं सपत्न्यादिषु' (पा. सू. ४. १. ३५) इत्यत्र 'दासाच्च' इत्युपसंख्यानात् ङीप् । असुरस्वामिकाः [v]अपः [v]अजयः जितवानसि । तानसुराज्ञित्वोदकानि च प्रासृज इत्यर्थः ॥

स सुक्रतू रणिता यः सुतेष्वनुत्तमन्युर्यो अहेव रेवान् ।
य एक इन्नर्यपांसि कर्ता स वृत्रहा प्रतीदन्यमाहुः ॥ १९ ॥

सः । सुऽक्रतुः । रणिता । यः । सुतेषु । अनुत्तऽमन्युः । यः । अहाऽइव । रेवान् ।
यः । एकः । इत् । नरि । अपांसि । कर्ता । सः । वृत्रऽहा । प्रति । इत् । अन्यम् । आहुः ॥ १९ ॥

अथ परोक्षकृताः[2] । [v]सः इन्द्रः [v]सुक्रतुः शोभनप्रज्ञः शोभनकर्मा भवति [v]यः [v]सुतेषु अभिषुतेषु सोमेषु [v]रणिता तत्पानार्थं रमणशीलः किंच [v]अनुत्तमन्युः परैरनुत्क्रोधः शत्रुभिर्नोत्तुमशक्यः[3] तादृशः [v]यः इन्द्रः [v]रेवान् धनवान् । तत्र दृष्टान्तः । [v]अहेव । यथा अहानि दिवसा धनवन्तः । दिवसेषु हि धनानि प्रादुर्भवन्ति न रात्रिषु । तद्वत् । तथा [v]यः इन्द्रः [v]एक [v]इत् असहाय एव [v]नरि कर्मनेतरि मनुष्ये [v]अपांसि कर्माणि [v]कर्ता कर्तुशीलो भवति । ताच्छीलिकस्तृन् । अत एव षष्ठीप्रतिषेधः । [v]सः पूर्वोक्तगुणोपेत इन्द्रः [v]वृत्रहा । अपामावरकस्यासुरस्य उपद्रवस्य वा हन्तृत्वाद्वृत्रहेति सर्वैः श्रूयते । तमेवेन्द्रम् [v]अन्यं [v]प्रति । [v]इत् अवधारणे । अन्यं प्रत्येव [v]आहुः । इन्द्रः सर्वमन्यं शत्रुसंघं[4] प्रति भवति । अभिभवत्येवेति वदन्ति ॥

स वृत्रहेन्द्रश्चर्षणीधृत्तं सुष्टुत्या हव्यं हुवेम ।
स प्राविता मघवा नोऽधिवक्ता स वाजस्य श्रवस्यस्य दाता ॥ २० ॥

---

१. ख-ग-त-भ-श–उदसृजः । २. ख-त–परोक्षकृतः । ३. ख-ग-त-श–शत्रुभिर्नेतुं० । ४. ङ्ग-त१-२-३-श–शत्रुसर्वं ।

सः । वृत्रऽहा । इन्द्रः । चर्षणिऽधृत् । तम् । सुऽस्तुत्या । हव्यम् । हुवेम ।
सः । प्रऽअविता । मघऽवा । नः । अधिऽवक्ता । सः । वाजस्य । श्रवस्यस्य । दाता ॥२०॥

वृत्रहा वृत्रस्य हन्ता सः इन्द्रः चर्षणीधृत् मनुष्याणां धनादिदानेन पोषको भवति । तम् इन्द्रं वयं सुष्टुत्या शोभनया स्तुत्या हुवेम अस्मद्यज्ञेष्वाह्वयामः । किमर्थं यूयमाह्वयथेति चेत् कारणं ब्रूमः । सः इन्द्रः प्राविता प्रकर्षेणास्माकं रक्षिता भवति । किंच मघवा धनवानिन्द्रः नः अस्माकम् अधिवक्ता अधिकं वक्ता बहुमानेन वक्ता भवति । यद्वा । धनदानेनास्मानधिकं वक्तुमर्हति । 'अर्हे कृत्यतृचश्च' (पा. सू. ३. ३. १६९) इति तृच् । किंच सः एवेन्द्रः श्रवस्यस्य श्रवसः कीर्तेर्निमित्तस्य वाजस्य अन्नस्य । यद्वा । श्रवसोऽन्नस्य हिताय वाजस्य बलस्य । दाता भवति खलु । तस्मादेवंगुणमिन्द्रं वयमाह्वयामः ॥

स वृत्रहेन्द्र ऋभुक्षाः सद्यो जज्ञानो हव्यो बभूव ।
कृण्वन्नपांसि नर्या पुरूणि सोमो न पीतो हव्यः सखिभ्यः ॥ २१ ॥

सः । वृत्रऽहा । इन्द्रः । ऋभुक्षाः । सद्यः । जज्ञानः । हव्यः । बभूव ।
कृण्वन् । अपांसि । नर्या । पुरूणि । सोमः । न । पीतः । हव्यः । सखिऽभ्यः ॥ २१ ॥

ऋभुक्षाः महान् । यद्वा । ऋभुशब्देनर्भवादयस्त्रयो गृह्यन्ते । ऋभुभिः सह क्षियति निवसतीति तादृशः । वृत्रहा सः इन्द्रः सद्यः तदानीमेव जज्ञानः प्रादुर्भवन् हव्यः सर्वैः स्तोतृभिः यष्टृभिराह्वातव्यो बभूव । किंच नर्या नर्याणि । नरा मनुष्याः कर्मनेतारः । तेभ्यो हितानि पुरूणि बहूनि अपांसि कर्माणि कृण्वन् कुर्वन् सखिभ्यः हविष्प्रदानेनोपकारकत्वान्मित्रेभ्य ऋत्विग्भ्यः हव्यः आह्वातव्यो हवनयोग्यो वाभूत् । तत्र दृष्टान्तः । सोमो न यथा पीतः सोमो यष्टृभ्यः स्वर्गादिफलानि कुर्वन् देवैराह्वातव्यो भवति तद्वत् ॥ ॥ ३५ ॥

'या इन्द्र' इति पञ्चदशर्चं चतुर्थं सूक्तं काश्यपस्य रेभस्यार्षमैन्द्रम् । दशम्यतिजगती द्वापञ्चाशदक्षरा । एकादशीद्वादश्यावुपरिष्टाद्बृहत्यौ त्र्यष्टकान्तद्वादशकवत्यौ । त्रयोदश्यतिजगती । चतुर्दशी त्रिष्टुप् । पञ्चदशी जगती । शिष्टा बृहत्यः । तथा चानुक्रम्यते—'या इन्द्र पञ्चोना रेभः काश्यपो बार्हतमतिजगत्युपरिष्टाद्बृहत्यावतिजगती त्रिष्टुब्जगतीत्यन्ततः' इति । सूक्तविनियोगो लैङ्गिकः । महाव्रते निष्केवल्ये बार्हततृचाशीतौ 'या इन्द्र' इत्यादिका नवर्चः । तथैव पञ्चमारण्यके सूत्र्यते—'या इन्द्र भुज आभर इति नव सूददोहाः' (ऐ. आ. ५. २. ४) इति । चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिनो वैकल्पिकानुरूपतृचस्य 'या इन्द्र' इत्यादिके द्वे द्वितीयातृतीये । सूत्र्यते च—'तमिन्द्रं जोहवीमि या इन्द्र भुज आभर इत्येका द्वे च' (आश्व. श्रौ. ७. ४) इति ॥

या इन्द्र भुज आभरः स्वर्वाँ असुरेभ्यः ।
स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥ १ ॥

याः । इन्द्र । भुजः । आ । अभरः । स्वःऽवान् । असुरेभ्यः ।
स्तोतारम् । इत् । मघऽवन् । अस्य । वर्धय । ये । च । त्वे इति । वृक्तऽबर्हिषः ॥ १ ॥

ऋषिरिन्द्रं प्रार्थयते । हे इन्द्र स्ववान् सुखवान् स्वर्गवान् वा । अथवा स्वःशब्दः[1] सर्वपर्यायः । सर्वं भूतजातम् । आत्मन एवोत्पन्नत्वात्तद्वान् । एवंगुणस्त्वं याः यानि भुजः भोक्तव्यानि

१. ख-त-न-भ-श-स्वशब्दः ।

धनानि vअसुरेभ्यः बलवद्भ्यो राक्षसेभ्यः vआभरः आहरः तान् हत्वाहृतवानसि। 'ह्मह्नोः°' इति भकारादेशः। अत एव हे vमघवन् धनवन्निन्द्र vअस्य। अन्वादेशेऽशादेशः। एतस्याहृतस्य धनस्य दानेन vस्तोतारमित् तव स्तोत्रकारिणमेव vवर्धय वृद्धिमन्तं कुरु। vये vच अन्ये यष्टारः vत्वे त्वदर्थं vबृक्तबर्हिषः स्तीर्णबर्हिषो भवन्ति अतस्तांश्च धनेन वर्धय॥

यमिन्द्र दधिषे त्वमश्वं गां भागमव्ययम्।
यजमाने सुन्वति दक्षिणावति तस्मिन्तं धेहि मा पणौ॥ २॥

यम्। इन्द्र। दधिषे। त्वम्। अश्वम्। गाम्। भागम्। अव्ययम्।
यजमाने। सुन्वति। दक्षिणाऽवति। तस्मिन्। तम्। धेहि। मा। पणौ॥ २॥

हे vइन्द्र vत्वं vयम् vअश्वं गमनसाधनान् हरीन् vगाम् अग्निहोत्रकर्मणि पयःप्रदानेनोपकारिका गाः vअव्ययं व्ययरहितमविनश्वरं vभागं भजनीयं धनम्। सर्वत्रैकत्वमविवक्षितम्। एतान्[1] शत्रुभ्य आहृत्य vदधिषे[2] बिभर्षि तं सर्वं vसुन्वति सोमाभिषवं कुर्वति vदक्षिणावति यज्ञ ऋत्विग्भ्यो दक्षिणादेयत्वेन तद्वति vयजमाने यागं कुर्वाणे vतस्मिन् त्वं vधेहि। सर्वत्र धनादिदानं मा कुर्वित्याह। vमा vपणौ। 'पण व्यवहारे'। द्रव्यव्यवहारादयष्टा जनः पणिः। तस्मिन्नेतत् सर्वं मा देहि॥

य इन्द्र सस्त्यव्रतोऽनुष्वापमदेवयुः।
स्वैः ष एवैर्मुमुरत्पोष्यं रयिं सनुतर्धेहि तं ततः॥ ३॥

यः। इन्द्र। सस्ति। अव्रतः। अनुऽस्वापम्। अदेवऽयुः।
स्वैः। सः। एवैः। मुमुरत्। पोष्यम्। रयिम्। सनुतः। धेहि। तम्। ततः॥ ३॥

हे vइन्द्र vअदेवयुः देवान् युष्मानकामयमानः[3] vअव्रतः व्रतरहितः कर्मरहितो भूत्वा[4] vअनुस्वापम् अनुवृत्तस्वप्नं यथा भवति तथा vयः[5] vसस्ति स्वपिति। 'षस स्वापे'। आदादिकः। vसः जनः vस्वैः आत्मीयैः vएवैः गमनैरेव vपोष्यं पोषणीयं vरयिं स्वीयं धनं vमुमुरत् मारयतु विनाशयतु। अमागैर्धूतादिभिस्तस्य[6] धनं नश्यतु न तु देवानां हविष्प्रदानेनेति। vततः त्वं vतम् अयष्टारं जनम्। सनुतरित्यन्तर्हितनाम। vसनुतः अन्तर्हिते कर्मरहिते कस्मिंश्चिद्देशे vधेहि स्थापय॥

यच्छक्रासि परावति यदर्वावति वृत्रहन्।
अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः सुतावाँ आ विवासति॥ ४॥

यत्। शक्र। असि। पराऽवति। यत्। अर्वाऽवति। वृत्रऽहन्।
अतः। त्वा। गीःऽभिः। द्युऽगत्। इन्द्र। केशिऽभिः। सुतऽवान्। आ। विवासति॥४॥

हे vशक्र शत्रुहननसमर्थेन्द्र vयत् यदा vपरावति विप्रकृष्टेऽतिदूरे द्युलोके देशे vअसि विद्यसे हे vवृत्रहन् वृत्रस्य हन्तरिन्द्र vयत् यदि vअर्वावति अर्वाचीने तस्मादधस्तात्स्थिते तदपेक्षया समीपे देशेऽन्तरिक्षे भवसि तस्मादपि vअतः अस्माद्भूलोकाद्वा vद्युगत्। 'गम्लृ गतौ'। क्विपि 'गमः क्वौ'

---

१. ख-ञ-त१-२-न-भ–एतान् यानश्वादीन्। २. ख-त-न-भ–दधिषे धत्से। ३. ख-त-न-भ-श–युष्मान् कामयमानः। ४. घ–भूत्वा यः। ५. ख-ग-घ-त-न-भ-श–'यः' नास्ति। ६. ज–चोराग्निद्यूता°।

इत्यनुनासिकलोपः । तुक् । ' सुपां सुलुक्° ' इति लुक् । द्युलोकं प्रति गच्छद्भिः स्वभासा सर्वतो गच्छद्भिः ᵛकेशिभिः केशवद्भिर्हरिभिरिव स्थिताभिः ᵛगीर्भिः स्तुतिभिः ᵛस्वा स्वां ᵛसुतवान् अभिषुतसोमवान् यजमानः ᵛआ ᵛविवासति । आत्मीयं यज्ञं प्रत्यागमयति त्वामेतैः स्तोत्रैः परिचरतीति वा ॥

यद्वासि रोचने दिवः समुद्रस्याधि विष्टपि ।
यत्पार्थिवे सदने वृत्रहन्तम यदन्तरिक्ष आ गहि ॥ ५ ॥

यत् । वा । असि । रोचने । दिवः । समुद्रस्य । अधि । विष्टपि ।
यत् । पार्थिवे । सदने । वृत्रहन्ऽतम । यत् । अन्तरिक्षे । आ । गहि ॥ ५ ॥

हे इन्द्र ᵛयद्वा यदि वा ᵛदिवः द्युलोकस्य ᵛरोचने दीपनशीले स्थाने[1] भवसि । यद्वा ᵛसमुद्रस्य मध्ये ᵛअधि अधिगते ᵛविष्टपि विष्टपे तत्संबद्धे कस्मिंश्चित् स्थाने भवसि । हे ᵛवृत्रहन्तम अतिशयेन वृत्रस्यासुरस्य पापस्य वा हन्तरिन्द्र ᵛयत् यदि वा ᵛपार्थिवे पृथिव्यां भवे ᵛसदने स्थाने विद्यसे । यदि वा ᵛअन्तरिक्षे तस्मिँल्लोके वर्तसे । यत्रकुत्र भवसि तथाप्यस्मदीयं यज्ञं प्रति ᵛआ ᵛगहि आगच्छ ॥ ॥ ३६ ॥

स नः सोमेषु सोमपाः सुतेषु शवसस्पते ।
मादयस्व राधसा सूनृतावतेन्द्र राया परीणसा ॥ ६ ॥

सः । नः । सोमेषु । सोमऽपाः । सुतेषु । शवसः । पते ।
मादयस्व । राधसा । सूनृताऽवता । इन्द्र । राया । परीणसा ॥ ६ ॥

हे ᵛसोमपाः सोमस्य पातः हे ᵛशवसस्पते बलस्य पालयितः ᵛइन्द्र ᵛसः पूर्वोक्तलक्षणस्त्वं ᵛसुतेषु अस्माभिरभिषुतेषु ᵛसोमेषु[2] ᵛनः अस्मान् ᵛराधसा बलसाधनेनान्नेन[3] ᵛसूनृतावता अनृतरहितत्वोपेतेन[4] । यद्वा । सूनृतेति वाङ्नाम । शोभनवाक्ययुक्तेन । अनेन पुत्रादिकं लक्ष्यते । पुत्रोपेतेनान्नेन । ᵛपरीणसा । बहुनामैतत् । बहुना ᵛराया धनेन च नोऽस्मान् ᵛमादयस्व मोदय । सोमस्य प्रदातृभ्योऽस्मभ्यमन्नपुत्रधनादिकं देहीत्यर्थः ॥

मा नं इन्द्र परा वृणग्भवा नः सधमाद्यः ।
त्वं नं ऊती त्वमिन्न आप्यं मा नं इन्द्र परा वृणक् ॥ ७ ॥

मा । नः । इन्द्र । परा । वृणक् । भव । नः । सधऽमाद्यः ।
त्वम् । नः । ऊती । त्वम् । इत् । नः । आप्यम् । मा । नः । इन्द्र । परा । वृणक् ॥ ७ ॥

हे ᵛइन्द्र ᵛनः हविषां प्रदातॄनस्मान् ᵛमा ᵛपरा ᵛवृणक् मा परित्याक्षीः । ' वृजी वर्जने ' । रौधादिकः । लङि रूपम् । तदेवाह । त्वं ᵛनः अस्माकं सोमेन ᵛसधमाद्यः सधमादनशीलः ᵛभव । किंच हे इन्द्र ᵛनः अस्मान् ᵛत्वम् एव ᵛऊती ऊत्यां स्थापय । यद्वा । ऊती । व्यत्ययेन कर्तरि

---

१. ज-भ१-स्वस्थाने । २. ख-ग-त-न-भ-श-' सोमेषु ' नास्ति । ३. ख-ज्ञ-त१-२-न-भ१-बलसाधनान्नेन; ग-बलसाधकान्नेन; त३-४-श-बलसाधसान्नेन । ४. ख-त-न-भ-श-°रहितस्योपेतेन; ग-ज-°रहितसत्योपेतेन ।

क्तिचि[1] वा निपातितः[1]। त्वमेवास्माकं रक्षिता खलु। तथा ᵛत्वमित्। इदवधारणे। त्वमेव अस्माकम्[2] ᵛआप्त्यं ज्ञातेयम्। त्वमेव बन्धुरित्यर्थः। अत एव ᵛमा ᵛन ᵛइन्द्र ᵛपरा ᵛवृणक् इत्येष गतार्थः॥

अस्मे इन्द्र सचा सुते नि षदा पीतये मधु।
कृधी जरित्रे मघवन्नवो महदस्मे इन्द्र सचा सुते॥ ८॥

अस्मे इति। इन्द्र। सचा। सुते। नि। सद। पीतये। मधु।
कृधि। जरित्रे। मघऽवन्। अवः। महत्। अस्मे इति। इन्द्र। सचा। सुते॥ ८॥

हे ᵛइन्द्र ᵛअस्मे अस्माभिः ᵛसचा सह ᵛसुते अभिषुते सोमे ᵛनि ᵛषद अस्मदीये यज्ञे निषीद। किमर्थम्। ᵛमधु ᵛपीतये मधुनः। 'सुपां सुलुक्°' इति ङसो लुक्। मदकरस्य सोमस्य पीतये पानाय। किंच हे ᵛमघवन् धनवन् इन्द्र ᵛमहत् ᵛअवः रक्षणं ᵛजरित्रे ᵛकृधि कुरु। कस्मिन् सति। ᵛअस्मे ᵛइन्द्र ᵛसचा ᵛसुते इति व्याख्यातः पादः॥

न त्वा देवास आशत न मर्त्यासो अद्रिवः।
विश्वा जातानि शवसाभिभूरसि न त्वा देवास आशत॥ ९॥

न। त्वा। देवासः। आशत। न। मर्त्यासः। अद्रिऽवः।
विश्वा। जातानि। शवसा। अभिऽभूः। असि। न। त्वा। देवासः। आशत॥ ९॥

हे ᵛअद्रिवः वज्रवन्निन्द्र ᵛत्वा त्वां ᵛदेवासः त्वदन्ये सर्वे देवाः ᵛन ᵛआशत। स्वकर्मणा स्वबलेन वा न व्याप्नुवन्ति। ᵛन ᵛमर्त्यासः मर्त्या मनुष्याश्च न व्याप्नुवन्ति। कुत एतदवसीयते तदाह। ᵛविश्वा विश्वानि सर्वाणि ᵛजातानि भूतजातानि ᵛशवसा स्वबलेनैव ᵛअभिभूरसि। अभिभावुकोऽसि भवसि। तस्मात् ᵛन ᵛत्वा ᵛदेवास ᵛआशत इति गतार्थः॥

चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिनः 'विश्वाः पृतनाः' इति वैकल्पिकः स्तोत्रियः। सूत्रितं च—'विश्वाः पृतना अभिभूतरं नरं तमिन्द्रं जोहवीमि' (आश्व. श्रौ. ७. ४) इति॥

विश्वाः पृतना अभिभूतरं नरं सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे।
क्रत्वा वरिष्ठं वर आमुरिमुतोग्रमोजिष्ठं तवसं तरस्विनम्॥ १०॥

विश्वाः। पृतनाः। अभिऽभूतरम्। नरम्। सऽजूः। ततक्षुः। इन्द्रम्। जजनुः। च। राजसे।
क्रत्वा। वरिष्ठम्। वरे। आऽमुरिम्। उत। उग्रम्। ओजिष्ठम्। तवसम्। तरस्विनम्॥ १०॥

ᵛविश्वाः सर्वा व्यासा वा ᵛपृतनाः। 'पृङ् व्यायामे[3]'। व्याप्रियन्त इति पृतनाः सेनाः। ᵛसजूः परस्परं संगताः सत्यः ᵛअभिभूतरं शत्रूणामत्यर्थमभिभवितारं ᵛनरं सर्वस्य नेतारम् इन्द्रं ᵛततक्षुः। आयुधादिभिस्तीक्ष्णीकुर्वन्ति। आयुधवन्तमश्ववन्तं च चक्रुरित्यर्थः[4]। यद्वा पृतना इति संग्रामनाम। व्याप्रियन्तेऽत्रेति पृतनाः संग्रामाः। सर्वानेव संग्रामानभिभावुकमिन्द्रं स्तोतारोऽन्योन्यं संगताः स्तुतिभिस्तीक्ष्णमकुर्वन्। स्तुते सति बलवान् भवतीति। यद्वा। यष्टारो हविष्प्रदानेन वीर्य-

१. ग–क्तिच पूर्वसवर्णः। २. घ–नोस्माकं। ३. ख-त-न-भ–व्याप्रियामे; श–व्याप्रियामो। ४. ख–चक्रतुरित्यर्थः; त-न-भ-श–चक्रथुरित्यर्थः।

वन्तं कुर्वन्तीति । किंच स्तोतारः [v]राजसे । राजतेस्तुमर्थेऽसेप्रत्ययः । आत्मनो विराजनार्थं प्रकाशनार्थं सूर्यात्मानम् इन्द्रं [v]जजनुः जनयामासुः । स्तोत्रं यज्ञे प्रादुरभावयन्नित्यर्थः । उत [v]अपि च [v]कृत्वा स्वीयवृत्रवधादिकर्मणैव [v]वरिष्ठम् उरुतरम् [v]आसुरिं शत्रूणामाभिमुख्येन मारयितारमिन्द्रं [v]वरे वरणीये धने स्तोतारश्चक्रुः । आत्मनां धनलाभार्थं स्तुवन्तीत्यर्थः । कीदृशम् । [v]उग्रम् उद्गूर्णबलमत एव [v]ओजिष्ठम् ओजस्वितमं [v]तवसं प्रवृद्धं [v]तरस्विनं संग्रामे शत्रुवधार्थं वेगवन्तमिन्द्रं धनार्थं स्तुवन्ति ॥ ॥ ३७ ॥

सर्मी रेभासो अस्वरन्निन्द्रं सोमस्य पीतये ।
स्वर्पतिं यदीं वृधे धृतव्रतो ह्योजसा समूतिभिः ॥ ११ ॥

सम् । ईम् । रेभासः । अस्वरन् । इन्द्रम् । सोमस्य । पीतये ।
स्वःऽपतिम् । यत् । ईम् । वृधे । धृतऽव्रतः । हि । ओजसा । सम् । ऊतिऽभिः ॥ ११ ॥

[v]रेभासः । ' रेभृ शब्दे ' । शब्दयितारः स्तोतारः । यद्वा । रेभासः[1] कश्यपपुत्रा रेभा एतन्नामका ऋषयः । [v]ईम् एनम् [v]इन्द्रं [v]सम् [v]अस्वरन् सम्यगशब्दयन् समस्तुवन् । किमर्थम् । [v]सोमस्य [v]पीतये सोमपानाय । किंच [v]स्वर्पतिं स्वर्गस्य पालयितारं धनस्य स्वामिनं वा [v]ईम् एनमिन्द्रं [v]यत् यदा [v]वृधे हविर्भिर्वर्धनाय संस्तुवन्ति तदा [v]धृतव्रतः धृतकर्मेन्द्रः [v]ओजसा बलेन स्तोतृभिः [v]ऊतिभिः मरुद्भिः पालनैश्च सह संगच्छते[2] । स्तुतिभिर्बलं मरुद्भिः पालनं चेन्द्रस्य भवतीत्यर्थः ॥

नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा ।
सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥ १२ ॥

नेमिम् । नमन्ति । चक्षसा । मेषम् । विप्राः । अभिऽस्वराः ।
सुऽदीतयः । वः । अद्रुहः । अपि । कर्णे । तरस्विनः । सम् । ऋक्वऽभिः ॥ १२ ॥

[v]नेमिम् । अरान् यथा नेमिर्व्याप्नोति तद्वत् सर्वं[3] व्याप्नुते[3] । तादृशं नमनशीलमिन्द्रं [v]चक्षसा दर्शनमात्रेणैव [v]नमन्ति । काश्यपा रेभाः स्तोतारो वा नमस्कुर्वन्ति । ततः [v]विप्राः मेधाविनः [v]मेषम्[4] । इन्द्रो मेषो भूत्वा मेधातिथिं स्वर्गमनयत् । तस्मात् मेधातिथेर्मेषभूतमिन्द्रम् [v]अभिस्वरा अभिस्वरणेन स्तोत्रेण प्रणमन्ति । इदानीं यजमानः स्तोतॄनाह । [v]अपि च [v]सुदीतयः शोभनदीप्तयः [v]अद्रुहः कस्याप्यद्रोग्धारः [v]वः यूयम् । छान्दसो वसादेशः । [v]तरस्विनः कर्मसु स्तोत्रेषु वा त्वरायुक्ताः सन्त इन्द्रस्य [v]कर्णे श्रोत्रसमीपे [v]ऋक्वभिः अर्चनायुक्तैर्मन्त्रैः[5] । यद्वा । ऋचो बह्व्यो येषु सन्ति तैः शस्त्रादिभिः । संस्तुत । इन्द्रो यथा युष्मदीयानि स्तोत्रशस्त्रादीनि शृणोति तथा सम्यगभिष्टुतेत्यर्थः[6] ॥

पूर्वोक्त एव शस्त्रे वैकल्पिकस्यानुरूपतृचस्य ' तमिन्द्रम् ' इत्याद्या । सूत्रमुदाहृतम्[7] ॥

तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं शवांसि ।
मंहिष्ठो गीर्भिरा च यज्ञियो ववर्तद्राये नो विश्वा सुपथा कृणोतु वज्री ॥१३॥

---

१. ज-त१-रेभाः । २. घ-संगच्छंते हि । ३. ग-सर्वं व्याप्नुवते । ४. भ२-मेषमिंद्रं । ५. ग-अर्चन° । ६. ज-तमभि° । ७. न-सूत्रमुदाहृतं । आश्वमेधिके अश्वपायाश्च चरोः हविषोनुवाक्या । सूत्रांतरेपि दृष्टत्वात् । तमिंद्रं जोहवीमि इंद्रश्रेष्ठार्तांति । तरति ब्रह्महत्यां योश्वमेधेन यजेत् इत्यादिसूत्रांतरेपि विषयप्रामाण्यात् चरुं निर्वपेत् ।

तम्। इन्द्रम्। जोहवीमि। मघऽवानम्। उग्रम्। सत्रा। दधानम्। अप्रतिऽस्कुतम्। शवांसि।
मंहिष्ठः। गीःऽभिः। आ। च। यज्ञियः। ववर्तत्।
राये। नः। विश्वा। सुऽपथा। कृणोतु। वज्री ॥ १३ ॥

vतं पूर्वोक्तगुणोपेतम् vइन्द्रं vजोहवीमि। यष्टाहं पुनःपुनराह्वयामि। ह्वयतेः 'अभ्यस्तस्य च' इति संप्रसारणम्। कीदृशम्। vमघवानं मंहनीयधनवन्तम् vउग्रम् उद्गूर्णबलं vसत्रा सत्यं यथार्थमेव vशवांसि बलानि vदधानम् अत एव vअप्रतिष्कुतं शत्रुभिरप्रतिरोधनीयमाह्वयामि। किंच vमंहिष्ठः पूज्यतमो दातृतमो वा vयज्ञियः यज्ञार्ह इन्द्रः vगीर्भिः अस्मदीयाभिः स्तुतिभिः vआ vववर्तत् vच यज्ञेष्वभिमुख्येन वर्ततां च। वर्ततेर्ण्यन्तस्य चङि रूपम्। 'चवायोगे प्रथमा' इति न निघातः। 'चङ्यन्यतरस्याम्' इति स्वरः। ततः vवज्री वज्रवानिन्द्रः vनः अस्माकं vराये धनाय vविश्वा विश्वानि सर्वाण्येव vसुपथा सुमार्गाणि vकृणोतु च करोतु। धनं सर्वदिक्स्थमस्मान् प्राप्नोत्वित्यर्थः ॥

त्वं पुरं इन्द्र चिकिदेना व्योजसा शविष्ठ शक्र नाशयध्यै।
त्वद्विश्वानि भुवनानि वज्रिन् द्यावा रेजेते पृथिवी च भीषा ॥ १४ ॥

त्वम्। पुरः। इन्द्र। चिकित्। एनाः। वि। ओजसा। शविष्ठ। शक्र। नाशयध्यै।
त्वत्। विश्वानि। भुवनानि। वज्रिन्। द्यावा। रेजेते इति। पृथिवी इति। च। भीषा ॥१४॥

हे vशविष्ठ बलवत्तम अत एव हे vशक्र शत्रुहननसमर्थ हे vइन्द्र vत्वम् vएनाः। अन्वादेशे। एतानि vपुरः शम्बरस्य पुराणि vओजसा स्वीयेनैव तेजसा vवि vनाशयध्य विनाशयितुं vचिकित् ज्ञाता भवसि। नशेर्ण्यन्ताच्छध्यैप्रत्ययः। पुनरपि सामर्थ्यं प्रशंसति। हे vवज्रिन् वज्रवन्निन्द्र vविश्वानि सर्वाणि vभुवनानि भूतजातानि vत्वत् त्वत्तो भीत्या कम्पन्ते। तथा vद्यावापृथिवी। 'दिवो द्यावा' इति द्यावादेशः। आद्युदात्तश्च। पृथिवी ङीषन्तत्वेनान्तोदात्तः। 'देवताद्वन्द्वे च' इत्युभयपदप्रकृतिस्वरत्वम्। विप्रकर्षस्तु छान्दसः। द्यावापृथिवी च vभीषा त्वत्तो भीत्या vरेजेते कम्पेते। 'अरेजेतां रोदसी' (ऋ. सं. १. ३१. ३) इति निगमः। सर्वे त्वदधीना इत्यर्थः ॥

तन्म ऋतमिन्द्र शूर चित्र पात्वपो न वज्रिन् दुरितातिं पर्षि भूरिं।
कदा न इन्द्र राय आ दशस्येर्विश्वप्स्न्यस्य स्पृहयाय्यस्य राजन् ॥ १५ ॥

तत्। मा। ऋतम्। इन्द्र। शूर। चित्र। पातु। अपः। न। वज्रिन्। दुःऽइता। अतिं। पर्षि। भूरिं।
कदा। नः। इन्द्र। रायः। आ। दशस्येः। विश्वऽप्स्न्यस्य। स्पृहयाय्यस्य। राजन् ॥ १५॥

हे vशूर बलवन् vचित्र चायनीय विविधरूप वा। 'इन्द्रो मायाभिः पुरुरूप ईयते' (ऋ. सं. ६. ४७. १८) इत्यादिषु दृष्टत्वात्। बहुविधरूप हे vइन्द्र vतत् प्रशस्तं त्वदीयम् vऋतं सत्यं vमा मां vपातु सर्वतो रक्षतु। किंच हे vवज्रिन् वज्रवन्निन्द्र vभूरि। सुपो लुक्। भूरीणि बहूनि vदुरिता दुरितानि पापानि vअति vपर्षि अतीत्य पारय। तत्र दृष्टान्तः। vअपो vन यथा नाविक उदकानि मनुष्यान् पारयति तद्वदस्मान् पापानि पारय। हे vराजन् दीप्यमान हे इन्द्र vविश्वप्स्न्यस्य। प्स[1] इति रूपनाम। रूपे साधु प्स्यम्। नकारोपजनश्छान्दसः। बहुरूपं तत् vस्पृहयाय्यस्य सर्वैः स्पृहणीयं

१. ख-ग-त-भ-श–'प्स' नास्ति।

vराधः । 'क्रियाग्रहणम्' इति संप्रदानसंज्ञा । 'चतुर्थ्यर्थे बहुलम्' इति षष्ठी । तद्धनं vनः अस्मभ्यम् vआ आभिमुख्येन vकदा vदशस्येः कस्मिन् काले प्रयच्छेः । तदा तव स्वभूतं सत्यं मा[1] रक्षतु । मह्यं धनं दत्वा कर्माणि च मयानुष्ठाप्य मां पापरहितं कुर्वित्यर्थः ॥ ॥ ३८ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये षष्ठाष्टके षष्ठोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ षष्ठस्य सप्तमोऽध्याय आरभ्यते । तत्र 'इन्द्राय' इति द्वादशर्चं पञ्चमं सूक्तमाङ्गिरसस्य नृमेधाख्यस्यार्षमैन्द्रम् । सप्तमी दशम्येकादश्यौ च तिस्रः ककुभो मध्यमपादस्य द्वादशाक्षरत्वात् । 'मध्यमश्चेत्ककुप्' (अनु. ५. ३) इति हि तल्लक्षणम् । नवमीद्वादश्यौ पुरउष्णिहौ । प्रथमपादस्य द्वादशाक्षरत्वात् । 'आद्यश्चेत् पुरउष्णिक्' (अनु० ५. २) इति हि तल्लक्षणम् । शिष्टा उष्णिहः । तथा चानुक्रम्यते—'इन्द्राय द्वादश नृमेध औष्णिहं सप्तम्युपान्त्ये च ककुभोऽन्त्यानवम्यौ पुरउष्णिहौ' इति । महाव्रते औष्णिहतृचाशीताविदं सूक्तम् । तथैव पञ्चमारण्यके सूत्रितम्—'इन्द्राय साम गायत सखाय आ शिषामहि' (ऐ. आ. ५. २. ५) इति । आभिप्लविकेषूक्थ्येषु[2] तृतीयसवने ब्राह्मणाच्छंसिनः 'इन्द्राय साम गायत' इति वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितं च—'इन्द्राय साम गायत सखाय आ शिषामहि' (आश्व. श्रौ. ७. ८) इति । पूर्वोक्तस्यैव ब्राह्मणाच्छंसिन आभिप्लविकेषूक्थ्येषु[3] 'एन्द्र नो गधि' इति वैकल्पिकः स्तोत्रियः । सूत्रितं च—'एन्द्र नो गध्येदु मध्वो मर्दितरम्' (आश्व. श्रौ. ७. ८) इति । उक्थ्ये[4] तृतीयसवनेऽच्छावाकस्य 'अधा हीन्द्र' इति स्तोत्रियस्तृचः । सूत्रितं च—'अधा हीन्द्र गिर्वण इयं त इन्द्र गिर्वणः' (आश्व. श्रौ. ६. १) इति । पूर्वोक्त एव शस्त्रे 'त्वं न इन्द्रा भर' इति तृचो वैकल्पिकः स्तोत्रियः । सूत्रितं च—'त्वं न इन्द्रा[5] भर वयमु त्वामपूर्व्य यो न इदमिदं पुरा' (आश्व. श्रौ. ७. ८) इति ॥

इन्द्रा॑य सा॒मं गायत॒ विप्रा॑य बृ॒हते॒ बृ॒हत् । ध॒र्म॒कृते॑ विप॒श्चिते॑ पन॒स्यवे॑ ॥ १ ॥

इन्द्रा॑य । सा॒मं । गा॒यत॒ । विप्रा॑य । बृ॒हते॒ । बृ॒हत् । ध॒र्म॒ऽकृते॑ । वि॒पः॒ऽचिते॑ । प॒न॒स्यवे॑ ॥ १ ॥

हे उद्गातारः vविप्राय मेधाविने vबृहते महते vधर्मकृते कर्मणः कर्त्रे vविपश्चिते विदुषे vपनस्यवे स्तुतिमिच्छते vइन्द्राय vबृहत् बृहन्नामकं vसाम vगायत पठत ॥

त्वमि॑न्द्राभि॒भूर॑सि॒ त्वं सूर्य॑मरोचयः । वि॒श्वक॑र्मा वि॒श्वदे॑वो म॒हाँ अ॑सि ॥ २ ॥

त्वम् । इ॒न्द्र॒ । अ॒भि॒ऽभूः । अ॒सि॒ । त्वम् । सूर्य॑म् । अ॒रो॒च॒यः ।
वि॒श्वऽक॑र्मा । वि॒श्वऽदे॑वः । म॒हान् । अ॒सि॒ ॥ २ ॥

---

१. ख-भ-मां । २. ख-ज्ञ-त१-२-३-भ१-श-°षूक्थेषु । ३. ख-ज्ञ-त१-२-३-भ१-श-°षूक्थेषु । ४. ख-ज्ञ-त१-२-३-भ१-उक्थे । ५. त-न-ईंद्राय ।

हे vइन्द्र vत्वम् vअभिभूः शत्रूणामभिभविता vअसि भवसि। किंच vत्वं vसूर्यम् आदित्यम् vअरोचयः तेजोभिरदीपयः। किंच vविश्वकर्मा विश्वस्य कर्ता vअसि vविश्वदेवः सर्वदेवश्चासि। तथा च यजुर्ब्राह्मणम्—'अग्निं वा अन्वन्या देवता इन्द्रमन्वन्याः' (तै. ब्रा. ३. ७. १. ८) इति। अतो vमहान् सर्वाधिकोऽसि ॥

विभ्राजञ्ज्योतिषा स्वरगच्छो रोचनं दिवः।
देवास्ते इन्द्र सख्याय येमिरे ॥ ३ ॥

विऽभ्राजन्। ज्योतिषा। स्वः। अगच्छः। रोचनम्। दिवः।
देवाः। ते। इन्द्र। सख्याय। येमिरे ॥ ३ ॥

हे vइन्द्र त्वं vज्योतिषा तेजसा vदिवः आदित्यस्य vरोचनं प्रकाशकमधिकरणत्वेन vस्वः स्वर्गं vविभ्राजन् प्रकाशयन् vअगच्छः प्राप्नोः। किंच vदेवाः सर्वे vते तव vसख्याय मित्रत्वाय vयेमिरे स्वं स्वमात्मानं नियमितवन्तः। अस्माकमिन्द्रः सखा यथा स्यादिति सर्वे[1] देवाः[1] प्रयत्नमकार्षुरित्यर्थः ॥

एन्द्र नो गधि प्रियः सत्राजिदगोह्यः। गिरिर्न विश्वतस्पृथुः पतिर्दिवः ॥ ४ ॥

आ। इन्द्र। नः। गधि। प्रियः। सत्राऽजित्। अगोह्यः।
गिरिः। न। विश्वतः। पृथुः। पतिः। दिवः ॥ ४ ॥

हे vइन्द्र vप्रियः प्रियतमः vसत्राजित् महतां जेता vअगोह्यः केनापि गूहितुमशक्यः vगिरिर्न पर्वत इव vविश्वतः सर्वतः vपृथुः पृथुतमः vदिवः स्वर्गस्य vपतिः ईश्वरस्त्वं vनः अस्मान् vआ vगधि आगच्छ ॥

अभि हि सत्य सोमपा उभे बभूथ रोदसी।
इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥ ५ ॥

अभि। हि। सत्य। सोमऽपाः। उभे इति। बभूथ। रोदसी इति।
इन्द्र। असि। सुन्वतः। वृधः। पतिः। दिवः ॥ ५ ॥

हे vसत्य vसोमपाः सोमस्य पातः vइन्द्र यस्त्वम् vउभे vरोदसी द्यावापृथिव्यौ vअभि vबभूथ सामर्थ्येनाभिभवसि स त्वं vसुन्वतः सोमाभिषवं कुर्वतो यजमानस्य vवृधः वर्धकः vअसि। vदिवः स्वर्गस्यापि vपतिः ईश्वरः असि[2] ॥

त्वं हि शश्वतीनामिन्द्र दर्ता पुरामसि। हन्ता दस्योर्मनोर्वृधः पतिर्दिवः ॥ ६ ॥

त्वम्। हि। शश्वतीनाम्। इन्द्र। दर्ता। पुराम्। असि।
हन्ता। दस्योः। मनोः। वृधः। पतिः। दिवः ॥ ६ ॥

हे vइन्द्र vत्वं vशश्वतीनां बह्वीनां vपुरां शत्रुनगरीणां vदर्ता vअसि दारयिता भवसि। किंच vदस्योः[3] उपक्षपयितुरसुरस्य[4] vहन्ता असि घातको भवसि। vमनोः मनुष्यस्य यागादिकं कुर्वतः vवृधः वर्धकश्चासि। vदिवः स्वर्गस्यापि vपतिः ईश्वरोऽसि ॥ ॥ १ ॥

---

१. ख-त-न-म-सर्वदेवा। २. घ-असि हि। ३. ख-ग-त-न-भ-श-दस्योः वृथा कालस्य। ४. ख-त-न-भ२-उपलक्षयितु°; ग-श-उपक्षयितु°।

अधा हीन्द्र गिर्वण उप त्वा कामान्महः ससृज्महे ।
उदेव यन्त उदभिः ॥ ७ ॥

अध । हि । इन्द्र । गिर्वणः । उप । त्वा । कामान् । महः । ससृज्महे ।
उदाऽइव । यन्तः । उदऽभिः ॥ ७ ॥

हे ᵛगिर्वणः गीर्भिर्वननीय ᵛइन्द्र ᵛअधा ᵛहि संप्रति हि ᵛत्वा त्वां ᵛमहः महतः ᵛकामान् कमनीयान् स्तोमान् ᵛउप ᵛससृज्महे उपसृजामः । प्रापयाम इत्यर्थः । तत्र दृष्टान्तमाह[1] । ᵛउदेव यथोदकेन[1] ᵛयन्तः गच्छन्तः ᵛउदभिः अञ्जलिना उत्क्षिप्य उदकैः समीपस्थान् पुरुषान् क्रीडार्थं संसृजन्ति तद्वदित्यर्थः ॥

वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि । वावृध्वांसं चिदद्रिवो दिवेदिवे ॥ ८ ॥

वाः । न । त्वा । यव्याभिः । वर्धन्ति । शूर । ब्रह्माणि ।
ववृध्वांसम् । चित् । अद्रिऽवः । दिवेऽदिवे ॥ ८ ॥

हे ᵛअद्रिवः वज्रिन् ᵛशूर इन्द्र ᵛवार्ण यथोदकमुदकस्थानं[2] ᵛयव्याभिः नदीभिः । 'अवनयो यव्याः' इति नदीनामसु पाठात् । ᵛवर्धन्ति वर्धयन्ति तथा ᵛब्रह्माणि स्तोत्रैः ᵛववृध्वांसं ᵛचित् यथा निरुदकं देशं नदीभिस्तथा न किंतु प्रवृद्धमेव त्वां ᵛदिवेदिवे अन्वहं[3] वर्धन्ति । स्तोतारो वर्धयन्ति ॥

युञ्जन्ति हरी इषिरस्य गाथयोरौ रथे उरुयुगे । इन्द्रवाहा वचोयुजा ॥ ९ ॥

युञ्जन्ति । हरी इति । इषिरस्य । गाथया । उरौ । रथे । उरुऽयुगे ।
इन्द्रऽवाहा । वचःऽयुजा ॥ ९ ॥

ᵛइषिरस्य गमनशीलस्येन्द्रस्य ᵛउरुयुगे महायुगे ᵛउरौ महति ᵛरथे ᵛइन्द्रवाहा इन्द्रस्य वाहनभूतौ ᵛवचोयुजा वचनमात्रेणैव युज्यमानौ ᵛहरी अश्वौ ᵛगाथया स्तोत्रेण स्तोतारः ᵛयुञ्जन्ति योजयन्ति ॥

त्वं न इन्द्रा भर ओजो नृम्णं शतक्रतो विचर्षणे । आ वीरं पृतनाषहम् ॥ १० ॥

त्वम् । नः । इन्द्र । आ । भर । ओजः । नृम्णम् । शतक्रतो इति शतऽक्रतो । विऽचर्षणे ।
आ । वीरम् । पृतनाऽसहम् ॥ १० ॥

हे ᵛशतक्रतो बहुकर्मन् ᵛविचर्षणे विद्रष्टः ᵛइन्द्र ᵛत्वं ᵛनः अस्मभ्यम् ᵛओजः बलं ᵛनृम्णं धनम् । 'गयो नृम्णम्' इति धननामसु पाठात् । ᵛआ ᵛभर आहर । ᵛवीरं वीर्योपेतं ᵛपृतनाषहं[4] सेनासहं[4] सेनाभिभवितारं[5] त्वाम् ᵛआ याचामह इति शेषः ॥

त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ ।
अधा ते सुम्नमीमहे ॥ ११ ॥

---

१. घ–दृष्टांतः । महः उदेव यथा महदुदकेन । २. न–°स्थानं वा । ३. घ–अहन्यहनि । ४. ख-ग-त-न-भ-श–पृतनासहं । ५. ख-घ-न-भ–'सेनासहं' नास्ति । ६. ग-भ१-३-य–सेनानाम° ।

त्वम् । हि । नः । पिता । वसो इति । त्वम् । माता । शतक्रतो इति शतऽक्रतो । बभूविथ । अधा । ते । सुम्नम् । ईमहे ॥ ११ ॥

हे वसो वासयितः शतक्रतो बहुकर्मन्निन्द्र त्वं नः अस्माकं पिता पितृवत्पालकः बभूविथ भव । त्वं माता मातृवद्धारकश्च बभूविथ । अध अथ च वयं ते तव स्वभूतं सुम्नं सुखम् ईमहे याचामहे ॥

त्वां शुष्मिन्पुरुहूत वाजयन्तुमुप ब्रुवे शतक्रतो ।
स नो रास्व सुवीर्यम् ॥ १२ ॥

त्वाम् । शुष्मिन् । पुरुऽहूत । वाजऽयन्तम् । उप । ब्रुवे । शतक्रतो इति शतऽक्रतो । सः । नः । रास्व । सुऽवीर्यम् ॥ १२ ॥

हे शुष्मिन् बलवन् पुरुहूत बहुभिर्यजमानैराहूत शतक्रतो बहुकर्मन्निन्द्र वाजयन्तं बलमिच्छन्तं त्वाम्[1] उप ब्रुवे उपस्तौमि । सः त्वं नः अस्मभ्यं सुवीर्यं धनं रास्व देहि ॥ ॥२॥

'त्वामिदा ह्यः' इत्यष्टर्चं षष्ठं सूक्तं नृमेधस्यार्षमैन्द्रम् । अयुजो बृहत्यो युजः सतोबृहत्यः । तथा चानुक्रान्तं—'त्वामिदाष्टौ प्रागाथम्' इति । चातुर्विंशिकेऽहनि माध्यंदिनसवनेऽच्छावाकस्य 'त्वामिदा ह्यः' इति (आश्व. श्रौ. ७. ४) । महाव्रतेऽपि निष्केवल्ये बार्हतनृचाशीतावयं प्रगाथः । तथैव पञ्चमारण्यके सूत्रितं—'त्वामिदा ह्यो नर इत्येतं प्रगाथं प्रत्यवदधाति' (ऐ. आ. ५. २. ४) इति । चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिनः 'श्रायन्तइव' इति वैकल्पिकः स्तोत्रियः प्रगाथः । सूत्रितं च—'श्रायन्तइव सूर्यं वष्महाँ असि सूर्य' (आश्व. श्रौ. ७. ४) इति । चातुर्विंशिकेऽहनि माध्यंदिने 'त्वमिन्द्र प्रतूर्तिषु त्वमिन्द्र यशा असि' (आश्व. श्रौ. ७. ४) इति । तस्मिन्नेवाहनि निष्केवल्ये वैराजयोनिभूतोऽयं प्रगाथः शंसनीयः । [सूत्रितं च—'तयोरक्रियमाणस्य योनिं शंसेद्वैरूपवैराजशाक्वररैवतानां च[2]' (आश्व. श्रौ. ७. ३) इति ॥

त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः ।
स इन्द्र स्तोमवाहसामिह श्रुध्युप स्वसरमा गहि ॥ १ ॥

त्वाम् । इदा । ह्यः । नरः । अपीप्यन् । वज्रिन् । भूर्णयः ।
सः । इन्द्र । स्तोमऽवाहसाम् । इह । श्रुधि । उप । स्वसरम् । आ । गहि ॥ १ ॥

हे वज्रिन् इन्द्र यं त्वां भूर्णयः हविर्भिर्भरणशीलाः[3] नरः कर्मणां नेतारो यजमानाः इदा अद्य ह्यः च अपीप्यन् सोममपाययन् सः त्वं स्तोमवाहसां स्तोत्रवाहकानामस्माकं स्तोत्रम् इह यज्ञे श्रुधि शृणु । स्वसरं गृहं च । 'दुर्याः स्वसराणि' इति गृहनामसु पाठात् । उप आ गहि उपागच्छ ॥

मत्स्वा सुशिप्र हरिवस्तदीमहे त्वे आ भूषन्ति वेधसः ।
तव श्रवांस्युपमान्युक्थ्या सुतेष्विन्द्र गिर्वणः ॥ २ ॥

---

१. ग-घ-ङ-त१-२-न-र्यं त्वां; त३-४-र्यं तां; श-र्यं तं । २. ख-त-श-वा । ३. ग-हविर्भरण° ।

मत्स्व । सुऽशिप्र । हरिऽवः । तत् । ईमहे । त्वे इति । आ । भूषन्ति । वेधसः ।
तव । श्रवांसि । उपऽमानि । उक्थ्या । सुतेषु । इन्द्र । गिर्वणः ॥ २ ॥

हे [v]सुशिप्र शोभनहनो शोभनोष्णीषिन् वा [v]हरिवः अश्ववन् [v]गिर्वणः गीर्भिर्वननीय [v]इन्द्र [v]त्वे त्वयि [v]वेधसः परिचारकाः [v]आ [v]भूषन्ति आभवन्ति । [v]मत्स्व सोमेन मादयात्मानम् । किंच [v]तत्[1] त्वां वयम् [v]ईमहे याचामहे । किं याच्यमित्यत्राह । [v]सुतेषु सोमेष्वभिषुतेषु सत्सु [v]तव [v]श्रवांसि अन्नानि [v]उपमानि उपमानभूतानि [v]उक्थ्या प्रशंस्यानि च सन्त्विति ॥

आऽयन्तऽइव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जाते जनमानऽओजसा प्रति भागं न दीधिम ॥ ३ ॥

आऽयन्तःऽइव । सूर्यम् । विश्वा । इत् । इन्द्रस्य । भक्षत ।
वसूनि । जाते । जनमाने । ओजसा । प्रति । भागम् । न । दीधिम ॥ ३ ॥

हे अस्मदीया जनाः [v]आयन्तइव [v]सूर्यं यथा समाश्रिता रश्मयः सूर्यं भजन्ते तथा [v]इन्द्रस्य [v]विश्वेत् विश्वान्येव धनानि [v]भक्षत भजत । स च यानि [v]वसूनि धनानि [v]जाते उत्पन्ने [v]जनमाने जनिष्यमाणे च [v]ओजसा बलेन करोति [v]भागं [v]न पित्र्यं भागमिव तानि धनानि [v]प्रति [v]दीधिम प्रतिधारयामेति । यद्वा । आयन्तइव सूर्यं यथा समाश्रिता रश्मयः सूर्यमुपतिष्ठन्ते तथेन्द्रस्य विश्वा विश्वानि विभक्तुमिच्छन्तः समाश्रिता मरुत इन्द्रमुपतिष्ठन्त इति शेषः । उपस्थाय च मरुतो वसूनि उदकलक्षणानि धनानि जाते जाताय जनमाने जनिष्यमाणाय च मनुष्याय च ओजसा बलेन भक्षत विभजन्ते[2] । तत्र चास्माकं यो भागस्तं भागम् । नेति संप्रत्यर्थे[3] । प्रतीत्येषोऽन्वित्येतस्य स्थाने । अनु दीधिम वयमनुध्यायाम[4] । तथा च यास्कः—[‘] समाश्रिताः सूर्यमुपतिष्ठन्ते । अपि वोपमार्थे स्यात्सूर्यमिवेन्द्रमुपतिष्ठन्त इति । सर्वाणीन्द्रस्य धनानि विभक्ष्यमाणाः[5] । स यथा धनानि विभजति जाते च जनिष्यमाणे च [’] वयं भागमनुध्यायाम[6] ’ (निरु. ६. ८) इति ॥

अनर्शरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः ।
सो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥ ४ ॥

अनर्शऽरातिम् । वसुऽदाम् । उप । स्तुहि । भद्राः । इन्द्रस्य । रातयः ।
सः । अस्य । कामम् । विधतः । न । रोषति । मनः । दानाय । चोदयन् ॥ ४ ॥

हे स्तोतः [v]अनर्शरातिम् अपापकदानम् । अपापिष्ठस्य दातारमित्यर्थः । तथा च यास्कः—[‘] अनर्शरातिमनश्लीलदानमश्लीलं पापकम् ’ (निरु. ६. २३) इति । [v]वसुदां धनस्य दातारमिन्द्रम् [v]उप [v]स्तुहि । यतः [v]इन्द्रस्य [v]रातयः दानानि [v]भद्राः कल्याणानि । महदैश्वर्यकारीणीत्यर्थः । यतश्च [v]सः इन्द्रः स्वकीयं [v]मनः [v]दानाय अभीष्टप्रदानाय [v]चोदयन् प्रेरयन् [v]विधतः परिचरतः [v]अस्य स्तोतुः [v]कामम् इच्छां [v]न [v]रोषति न हिनस्ति ॥

---

१. न-भ१–तं । २. ख-ग-ङ-त१-२-३-श–विभजते । ३. ख-त-न-भ३–संप्रत्यर्थे ध; श–संप्रत्यर्थे त्व । ४. ख-त-न-भ३-श–°मनुध्यायेम; ग–°मनुधारयेम । ५. ख-ग-त-न-भ३-श–विभज्यमानाः । ६. ख-त१-२-३-न-भ३–°मनुध्यायेम ।

त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥ ५ ॥

त्वम् । इन्द्र । प्रऽतूर्तिषु । अभि । विश्वाः । असि । स्पृधः ।
अशस्तिऽहा । जनिता । विश्वऽतूः । असि । त्वम् । तूर्य । तरुष्यतः ॥ ५ ॥

हे [v]इन्द्र [v]त्वं [v]प्रतूर्तिषु संग्रामेषु [v]विश्वाः सर्वाः [v]स्पृधः युद्धकारिणीः शत्रुसेनाः [v]अभि[1] [v]असि अभिभवसि । किंच हे [v]तूर्य शत्रूणां बाधकेन्द्र [v]त्वम् [v]अशस्तिहा दैत्यानामशस्तीनां[2] हन्ता [v]असि । [v]जनिता असुरेभ्योऽशस्तीनां जनयिता चासि । [v]विश्वतूः सर्वस्य शत्रुवर्गस्य हिंसिता चासि । [v]तरुष्यतः बाधकांश्च बाधमानोऽसि ॥

अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥ ६ ॥

अनु । ते । शुष्मम् । तुरयन्तम् । ईयतुः । क्षोणी इति । शिशुम् । न । मातरा ।
विश्वाः । ते । स्पृधः । श्नथयन्त । मन्यवे । वृत्रम् । यत् । इन्द्र । तूर्वसि ॥ ६ ॥

हे इन्द्र [v]ते तव [v]शुष्मं बलं [v]तुरयन्तं हिंसन्तं शत्रुं [v]क्षोणी द्यावापृथिव्यौ [v]मातरा मातरौ [v]शिशुं [v]न शिशुमिव [v]अनु [v]ईयतुः अनुगच्छतः । गमनमात्रे दृष्टान्तः । किंच हे [v]इन्द्र त्वं [v]यत् यस्मात् [v]वृत्रं शत्रुं [v]तूर्वसि हंसि अतः [v]ते तव [v]मन्यवे क्रोधाय [v]विश्वाः सर्वाः [v]स्पृधः संग्रामकारिण्यः सेनाः [v]श्नथयन्त श्रथिताः खिन्ना भवन्ति ॥

इत ऊती वो अजरं प्रहेतारमप्रहितम् ।
आशुं जेतारं हेतारं रथीतममतूर्तं तुग्र्यावृधम् ॥ ७ ॥

इतः । ऊती । वः । अजरम् । प्रऽहेतारम् । अप्रऽहितम् ।
आशुम् । जेतारम् । हेतारम् । रथिऽतमम् । अतूर्तम् । तुग्र्यऽवृधम् ॥ ७ ॥

हे अस्मदीयजनाः [v]वः यूयम् [v]अजरं जरारहितं [v]प्रहेतारं शत्रूणां प्रेरकम् [v]अप्रहितं केनाप्यप्रेषितम् [v]आशुं वेगवन्तं [v]जेतारं शत्रूणां [v]हेतारं[3] गन्तारं[4] [v]रथीतमं रथिनां श्रेष्ठम् [v]अतूर्तं केनाप्यहिंसितं [v]तुग्र्यावृधम् उदकस्य वर्धयितारमिन्द्रम् [v]ऊती ऊत्यै रक्षणाय [v]इतः कुरुत । पुरस्कुरुतेति यावत् ॥

इष्कर्तारमनिष्कृतं सहस्कृतं शतमूतिं शतक्रतुम् ।
समानमिन्द्रमवसे हवामहे वसवानं वसुजुवम् ॥ ८ ॥

इष्कर्तारम् । अनिःऽकृतम् । सहःऽकृतम् । शतम्ऽऊतिम् । शतऽक्रतुम् ।
समानम् । इन्द्रम् । अवसे । हवामहे । वसवानम् । वसुऽजुवम् ॥ ८ ॥

---

१. त-श–स अभि । २. ख-त१-२-३-मु–दैत्याना° । ३. ख-ञ-त२-३–हंतारं; घ–होतारं । ४. घ–देवानामाह्वातारं ।

[v]इष्कर्तारं शत्रूणां संस्कर्तारम् [v]अनिष्कृतं स्वयमन्यैरसंस्कृतं [v]सहस्कृतं बलेन कृतं [v]शतमूतिं बहुरक्षणं [v]शतक्रतुं बहुप्रज्ञं बहुकर्माणं वा [v]समानं बहूनां साधारणं [v]वसवानं धनान्याच्छादयन्तं [v]वसूजुवं यजमानेभ्यो वसूनां प्रेरयितारम्[1] [v]इन्द्रमवसे रक्षणाय वयं [v]हवामहे ह्वयामः ॥ ॥ ३ ॥

'अथं ते' इति द्वादशर्चं सप्तमं सूक्तं भृगुगोत्रस्य नेमस्यार्षम्। 'अयमस्मि जरितः' इति द्वृचेनेन्द्रो नेमसमीपमेत्य स्वकीयं माहात्म्यमवोचत् अतस्तस्य द्वृचस्य स एवर्षिः 'यस्य वाक्यं स ऋषिः' (अनु. २. ४) इति न्यायात्। षष्ठी जगती। सप्तम्याद्यास्तिस्रोऽनुष्टुभः। शिष्टास्त्रिष्टुभः। इन्द्रो देवता। 'यद्वाग्वदन्ती[2]' 'देवीं वाचम्' इत्येते वाग्देवत्ये शिष्टा ऐन्द्र्यः। तथा चानुक्रान्तम्—अथं ते द्वादश नेमो भार्गवस्त्रैष्टुभं षष्ठी जगती परास्तिस्रोऽनुष्टुभोऽयमिति द्वृचेनेन्द्र आत्मानमस्तौदुपान्त्ये वाच्यौ' इति। वाग्देवत्ये पशौ 'यद्वाग्वदन्ती' इति वपाया अनुवाक्या। सूत्रितं च—'यद्वाग्वदन्त्यविचेतनानि पतङ्गो वाचं मनसा बिभर्ति' (आश्व. श्रौ. ३. ८) इति। पूर्वोक्त एव पशौ 'देवीं वाचम्' इति हविषो याज्या। सूत्रितं च—'देवीं वाचमजनयन्त देवा जनीयन्तो न्वग्रव इति तिस्रः' (आश्व. श्रौ. ३. ८) इति। प्रयाणसमये वयसाममनोज्ञा वाचः श्रुत्वैतां जपेत्। सूत्रितं च—'कनिक्रदज्जनुषं प्रब्रुवाण इति सूक्ते जपेद्देवीं वाचमजनयन्त देवा इति च' (आश्व. गृ. ३. १०. ९) इति ॥

अयं ते एमि तन्वा पुरस्ताद्विश्वे देवा अभि मा यन्ति पश्चात्।
यदा मह्यं दीधरो भागमिन्द्रादिन्मया कृणवो वीर्याणि ॥ १ ॥

अयम्। ते। एमि। तन्वा। पुरस्तात्। विश्वे। देवाः। अभि। मा। यन्ति। पश्चात्। यदा। मह्यम्। दीधरः। भागम्। इन्द्र। आत्। इत्। मया। कृणवः। वीर्याणि ॥ १ ॥

हे [v]इन्द्र [v]ते तव [v]पुरस्तात् अग्रतः [v]तन्वा पुत्रेण सह [v]अयम् अहम् [v]एमि। शत्रूनभिभवितुं गच्छामि। तवाग्रतो गच्छन्तं मां [v]विश्वे [v]देवाः त्वया सह [v]पश्चात् [v]अभि [v]यन्ति अभिगच्छन्ति। [v]यदा त्वं [v]मह्यं भार्गवाय नेमाय [v]भागं शत्रुषु स्थितं भागं [v]दीधरः धारयसि [v]आदित् अनन्तरमेव [v]मया सह मच्छत्रून्जेतुं [v]वीर्याणि पौरुषाणि [v]कृणवः कुरु। यदि शत्रुषु स्थितं धनं मह्यं दित्सासि[3] तर्हि शत्रुजयार्थं गच्छतः सपुत्रस्य मम साहाय्यं कुर्वीति भावः ॥

दधामि ते मधुनो भक्षमग्रे हितस्ते भागः सुतो अस्तु सोमः।
असश्च त्वं दक्षिणतः सखा मेऽधा वृत्राणि जङ्घनाव भूरि ॥ २ ॥

दधामि। ते। मधुनः। भक्षम्। अग्रे। हितः। ते। भागः। सुतः। अस्तु। सोमः। असः। च। त्वम्। दक्षिणतः। सखा। मे। अध। वृत्राणि। जङ्घनाव। भूरि ॥ २ ॥

हे इन्द्र [v]ते तुभ्यं [v]मधुनः मदकरस्य सोमस्य [v]भक्षमग्रे प्रथमं [v]दधामि धारयामि। [v]सुतः अभिषुतः [v]भागः भजनीयः [v]सोमः [v]ते तव हृदये [v]हितः निहितः [v]अस्तु भवतु। अपि च [v]त्वं [v]मे मम [v]दक्षिणतः दक्षिणपार्श्वे [v]सखा सन् [v]असः स्थितो भव। [v]अध अथ [v]भूरि बहूनि [v]वृत्राणि अस्मदीयाञ्छत्रून् [v]जङ्घनाव त्वमहं चोभौ आवां हन्वः ॥

प्र सु स्तोमं भरत वाजयन्त इन्द्राय सत्यं यदि सत्यमस्ति।
नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभि ष्टवाम ॥ ३ ॥

---

१ ख-ग-त-भ–प्रेरकं। २. ख-ग-त-भ२-३-श–°ग्वदंति। ३. त-न–देच्छांत्ससि।

प्र । सु । स्तोमम् । भरत । वाजऽयन्तः । इन्द्राय । सत्यम् । यदि । सत्यम् । अस्ति ।
न । इन्द्रः । अस्ति । इति । नेमः । ऊँ इति । त्वः । आह ।
कः । ईम् । ददर्श । कम् । अभि । स्तवाम ॥ ३ ॥

हे जनाः ᵛवाजयन्तः संग्राममिच्छन्तो यूयम् । 'पौंस्ये वाजे' इति संग्रामनामसु पाठात् । ᵛइन्द्राय ᵛसत्यं सत्यभूतं ᵛस्तोमं[1] ᵛसु सुष्ठु ᵛप्र ᵛभरत । इन्द्रोऽस्तीत्येतत् ᵛयदि ᵛसत्यमस्ति भवति । इन्द्रास्तित्वे कः संदेहः । तत्राह । ᵛनेम ᵛउ भार्गवो नेम एव ᵛइन्द्रः नाम ᵛत्वः कश्चित् ᵛन ᵛअस्ति इति ᵛआह । तत्र कारणं दर्शयति । ᵛक ᵛईम् एनमिन्द्रं ᵛददर्श अद्राक्षीत् । न कोऽप्यपश्यत् । अतः ᵛकं वयम् ᵛअभि ᵛष्टवाम अभिष्टुमः । तस्मादिन्द्रो नाम कश्चिद्विद्यत इति वादमात्रं न तु तत्सत्यमित्यर्थः ॥

अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना ।
ऋतस्य मा प्रदिशो वर्धयन्त्यादर्दिरो भुवना दर्दरीमि ॥ ४ ॥

अयम् । अस्मि । जरितरिति । पश्य । मा । इह । विश्वा । जातानि । अभि । अस्मि । मह्ना ।
ऋतस्य । मा । प्रऽदिशः । वर्धयन्ति । आऽदर्दिरः । भुवना । दर्दरीमि ॥ ४ ॥

एवं नेमस्यर्षेर्वचनमाकर्ण्य इन्द्रस्तस्य समीपमाजगाम । आगत्य चात्मानमनेन ब्रूचेन स्तौति । हे ᵛजरितः स्तोतः ᵛअयम् अहम् ᵛअस्मि । ᵛइह तव समीपे स्थितं ᵛमा मां ᵛपश्य । ᵛविश्वा सर्वाणि ᵛजातानि[2] भुवनानि ᵛमह्ना महत्त्वेन ᵛअभ्यस्मि अहमभिभवामि । किंच माम् ,ᵛऋतस्य सत्यस्य यज्ञस्य वा ᵛप्रदिशः प्रदेष्टारो विद्वांसः स्तोत्रैः ᵛवर्धयन्ति । अपि च ᵛआदर्दिरः आदरणशीलोऽहं ᵛभुवना भुवनानि शत्रुभूतानि[3] ᵛदर्दरीमि भृशं विदारयामि ॥

आ यन्मा वेना अरुहन्नृतस्यँ एकमासीनं हर्यतस्य पृष्ठे ।
मनश्चिन्मे हृद आ प्रत्यवोचदचिक्रदद्दिशुमन्तः सखायः ॥ ५ ॥

आ । यत् । मा । वेनाः । अरुहन् । ऋतस्य । एकम् । आसीनम् । हर्यतस्य । पृष्ठे ।
मनः । चित् । मे । हृदे । आ । प्रति । अवोचत् । अचिक्रदन् । शिशुऽमन्तः । सखायः ॥ ५ ॥

ᵛयत् यदा ये ᵛऋतस्य यज्ञस्य यज्ञम् । कर्मणि षष्ठी । ᵛवेनाः कामयमानाः ᵛहर्यतस्य कान्तस्यान्तरिक्षस्य ᵛपृष्ठे ᵛआसीनम् उपविष्टम् ᵛएकं ᵛमा माम् ᵛआ ᵛअरुहन् तदानीं तेषां भवतामारोहं ᵛमनश्चित् मन एव ᵛमे मम ᵛहृदे हृदयाय ᵛप्रत्यवोचत् अब्रवीत् । अज्ञासिषं च तदाह्वानं ᵛशिशुमन्तः पुत्रयुक्ताः ᵛसखायः प्रिया अमी ᵛअचिक्रदन् मां क्रन्दन्तीति ॥

विश्वेत्ता ते सवनेषु प्रवाच्या या चकर्थ मघवन्निन्द्र सुन्वते ।
पारावतं यत्पुरुसंभृतं वस्वपावृणोः शरभाय ऋषिबन्धवे ॥ ६ ॥

---

१. ख-ग-त-न-भ-श–सोमं । २. ख-ज्ञ-भ-श–जातानि जनितानि; घ-ज्ञ-त१-२–जातानि जनितानि तानि; त३–जातानि तानि; न–जातानि जातानि । ३. ज्ञ-त१-२-४-भ२-श–शत्रुभूतानि भूतानि ।

विश्वा । इत् । ता । ते । सवनेषु । प्रऽवाच्या । या । चकर्थ । मघऽवन् । इन्द्र । सुन्वते ।
पारावतम् । यत् । पुरुऽसंभृतम् । वसु । अपऽअवृणोः । शरभाय । ऋषिऽबन्धवे ॥ ६ ॥

स्वसमीपमागतमिन्द्रं दृष्ट्वा संतुष्ट ऋषिरिन्द्रस्य विविधानि कर्माणि दानं च 'विश्वेत्ता ते' इत्यनेन द्रुचेन स्तौति । हे [v]मघवन्निन्द्र त्वं [v]सवनेषु यज्ञेषु [v]सुन्वते सोमाभिषवं कुर्वते यजमानाय [v]या यानि कर्माणि [v]चकर्थ अकरोः [v]ते तव [v]ता तानि कर्माणि [v]प्रवाच्या प्रवक्तव्यानि [v]विश्वेत् अनन्तान्येव । किंच त्वं [v]पारावतं परावन्नामकस्य कस्यचिच्छत्रोः स्वभूतं[1] [v]यत् धनमस्ति तत् [v]ऋषिबन्धवे[1] [v]शरभाय[2] शरभनाम्न ऋषये [v]अपावृणोः अपवृतवानसि । [v]पुरुसंभृतं यथा[3] बहुसंभृतं भवति[4] ॥ ॥ ४ ॥

प्र नूनं धावता पृथङ्नेह यो वो अवावरीत् ।
नि षीं वृत्रस्य मर्मणि वज्रमिन्द्रो अपीपतत् ॥ ७ ॥

प्र । नूनम् । धावत । पृथक् । न । इह । यः । वः । अवावरीत् ।
नि । सीम् । वृत्रस्य । मर्मणि । वज्रम् । इन्द्रः । अपीपतत् ॥ ७ ॥

[v]यः शत्रुः [v]नूनम् इदानीं [v]प्र [v]धावत प्रधावति [v]पृथक् [v]इह पृथङ् तिष्ठति च [v]वः युष्मान् [v]न [v]अवावरीत् न विवारयति च तस्य [v]वृत्रस्य शत्रोः [v]मर्मणि मर्मस्थाने [v]इन्द्रः [v]वज्रं कुलिशं [v]नि [v]अपीपतत् नितरामपातयत् ॥

मनोजवा अयमान आयसीमतरत्पुरम् ।
दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत् ॥ ८ ॥

मनःऽजवाः । अयमानः । आयसीम् । अतरत् । पुरम् ।
दिवम् । सुऽपर्णः । गत्वाय । सोमम् । वज्रिणे । आ । अभरत् ॥ ८ ॥

[v]सुपर्णः गरुत्मान् [v]मनोजवाः मनोवेगः [v]अयमानः गच्छन् [v]आयसीं हिरण्मयीं [v]पुरं नगरीम् [v]अतरत् अतारीत् । ततः [v]दिवं स्वर्गं [v]गत्वाय गत्वा [v]वज्रिणे इन्द्राय [v]सोमम् [v]आभरत् आहरच्च ॥

समुद्रे अन्तः शयत उद्ना वज्रो अभीवृतः ।
भरन्त्यस्मै संयतः पुरःप्रस्रवणा बलिम् ॥ ९ ॥

समुद्रे । अन्तरिति । शयते । उद्ना । वज्रः । अभिऽवृतः ।
भरन्ति । अस्मै । सम्ऽयतः । पुरःऽप्रस्रवणाः । बलिम् ॥ ९ ॥

यः [v]वज्रः [v]समुद्रे [v]अन्तः समुद्रस्य मध्ये [v]शयते शेते यश्च [v]उद्ना उदकेन [v]अभिवृतः [v]अस्मै[5] वज्राय [v]संयतः संग्रामस्य । 'सग्मन् संयतः' इति संग्रामनामसु पाठात् । [v]पुरःप्रस्रवणाः पुरस्ताद्गच्छन्तः शत्रवः [v]बलिम् उपहारं [v]भरन्ति धारयन्ति । तस्य छेद्या भवन्तीत्यर्थः ॥

---

१. ख-ग-त–स्वभूतं यद्वृत्तमस्ति तदृषियाय । २. न-भ-श–ऋषिप्रियाय शरभाय । ३. ग–वसु धनं । ४. ख–चेति; ग-घ-त-न-श–वेति । ५. ख-ग-घ-त-न-श–तस्मा अस्मै ।

यद्वाग्वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा ।
चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम ॥ १० ॥

यत् । वाक् । वदन्ती । अविऽचेतनानि । राष्ट्री । देवानाम् । निऽससाद । मन्द्रा ।
चतस्रः । ऊर्जम् । दुदुहे । पयांसि । क्व । स्वित् । अस्याः । परमम् । जगाम ॥ १० ॥

vराष्ट्री राजनशीला vदेवानां vमन्द्रा मादयित्री[1] वा vयत् यदा vवाक् vअविचेतनानि विज्ञानरहितानप्रज्ञातानर्थान् vवदन्ती प्रज्ञापयन्ती vनिषसाद यज्ञे निषीदति तदा vचतस्रः दिशः प्रति vऊर्जम् अन्नं vपयांसि तत्कारणभूतानि उदकानि vदुदुहे । vअस्याः माध्यमिकाया वाचः स्वभूतं यत् vपरमं श्रेष्ठं तत् vक्व vजगाम क्व गच्छतीति न दृश्यत इत्यर्थः । तथा च यास्कः—'यद्वाग्वदन्त्यविचेतनान्यविज्ञातानि राष्ट्री देवानां निषसाद मन्द्रा मदना चतस्रोऽनु दिश ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगामेति यत्पृथिवीं गच्छतीति वा यदादित्यरश्मयो हरन्तीति वा' (निरु. ११. २८) इति ॥

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥ ११ ॥

देवीम् । वाचम् । अजनयन्त । देवाः । ताम् । विश्वऽरूपाः । पशवः । वदन्ति । सा । नः ।
मन्द्रा । इषम् । ऊर्जम् । दुहाना । धेनुः । वाक् । अस्मान् । उप । सुऽस्तुता । आ । एतु ॥ ११ ॥

एषा माध्यमिका वाक् सर्वप्राण्यन्तर्गता धर्माभिवादिनी भवतीति विभूतिमुपदर्शयति[2] । यां vदेवीं द्योतमानां माध्यमिकां vवाचं vदेवाः माध्यमिकाः vअजनयन्त जनयन्ति vतां वाचं vविश्वरूपाः सर्वरूपा व्यक्तवाचोऽव्यक्तवाचश्च vपशवो vवदन्ति । तत्पूर्वकत्वाद्वाक्प्रवृत्तेः । vसा vवाक् देवी vमन्द्रा मदना स्तुत्या हर्षयित्री वा वृष्टिप्रदानेनास्मभ्यम् vइषम् अन्नम् vऊर्जं पयोघृतादिरूपं रसं च vदुहाना क्षरन्ती vधेनुः धेनुभूता vसुष्टुता अस्माभिः स्तुता[3] vअस्मान् नेमान् vउप vएतु उपगच्छतु । वर्षणायोद्युक्तेत्यर्थः[4] । तथा च यास्कः—'देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति व्यक्तवाचश्चाव्यक्तवाचश्च सा नो मदनाय च रसं च दुहाना धेनुर्वागस्मानुपैतु सुष्टुता' (निरु. ११. २९) इति ॥

सखे विष्णो वितरं वि क्रमस्व द्यौर्देहि लोकं वज्राय विष्कभे ।
हनाव वृत्रं रिणचाव सिन्धूनिन्द्रस्य यन्तु प्रसवे विसृष्टाः ॥ १२ ॥

सखे । विष्णो इति । विऽतरम् । वि । क्रमस्व । द्यौः । देहि । लोकम् । वज्राय । विऽस्कभे ।
हनाव । वृत्रम् । रिणचाव । सिन्धून् । इन्द्रस्य । यन्तु । प्रऽसवे । विऽसृष्टाः ॥ १२ ॥

हे vसखे vविष्णो त्वं vवितरम् अत्यन्तं vवि vक्रमस्व विक्रमं कुरु । हे vद्यौः त्वं vवज्राय वज्रस्य vविष्कभे विष्कम्भनाय vलोकम् अवकाशं vदेहि प्रयच्छ । हे विष्णो त्वं चाहं चोभौ आवां

---

१. घ–मादयित्री माध्यमिका वाक्; श–मादयित्री मोहयित्री । २. ख-ग-त-न-भ१-२-श–°मुपदर्शयतीति । ३. घ–सम्यक् स्तुता; श–नः । ४. ख–°योद्युतमित्यर्थः; ग-त-न-भ-श–°योद्युक्तामित्यर्थः ।

Vवृत्रम् असुरं Vहनाव हन्वः । Vसिन्धून् वृत्रावष्टब्धा नदीश्च Vरिणचाव नयावः[1] । तेऽमी Vविसृष्टाः सिन्धवः Vइन्द्रस्य Vप्रसवे Vयन्तु प्रेरणे गच्छन्तु । तमिममर्थं संगृह्य श्लोकैः शौनको दर्शयति— ' त्रींल्लोकानभिवृत्यैतान् वृत्रस्तस्थौ स्वया त्विषा ॥ तं[2] नाशकद्धन्तुमिन्द्रो[3] विष्णुमभ्येत्य सोऽब्रवीत् । वृत्रं हनिष्ये तिष्ठस्व विक्रम्याद्य ममान्तिके ॥ उद्यतस्य तु वज्रस्य द्यौर्ददातु ममान्तरम् । तथेति विष्णुस्तच्चक्रे द्यौश्चास्य विवरं ददौ ॥ तदेतदखिलं प्रोक्तं सखे विष्णो इति त्वृचा ' (बृहद्दे. ६. १२१–१२४) इति ॥ ॥ ५ ॥

' ऋधक् ' इति षोडशर्चमष्टमं सूक्तम् । अत्रानुक्रम्यते—' ऋधक् षोडश जमदग्निर्भार्गवो मैत्रावरुणं प्रागाथं त्रिष्टिष्टुबन्तं तृतीयादि गायत्री सतोबृहती स्तोत्रं राजस्वृक्सपादादित्याश्विन्यौ[4] वायव्ये सौर्यौ[5] बृहत्युपस्था सूर्यप्रभास्तुतिर्वा पावमानी गव्ये ' इति । भृगुगोत्रो जमदग्निर्ऋषिः । चतुर्दश्याद्यास्तिस्रस्त्रिष्टुभः । त्रयोदशी बृहती शिष्टानामयुजो बृहत्यो युजः सतोबृहत्यः । तृतीया गायत्री[6] । ' स्तोत्रं राजसु गायत ' इति पादेन सहिता ' ते हिन्विरे ' इत्यादित्यदेवताका । ' आ मे वचांसि ' इति द्वे अश्विदेवताके[7] । ' आ नो यज्ञं दिविस्पृशम् ' इति द्वे वायुदेवत्ये । ' बण्महाँ असि सूर्य ' इति द्वे सूर्यदेवताके । ' इयं या नीचीं ' इत्येषा उषोदेवत्या । यद्वा । सूर्यप्रभानया स्तूयते । अतः सैव देवता । ' प्रजा ह तिस्रः ' इत्येषा पवमानदेवताका । ' माता रुद्राणाम् ' इति द्वे गोदेवत्ये । शिष्टाः पञ्चर्चो मैत्रावरुण्यः । सूक्तविनियोगो लैङ्गिकः । संग्रामार्थं राज्ञः संनहने[8] ' प्र यो वां मित्रावरुणा ' इति द्वे राजानं वाचयेत् । सूत्रितं च—' अभीवर्तं वाचयति प्र यो वां मित्रावरुणेति च द्वे ' (आश्व. गृ. ३. १२. १२) इति । पृष्ठ्यस्य पञ्चमेऽहनि प्रउगे वायव्यतृचस्य ' आ नो यज्ञम् ' इत्यादिके द्वे ऋचावाद्ये । सूत्रितं च— ' आ नो यज्ञं दिविस्पृशमिति द्वे आ नो वायो महे तन इत्येका ' (आश्व. श्रौ. ७. १२) इति । आश्विनं शंसिष्यन् होता ' बण्महाँ असि सूर्य ' इति द्वाभ्यामग्निं जुहुयात् । सूत्रितं च—' बण्महाँ असि सूर्येति द्वाभ्यामिन्द्रं वो विश्वतस्परीति च ' (आश्व. श्रौ. ६. ५) इति । माध्यंदिनसवने सोमातिरेक एकं शस्त्रमुपजायते । तत्र 'बण्महाँ असि' इति प्रगाथः स्तोत्रियः । सूत्रितं च—' बण्महाँ असि सूर्योदु त्यदर्शतं वपुरिति प्रगाथौ स्तोत्रियानुरूपौ ' (आश्व. श्रौ. ६. ७) इति । अयमेव प्रगाथश्चातुर्विंशिकेऽहनि माध्यंदिने ब्राह्मणाच्छंसिनो वैकल्पिकोऽनुरूपः । सूत्रितं च—' श्रायन्तइव सूर्यं बण्महाँ असि सूर्य ' (आश्व. श्रौ. ७. ४) इति । मधुपर्के गामुत्सृज्य ' माता रुद्राणाम् ' इति जपेत् । सूत्रितं च—' माता रुद्राणां दुहिता वसूनामिति जपित्वोमुत्सृजतेत्युत्सृक्ष्यन्[9] ' (आश्व. गृ. १. २४. २५) इति ॥

ऋधगित्था स मर्त्यः शशमे देवतातये ।
यो नूनं मित्रावरुणावभिष्टय आचक्रे हव्यदातये ॥ १ ॥

ऋधक् । इत्था । सः । मर्त्यः । शशमे । देवऽतातये ।
यः । नूनम् । मित्रावरुणौ । अभिष्टये । आऽचक्रे । हव्यऽदातये ॥ १ ॥

Vयः मनुष्यः Vनूनं क्षिप्रं Vहव्यदातये हविषां प्रदात्रे यजमानाय Vमित्रावरुणौ Vअभिष्टये अभिमतसिद्ध्यर्थम् Vआचक्रे अभिमुखौ करोति Vसः Vमर्त्यः मनुष्यः Vऋधक् सत्यम् Vइत्था इत्थं Vदेवतातये यज्ञार्थं Vशशमे हविः संस्करोति ॥

---

१. ख-त-न-श–मवयावः; ग–गमयावः; भ–मेचीयाव । २. ख-त–तेनाप्राक° । ३. ख-त-न-भ–राजस्विति सपादा°; ग-रजस्विति सपादा; श–राजस्वृगिति सपादा° । ४. ख-त२-३-४-भ-श–सूर्यौ । ५. ख-त-भ-श–गायत्री सतोबृहती । ६. ख-त-न-शं-मु–अश्विनीदेवताके । ७. ख-त-न-भ–संहनने । ८. ख-त१-२-३-४-न–जपित्वा गामुत्सृजतेत्युत्सृज्यन्; भ–जपित्वा गामुत्सृतेत्युत्सृजन्; श–जपित्वा गामुत्सृजतेत्युत्सृक्ष्यन् ।

वर्षिष्ठक्षत्रा उरुचक्षसा नरा राजाना दीर्घश्रुत्तमा ।
ता बाहुता न दंसना रथर्यतः साकं सूर्यस्य रश्मिभिः ॥ २ ॥

वर्षिष्ठऽक्षत्रौ । उरुऽचक्षसा । नरा । राजाना । दीर्घश्रुत्ऽतमा ।
ता । बाहुता । न । दंसना । रथर्यतः । साकम् । सूर्यस्य । रश्मिऽभिः ॥ २ ॥

[v]वर्षिष्ठक्षत्रौ अतिशयेन वृद्धबलौ [v]उरुचक्षसा महादर्शनौ [v]नरा नेतारौ कर्मणां [v]राजाना दीप्यमानौ [v]दीर्घश्रुत्तमा अतिशयेन विद्वांसौ [v]ता तौ मित्रावरुणौ [v]बाहुता [v]न भुजाविव [v]सूर्यस्य [v]रश्मिभिः किरणैः [v]साकं सह [v]दंसना दंसनानि कर्माणि। 'अम्नः[1] दंसः' इति कर्मनाममु पाठात्। [v]रथर्यतः प्राप्नुतः। यथा बाहू सह कर्म प्राप्नुतः तथा मित्रावरुणौ सह यज्ञं प्राप्नुत इत्यर्थः ॥

प्र यो वां मित्रावरुणाजिरो दूतो अद्रवत् । अर्यःशीर्षा मदेरघुः ॥ ३ ॥

प्र । यः । वाम् । मित्रावरुणा । अजिरः । दूतः । अद्रवत् । अर्यःऽशीर्षा । मदेऽरघुः ॥३॥

हे मित्रावरुणौ [v]वां युवाम् [v]अजिरः गमनशीलः[2] [v]यः[2] यजमानः [v]प्र [v]अद्रवत् अभिगच्छति स देवानां [v]दूतः भवति । [v]अयःशीर्षा हिरण्यालंकृतशिरस्कश्च भवति । [v]मदेरघुः मदकरे धने गन्ता च भवति ॥

न यः संपृच्छे न पुनर्हवीतवे न संवादाय रमते ।
तस्मान्नो अद्य समृतेरुरुष्यतं बाहुभ्यां न उरुष्यतम् ॥ ४ ॥

न । यः । सम्ऽपृच्छे । न । पुनः । हवीतवे । न । सम्ऽवादाय । रमते ।
तस्मात् । नः । अद्य । सम्ऽऋतेः । उरुष्यतम् । बाहुऽभ्याम् । नः । उरुष्यतम् ॥ ४ ॥

[v]यः शत्रुः [v]संपृच्छे संप्रभाय [v]न [v]रमते न क्रीडते [v]न[3] च पुनःपुनः [v]हवीतवे हवनाय रमते[4] [v]न च [v]संवादाय रमते [v]तस्मात् शत्रोः [v]समृतेः संग्रामात् [v]नः अस्मान् [v]अद्य [v]उरुष्यतं हे मित्रावरुणौ युवां रक्षतम्। किंच तस्य शत्रोः [v]बाहुभ्यां [v]नः अस्मान् [v]उरुष्यतं रक्षतम् ॥

प्र मित्राय प्रार्यम्णे सचध्यमृतावसो ।
वरूथ्यं१ वरुणे छन्द्यं वचः स्तोत्रं राजसु गायत ॥ ५ ॥

प्र । मित्राय । प्र । अर्यम्णे । सचध्यम् । ऋतवसो इत्यृतऽवसो ।
वरूथ्यम् । वरुणे । छन्द्यम् । वचः । स्तोत्रम् । राजऽसु । गायत ॥ ५ ॥

हे [v]ऋतवसो यज्ञधन [v]मित्राय [v]सचध्यं सेवार्हं [v]वरूथ्यं यज्ञगृहे भवं च स्तोत्रं [v]प्र [v]गायत प्रकर्षेण गायत। [v]अर्यम्णे च [v]प्र गायत। [v]वरुणे [v]छन्द्यं प्रीणनसाधनं चैतादृशं [v]वचः प्र गायत। प्रगायतेति बहुवचनं पूजार्थम्। एतदेव दर्शयति। [v]राजसु मित्रादिषु राजसु [v]स्तोत्रं गायत पठत। मित्रादीन्क्षत्रियान्राज्ञः स्तुतेति समुदायार्थः ॥ ॥ ६ ॥

---

१. ख-ग-ङ-त१-२-अपः अप्नः। २. ख-त-न-भ-श-गमनशीलोपि; ग-घ-गमनशीलोपि यो। ३. ख-त-'न' नास्ति। ४. ख-घ-भ१-३-न रमते।

ते हिन्विरे अरुणं जेन्यं वस्वेकं पुत्रं तिसृणाम् ।
ते धामान्यमृता मर्त्यानामदब्धा अभि चक्षते ॥ ६ ॥

ते । हिन्विरे । अरुणम् । जेन्यम् । वसु । एकम् । पुत्रम् । तिसृणाम् ।
ते । धामानि । अमृताः । मर्त्यानाम् । अदब्धाः । अभि । चक्षते ॥ ६ ॥

vअरुणम् अरुणवर्णं vजेन्यं जयसाधनं[1] vवसु वासकं vतिसृणां[2] पृथिव्यादीनाम् vएकं vपुत्रं vते देवाः vहिन्विरे प्रेरयन्ति त्रैलोक्यस्य तमोनिवारणाय। किंच vअदब्धाः केनाप्यहिंसिताः vअमृताः[3] मरणरहिताः[3] vते देवाः vमर्त्यानां मनुष्याणां vधामानि स्थानानि vअभि vचक्षते अभिपश्यन्ति ॥

आ मे वचांस्युद्यता द्युमत्तमानि कर्त्वा ।
उभा यातं नासत्या सजोषसा प्रति हव्यानि वीतये ॥ ७ ॥

आ । मे । वचांसि । उत्ऽयता । द्युमत्ऽतमानि । कर्त्वा ।
उभा । यातम् । नासत्या । सऽजोषसा । प्रति । हव्यानि । वीतये ॥ ७ ॥

हे vनासत्या नासत्यौ सत्यस्य प्रणेतारौ[4] vसजोषसा संगतौ vउभा उभौ युवां vमे जमदग्नेर्मम vउद्यता उद्यतानि vद्युमत्तमानि दीप्ततमानि vवचांसि स्तोत्ररूपाणि वाक्यानि vकर्त्वा कर्माणि च vआ vयातम्। किंच vहव्यानि हवींषि vवीतये भक्षणाय vप्रति गच्छतम् ॥

रातिं यद्वामरक्षसं हवामहे युवाभ्यां वाजिनीवसू ।
प्राचीं होत्रां प्रतिरन्तावितं नरा गृणाना जमदग्निना ॥ ८ ॥

रातिम् । यत् । वाम् । अरक्षसम् । हवामहे । युवाभ्याम् । वाजिनीवसू इति वाजिनीऽवसू ।
प्राचीम् । होत्राम् । प्रऽतिरन्तौ । इतम् । नरा । गृणाना । जमत्ऽअग्निना ॥ ८ ॥

हे vवाजिनीवसू अन्नधनावश्विनौ vवां युवयोः संबन्धि vयत् vअरक्षसं रक्षोवर्जितं दानमस्ति तत् यदा vहवामहे[5]। एतदेव विशदयति। vयुवाभ्यां क्रियमाणां[6] vरातिं दानं हवामहे इति। तदानीं vप्राचीं प्राङ्मुखां vहोत्रां स्तुतिं vप्रतिरन्तौ वर्धयन्तौ vनरा नेतारौ vजमदग्निना ऋषिणा गृणानौ स्तूयमानौ च सन्तौ vइतम् आगच्छतम् ॥

आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः ।
अन्तः पवित्र उपरि श्रीणानो यं शुक्रो अयामि ते ॥ ९ ॥

आ । नः । यज्ञम् । दिविऽस्पृशम् । वायो इति । याहि । सुमन्मऽभिः ।
अन्तरिति । पवित्रे । उपरि । श्रीणानः । अयम् । शुक्रः । अयामि । ते ॥ ९ ॥

---

१. ग-त-श-जयनसाधनं । २. ग-न-भ२-३-तिसृणां । ३. ख-ग-त१-२-३-श-अमरणाः सहिताः; ङ-अमृताः अमरणसहिताः; न-अमृताः अमरणरहिताः । ४. न-भ-प्रणेतारौ वा । ५. घ-ङ-हवामहे याचामहे । ६. ग-क्रियमाणं ।

हे ᵛवायो त्वं ᵛनः अस्माकं ᵛदिविस्पृशं तं ᵛयज्ञम् ᵛआ ᵛयाहि । किमर्थमागमनमित्यत्राह । ᵛसुमन्मभिः सुष्टुतिभिः ᵛअन्तः ᵛपवित्रे पवित्रस्य मध्ये ᵛउपरि ᵛश्रीणानः श्रयमाणो निषिच्यमानः ᵛअयं ᵛशुक्रः[1] सोमः ᵛते तुभ्यम् ᵛअयामि नियत आसीदिति ॥

वेत्यध्वर्युः पथिभी रजिष्ठैः प्रति हव्यानि वीतये ।
अधा नियुत्व उभयस्य नः पिब शुचिं सोमं गवाशिरम् ॥ १० ॥

वेति । अध्वर्युः । पथिऽभिः । रजिष्ठैः । प्रति । हव्यानि । वीतये ।
अध । नियुत्वः । उभयस्य । नः । पिब । शुचिम् । सोमम् । गोऽआशिरम् ॥ १० ॥

हे ᵛनियुत्वः नियुत्संज्ञकाश्ववन् वायो ᵛअध्वर्युः हविर्धानात् ᵛरजिष्ठैः ऋजुतमैः ᵛपथिभिः मार्गैः ᵛवेति गच्छति । ᵛवीतये भक्षणाय तव भक्षणानि ᵛहव्यानि हवींषि च ᵛप्रति नयतीति शेषः । ᵛअध अथ ᵛनः अस्माकं संबन्धिनम् ᵛउभयस्य उभयविधं सोमम् । कर्मणि षष्ठी । ᵛपिब । उभयविधत्वं दर्शयति । ᵛशुचिं शुद्धं ᵛसोमं ᵛगवाशिरं गव्येन पयसा मिश्रितं चेति ॥ ॥ ७ ॥

बण्महाँ असि सूर्य बळादित्य महाँ असि ।
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि ॥ ११ ॥

बट् । महान् । असि । सूर्य । बट् । आदित्य । महान् । असि ।
महः । ते । सतः । महिमा । पनस्यते । अद्धा । देव । महान् । असि ॥ ११ ॥

हे ᵛसूर्य त्वं ᵛमहान् तेजसाधिकः ᵛअसि । ᵛबट् सत्यम् । नैतन्मिथ्येत्यर्थः । हे ᵛआदित्य अदितेः पुत्र त्वं ᵛमहान् बलेनाप्यधिकः[2] ᵛअसि । ᵛबट् सत्यम् । ᵛमहः महतः ᵛसतः भवतः ᵛते ᵛमहिमा महत्त्वं ᵛपनस्यते स्तोतृभिः स्तूयते । हे ᵛदेव द्योतनादिगुणयुक्त सूर्य त्वं ᵛमहान् वीर्येणाप्यधिकः ᵛअसि भवसि । ᵛअद्धा सत्यमेव । अत्र न संशय इत्यर्थः । 'बट् सत्रा अद्धा' इति सत्यनामसु पाठात् ॥

बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ।
मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥ १२ ॥

बट् । सूर्य । श्रवसा । महान् । असि । सत्रा । देव । महान् । असि ।
मह्ना । देवानाम् । असुर्यः । पुरःऽहितः । विऽभु । ज्योतिः । अदाभ्यम् ॥ १२ ॥

हे ᵛसूर्य त्वं ᵛश्रवसा श्रवणेन ᵛमहान् सर्वाधिकः ᵛअसि ᵛबट् सत्यम् । हे ᵛदेव द्योतमान सूर्य त्वं ᵛदेवानां मध्ये ᵛमह्ना महत्त्वेन ᵛमहान् अधिकः ᵛअसि ᵛसत्रा सत्यमेव । ᵛअसुर्यः असुराणां हन्ता चासि । किंच त्वं देवानां ᵛपुरोहितः हितोपदेष्टासि । किंच ते ᵛज्योतिः तेजः ᵛविभु महत् ᵛअदाभ्यं केनाप्यहिंस्यं च ॥

इयं या नीच्यर्किणी रूपा रोहिण्या कृता ।
चित्रेव प्रत्यदर्श्यायत्यन्तर्दशसु बाहुषु ॥ १३ ॥

---

१. घ–शुक्रः शुद्धोयं । २. ख-घ-त-य-श–बलेनाभ्यधिको; ग–बलेनाधिको ।

इयम्। या। नीची। अर्किणी। रूपा। रोहिण्या। कृता।
चित्राऽईव। प्रति। अदर्शि। आऽयती। अन्तः। दशऽसु। बाहुषु॥ १३॥

अस्यामृचि उषसः स्तुतिः सूर्यप्रभाया वा। vया vइयं vनीची अवाङ्मुखी vअर्किणी स्तुतिमती vरूपा रूपवती vरोहिण्या प्रकाशयुक्ता vकृता उषाः[1] सूर्यप्रभा वोत्पादिता[1] सा vअन्तः ब्रह्माण्डस्य मध्ये vबाहुषु बाहुस्थानीयासु vदशसु दशसंख्याकासु दिक्षु vआयती आगच्छन्ती vचित्रेव चित्रा गौरिव vप्रत्यदर्शि सर्वैरदृश्यत॥

प्रजा ह तिस्रो अत्यायमीयुर्न्यन्या अर्कमभितो विविश्रे।
बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आ विवेश॥ १४॥

प्रऽजाः। ह। तिस्रः। अतिऽआयम्। ईयुः। नि। अन्याः। अर्कम्। अभितः। विविश्रे।
बृहत्। ह। तस्थौ। भुवनेषु। अन्तरिति। पवमानः। हरितः। आ। विवेश॥ १४॥

याः vतिस्रः vप्रजाः vअत्यायमीयुः अत्यायमायन् vअन्याः ता इमाः प्रजाः vअर्कम् अर्चनीयमग्निम् vअभितो[2] vविविश्रे[2] अभितो निविष्टास्ततो न पराबभूवुः। vभुवनेष्वन्तः मध्ये vबृहत् महान् असावादित्यः। प्रजापतिरित्येके। vतस्थौ प्रकाशयन्नतिष्ठत्। vहरितः दिशः vपवमानः वायुः vआ vविवेश आविष्टः। तथा चैतरेयब्राह्मणं—'प्रजा ह तिस्रो अत्यायमीयुरिति या वै ता इमाः प्रजास्तिस्रो अत्यायमायंस्तानीमानि वयांसि वङ्गावगधाश्चेरपादाः। न्यन्या अर्कमभितो विविश्र इति ता इमाः प्रजा अर्कमभितो निविष्टा इममेवाग्निं बृहद्ध तस्थौ भुवनेष्वन्तरित्यद उ एव बृहद्भुवनेष्वन्तरसावादित्यः पवमानो हरित आ विवेशेति वायुरेव पवमानो दिशो हरित आविष्टः' (ऐ. आ. २. १. १) इति। वाजसनेयिनोऽप्यामनन्ति—'स तपोऽतप्यत स प्रजा असृजत ता अस्य प्रजाः सृष्टाः पराबभूवुस्तानीमानि वयांसि' इत्युपक्रम्य 'प्रजा ह तिस्रो अत्यायमीयुरिति या अमूः प्रजा अत्यायन्[3] न्यन्या[4] अर्कमभितो विविश्र इत्यग्निर्वा अर्कस्तमिमाः प्रजा अभितो निविष्टास्ता इमाः पराभूताः। बृहद्ध तस्थौ भुवनेष्वन्तरिति प्रजापतिमेवैतदभ्यनूक्तं पवमानो हरित आ विवेशेति दिशो वै हरितस्ता अयं पवमान आविष्टः' (श. ब्रा. २. ५. १. १–५) इति॥

माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः।
प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट॥ १५॥

माता। रुद्राणाम्। दुहिता। वसूनाम्। स्वसा। आदित्यानाम्। अमृतस्य। नाभिः।
प्र। नु। वोचम्। चिकितुषे। जनाय। मा। गाम्। अनागाम्। अदितिम्। वधिष्ट॥ १५॥

अस्मिन् द्वृचे गौः स्तूयते। या गौः vरुद्राणां[5] मरुतां vमाता जननी vवसूनां vदुहिता पुत्री vआदित्यानां vस्वसा भगिनी vअमृतस्य पयसः vनाभिः आवासस्थानं ताम् vअनागाम् अनागसम् vअदितिम् अदीनां vगां गोरूपां देवीं vमा vवधिष्ट हे जनाः मा हिंसिष्टेति vचिकितुषे चेतनावते vजनाय vनु इदानीं vप्र vवोचम् अहं प्रावोचमिति शुश्रूषमाणेभ्य उपदेशः॥

---

१. ख–उषसा सूर्ये वोत्पात्यादिता प्रभा; ग-न-भ-श–उषसा सूर्येण वोत्पादिता प्रभा; त–उषसा सूर्ये वोत्पादिता प्रभा। २. ख-ग-त-न-भ२-श–अभिनिविविश्रे। ३. ग–अत्यायमायन्। ४. ख-त-श–अन्या; भ–न्या। ५. झ-भ–रुद्राणां रुद्रपुत्राणां।

वचोविदं वाचमुदीरयन्तीं विश्वाभिर्धीभिरुपतिष्ठमानाम् ।
देवीं देवेभ्यः पर्येयुषीं गामा मावृक्त मर्त्यो दभ्रचेताः ॥ १६ ॥

वचःऽविदम् । वाचम् । उत्ऽईरयन्तीम् । विश्वाभिः । धीभिः । उपऽतिष्ठमानाम् ।
देवीम् । देवेभ्यः । परि । आऽईयुषीम् । गाम् । आ । मा । अवृक्त । मर्त्यः । दभ्रऽचेताः ॥ १६ ॥

[v]वचोविदं वचसो लम्भयित्रीं [v]वाचम् [v]उदीरयन्तीं पयः पीत्वा पश्चाद्वाचमुदीरयन्तीम् । क्षुधितो हि जनो न वाचमुदीरयति भुक्त्वा पश्चादुदीरयति । [v]विश्वाभिः सर्वाभिः [v]धीभिः वाग्भिः [v]उपतिष्ठमानां [v]देवीं द्योतमानां [v]देवेभ्यः देवार्थं [v]मा माम् [v]एयुषीम् अवगच्छन्तीं [v]गां [v]दभ्रचेताः अल्पबुद्धिः [v]मर्त्यः मनुष्यः [v]परि [v]आ [v]अवृक्त परिवर्जयति ॥ ॥ ८ ॥

'त्वमग्ने' इति द्वाविंशत्यृचं नवमं सूक्तं गायत्रमाग्नेयम् । भृगुगोत्रः प्रयोगो नामर्षिः । बार्हस्पत्यः पावकविशेषणविशिष्टोऽग्न्यास्त्यो वा । यद्वा । सहोनाम्नः पुत्रौ गृहपतियविष्ठसंज्ञकौ द्वावग्नी । तौ सहेदं सूक्तमपश्यताम् । तस्मादस्य तावृषी । अथवा तयोरन्यतरः । तथा चानुक्रान्तं—'त्वमग्ने द्व्यधिका भार्गवः प्रयोगो बार्हस्पत्यो वाग्निः पावकः सहसः सुतयोर्वान्यो गृहपतियविष्ठयोर्वान्यतर आग्नेयं तु' इति । प्रातरनुवाकस्याग्नेये क्रतौ गायत्रे छन्दस्यादितोऽष्टादशर्चः । सूत्रितं च—'त्वमग्ने बृहद्वय इत्यष्टादशार्चेन्तस्वेति सूक्ते' (आश्व. श्रौ. ४. १३) इति । देवसुवां हविःष्वग्नेर्गृहपतेरनुवाक्या[1] 'त्वमग्ने बृहद्वयः' इत्येषा । सूत्रितं च—'त्वमग्ने बृहद्वयो हव्यवाळग्निरजरः पिता नः' (आश्व. श्रौ. ४. ११) इति । अन्वारम्भणीयायामग्नेर्भगिनोऽनुवाक्या 'आ सवं सवितुः' इत्येषा । सूत्रितं च—'आ सवं सवितुर्यथा स नो राधांस्या भर' (आश्व. श्रौ. २. ८) इति । आभिप्लविकेषूक्थ्येषु[2] तृतीयसवने मैत्रावरुणस्य 'अग्निं वो वृधन्तम्' इति वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितं च—'अग्निं वो वृधन्तमग्ने यं यज्ञमध्वरम्' (आश्व. श्रौ. ७. ८) इति । दशमेऽहनि 'इमं नो यज्ञम्' इति स्तोकसूक्तस्य द्वितीयस्य स्थाने 'अग्ने घृतस्य' इत्येषा । सूत्रितं च—'स्तोकसूक्तस्य द्वितीयतृतीययोः स्थानेऽग्ने घृतस्य धीतिभिरुभे सुश्चन्द्र सर्पिष इत्येते' (आश्व. श्रौ. ८. १२) इति ॥

त्वमग्ने बृहद्वयो दधासि देव दाशुषे । कविर्गृहपतिर्युवा ॥ १ ॥

त्वम् । अग्ने । बृहत् । वयः । दधासि । देव । दाशुषे । कविः । गृहऽपतिः । युवा ॥ १ ॥

हे [v]देव द्योतमान [v]अग्ने [v]कविः क्रान्तकर्मा [v]गृहपतिः गृहपालकः [v]युवा नित्यतरुणः [v]त्वं [v]दाशुषे हविषां प्रदात्रे यजमानाय [v]बृहद्वयः महदन्नं [v]दधासि प्रयच्छसीत्यर्थः ॥

स नः ईळानया सह देवाँ अग्ने दुवस्युवा । चिकिद्विभानवा वह ॥ २ ॥

सः । नः । ईळानया । सह । देवान् । अग्ने । दुवस्युवा ।
चिकित् । विभानो इति विऽभानो । आ । वह ॥ २ ॥

हे [v]विभानो विशिष्टदीप्ते [v]अग्ने [v]सः त्वं [v]चिकित् ज्ञाता सन् [v]नः अस्माकं [v]दुवस्युवा परिचरणशीलया [v]ईळानया स्तुत्या वाचा [v]सह [v]देवान् [v]आ [v]वह ॥

त्वया ह स्विद्युजा वयं चोदिष्ठेन यविष्ठ्य । अभि ष्मो वाजसातये ॥ ३ ॥

---

१. ख-त-न-भ१-श-हवींष्यग्ने° । २. ख-त-भ-°धूक्थेषु ।

त्वया । हू । स्वित् । युजा । वयम् । चोदिष्ठेन । यविष्ठ्य । अभि । स्मः । वाजऽसातये ॥३॥

हे यविष्ठ्य युवतमाग्ने चोदिष्ठेन अतिशयेन धनानां प्रेरयित्रा त्वया युजा स्वित् ह सहायेनैव[1] वयं भार्गवः[2] प्रयोगो[2] बार्हस्पत्याः पावका अग्नयो वा वाजसातये अन्नलाभाय अभि स्मः शत्रूनभिभवेम ॥

और्वभृगुवच्छुचिमप्नवानुवदा हुवे । अग्निं समुद्रवाससम् ॥ ४ ॥

और्वभृगुऽवत् । शुचिम् । अप्नवानऽवत् । आ । हुवे । अग्निम् । समुद्रऽवाससम् ॥ ४ ॥

समुद्रवाससं समुद्रमध्यवर्तिनं वाडवं शुचिं शुद्धम् अग्निम् और्वभृगुवत् यथा और्वभृगुः अप्नवानवत् यथाप्नवानः[3] तथा आ हुवे आह्वयाम्यहम् ॥

हुवे वातस्वनं कविं पर्जन्यक्रन्द्यं सहः । अग्निं समुद्रवाससम् ॥ ५ ॥

हुवे । वातऽस्वनम् । कविम् । पर्जन्यऽक्रन्द्यम् । सहः । अग्निम् । समुद्रऽवाससम् ॥ ५ ॥

वातस्वनं वातसदृशध्वनिं कविं क्रान्तकर्माणं पर्जन्यक्रन्द्यं पर्जन्यसदृशक्रन्दनं सहः सहस्विनं वाडवम् अग्निं हुवे ह्वयामि[4] । अन्यद्व्रतम् ॥ ॥ ९ ॥

आ सवं सवितुर्यथा भगस्येव भुजिं हुवे । अग्निं समुद्रवाससम् ॥ ६ ॥

आ । सवम् । सवितुः । यथा । भगस्यऽइव । भुजिम् । हुवे । अग्निम् । समुद्रऽवाससम् ॥६॥

सवितुः प्रेरकस्य देवस्य सवं यथा प्रसवमिव[5] भगस्येव भुजिं भगाख्यस्य देवस्य भोगमिव च समुद्रवाससम् अग्निं हुवे[6] आह्वयामि ॥

अग्निं वो वृधन्तमध्वराणां पुरूतमम् । अच्छा नप्त्रे सहस्वते ॥ ७ ॥

अग्निम् । वः । वृधन्तम् । अध्वराणाम् । पुरुऽतमम् । अच्छ । नप्त्रे । सहस्वते ॥ ७ ॥

अध्वराणाम् अहिंस्यानां बलिनां नप्त्रे बन्धुं सहस्वते बलवन्तम्[7] । विभक्तिव्यत्ययः । वृधन्तं ज्वालाभिर्वर्धमानं पुरूतमम्[8] अतिशयेन बहुम् अग्निम् ऋत्विजः वः यूयम् अच्छ अभिगच्छत ॥

अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या । अस्य क्रत्वा यशस्वतः ॥ ८ ॥

अयम् । यथा । नः । आऽभुवत् । त्वष्टा । रूपाऽइव । तक्ष्या । अस्य । क्रत्वा । यशस्वतः ॥८॥

अयम् अग्निः नः अस्मान् तक्ष्या विकर्तव्यानि रूपेव रूपाणि त्वष्टा वर्धकिरिव[9] यथा येन प्रकारेण आभुवत् आभवति तथैनमग्निमभिगच्छतेत्यर्थः । किंच वयम् अस्य अग्नेः क्रत्वा प्रज्ञानेन युक्ताः यशस्वतः यशस्वन्तो भवामेति शेषः ॥

---

१. ग–स्वित्त्वत्सहायेनैव; श–त्वत्सहायेनैव । २. ख-त१-३–भार्गवगः प्रयोगाः; ग-त२-भ१-२-श–भार्गवाः प्रयोगाः; घ–भार्गवादयः; ज्ञ–भार्गवगः प्रयोगः; त४–भार्गवगः प्रायोगाः; न–भार्गवाः प्रायोगाः । ३. न-भ–यथा चाप्नवानः । ४. घ–ह्वयामि कीदृशं समुद्रवाससं । ५. ख-त२–प्रभव; ग–प्रसवं च; घ–प्रभवं; ज्ञ–प्रसवत्व; त१-३–प्रभवत्व; त४–प्रभव च; न–प्रभवमिव; श–प्रभवं च । ६. घ–आ हुवे । ७. घ–तेजसा बलवंतं । ८. ख-ग-घ-भ१-३–पुरुतमं । ९. ख-त-न-भ२–वर्धकिंच; घ–वर्धकः इव; भ१–वर्धकिव; श–वर्धकः च ।

अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते । आ वाजैरुप नो गमत् ॥ ९ ॥

अयम् । विश्वाः । अभि । श्रियः । अग्निः । देवेषु । पत्यते । आ । वाजैः । उप । नः । गमत् ॥ ९ ॥

मनुष्याणां [v]विश्वाः सर्वाः [v]श्रियः संपदः [v]देवेषु देवानां मध्ये यः [v]अयम् [v]अग्निः [v]अभि [v]पत्यते अभिगच्छति सोऽग्निः [v]नः अस्मानपि [v]वाजैः अन्नैः [v]उप [v]आ [v]गमत् उपागच्छतु ॥

विश्वेषामिह स्तुहि होतॄणां यशस्तमम् । अग्निं यज्ञेषु पूर्व्यम् ॥ १० ॥

विश्वेषाम् । इह । स्तुहि । होतॄणाम् । यशःऽतमम् । अग्निम् । यज्ञेषु । पूर्व्यम् ॥ १० ॥

[v]विश्वेषां सर्वेषां [v]होतॄणां मध्ये [v]यशस्तमं यशस्वितमं [v]यज्ञेषु [v]पूर्व्यं मुख्यम् [v]अग्निम् [v]इह अस्मदीये यज्ञे हे स्तोतः [v]स्तुहि ॥ ॥ १० ॥

शीरं पावकशोचिषं ज्येष्ठो यो दमेष्वा । दीदायं दीर्घश्रुत्तमः ॥ ११ ॥

शीरम् । पावकऽशोचिषम् । ज्येष्ठः । यः । दमेषु । आ । दीदायं । दीर्घश्रुत्ऽतमः ॥ ११ ॥

[v]ज्येष्ठः देवानां मुख्यः [v]दीर्घश्रुत्तमः अतिशयेन विद्वान् अग्निः[1] [v]दमेषु यज्वनां[2] गृहेषु [v]आ [v]दीदाय आदीप्यते । तं [v]शीरम् अनुशायिनम् । तथा च यास्कः—'अनुशायिनमिति वाशिनमिति वा' (निरु. ४. १४) इति । [v]पावकशोचिषं पावकदीप्तिं स्तुहीत्यर्थः ॥

तमर्वन्तं न सानसिं गृणीहि विप्र शुष्मिणम् । मित्रं न यातयज्जनम् ॥ १२ ॥

तम् । अर्वन्तम् । न । सानसिम् । गृणीहि । विप्र । शुष्मिणम् । मित्रम् । न । यातयत्ऽजनम् ॥ १२ ॥

हे [v]विप्र मेधाविन् स्तोतः [v]अर्वन्तं [v]न अश्वमिव [v]सानसिं संभजनीयं [v]शुष्मिणं बलिनं [v]मित्रं [v]न सखायमिव [v]यातयज्जनं हतशत्रुजनं[3] [v]तम् अग्निं [v]गृणीहि स्तुहि ॥

उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः । वायोरनीके अस्थिरन् ॥ १३ ॥

उप । त्वा । जामयः । गिरः । देदिशतीः । हविःऽकृतः । वायोः । अनीके । अस्थिरन् ॥ १३ ॥

हे अग्ने [v]हविष्कृतः यजमानार्थं[4] [v]गिरः स्तुतयः [v]जामयः स्वसार इव [v]देदिशतीः तव गुणान् दिशन्त्यः[5] [v]त्वा त्वामुपतिष्ठन्ते । [v]वायोरनीके समीपे त्वां समेधयन्त्यः [v]अस्थिरन् अतिष्ठंश्च ॥

यस्य त्रिधात्ववृतं बर्हिस्तस्थावसन्दिनम् । आपश्चिन्नि दधा पदम् ॥ १४ ॥

यस्य । त्रिऽधातु । अवृतम् । बर्हिः । तस्थौ । असम्ऽदिनम् ।
आपः । चित् । नि । दध । पदम् ॥ १४ ॥

[v]यस्य अग्नेः [v]त्रिधातु त्रिः[6] [v]अवृतम् अनावृतं[6] च [v]असंदिनम् अबद्धं च । स्तरणकाले हि बर्हिरबद्धं भवति । [v]बर्हिस्तस्थौ आसनार्थं तिष्ठति तस्मिन्नग्नौ [v]आपश्चित् आपोऽपि [v]पदं [v]नि [v]दध निदधति । अन्तरिक्षया माध्यमिके पदं निदधतीत्यर्थः ॥

---

१. ग-घ-योग्निः । २. ख-त२-यज्विना; ग-यजमानानां; घ-ज्ञ-त४-भ१-२-श-यज्विनां; न-याज्ञिनां । ३. घ-शत्रुहननं; ज्ञ-शत्रूजननं; त२-३-४-न-हशत्रुजननं । ४. ग-यजमानस्य । ५. ख-घ-ज्ञ-त१-२-३-श-आदिशंत्यः । ६. ख-ज्ञ-त२-३-४-भ१-२-त्रिर्वा अवृतमनावृतं; ग-घ-अवृतमनावृतं; त१-त्रिर्वा अवृतं; न-त्रिर्वावृतंनावृतं ।

पदं देवस्य मीळ्हुषोऽनाधृष्टाभिरूतिभिः । भद्रा सूर्यइवोपदृक् ॥ १५ ॥

पदम् । देवस्य । मीळ्हुषः । अनाधृष्टाभिः । ऊतिऽभिः । भद्रा । सूर्यःऽइव । उपऽदृक् ॥१५॥

vमीळ्हुषः कामानां सेक्तुः vदेवस्य द्योतमानस्याग्नेः vपदं स्थानम् vअनाधृष्टाभिः शत्रुभिः अनाधृष्टाभिः vऊतिभिः रक्षाभिर्भजनीयं भवतीत्यर्थः । तथैवास्य vउपदृक् उपदृष्टिरपि vसूर्यइव यथा सूर्यस्तद्वत् vभद्रा मनुष्यैर्भजनीया भवति ॥ ॥ ११ ॥

अग्ने घृतस्य धीतिभिस्तेपानो देव शोचिषा । आ देवान्वक्षि यक्षि च ॥१६॥

अग्ने । घृतस्य । धीतिऽभिः । तेपानः । देव । शोचिषा । आ । देवान् । वक्षि । यक्षि । च ॥१६॥

हे vदेव द्योतमान vअग्ने vघृतस्य दीप्तिसाधनस्याज्यस्य vधीतिभिः[1] निधानैः[1] vतेपानः तपन् vशोचिषा ज्वालया vदेवान् प्रति vआ vवक्षि आवह vयक्षि यज vच ॥

तं त्वाजनन्त मातरः कविं देवासो अङ्गिरः । हव्यवाहममर्त्यम् ॥ १७ ॥

तम् । त्वा । अजनन्त । मातरः । कविम् । देवासः । अङ्गिरः । हव्यऽवाहम् । अमर्त्यम् ॥ १७॥

हे vअङ्गिरः अग्ने vकविं क्रान्तकर्माणम् vअमर्त्यं मरणरहितं vहव्यवाहं हविषां वोढारं vतं प्रसिद्धं vत्वा त्वां vदेवासः देवाः vमातरः इव vअजनन्त जनयन्ति ॥

प्रचेतसं त्वा कवेऽग्ने दूतं वरेण्यम् । हव्यवाहं नि षेदिरे ॥ १८ ॥

प्रऽचेतसम् । त्वा । कवे । अग्ने । दूतम् । वरेण्यम् । हव्यऽवाहम् । नि । सेदिरे ॥ १८ ॥

हे vकवे क्रान्तकर्मन् vअग्ने vप्रचेतसं प्रकृष्टबुद्धिं vवरेण्यं वरणीयं vदूतं देवानां vहव्यवाहं हविषां वोढारं vत्वा त्वां vनि vषेदिरे देवा निषीदन्ति ॥

नहि मे अस्त्यघ्न्या न स्वधितिर्वनन्वति । अथैतादृग्भरामि ते ॥ १९ ॥

नहि । मे । अस्ति । अघ्न्या । न । स्वऽधितिः । वनन्ऽवति । अथ । एतादृक् । भरामि । ते ॥१९॥

हे अग्ने vमे मम भार्गवस्य प्रयोगस्यर्षेः vअघ्न्या गौः । 'अघ्न्या उस्रा' इति गोनामसु पाठात् । vनहि vअस्ति न विद्यते यस्याः पयसा आज्येन च त्वां यजेय । किंच vस्वधितिः नहि vवनन्वति काष्ठानि हन्ति यैः काष्ठैस्त्वां समिन्धीय[2] । vअथैतादृक् अग्निहोत्रार्थं पयसो दोग्ध्रीं गाम् इन्धनसाधनानि काष्ठानि चैतत्सर्वं vते तुभ्यमहं vभरामि ॥

यदग्ने कानि कानि चिदा ते दारूणि दध्मसि । ता जुषस्व यविष्ठ्य ॥२०॥

यत् । अग्ने । कानि । कानि । चित् । आ । ते । दारूणि । दध्मसि । ता । जुषस्व । यविष्ठ्य ॥२०॥

पूर्वस्यामृच्युक्तस्यैवार्थस्य विवरणमत्र । हे vयविष्ठ्य युवतम vअग्ने तुभ्यं[3] vयत् यदा vकानि vकानि vचित् यानि कान्यपि vदारूणि काष्ठानि vआ vदध्मसि आधारयामि तदा vता तानि अपरशुवृक्णान्यपि[4] vजुषस्व सेवस्व । तथा च यजुर्ब्राह्मणं—'न ह स्म वै पुराग्निरपरशुवृक्णं दहति

---

१. ख-घ-ङ्ग-त१-२–धीतिभिर्दीप्तिभिर्निधानः; त३-४–दीप्तिभिर्निधानः; श–निधानः । २. ख-ङ्ग-त१-२–समिधाय । ३. घ-भ१-३–ते तुभ्यं । ४. घ–काष्ठानि ।

तदस्मै प्रयोग एवर्षिरस्वदयथदग्ने यानि कानि चेति समिधमा दधात्यपरशुवृक्णमेवास्मै स्वदयति सर्वमस्मै स्वदते' (तै. सं. ५. १. १०. १) इति ॥

यदक्ष्युपजिह्विका यद्व्रो अतिसर्पति । सर्वं तदस्तु ते घृतम् ॥ २१ ॥

यत् । अक्षि । उपऽजिह्विका । यत् । वव्रः । अतिऽसर्पति । सर्वम् । तत् । अस्तु । ते । घृतम् ॥ २१ ॥

हे अग्ने यत् काष्ठादिकम् उपजिह्विका[1] । उपजिघ्रतीत्युपजिह्विका* । अक्षि भक्षयति । यत् च काष्ठादिकं[1] वव्रः । वमत्युदकमिति वव्रः । उपजिह्विकावव्रशब्दौ यद्यपि पर्यायौ तथापि पृथगुपादानात् वव्रशब्दस्तद्विशेषे पर्यवस्यति । सोऽपि अतिसर्पति अतिगच्छति । तत् सर्वं ते तव घृतं घृतसदृशम् अस्तु । यथा घृतं तव प्रियकरं भवति तथा प्रियकरं भवत्वित्यर्थः ॥

अग्निमिन्धानो मनसा धियं सचेत मर्त्यः । अग्निमीधे विवस्वभिः ॥ २२ ॥

अग्निम् । इन्धानः । मनसा । धियम् । सचेत । मर्त्यः । अग्निम् । ईधे । विवस्वत्ऽभिः ॥ २२ ॥

मर्त्यः मनुष्यः अग्निमिन्धानः काष्ठैः प्रज्वलयन् मनसा एव श्रद्दधानः धियं कर्म सचेत काले भजेत । विवस्वभिः ऋत्विग्भिश्च अग्निम् एव ईधे प्रज्वलयति ॥ ॥ १२ ॥

'अदर्शि' इति चतुर्दशर्चं दशमं सूक्तं काण्वस्य सोभरेरार्षम् । अत्रानुक्रम्यते—'अदर्शि षळूना सोभरिर्बार्हतं पञ्चम्याद्ययुजः[2] सतोबृहत्योऽष्टम्यादियुजः ककुब्गायत्री ककुबनुष्टुबन्त्याग्निमारुती' इति । पञ्चमीसप्तमीनवम्येकादशीत्रयोदश्यः पञ्च सतोबृहत्यः । अष्टमीद्वादश्यौ ककुभौ दशमी गायत्री चतुर्दश्यनुष्टुप् । शिष्टा बृहत्यः । 'आग्नेयं तु' इत्युक्तत्वादग्निर्देवता । अन्त्यास्त्वग्निर्मरुतश्च । प्रातरनुवाकस्याग्नेये क्रतौ बार्हते छन्दस्यादितः सप्तर्चः । सूत्रितं च—'अदर्शि गातुवित्तम इति सप्तेति बार्हतम्' (आश्व. श्रौ. ४. १३) । आभिप्लविकेषूक्थ्येषु मैत्रावरुणस्य 'प्र मंहिष्ठाय' इति वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितं च—'प्र मंहिष्ठाय गायत प्र सो अग्ने तवोतिभिः' (आश्व. श्रौ. ७. ८) इति । अध्यायोपाकरणोत्सर्जनयोर्मण्डलान्त्यहोमे 'आग्ने याहि' इत्येषा । सूत्रितं च—'मा चिदाग्ने याहि मरुत्सखा यत्ते राजन्नग्ने' (आश्व. गृ. ३. ५. ७) इति ॥

अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः ।
उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्त नो गिरः ॥ १ ॥

अदर्शि । गातुवित्ऽतमः । यस्मिन् । व्रतानि । आऽदधुः ।
उपो इति । सु । जातम् । आर्यस्य । वर्धनम् । अग्निम् । नक्षन्त । नः । गिरः ॥ १ ॥

यस्मिन् अग्नौ व्रतानि कर्माणि आदधुः यजमाना आदधन् गातुवित्तमः अतिशयेन मार्गाणां ज्ञाता सोऽग्निः अदर्शि प्रादुरभूत् । किंच सु जातं सम्यक् प्रादुर्भूतम् अस्य आर्यस्य उत्तमवर्णस्य वर्धनं वर्धयितारम् अग्निं नः अस्माकं गिरः स्तुतिरूपा वाचः उपो नक्षन्त उपगच्छन्त्येव ॥ 'नक्ष गतौ' इति धातुः ॥

---

१. ख-ग-त—'उपजिह्विका ..... काष्ठादिकं' नास्ति । * न-भ-श—'त्युपजिह्विका उपदहिका (न-श—उपदीहिका) । २. त१(प्रान्ते)-अनु.—पंचमी विराड्रूपा सप्तम्याद्ययुजः ।

प्र दैवोदासो अग्निर्देवाँ अच्छा न मज्मना ।
अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य सानवि ॥ २ ॥

प्र । दैवःऽदासः । अग्निः । देवान् । अच्छ । न । मज्मना ।
अनु । मातरम् । पृथिवीम् । वि । ववृते । तस्थौ । नाकस्य । सानवि ॥ २ ॥

vदैवोदासः दिवोदासेनाहूयमानः vअग्निः vमातरम् । सर्वस्य लोकस्य धारणवत्त्वात् पृथिवी माता । तां vपृथिवीम् vअच्छ प्रति vदेवान् तस्य दिवोदासस्य यज्ञे देवान् vअनु[1] प्रति हविर्वोढुं vन vप्र[2] vवि vवावृते[2] । यस्मादेनमग्निं दिवोदासः vमज्मना बलेन आजुहाव तस्मादयमग्निः vनाकस्य स्वर्गस्य vसानवि समुच्छ्रिते देशे स्वायतन एव vतस्थौ अतिष्ठत् ॥

यस्माद्रेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः ।
सहस्रसां मेधसातावि त्मनाग्निं धीभिः सपर्यत ॥ ३ ॥

यस्मात् । रेजन्त । कृष्टयः । चर्कृत्यानि । कृण्वतः ।
सहस्रऽसाम् । मेधसातौऽइव । त्मना । अग्निम् । धीभिः । सपर्यत ॥ ३ ॥

vयस्मात् कारणात् vचर्कृत्यानि कर्तव्यानि कर्माणि vकृण्वतः कुर्वाणात् मनुष्यात् vकृष्टयः इतरे मनुष्याः vरेजन्ते कम्पन्ते तस्मादिदानीं हे जनाः[3] यूयं vसहस्रसां गवां धनानां च सहस्रस्य दातारम् vअग्निं vमेधसातौ यज्ञे vधीभिः कर्तव्यैः कर्मभिः vत्मना आत्मनैव vसपर्यत परिचरत ॥

प्र यं राये निनीषसि मर्तो यस्ते वसो दाशत् ।
स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम् ॥ ४ ॥

प्र । यम् । राये । निनीषसि । मर्तः । यः । ते । वसो इति । दाशत् ।
सः । वीरम् । धत्ते । अग्ने । उक्थऽशंसिनम् । त्मना । सहस्रऽपोषिणम् ॥ ४ ॥

हे vवसो वासक vअग्ने त्वं vयं तव स्तोतारं vराये धनार्थं vप्र vनिनीषसि प्रणेतुमिच्छसि vयः च vमर्तः मनुष्यः vते तुभ्यं vदाशत् हवींषि प्रयच्छति vसः मनुष्यः vउक्थशंसिनम् उक्थानां[4] शंसितारं vत्मना आत्मनैव vसहस्रपोषिणं बहुधनं vवीरं पुत्रं vधत्ते धारयति ॥

स दुळ्हे चिदभि तृणत्ति वाजमर्वता स धत्ते अक्षिति श्रवः ।
त्वे देवत्रा सदा पुरूवसो विश्वा वामानि धीमहि ॥ ५ ॥

सः । दृळ्हे । चित् । अभि । तृणत्ति । वाजम् । अर्वता । सः । धत्ते । अक्षिति ।
श्रवः । त्वे इति । देवऽत्रा । सदा । पुरुवसो इति पुरुऽवसो । विश्वा । वामानि । धीमहि ॥५॥

हे[5] vपुरूवसो बहुधनाग्ने यस्तुभ्यं हवींषि प्रयच्छति vसः यजमानः vदृळ्हे vचित् दृढेऽपि शत्रुपुरे स्थितं vवाजम् अन्नम् vअर्वता अश्वेन vअभि vतृणत्ति हिनस्ति । तथा vसः यजमानः vअक्षिति अक्षीणं

---

१. ख-ग-त-भ-'अनु' नास्ति । २. ख-त१-२-प्र वि ववृते; ग-त४-भ-प्र ववृते । ३. ख-त-न-याजनाः; ग-श-यजमानाः । ४. घ-स्तोत्राणां । ५. ख-ग-घ-त-भ-श-अर्वता अश्वेन ।

vअग्नः अन्नं vधत्ते धारयति। तथा च सति तुभ्यं हविषां प्रदातारो वयमपि vदेवत्रा देवे vत्वे त्वयि स्थिताः vविश्वा सर्वाणि vवामानि वननीयानि धनानि vसदा सर्वदा vधीमहि धारयाम ॥ ॥ १३ ॥

यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्यग्नये ॥ ६ ॥

यः । विश्वा । दयते । वसु । होता । मन्द्रः । जनानाम् ।
मधोः । न । पात्रा । प्रथमानि । अस्मै । प्र । स्तोमाः । यन्ति । अग्नये ॥ ६ ॥

vहोता देवानामाह्वाता vमन्द्रः मोदमानः vयः अग्निः vविश्वा सर्वाणि vवसु वसूनि धनानि vजनानां जनेभ्यः vदयते प्रयच्छति तस्मै vअस्मै vअग्नये vमधोर्न मदकरस्य सोमस्येव vप्रथमानि मुख्यानि पात्राणि[1] vस्तोमाः vप्र vयन्ति प्रगच्छन्ति ॥

अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यन्ते देवयवः ।
उभे तोके तनये दस्म विश्पते पर्षि राधो मघोनाम् ॥ ७ ॥

अश्वम् । न । गीःऽभिः । रथ्यम् । सुऽदानवः । मर्मृज्यन्ते । देवऽयवः ।
उभे इति । तोके इति । तनये । दस्म । विश्पते । पर्षि । राधः । मघोनाम् ॥ ७ ॥

हे vदस्म दर्शनीय vविश्पते विशां पतेऽग्ने यं त्वां vसुदानवः शोभनदानाः vदेवयवः देवानात्मन इच्छन्तो यजमानाः vरथ्यं रथस्य वोढारम् vअश्वं vन अश्वमिव vगीर्भिः स्तुतिभिः vमर्मृज्यन्ते परिचरन्ति स त्वमस्माकं यजमानानां vतोके पुत्रे vतनये पौत्रे च vउभे उभयस्मिन् vमघोनां धनवतां vरायः धनं vपर्षि प्रयच्छ ॥

प्र मंहिष्ठाय गायत ऋताच्ने बृहते शुक्रशोचिषे । उपस्तुतासो अग्नये ॥ ८ ॥

प्र । मंहिष्ठाय । गायत । ऋतऽअच्ने । बृहते । शुक्रऽशोचिषे । उपऽस्तुतासः । अग्नये ॥ ८ ॥

हे यूयम् vउपस्तुतासः उपस्तोतारः vमंहिष्ठाय दातृतमाय vऋताच्ने यज्ञवते सत्यवते वा vबृहते महते vशुक्रशोचिषे दीप्ततेजसे vअग्नये vप्र vगायत स्तोत्रं पठत ॥

आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः ।
कुवित्नो अस्य सुमतिर्नवीयस्यच्छा वाजेभिरागमत् ॥ ९ ॥

आ । वंसते । मघऽवा । वीरऽवत् । यशः । सम्ऽइद्धः । द्युम्नी । आऽहुतः ।
कुवित् । नः । अस्य । सुऽमतिः । नवीयसी । अच्छ । वाजेभिः । आऽगमत् ॥ ९ ॥

vमघवा धनवान्[2] vद्युम्नी अन्नवान् यशस्वी[3] वा। तथा च यास्कः—'द्युम्नं द्योततेर्यशो वान्नं वा' (निरु. ५. ५) इति। vयशः यशस्करमन्नम्[3] vआ vवंसते यजमानेभ्य आ प्रयच्छति[4]। vअस्य

---

१. घ-श—पात्रा पात्राणि । २. ग—धनवान् समिद्ध आहुतः । ३. घ—समिद्धः दीप्त आहुतः अग्निः यशः यशस्करं वीरवत् पुत्रयुक्तमन्नं । ४. श—प्रयच्छति । तस्या साग्ने समिद्धः दीप्तः आहुतः अग्निः यशः यशस्करं वीरवत् पुत्रयुक्तमन्नमावंसते यजमानेभ्य आयच्छति ।

अग्नेः vनवीयसी नवतरा vसुमतिः अनुग्रहबुद्धिः vनः अस्मान् vअच्छ[1] प्रति[1] vवाजेभिः अन्नैः सह vकुवित् बहुवारम्[2]। 'सलिलं कुवित्' इति बहुनामसु पाठात्। vआगमत् आगच्छतु॥

प्रेष्ठं॒ शु्रियाणां॑ स्तु॒ह्यासा॒वाति॑थिम्। अ॒ग्निं रथा॑नां॒ यम॑म् ॥ १० ॥

प्रेष्ठ॑म्। ऊँ॒ इति॑। शु्रिया॑णाम्। स्तु॒हि। आऽस॒व॒। अति॑थिम्। अ॒ग्निम्। रथा॑नाम्। यम॑म्॥ १०॥

हे vआसाव स्तोतः vप्रियाणां vप्रेष्ठं प्रियतमम् vअतिथिम् अभ्यागतं vरथानां vयमं यन्तारम् vअग्निम् एव vस्तुहि ॥ ॥ १४ ॥

उदि॑ता॒ यो निदि॑ता॒ वेदि॑ता॒ वस्वा यु॒ज्रियो॑ व॒वर्त॑ति।
दु॒ष्टरा॒ यस्य॑ प्र॒वणे॑ नो॒र्मयो॑ धि॒या वाज॑ं सिषासतः ॥ ११ ॥

उत्ऽइ॑ता। यः। निऽदि॑ता। वेदि॑ता। वसु॑। आ। यु॒ज्रियः॑। व॒वर्त॑ति।
दु॒स्तराः॑। यस्य॑। प्र॒वणे॑। न। ऊ॒र्मयः॑। धि॒या। वाज॑म्। सिसा॑सतः॥ ११ ॥

vवेदिता वेत्ता vयज्रियः यज्ञार्हः vयः[3] अग्निः vउदिता उदितान्युद्गतानि vनिदिता निदितानि श्रुतानि च vवसु वसूनि धनानि vआ vववर्तति आवर्तयति[4]। vधिया कर्मणा vवाजं संग्रामं vसिषासतः संभक्तुमिच्छतः vयस्य चाग्नेर्ज्वालाः[5] vप्रवणे vनोर्मयः प्रवणाभिमुखाः समुद्रस्य तरङ्गा इव vदुष्टराः तर्तुमशक्याः। तमग्निं हे स्तोतः स्तुहीत्यर्थः॥

मा नो॑ हृणीता॒मति॑थिर्व॒सुर॒ग्निः पु॑रुप्रश॒स्त एषः। यः सु॒ऽहोता॑ स्वध्व॒रः ॥ १२ ॥

मा। नः॒। हृ॒णी॒ता॒म्। अति॑थिः। व॒सुः॑। अ॒ग्निः। पु॒रु॒ऽप्र॒श॒स्तः। एषः।
यः। सु॒ऽहोता॑। सु॒ऽअ॒ध्व॒रः॥ १२ ॥

vवसुः वासकः vअतिथिः अतिथिवत् प्रियः vपुरुप्रशस्तः बहुभिः स्तुतः vसुहोता सुष्ठु देवानामाह्वाता vस्वध्वरः सुयज्ञश्च vयः vअग्निः सः vएषः अग्निः vनः अस्मभ्यं vमा vहृणीतां केनापि न रुध्यताम्। केनाप्यनवरुद्धः सन् अग्निः अस्मभ्यमभीष्टं प्रयच्छत्वित्यर्थः॥

मो ते रि॑षन् ये अच्छो॒क्तिभि॑र्व॒सोऽग्ने॑ के॒भि॑श्चि॒देवैः॑।
की॒रिश्चि॒द्धि त्वामी॒ट्टे दू॒त्या॑य र॒तह॑व्यः स्वध्व॒रः ॥ १३ ॥

मो इति॑। ते। रि॒ष॒न्। ये। अच्छो॑क्तिऽभिः। व॒सो॒ इति॑। अग्ने॑। के॒भिः॑। चि॒त्। एवैः॑।
की॒रिः। चि॒त्। हि। त्वाम्। ई॒ट्टे॑। दू॒त्या॑य। र॒तऽह॑व्यः। सु॒ऽअ॒ध्व॒रः॥ १३ ॥

हे vवसो वासक vअग्ने त्वां vये मनुष्याः vअच्छोक्तिभिः अभिष्टुतिभिः vकेभिः कैः सुखकरैः vएवैः vचित् अभिगमनैरपि vते स्तोतारः vमो vरिषन् मैव हिंसन्ताम्। vरातहव्यः दत्तहविष्कः[6] vकीरिश्चित् स्तोतापि vदूत्याय हविर्वहनादिलक्षणाय दूतकर्मणे vत्वामीष्टे vहि स्तौति खलु॥

---

१. ख-ज्ञ-त१-२–अच्छ अभिलक्ष्य (ख–आलक्ष्य; ज्ञ–'अभिलक्ष्य' नास्ति; त२–आभिलक्ष्य) प्रयच्छति; घ-श–अच्छ आभिलक्ष्य; त४-न-भ२–प्रयच्छति। २. ख-ग-त-न-भ–बहु। ३. ग-त-भ–'यः' नास्ति। ४. ख-ग-घ-त-श–आवर्तयते। ५. ख-त-न-भ–वाग्नेः। ६. घ-श–दत्तहविष्कः स्वध्वरः सुयज्ञः।

अग्ने याहि मरुत्सखा रुद्रेभिः सोमपीतये ।
सोमर्या उप सुष्टुतिं मादयस्व स्वर्णरे ॥ १४ ॥

आ । अग्ने । याहि । मरुत्ऽसखा । रुद्रेभिः । सोमऽपीतये ।
सोमऽर्याः । उप । सुऽस्तुतिम् । मादयस्व । स्वःऽनरे ॥ १४ ॥

हे [v]अग्ने [v]मरुत्सखा[१] मरुतां प्रियस्त्वं [v]स्वर्णरे अस्माकं यजनलक्षणे कर्मणि [v]सोमपीतये सोमपानाय [v]रुद्रेभिः रुद्रैर्मरुद्भिः सह [v]आ [v]याहि आगच्छ । [v]सोमर्याः सोमरेमं [v]सुष्टुतिं शोभनां स्तुतिं चोपागच्छ । [v]मादयस्व । स्तुतिं श्रुत्वा सोमं पीत्वात्मानं मादय[२] च[२] ॥ ॥ १५ ॥

॥ इत्यष्टमे मण्डले दशमोऽनुवाकः समाप्तं चाष्टमं मण्डलम् ॥

---

१. न-भ-मरुत्सखा मरुत्सखः । २. ब्र-न-मादयस्व ।

संहितापदपाठशुद्धिपत्रम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२	१	हाता	होता
१४	५	°षर्भूद्भू°	°षर्भुद्भू°
१९	२२	कृष्णयामम्	कृष्णऽयामम्
३१	२७	अस्मे	अस्मै
३५	३	विऽभावा	विभाऽवा
११९	१५	विप्रेभिः	विप्रेभिः
११९	२४	अत्कैः।	अत्कैः। आ।
१२२	४	सत्राः	सत्रा
१२२	१७	वृत्रऽतूर्ये	वृत्रऽतूर्यै
१३३	४	नियुत्वान्	नियुत्वान्
१६६	३	दिवेदिवे	दिवेदिवे
१९८	२३	उभे इा	उभे इति
२२१	२३	वरांस्यमिता	वरांस्यमिता
२३९	२०	मित्रावरुणौ	मित्रावरुणौ
२४८	१४	मधुऽव्रते	मधुऽव्रते
२५२	२३	श्रुत्यम्	श्रुत्यम्
३११	४	व्युच्छान्	व्युच्छान्
३३६	७	रायः	रायो
३७९	२६	विप्राः	विप्रा
३८६	१२	°द्रातमूर्मिम्	°द्रातुमूर्मिम्
४०४	२२	शुचयः	शुचयः
४०९	७	तन्व१ः	तन्व१ः
४३७	११	सुमतिश्चनिष्ठा	सुमतिश्चनिष्ठा
४९७	७	वधान	वृधान
६३५	५	विपन्युभिः	विपन्युभिः
७५१	८	विभाऽवसुः	विभाऽवसुः
८८६	११	अर्यऽमा	अर्यमा
९५०	२०	°ञ्शिशुमन्तः	°ञ्छिशुमन्तः

भाष्यशुद्धिपत्रम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
७	१२	२. १. २९	२. १. २. ९
७	१३	१. ७. ८	१. ३. ६
३८	२	तनकुर्वन्	तनूकुर्वन्
४४	२३	°रादरार्था	°रादरार्था। एवं-
			विधस्त्वं
४६	८	अद्रहम्	अद्रुहम्
६३	२०	दशरात्र	दशरात्रे
७०	१०	ब्रहि	ब्रूहि
१००	२	कृण्वते	कृण्वैते
११५	२७	धावापृथिव्यौ	द्यावापृथिव्यौ
१२१	१४	बहुभिरुहूतः	बहुभिराहूतः
१३०	१३	स्तुत्यरायुधैः	स्तुत्यैरायुधैः
१४१	३०	शत्रन्	शत्रून्
२००	५	°स्याष	°स्यार्ष
३४१	२	क्रतु	क्रतुं
३४५	२१	इशिषे	ईशिषे
३४८	१३	°दशम्यादिभिः	°र्दशम्यादिभिः
३७५	१८	ऋग्वि. २. २५	ऋग्वि. २.३०६
४०९	२८	प्रत्यक्षणो°	प्रत्यक्षेणो°
४१०	१७	नियतोऽपोष्य	नियतोपोष्य
४१४	१६	इरयति	ईरयति
४१४	२७	सूक्त	सूक्तं

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
४२१	७	सुब्रामन्त्रिते ‘	‘ सुब्रामन्त्रिते
४४५	१८	अविचलित	अविचलितं
४४८	१७	विनियोग.	विनियोगः
४९९	२९	लृटि	लृटि
५०४	१७	सच्च	स च
५०५	१२	अवतीनां	अर्वतीनां
५१७	८	ऋषिश्चानुक्त-	‘ ऋषिश्चानुक्त-
		गोत्रः ‘	गोत्रः
५२७	२०	दशगुणितः	दशगुणितैः
५४०	२३	रुद्रापुत्रा	रुद्रपुत्रा
५५१	१३	सम्यकू	सम्यक्
५७५	५	°मित्यर्यः	°मित्यर्थः
६३२	२३	प्रागाथ	प्रागाथं
६५१	११	चा आभि-	च आभि-
		मुख्येन व	मुख्येन वा
७०८	६	य	यः
७१६	१	सोमलता	सोमलतां
७७४	१८	स्म	स्मः
७८६	२४	वर्तमानभिषुतं	वर्तमानमभिषुतं
८८९	२	वृष्टे°	वृष्टे°
९२३	११	मरुतामपि ।	मरुतामपि
९४२	१६	नाशयध्य	नाशयध्यै